725

श्रीभागवत with पदरत्नावली टीका

Bhāgawata with Pada Ratnā-	Title
Vyāsa	Author
Vijayadhwaja Tirtha Bhikshu	Editor
	Year, Vols.
	Publisher
725 -vali Tika. of.	Remarks

॥ श्रीगणेशाय नमः ॥ श्रीवेदव्यासाय नमः ॥ ॥ पतो न न्मा द्यस्य श्रुतिसुनियमानेकविषयास्त्वतंत्रं तत्र शोगुरुरपि गुरोर्यश्चम
गतौ ॥ विमूढायन्नत्वं प्रकरमिह वेत्तुं सुमनसो सुकुंदं ध्यायामो पहतकुहकं तत्स्वमहसा ॥ १ ॥ त्रिसर्गी यत्रायं लसति विदविद्धिलुविपर्यन्नाली
गतौ ॥ विमूढायन्नत्वं प्रकरमिह वेत्तुं सुमनसो सुकुंदं ध्यायामो पहतकुहकं तत्स्वमहसा ॥ १ ॥ त्रिसर्गीयत्रायं लसति विदविद्धि विषयों नाली
केनानेयं विकृतिरिव तेजो जलमृदां ॥ विशुद्धं वेतत्त्वं प्रकृतिविकलं यच्च विततं परं ब्रह्मात्मानं स्मर हृदय सत्यं गुरुतमं ॥ २ ॥ यदीयकृतिरे
जसा सुमनसां सुमानसतां सती सकलसत्त्रतासकलवेदवाणी निधिः ॥ सश्रितु सुखपयोनिधिः सरसिजेक्षणः श्रीपतिः वपशरशरीरज
ः शरणमक्रमेसंततं ॥ ३ ॥ ममववसिमंगदिवताप्रलयमतिसंनिधात्वियं दिलिसदुरसीवसुबद्धिपः कमलवनमध्यद्वान्हं हंसु तिसुवित
तायस्त्रा स्त्रीप्रमाणम् मनाकुलं परमविषये सम्यक्कुपेक्षावतां नमृषा कवित ॥ ४ ॥ हिमकरलसद्विंबद्योतः सुधारसजित्वरी समम सुधी
देयादानंदतीर्थमहामुनिः ॥ मुणिगणवराः शाणोल्लीढा इवाधिवार्द्धिसमुद्भवः शमदमगुणा यत्रास्माल्लसंति संततमेव सः ॥ ५ ॥ दरण
मलिने दैत्यारातेर्भवार्णवान्नरसत्तरी दिशनु विशदालं किं महां महं दृतीर्थयतीश्वरः ॥ कशहः क्वाप्पास श्रुतिरपि गुरोः क्वाग्रसरणि समी
नोपायाणि क्व खलु विवुधासराधिय ॥ ६ ॥ तथापि तत्तौ व्यामोहान्न गुरुगुरुकटाक्षैकशरणे मनाकूव्याकुर्वे भागवतपुराणं प्रगहनं ॥
॥ ७ ॥ आचार्यैरपरैरपि प्रविवृतं मार्गमिन नैवेदितां खद्योतस्तपन प्रकाशितपदेकिं तत्र कुर्यादिति ॥ तन्मार्गेनुगमेन वाकुनुमनः
शुद्धिक्रियायैततः श्रीमद्भागवतं पुराणमतुलं व्याकर्तुकामो पते ॥ ८ ॥ तदृस्या पद्यायां तुष्टि तितुतपात्रेमपि रूपां महांतः कुर्वंतु दीनुविव
शुद्धि क्रियायैततः श्रीमद्भागवतं पुराणमतुलं व्याकर्तुकामो पते ॥ ८ ॥ ... सर्वसुहृदः ॥ ९ ॥ अनंततीर्थविजयतीर्थौ प्रणम्य मस्कृरि
संताः सदयने ॥ निरस्ता ... हितिं ... तिपरो हृह ... वाः विपुलकरुणाः सर्वसुहृदः
वरवंद्यौ तयोः कृतीस्फुरत्सुपदी मप्रवक्ष्मि भागवतपुराणं ॥ ॥ अथ कलिमलापनुत्तये विविधमवपुरः सरैरमरदेरादरात्प्रार्थितो दितिसुत
बलभरपरिखिन्नधरणि तले चिरसमयसमावीर्णतपस्यायां सत्यवत्यां पराशरादवतीर्णो व्यासनामा सुरमथनः समुद्धृतसमुत्सन्ननिगमक
लतरुरल्पमतिमनुजदयालुः शारवोपशारवाभेदेन हि भक्त्वेद स्तदर्थनिर्णीतुर्विरचितब्रह्मसूत्रस्तदनधिकारजनापवर्गापप्रकाशितपु

राणसंहितो वेदांतार्थप्रकाशिकां द्वादशस्कंधसंमितां अष्टादशसहस्रसंख्योपेतां भागवतपुराणसंहितां चिकीर्षुर्विघ्नाभावे पिकालदोषे
ण विहतान् भागवतधर्मानाविष्कीर्षुर्निरंतरायपरोक्षितब्रह्मस्वरूपो निरंतरायोपि प्रेक्षावद्भिस्तायै मंगलाचरणानेकप्रयोजनाय सर्वेष्ट
देवतां नारायणं ध्यात्वा अनुस्मरति ॥ ॥ जन्माद्यस्य यत इति ॥ अत्र यद्यपि श्रुतेस्सूत्रादौ व्याहार्यः अस्य जगतो जन्मादि यतः ॥ यः अर्थेष्वभिज्ञः ॥ य
श्च स्वराट् यश्च ब्रह्म हृदा आदिकवये ब्रह्मणे तेने ॥ यं प्रति सूरयो मुह्यंति ॥ तेजोवारिमृदां विनिमयो यथा तथा त्रिसर्गोपि यत्र मृषा तं स्वेन धाम्ना स
दा निरस्तकुहकं सत्यं परं धीमहीति समस्तान्वयः ॥ तत्र प्रथमं परं धीमहीति प्रधानान्वयः ॥ पश्चादाकांक्षावशादितः सर्वेषामन्वयः ॥ परं ब्रह्म

श्रीवेदव्यासाय नमः ॥ ॥ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यं
सूरयः ॥ तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

गुणोत्कर्षैरिति शेषः ॥ बृंहणात् ब्रह्मेत्यादिना ... द्विविधा हि देवतायां प्रारंभे नमस्कारादि मंगलक्रिया महंतिआधिकारिकी अभीष्टा चेति यथान्यो
ति ... शास्त्रप्रारंभे ... आधिकारिकी नमनादिक्रियाहीपरत्रेमादिविषया ह्यभीष्टा भगवान् स्वरूपयत्नेत्यभिप्रायेण परमित्युक्तं ॥ प
रमात्मा हि सकलप्राणिनां संसारोन्मूलनायास्मिन् शास्त्रे प्रतिपाद्यते तदेतत्त्रेयः पुत्रात्प्रेयोन्यस्मात्सर्वस्मादंतरतरं यदयमात्मेति श्रुतेः स एव पर
मप्रेमविषयः परोपि नारायण एव नान्यः कश्चित् ॥ यदेतत्परमं ब्रह्म सर्वेषु वादेषु पठ्यते ॥ स देवः पुंडरीकाक्षः स्वयं नारायणः पर इति हरिवंशे ॥

भा॰ प्र॰
२

सत्यतपःप्रश्नोत्तरेदुर्वाससःप्रतिवचनेपरस्यनारायणत्वोक्तेः। त्रिसत्यविरोधात्तिपरमितिश्रुतेश्च। धीमहिध्यायेमानन्माद्यस्ययतइत्यादिविशेषणैः
परशब्दोक्तानुगुणान्विशिनष्टि। पालनपूरणभ्रांयथासंभवमूह्यापद्योवाग्याइत्यूहनीयं। अलौकिकवस्तुनोलक्षणोपदेशमंतरेणज्ञातुम
शक्यत्वात्शशविषाणकल्पत्वदित्यतोवालक्षणमाह। जन्माद्यस्ययतइति। अस्यप्रत्यक्षस्यजगतोजन्मआदिर्यस्यतज्जन्मादीतितद्गुणसंविज्ञा
नोबहुव्रीहिः। यतोयस्माद्भवतीतिशेषः। आदिशब्देनस्थितिसंहारनियमनज्ञानाज्ञानबंधमोक्षागृह्यंते। नकेवलंस्थितिसंहारौश्रुतिस्मृतिवि
रोधात्। यथाशास्त्रादिमान्गौरितिहेत्वापदिष्टःसास्नादिमत्वंपदार्थमश्वादिभ्योव्यावृत्तंगोशब्दवाच्यंप्रत्येतितथाजन्मादिकारणंपरमि
तिश्रुत्याद्यपदिष्टंजन्मादिकंप्रत्येकंपरब्रह्मलक्षणंतथाज्ञातव्यंवेदांतसूत्रेषुप्रतिपादितत्वात्। ननुपरस्यजन्मादिकारणत्वंकुतइति
तत्राहश्रुत्यादिति। यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतीत्यादिश्रुतीनांअहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते। [illegible]
वान्तानिखिलस्यैकएवत्वित्यादिश्रुतिस्मृतीनांचजगत्कारणेहरावन्वयात्उपक्रमोपसंहारादितात्पर्यलिंगात्परब्रह्मैवजगत्कारणंना
न्यदितिभावः। ननुरुद्रादीनामपिजन्मादिकारणत्वंश्रूयते। अतःकथंपरस्यैवेत्यवधार्यते। उच्यते। यद्यपिरुद्रादीनांवेदैकदेशप्रतिपाद्य
त्वमस्ति। अप्यनंतवेदपदकदंबप्रतिपादितत्वंविष्णोरेव। सर्वेवेदायत्पदमामनंतिवेदैश्चसर्वैरहमेववेद्यइत्यादिश्रुतिस्मृतिभ्यः। ननुश्रुत्या
देःपिपीलिकादिलिपिवदप्रमाणत्वात्माणवकदृष्टशार्दूलकल्पनेनतन्निश्चयाभावादतःपरमाणुपुंजस्यैवकारणत्वमितितत्राहइ
तरतइति। प्रत्यक्षागमाभ्यामनुगृहीतादितरस्मात्तर्कात्परब्रह्मणःकारणत्वंज्ञायते। समुदायउभयहेतुकेपितदप्राप्तिरितिभगवद्
द्वैपायनेनपरमाणुपुंजवादस्यनिरस्तत्वात्। अत्रश्रुत्याद्यनुगृहीततर्काभावात्। केवलतर्कस्याप्रतिष्ठितत्वात्। नतुकार्यकारणपूर्व

रा॰ म॰
२

कंकार्यत्वादितिकारणसामान्यमात्रंसिद्धंविशेषतःकुतःसिद्धिरितिचेत्सत्यं। प्रधानादेरचेतनत्वेनबुद्धिपूर्वकत्व[illegible]त्वानुपपत्तेरव्याप्तत्वाच्च
क्षित्यादेश्चेतनकर्तृकत्वपरिशेषसिद्धं। चेतनाद्धिपित्रादेःपुत्राद्युत्पत्तिदर्शनान्नहिदृष्टोतेनब्रह्मादिचेतनजा[illegible]परमचेतनाद्धिक्षोत्पद्यतइतिसु
शकोयंतर्कःसमुन्निष्ठते। चशब्दःसमुच्चये। वेदानामपौरुषेयत्वेनकर्तृप्रसिध्यभावादसंदिग्धप्रमाणत्वेनतदनुगृहीततर्कस्यापिप्रतिप
क्षपराहतिर्नाशंकनीयेत्यस्मिन्नर्थेवा। अनेनअथातोब्रह्मजिज्ञासाजन्माद्यस्ययतःशास्त्रयोनित्वात्। तत्तुसमन्वयादितिचतुःसूत्रीव्या
ख्याता। जिज्ञासैववधीमहीत्यनेनोच्यते। विदविचारनिर्णीतगुणोपसंहाररूपत्वात्। कियानेवविशेषः ध्यानमेवज्ञानसाधनंनकर्मादिकमित
तोधीमहीतिपदेकर्मणश्चुद्धांतःकरणस्यध्यानसंभवादिति। यत्तुश्रुतिस्मृतीअनादृत्यकेवलतर्केणब्रह्मणोजन्मादिकारणत्वंविघट
यत्प्रत्यवतिष्ठते। सोन्वयव्यतिरेकात्मकतर्केणापहस्तितव्यइत्यतोवाह। अन्वयादितरतइति। अन्वयात्अन्वयानुमानात्। इतरतोव्यतिरे
कानुमानात्। तोवदर्शितोवशब्दःपरोक्ततर्कस्यकेवलस्यव्याप्तिशून्यत्वादस्यचप्रत्यक्षानुगृहीतव्याप्तिकत्वेनबलीयस्त्वादप्राप्तिहतःस्वार्थं
साधयतीत्येतस्मिन्नर्थेवर्तते। पयोंबादेःतत्चेतनस्यस्पंदनादिप्रवृत्तिदर्शनात्तन्निदर्शनेनप्रधानस्यकारणत्वंकिंनस्यादितितत्राह। अर्थेष्वि
ति। अर्थेष्वघटपटादिष्वभितःसर्वतःअशेषविशेषाकारेणजानातीत्यभिज्ञः। प्रधानस्यजडत्वेनज्ञानाश्रयत्वलक्षणासंभवादितरानसर्वज्ञ
त्वंविष्णोस्तुसर्वज्ञत्वंश्रुतिस्मृतिसिद्धंयःसर्वज्ञःसर्ववित्तान्यहंवेदसर्वाणित्वंवेत्थपरंतपेत्यादि। नन्वस्यहेतोःसर्वज्ञेरुद्रादावपिहेते
रसाधकत्वमितितत्राहस्वराडिति। स्वयमेवराजतइतिस्वराट्। स्वस्यस्वयमेवराजानान्योधिपतिरितिवा। अयंभावः। यंकामयेतंतमुग्रं
कृणोमीति। रुद्रादीनांश्रीप्रसादायत्तज्ञानादिगुणवत्त्वदर्शनात्तस्ययोनिरस्वातंत्र्यरितिश्रियमश्चविल्वनुगृहीतज्ञानादिमत्त्वदर्शना

भा॰प्र॰
३

द्विसोस्यनन्याधीनज्ञानादिगुणवत्वात्कृतानां विशेषाणामनंतानां तैरज्ञातत्वात्तेषां निरूपयितृत्वसर्वज्ञत्वमतो नास्येश्वरस्य हेतोर्व्यभिचार इ
ति स एव सर्वकर्तेति। न ते विष्णो जायमानः एष सर्वेश्वर एष भूताधिपतिरित्यादिश्रुतिरनन्याधिपतित्वे सर्वाधिपत्ये च मानं। अद्रष्टा ज्ञातर
हित इति वा स्वराट् स्वात्मानं स्वयमेव राजयति प्रकाशयति न परेच्छयेति वा। ननु श्रुतीनामनंतत्वादेकत्र हरेरन्याधीनत्वं कथं न संभवादतः कु
तो निश्चयः परो नान्याधीन इति तत्राह तेने इति। यः परब्रह्मादिकवये चतुर्मुखाय ब्रह्मसांगवेदं हृदा तेने तेन विस्मारितवान्। तस्य सकृदुपदेश
मात्रेणाशेषविशेषग्रहणसामर्थ्यं विविस्मारितमिति वक्तव्यं ब्रह्म गुरूणां चतुर्वर्गमथापि वेदमुपदेशशास्त्रमनुसृत्य तेनेत्युक्तं। शिष्यशिष्याये
तथोपदेशसंभवात्। चतुर्मुखस्य वेदोपदेशेन हरेरनन्याधिपतित्वस्य किमायातमिति चेत्॥ न। प्रजायते न त्वदेतान्यन्यो विश्वा जातानि परिताब भू
वेति श्रुतेः। चतुर्मुखस्य निरतिशयमाहात्म्यकथनात्तदुपदेशात्तस्यानन्याधिपतित्वसिद्धेः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति त
स्मा इति श्रुतेः। सकलवेदविद्योपदेशोपि सिद्धः। आदिकवित्वं ब्रह्मणः। कविर्यः पुत्रः स ईमा विकेते त्यादिकं ति सिद्धं। ब्रह्म वेदस्तपस्त्वं च ब्र
ह्मा विप्रः प्रजापतिरित्यभिधानं। हृदा स्वहेमनः। स्निग्धेसु हृदयो हरावपीति वचनप्रहेलिकावदुपदेश इति द्योतनाय हृदेत्युक्तं। तेने ब्रह्मेति सर्वज्ञ
त्वहेतुं तं वा सकलवेदतनराश्रुत्नमस्य चतुराननस्योपदेष्टुः शार्ङ्गपाणेः सर्वज्ञत्वं न्यायप्राप्तमिति भावः। वेदाहमेतं पुरुषं महांतमादित्यव
र्णं तमसः परस्तादिति श्रुतेर्नारायणविषयत्वानेस्वातंत्र्यकथनात्तदुपदिष्टज्ञानेनैव तज्ज्ञानं कथं संगच्छत इत्याशंक्याह येनैव प्रसूते तेन
लभ्य इति श्रुतेः तत्प्रसादाद्यज्ज्ञानेन तद्विषयं ज्ञानं तदनुस्वप्रतिभयान्यथा ज्ञानमेव तस्मादुक्तहेतोरित्यभिप्रेत्याह मुह्यंति यं सुरय इति। यं प्र
ति सूतम विष्णुहृन्नैर्मानाब्रह्मादयो यत्प्रसादमंतरेण मुह्यंति मुह्यंते वित्व इति धातोः स्थितिज्ञानं न जानंति कविदन्यथा वजानंतीत्यर्थः। तस्मा

राम
३

द्ब्रह्मादिचेतनराशेरचिंत्यमहिमा महीश्वर इति प्रतीयते। न त्वीश्वरः स्वप्रयोजनं प्रवर्तमानः प्रयो[…]र्थी। नु जनित्रन्यथा वा न प्रश्नः यः यत्प्रयो
जनार्थं प्रवर्तते तेनस्य पूर्वं तदभावादपूर्णत्वेनाशक्तत्वात्सृष्ट्यनुपपत्तेः। न द्वितीयः प्रवृत्तिमा[त्रे] स्वप्रयोजनोद्देशेन दृष्टत्वाद्भयात्तदनुपपत्तेरतो
मायामयीयं सृष्टिरेषैव्येतदाह तेजोवारीति। तेजो वारिमृदां विनिमयो यथा तथा त्रिसर्गः यत्र यस्मिन् भगवति विषये सृष्टेः पूर्वं प्राप्तप्रयोजन
त्वापेक्षा न भवति। कथं तर्हि प्रवृत्तिरिति चेत्। उच्यते। देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा लोकवत्तु लीला कैवल्यमिति श्रुतिसूत्रव
चनात्प्राप्तसमस्तप्रयोजनस्य हरेर्लीलयैव प्रवृत्तिरिति भावः। जीवेश्वरजडानां सर्गो त्रिसर्गः यथा एकमेव मूलं तेजः स्ववीर्यं सु पार्थिवादिपदा
र्थेषु बहुधा स्थित्वा प्रविशति वहिश्च मथनादिना विर्भवति तथेश्वरोपि जगत्सृष्ट्वा बहुरूपी भूय जगंतः प्रविशति। वहिश्च भक्तानुकंपया वा
सुदेवादिवद्बहुरूप आविर्भवति। अयमीश्वरसर्गः। दीपाद्दीपांतरोत्पत्तिः यथा तथेश्वरसर्ग इति वा। यथा सूर्योदिते जलं जलाद्युपाधिनिमि
त्तैर्बहूनि प्रतिबिंबानि सूर्यकादीनि सूर्योदेर्जायंते तथैव सूक्ष्मस्थूलशरीराद्युपाधिभिन्नैः प्रतिबिंबभूतानीवाहेरुत्पद्यंते एव जीवसर्गः
। यथा कुलालो मृदमुपादानीकृत्य घटादीन् सृजति तथेश्वरो जडं प्रकृतिमुपादाय महदहंकाराद्यशेषजडपदार्थान्सृज[…] जडसर्गः। अ
नेन मायामयी सृष्टिरित्यस्य किमायातमिति चेदुच्यते। यत्रेश्वर इति विशेषणादन्यत्र जगत्सृष्टा मिथ्या न भवति […]योजना। यथा तेजो
वारिमृदां विनिमयः कार्यत्र्यर्थक्रियायोग्यत्वात्सदसद्विलक्षणो न भवति तथा यत्र यदाधारतया त्रिसर्गो मिथ्या न भवति। अतो
र्थक्रियोपपत्तिरेव मिथ्यात्वबाधिकेति भावः। ननु तेजःकार्यके शंड्कादि वारिकार्यफेनादि मृत्कार्यघटादि यथा मिथ्या तथा यत्र जग
न्मिथ्येत्यर्थः स्यात्तथा च श्रुतिः। वाचारंभणं विकार इत्यनुमानं च विमतं मिथ्या दृश्यत्वादित्यतो मायामयी सृष्टिरित्यत आह धाम्नेति। स्वेन धाम्ना

स्वरूपज्ञानमहिम्नासदानिरस्तकुहकं इंद्रजालादिमायायेनयस्य वा सतथोक्तः तं। यःसर्वज्ञः अथैनमाहुः सत्यकर्मेति विश्वं सत्यमि त्यादिश्रुतिविरोधाद्युदाहृतश्रुतेरर्थांतरस्यसंभवात् अनुमानस्य मायाभिभूयत्वेनतद्विरोधाभावान्नित्यनिरस्तेंद्रजालो विष्णुर्मायामयींसृष्टिं नदिस्यां तिकिंतुसत्यामेवलोकेवासमर्थः स त्विंद्रजालादिकं सृजतिनतुसमर्थः। विष्णुस्तु नित्यपरिपूर्णशक्तिः किमर्थंतत्करोतीत्यर्थः। मुक्त्या तिकिंतु सत्यामेवलोकेवासमर्थः इत्यादिकं उक्तं ते वा मुक्तेः पूर्वं बंधभाक्त्वे न कुहकत्वसंभवात्। ननुविष्णोः सदानिरस्तकुहकत्वेमुक्तमाहत्ति र्यदेततदेवकुतइतितत्राह स त्वमितितं सत्यं निर्दुःखनित्यनिरतिशयानंदाद्यनुभवरूपं। सच्चदउन्नमंब्रूयोदानंदेतीतिवेवदेतायेतिज्ञानेसमुद्दिष्टमिति वचनान्नित्यनिर स्तकुहकत्वेनमुक्तमाहनिर्गुज्यतइतिभावः। एतदुक्तं भवति। उपक्रमादितात्पर्यलिंगैःसर्वश्रुतिस्मृतितात्पर्यपर्यालोचनयासर्वज गत्सृष्ट्यादिकर्तृत्वात्सर्वज्ञत्वादनन्याधिपतित्वाच्चतुर्मुखस्तानोपदेष्टृत्वात्स्वानुग्रहमंतरेणदुर्ज्ञेयत्वात्स्वयोजनानुद्देशेनैकेवललीलयैवजगत्सर्जनादिषु हेतुत्वात्स्वत एव नित्यनिरस्तेंद्रजालत्वेन सत्यमहिमत्वान्निर्दुःखनित्यनिरतिशयानंदानुभवरूपत्वाच्च सर्वगुणपूर्णोविष्णुः सर्वैर्ध्येय इतितात्पर्यार्थः॥ ननुधीमहीतिछांदसः प्रयोगः कस्मात्कृतः। उच्यते। गायत्रीप्रतिपाद्यं नारायणं स्वयंपरंब्रह्मैव नसूर्यः तस्यवंशोः सूर्यो अजायतेतिश्रुत्या तदंगजननोक्तेरितिदर्शयितुं यथावेदाध्ययनोपक्रमेण यत्र अभिधीयते विशिष्टफलहेतुत्वात् थाभागवतोपक्रमइतिवागायत्र्याद्यशेषवेदप्रतिपाद्यो नारायणएव भागवते प्रतिपाद्यतइतिवा। इतरेषां भगवत्कृतत्वेनतत्स्वरूपेपित द्यथा हृत्येइतिवा। इतरेभ्योप्यस्यमाहात्म्याधिक्यप्रकटनायेतिवाधीमहीतिछांदसंपदंप्रयुक्तं भगवान्बादरायणः। तथा च मत्स्यपुराणे पुराणादि नमाहात्म्यप्रश्नाद्यमाहात्म्यंतल्लक्षणं प्रदर्श्यते। यत्राधिकृत्यगायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतं विदुः। लिखित्वा

तच्चयोदद्याद्धेमसिंहसमन्वितं। प्रोष्ठपद्यां पौर्णमास्यां सयातिपरमंपदं। अष्टादशसहस्राणिपुराणं तत्प्रकीर्तितमिति। स्कांदेच। ग्रंथो ष्टादशसाहस्रो द्वादशस्कंधसंमितः। हयग्रीवब्रह्मविद्यायत्र वृत्रवधस्तथा। गायत्र्या च समारंभो यत्र भागवतं विदुरिति। गारुडेच। अर्थोयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः। गायत्रीभाष्यरूपोसौ वेदार्थपरिबृंहितः। पुराणानां साररूपः साक्षाद्भगवतोदितः। द्वादशस्कंधसंयुक्तः शतविच्छेदसंयुतः। ग्रंथोष्टादशसाहस्रः श्रीमद्भागवताभिधइति। अन्येत्वष्टविंशत्साहस्रं भागवतमिति वदंति। असंप्रदायविदां वचनमि तुपेक्षणीयं। गायत्र्यर्थो प्यनेनश्लोकेनसूचितः। तथाहि। तत्सवितुर्देवस्येत्येतस्यार्थो जन्माद्यस्ययतइति। वामं वरेण्यं परमित्यभिधाना द्वरेण्यमित्यस्यव्याख्यानं परमिति। भर्ग इत्यस्य व्याख्यानं धाम्नास्वेनसदानिरस्तकुहकमिति भर्गः सकलदुरितजनंज्योतीरूपं तत्पदार्थव्या ःउपलक्षणमेतत्। सर्वेंद्रियाणिस्वतत्त्वविषयं ज्ञानं गुरुमुखेनोपदिश्यतत्त्वज्ञानसाधनानि सर्वाणि करणानि प्रचोदयात्। प्रचोदयति स्वा करतयापरममंगलं भर्गज्योतीरूपं गमनभरणयोगात्सर्वज्ञं वावपुः ज्ञानानंदगुणाश्वितकस्वरूपं घनयत्वतत्धीमहि ध्यायेमज्ञानमे दः॥ पदार्थोक्तिर्द्विविधो वाक्ययोजना। आक्षेपश्चसमाधानमिति व्याख्यानं लक्षणं। अतिरिक्तं पदंत्याज्यं हीनं वाक्ये निवेशयेत्। द्विरुक्तं वसंदध्यादानुपूर्व्यं चकल्पयेत्। लिंगंधातुंविभक्तिं च योजयेच्चानुलोमतः। वाक्यार्थस्यानुसारेण तेषां च प्रत्ययोपि वेतितदनुपासितग्रंथ

संप्रदायवित्सज्जनवरणोहत्येव्हितमितिविदुषांपरितोषदिसार्स्याआधवेनहियथावेदादावकरीत्यत्राकेरादितिपदंशवानिवेशनंतथाप्य
त्रातिरिक्तंपदंसंतत्पहीनंप्रयोज्यव्याख्यानंतत्त्वरूपंननभवतितस्माद्यथास्थितग्रंथव्याख्यानमेवसज्जनचित्तरंजनमितिसंतोष्टव्यंन
नुनायंश्लोकार्थः किंत्वन्यएव। तथाहि। तंसत्यंधीमहि। ननुष्टत्रिकेत्यैवसत्यमितिमृदादेरपिसत्यत्वश्रूयतेनहृदस्यापीतितत्राह। परमिति। प
दादेः कार्यापेक्षयासत्यत्वंन्नपेतुपारमार्थिकसत्यः तत्सत्यंसआत्मेतिश्रुतेः॥ परस्यसत्यस्यवाङ्मनसगोचरस्यकथंध्यानंध्यानध्येयादि
व्यवहारगोचरत्वमित्याशंक्याह। जन्माद्यस्येति। अस्यजगतोजन्मस्थितिभंगंयतः परात्सत्यात्तंधीमहीत्यर्थः। यतोवाइमानिभूतानिजायंतइ
तिश्रुतिसिद्धजगत्कारणरूपेणवाङ्मनसगोचरस्यापिध्यानध्यानादिव्यवहारोघटतइतिभावः। ननुब्रह्मणःसिद्धरूपत्वात्प्रमाणांतरागोचर
त्वमतस्तत्रवेदांतानामनुवादकत्वादप्रमाण्यमित्याशंक्याह। अन्वयादिति। वेदांतानांब्रह्मण्येवान्वयात्तात्पर्यादित्यर्थः। तथाचश्रुतिस्मृती। स
र्वेवेदायत्पदमामनंति। वेदैश्चसर्वैरहमेववेद्यइतिप्रमाणांतरासिद्धत्वेनह्यनुवादकत्वंसिद्धमित्यपिज्ञातंमानेकेवलंश्रुत्यन्वयात्सर्वप्रव
याञ्जेनाहइतरतश्चेति। अहंसर्वस्यजगतःप्रभवःप्रलयस्तथेतिस्मृतितश्चेत्यर्थः। अथवाप्रतिपदोक्तविवक्षितार्थसिद्धयेहेतुमाहअन्वयादित
रतश्चेति। असतिप्रकाशातेइतिब्रह्मणश्चकार्यप्रपंचेमृदादेरिवघटादौसमन्वयादितरतोऽसतिप्रकाशव्यतिरेकेणकदाचिदपिकस्याप्यप्रतिभासा
न्मृदादिव्यतिरेकेणघटादेरिवेत्यन्वयव्यतिरेकौदर्शितौ। अथवाब्रह्मणिकारणयन्नेमहदादिकार्यदर्शनादन्यथादर्शनादितिसन्नाछितो
रन्वयव्यतिरेकौदर्शितौ। ननुतर्हिसांख्यपरिकल्पितंप्रधानमेवजगत्कारणमस्तुकिंब्रह्मणेतितत्राह। अर्थेष्वभिज्ञइति। उत्पाद्यसर्वपदार्थ
षुअभिज्ञःसः अभिमतःसर्वतःसर्वमिदंजानातीति एवंविधस्यैवकारणत्वंनेतरस्यप्रधानस्यजडत्वात्सर्वज्ञत्वतमोवयः सर्वज्ञइतिश्रुतिः॥

तर्हिस्वर्थेष्वभिज्ञानांजीवानामेवजगत्कारणत्वमस्त्वित्याशंक्याहस्वराडिति। स्वयमेवराजतइतिस्वराट्जीवानांपरिच्छिन्नज्ञानत्वेनपराधीनत्वात्
सर्वज्ञत्वंसंभवतीत्यर्थः। एषसर्वेश्वरः एषसर्वलोकपालइतिश्रुतेः। नचेश्वरस्यापिनतस्यकार्यंकरणंचविद्यतइतिश्रुत्याकार्यकारणाद्यभावात्।
कथंसर्वज्ञत्वमितितत्राह। तेनेब्रह्मेति। आदिकवयेब्रह्मणेयः ब्रह्मऋग्वेदादिलक्षणंसांगंवेदंहृदामनसामनोमात्रेणसाधनांतरनिरपेक्षतया
स्वरमात्रावर्णपदवाक्यादिक्रमेणविस्तारितवान्। ब्रह्मणउपाधिभूतोबुद्धिनिर्माणतन्नवेदंप्रकाशितवानित्यर्थः। अथवाहृदोपनिवरासहसं
कल्पमात्रेणकार्यकारणसंबंधरहितोपिभगवान्सर्वांतर्यामीब्रह्मादिकार्यकारणसाक्षित्वेनसर्वज्ञइत्यर्थः। एवंजगत्कारणेसच्चिदानंदा
त्मकेवेदैकवेद्येनिरवद्येसर्वेश्वरेपरेरूढात्मदोषकलापिनाशीत्यभिधत्ते। मुह्यंतीति। यत्सूरयःकपिलादयःशास्त्रप्रणेतारः मुह्यंतीत्युक्तेत
स्यणीतशास्त्रस्यनिर्मूलत्वेनाप्रामाण्यान्नहिरोधग्रंथोनास्तीत्यर्थः। नानामतनर्कलीनांत! करणदुरवग्रहवादिनांविवादानवसरेउपरतसमस्त
मायामयेभगवतिकोनुदुर्घटइतिस्वोक्तेः। अतःपरमसत्यादुत्पन्नस्यजगतःकुतःसत्यत्वंकिंतुमिथ्यात्वमेवेतिदर्शयतितेजोवारीति। विनिमयः
कार्यंतेजआदिनिमयः केशांडुकादिः वारिणिनिमयः हिमकारकादिमृदोविनिमयोघटादिः यथायेनप्रकारेणतथाकारणसत्ताप्रतीतिव्यतिरेके
णकार्यस्यपृथक्सत्ताप्रतीतिशून्यत्वमेवात्रमिथ्यात्वंतद्वत्तेजोवारिमृदामयिकारणसत्ताप्रतीतिव्यतिरेकेणपृथक्सत्ताप्रतीत्यभावान्मिथ्या
त्वमित्यर्थः। किंचिच्चित्रमृष्टत्वानांबोधयथादृष्टांतदार्ष्टांतिकव्याजेनमिथ्यात्वकथितमितिसंप्रदायविदामभिप्रायः। ननुब्रह्मणोजगत्कारणत्वे
क्रियाकारकादिसंबंधादसंगोह्ययंपुरुषइतिविरुध्यतेत्यतोवाहतेजोवारीति। त्रिसर्गःभूतानांसर्गःतेजोवारिमृदांसर्गःउपलक्षणंचैतत्पंचभू
तानांसृष्टिः यत्रमृषाकथंयथातेजो[illegible]दौविनिमयोमिथ्या। तथाजगदपिमिथ्येत्यर्थः। वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिश्रु

भा॰ प्र॰
६

तेः। इदानीमेवं विश्वप्रपंचकारणत्वेन कल्पितमायासंबंधनिबंधनं किंचिदपि चिद्रूपपरमसत्यात्मके ईश्वरे घटद्वयावस्कागत्यापि नास्तीति द
र्शयति धाम्नेति। धाम्ना प्रकाशेन स्वरूपभूतेनात्मचैतन्येनापवारितः कारणत्वेन कल्पितेन सदा सर्वदा निरस्तं निराकृतं कुहकं कपटं येन
सतथोक्तः। सदेति जीवाद्वैलक्षण्यप्रदर्शनायात्र अर्थादसंगत्वकूटस्थत्वं चोक्तं तस्मादेकमेव ब्रह्मोपहितानुपहितभेदेन द्वेधा दत्र लक्षणोपे
मूर्त्तं चैवामूर्त्तं चेति श्रुत्या प्रतिपाद्यते तत्र सगुणब्रह्मोपासनाजनितेन ज्ञानेन शुद्धांतःकरणस्य निर्गुणब्रह्मोपाप्तौ बुद्धिरूपनिष्ठते ननतत्स्वस
कलस्वात्मानं पश्यन्नात्मन्यतिष्ठिं किं विद्यप्रपञ्चनिर्गुणएवावतिष्ठते इत्यभिप्रायोऽनेन प्रतिपाद्यते नापरोक्षप्रामाणिकइति। तदेतत्कंठशोक्त
णप्रलापज्वलनज्वालातुल्यमिति न परीक्षकाः ज्ञानमपि कराद्वेणप्रद्वेते पूर्वापरपर्यालोचनया स्वोत्प्रेक्षितयुक्तिविरुद्धत्वात् श्रुतिस्मृतीना
मतात्पर्यार्थत्वात्स्वल्पत्वादिप्रमाणग्रहणप्रकृतशिरस्कत्वादावार्थस्य तत्र निराकृतत्वाच्च स्मादीनां मिथ्यात्वपरत्वे विरोधस्य दर्शितत्वादस्म
इक्तार्थवक्तृप्रमाणसंभवाद्ग्रंथबाहुल्यभयाच्च न तन्निराकरणं प्रपंच्यते। न हि स्वपरस्य संस्कृतं किमन्यत्कामहे तुकमिति वदतां संप्रदायवित्त्वमि
ति १

श्रीराम राम राम राम

राम
६

ननु जन्माद्यस्य यत इत्यनेन सकलपुराणार्थस्य संक्षेपतो दर्शितत्वात्किमुत्तरश्लोकेनेत्यतो ग्रंथारंभे मंगलाचरणाद्यानारायणस्य प्रकृत
त्वं न तु सामान्यादिविषयत्वेन विषयस्तन्य एवेति संशयनिराकार्थं विषयतत्साधनाधिकारिप्रयोजनानि द्वितीयश्लोकेन दर्शयति॥ ॥ धर्म इति। ननु
यदिष्टसाधनाववोधकं शास्त्रं यस्मद्वेदप्रमाणं तयोपादेयमतः कथमस्य ग्रंथस्यात्यंतोपादेयत्वमाह धर्म इति॥ ॥ अत्र श्रीभागवते प्रोज्झितकैतवः परमः धर्मः
प्रतिपाद्यते। अत्र श्रीमद्भागवते निर्मत्सराणां सतां वेद्यं वास्तवं शिवदं तापत्रयोन्मूलनं वस्तु प्रतिपाद्यते। किं विशिष्टे महामुनिकृते। अपरैः किं वा।
शुश्रूषुभिः कृतिभिः। अत्र श्रीमद्भागवते अभ्यस्यमाने। ईश्वरः सद्यस्तत्क्षणाद्धृदि अवरुध्यत इत्येकान्वयः। अन्नास्मिन्व श्रीमति भागवते श्रीमत्वना

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं। श्रीमद्भागवते महा
मुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् २

मत्त्रप्रमाणमस्मती यत्तपार्थपर्यालोचनया वास्यैतरेभ्यः आधिक्यं। तथा वोक्तं। राजंते तावदन्यानि पुराणानि सतां गणे। यावन्न दृश्यते साक्षात् श्रीमद्भा
गवतं परमिति। ध्रियते अनेन लोकः पतनदुःखादिति धर्मः। धारयतीति धरो भगवान्स्वामी यते ज्ञाप्यते अनेनेति वा। रधाति कर्त्तारं रमयति भीनीते हि नाहि
पापमिति। वा भगवतः प्राप्तिसाधनम्। ननु धर्मोन्यत्रापि प्रतिपाद्यते किमत्रैवेति तत्राह प्रोज्झितकैतवः। कितवस्य भावः कैतवं प्रकर्षेणोज्झितं कै
तवं येन स तथोक्तः। कितवो नाम लोके मनस्यन्यदभिसंधायान्यदभिधत्ते अन्यदेवाचरति तद्वदपि भगवत्प्रीतिमंतरेण स्वर्गादिफलं मनस्यनुसंधा
य भगवद्गुणप्रतिपादनलोलुप निगमार्थं अन्यथावदत्स्वात्मनो देहेंद्रियाणामीश्वराधिष्ठितत्वमीश्वरनियम्यत्वं निगूह्य हरेः कारयितृत्वं फलद

भा॰प्र॰
१

त्वमप्यगाण्यहमेवेदं करिष्ये ऽर्थी समसमर्थो विद्वानहमेवास्वतंत्र इति बुध्या कितवेन क्रियमाणो धर्मः कैतवं वस्तु यतोऽतो ऽफलकामनयैव धर्म्मः
कर्तव्य इत्ययमर्थोऽत्र प्रतिपाद्यत इत्यर्थः। तत्कर्म्म यन्न बंधाय सा विद्या या विमुक्तय इति श्रीविष्णुपुराणे। तर्हि तावता पूर्ण इति तत्राह परमः। यत्करोषि
यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति स्मृतेः भगवदर्पणात् परमो भवतीत्यर्थः। परः परमात्मा मीयतेऽनेनेत्ये
तदभिप्रायेण परम इत्यप्यधायि। परो ऽरिः परमात्मनोऽरित्वाभिधानात् स परः शत्रुः संसारः मीयते प्रलीयते इति वा मीञ् हिंसायां। प्रमूया हिंसा च संज्ञ
पन्नमित्यभिधानं किं चान्यतोऽधिकतमः सुखहेतुर्न भवति स परमो धर्मः स च भक्तियोगलक्षण एव। तथा च भारते भीष्मयुधिष्ठिरसंवादे। को धर्म्मः सर्व
धर्म्माणां भवतः परमो मत इति पृष्टे। एष मे सर्वधर्म्माणां धर्म्मोऽधिकतमो मतः। यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदेति उक्तं। एतावानेव लोकेऽस्मिन् पुं
सां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः। नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यती।
तिस्वोक्तेः। केषामधिकारः कश्चासाक्षाद्विषय इति तत्राह निर्म्मत्सराणामित्यादिना। भावप्रधानो निर्देशः निर्गतमात्सर्यं येषां ते तथोक्ताः तेषां सतां
प्रशस्तकर्म्मणां पुरुषाणां सतामपि द्विविधत्वविचक्षणत्वात्सर्वस्यान्तनकर्त्रंशस्वात्ममेच्छितयतो निर्मत्सराणामित्युक्तं। वेद्यं ज्ञेयं यत्क्र योगेपष्ठीति सतामि
तिषष्ठी। वेद्यं ज्ञानमेव न कर्म्मादिकमित्यतो वेद्यमित्युक्तं। वास्तवं नित्यनिरस्तदोषपूर्णगुणं वस्तु अप्रतिहतं नित्यमप्रतिहतनित्यत्वेन वस्तु नश्वरी त्वत्वा
दित्यर्थः। दुःखनिवृत्तिसुखप्राप्तिलक्षणस्य पुरुषार्थत्वात्तदभावात्किमनेनेति तत्राह शिवदमिति। परमानंदं ददातीति वा। तापत्रयोन्मूलनं। आ
ध्यात्मिकादिसकलदुःखनिवर्तकं च। वेद्यं वेद्यस्य सर्वस्य मुक्तिसद्भिरुदाहृत इत्यभिधानान्मुनयो ब्रह्मादयः तेभ्योऽप्यतिशयितसार्वज्ञान्महामु
निर्व्यासः साक्षान्नारायणः। कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुमिति वचनात्। तेन कृते प्रणीते। ननु किमिति ईश्वरस्तुष्टिकरो भक्तियोगलक्षणो

राम
१

धर्म्म ईश्वरस्थात्र प्रतिपाद्यो न धर्म्मादिरिति तत्राह किं वेति। भक्तियोगलक्षणधर्मस्य हेरेरपरोक्षज्ञानमुत्पाद्य तत्प्रसादांतरंगसाधनत्वेनापवर्ग
लक्षणनश्वरफलहेतुत्वाद्बहिर्मुखमनोरंजकत्वेन स्वर्गादिक्षयिष्णुफलमुत्पाद्य संसारप्रवृत्तिहेतुत्वात्तद्धर्म्मादिकथनैः किं वा परेः जननकि
मपीत्यतः तानंतरेण भक्तियोगलक्षणधर्मं सद्विनय ईश्वरस्थात्र प्रतिपाद्यत इत्यर्थः। ननु दृष्टफलप्रवृत्तिद्वारा दृष्टफलप्रवृत्तिदर्शनात्किमत्र
दृष्टफलमिति तत्राह ईश्वर इति। अस्मिन् भागवतशास्त्रे सम्यगभ्यस्यमाने कृतिभिः शिक्षितबुद्धिभिः शुश्रूषुभिः मनोवाक्कर्मभिः गुर्वादिपरम
पुरुषपरिचर्याकरणकुशलैः साधनसामग्र्युपेतैरेभिः ईश्वरः लक्ष्मीशादिवेतनगणाद्युत्तमः तत्स्वरूपं नशीलो वा परमात्मा हृदि हृदयकम
लेसद्यः शीघ्रं तत्क्षणात्कालव्यवधानमंतरेणावरुध्यते भक्तिशृंखलया बद्धो दृश्यत इत्यर्थः। अत्र सद्यः तत्क्षणशब्दावधिकारिविशेषद्यो
तकतया प्रयुक्तौ ये साधनसामग्रीमंतस्तेषां यस्मिन् क्षणे ग्रंथोपक्रमस्तस्मिन् क्षण एव भगवान् दृश्यते। तदुक्तं। शनकैर्भगवल्लोकान्नृलोकं पु
नरागत इति ये भविष्यत्साधनसंपत्तिसंपादनयोग्यास्तेषामपि सद्यः। साधनसामग्र्यासत्या दृश्यते यन्नियतं कालांतरभावित इति भवत्येवे
ति वक्तुं शक्यत्वात् भक्तियोगलक्षणधर्मस्वरूपं विजयतया निर्मत्सरसद्धिकारिभिः प्राप्यं निर्दुःखपरमानंदाख्यप्रयोजनमित्येतत्त्रितयमत्र प्र
तिपाद्यत इत्यभिप्रायेणात्रेति त्रिशः कथितं। ननु सगुणं ब्रह्म तत्तुष्टिकरः परमधर्म्मः निराकारं निर्गुणं ब्रह्म चेति त्रितयाभिप्रायेणात्रेति त्रि
त्वमिति। कर्म्मदेवब्रह्मकांडार्थाप्यत्रैव निर्णीयत इति वा। धर्म्म इति कर्मकांडार्थः। निर्म्मत्सराणां सतामिति देवताकांडार्थः। देवतानामेव मा
त्सर्यराहित्येन मुख्यसत्त्वेनोत्तमाधिकारित्वात् वेद्यमिति ब्रह्मकांडार्थः। तस्मान्नारायणावतारेण। सर्वज्ञतमेन कृष्णद्वैपायनेनाप्रतमेन प्रणी
तत्वेन प्रमाणतमत्वादिदं श्रीमद्भागवतं सर्वमुमुक्षुभिर्निरंतरमस्यसनीयमिति सिद्धं २

एवं ज्ञातफलानामपि वेदज्ञानवतो प्रशंसाविधिभ्यां भागवतशास्त्रश्रवणाभ्यासे शिष्यप्रवृत्तिः स्यादिति प्रशस्यविधत्ते निगमकल्पतरोरिति॥ भुवि भावुका रसिकाः यन्निगमकल्पतरोर्गलितं शुकमुखादमृतद्रवसंयुतं भागवतं फलं तत्स्वरसमालयं मुहुः पिबतेत्यन्वयः। मर्त्यलोके भवनशीला रसज्ञा भूयं निरामयतिनितरां ज्ञापयत्यपेक्षितांशेषपुरुषार्थानिति निगमो वेदः स एव कल्पतरुः कल्पितं संकल्पितं भक्ताकांक्षितं तरति वितरति ददातीति कल्पतरुः सुरपादपः। उपसर्गः स्वयं धातुलीनमर्थं प्रकाशयति न स्वत उत्पादयतीति धातुवृत्तिकारदर्शनवचनात्तरतिर्दानार्थोपि भवति वितरणे वितरणादर्शनं प्रतिपादनं इत्यभिधानाच्च। तस्माद्भासनान्नामयाशाखितेगलितं पातितं शिवावतारस्य मनुत्वस्य शुकनाम्नो मुनेर्मुखात्परीक्षितेप्रवचनादमृतद्रवेण संयुतं पूर्वमप्यमृतवत् द्रवीकृतं पश्चाच्छुकाचार्यमुखप्रवचनेन तावद्द्रवीकृतमित्यर्थः। तथा च पद्मपुराणे अम्बरीषं प्रति गौतमवचनं॥ अंबरीष शुकप्रोक्तं नित्यं भागवतं सदा। पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति॥ भागवताख्यं फलं निष्पन्नं पक्वमिति यावत्।त

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं। पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३

स्य फलस्य मधुरं रसं लिंगशरीरमोक्षपर्यंतं मुहुः परावृत्य श्रवणांजलिपुटैः पिबत पानं कुरुत श्रवणादिना स्वादयतेत्यर्थः। अहो इति बालानुन्मुखीकरोति। अस्य फलस्यामृतरसास्वादसुखानुभवं पश्यतेति॥ ॥ रसशब्दस्यातिक्तादिषु षट्सु वृत्तावप्यमृतद्रवेष्वुक्तेः॥ पानपात्रं समासयेऽतिमधुर एवायं रसः न फलत इति वा अहो इति। निगमकल्पः वेदाख्यकल्पवृक्षः। कल्पः सुरपादपेपि संप्रोक्त इति वचनात् मेवतारयति प्रकाशयतीति निगमकल्पतरुः तस्माच्छुकाचार्याननात् गलितं व्याख्यातं परीक्षित इति शेषः। अमृतं कैवल्यं तस्य द्रवेणानंदेन तथा शुकं कैवल्यप्रापकमिति यावत् रसं संपन्नेर्निवासस्थानं भागवतं फलं पिबतेति वा अत्रापि वर्तिर्भक्षणार्थः। अनेकार्थत्वाद्धातूनां न्वायमाचार्योक्तार्थेनेत्यपश्रद्धेयं चतुर्मुखमुखलेखबुद्धिगौवरापरिमितार्थभागवततात्पर्यं दर्शयितां पूर्णमती नामा वा धीणामप्ययं कश्चिद्बुद्धिसमुद्भूतरंगा इति निश्चित्यवक्तुं शक्यत्वात्। भुवि गलितमिति वा। देवलोके देवैः पीयमानं सज्जनमनुजकृपया भुवि यातितमित्यर्थः ३

नत्वब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा। अथवा स्नानमात्रेण गोमत्यां कृष्णसन्निधाविति स्मृतेः प्रकारांतरेणापि पुरुषार्थः स्यात्किमनेनेत्यतोनेनैव पुरुषार्थो नान्येनेति ख्यापनायास्य ग्रंथस्य शिष्टपरिगृहीतत्वज्ञापनाय श्रोतृप्रवक्तॄणां महापुण्यफलवत्त्ववेदनाय शौनकादिमुनिवरसूतप्रश्नप्रतिवचनरूपामाख्यायिकामाह॥ नैमिष इति शौनकादय ऋषयः अनिमिषक्षेत्रे नैमिषे स्वर्गाय लोकाय सहस्रसमं सत्रमासतेत्यन्वयः। शुनकस्यापत्यं शौनकः तदेव तस्य नाम शौरिरितिवत्। सत्रादि दीर्घयागे तेन थोक्ताः ऋषयस्त्रिकालदर्शिनः। मंत्रद्रष्टारो वा। अनिमिषक्षेत्रे श्रीनरहर्यादिसुरवरसन्निधानावास। निमिषाक्तषिसेव्यफलाः वृक्षविशेषाः तस्मिन्संतीति नैमिषं। विष्णुकृत निमिषेण नेमिः चक्रं बुलो यथा मुगन्धं इत्यभिधानात्। विशिष्टक्षेत्रदर्शनायदेवप्रहि

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ४

तस्य सुदर्शनस्य नेमिर्यस्मिन् विशीर्यते तन्नैमिषं तदेव नैमिषं इति यत्तत्क्षेत्रं निमिषनाम्ना ऋषिणा यत्र तपश्चीर्णं तत्संबंधाद्वा नैमिषं तस्मिन्नैमिषारण्ये स्वरतो विष्णुः तेन गतो लोको वैकुंठाख्यः तस्मै। सदानंदज्ञानमूर्तित्वात् स्वर्गो विष्णुः। लोकः आश्रयः। तद्दर्शमिति वा। स्वरिति विष्णुं गमयति प्रापयतीति स्वर्गः। लुकृ प्रकाशन इति धातोर्लोकः प्रकाशः ज्ञानं। विष्णुविषयज्ञानार्थमिति वा। ननु मनः प्रीतिकरः स्वर्गो नरकः। तद्विपर्यय इति। दुःखासंभिन्नदेवसेव्यदेशविशेषायेति वा तस्य नाशत्वश्रुतेः। सहस्रं समा यस्मिन् तत्तथोक्तं वर्षसहस्रसमाप्यमित्यर्थः। सतः सुजनान् त्रायत इति सत्रो ब्रह्मणः त्राणमस्यति वा सत्रं प्रशस्ततरं कर्म्म सुश्रेष्ठमिति वा सत्रं बहुकर्तृकं पागविशेषं आसत उपाविशन् अङ्गीकृतवन्त इत्यर्थः ४

येसत्रयागेदीक्षितास्तेमुनयःसर्वज्ञाअपिएकदाकस्मिंश्चित्कालेस्वाश्रमंप्राप्तंतंसत्कृतंतद्योग्यसंस्कारैःपूजितमासीनंसुखंपीठउपविष्टंस्तंइदं
स्ववुद्धिस्थितंपप्रछुः।किंविशिष्टाःआदृताःविनीताःतेनापिपूजिताइतिवाहुतंहविरग्नौतीतिहुताशनोग्निः।प्रातःकालेहुतोहुताशनोयैस्तेतथोक्ताः
हुतेनपयआदिद्रव्येणहुतोग्निर्यैस्तेहुतहुताग्नयइत्यसत्।हुतशब्दस्यपयआदिषुपाठात्।तुलीकानुकंपाद्यांतकःइष्ठेतेर्द्विकर्म्मकत्वात्सूत

तएकदातुमुनयःप्रातर्हुतहुताशनाः॥सत्कृतंसूतमासीनंपप्रछुरिदमादृताः ५ ऋषयऊचुः त्वयाख
लुपुराणानिसेतिहासानिचानघ॥आख्यातान्यप्यधीतानिधर्म्मशास्त्राणियान्युत ६

मिदंपप्रछुरितिकर्म्मद्वयंयुज्यते ५ प्रशंसितःप्रवक्तासूतःस्वप्रश्नोत्तरंसंतुष्यसम्यग्वक्ष्यतीतिहृदिकृत्वाप्रष्टव्यार्थेप्रष्टुःतःकृत्वातंप्रशंसंतिशौनका
दयइत्याह॥त्वयाखल्विति।हेअनघदुःखेनोद्यमनेघद्यमित्यभिधानात्निरस्तसमस्तकार्यश्रमनत्वयासेतिहासानिभारतादीतिहाससहितानिपु
राणानिवशद्वादुपपुराणानिअधीतानिवेदवत्पठितानिआख्यातानिआख्यातान्यपियानिमनुयाज्ञवल्क्यादिप्रणीतानिधर्म्मशास्त्राणितानु
तत्रापिअधीत्यव्याख्यातानीत्यन्वयः ६

तस्यज्ञानेयत्नोवर्ततीत्याह।यानीति।वेदविदांश्रेष्ठःवादरायणोभगवान्यानिवेदअन्येचपरावरविदःमुनयःयान्येवविदुः।किंच।तेमुनयोवेदादन्यत्रया
निविदुःहेसौम्यत्वंतत्वतःतत्सर्वंवित्सेत्यन्वयः।विद्वद्वादरतानांवाहिनामाश्रयत्वाद्बादरायणः।वदराणांसंबंधित्वाद्बादरंआयनंस्थानंयस्यसतथोक्त
इतिवा।परंब्रह्मअपरंब्रह्मविदंतीतिपरापरविदः।अतीतानागतविदोवा।भक्तिज्ञानलक्षणसोमार्हविदकृतावितिधातोः।भगवान्यानिवेदस्वकारा
अन्येचमुनयोयानिवक्तुं।तत्संज्ञानासीतिवा।गुरवःस्निग्धस्यस्नेहलक्षणभक्तिसंपन्नस्यशिष्यस्यगुह्यमपिगोप्यमपिब्रूयुःउतअपितंसंभावित

यानिवेदविदांश्रेष्ठोभगवान्बादरायणः॥अन्येचमुनयःसूतपरावरविदोविदुः ७ वेत्थत्वंसौम्यतत्सर्वंतत्वतस्तदनुग्रहात्॥
ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ८ तत्रतत्रांजसायुष्मन्भवतायद्विनिश्चितं।पुंसामेकांततःश्रेयस्तन्नःशंसितुम
र्हसि ९ प्रायेणाल्पायुषोमर्त्याःकलावस्मिन्युगेजनाः।मंदाःसुमंदमतयोमंदभाग्याह्युपद्रुताः १०

मित्यन्वयः।ब्रूयुरपिब्रूयुरेवेत्यर्थइतिवा ७ ८ इदानीमभिमतार्थमाहुरित्याह।तत्रेति।आयुष्मन्प्रशस्तायुषेतः।सूतभवतातत्रतत्रपुराणादिषुजन
अंजसामार्गेणायत्पुंसामेकांततःश्रेयोनिश्चितंतन्नःशंसितुमर्हसीत्यन्वयः ९ ननुकिमितिसंक्षिप्यकथनंविस्तरेणाकिंनस्यादितितत्राह॥प्रायेणे
अस्मिन्कलौयुगेजनाःअल्पायुषःअतएवमर्त्यामरणशीलाःमंदाःकर्म्मकरणशक्तिशून्याःसुमंदमतयःअल्पप्रज्ञाःमंदभाग्याःअल्पपुण्यभागि
नःकुष्ठभगंदरादिव्याधिभिरुपद्रुताः।प्रायेणेतिप्रत्येकमभिसंवध्यते।वहुत्वमेवंकश्चिदेवोक्तार्थीतत्रान्यथास्यादित्यर्थवर्ततइत्यन्वयः १०

अल्पायुष्यादिषु अलसंतेषु दुर्बलानां श्रेयःसाधनशास्त्राणि हित्वा अर्थादिविषयानेकशास्त्रश्रवणं दुःशकमित्याह। भूरीणीति। अन्यथा विभागशः प्रत्येकं
विभक्तानि तथा श्रुतानि भूरीणि बहूनि भूरिकर्माणि श्राव्याणि पार्सवंति श्रोतव्यान्यर्थादिविषयशास्त्राणि संतीति परिहत्यान्वयः। प्रश्नार्थं निगमयति। अत
इति यत एवमर्थादिविषयशास्त्रज्ञानं दुःशकं श्रेयः परिपंथि च आयुरादिकं चाल्पमतः साधो हीनज्ञानस्य अत्रत्वेपि निर्दोष अत्रैषु शास्त्रेषु यत्सारं तन्म
नीषया बुध्या समुद्धृत्य इदमेवोपादेयमिति नः ब्रूहि। किमर्थं भूतानां भद्राय येन भवदुक्तसारश्रवणेनात्मा हरिरात्मा सुप्रसीदति अनुग्रहोन्मुखो भवती
त्येकान्वयः ११ समस्थहरेः कृष्णावतारकथैवेत्याशयवंतः पुनराहुरित्याह॥ सूतेति॥ भोः सूत जानासि सकलमिति शेषः। तेषु स्वं भद्रं मंगलमक्तात्त

भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः १० अतः साधोत्र यत्सारं समुद्धृत्य मनीषया॥ ब्रूहि भद्राय भूतानां येनात्मा सु
प्रसीदति ११ सूत जानासि भद्रं ते भगवान्सात्वतां पतिः॥ देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया १२ तन्नः शुश्रूषमाणा
नामर्हस्यंगानुवर्णितुं। यस्यावतारो भूतानां क्षेमाय च भवाय च १३

च वितंभूतं तं भद्रं सर्वमंगलं भगवंतं जानासीति वा॥ सात्वतां पतिर्भगवान् यस्य कार्यविशेषस्य चिकीर्षया वसुदेवस्य सकाशाद्देवक्यां जातः तद्वा रापकाशि
तः १२ यस्यावतारो भूतानां क्षेमाय ऐहिकामुष्मिकसुखाय विभवाय भिहृद्भये भवति। अंग हे वत्सा तस्य कृष्णस्य तं कार्यविशेषं चरित्रपरंपर्यां शु
श्रूषमाणानां अस्माकं अनुवर्णितुं सम्यग्वक्तुमर्हसीत्येकान्वयः। सात्वतामिति सत्त्वं ब्रह्म कृष्णाख्यमुपास्य मेषामस्तीति सत्त्वंतः त एव सात्वंतः प्रज्ञादि
त्वात्स्वार्थे अणु तस्यादर्शनं छांदसं। यद्वा। सातिः सौत्रो धातुः सुखार्थः वा सरूपन्यायेन क्तिपि सात् परमात्मा। स येषामस्तीति सात्वंतो भक्तास्तेषां पतिः
मतुलतामिति वत् सातामिति रूपसिद्धिः। यद्वा सात्वत प्रातिपदिके तत्करोति तदाचष्टे इति णिचि कृते क्विपि वेति णिचि पिच कृते णिलोपे च सात्वता
मिति रूपसिद्धिः। सात्वतां पंचरात्रोक्तानुष्ठानकारिणां यादवानां वा १२

सारत्वात्कृष्णचरितमेवानुवर्णनीयं नान्यद्यतस्तस्य वासुदेवादिनामोच्चारणाद् अखिलं बंधनिवृत्तिः तत्र किं वक्तव्यं तच्चरितश्रवणमननाभ्यामित्याशयवंत आहुरित्याह
॥ आपन्न इति। भवः संसारः अहंकाररूपेण बंधको रुद्रो वा। यं बिभेति विभेतिभयाद्दूषस्तो भवति। यन्नाम यस्य नाम गृणन् उच्चारयन् विविशः बद्धः अपासात् घोरां संसृति
मापन्नः पुरुषः ततः घोरसंसारात् सद्यस्तदानीमेव विमुच्येत विशिष्टां मुक्तिमाप्नोति १४ किं वा यत्पादसंश्रयाः यस्य पादावेव संश्रयो येषां ते तथोक्ताः प्रकृष्टः शमो
भगवन्निष्ठे वा यनमाश्रयो येषां ते प्रशमायनाः मुनयः थैः प्राणिभिरुपस्पृष्टास्तान् सद्यः पुनंति पवित्रीकुर्वंति। यत्पादसंश्रयादिति पाठे यच्चरणनिषेवणादात्मानं

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्॥ ततः सद्यो विमुच्येत यं बिभेति स्वयं भवः १४ यत्पादसंश्रयाः सूत मुनयः
प्रशमायनाः॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया १५ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिका
मो न शृणुयाद्यशः कलिमलापहं १६

पुनंतीत्यर्थः। तत्र निदर्शनं अनुसेवया अनुसेवनेन निषेवणेन उपस्पर्शनस्नानावमज्जनादिना स्वर्धुनी गंगा इव यथा लोकं पुनाति तथेत्यन्वयः॥ स्वर्धुन्यापइति पा
ठे गंगाजलपरमाणवः चिरकालसेवया मुनयः सद्य इति विशेषः १५ पुण्यश्लोकैर्ब्रह्मादिभिरीड्यं स्तुत्यं कर्म कंसवधादिचरितं यस्य स तथा। पुण्यश्लोकश्चा
यमीड्यकर्मेति वा। तस्य हरेः कलिमलापहं कलिनिमित्तं मलं पापं तद्धरणमपहंतीति। यशश्चरितापरपर्यायं शुद्धिकामः अंतःकरणनिर्मलताकामयमा
नः को वा पुरुषः न शृणुयादित्येकान्वयः १६

नकेवलं रूपकथैव वक्तव्यावतारांतरकथापीत्याकूतेनाह। तस्य कर्माणीति। लीलया मत्स्यादिकलाः दधतः तस्य हरेः सूरिभिर्ब्रह्मादिभिः परिगीतान्युदाराणि पापक्षिप्णूनि कृतदोषाणि वा कर्माणि ब्रूहीत्येकान्वयः १७ तदेवास्माकं वर्णनीयमित्यभिप्रेत्याकूतेनाह। अथेति। यत एवं यच्छ्रद्दधानानामस्माकं कलिमलापहं अथ तस्मादात्ममायाया स्वरूपभूतेच्छया स्वैरं यथेष्टं लीलाः प्रलयजलविहारादिक्रीडाः विदधत ईश्वरस्य स्वतंत्रस्य हरेः शुभा मंगला अवतारकथा हे धीमन् अस्माकमाख्याहीत्येकान्वयः १८ भवतां वक्तृत्वे अश्रुतहरिकथानां किमित्यपेक्षयमुत्कंठाविशेष इत्यत उ

तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः १७ अथाख्याहि हरे
धीमन्नवतारकथाः शुभाः॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया १८ वयं तु न वितृप्याम उत्तमश्लोकविक्र
मे॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ कृतवान् किल वीर्याणि सह रामेण केशवः॥ अतिमर्त्यानि भगवा
न्गूढः कपटमानुषः २०

च्यते। वयमिति। वयमुत्तमश्लोकस्य हरेर्विक्रमैः श्रुतैर्न वितृप्यामः। अन्ये यान्तृप्तिरस्तु वा नाम्नाकमलं बुद्धिरित्येतस्मिन्नर्थे तुशब्दः। यद्विक्रमजातं श्रुण्वतां रसविवेकविदुषां स्वादु स्वाद्विति मधुरं भवतीत्येकान्वयः। रसो रागे विषे वीर्ये तिक्तादौ द्रवे देहधाविति। विशेषज्ञा रसज्ञाः १९ संप्रति कृष्णावतारचरितश्रवण एव उत्कंठाविशेष इत्यभिप्रेत्याकूतेनाह। कृतवानिति। स्वमहिम्ना गूढः कपटमानुषः केशवो भगवान् रामेण सह यानि मर्त्यवीर्यमतिक्रम्य विद्यमानानि वीर्याणि पराक्रमलक्षणानि कृतवान् किल तान्यस्माकं ब्रूहीत्येकान्वयः।

दीर्घसत्रे दीक्षितानामस्माकं हरिकथाश्रवणावसरोऽस्तीत्याकूतेनाह। कलिमागतमिति॥ आगतं प्रविष्टं कलिमाज्ञाय अस्मिन्वैष्णवे क्षेत्रे दीर्घसत्रेणासीना आधारांतरं विहायवयं हरेः कथायां कथाश्रवणे सत्क्षणाः सावसरा इत्येकान्वयः २१ पुंसामसत्त्वगुणहरं दुस्तरं तर्तुमशक्यं कलिं निस्तितीर्षतां नितरां तर्तुमिच्छतां नः हे सूत त्वं धात्रा दैवेन संदर्शितः। कइव। दुस्तरमर्णवं निस्तितीर्षतां तस्य यंत्रिकाणां कर्णधार इव कर्णधारः पूपकान्नस्थायी पुरुषः २२ प्रश्नांतरं कुर्वंती स्माह। ब्रूहीति॥ अधुना धर्मरूपाणि कर्माणि यस्य सः धर्मकर्मा तस्मिन्। ब्रह्मण्ये ब्राह्मणहितकारिणि अणिमाद्यष्टयोगेश्वरे भक्तिज्ञानलक्षणयोगयोरीश्वरे वा कृष्णे र्वा वक्तः शब्दाणश्च निर्हेत्नि वावकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति वचनात्सच्चिदानंदलक्ष

कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं। आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २१ त्वं नः संदर्शितो धात्रा दुस्तरं
निस्तितीर्षतां। कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवं २२ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मकर्मणि॥ स्वां काष्ठामधु
नोपेते धर्मः कं शरणं गतः २३ इति श्रीभागवते महापुराणे प्रथमस्कंधे प्रथमोऽध्यायः॥ ॥ ॥

णे कृष्णे स्वां काष्ठां गुणपूर्णां स्वमूलरूपमुपेते गतवति सति पूर्वनिर्दिष्टो धर्मः भक्तिज्ञानलक्षणः कं पुरुषं शरणं गत इति तमस्माकं ब्रूहीत्येकान्वयः॥ पुंसामेकांतत इति श्रेयः साधनविषयः। ब्रूहि भद्रायेति प्रत्यगात्मविषयः। अर्हस्यंगानुवर्णितुमिति कृष्णावतारविषयः। ब्रूहि नः श्रद्दधानानामिति यशोविषयः। अथाख्याहीत्यवतारांतरविषयः। ब्रूहि योगेश्वर इति धर्मविषय इति षट् प्रश्नाः २३ इति श्रीभागवतविवरणे विजयध्वजतीर्थभिक्षुविरचिते प्रथमस्कंधे प्रथमोऽध्यायः॥ ॥

भा॰ प्र॰
१२

शौनकादिविप्राणामिति पूर्वोक्तैः षड्भिः समीचीनैः प्रश्नैः सम्यक् हृष्टः रोमहर्षणस्यापत्यं रोमहर्षणिः सूतस्तेषां शौनकादीनां वचः प्रतिपूज्य प्र
वक्तुमारब्धवान् उपचक्रमे इत्येकान्वयः । एतद्व्यासवचनं १ शौनकादिप्रश्नपरिहारतया भागवतपुराणं व्याकर्तुकामः उरुश्रवाः स्वेष्टगुरुं रुद्रावतारं
श्रीशुकमुनिं प्रणमति ॥ ॥ यमिति । विरहकातरः पुत्रवियोगकातरः अधीर इव स्थितः सन् द्वैपायनो यं प्रव्रजन्तमनुपेतमपेतकृत्यं पुत्रेत्याजुहाव
तदा तन्मयतया तरवोऽपि नेदुः अहं सर्वभूतहृदयं तं मुनिं सर्वज्ञमानतोऽस्मीत्येकान्वयः । द्वीपो नदीमध्यप्रदेशः स अयनमालयो यस्य स तथा द्वी
पायनः स एव द्वैपायनः । द्वीपस्यापत्यं द्वैपायनः । नदीद्वीपे समुत्पन्नत्वात् द्वैपायनत्वनिर्देशश्चौपचारिकः । तद्वत्पराशरसुतत्वं चाप्यौपचारिकमिति ज्ञाप

इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः । प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १ सूत उवाच यं प्रव्रजंतमनुपेतमपे
तकृत्यं द्वैपायनो विरहकातर आजुहाव पुत्रेति तन्मयतया तरवोऽपि नेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि २

यितुं एतदेव प्रसिद्धं नामाकरोत् । प्रव्रजंतं सर्वपरित्यागरूपमाश्रममाश्रयंतं तत्र कारणमाह । अनुपेतं देहाद्यभिमानशून्यं । अनुपेतं केनापि स
खायंतमेकाकिनमिति वा । नवोपनयनशून्येनानुपेतः । अनुपनीतस्य प्रव्रजनायोगात् । न च प्रव्रजनं संन्यासः । किं तर्हि प्रकर्षेणागमनमेवेति न
वाच्यं । यदहरेव विरजेत्तदहरेव प्रव्रजेदिति गौतमसूत्रविरोधात् । अपगतं कृत्यं यस्मात्सोऽपेतकृत्यस्तं कृतं कृत्यं अपेतं निराकृतं कृत्यं छेदनकर्म
येन स तथा अवात्ताहिंसालक्षणाश्रमत्वात्तमिति वा । पुत्रेति हा राद्यानैकताभावः बोद्ध्यः । सर्वगतत्वज्ञापनाय वा । तन्मयतया अहंकाराम
कतुद्रावतारशुकस्य व्याप्तिमत्तया हेतुना अपि प्रतिशब्दं नेदुः । किमुत शरीरिण इति द्योतयितुं अपि शब्दः । सर्वभूतानां हृत्स्थानमयते गच्छतीति स
र्वभूतहृदयं । अहंकारतत्त्वाभिमानित्वेन सर्वत्र स्थितमित्यर्थः २

राम
१२

पुनरपि भक्त्युद्रेकात्तमेव प्रणमति ॥ य इति । यः स्वानुभावं ब्रह्म ममाह उपादिशत् । पश्चात् अंधं तमः अंधत्वापादकमज्ञानं तितीर्षतां तर्तुमिच्छतां संसारिणां जी
वानां करुणया अखिलानां श्रुतीनां अर्थज्ञापकतया सारभूतं मे । अखिलस्य जगतः श्रुतेः श्रवणेंद्रियस्य सारं सुखदं । एकं सकलपुराणेषूत्तमं देहादीश्वरपर्यं
ततत्त्वानि दीपवत्प्रकाशयतीत्यध्यात्मदीपं पुराणगुह्यं पुराणेषु गोप्यं पुराणस्य भगवतः संनिधानयोग्यमिति वा । भागवताख्यं पुराणं मम व्याचख्यौ
। मुनीनां गुरुं तं व्याससूनुं श्रीशुकं उपयामि शरणं गच्छामीत्येकान्वयः । अखिलश्रुतीः सरति गच्छति विषयत्वेनेत्यखिलश्रुतिसारः कर्म्मण्यण्प्रत्ययः

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोंऽधं ॥ संसारिणां करुणयाह पुराणगुह्यं तं व्यास
सूनुमुपयामि गुरुं मुनीनां ३ नारायणं नमस्कृत्य नरं चैव नरोत्तमं । देवीं सरस्वतीं व्यासं ततो ग्रंथमुदीरयेत् ४

वेदार्थसारभूतमिति वा । अध्यात्मं देहः तत्र दीपवद्वर्तमानं । पुराणेषु गोपितं स्वानुभावं मम योपादिदेशेति वा ३ इष्टदेवतां शास्त्रगुर्वादीन् प्रणम
ति ॥ नारायणमिति । नारायणं शास्त्रप्रतिपाद्यं तथा तमेव शास्त्रकर्तृत्वाद्गुरुं व्यासं च नमस्कृत्य सकलभाग्यापादिकां श्रियं देवीं तथा परमगुरुं न
रोत्तमं वायुं तथा विद्याभिमानिनीं सरस्वतीं तथोपसाधकं नरं शेषं प्रणम्य ततस्तेषां प्रसादात् श्रीभागवताख्यं ग्रंथमुदीरये व्याख्यास्ये भव
त्प्रश्नपरिहारत्वेनेति शेषः इत्येकान्वयः । श्रीभागवतादिसर्वशास्त्रप्रवक्तृश्रोतृभिस्तेषां वंदनं नमस्कार्या इति द्योतयितुमेवेयमुक्तिः ४

संप्रतिस्तुतः शौनकादिप्रश्नं संहृष्टः स्वयमभ्यनंदतीत्याह। मुनय इति। कृष्णविषयः समीचीनः प्रश्नः कृत इति यत् यस्मात्। अतोऽहं भवद्भिः साधु सर्वसाधनेन सम्यक्प्रश्नं प्रति पृष्टः न केवलमुभयेषामस्माकं साधु किंतु लोकमंगलं। लोकं जनं मंगलयतीति। श्रवणमननादिना कल्याणजनकत्वादित्यर्थः। कुतः येन कृष्णसंप्रश्नेनात्मा परमात्मा मनो वा प्रसीदति तस्मादित्येकान्वयः ५ भगवद्भक्तिजनकत्वात् कृष्णसंप्रश्न एव परमधर्म इत्याह। स वा इति। यतः कृष्णसंप्रश्नात्। अधोक्षजे अहैतुकी अव्यवहिता भक्तिर्भवति पुंसां परो धर्मः स वा इत्येकान्वयः अक्षजं ज्ञानमधः कृतातीत्य वर्तत इत्य

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलं। यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ५ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे। अहैतुक्यव्यवहिता ययात्मा सुप्रसीदति ६

धोक्षजः। भगवत्प्रसादमंतरेण काम्यफलहेतुशून्या अहैतुकी। विक्षेपादन्यप्रसंगादिव्यवधानशून्या अव्यवहिता। न वा अन्यो भावन्यो वाहमस्मीति नाविष्णुः कीर्तयेद्विष्णुमित्यादिश्रुतिस्मृतिनिषिद्धत्वात् भेदबुद्ध्यपरपर्यायव्यवधानशून्येत्यर्थ इति। व्यवधानं तिरोधानमपिधानमथो समत इत्यभिधानविरोधात्। न च श्रुतिविरोधः। अस्या अन्यार्थत्वात्। अविष्णुः न विष्णुर्यस्य स तथा। तद्भक्त इत्यर्थः। अन्यः स्वतंत्रः। अप्रतिहतेति पाठे अस्खलितेत्यर्थः। यया भक्त्या आत्मा आशु प्रसीदति। स एव वैराग्यमनीषयेत्युक्तं दर्शयति। स इति स एव परो धर्मः येनाधर्मादधोक्षजे भक्तिर्भवतीति वा ६

भक्तिरपि वैराग्यद्वारेण अपरोक्षज्ञानसाधनमित्याह। वासुदेव इति। वासुदेवे भगवति प्रयोजितो भक्तियोगः वैराग्यं यदहैतुकं ज्ञानं तच्च जनयतीत्येकान्वयः। वसति सर्वत्र स्वस्मिन् सर्वं वासयतीति वा वासुः क्रीडादिकरणाद्देवः वासुश्चासौ देवश्चेति वासुदेवः तस्मिन्। भक्तिलक्षणोपायः भक्तियोगः। वैराग्यं विषयेष्वसारताबुद्धिः। अकारणात् विष्णुप्रसाद एव हेतुर्निमित्तं यस्य तत्तथोक्तं द्रव्यलाभादिहेतुसंबंधीद्रजालादिज्ञानं न भवतीति वा ७ ननु नित्यनैमित्तिकादिधर्माणां सत्वात् कथमस्यैव परमत्वमित्याशंक्य तेषामपि कृष्णकथारतिजनकतया तत्साधनत्वेन परमत्वमित्याह। धर्म इति। यः पुंसः स्वनुष्ठितो धर्मः विष्वक्सेनकथाश्रयां रतिं नोत्पादयेत् तर्हि पुंसां स केवलं श्रम एव हीत्येकान्वयः। शास्त्रोक्तमर्यादावास्त्वदेशकालादिभिर्युक्त

वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकं ७ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथाश्रयां। नोत्पादयेद्यदि रतिं श्रम एव हि केवलं ८ धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते। नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः ९

यासु स्वनुष्ठितः स्वधर्मः यज्ञाग्निकी र्तिति विष्वक्सर्वतः प्रवृत्तिदैत्यसेनामिति विष्वक्सेनः तस्य कथासु रतिं निरंतराभ्यासरूपां। केवलं श्रम एव क्रियाकाले उत्तरकाले पि दुःखरूपत्वादायास एवेत्यर्थः। हिशब्देनानेवंवित्पुण्यं कर्म करोति तत्तद्धास्यांततः क्षीयत इति श्रुतिप्रसिद्धिं दर्शयति ८ ननु धर्मस्य भगवत्कथारत्यजनकत्वेऽपि धर्मार्थकामैकफलत्वं धर्मादर्थ अर्थात्कामः कामात्सुखं इत्यर्थशास्त्रादौ प्रसिद्धिरिति तत्राह। धर्मस्येति। अपवर्गो मोक्षः तत्साधनमापवर्ग्यं तस्य धर्मस्य इह अर्थः कांचनादि द्रव्यं अर्थाय फलाय न कल्प्यते हि यस्मात्तस्मात् हरिकथारतिजनकत्वमेव फलमित्यर्थः॥ धर्मे एव एकांतो नियमेन फलं यस्य स धर्मैकांतः तस्य धर्मसाधनस्यार्थस्य कामो लाभाय प्रयोजनाय न स्मृतः विद्वद्भिरिति शेषः।

कामस्येंद्रियप्रीतिर्लाभो न भवति। तर्हि अशनाच्छादनाद्यभावे क्षुधादिना मरणमेव स्यात्तत्राह। जीवेतेति। यावता अर्थादिना जीवति शरीरयात्रानिर्वाह
को भवति तस्मादर्थशास्त्रादौ प्रतिपादितक्रमो बहिर्मुखाणामिति भावः। ब्रह्मार्पणबुध्या कृतस्य कर्मणो भगवत्कथारतिसाधनत्वमित्याह। जीव
स्येति इह कर्मभिर्योर्थः भगवत्कथारतिलक्षणः सः अतत्त्वजिज्ञासो जीवस्य न भवति। भगवत्तत्त्वमजानतः पुरुषस्य तदनर्पणबुध्या कृतैः कर्म
भिः फलमैहिकामुष्मिकं न स्यादिति भावः १० ननु अतत्त्वजिज्ञासोरित्युक्तं किं तत्तत्त्वं येन तदज्ञस्य कर्मभिः पुरुषार्थो न स्यादिति तत्राह। वदंती
ति। अद्वयं असमाधिकं ज्ञानं ज्ञानस्वरूपं देशकालादिषु त्रुटिरहितत्वात् सर्वान्तर्यामित्वादैश्वर्यादिगुणत्वाद् ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ११
यद्ब्रह्म नाम अनंतं केवलानंदं देहं अत एव यत्किंचिल्लोकविलक्षणं तत्तत्त्वं वदंतीति त्रिकालेऽप्यनयथाभूतमेकविधं ब्रुवते। नव क्षणे ज्ञानस्वरूपत्वमुक्ति
मल्लोके ज्ञानस्य विषयापेक्षयोत्पत्तिविनाशधर्मदर्शनादस्यापि तथात्वेनानित्यत्वप्रसंगादिति तत्राह। सदसदिति। सत्कार्यं असत्कारणं वा अविशे

कामस्येंद्रियप्रीतिर्लाभो जीवेत यावता। जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः १० वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं॥
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ११ सत्तामात्रं तु यत्किंचित्सदसद्वाविशेषणं। उभाभ्यां भाष्यते साक्षाद्भगवान् केवलः स्मृतः १२

षणं न स्वनियतविशेषापादकं यस्येति शेषः। विषयापेक्षया अनुत्पाद्यमपि उभाभ्यां सदसद्भ्यां भाष्यते घटस्य पृष्ट घटस्पृष्टभूत्वा घटज्ञानमित्यादि अनंतका
र्यकारणविशिष्टतया व्यवह्रियते अतो भगवान् साक्षात् केवलः प्रकृतिसंबंधविधुरः स्मृतः। यद्विषयज्ञानं भक्तियोगं जनयेत्तत्तद्ब्रह्म किं प्रमाण
गोचरमुत अगोचरः। गोचरश्चेद्घटादिवद्ब्रह्मत्वं अगोचरश्चेन्नास्त्येवेत्याशंक्य उभयदोषपरिहाराय आह। वदंतीति। नवयं प्रमाणैरनुमीमहे न चेतावता
त्निरिकितं हि विज्ञानमद्वयं ज्ञातृज्ञेयलक्षणरहितं तत्त्वविदस्तत्त्वं जगदाकारेण विवर्त्तितं इति वदंति तदेव वेदांतैर्ब्रह्मेति परमात्मेति भगवानि
ति शब्द्यते। तत्रायं विभागः। बृहत्वाद्ब्रह्मेति वेदांतिनः। परः केवलमादानादिकर्तृत्वादात्मेति योगिनः। षड्गुणयुक्तत्वाद्भगवानिति पौराणिकाः।
तत्र किं तत्सत्यमिति तत्राह सत्तेति। तस्माद्ब्रह्म सगुणं प्रमाणवेद्यं न निर्गुणमिति शास्त्रमथितार्थ इति केचिद्वा चक्षते तदसारं अत्रैव पूर्वापरवा

तदाह। तदिति। एवमुक्तप्रकारेण ब्रह्म परमात्मा भगवन्निति वैदिकादिपदवाच्यतया सगुणः सर्वज्ञः सर्वजगत्कर्त्ता परमात्मैव तत्त्वमिति यस्मात्तस्मान्मु
नयो ज्ञानिनः श्रद्दधानाः शास्त्रोक्तवस्तुगतास्तिक्यबुद्धियुक्ताः श्रुतिगृहीतया वेदांतश्रवणेन दृढगृहीतया तत्त्वज्ञानेन विषयवैराग्येण युक्तया भक्त्या तमे
वात्मानं परमात्मानं आत्मनि हृदि पश्यंति। चकारः स्वात्मन्येवात्मानं पश्येदिति श्रुतिप्रसिद्धिद्योतकोन त्वात्मनि हेऽज्ञे जीवे आत्मानं परमात्मानं पश्य
ति परमात्मनि क्षेत्रज्ञे वेति समुच्चयार्थः। तस्माज्जगदाकारेण विवर्त्तितं तत्त्वमन्यन्निर्गुणमन्यत्तत्त्वमिति नार्थः १३ उपसंहरति। अत इति। हे द्विजश्रे

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया। पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतिगृहीतया १३ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्र
मविभागशः। स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं १४ तस्मादेकेन मनसा भगवान्सात्वतां पतिः। श्रोतव्यः कीर्ति
तव्यश्च ध्येयः पूज्यश्च नित्यदा १५ यदनुध्यायिनो युक्ताः कर्मग्रंथिनिबंधनं। छिंदंति कोविदास्तस्य को न कुर्यात्कथा
रतिं १६

ष्ठाः संसिद्धिः फलं १४ कृष्णसंप्रश्नस्य परमधर्मत्वं निगमयति। तस्मादिति। यतः कृष्णसंप्रश्नस्यैव परमधर्मत्वं तस्माद्धेतोः। एकेन एकाग्रेण व
त्तिदर्शन श्रवणादिना किं फलमिति तत्राह। यदिति। यं भगवंतमनुसन्धनं निरंतरं ध्यान्तं शीलमेषामिति यदनुध्यायिनः युक्ताः मनोयोगयुक्ताः
कारो परस्परसमुच्चयार्थः श्रवणादितत्कालेकर्तव्यं न क्वचित्कालो वृथा यापनीय इत्यस्मिन्नर्थे नित्यदा शब्दः १५ फलदर्शनं पुरोधाय प्रवृ
कर्मपाशेन नितरां बंधनं तत् छिंदंति तस्य कथासु रतिं को न कुर्यात् अतः श्रवणादिफलमपरोक्षज्ञानद्वारा मुक्तिरेव १६

हरिकथारतिः केन स्यादिति तत्राह। शुश्रूषोरिति। हे विप्राः शुश्रूषोर्गुर्वादिपरिचर्याशीलस्य वेदादिषु श्रद्दधानस्य महतां सेवया पुण्यतीर्थानां भागवतादिसच्छास्त्राणां गङ्गादितीर्थानां वा निरन्तरसेवनाच्च वासुदेवकथारतिः स्यादित्यन्वयः १७ श्रवणफलमाह॥ शृण्वतामिति। सुहृदनिमित्तबन्धुः पुण्ये श्रवणकीर्तने यस्य सतथा १८ सर्वामङ्गलनाशफलमाह। नष्टेति। लिङ्गशरीरभङ्गपर्यन्तमभद्राणां संभवात्प्रायेष्वित्युक्तं। नैष्ठिकी अचला। उत्तमा उद्गतदोषाः श्लोकाः

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारतिः। स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् १७ शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः। हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सतां १८ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी १९ तदा रजस्तमोभावाः कामलोभादयश्च ये। चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति २० एवं प्रसन्नमनसो भगवद्भक्तियोगतः। भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते २१

कीर्तिर्यस्य सतथोक्तः तस्मिन् १९ भक्तिफलमाह। तदेति। यदा हरावचलाभक्तिस्तदा ये रजआदयोभावाः एतैरनाविद्धं असंसक्तं शुद्धसत्त्वे स्थितं वलज्ञानसमाहारवति हरौ स्थितं वा चेतः प्रसीदति सकलदोषविधुरतया निरन्तरं परमात्मानं स्मरतीत्यर्थः। रजस्तमोभ्यां भावा उत्पन्ना येषां ते तथोक्ताः कामलोभादयः। चकारान्मदादयः इति वा २० निरन्तरं हरिस्मरणफलमाह। एवमिति। भगवत्तत्त्वविज्ञानं स्वबिंबापरोक्षविज्ञानं २१

अपरोक्षज्ञानफलमाह॥ भिद्यत इति। आत्मनि हृत्कमलकर्णिकामध्ये स्वबिंबे सर्वेश्वरे दृष्ट एव तस्मिन् त्राण एव हृदयग्रंथ्याख्यलिंगमनो भिद्यते तस्मिन् भिन्ने सति ईश्वरादितत्त्वविषयाः सर्वसंशयाः छिद्यंते तेषु छिन्नेषु सत्सु पूर्वकृतपापकर्माणि क्षीयंते उत्तराणि न श्लिष्यंत इत्येकान्वयः। संसारच्छेदनमेवापरोक्षज्ञानफलमिति भावः॥ आत्मनि जीवे ईश्वरे ब्रह्मणि दृष्टे ब्रह्मणि जीवे दृष्टे चेति परस्परभेदनिरासेनाहमेव ब्रह्मेत्येवं दृष्टे

भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे २२ राम राम

यति हास्यायेन हृदयग्रंथिरहंकारः भिद्यत इति केचित्तदयुक्तं। श्रुतिस्मृतिविरोधात्। सत्यमात्मा। सत्यो जीवः। द्वासुपर्णा। विद्यात्मनि भिदा बोधः भेदहृष्याभिमानेनेति। भागवतज्ञानाद्वैतज्ञाननिषेधाच्च २२

भा.प्र.
१६

निगमयति। अत इति। अतो निःशेषदुःखनिवृत्त्यलं बुद्धिगोचरसुखानुभावलक्षणमोक्षाख्यपुरुषार्थलाभादिकवयः परया मुदा आत्मप्रसा-

अतो वै कवयो नित्यं भक्तिं परमया मुदा॥ वासुदेवे भगवति कु-
र्वन्त्यात्मप्रसादिनीम् २३ राम

राम
१६

दिनीं भक्तिं वासुदेवे भगवति कुर्वन्तीत्येकान्वयः। आत्मप्रसादिनीं मनसो नैर्मल्यापादनीं विष्णुप्रसादजननीं वा। मुक्तामुक्ताश्चेत्युक्तयेपि हि भ-
क्तिं कुर्वन्तीत्येतस्मिन्नर्थे वेशब्दः २३

उक्तमर्थं वर्णमनुतादिलस्य मुक्तौ कोधिकारीत्याशंक्य सात्विकप्रकृतिरेव तत्राधिकारीति वक्तुं सत्वादिगुणप्रदात्रयांश्चाह सत्वमिति सत्वं रजस्तम इत्येते
ते त्रयो गुणाः जडप्रकृतेः स्वरूपभूतास्थिमत्कृत्याभिमताः। हरेर्जगदुत्पत्तौ उपादानभूताः। तैर्गुणैः स्वयमगुणः सगुणः सन्नर्पितत्वं वर्तकतया यु-
क्तः परः पुरुषोस्य जगतः स्थित्यादये पालनसृष्टिसंहारान् कर्तुं हरिविरिंचिहरेति संज्ञा नामानि एक एव धत्ते। विष्णुर्ब्रह्माशिव इति संज्ञावत्वेनावतर-
ति तत्र सत्वगुणसंबंधविधुरोपि सत्वगुणप्रवर्तनेन जगत्पालयन् विष्णुसंज्ञो हरिस्तस्माविष्टिततया पृथगेवस्थितः। चतुर्मुखस्था ब्रह्माख्या

सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते॥ स्थित्यादये हरिविरिंचिहरेति सं-
ज्ञाः श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः २४

विष्णुः स्वयं रजसा अविरजो गुणमुपादानीकृत्य जगत्स्रजन् ब्रह्मा। शिवाख्यो विष्णुः स्वयमतमा अपि तमोगुणप्रवर्तकतया जगत्संहरन् शिव इति ख्याति
। तत्संनिधानविशेषादेव कमलासनवृषासनयोर्ब्रह्मशिवसंज्ञा। तस्माद्धरेरेव त्रिसंज्ञाः न तु लोकप्रसिद्धहरिब्रह्मशिवभेदनिरासेन संज्ञाः तथात्वे
ब्रह्मविष्णुशब्दपालित्रीणि विष्णोर्महात्मनः। ब्रह्माणि ब्रह्मरूपः सन्नित्यादिवामनपुराणविरोधात्। एवं त्रयोपि गुणाविष्टाश्चयाश्च तथापि सा

त्विकराजसतामसशरीरिणां नृणां मध्ये सत्वतनोः सात्विकशरीरिणो देवप्रकृतेर्जीवराशेरेव श्रवणभक्त्यादिश्रेयांसि स्युर्न राजसतामसशरीरि षु मिश्रमनुष्येषु असुरेषु च इत्यन्वयः॥ सत्वतनोर्विष्णोः केवलं भवतीति दर्शयितुं मूर्तित्रयस्वरूपमाह। सत्वमिति। सत्वादयः प्रकृतेर्गुणा स्तैर्युक्त एकः परः पुरुषः हर्यादित्रिसंज्ञां धत्ते किमर्थं जगतः स्थित्यादिहिमंगार्थं। तत्र तेषां त्रयाणां मध्ये सत्वगुणः तनुः शरीरं यस्य सः सत्वतनुः त स्मात् हि श्रेयांसि स्युरिति वाणी नयुक्ता। केवलो निर्गुणश्चेति श्रुतिव्याकोपात्। न तस्याः सर्वगुणराहित्यमर्थः। सत्यं ज्ञानमनंतं ब्रह्म। गु णाः सर्वेपि वेदमाध्यात्मा श्चन संशयः। आनंदादयः प्रधानस्येति श्रुतिस्मृतिसूत्रैर्ज्ञानादिगुणगणविधानात् अत्रापि साक्षीचेता के वल इत्यादि साक्षित्वादिगुणप्रतीतेश्च तस्मात् सत्वादिगुणराहित्यमेवास्या अर्थ इति संतोष्टव्यं। किंच। हरिविरिंचहरा इत्युक्तिं विहाय हरे रुक्तेः प्रमाणसिद्धः कश्चिदर्थविशेषोस्तीति विज्ञायते। सकलसकलसुरवरपुरटमुकुटपटलकोटितटपरिघट्टितचरणकमलपरागैः श्रीमद्बादरायणांतेवासिप्रवरैः श्रीमदानंदतीर्थभगवत्पादाचार्यैर्दर्शित इति नोस्माभिरत्रोच्यत इति तत्वं २४

ननु त्रयाणां गुणानां प्राकृतत्वाद् अविशेषेण कथं सत्वस्यैव श्रेयः प्रति हेतुत्वमित्याशंक्य सात्विकानामेवोत्तमत्वेन ब्रह्मविद्याधिकारित्वप्रतिपादनाय गुण त्रितये सत्वगुणस्योत्तमत्वेदाहरणमाह॥ ॥पार्थिवादिति। अत्रोत्तमपदमध्याहृत्य व्याख्येयं। पार्थिवात् पृथिवीकार्यात् दारुणः इन्धनात् पार्थिवाद्धूम उत्तमः लोकोपकारकमेघरूपत्वात् तस्मात् धूमात् पार्थिवोग्निरुत्तमः। कीदृशः त्रय्या प्रतिपाद्यत इति त्रयीमयः सकलपदार्थप्रकाशकः। अत्र यथा दृद धूमाग्नीनां पार्थिवत्वाविशेषेप्यग्निराधानेन संस्कृतो विशिष्टपुरुषार्थसिद्धये याज्ञिकैरुत्तमत्वेन गृह्यते तथा प्राकृतत्वात् तमसस्तमोगुणाद्रजोगुण

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥ तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं २५ भेजि
रे मुनयोथाग्रे भगवंतमधोक्षजं॥ सत्वं विशुद्धं क्षेमाय कल्पंते नेतराविह २६

उत्तमः तस्मात् सत्वं परब्रह्मादिसकलदेवतातत्वप्रकाशकः सत्वगुण उत्तमः यद्यस्मात् सत्वगुणाद्ब्रह्मदर्शनं ब्रह्मज्ञानं भवतीति शेषः। यत्सत्वं ब्रह्म दर्शयत्यपेक्षयतीति तस्मात् सात्विका एव ब्रह्मज्ञानाधिकारिण इति सिद्धं। अनेन चेतनानामपवर्गनरकतमःप्राप्तियोग्यानां त्रैविध्यं सूचितं २५ उक्तार्थे शिष्टाचारं दर्शयति॥ भेजिर इति॥ अथ तस्मात् सात्विकानां उत्तमाधिकारित्वात् अग्रे पूर्वं मुनयो ज्ञानिनो ब्रह्मादयो धोक्षजं भेजि रे। तस्मादिह गुणेषु विशुद्धं सत्वं क्षेमाय मोक्षाय कल्पते। नेतरौ तमोरजोगुणौ मुक्तये न कल्पेते इत्येकान्वयः २६

भा·प्र·
१८

इदानीमपि सदाचारं दर्शयति। मुमुक्षव इति। ब्रह्मादिपरमसात्त्विका वासुदेवं भेजिरे इति यस्मादथ तस्मात्स्वर्गादिसौख्यरहितादुस्तरसंसारान्मुमुक्षवो वर्तमानभविष्यत्सात्त्विका अपि घोररूपान्राजसतामसान्भूतपतीन्रुद्रादीन्हित्वा शांताः परिपूर्णसुखात्मिकाः वासुदेवकलाः भगवन्मूर्तीः संप्रति भजंति भजिष्यंति हि वै इत्येकान्वयः २७ इदानीं प्रसंगात्तामसराजससेव्यानाह। रज इति। श्रियैश्वर्यप्रजेप्सवः रजःतमःप्रकृतयः पुरुषाः समशीलान्पितृभूतप्रजेशादीन्भजंतीत्येकान्वयः। निर्दोषं हि समं ब्रह्मेति समं ब्रह्म तच्छीलान्यतस्तेषां केवलस्य यच्छीलं सेव्यस्यापि तच्छीलं ग्रसीतिवासम

मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ। नारायणकलाः शांता भजंति ह्यनसूयवः २७ रजस्तमःप्रकृतयः समशीला
न्भजंति वै। पितृभूतप्रजेशादीन्श्रियैश्वर्यप्रजेप्सवः २८ वासुदेवपरा वेदा वासुदेवपरा मखाः। वासुदेवपरा योगा वा
सुदेवपराः क्रियाः २९ वासुदेवपरं ज्ञानं वासुदेवपरं तपः॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ३०

शीलान्। श्रीकामः प्रजेशानैश्वर्यकामः भूतपतीन्प्रजाकामः पितॄन्। श्रियं च ऐश्वर्यं च प्रजां च प्राप्तुमिच्छंतः। श्रियैश्वर्यप्रजेप्सवः २८ सकलशास्त्रतात्पर्यपर्यालोचनया सकलैरवश्यं सेव्यः श्रीनारायण एवेत्यभिप्रेत्याह॥ वासुदेवपरा इति। अत्र वेदा वासुदेवपरा इत्यादि प्रतिपाद्यत्वमन्वेतव्यं। वासुदेवगुणोत्कर्षप्रतिपादनतात्पर्यवंतः। मखाः संसारमरं खनंतीति नाशयंतीति मखाः अग्निष्टोमादयः वासुदेवो दृश्यः नान्यो दृश्यः। योगा अष्टांगाः वासुदेवविषयाः। श्रुतिस्मृतिविहितसंध्योपासनादिकाः क्रियाः २९ ज्ञानं औपनिषदं। तपः कृच्छ्रचांद्रायणादिकायक्लेशः। धर्मो दानादिः गम्यत इति गतिः फलं परलोकः। अनेन हरेरखिलजगद्वेदादिशास्त्रप्रमुख्यविषयत्वेन सर्वोत्तमत्वमुक्तं ३०

राम
१८

अत्र हेतुमाह। स एवेति। यः सर्ववेदांतादिमुख्यविषयः परमसात्त्विकब्रह्मादीष्टदेवता वासुदेवः सोऽसावेवागुणः सत्वादिगुणविधुरः मुख्यकारणं वा विभुर्व्यापी भगवान्नारायणः अग्रे सृष्टेः पूर्वं आत्ममायया स्वेच्छया निमित्तकारणरूपया सदसद्रूपया च कार्यकारणरूपया गुणमय्या सत्वादिगुणात्मिकया प्रकृत्योपादानकारणरूपया चेदं जगत्ससर्जेत्येकान्वयः। अतो विष्णुरेव सत्यजगत्स्रष्टृत्वात्सर्वोत्तम इत्यर्थः ३१ नियंतृत्वमपि तदेकनिष्ठमित्याह। तयेति। स हरिः तया सदसद्रूपया विलसितेषु भूतभौतिकदेहेंद्रियाद्यात्मना परिणतेषु गुणेषु अंतः प्रविष्टो गुणवान्जीव इवाभाति स्थि

स एवेदं ससर्जाग्रे भगवानात्ममायया। सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ३१ तया विलसितेष्वेषु गुणेषु गु
णवानिव॥ अंतःप्रविष्ट आभाति विज्ञानेन विजृंभितः ३२ यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु॥ नानेव
भाति विश्वात्मा भूतेषु च तथा पुमान् ३३

ज्ञानामिति शेषः। कुतः विज्ञानेन विजृंभितः। विज्ञानपूर्णः। इदं हेतुगर्भविशेषणं। नाना कर्मविपाकिनां जीवानां विज्ञानाभावादस्य परिपूर्णत्वात्तेन नियम्यत्वं तेषामिति भावः ३२ न च स्थानभेदाद्द्वयस्य हरेर्भेदाशंका कार्येत्याह॥ यथेति। यथैको वह्निः स्वयोनिषु स्वस्य व्यक्तिस्थानेषु दारुषु अवहितः भूतानामदृश्यतया स्थितः नानेव भाति मथनादिना विशेषः दारूणामानंत्यात्तथैको विश्वात्मा विश्वव्यापकः पुमान्भूतेषु प्रविष्टो नानेव भाति। न तु नाना। नेह नानास्ति किंचनेति श्रुतेः। अभेदः कश्चिद्विशेषसंभवेऽपि नास्य कश्चिद्विशेष इति विशदार्थः ३३

नव दुर्भगशरीरेषु प्रविष्टस्य जीववत् दुःखभोगः संभाव्यत इत्याशंक्याह असाविति। असौ परमात्मा गुणमयैः सत्वादिगुणविकारैः भूतसूक्ष्मेंद्रियात्मभिः पंचमहाभूतपंचतन्मात्रादशेंद्रियमनोभिर्भावैः तत्त्वैरुपादानत्वेन स्वनिर्मितेषु स्वेन नत्वेषु प्रविष्टेन विरचितेषु भूतेषु निर्विष्टः योगैश्वर्यादसंगतया प्रविष्टस्तद्गुणानानंदादीनेव भुंक्ते। ननु देवनिमित्तदुःखादीन्। तस्मात्तद्दुर्भगशरीरस्थोपि न दुःखादिभोगप्रसंगस्तत्रत्यमात्यादित्यर्थः ३४ उत्तराध्याये अवताराख्यानीति प्रश्नं परिहरिष्यन्तदर्थं संक्षेपतो दर्शयति। भावयन्निति। लोकभावनः जगदुत्पादकः सत्वेन गुणेन

असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः। स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ३४ भावयत्येष सत्वेन लोकान्वै लोकभावनः॥ लीलावतारानुगतस्तिर्यङ्नरसुरादिषु ३५ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वितीयोध्यायः ॥ ॥

इतरगुणाननभिभूय लोकान् भावयन् पालनेन वर्द्धयन्नेष परमपुरुषस्तिर्यङ्नरसुरादिषु तिर्यक्षु वराहादिः जातिषु नरेषु मनुष्येषु देवेषु आदिशब्दात् ऋषभादिषु लीलावतारानुगतो भवतीति शेषेणान्वयः। लीलयैवावतारान् अनुगच्छति न तु पूर्वकर्मणा॥ यो योऽवतारो जगद्रक्षणादावनुकूलः स्यात्तं तमवतारं गृह्णातीत्यस्मिन्नर्थे अनुशब्दः ३५ प्रथमस्कंधे द्वितीयोध्यायः॥ ॥

भावयत्येष सत्वेनेति द्वितीयाध्यायोक्तानवतारान् कथयितुं प्रथमतः परमपुरुषाख्यभगवदभिव्यक्तिप्रकारमाह। जगृहइति। भगवानादौ लोकसिसृक्षया महदादिभिः संभूतं षोडशकलं पौरुषं रूपं जगृहे इत्येकान्वयः। प्रलयकालीनस्वगूहकृततमःपानेन परमपुरुषाख्यं निजं रूपमाविश्चक्रे। ननु विराड्रूपमहदादिभिः प्रलयकाले स्वोदरनिविष्टैर्महदहंकारादिसप्तप्रकृतिविकृतिभिः शरीरस्थानीयादिभिः संभूतं सहितं। कलाश्च पंचभूतानि ज्ञानकर्मेंद्रियाणि वा पंच पंच मनश्चेति षोडशोक्ता महर्षिभिरिति षोडशकला अंतर्गता यस्मिन्निति तत् षोडशकलं। यस्मिन्नेताः षोडशकलाः प्रभवंतीति श्रुतेः। प्राणादिषोडशकलासहितं वा। सिसृक्षया सृष्टीच्छया यः प्राक् जगत्संहृत्य सूक्ष्मरूपतया स्वोदरे निवेश्य प्रलयोदके श्रीपर्यंके श्रीभुजांतरगतः प्रकृति

सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः। संभूतं षोडशकलमादौ लोकसिसृक्षया १ यस्यांभसि शयानस्य योगनिद्रां वितन्वतः। नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २

मयतमसा निगूहस्थितः। स एव परमपुरुषः पुनरुत्पत्तिकाले स्वगूहकं तमः पीत्वा स्वात्मानं प्रकाशितवानित्येतदेवात्र पुरुषरूपग्रहणमभिप्रेतं। आमकुमारादिवल्लोकस्रष्टाभिप्रायोपी स्पृष्टं भवति १ एवं स्वगूहकतमःपानेन प्रकाशितः परमपुरुषः महदादितत्वोत्पत्त्यनंतरं ब्रह्मांडं सृष्ट्वा तदंतः प्रविश्य तत्रोदके शेषपर्यंकशायी नाभेर्लोकपद्मं निर्माय पद्मनाभनामा भूत्वा तस्मात्पद्माच्चतुर्मुखमस्राक्षीदित्याह। यस्येति। अंभसि शयानस्य योगनिद्रां वितन्वतः यस्य भगवतः नाभिह्रदांबुजाद्विश्वसृजां दक्षादीनां पतिर्ब्रह्मा आसीत् ३

स एव पुनर्ब्रह्मांडेनाप्याआसीदितरस्त्विमित्यादिनांतरिकलोककल्पकावयववान् पुरुषाख्योवतारेत्यभिप्रेत्याह। यस्येति। पातालमित्यादिलोक
विस्तरः चतुर्दशभुवनविस्तरः यस्य पुरुषनाम्नआवतीर्णस्यावयवसंस्थानैश्चरणाद्यवयवविन्यासैः कल्पितः तदुत्पन्नत्वेनतदाधारत्वेन विद्वद्भिर्निरू
पितः। ननु तदात्मत्वेन। स च विराडंतरस्य ब्रह्मणैव तन्मम विद्यादर्पणे प्रतिबिंबितं सजीवइत्यभिधीयते तदेव ब्रह्म वशीकृतमाय मीश्वरइति। तत्रसच्चि
दद्वयानंदब्रह्मलक्षणपुरुषोभगवानीश्वरः यो रूपं रूपं जगृहे। यो रूपं रूपं विराड्रूपं स्वमायया कल्पितं महदहंकारादिभिः संभृतमुत्पन्नं अतएवषं
वभूतादिषोडशकलोपेतं किमर्थं अनेन लोकसिसृक्षया कोसौ भगवानित्यपेक्षायामाह। यस्येति। स्वमायया परिणतभूतसूक्ष्मपुरुषानयत

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ३ राम राम राम

तद्रूपेणव्याप्तस्य योगनिद्रां जगत्कारणमायाशक्तिं वितन्वतो विस्तारयतः स्रष्टेशेरयतो यस्य नाभिह्रदांबुजात् पंचीकृतभूतनिष्पन्नलोकपद्मा
त् ब्रह्मासीद्यस्य ब्रह्मोत्पादकाजगत्पद्मस्यावयवविन्यासैः पद्मदलायमानैर्लोकविस्तरः कल्पितः नवप्रकृतःस त्वयः तद्भगवतस्त्रैलोक्यात्मकं
प्रथमं रूपमिति के चिन्नरूपयंति। तदिति। भगवतस्तद्रूपं पुरुषादिरूपत्रयं विशुद्धं निर्दोषं ऊर्जितं उद्रिक्तं सत्वं संपूर्णबलज्ञानादिसर्वगुण
समूहं। वाइति पदेन परकृतापव्याख्यानस्यप्रमाणविरोधं च दर्शयति। निरनिष्टो निरवद्यइति श्रुतेर्नित्य निरस्ताविद्याविलासस्यब्रह्मणो विद्या
दर्पणे प्रतिबिंबीभूय जीवत्वं न घटते। न हि नित्यनिर्मुक्तशिरो वेष्टो लीलया कदाचिन्नद्धास्यामि इति कामयते। पंचीकरणमपि स्वकल्पनामंतरेणन

इतोपितन्मतमयुक्तमित्याह। पश्यंतीति। अदभ्रचक्षुषः पूर्णज्ञानाः ब्रह्मादयः अदोरूपत्रयं पश्यंति। कीदृशं। सहस्रशब्दोनंतत्ववाची प्रत्येकमभि
संबध्यते। सहस्रं पादा ऊरवश्च भुजाश्चाननानि च सहस्रपादोरुभुजाननानि तैरद्भुतं सहस्रं मूर्धश्रवणाक्षिनासिका यस्मिन्नत्र तथोक्तं।
सहस्रमौल्यंबरकुंडलैरुल्लसच्छोभमानं। निरस्ताविद्ये तु न माधिकाशिति ब्रह्मादिभिरपरोक्षतया दृष्टत्वान्नैतद्रूपत्रयं मायाकल्पितमिति
भावः ४ त्रयाणां रूपाणां मध्ये पद्मनाभाख्यं रूपमवतारकारणमित्याह। एतदिति। यन्नक्षीरार्णवशायिपद्मनाभाभिधं रूपं एत

पश्यंत्यदोरूपमदभ्रचक्षुषः सहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंड
लोल्लसत्। ४ एतन्नानावताराणां निधानं बीजमव्ययं। यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ५ स एव प्र
थमं देवः कौमारं सर्गमास्थितः॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ६

न्मत्स्यादिनानावताराणां बीजं व्यंजकं निधानं अंततोवसर्वावतारा निधीयंते एकीक्रियंतइति निधानं। नव्येतीत्यव्ययं। यस्य पद्मना
भस्यांशांशेन सामर्थ्यैकदेशेन देवादयः सृज्यंते स पद्मनाभ एव सर्वावतारहेतुरित्यर्थः ५ स एव पद्मनाभो देवः प्रथमं स्वस्मा
देव कौमारं सनत्कुमाराभिधमवतारं आस्थितः। ब्रह्मा ब्राह्मणः सन्। स्वतः स्वर्गेविशिष्टजनशिक्षणाय दुश्चरं ब्रह्मचर्यमखंडि
तमप्रतिहतं यथा भवति तथा चचारेत्यर्थः। सनत्कुमारोन्यः सनकादिषु पठितः ६

भा॰प्र॰
२१

रसातलगतां महीमुद्धरिष्यन्नुद्धर्तुकामो यज्ञेशः श्रीनारायणोऽस्य जगतः भवाय तु स्थित्यर्थमेव सौकरं शूकरस्य वराहस्य विद्यमानेन वपुषा तु पादत्तेत्यन्वयः ७ आविर्भूतसर्गोऽभिव्यक्तिर्यस्य स तथोक्तः ऋषीणां स्वभावो यस्य स तं तृतीयं महिदासाभिधावतारमुपेत्य देवर्षित्वं देवत्वेसत्यपि सन्मभगवांस्तन्त्राव तारे सात्वतं पंचरात्रं नाम ग्रंथविशेषमाचष्ट व्याचख्यौ। नारदादेरिति शेषः। यतः सात्वततंत्रात् ज्ञात्वानुष्ठानात् कर्मणां नैष्कर्म्यं मोक्षसाधनत्वं स्यादित्यन्वयः। सर्गः स्वभावनिर्मोकनिश्चयाध्यायसृष्टिष्वित्यभिधाने। श्रुत्यादिप्रसिद्धिद्योतकेनैवेशब्देन देवर्षित्वे नारदत्वमुपेत्येत्यपव्याख्यानमपहस्ति

द्वितीयं तु भवायास्य रसातलगतां महीं॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ७ तृतीयमृषिसर्गं वै देवर्षि त्वमुपेत्य सः॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये धर्मकलासर्गे नरनारायणावृषी॥ भू. त्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९

तमिति ज्ञातव्यं। भोः शौनकादयः तृतीयमृषिसर्गं विद्धि इति वा तदवतारप्रयोजनमाह। देवर्षित्वमिति ८ भोः शौनकादयः॥ तुरीयं च तु तुर्यं तुर्यश्रुता कथं सपद्मनाभः धर्मनाम्नि भगवति कलासर्गे स्वांशावतारे नानाप्रकारेण नारायणावृषी भूत्वा अत्र लोके दृष्ट्यात्मनोऽन्तःकरणस्य उपशमेनाधिकशांत्या उपेतं युक्तं अन्यैः कर्तुमशक्यं तपोऽकरोदित्येकान्वयः। अत्र कलासर्गे इत्युक्त्वा नारायणस्यावतारत्वं नरे तु विशेषावेश इति ज्ञातव्यं। तुर्ये इति केचित् पठंति तत्र तुर्ये च तुर्थे धर्मकलासर्गे इति सुगमोऽन्वयः ९

राम
२१

पंचमोऽवतारोऽपि कपिलो नामेत्यन्वयः। स सिद्धेशः कपिलः कालवशेन तिरोहितं तत्त्वानां चतुर्विंशति संख्याकानां ग्रामः समूहः तस्य विशेषेण निर्णयो भगवत्परत्वेन यस्मिन् तत्तथोक्तं सांख्यं भगवद्ज्ञानप्रतिपादनपरं वेदार्थपरिबृंहितं नाम्ना सुरयेऽसच्छिष्याय प्रोवाचेति पश्चादन्वयः। अत्रास्मिन् लोके प्रतिष्ठां त्वे शास्त्रप्रणेता कपिलः तच्छिष्यः आसुरिश्चान्य एवेति सतां संप्रदायः ९ यः पद्मनाभः अनसूयया अत्रिपत्न्या वृतः अत्रेर्नाम्ना अनुसूयाभामपत्यत्वं प्राप्तः। आन्वीक्षिकीं तर्कविद्यामलर्काय प्रह्लादादिभ्यश्च आविर्नान्वात् तमवतारं षष्ठं विद्धि १० ततः स पद्मनाभः स प्तमे आकूत्यां रुचेर्भार्यायां आकूत्यापत्न्यां यज्ञोऽभ्यजायत जातः स यज्ञो नाम्ना यामाद्यैरादाय येषां ते तथा तैः सुरगणैः सह स्वायंभुवमन्वंतरमपात् अरक्षदित्यन्वयः। प्रतिमन्वंतरं देवा

पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं ९ षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् १० ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत। स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं ११ अष्टमो मेरुदेव्यां तु नाभेर्जात उरुक्रमः। दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतं। १२ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः॥ दुग्धवानौषधीर्विप्रास्तेनायं स उशत्तमः १३

नां नाम भेदाद्यामा इत्युक्तं ११ य उरुक्रमः नाभेराग्नीध्रपुत्रात् मेरुदेव्यां पत्न्यां जातः सर्वाश्रमनमस्कृतं धीराणां विद्यारतानां वर्त्म पारमहंस्याश्रमं दर्शयन् स्वस्य सोऽष्टमोऽवतारः न पुंल्क्षेशाणिताभिश्रतयाप्यजननं किंतु द्वारमात्रमित्यस्मिन्नर्थे तुशब्दः १२ ऋषिभिः प्रार्थितः पद्मनाभः नवमावतारं पार्थिवं पृथुचक्रवर्तिशरीरं विष्टरूपं भेजे हे विप्राः ज्ञानिनः। गोरूपिण्याः भुवः ओषधीः क्षीरात्मिका दुग्धवान् इति येन तेन कर्मणायं भगवानुशत्तमः सत्यकामेषु श्रेष्ठः। उश इच्छायां। वशकांतौ दोहनकर्मणोऽसमानुषत्वं द्योतयति १३

स भगवान् चाक्षुषांतरसंप्लवे चाक्षुषमन्वंतरप्रलये मात्स्यं मत्स्यस्य विद्यमानं रूपं जगृहे किंच महीमय्यां नावि तरीस्थानीयभूम्यौ वैवस्वतं मनुमारोप्यापादित्यन्वयः १४ सुरासुराणामुदधिं समुद्रं मथ्नतां यो भगवान् पातालं आविशंतं मंदरपर्वतं कूर्मरूपेण पृष्ठे दध्रे बभारेत्येकादशं परत्वेन तं अवतारमेकादशं विदुरिति १५ द्वादशमवतारं धान्वंतरं धन्वंतर्याख्यरूपसंबंधिनं विदुः स हरिर्यस्मिन्नवतारे मोहिन्या मोहकशक्तिमत्या स्त्रिया स्त्रीमूर्त्यान्यानसुरान्मोहयन्सुधामपाययत्तं त्रयोदशममेव विदुरित्येकान्वयः। वशे मोहयन्निति सुक्ताममृतामयं तद्रूपमिति शंकानिरासार्थम्॥

रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं १४ सुरासुराणामुदधिं मथ्नतां मंदराचलं॥ दध्रे कमठरूपेण पृष्ठ एकादशे विभुः १५ धान्वंतरं द्वादशमं त्रयोदशममेव वा॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया १६ चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं॥ ददार करजैरूरावेरकां कटकृद्यथा १७ पंचदशं वामनकं कृत्वागादध्वरं बलेः। पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं १८

१६ नरसिंहसंबंधि विग्रहं बिभ्रत्स भगवान् करजैर्नखैरूर्जितं हिरण्यकशिपुं ऊरौ अंके निपात्य तथा ददार। यथा कटकृत्तृणाख्यकर्ता एरकां तदीर्घाकारां तृणविशेषान् दारयति तमवतारं चतुर्दशं विदुरित्येकान्वयः १७ त्रिविष्टपं त्रैलोक्यं प्रत्यादित्सुः बलेराछिद्य इंद्राय दातुकामः तदर्थं बलिं पदत्रयं याचमानः। स पद्मनाभः पंचदशमवतारं वामनसंबंधिनं कृत्वा बलेरध्वरं यज्ञमागादित्यन्वयः १८

षोडशमे अवतारे स भगवान् जमदग्निसुतो भूत्वा ब्रह्मद्रुहः ब्रह्मद्रोहिणो नृपान् पश्यन् त्रिःसप्तकृत्वः एकविंशतिवारान्महीं निःक्षत्रियां क्षत्रियजातिरहितामकरोदित्येकान्वयः। कुपित इति कुपिताकारं दर्शयन् न तु कुपितः नहि ईश्वरस्य कोपः संभवति शोकस्मयादीनामभावात् यथा लोभः तस्मादेतत्र्त्रयं त्यजेदिति हेयत्वान्न स्यादिति १९ ततः स हरिः सप्तदशे अवतारे पराशरात् सत्यवत्यां जातो अल्पमेधसः अल्पप्रज्ञान् पुरुषान् दृष्ट्वा वेदतरोः शाखाः चक्रे कृतवान् २० अतः परं सप्तदशात्परं अष्टादशावतारे देवकार्यकरणेच्छया नरदेवत्वं राजत्वं प्राप्तः समुद्रनिग्रहादीनि सेतुबंधनपूर्वाणि वीर्याणि वीरकर्माणि कृतवानित्येकान्वयः २१ स भग

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान्। त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं १९ ततः सप्तदशे जातः सत्यवत्यां पराशरात्। चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः २० नरदेवत्वमापन्नः सुरकार्यचिकीर्षया। समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं २१ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी। रामकृष्णाविति भुवो भगवानहरद्भरं २२ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां। बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति २३ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्की जगत्पतिः २४

वान् एकोनविंशे विंशतिमे अवतारे वृष्णिषु नाम्ना रामकृष्णाविति जन्मनी प्राप्य भुवो भारमसुरपृतनालक्षणमहरदित्येकान्वयः। जन्मनी इति द्विवचनाद्बलभद्रे विशेषावेशो ज्ञातव्यः २२ ततः कलौ युगे संप्रवृत्ते सति सुरद्विषां त्रिपुरवासिनां दैत्यानाम् अयोग्यानां वेदमार्गप्रवर्त्तमानानां मोहाय नाम्ना बुद्धः कीकटेषु मगधविषयेषु जिनसुतः जिनेन सुतत्वेन वृतः भविष्यतीत्यन्वयः २३ अथ बुद्धावतारानंतरं असौ जगत्पतिः पद्मनाभो युगसंध्यायां प्रायशो राजसु दस्युप्रायेषु वर्त्तमानेषु सत्सु नाम्ना कल्की नाम्ना विष्णुयशसो विप्राज्जनितोत्पत्स्यतीत्येकान्वयः २४

हरेरवताराणामनंतत्वादनेनप्रबुधायुषापिसमापयितुंनास्माकंशक्तिरस्तीत्यभिप्रेत्याह।अवताराइति।हि हे द्विजाः सत्वनिधेर्बलज्ञानादिमहागुणनिधानस्य
हरेरवताराअसंख्येयाहियस्मात्तस्मात्साधस्यतःसंख्याताःनसाकल्येनसमापयितुंशक्याःतत्रोदाहरणमाह।यथेति।यथाविदासिनउन्नतस्थलान्भि
न्नाद्वासरसःसहस्रशःकुल्याःक्षुद्रनद्यःस्युरितिइदंमंदमतीनपेक्ष्योक्तंनतुयोगिनः।क्षुद्रनदीनांतैःसंख्येयत्वेपिनहरेरवताराःसंख्यातुंशक्यंतेइत्येतो
बुद्ध्यवतारार्थमितिज्ञातव्यं २५ इदानींप्रतिविंबांशानाह।ऋषयइति।मनुपुत्राःप्रियव्रतादयःप्रजापतिभिर्दक्षादिभिःसहिताएतेऋष्यादयः।हरेःक

अवताराह्यसंख्येयाहरेःसत्वनिधेर्द्विजाः।।यथाविदासिनःकुल्याःसरसःस्युःसहस्रशः २५ ऋषयोमनवोदेवामनु
पुत्रामहौजसः।।कलाःसर्वेहरेरेवसप्रजापतयःस्मृताः २६ एतेस्वांशकलाःपुंसःकृष्णस्तुभगवान्स्वयं।इंद्रारिव्या
कुलंलोकंमृडयंतियुगेयुगे २७

लाःमित्रांशाःस्मृताःस्मृतिषुउक्ताः २६ तर्हिकिंस्वरूपांशाइतितत्राह।।एतइति।सएवप्रथमइत्यारभ्याथासावित्यंतेनप्रोक्ताःएतेशेषशायिनःपरमपुरु
षस्यस्वांशकलाःस्वरूपांशावताराः नतत्रांशांशिनोर्भेदः।प्रतिविंबांशवत्।किमुक्तंभवति कृष्णोमेघश्यामःशेषशायीमूलरूपीपद्मनाभोभगवान्
स्वयंतुस्वयमेवनशाखिशाखावत्भेदाभेदोपीतिभावइत्याह।इंद्रारिभिर्दैत्यैर्व्याकुलंजगत्तस्यानंवयुगेयुगेअवतीर्यमृडयंतिरक्षंतीत्यन्वयः २७

फलमाहजन्मेति।प्रयतःप्रकर्षेणनिर्जितेंद्रियग्रामोयोनरोजनएवमुक्तप्रकारेणजन्मरहस्यंसायंप्रातर्भक्त्यागृणन्पठन्संसारिकदुःखसमूहान्मुच्यत
इत्यन्वयः २८ इदानींप्रतिमात्मरूपमाह।।एतदिति।मायागुणैःप्रकृतिविकारैःमहदहंकारादिभिरूपादानकारणैःआत्मनिसर्वगतेहरिणाविरचितमेत
ज्जन्मरूपंस्थूलमरूपस्यप्रकृतिविकृतिरूपरहितस्यचिदात्मनःकेवलज्ञानस्वरूपस्यभगवतोरूपंप्रतिमाख्यानीयंहिहेतोर्यस्मादेतज्जन्मउक्तंतस्मात्प्रतिमैवन
साक्षात्स्वरूपंचिदेकरूपस्यभगवतोमायाकल्पितसत्वादिगुणैर्महदाद्याकारेणपरिणतैरेतत्सर्वात्मानंविराट्रूपमात्मनिचिद्रूपेकल्पितं।।अत

जन्मगुह्यंभगवतोयएतत्प्रयतोनरः।सायंप्रातर्गृणन्भक्त्यादुःखग्रामाद्विमुच्यते २८ एतद्रूपंभगवतोह्यरूप
स्यचिदात्मनः।।मायागुणैर्विरचितंमहदादिभिरात्मनि २९ यथानभसिमेघौघोरेणुर्वापार्थिवोनिले।एवंद्र
ष्टरिदृश्यत्वमारोपितमबुद्धिभिः ३०

एवतन्मिथ्या।अतस्मिंस्तद्बुद्धिरितियैःकैश्चिदुच्यतेतन्नयुक्तं।प्रमाणविरोधादित्यस्मिन्नर्थेवहिः २९ प्रतिमात्वकल्पनामंतरेणसाक्षाद्रूपत्वंकिंनस्या
दित्याशंक्यसाक्षात्त्विति तिरोदाहरणमाह।यथेति।।यथामेघौघानभस्यारोपितामेघौघान्दृष्ट्वायमाकाशइतिकल्पयंतिविवेकशून्याः यथावा
निलेवायौपार्थिवोरेणुरारोपितःवायुनोह्यमानमूर्ध्वंरेणुंदृष्ट्वायंवायुरिति।आकाशवाय्वोश्चाक्षुषत्वाभावात्भ्रांतिरेवसा।एवंद्रष्टर्युर्व
शेभगवतिप्रतिमांदृष्ट्वामनुष्यदृष्ट्यगोचरेअबुद्धिभिरज्ञैर्भ्रांत्यादृश्यत्वंजडरूपत्वमारोपितंकल्पितंतस्मान्नद्रष्टुमतोनसाक्षाद्रूपंप्रतिमैवेतिभावः

एवं हरेर्लीलादेहादिप्रपंचं निरूप्याधुना तस्य रूपं ब्रह्माण्डात्मकप्रतिमारूपं च निरूप्य जीवस्वरूपमाह॥ अत इति। यच्चैवंरूपमतउक्तयोः जडेश्वररूपयोः परं यदव्यक्तमव्यूढगुणबृंहितं अनादिकालात्कर्त्राविद्यया नयगततत्त्वरजस्तमोगुणपूर्णं पश्चाददृष्टाश्रुतवस्तुत्वाददृष्टाश्रुतानामतानुपासितानपरोक्षितपरमात्मस्वरूपत्वात्पुनःपुनर्भवः उत्पत्तिर्यस्य सतथोक्तः पुनःपुनर्जायमानो म्रियमाणश्च स जीवः। तस्मादस्मात्त्रिविधादमीश्वरवशं जीवरूपमिति भावः। अतः कार्यरूपात्परं व्यतिरिक्तं यदव्यक्तं यदनभिव्यक्तं रूपादिव्यक्तिकारणसाधनैः सूक्ष्मं अव्यूढं अनभिव्यक्तं गुणानां बृंहितं कार्यं यस्मिन् तदव्यूढगुणबृंहितं अत एवाव्यक्तदृष्टाश्रुतवस्तु तस्मादव्यक्तं सप्रसिद्धो जीवो यद्यस्मात्पुनर्भवति जीवेन सह वर्त्तमानः पुनर्भवतीति पुनर्भवः देहादिप्रपंचलक्षणः संसारो।

अतः परं यदव्यक्तमव्यूढगुणबृंहितं। अदृष्टाश्रुतवस्तुत्वात्स जीवो यः पुनर्भवः ३१ यत्रेमे सदसद्रूपे प्रतिषि-
द्धे स्वसंविदा॥ अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ३२

यस्माद्भवतीति वा तत्कारणमिति यद्व्याख्यानं तददृष्टाश्रुतवस्तुत्वादिति हेत्वभिधानविरुध्यते। अस्मिन्पक्षे यददृष्टादिविशेषणोपेतं तत्कारणमिति वक्तव्यं प्रकृतानुपयुक्तं च। अत्र देवादिप्रपंचस्य मिथ्यात्वाविपर्यस्तरूपं। अतो यत्किंचिदेतत् ३१ जीवस्यैवं विधात्तद्विधनिवर्त्तकं ब्रह्मज्ञानमेव न कर्मादिकमित्यभिप्रेत्याह॥ यत्रेति। यत्र परमात्मनि सदसद्रूपे व्यक्ताव्यक्तमिति प्रकृतिप्राकृतरूपे स्वसंविदा स्वरूपज्ञानेन प्रतिषिद्धे अनादितएव निरस्तेऽविद्ययात्मज्ञानेनात्मनि जीवे कृते इति यद्दर्शनं ज्ञानं तद्ब्रह्मज्ञानं संसारनिवर्त्तकमिति शेष इत्येकान्वयः ३२

कं ब्रह्माह॥ यर्हीति। यदि अस्य परोक्षज्ञानोदयसाध्योत्तमगतास्वरूपे वा विशारदस्य हरेर्विद्यमाना देवी द्योतमाना मतिर्ज्ञानरूपा मायेच्छा अपरोक्षज्ञानदानेन नेनं जीवं संसारयामीत्युपरता तस्मान्निवृत्ता। तर्हि तं जीवं सम्पन्न एवेति परं ब्रह्मप्राप्त एवेति विदुः किं चास्वे स्वरूपे ज्ञानानंदाद्यात्मके महिम्नि स्थितः स्वावरणमुक्तजनैर्महीयते पूज्यत इत्यन्वयः। महीयत इत्युक्त्या एषा कार्यकारणलक्षणप्रपंचविवर्त्तरूपा देवस्य विष्णोः संबंधिनी माया वैशारदी विघटमानसंसाररूपा मतिर्बुद्धिर्यद्युपरता तदा स्वात्मरूपं ब्रह्मसंपन्नं तदेकरूपमापन्नं विदुरित्येतन्निरस्तं भेदनिष्ठत्वात्पूज्यपूजकभावस्य

येद्येषोपरता देवी माया वैशारदी मतिः। संपन्न एवेति विदुर्महिम्नि स्वे महीयते ३२ एवं जन्मानि कर्मा-
णि ह्यकर्तुरजनस्य च॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ३३

ति भावः ३२ हरेरेवं विधावतारकर्मभिराप्तकामत्वेन प्रयोजनाभावेपि जीवानां प्रयोजनमस्तीत्याह। एवमिति। अनन्याधीनकर्तृत्वात्फलोद्देशाभावाद्वाकर्तुरजनस्य जननरहितस्य जननविलक्षणस्य चाहृत्पतेः मनःप्रेरकस्य विष्णोरेवं विधानि वेदगुह्यानि उपनिषत्प्रतिपाद्यानि जन्मानि कर्माणि च कवयः संसारमोक्षाय वर्णयंति स्म। हि शब्देन हरेः साकल्येन क्रियाराहित्यं प्रतिषेधति। अन्यथोक्तश्लोकविरोधादित्येकान्वयः। तस्माज्जीवानां संसारमोक्षाय एव भगवदवतारपराक्रमप्रयोजनमित्यर्थः ३३

फलाभिसंध्यभावात्कर्तृत्वेनकर्तृत्वाभावादितियत्तत्स्पष्टमाह।सवाइति।अमोघलीलःसत्यकामलक्षणक्रीडःसप्तमनामएवइदंविश्वंसृजतिअवतिअ
त्तिआत्मसंहरतिनरुद्रादिः तथाप्यस्मिन्जगतिनसज्जतेलौकिककर्तृवत्फलासक्तोनभवति।अतोऽकर्तानतुकर्तृत्वाभावात्।अभोक्तृत्वमपि
दुःखाभोगादेवनतुभोगाभावात्सुखभोक्तृत्वसंभवादित्यभिप्रेत्याह।भूतेष्विति॥पंचभूतैःसंभूयोत्पन्नत्वात्भूतेषुशरीरेष्वंतर्हितःमनःश्रोत्रादिष
डिंद्रियवर्गग्राह्यशब्दादिविषयसारंजिघ्रतिभुंक्ते।ननुदुःखादिकंकुतः।आत्मतंत्रः।नहिस्वतंत्रस्यदुःखादनंघटते।इत्यपिनेत्याह।षडिति।षड्गु
णेशःषडिंद्रियविषयेशः॥अतश्चसारभुक्तस्माद्भोक्तृत्वंनामदुःखाभोगएवनतुभोक्तृत्वाभावादित्यर्थः।आत्मतंत्रइत्यनेनविशेषणेन

सवाइदंविश्वममोघलीलः सृजत्यवत्यत्तिनसज्जतेस्मिन्॥भूतेषुचांतर्हितआत्मतंत्रः षाड्वर्गिकंजिघ्रतिषड्गुणेशः ३४
नवास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊतिं।नामानिरूपाणिमनोवचोभिः संतन्वतोनटचर्यामिवाज्ञः ३५

ईश्वरएवदेहंप्रविष्टोजीवोभवतिनान्यइत्ययमर्थः।सवाइदंमित्यनेनसमर्थ्यतइत्येतत्तद्दूषितंनहिसुखमेवस्याद्दुःखमपिस्यादितिकर्तुंसमर्थई
श्वरःसुखदुःखपात्रीभूतंजीवत्वमभिकांक्षति।ईश्वरत्वविरोधात् ३४ एवंविधमिथ्याज्ञानीतत्त्वरूपाज्ञानात्भगवद्भजनादावनधिकारीत्याह।न
वेति।वचोभिःसंकीर्तनयोग्यानिनामानिमनोभिःस्मरणयोग्यानिरूपाणिसम्यक्तन्वतःविस्तारयतःमनोवचोभिर्वामद्रूपात्मकंप्रपंचंसृजतोवास
तोनिपुणंभद्रंविधातुःअस्यहरेःऊतिंचमिश्रायंगतिंवाकश्चिदपिनावैतिनजानातिकीदृशःकुमनीषःमिथ्याज्ञानीजंतुःकिमिवदृश्या।जंतुरिति
पुनःपुनर्जायमानोम्रियमाणःमिश्रबुद्धिःसंसारीकुमनीषइतिकुत्सितंप्रमाणाविरुद्धसर्वमिथ्यात्वमनसापश्यतेनतुमुक्तात्वकुंठाक्तोनी
त्यद्वैतवादीवा।कथमिवनटस्यगुणलाघवाभिनयविशेषाज्ञोनटचर्यांभरतादिकथाभिकांयथानजानातितथायमितिभावः ३५

तर्हिकीदृशोवेदेतितत्राह।सइति।योवेदप्रमाणिकःअप्रमायथाअयात्नेनइदमखिलंमायाकल्पितमनिर्वाच्यंनभवतीतिज्ञात्वेनवासंततयानिरंतरयाअ
वाहरूपयाअनुवृत्त्यासेवयाहृत्कमलमध्यवासिनस्तस्यपादसरोजयोर्गंधंभजेत।अत्रेवास्वाद्यमप्रमनाभवेत्।सपुरुषःदुरंतवीर्यस्यअसंख्यातपरा
क्रमस्यपरस्यपूर्णस्यधातुःपोषणादिकर्तुःरथांगपाणेःश्रीनारायणस्यपदवींमार्गंस्वरूपस्थितिंवेदेत्येकान्वयः।धातुरित्युक्तेचतुर्मुखोपिस्यादि
त्यतःपरस्येतिचतुर्मुखपरत्वमप्यक्षरस्यापिअतोरथांगपाणेरिति।तस्माद्भागवताएवभगवदापरोक्ष्यंलभंतेनेतरइतिसिद्धं ३६ भागवताअपिभवा

सवेदधातुःपदवींपरस्यदुरंतवीर्यस्यरथांगपाणेः।योमाययासंततयानुवृत्त्याभजेततत्पादसरोजगंधं ३६ अथेहधन्या
भगवंतइत्थंयद्वासुदेवेखिललोकनाथे।कुर्वंतिसर्वात्मकमात्मभावंनयत्रभूयःपरिवर्तउग्रः ३७ इदंभागवतंनाम
पुराणंब्रह्मसंमितं॥उत्तमश्लोकचरितंचकारभगवानृषिः ३८

दृशाएवेत्याशयवानाह॥अथेति॥हेभगवंतःप्रज्ञावंतःभाग्यवंतोवा।यत्रयस्मिन्भगवत्यात्मभावेत्वामिभूत्यभावेक्रियमाणेसतिभूयःपुनःउग्रःदुःसहप्रस
तीव्रःक्रूरःपरिवर्तःसंसारःमरणंवानस्यात्।तस्मिन्नखिललोकनाथेसर्वात्मकेसर्वांतर्यामिणिवासुदेवेइत्थमुक्तप्रकारेणात्मभावंकुर्वंतीतियत्
यस्मात्।अथतस्मादिहचेत्नराशेषयूयंधन्यानिरपेक्षगुणपूर्णाःकृतकृत्याइत्येकान्वयः।यत्रयस्मिन्नात्मभावेक्रियमाणेपरिवर्तोनस्यात्तमात्म
भावमितिवा ३७ धर्मःकंशरणंगतइतिप्रश्नंपरिहरति।इदमित्यादिना।ऋषिःसर्वज्ञोव्यासोभगवान्ब्रह्मणावेदेनसंमितंतुल्यं।उत्तमश्लो
कस्यहरेश्चरितानियस्मिन्संतितत्तथोक्तं।इदंबुद्धिस्थंभागवतंपुराणंचकार ३८

भा॰प्र॰
२६

किमर्थं लोकस्य निःश्रेयसाय मोक्षाय धन्यं पुष्टिकरं स्वस्त्ययनं सर्वमंगलानामालयं। अर्थतः शब्दतोऽपि महत् यदेवंविधं तदिदं स व्यासः आत्मवतां वरं वशीकृ
तमनसां वरं सुतं शुकं ग्राहयामास ३९ कुत एतदेवाग्रहयदिति तत्राह सर्वेति। वेदादिसर्वशास्त्रोत्तमत्वादिदमेव ग्राहितमिति भावः स तु शुकः परमर्
षिभिः परीतं समन्वितं गंगायां प्रायोपविष्टं अनशनव्रतमाचरन्तं परीक्षितं नाम महाराजं चक्रवर्तिनं श्रावयामास ४० ४१ किं वाहं वेद विप्राः तदनुग्र
हात्तत्र गंगायां नदीति के निविष्टः मम योग्यस्थानं उपविष्टः भूरितेजसः क्षात्रसामर्थ्योपेतस्य ब्रह्मापरोक्षज्ञानवतो वा तस्य राजर्षेः रथ्यकीर्तय

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्॥ तदिदं ग्राहयामास सुतमात्मवतां वरं ३९ सर्ववेदेतिहासानां सारं सारं समुद्धृ
तं स तु संश्रावयामास महाराजं परीक्षितं ४० प्रायोपविष्टं गंगायां परीतं परमर्षिभिः तस्य कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः।
४१ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्॥ सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति ४२ कृष्णे स्वधामोपगते धर्मज्ञा
नादिभिः सह। कलौ नष्टदृशां पुंसां पुराणार्कोऽधुनोदितः ४३ इति श्रीभागवते महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः ॥

ततः शुकादध्यगमं पठितवानस्मि योऽहं तत्राध्यगमं सोऽहं तत्र तत्रेत्यादि प्रश्नपरिहाराय सर्ववेदेतिहासादिसारत्वेन भगवतो दत्तं श्रीभागवतं वः युष्मा
कं श्रावयिष्यामि। कथं यथापठितं यथाप्रज्ञं इत्येकान्वयः ४२ यदुक्तं धर्मः कं शरणं गत इति तत्रोत्तरं धर्मज्ञानादिभिः सह कृष्णे स्वधाम वैकुंठं
प्राप्ते सति कलियुगे नष्टज्ञानानां पुंसां सर्वसद्धर्मप्रकाशकः श्रीभागवतपुराणार्कोऽधुना वेदव्यासेन उदितः उदयं प्रापितः तस्मात्स धर्मः सद्धर्मज्ञानस
द्धर्मप्रवर्तकं तमेव व्यासरूपिणं कृष्णं शरणं गत इति भावः ४३ इति श्रीप्रथमस्कंधटीकाविजयध्वजतीर्थविरचितायां तृतीयोऽध्यायः ॥

राम
२६

सोऽहं वः श्रावयिष्यामीति सूतेनोक्तोऽपि शौनकः श्रीभागवतश्रवणे श्रद्धालुत्वदर्शनाय विशेषप्रश्नाय सूतमाह। इतीति। दीर्घसत्रिणां प्रशस्यं दीर्घकालीने
सत्रे येषामस्तीति तेषां मध्ये ज्ञानवयोवृद्धः ऋषिकुलाचाररक्षकः बह्वृचः ऋग्वेदेषु निष्णातः शौनक इति ब्रुवाणं सूतं संपूज्य सूतमब्रवीदित्यन्वयः १ म
हाभाग भाग्ययुक्त सूत सूतेति तात्पर्यं हि द्विरुक्तिः। एकत्र पुण्यकर्मवासनेति वा। शुको भगवान् पूज्यानां च पुनातीति पुण्यां यां भागवतीं कथां आह परीक्षित इ
ति शेषः। हे वदतां वर तां कथामस्माकं वदेत्यन्वयः २ विशेषप्रश्नं दर्शयति। कस्मिन्निति। चतुर्णां युगानां मध्ये कस्मिन्विषयं प्रवृत्ता कस्मिन्वा स्थाने देशे
केन वा कारणेन कस्माद्धेतोः संचोदितः कृष्णद्वैपायन इमां संहितां कृतवानित्यन्वयः ३ शुकः परीक्षितं श्रावयामासेति त्वदुक्तं नमनुपपन्नमेव के

इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां। वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् १ शौनक उवाच सूत सूत म
हाभाग वद नो वदतां वर॥ कथां भागवतीं पुण्यां यामाह भगवान्शुकः २ कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना। कु
तः संचोदितः कृष्णः कृतवान्संहितां मुनिः ३ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः। एकांतगतिरुन्निद्रो गूढो मूढ
इवेयते ४

नापि श्रीशुकावगमनस्यासुलभत्वादित्याशयवानाह॥ तस्येति। तस्य व्यासस्य पुत्रः शुकः महायोगी महाज्ञानी महाध्यानी वा अत एव सर्वदेशकालव
स्तुज्ञानादिसर्वगुणैः समं एकप्रकारं ब्रह्म पश्यतीति समदृक्। मया श्रिया सह वर्तत इति वा समं। अत एव निर्विकल्पकः इदं मदीयं तत्तदीयमिति भे
दबुद्धिमपहाय सर्वमीश्वराधीनमिति स्थितः। अत एव एकत्वं ततः एकांतः तस्मिन्नरहरौ मनसोऽसंततगतिर्यस्य स तथा। अत एवोद्गतानिद्रा अज्ञा
नादिदोषपरंपरा यस्मात्स तथा मूढ इवाचगूढः अज्ञ इव ईयते दृश्यते अज्ञैरिति शेषः। तस्मात्तद्दर्शनमसुलभमिति मन्य इत्यन्वयः ४

कुरुजांगलं कुरुविषयं प्राप्तः गजसाह्वये हस्तिनपुरे क्वचिदुन्मत्तवत् क्वचिन्मूकवत् क्वचिज्जडवद्विचरन्मुनिः पुरवासिभिः कथमालक्षितः शुकत्वेनेति
शेषः। पौरैरपि तत्तज्ज्ञानं दुःशकं किं पुनरंतःपुरनिवासिभिः किं च परीक्षिता ५ तद्दर्शनानंतरकालीनस्तेन सह संवादः सुतरामतुलमद्भुतमित्याशयवानाह
॥ कथं वेति। यत्र ययोः संवादे सात्वतो हरेस्तत्त्वसंबंधिनी श्रुतिर्वर्तते तादृशः संवादः पांडवेयस्य राजर्षेः परीक्षितः तेन मुनिना सह कथं वा समभूत्
न कथमपि घटत इत्येकान्वयः ६ इतोपि तस्य तेन सह संवादो दुर्घट इत्याशयवानाह॥ स इति तदाश्रमं तेषां गृहस्थानां सतां गृहं तीर्थीकुर्वन्स्व

कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलं। उन्मत्तमूकजडवद्विचरन्गजसाह्वये ५ कथं वा पांडवेयस्य राजर्षेर्मु
निना सह। संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ६ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां। अवेक्षते महाभागस्ती
र्थीकुर्वंस्तदाश्रमं ७ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं॥ तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ८

पादकमलेन पवित्रीकुर्वन्महाभागः शुकः गृहमेधिनां गृहे गत्वा पाणिभिक्षामाचरन् गोदोहनमात्रं ततो नाधिकं अवाङ्मुखतया एकमनास्ति
ष्ठति परमतस्तेनास्ति हि यस्मात्तद्दर्शनमतुलमित्येकान्वयः ७ किं च॥ हे सूत सुज्ञाः अभिमन्युसुतं परीक्षितं भागवतश्रेष्ठं प्राहुः॥ ततः किमि
ति तत्राह। तस्य परीक्षितः महाश्चर्यं शोभनमिति शेषः। जन्म कलिनिग्रहादीनि कर्माणि च अस्माकं गृणीहीत्यन्वयः ८

तस्य वैराग्यहेतुं पृच्छति। स सम्राडिति। पांडवानाम भिमानवर्द्धनः। स सम्राट् अप्रतिहताज्ञश्चक्रवर्ती कस्य वा हेतोरधिराट्श्रियं चक्रवर्त्तिसंपदं लक्ष्मीमनाद
त्य त्यक्त्वा गंगायां प्रायोपविष्टोभूदित्यन्वयः ९ एवंविधश्रीसंगत्यागे महत्कारणेन भवितव्यं तत्किमित्याशंकते इत्याह। नमंतीति। शत्रवः मंड
लपतयः आत्मनः शिवाय स्वकल्याणाय धनानि वानीय यस्य परीक्षितः पादयोर्निकेतं पीठस्थानं नमंतीत्यन्वयः। अंग सूत। स धीरः असुभिः स
ह दुस्त्यजां श्रियं अधिराज्यसंज्ञां उत्स्रष्टुं हातुं इयेष ऐच्छत् अहो आश्चर्यमेतत् महता हेतुना भवितव्यं तत्किमिति भावः ९ पुनरपि तदेव पृच्छति। शिवा
येति। ये उत्तमश्लोकपरायणा जनाः ते लोकस्य शिवादिप्राप्तये जीवंति न स्वार्थं जीवंतीत्यन्वयः। तस्मात्परार्थैकजीवनोसौ कस्मात्कारणात्परासु

स सम्राट्कस्य वा हेतोः पांडूनां मानवर्द्धनः। प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रियं ९ नमंति यत्पादनिकेतमात्मनः शिवायवा
नीय धनानि शत्रवः। कथं स वीरः श्रियमंग दुस्त्यजामियेष वोत्स्रष्टुमहो सहासुभिः १० शिवाय लोकस्य भवाय भूतये य उत्तमश्लोक
परायणा जनाः। जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं ११ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन। मन्ये त्वां वि
षये वाचां स्नातमन्यत्र छांदसात् १२ सूत उवाच द्वापरे समनुप्राप्ते तृतीये युगपर्यये। जातः पराशराद्योगी वासव्यां कल
या हरेः १३

त्कुतः श्रियं निर्विद्य विरज्य कलेवरं देहं मुमोचेत्यन्वयः ११ इहास्यामवस्थायां पृष्टो राज्ञा शौनकेन यत्किंचित्प्रश्नद्वयं पृष्टस्त्वं तत्सर्वं किंचनेत्यनुवर्तीकृत्य सम्यगाचक्ष्व
। कुतः छांदसाद्वेदविषयादन्यत्र पुराणादौ वाचां विषये स्नातं निष्णातं मन्ये इति यस्मात्तस्मादित्यन्वयः १२ कस्मिन्युगे इति प्रश्नं परिहरति द्वापर इति।
कृतयुगापेक्षया तृतीये द्वापरे युगे युगपर्यवसाने समनुप्राप्ते सति हरेः कलयांशेन पराशरात्पराकृतः शरो हिंसा येन स तथोक्तः तस्मात् वासव्यां वसोरु
परिचरस्य पुत्र्यां सत्यवत्यां योगी नित्यज्ञानी नाम्ना व्यासो जातोवतीर्णो तो द्वापरे युगपर्यवसाने भागवतप्रवृत्तिरिति भावः १३

अवतारप्रयोजनमाह। सकदाचिदिति। सव्यासो भगवान् शुचिः शुद्धः कदाचित्सरस्वत्या नद्या जलमुपस्पृश्य संध्याक्रियादिकं निर्वर्त्य पश्चाद्रविमंडले उदिते सति तत्तटे विविक्ते एकांते स्वाश्रमे एवासीन एकाकी १४ परावरज्ञः कालत्रयज्ञानी स सर्वतः सारः सर्वोत्तमऋषिकुलावतीर्णः परावरज्ञत्वे हेतुर्वा। त्रिकालदर्शित्वाद्वाऽव्यक्तरंहसाऽत्रनभिव्यक्तवेगेन भुवि युगे युगे प्राप्तं युगधर्मव्यतिकरं युगधर्मसांकर्यं १५ तथा तत्कृतं कालकृतं भौतिकानां भूतकार्याणां भावानां पदार्थानां शक्तिह्रासं च तथा एव जनांश्चाश्रद्दधानान् तात्पर्यशून्यान् निःसत्वान् निरुत्साहान् दुष्टमेधायेषां तेन दुर्मेधास्तान् धारणाशक्तिशून्यान् वा एवशब्दवदयमपकारांतः ह्रसितायुषः अल्पायुषः १६ दुष्टभाग्यान्वीक्ष्य मुनिर्मौनवान् दिव्येन चक्षुषा अपरोक्षज्ञानेन सर्वाश्रमा

सकदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः। विविक्त एक आसीन उदिते रविमंडले १४ परावरज्ञः सऋषिः कालेनाव्यक्तरंहसा॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे १५ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं॥ अश्रद्दधानान्निःसत्वान् दुर्मेधान् ह्रसितायुषः १६ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा। सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् १७ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं। व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं १८

णां यद्धितं तद्धिरं दध्यौ चिंतितवानित्येकान्वयः। सर्वज्ञस्य चिरध्यानमज्ञदृष्ट्यपेक्षया दुष्टमोहनाय वेति ज्ञातव्यं। अमोघदृक् अवंध्यज्ञानः। अचिंत्यः १७ किं हितमपश्यदिति तत्राह। चातुर्होत्रमिति चत्वारो होतारो होत्रध्वर्युद्गातृब्रह्माणो यस्मिंस्तत्तथोक्तं। दशहोत्रादिचतुर्होत्रपर्यंतैर्मंत्रैः प्रकाश्यत्वात् अग्निष्टोमादिकं कर्म प्रजानां वैदिकीनां शुद्धिं शुद्धिकरं रागादिप्रयुक्तिवर्जितं वा। वीक्ष्य यज्ञसंतत्यै अग्निष्टोमादियज्ञपरंपराप्रवर्तनाय एकमविभक्तं वेदं ऋगादिभेदेन चतुर्विधमदधादित्येकान्वयः। आदिमध्यावसानेषु हरिस्तुत्यातत्तूजात्वेन क्रियमाणकर्म प्रजानां ज्ञानद्वारा शुद्धिकरमपश्यदिति भावः १८

कथं विभक्ता इति तत्राह। ऋगिति। वेदव्यासेन मूलवेदसमुद्रात् ऋग्यजुःसामाथर्वाख्याश्चत्वारो वेदाः उद्धृताः तन्तु कृताः। तदर्थज्ञानाय कृतं इतिहासपुराणं च वेदार्थावेदकत्वात्पंचमो वेद इत्युच्यते। पंचमो वेद इत्युक्तेः इतिहासादीनां शब्दतो रचनेन तदर्थतः तस्मान्नित्यत्वादिति ज्ञातव्यं १८ तत्र तेषां वेदानां मध्ये ऋग्वेदप्रवर्तकः पैलो भूदिति प्रत्येकमन्वयः। जैमिनस्यापत्यं जैमिनिः सामगापति शिष्यद्वारा मयतिप्रवर्तयतीति वा सामगः कविः सूक्ष्मज्ञानी ततो जैमिनेरनंतरं एकः प्रधानः वैशंपायन एव यजुर्वेदानां निष्णातः प्रवर्तकस्तथैतिशेषः एवशब्देन सूर्यादन्यः प्रतिषिध्यते न तु सूर्यस्तथा समनिवक्ष्यमाणा

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः॥ इतिहासपुराणं च पंचमो वेद उच्यते १८ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः। वैशंपायन एवैको निष्णातो यजुषामुत १९ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः। इतिहासपुराणानां पिता मे रोमहर्षणः २० त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा। शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् २१ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा। एवं चकार भगवान् व्यासः कृपणवत्सलः २२

विरोधात् १९ दारुणो वसूत्पुत्रः। सुमंतुर्नाम मुनिरथर्वांगिरसां अथर्ववेदानां प्रवर्तक आसीत्। मे पिता रोमहर्षणः इतिहासपुराणानां प्रवर्तकः २० भगवदाज्ञापूर्वकं चतुर्णां वेदानां शाखोपशाखाभेदेन सविकृतविभागमाह॥ त एवेति। त एव पैलादयः ऋषयः स्वं स्वं वेदमनेकधा व्यस्यन्विभजन्नित्यन्वयः। ते वेदाः शिष्यप्रशिष्यादिभिः शाखिनः तच्छिष्यैः सर्वशाखावंतो भवन्नित्यन्वयः २१ व्यासनाममनिर्वचनमाह। त एवेति दुर्मेधैः अल्पज्ञैः पुरुषैः त एव वेदा यथा धार्यंते पठिताः अवधृतार्थाः क्रियंते एवं तथा शिष्यप्रशिष्यादिभिः शाखोपशाखाभेदेन चकार व्यस्यतस्माद्व्यास इति। किमर्थमिति तत्राह कृपणवत्सलः दीनजनस्निग्धः २२

एवं भगवद्भक्तानां त्रैवर्णिकानां वैदिककर्मानुष्ठानेन शुद्धान्तःकरणानामधोक्षजोपासनाजनितज्ञानेन मुक्तिः स्यादिति व्यासेन स्थापितं तदनधिकारिणां
स्त्रीशूद्रादीनां हरिभजनं कुत्रोक्तमपायेनेत्याकांक्षायामाह। स्त्रीशूद्रेति। वेदोक्तकर्माख्यश्रेयसि पुरुषार्थसाधने मूढानामत एवानधिकारिणां स्त्रीशूद्रद्वि
जाधमानां त्रयी त्रयो वेदाः श्रोतुं न योग्या इति यस्मादत एवं मया क्रियमाणं भारतादिशास्त्रोक्तविधिना गृह्णते नैश्रेयो भवेदिति कृपया मुनिना सर्वज्ञेन
व्यासेन भारताख्यानं कृतमित्यन्वयः। अनेनैतत्स्वमेवमयमवगंतव्यं। स्त्रीशूद्रादिकृपया भगवता भारताख्यानस्य कृतत्वात्तेषामेव तत्राधिकारो नान्येषा

स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा॥ कर्म्मश्रेयसि मूढानां श्रेय एवं भवेदिह। इति भारतमाख्यानं
कृपया मुनिना कृतं २३ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः। सर्व्वात्मकेनापि यदा नातुष्यद्धृदयं त
तः २४

मिति शंका माभूदितिहासपुराणाभ्यां वेदं समुपबृंहयेदिति वचनात् ब्राह्मणादीनामपि वेदार्थपरिज्ञानाय भारताद्यभ्यासस्यावश्यकत्वेनो
क्तत्वादुभयत्राधिकारो युज्यते। तेषां स्त्रीशूद्रादीनां तु गत्यंतराभावात्तदुक्तानुष्ठानेन मुक्तिरिति भावः २३ केन हेतुना कुतः संचोदित इति प्रश्न
परिहरिष्यन्नायः कृतावतारकार्यस्य दुर्जनानुमोहयतो व्यासस्य लोकानुकरणप्रकारमाह। एवमित्यादिना। हे द्विजाः भूतानां सदा श्रेयसि नि
त्यमुक्तिसाधने एवं प्रवृत्तस्यापि यदा हृदयं सर्वात्मकेन नातुष्यत् मे मनोवतारप्रयोजनेन सर्वप्रकारेण नलमित्यलंबुद्धिं नापततत्तदा
२४

केन विशेषितः एवं महापुरुषः स्वकार्ये प्रवर्त्तत इतिन्यायात् भागवतकृतिरेवालंबुद्धिहेतुरिति निश्चयवान् पिनारदप्रेरितः भागवतमकार्षीदिति
नारदस्य लोके महती कीर्त्तिः स्यादिति भक्तवत्सलत्वान्नारदागमनमाकांक्षमाणं व्यासं प्रति तदागमनमाह॥ तस्येति। खिन्नं अनलंबुद्धिमात्मानं अत
ः खिद्यतः खिद्यमानस्य अनलंबुद्धिंगतस्य ३१ अभिज्ञाय संज्ञापूर्वकं विज्ञाय सहसा कालक्षेपमंतरेण सरस्वतीतीरवर्त्तिस्वाश्रमस्थितो भागवतधर्म
ज्ञापनहेतोर्नारदेन चोदितः श्रीकृष्णो भागवतसंहितामकरोदिति शौनकप्रश्नपरिहारः ३२ प्रथमस्कंधे चतुर्थोध्यायः अथार्घ्यपाद्यादि

तस्यैवं खिन्नमात्मानं मन्यमानस्य खिद्यतः॥ कृष्णस्य नारदोभ्यागादाश्रमं प्रागुदाहृतं ३१ तमभिज्ञाय सहसा प्रत्युत्थायाग
तं मुनिं। पूजयामास विधिवन्नारदं सुरपूजितं ३२ इति श्रीभागवते महापुराणे प्रथमस्कंधे चतुर्थोध्यायः सूत उवाच
अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव १ नारद उवाच पाराशर्य महाभा
ग भवतः कच्चिदात्मना। परितुष्यति शारीर आत्मा मानस एव वा २

मर्हणानंतरं सुखमुपविष्टो विस्तृतकीर्त्तिः वीणा महती नाम्ना पाणौ यस्य स तथोक्तः मंदस्मितं कुर्वन्निव प्रसन्नवदनो देवर्षिः समीप उपविष्टं तं विप्र
र्षिं व्यासं प्राह इत्येकान्वयः १ विज्ञातभगवदभिप्रायः तदनुकरणानुगुणानुकरणवान्नारदो नित्यकुशलं तस्य संजानन्नपि तदनुवदन्निव कुश
लं पृच्छतीत्याह। पाराशर्येति। महाभाग ऐश्वर्याद्यनंतभाग्यनिधे पाराशर्य पराशरपुत्र भवतः शारीरः मानसो वा शरीररूपो मनोरूपो वा भेदाभा
वादेव मुक्तिः आत्मा वतारप्रयोजनं कृत्स्नात्मना स्वत एव परितुष्यति कच्चित्स्वं तत्तया कृतावतारकार्यत्वात्परितुष्यतीत्येकवाक्यार्थः २

धर्मज्ञानी नातिप्रसन्नहृदयः अवतारप्रयोजनानालंबुद्धिमान् सरस्वत्यास्तटे तत्रापि शुचौ देशे विविक्ते स्थितः एकांते तिष्ठन् लोकहृष्ट्या नालं बुद्धिकारणं किं चेति विविधं तर्कयन् विचारयन् इदं वक्ष्यमाणमात्मानं प्रत्युवाचेत्यन्वयः २५ धृतव्रतेन लौकिकाचारापेक्षया वेदव्रतधारणवता मया निर्व्यलीकेन निर्व्याजेन वेदास्तेभ्योपि विशेषः। छंदांसि वेदाः गुरवो अध्यापकाः अग्नयः मानिताः सत्कृताः अनुशासनमाज्ञा च गृहीता हि शब्देन विप्रादिभिर्वेदव्रतादिवैदिककर्मावश्यं कर्तव्यमिति दर्शयति २६ यत्र भारते स्त्रीशूद्रादिभिरपि त्रैवर्णिकैः कृतानुष्ठेयो धर्मो दृश्यते तस्य भारतस्य करणेनाम्ना

नातिप्रसन्नहृदयः सरस्वत्यास्तटे शुचौ। वितर्कयन् विविक्तस्थ इदं चोवाच धर्मवित् २५ धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः।
मानिता निर्व्यलीकेन गृहीतं चानुशासनं २६ भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः। दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत २७ अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः। असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तमः २८ किं वा भागवता धर्मा न प्रायेण
निरूपिताः। प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ३०

यार्थः वेदादिसंप्रदायार्थः प्रदर्शितो हि तत्र किं विदुर्दरितं नास्तीत्यर्थः २७ अथापि भारतकृत्याम्नायार्थप्रदर्शनानंतरमपि दैह्यो देहरूप आत्मा आत्मनास्वत एव विभुर्व्याप्तो मे ममात्मा अवतारप्रयोजनासंपत्या असंपन्न अप्राप्तप्रयोजन इवाभाति। कीदृशः। ब्रह्मवर्चसि सत्तमः वेदाध्ययनसंपन्नानामपि श्रेष्ठ इत्यन्वयः। ब्रह्मवर्चस्यसत्तम इति पाठे अप्ययमेवार्थः २८ प्रायश इदमेवानलंबुद्धौ कारणमाह किं चेति। भागवता धर्माः प्रायेण न निरूपिताः। किं वा भारते निरूपिता अपि पुनः शास्त्रांतरेण निरूपणीया इत्यतः प्रायेणेत्युक्तं। किं विशिष्टाः परमहंसानां प्रियाः ततः किं ते परमहंसा एवाच्युतप्रिया हि यस्मात् तस्मादसंपन्न इवाभातीति भावः ३०

कृत इति तत्राह। जिज्ञासितमित्यादि। यत् त्वं धर्मादि सर्वपुरुषार्थं हि पूर्णं भारतं कृतवान् तेन त्वया सुसंपन्नं सुखपूर्णमद्भुतं सर्वस्मादाश्चर्यं तमं अन्नाद्रूढा यस्मात् भवति तद् अद्भुतं महत् देशतः कालतो गुणतश्चापरिच्छिन्नं ब्रह्मजिज्ञासितं विचारितं। अधिगतं वक्ष्यमाणसंशये। शब्दतोर्थतोपि महत्त्वाद्भुतं गहनं। व्यवहारे धने शास्त्रे वक्ता हेतुनिर्दिष्टि विविनात् तं तन्न्यायेनार्थशब्दस्यादिरात्त्यात् सर्वशास्त्रार्थपरिबृंहितं कृतवानिति यस्मात्तेन लोकानां ज्ञातुमिष्टं सुष्ठु पूर्णमभूदिति वा ३ किं च यद्वोपाध्यायपरंपरया भवता अधीतं सनातनं नित्यं वेदात्मकं शब्दब्रह्म तदपि जिज्ञासितं विचारितं तस्मात्कृतावतारकार्योपि तत्स्वस्यानातुष्टिकारणं पश्यामीत्यर्थः। तथाप्येवमपि कृतावतारकार्योपि अकृतावतारप्रयोजन इवात्मानं शोचसि न काशयसि हे प्रभो प्रभूतज्ञानेत्यन्वयः ४ एवं नारदेन पृष्टो परिमितज्ञानस्वरूपो पि अज्ञवत् दुष्टजनमोहनाय तत्कारणं तमेव पृच्छतीत्याह।

जिज्ञासितं सुसंपन्नमपि ते महदद्भुतं। कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितं ३ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं।
तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ४ व्यास उवाच अस्त्येवमे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे।
तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं ५

। अस्त्येवेति। हे नारद त्वयोक्तमिदं सर्वं मे अस्त्येव न किंचिदवशिष्टमस्ति तथापि मे आत्मा मनः न परितुष्यते नालंबुद्धिं प्राप्नोति तुष्यतीति वक्तव्ये तुष्यत इति प्रयोगात् अज्ञजनमोहनार्थमेव हरिणा प्रश्नः क्रियते न त्वज्ञानादिति महाविशेषो विज्ञायते। आत्मनो विष्णोर्भवतीत्यात्मभवो ब्रह्मा तस्यात्मनः शरीरादुद्भूत उत्पन्न आत्मभवात्मभूतः ब्रह्मपुत्र इत्यर्थः। आत्मभवेति वा। त्वेति त्वाम् अव्यक्तं सूक्ष्मं तस्या परितोषस्य मूलं कारणं पृच्छामहे। अल्पज्ञश्चेत्प्रश्नोत्तरं कथं ब्रूयादिति तत्राह। अगाधेति। अपरिमितज्ञानं प्रश्नोत्तरवचनसमर्थमित्यर्थः। अत्रापि समित्युपसर्गमंतरेण पृच्छते रात्मनेपदप्रयोगेण नारदस्य ज्ञानं बुलकजलपरिमितं व्यासज्ञानं पल्वयसमुद्रवदपरिमितमिति तात्पर्यं शब्दतोरेव विज्ञायते। आत्मभुवात्म

नारदस्यस्वात्मानलंबुद्धिहेतुवेदनकारणंवक्तीत्याह।। सवाइति। योगुणैर्हरिवितशरीरगतसुखदुःखफलसंगरहितोविश्वंमनसैवसृजतेत्रसाधनांतर
निरपेक्षतयासृजत्यवतिसंहरतिसपरावरेशोमुक्तामुक्तप्रपंचयोरीशइतिपरावरेशः जगदुत्पत्तेःपुराप्यस्थितिपुराणः। पुरमहरतीतिवा। पुरूणिकर्म
फलानिसनोतिददातीतिपुरुषः। उपासितइतिअतःभवान्समस्तगुह्यंवेदेत्यन्वयः। एतदुक्तंभवति।। चतुर्मुखप्रियपुत्रत्वान्नैवंसर्वज्ञत्वात्स्वा
दिकर्तृभगवदुपासकत्वेनसर्वज्ञत्वात्तत्प्रसादादस्मदनलंबुद्धिहेतुवेदनमस्तीति: ६ त्वंभगवत्प्रसादेनजनितापरोक्षज्ञानेनसर्वत्राव्याहतग
तिकर्मणावयोगप्रभावेनसर्वप्राणिशरीरांतश्चरणेनवानलंबुद्धिहेतुवित्त्वमाह।। त्वमिति।। त्रिलोकींपर्यटन्नर्कइवत्रिलोक्यामव्याहतगतिः

सवैभवान्वेदसमस्तगुह्यमुपासितोयःपुरुषःपुराणः। परावरेशोमनसैवविश्वंसृजत्यवत्यत्तिगुणैरसंगः ६ त्वंपर्यटन्
नर्कइवत्रिलोकीमंतश्चरोवायुरिवात्मसाक्षी। परावरेब्रह्मणिधर्मतोव्रतैःस्नातस्यमेन्यूनमलंविचक्ष्व ७ नारद
उवाच भवतानुदितप्रायंयशोभगवतोमलं। येनैवासौनतुष्येतमन्येतद्दर्शनंखिलं ८ राम

सर्वप्राणेपतश्चरोवायुरिवात्मसाक्षीसर्वजीवबुद्धिवर्तिदृष्टत्वंपरेब्रह्मणितथाअवरेतत्प्रतिपादकवेदाख्यशब्दब्रह्मणिधर्मतोवेदोक्तभगवद्ध
र्मानुष्ठानेनतदधिकारोपपादकवेदव्रतादिनियमैश्चानुष्ठापितैः। लोकमोहायवमथानुष्ठितैःस्नातस्याकृतकृत्यस्यमेअवतात्स्वयोजनंन्यूनंनित
रामुर्धरितंअलंयथाभवतितथाविचक्ष्वविशिष्टतयाब्रूहीत्येकान्वयः ७ नारदोपिसर्वज्ञस्यव्यासस्यहृदिस्थितानिजाशयंविद्वान्तत्प्रसादमा
दिखुरूलावतारप्रयोजनेवक्तीत्याह।। भवतेतिहेव्याससभवताभगवतोहरेरमलंयशोनुदितप्रायंवक्तृत्वेननप्रतिपादितंयेनानुदितेनयशःप्रति
पादकशास्त्रेणासौभगवान्नतुष्येत। अहंतत्स्ययशसःप्रतिपादकशास्त्रंखिलंसूर्वरितंमन्येइत्यन्वयः ८

भारतादिशास्त्रेषुहरियशःसोबहुदितत्वात्कथंखिलंमन्यसेइत्युच्यतइतितत्राह।। यथेतिहेमुनिवर्यसर्वज्ञतमसुनिभिःज्ञायतइतिवामुनिवरःप्राप्यइति
वामुनिवर्यधर्मादयःपुरुषार्थाःयथानुवर्णितास्तथावासुदेवस्यमहिमानानुवर्णितोहियस्मात्तस्मादनुवर्णनीयःधर्मादीनामल्पकथनेनापिपू
र्तिःस्यान्नथावासुदेवस्यमहिम्नोभारताद्यावतिकथितस्यापिसततंतत्तात्पर्यातिशयात्फलाधिक्याच्चनहिपूर्णोयस्यमाकांक्षमाणस्यवेद्योतोदये
नैच्छानिवर्ततइत्येतदर्थंहिशब्दःनाहद्वितीयोहिशब्दोहेत्वर्थः ९ धर्मादीनांअल्पकथनेनकथंपूर्तिःस्यादितितत्राह।। नेति। यद्वचोजगत्पाव
नकरंहरेर्यशोनप्रगृणीतकर्हिचिदपिनप्रतिपादयेत्तच्चित्रपदमपिविचित्राणिपदानियस्मिंस्तत्तथोक्तंतद्वचोनवक्तिप्रतिपादयतितद्वचः।

यथाधर्मादयोह्यर्थामुनिवर्यानुकीर्तिताः। नतथावासुदेवस्यमहिमाह्यनुवर्णितः ९ नतद्वचश्चित्रपदंहरेर्यशो
जगत्पवित्रंप्रगृणीतकर्हिचित्। तद्वायसंतीर्थमुशंतिमानसानयत्रहंसान्यपतन्निमंक्षया १०

शास्त्रंतन्नभवतीत्यर्थः।। कुतः तद्वायसंवयोमात्रानुजीवितार्थशास्त्रंउशंतिइच्छंति। यत्रकाकोच्छिष्टतीर्थमानसाःश्वेताःवतःमानसाख्यसरोविहारिणो
वाहंसाःपरमहंसाःधवलपक्षावाजलपयोर्विवेककारिणःमिमंक्षयापिवारलक्षणस्नानेच्छयानन्यपतन्ननिपतंतिनप्रविशंतितथायत्रयस्मिन्
तीर्थमानसाःब्रह्मणोमनसोजाताःसनकादयःहंसाःनिर्लेपाइतिवातस्मात्सज्जनानांदरणीयत्वेनधर्मादीनामल्पकथनेनपूर्तिरितिभावः। किंभूतस्तु
शिक्क्षयाउशिक्शुद्धेदर्यस्थानेयेषांतेतथोक्ताः। शुद्धंब्रह्मतदेवक्षयोयेषांतेतथोक्ताःइतिवेतिपठित्वाकेचिद्व्याचक्षतेतत्त्वचिंत्यं १०

वासुदेवमहिम्नोऽनिकथितस्यापि कथनं न पूर्त्तिरितितत्राह॥ सवागिति॥ यस्मिन् निबंधे प्रतिश्लोकमपशब्दाद्यबद्धवत्यपि शाद्वि केर्नु गुम्फिते देशकाल गुणेरनंतस्य हरेः पारिजातस्य हरणाद्यात्मकयशोलांछितानि नारायणादिनामानि संति साधवः परमभागवताः शुकादयो यच्च शृण्वंति गायंति गृणंति स जनताघः जनसमूहस्याघं पापं विप्लावयति नाशयतीति जनताघविप्लवः वाचां विसर्गः विशिष्टरचनाविशेषरूपेकान्वयः यस्मिन्संति प्रशस्तानि अनंतस्य नामानि साधवः शृण्वंतीति यत् यस्मात् तस्मात् स एव वाग्विसर्ग इति वा। जनताघपापविनाशहेतुत्वात्सज्जनस्पृहीतत्वाच्च वासुदेवमाहात्म्यप्रतिपादकमेव शास्त्रं नान्यत् तस्माद्देवशास्त्रप्रणेतृत्वमीरवनीयमिति भावः ११ न केवलं वासुदेवमहिमद्योत

सवाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्य यशोंकितानि यत्शृण्वंतिगायंतिगृणंतिसाधवः ११ नैष्कर्म्यमप्यच्युतभाववर्ज्जितं न शोभते ज्ञानमलं निरंजनं॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं १२

कयशोंकविधुरशास्त्ररचनमेवमोघं किं तु हरिभक्तिविरहितनिर्निमित्त ज्ञानकर्मणी अपि निःफले एवेति विज्ञापयतीत्याह॥ नैष्कर्म्यमिति॥ नैःकर्म्यस्वतो निष्कर्मणो मुक्तेः साधनं अलं निरंजनं विषयसंमार्जनमलरहितं अत्यंतविरक्तिमद्वेदाद्यर्थविषयेपरोक्षज्ञानमप्यच्युतभाववर्ज्जितं भगवद्भक्तिरहितं हरावच्युततया निरंतरभावनया मनोयोजनेन रहितं वा न शोभते अधिकारिणो भीष्टफलं न प्रकाशयति। वंधकतया शश्वत्सर्वदा भद्रममंगलं ईश्वरे हरौ न चार्पितं कर्म न शोभत इति कुतः पुनः किमु वक्तव्यं यद्यप्यकारणं फलकामनादिविधुरं तथापीत्यर्थः। शश्वदभद्रमनुष्ठानकाले फलकाले वा मंगलं यत्काम्यकर्म न शोभत इति कुतः पुनः यद्यदस्य कारणं नित्यं कर्म हरौ नार्पितं चेन्न शोभत इति किं वक्तव्यमिति वा। अच्युतभाववर्ज्जितमित्यनेनापरोक्षज्ञानस्य भक्तिसाध्यत्वात्परोक्षोपयद्गमेवात्र ज्ञानं विवक्षितमिति ज्ञायते १२

अधुनालं वुद्धिहेतुं विज्ञापयतीत्याह। अत इति। हे महाभाग अपरिमितभाग्यनिष्ठेउक्तप्रकारेण कर्मज्ञानयोर्हरिभक्तिरहितयोर्निःफलत्वाद्धर्मादीनामल्पकथने नापि पूर्त्तिर्भगवन्महिम्नोऽतिकथितेनाप्यपूर्त्तिरेवेति यतः साक्षाच्छुचिश्रवाः विष्णुरेवातएव सत्ये निर्दुःखानंदानुभवे रतोऽतएव शरणागतपालनादिरूपं व्रतं येन स तथा। अत एवामोघज्ञानोऽत एव भवान् कृत्स्नस्य सकलसज्जनसंसारवंधनविध्वंसनाय उरुक्रमस्य वद्दशपराक्रमस्य तव जगत्सृष्टिपालनादिविशिष्टचेष्टितं तत् समाधिना दर्शनगुह्यसमाधिभेदेन त्रिधा भिन्नानां भावानां मध्ये यथास्थितवस्तुकथनलक्षणस्य तवय

समाधिभावयानुस्मर भगवन्महिमप्रतिपादकश्रीभागवताख्यग्रंथं कुरु ते न कृतावतारप्रयोजनालं वुद्धिर्भविष्यतीति भावः। अखिलधर्मगुप्तये

अतो महाभाग भवानमोघदृक्शुचिश्रवाः सत्यरतो धृतव्रतः। उरुक्रमस्याखिलबंधमुक्तये समाधिनानुस्मर तद्विचेष्टितं १३ अतोन्यथा किंचन यद्विवक्षितं पृथग्दृशस्तत्कृतरूपनामभिः। न कर्हिचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदं १४

इति पाठे समस्तभागवतधर्मरक्षणायेत्यर्थः १३ केवलधर्मादिविषयशास्त्रकृत्यानर्थोपि भवतीति ज्ञापयतीत्याह। अतोन्यथेति। अत एव भगवन्महिम्नोन्यथाविरुद्धतया यद्धर्मादिपुरुषार्थकथनाय विवक्षितं तत् किंचन यत्किंचित्पुरुषार्थोपयोगि कुतस्तत्कृतरूपनामभिन्नास्विर्गुणस्य धर्मादिफलत्वेन प्रतिपादितस्वर्गादिगतलावण्यादिरूपमनकलिकेत्यादिनामवत्पदार्थैः पृथग्दृशस्तेमम सुखहेतव इति वस्त्वयथार्थज्ञानिनो रागादिदोषदुष्टत्वेन दुःस्थिता मतिः कर्हिचित्क्वापि कस्मिंश्चिद्विषयेपि समुद्रे वातेन वायुना आहता विघटिता नौस्तरी वास्पदमाश्रयं न लभेत तस्यैकान्वयः। तस्मात्केवलधर्मादिविषयशास्त्रकृतिरनर्थकरीति भावः॥ अतोन्यथा श्रीभागवतकृतिमंतरेण यत्किंचनग्रंथकरणं विवक्षितं तद्रचितकल्पितरूपनामभिर्मुग्धस्येति वाच शब्दान्नरकपातफलमेव स्यादिति सूचयति १४

भा॰ प्र॰
३२

नकेवलमनर्थकार्यं भवेदन्येषां निंदितधर्मकरिणेति ज्ञापयति॥ जुगुप्सितमिति। स्वतएव प्रवृत्तिधर्मादिषु रागिणोऽनुशासनं प्रवृत्तिधर्मादिकृते ऽनुशासनं कुर्वितिशरणं जुगुप्सितं त्वाहशैरितिशेषः नकेवलं निंदितं किंतु महान् व्यतिक्रमः हृद्धादधःपतितस्यदंडेनताडनवत्रिःसीमोन्यायः कुतः सयत्नमारणं कुरुतइति न्यायाद्वा वाक्यतो धर्मइतितस्य जनस्य इतरः स्थितो जनो निवारणं न मन्यतइत्यन्वयः॥ यस्यत्वाहशस्य वचनाद्धर्मोयमित्युषितस्य प्रवृत्तिमार्गस्थितस्य जनस्य तस्मिन् निवृत्तिमार्गस्थितो जनः शुकादिर्नायं धर्मः न चरतेति निवारणं न करोतितस्मात्ताहशं ग्रंथं कृतिरनपेक्षितेतिभावः १५ समाधिभाषात्मकग्रंथेधिकार्यभावात्तु परस्य नइतिन वक्तव्यमिति विज्ञापयति। विचक्षण इति॥ निवृत्तितो गुणेः प्र

जुगुप्सितं धर्म्मकृतेऽनुशासनं स्वभावरक्तस्य महान् व्यतिक्रमः। यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः
१५ विचक्षणोऽस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखं। प्रवर्त्तमानस्य गुणैरनात्मनः ततो भवान् दर्शय चेष्टितं विभोः १६

वर्त्तमानस्यानात्मनोस्यानंतपारस्य विभोः सुखं विचक्षणो वेदितुमर्हति यस्मात्ततो भवान् प्रवर्तस्वविभोश्चेष्टितं दर्शयेत्यन्वयः॥ अनुष्ठितनिवृत्तिधर्मात्सत्वादिगुणैर्जगत्सृष्ट्यादौ प्रवर्त्तमानस्यास्वामिकार्यस्यास्य जीवस्यापरिमितमूर्त्तेर्विभोर्भगवतः सकाशाद्यद्विध्यत्सुखं भवतितत्सुखं विचक्षणो विशिष्टाचार्यः सात्विकप्रकृतिर्ज्ञातुं योग्यइतियस्मात्तस्माद्विभोः सर्वगस्य हरेश्चरितं समाधिभाषात्मकग्रंथकरणेनज्ञापयेत्यतोधिकार्यभावान्नोपरंतव्यमितिभावः॥ अनात्मनो बुध्यादेर्गुणैः सत्वादिभिः शब्दादिषु प्रवर्त्तमानस्यजनस्य सुखाय विभोश्चेष्टितं दर्शयेतिवा १६

रं

इतोपि प्रवृत्तिधर्मोपदेशान्निवृत्तिधर्मोपदेशो वरीयानित्याह। त्यक्त्वेति॥ अथ स्वधर्मं त्यक्त्वा हरेश्चरणांबुजं भजन् ततः यद्यपक्वः पतेदमुष्यक्वका भद्रमभूत्। स्वधर्मं तु जतां कोवार्थ आप्तइत्यन्वयः॥ भगवद्विषयस्वधर्मानुष्ठानात्मकप्रवृत्तिधर्मं त्यक्त्वा निवृत्तिधर्मविधायकशास्त्रोक्ताचारैः पादपद्मं सेवमानः पुरुषस्तस्मादनधिगतापरोक्षज्ञानादितत्फलपरिपाकोऽन्तरायविहतः स्खलेत्तथाप्यमुष्य पुंसः किं भवति धर्मात्मत्यादिप्रमाणाद्यत्र क्वचाजन्मांतरे श्रीमदादिकुलोद्भूतस्य निवृत्तिधर्मात्मकं भद्रमेवानुनिश्चितं यत्र दत्ती तत्वेन भगवत्पदद्विवनारदशुकवित्यत्वेवकेवलं प्रवृत्तिधर्मं भजतां मनुतिष्ठतां अस्खलने पि धर्मादिषु कोवापुरुषार्थआप्तो न कोपीतिभावः॥ तस्मान्निवृत्तिधर्मेषिविधायकशास्त्रं भवानू करोत्विति प्रार्थये १७ तस्माद्विवेकिनाप्रवृत्तिधर्मं विहायनिवृत्तिधर्मएवानुष्ठेयइत्याह। तस्येति। कोविदस्तस्यैवहेतोः

त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि॥ यत्र क्व वाभद्रमभूदमुष्य को वार्थ आप्तोऽभजतां स्वधर्मतः १७ तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः॥ तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा १८

प्रयतेत उपर्यधोभ्रमतां यन्नलभ्यते गभीररंहसा कालेनान्यतः सर्वत्रतत् अदुःखवत्सुखं लभ्यतइत्यन्वयः॥ अनंतपारस्येति हरेर्मुख्यप्रसादलभ्यं यत्सुखं मुक्तं तस्यैव हेतोर्नान्यस्य तत्सुखहेतुनिवृत्तिधर्मात्मसाधनस्यार्थं प्रयत्नं कुर्याद्यत्सुखं भूस्वर्गादिषु प्रवर्त्तमानानां प्रवृत्तिधर्मिणां पुरुषाणां न सुलभं॥ निरंतरं निवृत्तिधर्मं सेवमानानामव्यक्तवेगेनानेकजन्मपरिमितेन कालेनान्यतः सर्वदेवेभ्योनंतमित्राद्धरेः सर्वदेशकालेषु निर्दुःखस्वरूपसुखमभिव्यज्यते। तस्मान्निवृत्तिधर्मएवश्रेयानितिभावः॥ यथा पापिना प्रयत्नमंतरेण दुःखं लभ्यते तथा निवृत्तिधर्माणामविसाधनसामग्रीविनानिरायासेन सुखं लभ्यतइत्यस्मिन्नर्थे दुःखवदितिदृष्टांतो वा स्वर्गादौ भ्रमतां यत्सुखं न लभ्यते विवेकी तस्यैव सुखस्य हेतोः प्रयतेत॥ एवं राजस्यावस्थामाहतदिति। अन्यतो विषयभोगात्प्रयत्नदुःखोपेतं सुखं तद्गभीररंहसा कालेन सर्वत्र लभ्यते तस्मा

इतोपिनिवृत्तिधर्म एवश्रेयानित्याह। नवा इति। अंगहेभगवन्मुकुंदसेवीजनोन्यवत् मुकुंदासेवमानवज्जातुकदाचिदपिकथंचनकस्माच्चिन्निमित्ता
त्संसृतिंनव्रजेद्वैविशाहेननहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छतीतिवाक्यंप्रामाण्ययतिकुतइतितत्राहस्मरन्निति। मुकुंदस्यमनसाचरणा
रविंदालिंगनसुखंस्मरन्नुअनुभवन्रसज्ञोजनःपुनर्विहातुंनेच्छेदित्यन्वयः १९ मुकुंदस्वरूपमाह। इदमिति। सभगवानिदंविश्वमिवनतुवि
श्वंकिंतुइतरः जगद्विलक्षणलक्षणः। कुतः जगत्स्थाननिरोधसंभवइतियतः जगत्स्थापयतिनिरोधयतिसंभावयतिउत्पादयतीतितथो
क्तः॥ जगत्स्रष्टृत्वादिलक्षणलक्षितसार्वज्ञसर्वस्यात्मसर्वशक्तिसर्वसामित्वाद्युपगुणपूर्णत्वादसार्वज्ञत्वादिगुणविशिष्टाज्जगतोभेदो
तुमर्हसिदृइतिहिशङ्क्यः। किंच। भवान्स्वयंतत्स्वरूपंवेदजानातिहियस्मात्तस्मादैक्यकथनंप्रमाणविरुद्धमितिभावः। तथापिभवतःसर्व

नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं। स्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहीजनः १९
इदंहिविश्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाः। तद्धिस्वयंवेदभवांस्तथापिप्रादेशमात्रंभवतःप्रदर्शितं २० त्वमा
त्मनात्मानमवेह्यमोघदृक्परस्यपुंसःपरमात्मनःकलां। अजंप्रजातंजगतःशिवायतन्महानुभावाभ्युदयोनुगण्यतां २१

सिद्धंनमयावक्तव्यंशोस्तिअपुपापायपुरोबालवदल्पाकृतात्काशसदृशज्ञानवतःभवतःकेवलप्रादेशाकाशपरिमितंज्ञानंप्रदर्शि
तमयेतिशेषइत्यन्वयः २० तद्धिस्वयंवेदेत्युक्तंविविच्यविज्ञापयति। त्वमिति। हेअमोघदृक्त्वमजमात्मानंपरस्मात्मनःपरस्यपुंसःकलां
जगतःशिवायप्रजातमात्मिन्नानेवैहीत्यन्वयः। आद्यानादिकर्तुःपरमपुरुषस्यांशंभवती एवंत्वतएवपरोपदेशमंतरेणजानासि। अतस्तो
हलउर्ध्व। अन्यथामोघदृक्कृत्वमेवानुपपन्नंस्यात्। तद्धिस्वयंवेदेतिचविरुद्धंस्यात्तन्महानुभावाभ्युदयःतस्यतवमहासामर्थ्यलक्षणोद
रितोदयः लोकहितायगण्यतांप्राधान्येनसंख्यायकथ्यतांतेनजगतःशिवंभवतीत्यभिप्रायः २१

भागवन्महिमाभ्युदयवर्णनात्कथंजगतःशिवंस्यादितितत्राह॥ इदमिति। यदुत्तमश्लोकस्यहरेर्गुणानुवर्णनंइदंहिपुंसस्तपआदेरपरोक्षार्था
न्तहारामोक्षसाधनत्वात्कविभिर्विनष्टफलात्मकोर्थोनिरूपितः हिशब्दोवधारणेहेतौवातपःकायक्लेशलक्षणंश्रुतंशास्त्रश्रवणंसि
ष्टंअजमकल्पतयायजनंसूक्तमध्ययनंबुद्धेज्ञानंदत्तंदानंएवंहरिमहिमानुवर्णनेनसर्वस्यशिवसंभवान्नदैक्यकर्तव्यमितिभावः २२
इदानींहरिकथाश्रवणादिशिवकरमितिवक्तुंस्वातीतजन्मकथनपूर्वकंस्वस्यभागवतसंगतिप्रकारमाह॥ अहमिति। पुराशब्दस्याती
तकालसामान्यवाचित्वेननिश्चयानुदयात्तदर्थंमतीतेत्युक्तं। अतीतेतीतजन्मनीत्यर्थः। तुशब्दइतरदासीजातिवैशिष्ट्यद्योतनार्थः

इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धदत्तयोः। अविच्युतोर्थःकविभिर्निरूपितोयदुत्तमश्लोकगुणानु
वर्णनं २२ अहंपुरातीतभवेऽभवंमुनेदास्यास्तुकस्याश्चनवेदवादिनां। निरूपितोबालकएवयोगिनांशुश्रूषणेप्रावृ
षिनिर्विविक्षतां २३ तेमय्यपेताखिलचापलेर्भकेदान्तेऽधृतक्रीडनकेनुवर्तिनि। चक्रुःकृपांयद्यपितुल्यदर्शनाःशु
श्रूषमाणेमुनयोल्पभाषिणि २४

योगिनांसमासिनां। कथंभूतस्यप्रशंसायांलोल्यादिदोषरहितोबालःप्रावृषिवर्षाकालेनिर्विविक्षतांएकत्रस्थितिमिच्छतां २३ शिष्यगु
णानतेषांप्रवृत्तिमाह॥ तइति। निरस्तसमस्तचंचलस्वभावेजितहादीद्रियेनियहवतिअतएवनिरस्तबालक्रीडासाधनेअनुकूलवर्तिनि
परिचरति। आत्यल्पबालविग्रहधारिणिमयितेयोगिनोनुग्रहलक्षणांकृपांचक्रुरित्यन्वयः। किंविशिष्टाःकल्पदर्शनाःयद्यपितुल्य
गुणक्रियारूपैःसमंब्रह्मपश्यंतःयथाच्छिन्नवक्रदर्शिनोवातथापीतिशेषः २४

किंच तच्छुश्रूषाकर्मेति तत्राह॥ उच्छिष्टेति। ब्रह्मकुलोद्भवानामेव चतुर्थाश्रमप्रतिप्रकाशनाय द्विजैरिति कथितं। उच्छिष्टपात्रेऽवशिष्टांगोमयो
दकेन मार्जनं वा तत्स्थलेलेपनं तत्रानुज्ञातः। न हि शूद्रस्य तदनुज्ञानाभावे न उच्छिष्टस्पर्शनं सुतरां तद्भक्षणं वा शक्यं। लिप्यंते उपदिश्यंते
सिध्यंते प्राणा एतैरिति लेपा ओदनाद्युच्छिष्टान्नामोदनानामदनं प्रत्यनुज्ञातइति वा। अनेन स्वशरीरयात्रानिर्वाहमाह तदनुवर्त्तित्वस्य
माहात्म्यमाह सकृदिति। चशब्द एवार्थे यतयः सकृदेव भुंजते तथाहमपि सकृदेव भुंजे न तत्फलमाहृतवदिति। तेन कर्मणा सकृद्भोजनेन अपास्तं नि
रस्तं किल्विषं पापं यस्य स तथा। ततः किमभूदिति तत्राह। एवमिति। एवमुक्तप्रकारेण प्रवर्त्तमानस्य विशेषेण शुद्धांतःकरणस्य ते

उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्विषः। एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजाय
ते २५ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः। ताः श्रद्धया मेनुसवं विशृण्वतः प्रियश्रवस्यंगतदा
मवन्मतिः २६

षां परमहंसानां धर्मे विषयवैराग्यलक्षणे भगवत्कथाश्रवणाद्युपासनलक्षणे वा आत्मरुचिरुत्कंठा प्रजायते इत्यन्वयः। संततानुवृत्तिस्व
वनाय लट्प्रयोगः २५ आत्मरुच्या किं जातमिति तत्राह। तत्रेति। तत्र तत्सकाशे मनोहराः कृष्णकथाः अनुदिनं प्रातःसवनादंततं प्रगा
यतां कीर्त्तयतां परमहंसानां अनुज्ञातलक्षणानुग्रहेण अशृणवमित्यन्वयः। अंग श्रीवेदव्यास तदा श्रद्धया अनुसवं त्रिसवमर्पिताः कथा
विशेषेण शृण्वतो मे मतिः ध्यानलक्षणोपासना प्रियश्रवसि परममंगलकीर्त्तौ हरावभवदित्यन्वयः २६

अखंडस्मरणोपासनाफलमाह। तस्मिन्निति। रागाद्यवद्यैरनुपहतत्वादस्खलिता निरंतरं स्थिरतया अखंडोपासनमभवदित्यन्वयः। अहं यया अखंडोपा
सनया एतत्सदसत्कार्यकारणात्मकं जगन्मयि स्थिते बिंबभूते ब्रह्मणि पूर्णे हरौ तत्सृष्टं तत्पालितं तत्संहृतं वेति पश्ये। कथं कल्पितं स्वमायया स्वे
च्छया मदनुग्रहाभिमुख्यया वाच्छायतामिति कल्पितं संकल्पितमित्यन्वयः। ब्रह्मण्यध्यस्तं जगत्पश्ये इत्यंगीकारो मिथ्याज्ञानित्वप्रसंजने नहि
शुक्त्यध्यस्तं रजतं पश्यन्यथार्थज्ञानी भवति किं तु नेदं रजतं शुक्तिरेवेति पश्यंस्तथा नेदं जगत्किं तु ब्रह्मैवेति न चात्र तथेत्यलमतिप्रसंगेन २७ म

तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम। ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे २७
इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेनुसवं यशोमलं। संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा २८
तस्यैवं मेनुरक्तस्य प्रश्रितस्य हतैनसः। श्रद्दधानस्य बालस्य दांतस्यानुचरस्य च २९ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं।
अन्ववोचन्गमिष्यंतः कृपया दीनवत्सलाः ३०

तदुपासनयोरन्योन्यनिमित्तनैमित्तिकभावो ध्वनित्यभिप्रेत्याह। इत्थमिति। इत्थमुक्तप्रकारेण मुनिभिः सर्वज्ञैर्योगिभिः सम्यक्कीर्त्यमानं अमलं ह
रेर्यशः अनुसवं शरत्प्रावृषिकावृतू विशेषेण शृण्वतो मम हरौ तदितरविरागवती। आत्मनो मनसो रजोगुणतमोगुणनिमित्तरागाद्यन्यथा
ज्ञानादिदोषहरा महत्त्वज्ञानलक्षणा भक्तिः प्रवृत्ताभूदित्यन्वयः २८ ननु सद्गुरूपदेशमंतरेण केवलं यशःश्रवणेनैव कथं ज्ञानोदय इति
चेत्तत्राह। तस्येति २९ गमिष्यंतश्चातुर्मास्यानंतरं ३०

भा॰प्र॰ ३१ एतस्मयोक्तं ज्ञानं तापत्रयात्मकसंसारनिवर्त्तकौषधं समीचीनं सूचितं लोकस्यातिशोकात्तस्मादेतादृशं ज्ञानमेवापाद्यमिति भावः तर्हि कर्मकरणाद्यर्थमिति तत्राहायदीति। यायजूकैः क्रियमाणमग्निहोत्रादि तदपि यदि ब्रह्मणि अपरिच्छिन्ने ईश्वरे ईशादपि परे हरौ भावितमर्पितं तर्हि ज्ञानमुत्पाद्यते तेन तापत्रयविकित्सितं। एतदुक्तं भवति ब्रह्मार्पणबुध्या क्रियमाणेन कर्म्मणा शुद्धान्तःकरणस्य विषयविरक्तिद्वारा भगवति तीव्रया भक्त्या जनितात्मज्ञानेन तापत्रयात्मकः संसारो निवर्त्तत इति यत ब्रह्मणि भावितं कर्म्म तदेव तापत्रयविकित्सितं संसूचितमित्यन्वयो वा ३२ ननु कर्म्मणां बंधस्वभावात् कथं तापत्रयभैषज्यमिति तत्राह। आमय इति। सुखमेव इत्यनेन सतथा तस्य संबुद्धिः हेसु

३६

येनैवाहं भगवतो वासुदेवस्य वेधसः। मायानुभावमविदं येन गच्छंति तत्पदं ३१ एतत्संसूचितं ब्रह्मंस्तापत्रयविकित्सितं॥ यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितं ३२ आमयो यश्च भूतानां जायते येन सुव्रत। तदेव ह्यामयं द्रव्यं न पुनाति विकित्सितं ३३ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः॥ त एवात्मविनाशाय कल्पंते कल्पिताः परे ३४

व्रत सत्यसंकल्पादिव्रतोपेतेति वा येन द्रव्येण भूतानां यं आमयः श्लेष्मादयो जायते। तदेवामयकारणं द्रव्यं विकित्सितं मौषधीकृतं तद्रोगलक्षणं पुनाति परिहरति हि तत्त्विदमनुभवसिद्धमिति हि शब्दार्थः। एवकारः कृतस्य प्राधान्यद्योतनार्थः। ननु द्रव्यांतरनिषेधार्थः। कुतः औषधीकरणाय द्रव्यांतरसंयोगदर्शनात् चशब्दः उपमार्थः सद्यथा ३३ एवं तथा नृणां संसारिणां क्रियालक्षणा योगा उपायाः स्वतः संसारहेतवः। त एव क्रियायोगाः परे पूर्णे ब्रह्मणि कल्पिता अर्पिताः आत्मविनाशाय अनेकजन्मसंचितदुष्कर्म्मवासनानाशाय कल्पंते तस्मात्केवलं कर्म्म बंधकं ब्रह्मार्पणेन औषधीकृतं भक्तिज्ञानद्वारा संसाररोगनिवर्त्तकमिति भावः ३४

राम
३६

ज्ञानद्वारा कर्म्मणो मोचकत्वमाह॥ यदिति॥ अत्र कर्म्मभूमौ भगवदर्पणेन भगवत्परितोषणं यत्कर्म्म जीवैः क्रियते यद्भक्तियोगसमन्वितं परोक्षापरोक्षापदं ज्ञानं तद्ज्ञानं तस्य कर्म्मणोऽधीनं हि कर्म्मणा ज्ञानमातनोति ज्ञानेनामृती भवति अथामृतानि कर्म्माणीति श्रुतेः। कर्म्मणा ज्ञानं जायते हि यस्मात्तस्मात्कर्म्म ज्ञानद्वारा बंधनिवर्त्तकमिति भावः। अत्राग्निहोत्रादिकर्म्मसु यत्कर्म्म भगवत्परितोषणमिति वा ३५ कथं

यदत्र क्रियते कर्म्म भगवत्परितोषणं। ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ३५ कुर्वाणा यत्र कर्म्माणि राम भगवच्छिक्षयासकृत। गृणंति गुणनामानि कृष्णस्यानुस्मरंति च ३६

कार्यं कर्म्मणा ज्ञानमुत्पद्यत इति तत्राह॥ कुर्वाण इति। यत्र यस्य यजमानस्यार्थे यस्मिन् यज्ञे हवनादीनि कर्म्माणि कुर्वाणा वैदिका ऋत्विगादयः सर्वे त्वयः सततं विष्णुर्विसर्ज्जनेन ज्ञानुविदिति भगवच्छिक्षयाः सकृन्निरंतरमादिमध्यावसानेषु वा कृष्णस्य गुणानुस्मरंति नामानि गृणंति॥

३६

भा॰प्र॰
३७

योयजमानः स्वयंवनित्यमोंनमोभगवतइत्यादिमूर्त्यभिधानेनमूर्तिवाचकेनमंत्रेणमंत्रशनिरपाधमूर्तिंअमूर्तिकंप्रकृतिचैकृतविग्रहविधुरंवा
सुदेवादिरूपंयज्ञपुरुषंवत्वारिशृंगात्रयोअस्यपादाइत्याद्युक्तचतिपाद्याकारंभगवंतंउद्दिश्ययजतेसपुमान्यजमानःपरोज्ञापरोक्षज्ञानवान्
भवतितितवकत्विग्गृह्यःसम्यक्दर्शनाःसमीचीनशास्त्रीयज्ञानाःसद्यज्ञाश्चसम्यक्भगवंतंदर्शयंतिज्ञापयंतीतिसम्यग्दर्शनाः।सर्वेषांद्द
रिपरायणत्वात्ॐसर्वगुणपूर्णसर्वजनरंजकेतिवाॐमित्येकंरूपंभगवतेषड्गुणपूर्णायतुभ्यंनमः।सर्वत्रवसतिदीव्यतीतिवासुदेवः
बलज्ञानरूपत्वाद्दैत्यनिरासनशीलत्वात्क्रीडाशीलत्वाद्वातस्मैधीमहिस्मरेमप्रकृष्टंद्युम्नंहिरण्यमेववरूपंयस्यसःप्रद्युम्नःहिरण्यश्मश्रुर्हि

ॐनमोभगवतेतुभ्यंवासुदेवायधीमहि।प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ३७ इतिमूर्त्यभिधानेनमंत्रमूर्ति
ममूर्तिकं।।यजतेयज्ञपुरुषंससम्यग्दर्शनःपुमान् ३८ इमंस्वधर्मनियमम वेत्यमदनुष्ठितं।अदान्मेज्ञानमैश्वर्यंस्वस्मि
न्भावंचकेशवः ३९

रण्यकेशआप्रणखात्सर्वएवसुवर्णइतिश्रुतेः।तस्मैनकेनापिनिरुद्धइत्यनिरुद्धः।अनेनमुख्यप्राणःसोऽस्याङ्गीत्यभीतेनानिनाप्रमुख्यप्राण
प्रसादवतापुरुषेणरुद्धःवशीकृतइतिवा।अनिरुध्यःसंसारमुक्तांश्चानुद्धातिधारयतिपोषयतीतिवा।अनिरुद्धमुदाख्यंनामयत्रइतिवातस्मै
दितिनामेतिश्रुतेःतस्मै।नसम्यक्पापकर्षणशीलत्वात्संकर्षणः।समीचीनंकरंसनोतिददातिइतिवातस्मैचशब्दःप्रत्येकंपृथक्मंत्रत्वद्यो
तनार्थःइतिशब्दःप्रभृतिवचनः।तस्मादृत्विगादिभिर्वैष्णवैर्यजमानाभगवंतमीजानानांज्ञानवंतोभवंतीतिभावः ३७ ३८ स्वानुभवंति
द्धमेतद्दितिविज्ञापयति।इमम्मिति।केशवःमदनुष्ठितमिमंस्वधर्मनियममवेत्यऐश्वर्यमीश्वरविषयंज्ञानंस्वस्मिन्भावंभक्तिंचमेमह्यं

इदानीमवतारप्रयोजनमलंबुद्धिकारणविज्ञापनमुपसंहरति।।त्वमिति।हेअदभ्रश्रुतश्रोतामनेत्यादिःसंपूर्णश्रोत्रत्वात्सगुणसंपन्नत्वंईश्वरो
पिऐश्वर्यादिगुणसंपन्नत्वेनात्रमार्थविश्रुतोपिसज्जनवात्सल्यादेवयेनतत्कीर्तिगर्भग्रंथकरणेनविद्वांविद्वांवाविंदंतीतिविदोज्ञानलाभकामाःतेषां
वाविचारकाणांवाबुभुत्सितंज्ञातुमिष्टंसमाप्यतेसंपूर्णंभवतितादृशंश्रीभागवतलक्षणंविभोःसमर्थस्यतवविश्रुतंयशःप्राख्याहिप्रख्यापयेत्यत्र
यःतस्मादस्मेवांभागवतकरणशक्त्यभावानत्कृतिरेवालंबुद्धिकारणमितिभावः ४० इतिश्रीटीकायांप्रथमेपंचमः इदंव्यासनारद

त्वमप्यदभ्रश्रुतविश्रुतंविभोःसमाप्यतेयेनविदांबुभुत्सितं।प्राख्याहिदुःखैर्मुहुरर्दितात्मनांसंक्लेशनिर्वाणमुशंतिनान्य
था ४० इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेपंचमोध्यायः सूतउवाच एवंनिशम्यभगवान्देवर्षेर्ज
न्मकर्मच।भूयःपप्रच्छतंब्रह्मन्व्यासःसत्यवतीसुतः १ व्यासउवाच भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिस्तव।
वर्त्तमानोवयस्याद्येततःकिमकरोद्भवान् २

संवादोपाख्यानंसूतःशौनकादिभ्योब्रवीदितिविज्ञापयितुमाहएवमिति।हेब्रह्मन्सत्यवतीसुतोव्यासःदेवर्षेर्जन्मकर्मचएवंश्रुत्वापुनरपि
तंनारदंपप्रच्छेत्यन्वयः १ नारदस्नेहपाशात्तद्यशःख्यापनायवसर्वज्ञोपिव्याससन्हृदयःशेषवृत्तिंपृच्छति।।भिक्षुभिरिति।।तवविशिष्ट
ज्ञानोपदेष्टृभिर्भिक्षुभिर्ज्ञानभिक्षादानशीलैर्विप्रवसितेदेशांतरंगतेआद्येवाल्येवयसिवर्त्तमानोभवान्तदनंतरंकिमकरोदित्यन्वयः २

भा॰ प्र॰ ३८

तदेव विविच्य पृच्छति स्वायंभुवेति। स्वयंभुवो ब्रह्मणः पुत्र ते तव परं ज्ञानोपदेशोत्तरकालीनं वयः कया वृत्त्या वर्तितं मरणकाले प्राप्ते इदं शरीरं कथं वा उदस्राक्षीः उत्सृष्टवानसीत्येकान्वयः ३ सर्वेषां पूर्वजन्मसंज्ञादीनां निराकृतिर्निराकरणं यस्मात्स सर्वनिराकृतिरेव कालः सुरसत्तम प्रा निवृत्तवानीत ब्रह्मकल्पविषयामेतां स्मरणशक्तिं नैव व्यवधात् तिरोहितां नैवाकरोत् आश्चर्यमेतदित्यस्मिन्नर्थे हि शब्दः। एवकारस्त्वव धारणार्थः॥ ४॥ विज्ञानस्य कीर्तिर्वितरणं यासां भिक्षूणां ते प्रायो नारदः तत्प्रश्नं परिहरति। भिक्षुभिरिति। उक्तार्थः श्लोकोयं ५ स्वस्य मन्मा सिनामननुगमने कारणमाह॥ एकात्मजेति। अहमेक एव आत्मजोऽपत्यं यस्याः सा तथा योषित् मध्ये मूढा विवेकज्ञानशून्या किंक

स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः। कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं ३ प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम। न ह्येव व्यवधात्काल एष सर्वनिराकृतिः ४ नारद उवाच भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम। वर्तमानो वयस्याद्ये तत एतदकार्षं ५ एकात्मजा मे जननी योषिन्मूढा च किंकरी। मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबंधनं ६ सास्वतंत्रा न कल्पासीद्योगक्षेमं ममेच्छती। ईशस्य हि वशे लोको योषा दारुमयी यथा ७

रीदासीव एवंविधा मम जननी न अन्या गतिराश्रयो यस्य सोऽनन्यगतिः तस्मिन्नात्मजे मयि स्नेहानुबंधनं चक्र इत्येकान्वयः ६ केवलं स्नेहमेव बंधवती न त्वशनवसनादिहानपूर्वकमित्याह। सेति। मम योगक्षेमं अप्राप्तस्य प्रापणं योगं प्राप्तस्य परिपालनं क्षेममिच्छती अस्वतंत्रा पराधीना कल्पा समर्था नासीदित्येकान्वयः। कुतो लोकः सेवको जनः ईशस्य स्वामिनो वशे हि यस्मात्तस्मादित्यर्थः। ईशावास्यमिति श्रुतेरीशस्य परमेश्वरस्येति वा कथमिव दारुमयी काष्ठनिर्मिता योषा यथा जडप्रवर्तकयंत्रपुरुषाधीना

॥ राम ॥

तर्हि किमिति तत्र वास इति तत्राह। अहमिति। चशब्द एवार्थः। पूर्वेण समुच्चयार्थो वा। अहं तस्याः मातुरपेक्षया तस्मिन् ब्रह्मकुल एव ब्राह्मणगृह एव ऊषिवानित्यन्वयः। कुलं वंशो गृहे सार्थं जाति साकर्थ्ययोरपी त्यभिधानात्। तत्र वासे हेत्वंतरमाह दिगिति दिगाद्यनभिज्ञाने कारणमाह बालक इति पंचहायनाः संवत्सरा यस्य स तथोक्तः योऽहं दिगाद्यनभिज्ञः पंचहायनो बालकः सोऽहमित्येकान्वयः ८ कियंतं कालमवात्सीदिति मातृमरणपर्यंतमवात्समिति परिहारमभिप्रेत्याह एकदेति। स्पृश उपतापे इति धातोः आक्रमणेन तमः। गां गोमतल्लिकां अदशत् अत्तद्यत्। कालेन मृत्युना चोदितः प्रेरितः ९ सोऽहं तदा मातुरंत्यकर्म कृत्वा तन्मरणं तत्कानामभीप्सतः ईशस्यानुग्रहं मन्यमान उत्तरां दिशं प्रातिष्ठ

अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया। दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ८ एकदा निर्गतां गेहाद्दुहंतीं निशि गां पथि। सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ९ तदा तदहमीशस्य भक्तानां शमभीप्सितः। अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां १० स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान्। खेटखर्वटवाटीश्च वनान्युपवनानि च ११

मित्यन्वयः १० एक एव सहायरहितः अहं तत्र उत्तरस्यां दिशि देशान् पुराद्भिः समेतान् अत्यतीत्य यातः। व्यालाश्च दुष्टगजाश्च उलूकाश्च शिवाः सृगाल्यश्च व्यालोलूकशिवाः तासामजिरं क्रीडास्थानं अतिभयाकारं स्वसुमाद्ध्य यदि विष्ठितं अतएव घोरं महदपारं विपिनमद्राक्षमित्येकान्वयः। सर्वर्तुसंपत्त्या स्फीतान् समृद्धान् पुराणि ग्रामाश्च व्रजाश्च आकराश्च पुरग्रामव्रजाकराः पुरं राजराजाश्रयः ग्रामो बहुजनाकीर्णः। गोपालानां गवां वनिवासस्थानं व्रजः। रत्नाद्युत्पत्तिस्थानं आकरः खेटान् मृगयोपजीवि वनप्रदेशान् पट्टनानि वाद्याश्रिताश्च योन्नाः ताः पट्टनवाटीः जलस्थलाद्युत्पत्तिस्थितराजधानी पट्टनं पुष्पोपजीविनां निवासस्थानं वाटी वृक्षसमुदायो वनं। आरोपितवृक्षसमुदाय

इमैर्गजैर्भग्नाभुजद्रुमाभूर्जद्रुमाये षुतेन तथोक्ताः। भूर्जपत्रे भुजो भूर्जे मृतत्वकुचर्ममल्लिकाविति यादवः। इभभग्नाः भुजाः शाखा येषां ते तथोक्ताः इभभग्नभुजद्रुमाये षुतेन तथोक्ताः इति वा तानू विचित्रधातुभिः नानाविधगैरिकहरितालादिभिः विचित्रा आश्चर्यरूपा अद्रयः गिरयः तान् शिवजलान् गुरुत्वादिदोषरहितान् जलाशयान् सरोवरादीन् जलाधारान् देवनिषेवितान् नलिनीः पुष्करिणीः १२ चित्रस्वनैर्नानाविधस्वरमधुरैः पत्ररथैः पक्षिभिः सह विभ्रमंतः इतस्ततश्चलंतः भ्रमरा भृंगाः विभ्रमत् भ्रमराः विभ्रमद्भ्रमराणां श्रीः शोभा यस्मिन् तथोक्ताः ताः। शराणां स्तंबाः शरस्तंबाः नलानि वेणवश्च शरस्तंबाश्च कुशाश्च कीचकाश्च तैर्गह्वरः निविडीकृतान्स्तथोक्ताः ताः। शराणां स्तंबाः शरस्तंबाः नलानि वेणवश्च शरस्तंबाश्च कुशाश्च कीचकाश्च तेन तथोक्ताः तैर्गह्वरः निविडीकृताः

विचित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान्। जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः १२ चित्रस्वनैः पत्ररथैः विभ्रमद्भ्रमरश्रियः। नलवेणुशरस्तंबकुशकीचकगह्वरं १३ एक एवातियातोहमद्राक्षं विपिनं महत्। घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं १४ परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः। स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः १५ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः। आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं १६

तत्र वातेन वायुना उद्धूतस्वनाः वेणवः कीचकाः उच्यंते १३ १४ तृषा परीतः पानीयपानेच्छुः बुभुक्षितो अन्नकामः अत एव परिश्रांतेंद्रियात्मा परिश्रांतानि इंद्रियाणि आत्मा च देहो यस्य सः तथोक्तः महारण्ये नद्या ह्रदे उपस्पृष्टः कृतपादप्रक्षालनादिकः स्नात्वा तर्पणादिसकलाः क्रियाः विधाय स्वादूदकं पीत्वा तेन हेतुना गतश्रमः अपगतालस्यो भूत्वा १५ मनुष्यसंचाररहितेरण्ये पिप्पलोपस्थे अश्वत्थमूले आश्रितः स्वस्तिकासन उपविष्टः समाहितचित्तो भूत्वा आत्मना विषयेभ्य आहृतेन मनसा आत्मस्थं हृदि संस्थितं आत्मानं परमात्मानं यथा परमहंसेभ्यः श्रुतं तथा अचिंतयमित्यन्वयः १६

राम

यथाश्रुतमचिंतयमित्येतत् दर्शयितुं जाग्रदाद्यवस्थास्वरूपं निरूपयति। स्वप्नाद्यवस्था आत्मनः परमात्मनः सकाशात् आत्मनो जीवस्य उत्पद्यंते इत्यन्वयः। तत्र एणोपात्तत्वात् आत्मशब्दस्य द्विरावृत्तिः कर्तव्या। जीवमनस्थितमायाख्यदृष्टश्रुतवस्तु संस्कारोपादानको जाग्रत्पदार्थसदृशकरितुरगाद्यनेकपदार्थदृष्टिरूपः स्वप्नः। सर्वेंद्रियोपरतिरूपत्वात् स्वप्नजागरितविषयग्रहणरहिता शय्या परपर्याया सुषुप्तिः नामरूपक्रियासु वृत्तिर्यस्य सतथोक्तः आभासः प्रत्ययः नामरूपक्रियाविषयप्रत्ययो जाग्रत्॥ एतदवस्थात्रयकारणं ब्रह्म न दृष्टादिवत् कार्यानुस्यूतं किं तु ततो विलक्षणं तदित्यभिप्रेत्याह संविदिति। सम्यक् विविक्ता प्रकृतिप्राकृतमिश्ररहिता वित् ज्ञानं यस्य तत्तथोक्तं सम्यग् निर्दोषमात्मानं वेत्तीति संवित् तदात्मानमेवावेदहं ब्रह्मास्मीति श्रुतेः। शाब्दं सर्वं निर्यत्तत्पद्यत इति पदं परम् उत्तमं स्थानमेवं नाम

स्वप्नशोभामायाग्रहः शय्या जाग्रद्रा भासमात्मनः। नामरूपक्रियावृत्तिः संविच्छब्दपरंपरं १७ नेंद्रियार्थेन च स्वप्नं सुप्तं न मनोरथं। न निरोधं वानुगच्छेत् चित्तं तद्भगवत्परं १८

दाद्यवस्थाकर्तृत्वेनात्मादि प्योत्यंतो यकारकं विशिष्टज्ञानघनं सर्वांतर्यामिश्रमव्यक्तमं तु यद्ब्रह्मस्वरूपं श्रुतं तदेवाचिंतयमिति भावः १७ एतदेव विविच्य दर्शयति। नेति चित्रमाश्चर्यरूपं चित्तं वा विभिन्नज्ञानात्मकं वा चितं वेत्तेर्जीवत्वायतत इति वा चित् ज्ञानं तनोतीति तानि नोज्ञानं वद्धूलीकरोतीति तदस्यैवं दृष्टातिशुरूपसुखेनेति वा चित्तरंते वा। सहि सर्वमनोवृत्तिशेरकः समुद्गाहृतदृतिस्मृतेः। चिनोतीति चितवेताप्रज्ञाब्रह्माणं तत्र तिष्ठतीत्यवतंते। चिनोतिसृजतिरमयतिवा तस्मादुत्तममिति वा भगवत् ऐश्वर्यादिगुणसामग्रीमत्पदं रूपं हरेरतिशेषः। ततं व्याप्तं भगवतः हरेः परं स्वाएवं विचित्तमहत्स्वादिसंबंधविधुरत्वादिंद्रियार्थं जाग्रदवस्थानानुगच्छेत् स्वप्नावस्थां न सुप्तावस्थां चिंतितोर्थो मनोरथ इत्यभिधानात्। न मनोरथमतएव न निरोधं मरणं अनुगच्छेदित्यस्य प्रत्येकमन्वयः। वशाद्धेविधः समुच

ननु कालेनो विश्वसृष्ट्युत्पत्तिदर्शनात्तत्कर्तृत्वं हरेः कथमित्याशंक्य सकलप्रपंचकर्तृत्वेन मुख्यकर्तृत्वान्नैतत्संपातिस्वभावस्थाकर्तृत्वं किं वक्ष्यामित्यपिप्रेत्य प्रपंचसृष्ट्यादिकर्तृत्वमाह॥ स इति। सृष्ट्यग्रे स एको भगवानासीदित्यन्वयः॥ स पुनः सिसृक्षुः अंतर्यामितया अवतारैश्च क्रीडिष्यन् क्रीडितुमिच्छन्नात्मनः स्वस्मात्स्वोदरात् ब्रह्मादिपरमाणुपर्यंतमिदं जगत्सृष्ट्वा अंतर्यामितया प्रविश्य प्रादुर्भावैश्च विहृत्य पुनश्च तत् जग्धा संहृत्य प्रलये केवल एकाकी उदास्ते। जीवप्रवृत्तिं प्रत्युदासीनो वर्तत इत्यन्वयः। जग्ध्वा उदास्त इति संध्यभावः प्रकृत्यादिप्रधानांतरमंतर्

> स एको भगवानग्रे क्रीडिष्यन्निदमात्मनः। सृष्ट्वा विहृत्य तज्जग्ध्वा उदास्ते केवलः पुनः १९ ध्यायतश्चरणांभोजं
> भावनिर्जितचेतसः। औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः २० प्रेमातिभरनिर्भिन्नपुलकांगोऽतिनिर्वृतः।
> आनंदसंप्लवे लीनो नापश्यमुभयं मुने २१

णा विसृष्टुं शक्त इति माहात्म्यं द्योतयितुं सृष्टिस्थितिसंहारकर्तृत्वमेव न ज्ञानादिकर्तृत्वमस्तीति वा १९ इदानीमुपास्तिफलमाह॥ ध्यायत इति। भावेन भक्त्या निर्जितं परमानंदमात्रं चेतो यस्य स तथा तस्य। उत्कंठया जातानामश्रूणां बाष्पाणां कलाभिः बिंदुभिर्युक्ते अक्षिणी यस्य स तथा तस्य। शनैः स्वप्रेम्णा स्वचरणकमलं ध्यायतो मे हृदि हरिरासीत् प्रत्यक्षोऽभूदित्येकान्वयः २० प्रेम्णातिशयितभारेण निर्भिण्णः समुल्लसन् जातः पुलकः रोमांचः प्रेमातिभरनिर्भिन्नपुलकांगो यस्य स तथा आनंदसंप्लवे सुखप्रलयोदके मग्नोऽहं तमेवापश्यमुभयं द्वितीयं समाधिकं वा नापश्यं सर्वात्ममत्वादित्यन्वयः २१

ततः परं किमभूदिति तत्राह। रूपमिति। मनःकांतं मनोहरं हरेर्यद्रूपं अद्राक्षं तत् सहसा अपश्यन् अवतीर्णो दुर्मना दुःखितांतःकरणः मुक्तिं प्रासः कैवल्यात् मोक्षादिव उत्तस्थौ उदतिष्ठमित्यन्वयः २१ पुनः हरेरूपं दिदृक्षुः हृदि मनः प्रणिधाय स्थित आतुरो रोगी वा वितृप्तः असंतुष्टो वीक्षमाणो अप्यहं नापश्यमित्यन्वयः २३ हरेर्भक्तवात्सल्यमाश्चर्यमिति दर्शयति। एवमिति। गिरां वाचाम् अगोचरः विषयो ईहयो यतं गंभीरया अगाधया श्लक्ष्णया मधुरया वाचा मानसीः शुचः प्रशमयन्निव नष्टाः कुर्वन्निव स्थितो हरिरेवं विजने जनसंचाररहिते देशे यतंतं मामाहेत्येकान्वयः २४ किमाह हरिरिति तत्राह॥ हंतेति। हंत विस्मये। भवानिह लोके अस्मिन् जन्मनि भूयो नो मां द्रष्टुं ना

> रूपं भगवतो यत्तन्मनःकांतं शुचापहं। अपश्यन् सहसोत्तस्थौ वैक्लव्याद् दुर्मना इव २२ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि। वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः २३ एवं यतंतं विजने मामाहागोचरो गिरां। गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव २४ हंतास्मिन् जन्मनि भवान्मा मां द्रष्टुमिहार्हति। अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनां २५ सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ। मत्कामः शनकैः साधु सर्वान्मुंचति हृच्छयान् २६

नू

र्हतीति कुतः कर्षणभोगेनायतेगच्छतीति कषायः पापं अभुक्तपापफलानां कुयोगिनां जन्मनानभिज्ञानेन वा कुत्सितः योगो ध्यानादि यस्य ते तथा तेषां पुंसां दुर्दर्शः द्रष्टुमशक्यः २५ तर्हि किमिति दर्शितमिति तत्राह। सकृदिति। अनघ सांसारिकदुःखरहित ते तव कामाय अथ कदानु पश्येयमित्युत्कंठायै तव किं फलमभूदिति तत्राह। मत्काम इति। मद्भक्तः पुरुषः क्रमेण सर्वान् हृच्छयान् शनकैः कामान् साधु मुंचतीत्यन्वयः २६

परमहंससेवाफलमाह। सदिति। दीर्घया बहुकालीनया सतां परमहंसानां सेवया परिचर्यया मयि दृढा मतिः मननलक्षणा भक्तिर्जाता वै यस्मादतः अवद्यं दोषरूपं शूद्रजातित्वादिमं लोकं देहं हित्वा पश्चाद्ब्रह्मपुत्रत्वेन जातस्त्वं मज्जनतां मम जनतां परमभागवतत्वं गंतासीत्यन्वयः २७ मयि निबद्धा इयं मतिः कदापि विपदि न विपद्येत न नश्येत। प्रजानां सर्गः सृष्टिः निरोधः संहार एतयोः स्मृतिनाशकयोः स्मृतिर्मोनिस्मरणशक्तिश्च न विपद्येत। कस्मात् मदनुग्रहात्। अनेन भगवदुक्तसंगोनिमित्तफलमित्युक्तं भवति २८ ईश्वरं ईशनशीलं सकलजनप्रवर्तनशक्तिमत। अलिंगं जडशरीररहितं तु द्रष्टुमन्यद्वा ईश्वरमित्युक्त्याभूतविग्रहवानयं हर इति शंकानिरासार्थं वा। लिंगमित्युक्तं। नभः लिंगं गमकं दृष्टांतत्वेन यस्य तत्तथोक्तं आकाशवत्सर्वगमित्यर्थः॥ तन्महद्भूतं ब्रह्म एतावदुक्त्वा विरराम ततो नानुकंपितः कृपापात्रीकृ

सत्सेवयादीर्घयावैजातामयिदृढामतिः। हित्वावद्यमिमंलोकंगंतामज्जनतामसि २७ मतिर्मयिनिबद्धेयंनविपद्येतकर्हिचित्॥ प्रजासर्गनिरोधेपिस्मृतिश्चमदनुग्रहात् २८ एतावदुक्त्वोपरराम तन्महद्भूतंनभोलिंगमलिंगमीश्वरं॥ अहंचतस्मैमहतांमहीयसेशीर्ष्णावनामंविदधेनुकंपितः २९ नामान्यनंतस्यगतत्रपःपठन्गुह्यानिभद्राणिकृतानिचस्मरन्। गांपर्यटंस्तुष्टमनागतस्पृहःकालंप्रतीक्षन्नपरोविमत्सरः ३०

तः। अहं च महतां महीयसे तस्मै महाभूताय शीर्ष्णा शिरसा अवनामं नमस्कारं विदधे कृतवानित्यन्वयः २९ गतत्रपः लज्जारहितः अनंतस्य हरेः कृतानि कर्माणि विक्रमलक्षणानि गां भूमिं यदृच्छालाभेनालंबुद्धिमान् गतस्पृहः परवस्तुस्पृहारहितः। पटगताविति धातोः पटो गतिः। न विद्यते गतिरीश्वरादन्या यस्य सोऽपटः। अनन्यगतिरित्यर्थः। असंगतो विरक्त इति वा। कषायादिप्रावरणरहितो वा। अत्रा अंत्रः अरणर्विरिति वाक्यात् अर इति संबोधनं वा। हे व्यास परः समर्थः। अपटो निकेतरहित इति केचित् तच्चिंत्यं। विमत्सरः विगतमात्सर्यः। एवंविधोहं मरणकालं प्रतीक्षमाणो भवमिति शेषः ३०

कृष्णे परमानंदघनात्मके हरौ मतिर्यस्य स तथा तस्य कालः मरणं प्राप्तः प्राप्तकाले प्रारब्धसमाप्तौ सौदामिन्याख्या विद्युद्यथा सहसा प्रद्योतते तथेत्यर्थः। तडिदित्याप्राप्तत्कालं सौदामिन्येरावतीवदिति देप्यमिमं त्रयमिति वचनात् कुतुपाउवत्पृथ्युक्तिर्दुष्पत इति भावः ३१ मयि शुद्धां निर्दोषां भागवतीं तनुं हरिमूर्तिं एवं प्रयुंजाने ध्यायति सति फलदानाय प्रारब्धकर्मविनाशवान् पंचभिर्भूतैर्निर्मितो देहो न्यपतदित्यन्वयः ३२ हरिध्यानरसुकस्वकं लोकं गत इति तत्राह॥ कल्पांत इति। अहं कल्पावसाने सृष्टमिदं विश्वमादाय स्वोदरे निवेश्य उदन्वतोंभसि शेषपर्यंके शयाने

एवंकृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः। कालःप्रादुरभूत्कालेतडित्सौदामिनीयथा ३१ एवंमयिप्रयुंजानेशुद्धांभागवतीं तनुं॥ प्रारब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः ३२ कल्पांतइदमादायशयानेंभस्युदन्वतः। शिशयिषोरनुप्राणंविविशेंतरहंविभोः ३३ सहस्रयुगपर्यंतेउत्थायेदंसिसृक्षतः। मरीचिमिश्राऋषयःप्राणेभ्योहंचजज्ञिरे ३४ अंतर्बहिश्चलोकांस्त्री न्पर्येम्यस्कंदितव्रतः॥ अनुग्रहान्महाविष्णोरविघातगतिःक्वचित् ३५

हरौ शिशयिषोः शयितुमिच्छोर्विभोर्विरिंचस्य अंतरनुप्राणं अंतर्गच्छन्तं श्वासमनु विवेश प्रविवेश प्रविष्टवानस्मीत्यन्वयः ३३ सहस्रयुगपर्यंते चतुर्युगसहस्रपरिमितस्वनिशावसाने विष्णोरुत्थायोत्पद्य इदं सिसृक्षतो विरिंचस्य प्राणाकादहं जज्ञे मरीच्यत्रिमुख्या ऋषयश्च तस्य प्राणेभ्यो जज्ञिर इत्येकान्वयः ३४ विष्णुनाम्नो यजमानादपि महतो विष्णोरनुग्रहादप्रतिहतगमनोऽस्खलितब्रह्मचर्यादिव्रतोऽहं त्रीन् लोकानंतर्बहिश्च पर्येमि पर्यटामीत्येकान्वयः ३५

भा॰ प्र॰
४२

तदेवाह देवेति। स्वरब्रह्मविभूषितां सप्तस्वरलक्षणवेदेनालंकृतां नाम्नादेवदत्तामिमां वीणां मूर्छयित्वा स्वरारोहणावरोहणक्रमेण मूर्छनां मतीं कारयित्वा हरिकथां गायमानो हं चरामीत्यन्वयः ३६ तीर्थं गंगाख्यं पादे यस्य सतीर्थपादः तस्य वीर्याणि चरितलक्षणानि प्रकृष्टं गायतः वशब्दस्त्वर्थः। एवमुपासकस्यैव मम चेतसि प्रियश्रवा भगवानाहूत इव शीघ्रमविलंबितं दर्शनं याति अपरोक्षी भवतीत्यन्वयः ३७ हरिचर्यानुवर्णनं समाधिभावयाभगवच्चरितवर्णनं यत्तदेतदातुरचित्तानां मात्रास्पर्शेच्छया शब्दादिविषयैरातुरचित्तानां क्षिप्तमनसां पुंसां भवसिंधुप्लवः संसारसागरतरी विशेषः दृष्टः सा क्षात्कृतः प्रमाणैरिति शेषः। इति यस्मात्तस्मात्सात्विकहितायैव वर्णनीयेति भावः॥

देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां। मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ३६ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः। आहूत इव मे शीघ्रं दर्शनं याति चेतसि ३७ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः। भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ३८ यमादिभिर्योगपथैः कामलोभहतो मुहुः। मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ३९ सर्वं तदिदमाख्यातं यत्पृष्टोहं त्वयानघ। जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ४०

३८ तर्हि यमादियोगानुष्ठानविधानं व्यर्थमिति तत्राह॥ यमादिभिरिति। मुकुंदकथासेवया यथात्मा जीवोंजसा शाम्यति भगवन्निष्ठ बुद्धिमान् भवति तथा कामलोभाभ्यां वैरिभ्यां हतः पीडितो नुष्ठितैर्योगमार्गैर्यमादिभिरद्धा न शाम्यति तस्माद्धरिकथासेवैव संसारतरीति कान्वयः ३९ उपसंहरति सर्वमिति। अतीतजन्मविषयत्वाद् रहस्यं मम जन्मकर्म च यदहं त्वया पृष्टः तदिदं सर्वमाख्यातं तुभ्यमिति शेषः। कीदृशं नित्यसंतुष्टस्य तवापि भवतः आत्मनो मनसस्तोषणं तुष्टिजनकं ... तदाख्यातमिति वा चशब्दः जन्मकर्मणोः समुच्चये श्रोतॄणामात्मनां जीवानां तोषणकमिति वा ४०

राम
४२

सूतः व्यासनारदसंवादं शौनकादीननुब्रूत इत्याह। एवमिति॥ वासवीसुतं सत्यवत्याः पुत्रं व्यासं एवं पूर्वोक्तप्रकारेण संभाष्य उक्त्वा गच्छामीति आमंत्र्य आज्ञां गृहीत्वा वीणां रणयन् ध्वनयन् ययौ। यादृच्छिकः अतर्कितागमनागमनः यतिः निर्जितेंद्रियग्रामः ४१ शार्ङ्गधन्वनो हरेः कीर्तिं माद्यन् मधुरयाभिरतंत्र्या वीणया गायन् आतुरं क्लिष्टं जगद्रमयति यः सोयं देवर्षिर्नारदः धन्यः कृतकृत्यः अहो आश्चर्यमेतत्। भूद्यो नैरप्यतादृशमाहात्म्यमभूदिति नारं ज्ञानं ददातीति नारदः। अरदो दोषदो न भवतीति वा। आरदे गारकं वद्यायुः खंडकोन भवतीति वा दोषखंडने ४२ इतिश्रीप्रथमस्कंधे षष्ठोध्यायः भागवतकरणोपदेशेन भगवति भक्तिः तन्माहात्म्यं च प्रतिपाद्यते स्मिन्नध्याये। निर्गत इति। तत्र अभिप्रेतं भागवतकरणं तस्य

॥ ॥ सूत उवाच॥ ॥ एवं संभाष्य भगवान्नारदो वासवीसुतं। आमंत्र्य वीणां रणयन्ययौ यादृच्छिको यतिः ४१ अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः। गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ४२ इतिश्रीभागवते महापुराणे प्रथमस्कंधे षष्ठोध्यायः शौनक उवाच निर्गते नारदे सूत भगवान्बादरायणः। श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः १ सूत उवाच ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे। शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः २ तस्मिन्स्व आश्रमे व्यासो बदरीखंडमंडिते। आसीनोप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ३

नारदस्य वा ततो नारदनिर्गमनानंतरं १ लकुटी कृत शम्या नाम यष्टी यत्र रूक्षशाखा पतितस्थले कृतशालांतर्यज्ञकरणात् शम्याप्रास इति लोके रूढिः। सत्रं वर्द्धयति अधिकफलं करोतीति सत्रवर्द्धनः २ कास्तूपयोगयोग्यफलबदरीवृक्षसमूहालंकृते तत्र विशालमान्याश्रमे अतीतानागतवर्तमानानंतकोटिब्रह्मांडबाह्याभ्यंतरवर्तिपरिमितपदार्थानशेषविशेषैः सह करतलामलकवत्तत्तमपरोक्षीकुर्वता स्थिरं मनः प्रणिधानमसुरजनमोहनायेति बोद्धव्यं ३

ध्यानेनकिंलब्धमभूदितितत्राह। भक्तीति। भक्तियोगेनसम्यक्प्रणिहितेसम्यक्स्थापितेअमलेरागादिदोषरहितेसतिपुरुषंपूर्णं मनसिप्रत्यक्षीभवंतंपूर्णंदेशतःकालतोगुणतश्चापरिछिन्नंपुरुषंपरमात्मानंजीवानांसंसारकारिमायांबंधकशक्तिंचतदपाश्रयांतस्यहरेरधीनामपश्यदित्यन्वयः। प्रकृतिपुरुषोविविक्ततयाद्रष्टुंलोकानांमनसिसम्यक्प्रणिहितेसतिशक्यामित्यपश्यदितिवा। एतदभिप्रायेणातद पाश्रयामित्युक्तं। ततोपगत्याश्रित्यस्थितांस्थातुमीक्षापथेमुयेतिवक्ष्यति ४ अनिर्वाच्याविद्यामायानाम अतःकथंबंधकशक्तिरियमित्याशंक्यअनिर्वाच्यायाअर्थक्रियायोगात्सम्यग्दर्शनात्तत्वंबंधकशक्तिरेवअतइत्यभिप्रेत्याह। ययेति। परोपित्रिगुणात्मकपृथक्तेरस्यापि यथासे

भक्तियोगेनमनसिसम्यक्प्रणिहितेमले। अपश्यत्पुरुषंपूर्णंमायांचतदपाश्रयां ४ ययासंमोहितोजीवआत्मानंत्रिगुणात्मकं। परोपिमनुतेनर्थंतत्कृतंचाभिपद्यते ५ अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे। लोकस्याजानतोविद्वांश्चक्रेसात्वतसंहितां ६ यस्यांवैश्रूयमाणायांकृष्णेपरमपूरुषे। भक्तिरुत्पद्यतेपुंसांशोकमोहभयापहा ७ ससंहितांभागवतींकृत्वानुक्रम्यचात्मजं। शुकमध्यापयामासनिवृत्तिनिरतंमुनिं ८

मोहितोजीवआत्मानंत्रिगुणात्मकंत्रिगुणोपाधानकदेहरूपंमनुतेतत्कृतंमायाकृतंतादृशमानकृतंवा। जननमरणाद्यनर्थंअहंकर्तेत्यनर्थंचाभिपद्यतइत्यन्वयः। तस्मादेवंविधमायाबंधनिवर्तकमपरोक्षज्ञानद्वाराभक्तियोगमद्राक्षीदितिभावः ५ ततःकिमकरोदितितत्राह॥ अनर्थेति। तन्निवृत्तिसाधनमाहेतिवा अनर्थेति। साक्षाद्धाहत्वेष्टानिष्टप्राप्तिपरिहारोपायमजानतोलोकस्यसात्विकप्रकृतेर्बंधकशक्तिनिमित्तमनर्थमुपशमयतिनाशयतीत्यनर्थोपशमंअधोक्षजेभक्तियोगंविद्वान्महत्तत्वज्ञानपूर्वकप्रेमलक्षणभक्तियोगप्रदर्शनायसात्वतसंहितांचक्रइत्येकान्वयः ६ अनयाकथंभक्तिरुत्पद्यतइतितत्राह। यस्यामिति ७ अनुक्रम्यसंशोध्यअनंतरंचपुत्रं। निवृत्तिनिरतमिसस्यफला भिसंधिरहितमित्यर्थः ८

अविद्यानिवर्तकःशौनकःसोदयति॥ सवाइति। आत्मनिरमतइत्यात्मारामःमुनिःसर्वज्ञोमौनीवाअतएवसर्वत्राशिष्यसंग्रहणादावुपेक्षकउदासीनबुद्धिर्निवृत्तिनिरतःशुकःकस्यफलस्यार्थंबृहतीमहतीमेतांसंहितांसमभ्यसद्वाइत्यन्वयः। चतुर्षुपुरुषार्थेषुकस्यपुरुषार्थस्येतिविकल्पार्थोवाशब्दः॥ शुकमतावि तिधातोःपरब्रह्मण्येवाहतबुद्धिगतित्वाच्छुकः ९ परिहरतीत्याह॥ आत्मारामाइति। चशब्दोप्यर्थे। आत्मारामाःस्वरूपसुखएवरममाणाअपतएवनिर्ग्रंथाःनिवृत्तग्रंथाःमुनयःउत्तमाधिकारिणःउरुक्रमेउरवःक्रमाःपादविक्षेपाःयस्यसतथातस्मिन्अहैतुकींप्रयोजनविधुराभावेनस्वरूपांभक्तिंकुर्वंति। किं

शौनकउवाच॥ ॥सवैनिवृत्तिनिरतःसर्वत्रोपेक्षकोमुनिः। कस्यवाबृहतीमेतामात्मारामःसमभ्यसत् ९ सूतउवाच आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे॥ कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिः १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः। अध्यगान्महदाख्यानंनित्यंविष्णुजनप्रियं ११

पुनर्बहुजन्मस्वपरोक्षितपरतत्वाःप्रेमभक्त्यादिसाधनातिशयेनमुक्तावानंदातिशयमाकांक्षमाणाःशुकादयःउरुक्रमेभक्तिंकुर्वंतीतिकिंवर्णनीयमित्येकान्वयः। इत्थंभूतगुणःनिरपेक्षमुक्तमनोवशीकरणरूपःगुणःकिंपुनर्मुक्तमनोवशीकरणरूपगुणइतिवाच्यमितिभावः १० केनभागवताभ्यसनंकृतमित्याह॥ हरेरिति॥ हरेरतिशयज्ञानानंदादिगुणैराक्षिप्ताआकृष्टामतिर्यस्यसतथोक्तःबादरायणसुतोभगवान्नित्यं भागवतजनहृदयंगमंमहदाख्यानंआख्यायतेभगवन्महिमानेनेत्याख्यानंभागवतपुराणमध्यगात्अध्यापयामासेत्येकान्वयः ११

कस्मिन्युगे इत्यादिशौनकप्रश्नपरिहारस्तत्स्यजन्मेति प्रश्नं परिहरन्नाह। परीक्षित इति। अथ परीक्षितो राजर्षेर्जन्मकर्मविलापनं मरणं वक्ष्ये। तत् दर्थं प्रथमतः पांडुपुत्राणां संस्थां स्वर्गारोहणं युद्धादुपरितनमहाभिषेकादिमेतत्स्थानांतं संस्थां ... की दृशीं ... कृष्णस्य कथा योदयो यस्यां सा तथोक्ता १२ अथोक्तक्रमं कथांतरं निरूप्यते। यदेति। कौरवपांडवानां मृधे युद्धे भीष्मादिषु वीरेषु ... वीरगतिं गतेषु सत्सु तथा धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण विद्धाया आविद्धाया भ्रामिताया गदाया अभिमर्शेन संस्पर्शेन कृतताडनेन भग्न ऊरुदंडो यस्य स तथोक्तः तस्मिन्सति दुर्योधनपातमारभ्य १३ तदनु भर्तुः स्वस्वामिनो दुर्योधनस्य प्रियं भवेदिति स्म पश्यन्निरूपयन् द्रौणिरश्वत्थामा स्वपतां निद्रां कुर्वतां कृष्णासुतानां द्रौपदीपुत्राणां शिरांस्युपाहरच्छिंदन् १४ सुतानां मातृ ... सुतानां निधनं निशम्य घोरं घाराणां वहनं घोरं तथा परितप्यमाना तानि धनं विश्रसनं वा तस्य द्रोणेः जुगुप्सितं निंदितं एतद्वि ...

... तथा राजर्षेर्जन्मकर्मविलापनं। संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं १२ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु। वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे १३ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि। उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंती १४ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना। तदारुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीटमाली १५ त... शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिर आततायिनः। गांडीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत् स्नास्यसि नेत्रजैर्जलैः १६

गुनिधनाख्यं कर्म विगर्हयंती ... तस्य द्रोणेः कीदृशं कर्म द्रोणेरेव विप्रियं न तु दुर्योधनस्य भारते पांडवाभिषेकादिना प्रियत्वोक्तेः। स्त्रांनी द्रौणि नाशिश्राद्धविधास्नार्थं ... स्वसमाह। नामिति। किरीटमाल्यर्जुनः सांत्वयन् दुःखं शमयन् द्रौपदीमाह १५ गांडीवनिःसृतैर्विशिखैः विविधशिखैः शरीरं खनित्वा विशंतीति विशाशैरानतायिनः ... कि याकारिणः ब्रह्मबंधोर्ब्राह्मणाधमस्य द्रोणेः शिर उपाहरे छित्वा निवेदये ततः पुरतः स्थितपदाक्रम्य पुत्रवधदुःखनिवृत्तानंतरं ... जलैः स्नास्यसि ... कुरुवध्यथुपालितानि ... सांत्वयदिति ... नैवेति वा। अथिदोगरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ... तिवायुपुराणोक्तं

सकपिध्वजः इति वल्गवो मनोहराः विचित्रा विविधाश्चर्यभूता जल्पा वाग्विशेषा ये तैः तथोक्ताः तैः प्रियां भार्यां सांत्वयित्वा रथेन गुरुपुत्रमन्वद्रवदित्यन्वयः। अच्युत एव मित्रं मनिमित्तं बंधुः सूतो यंता यस्य स तथोक्तः। दंशितः कवचितः उग्रं भयंकरं धनुर्यस्य स तथोक्तः १७ कुमारहा कुमाराणां हंता द्रौणिः उर्व्यां भूमौ यावद्गमं गंतुं शक्यं तावद्रथेन पराद्रवत् ... किं कृत्वा आपतंतं तमर्जुनं दूरात् विलोक्य उद्विग्नमनाः संभ्रांतचेताः प्राणपरीप्सुर्जीवनलालसः कइव रुद्रभयात् आर्किः अर्कपुत्रः शनैश्चरः। पुरा यथा रुद्रस्य त्रिशूलेन यस्य भयाद्दार्किः परिधावति तद्वत्

इति प्रियां वल्गुविचित्रजल्पैः ससांत्वयित्वाच्युतमित्रसूतः। अन्वाद्रवद्दंशितउग्रधन्वा कपिध्वजो गुरुपुत्रंरथेन १७ तमापतंतंसविलोक्यदूरात्कुमारहोद्विग्नमनारथेन। पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमंरुद्रभयाद्यथार्किः १८ यदाशरणमात्मानमैक्षत श्रांतवाहनं। अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः १९ अथोपस्पृश्य सलिलं संदधे तत्समाहितः। अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते २० ततः प्रादुष्कृतं तेजः प्रचंडं सर्वतो दिशं। प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह २१

तिवायुपुराणोक्तप्रसिद्धमिदं यथा कइति केचित्पठंति। ब्रह्मपंचमशिरःछेदनाय प्रवृत्तं रुद्रं दृष्ट्वा ब्रह्मा परिधावतीत्येतदसुरजनव्यामोहायेति ज्ञातव्यं १८ अशरणं पालकरहितं आत्मत्राणं आत्मानं त्रायत इति ब्रह्मशिरो नामास्त्रं १९ ब्रह्मास्त्रप्रयोग इति कर्तव्यतामाह। अथेति। अथ ईक्षणानंतरं उपस्पृश्य आचम्य। संहारं उपसंहारं अपिशब्देन विद्याया अक्षमत्वं दर्शयति किं किमर्थं संदधे इति तत्राह प्राणेति २० ततस्तस्मात् अस्त्रात् प्रादुर्भूतं सर्वतो दिशं प्राप्तं प्राणापदं प्राणसंकटं अतिक्रांतं तेजः अभिप्रेक्ष्य दृष्ट्वा जिष्णुः अर्जुनः हे कृष्णेत्येनेन मनस्याश्चर्यं कृत्वेति दर्शयति २१

कृष्ण सदानंदात्मक कृष्ण दुःखकर्षणशीलं संहृतेर्जातेन तापाग्निना दह्यमानानां पुंसां त्वमेक एव संसृतेरपवर्गोसि दुःखनाशकोसीत्यन्वयः॥
२२ अनिष्टपरिहारसामर्थ्यं तवास्तीत्याह। त्वमिति। पापानि त्रीषदहतीति पुरुषः॥ सर्वान्पाप्मन औषत्तस्मात्पुरुष इति श्रुतेः। पुरु बहु
सरतीति वा सर्वेषामादिभवनादाद्यः साक्षादीश्वरः नियुप चरितैश्वर्योपेतः तत्कथमिति तत्राह। प्रकृतेरितिविवित्यकृतेरपरस्तु मः। एवंविध
स्त्वं विद्धमायास्वरूपज्ञानशक्त्या मायायांधकशक्तिं निरस्य कैवल्ये प्रकृतिप्राकृतसंबंधरहितेआत्मनिस्वरूपे स्थितो यतोतइत्यन्वयः। सभगवा
न कस्मिन्प्रतिष्ठित इति स्वेमहिम्नीति श्रुतेः २३ स प्रकृतिप्राकृतसंबंधरहित एवंबंधकशक्त्या माहितबुद्धेर्जीवलोकस्य स्वरूपवीर्येण

अर्जुन उवाच॥ ॥ कृष्णकृष्ण महाबाहो भक्तानामभयंकर। त्वमेको दह्यमानानामपवर्गोसि संसृतेः २२ त्वमाद्यः पुरुषः सा
क्षादीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि २३ स एष जीवलोकस्य मायामोहितचेतसः। विधित्सुः
स्वेन वीर्येण श्रेयो धर्मादिलक्षणं २४ तथायं चावतारस्ते भुवो भारजिहीर्षया। स्वानां चानन्यभावानामनुध्यानाय चासकृत् २५ कि
मिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं। सर्वतो मुखमायाति तेजः परमदारुणं २६ श्रीभगवानुवाच वेत्थेदं द्रोणपुत्रस्य ब्राह्म
मस्त्रं प्रदर्शितं। नैवासौ वेद संहारं प्राणबाध उपस्थिते २७

मीदि लक्षणं श्रेयो विधित्सुरवतरतीत्यन्वयः २४ भगवदवतारान्तरवद्यथा पुंसामनुध्यानादिना मोक्षहेतवस्तथा भुवो भारजिहीर्षया कृतोयं तवावता
रस्त्वानन्यभक्तानां स्वानामसकृदनुध्यानाय यस्मादिमनोमोक्षं साधयतस्तव भक्ते हि कुदुःखनिवारकत्वं किं वर्णनीयमिति भावः। भूभारानुध्यानयोः
समुच्चये चशब्दः २५ यत्तेजः परमदारुणं सर्वतो मुखमायाति हे देव तदिदं किं स्वित्कुतो वेति अहं न वेद्मीत्यन्वयः २६ यत्तेजः तदिदं द्रोणपुत्र
स्य ब्राह्ममस्त्रं वेत्थेत्यन्वयः। कीदृशं प्राणबाधे जीवाधिष्ठितदेहनाशे उपस्थिते अत्रासन्ने सति प्रदर्शितं प्राणबाधः इत्येतत्कुतो वावगतं इति तत्राह ने
ति। असौ द्रोणिः अस्यास्त्रस्य संहारं न वेदेति यस्मादतो ज्ञायते प्राणबाधः उपस्थितमिति २७

अस्त्राणामन्यतमं किंचिदस्त्रमस्य प्रत्यवकर्षणं प्रतीकारसमर्थं निवर्तकं न हि अतो अस्त्रज्ञः विसर्गोपसंहारपूर्वकमस्त्रज्ञस्त्वमस्त्रतेजसा उन्नद्धमुद्धतम
स्त्रतेजः जहीत्यन्वयः। हि शब्दो हेतौ २८ परस्परं शब्दं संवेष्टिनो वीरानुद्दिश्य ते निपरवीरहा शत्रुवीरान्निति वा। तत्कृष्णं परिक्रम्य प्रदक्षिणीकृत्य २९
उभयोः शरसंहतेतेजसी अन्योन्यं संहत्य संपटनं कृत्वा रोदसी द्यावापृथिव्यौ खमाकाशं चावृत्य अर्कवह्निवत्ववृधाते इत्यन्वयः ३० सांवर्तकं प्र
लयकालीनं दाहं अमंसत मन्यते स्म २१ व्यतिकरो नाशः अस्त्रोपसंहारलक्षणं वासुदेवमतं ३२ गौतमीसुतं कृपीपुत्रं रशनया रज्ज्वा ३३ शि

न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्षणं। जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा २८ सूत उवाच श्रुत्वा भगवता प्रोक्तं फाल्गु
नः परवीरहा। स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे २९ संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते। आवृत्य रोदसी खं च ववृधाते
र्कवह्निवत् ३० दृष्ट्वास्त्रतेजस्तु तयोस्त्रील्लोकान्प्रदहन्महत्। दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ३१ प्रजोपप्लवमालक्ष्य
लोकव्यतिकरं च तं। मतं च वासुदेवस्य संजहारार्जुनो द्वयं। ३२ तत आसाद्य तरसा दारुणं गौतमीसुतं॥ बबंधामर्षताम्राक्षः पशुं
रशनया यथा ३३ शिबिराय निनीषंतं रज्ज्वा बध्वा रिपुं बलात्। प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः ३४ मैनं पार्थार्हसि त्रा
तुं ब्रह्मबंधुमिमं जहि। योसावनागसः सुप्तानवधीन्निशि बालकान् ३५

विराय स्कंधावाराय स्वसेनानिवेशनस्थानायेति यावत्। निनीषंतं नेतुमिच्छंतं ३४ हे पार्थ त्वं ब्रह्मबंधुं ब्राह्मणाधममेनमश्वत्थामानं त्रातुं नार्ह
सि किंतु यो सौ निशि रात्रौ सुप्तान्बालकानवधीदिमं जहि हनेत्यन्वयः। अनागसः अकृतापराधान्तत्राश्वत्थाम्नो ऽवध्यत्वे अनागस्त्वसुप्त
त्वबालकत्वमिति हेतुत्रयमनादृत्य तद्धननं कारणमिति ज्ञातव्यं। अनागसं प्रसुप्तं च बालकं हंति यो नरः। स त्वं ते दशो निशात्य इत्येवमनुरुद्ध

रिपुरणाग्नैते हतवानित्याह ॥ मत्तमिति । मत्तं मद्यादिपानेन मदांधं प्रमत्तं विस्मृतिमंतं उन्मत्तं ग्रहग्रस्तं नष्टं स्वप्नेनो विवेकज्ञानशून्यं । सुप्तं निद्रितं वालं
दिग्विशेषानभिज्ञं । स्त्रियं काल्पेनाहरणेपवादं केचपराधीनवृत्तिं प्रपन्नं शरणागतं विरथं रथादिसाधनरहितं । विपर्यं सुद्धमार्गी रूपं क्रांतमितिके
चिन्मिल्वाख्या वदंति तद्द्वयवलनयोरिति धातोर्भीतं वलितं युद्धमार्गादपसृतमित्यनेन पुनरुक्तं न वक्तं पितार्थत्वपाठविरोधादतोनुपासितगु
उवरणोत्रैत्वेक्तितमित्युपेक्षणीयं ३६ खलं इंद्रियारामः अघृणः दयारहितः तद्वधः तस्य हिंसकस्य हननं श्रेयः साधुकुतः येषां हिंसादिदोषा
दर्थोनरकं यातीति यस्मात्तस्मादिति ३७ प्रतिज्ञा वरक्षणीयेत्याह । प्रतिश्रुतमिति । हे मानिनि मानार्हे यस्ते तव पुत्रान्हतवान्तस्य शिर आहरि

मत्तं प्रमत्तमुन्मत्तं सुप्तं वालं स्त्रियं जडं । प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ३६ स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः
खलः । तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ३७ प्रतिश्रुतं च भवता पांचाल्यै शृण्वतो मम । आहरिष्ये शिरस्तस्य यस्ते
मानिनि पुत्रहा ३८ तदसौ वध्यतां पाप आततायात्मबंधुहा । भर्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ३९ सूत उ
वाच एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः । नैच्छद्धंतुं गुरुसुतं यद्यप्यात्महनं महान् ४०

ष्य इति मम शृण्वतः सतः पांचाल्यै द्रौपद्यै प्रतिज्ञातं च यस्मात्तस्मादित्यन्वयः ३८ आत्मबंधुः सुतसोकः पुत्रोंगज उदाहृत इत्यभिधानादा
त्मबंधून्सुतान्हतवानिति यस्मात्तस्मादसौ पापो विप्रियं तु लोकहष्टेति ज्ञातव्यं ३९ हरिणार्जुनं प्रति द्रौणिवधप्रतिपादनमर्जुनधर्म
परीक्षणाभिप्रायमेव न तु वधाभिप्रायमिति कथनपूर्वकमर्जुनस्य भक्त्यतिशयं कथयति । एवमिति । पार्थः गुरुसुतं हंतुं नैच्छदित्यन्व
यः कथंभूतः । यद्यप्येवं धर्मपरीक्षता कृष्णेन चोदितः तथापि नैच्छत् । कथंभूतं आत्मानं हतवंतं अयमपि कश्चिद्धेतुः पुनरपि कथंभूतः महान्

अथ गोविंदः प्रियः सुहृत्सारथिश्च यस्य स तथोक्तः स पार्थः स्वशिबिरमुपेत्य द्रोणिना हतानात्मजान्पुत्रान्प्रति शोचंत्यै प्रियायै द्रौपद्यै तं न्यवेदयदित्यन्
वयः ४१ वामस्वभावा मृदुस्वभावा चारुतरशीलेति यावत् । कृष्णा तथा हृतं तं देवाहा पशुवत्पाशेन बद्धं कर्मजुगुप्सितेन कर्मणा लज्जया वाङ्मुखं च
पहृतं पुत्रहत्यापापकर्तारमपि गुरोः सुतं निरीक्ष्य कृपया ननामेत्येकान्वयः ४२ न केवलं नत्वात् क्षमी अभूत् किंतु वचनं चोवाचेत्याह । उवाचेति । अस्य
द्रोणस्य धनेनानयनं असहमाना सती प्रशशंस शिल्पादिगुणवती ब्राह्मण एव वर्णानां गुरुः अयं च नितरां युष्माकं गुरुः ४३ अतिशयितगुरुत्व

अथोपेत्य स्वशिबिरं गोविंदप्रियसारथिः । न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान्हतान् ४१ तथाहृतं पशुवत्पाशबद्धमवा
ङ्मुखं कर्मजुगुप्सितेन । निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम ४२ उवाच चासहंत्यस्य बंधनानयनं
सती । मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ४३ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः । अस्त्रग्रामश्च भवता शिक्षितो
यदनुग्रहात् ४४ स एष भगवान्द्रोणः प्रजारूपेण वर्तते । तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ४५

माह । सरहस्येति । सरहस्यः सकीलकः । धनुर्वेदः सविसर्गोपसंयमः प्रयोगोपसंहारसहितः अस्त्रग्रामः ब्रह्मास्त्राद्यस्त्रसमूहः यस्य द्रोणस्यानुग्रहात्
भवता शिक्षितः अभ्यस्तः ४४ स एव द्रोणो भगवान्प्रजारूपेण आत्मा वै पुत्रनामासीति श्रुतेः पुत्ररूपेण वर्तते यतो गुरुपुत्रस्य गुरुवत्पूज्य
त्वादिति भावः । किंत्वन्योपि हेतुरस्तीत्याह । तस्येति । तस्य द्रोणस्यात्मनः शरीरस्यार्धं अर्धांगी सती वीरसूः वीरपुत्रवती कृपी संप्रत्यास्ते पतिना
नुगमनं अनुगमनं न कृतवती यतो गुरुपत्नी भक्त्या वंद्या नामेति भावः ४५

नकेवलंगुरुभक्तिरेवात्रहेतुः अन्योप्यस्तीत्याह॥ तदिति। गुरोर्गुरुपुत्रेषुवा वारनमनलक्षणोयोधर्मः तंजानातीति धर्मज्ञः हे धर्मज्ञ भगानांभाग्यानांसमुदायोभागः महान्भागो यस्यसतथातस्यसंबुद्धिर्महाभागअश्वत्थाम्नोदुःखेसतितन्माताकृपीदुःखंप्राप्स्यतिअतःतत्कोपेनास्मत्कुलस्यापिपापंभवेदितियस्मात्तस्मादभीक्ष्णशः सर्वदासर्वैःपूज्यंवंद्यं कौरवंकुलंभवद्भिर्वृजिनंपापंतन्निमित्तंदुःखंवाप्राप्तुंनार्हतियोग्यंनभवति ४६ यथाहमश्रुमुखीमृतवत्साश्चतथाअन्तस्वार्तीहंकुरनिशंरोदिमितथापतिरेवदेवतायस्याःसातथागौतमीकृपीअस्याश्वत्थाम्नोजननी

तद्धर्मज्ञमहाभागभवद्भिःकौरवंकुलं। वृजिनंनार्हतिप्राप्तुंपूज्यंवंद्यमभीक्ष्णशः ४६ मारोदीदस्यजननीगौतमीपतिदेवता। यथाहंमृतवत्सार्तारोदिम्यश्रुमुखीमुहुः ४७ यैःकोपितंब्रह्मकुलंराजन्यैरकृतात्मभिः। तत्कुलंप्रदहत्याशुसानुबंधंशुचार्पितं ४८ सूतउवाच धर्म्यंन्याय्यंसकरुणंनिर्व्यलीकंसमंमहत्॥ राजाधर्मसुतोराज्ञ्याःप्रत्यनंदद्वचोद्विजाः ४९ नकुलःसहदेवश्चयुयुधानोधनंजयः॥ भगवान्देवकीपुत्रोयेचान्येयाश्चयोषितः ५०

जननीमाता मारोदीदित्येकान्वयः। तस्मादस्मत्कुलहितायवाकुर्यात अयंगुरुपुत्रइत्यर्थः ४७ विपक्षेबाधकमाह। यैरिति। अकृतात्मभिरशिक्षितबुद्धिभिर्यैराजन्यैर्ब्राह्मणकुलंकोपितंतत्कुपितंशुचार्पितंप्राप्तशोकंसानुबंधंसमूलंभूतंतेषांराज्ञांकुलंतत्क्षणमेवप्रदहतीत्यन्वयः ४८ धर्म्यंधर्मादनपेतंन्याय्यंन्यायोपेतंदयासहितंनिर्व्यलीकंसमंशत्रुमित्रभावशून्यंसर्वशास्त्रानुसृतेवाअर्थतोमहत् ४९ एतेनकुलादपप्रत्यनंदन्नित्यध्याहृत्यान्वयः॥ युयुधानःसात्यकिः येचान्येनुजीविनःतेवयाश्चस्त्रियःताश्चनंदुरितिभावः ५०

तत्रतस्यामवस्थायाममर्षितोभीमःआहेत्यन्वयः। योभर्तुर्दुर्योधनस्यात्मनःस्वस्यचनार्थः। सुप्तान्शिशून्वृथाहन्नहतवान् यस्यायंवधएवश्रेयः वधानामर्थवत्नभवतितस्यवधस्तस्यैवश्रेयान्स्मृतःनास्माकंपापमितिभावः ५१ चतुर्भुजःभीमगदितंश्रुत्वाद्रौपद्याश्चवचनमितिशेषः। सख्युरर्जुनस्यवदनमवलोक्यमंदस्मितंकुर्वन्निदमाहेत्येकान्वयः ५२ हननहनेन्तुभयंमयैवाम्नानंअभिहितंयस्मात्तस्मादनुशासनमात्म

तत्राहामर्षितोभीमस्तस्यश्रेयान्वधःस्मृतः। नभर्तुर्नात्मनश्चार्थेयोहन्सुप्तान्शिशून्वृथा ५१ निशम्यभीमगदितंद्रौपद्याश्चचतुर्भुजः। आलोक्यवदनंसख्युरिदमाहहसन्निव ५२ श्रीभगवानुवाच ब्रह्मबंधुर्नहंतव्यआततायीवधार्हणः॥ मयैवोभयमाम्नातंपरिपाह्यनुशासनं ५३ कुरुप्रतिश्रुतंसत्यंयत्तत्सांत्वयताप्रियां॥ प्रियंचभीमसेनस्यपांचाल्यामह्यमेवच ५४ सूतउवाच अर्जुनःसहसाज्ञात्वाहरेर्हार्दमथासिना॥ मणिंजहारमूर्धन्यंद्विजस्यसहमूर्धजं ५५ विमुच्यरशनाबद्धंबालहत्याहतप्रभं। तेजसामणिनाहीनंशिबिरान्निरवापयत् ५६

चतनंपरिपाहीत्यन्वयः ५३ ५४ अर्जुनःसहसाझटितिहरेःहृदिस्थितंआज्ञायसम्यक्ज्ञात्वाक्षुरधारेणअसिनाद्विजस्यसहमूर्धजैःकेशैःसहितमूर्धन्यंमूर्ध्नीसहोत्पन्नंमणिंजहारेत्यन्वयः ५५ तेजसासामर्थ्येनशरीरकांत्यावारत्नेनरहितंशिशूनांवधेनहतप्रभंअजनीनिधानंरज्ज्वाबद्धंविमुच्यशिबिरान्निरवापयत्शवनिर्गमनवन्निःकाशयामासेत्येकान्वयः ५६

भा॰ प्र॰
४८

ब्रह्मबंधूनां प्राणात्यागलक्षणमरणप्रतिनिषिद्धं वधश्चस्याह॥ वंधनमिति॥ ब्रह्मबंधूनामेष एव वधः वधप्रतिनिधिः अन्यो दैहिको नेत्रोत्पार नादिको नास्तीत्यन्वयः। शास्त्रविहितो नास्तीति भावः। कोसावितितदाह वंधनमिति। पाशेन करौ पृष्ठे कृत्वा वंधनं। द्रविणादानं हिरण्यादिहरणं स्था नान्निर्यापणं स्वदेशान्निर्गमनं तथाशब्दः प्रत्येकमभिसंवध्यते यः। सांत्वयन्नित्याधारभ्य नान्योऽस्ति दैहिक इत्यन्तं यदुक्तं तदिदं द्रोणिनास्व नेदृष्टं संकथितं अन्यथा ग्रंथांतरविरोधः॥ तत्र भीमेन कृतं इत्युक्तत्वादिति ज्ञातव्यं ५७ इति प्रथमस्कंधे सप्तमोऽध्यायः॥ ॥ भक्तिविधा नार्थं भक्तवात्सल्यार्थादि वित्यमाहात्म्यं मुरारेर्निरूप्यते अस्मिन्नध्याये। तदर्थं मृतानां यत्कार्यं वलौकिकं तत्तदुच्यते। पुत्रशोकेति सर्वे पांडवा

वंधनं द्रविणादानं स्थानान्निर्यापणं तथा। एष हि ब्रह्मबंधूनां वधो नान्योऽस्ति दैहिकः ५७ इति श्रीभागवते महापुराणे प्रथमस्कंधे सप्तमोऽध्यायः सूत उ॰ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया। स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं १ अथो निशामयामास कृष्णायै भगवान्पुरा। पतितायाः पादमूले कुंत्यास्ताय त्वतिश्रुतं २ परस्परास्परिदारास्ते वुदतो मुक्तमूर्द्धजान्॥ आलिंग्य स्वपतीन्भीमगदाभग्नोरुवक्षसः ३ अथ ते संपरेतानां स्वानामुदकमिच्छतां। दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः॥ ४॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः। आप्लुता हरिपादाब्जरजःपूतसरिज्जले ५

मृतानां प्राणवियोगं प्राप्तानां स्वानां वंधूनां यत्कृत्यं निर्हरणादिकं शवदाहादिकं तच्चक्रुरित्यन्वयः १ भीमहतान्दर्शयत्इति पुरा यत्प्रतिश्रुतं तदस्यै द्रौपद्यै निशामयामास दर्शयांचकारेत्यन्वयः २ हेरा जितेन तव अरिदारा रणशत्रुभार्याः मुक्तमूर्द्धजान्मुक्तकेशीः भीमस्य गदया भग्नान्युरवः उत्संगाश्च वक्षांसि च येषां तेन तथोक्ताः। उरूणि विस्तीर्णानि वक्षांसि चेति वा ३ स्त्रियः पुरस्कृत्य संपरेतानां मृतानां सकृष्णा द्रौपद्या सहिताः कृष्णेन वा सहिता वा ४ ते पांडवा निनीयोदकं निनीय दत्त्वा भृशं विलप्य परिदेवनं कृत्वा रोदनं कृत्वा पश्चाद्धरेः पादपद्मपरागेण पूते सुदेसरितो गंगा

राम
४८

अजेनेन संजयेन सह वर्तमानं ६ मुनिभिः सह हतानां पुत्राणां यथा तथा तान्। भूतेषु प्राणिषु कालस्य परमेश्वरस्य गतिं विक्रमं अप्रतिक्रियं परिहार्यं दर्शयन् ७ घातयित्वा वधं कारयित्वा पांडवैरिति शेषः। कचानां केशानां स्पर्शेन हतानि नष्टानि आयूंषि येषां तेषां तथा तान्। अजातः सुयोधनः शत्रुर्यस्य सः तथोक्तः। तथा चोक्तं। सुयोधनादयः सर्वे त्वजाता जज्ञिरे ततः। व्यासेनानंतवीर्येण मार्गेण धिक्कृतेजसा इति प्रयोगात्। न जातः शत्रुर्यस्य स तथोक्त इति केचित्। कितवैः चौरप्रायैर्दुर्योधनादिभिः ८ मध्यमाधमकल्पयो उत्तमकल्पकैः। शतमन्युवत् शक्रवत्तथा यशस्य स

तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं। गांधारी पुत्रशोकार्ता पृथां कृष्णां च माधवः ६ सांत्वयामास मुनिभिर्हतपुत्रान्शुचार्पितान्। भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां ७ घातयित्वासतो राज्ञः कचस्पर्शहतायुषः॥ साधयित्वाजातशत्रोः स्वराज्यं कितवैर्हृतं ८ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः। तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ९ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः। द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः १० गंतुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः॥ उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां ११ पाहि पाहि महायोगिन्देवदेव जगत्पते। नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं १२ अभिद्रवति मामीश शरस्तप्तायसो विभो। कामं दहतु मां नाथ मा मे गर्भो निपात्यतां १३

तथा तस्येंद्रस्य यशो वामनावतारे हरिर्यथा तनोत्तथा तनोत्। तनुविस्तारे ९ १० भगवान्यदा द्वारकां गंतुं कृतमतिः रथमास्थितः तदा पाहि पाहीत्याद्यभिधायिनीं भयेन विह्वलामागतामुत्तरामुपलेभे ददर्शेत्यन्वयः॥ यत्र मर्त्यलोके परस्परं मृत्युः। तत्र त्वदन्यमभयम भयप्रदं न पश्ये स्वस्याभिमतप्रकाशनायात्मनेपदप्रयोगः ११ १२ अयसो विकारः आयसः तप्तश्चासावायसश्चेति तथोक्तः। शरः हननशीलो बाणः। शरीरविनाशनशक्तिप्रकाशनाय आयसेति। अपरिच्छिन्नस्य तव गर्भरक्षणं शक्यसाधनमिति द्योतनाय विभविति नाथ ऐश्वर्यश

भगवानस्या उत्तराया वच उपधार्य श्रुत्वा निश्चित्य इदं भवनिमंडलम पांडवं पांडुपुत्ररहितं कर्तुं मुक्तं द्रौणेरस्त्रमबुध्यतेत्यन्वयः १४ हे भृगुश्रेष्ठ यतर्ह्येव तदानीमेव पंचपांडवाः आत्मनोभिमुखान् ज्वलितान् पंचसायकानंतकरान् बाणानालक्ष्यानंतरमेवास्त्राण्युपाददुरित्येकान्वयः। पांत कर्मणीति धातोः स्यंति अंतं कुर्वंतीति सायकाः एवुलू आण देशः श्च १५ न अन्यविषय आत्मा येषां ते ऽनन्यविषयात्मानः तेषां अन्येषु भगवद्रहितेषु विषयेषु शब्दादिषु आत्मा मनो न गच्छति येषां तेषां तत्तथोक्तानां तेषामिति वा पांडवानां तद्व्यसनं वीक्ष्य विभुः सुदर्शनाख्यस्वास्त्रेण स्वानां पांडवानां रक्षां व्यधादित्येकान्वयः १६ सर्वप्राणिनामंतर्हृदि स्थितः आत्मा आदानादिकर्ता योगैश्वर्यवान् सहजाणिमादियोगैश्वर्यवा

सूत उवाच उपधार्य वचस्तस्या भगवान् भक्तवत्सलः। अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत १४ तर्ह्येवाथ भृगुश्रेष्ठ पांडवाः पंच सायकान्। आत्मनोभिमुखान् दीप्तानालक्ष्यास्त्राण्युपाददुः १५ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां। सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः १६ अंतस्थः सर्वभूतानामात्मा योगेश्वरो हरिः। स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे १७ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं विष्णवं तेज आसाद्य समशाम्यद् भृगूद्वह १८ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेच्युते। य इदं मायया देव्या सृजत्यवति हंत्यजः १९ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया। प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती २०

न् सर्वपापानामीश्वरो वा हरिः संसारदुःखहरणशीलः कुरुतंतोः संतत्यविच्छेदाय वैराट्या विराटपुत्र्या उत्तराया गर्भं स्वमायया स्वयोगसामर्थ्येन यथा ब्रह्मास्त्रं न दहेत्तथा वृणोदात्मना गूहितमकरोदित्येकान्वयः १७ यद्यपि ब्रह्मशिरोस्त्रं त्वमोघमव्यर्थमप्रतिक्रियं प्रतीकाररहितं च तथापि वैष्णवं तेज आसाद्य सम्यक् शाम्यदित्येकान्वयः १८ यो मायया देव्या दीप्यमानया इदं विश्वं ब्रह्मादि जगत्सृजति रक्षति संहरति स्वयं जन्मरहितस्तस्मिन् सर्वाश्चर्यमयस्वरूपे अच्युते विनाशरहिते हरौ एतद्ब्रह्मास्त्रोपशमनलक्षणमाश्चर्यं मा मंस्था न विंतयेत्येकान्वयः १९ ब्रह्मास्त्रतेजोमुक्तैरात्मजैर्युधिष्ठिरादिभिः पुत्रैः सह सती साध्वी २०

संसारिणामात्मनये आद्यं पुरुषमिति हिरण्यगर्भस्यान्तर्येईश्वरमिति जगत्सृष्ट्याद्यैश्वर्यवत्त्वं न तेनाव्याप्तत्वमित्यतः प्रकृतेः परमिति एतत्स्वरूपं तत्त्वमुक्तमलक्ष्यमिति। लक्षणया वृत्यापि ज्ञातुमशक्यं तर्हि शून्यप्रायमित्यत उक्तं। सर्वभूतानामिति। सर्वभावानामंतर्बहिश्च व्याप्य स्थितं। अंतर्बहिश्च तत्सर्वमिति श्रुतेः। आद्यस्य कथमंतर्बहिश्च व्याप्य स्थितत्वमित्यत उक्तं भूतप्रलयेपि ध्रुवं नित्यमविनाशिनं २१ त्वां नमस्ये इत्यपरो कृतयो कस्यकथमलक्ष्यत्वमिति तत्राह॥ मायेति हे अधोक्षज वशीकृतेंद्रियजीवस्वगुणाच्छादकपरमाच्छादको भय निध्रमायारूपतिरस्करिणया छन्नं स्वं मूढदृशा

पृथोवाच॥ ॥नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं। अलक्ष्यं सर्वभावानामंतर्बहिरपि ध्रुवं २१ मायायवनिकाछन्नमयाधोक्षजमर्त्ययाा। न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा २२ तथा परमहंसानां मुनीनाममलात्मनां॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः २३

विपरीतज्ञानया मर्त्यया मया न लक्ष्यमाणोपि न लक्ष्यसे। यथा नाट्यधरो नटो दृश्यमानोपि तद्रूपत्वाद्यभिनयलक्षितकथाविशेषाद्येन नेरगान लक्ष्यते। तथा तस्माद्लक्ष्यस्त्वमित्यर्थः २२ इतोपि मादृशीनां तद्दर्शनमशक्यमित्याह॥ तथेति। अमलात्मनामविद्याकामकर्मादिमलरहितमनसां मुनीनां सर्वज्ञानां परमहंसानां सनकादीनां भक्तियोगविधानार्थं भक्तियोगकरणविषयं त्वां ते पश्यंति। तथा रागादिमत्यस्त्रियो वयं कथं त्वां पश्येमहीत्येकान्वयः। स्त्रीपुतारतम्यविशेषद्योतनार्थमात्मनेपदप्रयोगः॥ ॥

भा·प्र·
५०

तर्हि श्रीणांभगवदुपासनाभावेनतज्ज्ञानाभावात्मोक्षाभावइत्याशंक्यतन्त्रक्तिरेव अपरोक्षज्ञानजनकतयामोक्षसाधिकेत्यभिप्रेत्यकृष्णसंस्तो
ति। कृष्णायेति। कर्षतिविलिखतिदारयतिमोहपटलमितिकृष्णः तस्मैनमोनमः। नीलोत्पलदलश्यामलायवा। वसुनादीव्यतीतिवसुदे
वः आनकदुंदुभिः तस्यपुत्रोवासुदेवः तस्मैइति। वसआच्छादनइतिधातोः इदंजगदाच्छाद्यदीव्यतीतिवासुदेवः तस्मैइतिवा। बलात्
दैत्यनिरशनशीलक्रीडादिगुणसंपन्नायवासुदेवायइतिवा। देवकीलक्ष्मीः तांनंदयितुंशीलमस्यतिदेवकीनंदनः तस्मैनंदगोपनाम्नाराज
कुत्सितंकुष्ठंमारयतिनाशयतीतिनंदगोपकुमारः तस्मैपुराणांतरसिद्धार्थमवलंब्यकथितोयमर्थः। अन्यःप्रसिद्धः गवांविदोलाभोय

कृष्णायवासुदेवायदेवकीनंदनायच।।नंदगोपकुमारायगोविंदायनमोनमः २४ नमःपंकजनाभाय
नमःपंकजमालिने।।नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २५ यथाहृषीकेशखलेनदेवकीकंसेनरुद्धाति
चिरंशुचार्पिता।विमोचिताहंचसहात्मजाविभोत्वयैवनाथेनमुहुर्विपद्गणात् २६

स्यसतथातस्मैगवावेदेनलभ्यतइतिगोविंदइतिवा २४ पंकजंनाभौयस्यसतथातस्मै पंकाज्जातंजननंयस्यतत्पंकजंनपद्मंतत्राभवंतित्र
भिभवतिआभातीतिवापंकजनाभः तस्मैपंकजैरचितामालास्यास्तीतिपंकजमालीतस्मै। पंकजदलवन्नेत्रेयस्यसतथापंकजनेत्रेविजेरवां
घ्री अंघ्रियस्यसतथोक्तस्तस्मै २५ हृषीकेशइंद्रियगणनाथकसिहिंसायामितिधातोः कंसेनहिंसाशीलेनखलेनइंद्रियारामेणगतिवि
रेकारम्भहेतुदाशुचार्पितादेवकीत्वयायथाविमोचिता। हेविभोसहात्मनापुत्रैः सहिताहंत्वयैवनाथेनविपद्गणान्मुहुर्विमोचितेत्येका

राम
५०

विपद्गणंविविनक्तिअह विषादित्यादिना। हेहरेवयंभीमायदत्तकालकूटविषात् जतुगृहदाहप्रयुक्तमहाग्नेः पुरुषादानांहिडंबबककिर्मीरादीनांदर्श
नाद्दृष्टरगादसतांदुर्योधनादीनांद्रौपदीकेशग्रहणादिनिंदितकर्मणांसभायाः वनवासंकष्टात् मृधेमृधेरणेरणेअनेकेषांमहारथानांनानाप्र
स्त्रतः तथाश्वत्थाम्नोब्रह्मास्त्राच्चत्वयाभिरक्षिताअस्मइत्येकान्वयः। तस्मादहमद्यत्वांशरणंगतास्मीतिवाक्यशेषः २१ भगवत्स्मरणविरोधिसं
पत्त्यंपरार्थाभगवद्दर्शनकरविपत्परंपरैवश्रेयसीभवद्दर्शनहेतुत्वात्तः संपद्भ्यो भवद्दर्शनकरविपदएवास्माकंसंत्विति विज्ञापयति।। विपद

विषान्महाग्नेःपुरुषाददर्शनादसत्सभायावनवासकृच्छ्रतः। मृधेमृधेनेकमहारथास्त्रतोद्रौण्यस्त्रतश्चास्महरेभिरक्षि
ताः २७ विपदःसंतुनःशश्वत्तत्रतत्रजगत्पते।।भवतोदर्शनंयत्स्यादपुनर्भवदर्शनं २८ जन्मैश्वर्यश्रुतश्रीभिरे
धमानमदःपुमान्।नार्हत्यभिधातुंवैत्वामकिंचनगोचरं २९

इति। हेजगत्पतेनोस्माकंतत्रतत्रसांसारिकव्यापारेषुनिरंतरंविपदःसंतुयासुयासुविपत्सुअपुनर्भवंमोक्षंदर्शयतीत्यपुनर्भवदर्शनंभवतोद
र्शनंस्यादितियद्यस्मात्तस्मात्ताःसंत्वितिवाक्यशेषः २८ संपद्भ्योविपदांश्रेयस्त्वंकुतइतितत्राह। जन्मेति।। अभिजनेनैश्वर्येणशास्त्रश्रवणेन
नितविद्याधनश्रीमदेनैधमानःमदःपुमानकिंचनानांपरमहंसानांविषयंज्ञातुंयोग्यंत्वामितीत्थमभिधातुंवक्तुमुपलक्षणमेतत्स्मर्तुंवा
नार्हतिवैयस्मात्तस्मात्स्मरणहेतुविपदएवश्रेयस्यःसंपद्इतिभावः २९

श्रीहृत्स्मादस्यकिंचनोपादेयंनविद्यतेयेषांतेअकिंचनास्तएवविन्नंधनंयस्यसतथातस्मै। निवृत्ताः सत्वादिगुणानांवृत्तयोयस्मात्तस्मै। आत्मारामायातएवशांतायशुद्धपूर्णायातएवकैवल्यपतयेमुक्तिनाथायनमइत्यन्वयः ३० नविद्यतेआदिनिधनेयस्यसतथातमनादिनिधनंअनस्यप्राणस्यजन्मलयकर्त्तारमितिवा। ईशंशिवमानयतिचेष्टयतीतीशानःतं। सर्वेश्वरंवा। जगच्चेष्टाशक्तिमंतंवा। परंसर्वस्मादन्यं। सर्वत्रस्वपरेषुसमंयथायोग्यंचरंतंत्वांकालंसंहर्त्तारंमन्येकुरुपांडवादिभूतानांयद्यस्मात्त्वमिथोऽन्योन्यक

नमोकिंचनवित्तायनिवृत्तगुणवृत्तये। आत्मारामायशांतायकैवल्यपतयेनमः ३० मन्येत्वांकालमीशानमनादिनिधनंपरं। समंचरंतंसर्वत्रभूतानांयन्मिथःकलिः ३१ नवेदकश्चिद्भगवंश्चिकीर्षितंतवेहमानस्यनृणांविडंबनं। नयस्यकश्चित्दयितोस्तिकर्हिचित्द्वेष्यश्चयस्मिन्विषमामतिर्नृणां ३२

लिःकलहस्तंत्वामितिवाक्यशेषः ३१ समंचरतमित्येतद्विवेचयतिनवेदेति। यस्यतवयोग्यतातिरेकेणकर्हिचित्कोपिदयितोनास्तिकश्चिद्द्वेष्योनास्तीतिशेषः। एवमपियस्मिंस्त्वयितुणमासुरभक्तानांमतिर्विषमा। अर्जुनोनुग्राह्योयंदुर्योधनोद्वेषीतिताभ्यामुभाभ्यांवहूपचितपुण्यपापहेतुनिवयावगण्यमा। हेभगवन्नृणांविडंबनमनुकरणमीहमानस्यचेष्टमानस्यद्विषद्भ्यनेनमोक्षंमह्यमितितेनैवभोजयेदिम्यादिवचनात्स्यतवकश्चित्पुरुषश्चिकीर्षितंकर्तुमिष्टंनवेदनजानातीत्येकान्वयः। अथवालोकेयस्मिन्पुंसियोग्यतातिरेकेणस्नेहद्वेषकारिणीनृणांमतिर्विषमा। असदयितोयमस्यद्वेष्योतिनस्मात्तवाहरशइत्यतःसमचारीतिवेदिकाइति ३२

अधुनानादिनिधनत्वंसमर्थयते। जन्मेति। हेविश्वात्मन्सर्वात्मन्नजस्यजातस्यानाप्तस्येनफलानपेक्ष्ययाअकर्तुरात्मनःस्वामिनस्तवतिर्यक्षुपशुषुयादःसुजलजंतुषुयज्जन्मतत्कर्मकारिकर्मचतदतिशयेनविडंबनमतोनादिनिधनोसीतिभावः। अजस्यात्मनस्तिर्यगादिषुयज्जन्माकर्त्तुरात्मनस्तज्जन्मानुसारियत्कर्मतदुभयमत्यंतविडंबनमितिवायोजना ३३ इदंचातिविडंबनंविदुषामपिमोहकमित्यभिप्रत्याह। गोपीति। त्वयिकृतागसिदधिभांडेभित्त्वानवनीतापहारिणिसतियदागोपीनाम्नायशोदानित्यमुक्तंत्वांवद्धुंदामआददेतावत्तद्यत्त्वांप्रतिभीःसर्वजनस्यभयकारिणीदुर्गापिबिभेतितस्यभयभावनयाअश्रुभिःकलिलंकलुषंअंजनंयस्यतत्तथोक्तं। अश्रुकलिलांजनं

जन्मकर्मचविश्वात्मन्नजस्याकर्त्तुरात्मनः। तिर्यङ्नृषुयादःसुतदत्यंतविडंबनं ३३ गोप्याददेत्वयिकृतागसिदामतावद्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं। वक्त्रंनिनीयभयभावनयास्थितस्यसामांविमोहयतिभीरपियद्बिभेति ३४ केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्त्तये। यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ३५ अपरेवसुदेवस्यदेवक्यांयाचितोभ्यगात्। अजस्त्वमस्यक्षेमायवधायचसुरद्विषां ३६

चतत्संभ्रमयुक्तंअक्षियस्मिंस्तत्तथोक्तंवक्त्रंविनम्याधोवीनतयाकृत्वास्थितस्यतेतवयादशावस्थासामांविमोहयतीत्येकान्वयः। तस्मात्तदेतत्करणंविदुषामपिमोहकमितिभावः ३४ इदानीमेवंविधस्यतवदेवक्यांजन्मानुकरणेनिमित्तंविद्वांसोनेकधावदंतीतिविज्ञापयति। केचिदिति। केचिद्विद्वांसःपुण्यकीर्तेर्भगवद्भक्तस्ययदोराज्ञोन्ववायेतस्यकीर्त्तयेजातंत्वामाहुरित्यन्वयः। नाम्नामलयस्यपर्वतस्यकीर्त्तयेचंदनमिव ३५ अपरेतुयादवैर्याचितोजस्त्वमस्यसज्जनस्यक्षेमायसुरद्विषांवधायचवसुदेवस्यसकाशाद्देवक्यामभ्यगाद्आविर्भूतइतिब्रुवते ३६

अन्ये त्वाहुः उदधौ हिरण्यादिभूरिभारेण सीदन्त्या आसन्नमज्जनाया नाव इव दुःसहासुरजनभारेण परिखिन्नाया भुवः आत्मभुवा प्रार्थितः भारो(ऽ)वतारणाय जातो(ऽ)सीत्यावर्त्तते ३७ केचन पण्डिता अस्मिन् भवे संसारे अविद्याकामकर्म्मभिः क्लिश्यमानानां दुःखेन परिभूयमानानां श्रवणार्हाणि नामानि स्मरणार्हाणि तत्राणि करिष्यन्नवातरदिति वदंति ३८ कर्मणां श्रवणस्मरणेः किं फलमिति तत्राह। शृण्वंतीति। ये जनास्तवेहितं चेष्टितं अभीक्ष्णशः शृण्वंति गायंति गृणंति स्मरंति नंदंति त एवाचिरेण क्षिप्रं भवप्रवाहोपरमं संसारप्रवाहस्य उपरमो निवृत्तिः यि(ना)

भारावतारणायान्ये भुवो नाव इवोदधौ। सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ३७ भवे(ऽ)स्मिन् क्लिश्यमानानाम विद्याकामकर्म्मभिः। श्रवणस्मरणार्हाणि करिष्यन्निति केचन ३८ शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः। त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजं ३९ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित् सुहृदो(ऽ)नुजीविनः। येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांहसां ४०

स्मरति॥ कर्मणा हितं चेष्टितं कर्म [illegible]

शो यस्मात्तत्तावकं पदांबुजं पश्यंतीत्यन्वयः। तस्मात्त्वत्कर्म्मश्रवणादि फलं मुक्तिरेवेति भावः ३९ स्वात्मादिभ्यो(ऽ)त्यंतहितकरत्वात्त्वद्विरहो(ऽ)स्माकं अतिदुःसह इत्यभिप्रेत्याह। अप्यद्येति हे प्रभो राजसु योजितांहसां कृतापराधानां येषां अस्माकं भवतः पदांबुजादन्यत्परायणं नास्ति त्वं तान् सुहृदो(ऽ)नुजीविनः किंकरान् त्वदुक्तभोजनसिक्थसेविनो नो(ऽ)स्मान् जिहाससि अपि स्वित् द्वारकागमनव्याजेन त्यक्तुमिच्छसि किं स्वित् कीदृशः स्वकृतेहित स्वतंत्रचेष्टितः स्वार्थभूतस्वार्थं हितो वा भूत्यर्थं यो जनाय कृतचेष्टो वा वशदृष्ट्यर्थं ४०

तत्कुत इति तत्राह। तइति। यर्हि ... इंद्रियस्वामिनो दर्शनं तदेव हृषीकाणां इंद्रियाणां दर्शनाभावे ... किं रूपदानाम्नी तिपथा तत्राप्यदूतं अस्माकं यर्हि यदस्मद्भवतो दर्शनं ... काशाद्यदुभिः सहपांडवाः। कथं ... नामरूपाभ्यां युधिष्ठिरादिनाम्ना शुक्लादिरूपेण च युक्ता अतिशयर्दु त्यन्वयः। यशो येषां यदूनां ... दर्शनं तदा ते यादवाः पांडवाश्च ते वयं नामरूपवंत इति वा। के वयं इति केचित् पठंति यर्हि भवतो(ऽ)दर्शनं तदा नाम्ना यशसा बलेन रूपेण ... नकोश ... यदुभिः सह वयं केन सत्कल्पा एवेति तस्मात्त्वद्विरहो(ऽ)स्माकं मरणकल्प इत्यर्थः ४१ भोगदाधर इयं राजधानी इदानीं ध्वजादि ... विशेषचिह्नैर्विलक्षितैः ... अंकिता यथा भाति त्वयि द्वारकां गते तथा न शोभिष्यते ... त्र

ते वयं नामरूपाभ्यां यदुभिः सहपांडवाः। भवतो(ऽ)दर्शनं यर्हि हृषीकाणामिवेशितुः ४१ नेयं शोभिष्यते तत्र यथेदानीं गदाधर। त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ४२ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः। वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षिताः ४३ अथ विश्वेश विश्वात्मन् विश्वमूर्त्ते स्वकेषु मे। स्नेहपाशमिमं छिंधि दृढं पांडुषु वृष्णिषु ४४

यः। अथवा इयं भूः त्वत्पदैरंकिता यथा भाति त्वयि वैकुंठं गते तथा न शोभिष्यत इति वा ४२ न केवलं अस्माकमेव त्वत्कृतं सुखं किंतु सर्वेषां जनपदादीनामपीत्याह॥ इमइति। इमे जनपदा दयः तव संनिधानात् स्वृद्धाः त्वत्कारुण्यपूर्णदृष्ट्या वीक्षिताः एधंते हि यस्मात्तस्मादित्येकान्वयः ४३ पांडवयादवेषु भागवतत्वेन स्नेह आवश्यक इति जानंत्यपि पुत्रमित्रादिस्नेहः संसारहेतुत्वात् त्याज्य इति ज्ञापयितुमाह। अथेति। अथानंतरमेतदनुग्रहाणां किंतदिति हे विश्वेश विश्वात्मन् विश्वव्यापिन् विश्वमूर्त्ते अनंतविग्रह स्वकेषु स्वीयत्वेनाभिमतेषु पांडवेषु पांडवसंबंधिषु यादवेषु मम मगाढं पुत्रमित्रादिस्नेहपाशं छिंधीत्यन्वयः। पुत्रादिस्नेह एव छेद्यो न तु भागवतस्नेहः तस्य शास्त्रे कर्त्तव्यत्वेन विहितत्वादित्यभिप्रेत्योक्तं इममिति ॥ ॥

नकेवलं विषयविरक्त्या लंकिंतु त्वय्यनपायिनीं रतिं त्वं वितरेत्याह । त्वयीति । हे मधुपते आनंदनाथ नअन्यविषया तुच्छादिविषया अनन्यविषया अ
खंजलप्रवाहवेगं उदन्वति समुद्रे ४५ कृतिं उपसंहरति । श्रीकृष्णेति ॥ श्रियाअतसीकुसुमसदृशया कृष्णमी[?] वर्णो कृष्णसख अर्जुनसख हे सखि
वृष्णिकुलश्रेष्ठ हे अवनेर्भूमेर्ध्रुह्यः अभिमतवर्षण [?] कुलं विशेषेतु वर्षं मेघोपि कथ्यते इत्यभिधानं अवनि[?] हंसकं रक्षको नाराजांवंशम
न्वयं दहतीत्यवनिध्रुग्राजन्यवंशदहन ॥ अवनिध्रुग्राजन्याख्यवेणु दाहक इति वा तस्य संबुद्धिरवनिध्रुग्राजन्यवंशदहन । अमरवृंदवीर्य देवकृतपराक्रमगो

त्वयि मेनन्यविषया मतिर्मधुपते ऽसकृ[त्] । रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ४५ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंश
दहनाऽमरवंद्यवीर्य । गोविंद गोद्विजसुरार्तिहरावतार योगे[श्वराखिलगुरो भगवन्न]मस्ते ४६ सूत उवाच पृथयेत्थं कलपदैः प
रिणीताखिलोदयः मंदं जहास वैकुंठो मोहयन्निव मायया ४७ तां बाढमित्युपामंत्र्य प्रविश्य गजसाह्वयं ॥ स्त्रियश्च स्वपुरं यास्य
न्प्रेम्णा राज्ञा निवारितः ४८ इति श्री[भाग]वते महापुराणे प्रथमस्कंधे अष्टमोऽध्यायः ॥ ॥ ॥८॥ ॥

विंदवेदं वाणी लब्धविभवा गवां द्विजानां सुराणां आर्तिहरो अवतारो यस्य स तथोक्तः तस्य संबुद्धिः गो द्विज सुरार्तिहरावतार । योगैश्वर्ययुक्त अखिलगुरो यथा
योग्यं ज्ञानोपदेशकर्तः तेतु [?] ४६ विकुंठानाम काचिद् ऋषिपत्नी तत्सुतत्वेनजातः । वैकुंठ पुरस्थोपि वैकुंठ इति वा ॥ ॥ पृथयाकुंत्या क
लपदैः श्री[?] वाक्यैः[?] यया स्वरूपशक्त्या ४७ यत्वदमीएं तथा स्त्वितिवा [?] मिति तामुक्त्वा द्रौपदीपूर्वा स्त्रियश्च द्वारकांगमिष्या
[म]ीत्युपामंत्र्य गजाती[?] प्रविश्य स्वपुरं द्वारकां यास्यन् गमिष्यन् प्रेम्णा संप्रतिनांतव्यमिति राज्ञा [निवा]रितः पंडुपुत्रा सेन्यानैव वा सोत्सी
दिल्पकान्वयः ४८ प्रथमेऽष्टमः ॥ ॥

स्थाने दानुमबल कृष्णेमोहः सकलपुरुषार्थोत्तमः सवभगवदपरोक्ष ज्ञानलब्ध विष्णुप्रसादलभ्य इत्ययमर्थः प्रतिपाद्यते स्मिन्नध्याये । तत्र ज्ञाषपितुमुपो
द्घातं रचयति । व्यासाद्यैरित्यादिना । स्वरान्येभिषिक्तोपि ज्ञातितद् अनुबंधिवधात्पापबुध्या राज्यानिच्छु र्युधिष्ठिरो राजा नाबुध्यत अयं धर्म इति ज्ञानं नाविदि
त्यन्वयः । कथंभूतैः ईश्वरस्य ईहां चेष्टां कृष्णादि तत्कृष्णं चेष्टां जानंती तीश्वरेहाज्ञास्तैर्व्यासाद्यैर्मुनिभिरद्भुतपराक्रमेण कृष्णेन च इतिहासैः पुरावृत्तकथावि
शेषैः प्रकर्षेण बोधितोपि ज्ञात्यादिमरणनिमित्तं शुचा विद्धः १ इत्थं बोधितेपि धर्मे अधर्मबुद्धिः किंचकारेति तत्राह ॥ आहेति । हे विप्राः शृणुते ति
शेषः । प्राकृतेनात्मना धर्माधर्मविवेकविधुरेण मनसा । तत्कारणमाह ॥ स्नेहाज्जातो मोहो भ्रमः स्नेहमोहस्तस्य वशंगतः तस्मात्तन्निमित्तमाह

सूत उवाच व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा । प्रबोधितोपीतिहासैर्नाबुध्यत शुचार्पितः १ आह राजा धर्मसुतश्चिं
तयन्सुहृदां वधं । प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः २ अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः । पारक्यस्यैव देहस्य ब
ह्व्यो मेक्षौहिणीर्हताः ३ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः । न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ४

। सुहृदां ज्ञातितदनुबंधिनां वधमहर्निशं चिंतयन्धर्मसुत उद्यमाह स्नेहेपेकान्वयः । स्नेहमोहवशंगत इत्यनेन धर्मात्मनो धर्मसुतस्य कथं धर्मे हरिविमुख
[त्व]मेतदनुबंधिवधलक्षणेत्वधर्मत्वशंका भूदित्येतन्नू रतोपास्त २ किं माहेति तत्राह । अहो इति । मे हृदि रूढं कुरितमज्ञानं तत्पश्यत अहो आश्च
र्यं कथं मे पारक्यस्य परकीयस्य स्वश्व गालभोग्यस्य मे देहस्यार्थं बह्व्यो ह्यक्षौहिणी ह्यक्षौहिण्यो हता एव यस्मात्तस्मादिति शेषः ३ तत्फलमाह न मे इति ।
मे निरयान्मोक्षो वर्षाणामयुतायुतैः नस्यात् किंकथंभूतस्य मे बालान्सौभद्रादीन् द्विजान्द्रोणादीन् सुहृदो द्रुपदादीन्मित्राणि धनदानेच्छान् भद्रविशे
षान्पितॄन्भूरिश्रवः प्रभृतीन् भ्रातॄन्दुर्योधनादीन् गुरुन्भीष्मादीन् द्रोहितवान् हिंसितवान् इति बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहस्तस्य ४

प्रजाभर्तुः प्रजापालकस्य राज्ञो द्विषां वधेनैनः न पापं भवति। धर्मयुद्धे धर्मः वैरिणां राज्ञां वधो धर्मो धर्मसाधनमिति पदत्रयः पदानि हिंसितस
म्बन्धिनां मर्म स्पृशति इत्यादि शाश्वतं नित्यं वेदवचो मे बोधाय भ्रमनिरस्य यथार्थज्ञानाय न कल्पत इत्यन्वयः। तु शब्द एवार्थे न ज्ञातस्यान्वयः ५ कुतो
न कल्पत इति तत्राह। स्त्रीणामिति। मद्धतबन्धूनां मया हता बन्धवो यासां तासां स्त्रीणां। मद्धता बन्धवो यासामिति वा स्त्रीणां यो द्रोहो हिंसारू
पो ऽयं वध्यघात्याम् अभ्युत्थितः सम्प्रवृत्तः तमहं गृहमेधीयैरश्वमेधसंबंधिभिः कर्मभिर्व्यपोहितुं न कल्पो न समर्थ इत्येकान्वयः ६ तत्र दृष्टान्तमाह

नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां। इति मे न तु बोधाय कल्पते शाश्वतं वचः ५ स्त्रीणां मद्धतबन्धूनां द्रोहो यो ऽसाविहो
त्थितः। कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ६ यथा पंकेन पंकाम्भः सुरया वा सुराकृतं। भूतहत्यां तथैवैकां न यज्ञै
र्मार्ष्टुमर्हति ७ सूत उवाच इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया। ततो विशसनं प्रागाद्यत्र देवव्रतो ऽपतत् ८ त
दा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः। अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा ९

यथेति। पंकाम्भः कर्दमजलं पंकेन कर्दमेन युक्तं दुष्टं शोधयितुं यथा न शक्नोति। सुरया मिश्रितं कृतं यथा सुरादोषं व्यपोहितुं कर्तुं न शक्नोति च
यम शुद्धता हता तथैव यज्ञो हिंसारूपत्वादेनां भूतहत्यां मार्ष्टुं मार्जयितुं नार्हतीत्येकान्वयः। ज्ञानपक्षमाश्रित्य युधिष्ठिरेण यज्ञो निन्दितो न त्वकर्तृत्व
बुद्ध्या ब्रह्मार्पणं ब्रह्म हविरित्यादौ ब्रह्मार्पणबुद्ध्या कर्तृत्वेन विहितत्वात्कर्मणां ज्ञानमातनोतीत्यादेश्च ७ प्रजाद्रोहादिति भीतो युधिष्ठिरः सर्व
धर्मज्ञानेच्छया ततो हस्तिनपुराद्विशसनं युद्धस्थानं कुरुक्षेत्रं प्रायात्। यत्रापि यत्र देवव्रतो भीष्म अपतदित्येकान्वयः ८ तस्य युधिष्ठिरस्य भ्रात
रः भीमादयः सन्तः प्रशस्ता अश्वा येषां तैस्तथा तैः। तथा व्यासादयो विप्रा अन्वगच्छन्नित्यन्वयः ८

सधनंजयः सार्जुनः। गुह्यकैर्यक्षैः कुवेरो वैश्रवणः इव व्यरोचत अराजत तद्वदित्यर्थः १० सहचक्रिणः चक्रिणा कृष्णेन सहिताः दिवः स्वर्गाच्च्युतं समागतं दे
वमिवोद्योतमानं ११ तत्र तदा सर्वे देवर्षयः नारदादयः ब्रह्मर्षयो व्यासादयः राजर्षयो विश्वामित्रादयः तत्र भारतपुंगवं भीष्मं द्रष्टुमायाता आस
न्नित्यन्वयः १२ तेषां नामान्याह। पर्वत इत्यादिना रेणुकासुतः श्रीपरशुरामः १३ कौशिको विश्वामित्रः १४ ब्रह्मरातः शुकः पर्वतादयो आंगिर
सान्ता मुनयः आजग्मुरित्यन्वयः १५ महाभागो वसूत्तमो भीष्मः समेतान् संगतान् तान् व्यासादीनुपलभ्य दृष्ट्वा मनसा अतिगम्य वा पूजयामास। कथं
भूतः देशकालविभागवित् देशः कुरुक्षेत्रे कालः शरतल्पशयानलक्षणः तयोर्विभागमौचित्यं वेत्तीति। वसुत्वान्नाभिवंदनादिपूजायामशक्त

भगवानपि विप्रर्षे रथेन सधनंजयः। स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः १० दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं। प्रणेमुः
पांडवा भीष्मं सानुगाः सहचक्रिणः ११ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम। राजर्षयश्च तत्रासन् द्रष्टुं भारतपुंगवं १२ पर्वतो
नारदो धौम्यो भगवान्बादरायणः। बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः १३ वसिष्ठ इंद्रप्रमदस्त्रितो गृत्समदो ऽसितः। कक्षी
वान् गौतमो ऽत्रिश्च कौशिको ऽथ सुदर्शनः १४ अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयो ऽमलाः। शिष्यैरुपेता आजग्मुः कश्यपांगिर
सादयः १५ तान्समेतान्महाभागानुपलभ्य वसूत्तमः। पूजयामास धर्मज्ञो देशकालविभागवित् १६ कृष्णं च तत्प्रभावज्ञ आ
सीनं जगदीश्वरं। हृदिस्थं पूजयामास माययोपात्तविग्रहं १७ पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान्। अभ्याचष्टानुरागा

त्वान्मानसीं वाचिकीं आंजलिकीं वा पूजां कृतवानित्यर्थः। अन्यत्र तद्देशतत्कालविभागं जानातीति धर्मज्ञः। आपत्सु श्रैरंधीभूतेन चक्षुषा १८
पि धर्मं जानातीति धर्मं तज्ज्ञानातीति वा धर्मज्ञः १६ कृष्णं च पूजयामासेत्यन्वयः। कथंभूतः तस्य कृष्णस्य प्रभावं सामर्थ्यं जानातीति तत्प्रभावज्ञः
कथंभूतं तत्र आसीनं जगत ईश्वरं मायया स्वेच्छया उपात्तविग्रहं धृतशरीरं वसुदेवशरीरं हृदि मनसि स्थितं ध्यानलक्षणोपासनया शरीरमध्ये पुंडरीककर्
णिकायां दीपवद्दीप्यमानं वा १७ प्रश्रयगुणेन प्रेमगुणेन च सम्यक् संगतान् समीपे निषण्णान् पांडोः पुत्रान् अनुरागजैरश्रुभिरंधीभूतेन चक्षुषा

णोधर्मनंदनयुधिष्ठिरप्रभृतयःक्लिष्टंक्लेशयुक्तंयथाजीवितुंनार्हथविप्रादिद्विजेभ्योपिसुखजीवनायालं।किमुतवक्तव्यंत्रयमभिप्रायेणोक्तंविप्रधर्माच्युता
श्रयाइति।तथापियत्क्लिष्टंजीवथतत्कष्टंअन्याय्यंअहोअहोआश्चर्यादप्याश्चर्यंअहोन्याय्यमितिप्रश्नहृष्टसंज्ञाभावोलोकदृष्टिमपेक्ष्यबोध्योनतुप
रवानांदुःखमस्तीतितेषांभूभारावतारणायावतीर्णानामसुरजननिधनेनवनवासादिद्वपिनित्यसुखित्वादितितद्योतनार्थः।धर्मस्यनंदनः।ध
र्मंनंदयतीतिवा।धर्मएवनंदनोयस्यसतथेतिवा।धर्मेणसुखकारीडायस्यसतथेतिवा।तस्मान्नंदनंसुखंयस्यसतथेतिवा १९ अतिरथेपांडौसं

भीष्मउवाच अहोकष्टमहोन्याय्यंयत्यूयंधर्मनंदन।।जीवितुंनार्हथक्लिष्टंविप्रधर्माच्युताश्रयाः १९ संस्थिते
तिरथेपांडौपृथाबालप्रजावधूः।युष्मत्कृतेबहुक्लेशान्प्राप्तातोकवतीयथा २० सर्वंकालकृतंमन्येभवतांचयद
प्रियं।सपालोयद्वशेलोकोवायोरिवघनावलिः २१

स्थितेस्वर्गंगतवतिसत्यतोकवतीपुत्ररहितायथाबहुक्लेशवतीभवतितथाबालप्रजायुष्मन्माताप्रथापुत्रवत्यपियुष्मत्कृतेयुष्मत्पोषण
पालनाद्यर्थान्बहुक्लेशान्प्राप्ता।पुत्रवाहुल्येनतुश्रुतवयःपुत्रवतीपुत्रपोषणादावतिक्लेशंप्राप्नोतितथेत्यन्वयदृष्टांतोवेत्येकान्वयः २०
एवंविधयुष्मदप्रियेसर्वदास्वकर्मनियामकोहरिरेवहेतुरित्यभिप्रेत्याह।।सर्वमिति।भवतांयदपियंदुःखादितत्सर्वंयुष्मत्प्रारब्धकर्म
नियामककालाख्यहरिकृतंमन्ये।वायोर्वशंगताघनावलिरिवजनराजन्डलोकोयस्यभगवतोवशेवर्त्ततेसनारायणःसर्वगुणपूर्णत्वा
त्कालइत्युच्यतेइत्येकान्वयः २१

अन्यथानुपपत्तितर्कतोप्ययंहेतुःसिध्यतीत्याह।यत्रेति।यत्रराजारंजकःधर्मस्यसुतःयत्रचतस्यराज्ञःकनिष्ठःक्षितिभाराचितदितिसुतशो
णितदिग्धांगदांपाणौबिभ्रत्।तन्नावशीकृत्यरक्षाकृत्कोदरः।तथाचयत्रवेंद्रावतारःकृष्णोर्जुनोऽस्त्रीद्रोणादुपात्ताश्रयामःतस्यचक
रिपूर्णंपूयशोणितवमनकारिगांडीवाख्यंधनुर्यत्रचैषांसर्वसुपर्वाधिराजोराजपक्षोनंतबलवीर्याद्यनंतगुणार्णवःश्रीमान्वासुदेवःवसुदेव
पुत्रःकृष्णःसुहृदनिमित्तबंधुस्ततस्तत्रविपत्तेषांप्रारब्धकर्माभावेविपत्कुतःस्यादन्यत्रततस्मादित्येकान्वयः २२ सुहृदसंस्यविपत्कारत्वक
थमितितत्राह।नहीति।।अपरिछिन्नत्वादस्यस्वरूपजिज्ञासयायुक्ताःकवयोपिमुह्यंतिअयमित्थंभूतइतिनिर्दिष्टुंनजानंतिहेराजंस्तस्या

यत्रधर्मसुतोराजागदापाणिर्वृकोदरः।कृष्णोस्त्रीगांडिवंचापंसुहृत्कृष्णस्ततोविपत् २२ नह्यस्यकर्हिचिद्राजन्
पुमान्वेदविधित्सितं।यद्विजिज्ञासयायुक्तामुह्यंतिकवयोपिहि २३ तस्मादिदंदैवतंत्रंव्यवस्यभरतर्षभ।तस्यानुवि
हितोनाथानाथपाहिप्रजाविभो २४

स्यविधित्सितंकर्तुमिष्टंकश्चिदपिपुमान्कदाचिन्नवेदहियस्मात्तस्मात्सर्वेषांस्वकृतादृष्टानुसारिफलदातुरस्यतत्त्वत्सुहृत्त्वेपिप्रारब्धकर्मानुकू
ल्येनविपत्करत्वंयुक्तमित्येकान्वयः २३ विवक्षितकथनंनिगमयति।तस्मादिति।तस्मादुक्तहेतुभ्योदेवस्यहरेस्तंत्रमधीनंजगन्निश्चित्यत
स्यहरेरनुकूलयाक्षतिस्मृतिलक्षणयाज्ञयाभगवद्विहितदंडविधिनिग्रहशिष्टजनपरिपालनाख्यस्वकर्मविहितःविधिमनुवर्त्तमानःतत्राथ
श्रीबुद्धिमपहायहेभरतकुलश्रेष्ठप्रभोसमर्थनाथअनाथास्त्वदन्यनाथरहिताःप्रजाःपाहीत्येकान्वयः २४

एतावंतं कालमीश्वरं परोक्षतयाभिधायेदानीमपरोक्षतयाह एष वा इति। एष वा इति। यः साक्षादाद्यो नारायणो भगवान् एष पुमांल्लोकमज्ञानेन यथार्थज्ञानाच्छादिकया मायया मुह्यन्निति मोहयन् गूढोऽविज्ञातो वृष्णिषु चरतीति। यस्मात्तस्माद्भयमेव कालात्मेत्यन्वयः २५ तर्हि किमेनं यथावद्वेदेति तत्राह। अस्येति। हे नृप सदाशिवो भगवानस्य हरेर्गुह्यतममनुभावं वेद तथा देवर्षिर्नारदः साक्षात्कपिलो भगवान् पि जानातीत्येकान्वयः २६ त्वं यं कृष्णं मातुलेयं मातुलस्य वसुदेवस्यापत्यं प्रियं बंधुं मित्रं संकटेषु मित्वा ज्ञात्वा रक्षितारं सुहृत्तमं अतिशयेन सुहृदं मन्यसे। यं त्वं च सौहृदात्सौहार्दात् त्वत्सचिवं मंत्रिणं दूतं संदेशहरं सारथिं यतारमकरोः स्मस्यास्येति पूर्वेण संबंधः २७ तथा

एष वै भगवान्साक्षादाद्यो नारायणः पुमान्। मोहयन्मायया लोकं गूढश्चरति वृष्णिषु २५ अस्यानुभावं भगवान् वेद गुह्यतमं शिवः। देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप २६ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं। अकरोः सचिवं दूतं सौहृदादथ सारथिम् २७ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् २८

यद्दोस्य सर्वात्मनो ह मनेन सारथित्वादिषु विहितो न नु इति विषमबुद्धिर्नास्तीत्याह। सर्वात्मन इति। सर्वांतर्यामिणः पिता माता सुहृद्बंधुरित्यादिवाक्याद्बंधादिबुद्धित्वाद् बंध्वादीनां बंधादित्वापादकत्वेन मुख्यबंधादित्वाद्बंधादि सर्वरूपत्वात् सर्वात्मनो वा समदृशः यथा वक्ता तथा सर्वपदार्थान् जानतः अद्वयस्य समाधिकरहितस्य अनहंकृतेः प्राकृतवैकृतशरीररहितत्वाद्देहाद्यहंबुद्धिरहितस्यात एव निरवद्यस्य रागादिदोषरहितस्य तैस्तैर्हेतुभिरस्य कृष्णस्य तत्कृतं सारथित्वादिकृतं निमित्तं च यन्मतिवैषम्यं क्वचिदपि नास्ति। अनेनं विधानां जीवानां हितदित्येकान्वयः

एवं विधविषममतिशून्यस्य स्वस्य संसर्गकारणं किमित्याशंक्याशुभ्याद्विषमकमपि भक्त्या द्रवीकृतमनो नु कंपैव कारणमित्याह। तथापीति हे नृप तथापि एवं उक्तप्रकारेण कृतकृत्यस्याप्यस्य एकांतभक्तेषु अनन्यभक्तिमत्सु युष्मासु अत्र भीष्मे पश्य पितामहे अनुकंपितं अनुकंपा कृपां गच्छत् तदिति तत्राहयदिति। प्राणत्यागकाले प्रायः स्वेन बुद्ध्या शुद्धा दयोपि पूर्वमेव विमुखा गच्छत्यहो अस्य नृपाणां अनजतो मे मम स्वामी श्रीकृष्णः साक्षाद्दर्शनं दृष्टिविषयमागत इति यद्यस्मात्तस्मात् कृपानुकंपैव संसर्गकारणमित्येकान्वयः २९ प्राणत्यागकाले हरिदर्शनफलमाह। भक्त्येति। भक्त्या हरौ मन आवेश्य वाचा यस्य हरेर्नारायणादिनाम कीर्तयन् कलेवरं शरीरं त्यजन् योगी कामकर्मभिर्मुच्यते मुक्तः स्यात्तत्र त्यक्तो दृष्ट्वा म्रियमाणस्य मे मुक्तिः किं वर्णनीयेति वाक्यशेषः। तस्मात्तत्

तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं। यन्मेसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः २९ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन्। त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ३० स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं। प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः ३१ सूत उवाच युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे। अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वतां ३२

तिकृष्णमाश्रित्य सद्भक्त्वकारणस्वधर्मे बुद्धिः धर्मं हित्वा त्वं राज्यं कुर्वितिपरमतात्पर्यार्थः ३० युधिष्ठिरं प्रत्यभिधायेदानीं स्वच्छंदमृत्युर्भीष्म उत्तरायणसमयपर्यंतं भगवतोवस्थानं प्रार्थयते। स इति। अहं यावदिदं पंचभूतरचितं कलेवरं हिनोमि त्यजामि तावदुत्तरायणपर्यंतं स देवदेवो भगवान्प्रतीक्षतां मपि कृपया अनुग्रहं कुर्यादिति प्रार्थयइत्यन्वयः। कथंभूतः प्रसन्नहासस्तथारुणे लोचने नेत्रे च प्रसन्नहासारुणलोचनानि तैरुल्लसन्मुखमेवांबुजं यस्य सतथा ध्यानपथः उपासनाविषयः इदं ध्यानमेव पंथा मार्गो यस्य स तथा चत्वारो भुजा यस्य स तथा। इदमेव ध्यानविषयवपुः पुरतः स्थितस्याक्षिगुणत्वादत एव स इति परोक्षतया निर्देशः ३१ अथ युधिष्ठिरो भीष्मोक्तमाकर्ण्य शरतल्पे शयानं भीष्मं विविधान्धर्मान् पृष्टवानित्यन्वयः। इष्टं त्वेतर्हि किमर्

कान्तादि॰ श्रीधर्मानितिपृयते ३२

धर्माणां तत्त्वविद्भीष्मः एतान् धर्मान् नानाख्यानात्मकेष्वितिहासेषु वर्णयामासेत्यन्वयः। कान् कथंभूतान् वर्णिपुरुषस्यैते निजत्वेन विहिता धर्मा
तन्नदाश्रमिपुरुषस्यैते विहिता धर्मा इति विविच्य यथावर्णं यथाश्रमं वर्णिनामाश्रमिणां पुरुषाणां स्वभावविहितान् निजत्वेन विहितान् धर्मान्
वैराग्योपाधिना रागोपाधिना च एते निवृत्तिधर्मा एते प्रवृत्तिधर्मा इति निष्कामं ज्ञानपूर्वमित्यादिवचनैः प्रतिपादितोभयविधलक्षणान् ३३ विभा
गशः पृथक् पृथक्। भगवतः सर्वजगत्स्रष्टृत्वादिधर्मान् ३४ तथा धर्मार्थकाममोक्षांश्च तत्साधनसहितान् समासव्यासयोगतः संक्षेपवि
स्तराभ्यां यथा यथावत् तात्त्विकदेवेन मय्युपदिष्टादिबोधने भीष्मस्य सामर्थ्यात् तं भीष्मस्य कीर्त्यर्थं तस्मिंस्तत्काले विशेषाविष्टश्रीकृष्णरू
पं उपश्रृण्वन् भाव व्यो विलस्यार्थ्ययेति ३५ स्वच्छन्दमृत्योः स्वेच्छया मरणं कुर्वतो योगिनो वाञ्छित उत्तरायणाख्यः कालो यः स भीष्मस्य प्रत्यु

पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं। वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ३३ दानधर्मान् राजधर्मान् मोक्षधर्मान् वि
भागशः। स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ३४ धर्मार्थकाममोक्षांश्च सहोपायान्यथामुने। नानाख्यानेतिहासेषु वर्णया
मास तत्त्ववित् ३५ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः। यो योगिनः छंदमृत्योर्वाञ्छितस्तूत्तरायणः ३६ तदोपसंहृत्य गिरः सह
स्रणीर्विमुक्तसंगं मन आदिपूरुषे। कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ३७

पस्थित इत्यन्वयः। उत्क्रमिष्यतो ज्ञानिनः कालोऽनुगुणो किंचित्सुखबाधिकं भवति नान्यथा मुक्त्यभावमिदं इत्येतमर्थं तु शब्दो वक्ति ३६ तदोत्तराय
णे प्राप्ते सप्तिसहस्रणीः स्वभुक्तिसमये स्वोपदिष्टानेकजननेता एकादशाक्षौहिणीनायकस्य च सहस्रसंख्यावतां नायकत्वकथनसनि
त्यत्वाद्रुपेक्षणीयं। अमीलितदृक् प्रफुल्ललोचनः विशेषतश्चक्षुर्लितज्ञानो वा भीष्मो गिरं विषयसंबन्धिनीमुपसंहृत्य मुक्तो विषयसंगो येन तत्तथो
क्तं मनः पुरःस्थिते प्रत्यक्षे चतुर्भुजे नृपलक्षशोभमानपिशंगवस्त्रे आदिपुरुषे नारायणावतारे श्रीकृष्णे व्यधारयत् विशेषेणाचलं तथा धारय
दित्येकान्वयः। मीलितदृक् अर्द्धमुकुलितचक्षुर्वा ३७

विशुद्धया फलरागादिदोषरहितया यहो निरंतरमनोधारणया हताशुभः निरस्तपापः तस्य कृष्णस्येक्षया निरीक्षणेनैव नान्येनाशु तत्क्षणं विनष्टायुध
निमित्तव्यथश्च अत एव तदितर निवृत्तः निरस्तः सर्वेषामिन्द्रियाणां वृत्तीनां व्यापाराणां विभ्रमो विलासो यस्य स तथोक्तः। निवृत्तसर्वेन्द्रियवृत्तिश्चायं विग
तश्रमश्चायमिति वा। यद्यमयं जन्यं वचनं विसृजन् त्यजन् व्यर्थवचनं सुवन्नाजनं जननमर्दयति विनाशयतीत्युपलक्षणमेतत्। मरणं च जननं
च जननमरणनाशकत्वेन नित्यमुक्तिदातृत्वाज्जनार्दनं संतुष्टावेत्येकान्वयः ३८ ननु किमियं स्तुतिर्मानसी वाचनिकी वा नाद्यः। पार्थं जीवत
स्त्वप्रयोजनाय स्तुतेरनुपपन्नत्वात् द्वितीयो युक्त इत्यभिप्रेत्याह॥ इति मतिरिति। इतिशब्दो हेत्वर्थः। प्रकरणार्थो वा समाप्तिवचनो वा। यत एवं
भगवान् सकलप्रवर्तकः। तस्मात्तस्मिन् मतिर्मननशीला बुद्धिरुपकल्पिता तद्विषयीकृता। सकलशास्त्रप्रकरणे वक्ष्यमाणप्रकरणे वा। स

विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः। निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजन्जनार्दनं ३८
भीष्म उवाच   इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि। स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृति
मुपेयुषि यद्भवप्रवाहः ३९

मासीन्मरणकाले। किंविशिष्टे विभूम्नि परिपूर्णे अपरिच्छेदलक्षणापूर्णत्वं देशकालयोरप्यस्तीत्यत उक्तं भगवति निरवधिकैश्वर्यादिगुणवति
यः कश्चिद्विषिसत्तमो निर्दिश्यत इति शंका माभूदित्याह सात्वतपुंगवे यादवेश्वरे स्वसुखे स्वरूपानन्दे उपगते आगते अतिनिकटे वर्तिनी निरावि
त्वाद्दुका मतां प्रकृतिं श्रियं निरात्मकां त्रउपेयुषि प्राप्तवति। कीदृशी मतिः। वितृष्णा विषयतृष्णारहिता वीरेऽतृष्णा यस्याः सा तथा वा विःप
क्षि परमात्मनो रित्यभिधानं॥ ॥

विजयोऽर्जुनः यस्य सखा स तथा तस्मिन् कृष्णे मम अनवद्या रागाद्यवद्यविधुरा रतिरस्तु। रतिरनवद्या निर्दुष्टास्त्वित्यन्वयः। कथंभूते त्रिभुवनैकमनं कमनीयं त्रिभुवनानां कमनमिच्छा यस्मिंस्तत्तथोक्तमिति वा तमालपुष्पवद्वर्णो यस्य तत्तथा। तमालवर्णं वरं च तत् अम्बरं च वरांबरं वस्त्रं रवेरादित्यस्य करः किरण इव गौरमनुरागवर्णं वरांबरं यस्य वपुषस्तत्तथोक्तं गौरोऽरुणे सिते पीते स्वच्छे च परिकीर्तित इत्यभिधानात् अलककुलैः कुंतलकुलैः आवृतमाच्छन्नमाननाब्जं यस्य तत्तथा। एवंविधं वपुर्दधाने ३३ ममात्मा मनः कृष्णे अस्त्वित्यन्वयः। कथंभूते विलसच्छोभमानं कवचं यस्य स तथा तस्मिन्। विलसन् स्वर्णनिर्मितः कवचे शब्दायमानी यस्य स तथा तस्मिन्निति वा। अच्छेद्यत्वात् मे द्यात्वेप्स्युरस्मा[illegible]नायममनिशि

त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने। वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ३३ युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये। मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ३४ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य। स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ३५

तैः शरैर्विभिद्यमाने च त्वक् यस्य स तथोक्तस्तस्मिन् वीतुपसर्गाद्विद्यमानत्वगप्यभिद्यमाने वेति ज्ञातव्यं निशितशरैरप्यविभिद्यमानत्वगिति तात्पर्यार्थः। विशिष्य इति वत्। युद्धे तुरगाणां खुरनिपातोच्छितेन रजो विशेषेण धूम्रवर्णैश्च नैर्विध्यद्भिः परस्परमाघ्नद्भिः कचैः केशैर्लुलितैः कलुषितैः श्रमवारिभिः श्रमनिमित्तस्वेदोदबिंदुभिरलंकृतमास्यं मुखं यस्य स तथोक्तः तस्मिन् ३४ पार्थसखे कृष्णे मम रतिरस्त्वित्यन्वयः। सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युतेति सख्युरर्जुनस्य वचो निशम्य सपदि स्वः श्रवणानंतरं निजपरयोः पांडवकौरवसंबंधिनोर्बलयोः सैन्ययोर्मध्ये रथं प्रवेश्य स्थितवति अक्ष्णा निरीक्षणेन परसैन्यानां कौरवसैन्यानां आयुर्जीवलक्षणं हृतवति ३५

यः परमः वीरस्तस्य चरणयोः रतिरस्तु। युद्धाय व्यवस्थितयोः उभयोः सेनयोः मुखं भीष्मादिकं निरीक्ष्य हत्वार्थकामो मम कृत्यं गुरून्निहत्येति दोषबुद्ध्या नयोत्स्य इत्युक्त्वा स्वजनहननाद्विमुखस्य अर्जुनस्य कुमतिं दुष्टनिग्रहशिष्टपरिपालनलक्षणव्यापारबुद्धेर्विपरीतबुद्धिमशोच्यानन्वशोचस्त्वमित्यादिरूपया आत्मविद्यया हरत् कस्विविषये वदनं तवेति दुष्टनिग्रहरूपधर्मे बुद्धिं कारितवान् मे तस्य परमस्य चरणयोः स्मरणेन ज्ञानसाधनयोरव्ययविशेषयोः रतिरस्त्वित्यन्वयः ३६ अथ युद्धे आयुधं न ग्रहिष्यामीति स्वविषयं प्रतिज्ञां कृष्णो विहाय यो मत्कृतानुकंपी आयुधं ग्राहयिष्यामीति मत्प्रतिज्ञामृतमधिकर्तुं स्थितां कर्तुं धृतरथचरणो छत्रसुदर्शनचक्रः रथस्थो रथात्

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या। कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु॥ ३६ स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो [illegible]। धृतरथचरणोऽभ्ययाद्बलाद्गर्हरिरिव हंतुमिभं गतोत्तरीयः ३७ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत [illegible]आततायिनो मे। प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुंदः ३८

प्लुतोऽवतीर्णः गतोत्तरीयः स्रथितोत्तरीयवासाः हरिः सिंहः इभं गजमिव बलात् उभयोः सेनयोः पुरतो मां हंतुमभ्ययात् [illegible]स्मात् आततायिनो मे निशितैस्तेजितैर्विशिखैर्बाणैर्हतो विद्धो विशीर्णदंशः खंडितकवचः क्षतजेन रुधिरेण परिप्लुतः स्नातस्तत्प्रसभं रथात् अवतरभीष्म प्रति हे तत्त्वर्जुनवाक्यमनादृत्य बलात्कारात् मम वधार्थमभिससार स मुकुंदो भगवान् मम मुदे भवत्विति श्लोकान्वयः ३४

इह युद्धे यं निरीक्ष्य हताः स्वरूपं वैष्णवं धाम गताः मुमूर्षोः म्रियमाणस्य मे तस्मिन् भगवति रतिरस्त्वित्यन्वयः। कथंभूते विजयस्य अर्जुनस्य रथ एव कुटुं
बं रक्षणीयवर्गो यस्य तस्मिन्। आत्ततोत्रे गृहीतप्रतोदे धृता हयरश्मयः कविकामुखरज्जवो येन तथा। जितश्रम इति भावप्रधानो निर्देशः
। जितश्रमतया ईक्षणीयो दर्शनीयः धृतहयरश्मिश्चासौ जितश्रमेक्षणीयश्चेति तथोक्तः तस्मिन्। जितश्रम इति कुलविशेषणं वा। स्वरूपं मूलरूपं
वा ३९ यस्य ललितानि गतिविलासादीनि तैर्याक्रान्ति ललितगतिश्च विलासश्च वल्गुहासः मंदस्मितं च प्रणयेन निरीक्षणं च तथोक्तानि तैः कल्पि
त उरु पृथु मानो यासां ताः तथोक्ताः। ललितगत्यादिभिः कृष्णकल्पितं समर्पितमुरुमानं महापूजा याभिस्ताः तथोक्ता इति वा। अत एव उत्कृष्टेन म

विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिजितश्रमेक्षणीये। भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं ३९
ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः। कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगुः किल यस्य गोपव
ध्वः ४० मुनिगणनृपवर्यसंकुलेंतःसदसि युधिष्ठिरराजसूय एषां। अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा
४१

देनांधाः कृतं कृतं रासलीलादिपराक्रमम् अनुकृतवत्यः कृष्णायमानत्वेनानुकुर्वाणाः गोपवध्वः गोपस्त्रियः यस्य प्रकृतिं तदशरीरं विहाय स्वभावाविर्भा
वलक्षणं मोक्षमगुः किल। तस्मिन् कृष्णे रतिरस्त्विति पूर्वेणान्वयः ४० मुनीनां गणैः नृपाणां वर्यैश्च संकुले निबिडे युधिष्ठिरराजसूययज्ञे
अंतःसदसि एषां ऋष्यादीनां मध्ये यो अर्हणम् अग्रपूजाम् उपपेदे प्राप्तवान्। युधिष्ठिरस्त्वेष भीष्ममुखेनायमेवाग्रपूजार्ह इति शास्त्रं ते उपपादया
नेति वा स एव आत्मा परमात्मा मत्कालिक्षणान्तकाले समये मम दृशिगोचरः दृष्टिविषय आविर्भूतोऽहो मम भाग्यमिति शेषः। आविरात्मा प्रका
शस्वरूप इति वा ४१

आत्मत्वविवरणपूर्वकं सोऽस्मीति तमिममिति। वक्ष्यमाणमानित्वेन प्रति दृशं दृशं दृशं प्रति नैकधा चक्षुरिंद्रियनियामकतया अनेकरूपं स्थितमर्कं यथैकमे
व समधिगच्छन्ति ज्ञानी तथा अहमप्यात्मना कल्पितानां सृष्टानां शरीरभाजां जीवानां हृदि हृदि विष्ठितं धिष्ठितं विविधं बहुरूपं स्थितं तमिममजं कृष्णं एकत्व
संख्याविशिष्टं न द्वित्वेपितं समधिगतोस्मि ज्ञातवानस्मि कीदृशोहं विधूतभेदमोहः अवतारगुणादिषु निरस्तभेदभ्रमबुद्धिः यथास्थितवस्तुविज्ञानी
वा। अधिगंत्रधिगमनाधिगम्यानां भेदस्याबाधितानुभवसिद्धत्वाद्दृष्टान्तः कृष्णोन्य इति भेदमोहनिरासवर्णनेन नित्यदर्शनदुराग्रहविजृंभितैरविद्याक
ल्पितत्वमात्मपरत्वयोग निरस्तं। अन्यथा तस्यैव यद्धर्मस्यात्। शरीरभाजामित्यनेन चेतनबहुत्वसिद्धेश्च नित्यो नित्यानां चेतनश्चेतनानामिति श्रुतेः

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां। प्रतिदृशमिव नैकधार्कमेकं समधिगतोस्मि विधूतभेदमोहः॥४
२॥ क्षितिभरमवरोपितुं कुरूणां श्वसन इवावृजन दृक् वंशवह्निं। तमिममजमनुव्रतार्तिहांघ्रिं हृदि परिरभ्य जहामि मर्त्यनीडं ४३
सूत उवाच कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः॥ आत्मन्यात्मानमावेश्य सोंतःश्वास उपारमत् ४४

४३ स्तुतिमुपसंहरति। क्षितिभरमिति। श्वसन इव वायुर्यथा वंशेषु वेणुषु मिथः संघर्षणाद् वह्निं सृजति तथा यः श्रीकृष्णः क्षितिभरं भूभारं असुरबलल
क्षणं अवरोपितुम् अवतारयितुं कुरूणाम् अन्वये वंशे कृतवंशे वह्निं कृतान्तदहनमसृजत्। तमिममनुव्रतानां भक्तानामार्तिहता आर्त्तिहा अंघ्रिर्यस्य तं
थोक्तं। अजं श्रीकृष्णं हृदि परिरभ्य मर्त्यनीडं मरणधर्म शरीरं जहामि स कृष्णो मामनुग्रहं करोत्विति वाक्यशेषः ४३ कथंकारं शरीरमत्याक्षीदित्यत्रा
ह। कृष्ण इति॥ एवमुक्तप्रकारेण मनसा वाचा दृष्टेर्वृत्तिभिः इंद्रियैः परिरभ्यैव तु कृत्वा आत्मनि हृदि स्थिते बहिः स्थिते च श्रीकृष्णे भगवति आत्मानं स्वजीव
चैतन्यलक्षणं अंतःकरणं वा अहंस्वतंत्रं तदधीनम् एवं समावेश्य निधाय सभीष्मः अंतःश्वासः रेचकपूरके कृत्वा श्वासोच्छ्वासस्य प्राणापानौ कुंभके कृत्वा
मूलाधारात् सुषुम्नाद्वारा नाभिचक्रादिक्रमेण उदानवायुं मूर्द्धनि नीत्वा उपारमत् शरीरं सजहादित्येकान्वयः ४४

समागतास्ते सर्वे निष्कले षोडशकलावर्जिते ब्रह्मणि हरौ संपद्यमानं प्राप्नुवन्तं भीष्मम् आज्ञाय तूष्णीं बभूवुः। कथमिव दिनात्यये संध्यासमये वयांसि पक्षिण इवेत्यन्वयः ४५ तत्र भीष्मस्य निर्याणसमये खात् आकाशात् भीष्ममूर्ध्नि निशेषुः ४६ संपरेतस्य मृतस्य निर्हरणादीनि शवसंस्कारपूर्वःसराणि कर्माणि कृत्वा भीमादिभिश्च कारयित्वा ४७ भगवन्महिम्ना हृष्टा रोमाञ्चितसर्वगात्रास्ते कृष्णस्य गुह्यनामभिः वेदशिरोगतरहस्यना-

संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले। सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ४५ तत्र दुन्दुभयो नेदुर्देवमानववादिताः॥
शशंसुः साधवो ब्रह्मन् खात्पेतुः पुष्पवृष्टयः ४६ तस्य निर्हरणादीनि संपरेतस्य भार्गव॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितो
भवत ४ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ४८ ततो युधिष्ठिरो गत्वा स
हकृष्णो गजाह्वयं। पितरं सान्त्वयामास गान्धारीं च तपस्विनीं ४९ पित्रा चानुमतो राज्ञा वासुदेवानुमोदितः। चकार राज्यं धर्मेण
पितृपैतामहं विभुः ५० इति श्रीभागवते महापुराणे प्रथमस्कन्धे नवमोऽध्यायः॥ ॥

मभिः कृष्णहृदयाः कृष्णे हृदये येषां ते तथा कृष्णे हृदयं मनो येषां वा मिलिता ४८ गजाह्वयं गजसमानं नाम हस्तिनपुरं पितरं धृतराष्ट्रं ४९ अनुमोदितो अनुज्ञातः पित्रा धृतराष्ट्रेण च पितृपैतामहं पितृपितामहागतं धर्मेण शास्त्रोक्तवर्त्मना विभुः राज्यकरणशक्तिमान् ५० इति श्रीविजयध्वजतीर्थविरचितायां प्रथमस्कन्धटीकायां नवमोऽध्यायः॥ ॥

हस्तिनपुराहारकायाञ्चाकथनपूर्वकं भगवत्प्रसादलब्धयुधिष्ठिरराज्यसमृद्धिकथनेन हरेर्महिमैव वर्ण्यतेऽस्मिन्नध्याये। तत्र हरितद्भक्तकथायामविरतमनाः शौनकः पुनरपि पृच्छतीत्याह हत्वेति। स्वरिक्थं स्वराज्यं स्पर्धत इदं ममास्माकमिति स्पर्द्धत इति स्वरिक्थस्पृधः तान् आततायिनः प्रतिवीरं हत्वा भर्तुकामान् दुर्योधनादीन् हत्वा अनुजैः सह प्रत्यवरुद्धभोजनः संक्षिप्तभोगः धर्मभृतां धर्मप्रवर्तकानां व्यासादीनां गविवा चिस्थिरो निश्चलः युधिष्ठिरः कथं केन प्रकारेण राज्यपालने प्रवृत्तः किं कर्माकार्षीत् यथा कृष्णश्च तेन सह हस्तिनपुरमागतः किमकृत तदस्माकं ब्रूहीत्यन्वयः १

शौनक उवाच हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां गरिष्ठः। सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः
किमकार्षीत्ततः १ सूत उवाच वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवतापनो हरिः॥ निवेशयित्वा निजराज्य
ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह २ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः। तद्यशः पावनं दिक्षु शतमन्योरिवातनो
त् ३

पांडवानां निरतिशयहरिकृपयैव राज्यादिलाभ इति ज्ञापयन् पांडवस्थापनादिकृष्णमहिमानं तावदाह॥ वंशमिति। ईश्वरः जगच्चेष्टायां समर्थः हरिः वंशदवाग्निना उत्पन्नाग्निना निर्हृतं कुरोः वंशं संरोहयित्वा परीक्षिदंकुरेण जनयित्वा युधिष्ठिरं निजराज्ये निवेशयित्वा प्रीतमना बभूवेत्यन्वयः। नित्यप्रीतस्य कादाचित्कप्रीतिस्तु लौकिकापेक्षयेत्यमर्थं हशब्देन प्रसिद्धं द्योतनेनाह भवभावन इति वा पाठः। सृष्टिवर्धनः। अनेन संरोहणशक्तिरदर्शि। ईश्वर इत्यनेन राज्यस्थापनमाहात्म्यमसूचि। भवतापन इत्यनेन संसारोन्मूलनकर्तुः हरेः पांडवरिपुनिबर्हणं किमु वक्तव्यमिति न्यायो दर्शितः २ याजयित्वेत्यस्य युक्तार्थः ३

किमकार्षीदिति प्रश्नं परिहरति। निशम्येति। अथ युधिष्ठिरः भीष्मोक्तं धर्मं सर्वं तथा अच्युतस्य कृष्णस्योदितं वाक्यं च निशम्य तदुभयं श्रुत्वा प्रवृत्तमुत्पन्नं यद्विज्ञानं तेन विशेषेण धूतः निरस्तः विविधभ्रमः तत्त्वे नानासंशयो यस्य स तथोक्तः। श्रीकृष्णाश्रयः अनुजैर्भीमादिभिरनुवर्तितः अमात्यादिसप्रणिधिभिः रूपालिताम् गामवनीं स्वर्गं इंद्रो यथा शशासेत्यन्वयः। भूमिः स्वर्गसमानामफलप्रदेति द्योतनाय इंद्रोक्तं। अमात्या मंत्रिणो दूताः श्रेणयश्च पुरोहिताः। पुरं जनपदं चेति सप्त प्रणिधयः स्मृता इति वचनात्॥ परिधिः समुद्रः स एव उपांते अवसाने यस्याः सा परिध्युपांता तामिति वा टीकायां रायराणमतापरित्ता नादुच्छ्रितइतिज्ञातव्यं ४४ कृष्णाश्रयफलमाह। काममिति। पर्जन्यो मेघाभिमानी देवः। सर्वेषामभीष्टं दोग्धीति सर्वकामदु

निशम्य भीष्मोक्तमथाच्युतोदितं प्रवृत्तविज्ञानविधूतविभ्रमः। शशास गामिंद्र इवाजिताश्रयः परिध्युपांतामनुजानुवर्तितः ४ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही। सिषिचुः स्म व्रजान्गावः पयसोधस्वतीर्मुदा ५ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः। फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ६ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः। अजातशत्रावभवन्जंतूनां राज्ञि कर्हिचित् ७

घा गावः सौरभेय्यः पयसा क्षीरेण गोष्ठं सिषिचुः सिक्तवत्यः अतिस्थूलं ऊधः क्षीरपात्रं यासां ताः अत्यूधसः ५ नद्यादयः रत्नानि फलंतीति। वनस्पतयः पनसादयः वीरुधो मातुलंगादयः। औषधयो व्रीह्यादयः। पर्जन्यादयः तस्य युधिष्ठिरस्य काममिच्छानुसारेण अवर्तंत ऋतावृतौ कृष्णादिभिर्मनोः सुवर्तित्यन्वयः ६ न केवलमिष्टप्राप्तिरनिष्टनिवृत्तिश्चेत्याह नाधय इति। अजातशत्रौ युधिष्ठिरे जंतूनां राज्ञि सति कदाचिदपि दैविकादिहेतवः क्लेशा नाभवन्नित्यन्वयः। आधिः मानसी पीडा। व्याधिः भगंदरादिः। कथंभूताः दैवानि भूतानि च आत्मा च हेतुर्निमित्तं येषां ते तथोक्ताः। अधिदैवहेतुः अनावृष्ट्यादिः। अधिभूतहेतुः उन्मादादिः। अध्यात्महेतुः कुष्ठादिः ७

इदानीं कृष्णः पुरं प्रविष्टः कृष्णः किमकार्षीदित्यभिप्रायिकं प्रश्नं परिहरति। उषित्वेति। सुहृदां पांडवानां विशोकाय स्वसुः सुभद्रायाश्च प्रियकाम्यया कतिचिन्मासान् हस्तिनःपुरे उषित्वा ८ आमंत्र्य द्वारकां गमिष्यामीति युधिष्ठिरं योक्त्वा शिष्टाचारं कृत्वा गोयुधिष्ठिरं परिष्वज्याभिवाद्य केश्चिदर्जुनादिभिः आलिंगितो वंदितश्च रथमारुरोहेत्यन्वयः ९ सुभद्रादयः शार्ङ्गधन्वनो हरेर्विरहं न सेहिरे इत्यन्वयः। युयुत्सुः धृतराष्ट्राद्वैश्यायां जातो दुर्योधनानुजः। गौतमः कृपाचार्यः यमौ नकुलसहदेवौ मत्स्यसुतादयः उत्तराप्रभृतयः विमुह्यंतः कर्तव्यतामजानंतः १०।११ पार्था मुकुंदविरहं न सेहिरे इत्येतदाश्चर्यं न भवतीत्याह तत्संगादिति। तस्य हरेः संगात्सेवालक्षणात् मुक्तः दुःसंगः दुःखदः संगः अन्यत्र पुत्रदारादिसंगः येन स मुक्तदुःसंगः। बुधो विवेकी जनः तं हातुं नोत्स

उषित्वा हस्तिनपुरे मासान्कतिपयान्हरिः। सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ८ आमंत्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तं। आरुरोह रथं कैश्चित्परिष्वक्तोभिवादितः ९ सुभद्रा द्रौपदी कुंती विदुरोथ युधिष्ठिरः। गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ १० वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः। न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः ११ तत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः। कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं १२ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथं। दर्शनस्पर्शसंलापशयनासनभोजनैः १३ सर्वे ते निमिषैरक्षैस्तमनुद्रुतचेतसः। वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह १४

हते तस्यादित्यन्वयः। तत्र कैमुत्यन्यायमाह कीर्त्यमानमिति। भागवतैः कीर्त्यमानं यस्य कृष्णस्य यशः सकृदाकर्ण्य पुंसां रोचनं रुचिजनकं १२ दर्शनस्पर्शनादिभिरस्य न्यस्तधियः पार्थास्तस्य विरहं कथं सहेरन्नैव सहंत इत्येतत्किमु वक्तव्यमिति भावः १३ विरहमसहमानानां तेषां भक्तिरसस्य संप्लवातिरेकमाह। सर्वे इति। अनिमिषैः पक्ष्मव्यापाररहितैः अक्षैर्नेत्रैः संवीक्षमाणाः कृष्णानुगतहृदयाः ते सर्वे स्नेहात्तत्र तत्र विचेलुरित्यन्वयः। यावद्यावद्दूरं गतः तावत्तावद्दूरं गच्छंतः अनुधावीक्षमाणाः तत्कृष्णदर्शनं यावत्तावत्तस्मिन् द्रुतमानसा मनुद्रुदुवुरित्यर्थः हशब्दः सूचयति १४

पांधवस्त्रियः देवकीसुते आगारात् गेहान्निर्गच्छति नाशलक्षणं यस्मात्तस्मोऽगारः। अगा वृक्षा एवागारा लिंबशवंशपलक्षणानि यस्येतिवा। अगमगमनं कांत्यतिश यादेरमलं यस्मादितिवा। अगानां स्वर्गात्मकानां पर्वतानामारः प्रवेशलक्षणं गमनं यस्मिन्निति वा तस्मात्पुरान्निर्यातिसत्य भद्रममंगलं न स्यादिति भा वेनोत्कंठाद्रुद्भूतबाष्पेन नेत्रजलेनस्तु धृंतं स्मितवत्य इत्येकान्वयः। १५ मार्दंगिकादिभिराहतामृदंगादयो नेदुरित्यन्वयः। भेरी नाम चर्मपिहितो दीर्घमह द्वाद्यविशेषः। धुंधुरिकाख्यात्मकं वाद्यं दुंदुभिः तिरश्चीनवाद्यविशेषः। आनकः पटहः। पणवो ढक्काविशेषः १६ प्रेम्णा व्रीडेन स्मितेन वस हितमीक्षणं दर्शनं यासां ताः प्रथोक्ताः। व्रीडा शब्दः उत्तयलिंगः। प्रेमव्रीडाभ्यां यत्स्मितं तत्सहितमीक्षणं यासामिति वा। कुसुमैः कुसुमानि व्यत्ययो सन्नपाति

च्यारुधन्नुद्धलबाष्पमौत्कंठ्याद्देवकीसुते। निर्यात्यगारान्नाभद्रमिति स्याद्बांधवस्त्रियः १५ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः।
धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा १६ प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया। ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः १७
सितातपत्रं जग्राह मुक्तादामविभूषितं। रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह १८

शयद्योतनार्थः। पुष्पैः करणैरितिवा १७ गुडाका निद्रा निद्रा गुडाका संशोक्ता प्रमीला स्पृक्सुषुप्त्यत इत्यभिधानं। तस्याः ईशः गुडाकेशः जितनिद्रोऽर्जुनः उ द्रकीलकेविनिद्रोऽभूत्त्वात समतपाः पशुपतेरेतन्नाम लब्धवान्। गुडवद्धककेशो वा दीर्घकुंचितकेशः। मुक्तादाम विभूषितं मौक्तिकमालालंकृतं प्रांतमंड लं रत्नखचितदंडं सितातपत्रं श्वेतछत्रं जग्राहेत्यन्वयः। ह इति हर्षादेरतिशयेन प्रियत्वं तदेतत्प्रियतमस्य दिक्षु तिष्ठति हेस्माहेनाह। अर्जुनस्य कैंकर्यातिशयदर्शी वा। स्वसारथ्यकरणलक्षणापराधपरिहारार्थी वा १८

उद्धवसात्यकी चव्यजनेन गृह्हतु रिति शेषेण संबंधः। एव शब्दः स्वहस्ताभ्यामेव न तु शहस्तैर्न वा चा व्यास्यां स्वदासाभ्यां इत्यस्मिन्नर्थे मधूनां यादवगोत्रविशेषा णां पतिः। मुक्ताधीशो वा। कुसुमैः कुरुपुरपुरंध्रिकरकमलमुक्तैरिति शेषः। पथि राजमार्गे १९ कुतुपुरेत तत्र तत्र तत्तन्मार्गे द्विजवरमुखनिःसृताः दुष्टानुजहि जहि साधूननुपालय पालयास्माननुगृहाण इत्यादिका आशिषः शुभवाक्यप्रबंधाः अश्रूयंतेत्यन्वयः। कीदृश्यः सत्याः यथार्थविषयाः। निर्गुणस्य सत्वादिगुण रहितस्य दासीनस्य अनुद्धहिस्थितस्य नानुरूपाः अननुकूलाः इति सत्वादिगुणकार्ये उपस्थित्वा सत्वादिगुणान्नातयति सततं प्रवर्त्तयतीति गुणात्मा। आत्मात

उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते। विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि १९ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः।
नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः २० अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां। कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिम
नोहरः २१

त्पगमन इति धातोः उणादिप्रत्ययनिमित्तमेतद्रूपं तस्य पालनादिकर्त्तुरनुरूपाः पालनानुग्रहादिगुणात्मनो वा। च शब्दः समुच्चये इवार्थे वा २० नके वलं कुरुपुरस्त्रियो हरौ पुष्पावकीरणमकुर्वन् किंतु तत्स्तुतिमपीति भावेनाह। अन्योन्यमिति। उत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतीनां वेदाभि मानीनां देवतानां मनोहरः। सर्वेषां नेत्रनां श्रुतीः श्रवणानि मनांसि च हरतीति वा। परस्परं संजल्पः कृतिलक्षणाः संल्लापः आसीदित्येकान्वयः २१

कोसाविति तत्राह। स वा इति। हर्यपेक्षया प्रधानत्वात्पुरुषशब्दवाच्येभ्यो महदादितत्त्वेभ्यो ऽग्रे निशि महाप्रलये सुप्तशक्तिषु अशक्तत्वात्तद्धीनत्वाच्छक्तिशब्दवाच्या सुसत्त्वादिगुणाभिमानिनी श्रीभूदुर्गासु सुप्तासु जगद्व्यापारान्विहाय हरौ रममाणासु सतीषु य एकः प्रधानो जगदात्मनि जगदादानकर्त्तर्यप्स्विग त्वेऽहन्तरोऽनि विशेषो ऽधिकोऽस्मात्सा विशेषः तस्मिन्नीश्वरे ईशानादिशक्तिमति स भगवः कस्मिन्प्रतिष्ठित इति श्रुतः। स्वरूपाधारे स्थितः निमीलितात्मा। तु क्षेपनाम्नि पिहितं यदासीदिति श्रुतेर्गुणतो ऽल्पयातमसा ऽऽदिरूपया शक्तया निगूहितमासीत्स पुरातनः पुरुषो विष्णुरयं ऋषभः किल परमार्थः सत्यं नेवानयोः कश्चिद्विशेष इत्यन्वयः २२ स परमपुरुष एव भूयः पुनः सृष्टिदशायां स्वजीवमायां प्रकृतिं स्वभार्यां महालक्ष्मीमनुसमारतस्यां वीर्यमाधादित्यन्वयः। कथंभूतां निजवीर्यवोदितां स्वसामर्थ्येन प्रेरितां सिसृक्षतीं सृष्टीच्छावतीं। कथंभूतः सः अप्रसिद्धगुणत्वादप्राकृतरूपत्वाच्च नामरूपात्मनिरूपस्मिन्नाधारे रूपनामनी विधित्सुः॥

॥ स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि। अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु २२ स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं। अनामरूपात्मनि रूपनामनी विधित्समानो ऽनुससार शास्त्रकृत २३ स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः। पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति २४

सत्त्वमानः रूपनामात्मकं प्रपंचं सृष्टिमिच्छन् शास्त्रकृत् सकलनियमनकर्त्ता य एवंविधः स हरिरयं किलेत्यन्वयः शेषः २३ अत्र कर्मभूमौ जितेन्द्रियाः प्राणायामेन निर्जितमातरिश्वनः वशीकृतप्राणाः सूरयः भक्त्या उत्कलितेन विकसितेन उत्कण्ठितेन वा अमलेन रागादिमलरहितेनात्मना स्वरूपेणान्तःकरणेन यत्पदं यत्स्वरूपं पश्यन्ति स वा अयं ऋषभः किलेत्यन्वयः। एष ऋषभः सात्त्विकानाम नुग्राहकः अस्माकं सत्त्वस्वविषयकं ज्ञानं परिमार्ष्टुं नाशयितुमर्हतीति परिपूर्वो मार्ष्टिर्वर्जनार्थः॥ न विद्यते नश्वरं पापं प्रवृत्तिं नइति सत्त्वं प्रमाणयति। नत्विति पाठे सुगमः। कर्मणांतःकरणशुद्धिः किमस्यादिति तत्राह। नत्विति एष कर्मणां सत्त्वमंतःकरणं परितः सर्वतः। मा॰ शोधयितुं नार्हतीति किं तु भक्त्या श्रवणादिषूपसंस्कृतयावदंतःकरणशुद्धाति तावन्न कर्मणेति भावः २४

यो वेदवादिभिरनंतवेदेषु गुह्येषु उपनिषत्सु च अनुगीतसत्कथः निरंतरोदितसच्चरितः य एक एव ईशः य आत्मलीलया जगत्सृजति सृष्टमवति तत्र दोषप्रकर्मफलमुक्तो यस्त्रितिं संहरति यश्च जगति न सज्जते आप्तकामत्वात्फलेनादित्सति हे संविसर्गाश्रयं ऋषभः इत्येकान्वयः। गुह्यवादिभिरिति पाठे उपनिषद्विचारकुशलैरित्यर्थः २५ तमोधिकान्सामसाञ्जसुरप्रकृतयो नृपाः अधर्मेण धर्मविरुद्धेन श्रुतिस्मृत्यविहितप्राणिहिंसादिकर्मणा यदा जीवंति स्वशरीरयात्रां कुर्वंतीति तत्तदेव हरिः सात्वतः सात्त्विकान्देवादीननुगृह्णन्धर्मादिनामवंति रूपाणि युगे युगे दधत्तद्धानो वर्जतइति शेषः। वराहमत्स्यादिरूपस्य भूसु

स वा अयं यत्पदमनुगीतसत्कथो वेदेषु गुह्येषु वेदवादिभिः। य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते २५ यदा ह्यधर्मेण तमोधिका नृपा जीवंति तत्रैष हि सात्वतः किल। धर्मं भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे २६ अहो अलं श्लाघ्यतमं यदोः कुलं त्वहो अलं पुण्यतमं मधोर्वनं।। यदेष पुंसामृषभः प्रियश्रवाः स्वजन्मना चंक्रमणेन चांचति २७

द्धरणा कर्मणा धर्मी ख्यातः कपिलादेर्गुणैर्भगः षट्स्वैश्वर्यं योगात्षड्गुणपूर्णत्वाद्भगाख्या। कल्पपादेष्प्रमो विनाशपरसत्त्वगुणमनि संबंधान्नंतरगुणाभिव्यंजकतया विशेषानं दरूपत्वात्सत्याख्या। व्यासादेर्ज्ञानप्रवर्त्तकत्वेनऋतानविशिष्टत्वादृताख्या। किमर्थं भवाय वराणावगतजनाभिवृद्धये। तस्मादिदानीमधर्मप्रवर्त्तकान्नृपान्सुतादीन्निगृह्ण देवावतारानुयुधिष्ठिरादीननुगृह्णन्कृष्णात्मना वतीर्णः किलेत्यर्थः २६ प्रियश्रवाः मनोहरकीर्त्तिः पुंसामृषभः पुरुषोत्तमः एष ऋषभः यदोः श्लाघ्यं कृत्स्नं मधुवनं चालमत्यर्थमतिशयेन पुण्यमहो अहो आश्चर्यादप्याश्चर्य। वशत्रूः समुच्चये २७

अनुग्रहइतितादर्थ्येसप्तमी।भक्तानुग्रहार्थमिङ्गितमुचितंमुखेष्वितंयत्स्मितंतेनयुक्तोवलोकोयस्यसतथोक्तः।तंक्षिनिवासगत्योरितिधातुः।भक्तेष्वनु
ग्रहेणाप्यरीङ्गितंगोचरमूरुद्दिशस्मितेनयुक्तावलोकेयस्यसतथोक्तः तंवास्वपतिंस्वस्वामिनंश्रीकृष्णंयत्प्रजाःयत्रत्याःप्रजाःनित्यंपश्यन्तीतियद
स्मात्तस्मात्कुशस्थलीद्वारवतीस्वर्यशसस्तिरस्करीस्वर्गकीर्त्तिनिरासिनीभुवःपुण्ययशस्करीचेत्यन्वयः।तदेवंकृतेतीत्यपदेशादीक्षितमिवाभक्ता
नुग्रहेच्छयासहितौस्मितावलोकौयस्यसतथाभूतमितिवा २८ अस्यश्रीकृष्णस्यपाणिनागृहीताःपाणयोयासांताःतथाताभिरस्यभार्याभिर्नूनंनिश्चि
तंव्रतस्नानादिनेश्वरःपूर्वंसम्यगर्चितः।नकुतः।याःव्रजस्त्रियःयदाशयायस्याधरामृतमाधुर्यस्यास्वादनेच्छयासम्यक्मुमुहुः।हेसखितदधरामृतं

अहोवतस्वर्यशसस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः।पश्यन्तिनित्यंयदनुग्रहेषितस्मितावलोकंस्वपतिंस्मयत्प्रजाः २८ नू
नंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिः।पिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः २९ यावी
र्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः।प्रद्युम्नसांबप्रमुखात्मजाःपरायाश्चाहृताभौमवधेसहस्रशः ३० ॥

मुहुःपिबंतीतियस्मात्तस्मादित्येकान्वयः।हेसखियाःस्त्रियोस्याधरामृतंपिबंतिअनेनगृहीतपाणिभिस्ताभिर्नूनंव्रतादिनेश्वरःसमर्चितःयदाशयाव्र
जस्त्रियोमुमुहुरितिवान्वयः २९ ताःकाइतितत्राहयाइति।विशुष्मिणःविशिष्टबलान्चैद्यप्रमुखान्शिशुपालादीन्प्रमथ्यविलोड्यपराजित्यस्वयं
वरेवीर्यमेवशुल्कंउक्तोवतेनयाःस्त्रियोहृताःआनीताःतासांप्रद्युम्नश्चसांबश्चआंबश्चप्रमुखायेषांतेतथाप्रद्युम्नसांबप्रमुखाःतेआत्मजायासांतास्तथो
क्ताः।उक्मिण्याद्यायाश्चपराःअपराःसहस्रशःकशेर्वादिशतोत्तरषोडशसहस्रसंख्याःभौमवधेआहृताः ३०

एताःप्रपत्निपुत्रत्वेकृत्स्नभार्यात्वायस्त्रीत्वमवाप्नयेआपेशलंसमंसंभूयसाधुशोभनंतपआरंभ्यकुर्वतेअकुर्वतवततहर्षेनिरस्तशोकमितिक्रियाविशेषणंवाकु
तःपुष्करलोचनःपुंडरीकाक्षःपतिराहृतिभिराकारैश्चेष्टाविशेषैर्हृदिस्पृशन्यासांगृहात्ज्ञातुकदाचिदपिनापैतियस्मात्तस्मादित्यन्वयः ३१ ३२ परेभ्यः
शत्रुभ्यःगोपीथायरक्षणायचतुरंगिणींहस्त्यश्वरथपदातिवतींपृतनांसेनांस्नेहात्स्नेहमात्रात्।तदानींमाहात्म्यज्ञानंनास्तीतिभावः। ३३ स्वनगरीं
द्वारवतींप्रियैःपुरुषैःसह ३४ ३५ हेभार्गवशौनक।कुरुजांगलप्रभृत्येकादशदेशानतिक्रम्यआगात्।श्रांतवाहोविभुरानर्तान्स्वाधिकृतान्देशानु

एताःपराःस्त्रीत्वमवाप्नयेसमंनिरस्तशोकंवतसाधुकुर्वते।यासांगृहात्पुष्करलोचनःपतिर्नजात्वपैत्याहृतिभिर्हृदिस्पृशन् ३१
सूतउवाच एवंविधागदंतीनांसगिरःपुरयोषिताम्।निरीक्षणेनाभिनंदन्सस्मितेनययौहरिः ३२ अजातशत्रुःपृतनांगो
पीथायमधुद्विषः।परेभ्यःशंकितःस्नेहात्प्रायुंक्तचतुरंगिणीम् ३३ अथदूरागतान्शौरिःकौरवान्विरहातुरान्।संनिवर्त्यदृढंस्नि
ग्धान्प्रायात्स्वनगरींप्रियैः ३४ कुरुजांगलपांचालान्शूरसेनान्सयामुनान्।ब्रह्मावर्तंकुरुक्षेत्रंमत्स्यान्सारस्वतानथ ३५
मरुधन्वमतिक्रम्यसौवीराभीरसैंधवान्।आनर्तान्भार्गवोपागाच्छ्रांतवाहोमनाग्विभुः ३६ तत्रतत्रहतत्रत्यैर्हरिःप्रत्युद्यतार्हणः।
सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा ३७ आनर्तान्सउपव्रज्यस्वृद्धान्जनपदान्स्वकान्।दध्मौदरवरंतेषांविषादंशमयन्निव ३८

पागादित्यन्वयः ३६ यदाहरिःसायंसंध्यासमयेपश्चाद्दिशंपश्चिमांदिशंभेजे।कथंभूतःतत्रतत्रवर्त्मनिप्रतिपदंतत्रत्यैर्जनैःप्रत्युद्यतार्हणःप्रस्तुता
र्हणःपूजनःतदागविष्ठःदिविस्थितःआदित्यःगांसमुद्रोदकंगतः।अस्तंगतइत्यर्थः।असौवागविष्ठोपूर्वोदितस्ववस्मेमनीतिश्रुतेः ३७ सऋद्धाःस्वृद्धा
न्सुष्ठुसंपन्नान्स्वकान्स्वीयान्आनर्तान्जनपदानुपगम्यइतिदरवरंशंखश्रेष्ठंदध्मौपूरयामासतेषांविषादंजनकलत्र्यंशमयन्निवहरिरित्यन्वयः
३८

सदरः पांचजन्याख्यः उच्चकाशे धवलं शुक्लं उदरं यस्य स धवलोदरः। अपि धवलोदरोपि उरुक्रमस्य श्रीकृष्णस्याधरशोणेन शोणिमा रक्तभावो यस्य स तथोक्तः दाध्मायमानः पुनः पुनः पूर्यमाणः करौ एव कंजे कर कंजे हस्तकमले तयोः संपुटे मध्ये वर्त्तमान इति शेषः करकंजसंपुटे निधाय दाध्मायमान इति वा तत्र दृष्टांतः अब्जखंडे कमलवने स्थितः उत्स्वनः उच्चध्वनिः कलहंसः राजहंसः इव यथा तथेत्यन्वयः ३९ भर्तृदर्शनलालसाः श्रीकृष्णस्य दर्शनोत्सुकाः सर्वाः प्रजाः जगतः भवः संसारः तस्माद्भयमपि हंतीति जगद्भवभयापहः तं। जगद्भयभयापहं इति पाठे जगद्भयानां दैत्यानां सकाशाद्भयनाशनं तं निनदं शंखध्वनिं श्रुत्वा तं कृष्णं प्रत्युद्ययुरित्यन्वयः ४० नित्यदा निजलाभेन स्वतो लब्धेन पूर्णकाम

स उच्चकाशे धवलोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा। दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः
३९ तमुपश्रुत्य निनदं जगद्भवभयापहं। प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ४० तत्रोपनीतबलयो रवेर्दीपमिवा
दृताः। आत्मारामं पूर्णकामं निजलाभेन नित्यदा ४१ प्रीत्युत्फुल्लमुखाः प्रोचुः हर्षगद्गदया गिरा। पितरं सर्वसुहृदमवितारमिवा
र्भकाः ४२

अत एवात्मारामं आसमंतात् रममाणं कृष्णं नत्वा हर्षेण गद्गदया स्खलंत्या गिरा ताः प्रजाः प्रोचुरित्यन्वयः। कीदृश्यः प्रीत्युत्फुल्लं विकसितं मुखं यासां ताः तथोक्ताः उपनीतः समर्पितः बलिः भागधेयः याभिस्तास्तथा बलिः पूजा तत्साधनं वा। कथमिव। तेजःपुंजस्य रवेर्दीपमिवात्मारामस्य बलिं ददतीति भावः॥ आदृताः परमादरयुक्ताः अर्भकाः बालाः पितरमिव। कथंभूतं हरिं अन्नादिदानेन पातृत्वात् पितरं सर्वस्मात् आत्मादेः सुहृदं समानमित्रं बंधुं वा नादिदानेन अवनकर्त्तृत्वात् अवितारं ४१ ४२

हे नाथ तव अंघ्रिपंकजं सदानताः स्मेत्यन्वयः। कीदृशं विरिंचवैरिंचसुरेंद्रैः वंद्यं शंकर देवेंद्रैर्वंदितं इह एतन्नाराशिमध्ये परं क्षेमं मोक्षमिच्छतां भक्तानां परायणं उत्तमाश्रयं परस्य हरिस्वरूपस्य प्रभुः समर्थः जननमरणधर्मी पादकोपि कालः यत्र पदारविंदे भक्तानां न प्रभवेत् जरादिधर्मा पादकोन भवति परे धामभक्तानां प्रभुः कालः यत्र तत्र भक्तानां न प्रभवेत् तस्मात् अंघ्रिपंकजं न समर्थ इति किं वाच्यमिति वा ४३ हे विश्वभावन जगतः सत्तादिप्रद नोस्माकं भवाय ज्ञान भक्त्यादि कल्याणाय भव यस्य तव अनुवृत्त्या सेवालक्षणेनानुवर्त्तनेन कृतिनः सुकृतिनो बभूविम स त्वं नः परमं दैवतं इष्टदेवतानः सद्गुरुर्निर्दोषगुरुः उपास्यनीयश्च त्वमेव माता भीष्टदानेनात्मना त्वयैव नास्मत्प्रयत्नेन सुहृत् पिता माता पतिः स्वामी। ४४। हे नाथ तव रूपं पश्येम

नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितं। परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ४३ भवाय न
स्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता। त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ४४ अहो सनाथा
भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं। प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं ४५ यर्ह्यंबुजाक्षापससार
भो भवान् कुरून्मधून्वाथ सुहृद्दिदृक्षया। तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ४६

ति यद्यस्मात्तस्माद्वयं भवता सनाथाः स्मनाथवंतो भवाम। अहो अस्मद्भाग्यमित्यन्वयः। कथंभूतं रूपं त्रैविष्टपानां इंद्रादिदेवानामपि दूरतः चिरकालतः वीर्णतपः संपत्त्या दृश्यत इति दूरदर्शनं अनेन दर्शनसाधनसामग्र्यभावात् तेनान्तरदर्शनाभावः तैः प्रार्थितत्वेन तत्कार्यार्थमवतीर्णत्वाद्दर्शनतारतम्याभिप्रायो वा प्रेम्णा स्मितं प्रेमस्मितं स्निग्धं निरीक्षणं मधुरावलोकनं ताभ्यां युक्तमाननं यस्मिंस्तत्तथोक्तं सर्वसौभगं सौभाग्यं यस्मिंस्तत्तथोक्तं ४५ हे अंबुजाक्ष अथ यर्हि यदा माधव श्रीवल्लभो भवान्मधुविषयेभ्यः सुहृदां पांडवानां दिदृक्षया दर्शनेच्छया कुरून् कुरुविषयान् कुरून् विषयेभ्यो मधून् वा तिगच्छति हे अच्युत तत्र तस्मिन्समये अक्ष्णोः नेत्रयोः दृष्टी द्वितीयार्थे त्वां विना कुरूणां मधूनां वा नोस्माकं रविं विना अक्ष्णो

तथोक्तं: तस्मात्कालमनुभूय... (vertical marginal note, partly legible)

दृष्ट्वा दर्शनेन स्पृशन् आलापेन श्रुण्वन्ननुग्रहं वितन्वन् दशार्हादीनां गिरः ४७ भुजङ्गैः रक्षितां भोगवतीनाम नागानां पुरी। आत्मतुल्यबलैः परस्परमात्मना तुल्यवीर्यैः रक्षितां कृष्णेन तथा पालिता ४८ वसन्तादिसर्वर्तूनां सर्वविभवैः पूर्णाः पुण्याः संपन्ना निः पुण्यैः वृक्षैः रसवन्ताः दिभिर्लताभिर्निर्मिता आश्रमैः तुहाभिः कल्पवल्ल्यादिभिः पञ्चवटीशाखादिभिर्निकटस्थैः रम्यापाता ४८ वसन्तादिसर्वर्तूनां सर्वविभवैः ... उपवनैः नगरान्नातिदूरे आरोपितवृक्षसमुदायैः आरामैः पुराद्बहिः रथ्याभयपा... आश्रमेषु पवेशयन् स्थानेषु स्थानेः प्रमदाभिः सह राज्ञां क्रीडाभूमिभिः उपवनैः नगरान्नातिदूरे आरोपितवृक्षसमुदायैः आरामैः पुराद्बहिः रथ्याभयपा... ४९ गोपुरेषु पुरद्वारेषु अन्यद्वारेषु मार्गेषु सर्वतः सर्वविभवादिभिः कृतापद्माकाराणां श्रीः शोभा यस्यास्तथोक्तां ४९ गोपुरेषु पुरद्वारेषु अन्यद्वारेषु मा...

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः। शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत्पुरीं ४७ मधुभोजदशार्हार्हकुकुरान्धकवृ-
ष्णिभिः॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ४८ सर्वर्तुसर्वविभवैः पुण्यवृक्षलताश्रमैः। उद्यानोपवनारामैर्वृतपद्माकर-
श्रियं ४९ गोपुरद्वारमार्गेषु कृतकौतुकतोरणां। चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपां ५० संमार्जितमहामार्गरथ्याप-
णकचत्वरां सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ५१ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः। अलंकृतां पूर्णकुम्भै-
र्बलिभिर्धूपदीपकैः ५२

कृतानि कौतुकतोरणानि उत्सवहेतोरणानि यस्यां सा तथा तां अन्तः प्रतिहतः निवारित आतपः यस्यां सा तथा तां ५० संमार्जिता निविक्षिप्ता ... रेषु कृतानि कौतुकतोरणानि उत्सवहेतोरणानि यस्यां सा तथा तां ... चत्वराणि महामार्गरथ्यापणकचत्वराणि यस्यां सा तथा तां महामार्गा राजमार्गाः रथ्या रथमार्गाः। आपणका निपणपविक्रयस्थानानि चत्वरं चतु-
रङ्गानि महामार्गरथ्यापणकचत्वराणि यस्यां सा तथा तां महामार्गा राजमार्गाः रथ्या रथमार्गाः। ... ५१ गृहाणां द्वारि दध्यक्षतफलेक्षुभिः पूर्णकुम्भैर्बलिभिः पूजा-
साधनैः धूपदीपादिकैरलंकृतां एवंविधां पुरीं प्राविशदिति पूर्वेणान्वयः ५२

वसुदेवाक्रूरादयः आयान्तं कृष्णं निशम्य श्रुत्वा। कररहितमौक्तिकपूर्णं ... पुरस्कृत्य पुरस्कृतेर्ब्राह्मणैश्च सार्द्धं ... साधनैः प्रत्युज्जग्मुरिति वृद्धाः। किंविशिष्टाः प्रहर्षवेगेन उच्छ्वसितानि सहसा परित्यक्तानि शयनासनभोजनानि येषां ते तथा तूर्यकाहलतूर्यनादः ब्रह्मघोषः वेदघोषः। प्रणयात्स्नेहात् आगतं साध्वसं येषां ते तथा भिन्न-
स्मुरिति हार्दो भावः साध्वसं प्रणये नागतं साध्वसं येषां ते पौरा वारमुख्याः नर्तकी ... श्रेष्ठाः। तस्य कृष्णस्य दर्शनोत्कण्ठावन्तः। चलद्भिः कु-
ण्डलैर्निर्भातानि विद्योतितानि कपोलानि येषां तानि तथोक्तानि चलत्कुण्डलनिर्भातकपोलानि वदनानि च चलत्कुण्डलनिर्भातकपोलवदनानि ते-

निशम्य कृष्णमायान्तं वसुदेवो महामनाः। अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ५३ प्रद्युम्नश्चारुदेष्णश्च ये च साम्बगदादयः।
प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ५४ वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः॥ शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः
५५ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः। वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः। चलत्कुण्डलनिर्भातकपोलवदन-
श्रियः ५६ नटनर्तकगन्धर्वाः सूतमागधवन्दिनः। गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ५७ भगवांस्तत्र बन्धूनां पौराणाम-
नुवर्तिनां। यथाविध्युपसंगम्य सर्वेषां मानमादधे ५८ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः॥ आश्वास्य चाश्वपाकेभ्यो वरैश्चा-
भिमतैर्विभुः ५९ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि। आशीर्भिर्युज्यमानोऽन्यैर्वन्दिभिश्चाविशत्पुरं ६० राजमार्गं गते कृष्णे द्वा-
रकायाः कुलस्त्रियः। हर्म्याण्यारुरुहुर्विप्रास्तदीक्षणमहोत्सवाः ६१

... श्रीः यासां तास्तथोक्ताः ५३ ५६ अभिनयेन शृङ्गाराद्यनुकरणकर्त्तारो नटाः गीतवाद्यानुसारेण नृत्तकर्त्तारो नर्तकाः। षड्जादिकुशला गन्धर्वाः।
पुराणार्थानुसारेण श्रावकाः सूताः। पराक्रमाङ्कितस्तुतिकर्त्तारो मागधाः। मङ्गलपाठका वन्दिनः ५७ तत्र तेषु वसुदेवादिष्वागतेषु सत्सु श्री-
कृष्णो भगवान् सर्वेषां बन्ध्वादीनां यथाविध्युपसंगम्य मानमादधे चकारेत्यन्वयः ५८ कैः प्रह्वादिभिः ५९ ६० हर्म्याणि सौधानि तदीक्षणं
तस्य श्रीकृष्णस्य दर्शनमेव महानुत्सवो यासां ताः तथोक्ताः ६१

दृष्टचरस्याप्यदृष्टपूर्ववद्दर्शनवद्दर्शने किमिति उत्कंठातिशय इति तत्राह। नित्यमिति। श्रियो धाम स्थानमंगं वपुर्यस्य तं तथा तमच्युतं नित्यं निरीक्षमाणानां
द्वारकानिवासिनामपि दृशो न वितृप्यन्ति पुनः पुनर्दृष्टमप्यलं दर्शनेनेति भावं न प्राप्नुवन्ति यस्मात्तस्मात् पुनरुत्कंठातिशयो हीत्यन्वयः ६२ नेतद्
आश्चर्यमित्याह। श्रियइति। यस्य हरेरुरः वक्षःस्थलं श्रियो लक्ष्म्या निवासस्थानं यस्य मुखं दृशां लोचनानां पानपात्रं यस्य बाहवो लोकपालानां
बलस्थानं यस्य पदांबुजं सारंगाणां सारग्राहिणां ब्रह्मादीनां परायणं ६३ सितातपत्रव्यजनादिभिरलंकृतो भगवांस्तथा बभौ यथाऽर्को दिभिरभ्रैर्
मेघो भातीत्यन्वयः। अत्रायं विभागः। मध्याह्नार्कस्थानीयं श्वेतछत्रं उडुपस्थानीयं व्यजनं इंद्रचापस्थानीया माला पीतवस्त्रं विद्युत्स्थानीयं मेघस्था

नित्यं निरीक्षमाणानां यदपि द्वारकौकसां। न वितृप्यन्ति हि दृशः श्रियो धामांगमच्युतं ६२ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां
॥ बाहवो लोकपालानां सारंगाणां पदांबुजं ६३ सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि। पिशंगवासा वनमालया
बभौ घनो यथार्कोडुपचापवैद्युतैः ६४ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ६५
ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः। हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ६६ अथाविशत्स्वभवनं सर्वकाममनुत्तमं।
प्रासादा यत्र पत्नीनां सहस्राणि च षोडश। शतमष्टोत्तरं चैव वज्रवैडूर्यमंडिताः ६७

नीयो भगवान् अर्कस्थानीयं किरीटं उडुपस्थानीयं श्वेतछत्रं मंदारादिप्रसूनमाला इंद्रचापस्थानीया विद्युत्स्थानीयं मज्जनमिति वा ६४ पित्रो
:मातापित्रोः स्वमातृभिः। देवक्यादिभिः परिष्वक्तः आश्लिष्टः ६५ ताः मातरः पुत्रात्पुंनरकात्त्रायत इति पुत्रः तं क्रोडे सिषिचुः अभ्यषिंचन् विवशे
कोद्वर्षेण विह्वलीकृतः विविशीकृतः आत्मांतःकरणं यासां तास्तथोक्ताः ६६ यत्र यस्मिन्भवने वज्रवैडूर्यमणिमंडिताः षोडशसहस्राणि
पुनरष्टोत्तरशतं पत्नीनां प्रासादाः संति तदुत्तमं सर्वकामं स्वभवनमाविशदित्येकान्वयः। काम्यंत इति कामा इच्छाविषयास्तेषु सर्वे यत्र संति तत्

पत्न्यः आरात्तद्दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां तास्तथोक्ताः सहसा उत्तस्थुरित्यन्वयः। कथंभूतं प्रोष्य प्रवासं कृत्वा गृहा
नुपागतं की दृश्यः पत्न्यः साकं पिताः व्रीडितलोचनाननाः साकं पितव्रीडितलोचनाननाः सहितमाकंपितं याभिस्ताः तथा व्रीडिता निलोचना
नि आननानि च यासां तास्तथा ६८ दुरंतभावाः वेलातीतस्नेहाः। अनंतभूतंगाराद्याः अत्र ताः अभिप्रायाद्वा दृष्टिभिरात्मजैरंतरात्मना मनसा च तं
पतिं परिरेभिरे। वैक्लव्यात्पारवश्याद्विलज्जतीनां तासां नेत्रयोर्निरुद्धमप्यश्रु प्रावदित्यन्वयः ६९ नेतत्तासां स्नेहकार्यं किमित्याह। यद्यपि यद्य
प्यसौ कृष्णः रहोगतः एकांतगतः सदा तासां पार्श्वगतः समीपस्थः तथाप्युपदं तासां तस्यांघ्रियुगं नवं नवं नूतनान्नूतनं तथा हि का स्त्री तस्य पद

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः। उत्तस्थुरारात्सहसासनाशयात् साकं पितव्रीडितलोचनाननाः॥
६८ तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं। निरुद्धमप्यस्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ६९
यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं। पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ७० ए
वं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां। विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ७१ स
एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया। रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ७२

कमला दलमिति विरमेत विरामं कुर्यात्। अन्यत्र चंचला विभवप्रदायिनी श्रीः यं भगवंतं कर्हिचिन्न जहातीत्येकान्वयः ७ वायुर्यथा वनदहना
य वेणूनां मिथः संघर्षणेनाग्निमुत्पादयति तथाऽक्षौहिणीभिः क्षितिभारजन्मनां भूमेर्भारभूतं जन्म येषां तेन तथोक्ताः तेषां परिवृत्तपरिवृद्धं तेजो
येषां तेन तथोक्तानां असुराणां विनाशमकुर्वन्पांडवव्याजेन नृपाणां मिथो वैरं विधाय स्वयं निरायुधः परस्परवधेन विनाशं विधाय
वोपरत उदासीन इत्यन्वयः ७१ स्वमायया लक्ष्म्या प्राकृतः स्त्रीजितः। स्त्रीरत्नकूटस्थः स्त्रीश्रेष्ठसमूहस्थः ७२

श्रीश्रेष्ठसमूहगतः श्रीजितानुकरोत्येव यत्नं स्वयं श्रीजितत्वमाह। उद्दामेति। यासामुद्दामभावस्य उत्कटस्य शृंगारचेष्टितस्य पिशुनः सूचकः अमलः नि
र्व्यलीकः वल्गुः कोमलः हासः स्मितं व्रीडया अवलोकः कटाक्षवीक्षणं उद्दामभावपिशुनामलवल्गुहासेन व्रीडावलोकनेन च विहतः ताडितः मदनो
पि संमुह्य पुष्पमयं चापमजहात् मुक्तवांस्ताः प्रमदोत्तमाः कुहकैः उद्दामभावादिभिर्यस्य श्रीकृष्णस्येंद्रियं प्रमथ्य वशीकर्तुं न शेकुः तस्य कुतः श्रीजि
तत्वमित्यन्वयः १३ तस्य श्रीजितत्वपरिवादो न तं मन्येत्याह। मन्यत इति। अयं लोकः स्वसुखानुभवेनैव सकामतया श्रीसुसंगमपि आत्मौपम्येना
त्मानं दृष्टांतीकृत्य श्रीसंगिनं तन्मयं श्रीमयं मन्यते हि यस्मात्तस्मादयं जनोऽबुधः अज्ञः। कथंभूतं मनुजं प्रावृण्वानं आच्छादयंतं १४ तर्हि ज्ञानि

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकविहतो मदनोपि यासां। संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथितुं कु
हकैर्न शेकुः १३ मन्यते तमयं लोको ह्यसंगमपि संगिनं। आत्मौपम्येन मनुजं व्यापृण्वानं मतोऽबुधः। १४ यत्तदीशनमीशस्य
प्रकृतिस्थोपि तद्गुणैः। न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया १५ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः। अप्रमाणविदो भ
र्तुरीश्वरं मतयो यथा १६ इति श्रीभागवते महापुराणे प्रथमस्कंधे दशमोऽध्यायः॥ ॥

प्रवादः कीदृश इति तत्राह। यत्तदिति। प्रकृतिस्थोपि सदात्मस्थैः स्वाधारैस्तद्गुणैः प्रकृतिगुणैः सत्वादिभिः शब्दादिभिश्च न युज्यते न संबध्यत इति य
त्तदीशस्येशनं ईश्वरत्वं। तत्र अस्मिन्दृष्टांतमाह। यथेति यथा प्रकृतिस्थानां ज्ञानिनां तदाश्रया तत्स्वरूपस्याश्रया बुद्धिः प्रकृतिगुणैर्न बध्यते कि
मुतस्य प्रकृतिगुणसंबंधेनेत्यतो बुधजनप्रवाद इति भावः १५ तथाविदो मूढा इति सोदाहरणमाह। तमिति। अबलाः इंद्रियाणाम् मूढाः शास्त्रार्था
विदः तां मत्या न सम्यक् ज्ञातवत्यः एवाप्रमाणविदो अनंतगुणत्वादिप्रमाणाविदः स्वरूपमनुव्रतं स्त्रैणवदनुगतं स्त्रीणां श्रीजितं मेनिरे वैशेषिकादिवादि
नां मतयो यथेश्वरं यथा मतिमेनिरे तथा तस्मात्तस्य आमकामस्य श्रीजितत्वमिति भावः १६ इति प्रथमे दशमः॥ ॥

वैराग्यप्रकारो हरेर्भक्तानुकंपित्वं चास्मिन्नध्याये प्रतिपाद्यते। उपलेभेभिधावंतीमुत्तरामित्यादिश्रुतानुवादपूर्वकं परीक्षिज्जन्मादि पृच्छति शौनक इत्या
हा अश्वत्थाम्नेत्यादिना। उरुतेजसा अश्वत्थाम्ना विसृष्टेन ब्रह्मास्त्रेण उत्तराया हतो गर्भः पुनरीशेनोज्जीवित इत्यन्वयः १ निधनं मरणं यथा कथं प्रेत्य
गत्वा गतवानूर्ध्वं लोकमिति शेषः २ वक्तुं वा यदि मन्यसे इत्यनेन वक्तव्यस्यातिगोप्यत्वं सूचयति ३ अपीपलदिति। अपीपलत् अरक्षत् निःस्पृहः
सर्वकामेभ्य इत्यनेन कृष्णपादसेवया अतिस्वादुत्वं दर्शितं कामानामतिक्तत्वं च ४ एतदेव स्पष्टमाह। संपद इति ५ कामास्तुरस्यार्थाः विषया वि

शौनक उवाच॥ ॥ अश्वत्थाम्नाविसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा। उत्तराया हतो गर्भ ईशेनोज्जीवितः पुनः १ तस्य जन्म महाबुद्धेः कर्माणि च म
हात्मनः। निधनं च यथैवासीत्स प्रेत्य गतवान्यथा २ तदिदं श्रोतुमिच्छामि वक्तुं वा यदि मन्यसे। ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ३
॥ सूत उवाच अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः। निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ४ संपदः क्रतवो विप्रा महि
षी भ्रातरो मही। जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ५ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः। अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे
६ मातुर्गर्भगतो वीरः स तदा भृगुनंदन। ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ७ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं। अपीव्यदर्श
नं श्यामं तडिद्वाससमच्युतं ८

यथा विरक्तस्य मुकुंदमनसो युधिष्ठिरस्यार्थाः किं पुरुषार्थत्वेनार्थाः कुत इति तत्राह नेति यथा क्षुधितस्येतरे स्त्रीणादयो न तृप्तिं कुर्वंति तथा ते दुःखहेतुत्वा
न्मुदं नाकुर्वन्नित्यर्थः। अनेन विषयवैराग्यातिशयो मोक्षातिशयोत्सुकत्वातिशयो दर्शितः ६ कंचिदलौकिकविलक्षणं ७ स्फुरत्पुरटमौलिनं देदीप्यमान
स्वर्णमुकुटं अपीच्यदर्शनं अषोडशवर्षवद्दृश्यमानं मेघश्यामं ८

क्षतजवदरुणे अक्षिणी यस्य तं तथा तं आत्मनः सर्वतो दिशं पूर्वादिदिक्षु विदिक्षु परिभ्रमंतं परितो वर्तमानं उल्काभां गगनात्पतन्तारकविशेष सदृशीं गोपतिः सूर्यः नीहारं हिममिव धमंतं शमयंतं पुनः सन्निकर्षे समीपे दृष्ट्वा क एष पुरुष इति पर्यैक्षत आलोचनमकरोत् ९ १० धर्मगोपा पतिरक्ष तीति धर्मगुप्। अमेयात्मा अनंतरूपः। दशमास्यस्य दशमासानां तस्य कुमारस्य पश्यतः सतः इति शेषः विभुः समर्थो हरिः सर्वपापापकर्षणशीलः भग वान्षड्गुणोपेतः ११ ततो हरेरदर्शनानंतरं सर्वगुणोदर्के सकलगुणोत्तरफले सानुकूला ये ग्रहा येषामुदयो यस्मिन्स तथोक्तः तस्मिन्काले पांडोर्वं

श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं। क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं ९ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः। अस्त्रतेजः स्वगदया नीहारमिव गोपतिः। विधमंतं संनिकर्षे पर्यैक्षत क इत्यसौ १० विधूय तदमेयात्मा भगवान्धर्मगुप्विभुः॥ मिषतो दशमास्यस्य तत्रैवांतर्दधे हरिः ११ ततः सर्वगुणोदर्के सानुकूलग्रहोदये। जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा १२ तस्य प्रीतमना राजा विप्रैर्धौम्य कृपादिभिः॥ जातकं कारयामास वाचयित्वा च मंगलं १३ हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान्। प्रादात्स्वन्नं च विप्रेभ्यः प्र जातीर्थे स तीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं॥ एष ह्यस्मिन्प्रजातंतौ कुरूणां पौरवर्षभ १५ दैवेनाप्रतिघातेन कुले संस्थामुपेयुषि। रातो वोनुग्रहार्थाय विष्णुना प्रभविष्णुना १६ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः। भविष्यति न संदेहो महाभाग म हाभागवतो महान् १७

शधरः संतानांकुरो बलेन ओजसा भूयः पुनरुत्पन्नः पांडुरिव स्थितः १२ जातकं जातकर्म १३ तीर्थं शास्त्रं पात्रं वा वेत्तीति तीर्थवित् प्रजातीर्थे पु त्रारब्धसूतकमले पुत्रजन्मसुहृत्काले वा स तीर्थविदिमं कर्मापरं सतीर्थं तरत्यर्थः १४ अप्रयानंतं ज्ञावाप्य गुणानंतं कुरूणां कुरुवंशजातानां। अ स्मिन्कुले प्रजातंतौ पुत्रारब्धसंताने संस्थां विनाशमुपेयुषि प्राप्तवति सति वो युष्माकमनुग्रहार्थाय प्रयोजनाय प्रभविष्णुना विष्णुना रातो दत्त इति यस्मात्तस्मान्नाम्ना लोके विष्णुरात इति बृहच्छ्रवा विख्यातयशा भविष्यति १५ १७

ब्राह्मणवचनानंतरं युधिष्ठिरस्तान्प्रष्टुमिच्छन्नाह। अपीति। हे सत्तमाः अपि स्वित् अनेन अन्वयः। साधुवादो यस्य तत् साधुवादं तेन साधुरि ति वादेन वा १८ हे पार्थ एष प्राधाः सुत युधिष्ठिर मानवो मनुपुत्रः प्रजानामविता दाशरथिः दशरथपुत्रः सत्यसंधः सत्यप्रतिज्ञः १९ औशीनरः उशी नरपुत्रः। दौष्यंतिः दुष्यंतपुत्र इव यज्वनां यशो विस्तारकर्ता यथा तथायमपि स्वानां स्ववंशजन्मनां यशो वितनिता २० द्वयोरर्जुनयोः कार्तवीर्य पांडवयोः तुल्यः दुर्धर्षः दुःसहः २१ तितिक्षुः क्षमावान् पितरौ इव सहिष्णुः सहनशीलः २२ साम्ये सामंजस्ये पितामहस्य विरिंचस्य समः। प्रसादे गिरिशः शिवसमः। रमाया आश्रयः पतिः २३ सर्वैः सतां गुणैर्माहात्म्यं महात्मत्वं यस्य स तथोक्तः। अथवा सर्वसद्गुणमाहात्म्यविषये कृष्णं यादवेंद्रमनुगतः

राजोवाच॥ ॥अप्येष वंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः। अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः १८ ब्राह्मणा ऊचुः॥ ॥पा र्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः। ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा १९ एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः। यशो वितनिता स्वानां दौष्यंतिरिव यज्वनां २० धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः। हुताश इव दुर्धर्षः समुद्र इव दुस्तरः २१ मृगेंद्र इव वि क्रांतो निषेव्यो हिमवानिव। तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव २२ पितामहसमः साम्ये प्रसादे गिरिशोपमः। आश्रयः सर्वभूतानां यथा देवो रमाश्रयः २३ सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः। रंतिदेव इवोदारो ययातिरिव धार्मिकः २४ धृत्या बलिसमः कृष्णे प्रह्राद इव सद्ग्रहः। आहर्तैषोश्वमेधानां वृद्धानां पर्युपासकः २५ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां। निग्रहीता कलेरेष भुवो धर्मस्य का रणात् २६ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात्। प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः २७ जिज्ञासितात्मयाथार्थ्यो मुनेर्व्यास सुतादसौ। हित्वेदं नृप गंगायां यास्यत्यद्धाकुतोभयं २८

तथा भूतः कृष्णमर्जुनं वा २४ धृत्या धैर्येण बलिना तितिक्षोत्सकिः सत्यां भक्तिर्यस्य स तथोक्तः। अंबुवद्यस्य ग्रहणा अंबुवत्स एहेन साहस्रार्थी वति। अथ ग्रहणा तमहात्म्यज्ञानाभावात्। ततस्वस्नेहपूर्वकमहात्म्यज्ञानाभावान्। तु सम्यक्। तथा त्वं सा हर्षंपन सम्यग्भविष्यतत्यर्थः। मिति सूत्रात् २५ राजर्षीणां कु माराणां जनयिता उत्पादकः। उत्पथगामिनीं अशास्त्रविहितमार्गवर्तिनां शास्ता धर्मस्य भगवतः ॐ रवा पादनकारणात्कलेर्निग्रहीता निग्रहशिक्षा कर्त्ता हि २६ जपुत्रोपसर्जितात् द्विजकुमारप्रेरितात्तक्षकात् मुक्तसंगः पुत्रादिसंगरहितः २७ व्याससुतात् श्रीशुकात् मुनेर्जिज्ञासितं विचारितं आत्मनः परमात्मनो याथार्थ्यं स्वरूपं संवधिगुणगणादिकं येन स तथोक्तः इदं शरीरं त्यक्त्वा समीचीनं अकुतोभयं स्वस्वरूपानंदाविर्भावलक्षणं मोक्षं यास्यतीत्यर्थः

भा॰प्र॰
७०

लब्धाप्राप्तपचितिः पूजा यैस्तेन तथोक्ताः २९ यः प्रभुः सर्वं दृष्टं गर्भे कृष्णरूपं सर्वदर्शनं अनुध्यायन् निरंतरं चिंतयन् इह नरेषु स्वसमीपं आगच्छन्तं परीक्षेतेति यस्मात्तस्मात्स एव लोके परीक्षिदिति विख्यातः इति परीक्षिन्नामनिरुक्तिरित्यन्वयः ३० उडुपश्चंद्रः शुक्लपक्षे काष्ठाभिः दिग्देवतासरस्वती गोभिरन्वहं यथा पूर्यते स राजपुत्रोऽपि पितृभिर्युधिष्ठिरादिभिरन्वहं अन्नपानादिभिः पूर्यमाण एधते इत्यर्थः ३१ ज्ञातिद्रोहजिहासया भीष्मादिवधनिमित्तपापहननेच्छया अश्वमेधयज्ञेन भगवंतं यष्टुकामो राजा करदंडयोरन्यत्र करं दंडं च वर्जयित्वा नलब्धधनो येन सोऽलब्धधनः दध्यौ चिंतयामास ३२ उदीच्यामुत्तरस्यां

इति राज्ञ उपादिश्य विप्रा जातककोविदाः । लब्धापचितयः सर्वेप्रतिजग्मुः स्वकान्गृहान् २८ स एष लोके विख्यातः परीक्षिदिति यः प्रभुः । पूर्वं दृष्टमनुध्यायन् परीक्षेत नरेष्विह ३० स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः । आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं ३१ यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया । राजा लब्धधनो दध्यावान्यत्र करदंडयोः ३२ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतनोदिताः । धनं प्रहीणमाजह्रुरुदीच्यां भूरिशो दिशः ३३ तेन संभृतसंभारो धर्मपुत्रो युधिष्ठिरः । वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं । ३४ आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपं । उवास कतिचिन्मासान् सुहृदः प्रियकाम्यया ३५ ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बंधुभिः । ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः ३६ इति श्रीभागवते महापुराणे प्रथमस्कंधे एकादशोऽध्यायः ॥ ॥

दिशः भूरिशः बहुलं प्रहीणं यज्ञशिष्टं मरुत्तेन पूर्वं निनस्थापितं धनं ३३ तेन द्रव्येण संभृतः संपन्नः संभारो यज्ञसाधनं येन स तथोक्तः ३४ सुहृदः युधिष्ठिरस्य प्रियेच्छया ३५ बंधुभिः सह कृष्णया द्रौपद्या वासुदेवः ज्ञातः सार्जुनः अर्जुनेन सहितः यदुभिश्च परिवृतः कृष्णो द्वारवतीं ययाविन्वयः ३७ इति प्रथमे एकादशः श्रीरामराम ॥

रा॰
७०

विषयरागः संसारायतदभावो विमुक्तये इत्यतो मुमुक्षुणा स्वतो वैराग्यपरतो वा संपादनीयमित्ययमर्थः प्रतिपाद्यते स्मिन् अध्याये तत्र शुद्धांतःकरणस्यैव विषयविरागः सुदृढ इति सवकर्मणा तीर्थसेवया वास्यादित्यभिप्रेत्य विदुरस्य तीर्थसेवां कृत्वा युधिष्ठिरादिबंधुदिदृक्षया हस्तिनपुरागतिमाह । विदुर इति विदुरो हस्तिनपुरमगादित्यन्वयः । किं कृत्वा तीर्थयात्रायां कुरुष्माद्दिष्टान्मैत्रेयादात्मनः परमात्मनो जीवस्य गतिं स्वर्गनरकादिविषयामिति वा तया परमात्मविद्यया अवाप्तं विवित्सितं ज्ञातुमिष्टं येन स तथोक्तः १ नाष्टष्टः कस्यचिद्ब्रूयादिति वचनात् प्रश्नप्रतिवचनाभ्यां तत्त्वमवगम्यालं बुद्धिरभूदित्याह । यावत इति । क्षत्ता विदुरः कुषारवस्यापत्यस्य मैत्रेयस्याग्रतो यावतः प्रश्नान्कृतवान् तेभ्यः प्रश्ने

सूत उवाच । ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं । ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः १ यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः । जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह २ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः । धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ३ गांधारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी । अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ४ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं । अभिसंगम्य विधिवत्परिष्वंगाभिवंदनैः ५

भ्यो मैत्रेयेण परिहृतेभ्य उपरराम ज्ञातत्वादलं बुद्धिमानभूत् ह शब्दः त्वभिप्रायकः । वस्तुतस्त्वर्थतत्त्वज्ञानेन फलमाह जातेति । तत्त्वज्ञानादतिशयेन जाता एका प्रधाना भक्तिर्यस्य स तथोक्तः कुत्र गोविंदे श्रीकृष्णे अनेन भक्तिज्ञानयोरन्योन्यहेतुत्वं सूचितं २ सूतः संजयः शारद्वतः कृपः ३ अन्याः पांडोर्जामयः पुत्रभार्याः अन्या वा प्रसिद्धनामानः जामयः स्वसारो वा ४ आगतं प्राणं दृष्ट्वा तन्वः भोगायतनानि शरीराणि वा तत्प्राणे उपपन्न उत्तिष्ठंतीति श्रुतेः ॥ ॥

भा॰ प्र॰
७१

मिथः प्रेमबाष्पौघं प्रेमनिमित्तं नेत्रजलप्रवाहं। अर्हयांचक्रे पूजयामास। औत्कंठ्यकातराः औत्कंठ्येन परवशाः। कृत आसनस्य पीठस्य परिग्रहः स्वीकारो येन स तथोक्तः ६ शृण्वतां शृण्वतां सतां ७ नः अस्मान् स्मरथ यूयमिति शेषः मात्रा सह वर्तमानाः समातृकाः विषाग्न्यादेर्विपद्गणान्मोचिताः यत् येन तस्मादिति शेषः ८ एकभक्तादिव्रतेन किमिति शेषः इह भूतले क्षेत्रमुख्यानि क्षेत्रप्रधानानि तीर्थानि यानि तानि सर्वाणि च सेवितानीत्यन्वयः ९ हे प्रभो स्वांतःस्थेन गदाभृता हरिणा तीर्थभूताः भवादृशाः भागवताः गंगादीनि तीर्थानि तीर्थीकुर्वंति न स्वयमात्मशुद्ध्यपेक्षया

मुमुचुः प्रेमबाष्पौघं मिथ औत्कंठ्यकातराः। राजा तमर्हयांचक्रे कृतासनपरिग्रहं ६ तं भुक्तवंतमासीनं विश्रांतं सुखमासने। प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां ७ युधिष्ठिर उवाच अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान्। विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ८ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं। तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ९ भवद्विधा भागवतास्तीर्थभूताः स्वयं प्रभो। तीर्थीकुर्वंति तीर्थानि स्वांतस्थेन गदाभृता १० अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः। दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ११ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत्। यथानुभूतं क्रमतो विना यदुकुलक्षयं १२ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं। नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः १३ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं। भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् १४

राम
७१

तीर्थानि गच्छंतीति शेषः १० कृष्णो देवतं येषां ते तथोक्ताः ११ क्रमतः परिवर्तमानेन क्षितितलमिति शेषः स्व नयथानुभूतं तथा तत्सर्वमवर्णयत् किंतु यदुकुलक्षयं विना तीर्थयात्रायां यमुनायां भगवदाज्ञया बदरीं गच्छंतमुद्धवं दृष्ट्वा तस्माद्द्विजशापाद्धेतोः उद्विंशाद्वर्षादुपरि नाशमेष्यद्यदुकुलं श्रुत्वा तन्नावर्णयदिति भावः १२ तत्किमिति नावर्णयदित्यत आह। नन्विति १३ विदुरः किमकार्षीदिति तत्राह। कंचिदिति। सुखं लक्षणं श्रेयः ज्येष्ठस्य भ्रातुर्धृतराष्ट्रस्य १४

एवं भगवद्भक्तिज्ञानादिमानयं विदुरो देवेषु कस्यावतार इति तत्राह। अबिभ्रदिति। अर्यमा वैवस्वतो यमः अघकारिषु पापकृत्सु यथायोग्यं पापमनतिक्रम्य दंडमबिभ्रत् शिक्षामकरोत् पापफलमभोजयदित्यर्थः। स यमः अणीमांडव्यशापात् यावद्वर्षशतं तावच्छूद्रत्वमबिभर्त्। नृपः। मांडव्यो नाम कश्चिद्द्विजः कस्मिंश्चिद्वने तीरे तपश्चरन् कस्मिंश्चिन्नगरात् चौर्यं गृहीत्वागतैश्चौरैः सह अनुधावद्भिः नगरपालैरज्ञानात् गृहीतो राज्ञे निवेदितो पतद्नुज्ञया शूले समारोपितो भूत्। तत्र शूले तपः कुर्वंतमपि जाज्वल्यमानं दृष्ट्वा नैर्निवेदितो राजा ससंभ्रममुपागम्य शूलादवरोप्य प्रसाद्य तस्यापराधमासकोपेन जाज्वल्यमानेन यमसमीपं गते न तेन मुनिना कस्मादहं शूलमारोपित इति पृष्टो यमः तस्माज्जापमादातु कामो बाल्यावस्थायां काचिन्मक्षिका शूले समारोपिता तेन दोषेणायमवस्थाविशेषः प्राप्त इति प्राह। तस्मै क्रुद्धो मुनिः शूद्रो भवेति शशाप तमिति मांडव्यशापः १५ अथ युधिष्ठिरः किं चकारेति तत्राह। युधि

अबिभ्रदर्यमा दंडं यथावदघकारिषु। यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः १५ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं। भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया १६ अथ मंत्र्यच्युतो बभ्रुर्निर्दिष्टानुगतो विभुः। अर्जुनोद्धवशैनेयैर्ययौ द्वारवतीं हयैः १७ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया। अत्यक्रामदविज्ञातः कालः परमदुस्तरः १८

ष्ठिर इति। इंद्रादिलोकपालसमानैर्भीमादिभ्रातृभिर्लब्धराज्यो युधिष्ठिरः कुलंधरं पौत्रं दृष्ट्वा परया श्रिया संपदा मुमुदे इत्येकान्वयः। कुलं धारयतीति कुलंधरः १६ यथो द्वारवतीमित्युक्ते श्रीकृष्णप्रयाणशेषमाह। अथेति। अथ विभुः कृष्णो बभ्रुनाग मिव्याभीत्यामंत्र्य संभाष्य यांतं अनुगतान्वभ्रुन्निर्वर्त्य अर्जुनादियुक्तो हयैर्युक्तेन रथेन द्वारवतीं ययाविस्येकान्वयः १७ अधुनाऽष्टतराष्ट्रस्य स्वर्गप्राप्तिप्रकारं वक्तुमुपक्रमते। एवमिति। एवमुक्तप्रकारेण हरिपरायणानां पांडवादीनां यः कालः एकमपि क्षणमवध्यतां नेतुं शक्यः स कालो हरिविमुखानां गृहेषु पुत्रमित्रादिलक्षणेषु केवलं शिश्नोदरंभरतया सक्तानां गृहपोषणधनान्वेषणव्यग्रतया प्रमत्तानां विस्मृतपरमात्मतत्त्वानां अतएव अविज्ञातो सन् अत्यक्रामदतिक्रांतो भूदित्येकान्वयः १८

तत्कालस्यातिक्रमणं विदुर इति नाम सार्थं साक्षयन्नाह निर्गम्यतां गृहादिति शेषः। प्राप्तमिदं मरणभयं पश्येत्यन्वयः १९ यस्य कालस्य कुतश्चित्का रणात्कर्हिचिदपि प्रतिक्रिया निवर्तनं क्रिया नास्ति स एष भगवान् कालरूपी नः सर्वेषामागतः शरीरवियोगकरणाय प्राप्त इत्यन्वयः २० इतोपि निर्गमनमुचितमित्याह। येनेति इह जीवलोके येन कालरूपिणा हरिणाभिपन्नो ग्रस्तः अयं जनो तिशयेन हृदयंगमैः प्राणैरपि वियुज्येत तान्यैर्धनादि भिर्वियुज्यत इति किमुतेत्यन्वयः २१ अस्तु ममापि मरणं ततः किमिति तत्राह। पित्रिति। तव पित्रादयो हताः वयश्च विगतं आत्मादेहश्च जरया ग्रस्त इ तिपन्नथापि त्वं परगेहमुपाससे नं श्रेयः सा धुना येह सेवमानस्य तवातः परलोके न सुखं वा नास्तीत्यर्थः २२ परलोके सुखं नेति वेदिहैव दीर्घजीवनम स्तीत्यभिप्रायश्चेन्नहि तन्निरपत्रपस्य मित्रेत्याह। अहो इति। जंतोर्जीविताशा बहुकालं जीवामीत्याशा इच्छा महीयसी महत्तरा। अहो आश्चर्य नातिरेकः

विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत। राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं १९ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो। स एव भगवान् कालः सर्वेषां नः समागतः २० येन चैवाभिपन्नोयं प्राणैः प्रियतमैरपि। जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः २१ पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः। आत्मा च जरया ग्रस्तः परगेहमुपाससे २२ अहो महीयसी जंतोर्जीविताशा यया भवान्। भीमापवर्जितं पिंडमादत्ते गृहपालवत् २३ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः। हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् २४ तस्यापि तव देहोयं कृपणस्य जिजीविषोः। परैत्यनिच्छतो जीर्णो जरया वाससी इव २५

यया जीविताशया भवान् भीमापवर्जितं भीमेन तिरस्कृत्य दत्तं पिंडमादत्ते। क इव गृहपालवत् सारमेय इव २३ ननु विषम उपन्यासः। अग्नि कनिष्ठपुत्रत्वेन मत्सुतत्वात्तद्दत्तान्नेन शरीरपोषणमुचितमिति चेत्। सत्यं। विषदानादिनात्यपराद्धत्वात्तद्दत्तं विषोपममित्यभिप्रेत्याह। अग्नि रिति। अग्निदाहादयपराधाः त्वया येषां कृताः तेषामेव दत्तैरसुभिः कियत् त्वया जननं लज्जाकरत्वान्मृतिरेव गरीयस्यतो निर्गम्यतामित्यन्वयः २४ यु धिष्ठिरादीनां मयि तात्पर्यान्न निर्गमिष्यामीति चेत्तत्राह। तस्येति। जरया ग्रस्तो वाससी इव वस्त्रे इव यथा तथा अनिच्छतोपि जीविषोर्जिजीविषोः कृपणस्य परान्नादनिरतस्यापि तवायं जीर्णो देहः परैति निरस्तासुः स्याद्यतो देहस्यानित्यत्वान्निर्गच्छेति वदामीति भावः २५

सुबलस्य पुत्री गांधारी पति मुख्यैव व्रतं यस्याः सा तथोक्ता। प्रयांतं पतिमनुजगामेत्यन्वयः। क्व कान् कुंतीरगत्वा कुत्रावसदिति तत्राह। हिमालयमिति का यवाङ्मनोभिर्न्यस्तः परित्यक्तः भूतद्रोहलक्षणो दंडो यैस्तेषां प्रकर्षेण हर्षजननयतीति न्यस्तदंडप्रहर्षं अत एव मनस्विनां वशीकृतेंद्रियग्रामाणां संन्यासिनां प्रकृतिरभूतत्तया विषशकुनप्रतिभासादित्यभिप्रेत्याह। अजातशत्रुरिति। मित्रः सूर्यः तद्विषयं कर्म मैत्रं संध्योपासनादि तत्कृतं येन स कृतमैत्रः। ग ईपत्याद्यग्निषु हुतं येन स हुताग्निः तिलगोवसुरुक्मैः विप्रान्संपूज्य नत्वा रुक्मं सुवर्णं दत्वा च पित्राद्युपवेशस्थले पित्रादिगुरुवंदनाय पितृगृहान्प्रविष्टो

पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी। हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामवसत्संविहारं ३० अजातशत्रुः कृ तमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोवसुरुक्मैः। गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं च ३१ तत्र संजयमासीनं पप्र च्छोद्विग्नमानसः। गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः। अंबा वा हतपुत्रार्ता पितृव्यः क्व गतः सुहृत् ३२

जातशत्रुस्तदायतनं नमस्कुर्वन्पितरौ कुंतीधृतराष्ट्रौ सौबलीं गांधारीं मनसा नीतौ नापश्यत्। संशतितेभूतात इति तस्य मनसि तथा प्रत्यभादित्यर्थः। पितरा वित्यत्र पितृशब्देन विदुरोपि नाभिप्रेतः। तस्य शूद्रजातित्वेनावंद्यत्वात्। धृतराष्ट्रादिभ्यः पूर्वं युधिष्ठिरेण कीर्तितत्वाच्च। न चापश्यदित्य स्यानुक्त्वा धृतराष्ट्रगमनार्थं गीतिं कारैर्भारतादौ युधिष्ठिरादयुक्तत्वाद्गमनुक्तेः तद्विरोधो दुर्वारः ३१ मनसि प्रतीतपितृस्वर्याणस्य युधिष्ठिरस्य तत्क्व कं लोकं प्रतिगतः कथंभूतः नेत्रयोरिति तत्नीयार्थे षष्ठी नेत्राभ्यां हीनः नेत्रयोर्योगेन वा वृद्धः जरया च ग्रस्तः अंबा कुंती वा हतपुत्रत्वादार्ता गांधारी च यत्र कं प्रति गतेति पितृव्यो धृतराष्ट्रः क्व गत इति पुनः प्रश्नस्तात्पर्यातिशयात् ३२

नन्वप्रथममेव पतिष्यतीति देहमुपेक्षमाणस्य आत्महननाख्यदोषानुषंग इति तत्राह। गतेति। गतः स्वार्थः ऐहिकामुष्मिकसुखसाधने यस्मात्स तथोक्तः तं
इमं देहं देहाभिमानमुक्तश्चद्रष्टुमार्थादिकं त्रिहर्वधानमुक्तः अविज्ञातगतिरन्यैर्जनैरनवबुद्धारण्यादिगतिः जह्यात्स वै एव धीरो विवेकज्ञान्युदाहृतः। तस्मात्
इमं देहं देहाभिमानमुक्तः... दोषाभावात्। निर्जनवनगतत्वात् पश्चाद्यथा शरीरमिदं साधितस्वार्थं कुर्विति भावः २६ इतोपि प्राप्तवनस्य तवतपःसाधन
रूपार्थसाधनायोग्यदेहहानौ दोषाभावात्। निर्जनवनं गत्वात पश्चाद्यथा शरीरमिदं साधितस्वार्थं कुर्विति भावः २६ इतोपि प्राप्तवनस्य तवतपःसाधन
मेव श्रेयस्कर मित्यक्तोत्याह। यइति। यः स्वतः स्वबुध्या परतः परबोधनेन वा जातनिर्वेद उत्पन्नवैराग्यः आत्मवान्वशीकृतमनाः हरिं हृदि कृत्वा गेहा
त्प्रव्रजेत्स नरोत्तमः पुरुषश्रेष्ठः इत्येकान्वयः २७ अथ तस्मात्त्वमुदीचीं दिशं यातु कथंभूतः स्वैरज्ञातगतिः विविक्तगतिः नतु स्वैः पांडवैरविज्ञातगतिः

गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः। अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः २६ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान्। हृ
दि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः २७ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान्। इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्ष
णः २८ एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः। छित्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा २९

पांडवानुसृतैर्वतस्यवनवासायगमुक्तेः। कथंत हि शिवृधाजनास्वैरिणीशहार्थं वनस्वेच्छानुसारेणज्ञाता गतिर्यस्य न परैर्ज्ञातः मतयोक्त इति विवरणेप
पंथे... इतोऽर्वाक्कुर्वतनः कालः पुंसामधिकारिणां ज्ञानभक्त्यादिगुणसामग्र्यापादकः। इतउपरितनः कालः
पत्रे। अन्यथा अविज्ञातगतिरित्येतदपहसितं स्यात् इतोर्वाक् कुर्वतनः कालः पुंसामधिकारिणां ज्ञानभक्त्यादिगुणसामग्र्यापादकः। इतउपरितनः कालः
प्रायेण गुणेषु विषयेषु विकृष्यनाशयतीति गुणविकर्षणः विविधदर्शयतीति वा वेदस्य वा विकर्षणमित्युक्तेः २८ एवमुक्तप्रकारेणानुजेन विदु
रेण बोधितोऽतः प्रज्ञाज्ञानमेव चक्षुर्यस्य तथा स्वतो ज्ञानं ध्वः प्रज्ञया वेद पश्यतिन तु मांसदृष्ट्येति वा। आजमीढः अजमीढवंशोद्भवः। आनेन ज्ञानेन मी
ढः सिक्त इति वा मिहसेचने इति धातोः। द्रढिम्नः दृढतरान्स्वेषु स्नेहपाशान्छित्वा भ्राता विदुरेण सम्यग्दर्शितअभयपथो वैदिकलौकिकमार्गो
येन सः... अध्वामार्गो यस्य सतथोक्तः। राजा धृतराष्ट्रः निश्चक्राम निर्गतो वभूवेत्येकान्वयः। द्रढिम्न इति विशेषः २९

धृतराष्ट्रस्यमरणकाले स्वस्मिन् प्रियाप्रियविवेकं तस्य मरणप्रकारं च पृच्छति। अपीति। अकृतप्रज्ञे अशिक्षिते दुर्बुद्धौ मयि स्वभार्यया सह शमलं पापम
पराधमाशंसमानः हतबंधुः दुःखितः सन् गंगायामपतत् पितृव्यं पुत्रान्सर्वान्मारयित्वा स्वयं राज्यमादाय मां निष्कासितवानिति शमलबुद्धिर्नाभवत्
किं तद्दुःखातिशयाद्गंगायां पतित्वा मृतोन्न विविभावः ३३ स्वस्याकृतप्रज्ञत्वमुपपादयति। पितरीति। नः अस्माकं पितरि पांडौ उपरते स्वर्गगते स
ति योगंधारिधृतराष्ट्रौ शिशून्सर्वान्व्यसनतो रक्षतौ सुहृत्वे शिशुत्वे च रक्षणीयत्वे हेतुः तौ पितृव्यौ गांधारीधृतराष्ट्रौ मृत्वेतः अस्मा लोकात्परत्रकं

अपि मय्यकृतप्रज्ञे हतबंधुः स्वभार्यया। आशंसमानः शमलं गंगायां दुःखितोऽपतत् ३३ पितर्युपरते पांडौ सर्वान्नः सुहृदः शि
शून्। अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ३३ सूत उवाच कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः। आत्मे
श्वरमचक्षाणो न प्रत्याहातिपीडितः ३४ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना। अजातशत्रुं प्रत्यूचे प्रभोः पादा
वनुस्मरन् ३५ संजय उवाच अहं च व्यंसितो राजन् पित्रोर्वः कुलनंदन। न वेद सा ध्व्यां गांधार्या मुषितोऽस्मि महात्म
भिः ३६

लोकं गताविति नृपः। तयोरनवरतशुश्रूषणेन देवकृतप्रज्ञतानदभ्यावाद कृतप्रज्ञत्वमिति भावः ३४ अतिपीडितः दुःखेनेति शेषः आत्मनः
स्वस्य ईश्वरं स्वामिनं धृतराष्ट्रमचक्षाणः मृतत्वाद्देवापश्यन्नत एव विरहेण वियोगेन कर्शितः कृशतरः कुतः स्नेहपारवश्यात् दाक्षिण्याच्च
संजयो युधिष्ठिरं वोद्धारं वक्तुं नाशकदिति नृपः ३५ आत्मना मनसात्मानं विष्टभ्य संस्थाप्य प्रभोर्धृतराष्ट्रस्य ३६ प्रजारंजयित्वा कुलं
नंदयतीति तत्संबुद्धिः पदद्वयं प्रायोजितनैकवलं त्वमेव व्यंसितो हं वियोजित इति वार्थः। पित्रोः कुंतीधृतराष्ट्रयोः परलोकगतिमिति शे

३६

भा॰पु॰
७४

एतस्मिन्नंतरे युधिष्ठिरस्य जनपसंवादसमये त्रितंत्रीं तंत्रीत्रयमेलनोपेतां वीणां ध्वनयन्नादयन्तुंबुरुणा सह वर्तमानः भगवान् हरेः षड्गुणवेत्ता श्र
ज्योवा ३८ राज्ञा दरेणोपनीतं दत्तमर्घ्यं यस्मै स तथा तं प्रत्युत्थानेन कृत्वाभिवंदितं परमासते सिंहासने समानपीठे आसीनमुपविष्टं नारदं कौर
वेंद्रो युधिष्ठिरोऽभ्यभाषत इत्यन्वयः ३९ हे भगवन्मृतयोः पित्रोः परलोकगतिं न वेद तां भवंतं पृच्छामीतो मृत्स्वतः कं लोकं प्रतिगतावित्यर्थः अपा
रे संसारे सीदतां विपन्नानां कर्णधारो नाविक इव तस्मात्त्वं दुःखार्णवे मग्नानां पारं तीरं दुःखशमनोपायं दर्शयतीति पारदर्शनः ४० धृतराष्ट्रा
दिषु कंचन माशुचः शोकं मा कार्षीः कुतः जगदीश्वरवशमिति यद्यस्मात्तस्मात्स एवेश्वरः भूतानि संयुनक्ति स्वकर्मानुसारेण संयोजयति

सूत उवाच एतस्मिन्नंतरे विप्रा नारदः प्रत्यदृश्यत । वीणां त्रितंत्रीं ध्वनयन्भगवान्सहतुंबुरुः ३८ राज्ञा दरोपनीतार्घ्य प्र
त्युत्थानाभिवंदितः । परमासनआसीनं कौरवेंद्रोऽभ्यभाषत ३९ युधिष्ठिर उवाच नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः ।
कर्णधार इवापारे सीदतां पारदर्शनः ४० माकंचन शुचो राजन्यदीश्वरवशं जगत् । स संयुनक्ति भूतानि स एव वियुनक्ति
च ४१ यथा गावो नसि प्रोतास्तंत्यां बद्धाः स्वदामभिः ॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ४३

नारद उवाच

स एव स्वकर्मावसाने वियुनक्ति वियोजयति। एतस्मादस्ववशत्वान्माशुच इति भावः ४१ ईश्वरजीवयोः स्वातंत्र्यपारतंत्र्ये सोदाहरणं दर्शयति। यथे
ति। यथा गावो बलिवर्दा नसि नासिकायां त्रिवृत्कृततंतुदामभिः प्रोताः स्यूता नासिकाछिद्रस्यूताः स्वदामभिः आधारभूतायां दीर्घायां तंत्यां बद्धाः
ईशितुः स्वामिनो व्रीह्यादिगोणीं वहंति तथा ब्राह्मणक्षत्रियवैश्यशूद्रब्रह्मचारिगृहस्थवानप्रस्थयतय इति नामात्मकदामभिर्वाक्तंत्या विधिनिषे
धात्मकवेदलक्षणायां बद्धाः स्ववर्णाश्रमविहितकर्मभिः ईश्वरस्य बलिं यज्ञादिलक्षणां पूजां वहंति कुर्वंति। तस्मात्स ईश्वरः स्वतंत्रो जीवाः परदधीना इति
शोकपरिहारायस ईशः स्वविहितकर्मणा पूज्य इति भावः ४३

राम
७४

वेदस्यानेकार्थत्वेन तात्पर्यस्य दुर्ज्ञेयत्वाद्द्वैरथ्याणां वगोष्ठ्यादिपालनेन स्वामिकार्यावज्ञानदर्शनाद्द्विधमोच्यमुपन्यास इत्यतो निदर्शन[illegible]माह। यथे
ति। यथा क्रीडोपस्कराणां लीलासाधनानां संयोगविगमौ क्रीडितुः पुरुषस्येच्छया तथैवेशेच्छया पितृपुत्रादिनृपेणान्नृणां मिथः संयोगवियोगौ स्या
तामित्यन्वयः। अनेन वेदस्य मुख्यार्थः श्रीनारायण एवेति निरणायि। तस्मात्पराधीनत्वाच्छोकेन प्रयोजनं तदे[illegible]तिभावः ४४ यस्त्वर्केणानुसंधत्ते
सधर्मं वेदनेतर इति स्मृतेरुक्तार्थनिर्णायके युक्तिरिति तत्राह। यदिति। यत्तु यदि लोकं शरीरं ध्रुवं मन्यसे अध्रुवमनित्यं वा। अथवोभयं नित्यानि
त्यमनुष इति विकल्प्य परिहरति। सर्वथेति। सर्वप्रकारेण ते पितरो न शोच्याः। तथा हि नित्यत्वान्नाशाभावात् तस्य चादर्शनादनित्यमिति वक्तव्यं तस्मा

यथा क्रीडोपस्कराणां संयोगविगमाविह। इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ४४ यन्मन्यसे ध्रुवं लोकमध्रुवं वाथ
वोभयं॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ४५ तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः॥ कथं त्वनाथाः कृपणाः
वर्तेरंस्ते च मामृते ४६

परिहार्यत्वात्तृतीयो नुपपन्नः व्याहतत्वात्तर्हि शोके किं कारणमिति तत्राह। स्नेहादिति। अहं ममेति मोहो बुद्धिभ्रमः तस्माज्जातात्स्नेहादन्यत्र ते शोक
कारणं नास्ति। तस्माद्भ्रमजन्यस्नेह एव तस्य हेतुरिति भावः ४५ ननु यस्य देवे परा भक्तिर्यथा देवे तथा गुराविति श्रुतेः गुरुविषयस्नेहलक्षणभक्तेः पु
रुषार्थहेतुत्वेन परिमाणात्कथं तस्य मोहजन्यत्वमित्याशंक्य तस्य वैक्लव्यं कृपणास्ममतत्पोषणकर्तृत्वेन मन्नाथत्वान्मदृते जीवनमेव नास्ति तेषामी
श्वरदृष्ट्वा ज्ञानादित्वात्मन्यस्मयाभिमाननिमित्तका तदर्थत्वयात्यक्रममित्याह। तस्मादिति। आत्मनः परमात्मनोऽज्ञानेन ज्ञातं वैक्लव्यं जहि त्यजे
त्यन्वयः। परमात्मनः स्वातंत्र्यपरामर्शेनेति शेषः ४६

भा॰ प्र॰
७५

किंचतवायंदेहः स्वाधीनः पराधीनोवा स्वाधीनत्वेभोगयोग्यदुःखनिवारणक्षमता कथंनहि कश्चिद्दुःखमेस्त्वितिप्रार्थनादर्शनविवक्षणः। तस्मात्पराधीनइतिवक्तव्यं। तथाचतस्यपररक्षणसामर्थ्यंनघटतइत्याह। कालेति। कालः पक्षमासादिलक्षणः। कर्मफलप्रापकंपुण्यपापलक्षणमदृष्टं गुणाः सत्वादयः। निमित्तोपादानकारणजन्यत्वेनकालाद्यधीनः सजीवोयंदेहः पंचभिःभूतैरारब्धः स्वव्यतिरिक्तान्कथंगोपायेत्रक्षेत्। तत्रदृष्टांतः। सर्पग्रस्तोमंडूकः सर्पग्रस्तंपरंरक्षितुंनसमर्थः तथेतितुशब्देनानुभवसिद्धमेवेदमितिद्योतयति। तस्मादहंपित्रादिरक्षाकर्त्तेत्यज्ञानंत्यजेतिभावः ४७

कालकर्मगुणाधीनोदेहोयंपांचभौतिकः। कथमन्यांस्तुगोपायेत्सर्पग्रस्तोयथापरं ४७ अहस्तानि सहस्तानामपदोद्विचतुष्पदां। अणूनितातमहतांजीवोजीवस्यजीवनं ४८

ननुभगवन्सत्यमेतत्तथापिवृद्धानामंधानांवात्रादिसौख्यान्नजीवनेममसंदेहइतिचेत्तत्राह। अहस्तानीति। हेतात वत्स अहस्तानिशशपारावतपक्षिप्रभृतीनिसत्वानिसहस्तानांमनुष्याणांजीवनंदेहधारणसाधनं हि चतुष्पदांवाजेतृणादयः। तत्रहिपत्स्वपिअणूनिमत्स्यादीनिमहतांराक्षसादीनांजीवनमित्यनुवर्त्तते। एवंजीवएवजीवस्यजीवनेविधात्राविहितमतोनतान्प्रतिचिंताकर्त्तव्येत्यर्थः ४८

राम
७५

इतोपिनशोककर्त्तव्यः। किंतुअखिलस्यहर्यधीनत्वात्तद्भजनमेवावश्यंकर्त्तव्यमित्याह। तदिति। एवंइदंहरेरितरत्सर्वमनित्यमस्वतंत्रंचेतियस्मात्तस्माद्धेराजन्भगवानात्मनांजीवानामात्मादेहादिकर्त्ताएकोऽद्वितीयः। स्वदृक्स्वयंप्रकाशः। विवेकज्ञानिनांअंतरः अस्यजगतोंतस्थित्वारतिकृतत्वअनंतरोगुणगुणादिभेदरहितोभातितस्मात्त्वमपिदेवोत्तमावतारत्वेनविवेकित्वान्माययास्वेच्छयाकृतामुरुतामनेकावतारांतर्यामिप्राणातिकांनिर्भेदात्मकोहरेर्विभूतिपश्यंस्वंतमेवभजेतिवाक्यशेषः। स्वदृक्भगवानात्मासएकएवेदंजगद्भातिकथंभोक्तृरूपेणांतरः भोग्यरूपेणानंतरः निर्भेकस्यानेकत्वंकथंतत्राह ।। पश्येतितंपरमेश्वरंमाययाबहुधावर्त्तमानंपश्येतिकेचिद्योजयंति। एकस्यभोक्तृभोग्यरूपत्वानुपपत्तेरनिर्वाच्यमाययाअप्रमाणिकत्वेनानंगी

तदिदंभगवान्राजन्नेकआत्मात्मनांस्वदृक्। अंतरोनंतरोभातिपश्यतंमाययोरुधा ४९ सोयमद्यमहाराजभगवान्भूतभावनः। कालरूपोवतीर्णोस्यामभावायसुरद्विषां ५० निष्पादितंदेवकृत्यमवशेषंप्रतीक्षते। तावद्यूयमवेक्षध्वंभवेद्यावदिहेश्वरः ५१

कार्यत्वादनादरणीयमेवतदिति ४९ ननुभगवतेश्वरवशंजगदित्युक्तंतमीश्वरंवयंकथंबुध्यामहइतितत्राह। सोयमिति। यः सकलंस्ववंशविधायात्मेसोयमद्यदेवैःप्रार्थितोस्यांपृथ्व्यांयदुकुलेवतीर्णः इत्यन्वयः। कथंभूतः भूतानांभावनोवर्द्धनः। कालरूपः संहाररूपः। किमर्थंसुरद्विषामभावायविनाशाय ५० अवतारप्रयोजनंचसंपन्नप्रायमितिद्योतयन्नाह। निष्पादितमिति। भूभारदैत्यसंहाराख्यंदेवकार्यंतेननिष्पादितं। सपुनरवशेषंअवशिष्टंयदुकुलक्षयंप्रतीक्षते। पश्चाद्वैकुंठमेष्यतीतिशेषः। श्रीकृष्णइहस्थलेयावद्यावंतंकालंतिष्ठतिस्थमपितावंतंसमयमनुवर्त्तध्वमित्यन्वयः ५१

नाहं वेद गतिमिति पितृव्यपरिहरिष्यन्नूधृतराष्ट्रस्य तपश्चरणाश्रमतीर्थनाम वक्ष्यन्नाह धृतराष्ट्र इति गमनसमये भ्रात्रा विदुरेण वशीकृतः कुंत्यास हगतः
हस्तिनपुरात् निर्गम्य हिमवतः पर्वतस्य दक्षिणेन दक्षिणदिग्गत ऋषीणामाश्रमं सप्तस्रोतो नाम गतोऽभूदित्यन्वयः ५२ कस्मात्सप्तस्रोत इत्युक्तमित्यत्रा
ह स्रोतोभिरिति । यत्र यस्मिन्नाश्रमे स्वर्धुनी भागीरथी सप्तानामृषीणां प्रीतये सप्तभिः स्रोतोभिः जलस्यंदनधाराभिः सप्तधा सप्तभिः स्रोणीभिरभ्यगा
त्समुद्रमिति शेषः इति यस्मात्तेन कविजनाः सप्तस्रोत इति संज्ञां प्रवदंतीत्यन्वयार्थः ५३ तु उपशांत आत्मांतःकरणं यस्य स तथोक्तः । विगते

धृतराष्ट्रः सह भ्रात्रा गांधार्या च स्वभार्यया ॥ दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ५२ स्रोतोभिः सप्तभिर्या वै स्वर्धु
नी सप्तधा व्यगात् । सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते ५३ स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन्यथाविधि ॥
अब्भक्ष उपशांतात्मा स आस्ते विगतैषणः ५४ जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः । हरिभावनया ध्वस्तरजःसत्व
तमोमलः ५५

षणाः नष्टममत्वस्पृहाः सोपरमात्मनि गतं प्रापमीकृत्य निरंतरं चिंतनं यस्येति वा । अब्भक्षः कृतजलभक्षः स धृतराष्ट्रः तस्मिन्नाश्रमे स्नात्वा च यथाविधि
अग्नीन्हुत्वास्ते इत्यन्वयः । आस्ते इति लट् भूतार्थे अन्यथोक्तार्थविरोधः स्यात् ५४ अपि मयीति मृत्युकालीन निष्ठासौमनस्यविषयं प्रश्नं परिहरतीत्या
ह । जितासन इति । धृतराष्ट्र उक्तविधिना तपः कुर्वन्नभ्यासपाटवेन जितासनः स्वस्तिकाद्यासनजयवान् निर्जितश्वासः प्राणजयवान् विषयेभ्यः प्रत्याहृ
तश्रोत्रादिषडिंद्रियः सन् हरिभावनया हरिनिरंतरध्यानेन ध्वस्तसत्वरजस्तमोनिमित्तमनोमलं येन स तथा ५५

स्वरूपज्ञानेन स्वस्वरूपमात्मपरतत्वपर्यंतानि अशेषतत्वान्यपरोक्षीकृत्य सर्वजगद्विज्ञानात्मनि विज्ञानतत्वाभिमानिनि विरिंचे संयोज्य तन्त्र प्रविलाप्य
लयमेष्यतीति ध्यात्वा तं विरिंचं क्षेत्रज्ञे स्वहृदि स्थिते हरौ तथा मिलाप्य विलाप्य ब्रह्मांबरमंबर इव उत्पद्यमानघटस्वर्तिनो राकाशस्वरूपतद्भिन्नजायमाना
काशयोर्भेदे महाकाशस्वरूप घटाकाशो महाकाशे घटे भिन्ने यथैकीभवति तथात्मानं स्वांतर्यामिणं हरिमाधारे सर्वाधारे ब्रह्मणि सर्वगते प्रविलाप्यै
कीभावेन चिंतयन् ५६ अत एव ध्वस्तमायागुणोद्रेक इति हेतुगर्भं । निरस्तप्रकृतिसत्वादिगुणोद्रेकत्वाद्धरावेव निरुद्धाशेषकरणमनाः अत एव निव
र्तिताखिलाशनोऽधुनास्थाणुरिवाचलः आस्ते तदा श्रुतिकाले आसीदित्यन्वयः । तस्मात्त्वयि शमलमाशंसमानो मापि दुःखितो गंगायामपतदिति मा

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं । ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ५६ ध्वस्तमायागुणोद्रेको निरुद्धकरणाशयः ॥
निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना ॥ तस्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः ५७ स वा अद्यतनाद्राजन्परतः पंचमेऽहनि
॥ कलेवरं हास्यति हि स्वं तच्च भस्मी भविष्यति ५८ दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे ॥ बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्य
ति ५९

वः । ब्रह्मार्पणबुध्या संन्यस्तसमस्तकर्मणः तस्य धृतराष्ट्रस्य तपोविघ्नो माभूदित्यन्वयः ५७ इदानीं धृतराष्ट्रमृतिकालं वक्ष्यन्नाह । स वा इति । स धृतराष्ट्रो
द्यतनाद्दिनात्परतः पूर्वस्मिन् पंचमेऽहनि कलेवरं हास्यति जहातीत्यत्र तच्च भस्मी भविष्यति भस्मसात् दग्धं स्यात् हिशब्देन सुचितिरूपं देयहलिंगनराणामिति प्राक्
रणास्त्वमत्र प्रमाणीकरोति इतिहासं वा प्रसवयंतीवा इत्यनेन नतां प्रदानादस्य विदुर्णानुमयामास धर्मवित् । उक्तौ नमां गति तेषां निष्ठां तात्कालिकीं तथेति
स्कंदपुराणवाक्यमुक्तवंपति । चशब्द एवार्थे तत्कलेवरमेव तत्स्मी भविष्यति न तु सः स्वयं भूत्वा तमिष्यति वेनतस्य नित्यत्वात् ५८ उटजेन पर्णशालया सह दह्य
मानः सहोटजः तस्मिन्प्रवेशस्तत्रासाविशत् । साध्वी शब्देन कुंती वसाधनाधिमाविशत्तत्त्वाद्गतगंगां प्रापरतात्मतामिति परलोकमुद्दिश्यनशोचितव्यमि

एवमनस्य विदुरस्य धृतराष्ट्रवनप्रवेशं शास्त्रूर्वतनावरणं प्रकारमाह। विदुर इति। सर्वज्ञोऽपि विदुरो दिव्यज्ञानेन तद्विधिदाश्चर्यं धृतराष्ट्रपांडवयोर्दवानौ स्व निर्याणं निशाम्य हरिसामर्थ्यस्मरणेन बंधुमरणस्मरणेन च हर्षशोकान्वितः सर्वमनित्यमीश एव नित्य इतः तीर्थयात्रादितस्तेचैव पुरूषार्थ इदं मत्वा कारणतीर्थनिषेवणका गंता गंगा इति। तीर्थनिं भाग वता दिशाश्वाणां वसे वनोयथो नुशहोगतेति लु इ भूता थत्वमेद माह। तुस्याद्देव धारणे इत्यभि

विदुरस्तत्तदाश्चर्यं निशाम्य कुरुनंदन॥ हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः ५९ इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबुरुः॥ युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ६१ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वादशोऽध्यायः॥ ॥

धानात्स च पुनर्दृष्टतराष्ट्रपरिसरमागतोऽभवत्। धृतराष्ट्रादिदिदृक्षया वनं गते पुभवं तं प्रविश्य एकत्वमागतो हितस्मात्तत्तस्य गतिर्मया वर्णनीयेति भावः पुरादिदृक्षार्थं वनमागते षु पांडवेषु राजानं प्रविश्य एकत्वमागत इति स्कंदादकथितार्थभेदेवाक्तं तद्वितिनुशहः ६० सतुंबुरुरिति वक्तव्ये सहतुंबुरुरिति नारदः सर्वदा तुंबुरुणा सहैव वर्त्तते न तं विहायेति द्योतनार्थः। कुंत्यादिविषयाः शुचः ६१ प्रथमे द्वादशः

दुर्निमित्तादिसंमारख्यात्राश्रतिपात्सनात्तस्मानित्यत्वज्ञापनेन हरौ परा भक्तिर्जायत इति अर्थो निरूप्यते स्मिन्नध्याये तत्रावशेषं प्रतीकृतरुक्तयदुकुलसंहारकथनपूर्वकं श्रीकृष्णस्य स्वधामप्राप्तिं वक्तुं उपक्रमते॥ संप्रस्थित इति। नारदोक्तपरामर्शेन वीतशोकतया राज्यं पालयन्नृपः स्वानुमतेन जिष्णावर्जुने द्वारकायां स्थितानां बंधूनां दर्शनेच्छया। मायया इच्छया गृहीतमनुष्यवेषस्य वासुदेवस्य ईहितं चेष्टितं च ज्ञातुं द्वारकां प्रति संप्रस्थिते गते १ यदा कति चिन्मासा दिवसा अतीताः अतिक्रांताः तदा शतशः सहस्राणि घोररूपाणि भयंकराणि यद्दर्शनकराणि निमित्तान्याध्यात्मिकाधिभौतिकाधिदैविकानुत्पातान्ददर्श इत्यन्वयः। अहश्च

सूत उवाच॥ ॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया। ज्ञातुं मायामनुष्यस्य वासुदेवस्य चेहितं १ व्यतीताः कति चिन्मासास्तदा नुशतशो नृपः॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वह २ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः॥ पापीयसीं नृणां वार्त्तां क्रोधलोभानृतात्मनां ३

मासशब्दोक्तं यत्र विना पुत्रं वनेदित्य भिधानं तु शब्देन गृहीतं २ उत्पातं दृष्ट्वा किं चकारेत्यपेक्षायामाह॥ कालस्येति॥ कालगत्या दिकं दृष्ट्वा ददर्शेत्यनुजेनेति मसेन मित्यभाषतेत्यन्वयः॥ विपर्यस्ता व्यत्यस्ता वसंतादीनामृतूनां धर्माः पुष्पोद्गमादयो यस्मिन्नतीति विपर्यस्तर्तुधर्मस्य कालस्य रौद्रीमित्यपाठात्तु गतेरपरिहार्यत्वं वक्ति। क्रोधादिग्रस्तात्मानो येषां ते तथोक्ताः तेषां नृणां वार्तां श्रुत्वा जीवनोपायप्रवृत्तिं पापीयसीं पापप्रचुरां दृष्ट्वा ३

व्यवहृतं दानोपादानादिव्यवहारं जिह्मप्रायं कपटप्रचुरं सौहृदं स्नेहं शाठ्यमिश्रं स्वप्रयोजनोपेतं पित्रादीनां कल्कितं कलंकतां कलहं वा ४ अरि
ष्टानि अशुभानि अरिष्टं पापशुभयोरिष्टं अशुभेपि निर्दिष्टमित्यभिधानमपि शब्दानायासे हि। पूर्वकालवैलक्षण्यद्योतकस्तुशब्दः। लोभादिला
अधर्मस्वभावं ५ ६ अत्रापि मासादिवसाः अहमंजसेदं कारणं न वेद त्वमिदं वेत्सि किमिति वा काक्वशेषः ७ आत्मनः स्वस्याक्रीडं क्रीडास्थानमं
गं निजां भूमिं। यस्य पृथिवी शरीरमित्यादेः यद्वा। देवर्षिणा नारदेन पूर्वं तावद्देवेषु धाममिति निर्दिष्टः सः कालः प्रत्युपस्थितः आसन्नः अपि किं ८

जिह्मप्रायंव्यवहृतंशाठ्यमिश्रंचसौहृदं।पितृमातृसुहृद्भ्रातृदंपतीनांचकल्कितं ४ निमित्तान्यत्यरिष्टानिकालेत्वनुगतेनृणां
।लोभाद्यधर्मप्रकृतिंदृष्ट्वोवाचानुजंनृपः ५ युधिष्ठिरउवाच संप्रेषितेद्वारकायांजिष्णौबंधुदिदृक्षया। ज्ञातुंचपुण्यश्लो
कस्यकृष्णस्यचविचेष्टितं ६ गताःसप्ताधुनामासाभीमसेनतवानुजः।नायातिकस्यवाहेतोर्नाहंवेदेदमंजसा ७ अपिदे
वर्षिणादिष्टःसकालोयमुपस्थितः।यदात्मनोंगमाक्रीडंभगवानुत्सिसृक्षति ८ येषांन्नःसंपदोराज्यंदाराःप्राणाःकुलं
प्रजाः॥आसन्सपत्नविजयोलोकाश्चयदनुग्रहात् ९ पश्योत्पातान्नरव्याघ्रभौमान्दिव्यान्सदैहिकान्।घोरमाशंसतोदूरा
द्भयंनोबुद्धिमोहनं १०

यस्य कृष्णस्यानुग्रहात् येषामस्माकं संपदादयश्च आसंस्ते यानः स कालः आसन्न इत्यन्वयः। दाराः भार्याः सपत्नानां
शत्रूणां विजयो लोकाः स्वर्गादयः। प्रजाः पुत्राः ९ कुत आशंकस इति तत्राह पश्येति। दिव्यान् सूर्यप्रकाशादीन् भौमान् भूकंपादीन् देहभवान् दै
हिकान् नेत्रोरुस्फुरणादयः तैः सह वर्तमानाः सदैहिकास्तान् इति त्रिविधान् दृष्टान् अतिरिक्तकारणशून्यान् अशुभसूचकान् उत्पातान् पश्येत्यन्वयः। की
दृशान् बुद्धिमोहनं भयमदूरादिदानीमेव आशंसतः कथयतः तस्मादाशंक इति भावः १० ॥ ॥राम॥ ॥ ॥

दैहिकांश्च क्रीत्याह। ऊर्वक्षीति। ममोत्तमांगादयः पुनः पुनः स्फुरंति कंपंते। एते आरात् क्षिप्रं विप्रियं मह्यं दास्यंतीत्यन्वयः ११ अनलानि शिवाननया स्याः सा तथोक्ता मु
खादग्निज्वालामुद्गिरंतीत्यर्थः। एषा शिवा शृगाली उद्यंतं गच्छंतमरुणमादित्यमभिमुखं रौति रटति। रटशृगालीकोशेकाका ह्वाने च सारमेयः श्वा १२ शस्ता
ः गवादयः मां सव्यमप्रदक्षिणं अपरे पशवो वामगर्दभादयः मां प्रदक्षिणं कुर्वंति वाहानश्वादींश्च रोदनं कुर्वतः मनसा निरूपयामि १३ मृत्युदूतः मरण

ऊर्वक्षिबाहवोमह्यंस्फुरंत्यंगपुनःपुनः।वेपथुश्चापिहृदयेआराद्दास्यंतिविप्रियं ११ शिवैषोद्यंतमादित्यमभिरौत्यनलानना।माम
गसारमेयोयमभिरोदित्यभीतवत् १२ शस्ताःकुर्वंतिमांसव्यंदक्षिणंपशवोपरे।वाहांश्चपुरुषव्याघ्रलक्षयेरुदतोमम १३ मृ
त्युदूतःकपोतोयमुलूकःकंपयन्मनः।प्रत्युलूकश्चकुह्वानमनिद्रौशून्यमिच्छतः १४ धूम्रादिशःपरिधयःकंपतेभूःसहा
द्रिभिः।निर्घातश्चमहांस्तातसाकंचस्तनयित्नुभिः १५

मृत्युसूचकः कपोतः शिलाकणाशनपक्षी अथो पदं करोति। यत्कपोतः पदमग्नौ कृणोतीति मंत्रात्। इदं स्वप्ने दर्शनमिति ज्ञातव्यं। मे मनः कंपयन् उलूकः प्र
त्युलूकश्च मिथो हुंकारैर्जगत् शून्यमिच्छतः। सर्वनाशेच्छया तथा कुह्वानं कुरुत इत्यर्थः। कुह्वानमिति केचित् पठंति। कुह्वानं नाम तज्जातिध्वनिविशेषः।
१४ परिधयः दिशः धूम्राः धूम्रवर्णाः। स्तनिताः परिवेषा वा स्तनयित्नुभिः शनि निरिकाले मेघैर्वा साकं महानिर्घातः निर्मेघगर्जितं १५

वायुरस्पर्शस्तत्र पकर्षकालमित्याह। वायुरिति रजसा सृजन्नात्मनोंधकारं विसृजन् निष्ठुरस्पर्शः वायुर्वाति। असृग्वर्षन्ति। जलदाः सर्वतो दिशं बीभत्समिव भीषकमिव असृग्रुधिरं वर्षन्ति १६ दिवि ग्रहाणां परस्परं ग्रहमर्दं ग्रहयुद्धं भूगणे नक्षत्रसमूहे ससंकुले संकर्षसहिते भावप्रधानत्वेद्योत नायससंकुल इत्युक्तं। तेनाविभयप्रापकत्वमाह। तु शब्दे नैव चेदेवस्या दितिज्योतिः शास्त्रप्रमाणीकरोति रोदसी द्यावापृथिव्यौ ज्वालाकुले इव भातः १७

वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः। असृग्वर्षन्ति जलदा बीभत्समिव सर्वतः १६ सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी १७ नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च। न ज्वलत्यग्निराज्येन कालोयं किं विधास्यति १८ न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः। रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे॥ दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च १९ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः॥ भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः २०

भौमानाह॥ नद्य इति। स्वर्नद्यादीनां दिव्यत्वसंग्रहार्थमत्र नानापाठिनदाः पुंवह्यः शोणाद्यः क्षुभिताः निमित्तं मनोरोगकलुषाः नित्यमाज्येन हू लनस्वभावो वह्निः आज्येनन ज्वलतीति यस्मादयं कालः किं शमलं विधास्यति १८ व्रजे गोष्ठे अश्रुमुखेयाः संतानस्तथोक्ताः नहृष्यन्ति नाविक्रीडन्ति तदाघातं न कुर्वन्तीत्यर्थः। दैवतानि प्रतिमाः रोदनादेर्यो भावः तं कुर्वन्ति १९ भ्रष्टश्रियः अत एव निरानन्दाः सम्पद्विरहिताः। सुखदुःखाभावाद्धंस

राम
७९
४
८

एषामुत्पातानां फलं स्वयमेवानुमिनोमीत्याह। मन्य इति। एतैर्महोत्पातैः प्रायेणास्यां भुवि भगवतः पदैर्हीना त्यक्ता अत एव हतसौभगा भूर्मही इति मन्ये कथंभूतैः पदैः अनन्यपुरुषश्रीभिर्नान्यपुरुषाश्रिता श्रीः सौन्दर्यसम्पदाधिक्यं वर्तते येषां तान्यनन्यपुरुषश्रीणि तैः ईदृशैश्चिह्नैः अनन्यैः भगवदेकशरणैः पुरुषैः श्रीभिश्च हीनेति वा २१ दृष्टारिष्टेन दृष्टाशुभेन व्यसनमनुमिमानेन चेतसा तस्य युधिष्ठिरस्य राज्ञ इति चिन्तयतो नुर्जुनः प्रति

मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः। अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा २१ इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा। राज्ञः प्रत्यागमद्ब्रह्मन् यदुपुर्याः कपिध्वजः २२ तं पादयोर्निपतितमयथापूर्वमातुरं अधोवदनमब्बिन्दून् सृजन्तं नयनाब्जयोः २३ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः। पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं २४ युधिष्ठिर उवाच कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते। मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः २५

कथयतः प्रत्यागत इति शेषः॥ कपिध्वजोर्जुनः यदुपुर्या द्वारकाया हस्तिनपुरं प्रत्यागमदित्यन्वयः २२ अयथापूर्वं पूर्वं यथा तथा न स्थिततीति। आतुरं संभ्रान्तं रोगिकल्पं वा। अधोवदनं चवाश्रुरूपान् अब्बिन्दून् जलबिन्दून् २३ विच्छायं विगतश्रीकं अनुजं निरीक्ष्य उद्विग्नहृदयः त्वरितमनाः पृच्छति स्म अत्र पृच्छदित्यन्वयः २४ आनर्तपुर्यां द्वारवत्यां मधवश्च भोजाश्च दशार्हाश्च अर्हाश्च सात्वताश्च अन्धकाश्च वृष्णयश्च मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः
२५

मारिषः आर्यः । मातामहः मातुः पिता मातुलः मातुः सहोदरः आनकदुंदुभिर्वसुदेवः कच्चित् हृष्टः प्रश्नार्थे कुशली सुखी २६ सप्त स्वसारः सहोदर्यः कुशलवत्यः किं तस्य वसुदेवस्य पत्न्यः अस्माकं मातुलान्यः मातुलभार्याः आत्मजैः सह वर्तमानाः अनेन तत्पुत्राणां च कुशलप्रश्नः कृत इति ज्ञातव्यं स्नुषाभिः पुत्रभार्याभिः सहिताः २७ असत् दुष्टः पुत्रः कंसनामा यस्य सो सत्पुत्रः आहुकः उग्रसेनो स्यानुजो देवकः ससुतः कृतवर्मा ख्यपुत्रसहितो हृदिकः पुत्रैः सहितो क्रूरो वा २८ शत्रुजिदादयः ते च सुखमासते किं रामो बलभद्रः २९ सर्ववृष्णीनां मध्ये महारथः गंभीररयः उग्रवेगः आग

शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः । मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः २६ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः । आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं २७ कच्चिद्राजाहुको जीवत्यसत्पुत्रोऽस्य चानुजः । हृदीकः ससुतोऽक्रूरो जयंतगदसारणाः २८ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः । कच्चिदास्ते सुखं रामो भगवान्सात्वतां प्रभुः २९ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः । गंभीररयोऽनिरुद्धो वर्द्धते भगवानुत ३० सुषेणश्चारुदेष्णश्च साम्बो जांबवतीसुतः । अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ३१ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः । सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ३२ अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः । अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः ३३ भगवानपि गोविंदो ब्रह्मण्यो भक्तवत्सलः । कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ३४

षत्रूनो वा रयः मनोगतिर्ज्ञानं ३० कार्ष्णीनां कृष्णसुतानां प्रवराः कार्ष्णिप्रवराः ३१ श्रुतसेनोद्धवादयः शौरेरनुचरा भृत्याः सुनंदनंदौ शीर्षण्यौ प्रधानौ येषां ते सुनंदनंदशीर्षण्याः सुनंदनंदप्रधाना इत्यर्थः सुनंदनंदशीर्षाद्याः इति पाठे सुनंदः नंदशीर्षश्च आद्यौ येषां ते तथोक्ता इति पोजनीयाः शीर्षशब्दः प्रधानवाची पार्षदेषु प्रधानौ सुनंदनंदौ आद्यौ येषां ते तथोक्ता इति वा ३२ ३३ सुधर्मायां सभायां ब्रह्मण्यो वेदेन गम्यत इति ब्रह्मण्यः विप्रप्रियो वा नित्यसुखस्य हरेः कुशलोद्देशेन प्रश्नः । किं तु लोकसुखकरत्वाद्देश इत्ययमर्थो पिशब्देन दर्शितः ३४

एतमेवार्थं दर्शयति । मंगलायेति ॥ अनंतः शेषः सखा यस्य सो नंतसखः आद्यः पुमान् लोकानां मंगलाय सुभाय क्षेमाय प्राप्तपरिपालनाय भवाय वृद्धये यदुकुलसमुद्रे आस्ते कच्चिदित्यन्वयः । वशहाः मिथः सद्वुद्ध्याद्याः मंगलाद्येनेकप्रयोजनार्थाः ॥ ३५ ॥ यस्य दोर्यस्य कृष्णस्य वाहुदंडैः रक्षितायां स्वपुर्यां क्रीडंतीत्यन्वयः । क इव परमानंदं प्राप्य महापौरुषिकाः इव मुक्ताः इव परमानंदापरपर्यायं वा । देवगणा बाहुदंडगुप्तैवेत्ररथप्राप्य महापौरुषिका यज्ञा इव वा ॥ २६ ॥ यस्य हरेः पादयोः शुश्रूषणं सेवा लक्षणं तदेव मुख्यं कर्म तेन साधनेन सत्यादयः सत्यभामा पुरःसराः द्व्यष्टसह

मंगलाय च लोकानां क्षेमाय च भवाय च । आस्ते यदुकुलांभोधावाद्योऽनंतसखः पुमान् ॥ ३५ ॥ यद्बाहुदंडैर्गुप्तायां स्वपुर्यां यदवोऽर्चिताः । क्रीडंति परमानंदं महापौरुषिका इव ॥ ३६ ॥ यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः । निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरंति वज्रायुधवल्लभोचिताः ॥ ३७ ॥ यद्बाहुदंडाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः । अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचितां ॥ ३८ ॥

स्रयोषितः षोडशसहस्रसंख्याः स्त्रियः । संख्ये युद्धे त्रिदशानिंद्रादीन्निर्जित्य वज्रायुधस्येंद्रस्य वल्लभायाः शच्याः उचितास्तदाशिषस्तेषामिंद्रादीनामाशिषः पारिजातादिकाः हरंति आच्छिद्य स्वीकुर्वंतीत्यन्वयः ॥ ३७ ॥ यस्य हरेर्बाहुदंडानामभ्युदयो दिग्विजयश्रीस्तामनुजीविनः शीलाः अत एवाकुतोभया यदुप्रवीराः सुरसत्तमस्येंद्रस्योचितां वाहुबलादाहृतामानीतां सुधर्माख्यां सभामंघ्रिभिरनुदिनमधिक्रमंत्याक्रम्यतिष्ठंतीत्यन्वयः ॥ ३८ ॥

तव किमेतादृशं दुःखनिमित्तमिति पृच्छतीत्याह॥ कच्चिदिति। हे तात ते तव अनामयं कच्चित् सुखं वा किं। कुतः कुशलभ्रंश इत्यत आह भ्रष्टतेजा इति। भ्रष्टते जस्त्वे कारणं पृच्छति। अलब्धेति। अलब्धो मानो येन स तथोक्तः। न केवलं मानाभावः किंतु अवज्ञातश्चकिमित्याह। अवज्ञात इति पूर्वं विरोषितो वा किं वा चिरप्रवासगतः तद्रूहीत्यर्थः॥ ३९॥ अवज्ञा वइंगितैः क्रियया वा वाचा वा स्यात्तत्र तत्र केन सर्वैः किं वेत्यभिप्रेत्य पृच्छति॥ कच्चिदिति। आदिशब्देन इंगितक्रिये गृहीते शब्दादिभिरवज्ञाने कारणं स्वदोषः परदोषो वा तत्र स्वदोषो नास्तीति पृच्छति। नद

कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे। अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः॥ ३९॥ कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंगलैः। न दत्तं युक्तमर्थिभ्य आशया यत्प्रतिश्रुतं॥ ४०॥ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं। शरणोपसृतं सत्वं नात्याक्षीः शरणप्रदः॥ ४१॥ कच्चित्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियं। पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि॥ ४२॥

त्तमिति। वित्ताशया प्राप्तेभ्योऽर्थिभ्यो युक्तं योग्यं यद्दास्यामीति प्रतिज्ञातं तत्र दत्तं किमिति। यद्वै स्वदोषात्। दत्त्वापि तदाशापूर्तिपर्यंतं न दत्तमि तीयं परदोषात् उभयं च न प्राप्तं हीति वाक्यार्थः॥ ४०॥ ब्राह्मणादिसत्वं जीवजातं शरण्योपसृतं शरणार्थितया प्राप्तं शरणप्रदस्त्वं नात्याक्षीः त्य क्त्वा त्यक्तवानसि किं। अरक्षितैः रेवज्ञात इति वाक्यार्थः॥ ४१॥ अगम्यां विषयं परस्त्रियं वा गम्यां असत्कृतां वा स्नानादिसंस्काररहितां प्रदा नकर्मरहितां वा स्त्रियं नागमः न गतवानसि किं। इदं च पार्थ एवंविधं कर्म करोतीति कापि तत्स्वदोषनिमित्ता अवज्ञाया॥ ४२॥

आह वृद्धबालकान् बालान् वृद्धांश्च सर्वान् संभोज्यान् भोजयित्वा पर्यभुंक्थाः भुक्तवानसि किं संभोज्यानिति पाठे सह ते भोक्तुं योग्यान् वर्जयित्वा भुक्तवानसीत्यर्थः। अ सदक्षमं कर्तुमशक्यं तादृशं किंचित् शास्त्रनिषिद्धं कर्म कृतवान् किं एकादशी भोजनं स्वर्णस्तेयं निंद्यानां दुग्धपानमित्यादि जुगुप्सितं कर्म॥ ४३॥ उ क्तं सर्वं विज्ञाय तत्त्वं न शून्यमिति मत्वा कारणांतरं पृच्छति॥ अथेति। अथ यं नित्यं प्रेष्ठादिगुणवत्त्वेन मन्यसे तेन सर्वतः प्रेष्ठेन प्रियतमेन हृदयेन मनो हारिणा आत्मबंधुना स्वाभाविकबंधुना कृष्णेन रहितो वियुक्तोऽसि शून्योऽमंगलोऽसि कच्चित् ते तव रुक् शरीरप्रभा अन्यथा न पूर्ववत् यस्मात्तस्मात्तेन

अपि स्वित्पर्यभुङ्क्थास्त्वं संभोज्यान् वृद्धबालकान्। जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमं॥ ४३॥ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना। शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा हि रुक्॥ ४४॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे त्रयोदशोऽध्यायः॥ ॥ ॥ श्रीरामायनमः॥ ॥

वियुक्तोऽमंगलो भवितुमर्हसीति मन्ये। नित्यं प्रेष्ठतमेन रहितः शून्योऽस्मीत्यात्मानं हृदयेन मन्यसे सर्वथा तव शरीरकांतिरन्यथा न पूर्ववदिति वा प्रेष्ठतमेन रहितः शून्योऽस्मीति मन्यसे अन्यथा तथा मननाभावे तव रुक् रोगो मनो व्यथा कथमिति वा। त्वं मनिष्ठत्वाद्यात्मैकनिष्ठत्वाच्च कृष्णप्रेष्ठत्वाच्च लोकशास्त्रनिषिद्धं न करोषि हि तस्मात्तेन कृष्णेन वियुक्तत्वान्न विच्छायत्वमिति मन्ये इति हि शब्दार्थः॥ ४४॥ प्रथमे त्र योदशः॥ ॥

भगवति भक्तिविधानार्थं दुःखकथनमाजेन तन्महिमा प्रतिपाद्यते स्मिन्नध्याये। कृष्णस्य विश्लेषेण वियोगेन कर्षितः। उक्तं नानाशंकायाश्चास्पदं
शोकाग्निना शुष्यती वदनहृत्सरोजे यस्य तत्तथोक्तं अत एव हतप्रभं नष्टकांति रूपं आकारं दृष्ट्वा भ्रात्रा राज्ञा विकल्पितः एवं वा एवं वेति वितर्कोटिवि
षयीकृतः। तमेव विभुमनुध्यायन् निरंतरं चिंतयन् कृष्णस्य सखार्जुनः प्रतिभाषितुं नाशक्नोदित्येकान्वयः ॥१॥२॥ शोकहेतूनामनेकत्वाद्धृद्ग
ववनं शुचः शोकान् कृच्छ्रेण संस्तभ्य पाणिना नेत्रजमश्रु आमृज्य कृष्णस्य परोक्षेण प्रत्यक्षत्वेन समुन्नद्धेन प्रणयेन कदानुपश्येयमित्यौत्कंठ्ये

सूत उवाच एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः। नानाशंकास्पदं रूपं कृष्णविश्लेषकर्षितः ॥१॥ शोकाग्नि
शुष्यद्वदनहृत्सरोजं हतप्रभं ॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं ॥२॥ कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रजं॥
परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः ॥३॥ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् नृपमग्रजमित्याह बाष्पगद्गदया
गिरा ॥४॥ अर्जुन उवाच ॥ वंचितोहं महाराज हरिणा बंधुरूपिणा। येन मेपहृतं तेजो देवविस्मापनं महत् ॥५॥

न कातरः विवशः ॥३॥ सारथ्यादिषु कर्मसु सख्यादिकं सम्यक् स्मरन् अर्जुनो बाष्पेण निमित्तेन गद्गदया स्खलंत्या गिरा अग्रजं नृपमिति वक्ष्यमा
णप्रकारेणाहेत्येकान्वयः ॥४॥ देवानपि विस्मापयतीति देवविस्मापनं महत्तेजः सामर्थ्यं लक्षणं येन कृष्णेनापहृतं सहैव नीतं तेन बंधुरूपिणा

प्रधानबंधुना हरिणा अर्जुनोहं वंचितः इत्येकान्वयः। वंचित इति हरौ न दोषः आरोप्यते किंतु तेन वियुक्त इति तद्वियोगमात्रं। वियोगोपि स्वेच्छातमा
नुषा कारेण न साक्षात्सर्वहृदि सन्निहितत्वात् अस्य त्वभिप्रायेण बंधुरूपिणेत्युक्तं तस्माच्छोकाकुलोस्मीति भावः ॥५॥

एतमर्थं सदृष्टांतमाह। यस्येति। यथोक्थेन प्राणेन रहित एष देहो मृतकः कुणप इति प्रोच्यते तथा यस्य कृष्णस्य क्षणवियोगेन लोकोप्यप्रियममंगलं
पश्यतीत्यप्रियदर्शनः यस्मात्तस्मात्कृष्णमृत्तमित्यर्थः। प्राणस्यापि पित्रादिशरीरमपि पुत्रादेरप्रियत्वात् बहिर्भूमौ निक्षिप्यते यथा तथाहमपि बंधु
भिरप्रियत्वात् अवज्ञात बहिष्कृत इति भावः। मम अयं लोको देहो अप्रियदर्शनो जात इति वा। प्रथमं हि शब्देन प्राणवियुक्तदेहस्य कुणपत्वं श्रुतिसिद्धमि
ति दर्शयति। न केवलमहमेवाप्रियदर्शनः। किंत्वयं लोको बंधुजनो द्वारवत्यादिप्रदेशो वा। उक्थेन पित्रादिना वियुक्त एवं बंधुजनोपीति वा
दृष्टांतयोजना ॥६॥ यत्संश्रयाद्यत्सन्निधाविति पादियद्दन्धभाव निरस्तवितादृत्यन्ना नांश्लोकानां तेनाहमद्य मुषित इति मध्यगतश्लोकेन मध्ये कुलक
न्यायेनान्वयः। यत्संश्रयाद्यस्य कृष्णस्य सेवाबलात् द्रुपदगेहे पांचालपुरे स्वयंवरमुखे स्वयंवरश्रेष्ठे उपागतानां मिलितानां स्मरकारणेन जातो दुष्ट

यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः। उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥६॥ यत्संश्रयाद्द्रुपदगेहमुपागतानां राज्ञां स्वयं
वरमुखे स्मरदुर्मदानां। तेजो हृतं खलु मयाविहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥७॥ यत्सन्निधावहमु खांडवमग्नयेदा
मिंद्रं च सामरगणं तरसा विजित्य। लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योहरन्नृपतयो बलिमध्वरे ते ॥८॥

मदो येषां ते तथोक्ताः तेषां राज्ञां जरासंधादीनां तेजोभिमानलक्षणं मया दृष्टेनैव हृतं किंच सज्जीकृतेन धनुषायं त्रविहितो मत्स्योविहतः पातितश्च। किंच
मया कृष्णा द्रौपदी चाधिगता वेदाध्ययनवदादरेण प्राप्तेत्येकान्वयः ॥७॥ यस्य सन्निधावहमेवामरगणैः सह वर्तमानमिंद्रं च तरसा वेगेन बलेन वा
विजित्य खांडवाख्यं वनमग्नये अदां दत्तवान् स्मि अद्भुतानि शिल्पानि स्थलेजलप्रत्ययादीनि माया यस्यां सा सभा तथोक्ता म
यनाम्ना तक्ष्णा कृता सभा मया लब्धा यत्सन्निधानविशेषादिति योज्यं तेन वा धर्मराजसूयलक्षणे दिग्भ्य आगतनृपतयो बलिं ते तुभ्यमह
रन्नद्दुरित्यन्वयः ॥८॥

गदाख्यमायुधं यस्य तं च हृदयस्य सारस्थं वीर्यं वीर्यमावश्यसत्वं मानसबलं च वीर्यं कायबलं च वायस्य स गदायुधसत्ववीर्यः। तवानुजो मम ज्येष्ठो भीमसेनोऽव
पशिरः लंघ्रिर्यस्य सतथा क्रमं जरासंधं यत्तस्त्रिधा व हन् हतवानित्यन्वयः। किमर्थं मखार्थं राजसूययज्ञमुद्दिश्य जरासंधेन तेन प्रमथ्य नाथमखायरू
इत्युद्दिश्य पुरुषमेधाख्ययज्ञाया हृता गृहीता येन रुद्धेन मोचिताः जरासंधवधेनेति शेषः। भूपा मे तव बलिं चरुपायनमानीतवंत इत्यन्व
यः। बद्धिं मायुरिरश्वोपमं वा व्योरूपसर्गयोरित्यत्रा सैरप्युपसंख्यानं कर्तव्यं ॥ ९ ॥ कुरुसभायां तव पत्न्या द्रौपद्यास्त्रपि राजसूयनाम्नि मखे कॢप्तेन कृते
न महाभिषेकेण श्लाघिष्ठं अतिशयेन श्लाघ्यतमम तएव चारु रुचिरं कबरं केशबंधनं येस्स्पृ कितवैर्दुःशासनादिभिः स्पृष्टं यत्तत्कबरं विकीर्य

यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थ आर्यो नुजस्तव गदायुधसत्ववीर्यः। तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनय
न्बलिमध्वरे ते ॥ ९ ॥ पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायां। स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या
यैस्तत्स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥ १० ॥ यत्तेजसाथ भगवान् युधि शूलपाणिर्विस्मापितः सगिरिशोऽस्त्रमदान्निजं मे। अन्येपि वा
हममुनैव कलेवरेण प्राप्तो महेंद्रभवने महदासनार्धम् ॥ ११ ॥

त्पदयोः पतिताया अश्रुमुख्याः अश्रुप्रधानोयः सः तत्पदयोः पतितत्वादेव तत्र ख्रियस्ते वा कितवानां स्त्रियो भार्याः विमुक्तकेशाः भीमा विहृत्य **राम**
ष्टदयोः पतिताया अश्रुमुख्यः। अश्रुप्रधानोयः सः तत्पदयोः पतितत्वादेव ततस्त्रियस्तेषां कितवानां स्त्रियो भार्याः विमुक्तकेशपं भीमा विद्धृत्य
दाभग्नोरुदंडान्स्वपतीनालिंग्य रुदती विकीर्णकेशपाशाः न्यकृतन्निति रामकाधीदित्येकान्वयः। अश्रुश हृतभयलिंगोष्णक्षिपत्रुः शकुवत ॥ १० ॥
मस्यते जसा युधि वराहनिमित्तयुद्धे विस्मापितः विस्मयंगमितः शूलं यस्य पाणौ यस्य सः शूलपाणिः सगिरिशः निजमस्त्रं पाशुपताख्यं मेमह्यमदादि
त्यन्वयः। अन्ये लोकपालाः अपि स्वस्वमस्त्रमदुरिति शेषः। अपि चार्जुनोऽहममुनैव कलेवरेण नान्येन महेंद्रभवने अमरावत्यां महतो देवेंद्रस्यासना
र्धं प्राप्त इत्येकान्वयः। अथान्यच्च स्त्रीकृतमाहात्म्यं च स्मामि विशेषतइमथ शङ्कार्थी ॥ ११ ॥

येन कृष्णेनानुभावितं प्रहृष्टबलवत्कृतं। गांडीवज्याघातलांछनं भुजदंडयुग्मं श्रिताः केइंद्रेण सह वर्तमाना देवाः अराति वधाय निवातकवचनाम्नां श
त्रूणां हननाय कस्य भुजदंडयुग्मं। तत्र महेंद्रभवनएव विहरतः क्रीडमानस्य मे मम ॥ १२ ॥ येषां बांधवोहं कुरुभिर्विराटगोग्रहणे अनंतपारं अदृश्यतीरांतरं अनं
तपरिच्छिन्नः पारः शूर्निर्यस्य स तथा तं कुरुसेनासमुद्रं रथेन तरसा वेगेनातरं तीर्णवानस्मीत्यन्वयः। कथंभूतः एकोऽसहायः आर्यसत्वः भूरबलः। किंच
यद्वांधवेन मया विराटपुरे गोधनं च प्रत्याहृतं पुनरानीतं तथा परेषां शत्रुभूतानां भीष्मादीनां शिरोभ्यो मणिमयं धनमुष्णीषलक्षणं न केवलं हृतं किंतु परं के
वलं तेजोभिमानलक्षणं सामर्थ्यमेवापहृतमित्यन्वयः ॥ १३ ॥ राजन्यवर्याणां श्रेष्ठानां रथानां मंडलैः समूहैर्मंडितासु अलंकृतासु भीष्मकर्णद्रोणगुरुश

तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः। सेंद्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥ १२ ॥
यद्बांधवः कुरुबलाब्धिमनंतपारमेको रथेन तरसातरमार्यसत्वः। प्रत्याहृतं पुरधनं च मया परेषां तेजः परं मणिमयं च हृतं शिरोभ्यः ॥ १३ ॥
यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडलमंडितासु। अग्रेचरो मम रथे रथयूथपानामायुर्मनांसि च दृशा सह सायवाच्छे
त ॥ १४ ॥ यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णद्रोणत्रिगर्तशलसैंधवबाह्लिकाद्यैः। अस्त्राण्यमेयमहिमानि निरूपितानि नोपस्पृशुर्नृह
रिदासमिवासुराणि ॥ १५ ॥

ल्यप्रवलेतथोक्ताः तेषां सेनापतीनां चमूषु सेनासु मध्ये मम योरथः तस्मिन्रथेयः अग्रेचरः सारथित्वात्पुरोभागवर्तीत्तेवामेवरथयूथपानां भीष्मादी
नामायुर्मनांसि च सहसा शीघ्रं दृशा दर्शनेनाच्छैत् अपाहरदित्येकान्वयः। वशहृद एवार्थेय दाच्छैत् हृशेवनायुधादिना समुच्चयेवा ॥ १४ ॥ गुरुभीष्मादि
भिर्निरूपितानि प्रयुक्तानि अमेयमहिमानि अचिंत्यसामर्थ्यानि अस्त्राणि यस्य दोःषु भुजेषु प्रणिहितं निहितं मां नोपस्पृशुः न तापं चक्रुरित्यन्वयः। स्प
र्शउपतापे इति धातुः। कानिकमिव आसुराणि शिल्पकशिपुप्रेरितानि असुरप्रयुक्तानि नृहरिदासं प्रह्लादं यथा नस्पृशंति तथेति ॥ १५ ॥

हे नरेंद्र दर्शी सर्वज्ञो यदीशोरणमूर्द्धि अलब्धरूपं केनाप्यज्ञातं दृष्टरूपं मे अवदत् । सूत्रादयः मुख्यप्राणा मुखोदेवाः यं न विदुरिति यद्यस्मात्तत्स्मारी शोतर्क्यविहारः अ
चिंत्यक्रीडइत्यन्वयः । लब्धरूपमानंदरूपमितिवा । कथंभूताः सूत्रादयः यस्य मायया मोहकशक्त्या कृतदृशः पिहितनेत्रा न पश्यंता नाइतियावत् । कथं मायाकृतदृ
शइतितत्राह अहमहमितिलब्धाः ज्ञातुयोग्यतावंतः सकलमंगलरूपा इतिवा ॥ १६ ॥ भगवानुयुक्तवीयस्यादपयममभावायमोत्तायलंतेतियत्प्रश्नी कृष्णस्या
नुभावेन महिम्ना निरस्तमुग्धं चित्तं येषां तेतथोक्ताः अरयः कर्णादयो मां न प्राहरन्नायुध्यन् कथंभूतारथिनः रथादियुद्धसाधनोपेताः । किंविशिष्टं मां भुविष्टं भू

यन्मे नृपेंद्र तदनर्थ्यविहार ईशो थौल ब्धरूपमवदद्रणमूर्द्धिदर्शी । यन्मायया कृतदृशो न विदुः परं तं सूत्रादयो हमहमस्मि ममेति लब्धाः
॥ १६ ॥ सौत्ये वृतः कुमतिनात्मद ईश्वरो मे यत्पादपद्ममभवाय भजंति भव्याः । मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्तचि
त्ताः ॥ १७ ॥ नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हे अर्जुन सखे कुरुनंदनेति । संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम
माधवस्य ॥ १८ ॥

मौ स्थितं सम्यक् श्रांताः वाहाः अश्वा यस्य स तथोक्तः तं श्रांतानां वाहानां जलपानाय रथादवरूढमयुद्धसाधनमंतरेण भूमिं तले स्थितमित्यर्थः । सोयमीश्व
रः कुमतिना मया मम सौत्ये वृत इति सौत्ये सारथ्यकर्मणि वृतः किं विशिष्टः आत्मानं ददातीत्यात्मदः । य आत्मदा बलदा इति श्रुतेः । अथ तेन भूमा पुरुषेण मुषितो
स्मीति परमो न्वयः ॥ १७ ॥ हे नरदेव माधवस्य हृदिस्पृशानि मनोहराणि हे पार्थ अर्जुनेत्यादीनि गोष्ठ्यां संजल्पितानि नर्माणि परिहासलक्षणानि स्मर्तुर्मम हृद
यं लुठंति परिवर्त्तंते हृदयान्न निर्गच्छंति कथंभूतानि उदाररुचिरस्मितेन शोभमानानि मंगलानि ॥ १८ ॥

ममायं कृष्णो वयस्यः । अहमेतादृशेन कृष्णेन समानवयस्कत्वात् ऋतुमान् सदैव इति भावेन परमेष्ठदेवेन श्रीकृष्णेन शय्यादिष्वैक्यान्नेन वंचितः । तादृशवृद्धे
स्तस्याधीनत्वात्परदेवतया शय्यादौ क्वापराधो हि यस्मात्तस्माद्वंचितोस्मि शय्याशयनं विकत्थनं गालीवचनं सुव नेवात तथापि स कृष्णो महता माहित्वेन
सख्युरघमपराधं सखेव पुत्रस्यापराधं पितेव कुत्सितबुद्धेर्मेघं मया विप्रलब्धोपि सर्वं विचिंतोपि महान् महितया कुमतेर्मेघं सेहे इति काशय्यादिषु अभुमा
न्महात्मा मया विप्रलब्धस्तिरस्कृतः किमिति वयस्यः सखेत्यैक्यव्यवहारात्तथापि महान् महात्म्येन मम मापराधं सेहे इतिवा ॥ १९ ॥ अन्योसीति वि

शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः । सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महि
तया कुमतेरघं मे ॥ १९ ॥ सोहं नृपेंद्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः । अध्वन्युरुक्रमपरिग्रहमं
ग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोस्मि ॥ २० ॥ राम

कल्यं पुनः स्पष्टं परिहरतीत्याह । सोहमिति । हे नृपेंद्र सख्या जन्मप्रभृति सहवर्तमानेन प्रियेण विषयादिसुखप्रापकेण सुहृदा अनिमित्तबंधुना
हृदयेनातिस्निग्धेन अतिकांतेन वा पुरुषोत्तमेन कृष्णेन रहितः अत एव शून्योस्मि मंगलोस्मीत्येकान्वयः । येन मे पहतं तेज
इत्येतद्धि वृणोति । अध्वनीति । अंग राजन् उरुक्रमस्य हरेः परिग्रहं कलत्रं रक्षन् आगच्छन् असद्भिरसाधुभिर्गोपैरबलायोषेव विनिर्जितोस्मि तस्मा
त्तेन मत्तेजोपहृतमिति भावः ॥ २० ॥

तदेवस्पष्टयतीत्याह॥ तदिति। धनुस्तदेवतदेवतइषवः ताहृशाःशराःसरथः ताहृशोरथःतेहयाताहृशाश्वाःरथीसोहंनाप्यःयतःयस्मैनृपतयःआमनंतितत्सर्वमीशरिक्तंश्रीकृष्णतेजसाविहीनंक्षणेनअसत्नाशवत्तत्रप्रयोजकमभूत्।कथमिवतस्मन्हुतमिवकुहकेनराद्वेवोरेणाहिद्धमिवऊषरउप्तमिवतस्मनिहुतस्यमंत्रोच्चारणादिनाकिंविफलंस्यादित्यतःकुहकेतिऐंद्रजालिकेनकुटुंबरक्षणमुद्दिश्यद्याहरणान्नजीवनेनैहिकफलदर्शनादित्यतउक्तमुप्तमूषइति।नतत्रकिंचिद्बीजंप्ररोहतीत्यभिप्रायेणनिदर्शनत्रयमुक्तमितिवेदितव्यं॥

तद्वैधनुस्तइषवःसरथोहयास्तेसोहंरथीनृपतयोयतआमनंति॥सर्वंक्षणेनतदभूदसदीशरिक्तंभस्मन्हुतंकुहकराद्धमिवोप्तमूष्ये॥२१॥राजंस्त्वयानुपृष्टानांसुहृदांनःसुहृत्पुरे।विप्रशापविमूढानांनिघ्नतांमुष्टिभिर्मिथः॥२२॥वारुणींमदिरांपीत्वामदोन्मथितचेतसां।अजानतामिवान्योन्यंचतुःपंचावशेषिताः॥२३॥प्रायेणैतद्भगवतईश्वरस्यविचेष्टितं।मिथोनिघ्नंतिभूतानिभावयंतिचयन्मिथः॥२४॥

२१॥कथिदानर्तपुर्यामित्यादिनायादवकुलप्रश्नंपरिहरतीत्याह॥राजन्निति।सुहृत्पुरेद्वारवत्यां॥२२॥नाम्नावारुणींवरुणनिर्मितांमदिरांमदकरींसुरांपीत्वाअन्यद्वनिमित्तमस्तीत्याहविप्रशापेति।ब्राह्मणशापेनविमूढानांकृत्याकृत्यज्ञानरहितानांअतएवान्योन्यमजानतां॥२३॥इदंयादवसुरांपीत्वा...निधनमपिश्रीकृष्णकृतमित्यभिप्रेत्यब्रूतइत्याह॥प्रायेणेति।भूतानिमिथोनिघ्नंतितावयंतिउत्पादयंतिचेतीतियत्तदीश्वरस्यभगवतोविशिष्टंविचेष्टितमितिमन्ये।प्रायःशब्दःस्वप्रायुर्यार्थवाचित्वेप्यत्रावधारणार्थएव।वशब्दःसमुच्चयार्थः॥२५॥

इममर्थंसोदाहरणंस्पष्टयतीत्याह॥जलौकसामिति।जलौकसांयादसांमध्येमहांतोणीयसोऽल्पतरानदंतिबलिनोदुर्बलान्भक्षयंति।येमहांतःयेचबलिनःतेमिथोन्योन्यंसत्तयंति।यथा॥२५॥एवंविभुर्बलिष्ठैर्महद्भिर्यदुभिरितरान्हत्वायदुभिरेवयदूनन्योन्यंहत्वाभूभारंदैत्यकुलंसंजहारेत्यकान्वयःभूसारहरणमेवावतारप्रयोजनमित्येतत्तहशब्देनाह॥यद्वाद्वंद्वाप्युदयानुजीविनःयदून्यदुभिरन्योन्यमित्याद्यक्रमपालनेनसंहरणंवहरेविषममिति...तन्नाह।द्वयमिति।तत्तत्कर्मानुसारिफलदातुरीश्वरस्याप्तकामस्यतेषांसंजीवनेमरणेचोभयंद्वयंसममेवजीवनेनोपादेयाभावान्मरणेनहान्यभावात्तःद्वयंनविषममितिभावः॥२६॥

जलौकसांजलेयद्वन्महांतोदंत्यणीयसः।दुर्बलान्बलिनोराजन्महांतोबलिनोमिथः॥२५॥एवंबलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः।यदून्यदुभिरन्योन्यंभूभारंसंजहारह।कंरकंकंरकेनौद्वहृदयंचापीशिशुःसमं २६ देशकालार्थयुक्तानिहृत्तापोपशमानिचाहरंतिस्मरतश्चित्तंगोविंदाभिहितानिमे॥२७॥ सूतउवाच॥ एवंचिंतयतोजिष्णोःकृष्णपादसरोरुहं।सौहार्देनातिगाढेनशांतासीद्विमलामतिः॥२८॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेचतुर्दशोध्यायः॥ ॥

स्वदुःखकारणंब्रूतइत्याह॥देशेति।देशकालार्थयुक्तानितत्तद्देशतत्तत्कालतत्तदर्थान्वितानिहृत्तापोपशमानिअहंकाराश्रितसंसारसमुद्रशोषणकारणानिगोविंदस्याभिहितानिवचनानिस्मरतोममचित्तंहरंतीतियस्मात्तस्मात्तद्विहितत्वेनशोचामीत्येकान्वयः २२ बांधवनिमित्तस्नेहलक्षणभक्त्यतिशयेनतच्चरणस्मरणमाह॥एवमिति।अतिगाढेनातिशयेनदृढेनतत्रैवातिशयेनमग्नेनदासौहार्देनप्रेमलक्षणलक्षितसाधनेनकृष्णपादपद्ममेवमुक्तप्रकारेणस्मरतोजिष्णोःनिर्मलामतिर्मननसमर्थाबुद्धिःशांतासुखेपूर्णापूर्वस्मादतिशयेनभगवन्निष्ठावतीआसीदित्येकान्वयः॥२८॥ इतिश्रीप्रथमस्कंधेचतुर्दशोऽध्यायः॥

नन्वर्जुनस्य मनाविशुद्धन्तहत्यापापोपरक्तायामस्याबुद्धेर्नैर्मल्यं कथं युज्यत इत्याशंक्य जीवन्मुक्तेष्वेकत्वात्तद्भगवदर्पणबुद्ध्याकृतं दुष्टकर्म हृतत्वस्य तस्या मतेर्नैर्मल्यं युक्तमिति दर्शयति। वासुदेवेति। ब्रह्मसंपत्त्या ब्रह्मणैव गतत्वाद्ब्रह्मापरोक्षज्ञानेन विशोकः तस्मादेव छिन्नो निवृत्तो द्वैतसंशयो यस्मात्स तथोक्तः द्वैतं हीति द्विधागतं ज्ञानं तस्य भावः द्वैतं अन्यथा ज्ञानमिति यावत् संशयः इदं वा देवं उभयकोटिविषयज्ञानं विच्छिन्नो जीवब्रह्मभेदविषयः संशयो येन निवालीना अपसारिता प्रकृतिरहंकारात्मिका यस्मात्स तथोक्तः भावप्रधानो निर्देशः तस्माल्लीनप्रकृतित्वान्निर्गतानि सत्त्वादिगुणकार्याणि यस्मात्स तथोक्तः तस्य भावो नैर्गुण्यं तस्मादलिंगत्वात्सूक्ष्मशरीररहितत्वादसंभवो नारब्धकर्मसूलाया पुनरुत्पत्तिस्तया वर्जितः। अनारब्धकर्मणां ज्ञानोदयेन नाशादारब्धक

॥सूत उवाच॥ ॥वासुदेवांघ्र्यभिध्यानपरिबृंहितरंहसा॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः॥१॥ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि। कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः॥२॥ विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः। लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः॥३॥

र्मणामेवावशिष्टत्वात् ज्ञानोदयकाल एवं भूतः सन्नर्जुनो रणमूर्द्ध्न्यारब्धकर्मणा स्वधर्मेऽप्यधर्मबुद्धये स्वात्मने भगवता यज्ज्ञानं गीतमुपदिष्टं तदारब्धकर्ममूलैः कालकर्मतमोभिरुद्धं कालेन कर्मणा तमसा वा रुद्धं पुनरध्यगमद्गतवानर्थान्तितवानित्यन्वयः। कीदृशः। वासुदेवस्याङ्घ्रेरभितः सम्यग्ध्यानेन परितो वृंहितं वृद्धं रंहो वेगो यस्याः सा तथोक्ता तया भक्त्या निर्मथिता अशेषाः समूलाः कषायाः पापलक्षणाः रागलक्षणा वा यस्याः सा तथोक्ता निर्मथिताशेषकषाया धिषणा बुद्धिर्यस्य स तथा। अत्र न सर्वारब्धकर्मणां निर्मथनमभिप्रेतं किं तु महता भगवत्कारुण्यादिना कारणेन केषांचिदेव। अन्यथा भोगेन त्वितरे क्षपयित्वाथ संपत्स्यत इत्यस्य तावदेव चिरमित्यादिश्रुतिविरोधः स्यात् महता कारणेनैव प्रारब्धान्यपि कानिचित्कर्माणि रुध्यमानानि ब्रह्मसहोमतः क्वचिदिसुक्तत्वाद्ब्रह्मतो नाशेषशब्देन निर्मथनयोग्याशेषप्रारब्धविषय इति भावः॥१॥२॥३॥

एवं यादवसंस्थां श्रीकृष्णस्वधामप्राप्तिं चाभिधाय पांडवस्वर्यारोहणमुपक्रमते। निशम्येति। भगवतः श्रीकृष्णस्य स्वधामगमनप्रकारं यदुकुलस्य संस्थां विनाशं च श्रुत्वा निभृतात्मा राज्यादिभ्यो व्यावृत्तमनाः नितरां हृते सदाचारे आत्मा यस्येति वा। युधिष्ठिरः कामक्रोधादिजयलक्षणयुद्धे स्थिरः स्वः पथाय स्वर्गमार्गाय वीराध्वनेमतिं चक्रे इत्यन्वयः॥४॥ स्वर्यारोहणे कारणमाह। यदेति। यदा श्रवणीयसत्कथो मुकुंदः स्वतन्वा स्वाभिमतया मूर्त्या इमां महीं जहौ त्यक्तवान् तदाहरेवाप्रतिबुद्धचेतसां हरिविषयबोधरहितबुद्धीनां पुंसामभद्रहेतुः पापकारणं कलिरन्ववर्ततेत्यन्वयः॥५॥ बुधः विवेकज्ञानी युधिष्ठिरः राज्ये पुरे राष्ट्रे गृहे भार्यादौ च तथात्मनि स्वस्मिंश्च तस्य कलेः परितः सर्पणं व्याप्तिं विभाव्य ज्ञात्वा कलिव्याप्तिमूलं लोभाद्यधर्मसमुदायं

निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च। स्वः पथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः॥४॥ यदा मुकुंदो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः॥ तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्तत॥५॥ युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि। विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात्॥६॥ स्वराट् पौत्रं विनीतमात्मनोऽनवमं गुणैः। तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये॥७॥ मथुरायां ततो वज्रं शूरसेनपतिं ततः। प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः॥८॥

च विज्ञाय गमनाय वीराध्वगमनाय पर्यधात् निश्चितवान् निक्षेपकाश्यपः। अभिधानं तु निक्षेपः परिधानं तु निश्चय इत्यभिधानं। लोभश्चानृतं च जिह्मं कौटिल्यं च हिंसनं च लोभानृतजिह्महिंसनानि आदिर्यस्य परुषादेस्तत्तथोक्तं॥६॥ स्वराट् चक्रवर्ती स्वपौत्रं गुणैरनवमं योग्यं पौत्रं अभिमन्योः सुतं परीक्षितं तोयमेव नीवी वसनं यस्याः सा तथोक्ता तस्याः॥७॥ मथुरायामनिरुद्धपुत्रं नाम्ना वज्रं शूरसेनविषयपतिमभ्यषिंचदिति शेषः। प्राजापत्यां प्राजापतिदेवताभिष्टिं निरूप्य सर्वस्वदक्षिणामिष्टिं कृत्वा त्रेताग्नीनपिबत् आत्मनि समारोपयामास। स कीदृशः ईश्वरः राज्यादिषु निर्विद्य संन्यासेन समर्थः ८

भा॰प्र॰
८७

तदेवाह॰ विसृज्येति॥ संछिन्नाशेषबंधनः॥ ३९॥ स्वमरणकालं एतच्च चिंतनीयमित्यभिप्रेत्य तत्कृतमित्याह॥ वाचमिति॥ वाचं वागभिमानिनीं देवतां मनसि तदभिमानिनि रुद्रे जुहाव अस्मिन्नात्मनि लयभावना कृतवानित्यर्थः॥ तत् मनः प्राणे मनः कारणे जुहाव॥ इतरे च तं प्राणादयः सर्वेऽपि मन एकाग्रतया॥ सोत्सर्गं सह त्रिकं अपानेन तत्परत्वे तस्मान् मनसः परउत्तमं प्राणं इतरेऽपि इतरस्मिन् अपानेऽत्र त्सर्गकर्माभिमानिनि जुहाव॥ अथवानस्य प्राणापानचिंतनानंतरं अवशिष्टा व्युदानसमानौ त्रित्वे वि त्वसत्त्वा स्थानात् पूर्वभाविनि व्याने अजोहवीदित्यर्थः॥ तथाहि श्रुत्यंतरप्रसिद्धिः॥ १०॥ अथ व्यानापानचिंतनानंतरं अवशिष्टा व्युदानसमानौ

विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं॥ निर्ममो निरहंकारः संछिन्नाशेषबंधनः॥ ९॥ वाचं जुहाव मनसि तत्प्राण इतरे च तं॥ मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत॥ १०॥ त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वे ऽजुहोन्मुनिः॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये॥ ११॥

विशिष्टेषु स्वकारणेषु प्राणापानव्यानेषु हुत्वा लयं विचिंत्य तत्र पंचत्वं पंचत्वसंख्याविशिष्टान् प्राणापानव्यानोदानसमानान् एकत्वे एकविशिष्टे स्वकारणे मुख्यप्राणे अजुहोन्मुनिर्मौनी तत्सर्वं एकं सर्वं तत्स्व मूलप्राणस्यापि कारणे आत्मनि स्वहृदिस्थिते चिदात्मनि जुहोत्वसंख्याविशिष्टे वा नानाकारणे मूलप्राणे अजुहोन्मुनिर्मौनी तत्स्वरूपं सर्वं तत्स्व मूलप्राणस्यापि कारणे आत्मनि स्वहृदिस्थिते चिदात्मनि जुहोत्॥ तं वात्मानं अव्यये विनाशरहिते ब्रह्मणि सर्वगते तदभिव्यक्तिकारणे विलापयन् जुहोदित्येकान्वयः॥ अत्र वागादीन्द्रियाणां तदभिमानिदेवानां देवशरीराणां चात्मावात्मलयवत् स्वकारणेषु विलय एवेति ज्ञातव्यं॥ ११॥

राम
८७

भा॰प्र॰
८८

शब्दादिविषयमनस्कैः सद्भिर्मंगलैः पुरुषैर्दुरवापं गंतुमशक्यं निरस्तजरामरणादिकल्मषस्थानं स्वस्वमूलरूपं विरजेन रजआदिगुणात्मकलिंगशरीराभिमानरहितेनात्मना मनसा उपलक्षितास्ते प्रापुरित्येकान्वयः॥ एवंकारकृदेव हृतदर्शितमार्गया युधिष्ठिरादयो भीमादिरोदनापादकलोकेनापुरितस्मिन्नर्थेन जरंजो मिश्रिता त्मनेत्यत्र वा॥ हि शब्दः कृतदोषानदेहपाताः किंतु प्रारब्धकर्मनाशादित्यस्मिन्नर्थे श्रुतिप्रसिद्धिं द्योतयति॥ कृतिरपि सकलसुरोत्तमालिपुरस्सरगणैराराधितवरणैः श्रीभगवत्पादैः सकलपुराणसारसंग्रहग्रहे श्रीमहाभारततात्पर्यनिर्णये उदाहृतानास्माभिरत्रोदाह्रियंते॥

अवापुर्दुरवापं ते असद्भिर्विषयात्मभिः॥ विधूतकल्मषस्थानं विरजेनात्मनैव हि १८ द्रौपदी च तदाज्ञाय पतीनामनपेक्षितां॥ वासुदेवे भगवति ह्येकांतमतिराप तं॥ १९॥ यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामिति संप्रयाणं॥ शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति शांतिं॥ २०॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे पंचदशोऽध्यायः॥ ॥ राम॥

यं यथा ज्ञात्वा पश्यादिति॥ विदुरोऽपि परित्यज्येति प्रहेष श्लोकः॥ १७॥ अनपेक्षितां देहाद्यनभिमानतां एकांतमतिरेकाग्रचित्ता॥ १९॥ श्रीकृष्णपांडवानां स्वधामप्रवेशश्रवणादिना किं प्रयोजनं येनात्रावश्यवक्तव्यं स्यादिति तत्राह॥ य इति॥ य एतद्भगवत्स्वधामप्रयाणं भक्तानां पांडवानां च प्रयाणादिकं शृणोति स हरौ सत्क्तिं लब्ध्वा शांतिं मुक्तिमुपैतीत्यन्वयः॥ अलं त्रिकरणशुद्ध्या॥ २०॥ प्रथमे पंचदशः॥ ॥

राम
८८

चीरवासाः वल्कलवस्त्रः। निराहारः अन्नपानवर्जितः। बद्धवाक् वचनप्रवृत्तिविकलः। मूर्धजाः केशाः। जडादिवदात्मनो रूपं दर्शयन् बधिरो यथा तथा अशृण्वन्नेव नितरामनपेक्षमाणः स्वयं गेहान्निरगात् इति केचिद्वचः॥१२॥ यावच्छरीरपातं भुवं प्रदक्षिणीकृत्य निरंतरं अटनमेव संकल्प्य हृदि परं ब्रह्म ध्यायन् क्रियेर्मता त्मभिः गतपूर्वामुदीचीमाशामुत्तरां दिशं प्रविवेश वीरगतिं गमिष्यन् यतो गतो नावर्तेत यां वीरगतिं गतः पुनर्नावर्तते तामित्यन्वयः॥१३॥ भ्रातरः भीमसेनादयः॥ अधर्ममित्रेण अधर्मप्रधानेन॥१४॥ आत्मनः परात्मनः स्वरूपं आत्यंतिकं सर्वातिशयमथवात्मनः स्वस्य आत्यंतिकमंतकालं कर्तव्यं ज्ञा

चीरवासा निराहारो बद्धवाङ्मुक्तमूर्धजः। दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत्। अनपेक्षमाणो निरगादशृण्वन्बधिरो यथा॥१२॥ उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः। हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः॥१३॥ सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः। कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि॥१४॥ ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः। मनसा धारयामासुर्वैकुंठचरणांबुजं॥१५॥ तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे। तस्मिन्नारायणपदे एकांतमतयो पतन्॥१६॥

त्वा साधु सम्यक् कृतं अनुष्ठितः सर्वार्थो धर्मादिः यैस्ते तथा साधुना कर्मणा उत्पन्नेन ज्ञानेन कृतो छिन्नानि स्नाः सर्वे अर्थाः शब्दादिविषयाः यैस्ते तथोक्ताः इति वा। कृती छेदने इति धातुः। अत्र हेतोः मनोधारणा नाम अखंडस्मरणमिति ज्ञातव्यं॥१५॥ इत्थं नारायणचरणांबुजं हृदि हितं विधाय तद्ध्यानेनोद्रिक्तया भक्त्या विशुद्धमतयो ह्येभिः सप्तभिर्भुवं प्रदक्षिणीकृत्य गंधमादनगिरिवरे बदर्याख्ये नारायणाश्रमं प्राप्य तस्मिन् परे मनोहरे नारायणपदे नारायणाश्रमे एकांतमतयः एकांतं नारायणं ध्यायंतस्ते पांडवाः अपतन् शरीराणि तत्यजुरित्यन्वयार्थः एकमनस्का वा॥१६॥

अत्र भगवति भक्तिविधानार्थं भगवद्भक्तपरीक्षितः कलिनिग्रहादिमाहात्म्यवर्णनेन हरिमहिमैव प्रतिपाद्यत इति तन्महिमा प्रतिपाद्यतेऽस्मिन्नध्याये। तत्र प्रथमं राज्यपालनादि महिमोच्यत इत्याह तत इति। ततः पांडवस्वर्गाणानंतरं द्विजवर्यशिक्षया कृपादिब्राह्मणश्रेष्ठसदुपदेशेन शिक्षा विद्योपपादनं। अभिजातकोविदाः जातकज्ञानपटवः सूत्याः मुहूर्ता यथा महद्गुणानुपादिशंस्तथा तदनुसारेण महीं शशासेत्यन्वयः॥१॥ उत्तरस्य विराटपुत्रस्य पुत्रीं नाम्नेरावतीं उपयेमे। उपयमनं विवाहः। उत्पादयत् उदपादयत् जनमेजयप्रमुखान् चतुर इति पाठः॥२॥ शारद्वतं कृपं यत्र येषु अश्वमेधेषु देवाः इंद्रादयः। अक्षिगोचराः प्रत्यक्षाः दृश्यानितिशे

सूत उवाच॥ ॥ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह। यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्र महद्गुणस्तथा॥१॥ स उत्तरस्य तनयामुपयेम इरावतीं। जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान्॥२॥ आजहाराश्वमेधांस्त्रीन्गंगायां भूरिदक्षिणान्। शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः॥३॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित्। नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा॥४॥ शौनक उवाच॥ कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः। नृदेवचिह्नधृक्शूद्रकोऽसौ गां यः पदाहनत्॥५॥

षः ३ स धीरः दिशां जये ओजसा स्वाभाविकशक्त्या कलिं निगृहीतवानित्यन्वयः। नृपाणां लिंगं लक्षणं धारयतीति नृपलिंगधरः तं कर्मणा शूद्रं तं देवाह पदेन पदा गोमिथुनं घ्नंतं ताडयंतं क्वचिद्देशांतरप्रदेशे॥४॥ नृपलिंगधृक् नृपः शूद्रः पदा गाम् हन्तं तं कलिं दिग्विजये निजग्राह। असौ कः कश्चकर्म इत्याहे पः न प्रश्नः कलिमित्युक्तो ज्ञानत्वेन सिद्धप्रश्नत्वापातात्॥५॥ ॥श्रीराम॥ ॥राम॥ ॥राम॥ ॥राम॥

विष्णुकथाश्रयो यस्य तत् एतादृशं कलिबंधनं केनहिं कथ्यतां। अथवा अज्ञानतरे वा यदि अस्य हरेः मकरंदं मदकरं भावं ददातीति मकरंदः सेवनेन लिहं नि आस्वादयंतीति लोकं कथाश्रयं तर्हि तत्कथ्यतामित्यन्वयः॥ किमिति विष्णुवैष्णवकथाकथनमिति तत्राह। किमन्यैरिति। असदालापैरमंगलप्रसंगैः किं प्रयोजनं न किमपि कुतः। आयुषो सद्व्ययः व्यर्थकृयइति यस्मात् दतरवर्थः। अमैरसदालापैरायुषो समीचीनो व्ययइति वा। इतोपी तत्प्रसंगेनापे क्षितइति ब्रूत इत्याह। क्षुद्रायुषामिति। क्षुद्रायुषामल्पायुषां मर्त्यानां मरणधर्माणमत एव मृतिमिष्टछतां त्राणं मारकः। मृत्युः भगवान् नरसिंहः शामित्रकर्मणि पशुसंज्ञपनकर्म कर्त्ता शमिता तस्य कर्म शामित्रं तादर्थ्ये सप्तमी शामित्रकर्मार्थं अविभित्रैर्मिबारणपबासिभि रिहोपहूतः आहूयप्रसादस्यापितः अंतं करोतीत्यंतकः स भगवान् यावदिहास्ते न तावत्कश्चिन्म्रियते इत्यन्वयः॥ ७॥ अनेन च कृते किमायातमिति तत्राह॥ एतदर्थमिति। अतः संप्रति नूलो

तत्कथ्यतां महाभागयदि विष्णुकथाश्रयं। अथवास्य पदांभोजमकरंदलिहां सतां॥ किमन्यैरसदालापैरायुषोयदसद्व्ययः। क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छतां॥ ७॥ इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि॥ न कश्चिन्म्रियते तावद्यावदास्त इहांतकः॥ ७॥
॥ एतदर्थं हि भगवानाहूतः परमर्षिभिः। अहो नृलोके पीयेत हरिलीलामृतं वचः॥ ८॥ मंदस्य मंदप्रज्ञस्य प्रायो मंदायुषश्च वै। निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः॥ ९॥

के मृत्युस्तयविधुरतया स्थिते मर्त्ये लीलामृतं वचः पीयेते त्यतदर्थं हि परमर्षिभिरिहाहूतः अहो आश्चर्यं मरणधर्मिणामपि हरिलीलामृतत्वपरं हि यस्मात्तस्मादिहक्कवेलं वकथाश्रयं वेत्कथ्यतामिति भावः। ८। यथा मर्त्यस्यासत्प्रसंगात् आयुषो व्ययश्च तथा निद्रार्थादिपरस्यापीत्याह॥ मंदस्येति। अल्पस्यापि प्रज्ञाबाहुल्याद नेकवेदशास्त्रतदर्थग्रहणं स्यात्किं तो मंदस्य तेष्पति मंदप्रज्ञस्य अल्पायुषस्तस्मात्किं तो मंदायुषइति। अल्पायुषोपि भाग्यवशात्तस्मात्किं तो मंदस्येति मंदस्य निर्भाग्यस्य एवं विधस्य मर्त्यस्य नक्तं रात्रिः निद्रया ह्रियते हिरण्यार्थादर्थी च्यवणकर्मभिर्दिवादिनमपि ह्रियते वशइहे लप्यते तस्मान्निद्रादिजयेन हरितत्परायणकथात्र वा कथ्यतामिति भावः। वाइत्यनेनानुभव सिद्धमेतदिति दर्शयति। सत्रदिदृत्याग्रागते मर्त्ये श्लाकर्ण्येतासूतस्माव

कुरुजांगले कुरुविषये हस्तिनपुरे वसन्परीक्षिद्यदा निजचक्रवर्त्तिनि जचक्रेणस्यानुत्तया निजानां पांडवानामात्मया वर्त्तितराष्ट्रे प्रविष्टं कलिं शुश्राव तिशेषः। ततस्तदा संयुगशौ विर्युद्धेष्टुः राष्ट्रविज्ञवहूपामनति प्रियां वार्त्तां निशम्य शरासनमाददइत्यन्वयः। संयुगं रौवयतीति धनुर्विशेषणं वा॥ ११॥ अपामेर्नवसुर्वीथिषु विशिष्टामिनिर्मिनीलवर्णैर्वाजुरंगै शोभितं भृंगेंद्रो ध्वजे यस्य स तथा तं सिंहलां छनध्वजं रथाश्वअश्वाश्च द्विपाश्च पत्तयश्च रथाश्च द्विपपत्तयः तेर्युक्तया पुरान्निर्गतो भूदित्यन्वयः॥ १२॥ सपरीक्षितभद्राश्वादिवर्षाणि उत्तरकुर्वादिजनपदानि च विजित्य बलिकरं जग्रहइत्यन्व

सूत उवाच॥ ॥ यदा परीक्षित्कुरुजांगलेवसन्कलिंप्रविष्टं निजचक्रवर्त्तिते। निशम्यवार्त्तामनतिप्रियांततः शरासनं संयुगशौ विराददे॥ ११॥ स्वलंकृतं श्याम तुरंगयोजितं रथंमृगेंद्रध्वजमाश्रितः पुरात्। वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः॥ १२॥ भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून्। किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं॥ १३॥ तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनां। प्रगीयमानं पुरतः कृष्णमाहात्म्यसूचकं॥ १४॥ आत्मानं च परित्रातमश्वत्थाम्नोस्त्रतेजसः। स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे॥ १५॥ तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः। महाधनानि वासांसि ददौ हारान्महामनाः॥ १६॥

यः॥ १३॥ स महामना तत्र तत्र वर्षेषु विषयेषु च स्वपुरतो गायकैः उपगीयमानं कृष्णमाहात्म्यसूचकं महात्मनां स्वपूर्वेषां पांडवानां माहात्म्यमुपशृण्वानः शृण्वन्॥ १४॥ कथं माहात्म्यं सूच्यत इति तत्किं विदाह। आत्मानमिति। अश्वत्थाम्नोस्त्रतेजसः कृष्णेन परिरक्षितमात्मानं च वृष्णीनां पांडवानां मिथः स्नेहं च तेषां कृष्णे भक्तिं च शृण्वन्॥ १५॥ तेभ्यो गायकेभ्यः परमसंतुष्टः अत एव प्रीत्या उज्जृंभिते विकसिते लोचने यस्य सः तथोक्तः महाधनानि अनर्घ्याणि वस्त्राणि हारा मौक्तिकमालास्तेभ्यो ददौ इत्यन्वयः॥ १६॥

नृपतिः परीक्षित् कृष्णे स्निग्धेषु पांडुपुत्रेषु मुक्तामुक्तकर्मैव प्रणतस्य विष्णोः सारथ्यादिना अहो हरिश्चरणनतजनतासु सकरुणार्द्रो नचि
ति। तस्य चरणारविंदे विशेषतो भक्तिं करोतीत्येकान्वयः। सारथ्यं कर्म सारथ्यं पार्षदं सभापतिकर्म हास्यं त्वेवापरिषत्कर्म नित्यासेवनं उक्तकर्म
कारित्वं सख्युः कर्म सख्यं दूतस्य कर्म संदेशकरत्वं दौत्यं वीरासनेन रात्रौ खड्गपाणिः स्थित्वा स्वामिरक्षार्थं जागरणं वीरोचितासनं गच्छतः पृष्ठतो ग
मनमनुगमनं स्तवनं स्तुतिः। प्रणामो नमस्कारः। प्रकृत्वं वा वीरासनानुगमने सिंहासनोपमर्जनतया उपवेशनं वा॥१७॥ पूर्वेषां पित्रादीनां वृत्त
माचरितमनुदिनमेवं वर्त्तमानस्य नातिदूरस्थ अस्मत् इह क्षितौ वा यदाश्चर्यमासीत्तन्निबोधेत्यन्वयः॥१८॥ किं तदित्यत आह॥ धर्म इति। सप्त
स्येनैकेन पदेन चरन् धर्मः वृषभो भूत्वा वत्सरहितां मातरमिवाश्रुवदनां अत एव विच्छायां विगतकांतिं गोरूपिणीं गां भूमिमुपलभ्य पृच्छति स्म

सारथ्यपार्षदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामैः। स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणा
रविंदे॥१७॥ तस्यैवं वर्त्तमानस्य पूर्वेषां वृत्तिमन्वहं। नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे॥१८॥ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गां
। पृच्छति स्माश्रुवदनां विवत्सामिव मातरं॥१९॥ धर्म उवाच कच्चिद्भद्रेनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन। आल
क्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंचनांब॥२०॥ पादैर्न्यूनं शोचसि मैकपादमात्मानं वृषलैर्भोक्ष्यमाणं। अथो सुरादीन्हृतयज्ञ
भागान्प्रजा उत स्विन्मघवत्यवर्षति॥२१॥

न्वयः॥१९॥ भद्रागो गोमत ह्रिके त्यभिधानात् हे भद्रे तव आत्मनः देहस्य अनामयं आरोग्यं कच्चित् किं म्लायता म्लानिं गच्छता मुखेन विच्छाया विगतकां
तिरसीति यद्यस्मात् अस्माद्भवतीमंतराधिं मनःपीडावतीमालक्षये पश्यामि किं वा कंचन दूरे बंधुं परोक्षदेशस्थितं बंधुं प्रति शोचसीवेति॥२०॥ अपि वा त्रि
भिः पदैर्न्यूनं हीनमेकपादं मां प्रति शोचसि उत पद्यंते रक्षा अहो स्वित् वृषं धर्मलीनं न कुर्वंतीति वृषलाः राजाभासाः शूद्रास्तैर्भोक्ष्यमाणमात्मा
नं शोचसि। अथो अथवा हृतो यज्ञभागो येषां ते तथोक्तान् सुरादीन् शोचसि किं मघवति इंद्रे वर्षति यज्ञाभावाद्वर्षमकुर्वति सति सस्यादि स
त्त्वाभावेन दरिद्राः प्रजा उद्दिश्य शोचसि उतास्वित् अपि स्वित्॥२१॥

अथवा हे उर्वि भूः राजकुले अब्रह्मण्ये अरक्ष्यमाणाः स्त्रियः उद्दिश्य शोचसि अथवा पुरुषादैर्मनुष्यभक्षकैरिवास्थितैरुपद्रवकै राजभिः दुःखितान्
बालांश्च शोचसि। किं वा ब्रह्मकुले ब्राह्मणकुले कुत्सितकर्मणि दुश्चरिते यहो ष्ठेनादिकर्म कुर्वति सति राजकुले अब्रह्मण्ये ब्राह्मणावकुमानमह
त्वात्तस्मात्करादीनाददाने सति च कुलाग्र्यां श्रेष्ठां कुलीने वर्त्तमानामिति वा देवीं द्योतमानां वाचं वेदवाणीं आचारकुलहीनाश्रयेष्वपतीति शोचसि स्वि
त्। किमेतत्स्वल्पश्रुता हृदेशामामयं प्रवलिष्यतीति वचनात्॥२२॥ कलिनोपसृष्टान् उपद्रुतान् क्षत्रबंधून् शोचसि ते क्षत्रबंधुभिः अवरोपितानि विनाशिता
नि राष्ट्राणि वा शोचसि यद्वा एवं वा इतस्ततः अनियमेनाशनं पानं वासः स्नानं व्यवायो ग्राम्यधर्मः एतेषु तथोक्तः ते षूत्सुकमुत्कंठं गतं जीवलोकं

अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्त्तान्। वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यां॥२२॥ किं क्षत्रबं
धून्कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि। इतस्ततो वाशनपानवासःस्नानव्यवायोन्मुखजीवलोकं॥२३॥ यद्वांब ते भूरिभरावता
रकृतावतारस्य हरेर्धरित्रि। अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबितानि॥२४॥ इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन वि
कर्शितासि। कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमंब सौभगं॥२५॥

आर्त्तिसमूहं किं शोचसि॥२३॥ अथेति पक्षांतरारंभः। ते तव भूमेः भूरिर्महतो भारस्यावतारो अवरोपणं तस्मै भूरिभारावतारायकृतो अवतारः स्वरूपप्रकाशो ये
न स तथोक्तः तस्यांतर्हितस्य निर्वाणं स्वस्वरूपयोग्यमोक्षं विशेषेण लंबयंति पुरतः स्थितं कारयंतीति निर्वाणविलंबितानि निर्वाणं विलंबयंत्यपहसंती
ति वा तानि हरेः कर्माणि चरितानि स्मरती ते तेन हरिणा अहमेव विसृष्टा न स्थिति शोचस्यथ किं येन मनोदुःखेन विकर्शिता कृशतरासि हे वसुं
धरे तदिदमाधेर्मनःपीडाया मूलं ममाचक्ष्व हीत्यन्वयः। अथवासं प्रति अंशुना समर्थेन बलिना सर्वोपराधुपेन कालेन तव सुरार्चितं सौभाग्यमवलीढं
ग्रस्तं वेत्यन्वयः॥२५॥

धर्मेण एषा भूमिः नेप्रतिष्ठितत्यत्याहाभवानिति। हे धर्म पदानि मूलं तं मामनुस्मृत्य सितत्वं सर्वं भवान्न वेद हि तथापि वक्ष्य इति शेषः। येन स्त्री क्रमेण त्वं लो
कसुखावहैः तपः शौचदयासत्यारूपैश्चतुर्भिः पादैः कलावपि वर्तसे अवर्तसे अवर्तयः॥ २६॥ यत्र यस्मिन्नुस्त्री कृष्णे इमे उक्ताः सत्यादयो उक्ता अन्येवम
हागुणाः प्रत्येकमनंता संति कीदृशा महत्त्वमिच्छद्भिः पुरुषैः प्रतिदिवेना दृशगुणालाभाय प्रार्थ्याः उपास्याः सेकर्हिचिद्यतो न यांति च अभिन्नत्वादित्यतम
र्थस्मेत्यनेनश्रुतिसिद्धं दर्शयति। हे देवो न मत्तेन गुणपात्रेण श्रीनिवासेन संप्राप्तं रहितं पाप्मना पापात्मना कलिनेक्षितं दृष्टं आत्मानं मा च भवंतं वशो चा
मी त्वं च यः॥ २६॥ सत्यं निर्दुःखाने स्तनुमवः भूतहितं यथार्थभाषणं वा शौचं नित्यशुद्धिः प्रकृतिसंबंधाभावान्नित्यं बाह्याभ्यंतरशुद्धिता हरेर्वा। अन्य

धरो वाच॥ ॥भवान्हि वेदतत्सर्वं यन्मां धर्मानुपृच्छसि। चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः॥ २६॥ सत्यं शौचं दया क्षांतिस्त्यागः सं
तोष आर्जवं॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं॥ २७॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः। स्वातंत्र्यं कौशलं कांतिः
र्धैर्यं मार्दवमेव च॥ २८॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः। गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोनहंकृतिः॥ २९॥ इमे चान्ये
च भगवन्नित्या यत्र महागुणाः। प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित्॥ ३०॥ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं। शो
चामि रहितं लोकं पाप्मना कलिनेक्षितं॥ ३१॥ आत्मानं चानुशोचामि भवंतं चामरोत्तमं। देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्त

व स्वजनत्वाभ्यां रागरहित्ये न दयास्वजने च्छार्थिशालिषु वित्तं इव त्वं वा उभयत्र समे हानं तच्चानुक्रम मध्यमेषु सुखदुःखे यथा श्रमान्॥ ३२॥
मिश्रफलवितरणं। अन्यत्र धर्मोर्थपात्रे वित्तविश्राणनं त्यागो स्वकीयेस्वकीयता बुध्यपरपर्यायमिथ्याभिमानो सन्नता अन्यत्र संन्यासः। संतोषः स्वरू
पानंदपानेनान्यत्रालं बुद्धिः। अन्यत्र यदृच्छया प्राप्तभोगे च अलं प्रत्ययः। आर्जवं व्यवहारे च वक्रतामनसि च वाक्ति वैकविधता उभयत्र समानं। शमः स्व
तः प्रियं रूपत्वादिदं प्रियमिदमप्रियमिति बुद्धिविधुरता शरूपतामीयत इति वा। अन्यत्र बुद्धेर्भगवन्निष्ठता दयंइंद्रियाणां स्ववशत्वं उभयत्र समानं
स्वतः परत इति विशेषः। शत्रुनि॥

ग्रहोवा तपआलोचनं शुक्तित्यागनं अन्यत्र कृच्छ्र चांद्रायणादि उपवासनियमः। साम्यं सर्वात्मतायां तर्यामिरूपेषु निर्दोषगुणदर्शनेन समता यथास्थितवस्तु द
र्शनं वा उभयत्र समानं। ननु सर्वत्र शत्रुमित्रता वराहित्यं तितिक्षा महापराधसहनं। यथा भृगोः पादाहत्यपराधं। अन्यत्र द्वंद्वसहिष्णुता उपरतिः स्वव्यूपरतिः।
उपरतिः उपः मुख्यप्राणः तस्मिन्नुरतिर्वा उरुद्धः। अन्यत्र काम्यकर्मनिवृत्तिः। कृतकृत्यतया अर्थ सर्वव्यवहारोपरमो वा। श्रुतं सर्वत्र श्रवणशक्तिः। श्रोतेत्यादेः
श्रुतिप्रसिद्धता वा अन्यत्र शास्त्रार्थतात्पर्यावधारणं श्रुत्यर्थविचारो वा॥ २७॥ ज्ञानं सर्वज्ञता अन्यत्र परोक्षापरोक्षभेदेन परमार्थविषयं। विरक्तिः स्वेतरविषये
असारता बुद्धिः। अन्यत्र शब्दादिविषयरागराहित्यं ऐश्वर्यं समस्तजगदीशितृत्वसामर्थ्यं अन्यत्राणिमादिकं। शौर्यं संग्रामेषु पलायित्वं उभयत्र समानं।
तेजः परैरप्रधृष्यत्वं अन्यत्र ब्रह्मवर्चसं धृतिः सर्वाधारणं एषसेतुर्विधृतिरिति श्रुतेः। विकारहेतावविकारित्वं वा अन्यत्र जिह्वोपस्थजयः। स्मृतिरती
तानागतानां तत्र ह्लादादि स्मरणं अन्यत्रावगतपदार्थानुसंधानं स्वातंत्र्यमपराधीनत्वं अन्यत्र स्वतंत्रो विष्णुः तदधीनत्वं कुमारीकंकणावदेकाकि
त्वं वा कौशलं सर्वकर्मणि वैचित्र्यकरणबुद्धिः। अन्यत्र शिल्पविद्या वैशारद्यं कांतिर्देहगता दीप्तिः। अन्यत्र भगवद्भक्ति कामनं सौभाग्यं स्वैकभामि
त्वं अन्यत्र लोकमनोहरत्वं मार्दवं सत्सु मृदुत्वं उभयत्र समं नंदकमाक्रोधासमुत्थितिः उभयत्र समं॥ २८॥ प्रागल्भ्यं धार्ष्ट्यं उभयत्र समं प्रश्रयो विनयः
समं शीलं लोकमनोहरस्वभावत्वं समं सहः सहनशक्तिः। प्राणस्य स्वाभाविकसामर्थ्यं वा समं। ओजः पराभिभवशक्तिः। अन्यत्र मानसं बलं बलं स्वे
च्छाकरणशक्तिः। अन्यत्र शरीरादिधारणं सामर्थ्यं वा। भगः षड्गुणवत्त्वं भाग्यं वा। अन्यत्रोत्सवादिज्ञाने। गांभीर्यं परैरनवगाह्यत्वं। अन्यत्र क्षोभित
त्वं स्थैर्यं नित्याकंपनं। अन्यत्र धर्मादचलनं। आस्तिक्यं वेदाद्युक्तं मस्तीति बुद्धिः। अन्यत्र गुरुवाक्येषु श्रद्धानता कीर्तिर्दिक्षु ख्यातिः। अन्यत्र हरि
नामकीर्तनं मानः परेभ्यो मानने। अन्यत्राभिमानः। अनहंकृतिः स्वरूपदेहादावहमिति बुद्धिराहित्यं अन्यत्र नाहं कर्ता हरिरेव मयि स्थित्वा सर्वं क
रोतीति बुद्धिः॥ २९॥ न केवलं भवंतं शोचामि किं तु देवादीनपि॥ ३२॥ ॥ श्रीराम॥ ॥ श्री॥

श्रीकृष्णविरहएवममाधिमूलमित्याख्यातिब्रह्मादयइति। यस्याःश्रियःअपांगःकटाक्षःतस्यमोक्षउन्मीलनविशेषःतंकामयंतइतियदपांगमोक्ष
कामाःस्वेषुश्रियःकटाक्षनिपातमाकांक्षमाणाइत्यर्थः।शास्त्रोक्तप्रकारेणभगवत्प्रपन्नाःब्रह्मादयोबहुतिथंबहुकालंभगवतीमभजन्नितिशेष
णान्वयः। साश्रीरनुरक्तासद्भक्तिमतीस्वनिवासमरविंदवनंपद्मवनंविहाययस्यश्रीकृष्णस्यपादयोःसौभगंसौभाग्यमलंभजतइत्यन्वयः॥३३॥ उपल

ब्रह्मादयो बहुतिथं यदपांगमोक्षकामायथोक्तविधिना भगवत्प्रपन्नाः। सा श्रीः स्ववासमरविंदवनं विहाय यत्पाद
सौभगमलं भजतेनुरक्ता॥३३॥ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी। त्रीनत्य
रोचमुपलभ्य तपोविभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदंते॥३४॥

ब्ध्यतपोविभूतिर्ययासा तथा तपसा विविधफलं प्राप्तासती तस्य भगवतः अब्जं च कुलिशं चांकुशश्च केतुर्ध्वजश्च अब्जकुलिशांकुशकेतवः लेखा
रूपाः एते केता चिह्नानि येषां तानि तैः श्रीमद्भिः पदैः सम्यगलंकृतसर्वांगाहं त्रीन्लोकानतिक्रम्यारोचं शोभितवती स श्रीकांतः तदंते तपोवि
भूतेरवसाने उत्स्मयंतीं काद्रमत्सहशी स्त्रीत्यहंकुर्वाणां मां व्यसृजदितिशेषान्वयः। तदंतइतित्वितरापेक्षयोक्तं नतु भूमेः पुण्यावसानमस्ति भ
गवत्पत्नीत्वात्॥३४॥

योवैअसुराणांसंबंधीवंशआसुरवंशःतस्मिन्उत्पन्नानांराज्ञामक्षौहिणीशतंममातिभरमपानुददपाहरत्।शतमितिशब्दःसहस्रादिवाचीत्यपि
चतुष्पदत्वेनपूर्णपदंसंपादयन्।आत्मतंत्रोयदुषुरम्यंदरमंगंविभ्रत्॥३५॥ यस्यप्रेम्णाअवलोकश्चरुचिरंस्मितंचवल्गुर्मधुरःजल्पश्चतैस्तथा क्र
मैर्मधुमानिनीनांसमानंअभिमानेनसहवर्तमानंस्थैर्यमहरत्। यस्यांघ्रिभ्यांविटंकितायाअंकितायाअलंकृतायावाममरोमोत्सवःरोमांचअभूदिति
शेषः तस्यपुरुषोत्तमस्यविरहंकावास्त्रीसहेतनकापीत्यन्वयः॥३६॥ तदवसरेतत्रपरीक्षितोगमनमाह।तयोरिति।परीक्षिन्नामराजश्रेष्ठःकुरुक्षेत्रे

यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः। त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्य
मविभ्रदंगं॥३५॥ का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः। स्थैर्यं समानमहरन्मधुमानिनीनां
रोमोत्सवो मम यदंघ्रिविटंकितायाः॥३६॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा। परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सर
स्वतीं॥३७॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे षोडशोऽध्यायः॥ सूत उवाच॥ तत्र गोमिथुनं राजा हन्यमा
नमनाथवत्। दंडहस्तं च वृषलं ददृशे नृपलांछनं॥१॥

प्राचीदिशंउद्दिश्यस्यंदमानांनाम्नासरस्वतींनदींप्राप्तइत्यन्वयः॥३७॥ प्रथमेषोडशः॥ अत्रापिभगवद्भक्तप्रधानस्यपरीक्षितःकलिबंध
नादिमाहात्म्यवर्णनेनहरेर्महिमैववर्णितइतितन्महिमोच्यते।तत्रनातिदूरइतिकथितमाश्चर्यमाहतत्रेति।तत्रकुरुक्षेत्रेप्राग्वाःसरस्वत्याःतीरे
अनाथवत्अनाथःस्वामीतेनरहितोयथाहन्यतेतथाताड्यमानंगोमिथुनं॥१॥

मिथुनं विविक्याह । वृषमिति । मृणालधवलं कमलनालसूत्रवद्धवलं शुक्लवर्णं बिभ्यतं भीतमिव मेहंतं शकृन्मूत्रं त्यजंतं वेपमानं एकेन पदा स्थितत्वात्सीदं
तं भग्नांगवत्तिष्ठंतं शूद्रेण कलिना पीडितं वृषमद्राक्षीत् ॥२॥ यवसं तृणमाकांक्षमाणां अत एव कृशां अश्रुवदनां अश्रुमुखीं विवत्सां वत्सरहितां मि
वास्थितां शूद्रस्य पदाताडितां भृशमत्यर्थं दीनां कृपणां धर्मदुघां तयोः पयसोः दोग्ध्रीं गां चैवं विधामपश्यदित्यन्वयः ॥३॥ दृष्ट्वा वनान्नृराजा पप्रच्छेत्य
न्वयः । कथंभूतः । कार्तस्वरपरिच्छदं सुवर्णपरिकरपरिष्कृतं रथमारूढः समारोपितकार्मुकः सज्जीकृतधन्वा ॥४॥ तत्र प्रथमं शूद्रं प्रति प्रश्नप्रकारमाह

वृषं मृणालधवलं मेहंतमिव बिभ्यतं । वेपमानं पदैकेन सीदंतं शूद्रपीडितं ॥२॥ गां च धर्मदुघां दीनां भृशं शूद्रपदाहतां । विव
त्सामश्रुवदनां कृशां यवसमिच्छतीं ॥३॥ पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदं । मेघगंभीरया वाचा समारोपितकार्मुकः ॥४॥
कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान्बली । नरदेवोसि वेषेण नटवत्कर्मणाद्विजः ॥५॥ यस्त्वं कृष्णे गते दूरं सहगांडीवधन्वना । शो
च्योस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥६॥ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् । वृषरूपेण किं कश्चिद्देवो नः परिखेदय
न् ॥७॥

कस्त्वमिति । यस्त्वं नटवद्वेषेण नरदेवोसि ननु राजा कर्मणा अद्विजः शूद्रोसि । अद्विज इत्युक्त्या शूद्रस्त्वं कथं ज्ञातमिति चेत्कर्मणा अनेन क्षत्रियवै
श्ययोः परिहृतत्वात् मच्छरणे अहमेव रक्षको यस्य स तथा तस्मिन् शरणं गृहरक्षित्रोरित्यभिधानं बली त्वं अबलो दुर्बलो गो वृषो वृषान्यसह्य हंसि
पीडयसि त्वं कः ॥५॥ गांडीवधन्वना सह कृष्णे दूरं गते सति शोच्यो रहसि अशोच्यान् प्रहरन् असि स त्वं वधमर्हसीत्यन्वयः ॥६॥ इदानीं वृषं तं पृच्छति । त्वं वे
ति । हे वृष न पादैर्न्यूनः यथा चरसि तथा त्रिभिः पदैर्न्यूनः एकेन चरन् मृणालवत् धवलस्त्वं वा को वा वृषभरूपेण अस्मान् परिखेदयन् अस्मत्तुःख
परिघातं कुर्वन्नुगतस्त्वं कश्चिद्देवः किं ॥७॥

कुतः परिखेदकत्वमिति तत्राह । न जात्विति कौरवेंद्राणां दोर्दंडैः परिरंभिते रक्षिते अस्मिन् भूतले प्राणिनां शुचः शोकनिमित्ता अश्रुबिंदवः जातु कदा
पि न निपतंति त्वां विना त्वं तु बाष्पकलाः शोचसि यस्मात्तस्मात् परिखेदयसीति भावः ॥८॥ हे सौरभेय सुरभिवंशोद्भव मा शुचः शोकं मा कार्षीः
ते तव वृषलाद्भयं व्येतु नश्यत्वित्यन्वयः । इदानीं सौरभीं पृच्छति मा रोदीरिति । हे सौरभेयि त्वमपि कासि इत्यध्याहारः कर्तव्यः । कस्त्वमित्युक्तत्वा
त् । हे अंब मा रोदीः अश्रुविमोचनं मा कार्षीः ते तु सं भद्रमस्तु कुतः मयि दुष्टानां शास्तरि सति ॥९॥ यस्य राज्ये राष्ट्रे असाधुभिर्दुष्टैः प्रजाः साधु
हिंस्यंते पीड्यंते मत्तस्य तस्य कीर्त्यादयो नश्यंतीत्यन्वयः । गतिः परलोकः ॥१०॥ यत आर्तानामार्तिनिग्रहः एषः राज्ञः परो धर्मो हि यस्मात्तस्मादा

न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते । भूतले निपतंत्यस्मिन्विना त्वा प्राणिनां शुचः ॥८॥ मा सौरभेयानुशुचो व्येतु ते वृषलाद्भयं । मा
रोदीरंब भद्रं ते खलानां मयि शास्तरि ॥९॥ यस्य राष्ट्रे प्रजा मातर्हिंस्यंते साध्व्यसाधुभिः । तस्य मत्तस्य नश्यंति कीर्तिरायुर्भगो गतिः ॥१०॥ ए
ष राज्ञः परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः । अत एनं वधिष्यामि भूतद्रुहमसत्तमं ॥११॥ को वृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पदः । मा भूवंस्त्वा
दृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनां ॥१२॥ आख्याहि वृष भद्रं वः साधूनामकृतागसां । आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणं ॥१३॥ गले
नागस्यघं युंजन्सर्वतोस्य च तद्भयं ॥१४॥ अनागःस्विह भूतेषु य आगस्कृन्निरंकुशः । आहर्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदं ॥१५॥

र्तिनिग्रहस्य स्वधर्मत्वादसत्तमं भूतद्रुहमेनं वृषलं वधिष्यामीत्यन्वयः । अनेन कस्य हेतोः निजधाहे निवोद्यं परिहृतं ॥११॥ हे सौरभेय चतुष्पद तव त्रीन्पा
दान् को वृश्चत् छिदितवान् सकः ज्ञातश्चेत्परिहरिष्यामीति शेषः कुत इति तत्राह । मा भूवन्निति । त्वादृशाः त्वद्विधाः ॥१२॥ अकृतागसां अकृतापराधानां
साधूनां निर्दोषाणां वो युष्माकं भद्रमस्तु पार्थानां कीर्तिदूषणं यशोदूषकं आत्मवैरूप्यकर्तारं पुरुषमाख्याहीत्यन्वयः ॥१३॥ हे गले हे सुरभि अनागसि अ
घमपराधं युंजन् प्रयुंजानो वर्तते अस्य तस्माद्पराधात् सर्वत इह परलोके च भयं भवत्येवेति शेषः सौरभेयी गला धेनुर्भद्रा नंदा घटनस्रवेत्यभिधानं ॥१४॥
निरंकुशः अनिवारितः अंगदेन बाहुभूषणेन सह वर्तमानं अमर्त्यस्य देवस्यापि आहर्तास्मि छेत्तास्मि ॥१५॥

कुत इति तत्राह। राज्ञ इति स्वविहितधर्मस्थानुपालनं तत्र दोषमतयान्याञ्छासतः परो धर्मो हि किं विशिष्टस्य इहानापदि आपदभावे पितृत्वपथान्मा
र्गमुत्सृज्य वर्तमानानन्यान् दुष्टान् यथाशास्त्रं शासतः॥१६॥ श्रीकृष्णो भगवान्येषां पांडवानां ज्ञानभक्तिविरक्त्यादिगुणगणैर्दौत्यादौ वृतः पांडवेयानां
तेषां पांडवानां वंशोद्भवानां वः एतदार्त्तानामभयंकरं वचनं युक्तमुचितमित्यन्वयः॥१७॥ हे पुरुषर्षभ यतो जीवानां क्लेशबीजानि स्युर्वयं तं पुरुषं त्रयमे
व तिना जानीमः अनेकशोकबीजप्रतिपादकवेदवाक्यविमोहिताः॥१८॥ वाक्यभेदमेवाह केचिदित्यादिना केचिद्विकल्पविकल्पसन्दोहो येषां तेषां
तेत थोक्ताः संदिग्धवचसः इत्यर्थः। आत्मनः स्वस्य क्लेशबीजमात्मानं स्वयमेवाहुः केचित्सांख्याः आत्मानमंतःकरणं तत्कारणमाहुः वैकल्पव

राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं॥ शासतोन्यान्यथाशास्त्रमनापद्युत्पथानिह॥१६॥ धर्म उवाच॥ एतद्वः पांडवेयानां यु
क्तमार्त्ताभयं वचः। येषां गुणगणैः कृष्णो दौत्यादौ भगवान्वृतः॥१७॥ न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ। पुरुषं तं विजानी
मो वाक्यभेदविमोहिताः॥१८॥ केचिद्विकल्पवसना आहुरात्मानमात्मनः। दैवमन्ये परे कर्म स्वभावमपरे प्रभुं॥१९॥ अप्रतर्क्यादनि
र्देश्यादिति केष्वपि निश्चयः॥ अत्रानुरूपं राजर्षे विमृश स्वमनीषया॥२०॥

वसः इक्तिपुरुषयोर्विवेकाग्रहवन्तः एके सम्यग्ज्ञानिनः दैवं सर्ववेदे प्रधानं हरिं क्लेशबीजमाहुः। अपरे प्रभुं स्वभावं कालं क्लेशबीजमाहुः। स
र्वनिमेषान्तशिरेविद्धतः पुरुषादिति श्रुतेः स्वशब्दवाच्याहितो भावो यस्य स स्वभावः॥१९॥ अनंतत्वात्सर्वात्मना प्रतर्क्यात्तर्काविषयादनिर्देश्या
त्शब्दानात्क्लेशपरंपरात्सर्वेषां जीवानां प्रकृत्याविहितत्वादिति केष्वपि निश्चयः। अथवा अप्रतर्क्यात् प्रकर्षेण तर्कायोग्यात्सत्त्वेनासत्त्वेनस
दसत्त्वेन वा निर्वक्तुमशक्यात् भावादज्ञानादिति केषुमायावादिषु निश्चयः। भो राजश्रेष्ठ येषु पक्षेषु अनुरूपं श्रुतिस्मृत्यनुकूलं विमृश स्वबुध्यालो
चय निश्चिन्विति॥२०॥

धर्मे एवं प्रवदति सति स सम्राट् समाहितेन एकाग्रेण मनसा लोचयस्वाधीनैः कर्मकालप्रधानैः दैवमेवास्तु तत्राणां जीवानां दुःखादिबीजं नत्वंतरं स्वतंत्रकर्मा
दीनां दुःखबीजपक्षो हेय एवेत्येवं धर्मात्तु विदित्वा तं प्रत्यचष्टेत्येकान्वयः॥ आत्मादिशब्दवाच्यं परमात्मानं क्लेशबीजं विदित्वेति वा आद्यनादिकर्तृत्वादात्मा
देवोत्तमत्वाद्दैवं क्रियादिप्रधानत्वात्कालकरणशक्तिमत्वाद्वा कर्म स्वस्माद्भावः प्रकाशो यस्य स स्वभावः॥ स्वभासं स्वरूपभूतं भा प्रकाशं व्याप्तिगच्छति न परप्रकाश्य
मिति स्वभावः स्वयंप्रकाश इत्यर्थः। अप्रतर्क्यात् दुस्तर्कविषयत्वाद्अप्रसिद्धत्वादनिर्वाच्यात्। अप्रसिद्धेरवाच्यं तदिति स्मृतेः इति सर्वेषु पक्षेषु हरिरेवोच्यते
क्लेशबीजत्वेन। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते इति स्मृतेः। इति मत्वा भजंते मां बुधा भावसमन्विताः। बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः। सु

॥एवं धर्मे प्रवदति स सम्राड्द्विजसत्तमाः। समाहितेन मनसा विदित्वा प्रत्यचष्टतं॥२१॥

खं दुःखं भवोऽभावो भयं चाभयमेव च। अहिंसा समता तुष्टिस्तपो दानं यशोयशः। भवंति भावा भूतानां मत्त एव पृथग्विधाः इत्यादेश्च। अहं हि सर्वयज्ञा
नां भोक्ता च प्रभुरेव च। न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते इति स्मृतेः। एथकृत्कल्पनाया अज्ञानविषयत्वादित्यादिकं समाहितेन सम्राडिति प
दद्वयेनोक्तमिति ज्ञातव्यं सम्यग्राजते प्रकाशते सर्वमस्येति सम्राट्॥ अत एवात्मवेरूपकर्त्तारं न विज्ञानीम इति वदंतं धर्मम ब्रवीदित्यन्वयः। सम
हितेन चेतसा ज्ञानेन तं धर्मं भगवंतं प्रत्यचष्ट दृष्टवान् अपरोक्षदर्शिनेन तस्मिन्निजरूपमद्राक्षीदित्यर्थः। दृष्ट्वा चाब्रवीदितिशेषः॥२१॥

किं ब्रवीषीति तत्राह। धर्ममिति हे धर्मज्ञ धर्मं ब्रवीषि यतस्त्वमस्माद्धर्मोऽसि न तु वृषः। अपि तु अज्ञजनमोहनाय वृषरूपं धृतवान्। यद्वा उक्तमात्मैव रूपमकर्तारं न वि
जानीम इति तत्राह। यद्वेति। असत्कृतमधर्मं तु वदन्नधर्ममेवाक्रयात् इति वचनाद्यत्र वृषलस्तत्त्वमेव रूपमकर्तृत्वात् सूचने दोषाभावे पिष्यद्यधर्मः कृतः स्व
र्न सवाच्यः कथं वनेति वाक्यात्तस्तेन त्वधर्मकृतोऽयतस्थाने नरकादिलक्षणं तत्सूचकस्यापि तत्स्थानं भवेदिति ज्ञापनाय त्वयात्म वेरूपमकर्तानिज्ञापितइ

धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक्। यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत्॥२२॥
अथवा देवमायाया नूनं गतिरगोचरा। चेतसो वचसश्चापि भूतानामिति निश्चयः॥२३॥

त्यतो धर्मं ब्रवीषीत्यर्थः॥२२॥ यत् क्लेशबीजानि तं न विजानीम इति वदतः तवाभिसंधिरयं वेति वक्तीत्याह। अथवेति। मादृशानां गोचरो पि नूनं प्रापे
ण भूतानां चेतसो वचसश्च देवमायायाः सर्वजीवानां सुखासुखप्रक्लेशबीजस्य देवस्य हरेरिच्छाया गतिं स्थितिरधर्मेण धर्मशोचामीत्यादिकाप्र
गोचरेति ज्ञापयितुं सर्वज्ञेन भवतान जानीम इत्युक्तमिति भावः। अभिप्राय निश्चय इति॥२३॥

नवतप आदिचत्वारः पादाः कृतयुगे कृताः पूर्णा अवर्त्तन्त तेषां मध्ये त्रयः पादास्त्रयः शौचदयाख्याः अधर्मांशैरधर्मपादैः स्मयसंगमदैर्भग्नाः स्मयेन तपो
भंगः स्त्रीसंगेन शौचभंगः मदेन दयाभंगः॥२४॥ इदानीमस्मिन्युगे यतो येन पादेन निर्वर्त्तये हे धर्म ते सपादः सत्यं सत्यात्मकस्त्ववशिष्टोऽनृतेनाधर्मपादे
न एधितो वर्धितो धर्मात्मकः कलिः तं सत्याख्यं पादं जिघृक्षति तं गृहीतुमिच्छति ग्रसितुमाकांक्षते इत्यन्वयः॥२५॥ इयं भूश्च भगवता न्यासितः अवरोपि
तः उरुर्महान् भरो भारो यस्याः सा तथोक्ता श्रीमद्भिस्तस्य हरेः पदन्यासैः पदपरिक्रमणैः सर्वतः कृतकौतुका रचिता लंकारा रचितरोमांचेति वा सती

तपः शौचं दया सत्यमिति पादाः कृते कृताः। अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव॥२४॥ इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः। तं जिघृ
क्षत्यधर्मोऽयमनृतेनैधितः कलिः॥२५॥ इयं च भूर्भगवता न्यासितोरुभरा सती। श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका॥२६॥
शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता धुना। अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यन्ति मामिति॥२७॥ सूत उवाच॥ इति धर्मं महीं
चैव सान्त्वयित्वा महारथः। निशातमाददे खड्गं कलयेऽधर्महेतवे॥२८॥ तं जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम्। तत्पादमूलं
शिरसा समगाद्भयविह्वलः॥२९॥ पतितं पादयोर्वीरः कृपया दीनवत्सलः। शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव॥३०॥

निर्मला भूता॥२६॥ सेयं साध्वी अधुना तत्पदन्यासैरुज्झिता रहिता दुर्भगेव भाग्यहीना स्त्रीव शोचन्ती अश्रुकला संततस्रुत नेत्रजलधारा सा इत्यन्वयः।
किं कृत्वा अब्रह्मण्या ब्राह्मणभक्तिरहिता नृपव्याजाः शूद्रा मां भोक्ष्यन्ति पालकमानेन भोक्ष्यन्त इति॥२७॥ अधर्महेतवे अधर्मकारणाय निशातं
तेजितं हंतुमिति शेषः॥२८॥ जिघांसुं हंतुकामं पादमूलं समगात् अंगं विशिष्टतयासीदित्यन्वयः॥२९॥ श्लोक्यः कीर्त्तिकामः॥३०॥

भा.प्र.
९६

गुडाकेशयशोधराणां अर्जुनकीर्त्तिविश्रुतां कौरवाणां मध्ये कमर्थवद्धांजलिर्येन स तथोक्तः। तस्य गुडाकेशयशोधराणां सकाशात् भयं नास्तीति वा किं तर्हि कले त्वया मदीये क्षेत्रे कथंचिदपि न वर्त्तितव्यमित्यन्वयः। देहमारभ्यापि यदि तस्यानविवक्षया क्षेत्र इत्युक्तं कुत इति तत्राह। त्वमिति। अधर्मस्य बंधुर्यस्य स तथोक्तः। अधर्मबंधुत्वादिति भाव॥३१॥ ततश्च किमिति तत्राह। त्वामिति। नरदेवानां धर्मपालकानां राज्ञां देहेषु वर्त्तमानं सन्नि

राजोवाच न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचित्। न वर्त्तितव्यं भवता कथंचित् क्षेत्रे मदीये त्वमधर्मबंधुः॥३१॥ त्वां वर्त्तमानं नरदेवदेहेष्वनुप्रवृत्तोयमधर्मपूगः॥ लोभोनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः॥३२॥ न वर्त्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्त्तितव्ये। ब्रह्मावर्त्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः॥३३॥

धानं त्वामनु नतं अयं लोभाद्यधर्मपूगः प्रवृत्तो भवतीति यस्मात्तस्मात् अधर्मबंधो हे कले तत्तेन धर्मेण च वर्त्तितव्ये ब्रह्मावर्त्ते विंध्यहिमवत्पर्वतयोर्मध्ये पुण्यदेशे न वर्त्तितव्यमित्यन्वयः। लुभ गार्ध्य इति धातोर्लोभः परवित्ताभिलाषः सद्यायेश्वामेस्ववित्तापरित्यागो वा ज्येष्ठा अलक्ष्मीः मायानिकृतिः। यत्र यस्मिन् ब्रह्मावर्त्ते स्वाध्यायादिब्रह्म यज्ञश्चरुपुरोडाशादिद्रव्यलक्षणवितानयज्ञश्च ये जानंते ब्रह्मवितानयज्ञाः मुनयः यज्ञैर्यज्ञेश्वरं यजंति॥३२॥३३॥

राम
९६

यस्मिन्निज्यात्ममूर्त्तिः इज्यातनुः इज्यमानो हरिर्भगवान् यजतां पुंसां शं सुखं तनोति विश्वपं वयति अमोघान्कामानपि तनोतीति किं विशिष्टो हरिः स्थिरजंगमानां अंतर्बहिर्वर्त्तमानः क इव वायुरिवात्मा व्याप्तः ईशः प्रवर्त्तकः॥३४॥ उद्यतं सन्नद्धं दंडपाणिं यममिव स्थितं उद्यतासिं उद्धृतखड्गं॥३५॥ यत्र क्व वा त्वं वृक्षस्थले वा आत्मनीत्यन्वयः लक्षये पश्यामि॥३६॥ हे धर्मभृतां श्रेष्ठ तत्स्थानं निर्देष्टुमर्हसीत्यन्वयः। आतिष्ठन् अनुतिष्ठन् तवैव अनुशासनानि॥३७॥ कानि तानि स्थानानीति तत्राह। द्यूतमिति। द्यूतं देवनं पीयत इति पानं मद्यं। सूना प्राणिहिंसनं। यत्र येषु स्थानेषु चतुर्विधो धर्मः पापं स्यादिति शेषः॥३८॥ जातरूपं सुवर्णं तत्फलमाह। अनृत

यस्मिन् हरिर्भगवानिज्यमान इज्यात्ममूर्त्तिर्यजतां शं तनोति। कामानमोघान् स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा॥३४॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः। तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतं॥३५॥ यत्र क्व वाथ वत्स्यामि सार्वभौम तवाज्ञया। लक्षये तत्र तत्रापि त्वामात्तेषुशरासनं॥३६॥ तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि। यत्रैव नियतो वत्स्य आतिष्ठंस्तेनुशासनं॥३७॥ सूत उवाच अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ। द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः॥३८॥ पुनश्च याचमानाय जातरूपमदात्प्रभुः। ततोनृतं मदं कामं रजो वैरं च पंचमं॥३९॥ अमूनि पंच स्थानानि ह्यधर्मप्रभवः कलिः। औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत्॥४०॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित्॥ विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः॥४१॥ वृषस्य नष्टांस्त्रीन्पादान् तपः शौचं दयामिति। प्रतिसंदध आश्वास्य महीं च समवर्द्धयत्॥४२॥ स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं। पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता॥४३॥ आस्तेधुना स राजर्षिः कौरवेंद्रश्रियोल्लसन्। गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः॥४४॥

इति। ततो द्यूतादिस्थो नृतादीनि पापसाधनानि सचंतीति शेषः॥३९॥ तस्य राज्ञो निदेशकृत् आज्ञाकृत्। अधर्मप्रभवः अधर्मोत्पादकः अमूनि द्यूतादीनि पंच स्थानानि॥४०॥ बुभूषुः भूतिकामः लोकपतिर्लोकपालः गुरुरुपदेष्टा धर्मस्येति शेषः॥४१॥ वृषस्य धर्मस्य॥४२॥ एतर्हि इदानीं पार्थिवानां राज्ञामुचितं आसनं सिंहासनं अध्यास्त इति लङ्लुङर्थः। अरण्यं प्रति त्यक्त्वा परं प्रवनं विविक्षता प्रवेष्टुकामेन पितामहेन पितुः पित्रा युधिष्ठिरेण उपन्यस्तं दत्तं आसनमध्यास्त इति अधिशीङ्स्थासां कर्मेति सप्तम्यर्थे द्वितीया॥४३॥ बृहच्छ्रवाः महाकीर्त्तिः॥४४॥

यस्य क्षोणीं पालयतः सतः यूयं सत्राय यज्ञविशेषाय दीक्षिताः सोऽयमभिमन्युसुतो नृपः इत्थंभूतानुभावः कल्यादिवृषनलरूपेण सामर्थ्याद्येतद्रूपत्वाद्य ॥४५॥ प्रथमे सप्तदशः॥ पुनरपि भगवति भक्तिविधानार्थं तन्माहात्म्यमुच्यते तस्मिन्नध्याये तदर्थं पारीक्षितं स्वर्याणमुपक्रमते यइति। योऽद्भुतकर्मणः श्रीकृष्णस्यानुग्रहाद्द्रौण्यस्त्रदग्धोऽपि मातुरुदरेण न मृतः॥१॥ यश्च ब्रह्मशापोत्थितात् ब्राह्मणशापप्रेरितात् तक्षकनागात् प्राणविप्लवे विलम्बेन नाशे प्राप्ते सति भगवत्यर्पितचित्तत्वात् मरणात् उरुभयात् न सम्मुमोह॥२॥ स परीक्षित्सर्वत्र सर्वपुत्रादिषु स्नेहलक्षणं सङ्गमुत्सृज्य वैयासकेः श्रीशुकस्य शिष्यो भूत्वा तदुपदेशेनात्मयोगं विज्ञानं स्वबिंबरूपं परतत्त्वं परोक्षज्ञानेन अजितात्मपादितां संस्थितिर्मुक्तिर्येन स तथोक्तः। गङ्गायां शरीरं स्वकलेवरं जहौ

इत्थंभूतानुभावोऽयमभिमन्युसुतो नृपः। यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः॥४५॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे सप्तदशोऽध्यायः॥ ॥सूत उवाच॥ ॥यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः। अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः॥१॥ ब्रह्मशापोत्थिताद्यस्तु तक्षकात्प्राणविप्लवे। न सम्मुमोहोरुभयाद्भगवत्यर्पिताशयः॥२॥ उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः। वैयासकेर्जहौ शिष्यो गङ्गायां स्वकलेवरं॥३॥ नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतं। स्यात्संभ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजं॥४॥ तावत्कलिर्न प्रभवेत्प्रविष्टोऽपीह सर्वतः। यावदीशो महानुर्व्यामाभिमन्यव एकराट्॥५॥

विस्मयः॥४॥ नैतदाश्चर्यमित्याह। नेति उत्तमश्लोकस्य वार्त्ताप्रसंगो येषां तेन तथा उत्तमश्लोकस्य वार्त्ता जीविका येषां तेन तथेति वा। तेषां श्रवणपुटेन तस्य हरेः कथामृतं जुषतां श्रवणव्याजेन सेवमानानां तस्य पादपद्मं स्मरतां अन्तकाले मरणकालेऽपि संभ्रमो न स्यादित्यन्वयः। निरन्तरं हरिचरणनिषेवणेनात्मप्रतिकूलरूपसर्वदेहविरहमिच्छतां देहेन्द्रियमरणभयं नास्तीति किं वर्णनीयमित्यपि शब्दार्थः। उत्तमश्लोकवार्त्तादिष्वेकमेवालं मिलितं किमु वर्णनीयमिति वा॥४॥ मदीयराष्ट्रे न वर्तितव्यमिति तस्याभिप्रायः कलेः सामर्थ्यप्रकटनाभाव एव न तु प्रवेशाभाव इत्यभिप्रेत्याह। तावदिति। आभिमन्यवः अभिमन्योः पुत्रः परीक्षिदेकराट् चक्रवर्ती यावद्यावन्तं कालमुर्व्यामास इत्यन्वयः। कीदृशः महान् ईशः समर्थः पूर्वत्प्रभुमेरधिपतिः मंडलेशः इत्यर्थः। तावन्तं कालमिह सर्वत्र प्रविष्टोऽपि कलिः न प्रभवेत् स्वशक्तिप्रकटने समर्थो नाभूदित्यन्वयः॥५॥

कदा च भूमौ कलिः प्रविष्ट इति तत्राह यस्मिन्निति॥६॥ सारंगो मधुकर इव सारभुक् सारग्राही सम्राट् कलिं न द्वेष्टीत्यन्वयः। कुत इति तत्राह। कुशलानीति। कुशलानि सुकृतानि इतराणि पापानि यद्यस्मात्॥७॥ इतोऽप्युदास्त इत्याह। किंन्विति। धर्मज्ञानादिकं हरणेनोति नाशयतीति वृकः। शूरेषु भीरुणा बालेषु शूरेण कलिना किं सुप्रयोजनं॥८॥ उपसंहरति उपवर्णितमिति॥९॥ यद्येयं पारीक्षिती कथा भागवतो गुणकर्माश्रयत्वात्सेव्यासीत्तथान्या अपि तादृशाः कथा मुमुक्षुभिः सेव्या इत्याह। या या इति। कथनीयानि उरूणि कर्माणि यस्य स तथोक्तः तस्य बुभूषुभिर्मोक्षकामैः॥१०॥ सूत यस्त्वं श्रीकृष्णस्य विशदं यशः शंससि सोऽमृतं मरणधर्मिणामस्माकं शंससि हि यस्मात्तस्मात् शीलेन हे सौम्य हे भद्रेति वा सुमाया वत्सेति वा सुमाते महर्षेण आर्या शाश्वतीः समाः बहुवर्षा

यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां। तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः॥६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक्। कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत्॥७॥ किंनु बालेषु शूरेण कलिना धीरभीरुणा। अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते॥८॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया। वासुदेवकथोपेतमाख्यानं यदपृच्छथ॥९॥ या याः कथा भगवतः कथनीयोरुकर्मणः। गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः॥१०॥ ऋषय ऊचुः॥ सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः। यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः॥११॥ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्। आपाययति गोविन्दपादपद्मासवं मधु॥१२॥

न् जीव शतवर्षाद्युपर्यपि प्राणान्धारयेत्येकान्वयः॥११॥ कर्मणोऽज्ञानमातनोतीत्यादिश्रुतिप्रत्ययात् अन्तःकरणशुद्धिद्वारा हरिज्ञानलब्धये यागं परं परामन्याश्वासमस्मिन्ननाश्वासे ज्ञानवसरे। अन्यत्र संगानवसरविधुरे तात एव हरिकथाकर्णने सावसरे। अस्मिन्नुपक्रान्ते सत्रारब्धकर्मणि हविर्दहनधूमेन धूम्रवर्णा आत्मानः अन्तरिन्द्रियजातं येषां तेन तथोक्ताः। कर्मणि बद्धीदर्शिनां तेन धूमेन धूम्रतया पवित्रीकृतशरीराणामस्मीनं बुभुक्षुरंगो विंदपादपद्मासवं आपाययतीत्यन्वयः। पादपद्मादाहृतं इत्यासवं मधु वा अनेन सत्रयागः सफलो जात इत्युक्तं भवति॥१२॥

दीर्घकालीनसत्रकरणमंतरेणाल्पकालीनयज्ञकरणेन धूम्रध्वांतः करणानस्मान्नानाम्नाहः सुकरमित्याशंक्याह। तुलयामेति भगवत्संगिनो वैष्णवानां संग
स्य सेवालक्षणस्य सकाशाद्यत्सुखं तस्य लवेनापि लवलक्षणकालावच्छिन्नभागेन सह स्वर्गं दुःखासंभिन्नप्रदेशनाकलक्षणमपुनर्भवं कैवल्यसम्पत्स्व
रूपाभिव्यक्तिजननाभावलक्षणं न तुलयाम तुलयितुं न प्रभवामः लड् अर्थे लोट् प्रार्थनायां वा मर्त्यानां मर्त्यशरीरभोगाः सन्त्यादिस्तेयदः किमुत न तुलया
मेति किं वक्तव्यं सायुज्यादिविशिष्टफलहेतुत्वेनोत्तरंगत्वात् सममित्यर्थः। ह्रिविमुक्तौ तत्र नेतरं स्वर्गं स्वर्गादितिरिक्तफलविशेषाभावाच्चिरसमयस्य संकीर्ण
महत्सेवादिलक्षणं संगस्यातिसुखहेतुत्वेन तस्य चेह दीर्घसत्रकरणव्याजेन संभवादिदमेव सर्वैरनुमतम् इति सुक्रमेनेति भावः ॥१३॥ श्रुतत्वाद्भगव

तुलयाम लवेनापि न स्वर्गं नापुनर्भवं। भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥१३॥ को नाम तृप्येद्रसवित्क
थायां महत्तमैकांतपरायणस्य। नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥

त्कथानामप्यस्माकं न तत्कथायामलंबुद्धिरित्याशयेनाह। को नामेति। ये तु भवपाद्ममुख्याः भवः शिवः पाद्मो ब्रह्मा तौ मुख्यौ ये
षां ते तथोक्ताः योगेश्वराः तन्त्रदधिकारिणोऽप्यमी ज्ञोपायोपदेष्टृप्रधानाः सेऽप्यगुणस्य सत्त्वादिगुणरहितस्य सर्वकार्यप्रधानस्य वा यस्य ज्ञा
नस्य गुणानामंतमवसानं न जग्मुः को नाम पुमांस्तस्य मुक्तामुक्तब्रह्मादीनां महत्तमानामेकांततो नियमेन परायणस्य उत्तमाश्रयस्य महत्तमे
भ्यः एकांततः परा या उत्कृष्टा यावः श्रियोऽप्ययनस्य वा हरेः कथायां तृप्येदलंबुद्धिमाक्रयादित्यन्वयः। कीदृशः रसवित् सारज्ञानी स्वादुविद्वान्
॥१४॥

ततः किमिति तत्राह। तन इति। अलंबुद्धिर्नास्तीति यतस्ततो हे विद्वन् भगवतां मोऽभ्यवतां पुंसां प्रधानो भवान् हरेरुदारं चरितमस्माकं वितनोतु विस्तारय
त्वित्यन्वयः। भगवान्प्रधानो यस्य मते स तथेति वा महत्तमश्च एकांतश्च परायणश्चेति महत्तमैकांतपरायणाः महतां ब्रह्मादीनामतिशयेन श्रेष्ठः अंते च
लये एक एव नहि द्वितीयाः शिवपाशुक्तास्ते बा मा आश्रयः। शुश्रूषतामित्यनेन श्रवणशीलत्वं स्वालाविकमिति दर्शयति ॥१५॥ हरेरुदारचरितानामनंतत्वात्तेषां मध्ये
किं वक्ष्यामीति प्रश्नोमाभूदित्यभिलषितचरितमिदमित्याह। तन्न इति। तदाख्यानमस्माकं आख्याहि त्वमित्यन्वयः। परं मुख्यं पुण्यं पुनानं असंवृतः स्प
ष्टोऽर्थः पुरुषार्थो यस्मात् इति तत्तथोक्तं तत् अत्यद्भुतानां योगानां रक्तिज्ञानादिलक्षणानां निष्ठा प्रतिपाद्यतया नितरां स्थितिर्यस्मिंस्तत्तथोक्तं तत्काल

ततो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य। हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥१५॥ तन्नः परं पुण्यमसं
वृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं। आख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभिरामं ॥१६॥ स वै महाभागवतः परीक्षिद्येना
पवर्गाख्यमदभ्रबुद्धिः॥ ज्ञानेन वैयासिकिशब्दितेन भेजे खगेंद्रध्वजपादमूलं ॥१७॥ सूत उवाच। अहो वयं जन्मभृतोऽद्य हास्म
वृद्धानुवृत्त्यापि विलोमजाताः। दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥१८॥

तो देशतश्चानंतस्यापरिच्छिन्नस्य हरेश्चरितेनोपपन्नं सहितं तथा पारीक्षितं परीक्षित्संबंधि भागवतानामभिरामं मनोहरं भागवताः अभिरमंते स्मिन्निति
ति वा भगवत्संबंधित्वाद्वाभिरामं ॥१६॥ तत्किमिति तत्राह। स वा इति। अदभ्रबुद्धिः पूर्णज्ञानः महाभागवतः परीक्षिद्व्यासकिनाश्री शुकेन शब्दिते
नोपदिष्टेन श्रुतेन ज्ञानेन येनापवर्गाख्यं खगेंद्रध्वजस्य गरुडध्वजस्य पादमूलं भेजे इत्यन्वयः। वाइत्यनेनाख्यानस्य दृष्टसाधनाववोधकत्वेनोपादे
यत्वं दर्शयतीति ॥१७॥ हे महात्मन् शौनक विलोमजाताः हीनजन्मानोऽपि वयं ज्ञानवृद्धानामनुवृत्त्यासेवया जन्मभृतः सफलजन्मानो भूमेत्यन्वयः। अ
हो आश्चर्यं अस्मद्भाग्यं कुतः महत्तमानामभिधानं गोष्ठी तस्य योगः संबंधः अभिधानेन नाम्ना योग इति वा दुष्कुलोत्पत्तिनिमित्तं दौष्कुल्यमाधिं मनोदुः

कैमुत्यमाह। कुतइति। महत्तमैकांतपरायणस्यतस्यहरेर्नामगृणतः पुंसः आधिं विधुनोतीति कुतः पुनः किंवक्तव्यमित्यन्वयः। अनंतात्रपरिमिताः शक्तयो यस्यसतथा देशादितः परिच्छेदेन विद्यते यस्यसोनंतः योभगवाननंतशक्तिरनंतश्चनकेवलंतावद्भ्रामानं गुणानंत्यमप्यस्तीत्याह महदिति महांतो गुणाः महद्गुणाः तेषांभावः महद्गुणत्वं तस्माद्धेतोः समत्वान्महद्भूतस्यमहादेशाभावः। यंभगवंतमनंतं गुणतः परिच्छेदरहितंसंतं ज्ञानमनंतमित्यादिवेदांताआहुरित्यन्वयः ॥१९॥ प्रार्थयतः कराट्टमोरूमितिशेषः इतरान्ब्रह्मादीन्हित्वाकटाक्षवीक्षामकृत्वाविभूतिर्महालक्ष्मीः

कुतः पुनर्गृणतो नामतस्यमहत्तमैकांतपरायणस्य। योनंतशक्तिर्भगवाननंतोमहद्गुणत्वाद्यमनंतमाहुः ॥१९॥
एतावतालंननुसूचितेनगुणैरसाम्यानतिशायिनस्य। हित्वेतरान्प्रार्थयतोविभूतिर्यस्यांघ्रिरेणुंजुषतेनभीप्सोः ॥२०॥

स्वरतत्वादनभीप्सोरनिच्छोर्यस्यहरेरंघ्रिरेणुमनवरतंजुषतेसेवते तस्यास्यहरेरसाम्यअद्वितीयत्वेतथागुणैरनतिशायिने आधिक्यरहितेसर्वोत्तमत्वे वसूचितेनलक्ष्मीपतिरित्येतावताअलंनद्वितीयेकान्वयः। अहमेववस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषेभिः। श्रीमन्नंदकराट्टलब्धविभवब्रह्मेंद्रगंगाधरमित्यादिश्रुतिस्मृतिशतेरितरेषामशेषाणांलक्ष्म्या अवरत्वाल्लक्ष्मीपतित्वं विष्णोः सर्वोत्तमत्वेयुक्तिरितिभावः ॥२०॥

अथसर्वोत्तमत्वाद्वितीयत्वसमर्थनस्यबहुयुक्तिसंदृष्टत्वप्रकटनायेदमपिभवतीत्याह। अथापीति। यस्यपादनखादवसृष्टंविगलितंविरिंचेनब्रह्मणाउपहृतंसमर्पितमर्हणंतत्तः अर्घ्यजलेश्रीपादावनेजनोदकमितियावत् रुद्रेणसहवर्तमानं सजगच्चतुर्दशभुवनं पुनातियस्मादयन्तस्माल्लोकेभुवनेमुकुंदादन्यःप्रसन्नारायणाद्न्यतमः अन्यः स्वाधितमपृष्ठस्ययः कोनामभगवत्पदार्थः निरतिशयज्ञानादिगुणवत्तयाभगवानिति नामवाच्योस्तिसर्वथांतद्व्यक्तत्वात्रकोप्यस्तीत्यर्थः। अनेनविरिंचप्रमुखत्वशिवप्रभृतिकर्तीर्थपदत्वभगवन्नामवाच्यत्वाद्वितीयत्वानिसर्वोत्तमत्वसूचकानीतिज्ञातव्यं ॥२१॥

अथापियत्पादनखावसृष्टंजगद्विरिंचोपहृतार्हणांभः। सेशंपुनात्यन्यतमोमुकुंदात्कोनामलोकेभगवत्पदार्थः ॥२१॥
यत्रानुरक्ताः सहसैवधीराव्यपोह्यदेहादिषुसंगमूढं। व्रजंतितत्पारमहंस्यमंत्यंयस्मिन्नहिंसोपशमस्स्वधर्मः ॥२२॥

मुकुंदत्वंविहृणोति। यत्रेति। यत्रमुकुंदेअनुरक्ताः स्निग्धाः धीराः विषयवार्तानिहताया बुद्धेरतारः संतोदेहादिषूढंप्ररूढंसंगंस्नेहलक्षणं सहसाविमृश्यज्ञानेनव्यपोह्य निरस्यतत्परमहंसाश्रमप्राप्यसत्वं साधुगुणायुक्तं ब्रह्ममुकुंदाख्यंव्रजंतियस्मिन्परमहंसाश्रमेअहिंसाविहितातिरिक्तहिंसावर्जनमुपरमउरुद्रूपातिपिदतिहिंस्त्रीतिवाउपाविष्णुः। सर्वाधिकस्तस्मिन्नुहरौरमोरमणंरतिर्विषयनिवृत्तिर्वाधर्मोविहितइतिशेषः। अनेनमुक्तिदानमपिसर्वोत्तमत्वद्योतकमितिसूचितंभवति ॥२३॥

आख्याहीति शौनकप्रश्नोत्तरं वक्ति। अहं हीति। अस्य हरेर्गुणान्वक्तुं भवद्भिः पृष्टोऽहमत्र हरिगुणेषु यावानात्मावगमः आत्मनो मज्ज्ञानं तावत् आचक्षे व्याक
रिष्ये गुणानामनंतत्वात्कस्यापि सर्वात्मना ज्ञातुं शक्तिर्नास्तीत्येतदर्थं हि शब्देनाहं न केवलमहमेवाशक्तः किंतु अतीतानागतवर्तमाना ब्रह्मादयः
सर्वेप्येवमेव हरिगुणविषय इति सोदाहरणमाह। नभ इति। यथा पतत्त्रिणः पक्षिणः नभः आत्मसमं स्वशक्त्यनुसारेण पतंति शक्त्यभावादेव
परमं तिन नभोऽवसानादनंतत्वादस्य तथा ब्रह्मादयो विपश्चितो ज्ञानिनो विष्णुगतिं विष्णुज्ञानं प्रति समं आत्मशक्त्यनुसारेण यंति ते शक्त्यभावादुप
रमंति न गोविंदगुणानां मितत्वादिति भावः॥२३॥ पारीक्षितमाख्यानं वक्तुं तस्य निर्वेदनिमित्तब्रह्मशापं वक्तुमुपक्रमते एकदेति। धनुरुद्यम्य सज्जं

अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान्। नभः पतंत्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः॥२३॥
एकदा धनुरुद्यम्य विचरन्मृगयां वने। मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं॥२४॥ जलाशयमचक्षाणः प्रविवेश तमाश्रमं। दद
र्श मुनिमासीनं शांतं मीलितलोचनं॥२५॥ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं। स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम्॥२६॥

कृत्वा प्रगृह्य मृगया मृगव्यमुद्दिश्य वने विचरन्॥२४॥ जलाशयं न लाघारं तटाकं। विशेषं अपश्यन् आलोच्य परस्परं संपरीक्षित आश्रमं आलस्यपरिहारकारणम
न विशेषं प्रविवेशेत्यन्वयः। शांतं असंप्रज्ञातसमाधिस्थं किंचिन्मीलितनेत्रं॥२५॥ प्रतिरुद्धाः परमात्मन्येव संनिधापिताः श्रोत्रादीनींद्रियाणि प्राण
श्च मनश्च बुद्धिश्च येन स तथोक्तः तं प्राणरोधः कुंभकेश्वासरोधः वेद्यानि वृत्तिर्वा अत एव शब्दादिज्ञानेभ्य उपारतं तत्तदेवस्पष्टयति। स्थानेति। जाग्रदा
दिस्थानत्रयात्परमतीतं तुरीयं हरिं प्राप्तं अत एव ब्रह्मणि भूतं प्रयत्नमंतरेण स्वत एव मनसोऽस्य विंदरूपं परमात्मानमनुभवंतं अत एवाविक्रियं नि
श्चेष्टं निवातस्थदीपोपमं विरुद्धक्रियारहितं वा॥२६॥

विप्रकीर्णाभिर्जटाभिः छन्नं संवृतं रुरोः कृष्णमृगस्य विद्यमानेनाजिनेन च संवृतं आसीनं वा विशुष्यत् नीरसं तालु जिह्वामूलं मूर्धा जिह्वा यस्य स तथा
स परिक्षित्तथाभूतं एवंविशिष्टं मुनिं उदकमयाचत प्रार्थितवानित्यन्वयः॥२७॥ स राजा चुकोपेत्यन्वयः। तस्मा इति शेषः। अलब्धं तृणभूम्यादि येन स त
थोक्तः। आदिशब्देन मधुपर्कादि गृह्यते स्वागतमित्यादि प्रियवचनं सूनृतं तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता इति स्मृतेः। आत्मानं मुनिना वज्ञातमिव
मन्यमानः। क्षुधादिनिमित्तोऽयं कोप इत्याह निर्थं हि शब्दः इतिहासद्योतको वा॥२८॥ तस्य परीक्षितः ब्राह्मणं प्रतिमन्युरभूत् न केवलं मन्युः किंतु मत्सरश्चाभूदि
त्यन्वयः। मन्युरेव न प्रसादश्च एवशब्दार्थः मत्सरो नाम यमहं शद्रस्य प्रीति श्च कीदृशः अभूतपूर्वः इतः पूर्वमनुत्पन्नः कीदृशस्य क्षुत्तृड्भ्यामर्दितात्मनः पीडितमा

विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च। विशुष्यत्तालुरुदकं तथाभूतमयाचत॥२७॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घ्यसूनृतः। अवज्ञा
तमिवात्मानं मन्यमानश्चुकोप ह॥२८॥ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः। ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च॥२९॥ स तु ब्र
ह्मर्षेरंसे गतासुमुरगं रुषा। विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागमत्॥३०॥ एष किं निभृताशेषकरणो मीलितेक्षणः। मृषासमाधिराहो
स्वित्किं न स्यात्क्षत्रबंधुभिः॥३१॥ तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः। राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत्॥३२॥

नसस्य॥२९॥ शापनिमित्तमाह। स इति। स राजा तस्य ब्रह्मर्षेः स्कंधे गतासुं मृतं सर्पं धनुष्कोट्या निधाय पुरमागादित्यन्वयः॥३०॥ पुरमागच्छन् तस्य आलोचनप्रका
रमाह। एष इति। एष मुनिः विषये स्वः प्रत्यक्षमुखतया निभृताशेषकरणः परतत्त्वविषयी कृतसकलेंद्रियः मीलितेक्षणः किं नोऽस्माकं क्षत्रैर्बंधुभिः किं
स्यादिति मृषासमाधिर्मीलिते क्षणः आहोस्विदिति मनसा पितर्कयन्पुरमगादिति पूर्वेणान्वयः॥३१॥ अतस्य ब्रह्मर्षेः पुत्रः शृंगी नामकः तत्रेदमब्र
वीदित्यन्वयः। इदमिति वक्ष्यमाणं किं कृत्वा राज्ञा परीक्षिता अघं अपराधं प्रापितं तातं पितरं श्रुत्वा अश्रुवितां प्रापितमिति वा। अतितेजस्वी त्वनेन शापदा
नसामर्थ्यमस्यास्तीति दर्शितं। अर्भकैर्बालैः सह विहरन्वयसा बालः न तु सामर्थ्येनेत्येतद्दर्शितं कप्रत्ययेन॥३२॥

किमाहेतितत्राह। अहोइति बलिभुजांकाकानामिव पुष्टानां पालानांराज्ञां अधर्मोऽन्यायो यद्दासाभिर्दुष्टः अहोकष्टंयस्मात्तत्कृतइतितत्राह स्वामिनीति शुनां स्वामिन्यघमिव ब्राह्मणदासो नातद्गृहद्वारपानां राज्ञां संप्रति स्वामिनि ब्राह्मणे द्यघमिति यत्तस्मादिति ॥३३॥ राज्ञां विप्रदासत्वं कथमिति तत्राह। ब्राह्मणैरिति। ब्राह्मणैर्दासवत्पाद्वारपालो निरूपितः सराजा तस्य विप्रस्य गृहे द्वास्थो द्वारपालः कथं सभांडं भांडेनसह वर्त्तमानं गृहे भोक्तुं नाशयितुमर्हति नार्हति वहियस्मात्तस्माद्दंडोस्वामिना दंड्य इत्यर्थः ॥३४॥ तर्हि संप्रतिको दंडकर्त्तेत्यत इति तत्राह। कृष्णइति। उत्पथगामिनां विहितमार्गपरित्यागगच्छतां शास्तरि कृष्णे भगवति गते भिन्नसेतून् लंघितमर्यादांस्तान् अद्याहं शास्मि दंडयामीत्यन्वयः। मे बलं सामर्थ्यं पश्यत हे बालाः इति शेषः ॥३५॥ सचदंडःकः

अहो अधर्मः पालानां पुष्टानां बलिभुजामिव। स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥३३॥ ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपितः। स कथं तद्गृहे द्वास्थः सभांडं भोक्तुमर्हति ॥३४॥ कृष्णे गते भगवति शास्तर्युत्पथगामिनां। तान् भिन्नसेतूनद्याहं शास्मि पश्यत मे बलं ॥३५॥ इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकः। कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥३६॥ इति लंघितमर्यादं तक्षकः सप्तमेहनि। धक्ष्यति स्म कुलांगारं चोदितो मे पितृद्रुहं ॥३७॥

दृष्ट इति तत्राह। इतीति। रोषताम्राक्षः रक्तनेत्रः कौशिकी कुशपाणिः अप उपस्पृश्य आचम्य वाग्वज्रं शापलक्षणं विससर्ज दत्तवान् राज्ञ इति शेषः। इतिहासद्योतकेन हशब्देन कौशिकी नदी तस्या अप उपस्पृश्येत्यपव्याख्यानमपहस्तितमिति ज्ञातव्यं ॥३६॥ इतो द्योतनादङ्कः सप्तमेहनि मया चोदितः प्रेरितः तक्षकः सर्पविशेषः लंघितमर्यादं कुलांगारं कुलनाशकं मम पितृद्रुहं परीक्षितं नाम राजानं धक्ष्यति स्म दग्धं कुर्यादित्येकान्वयः। धक्ष्यतीति लृट् स्म शब्द सामर्थ्याल्लोडर्थो बोध्यः। आगमवत प्रधानराजदहनेपि सामर्थ्यद्योतनाय वा व्यत्ययः ॥३७॥

आश्रमं गतः ततः गले सर्पकलेवरं अर्पितसर्पशरीरं पितरं दृष्ट्वा मुक्तकंठः उच्चैरुरोद तत्त्वयः। समाधिस्थो वा चानेवो वृषभी यद्रत्वतो रोदनमुच्चैः कृतमिति अर्थद्योतको हशब्दः ॥३८॥ वै अपि आंगिरसकुलोत्पन्नः सः शमीकोपि सुतस्य विलापितं रोदनं ॥३९॥ उरगं सर्पं परिहृत्य कस्माद्धेतोः विशेषि पीतिमुत्रं पप्रच्छेत्यन्वयः। विप्रकृतं विपरीतं कृतं ॥४०॥ अतदर्हं तस्य शापस्यार्हो योग्यो न भवतीत्यतदर्हः तं न केवलं नाभ्यनंदन्निंदयेसाहा अहो इति अंहः पापं वत खेदे। अल्पीयसि अणुतरे द्रोहे अपराधलक्षणे उरुरत्यो महादंडः ॥४१॥ कुतः अनिंदत्व इति तत्राह। नवाइति। नराणां देवार

ततो भ्येत्याश्रमं बालो गले सर्पकलेवरं। पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ॥३८॥ स वा आंगिरसो ब्रह्मन् श्रुत्वा सुतविलापितं। उन्मील्य शनकैर्नेत्रे दृष्ट्वा चांसे मृतोरगं ॥३९॥ विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि। केन वा ते विप्रकृतमित्युक्तः स न्यवेदयत् ॥४०॥ निशम्य शप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत्। अहो बतांहो महदद्य ते कृतमल्पीयसि द्रोह उरुर्दमो धृतः ॥४१॥ न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे। यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः प्रजाः ॥४२॥ अलक्ष्यमाणे नरदेवनाम्नि रथांगपाणावयमंग लोकः। तदा हि चोरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणोविवरूथवत्क्षणात् ॥४३॥

नात दधीने दृभिः नापराध्य इति दुर्विषहेण यस्य राज्ञस्तेजसा गुप्ता रक्षिता नाकुतोपिभयं पासां ताः अकुतोभयाः प्रजाः भद्राणि विंदंति लभंत इति। वेयतः वक्तु श्रेयो विवक्षया भद्राणीति वक्तुवचनं ॥४२॥ बाधकं चाह। अलक्ष्यमाण इति। नरदेवांतर्यामित्वात्तरदेवनाम्नि रथांगपाणौ विष्णौ अलक्ष्यमाणे पालनमकुर्वाणे सति तदानीमेवायं अरक्ष्यमाणः अपाल्यमानः चोरप्रचुरः लोको जनो विवरूथवत् रक्षारहितसेनावत् क्षणाद्विनंक्ष्यति हीमकाचयः। सेना रक्षावरूथः स्यादवरोधो निवेशनमित्यभिधानं ॥४३॥

नष्टनाथस्य पालकरहितस्य पशोः राष्ट्रस्य कोऽर्थः विलुंपकाः नाशकाः इति यद्यस्मात्तस्माद्द्यनोऽस्माकं अनन्वयमनुपमं अन्वयविरोधि संततिनाशकं वा पापमुपैतीत्यन्वयः। उक्तमेव विवृणोति। परस्परमिति। घ्नंति हिंसंति। वृंजते अपहरंति छिंदंतीति वा दस्युर्हिंसायामिति धातोः नागरनाशकाः। पुरु गतावितिधातो रितःस्ततो पाठाविप्रकारावावभून् घ्नंति स्त्रियः शपंति उपालभंते धर्षयंति अर्थान् वृंजंत इति विवेकः॥४४॥ तत्परिपाकमाह। तदेति यदा पश्चादिहेत्वशिष्टा न क्रियते तदार्याणां शिष्टानां संमतो धर्मो धर्मविधि कृतानामनुष्ठातॄणां विलीयते क्रमेण ह्रसितः स्थिरो भवति वक्ष्यते दृशः। त्रयात्रिभिर्वेदैर्मीयते ज्ञायते प्रतिपाद्यत इति त्रयीमयः। अत एव वर्णाचारैराश्रमाचारैश्च युतः। धर्मलयपरिपाकमाह। तत इति। ततः वर्णाश्रमाचारयुतवैदिकार्थधर्मनाशानंतरं क

तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य पशोर्विलुंपकात्। परस्परं घ्नंति शपंति वृंजते पशून्स्त्रियोर्थान्पुरुदस्यवो जनाः॥४४॥ तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः। ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः॥४५॥ धर्मपालो नरपतिः स तु सम्राड्बृहच्छ्रवाः। साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् क्षुत्तृट्श्रमान्वितो दीनो नैवास्मच्छापमर्हति॥४६॥

न कार्यर्थेषु स्रक्चंदनवनितादिभोगलक्षणेषु कामेषु च अभिनिवेशित आत्मा मनो येषां ते तथोक्ताः तेषां पुंसां यथा शुनां कपीनां च भक्षणभोगादाव व्यवस्था तथा हीनजातीनामुत्तमजातिभिरुत्तमजातीनां हीनजातिभिर्भोगसंभोगादिना वर्णानां संकरः कलुषीभावो भविष्यतीत्येकान्वयः॥४५॥ परीक्षितो दुष्टत्वेन चिंतं देवकथमिति तत्राह। धर्मपाल इति। अत्र धर्मपालादिविशेषणानि हेतुगर्भाणि। धर्मपालत्वान्महाभागवतत्वाद्राजर्षित्वाद्धयमेधयाजित्वाच्च सम्राट् न तु द्रोतः क्षुत्तृट्श्रमान्वितत्वेन बुभुक्षापिपासादीनोऽस्मदाश्रममागतो धीदिष्ट्याजायेस्यानेवास्मत् अस्मत्तः शापमर्हतीति तस्मादनिवार्यमद्यमापन्नमिति भावः। हयमेधैरश्वमेधैरिष्टवानिति हयमेधयाट्॥४६॥

इत्थमद्य स्वपितृद्रोहेत्यमापाद्यानुतापपूर्वकं तदघनिष्कृतिं करोति। अपापेष्विति। सर्वात्मा सर्वांतर्यामी श्रीनारायणः बालेन स्वभृत्येषु कृतं तत्पापं क्षंतुमर्हतीत्यन्वयः॥४७॥ अस्मदाश्रममागतो वज्ञातः परीक्षित्तद्भक्तेषु अपि न तत्प्रतिकुर्वन्ति इत्याशयेनाह। तिरस्कृता इति। तिरस्कृता निंदिताः विप्रलब्धा वंचिताः शप्ताः उपालब्धाः क्षिप्ता अधिक्षिप्ताः हताः ताडिता अपि शब्दः प्रत्येकमभिसंबध्यते प्रभवोऽपि प्रतिकर्तुं समर्था अपि प्रतिशापं कर्तुं वा तद्भक्ता हरेर्भक्ताः अस्य तिरस्कारादिकर्तुः संबंधि तत्तिरस्कारादि दुरितं न प्रतिकुर्वंति प्रतिक्रियां नैव कुर्वंतीत्यर्थः। हिशब्देन त्वमाबलमशक्तानां शक्तानां भूषणं क्षमेति प्र

अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना। पापं कृतं तद्भगवान्सर्वात्मा क्षंतुमर्हति॥४७॥ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोऽपि हि ४८ इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः। स्वयं विप्रकृतो राज्ञा नैवाघं तदचिंतयत॥४९॥ साधवः प्रायशो लोके परैर्द्वंद्वेषु योजिताः। न व्यथंति न हृष्यंति यत आत्मागुणाश्रयः॥५०॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे अष्टादशोऽध्यायः॥ ॥

सिद्धिं दर्शयति॥४८॥ तस्य द्योतेन राज्ञा कृतमपराधं महामुनिरिति हेतुगर्भं विशेषणं सर्वज्ञत्वमत्वा च्छरीराभिमानिन एव दुःखादि प्राप्याकोपोत्पत्तिर्न त्वस्ते प्रज्ञा तस्माधेनास्य पश्चात्पानीयवदश्लिष्टदुरितत्वादिपादिविशेषज्ञत्वादित्यर्थः॥४९॥ साधूनामयं स्वभाव इत्याह। साधव इति। द्वंद्वेषु सुखदुःखादिषु योजिताः संगमिताः साधवः यथास्थितवस्तुदर्शिनः। कुतो व्यथाद्यभाव इति तत्राह। यत इति। आत्मा गुणाश्रयः इत्यस्याकारप्रश्लेषाप्रश्लेषाभ्यां पदच्छेदः कर्तव्यः गुणाश्रया गुणस्पर्शरहितस्वरूपा आत्मा कर्ता जीवः स्वयमेवाश्रयः। तत्तस्मादिति॥५०॥ इति प्रथमे ष्टादशः॥ ॥

विमुक्तिसाधने तु प्रथमोपाद्यसाधनत्वेन वैराग्यमवश्यमापाद्यं मुमुक्षुणेति परीक्षिच्चिंताकथनापदेशेन तत्प्रतिपाद्यते अस्मिन्नध्याये॥ ननु परीक्षितो धर्मपालत्वादिकं न युज्यते नृशंसवन्नीचकर्मकरणात् पश्चात्तापानुदयाच्चेत्याशंकापरिहारत्वेनाह। महीपतिरिति। मुनेः स्कंधे मृतसर्पशरीरार्पणलक्षणमात्मनाऽनुष्ठितं यत्कर्म तच्चिंतयन् सुदुर्मनाः सुष्ठु दुःखितमनाः अभूदिति शेषः। तु शब्दः ईश्वरेच्छाधीनत्वं दर्शयति। श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुरा इति स्मृतेः। न त्वस्मिन्विषये अनुष्ठितं कुतः येन महती चिंता संसाध्यते इत्यत आनुष्ठितमेवेत्याह। अहो इति। मया निरागसि निरपराधे गूढतेजसि अप्रकाशिततेजोबले तस्मिन् ब्राह्मणे अनार्यवन्मूर्खवन्नीचं कर्म कृतं अहो कष्टमिति महीपतेः कर्मणो गर्ह्यत्वद्योतनाय ब्राह्मणीति सोऽप्यपराधी स्यात् कथं

सूत उवाच

महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः। अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥१॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात्। तदस्तु कामं मम घनिःकृताय मे यथा न कुर्यां पुनरेवमद्धा ॥२॥

चित्तघटत इत्यतो निरागसीति प्रतिक्रियासामर्थ्यप्रकटनाय गूढतेजसीति ब्रह्म वेदः तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिरित्यभिधानात्। ब्राह्मणेनापवंतव्यो निरागाश्च विशेषत इति वचनात्॥१॥ तद्वदुष्कृतमपरिहार्यविपत्तिकरमिति चिंतयतीत्याह ध्रुवमिति। ब्राह्मणस्यास्य अवज्ञाविक्षोरेव ज्ञेयत्वात् तस्मात्तस्माद्देवस्य हरेर्हेलनादवज्ञानात् ध्रुवमवश्यं दुरत्ययमत्येतुमशक्यं व्यसनं दुःखं नातिदीर्घात् चिरेण मम भविष्यतीत्यन्वयः। तद्व्यसनं मन साभ्युपगच्छतीत्याह। तदिति। अघनिष्कृताय पापशाय शुद्धिनाय तद्व्यसनं कामं अस्तु कुतः अद्धा निरंकुशतया अहं पुनरेवंविधमघं यथा न कुर्यां तथास्त्विति शेषः ॥२॥

नौपचारिकमिदमांतरमेवेत्यभिप्रेत्य तदेवाह। अद्यैवेति। प्रकोपितब्रह्मकुलमेवानलः वह्निर्दाहे प्रबलं बुद्धिर्नाशीत्यनलः मे मदीयत्वेन अभिमतं राज्यादिकमद्यैव कालक्षेपमंतरेण दहतु भूयः अभद्रस्य मे द्विजदेवतासु पापीयसी बुद्धिर्नाभूत् न भूयादित्यन्वयः। अभूदिति मत्यघोरा राज्ञो महत्त्वनुतापसूचनायेति ज्ञातव्यं द्विजाश्च देवताश्च द्विजदेवताः द्विजेषु सन्निहिता देवता वा द्विजरूपदेवता वा तासु अभद्रस्य मंगलस्य नविद्यते तादी न्निर्य्यर्वाते अतास्तान् द्रातिकुत्सयतीत्यभद्राकुत्साया मिति धातुः तद्वत् ज्ञानमज्ञानं यस्य स तथेति वा। द्रा निद्रा या मिति धातुः तस्य॥३॥ अथेत्थं चिंतयन्सपरीक्षित्तस्य तक्षकाख्यान्मुनेः सुतोक्तात् सुतेनेरितात् विकृतिं कृतापराधपरिहारं देहवियोगलक्षणं यथावदशृणोदित्यन्वयः। आकर्ण्य किमकार्षीदित्यत्राह। स इति सवाकर्णितकाद

अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवतासु ॥३॥ सं चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः। स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणं ॥४॥ अथो विहायेमममुं च लोकं विमर्शितौ हेयतया पुरस्तात्। कृष्णांघ्रिसेवामभिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ॥५॥

विरेण मरणं राज्यादिषु अत्यंतप्रसक्तस्य विरक्तिकारणमभूदिति साधु मेने इत्यन्वयः॥४॥ संसमस्त्राट् कस्य वा हेतोरिति शौनकप्रश्नं परिहरति। अथो इति। अथो ब्रह्मशापाकर्णनसमनंतरमेव ममायं शापोऽपि विरक्तिहेतुत्वात्साधुरिति मत्वा जः पुरस्तात्प्रथमं तावदिहलोकपरलोकाववनित्यत्वदुःखमिश्रत्वादिना हेयतया विमृश्य पाधिराट् श्रीसुतमिमं भूलोकं तथा अमुं स्वर्गलोकं च निर्विद्य विहायास्मिन्संसारे कृष्णांघ्रिसेवैवात्यंतिकदुःखनिवृत्तिसुखसाधनत्वात् कर्तव्येति च विमृश्य तामेव ध्रियमाणस्यात्मनः कर्तव्यामभिमन्यमानः परीक्षित् अमर्त्यनद्यां गंगायां प्रायमुपाविशत् प्रायो वह्निर्जीवमनशनव्रतं वकारोऽस्य न्वयः ॥५॥

किमितिगंगायामेवप्रायोपवेशोन्यत्रापिकिंनस्यादितितत्राह।यावाइतिलसंतीश्रीमतीतुलसीलसच्छ्रीतुलशीब्रह्मज्ञानेनतुलांसिनोतीतितुलशी
ब्रह्मज्ञानसदृशीब्रह्मज्ञानस्यसंसारनिवर्तकत्वंयथाहातथंतदस्याअप्यस्तीतितत्सदृशी।तनोतिकरोतिमोक्षादिपुरुषार्थमितितुर्विष्णुप्रत्रलस
तीतिवातुलसीतस्यामंजरीरजोभिर्विमिश्राः कृष्णस्यांघ्रिरेणवःतैः सहाधिकानियाम्बूनिजलानितेषांनत्रीलसच्छ्रीतुलशीमंजरीरजोभिर्विमि
श्रश्रीकृष्णचरणरेणुसमाधिगतमाहात्म्यात्स्वधिकसलिलप्रवाहाकुलेसर्थः।बावातएवाशेषान्लोकानुभयत्रांतर्बहिश्चपुनातिउतयत्रइहलोके
शिष्टव्यवहारयोग्यतालक्षणांशुद्धिंपरलोकेनरकमाप्त्यादिनिवर्तनलक्षणांकरोतीतिवा।अतोमरिष्यमाणःपुमान्कस्तांगंगांनसेवेत६अतो

याचेलसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री॥पुनातिलोकानुभयत्रसेशान्कस्तांनसेवेतमरिष्यमाणः॥६॥
इतिव्यवस्यायप्रपांडवेयः प्रायोपवेशंप्रतिविष्णुपद्यां।दध्यौमुकुंदांघ्रिमनन्यभावोमुनिव्रतोमुक्तसमस्तसंगः॥७॥
तत्रोपजग्मुर्भुवनंपुनानामहानुभावामुनयःसशिष्याः।प्रायेणतीर्थाधिगमापदेशैःस्वयंहितीर्थानिपुनंतिसंतः॥८॥

मरिष्यमाणोहंतीर्थात्तममेत्वाहिविष्णुपद्यांगंगायामनशनव्रतंकरिष्यइतिप्रायोपवेशंप्रतिव्यवस्थायनिश्चित्यानन्यभावोनन्यवतारज्यभारादि
चिंतारहितांतःकरणोविमुक्तचेतामुनीनांनिवृत्तानांज्ञानिनांव्रतमिवव्रतंयस्यसमुनिव्रतःवाचालत्वरहितोवाअतएवमुक्ताःसमस्ताःसंगाःपु
त्रादिविषयस्नेहायस्यसमुक्तसमस्तसंगः।युक्तेहरोसमस्तसंगःश्रोत्रादीद्रियैस्तत्प्रसंगमंतरेणतत्कथाश्रवणादिप्रसंगोयस्यसतथेतिवासर्पा
इवेयः परीक्षितविष्णुपद्यांप्रायोपवेशंप्रतिष्ठितःमुकुंदेतदंघ्रिंवएवदध्यावित्येकान्वयःवःसमुच्चयेवधारणेवावा।७।यत्रपरीक्षिन्निहिति
तत्रोपजग्मुः।८।

मुनीनांनामानिनिर्दिशतीत्याह।अत्रिरिति।गाधिसुतोविश्वामित्रःरामःपरशुरामः।९।कुंतयोनिरगस्त्यः।इंद्रप्रमतिरिध्मवाहश्चइंद्रप्रमती
ध्मवाहो।१०।अन्येचप्रसिद्धाप्रसिद्धनामानः।नारदादयोदेवऋषयःरामादयोब्रह्मर्षयःविश्वामित्रादयोराजर्षयःजातिभेदकथनार्थपुनर्वचनंअ
रुणःआदिर्येषांतेतथोक्ताऋषीणांसमूहःआर्षेयंतस्मिन्प्रवराःनानार्षेयप्रवराःतानभ्यर्च्यअर्घ्यपाद्यादिभिरितिशेषःशिरसावंदननामनमस्कार
एवाभिप्रेतःकृतप्रणामइत्युत्तरवचनात्।११।ऋषीणामयेउपविष्टितःअर्घ्यगृहीतंपाणौयेनसतथायत्स्वेनकर्तुमिष्टंतदेभ्योविज्ञापयामास
त्वद्वयः।१२।महत्तमैःमहापुरुषैरनुग्रहणीयशीलंयेषांतेतथोक्ताःवयंनृपाणांमध्येधन्यतमाःअहोअस्मद्भाग्यंयतःराज्ञांकुलंगर्ह्यकर्मनिंद्य
कर्मवतकष्टंयेनराजकुलेनब्राह्मणपादशौचमारात्दूराद्धिसृष्टंविरहितंतदितिशेषः।१३।स्वविकीर्षितमाह।तस्यैति।परावरेशेमुक्तामुक्तप्रपंच

अत्रिर्वसिष्ठश्च्यवनःशरद्वानरिष्टनेमिर्भृगुरंगिराश्च।पराशरोगाधिसुतोथरामउतथ्यइंद्रप्रमतीध्मवाहो॥९॥मेधातिथिर्देवलआ
र्ष्टिषेणोभारद्वाजोगौतमःपिप्पलादः।मैत्रेयऔर्वःकवषःकुंभयोनिर्द्वैपायनोभगवान्नारदश्च॥१०॥अन्येचदेवर्षिब्रह्मर्षिवर्या
राजर्षिवर्याअरुणादयश्च।नानार्षेयप्रवरान्समेतानभ्यर्च्यराजाशिरसावववंदे॥११॥सुखोपविष्टेष्वथतेषुभूयःकृतप्रणामःस्वचि
कीर्षितंयत्।विज्ञापयामासविविक्तचेताउपस्थितोग्रेभिगृहीतपाणिः॥१२॥राजोवाच अहोवयंधन्यतमानृपाणांमहत्तमा
नुग्रहणीयशीलाः।राज्ञांकुलंब्राह्मणपादशौचमाराद्विसृष्टंबतगर्ह्यकर्म॥१३॥तस्यैवमेघस्यपरावरेशोव्यासक्तचित्तस्यगृहेष्वभी
क्ष्णं।निर्वेदमूलोद्विजशापरूपोयत्रप्रसक्तोभयमाशुधत्ते॥१४॥तंमोपविष्टंप्रतियांतुविप्रागंगाचदेवीधृतचित्तमीशेद्विजोपसृष्टः
कुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः॥१५॥ नाथेहरौव्यासक्तचित्तस्यअनुरक्तबुद्धेर्मतेषुगृहेषुअयंद्विजशापरूपोरोडोभी
क्ष्णंअलंनिर्वेदमूलोवैराग्यहेतुरस्तुयत्रयेषुगृहेषुप्रसक्तःसंसारभयमेवधत्तेयत्रयस्मिन्भगवतिप्रसक्तोभयंमोक्षमेवधत्तेप्राप्नोतितस्मिन्हरौविति
वा।१४।योहमेवंमहत्तमानुग्रहणीयशीलःतमामांद्विजोपसृष्टःद्विजकुमारेणप्रेरितःवेषांतरधारितयाकपटीकुहकःसर्वज्ञातिविशिष्टोवा
तक्षकःदशतुतक्षयतुयूयमभिरेतत्कर्तव्यमित्याह।अलमिति।यूयंदेवकीनंदनमितादिकाविष्णुविषयगाथाअरणानयाधुपलक्षितानुस्लो

कानंतदेहविवेकाणपर्यंतंनागतनवद्दुशौरेहितिकेवलमनुष्यः।९५

नकेवलमस्मिन्जन्मन्येवहर्यादौमनोरतिःप्रसंगोपितुजन्मांतरेपीतिप्रार्थयंस्तत्राह॥ पुनश्चेति। तदाश्रयेषुभगवत्भक्तेषु युष्मास्विहैवेषुममैत्री
अस्त्वद्रीयोयमितितिचित्तवृत्तिलक्षणा सृष्टिंजन्म॥१६॥ कुत्रगंगायांकुत्रत्यपीक्षितइतितत्राह। इतिस्मेति॥ स्वसुतेजनमेजयन्यस्तोनिहितोराज्यभारोयेनसत
थोक्तः इत्युक्तप्रकारेणाध्यवसायनिश्चित्तमनोयोगयुक्तः। निश्चययुक्तोवाराजावापरीक्षित्समुद्रपत्न्यांगंगायाख्यायानद्याउदकएवकिंविह
क्षिणकुलेदक्षिणतीरभागेप्राक्प्रादेशावीनाग्रेषुकुशेषुउदङ्मुखआस्तइत्यन्वयः। प्रष्टविंतारहितत्वाद्धीरइत्युक्तं कुलशब्दस्यलक्षणार्थमनाश्रित

पुनश्चभूयाद्भगवत्यनंतेरतिःप्रसंगश्चतदाश्रयेषु॥ महत्सुयांयामुपयामिसृष्टिंमैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः॥१६॥ इतिस्मराजा
ध्यवसाययुक्तःप्राचीनमूलेषुकुशेषुधीरः। उदङ्मुखोदक्षिणकूलआस्तेसमुद्रपत्न्याःस्वसुतेन्यस्तभारः॥१७॥ विहायसर्वंनरदे
वविक्रके पूरहारांगदमौलिरत्नान्यंगुलीया विमलान्निरस्यपवित्रपाणिर्मुनिवेषआस्ते॥१८॥ एवंचतस्मिन्नरदेवदेवेप्रायो
पविष्टेदिविदेवसंघाः।प्रशस्यभूमौव्यकिरन्प्रसूनैर्मुदामुहुर्दुंदुभयश्चनेदुः॥१९॥ महर्षयोवैसमुपागतायेप्रशस्यसाध्वित्यनुमो
दमानाः।ऊचुःप्रजानुग्रहशीलसारायदुत्तमश्लोकगुणानुरूपं॥२०॥ नवाइदंराजर्षिवर्यचित्रंभवत्सुकृष्णंसमनुव्रतेषु।येध्या
सनंराजकिरीटजुष्टंसद्योजहुर्भगवत्पार्श्वकामाः॥२१॥

इत्वार्थंगीकारेभारतविरोधःस्याद्यथागंगायांकटकमास्तइति गंगापदेनतीरंलक्ष्यतेकूलआस्तइतिकूलपदेनापिजलेलक्षणोपपत्तेःआस्तइ
तिलङघ्यवंविधिविशेषद्योतनार्थः॥१७॥ श्वेतछत्रचामरादिनरदेवचिह्नानकेवलंतावदेवकिंतुकेयूरादीन्यपिनिरस्यसत्त्वावमर्दकानिनादिषु
निवेषः॥१८॥ व्यकिरन्ववर्षितवंतः॥१९॥ यदुत्तमश्लोकस्यहरेर्गुणानुरूपंगुणप्रकटनानुकूलंतद्वचऊचुरित्यन्वयः। प्रजानुग्रहमंतरेणान्यस्वभा
वोनास्तियेषांतेतथोक्ताः॥२०॥ अध्यासनंसिंहासनंराज्ञांमंडलपतीनांकिरीटैर्जुष्टंसेवितंकालक्षेपराहित्यद्योतनार्थःसद्यःशब्दः॥२१॥

अस्मावयंविशोकंनित्यनिर्दुःखंकुतःविरजस्कंअशोभनेशोभनाध्यासबुद्धिरहितंकुतःपरंत्रिगुणातीतंपूर्णंवाकुतःअजंजन्मजरामरणरहितंहरियां
स्यतीत्यन्वयः॥२२॥ मधुच्युदमृतंश्चोततीतिमधुच्युत्तच्चश्रवणसुखमतएवगुरोर्ब्रह्मणकुमारस्यशापंव्यलीकयतिअनृतंकरोतिफलतइतिगुरुशापव्य
लीकंअनेनतुमरणदोषपरिहारोलक्ष्यतेननुतत्तक्षकदंशनाभावःतत्कृतदर्शनात्तत्क्षणविगणनवचआश्रुमरणान्नृपीनाभाषतेत्यन्वयः॥२३॥ त्रिपृष्ठे
सत्यलोकेशीलसमाधावितिधातोःपरमात्मसमाधिमंतःवोयुष्माकंइहलोकेअथवाअमुत्रवपरलोकेकश्चनार्थःसाध्यंप्रयोजनंनास्तीतियतस्ततः

सर्वेवयंतावदिहास्महेथकलेवरंयावदसौविहाय। अजंपरंविरजस्कंविशोकंयास्यत्ययंभागवतप्रधानः॥२२॥ आश्रुत्यतदृषि
गणवचःपरीक्षित्समंमधुच्युद्गुरुचाव्यलीकं।आभाषतैतानभिवंद्ययुक्तःशुश्रूषमाणश्चरितानिविष्णोः॥२३॥ राजोवा
च समागताःसर्वतएवसर्वेवेदायथामूर्तिधरास्त्रिपृष्ठे।नेहाथवामुत्रचकश्चनार्थऋतेपरानुग्रहमात्मशीलाः २४
ततश्चवःपृच्छ्यमिमंविपृच्छेविश्रभ्यविप्राइतिकृत्यतायां।सर्वात्मनाम्रियमाणैश्चकृत्यंशुद्धंचतत्रामृशताभियुक्ताः॥२५॥
इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेएकोनविंशोध्यायः॥ ॥

परानुग्रहकरणस्वभावात्वोयुष्मानिमंविपृच्छेपृच्छामीत्यन्वयः। किंकृत्वाइतिकृत्यतायांइत्थंकर्तव्यतायांविश्वविशिष्टज्ञानिनःअकुटिलबुद्ध
यःसात्त्विकप्रकृतयइतिविस्रब्धविश्वस्य।कोसावितितत्राह।सर्वात्मनेतितत्रकृत्यशनेम्रियमाणेःपुरुषैःसर्वप्रकारेणशुद्धंनिर्दोषंपुरुषा
र्थपर्यवसायिकृत्यंकर्तव्यंचाभियुक्ताआग्रहयुक्ताःसत्यर्थापितात्राअमृशतआलोचयत॥ आलोच्यवाच्यमाकंब्रूतेतितुशब्दः॥२४॥२५॥ इतिप्रथ
मेएकोनविंशः॥

स्नानादिनैव सत्संगत्या सकलपापक्षयो भवतीति प्रतिपाद्यते स्मिन्नध्याये तत्रादौ शुकागमनं वक्ति॥ तत्रेति। यत्र परीक्षितामुनिभिश्च स्थितं तत्र तस्यामेव सभायां वा व्यासपुत्रः शुको भगवान्यदृच्छया दैवेच्छया अभवदित्यन्वयः। पूर्वस्मात्कीर्तिविशेषद्योतनाया तव दिशुकं आगमनस्पता वतो चरितार्थत्वात्अटनस्य स्वाधीनत्वप्रकाशनायाटमान इति अनिवृतश्चप्रत्ययः। तर्ह्यर्थाभिलाषी किमटतीत्यत उक्तमनपेक्ष इति बाह्यविषयापेक्षारहितः। तत्कुतः इत्यस्यापि तदेवोत्तरं। अनपः प्राणनाथः श्रीविष्णुः तद्विषये ईक्षा इक्षणं दर्शनं यस्य स तथोक्तः। न हि करतलामलकवत्ससतत मपरोक्षीकुर्वाणस्य तस्य बाह्यपदार्थापेक्षा भवतीति वा बाह्यपदार्थापेक्षाभावे शरीरयात्रा कथमित्यस्यापि तदेवोत्तरं। अनं प्राणं पिबतीत्य

सूत उवाच तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः। अलक्ष्यलिंगो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः॥ १॥

नपाई इक्षा दर्शनं का कवं वृ पुटेन वायुपानं ज्ञानं यस्यास्मि स तथा कथित इति वा श्रीप्रसादाभावादशनदारिद्र्यं किमित्यस्येदमप्युत्तरं शश्वदपगतानन्नवती त्यनपा लक्ष्मी स्वस्याः ईक्षणं यस्यास्मि स तथेति वा तत्कटाक्षस्य पात्रीभूत इत्यर्थः। संततमागमनस्वभावेन वायुना तत्प्रभिः कथं स्यादितित्राह। निजेति। स्वरूपानंदेनालं बुद्धिमान्यदृच्छालाभेन तुष्टः। किमाश्रम इति। तत्राह। अलक्ष्येति। न लक्ष्याण्याश्रमादिलिंगानि यस्य स तथोक्तः। तत्कुत इतितत्राह। अवधूतेति। अवधूता नादिगंबराणां वेषो यस्य स तथोक्तः। अवधूतोपरित्यक्तः वेषालंकारो येन स तथेति वा अत एव बालैश्च वृतः॥ १॥

मुनयः स्वं स्वं स्वासनेभ्यः प्रत्युत्थिता इत्यन्वयः। व्यासादन्ये च तत्र स्थिता उत्तस्थुरिति ग्राह्यं। गूढवर्चसं आच्छादितनिजतेजोलक्षणमहिमानमपि तल्लक्षणज्ञाः किंविशिष्टं द्व्यष्टवर्षैः कृत्वा षोडशवर्षाणि यस्य स तथोक्तः। तं षोडशवर्षं सुकुमाराणि कोमलानि पादादीनि यस्य स तथोक्तः। तं पादौ च करौ च ऊरू च बाहू च अंसौ च कपोलौ च गात्रं च तानि तथोक्तानि चारुणी ईषद्दरूपोरक्ते वक्त्रस्थिते यस्य स तथा उन्नता नासिका यस्य स तथा। तुल्यौ परस्परसमौ कर्णौ यस्य स तथा। तं सुभ्रेशोभने आननं यस्य स तथा। तं। कंबुवत्त्रिरेखांकितशंखवत्सुजातलक्षणवन्नमः कंठो यस्य स तथा। तं॥ २॥ अंसवक्षसोर्मध्ये जत्रुनिगूढं पूरित विवरं पीवरं जत्रु यस्य स तथा

तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं। चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कंबुसुजातकंठं॥ २॥ निगूढजत्रुं पृथुतुंगवक्षसमावर्तनाभिं वलिवल्गूदरं च। दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाभं॥ ३॥ श्यामं सदापीव्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन। प्रत्युत्थिता मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसं॥ ४॥ स विष्णुरातोतिथय आगताय तस्मै सपर्यां शिरसाजहार। ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः॥ ५॥

तं पृथु विस्तीर्णं तुंगमुन्नतं वक्षो यस्य स तथा। तं आवर्तः पयसंभ्रमः तद्वन्निम्ना इष्टा नाभिर्यस्य स तथा। तं वलिभिः रेखाभिर्वल्गु सुंदरं उदरं यस्य स तथा। तं दिगेवांबरं यस्य स तथा। अपीव्यं षोडशवर्षीयं वयो यस्य तदापीव्यवयः तदंगगतस्य लक्ष्म्या स्त्रीणां मनोज्ञं मनोहरं रुचिरस्मितेन च मनोहरमिति शेषः॥ ४॥ विष्णुरातः। विष्णुना दत्तः। न तिथिर्दिनविशेषो यस्य स तथा। तस्मै आजहार चकार हि शब्दो बुधत्वे हेतुः। अनेन कथमालक्षितः पौरैः कथं पांडवेयस्येति प्रश्नः परिहृत इति ज्ञातव्यं॥ ५॥

भा·प्र·
१०७

सः परीक्षिन्महीयसां महत्तराणां मध्ये महान् संवृतः शुद्धः महत्त्वप्रकाशनाय ग्रहनक्षत्रादिभिः परीत इव व्यरोचतेत्युक्तं। तत्कृकान्यरिष्य इति मरणमियासु खेवाग
कांतिक्षान्तिर्नाशीति यस्मात्तस्मादित्यर्थः॥६॥ सूनृतया गिरा प्रियवचनेन॥७॥ हे ब्रह्मन्नत्र सज्जानिकृत्त्वं बंधवो वयमद्य सद्भिः सेव्याः अभूम अहो भाग्यं कुतः अ
तिथिरूपेण आगतैर्भवद्भिस्तीर्थकाः तीर्थभूताः शुद्धाः तीर्थाः कृताः यथा भवंतो निःकलुषत्वात्तीर्थानि भवंति तथा वयमपि पुण्यत्वं गतास्त इत्यर्थः॥ तत्र हेतु एव
कारणमित्यतः कृपयेत्युक्तं॥८॥ तीर्थीकरणमेव विशिनष्टि येषामिति। येषां भवतां संस्मरणात्पुंसां गृहाः सद्यः शुध्यंति वै यस्मात् अतो दर्शनादिना शु

स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः। व्यरोचतालं भगवान्यथेंदुर्ग्रहर्क्षतारानिकरैः परीतः॥६॥ प्रशांतमासीनमकुंठमे
धसं मुनिं नृपो भागवतोभ्युपेत्य। प्रणम्य मूर्ध्नावहितः कृतांजलिर्नत्वा गिरा सूनृतयान्वपृच्छत्॥७॥ राजोवाच॥ अहो अद्य वयं ब्रह्मन्सत्
सेव्याः क्षत्रबंधवः। कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः॥८॥ येषां संस्मरणात्पुंसः सद्यः शुध्यंति वै गृहाः। किं पुनर्दर्शनस्पर्श
पादशौचासनादिभिः॥९॥ सान्निध्यात्ते महायोगिन्पातकानि महांत्यपि। सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः॥१०॥ अपि मे भगवान्प्री
तः कृष्णः पांडुसुतप्रियः। पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः॥११॥

ध्यंतीति किं पुनर्वक्तव्यमित्यन्वयः॥९॥ भवत्संगत्या विशेषोप्यस्तीत्याह। सान्निध्यादिति। अनेन तत्र ब्रह्महत्यादिपापपरिहारोपि भवतीत्युक्तं भवति। ज्ञानात्पूर्वतनानि
भस्मी भवंति पश्चात्तनानि नंक्ष्यंतीति शास्त्रनिश्चितं वैशब्देनाह। न केवलमस्मत्पापहानिरेव किंतु अस्मत्संगतानामपीति॥१०॥ पांडुसुतानां प्रियः पांडुसुत
ःप्रियो यस्येति वा कृष्णो भगवान्मे मह्यमपि प्रीतोपि प्रीत एव कुतः पिता वसुदेवः तस्य स्वसा कुंती तस्याः पुत्राः पैतृष्वसेयाः युधिष्ठिरादयः तेषां प्रीतये तेषां गोत्रस्य
स्य सोहं तद्गोत्रः तस्य मे अपि बांधवो जात इति यस्मात् इति॥११॥

राम
१०७

भा·प्र·
१०८

अन्यथा तेऽव्यक्तगतेरज्ञातगमनस्य संसिद्धस्य ब्रह्मज्ञानिनस्तथा कृतकृत्यस्य वरीयसः वरणीयस्य पूज्यस्य तेन तव दर्शनं नृणां नः कथं घट
ते म्रियमाणानां नितरां न घटत इति शेषः॥१२॥ भवद्दर्शनं दुर्लभमिति यतोऽतः दैवात्प्राप्तं योगिनां परमं गुरुं संसिद्धिं कैवल्यमूलं भवंतमिह म्रियमाणा
स्य पुंसः सदा यत्कार्यं यच्च श्रोतव्यं अथो यज्जप्यं अथवा नृभिर्यत्कर्तव्यं भजनीयं वा यद्वा विपर्ययं। अकर्तव्यास्मर्तव्यादि तदस्माकं ब्रू
हीत्यन्वयः॥१३॥१४॥ गृहमेधिनां गृहस्थानां गृहेषु क्वचिदेकत्रापि गोदोहनक्षणमपि भवतोऽवस्थानं न लक्ष्यते नूनं निश्चितं हि यस्मात्तस्मात्तद्ग्र

अतः पृच्छामि संसिद्धिं योगिनां
अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणां॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः॥१२॥ अतः पृच्छामि संसिद्धिं योगिनां
परमं गुरुं॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वदा॥१३॥ यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः सदा। स्मर्तव्यं भजनीयं वा
ब्रूहि यद्वा विपर्ययं॥१४॥ नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनां। न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित्॥१६॥ सूत उ
वाच॥ एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा। प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः॥१७॥ इति श्रीभाग
॥इति प्रथमस्कंधे विंशोऽध्यायः॥

...भावः॥१५॥ एवमाभाषितः पृष्टः संबोध्य कृतप्रश्नः गुरुशि
भिनिः स्वतः श्लक्ष्णया गिरा कर्तव्यमाह इत्यनेन साकं महा... इति भवतः पृच्छामीति भावः॥१५॥ ...भागवतविवरणमिदं तुलसीदल
व्यासंवादलक्षणधर्मज्ञो बादरायणिः शुकः श्लक्ष्णया मधुरया गिरा राजानं प्रत्यभाषतेत्येकान्वयः॥१६॥ भागवतविवरणमिदं ... जयध्वजना
मिदक्षमर्पयामि हरेः वरणनलिनयुगले हे प्रथमस्कंधोपगंमतां प्रीतो इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां विजयध्वजनी
र्थभिक्षुविरचिते प्रथमस्कंधे विंशोऽध्यायः॥ शुभमस्तु॥ ग्रंथसंख्या ४५०॥

राम
१०८

॥श्रीवेंकटेशनारसिंहाभ्यांनमः॥

॥नरहरेरिदं॥

॥श्री॥

॥श्रीवेंकटेशनारसिंहाभ्यांनमः॥

॥नरहरेरिदं॥

॥श्री॥

श्रीगणेशाय नमः   वरीयान्नृह्यौनिगमविषयो योस्य जनकौ वराहाद्यात्मायो वतरति सुररातिहृतपौत्रदाद्यो ज्ञानं सकल
विषयं यश्च वितुतस्तमंगोपाल्य त्वंहृदयसततं स्वेष्टकृतये १ संप्रतिपरीक्षित्प्रश्नं परिहरिष्यन्स्तौति वरीयानिति। श्रीभागवतसंहिताप्रारं
तकारणं सविस्तरमभिधाय ज्ञानी श्रीभागवतसंहिताप्रारभ्यत इत्यतो वा ह वरीयानिति य छ्लोकमथो ज्ञाप्यमित्यादिनाय त्त्वया कृतः स प्र
श्नश्रो वरीयान्गीकार्यतमः। सर्वोत्कृष्टत्वात्लोकहितमितिक्रियाविशेषणं। यथा लोकस्य हितं भवति तथा कृत इत्यनेन न केवलं तवैव

ॐ नमो भगवते वासुदेवाय   श्रीशुक उवाच   वरीयानेष ते प्रश्नः कृतो लो
कहितं नृप। आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः १ श्रोतव्यानीह राजेंद्र
णांसंति सहस्रशः २

हितकरोयं किंतु सर्वस्य सुखं भवति। उत्कृष्टत्वे हेतुगर्भं विशेषणमाह आत्मविदिति। मुमुक्षत आत्मविदो ब्रह्मादयस्तेषामपि संमतत्वात्। तत्र
थमत्राह पुंसामिति १ आत्मविदित्युपवर्तते। इह जगति नृणां सहस्रशः श्रोतव्यानि संति म्रियमाणानाममम्रियमाणानां च पुंसां श्रोतव्यादि
षु यः परः परमात्मा स एवात्मवित्संमत इति यस्मात्तस्मादित्यर्थः। आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतेः। अनेन परमात्मविषयत्वेनास्य वरीयस्त्व
मिसुक्तं भवति १

इतोपि परमात्मश्रवणादिकमंतरेण संसारस्य तदज्ञाननिबंधनस्य दुरुच्छेदकत्वात् स एव तेषु मुख्यत्वेन संमत इत्युपसंहरन्नज्ञलोक
प्रवृत्तिप्रकारमाह अपश्यतामित्यादिना। हृशि रत्नत्ता नार्थः। आत्मनः परमात्मनस्तत्त्वमनारोपितं रूपं ज्ञानादिलक्षणं आत्मनां लक्षि
हादिवेतनानां कदाचन अभिभूततरतमभावेनावस्थितिं चापश्यतां अजानतां निद्रैवेत्यत्राप्यनुसंधेयं गृहमेधिनां गृहमेधाः गृहाश्र

अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनां २ निद्रया ह्रियते नक्तं व्यवायेन न वं वयः।
दिवा वार्थेहया राजन्कुटुंबभरणेन वा ३

म एव कर्तुं योग्याः पंचमहायज्ञाः स्मृतिविहिताः प्रत्यवायपरिजिहीर्षया तानुकर्तुं शीलमेषामस्तीति गृहमेधिनः तेषां गृहेषु गृहाश्र
मधर्मवर्तमानानां च पुंसां २ निद्रया व्यवायेन च स्त्रीसंगेन च नक्तं रात्रिः नवं वयो ह्रियते। दिवा चाहस्त्वार्थेहया श्रीनारायणाराधनादु
पयोगिहिरण्याद्यापादनायासेन। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदिति वचनात् कुटुंबभरणेन वा ह्रियत इत्यन्वयः ३

आत्मतत्त्वाज्ञाने कारणमाह देहेत्यादिना। अपि गृहार्थः। आत्मनः स्वस्य दीनत्वं क्षीणत्वमापादयंतीति आत्मसैन्यानि तेषु देहादिषु त्रयश्च निधा
नोः। पद्मास्वजनए वदीनभावो येषां तेन तथा तेषु अत एवासत्सु अनृत इत्येषु। तदुक्तं। सद्भावे साधुभावे चेति। निधनं नाशं। प्रकर्षेण सक्तः प्रसक्तः। न
पश्यति स्वस्यापीति शेषः। अविनाशकृत्स्न मिथ्यार्थी शिक्षापि त्वगर्हितमिति दर्शयति। तेषु प्रमत्तो निधनमिति पाठोऽन्वितः ४ यतः श्रीना
रायणश्रवणादिना विना न संसारनिवृत्तिर्यस्मात्सर्वात्मा सर्वव्यापी सर्वस्य भीष्टमाददानो वा भगवान्निरतिशयैश्वर्यादिगुणवान् ब्रह्मादि
वेतनराशिपूज्यो वा। हरिः स्मरणमात्रेणाशेषसंसारक्लेशसंहर्त्ता ईश्वरः सर्वजगदीश्वरो नित्यभयरूपात्स्मात्संसारादभयमात्मन इच्छता

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि। तेषु प्रसक्तो निधनं पश्यन्नपि न पश्यति ४ त
स्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ५

गुरुमुखेन श्रवणादिविषयः कर्तव्य इत्यन्वयः। श्रवणादित्रयेण ज्ञानसंशयादिनिरासादिकं करोति। श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविप
र्ययो। संशयं च परमणुह्यल सतेज्ञ सदर्शनमिति वचनात्। श्रवणेनाज्ञाने कीर्तनापरपर्यायमननेन संशयविपर्ययो निरस्य स्मरणेन त
र्ययो। संशयं च ... दर्शनमिति वचनात्। ... ज्ञानेन ब्रह्मापरोक्षज्ञानं लभत इति श्लोकतात्पर्यार्थः। श्रवणादीनां चतुर्णामेकविषयत्वं द्योतयितुं सर्वा
त्मेत्यादिविशेषणचतुष्टयमुपात्तं। अहंकाररूपेण सर्वव्यापित्वेन सर्वात्मा रुद्रः किं न स्यादित्यत उक्तं। हरिर्भगवानिति। तथापि सूर्यो
ऽन्यतमः किं न स्यादत ईश्वर इति। ईशा रुद्रादय इति योगेन तस्य रुद्रत्वादिविनिरासेति ज्ञातव्यं ५

एतदेव सर्ववेदेतिहासपुराणेषु तात्पर्येण प्रतिपादितमिति दर्शयति एतावानिति। अंते मरणकाले यथा नारायणस्मरणं स्यात्तथा चतु
शास्त्राभ्यासः कर्तव्य इति भावेनवाह एतावानिति। सांख्यशास्त्रोक्तसांख्येन तत्त्वज्ञानेन योगशास्त्रोक्तभगवत्सूत्रादियोगानुष्ठानेन तथा स्व
धर्मपरिनिष्ठया स्वविहितवर्णाश्रमोक्तस्वधर्मानुष्ठानेन चांते मरणकाले नारायणस्मृतिरिति यावानेतावानेवैत्यानेव पुंसां परउत्कृष्टो जन्म
लाभः जन्मनः साफल्यमित्यन्वयः। अतो वेदादिशास्त्रेषु प्रियमाणेन सर्वथा नारायणस्मरणं कर्तव्यं नान्यदिति प्रतिपाद्यत इति। अतः चतु

एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामंते नारायणस्मृतिः ६ प्रायेण मुने
यो राजन्निवृत्ता विधिनिषेधतः। नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ७

परिहारः सुप्रसिद्ध इति सिद्धं ६ सर्वथा नारायणश्रवणादिकार्यमित्यत्र कैमुत्यन्यायमाह। प्रायेणेति। मुनयः सत्त्वयोग्यज्ञानवंतो वि
धिनिषेधाभ्यां निवृत्ता निर्गुणे भगवति ब्रह्मनदी यमानत्वात्तत्संबंधिनिर्वाणं नैर्गुण्यं तत्स्थाः मुक्ता हरेर्गुणानुकथने रमंत इत्यन्वयः। गुणा
नुसारं स्मारं कथयंत इत्यपभिन्नार्थस्मेति पदं कदाचिद्यानामपि प्रायेणोक्तं प्रायेणेति। अतो ज्ञानार्थिभिर्निरंतरं हरिगुणश्रवणादिकार्यमिति
किं वाच्यमित्यर्थः ७

इदानीं भागवतप्रतिपाद्यमर्थं तस्माद्भारतेत्यादिश्लोकत्रयेणाभिधाय पुनस्तद्विस्तरेणावक्तुमुपक्रमते इदमिति। बुद्धिसंनिहितत्वादिदमित्युच्यते ब्रह्मसंमितं वेदसमं। तदर्थव्याख्यानरूपत्वात्। द्वापरादौ कृष्णावतारापेक्षया द्वापरे आदौ चन तु द्वापरस्यादाविति। व्यासः षट्शतवर्षीयोऽक्षत्रराङ्मुनीजन दितिवचनात्। द्वापरांते भारतकथाप्रवृत्तिकथनाच्च ८ स्थितप्रज्ञतया कृतकृत्यस्य भवतो भागवताध्ययनं किमर्थमिति तत्राह परिनिष्ठित इति॥ नैर्गुण्ये मुक्तौ परिनिष्ठितः मुक्तिरस्य भवतीति निश्चयवानपि। उदरं संशयः शोकः परिनिष्ठा विनिश्चय इत्यभिधानात्। कथमनेनास्य परिहारश्चा

इदं भागवतं नाम पुराणं ब्रह्मसम्मितं। अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम् ८ परिनिष्ठितोपि नैर्गुण्य उत्तमश्लोकलीलया। गृहीतचेता राजर्षे आख्यानं यदधीतवान् ९ तदहं तेभिधास्यामि महापुरुषिको भवान्। यत्र श्रद्दधतामाशु स्यान्मुकुंदे मतिः सती १०

यात इति तत्राह उत्तमश्लोकेति। अनेनैवं विधमाहात्म्यातिशयो भागवतानिमुक्तं भवति ९ ननु कुर्भवतो भागवताध्ययनं तत्किं ममेति तत्राह तदहं त इति॥ यस्य यश्रद्दधतां यस्य यस्मिन्भागवते प्रतिपादितमर्थं श्रद्दधतामिति वा। अहं भागवतं नाम यद्ग्रस्थानमधीतवांस्तत्ते तुभ्यमभिधास्यामीत्यन्वयः। अभिधाने निमित्तमाह महापुरुषिक इति। पूर्णा बहुगुणत्वात्पुरुषो भगवान्स उक्तः पुरुषिकास्तेषां मध्ये महानिति यस्तस्मादित्यर्थः १०

न केवलं तवैवैतन्निर्णीतम् अपि तु सर्वयोगिनामपीत्याह एतदिति निर्विद्यमानानां विरज्यमानानां क्लेशैरिति शेषः। अकुतोभयं मोक्षः। एवं वैराग्यादिसाधनसामग्रीमतां योगिनां हरेर्नामानुकीर्तनं यदेतन्नंदते हरिस्मरणकारणमित्यर्थः ११ अनेन भागवताकर्णनमपि प्रेंतं तदल्पतात्पायुषो नन घटत इति शंका मा भूदित्याह किमिति। हायनैर्वत्सरैः परोक्षैः अज्ञातैमितैः। यतः येन मुहूर्तेन हरिस्मरणात्क्षेमं श्रेयसे घ

एतन्निर्विद्यमानानामिच्छतामकुतोभयं। योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं ११ किंप्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह। वरं मुहूर्तं विदितं घटते श्रेयसे यतः १२ खट्वांगो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः। मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम् १३

टते। तदैकमुहूर्तं घटिकाद्वयमपि परमुत्तमं विदितं प्रख्यातं १२ एतमर्थमाख्यानेन द्रढयति खट्वांग इति। नामशब्दः प्रख्यातार्थः। इह मनुष्यलोके मुहूर्तात्सर्वमायुष इयत्तां मर्यादां ज्ञात्वा राज्यादिसंगमुत्सृज्य हरिमुद्दिश्य इंद्रियाणि दत्वा अभयलक्षणं मोक्षं गतवानित्यन्वयः। त्यागो विहायितं दानमुत्सर्जनं विसर्जनमित्यभिधानं। अभयं पुरुषार्थरूपं हरिं गतवानिति वा १३

तवत्तदपेरूपयानेकाप्युहूर्त्तत्रहत्तापः कार्यइत्यतस्तत्सर्वंहरिचरणारविंदस्मरणविषयत्वेनकल्पयेत्याहतवापीति। एतर्हिइदानींसप्तानामह्नांसमाहारः सप्ताहंजीवितावधिरायुष्यस्यइयतायत्तावदायुः तत्सर्वमपिसांपरायउत्तरकालोमुक्तिकालस्तत्तंवंधियथाभवतितथातावंतंकालंहरिचरणस्मरणगोचरमुपकल्पयभागवताकर्णनेतात्पर्यंकुर्वित्यर्थः। सांपरायक्तसंग्राममापदाग्रामिकालयोरितियादवः मरणलक्षणपतेकालेहरिचरणस्मरणंयथाभवतितथातावंतंकालेभागवताकर्णनेकुर्वितिवा। १४ मरणान्तक्षणकालंज्ञात्वाहरिस्मरणमिच्छतोवै

तवाप्येतर्हिकौरव्यसप्ताहंजीवितावधिः। उपकल्पयतत्सर्वंयत्तावत्सांपरायिकं १४ अंतकालेतुपुरुष
आगतेगतसाध्वसः। छिंद्यादसंगशस्त्रेणस्पृहांदेहेनुयेचतं १५ गृहात्प्रव्रजितोधीरः पुण्यतीर्थजलाप्लुतः॥
शुचौविविक्तआसीनोविधिवत्कल्पितासने १६

राज्यंप्रथमसाधनमित्याहअंतकालइति। आगतेस्वतः परतोवाज्ञातेसतिगतसाध्वसः। देहनाशप्रयुक्तभयरहितः पुत्रादिस्नेहलक्षणः संगः तद्विरोधीविवेकज्ञानलक्षणोऽसंगस्तेनशस्त्रेणतंदेहमनुयेस्त्रीपुत्रादयस्तेषुचस्पृहांछिंद्यादित्यन्वयः १५ अथकिंकरोतीत्याहगृहादिति। गृहात्प्रव्रजितः सन्यासलक्षणंवैराग्यंप्राप्तः धीरः प्रतिबंधकनिवर्त्तनसमर्थः पुण्यतीर्थजलाप्लुतः। भागवतादिपुण्यशास्त्रजलस्नातस्तथागंगादिपुण्यतीर्थजलस्नातोनिर्धूतवाह्याभ्यंतरमलः स्नानपूर्वकशुचौविविक्तेदुर्जनसंसर्गरहितेदेशेनात्युच्छ्रितंनातिनीचमितिविधिवत्

स्थिरासनस्यकृत्यमाहअभ्यसेदिति। रेचकादिक्रमपरंपरयाप्राणायामेनजितश्वासः प्राप्तप्राणप्रसादः। मनोयच्छेत्स्ववशंकुर्यादेवंजितमनस्कः सन्बीजंसर्वजगद्बीजकंशुद्धंपरंब्रह्मानुस्मरन्अकारादीन्त्रीन्वर्णान्वृणोतीतित्रिवृदक्षरंब्रह्मवाचकत्वात्सर्वगतंपरमुत्कृष्टंॐकारंमनसाभ्यसेदावर्त्तयेदित्यन्वयः १७ जाप्यमुक्त्वाध्यानप्रकारमाहनियच्छेदिति। बुद्धिः सारथिर्यस्यसतथासपुरुषोजितेनमनसाअक्षान्इंद्रियाणिविषयेभ्योनियच्छेत्प्रत्याहरेत्। प्रत्याहृत्यवसंस्कारवशात्बहिर्मुखतयाकर्मभिराक्षिप्तंमनः स्वधियासारथिनाशुभार्थेपरममंगलार्थेहरौधारये

अभ्यसेन्मनसाशुद्धंत्रिवृद्ब्रह्माक्षरंपरंमनोयच्छेज्जितश्वासोब्रह्मबीजमनुस्मरन् १७ नियच्छेद्विषयेभ्योक्षान्मनसाबुद्धिसारथिः। मनः कर्मभिराक्षिप्तंशुभार्थेधारयेद्धिया १८ तत्रैकावयवंध्यायेदव्युच्छिन्नेनचेतसा। मनोनिर्विषयंयुक्त्वा
ततः किंचिन्नसंस्मरेत् १९ पदंतत्परमंविष्णोर्मनोयत्रप्रसीदति २०

दित्यन्वयः १८ एवंहरौनियतचेतसोयोगिनोध्यानाभ्यासप्रकारमाहतत्रेति। तत्रयुगपत्सर्वावयवध्यानाशक्तौविषयैरव्युच्छिन्नेनाखंडितेनचेतसाएकावयवमेकैकावयवं। श्रीपादादिलक्षणंध्यायेदेवमनायासेनस्मरणविषयंकुर्यात्। तत्परिपाकमाहमनइति। एवमभ्यासपाटवेनयुगपत्सर्वावयवस्मरणसमर्थः संस्तन्मनोनंतरंनिर्विषयंविषयेभ्योनिर्गत्यस्थितंमनस्तस्मिन्हरौसर्वावयवव्यापितयायुक्त्वानियुज्ययत्रमनः प्रसीदतिनिरतिशयंसुखंलभते। तद्विष्णोः परमंपदंसमग्रंरूपमेवस्मरेत्ततोन्यत्किंचिन्नस्मरेदित्यन्वयः १९ २०

अखंडध्यानोपायमाह रजस्तमोभ्यामिति। रजसाक्षिप्तं तमसा विमूढं कृत्वा कृत्स्नज्ञानशून्यं। आत्मनो मनो धारणया तैलधारावदविछिन्नया स्मृत्या यच्छेद्विषये सन्याहृत्यज्ञानमग्रं कुर्यात्। या धारणा तत्कृतं रजस्तमोभ्यामाक्षिप्तत्वमविद्यादिमलं हंति तथेत्यन्वयः २० न केवलं मलनाशो धारणायाः फलं किंतु निरंतरं भक्तिलक्षणयोगश्चेत्याह यस्यामिति। यस्यां धारणायां सर्वजगदाश्रयं भद्रं मंगलं पश्यत

रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः २० यच्छेद्धारणया धीरो हंति या तत्कृतं मलं। यस्यां संधार्यमाणा
यां योगिनो भक्तिलक्षणः २१ आशु संपद्यते योग आश्रयं भद्रमीक्षतः राजोवाच यथा सं
धार्यते ब्रह्मन्धारणा यत्र संमता। यादृशी वा हरेदाशु पुरुषस्य मनोमलम् २२ राम

श्रीकृत ईक्षितश्चिंतयतो योगिनो भक्तिलक्षणो योग आशु संपद्यत इत्यन्वयः भद्रदिकल्याणे इति धातोः कल्याणं मंगलं। मंगलं भगवान्विष्णुरिति
वचनं २१ परीक्षिद्विशेषबुभुत्सया पृच्छति यथेति। अत्र यथा यत्र यादृशीति पद्यत्रयः प्रश्नार्थाः। यतः शीघ्रादेति सूर्यतः यच्छः सुकरम
र्थप्रश्नार्थे वा विभक्त्येपत इति कृत्यभिधानान्निश्चितत्वात्। तथा च यथा कथं यत्र कुत्र यादृशी कीदृशी तिसंपद्यतोर्थः २२

तत्र प्रथमतो यथेति प्रश्नं परिहरति जितासन इति। यत्रेत्यनंतरं प्रश्नं प्रत्याह स्थूल इति २३ क्रमप्राप्तत्वाद्यादृशीति प्रश्नं प्रति वक्ति विशेषइ
ति। यदिदं भूतं भव्यं भवच्च जगदजडं तद्विश्वं यत्र अंडकोशे दृश्यते। सोऽयं स्थवीयसां स्थूलतराणां महाकाशादीनां स्थविष्ठः स्थूलतमः विशेषत्वादंडकोशः
शिलालक्षणप्रतिमावत्तस्य देहो यः हरेर्देहः। ननु सा साक्षाद्देहइत्यन्वयः। तदुक्तं। शिलावत्तस्य देहोयमंडकोशस्तु सा कृतिरिति २४ पृथि

श्रीशुक उवाच जितासनो जितश्वासो जितसंगो जितेंद्रियः। स्थूले भगवतो रूपे मनः संधारये
द्धिया २३ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां। यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् २४
अंडकोशे शरीरेस्मिन्सप्तावरणसंयुते। वैराजः पुरुषो योसौ भगवान्धारणाश्रयः २५

व्यादिपंचभूताहंकारमहत्तत्त्वसंज्ञैः सप्तभिरावरणैः कवचस्थानीयैः संयुते बहिरावृते शरीरे शीर्यमाणत्वान्नरां अंडकोशे योसौ विशेषेण प्रकाश
नाद्विराजा र्व्यांडांतर्वर्तित्वात्सर्वतो वरत्वाद्वैराजाख्यः पुरुषः पुरु बहु कर्मफलं सनोति ददातीति पुरुषः। असौ भगवान् धारणाश्रयः तद्विषय
तया कृता धारणा मनोमलं हरतीत्यन्वयः। अंडकोशो विराट् प्रोक्तो विशेषेण प्रकाशनात्तु वैराज स्मृत इत्यादेः २५

उपदिष्टरूपे ध्यानप्रकारमाह पातालमित्यादिना । अत्र आरभ्य इति माद्याः पातालादिसत्यलोकपर्यन्ता लोकाः पादमूलादिशिरोन्तान्यङ्गानि अत्र उक्ता
स्य तस्य हरेरंगानि । किं तर्हि तत्पादमूलाद्यवयवेभ्यो जातानि तदाश्रितानि वा तेन तेष्वेकैकं चिदानंदाद्यात्मकत्वावदवयवैरस्य दोषः शंकनीयः । ए
तस्य पादमूलमित्याद्यभेदोक्तिः कृत्वा ब्राह्मणोऽस्य मुखमासीदित्यादिवदुच्यते एवमेवेन्द्रादिदेवादीनामत्र तत्तदवयवेन्द्रियगोलकाद्यत्वेदकथनं तत्तदं
गादिस्थत्वात्तदाश्रितत्वात्तदधीनत्वाभिप्रायं न तु स्वरूपैक्याभिप्रायं तेषां स्वतन्त्रेभ्यो भिन्नत्वात् इति मायेरूर्थांगानि भूरादीनि स्वरूपतश्चा
देः । तथा वा कुरयो जनाः । एतस्य अङ्गतया ध्विनो हरेः पादमूले पातालं पठन्ति तत्त्ववेदिनः । चिदानंदाद्यात्मकात्पादमूलाज्जातं तदाश्रितं वेति ज्ञानिनः शि

पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ॥ महातलं विश्वसृजः सुगुल्फौ तलातलं वै
पुरुषस्य जंघे २६ द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च । महीतलं तज्जघनं महीपते
नभस्तलं नाभिसरो गृणन्ति २७

क्षेप्सः उपदिशन्ति उपदिश्य तथोपासते त्वेतरत्राप्येवमेवानुसंधेयं । हि शब्द उक्तार्थप्रमाणप्रसिद्धिप्रकाशकः । पार्ष्णिश्च प्रपदं च पार्ष्णिप्रपदे पा
र्ष्णिः पादस्य पृष्ठभागः प्रपदं पादाग्रं विश्वं सृजतीति विश्वसृक् तस्य गुल्फौ प्रशस्तलदृग्गणपिण्डिकारूपपर्वणी महातलं पठन्तीति पूर्वेणा
न्वयः २६ विश्वमूर्तेर्द्वे जानुनी सुतलं । ऊरुद्वयं अतलं वितलं च अधोभागे वितलं उपरिभागे त्वतलमिति विभागः । जघनं कटितटं तत्स्म
रणं विशेषात्त्वया कार्यमित्यतो महीपत इति संबोधितं । अग्र्याधन्वब्रह्मजनकपद्मनिदानत्वाभिप्रायेण नाभिसर इत्युक्तेन तत्स्थलं भुवर्लोकः २७

ज्योतिरनीकं ज्योतिश्चक्रस्थानं स्वर्लोकः महर्लोकोऽस्य ग्रीवेति गृणन्ति । जनो जनलोकः । तपो लोकोऽस्य राटिं ललाटं २८ इन्द्रादयो लोकपालास्त्वस्य बाहव उस्रा
दिशः कर्णगोलकस्थानीयोऽमुष्य हरेः श्रोत्रमिन्द्रियं शब्द इति नासत्यदस्रावश्विनौ नासे नासिके । गन्धो भूमेर्गुणः घ्राणं गन्धग्राहीन्द्रियं धजनकमाद्गुरि
त्यर्थः । इद्धो दीप्तः २९ द्यौः द्युलोकः अक्षिणी गोलके पतङ्गः सूर्यः मनुष्याणामहनी देवादीनामहनी इति उभे च विष्णोः पक्ष्माणि ततो जाते तरा

॥ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य तपो वराटिं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः २८ इन्द्राद
यो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः । नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः २९ द्यौरक्षिणी
चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च । तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालु रस एव जिह्वा ३० छन्दांस्यनन्तस्य शिरो
गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि । हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ३१

श्रितं च परमेष्ठिधिष्ण्यं ब्रह्मलोकः मधुरादिरसः ३० गायत्र्यादिच्छन्दांसि शिरो वचनानि गृणन्ति अर्यमेद्रूपं सूर्यवंशे दंष्ट्रा द्विजा ज्ञाताविति शेषः वक्तृत्व
त्वात्पुनर्दर्शनं वदं गतं वक्तृत्वतत इतिवचनात् । उडुगणाः नक्षत्राणि द्विजानि दन्ताः अत्र पद्यहसंज्ञाभावो लिङ्गमत्यय श्चैवेल तत्पद्योतनायेति ज्ञा
तव्यं । माया मोहनशक्तिः हासो हासादसौ व्यक्ता सप्रपंचमेतिस्मृतात् । दुरन्तसर्गः अनवसानविश्वसृष्टिः ३१

व्रीडा लज्जा अधरः। अधरोष्ठः एवशब्दोऽन्ययोगव्यवच्छेदकः। कः प्रजापतिः। मेढ्रं इंद्रियं वृषणौ वीजहेतू मित्र इति उपलक्षणं वरुणश्च ३२ विश्वात्मनस्तस्य देहे सुप्रसिद्धानदुर्यस्य सतथा तस्य विश्वतनुः प्रतिमा यस्य सतथा तस्य प्रतिवा। वीर्यं रेतो अन्नप्राणि भोग्यं पातिर्गमनं तस्मादयत्र आयुः प्राणिनां जीवनावधि लक्षणमुत्पन्नं कर्म आपारः। तस्मात्सत्वादिगुणानां प्रवृत्तिक्रमः ३३ संध्ये द्वे अव्यक्तं मूलप्रकृति मनोऽभिमानित्वात् चंद्रस्य कामादीनां विकारस्य हेतु

व्रीडोत्तरोष्ठोधर एव लोभो धर्मस्तनोऽधर्मपथोस्य पृष्ठं। कस्तस्य मेढ्रं वृषणौ च मित्रः कुक्षिः समुद्रा गिरयोस्थिसंघाः ३२ नद्यो स्य नाड्योथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र। अनंतवीर्यश्वसितं मातरिश्वा गतिर्वयः कर्मगुणप्रवाहः ३३ ईशस्य केशान्विदुरंबुवाहान्वासस्तु संध्ये कुरुवर्य भूम्नः। अव्यक्तमाहुर्हृदयं मनश्च सचंद्रमाः सर्वविकारकोशः ३४ विज्ञानशक्तिं महिमामनंति सर्वात्मनोंतःकरणं गिरित्रं। अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ३५

त्वसुप्रचारः मनो मनसो जातः ३४ विज्ञानशक्तिं विरिंचं गिरिके कैलाशे त्रायत इति गिरित्रो वा यो ब्राह्मणं यस्य सतथेति वा गिरित्रो रुद्रः सर्वात्मनः सर्वस्वामिनः। अंतःकरणमहंकारः तस्माज्जातः। नखानि नखेभ्यः गर्दभादयो वा या मुत्पन्नाः अश्वतरी श्रोणिदेशे स्थिता स्तस्माज्जाताश्च ३५

वयांसि लौकिकवैदिकानि विचित्राणि तस्य व्याकरणं शब्दः व्याकरणाश्रितानि तज्जातानि वा। मनुर्वा पुंसः तस्य मनीषा बुद्धिः। तेनायमेव मनवे वा विनायेति श्रुतिः। मनुः स्वायंभुवो वा। मनीषा विचारः। भगवद्विचारशक्तिजातत्वात्स्मृतिकर्तृत्वं च मनोः। निवासो निवसनकर्म जनितत्वात् गंधर्वादीनां गुणादिके स्वरस्मृती यस्य सतथा स्वरः षड्जादिलक्षणाः स्मृतिरतीतादिविषया। असुरानीकस्य जनकं वीर्यं यस्य सतथा ३६ ब्रह्मणः ब्राह्मणजातेर्जनकं आननं यस्य सतथा क्षत्रजनाते रुत्पादको भुजो यस्य सतथा विशां जनका वूरू यस्य सतथा अंघ्रिश्रितः कृष्णवर्णः शूद्रजातिर्यस्य सतथा देवपितृभ्यो विनियुज्यमाने स्वाहास्वधा तयोरुत्पादको वीर्यगुणः रेतो गुणास्तेनोपपन्नः। हव्यजनकः आ

वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः। गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः ३६ ब्रह्माननः क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः। स्वाहास्वधावीर्यगुणोपपन्नो हव्यात्मकः कर्मवितानयोगः ३७ इयानसावीश्वरविग्रहस्य यः संनिवेशः कथितो मया ते। संधार्यतेस्मिन्वपुषि स्थविष्ठे मनः स्वबुध्या न यतोस्ति किंचित् ३८ इति श्रीभागवते महापुराणे द्वितीयस्कंधे प्रथमोध्यायः॥ ॥

त्मा मध्यदेहो यस्य सतथा अग्निष्टोमादिकर्मवितानस्योत्पादको योगः उपायो यस्य सतथा वितानं विस्तारः ३७ उक्तार्थमुपसंहरति इयानिति ईश्वरविग्रहस्य वैराजाख्यस्य देहस्य यः संनिवेशः अवस्थितिविशेषः स इयानित्थंभूतो मया ते तव कथितः यतो यस्मादीश्वरविग्रहात् स्थविष्ठात् मनः स्वबुद्ध्या संधार्यते मनो नैर्मल्यायेति शेषः तस्मात्त्वयः ३८ इति श्रीमद्भागवते द्वितीयस्कंधे विजयध्वजनीर्थाख्यानेपदरत्नावल्यां प्रथमोध्यायः॥ ॥

भा॰ द्वि॰
८

एवं वैराजस्य स्थूलरूपस्य धारणाश्रयत्वमुक्त्वास्मिन्नध्याये तन्न हृदयकमलकर्णिकान्तर्वर्तिनो हरेरात्मस्वरूपस्य धारणाविषयत्वं तद्‌द्वार
कानां फलं चोपदिशति। तत्र प्रथमतो धारणायां विघ्नहृन्नये कुत्र कस्य दृष्टफलेयं धारणेति शंकाशंकुमुन्मूलयन् ब्रूहि यद्वा विपर्ययमिति
प्रश्नं परिहरति। एवमित्यादिना। आत्मा परमात्मा योनिः कारणं यस्य स तथा स ब्रह्मा पुरा आदिसृष्टिकाले नष्टां तिरोहितां प्राक्कल्पविषयां स्मृ

श्रीशुक उवाच एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यव
रुध्य तुष्टात्। तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसा
यबुद्धिः १

तिं एवमुक्तया धारणया प्रत्यवरुध्य अंकुरीकृत्य प्रतिलभ्य तुष्टात् अलब्धबुद्धिं गच्छन् व्यवसाये जगत्सर्जनलक्षणे उद्योगे बुद्धिर्यस्य स तथा। तत
एव धारणया एवामोघदृष्टिः अप्ययात्प्रलयात् पूर्वं यथा आसीत् तथेदं जगत् ससर्जेत्यन्वयः। ब्रह्मणा दृष्टफलत्वादियं विश्वसनीयेति वि
ज्ञायते १

राम
८

वाङ्मनसागोचरस्य कथं धारणालंबनत्वमत्राह। शाब्दस्येति। उक्तप्रकारेण श्रोतव्यादित्वेन विवक्षितं सम्मतत्वात् स्वतन्त्रत्वात् ब्रह्मादि सर्वजगत्सृष्टत्वात् स्व
कीर्तिस्थितत्वात् सर्वस्य तदधीनत्वात् सर्वगुणपूर्णत्वात् शब्दस्य ब्रह्मणः वेदादि सर्वशब्दराशेरेव हरिः पंथा विषयो पुरुषवाचो यस्य पंथाः। इंद्रादिनाम्ना
पुरंदरादिविवरूढत्वाद्धरेस्तन्नामवाच्यत्वे रूढेः क्वाथप्रयोजकत्वमत्राह। यन्नामभिरिति मायामये ईश्वरेच्छानिर्मितत्वात् तदधीने संसारे शयानः किमप्य
ज्ञानं वर्तमानो ऽत एव वासनया नानाकर्मवासनया नानायोनिषु परिभ्रमन् यो जीवः तस्य धीः यत् पुरंदरादिकमिंद्रादिनामभिर्ध्यायति तत्र पुरंदरादौ त्र
र्थान् इंद्रादिनाम्नामनुपहतपरमैश्वर्यादिलक्षणान् न विंदते अलब्धबुद्धिं न प्राप्नोतीति किं वा तदुपास्त्या तेषां पुरुषार्थश्च न लभते कुत इत्यत उक्तं अपार्थैः

हरिरेवे २

शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः। परिभ्रमंस्तत्र न विंदतेऽर्थान्मायाम
येवासनया शयानः २

रिति तन्नैश्वर्याद्यर्थानामसंभवात् अतो हरिरेव परमैश्वर्यादिगुणाकरत्वेनाभिधेय इति स एव स्मर्तव्य इत्यभिप्रायः। सर्वत्र समर्त्वं शब्दस्येति भावः। च नु
पसर्गेपि क्विप्प्रत्ययविधानात् ध्यायतीति धीः ज्ञानाश्रयः पुरुषो वायदित्यस्यार्थत्वेनापार्थैरित्यनेन न संयोज्य पदं पार्थैर्यस्मिन् पुरंदरादावपार्थै
रिंद्रादिनामभिः पुरंदरादिकं ध्यायति तत्र पुरंदरादाविति वा। सर्वनाम्नायतो विष्णुः सदर्थान्नं तु स्मरेदिति स्मृतिप्रसिद्धिं हि शब्देनाह २

भा· टि·
९

सर्वशास्त्राणां विश्लेषकविषयत्वे विदुषाम् अपि वदनादिसर्वव्यवहारोच्छेदप्रसंग इति तत्राह। अत इति एवं सर्वज्ञताया अर्थतया हरिरेव श्रेयस्तद्व्यवहारार्थम् अपेतो ऽतः कविः सर्वज्ञः अप्रमत्तो जागरणशीलो नाम्नो हरिविषयत्वम् अविस्मरन्नित्यर्थः। अत एव व्यवसाय बुद्धिर्निश्चय बुद्धिर्नाम सुहरीतरविषये षु घटादिषु अपि वदनादिना यावदर्थः यावान् अर्थः स्वप्रयोजनं यस्य सतथा स्यान्नातो ऽधिकप्रयोजन इत्यर्थः। अन्यथा घटादिलौकिकविषयव्यवहारं मतेरर्णार्थस्वप्रयोजने सिद्धे स्वयम् एव संपन्नेन तत्र यतेतेत्यन्वयः। कुतो ऽत्राह तत्र दितिन तत्परार्थे षु तत्परिश्रमं अर्थशून्यभावेन मनः क्लेशं समीक्षमाण इत्यन्वयः २ ३

॥ अतः कविर्नाम सु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः। सिद्धे ऽन्यथार्थे न यतेत तत्र तत्परिश्रमं तत्र समीक्षमाणः

३ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं। सत्यञ्जलौ किं पुरुधान्नपात्रैर्दिग्वल्कलादौ सति किं दुकूलैः ४

दानीं स्वतः सिद्धिप्रकारं दर्शयति सत्याम् इति दैवनिर्म्मितायां क्षितौ सत्यां कशिपोः शय्यायाः संपादनप्रयासैः किं न किम् अपि प्रयोजनं शरीरयात्रा निर्वाहस्य द्वयान्तरेण सिद्धत्वादिति भावः बाहौ स्वसिद्धे स्वतः अनायासेन संपन्ने सति उपबर्हणैः शिरःपीठैः उच्छीर्षकैः किं करौ जलौ सति पुरुभिर्विप्रैर्लोकैः पर्णपात्रैः किं बर्हपर्णदलपत्र नित्यम् अभिधानं दिशाम् एव वस्त्राणां लाभे सति दुकूलैः निष्कापाद्यन्तैर्म्मादि वसनैः किं ४ राम राम

राम
९

नन्वस्त्वेवं दशानां योगिनां क्षित्यादिना शरीरयात्रासिद्धावप्यपरिपक्वयोगिनां पुंसां कथम् उपभोगः संपत्स्यत इत्यत्राह चीराणीति पथि चीराणि गृहिभिर्द्दत्तानि पथितो रथ्यो दरिद्राणां वा भिक्षूणाम् आच्छादनकराणि वेतिस्मृतेः पथितो रथ्यागृहस्थैर्न्निहितानि चीराणि जीर्णवस्त्राणि भूमिका दिश तिज्ञानि वा न संति। किं तो जनार्थम् इति चेत् परान् पुष्पलपाकादिना बिभ्रतीति परभृतः अंघ्रिपाः वृक्षाः सिद्धाः फलादिना नो दिशंति वा दिशं त्वे वउदकार्थम् इति चेत्। सरितः संप्रमा

चीराणि किं पथि न संति दिशंति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितो ऽप्यशुष्यन्। रुद्धा गुहाः किम् अवधूतसुहृत् न कृष्णः कस्माद्भजंति कवयो धनदुर्म्मदांधान् ५ राम

नाः नद्यः अशुष्यन् अपि किं नाशुष्यन्नित्यर्थः। शयनार्थम् इति चेत् गुहा रुद्धाः पिहिताः किं केन विदिति शेषः। गुहा सुप्तिं हा दिश येन कथं वासः संपद्यत इति तत्राह किम् इति कृष्णो ऽवधूतानां धूलिधूसरांगानां योगिनां सुहृत् न किं सुहृदेव। अतो वस्त्राद्याशयाकवयो धनादिदुर्म्मदेनांधान् विवेकचक्षुरहितान् राजादीन् कस्माद्भजंति न भजेयुर्वस्तुतो ऽसुहृत् कृष्णयह क्षयाल स्वाशनादिना प्राप्य इति भावः ९

इदानीं मुक्तानुष्ठानपरिपाकप्रकारमाह॥ एवमिति। एवमुक्तप्रकारेण यदृच्छोपपन्नाशनादिना वृत्तिं दधानस्य स्वतः स्वतंत्रस्य हरेः प्रसादात्तस्य चित्ते स्वाधीनतया वर्त्तमाने सति भगवानैश्वर्यादिगुणसंपन्नः अनंतः परिच्छेदशून्यः आत्मा परमात्मा देहपुत्रादिभ्योप्यंतिप्रियोऽर्थ इति कृत्वा निर्वृतः सन् दृढनिश्चयेन योगमार्गेऽपि नियतार्थ एतमितः प्रेत्याभिसंभवितास्मीति निश्चितार्थः। पुरुषः तं भगवंतं भजेत कदाचिदपि तद्भजनं न मुंचेत्। ततः किं फलमत्राह। संसा

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननंतः। तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ६

रेति। यत्र यस्मिन्सेव्यमाने सेवकस्य संसारहेतूनामविद्यादीनामुपरमः। अविद्यादीनां सद्भावे सोऽस्तीति शंक्यशंका। तत एव न संत्यज्य इत्याशंक्य मा रेति। ... नः प्रभुरप्रकृतिरितिभावः। तदेतन्प्रेयइत्यादि श्रुतिसिद्धं हरेः प्रियार्थत्वं वचनं केवलं संसारहेतूपरमः फलं किंतु निर्दुःखानंदानुभवलक्षणमो
क्षप्राप्तिश्चेति च शब्दः ६

भजनापरपर्यायोपासनं गुणोपसंहारेण कार्यमिति यदुक्तं तद्गुणकथनपूर्वकं तदेवोपासनं स्पष्टीकुर्वन्विपक्षे बाधकमाह॥ स सर्वधीवृत्तीति। योऽणीम य एवैतस्मिन्पुरे नायतीति श्रुतेः। पंचवृत्तिरिकोऽसुखज्ञाणि एवं यथा स्वप्नजनस्येक्षिता द्रष्टा तथा स हरिः सर्वान्वेत्तीति सर्ववित् हृदि स्थितत्वादनुभूय चेप्साऽनंदानुभवनात् सर्वैः गुणपूर्णः आत्मा स्वामीत्येवं गुणाननुपसंहृत्य सत्यं सर्वतः सारमानंदनिधिं तं विष्णुं भजेत उपासीत तत्रापि प्रियाद्यादिसद्भावेऽप्युपासनं न हातव्यमित्याशयेनोक्तं सर्वात्मनेति। अतोऽन्यतः परमात्मानुपासने आत्मघातः अहितकरणादिना स्वात्महननात्संसारदोषापत्या नित्यदुःखतमः

स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः। तं सत्यमानंदनिधिं भजेत सर्वात्मना तोऽन्यत आत्मघातः ७

प्राप्तिः स्यादित्यन्वयः। विशदस्तु तद्योग्यतानुसारेणास्मिन्नर्थे यथैकस्य बहुस्वप्नानन्य असुप्तः पश्यति प्रभुः। यथैव भवनादिभ्युरत्वभूः परिकीर्तितः इत्यादेरुक्त एवार्थ इति स्वेच्छानुकूलविग्रहग्रहणाद्यनुभव अत्र नेनशब्देन दत्तानि देहानि लक्षणानि कर्माणि त्यानंदशब्देन कर्माणपुण्यं तत्तेषां फल पर्यंतं निधायकत्वेन विधिपालनत्वात् स्वामित्वाद्यानंदनिधिः हरिः स्वंवा ७

भा० द्वि०
११

भगवदुपासनामकुर्वाणस्य पशोरपि वैलक्षण्यं न स्यादित्याह। कस्मिन्निति नरके विगततरणत्वाद्वैतरणीनाम नदी यातस्यां हरेरनुपासनादोषात्प
तितं स्वकर्मजान्स्वकृतकर्मसमुद्भूतान्परितापान्सर्वतो दिशमायातान्दुःखविशेषाननुजुषाणं भुंजानं जनं गुरुशास्त्रोपदेशदृष्ट्यापश्यन्क श
दृष्ट्वा चिंततादृशदुःखनिवर्त्तकानन्तबुद्धिगोचरसुखप्रदं हरिं पश्यन् को विवेकी तं भगवंतमनादृत्यासतीमसुखां परानुचिंतामितरविषयानुपास्ति
लक्षणां स्मृतिं कुर्यात्। पशुस्त्वविवेकबुद्धिराहित्यात्कृतेऽपि यदि कुर्यात्तर्हि स पशुरेव न विवेकीत्यन्वयः। चतुर्वेद्यपि यो विप्रो वासुदेवं न विंदति वेद

कस्तां त्वनादृत्य परानुचिंतामृते पशूनसतीं नाम कुर्यात्। पश्यन्जनं पतितं वैतरण्यां स्वकर्मजान्परितापान्
जुषाणं ८ केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं। चतुर्भुजं कंजरथांगशंखगदाधरं धार
णया स्मरंति ९

भारभराक्रांतः स वै ब्राह्मणगर्दभ इति ८ योग्यतातारतम्येनाधिकारिणां वक्तृत्वात्स्थूलरूपोपासनायोग्यानां तदुपास्तिमभिधायाधुना
स्वदेहहृदयकमलकर्णिकानिकेतनात्मोपासनायोग्यानां तदुपासनाविधिमाह केचिदिति। केचिदात्मोपासनायोग्याः स्वदेहांतर्हृदयावकाशे वसंतं
प्रादेशमात्रं प्रादेशपरिमाणं कंजं पद्मं रथांगं सुदर्शनं शंखं पांचजन्यं गदां कौमोदकीं धारयतीति कंजरथांगशंखगदाधरस्तं धारणया तैलधाराव
दविच्छिन्नमनोवृत्त्या स्मरंतीत्यन्वयः ९

राम
११

श्लोकचतुष्टयेन तमेव विशिनष्टि प्रसन्नवक्त्रमित्यादिना। प्रसन्नं भक्तानां प्रसादाभिमुखं वक्त्रं प्रसन्नतथा तं नलिनवत्पद्मरूपपद्मदलवदायते दीर्घे ईक्षणे य
स्य स तथा तं। कदंबः कदंबवृक्षस्तस्य पुष्पस्य किंजल्कं केसरं कुरविशेषस्तद्वत्पिशंगं पीतं वासो यस्य स तथा तं लसन्महाहारश्च हिरण्मयांगदश्चेति लस
न्महाहारहिरण्मयांगदः तं स्फुरंति शोभमानानि महांति वराणि रत्नानि येषु तैर्युक्ते किरीटकुंडले यस्य स तथा तं १० उन्निद्रस्य विकसितस्य हृत्पंकजस्य

प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससं। लसन्महाहारहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलं १०
उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं। श्रीलक्षणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालया
चितं ११ विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः। स्निग्धामलैः कुंचितनीलकुंतलैर्विरोचमानान
नहासपेशलं १२

कर्णिकारूपालये योगेश्वरैः सनकादिभिरास्थापितौ पादपल्लवौ यस्य स तथा तं श्रीरेव लक्षणं चिह्नं वक्षसि यस्य स तथा तं कुक्षौ लसत्प्रभुदाज्ञातं कौ
स्तुभे नरत्नेन युक्ता कंधरा यस्य स तथा तं। अम्लानानां नवपल्लवदलानां लक्ष्मीर्यस्याः सा तथा तया ११ मेखलया कांच्या अंगुलीयकैरंगुलीभूषणैः
महांति धनानि गृह्णंतीति महाधनानि तैः स्निग्धाश्चामलाश्च ते कुंचिता वक्राश्च नीलाश्च ते कुंतलाश्च तैः विरोचमाने आनने यो हासस्तेन पेशलं सुंद
रं १२

अदीनलीलयोद्भूतास्मितेन हासितेनेक्षणेन चोल्लसन् संलग्नः भ्रूभङ्गो येन सञ्जातविशेषेण संसूचितो भूर्यनुग्रहो येन तम् ईदृशं चिन्तयेत् चिन्तामयं चिन्ताप्रधानं यस्मात् सञ्चिन्तितो विष्णुश्चिन्तितं प्रददात्यजइत्यादेः। किंयन्तं कालं चिन्तनमत्राह यावदिति। यावत्स्वधारणयास्मयोगेन मनो वलमवतिष्ठते तावदिति शेषः १३
सर्वाङ्गस्मरणाशक्तस्य स्मरणप्रकारमाह। एकैकश इति। ध्यानेन जितं जितं मनायासेन ध्यानविषयं स्थानं मवयवमपोह्य वशीकृत्य परं परमजितमङ्ग

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहं। ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते १३
एकैकशोऽङ्गानि धियानुभावयेत् पादादि यावद्धसितं गदाभृतः। जितं जितं स्थानमपोह्य धारयेत् परं परं शुद्ध्यति धीर्यथा यथा १४

तमनन्तमनवयवं पादमारभ्य यावद्धसितं पुष्पितं वनमिति वद्धासेन विकसितं मुखं वहसितमिति लक्षनेनमुखपर्यन्तं सांगोपांग प्रतिधिया मनो धारयेद्यथा यथा धीः शुद्ध्यति सर्वाङ्गध्यानेन समासवतितथा तथास्वर्थं कुर्यादतः सर्वाङ्गध्याना सामर्थ्ये तावत्पर्यन्तमेकैकावयवमनुभावयेदित्यर्थः १४

इममर्थमुपसंहरति। यावदिति। परा ब्रह्मादयोऽवरा यस्मात् स परावरस्तस्मिन् द्रष्टरि सर्वसाक्षिणि विश्वेश्वरे हरौ यावत्सर्वोन्नमो ममप्रकारकोत एवम् ... ततः श्रियतम इति ज्ञानपूर्वकप्रेमलक्षणभक्तियोगो दृढध्यानप्रापको न जायेत तावत्स्थवीयान्पातालमूलमित्यादिनोक्तं सर्वलोकदेवाद्याधारं पुरुषस्य स्थवीयो अतिस्थूलं रूपं स्मरेत् तत्रापि निरन्तरध्यानाशक्तः सन्नित्यक्रियावसाने प्रयतः प्रयत्नवान् स्मरेते तन्त्वयः १५ इदानीं मुक्तविधोपासनाजनितज्ञानेनापरोक्षीकृतपरमात्मतत्त्वस्य तत्स्मरेत तत्रापि ... इति। यतिर्निर्जितेन्द्रियादिज्ञातब्रह्मादितत्त्वस्य च ज्ञानिनो यदा देहत्यागेच्छा तदा स्वदेहगतेन्द्रियाद्यभिमानिदेवतालयस्मरणपूर्वकं मोक्षप्रकारमाह। स्थिरमिति। यतिर्निर्जितेन्द्रि

यावन्न जायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः। तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत १५ स्थिरं
सुखं चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग लोकं। काले च देशे च मनो न सज्जेत् प्राणान्नियच्छेन्मनसा जितासुः १६

ययामोऽपरोक्षज्ञानी इमं लोकं देहं यदा जिहासुः त्यक्तुमिच्छति तदा यथा सुखं भवति तथा स्थिरं मचलमासनमास्थितः काले देशे च कालस्य शुभे देशस्य शुभविषयेषु धावन्मनो न सज्जेत् सक्तं न कुर्यात् तत्र प्रथमं नकाश्यवशेन प्राणान्विषयानन्धावन्तीन्द्रियाणि च नियच्छेत् ततश्चाहरेदाहत्य च प्राणान्नियच्छेत् प्राणायामान् कुर्यादेवं जितासुः मन्त्रप्राप्तप्राणप्रसादं इन्द्रियेश्वरकान्दिशादिदेवान् मनो अभिमानिनीन्द्रियच्छेत् इन्द्राधीनाश्रितयेत १६

भा॰ द्वि॰
१३

मनश्चमनोभिमानिनमिदं वामलयाबुद्ध्याबुद्धिदेवतयोमयानियम्यतत् धीनंस्कृत्वाएतंबुद्धिदेवतायुमां क्षेत्रज्ञेनीबांतर्यामिणिहरौनिनयेत् नितरांतदधी नंचिंतयेततं क्षेत्रज्ञमात्मनिदेहमध्यस्थेहरौनिनयेततदैक्येनचिंतयेततंदेहगतमात्मानंहरिमात्मनिसर्वगतेहरावव रुध्यतदैक्यभावेनसंचिंत्यदेहाद्यु क्रमेलब्धोपशांतिः श्रमसर्वाधिकमंगलास्यविष्णुरूपोधीरः कृत्वाद्विविधनिषेधलक्षणात्कार्याद्विरमेदित्यन्वयः।मनस्त्राणादभिमानिनित्वाजितत्राणेणा लब्धतुतत्जीवस्तोभगवान्विष्णुः क्षेत्रज्ञइतिगीयते हरूतक्तसएवात्माआत्मोप्यात्मेतिसर्पते।हरौहरेर्भक्तनीतिमदेकत्वस्यचिंतनं।अन्यत्रतन्नियम्यादि चिंतनंनीतिरुमतइतिश्रमाणस्यउक्तएवार्थोन्योनस्वकपोलकल्पितइतिभावः।मनस्तत्वेबुद्धितत्वेबुद्धितत्वंक्षेत्रज्ञेधिष्ठानभूतेतंक्षेत्रज्ञाधारमात्मनि चिंतनंनीतिरुमतइतिश्रमाणस्यउक्तएवार्थो

मनस्तुबुद्ध्यामलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमात्मनि।।आत्मानमात्मन्यवरुध्यधीरोलब्धो
पशांतिर्विरमेतकृत्यात् १७

राम
१३

शोधितत्वंपदार्थविन्मात्रेतमात्मानंशोधितत्वंपदार्थभूतमात्मनिशोधिततत्पदार्थभूतेपरमात्मनिअवरुध्यैकीकृत्यभेदहेतुमविद्यामधिष्ठानयथा र्थज्ञानेननिरस्यकृत्यात्विरमेतेतिमायावादिनः।एतायदृष्टिद्वयंबुद्धितत्वेक्षेत्रसमष्टिरूपहिरण्यगर्भात्मनितं क्षेत्रज्ञमात्मनिकारणात्मकेतंकारणात्मा नमात्मनिशुद्धेब्रह्मणिअवरुध्यकृत्यात्विरतः स्यादितिवैराणिकंमन्याः इतिद्वयमपिप्रमाणविधुरत्वादुपेक्षणीयं।मनश्रुतिवशब्देनमनःशब्द वाच्यंरुद्रंबुद्धिशब्दवाअवाणींविरिचिलक्ष्मीद्वाराक्षेत्रज्ञेलयंतत्वानांस्वस्वकारणेपुकल्प्यातइतिज्ञातव्यं।उपाधीकेसमीयेवेति।शांतिःप्रशममं गलेइतिवमंगलंतगवाश्वविष्णु

एवमुक्तांतां तानीयंलोकमाशांतितमितरलोकेभ्योव्यावर्त्तयति।नयत्रेति।यत्रयस्मिन्लोकेअनिमिषाणांरुद्रादिदेवानांप्रभुः कालोवायुर्नप्रभुःस शक्तेरुद्रोधकः।हरिश्चप्रकृतिश्चैववत्सवायूतथैववैतादेः।येरुद्रादयोदेवाः जगतामीशिरेजगंतिस्वस्वकार्यप्रवर्त्तयामासुः तेदेवानप्रभवंतिकुतोन्या

प्रभुः॰२

नयत्रकालोनिमिषांपरःप्रभुःकुतोनुदेवाजगतांयईशिरे।नयत्रसत्वंनरजस्त
मश्चनवैविकारोनमहान्प्रधानम् १८

वकाशःनकुतोपीत्यर्थः।यत्रयस्मिन्स्थानेसत्वादिगुणत्रयंयत्स्वशक्तिप्रकाशकंनविकारोवैभूतेंद्रियात्मकोहंकारश्चन।महान्महत्तत्वंचनप्रधानंप्रकृ तिश्चनान्यरादिस्वधर्मापादिकानभवतीत्यर्थः १८

भा. द्वि.
१४

ननुकालादिसंसर्गाभावात् शशविषाणवन्नास्तीति तत्राह परंपदमिति तद्धि एवं विष्णोर्विद्यमानं परं पदं शास्त्रज्ञा आमनंति पठंतीत्यन्वयः अनेनन
थाकालादिकृतोपद्रवो हरेर्नास्ति तथा लोकस्यापीत्युक्तं भवति यत्संबंधाल्लोकोपि नाहङ्ग हि मायाविलुः किंमु हि मेतित तत्राह। यन्नेति। वैष्णवमित्यनेन प्रकृतो
विष्णुर्यमित्युच्यते अतत्तस्मात् ब्रह्मण इतरत् संसारलक्षणं दुःखमुत्सिसृक्षवः त्यक्तुकामाः विशिष्टाधिकारिणोयं विष्णुर्नेतिनेतिश्रुत्यादिवचनाकाश
दिवचनतत्कारणमहदादिवचन। तदभिमानिवचनेन तु पास्य दौरात्म्यं दुरात्मना मासुरप्रकृतीनां विद्यमानं संसारदुःखं विसृज्यानन्यसौहृदा अनन्यभ

परंपदं वैष्णवमामनंति तत्यन्नेति नेतीत्यतदुत्सिसृक्षवः।। विसृज्य दौरा
त्म्यमनन्यसौहृदा हृदोपगुह्यापुरं पदे पदे १९

न्य हृदा निरतिशयस्नेहलक्षणसख्येनोपगुह्य पदे पदे मनसा निरंतरं परिरभ्य यमापुः। एवंविधस्य हरेर्विद्यमानमिति पूर्वेणान्वयः। यद्वा यत्सर्वोत्तमंपर
मंगलं विष्णुरूपं आमनंति यद्रूपमितरे भोग्यावर्त्मयंति। नयन्नेति। अतत् तस्माद्ब्रह्मणोन्यत् जगदुत्सिसृक्षवस्त्यक्तुकामाः सवासनं अनात्मानं नेतिनेती
त्यादिवेदार्थं नेतिनेतीत्यामनंति तद्दित्यन्वयः। वेदा नाम वेतनत्वेन बुद्धिपूर्वकप्रवृत्त्यसंभवात् कथं तदुक्तं निर्णेतुं शक्यत इत्यत आह। विसृज्येति। वेदोक्तं
निर्णीय दौरात्म्यं दुष्टोपाधिमैक्यविषयं। विसृज्य पदे पदे अर्वाक् हृदोपगुह्यापरोक्षीकृत्यानन्यसौहृदाभूतभवद्भविष्यतो यमापुः आप्नुवंतीत्यर्थः
तिवा ते युक्तमुक्तमिति १९

राम
१४

संप्रति ज्ञानिनो देहादुत्क्रमणप्रकारमाह। इत्थमिति। तु शब्दः प्रकरणार्थः। इत्थं स्थिरं सुखं वासनमित्युक्तप्रकारेण मुनिरुपरमेदुत्क्रांतो भवेत् कथ
मत्राह। व्यवस्थित इति। देहात् उत्क्रमणे व्यवस्थितो निश्चितबुद्धिर्विज्ञानमात्मयोगपञ्चानं तेन विविषयं तदेव दृक्तस्या वीर्येण सुष्ठु रंधितो दग्ध आशयो वा
सनाः करणं यस्य स तथोक्तः। विज्ञानं ब्रह्मेति श्रुतेर्विज्ञानस्य ब्रह्मणो दृशो वीर्येणेति वा जितक्लमः शरीरग्लानिरहितः। प्रथमं स्वपार्ष्णिना गुल्फाधोभा
गेन गुदमपानद्वारं आपीड्य ततोपानद्वारनिरोधानंतरं ततो मूलाधारात् चतुर्दलपद्मादनिलमुदानवायुमुन्नाम्य नाभिहृदयोरस्तालुमूलभ्रूमध्यमूर्ध

इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः। स्वपार्ष्णिनापीड्य गुदं ततोनिलं स्थानेषु षट्सून्न
मयेज्जितक्लमः २० नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः। ततोनुसंधाय धियामन
स्वी स्वतालुमूलं शनकैर्नयेत २१

सु षट्सु स्थानेषु क्रमादुन्नमयेदूर्ध्वं गमयेदित्यन्वयः २० संक्षिप्योक्तं विशिनष्टि नाभ्यामित्यादिना। मुनिर्मूलाधाराच्चतुर्दलपद्मात् तृतीयनाभ्यां स्थितं षट्
दलपद्मे नीतमुदानगत्या ब्रह्मनाड्या हृदि द्वादशदलपद्मे अधिरोप्य संनिधाप्य ततो दशदलपद्मात्तस्मादुरसि द्वादशदलपद्मे नयेत्स मनस्वी मनःसमाधा
ने निरतः ततो द्वादशदलपद्मात् यथा नाड्यंतरं न गच्छेत्तथा धियानुसंधाय शनकैः संभ्रमेण स्वतालुमूलं षोडशदलकमलं नयेत २१

निरुद्धेति। निरुद्धाः सप्त नासिकानां कर्णयोः श्लिनासिकादिंसं
तस्मात् भ्रुवोरन्तरं भ्रूमध्यस्थितं हृद्दलेकमलमुन्नयेत तत्रापीति कर्तव्यमतयास्या ममित्याह। निरुद्धेति। मनसा परंगतो भ्रूमध्ये मुहूर्तार्धं स्थित्वा मार्गाम्प विशेषेमुख
ज्ञानां पंथा नो येन स तथोक्तः अनपेक्षः वाह्यसुखे निस्पृहः अत्रापीच्छाभावमाह स्थित्वेति। मनसा परंगतो भ्रूमध्ये मुहूर्तार्धं स्थित्वा मार्गाम्प विशेषे
कुंठदृष्टिः मूर्द्धन्मूर्द्धनि शिरोमध्ये निर्भिद्य विसृजेत् शरीरमिति शेषः गत इत्यनेन वितनमुख्य तेत्रथैक योर्ध्व उदानः प्राणापानादिवायवो पिंगलयाव
वर्त्तितः मानः संधिषु सर्वत्र उदानो ब्रह्मनाडिगइति श्रुतिस्मृतिभ्यामुदानगतिर्ब्रह्मनाड्यामिति सिद्धं। इत्थं मुनिरित्यनेन निर्गुणविद्याफलमुक्त्वा
पाश्रिनेत्यनेन सगुणविद्याविदो देहोत्क्रमणप्रकार उच्यत इत्यतद्दुपपन्नं एकवाक्यतया मुख्यार्थसंभवतिवाक्यभेदायोगादिति २२ एवं देहादुत्क्रां
तानां योगिनां प्राप्यस्थानं गम्यं वाह यदीत्यादिश्लोकद्वयेन। अत्र यदि यदर्थे निशब्दः पुनरावृत्त्याचितमाप्तव्याहि य दि सम्यगपक्कतन्त्रादिसाधनवा

तस्माद् भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोनपेक्षः। स्थित्वा मुहूर्तार्धमकुंठदृष्टिर्निर्भिद्य मूर्द्धन्विसृजेत्परं गतः २२ यदि
प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं। अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेंद्रियैश्च २३

स्यर्हि अथोत्क्रमणानंतरमेव पारमेष्ठ्यं परमेष्ठिनो ब्रह्मणो लोकं प्रयास्यति तत्रापि किं करोतीति तत्राह अथेति अथ तल्लोकप्राप्त्यनंतरं पुनरुत्पत्तिहीनो
ब्रह्मसालोक्यमात्रं प्राप्य ब्रह्मत्वादिकल्पाणपरिपाकाभ्यां योगी वसति अनंतरं ब्रह्मप्रलये ब्रह्मणा सह स्वयोग्यां मुक्तिं प्राप्नोतीति शेषः। उत शब्दोप्यर्थे
यद्यपि तत उत पूर्वोक्तयोगिनोप्यपरिपक्कतन्त्रादिकल्पाणां वांछाहि वैहायसानां वैमानिकानां सिद्धानां विहारं क्रीडास्थानं महर्लोकादि प्रयास्यति तत्रा
यद्यपि तत उत पूर्वोक्तयोगिनोप्यपरिपक्कतन्त्रादिकल्पाणां वांछाहि वैहायसानां वैमानिकानां सिद्धानां विहारं क्रीडास्थानं महर्लोकादि प्रयास्यति तत्रा
प्यणिमादियोगानामाधिपत्यमवाप्य वसति॥ अथ यदि सम्यक् पक्कतन्त्रादिसा
स्य योगफलमाह। अष्टाधिपत्यमिति अथ महर्लोकादिस्थानेष्टानामणिमादियोगानामाधिपत्यमवाप्य वसति यदि श्वेतीकालेव
नपतीकालेव नस्त्वर्हि यत्र पवनस्यांतरात्मा विकुंठनाथस्तत्र विकुंठनाथलोके मुक्तस्थाने अस्मुक्तैर्ह्यादिभिरुपास्यमानं हरिं प्रयास्यति यदि श्वेतीकालेव
नस्त्वर्हि यत्र पवनस्यासावंतरात्मा वेति पवनांतरात्मा वायुर्ब्रह्मा वा तत्र सत्यलोके वा युक्तब्रह्माणं प्रयास्यति किमुक्तं भवतीत्याह २३

योगेश्वराणामिति। त्रिलोक्याः भूम्यंतरिक्षस्वर्गसंज्ञायाः बहिर्महर्लोकादौ योगेश्वराणां गतिमामनंतीत्यर्थः कृतल्लोकप्राप्तौ साधनविशेषमाह नविद्येति
। विद्यापरो ज्ञानं तत्तदादि पुरुषार्थसाधनसामग्रीमतां पुंसां तां महर्लोकादिगतिं केवलकर्म्मभिर्न प्राप्नुवंति किंत्वपरोक्षज्ञानेनैवात्रायं कश्चन विशेषः गुणा
नां सत्वादीनां संनिवायः संनिवासो यत्र सगुणसंनिवायः तस्मिन्महर्लोकादिवैकुंठामुक्तस्थानावधिके प्रदेशे प्रयास्यन्नुपाधींद्रियमनोभिः सहैव गच्छेत्तत्रा
विकृतनिजरूपस्याप्यितत्स्यारब्धकर्म्ममोक्षपर्यंतं दग्धपटवत्तेषां स्थितेः सूक्ष्मः पश्चात्तज्ज्ञानादिगुणसंनिवाये मुक्तस्थाने चिन्मात्रेंद्रियमनोभिः सहैव वसे

योगेश्वराणां गतिमामनंति वहिस्त्रिलोक्याः पवनांतरात्मा॥ नकर्म्मभिस्तां गतिमाप्नुवंति विद्या
तपो योगसमाधिभाजां २४

ति। तदुक्तं चिन्मात्राणींद्रियाण्याहुर्मुक्तानामस्पष्टं वचिति। ईपुरुषी नकर्म्मणा लोकानुज्ञानेनैव तदुत्तरान्। तत्र मुख्यमाहरियांतितदन्ये वायुमेव तु। अपका
येन तेषां तिवायुं वा हरिमेव वा। स्थानमात्राश्रिताः स्ते न पुनर्जनिविवर्जिता इति स्मारव्याववनवलाद्व्याहारेणमाख्यातं। ननु स्वमनीनो से ह्यावलादि
ति। यदि पारमेष्ठ्यादिलोकं प्रयास्यति तर्हि मनसेंद्रियैः सहैव गच्छेदिति वान्वयः। यत्र योगेश्वराणां गतिं त्रिलोक्याः बहिरामनंति। यत्र च पवनां
तरात्मा तत्र विद्यादिभाजां तां गतिं कर्म्मभिर्न प्राप्नुवंतीति वा २४

तस्य योगिनो मार्गमाह। वैश्वानरमिति। सुषुम्नयानाड्योत्क्रम्य विहायसा हृदयाकाशेन ब्रह्मपथेन सुषुम्नया सुषुम्नाख्येन शो विपाप्मा विःशोचिर
र्ब्रह्मरन्ध्रमिधानं गतो निर्गतोऽर्चिरादिदेवानुगत्वा यं वैश्वानरं याति अथ वैश्वानर आश्मा विधूतकल्कोऽरस्थपापतृणमंते वैश्वानरलोकाद्धुदग्रा
मी सुपरिहरेः शैषुमारं वक्रं शिंशुमारस्वरूपं प्रयातीत्यन्वयः। वैश्वानरेद्धनद्यावा सूर्येण देहएव वाविधूयसर्वपापानि यानि किं कुर्वके शवमिति
तत्रायेति सूचितं २४ वैश्वानरो नामक इत्यत्राह योनइति। यो भूतानामंतः कोष्ठगाग्नेः छित्त्वा तदुक्तं चतुर्विधमन्नं पचति यश्च ब्रह्मांडमध्यगाः स्व

वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा। विधूतकल्कोऽथ हरेरुदस्ताद्व्रयाति
चक्रं नृप शैंशुमारं २४ योंतः पचति भूतानां यश्च पत्युरमध्यगः॥ सोग्निर्वैश्वानरो मार्गो देवानामपि
त्वर्गां मुने: २५

पुरमध्यगः स्वपति प्रकाशते सः प्रधानवह्निः वैश्वानराख्यः ब्रह्मदेवपितृलोकं गंतुमुनेर्योगिनः कर्मयोगिनश्च गम्यत्वान्मार्ग इतीरितः इत्यन्वयः। पि
तृयानं देवयानं ब्रह्मयानमिति त्रिधा। गच्छ वैश्वानरं याति तस्मान्मार्गः स ईरित इति वा देवयानेन गंतृणां वैश्वानरादर्वाग अर्चिरादयो गम्याः संति तत्र
ब्रह्मदेवपितृलोकं गंतृभिः सर्वैरपि वैश्वानरः प्राप्यत इति द्योतनाय वैश्वानरं याति इति प्रथमत एव वैश्वानरस्यात्रिकथनमिति ज्ञातव्यं २४

केन हि तरश्रित तत्राह। देवयानमिति शरीरदक्षिणपार्श्वस्थपिंगलाख्यनाडीभिः शतायुषामरणोत्क्रमणादहानि अहः संज्ञदेवयानमेति इडाभिर्हि वामपार्श्वस्थ
इडाख्यनाडीभिः शतायुषामरणेनोत्क्रमणात्रात्रीः रात्रिसंज्ञं पितृणां यानं पितृयानमेति। देवयानपितृयानमार्गस्थानामहरादिकालाभिमानिनीनां देवता
नां प्रायुर्यादहानि रात्रीरिति वहुवचनं दक्षिणाः पिंगलाः सर्वा इडा वामाः प्रकीर्तिताः। नाड्योथ मध्यमा प्रोक्ता सुषुम्ना वेदपारगैरिति देवयानस्य मार्गस्था
अहः शब्दाभिसंज्ञिताः। पितृयानस्य मार्गस्था रात्रिशब्दाद्धयामता इति वा। पिंगलेडामध्यस्थया सुषुम्नया नाड्या शतायुषा विशिष्टसुखवत्त्वान्न हि सुवता

देवयानं पिंगलाभिरहान्येति शतायुषा॥ रात्रीरिडाभिः पितृणां विषुवत्तां सुषुम्नया २५ राम राम

ख्यं ब्रह्मयानमेति। विशिष्टसुखं विषुतदस्यास्तीति विषुवत्तस्य भावः विषुवत्तां तां सवयोरभेदाहीन्नुपसर्गयोगाद्धासकारस्य षकारः विषुवत्तां ब्रह्मयानं
विशेषेण सुखं यतः इति रागोपरक्तसुखादिदानत्वात् पिंगलादेर्देवयाना दिशब्दवाच्यत्वात् दुक्तं पिंगला देवयानं स्यात् पिंगाख्यसुखं दयतः। इडाननरा
नात्पितृणामेवं मार्गाः प्रकीर्तिता इति अत्र देवयानब्रह्मयानयोरेवांतरो वर्गं तव्यः २५

मा· द्वि·
१८

अधुना शिंशुमारलोकादुपरितनमार्गप्रकारमाह तदिति। शिंशुमारमित्यनेन यद्रूपमुक्तं विष्णोस्तत् विश्वनाभिं विश्वाधाररूपं प्रतिपद्य तु शब्दात्तदप्यतिवर्त्य अणीयसा सूक्ष्मतरेणात्मना लिङ्गदेहेन सर्वोपाधिविशुद्धेन एकः ब्रह्मविदां नमस्कृतं लोकमुपैति तं विशिनष्टि कल्पायुष इति कल्पायुषः। यन्महर्लोके भृग्वादयो विबुधा रमन्ते। कल्पान्तरेषु पुनर्भाविनः। अणीयसा सूक्ष्मतरेणात्मना स्वरूपेण सर्वोपाधिविशुद्धेनेत्यर्थः। विरजेन विगतरागादिदोषेण। एकः। किं विशिष्टं रूपं ब्रह्मविदां समुदायेन नमस्कृतमेकं मुख्यके वलमिति वा महर्लोकं कल्पायुषः स्वर्ग्या महर्लोके कल्पायुषो विबुधा यद्यत्र रमन्ते क्रीडन्तीति तमिति शेषः। किं विशिष्टं रूपं ब्रह्मविदां समुदायेन नमस्कृतमेकं मुख्यं केवलमिति वा महर्लोके कल्पायुषो विबुधा यत्र रमन्ते क्रीडन्तीति तमिति शेषः। किं विशिष्टं रूपं ब्रह्मविदां समुदायेन नमस्कृतमेकं मुख्यके वलमिति वा मन्वन्तरायुषः स्वर्गाद्महर्लोके कल्पायुषो विबुधा यद्यत्र रमन्ते क्रीडन्तीति तमिति शेषः। किं विशिष्टं रूपं ब्रह्मविदां समुदायेन नमस्कृतमेकं मुख्यके वलमिति वा मन्वन्तरायुषः स्वर्गान्महर्लोके कल्पायुषो विबुधा यद्यत्र रमन्ते

॥ तद्विश्वनाभिं त्वतिपद्य विष्णोरणीयसा विरजेनात्मनैकः। नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते २६

राम
१८

लोके किं च न तपो लोके ज्ञानादिपरिपाकाय अन्यलोके हर्षाज्ञया वसति ब्रह्मयानेन गताः अथ ते कालेन वनाः यतीकालं वनाश्च शिंशुमारः हरिणा तु ज्ञाता अस्मै देवानिरूढ्वा यदस्मिन् संकर्षणाग्नि दुद्ध्वा न प्राप्य द्विसप्तिर्वायु प्राप्यते न कार्यं ब्रह्म प्रापिताः तदुपदेशं प्राप्य यती कोपासकाः निवसन्त्यन्ये तु ते न वायुना परं ब्रह्म प्रापिताः तल्लोके निवसन्तीत्यादि विशेषणक्रमशः दृष्टेन सूचित इति ज्ञातव्यं २६

महर्लोकादिषु विहरतां तथा ज्ञानादिसाधनपरिपाकाय च निवसतां चतुर्मुखप्राप्तिप्रकारमाह। अथो इति। महर्लोकादिषु वसन्तु सज्ज्ञानिसंघो यो द्विपरार्द्धावसाने ब्रह्मप्रलये ब्रह्मणा सह मुक्तिं यास्यन्। सिद्धेश्वरैः सनकादिभिः जुष्टस्य चतुर्मुखस्य धिष्ण्यं निवासस्थानं यत् द्वैपरार्ध्यं द्वयोः परार्द्धयोः संबन्धि चतुर्मुखस्यायुः परेति नाम चतुर्मुखायुर्ब्रह्मणः शतसंवत्सरभोग्यमित्यर्थः। तत्पारमेष्ठ्यं निर्याति महर्लोकादेर्निर्गत्य सत्यलोकमाप्नोतीत्यर्थः। गंतुं हेतुमाह। अनंतस्येति।

अथो अनन्तस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं। निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यं २७ राम

तिअनन्तस्य भगवतो मुखानलेन मुखान्निर्गताग्निना पुनः पुनर्दंदह्यमानं विश्वं निरीक्ष्य संकर्षणमुखाग्निना प्रपंचस्य दाहो हेतुरित्यर्थः। उ शब्दो ब्रह्मलोकं प्राप्यतेनैव सह मुक्तिं प्राप्नोति इत्यस्मिन्नर्थे वर्त्तते २७ श्रीराम राम

सत्यलोकस्येतरलोकेभ्यो वैशिष्ट्यमाह। नयत्रेति। यत्र ऋते सत्यलोके शोकादयो न सन्ति। आधिक्रमसनेविन्न दुःखविष्ठानं बंधयोरिति व्यसनमाधिरुत्वोद्वेगयत्रा मिदं विदां मब्रह्मविदां कृपया दुःखस्य प्रभवस्य जननादिलक्षणस्यानुदर्शनात् जनस्य पश्चित्ततोदः सोपिनास्तिं सत्यलोकमाप्नोतीति पूर्वेणान्वयः। जना दिलोकापेक्षया सत्यलोकस्य वैशिष्ट्यं न तु मुक्त्यपेक्षयात्। तदुक्तं। सर्वदुःखविहीना येसुक्ताः प्रायश्चतादृशाः। अमुक्ताश्च जनाद्येषु विशेषेणतु स

नयत्रशोको न जरा न मृत्युर्नार्तिर्न चोद्वेगऋते कुतश्चित्। यच्चित्ततोदः कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात् २८ राम

त्यगा इति। ननु यदि ब्रह्मणा सहैव मुक्तिः सर्वेषां तर्हि ततः पूर्वमायासेन साधनसामग्रीसंपादनं व्यर्थमिति चेत्। न योग्यता वा कृविध्या मुक्तिप्राप्तेरपिवा ङ्गविधत्तिदुक्तं विभ्रो ब्रह्मं तद्देवैके यांति कालांतरे परे। आशु येवहरेः केचित् प्राप्नैः केविदं जसा। विहृत्येवाल्पलोकेषु मुच्यंते ब्रह्मणा सहेति २८

एवं देवयानेन गत्वा सत्यलोके पर ब्रह्मलोके वस्थितानां ज्ञानिनां मोक्षं वक्तुं देवमुक्तिप्रकारमाह। तत इति पृतीकालंवनाप्रतीकालंवनसंज्ञः सज्ञानिष्ठो ब्रह्मप्र लये स्वबिंबं प्रविष्टो गरुडशेषलक्षणमार्गद्वयेन वा हं प्रविश्यतया भोति कशरीरं ब्रह्मांडं प्रविश्य ततस्तेन ब्रह्मणा सह विशेषं पृथिवीं प्रतिपद्य तेन पृथिव्या त्मना सहौषः प्रतिपद्यते नाबात्मना नलमूर्तिं प्रतिपद्य ज्योतिर्मयो ग्निप्रधानो भूत्वा वायुमुपेत्य मुक्तिकालेतेन वा वाय्वात्मना त्मनो हरेर्लिंगं आकाशवद्व्याप्तं नि त्यं चेति बृहन्महत् खं प्रविशतीत्यन्वयः। निर्भयः संसारभयात् मुक्तः। अतएवात्वरन् त्वरमाणः प्रलयकालीनमार्गत्वात् अत्रेदं तात्पर्यं वशब्दाद्वगंतव्यं तथा हि विशेषाख्यां डेयवस्थिते विशेषनाम्नि विरिंचे स्थितं वैराजाख्यं महरिं पुनरत्र द्विगुणांडकटाहात्मकविशेषाख्यपृथिव्यां स्थिते विरिंचे स्थितमत्रनामा

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिरत्वरन्। ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिंगं २९

नं हरिं तेनात्र नाम्ना हरिणा पृथ्व्यां स्थिते नचतुर्मुखे स्थितमत्राख्यं हरिं तेनापन्नेन विष्णुना तेजोगतविरिंचिस्थं प्राणनामानं हरिं तेनाग्निगतेन हरिणा वायुस्थित चतुराननस्थितं प्राणाख्यं प्राप्य तेन वायुस्थविरिंचेनांतर्यामिणा आकाशस्थिते विरिंचे स्थितं प्राणाख्यं हरिं प्रविशतीति पृथिव्यादिकार्याणां स्वकारणे षु अवादि प्रधानांतेषु लयः तदभिमानिदेवताशरीराणां च तत्र विरिंचके शवयोस्तत्तत्पदार्थस्थितस्वस्वरूपैरेकीभावः। दीपानां दीपांतरेरिव अन्ये षां द्वारमात्रमिति। ज्ञानिनः प्रलये सर्वे ब्रह्मणा सह पार्थिवं भूम्यवाम तन्नामानं प्राणमग्न्यादिसंस्थितमित्यादिवाक्यद्वयेनवशद्वयही तेन निष्प्र माणमितिशंकानिरस्तेति ज्ञातव्यं २९

इदानीं पंचतन्मात्राप्रलयप्रकारमाह॥ घ्राणेनेति घ्राणेंद्रियाद्यधिष्ठित विरिंचिस्थेन हरिणा गंधतन्मात्राद्यधिष्ठात्र विरिंचिस्थितं हरिमुपेत्य योगी पुन
रावृत्तिं नोपैतीत्यन्वयः। तत्र वाय्वादीनां पुनरावृत्तिसद्भावात् प्रायेणेत्युक्तं यद्वा एवमुक्तवत्समाणप्रकारेण मुक्तानां तेषां ज्ञानिनां भोगप्रकारमाह। घ्राणे
नेति। एवंमुक्तः केवलं विदानंदैकदेहो योगी सज्ञानि संघपा दृशैरिंद्रियैर्घ्राणादिभिरमुत्तमान् गंधादीन् पंचविषयानुपेत्य श्वेतद्वीपादिस्थाने प्रभि

घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या स्पर्शं त्वचैव। श्रोत्रेण चोपेत्य नभोगु
णत्वं प्राणेन चाकूतिमुपैति योगी ३०

श्रितः प्रलयेपि न पुनरावृत्तिमुपैतीत्यन्वयः॥ वाङ्मनेनपंचेंद्रियैर्विषया एषयाः सर्वतो वराङ्मादिमान् स इदं द्योतयति। इयमेव मुक्तिर्वा
द्वैतवादिकथितेत्यवशष्टः। तु नामग्रस्यहि परे ज्ञाने किं न दुःखतरं तत्वेदितिमानं सूचयति ३०

उक्तमुक्तिशेषमाह। स इति भूतसूक्ष्मेंद्रियसन्निकर्षात् सूक्ष्मैः पंचभूतैः शब्दादितन्मात्रादिभिस्तथा भूतसूक्ष्मैर्जीवराशिभिश्चेंद्रियैश्च सन्निकर्षात् इति मानि मि
श्रसहितो नादिः सनातनः सोसौ भगवान् विकार्यं विविधकार्ययुक्तं देवमयं देवप्रधानं मनोमयं मनस्तत्वस्थं इत्थं स्थित विरिंचगतं मानसनामानं स्वात्मानं
यातीत्यन्वयः। नातेन नादेन सहितत्वात् सनातनः। नादेनेते नमहता सनातन इति स्मृत इति। मनस्थितो हरिर्नित्यं सर्वदेवेषु संस्थितः। देवप्रधानकार्यत्वे
कार्यं करोत्यनुगतः सदेति च। यो भावनादिर्मनोमयो विष्णुं प्रयातीति चोभयथापि तस्यैव गंतृत्वं गम्यत्वं च ज्ञातव्यं। मनस्थं मानसं विरिंचस्थं मानसना
मानं स्वात्मानं संप्राप्य स हरिरूमास्थितविरिंचस्थितस्वात्मद्वारा मनिशब्दगम्यमहंकारगतवाणीस्थं विरिंचस्थं स्वात्मानं याति। मत्वा मतिस्थेन तेन मनस्थेन

सभूतसूक्ष्मेंद्रियसंनिकर्षात् सनातनो सौ भगवाननादिः। मनोमयं देवमयं विकार्यं संसाद्य मत्या सह तेन याति ३१
विज्ञानतत्वं गुणसंनिरोधं तेनात्मनात्मानमुपैति शांतिं। आनंदमानंदमयो वसाने सर्वात्मके ब्रह्मणि वासुदेवे ३२

वसह विज्ञानतत्वं विज्ञाननामानं विज्ञानतत्वाख्यवाणीगतं विरिंचस्थं स स्वात्मानं याति तेन विज्ञानतत्वगतेन हरिणा गुणसंनिरोधं सत्वादिगुणाविधु
रं सर्वसूक्ष्मकारणं महत्तत्वाख्यविरिंचगतं विज्ञाननामानमात्मानं याति। एवं सर्वांतर्यामित्र्यपैरेकीभूतः समहत्तत्वांतर्यामी विज्ञाननामा हरिस्तेना
त्मना विरिंचेन सह शांतिं विनिवृत्तिस्थितमानंदनामानं स्वात्मानं हरिं याति। स आनंदमयः पूर्णानंदः आनंदनामा महत्तत्वगतो विष्णुः श्रियानु
ज्ञातं ब्रह्माणमादाय अवसाने द्विपरार्धवसाने सर्वात्मके सर्वांतर्यामिणि गुणबृंहितेपरिपूर्णगुणे ब्रह्मणि वासुदेवे वासुदेवाख्ये विहरति जीवसं
घस्तु स्वस्वयोग्यतानुसारेण बृंहितत्वाच्च ब्रह्माख्ये स्वमूलरूपे विहरतीति शेषः। इत्येषां देवानां मुक्तिरिति भावः। एवं स्वस्वबिंबद्वारेण हरिं प्रवि

यो भागवत आत्मनि कोभक्तो वासुदेवे एतां सायुज्याख्यां गतिं मुक्तिं गतः स ब्रह्मादिसंघः पुनरिह संसारे न विषज्जते सामान्यविषयो नेत्यन्वयः। विशेषेणानंदसंहकेनापि ब्रह्मणोपारस्परैकं समुद्दिष्य विघ्ननदीवदित्यादि दर्शयति। न चित्तत्रानंदातिशयेनेह विषज्जते इतीदं युक्तं तस्मादेव शश्व सामान्यमिदं किं तस्मादित्येतद्योग्यं वासुदेवाश्रितादेवा ब्रह्माद्यामुक्तबंधनाद्ध्यादिनापरिहर्तव्यं। उपसंहरति। एते इति। पुरा चतुर्मुखेनाराधि

एतांगतिंभागवतीगतोयः सवैपुनर्नेहविषज्जतेंग ३३ एते सृती ते नृप वेदगीते त्वयाभिपृष्टे च सनातने च। ये वै पुरा ब्रह्मण आह तुष्ट आराधितो भगवान्वासुदेवः ३४

तः तुष्टो वासुदेवो भगवान् ये वै सृती ब्रह्मण आह ते एते सृती मया ते कथिते इत्यन्वयः। वक्तव्यत्वे हेतुमाह। त्वयेति तत्रापि निमित्तमाह। वेदेति। अथेत्यनेन तत्र यथेरल्पेष्व ज्ञातपद्धतुपासतेते द्विविधमभिसंभवंतीत्यादि वेदैः सूचयति। वेदगीतत्वेप्यश्रद्धेयत्वेन हयत्वंः दृष्टमत्राह। सनातने इति। नित्यासिद्धिहेतुत्वादित्यर्थः ३४

अतोऽत्र निःश्रेयसार्थिभिः श्रीभागवतमेवाभ्यसनीयमिति भावेनाह नहीति। इह संसृतौ अतो भागवताख्यात्पंथात् विशतः शिवः पंथाः नास्ति सज्जनकरुणाया भगवतोक्तत्वादिति शेषः। हेत्वंतरमाह। वासुदेव इति ३४ एकस्य श्रुतिमात्रं तु कृतकार्यं विशिष्यत इत्यत आश्रिमूलत्वेन तदुक्तं प्रमाणमेव

न ह्यतोऽन्यः शिवः पंथा विशतः संसृताविह। वासुदेवे भगवति भक्तियोगो यतो भवेत् ३४
भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ३५

त्याह। भगवानिति हि यस्मात् भगवान् त्रिः त्रिवारं ब्रह्म वेदं अन्वीक्ष्यालोच्य यतो ग्रंथादस्मादात्मन्यात्मनि कूटस्थे निर्विकारे हरौ तत्किल लक्षणा रतिर्भवेत्। तस्मात्तत् भागवतं पुराणमध्यवस्यदित्यन्वयः। द्वितीयार्धे शब्देन नित्यज्ञानेन सिद्धस्य पुनः पुनरवेक्षणं तद्दृष्टादिकं सूचयति ३५

भा० द्वि०
२१

उक्तमाविकारिणां देहादिना भगवत्सद्भावसिद्धेपीतरेषां तदस्तित्वं कथमवगंतुं शक्यमित्याशंक्याह। भगवानिति। इतोपीदमेव निश्रेयसहेतुत्वाच्छ्रवणादि नाभ्यसनीयमित्यतो वाह भगवानिति। द्रष्टा साक्षी भगवाननुमापकैर्लिंगैरुपलब्धिज्ञानजनकैर्दृश्यैर्हरिः सर्वस्वातंत्र्यादिना ब्रह्मादिजीवराशेरस्वातंत्र्यादिना व प्रमाणेन गृहीतया मितैर्बुद्ध्यादिभिर्लक्षणैर्लिंगैः सर्वभूतेषु नियामकत्वेन स्थित इति आत्मना जीवेनाभिन्नत्वेन लक्षितो ज्ञानइत्यतस्तदस्तित्वं सिद्धं तेन प्रोक्तत्वाद्वेदमूलत्वेनाप्रिमूलत्वाद्वेदमवश्यमभ्यसनीयमित्यायातमिति भावः इदं बुध्येवं नेदमित्यनबुद्ध्यादीनां पारवश्यदर्शनात्तस्य नियंतासिद्धि त्य

भगवां सर्वभूतेषु लक्षितस्वात्मना हरिः। दृश्यैर्बुध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ३६ पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं। पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं ३७ इति श्रीभागवते महापुराणे द्वितीयस्कंधे महापुरुषसंस्थानुवर्णने द्वितीयोऽध्यायः ॥

स्यस्वानुलवसि इत्वान्सर्वान्यो हरिरेवेत्यस्यावधारणाय वशब्दः। तदुक्तं। समाधावसमाधौ वनिः स्वतंत्रस्य देहिन इत्यादि ३६ उक्तमुपसंहरति तस्मा दिति यस्मात्सर्वज्ञेन व्यासेनैव नारायणएव वेदवेद्येषु सर्वोत्तमत्वेन दृष्टस्तत्वेनोक्तः। तस्मात्स एव श्रोतव्यः ३६ श्रवणादिफलमाह। पिबंतीति सतां सकाशात्श्रवणपुटेषु संभृतं संपूरितं विषयैर्विशेषेण दूषितं ३७ इति श्रीभागवते टीकायां पदरत्नावल्यां विजयध्वजकृतायां द्वितीयस्कंधे द्वितीयोऽध्यायः॥ ॥

राम
२१

हरेः श्रवणादिजनित भगवद्भक्तिरेवापेक्षिताशेषपुरुषार्थसाधनं नान्यदन्यदेवतायागादिकं प्रातिस्विकफलदं तदपि हर्यकायत्तमित्येतदस्मिन्नध्याये निरूप्यते। तत्र प्रथमतो वृत्तमनुवदति। एवमिति। भवान्मनुष्येषु मध्ये म्रियमाणानां मनीषिणां नृणां यत्कर्तव्यत्वेन मम सकाशे पृष्टवांस्तदेतदेवं निगदितं। यद्वा मनुष्येषु म्रियमाणानां नृणां यत्कर्तव्यत्वेन मनीषिणां मतं पृष्टवानेतदिति १ इदानीं प्रातिस्विकफलप्रदयागप्रकारमाह। ब्रह्मेति। ब्रह्म

श्रीशुक उवाच एवमेतन्निगदितं पृष्टवान्यद्भवान्मम। नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां १ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं। इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् २

वर्चसकामः ब्रह्माध्ययनसंपत्कामः शिष्यप्रशिष्यादिषु वेदप्रणेतृत्वेन ब्रह्मणस्पतिं वेदस्य पतिं बृहस्पतिं बृहनाति जीवकमलासनशब्दराशि वि ति धातोरयजेत तत्तन्मंत्रोक्ततत्तद्रूपैरिति शेषः। तुना ब्रह्मणि बुद्धिं स्तवयति। इंद्रियकामश्चक्षुरादींद्रियपाटवकामः। शुक्लस्तंभनकामो वा प्रजाकामः जनकामः प्रजानुजनपुत्रपौत्रादिरिति यादवः। प्रजापतीन्कश्यपादीन् २

भा॰ द्वि॰
२२

मायां देवीं लक्ष्मीं विभावसुमग्निं तेजो बलं प्रभावं वह्नेर्ज्योतिष्मद्भिर्विरेजसीतिवा। वसुकामः हिरण्यकामः। वीर्यकामः वीर्यं पराक्रमं तेजस्वत्वमाहात्म्ययोरपीतिवा ३ विशां वैश्यानां ४ इलां भूमिं प्रतिष्ठाकामः स्वस्थानादभ्रंशेच्छुः। लोकमातरौ लोकस्य मातापितरौ माता पृथिवी द्यौः पिता मधुधीरक्तनः पितेतिश्रुतिः ५ अप्सरा श्चासा वुर्वशी वेत्यप्सरउर्वशीं तां परमेष्ठिनं चतुर्मुखं ६ यज्ञमिंद्रं फलसेदात नपुनरुक्तिः कोशकामः निधिका

देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं॥ वसुकामो वसून्रुद्रान्वीर्यकामस्तु वीर्यवान् ३ अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान्। विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशां ४ आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत्। प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ५ रूपाभिकामो गंधर्वान्स्त्रीकामोऽप्सर उर्वशीं। आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनं ६ यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं। विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ७ धर्मार्थ उत्तमश्लोकं तंतुं तन्वन्पितॄन्यजेत्। रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ८

मः प्रचेतसं वरुणं गिरिशं दक्षिणामूर्त्तिधरं दांपत्यार्थं अखंडितदांपत्याय ७ धर्मार्थं मत्कृत्यक्षपुण्यफलार्थं उत्तमश्लोकं विष्णुं अकामो धर्मकामो वामो त्तकामो पियो भवेत्। अथवा सर्वकामो यः स विष्णुं पुरुषं यजेदित्यनेन विष्णुरेवोत्तमश्लोक इति निश्चीयते। अकामः पुरुषं पुमानित्यत्रापि पुरुषो विष्णुरेवास्मादुक्तप्रमाणात्। तंतुं संतत्यविच्छेदं तन्वन् वितनं कुर्वन् पुण्यजनान् यक्षान् मणिभद्रादीन् ८

राम
२२

अभिचरन् परोपद्रवकर्म कुर्वन् निर्ऋतिं कोणदिक्पतिं सोमं चंद्रं। अकामो निषिद्धकामरहितः पुरुषं पूर्णषड्गुणं ९ अकामः भगवत्प्रसादं मतेरेणान्यत्रकामः सर्वकामः उक्तसर्वकामोऽन्यदेवतायजनमिच्छन्॥ परं पुरुषं यजेत। विष्णुयजने साधनमाह। तीव्रेणेति १० काम्यानुष्ठानस्य यथा मुक्तिसाधनता स्यात्तं प्रकारमाह। एतावानिति। इह कर्म्मभूमौ यजतां काम्यानुष्ठानं कुर्वतां निःश्रेयसोदये एतावान्। भागवतानां संगतः सेवालक्षणात् भगवति हरौ अचलो भावो भक्तिलक्षणइति यत् स इति ११ भागवतसंगात् अचलो भावः कथं स्यादित्याशंक्य तेषां सदसि प्रसक्तानां हरिकथा मृतानां श्रवणलक्षणपानादित्याप्रसन्नांतःकरणस्य पुंसो हरेरितरत्र विरक्तस्य ज्ञानसाधनं भगवत्यचला भक्तिर्यया ज्ञानं भविष्यतीत्याह। ज्ञानमिति १२ वृतीयदासत्सभासु प्रसक्ताभिः कृताभिर्या हरिकथाभिः पुंसः आत्मप्रसादः मनसः प्रसन्नतानैर्मल्यलक्षणात् तदो भयत्र इह परत्र च स्वर्गादौ गुणेषु विषयेष्वसंगः फलस्य

राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत्। कामकामो यजेत्सोममकामः पुरुषं पुमान् ९ अकामः सर्वकामो वा मोक्षकाम उदारधीः॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परं १० एतावानेव यजतामिह निःश्रेयसोदयः। भगवत्यचलो भावो यद्भागवतसंगतः ११ ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः। कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् १२

इत्याहित्यलक्षणवैराग्यं भवति। अथ तत्किं साधनवैराग्यजन्मानंतरं कैवल्यसंमतपथः सम्यक् संपादितमोक्षमार्गो भक्तियोगो जायते तु शब्दात्तद्भक्तेश्च पि। अथवात्मनो हरेः प्रसादः स्यादनंतरं हरेरपरोक्षज्ञानं भवति कीदृशं प्रतिनिवृत्तं समपक्रांतं सत्वादिगुणनिमित्तानामस्मि जायत इत्यादि षड्ूर्मीणां चक्रं पुनः पुनरावर्त्तनं येन तत्तथोक्तं यद्वा अपसारितसत्वादिगुणा एव कर्म्मयस्मंगास्तेषां चक्रं येन तत्तथेति यद्वा यदा या सा हरिकथानां श्रवणेन भगवदपरोक्षज्ञानं तदा प्रतिनिवृत्तगुणोर्मिचक्रं सत्वादिगुणनिमित्ताशनापिपासाशोकमोहरागद्वेषलक्षणाऊर्म्मयस्तेषां चक्रं निरस्तं भवतितस्मादात्मप्रसादस्तस्मादुभयत्र गुणेष्वसंगस्तस्माद्वैराग्यात् कैवल्यं संप्रियते नेनेति कैवल्यसंमत मपरोक्षज्ञानं तदेव पंथाः मार्गो यस्य स तथोक्तः ९

विविधभक्तियोगेन यतोऽज्ञानस्वात्मनि हितोऽस्तमनः
पुंसां भगवद्धरिकथासु रतिं न कुर्यात् इति शेषः १२

परीक्षित्पृष्टःशुकोक्तभगवत्कथातद्विरागी भूत्वासेवस्यादित्याशयवान्शौनकः सूतंपृच्छति।इतीति।अभिव्याहृतंव्यक्तिकालदर्शितमस्तीत्यतःकथ्यमिति भागवतंमयरोद्धतोज्ञानातीति १३ शुश्रूषतांश्रोतुकामानांमसभाषणंकदाचित्सभादितरकथापिसंभाव्यतइतिनेत्याहकथाइतिध्रुवमित्यनेननियमोदर्शितः १४ अनयोरेकस्याप्यसत्वेनियमभंगःस्यादितिनेत्याहसवाइति।तत्रहेतुमाहबालइति १५ अस्तूभयोःसत्वेततःकिंतत्राहउरु

शौनकउवाच — इत्यभिव्याहृतंराजानिशम्यभरतर्षभः।किमन्यत्पृष्टवान्भूयोवैयासकिमृषिंकविम् १३ एतच्छुश्रूषतांविद्वन्सूतनोर्हसिभाषितुं।कथाहरिकथोदर्काःसतांस्युःसदसिध्रुवम् १४ सवैभागवतोराजापांडवेयोमहारथः।बालक्रीडनकैःक्रीडन्कृष्णक्रीडांयआददे १५ वैयासकिश्चभगवान्वासुदेवपरायणः।उरुगायगुणोदाराःसतांस्युर्हिसमागमे १६

रुगायेति।उरुगायेत्यनेनहरिकथायाअवश्यसद्भावंदर्शयति।उरुभिर्वेदविद्याविशारदैर्महद्भिर्गीयतइत्युरुगायः।सतांसमितौप्राचुर्येणहरिकथासत्वेपिप्रसंगादन्यकथास्यात्ननतथाश्रीशुकपरीक्षितोरितितस्मिन्नर्थेहिशब्दःकथाइतिशेषः १६

वासुदेवकथामंतरेणाजीवनंव्यर्थमित्याह।आयुरिति।उद्यन्उद्गच्छन्अस्तंचयन्अस्तंगच्छन्असौआदित्यः पुंसांयदायुर्हरतिवैआदित्यस्यगतागतैरहरहःसंक्षीयतेजीवितमितिवचनात्।तस्यायुषोयउत्तमश्लोकवार्तयाविनाक्षणःकालविशेषःसनीतएववृथेत्यन्वयः १७ हंतलोकेदीर्घकालंजीवन्तउमांसभूयतइतितत्राह।तरवइति तरूणांश्वासाद्यभावादित्यतउक्तंभस्त्राइतिभस्त्राहत्यःआयुःसंतापनार्थाश्चर्मविशेषाः।तस्त्राणांनिश्वैतन्यात्ननतत्त

आयुर्हरतिवैपुंसामुद्यन्नस्तंचयन्नसौ।तस्यर्तेयत्क्षणोनीतउत्तमश्लोकवार्तया १७ तरवःकिंनजीवंतिभस्त्राःकिंनश्वसंत्युत।नखादंतिनमेहंतिकिंग्रामपशवोपरे १८ श्वविड्वराहोष्ट्रखरैःसंस्तुतःपुरुषःपशुः।नयत्कर्णपथोपेतोजातुनामगदाग्रजः १९

मगदाग्रजः १९

घ्यमत्राहनेतिग्रामपशवःसारमेयादयःमेहंतिरेतोमूत्रादिकमुत्सृजंतिअपरेतिर्यग्जातिव्यतिरिक्ताश्चपुरुषाः।अनेनहरिचरितश्रवणाभावेचेतनत्वमप्रयोजकमित्युक्तंभवति १८ एतदेवविशिनष्टि।श्वविडिति विड्वराहःग्रामेध्यसूकरः।पशुःविवेकशून्यः।गदाग्रजइतिपाठेगदाग्रजइतिपदार्थः।आमंश्रितइतिवत् १९

भा॰ द्वि॰
२४

इतोपि हरिकथाश्रवणं वर्त्तमानस्य पुंसः श्रोत्रादीन्द्रियसाफल्येन आयुषः साफल्यम् अन्यथा व्यर्थम् इत्याशयेनाह बिल इति। शृण्वतः अशृण्वतः बिलपर्व्वतस्य
तिशेषः। उरुगायगाथा न प्रगायति चेत्तर्हि दार्दुरिका दर्दुरस्य मण्डूकस्य संबन्धिनी दार्दुरिका यथा तथा एतस्य विद्यमानापि जिह्वासती चासौ अविद्यमानेव। २०

बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य। जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगाय
गाथाम्। २० भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दं। शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कां
चनकंकणौ वा २१ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये। पादौ नृणां तौ द्रुमजन्मभाजौ
क्षेत्राणि नानुव्रजतो हरेर्यौ २२

राम
२५

वा यद्यपि शावो शवस्य विद्यमानौ २१ बर्हायिते पिच्छनेत्रवद्वावरिते निष्फले इत्यर्थः। लिंगानि प्रतिमा द्रुमवत् जन्म भजत इति। क्षेत्राणि पुण्य
स्थानानि क्षेत्रं पुरे गृहे देहे केदारे योनि भार्ययोः। पुण्यस्थाने समूहे च घृतमाज्यं तु सर्पिषोरिति यादवः २२

भागवतस्य भगवद्भक्तजनस्य यः अङ्घ्रिरेणुः यद्वा भागवतयोः भगवतो विद्यमानयोः अङ्घ्रिरेणुं नाभिलभेत न कांक्षेत् जीवञ्छवः जीवन्मृतः। श्रीविष्णुपद्याः श्रीवि
ष्णुपदप्रियायाः श्वसञ्छवः श्वासकृत् कुणपतुल्यः २३ पुरुषस्य यद्धृदयं कथारूपेण गृह्यमाणैः हरिनामधेयैः न विक्रियेत द्रवीभावात्मकं विकारं ना
ति। तदिदम् अश्मसारवत् नितिकठिनं अयोघनं वा। अथ दैवाद्यदि विकारः तर्हि इदं लक्षणं मुखविकाससलक्षणो विकारः नेत्रे जलं च भवति गात्ररुहेषु लोमसु

जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योभिलभेत यस्तु। श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसं छवो यस्तु न वेद गंधम् २३
तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः २४ अथाभि
धेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः। यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः २५ इति
श्रीभागवते महापुराणे द्वितीयस्कंधे तृतीयोध्यायः॥ ॥

हर्षः रोमांचलक्षणः स्यादिति शेषः २४ यत एवं हरिकथाश्रवणाभावे जन्मादेर्नैष्फल्यं अथ तस्मात् नृपतिना साधु पृष्टः आत्मविद्याविशारदः प
रमात्मविद्यायां पटुतरो वैयासकिर्नृपतिं यदाह तत् नाम अभिधेहि। हरिकथाभिधानेन मदन्यः किं न स्यादत आह। मन इति मनोनुकूलं यथा भवति तथा
प्रभाषसे हि त्वं तत्र माह। भागवते ति अतस्तत एव श्रोतुमिच्छा प्रवर्त्तत इति २५ इति श्रीभागवते द्वितीयस्कंधे तृतीयोध्यायः॥ ॥

संक्षेपतः कृतं हरिचरितं तत्त्वान्तस्मिन्नेवावहितांतःकरणस्य परीक्षितो भक्त्यतिशयात्पुनर्विशेषतः श्रोतुकामस्य हरिसर्जनलीलाविलासविषयप्रश्नप्रकारः श्रीशुकाचार्यस्य गुरुदेवतानमस्कारपुरस्सरं तत्प्रश्ननिर्वचनप्रतिज्ञाप्रकारश्चास्मिन्नध्याये प्रतिपाद्यते। तत्र प्रथमतः शुकोपदेशान्तरं प्रवृत्तविज्ञानविरक्ती अनुवदति। वैयासकेरिति। आत्मनः सर्वगुणपूर्णस्य हरेस्तत्त्वस्य निश्चयो येन तत्तथा। उपधार्य हृदि निधाय सतीं मतिं भक्तिपरिशुद्धां १ आत्मजायाराज्यादिचिंतामलकलिलांतःकरणस्य तस्य कृष्णे सन्मतिविधानं कथमत्राह। आत्मेति। मत्प्रौ तेरय आत्मजायादि

सूत उवाच वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः। उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् १
आत्मजायासुतागारपशुद्रविणबंधुषु। राज्ये चाविकले नित्यं विरूढां ममतां जहौ २

षु नित्यं निरूढां ममतां जहाविति पञ्चयः। हरेः सर्वस्वान्तं आद्विज्ञानविधुराणामहंममेति नित्यनिरूढा ममेनेन नित्यं तद्धि दुस्त्यजैवेत्यक्तामपि तदा विशेषतस्त्यक्तवानित्यस्मिन्नर्थे वशब्दः। आत्मा देहः। स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ तथा सुहृत्। सप्तैतानि समस्तानि लोकेस्मिन्राज्यमुच्यत इति मनुवचनाद्विकले समग्रप्रकृतिपूर्णे २

किमयमपृष्टवानिति शङ्कां परिहरति। पप्रच्छेति॥ संस्थां मरणं यत्त्रैवर्गिकं धर्मार्थकामसाधनं यत्कर्म तच्च संन्यस्य स्वस्यात्मा स्वामी तस्मिन्भावं मर्किंगतः। एवं मथिकारसामग्रीमानूत्साय मर्थं पृष्टवानित्यमेवार्थं परिपप्रच्छ च शुकमिति शेषः ३ ४ स्वामीष्टं पृष्टं शुकवचनं सौति समीचीनमिति। यदि दृष्टसाधनावबोधकं तत्प्रतिबंधकनिवर्तकं च तदेव वचनं समीचीनं दृष्टमेतत्कथमत्राह। तम इति। मह्यं मम तमः आंतरमज्ञानं विशीर्यत इत्यनेन स्थूलभूतशुद्धिप्र

पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः। कृष्णानुभावश्रवणे श्रद्दधानो महायशाः ३ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत्। वासुदेवे भगवति आत्मभावं दृढं गतः ४ राजोवाच समीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवानघ। तमो विशीर्यते मह्यं हरेः कथयतः कथाः ५ भूय एव विवित्सामि भगवानात्ममायया। यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ६

तदुक्तं भवति। मह्यमित्यनेनादृष्टसाधनं ज्ञानं च येन दीयत इति सूचितं भवति। हेतुर्वर्तमानेनोच्यते मह्यं तमो विशीर्यत इति येन तस्मात्समीचीनमिति ५ आत्ममायया स्वेच्छया स्वनियतया प्रकृत्या वक्रमस्य दुर्विभाव्यं दुरूहं हि इदं विश्वं यथा येन प्रकारेण सृजते ६

भा॰ द्वि॰
२६

येन प्रकारेण गोपायति रक्षति पुनर्येन प्रकारेण संयच्छते संहरति तं प्रकारं भूयः पुनरपि विविदिषामि ज्ञातुमिच्छामि ६ पुरुशक्तिरनंतशक्तिः परः पुमान्॥ आत्मानं क्रीडयन् संसारे क्रीडयन् अवतारैश्च क्रीडन् यां यां शक्तिमुपाश्रित्य विश्वस्य प्रपंचं तत्सर्वं सामान्यतो विशेषतश्च करोति तदपि विविदिषामि। तवश ब्देन निर्विकारः सदाशुद्ध इति वाक्यं प्रमाणयति ७ भगवच्चेष्टा विषयस्य ज्ञानस्य वक्तृज्ञानिष्ठ विदुर्लभ इति भावेनाह। नूनमिति॥ अज्ञे दुर्वि

यथा गोपायति विभुर्यथा संयच्छते पुनः ६ यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान्॥ आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ७ नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः॥ दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ८ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा॥ बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ९

राम
२६

ज्ञेयमिति किं वक्तव्यमित्यस्मिन्नर्थे चशब्दः ८ अथापेक्षः प्रश्नो भवतीत्याह। यथेति। एको हरिर्जन्मभिर्वासुदेवाद्यवतारैर्भूरिशः सृष्ट्यादिकर्माणि कुर्वन् प्रकृतेः सत्वादिगुणान् बिभर्ति यथा कथं बिभर्ति। युगपत्क्रमशः क्रमेणैवेति। तुशब्देन गुणानां विरुद्धस्वभावत्वेन युगपद्ग्रहणेऽनुपपत्तिं द्योतयति। अपि पदेन क्रमशोऽग्रहणं संभावितमिति ९

न केवलं विविदिषामि किं तु वक्तव्यमिति प्रार्थयन्नाह। विचिकित्सितमिति। यथा यथावत्। एतद्वक्तुं तव योग्यतास्तीत्याशयेनाह। शब्दे इति। अनेनालौकिकमपि वक्तुं यथा वेत्तुं शक्यं तथा वक्ता बोधयितुं त्वं समर्थ इत्युक्तं भवति १० परीक्षितः प्रष्टुः शुकः किं चकारेति सूतः शौनकस्य हार्दीं शंकां परिहरतीत्याह। इति शब्दः प्रकारवचनः हृषीकेशमित्यनेन मुख्यतो वागादीन्द्रियप्रवर्तकत्वं हरेरित्यभिप्रेति॥ प्रतिवक्तुं प्रचक्रमे प्रारब्धवान् भागवतसंहितामिति शेषः ११ परीक्षित्प्रश्नोत्तररूपत्वेन भागवतपुराणं वक्तुकामः श्रीशुकः शिष्टाचारं परिपालयन् स्वेष्टदेवतां प्रणमति। नमः परस्मा इत्यारभ्य नमस्तस्मा इत्यंतैः

विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा॥ शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु १० सूत उवाच इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः॥ हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ११ श्रीशुक उवाच नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया॥ गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्यवर्त्मने १२

श्लोकैः भूयस्त्वमुपपादयति। सदित्यादिना सतः सत्यस्य जगतः उद्भव उत्पत्तिः स्थानं पालनं रूपा स्थितिः निरोधो लय एतत्त्रिभिस्तल्लीलया गृहीता शक्तीनामिच्छाज्ञानक्रियाख्यानां त्रितयं येन सत्तथोक्तस्तस्मै इच्छा ज्ञानं क्रिया चेति नित्याः शक्तय ईशितुरिति वचनात्रितयेति पदमध्याहार्यं नित्यगृहीतशक्तित्रितयायेत्यर्थः॥ वेदादिरेवात्र प्रमाणं नत्वन्यत्तत्रापि निमित्तमित्याह। देहिनामिति देहिनां जीवानां वस्तुरादिनानुपलक्ष्यवर्त्मने दुर्ज्ञेयमार्गाय इन्द्रस्तुत्यादिति नेत्याह। अंतर्भवायेति। अंतर्यामित्वेन संततमंतः स्थिताय। यो वै भूमा तत्सुखं द्वाविमौ पुरुषौ लोके इत्यादिवाक्यमत्र प्रमाणं १२

सर्वस्मान्नारायणप्रसादसाधनाद्भक्तिपूर्वकं पुनः पुनः नमनमेव तत्त्वीति जनकमिति भावेनाह। भूय इति। भूयोऽपि परस्मै पुरुषाय नमः अस्तु। कथं।
यत इत्याशा नित्यनिवंधकनिवृत्तिस्याता सएवं नन्तव्योदृष्टोस्य कथमिति तत्राह। सदिति। सतां नमनादिप्रशस्तकर्मणां पुंसां वृजिनं दुःखकारणं पा
पं छिनत्ति निर्मूलयतीति सद्वृजिनच्छित्तस्मै। असतामप्रशस्तकर्मणाममसुरादीनामसंभवायत्र असम्भाकरायमुखप्रतिवंधकजननिर्मूलकायेत्य
र्थः। एतत्करणसामर्थ्यमस्यास्तीति भावेनाह। अखिलेति। अखिलसत्वमूर्तये पूर्णसाधुभावस्वरूपाय निःशेषगुणपूर्णत्वात्सत्वइत्येवंतं विद्व

भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्वमूर्तये। पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनु
मृग्यदाशुषे १३

रिति वचनात्। साधुभावा गुणा इति ज्ञायते। अनेन समस्तवरावरलक्षणप्राणिमूर्तये इत्येतन्निरस्तं। अथाप्यस्य दिक्षावाप्तिः कथमवगतेत्य
त्राह। पुंसामिति। परमहंससंवंधिन्याश्रमे व्यवस्थितानां संन्यासधर्मवतां पुंसां अनुमृग्यपदाय शुषे निजानंदानुभवलक्षणमोक्षदात्रे। दाश्व दाने इति
धातुः। अवधारणवाचिना पुनः शब्देनान्ययोगं निवारयति। एतेभ्य एवानुमृग्यं पदं ददातिनान्येभ्य इत्यर्थः १३

न त्वन्यप्रशस्तेन संन्यासीतरज्ञानिविवक्षायां तमेवं विज्ञानमृत इतीदमप्रमाणं स्यादत्र विवक्षायाम ज्ञानां ज्ञानदो विष्णुरिति वानः केन विवक्षिता उक्तिमंदा
शंकां परिहरिष्यन्भागवतशास्त्रोक्तविरुद्ध्यो गायेत इति विक्ति। नमो नम इति। सात्वतसंहितोक्तविधिना विष्णुमर्चयतः सात्वतः तेषां सात्वतां सर्वं ज्ञानं
भासयति दीपयतीत्यत्र ज्ञानमुद्दीप्य मुक्तिं ददातीत्यर्थः तस्मै सत्वं तु शोभनत्वं स्यात्तद्युक्ताः सात्वतामता इति वचनात्सात्वताः शोभनत्ववंतः
तेषामनुत्पन्नज्ञानानां ज्ञानयोगपुरःपवंतां ज्ञानं ददातीत्यर्थस्तस्मा इति वा। अनेनोक्तवाक्यद्वयमविप्रमाणमित्यायातमिति। यः परस्मै पुरुषाय ति
प्रक्रान्तमितत्स्मै। यद्वा स्वचित्तस्थं संबोध्यते तुभ्यं नम इति। एवंविधफलदातृत्वेन तत्त्वामीति वाक्यार्थः। भस्तत्स्मिन्नदीप्योरिति धातोः इलोपेनस

नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां। निरस्तसाम्यातिशयेन राधसा स्वधामनि
ब्रह्मणि रंस्यते नमः १४ राम राम

लोपः। शास्त्रकुत्सितो योगः ऐकध्यानलक्षणः स एषामस्तीति कुयोगिनः। तेषां विदूरे काष्ठा परिच्छिन्नापरिच्छिन्नलक्षणा यस्य स तथा तस्मै। भगव
दधिष्ठितदिग्भागमपि न जानंतीत्यतो वा विदूरकाष्ठायेति। आशाश्च ककुभः काष्ठा इत्यमरः। स्वन स्वतंत्रत्वेन न स्व प्रयोजनमपेक्षतानादिहा
त्वमिति भावेनाह। निरस्तेति। निरस्तो साम्यातिशयो येन तत्तथोक्तं तेन राधसा संसिध्यास्वं धामनि स्वयंप्रकाशे ब्रह्मणि अनवच्छिन्नचिदानंदे
करसे रंस्यते रममाणाय। भदात्तनो नुत्तवोयमिति स्मयोगः लोकविलक्षणो यंरतिः इति द्योतयितुं परस्मैपदप्रयोगः। प्रतिपदमनुसंधेयमि
ति नमसां बहुत्वं १४

कीर्त्तनादिविधूतकल्मषस्य नमस्क्रिया संपद्यत इति भावेनाह। यत्कीर्त्तनमिति। सुभद्रश्रवसे सुमंगलकीर्त्तये। सद्यइत्यनेन नसक्तिपूर्वकमिति सूचयति। भद्रोप्यस्त्री सुमंगलइत्यमरः १५ वैराग्येण दृढीभूतया तत्पादपद्मचरणनिषेवणं ब्रह्मज्ञानसाधनेत्ववतीति भावेनाह। विचक्षणा इति। यच्चरणोपसादनात् यच्चरणैकशरणत्वात्प्राप्तिलक्षणनिषेवणात् अंतरात्मनः अंतःकरणस्य उभयतः इहामुत्रविषयेषु संगं त्यक्त्वा व्युदस्य

यत्कीर्त्तनं यच्छ्रवणं यदीक्षणं यद्वंदनं यत्स्मरणं यदर्हणं॥ लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः
१५ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतोंतरात्मनः। विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः
१६ तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः। क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः
१७

दस्य निरस्य ब्रह्मगतिं ब्रह्मज्ञानं तेन मोक्षं च विंदंति। यस्य स्वरूपस्य हरेश्चरणोपसत्तेरंतरात्मनः क्षेत्रज्ञस्य उभयतः संगं स्थूलसूक्ष्मशरीरसंगं व्युदस्यापोह्य ब्रह्मगतिं ब्रह्मस्वरूपं विंदंत्यवगच्छंतीति यत्स्मतेनहेतुत्वाविनाद्दिशहेतून निरसनं। यतो सेदः प्रत्यग्ज्ञाद्विभ्रमात्प्रसिद्धो तो नुपपन्न एव भवेद। सुसदृश्रवः श्रवणं यस्य स तथा तस्मै १६ १७

तज्जनसेवायाश्चाप्येतादृशमाहात्म्यं किमुत भगवत्सेवायाः इति भावेन तन्महिम्ना विशिष्टं नमति। किरातेति। किरातादयो ये येन च पापाः पापकर्मसु येषां प्रवर्त्तनं तद् पाश्रयाश्रयात् शुध्यंतीत्यन्वयः। यस्माद्यत्पराश्रयेषां ना स्त्रियेषां ते यदपाश्रयाः विशादयस्तेषां आश्रयात्सेवातत्स्मरणात् शुध्यंति निःपापा भवंतीत्यर्थः। शवरात्परणीशवरीजाताः किराताः ऊर्ध्वपका। वैदेहजात्पुल्कसीजाताः हूणाः। वैश्याद्ब्राह्मणी जातो वैदेहकः। वैदेहकपुत्राद्भ्रष्टाः नित्रिशाः अनंतात विशादि भावाः मधुपायिनः। निषादात्किरातीजाताः पुलिंदाः। अभिचारान्जातश्चोर्मकस्मात् जातोवाभूद्राद्ब्राह्मणीजातश्चंडालस्तस्माज्जाताः पुल्कसाः। ब्राह्मणाद्वैश्यांजातो वष्ठः। ब्राह्मणात्तस्यां वष्ठस्य कन्यायांजाता आभीराः। कंकाः कर्प्पराः नृपा द्वेशपाजाताः यवनाः इम श्रुला शकाश्च रुक्ष विशेषाः डों

किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः शकादयः। येन्ये च पापा यदपाश्रयाश्रयात्
शुध्यंति तस्मै प्रभविष्णवे नमः १८

धुकुक्तविदन्मूलनिव पूर्वा आदिशाद्दृष्टहीताः तथा चानुकेः सहवर्तुः षष्टि जातयस्त्वद्यावोक्तं। ब्राह्मणस्य त्रयः पुत्राः वर्णा क्षत्रियवैश्यानुलोमजाः। शूद्रस्य चत्रयं पुत्रास्तेष्वेव प्रतिलोमजाः। त्रयस्त्रयः स्तत्रविशोः प्रतिलोमानुलोमजाः। एते द्वादश वर्णानां पुत्रा एकैकशस्ते चातुर्वर्ण्येपि प्रसूयंते चतुरश्चतुरः सुताश्चाते चत्वारिंशद्दष्टौ च पूर्वैर्द्वादशभिः सह। ब्राह्मणाद्येश्चतुर्भिश्च चतुःषष्टिर्हि जातयः। तसर्वदस्यवोदोषेश्चौर्यादिदोषैः सहहिः कृता इति जातिविवेकाभिधानं। अन्ये पापा ब्रह्महत्यादिकर्त्तारस्तस्मै प्रभविष्णवे प्रभवशीलायन मइत्यन्वयः १८

भा॰ द्वि॰ २५

य एवंविधमहिमत्वेन प्रसिद्धः स एष आत्मा परमात्मा भगवान्प्रसीदतामित्यन्वयः। किंविशिष्टः आत्मवतां सत्कपात्रपरोक्षीकृतपरमात्मतत्त्वानां मुक्तानां
प्रशंसायां मतुविति प्रशस्तमनसां ज्ञानिनां वाधीश्वरः। विद्यधर्मेतयोनुसारिणां पुंसां वशगत्वात्त्रयीमयो धर्ममयस्तपोमयश्च एतेन तत्क्रवात्स्वल्पदर्शित
। तदुक्तं। वेदानुसारिवशगः स्वेच्छयेति। तत्र प्रमाणमाह गतेति। अलीकं त्वविषये तत्त्वइत्यभिधानात्। गतव्यलीकैरजशंकरादिभिर्ब्रह्मशिवादिभिर्वित
र्क्यविशेषेणानुमेयं लिंगं जगत्कर्तृत्वादिलक्षणं यस्य स तथोक्तः १८ विभ्नीकृततत्तद्धर्मीष्टसिद्धये तत्तद्गुणविशिष्टस्य हरेः प्रसादं प्रार्थयते श्रियः पति
रिति श्रीधरयोः पतित्वकथनेन सर्वाधिपत्ये सिद्धे पि तदंतरदेवतानामाधिपत्यं निवारयति। वेदादिवाक्ष्याणामभिमानित्वेन श्रीप्रसादोपि प्रार्थनीय

स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः। गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां १८
श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः। पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतांपतिः १९

इत्यभिप्रायेण श्रियः पतिरितीतरविशेषणान्येवमनुसंधेयानि इति। यज्ञजनाश्रयत्वेन तन्मात्रगुणनिधिंत्वेन स्थिरायाः धरायाः पतिः मनआदीद्रि
यव्यापारसाध्यस्य देहांतरभोग्यफलस्य यज्ञकर्मणः फलदातृत्वेन तत्फलपालकः। फलपालनं किमर्थमित्यत आह प्रजापतिरिति कर्मणप्रविश
तस्य जनस्य जीवनहेतुत्वेन पतिः। प्रजानुजनपुत्रयोरिति। प्रजापतिशब्दवाच्यत्वमुख्यमस्येति वा। प्रवृत्ते ज्ञानपूर्वकत्वेन संभवात्तदर्थं धियांपतिरि
ति। लोकपतिरित्यनेन पुरंदरादीनां तत्पतित्वं निवारयति। पतिर्गतिश्चेत्यादिना भक्तवात्सल्यातिशयं दर्शयति निरपेक्षत्वेन सतां स्वाधित्वापेक्षानाप्ती
तिशंकां निवारयति सतांपतिः १९

राम २८

उक्तार्थजातमिदं किंप्रमाणकं कथं वा ज्ञातुं शक्यमिति तत्राह यदंघ्रीति। कार्त्स्न्येनानिवृत्तविषयसंस्कारं स्मरणमभिध्यानं। निवृत्तविषयसंस्कारो संप्रज्ञा
तारव्यः समाधिः यदंघ्रिविषयाभ्यां ताभ्यां धौतया निर्णिक्ताविद्याकामलया धिया। आत्मनः परमात्मनस्तत्त्वमनुपश्यंति यस्मात्तस्मात्तद्दर्शनं प्रमाण
म्। एवं यथारुचयथारुचि विशिष्याभिप्रसन्नत्वं वदंति चैतन्तत्तदुपदेशशास्त्रेणाज्ञातुं शक्यमित्यर्थः २० ग्रंथारंभे सरस्वती चतुर्मुखादिप्रसादश्चाभीष्ट
साधनं भवतीत्यभिप्रायेणाह प्रचोदितेति। पुरा सर्गादौ अजस्य आत्मप्रब्रह्मणो जातस्य चतुर्मुखस्य हृदि सतीं सर्वचेतनेस्य उत्तमां स्मृतिं सं नियमलक्षणा
वितन्वता संस्कारोद्बोधद्वारेण विस्तारयता येन भगवता प्रचोदिता प्रेरिता स्वलक्षणा स्वरूपभूता निमित्तारंभलक्षणा स्वरूपनिर्णायकषडंगारभ्यलक्ष

यदंघ्र्यभिध्यानसमाधिधौतया धियानुपश्यंति हि तत्त्वमात्मनः। वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां २० प्रचोदि
ता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां २१

णा वा सरस्वती वाक् अंगानि आदिवेदरूपा तस्य आस्यतः आस्यचतुष्टयात्प्रादुरभूदभिव्यक्ताभूत्। चत्वारो निर्गता वेदाः सर्ववक्त्रचतुष्टयादित्यादेश्च। ऋषीणां ब्रह्मा
दिज्ञानिनामृषभः ज्ञानप्रदः परमवागीश्वरीपतिर्नारायणो मे प्रसीदतां प्रसन्नो भवत्वित्यन्वयः। किलेत्यनेन सर्वश्रुत्यादिसंवादं दर्शयति। वाक्ष्णीसंवा
दयोः किलेति यादवः। यद्वा पुराशास्त्रप्रबंधे धिकृते नाजस्य मम पितामहस्य पराशरस्य हृदि सतीं ज्ञानोपदेशलक्षणां स्मृतिं वितन्वता येन व्यासेन प्रचोदि
गंधर्वविद्याधरचारणेशायेयक्षरक्षोरगनागनाथाः।येवाऋषीणामृषभाःपितॄणांदैत्येंद्रसिद्धेश्वरदानवेंद्राः ४३ अ
न्येचयेप्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः॥ यत्किंचलोकेभगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ४४

तेशोपियमः।रूपांतरविवक्षयापुनर्वचनं।व्यासवासुदेववत्।पिशाचेशाःघंटाकर्णादयः।भूतेशाःभैरवादयः।कूष्मांडेशाःभृंगिरिट्यादयः।यादसा
मीशाःतिमिंगिलादयः।मृगाणामीशाःसिंहादयः।पक्षिणामीशाःनंदिकेश्वरादयः।भगवद्यशोज्ञानादिमत्महस्वत्तस्वतोमहत्ववत्।ओजस्वत्
बलवत्।सहस्वत्सहनगुणवत्।बलवद्धिकारणशक्तिमत्क्षमावत्क्रोधासमुच्छित्तिमत् ४४

ह्रीमद्योग्यलज्जावत्। श्रीमत्लक्षणोनंद्विभूतिमत् विशेषशक्तियोग्यतावत्स्वतो महत्त्वम ह्री विशेषशक्तिशक्तिता विभूतिर्लक्षणोज्ञाहो लक्ष्मी
शब्देनभाष्यतइति आत्मवत्स्वतन्त्रमतम नोजयवद्धा अद्भुतार्णं आश्चर्यसमुद्रं। स्वरूपैर्येषां विशिष्टं तत्कुरुते तत्तथा स्मृतमित्युक्तो मिथ्याविभूतिर्लप्र
सुक्तं ४४ पुरुषनामकएवस्वरूपांशावतारेणान्यइ तिशंकांपरिहरन्निदानंदवतारानुक्रमणं प्रतिजानीते। प्राधान्यतइति ऋषयो ब्रह्मादितः
निर्मोभूत्रः आनंदादिगुणपूर्णस्य पुरुषस्य यान्लीलावतारान् आमनंति पठंति। अस्याभिनो पासते चतां स्तेतव प्राधान्यतोऽनुक्रमिष्ये गणयिष्यामी

ह्रीश्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपं ४४ प्राधान्यतो यानृषय आमनंति लीलावतारान्पुरुषस्य भूम्नः।
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशलान् ४५ इतिश्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोऽ
ध्यायः॥ ॥

त्वत्तः। भवतात दनुक्रमणात् सः कर्णपुटेनापीयतां अभिगम्यतां यद्वा पीयतां गायतां ध्यायतां पश्यतां पिबतां जनानां कर्मकषायः देहाहंकार
हेतुः कर्मारम्भरसः तस्य शोषो येभ्यस्तथोक्तान् नृपेत्यत्र गुणमाह। सुपेशलानिति मनोज्ञान् प्रतिमधुरानिमानिति स्वमनसि प्रकाशितत्वेन का
लक्षेपं क्षिपति ४५ इतिद्वितीये षष्ठोऽध्यायः

अस्मिन्नध्याये इति ज्ञातान् परमपुरुषस्यावतारान् सचरितानि विविशिनष्टि तत्र प्रथमतो वराहकल्पमनुसृत्य वराहावतारं तत्कर्म चाह। यत्रेति।
अत्र दंष्ट्राशब्देन सुदर्शनं गदा वोपलक्ष्यते। सकलयज्ञमयीं स्रुक्स्रुवादि सर्वयज्ञोपकरणजननीं तदाधारां क्रौडीं क्रोडस्य वराहस्य विद्यमानां
तनुं बिभ्रत् ब्रह्मादिभिः स्तुतोऽनंतो यत्र यदा क्षितितलोद्धरणाय उद्यतः समुद्रे निमज्ज्य रसातलगतां महीमुद्धर्तुं दंष्ट्राग्रे निधायोर्ध्वं गतो भवत्। तदा

ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनं
तः। अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार १

तन्महार्णवे तदोधाय उपागतं नमादिदैत्यं हिरण्याक्षं वज्रधर इंद्रो वज्रेणाद्रिं यथा तथा दंष्ट्रया तदा गदया विदीर्णगात्रं मुष्टिभिः कर्णमूले हत्वा
गतासुमकरोदित्यर्थः। दॄ विदारणे इति धातोः। येनांतर्महार्णवे स्वर्गीतातमिति वा १

भा·द्वि·
५०

सुयज्ञं पयशो यस्य स सुयशाः उत्तमश्लोकशिखामणिः। स्वार्पणबुद्ध्या क्रियमाणः शोभमानो यज्ञो यस्य स सुयज्ञः। क्रियाभिमानी यज्ञनामें
द्रस्तु शोभनो यस्मात्स इति वा स नारायणो रुचेः प्रजापतेः सकाशात् यज्ञ इति नाम्ना आकूत्यां रुचिपत्न्यां जातो भूत्वा अथेंद्रपदस्य आकूतिसू
नुर्यज्ञो दक्षिणायां रमावतारायां स्वपत्न्यां स्वायंभुवमन्वंतरे तुषिताख्यानमरानजनयत्॥ यो राक्षसैरनुधावनेन स्वायंभुवेन मनुना संसारक्ले

जातो रुचेरजनयत्सुयशाः सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां। लोकत्रयस्य महतीम
हरद्यदार्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः २

राम
५०

शसंहरणाद्धरिरिति ज्ञात्वेशावास्यमित्यादिना नूक्तः वेदवचनेनोक्तः। त्रयीकृतिर्निन्त्यवाक्यं वेदोऽनुवचनेन तथेत्यभिधानं किं च यस्मात्सुरजनादु
त्पन्नां लोकत्रयस्य महतीमार्तिं महरत्तद्धननेनेति शेष इत्यर्थः। लोकत्रयस्य महतीमार्तिमहरदिति यस्मात्तस्माद्धरिरिति ज्ञात्वानूक्त इति वा।
।क्रियाभिमानाद्यज्ञोऽसाविंद्रस्तु यकीर्तितः। यज्ञेशत्वात्स्वयं विष्णुर्यज्ञो रुचिसुतं स्मृत इत्यादेरयं यज्ञो हरिरेवेति २

वशः। आनंतर्यार्थो हे द्विज अथ स विष्णुः कर्दमगृहे कर्दमप्रजापतिपत्न्यां नाम्ना देवहूत्यां नवभिः मरीच्यादिपत्नीभिः समं सह कपिलनामा जज्ञ इत्यन्वयः। त
च्चरितमाह। आत्मगतिमिति। यः कपिलः स्वमात्रे आत्मगतिं तत्त्वसंख्यानरूपामात्मविद्यामूचे स कपिलोऽस्मिन्सात्विकप्रकृतिचेतनगणे विद्यमानं गुणसंग
पंकं शब्दादिगुणानां संगान्निरंतरनिषेवणादुत्पन्नमविद्याकामकर्माख्यं पंकमात्मशमलं मलं नकल्मषं सांख्यशास्त्रश्रवणाज्जातज्ञानवारिणा विधूय प्रक्षा
ल्य स्वगतिं दत्वा स्वलोकं प्रपेदे इत्यन्वयः ३ हरिणा स ममापत्यमभिकांक्षत इच्छतोऽत्रेर्मुनेस्तपसा तुष्टो भगवान्स प्रसादप्रसन्नेन मयाहं तव पुत्रत्वेन दत्त इत्या

जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे। ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय क
पिलः स्वगतिं प्रपेदे ३ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः। यत्पादपंकजपरागपवि
त्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ४

हेति यद्यस्मात्तद्धरिरत्रेरनुसूयायामवतीर्णो नाम्ना दत्त इति प्रसिद्धो भूतः। यस्य दत्तस्य पादपंकजपरागनिषेवया पवित्रदेहा यदुः कार्तवीर्यस्य पूर्वजः
हैहयः कार्तवीर्यार्जुनः तौ आद्यौ येषां तेन तथा। उभयीं विष्णुप्रधानां योगर्द्धिमणिमादियोगसिद्धिमापुरित्यन्वयः। उ इति ब्रह्मेति श्रुतेः मयद्योपि
प्राधान्ये प्रयोगदर्शनात्। उभयीमिति पाठे। इहलोकपरलोकविषयां सगुणनिर्गुणविषयां वेति व्याख्यानं वाना मायज्ञानामिति ज्ञातव्यं ४

आदाविति तुतयत्रसंबध्यते। यदादौ मया विविधलोकसिसृक्षया तपस्तप्तं कृतं तदा मम तपतः तत्पुंकुर्वतः। स्वतपसः सर्वकृत्यतपसः सनात्सदासनो
त्वत्तेः इर्वनोऽस्माकमर्थे स विष्णुनामाभूदित्यन्वयः। अवतीर्य च यत्तत्वं मुनयः आत्मन्यात्मनि हृदय एव एकाकिकायां अवद्वन्। प्राक्कल्पस्य संप्लवेन
जलीभावेन प्रलयेन इह जगति विनष्टं तिरोहितमात्मतत्वं सम्यक् अगाद मम उपदिदेश इत्यन्वयः। ब्रह्मणः प्रपतः इत्यं विष्णुर्जातः उरुक्रम इत्यादि

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत्। प्राक्कल्पसंप्लव
विनष्टमिहात्मतत्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ५

वाक्यं चेममर्थमनुवदति। सनात्सभाजनात्समाराधनलक्षणात्स्वतपसः। स्वतपः साधनात् ज्ञानलक्षिरूपात्करणादिति यावत्। स आराधि
तो देवः चतुःसनोऽभूत्। सनकः सनंदनः सनातनः सनत्कुमार इति चतुर्मूर्तिरभवदिति देवर्षीकं तुल्यमिति। अस्य अवतारस्य मुख्यप्रयोज
नं जगद्ब्रह्मणमात्मतत्ववचनं प्रासंगिकमिति ज्ञातव्यं। तदभिप्रायेण क्रमावार्यैः सर्वज्ञैः। यश्च पाति सदा लोकानजितो जयतां वर इत्यादि
५

धर्मस्य भगवतो दक्षदुहितरि दक्षपुत्र्यां स्वमूर्त्यां सच्चिदानंदलक्षणस्वदेहेन नारायणो नर इति नाम्नाजनि कीदृशः स्वतपसः स्वज्ञानस्य प्रभावो मा
हात्म्यं यस्मिन्सः स्वतपः प्रभावः प्रतापमाहात्म्ययोः प्रभावः स्यादित्यतः लोकशिक्षार्थं स्वतपः प्रतापवाञ्चात्र देतात्पर्यं। नारायणो हरिः कृष्ण
इति चत्वारो विष्णोः साक्षादवताराः। नरनाम्नस्तेंऽतर्यामितया नरनामावतीर्ण इति। तत्र लोकशिक्षार्थं तपः कुर्वाणो वदर्याश्रमे तौ सहैव तिष्ठत
इति नारायणो नर इत्येतावेवोक्ताविति ज्ञातव्यं। नरो नारायणश्चैव हरिः कृष्णस्तथैव चेत्यादिवचनात्। स्वतपः प्रभाव इत्युक्तं विष्णुनेति।

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः। दृष्ट्वात्मनो भगवतो नि
यमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ६

दृष्ट्वात्मन इति। दृष्ट्वात्मनो नित्यमपरोक्षीभूतनिजस्वरूपस्य नरनारायणात्मनो भगवतो नियमावलोपं तपआदेर्भंगं। अनंगस्य पृतनाः सेनाः स्थानी
याः देवस्त्रियो घटितुं कर्तुं न शेकुरित्यन्वयः। किं च स्वतोप्यधिकसौंदर्यमंदिराणां आवतातं कृष्णाः दृष्टा नाम्ना स्त्रीणां दर्शनात् लज्जिताः सतोन्यवर्त
न्तेत्यस्मिन्नर्थे तु शङ्कः। यद्यप्यनंगपृतनाः स्तथापीति पदार्थे वा ६ श्रीरामाय नमः

क्रोधवतएवमनसिकामः पदंलभतोहरेस्क सएवपदंनप्राप्नोतिनितरांकामोतंतत्साधनंनकार्यत्वममम्भूदित्याह। काममिति। क्रतिनोमहात्मानःशंकराद्येरोषाविष्टद्दस्याकामंदहंतिनतुप्रसिद्धोयमर्थः। उतशब्दोप्यर्थः। तेपिदहंतेरोषंनदहंति। तत्रहेतुगर्भविशेषणमाह। असह्यमिति।

कामंदहंतिक्रतिनोननुरोषदृष्ट्यारोषंदहंतमुततेनदहंत्यसह्यं। सोयंयदंतरमलंनिविशन्विभेतिकामःकथंनुपुनरस्यमनःश्रयेत ७

सोयंरोषोमधुसूदनेअंतःनिविशन्निवेशुमिच्छन्अलंविभेति। अत्रहेतुरमलमिति वाक्रोधनिवेशनसहकारिरागद्वेषलक्षणमलविधुरत्वादित्यर्थः। कामःअस्यहरेर्मनः कथंनुश्रयेतनकथमपिसहकारिणःक्रोधस्यप्रवेशसंदेहादित्यर्थः। कंवनावसरमासाद्यापीत्यस्मिन्नर्थेपुनरिति ७

परोन्नानपादनाम्नोराज्ञोंतिकेमुनीत्याःसपत्न्याउदितपत्रिभिर्वाग्भिर्विद्धःसन्बालोपिपुरादपगतोनिर्गतस्तपसेवनायत्रागमदितिशेषः। तत्रनारदोपदिष्टविधिनातपश्चरतेप्रमत्तंदृष्ट्वाश्रणतेस्क वततस्मैक्रवायतपत्नाप्रसन्नोहरिःवासुदेवनामविग्रहविशेषंगृहीत्वाक्रवगतिंनित्यस्थानमदादित्यन्वयः। वैकुंठाद्यन्यतममदात्किमित्याशंक्यतद्विशिनष्टि। दिव्याइति। यदुपर्यधस्तात्यस्माक्रवगतेरुपर्यधस्तात्स्थिताअवरवारिलोकुनयोध्रुवक्रवतितामितिशेषः। अवतारोमहाविष्णोर्वासुदेवइतीरितइत्यादेःकिंनामायमवतारइतिशंकानिरस्तेति ८ अथे[illegible]यथागतंमोमेवयन

विद्धःसपत्न्युदितपत्रिभिरंतिराज्ञोबालोपिसन्नपगतस्तपसेवनाय। तस्मैअदातध्रुवगतिंगृणतेप्रसन्नोदिव्यांध्रुवंतिमुनयोयदुपर्यधस्तात् ८ यद्वन्नमुत्थगतंद्विजवाक्यवज्रनिष्पिष्टपौरुषमगंनिरयेपतंतं। त्रात्वार्थितोजगतिपुत्रपदंचलेभेदुग्धावसूनिवसुधासकलानियेन ९

ध्रुवंमंत्रोन्यद्दैवंनाम्नीत्यद्देतमार्गवर्त्तिनमतएवद्विजवाक्यवज्रेणनिष्पिष्टपौरुषमगंविनाशितपुरुषाकारभागधेयं। मत्वानिरयेपतंतंवेनंत्रात्वापरमर्षिभिर्ज्ञगत्यालनायार्थितोजगतिभूलोकेपुत्रपदंमथितवेनदक्षिणभुजोत्पन्नपृथ्वाख्यमहाराजरूपंलेभइत्यन्वयः। स्वयंवपृथुनामातत्रविष्णुरित्यर्थवशहेनानुवदति। पृथुर्नामममहाराजस्तत्रविष्णुःस्वयंविष्णुरित्यादेः। तत्कर्म्माह। दुग्धेति। येनपृथ्वाविष्टेनपृथुनाप्राहरिणावसुधाभूमिःसकलानिवसूनिअन्नादिद्रव्याणिदुग्धानीत्यन्वयः ९

असौ नारायणो नाभेराज्ञः सकाशात्सुदेविसूनुर्ऋषभ आसेत्यन्वयः। मेरुदेव्याः सुदेवीति नामान्तरं। जडकृतं तत्स्वतारकर्माह। यो वा इति। ऋषभस्तत्र मायो वैद्दिसमद
क् सर्वत्र हृदिस्थितं समं ब्रह्म पश्यतीति नित्यापरोक्षीकृतं तस्य रूप इत्यर्थः। योगचर्या परमहंसधर्मं चचार। ऋषयो यद्रूपं पारमहंस्यं परमहंसप्राप्यं साम मनन्ति।
यश्च स्वस्थः स्वाधारः प्रशान्तकरणः अकृष्टसुखात्मकदेहेन्द्रियः। अत एव परिमुक्तसंगः बाह्यसुखानपेक्षः विधिनिषेधविमुक्तस्य योगचर्याचरणं किम
र्थमित्याशंकावाद्भ्येनेन निरस्तालोकसंग्रहार्थत्वेन तदाचरणप्रसिद्धेरिति। स्वस्थ इत्यादिविशेषणबाहुल्यात्तु तत्प्राप्यप्रयोजनान्तरं वास्ति १० साक्षा

नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृक् जडयोगचर्यां। यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशां
तकरणः परिमुक्तसंगः १० सत्रे ममास भगवान्हयशीर्ष एव साक्षात्स यज्ञपुरुषस्तपनीयवर्णः। छंदोमयो म
खमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ११

त्तुर्य एव यज्ञपुरुषो मम सत्रे यज्ञे नाम्ना हयशीर्ष आसेत्यन्वयः। तिर्यग्योनित्वेऽप्यैश्वर्यादिगुणसामग्रीमाह। भगवानिति। तपनीयं रूपं हेम्नो
रित्यभिधानान्मूलावताररूपापेक्षया भयवर्णत्वमुक्तं। अनेन साक्षान्नारायण एवेति निरणायि हिरण्यश्मश्रुरित्यादिश्रुतेः इतोऽप्ययं नारायण एवे
त्याह। छंदोमय इति। छंद आदीनामाधारत्वात्तद्विषयत्वात्तदुद्देश्यत्वादंतर्यामित्वात्तन्मयत्वे तत्कर्म्म चाह। वाच इति। अस्य हयग्रीवस्य श्वसतः श्वा
संकुर्वतो नस्तो नासिकाया उशतीर्भगवद्गुणप्रतिपादकत्वेन सुंदराः श्वासरूपा वाचो वेदादिलक्षणा बभूवुरित्यन्वयः। छंदांसि च मखाश्च देवाश्च लोका
श्च सर्वे इत्यादिना मयटो विकारार्थत्वमप्युक्तं ११

मे मुखाद्विस्रंसितान्निर्गतान्वेदमार्गान् हयग्रीवदैत्येनापहृतान्दृष्ट्वा मत्स्यावतीर्य तं हत्वा तान्समादाय स्थितः पुनर्युगान्तसमये मन्वन्तरप्रलये स
सप्तर्षिभिः सह सत्यव्रताख्येन वैवस्वतमनुनोपलब्धो दृष्टः। क्षोणीमयः क्षोणीमयनावाश्रयत्वात् अत एव निखिलजीवनिकायानां केतः आश्रयः तत्रोरुभ
ये महान्ति भयंकरे सलिले प्रलयसमुद्रजले विजहारेत्यन्वयः १२ अमृतलब्धये अमरदानवयूथपानां क्षीरसमुद्रमुन्मथ्नतां सतां अतिभारेण क्षीरोद
धौ मज्जंतं गोत्रं पर्वतं स आदिदेवः कच्छपवपुर्भूत्वा पृष्ठेन विदधारेत्यन्वयः। उपर्यधोनेत्रंगोत्रयोरित्यर्थद्योतको वी ह्युपसर्गः। सन्ज्ञातिस्वभावसा

मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः। विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र
विजहार ह वेदमार्गान् १२ क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः। पृष्ठेन कच्छपवपुर्विदधार गो
त्रं निद्राक्षणोऽद्रिपरिवर्तकषाणकंडुः १३ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं। दैत्येंद्रमाशुग
दयाभिपतंतमाराद् ऊरौ निपात्य विददार नखैः स्फुरंतं १४

हा। निद्राक्षण इति। निद्रया ईषन्मीलितनेत्रः निद्राहेतुमाह। अद्रीति। मंदराद्रेः परिवर्तैः परिभ्रमणैस्तेन कषाणं विलेखनं तेन जाता कंडूः कंडूयनं यस्य
स तथा १३ त्रैविष्टपानां देवानां दैत्याद्यदुरुभयं तद्धारि तद्धननशीलं। भ्रमंत्यौ भ्रुकुटी ययोस्ताभ्यां दंष्ट्राभ्यां च करालं भयंकरं वक्त्रं यस्य स तथा।
नृसिंहयोर्नरस्य सिंहस्य च रूपमिव रूपं कृत्वा महाहरिः आराद्दूरात् गदयाभिपतंतं स्फुरंतं दैत्येंद्रं हिरण्यकशिपुं वेगेनोरौ निपात्य नखैर्विददारेत्यन्वयः। दवि
दारण इति धातोः १४

यदा यूथपतिर्गजेंद्रः सरसंतर्ग्राहेण पदे गृहीत आर्तः सन्नंबुजहस्तः हे आदिपुरुषाखिललोकनाथ तीर्थश्रवः पावनकीर्त्ते श्रवणमात्रेण मंगल प्रदनारायणेत्यभिधानं त्वमस्मान्रक्ष इतीदमाह १५ तदा तां प्रपन्नामाभगवानरणार्थिनं शरणार्थिनं स्मृत्वा तत्रागत्य कृपया तं हस्ते प्रगृह्योज्जहार भगवच्छब्दवाच्यत्वं सूच्यादीनामप्यसीति ततो आवर्त्तयति। अप्रमेय इत्यादिना। अप्रमेयः इयत्तारहितः। एतदाकाशस्याप्यसीत्यतश्चक्रायुध इति। नन्वनेनयोद्धास्तु अत इति तत्राह। पतगेति। पतगराजो गरुडस्तस्य भुजमधिरूढः भुजस्कंधयोरति सामीप्यादेवमुक्तं। किं कृत्वा चक्रेणासुदर्शनेन नक्रस्य ग्राहस्य वदनं विनिपाद्य छित्वा हरिः प्रपन्नामाश्रे उज्जहार प्रपसिवैमनुरित्यादेः कोयमवतारो नामेति शंका निरस्ता १६ वामनत्रि

अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्त्तः॥ आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवण मंगलनामधेय १५ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः। चक्रेण नक्रवदनं विनिपाद्य तस्मा द्धस्ते प्रगृह्य भगवान्कृपयोज्जहार १६ ज्यायान्गुणैरवरजोप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः क्ष्मां वा मनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः १७

विक्रमावतारो तत्कर्म चाह। ज्यायानित्यादि श्लोकद्वयेन। अत्र यन्नच्छद्वावध्याहार्यौ। तथाहि। यो धियज्ञो भगवान्गुणैर्ज्यायानप्यदितेः सुता नामवरजोऽभूत्तेन भगवता दैत्यानां गर्भवामयति उद्धारयतीति वामनः तेन वामनरूपेण त्रिपदच्छलेन क्ष्मां जगृहे इति यद्यस्मात्तदथो तस्मात्स ए व वामनः इमांस्त्रीन्लोकान्त्रिभिः पदैर्विचक्रमे तस्मात्त्रिविक्रम इति वा भूदितिवाक्यशेष इत्यर्थः। किमर्थमेव हरिणा कृतमत्राह। याच्ञामिति। मार्गवर्त्तिषु मानुषप्रभुभिरप्युपायैर्विना न चाल्य इति न्यायदर्शीनार्थमेवं कृतमिति भावः। यद्वा अधियज्ञः क्ष्मां यामुर्व्यां वामनेन रूपेण जगृहे त्रिलोकीमिति शेषः। कथं त्रिपदच्छलेन इमान्त्रीन्लोकान्विचक्रमे इति यत्तस्माददितेः सुतानां जन्मनावरजोपि गुणैर्ज्यायान सममन्यत १७

त्रिपदच्छलेनैव त्रैलोक्यं स्वव्रतो बलेर्ह्रीनफलमिंद्रपदावाप्तिरिति संभोरंते केचिन्नेत्रा। किंतु हरितोषणद्वारा मुक्तावानंदोद्रेकतैव। ऐंद्रपदं नांतरीयफलं तु हरितोषणमित्याह। हरित्याश्रयेनाह। नार्थ इति। अंग नारदयः प्रतिश्रुतं पदत्रयमृते पिवा त्मन्यस्वसंबंधि शीर्षमात्मशीर्षं चिकीर्षमानं मनसा मनः पूर्वकं हरयेभिमेने समर्पयामास। तस्मात्स उरुक्रमपादशौचमंभः शिवं शिरसा धृतवतो बलेर्यद्विबुधाधिपत्यं लक्षणं फलमयमर्थो न साक्षात्फलं न भवति। तन्नांतरीयकमेवेत्यन्वयः। वाइत्यनेनास्यार्थस्यानन्यथात्वं वक्ति १८ महिदासनाम्नो हरेरवतारस्य चरित्रमाह। तुभ्यमिति। विवृद्धभावेन समुद्रिक्तसत्वा साधुपरितुष्टो नाम्ना महिदासो भगवान्कृत्यमस्मदादिभ्यश्च भगवद्विषयं कर्मयोगं ज्ञानयोगं च वा चेत्यन्वयः। आत्मेत्यनेन भागवतं तत्त्वस्य प्रदीयति। अ

नार्थो बलेरयमुरुक्रमपादशौचमंभः शिवं धृतवतो विबुधाधिपत्यं। यो वै प्रतिश्रुतमृतेऽपि चिकीर्षमाणमात्मानमंग मनसा हरयेभि मेने १८ तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधुपरितुष्ट उवाच योगं। ज्ञानं च भागवतमात्मसुतत्वदीपं यद्वासुदेवशरणा विदु रंजसैव १९ चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्त्ति। दुष्टेषु राजसु दमं व्यदधत्स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः २०

त्रप्रमाणमाह। यदिति। यत्ज्ञानं वासुदेवशरणाः ब्रह्मादयः। अंजसैवेत्येव निषेधार्थ एवशब्दः। तदुक्तं। ऐतरेयो हरिः प्राह नारदाय स्वकं तत्त्वं। यस्माद्वै वेदवादानांन्यमहत्तेन मधुरं वपरमिति १९ राजराजेश्वरावतारं तच्चरितं चाह। चक्रं चेति। राजराजेश्वर इति नाम्नावतीर्णो हरिः स्वायंभुवादिमनुवंशधरः सन्दुष्टेषु राजसु दमं विदधत्सत्ये धर्मे सत्यसंधाने वा निविष्ट उशतीं कमनीयां स्वकीर्त्तिं चरित्रैः प्रथयन् प्रख्यापयन्मन्वंतरेषु प्रियव्रतादिचक्रवर्तिप्रभ्यास्थितो दशसु दिक्ष्वविहतमप्रतिहतं तेजः स्वरूपभूतप्रभावचक्रं माज्ञालक्षणं बिभर्तीत्यन्वयः। मन्वंतरेषु भगवांश्चक्रवर्तिषु संस्थित इत्या दिकमत्रमानं २०

मा· द्वि·
५५

देवो स्वगवान्स्वयमेव विशेषावेशमंतरेण धन्वंतरिश्चासावतीर्णः श्च । पुरुरुजां बहूनां रोगाणां रुजो रोगान्नाम्नैव स्मारितेन हंति । सएवामृतायुश्चिरंतमायु
रुः सन्नद्यायत माग वा वा प श्चायुर्वेदं च ब्राह्मंडेशाद्धैवानुशास्ति कृत्वा लोके प्रवर्तयति २१ मार्गवरामावतारं तत्कर्म च संक्षिप्याह । क्षत्रमिति । उरु
द्रंग्रसतीति उग्रंवीर्यं यस्य स उग्रवीर्यः । आत्मभ्यः पुत्तुषेभ्यो महाद्रपुरुषोत्तमो सो उवीधारा निशिताग्रं यस्य स उरुधारः स चासौ परश्वधः परशुः तेना

धन्वंतरिश्च भगवान्स्वयमास देवो नाम्ना नृणां पुरुरुजां रुज आशु हंति । यज्ञे च भागममृतायुरवावरुन्ध आयुश्च
वेदमनुशास्त्यवतीर्य लोके २१ क्षत्रं क्षयाय विधिनोपहृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु उ
द्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन २२

राम
५५

वनिकंटकमत एव नरकार्तिलिप्सु नरकदुःखलब्धुकामं उज्झितपथं त्यक्तसन्मार्गं ब्रह्मध्रुक् ब्राह्मणद्रोहि अत एव विधिना दैवेन क्षयायोपहृतं
समर्पितं क्षत्रं क्षत्रियकुलं । उद्धंति उन्मूलयति इत्यन्वयः । त्रिःसप्तकृत्व एकविंशद्वारं २२

एमावतारं तद्विक्रमं च श्लोकत्रयेणाह कृत्स्नप्रसादेति । दशकंधरो रावणो यस्मिन्विरुध्य आर्तिं मरणलक्षणां मार्च्छत् प्रापत । सकलेशः प्राणः अद्वावायु
रित्यादिश्रुत्युक्तानां कलानां स्वकार्यशक्तिप्रदः प्रभुः कृत्स्नः पूर्णः प्रसादः आनंदो यस्य स तथा । कार्येण कारणोपलक्षणं । सुमुखं सुखं यस्य स त
था । कृत्स्नप्रसादश्चासौ सुमुखश्चेति समासः । इक्ष्वाकुवंशे कलया स्वनृपांशेनावतीर्य गुरोर्दशरथस्य निदेशे नियोगे तिष्ठन् सदयितानुजः सीताल
क्ष्मणाभ्यां सहितो रामो वनमाविवेशेत्यन्वयः । इक्ष्वाकुवंश अवतीर्येति संधिकार्यस्यानाकांक्षितत्वात् कस्यचिद्विशेषस्य संभवाच्चार्षत्वमेवेत्यत्वात्

कृत्स्नप्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे । तिष्ठन्वनं सदयितानुज आविवेश यस्मि
न्विरुध्य दशकंधर आर्तिमार्च्छत् २३ तस्मा अदादुदधिरूढभयांगवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः । दूरेसुहृ
न्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः २४

स्याक्षिते ३

२३ दूरेस्थितासुहृत्सीता यस्य सः तस्य रामस्य उज्वलितो रोष एव सुशोणो ऽग्निः तेन युक्तया दृष्ट्या । अग्निः सुशोषः कल्पाग्निर्मिरारिर्हिरण्यपद इति । म
कराश्च उरगाश्च नक्राश्च मकरोरगनक्राः तातप्यमानानां पुनःपुनः पच्यमानानां मकरोरगनक्राणां चक्राणि यस्मिन् स तथा । ऊढलयं येन स तथा । अंगे
वेपः कंपो यस्य स तथा । ऊढभयश्चांगवेपश्च एवंविध उदधिः त्रिपुरं हरवद्रिपुरं लंकां दिधक्षोर्दग्धुकामाय तस्मै रामाय सपदि मार्गमदादित्यन्वयः २४

भा· द्वि·
५६

वक्षःस्थलस्पर्शेन रुग्णा भग्ना महेन्द्रवाहस्यैरावतस्य दन्ता यैः। वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितः प्राप्तः ककुभां जयः। विडम्बितककुब्जयस्तेन रूढ
उपलब्धो हासो हास्यो यस्य स तथा॥ ससैन्येन सहितो रावणः तस्य दारहर्तुः दारान् सीतामाहर्तुकामस्य रामस्य धनुष उच्चरितैर्निर्गतैर्विस्फूर्जितैरसुभिः सह विने
ष्यति सर्वं विनयं मदस्य विनाशमेष्यति पुनः स यः स्वप्राणैरपि रामसमुक्तैः शरैः विनेष्यति विनाशं प्राप्नोतीत्यन्वयः। धनुर्विस्फूर्जितैर्नष्टो रावणः पूर्वमेव
तु। पुनः शरैरामसमुक्तैः सानुबन्धो विनेष्यतीत्यनेन धनुर्विस्फूर्जितैर्विनाशः कथमभूदितीयमाशंका निरस्तेति। ससैन्य इत्यस्य विवरणं सानुबन्ध इति २५
कृष्णावतारमनन्यसाध्यं तत्कर्म एवं संगृह्य कथयति। भूमेरित्यादिश्लोकदशकेन। स हरिः सितकृष्णकेश इति नामककलया जातः कर्माणि करिष्यती

वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जयरूढहासः। सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष
उच्चरितैः ससैन्यः २५ भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः॥ जातः करिष्यति ज
नानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि २६

त्यन्वयः। कर्मणा न तत्त्वज्ञानं कस्मान्नो देत्यत उक्तं जनेनेति। प्राकृताज्ञेयमार्गत्वादित्यर्थः॥ अवतारप्रयोजनमाह। सुरेतरेषामसुराणां वरूथेन समूहेन यु
क्तेन विमर्दितायाः पीडितायाः भूमेः क्लेशव्यपायेति। कीदृशानि कर्माणि आत्ममहिमोपनिबन्धनानि स्वमहिमनिमित्तानि पूतनावधादीनि हरेः
कर्माणि परकर्मनिबन्धनानि न भवन्त्यन्येषां कर्माणि तन्महिमानिबन्धनानीति वार्थः। तदुक्तं। विष्णोर्नु वीर्याण्यनेन कर्माणि परेषां तन्निबन्धनमिति अत्रान
न्तांशे रौहिणेये रामे शुक्लकेशात्मकरामाभिधानो हरिस्त्रिष्वनुजगद्व्यापयतीत्येतद्राम एको ह्यनन्तांशस्तत्राभिधो हरिरित्यादिनोक्तमत एवमे
वगाह्यमिति भावः २६

लुं

तोकेनेत्यणुना बालेन निर्दिशेनेत्यर्थः। शरीरोत्थानादिप्रवृत्तिहेतुत्वाद्वः प्राणाः प्राणापहा उलूकिपतीत्युलूकिका तस्याः स्तनपानेन जीवहरणं यत्कर्म त्रैमा
सिकस्य त्रयो मासा वयो लक्षणानि वृत्ता यस्य स तथा तस्य कृष्णस्य उक्तिः तेन पादेन शकटोऽपवृत्तः व्यत्यस्तः। शकटेन राक्षसाकारेणाऽऽत्माहत इति
यच्च। उलूखलबद्धेन रिङ्गता क्रीडताऽन्तरगतेन मध्यगतेन बालेन दिविस्पृशोः सहस्रधनुर्मितोर्ध्वदेशं स्पृशतोः तावद्वृक्षयोरित्यर्थः। यमलार्जु

तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः। यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं
त्वितरथार्जुनयोर्न भाव्यम् २७ यद्वै व्रजे व्रजपशून्विषतोयपीतान्गोपांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या तच्छुद्धयेति
विषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्ह्रदिन्याम् २८

नयोरुन्मूलनं च यत्तत्सर्वं कर्म इतरथा विष्णुर्नैव तत्स्वमहिमोपनिबन्धनत्वेन न भाव्यम्। सहस्रधनुरूर्ध्वदेशस्पृशोरनायासेनापि तत्पतत इति च २७ वि
षतोयपीतान्। विषमिश्रजलपीतवतः जीवयदजीवयत् अनुग्रहलक्षणा दृष्टिवृष्टिः। तच्छुद्धये यमुनाह्रदजलशुद्धये ह्रदिन्यां यमुनायां वि
हरन् क्रीडितवान् कालीयनागमुच्चाटयिष्यत्। उच्चाटितं करिष्यति च। विषजले विहरणं दुर्गं दुष्करं दुर्वारं च नान्यसाध्यं तदनेन कृत
मितरथा न साध्यमित्यर्थः २८

राम
५६

आसुआशुनाविषद्यापिनादावाग्निनाविपिनेदह्यमानेसतिनिशिसर्वात्मनाज्ञानेयत्तुसर्वात्मनाज्ञानंनिशासापरिकीर्त्तितेतिवचनात्।निः
शयानेनितरांशयानेकर्त्तव्यमूढंतंहिअवेतनेकिंनेत्याह।अवसितांतकालेनिश्चितमरणकालंव्रजेतेषांनेत्रेपिधाप्यपिहितकारयित्वाइतोदा
वाग्नेउन्नेष्यतीतियत्कर्मतदन्येषांदिव्यमिवक्रतमेवकुतइतितत्राहअनधिगम्यतिनित्यसमाहितैर्ब्रह्मादिभिरप्यविज्ञेयमाहात्म्यत्वादित्यर्थः।

तत्कर्मदिव्यमिवयन्निशिनिःशयानंदावाग्निनाशुविपिनेपरिदह्यमाने।उन्नेष्यतिव्रजमितोवसितांतकालंनेत्रे
पिधाययसबलोनधिगम्यवीर्यः २८ गृह्णीतयद्युपबद्धुममुष्यमाताशुल्बंसुतस्यनतुतत्तदमुष्यमाति।यज्जृं
म्भतोस्यवदनेभुवनानिगोपीसंवीक्ष्यशंकितमनाःप्रतिबोधितास्य ३०

सबलइत्यनेनबलस्यापिएतादृशीशक्तिर्नास्तीतिलक्ष्यते २९ अमुष्यकृष्णस्यमातासुतमुपबद्धुंयच्छुल्बंदामगृह्णीतगृह्णातितत्तद्दामामु
ष्यसुतस्यनमातिनपूर्यतेइत्यमेयलक्षणमाहात्म्ययशोदापीप्रतिबोधितस्यनिद्रायाउत्थितस्यजृंभतोमुखंव्यादाययालस्यंपरिहरतोस्यकृष्ण
स्यवदनेवक्त्रेभुवनानिसमवीक्ष्यशंकितमनाःभीतमनाअभूदितियच्चतदपि ३०

पाशाद्ययात् निशयविद्यायांशयानंजल्पात्अन्यथाज्ञानहेतुवाहृतं।अन्यथाज्ञानहेतुर्याचाकुसाजल्पिःप्रकीर्त्तितेतिच।अतएवातिश्रमे
णसंसारक्लेशेनयीडितंगोकुलंविकुंठेलोकेउपधास्यतीतियत्तदपि ३१ मखेत्र्यात्मोद्देशेयज्ञोदेवइंद्रस्तज्जविहितवायजतोबीघ्नेनगोघ्नाशायगोष्ठाद्व
निवहाव्रजाइतिरिरक्षुःरक्षितुकामःमहीध्रंगोवर्द्धनगिरिंसलीलंधत्तेधारयिष्यतीति।उच्छिलींध्रंछत्राकं ३२ निशाकरस्यरश्मिभिःगौर्याधवलं

नंदंवमोक्ष्यतियदाहृतवारुणस्यपाशात्गोपान्बिलेषुपिहितान्मयसूनुनावाजल्पाहृतंनिशिशयानमतिश्रमेणलो
केविकुंठउपधास्यतिगोकुलंस्म ३१ गोपैर्मखेप्रतिहतेव्रजविप्लवायदेवेभिवर्षतिपशून्कृपयारिरक्षुः धर्त्तोच्छि
लींध्रमिवसप्तदिनानिसप्तवर्षोमहीध्रमनघैककरेसलीलं ३२ क्रीडन्वनेनिशिनिशाकररश्मिगौर्यांरासोन्मुखः
कलपदायतमूर्च्छितेन।उद्दीपितस्मररुजांव्रजसद्वधूनांहर्तुर्हरिष्यतिशिरोधनदानुगस्य ३३

त्वंशानाथांनिशिरात्रौरासक्रीडाभिमुखःश्रीकृष्णःवनेक्रीडन्सन्कलपदंस्वायतेवमूर्च्छितंयकलपदायतमूर्च्छितंतेनसप्तस्वरसमाहारवताना
नेनसप्तस्वरसमाहारोमूर्च्छितेतिप्रकीर्त्तितेति उद्दीपितउज्ज्वलितःस्मरात्कामारुजोयायासांताउद्दीपितस्मररुजस्तासांव्रजसद्वधूनांव्रजनिलयानां
वधूनांस्त्रीणांहर्तुर्नेतुःधनदानुगस्यशंखचूडस्यस्यशिरोहरिष्यतीतिइदमपिविश्वस्त्वेघटतेनान्यथेति ३३

भा॰ द्वि॰
५८

ये प्रलंबादयः कृष्णाख्येन हरिणा दर्शनमिताः ये वान्ये मैंदादयस्तथा जरासंधादयः ये च कुरुपांडवसेनागताः कांबोजादयो बलपार्थभीमद्रो
णपादिव्याजाह्वयेन हरिणा मरणं प्रापिताः ते सर्वे तदीयं निलयं यांतीत्यन्वयः। द्विषिण उदासीना भक्ता इति त्रिविधा जीवास्तत्र द्विषिणो नि
तरां लीयते सुखं यस्मिंस्तं स्वरं ध्वंतमो यांति। उदासीना निरयं नरकं भक्ताः निकामस्वामीष्टस्यानंदस्य प्राप्तिर्यस्मिंस्तं वैकुंठादिकं यांतीत्यर्थः। स
दर्शनस्थानं हरेर्विद्यमानं तदुक्तं। विद्विषिणोऽप्युदासीना भक्ता अपि न संशयः। हरेर्हि सदनं यांति व्यक्तं भक्तैस्तु गम्यते। आरभ्यतम आमुक्तेः कृष्ण

स्कं॰ २

ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः। अन्ये च साल्वकपिबल्वलदंतवक्रसप्तोक्षशंबर
विदूरथरुक्मिमुख्याः ३४ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुसृंजयकैकयाद्याः। यास्य
त्यदर्शनमिता बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं ३५

राम
५८

स्य सदनं यतः अव्यक्तहरिलोकत्वादन्ये बाम्न्यलोकतेति। राम भीमादिनामानि हरेरेव मुख्यानि रमणाशत्रुभयवर्णादीनां शब्दप्रवृत्तिहेतूनां
हरेर्मुख्यत्वादन्यत्रामुख्यत्वाद्व्यवहारार्थसंकेतितत्वाच्चाजानि तदप्युक्तं। रामभीमार्जुनादीनि विष्णोर्नामानि सर्वशः रमणाभयवर्णाद्याः
शब्दप्रवृत्तेर्हि हेतवः इत्यादि स्वगता विविधा तोः रलयोरभेदः न्यग्भावनिरयं नीवगातिं तमद्भुतिवा निन्यांसावनिकामयोरिति ३५

१५७

कालबलेन मीलितदृशां अल्पज्ञानानां स्तोकायुषां अल्पायुषां नृणां स्वनिगमः स्वविषयो वेदो दूरपार इत्यवमृश्य पर्यालोच्य विभुर्दत्तकृपया सत्य
वत्यामाविर्हितोऽवतीर्णो वेदद्रुमं विटपशः शाखोपशाखाभेदेन विभजिष्यतीत्यन्वयः। कस्मिन्नु युगे इत्यत उक्तं। अनुयुगमिति। एतदुक्तं भ
वति। तृतीये सप्तमे षोडशे विंशेऽष्टाविंशे च द्वापरे पूर्वेषु वान्ये व्यासनामतिर्विभाजयिष्यतीति अष्टाविंशे स्वयमेव विभजिष्यतीति त्य

५५२

कालेन मीलितदृशामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः। आ
विर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ३६

तीये सप्तमे चैव षोडश इत्यादिवचनं च विशेषवाविनानुराहेन गृहीतं। कृष्णावतारादुपरि व्यासावतारकथनं तदुपरितनमन्वंतरेष्वपि व्या
सावतारसद्भावाद विरुद्धमित्यस्मिन्नर्थे हि शब्दः पुराणप्रसिद्धेरिति ३६

देवद्विषांमतिविमोहंबुद्धिमोहजनकमतिप्रलोभमतिवंचकं बालवेषंविधाययदौपधर्म्यंउपधर्माणांपाखंडधर्माणांप्रतिपादकंशास्त्रं तदभाषततेप्यवतारा नारायणाइतिशेषः। एतेसुराःकेइत्याशंक्यपूर्वजन्मकर्मपूर्वकंतान्विशिनष्टि। निगमेत्यादिना। प्राक्तनजन्मनियेनविहिताभिस्त्रिपूर्भिःपूर्भिःपुरीभिःलोकान्घ्नतांनाशयतांरुद्रेणरणेहतानांपुनर्विप्रजन्मलब्ध्वानिगमेनविहिताभिःक्रियाभिःनिगमवर्त्मनिविष्ठितानांवेदमार्गेप्रतिष्ठायज्ञादिविशिष्टकर्मानुष्ठानेस्थिराणांअदृश्यामूर्त्तिर्यस्यसतथा। दैत्यैरज्ञेयस्वरूपइत्यनेनततोवेदमार्गाच्चालनायदेवैःप्रत्यक्षीकृत्यप्रार्थितइतिज्ञातव्यं। बुद्धोक्तशास्त्रस्यवेदबाह्यधर्मप्रतिपादकत्वेअज्ञजनदृष्ट्यावेदप्रमाणामि

देवद्विषांनिगमवर्त्मनिविष्ठितानांपूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः। लोकान्घ्नतांमतिविमोहमतिप्रलोभंवेषं
विधाययद्भाषतऔपधर्म्यं ३७ यर्ह्यालयेष्वपिसतांनकथाहरेःस्युःपाषंडिनोद्विजजनावृषलानृदेवाः। स्वा
हास्वधावषडितिस्मगिरोनयत्रशास्ताभविष्यतिकलेर्भगवान्युगांते ३८

त्वादिरूपस्यतस्यैवैविप्रलंभप्रमाणमित्यादिवेदप्रतिपाद्यार्थत्वेनदेवेभ्यःप्रशांतसंहितायांहरिणोक्त्वादितिद्योतनायाभाषतेत्युक्तं। स्वस्त्राणांभाष्यंवक्तवानित्यर्थः ३७ यर्हियस्मिन्युगेसतामालयेष्वपिहरेःकथानस्युर्द्विजजनाश्चपाखंडिनःपाखंडवर्त्तिनःस्युर्नृदेवानृपलाधर्मविनाशकायत्रयस्मिंश्चयुगेस्वाहादिगिरोनसंतिस्मववनाभावेस्मरणमपिनास्तिइतिशब्दआद्यर्थेतदातस्यकलेर्युगस्यांतेअवसानेभगवान्शास्ताभविष्यति। दुष्टानामितिशेषइत्यन्वयः। इतिशब्दःस्वरूपावतारकथनसमाप्तिवचनोवेति ३८

मायाविभूतीराह। सर्गइति। योहंचतुर्मुखःयेचतत्कर्मायायाऋषयःयेचमरीच्यादयोनवप्रजापतयःतेसर्वेसर्गेसृष्टिसमयेप्राप्तेपुरुशक्तिभाजःपूर्णशक्तिभाजःहरेर्मायाविभूतयः अथयोधर्मःयेमखाःयेचनुर्दशमनवोयेवामरेशाश्चतुर्दशेंद्राःयेचावनीशाःप्रियव्रतादयस्तेसर्वेस्थानेस्थितिकालेप्राप्तेपालनायविष्णोर्मायाविभूतयोयेचधर्मायच्चहरोरुद्रोयेचमन्युवशासुराद्याःक्रोधवशासुरासुराःसर्पास्तेसर्वेअंतेतुसंहारकालेवशाप्तेसंहारायहरेर्मा

सर्गेतुपोहमृषयोनवयेप्रजेशाःस्थानेथधर्ममखमन्वमरावनीशाः। अंतेत्वधर्महरमन्युवशासुराद्या
मायाविभूतयइमाःपुरुशक्तिभाजः ३९

याविभूतयइत्यन्वयः। सृष्टिपालनसंहारकालेषुमाययास्वेच्छयाविविधाभूत्वास्मदादिषुस्थित्वासृष्टिपालनसंहारान्करोति। यद्वामाययातत्तदव दिच्छयास्मदादीनांप्रदाविभूतयोभवंतीत्यतोस्मदादयोहरेर्मायाविभूतयोनतुस्वरूपविभूतयः इत्ययंविशेषस्कंधःशब्दसूचितयाहरीच्छयाविभूतिर्यतब्रह्मादीनांप्रदाभवेतइच्छयावाबहुविधस्तेषुविष्णुःस्वयंस्थितः अतोमायाविभूतित्वंतेषांमत्स्यादयःस्वयमितिस्मृत्याप्रतीतइति ३९

ननुस्वरूपमायाविभूतीनामेतावत्त्वंवेदिदंसर्वसुलभंतत्तानिनामज्ञानानीत्याशंक्यानंतायुषापिविभूतीनांगणनंनसुशकमित्याह।विष्णोर्न्विति।य
स्त्रिपृष्ठस्सदनाद्धिशरणात्त्रासादुरुकंपमानंमानिशाम्यस्वरभसात्रिविक्रमक्रमणवेगेनआस्खलितंचलितमासन्नपतनंत्रिपृष्ठंसत्यलोकंचस्कंभ
स्तंभितवांस्तस्यविष्णोर्वीर्यगणनांविभूतिलक्षणमाहात्म्यप्रसंख्यानंप्रतिकवीनांकतमोऽर्हतीतिनकोऽपीत्यन्वयः।आस्तिकविरोधिनसमर्थइत्याह।पार्थिवानी
ति।यःकविःप्रतिभाविशेषसंपन्नोऽपिब्रह्मापार्थिवानिरजांसिभूमिपरमाणून्विममेगणितवान्।सोऽपिनशक्नोतीतिशेषान्वयः।यद्वेतिहेत्वर्थे

विष्णोर्नुवीर्यगणनांकतमोऽर्हतीह यः पार्थिवान्यपिकविर्विममेरजांसि।चस्कंभयःस्वरभसास्खलितंत्रिपृष्ठं
यस्मात्त्रिसाम्यसदनादुरुकंपमानं ४० नांतंविदाम्यहममीमुनयोऽग्रजास्ते मायाबलस्यपुरुषस्यकुतोऽपरेये।गा
यन्गुणान्दशशतानन आदिदेवः शेषोऽधुनापिसमवस्यतिनास्यपारं ४१

अनंतानियस्मात्तस्मादिति ४० अनंतत्वमुपपादयति।नांतमिति।विदामीतिविकरणव्यत्ययेनवक्तुर्मुखात्ब्रह्मणःशेषस्यमहत्त्वमनुरवत्वक
यनात्तानाविकल्पमप्रीत्यत्तशंकांनिवारयति।नसमवस्यतिननिश्चिनोतिमात्मास्तुतादित्वानेऽपिशेषेतिवैजयंतीकोशः।अहलाशीर्वचनवा
नूशेषःकश्चित्तुमानितिसंशयंनिरस्यतिदशशताननइत्यनेन।अयमपिनागेष्वन्यतमःकश्चिदित्यतआह।आदिदेवइति।अपरेत्वर्वाचीनाः
।अनेनश्लोकद्वयेन।विष्णोर्नुकंवीर्याणिप्रवोचं।नतेविष्णोजायमानइत्यृगर्थंउदाहरति ४१

नन्वेवंचेत्कस्यापिज्ञानाभावेनपुरुषार्थप्राप्तिरित्याशंक्यतत्प्रसादेनसर्वंसुलभमित्याह।येषामिति।सोऽनंतोभगवान्स्वयमेवयेषांदययेत
दयांकरोतितेदेवस्यमायांस्वरूपशक्तिंविदंति।संसारहेतुंशैवलींमायामतितरंति।चतत्साधनमंतरेणदययैवतत्सेवयाप्यनेदुर्गंपदवस्था
तामित्यत्राह।सर्वात्मनेति।तत्रैतत्स्वभावमाह।नैषामिति।एषांसेवकानांश्वशृगालभक्षणयोग्येदेहेममाहमितिधीर्नास्ति।देहाद्यभिमानस्तु

येषांसएवभगवान्दययेदनंतः सर्वात्मनाश्रितपदोयदिनिर्व्यलीकं।तेवैविदंत्यतितरंतिचदेवमायांनैषांममाह
मितिधीःश्वशृगालभक्ष्ये ४२ वेदाहमंगपरमस्यहियोगमायांयूयंभवश्चभगवानथदैत्यवर्यः।पत्नीमनोःसच
मनुस्तदपत्यभूताःप्राचीनबर्हिऋभुरंगउतध्रुवश्च ४२

न्यत्वेनभाव्यमितिभावः।तत्रयोग्यतानुसारेणतत्प्रसादोऽपिविविधःइत्यस्मिन्नर्थेविशेषः ४२ ननुतर्हितत्प्रसादयोग्याःकेइतितानाह।वेदा
हमिति।अतस्यतंतुविततेविद्वत्यतदपश्यन्नदभ्रवत्सजानासुइतिश्रुतिद्योतकोहिशब्दः।प्रथमप्रक्तातत्वाच्चतुर्मुखःसर्वस्मादधिकंवेत्ति।तद
न्येयथायोग्यतयावेत्तारइत्यर्थः।स्मारकोवा।भगवानितिविशेषणाद्रूवस्यनारदोद्देशनातिशयोऽस्तीतिसूचयति।अथेत्यनेनेतरेभ्यएषुप्रह्लादस्य
ज्ञाननैर्मल्यंसूचयति।अंगोवेनस्यपिता ४३

भा॰ द्वि॰
६१

ऐलः इलायाः पुत्रः पुरूरवाः। नाहुषो ययातिः ४४ हरेः स्वरूपांशानां उपेंद्रदत्तादीनां नित्यबद्धगुणेषु सहपाठो दुष्टजनमोहनार्थः। ४५ अत्र कैमुत्यन्यायमाह। तइति। ये स्त्रीशूद्रहूणशबराः पापजीवा अपि देवमायां विदंति। संसारमतितरंति च किमुतास्मदादय इत्यन्वयः। तर्हि किमिति सर्वे निस्तीर्णाः संसारान्नाभुवन्निति तत्राह। यदीति। अद्भुतक्रमो विष्णुः स एव परायणं तत्परशीलं तस्य शिक्षा येषां ते

इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयनाहुषाद्याः। मांधात्रलर्कशतधन्वनुरंतिदेवदेवव्रता
बलिरमूर्त्तरयो दिलीपः ४४ सौभर्युतंकशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः। येन्ये
विभीषणहनूमदुपेंद्रदत्ताः पार्थार्ष्टिषेणविदुरश्रुतदेवमुख्याः ४५ ते वै विदंत्यतितरंति च देवमायां स्त्री
शूद्रहूणशबरा अपि पापजीवाः। यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये
४६

राम
६१

तथोक्ताः। अद्भुतं जगत्क्रमनीत्यद्भुतक्रमः। अत्रापि कैमुत्यन्यायमाह। तिर्यगिति। वृंदावनगताः पशुपक्ष्यादयस्तिर्यग्जना अपि देवमायां विदंत्यतितरंति ये श्रुतधारणास्ते विदंतीति किमु वक्तव्यं इत्यन्वयः ४६

अद्भुतक्रमः किंलक्षणक इति तत्राह। शश्वदिति। यत्शाश्वत् सदैकप्रकारं। प्रशांतं प्रकृष्टपूर्णसुखं। अद्वितीयत्वादभयं। द्वितीयाद्वै भयं भवतीति श्रुतेः। यत्प्रतिबोधमात्रं निर्दोषज्ञानस्वरूपं। मात्रशब्दोऽवधारणार्थः। प्रतिशब्दो मुख्यार्थः। अत एव शुद्धं रागादिदोषरहितं। यत्समं परम एवादिपरममहदंतेषु पदार्थेषु नातिरेकगुणविधुरं वैषम्यादिरहितं वा सदसतः परं व्यक्ताव्यक्तजगतो विलक्षणं आत्मतत्त्वं अव्यक्तादिसर्वप्रपं

शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं। शब्दो न यत्र पुरुकारकवा
क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ४७

चाहंभावरहितां पुरूणि बहूनि कारकपदानि कर्तृकर्मादीनि क्रियावाची नियस्मिन् संति स तथा अग्निष्टोमाद्यनेकक्रियार्थः शब्दो वाक्यलक्षणोनंत वेदाख्यो यत्र यस्मिन् साकल्येन वाचकत्वेन न वर्त्तते तदुक्तं। अव्यक्ताद्यनहंमानादात्मतत्त्वं हरिः स्मृतः। अशब्दश्चाप्रसिद्धत्वाज्ज्ञातः पूर्णासु खलतद् तिहरिः स्वयं मायाधीनश्चेत्तदुपासकाः कथं तां तरंतीति तत्राह। मायेति। माया संसारकारणं प्रकृतिर्यस्याभिमुखे लज्जानुविलज्जमाना यस्मात् यदुपासकेभ्यश्च परैत्यपसरति। दृष्टिमार्गे विज्ञाय वर्त्तत इति ४७

पक्षसर्वगुणपूर्णत्वात्ब्रह्मेत्यजस्रसुखंनिरंतरसुखमितिविदुरतीतानागतवर्तमानात्रसादयःश्रवणादिभिःयतमानत्वात्यतयःआ
धनपरिपाकेनयतयःसम्यङ्गिःशाम्यइंद्रःसुधांप्राप्यनिपानखनित्रंकूपखननसाधनंकुद्दालादीवयमनापेक्ष्यतोलोकोनरकाख्यस्तस्य
हेतुंसंसारंजह्युस्त्यजंति।परमस्यपुंसोनारायणस्यपदंस्वरूपंतद्वैतादृग्लक्षणकंहीत्यर्थः।इंद्रईश्वरोधनवान्सुधामृतंतलेप्राप्येतिवा ४८
इदानीमेवंविधभगवत्ज्ञानाधिकारीसम्प्रतिपदइत्याह।सइति।नकेवलंधर्मादिसर्वश्रेयसांविभुःस्वामीअपितुफलदाताच।अथधर्मादिसर्वा
श्रेयसामपीतिवा।भगवाननादिकालमारभ्यहरिश्रद्धादेनपरिहृद्धेनभावस्वभावेनभक्तिस्वभावेनविहितस्यनिर्मितस्यास्यसतःजीवराशेःप्र
सिद्धःकरतलामलकवत्प्रत्यक्षःस्यादितियतोतोत्रसात्त्विकप्रकृतिर्जीवराशिस्तादृशज्ञानाधिकारीएतेनोक्तार्थज्ञानेप्रत्यक्षप्रमाणमुक्तं

तद्वैपदंभगवतःपरमस्यपुंसोब्रह्मेतियद्विदुरजस्रसुखंविशोकं।सम्यङ्निशाम्ययतयोयमलोकहेतुंजह्युःसु
धामिवनिपानखनित्रमिंद्रः ४८ सश्रेयसामपिविभुर्भगवान्यतोस्यभावस्वभावविहितस्यसतःप्रसिद्धिः।दे
हेस्वधातुविगमेनुविशीर्यमाणेव्योमेवतत्रपुरुषोनविशीर्यतेजः ४९

वनिभावोभक्तिःप्रणामश्रवणादिरूपमपिवादरइति।उत्पत्तिमतोस्यानित्यत्वेनकथंतस्यपरमात्मप्रसिद्धेस्तत्रइतितत्राह।देहइति।व्योमकाशंपृथि
व्यादिधातूनांविगमेविनाशलक्षणविश्लेषेसतिदेहेऽनुविशीर्यमाणेस्वकारणेषुविलीयमानेसतितत्रदेहस्थःपुरुषःस्वकर्मानुसारेणपुराणपुरुषस्व
तोजोजननविधुरोपिकेवलंदेहाभिमानेनजायमानोयथादेहस्थितंव्योमनविशीर्यते।अतोदेहस्यैवोत्पत्तिमरणधर्मवत्त्वाच्चेतनस्यनित्यत्वादुवित
स्यप्रसिद्धःपरमइत्यनेनपरमात्मापिव्याख्यातःतत्रजीववदभिमाननिमित्तजन्मादिमानपिनभवतीतिविशेषःअतएवतदृष्टांतेनहरेःशश्वत्
प्रतिबोधादिरूपत्वंनविद्यस्नीयमितिभावः ४९

रेवदेवनमस्कृत्यमित्यारभ्यप्रश्नप्रतिवचनाभ्यामुक्तमर्थमुपसंहरति।सोयमिति।समासेनसंक्षेपेणएतावत्ज्ञानंसर्वथानविस्मर्तव्यमितिभावेनाह।हरेरिति।
वशद्एवार्थःयत्सदसत्कार्यकारणात्मकंजगत्सर्वंस्मात्प्राप्तिलक्षणाद्धरेरन्यद्भिन्नंनअतएतदुक्तंभवति।स्वतोहरेर्भिन्नमपितदधीनसत्तादिमत्वे
नस्वातंत्र्याभावेनअभिन्नमिवोच्यते।नस्वतोभेदाभावान्नस्मात्सहरिःस्वतंत्रोन्यदस्मादाद्रिकंसर्वंतदधीनमितिविजानीहीति।तदधीनसत्तादिमत्वात्
तदित्युच्यते।तत्रकिंमानमित्येतन्नोद्यं।सत्तादिर्यस्त्वत्तोविद्योप्रस्मादन्यःसमस्तवंतश्रुत्यादिनापरिहर्तव्यं ५० भगवद्विभूतिसंग्रहरूपमिदंभागव

सोयंतेभिहितस्तातभगवान्विश्वभावनः।समासेनहरेर्नान्यदन्यस्मात्सदसच्चयत् ५० इदंभागवतंनामय
न्मेभगवतोदितं।संग्रहोयंविभूतीनांत्वमेतद्विपुलीकुरु ५१

तंपुराणंनृलोकेप्रवर्तनायत्वयाव्यासायविज्ञापनीयमित्यभिप्रायवानाह।इदमिति।सर्गादेयद्भगवतामेमह्यमुदितं।तत्इदंभागवतंनामप्रका
शमुपदिष्टोतिशेषः।कस्माद्भागवतमितिप्रकाशमितितत्राह।संग्रहइति।यत्रोद्यातइत्युक्तविभूतीनांसर्गानुयोगहमित्याद्युक्तमायाविभूतीनांच
संग्रहः।कोडीकारइतिहेतुगर्भःसंक्षिप्तोक्तमितिनश्रद्धेयमितितत्राह।तदेतदिति।तदेतन्नृलोकेज्ञानप्रदानायावतीर्णव्यासरूपनारायणाय
विज्ञाप्यविपुलीकुरु।एतदर्थविस्ताररूपंभागवतंपुराणंकुर्विति विज्ञापयेत्यर्थः।नामप्रकाशसंभावनाक्रोधापगमकुत्सनेइति ५१

एतदेव विशदयति। यथेति। यथा सात्विकप्रकृतीनां नृणां सर्वात्मनि सर्वाधिष्ठाने नित्यं एवाखिलाधारे भगवति सर्वज्ञे मत्त्वज्ञानपूर्वकं प्रेमलक्षणा भक्तिर्भविष्यति इत्येवं हेतुपूर्वकं संकल्प्य समर्थ्य समाधिभाषया सम्यक् कृत्वा श्रुकादिशिष्येभ्यो वर्णयेति विज्ञापयेत्यन्वयः ५२ इत्यपवर्गे तोपि हरिभक्ति जनक पुराणश्रवणमेव तत्वावतार प्रयोजनं नान्यदित्यभिप्रेत्याह। नृजन्मनीति। भक्ति विषयोन्यस्तत्फलदोन्य इत्यत उक्तं। अपवर्गेशाइति। कृष्णे शूर्णे बलप्राणात्मनि हरौ यद्यन पायिनी नित्या भक्तिर्नवेद्यायते वेत्तृजन्मापुमानुपमनश्वरे यमादंतकात्राणं मद्धनिष्ट

यथा हरौ भगवति नृणां भक्तिर्भविष्यति। सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ५२ नृजन्मनि न तु ष्येत किं फलं यमनश्वरे। कृष्णे यद्यपवर्गेशे भक्तिः स्यादनपायिनी ५३ किं स्याद्दर्णाश्रमाचारैः किं दानैः किं तपः क्रतैः। सर्वाद्यध्यानमच्छ्रोके न चेद्भक्तिरधोक्षजे ५४

जन्मनि न तुष्येत अलं पुरुषार्थसाधनं बुद्धिं नाप्नुयात्। धर्मादिफलमस्तीत्यत्राह। किं फलमिति। धर्मादेरनित्यस्वर्गादिफलं किं नैव फलं अल्पफलत्वात् इत्यर्थः। तस्मात्कृष्णभक्तेरेव नृजन्मफलत्वात्तत्प्रतिपादकपुराणकरणे विज्ञापनं युक्तमिति भावः ५३ किं फलमित्युक्तं विवृणोति। किं स्यादिति। किं स्यादित्याक्षेपः। तदुक्तं आक्षिप्यते किमितीत्यत्र अल्पफलता भवेदिति। प्रश्नेक्षेपे विकल्पे किमिति यादवः ५४

भगवत पुराणोक्तप्रकारेण भगवति भक्तिं कुर्वतः पुंसः पुत्रकलत्रादिलक्षणा माया संसारहेतुर्न स्यादतएतत्पुराणकरणं विज्ञापनीयमिति भावेनाह। मायामिति। अमुष्येश्वरस्य पुंसः आत्मा मनो मायया बंधकशक्त्या न मुह्यति। अहंकारममकाराभ्यां न भ्रमतीत्यतः सर्वसज्जनपुरुषार्थकारणं भागवतकरणं विज्ञापनमिति भावः। अमुष्य ईश्वरस्येति संध्याकरणेनास्य भागवतस्यैव दृष्टान्तं सूचयति। यद्वा ईश्वरशब्देन शिवो नोच्यते तद्विलक्षणशील

मायां वर्णयतोमुष्य ईश्वरस्यानुमोदतः। शृण्वतः श्रद्धया नित्यं मायया आत्मा न मुह्यति ५५ इति श्रीभागवते महापुराणे द्वितीयस्कंधे सप्तमोध्यायः राजोवाच ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च। यस्मै यस्मै यथा प्राह नारदो देवदर्शनः १

ईर्लक्ष्मीस्तस्या ईश्वरो नारायण इति द्योतयति। अत्र सवर्णदीर्घत्वमनुसंधेयमिति ५५ इति श्रीभागवतटीकायां द्वितीयस्कंधे सप्तमोध्यायः। अष्टमेस्मिन्नध्याये परीक्षितभागवतपुराणप्रतिपाद्यमुक्तं पृच्छति। तत्र प्रथमं नारदेन विरिंचाज्ञापालनं कथमकारीति भावेन पृच्छति। ब्रह्मणेति। अगुणस्य नित्यनिर्गुणस्य सत्वादिगुणस्य सर्वत्र प्रधानस्येति वा गुणाख्यान इति तादर्थ्ये सप्तमी। व्यासादन्यस्मै यस्मै १

नारदव्याससंवादानंतरं व्यासमुखविगलितभागवतोक्तहरिकथाप्रश्नमेवमदभीष्टमितीहमेवतत्त्वंवेदितुमिच्छामीत्युक्तमिति भावेनाहाह
रेरिति २ यथाप्रथितश्रुतगुणोपसंहारपूर्वकं निःसंगं मनः कृष्णे निवेश्याहमिदं कलेवरं त्यक्ष्ये तथा प्रथयस्वेत्यन्वयः ३ श्रवणादिनैदृक्
लेसादित्याह। शृण्वतइति ४ ततः किं तत्राह। प्रविष्टइति ५ तत्फलमाह। धौतात्मेति। पांथः पथिकः स्वशरणं स्वगृहं शरणं गृहरक्षित्रोरि
त्यभिधानं ६ इत्थं भागवतार्थकथनश्रवणादेः पुरुषार्थहेतुत्वमुक्त्वा स्वतः विदूषस्यादेहस्य देहसंबंधहेतुं पृच्छति। यदिति। अधातुमतः स्वतः

एतद्वेदितुमिच्छामि तत्त्वं वेदविदांवर। हरेरद्भुतवीर्यस्य कथा लोके सुमंगलाः २ कथयस्व महाभाग यथाहमखिलात्मनि। कृ
ष्णे विवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरं ३ शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितं। कालेनानतिदीर्घेण भगवान्विशते हृदि ४
प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं। धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ५ धौतात्मा पुरुषः कृष्णपादमूलं न मुं
चति। मुक्तः सर्वपरिक्लेशैः पांथः स्वशरणं यथा ६ यदधातुमतो ब्रह्मन्देहारंभोस्य धातुभिः। यदृच्छया हेतुना वा भवंतो जान
ते यथा ७

प्रकृत्यादिधातुसंबंधरहितस्यानित्यस्य जीवस्यास्य धातुभिः प्रकृत्यादिभिरुपादानकारणैः देहारंभोभूदिति यत्तत् किं यदृच्छया केवलेश्वरेच्छया निमि
त्तं तथा तात्स्येनहेतुना कर्मणा अन्यहरीच्छेव हेतुं गांविना हेत्वंतरमप्यस्तीति प्रश्नतात्पर्यं भवंतस्तद्देनद्यथा यथावज्जानते तदस्माकं वदंत्विति शे
षः। धातुभिर्नित्ययोगो नास्तीत्यधातुमतं इत्युक्तं। धातुर्वाता दिशब्दादिगोरकादित्वगादिषु महाभूते चेंद्रियेषु शब्दयोनिस्वभावयोरित्यभि
धानं ७

पुराणाधिकारिलक्ष्ये जीवानांबंधहेतु पृष्ट्वा कृतार्थमनुवदति। आसीदिति। आदौ महाप्रलये श्रीसहायतया शयानस्य नारायणस्य सिसृक्षोः प
रमपुरुषतया वतीर्यतत्त्वसृष्टिपूर्वकमंडसृष्ट्वा तेस्वत्वेः स्वहाद्रूव विशंधाडो देविशेषपर्यंके शयानस्य तस्योदरात् लोकसंस्थानलक्षणं चतुर्दशभुवन
संनिवेशरूपं पद्ममासीत्। सएवांडांतर्वैराजाख्यावतीर्णइतियावत् अयंपुरुषोंडकोशः पुरुषाकारभगवद्रूपेणाधिष्ठितत्वात्पुरुषइत्युच्यते।
पातालादिभिरियत्तावयवैरियत्तावच्छिन्नावयवैर्यावान्यावत्परिमाणः। असावपि वैराजस्तावांस्तावत्परिमाण इति प्रोक्तस्तथावयववा

आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं। यावानयंवै पुरुषइयत्तावयवैः पृथक्॥ ॥तावानसाविति प्रोक्तः
संस्थावयववानिव ८ अजः सृजति भूतानि भूतात्मा यदनुग्रहात्॥ ॥

निव तद्वंतस्थितत्वात् इव इत्थं वै पितथाता हृशावयववानिवप्रोक्त इत्यन्वयः॥ वाइत्यनेन प्रोक्तार्थस्य प्रमाणप्रसिद्धिमप्याध्यात्मिकः शिरःपाण्या
दिमान स्मदादिदेहः पृथगिपत्तावयवैर्यावत्परिमाणो भाव धिदैवको विराड्देहो। पितावत्परिमाण इत्युपाख्यानस्य पापहेतुत्वं वस्तुत्वं निसृ
ष्टयेवेत पार्थवाक्यारंभप्रसिद्धयोरिति ८ आसीद्यदुदरादित्युक्तं भगवद्रूपदर्शनप्रकारं तत्र च स्थितिप्रदेशं च पृच्छति। अजइति। भूतात्मा स्वसृष्ट
तनत्कार्यव्यापी सर्वविलक्षणाद्भिन्नाजनित्वादजो ब्रह्मा भूतान्यहंकारादिनीवा स्वदभिमन्यमानानि चतन्वानि सृजति। सृष्टिरपि नस्वातंत्र्या
दित्युक्तं यदनुग्रहादिति॥ ॥

पाद्मकल्पेवनाभिपद्मभवो विरिंचः स्वकारणं पद्मनाभं हरिं हृदि येन प्रकारेण तद्रूपं ददृशे तत्सर्वं ममोच्यतामित्यन्वयः ९ विश्वस्य स्थित्युद्भवाप्यया यस्मा त्समतथोक्तः॥ लक्ष्म्या ईशः ज्ञानानंदादि सर्वगुणानामाश्रयः सृष्ट्यादौ गुणाभूतानां ब्रह्मादीनामाश्रयो वा पुरुषः पुरुषाकारवान् पद्मनाभो आत्म मायां स्वेच्छाधीनां बंधकशक्तिमुक्त्वा तत्प्रवर्तकत्वं विस्मृत्यमुक्तप्रवर्तकत्वेन यत्र यस्मिँल्लोके शेते १० अधुना पुनरपि कृतार्थमनुवदति। पुरुषेति पाताला द्यङ्घ्रितस्य वैराजाख्यस्य पुरुषस्य हरेर्भिन्नावयवैः सपाला इंद्रादिलोकपालैः सहिताः पातालादयो लोकाः पूर्वकल्पिताः प्रथमं सृष्टाः पाताला

दृदृशे येन तद्रूपं नाभिपद्मसमुद्भवः ९ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः॥ मुक्त्वात्ममायां मायेशः शेते सर्व
गुणाश्रयः॥ १०॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः॥ लोकैरमुष्यावयवाः सपालैरिति शुश्रुमः ११ यावान्क
ल्पो विकल्पो वा यथा कालोऽनुमीयते॥ भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः १२ कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृ
हत्यपि॥ ॥

दिलोकैः अमुष्य वैराजाख्यस्य हरेर्बाह्यावयवाः कल्पिताः प्रतिमात्मकब्रह्मांडावयवैः लक्ष्मादृत्पत्त्यः॥ सपालैर्लोकैरमुष्यावयवाः प्रतिमाव त्वं कल्पिता इति वा ११ कृतार्थमनूद्याधुना प्रश्नांतरं पुराणार्थं पृच्छति यावानित्यादिना कल्पो ब्रह्मकालः द्विपरार्धाख्यः ब्रह्मणो दिनं वा। यावान् यावत्परिमितः। विकल्पो मन्वादिकालः वाराहादिर्वा॥ भूतो भव्यो भवन्निति शब्दो यस्मिन्स तथोक्तः। अतीतानागतवर्तमानाख्य इत्यर्थः। यथा यथार्थतया अनुमीयते ज्ञायते कथं वा आयुषो मानं प्रमाणं च येन कालेन कृतं स कालः १२ अण्वी परमाणुलक्षणा महती परममहत्परिमि ताकालस्य गतिः सापि कथं लक्ष्यते॥ ॥

कर्मगतयः कर्मफलानि यावतीः कति संख्यानि यादृशीः कीदृशानि १३ यस्मिन्कस्मिन्जीवे किं कर्मसमवायः यथा कथं येन केन स कर्मसमवाय उपगृह्यते। कर्मसमवायकर्त्राकः। सत्वादिगुणानां परिमाणं गुणिनां महदादिजीवानां सामर्थ्यपरिमाणं गुणानां शब्दादीनां गुणिनामाकाशादीनां इति व्याख्या नेनयुक्तं परिमाणानुक्तेः। देवासुरेभ्यो मध्यवानित्यादिनोक्तेश्चान्यत्र १४ भूपातालादीनां च परिमाणं। एतानि भूम्यादीनि कानि तेषां तेषां तथा तेषां स्थानं नमुक्तं परिमाणं। सत एवेत्यादिना वक्ष्यमाणत्वात्। महता मवभुत्पत्तिं च १५ बाह्याभ्यंतरे वर्तमानस्य वक्तो हरेः परमाण्वादिपरममहदंतानां रूपाणां च परिमाणं सत एवेत्यादिना वक्ष्यमाणत्वात्। महतो

यावतीः कर्मगतयो यादृशीर्द्विजसत्तम १३ यस्मिन्कर्मसमवायो यथा येनोपगृह्यते। गुणानां गुणिनां चैव परिमाणं स
विस्तरं १४ भूपातालककुब्व्योमग्रहनक्षत्रभूभृतां। सरित्समुद्रद्वीपानां संभवश्चैतदोकसां १५ प्रमाणमंडकोशस्य बाह्या
भ्यंतरवर्त्मनः। महतां चानुचरितं वर्णाश्रमविनिर्णयं १६ अवतारानुचरितं यदाश्चर्यतमं हरेः॥ युगानि युगमानं च ध
र्मो यश्च युगे युगे १७ नृणां साधारणो धर्मः सविशेषश्च यादृशः। श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां १८

मरीचिकर्दमादीनामनुचरितं वर्णानामाश्रमाणां विशेषतो निर्णयं १६ यदाश्चर्यतमं अन्येषामिति शेषः हरेरवतारानुचरितं तच्च कति युगा नि युगमानं च वर्षैरियत्तया परिच्छेदः अनुयुगं यो यो धर्मस्तं च १७ साधारणो धर्मो जातिमात्रप्रयुक्तः। अहिंसादिलक्षणो यो धर्मो विशेषस हितः। यादृशः कीदृशः श्रेणीनां संघात्मकानां धर्मो युद्धे प्रच्यते। राजर्षीणां क्षियव्रतादीनां कृच्छ्रे आपत्सु जीवतां १८

तत्वानां महदादीनां परिसंख्यानं सामान्यविशेषसंख्या तेषां लक्षणं व्यावर्तकधर्मः हेतोः कारणस्य ब्रह्मणो लक्षणं स्वरूपं। पुरुषस्य विष्णोः आध्यात्मिकस्य परमात्मसंबंधिनो यमादियोगस्य भक्तियोगस्य च विधिः तेन १९ योगेश्वरैश्वर्यगतिः योगेश्वराणाम् अणिमाद्यष्टैश्वर्यप्राप्तिः तेषां स्वरूपं च योगिनां यमादियोगाभ्याससिद्धानां वेदांतादिशास्त्राभ्याससिद्धानां च योगतो लिंगभंगः सूक्ष्मशरीरनाशप्रकारं च अर्चिरादिना दिनोक्तोऽयं पानेन तत्तदेवकथासुधाया इत्यादिप्रकारः ऋग्यजुरादिवेदानां आयुर्वेदाद्युपवेदानां वेदादिविहितवर्णाश्रमधर्माणां च यः संभवः उद्भा

तत्वानां परिसंख्यानं लक्षणं हेतुलक्षणं। पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च १९ योगेश्वरैश्वर्यगतिर्लिं
गभंगस्तु योगिनां। वेदोपवेदधर्माणामितिहासपुराणयोः २० संभवः सर्वभूतानां विक्रमः प्रतिसंक्रमः। इष्टापूर्त
स्य काम्यानां त्रिवर्गस्य च यो विधिः २१ यो वानुशायिनां सर्गः पाखंडस्य च संभवः। आत्मनो बंधमोक्षौ च व्यवस्थानं स्व
रूपतः २२

रादिसंबंधा इतिहासपुराणयोः संभवः उत्पत्तिः २० विक्रमो विविधचरित्रलक्षणः प्रतिसंक्रमः संहारः इष्टस्य यागादेः पूर्तस्य वापीकूपादेः काम्यानां कारीर्यादीनां त्रिवर्गस्य च धर्मार्थकामलक्षणस्य २१ प्रकृतावनुशायनात् अनुशायिनः संसारिणस्तेषां स्वर्गादेः परिभ्रष्टानां स्वभावेन। आत्मनो जीवस्य मोक्षं विशिनष्टि स्वरूपेणावस्थानमिति। यद्वा तारतम्येनावस्थानं २२

आत्मतंत्रो भगवान् आत्ममायया। स्वेच्छया वितत्य कृत्वा च जगत्सृष्ट्यादिना यथा येन प्रकारेण विक्रीडति। द्विविधा आत्ममाया चित्स्वरूपभूता तद्वशा चेति। तत्र तद्वशया जीवं संसारयन् स्वस्वरूपभूतया भक्त्यादिसाधनसंपन्नं साधयन् संसाराद्विमोचयन् स्वस्वेन रमयन् पुनस्तद्वशां बंधकशक्तिं विसृज्य साक्षिरूपः पुरुषवन्निर्लेपो यथोदास्ते प्रकृतिं मुक्त्वा तिष्ठति द्विधा वा आत्ममाया तद्रूपा तद्वशा चेति। तद्वशया संसारयति। स्वरूपया विमोचय

यथात्मतंत्रो भगवान् विक्रीडत्यात्ममायया। विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः २३ सर्वमेतच्च
भगवन्पृच्छतो मेनुपूर्वशः। तत्वतोर्हस्युदाहर्तुं प्रपन्नाय महामुने २४

त्युदास्ते इत्यादिकं तेनैव निर्विशेषमायायोच्यते २३ प्रश्नराशिमुपसंहरति। सर्वमिति। चशब्दादन्यदपि दृष्टं च यदनुपूर्वशः पूर्ववत्क्रममिति प्रतीयते तत्क्रमेण उदाहर्तुमिति हार्हसि पुरस्कृत्य प्रपन्नायेत्यनेन आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा आत्मनिक्षेपः कार्पण्यमिति षड्विधा शरणागतिरित्युक्तमर्थमात्मनः सूचयति। महामुने इत्यनेन शुकस्य स्वप्रतिवचनसामर्थ्यसद्भावं सूचयति २४

सर्वज्ञस्यापि केनचिन्निमित्तेनान्यथा वचनं संभाव्यत इति मंदमत्याशंकां परिहरति। अत्रेति। यथात्मभूः परमात्मन उत्पन्नः परमेष्ठी सर्वजीवो
त्तमो ब्रह्मा सर्वजनानां सर्वशास्त्रार्थेषु प्रमाणं सम्यग्ज्ञत्वेनाप्ततमः। तथाप्यासग्न्यो भवानप्यत्रास्मदर्थे प्रमाणं हि यस्मात्तस्मादुक्तं युक्तमि
ति। एतदेवोपपादयति। अपर इति। अपरेन्ये पूर्वेषां मरीच्यादीनामपि पूर्वजैर्ब्रह्मभवादिभिः कृतं शास्त्रार्थमनुतिष्ठंति हि प्रसिद्धं। यद्यदाचरति
ति। एतदेवोपपादयति। ... परमेष्ठी प्रमाणमतो भवानप्यत्र प्रमाणमिति वाक्यार्थ उक्तो भवतीति २५ अनन्नतस्तवम
श्रेष्ठ इत्यादौ अनेनापरेनुतिष्ठंतीति यस्मात्तस्मात्परमेष्ठी प्रमाणमतो भवानप्यत्र प्रमाणमिति

अत्रप्रमाणंहि भवान्परमेष्ठी यथात्मभूः। अपरे ह्यनुतिष्ठंति पूर्वेषां पूर्वजैः कृतं २५ नमेसवः परायंति ब्रह्मन्नन
शनादमी। पिबतोच्युतपीयूषं तद्वाक्याब्धिविनिःसृतं २६ सूत उवाच सउपामंत्रितो राज्ञा कथाया
मितिसत्पतेः। ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि २७

नअसवः इंद्रियदौर्बल्यादस्मद्विक्षावधारणाशक्तेरण्परो दहनवद्यर्थमापद्यत इति तत्राह। नम इति। नपरायंति नश्यत प्राया भवंति अशनादप्यति
न अशेंद्रिय दौर्बल्याद्स्मद्विक्षावधारणाशक्तेः ... किं तत्पबोव दितिशोनकादिभ्यु
बलहेतुरसायनपानादित्याह पिवत इति। अच्युतकथापीयूषं २६ सूतस्तावन्मुनिसंसदि राज्ञा पृष्टः शुकः किं तत्पबोवदितिशोनकादिभ्यु
नीनां मानसीं शंकां परिहरति। स इति। मुनिसंसदि विष्णुरातेन विष्णुदत्तेन परीक्षिता सतां ब्रह्मादीनां पत्युः हरेः कथायामित्युपामंत्रितः सत्कं
त्यआख्यातुं व्यापारितः। तएव भृशं प्रीतो ब्रह्मरातः शुकः बालोपि सगुणत्वेन मुनिभ्यो ब्रह्मणा यतः। दत्तो ब्रह्मरातेतिनामधेयासिकेरध्
दितिवचनाच्छुकस्य ब्रह्मरातत्वं नान्यस्येति २७

भागवतं नाम पुराणं तत्प्रश्नोत्तरत्वेनाहेत्यन्वयः। आप्तिमूलत्वमाह। ब्रह्मण इति। अतीतब्रह्मप्रलयानंतरं ब्रह्मकल्पे ब्रह्मांतरोत्पत्तिनिमित्ते प्राप्ते सति स्वपुत्राय
ब्रह्मणे भगवता नारायणेन प्रोक्तमाहेति शेषः २८ परीक्षित्प्रश्नप्रतिवचनतया शुकेनोक्तमन्यद्वा किं विदिति शंकां परिहर्तुमाह। यद्यदिति २९ इ
ति श्रीमद्भागवतटीकायां द्वितीयस्कंधेष्टमोध्यायः चतुर्मुखस्य भगवदनुग्रहेण तल्लोकदर्शनं तेन। विनाभूतं तत्स्वरूपदर्शनं प्रकृतिजीवयोस्तदधी
नत्वं इत्यादि माहात्म्यवर्णनेन हरेर्हृदि यद्वीभावहेतुर्सक्तिरेवेत्यतः साहशौकनैयत्यमस्मिन्नध्याये प्रतिपाद्यते तत्रादौ यदवानुमत इत्यस्योत्तरं वक्ति। आ
त्ममायामिति। परस्याधानुशहवाद्यार्थभ्यः प्रकृत्यादिभ्यो व्यतिरिक्तस्यानुभवात्मनः ज्ञानात्मनो अतएव स्वतोऽशरीरस्य जीवस्यात्ममायां हरेरिच्छात

प्राह भागवतं नाम पुराणं ब्रह्मसंमितं। ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्पउपागते २७ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति।
आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे २८ इति श्रीभागवते महापुराणे द्वितीयस्कंधे विवृत्तानुप्रश्नो नामाष्टमोध्यायः ॥ ॥
॥श्रीशुक उवाच॥ ॥आत्ममायामृते राजन्परस्यानुभवात्मनः। न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा १

यातत्स्थीनां सत्वादिगुणरूपां प्रकृतिं च ऋते विनार्थसंबंधो देहादिसंबंधो न घटेत। यथा स्वप्ने करितुरगादिपदार्थानां द्रष्टुः जीवस्य भगवदिच्छानियते
र्वासनोद्बोधकैरजस्तमोभावैर्नीतेस्वाप्नपदार्थसंबंधः करितुरगादिदर्शनं न युज्यते तस्माद्देहस्य जीवस्य देहसंबंधे भगवदिच्छा प्रथमहेतुः द्वितीयास्व
गुणोः सहशक्तिरित्युत्तरं। अंजसेत्यनेन अशरीरस्य जीवस्य शरीरोत्पत्तिकारणं ईश्वरेच्छा प्राथमिकी तां विना नहि किंचिनेनमादि प्रमाणं स्त्वयति। यद्वा
जमदेमवत्तत्स्वप्नस्यार्थक्रियाकारित्वेनसत्यत्वादसत्यस्य तद्यागाज्ञात्राघटितघटनपटीयस्या निर्वाच्यलक्षणमायो व्यतेकिं नीश्वरेच्छेव स्वस्वकथ
हि कृतेरावश्यत्वे चतद्विद इति स्वत्राद्वितीयं नस्यात्त्वरितेतत्त्वइनियादवः १

नन्वशरीरस्य जीवस्य भगवद्दिष्टानि यत्नैः प्रकृतेर्गुणैर्देहारंभः कथमत्राह। बहुरूप इति। ईशेच्छयानादित एवास्याः प्रकृतेर्गुणेषु सृष्टेष्विति वा तद्गुणका
र्येषु देहेन्द्रियेषु रममाणः सत्वादिगुणात्मकलिंगशरीरबद्धतया वर्त्तमानः सृष्टिकाले महदहंकारादिपंचभूतोपादानकत्वेन मानुषदेवासुरशरीरा
दिबहुरूपत्वेन बहुरूपया विकृतया प्रकृत्या सह स्वयमविकृतोपि तदभिमानादिकृतत्वेनात्मानं च मन्यमानो बहुरूप इव मानुषादिरूप इवाभाति
। अहं मनुष्योहं देव इत्यात्मानं मन्यते। देहदैहिकेषु त्रिगुणसंघातजेष्वहं ममेति मन्यते चेत्यर्थः। तदुक्तं। तेषां संघातजो भावो ममाहमिति या
मतिरिति। तस्मात् प्रकृत्यैव पुमान् मानुषादिविकारया मानुषादिरिवाभाति नित्यं चैतन्यरूपवानिति वा। तस्मादीशेच्छयानियतां त्रिगुणात्मकानि

बहुरूप इवाभाति मायया बहुरूपया। रममाणो गुणेष्वस्या ममाहमिति मन्यते २ यर्हि वाव महित्वे
स्वे परस्मिन् कालमाययोः। रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयम् ३

गशरीरेहंमानात्तन्मूलतया धातुभिर्देहारंभो युक्त इति भावः २ एवं बंधप्रकारमुक्त्वा ततोधुना जीवस्य मुक्तिप्रकारमाह। यर्हीति वशब्द एवार्थे।
यर्हि यदायं जीवो वैराग्यादिसाधनसामग्र्या समुत्पन्नभगवज्ज्ञानेनापरोक्षितनिजस्वरूपः कालमाययोः कालप्रकृत्योः परस्मिन् विलक्षणे त
त्संसर्गरहिते स्वे महित्वे सच्चिदानंदलक्षणस्वरूपे रमेत वा अत्यवधानेन रमस्येत एव स्वस्वरूपेण गतसंमोहो निरस्ताविद्यातत्कार्य उभयं वाई
काद्यामाहंकामायां देहारंभहेतुभूतां तन्मूले संसारं त्यक्त्वेति यावत् उदासे उत्कृष्टो वर्त्तते। नीचत्वापादकात् संसारान्मुक्तो भवतीत्यर्थः। तदुक्तं। यदा
स्वरूपं जानाति कालप्रकृतिवर्जितं वासुदेवप्रसादेन तदा मुक्तो भवत्यसाविति। अनेन सायुज्यं त्यक्त्वा नैर्गुण्यमाप्नोतीत्यपि मा स्वातंत्र्यमपास्ततें

अत्रापि किं प्रमाणमित्याशंक्य तद्भगवदुक्तं भागवतमेवेत्याह शमोहे प्रमाणमित्याह। आत्मेति। आत्मनः परमात्मनो जीवस्य वा यत्तत्वमनारोपितं सच्चिदा
नंदलक्षणरूपं तस्य विशुद्ध्यर्थं निर्दोषत्वेन निश्चयार्थमनुभवार्थं वा व्यासो भगवान् यद्भागवतपुराणमाह तद्धर्तयोक्तमुक्तिसाधनज्ञानसाधनं शास्त्रं
तव्यामोहकं अतो भगवदुक्तत्वेनोक्तमुक्तौ प्रमाणत्वात् तत्वज्ञानानुत्तरत्वेन वदिष्यामीति शेष इत्यर्थः। प्रथमं तावत्साधकत्वादि वस्तुदर्शयेनतद्रू
पमिति प्रश्नप्रतिवक्ति ब्रह्मण इति। अव्यलीकेन प्रियत्वेन प्रसन्नताहेतुना व्रतेन भक्तिलक्षणेनाहतो र्चितः सहरिः स्वनाभिपद्मादुत्पन्नाय ब्रह्मणे च

आत्मतत्वविशुद्ध्यर्थं यदाह भगवानृतं। ब्रह्मणे दर्शयद्रूपमव्यलीकव्रतादृतः ४ स आदिदेवो भजतां परो गुरुः स्वधि
ष्ण्यमास्थाय सिसृक्षयैक्षत। तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माणविधिर्यया भवेत् ५ स चिंतयन् द्व्यक्षरमेकदां
भस्युपाशृणोद्द्विर्गदितं वचो विभुः। स्पर्शेषु यत्षोडशमेकविंशं निःकिंचनानां नृप यद्धनं विदुः ६

तुर्भ्यस्वीयरूपमदर्शयन्निजमिति शेष इत्यन्वयः ४ एतदेव विवृणोति। स इति। भजतां सनकादीनां स्वधिष्ण्यं नाभिपद्मकर्णिकाख्यानं ऐक्षत चिंतय
न् यया दृशा अत्र प्रपंचनिर्माणे ५ ततः किमत्राह। स चिंतयन्निति। कथं नु सृष्टिविषयया दृष्टिः स्यादिति स चिंतयन् विभुर्ब्रह्मा द्वे अक्षरे यस्मिंस्तद्व्यक्षरं वचः
वः। अक्षरयोः स्वरूपं लक्षयति। स्पर्शेष्विति। ककारादिमकारांतेषु स्पर्शेषु यत् षोडशमक्षरं तकारः एकविंशं पकारः तद्रूपं वच इति यावत्। तद्वाक्यस्य फल
क्षयति निष्किंचनानामिति। निष्किंचनानां परमहंसानां यद्धनं विदुस्तद्वाक्यं च वनं तपो लक्षणमित्यर्थः। कादयो मावसानाः स्पर्शाः ६

किमनेन निरणायीति तत्राह निशम्येति। ब्रह्मा तद्वचो निशम्य श्रुत्वा येनैतद्वच उक्तं तद्वक्तृदिदृक्षया दश दिशो विलोक्य तत्र तमुद्दिश्यान्यदपश्यमानः
पद्मनालनाडीभिराविश्य पाद्मेऽग्रहद्गृहास्वधिष्ण्यं पद्ममेवास्थायाध्यास्य तद्वचः तद्भूतं वचः आत्मनो हितं हितसाधनं विमृश्य पाहं मज्जनकेन प्रपंचनिर्मा-
णोपायेन तपोऽनुष्ठेयं तेनैतत्स्वात्मनुज्ञायातमः कर्तुमंतः तपति तावत्तपस्युपादिष्ट आज्ञप्तोऽस्मीति चालोच्य तपसि स्थितवान्तपस्येव मन आदधे इत्यन्वयः
७ विमर्शफलमाह। दिव्यमिति। अखिललोकतापनं अखिललोकप्रकाशनं तपो ज्ञानरूपं ब्रह्मात प्यतालोचयामास दिव्यादिति यावत्तपो
रूपं परं ब्रह्म ब्रह्माविनयदं जसेति जितमनस्कत्वादि सर्वसाधारणमित्यतो विशिनष्टि तपीयानिति। तपतां तपीयान् तत्र अमुत्तमोत्तमः। द्वि

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः। स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इ-
वादधे मनः ७ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः। अतप्यत स्माखिललोकतापनं
तपस्तपीयान्तपतां समाहितः ८

र्वचनविभज्योपयदेत स्वीयसुनाविन्दुतमार्थत्वि इयसुन किं प्रमाणमित्यत उक्तं स्मेति स्मृतौ वृत्ते निषेधे स्मेत्यभिधानादनेन महान्महीयसा
मादिश्रूयादनुत्तमोत्तममित्येतत्तस्त्वयति। विजितोभयेंद्रियत्वाद्यपितपड्डुत्तरेभ्यस्त्वा धिक्यस्ववनायोक्तमिति। ज्ञातक्वं यत्राधिकं वदेत्विं
विज्ञेयोऽर्थस्तत्राधिक इति वचनात्। अन्यथा तपो। तप्यतेऽनेनावेद्वात्। अतउभयेंद्रियजयापि तत्र स्मरणीयो त्वत्निको गुणः। परं विद्या नि
ष्करणात्स्वयंभूरिति श्रुतेः। हरिमंतरेणामोघदर्शनत्वं वाक्येकाधिकं प्रजापतेनत्वदेता न्यन्यो विश्वान्नाता निपरिताद्रभूवेति श्रुतेः ८

इदानीं सर्वाप्रियत्रयं तु बद्ध इति प्रश्नं परिहरति। तस्मा इति। प्रीतिजनकतपसा सभाजितः पूजितः यद्यतो लोकात्परमधिकं पदं स्थानं न। तस्मात्स्वदृष्टव-
द्भिः सम्यगपरोक्षज्ञानवद्भिः विबुधैरभिष्टुतमभितो मुख्यत्वेन स्तुतं अविद्यास्मितरागद्वेषाभिनिवेशाः संक्लेशाः मोहो विमोहः आकुलत्वं साध्वसं
व्यपेताः संक्लेशादयो यस्मात्तस्तथा तं ९ संक्लेशाद्यभावे कारणमाह। नेति। तयो रजस्तमसोर्विमिश्रं सत्त्वं सत्त्वरजसोर्मिश्रं तमः सत्त्वतमसोर्मि-

तस्मै स्वलोकं भगवान्सभाजितः संदर्शयामास परं न यत्परं। अपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधै-
रभिष्टुतं ९ नवर्त्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता
यत्र सुरासुरार्चिताः १०

श्रं च रजः केवलं वित्वक्कतिमध्य एव कालविक्रमः कालकृतोत्पत्तिनाशहद्धिक्षयादिलक्षणाः सत्त्वाद्यभावे कारणमाह। नेति। माया त्रिगुणात्मिका
जडप्रकृतिः अपरे मायाविकाराः तस्य लोकस्य मायातीतत्वात्। नह्ययं शून्यागारतुल्य इति तत्राह। हरेरिति। असनादसुर्ईरिः तस्मिन्रमंत इत्यसुराः
असुरत्वगुणोपेतैः सुरैरर्चिताः। महद्देवानामसुरत्वमेकमिति श्रुतेः। तं लोकमित्यन्वयः १०

श्यामवर्णाश्च अवदाता निर्मलाश्च। अवदातः सितगौरयोः शुद्ध इति यादवः। अत्र सेंद्रनीलवन्निर्मलाः। दशदोषविनिर्मुक्तः श्याम इन्द्रमणिः स्मृत इति वा। शतपत्रे
पत्रे सुष्ठु रुक् प्रभा एषां ते सुरुचः। सुष्ठु पेशः सौंदर्यं येषां ते सुपेशसः। मृदु पिंडश्च पेशस्स्यादिति वचनात् सुकुमारतरशरीरा इति वा। उन्मिषंतश्च सु
ष्यंतः मणिप्रवेकाः रत्नश्रेष्ठाः येषु ते तथा ते च निष्का हेमनिर्मिताश्चोलंकारा येषां ते तथा निष्कोस्त्री हेम्नि दीनारे साष्टे कर्षशते पले। वक्षोविभूष
णे कर्ष इति सुवर्चसः सुतेजसः। अनेन सारूप्यादि लाभो मुक्तानपि संतीति सूक्तं भवति ११ पुनरपि तं लोकं विशिनष्टि। प्रवालेति। यो लोको महा

श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः। सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्का
भरणाः सुवर्चसः १२ प्रवालवैडूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः॥ भ्राजिष्णुभिर्यः परितो
विराजते लसद्विमानावलिभिर्महात्मनां॥ विद्योतमानप्रमदोत्तमाभिः सविद्युदभ्रावलिभिर्यथा नभः १३

त्मनां भ्राजिष्णुभिर्लसद्विमानावलिभिः सर्वतो विराजत इत्यन्वयः। प्रवालवत् वैडूर्यवन्मृणालवत् वर्चः प्रभा येषां ते तथा तेषां। परिस्फुरंतः॥ कुं
डलमौलयः परिस्फुरत्कुंडलमौलयः कुंडलानि मौलयश्च कुंडलमौलयः तेषां मालाः पंक्तयः येषां संतीति परिस्फुरत्कुंडलमौलिमालिन
ः तेषां परिस्फुरंति कुंडलानि मौलयः किरीटानि मालाः स्रजश्च येषां संतीति ते तथा तेषामिति वा १२ तत्र दृष्टांतमाह। सविद्युदिति १३

प्रेंखं स्थिता याः रत्नदोलामास्थिताया विभूतयः ताभिर्विभूतिभिः स्वमूर्तिभिः सह कुसुमाकरो वसंतस्तमनुस्यानुगाः भृंगकोकिलादयस्तैः कारमिता ब्रह्मा
दयस्तैर्विगीयमाना प्रियस्य तर्तुः कर्माणि गायती १४ प्रयोजकपुरुषदर्शनं विना लोकमात्रदर्शनेन किमस्य प्रयोजनमत्राह। ददर्शेति। तत्रैवंविधे
श्वेतद्वीपाभिधे लोके मुक्तसभामध्ये मुक्तैः सेव्यमानमात्मनो बंधकशक्तिप्रवर्तनं विरमुक्तप्रवर्तकत्वेन शयानं लक्ष्मीकांतं ददर्शेत्यन्वयः। अनेन मुक्ता
त्मा मायामित्यस्य परिहारोप्युक्तो भवति मुक्तैः स्वपार्षदैः पूर्वं ब्रह्माद्यैश्चैवं संयुतं॥ ब्रह्मा ददर्श तत्र पक्षा भगवंतं हरिं प्रभुमित्यनेन ब्रह्मा सगुणं ब्रह्म ददर्शेत्येत

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः॥ प्रेंखं श्रिता याः कुसुमाकरानुगैर्विगीयमाना प्रियकर्म
गायती १४ ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं॥ सुनंदनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः
परिसेवितं विभुं १५ भृत्यप्रसादाभिमुखं दृगासवैः प्रसन्नहासारुणलोचनाननं॥ ॥

त्रिरस्तं॥ सतः शोभनस्य भावः सत्वं तेन युक्ताः सात्वताः तेषां सात्वतां सात्वतानां पतिं। तदुक्तं। सत्वं तु शोभनत्वं स्यात् तद्युक्ताः सात्वता मता इति॥ विभुं
सर्वगतमिति अनेन परिच्छिन्नरूपमत्रोच्यत इति निरस्तं। विभुः सर्वगते पत्यौ चंद्रे विभु कुबेरयोरिति १५ दृगासवैः नेत्राभ्यां ध्यानिदर्शनानि तान्ये
वामृतानि तैः दृक् स्त्रीस्याद्दर्शने बुद्धौ नेत्रे दृष्टिरपि त्रिषु इति। प्रसन्नेन हासेनारुणाभ्यां लोचनाभ्यां सहितमाननं यस्य स तथा तं॥ ॥ ॥

भा॰ द्वि॰
७१

किरीटिनं कुंडलिनमित्यस्य इन्प्रत्ययस्य मतुवादित्वादयमिन् नित्ययोगार्थः॥ भूमनिंदाप्रशंसासु नित्ययोगेतिशायने संसर्गेस्तिविवक्षायां भवं
तिमतुबादय इति वचनात्। वक्षसि लक्षितपालक्षितमित्येतल्लक्षणं हरेरेवेत्यभिप्रायेणोक्तं १६ नारायणत्वनिर्णयाय लक्षणांतरमाह। वृतमिति
॥ चतुः षोडशपंचशक्तिभिर्वृतं इच्छाज्ञानक्रियाबलाख्याभिः प्रकृतिसत्येशानानुग्रहाख्याभिः आत्मांतरात्मापरमज्ञानात्माख्याभिरिति चतुः
शक्तिभिर्वृतं तमोविकास्सूक्ष्माश्च सूक्ष्मामृताज्ञानामृताप्यायनी व्यापिनी व्योमरूपिणी अनंताणिमा महिमा लघिमा प्राप्तिः प्राकाम्येशित्वव
काम्याख्याभिः षोडशशक्तिभिश्च वृतं वासुदेवादिदामोदरांताभिः षोडशशक्तिभिश्च तथा पंचयोगाभिधाभिर्विमलोत्कर्षिणीज्ञानाक्रिया

किरीटिनं कुंडलिनं चतुर्भुजं पीतांशुकं वक्षसि लक्षितं श्रिया १६ अध्यर्हणीयासनमास्थितं विभुं वृतं चतुःषो
डशपंचशक्तिभिः॥ युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्रममाणमीश्वरं १७

राम
७१

योगव्यापिन्याख्याभिः पंचशक्तिभिश्च परिवृतं। तमोविकाचैव सूक्ष्मा तथा सूक्ष्मामृता पराज्ञानामृताप्यायिनी व्यापिनी व्योमरूपिणी अनंता
वेवं संस्पर्शात्मामोविकाद्या स्वशक्तय इति वायुप्रोक्ते इच्छाद्यामोविकाद्याश्च अणिमाद्याश्च शक्तय इत्यादेः १६ युक्तमित्यनेन स्वरूपभूतानभगं
वेवं तमोविका आग्नेयादि ... इति वायुप्रोक्ते इच्छाद्यामोविकाद्याश्च अणिमाद्याश्च शक्तय इति वा॥ इतरत्र पुरुषांतरेष्वध्रुवैरनित्यैः स्वैः स्वरूपैर्भगैरैश्वर्यादिभिश्च यु
तीति नाशंकनीयं। योगशास्त्रस्य सहननेन वृत्तेः। तत्स्वरूपाश्च शक्तय इति वा॥ इतरत्र पुरुषांतरेष्वध्रुवैरनित्यैः स्वैः
क्तं। स्व एव धामन्स्वस्वरूपानंद एव रममाणं नान्यत्रेत्येवशब्दार्थः। ईदृशं विष्णुमीश्वरं ददर्शेति पूर्वेणान्वयः १७

तस्य हरेर्दर्शनादुद्भूतेनाह्लादेन परिप्लुतमार्द्रीभूतमंतरंतरं यस्य स तथा हृष्यंती रोमांचकुर्वती तनुर्यस्य स तथा प्रेमभरेण जातेनाश्रुणा पूर्णे लोच
ने यस्य स तथा॥ यस्य पादांबुजं पारमहंस्येन परमहंससंबंधिना पथा ज्ञानमार्गेण हिंसादिधर्मेतरेणान्येनाधिगम्यते ज्ञायते १८ प्रीयमाणं हृष्यंतं कविं
ब्रह्माणं आदिकवय इत्युक्तेः कविर्यः पुत्रः स ईमाविके ते निरूढे तत्रैव ईषद्भावे इत्यनेन न शब्दो न्यूनत्वमर्थनो गुरुत्वं द्योत्यते। प्रकृतामितभावि

तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभराश्रुलोचनः॥ ननाम पादांबुजमस्य विश्वसृग्यत्पारमहंस्येन पथाधिगम्यते १८
तं प्रीयमाणं समुपस्थितं कविं प्रजाविसर्गे निजशासनार्हणं॥ बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृश
न् १९ श्रीभगवानुवाच त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया॥ चिरं भृतेन तपसा दुस्तोषः कूटयोगिनां २०

णा इति वचनात्करे स्पृशन्नित्यनेन प्रीतमनस्कत्वं प्रकाशयति। मनसि प्रसन्ने तदितरेंद्रियाणां प्रसन्नत्वं किं वक्तव्यमित्यर्थः १९ आंतरां अंतःक
रणप्रीतिं वाचोद्गलयति। त्वयेति। किं धनादिनेत्यत उक्तं तपसेति। किमर्थं नेत्यत उक्तं सिसृक्षयेति। अनुपचितं गोपांगेनेत्यत उक्तं चिरमि
ति। अहं न तपोमात्रेण तुष्यामि किं तु त्वादृशानामधिकारिणामेवेति भावेनाह। दुस्तोष इति २०

स्वतुष्टिफलमाह। वरमिति। पुंसां सर्वश्रेयःपरिश्रामः तपआदिसर्वकल्याणानां परिश्रामः परिपाको मद्दर्शनावधिः मद्विषयावलोक एवावधिः पर्यवसानं यस्य स तथा। मद्दर्शनमेव सर्वश्रेयसां फलमिति यतोनो मद्दर्शनाख्यसर्वश्रेयःफलं वांस्त्वं इह मामपात्नी कल्पको छितं वरं वरयेत्यन्वयः तस्य सर्वश्रेयःपर्याप्तत्वात् ... मनीषितेति। यद्यद्रूरंतपइति वचः उपेतुस्वंतइमस्थिति॥ वरेशमित्यानेनया वितरातुंसमर्थइतिद्योतयति २१ तपसः कर्तृत्वमंत्रद्वावयति। मनीषितेति। यदुपश्रुत्यरहसिमद्रूपणलोचनरूपं परमंतपश्चकर्थ कृतवानसि तन्मम लोकावलोकनं ममालोकनं वायं ममनीषितस्याभिप्रेतस्य तपसोनुभावोमहिमा

वरंवरयभद्रंतेवरेशंमाभिवांछितं। ब्रह्मञ्छ्रेयःपरिश्रामः पुंसांमद्दर्शनावधिः २१ मनीषितानुभावोयंममलोकावलोकनं। यदुपश्रुत्यरहसिचकर्थपरमंतपः २२ प्रत्यादिष्टंमयातत्रत्वयिकर्मविमोहिते। तपोमेहृदयंसाक्षादात्माहंतपसोनघ २३

हिमेत्यन्वयः २२ तपसःस्वमनीषितत्वंकथयति। प्रत्यादिष्टमिति। तत्रतदा त्वयि कर्मविमोहिते इदं कर्तव्यमित्यजानति सति मया तपः कुर्विहिमेत्यन्वयः २२ तपसःस्वमनीषितत्वं कथयति। तपइत्यन्वयः। त्वत्प्रसादजनकं तपएवेति कुतः अन्यत्किं नस्यादिति। तत्राह। तपइति हृदयं प्रियं प्रियंतिप्रत्यादिष्टंत्वामुद्दिश्योक्तं तस्मात्मनीषितं तप इत्यन्वयः। हृदयमुद्दिश्योक्तं तमित्यभिधीयतइति तदुपपादयति॥ साक्षादिति। अहं साक्षात्सर्वस्य आत्मा ज्ञानात्मेति यस्मात् २३

तस्मादिदं तपसैवसृजामिपदार्थविषयाशेषविशेषज्ञानाभावेतदनुपपत्तेः। उपसंहरति। वीर्यमिति। वीर्यं माहात्म्यं जडोपचितज्ञानत्वात्सुतरमितरेषां दंतुनताहशमतो दुश्चरमित्यर्थः। कायक्लेशसाध्येन तपसाहस्मादिकं चेद्धरेरपि क्लेशित्वमापद्यतइत्याशंक्या। तपः श्रियं सदा विलोक्य पसेवाप्यतेहरिरित्यादिनापरिहृतेति ज्ञातव्यं साक्षादात्मा वीर्यमिति कथनाच्चनहि पूर्णानंदस्य हरेः क्लेशात्मकत्वंयुज्यते। तस्मात्तपःशब्देन ज्ञानमेवोच्यतइत्यर्थः २३ वरमादास्यतोब्रह्मणो हरिं प्रति विज्ञापनप्रकारमाह भगवन्निति। भवता वरं वरयेति मां प्रतियदादिष्टं तद्विडंबनमेवेत्याह। हि। सर्वभूतानां हृदयगुहामध्यक्षोवस्थितो भवानप्रतिरुद्धेनाप्रतिहतेन ज्ञानेन सर्वेषां चिकीर्षितं वेद हि यस्मात्स्मादस्माच्चिकीर्षितमपि वेवेद २४ तथापि वरं वरयेतित्वदाज्ञा

सृजामितपसैवेदंग्रसामितपसापुनः। बिभर्मितपसाविश्वंवीर्यमेदुश्चरंतपः २३ ब्रह्मोवाच भगवन्सर्वभूतानामध्यक्षोवस्थितोगुहां। वेदह्यप्रतिरुद्धेनप्रज्ञानेनचिकीर्षितं २४ तथापिनाथमानायनाथनाथयनाथितं। परावरेयथारूपेजानीयांतेत्वरूपिणः २५

कर्तव्यतथावरंयाचेइतिविज्ञापयति। तथापीति नाथमानायया चमानाय नाथितं याचितं वरं नाथय समर्थय॥ नाथृणाथृ याच्ञोपतापैश्वर्याशीष्विति धातुः। कोसौ विज्ञी कृतो वर इति तत्राह। परावरेइति। अरूपिणः प्राकृतरूपरहितस्य तव चिदानंदाद्यात्मकेवरे जात्वपरं रूपं सनं वावरं सावरमवरमपरं रूपमिति द्वेपरावरे रूपे यथा येन प्रकारेण जानीयां तथा तद्विवायामनीषां मयि धेहि आधेहीत्यन्वयः। तुशब्देनोभेवरूपे सत्ये इत्यवधारयति। द्वेवाव ब्रह्मणो रूपेइति श्रुतिसिद्धत्वात्। अनेन कार्यकारणरूपे आवर्तयति २५

किंवा यथोर्णनाभिः लूताकीटः ऊर्णा ऊर्णुते सृजति विस्तृणाति वा। ऊर्णामंडलमध्ये क्रीडति। अथवात्मन्येव लुंपति। तथात्ममायायोगेन स्वस्वरूपे
छायायोगेन स्वविषयोगिन्याश्रियावजगत्सृजन्नात्मनात्मभावेनात्मानमवतारैर्गृह्णन्बिभ्रत्पालयन्विलुंपन् २६ क्रीडसि च यथा तथा तत्
द्विषयां मनीषां धेहीति नानाशक्त्युपबृंहितो मोघसंकल्प इत्याभ्यामूर्णनाभिसहरैर्वैशिष्ट्यं दर्शयति २७ तां दृशमनीषाप्रयोजनमाह। भगवच्छि

यथात्ममायायोगेन नानाशक्त्युपबृंहितः॥ विलुंपन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना २६ क्रीडस्यमोघ
संकल्प ऊर्णनाभिर्यथोर्णुते। तथा तद्विषयां धेहि मनीषां मयि माधव २७ भगवच्छिक्षितमहं करवाणि ह्यतंद्रि
तः। नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् २८

च्छितमिति। यदनुग्रहाद्यस्या मनीषाया आनुकूल्येन ग्रहणाद्दतंद्रितोहं भगवता शिक्षितं करवाणि एवं यद्यदनुग्रहाच्च प्रजासर्गमीहमानः कुर्वाणो
न बध्येयं तां दृशीं मनीषां यस्य भगवतोनुग्रहाद्बन्न बध्येयं तेन भगवता शिक्षितमेव करवाणीति वरांतरप्रार्थनं वा २८

इदानीं बहुमूलाहंकारनाशं प्रार्थयते अत आह। यावदिति। ईश यथा सखा राजादिः स्वानुकारिणः सख्युः जनपदाद्यधिकारं ददाति तथा ते त्वया प्रजादि
सर्गे कृतोधिकृतो विक्लवस्त्रस्तसाध्वसहीनस्तव परिकर्मणि जगत्सृष्ट्यादिशुश्रूषाकर्मणि स्थितोहं यावद्बुद्ध्यादिप्रजानीत्वहं ज्ञात वेदं पदत्तवा
यं भोग इत्यादिरूपं भोजनं विभजामि विभज्य विभज्य ददामि। तावत्प्रलयावधितायुः पर्यंतमज माननिनः आत्मदृविलक्षणाज्ञाज्ञातोहमित्यभिमानवतो मे समुन्नद्ध
मदः समुत्सन्नो हंकारो जगतः स्रष्टाहमित्यादिलक्षणो मा भूदित्यन्वयः। भो स्वामिन्यथा सखा सख्युर्व्यापारे धिकृतः सखा तात्पर्यात्तत्कार्यं करोति। तथाहमपि
त्वत्प्रजासर्गे अधिकृतो यावत्तज्जन्यत इति जनो जन्यपदार्थं संविभजामि। सुरनरतिर्यगादिरूपेण त्वात्मया भितावत्समुन्नद्धमदो माभूदिति वा २९ यत्किंचि
त्तदृष्टं यः कश्चित्परिहार इत्यतः परावरं इति प्रार्थितवरदानप्रकारं वक्ति। ज्ञानमिति। नियतमुक्तिप्रापकेणास्वविंबविषयेण विज्ञानेन समन्वितं मे स्वरूपवि

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनं। अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोज मानि
नः २९ श्रीभगवानुवाच ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं। सरहस्यं तदंगं च गृहाण गदितं मया ३० यावानहं यथा
भावो यद्रूपगुणकर्मकः॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ३१

षयं सरहस्यमुपनिषत्संवादसहितं यज्ज्ञानं तस्य ज्ञानस्य यदंगं च तन्मया गदितं गृहाण इत्यन्वयः। उपनिषदो वाह्यार्थरूपं वेदिद्दमनुपादेयं स्यादित्यत
उक्तं। परमेति। ज्ञानं शास्त्रार्थविषयं विज्ञानं स्वानुभवस्तत्पद्यानां ख्यातं ज्ञानं गदितमित्यनेन सूचितया। येन येन यथा ज्ञात्वा नियतमुक्तिराप्यते तद्विज्ञानमिति
चोक्तं ज्ञानं साधारणं स्मृतमिति स्मृत्या निरस्तं ३० यथात्ममायायोगेनेति याचितवरप्रदानप्रकारमाह यावानिति देशकालव्याप्त्या यावान् यावाननंत
परिमाणोपेतोहं यथा भावः यादृशसत्तावान् निरुपाधिकसत्तोपेतः यद्रूपगुणकर्मकः यादृशावतारो यादृशगुणो यादृशकर्म्मा वाहमस्तदनुग्रहात्तेन
व तथैव तत्त्वविज्ञानमस्त्वित्यन्वयः। एवं शाहेन सोपाधिकरूपं समावर्णयति ३१

ज्ञानोपदेशप्रकारमाह।। अहमिति। अयेसृष्टेः प्रागहमेवासंवशब्दात्सदसदासीत्कालप्रकृत्यादिकमस्तुतत्तथाप्रलयेयत्कालकर्मादिकमन्यत्तहरे
र्भिन्नमस्तुत्परंस्वतंत्रंनासा। किंवमायावृतत्वेनमदधीनमेवाभूत्पश्चात्सृष्ट्यनंतरं स्थितिकालेत्वमहमेतज्जगद्यासीरासमासीत्। फलितमाह। यइति
। सृष्टेः प्राक्स्थितिकालेवभोक्ताहंकर्ताहंइतिस्वातंत्र्यप्रतीतेः सृष्टेः प्राक्प्रलयानंतरंवास्यजगतः स्वातंत्र्यस्यादितिचेत्तत्तत्प्रतीतेर्बुद्धिमोहमूलत्वात्त

**अहमेवासमग्रेवनान्यद्यत्सदसत्परं।। पश्चाहंत्वमेतद्ययोवशि
ष्यतसोस्म्यहं ३२ राम राम**

दुक्तंविष्णोरधीनंप्राक्सृष्टेस्तथैवप्रलयादरुत्। अस्यसत्वप्रकृत्यादिविशेषणाधिगम्यते। स्वातंत्र्यांस्थितिकालेतुकथंचित्बुद्धिमोहतः। प्रतीयमानम
पितुतस्यात्रैवेतिगम्यतामित्यादिग्रनेनकालत्रयेपिस्वतंत्रोहंत्वदादिकंसर्वंमदधीनमेवेत्युक्तंभवति ३२

अस्वतंत्रस्यप्रकृत्यादेःस्वरूपमुपदिशतीत्याह। ऋतेर्थमिति। यद्दक्तआप्तकामस्यममार्थप्रयोजनंस्तेतसर्वत्रवेदादिषुप्रतीयेत। यद्यात्मनिमयिबाधकं
नप्रतीयेतनहीश्वरस्यजीवप्रकृतिभ्यामर्थीबाधश्चास्तः। तदस्वात्मनः परमात्मनोमायाविद्यादित्यन्वयः। मायेतिनेंद्रजालमुच्यतेकिंतुजीवप्रकृती
एवेत्याहायथेति। यथायथार्थत्वेनैववस्तुसत्वेनैवप्रतीयमानआभासोममप्रतिबिंबरूपोजीवोयथायथार्थत्वेनैवतमोज्ञानिहेतुःमूलप्रकृति

**॥ऋतेर्थंयत्प्रतीयेतनप्रतीयेतचात्मनि॥तद्विद्यादात्मनोमायांयथाभासो
यथातमः ३३**

अमायेत्युच्यतेप्युच्यतेविष्णुशक्तिर्हिमायाशब्देनभण्यते। उपचारतस्तुप्रकृतिर्जीवश्चैवहिभण्यतइतिवचनात्एतदुक्तंभवति। यथाछत्रधराद्या
रथस्थाअपिरथिनोनोच्यंतेतथाजीवप्रकृतिकर्मकालाःसत्तामयिवर्तमानाअपिजीवनजीवनाभावात्प्रकृत्याबंधासावात्कर्मणाफलाभा
वात्कालतःपरिणामाभावाच्चमयिस्थिताइतिनोच्यंते। सर्वपरेस्थितमपिनैवतत्रेतिभण्यतइत्यादेरिति ३३

भा॰ द्वि॰
७५

भगवान्स्वव्याप्तिं सोदाहरणामुपदिशतीत्याह। यथा महांतीति। यथा महांति पंचभूतानि उच्चावचेषु भूतेषु स्वकार्येषु शरीरेष्वनुप्रविष्टानि वर्त्तंते। ततोऽप्य
धिकत्वात्तिसद्भावात्ते अप्रविष्टानि च तथाहमपि अनंतदेशकालव्यापी तेषु भूतेषु प्रविष्टोऽस्म्यतो बहिरवस्थितत्वात्तेषु न प्रविष्टश्चाथवा महां
ति भूतानि शरीरेषु बहिश्चेत्यादेः ३४ उक्तव्याप्तिस्फुटीकरणपूर्वकमुपदेशमुपसंहरति। एतावदिति। यद्वस्तु सर्वत्र सर्वदेशे सर्वदा सर्वस्मि

यथा महांति भूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ३४ एतावदेव
जिज्ञास्यं तत्वजिज्ञासुनात्मनः। अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३५

न्काले वान्वयव्यतिरेकाभ्यामन्वयस्यान्वितानन्वितदेशकालस्वरूपाभ्यां व्याप्तं स्यादेतावदेव मत्स्वरूपमात्मनः परमात्मनस्तत्वजिज्ञासुना त्वया
जिज्ञास्यं विचार्यं स्यादित्यन्वयः। अनेन वस्त्वंतरसद्भावासद्भावरूपाभ्यामन्वयव्यतिरेकाभ्यां सर्वदेशकालयोरेकप्रकारेण गुणक्रियाभिर्व्या
प्तमिति विचार्यमित्युक्तं भवति ३५

राम
७५

नेहमान इति प्रार्थितं वरं ददातीत्याह। एतन्मतेति ३६ तिरोधानातिरोधाने अपि स्वेच्छाधीने इति ज्ञापयन्हरिः स्वस्वरूपं तिरोधत्त इत्याशयेनाह
। संप्रहर्षेति। अजनो जननरहितो जनविरुद्धलक्षणो वा हरिर्जनानां रुद्रादीनां सकाशात्परमेष्ठिन उत्तमस्य हिरण्यगर्भस्य यद्रूपं प्रादर्शयत्तदा
त्मरूपं तस्य विरिंचस्य पश्यतः सतो न्यरुणदित्यन्वयः ३७ भगवतीन्द्रियविषयादंतर्हिते सति विरिंचेन किं कृतमित्याह। अंतर्हितेति। इंद्रियार्थं इं
द्रियविषयस्तस्मादंतर्हिताय बाह्येंद्रियग्राह्यरूपरहितायेत्यर्थः। सर्वभूतमयः सर्वभूतप्रधानः सर्वस्यापि प्रधानत्वात्स सर्वमय ईर्यत इति ३८

एतन्मतं समातिष्ठ परमेण समाधिना। भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ३६ शुक उवाच संप्रहर्षेप एवम
जनो जनानां परमेष्ठिनः। पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ३७ अंतर्हितेंद्रियार्थाय हरये विहितांजलिः। सर्वभूतमयो
विश्वं ससर्जेदं स पूर्ववत् ३८ प्रजापतिर्धर्मपतिरेकदा नियमान्यमान्। भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ३९

सदा स्वेष्टदेवतां सेवमानोऽपि पुमान्विशेषप्रयोजनप्राप्तौ विशेषतस्तदुपास्तिं कुर्यादिति न्यायं दर्शयितुं विरिंचस्य विशेषोपास्तिमाह। प्रजापतिरिति
। धर्मपतिः सप्रदिविपस्त्वात्तद्विशेषकार्यप्राप्तौ तद्योग्यानुष्ठानं कर्तव्यमिति धर्मस्य पालकः प्रजानां भद्रमन्विच्छन्न स्वार्थ इत्यत उक्तं स्वार्थमि
। तदपि स्वप्रयोजनमिति मनीषया पुंसो सुखोद्यकार्थत्वादित्यर्थः। अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवं। क्षमा धृतिर्मिताहारः शौचं चेते यमाः
। तदपि स्वप्रयोजनमिति मनीषया पुंसोऽसुखोद्यकार्थत्वादित्यर्थः। अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवं। क्षमा धृतिर्मिताहारः शौचं चेते यमाः
श। तपः संतोष आस्तिक्यं दानमीश्वरपूजनं सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो व्रतं। एते तु नियमाः प्रोक्ताः स्वान्यनुष्ठ(?) क्रुष्टरीत्या द्वियोगशास्त्रे
३९

भा· द्वि·
७६

रिक्थं पित्र्यधनमादद्त इति रिक्थहाराः पुत्रास्तेषामध्ये नारदोतिशयेन प्रियः ४० मायां जगत्सृष्ट्यादिमाहात्म्यं विविदिषुर्ज्ञातुकामः मायेशस्य
अन्येषां माहात्म्यानां पतेः। मुख्यतो विष्णुमाहात्म्यं मायाशब्दोदितं भवेत्प्रधानत्वान्महत्त्वात् मेयत्वे चैवतस्महीति ४१ पितृतोवरणप्रयोजनमाह
तुष्टमिति ४२ भगवतास्वस्य शोकः पूर्तं सद्भावतत्सत्वं जगत्करोतीति भूतकृत् ४३ नारदस्येतिसंकल्प्यवर्णयेतिस्वपितृज्ञापालनप्रकारमाहना
रद इति। मुनय इत्यादि विशेषणेभ्यो व्यासस्य सार्वज्ञादिप्रतीतेर्नारदादिभ्यः श्रवणं मोहनार्थमिति ज्ञातव्यं। तदुक्तं हरिर्व्यासादिरूपेण सर्वज्ञो

तं नारदः प्रियतमो रिक्थादानामनुव्रतः। शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४० मायां विविदिषुर्विष्णोर्मायेशस्य महामुनिः।
महाभागवतो राजन् पितरं पर्यतोषयत् ४१ तुष्टं निशाम्य पितरं लोकानां प्रपितामहं। देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ४२
तस्मा इदं भागवतं पुराणं दशलक्षणं। प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ४३ नारदः प्राह मुनये सरस्वत्यास्तटे नृप। ध्यायते ब्र
ह्म परमं व्यासायामिततेजसे ४४ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं। यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४५ ॥

इति श्रीभागवते महापुराणे द्वितीयस्कंधे नवमोध्यायः॥

पित्स्वयंप्रभुरित्यादि ४४ अधुना परिक्षित्प्रश्नपरिहाराय श्रीभागवतव्याख्यानं पृथक्पृथक्प्रश्नप्रतिवचनं च प्रतिजानीते। यदुतेति यत्पुराण
परिज्ञाने प्रत्यहं त्वया पृष्टस्तद्व्यासकृतं भागवतपुराणं तदेवाख्यास्ये तत्पुराणं व्याकुर्वन् प्रथमतः सर्वदेशत्वात् विराजाख्यविरिंचिस्थितत्वात्
वैराजपुरुषाख्यहरेरिदं विश्वं यथासीत्तथोपाख्यास्ये तत्र यथान्यान् प्रश्नांश्च कृत्स्नशो व्याख्यास्ये इत्यन्वयः। श्रीभागवतप्रथमकथानाराय
णोद्भूतविराजभिन्नविरिंचस्य हरेरधिदेवादिसर्वजगत्सृष्टिरुतापीति वा। उताप्यर्थे विकल्पयोरित्यभिधानं ४५ द्वितीये टीकायां नवमोध्यायः

राम
७६

अस्मिन्नध्याये वैराजाख्यहरेः सकलजगत्सृष्टिः प्रपंच्यते। तत्रादौ भागवतपुराणं दशलक्षणमित्युक्तं दशलक्षणानि कथयतीत्याह। अत्रेति। अ
त्र श्रीभागवते सर्गादिदश लक्षणानि प्रवृत्तिपाद्यंत इति शेषः १ मुक्तामुक्तप्रपंचाधारस्य दशमस्य हरेर्माहात्म्यवर्णनस्यावश्यापेक्षितत्वात् सर्गादि
नवानां वर्णनं क्षोपयुज्यत इति तत्राह॥ दशमस्येति। महात्मानो ब्रह्माद्य इह पुराणे दशमस्याश्रयस्य विशुद्ध्यर्थं सर्गादिनवानां लक्षणं वर्णयंति

श्रीबादरायणिरुवाच — अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वंतरेशानुकथा निरोधो मु
क्तिराश्रयः १ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणं। वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा २

त्पत्रयः॥ अनेनार्थात् ब्रह्मज्ञानलक्षणार्थत्वमुक्तं भवति। अत्र किं प्रमाणमत्राह। श्रुतेनेति। अंजसा मुख्यया वृत्त्यानंतवेदार्थसंवादेनेत्यर्थः। ब्रह्मणः स
र्वगुणपूर्णत्वेन सर्वोत्तमत्वादिज्ञानार्थत्वेन तदुपयोगात्तल्लक्षणकथनं युक्तमिति भावः २

भा॰ द्वि॰
११

तत्र प्रथमं सर्गं लक्षयति। भूतेति। सृष्टिकाले ब्रह्मणः परब्रह्मणः सकाशात् जातात् गुणवैषम्यात् तन्नामकात् महत्तत्त्वात् अहंकारद्वारा भूतमात्रेंद्रियधियां पंच महाभूतानां शब्दादितन्मात्राणां श्रोत्रादिदशेंद्रियाणां धियो बुद्धेश्चांडपर्यंतं यत् जन्म स सर्ग उदाहृत इत्यन्वयः १ विसर्गं लक्षयति विसर्गो इति। पौरुषो विसर्गः स्मृत इत्यन्वयः। अंडांतर्गतपुरुषनाम्नो हरेर्भूतानां यद्विविधं जन्म स विसर्गः स्मृतः शास्त्रांतरोक्त इति शेषः। तदुक्तं। महदाद्यंडपर्यंतः सर्गोंडे ब्रह्मणः क्रियः। अनुसर्ग इति प्रोक्तः पौरुषश्चेति कथ्यते॥ किं च पंचभूतसमूहेन जातः पुरुषो जीवः तद्विषयसर्गः पौरुषो विसर्ग इत्युच्यते॥ अत्राप्युक्तं च स्मृतिः प्रमाणं पंचभूतसमूहेन जातः पुरुष उच्यते अंडांतर्हितजातानां नानाजीवानां सात्त्विकादिस्वभावानां व्यक्तिस्त

भूतमात्रेंद्रियधियां जन्म सर्ग उदाहृतः॥ ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ३ स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः। मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ४

भुजीवेषु तेजसाप्यादिकार्यापेक्षया भूतानां बहुत्वात् स्वस्वत्वात् तथा च भूतानां काठिन्यादिस्वभावव्यंजकत्वेन कृतार्थत्वात् जीवतत्त्वमेकस्मात् भूतसमूहात् जातत्वात् एकजमित्युच्यते॥ पंचभूतसमूहेन जातः पुरुष उच्यते। बहुत्वात्तत्र भूतानां तावत्त्वात्तत्त्वमेकजमिति च ३ स्थानं लक्षयति स्थितिरिति। वैकुंठस्य हरेर्दुष्टनिग्रहानुग्रहलक्षणो विजयः स्थितिरित्युच्यत इत्यन्वयः। तस्य वैकुंठस्यानुग्रहो भक्तपिता प्रसादविशेषः पोषणमित्युच्यते। तद्भक्तैकविषयत्वात् सर्वस्माद्विशेषः। मन्वंतरं लक्षयति मन्वंतराणीति तद्धर्माः मन्वंतरेषु सतां धारकाः धर्माः मन्वंतराणीत्युच्यंते। ऊतीराह। ऊतय इति। नानाजीवानामनादिकर्मणा तत्संस्काराश्च नानासृष्टिहेतुभूता ऊतय इत्युच्यंते ४

राम
११

ईशानुकथामाह। अवतारेति। हरेर्मत्स्याद्यवताराणामनुचरितमस्य हरेरनुवर्तिनां ब्रह्मादीनां पुंसामनुचरितं च नानाख्यानोपबृंहिता विविधेतिहासयुक्ता ईशकथेत्युच्यते ५ निरोधं लक्षयति। निरोध इति। आत्मन इति जातावेकवचनं। अस्यात्मनो जीवसमुदायस्य नानाविधशक्तिस्वरूपेच्छादिशक्तिभिः सह श्रीविष्णुमनु प्रविश्यानुशयनं स्वापो निरोध उच्यते॥ अनु प्रविश्य परमेश्वरे जीवस्य शयनं तु यत्। सह स्वशक्तिभिः स्वीयैरिच्छाद्यैर प्रकाशितैः सह श्रीविष्णुमनु प्रविश्यानुशयनं स्वापो निरोध उच्यते॥ मुक्तिं लक्षयति मुक्तिरिति। अन्यथारूपं प्राकृतं वैकृतं स्थूलसूक्ष्मेंद्रियादिकं हित्वा केवलविदानंदाद्यात्मकेन स्वरूपेण व्यवस्थितिर्विशिष्टा मुक्तिः

अवतारानुचरितं हरेश्चास्यानुवर्तिनां पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ५ निरोधोस्यानुशयनमात्मनः सह शक्तिभिः। मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ६ आभासश्च निरोधश्च यतस्सत्त्रयमीयते। स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ७

१२

णावस्थानं मुक्तिरित्युच्यते ६ आश्रयरूपं लक्षयति॥ आभास इति। यतो यस्मात् जगत आभासः सृष्टिर्गौणवृत्त्या सृष्टिश्च शब्दात् स्थितिर्निरोधश्च भवति। तत्त्रयमपि यत्र यदाधारतया मीयते वेदादिभिर्ज्ञायते। स आश्रय इत्युच्यते किं नामधेयोऽयमिति तत्राह॥ परं ब्रह्मेति। पुरुष्याहृत्सर्वपरमात्मेति। सृष्टिस्थित्यपाया भासाय यद्बलाद्यत्र च स्थिता इत्यादिना लक्षित इत्यर्थः ७

प्रकारांतरेणाध्यात्मिकादिविभागं तत्र विष्णुः आध्यात्मिकादिभगवद्रूपैक्यकथनपूर्वकं जीवानामीशानेत्वमाह। आध्यात्मिक इति। आध्यात्मिकः शरीर
संबंधिषु वस्तुरादिषु तत्तेषु रत्वेन स्थितः पुरुषो विष्णुः सोसावेवाधिदैविकः अधिदेवेष्वादित्यादिषु स्थितः यस्तत्राधिष्ठेतेषु घटादिपदार्थेषु स्थित्वा
तयोरुभयोरध्यात्मिकाधिदैवकयोश्चक्षुः प्रकाशयोर्विछेदः सम्यक् निश्चायको विष्णुः आधिभौतिको हि स्मृत इत्यन्वयः ८ हेत्वर्थं वाविना त्रि
तयोरुभयोरध्यात्मिकाधिदैवकयोः प्रकाशयोर्विछेदः सम्यङ्निश्चायको विष्णुः आधिभौतिको हि स्मृत इत्यन्वयः
हेनस्यूवितहेतुं मनक्ति। एतदिति। एतेषां त्रयाणां मध्ये एकतमाभावे वस्तुरादि भावे प्रकाशाभावे वा तद्विषय घटादिपदार्थाभावे वा नोपलभा
महे घटादिविषयानुपलब्धिर्ज्ञानेनाक्रमः इति यदायस्मात्तस्मात्तज्ज्ञानस्वातंत्र्याभावात् सर्वं वयमस्वतंत्रा इत्यर्थः। ननु कोसौ ज्ञाने स्वतंत्र इति तत्र
आह। त्रितयमिति। तत्र तेषामस्वतंत्राणां जीवानां मध्ये योध्यात्मादित्रितयं वेद स आत्मा विष्णुराश्रय इत्यन्वयः। ननु स्वस्यैव विषयज्ञानमस्त्व
नसुषुप्त्यादावित्यस्येदमेवोत्तरं तत्र सुषुप्त्यादावपींद्रियप्रकाशविषयाननपेक्ष्य वयो जीवानां सर्वस्वरूपज्ञानेनैव वेत्ति स आत्माश्रय इति

आध्यात्मिकोयः पुरुषः सोसावेवाधिदैविकः। यस्तत्रोभयविछेदः सस्मृतो ह्याधिभौतिकः ८ एकदेकतराभा
वे यदा नोपलभामहे॥ त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ९ पुरुषोंडविनिर्भिद्य यदासौ स विनिर्गतः॥
आत्मनोयनमन्विछन्नपोस्राक्षीछुचिः शुचीः १०

ननु आश्रयस्याप्येतत्त्रयापेक्षाभावेन ज्ञानसंभवात्। प्राणादावप्येवं तस्मिन्नुपुरेजायतीति कृतः अयोपि नित्यमुक्तत्वात्सुक्तानां निर्दिष्टकत्वात्तकथ
मेतत्स्रष्टत्वं लक्ष्यमावर्त्तयतीति तत्राह। स्वाश्रयाश्रय इति सुक्तोश्रयाणां स्मात्सुस्य प्राणादीनां स्वाश्रयाणां आश्रयः आधारः अनेन स्वातंत्र्यलक्ष
मेतल्लक्षणं लक्ष्यमावर्त्तयतीति सुक्तं भवति। सुप्त्यादीवी स्वरस्य सर्ववेत्तृत्वं च स्वप्रेनशारीरमभिप्रहत्यासुप्तः सुप्ता
तीयमानं सर्वज्ञत्वं लक्षणं लक्ष्यादिष्वोलक्ष्याव्यावर्त्तयतीति सुक्तं भवति। सुप्त्यादीवी स्वरस्य सर्ववेत्तृत्वं च स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्ता
नपि वा कशीतीति क्लप्तिसिद्धं ९ एवं पुराणलक्षणमभिधायाधुनाविरालाख्यविरिचोत्पत्तिं वक्तुं प्रथमतः तत्स्रष्टुपुरुषारम्भहेतोरवता
रकथनपूर्वमस्य सृष्टिमाह। पुरुष इति। यदा स पुरुषः सृष्टैस्तत्त्वैः सहांडं प्रविश्य विनिर्भिद्य विभज्य विनिर्गतः प्रकाशितः पुरुषाभि
व एव प्रादुर्भूतः॥ तदात्मनः स्वस्य दरीपादीपांतरवद्ध्रूपांतरेणशेषपर्यंके शयनीयायनमाश्रयमन्विछन्नित्यं शुचिः स भगवानात्मनोयनभूता
शुचीः स्वसृष्टासाधनयोग्या अपोस्राक्षीदित्यन्वयः। अंडं प्रविष्टोयो विष्णुः सोडभिलाप्रकाशितइत्यादेः १०

ततः किं तत्राह। तास्विति। स्वसृष्टासु तास्वप्सु सहस्रपरिवत्सरान् अवात्सीदितियत्। तेन नारायणो नामाभूदित्यन्वयः। ननु अन्येनाप्यपनमप्यास
इति वांतरेणनारायण इति नाम कथमत्राह यदिति। अनाशात् पुरुषो नरः तदुद्भवा आपो नारा इति यद्यस्मात्तस्मान्नाराअयनं यस्य सना
रायण इति सोपोसृजत्ततो नारा नरो नाशात्परोयत इति च ११ हरेरियं सृष्टिः स्वाधीनसाधनांतरसहकृतेत्याशयेनाह। द्रव्यमिति। द्रव्यं प्र
थिव्यादि १२ ब्रह्मांडस्यांतस्त्रैविध्यमपि श्रीनारायणेनैव कृतमित्याह॥ एक इति। जले शेषपर्यंके शयानः एको नारायण एव स्वसृष्टेत

तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान्॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः ११ द्रव्यं कर्म्म च कालश्च
स्वभावो जीव एव च॥ यदनुग्रहतः संति न संति यदुपेक्षया १२ एको नानात्वमन्विछन्योगतल्पात्समुत्थितः॥ वीर्यं हिरण्म
यं देवो मायया व्यसृजत्त्रिधा १३ अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः॥ ॥

त इक्षणनियामकत्वांतर्यामित्वेपेक्षीनात्वं बहुत्वं संख्यागोचरत्वमात्मन्यन्विछन्योगतल्पात्समुत्थितः॥ देवो लीलालोलो हिरण्मयं स्ववीर्यं संड्माय
या स्वलयांतस्त्रिधा व्यधात्॥ तत्र त्रिनियामकत्वेन बहुत्वं शास्त्रुमीश्वर इत्यादेः किं च हिरण्मयं शरीरं तु तेशत्वानं देवीर्यं स्वरेतो रूपं त्रिधा व्यसृजदित्यन्वयः
अंतस्थितहरेः कामादंडब्रह्मतनोर्निरित्यादेः १३ अंडांतस्त्रैविध्यप्रकारं कथयति॥ अधिदैवमिति। प्रभुरिति त्रिधा सृष्टवानिति शेषः॥ ॥

हरिवीर्यरूपस्य विराजोपि त्रैविध्यमस्तीति कथयति॥ पुनरिति॥ पुनर्यथा तत्पोरूपं पुरुषाख्यस्य हरेर्वीर्यं विराण्नामब्रह्मात्मकं जातं त्रिधाभि
द्यत इति त्रिविधमभवत् तथाश्रुणुत्वमिति वयः १४ तत्त्रैविध्यं विवृणोति॥ अंत इति॥ विराडाख्यब्रह्मशरीरे अंतराकाशे विचेष्टतः पुरुषस्य हरेः ओजः
सहोबलं पराभिभवसहनस्वेच्छाकरणशक्तयोजज्ञिरे ततस्तेभ्य ओजआदिभ्यो महान् प्राणो मुख्यप्राणो जज्ञे इत्यन्वयः॥ अज्ञातयामिहयोजः
सहोबलानुविष्टहिरण्यगर्भो जः सहोबलेभ्यः सर्वेंद्रियनायक ओजः सहोबलात्मको मुख्यप्राणो जात इत्युक्तं भवति॥ एतेन वपूर्वप्रकृता

पुनस्तत्पोरूपं वीर्यं त्रिधाभिद्यत तच्छृणु १४ अंतः शरीर आकाशे पुरुषस्य विचेष्टतः॥ ओजः सहोबलं जज्ञे ततः प्राणो महान
सुव १५ अनुप्राणंति यं प्राणाः प्राणंतं सर्वजंतुषु॥ अपानंतमपानंति नरदेवमिवानुगाः १६ प्राणेनाक्षिपता क्षुत्तृडंतरा जाय
ते विभोः॥ पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत १७ मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते॥ ततो नानारसो जज्ञे जिह्व
यायोधिगम्यते १८ विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः॥॥

प्राणेनाक्षिपतेत्यादि विक्षमाणत्वात् १५ प्राणस्य सर्वेंद्रिय
धात्माधिष्ठाताधिदेवानां ब्रह्मा तस्य नारायणब्रह्मप्राणेभ्यः सृष्टिरिति ज्ञातव्यं॥ प्राणेनाक्षिपतेत्यादि वक्ष्यमाणत्वात् १५ प्राणस्य सर्वेंद्रिय
प्रभुत्वं स्पष्टयति॥ अनुप्राणंतीति॥ पिंगलया नाड्या प्राणमपानंतमथश्रेष्ठमाने २६ इलापिंगलयोः प्राणापानचेष्टाफलमाह प्राणेनेति॥ प्राणो
नापानेन च विभोर्विरिंचस्य॥ वक्तुर्मुखावयवोत्पत्तिकथनपूर्वकं तेभ्यो ध्यात्मादीनामुत्पत्तिप्रकारं प्रपंचयति॥ पिपासत इति प्रागादौ मुखं निरभि
द्यतव्यक्तमभवत् १७ मुखतः मुखेन तत्रतालुनिरभिनत्॥ जिह्वया जिह्वेंद्रियेण १८ वाक्च वागिंद्रियं तयोर्वह्निवाचोरनंतरं व्याहृतमभिव
नम्॥॥

शरीरांतश्छिन्नमस्वतिवायोरोधूयति पुनः पुनर्दुग्धतिकंपमाने सतिजलेंडोदके वर्तमानस्य विरिंचस्य वायुनिर्गमद्वाराभावेन निरोधः क्लेशविशेषोभूत् तदनं
तरं नासिके श्वासोच्छ्वासरूपवायुनिर्गमागमद्वारे व्यक्ते॥ वाइत्यनेनाद्याविनिरोधोनुभवसिद्ध इत्याह॥ जिघृक्षतो घ्रातुमिच्छतो धातुः तत्रनसिनासिकायां घ्रा
तरं नासिके श्वासोच्छ्वासरूपवायुनिर्गमागमद्वारे व्यक्ते॥ वाइत्यनेनाद्याविनिरोधोनुभवसिद्ध इत्याह॥ जिघृक्षतो घ्रातुमिच्छतो धातुः तत्रनसिनासिकायां घ्रा
णः संगंधग्राही वायुर्घ्राणेंद्रियं तद्विषयो गंधश्च जात इति शेषः २० यदा स विरिंच आत्मनि निरालोको निष्प्रकाशस्तदा त्मानं स्वशरीरमन्य
च दिदृक्षतस्तस्य॥ अक्षिणी गोलके व्यक्ते ततो ज्योतिः सूर्यो रूपे गुणग्रहश्चक्षुरिंद्रियं तद्ग्राह्यं रूपं चोत्पन्नमिति शेषः २१ ऋषिभिर्ज्ञानसाधनैर्वेदादि

जले वैतस्य सुचिरं निरोधः समजायत॥ नासिके निरभिद्येतां दोधूयति नभस्वति॥ तत्र वायुर्गंधवहो घ्राणो नसि जिघृक्षतः २०
यदात्मनि निरालोक आत्मानं च दिदृक्षतः॥ निर्भिन्ने अक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः २१ बोध्यमानस्य ऋषिभिरात्मनस्त
ज्जिघृक्षतः॥ कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः २२ वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीततां॥ जिघृक्षतस्त्वङ्निर्भिन्ना
तस्यां रोममहीरुहाः॥ तत्र चांतर्बहिर्वातस्त्वचा लब्धगुणो वृतः २३

भिस्तत्त्वादिभिर्वा बोध्यमानस्य वेदनिवेदेधेति विज्ञाप्यमानस्य तस्य विरिंचस्यात्मनस्तद्विज्ञापनं जिघृक्षतः गृहीतुकामस्य॥ कर्णौ जातौ तयोर्दिशो
दिग्देवता गुणग्रहः श्रोत्रेंद्रियं च तद्विषयश्च शब्दः २२ वस्तुनो घटादिपदार्थस्य मृदुत्वादिगुणान्॥ जिघृक्षतो ज्ञातुमिच्छतस्तस्य विधेस्त्वगिंद्रि
यं तस्यां त्वचि रोममहीरुहाः तत्र त्वचि अंतर्बहिर्व्याप्तो पि त्वचा त्वगिंद्रियेण स्पर्शलब्धेन ज्ञातेन स्पर्शगुणेनावृतो वातः स्पर्शवायुः स्पर्शश्चाभव
दित्यन्वयः॥ गुर्वित्यविच्छेदः २३

उभौ इंद्रियेंद्रियाभिमानिनौ वा आश्रयो यस्य तत्तथोक्तं। आदानमुपादानं हानादिकं वा २४ गतिं गमनलक्षणं कर्म यत्र इंद्रस्तत्र स्वयं तदभिमानी ग
तिश्च षड्भ्यामभूतां। तथा नृभिः यद्द्रव्यं हविः संबंधि हवनादिकं कर्म क्रियते यमुद्दिश्य स उपेंद्रो भगवान्यज्ञो अंतर्यामितया अभिव्यक्त इति शेषः २५ प्रजा
संततिसन्निमित्ता या रतिस्तस्या जात आनंदः स एवामृतं तदर्थिनः पितुः शीलमस्येति प्रजानंदामृतार्थिनः तस्य विधेः शिश्नं इंद्रियस्थानं तस्मिंश्च उपस्थ कामा
नां प्रियं परतः प्राप्य सुखसाधनं तादृशं उपस्थेंद्रियं तदुभयाश्रयं शिश्नोपस्थाश्रयं रतिः सुखं वा आसीत्। कामानां भोगसाधनमिति वा २६ धातुम
लं पुरीषसंज्ञमुत्सिसृक्षोरस्य कुकामस्य गुदमपानद्वारं ततस्तस्मिन्गुदे पायुनामेंद्रियं तत इंद्रियानंतरं तत्रैव मित्रनामा देवः उभयाश्रयः पायु

हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया॥ तयोस्तु बलवानिंद्र आदानमुभयाश्रयं २४ गतिं चिकीर्षतः पादौ रुरुहातेभि
कामतः। पद्भ्यां हव्यं स्वयं यज्ञः कर्मभिः क्रियते नृभिः २५ निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः। उपस्थ आसीत्कामानां प्रि
यं तदुभयाश्रयं २६ उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदं॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः २७ आसिसृप्सोः पु
रः पुर्या नाभिद्वारमपानतः। ततोपानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं २८

मित्राश्रयः। वा उत्सर्गेन मलादिकं कदाचित्तु बहला लोकाभिपत्तये। आत्मनो निर्ममे कामान्सर्वेषामसवन्नत इत्यादि वाक्यं स्मारयति २७ पर
कायप्रवेशप्रकारमाह॥ आसिसृप्सोरिति पुरः स्वाधिष्ठिताद्देहात् पुर्यामन्यस्मिन्देहे पुरीतन्नाम नाडीविशेषमासिसृप्सोः प्रवेष्टुकामस्य विरिंचस्य तु
पलक्षणं योगिनः नाभिद्वारमपाहृतं। चिह्नतं ततो नाभिद्वारादपानवायुस्तस्मान्मृत्युस्तदुभयाश्रयं पृथक्त्वं देहांतरप्राप्तिलक्षणं वा प्राणत्यागः। अत्र ह
मुमूर्षणं तस्यापकत्वादपानः इदं च लक्षणो न किंतु देहिनामित्यनुसंधेयं २८

अन्नपानानां अन्नपानानि आदित्सोरादातुकामस्य विरिंचस्य कुक्षिनाड्यादि भूतानि आस्य ओजोरुधिरस्य स्थानं नाडी कुक्षिरन्नस्थानं नाड्यो रससृतिभेदभिन्नाः तयो
ः कुक्षिनाड्योः समुद्रा नद्यश्चासन्। तद्भिः पुष्टिश्च तदाश्रये तस्मिन्कुक्ष्याश्रया पुष्टिर्नाड्याश्रया २९ आत्ममायां चित्तवृत्त्यादिमहिमानं निदिध्यासोर्ध्या
तुकामस्य हृदयं मनोनिवासस्थानमभूत् ततो हृदयात् मनो मनसश्चंद्रो अधिदेवता संकल्पः कामश्च मनोवृत्तिविशेषावभूतां। इतिशब्दो निरुद्धग्रहणार्थः॥
३० त्वगाद्याः सप्त धातवः शरीरस्थितिहेतुभूता जाता इति शेषः। तेषां निदानमाह। भूमीति। मुख्यप्राणाभिमन्यमानजउ प्राणोपादानकारण

आदित्सोरन्नपानानामासन्कुक्ष्यंत्रनाडिकाः। नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये २९ निदिध्यासोरात्ममायां हृदयं
निरभिद्यत। ततो मनश्चंद्र इति संकल्पः काम एव च ३० त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः। भूम्यप्तेजोमयाः सप्त
प्राणो व्योमांबुवायुभिः ३१ गुणात्मकानींद्रियाणि भूतादिप्रभवा गुणाः। मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ३२
एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया। मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३३

माह। प्राण इति। मुख्यप्राणो नाभिमन्यमानजउ प्राणो व्योमांबुवायुभिः सृष्ट इति शेषः ३१ इंद्रियोपादानकारणमाह। गुणेति। गुणाः सत्त्वाद
यः। गुणकारणमाह। भूतादीति। बुद्धिस्वरूपमाह बुद्धिरिति। विज्ञानरूपिणी निश्चयज्ञानरूपिणी ३२ ब्रह्मशरीरस्य भगवत्प्रतिमात्वमुपसंह
ति। एतदिति। पंचभूताहंकारतत्त्वमहत्तत्त्वप्रकृत्याख्याष्टावरणावृतमेतत्स्थूलं विराड्रूपं ब्रह्मशरीरं भगवतो नारायणस्य प्रतिमारूपेण तव म
या व्याहृतं रस्य त्वया। तदुक्तं। स्थूलं भगवतो रूपं ब्रह्मांडदेहजदाहृतः तत्रैव त्वा वदेति ३३

ननु तर्हि हरेर्निजरूपं कीदृशमत्राह। अत इति। अतोऽस्मात् स्थूलाद्देहाद्यपरं विलक्षणमपि स्थूलं किं नेत्याह। सूक्ष्मतममिति। सूक्ष्माणामप्यतिशयेन सूक्ष्मम् अणोरणीयानिति श्रुतेः। महत्परिमाणाभावेनावाङ्मनसत्वेन भक्तानां दिदृक्षोपासनार्थं स्यात्तदुक्तं। अव्यक्तमिति। महत्परिमाणवत्त्वेपि स्वप्रकाशत्वेनाग्राह्यत्वं न स्यादित्यर्थः। महतो महीयानिति श्रुतिः। यमेवैष वृणुते तेन लभ्य इति श्रुतेः। सूक्ष्मं वशं त्वचकं गन्धाक्षरमिति च। अस्य स्वकसाविदतिशयत्वं तर्हि विशेषणसंभवे कथमेतदित्यत उक्तं। निर्विशेषणमिति निर्गतं विशेषणमतिशयलक्षणं यस्मात्तन्निर्विशेषणं तथोक्तं। अस्य कार्यस्य स्वकचयोऽनसमर्था

अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम्। अनादिमध्यनिधनं नित्यं वाङ्मनसः परम्॥ ३४ अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते। उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः॥ ३५

विशेषणा इति दर्शनात् एवं विधस्यापि वक्तृत्वेन घस्वदाद्यैनवत्त्वं किं न स्यादिति मंदाशंकापरिहारायोक्तं। अनादीति। आदिमध्यान्तशून्यं। नैतदौपचारिकमत उक्तं नित्यमिति। नित्यमविनाशि। नित्यो नित्यानामिति श्रुतिः। वाङ्मनसयोरभावेऽपि वागादिविषयत्वं स्यान्नेत्युक्तं वाङ्मनसोः परमिति। वाङ्मनसयोरगोचरः। सरस्वती रुद्रोऽनन्तो वा ३४ ऐश्वर्यादहृहीतत्वेनेते उभे अपि याद्येय इत्याशयेनोपसंहरति। अमुनी इति। स्थूलसूक्ष्मे अमुनी भगवद्रूपे मयानेतवानुवर्णिते। मायासृष्टे भगवदिच्छया सृष्ट्वा विरचिते जगति ये अविपश्चितः अपंडिताः ज्ञानदुर्बलास्ते जना उभे अपि रूपे न गृह्णन्ति न जा

मायामये जगति विपश्चितः उभे कार्यकारणरूपेण गृह्णन्ति नांगीकुर्वन्तीत्येतदप्यारभ्यानं प्रस्याह। स वाच्येति। नाम एव वाचकत्वेन नामरूपक्रिया अपि। वाच्यत्वेन हरिर्देवो नियामयति वेकरां। कर्तृत्वानुसकर्म्मासौ निष्फलत्वादकर्म्मक इत्यनेन व्याख्यातो यं श्लोकः। निष्फलत्वात्कर्म्मफलानपेक्षत्वात् तेनैकस्य नानानामरूपक्रियाधारकत्वं मायामन्तरेण कथं संजाघटीत्यत उक्तं ब्रह्मेति। अन्तर्बहिर्व्याप्य ब्रह्मस्वरूपं वाच्यरूपं तस्य धारकत्वादुक्तमित्यर्थः। ब्रह्मवेदस्वरूपत्वं इत्यतो वेदादिशब्दराशिकृतत्वाद्वा। अनेन प्रपंचस्य वेदादिप्रमाणसिद्धत्वेन सत्यत्वात्तस्य मायामयत्वे वेदादेरप्रमाणत्वेन तदुक्तत

स वाच्यवाचकतया भगवान्ब्रह्मरूपधृक्। नामरूपक्रिया धत्ते सकर्म्माकर्म्मकः परः॥ ३६ प्रजापतीन्मनून्देवानृषीन् पितृगणान्पृथक्। सिद्धचारणगन्धर्वान्विद्याध्रासुरगुह्यकान्॥ ३७ किन्नराप्सरसो नागान्सर्पान्किंपुरुषान्नरान्। मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान्॥ ३८ कूष्माण्डोन्मादवेतालान्यातुधानान्ग्रहानपि। खगान्मृगान्पशून्वृक्षान्गिरीन्नृप सरीसृपान्॥ ३९

दैकस्यापि तथात्वेन विश्वस्यैव सत्यत्वं न्यायप्राप्तमित्युक्तं भवति ३६ उक्तमेव विशदयति। प्रजापतीनित्यादिना। सर्वनामरूपक्रियावतः प्रजापत्यादीनामरूपक्रियाश्च धत्त इति पूर्वेणान्वयः ३७ मातरो क्षिप्राद्याः ब्रह्माद्या वा पिशाचाः घंटाकर्णादयः भूताः शंभोरुद्रानुगाः विनायकाः विघ्नादयः ३८ कुष्मांडपलेहादयः उन्मादाः। कालकर्णादयः यातुधाना रक्षो विशेषाः स्कंदकुमारादयः ग्रहाः अष्टादश नवग्रहा वा हे नृप नृपाः शिवक्रतादयो वा सरीसृपाः सहस्रपादादयः ३९

संख्यातुमशक्यत्वात्सामान्यतो निर्दिशति ॥ द्विविधा इति । यो मर्त्त्यप्रथमा काशं नसः शब्दगुणं खं । पुष्करं गगनं विष्णोः पदं द्यौरभ्रमस्तत इत्यभिधाना
त्नभः शब्दतयलिंगाः । तेषां पुत्रमादित्वे कारणमाह । कुशलेति । उक्ता इमा जातयः कुशलादिकर्म्मणां गतयः फलानि ४० उक्तजातीस्त्रि
धा विभजति । सत्वमिति । सत्वंरजस्तम इति गुणत्रयहेतुकाः सुरनृनारका इति तिस्रो ज्ञेया इत्यन्वयः । सत्वहेतुकपुण्यफला सुरगतिः । रजोहेतुक
पुण्यपापफला मनुष्यगतिः । तमोहेतुकपापफला नारकी गतिः । अनेन नरकयोग्या असुरा इत्युक्तं भवति । अवांतरभेदो पि त्रिधेत्याह तत्रापी
ति । गुणत्रयमूलकर्म्मभ्यः प्राप्तसुरनरासुरगतयः प्रत्येकं सात्विकराजसतामसतया त्रिधा भवंति । तथाहि । कल्पादिप्रधाना असुरास्तामस

द्विविधाश्चतुर्विधा ये न्ये जलस्थलनभोकसः । कुशलाकुशलमिश्राणां कर्म्मणां गतयस्त्विमाः ४० सत्वं रजस्तम इति तिस्रः
सुरनृनारकाः । तत्राप्येकैकशो राजन्भिद्यंते गतयस्त्रिधा ४१

तामसाः प्रधानासुरभृत्यास्तामसराजसास्त्वप्रसिद्धासुरास्तामससात्विकाः केवलयापवारिणो मनुष्या राजसतामसाः मिश्रकर्म्मकृतो मनुष्या राजसराज
साः । मनुष्येषु पुण्यैककर्म्मकृत उत्तमा मनुष्या राजससात्विकाः । पृथगप्रसिद्धा देवाः सात्विकतामसाः । तत्वाभिमानिनो लोके ख्याताः सात्विक
राजसाः । तत्वाभिमानिनो देवाः सात्विकसात्विकाः । सात्विकेभ्योपि सात्विकाः गरुडादित्रिकतद्भार्याभ्योपि सात्विकी ब्रह्मभार्या सरस्वती ततोपि
सात्विको ब्रह्मेति भेद एकैकशः इतिशः प्रत्ययेन ज्ञाप्यते । तदुक्तं । तामसास्तामसा दैत्याः प्रधाना देवशत्रव इत्यादिना ४१

एवं जगत्स्वरूपं निरूप्याधुना भगवदवतारावसरमाह ॥ यदेति । यदैकतमः स्वभावः सात्विकोन्याभ्यां राजसतामसाभ्यामुपहन्यते तदेवं तस्मिन्नवसर एवं धाता
पोषणादिकर्त्ता वर्णाश्रमादिधर्म्मप्रवर्त्तकरूपधरो भगवान् ॥ तिर्यङ्नरसुरात्मभिः मत्स्यकूर्म्मवराहरामकल्क्युपेंद्रादिरूपैरवतीर्येदं जगत्सत्वेन
स्थापयन्पुष्णाति संवर्द्धयति स्थितं रक्षयतीत्यन्वयः । तेषु त्रिविधेषु कतमो भावः सात्विकतामसः सात्विकराजसः सात्विकसात्विको वा तामसराजस
भ्यामुपहन्यते तदेति वा ॥ यद्वा ते तामसादिभिः राजसतामसादिभिश्च दैत्यदानवराक्षसादिभिः ते त्रयः सात्विकभेदा बाध्यंते तदा वराहादिरूपैरिति वा ।

यदैकैकतमोन्याभ्यां स्वभाव उपहन्यते । स तदेदं जगद्धाता भगवान्धर्म्मरूपधृक् ॥ पुष्णाति स्थापयन्विश्वं तिर्यङ्न
रसुरात्मभिः ४२ ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ॥ संनियच्छति तत्काले घनानीकमिवानिलः ४३

तदुक्तं ॥ सात्विकेषु त्रिषु यदात्विकस्य प्रतिबाधनमित्यादिना ४२ ननु संहारोन्यनियतश्चेत्तदुपद्रवेण जगद्रक्षणं दुःशकमित्याशंक्याह स्वनियत
रूपभेदेन संहारस्य क्रियमाणत्वात् न तदुपरोधो जगद्रक्षणस्येति ध्वनयति । ततइति । ततः स्थित्यनंतरं प्रलयकाले प्राप्ते कालाग्निरुद्राणामात्मा
न्तर्यामी स भगवानात्मनो ब्रह्मणोंतर्यामिणः स्वोदराद्यत्सृष्टं जगत् ॥ तदिदं सर्वं नियच्छति । कथमिव । अनिलः घनानीकं मेघपटलमि
त्यन्वयः । तदुक्तं । मत्स्यादिरूपी पोषयति । नृसिंहो रुद्रः संस्थित इत्यादिना ॥ कालो यमः ४३

भा॰ द्वि॰
८३
रय:३

उक्तमर्थंप्रमाणयति।इत्थंभावेनेति।भगवंतोब्रह्मादयस्तेभ्योतिशयेनोत्तमोभगवत्तमोभगवानैश्वर्यगुणोनासर्वजगन्नेतापरमपुरुषःइत्थं
भावेनसृष्टिस्थितिसंहारादिकर्तृत्वेनसर्वात्माद्भिन्नत्वेनसर्वदोषविवर्जितत्वेनकथितःप्रतिपादितः।श्रुत्यादावितिशेषः।यतोवाइमानिभूता
निजायंतेइत्यादि।तथाकथनेकारणमाह।इत्थमिति।सूरयःपरंपरमात्मानमित्थंभावेनसर्वविलक्षणंपनद्रष्टुमर्हंतिहिनाभेदज्ञानेनातस्तत्क

इत्थंभावेनकथितोभगवान्भगवत्तमः।।
नेत्थंभावेनहिपरंद्रष्टुमर्हंतिसूरयः ४४

थाकथनंयुक्तमितिभावः।यद्वाभगवान्जगत्स्रष्टृत्वादिलक्षणविशिष्टत्वेनकथितइतियस्मात्तस्मात्सूरयःपरमार्थदर्शिनःइत्थंभावेने
तसिपरंद्रष्टुंनार्हंतीतिनह्यर्हंत्येवेति।अनेनज्ञानिप्रत्यक्षमपिश्रोक्तार्थप्रमाणमितिसूचितं ४४ राम राम राम

राम
८३

अत्रोच्यमानंजन्मादिकर्तृत्वंमायामयंकिंनस्यादत्राह।नचेति।अस्यपरस्यकर्तृत्वंजन्मकर्माणियथाजीवानांबंधस्वप्रतिषेधार्थमेवंतितथान
विधीयतइतिन।आदौकर्तृत्वंजन्मकर्मैवविधीयतएव।अतोमाययास्वेच्छयारोपितंनित्यारूढस्वरूपाविभिन्नत्वान्नकर्तृत्वंनानिर्वाच्यंप्रतिषे
धायबंधस्यजीवानांपरमेशितुः।स्वेच्छयैवतुकर्तृत्वंनित्यारूढंचिदात्मकमितिवचनात्।।रूपउपरिभावइतिधातोः।सुभद्रारथमारोप्येतिप्र
योगात्स्वाभाविकीज्ञानबलक्रियाचेतिच।अनेनमायाशब्दस्येच्छार्थत्वेनमिथ्यार्थत्वमित्युक्तंभवति।हिशब्देननिरस्तकुहकमितिपूर्वोक्तस्य
वयति ४५ संप्रत्युक्तब्रह्मकल्पेनान्यब्रह्मकल्पानांचसाधारण्यमाह।अयमिति।अयंब्रह्मणः।७ कल्पभेदोदाहृतःमयेतिशेषइत्यन्वयः

नचास्यजन्मकर्माणिपरस्यनविधीयते।कर्तृत्वप्रतिषेधार्थंमाययारोपितंहितत् ४५ अयंतुब्रह्मणःकल्पः
सविकल्पउदाहृतः।।विधिःसाधारणोयत्रसर्गाःप्राकृतवैकृताः ४६ परिमाणंचकालस्यकल्पलक्षण
विग्रहम्।।यथापरस्ताद्व्याख्यास्येपाद्मंकल्पमिमंशृणु ४७

कीदृशःसविकल्पःमन्वंतरादिविविधकल्पनासहितः।यत्रब्रह्मकल्पेअन्यब्रह्मकल्पानामन्यकल्पानांचसाधारणःसमानोविधिःयत्रचप्रा
कृतवैकृताःसर्गाःसंतिइत्यर्थः।अनेनप्राकृतादिसर्गकथनसाधारण्येकारणमित्युक्तंभवति ४६ श्रोतृप्रवृत्त्यर्थमुत्तरस्कंधार्थंप्रती
जानीतेपरिमाणमितिकल्पानांलक्षणानिविग्रहमियत्तांवाकल्पलक्षणस्वरूपंवा।।परस्तात्पश्चाद्यथावद्व्याख्यास्ये।प्रथमंतइमंपाद्मं
कल्पंशृणुइत्यन्वयः ४७

अस्य ग्रंथस्य शुकशिष्यसूतशौनकसंवादत्वं स्पष्टयन् शौनकप्रश्नप्रकारमाह। यदाहेति। विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिमित्या
दिना ज्ञात्वा बंधून्त्यक्त्वा भुवस्तीर्थानि चचार॥ तत्र तीर्थसंचरणसमये मैत्रेयादात्मज्ञानं चापेति यदुक्तवानाह ४९ ततः किं तत्राह॥ कुत्रेति।

शौनक उवाच   यदाह नो भवान्सूत क्षत्ता भागवतोत्तमः॥ चचार तीर्थानि भुवस्त्यक्त्वा बंधून्सुदुस्त्यजान्
४९ कुत्र कौषारवेस्तस्य संवादोध्यात्मसंश्रवः॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्वमुवाच ह ५० ब्रूहि नस्त
दिदं सौम्य विदुरस्य विचेष्टितं॥ बंधुत्यागनिमित्तं च यथैवागतवान्पुनः ५१

तस्य विदुरस्य तत्र अध्यात्मसंश्रवः आत्मनां प्रभुत्वाद्गणामधिकस्य हरेः कथायाः संश्रवो यस्मात्स तथा। यद्वात्मानं शरीरमधिकृत्य वर्त्तमा
नं देहेंद्रियादि तद्विषयः विदुरेण पृष्टः स भगवांस्तस्मै विदुराय यद्वा तत्वमुवाच हेत्यनेन ग्रंथांतरप्रसिद्धिमाह। अत्यास्य प्रसिद्धिरिति यादव
: ५० ५१

तत्र सूतः शौनकप्रश्नपरिहारप्रकारं प्रतिजानीते राज्ञेति। यत्समाधानं राज्ञः प्रश्नानुसारतः इति पुनरुक्तप्रश्नयोरेकविषयत्वेन परिहारोपि तद्
विनाभूतः इति तत्प्रश्नप्रतिवचनमपि युष्मत्प्रश्नप्रतिवचनमेवेति दर्शयति ५२ द्वितीयस्कंधगा ह्येषा पदरत्नावली मया। स्वर्पिता चरणांभो

सूत उवाच   राज्ञा परीक्षिता पृष्टो यदवादीन्महामुनिः। तद्वोभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः
५२   इति श्रीभागवते महापुराणे द्वितीयस्कंधे पुरुषसंस्थानुवर्णनं नाम दशमोध्यायः॥   ॥

जे पद्मनाभस्य भासतां ५२   इति श्रीमन्महेंद्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थयतींद्रकृतायां श्रीमद्भागवतटीकायां पदरत्नावल्यां
द्वितीयस्कंधे दशमोध्यायः॥ ॥   समाप्तश्चायं द्वितीयस्कंधः   रामराम

द्वितीयः

॥श्रीवेंकटेशनारसिंहाभ्यांनमः॥

॥नरहरेरिदं॥

॥श्री॥

॥श्रीवेंकटेशनारसिंहाभ्यांनमः।

॥नरहरेरिदं॥

श्री

श्रीगणेशायनमः ॥ यल्लीलानलराशिलोललहरीलावण्यकर्माणं(?)तृणांसंसारोदधिराशुशुष्यतितरामग्ध्यन्नश्शुद्धकेवलं। यस्माद्विश्वमशेषमुद्भवति यस्मिंल्लयं योगिनो श्रीमंतं तमुपास्महे सुमनसामिष्टप्रदं विठ्ठलं १ अगाधश्रीमद्भागवतजलराशौ मणिगणं तृतीयस्कंधोद्भ्रममनवगाहं मृगयति। निमज्जन्न्यार्थं तु पदमनुरक्तं इममलधियः कृपालेशं क्षतः खलु विदधतोमध्यनुपदं २ अत्र मुमुक्षूणां स्वस्वयोग्य भगवद्परोक्षज्ञानोत्पत्तौ प्रधानसाधनं भक्तिरेवेतत्साधनमितरत्सर्वमिति प्रपंच्यते। तत्र सूतः शौनकप्रश्नपरिहाराय शुकपरीक्षित्संवादं कथयति॥ एवमिति। पृथाहे चत्वय्या एतत्प्रमेयं प्रतिपृष्टः। एवं त

ॐ नमो भगवते वासुदेवाय ॥ श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल। क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् १ यद्वा अयं मंत्रकृद्वो भगवानखिलेश्वरः। पौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतं २

विदुर मैत्रेय संवादं घटत्वेन अत्र विदुरेणापि भगवान्व्रज्यकाले मैत्रेयः पृष्ट इत्यन्वयः। ऋद्धिमत्स्वगृहं त्यक्त्वेत्यनेन वैराग्यं प्रथमसाधनमिति सूचितं १ विदुर मैत्रेय संवाद घव घाल्लत्रा विदुरेणापि भगवान्व्रज्यकालत्तो मैत्रेयः पृष्ट इत्यन्वयः। ... यद्वा त्विति। वः पितामहानां मंत्रीमंत्रकृतस्य अधिकृतस्य अधिकार्ये भ्रमुत्पन्ने पौरवेंद्रगृहं हित्वा पुंसां यन्नु तीर्थयात्राकालापदेशेन प्रश्नबीजमुत्थापयति॥ यद्वा त्विति। ... अत्र तु शब्देन युद्धकाले तु विदुरस्तीर्थयात्रां गतोपि सगृहात्मसात्कृतमुपलभ्य आरंभगृहं यदा प्रविवेश तदा विदुरस्तीर्थसेवार्थं गत इति शेष इत्यन्वयः। अनेन विदुरस्य तीर्थसेवा कदाचित्कृता न युद्धकालमारभ्य तत्समाप्तिपर्यंतमित्युक्तं भवति। यत्र आसीत्पांडवानां हिते लक्ष्ये निवासं च विशिनष्टि। अनेन विदुरस्य तीर्थसेवा कदाचित्कृता न युद्धकालमारभ्य तत्समाप्तिपर्यंतमित्युक्तं भवति २

तीर्थनिषेवितो विदुरस्य सामान्यतो ज्ञात मैत्रेयसंगकालघटनोपि राजा देशविशेषबुभुत्सया पृच्छति कुत्रेति। कुत्र कस्मिंस्तीर्थविशेषे। पुरा निर्याणहेतुर पिवक्तव्य इत्यतो वर्णयेत्युक्तं ३ विविदिषायां नोल्पकारणमाह। नहीति। हिशब्दो हेत्वर्थः। यस्मादल्पार्थोदयो न तस्मात्तदर्थं प्रत्यर्थः। अत्रापि हेतुमाह। साधुवादोपबृंहित इति। साधुत्रिवृवित सौम्य सज्जनैर्वा ईशो पुमानिति यास्त्वः ४ सूतः शौनकप्रश्नपरिहाराय तत्संवादं कथयति। स एवमिति। बहुपूर्णतायामिति। प्रसन्नमिति धातोरीश्वरादि सज्जननिषेवितं पूर्णं भगवंतं वेत्तीति सुबहुविदिति। तद्ज्ञानफलमाह। प्रीतात्मेति। प्रियो हि ज्ञानिनोत्यर्थमिति स्मृतेः। प्रसन्नम

परीक्षिदुवाच ॥ कुत्र क्षत्तुर्भगवता मैत्रेयेणास संगमः। कदा वा सह संवाद एतद्वर्णय नः प्रभो ३ न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः। तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ४ सूत उवाच ॥ स एवमृषिवर्योयं पृष्टो राज्ञा परीक्षिता। प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ५ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः। भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभवने ददाह ६

नाद्वा श्रूयतामित्यनेन वक्तव्यार्थश्रादरं जनयति। उच्यमानं सहेतुकं चेतश्च आह्लादं जनयत्यस्य कथ्यतदित्यत उक्तमितीति। इति हेतुप्रकरणेतियादवः॥ ५॥ विदुरस्य तीर्थयात्रायां निमित्तमाह। यदा त्विति। अत्र यदा शब्दो हेत्वर्थः। यदा तदेति हेत्वर्थे कालार्थेपि वचनादिति वचनात्। अधर्मेणात्मस वधारणार्थं तु शब्दः। विनष्टा भगवद्विषया दृष्टिर्यस्य स तथा। असाधून्न्यायवर्जिनः अधर्मेण धर्मविरुद्धकर्मणा। यविष्ठस्य कनिष्ठस्य। विबंधून्लौकिकबंधुरहितान्। लाक्षाभवने लाक्षोपयुक्तगृहे ददाह यदा यस्मात्तस्मादित्येको हेतुः ६

भा· त्व·
२

अयमेको हेतुरित्याह॥ यदेति॥ नृपो धृतराष्ट्रः। कुचकुंकुमान्यास्रैर्नेत्रजलैर्हरन्त्याः क्षालयन्त्याः स्वस्य स्नुषायाः कुरुदेवस्य युधिष्ठिरस्य देव्याः पदाभि
षिक्तायाद्रौपद्याः सभायां गर्ह्यं निंद्यं सुतस्य दुःशासनस्य कर्म केशाभिमर्शं कबरीभारपरामर्शलक्षणं न निवारयामास। यदा यस्मात्तस्मात् ७ अयं
तृतीयो हेतुरित्याह॥ द्यूते त्विति। तु शब्दो बाधारणार्थः। अधर्मेणोत्पन्ने न संबध्यते। साधुत्वादीनि पित्र्यधनदानयोग्यत्वहेतवइति प्रकाशनायोक्ता
नीति। अवलंबस्ताधारयेदिः। दायं स्वपित्र्यं पितृधनं वनवासावसानसमयेन नादादिति यद्यस्मात्तस्मादिति शेषः। तत्र हेतुस्तमइति। तमो

यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यं। न वारयामास नृपः स्नुषायास्रैर्हरंत्याः कुचकुंकुमानि ७ द्यूते
त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य। न याचतोऽदात्समये न दायं तमो जुषाणो यदजातशत्रोः ८ यदा तु पार्थ
प्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः। न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ९

यथार्थज्ञानस्तानिकारणं पुत्रवचनं जुषाणः सेवमानोंगीकुर्वाण इत्यर्थः ८ चतुर्थहेतुमाह॥ यदात्विति। पार्थेन युधिष्ठिरेण प्रहितः प्रेषितः
पुंसाममृतायनानि मोक्षादिसकलपुरुषार्थसाधनानि। क्षतः पुण्यलेशो यस्य स तथा॥ लिश अल्पीभाव इति धातुः। अनेन पापं बहुलं पुण्यम
ल्पं। तदपि नष्टमित्युक्तं भवति। इदमेव सुखलेशविनाशकारणमित्याशयेनार्थानुशब्दः। गुरुमात्रस्यापि वाक्यं ग्राह्यं किंतु जगद्गुरोरित्यभिप्राये
णतथोक्तं ९

राम
२

ततः किं विदुरस्य तीर्थयात्रायामित्यतो विशेषहेतुमाह॥ यदेति। पूर्वजेन ज्येष्ठेन। यदोपहूतो भवनं प्रविष्टो विदुरो मंत्राय स्वकर्तव्यालोचनाय
पृष्टः किं कार्यं तद्ब्रूहीति अथ तदा मंत्रदृशां मंत्रज्ञानां वरीयान् श्रेष्ठतरो यदुमाह। मंत्रदृग्वरीयस्त्वं कुतइति तत्राह। यदिति। वैदुरिकं विदुरेणोक्तं यद्यस्मा
त्तस्मादिति शेषः। कृत्स्नसंधिकार्यमनुस्माद्योपष्ट्रा थं गतेसस्तु पहूत इति अस्मिन्नर्थे किलशब्दः १० किमाहेति तत्राह॥ अजातशत्रोरिति। प्रतिय
च्छ प्रदेहि प्रदाने हेतुमाह। सहानुज इति। हिशब्दो हेत्वर्थः। यत्र यस्य युधिष्ठिरस्याभिप्रेतसाधक इति शेषः। किमसौ यम इति तत्राह यमिति। यं भीमं प्रति

यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन। अथाह तन्मंत्रदृशां वरीयान्यन्मंत्रिणो वैदुरिकं वदंति १० अजातश
त्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः। सहानुजो यत्र वृकोदराहिः श्वसन्रुषा यत्त्वमलं बिभेषि ११ यदा तु पार्थान्भग
वान्मुकुंदो गृहीतवान्सक्षितिदेवदेवः। आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः १२

अत्रापि हेतुमाह। स्वशत्रुहेति। स्वस्य राज्यलक्षणद्रव्यस्य शत्रवो दुर्योधनादयः तान्हतवानिति। निश्चितत्वान्नयापेक्षा: ११ राज्यप्रदानेन
लवद्दैवं तत्राह॥ यदात्विति। क्षितिदेवा ब्राह्मणास्तैः सह देवः कृष्णः मुक्तिमपि ददाति किमु राज्यमित्यतो मुकुंद इति॥ एवंविधसामर्थ्यवा
न्पार्थान्गृहीतवानिति यदा यस्मात्तस्माच्च। सोपि न दूरस्थ इत्याह। आस्त इति। स्वपक्षपांडवानां पुर्यामुपप्लवाख्यायामास्त इति यस्मात्तत्रा
च्चासौ प्रतं सावसर इत्याह विनिर्जितेति १२

पुत्रसंचाराभावात्सुधिष्ठिरापराध्यनदत्तमिति धृतराष्ट्राभिप्रायं विद्वान्विदुरो विष्णुवेश्मवद्दृष्टिणः पुत्रस्यापि परित्यागः श्रेयानिति विक्ति॥ सएष इति
॥ हे ज्येष्ठ त्वं यमपत्यमत्यानपतति कुलं यस्मात्तदपत्यमिति बुद्ध्या पुष्णासि स एष दृष्टः प्रविष्टश्चाप्र इत्यन्वयः॥ कीदृशो दोषः पापात्मा पुरुषपूर्णिष
द्गुणो विष्णुद्वेष्टी निपुरुषद्विद् कुतः कृष्णाद्विमुखः। उपलक्षणमेतत् तद्भक्तविमुखश्च अतएव गतश्रीः श्रीप्रसादरहितः। यतएवंविधो यतस्मा
त्कुलकौशलाय आशुकालक्षेपमंतरेणैनं दुर्योधनं त्यजेत्यन्वयः १२ स्ववचनादिकं धृतराष्ट्रेणागीकृतमिः त्यतावता विदुरस्यतीर्थयात्रा

सएषदोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या। पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय १३
इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण। असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन १४ क
एनमत्रोपजुहावजिह्मं दास्याः सुतं यद्बलिनैव पुष्टः। तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः १५

कारणाविरागहेतुः कः प्राप्त इति तत्राह इतीति॥ इति शब्द आदिवचनः॥ एवमादिवाक्यमुक्तवान्। प्रकारवचनो वा। स्फुरणं संचलनं। तत्र ज्ये
ष्ठस्य पुरतः असत्कृतोऽधिक्षिप्तः १४ धिक्कारप्रकारमाह॥ क एनमिति॥ दास्याः सुतमित्याक्रोशे षष्ठी। उपजुहाव आहूतवान्। जिह्मं वक्रहृद
यं। यस्य पुंसो बलिना एव अर्जितान्नेन। तस्मिन्नपि प्रतीपः विरोधी। परेषां मम विरोधिनां पांडवानां कृत्यं कार्यं आस्ते यस्मात्तस्मादिति शेषः।
निर्वास्यतां निःकास्यतां। श्वसानः श्वासमात्रावशेषो स्वकृतो दोषः स्वस्यैवेति सूचनाय शानच्प्रयोगः १५

मित्रा

संभावितस्य तादृशात्स्वगेहनिर्गमनं श्रेय इति भावं श्लोकद्वयेन स्वयमेवाह॥ स इति॥ भ्रातुर्धृतराष्ट्रस्य। स्मयन्मंदस्मितं कुर्वन्मायां पुत्रप्रेमादि
स्नेहलक्षणां हरेर्बंधकशक्तिं गुरु मानयानः बहुमन्वानः सोऽयाद्ययौ तीर्थमिति शेषः १६ पुण्यलब्धः स्वस्मिन्नेव हस्तिनपुरमतिपुण्यपदेऽत्र मि
ति सूचयति। तीर्थपदो हरेः पदानि स्थानानि सहस्रमूर्तिः अनंतमूर्तिः तदेतत्सहस्रं तत्सर्वमिति श्रुतिः १७ एतदेव विशिनष्टि। वनेषु

सइत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि। स्वयं धनुर्द्वारि निधाय मायां गतव्यथो याद्रुरुमानयानः॥
१६ सनिर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि। अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितो यानि सहस्रमू
र्तिः १७ वनेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरस्सु। अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः
१८

ति तीर्थानां शुद्धजलानामायतनेषु स्थानेषु नित्यशुद्धस्य हरेः सन्निधानस्थानेषु वा पुण्यशब्दः प्रत्येकमभिसंबध्यते। उपवनेषु पुरोपकंठव
नेषु अद्रिषु श्रीपर्वतादिषु कुंजेषु सिंहगिरिव्रजादिषु उत्तरपर्वतेषु वनेषु वृंदावनेषु। सेव्यत्वे हेतुमाह। अपंकेति। सरित्सु गोदावर्यादिनदीषु सरःसु
पुष्करादिषु अनंतस्य हरेर्लिंगैः प्रतिमाभिः सम्यगलंकृतेषु १८

चरणं विशिनष्टि॥ गामिति॥ गां भूमिं मेध्यैः शुद्धैः विविक्तैः पृथग्भूतैः वृत्त्यौत्पतितैः पत्रादिभिः वृत्तिराजीविका जीवनं यस्य स तथोक्तः। यद्वा शुद्धमेकांतस्थले वृत्तिरवस्थानं यस्य स तथा। अधः शयनेन स्थंडिलशयनेन अवधूतः रजोरूषितदेहः स्वैः स्वकीयैरलक्षितो ऽविज्ञातो ऽवधूता वायुनोद्धूताः केशा यस्य स तथा। यद्वा ऽवधूतवेषवद्वेषो यस्य स तथा॥ कीदृशानि व्रतानि हरितोषणानि यानि यानि व्रतानि चेरे तानि तानि सर्वाण्यपि हरिप्रसादजनकानीत्यर्थः। अनेनोद्देश्यदेवतावशीकरणसमर्थानीति व्रतशब्दनिर्वचनं सूचितं। वृञ्वरण इति धातोः व्रियते

गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतो ऽधः शयनावधूतः। अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणा
नि १९ इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासं। तावच्छशास क्षितिमेकचक्रामेकातपत्रामजिते
न पार्थः २०

नेनेति दित्यस्मिन्नर्थे व्रतमिति रूपं सिध्यति १९ कर्मभूमित्वाद्भारतवर्षमेवातिनवानुनान्यदित्यस्मिन्नर्थे एवशब्दः। केनचित्कालेन यावद्य
नेने तदित्यस्मिन्नर्थे व्रतमिति रूपं सिध्यति... दाता वन्नृपार्थो ऽजितेन कृष्णेनोक्तविधिना एकचक्रामेकातां एकमेवआतपत्रं श्वेतछत्रं यस्यास्तथा तां क्षिनिवासगत्योरिति धातोः सर्वत्रसं
निवासः सुगमः नवोराद्यकपइवोक्षीत्येतत्स्नवनायक्षितिमितिप्रायो ऽजि इत्यमित्यनेननियमभंगो नाशंकीतिमूल्यते २०

प्रभासतीर्थगमनेन कश्चिदर्थविशेषः सूचितः को ऽसावितितत्राह॥ तत्रेति। अथ प्रभासे हेतौ गमनानंतरं तत्र प्रभासे तिष्ठन् विदुरः सुहृदां यदूनां विनष्टिं विप्रशापनिमित्तं विनाशं शुश्राव इत्यन्वयः। विदुरस्य प्रभासस्थः शापं संक्षेपतो ऽशृणोत्। यदूनां विप्रशापश्चाद्युद्धवाद्यशुनामश्विति वचनात् विप्रशापेन मविध्वंतं यदुविनाशं श्रुतवानन्यथा महाभारतविरोधः स्यादित्यर्थः। तद्विनाशस्तत्रागमत्किंनेत्याह यथेति। वायुनोद्धूतवेणुसंघर्षणलक्षणसं स्पर्शोत्थितवह्निना तदाश्रयं वनं यथा दग्धं भवति तथा विप्रशापहेतुसंस्पर्द्धया ऽन्योन्यमर्मस्पर्शवचनोत्थितकलहवह्निना दहिष्यत्स्वकु

तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निनाश्रयं। संस्पर्द्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगियाय
तूष्णीं २१ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः। तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्ध
देवस्य स आसिषेवे २२

रेषां ब्रह्मादिदेवमनुष्याणां कृतानि मे मया व्यासमुखादभीक्ष्णं श्रुतानि ततः किं तत्राह। नेति। श्रुतानां तेषां ब्रह्मादिचरित्राणां क्षणेनगमेताल र्यज्ञाने सति। ब्रह्मादिमहिम्नामपि भगवन्महिमावलंबित्वात् कृष्णकथामृतौघ एवासौ इति यतोऽतः तेषां भागवतानां कृष्णस्य च कथामृ तौघात् कृतात् न तृप्नुमः। तात्पर्यज्ञाने सति कृष्णकथामृतौघत्वं कुत इति तत्राह कर्णेति कृष्णकथामृतौघस्यैव कर्णसुखावहत्वेनान्यस तो घात् कृतात् न तृप्नुमः। तात्पर्यज्ञाने सति ... नितिरूपं न तु क्तत इति अव्ययं तदंगीकारे तेभ्योऽनतृप्नुम इति प्रयोगः स्यात्र हुते तस्य कर्णकर्कशत्वमित्यर्थः। अगता विनिधातो निर्दिष्टा तत्सृतमिति ... षामिति ग्रंथांतरे भारतस्य प्रशंसानुपपन्नेश्च १०

इतोपि श्री कृष्णस्य गुणगणकथामृतस्य पात्रीभूतात् भारतात्तत्कस्यापि तृप्तिरित्याह। कस्तृप्नुयादिति। वायुप्रमुखेषु सत्रेषु सूरिभिरीड्यमाना त्स्तूयमानात्तीर्थपदो हरेरभिधानात् नामसंकीर्तनात् रसज्ञः कः पुरुषः तृप्नुयात् अलमिति बुद्धिं कुर्यादित्यन्वयः। अलं बुद्ध्यभावे हेतुमाहा यः तीर्थपात् पुरुषस्य कर्णनाडीद्वारा हृदयगुहां प्रविष्टः संसारभयप्रदां गेहरतिं गृहजायापुत्रादिस्नेहलक्षणां रतिं छिनत्ति तस्येति शेषः ११ यन्न्यायात्सुखानुवादिशास्त्रं तस्य श्रवणीयं भारतस्य ग्राम्यसुखानुवादित्वेन पुरुषार्थानुपयोगित्वादिति तत्राह। मुनिरिति। गुणानामिति

कस्तृप्नुयात्तीर्थपदोभिधानात्सत्रेषु वः सूरिभिरीड्यमानात्। यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ११ मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः। यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथा यां १२

ष्ठी द्वितीयार्थे। भगवद्गुणान्वक्तुकामस्तव सखा मुनिः सर्वज्ञोपि कृष्णः भारतमाह। ननु गुणान्वक्तुकाम एव तत्तत्वं पृथग्ग्रंथो ग्राम्यसुखानु वादेन नृणां मतिर्गृहीतेति तत्राह। यस्मिन्निति। यस्मिन्भारते तापिश्रवणादिना सम्माने सति नृणां मतिर्ग्राम्यसुखानुवादैर्गृहीता हरेः कथा यामेव गृहीता भारतात्परं विष्णोर्महिमावाचकं किं चित् भारतात्तु विरागाय भारतान्विमुक्तये इति वचनात् सत्यकामेन हरिणा विवक्षिता गुणा भारते कथिता इत्यत इदमेव शास्त्रं मुमुक्षुभिरभ्यसनीयमित्यविगीतं १२ राम

अक्रहरेः कथायां गृहीता नृणां मतिः तत किं फलं विधत्त इतितत्राह। साश्रद्दधानस्येति। ग्राम्यसुखानुवादैर्नगृहीता हरेः कथायां विवर्द्धमाना सा श्रद्दधानस्य पुंसो मतिरन्यत्र विषयेषु विरक्तिं करोतीति प्रथमं वैराग्यं पश्चात् तीव्रभक्तिलक्षणं तत्तीयमुपासनाजनिता परोक्षज्ञानं चतुर्थं समस्तसंसारदुःखोच्छेदेन परमानंदलक्षणं मोक्षाख्यं फलं करोति। एतदेवाह हरेरिति। सदानुस्मृत्या जाता परोक्षज्ञानेन निर्वृतस्य संप्रज्ञातसमाध्यवस्थासुखं प्राप्तस्याशुकालक्षेपमंतरेण १३ व्यतिरेकमुखेन हरेः कथायाः दुःखाप्ययहेतुत्वमाह। तानिति। अविदोज्ञानदुर्बलात्

ये

साश्रद्दधानस्य विवर्द्धमाना विरक्तिमन्यत्र करोति पुंसः॥ हरेः सदानुस्मृतिनिर्वृतस्य समस्तदुःखाप्ययमाशु धत्ते १३
तां छोच्यशोच्यानविदोनुशोचे हरेः कथायां विमुखानघेन। क्षिणोति देवो निमिषस्तु येषामायुर्वृथावादगतिस्मृतीनां
१४ तदस्य कौषारवशर्मदातुर्हरेः कथामेव कथासु सारं। उद्धृत्य पुष्पेभ्य इवार्त्तबंधो शिवाय नः कीर्त्तय तीर्थकीर्त्तेः १५

घेन व्यसनेन आत्मनः शोकाधिकरणत्वं यथार्थं न मिथ्याभूतमिति द्योतयितुं अनुशोच इत्यात्मनेपदप्रयोगः। अनिमिषो देवः कालात्मा विष्णुः। वृथावादा वृथागतिः वृथा स्मृतिश्च येषां ते तथा तेषामायुर्वृथा क्षिणोतीति वा। तदावादो विवादः तत्सहितेगतिस्मृती येषां ते तथा तेषां न हरिकथावतां च वृथेति विशेषद्योतकस्तु शब्दः १४ स्वार्थप्रश्नमुपसंहरति। तदिति। हरिकथाविमुखा व्यर्था युष्वइति यस्मात् तस्मात् अर्थयथा सत्वमानानां पापं क्षिणोतीति तथा हरेः कीर्त्तिरपि ताद्दशी तीर्थरूपा कीर्त्तिर्यस्य स तथा तस्य नान्यकथा शिवसाधनमित्यस्मिन्नर्थे एवशब्दः १५

सारकथापि सृष्ट्यादिविषयलीलैवेत्याशयेनाह। स इति। पुरुषा ब्रह्मादयः तत्कर्मातिक्रांतानि अतिपूरुषाणि कृतवासुदेवाद्यवतारः सृष्ट्यादिकर्त्तारो ब्रह्मरुद्राविति भ्रांतिनिवारणार्थं ईश्वर इत्युक्तं ब्रह्मशिवेशनशील ईश्वर इत्यर्थः। प्रगृहीतसृष्ट्यादीच्छाशक्तिः। वशीकृतप्रकृतिशक्तिर्वा। स्पष्टं। मैत्रेयो विदुरप्रश्नपरिहारं वक्तुमुपक्रमत इत्याह शुकः। एवमिति। निःश्रेयसार्थाय मोक्षादिपुरुषार्थाय १७ बहुमानप्रकारं वक्ति॥ साधि

स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः। चकार कर्माण्यतिपौरुषाणि यानीश्वरः कीर्त्तय तानि मह्यं १६ श्रीशुक उवाच स एवं भगवान् पृष्टः क्षत्त्रा कौषारविर्मुनिः। पुंसां निःश्रेयसार्थाय तमाह बहुमानयन्
१७ मैत्रेय उवाच साधु पृष्टं त्वया साधो लोकान् साध्वनुगृह्णता॥ कीर्त्तिं वितन्वता लोक आत्मनोधोक्षजात्मनः
१८ नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे। गृहीतो नन्यभावेन यत्त्वया हरिरीश्वरः १९

ति। अधोक्षजे हरावात्मा मनो यस्य स तथा तस्य आत्मनो मम स्वस्य परमात्मनो वा १८ तवेतद्विषयप्रश्न उचित एवेति कथयति। नैतदिति। यादृशो भावो विष्णोरन्यस्मिन् वस्तुनि नास्ति तादृशो भावो नन्यभावस्तेन सर्वोत्तमत्वज्ञानपूर्वकबहुमानेनेत्यर्थः। हरिरीश्वर इत्येतौ शब्दावन्योन्यव्यावर्त्तकत्वेन प्रयुक्ताविति ज्ञातव्यं १९

देवयोनित्वात्तव हरिकथाप्रश्नो नाश्चर्यकर इति भावेन कथयति। मांडव्येति। भ्रातुः क्षेत्रे भ्रातुर्विचित्रवीर्यस्य क्षेत्रे वीर्याधानयोग्यायां भुजिष्यायां दास्यां सत्यवतीसुताज्ज्ञातः प्रजासंयमनो यमो भवानिति यस्मात् २० किं च स्वधाम व्रजन्भगवान् ज्ञानोपदेशाय मामादिशदिति यस्मात्तस्माद्भवान्सानुगस्य भगवतो नित्यं प्रियत्वेन संमतो ततो युक्त इति भावः। हिशब्देन संमतत्वे प्रसिद्धिं द्योतयति २१ श्रोतुरभिमुखीकरणार्थं वक्तव्यार्थं प्रतिजानीते। अथेति। योगमायोपबृंहिताः स्वरूपसामर्थ्योपेताः २२ भागवतटीकायां तृतीये पंचमः भगवानेकः इदमग्रे अस्याग्रे आत्मा परमात्मा

मांडव्यशापात् भगवान्प्रजासंयमनो यमः॥ भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात् २० भवान्भगवतो नित्यं संमतः सानुगस्य हि। ज्ञानोपदेशाय च मामादिशत् भगवान्व्रजन् २१ अथ ते भगवल्लीला योगमायोपबृंहिताः। विश्वस्थित्युद्भवांतार्था वर्णयाम्यानुपूर्वशः २२ इति श्रीभागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे पंचमोऽध्यायः मैत्रेय उवाच भगवानेक आसेदमग्र आत्मात्मनां विभुः। आत्मेच्छानुगतो ह्यात्मा नानामत्युपलक्षितः १

आत्मनां जीवानां विभुरधिपतिः आत्मा दानादिकर्ता। आत्मेच्छां स्वरूपभूतां सृष्टीच्छामनुगतः सिसृक्षामीति भावमुपगतः। तदुपकरणाभावे द्रष्टा वदनो छावततद्दिक्षापि मर्थीनेत्याह नानाशक्तीति। स्वाधीननानाशक्त्येनोपलक्षितः। नानामत्युपलक्षित इति पाठे सदेव सोम्येदमग्र आसीदेकमेवेदमग्र आसीदित्यादिश्रुतितात्पर्यार्थी ज्ञानि नानावादिमतोपलक्षित इत्यर्थः। सतोऽस्य सुमसतिनिरविंदन्नित्यादिश्रुतेः असत्वमतमासुरमिति

एकस्य सतो हरेः सृष्टीच्छोत्पत्तिप्रकारमाह॥ स वा इति। योऽसावेकराडेकोऽनाविकवर्ती स एष तदा प्रलये विश्वं नापश्यत् सर्वकार्याणां मूलप्रकृतौ लीनत्वादिति शेषः। दर्शनशक्त्यभावादित्यत उक्तं द्रष्टेति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति श्रुतिर्वा इत्यनेन न गृहीता। असुप्तदृगित्यनेनैतदेव विव्रियते। जीवानां नित्यत्वेनालीनत्वात्तद्दर्शनसंभवात्कथं नापश्यदिति तत्राह मेन इति। आत्मानमिति ज्ञातावेकवचनं। परमात्मा यतो जीवं मेनेऽसंतमशक्तत इति वचनादसत्वमशक्तत्वमेव न तु स्वरूपातिरेकेणासत्वं। पुरुषश्चासीदिति श्रुतेः। क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मत इत्यभिधानं। सुप्ता आत्मन्येवातीवरता शक्तिः शक्यत्वाद्भार्या रमा यस्य स सुप्तशक्तिः। तदुक्तं। शक्यत्वाच्छक्तयो भार्याः शक्तिः सामर्थ्यमुच्यत इति। सुप्तिश्च

स वा एष तदा द्रष्टा नापश्यत् विश्वमेकराट्। मेनेऽसंतमिवात्मानं सुप्तशक्तिरसुप्तदृक् २
सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका। माया नाम महाभाग ययेदं निर्ममे विभुः ३

कृतेः प्रोक्ता अतीव भगवद्रतिरिति वा। अनेन प्रकृतिदर्शनमपि प्रत्युक्तं पृथगनवस्थानात् हरिरपि निद्रामुद्रितनेत्रत्वेन नापश्यदिति किं न स्यादित्यत उक्तं। असुप्तदृगिति। क्वापि तयोः व्यमानस्य का गतिः अनास्थान्यत्र च प्रोक्ता विश्वोऽस्य स्तुर्निमीलनमिति वक्तव्या २ शक्तेर्नामाह सा वा इति महानुभागो भाग्यसमूहो यस्य स तथा महती भां प्रतिभांगश्चेतीति महाभागो वा तस्यासंबुद्धिर्महाभागेति एतस्य संद्रष्टुः सर्वदर्शनशक्तिमतो नारायणस्य या प्रलये सा युज्यं प्राप्य रमते सा शक्तिर्भार्या नाम सर्वप्रधानत्वान्नामया विश्वं प्रत्यस्येयं माया। वा पीदेशब्दः सा जडात्मिका शक्तिश्च माया नाम। स विभुर्ययेदं जगन्निर्ममे। कीदृशी सदसदात्मिका आद्या महदादिकार्यकारणव्यापिनी द्वितीया तद्रूपा ३

ययेदं निर्ममे जगदित्युक्तं प्रपंचयति। कालवृत्त्येति। जगृहे योऽद्भुतरूपं इत्यादिना स्वेच्छाकल्पितमूलरूपाविर्भूत पुरुषरूपेणाधोक्षजः कालेन पुरुषादृष्टापाक्यफलपा यथेदं निर्ममे जगदित्युक्तं प्रपंचयति। कालवृत्त्या मितिः प्रकृतेः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् इत्यत्र क्षोभलक्षणा वृत्तिः। गुणमय्यां सत्वादिगुणाभिमानिन्यां। इतरत्र तद्रूपायां मा चकेन वृत्तिः सिसृक्षत्वादिलक्षणा यस्याः स्थितनाम्नः स्तात् थोक्ता॥ अन्यत्र क्षोभलक्षणा वृत्तिः। गुणमय्यां सत्वादिगुणाभिमानिन्यां। इतरत्र तद्रूपायां मा यायां चेतनायामचेतनायां च वीर्यं रेतः आरंभपरिणामकरं सामर्थ्यं चाधत्त तु शब्देनोत्तयोर्महावैलक्षण्यं व्यक्ति। वीर्यवानिति हरेर्नपुंसकरूपं नास्तीति लक्ष यति। नैनं वा स्त्रियं ब्रुवन्नेनमस्त्री पुमान् ब्रुवन्निति श्रुतेः। यद्वा स्वेनाहितवीर्यस्य जनकत्वशक्तिं द्योतयति ४ नहि लोके वीर्यमादधानाः कार्यं जनयं तो दृश्यंते। न चैवमयं तत्कुतः कार्योत्पत्तिदर्शनादित्याह तत इति। यत्र वीर्यमाहितं ततो माया अव्यक्तनो महत्तत्वं च चतुर्मुखशरीरमभवत्। मायाया नामां

> कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ४ राम
> ततो भवन्महत्तत्वमव्यक्तात्कालचोदितात्। विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदन् ५

तरमाह। अव्यक्तादिति। अतिसूक्ष्मत्वादव्यक्तात्। कालेन सकलप्राण्यदृष्टसाक्षिणा पुरुषेण स्वस्य द्वेधकेन वचोदितात् प्रेरितात् अभिमानिनोऽभिमा नात् उत्पादेश शरीरोत्पादोऽयमर्थ इति तत्राह विज्ञानात्मेति। विज्ञानात्मा ब्रह्मा च ततो व्यक्ताभिमानित्वात्तत्राभ्रामरमात्मा तत्कूटस्थाद्धृतसरीयोऽयं देह इत्य नाद्युत्पादेश शरीरोत्पादो यमर्थ इति तत्राह विज्ञानात्मेति। विज्ञानात्मेतिपदं अभिमानोत्पत्तेः किं लक्षणमत्राह। आत्मदेहस्थमिति भिमानोत्पत्तिमानभूदित्यर्थः। उत्पत्तेः प्राग विज्ञाननाशो नास्तीति द्योतनार्थं विज्ञानात्मेतिपदं अभिमानोत्पत्तेः किं लक्षणमत्राह। आत्मदेहस्थमिति। निरालोके कथमिदं व्यज्यत इत्यत उक्तं तमोनुदन्निति। नारायणप्रसादप्रादुर्भूतज्ञानलक्षणप्रकाशेन सूर्य इव तत्काल भवं तमो नुदन्नभिव्यंजयन्सूर्यवत् वर्तमान इत्यर्थः। शरीरनिमित्तज्ञानिरहितो वाऽस्याभिमानरहितो वा ५

प्रपंचपंचीकरणप्रकारं प्रपंचयति। सोपीति। स आत्मा महतत्वाभिमानी विरिंचोपि। अंशो जीवो गुणाः सत्वादयः कालः फलप्रवर्तकः एषामात्माभि मानी। भगवतो हरेर्दृष्टेः कटाक्षवीक्षणस्य गोचरो विषयोऽस्य प्रपंचस्य सिसृक्षया ऽत्मानं स्वकीयत्वेनाभिमन्यमानं महत्तत्वं व्यकरोत् परिणामो न्मु खं कृतवान् चैतन्यस्याविकारित्वेन अत्र आत्मपदं न चैतन्यवाचि किंतु देहवाच्येव। कालजीवगुणादीनामभिमानी चतुर्मुख इति वचनाद् दंशगुण

> सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः। आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ६ महत्त
> त्वाद्विकुर्वाणादहंतत्वमजायत। कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः ७

कालात्मेत्यत्रात्मपदेनाभिमानित्वमुच्यते न देहः। क्वचिच्च हिरण्यगर्भस्यांशशब्दवाच्यत्वमंगीकर्तव्यं। सर्वजीवाभिमानित्वादंश इत्येव वचो व्यान इति वचनात् ६ अहंतत्वमजायतेत्यत्र जडाजडस्योत्पत्तिरभिमानिनो गरुडादय उद्भूवन्निति तात्पर्यं ग्राह्यं। भूतं भूताभिमानी चेति वचनात् तत्स्व रूपमाह। कार्येति। कार्यं शरीरं कारणानींद्रियाणि कर्ता मनः एषामात्माऽऽदिकारणं किमुक्तं तत्राह भूतेति। भूतेंद्रियमनसां भवत्युत्पत्तिर्यस्मात्

भा·त·
२६

भूतादीनां त्रयाणां अहंकारस्य कारणस्य नामभेदेन त्रित्वमाह। वैकारिक इति। अधुना त्रित्वसंख्याविशिष्टाहंकारात् पृथक् पृथक् सृष्टिभेदमाह। अ
हंतत्त्वादिति। अंशगुणकालानामीशस्य वशेरणया विकुर्वाणादहंतत्त्वाद्वैकारिकनाम्नो मनस्तत्त्वमभूदित्यन्वयः ८ यतो येभ्योऽर्थानां विषयाणा
मभिव्यंजनं तद्विषयज्ञानं भवति ये इंद्रियाभिमानिनो वैकारिकनामानो देवास्ते च वैकारिकादहंतत्त्वादभूवन्निति संबंधः। ज्ञानकर्ममयानि ज्ञान
प्रधानानि श्रोत्रादीनि कर्मप्रधानानि वागादीनि च तैजसान्येव तैजसादहंकारादेवोत्पन्नानि नान्यस्मादहंकारादित्यन्वयः ९ तामसाहंकाराद्भू

वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा। अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ८ वैकारिकाश्च ये दे
वा अर्थाभिव्यंजनं यतः। तैजसानींद्रियाण्येव ज्ञानकर्ममयानि च ९ तामसो भूतसूक्ष्मादिर्यतः खं लिंगमा
त्मनः १० कालमायांशयोगेन भगवद्वीक्षितं नभः॥ तामसानुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलं ११

तसूक्ष्माणामादिः कारणं। शब्दादितन्मात्रास्तामसादहंकाराज्जाता इत्यर्थः। तत्र कीदृशी शब्दतन्मात्रा। यतः यस्याः शब्दतन्मात्राया आत्म
नो हरेर्लिंगं गमकं प्रमाणं खं समुत्पन्नमित्यन्वयः १० कालमायांशयोगेन कालस्य सृष्टिविशिष्टस्य मायायाः प्रकृतेरंशस्य जीवाभिमानिनश्च
तुर्मुखस्य संनिकर्षेण लक्षणसंबंधेन भगवता वीक्षितं कटाक्षितं। तामसानुसृतं तस्य कारणतामसाहंकारेणानुसृतं। अत एव विकुर्वन्नभः स्प
र्शं स्पर्शतन्मात्रां निर्ममे। तस्मात्स्पर्शादनिलं वायुं निर्ममे ११

राम
२६

कालादिसहकारिणा नभसा स्वकारणेनानुसृतत्वादुरुबलान्वितो विकुर्वाणोऽनिलो रूपतन्मात्रं ससर्ज। तन्मात्रया लोकस्य लोचनं प्रकाशकं लुच प्रका
शन इति धातुः। ज्योतिस्तेजस्तत्त्वमस्राक्षीत् १२ रसमयं रसतन्मात्राकार्यं परेण हरिणा वीक्षितं। कालमायांशयोगतः कालात्परिणामात्माया
याः प्रकृतेरंशाद्धिरण्यगर्भाच्च १३ गंधात्मा गुणो यस्यास्तां गंधगुणकार्यमित्यर्थः १४ विशेषगुणत्वाच्छब्दादेर्नभआदिव्यावर्तका इति य

अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः॥ ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं १२ अनिलेनान्वितं
ज्योतिर्विकुर्वत्परवीक्षितं॥ आधत्ताम्भो रसमयं कालमायांशयोगतः १३ ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वत्प
रवीक्षितं॥ महीं गंधगुणामाधात्कालमायांशयोगतः १४ भूतानां नभआदीनां यद्यद्द्रव्यं परात्परं॥ ते
षां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः १५

द्वैशेषिकमतं तन्निराकरोति॥ भूतानामिति। नभआदीनां भूतानां मध्ये यद्यत्परात्परस्मात्पूर्वस्मात्परं पश्चात्तयद्द्रव्यमुत्पाद्यं तेषां परानुसंस
र्गात् पूर्वेषां कारणानामनुप्रवेशान्तरकार्येष्वनुप्रवेशात् यथासंख्यमेकद्वित्र्यादिसंख्याविशिष्टान् शब्दादीन् गुणान् विदुः वैशेषिकादितर इति शे
षः १५

ब्रह्मांडोत्पत्तिप्रकारं वक्तुं महदाद्यभिमानिदेवानां कृतिप्रकारं कथयति। एते देवा इति। ये महदाद्यभिमानित्वेन हरिणा सृष्टाः एते ब्रह्मादयो देवा विष्णोरंशा कुरित्यन्वयः। कीदृशा विष्णोः कलाः भिन्नांशाः कालनिमित्तेन मायानिमित्तेनांशनिमित्तेन च लिंगं शरीरमेषामस्तीति कालमायांशलिंगिनः अत्रैक एवैवविरिंचस्य कालांशाभिमानिरूपद्वयमस्तीति याह्यं। कालजीवाभिमानेन रूपद्वंद्वी चतुर्मुख इति वचनात्॥ कुतो निमित्तमाह। नानात्वादिति। नानात्वाद्दश्लिष्टत्वात् स्वक्रियायां ब्रह्मांडोत्पादनक्रियायामनीशा असमर्थाः शिरसि प्रकृष्टेनांजलियेषां ते तथा २६ किमूचुरिति तत्राह॥ नताः स्मेति। ते तव प्रपन्नानां पुंसामाध्यात्मिकादितापोपशमाय आतपत्रमिव स्थितं। आतपात्त्रायत इत्यातपत्रं छत्रं। न केवलं तात्कालिकतापनिवारणं

एते देवाः कला विष्णोः कालमायांशलिंगिनः॥ नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुं २६ देवा ऊचुः नताः स्म ते देव पदारविंदं प्रपन्नतापोपशमातपत्रं। यन्मूलकेता यतयोंजसोरुसंसारदुःखं बहिरुत्क्षिपंति २७ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिहता न शर्म। आत्मन्लभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम २८

पदुत अनादिसंसारदुःखनिवारणसमर्थमपीति भावेनाह। यन्मूलेति। यत्पदारविंदमेव मूलं केतनमधिष्ठानं गृहं येषां ते तथा॥ यतयो निर्जितेंद्रिया अंजसा अनुमार्गेण संसारारंभ दुःखं हृदयग्रंथिलक्षणं बहिरुत्क्षिपंति निर्मूलयंति २७ ईशत्वाणिमादिश्वर्यैश्वर्यमूर्ते। अस्मिन्भवे संसारे जीवाः बंधमोक्षोपायभूतपादारविंदस्थेते तत्सेवां विना त्वमन्नात्मनि शर्म न लभंते यद्यस्मात् हे भगवंस्तवांघ्रेः छायायाः ब्रह्मविद्यायां अंशविद्यामेकदेशविद्यामाश्रयेम। ब्रह्मविद्या हरेश्छाया तदंशो हि सुरेष्वपि। सर्वविद्याश्रियः प्रोक्ताः प्रधानांशश्च वतुर्मुख इति वचनात्। येम्यतातारतम्यमपेक्ष्यांशविद्यामित्युक्तं अनेन अतिरेकन्यायो दर्शितः २८

इतोपि भगवत्पादत्वानमेव स्वाभीष्टसाधनमिति भावेनकृवंति। मार्गंतीति। अथ योब्रह्मादिज्ञानिनो विविक्ते स्थित्वा मुखपद्मनीडैः मुखपद्ममेव नीडं येषां ते तथा तैः। छंदांसि वेदा एव सुपर्णाः पक्षिणस्तैस्तैस्तव यत्पदं मार्गंति अन्विच्छंति विचारयंति। अद्यापि मृग्यं यत इति वा। यच्च यस्मात् प्रपन्नानामघमर्षः दुःखनाशः स्यात् यच्च द्युसरितो धुन्याया अपरं पदं वयं तीर्थपदस्तैत तव पदं प्रपन्नाः इत्यन्वयः २९ एतत्पदमेवाभीष्टसाधनमाह॥ यच्छ्रद्धयेति संमृज्यमाने सम्यक्शोध्यमाने अवधार्य संनिधाप्य वैराग्यमेव बलं यस्य तत्तथा तेनांघ्रिसरोजाख्यं पीठं ३० हरेर्विक्रमो लोकोपकाराय न स्वार्थ

मार्गंति यत्ते मुखपद्मनीडैः छंदःसुपर्णैर्ऋषयो विविक्ते। यस्याघमर्षोदसरिद्वरायाः परं पदं तीर्थपदः प्रपन्नाः २९ यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेवधार्य। ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंघ्रिसरोजपीठं ३० विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते। व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ३१ यत्सानुबंधेसति देहगेहे ममाहमित्यूढ दुराग्रहाणां॥ पुंसां सुदूरं वसतोपि पुर्यां भजेम तत्ते भगवन्पदाब्जं ३२

र्थं यस्मात् अतः स्मरणमात्रेण प्रीतो मदभीष्टं करोतीति भावेन कृवंति विश्वस्येति। तव यत्पदांबुजं स्मृतं स्वपुंसामभयं प्रयच्छति सर्वे तच्छरणं व्रजेमेत्यन्वयः॥ कृतावतारस्य गृहीतपुरुषादिरूपाद् दुर्भावस्य ३१ हरेः पदं विरक्तैकलभ्यमिति भावेन कृवंति। यत्सानुबंध इति। सानुबंधे पुत्रादिपरिकरसहिते असत्ये मंगले देहे गेहे जातिभिन्ने देहे अहमिति गेहे मम इति वोढ दुराग्रहाणां दुष्टज्ञानस्य वोढॄणां पुंसां पुर्यां देहे वसतोपि तव यत्पदांबुजं सुदूरमस्ति तं भगवंस्तेत्पदांबुजं भजेमेत्यन्वयः ३२

भा·त·
२८

निकटवर्तिनो हरेर्दर्शनासंभवे किं कारणमिति तत्राह। तं त्वामिति। यस्त्वमेवमुक्तमहिमा अथो तस्मात्तं त्वां नूनं निश्चयेन न पश्यंतीत्यन्वयः। असद्भिरिन्द्रियैः। पराहृतं बहिः कारितं मंतः स्थितं मनो येषां ते पराहृतांतर्मनसो ये यद्यस्मात्। अंतः स्थितं प्रत्यगात्मानं विषयीकर्तुं योग्यमिति सूचनायां तरिति विशेषणं। कीदृशं न्यासेन सकलकर्मणां परब्रह्मार्पणेन विलासो येषां ते न्यासविलासाः तेषां लक्ष्म्याः लक्ष्म दर्शनाकनयोरि

तं त्वामसद्भिरिन्द्रियैः पराहृतांतर्मनसः परेशात्॥
अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः
२३

राम
२८

तिधातोर्दर्शनस्य पदं विषयं। अनेन परमहंसाश्रमस्था एनं पश्यंतीत्युक्तं। युडागमो ऽडीपतत्वज्ञानस्यातिशयस्त्वयतः। पदयोर्न्यासो भुवि निक्षेपविशेषः तस्य विलासलक्ष्म्याः पदमिति द्विरावृत्यान्वेतव्यं। अनेन पदविषयाकृतिर्युक्तेति शंका निरस्तेति ज्ञातव्यमिति वा २३

एवंविधस्य हरेरपरोक्षज्ञानसाधनोपासना द्विविधा। ध्यानरूपा वेदांतशास्त्रश्रवणादिलक्षणा वा। तत्र द्वितीयप्रवृत्यर्थं प्रथमा क्लेशसाध्या द्वितीया सुखसाध्येति उभे विशिनष्टि॥ पानेनेति। हे देव ते कथासुधायाः पानेन श्रवणादिलक्षणेन प्रवर्द्धमानया भक्त्या विशदाशयाः निर्मलांतःकरणाः वैराग्यसारं वैराग्यफलं बोधमपरोक्षज्ञानं प्रतिलभ्य प्राप्य अंजसा अनुमार्गेण अकुंठधिष्ण्यं अप्रतिहतवैकुंठादिस्थानं अपरिच्छिन्नस्वरूपं वा
यथा ईयुः २४ तथापरे ये ऽन्ये योगिनः यमनियमादियोगनिष्ठा आत्मसमाधियोगबलेन परमात्मचित्तैकाग्र्यलक्षणध्यानसामर्थ्येन बलि

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये। वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुं
ठधिष्ण्यं २४ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठां॥ त्वामेव धीराः पुरुषं विशं
ति तेषां श्रमः स्यान्न तु सेवया ते २५ श्रीराम

ष्ठामन्यसाधनाजेयां प्रकृतिं बंधकशक्त्यभिमानिनीं प्रसाद्य जित्वा धीरा धीरा अरममाणा अपरोक्षज्ञानिनः पुरुषं पूर्णषड्गुणं त्वामेव विशंति। तुःस्या द्देवधारणाद्यति वचनात्तत्र तेषां योगिनां श्रमः स्यात् ध्यानयातेन च श्रवणादिरूपया सेवया न तु नैव श्रमः स्यात् किंतु सुखमेवेत्यन्वयः। अत्र प्रकृतिजयो नाम तत्प्रसादैकलभ्यो नान्यः। तदुक्तं। वायोश्च प्रकृतेर्विष्णोर्जयो भक्त्यैव नान्यथेति २५

भा-त्व-
२८

कृत्वा प्रसन्नीकृत्य हरिं स्वाभीष्टं विज्ञापयंतीत्याह। तत्तेवयमिति। यस्मात्त्वं लोकदयालुस्तस्मात्त्वया लोकसिसृक्षया त्रिभिरात्मभिः कालमा
यांशैर्विसृष्टा ये ते वयमद्य सर्वे वियुक्ता विश्लिष्टाः स्वविहारतंत्रं स्वस्य नवक्रीडोपकरणं यत्तद्ब्रह्मांडं तत्प्रतिकर्त्तवे शतिकर्तुं न शक्नुम इत्यन्व
यः २६ ब्रह्मांडनिर्माणे न प्रयोजनमाहुरित्याह। यावदिति। यावत्त्वबलिं तत्काहराम यावन्यर्पितं ब्रह्मांडमुत्पाद्य तस्मिन्स्थित्वा त्वद्विषयज्ञा

तत्तेवयंलोकसिसृक्षयाद्यत्वयाविसृष्टास्त्रिभिरात्मभिर्यै। सर्वेवियुक्ताःस्वविहारतंत्रंनशक्नु
मस्तत्प्रतिहर्त्तवेते २६ यावत्बलिंतेःजहरामकालेयथावयंचान्नमदामयत्र। तथोभयेषां
तइमेहलोकाबलिंहरंतोन्नमदंत्यनीशाः २७

राम
२९

नकर्मलक्षणं बलिमुपहारं समर्प्यतर्प्ययामः। यत्र ब्रह्मांडे स्थिता वयं काले काले यथान्नमदाम स्वविषयेषु त्वद्यद्वहराम तथोभयेषामस्मा
कं युष्माकं च बलिं हरंतः समर्प्यंत इमे ऽनीशा अस्मत्प्रेरणामंतरेणाप्रवृत्ता वसमर्था लोकाः जनाः अन्नं ज्ञानकर्मलक्षणमदंति तादृश
ब्रह्मांडनिर्माणोपायं कुर्विति वाक्यशेष इत्यन्वयः॥ तादृशमंडं कर्तुं न शक्नुम इति पूर्वेण संबंध इति वा। अजविभो अनादिविस्तुहरच्छागाइत्य

किमिति मां प्रत्येतद्विज्ञापनमन्यस्यैतस्मादितितत्त्रैवमूचुरित्याह॥ त्वन्न इति। आद्यः आदेरुत्पत्तेः कर्ता पितृत्वात्त्वं विज्ञापयाम इति भावः। अस्म
त्पदं विशिनष्टि। सुराणामिति। न केवलमस्माकमेव जनयिता किं त्वस्मत्संततीनामिति भावेनोक्तं सान्वयानामिति। त्वं क इति पुराणः पुरुषः
श्रीनारायणः। पितुरपि देहरूपेण विकारदृष्टेः स्वहितकारी वयमिति शंका माभूत् कूटस्थः विकारकूटेषु तिष्ठति न तु विकारवान्। हरेः पितृस्था
नीयत्वं स्पष्टयितुमाहुरित्याह। त्वं देवेति। हे देव त्वं कविरतिक्रांतदर्शी। अजश्च देव यस्त्वं तद्भवतो गर्भाधानादिकर्माण्यसंभावितानि तथापि

त्वन्नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः॥ त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेजः॥२८
॥ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किंते॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहेण २९
इतिश्रीभागवते महापुराणे तृतीयस्कंधे षष्ठोध्यायः ॥राम॥ ॥

भवान्नु शक्त्यां भार्यायां सत्वादिगुणानां कर्मणामदृष्टानां योनौ कारणभूतायामजायां जननधर्मरहितायां विदचित्स्वरूपे रेतो गर्भमादध इत्यन्व
यः। तु शब्देनोभयेषां महान्विशेषोस्तीति सूचयति २८ ततस्तस्याः प्रकृतेर्वयं सत्प्रमुखा महत्तत्वमुखा बभूविम॥ ततः किं तत्राहुः यदर्थ इ
ति। आत्मन्हे स्वामिन्यदर्थं यस्य योजनाय बभूविम तदर्थं ते तव किं करवाम वियुक्ता अस्वतंत्रा यस्मात्तस्मात्त्वं च चक्षुर्ज्ञानमंडनिर्माणोपायविष
यं परिदेहि। कीदृशं तत्राहुः शक्त्या इति। यस्य ज्ञानस्य अनुग्रहेण क्रियार्थं ब्रह्मांडनिर्माणाय शक्ताः स्यामेत्यन्वयः। २९ तृतीये षष्ठोध्यायः

भा॰त॰
३१

एतदेव स्पष्टयति। परेणेति। क्षुब्धो भवस्रष्टा अकारेण विकृतवान्। यस्मिन्नंडे उत्पन्नः ५ प्रथमसृष्टाण्डशरीरस्थदेशो हरेरनंतभोगिनश्चेतनस्येति दर्शयितुकामस्य हरेरंडप्रवेशमाचष्टे। हिरण्मय इति। यस्य प्रेरणया तत्वगणोंऽडमजनयत्स हिरण्मयो ज्ञानानंदात्मकस्वरूपावयवानुप्र रूपाख्यो हरिरंडकोशेऽण्डकोशस्थासु अंडकोशस्थोदके शेषपर्यंके सहस्रपरिवत्सराननुवासेत्यन्वयः। प्रलये सर्वचेतनानां परमचेतने नैकी भाव इति शंकां निवारयति। सर्वेति। सर्वसत्वैः सर्वजीवैरुपबृंहितो न त्वेकीभूतः अनेन निर्देहानां चेतनानां प्रलयावस्थानेकत्वमिति शंका निरस्ता।। परमात्मन्यवस्थानोपपत्तेः ६ स्थितस्तोर्हे गर्भो दके वहुकालव्यापकेन निवासेन सृष्टिकथोपरतेति शंकां परीक्षितो हार्दीप

परेण विशता स्वस्मिन् मात्रया विश्वसृग्गणः। क्षुब्धोऽन्योन्यमासाद्य यस्मिन् लोकाश्चराचराः ५ हिरण्मयः स पुरुषः सहस्रपरिवत्सरान्। आंडकोश उवासाप्सु सर्वसत्वोपबृंहितः ६ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान्। विबभाजात्मनात्मानमेकधा दशधा त्रिधा ७

राम
३१

रिहरणं डांतर्वर्तिनो हरेर्विक्रमविशेषमाह।। स वा इति।। यो गर्भो दके शेषपर्यंके शयानः स विश्वसृजां ब्रह्मांडसृष्टवतां तत्वानां गर्भोंतर्या मी देवं ब्रह्मादिदैवतेष्वाधिकं कर्म प्राणप्रदं सुखदुःखभोगसाधनमात्मशक्तिः प्रकृतिः नित्यमेतैर्युक्तत्वाद्देवकर्मात्मशक्तिमान्।। ब्रह्मणो विराडाख्यं शरीरं सृष्ट्वा तत्र विश्यात्मना परप्रेरणामंतरेण स्वेच्छयात्मानं तद्देहहृदयादिनियामकत्वेनैकधा दिविबभाज विभक्तवानित्यन्व यः।। वा इत्यनेनोक्तार्थस्य ग्रंथांतरप्रसिद्धिद्योतकेन विश्वसृजां गर्भः कार्यात्मा नैमंडरूपमेकधादिभेदेन विबभाजेत्येतदपव्याख्यानं प त्याख्याति। स्वतो चेतनस्य कार्यकरणत्वशक्त्यदर्शनात् अप्रसिद्धत्वाच्चेति ७

ननु विश्वसृजां गर्भः आंडकोश एव भवेदेष ह्यशेषसत्त्वानामात्मेति सर्वप्राणाधारत्वेन परामर्शान्न दर्शसृष्टत्वाच्चेति तत्राह। एष हीति।। नायमंडकोशस्य परामर्शः किंतु पुरुषेणात्मभूतेनैवी र्यमाधत्त वीर्यवानिति यः पुरुषाख्यो हरिरभिहितः स एष इति परामृश्यते। प रमात्मनोंऽश इत्युक्तत्वादाद्योऽवतार इत्यवतारशब्देन विशेषितत्वाच्च न ह्यंडकोशस्य हरेरवतारत्वनिर्देशः क्वचिद्दृष्टः श्रुतो वा तथा चाय मत्रार्थः। यो महदादितत्वानि सृष्ट्वा तेषामंडसृष्टावस्वातंत्र्यप्रकाश्यात्मानं तेष्वाविश्य तदनुग्रहाय सर्वचेष्टकरूपेणारमयास

एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः। आद्यो
ऽवतारो यत्रासौ भूतग्रामो विभाव्यते ८

हृष्टविश्यपर्संयोज्य क्षोभयित्वा तद्देशेरंडं सृष्ट्वा तत्र विश्याप्सु सहस्रपरिवत्सराननुषित्वा तदंते ब्रह्मणो विराट्शरीरं सृष्ट्वा तद्देहेंद्रियादिनि यामकत्वेनाविर्बभूव। एष ह्यशेषसत्त्वानामात्मा नियामकः परमात्मनः स्वरूपांश आद्योऽवतारः एतादृशमहिमेति शेषः इति कोऽत्रावििति तात्पर्यान्न श्रद्धातिशयजननार्थं पूर्वोक्तमेवाहृतयन्नेति। यत्र यस्मिन्नाद्यावतारे पुरुषनाम्नि भूतग्रामो भूतसमूहो विभाव्यते सत्त्वाशायद श्यते स इत्यर्थः। हिशब्द आद्योऽवतारो विराट्पुरुषो नाम कीर्तित इत्यादौ प्रसिद्धोऽयमर्थ इति दर्शयति ८

भा० तृ०
३२

एकधेत्याद्युक्तं विवृणोति। साध्यात्म इति। क्रमोल्लङ्घनं प्राधान्यदर्शनाय अध्यात्मादित्रित्वस्य नियतत्वात् द्वादशानीन्द्रियाण्याद्यरिति श्रुतेरिन्द्रियाणां दशविधत्वस्य प्रायिकत्वात् हृदयस्य ज्ञानविवक्षयैकत्वादन्तःकरणविवक्षया वा त्रिविधत्वात् अध्यात्मसाहित्येन वर्त्तमानेन रूपमित्यादि योज्यं। विशेषेण राजनाद्विराट्प्रकृष्टचेष्टकत्वात्प्राणो नामात्र ह्यन्तर्यामी ब्रह्म दशेन्द्रियान्तःस्थत्वेन दशविधः ब्रह्म हृदयस्थत्वेनैकविधः वशवृत्त्यध्यात्मादित्रिषु श्रोत्रादीन्द्रियेषु हृदये च प्रवेशसम्भवाद्धरेः संख्याभेदः तत्तद्धत्वात् देवानुप्राविशदिति श्रुतिसिद्धत्वाद्युज्यत इति दर्शयति। प्राणादिनामादिदशप्राणा अप्यध्यात्मादिभेदेन त्रिधा ज्ञातव्याः॥ तदुक्तं। प्राणादिपञ्चकं चैव तथा

साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा। विराट् प्राणो दशविध एकधा हृदयेन च ९
स्मरन् विश्वसृजामीशो विज्ञापितमधोक्षजः। विराजमतपत्स्वेन तेजसैषां विवृत्तये १०

नागादिपञ्चकं। एवं तु दशधा प्राणा अध्यात्मादित्रिधा स्त्रिता इति। अधिभूतमपि द्विधा प्रधानवायुत्वगादिभेदेन। प्राणः प्रथमजो यक्षनागादिपञ्चकं। एवं तु दशधा प्राणा अध्यात्मादित्रिधा... इति वचनादिन्द्रप्रसंगाद्युक्तं ९ इदानीं तत्त्वानामस्याकमायतनप्रधानो वायुरीरितः। त्वगात्मा द्याक्षतन्तु त्राद्विधा भूतं मुराहृत मिति वचनादिन्द्रप्रसंगाद्युक्तं ९ इदानीं तत्त्वानामस्याकमायतनप्रधानो वायुरीरितः। त्वगात्मा... अधोक्षजो विराजं ब्रह्मशरीरं अन्तर्यामिरूपेण प्रविश्य स्वेन तेजसा निर्माणेशक्तिं देहि इति यदुदितं तत्कारणप्रकारमाह स्मरन्निति। अधोक्षजो विराजं ब्रह्मशरीरं अन्तर्यामिरूपेण प्रविश्य स्वेन तेजसा निर्माणे शक्तिं देहीति यदुदितं तत्कारणप्रकारमाह स्मरन्निति। तदेषां ब्रह्मशरीरमेवाम् अध्यादिदेवानां यथायतनानि भवन्ति तथा विवृद्धये तपद्वकाशवदकरोदित्यन्वयः १०

राम
३२

तापकार्यमाह। अथेति। देवानामायतनानि तस्याभितप्तस्य शरीरस्य सकाशान्निरभिद्यन्त विवृतानि अथ गदतो मम सकाशान्नि श्रुणु इत्यन्वयः। कतिधेत्येकं पदं। वाशब्दः चित्यर्थाय हेत्वनेनेमाद्या एव पुरुषं समुद्भूत्या मूर्द्धन्यन्नमसत पन्नस्याभितप्तस्य मुखेनिरभिद्यते त्यादि समाख्यासूचयति ११ शरीरावयवेभ्यो मुखलक्षणावयवस्य प्राधान्यज्ञापनायन तद्धस्तिन्तरभिमात्य भिमन्यमानो वह्निर्वाह। तस्येति। तस्य ब्रह्मान्तर्यामिणो विवक्षो हरेरास्यं मुखसंज्ञायतनं यन्निर्भिन्नं विवृतं तत्पदं स्थानं

अथ तस्याभितप्तस्य कतिधायतनानि ह। निरभिद्यन्त देवानां तानि मे गदतः शृणु ११ तस्याग्निरास्यं निर्भिन्नं लो
कपालोविशत्पदं। वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते १२ निर्भिन्नं तालु वरुणो लोकपालोविशद्धरेः।
जिह्वयांशेन च रसान्ययासौ प्रतिपद्यते १३

लोकपालोग्निर्वाचा वागिन्द्रियाख्य स्वांशेन सह प्राविशदित्यन्वयः। अग्निर्वाग्भूत्वा मुखं प्राविशदिति श्रुतिः। यया वाचा येन वागिन्द्रियेण ब्रह्मशरीरवर्त्ती हरिर्वक्तव्यं वागिन्द्रियविषयं व्यवहाराख्यं प्रतिपद्यते॥ विज्ञापयन्वदहरतीत्यन्वयः। उत्तरग्रन्था एवमेव व्याख्येयाः १२ तालु जिह्वामूलं अन्नसो हरिः प्रतिपद्यते जानाति १३

नासेनासिके १४ १५ चर्माणित्वगिंद्रियस्थानानि १६ १७ ओषधीरोषध्यभिमानिदेवताः अस्य देहे रोमभिरंशेन १८ कः प्रजापतिः रेतसा गुह्येंद्रियेणा नंदमैथुनोत्थसुखं १९ विसर्गधातुमलोत्सर्जनादिक्रिया २० इंद्रोहृषामशक्रार्के इत्यभिधानात् इंद्रशब्दस्य पुरंदरादन्यविषयत्वनिरासाय स्वर्पतिरित्यु

निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदं। घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् १४ निर्भिन्ने अक्षिणी त्वष्टा लोकपालो विशद्विभोः। चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् १५ निर्भिन्नान्यस्य चर्माणि लोकपालोनिलो विशत्॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते १६ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः। श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते १७ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः। अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते १८ मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत्। रेतसांशेन येनासावानंदं प्रतिपद्यते १९ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत्॥ पायुनांशेन येनासौ विसर्गं प्रतिपद्यते २० हस्तावस्य विनिर्भिन्नाविंद्रः स्वर्पतिराविशत्। वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते २१ चरणावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत्। गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते २२ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत्। मनसांशेन येनासौ विक्रियां प्रतिपद्यते २३

क्तं वार्तया हस्तेंद्रियेणांशेन वृत्तिमादानाख्यां २१ गत्या गतिसाधनपादेंद्रियेण २२ हृदयं मनोनिवासस्थानं मनसेंद्रियेण विक्रियां संकल्पविकल्परू पां २३

आत्मानं आत्मनाडीविशेषमुत्पन्नं वाचस्पतिः बृहस्पतिः बुद्ध्या स्वांशेनाविशत्। यया बुद्ध्या असौ हरिनियंता ब्रह्मा निश्चयं प्राप्नोति। आत्मनाड्यां तथा बुद्धिस्थ नस्य च बृहस्पतिः इत्यत्र आत्मशब्देन नाडी नाम्नोच्यते २४ अस्य ब्रह्मणो देहस्य निर्भिन्नमहं नाम नाडीविशेषं अभिमानो अहंकारो हरः पदं स्वस्थानमविशत् कर्तृ स्वांशेन च अहं कर्तेत्यभिमानेन स येन कर्तृत्वेन २५ महान् ब्रह्मा सत्त्वं सत्त्वनाडीविशेषं धिष्ण्यं स्वस्थानं चित्तेनाविशत् असौ ब्रह्मांतर्यामी ब्रह्मा च। शतं चैका च हृदयस्य नाड्य इति श्रुतेः बहुत्वान्नाडीनां किमेते विशेष्या येन इति चेत्। उच्यते। ब्रह्मनाड्या अवांतरत्वज्ञापनाय एते। यो मुख्याभिमानी ब्रह्मा चेति। तदुक्तं

आत्मानं चास्य निर्भिन्नं वाचस्पतिरुपाविशत्॥ बुद्ध्या स्वांशेन येनासौ निश्चयं प्रतिपद्यते २४ अहं चास्य विनिर्भिन्नमभिमानो विशत्पदं। कर्तृ स्वांशेन येनासौ कर्तव्यं प्रतिपद्यते २५ सत्त्वं चास्य विनिर्भिन्नं महान्धिष्ण्यमुपाविशत्। चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते २६ शीर्ष्णोस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत। गुणानां वृत्तयो येषु प्रतीयंते सुरादयः २७

अहंसत्त्वमिति द्वेधा ब्रह्मनाड्या अवांतरे। कर्तृनामात्वहंकारस्त्वहंनाड्यामवस्थितः। सत्त्वनाड्यां तथा चित्तमभिमानो हरस्तथा। अहंनाड्यां सत्त्वनाड्यां ब्रह्मा चैवमवस्थित इति २६ शीर्ष्णः शिरसः धरा भूमिः। खं अंतरिक्षं। येषु त्रिषु लोकेषु सत्त्वादिगुणानां वृत्तयः सुखकर्मप्रमादलक्षणाः स्वर्ग हश्यंते ते षु लोकेषु सुरादयो वसंतीति शेषः। आदिशब्देन मनुष्या रुद्रपार्षदगणा गृह्यंते २७

एतदेव विवृणोति। औत्पत्तिकेनेति। औत्पत्तिकेन स्वाभाविकेन सत्त्वेन स्वाभाविकसात्त्विकत्वात्॥ पणायो हानोपादानव्यवहारं कुर्वंतो मनुष्याः ये च ता
न्पणीननुव्रता नागादयोपि २८ तार्त्तीयेन तामसेन स्वभावेन भगवन्नाभिमन्तरिक्षमाश्रिताः रुद्रपार्षदगणाः। उभयोर्द्यावापृथिव्योः अंतरं मध्यं व्यो
माश्रिता इति शेषः २९ इदानीं चतुर्वर्णोत्पत्तिं तदभिमानोत्पत्तिं च किमुखत इति पुरुषस्य ब्रह्मांतर्यामिणो मुखतो ब्राह्मणजातिरवर्त्तत। अत्र ब्रह्म

औत्पत्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे॥ धरां रजःस्वभावेन पणयो ये च ताननु २८ तार्तीयेन स्वभावेन भगवन्नाभि
माश्रिताः॥ उभयोरंतरं व्योम ये रुद्रपार्षदां गणाः २९ मुखतोऽवर्त्तत ब्रह्म पुरुषस्य कुरूद्वह॥ यस्तून्मुखत्वाद्वर्णानां
मुख्योऽभूद्ब्राह्मणो गुरुः ३०

शब्देन ब्राह्मणजातिः तदुत्पन्ना ब्राह्मणाः तज्जात्यभिमानिन उक्तेन इति ज्ञापनाय ब्रह्मेत्युक्तं। उत्तरत्रापि एवमेवानुसंधेयं। ब्रह्माभिमानी तु ष्टुपुरुषनि ब्र
ह्मणो मुखात्। क्षत्राभिमानी तु मनुर्ब्रह्मवाक्केन जायते तस्मादिति वचनेनाश्रुतत्वात् व्येयमित्यपवादं निवारयति। यस्त्विति तून्मुखत्वात् ब्राह्मणः श्रे
वर्णानां मुख्यो गुरुरभवत् तस्य पुरुषस्यैव तत्त्वोपदेशात् तत्त्वज्ञानदानेनाविद्यादिदोषनिगिरणात् स्वगुरुरित्यर्थः गृ शब्दे गृ निगिरणे इति धातुः
३०

तं ब्राह्मणमनुव्रतः क्षत्रं शरीरं निर्वक्ति। यदिति। कंटकाः शत्रवः वेणौ द्रुमांगे रोमांचे क्षुद्रशत्रौ च कंटकः इति यादवः। क्षतात्त्रायत इति क्षत्रं ३१ विशो
वैश्यजातयः तदभिमानी वा कृत्स्ना। वार्त्ता कृषिगोरक्षणादिजीवनं। आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तनजीवने। स्त्रियां कृषिः पाशुपाल्यं वाणि
ज्यं चेति वृत्तयः इति अमरः। विष्णुब्रह्मवापुरुषेभ्यो जातत्वात् द्विश इति बहुवचनं। एते पूर्वं हरेर्जाता ब्राह्मणास्मद्वदनं तरमित्यादेः। विरंवादिभ्यो जन्म वेद
हृत्या तुष्यते हरिरित्येतत्कथं युक्तमिति चेत् तदंतस्य हरेर्जातत्वात्। तदंतस्थ हरेर्जनिरिति च ३२ शूद्रजात्यभिमानी कृतिः कृति नाम शुश्रूषा

बाहुभ्योऽवर्त्तत क्षत्रं क्षत्रियस्तदनुव्रतः॥ यो जातस्त्रायते वर्णान्पौरुषः कंटकक्षतात् ३१ विशोऽवर्त्तंत तस्योर्वोर्लोक
वृत्तिकरीर्विभोः॥ वैश्यस्तदुद्भवो वार्त्तां नृणां यः समवर्त्तयत् ३२ पद्भ्यां भगवतो जज्ञे शुश्रूषा कर्मसिद्धये॥ तस्यां जा
तः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ३३ एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिं॥ श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सह वृ
त्तिभिः ३३

कर्मसिद्ध्ये शुश्रूषाख्यकर्मसाधनाय पुरादिसृष्टौ। यस्य शुश्रूषाख्यया वृत्त्या ३३ एतेषां स्वस्ववर्णविहितकर्मभिर्विष्णुर्हरिर्यजनात्मकत्वेन तत्तुष्टिक
रत्वादिति भावेनाह॥ एत इति। तत्र हेतुमाह यज्जाता इति स्वस्वविहितवृत्तिभिः सह विष्णोर्जाता यद्यस्मात् तस्मात् पितृत्वात् गुरुत्वात् इष्टदेवतात्वा
त् स्वामित्वाच्च आत्मविशुद्ध्यर्थं अंतःकरणनैर्मल्याय ३४

एवंविधस्यहरेर्माहात्म्यंपुरुषायुषशतेनापिवर्णयितुंनकस्यापिशक्तिरित्याह। एतदिति॥ भगवानेवमतीतनागतवर्त्तमानानंतब्रह्मांडानांनिर्मा
तेतियतोदैवकर्मात्मरूपिणः देवेष्वधिकत्वाद्देवःसर्वस्यस्थूलकारणत्वात्कर्मव्याप्तत्वादात्मैवंविधंरूपंस्वभावोस्यास्तीति। रूपंशब्देपशौश्लो
केग्रंथावृत्तौहितादिषु। सौंदर्येवस्तुभावेचेतियादवः। तस्यभगवतोयोगमायायाःस्वरूपमहिम्नोबलोदयंशक्तिप्रसरंकःपुमानुदाहर्त्तुंश्रद्दधांत

एतत्त्वत्रभगवतोदैवकर्मात्मरूपिणः। कःश्रद्दध्यादुदाहर्तुंयोगमायाबलोदयं ३५
अथापिकीर्त्तयाम्यंगयथामतियथाश्रुतं। कीर्त्तिंहरेःस्वांसंस्कर्त्तुंगिरमन्याभिधासतीं ३६

वक्तुंश्रद्दध्यात्श्रद्धांकुर्यात्। अनंतत्वादितिशेषः। अधिकत्वाद्देवशब्दोदेवतेष्वधिकोयतः दिवंहरिः कर्मस्थूलकृतेरित्येवभण्यते। व्याप्तत्वादात्मशब्दश्च
श्रीपतित्वाद्रमाधवइतिवचनादुक्तएवार्थोदैवंदिष्टंभागधेयमित्याद्यभिहितोनभवति ३५ भगवन्माहात्म्यकथातुवर्णनसामर्थ्याभावेपिस्वप्रयोजनं
वशाद्वक्ष्यामीत्याह। अथापीति। यद्यप्यानंत्याद्वक्तुंनशक्नोमितथापिहरेस्त्वस्याभिधानयस्याःसाअन्याभिधातांस्वांगिरंसंस्कर्तुंअन्यवार्त्तापरित्यागेनस
तींकर्तुमित्यर्थः ३६

वागादींद्रियाणांनिष्फलाभोऽयमेवेत्याह। एकांतलाभइति॥ पुंसोवचसोवागिंद्रियस्यसुश्लोकमौलेर्हरेर्गुणानुवादंगुणानामभिवदनंएकांतलाभम
व्यभिचरितपुरुषार्थफलमाहुः प्रेक्षावंतइतिशेषः। श्रुतेःश्रवणेंद्रियस्यचविद्वद्भिरुपाकृतायाःव्याख्यातायाःकथासुधायाःसंप्रयोगःएकां
तविन्नत्वेनश्रवणमेकांतलाभः उतशब्दाच्चत्वगादिग्रहणंकर्तव्यं। तमुश्रोतारःश्रूयंयन्नामसकृच्छ्रवणात्पुल्कसोपिविमुच्यतइत्यादिश्रुतिस्मृत
योप्यस्मिन्नर्थेप्रमाणं ३७ नन्वादिकविनाहरेर्महिम्नःसमापितत्वाच्छेषउदाहर्त्तुंकथंनशक्यतइत्युच्यतइतितत्राह। आत्मनइति॥ आदिनाक
विनाकिंस्विनसंवत्सरसहस्रांतयोगेनशमदमाद्युपायेनविपक्वयापरिपाकंप्राप्तयाधियासकलशास्त्रार्थावधारणशक्तिमत्याबुद्ध्याअव

एकांतलाभंवचसोनुपुंसःसुश्लोकमौलेर्गुणवादमाहुः। श्रुतेश्चविद्वद्भिरुपाकृतायांकथासुधायामुतसंप्रयोगः ३७
आत्मनोवसितोवत्समहिमाकविनादिना॥ संवत्सरसहस्रांतेधियायोगविपक्वया ३८ अतोभगवतोमायामायिना
मपिमोहिनी॥ यत्स्वयंचात्मवर्त्मात्मानवेदकिमुतापरे ३९

तउपाश्रितआत्मनःपरमात्मनोमहिमाअवसितःपरोक्षीकृत्यज्ञातोयस्मादतोभगवतोमायामहिमामायिनांज्ञानिनामपिमोहिनीबुद्धिभ्रं
शकरीति ३८ ब्रह्मणाज्ञातत्वात्कथंमोहकरीत्याशंक्यतस्यापिसाकल्येनज्ञानंदुःकरमित्याशयेनाहयदिति॥ आत्मवर्त्मापरमात्मज्ञानो
पदेशाचार्यआत्माब्रह्मास्वयमपिभगवतोमायांनवेदेतियद्यस्मात्सर्वात्मनेतिशेषः। अतोपरेऽस्मदादयोनविदुरितिकिमुतमायानुमहिमापा
कःप्राप्तुंयत्नमपश्यतइति। गुणपूर्त्तिरात्मशब्दोब्रह्माहीनत्वतोहरः॥ अहंशास्त्रयाप्येनोनजानीतोहरिपरमितिस्मृतिः। अहंरुद्रः ३९

भा॰ टी॰
३६

नैतच्चित्रमिति भावेनाह । यत इति । वाचो नंतत्वेनाभिमानिन्यः श्रियश्चानादिकालमारभ्य मनसा गुणगणाननुध्यायंत्यो वागिंद्रियेण निरंतरं वर्णयंत्योपि गुणकथावसानमप्राप्य नशक्ता इति । यतो निवर्त्तंते अनंतगुणपूर्णत्वात् इति निश्चित्य नित्य परिचितगुणकथने च निवर्त्तंते इति । अहं वा अहंकाराभिमानिनो रुद्रः रुद्र शेषाः अन्ये इमे देवा इंद्रियाभिमानिन इंद्रादिदेवाः यन्मायांन विदुरिति । तस्मै भगवते नमः इत्यन्वयः ॥ चावइति वङ्गुवचनं श्रियो रूपानंत्याद्रुपते श्रीर्य च्छ्रीरूपिणः पुरुगायपादयोः करोति मानं बहुधा विभूतिभिरिति वा । अहंत्रिधेत्यहं शब्दस्याहंकारे प्रयुक्तत्वात् नेमे त्रयेऽत्र यतेश्च गुण इत्यनेन शब्दोत्र स्वार्थः । ननु तेोऽहरः । अहं शहस्राख्ये तो न जानीतो हरिं परमिति च ४० तृतीय स्कंधे षष्ठमोऽध्यायः दुर्भगशरीरस्थस्य हरेर्देवेदत्त

यतोऽप्राप्य निवर्त्तंते वाचश्च मनसा सह । अहं चान्य इमे देवास्तस्मै भगवते नमः ४० इतिश्रीभागवते महापुराणे तृतीयस्कंधे षष्ठमोऽध्यायः श्रीशुक उवाच एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ॥ प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत १ विदुर उवाच ब्रह्मन्कथं भगवतश्चिन्मात्रस्याविकारिणः ॥ लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः २

स्यैव माहात्म्यतिरोभावो दुःखभोगश्च नास्ति विदुरस्यच वक्ष्यमाणार्थप्रश्नप्रायमस्मिन्नध्याये निरूप्यते । तत्रादौ विदुरः श्लोकमेवं किं एवमिति । भरतस्य मुख्यप्राणस्य प्रियया वाचा १ सत्वहन्तो तु मायाया इत्यादिना निर्गुणस्य हरेः सत्वादिगुणैरुपादानकारणैर्जगत्सृष्ट्यादिकरोतीत्युक्तं । तत्र चोदयति विदुर इत्याह । ब्रह्मन्निति । हे ब्रह्मन् नृशमस्मात्स्युणवृंहितं चिन्मात्रस्य ज्ञानैकरसशरीरस्यात एव निर्गुणस्य सत्वादिगुणाः श्रवरइत्युक्तं । तत्र चोदयति विदुर इत्याह ॥ ब्रह्मन्निति । हे ब्रह्मन्नृशमस्मात्स्युण निमित्तजगत्सृष्ट्यादिक्रिया श्च कथं युज्येरन् नकथमपि तत्कारेहितस्यात एवाविकारिणो भगवतः ऐश्वर्यात्स्युणसमुद्रस्य हरेः सत्वादिगुणाश्च निमित्तजगत्सृष्ट्यादिक्रिया श्च कथं युज्येरन्न कथमपि तत्कारेहितस्यापि तु प्रत्युत हरादेव परिहरति ऐश्वर्यादविपुत्रतोरिस न्वयः । लीलार्थं घटते इति तत्राह लीलयेति । नहि कश्चित्लीलया कंदकाद्येपादं निक्षिपति । अपितु प्रत्युत हरादेव परिहरतिऐश्वर्यादविपुत्रतो तदित्यत्वा पीति निरनिहो निरवद्य इति श्रुतेर्गर्हितत्वात्कारो ति बानरदंतत्वतो ब्रूहीति प्रश्नार्थः २

राम
३६

लीलया चान युज्यत इति तत्र किं बाधकमत्राह । क्रीडायाइति । क्रीडायाः मुद्यर्भस्य पूर्णासुखस्य यतो यस्मात्तस्मात्र घटत इति । अन्ये केचित्पमाह । काम इति । यथेहं क्रीडितुमिच्छापि अन्यतोऽरतितसंज्ञा संभवति । अन्येन समेन पुरुषेण वा सह । एतद्द्वयमप्याक्षिपति । स्वत इति । शब्दादि विषयनिमित्तत्वतृप्तिमं तरेणास्व प्रलाभे नैवालं बुद्धिगोचरानंदसमुद्रमग्नस्यात एव निर्वृत्तस्य शेमा वितणा अस्या ऽरत्यसंभवात् । सद्धासा वा त्मा च सदा त्मा तस्य । सदेव सोम्येदमग्र आसीदात्मा वा इदमेक एवाग्र आसीदेकमेवाद्वितीयमित्यादिश्रुतेस्समत्वाच्च पुरुषांतरेण सहक्रीडेच्छाया एवासंभवात् किमुत लीलासंभव इति । सदानि

क्रीडायां मुद्यतोऽर्भस्य कामश्चिक्रीडिषान्यतः ॥ स्वतस्तृप्तस्य तु कथं निवृत्तस्य सदात्मनः ३ असाक्षीद्भगवान्विश्वं गुणमय्यात्ममायया ॥ तया संस्थापयत्येतद्भूयः प्रत्यभिधास्यति ४

वृत्तस्य आत्मन इति भिन्नं वा पदं ॥ समस्तगुणपूर्णत्वेन लीलाप्राप्य श्रेयोजनानवकाशादित्यर्थः । तुनाप्रकारांतरं निवारयति ३ ननु हरेर्गुणैः सृष्ट्यादिक्रियायां सत्यामपि पंचितासैव नाक्षिनिः क्रिय मिति श्रुतेरिति तत्राह । अस्राक्षीदिति । आत्ममायया स्वाधीनया प्रकृत्या भूयः पुनः तथा सेन रूपयाऽस्राक्षीत् । सत्वरूपया संस्थापयत्तमोरूपया तद्विश्वं प्रत्यभिधास्यति संहरिष्यती त्यतो गुणक्रियासंसर्गदर्शनान्नमायं संशय इत्यर्थः ४

इतोपिसंशयोदुरूत्सारइत्याह।देशतइति।देशादिनिमित्तत्वेनस्वतोन्यतःपरतोऽविलुप्तावबोधात्माअविनष्टज्ञानस्वरूपोयोसौभगवान्सोऽजयाप्रकृत्याक थंयुज्येत।युक्तायुगुणरूपप्रकृतिसंसर्गोनसंभवति।दृश्यतेतुतुच्छेनाप्यपिहितमितिश्रुतेः।अतःसंदेहइत्यर्थः।अवस्थातोजाग्रदाद्यवस्थानिमित्तत्वे न ५ विदुरःप्रक्रांतरेणसंशयतेइत्याह।भगवानिति।नित्यनिरतिशयसकलैश्वर्यादियोगोस्तिहरेरित्याशयेनोक्तंभगवानिति।यथादेवदत्तस्यदु र्भगशरीरस्थत्वेनदुर्भगमैश्वर्यादिराहित्यमविद्यास्मितरागद्वेषाभिनिवेशात्मकसंस्कारजन्यदुःखलक्षणक्लेशोवादृश्यतेनथातुर्भगसर्वदेहे

देशतः कालतो योसाववस्थातः स्वतोन्यतः॥ अविलुप्तावबोधात्मा संयुज्येताजया कथं ५ भगवानेष एवैकः सर्वक्षेत्रेष्ववस्थितः।
अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ६ एतस्मिन्मे मनो विद्वन्खिद्यतेऽज्ञानसंकटे॥ तन्नः पराणुद विभो कश्मलं मानसं
महत् ७

ष्वस्थत्वात्तस्याप्यस्तुभ्यापितत्संसर्गःसंभाव्यःसनयुज्यतेकुतोभगवत्वादतःसंशयइत्यर्थः ६ युक्तिज्ञानपूर्वकत्वात्अयंसंशयःस्वयमेवज्ञापितोभवतीत्याशंक्याज्ञा नदार्ढ्याभावान्स्थाणुवदवस्थानात्त्वयैवनिर्मूलनीयइतिभावेनाह।एतस्मिन्निति।ज्ञानसंकटेज्ञानसंबाधेनिश्चितज्ञानाभावइत्यर्थः।पराणुदनिराकुरु ॥मूर्छांतुकश्मलंमोहइत्यभिधानं।अतःसंतप्तआत्मन्यल्पमपिदोषंमहत्वेनभावयतीत्याशयेनमहदित्युक्तं।नतुतत्वेन।अतएवमानसंनतुबुद्धिस्थं॥
७॥

उक्तसंशयंपरिहरतीत्याह॥सइति।गतस्मयोनष्टाहंकारः।स्मयमंदहसन्निवान्दुर्भगशरीरस्थस्यापिदुःखादिकर्दमास्पर्शोमाहात्म्यातिशया त्इतिपरिहरति।।सेयमिति।ईश्वरस्यैश्वर्यसर्वज्ञहरेःकार्पण्यपदेत्यविमुक्तस्यनित्यमुक्तस्यापिबंधनंविरुध्यतेप्रमाणतोयुक्तितश्चविरुद्ध मितियदुक्तेनतदायंन्यायोयेनमेवक्तुंसेयंभगवतोमायाअयंहिहरेर्महिमा।दुर्भगादिशरीरस्थस्यापितद्दोषास्पर्शएवतन्माहिमेत्यर्थः।य त्वमाणयुक्तिभ्यांउपपन्नंतत्स्वरूपार्थवक्तुंयत्नाप्तंदुर्घटंतथापिप्रतीयतेयुक्तिरजतवत्सामायेत्यनुभवसिद्धमित्यभिप्रेत्यप्रश्नंपरिहरतिसेयमिति।यन्न येनन्यायेनविरुध्यतेसाभगवतोमायाअनिर्वाच्याविद्यालक्षणाइयमितिसर्वानुभवसिद्धत्वात्मायाकरणयोग्यतिदर्शयतिन्यायविरोधंदर्शयतिईश्वर स्येति।इत्येतद्भगवतइत्युक्त्याअपहस्तितमितिज्ञायते।तथाहिसमस्तैश्वर्यादिमतोभगवतःक्षुद्रार्थत्वेनभ्रमितत्वात्तस्यकार्यकरणेमायापेक्षा

शुक उवाच स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः। प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ८ मैत्रेय उवा
च सेयं भगवतो माया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनं ९

आशंकादिसाध्वात्मयोमायामपेक्षतेअशक्ताःसत्यस्वष्टेहिमायाष्टष्टिंवितन्वतेइतिवा।कथंदेहेपरोदेवोनलिप्यतेदेवंधनैः।कथंनदुःखीसम वेतदुःखीवेहीश्वरःकुतः।इत्यादिश्रुतिविरुद्धत्वादुक्तएवार्थइति।साकृतदेहत्वादेवस्तत्वतमायायोगोघटतइतीयमाशंकाअलुप्तबोध रूपत्वात्सोपाकृतदेहवानितिवाक्यमवतारयतान्वयेवपरिहृता।अविलुप्तावबोधात्मेति।अतएवमायासृष्ट्याद्यर्थतद्योगइतिवनयुक्तं। यश्चिकेतसत्यमिदंनमोघमितिसत्यत्वावधारणादेवमपितदंगीकारेदानवमतप्रवेशःस्यात्।तदुक्तं।नवसृष्ट्यादिकंश्रौतिश्रौतिवादादिहि नवाः।अतोभ्रांत्यादिसंबंधोनास्त्युक्तंवनयुज्यतइति ९

भा॰ तृ॰
३८

तर्हि कस्य भ्रांत्या संसार इत्याशंक्य प्रकृतिसंबंधान्न यान्नीवस्यैव संसार इतीममर्थं सदृष्टांतमाह यथेति। अमुष्य पुंसो जीवस्योपद्रष्टुः स्वप्नं पश्यतोऽर्थे
न विना प्रयोजनाद्विते स्वप्ने स्वशिरश्छेदनादिक आत्मविपर्ययः आत्मनो देहस्य विपर्ययो दृष्टश्रुतवासनया विद्यमान एव प्रतीयते। अत्रेदं तात्पर्यं
। अस्मिन् जन्मनि जन्मांतरे वा शिरश्छेदः स्कंधारोहणं वा दृष्टः श्रुतो वा सन्नैवैकाधिकरणेपन दर्शनं भ्रांत्या दृश्यते तद्दर्शनं च न प्रयोजनवदतएवा
। अस्मिन्नुक्तमनिन्नमंतरे वा शिरश्छेदः … निमित्तकारणेशेच्छानिय
र्थेन विनेत्युक्तं। न च तावता स्वप्नस्य मिथ्यात्वं अर्थक्रियाकारित्वात्। सूचकश्च हि श्रुतेराचक्षते च तद्विद इति सूत्रात्। निमित्तकारणेशेच्छानिय
तज्जीवोपादानकारणभूतमनोगतवासनाजन्यत्वाद्वैनिवेदिकाधिकारविवक्षया पुंस इत्युक्तं। स्वाधीनज्ञानाभावादुपद्रष्टुरिति १० यथा च जल

धा ८

पर्थेन विनामुष्य पुंस आत्मविपर्ययः। प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः १० यथा जले चंद्रमसः कंपादि
स्तत्कृतो गुणः। दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ११

ले चंद्रप्रतिबिंबस्य तत्कृतो जलकृतो जलचलनादिकृतः कंपादिर्जलगुणोऽसन्नपि द्रष्टुः पश्यतः पुरुषस्य दृश्यते। एवमेवात्मनो जीवस्यातत्त्वज्ञानादीशेच्छया
नात्मनो देहस्य जननमरणादिर्गुणो जातोऽहं मृतोऽहं कर्ताहमित्यादि प्रतीयते। अतः स्वतो द्रष्टुर्जीवस्यादिरूपस्य जीवस्येशेच्छया तत्स्वातंत्र्यस्य पारतंत्र्या
दज्ञानाज्ञानाद्भ्रांत्या संसारः स्फटिकस्य यथा जपाकुसुमसंपर्ककृतः स्फटिके लौहित्यं तथा प्रकृतिसंबंधकृतः संसारः सत्य एव नानिर्वाच्य इत्यविद्यानन्य
त्वेन भ्रांतिरित्युक्तं। भ्रांत्या जीवस्य संसार इति। स्वप्नस्य वासनाजन्यत्वेनास्पष्टत्वात् दृष्टांतेन संसारस्यासत्यत्वं दुःखप्रतिपादकमिति द्वितीयदृष्टांतकथनं ११

राम
३८

ननु संसारस्यासत्यत्वे निवृत्त्यभावेन कदापि मोक्षो न स्यादिति तत्राह। स वा इति। इह जीवे देहस्थमानः भगवद्भक्तियोगेन ज्ञानतया वासुदेवानुकंपया। यस्य प्रसा
दादिति श्रुतेः। तिरोधत्ते विलीयते वा इत्यनेन ईशज्ञानाद्विलीयत इतिमानं दर्शयति। यथा गरुडध्यानाद्विषनाश इति सत्यस्यापि नाशो घटवत्तद्
त्यस्मिन्नर्थस्य। ईशस्वातंत्र्यात् ज्ञानादुत्पन्नकर्तृत्वाभिमानलक्षणभ्रांतिविलये ईशज्ञानाद्धक्षते। भ्रांतिर्हि देहाभिमतिरीशज्ञानाद्विनश्यतीति
च बहूनां जन्मनामंत इति वचनात् शनैरिति १२ विकल्पेन सर्वनामसंज्ञाभावात् पर इति। सर्वोत्तमे हरौ संसारकारणदुरितहरीकरणसमर्थे भ
गवति द्रष्टात्मनि अपरोक्षीकृतस्वरूपे सति यदेंद्रियाणां विक्षुब्धी परमलाभः पुरुषार्थः मुक्तिस्तदा सर्वे क्लेशा विलीयंते संसुप्तस्येवाथवा

स वै निवृत्तिधर्मेण वासुदेवानुकंपया॥ भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यदेंद्रियोपरामोऽथ द्रष्टात्मनि परे हरौ। वि
लीयंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः किं वा पुनस्तच्चरणार
विंदपरागसेवारतिरात्मलब्धा १४

सुप्तस्य जीवस्य सुप्त्यवस्थायां कृत्स्नशः क्लेशाः यथा विलीयंते तथेत्यर्थः १३ क्लेशनिवृत्तौ केमुत्यन्यायप्रदर्शनव्याजेन सुगमोपायं दर्शयति॥ अशे
षेति। गुणानामनुवादश्च तच्छ्रवणं च यद्वा गुणानामनुवादो येषु ते गुणानुवादा भागवतादयस्तेषां श्रवणमेवाशेषसंक्लेशविनाशं करोति किं पुनर्व्या
ख्यानमिति सिद्धत्वात् पृथक् नोक्तं। आत्मनि लब्धा तस्य मुरारेश्चरणारविंदपरागसेवायां रतिः क्लेशशमं विधत्त इति किं वा किं वक्तव्यं पुनरिति संदे
हं निवारयति। पुनरप्रथमे च श्रवणाद्वासनावधारणाद् इति वचनात्। अनेन श्रवणमननव्याख्यानोपासनानामुत्तरोत्तरप्राबल्यमुपायांतराभावश्चेति
दर्शितं १४

भा० त०
३९

विदुरोमैत्रेयस्यावश्यवक्तव्यत्वेतात्पर्यंजनयितुमुक्तार्थंवक्तव्यांशोनास्तीत्याह॥ संछिन्नइति। सूक्तमेवासिःखड्गःतेन। अत्र संशयपदेनान्यथाज्ञानंग्राह्यं
मन्यथोभयत्रेत्युत्तरार्धमनुपपन्नंस्यात्। ज्ञानंवा। शीङ् स्वप्नइतिधातुजत्वात्स्वप्नस्य ज्ञानशब्दोक्तोविपरीतमथापिवेतिवचनात्। दुर्लभदेहस्थस्यापिहरे
मन्यथोभयत्रेत्युत्तरार्धमनुपपन्नंस्याद्ज्ञानंवा। अस्यतडुःखादिभोगःसंभाव्यतइत्यन्यथाज्ञानंनिरस्तमित्यर्थः। महंममेतिआत्मासःविरकालस्थायीनस्यादित्याशयेनोक्तं। नत्वन्यथाज्ञानस्यछिन्न
स्यापितदुःखादिभोगःसंभाव्यतइत्यन्यथाज्ञानंनिरस्तमित्यर्थः। अपिःसमुच्चयार्थः
त्वात्किमुत्तरग्रंथेनेतितत्राह॥ उभयत्रेति। उभयत्रदेहाद्यहंममतादौदृष्टौवान्यथाज्ञानेनाशादिदमदोवेतिसंदेहोजायतेइतिभावः। अपिःसमुच्चयार्थः
१५ अस्मद्वचनेनेशिरस्यतावान्नवंसंशयःकिंनेत्याह। साध्विति। हेविद्वन्ब्रह्मसाक्षात्कारयोग्यज्ञानवन्हरेरात्ममायायनंस्वरूपसामर्थ्याश्रयमयं

विदुरउवाच॥ ॥संछिन्नःसंशयोमह्यंतवसूक्तासिनाविभो। उभयत्रापिभगवन्मनोमेसंप्रधावति १५ साध्वेतद्व्या
हृतंविद्वन्नात्ममायायनंहरेः। आभात्यपार्थंनिर्मूलंविश्वमूलंनयद्बहिः १६ यश्चमूढतमोलोकेयश्चबुद्धेःपरंगतः।
तावुभौसुखमेधेतेक्लिश्यत्यन्तरितोजनः १७

हिभगवन्नसहिमेतिपद्याहृतंत्वयोक्तंतत्साधुसंशयनिरासनेशिरस्यावितंआत्मत्पनेनमायाशब्दस्येदन्नात्ताभिधेयत्वंदूरोत्सारितं। यद्यप्येवंतथाप्य
पार्थंप्रयोजनशून्यमतएवनिर्मूलंइश्वराद्दृष्टमेतेरणकारणांतरशून्यंदेहात्मत्वादिमनस्याभाति। विश्वमूलंब्रह्मतममज्ञानात्बहिर्नभवतियद्य
स्मात्तस्मात्अंतरितःउभयथाइद्वास्मीतिशेषः १६ एतदेवस्पष्टमाह। यश्चेति। लोकेब्रह्मणाद्दृष्टजनेयोमूढतमःअत्यंतज्ञानविवेकशून्यःप
श्चबुद्धेःपरंतेःपरंब्रह्मगतःतावुभौमन्नवत्सुखवत्सुखमेधेते। अंतरितमुभयोर्मध्यवर्तीजनःस्वप्नदर्शिवत्क्लिश्यतिक्लेशंप्राप्नोतितथाहमपिक्लि
श्यामीत्यर्थः १७

राम
३९

त्वमंतरितजनेप्रेक्षकस्त्वंसंशयानुपगमेनमुक्तोनस्याः। तत्त्वंसंशयमुक्तायेसर्वेतनिरयोपगाइतिवचनाहित्याशंक्यस्याएवं पुरुषोवेतिसंदिह्यतेनायथाप्रवाक्या
द्धकेकोटरादिदर्शनाद्वासंशयप्रतीतिंपराहत्यस्थाणुरेवायंनपुरुषइतिनिश्चयज्ञानंप्रतिपद्यतेतथाहमपियुष्मच्चरणसेवाप्रसन्नयुष्मदुपदेशात्स्वनात्म
नोदेहस्पर्शंवंध्विनोहंममतादेःमोहात्सत्वेनप्रतीतस्याप्यर्थाभावंजीवस्वरूपपर्यालोचनयाप्रयोजनाभावंनिश्चित्यचोभयविषयांतांप्रतीतिंनिरस्य
पुरुषार्थोपयोगिज्ञानंलभइत्यभिप्रायंवानाह॥ अर्थाभावमिति॥ द्वितीयापिशब्देनसेवायाःप्राधान्यंवक्ति। वशब्दःसंशयनिरासनिश्चयज्ञानलब्धोः

अर्थाभावंविनिश्चित्यप्रतीतस्यापिनात्मनः॥ तांवापियुष्म
च्चरणसेवयाहंपराणुदे १८

समुच्चयेवर्तते॥ पराणुदेइत्यनेननियतपरस्मैपदेनान्यथाप्रयुक्तेनविद्यमानमप्यनुभवमन्यथाक्रदतिविदुरइतिसूच्यते। नचमूढयोर्गौणस्यायथार्थ
ज्ञानमेवनास्तीतिवाच्यं। द्रोणद्रौणिकृपाःपार्थाःभीष्मोविदुरसंजयो। येवान्येतत्रदेवांशाःसम्यक्ज्ञातत्वापरोक्षिणइतिवचनात्सम्यक्ज्ञातत्वापरोक्षत्वा
त्। तद्दोषतभाविल्वेनदोषित्वमापन्नमितिचेत्तन। दृष्टमेववक्तुंमनादृष्टमितिअदृष्टार्थप्रवचनोपरमार्थत्वेनगुणत्वात्। आत्मनस्तुगुणाभावेव
दतोनत्वमस्त्यता। अदृष्टस्यदमार्थंवगुणायेवमवत्यपीतिवचनात् १८

श्रीनारायणचरणारविंदनिषेवा संसारव्यथानिरासकत्वेन पुरुषार्थोपयोगिनी स्यात्॥ किमस्मच्चरणसेवा करिष्यतीति शंकामाभूदित्याह॥ यत्सेवये
ति॥ येषां हरिस्वरूपद्रष्टॄणां युष्माकं सेवया भगवतः पादयोः तीव्रः पटुतरो रतिरासो रतिरूपा क्रीडा रतिलक्षणो रागो वा भवेदित्यन्वयः। मधुद्विष
इत्यनेन हरेर्बहिरेवावस्थानं प्रतीयते तन्निरासार्थं कूटस्थस्येति। वितनोति वितनराशिनियामकत्वेन तदंतस्थस्य क्रोधादिविकारवाह्यस्य रहितस्य १८
पूर्वसंचितपुण्यैरेव भवादृशानां महतां सेवा लभ्या नान्यैरित्याह॥ दुरापेति। वैकुंठस्य वर्त्म ज्ञानोपदेशमार्गो येषां ते तथा तेषु महत्सु सेवा। हिशब्द एवा

यत्सेवया भगवतः कूटस्थस्य मधुद्विषः। रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः १८ दुरापाह्यल्पतपसः से
वा वैकुंठवर्त्मसु। यत्रोपगीयते नित्यं देवदेवो जनार्दनः २० सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात्।
तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः २१

र्थ। दुष्प्रापत्वे निमित्तमाह। यत्रेति। यत्र येषां भवादृशानां परिसरे भगवद्विमुखानां जनार्दनप्रसंगो दुःसह इति यस्मादतस्तत्कथाप्रसंगकेषु सत्सु दुःसहत्वे
न सेवा दुरापेत्यर्थः। जनो जननमुपलक्षणं मरणं वा अर्दयति नाशयतीति जनार्दनः। अर्द हिंसायामिति धातुः २० विदुरो विशेषश्रोतुं श्रुतमनुवदति॥ सृष्ट्वे
ति। अग्रे जगदादौ षोडशविकारास्तैः सहितानि तेभ्यो महदादिभ्यः अंडं सृष्ट्वा अंडांतर्वर्तिनं विराजं ब्रह्माणमुद्धृत्य सृष्ट्वा तं ब्रह्माणमनु प्राविशत्॥ तत्प्र
वेशानंतरं ब्रह्मप्रवेश इति ज्ञापनायाऽन्विति। विभुर्व्यापकः २१

नवंतर्बहिर्व्याप्तस्य परिच्छिन्नयोग्यः प्रवेशः कथमित्याशंक्य तत्तदस्तु परिमितरूपग्रहणेन सुकर इति भावेनाह यमाहुरिति। यत्र यस्मिन् पुरुषे इमे पाताला
दयः २२ यस्मिन् ब्रह्मांतर्यामिणि पुरुषे प्राणापानौ तथा व्यानश्चोदानसमानकौ। नागः कूर्मश्च कृकलो देवदत्तो धनंजयः इति दशविधः। सेंद्रियार्थेंद्रि
यः इंद्रियार्थैः शब्दादिभिश्चक्षुरादींद्रियैश्च सहितः त्रिवृत् ओजः सहो बलरूपो वर्तत इति शेषः। श्रुतमनुवदत्याशंक्य प्रार्थयते त्वयेरिता इति। त्वया ये ब्राह्म
णादिवर्णा यतो ब्रह्मांतर्यामिणः सृष्टा ईरिताः तद्विभूतीस्तेषां वर्णानां तस्य ब्रह्मांतर्यामिणश्च विभूतीर्नोऽस्माकं वदस्व। यथा ज्ञातुं शक्यते तथा ब्रूहीत्यन्वयः।

यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकं। यत्र विश्व इमे लोकाः सविकाशं समासते २२ यस्मिन्दशविधः प्राणः सें
द्रियार्थेंद्रियस्त्रिवृत्। त्वयेरिता यतो वर्णास्तद्विभूतीर्वदस्व नः २३ यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः। प्रजा वि
चित्राकृतय आसन्याभिरिदं ततं २४

भासनोपलक्षणं भाषाज्ञानयत्नविमत्युपमंत्रणेषु वद इत्यात्मनेपदं २२ यत्र येषु वर्णेषु जातैर्नप्तृभिः पौत्रपुत्रैर्विचित्राकृतयः परस्परमावृत्तलक्षणोपेता
काराः। विभुर्ब्रह्मा विराजं ब्रह्मांडं जलादुद्धृत्य अवकाशवत्कृत्वाऽनुप्राविशदिति प्रतीतार्थं परित्यज्याप्रतीतांगीकारे किं नियामकं सृष्टिश्च ब्रह्मणा इ
ति प्रसिद्धिरिति चेत्। न। ब्रह्माणं प्राविशद्विभुः सहस्रांघ्र्यूरुः सहस्रपात्। अनुप्रविश्य ब्रह्माणं प्राणान् दशविधं तथा। इंद्रियाणींद्रियार्थांश्च वर्णांश्चैवा
सृजद्धरिरिति प्रमाणद्वयेन नियतत्वाद्योगरूढेर्दुर्बलत्वाच्च २४

२५ आसते तिष्ठंति। संस्थां अवस्थां २६ सरीसृपाः सर्पादयः सह प्रपादादयो वा। सर्गसंप्लूहं सृष्टिविस्तारं। गर्भस्वेदद्विजोद्भिज्जां गर्भजानां जरायुजा
स्वेदजानां मत्कुणादीनां द्विजानां अंडजानां पक्षिणां उद्भिज्जानां स्थावराणां गर्भजस्वेदजोद्भिजामितिवा पाठः॥ अस्मिन्पक्षे पुनरुक्तिर्नास्ति २७ ब्रह्मा
तर्यामिणो विभूतीर्वेदस्येति गम्यं विशेषतः प्रार्थयते॥ गुणावतारैरिति। सर्गस्थित्यप्ययात्मनो विश्वस्य जगतोर्थे सृजतः आत्मानमितिशेषः। ज्ञानादि
गुणयुक्तावतारैः सत्वादिगुणनिमित्तावतारैर्वा। यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमित्यादेः। वीर्यादिगुण

प्रजापतीनां स पतिश्चक्लृपे कान्प्रजापतीन्। सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् २६ एतेषां मपि वंशांश्च वंशानुच
रितानि च २५ उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते। तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय २७ तिर्यङ्मानुषदेवानां
सरीसृपपतत्रिणां॥ वदनः सर्गसंप्लूहं गर्भस्वेदद्विजोद्भिजाः २८ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययात्मनः। सृजतः श्रीनि
वासस्य व्याचक्ष्वोदारविक्रमं २९ वर्णाश्रमविभागं च रूपशीलस्वभावतः २९ ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणं।
। यज्ञस्य च वितानानि योगस्य च पथः प्रभो ३०

प्रकाशेर्वा। श्रीनिवासस्योदारविक्रमं प्रख्यातं चरितं व्याचक्ष्वेत्यन्वयः। उदारो महतिख्यातइत्यभिधानं सर्वस्मादिदं श्रीहरिचरितं विलक्षणं वदेत्यतो
ऽकाशेर्वा। श्रीनिवासस्योदारविक्रमं प्रख्यातं चरितं व्याचक्ष्वेत्यन्वयः॥ श्रीनिवासस्य श्रेनेन ह्येवैतो नित्यमुक्ताविति श्रुतिः सूच्यते। श्रीर्निवसत्यस्मिन्निति वा चक्रवर्ति रिव
च्याचक्ष्वेति। श्रिया सह निवासो यस्यासौ इति श्रीनिवासस्तस्य अनेन ह्येवैतो नित्यमुक्ताविति श्रुतिः सूच्यते। श्रीर्निवसत्यस्मिन्निति वा॥ अकर्तरि च
कारके संज्ञायामिति घञ् २८ रूपतः शीलतः स्वभावतः २९ विकर्षणं विभागं। यज्ञस्य वितानानि विस्तारान् योगस्य पथः मार्गान् ३०

नैःकर्म्यस्य सांख्यस्य मोक्षसाधनस्य ज्ञानस्य। स्मृतं प्रणीतं तंत्रं शास्त्रं। पाषंडपथवैषम्यं। पाषंडमार्गोत्पत्तिविशेषं। गुणानां विषमावस्थासंभवः परिकीर्ति
तः। साम्यं तु प्रलयो ज्ञेय इति तत्वविदो विदुरिति वचनात्॥ यद्वा पाषंडपथस्य पापलिंगमार्गस्य धर्मस्य सकाशात् बुद्धिवैषम्यं प्रतिलोमनिवेशनं ब्रा
ह्मणादिकन्यकानां शूद्रादिविवाहलक्षणं ३१ यावतीर्यावत्यः। तावतीरितिशेषः। सत्वादिगुणकर्मभ्यो जाताः। निमित्तानि साधनानि अवि
रोधतः परस्पराविरोधेन ३२ वार्तायाः वाणिज्यादेः। दंडनीतेः अर्थशास्त्रोक्तस्य राजधर्मस्य। श्रुतस्य श्रुत्युक्तस्य विधिं प्रकारं ३३ ग्रहाः सूर्यादयः

नैःकर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं। पाषंडपथवैषम्यं प्रतिलोमनिवेशनं ३१ जीवस्य गतयो याश्च यावतीर्गुणकर्म
जाः॥ धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः ३२ वार्तायादंडनीतेश्च श्रुतस्य च विधिं पृथक्। श्राद्धस्य च विधिं ब्रह्मन्पितॄ
णां सर्गमेव च ३३ ग्रहनक्षत्रताराणां कालावयवसंस्थितिं। दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं ३४ प्रवासस्थस्य यो धर्मो
यश्च पुंस उतापदि। येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः॥ संप्रसीदति वा येषामेतदाख्याहि मेनघ ३५ अनुव्रतानां शिष्या
णां पुत्राणां च द्विजोत्तम॥ अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ३६ तत्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः॥ तत्रेमं क उपासी
रन्क उ स्विदनुशेरते ३७ पुरुषस्य च संस्थानं स्वरूपं वा परस्य च ३८

नक्षत्राण्यश्विन्यादीनि। ताराः अगस्त्यादयः। कालावयवानां परमाण्वादीनां संस्थितिः। इष्टं यागादि। पूर्तं तडागखननादि ३४ धर्मात् प्रणपात्योनि
राविर्भावलक्षणोत्पत्तिर्यस्य स तथा। धर्मस्य योनिः कारणं। लोकसंग्राहकत्वेन कर्तेत्यर्थः ३५ ६ प्रतिसंक्रमः प्रलयः। तत्र प्रलये॥ इमं हरिं उनाहू
त्वा पश्च वयति। प्रश्न प्रवचनपर्यंतं सो ज्ञीति। उताविद्ययमीशानेऽहतियाद्वः। चेतस्मिन्नर्थे वा ३७ पुरुषस्यावतारसंस्थानं परस्य परमात्मनः स्वरूपं
अवतारेष्वपि नित्यावताराः कइत्यर्थः। यद्वा पुरुषस्य जीवस्य एकत्वादिविषयं परस्य मुक्तस्य स्वरूपं। मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिरिति व

गुरुशिष्ययोः प्रयोजनं व्याख्यानश्रवणाभ्यां नैःशिल्यनिश्चयलक्षणं। यद्वा गुरुशिष्यौ प्रयोजयतीति वा। नैगमं वेदांतजन्यं ज्ञानं। इह शास्त्रे तस्य ज्ञानस्योपायनिमित्तानि साधनानि नानापि ३८ पुंसां स्वतः साधनानि विना ज्ञानं कुतो भवेत्। भक्तिर्वैराग्यं वा कुतः स्यात् तामिति शेषः ३९ कर्मविवित्सया वेत्तुमिच्छया पृच्छत इति शेषः। वक्तव्यत्वे निमित्तमाह। मित्रत्वादिति॥ आपत्सु मित्रं जानीयादिति वचनात्॥ कातवापदिति तत्राह॥

ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनं ३८ निमित्तानि च तस्येह प्रोक्तान्यनघ सूरिभिः॥ स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा ३९ एतान्मे पृच्छतः प्रश्नान्हरेः कर्मविवित्सया। ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ४० सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ। जीवाभयप्रदानस्य न कुर्वीरन्कलामपि ४१

अजयेति। अनया प्रकृत्या। पुरुषस्यांधत्वादधिकापन्नास्मीत्यर्थः। अंधकारेण नष्टचक्षुः शंके। पुंसो यथा मित्रः सूर्यः प्रयोजकः तथा त्वमपीति भावेनोक्तं मित्रत्वादिति ४० त्वद्भी एत्वे कुत एतदेव वक्तव्यं अन्यत्किं न स्यादत्राह। सर्वे इति। जीवाभयहेतुज्ञानप्रदानस्य कलां षोडशीमपि नाचेरादित्यात् प्रवक्तृप्रायोऽत्र पुरुषमंतरेणेति सूचयति ४१

शुकः पृष्टेन मैत्रेयेण पृष्टमेवोक्तमन्यद्वेति परीक्षितो हार्दीं शंकां परिहरति। सइत्थमिति॥ पृष्टा ख्यपुराणविषयः कल्पः विकल्पः। कल्पो न्यायेषु रहस्ये विकल्पे चेति यादवः। बालकथा प्रश्नवद्वद्धीकथैव सारभूता न भगवत्कथा पृष्टेति मंदाशंकां परिहरति। भगवत्कथायामिति। अनेन सर्वविप्रश्ना भगवत्कथाविषया इति सूचितं भवति ४२ तृतीयस्कंधेसप्तमोध्यायः अस्मिन्नध्याये सर्वजीवोत्तमहिरण्यगर्भसृष्ट्यभिधानेन हरेः स

शुकउवाच सइत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः। प्रवृद्धहर्षो भगवत्कथायां संचोदितस्तं प्रहसन्निवाह ४२ तृतीयस्कंधेसप्तमोध्यायः॥ ॥मैत्रेयउवाच सत्सेवनीयो वत पूरुवंशो यल्लोकपालो भगवत्प्रधानः॥ बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णं १

र्वोत्तमत्वमाहात्म्यमवश्यं तत्प्रतसद्भानमवश्यमापाद्यं मुमुक्षुभिरिति निरूप्यते। तत्रादौ प्रश्नानुपरिहरिष्यन् तं विदुरं मानयन्नुक्तस्य पुराणावगतिप्रकारं कथयति। सत्सेवनीय इति। बत अनुकंपायां यस्मिन्पूरोर्वंशे भगवानेव प्रधानः सर्वोत्तमो यस्य स तथा लोकपालस्त्वं। निरलोक विदुर बनार्थं गर्भवासानुसवं परोक्षयति। भगवत्प्रधानत्वं प्रकाशयति। इहेति। इह लोके अजितस्य हरेः कीर्तिपुष्पमालां नूतनयसि नवां करोषि। यस्मात्तस्मादित्यध्याहार्यो १

भा॰ त॰
४३

अधुना प्रश्नप्रतिवचनं प्रतिजानीते। सोऽहमिति। योऽहं कृष्णेन तत्त्वज्ञानोपदेशाय आदिष्टो यश्च मम ज्ञानमुपदिशेति त्वया प्रार्थितः सोऽहं क्षुल्लसुखाय अल्पसुखाय महद्दुःखं गतानां नृणां दुःखस्य विरमाय निर्मूलनाय साक्षात्संकर्षणो भगवान्सनत्कुमारादिभ्य ऋषिभ्यो यदाह तत् भागवतं पुराणं त्वत्प्रश्नपरिहारत्वेन प्रवर्तये इत्यन्वयः २ सूचितमाविर्मूलत्वं प्रपंचयति॥ आसीनमुर्व्यामिति॥ उर्व्यां पाताले त्रिलोकी

सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य। प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः २ आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्वं। विवित्सवस्तत्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ३ राम राम

राम
४३

विवक्षया। भूमिपदेन पातालाभिधेयत्वं युक्तं। अतः संकर्षणात्परस्य हरेस्तत्त्वं विवित्सवः ज्ञातुकामाः कुमारमुख्या मुनयः। उर्व्यां पाताले विस्तृतायां वृतत्वात् आसीनमाद्यं सनकादिभ्यः पूर्वजातं देवं श्रीहरिमूर्त्याभेव प्रकाशमानमकुंठसत्त्वं अप्रतिबद्धज्ञानशक्तिं। नकुंठो यस्य तत् अकुंठं अकुंठसत्त्वं वैष्णवस्वभावो यस्य सोऽकुंठसत्त्वस्तमिति वा। संकर्षणं भगवंतमन्वपृच्छन्नित्यन्वयः ३ राम

स्य

भगवद्भुजाभिमंतरेणान्योऽन्यापारोऽस्यनास्तीति तादृशे विशेषणेः तं विशिनष्टि। स्वमेवेति। ये त्वावंतोऽयं वासुदेवाभिधमामनंति। तं स्वं सदानंदरूपं स्वतंत्रं वा धिष्ण्यं स्थानमाधारं भगवंतमेव बहुमानयंतं तत्सेवा परमानंदं पुनरपि कीदृशं प्रत्यगात्मनि धृतान्यक्षीणि इति धृतमाहितमक्षाम्बुजकोशं विबुधानामुदयाय ईषदुन्मीलयंतं विकसितं कुर्वाणं। अनेन न संप्रेक्ष्य नासिकाग्रं स्वदिशश्चानवलोकयनिति वचनात् वनतजनानुग्रहाय उन्मीलनमप्यदानयुक्तोऽनुपाक्षी विद्धंभावो दर्शितः। आधार आश्रयो धिष्ण्यं निधानं वाभिधीयत इति वचनात्। धिष्ण्यो शुक्रानलोधिष्ण्यं मृहे स्थाने बले गृहइत्युक्तं शुक्रादि

स्वमेव धिष्ण्यं बहुमानयंतं यं वासुदेवाभिधमामनंति॥ प्रत्यग्धृताक्षांबुजकोशमीषदुन्मीलयंतं विबुधोदयाय॥ स्वर्धुन्युदारैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं॥ पद्मं यदर्चंत्यहिराजकन्याः सप्रेमनानाबलिभिर्वरार्हाः ५

कं नया ह्यमनुपयोगात् वासुदेवाभिधमित्युक्तत्वाच्च ४ पथिकसार्थप्रश्नवन्नाद्य प्रश्नः अवश्यप्रज्ञानव्यत्वेनेति बहुमानं वक्ति॥ स्वर्धुन्युदारैरिति। सप्रेमोतिक्रियाविशेषणं अहिराजकन्याः। नानाबलिभिः बहुविधपूजासाधनैर्यत्पद्ममर्चयंति। वरार्हाः वरप्राप्तियोग्या इत्यनेनोत्तमभर्तृप्राप्तये पूजेति सूच्यते। स्वर्धुन्याम् आगीरथ्या उदस्योदकस्य आरात्स्नानलक्षणाद् आर्द्रैर्बांतेः स्वर्धुन्युदारार्द्रैः। अगतावितिधातोः ईजूप्रत्ययेन आर इति रूपं। यद्वा स्वर्धुन्यां अवगाहेन उदारैर्महद्भिः उदारो महति स्यादिति यादवः॥ एवंविधैः स्वजटाकलापैस्तस्य संकर्षणस्य चरणयोरुपधानं पीठायमानं तत्पद्ममुपस्पृशंतः या वत्सा सांदृष्ट्या नमंत इत्यर्थः ५

नमस्कारस्यांगं विशिष्टं तेषु सूचयतीत्याह। मुहुर्गृणंत इति अस्य शेषस्य कृतानि कर्माणि अनुरागेण स्खलंति पदानि यस्मिंस्तत्तथोक्तेन व
चसा तज्ज्ञाः नमनप्रकारं कर्मप्रकारं वा जानंत इत्यर्थः। दिव्याः किरीटाद्यलंकारवंतः श्रूयंते। कोस्यालंकारो येन देवमित्युक्तिः सार्था स्यादित्यत आह विशि
ष्टकिरीटेति। सहस्रमेव साहस्रं किरीटानां सहस्रे प्रस्तुतानां मणीनां प्रवेकैः श्रेष्ठैः प्रद्योतितं प्रकाशितमुद्दाममुत्कृष्टं च फणानां सहस्रं यस्य स

मुहुर्गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः। किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ६ प्रो
क्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन। सनत्कुमाराय स आह पृष्टः सांख्यायनायांग धृतव्रताय ७ सांख्याय
नः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः। जगाद सोस्मद्गुरवेन्विताय पराशरायाथ बृहस्पतेश्च ८ प्रोवाच म
ह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं। सोहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ९

तथोक्तः तं ६ तेन संकर्षणेन सनत्कुमाराय प्रोक्तं इदं पुराणं तत्प्रश्नपरिहारत्वेन वक्ष्यामीत्येतावता पूर्णेन्वाजां सांख्यायनायेत्यादि कथनेन किं
प्रयोजनमित्याशंक्य पुराणस्येत्थं गुरुपरंपराकथनेन श्रोतॄणामास्तिक्यबुद्ध्या तच्छ्रवणे दृढातिनिरंतरं प्रवृत्तिः स्यादिति महाप्रयोजनमस्ती
ति सूचयन्नाह। प्रोक्तमित्यादिना। निवृत्तिधर्माभिरतत्वादिकं पुराणश्रवणाधिकारसंपत्यर्थमुच्यत इति ज्ञातव्यं ७ ८ ९

तदेवं शुकः पाद्मकल्पमिमं अवान्तरकल्पाद्यं कल्पं मैत्रेयेण विदुरप्रश्नपरिहाररूपत्वेन कथयति। उदाप्लुतमिति। अनीहाक्लिष्टकारी। अन्तः प्राणोस्यास्तीत्यन्तःप्रा
णीतद्धर्मी हावेष्टारताराहित्यरितं यस्य सोनीहः। उपरतसर्गादिव्यापारो वा स्वात्मनि रतो कृतक्षणः लब्धावसरः। अहींद्रस्यानंतस्य तल्पे भोगात्वशय्यायामे
काधिशयानो यद्यदामीलितदृक् विनिद्रोपि निद्रामीलितलोचनोन्यमीलयत्। योगनिद्रामुद्रितनेत्रः अभूत्। तदेदं विश्वं उदाप्लुतं उदके जले प्लुतं गतं मग्नमा
त्मप्रलयजलशायिश्रीनारायणोदरगतमासीदित्यर्थः १० तदोदरीकृतलोकया नोहरिः किंवकारेतितत्राह सोंतरिति। यथानलो दारुणि काष्ठे रु

उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत्। अहींद्रतल्पेधिशयान एकः कृतक्षणः स्वात्म
रतावनीहः १० सोंतःशरीरेर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः। उवास तस्मिन्सलिले पदे स्वे
यथानलो दारुणि रुद्धवीर्यः ११ राम राम

द्धवीर्यः प्रतिबद्धदाहकत्वशक्तिर्वसतीति। तथा स हरिरपि शरीरांतर्हृदयाकाशेर्पितानि स्थूलकार्यदेहस्य लीनत्वात् भूतानां सूक्ष्माणि रूपाणि यस्य
स तथा यद्वा शब्दादितन्मात्रारूपाणि एतदात्मकत्वात्सर्वस्येति चराचरात्मकं सर्वं दृष्टं द्योते। कालात्मिकां प्रलयकालमात्रारम्भां शक्तिं। यद्वा। प्रलयकाला
भिमानिनीं शक्तिं भार्यां सुखे पेरयन्स्वे पदे स्वस्थाने सलिले उवासेत्यन्वयः। उदीरयाण उदीरयमाणः इति शानचा स्वात्मनीति सूचयति ११

स्थापावधिमाह। चतुर्युगानामिति। चशब्देनो वासेति पदं अनुकर्षति। चतुर्युगानां सहस्रमिति संख्याते काले स्वपन्न सुष्वापेति। तदुत्तरकाले का क्रिया सूदितित्त्राह तयेति। सृष्टिसंहारशक्त्योरेकत्वद्योतनाय तयेति परामृष्टं। सृष्टिकालाख्यया उदीरितया प्रेरितया स्वशक्त्या सादितकर्मतंत्रः सूक्ष्मार्थमुपलब्धापितजगत्सर्गी दृष्ट्वा स्वसाधनः नित्यज्ञानगोचरत्वादिमान् लोकान् स्वदेहे दृदृश यावकाशे ददृशे। अपिशब्दात्त्रिविधात्र पश्यदितियाह्यं। दृष्ट्वासिसृक्षुरभूदिति वाअपीतानित्यपपाठः १२ सिसृक्षोस्तस्मादादौ किमुदभूदित्येन तद्विशेषणोपादानेप्रयोजनं स्यादितित्त्राह। तस्येति। यदासिसृक्षुरभून्नदार्थी गर्भोदकलक्षणमस्य हरेर्नाभिदेशादभिद्यत नाभिदेशं भित्वा प्रकाशयतेत्यन्वयः। हरेः स्वातंत्र्यद्योतनार्थ भावप्रयोगः॥ हरेः सूक्ष्मे प्रशे

चतुर्युगाणां च सहस्रमप्सु स्वपं स्वयोदीरितया स्वशक्त्या। कालाख्यया सादितकर्मतंत्रो लोकानपीतान्ददृशे
स्वदेहे १२ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थो रजसा तनीयान्। गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभि
द्यत नाभिदेशात् १३

षविशेषज्ञानमग्निनकेवलं कुलालवद्युक्तिज्ञानमेवेति भावेनाह अर्थेति। अर्थनिस्थितेषु सूक्ष्मेषु योगिप्रत्यक्षविषयेषु आकाशादिभूतेंद्रियेषु जीवेषु वाभिनिविष्टा सम्यक् विषयीकृता दृष्टिरपरोक्षज्ञानं यस्य सत् तथा तस्य। घटकारणादिवत्तवाह्यार्थीनेत्याह अंतर्गत इति। अनेनाप्युक्तस्योपादरसत्वमुक्तं भवति। इतोपि वाद्योदकं नेत्याह तनीयानिति। परमाणुत्वप्राप्तः। गर्भोदकस्य प्रागेव सत्वात् किमिति कार्यानुत्पन्नमिति तत्राह रजसेति रजसा गुणेन विद्धः अनुस्यूतः। रजसोपि सत्वात्किमिति ततः पूर्वमनुत्पन्नमित्यत कालेति। सृष्टिकालशक्त्या। अनुत्तरूत्पन्नमिति भावः। अनेने सूरेक्षामुख्यकारणमित्युक्तं भवति। वायुमंतरेण कथमुत्पन्नं घटत इत्यत उक्तं सुष्यन्निति। सुष्यन् घनीभवन् वायुनेति शेषः उदकं वायुनाशुष्यद्विप्रपद्मभूद्

उक्तकारणानां बहुत्वात्किमस्य मुख्यकारणं किंवास्य नामधेयमिति तत्राह॥ सपद्मकोश इति। तयोरकंविनान्यस्य प्रकाशो भावादनिरूपितत्वेनैतद्दर्शनात्मकं सेत्युक्तं। आत्मा विष्णुर्योनिर्मुख्यकारणं यस्य स आत्मयोनिः कर्मणा अदृष्टेन प्रतिबोधितेन फलदानाय प्रेरितेन कालेनेरित इति शेषः। उदतिष्ठत्। यथा चतुर्दशभुवनं स्यान्नथाप्रवृद्धो भूदित्यर्थः १४ चेतनसंबंधमंतरेणावेतनस्य पद्मस्य सूर्यवत्प्रकाशकत्वं कथमणुपादीनामीश्वरेच्छया तेनः परमाणूनां प्रावुर्यणसंयोगसंभवात्कथं विद्युत्पत्ते। अस्य तु रजसेति पार्थिवपरमाणुभ्यः उत्पन्निकथनात्तेषांता दृशशक्त्या दर्शनात्ततः कारण

सपद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधितेन। स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः
१४ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं॥ ॥

तेरणभाव्यं तत्किं तत्राह। तल्लोकेति। यस्मात्पद्ममभूत्स एव विष्णुः तल्लोकविभागकारणं पद्मं प्रावीविशत्। यथा सूर्यवत्प्रकाशकत्वमाहात्म्यस्यातथा विष्टवान्। उकारेणापूर्वांतरेण प्रविशस्तूचयति। एवकारेण गुणमात्रमपि भेदो नास्तीति निर्द्धारयति। भेददर्शने नसंतापलक्षणं दुःखं स्यादित्यर्थवाची वोकारः। उत्तापेक्षया मीशानइति याद्गवः। विष्णोरेव प्रकाशकत्वं न पद्मस्य तस्य पृथिव्यात्मकत्वादिति भावेनाह सर्वेति सर्वेषां शब्दादिगुणानामवभासः प्रतीतिर्यस्मात् पृथिव्यास्तासर्वगुणावभासात्तदात्मकत्वात्पद्ममपि गुणावभासमित्युच्यते। तदुक्तं। तस्यासनविधानार्थं पृथिवीपद्मरुच्यत इति॥ ॥

पुन्नाभ्यात्तपद्मकारणो ब्रह्मा पुनः किमकार्षीदितितत्राह। सइत्थमिति। इत्थं परिशिष्टप्रमाणेन उद्भूतं तस्यादिति नाभेर्निश्रुतः वीक्षालोकतस्या
ब्जस्य नालस्यरंध्रस्य नालीभिर्नाडीभिः सुषिरेष्वंतर्जलं किं तत्राह नेति। खरनालस्य पद्मस्य नालसंबंधिनी नाली विविंचन्नन्विच्छन्मार्गमाणइत्य
र्थः तं कारणं नाविंदत्तवस्तुविषयं न लब्धवान् १८ भगवत्प्रसादं मंतरेण पुरुषाणां सुखेनापि तद्दर्शनं दुःकरं तावद्दृष्टा हात्म्यापत्त्वादिति तत्का
लस्यानेकसंख्यया विशिष्टत्वमाह॥ तमसीति॥ अपारेऽज्ञानवसानेतमसिस्वरूपाच्छादकमायालक्षणेऽन्धकारे भो विदुरआत्मनः सर्गो यस्मा

स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश। नार्वाग्गतस्तत्खरनालनाडी विविंचंस्तदविंदताजः १९
तमस्यपारे विदुरात्मसर्गं विचिन्वतोभूत्सुमहांस्त्रिनेमिः। यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः
२० ततो निवृत्तोप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः सदेवः। शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधि
योगः २१

त्तस्यात्मसर्गः तस्य कारणं। त्रिनेमिः नेमयश्चातुर्मास्यलक्षणा यस्य सत्रिनेमिः। अजस्य विलोकहेतिः चक्राख्यः २० एतद्दर्शनं नाममिति स्वप्रयत्नेन
साध्यं किंतु तत्प्रसादेनैव तत्प्रसादश्च तत्समाधियोगेनेति तं करवाणीति तदुपाप्तिप्रकारं कथयति। ततइति अप्रतिलब्धोऽप्राप्तकामोऽभिलषितवस्तु
लक्षणो येन स तथा। अदृष्टस्वकारण इत्यर्थः। ततो निमार्गणात्स्वधिष्ण्यपद्ममासाद्य आरुह्य शनैः प्राणं कुंभके निरुध्य जितश्वासोऽत एव
विषयेभ्यो निवृत्तचित्तः सन् आरूढसमाधियोगः असंप्रज्ञातचित्तैकाग्र्यलक्षणध्यानः पद्मकर्णिकायां वेलाजितलक्षणयां न्यषीदत्। स्वनाभाव

योगफलमाह। कालेनेति। पुरुषायुषा शतवर्षावधिना कालेन तत्कारणमपश्यतेत्यन्वयः। उपासनाजनितज्ञानफलमिदं दर्शनमिति भावेना
ह। प्रवृद्धेति। अनुदिनं वर्द्धमानेन समृद्धस्य मुद्ववत् प्रवृद्धयोगेन प्रकर्षेण समिद्धेन ध्यानापरपर्यायोपासनया विरूढबोधः समुत्पन्नापरोक्षज्ञानः
। तदपि स्वप्रसादेनेति भावेनाह अंतर्हृदय इति अवभातं प्रकाशितं स्वयं प्रधानं अनेन तस्मिन् स्वयमित्युक्तत्वात् ब्रह्मोत्पादकमेवापश्यन्नान्यदि
ति सिध्यति। अवभातमिति विशेषणं विशिनष्टि। अपश्यतेति। पूर्वं पद्मनाले निमार्गणसमयेऽयन्नापश्यत तदिति शेषः। आत्मनेपदप्रयोगपा

कालेन सोऽजः पुरुषायुषाभिप्रवृद्धयोगेन विरूढबोधः। स्वयं तदंतर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वं २२
मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानं॥ फणातपत्रायुतमूर्द्धरत्नद्युभिर्हतध्वांतयुगांततोये २३

ममेयमेवेष्टदेवतानान्येति ध्वनयति २२ कीदृशं हरिमपश्यदित्याशंक्य नवभिः श्लोकैस्तं विशिनष्टि॥ मृणालेति। फणानां सहस्राणामयुतेषु
अविमिश्रितेषु अन्योन्यसंपर्करहितेषु मूर्द्धसूत्पन्निकानां रत्नानां द्युभिर्द्युतिभिर्हतं नष्टध्वांतं यस्य तद्धतध्वांतं तच्च युगांततोयं हतध्वांतयुगांततो
यं तस्मिन् कल्पप्रलयजले स्थिते मृणालगौरायतशेषभोगपर्यंके शयानं शेषस्य अनंतस्य नागस्य भोगो देहः शेषभोगः अहेः शरीरे भोगः स्या
दित्यभिधानं। मृणालवद्गौरः स्वर्णश्च आयतश्च मृणालगौरायतः मृणालगौरायतश्चासौ शेषभोगश्च मृणालगौरायतशेषभोगः स एव पर्यंकः
शयनीयं तस्मिन् पुरुषं पुरुषाकारं एकं केवलं अशाकृतमित्यर्थः २३

ध्यानसौकर्यायनीलपर्वतसाधर्म्येणवर्णयति।पेशलमिति।हरितोपलाद्रेः नीलपर्वतस्यपेशलंदर्शनीयंकांतिंक्षिपंतंनिराकुर्वंतंकीदृशस्यनील गिरेः संध्याभ्रनीवेः संध्याकालीनाभ्रमेवनीविर्वस्त्रंयस्यसतथातस्यऊरूणिबहूनिरुक्माणिसुवर्णानिमूर्द्धिशृंगेयस्यसतथातस्यरत्नैरुद धिस्थरत्नाकरस्येत्यर्थः। ओषधयः सौमनस्यानिवसुमनसांसमूह एववनस्रग्वनमालायस्यसतथातस्यवेणवएवभुजायस्यांघ्रिपाद्रुमा एवांघ्रिर्यस्यसतथातस्य।अनेनहरिरपिनीलद्युतिदेहः पीतांबरधरः सुवर्णकिरीटालंकृतमूर्द्धाकौस्तुभरत्नकंधरः वनमालांवितोदीर्घदो

पेशलंक्षिपंतंहरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्द्ध्नः। रत्नोदधेरौषधिसौमनस्यवनस्रजोवेणुभुजांघ्रिपांघ्रेः २४
आयामतोविस्तरतः स्वमानदेहेनलोकत्रयसंग्रहेण।विचित्रदिव्याभरणांशुकानांकृतश्रियोपाश्रितदिव्यवेषं २५

र्दंडितः पूर्णतानिहारिश्रीपादपद्मइत्युत्प्रेक्षितंभवति।संध्याभ्रवस्त्रीवियत्स्येत्यादिव्याख्यानंपेशलंक्षिपंतमित्यनेनान्वितंस्यात् २४ लोक त्रयंसंगृह्णातीतिलोकत्रयसंग्रहः तेनायामतोविस्तरतः दैर्घ्यपरिमंडलाभ्यांसमानेनन्यग्रोधपरिमंडलत्वादिलक्षणवतादेहेनविचित्रदिव्याभ रणांशुकानांकृतश्रियापूर्णश्रियाचोपाश्रितः समाश्रितोदिव्यश्चौत्पत्तिकोवेषः सौंदर्यंयस्यसतथातं।यद्वाभरणादीनांकृतश्रियाउपगम्याश्रि
तः सेवितोदिव्यवेषोयस्यसतथातमिति २५

कामंदोग्धीतिकामदुघंतत्त्वांघ्रिपद्मंपुंसांप्रदर्शयंतमित्यन्वयः।नन्वेवंतर्हिकिमितिसर्वेपुरुषार्थभाजोनाभूवन्नितितत्राहस्वकामायेति।विविक्त एवमुख्यभावइतिधातोर्विविक्तैर्वैदिकादिभेदेनपृथक्कृतैर्मार्गैरभ्यर्चितंयथाभिमुखोभवतितथार्चनंकुर्वतां।नखाएवेंदवः तेषांमयूखारश्मयः तै र्भिन्नाइतरेतरविलक्षणाअंगुलयः ताएवचारूणिपत्राणियस्यांघ्रिपद्मस्यतथातत्।अत्रजनबुध्यारोहार्थमेवमुक्तं।स्वतइतरपद्मविलक्षणमिद मंघ्रिपद्ममित्यर्थः २६ मुखेनप्रत्यर्हयंतंशरणागतजनानुसम्मानयंतमिवस्थितमितिशेषः।लोकार्तिहरस्मितेनेत्यादिनामुखंविशिनष्टि।अध

पुंसांस्वकामायविविक्तमार्गैरभ्यर्चतांकामदुघांघ्रिपद्मं।प्रदर्शयंतंकृपयानखेंदुमयूखभिन्नांगुलिचारुपत्रं २६ मुखेन
लोकार्तिहरस्मितेनपरिस्फुरत्कुंडलमंडितेन।शोणायितेनाधरबिंबभासाप्रत्यर्हयंतंसुनसेनसुभ्र्वा २७ कदंबकिं
जल्कपिशंगवाससंस्वलंकृतंमेखलयानितंबे।हारेणचानंतधनेनवत्सश्रीवत्सवक्षस्थलवल्लभेन २८

रबिंबभासाशोणायितेनरक्तवद्दृश्यमानेनसुनसेनशोभमाननासिकेनसुशोभनाभ्रूर्यस्यतत्सुभ्रुतेनसुभ्र्वानपुंसकश्चसुलुवशब्दवदयंशब्दः २ ७ किंजल्कः केसरः कदंबेतितत्सुवंधा।मेखलाकांची।अनंतधनेनेतिहारस्यानर्घ्यत्वंवक्तिहेवत्सविदुरश्रीवत्सलक्षणस्यवक्षस्थलस्यवल्लभे नप्रियेण २८

अधुना हृदुक्तसाधर्म्येण हरिं वर्णयति। परार्ध्येति। परार्ध्यैरनर्घ्यैः केयूरैः मणीनां प्रवेकाः श्रेष्ठाः ये धृतैः कंकणैश्च पर्यस्तं परितो न्यस्तं अलंकृतं दोर्दंडसहस्रमेव शाखा यस्य सतथोक्तस्तं। अव्यक्तं प्रधानं त्रिगुणं मूले पादे यस्य सतथा तं प्रकृतेः कारणं वा। तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेति वचनात्। अविज्ञाताधः प्रदेशमिति वा प्रधाने व्यक्तमव्यक्तो ब्रह्मणः परस्य इत्युक्तं योरिति यादवः। भुवनेषु विद्यमानानां अंघ्रिपाणां वृक्षाणामिंद्रं

परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं। अव्यक्तमूलं भुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्कं २९
चराचरौको भगवन्महीध्रमहींद्रबंधुं सलिलोपगूढं॥ किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भं ३०

यद्वा चतुर्दशभुवनाख्यांघ्रिपाणामिंद्रं श्रेष्ठं। अहींद्रस्य शेषस्य भोगैः शरीरविशेषैरधिवीतवल्कं संवीतत्वचं उभयत्र समममिदं २९ पुनर्

पि पर्वतसाधर्म्येण वर्णयति॥ चराचरौक इति। भगवन्महीध्रं श्रीनारायणाख्यपर्वतमपश्यदित्यन्वयः। चराचरस्य जगतः ओकोमंदिरं॥ ओकसी पि पर्वतसाधर्म्येण वर्णयति। प्रलयसलिलेन किरीटानां सहस्राण्येव हिरण्यशृंगाणि यस्य सतथा तं। कंठे आविर्भवत्कौस्तुभरत्नगर्भप्रकाशमानं कौ मंदिराश्रयाविति वा। प्रलयसलिलेन किरीटानां सहस्राण्येव हिरण्यशृंगाणि यस्य सतथा तं। गर्भोपवारके वृंदेनेपथ्ये ग्रथितेपि वेत्यभिधानम् ३०
स्तुभं कुसुभात्समुद्राज्जातं तत्राम रत्नेगर्भं आभरणं यस्य सतथा तं।

आम्नाया एव मधुव्रता भृंगाः तेषां या श्रीः शोभा स्वरूपकीर्तिमय्या वनमालया निवीतं संवीतं कंठ इति शेषः। इयं तत्कालमयुक्तं शबलब्रह्मब्रह्मादर्शन नित्यमुक्तं निर्गुणमिति तत्राह सूर्येति। त्रिधाम्नो विष्णो रगच्छद्भिः नित्यं तत्समीप एव तिष्ठद्भिर्मुक्तैः सूर्येंदुवाय्वग्निभिर्वृतं। अत्र व्यत्यासादा दिश्यहृष्टे पोन्नातमयः। सूर्येंदुवाय्वग्न्यादिभिरित्यावार्यवचनाच्च। परिक्रमद्भिः प्रदक्षिणं कुर्वद्भिः प्राधनिकैः प्रधानस्य हरेर्भृत्यैः पुरपालकैश्च वृतमिति शेषः तदुक्तं। मुक्तवाय्वादिभिर्विष्णुं वृतं ब्रह्मा ददर्श ह। इत्यादिविशिष्टवचनाच्च। दुरासदमित्यनेनापि मुक्तैर्निषेवितैर्विष्णुमपश्यदिति गम्यते ३१ अने

निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिं। सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकै
र्दुरासदं ३१ तर्ह्येव तन्नाभिसरःसरोजमात्मानमंभः श्वसनं वियच्च। ददर्श देवो जगतो विधाता नातः परं लोकवि
सर्गदृष्टिः ३२

नैतद्बलद्वमित्याह। तर्हीति। यदैवंविधं हरिमपश्यत् तर्हि तदैव नाभिसरसि उत्पन्ने सरोजे स्थितमात्मानं स्वं ब्रह्मणो लोकविसर्गदृष्टिः लोकेन ज्ञानेन विशिष्टमुक्तस्वभावो येषां सूर्यादीनां ते लोकविसर्गास्तेषां दर्शनं। लोके विसर्गाः सृष्टिरहितालयोदकवाय्वादय एषां दर्शनमभूदतः एतद्दर्शना त्परमन्यद्दर्शनं नाभूत्। मुक्तसूर्यादिकं प्रलयजलादिकमेव ब्रह्मा ददर्श परं न ददर्शेत्युक्तं भवति। यद्वा लोकस्य ज्ञानस्य विसर्गस्य सृष्ट्यादिव्यापा रस्यान्यस्य निर्गुणस्य दृष्टिरतः परं न भवति इदमेव निर्गुणदर्शनमिति भावः ३२

यद्यर्थमहं हरिणा सृष्टः तत्कर्तुं तदनुग्रहं मंतरेण न शक्नोम्यतः कृत्वा तं प्रसाद्य तत्करोति इति चिंतितं ज्ञानवीर्या भीष्टं कार्यं शुश्रूषालक्षणं करोमीति भावेन तेनेत्यातीत्याह। स्वकर्मबीजमिति। स ब्रह्मा तमीशमनेदृशनोनीदित्यन्वयः। कीदृशः स्वकर्मबीजं सृष्टौ स्वनिमित्तकारणादृष्टस्यांकुरकं। कीदृशो ब्रह्मा रजसा गुणेनोपरक्तः। उपरागफलमाह। प्रजा इति सृष्टिसाधनमियद्देवमत्र्यादिकं दृष्ट्वा विसर्गाभिमुखः विविधसृष्ट्यभिमुखः अव्यक्तवर्त्मनि ब्रह्मलक्षणमार्गे अभिनिवेशितात्मा निर्विषयान्निविष्टमना
: ३३ तृतीयस्कंधे नवमोऽध्यायः॥ ॥ब्रह्मणः स्तुतिप्रकारो स्माकमपि श्रवणगोचरः किमिति मनः शंका माभूदिति भावेन तत्स्तुतिप्रकारं कथयति। ज्ञातोसीत्यादिना। न चित्यवधारणार्थो वा अद्य तु न पार्थवामेनतुमम सुचिरात्पश्चाद्य तु न येनाद्य ज्ञातोसि। नन्वेवमेः व्यक्तस्वभावस्य ज्ञानं कथं घटत इति तत्राह देहभाजामिति। भगवतो गतिः स्वरूपं देहभाजामनुनयेन न ज्ञायत इति यत्तद्दवद्यं दुष्टं। अतोऽव्यक्तस्वभावोऽपि मत्त्वादि साधनसामग्र्या ज्ञायत एवेत्यर्थः। ननु तर्हि कस्मात्त्व

स्वकर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा। अस्तौद्विसर्गाभिमुखस्तमीशमव्यक्तवर्त्मन्यभिवेशितात्मा ३३ इति श्रीभागवते महापुराणे तृतीयस्कंधे नवमोऽध्यायः ब्रह्मोवाच ज्ञातोसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यं। नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि १

वै पुरुषार्थभाजः किं नाभूव न्निमित्यस्मिदेमे वोन्तरं। तवगतिर्न ज्ञायत इत्यत्रावद्यं पापं कारणं न त्वन्यथेत्यर्थः देहभाजामिति स्वस्वामिसंबंधज्ञापनाय षष्ठी स्वस्वामिभावज्ञानाभावात्तन्न ज्ञायत इति भावः। ननु स्वव्यतिरिक्तवस्तुनोऽसत्त्वान्न ज्ञायत इति किं न स्यादत्राह नेति। त्वदन्यद्वस्तु किंचित्तो नास्ति त्वदधीनसत्ताकत्वात्। द्रव्यं कर्म च कालश्चेत्यादेः। तर्हि तेन ज्ञायेतेति तत्राह तदिति। तुशब्दोऽप्यवधारणे वा। त्वत्तो भिन्नं तज्जगदशुद्धं सदोषमेवातः सदोषत्वान्निर्दोषो भवान्न ज्ञायत इत्यर्थः। त्वदन्यस्य सदोषत्वं भवतो निर्दोषत्वं च कथमत्राह मायेति। मायायाः प्रकृतेः सत्त्वादिगुणानां व्यतिकरात् क्षोभाज्जातेषु महदादितत्त्वेषु अंतर्यामिरूपेण वर्तमानो भवान्नुरुर्बहुत्वसंख्याविशिष्टो विभासीति यद्यस्मात्तस्मादितरत्सर्वं सदोषं त्वं निर्दोष इत्यतो विभासीत्युक्तं। अत्रायं त्वनानात्वं तदपि स्थानभेदात्सदेव भाति। एकोऽपि स्थाननानात्वान्नानेव हरिरीयते। सर्वांतर्यामिणा स्वयं न भेदो विद्यते क्वचिदिति वचनात् १

इतोऽपि वाद्य न सा गोचरं भवतः स्वरूपं इत्येतदवद्यमित्याह। रूपमित्यादिश्लोकद्वयेन। अवबोधरसोदयेन अपरोक्षज्ञानरससमुद्रेकेण शश्वन्निवृत्ततमसः नित्यनिरस्तप्रकृतिगुणात्मकेः तव यदेतदवतारशतैकबीजं मत्साद्यवतारशतानामंकुरकं रूपं आदौ गृहीतं अनादित्त एव नेदानीं गृहीतं। यन्नाभिपद्मभवने रूपं क्षीरसागरमध्यगं इत्यतः क्षीरसमुद्रशायि यत्राभिपद्मभवनाद्यस्य नाभिकमलाख्यगृहाद्दहमाविरासं जातोस्मि। अनादिनित्या द्रव्यक्तात्स्या ज्ञेत्वरुर्युखेइति वचनात् २ हे परम यदानंदमात्रं सत्ज्ञानानंदैकरसं। अत एवाविकारं षड्विधविकाररहितं। अत एवाविद्धवर्चः अप्रतिहताविरूपभवतः स्वरूपं पश्यामि। अतः परं निर्गुणं नास्तीति पश्यामि सत्ज्ञानानंदैकमात्रेन ततः परमं क्वचिदिति वचनात्। यच्च विश्वसृजं विश्वस्य स्रष्टृ एकं प्रपंचांतररहितं॥ अविश्वं प्रपंचविलक्ष

रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय। आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासं २ नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकारमविद्धवर्चः। पश्यामि विश्वसृजमेकमविश्वमाद्यं भूतेंद्रियात्मकमदस्त उपाश्रितोऽस्मि ३

णं। आद्यं सर्वस्यादिभूतं उपजीव्यं वा। भूतेंद्रियाणामात्मकं व्यापकं। यद्यप्येतादृशं तितवादो रूपं तदुपाश्रितोस्मीत्यतो न ज्ञायते वाद्य न सा गोचरत्वादित्येतदवद्यं अवश्यं भद्रमतां अद्य तु न माधिकार्यपेक्षयोक्तं न देवदत्तादय इव मापेक्षयेति तत्त्वं। अनेन प्रकृतिगुणविकृतपदार्थश्रुति छतो हरेर्ज्ञानादिकं न स्यात्कथं वोदासीनस्याहिती यस्य रूपांतरग्रहणं कथं वा विकारिकृज्ज्यं सृजतो विकाराभाव इत्येतच्छंकात्रयमुन्मूलितं उक्तयुक्तेरिति भावः। अदइत्यनेन दूरस्थवस्तुवाचिना पूर्णमदः पूर्णमिदमिति श्रुतेः जगद्व्यापिरूपेणास्वदृष्टविषयरूपस्यैकत्वं सूचयति ३

भा॰ टी॰
५१

नकेवलंमयैवदृष्टोसिस्वत्प्रसादेनान्यैरपिज्ञायमानत्वात्नज्ञायतइत्यवद्यमितिभावेनाह। यद्वाइति। ध्यानात्मनोज्ञानरूपस्यतत्तद्ध्यानानुगुणरूपस्यवातेतवउपासकानांयदिदंदर्शितंतादृक्रूपविशिष्टायानुविधेमकुर्मः। तर्हिदुर्ज्ञेयाहिहरेर्गतिरित्यादेःकोभिप्रायइतितत्राह यइति। असत्सुविषयेषुप्रकर्षेणासंगोयेषांतेतथातैः। इदानीममापिजन्मांतरेपिसत्संगात्प्राक् सद्गतिःस्यादत्राह निरयेति। अयगताविति धातोःअयनंगमनंनिरस्तंयस्मात्सनिरयःनिर्गमनशून्यमंधंतमइत्यर्थः। तं भजंतीतिनिरयभाजःतैःअंधंतमःप्राप्तियोग्यैरित्यर्थः। यश्चानादृतःअनादरंनार्हतःतेर्दुर्ज्ञेयइतिशेषः। तस्मैनमःवाइत्यनेनसाधनसामग्र्यांदर्शनंभवत्येवेतिसूचयति ४ बलिसमयेपत्रप्रत्यग्रवद्धरेःप्रत्यक्षत्वेनसाक्षात्तेनज्ञायतइतितत्राह येत्विति उपासकत्वेविश्वसूचकस्पृश

यद्वा इदंभुवनमंगलमंगलेयत्तध्यानात्मनोदर्शितंतउपासकानां। तस्मैनमोभगवतेनुविधेमतुभ्यंयोनादृतोनिरयभाग्भिरसत्प्रसंगैः ४ येतुत्वदीयचरणांबुजकोशगंधंजिघ्रंतिकर्णविवरैःश्रुतिवातनीतं। भक्त्यागृहीतचरणःपरयाचतेषांनापैषिनाथहृदयांबुरुहात्स्वपुंसां ५

द्वांतेनयेतःउपासकाःमहांतोगुरुमुखेभ्यःश्रुतिवातनीतंउपनिषदुक्तप्रकारेणश्रवणाख्यवायुनाकर्णविवरैःप्रापितंत्वदीयचरणांबुजकोशस्यश्रीराध्याःतत्रयेतःउपासकाःमहांतोगुरुमुखेभ्यःश्रुतिवातनीतंउपनिषदुक्तप्रकारेणश्रवणाख्यवायुनाकर्णविवरैःप्रापितंत्वदीयचरणांबुजकोशस्यश्रीरा

राम
५१

द्वांतेनयेतःउपासकाःमहांतोगुरुमुखेभ्यःश्रुतिवातनीतंउपनिषदुक्तप्रकारेणश्रवणाख्यवायुनाकर्णविवरैःप्रापितंत्वदीयचरणांबुजकोशस्यश्रीराध्या

इविणादिनिमित्तंभयंयावत्तावत्नज्ञायतइतिमतंनिर्मूलमितिभावेनाह। तावदिति ६ कस्मात्तर्हिनज्ञायतइत्याशंक्याह। भवदनुग्रहाप्राप्त्यादित्याशयेनाह। दैवेनेति। अंधंतमःप्राप्तिपर्यंतंशश्वदकुशलकरणात्नज्ञायतइत्याग्रहेणनिवर्ततेइतिभावः। दैवेनसर्वात्मनेनहरिणाविमुखवर्गादीद्रियाःसुखलेशलवायअल्पादल्पसुखायलघुमुग्धार्थइतिधातोर्लोभोगार्थममिलाषेणाभिभूतमनसोयेषांतेतथाहासह्यानिकुर्वते७

तावद्भयंद्रविणदेहसुहृन्निमित्तंशोकःस्पृहापरिभवोविपुलश्चलोभः। तावन्ममेत्यसदवग्रहआर्तिमूलंयावन्नतेंघ्रिमभयंप्रवृणीतलोकः ६ दैवेनतेहतधियोभवतःप्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियाये। कुर्वंतिकामसुखलेशलवायदीनालोभाभिभूतमनसोकुशलानिशश्वत् ७ क्षुत्तृट्त्रिधातुभिरिमामुहुरर्द्यमानाःशीतोष्णवातवर्षैरितरेतराच्च। कामाग्निनाच्युतरुषाचसुदुर्भरेणसंपश्यतोमनउरुक्रमसीदतेमे ८

यज्ज्ञातेसर्वमिदंज्ञायतेअविज्ञातंविज्ञातमितिश्रुतेः ७ अतस्त्वद्गतिर्नज्ञायतइत्यत्रतसाहसमितिसूचनायब्रह्मानुर्ज्ञानफलभोगिप्रजानुकंपाव्याजेनसद्ज्ञानोत्पन्नोप्यथमवैराग्यमेवसाधनीयंबुभुक्षुणेतिभावेनाह। क्षुत्तृडिति। क्षुधातृषात्रिभिर्धातुभिर्वातादिभिराध्यात्मिकैः। इमाःप्रजाःशीतोष्णवातवर्षैःआधिदैविकैःइतरेतरादन्योन्यनिमित्ताद्धाधिभौतिकैःसुदुर्भरेणकामाग्निनासुदुर्भरयारुषाच ८

भा·त·
५२

त्रिविधोजीवसंघोमुक्तियोग्यःसंसारयोग्यस्तमोयोग्यइतितत्रभगवतोगतिर्नज्ञायतइत्यादिरूपामुक्तियोग्यानांसंसृतिःकदानिवर्ततइतितत्राहया
वदिति।चशब्दस्तुक्तसमुच्चयार्थोवधारणार्थोवा।यावद्यदाआत्मनःस्वस्यभगवतःसकाशादिंद्रियार्थइंद्रियविषयभोगार्थंत्रयंमुक्तियोग्यजनोध्या
यामिपश्यामिशृणोमीत्यादिपृथक्त्वंविभागलक्षणंमायाबलंभगवदिच्छाबलंभगवदिच्छयाप्रणीतंचेष्टितमित्यर्थः।बलप्राणनइतिधातोःपश्ये
त्।चशब्दान्मुक्तावपि।ध्यायेमस्येतथापश्येशृणोमीतिविभक्तता।जीवस्यतुहरेरिच्छाबलादिंद्रियभुक्त्यइत्यतोनानिर्वाच्यलक्षणोभेदःपृथक्त्वंपश्ये
दितिदृग्विषयत्वेनज्ञेयत्वोक्तेःहरेरिच्छैवमायानानिर्वाच्यामायाविद्या।।तदुक्तं।।ज्ञेयत्वंदुर्घटस्यापिघटनाधिकशक्तिता।अभेदईश्वरेणापिस्पृष्ट्यादावत

यावत्पृथक्त्वमिमयदैमात्मनइंद्रियार्थमायाबलंभगवतोजनईशपश्येत्।।तावन्नसंसृतिरसौप्रति
संक्रमेतव्यर्थापिदुःखनिवहंवहतीक्रियार्था ९

राम
५२

रंगता।उच्यतेयस्याःसामायाहरेरिच्छाथवाबलमिति।ननुतर्हिमायापाशद्वयस्ययोर्लक्ष्मीवंधकशक्त्योर्विभागज्ञानंकथमेवेतनप्रकृतेश्चेतिप्रसक्ता
शंकाभगवतंत्रतायस्यामज्ञायीत्वसुरूपता।उच्यतेमायासातुश्रीर्हीमयुक्ताजडास्मृतापरिणामिनीवधस्याप्रदोषाश्चेतनतातथा।शेवलीना
मसामायाजगद्द्वधात्मिकासदेत्यनेनपरिहृतमेत्यभिप्रायेणावार्थःशेषोसाहरणंकृतं।तावन्नदा।व्यर्थापिआत्यंतिकप्रयोजनशून्यापि।धर्मादिक्रिया
र्थादुःखनिवहंदुःखपरंपरांवहतीसंसृतिःप्रतिसंक्रमेतनाशंगच्छत्येवेत्यन्वयः।अघटितघटकत्वशक्तिरज्ञोतिद्योतनायईशेतिसंबोधनं।एतदभिप्रा
येणोक्तंज्ञेयत्वंदुर्घटस्यापिघटनाधिकशक्तितेति ९

नित्यसंसारिणांसंसरणप्रकारंनिरूपयति।अध्याहृतेति।अध्याहृतार्थानिआकृष्टशब्दादिविषयाणिकरणानींद्रियाणियेषांतेतथा।अन्योन्याकर्षण
त्वज्ञापनायैवमुक्तं।तत्रनिमित्तमाह।निशीति।अत्रानंतुनिशाशोकादिवाज्ञानमुदीर्यतइतिवचनात्निशपदज्ञानेनितरांशयानाःपरमतत्वाज्ञानेकारणे
मित्यर्थः।नानामनोरथधियइतिहेतुगर्भविशेषणं।।तस्मात्क्षणेक्षणेभंगयुक्तनिद्राःनिद्रातुंमप्यवसरोनास्तीत्यर्थः।नित्यस्तुनकर्मानुष्ठानत्वेनदैवा
दनुदितप्रसादाहृतार्थरचनाःविनाशितार्थामीष्टवक्रचमत्काराअक्षयोपिऋषिकुलप्रसूताअपि।अत्रसर्वत्रस्पष्टंनिमित्तमाहयुष्मदिति।इहजीव
लोके।स्वर्गेनरकेच १० पृथक्त्वमायाबलंपश्येदितियदुपरोक्तज्ञानेमुक्तंतदुत्पन्नविरुद्धभूतसाधनमाह।त्वद्भावेति।पुंसांनाथपुरुषोत्तमाःसतोलो
कमान्याच्छेष्टादावार्थीकृतेनशास्त्रश्रवणेनईक्षितोदर्शितःपंथाविष्णुभक्त्यादिलक्षणोयैस्तेतथोक्ताः।अतएवत्वद्भावयोगेनत्वद्विषयेणभक्ति

अध्याहृतार्थकरणानिशिनिःशयानानानामनोरथधियःक्षणभग्ननिद्राः।दैवाहतार्थरचनाऋषयोपिदेवयुष्मत्प्रसंगवि
मुखाइहसंसरंति १० त्वद्भावयोगपरिभावितहृत्सरोजआस्सेश्रुतेक्षितपथानुनाथपुंसां।यद्यद्धियातउरुगायविभाव
यंतितत्तद्वपुःप्रणयसेतदनुग्रहाय ११

योगेनभावितमधिवासितंहृत्सरोजंमनःकमलंयेषांतेतथोक्ताः।मनइत्युपलक्षणंचेदंनादिसद्धास्त्रश्रवणसेनातत्वंद्भक्तियोगेननिर्मलीकृतेंद्रिय
ग्रामायेमुक्तियोग्याजनाः।हेउरुगायविष्णो।तेपुरुषामत्वयद्यद्वपुर्नन्वनुमतंयथायथास्वस्वयोग्यज्ञानानंदादिगुणत्वेनानुज्ञातंधियाविभावयं
ति।तत्तदनुग्रहायतेषामनुग्रहायतत्तद्वपुस्तादृशेनतादृशमुखाकारंप्रणयसेव्यक्तीकरोषीनस्निग्धंकरिष्यसीमत्वयः।नचित्यनेनैतिह्यचाविनायादृशोभा
वितस्तीशस्तादृशोजीवआभवेत्तंयथायथोपासतेतदेवभवतीतिवाक्यद्वयंप्रमाणयति।एतदुक्तंभवति।सद्गुरुमुखात्सच्छास्त्रश्रवणेनेतरविरक्तिद्वा
रहरोभक्तिरन्यास्वयोग्यगुणोपसंहारलक्षणोपासनातथाहरेरपरोक्षज्ञानंतेनपृथक्त्वस्यमायाबलविषयंत्वतस्माद्धरेःप्रसादस्तेननज्ञायतेभगवतोगति

धियायद्यद्विभावयंतीत्यत्र सकामैरेवोपास्यते इत्यन्यथाप्रतीयते तन्मा तु मुक्तिपरिपंथिनीति मानकर्त्तव्येति भावेनाह नेति॥ हृदीत्युभयत्रान्वेतव्यं॥ स
र्वभूतदयायाः कर्तृत्वे हेतुर्नानाजनेष्ववहित इति। दुर्भगाशरीरस्थत्वेप्यणुमात्रं दुःखमस्य नास्तीत्यत्र हेतुरंतरात्मेति। अंतःस्थित्वापि रतिरूप इत्यर्थः।
अत एव सुहृद् निमित्तं बंधुः। एवंविधो यस्त्वमसद्भिरासुरप्रकृतिभिरलभ्यया लब्धुमशक्यया सर्वभूतदयया सुरगणैर्हृद्याराधितोपि यथातिप्रसीदसि सत्वं तथा
हृदि बद्धकामैर्जनैरुपचितोपचारैराराधितो नातिप्रसीदसि। मंत्रगुरुदेवताशक्त्या तन्नियतया किंचित्फलदानाभिमुखोपि नात्यंतिक मुक्तिफलदत्वेन

नातिप्रसीदसि तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः। यत्सर्वभूतदययासदलभ्ययैको नानाजने
ष्ववहितः सुहृदंतरात्मा १२ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च। आराधनं भग
वतस्तव सत्क्रियार्थो धर्मोर्पितः कर्हिचित्क्रियते न यत्र १३

प्रसन्नो भवसीत्यतोतीत्युक्तं। आराधितो यो ब्रह्माद्यैर्भक्तिज्ञानदयादिभिः। किं तस्य कामुकजनैः कृतया परिचर्ययेति वचनादुक्त एवार्थः। इतरेषां
सेवानुगुणफलदत्वेपि त्वमेक एवंविधस्वभाव इत्येक इति १२ न केवलं निष्कामतया कृतं भवत्प्रसादजनकं किंतु भवदर्पणसहितमित्याह। पुंसा
मिति पुरुषैर्धर्त्रये पुयज्ञादिषु सत्क्रियार्थः तव पूजाप्रयोजनाः दृष्टा ये धर्मा यत्र यस्मिन्स्वय्यर्पिता न क्रियते तेषां पुंसां अध्वराद्यैः क्रियमाणं भगव
दाराधनं प्रसादजनकं न भवतीत्यन्वयः १३

हरेस्तत्वाज्ञानादुत्पन्नो यो न ज्ञायते गतिरित्यादिरूपः संसारस्तन्निवर्त्तकोपास्तोतात्वगुणोपसंहारः कर्त्तव्य इत्याह। शश्वदिति। देवदत्तवदेकदापि मे
दमोहोस्तीत्यन्यथाप्रतीतिनिरासाय शश्वदिति परोपदेशमंतरेण स्वरूपमहसैव स्वरूपज्ञानेनैव तद्ब्रह्मावेदहं ब्रह्मास्मीति श्रुतेर्निपीतभेदमोहाय
सम्यक्छिन्नः स्वस्त्रेशापूर्णतादिषड्विधभेदमोहाय। ईशस्यापूर्णताज्ञानं विक्षोरन्यस्य वेशता। भेदस्तस्यावतारेषु जीवस्येशत्वमेव च। तथा जीवत्वमीश
स्य जडाभेदस्तयोरपि। भेदमोह इति प्रोक्तः समस्तान हरेः क्वचित्। अन्येषां तत्प्रसादेन शनैर्यातिसतामपीत्यादिवचनात्स्वतो भेदमोहाभावे विश्वा

शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै। विश्वोद्भवस्थि
तिलयेषु निमित्तलीलारामाय ते नम इदं चकृमेश्वराय १४

क्तत्वबुद्धावस्यादिति तत्राह बोधेति अप्राकृतज्ञानरूपंबुद्धये। न त्वेतज्जीवस्याप्यस्तीत्यत उक्तं परस्मै इति। स्वनियतकालप्रकृतित्वेन तदुत्तमत्वेन ततो
विलक्षणत्वेन दूरीकृततदुपद्रवस्य जीवस्य तद्वशत्वात्कर्मवशत्वात्तन्मग्नत्वात्त्रलौकिकं वक्ष्यलक्षणमंतरेण ज्ञातुमशक्यमिति मन्वानो जगत्कर्तृ
त्वादिलक्षणविशिष्टत्वेन नमति विश्वेति। निमित्तभूता लीला शृंगारचेष्टा तस्या आरामाय क्रीडावनाय ते तुभ्यं एवंविधलक्षणवतः किं नामेत्यत उक्तं
ईश्वरायेति। प्राक्कालीनजन्मप्रवितपुण्यराशेरिदानीमपि भगवद्दर्शनं प्राप्तमिति सूचयितुं चकृमेति लिङ्प्रयोगः १४

भगवतो वताराणां गतिरपि न ज्ञायत इत्येतदपि मतं दुष्टं। यतो मूलरूपवदवताराणामपि मुक्त्यादिदानसामर्थ्यं दृश्यते तस्मादिति भावेनाह। यस्येति। यथाहुरवतारभेदो मोहो नास्तीति तथा तत्प्रसादान्नदीयत्वपि नाप्तीति द्योतयन्नित्यतो वाप्तोति। यस्येति। असुविगमे प्राणप्रयाणकाले विवशाः भक्ति विवशाः अनेन पूर्वाभ्यासपाटवं दर्शयति। येभक्त्या विवशा विष्णोर्नाममात्रैकजल्पकाः ते पि मुक्तिं व्रजन्त्याशु किं पुनस्तद्ध्यायिनः सदेति कैमुत्यन्यायसिद्धत्वाद्बलवत्तरा तिबंधकानन्तकालमुक्त्यभावे पि कालान्तरे निश्चितेति सहसेति। अपावृतं स्वाच्छादिकमायावरणरहितं सृष्टिप्रलयादिमुविकारराहित्यादृतं अनतत्वे हेतुरजमिति १५ सृष्टिप्रलयहेत्वोः भवतः शिवस्य च जायतोः सतोः हरेः विश्वेत्वाद्वादिलीलारामत्वं कथमितिनटस्थरं

यस्यावतारगुणकर्मविडंबनानि नामानि ये ऽसुविगमे विवशा गृणंति। ते नेकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये १५ योवा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलाः। भित्त्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय १६

कोपरिहर्तुमाह। योवा इति॥ वशाद्याः समुच्चयार्थाः अनंतासनवैकुंठवद्गीराद्विस्थो हरिः त्रिपादिति॥ एको हरिरात्मा नारायणो मूलं कारणं येषां ते आत्ममूलाः यो विभुः स्वयं विष्णुर्यो वा अहमंतर्यामी ब्रह्मा स्वीयश्च गिरिशाख्यः शिवांतर्यामी स्थित्युद्भवप्रलयहेतवो भूत्वावतीर्य कृत्स्नपदार्थानां नानाविधत्वात्तेषु तत्तद्यामित्वेनोरुप्ररोहो बहुरूपोववृधे तस्मै भुवनद्रुमाय नम इत्यन्वयः द्रुमसाधर्म्यकथनेनाविकारित्वमुक्तमिति विष्णुब्रह्मरुद्रलोभगवत इत्याह नाद्यं लोकद्रुमवद्विकारी किं त्वैश्वर्यादिगुणविग्रह इति तस्माद्धुभवतारायतयोक्तमिति भावः वा इत्यनेन ब्रह्मादिभावो विलोकं तन्नियामकता भवेत्। मत्स्यादितास्वभावक्रनान्यथा कविक्षिप्यते इति प्रमाणप्रसिद्धिसूचयतामत्स्यादिवदेतौ ब्रह्मशिवौ न साक्षात्स्वरूपे इति ज्ञापितं १६

शतं सहस्रं वर्षाणां जीवामि तदनंतरे शुभं संचिनोमि किमिदानीं तत्करणमिति मत्वा भगवदुपासनादि सत्कर्मण्यालस्यं न कर्तव्यमिति भावेन कालांतर्यामिणं भगवंतं नमति। लोक इति। तावदत्र तावद्बलवानस्य जनस्येह जीविताशां सद्यः कालरूपमंतरेणाच्छिनत्ति अपराधं तेनजीविताशाछेदनं साहसं इति न मंतव्यं इत्यत उक्तं विकर्मेति। विहिताकरणादिनात्महत्यादिदोषापन्ने रनोधिकोपराधो ह्री त्यतो नवैषम्यनैर्घृण्ये हरेरिति भावः। स्वेस्व विहिते। तस्मै अनिमिषाय नित्यज्ञानेनैव नित्यं पश्यते कालांतर्यामिणे नित्यं तुभ्यं नम इत्यन्वयः। नित्यज्ञानदृशा नित्यं लवकालमपीश्वरः॥ पश्येन्नात्कालिकं चैवतस्मादनिमिषो हरिरित्यादेर्नदेवमात्र मन्तं ग्राह्यं। कालांतर्यामिणो निमिषत्वे नित्यं लवादिकाल

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे। यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै १७ यस्माद्बिभेम्यहमपि द्विपरार्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत्। तेपे तपो बहुसवो वरुरुत्समानस्तस्मै नमो भगवते धिमखाय तुभ्यं १८

निरीक्षणान्नयोक्तं कालस्यानिमिषत्वं बलवादेर्नित्यवीक्षणादिति। इतरस्य तु क्षणाद्यत्वं ते नियतत्वात् १७ उक्तकालोहमपि यस्माद्बिभेमि किमितरो। तस्मात्कालांतर्यामिहरिप्रसादो वश्यं संपादनीयः पुण्यनिचयं संपादयितुमिति भावेन कालांतर्यामिणं विशिनष्टि। यस्मादिति। धिष्ण्यमध्यासितं इति संबंध्यं द्वितीया। द्विपरार्धधिष्ण्यं ब्रह्मशतवर्षकालावस्थायि स्थानं सत्याख्यं। स्वस्य ली तिष्ठानेन ज्ञानतो त्याशयेनाह। तेप इति। मुक्तावानंदवृद्धिकरं बहु तपः पूर्णं ज्ञानं वा वरुरुत्समानः आमुमिच्छं स्तपश्चकारेत्यर्थः। गुणोपसंहाररूपामुपास्तिमकरवमित्यर्थः॥ स्वक्रियमाणोकर्मणि महायातरानपेक्षणाद्बिमतः सरवाय स्वमतथा तस्मै १८

तिर्यगादिजीवयोनिषु विज्ञानविलोपहेतुष्ववतरन्निमोदित तत्तन्नानं रत्वेनानन्यसाध्यं विक्रमं कुर्वन् रक्रीडतीति यत्नेनैवतत्त्वज्ञानं सुलभं पुंसामतो पि नज्ञायते गतिरित्यहो दुरत्ययहो दुष्टानामिति भावेन श्रीहरिं स्तौति। तिर्यगिति। आत्मेच्छया दयया। प्रयोजनमाह आत्मेति। परीप्सया पालनेच्छया तिर्यगादिजीवयोनिषु पुनिरस्तरतिः। अन्यत्र नित्यरतिरपीति किं तु। अत्र हेतुगर्भविशेषणमाह अवरुद्धकाष्ठ इति। नित्यानंदानुभवलोपे हि दुःखानुभवः संभाव्यते नास्य तथा नित्यानुभूतानंदोत्कर्षत्वादित्यर्थः॥ १९ हरेः श्रमोद्रेकोत्थनिद्रादिदर्शनात्तद्रूति दुर्बोधेति तत्राह।

तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः। रेमे निरस्तरतिरप्यवरुद्धकाष्ठस्तस्मै नमो भगवते पुरुषोत्तमाय १९ यो विद्ययानुपहतोपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः। अंतर्जले हिक शिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् २०

यइति। दशार्धेन पंचसंख्यया वृत्त्या निर्यस्याः सा तथा तया पंचपर्वतृत्येत्यर्थः॥ एवंविधाविद्ययानुपहतो ऽबाधितोपि स्वेनैकमेव ब्रह्माविद्ययालंसरतिविद्यया सुख्यतइतिमं तदूरादुत्साहितो। भीमा भयंकर्यऊर्मीणां माला अस्य संतीति भीमोर्मिमालितस्मिन्नंतर्जले अहिक शिपुस्पर्शानुकूलं इति क्रियाविशेषणं। अहिः शेष एव कशिपुरुत्तरवस्त्रास्तरणं शय्या तस्य स्पर्शानुकूलं स्पर्शसुखानुगुणं यथा भवति तथा। नस्वार्थं निद्रां किंतु परार्थत्वाशयेनाह जनस्येति। अनेनापि निद्रामुद्रितनेत्रत्वमेव न सर्वेंद्रियोपरमत्वमुक्तं भवति २०

पितृनमस्कारोपि पुत्रेणावश्यं कार्य इत्याशयेन तं नमति। यन्नाभीति। यदनुग्रहेण स्तुतयत्नावयः। अहं यदनुग्रहेण यन्नाभिपद्मभवनादासं यदनुग्रहेण लोकत्रयोपकरणश्चासमिति लोकत्रयस्रष्टा सहकारी त्यनेन मुख्यस्रष्टेशो मुख्यप्रष्टा स एवेत्युक्तं भवति। शिवोपि भगवदाज्ञानियत इति भावेनाह उदरस्थेति। उदरे तिष्ठतीत्युदरस्थः उदरस्थो भवो रुद्रो यस्य स तथा तस्मै अनेन सर्वसंहर्तृत्वमपि रुद्रकृतमप्युपचारमात्रं मुख्यं तु हरेरित्युक्तं भवति। रुद्रस्यापि संहर्तां किमुत जगत इतिवा। ब्रह्मरुद्रौ नारायणात्मानाविति श्रुतिरपहस्तितेति वज्ञातव्या। योगनिद्रावसानविकसन्नलिनेक्षणाय स्तुतिर्नित्यविकसन्नलिनेक्षणस्य कादाचित्कविकासोक्तिरज्ञजनदृष्टिमपेक्ष्योक्ता। अतो भगवतो मतिर्न ज्ञायत इति मतमवद्यात्मकत्वात् दुर्बुद्धिभिर्नग्राह्यमिति सिद्धं २१ अधुना स्वाभीष्टप्रार्थयत इत्याह। सोयमिति।

यन्नाभिपद्मभवनादहमासमीड्यलोकत्रयोपकरणो यदनुग्रहेण। तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय २१ सोयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान् भगेन। तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ २२

स इति ज्ञातोसीत्युक्तः परामृश्यते। सुहृत्वादेकत्वात्सुहृदंतररहितत्वात् आत्मत्वाद्युत्कृष्टत्वादिमं वरं प्रार्थय इति भावः। आत्मशब्दस्य मुख्यार्थो विष्णुरेकः सनातनः। संदेहदेहमनसो बुद्धिर्जीवाः स्वयं तथा। ब्रह्माद्यमुख्याः क्रमशस्तत्कर्षेप्यात्मभासवेदिति वचनान्मुख्यार्थो विष्णुरेव तस्यैव ग्राह्यत्वात्। यदेन तगेनऐश्वर्यादिरूपेण सत्वेनात्मभावेन पराक्रमेण वा सृष्ट्यतेर मृततिविस्वमिति शेषः। स्पृशशत्रा नइति धातुः अनुस्पृशतात् ददातु। दृशं विशिनष्टि यथेति। एवं प्रयच्छतः प्रतिदानमिदमेवेति भावेनाह प्रणतेति। अनेनेश्वरस्य स्वतस्तु भस्यतर्पकांतरानपेक्षां सूचयति २२

उरुक्रमेवार्थविशेषणांतरत्रयेणप्रार्थयते। एषइति। आत्मशक्त्यास्वभार्ययास्वसामर्थ्येनवा। स्वसामर्थ्यात्सकर्माणिरमयासहकेशवः। कुरुतेस्वयमेवेषकानिविष्टरूपोत्तमइतिवचनात्। यद्यत्स्वयंविक्रमं। तस्मिन्स्वविक्रमेस्वव्यापारेवीर्यलक्षणेजगत्सर्जनव्यापारमप्यस्याप्रिमेचेतः स्मृतिकारणंज्ञानंयुंजीत अपुष्टंपुष्टंकृषीष्ट। इयदेवनालमित्याहकर्मेतिज्ञानप्रतिबंधकंपापात्मदैत्यादिष्टष्टिपापकर्मणाज्ञानंशमलंयथाधिनजहामितादृशमितिशेषः। सत्त्वादिगुणाधीनेज्ञानाज्ञानेकिमनेनस्यातामित्यतउक्तं। गृहीतेति। स्वनियतसत्त्वादिगुणप्रकाशः हयग्रीवादिप्रसादप्राप्यंज्ञानमस्मात्कथंस्यात्इत्यतोवे

एषप्रपन्नवरदोरमयात्मशक्त्यायद्यत्करिष्यतिगृहीतगुणावतारः। तस्मिन्स्वविक्रमइदंसृजतोपिचेतोयुंजीतकर्मशमलंचयथाविजह्यां २३ नाभिह्रदादिहसतोंभसियस्यपुंसोविज्ञानशक्तिरहमाससमनंतशक्तेः। रूपंविचित्रमिदमस्यविवृण्वतोमेमारीरिषीष्टनिगमस्यगिरांविसर्गः २४

वेदिकप्रतिपाद्यवक्तेत्युक्तं। गृहीतेति। स्वप्रकाशितज्ञानादिगुणहयग्रीवाद्यवतारः। एतत्प्रार्थनयारूपांतरप्राप्यफलमपिस्यादित्यर्थः २३ वेदिकप्रतिपाद्यवक्तेत्युक्तं। नाभिह्रदादिति। इहअत्रसतिसतोंभस्यहरेरूपंप्रतिज्ञानविशेषोवेदार्थतात्पर्यज्ञाननांतरीयकइतितद्विषयकज्ञानमपिनविनश्येत्स्यादितिप्रार्थयते। मारीरिषीष्टइत्यादिलक्षणेमारीरिषीष्टगीर्णनष्टोमाभूदित्यर्थः २४ मास्थानीयंनिगमस्यसंबंधिनींगिरांवाचांविसर्गःविशिष्टनिश्चयोविष्णुरेवसर्वोत्तमइत्यादिलक्षणे

अवुयहमात्रेणाभिप्रायसिद्धावपिसंलापेनाधिकविश्वासोभवतीतिष्टिविषादापनयनप्रार्थनव्याजेनसंलापमभिप्रैति। सोसाविति। योशेमयावर्णितगुणोदभ्रकरुणः पूर्णदयासमुद्रः सपुराणः पुरुषोभगवान्विश्वविजयायशेषपर्यंकादुत्थायविवृद्धप्रेमस्मितेनप्राग्लेहप्रसरवशादुर्लसितमंदहासेनसहनयनांबुरुहंविजृंभत्समुन्मीलयन्माध्व्यामदिरावद्योमावंजनयंत्यागिरामनोविषादंभयमपनयतात्इत्यन्वयः। हेवेदगर्भतत्प्रेमाष्टतस्रगीर्णमंकुर्विन्यादिवचनेनप्रीतिमावहेत्यर्थः २५ हरिगुणानंत्यात्स्वज्ञेनविरिंचेनयावदायुक्ततोहरिःकिमितिमंदाशंकांपरिहरति॥ मैत्रेयइति। स्वसंभवंस्वजन

सोसावदभ्रकरुणोभगवान्विवृद्धप्रेमस्मितेननयनांबुरुहंविजृंभन्। उत्थायविश्वविजयायमनोविषादंमाध्व्यागिरापनयतात्पुरुषःपुराणः २५ मैत्रेयउवाच स्वसंभवंनिशाम्यैवंतपोविद्यासमाधिभिः। यावन्मनोवचःस्तुत्वाविरराममखिन्नवत् २६ अथाभिप्रेतमालक्ष्यब्रह्मणोमधुसूदनः। विषण्णचेतसंतेनकल्पव्यतिकरांभसा २७ लोकसंस्थानविज्ञानआत्मनःपरिखिद्यतः। तमाहागाधयावाचाकश्मलंशमयन्निव २८ श्रीभगवानुवाच मावेदगर्भगास्तंद्रीसर्गउद्यममावह। तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभवान् २९

कंविद्यामंत्रलक्षणानिष्ठाकृतेरूपरमोगुणानामानंत्यादप्रतिस्तानात्स्वाभीष्टसिद्धेरप्यनेकविधोहृष्टोत्रतुप्रथमपक्षएवेतिभावेनाहयावदिति। खिन्नवदलंबुद्धिरहितवत्इत्यनेनपुनरपिज्ञातुमिच्छांसूचयति २६ तर्हिनयास्वाभीष्टंनसेत्स्यतीतितत्राह। अथेति। कल्पव्यतिकरःप्रलयःतदंभसाआत्मनःस्वस्य। लोकानांसंस्थानस्यावयवशोविन्यासविशेषस्यविज्ञानेपरिखिद्यतःअलंबुद्धिमकुर्वतःब्रह्मणःअभिप्रेतमालक्ष्यलक्षणेनोज्ञात्वाकश्मलंज्ञानसंकटं २७ २८ तद्दीलोकसंस्थानविज्ञानविषयेपरिखेदंमायाः। भवान्यल्लोकसंस्थानविज्ञानंप्रार्थयतेतन्मयापूर्वमेवतपइतिद्वारकथनेनबोधितंतत्प्रार्थनमपिनस्वाधीनंकिंतुमत्प्रेरणयैवेतीममर्थंहिनासूचयति २९

नैतावता लमिस्माह्य भूयश्चेति॥ तपश्चालोचनं प्रोक्तं विद्यानिष्ठापकीर्तिते तिवचनात् तपश्चालोचनं गुणोपसंहार लक्षणं ध्यानं विद्यानिष्ठां भक्तिलक्षणां ततः किं स्यादित्यत आह॥ ताभ्यामिति ३० लोकदर्शनमेव विशिनष्टि। ततइति भक्तियुक्तः समाहितः एकाग्रचित्तस्त्वं ततस्तेन योगेन ध्यानेन आत्मनि देहमध्ये हृदि ततं सर्वगुणपूर्णं मां द्रष्टासि आत्मनि त्वयि स्थितं मयि लोकान् द्रष्टासीत्यन्वयः। देहे देहे हरिरस्मिन् लोकाः सर्वे प्रतिष्ठिताः। अंगुष्ठमात्रेपि परे परशक्तियते विष्णुरिति वचनात् हृद्यंतर्लोकदर्शनं युक्तमिति भावः ३१ लोकसंस्थानविज्ञानयोगमुपदिश्याधुना ब्रह्मणः सर्वेषां गुरुत्वात् तदुपदिष्ट ज्ञानस्य मुक्तिसाधनत्वाल्लोकोपकारकं तत्ज्ञानप्रकारमुपदिशति। यदात्विति। तु शब्दो ज्ञानविशेषसूचकः। लोको योग्यो जनो दारुणग्निमिव निःसंगत या सर्वभूतेषु स्थितं तु शब्दात्सर्वभूतेषु स्थितेंगुष्ठमात्रेमय्यपि लोकाश्च यदा प्रतिचक्षीत प्रतिदेहं पश्येत् तर्हि तदानीमेव कश्मलं जीवेश्वराभेददर्शननिमि

भूयश्च तपआतिष्ठ विद्यां चैव मदाश्रयां॥ ताभ्यामंतर्हृदि ब्रह्मन् लोकान्द्रक्ष्यस्यपावृतान् ३० ततआत्मनि योगेन भक्तियुक्तः
समाहितः। द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनि ३१ यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितं। प्रतिचक्षीत मां लोको ज
ह्यात्तर्ह्येव कश्मलं ३२ यदा रहितमात्मानं भूतेंद्रियगुणाशयैः। स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति ३३

त्तं दुःखं जह्यात् जहाति। देहे देहे हरिरस्मिन् लोकाः सर्वे प्रतिष्ठिताः इत्येतद्वाप्युदाहर्तव्यं ३२ नैतावतापि पूर्यत इति पूर्वोपदिष्टज्ञानमुपविनो ति। यदेति। यदात्मानं भूतेंद्रियगुणाशयैर्रहितं पश्यति स्वाराज्यमृच्छतीत्यन्वयः। किं विशिष्टमित्याह स्वरूपेणेति। स्वरूपेण मयोपेतं हृदि स्थितं जीवस्वरूपं पश्यन् मुक्तो भवति। अयं भावः यदात्मानं स्वरूपं जीवसंज्ञं भूतेंद्रियादिरहितं देहादिष्वात्मभावं त्यक्त्वा हृदि स्थिते जीवरूपे आत्मभा वं दृष्ट्वा हृदि स्थितेन स्वरूपेणास्वर्विबरूपेण मया उपेतं समीपस्थितं मम परांशस्य सेवकत्वेन वर्तमानं पश्यति। तदा स्वरूपानंदानुभवमुपैतीति। तदु क्तं। तस्माद्देहाद्यात्मभावं जीवरूपे हृदि स्थिते हत्वात्मभावं तं वापि हरिपादाब्जसंस्थितं। यदा पश्यन्त्यपरोक्षात्तदा मुक्तिं व्रजत्यसाविति ३३

इदानीं तस्मिन् स्वविक्रम इति यत्प्रार्थितं तत् दानप्रकारमाह नानेति॥ अस्मिन् सृष्टिकर्मणि नानाविधा सृष्टा स्वकर्मणां विपाकेन फलदानेन सुखेन काले न बुद्धीः प्रजाः सिसृक्षतस्तेन वात्मा बुद्धिर्नावसीदतीति नश्यति। तत्र निमित्तमाह। वर्षीयानिति। वर्षीयान् बहुसंवत्सरकालं संपन्नः मदनुग्रहो यस्मात्तस्मादिति शेषः। वर्षीयान् ज्यायानिति वा ३४ एतदेवस्पष्टयति। ऋषिमिति। ऋषिं त्रिकालदर्शीत्यादिति वचनात् ज्ञानित्वादाद्यमाद्यो भवं तं त्वा। प्रथमोत्पन्नत्वेन तव श्रेष्ठत्वात्। हेत्वंतरमाह। यन्मनइति। प्रजाः संसृजतस्ते तवायमापारप्रसत्त्यान्यन्मनो मिधाने दुष्करं तथापि तत्तम

नानाकर्मविपाकेन प्रजा बह्वीः सिसृक्षतः। नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ३४ ऋषिमाद्यं न बध्नाति
पापीयांस्त्वां रजोगुणः॥ यन्मनो मयि निर्बद्धं प्रजाः संसृजतोपि ते ३५ ज्ञातोहं भवता त्वद्य दुर्विज्ञेयोपि देहिनां। य
न्मां त्वं मन्यसे युक्तं भूतेंद्रियगुणात्मभिः ३६

तद्वतरान् प्रतिपापीयान् परिणोगुणस्त्वां न बध्नातीत्यर्थः ३५ मनोनिबंधनफलमाह। ज्ञातइति। यथास्थितवस्तुज्ञानमेव मत्प्रसादजनकं तत्तवा स्तीत्याह। यन्मामिति। त्वं भूतेंद्रियगुणात्मभिः भूतेंद्रियत्रिगुणमनोबुद्धिभिर्नियामकतया युक्तं मां मन्यसे न तु तदात्मत्वेनेति यद्यस्मात्तस्माद्यथा र्थज्ञानित्वादित्यर्थः। भूतेंद्रियमनोबुद्धित्रिगुणादिषु सर्वशः। युक्तं नियामकतया पश्यन् जानाति केशवमिति वचनात् भूतेंद्रियादिनियामकत याततयुक्तज्ञानमेव केशवज्ञानमिति भावः ३६

इतः पूर्वं स्वरूपानाविष्करणमपि तवानुग्रहविशेषार्थमित्याशयेनाह। तुभ्यमिति। प्रलयसलिले पुष्करस्य पद्मस्य नालेन नालनाडीद्वारा पुष्करस्य मू
लं कारणं मां विचिन्वतस्तव मद्विचिकित्सायां मद्विजिज्ञासायां मया आत्मा सच्चिदानंदलक्षणः स्वरूपं त्वदर्थं बहिर्दृष्टिविषयत्वेन दर्शितः ३७ त्व
त्कथा तपोनिष्ठाबलात्त्वं प्रत्यक्षो भूर्न तु स्वत इति दर्शितमभूदिति भावेनाह। यच्चकर्थेति। कथ वाक्यप्रबंध इति धातोः स्तोत्रलक्षणो वाक्यप्रबंधः
कथा तस्याः सम्यगुदयो यस्याः सा तथा तां। वागादींद्रियव्यापाररूपं मदनुग्रहमंतरेणानुपपन्नेष्वनश्रुभविजया प्रवृत्तिरस्तु इत्यर्थः। स एष म

तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः। नालेन सलिले मूलं पुष्करस्य विचिन्वतः ३७ यच्चकर्थांग मत्स्तोत्रं म
त्कथाभ्युदयांकितं। यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ३८ प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया। यदस्तौषीर्गु
णमयं निर्गुणं मानुवर्णयन् ३९ श्री४

दनुग्रहस्तु उच्यते। यो वा विनिष्ठन्नयो मनसि तिष्ठन्नित्यादेः ३८ कथापि स्तोत्रलक्षणा न प्रहेलिका बालप्रियेति भावेनोक्तं स्फुरयति। प्रीत इति। लो
कानां सृष्टिविजयेच्छया गुणमयं सर्वज्ञादिगुणपूर्णं निर्गुणं सत्वादिगुणवर्जितं मामनुवर्णयन् मां स्तौषीर्दिति यस्मात्तेनाहं प्रीतोस्मि ते भद्रं कल्याण
मस्त्वित्यन्वयः। सार्वज्ञादिगुणैर्युक्तं सत्वादिगुणवर्जितं। यो जानाति हरिं तस्य प्रीतो भवति केशव इतीदं प्रमाणं गुणोत्कर्षज्ञानमेव प्रीतिजनकं
न निर्गुणज्ञानमिति भावेनोदाहृतं ३९

त्वत्कृतं स्तोत्रेण मां भजमानो यस्तस्मै प्रसन्नोऽभीष्टं ददामि किमु तुभ्यमित्यभिप्रेत्याह। य एतेनेति। आधिकारिकदेवानां स्वाधिकाराभिकामनं
भवति प्रीतये विश्रामं ब्रह्मादेः प्रियत्वसंदेत्यनेन नष्टदृष्टिस्वाविकारकामनब्रह्मणा कृतमिदं स्तोत्रं कथं हरिप्रीतिजनकं स्यात्तत्राह देवोद्यं निर्मूल
नीयं। अत एव सर्वकामवरेश्वर इत्युक्तं सर्वकामितवराणामीश्वर इत्यर्थः ४० मत्प्रीतेरेव सर्वपुरुषार्थात्मत्वेनान्यस्येत्याह पूर्तेनेत्यादिना। तु
लापुरुषादिहिरण्यदानैः पुंसां मत्प्रीतिः निःश्रेयसराज्यं रंजनीयं तत्वविद्भिर्मतं तत्वज्ञानिभिः मतं। रंजनीयमित्यनेन मोक्षेपि रंजनीया मत्प्रीतिरे
वेति ध्वनयति। तदुक्तं। मुक्तस्यापि हरेः प्रीतिः सर्वतोप्यनुराजत इति ४१ मुक्तावपि मत्प्रीतिरेव रंजनीयेत्युक्तं तत्र मुख्यसाधनं भक्तिरेवेत्याह।

य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत्। तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः ४० पूर्तेन तपसा यज्ञैर्दानैर्योगसमा
धिना। राज्यं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतं ४१ अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि। अतो मयि रतिं
कुर्याद्देहादिर्यत्कृते प्रियः ४२

अहमिति। धातश्चतुर्मुख। अहमात्मनां सर्वजीवानामात्मा अंतर्यामित्वेनानंदादिनिर्माता अत एव प्रेयसामतिशयेन प्रियाणां स्वात्मादीनामपि
सन् अस्मर्हितः प्रेष्ठः प्रियतमः। सर्वस्मात्प्रियाद्देहादेस्तव प्रेष्ठत्वं कथमित्यत उक्तं देहादिरिति। देहादिर्यस्य स्वात्मनः कृते अर्थे प्रियः अस्य स्वात्मनो
देहादिः प्रियः स्यादिति मयैवापादितत्वादिति यस्मात्ततः स्वात्मादिभ्यः प्रियतमत्वान्मयि रतिं भक्तिं भवान् कुर्यादित्यन्वयः। सर्वतोपि प्रियो ह्या
त्मा तस्यापि प्रियतमो हरिः। आपादयति यत्तस्मात्स्वात्मनोपि प्रियो हरिरिति च ४२

सृष्टावेवाधिकृतत्वाद्ब्रह्मणः सृष्टिकामनं नदोषहेतुः किंतु हरेः प्रीतिहेतुः तदाज्ञाकारित्वादिति सूचितं तदिदानीं स्पष्टमाह। सर्वेतिसर्वे वेदमये न प्रजापतेनत्वदेतान्यन्यो विश्वाजातानिपरिताबभूवेत्यादाखिलवेदप्रतिपाद्येनात्मनेोमतः योगः सबंधोयस्यास्तीतिद्यात्मयोगी तेन मन्नोजातेनात्मनादेहेनात्माब्रह्मात्वयाः मय्यनुशेरतेताइमाः प्रजाः यथापूर्वं यथा पूर्वकल्पे सृष्टास्तथासृजेत्यन्वयः। त्वदन्यस्यानधिकृतत्वात्त्वमेवैतत्कुर्विति अवधारणार्थं वशाद्वः रुद्रादुपसंग्रहार्थो वा ५३ एवं विधमहिम्नोब्रह्मणोप्युपदेष्टा श्रीनारायण इति माहात्म्यातिशयप्रकट

सर्ववेदमयेनेदमात्मनात्मात्मयोनिना। प्रजाः सृज यथा पूर्वं याश्च मय्यनुशेरते ५३ मैत्रेय उवाच तस्मा एवं जगत्स्रष्ट्रा प्रधानपुरुषेश्वरः। व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे ५४ इति श्रीभागवते महापुराणे तृतीयस्कंधे पञ्चदशोऽध्यायः विदुर उवाच अन्तर्हिते भगवति ब्रह्मा लोकपितामहः। प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः १ ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम। तान्वदस्वानुपूर्व्येण छिन्धि नः सर्वसंशयान् २ सूत उवाच एवं संचोदितस्तेन क्षत्रा कौषारविर्मुनिः। प्रीतः प्रत्याह तान्प्रश्नान्हृदिस्थानथ भार्गव ३ मैत्रेय उ॰ विरिंचोपि तथा चक्रे दिव्यं वर्षशतं तपः॥ आत्मन्यात्मानमावेश्य यथाह भगवानजः ४

नापहरेस्तिरोधानं कथयति तस्मा इति। प्रधानपुरुषयोः प्रकृतिब्रह्मणोरीश्वरः। यद्ब्रह्मणो मनसि सन्निहितमिदं व्यज्य व्यक्तीकृत्य ५४ ॥अस्मिन्नध्याये नवविधसृष्टिकथनेन निरतिशयमहिमा हेरुच्यते तत्र शुको विदुरो मैत्रेयं पृच्छतीतिपरीक्षितमाह तृतीयस्कंधे दशमोध्यायः॥ ॥ अन्तर्हित इति। दैहिकीर्मानसीरिति देहमनोभ्यां सृष्टाः १ २ हृदिस्थाश्च विदुरस्येति शेषः ३ भूपश्चात्तपश्चातिष्ठदिति हरिणा यदुक्तं तदाज्ञाकरणप्रकारमाह। विरिंचोपीति। आत्मनि परमेश्वरे आत्मानं मन आवेश्य निधाय ४

यदात्मनाधिष्ठितं तत्पद्मं तत्कालकृतवीर्येण प्रबोधकालकृतपराक्रमेणातीवेणेत्यर्थः। वायुना कंपितं तं तस्य कंपितं विलोक्य ६ मूलोन्मूलनन्यायेनांभसा सह वायुं न्यपादित्यपियः। निपानमुदपानं स्यादापानं पानगोष्ठिकेइति हलायुधः ७ हरिणा सृष्टावुपदिष्टेन ब्रह्मणा संहर्तुमुपक्रान्ते। किमिदंहंतेत्याशंक्य सर्वविरोधित्वात्तयोः पानमिति भावेनाह। तद्विलोक्येति वियद्व्यापि आकाशवन्महत्परिमाणोपेतं ८ एकेन पद्मेन त्रित्वादिसंख्याविशिष्टलोकरचनं कथमिति तत्राह। पद्मकोशमिति। यदा वेत्तयत्रदेवा चतुर्दशभुवननिर्माणनिमित्तेन कर्मणा दृष्टेन चोदितः कर्मणा विषयभूतेन हरिणा प्रेरितो भगवान् ज्ञानवैराग्यादिगुणशाली पद्मकोशमाविश्य एकत्वसंख्याविशिष्टमुरुधा बहुत्वसंख्याविशिष्टत्वेन व्यभांक्षीद्विभक्तवा

तद्विलोक्याब्जसंभूतो वायुना यदधिष्ठितं। पद्ममंभश्च तत्कालकृतवीर्येण कंपितं ६ तपसा ह्येधमानेन विद्यया चात्मसंस्थया॥ विवृद्धविज्ञानबलो न्यपाद्वायुं सहांभसा ७ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितः। अनेन लोकान्प्राग्लीनान्कल्पितास्मीत्यचिंतयत् ८ पद्मकोशं तदाविश्य भगवान्कर्मचोदितः। एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ९ एतावान्जीवलोकस्य संस्थाभेदः समाहृतः॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठिनः १०

न्कि मनंतसंख्याविशिष्टमकरोत्रेत्याह त्रिधेति। भूर्भुवं तरिक्षं स्वर्गात्मना त्रिधा भाव्यं कृत्वा तत्त्रयं पुनर्द्विसप्तधा चतुर्दशभुवनात्मना विभक्तवानिति शेषः ९ न्यूनातिरेकसंख्यां निषेधयति। एतावानिति। जीवानां लोकस्यावस्थानस्य संस्थाभेदः व्यवस्थाविभागः समाहृतः संक्षेपतः मयात्र कथित इति शेषः। इदमपि न स्वशक्त्या कृतमित्याह धर्मस्येति परमेष्ठिनो ब्रह्मणोऽनिमित्तस्य निषेधपुमानुविस्माचित्यभिधानादः परमात्मानिमित्तयस्य सोऽनिमित्तः तस्य त्रसाप्तेराधुधाकृतस्येत्यर्थः। धर्मस्य सुकृतस्य विपाकः विशिष्टफलमिति विद्धीति शेषः अः इति ब्रह्मेति श्रुतेः निर्निमित्तोनार्थः तयश्चादीनामगवद्विषयत्वाके: १०

श्रुतहरिमहिमा विदुरः कथांतरप्रसंगेन मैत्रेयः भगवत्कथां समापयतीति भीत्वा मैत्रेयं पृच्छति। यदिति। बहुरूपस्यानंतरूपस्य हरेः कालरूपं लक्षणं स्वरूपं यथा यथावल्लक्षणं लक्ष्यमात्मनो वा स्वरूपमिति कथ्यत इत्यभिधानात् अन्योर्थः किंतु स्वरूपमेव ११ कालस्य स्वरूपं च वर्णकत्वेन प्रधानत्वात् स्वीकयाह न्यायेन तत्स्वरूपं वस्तु मैत्रेय आदौ जगत्सृष्ट्याद्यर्थं गुणत्रयोपादानकर्तृ भगवद्रूपत्रयप्रादुर्भावप्रकारं वक्ति। गुणेति। प्रलये गुणानां दृष्टत्वे

विदुर उवाच — यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः। कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो ११

मैत्रेय उवाच — गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः। पुरुषस्तदुपादानमात्मानं लीलयासृजत् १२

नष्टिते गुणानां व्यतिकरं विकारविशेषं सम्पर्कं करोतीति गुणव्यतिकराकारः। कर्मण्यण्प्रत्ययः। पुरुषः पूर्णषड्गुणो तत एव निर्विशेषः निर्विकारः अधिकांतररहितो वा। अत एव अप्रतिष्ठितः अन्यत्रेति शेषः। स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नीति श्रुतेः। तस्य गुणव्यतिकरस्योपादानं स्वीकारो येन स तथा तं। गुणव्यतिकरोपादानकर्तारमित्यर्थः। त्रिरूपत्वेनात्मानं लीलया सृजन् आविर्भावयत् १२

स्वार्थाभावेप्यन्यस्य किं प्रयोजनमुद्दिश्य रूपांतरस्य ग्रहणं हरेरिति तत्राह। विश्वमिति। सृष्ट्याद्यर्थत्वेन तस्य पुरुषस्य ब्रह्मा विष्णुरीश्वर इति त्रीणि रूपाण्यात्मना सृष्टानीत्यनेनोच्यते। तथा हि विश्वं ब्रह्म तन्मात्रं वै ब्रह्माणं सृष्ट्वा चतुर्मुखत्वेन तं प्रविश्य सृष्टिं बृंहणात् ब्रह्मनामा तेन विष्णुनामितं चोतं वेति तथोक्तं। विष्णुनाम्नो हरेर्मायया पाप्तसामर्थ्येन संस्थितं ब्रह्मस्थापितं स्वस्वाधिकार इति शेषः अत्र यदीश्वरांशेन संहृतरूपं तत्कालाख्येन नरूपं सृष्ट्वा मं पंचमुखत्वेन तं प्रविश्य कालेन संहर्त्राव्यक्तमूर्तिना चक्षुराद्यग्राह्यस्वरूपेण हरिणा परिच्छिन्नं संहृतमित्यन्वयः। चतुर्मुखं सृष्ट्वा तं प्रविश्य स्वयं चतुर्मुखो ब्रह्मनामा हरिः सृष्ट्यर्थं रजोगुणमुपादत्ते अन्यरूपप्रवेशमंतरेण स्वयं विष्णुनामा रक्षार्थं सत्त्वमुपादत्ते। पंचमुखमीशानं सृष्ट्वा पंचमुखं तं प्रविश्य ईश्वरनामा हरिः संहारार्थं तमोगुणमुपादत्तेति तात्पर्यार्थोपि वा इत्यनेन श्रुतिप्रसिद्धिद्योतकेन ज्ञायते। अथ त्रयी वा

विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया। ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना १३ रामराम॥ ॥४॥

वा प्रकृतिः सत्त्वं रजस्तम इति तां नारायणः परिपश्यत्यनन्यप्रतिष्ठं ब्रह्म वा एनमाहुः पुरुष इति पूर्णो ह्येष भवति स त्रेधाबभूवैषां गुणानामुपादानाय विष्णुर्वाव सत्त्वस्य रजसो ब्रह्मेशो नो नाम तमसः स आविवेश ब्रह्मा ब्रह्माणं चतुर्मुखं ईश ईशानं पंचमुखं यो वाव ईश ईशानमाविवेश तं वा एतं काल इत्याचक्षते काल इत्याचक्षत इति सौकरायणश्रुतिः॥ ॥ तदुपादाने सोऽव्यक्तलक्षणेन बोध्य उपादाने कार्याधिकरणे यस्य स तथा तं तदुपादानमात्मानमेव चेतनाचेतनस्वरूपेणासृजदित्युक्तत्वादाकाशादेरविद्यमानस्यैवोत्पत्तिर्नैतत्सारं। यतो विश्वमाकाशादितन्मात्रं प्रलयकाले बभूव। तत्कथं संस्थितं प्रलीनं प्रनष्टमिति यावत्। विष्णुमायया व्याप्तस्य ब्रह्मणो मायया अव्यक्तलक्षणया। ईश्वरेण ब्रह्मणा परिच्छिन्नं विषयीकृतं कालेन कलनात्मकेन ज्ञानस्वरूपेण साक्षिणाव्यक्तमूर्तिना चक्षुराद्यग्राह्यस्वरूपेणेति त्रैकालिकास्ते तेन व्याख्यानमयुक्तं १

प्रपंचवैकालिकाबाध्यत्वस्यानुमानसिद्धत्वादित्याह। यथेति। यथेदानीं सृष्टिकाले अर्थक्रियाकारित्वात्सत्यत्वमनुभूयते तथाग्रे सृष्टेः पूर्वं प्रलये
पश्चाद्गुत्तरस्यापि तज्जगदीदृशं सत्यमित्यनुमातव्यं। यथेदानीं कारणरूपेण सद्वैतन्यदृश्यमाकाशादिकार्यमुपलभ्यते तथाग्रे प्रलयकाले वका
रणरूपेव सद्वैतन्यरूपेणैवदृश्यमिति वानुमातव्यमिति त्रैकालिकासत्वेयं दृष्टांत इति वेन्न अस्मदुक्तस्य प्रमाणानुकूल्याद्न्यस्यानुकूल्याद
नर्थहेतुत्वाच्च। तदुक्तं। सृष्टिश्च प्रलयश्चैव संसारो मुक्तिरेव च। देवर्षिप्रभृतयो लोकालोकाभूरादयस्तथा। अनाद्यनंतकालीनाः सर्वदैकप्रकार
तः। जगत्प्रवाहः सत्योयं नैव मिथ्या कथंचनयेत्वेतदन्यथा ब्रूयुः सर्वहंतार एवते इत्यादिप्रवाहरूपेण सत्यस्य विश्वस्य सर्गस्य नवविधत्वाच्च सत्यत्वं
सिद्धं। नहींद्रजालवन्मिथ्याभूतस्य नियतसंख्याविषयत्वं अनेकविधत्वान्नस्येति भावेनाह। सर्ग इति। तस्य विश्वस्य। विधा विधो प्रकारः स्यादित्य
भिधानं। प्रकृतिविकृतत्वाद्विना निर्वाच्यमाया कृत इत्याह। प्राकृत इति। यः सर्गः प्राकृतो वैकृतस्त्रैत्यव्ययः। अव्यक्ताद्याः पृथिव्यंताः सर्वाः प्रकृ

यथेदानीं तथा वाग्रे पश्चाद्प्येतदीदृशं। सर्गो नवविधस्तस्य प्राकृतो वैकृतस्त्रयः १४ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः॥

तयः स्मृताः। तदुपादानकः सर्गः प्राकृतः परिपठ्यते। अंडं तु विकृतं ज्ञेयं तज्जो वैकृत उच्यते इति वचनात्। अंडाद्बहिः सर्गः प्राकृतः विकृतो डों तस्थः
सर्गो वैकृत इति ज्ञातव्यं॥ चशब्देन मायामयस्य परिणामादर्शनं लिंगमिति सूचयति। स्वरूपादप्रच्युतादन्यथास्फुरणं मायेत्यंगीकारात् १४ प्रति
पन्नोपाधौ सत्वप्रतिषेधवद्बाधाभावाच्च सत्यइति भावेनाह कालेति। अस्य विश्वस्य प्रतिसंक्रमः प्रलयाख्यो नाशः कालद्रव्यगुणनिमित्तभेदेन त्रिविधो
ज्ञेयः। शतवर्षाद्विसंख्याजातः कालतो घटादेः मुसलादिना द्रव्यतः। प्रवृद्धेन सत्वेन तामसमज्ञानमुत्त्वणेन तमसा सात्विकं सुखं क्वचिद्बुद्धिकेनर
जसा सात्विकतामसयोरपि क्वचित्सत्वेन राजसतामसयोरपीत्यादिको विलयो गुणतः। रजस्तमश्चाभिभूय सत्वं भवतीत्युत्तामसस्य पदार्थस्य सत्वे
हि लयकारणं। सात्विकस्य तमश्चैव द्वयोरपि रजः क्वचित्। गुणतोयं लयः प्रोक्तो द्रव्यतश्च विरोधिना। कालतः कालसंख्याको लयः सर्वस्य वक्ष्य
न इति वचनाच्च विश्वस्य नैकालिकासत्वलक्षणो बाधो नोपपन्न इति॥ ॥

तत्र प्राकृतवैकृतयोर्मध्ये प्राकृतसर्गमाह॥ आद्य इति आत्मनः परमात्मनः सकाशाद्गुणवैषम्यं गुणवैषम्यनामको महत्तत्वचतुर्मुखदेहस्य तदभिमन्यमानमहत्तत्व
स्य च प्राकृते ष्वाद्यः सर्ग उच्यते। अत्रेदमाकूतं। तमोगुणाद्रजोगुणो द्विगुणः रजोगुणात्सत्वगुणो द्विगुण एवं प्रकृतिजानां गुणानां परिमाणं स्यात्तत्र त्रिगुणो
पु सत्वगुणः केवलो रजस्तमोभ्यामविमिश्रः रजोगुणस्त्रिविधः। तथाहि। मूलरजसि रजोगुणाच्छताधिकः सत्वगुणः रजः शतांशस्तमोगुण इति रजोरा
शिः मूलतमोगुणो विविधः। मूलतमसि तमोगुणाद्दशगुणाधिकः सत्वगुणः। रजस्तमस एकादशधा विभक्तादेकांशसमित एवं गुणानां निजस्थितिः
तत्र प्रलये मूलरज एकादशधा विभक्तं दशांशेन शुद्धसत्वे मिश्रितं भवति। एकांशेन मूलतमस्य पि मिश्रितं स्यादेतां गुणानां साम्यावस्थामाहुः। तत्रय दा सू
ल सत्वेन संगतं दशांशं तद्रजः सर्वं मूलतमसा सह संगतं संयुक्तं भवति तदा महत्तत्वमुत्पन्नमाहुः। तत्कथमुच्यते प्रलये मूलसत्वेन संगतं मूलरजः मूलतम

आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः १५ राम

सि संगतं मूलरजः मूलरजसि स्थाभाविकं रज इति रजांशस्यैव विभागा एकांशस्तम इति चतुर्भागात्मकं संयोगेनोत्पन्नगुणवैषम्यनामकं महत्तत्वं ब्रह्मणो रू
पं इति। तदुक्तं। तमसो रजसस्तु द्विगुणं रजसः सत्वमेव वा परिमाणं तत एवं स्युः त्रयः प्रकृतिजा गुणाः। तत्र सत्वं केवलं स्याद्रजस्यपि शताधिकं। सत्वं रजः
शतांशं तु तमस्तत्र प्रकीर्तितं। तमस्यपि तथा सत्वं तमसश्च दशोत्तरं। तद्दशांशेन तु रजो मूलं नैव द्रजश्च तत्। विलयेद्दशांशतः सत्व एकांशेन तमस्यपि।
मिश्रितं भवति ह्येतां साम्यावस्थां विदुर्बुधाः। यदा तु तद्रजः सर्वं तमसा सह संगतं। तदा त्वाहुर्महत्तत्वं तच्चतुर्भागसंभवं। तत्र त्रिभागो रजस एकांशस्तमस
स्तथा। तदाहु ब्रह्मणो रूपं गुणवैषम्यनामकं। तदेव केवलं सत्वमितरापेक्षया भवेत्। श्रीर्मूलसत्वं विज्ञेया भूर्मूलं रज उच्यते। मूलं तमस्तथा दुर्गा महा
लक्ष्मीस्त्रिमूलिका। गुणेभ्यो गुणमूला द्वयोतीतः स जनार्दनः इति १५

द्वितीयसर्गमाह। द्वितीय इति। द्वितीयो अहमः अहंकारस्य सर्गः। यत्राहंकारसर्गे द्रव्याणि विषयादिभूतानि ज्ञानक्रिया ज्ञानेंद्रियाणि कर्मेंद्रियाणि आदिश
ब्देन गृहीता मनइंद्रियाभिमानिदेवाश्च जायंत इति शेषः। भूतादीनां सर्गक्रमेण तृतीयादित्वेनाह। भूतसर्ग इति। भूतानामाकाशादीनां सर्गः तन्मात्रद्रव्यश
क्तिमान्। तन्मात्राः शब्दादयः आकाशादीनां शब्दादिस्वरूपत्वात् तन्मात्रशक्तिमान्। द्रव्याणि शक्तिमत्त्वाद्द्रव्यशक्तिमान्। अहंकारतत्त्वेपि गुणवैषम्यमस्तीति
ज्ञातव्यं। तथाहि मूले रजसि यद्रजः मूले तमसि यद्रजः मूले तमसि यत्तमः एतदात्मकं महत्तत्त्वं ब्रह्मणो रूपमेकादशधा विभज्य दशांशाः सत्त्वस्य एक
कोंशो रजः रज एकादशधा विभज्य एकोंशस्तमस्तस्मात्तमस उत्पन्नोहंकारस्तदभिमन्यमानमहंकारतत्त्वं वेति महतो अहंकारसर्गः। सोहंकारोपि त्रिविधस्त्रि

द्वितीयस्त्वहमः स्तत्र द्रव्यज्ञानक्रियादयः। भूतसर्गस्तृतीयस्तु तन्मात्रद्रव्यशक्तिमान् १६

त्वहंकारेपि दशांशाः सत्त्वं एकोंशो रजस्तद्रज एकादशधा विभज्य एकोंशस्तमस्तमोंशात्तामसाहंकारः। रजोंशात्तैजसाहंकारः सत्त्वांशाद्वैकारिकाहंका
र इति। तत्रापि तामसाद्भूतसर्गः तैजसादिंद्रियसर्गो वैकारिकाद्देवसर्गः। यद्वा मूले रजसि मूले तमसि यद्रजः तमश्च मूले तमसि महत्तत्त्वं तदात्म
कं। दशांशाः सत्त्वस्य एकोंशो रज एव वा तद्दशांशं तमो ज्ञेयमहंकारस्तदात्मकः। स रुद्रनामसौ ज्ञेयो विरिंचापेक्षया वै तु। इतरापेक्षया सत्त्वं सत्त्वाद्याप्त
रूपं च। तत्तमोंशात्सात्त्विकोंशो मेनकाद्याः प्रकीर्तिताः। राजसोंशस्त्विंद्रियाणि तामसोंशः खादयः इति वचनादिदं तात्पर्यमवगम्यते १६

ज्ञानक्रियात्मकः ज्ञानेंद्रियकर्मेंद्रियात्मकः। पंचमो वैकारिकाहंकाराद्वैकारिकनामा देवसर्गः इंद्रियप्रेरकत्वेनातिविकारित्वाद्वैकारिकनामकत्वं
तेषां। यस्माद्वैकारिकाहंकारादुत्पन्नत्वान्मनश्च यन्मयमित्युच्यते। भूतानि द्रव्यशक्तीनि भूतेषु द्रव्याणि यतः। तथा तन्मात्रशक्तीनि शब्दाद्यात्मकता
यतः॥ क्रियाशक्तीनि वागाद्यानींद्रियाणि तराणि तु। ज्ञानशक्तीनि मनसादेवाश्च ज्ञानशक्तयः एतेषां मूलभूतत्वात् अहंकारस्त्रिशक्तिमान्॥ मातु
जापेक्षया देवाः सात्त्विकाः परिकीर्तिताः। तत्रापि सात्त्विकाः श्रोक्ताः सात्त्विकायाश्च देवताः। तत्रापि सात्त्विको रुद्रस्तत्रापि तु चतुर्मुखः। अविकारोब्ज

चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः। वैकारिकोदेवसर्गः
पंचमोयन्मयंमनः १६

स रुद्रो देहभेदादिसंभवे॥ विकारवांस्तु ईशाद्यास्तस्माद्वैकारिका मताः। त एतेंद्रियरूपेणापतस्त्वतिविकारिणः। ज्ञानमात्रगुणोद्रिक्तास्तस्मात्तैजसनाम
काः। अविकारित्वयोग्यत्वं निरूढं ह्यींद्रियेषु तु। वैकारिकत्वनामापि ततस्तेषां न विद्यते। यथा विप्रकुले मूर्खो मूर्ख इत्यभिधीयते। विद्यायोग्यत्व
तः शूद्रो न मूर्खो मूर्ख एव स न हि तामसानीह रत्तानि किं विद्यावहितत्वतः ज्ञानस्य सुष्ठु जलेपि पूर्णो ज्ञानो हरिः स्वयमिति वचनात्। तु शब्दश्चतुर्थपञ्च
वितएषां विशेषो ज्ञातव्यः १६

तमसो ऽविद्यायास्तु सर्ग एवार्थः एवं विधो बुद्धिरबुद्धिस्तत्पूर्वमिव कृतः स सर्वविज्ञबुद्धित्वेपि तमःसंसर्गेणास्य बुद्धिभ्रंशो भवतीति भीत्या विशेषतः
सह बुद्धौ वेसुक्तं सर्वदा तद्बुद्धित्वयोऽपेक्षना येवेति यो भूतानां तामसो ऽशस्तस्यांशाद्विद्या ब्रह्मणो त्वादितेति द्योतनाय प्रथमश्लोकस्य शब्दः॥ तदुक्तं॥ अ
बुद्धिपूर्वमिव तु ब्रह्मणो हरिबुद्धितः। तामसानां तु भूतानां सह अंशसत्वभागिना॥ शतांशरजसा मेकतमसां सर्ववेदिनां॥ केवलस्तामसो यो ऽशः सो ऽवि
द्या पंचपर्विका॥ जाता भिक्रमात्तद्देहाद्धेत्यरक्तः पिशाचकाइति॥ अबुद्धिपूर्वकस्तस्य प्रादुर्भूतस्तमोमयः। तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञि

षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। षडिमे प्राकृताः
सर्गा वैकृतानपि मे शृणु १७ राम

तः॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति श्रीविष्णुपुराणे। पंचपर्वात्वविद्यानुभूतेभ्यो हरिणा पुरा॥ उद्धृत्य ब्रह्मणि क्षिप्तास्तां पुनस्तेन निःसृ
ता। तत्स्य षष्ठत्वज्ञापनाय तत्स्मात्सा प्राकृता मतेति च। मया इमे षट् प्राकृताः सर्गाः प्रवक्षिता इति शेषः। प्राकृतसर्गकथनानंतरं अन्यः प्रसंगो माभू
दिति परीक्षिद्वाक्यस्यानवकाशं वक्ति। वैकृतानिति १७ राम राम

प्राकृतवैकृतसर्गकथनश्रवणेन किंफलमित्याशंक्य भगवल्लीलात्वात्तच्छ्रवणेन मुक्तिरेव फलमिति भावेनाह। रजोभाज इति। सृष्ट्यर्थं रजोगुण
प्रवर्तकस्य हरिवत्सर्पोमिवन्मेधा यस्य सत तथा तस्य नाह्नात्मानबुद्धेरित्यर्थः। भगवता नारायणस्येयं सृष्टिः लीला न स्वार्थपरा योपजननुग्र
र्थेत्यर्थः॥ विरिंचविषयत्वे हरौ मेधा यस्य सत तथा तस्य। अनेनाबुद्धिकृत इति पदं विवृतं। विरिंचस्यापि श्रीनारायणानुग्रहेण सृष्टिरियं न श्रमजननी
किंतु लीलारूपैत्यनेनाप्यबुद्ध्याकृतत्वाच्छ्रमकरी त्वन्यथा प्रतीति निरस्ता। सृष्ट्यादावेते गुणा हरेरेव मुख्याः। तदुक्तं। एते गुणा हरेः सम्यक् स्वातंत्र्य
विषया सदा इत्यादि॥ यस्तस्थुषां स्थावराणां मुख्यसर्गः स सप्तमः। स च षड्विधः। स्थास्नुभिर्नियमान्मुख्या स्थितेर्गतिरवाप्यते। प्रायः परोपकर्तृ
त्वान्मुख्यः सः स्मृत इति मुख्यस्रोतस्त्वं स्थावराणामुक्तं १८ षड्विधमाह वनस्पतीति। फलं निष्पद्य विना पुष्पैः तान्वदंति वनस्पतीन् उदुंबरः पनसा
दयो वनस्पतयः। ओषधयः फलपाकान्ता व्रीह्यादयः। लताः पराश्रयबलाः त्वक्साराः वेण्वादयः वीरुधः कांडरुहालिगुल्मानि द्रुमास्तरवस्तास्य॥

रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः १८ वनस्पत्यो
षधिलतात्वक्सारा वीरुधो द्रुमाः। उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशेषिणः १९

प्रमाणवचनेपि मुख्यस्रोतस इत्युक्तं देवोत्स्रोतस इति कथ्यते। उत्स्रोतस इत्यस्यार्थः ऊर्ध्वस्रोतस इति किं न स्यात् न स्यादसंभवात्तथा हि ऊर्ध्वं गंतारो दे
वा मोक्षैकभागित्वात्॥ तदुक्तं। नियमादूर्ध्वगंतारो देवा मोक्षैकभागिनः। ऊर्ध्वस्रोतस इत्येवं तस्मात्ते परिकीर्तिता इति। तर्हि देवानामयमर्थः कथं सं
पत्स्यते। उच्यते। प्रथम उद्भूतमत्वमूर्ध्वत्वं तद्देवोच्छ्रूह्यपीति। तदुक्तं। ऊर्ध्व इत्येव यः स्वद्भुतमेवाभिधीयते। ऊर्ध्वस्रोतस एतस्माद्देवा एवं न तत्पर इति।
स्थावराणामेतच्छ्रूह्वाव्याप्त्वं उच्चवर्धमाने अमुख्यत्वात्॥ तदुक्तं। उच्छ्रूह उच्चमाने पितस्मात्तस्याममुख्यमपत इति। अनेन मुख्यशब्दस्यार्थो दर्शितः
तत्स्वभावमाह तमःप्राया इति। तमःप्रायाः अज्ञानप्रचुराः कल्पवृक्षादिव्यावृत्त्यर्थं प्रायःशब्दः। अंतःस्पर्शाः स्पर्शनैस्संपत ज्ञानवंतः। विशेषिणः भेद
नेसति सपदिशोषवंतः १९

तिरश्चां तिर्यक्स्रोतसां। नाधो नोर्ध्वं तिरश्चां तु पुनस्तत्रैव यज्जनिः। यज्ञोपयोगं वसतां सुपकारं विना पिवा। तिर्यक्स्रोतस इत्येव प्रोच्यंते ज्ञानिभिस्ततः। इत्यनेन तिरश्चां तिर्यक्स्रोतस्त्वं विहितमिति ज्ञातव्यं। तिरश्चां लक्षणमाह। अविद इति। अविदः कार्याकार्यविशेषज्ञानशून्याः। भूरितमसः शरीरमात्रे हंममाभिमानवंतः। यद्वा आहारनिद्राद्यतिरिक्तविषये ज्ञानरहिताः। घ्राणेनैव जानंतीति घ्राणज्ञाः। हृद्येव वेदो ज्ञानं येषां ते तथोक्ताः। इदमु भयेषां तस्तुवो तिरश्चां समं लक्षणं। तदुक्तं। तिरश्चीनास्थावराश्चात्र तत्स्पर्शा इतीरिताः। यत्तत्स्वानुमानाभ्यां हृद्ज्ञानेन शास्त्रत इति। यद्वप्रयत्ना

तिरश्चामष्टमः सर्गः सोष्टाविंशद्विधो मतः। अविदो भूरितमसो घ्राणज्ञा हृदिवेदिनः २०

त्वहृद्यं मम तदेव जानंति न शास्त्रयुक्तिभ्यामित्यर्थ इति। अष्टाविंशद्विधत्वप्रतिज्ञाया अधिकोक्तिर्विशिषतो यज्ञोपकृतत्वाभिप्रायेणायो यस्य सदृशः सतत्रांतर्गत इति ज्ञापनं वेति न दुष्यति। तदुक्तं। अष्टाविंशद्विशेषेण यज्ञोपकृतं यतः। तिरश्चां तावदेतस्माद्रूपते शास्त्रवेदिभिरिति। अष्टाविंश त्यधिकास्तु तिरश्चां याः क्षजातयः। यो यस्य सदृशस्त्वन्यः स तत्रांतर्गतो भवेत्। जलांतर्गताः सर्पाः कीटाद्याश्च जातयः। तेषां जलप्रधानत्वा
च्छरीरस्य तु सर्वश इति च २०

गवादिगोधांतैः षड्विंशनिर्मकरादिभिः सप्तविंशतिः कंकादिभिरष्टाविंशतिः तदुक्तं। गौरजो महिषः कृष्णः सूकरो गवयो रुरुः। अवियुष्ट्री खरश्चाश्वतरौ वा श्वतरो परः। गौरश्च शरभश्चैव चमरी च सृगालकौ। वृको व्याघ्रश्च मार्जारो हरिश्च शशशल्यकौ। कपिर्गजश्च गोधाद्या जलजाः पक्षिणश्च ये इति। तत्र कूर्मो जलजत्वेनाष्टाविंशतिष्वंतर्भूतोपि पंचनखत्वप्रदर्शनार्थं पृथगुक्तः। तत्र दाकारसंयुक्ता नूपृष्ट्यानुस्वाष्टारमेव च। यःस

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम २१ खरोश्वोश्वतरो गौरः शर
भश्चमरी तथा। एते चैकशफाः क्षत्तः शृणु पंचनखान्पशून् २२ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्यकौ
। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः २३ कंकगृध्रबकश्येनभासभल्लूकबर्हिणः। हंससारसचक्राह्वकाको
लूकादयः खगाः २४

दासंस्मरे द्योगीन सम्भूयो भिजायते इति वचनात् प्रसिद्धानामपि द्विशफादीनां स्मरणविधानार्थं उक्तिः। उक्तं तेषु प्रसिद्धं च स्मरणार्थं वकुन वित्। अप्रसिद्धज्ञापनार्थं द्विधा शास्त्रवचः स्मृतमिति च। भल्लूकोऽत्र पक्षीविशेषः लूकश्चकथ्यते इत्यभिधानं २४

नवमः सर्गोर्वाक्स्रोतो नामा केषां नृणां विषयः तुशब्दस्त्वेकविधोपि द्विविधः असुराद्या मानुषाश्चेति। मानुषाणां स्वभावमाह रजोधिका इति। भौतिकरजोंशजातत्वाद्रजोनिष्ठाः। तदुक्तं। यद्रजो भौतिकं तेन मानुषाणां सदा जनिः। तमो गूढेन रजसा न्वितरस्थास्तु वारिणामिति। अनेन भूरितमस इति पदं विवृतं। रजोनिष्ठत्वादेव कर्मपराः। न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृदिति वचनात्। किंच। रजोनिष्ठा स्तमोनिष्ठा द्विधार्वाक्स्रोतसः स्मृताः। असुराद्यास्तमोनिष्ठा मानुषास्तु रजोधिका इति वचनाच्च। मानुषलक्षणमुक्त्वासुरादिलक्षणमाह दुःखे

अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणां। रजोधिकाः कर्मपरा दुःखे
च सुखमानिनः २५

ति। च शब्द एवार्थः। दुःख एव सुखमानिनः। अनेन सर्वार्थेषु विपरीतज्ञानित्वमासुरलक्षणमुक्तं भवति। सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसीति वचनात्। सुखे सुखे कभावात्तु देवानेवं तु तानवा इति। च शब्दात् मानुषा उभयात्मका इति ज्ञातव्यं। तर्हि अर्वाक्स्रोतस्त्वं मानुषाणां कथमिति चेत्। शुभप्रयत्नमंतरेणाधोगमनात्। तदुक्तं। पापयोऽधोगमनं यस्मात्प्रयत्नेन विना भवेत्। अर्वाक्स्रोतस इत्येवं मानुषाः परिकीर्तिता इति। तिरश्चां स्थावराणां च बुद्धिः पूर्वं प्रवर्तिता। असुराणां रक्षसां च पिशाचानां तथैव च। अर्वाक्स्रोतस्त्वबुद्धिः नियमाद्दृ

दृष्टिनामिति वचनात् श्रुतिमिति साधारणमविद्या
दीनामर्वाक्स्रोतस्त्वं विवृतमिति ज्ञातव्यं २५

सत्त्वमसत्तु सृष्टं। एते त्रयः सस्त्यु सिर्यक्छा तुपविषया एव वैकृता मुख्यांशतरसर्गा उक्ता इति शेषः। एवमसाम्यैवधारणात्पत्यभिधानात् एव शब्दस्यसाम्यार्थमा हदेवसर्ग इति। देवसर्गः प्राकृतो वैकृतश्चेत्यर्थः। एतदेव विशदयति। वैकारिकश्चेति। यो वैकारिको देवसर्गः प्राकृतत्वेन प्रोक्तः सकौमारश्च सुभयात्मकः प्राकृतो वैकृतश्चेति कौशूमौ मामाने निर्मिणत स्मारः प्रासियैस्पसत थोक्तः अंडाद्दहिर्जातानां देवानां पुनरंडांतर्भूमौजन्म कौमारं तत्तुच्यत इत्यर्थः। मानिर्माण इति धातुः। कुमारंतीति कौमारो देवानां मंडजोद्भवः। वैकारिकाणां जननात्प्राकृता वैकृतश्च सः। वैकारिके स्ववान्यकामी बद्धा गित्व हेतुतः। उभयात्मकत्वेन वृषोच्यते ह्युणाप्रपीति वचनात् २६ देवसर्गं विभजति। देवसर्गश्चेति। च शब्देन संख्या विशेषं केषां चिदंतर्भावं च सूचयति। तदुक्तं। प्रोक्ता अष्टविधा देवा विबुधाः सर्व एव तु। पितॄणां शतमेवात्र असुरास्त्रिंशदेव च। गंधर्वाप्सरसां चैव द्विशतं परिकीर्तितं। सप्तति र्यक्षरक्षः सु त्रिंशच्चारणजातिषु। शतं सिद्धास्थान्यास्तु सप्ततिः सर्वजातिषु। ऊर्ध्वस्रोतस एवैते अन्यर्वाक्स्रोतसः स्मृताः। वैकारिकेषु देवेषु एते वै मुख्यभोगिनः। अभोगिनस्तदन्ये तु देवा एते ततः स्मृताः। सर्वज्ञास्तैः सहाराधा भक्ताः ते धनेरेशुच। नृत्तगानादिकर्त्तारो वाहनानि कुतन्नथा। सिद्धसिद्धेति वक्तारस्त्वाराध्येषां क्वचित्क्वचित्। सेवाकरा इति होते

वैकृतास्त्रय एवैते देवसर्गश्च सत्तम। वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः २६ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः २७ भूतप्रेतपिशाचाश्च विद्याध्राः किंनरादयः। दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः २८

भेदैरष्टविधा मताः। अन्ये त्वपेक्षुसर्वज्ञा विबुधास्ते प्रकीर्तिताः। तथान्ये कर्मभिस्तेस्तैरष्टभेदांतरंगता इति। अंडांतर्भूमौ जायमानानां देवानां भूतगत गुणत्रयादुत्पन्नियोग्यता भेदेनानेकविधा। तदुक्तं॥ भौतिकेन तु सत्त्वेन गूढेन ह्यणुगाउजं। रूपं तत्रापि तु तमः शतांशेन प्रकीर्तितं। तज्ज्ञा रुद्रस्ततस्त्वेवमिंद्रादीनां गुनर्जनिः। गूहितं सत्तरजसा तत्स्वत्वं मानुषापरा। देवा एवं गुणा ह्येते सर्वमाप्य व्यवस्थिताः। गुणातीतं वयं रूपं ब्रह्मादीनां सुखात्मकं। विरूपं तत्स्वसत्त्वस्यैवोक्तं यत्र विद्यते। तनोत्कृष्टं तमोयत्र हीनं तत्तु स्वभावतः। उपगूहनेतु नेवास्ति विशेषो नित्यचिन्मये। प्रकृते गुणप्रला या मूलिका या अनक्वचित्। विशेषः परमेतत्वे वास्तु देवे कुतः पुनरिति। देवानां शापादिदोषादुन्मोत्त जननेपि भूतगुणस्वभावेन देवत्वमासुरत्वं च ज्ञायते। तदुक्तं। यदि देवाद्योदोषाज्जायेरन्मानुषादिषु। तथापि देवा विज्ञेया असुराद्यास्तथाक्रमिति। वैकृतमुपसंहरति देशेति। देवसर्गस्य प्राकृतवैकृतभेदेनोक्तसर्गाणां दशत्वं युज्यते २८

भा॰ तृ॰
९९

मूलस्पृष्टिर्हरिरेवाह्लमन्वंतरेष्वंतरस्थितःहरिरेवेति॥ तिशंकामपभूक्त्यिाशयेनाह। एवमिति। आत्मभूरजोहरिरात्मनास्वेच्छया कल्पादिष्वात्मेवस्व धर्मवत्सलं नैत मूलत्वाभक्तसुपादानेनदेवादिदेहान्स्पृष्ट्वातन्नियंतृतयात्मानंसृजतिप्रादुर्भवन्नेवबहुरूपत्वेनेतिशेषः। कीदृशो हरिरेवमुक्तप्रकारेणसृष्टा। अनेनविरि वादीनांस्रष्टृत्वंद्वारमात्रमुक्तंभवति। कथंप्रष्टेत्यतउक्तं रजःक्षुतइति। रजआदिगुणानांमध्यवर्तित्वातू रजोगुणाक्रतोनतुगुणाधीनत्वाद्रजनभिमाना बदेवस्त्रवबहुरिरिंद्राद्यन्यतमः किंनस्यादित्यतउक्तंआत्मभूरिति॥ कामेनेतिसृष्टेतितद्दिविरिवः किमित्यतउक्तं हरिरिति। रजोगुणेनदृतीभूतोरजःक्ष तइतिप्रसिद्धार्थपरित्यागप्रसिद्धार्थकल्पनेकिंप्रमाणमित्यतआवार्येरिदेमानं वदाहृत। गुणाक्रतोहरिर्नित्यंगुणानांमध्यगोयतः। अनहंवेदना

अतः परंप्रवक्ष्यामिवंशान्मन्वंतराणिच। एवंरजः क्षुतः स्रष्टाकल्पादिष्वात्मभूर्हरिः॥ सृजत्यमोघसंकल्पआत्मैवात्मानमात्मना २९
गुणव्यत्यय एतस्मिन्मायावत्वादधीशितुः॥ नपौर्वापर्यमिच्छंतिनद्याधाम्युर्ममेर्यथा ३० देवासुरादयः स्तनः कल्पेस्मिन्येप्रकी
र्त्तिताः॥ तएवनामरूपाभ्यामासन्मन्वंतरांतरे ३१ इतिश्रीभागवतेम॰ तृतीयस्कंधेएकादशोध्यायः॥ ॥

त्तस्यगुणासंस्पर्शएववेति। सृष्ट्वादेवादिदेहान्स्वआत्मानंबहुधाकरोत्। तन्नियंतृतयात्मानंप्रकृतिदेहभेदतइतिदवनेस्वबहुत्वेप्रमाणं। एकत्वस्यक र्तृकर्मादिभावः कथमितीदंवोद्यं कर्त्ताचकरणंवैवकर्मैवस्वयंहरिः। आत्मनोबहुधाभावेप्रकृतेक्रस्वतंत्रतइतिवावापरिहर्त्तव्यं। एतदभिप्रायेणा मोघसंकल्पइत्युक्तं २९ तर्हिकथंसृष्टिः प्रथमेत्पांशकृतनियमोनास्तीतिसदृष्टांतमाहगुणेति। एतस्मिन्गुणव्यत्ययेगुणाद्यतिकरेपौर्वापर्यप्रवाप रीभावंनेच्छंतिविपश्चितइतिशेषः। कुतः अधीशितुः अखंडैश्वर्यस्यहरेर्मायावत्वादिछानियतत्वात्। नद्याःभ्रमत्याः पुनः पुनरावर्त्तमानायाऊर्मेत्रा वर्तस्येव ३० एतत्कल्पसृष्टेर्न्योन्यस्मिन्कल्पेन्येसृज्यंतइतिभ्रांतिंनिवारयति। देवेइति इंद्रादिनाम्नासहआद्यश्वक्रादिरूपेण च ३१ तृतीयस्कं धेएकादशोध्यायः ११

राम
९९

हरेरुभयानंत्यज्ञानंमोक्षैकफलमित्ययमर्थास्मिन्नध्यायेनिरूप्यतेतत्रकालाख्यंस्वरूपंज्ञातुंप्रवृत्तिविदुरप्रश्नेप्रसिद्धेरिष्यन्परमाणुकालज्ञा नायद्व्यपरमाणुपरिमाणमाहचरमइति। तुशब्दएवार्थे। एकएवार्थोयोविशेषाणांपार्थिवादिपदार्थानांचरमोंत्यो विशेषः तर्हिनिरवयवः किंनेत्याह। अनेकेति। पश्चानेकैरवयवैः आसमंतात्सम्यग्युतः। अनेकावयवत्वेचरमेतिविशिष्टोक्तिः कथमित्यतक्रशब्देनविशिनष्टि। देवलो केस्थितामनुष्याविशेषणामेत्रैक्यमाद्दर्शनेयस्यांशांशित्वविशेषंद्रष्टुंनशक्ताः सएवचरमोविशेषः इत्यावहेतेप्रज्ञावंतः। एवंकारणादीनां

मैत्रेयउवाच॥ ॥चरमक्रविशेषाणामनेकासंयुतक्र्यदा परमाणुः सवि
ज्ञेयोनृणामैक्यभ्रमोयतः १ राम राम

यतोयस्मादैक्यभ्रमः। यतः परमाणुर्नीक्षिसपदार्थः परमाणुरितिभ्रांतिभ्रमोभ्रांतिज्ञानंयुक्तमितिदर्शयितुंनृणामित्युक्तं। नाभ्रापरमाणुर्वि ज्ञेयइत्यन्वयः। मनुष्यादेवलोकेपिविशेषेणैवदर्शने। अंशांशित्वविशेषंतुयस्यद्रष्टुंनशक्नुयुः॥ चरमोविशेषइतितंमुनयोब्रुवंजसा। परमा णुः सविज्ञेयः कणादाद्यानिरंशिनं। अनंतांशयुतत्वेपियंब्रुवंभ्रांतिदर्शनात्। ततोपिपरमाणुत्वंतदंशानांनयद्यपि। अनंतत्वाद्विवेकार्थमस्ये क्तापरमाणुत्तेतिवचनात्। अस्येवपरमाणुत्वंनान्यस्येतिज्ञायते। अतएवविज्ञेयइति १

अणुपरिमाणं निरूप्य महत्परिमाणं दर्शयति। स तु इति। स तु एव परब्रह्मण एव यत्कैवल्यं यः केवलभावः स परममहान् इत्यन्वयः। कालतो देशतो गुणतश्चानंतत्वं स तः परब्रह्मण एव मुख्यमित्यर्थः। सन् घट इत्यादौ सद्रूपानुवृत्तिदर्शनादित्यत आह पदार्थस्येति। सदित्यनुवर्तते। सत्पदमुख्याभिधेयस्य मुख्याभिधेयस्यार्थः स्यात् तवाच्यमन्यत्र भण्यते। अमुख्यमपि यथा शक्ति नीवां परिहितो भवेदिति वचनात् मुख्यस्योपपत्तावमुख्यस्यैव कारणयोगात्तत्र अणुतरत्वस्य निश्चितस्य सत्पदमुख्याभिधेयस्य तत्परिमाणत्वेन भाव्यं। यद्वैवसमः प्लुषिणा त्यादौ दर्शनादित्यतः स्वरूपावस्थितस्येति स्वरूपमेवावष्टभ्य स्थितस्य स्वे महिम्नीति श्रुतिः। जगदावरकस्य वासुदेवाख्यस्य हरेर्जगत्प्रविष्टरूपात्किं चिन्महत्वात् स्वरूपावस्थितत्वाद्यनावृत्तिः कथं इत्यतः कैवल्यमिति। जगदावरणादिव्यापारोदासीनतया स्थितं। तादृशरूपाणामनेकत्वात्कथं निर्णय इत्यतो विशेष इति। तादृग्रूपविशेषरहितः। सर्वगतस्यापि प्रादेशमात्रतया स्थितत्वेन विशेषवत्त्वात्कथमविशेष इत्यतो निरंतर इति। प्रादेशमात्रादिविशेषरहितः। एतदुक्तं भवति। परब्रह्मणो यः केवलभावो डाद्यतः प्रविश्य तदावरकं तस्यैव परममुरूपादि रूपांतरं तदेकदेश प्रादेशमात्रादिविशेषं विना पत्सर्वगतं रूपं तदेव परममहानित्युच्यते। कालकोटिवि

स तु एव पदार्थस्य स्वरूपावस्थितस्य यत्। कैवल्यं परममहानविशेषो
निरंतरः २

हीनत्वं कालानंत्यं विदुर्बुधा। देशकोटिविहीनत्वं देशानंत्यं तथैव च। गुणानामप्रमेयत्वं वस्त्वानंत्यं विदो विदुः। आनंत्यं त्रिविधं नित्यं हरेर्नान्यस्य कस्यचित्। तस्य सर्वस्य रूपेष्वप्यानंत्यं तु त्रिलक्षणं। तथापि देशतस्तस्य परिच्छेदोऽपि विद्यते। परिच्छेदस्तथा व्याप्तिरेकरूपेऽपि युज्यते। तस्याचिंत्याद्भुतैश्वर्याद्व्यवहारार्थमेव च। गुणतः कालतश्चैव परिच्छेदो न कुत्रचित्। व्याप्तत्वे हेतोप्यस्ति सर्वरूपेषु यद्यपि। न च भेदः क्वचित्तस्य अणुमात्रोऽपि विद्यते। तथापि विद्यते गुणत्वं तस्मादैश्वर्ययोगतः। तस्माद्बुद्धावताराणां धर्मग्रामस्तु च भण्यते। यत्तत्स्य व्यापकं रूपं परं नारायणाभिधं। शून्यं ब्रह्मेति यत्प्राहुर्द्वितीयं रूपमुच्यते। तः पर मः पुरुषो नाम भिन्नं तत् देशतो विभोः। तृतीयं वासुदेवाख्यं जगदावरकं मितं। देशतो जगदाविष्टं तुरीयं विष्णुनामकं मितिवचनेन मंदमतीनां शंकोपद्रवाः परिहृता इति ज्ञातव्यं। किं च सर्वगतस्यापि ब्रह्मरूपस्य कालादिरूपया प्रकृत्या समव्याप्याव्यापित्वाज्ञानिकांतर्भावात्तदन्यस्मिन्नवस्थानात्स्वरूपावस्थितस्येत्युक्तं। देशकालादिरूपिण्यां स्थितं ब्रह्मापि सर्वगं। उच्यते नान्यगं यस्मादात्मवत्साहरेर्विभोः। महदादिगतं यत्तु तदन्यगतमुच्यत इति
२

राम
६७

उक्तमर्थं दार्ष्टांतिके करोति। एवमिति। सोऽक्ष्मेपरमाणुत्वे स्थौल्ये परममहत्वे वर्तमानः कालोप्येवमनुमितः कलामुहूर्तादित्यादिशब्दानां सांशिकत्वज्ञानापुरहीतव्याप्तिमल्लिंगज्ञानवताजनेनानुमितः ज्ञात इत्यन्वयः। अनुमेति ह्युपश्चाद्भ्रमयथाज्ञानं वलिंगजमित्यभिधानादर्थं द्रूयं सेत्यमिति। यावंतं देवलोकस्यामायुष स्वधारयेत्। महाप्राज्ञो देवनूकः स कालः परमाणुकः। सर्गाद्यैरनवच्छिन्नस्स्वं नंतर इत्यपि तथैव परमाणुवादिविशेषात्मापि नो भवेत्। इत्यपरादिमेदो न स कालः परमो महान् इति शास्त्रवचनं त्वात्रमानं। यज्ञादिकर्मणा प्रीतदेवताप्रसादेन प्राप्तैश्वर्यो मानवो देवनूक इति। न केवलमुभयविधः कालोऽनुमितः किंतु तदंतर्यामीतदारभ्य हरिरप्यनुमित इत्यभिप्रेत्याह। संस्थानभुक्त्येति। विभुर्व्याप्तो भगवान् संस्थानभुक्त्या संस्थानयोः परमाणुत्वेन परममहत्वेन व्यवच्छिन्नयोः कालयोः स्थित्या नदंतर्यामित्वेनाऽव्यक्तो दृश्यः परमाणुः परममहान् इत्यनुमित इत्यन्वयः। तत्र स्थित्वा किं

एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम। संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ३

करोत्यत उक्तं व्यक्तभुगिति व्यक्तं तत्तत्कालहविर्निर्गतं दृष्टं ज्ञप्तिपातिसंहरतीति व्यक्तभुगिति। यद्वाप्यसमानधर्मत्वाद्व्यक्तं प्रकृतिरूपं दृष्ट्वा दोषवर्णयतीति। अत्र विशेष उक्तो देशतः कालतश्चैव वक्तत्वत्रिधा हरेः। यथानंत्यं न वान्यस्य प्रकृतेर्देशकालतः। तथाशक्त्यस्य कालस्य देशानंत्यं स्वकालतः। कालशब्दात्मिकासेव तथापि तु हरेः सदा। नास्याः सामर्थ्यलेशोऽपि ज्ञानानंदगुणेष्वपि। ज्ञेयस्त्वद्वयो वायुः शेषवीन्द्रदरायतः। अवरस्ततश्चेन्द्राद्याः गुणैः सर्वैर्न संशय इति वचनादवगंतव्यः। किं च कालकालांतर्यामिणः परमाणवादिनामवाच्यत्वेन तत्र दिशेषभोक्तृत्वात्। तदुक्तं अणवादिकालसंस्थानभोक्तृत्वात्परमेश्वरः। अणवादिनामवाच्योसौ कालश्चेत्यभिधीयत इति ३ राम राम राम

भा· त·
६८

सामान्यतउक्तं विशिनष्टि कालइति। यः कालः कालांतर्यामी हरिश्च परमाणुतां परमस्तु विशेषाणां इत्याद्युक्तलक्षणवस्तां भुंक्ते। सकालः हरिश्च पर माणुर्वैपरमाणुनाम्नावाच्य इत्युक्तस्मृतिप्रसिद्धमित्यर्थः। सतोब्रह्मणो विशेषंस्वरूपंस्वरूपावस्थितकैवल्याद्यविशेषनिरंतरलक्षणंपरममहद्रूपंयःकालां तर्यामी भुंक्ते। सकालः कालांतर्यामी ब्रह्मरूपंपरममहानितिनाम्नावाच्यः। तस्यकालांतर्यामिणो विविधापरिच्छेदाभावात्। तदुक्तं सर्वसर्वत्रभोक्तापि विशे षादेकभोक्तृवत्। स्थितोहरिरचिंत्यात्मानिजैश्वर्यादजोविभुरिति। अनेनसत एवपदार्थस्येत्यादिनायानिविशेषणानिपरममहतोब्रह्मणःकथितानि तानिमहत्कालांतर्यामिणोपिसंतीत्युक्तंभवति। तथाहि। येःसच्छब्दस्यमुख्यार्थः परमाण्वादिकालांतर्यामिस्वरूपव्याप्तत्वात्तेथांतत्त्वनरादिकालांत र्यामिस्वरूपव्याप्तत्वात्तोपिस्थूलपरार्द्धपरादिकालान्तर्यामिस्वरूपव्याप्तत्वोपश्चाखंडितत्वेपितदेकदेशाद्यवांतरभेदव्याप्तत्वेनपरममहद्रूपभोक्तास

सकालः परमाणुर्वैयोभुंक्तेपरमाणुतां। सतोविशेषभुग्यस्तुसकालः परमोमहान् ४ अणुर्द्वौपरमाणूस्यात्त्रसरेणुस्त्रयःस्मृतः।
जालार्करश्म्यवगतःखमेवानुपतन्नगात् ५ त्रसरेणुत्रिकंभुंक्तेयःकालःसात्रुटिःस्मृता। तत्रिभागक्ष वेधःस्यात्तैस्त्रिभिस्तुलवः
स्मृतः ६

परममहानिति। यावताकालेनपरमाणुपरममहतोरूत्यन्निपलयोस्यातांतोकालोपरमाणुपरममहानित्यर्थः प्रमाणभून्यत्वा
दुपेक्षणीयः ४ इदानींपरमाणुपरममहतोरंतराकालावयवानांसंख्यायोगेननामान्याह। अणुर्द्वाविति। द्वौपरमाणूमिलितौ द्व्यणुकनामकालःस्यात्
तत्रस्वाप्येवमेवज्ञातव्यानित्रयोद्व्यणुकामिलितास्त्रसरेणुस्त्र्यणुकःकालः। सोयमयोगिप्रत्यक्षसिद्धइत्याह। जालेति। जालंगवाक्षं तत्रवर्त्तमानार्करश्मि
नावगतःखमेवानुपतन्नगात्दृष्टिविषयंप्राप्यज्ञातइत्यर्थः। अत्रसर्वत्रतत्कालावयवांतर्यामित्वेनतत्तद्रूपवाच्यत्वेनतत्तत्कालवन्निद्व्यप्रवर्तकत्वेनस्थि
तंसच्चिदानंदलक्षणमनंतसंज्ञंस्वरूपमनुभवतीतिज्ञातव्यं। अतएवसर्वत्रसर्वभोक्तेत्युक्तं। ५ तासांतिसृणांत्रुटीनांभागोभजनंयस्यसतत्रिभागः। ति
सृणांत्रुटीनांवेधइत्युक्तंभवति ६

राम
६८

निमेषास्त्र्यंगुलिस्फोटेनज्ञेयाः। ताः काष्ठाःपंचदशलघु ७ दशपंचचलघूनिनाडिका। तेद्वेनाडिकेमुहूर्त्तंविदुः षण्नाडिकाःप्रहरःसप्तनाडिकायामः। सूर्यग
तिलक्षितराशिभेदाद्न्यातिरेकात्वेतिविकल्पः ८ नाडिकाद्यवधिवक्तुंतत्स्वलक्षणमाह। द्वादशेति। द्वादशार्द्धैःषड्भिःपलैःकृतमुन्मानंउत्कृष्टमानंप
स्यद्वादशार्द्धपलोन्मानंचतुर्भिश्चतुरंगुलैःचतुरंगुलदीर्घैः स्वर्णमाषैः कृतछिद्रंकृतद्वारमेवंरचितंनाडीपात्रंयावत्प्रस्थजलंपिवेत् तावताकालेनप्रशस्त
जलेस्थापितंतज्जलंपीत्वानिमज्जतिसानाडिकेत्यन्वयः। इदमुक्तंभवति। चतसृभिःकाकणिकाभिःकृतोविंशांशःतैश्चतुर्भिर्युतोमाषः। चतुरंगुलदीर्घमाष
चतुष्टयेकृतेसतियावान्परिणाहःस्यात्तावतादंडविस्तारेणकृतद्वारंषट्पलरूपंनाडीपात्रमतिशैत्यकालेकर्मांद्यादिदोषवर्ज्जितंनिर्मलेसमोष्णेनित्यम

निमेषस्त्रिलवोज्ञेयआम्नातास्तेत्रयःक्षणः। क्षणान्पंचविदुःकाष्ठांलघुतादशपंचच ७ लघूनिवैसमाम्नातादशपंचचनाडि
का। तेद्वेमुहूर्त्तंप्रहरःषड्यामःसप्तवानृणां ८ द्वादशार्द्धपलोन्मानंचतुर्भिश्चतुरंगुलैः। स्वर्णमाषैःकृतछिद्रंयावत्प्रस्थजलंपिवेत्
९

र्यरश्मिद्युतंप्रवाहगतंवसंतकालीनंवप्रयागगतंवाजलंपिबतिसकालोनाडिकेत्युच्यतइति। तदुक्तं। काकणिकाचतुष्कंचविंशांशेत्यभिधीयते। कृष्णलेस्त
पिते द्युसुस्थचतुर्भिश्च माषकः। चतुरंगुलदीर्घेतुकृतेमाषचतुष्टये॥ यावान्स्यात्परिणाहेनतावद्द्वारंविधीयते। प्रस्थस्यनाडीपात्रस्यषट्पलस्यशुभेजले। आ
राधिक्येनोदकेनछिद्रंप्रविशेत्। अतिशैत्यकलेकेचमांद्येनैवतुपूरणं। तस्माद्वसंतकालेचप्रयागस्थोदकेनच। नाडीशुद्धिःपरीक्ष्यास्यादन्यथानसंभ
वेदिति। निर्मलेनसमोष्णेननित्यंसूर्यांशुवारिणा। प्रवाहगेनकार्यास्यात्कालशुद्धिःसदैवहि ९

उभे अहनी अहोरात्रे अहनी इत्युक्ते क्वाहि दिवारात्रिर्निसिध्यतीत्यत उभे इति। यत्रोभयोः सशब्दस्यात्र द्विवचनेपि उभे इत्यभिधानात् १० उत्तरलिंगापेक्षयाहतस्तु कृष्णमनुष्यमासः पितृणामहोरात्रे ते द्वौ मासावृतुः षड्ऋतवो दक्षिणायनउत्तराख्यमयनमिति संज्ञिताः ११ दिविस्वर्गे देवानां द्वेअयने अहनी अहोरात्रे रात्रिक्रिया भावात् रात्रिरप्यहः शब्देनोच्यत इत्यहनी इत्युक्तं। मानुषद्वादशमासा वत्सरः १२ सूर्यादिनवग्रहाणां अश्विन्यादिनक्षत्राणां ध्रुवादितारकाणां चक्रस्थाने उत्तस्थः प्राणिनां पुण्यपापकर्म दर्शनादनिशं निमिषणाद्गमनाद्वा विकसनाद्वा निमिषतो विकासे वा निमिषो विभुः। परमाण्वादिना संवत्सरावसानेन कालेन पर्येति जगदिति शेषः। सर्वदा दर्शनात्तस्यानिमिषत्वं विदुर्बुधाः। सततंगमनाद्वा पिकालस्थस्य महात्मन इति अनेनापि मुख्यतः कालशब्दवाच्यो हरि

यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे। पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद १० तयोः समुच्चयो मासः पितॄणां तदहर्निशं। द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ११ अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः। संवत्सरशतं नृणां परमायुर्निरूपितं १२ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत्। संवत्सरावसानेन पर्येत्यनिमिषो विभुः १३ संवत्सरः परिवत्सर इडावत्सर एव वा अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते १४

रिति सिद्धं १३ तत्तत्संज्ञकालस्थत्वेन तन्नियंतृत्वेन तत्तन्नामवानित्याह। संवत्सर इति। सौरद्वादशमासाः संक्रमणावसानास्तेषु द्वादशेषु मासेषु स्थितः संवत्सरः। द्वादशराशिषु बृहस्पतेराहत्या यः कालः तस्य द्वादशमे भागे यस्मिन् वृत्ति सपरिवत्सराख्यः। सप्तविंशनक्षत्राणि तद्वादशमासेषु स्थित इडावत्सरनामा। तिथीनां द्वादशावर्त्तो यो द्वादशमासरूपः तत्र स्थितो हरिरनुवत्सरः। अर्कोष्ट्युत्तरशतत्रयात्मद्वादशमासेषु स्थितो हरिः वत्सरनामा। कालांतर्यामी हरिरेवं स्वरूपो भाष्यत इत्यन्वयः। तदुक्तं। इडावत्सरनामासौ नक्षत्रद्वादशे स्थितः। तिथीनां द्वादशावर्त्तो यो हरिः सोनुवत्सरः वत्सरोयः स्थितस्त्वर्कावष्टुत्तरशतत्रये। गुर्वावर्त्तद्वादशांशेयः स्थः सपरिवत्सरः। सोरद्वादशमासेषु यः स्थः संवत्सरो हरिः। एवं सकालनामापि कालस्थः परमेश्वरः। इति स्मृतिसिद्धत्वा द्विद्याद्यं १४

वत्सरादिनामकरणप्रयोजनमाह। य इति। यः कालांतर्यामी हरिः क्रतुभिः स्वप्रज्ञाभिः स्वेच्छारूपाभिः। कालाख्यया स्वशक्त्या प्रकृत्या गुणमयीं सत्वादिगुणविकाररूपां सृज्यशक्तिं सृष्टव्यपदार्थविषयां प्रकृतिमुरुधोच्छ्वसयन् उज्जृंभयन् पदार्थान्वितत्वविस्तारयन् पुंसोऽभ्रमाय अज्ञाननिवृत्तये भूतानां भेदो येषु दृष्टकानिष्टविवेकज्ञानं यस्मात्स तथोक्तः। भूतानां इष्टानिष्टज्ञस्थैर्यज्ञापितृत्वये। बोधयन् सृज्यशक्तिं च कालस्थो वर्त्तते हरिरिति च। दिवि व्योम्नि धावति विष्णुर्यस्थो भूत्वा वेगेन गच्छति। तस्मै वत्सरपंचकाय संवत्सरादिपंचकांतर्यामिणे बलिं हरत कुरुतेत्यन्वयः। अनेकार्थत्वाद्धातूनां १५ विदुर उक्तार्थमनूद्य वक्तव्या

यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः। कालाख्यया गुणमयीं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय १५ विदुर उवाच पितृदेवमनुष्याणामायुः परमिदं स्मृतं। परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः १६ भगवान्वेद कालस्य गतिं भगवतो ननु। विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा १७ मैत्रेय उवाच कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं। दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम् १८

र्थं विज्ञापयति। पितृदेवेति। ये विदो ज्ञानिनः। कल्पात् लोकत्रयात्। बहिर्महर्लोकादिषु वर्त्तमानाः स्युः तेषां परेषां उत्तमानां गतिं स्थितिमाचक्ष्वेत्यन्वयः। १६ मैत्रेयस्य वक्तृत्वार्थं ज्ञानपाटवमस्तीत्याह। भगवानिति। कालस्य कालांतर्यामिणो भगवतो गतिं गमनं वर्त्तनं वेद ननु कुतः धीरो धीषु रममाणाः ज्ञानिनो योगराद्धेनाष्टांगयोगसिद्धेन चक्षुषा विश्वं विचक्षते। भगवान् पितेव्यक इति यस्मात्तस्मादिति शेषः १७ महर्लोकादिस्थितानामायुर्वक्तुं कृतादि चतुर्युगतत्संध्याकालपरिमाणं वक्ति। कृतमिति। दिव्यैर्देवानां विद्यमानैः १८

एतदेव विवेचयति चत्वारीति। एवं कृतादिषु हस्रसहस्राणि एकैकह्रासक्रमेण संख्यातानि द्विगुणानि शतानि च अवशिष्ट द्विसहस्रागतशतानि कृतादिपूर्वा परसंध्यारूपाणि कलियुगपूर्वापरसंध्यामारभ्य द्विगुणानि ज्ञेयानि। तथाहि। कलियुगपूर्वापरसंध्ये शतं शतं द्वापरे पूर्वापरसंध्ये द्विशतं द्विशतं त्रेतायुगपू र्वापरसंध्ये त्रिशतं त्रिशतं कृतयुगपूर्वापरसंध्ये चतुः शतं चतुः शतं। एवं विंशति शतानां युगेभ्यो द्विगुणित्वं १९ एवं तर्हि कृतादियुगत्वं कस्य कालस्येति तत्रा ह। संध्येति। शतसंख्ययोः संध्यासंध्यांशयोः अंतस्थो यः कालः। यत्र तत्तद्युगधर्मो विधीयते तमेव युगज्ञा युगमानमाहुः॥ कृतादियुगसंध्याकालाः पूर्वा

संध्या

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं। संख्यातानि सहस्राणि द्विगुणानि शतानि च १९ संध्यांशयोरंतर्यः कालः शतसंख्य योः। तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० धर्मश्चतुष्पात् मनुजान् कृते समनुवर्तते॥ स एवान्येष्वधर्मेणाव्येति पादेन वर्द्धता २१ त्रैलोक्याद्युगसाहस्रं बहिराब्रह्मणो दिनं। तावत्येव निशा तात यन्निमीलति विश्वसृक् २२

परकोटिसंबद्धा द्वारस्थाः कालविशेषाः संध्यांशाख्या इति २० कृतादिषु यो धर्मो विधीयते स किमवयवोपचर्णनतइतितद्विप्रकारं वक्ति। धर्म इति। तपः सत्यं दया शौचमिति चतुष्पात् मनुजानुद्दिश्येति शेषः। अन्येषु त्रेतादिषु स्वनामानुसारेण तपो विरोधिना वर्द्धता वर्द्धमानेनाधर्मेणाव्येतिक्रमेण लोति योज्यं २२ तत्र येस्युः कल्पाद्बहिर्विदः इति प्रश्नपरिहारमारभते। त्रैलोक्यादिति। त्रैलोक्याद्बहिराब्रह्मणः ब्रह्मपर्यंतं तल्लोकपर्यंतमित्यर्थः। तावत्पर्यं तं वर्त्तमानं चतुर्युगसहस्रं ब्रह्मण एकं दिनमाहुः तावत्येव चतुर्युगसहस्रात्मिका निशा। यद्यस्यां निशायां विश्वसृट् ब्रह्मा निमीलति निद्रामुद्रितलोचनो भवति २२

चतुर्युगसहस्ररूपनिशावसाने पुनर्ब्रह्मणोर्थाय आरब्धो लोककल्पः लोकानां जननं तथा भूरादिलोकानां कल्पः सृष्ट्यादिलक्षणस्तावदनुवर्त्तते। यावद्भगव तो ब्रह्मणश्चतुर्द्दशमनून् भुंजन् भुंजानं दिनं स्यादिति शेषः। दिनस्य भोक्तृत्वं नाम भोपचारमात्रं तत्र यज्ञादिमूर्त्त्यावतीर्णस्य हरेर्मुख्यभोक्तृत्वमित्येतत् ज्ञापनाय भु जन्निति लिंगव्यत्ययः २३ मनूनां भोज्यमन्वंतरकालमाह। स्वंस्वमिति। साधिकैकसप्ततिर्मनोः काल इत्यन्वयः। सार्द्धद्वादशलक्षवर्षाधिकैकसप्ततिचतु र्युगावसानं मनुकाल इत्यर्थः। तदुक्तं। युगेकसप्तते स्वं ह्रस्वं सार्द्धद्वादशलक्षकं। वत्सराणां मनोर्भुक्तिः सहस्रं चतुरुत्तरं। शतानां प्रलयश्चैव पंपेवोत्तरमथापि च।

निशावसान आरब्धो लोककल्पानुवर्त्तते॥ यावद्दिनं भगवतो मनून् भुंजंश्चतुर्द्दश २३ स्वंस्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिं। मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः॥ भवंति चैते युगपत्सुरेशाश्चानु ये च तान् २४ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्त नः॥ तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः २५ मन्वंतरेषु भगवान् बिभ्रत्सत्वं स्वमूर्त्तिभिः। मन्वादिभिरिदं विश्वमवत्युदितपौ रुषः २६

आद्येषु षट्सु प्रथमे द्विसाहस्रं प्रकीर्त्तितं वत्सराणां मनोरंत एवं मिद्रादीनां भवेदिति। मन्वंतरेषु अधिकृतमन्वादीनाह। मन्वंतरेष्विति। तद्वंश्याः मनुवं शभवा राजानः। सुरेशा इंद्रादयः। ये च तान् अनु इंद्रादीननुवर्त्तंते गंधर्वाद्याः। एते सर्वे युगपदेककाल एव भवंतीत्यन्वयः २४ ब्राह्मः ब्रह्मकृतः दैनं दिनः ब्रह्मणोदिने दिने क्रियमाणः त्रैलोक्यं प्रवर्त्तयतीति त्रैलोक्यवर्त्तनः। यत्र यस्मिन् दैनंदिनसर्गे तिर्यगादीनां संभवउत्पत्तिः २५ मन्वादयो जगत्पालनादिकुर्वंतीति यत्तद्भगवदनुगृहीतमेवेत्याह। मन्वंतरेष्विति। सत्वं सत्वगुणं। उदितपौरुषः निष्पादितपराक्रमः २६

भा॰ टी॰
७१

जगत्पालनमेवभगवन्नियतंनप्रलयइतिमंदाशंकांनिवारयति।तमोमात्रामिति।दिनात्यये ब्रह्मदिनापगमेरात्रिसमयेभगवांस्तमोमात्रांस्वनियततमोगुणप्रवर्त्तककालसंकर्षणरुद्रादिरूपमुपादायप्रतिसंरुद्धविक्रमः कालेनकालनाम्ना ब्रह्मणानुगतः।कल्पप्रलयोदकेशेषेअनंतभोगपर्यंकेतूष्णींनिवृत्तजगद्व्यापारआस्तेशेतइत्यर्थः।ब्रह्मणाकालनाम्नासहशेतेहरिर्निशीतिवचनात्कालेनेतिनप्रलयकालोत्रविवक्षितस्तस्यदिनात्ययःइत्यनेनगतार्थत्वात् २७ देवदत्तस्वापविलक्षणोभगवत्स्वापःकुतोलिंगशरीराणामनवशेषविनाशादित्याशयेनतत्स्वापप्रकारंवक्ति।तमेवेति।लोकेनिर्मुक्तशशिभास्करेसति।ब्रह्मणिवशयानइवहरिंप्रविष्टेसतितत्रिशायामनुवृत्तायांसत्यांभूरादयोलोकाअंब्रह्म

तमोमात्रामुपादायप्रतिसंरुद्धविक्रमः।कालेनानुगतःशेषआस्तेतूष्णींदिनात्यये २७ तमेवानुविलीयंतेलोकाभूरादयस्त्रयः॥ निशायामनुवृत्तायांनिर्मुक्तशशिभास्करे २८ त्रिलोक्यांदह्यमानायांशक्त्यासंकर्षणाग्निना॥यांत्यूष्मणामहर्ल्लोकाज्जनंभृग्वादयोर्दिताः २९ तावत्त्रिभुवनंसद्यःकल्पांतैधितसिंधवः॥प्लावयंत्युत्कटाटोपचंडवातेरितोर्म्मयः ३० अंतःसतस्मिन्सलिलेआस्तेनंतासनोहरिः॥योगनिद्रानिमीलिताक्षःस्तूयमानोजनालयैः ३१

णमन्वेवविलीयंते।अनुविधीयन्तइतिपाठेशयानंहरिमनुविधीयंतेब्रह्मणासहसुप्ताःक्रियंतइत्यर्थः २८ तमेवलयंस्पष्टयति।त्रिलोक्यामिणमन्वेवविलीयंते।... संकर्षणमुखनिर्गताग्निनाशक्त्याज्वालयाऊष्मणाभृग्वादयोमहर्लोकनिवासिनःतस्मान्महर्लोकाज्जनलोकंयदायांति २९ तावत्तदाविवासिंधवःसंकर्षणमुखविषमिश्राःसप्तसमुद्राः।उत्कटश्चाटोपोयस्यतत्तथा।अतएवचंडःउत्कटाटोपश्चासौचंडश्चउत्कटाटोपचंडस्तादृशेनवातेनेरिताःउन्नमिताऊर्म्मयोयेषुतेतथोक्ताः।आटोपःकोलाहलः ३० कल्पप्रलयोदकेहरेःस्थितिप्रकारंवक्ति।अंतरिति।अनंतासनइत्यनेनहरेःस्वापःप्रलयार्थमुपचर्यते।नतुतात्विकइत्यवगम्यते ३१

सप्त
७१

एवंविधाहोरात्रवर्णनेनकिंप्रयोजनमत्राह।एवमिति।अस्यब्रह्मणोप्येवंविधैरहोरात्रैर्वयःशतंपरमायुस्तथापिपुनरपेक्षितमिवेत्यन्वयः।कीदृशैःकालनाम्नःसूर्यतिर्यग्गमिरुणोहरेर्गत्योपलक्षितैः।ब्रह्मकालस्यसूर्यगत्योपलक्षणंमनुष्यकालस्यतुदर्शनमितिविवेकः।अस्येतिनपरमात्मनउच्यते।नायुर्मानंभगवतःकस्मिंरूपेपिविद्यते।अनादित्वादमध्यत्वादनंतत्वादसौव्ययइतिवचनेनहरेःकल्पितायुर्निषेधात्वहिरब्रह्म

एवंविधैरहोरात्रैःकालगत्योपलक्षितैः॥अपेक्षितमिवास्यापिपरमायुर्वयःशतं ३२ यदर्धमायुषस्तस्यपरार्द्धमभिधीयते॥पूर्वःपरार्द्धोपक्रांतोह्यपरोद्यप्रवर्त्तते ३३ पूर्वस्यादौपरार्द्धस्यब्राह्मोनाममहानभूत्॥कल्पोयत्राभवद्ब्रह्माशब्दब्रह्मेतियंविदुः ३४ तस्यैवचांतेकल्पोभूद्यंपाद्ममभिचक्षते॥यद्धरेर्नाभिसरसआसील्लोकसरोरुहं ३५ अयंतुकथितःकल्पोद्वितीयस्यापिभारत॥वाराहइतिविख्यातोयत्रासीत्सूकरोहरिः ३६

णोदिनमितितस्यप्रकृतत्वाच ३२ ब्रह्मणआयुरधुनेतावद्गतमितिज्ञापयितुंतदायुर्विभजति।यदर्धमिति ३३ यत्रयस्मिन्कल्पेसब्रह्मासर्वस्मात्प्रथममभवत्।पाद्मादिकल्पेषुपद्माद्युत्पत्त्यनंतरंब्रह्मोत्पत्तेः।यंब्राह्मंब्रह्माणंवाशब्दब्रह्मेतिवेदवेद्यंविदुर्ज्ञानिनइतिशेषः ३४ प्रथमपरार्द्धावसानेकल्पमाहतस्यैवेति।यद्यस्मिन्कल्पे ३५ द्वितीयपरार्द्धस्याद्यकल्पमाह।अयमिति।द्वितीयपरार्द्धस्यायंवाराहइतिविख्यातःप्रथमःकल्पः ३६

भा॰ तृ॰
१२

हरेः कालनिमित्तायुर्मानं नास्तीति द्योतितं मितानीत्स्य त्यति। कालइति। निमेषइति लवइत्युपचर्यते। ननु परमार्थः हरेरितिशेषः। तस्य निमिषोपि हे दस्य तद्धर्मत्वेन काला भिभूतत्वमायातमिति मंदाशंकां प्रमाह। अव्याकृतस्येति। यः परमाण्वादिर्द्विपरार्द्धांतस्सर्वेरितिः कथितः। यश्चधाम्नो लोकानां मानिनां ममाहमित्यभिमानवतां ब्रह्मादीनां प्रभुरन्यथाकर्त्तेश्वरः सकालो भूम्नो देशतः कालतो गुणतश्च पूर्णस्य तैवेष्टे नैवेश्वरो न प्रभुर्न्नान्यथा कर्त्तुंस मर्थश्चेति यस्मात्तस्माद्दृज्ञबोधनाय निमेषइत्युक्तं अतएवोपचर्यतइत्युक्तं। भूमत्वमुपपादयति। अव्याकृतस्येत्यादिना। अव्याकृतस्य निमेषादिविका रहितस्य। परिच्छिन्नत्वेन विकारसंभवः स्यादित्यत उक्तं। अनंतस्येति। देशाद्यंतत्रयरहितस्य। आकाशो नीलिमोदेतीति श्रुतेरनंतस्याप्याकाशस्येव जनि

कालोयंद्विपरार्द्धाख्यो निमेषउपचर्यते॥ अव्याकृतस्यानंतस्य ह्यनादेर्ज्जगदात्मनः ३७ कालोयंपरमाण्वादि र्द्विपरार्द्धांतईश्वरः॥ नैवेशितुं प्रभुर्भूम्नईश्वरोधाममानिनां ३८

मत्वं किंनस्यादत उक्तं। अनादेरिति। कारणशून्यस्य विचित्रजगत्स्वेकं कारणं किंनस्यादत उक्तं। जगदात्मनइति। जगत्स्वामिनः। हीत्यनेनानादित्वाद मध्यत्वादनंतत्वादिति हेतुत्रयं स्फुटमुक्तं सूचितं। अत्रकालशब्देन बहुनाममभिधेयात्वेपि सर्वसंहर्त्तृ श्रीदुर्गैवाभिधीयते। तस्याएव ब्रह्मादिप्रभुत्वादन्यथा चेतनसंनिधानरहितस्य पाषाणादेरपि प्रभुत्वंस्यान्नचेदं क्वापि दृष्टमित्यभिप्रायेणावार्यैः यमः कालोमानुषाणां तस्यकालः सुदर्शनः तस्यापि रुद्र स्तत्कालो ब्रह्मादुर्गापितस्य त्वित्याद्युदाहृतं ३८ राम राम

राम
१२

प्रकारांतरेण भगवन्माहात्म्यं कथयति। विकारैरिति। अंतर्दशेंद्रियपंचभूतमनआख्यैः षोडशविकारैः युक्तः। दशेंद्रियाणिवमनो भूतान्यंडगतानितु विका राइति विज्ञेया इतिवचनात्॥ बहिर्द्दिशुणया विशेषनाम्ना पृथिव्या वृतः। ततः परत आदिशब्दग्रहीतैर्द्दशोत्तरैः अप्तेजोवायुआकाशाहंकारमहत्तत्वप्रकृतिभि : पृथिव्यासहाष्टप्रकृतिसंज्ञगतैरावृतः। पृथिवी विशेषइत्याङुः शब्दादीनां बहुत्वतः। सासूक्ष्मत्वात् पृथ्वोंडं द्विगुणाद्दशोत्तराः। अबादयः प्रकृत्यं ताश्च एष प्रकृतयः स्मृता इति वा। कियत्संख्यविस्तार इत्यत उक्तं। पंचाशदिति। एवंविधोंडकोशोऽयं यत्र हरौ प्रविष्टः परमाणुवल्लक्ष्यते। यस्मिन्नंडकोशेंतर्ग ताश्चान्ये च कोटिशो हरेः शरीररूपा अंडराशयो लक्ष्यंते ४० परमाणुपरममहद्भ्यांवाच्यः पदार्थः साक्षान्नारायण एवनपार्थिवाद्यन्यतम इत्याह। यमिति। यमंडाधारं भगवंतमक्षरं ब्रह्म सर्वकारणानां प्रकृत्यादीनामपि कारणमाहुः। तस्यमहात्मनः महत्परिमाणोपेतस्य साक्षात्पुरुषस्यात्यंतापूर्णतस्य शरी

विकारैः षोडशभिर्युक्तो विशेषादिभिरावृतः। अंडकोशो बहिरयं पंचाशत्कोटि विस्तृतः ३९ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणु वत्। लक्ष्यतेंतर्गताश्चान्ये कोटिशो ह्यंडराशयः ४० यमाहुरक्षरं ब्रह्म सर्वकारणकारणं॥ विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ४१ इति श्रीभागवते महापुराणे तृतीये द्वादशोध्यायः॥ ॥

रेषु सरणाद्वर्त्तमानात्पुरुषनाम्नो विष्णोरयमंडकोशः परं धाम केवलगृहवद्वर्त्तते। दिशब्देन तदंतर्गता अंडराशयोपि गृहवद्वर्त्तमाना एकमेवांडं बहुत्वेन प्र त्येकं रोमकूपगतत्वादनंतमित्यादि विशेषस्मृति प्रसिद्धं सूचयति। तदुक्तं॥ अंतर्गताः शरीराणि शरीराणां बहुत्वेन अतीतानागतेष्वथा। अस्येव दे वकायेषु प्रतिप्रतिवदर्शनात्। विष्णुसामर्थ्यतोंडानां बहुत्वं नान्यथा भवेदिति एकमंडं बहुत्वेन प्रत्येकं रोमकूपगं। ब्रह्मापश्यत्तथात्मानं हरेर्देहेपृथ पृथक्पृथगितिवा। अतीतानागतवर्त्तमानानंतब्रह्मादिपरमभागवतैरनवरतागणितार्चित्यमहिमत्वादायुर्मानहीनत्वात्तस्य देशकालगुणानंत ज्ञानस्यानंतकालीनतत्सामीप्यादिनिर्वाणमुख्यसाधनत्वात्तस्मिन्निरतिशय भक्त्यातत्ज्ञानं सर्वथा संपादयमुमुक्षुरिति भावः ४१ इति तृती येटीकायां द्वादशोध्यायः॥

अनुग्रहेणानन्यज्ञानं यथा शीतिजनकत्वेन मुक्तिसाधनं तथा ब्रह्मादितारतम्यज्ञानं वेत्येतदर्थं सृष्टिप्रकारः कथ्यते। तत्राविद्यायाः हेयेत्युपाद्यस्यात त्सृष्टिं वक्तुं हन्तमनुष्यवक्तव्यार्थं प्रतिजानीते। इतीति १ आदिकृद्ब्रह्माग्रे यत्तमः ससर्जेत्यन्वयः। अथमोहादिक। मन्नैव वचनेन यथा तारतम्येन सृष्टिरिति ज्ञापनायेति ज्ञातव्यं। क्रमस्तु। तमस्तु शार्वरं प्रोक्तं मोहश्चैव विपर्ययः। तदाग्रहो महामोहस्तामिस्रः क्रोध उच्यते। मरणं त्वन्धतामिस्रम वि द्यापंचपर्विकेत्युक्त एव। तमोऽज्ञानं वा तमोऽज्ञानं विपर्यासो मोहोऽन्ये तु तदाग्रहा इति वचनात्। एषां मूलकारणमाह। अज्ञानेति। अज्ञानात् वृत्ति

मैत्रेय उवाच॥ ॥इति ते वर्णितो विद्वन्कालाख्यपरमात्मनः। महिमा वेदगर्भोऽथ यदस्राक्षीन्निबोध मे १ ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत्। महामोहं च मोहं च तमश्चाज्ञानवृत्तयः २ दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत। भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत् ३ सनकं च सनन्दं च सनातनमथात्मभूः। सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ४ तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः। तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ५

र्यचांतेतथा २ अविद्या हेयेत्याशयेनाह। दृष्ट्वेति। ततस्तर्हि सृष्टिर्निवृत्ता किं नेत्याह। भगवत्ध्यानेति। अनेन सर्वथाऽयश्चित्तरूपेऽपायः भगवत्ध्यानमिति सूचितं ३ आत्मभूर्ब्रह्मा वसिष्ठादिव्यावृत्त्यर्थं निष्क्रियानिति। परमहंसान् ४ ऊर्ध्वरेतस इत्यनेनैव स्वाज्ञाविमुखा एत इति जानन्नपि ब्रह्मा सृष्ट्यंतरस्का रणाशयो वक्ति। तानिति। स्वो विष्णुस्तस्माद्भूतवानिति स्वभूः। तत्सृष्टिकर्ममोक्षधर्माणो निवृत्तिमार्गस्थाः ५

कथमवज्ञात इत्यत उक्तं प्रत्याख्यातेति। निरस्तमनुशासनं आज्ञाकरणं यैस्तैस्तथा तैः पुत्रैः क्रोधे इति शेषः। ब्रह्मणि कोऽयं कोपश्च दुर्मुखस्य न दीर्घकाली न इति भावेनाह। क्रोधमिति। ६। प्रजापतेर्ब्रह्मणः सद्यस्तत्क्षणमेव मन्युः क्रोधः तन्मन्युः सद्यो नियमनात्पूर्वं क्षणमेव क्रोधसमये भ्रुकुटी नीलशिरोनेत्र लोहितं स्याद्दिमतो नीललोहित इति कारणगुणाः कार्यं समवयंतीति न्यायात्। अनेन सद्योजातो नीललोहित इति नामद्वयं निरुक्तं। ७ लोके बाल

सोऽवज्ञातः सुतैरेवं प्रत्याख्यातानुशासनैः। क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे ६ धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः। सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ७ स वै रुरोद देवानां पूर्वजो भगवान्भवः। नामानि कुरु मे धातः स्थानानि च जगद्गुरो ८ इति तस्य वचः पाद्मो भगवान्परिपालयन्। अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ९ यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः। ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः १० हृदिंद्रियाण्यसुर्व्योम वायुरग्निर्जलं मही। सूर्यश्चंद्रस्तपश्चैव स्थानान्येकादशैव ते ११ मन्युर्मनुर्महानासो महाञ्छिव ऋतध्वजः। उग्ररेता भवः कालो वामदेवो धृतव्रतः १२ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलांबिका॥ इलावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः १३

स्वभावप्रवर्त्तनाय तस्यतं वक्ति॥ स वा इति इंद्रादिदेवानां पूर्वजः ८ पाद्मो ब्रह्मा रोदीरिति पदं ९ प्रधाननामाह। यदिति १० हृत्मनः ११ नामानीति नामबहुलस्य प्रार्थितत्वात्कथं रुद्रेत्येकनामकरणनिमित्तमिति तत्राह। मन्युरिति। मरुरेताः मरुभिः कृष्णवर्त्मा शुचिर्वह्निरुषर्बुधः। शुमध्वजश्चित्रभानुर्हुतवहनो हव्यवाहन इत्यभिधानात्। वह्निवीर्य इत्यर्थः। ऊर्ध्वरेतस्त्वादिव्रतधारणाद्धृतव्रतः। ऊर्ध्वरेतं विरूपाक्षं शंकरं नीललोहितमिति श्रुतेः १२ रुद्राण्यो भार्याः हे रुद्र ते तुभ्यं दत्ता इति शेषः १३

सपोषणमितिक्रियाविशेषणं। पुष्णात्यनया गार्हस्थ्यधर्ममिति पोषणा भार्या। प्रजानां पतिरसि यद्यस्मात्तस्मात्प्रजाभावेन तन्नत्यनितिमपि गच्छतीति
१४ गुरुणा ब्रह्मणा सत्वाकृतिर्वीर्याकृतिः। सत्वं बलं माकृतिर्मूर्तिः स्वभावेनोग्रत्वादिगुणैरात्मसमाः १५ । प्रवृत्तं कर्म निवार्य पुनः किं व्यधत्ते
तितत्राह। तप इति॥ तपो बहुविधं तत्रेदं कीदृशमत्राह। सर्वेति। भगवद्गुणस्मरणलक्षणं तप आतिष्ठेत्यर्थः। तपश्चालोचन इतिधातोः। सृष्ट्यावनु
पयुक्तेनानेन किमितिमा भूच्छंकेत्यभिव्यक्ति॥ तपसेति। भवांस्तपसैव यथा पूर्वं तथेदं विश्वं स्रष्टा संभविष्यतीत्यन्वयः ८ निर्विषयेणानेन किमि

गृहाणैतानि नामानि स्थानानि च सयोषणः। आभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः १४ इत्यादिष्टः सगुरुणा भगवान्नी
ललोहितः। सत्वाकृतिः स्वभावेन ससर्जात्मसमाः प्रजाः १५ रुद्राणां रुद्रसृष्टानां समन्ताद्ग्रसतां जगत्। निशाम्यासंख्यशो यू
थान्प्रजापतिरशंकत १६ अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम। मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः १७ तप आ
तिष्ठ भद्रं ते सर्वभूतसुखावहं। तपसैव यथा पूर्वं स्रष्टा विश्वमिदं भवान् १८ तपसैव परं ज्योतिर्भगवन्तमधोक्षजं। सर्वभूतगुहा
वासमञ्जसा विन्दते पुमान् १९

तितत्राह तपसेति। स्वविषयेण तपसोपलब्धस्य हरेः प्रसादेन लब्धज्ञानो भवान्सुखाभविष्यतीति भावः। सूर्यादिज्योतिर्वैलक्षण्यपान्परं तर्हि
निराकारं किं नेत्याह। भगवंतमिति॥ ऐश्वर्यादिगुणशालिनं। तर्हि किं न दृश्यत इत्यत उक्तं अधोक्षजमिति। अक्षजो इंद्रियज्ञानविषयः तर्हि शशशृं
गतुल्यमित्यत उक्तं। सर्वेति। न च्छिद्र जीववत्तत्वं किं नेत्याह। अंजसेति। इदमेव तत्त्वं नान्यदितिपर्थः। अंजसा त्वरितेन त्वेसम्यग्दृतखेदयोरितिया
दवः। नत्वेयञ्चांजसाहृदयमित्यमरश्च १९

सत्वाकृतिस्वभावेनेत्युक्तसत्वस्वभावो वा स्पष्टो गुर्वाज्ञाकरणादिति भावेनाह। एवमिति। वनं जलं २० तपस्थस्यास्य इव सृष्टिविशेषं करिष्यतीतिम
त्वा ब्रह्मणस्तूष्णीं स्थितं किं तत्राह। अथेति। भगवतो हरेरंशो मिश्रसत्वशक्त्यायुक्तस्य चतुर्मुखस्य अंगेभ्य इति शेषः २१ किंनामान इतिबोधानव
काशायाह। मरीचिरित्यादिना २२ कस्मात्कस्मादंगाद्देषां जन्मेति तत्राह। उत्संगादिति। उत्संगाद्गुरोः २३ सकलतत्वनिर्णायकेस्मिंच्छास्त्रे ऽ यथात्

मैत्रेय उवाच एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिं। बाढमित्यमुमामंत्र्य विवेश तपसे वनं २० अथाभिध्यायतः सर्ग
दश पुत्राः प्रजज्ञिरे भगवच्छक्तियुक्तस्य लोकसंतानहेतवः २१ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठो दक्षश्च दश
मस्तत्र नारदः २२ उत्संगान्नारदो जज्ञे दक्षोंगुष्ठात्स्वयंभुवः। प्राणाद्वसिष्ठः संजातो भृगुस्त्वचिकरात्क्रतुः २३ पुलहो नाभितो ज
ज्ञे पुलस्त्यः कर्णयोर्ऋषिः। अंगिरा मुखतोक्ष्णोत्रिर्मरीचिर्मनसोभवत् २४

एतस्य दृष्टिकथने दुष्टजनमोहनाय तस्यापि शास्त्रतात्पर्यार्थत्वान्महतां पियत्वात् दृष्टेष्टश्च बहुविधत्वात्स्वज्ञानां च बहुरूपत्वाद्दोतो निर्णायकं यथो
तरानुसारेणास्य तात्पर्यमवगंतव्यं॥ तदुक्तं॥ कालतो बलतश्चैव ज्ञानानंदादिकैरपि। सर्वैर्गुणैर्विष्णुरेव श्रेष्ठस्तदवरा रमा। अनंतांशेन कालानुसमात
स्याश्चतुर्मुखः। अवरो बहुलांशेन तस्मात्समो वायुरुच्यते। नियमाद्वायुरेवैको ब्रह्मत्वं याति नापरः। तस्मात्समानता मुक्तौ वायुत्वे किं विहूनता॥ दशवर्ष
तु तत्पश्चाज्जननं तत। श्री

भा॰ त्व॰
७५

योरपि। आनंदादिस्तद्दशांशः कालः संवत्सरात्परः। यावत्पश्चाज्जनिस्तावत्पूर्वं दहकृयो भवेत्। ब्रह्मवाय्वोश्च कयेदेयोत दशांशः सुरादिकाः। शेषस्य ग
रुडस्यापि कालो द्विगुणसहस्रकः। शेषरुद्रौ ब्रह्मवायू यथा तद्वत्परस्परं। नद्योश्च तद्दशांशास्तु स्मृतग्न्विंद्रादयो मताः। एवमुक्तौ वपूर्वं वचनान्यथा क्वचि
दिष्यते। अन्यथोक्तिर्यत्र वस्यात्तन्माहात्म्यं भविष्यति। पूर्वापरविपर्यासो बहुरूपत्वहेतुत इति वचनात्। इंद्राद्याः सनकाद्याश्च दक्षाद्याश्चापि चापरे
ऋषयो मनवो देवास्तद्दृश्या येव केवन। उमायाश्च वराः सर्वगुणैः सर्वैर्न संशयः।। तत्समो न भविष्यो वा न भूतो द्यतनोपि वा। अतेहरिब्रह्मवायुशेषवी
द्रान्स भार्यकान्। शंकरं वेति वेत्त्यथो अन्यन्माहात्म्यमुच्यत इत्यन्यत्रापि २४ श्रीरामायनमः

राम
७५

यत्र यस्य धर्मस्य गृहे नारायणः स्वयं हरिर्नरनारायणाख्य मनाम्नाजात इति शेषः। यस्मात् अधर्मान्मृत्युर्देहवियोगलक्षणः २५ उत्पत्त्यनंतरमपि स्वकारणं मुक्त्वा न
तिष्ठतीति हृदीति। अथ ररद्धदारधर्मेणाततात्कात्तुग्नी। पायोर्गोलकात् अद्याश्रयः दुःखाद्यभिमानी २६ शरीरच्छायायाः कर्दमो व्यन्कोव्यजनीतिदेवहूत्या
: पतिरिति संक्षिप्य फलितमाह मनस इति २७ भगवन्माहत्त्वविद्भिर्महद्भिरसुरजनमोहनं कर्तव्यमिति नियममवेत्तमाणस्य ब्रह्मणः कामिजनविडंबनप्रका

धर्मस्तनाद्दक्षिणतो यत्र नारायणः स्वयं। अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः २५ हृदि कामो भ्रुवोः क्रोधो लोभ
श्चाधरदच्छदात्। आस्याद्वाक् सिंधवो मेढ्रात् निर्ऋतिः पायोरघाश्रयः २६ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः
प्रभुः।। मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् २७ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः। अकामां चकमे क्षत्तः स
काम इति नः श्रुतं २८ तमधर्मे कृतमतिं विलोक्य पितरं सुताः। मरीचिमुख्या मुनयो विश्रंभात्प्रत्यबोधयन् २९
नैतत्पूर्वैः कृतं त्वद्यन करिष्यंति ये परे। यं त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः ३०

स्माहा वा चमिति। दुहितरं सृंगारस दोग्ध्रीं तन्वीं सुंदरीं।। अकामाम कुत्सितां वा चं मातुर्वीनोस्माकं कृते वार्त्रीमात्रेन तु तथ्यमित्यर्थः २८ भगवद्रूपासन
यातेन नित्यसंनिहितमनस्कत्वात् दुष्टमनसः स्वयंभुवो दुष्टजननमोहनरीतिमाह।। तमिति २९ कथमद्भुतत्रितितत्राह नेति। यां गजं कामम निगृह्य त्वं दुहि
तरं गच्छेस्तयेतत्कर्म पूर्वैः त्वदन्यैर्न कृतं। ये च परे पश्चात्तनास्तेपि न करिष्यंतीत्यन्वयः ३०

भा॰त॰
७६

नतुपामरस्येदंदुष्करमपिवतदुष्कर्मैधनलस्मीकरणसमर्थस्यनमहिंधुस्येतितन्नाह।तेजीयसामिति।एकस्यवेदिदंदुःकीर्त्तिकरंनबहूनामितिमंदाशंकानिरासा नतुपामरस्येदं...यतेजीयसामितिवकुवंनवकुमिरउक्तितमपिसुरापानंयथानिंद्यंतथेदमपीतिहिशब्देनलोकप्रसिद्धिंसूचयति।इतोप्यनुपपन्नमित्याह।यद्वृत्तमिति।अने नजगद्गुरुत्वेनैततत्त्वहृत्तकरणेनेतरेषामनर्थःस्यादितिध्वनितं ३१ क्रोधलीत्यासांत्वयन्तोनमंतीत्याशयेनाह।तस्माइति।संल्लापेनप्रार्थयमानाइतिभा वेनाह।यइति।स्वेनस्वयंप्रतिभासमानेनरोचिषाज्ञानेनात्मस्थंपरमात्मस्थंइदंविश्वंव्यंजयामास।सब्रह्मास्वष्टंधर्मंपातुमर्हतीत्यन्वयः ३२ त्यागात्यागो

तेजीयसामपिह्येतन्नसुश्लोकंचजगद्गुरो।यद्वृत्तमनुतिष्ठन्वैलोकःक्षेमायकल्पते ३१ तस्मैनमोभगवतेयइदं स्वेनरोचिषा।आत्मस्थंव्यंजयामाससधर्मंपातुमर्हति ३२ सइत्थंगृणतःपुत्रान्पुरोदृष्ट्वाप्रजापतीन्।प्रजा पतिपतिस्तन्वींतत्याजव्रीडितस्तदा ३३ तांदिशोजगृहुर्घोरांनीहारंयद्विदुस्तमः।कदाचिद्ध्यायतःस्रष्टुर्वेदाआ संश्चतुर्मुखात् ३४

त्वितरप्रार्थनयामहतांस्वभावइतिभावेनाहसइत्थमिति।अथापिसहासितत्वात्तत्रयंनिजासरस्वतीकिंत्वन्येवत्यमकामाकेतिमंदाशंका।यांतस्याजविदु र्ब्रह्मामानुषीवाक्सास्मृता॥सरस्वतीनिजाहार्यादेवीवाचंतुतांविदुरितिवाक्येनपरिहर्त्तव्या ३३ दिशइतिदिक्स्थाजनालक्ष्यंते।अन्यथामानुषीति विशेषोक्तिर्व्यर्थास्यात्।तथाचयद्यस्मात्उत्पन्नंनीहाराख्यंतमोविदुरित्यर्थः।वेदादितदभिमानिनांसृष्टिरुर्वरितेतिसुस्पष्टतिबुद्धइवततःसृष्टिंकथयतिक दाचिदिति।चतुर्मुखादितिचतुर्भ्योमुखेभ्यइत्यर्थः ३४

राम
७६

चातुर्होत्रंकर्मादिकमपिभगवद्ध्यानपूर्वकंसृष्टत्वात्याह्यमितिभावेनाह।कथमिति।कर्मणासमवेतानुपपन्नाल्लोकान्कथंप्रस्रक्ष्यामिदास्यामीतिध्यायतो ब्रह्मणोवाचाकर्मतंत्रंकर्मणःसृष्टमुत्पन्नंउपवेदैःस्मृतिलक्षणैर्नयैरूपोद्घातंयथैःसह।अत्रविशेषप्रश्न।अभिमानिनःशब्दतस्रब्रह्मावेदान्ससर्जेहाय ज्ञादीश्चकृपेवाचातथासर्वाभिमानिनः।इतिहासपुराणेतुश्रुत्वाहरिमुखात्स्वयं।भारतादींश्चविनाप्रश्चाद्वहिणान्येषुनिर्मितानित्यनेनज्ञातव्यः।आश्रम वृत्तयःआश्रमास्तदाचाराश्च ३५ विदुरःस्वयंविभागंजानन्नपिलोकहितार्थंविविच्यवक्तव्यमितिपृच्छतीत्याह।विदुरइति ३६ मैत्रेयोपिलोकहिता

कथंस्रक्ष्याम्यहंलोकान्समवेतान्यथापुरा।चातुर्होत्रंकर्मतंत्रमुपवेदनयैःसह ३५ धर्म्मस्यपादाश्चत्वारस्तथैवा श्रमवृत्तयः ३५ विदुरउवाच सवैविश्वसृजामीशोवेदादीन्मुखतोसृजत्।यद्यद्येनासृजद्देवस्तन्मेब्रू हितपोधन ३६ मैत्रेयउवाच ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः।शस्त्रमिज्यांस्तुतिस्तोमंप्रा यश्चित्तंव्यधात्क्रमात् ३७ आयुर्वेदंधनुर्वेदंगांधर्वंवेदमात्मनः।स्थापत्यंचासृजद्वेदंक्रमात्पूर्वादिभिर्मुखैः ३८

यविस्मरतोविदुरप्रश्नंपरिहरतीत्याह।ऋग्यजुरिति।पूर्वादिभिःपूर्वदक्षिणपश्चिमोत्तरदिग्भेदभिन्नैः।शस्त्रंमंत्रस्तोत्रंदगतमिज्यामंत्रयाज्ञुपंस्तुतिस्तोमं नैश्चामवेदगं।स्तोमःक्रियमाणकर्मत्वरतःक्रियमाणस्तुतिविशेषः।अन्यदाक्रियमाणास्तुतिः।प्रायश्चित्तमाथर्वणं।व्यधाद्विभागंकृतवान्।वेदा नांपूर्वमेवोद्धृतत्वात् ३७ आयुर्वेदबाहूंदां।धनुर्वेदमायुधविद्यां।गांधर्वंभरतशास्त्रं।स्थापत्यंवेदंस्तत्त्वशास्त्रं ३८

भा॰ टी॰ २१

इतिहाससहितं पुराणं। शब्दत एवरचनंनत्वर्थतः तस्यवैदिकत्वात् विदस्य ध्यक्तिमात्रमेवकरणं। नवजनिकादिनोवाक्याख्याविषयत्वेनाप्रामाण्यंपातस्य स्वाभिमान्युत्पत्त्याचरितार्थत्वात्। अभिमानिनः शब्दतश्चब्रह्मावेदानसृजत्यादेः। सर्वदर्शनः सर्वज्ञः। अनेनब्रह्मोक्तस्याभिमृत्वत्वंदर्शितं। सर्वाणि दर्शनानियस्मादुत्पन्नानिसतथोक्तइतिवा ३८ षोडश्पादयोयज्ञविशेषाः तद्भेदः कल्पतोबोद्धव्यः। अथपुरीष्याग्निष्टुतादिकंद्वयंद्वयंपवदक्षिणादि

इतिहासपुराणंवपंचमंवेदमीश्वरः॥ सर्वेभ्यएववक्त्रेभ्यः सोऽसृजत्सर्वदर्शनः ३९ षोडश्युक्थौ पूर्ववक्त्रात् पुरीष्याग्निष्टुतावथ॥ आप्तोर्यामातिरात्रौचवाजपेयंसगोसवंतपः शौचंदयासत्यंधर्मस्येतिपदानिच॥ आश्रमांश्चयथासंख्यंमसृजत्सहवृत्तिभिः ४१ सावित्रंप्राजापत्यंचब्राह्मंचाथबृहत्तथा॥ ॥

वक्त्रेभ्यउत्पन्नं ४० तपआदिधर्मपादानामपिवक्त्रचतुष्टयात्जन्मेतिज्ञातव्यं। यथासंख्यंब्रह्मचार्यादाश्रमांश्चपूर्वादिवक्त्रेभ्यः संसर्जसेवृत्तिभिः सह ४१ यथासंख्यमित्यनेनाश्रमचतुष्टयावांतरभेदोपिविवक्षितस्तत्रब्रह्मचर्याश्रमावांतरभेदमाह॥ सावित्रमिति। गुरुकुलेब्रह्मचारिणोद्दशवर्षपर्यंतमध्ययनंकर्मसावित्रं। प्राजापत्यंब्रह्मचर्यंएकभार्यत्तुगमनं। प्राजापत्यंब्रह्मचर्यमेकभार्यत्तुगामितेतिवचनात्। ब्राह्मंब्रह्मचर्यंयावद्दि

गृहेगृहस्थाश्रमेपीत्येवंचातुर्विध्यंवार्तायायावरं भेदचर्याविशेषः असंचयएकाहित्वंतत्रद्दिनार्जितव्रीह्यादेस्तद्दिनएवव्ययः। शालीनंत्तुवत्सरपर्यंतस्ववृत्तिहेतोः कुसूलमंजूषादिषुव्रीहिधान्यादिग्रहणं। शिलोञ्छवृत्तिः हिसस्येत्तेत्रेषुगलितव्रीह्यादिनादेहयात्रावर्तनं। वार्तायायावरंजेयंएकाहित्वमसंचयइति ४२ वनेवानप्रस्थाश्रमे। वैखानसाःमूलभक्षाः फलभक्षाउदुंबराः। वालखिल्याः सर्वतक्षाः फेनपावत्सफेनपाइत्यनेनव्याख्यातोयंश्लोकः॥ वृक्षच्युतगलितपय

वार्तासंचयः शालीनंशिलोंछइतिवैगृहे ४२ वैखानसावालखिल्योदुंबराः फेनपावने॥ न्यासेकुटीचकः पूर्वंबहूदोहंसनिःक्रियौ ४३

फेनपानेनजीवंतः। न्यासेयत्याश्रमे। पूर्वंकुटीचकः कुट्यांस्वगृहएवपुत्रादिस्नात्रादिनाचकतेत्यल्पेलंबुद्धिमाश्रोतीतिचकन्नौड्डइतिधातुः। द्वितीयोबहूदः सवनत्रयस्नानेविनात्वकालेतीर्थजलदर्शनेतत्रस्नानेकुर्वन्निदंडी। तृतीयचतुर्थौहंसनिःक्रियौ। हंसएकदंडीयज्ञोपवीतीचानिःक्रियएकदंडीहिंसादिक्रियारहितः परमहंसः ४३

भा॰ तृ॰
७८

आन्वीक्षिकी वेदानुसारिणी तत्र विद्या। त्रयी त्रयो वेदाः। वार्त्ता वाणिज्यादि। दंडनीती राजधर्मः। एते यथा ब्रह्मणो वक्त्रचतुष्टयादासन् एवं भूरादि व्याहृ
तयश्चाजस्य मुखचतुष्टयादभिव्यक्ताः। प्रणवेन सह तद्वक्त्रस्यास्य दहतां ताश्चेत्यन्वयः। तस्य सहृत्पादात् शिवप्रोक्ता आन्वीक्षिकी। तस्यां वेदबहिष्का
राद्विष्णुप्रोक्तेयं। तदुक्तं। आन्वीक्षिकी तत्र विद्या सा च वेदानुसारिणी। विष्णुप्रोक्ता शिवाद्युक्ता ज्ञेया वेदबहिष्कृता॥ दंडनीती राजधर्मस्त्रयी वेदाः प्र
कीर्तिताः इति। आन्वीक्षिक्या त्रय्या च ब्राह्मणानां जीवनं दंडनीत्या राज्ञां। वार्त्तया वैश्यादीनां इत्येतद्द्योतयितुं च पुनस्त्रयीग्रहणं। वार्त्ता वाणिज्यकादिस्यादि
ताभिर्यत्तु जीवनं। तदान्वीक्षिक्यादिनाम ब्रह्मणा निर्मितं पुरेति च। यद्वा प्रणवेन सहास्य देहस्य ब्रह्मणः तात्प्रतिपादकत्वेन तदेकविषयत्वं प्राप्ता इत्यर्थः। प्रणवेने
ति तृतीयया प्रणवस्य प्राधान्येन ग्रहेयं। तस्य पूर्ववक्त्रजत्वात् तदुक्तं प्रणवः पूर्ववक्त्रेण भूरादयश्च मुखचतुष्टयात्। पद्द्विपमवर्णतवेदाश्चैवाश्रमाश्च इति। तस्मात् त

आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिस्तथैव च। एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दहतः ४४ तस्योष्णिगासील्लोमभ्यो गाय
त्री च त्वचो विभोः। त्रिष्टुप्मांसात्स्नुतोनुष्टुब्जगत्यस्थ्नः प्रजापतेः। मज्जायाः पंक्तिरुत्पन्ना बृहती प्राणतोऽभवत् ४५ स्पर्श
स्तस्याभवज्जीवः स्वरो देह उदाहृतः। ऊष्माणमिंद्रियाण्याहुरंतःस्था बलमात्मनः ४६

णवं मुखीकृत्य ब्रह्मप्राप्तावेवमर्थत्वमितीयेति ४४ तस्येति ब्रह्मणो रोमादिभ्यः सप्तछंदसां सर्गप्रकारमाह॥ तस्येति। अत्र क्रममन्यत्पद्मस्योष्णिक् लोमानीत्यादि
श्रुत्यनुसारात्कारणानुगुण्यपाठ ४५ पंचाशद्वर्णानामपि ब्रह्मणोभिव्यक्तिप्रकारमाह। स्पर्श इति। कादयो मावसानाः स्पर्शाः तस्य ब्रह्मणो जीवाच्चैतन्यादभव
न्नित्यक्ता आसन्वर्णानां नित्यत्वादभिव्यक्तिरेवा स्वरोकारादिर्दीर्घो देहादुदाहृत उद्भूतः। शषसहा ऊष्माणः। श्रोत्रादींद्रियाणींद्रियेभ्यस्त उत्पन्ना इत्याहुः। यर
लवा अंतस्था आत्मनो ब्रह्मणो बलं बलादभिव्यक्ताः। अत्र सामानाधिकरण्यप्रवचनं यस्माद्यज्जायते तत्तदात्मकं तदंगाभिधं भवेदिति वचनात् उक्तं प्रथमायाः पं
चम्यर्थे अकुहविसर्जनीयानां कंठ इत्यादिस्थानभेदस्वतंत्रयत्नांतरस्थानभेदसंभवे कथमत्रोक्तमवेस्थानमिति निर्णयशक्ती दंवेदा॥ स्पर्शास्तस्याभवन्जीवात्
स्वरो देहात्स्वजनिरे। ऊष्माणमिंद्रियेभ्यश्च अंतस्था बलतो विभोरित्यनेन परिहृतं च ४६

राम
७८

निषादर्षभगांधारषड्जमध्यमधैवताः। पंचमश्चेत्यमी सप्ततंत्रीकंठोत्थिताः स्वराः इति सप्तस्वराः। प्रजापतेर्विहारेण शरीरसंचरणविशेषेण भवंतिस्म अभवन् नि
त्यन्वयः। स्वराणां शब्दविशेषत्वान्नत्वामयी मतस्तदुत्पादनसामर्थ्यमस्यास्त्यकथमिति तत्राह शब्देति। शब्दब्रह्मात्मको ब्रह्मा सर्वशब्दाभिधेयः यतः अतेन ना
रायणादीनि नामानि सर्वविषयो यत इति वचनान्नारायणादिनाम व्यतिरेकेण सर्ववेदादिशब्दराशेर्विषयत्वात् तदुत्पादनसामर्थ्यमस्तीत्यर्थः॥ नित्यव
र्णात्मकवेदानां नित्यत्वेन व्यामत्वात्परिछिन्नस्य ब्रह्मणस्तद्विषयत्वं कथमत्राह। व्यक्तेति। व्यक्तं ब्रह्मांडमुद्दिष्टमव्यक्तं महदादि च। तद्व्यापकत्वाद्ब्रह्म

स्वराः सप्त विहारेण भवंतिस्म प्रजापतेः। शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः ४७
ब्रह्मानुभावविततो नानाशक्त्युपबृंहितः। ततोपरामुपादाय स सर्गाय मनो दधे ४८

त्युव्यक्ताव्यक्तात्मकः स्मृत इत्यतो व्याप्तिमत्त्वात्तद्विषयत्वं युक्तं। उक्तादन्यत्रापि व्याप्तिशक्तिमत्त्वात् प्रभोरित्युक्तं ४७ देहांतरवपये प्रो ब्रह्मणः सृष्टि
मुक्ता अधुना प्रकारांतरेण तस्मात् सृष्टिं विवक्षुः ब्रह्मेति। ब्रह्मा ततः पूर्वस्मादपरां श्री पुरुषकारणशक्तिमुपादाय सर्गाय मनो दध इत्यन्वयः। परं तंत्रस्य
ब्रह्मणः स्वाधीनसृष्टिः कथमतउक्तं। अनुभावेति। अनुभावेन परब्रह्मणा विततः तस्यानुग्रहात् स्फूर्तेन स्फूर्तिरित्यर्थः। ब्रह्मानुभावविततइत्येकं वा पदं।
परब्रह्मणोनुभावेन प्रभावेन विततः। हरेरनुकूलेन भावेन सन्नया विततो विस्तृतो विशेषसन्निधानवानिति वा अतएव नानाशक्त्युपबृंहितः। नानावि
वस्तुहि माम [illegible] ४८

तत्र सिंहावलोकनप्रकारेण परीक्ष्य हिं चिंतयतीत्याह।अक्षीणामिति।यत्रपश्चान्ननः श्रेष्ठस्तत्र सिंहावलोकनमिति वचनात्।पश्चाद्भुत्पत्स्यमानस्यमनोः श्रेष्ठपाद
त सिंहावलोकनं कृतमित्यर्थः।मरीच्यादिऋषीणां सकाशाद्यपितन्नस्मादविस्तृतत्वाद्वैवाद्येनेनमहतापिपुरुषेणाकरिष्यमाणं कार्यमालोच्यकर्तव्यं नमहेश
तिनिदर्शितं ४९ चिंतनविधां दर्शयति।अहोइति।दृष्ट्वाष्टतस्य कृतमन्त्राह।नहीति।चिंतयानिश्चितमाह।।देवमिति।देवानुग्रहोऽस्मिवेत्सृष्टिः सृष्टेतद्रति
निरविनोदित्यर्थः ५० फलितमाह।एवमिति।युक्तिमतः ध्यानवतः।देवानुग्रहमप्यपेक्षमाणस्य कस्यब्रह्मणोरूपंद्विधाभूत।पद्रूपं केनब्रह्मणा प्राप्त

ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतं। ज्ञात्वा तद्धृदये भूयश्चिंतयामास कौरव ४९ अहो अद्भुतमेतन्मे व्यापृतस्यापि नि
त्यदा।न ह्येधंते प्रजा नूनं दैवमत्र विघातकं ५० एवं युक्तिमतस्तस्य दैवं चावेक्षतस्तदा।कस्य रूपमभूद्द्वेधा यत्कायमभिचक्ष
ते ५१ ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत।यस्तु तत्र पुमान्सोऽभून्मनुः स्वायंभुवः स्वराट् ५२ स्त्रियासीच्छतरूपाख्या
महिष्यस्य महात्मनः।तदा मैथुनधर्मेण प्रजा ह्येधां बभूविरे ५३ सचापि शतरूपायां पंचापत्यान्यजीजनत्।प्रियव्रतोत्ता
नपादौ तिस्रः कन्याश्च भारत।।आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम। ५४ आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमां।।द
क्षायादात्प्रसूतिं च यत आपूरितं जगत् ५५ इति श्रीभागवते महापुराणे तृतीयस्कंधे त्रयोदशोऽध्यायः

त्कायं नामाभिवक्षते।निरुक्तज्ञा इति शेषः ५१ तद्रूपद्वयं किमभूदिति तत्राह।ताभ्यामिति।तयोर्नामविशेषमाह।यस्त्विति।स्वराट्चक्रवर्ती ५२
अस्य मनोः।अयं योगो विसृष्टिकर इत्याह।। तदेति।तदा तस्मिन्मिथुनसृष्टिकालमारभ्य ५३ अनेन मनुनाकान्यपत्यान्युत्पादितानीति तत्राह।सचेति।तत्रा
मान्याह।प्रियव्रतेत्यादिना ५४ यतः कन्यात्रयात् ५५ इति तृतीये त्रयोदशोऽध्यायः।। ।।

अस्मिन्नध्याये हरेरवतारकथाश्रवणादिना सा ज्ञात्पुरुषार्थस्यादिति निरूप्यते। श्रीशुकः परीक्षितं पुनरपि विदुरस्य प्रश्नप्रकारं वक्ति।निशम्येति १ स्वधर्मचारेः स्व
पतिस्वांगं न पतीति पत्नी तां प्रति लसन तदस्य नेनव्यापारोत्तरं निषेधति २ कोसौ वैदुरिकः प्रश्न इत्यत्राह।चरितमिति।मेमह्यं।वक्तव्यत्वे हेतुमाह।विष्वक्से
नेति।।विष्वक्सर्वत्र सेना ज्ञानलक्षणा यस्य स तथोक्तः ३ विष्वक्सेनचरितं तद्भक्तचरितं चेति द्वयमेव पुरुषार्थतरंगत्वेन मुमुक्षुणा श्रोतव्यमित्य[illegible]ित
त्यादित्याह।श्रुतस्येति।सुचिरं श्रमआयासो यस्य स तथा तस्य। पुंसां श्रुतस्य वेदाद्यर्थश्रवणस्यांजसा तत्त्वेन सूरिभिरीडितोऽर्थोयं नतु इदं फलं हि।यत्तस्य

श्रीशुक उवाच निशम्य वाचं वदतो मुनेः पुण्यतमां नृप।भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः १ विदुर उवा
च सवै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः।प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने २ चरितं तस्य राज
र्षेरादिराजस्य सत्तम।ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ३ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभि
रीडितोऽर्थः।यत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां ४ श्रीशुक उवाच इति ब्रुवाणं विदुरं विनीतं स
हस्रशीर्ष्णश्चरणोपधानं।प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ५

हरेर्गुणानुश्रवणं येषां हृदयेषु मुकुंदस्य पादारविंदं लसतीति शेषः।तेषां पुंसां चरितश्रवणं वा ज्ञानिभिः अभिष्टुतोऽर्थः इति यस्मात्तस्मात्स्वायंभुवमनोर्वि
ष्वक्सेनकथाविनाभूतत्वात्कथां ब्रूहीति भावः ४ श्रीशुकः परीक्षितं विदुरप्रश्नप्रकारं वक्त्वीति वक्ति सूतः शौनकादीन्प्रत्याह।इति ब्रुवाणमिति।
सहस्रशीर्ष्णो हरेश्चरणोपधानं पादपीठायितं।भगवत्कथायां प्रणीयमानः प्रेर्यमाणः।अभ्यचष्ट आहेत्यन्वयः।विदुरमिति शेषः ५

संभाषणानंतरमन्यत्कथाप्रसंगो नास्तीति भावेनाह । यदेति । नायमंजलिः उंभिक इति भावेनोक्तं । प्रणत इति ६ ननु किमियं भाषा शुश्रूषा ह्यस्मत्तमां साकेतिकी वा । न द्वितीयः अप्रकृतत्वादसंभवाच्च । प्रथमे पि समाधिरेवेति भावेनाह । त्वमेक इति । अथ जन्म कृत्वा वृत्तिं दत्त्वा पितृत्वाद्यपोष्यैः शुश्रूषा कर्तव्या सा के न केन कर्मणा स्यादित्यर्थः । अपि शब्देन कार्याकरणे पातकं सूचयति ७ तत्कर्मस्तोपि भगवच्छुश्रूषा कर्तव्येत्याह । कर्मस्विति । आत्मशक्तिषु स्वके

मैत्रेय उवाच — यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः । प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ६ त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता । अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ७ तद्विधेहि नमस्तुभ्यं कर्मस्विज्यात्मशक्तिषु । यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ८ ब्रह्मोवाच — प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर । यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितं ९ एतावत्यात्मजैरेव कार्या ह्यपचितिर्गुरौ । शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः १०

षु नित्यं नैमित्तिकेषु कर्मस्विज्या पूजा तत्कर्म विशिनष्टि । यत्कृत्वेति । इह लोके सर्वत्र यशो मुत्र परलोके गतिः सुख प्राप्तिलक्षणा स्यात्तादृशमिति शेषः ८ सद्भिः वामद्भुक्षणाएवमनुग्रहः कर्तव्यः इति भावं ध्वनयन् ब्रह्मोवाच प्रतिवक्ति । प्रीत इति । यद्यस्मात् शाधि शिक्षय त्वं आत्मना परप्रेरणामंतरेण ९ इयमेव गुरोः क्रियमाणा पूजेत्याह । एतावतीति । अपचितिः पूजा । एतावती तिकेयमित्यत्राह । शक्त्येति । अथ गुरु नियोगानंतरमेव । शक्त्या शासनमाज्ञा गृह्येत इति यत्सेयमित्यर्थः १०

आज्ञामाह । सत्वमिति । अस्यां शतरूपायां ११ केनवेत्यस्य प्रश्नं परिहरति । परमिति । अनेनाज्ञाग्रहणमेकमितरत्प्रजापालनमिति द्वयं शुश्रूषणमुक्तं भवति । पुरुषस्य पुरुषार्थाय श्रीनारायणाय स्माद्दृष्टवततः प्रजापालनेन किं तत्राह । भगवानिति १२ बाधकमाह । येषामिति । यज्ञो लिंगं ज्ञापको यस्य तथा । श्रमः इदं न श्रेयः साधनमित्यनुष्ठानाद्यायासः । आत्मा परमात्मा १३ ब्रह्मणा प्रजापालनायोपदिष्टो मनुस्तदाज्ञामादाय ब्रह्माणं प्रार्थयते । आदे

सत्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः । उत्पाद्य शाधि धर्मेण गां यज्ञैः पुरुषं यज ११ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप । भगवांस्ते प्रजाभर्तुर्हृषीकेशोनुतुष्यति १२ येषां न तुष्टो भगवान्यज्ञलिंगो जनार्दनः । तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयं १३ मनुरुवाच — आदेशेहं भगवतो वर्तेयामीवसूदन । स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो १४ यदोकः सर्वसत्वानां मही मग्ना महांभसि । अस्या उद्धरणे यत्नो देव देव्या विधीयतां १५

मैत्रेय उवाच — परमेष्ठी त्वपां मध्ये तथा सन्नामवेक्ष्य गां । कथमेनां समुन्नेष्य इति दध्यौ धिया चिरं १६

शेहमिति । अमीवघ्नस्य पापस्य सूदन । अनुजानीहि अनुज्ञया आदिशेत्यर्थः १४ भूम्यां स्वस्थाने स्थितिं विधाय प्रजापालनं कर्तव्यमित्याज्ञातवदाशंक्य परिहरति । यदोक इति । सर्वसत्वानां पिपीलिकादि सर्वप्राणिनां यदोकः आवासस्थानं सा मही महांभसि प्रलयजले मग्ना भूत् । हे देव । अस्याः देव्याः भूमेरुद्धरणे प्रयत्नः क्रियतामित्यन्वयः १५ पूर्वमेवाभूमेरभावं जानन्नपि ब्रह्मा प्रार्थनापूर्वकं कृतमेवोपकृतं स्यादिति मत्वा नो भूमेरुद्धारमालोचयतीत्याह । परमेष्ठीति । यथा नेतुमशक्या तथा सन्नां मग्नां १६

मज्जनेनिमित्तमाह। पीतमिति। यावत्तत्पीतेनजलस्योद्रेकः शाम्यति तावत्सर्वमित्युच्यते। नतु निःशेषत्वेन। अन्यथा वार्भिः प्लाव्यमानेत्यसंगतं स्यात्। निवेशिता निवेशनीकृता १७ १८ वार्भिर्जलैः प्लाव्यमाना वंचलीक्रियमाणा रसांगता मग्ना प्रजानां भारेणातिशयः। सृजतः सतः अत्राप्यामवस्थायां १९ इदमेवानुष्ठेयमित्याह॥ यस्येति॥ सत्यसंकल्पस्य हरेर्भक्तत्वात् ब्रह्मापि सत्यसंकल्प इतीमम र्थं द्योतयन् हरेः प्रादुर्भावप्रकारमाह। इतीति। नासाविव

पीतं मया जलं पूर्वं पृथिवी च निवेशिता। प्रजा देवासुर पितृ मनुष्य पशु पक्षिणः १७ सरीसृपान्नगान्नागान्भूतान्सुधा ववानिव॥ १८॥ सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता॥ अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः १९ यस्याहं हृदयादासं स ईशो विदधातु शं। इत्यभिध्यायतो नासाविवरात्सहसानघ॥ वराहतोको निरगादंगुष्ठपरिमाणकः २० तस्याभिपश्यतः खस्थः क्षणेन किल भारत। गजमात्रः प्रववृधे तदद्भुतमभून्महत् २१ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा २२ किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितं॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतं २३ दृष्टोंगुष्ठशिरोमात्रः क्षणात्गंडशिलोपमः॥ अपिस्विद्भगवानेष यज्ञो मे खेदयन्मनः २४

रान्नासाविलात्सहसा सद्यो निरूपितत्वेन। वराहतोको वराहशिशुः २१ तस्य ब्रह्मणः खस्थ आकाशे स्थितः २१ कुमारैः सनकादिभिः सौकरं सूकरस्य विद्यमानं तर्कयामास मीमांसितवान् २२ मीमांसाप्रकारं वक्ति किमेतदिति। अहो इत्यनेन निकटवर्तिनो मुनीनभिमुखीकरोति॥ बत खेदयत २३ किं बहुना इदं महाश्चर्यं। अंगुष्ठशिरोमात्रः अंगुष्ठाग्रपरिमाणः। गलिता स्थूलपाषाणा गंडशैला इति स्मृता इति। एष वराहः मे मनः खेदयन् यज्ञो भगवानपि स्वित् २४

ब्रह्मणः सह सोत्पन्नाज्ञाननिरासप्रकारमाह॥ इतीति। मीमांसतः मीमांसमानस्य सतः। मरीच्यादिसूनुभिः २५ गर्जितफलमाह। ब्रह्माणमिति। प्रतिस्वनयता प्रतिध्वनिमतीः कुर्वता गर्जितेन २६ अयं हरिरिति ज्ञात्वा तैः किमकारीति तत्राह। निशम्येति॥ मायामयसूकरस्य इच्छामयवराहस्य। स्वखेदक्षयिष्णुः स्वखेदविनाशकरं। घुर्घुरितं सूकराणां नादविशेषं श्रुत्वा जनादिलोकनिवासिनो मुनयः त्रिभिः पवित्रैर्निर्दोषैर्वेदैः अयं यज्ञपुरुषमगृणन् इत्यन्वयः।

इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः॥ भगवान्यज्ञपुरुषो जगर्जागेंद्रसन्निभः २५ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान्॥ स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः २६ निशम्य ते घुर्घुरितं स्वखेदक्षयिष्णु मायामयसूकरस्य। जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म २७ तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं। विनद्य भूयो विबुधोदयाय गजेंद्रलीलो जलमाविवेश २८

स्मात्यनेन गुणानुस्मरणपूर्वक स्तुतिं सूचयति। जनस्तप इति छंदोभंगभयाद्धेदानुकारित्वाद्वा विसर्गितं २७ स्तुतिश्रवणसाहजननीसमसूद्दितिभावेनाह तेषामिति। वेदानां वितानेन विस्तारेण प्रतिपादिता मूर्तिर्यस्य स तथा। यद्वा वेद एव वितानमुल्लोचम् उपरि पतत्स्वकरनिवारणवस्त्रं यस्याः सा वेदवितानात् तादृशी मूर्तिर्यस्य स तथा। यज्ञवितानमूर्तिरिति पाठे यज्ञविस्तारेषु गृहीतमूर्तिरित्यर्थः॥ आत्मनो ज्ञानानंदादिगुणानामनुवादो यस्मिं स्तवे तथा ब्रह्मस्तुतिलक्षणं वेदमवधार्य नन्नर्दननादभूयस्तु भयत्रसं बध्यते। प्रलयजलं २८

तत्र द्यो निजानां तत्तत्क्रियायां तत्प्रभावो निवार्यइति जलप्रवेशेन द्योतयति ॥ उत्क्षिप्तेति । स भगवान्महीध्रः श्रीनारायणाख्यः पर्वतः । कं जलं जलमवितव्यो निजानां तत्तत्क्रियायां तत्प्रभावो । बालस्तु कपिलवर्णः केचित् दीर्घरोमक मित्यभिधानात् दीर्घबालो । खेऽन्तरिक्षे आकाशे शतइत्यच्चयः ॥ तं विशिनष्टि । उत्क्षिप्तबालः उद्धृतपुच्छः अन्यत्रोन्नतकोलः । बालस्तु कपिलवर्णः दीर्घरोमकमित्यभिधानात् । खेऽन्तरिक्षे आकाशे चरतीति खचरः उभयत्र समानं । कठोरः परिणाहरूढाः सटाः बहलकेसरान् धुन्वन् कंपयन् । अन्यत्र सटा द्युदीपितलता विशेषाः । खराः परुषा लोमशाश्चरतीति खचरः । खरा परुषा रोमशा विधुमंदस्य त्वग्यस्मिन् सतथा । खुरैराहतं मभ्रं येन सः खुराहताभ्रः । शृंगखुरैः शृंगताडितमेघाः । अमवतीत्वगप्यसतथोक्तः । अन्यत्र रोमशाः विधुमंदः । खरा विधुमंदस्य त्वग्यस्मिन् सतथा । खुरैराहतमभ्रं येन सः खुराहताभ्रः । शृंगखुरैः शृंगताडितमेघाः । अ

उत्क्षिप्तबालः खचरः कठोरस्सटा विधुन्वन् खररोमशत्वक् ॥ खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बिभासे भगवान्महीध्रः
२९ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वरांगः । करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान् गृणतोऽविशत्कं ३०

न्यत्र गौः । सितशृंगः धवलदंष्ट्रः । अन्यत्र सपष्टं । ईक्षायां नेत्रस्य ज्योतिः प्रकाश कनीनिकालतया विभासो विभासनं दीप्तिर्यस्य सतथोक्तः । यद्वा दर्शनाख्या शिखालया शोभमानः । २९ ॥ घ्राणेनेंद्रियेणापि जिघ्रन् गंधोपादानं कुर्वन् क्रोडापदेशः देवकार्यनिमित्तेन वराहः । नतु साक्षाद्वराहः । किंतु स्वयं स्वतोऽध्वरांगः यज्ञमूर्तिः श्रीनारायणः । पूर्वत्र पर्वतोपमत्वेन दंष्ट्रोक्तिः स्वाशांतत्वद्योतनायेति न पुनरुक्तिः अध्वरस्य यज्ञस्यांगानि साधनानि कुशादीनि यस्मिन् सोऽध्वरांगइति वा । अपदेशः छलं छद्म स्यादिमित्त व्याज योरपीति यादवः ३०

जलप्रवेशसमये समुद्रेण कृतिरेवाकारिता क्रोशइत्याशयेनाह ॥ स वज्रेति स उदन्वान् समुद्रो हे यज्ञेश्वर मां मां पाहीति भावेन चुक्रोश चुक्रोशेत्यन्वयः । अर्थः । रक्षा प्रार्थनायां कः क्रोशः प्राप्त इत्यत उक्तं । वज्रवत् कूटवत् अयोघनवद्धरिमूर्त्या पतत्तस्यांगस्य निपातवेगेन विशीर्णा निर्भिन्ना कुक्षिर्यस्य सतथा । अत एवोदरवेदनया स्तनयन् शब्दं कुर्वन् आर्त इव उत्सृष्टाऊर्ध्वंगता अत एव दीर्घा ऊर्मय एव कराः । उदरादिवेदनार्तः पुरुषो यथा शिरसि करं निधाय उच्चैः क्रोशति तथेति लौकिकोऽर्थः । आध्यात्मिकः कृतिरेव कृतेत्यर्थः ३१ रसातलरतिं किराणपरित्यक्तो ककवराहवत्तद्धरेर्जलप्रवेशः । किंत्वयद्दर्शनार्थप्रावेशितदर्शनमनेनकृतमि

स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् । उत्सृष्टदीर्घोर्मिकरैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ३१
खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारवारं त्रिवरू रसायां ॥ ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ३२

त्याह ॥ खुरैरिति । उत्पारवारमिति क्रिया विशेषणं । पारे तीरं तत्र स्थितं वार्जलं यथा भवति तथा । क्षुरप्रैः क्षुरस्य धर्मं प्रदरयंतीति क्षुरवत् तीक्ष्णैरित्यर्थः । यद्वा क्षुरं पदं यद्वैरिति यादवः । खुरैः समुद्रस्यापो दरयन् भिंदन् । त्रिभिर्वेदैर्व्रियत इति त्रिवरूः त्रिषु युगेषु व्रतानां वृणोतीति स्यानत्रयं वृणोतीति वा । युरुशब्दवत् प्रक्रिया । दुलोप पूर्वस्य दीर्घोऽण इति दीर्घः । अग्रे पूर्वं प्रलये सुषुप्सुः निद्रां कर्तुकामः स हरिर्यां जीवधानीं सर्वप्राण्याधारभूतां मभ्यधत्त जलस्थो परिनिहितवान् । तां गां तत्र रसायां पाताले ददर्शेत्यन्वयः । वरूः सुगलरेखास्या हरा हस्ववविसृतेत्यभिधानात् वलित्रयांकितगलो वा । पारं वृणोतीति पारवारः । कर्मण्यण् प्रत्ययः । पृक्षादिषु णत्वं ततस्ततो घोषात्यादेनेति वा २९

भा॰त्व॰
८३

भगवता महीं दृष्ट्वा किमकारीति तत्राह। स्वदंष्ट्रयेति। विलग्नां रसातले वन्दीगृह इव स्थितां महीं स्वदंष्ट्रयोद्धृत्य रसायाः उत्थितः। स आदिवराहः संरुरुहे उप
र्यारुरोह। रसालयैरसुरैः स्वभूतवसुन्धरानयनसमये निद्रितः किं तत्राह॥ तत्रापीति। स हरिस्तत्र भूम्युद्धरणसमये विघ्नं रुन्धानं गदयापतन्तं दैत्यमादिहिरण्याक्षं
दंष्ट्रया जघानेत्यन्वयः॥ कीदृशः सुनाभश्चक्रं तद्वत्संदीपिततीव्रमन्युः प्रज्वलितात्युग्रकोपः। अत एवासह्यविक्रमः। मृगराट् सिंहः इभं ग्राहं यथा तथा। त्रिभ
सीत्तेनैव रसातलात्किंचिदूर्ध्वमागत्येति सूचयति। तस्य दीप्तिविशेषमाह॥ तद्रक्तेति। यथा जगतीं तटभूमिं विभिन्दन् तिर्यक्ततप्रहारेण शोभितो भवति तत्पंकांकि

स्वदंष्ट्रयोद्धृत्य महीं विलग्नां स उत्थितः संरुरुहे रसायाः। तत्रापि दैत्यं गदयापतन्तं सुनाभसंदीपिततीव्रमन्युः ३३ जघा
न रुन्धानमसह्यविक्रमं स लीलयेभं मृगराडिवाम्भसि॥ तद्रक्तपंकांकितगण्डतुण्डो यथा गजेन्द्रो जगतीं विभिन्दन् ३४

राम
८३

ततुण्डो भवति। तथा दंष्ट्रया हिरण्याक्षं हत्वा तस्य रक्तपंकेनांकिततुण्डः उज्ज्वलप्रकाश इति शेषः। अनेन विशेषणेन हिरण्याक्षौ द्वौ तत्रैको दंष्ट्रया हत इत
रस्त्वन्येन आयुधेन इति ज्ञायते। ब्रह्मकल्पे हिरण्याक्षः प्रथमं दंष्ट्रया हतः। स एव पार्षदाविष्टो द्वितीयः कर्णताडनात्। पूर्वं ह्यस्योदके मग्नो द्वितीयस्तेन मग्नि
तो। भुवमुद्धरतैवासौ हरिणाक्रोडमूर्तिनेत्यवगन्तव्यः। अत्रैवोत्तरग्रन्थे विदुरप्रश्नं परिजिहीर्षुणा हरिणा हिरण्याक्ष एक एव व्यत्यस्याख्यातः। तं दुष्टजनमोहना त
र्थं मिथ्याविचित्रकथनं देवानामिवार्थं चेति तदुक्तं। व्यासेनापि वोच्यते अविवेकेन कुत्रचित्। दुष्टानां मोहनार्थाय तत्र तत्र कथा क्वचित् इति। अविवेको
नाम अविच्यकथनेन वक्तुर्हरेरज्ञानं। सर्वज्ञस्य कुतो ज्ञानं व्यासस्यादारकर्मण इति वचनात् ३४

अयं हरिर्वनलोकवराह इति ज्ञापनाय विरिञ्चमुख्यानां देवानामुपसत्तिविधिं वक्ति। तमालेति। उत्क्षिपन्तमुद्धरन्तं। अनुवाकैरियत्संख्याविशिष्टैर्वेदवाक्यैः ३५
उपस्थाय किं कृतं तत्राह। जितं जितमिति। त्रयी तनुं त्रिवेदप्रतिपाद्यां मूर्तिं। परिधुन्वते रोमजलमागाय कंपमानाय। निलिल्युर्निलीनाः तेनुस्म ३६ अ
नेन विष्णुरयं न लोकवराह इत्यस्य किमायातमिति तत्राह रूपमिति। दुःकृतात्मनामिति विशेषणेन सुकृतात्मनां सुदर्शनमिति ध्वनितं। अत इदमेवा
स्य परब्रह्मत्वे मानं सूचितं। अध्वरात्मकं यज्ञसाधनप्रकृतिकारणं। अनेनापि न केवलं भूम्युद्धरणाय किंतु सकलयज्ञसाधनप्रवृत्तये इदं रूपमिति

तमालनीलं सितदन्तकोट्या क्ष्मामुत्क्षिपन्तं गजलीलयांग। प्रज्ञाय बद्धाञ्जलयोऽनुवाकैर्विरिञ्चिमुख्या उपतस्थुरीशं ३५
देवा ऊचुः॥ ॥ जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः॥ यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः का
रणसूकराय ते ३६ रूपं तवैतन्ननु दुःकृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं। छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्व
ङ्घ्रिषु चातुर्होत्रं ३७ स्रुक्तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे। प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं
भगवन्नग्निहोत्रं ३८

सूचितं। यद्वा यज्ञात्मपरमात्मरूपं। यज्ञो वै विष्णुर्देवतेति श्रुतेः। अनेन ब्रह्मत्वस्य दृष्टुकं भवति। अयमात्मा ब्रह्मेति वा। अस्य यज्ञात्मकत्वं स्पष्टयति। छन्दांसीत्यादिना
॥ सप्त छन्दांसीत्यादयो यस्य तव त्वगादिषु वर्तन्ते तस्मै नम इत्यन्वयः। बर्हिर्दर्भः॥ दृशि चक्षुषि चतुर्भिर्होतृभिः क्रियमाणं कर्म चातुर्होत्रं ३७ इडा यज्ञपात्र
। चमसश्च तु श्रोत्रयोः निवेशो यज्ञपात्रे। प्राशित्रं यज्ञपात्रं पुरोडाशादि। द्वादश सोमग्रहाः। रसने जिह्वा क्रियायां चर्वणं हे ईश सर्वतश्चर्वणं चूर्णनं दन्तैरिति या
वत् ३८

भा० त०
८४

आत्मजन्मतवजननं दीक्षाव्रतसंग्रहः। उपसदः उपसन्नामानोग्रतविशेषाः उपसन्निविशेषावा। यस्त्वं प्रायणीयोदयनीयदंष्ट्रः यस्य तव दंष्ट्रे प्रायणीयोदयनीयौ रूपक्रमावसानकर्मणी इष्टी प्रायणीयोदयनीयसंज्ञे वर्त्तेते इत्यर्थः। क्रतोः सत्यसंकल्पहोमरहितो ग्निः सभ्यः औपासनोग्निरावसथ्यः सभ्यावसथ्यौ अग्निचितयः सप्त क्रतवः तवासवः प्राणा जन्मसूत्रयः। चितय इष्टकाबंधनविशेषावा ३९ सोमोलता प्रातरादित्रीणि सवनानि अवस्थितिर्निश्चलत्वेन गतिनिवृ

दीक्षात्मजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः। जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यौ चितयो।
सवोहिते ३८ सोमस्तु रेतः सवनान्यवस्थितिः संस्था विभेदास्तव देहधातवः। सत्राणि सर्वाणि शरीरसंधिस्त्वं
सर्वयज्ञक्रतुरिष्टिबंधनः ४०

त्तिं संस्था विभेदा अग्निष्टोमादयः सप्त अग्निष्टोमादयः संस्थाभेदाः सप्त सप्त तंतवः इति याद[व]स्था। त्वगादिसप्त देहधातवः। सत्रमनु प्रथमेति सूत्रात् प्रथमायाः सप्तमीत्वं युक्तं। त्वचीत्यादि सप्तमी प्रयोगाश्च। सर्वाणि सत्राणि बहुभिः संभूय कर्त्तव्यानि दीर्घकालीनानि यज्ञविशेषकर्माणि। किं बहुनोक्तेनेत्युपसंहरति। त्वं सर्वेति एकाहिकद्याहिकादिसर्वयज्ञस्यापको च्छावान् इष्टिबंधनः तव देहस्य बंधने संनहने इष्टिः प्रतिपत्ति ध्यादि शुक्रियमाणाकर्मविशेषो वर्त्तन्त इत्यर्थः ४०

राम
८४

उक्तानुक्तविशेषणानि समुच्चीय विशिंषंति। अखिलेत्यादिना। सत्तासहत्वेन मंत्रादिषु सन्निहितत्वात् अखिलमंत्रदेवताद्रव्याय सर्वक्रतवः संकल्पाय सा द्रवंति स सर्वक्रतुः तस्मै क्रियात्मने कर्मकारयितृत्वेन तदात्मा य। आत्मजयात्मन स्व प्रसादा[?] ज्ञानतया वैराग्यभक्तिभिन्नरनुतावितं संस्वयोग्यतानुसारेण समुत्पादितं स्वविषयज्ञानं येन सतथा तस्मै। वेदादिपरविद्यागुरवे ४१ इर्दमना थत्वेन विलसामित्यनेन तद्गुणं मध्यवत् कशत्वं घ्निते अश्रुना सनाथत्वेन पर्वताद्यवयवपुष्टा भूमिर्विराजत इति किं वंतीत्याह। दंष्ट्राग्रकोट्येति। इत्तादंतेन। मतंगजेंद्रस्य सपत्रपद्मिनी सपत्रविसिनी। त

नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने। वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः
४१ दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा। यथा वनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मि
नी ४२ त्रयीमयं रूपमिदं च सौकरं भूमंडलेनाथ दता धृतेन ते। चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः ४३

लिन्यो नुविसिनी पद्मिनी मुखा इत्यमरः। अनेन हरेर्धरणिधरेति नाम सार्थकमिति सूचितम् ४२ इतरसंयोगेनेतरेषां विराजनं हरेः स्वात्मनैवेति भावेन स्फुरंतीत्याह। त्रयीमयमिति। भूमंडलेन धृतेन दता चकास्ति विराजते। चकासृ दीप्ताविति धातुः। अदादिः। शृंगेणोढेन धृतेन घनेन विभ्रमः कांति
विशेषः ४३ श्रीरामयनमः॥ ॥श्री॥ ॥ ॥ ॥श्री॥ ॥ ॥ ॥

भा॰ टी॰ ८५

वैलायमीषं नानतोप्येना किंकरोमीति हरेः प्रश्नाभावेनं स्वामीष्टं विज्ञापयंतीत्याह। संस्थापयेति। जगतां जंगमानां तस्थुषां स्थावराणां मातरं न वपत्नी मेनां संस्थापय जलस्योपरीति शेषः। कीदृशस्त्वं पिता सितसर्वस्येति शेषः। यद्वा त्वं जगतां पितासि तस्थुषां मातरं एनामिति। त्वत्कृतोपकारप्रत्युपकारमन्यमपश्यंतो वयमिमं नमस्कारं कुर्म इति विज्ञापयंतीत्याह विधेमेति। उभयोर्मातृत्वपितृत्वं तस्मादिति अजयंतो विशिषंती स्वाहाय स्वामितित्र नेन नूनमेमी हात्म्यवसूचितं। अरणिरग्निमथनदारुविशेषः ४४ त्वदन्येनेदं कर्म निरूपयितुमशक्यं किंपुनः करणमिति विज्ञापयंती

संस्थापयैनां जगतां सतस्थुषां लोकायपत्नीमसि मातरं पिता॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोग्निमिवारणा
ऽवधाः ४४ कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणं। न विस्मयोसौ त्वयि विश्वविस्मये यो माययेदं ससृजेति
विस्मयः ४५ विधुन्वता वेदमयं निजं वपुर्जनस्तपः सत्यनिवासिनो वयं। सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्यमाना भृशमी
शपाविताः ४६

त्याह। क इति। उद्विबर्हणं उद्धरणं इदमस्माकमेवाश्चर्यं न तत्वेति श्लाघयंतीत्याह। नेति। इतोप्यधिकविस्मयोस्मीति विज्ञापयंतीत्याह य इति। अतिवि स्मयोतिशयितविस्मयः ४५ वा तावत्तवगुणगणानां संकीर्तनेन मनसा संस्मरणेन ताः स्मः मुद्रा बर्हिस्नव सटाय समुत्पन्नभूतस्युर्जलबिंदुभिः पा विता वयमिति विज्ञापयंतीत्याह। विधुन्वतेति। तृतीयार्थे षष्ठी। विधुन्वतस्तवाय द्वा विधुन्वता त्वया पाविताः। तत्कथमित्यतो विशिंषंति सटेति। त्वया पाविताः सटाशिखांबुबिंदुभिरिति ४६

राम ८५

वराहस्य गंडशिलाद्युपमत्वेन परिच्छित्त्वात्कर्मणोपि तथात्वात्तन्नायं विष्णुरित्याशंकया तथा मन्वानो भ्रष्टमतिरित्याह। सवा इति। यः पुरुषोपारकर्मणोनंतविक्रमस्य तव कर्मणां भूम्युद्धरणादीनां पारं अंतमेषते सम्यगिच्छति स भ्रष्टमतिर्वा इत्यनेन नरकपातं लक्षयति। नोस्माकं ताहशत्वाने न दुःखोदर्कोलोकोमाभूत्। किंतु सुखोदर्क एवस्यादिति प्रार्थयंतइत्याह। त्वद्योगेति। तवैवं धकशक्त्या भ्रष्टमनस्कत्वेन विश्वंसमस्तं गलितं तत्त्वज्ञा

सवैबत भ्रष्टमतिस्तवैषते यः कर्मणां पारमपारकर्मणः। त्वद्योगमायागुणमोहितं त्वनाविश्वंसमस्तं नो भगवन्विधे
हिशं ४७ मैत्रेय उवाच प्रत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः। सलिले स्वखुराक्रांत उपाधत्ताविताविनं
४८ स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः। रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ४९ य एवमेतां हरिमेध
सो हरेः कथां सुभद्रां कथनीयमायिनः। शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोस्याशु हृदि प्रसीदति ५०

नानानार्थं सुखसाधनज्ञानसाध्यं लोकं विधेहीत्यन्वयः ४७ भक्तवत्सलोहमिति भावयंस्तदुक्तं करोति हरिरित्याह। प्रत्युपस्थीयमान इति ४८ हरिः ततः परं किं चकारेति तत्राह। स इत्थं इति। प्रजापतिः प्रजापालनशीलः। उन्नीतां उद्धृतां ४९ अस्य वराहस्य विक्रमस्य पुरुषार्थैकहेतुत्वात् श्रवणादि फलमाह। य इति। हरिमेधसः संसारसंहारिबुद्धेः। कथनीयमायिनः कथनयोग्यसामर्थ्यस्य। उशती मनोहरां ५०

तत्प्रसारफलमाह। तस्मिन्निति। लवात्मभिः लवकालरूपाभिः पश्चात् नश्वरीभिः आभिः स्वर्गाद्याशीर्भिः प्रमत्तो पिता आत्मा बन्धुर्वणा दिना नश्या
दिति धनपत्राह॥ अनन्यभक्त्येति ५१ ननु कं वित्काले हरिकथानिषेवणस्यान्मुं चेतो दृश्यते तत्र सारत्वं कथमिदाशंक्य तेषां पशुकल्पाइत्याह॥
को नामेति। नामशब्दः कुत्सने को नाम कः कुत्सितः पुराशब्दः पुराणे निकटातीते नागते च वर्त्तते। पुराणकथानां निकटातीतकथानां अनागत
कथानां च मध्ये सारभूतां मितिशेषः। प्रबंधे निकटातीते पुराणे नागते पुरेतियादवः॥ सुपूजिते मोक्षधनेषु मुक्तं धापयतीति वा सुधा। डु धाञ् धार
ण पोषणयोः धेट् पाने इति धातुः। भवापहां संसारविनाशनीं भद्रां वहां वा पयो शशामिति प्राप्या इति सूत्रात्यकारस्य वकारः। भवो भद्र इतियादवः॥ नरे

तस्मिन् प्रमत्तेत्र सकलाशिषां प्रमोकिं दुर्लभं ताभिरलं लवात्मभिः। अनन्यभक्त्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पुमान् ५१
को नाम लोके पुरुषार्थसारवित् पुराकथानां भगवत्कथासुधां॥ आपीय कर्णांजलिभिर्भवापहामहो विरज्येत विना नरेतरं ५२ इ
ति श्रीभागवते महापुराणे तृतीयस्कंधे चतुर्दशोऽध्यायः॥ ॥श्रीशुक उवाच॥ ॥निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसू
करात्मनः। पुनः स पप्रच्छ समुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः १

तरं पशु ५२ इति श्रीतृतीयस्कंधे चतुर्दशोऽध्यायः॥ ॥रुद्रादीनां हर्यीज्ञाकारित्वेन तद्दशाविरूपवरितस्यातं अनुगुणाकारे हरौ मनोरतिः कर्तव्या
पुरुषेणेति विधीयते तस्मिन् अध्याये तत्रादौ विदुरः पुनर्मुनिनावर्णितं वराहचरितमाकर्ण्य हरिकथायामलं बुद्धिरहितो विशेषतः श्रोतुकामो मैत्रेयं पप्र
च्छेति शुकः परीक्षितं कथयति। निशम्येति। समुद्यतांजलिः हरिं शुद्धिं पतिशेषः। कुत एतद्वगतमित्यत उक्तं। न चेति। अनेन कथाश्रवणे तृष्णाति
शयं सूचयति। ततो हरिप्रसादेन हरिकथाश्रवणं स्यादिति शिरसि मुकुलितकरकमल इत्यर्थः। कथाश्रवणविघ्नपरिहाराय धृतव्रत इति १

उक्तकथांशे वक्तव्यं नासीति द्योतयितुं श्रुतमनुवदति विदुर इत्याह। तेनेति। येन लयोदके मग्ना भूः दहारि तेनैव नरूपांतरेण॥ २॥ तत्र श्रोतव्यांशं पृच्छ
ति॥ तस्येति॥ रक्षोत्यन्नो महता पराधेन भवितव्यं ताहृशो पराधः कः इति प्रश्नार्थः ३ मैत्रेयो विदुरप्रश्नं प्रशंसतीत्याह। साध्विति। साधुसत्सभासु वितां वे
हरेरिच्छायां रमत इति वीरः। तत्रास्य संबुद्धिः पुरुषार्थोपयोगित्वात् साधुत्वमस्येत्याह। यत्त्वमिति ४ न केवलं संसारलक्षणमृत्युपाशविमोचनी विछेद
नी हरिकथा अपि त्वेहिकामुष्मिकसिद्धिकरीति निदर्शयति। ययेति। मुनिना नारदेनार्भकः पंचवर्षः अस्याः प्रपंचश्चतुर्थे वक्ष्यते ५ श्रोतॄणां श्रद्धाति

विदुर उवाच तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना। आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम २ तस्य चोद्धरतः क्षौणीं स्वदं
ष्ट्राग्रेण लीलया। दैत्यराजस्य च ब्रह्मन् कस्माद्धेतोरभून्मृधः ३ मैत्रेय उवाच साधु वीर त्वया पृष्टमवतारकथां हरेः। यत्त्वं पृ
च्छसि मर्त्यानां मृत्युपाशविनाशिनीं ४ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः। मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदं ५
अथात्रापीतिहासोयं श्रुतो मे वर्णितः पुरा। ब्रह्मणा देवदेवेन देवानामनुपृच्छतां ६ दितिर्दाक्षायणी क्षत्तर्मारीचं काश्यपं पतिं।
अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ७

शये जननार्थं विदुरस्य प्रश्नपरिहारत्वेन पुरावृत्तं कथयति। अथेति अथशब्देन पूर्वं ब्रह्मपुत्रो हिरण्याक्षो वराह हरिणा हतो ननु दितिपुत्रः सस्वयापार्ष
दाविष्टो निहन्यत इति कथाविशेषस्य आरंभ इति सूचयति॥ वध्यस्यैक कर्तृत्वात् इह जनमोहनार्थत्वाच्चैवं कथनं संभावितमित्यपि पदेन वक्ति।
। स्मृतौ वक्ष्यत इति शेषः ६ को यमिति तत्राह। दितिरिति। दाक्षायणी दक्षस्य पुत्री नाम्ना दितिः। मारीचं मरीचेः पुत्रं। रामवैरिमारीचव्यावृत्त्यर्थं काश्य
पमिति। हृच्छयः कामः तेनार्दित ७

मारीचं विशिनष्टि। इष्ट्वेति। अग्निरेव जिह्वा यस्य स तथा तं यजुषां पतिं यजुर्वेदगतमंत्राणां विषयत्वेन स्वामिनं। निम्लोचति अस्तं गच्छति। अग्न्यागारे अग्नि गृहे ८ मनसैव स्वकमेन तु वाक्पूर्वकमिति तत्राह। एष इति। त्वत्कृते त्वामुद्दिश्य पारंभां कदलीं ९ न केवलं विषयभोगेच्छुरहं तत्राप्यवेकिंतुप्रयोजनांतरेच्छयापीत्याह। तद्भवानिति। प्रजावतीनां पुत्रवतीनां। मय्यायुंक्तामिति पदच्छेदः संभ्रमादिकारशिराः अकारो भवेन्न लुप्तः १० अस्मत्कु

इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषांपतिं। निम्लोचत्यर्क आसीनमग्न्यागारे समाहितं ८ दितिरुवाच एष मां त्वत्कृते विद्वन् कामआत्तशरासनः। दुनोति दीनां विक्रम्य रंभामिव मतंगजः ९ तद्भवान्दह्यमानायां सपत्नीनां समृद्धिभिः। प्रजावतीनां भद्रं ते मय्यायुंक्तामनुग्रहम् १० भर्तर्याप्तोरुमानानां लोकानाविशते यशः। पतिर्भवद्विधो यासां प्रजया ननु जायते ११ पुरा पिता नो भगवान्दक्षो दुहितृवत्सलः। कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् १२ स विदित्वात्मजानां नो भावं संतानभावनः। त्रयोदशादात्तासां यास्ते शीलमनुव्रताः १३ अथ मे कुरु कल्याणं कामं कंजविलोचन। आर्तोपसर्पणं भूमन्नमोघं हि महीयसि १४

ग्रहात् किं तव प्रयोजनमिति तत्राह। भर्तरीति। सप्तमी पंचम्यर्थे भर्तुराप्तोरुमानानां इत्यर्थः। मानमपि पुत्रावाप्तिलक्षणमित्याशयेनाह पतिरिति ११ श्रुतगुणत्वेन स्नेहो दक्षस्य मया भवान् वृतः इत्यतोपि मदनुग्रहः कार्य इत्याशयेनाह। पुरेति १२ भावं हृद्गतमभिप्रायं। अदादात् १३ उपसंहरति। अथेति। अथ तस्मात्। भवतो महत्त्वमत्वात् मम भवच्छरणागमनं सफलं स्यात् तथा दृष्टत्वादिति भावेनाह। आर्तेति। महीयसि पुरुषे आर्तत्वेनोपसर्पणं शरणागमनं १४

एवं प्रार्थ्यमाना मे नामगणं मारीचः किं तत्स्त्रीमध्ये त्यक्तं किं विदुत्तरमवदत् तेनेति संशयो माभूदिति भावेनाह। इतीति १५ यतः यस्याः भार्यायाः त्रैवर्गिकी त्रयाणां धर्मार्थकामानां संबंधिनी सिद्धिः १६ एतदेव समर्थयते। सर्वाश्रमानिति। कलत्रवान् प्रशस्तभार्यायुक्तः स्वाश्रमेण गार्हस्थ्याश्रमेण त्रदानादिना ब्रह्मचर्यादि सर्वाश्रमानुपादाय संभाव्य संसाराख्यव्यसनसमुद्रमत्येतीत्यन्वयः १७ स्वधुरं स्वव्यापारभारमध्यस्य निक्षिप्य १८ इतोपि त्वं संभाव्येत्याह। यामिति। इंद्रियाण्येवारातयः शत्रवः इंद्रियारातयस्तान्। इंद्रियाणामरातयो विषयास्तान्निति वा

इति तां वीर मारीचः कृपणां बहुभाषिणीं। प्रत्याहानुनयन्वाचा प्रवृद्धानंगकश्मलां १५ एष तेहं विधास्यामि प्रियं भीरु यदिच्छसि। तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः १६ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान्। व्यसनार्णवमत्येति जलयानैर्यथार्णवं २० यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि। यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः १८ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः। वयं जयेम हेलाभिर्दस्यून्दुर्गपतिर्यथा १९ न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि। अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः २० अथापि काममेतं ते प्रजात्यै करवाण्यलं। यथा मां नातिवोचंति मुहूर्तं प्रतिपालय २१

। एवं चेदृष्टांतोपि संगच्छते। उभयेषामपि बाह्यत्वात्। पूर्वत्र संभावनामात्रयोक्तं १९ वक्ष्यमाणस्य वाक्यार्थकारयितुमतिस्तुतिं करोति। न वयमिति। भवंतो न प्रभवस्त्वेदन्यो भवादृशानेतित तत्राह। ये चेति। येन्ये वयगुणगृध्नवः गुणलुब्धाः पुरुषास्तेपि भार्यामनुकर्तुं न प्रभवंतीत्यर्थः २० किमिति स्त्रोत्राणि प्रयोजनेनेति माभूदुक्तं केत्याह। अथापीति। यद्यप्येवमथापि तर्हि किमिति कालः क्षिप्यत इति तत्राह। यथेति। अतिवावंति निंदंति तं हीरं रवचनं गुडजिह्विका कल्पमिस्पतमुक्तं। मुहूर्तमिति। प्रतिपालय प्रतीक्षस्व २१

भा॰तृ॰
८८

पतीक्षायां किं कारणमत्राह। एषेति। घोराणां वेलेत्युक्तं स्पष्टयति। चरंतीति २२ भवत्सामर्थ्येन भूतानि किं कुर्वंतीति तत्राह। एतस्यामिति २३ अस्मात्पशुपतेरपि किं भयमित्याशंक्य तस्मादस्मद्दर्शने भयं इत्याशयेनाह। श्मशानेति। श्मशाने विद्यमानश्चक्रानिलो वात्या वायुः श्मशानमंडलवर्ती वातस्तस्मादुत्पन्नया धूल्या धूम्रो धूम्रवर्णः विशीर्णश्च विद्योतश्च जटाकलापो यस्य स तथा विशिष्टो द्योतः प्रकाशो यस्य स तथा। भस्मनावकुंठितो रुक्मवर्णो यस्य स तथोक्तः। अमलरुक्मरजतं। भस्मावकुंठश्च रजतवद्धवलो देहो यस्य स तथा। त्रिभिर्नेत्रैरिति शेषः। ते तव देवरः श्वशुर...

एषा घोरतमा वेला घोराणां घोरदर्शना। चरंति यस्यां भूतानि भूतेशानुचराणि हि २२ एतस्यां साध्वि संध्यायां भगवान्भूतभावनः। परीतो भूतपर्षद्भिर्वृषेणाटति भूतराट् २३ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः। भस्मावगुंठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते २४ न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः। वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां बत भुक्तभोगां २५ यस्यानवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं बिभित्सवः॥ ॥४॥ ॥

होदर्याः सत्याः पतिः २४ गर्भित्ती बंधनो दार्थं पिशाचचर्यायाः हर्याज्ञाकारित्वेन हरेः प्रियत्वाद् तस्य तञ्च अप्रियं तस्याप्यप्रियमिती दानी मिदं नकार्यमित्यभिप्रेत्य तस्य हरेरतिशयितमहात्म्यमाह। न यस्येति। व्रतैर्हरिप्रीतिकरैर्यस्य चरणाच्च विक्षेपदातिर्यक् प्रहतां भुक्तभोगामप्यजां श्रेष्ठमायां पुत्रादिरूपां प्रकृतिं शक्त्वा वयं श्रियमाशास्महे हे ब्रह्मन्। बत तेन तेन हरिमाहात्म्यमचिंत्यमित्याश्चर्यं द्योतयति २५ अविद्यालक्षणं पटलं दर्शनप्रतिबंधकनेत्रदोषं बिभित्सवो भेत्तुकामा मनीषिणो यस्यानवद्याचरितं न गततृष्णादिकर्म गृणंति श्रवणादिने तिशेषः॥ ॥

पश्चहरिर्निरस्तसाम्यातिशयस्तस्य हरेराज्ञया देवेंद्रादिस्तमाश्रयो हरः पिशाचचर्यामचरदित्यन्वयः॥ पिशाचचर्यामचरदुद्दो विश्वाज्ञयेवनु। गर्भिणीं च धनोदार्थमतो विष्णुर्विडंबनकृदिति वचनबलान्मध्ये हर्याज्ञयेति पदमध्याहृयते। पशुपतावुक्तगुणा नामसंभवाच्च। अहं रुद्रायधनुरातनोमीतिपराधीनप्रतीतेश्च २६ ननु के विहरेश्चरितमपि निंदंति तत्कथमित्याशंक्य ते तमःप्रा अयोग्याः अभुरजना इति भावेनाह॥ हसंतीति॥ ये शुनो भोजनमन्नमिदं शरीरं वस्त्रादिभिः स्वात्मतया निजस्वरूपतयोपलालितं। ते पुरुषाः समीहितं विडंबनरूपं चेष्टा विशेषमविदुषः विद्वांसो

निरस्तसाम्यातिशयोऽपि यः स्वयं पिशाचचर्यामचरद्गतिः सतां २६ हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितं। यैर्वस्त्र माल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितं २७ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं हि मायया॥ ॥

राम
८८

जानंतो न एव दुर्भगाः। दुःखरूपतमः प्रायं योग्याः स्वात्मनि स्वरूप एव रतस्याचरितमुपनयात् ज्येष्ठविवाहाद्यपूर्वपुत्रोत्पात्यादिरूपं हसंति। न देवजानं तो न एव दुर्भगाः॥ स्वरूपतमः प्रायं योग्या... चरितं चरेरक्षिति द्योतको हि शब्दः २७ इतो पि ब्रह्मरुद्राद्यचिंत्यमहिमा परमात्मेत्याह। ब्रह्मादय इति। ब्रह्मादयो देवा येन हरिणा कृतं धर्मसेतुं तत्पालयंतीति तत्कृतसेतुपालाः इदं विश्वं च यो हरिः कारणं निमित्तं यस्य तद्यत्कारणं तत्कारणत्वं च माययास्वेच्छयानपराधीनतया हि शब्देन सहि कर्मफलो भिन्न इति मानं स्वयति॥ ॥

भा॰ त॰
८९

तस्य हरेराज्ञां करोतीत्याज्ञाकरी केयं शिवस्य पिशाचचर्या हरेराज्ञया शिवः पिशाचचर्यां करोतीत्युक्तं भवति। ततः किं तत्राह। अहो इति विभूम्नः परि
पूर्णस्य हरेः विडंबनं लोकानुकारि रूपं चरितमहो। जगत्सृष्ट्यानुरुद्रादीनपि स्वाज्ञाकर्मणि प्रवर्तयतीति। अत्र रुद्रविषयत्वेन यथास्थितव्या
ख्यानस्यानुपपत्तिरुक्तेति नेह प्रपंच्यते २८ हरेर्माहात्म्यं दुरवबोधं यद्देवं ज्ञापितया दित्या पापकर्मणि प्रवृत्तमिति भाववान् मैत्रेय एवमुक्तयान्तया

आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं २८ मैत्रेय उवाच एवं संवेदिता भर्त्री मन्मथोन्मथितें
द्रिया। जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा २९ स विदित्वाथ भार्यायास्तं निर्बंधं विकर्मणि। नत्वा दिष्टाय रहसि
तयाथोपविवेश ह ३० अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः। ध्यायन्जजाप विरजं ब्रह्म ज्योतिः सनातनं ३१

राम
८९

किमकारीति वैदुरिकीं मनःशंकां परिहरन्नाह। एवमिति। संवेदिता सम्यक् ज्ञापिता। वासः परिधानं २९ निर्बंधं दुराग्रहं। दिष्टाय कर्मसाक्षिणे देवा
य। निर्बंधश्च परमोग्रः स्यादुपदेशाग्रहे मैथुनमित्यभिधानं। प्रत्यारंभे प्रसिद्धे हेत्वभिधानात् हेत्वनेन प्रत्यारंभं सूचयति ३० अप्सरोमुग्धमुनिवदाक
त्यमारीचेन तयोपविष्टं किं नेत्याह। अथेति। अथ वीर्यपातानंतरमेव अथाचम्य मुनेस्तेन किमत्राह। ध्यायन्निति। ज्योतिः ज्योतीरूपं विरजं केनचिल्ला
द्रिरजोमलविधुरं ब्रह्म ध्यायन् सनातनं प्रणवनादेन सहितं ब्रह्मगायत्र्यात्मकं मंत्रं जजापेत्यन्वयः ३१

दित्या पुनः स्वकार्यमभूदथ किमिति गर्वीभूय स्थितं कियांतरमारब्धं मुनेनेति तत्राह। दितिस्त्विति। स्वकर्मणा जातेनावद्येन ३२ स्वकृतपापकर्मप्रतीका
रोपायमाह किं नेत्याह। नम इति। भूतानामृषभ इत्यस्य व्याख्यानं पतिरित्यादि। अंहसमपराधं अंहसो रंह इत्यपीति शङ्के विष्वः ३३ समस्तापरा
धानां प्रतीकारो नमस्कारादन्यो नास्तीति मत्वा तमेव तद्दोषनिरासपटुगुणविशिष्टत्वेन करोति। नम इति। रुद्राय परावलत्वजनरोगद्रावकाय रोदना
दुद्र इति शिशुस्वभावो न युक्त इति आह। महत इति। तस्य लोकानुकरणार्थत्वात् तत्र दोषायस्यादिति भावः। यद्वा दोषमहत्वादित्यत उक्तं। देवाये

दितिस्तु व्रीडिता तेन कर्मावद्येन भारत। उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ३२ न मे गर्भमिमं ब्रह्मन्भूतानामृषभो
वधीत्। रुद्रः पतिर्हि भूतानां यस्याकरवमंहसं ३३ नमो रुद्राय महते देवायोग्राय मीढुषे। शिवाय न्यस्तदंडाय धृतदंडा
य मन्यवे ३४

ति। तस्यापि देवयोनित्वादित्यत उक्तं। उग्रायेति। उद्धतं सर्वं ग्रसतीत्युग्रः तस्मै। तर्ह्ययं सर्वभक्षकोऽनन्तु निजाभीष्टवर्षीत्यत उक्तं। मीढुष इति। मिह से
चन इति धातुः स्वयं सुखित्वेन वर्तते चेन्निजाय सुखं ददातीति तत्कथमित्यतः शिवायेति अनेन प्रसिद्धनामकरणेन। कृत्यकर्तृरि न्यस्तदंडाय तर्हि
दुष्टकर्तृरि धृतदंडायेति तत्तद्योग्यतातिरेकेण क्रियां न करोतीत्युक्तं। उभयार्थसूचकविशेषणमाह। मन्यवे मननशीलाय क्रोधात्मने वा। गुण
दोषौ मत्वा निग्रहानुग्रहौ करोतीति। अनेन न इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्न इत्यादि मंत्रो दर्शितः ३४

फलितमाह। सनइति। माभीरितिभीमः। प्रसादकर्तृत्वेहेतुमाह। व्याधस्येति व्यध हिंसायामिति धातोः संततहिंसाशीलस्य। अपिपदेनकेवलस्य
लक्षणोहेतुरुक्तः ३५ गर्भः स्रव्येत्याद्याशास्त्रणीयइति लौकिकी लोकख्यातामनुसरंतीमाशासानांकामयमानांप्रवेपतींकंपमानां ३६ आत्मनः
मनसोप्रायत्यात उपशमनलक्षणप्रयत्नाभावात्व्यवायाख्यदोषात्। मन्निर्देशातिचारेणमदाज्ञातिक्रमेणनहेलनादवज्ञानात ३७ जा

सनः प्रसीदतात्भीमोभगवानुर्वनुग्रहः। व्याधस्याप्यनुकंप्यानांस्त्रीणांदेवः सतीपतिः ३५ मैत्रेयउवाच स्वगर्भस्या
शिषंलोक्यामाशासानांप्रवेपतीं। निवृत्तसंध्यानियमोभार्यामाहप्रजापतिः ३६ कश्यपउवाच अप्रायत्यादात्मन
स्तेदोषात्मौहूर्तिकादुत। मन्निर्देशातिचारेणदेवानांचैवहेलनात् ३७ भविष्यतस्तवाभद्रावभद्रेजाठराधमौ। लोकान्स
पालांस्त्रींश्चंडिमुहुराक्रंदयिष्यतः ३८ प्राणिनांहन्यमानानांदीनानामकृतागसां। स्त्रीणांनिगृह्यमाणानांकोपितेषु
महात्मसु ३९ तदाविश्वेश्वरः क्रुद्धोभगवान्लोकभावनः। हनिष्यत्यवतीर्यासौयथाद्रीन्शतपर्वधृक् ४० दितिरुवा
च वधंभगवतासाक्षात्सुनाभोदारबाहुना। आशासेपुत्रयोर्मह्यंमाक्रुद्धाद्ब्राह्मणात्प्रभो ४१

राधमौपुत्राधमौ। अधमत्वमुपपादयति। लोकानिति ३८ प्राणिनांहन्यमानानांनामतामकृतापराधानांस्त्रीणांनिगृह्यमाणानांसतीनांम
हापुरुषेषुकोपितेषुसत्सु ३९ शतपर्वधृक्देवेंद्रः ४० भर्त्रैवमुक्तादितिः किमाहेतितत्राह। वधमिति। सुनाभेनचक्रेणयुक्तः उदारः महा
बाहुर्यस्यसतथोक्तः उदारोमहतिख्यातइतियादवः। तेनमह्यंममाशासेइच्छामि। किंतुविशेषोस्तीत्याह। माक्रुद्धादिति ४१

ब्रह्मशापेनहतस्यकोदोषइतितत्राह। नब्रह्मेति। एतादृशः कोन्योपीतितत्राह। नभूतेति। नारकाः नरकेपच्यमानाः प्रजाः। असौब्रह्मशापदग्धः भूतभयदो
वाचशद्वार्थः ४२ सुनाभायुधात्पुत्रयोर्वधंसद्गतिमाशासइतियदुक्तंमिलषितंतत्रइतस्यनत्वमकस्यायोग्यासुरस्य। तदुक्तंविष्णुहस्तवधाच्छ्रेष्ठोभक्त
स्यान्यस्यनकचित्। तथाप्यसुरेमोहायनविविक्तंकचितक्वचिदितिइत्साशयवान्कश्यपः प्रकारांतरेणतयोः सद्गतिः स्यादितिध्वनयन्नुत्तरंवक्ति। कृतशोके
ति। कृतपापकर्मनिमित्तशोकाज्जातेनानुतापेनपश्चात्तापेनतवपुत्रस्यहिरण्यकशिपोः पुत्राणांमध्येसतांसंमतएकः पुत्रोभवितासतवपुत्रस्यसद्गतेर्हेतुः स्या
दितिशेषः। तदुक्तं। हिरण्यकशिपुश्चापिभगवन्निंदयातमइत्यादि नपुत्रमात्रात्पित्रादेः सद्गतिः किंतुनिर्वैरादिगुणविशिष्टादितिभावेनतद्गुणानाह। गायं

नब्रह्मदंडदग्धस्यनभूतभयदस्यच। नारकाश्चानुगृह्णंतियांयांयोनिमसौगतः ४२ कश्यपउवाच कृतशोकानुतापेन
सद्यः प्रत्यवमर्शनात्। भगवत्युरुमानाच्चभवेमय्यपिचादरात् ४३ पुत्रस्यैवचपुत्राणांभवितैकः सतांमतः। गास्यंतियद्यशः शुद्धंभ
गवद्यशसासमं ४४ योगैर्हेमेवदुर्वर्णंभावयिष्यंतिसाधवः। निर्वैरादिभिरात्मानंयच्छीलमनुवर्तितुं ४५

तीति। भगवद्यशोविनाभूतत्वात्सममित्युक्तं ४४ साधवोयस्यप्रह्लादस्यशीलंशमादिस्वभावमनुवर्तितुमात्मनिकर्तुंनिर्वैरादिभिर्यथाच्छितकक्कद
र्शनादिगुणैरात्मानमंतः करणंभावयिष्यंतिशमादिमत्कुर्वंतितद्दोषानपनीयकथमिवयोगैरौषध्याद्युपायैर्दुर्वर्णंदुष्टवर्णंहेमेवयथाभावयंति
। अष्टादशदोषाविरस्यस्वस्वरूपस्थितंकुर्वंतितथेत्यर्थः। अनेननिदर्शनेनात्रेदंतात्पर्यमवगंतव्यं। तथाहि। हिरण्यकशिपोर्द्वेषेतनोपसत्त्वेकः सद्ग
तियोग्यएकोन्यगतियोग्यः। अनादिभक्तिलक्षणयोग्यतौषधेनदुःसंगदोषलक्षणदुर्वर्णमपनीयपुत्रादिः सचेतनस्यसद्गतिहेतुः स्यान्नविष्णुभक्ति
विधुरस्यानोन्यतद्दुष्टमोहनार्थं। तदुक्तं। स्वतः सद्गतियोग्यस्यपुत्रादेर्हेतुताभवेत्। योग्यतानादिभक्तिः स्यादयोग्यस्यकुतोगतिरिति ४५

तवपोत्रस्य प्रह्लादस्य माहात्म्यं भगवत्प्रसादायत्तमिति भावेनाह। यत्प्रसादादिति। यस्य हरेः प्रसादात्प्रसन्नत्वे हेतुमाह। यदात्मकमिति। येनात्मा मयत्वा मिकं वशश्वद्दृक्कु सर्वदैकप्रकारज्ञानो भगवान्यस्यानन्यथा सर्वोत्तमो हरिरेतत्सदृशो न्यो नास्ति। त्वं विशिष्टया दृशा ज्ञानेन न तो ख्यते ४६ स एव पोत्रोम हात्मा स्तादृशमहिमा च तत्तस्माद्धरेरन्यत्सर्वमनित्यमसारं हीनं वेति निरूप्य विहाय नित्यस्मृतीन्वयः। महानुभावः महाप्रभावः। वैष्णवसिद्धांतम हानिष्ठयो वा। वैकुंठे नारायणे ४७ निर्वैरादिभिरित्यत्रादिशब्दोक्तानगुणानाह। अलंपट इत्यादिना। अलंपटो विरक्तः। शीलधरः शीलसमधाविति

यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकं। शश्वद्दृक्कु भगवान्यस्य तो ख्यते नन्यथा दृशा ४६ स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः। प्रवृद्धभक्त्याह्यनुभाविताशये निवेश्य वैकुंठमतद्विहास्यति ४७ अलंपटः शीलधरो गुणाकरो हृष्टः परार्थ्या व्यथिते दुःखितः। अभूतशत्रुर्जगतः शोकहर्ता नैदाघिकं तापमिवोडुराजः ४८ अंतर्बहिश्चाखिलवद्वरं तं स्वरूपे लातुप्टहीतरूपं पौत्रस्य वश्रीललनाललामं द्रष्टास्फुरत्कुंडलमंडिताननं ४९ मैत्रेय उवाच श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशं। पुत्रयोश्च वधं कृष्णा द्विदित्वासीन्महामनाः ५० इति श्रीम· भागवते महापुराणे तृतीयस्कंधे दितिकश्यपसं॰ पंचदशोऽध्यायः॥ ॥ ॥

धातोः समाधिं कुर्वाणः। गुणाकरः शमादिगुणनिधिः। व्यथितेषु दुःखितेषु परेषु दुःखितस्तत् दुःखमात्मीयं करोतीत्यर्थः। अभूतशत्रुरजातशत्रुः नैदा घिकं ग्रीष्मकालजातं ४८ अंतर्द्रास्यतीत्यनेन ब्रह्मेतरजगद्धास्यति न तु ब्रह्मेति ध्वनितमर्थं स्पष्टयति। अंतर्बहिरिति। श्रियो ललनायाः श्रियो ललाम तिलकस्थानीयं द्रष्टा द्रक्ष्यति ४९ एतत्कृत्वा दितिः किमकारीति तत्राह। श्रुत्वेति। अमोदतेत्यनेन दितिरपि सद्गतिं प्राप्तेति निरूपितमिति ५० इ ति तृतीयस्कंधे पंचदशोऽध्यायः॥ ॥

जयविजययोः शापमोक्षयोः प्रदानरूपसनकादिमहिम्नो वर्णनेन तेषां भगवत्समाधिसमुद्रेकसमुद्भूतमाहात्म्यं निरूप्य चरितमहिम्ना हरिरिति निरूप्य ते स्मिन्न आयतत्वादो दित्या पुनः किमकारीति प्रश्नं परिहरति। प्राजापत्यमिति। प्रजापतेः कश्यपस्येदमिति यथाविहितप्रत्ययः परेषां तेजस्विनां तेजो हंतीति स्पर्धातिधुनोतीति परतेजोहनं। असुरार्द्दनाद्देवैर्धर्षशंकमाना १ किमतस्तत्राह लोक इति। तेन गर्भेण लोके हतालोके अपहतप्रकाशे सतितत्परि

मैत्रेय उवाच प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः। दधार वर्षाणि शतं शंकमाना सुरार्द्दनात् १ लोके तेन हतालोके लोकपाला हतौजसः। न्यवेदयन् विश्वसृजे ध्वांतव्यतिकरं दिशां २ देवा ऊचुः तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशं। न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ३ देवदेव जगद्धातर्लोकनाथशिखामणे। परेषामपरेषां त्वं भूतानामसि भाववि त् ४

हारार्थहतौजसो नष्टसामर्थ्याः इंद्रादिलोकपालाः दिशां ध्वांतव्यतिकरमंधकारेण प्रभवं व्यत्ययमुपद्रवमित्यर्थः २ यद्येन संविग्नाः श्रांता वयं एतत्तमो वे त्थ जानासि। तत्र निमित्तं वदंति। न हीति। कालादिष्टवधामेना ज्ञानं स्यादित्यत उक्तं कालेनेति। अस्पृष्टमव्यवहितं ज्ञानवर्त्म यस्य सतथा तस्याप्रतिब द्धज्ञानमार्गस्येत्यर्थः ३ एतदेव विवृणोति। देवदेवेति परेषामुत्तमानामपरेषामधमानां अतीतानागतानां वा भूतानां भाववित् हृद्गतज्ञोसीति यद तो व्यक्तं जानासीति भावः ४

भा॰ त॰
९२

सर्वस्मात्स्वगुणातिरेकवशादज्ञननीतिमत्वात्तत्पूर्वकं स्तुवंति ॥ नम इति ॥ ज्ञानवीर्याय अप्रतिबद्धज्ञानायतदेव विशदयति । माययेति । माययाश्री
नारायणानुगृहीतप्रज्ञाबलेनेदं विश्वं उपेयुषे ज्ञातवते रज आदिगुणेन ज्ञानप्रतिबंधः संभाव्यत इत्यत उक्तं गृहीतेति हर्यां ज्ञयानुपद्रावकत्वेनगृ
हीतरज आदिगुणविशेषाय इतोपि ज्ञानवीर्यतेवेति भावेन स्तुवंति । नमस्त इति व्यक्तं ब्रह्मांडं तस्य योनये कारणाय पृथग्जनेषु व्यक्त गुणब्रह्मांडस्रज्

नमो विज्ञानवीर्याय माययेदमुपेयुषे । गृहीतगुण
भेदाय नमस्ते व्यक्तयोनये ५ ॥ ॥

राम
९२

नस्यातिबहलज्ञानसापेक्षत्वात्तस्य सृष्टुर्ब्रह्मणोतिशयितज्ञानमस्तीति किं वक्तव्यमिति निरूपितं । सर्वेषां ज्ञानादिगुणप्रतिबंधकारज आदिगु
णाः कथमस्य न विरोधकाः हरिप्रसादादिति चेत् । तत्प्रसादसंभवोपि कथमित्यतो वाह । अव्यक्तेति । अव्यक्तं ब्रह्म तत् योनिः कारणं यस्य स तथा तस्मै । यो
ब्रह्माणं विदधातीति श्रुतेः । तेन ब्रह्म हृदयप्रादिकवद् इति व अतः स्वपुत्रत्वेन सर्वानुग्रहपात्रत्वान्न तस्य सत्त्वादिगुणाः परिपंथिन इति ५

यस्य यदेतीदं तत्त्वाप्रयेतेन तथानुष्ठेयमिति मन्वानादिति गर्भनिमित्तिमिरुपाप्तपराभवपरिहरणाय तादृशगुणविशिष्टत्वेन स्तुवंतीत्याह । यइ
ति । ये पुरुषा अनन्यभावेन हरेरस्य स्वतंत्रो नास्तीति ज्ञानदृढीकृतभक्त्या त्वां भावयंति निरंतरोपासनया वशीकुर्वंति तेषां पुंसां न कुतश्चित्पराभव
इत्यन्वयः । पराभवकर्तॄणां त्वत्स्पृष्टजीवांतर्गतत्वेन त्वन्नियतत्वान्नेता वकानुद्युंजतीति भावेनोक्तं । आत्मभावनमिति । आत्मनो जीवान्भावयत्यु
त्पादयतीत्यात्मभावनस्तं । आत्मनः परमात्मनो भावनया निरंतरोपासनया प्रहृष्टतदनुग्रहस्य तवासाध्यं नास्तीत्यतो वात्मभावनमिति । आत्मनो भा
वनं यस्य स तथा तेन केवलं जीवजातं त्वदुत्पन्नत्वेन त्वदधीनं किंतु चेतनाचेतनात्मकं सर्वमपि त्वय्याश्रितमित्याद्यरित्याह ॥ आत्मनीति । त्वमपि

ये त्वानन्येन भावेन भावयंत्यात्मभावनं । आत्मनि प्रोतभुवनं परं सदसदात्मकं ६ तेषां सुपक्वयोगानां
जितश्वासेंद्रियात्मनां । लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ७

जीवेष्वेक इति भ्रमदाशंकां निवारयति । परमिति । परं सर्वोत्तमं । अनेन जीवोत्पादकत्वेनुपपत्तिः परिहृता । महदादिकार्यकारणव्यापित्वेन स्वेन्निम
त्वं युक्तमिति भावेनोक्तं । सदसदात्मकमिति । न केवलं हनलक्षदेवदत्तवत्जगद्धारकत्वमस्य किं त्वेतद्वहिर्व्यापित्वेनापीत्यतो वोक्तं सदसदात्म
कमिति । ततो विशेषं प्रतिपद्योत्याद्दिहितीये सर्वव्याप्तिमत्व मुक्तं । मुक्तामुक्तप्रपंचस्य सुखादिदातृत्वादुक्तं युक्तमित्यतो वेत्युक्तं । सदसदात्मकमि
ति । संत आत्मानो मुक्ता असंत आत्मानो मुक्ताः एषामुत्तयेषामपि कं सुखं यस्मात्स तथोक्तस्तं । विशिष्टध्यानमन स एवैवं विधफलवत्वं न तु तन्मात्र
स्यत न्यायेन योगादीनां परिपाकाभावेन पुष्मत्प्रसादानुत्पत्तिरिति भावेन तान्विशिंषतीत्याह ॥ सुपक्वेति । अष्टांगलक्षणो योगः ७

भा·तृ·
९३

विधिनिषेधलक्षणया वेदवाचा प्रवर्त्यमानाः प्रजाः स्वकर्मानुसारेण सुखादिकमश्नंति। तत्रायं कुतोऽपयुज्यते इत्याशंक्य तया त्वदीयया निय ताः प्रकृष्टप्रकारेण त्वत्पूजां कुर्वंति तदनुसारेण भवदानुकूलफलं च प्रयच्छंतीत्यतस्त्वं सर्वोत्तम इत्याह। यस्येति। यस्य ते वचनात्तागो ढंभनाय रचितया दीर्घया रज्ज्वा यंत्रिता बद्धाः पंत्रबद्धनद्विनिधानुः हरंति नयंति मुख्यात्मने सर्वप्रयोजकाय मुख्याय ८ भवंतं महत्ताप्रसंभे तामसवनाभिप्रायः कृष्टस्तस्मात्कृपया हासत्वमिति। सइति तस्ल्द्दृष्टेन पूर्वोक्तवैशिष्ट्यं स्मारयंति। दितिगर्भनिमित्तं तिमिरेण लुप्तसंध्यादिकर्मणां। तदर्थमयमेवोपाय इति विज्ञापयंती त्याह। अदभ्रेति। अदभ्रा भूर्णा दया यस्यां तया दृष्ट्यापन्नानस्मानीक्षितुं द्रष्टुं ९ किमिदानीं भयनिमित्तमिति तद्विज्ञापयंतीत्याह। एषइति। काश्यपं कश्यप

यस्य वाचा प्रजाः सर्वाः गावस्तंत्येव यंत्रिताः। हरंति बलिमायत्तास्तस्मै मुख्यात्मने नमः ८ सत्वं विधत्स्व शं भूमंस्तमसा लुप्त कर्मणां। अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुं ९ एषदेव दितेर्गर्भ ओजः काश्यपमर्पितं। दिशस्तिमिरयन्सर्वा एधते ग्निरिवैधसि १० मैत्रेयउवाच सप्रहस्य महाबाहो भगवान् शब्दगोचरः। प्रत्याचष्टात्मभूर्देवान्प्रीणन् रुचिरया गि रा ११ ब्रह्मोवाच मानसा मे सुता युष्मत्पूर्वजाः सनकादयः। चेरुर्विहायसा लोकाल्लोकेषु विगतस्पृहाः १२

स्य वित्द्यमानं। दित्यामर्पितमोजस्तेजः। एषगर्भः सर्वा दिशस्तिमिरयन्नंधकारयन् लोकप्रदीपानां सूर्यादितेजसां तेजो वष्टंभेन दिशामंधका रितत्वमतोऽस्य परिहारो दृष्टव्य इति यावत् १० स प्रज्ञाभिगमं सर्वतोऽतेषामुत्तरं वक्ति जानीते ब्रह्मेति मैत्रेयो विदुरं वक्ति। सप्रहस्येति। शब्दगोच रः मिथो व्यवहारविषयः वेदवेद्यो वा प्रीणन्प्रीणयन् प्रत्याचष्ट भवदुक्तस्योत्तरं वक्ष्यामीत्याह॥ ११॥ स्व वचन मध्ये तत्प्रश्नो मा भूदिति मद्यानु आदित एवं वक्तुं प्रारभते। मानसाइति। मम मनसो जाताः। अंतरिक्षादिलोकान्किं प्रयोजनं वंत इत्यत आह। लोकेष्विति १२

राम
९३

३५२

ततः किमत आह तइति॥ विकुंठारव्यनिलयं स्थानं १३ नितरां लीयते स्मिन्सर्वमिति मूलागारं च निवास्यति। वसंतीति। येनित्यमनिमित्तेन स्तः विष्णुर्निमित्तं यस्य सो निमित्त तेन विष्णुपीत्युद्ध्या क्रियमाणेनेत्यर्थः। धर्मेण हरिमाराधयंत्स्य यत्र वसंति तत्र स्वयं विकुंठवन्मूर्तिर्येषां ते तथोक्ताः सारूप्यभाजइत्यर्थः १४ यत्र लोके वृषः श्रेष्ठः आद्यः सर्वरूपजीवो भगवान् स्वधर्मगोमूर्तिमद्विरूपेतः शब्दगोचरः अनंतानां मूर्तिधराणां वेदानां विषयः पुमान्नारायण विरजं हरीकृतरजोगुणं। सत्वं बलज्ञा नसमाहारात्मकमवष्टभ्यास्ते स्वानां नो यदस्मितत्सर्वं मृडयन्सुखयन्नास्त इत्यन्वयः १५ कैवल्यं ब्रह्म। कैवल्यममृतमदरं ब्रह्मेत्यभिधानं। ज्ञानपुण्यसाध्यत्वात्रै श्रेयसं १६ सललनाः ललनाभिः स्त्रीभिः सहिताः। वैमानिकाः विमानेन चरंतः पुरुषाः लोकस्य जनस्य शमलक्षपणानि पापनाशनानि भर्तुर्हरेश्चरिता

तएकदा भगवतो वैकुंठस्यामलात्मनः। ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं १३ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः। येनित्यमनिमित्तेन धर्मेणाराधयन्हरिं १४ यत्र चाद्यः पुमानास्ते भगवान् शब्दगोचरः। सत्वं विष्टभ्य विरजं स्वानां नो मृड यन्वृषः १५ यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः। सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् १६ वैमानिकाः सललना श्चरितानि यत्र गायंति लोकशमलक्षपणानि भर्तुः। अंतर्जलेनुविकसन्मधुमाधवीनां गंधेन खंडितधियोप्यनिलं क्षिपंतः १७

नि यत्र गायंति। ननु तद्गानं वदनव्यादानेन घटते तत्पुष्पसौरभ्यसमावेशाद्वि नेंद्रियज्ञो तासंभवादित्याशंक्य परिहरति। अंतर्जलइति। अत्रांतः शब्दः समीपवर्ति नः। जलसमीपे तटे विलसंती नां मधौ वसंते विद्यमानानां माधवीनां वासंतीलतापुष्पाणां गंधेन खंडितधियो विक्षुब्धबुद्धयो नितरां गंधनापकं वायुं क्षिपंतः परिहरंतः तुशब्देन भेदवाचिनामुक्तामुक्तायां तुल्ययसंति। तत्र मुक्तानां क्वचिदपि पुष्पगंधवायुनेंद्रियक्षोभलक्षणो धर्मो नास्ति अमुक्तानां क्वचित्स्या दिति तात्पर्यं निरूप्यते। मुक्ता अधिकारस्था इति द्विधा वैकुंठलोकगाः। अमुक्तानामयं धर्मः क्वापि न मुक्तानां क्वचिद्वेदिति वचनात् १७

तत्रत्यानां भक्तानां हरेश्चरणारविंदार्चनावसरे करात्किंतत्राह। पारावतेत्यादिना। भृंगाधिपे हरिकथामनुगायमाने सति मकरसमाहारेणानुसुप्तकोकिलतिष्ठान मनुकुर्वद्भिः पारावतादिपक्षिगणैः विरमात्पात्रिमात्रादिस्वरेणकोलाहलेकलकलशब्दोयो कूजने विरचिते सत्ययं समयइतिमत्वा १८ यस्मिन्वैकुंठेतुलसी दलेमंदारादिपुष्पराशौचसत्त्वेहरेरंघ्रिमूलेर्चिते सतितुलसिकाभरणेनतुलसीमालाधारिणाहरिणान्यपुष्पदलेमपहायहृष्टेनतुलसीदलसुहृत्यतदंघ्रेघ्रा णेनार्चितेसंभाविते सति मंदारादयाः सुमनसोमंदारादिशब्दवाच्याःपुष्पदेवतास्तस्याःकुलस्यास्तपोबहुमानयंति। गंधार्थंकृतमितिशेषः। तिरश्चांतास्थावराश्च सर्वेज्ञानाद्विकुंठगाः। अमुक्तामुक्तिमायांतिनियमात्कर्मणःस्वपदइतिवचनात्ज्ञानान्मुक्तत्वान्नतत्समयज्ञानंगानंचशंसनंचभृंगाधिपादीनांतिर्यक्त्वेमंदारा

पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः। कोलाहलोविरमतेचिरमात्रमुच्चैर्भृंगाधिपेहरिकथा मनुगायमाने १८ मंदारकुंदकुरबोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः। गंधेर्चितेतुलसिकाभरणेनतस्या यस्मिंस्तपःसुमनसोबहुमानयंति १९ यत्संकुलंहरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः। येषांबृहत्क टितटाःस्मितशोभिमुख्यःकृष्णात्मनांनरजआदधुरुत्स्मयाद्यैः २०

दीनांस्थावराणांचयुज्यते। यद्वातुलसिकाभरणेनतुलसिकाभरणेकृतेसतिगंधार्थंतयोबहुमानयंतिविंधइतितास्थ्यैःसप्तमी। ऊर्णकरवीरपुष्पंना गोनागकेसरःपुन्नागःसुरकर्णिकारः १९ बृहंतःकटितटाःश्रोणीभागायासांताःतथोक्ताःस्मितशोभिमुख्यःस्मितेनशोभमानवक्त्राःस्त्रियउत्स्म याद्यैःमंदहासश्रृंगारादिरसविशेषैःकृष्णेहरावात्मामनोयेषांतेतथातेषांयेषांरजोरागंनआदधुःनाकुर्वन्येषांविमानैर्दिव्यैर्वैकुंठस्थानंसंकुलंव्याप्तं।मंद स्मितहासाद्यैःरसविशेषैःविरुतेनसुरूपन्यायेनविमानानिविशिनष्टि।हरीति।हरिपदयोरानतिमात्रेणदृष्टैःकृतार्थैर्वयमितिभावबद्धिः।यद्वाहरिपदयोरानतिमात्रत्वेसंवरण गात्रभयाजनैःवैदूर्यपद्मरागमरकतमिंद्रनीलहेमसुवर्णमयैर्विराजितैः २०

वैकुंठस्थितोधिकंमाहात्म्यंकिंवक्तव्यमितिभावेनाह॥ श्रीरिति।। अन्येषामुपासकानामस्मदादीनामुपासनादिप्रयत्नायस्याअनुग्रहणेऽनुग्रहार्थंस्पृह। साऽनूपुरालंकृतंचरणारविंदंक्वणयतीशब्दयंतीजननादिसमस्तदोषैर्मुक्तारूपिणीसौंदर्यसागरमूर्तिःश्रीर्यत्रवैकुंठेहरिवेश्मनिस्फुटंउपेतहेम्निसुव र्णखचितेस्फटिककुड्येलीलांबुजेनावकरधूननसाधनस्थानीयेनसंमार्जयंतीवसंलक्ष्यतइत्यन्वयः। कुंड्यंगृहभित्तिः २१ अंगस्वीयतत्पत्नवेष्टाभिर्हा

श्रीरूपिणीक्वणयतीचरणारविंदंलीलांबुजेनहरिसद्मनिमुक्तदोषा। संलक्ष्यतेस्फटिककुड्यउपेतहेम्निसंमार्जती वयस्त्वनुग्रहणेन्ययत्नाः २१ वापीषुविद्रुमतटास्वमलामृताप्सुप्रेष्यान्वितानिजवनेतुलसीभिरीशं। अभ्यर्चतीस्व लकमुन्नसमीक्ष्यवक्त्रमुच्छेषितंभगवतेत्यमतांगयच्छ्रीः २२

सीभिरन्विताानिजवनेकमलवनेतुलसीभिरीशमभ्यर्चतीरूपिणीसौंदर्यसागरमूर्तिःश्रीरमृतामलाप्सुविद्रुमरत्नबद्धतट[illegible]सुसुखावतारतीरकूलेषुप्रति बिंबितंस्वलकंशोभनकुंतलंउन्नसंकिंचिदुन्नतनासिकंवक्त्रमुद्वीक्ष्यहरिणोदमुच्छेषितंचुंबितमित्यमतेत्यन्वयः २२

भा॰ तृ॰
९५

स्वर्गादीनामप्युपरिगम्यत्वात्तत्प्रभावात्ततोतिशयमाहात्म्यमस्तीतिभावेनाह। यन्नव्रजंतीति। अघभिदः संसारदुःखहेतुभूतपापनाशिनः कृष्णस्य रचनानां बालक्रीडादिचरितानां जगत्सृष्ट्यादिकर्मणां वा अनुवादो येषां ते अरचनानुवादाः अप्सुरायतस्थानं नव्रजंति रचनानुवादः श्रवणमननादिलक्षणः येन्यविषयाः मतिघ्नीः यथार्थज्ञाननाशनीः कुकथाः कुत्सितरतिवर्णनादिरूपाः कथाः शृण्वंतितेयत्स्थानंनयांति। तासांक

यन्नव्रजंत्यघभिदोरचनानुवादाःच्छृण्वंतियेन्यविषयाःकुकथामति
घ्नीः। यास्तुश्रुताहतभगैर्नृभिरात्तवीर्यास्तांस्तान्क्षिपंत्यशरणेषुतमस्सु
हंत २३

थानामेतत्स्थानप्राप्तिप्रतिबंधकत्वमेवनफलंकिंतुतमःप्रापकफलमपीत्याह। यास्त्विति। हतभगैर्विनष्टभद्रादिभाग्यैर्नृभिःश्रुताःयाःकथास्ता
अशरणेषुनिराश्रयेषुतमःसुक्षिपंति। आत्तवीर्याःतमःपातनेबद्धप्राप्तसेनसमुत्रद्धशक्तयः हंतअहोकष्टंतुशब्दोऽधःपतितानांतारतम्यद्योतकः २३

राम
९५

केचित्ज्ञानसाधनयोग्यंमनुष्ययोनिंप्राप्यापितत्साधनंनकुर्वंति। तत्रकिंकारणमित्याशंक्यासुरत्वमितिभावेनाह येभ्यर्थितामिति। येपुरुषानोस्माकमभ्य
र्थितांज्ञानादिप्राप्तियोग्यत्वादाकांक्षितांनृगतिंमनुष्ययोनिंप्राप्यअत्रअस्यांनृगतौसहधर्मंधर्मेणसहवर्तमानंतत्वविषयंज्ञानंचनप्राप्नुवंति आसुरत्वप्रेरिताःविततयामायया बंधकत्वप्राधर्मज्ञानप्राप्तियोग्यत्वेनसंमोहिताः नभगवतआराधनंकुर्वंति। नवितरंत्यर्थिभ्योनोपदिशंत्यतोधर्मज्ञानादिवर्जिताअसुरत्वा
नेनमनुष्याइतीममर्थंद्योतयतिनचित्पनेन २४ सतोदेवप्रकृतयएवभगवतआराधनंकृत्वातत्ज्ञा[illegible]नयत्रस्थितंहरिंप्राप्नुवंतीत्याह। यच्चेति। तेयत्रनो

येभ्यर्थितामपिचनोनृगतिंप्रपन्नाज्ञानंचतत्वविषयंसहधर्मयत्रानाराधनंभगवतोवितरंत्यमुष्यसंमोहिताविततयानुमाययाते २४ यच्चव्रजंत्यनिमिषामृषभानुवृत्त्यादूरेयमाह्युपरिनःस्पृहणीयशीलाः। भर्तुर्मिथःसुय
शसःकथनानुरागवैक्लव्यबाष्पकलयापुलकीकृतांगाः २५

राम

स्माकमुपरिस्थितवैकुंठेस्थितंहरिंप्रयांतीत्यन्वयः। येअनिमिषांदेवानामृषभस्यस्वामिनोहरेरनुवृत्त्यानिरंतरसेवयादूरेयमाः दूरीकृतयमलोकाःअ
तएवसर्वैःस्पृहणीयशीलाः सुयशसोभर्तुर्हरेर्गुणगणानांमिथःकथनेयोनुरागःतस्मादुत्पन्नंयद्वैक्लव्यंपारवश्यंतन्निमित्तेनजातायाबाष्पकलानंदा
श्रुधारातयापुलकीकृतान्यंगानिशरीरावयवायेषांतेतथोक्ताः सुयशसइतिभागवतानांविशेषणंवावैकुंठादप्युपरिशिवलोकइतिकेचिद्वदं
ति। तस्याप्रकृतत्वादनुपपन्नत्वादितिहेतुद्वयंहीत्यनेनसूचयति २५

प्रकृतमनुसरति। तद्विश्वगुर्वधिकृतमिति। अथमुनयः परां मुदमापुरित्यन्वयः। भगवत्समाधिनानित्यत्वप्राप्तानां मुनीनां कालावित्क्रमो दृश्यते किं कारण
मुच्यते। तत् विकुंठस्थानमुपेत्य कीदृशं उतामृतत्वस्येशानो यदन्नेनातिरोहतीत्यादिना योमुक्तामुक्तप्रपंचाधारत्वेन श्रुतः सवासौ विश्वगुरुत्वेन मुक्ता
मुक्तप्रपंचगुरुणा हरिणाधिकृतं विशेषतः स्वामित्वेनाभिमतं। भुवनशब्देन तत्स्थाः पुरुषालक्ष्यंते तैः शिवलोकोत्तमतयावंद्यं दिव्यमप्राकृतं विवि

तद्विश्वगुर्वधिकृतंभुवनैकवंद्यंदिव्यंविचित्रविबुधाग्र्यविमानशोचिः। आपुः परांमुदमपूर्वमुपेत्ययोगमायाब
लेनमुनयस्तदथोविकुंठं २६ श्रीब्रह्मोवाच तस्मिन्नतीत्यमुनयः षडसज्जमानाः कक्षाः समानवयसावथ
सप्तमायां। देवावचक्षतगृहीतगदौपरार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ २७

चाणि नानावर्णानि विबुधाग्र्याणां विमानानि शोचींषि यस्मिन्। दीपयंतीति विचित्रविबुधाग्र्यविमानशोचिः। शुचिर्दीप्ताविति धातुः। अपूर्वं पूर्वमदृष्टं यो
गमायाबलेन भगवदुपासनात्मज्ञानबलेन प्राप्येत्यर्थः २६ मुदमुपेत्य बहिरेवातिष्ठन् उतांतरा विशन् आविश्य च किंचक्रुरिति तत्राह॥ तस्मिन्निति।
तस्मिन्वैकुंठे षट् कक्षाः गोपुरद्वाराणि अतीत्य तत्रासज्यमानाः अनिवार्यमाणाः सप्तमायां कक्षायां स्थितौ देवौ अवचक्षत अपश्यन्नित्यन्वयः। केयूरादिभिर्वि
टंकावलंकृतौ वेषौ ययोस्तौ तथोक्तौ २७

तयोर्भर्विवर्णयति। मत्तेति। असितानां श्यामानां चतुष्टयानां बाहूनां मध्ये उरसि विन्यस्तया मत्ता द्विरेफा भृंगा यस्यां सा सा मत्तद्विरेफा वनमालिका व
नमाला तया निवीतौ परिहितौ कुटिलया वक्रया वक्रस्थितया भ्रुवा सह स्फुटं निर्गतेन रक्तेन ईक्षणेन रक्तांतकटाक्षनिरीक्षणेन मनाक् किंचित् विभ्र
संक्षोभं दधानौ अनुसंधानं कुर्वतो अंतः प्रविशतो निरुध्य तस्थतुः जनान् ज्ञात्वा तिष्ठत इत्यर्थः २८ येमुनयः सर्वत्र चक्षुः स्वस्वतंत्रस्य हरेर्द्वीपान

मत्तद्विरेफवनमालिकयानिवीतौविन्यस्तयासितचतुष्टयबाहुमध्ये। वक्रेभ्रुवाकुटिलयास्फुटनिर्गतेनरक्तेक्षणे
नचमनागभसंदधानौ २८ द्वार्यतयोः प्रविविशुर्मिषतोरपृष्ट्वापूर्वायथापुरटवज्रकपाटिकायाः। सर्वत्र
तेह्यविषयामुनयः स्वदृष्ट्यायेसंचरंत्यविहताविगताभिशंकाः २९ राम १

र्यामित्वदर्शिनेनाविषयाः निस्पृहा अतएव विगताभिशंकाः अविहताः अप्रतिहतगतयः सर्वत्र संचरंति हि यस्मात् तस्मात् ते मुनयः तावपृष्ट्वा मि
षतोः पश्यतो सतोः तयोर्द्वारि तथा प्रविविशुरित्यन्वयः। यथा पूर्वाः षट् द्वारः प्रविविशुः निःशंकतया कीदृशी द्वारि या आरपुरटवज्रकपा
टिका आरेणापि नलेनालंकृतं पुरटं यस्याः सा आरपुरटा वज्रशिलया कृता कपाटिका आरपुरटवज्रकपाटिका यासां तास्तथा लोहमय्या रक्
तस्या पित्तलं वा रसक्रियामितियादवः २९

ततः किमभूदिति तत्राह। तानिति। वातो वायुरेव रशना वस्त्रं येषां ते तथा तान् कुमारान् निःसुक्तं विहृत्येति। दशार्द्धवयस इति। दृष्टायं चवर्षान् विदितात्मतत्त्वान् ज्ञातपरमात्मस्वरूपान् वेत्रेण यष्ट्यास्खलयतां प्रवेशप्रतिरोधं वक्रतुः। अतदर्हणान् स्खलनायोग्यान् तेजः तेषां प्रभावं विहस्यावगणय्य तत्र निमित्तमाह। भगवदिति। भगवतो हरेः प्रतिकूलं विरुद्धं शीलं ययोस्तौ तथा तौ जयस्य विजयस्यापि कदाचिद् ब्रह्मशापतः कृष्णावतारपर्यंतं प्राप्ति

तान्वीक्ष्य वातरशनांश्चतुरः कुमारान् वृद्धान् दशार्द्धवयसो विदितात्मतत्त्वान्। वेत्रेण चास्खलयतामतदर्हणांस्तौ
तेजो विहस्य भगवत्प्रतिकूलशीलौ ३० ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रति
हारपाभ्यां। ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ३१

कूल्यं च जायत इति वचनेन शापनिमित्तं प्राप्तिरूल्पसावधिकं चेति ज्ञापयतो। अन्यथा तयोस्तत्रावस्थानमेव न युज्यते रजआद्यभावसोक्तत्वात्।
३०॥ स्वप्रदंडत्वात् निषिद्धास्ते तूष्णीं यथागतं ययुः किं तत्राह। ताभ्यामिति। सुष्ठु अर्हत्तमाः पूज्यतमाः सुहृत्तमस्य हरेर्दिदृक्षितस्य दर्शनेच्छायाभं
गो विघ्ने सति ईषत्कामानुजेन अल्पकोपेनोपप्लुतान्यतिकलुषितान्यक्षीणि येषां ते तथोक्ताः। प्रतिहारपाभ्यां द्वारपालाभ्यां ताभ्यामनिमिषेषु
देवेषु मिषत्सु पश्यत्सु निषिद्ध्यमाना ऊचुरित्यन्वयः ३१

एवं रोषमुत्पाद्य तद्योग्यं दंडं कर्तुमुपक्रमंते। तद्वाइति। मंदधी भ्यां कपटबुद्धिभ्यां युवाभ्यामयुष्य विकुंठभर्तुर्मूलरूपस्य परं पश्चाद्दस्यावतारांतर्यामिरूपस्य
चयद्भेददर्शनं तत्कर्तुं न युक्तमिति धीमहि चिंतयामः। न घुवाभ्यां कृतमतो तत्स्वभावदृष्ट्या भेददर्शनेन इतो वैकुंठलोकाद्यन्नयेषु त्रिषु त्रिमे त्रयो स्य हरेरिपवः सु
ः तान् पापीयसोऽतिपापात् जन्मयोग्यान् लोकान् देहान् व्रजतं इत्यन्वयः। त्रीनासुरान् देहान् यथा तमित्यर्थः। वाइत्यनेन यथा दक्षं दुर्गं हृष्टपर्वते तु विधाव

तद्वामुष्य परमस्य विकुंठभर्तुः कर्तुं न युक्तमिति धीमहि मंदधीभ्यां। लोकानितो व्रजतमंतरभावदृष्ट्या पापी
यसस्त्रय इमे रिपवोऽस्य यत्र ३४ तेषामिती रितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः। सद्यो
हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ३५ राम

तीत्यादिस्मृतिं प्रमाणयति ३४ स्वतो जयविजयो स चेतना विनिश्चिनयति। तेषामिति। तावुभौ हरेरनुचरौ जयविजयौ उरु बहु बिभ्यतः इत्यन्वयः। ब्रह्मास्त्रा
द्यस्त्रपूगैरनिवारणं प्रतिषेद्धुमशक्यं घोरं तेषामितीरितं ब्रह्मदंडं ब्रह्मशापमवधार्य हृदि कृत्वा किं च ते षां पादौ गृह्णीत इति तत्पादग्रहावपततां भूमावि
ति शेषः। अतिकातरेणेति समयातिरेकं दर्शयति। सद्य इति निर्दोषत्वं ३५ श्रीराम राम॥ ॥ ॥४॥ ॥

पादयोः पतित्वा ताभ्यां पुनः किं कृतमत्राह। भूयानिति। हे वनुर्थाश्रमशिखामणयः भगवद्भिः अस्मत्कृतादपराधाद्धेतोः भूयान्महान्दंडो कारि युक्त एवाय मिति ब्रुवाते॥ य इति। योदंडो नावावयोः न केवलं युष्मदपराधमेव हरति किंत्वशेषं यथा तथा सुरहेलनं श्रीब्रह्मादिदेवावज्ञानमपि हरेत हर्तुं समर्थो भवति। तत्रेदं भगवतः प्रार्थयावहे। नावावयोरिह वैकुंठे स्थितयोः शिनो वो युष्माकमनुतापकलया पश्चात्तापलेशेन पुनः पूर्ववत् भगवत्स्मृतिघ्नो भगवतो यथास्वरूपज्ञाननाशको मोहो मा भवेत्मा भूत् कीदृशयोः युष्मच्छापेनाधोधः अधोलोकादप्यधरलोकमासुरं व्रजतो

भूयानघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषं। मा वोनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः ३६ एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः। तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः ३७

तोरंशेनेति शेषः ३६ जयविजययोः सनकादीनां सह्लापो हरेः कर्णनाडितः किं नाभूदत्राह॥ एवमिति। द्वयोरप्यंशांशिविवक्षया बहुत्वात्स्वाना मिति बहुवचनं। एवं स्वानां स्वपार्षदानां सत्सु सनकादिष्वतिक्रमं गमनप्रतिघातलक्षणमपराधं निशम्य निलयात्तत्सुकृच्छानात्तत्र देवतस्मिन् सप्तमकक्ष्यास्थाने स्थितां स्तान्प्रयावित्यन्वयः। स्वानां स्वभक्तानां सनकादीनां सदतिक्रमे विद्यमानमपराधं इति वा। आर्याणां ज्ञानिनां हृद्यो हृदयंगमः भगवदागमनं सनकादीनां पुण्यपाकं सूचयति। परमेति। ॥३७॥ ॥

कोधाकुलितनेत्रत्वाद्धितं न किं त्वहितमेव तत्कीदृशमभूदिति तत्राह। कोवामिति। भगवत उच्चैः परिचर्यया सम्पन्नतत्पूजादिसेवया इह वैकुंठे त्वयोर्युष्मत्स्थाने मे त्यत तद्धर्मिणां तत्स्पृहे रैर्ष्यानादिधर्मवतां सतां भागवतानामपि मध्ये कः पुमान् विषमस्वभावः शत्रुरयं इदं मित्रमिति तामसशीलः वा इत्यनेनात्यतानुपपत्तिः सूचयति भगवद्विषये शंकनीयो ऽस्तीति भगवन्निषेधः क्रियत इति तत्राह। तस्मिन्निति। कुहकयोर्मिथ्यादृष्टिमतो र्युवयो रात्मवत् यथात्मा परिशंकनीयस्तथेह तस्मिन् भगवति विषये परिशंकनीयो विरुद्धस्वभावः को

कोवामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणामपि सतां विषमस्वभावः। तस्मिन्प्रशांतपुरुषे गतविग्रहे वां कोवात्मवत्कुहकयोः परिशंकनीयः ३२

वास्मिन्कोपीत्यन्वयः। कुतो नास्तीत्यत आह। प्रशांतेति। लोके अप्रशांतस्य परेण सह द्वोत्पादितवैरस्य च शंकनीयो दृष्टस्तथा नायं पुरुषेषु प्रशांतत्वात् रक्तत्वादित्तवैरत्वाच्च। किंच प्रकृष्टानंदस्वरूपत्वाद नुपहतैश्वर्यादिषड्गुणपूर्णत्वात्सर्वशरीरेष्वगतत्वादप्रतिहतत्वात् प्राकृतशरीरत्वाच्चातोस्मिन्निषेधोव्यर्थ इत्यर्थः ३२ राम राम

आपादितरोषएवपुरुषोद्वयोरप्यइतितयोर्दोषित्वमुपपादयति। नहीति। इहास्मिन्लोके स्थिताधीराज्ञानिनः समस्तस्यमुक्तामुक्तप्रपंच स्यकुक्षयःशरीरकुहराणियस्यावासभूतानि ससमस्तकुक्षिः तस्मिन्यद्वासमस्तकुक्षोस्थितेभगवतिअंतरंछिद्रंभेदंनपश्यंतिकिंतुयत्रय स्मिन्लोकेनभसिमहाकाशेनभोघटाकाशमिवात्मानंस्वात्मांतस्थंभगवद्रूपमात्मनिव्याप्तेभगवद्रूपेपश्यंतिततयोरेवैनेत्यर्थः। ततः किमत्राह। युवयोरिति। एवंज्ञानिप्रत्यक्षेजाग्रतिसुरलिंगिनोर्द्वयोर्वलक्षणवतोर्युवयोर्मनसायतोभेददर्शनाद्दृष्यभेदस्यदुष्टः वुंसः सर्वत्रदु

न ह्यंतरंभगवतीहसमस्तकुक्षावात्मानमात्मनिनभोनभसीवधीराः। पश्यंतियत्रयुवयोःसुरलिं गिनोःकिंव्युत्पादितंह्युदरभेदिभयंयतोस्य ३३ राम राम

स्वप्राप्तिरूपंभयंभवति। ताद्दशसुदरभेदिउक्ततात्रादोषायस्मात्तदुदरंब्रह्मतस्यभेददर्शननिमित्तंभयंयुत्पादितंकिं। प्रतिशरीरमंतर्यामि त्वेनस्थितस्यानयस्यहरेरन्यस्माद्भयमस्तीतिबुद्धिःकृताअन्यथास्यनिवारणंकिमितिकृतं। हिशब्देनतत्वानुभवसिद्धंदर्शयति। यद्वास र्वोदरगतंब्रह्मयेभेदेनविवक्षते। सर्वज्ञापिसंयंतेषांमृत्युनांतमएवचेतिवाक्यंप्रमाणयति। युवयोरितित्वतीयार्थेषष्ठी।। तयातद्वारपाल त्वेनस्वस्वामिसंबंधस्यस्वानुत्तवसिद्धत्वेनतदपलापेनसर्वापलापप्रसंगात्। भगवदपराधएवकृतइतिद्योतयंति ३३

रोषकलुषितशेमुषित्वात्भृत्यापराधंततस्वामिन्यारोप्यतस्मिन्नागतेतेमुनयस्मिर्यग्दृष्ट्योभूवत्किमत्राह। तंत्विति। तुशब्दोरोषस्मात्कानि कोमध्यंदिनवलनार्कवत्तत्रकालभावीतिनिरूपयति। स्वपुंभिःस्वभृत्यैः प्रतिहृतमत्यर्पितमोपविकमौपायनादिसत्कारइत्यंयस्येसत थोक्तः तेसहसोत्थायागमनात्संज्ञिप्तवाहनादिममनयोग्यसाधनंवावृद्धविषयमित्यनेनश्रोमाधारूस्थांतिंउन्मूलयति। स्वसमाधिगम्य मिति। सच्चिदानंदलक्षणमपश्यन्नित्यर्थः।। तदानींतनवैशिष्ट्यंवर्णयतिहंसश्रियोरिति। हंसवद्धवलश्रियोर्व्यजनयोःशिववायुनासुखस्पर्श वायुनालोलंचंचलंशुभ्रंधवलंवातपत्रंउष्णनिवारणछत्रंतदेवशशीचंद्रमास्तस्यकेसरेभ्योरश्मिभ्योनिःसृतानिशीकराणिवांबूनितएववाना

तंत्वागतंप्रतिहृतौपयिकंस्वपुंभिस्तेचक्षताक्षविषयंस्वसमाधिगम्यं। हंसश्रियोर्व्यजनयोःशिववायुलोलशुभ्रातपत्रशशि केसरशीकरांबु ३८ कृत्स्नप्रसादसुमुखंस्पृहणीयधामस्नेहावलोककलयाहृ[illegible]संस्पृशंतं।। श्यामेपृथावुरसिशोभित याश्रियास्वग्रीवामणिंसुभगयंतमिवात्मधिष्ण्यं ३९

रीणियस्मिन्सशिववायुलोलशुभ्रातपत्रशीकरांबुःतं ३८ कृत्स्नःपूर्णःप्रसादःप्रसन्नतायस्यतत्तथासुप्रशस्तमेवंविधसुखंयस्यसततथातं। स्पृ हणीयधामकमनीयतेजः पुंसइच्छाविषयक्षानंवास्नेहोद्भूतयावलोककलयाकटाक्षकलयाभक्तानांहृदिसंस्पृशंतंत्वगिंद्रियसुखंकुर्वंतं। श्या मेइंद्रनीलरत्नकांतिमतिपृथौविस्तीर्णेउरसिशोभितयाश्रियाश्रीवत्सरूपयात्मनश्चतुर्भुखस्यधिष्ण्यंगृहस्थानीयंरूपंकौस्तुभोत्रस्तलक्षणंशाण शूडामणिस्तथेतिवचनात्स्वग्रीवायांस्थितंमणिंकौस्तुभनामानंसुभगयंतमिवविकासयंतमिवस्थितं ३९

पीतांशुके पृथुनितंबमधिपीतांबरावीतविस्तीर्णकटितटे परिस्फुरंत्या सह प्रगुणया कांच्या अलिभिर्विरुतया शब्दितया वनमालया च शोभमानं वल्गौ सुंदरे प्रकोष्ठे मणिबंधस्थाने वलयः कंकणो यस्य सत्तथा तं। इतरेण दक्षिणेतरेण करेण अब्जं धुनानं कंपयंतं ४० कांत्यादिगुणैर्विद्युतं तां क्षिपती निरस्यंती मकराकारकुंडले विद्युत्क्षिपन्मकरकुंडले तयोर्मंडनोर्हे अलंकारयोग्ये गंडस्थले यस्मिन्नसं तथा तं। उन्नसं उन्नतनासिकं मुखं वदनं यस्य सत्तथा तं प्रशस्तमणयो यस्मिन्संतीति मणिमत्तादृशं किरीटं यस्य सत्तथा तं दोर्दंडानां खंडस्य समूहस्य विवरे मध्ये चरता वर्तमानेन परार्ध्यहारेण अनर्घ्यमुक्तामालया कंधरगतेन कंठावलंबिना कौस्तुभेन मणिना च युक्तं एवं विशिष्टं भगवंतमवज्ञते तिर्यग्वर्ष्णान्वयः ४१ यो अंतर्गर्भितमन्युर्द्दृष्टो भगवद्दर्शनानंतरं बहिरपि विनिर्गत इति भावेनाह। अत्रेति। ते मुनयो हरेरंगं वीक्ष्य मुदा न वितृप्तदृशः अलंबुध्य प्राप्तनेत्राः। कैः शिरोभिर्नेमुर्दंडवत्प्रणिपेतुरित्य

पीतांशुके पृथुनितंबमधिस्फुरंत्या कांच्यालिभिर्विरुतया वनमालया च। वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जं ४० विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटं। दोर्दंडखंडविवरे चरता परार्ध्यहारेण कंधरगतेन च कौस्तुभेन ४१ अत्रोपसृष्टमिति चस्मृतमिंदिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यं। मह्यं भवस्य भवतां भजतां भजंतमंगं नेमुर्निरी

क्ष्य न वितृप्तदृशो मुदा कैः ४२

र्थः। अंगं गिनो रणुरपि भेदोनास्तीति तस्येति विशेषणावचनमित्यत आह अंगं विशिनष्टि। अत्रेति वशदोद्दृप्तन वितृप्तदृशो मुदाकैः ४२ प्यर्थः। यथापि ब्रह्मादिभिरारोध्यं दिरायाः स्यादपि त्रालिनूकालउपसृष्टं मुद्रूतमिति स्मृतं। यद्वा अके शादिपदावयवविशिष्टे वपुषीदं मयोपसृष्ट मवसितं निश्चितं नाततः परमिति॥ तथापि स्वानां स्वभक्तानां धिया विरचितं स्मृतं। केवितस्वदेहांतर्दयावकाशेशादेशमात्रं पुरुषं वसंतमित्यादिना। अविद्यमानकरणं विद्यमानस्मृतिं तथाउभयं स्वने पोक्तं पूर्वसिद्धेषु तु स्मृतिरित्यभिधानाच्च। तस्मादुच्चनाशत्रुस्य स्मरणार्थत्वं सिद्धं इतोपि भक्तधिया स्मृतेन कृतेकृतस्य तत्त्वातिरेकसंभवादिति भावेनाह। बहिति। विपुलानेकयोर्बहु रिति वचनादनंतसौंदर्यादिगुणपूर्णं। इतोपि मायारचितं नेत्याह॥ मह्य

मिति। मह्यं मम प्रदर्शितमित्यर्थः॥॥

अर्थक्रियाकारित्वान्न रमायारचितमित्याह। तस्येति। स्वविवरेण स्वनासिकारंध्रेणांतर्गतः प्रविष्टस्तस्य हरेः पदारविंदयोः किंजल्कैः केसरैरिव स्थितैरजाद्भिर्मिश्राः संसृष्टाः था तुलसी तस्याः मकरंदेन मधुना युक्तो मंदो वायुः श्रेयसां सनकादीनां चित्ततन्वोः संक्षोभं कंपनविकारं चकारेत्यन्वयः। विकारानुत्पत्तौ कारणमुपपत्तिरिति तत्राह। अक्षरजुषामपीति। वैराग्यादिगुणैरक्षरं जुषां ब्रह्मसेवतां न्यासिनामपि। अनेन यद्यपूर्वविकारसंभावना प्राप्तिर्नास्ति। तथापि हरिचरणार्पिततुलसीमहिमातिशयद्योतनाय मनोविलासलक्षणविकारानंदाश्रुधारासंपाताद्देहसंक्षोभाइमौ भावइति सूचितं। क्षुभसंचलनइति धातोः ४ ३ मनवाश्चलनेध्रिवं यं चलनमस्मान्नेनोः संचलनमिति नियमारतेयम पिकस्वनसंक्षोभ इति घनयन्नाह॥ तेवाइति। योनिन्निसह द्यतेरपरोक्षीय

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः। अंतर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्तत्वोः ४३ ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुंदरतराधरकुंदहासं। लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ४४

ते स एवायमित्यतो मुष्ट्यंति। धीम्रवध्वनइति धातोः सितं बद्धं मुकुलितमसितं नवो त्फुल्लं वदनमेवासितपद्मकोशमन्यथासितं मुक्तमसितं कृष्णमिति शापप्रदानस्यानभीष्टत्वेन मुखस्य कार्ष्ण्यं जातं तद्युक्तमुत्तरत्र शापानुमतिप्रतीतेः। यद्वा नेत्रयोनीलनवर्णत्वेन तद्युक्तत्वाद्वदनाख्यनीलपद्मकोश मुद्वीक्ष्य स्वयं वामनत्वाद्दोः प्राप्तत्वादूर्ध्वमुखा दृष्ट्वा लब्धाशिषः भगवदवयवेषु मुख्यमुखदर्शनात्। प्राप्तपुण्याच्च्याः सुंदरतराधरश्च कुंदवद्धवलो हासश्च यस्मिन्नसत्तथा तं। पुनर्मुखस्य दर्शनानंतरं नखा एवारुणारक्ता मणयस्तेषां श्रयणं आश्रयणमाश्रयं तदीयमंघ्रिद्वंद्वमदेहावाङ्मुखा दृष्ट्वा मुखमारभ्य पदाद्यंतं सर्वांगमवलोक्य नितरां दध्युः दध्युरितवयः। हृदिविनिदध्युः अवलोकयन्निति वा। बहिरिष्टस्य हृद्गतस्यैव कल्पमपरपवित्रमित्यर्थः ४४

मनःसंकल्पेनवाभिंद्रियदर्शनाद्यमपिकश्चनसंक्षोभःसंजातइत्यभिनयंतत्कृवंतीत्याह।पुंसामिति।ध्यानास्पदमुपासनाविषयंबहु पूर्णतायाभि
नि धातोर्बहुलत्वेनपूर्णत्वेनमतंज्ञातंनयनान्यभिरामयति सुखयतीतिनयनाभिरामंएवंविधंतद्वपुःदर्शयानंदर्शयंतमनन्यसिद्धैरन्यैरननुभूतैरौत्प
त्तिकैःसहजैरष्टभोगैरणिमाद्यष्टैश्वर्यैर्युतंमिश्रितमभिव्रहरिंसमगृणन्नित्यन्वयः।गृणाञ्छुताविनिधातुः ४५ गुरूपदिष्टगुणानुसंकीर्तनरूपत्वादि
यंस्तुतिःपारमार्थिकीनलौकिकीत्याशयेनाह।।योंतर्हितइति।त्वंदुरात्मनामशुभमनस्कानांहृदिगतोप्यंतर्हितोसि।अत्यंतसमीपवर्तिनोऽदर्शनव

पुंसांगतिंमृगयतामिहयोगमार्गैर्ध्यानास्पदंबहुमतंनयनाभिरामं।।पौंस्नंवपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैःसमगृ
णन्युतमष्टभोगैः ४५ कुमाराऊचुः योंतर्हितोहृदिगतोपिदुरात्मनांत्वंसोयैवनोनयनमूलमनंतराद्धः।।य
र्ह्येवकर्णविवरेणगुहांगतोनःपित्रानुवर्णितरहोभवदुद्भवेन ४६

वनंकृतिर्त्वाह।अपतांनामनपरमार्थतइत्यतउक्तमनंतराद्धइतिअनवसितमाहात्म्यादिरमपिकिंचनमाहात्म्यमित्यर्थः।सत्वमद्यनोनयनमूलंए
षिचक्षुर्विषयंगतोसि।किंगुणविशिष्टत्वेनेत्यतआह।यर्हीति।भवतउद्भवोजननंयस्यसतथातेननःपित्रानाम्नाब्रह्मणायर्हियेनलक्षणेनानु
वर्णितरहोयथावदुपदिष्टरहस्योहरिरस्मत्कर्णविवरेणहृदयगुहांगतोभूतस्तल्लक्षणविशिष्टत्वेनेतिशेषः।अनेनसच्चिदानंदलक्षणंभगवंतम
ज्ञात्वंतुमापामयमित्युक्तंभवति।एवकारेणोपदिष्टदृष्टयोरूपयोरेकत्वंदर्शयति ४६

इतोपिनेदंतत्कालोपचन्नमायामयरूपंकिंतुसाक्षाज्जगज्जन्मादिकारणमितिभावेनकृवंतीत्याह।तंत्वेति।हेभगवन्नःपित्रायोजन्मादिकारणत्वेनो
पदिष्टःतथेदानींचक्षुर्विषयश्चतंत्वांपरमात्मनःपरब्रह्मणस्तत्वमनारोपितंरूपंविदामविद्म।कीदृशंत्वांसंप्रतीदानीमेषांलोकानांसत्वेनगुणेन
इतिसुखंरचयंतउत्पादयंतं।इच्छाद्रोपवर्द्धमानस्यानारोपितरूपत्वेकिंप्रमाणमित्याशंक्यसम्यग्ज्ञानिज्ञानमित्याहुरित्याह।यत्तद्गलिततवानुभावस्यजगत्सृष्ट्या
दिमहिम्नोनुभावेननिश्चयज्ञानेनविदितैर्लब्धैर्दृढैर्वलैर्नभक्तियोगैर्विरागाविषयेषुशोभनाद्यासबुद्धिविधुराःअतएवोद्ग्रंथयःउन्मूलिताहंकारबंधाउत्पादितसु
खभावादिरूपहृदयग्रंथयोवामुनयःसर्वज्ञाःपरमहंसाःयत्तत्वंविदुरूपास्यापरोक्षीकुर्वंततत्ताहक्तत्वात्मकंत्वांविद्मइत्यन्वयः ४७ इतोप्युपनिषत्कामिन्या
परिपक्वंजन्मत्वमेवयतोभवत्कथारसायनस्वादुज्ञामुक्तावानंदसमृद्धिहेतुभूतभक्तिज्ञानमंतरेणदर्शनमात्रेणापरिपक्वभक्तिज्ञानानांपुंसांयोग्यासुक्तिनका

तंत्वाविदामभगवन्परमात्मतत्वंसत्वेनसंप्रतिरतिंरचयंतमेषां।।यत्तेनुभावविदितैर्दृढभक्तियोगैरुद्ग्रंथयोहृदिविदुर्मुनयोविरागाः ४७
नात्यंतिकंविगणयंत्यपितेप्रसादंकिंत्वन्यदर्पितभयंभ्रुवउन्नयैस्ते।।येंगत्वदंघ्रिशरणाभवतःकथायाःकीर्तन्यतीर्थयशसःकुशला
रसज्ञाः ४८

ह्यंतइत्याद्युरित्याह।नात्यंतिकमिति।आत्यंतिकंप्रसादंभावदर्शनमात्रेणास्वलिंगशरीरात्ययसमयेविद्यमानेनैभक्तिज्ञानपरिपाकार्थवातसम्यानभिव्य
क्तानंदंमोक्षमपिनविगणयंतिविशिष्टोयमितिनबहुमन्यंते।भक्तिज्ञानपरिपाकात्किंविन्मूर्छचसुखयते।दर्शनेनहरेस्तच्चनानंदःपूर्णतांव्रजेदितिवच
नात्।तवभक्त्याकथामृतपानत्वमत्वात्।भ्रुवउन्नयैस्तजृंभणविशेषैरर्पितभयमल्पपारमेष्ठ्यादिपदंकिंवकिंपुनकथ्यं।कुशलाइत्यनेनमुमुक्षोःकेवलो
मक्तोमुक्तावपिसुखीभवेदित्यतोमोक्षेनुष्योनपेक्षकाणांमुक्तावानंदोद्रेकःस्यादितिभक्त्यापादनमेवसाधीयइतिबुद्धिपाटवंदर्शयति।कीर्तन्यंकीर्तनीयं
तीर्थंसुहृदयशोयस्यसतथातस्य।अत्रमुक्तानांबाहुविध्यात्तदधिकारिणांचतथात्वान्मुक्तावपिभेदःपारमार्थिकः।नहितुरेकत्वेनापुरुषपिस्वपत्नोभेदो

वयमपि त्वदेकशरणत्वादिदमेवाकांक्षामहे नान्यमिति विज्ञापयन्तीत्याह। काममिति। अङ्घ्रिशोभयेति त्वत्प्रशोभास्तुतिद्वारेणेति शेषः। निरये पुष्पादियोनिषु वृजिनैर्दुःखैर्नः छाक्रियन्ताः। यावत्त्वत्परमभक्तेः सुखं त्वदुपत्वेन दुःखमुत्पन्नम्। तावन्नस्तेः सुखेऽदृष्टक्कनवेद्र क्रियेदन्तमिति वचनार्थम पिशब्दस्य निरयप्राप्त्यर्थं नाक्रियत इत्यभिप्रायः। सत्यां भक्तौ सर्वत्र पदेऽदृष्टः कः स्यात्। न वा परोक्षं सं॰ ॥ यथे हास्मदपराधमविगणय्येति भावेनाह। दिस्याह। प्रादुरिति। पुरु विस्तीर्णं हूतं यशो यस्य मे तथा हे पुरुहूत। अलं निर्वृतिमापुरित्यनेनान्तर्दृष्टिर्बाह्यदृष्टेः स्पष्टत्वं सूचयति। तस्य भक्तिये ह्याह। दिस्याह। तस्मा इति। यो भगवाननीतः प्रतीतिभक्तेरितिशेषः। पश्चद्वुरात्मनां दुरूदयः दुःप्रकाशस्तस्मै भगवते इदं इद्वुर्न्हं नमः विधेम कुर्म इत्यन्वयः ५० इति

कामंभवोकमवृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पदयोरमेत। वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ४९ प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः। तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान्प्रतीतः ५० इति श्रीभागवते महापुराणे तृतीयस्कन्धे षोडशोऽध्यायः ब्रह्मोवाच इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम्। प्रतिनन्द्य जगादेदं विकुण्ठनिलयो विभुः १ भगवानुवाच एतौ तौ पार्षदौ मह्यं जयो विजय एव च। कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम् २१

श्रीभागवते टीकायां तृतीयस्कन्धे षोडशोऽध्यायः॥ ॥ दुस्तरापत्तिपरिहाराय भक्त्या हरिरेव प्रार्थनीय इत्ययमर्थः प्रतिपाद्यते स्मिन्नध्याये। तत्रादौ भक्तभक्तिपराधीनो हमिति प्रकटयिष्यतो हरेः सनकादीन्प्रति स्निग्धवचनप्रकारमाह। इतीति। योगो भक्तियोगः स एव धर्मस्तेषामस्तीति योगधर्मिणः तेषामिदं वक्ष्यमाणम्। तत्र वचनं प्रतिनन्द्य वैकुण्ठनिलय इत्यनेन प्रतीतं परिच्छिन्नत्वं निवारयति। विभुरिति। विभुः सर्वगतेऽपत्याविति यादवः १ मह्यमिति मत्पत्येन जयविजययोः पार्षदप्राधान्यं सूचयति। मां कदर्थीकृत्या विगणय्य मत्प्रयोजनीकृत्येति वा। तत्र कृतइति तत्राह। यदिति। बह्विति क्रियाविशेषणं यथा बहुः पूर्णो भवति। तथातिक्रममपराधमाचरतां प्रकुर्वतां यस्मादितिशेषः २

तर्हि भवता प्येतौ दण्ड्याविति शंकित्वा युष्माकमस्माकं चैकमनस्कत्वाद्युष्माभिर्दत्तएव दण्डोऽस्माभिर्दत्त इत्याह। यस्त्विति ३१ किं चात इति तत्राह। तद्व इति तन्नेनदण्डानुज्ञानेन। किमेषां प्रसादनमत्राह। ब्रह्मेति। सर्वेषामिति परमध्याहृत्याव्रैतव्य मिममभक्तियुक्तं ब्रह्म विप्रकुलं सर्वेषां परं दैवं दृष्ट्यं हि प्रसिद्धमेमेपरमत्रात्पर्य युक्तमिति वा। अन्यकृतापराधस्य स्वात्मन्यारोपणं कथमत्राह। तद्धीति ४ एतदेवोपपादयति। यन्नामानीति। ततः कारणान्निरस्तत्राह। स इति। आमयः कुष्ठलक्षणः। अमुरोग इत्यस्माद्धातोः स्वार्थप्रत्ययः। रोगमंगमंगं यापयतीत्यस्मिन्नर्थे ५ लोके पूज्यत्वाय हरिर्ब्राह्मण

यस्तु तयोर्धृतो दण्डो भवद्भिर्मामनुव्रतैः। स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ३ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे। तद्धीत्यात्मकृतं मन्ये यत्स्वपुम्भिरसत्कृताः ४ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि। सोऽसाधुवादस्तत्कीर्तिं हन्ति त्वचमिवामयः ५ यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुण्ठः। सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिं ६

पुपरमप्रियत्वं प्रतिपादयति। यस्येत्यादिना। यस्य ममामलामृतत्वप्रदयशः श्रवणादिलक्षणो वगाहः स्नानरूपप्रवेशः सद्यस्तत्क्षणादेवाश्वपचं जगत्पुनाति। भवद्भ्य उपलब्धा विस्तृता सुतीर्था सुपावनी कीर्तिर्यस्य स तथा। सोऽहं विकुण्ठः वो युष्मान्प्रति प्रतिकूलवर्तिनं स्वबाहुमपि छिन्द्यामित्यन्वयः। सर्वान्नमोऽपि भगवान्विप्रादेः पूजनाय यदा गुणलब्धिं तनोऽब्रूते नित्यपूर्णगुणोऽपि सन्। ब्रूयुः स्वान्ये कविनन्तुतद्वक्रे तत्सारतः। उपादत्ते वरांस्तापि लोकानां मोहनाय चेति वचनेन कथं श्रेणी गुणस्य स्वतन्त्रस्य हरेरन्यतो गुणलब्धिरिति चोद्यं निरस्तं ६

विप्राणांचरणपद्मपवित्ररेणोःसेवयासेवाविडंबनेनप्रतिलब्धशीलंविडंबितंतत्स्वाभावमिदंकेवलंविडंबनार्थंमोहनार्थमुक्तमतइतिभावेनात्मानं विशिनष्टि।सद्यइति।नामसंकीर्त्तनादिनासद्यस्तत्क्षणादेवक्षतंनष्टमखिलजनस्यमलमघंयेनसतथातं।मलंक्लिष्टाद्यघेपीनेज्ञीतियादवः।स्वरत त्वेनविरक्तंतदपेक्षारहितमिवस्थितमपिमांश्रीर्नजहातीतियद्यस्मात्स्वबाहुमपिछिंद्यामितिपूर्वेणान्वयः।अनुक्तान्गुणान्विशेषणद्वारेणाह।तस्य तु।अज्ञानादोषविज्ञानेगुणज्ञानंयथार्थंतइतिश्रुत्वाविप्रचरणसेवयाहरेर्वनिष्टमलत्वंकिंनस्यादितिचेन्नेत्याह।संदिग्धवचनंतुमोहनार्थत्वा दितिज्ञायते।विशरणंचापिभक्तानामन्येषांवजनार्दनः।ब्रह्मणः शंकराद्वापिदेवतान्यन्नथेववा।आत्मवच्छ्रियश्चैवसकाशात्प्रियतामपि।इत्य

यत्सेवयाचरणपद्मपवित्ररेणोः सद्यःक्षताखिलमलंप्रतिलब्धशीलं।।नश्रीर्विरक्तमपिमांविजहातियस्याः प्रे
क्षालवार्थमितरेनियमान्वहंते ७

तामत्यद्भुतंवचदेतत्कापिविमोहयन्।इत्यनेनपरिहर्त्तव्यं।श्रीत्वाविशेषात्मांनजहातीतिकिंमाहात्म्यंविशेष्योक्तइतितत्राह।यस्याइति।मदितरेषां ब्रह्मादीनांनियमस्तपोलक्षणोयस्याःश्रियःप्रेक्षालवार्थंकटाक्षनिरीक्षणलेशार्थमर्हतइत्यन्वयः।यद्वामदितरेषांनियमोयस्याःप्रेक्षालवार्थम र्हतेसाश्रीर्ममचरणपद्मपवित्ररेणोःसेवयाप्रतिलब्धशीलंनिरंतरमद्उपासनास्वभावमितिक्रियाविशेषणंमांनजहातीतियत्तस्मादेवंविधमाहात्म्या हंयुष्माद्विरोधकरंस्वबाहुमपिछिंद्यामिति।विप्रस्यःकिमपिप्रयोजनमपेक्ष्यमाणांकिंनेत्याहसद्यइतिसद्यइत्यनेनेतरसेवकेभ्यःस्वसेवकानांकालक्षे पमंतरेणफलप्राप्तिंद्योतयति।श्रियोमन्नःप्रयोजनसद्भावेनपिममतस्याअर्थइत्याह।विरक्तमिति।नैविशिष्टमपिरक्तंस्वरतमित्यर्थः।स्वरतस्यान्य तःप्रयोजनापेक्षाधिकरोतिश्रपीति ७

वंदान्यान्स्वरूपान्संक्षिप्यमाणइवपुनरपिविप्रान्स्तौतीत्याह।नाहमिति।अहंवितानैस्तन्नमकल्पैर्यज्ञैःकरणेश्च्योतद्घृतप्लुतंतेनाज्येनप्लुतंस्वरमानं यजमानस्यहविर्हुतवधुङ्मुखेनाग्निमुखेनादंस्तथात्मप्रीतिंनदधामि।अहंयथामय्यवहितैरर्पितैर्निजकर्मणांपाकैःफलैस्तुष्टस्यचरतोभुंजानस्यब्रा ह्मणस्यमद्भक्तिलक्षणस्य विप्रस्यानुघासंप्रतिकवलंमुखेनअग्निअदनेनप्रीतोभवामीतियत्तस्मात्कोतिप्रियत्वाद्विप्राःपूज्याइतिभावः ८ इ दानींस्पष्टमसुरजनमोहकवचनमिदमितिप्रकटयन्विप्रान्स्तौतीत्याह।एषामिति।अखंडापूर्णाविकुंठाविगतभेदाचयोगमायास्वरूपेच्छातया

नाहंतथाद्मियजमानहविर्वितानेश्च्योतघृतप्लुतमदन्हुतभुङ्मुखेन।।यद्ब्राह्मणस्यमुखतश्चरतोनुघासंतुष्टस्यमय्यवहि
तैर्निजकर्मपाकैः ८ येषांबिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजःकिरीटैः।।विप्रांस्तुकोनविषहेतय
दर्हणांभःसद्यःपुनातिसहचंद्रललामलोकान् ९

विभूतिर्विविधभवनंआदित्यानामहंविष्णुरित्यादिरूपंयस्यसतथोक्तः।अहंकिरीटैःयेषांविप्राणां [illegible] मलांघ्रिरजोबिभर्मिकोनुपुमान्तान्विप्रान्न विषहेतसोढानभवेदित्यन्वयः।एकस्मिन्नवतारेपिविप्रावज्ञानेनाप्सीतिद्योतनायकिरीटैरितिबहु[illegible]वचनं।केवलंविप्रवहुमानार्थंनदंघ्रिरजोभर णमित्याशयेनात्मानंविशिनष्टि।यदर्हणेति।यदर्हणांभःयस्यममब्राह्मणक्षतपादप्रक्षालनोद[illegible]गंगाख्यमंभःचंद्रललामेनचंद्रशेखरेणसह वर्तमानान्लोकान्जनान्पुनाति ९

इदमपि महिमानं तरकथनं विप्रद्वेषोपि मद्द्वेष एव स च अधःपातहेतुरित्याह। ये म इति। ये पुरुषा मे तनूः प्रतिमास्थानीया तनूर्मदीयान्मदङ्कान् द्विजवरां
मया शरणं गृहरहितेन्यो रित्यभिधानादलब्धशरणानि रक्षकरहितानि भूतानि भेदबुध्या वेलत्वाएव बुध्या दुहुकुः पीडयांचक्रुः ये वाद्येन त्वत दृशः अ
धीकृतदृष्टयो भितोमनुर्यथा ते तथा इदं संतितान्मम अधिदंडनेतुः दंडनायकस्य यमस्य गृध्राः श्येनाः कुषंति निन्दाएणुत्पाद्य भक्षयंतीत्यन्वयः १० इ

ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुध्या ॥ द्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान्गृध्रा
रुषा मम कुषंत्यधिदंडनेतुः १० ये ब्राह्मणान्मयि धिया क्षिपतोर्चयंतिस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः ॥
वाण्यानुरागकलयात्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाकृतस्तैः ११

दानीं मद्भक्तब्राह्मणसत्कारपरिपाकं वक्तुमित्याह। ये ब्राह्मणानिति। तुष्यद्धृदः हृष्यन्मनसः स्मितान्यसुधया उक्षितम् आसिक्तं पद्मवक्त्रं येषां ते तथा
। अनुरागकलया स्नेहवत्तया। कलबंधन इति धातोः। वाण्या आत्मजवत्पुत्रं तं प्रशंसंतः अहमिव यथाहं विप्रान्संबोधयामि तथा संबोधयंति। ये
मद्भक्ता परुषाक्षिपतः भर्त्सयतः ब्राह्मणानर्चयंति। कथं। मयि धिया हरिरेषु विशेषतः सन्निहित इति बुध्या अहं तैर्विप्ररूपवत्कैः उपाकृतो वशीकृत इ
त्यन्वयः ११

नन्वेवमुभयेषां युष्माकं शापो भिमतश्चेत्तर्हि विशापमोक्षोनेति तत्रान्येभ्यो क्रमाह। तन्मे स्वभर्तुरिति। विप्राणां ममाभिमतं प्रियत्वात्तद्विरोधिनो मद्विरोधि
न एवेति यस्मात्तथापि युष्मद्व्यतिक्रमगतिं युष्मदपराधफलमसुरत्वादिलक्षणं प्रतिपद्यसद्यः भूयो ममांतिकमितामागच्छतामित्यन्वयः। भ
गवतोक्तमिदं तात्कालिकं न तु तत्त्वमित्यत्राह। मे स्वभर्तुरिति। स्वभर्तुर्मेवसायं विप्रानुरागलक्षणं निश्चयमलक्षमाणौ विप्रावानादिलक्षणौ रप्य
जानंतौ। अत्रानेनव ब्रह्मशापनिमित्तं तयोरिति ध्वनयति। नहि वैकुंठे अज्ञानादिसंभवोस्ति। न तु ममांतिकमितामित्यनेन शापमोक्षलक्षणः कोनु

तन्मे स्वभर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः ॥ भूयो ममां
तिकमितां तदनुग्रहो मे यत्कालतो ह्यविरमो हृतयोर्विवासः १२

अयं विशेषो भवितः स्यादिति तत्राह। तदनुग्रह इति। भृतयोर्युष्मच्छायेनसुरेतरगतिं गमितयोरेतयोर्विवासो वैकुंठात्सुरादिष्ववस्थानं कालतः बहु
ना कालेनाप्यविरमोऽवसानरहितमिति यत्तत्स्मात्समे अनुग्रहः पुनर्मम लोकप्राप्तिलक्षणशापमोक्ष इत्यर्थः। मदनुग्रहाभावे बलवता ब्राह्मणशा
पेन कदाप्यसुरादियोनिमोक्षो न स्यादिति भावः। हि शब्देन सनकादीनामपि शापमोक्षानुमतिरस्तीति द्योतयति। यतः स्वामिनोभिमतं भृत्यैरप्यनुमं
तव्यमिति १३

भा॰ तृ॰
१०५

कोपाद्धिदृष्टानां तेषां शापमोक्षानुमतिः कथं संगच्छत इति तत्राह। अथेति। तस्य हरेः उशतीम भीष्टप्रसन्नरां ऋषिकुल्यां ऋषिकुलस्य नितरामन्यत्र कुनिकुलप्रियां देवीमभिधेयमणिभिर्द्योतमानामन्यत्र देवादिस्नानक्रीडायोग्यां सरस्वतीं वाचमन्यत्र नदीमास्वाद्य श्रवणादिनान्यत्र स्नानादिना भगवद्दिदृक्षाभंगं कुर्वतिनमन्युना सर्पेण दृष्टानां तेषां सनकादीनामात्मा मनोन्यत्र बाह्यान्तरविशिष्टो देहो तप्यत तीतापापगमेन भगवद्दुन्नुद्भूतानं दृष्टेरग्भूदन्यत्र विषयापगमेन प्रकृतिस्थितोभूदित्यर्थः १३ वचनमाधुर्यास्वादनेन मनसस्तृप्तिर्न तत्वार्थज्ञानेनतस्यानवगाहादिति भावेना

ब्रह्मोवाच अथतस्योशतीं देवीमृषिकुल्यां सरस्वतीं॥ आस्वाद्य मन्युदष्टानां तेषामात्माप्यतप्यत १३
सतीं व्यादाय शृण्वन्तो लघ्वीं गुर्वर्थगह्वरां॥ विगाह्यागाधगंभीरां न विदुस्तच्चिकीर्षितं १४ तेयोगमाययार
ब्धपारमेष्ठ्यमहोदयं॥ प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः १५

राम
१०५

हा सतीमिति। सुखं व्यादाय श्रद्धया तो लघ्वीं मितां गुरुणा महतार्थेन गह्वरां प्रवेष्टुं कठिनां वां विगाह्य विचार्य। गाधः प्रतिष्ठायामिति धातोरगाधमतलस्पर्शमत एव गंभीरमवगाढुमशक्यं तस्य हरेश्चिकीर्षितं किं वक्तुमिष्टं कुर्वत इत्युवेतिनविदुः। क्षुविक्षेप इति धातुः १४ तर्हि यावत्तज्ज्ञानमपि किंवनोचुः किमितितत्राह। तेयोगेति। सनकादयः योगमायया स्वरूपेच्छया जातेन भ्रूभंगेनारब्धः उत्पादितः पारमेष्ठ्यमहोदयः ब्रह्मपदं सर्वविधिप्रभूतैश्वर्यं येन तथाभूतं हरिं प्रोचुरित्यन्वयः॥ क्षुभितत्ववो रोमांचितगात्राः १५

किमवोचुरित्याशंक्य न विदुः तच्चिकीर्षितमिति हृद्गतं यावोद्धल यंतीत्याह। न वयमिति। अध्यक्षः सर्वेश्वरस्त्वं स एवानुमतो दंडः स्वदत्तग्रहो मे इत्यादिना ममानुग्रहः कृत इति प्रभाषस इति यत्तस्मात्तव चिकीर्षितं न विद्म इति १६ अस्मदुक्तेरन्यथाकरणासंभवात् कस्माद्दत्तानं भवतामित्याशंक्याऽस्मादृद्वनादित्याकुरित्याह। ब्रह्मण्यस्येति। किलेत्यनेनास्मदिनरेषां मोहकं। अस्माकं तु स्तुतिपरमिदमिति सूचितं। तत्कथमित्यत्राकुरित्याह। विप्राणामिति। हे देवदैवतं कुलदेवता १७ कुतो हेतोरित्यत उक्तं। त्वत्त इति विप्रादिसर्ववर्णैर्ब्रह्मचर्याद्याश्रमिभिश्चानुष्ठेयः सनातनो वेदवेद्यत्वेन नित्यो धर्मस्तव तनुः

ऋषय ऊचुः॥ ॥न वयं भगवन् विद्मस्तव देव चिकीर्षितं॥ कृतो मेनुग्रहश्चेति यदध्यक्षः प्रभाषसे १६ ब्रह्मण्य
स्य परं दैवं ब्राह्मणाः किल ते प्रभो॥ विप्राणां देवदेवानां भगवानात्मदैवतं १७ त्वत्तः सनातनो धर्मो रक्ष्यते तनु
भिस्तव॥ धर्मस्य परमो गुह्यो निर्विकारो भवान्मतः १८

त्वावतीतक्षेत्रादिवतका लातोद्भूतोनो त्पाद्यते। कथं तत्निरत्राकुरित्याह। रक्ष्यत इति। तनुभिर्मत्स्याद्यवतारैः। यदा यदा हि धर्मस्य ग्लानिर्भवति भारते त्यादेः। त्वदासनातनत्वमवधारयति। भवान् क इतितत्राकुरित्याह धर्मस्येति। वायुना वै गौतम सूत्रेणेत्यादिश्रुत्या सर्वधारकत्वेन मतो धर्मो वायुस्तस्मात्त्वेन परो न मामा श्रीर्यस्य स तथोक्तः। लक्ष्म्यादिभुक्तसमुदायवा द्यायमुक्त जगतो विशिष्टो भवानित्यर्थः॥ अत्र किं प्रमाणमित्युक्तं गुह्य इति। ध

र्मस्यात्यनुवर्त्तते। आपीतिपदमध्याहृत्य वाक्ययोजनं। गुहसंवरण इति धातोः वायोरपि गुह्यः संवार्यः दुर्ज्ञेय इत्यर्थः। नीलिम्ना काशादिवत् केना
पि विकारेण ज्ञेयः किं न स्यादित्यत उक्तं। निर्विकार इति। उक्तवेद्यस्य किमुत्तरमित्यत उक्तं मत इति। भवानिति वर्त्तते। मनु अवबोधन इति धातो
रेव सर्वज्ञ इत्यादिना। निर्विकारः सदा शुद्ध इत्यादिना च भवानवबुद्धः सम्यक् ज्ञात इत्यादिश्रुत्यादिकं मानमुत्तरमुक्तं भवति। अनेन वायोरपि दु
र्ज्ञेयत्वे शशशृंगतुल्यमिदमिति बोद्धं निरस्तं। तेन तद्विषयज्ञानस्याकल्पनं निषिध्यते न तु ज्ञानमात्रं अत एव गुह्यं इत्युक्तं। समाधिना ज्ञातुं शक्यो
न घटादिवत् सुज्ञेय इति। यद्वा धर्मस्य मुख्यविषयो भवानेव न स्वर्गादिरित्याकूतेनाह। धर्मस्येति। कुतो न स्वर्गादिरित्यत उक्तं। निर्विकार इ
ति। स्वर्गादेः प्राकृतत्वेनानित्यत्वादस्य तु निर्गुणत्वेन स्वतोन्यतो वा तद्धर्मराहित्यात्। धर्मकारणितत्वेन निरूपमस्वातंत्र्यात्। तत्फलदत्वस्य
वनित्यस्य संभवादिति भावः १८

मुक्तामुक्तप्रपंचोत्तमत्वमर्थादुक्तं तदिदानीं स्पष्टयन्नीत्याह। तरंतीति। निहतानि हतानि धर्मनिष्ठा योगिनो ज्ञानिनो यस्मात् तदनुग्रहात् मृत्युं संसारमंजसा तरं
ति हि यस्य प्रसादाद् दिव्यादि श्रुतिसिद्धत्वात् संसारोन्मूलकत्वेन स मुक्तामुक्तोत्तमो भवान् परैरन्यैर्ब्रह्मादिभिरनुशिष्टो हि तदनुग्रहपात्री क्रियेते नियन्त
त् किं स्वित् विप्रभुत्वनिमित्तं तेन न किमपीत्यर्थः १९ तदेवमुत्तमत्वं स्पष्टयन्नीत्याह। यं वा इति। वा इत्यनेन ममधेयानिरसनं तं रित्यादिवाक्यं प्रमाणयति
। विभूतिः श्रीः अन्यैर्ब्रह्मादिभिर्विरक्तिभक्त्याद्यर्थार्थिभिः। नित्यप्राप्तभगवत्स्वरूपहाया नित्यमुक्तायाः प्राप्यप्रयोजनांतराभावाद् उपयानं किमर्थमि
त्याशंक्य सेवायां आनंदैकरूपत्वेन स्वभावत्वेपि लोकविडंबनमेव प्रयोजनमिति भावेन विशिनष्टीत्याह। धन्येति। धन्यैर्भक्तिज्ञानादिगुणपूर्णत्वे

तरंति ह्यंजसा मृत्युं निवृत्ता यदनुग्रहात्। योगिनः स भवान् किं स्विदनुशिष्टो हि तत्परैः १९ यं वै विभूतिरुपयात्यनुवेलमन्यै
रर्थार्थिभिः स्वशिरसा धृतपादरेणुः। धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना २० यस्यां वि
विक्तचरितैरनुवर्त्तमानां नात्याद्रियत्परमभागवतप्रसंगः॥ ॥

न स्वर्गादिफलानि स्रुग्भिरर्पितं मम घ्रितुलसी नवदाम यत्तस्य धाम्नो धारकस्य तव तुलस्याः लोकं स्थानं चरणयुगलस्य बोरसि स्थिता सा ईर्ष्येव कामयमा
ना मम नैतत्स्थानं भूयादिति भावं दर्शयंतीयं निषेवत इत्यर्थः। न वेदम विज्ञातं हरिणेति भावेनोक्तं। मधुव्रतपतेरिति। मधुनो रसस्य व्रतं भुक्तिर्येषां तेम
धुव्रताः सारभोजिनः तेषां पत्युः। व्रतं विष्णुर्वर्षे स्यात् तपोमासाभिभुक्तिश्रित्यभिधाने। लब्ध्वापि वक्षसि पदमित्यस्मात् उक्त एवार्थः २० एवमितरेभ्योधि
कं निषेव्यमाणायामस्या कोपि प्राप्यप्रयोजनांतराभावात् पूर्वस्मादर्थविशेषो नास्ति किंतु भागवतानां गुणतारतम्यप्रज्ञा वैपरमभागवतत्वेन प्रशं
सा प्रसंग एवेत्याह। यस्यामिति। विविक्तचरितैरनन्यसाधारणसेवाकरणैरनुवर्त्तमानांतां श्रियं नात्याद्रियत गुणानां प्रतीयमानत्वात्तदधिकार्योत्पत्तेर
नाकरोत्। किं तु परमभागवतत्वेन प्रशंसैव कृता॥॥

एवं विप्रमाहात्म्यमुक्त्वा द्विजानामनुपथेनानुगमनेन तत्पादरजसा पुनीतिः शुद्धिर्यस्य स द्विजानुपथपुण्यरजःपुनीतिः पृथगनादिति धातुः। श्रीवत्सलक्ष्म श्रीवत्सा लक्ष्म लाञ्छनं यस्य स त्वं भगवान् भाजनं सौभाग्यपात्रं त्वं वा गच्छः किमित्यन्वयः। अत इदं भगवद्वचनं सर्वं विप्रक्षतिपरमिति सिद्धं। यद्यपि शास्त्रतात्पर्यार्थः स्यात् तर्हि इदं द्विजस्तुतिपरं स्यात् स कुत इतीयमाशंका। हरिभक्तिर्हरेः श्रीः तिर्ज्ञानानन्दादयो गुणाः। अधिकारे च मुक्तौ च ब्रह्मवाद्या स्ततस्त्रियोः। शेषवीन्द्रहराणां च तत्स्त्रीणां वासवादिनां। यथाक्रमं तु विज्ञेया भूमौ कारणतो न्यथा। देहस्य लक्षणं चैव भूमावप्यन्यथा भवेत्। ब्रह्मादिषु क्रमेणैव नित्यस्यादेहलक्षणं। स्त्रियो धिका गुणाः सर्वे सर्वेभ्यो नियमेन तु। उक्ताश्चैवाप्यनुक्ताश्च ततो विष्णोर्न संशयः॥ इत्यनेन परिहृतेति २१ इतोपि द्विजकुलस्य गोपनीयत्वाभिप्रायेण भवता द्विजावनादिकं क्रियत इति विज्ञापयन्तीत्याह। धर्मस्येति। नूनमन्वयः योजनं मंतेरेण धर्मस्य सर्वेधारकस्य धारणात् भगवान् धर्म इत्यादेः। भगवतस्तत्त्वस्वैः स्वरूपभूतैः त्रिभिरनंतासनवैकुंठक्षीरसमुद्रशायिभिः पद्भिरंशैर्मूर्तिभिश्चराचरमिदं विश्व

सत्वं द्विजानुपथपुण्यरजःपुनीतिः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वं २१ धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भि
श्चराचरमिदं द्विजदेवतार्थं। नूनं भृतं तदभिघाति रजस्तमश्च सत्वेन नो वरदया तनुवा निरस्य २२

द्विजानां देवानां च प्रयोजनमुद्दिश्य भृतं रक्षितमित्यन्वयः। हे त्रियुग त्रियुगेषु वनारो यस्य स तथा तस्य संबुद्धिः। न त्वति षेधपक्षनिर्मूलनाभावे रक्षणं कथं संगच्छत इत्यत उक्तं। तदभिघातीति। तपआद्यनुष्ठानविरोधि रजस्तमश्च तनुवा स्वयं निरस्याभिप्रायात् कथं मूर्तिरित्यत उक्तं नो वरदयेति। अस्माकं ज्ञानप्रदानिरतया। किमारम्यपेत्यस्या पीदृमेवोत्तरं वरदया कपिलाख्यया। कपिला वरदश्चैव विकल्पश्चेति कथ्यते इत्यतो गुणवाचकस्य विशेष्याभिधेयत्वं कथमिति निरस्तं। तापसस्य शांतस्य कपिलस्य क्षत्रियवदायुधाद्यग्रहणात् कथं विरोधिविनाशकत्वमित्यत उक्तं सत्वेनेति। सत्वेन सत्वगुणवर्द्धनेन निरास इति शेषः। तृतीयया सत्वगुणस्य कारणमात्रत्वं न मुख्यत्वं कपिलस्यैव मुख्यत्वं ज्ञापयति। शरेणारामइति वत्। एवं विशेषार्थः कस्माद्यं कल्प्यत इतीदं वोद्यं। अनंतासनवैकुंठक्षीरसागरैस्त्रिभिः रक्षां करोति भगवान् कपिलः सत्ववर्द्धनात्। अन्यत्रोपि रजश्चैव तमश्चापि निरस्य लिस
नेन निरस्तं २१

हे वृषं इन्द्रपरमे श्वर्यवारिधे येयो द्विजदेवतारक्षैकनिरतः सत्वं यद्यदीह जगति आत्मैव गोप्ता गोपकोयस्य तदात्मगोपं द्विजोत्तमकुलं सुसूनृतेन शोभना मधुरा वाग्यस्य तत्तया तेन स्वर्हणेन लोकमान्यसत्कारेण गोप्ता न रक्षिता सि देवक्रीडादिगुणपूर्णतर्हि तदानीमेव तव शिवः शुद्धः पंथाः तत्वविषयो ज्ञानमार्गः शिष्टाचारश्च नंक्ष्यति उत्सन्नो भविष्यति। तत्र हेतुगर्भं विशेषणमाह। लोक इति। लोक इतरो जनः ऋषभस्य सद्धर्मप्रवृत्तिसमर्थस्य यत्प्रमाणं तद्धि वा गृहीष्यत। यद्यदाचरति श्रेष्ठ इत्यादेः २३ ततः किमनिष्टं तत्राह। तत्त इति। यस्माद्दसुरा अप्रिया अपि लोकस्य यथा दुःखजनकत्वेन न तथा हरेः नित्यानंदपूर्णत्वात्। दुःखप्रवेशानवकाशात्। किंतु। निषेध्ययोग्यत्वान विषयमप्रियं भगवतो मतं। तदुक्तं। अप्रिया असुराश्चापि नित्यानंदान्न लोकवत्। निषेध्यबुद्धिविषयमपि

न

नत्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषस्वर्हणेन सुसूनृतेन॥ तर्ह्येव नंक्ष्यति शिवस्तव देवपंथा लोकोऽग्रहीष्यदृषभस्य हि तत्प्रमाणं २३
तत्ते नभीष्टमिव सत्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः। नैतावता त्र्यधिपतेर्बत विश्वभर्तुस्तेजः क्षतिस्त्वनतस्य स ते विनो
दः २४

यद्धि हरेर्मतमिति तस्मादनभीष्टमिवेत्युक्तं। सत्वनिधेरित्ययं हेतुः। सुखकरमार्गनाशनं तत्ते तवानभीष्टमिव। दुःखजनकत्वेन न किं तु निषेध्यत्वेनैवाभीष्टं कुत इति तत्राह। विधित्सोरिति। अशक्तस्येच्छया वे [illegible] ति तत्राह। निजेति। नन्वेवं विप्रस्य तवमानभंगहेतुः विप्रप्रणामः किमिति। क्रियत इति तत्राह। नैतावतेति। विप्रावनतस्य तदावनत इत्येतावता तेजः क्षतिः मानलक्षणतेजोभंगो नास्ति। तत्र हेतुगर्भं विशेषणमाह। त्र्यधीति। न केवलं त्रिलोकीमात्रस्याधिपतिस्त्वं त्रयाणां सर्वस्वानामविशेषेण वोढ त्याह। विश्वभर्तुरिति। त्वया नेन किमपि प्रयोजनमित्याह स त इति। विप्रप्रणामो विनोदो लीलाविलासः तु शब्देन प्रयोजनांतरं निवारयति २४

अधीशनिरुद्धवारितावंडेशभवान नयोर्यद्भक्षर्दमदंडं विचेष्टेयश्यसि। अथ मैर्वक्ष्वरनिंखितितिलक्षणां। वयंतन्नयोरेकं निर्व्यलीकमन्याहिरनुजानीमहे। पूर्वं दंडारल्पोदंडोमिमतश्चेत्तोस्त्वित्यमिप्रेत्यथंवादमभिनुक्तं। येनयमूनागसोस्वतोनिष्पापोकिल्बिषेणदोषेणायुंमहियोजितवंततेषस्मासुयउचितो दंडः सवाध्रियनामित्यनेनापिहरेः विप्रप्रियत्वमुक्तं दंडाभावात्त्वचध्वनितं। किल्विविप्रक्तेनिरूढात् किल्बिषेत्यकोडनयोरित्यस्मात्। ततः क्विप्रप्रत्ययो भवति। युगागमश्च। दोषेभिधेयेनेनकिल्बिषमिति। भवतीत्यनेनस्वतएतौनिर्दोषौनिमित्तान्तरदोषाविति सूचितं २५ सनकादयस्त्वेकेरुत्तरत्वेन पुन

यद्वानयोर्दममधीश भवान्विचेष्टेहन्त्रिंवातद्नुमन्महिनिर्व्यलीकं॥ अस्मासुवायउचितो ध्रियतांसदंडोयेनागसोवयमुंमहिकिल्बिषेण २५ श्रीभगवानुवाच एतौसुरेतरगतिंप्रतिपद्यसद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ॥ भूयः सकाशमुपयास्यतआशुयोवः शापोमयैवविहितस्तदवैतविप्राः २६ ब्रह्मोवाच अथतेमुनयोदृष्ट्वानयनानंदभाजनं॥ वैकुंठंतदधिष्ठानंविकुंठंचस्वयंप्रभुं २७ भगवंतंपरिक्रम्यप्रणिपत्यानुमान्यच। प्रतिजग्मुः प्रमुदिताः शंसंतोवैष्णवींश्रियं २८ भगवाननुगावाहयातंमाभैष्टमस्तुशं। ब्रह्मतेजः समर्थोपिहंतुंनेच्छेमतंमुनेः २९

रुक्तिंकरोति। एताविति। संरंभोद्वेषोत्कर्षः। तेनसंभृतः संपादितोयः समाधिर्मनसएकाग्रतारूपः तेनानुबद्धोयोगोभक्तियोगोययोस्तौतथाउपयास्यतउपयातामितिव्यत्ययश्छांदसः। अंतर्भक्ताबहिः क्रुद्धाहिरण्याक्षाद्याइति॥ सर्वेकुद्धाः शबराद्याअंतः क्रोधवशास्तथेतिविशेषस्तयोः तयोः २६ अथोत्तरकथाप्रसंगः कइतितत्राह। अथेति। अथशापमोक्षानंतरं २७ अनुमान्यानुज्ञाय्यश्रियंस्वरूपभूतां। स्वरूपश्रीस्तथाभार्याहिश्रीश्रीसुहरेर्मतेति २८ माभैष्टंभयंनकुरुतंशंसुखमस्तु। इच्छेकामि २९

अपराधांतरसद्भावान्मतमित्युक्तं। कोसावपराधइतितत्राह। एतदिति। अपवारितानिवारिता। योगनिद्रामुपागते ३० ब्रह्मशापसंतारकसंरंभएवभक्तियोगवरमुपदिशन्निवाह। संरंभेति। एतयोर्भक्तियोगोस्तीतिकस्मादवगतमितीदंचोद्यमंतर्भक्ताबहिर्वैराहिरण्याक्षाद्याहरेर्मताः। तत्रभक्त्याभवन्मूताद्वेषआवेशकारणतः॥ ब्रह्मजाअसुरायेनुविष्णोः पार्षदतांगताः। बल्याद्याश्चहरेर्द्वेषमंतः कृत्वानभोगताः इत्यनेननिरस्तं। अनेनसंरंभोनविफलोभक्तियोगएवब्रह्मशापनिस्तारकइत्युक्तंभवति। पुनः शापाद्याहन्तोस्वरूपावाप्तोकालक्षेपोनास्तीत्याशयेनोक्तंकालेनेति ३१ द्वास्स्थौद्वारपालौ ३२ दुर्मदानां दंडएवमदशांतिहेतुरितिभावेनाह। तौत्विति। गीर्वाणाऋषभाविति संधिकार्या

एततुरैवंनिर्दिष्टंरमयाक्रुद्धयापुरा॥ तां द्वापवारितांद्वारिविशंतीमय्युपारते ३० मयिसंरंभयोगेननिस्तीर्यब्रह्महेलनं॥ प्रत्येष्यतंनिकाशंमेकालेनाल्पीयसापुनः ३१ द्वास्स्थावादिश्यभगवान्विमानश्रेणिभूषणं॥ सर्वातिशयथालक्ष्म्याजुष्टंस्वंधिष्ण्यमाविशत् ३२ तौतुगीर्वाणऋषभौदुस्तराद्धरिलोकतः॥ हतश्रियौब्रह्मशापादभूतांविगतस्मयौ ३३ तदाविकुंठधिषणात्तयोर्निपतमानयोः। हाहाकारोमहानासीद्विमानाग्र्येषुपुत्रकाः ३४ तावेवह्यधुनाप्राप्तौपार्षदप्रवरौहरेः। दितेर्जठरनिर्विष्टंकाश्यपंतेजउल्बणं ३५ तयोरसुरयोरद्यतेजसायमयोर्हिवः॥ आक्षिप्तंतेजएतर्हिभगवांस्तद्विधित्सति ३६

भावाद्देवश्रेष्ठावुभौपवारिकमितिदर्शयति। दुस्तरात्ब्रह्मशापतः विगतस्मयौनष्टमदौबभूतामित्यन्वयः ३३ मदाभावस्तत्रैवावस्थानमभक्तिनेत्याह। तदेति। विकुंठधिषणात्वैकुंठलोकात्। विमानाग्र्येषुस्थितानामितिशेषः। ३४। कथाप्रसंगंप्रकृतेसंगमयति। तावेवेति। दितेरुदरप्रविष्टंकश्यपस्यविद्यमानमपिकाश्यपंतेजोवीर्यंप्राप्तौ ३५ असुरयोरसुराविष्टयोः। आक्षिप्तमभिभूतं। तस्यप्रतीकारमुपदिशति। एतर्हीति। एतर्हिइदानीं। तन्नस्यप्रतीकारंविधित्सतिकर्तुमिच्छति। कल्पांतरेक्रियमाणत्वात्स्वपराधस्वरूपस्यवापेक्षितत्वादिदानीमि

अथ भुत्तैवं भवता किंचिदुपायो निरूपणीय इत्याशंक्योक्तमेव विवृणोति। विश्वस्येति। विश्वस्य स्थित्यादिहेतुरित्यनेनास्य तत्कर्तृकत्वं सूचयति। योगेश्वरैर्ब्रह्मादिभिरपि दुरत्ययो दुर्ज्ञेयो योगमार्ग उपायप्रकारो यस्य स तथा क्षेमं प्राप्तरक्षां विधास्यतीत्यनेनेदानीं कालइति सूचयति। उत्तरकालेको निश्चय इत्यत उक्तं। त्राता ति। त्राणशीलत्वात्करिष्यत्येवेति निश्चयोपपत्तेः। हेतुत्वं तत्र संचाह। त्र्यधीश इति। त्रयाणां लोकानामीश्वराः इंद्रादयः तेषामीश्वरः ऐश्वर्यकर्तृत्वेन स्वामी। त्राणेपि त्रायामि इष्टैश्वर्यमपि न स्यादिति। फलितमाह। अस्मदीयेति। अस्मदीयेन

विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमार्गः॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीय
विमृशेन कियानिहार्थः ३७ इति श्रीभागवते महापुराणे तृतीयस्कंधे षोडशोऽध्यायः मैत्रेय उवाच निश
म्यात्मभुवा गीतं कारणं शंकयोज्झिता ॥ ततः सर्वे न्यवर्तन्त त्रिदिवाय दिवौकसः १ दितिस्तु भर्तुरादेशादपत्यपरिशंकि
नी। पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ २

विमर्शेनोपायनिर्मार्गणेन कियानर्थः न कोपीत्यर्थः। स्यादभ्यधिकई अरइतियादवः ३७ इति भागवतटीकायां तृतीये सप्तदशः॥ ॥
विमर्शेनोपायनिर्मार्गणेन कियानर्थः न कोपीत्यर्थः। स्यादभ्यधिकई अरइतियादवः ३७ इति भागवतटीकायां तृतीये सप्तदशः॥ ॥ अत्र भगवत्यस्मिन्भगवति भक्तिः कर्तव्येति तन्महिमा प्रतिपाद्यतेस्मिंस्त्र
अनन्यवध्ययोर्हिरण्यकशिपुहिरण्याक्षयोर्निहंतुर्हरेरमितमहिम्नो जगतत्वादस्मिन्भगवति भक्तिः कर्तव्येति तन्महिमा प्रतिपाद्यते
ध्यायद्वये। तत्रादौ देवानां त्रिदिवगमनं वक्ति। निशम्येति। आत्मभुवा ब्रह्मणा गीतं कथितं। अपत्यपरिशंकिनी अपत्ययोर्हरेर्नाशशंकाव
तीयमौ यमलौ २

आमां दैत्याभ्यां यथा जनोपद्रवा भवंति तथा सूचकानुत्पातानाह। उत्पाता इति ३ सहाचलाः सपर्वताः प्रदेशबहुत्वाद्भुव इति बहुवचनं। सो
ल्का उल्कापातसहिताः अशनयो निर्घाताः ४ फट्कारश्चेव फत्कारस्तथा किलिकिलादयः। अनुकारशब्दा विज्ञेया येवाम्मिता दृशामताइत्य
भिधानात्। फट्कारोनुकारशब्दः तद्वान्फट्कारस्य वान्। ताहशा इति टंकारादयः। वात्यानां मंडलीवायूनामनीकं समूहो यस्य स तथा।

उत्पाता बहवस्तत्र निपेतुर्जायमानयोः। दिवि भुव्यंतरिक्षे च लोकस्योरुभयावहाः ३ सहाचला भुवश्चेलुर्दिशः सर्वाः प्र
जज्वलुः॥ सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ४ ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन्मुहुः॥ उन्मूलयन्नगप
तीन्वात्यानीको रजोध्वजः ५ उद्धसत्तडिदंभोदघटया नष्टभागणे। व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदं ६ चुक्रोश वि
मना वार्धिरुदूर्मिः क्षुभितोदरः। सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः ७

। रज एव ध्वजो यस्य स रजोध्वजः ५ उद्धसत्यस्तडितो येषु ते तथा उद्धसत्तडितं भोदा मेघाः तेषां घटया आवलया। नष्टो भानां नक्षत्राणां गणो य
स्मिंस्तत्र व्योम्नि तस्मिन्तारकं तारकेति च तत्र भं भेति नाममहत्य। ६ वार्धिः समुद्रः सोदपानाः वापीकूपादिभिः सहिताः। शुष्काणि म्लानानि पंक
जानि यासु ताः तथा ७

भा॰ तृ॰
११०

परिधयः परिवेषाः। निर्घातरवो निर्मेघगर्जनशब्दः। तस्मिन्निर्ह्रादाः प्रतिध्वनयः। विवरेभ्यः पर्वतगुहाभ्यः ८ सृगालाः पुमांसः शिवाः सृगाल
स्त्रियश्च पिटंकारैः निंदितानुकारस्वरैः प्रणेदुरित्यनेन नाशं सूचयंति। तदुक्तं। अपिः संभावनाप्रश्नगर्हाशंकासमुच्चये। नाशस्तत्र सृगालानां
शिवानां वान्यथास्वर इति ९ ग्रामसिंहाः सारमेयाः। शिरोधराः कंठाः सानुन्नमय्य ऊर्ध्वीकृत्य संगीतवच्चाद्यगानवत् १० खराः क्रूराः

मुहुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः। निर्घातरवनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ८ अंतर्ग्रामेषु मुखतो वमंत्यो वह्निमुल्ब
णं। सृगालाश्च पिटंकारैः प्रणेदुरशिवाः शिवाः ९ संगीतवद्रोदनवदुन्नमय्य शिरोधरान्। व्यमुंचन्विविधा वाचो ग्रामसिंहास्त
तस्ततः १० खरोष्ट्राः कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलं। खात्काररभसामत्ताः पर्यधावन्वरूथशः ११ रुदंतो रासभत्रस्ता नी
डादुदपतन्खगाः। घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत १२ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः। व्यरुदन्देवलिंगा
नि द्रुमाः पेतुर्विनानिलं १३ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः। अतिचेरुर्वक्रगत्या युयुधुश्च परस्परं १४ दृष्ट्वान्यांश्च
महोत्पातानतत्तत्वविदः प्रजाः। ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवं १५

उष्ट्राः खरोष्ट्राः खात्कारोऽप्यनुकारशब्दः तस्य रभसा वेगेन ११ रासभा गर्दभा गर्दभादिभ्यो नित्रस्ताः खगाः पक्षिणो नीडात् उदपतन् १२ गा
वः सौरभेय्यः अत्रसन्भीताः देवलिंगानि प्रतिमाः १३ अन्ये दुष्टग्रहाः १४ अन्यान्भूकंपादीन्न तयोः जयविजययोस्तत्वं शापादिनिमित्तं
विदंतीति जानंति। न तेषामुत्पातादीनां तत्त्वं जयविजयनिमित्तं विदंतीति वा १५

राम
११०

इदानीं दैत्ययोर्भावं वक्ति। तौ वितिः सहसा बलेन पौरुषं पराक्रमः। अश्मवत्सारेण दृढेन १६ कोटिभिरिति बहुवचनं वस्तुप्राप्तेज्ञया। का
ष्ठा दिशः १७ तयोर्नामकरणं वक्ति। प्रजापतिरिति। प्रजापतिः काश्यपः तयोर्नामाकार्षीदित्यन्वयः। कथमत्राह य इति यमयोर्यमयोर्मध्ये
यः स्वदेहात्प्रागजायत जातं तं हिरण्यकशिपुं विदुर्वै तयोर्माता सा ततः पश्चाद्यमसूत प्रजा तं हिरण्याक्षं विदुरित्यन्वयः १८ पूर्वजस्यन

तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ। ववृधाते ऽश्मसारेण कायेनाद्रिपती इव १६ दिविस्पृशौ हेमकिरीटकोटिभिर्नि
रुद्धकाष्ठौ स्फुरदंगदे भुजैः। गां कंपयंतौ चरणैः पदे पदे कट्या सुकांच्यार्कमतीत्य तस्थतुः १७ प्रजापतिर्नाम तयोरकार्षी
द्यः प्राक्स्वदेहाद्यमयोरजायत। तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः १८ चक्रे हिरण्यकशिपुर्दो
र्भ्यां ब्रह्मवरेण च। वशे सपालाल्लोकांस्त्रीनकुतोमृत्युरुद्धतः १९ हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहं। गदापाणि
र्दिवं यातो युयुत्सुर्मृगयन्रणं २० तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरं। वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदं २१ म
नोवीर्यमदोत्सिक्तमसृण्यमकुतोभयं। भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः २२

यस्य दिग्विजयं वक्ति। चक्रे इति। न कुतोऽपि बहिरंतः शुक्रादेरपि मृत्युर्यस्य सोऽकुतोमृत्युः १९ अनुजस्य दिग्विजयं विस्तृत्याह। हिरण्याक्ष इ
ति। युयुत्सुर्योद्धुकामः २० रणत्कांचननूपुरं क्वणत्कनकपादवलयं। पंचवर्णा तु या माला वैजयंती विदुर्बुधा इत्यभिधानात्तद्गुंफिता वै
जयंती नाम २१ मनोऽभिमतवीर्यमदेनोत्सिक्तमुद्रिक्तं। निलिल्यिरे निलीनाः। तार्क्ष्यो गरुडस्तेन २२

भा॰ त्ृ॰
१११

महसावलेन २३ २४ सन्नधियोनष्टबुद्धयः। प्रधर्षिताश्चभिभूताः २५ तातविदुर प्रचेतसोवरुणस्यनाम्नाविभावरींपुरमासेदिवान्प्राप्तः
महत्यागदयाभिजघ्नइत्यन्वयः २६ प्रलब्धुंविप्रलब्धुंस्मयन्नुमाद्यन्नुनीचवत्प्रणिपत्यवदेकहसेनन्नत्वा २७ बृहच्छ्रवाःलोकव्यापकीर्त्तिः।
दुष्टोमदोदुर्मदः तेनवीरावयमित्यात्मानंमन्यन्तेषां त्वमेवामसीतिदुर्मदवीरमानिनः तेषां वीर्यमात्मन्यावहतिसंनिधापयतिवीर्यहरहितान्

सवैतिरोहितान्दृष्ट्वामहसास्वेनदैत्यराट्॥ सेंद्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशं २३ ततोनिवृत्तःक्रीडिष्यन्गंभीरंभीमनि
स्वनं॥ विजगाहेमहासत्वोवार्धिंमत्तइवद्विपः २४ तस्मिन्प्रविष्टेवरुणस्यसैनिकायादोगणाःसन्नधियःससाध्वसाः॥ अहन्य
मानाअपितस्यवर्चसाप्रधर्षितादूरतरंप्रदुद्रुवुः २५ सवर्षपूगानुदधौमहाबलश्चरन्महोर्मीःश्वसनेरितामुहुः॥ मौर्व्याभिजघ्नेगद
याविभावरीमासेदिवांस्तातपुरींप्रचेतसः २६ तत्रोपलभ्यासुरलोकपालकंयादोगणानामृषभंप्रचेतसं॥ स्मयन्प्रलब्धुंप्रणिपत्यनी
चवज्जगादमेदेह्यधिराजसंयुगं। २७ त्वंलोकपालोधिपतिर्बृहच्छ्रवावीर्यापहोदुर्मदवीरमानिनां॥ विजित्यलोकेखिलदैत्यदा
नवान्यद्राजसूयेनपुरायजत्प्रभो २८ सएवमुत्सिक्तमदेनविद्विषादृढंप्रलब्धोभगवानपांपतिः॥ रोषंसमुत्थंशमयन्स्वयाधिया
व्यवोचदंगोपशमंगतावयं २९ पश्यामिनान्यंपुरुषात्पुरातनाद्यःसंयुगेत्वांरणमार्गकोविदं॥ आराधयिष्यत्यसुरर्षभेहितंमनस्विनोयंगृणतेभवादृशाः ३०

रा॰म॰
१११

करोतीतिवीर्यावहः। एतदेवविवृणोति। विजित्येति। राजसूययज्ञेनायजत्तइतियदतोदुर्मदवीरमानिनां त्वंवीर्यापहः २८ नहिमेयंरणोत्सवाहशाः ३०
निनांवीर्यापहर्ता हविरानत्वाच्चमेयुद्धंदेहीतिगतेनान्वयः २८ विनिषिषेधवावोचत्। कथमित्यतउक्तंअंगेति। यद्वा। विष्टयक्रमूर्तंपुरुषम
वोचत २८ सकइतितत्राह। पश्यामीति। आराधयिष्यतिआह्वयिष्यतीति। संप्रद्रिरोत्स्यतीतिवा। तत्रत्वंविजनयति। मनस्विनइति ३०

सकुत्रेतितिविचारोमाभूदित्याह। तमिति। वीरंशूरंआरात्निकटमधुनैवविराःशेरतेस्मिन्निति वीरशयःरणांकणस्तस्मिन्। ममविस्तरेणरणे
नसंगमःकथंघटतइतिशंकामाभूदित्याह। यस्त्वद्विधानामिति। प्रशांतयेविनाशायवराहादिरूपाणि। यत्वोत्पन्निकजयभाजनानांदेवा
दीनांजयोनयोःकथमितिशंकेथं। नदेवानांप्रजापानांविजेतावरतोविना। बलेनविद्ययावापिनसमस्त्यपतीत्विना॥ वरोपिताहशोया
वच्छरीरंनान्यदेहगइत्यनेनपरिहर्त्तव्येति ३१ इतिश्रीभागवतटीकायांतृतीयस्कंधेसप्तदशोऽध्यायः॥ ॥एकमर्थमनेकधाप्रतिप

तंवीरमारादभिपद्यविस्मयःशयिष्यसेवीरशयेश्वभिर्वृतः॥ यस्त्वद्विधानामसतांप्रशांतयेरूपाणिधत्तेसदनुग्रहेच्छया ३१
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेहिरण्याक्षदिग्विजयोनामसप्तदशोऽध्यायः॥ ॥मैत्रेयउवाच॥ ॥तदेवमाक
र्ण्यजलेशभाषितंमहामनास्तद्विगणय्यदुर्मदः॥ हरेर्विदित्वागतिमंगनारदाद्रसातलंनिर्विविशेत्वरान्वितः १ ददर्शतत्रा
भिजितंधराधरंप्रोन्नीयमानावनिमग्रदंष्ट्रया॥ मुष्णंतमक्ष्णास्वरुचोरुणश्रियाजहासचाहोवनगोचरोमृगः २

द्यमानोमहामनाः। तद्वरुणोक्तंविगणय्यावज्ञायविचार्यवाआगच्छेति। यद्यपिविंशतेःसंपूर्वीत्त्वापार्ष्णत्वंतथाप्यत्रजलेनेत्रेनिमील्यप्र
वेशाभिप्रायेणोक्तं १ अग्रेदंष्ट्रयादंष्ट्राग्रेणप्रकर्षेणोर्ध्वंनीयमानावनिर्येनसतथातं। धराधरंपर्वतंकिंत्वत्युत्क्रमविजितं। अक्ष्णाअंबुरुहा
रुणश्रियंरक्तपद्मस्यलक्ष्मीमुष्णंतंचोरयंतं। वनेजलेगावश्चरतीतिवनगोचरोवराहः २

भा·त·
११२

नन्वनुमृगयमाणो वने जले वा हरिर्यो भूद्यो हरिरित्युपहसन्तिरश्चीनो गतः किमित्यपाह। आहेति। विश्वसृजा ब्रह्मणा रसौकसां दैत्यानामर्पिता दत्ता अनुयाऽभूम्या। सुराधम आयस्मात्सुराधम इति तात्पर्यार्थः। अनेन हिरण्याक्षस्यातर्भक्तिं द्योतयति। शाती तिकेन द्वन्द्वं प्रकटयति। यथा सं भ अस्माकं शत्रुभूतैर्देवैरभवाय हननाय मायया सूकरादिभाजेनासुरान्नो हंसि मारयसि। अन्यत्र नो भयाय संपन्ने वसुन्धराद्रोरमूहतीयं ३

आहैनमेह्यज्ञ महीं विमुञ्च नो रसौकसां विश्वसृजेयमर्पिता। न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ३ त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंस्यसुरान्परोक्षजित्। त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढं प्रमृजे सुहृच्छुचः ४ त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यम्। बलिं हरन्त्यृषयो ये च देवाः स्वयं सर्वे न भविष्यन्त्यमूलाः ५

राम
११२

ईतः किं यस्त्वं मायया असुरान्हंसीति। कीदृशस्त्वं। परोक्षजित्परोक्षेणाप्रत्यक्षतया वीर्येण जयतीति। अज्ञानी द्वियाणि जयतीत्यनृति रत एव परः। योगमायाबलं कपटोपायबलं न तु एवाल्पपौरुषं त्वां संस्थाप्य हत्वा सुहृदां शुचः प्रमृजे इत्यन्वयः॥ स्वरूपे छायाबलं स्वसमपुर चसमूहरहितमेकं विन्नेस स्थ्यक्रुस्यापयितुं योगं प्रमूढं भक्त्याहं तं कृत्वा सर्वत्र सुहृदहं संसारशुचः प्रमृजे इत्यन्वयः ४ इदानीं बाह्यदेवभुक्त यति। त्वयीति। अमूलाः मूलाश्रयरहिताः ५

तस्यान्तरभक्तिं विदधान इव बाह्यद्वेषं सहमानोऽपदर्थं जलमज्जनं तत्करोमीति मत्वा न उदमज्जदित्याह। स इति। उपलक्ष्य दृष्ट्वा। करेणुर्हस्ति नी। ग्राहेरे भीष्टकार्यमध्ये हिरण्याक्षेण किमकारीत्याह। तमिति। अनुद्रुतोऽनुयातः हिरण्यकेशो हिरण्याक्षः ७ विलोक्यामिकी भूया गता यामप्यविभ्यतो हरेः किमकेनहिरण्याक्षेणानुयातेनेति भावेन भूमेः प्रतिष्ठापनप्रकारं वक्ति। सगामिति। गां भूमिमुदस्तादुपरि गोचरे अदृश्य

स तुद्यमानोऽरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलक्ष्य भीताम्॥ तोदं मृषन्निरगादम्बुमध्याद्ग्राहाहतः सकरेणुर्यथेभः ६ तं निःसरं तं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः॥ करालदंष्ट्रोऽशनिनिस्वनोऽब्रवीद्गतह्रियां किं त्वसतां विगर्हितं ७ स गामुद स्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वं॥ अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः ८ परानुषक्तं तप नीयोपकल्पं महागदं काञ्चनचित्रदंशं॥ मर्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः प्रचण्डमन्युः प्रहसंस्तं बभाषे ९

देशे स्वसत्त्वं स्थैर्यलक्षणं स्वबलं। जलमध्ये। न अथ जले भूमिं प्रतिष्ठाप्य पृष्ठतोऽनुहतं रिपुमविगणय्य हरिणा किं कृतमत्राह। परानुषक्तमिति। परानुषक्तं पृष्ठतो गतं। तपनीयोपकल्पा सुवर्णाभरणभूषिता महती गदा यस्य स तथा तं। काञ्चनैराभरणैश्चित्रितान्यलंकृतान्यङ्गान्यवयवा यस्य स तथा तं। प्रहसन्नित्यनेन वाक्यकोपलक्षणं निराकृतं। इदं महतां लक्षणं ९

किमाहेत्यत आह। सत्यमिति। जलशायित्वाद्वनगोचरा जलविषयाः। ज्ञानिनिर्भयत्वान्मार्गणा इच्छागा इत्येन तत्सर्वं। तत्र केषां मार्गणं क्रि
यत इत्यत उक्तं युष्मद्विधानिति। ग्रामसिंहान् श्वानः। मृत्युपाशैः प्रतियुक्तस्य बद्धस्य पुंसो विकत्थनमसंबद्धभाषणं १० न्यासहरा निक्षेप
हारिणः। रसौकः सुस्थितेषु कथं निक्षेपापहरणमित्यत उक्तं गतह्रिय इति। तदुक्तं त्वं न भवानपि द्रवति वै तुल्यः समाधिरित्यत उक्तं।
तिष्ठामहइति। बलिना रिपुणा वैरमुत्पाद्य कथं विद्राणोऽस्थेयं स्थानं त्यक्त्वा कुत्र यामो गंतव्यप्रदेशाभावात्। अथ तस्मात्तिष्ठामहे आत्मानं प्र

श्रीभगवानुवाच सत्यं वयं भो वनगोचरा मृगाः युष्मद्विधान्मृगये ग्रामसिंहान्॥ न मृत्युपाशैः प्रतियुक्तस्य वीरा
विकत्थनं तव गृह्णन्त्यभद्र॥१०॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताः ते॥ तिष्ठामहे थापि कथंचिदाजौ
स्थेयं क्व यामो बलिनोत्पाद्य वैरं ११ त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः॥ संस्थाप्य चास्मान्
मृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः १२

कास्यपि स्थितिं कुर्मः। प्रकाशनस्थेया स्वयोग्येति सम्राडात्मनेपदस्य योगः ११ नाहं बलीति नेत्याह। त्वमिति। रथानामिति रथिनो लक्ष्यंते।
रथानां रथिनां यूथपाधिपस्त्वं नोऽस्मान् अस्वस्तये नाशाय आशु अमंगलाय उद्दुहे दोहमकार्षीरिति यत्नात् किं लक्ष्मीडनमसुराणां हिंसा विहास्व
भावो ह्यतो युद्धाय घटस्वेत्यन्वयः। किल स्वैव्यक्रीडन इत्तिथा नुः। ततः किं फलमत्राह संस्थाप्येति। इयं तव प्रतिज्ञा अस्याः अपालनेन तवाप्रशस्त
कर्मत्वस्या दित्याह। यः स्वामिति। अतिपिपर्ति प्रशस्य पालयति। पूपालनपूरणयोः अतिः स्यादधिकार्थी नो प्रशंसायामतिक्रम इति १२

आविष्टासुरभावनिमित्तं बाह्यक्रोधभावमाह। स इति। प्रलब्धः वाचा वंचितः क्रीड्यमान अनिष्टक्रीडाविषयं क्रियमाणः पीड्यमान इ तिवा
१३ मन्युना प्रपंचलितानि स्वस्थानच्युतानीन्द्रियाणि यस्य सः १४ योगारूढो योगाविष्टः १५ दष्टो दच्छदोऽधरोष्ठो येन स तथा १६ आजघ्न इत्यस्या
कर्मकत्वस्य द्योतनाय दक्षिणांसभ्रुवीत्युक्तं आङो यमहन इत्यात्मनेपदं। कोविदो गदायुद्धमार्गप्रभेदज्ञानपटुः।१७। हर्यक्षो हिरण्याक्षः हरिरच्युतः १८

सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं॥ आजहारोल्बणं क्रोधं क्रीड्यमानोऽहिराडिव १३ विसृजन्नमर्षितः श्वासान्मन्युप्रचलितेंद्रियः॥ आसा
द्य तरसा दैत्यो गदयाभ्यहनद्धरिं १४ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि॥ अवंचयत्तिरश्चीनो योगारूढ इवांतकं १५ पुनर्गदां स्वामा
दाय भ्रामयंतमभीक्ष्णशः॥ अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदः १६ ततः स्वगदयारातिं दक्षिणांसभ्रुवि प्रभुः॥ आजघ्ने स तु तां सौ
म्य गदया कोविदोऽहनत १७ एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च॥ जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः १८ तयोः स्पृधोस्ति
ग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः॥ विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः १९ दैत्यस्य यज्ञा
वयवस्य मायया गृहीतवाराहतनोर्महात्मनः॥ कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् २०

स्पृधोः स्पर्द्धमानयोः क्षतस्रवस्य घ्राणेन विवृद्धयुद्धयथोक्तं तयोः इलायां भुवि शुष्मिणोः मत्तवृषभयोः १९ इदं युद्धं काकयाम्यकर्मवद्दृष्टांतं
न किंतु ब्रह्मादिदेवैर्दृष्टमिति भावेन ब्रह्मागमनेवक्ति। दैत्यस्येति। यज्ञात्मत्वाधनानि वा वयवे तु यस्य स तथा तस्य मायया स्वेच्छया। स्वं स्वतंत्रप
रमात्मानं राजयति प्रकाशयतीति स्वराट् ब्रह्मा। तदुपदिष्टब्रह्मज्ञानेन हि सर्वेषां मुक्तिरिति २०

नकेवलंयुद्धदर्शनायब्रह्मणआगमनंकिंतुदैत्यवधोपायनिवेदनलक्षणकार्यांतरज्ञापनायचेत्यनेनाशयेनहरिंप्रतिब्रह्मविज्ञापनप्रकारंव क्ति॥ आसन्नेति। अनेनकोविदेनापृथ्वीप्राप्तपरिहारप्रकारोवक्तव्यइतिन्यायदर्शनार्थमुक्तंनतुहरेरूपायाज्ञानादितितात्पर्यं। आसन्नंशौंडीरं प्राप्तपाटवं। अहार्यःआहर्तुमशक्योविक्रमोयस्यसतथातंविलक्ष्यदृष्ट्वासहस्रणीःअनेकल्पजननेतृत्वात्ब्रह्मणोयोगनाम २१ प्रथमतो दैत्यस्यवध्यत्वेकारणमाह। एषइति २२ इयदागःप्रहारेणागस्कृत्। अस्मिकृत। आगोमेतत्स्वविप्रियमिति। वधादिनाभयकृत् अग्निहोत्रादि

आसन्नशौंडीरमपेतसाध्वसंकृतप्रतीकारमहार्यविक्रमं॥ विलक्ष्यदैत्यंभगवान्सहस्रणीर्जगादनारायणमादिसूकरं २१ ब्रह्मो॰ एषतेदेवदेवानामंघ्रिमूलमुपेयुषां॥ विप्राणांसौरभेयीणांभूतानामप्यनागसां २२ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः। अन्वेषन्नप्रतिरथोलोकानटतिकंटकः २३ मैनंमायाविनंदृप्तंनिरंकुशमसत्तमं॥ आक्रीडबालवद्देवयथाशीविषमुत्थितं २४ नयावदेषवर्द्धेतस्वांवेलांप्राप्यदारुणः॥ स्वांदेवमायामास्थायतावज्जह्यघमच्युत २५ एषाघोरतमासंध्यालोकच्छंबट्करीप्रभो॥ उपसर्पतिसर्वात्मन्सुराणांजयमावह। २६

दूषणेनदुःकृत। तत्रनिमित्तमाह। अस्मद्राद्धेति। २३। क्रीडायाअकरणेकारणमाह। यदिति। आशीविषंकृष्णसर्पंविबुद्धमुत्थितंबाल तयनस्पृशेदिति। २४॥ स्वांवेलामासुरीमपराह्णीनावद्भवतः। सर्वमेवस्वांमायांमहिमानं। त्वदन्येननहन्यतइत्यर्थः। ब्रह्माच्युतेत्यनेन। अघ्नतः स्वनवद्धिष्णुरसमःसमवत्तथा। अजितोजितश्चैवज्ञोज्ञवच्चप्रकाशयेत्। सर्वरूपेषुनंतोपिब्रह्माद्याश्चैवतन्मतेः। अनुसारितयाब्रूयुःकुर्युश्चन सदुःखभागितिवाक्यंद्योतयति २५ कीदृश्यासुरावेलेतितत्राह। एषेति। आदरंतुसुरंवविद्याच्छंबट्कारंतुभक्षणमित्यभिधानात्लोकच्छंबट्करी सर्वजनभक्षणी २६

इदानींसमीचीनोयोगःकइतितत्राह। अधुनेति। मध्याह्नस्थमिजिन्नोक्तआषाढोत्तरएवच। श्रवणपित्र्यंवीक्षिविपुवच्चाभिजित्स्मृतइत्यतोभि जिन्मत्रयोगोमध्यंदिनमुहूर्त्ते २७ अस्यानन्यवध्यत्वंस्पष्टयनयति। दिष्ट्येति। मृत्युंमारकंत्वांत्वांशर्मणिसुखेआधेहिस्थापय २८ इतिश्री भागवतेमहापुराणेभागवतटीकायांतृतीयस्कंधेएकोनविंशोऽध्यायः॥ ॥ब्रह्मवचनेहरिणावष्टंतंकिमत्राह। अवधार्येति। अपांगेनकटा क्षेण १ विरिंचवाक्यग्रहणंगाहरिणाकृतमितिकथंनायतइतितत्राह। ततइति। मुखतःपुरतःहनौकपोलेअक्षजोब्रह्मनसाहेणजन्नस्तस्यासुरस्यक

अधुनैवाभिजिन्नामयोगोमौहूर्त्तिकोह्यगात्॥ शिवायनस्त्वंसुहृदामाशुनिस्तरदुस्तरं २७ दिष्ट्यात्वांविहितंमृत्युमयमासादितः स्वयं॥ विक्रम्यैनंमृधेहत्वालोकानाधेहिशर्मणि २८ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेहिरण्याक्षवधोपायोनामएको नविंशोऽध्यायः॥ ॥मैत्रेयउवाच॥ ॥अवधार्यविरिंचस्यनिर्व्यलीकामृतंवचः॥ प्रहस्यप्रेमगर्भेणतदपांगेनसोऽग्रहीत् १ ततःस पत्नंमुखतश्चरंतमकुतोभयं। जघानोत्पत्यगदयाहनावसुरमक्षजः २ साहतातेनगदयाविहताभगवत्करात्॥ विघूर्णिता पतद्रेजेतदद्भुतमिवाभवत् ३ सतदालब्धवीर्योपिनबबाधनिरायुधं॥ मानयन्समृधेधर्मंविष्वक्सेनंप्रकोपयन् ४

पोलेहननंकथमित्यतउक्तं। उत्पत्येति २ दुष्टजनमोहनार्थंहसाहतेति। विघूर्णिताविभ्राम्यत्पक्षोरेजेउल्कावदितिशेषः। ३ तदाजनं। असु रोपिस्वस्यधर्मयुद्धविर्त्वप्रकाशयति। सइति। लब्धवीर्यःप्राप्तावकाशः। मृधेधर्मप्रत्ययार्थंनिरायुधेसायुधेनतेस्तानप्रतिहर्त्तव्यमितिलौकिके अरयांपहरिप्रियंतदुक्तं। धर्मःसत्यमितिप्रोक्तोधर्मपिद्वेशप्रियइति। अनेनयोहरेःप्रियसधर्मोऽन्योलौकिकइत्युक्तंभवति। अतएवमानया

अथ विद्धगदाशस्त्रापादानं येऽधानानुगुणितं किमुत हरेरनेन हरिणा किमकारीति तत्राह। सुनाभमिति। सुनाभं सुदर्शनं ५ महानपीतरप्रेरितस्य स्वकर्तव्यं करोति न तु स्वयमिति भावज्ञाः खेचरा अस्य वधाय प्रेरयन्तीत्याह। तमिति। अयं शत्रुहननाय विभ्रमद्व्यग्रचक्रे यस्य स तथा तं। नहि दृष्ट स्य हरेः स्वरूपज्ञानां ६ दैत्यस्य वीरस्वभावं दर्शयति। स इति। खेचराणां तद्वचनं निशम्यामर्षेण दुःसहद्वेषेण परिप्लुतानि स्वस्थानच्युतानि

गदायामपविद्धायां हाहाकारे विनिर्गते॥ मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः ५ तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्षदमुख्येन विषज्जमानं॥ चित्रा वाचोऽतद्विदां खेचराणां तत्र स्मासन्स्वस्ति तेऽमुं जहीति ६ स तं निशाम्यात्तरथाङ्गमग्रतो व्यवस्थितं पद्मपलाशलोचनं॥ विलोक्य चामर्षपरिप्लुतेन्द्रियो रुषा स्वदन्तच्छदमादशच्छ्वसन् ७ करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव॥ अभिप्लुत्य स्वगदया हतोऽसीत्यहनद्धरिं ८ पदा सव्येन तां साधो भगवान्यज्ञसूकरः॥ लीलया मिषतः शत्रोः प्राहरद्वातरंहसा ९

इंद्रियाणि यस्य स तथा। स्वदंतच्छदं स्वाधरोष्ठमदंशद्दष्टवान् ७ वीरत्वाद्धरोष्ठदंशनफलमाह। करालेति। संचक्षाणः पश्यन् हतोऽसीत्याभाष्ये ति ८ हरेर्युद्धश्लाघनं वक्ति। पदेति। शत्रोः तां गदां वातरंहसा वायुवेगगमनेन प्रतिवीरस्य प्रतिहारयोग्यत्वप्रकाशेन हरेरतिमाहात्म्यं प्रकाशितं ९

एतदेव घनयति। आहेति। वः समुच्चये। नह्यल्पमाहात्म्यस्यायुधमादत्स्वेत्यादिप्रतिवचनं युज्यते भीत्या वा गतुकूलनात्। युद्धमाकांक्षतीत्याह। त्वमिति। उक्तं सत्यमिति मत्वा नः स्वपार्श्वं व्यनक्ति। इतीति १० हरिरपि युद्धश्लाघं वदर्शयतीत्याह। तामिति ११ दैत्यस्याभिमानमुन्मूलयति। स्वपौरुष इति १२ ततः किं चकारेति तत्राह। जग्राहेति। अभिचरन्कृत्यां प्रयुंजानः १३ स्मरणादागतं मां वैरि विधाय किमिति तत्राह युक्तं भगवानि ति सुदर्शनवेत्यज्ञानं निवर्तनेन शूलमच्छिनदित्याह। तदेति। यदौजसा बलेन दैत्येन महाभटेनार्पितं मुक्तं तदा भगवान्निशातनेमिनाऽत्युज्जित

आह चायुधमाधत्स्व घटस्व त्वं जिगीषसि॥ इत्युक्तः स तदा भूयस्ताडयन्व्यनदद्भृशं १० तां स आपततीं वीक्ष्य भगवान्समवस्थितः॥ जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीं ११ स्वपौरुषे प्रतिहते हतमानो महासुरः॥ नैच्छद्गदां दीयमानां हरिणा विगतप्रभः १२ जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपं॥ यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा १३ तदोजसा दैत्यमहाभटार्पितं चकासदन्तःख उदीर्णदीधिति॥ चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितं १४

धारणानेनानेकसंख्यारिच्छेदनेऽप्यस्य नैशित्यनाशो नास्तीति सूचनेन हरिचक्रस्य हरेरिवातिमाहात्म्यमुक्तं। चक्रेण शूलं चिच्छेद दैत्यस्त्वयः आत्म स्पर्शात्पूर्वमेवाच्छिनदिति द्योतनायोक्तमन्तःख इति अन्तःखे आकाशमध्ये उदीर्णा दीधितिर्यस्य तत्तथोक्तं। अनेन हरिचक्राद्दनेनाच्छेद्यत्वसूच द्योतितं। मंदबुध्यवतारार्थं निकृष्टमपि दृष्टान्तयति। हरिरिति। दधीचेर्महामुनेरस्थ्ना विरचितवज्रस्यामोघत्वेन तच्छेदसुनेरवज्ञानिमित्तकोपभ यात्तार्क्ष्यदेनोज्झितं यत्पक्षपतत्रमिंद्रोऽच्छिनदिति तद्दिष्टान्यत हरिरित्यादिना १५

किंदैत्यआयुधाभावात्स्थावदितितत्राह। वृक्णइति। वृक्णेछिन्ने। विभूतिर्लक्ष्मीस्तस्याश्रीनिविभूतिमत्। प्रहृत्यप्रकाहारंकृत्वांअसुरःमायया असनशीलः असेरुरदितिसूत्रात्दसुकेपएाइतिधातोश्च्छील्पार्थउरनत्यपयोभवति १५ दैत्यमुष्टिप्रहारेणकिंहरिणापतितंमूर्छितंपलायि तमितिविदुरस्यमानसींशंकांपरिहरति। तेनेति। द्वाभ्यांपिबतीतिद्विपोगजः १६ अंतर्धायदैत्येनकिमकारीतितत्राह। अथेति। योगमाये

वृक्णेस्वशूलेबहुधारिणाहरेःप्रत्येत्यविस्तीर्णमुरोविभूतिमत्॥ प्रवृद्धरोषःसकठोरमुष्टिनानदन्प्रहृत्यांतरधीयतासुरः १५
तेनेत्थमाहतःक्षत्तर्भगवानादिसूकरः॥ नाकंपतमनाक्क्वापिस्रजाहतइवद्विपः १६ अथोरुधासृजन्मायांयोगमायेश्वरेहरौ॥
यांविलोक्यप्रजास्त्रस्तामेनिरेस्योपसंयमं १७ प्रववुर्वायवश्चंडास्तमःपांसवमैरयन्॥ दिग्भ्योनिपेतुर्ग्रावाणःक्षेपणैःप्रहिता
इव १८ द्यौर्नष्टभगणाभ्रौघैःसविद्युत्स्तनयित्नुभिः॥ वर्षद्भिःपूयकेशासृग्विण्मूत्रास्थीनिचासकृत् १९ गिरयःप्रत्यदृश्यंत
नानायुधमुचोऽनघ॥ दिग्वाससोयातुधान्यःशूलिन्योमुक्तमूर्द्धजाः २०

श्वरेस्वरूपभूतानामणिमादिमहिम्नामधिपतौविस्मनेनासृजत्मायाःहरेर्वाधिकानस्युरितिसूचितं। अस्यविश्वस्योपसंयमंप्रलयं १७ पांसवं धूलिमयंक्षेपणैःपाषाणक्षेपणैः पाषाणक्षेपणयंत्रैः १८ द्यौर्व्योमाभ्रौघैर्मेघजालैःविद्युतस्तडितस्तनयित्नवोगर्जन्मेघाः विद्युतैस्तन यित्नवःतैःसहवर्त्ततइतितैः १९ मुधसंप्रहारइतिधातोःनानायुधानिनानायुधसंप्रहारान्मुंचंतीति। दिग्वाससोनग्नाः २०

अतिवैशसाःअतिक्रूराःपत्त्यादिभिरुत्सृष्टाःउच्चरिताहिंस्राःवाचोऽश्रूयंतेतिशेषः २१ यथैवच्छायैवसर्वंतुमनसादेहतोपिवा। कर्तुंशक्ताविशा खाद्यालीलैवानंतशक्तिरितिवचनान्मनआदिनाअसुरमायानिरासेसमर्थोपिभगवान्लीलयैवतन्नाशायसुदर्शनंप्रायुंक्तेत्याह। प्रादुष्कृता नामिति। विनाशनंविनाशकारणं। अस्मृते त्रेममभयमितित्रयःपादायस्यसःत्रिपात् २२॥ सुदर्शनप्रयोगेणभगवान्दितेःपुत्रमरणंसूचितमिति तदे ति। २३॥ प्रभातेनकर्कवरवत्स्वमायानाशेपराङ्मुखत्वंकिंनेत्याह। विनष्टास्विति। रुषाक्रोधभावात्कथंपुनरुपगूहमानःआलिंगितुमिच्छन् आहिवतयदावेष्ट्य निष्पीड्य

वहुभिर्यक्षरक्षोभिःपत्त्यश्वरथकुंजरैः॥ आततायिभिरुत्सृष्टाहिंस्रावाचोतिवैशसाः २१ प्रादुःकृतानांमायानामासुरीणांविनाशनं॥ सु दर्शनास्त्रंभगवान्प्रायुंक्तदयितंत्रिपात्॥२२॥ तदादितेःसमभवत्सहसाहृदिवेपथुः॥ स्मरंत्याभर्तुरादेशंस्तनाच्चासृक्प्रसुस्रुवे २३ विनष्टा सुस्वमायासुभूयश्चाव्रज्यकेशवं॥ रुषोपगूहमानोऽमुंददृशेवस्थितंबहिः॥२४॥ तंमुष्टिभिर्विनिघ्नंतंवज्रसारैरधोक्षजः॥ करेणकर्णमूले हन्यथात्वाष्ट्रंमरुत्पतिः॥२५॥ सआहतोविश्वजिताह्यवज्ञयापरिभ्रमद्गात्रउदस्तलोचनः॥ विकीर्णबाह्वंघ्रिशिरोरुहोपतद्यथानगेंद्रोलुलि तोनभस्वता २६

हन्मीतिभावोप्यप्रयोजकइत्याशयेनाह। उपेति। उर्वेत्यंतसमीपवर्त्तमानममुंभगवंतंउपगूहमानः स्वहस्तवलयात्बहिरवस्थितंहरिंददर्शइत्यन्वयः २४ म मशत्रुहननात्रावायुधग्रहणंमंदजनानुकरणार्थंनत्वशक्यत्वतः स्वहस्तादिनैवशक्तिरस्तीतिज्ञापयन्शत्रुंहंतीत्याह। तमिति। अहन्आहतवान् त्वष्टुःपुत्रंवृत्रंमरुत्पतिरिंद्रः २५ हरेरयंप्रहारोरिपोर्दीर्घनिद्राहेतुरित्याह॥ सआहतइति॥ विश्वजिताहरिणाअवज्ञयानिरायासेनसआहतः लुलितउ न्मूलितःनभस्वतावायुना २६

वीराणां रणाङ्गे मरणं श्लाघ्यं किं पुनर्भगवन्निमित्तमिति भावेन ब्रह्मादयोऽस्यासुरस्य मरणं श्लाघयंतीत्याह। क्षिताविति। संस्थितिं मरणं २७ इतरमरणादस्य
मरणस्य वैशिष्ट्ये किं कारणमत्राह। यमिति। असतो मंगलात् सूक्ष्मशरीरात् मुमुक्षवः। करपादयोरैक्यादन्योन्यं क्रियाशक्तिमत्वाच्च पदाहत इत्युक्तं। यो
गिनामस्य दैत्यस्य महान् विशेषोऽस्तीति द्योतयितुं वा हि तस्य नेत्र न तद्देहत्यागोऽपि देहान्तरारंभोऽस्तीति सूचनात्। अतोऽस्य मुक्तता पि कं च हरिमुखं दृष्ट्वा मरणेन

क्षितौ शयानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदं॥ अजादयो वीक्ष्य शशंसुरागता अहो इमं को नु लभेत संस्थितिं २७ यं योगि
नो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षवः॥ तस्यैष दैत्यऋषभः पदाहतो मुखं प्रपश्यंस्तनुमुत्ससर्ज २८ एतौ हि पार्ष
दावस्य शापाद्यातावसद्गतिं। पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः २९ नमो नमस्तेऽखिलयज्ञतंतवे स्थितौ गृहीतामल
सत्वमूर्तये॥ दिष्ट्या हतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ३०

स्यान्तरं विपार्षदस्यैव तत्तदा विहस्यासुरस्य २८ पार्षदत्वं स्मारयति। एताविति। असद्गतिमासुरीं योनिं जन्मभिरिति बहुवचनेन शापमोक्षानंतरं
जन्मान्तरं प्राप्य ज्ञानमापद्य वैकुंठे मुक्तिस्थानप्राप्तिरिति सूचयति २९ इदानीमपरोक्षं स्तुवंतीत्याह। नमइति। अखिलयज्ञतंतवे अखिलयज्ञा
नां प्रवर्तने संतानभूताय स्थितौ निमित्तभूताय अरुंतुदो व्यथकः। अयं विक्रमोऽस्माकमपि परमानंदहेतुरभूदित्यानुरित्याह त्वत्पादेति ३०

हिरण्याक्षहननानंतरं हरिणा को विक्रमो कारि सोऽपि वेत्तमाख्याहीति मानसीं विदुरशंकां प्रत्याह। एवमिति। संसादयित्वा निहत्य नितरां हननेन स्वातंत्र्यं दर्शयति। पु
ष्करविष्टरादिभिर्ब्रह्मादिभिः ३१ हरेर्वराहावतारस्य चरितमुपसंहरति। मयेति। यथा येन प्रकारेण हरिणा हिरण्याक्षो निराकृत हतः स यथा तेन विधिना कृत
वराहावतारस्य हरेश्चेष्टितं मया नूनं कृत्स्नवत् कथितं आदितश्च अथ आरीय। अधाथोऽनंतराप्यर्थविकल्पारंभमंगल इति यादवः ३२ कोऽप्येतां कथां श्रो

मैत्रेय उवाच॥ ॥एवं हिरण्याक्षमसह्यविक्रमं स संसादयित्वा हरिरादिसूकरः॥ जगाम लोकं स्वमखंडितोत्सवं समीडितः पुष्करविष्टरादि
भिः ३१ मया यथानूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितं। यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ३२
श्रीशुक उवाच इति कौषारवाख्यातामाश्रुत्य भगवत्कथां॥ क्षत्तानंदं परं लेभे महाभागवतो द्विजाः ३३ अन्येषां पुण्यश्लोकाना
मुद्दामयशसां सतां॥ उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ३४ यो गजेंद्रं झषग्रस्तं ध्यायंतं चरणांबुजं॥ क्रोशंतीनां करेणूनां कृ
च्छ्रतोऽमोचयद्द्रुतं ३५ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः। कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ३६

त्वशेषुरवीमनुकूलयति। इतीति। यथा मम परमानंदोऽभूत्तथा विदुरस्यापि किमिति परीक्षितो मनःशंकां परिहरति शुक इत्यनेनाह। इतीति ३३ अत्र
केमुत्येन परमानंदं संपादयति। अन्येषामिति ३४ उक्तापि हरेः कथाश्रवणात् परमानंदावाप्तिः स्यादित्याह य इति। करेणूनां करिणीनां क्रोशंतीनां रुदं
तीनां सतीनां कृच्छ्रात् आसन्नमरणात् कृतस्मरणानंतरं कालक्षेपमंतरेण ३५ एवंविधो हरिर्भक्त्यैकसाध्य इत्याह। तमिति। अन्ययोगव्यवच्छेदार्थमाह। दु
राराध्यमिति ३६

फलश्रवणोक्तिः प्ररोचनार्थेति न मन्तव्यं विशेषप्रवृत्तिः स्यादिति तद्वृत्तिर्योग्यः इति ब्रह्मपिशब्देनान्यदुःकृतानां संग्रहात् ब्रह्म परमात्मतत्वमजाननेन वध्यत इति ब्रह्मवधः संसारः तस्मात् उक्तफलेऽधिकारिणमाह। द्विज इति। तस्यैव हरौ निरतिशयभक्तिसंभवात् ३७ गानाद्यशक्तानां श्रवणेकरतानां किं फलमत्राह एतदिति। अंत इति विशेषणात् श्रवणाभ्यासेन मननादिशक्तिसंभवात् अपरोक्षज्ञानसामर्थ्याल्लिंगशरीरविनाशे नारायणो गम्यत इति गतिर्भवतीति ध्वनयति ३८ इति तृतीये विंशोऽध्यायः॥ ॥ सृष्टिप्रलयाभ्यां स्फुटं विज्ञेयस्य देवादीनां तारतम्यज्ञानस्य हरिप्रीतिजनकत्वेन पुरुषार्थहेतुत्वादनुक्तसमुच्चयार्थं च पूर्वो

यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः॥ शृणोति गायत्यनुमोदतेंजसा विमुच्यते ब्रह्मवधादपि द्विजः ३७ एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुराशिषां। प्राणेंद्रियाणां युधि शौर्यवर्द्धनं नारायणोंते गतिरंग शृण्वतां ३८ इति श्रीभागवते महापुराणे तृतीयस्कंधे हिरण्याक्षवधो नामविंशोऽध्यायः राजोवाच महीं प्रतिष्ठामध्यास्य सौते स्वायंभुवो मनुः॥ कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनां १

क्तसृष्टिप्रपंचयत्यस्मिन्नध्याये। सृष्टौ लये तारतम्यं देवानां ज्ञायते स्फुटं। तारतम्यपरिज्ञाने महातात्पर्यमिष्यते। अतस्तद्वदुशस्तूक्तमन्यच्चेत्यकाशकमिति वचनात् प्रवक्ता श्रोतुरभीष्टमर्थं ब्रूते किमन्यदिति ज्ञातुं न शक्यते तस्मात्तन्निरासार्थं तत्रादौ राजा शुकं पृच्छति। महीमिति। महीमध्यास्य महां स्थित्वा आधिशीङ् स्थासां कर्मेति सूत्रात् सप्तम्यर्थे द्वितीया। अवरजन्मनां पश्चात्तनकाले जातानां प्राणिनां मार्गाय वर्णाश्रमस्वरूपप्रभेदज्ञानाय कानि द्वाराणि सृष्टिसाधनानि अध्यतिष्ठत् अन्वस्थित आसृजदित्यर्थः १

विदुरश्च प्रवचनानुसारेण मम वक्तव्यमिति भावेन पृच्छसीत्याह क्षत्तेति। स नि कृष्णमृत्योस्त्वं विदुर प्रश्नो ग्राम्यविषयत्वेन कथं संगच्छत इत्याशंक्य नमाह शोत्साविति तद्गुणानाह। क्षत्तामहाभागवत इत्यादिना। अत्रैतानि विशेषणानि मिथो हेतुहेतुमद्भावस्त्वकानीति ज्ञायते। क्षतसंचूर्ण न इति धातोः। संसारगिरिसंचूर्णनात् क्षत्ता। एकः प्रधानः सर्वान्नमो हरिरंतो निर्णयो यस्यासौ यस्मिन्नर्थे यथाविहितप्रत्ययः। अग्रजो वा नपरा

क्षत्ता महाभागवतः कृष्णस्यैकांतिकः सुहृत्॥ यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति २ द्वैपायनादनवरो महित्वे तस्य देहजः॥ सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयं विदुरो जगती(?)तीर्थसेवकः॥ उपगम्य कुशावर्त्त आसीनं तत्वविन्तमं ४ तयोः संवदतोर्विप्र प्रवृत्ता ह्यमलाः कथाः॥ आपो गांगा इवाघघ्नीर्हरेः पादांबुजाश्रयाः ५ ता नः कीर्त्तय भद्रं ते कीर्त्तन्योदारकर्मणः॥ रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन् ६ सूत उवाच एवं परीक्षिता पृष्टो भगवान्बादरायणिः॥ भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ७

धवान् २ सर्वात्मनेति प्रोक्तहेतूनि निगमनरूपं ३ किमन्वपृच्छन्मया पृष्टमन्यद्वेति। कुशावर्त्ते गंगाद्वारे। तत्रान्यप्रसंगाद्दूरीभूता एवेति भावेनाह। तयोरिति ५ बहुत्वाः श्रुतत्वात्तवतेऽथानिद्रालुत्वस्मादिति तत्राह रसज्ञ इति ६ एतमर्थं सूतः शौनकादिभ्यः कथयति। एवमिति। अर्पिताध्यात्मः शरीरमधिकृत्य वर्त्तमानं मन आदीन्द्रियजातं येन सोऽर्पिताध्यात्मः ७

शुकोपि वत्सृष्टमर्थं पृष्टं विदुरेयोमेत्र तत्कीर्त्या हाहरेरिति। ८। किमाहेति। तत्राह। प्रजापतीति। अव्यक्तानां परमात्मादितत्त्वानां मार्गं प्रकारं वेत्तीति। ९। राजन्विदुरस्य श्रेयोरेकविषयत्वं वक्ति। यदृति। आभावयन् भावयन्। १०। द्वितीयो भार्या। स्वतंत्राः अन्यापेक्षारहिताः कर्मभिः योरिता उति शेषः। संहताः संमिलिताः। स्वेत्यनेनेनसंहत्यसर्जनं प्रधानं स्मारयति। ११। किमारभतेति यत्पृष्टं तस्योत्तरं वक्तुं पूर्वोक्त सृष्टिमविचारणयाद्वितीयानुवदति। दैवेनेति। दुर्वितर्क्येण प्राणपदृष्टानां बहुत्वादनुमानुमशक्येन दैवेनादृष्टेन नेवात्तर्केण मतिरापनेयेतिक्तेतरदृष्टांतर्यामिणा हरिणा वा। दुर्विकल्पेनेति पाठे इदमदो वेति संशयाविषयेण निमिषेण सर्वतो विलक्षणेन सृष्टि

श्रीशुक उवाच॥ ॥हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात्॥ लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनिमाह भारत ८ विदुर उवाच प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन्॥ किमारभत मे ब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित् ९ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः॥ ते वै ब्रह्मण आदेशात्कथमेतदभावयन् १० सद्वितीयाः किमसृजन्स्वतंत्रा उत कर्मभिः॥ आहोस्वित्संहताः सर्व इदं स्म समकल्पयन् ११ मैत्रेय उवाच दैवेन दुर्वितर्क्येण परेणानिमिषेण च॥ जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् १२

कालेन तदंतर्यामिणा हरिणा वा सर्वेषां मूलकारणस्य प्रलयसमुद्रे लक्ष्मीमयपर्यंकशायानस्य भगवतः प्रेरणया जाता त्क्षोभात्कार्याभिमुखात्तत्र विकारा द्विषमावस्थामुपगताद्गुणत्रयाद्यथा सर्वं संयुक्तसत्त्वादिगुणत्रयात्महान्महत्तत्त्वाभिमानी ब्रह्मासीत्तदभिमन्यमानमहत्तत्त्वं वाभूत्। किं च भगवतो वीर्याधानेन जातक्षोभात्तत्वत्पन्नमिति सृष्टत्वविशेषात्तत्वं नीवशक्तां गुणकर्मयोनाविति तो गुणत्रयाभिमानिनो जाया अभिधाना दक्षाराम महत्तत्त्वाभिमानी वाग्रुपा सरस्वती भारती वजाता इत्यर्थः। महत्तोऽ

महत्तत्त्वादहंकारस्योत्पत्तिमाह। रजः प्रधानादिति साम्यावस्थायां मूले स्वसियद्भ्रो मूले तमसि मिश्रितं। यद्रजमूले सत्वे यदनइति त्रिधा विभक्तेन समक्तेन तमसा युक्तत्वाद्रजः प्रधानत्वं महत्तत्त्वस्य। तस्मान्महतो महत्तत्त्वाद्दैवचोदितात् द्विकुर्वाणाज्जातो वैकारिकतैजसतामसाः सह त्रिलिंगात्रिरूपो भूतादिस्तामसाहंकारो वियदादीनि पंच भूतानि ससर्जेत्यन्वयः। अनेनैतद्यत्सिद्धं तैजसाहंकारात्क्रु श्रोत्रादि दशेंद्रियाणि वैकारिकाहंकारात् मनो दिगाद्यभिमानिदेवान् ससर्ज मूलाहंकारादनंतगरुड रुद्राद्याः स्वभार्याभिः सह जाताः मनोभिर्मानिनाव निरुद्धं चंद्रो वैकारिकाभिमानि देव विशेषाज्जातो। तदुक्तं। अहमः

रजः प्रधानान्महतस्त्रिलिंगो दैवचोदितात्॥ जातः ससर्ज भूतादिर्वियदादीनि पंचशः १३ तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकं॥ संहत्य दैवयोगेन हैममंडमवासृजन् १४

शेषवी द्वीवरुद्रं द्रौकामनत्त्रियः॥ मन सस्व निरुद्ध श्चंद्रश्चान्ये यथोदितं। एवं क्रमोप्यत्ययस्तु सूक्ष्मस्थूलाभिर्दतः। सृष्टोगुणावज्ञानादौ मुक्तिस्थप्यपर्यंक्रमः। मियमेनान्यथा क्तिस्क मोहायासुरजन्मनामिं १३ सूक्ष्मसृष्टिमनूद्य स्थूलसृष्टिं वक्तुमारभते। तानीति। यद्वा सद्वितीया इत्यादि प्रश्नपरिहरति। तानीति। तानि त्रयोविंशतितत्त्वानि। भौतिकं हैमं ब्रह्मांडं दैवस्य क्रीडादिगुणसंपन्नस्य हरेर्योगेन चेष्टकलक्षणाप्रवेशसंबंधेन संहत्य संयुज्याव गम्य वासृजन् १४

भा॰ टी॰
१२०

सूक्ष्मवस्तूनि विमृश्य प्रसुप्त्यानि न सहस्रेति न्यायमनुसंदधानो हरेरंडोत्पत्त्यनंतरं तदंतः सर्जनंक्रमेणास्या दित्यभिमतत्वेन जलावगाहे तदार्द्दीदिकं वस्था दित्यं द्रुष्य जलावस्थानं वक्ति। सोशयिष्टेति। निरात्मकः अप्रकाशितपरमात्मस्वरूपः। परमात्मा तत्र नासीति किं न स्यादत्राह। अन्ववात्सीदिति। अ चक्रतयास्थितः १५ यो ब्रह्मांडगर्भोदकेश्रीमयपर्यंके कालनाम्ना ब्रह्मणा सह शयानस्तस्य हरेर्नाभेः पद्ममभूदित्यन्वयः। इदमितरपद्माद्विशि नष्टि। सहस्रेति। सहस्रधाया संख्यातस्योर्कस्य उर्वी दीधितिर्यस्य तत्तथोक्तं॥ अनेन सर्वप्रकाशकसूर्यादुत्पन्नैः पूर्वं तमसावगूढाकाशे कथं प्रवृत्ति रिति निरस्तं॥ सर्वजीवनिकायस्यौकोगृहस्थानीयं यतो यस्मात्तस्मात्स्वयं सर्वजीवप्रधानः स्वराड्ब्रह्मा भूदित्यन्वयः १६ यस्तथैव ब्रह्मोत्पन्नस्तस्यो

सोशयिष्टाब्धिसलिलआंडकोशो निरात्मकः॥ साग्रंवैवर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५ तस्यनाभेरभूत्पद्मंसहस्रार्कोरुदीधिति॥ सर्वजीवनिकायौको यतःस्वयमभूत्स्वराट् १६ सोनुविष्टोभगवतायःशेतेसलिलाशये॥ लोकसंस्थांयथापूर्वंनिर्ममेसंस्थयास्वया १७ ससर्जछाययाविद्यांपंचपर्वाणिमग्रतः॥ तामिस्रमंधतामिस्रंतमोमोहोमहातमः १८ विससर्जात्मनःकायंनाभिनंदंस्तमोमयं॥ जगृहुर्यक्षरक्षांसिरात्रिंक्षुत्तृट्समुद्भवां १९

जनमाह। सोनुविष्टइति। यो हरिः सलिलाशये गर्भोदकलक्षणे वारिधौ श्रीसन्निहितशेषपर्यंके शेते। तेन भगवता अनुविष्टः स ब्रह्मा स्वया संस्थया परमात्मनि स्थितसामर्थ्येन यथापूर्वं लोकसंस्थानेन पद्मे न चतुर्दशलोकव्यवस्थां निर्ममे इत्यन्वयः १७ विद्यैकापनोद्यत्वादविद्यायास्तज्ज्ञाप नार्थं तत्सृष्टिं प्रथमतो वक्ति। ससर्जेति। छायया रात्र्यपरपर्याययाययातन्वा। पर्वाण्याह। तामिस्रमित्यनेन। उक्तावसृष्टाणि नकान्यथा निश्चतरहास्य णीत्यस्यान्तरसुक्तं भवति १८ अधिष्ठातृभावेन विसृष्टो देहो नष्टो भूत्तत्किं नेत्याह। जगृहुरिति। क्षुत्तृषोः समुद्भवो यस्याः सा तथोक्ता तां १९

राम
१२०

क्षुत्तृषोर्ज्ञानविरोधित्वेन यतो ब्रह्मणः स्थैर्योत्पादकत्वेन गुरुत्वमविज्ञाय यत्नादिभिस्तद्भक्षणार्थमद्रावीति भावेनाह। क्षुत्तृड्भ्यामिति। उपसृष्टा उपद्रुताः। अस्यविव रणं क्षुत्तृडर्दिता इति। इत्यूचुरेवं दृत्तो भिदुद्रुवुः। एतं ब्रह्माणं मा रक्षत किं तु जक्षध्वं भक्षयतेति २० तत्र ब्रह्मणा किं कृतमत्राह। देवइति। यूयं मा मां मा जक्षत। किं तु रक्षत। आपदि मित्रजनो वो रक्षणीय इति भावेनाह। अहो इति। अहो युष्माकमज्ञानं। यूयं मे प्रजाः पुत्रा भविष्यथ तस्माज्जक्षणमयुक्तं रक्षणमेव। कीदृश्यः युष्माकं मध्ये ये यूयं मा जक्षत किं तु रक्षतेत्यविधं ते यक्षा भविष्यथ ये के विद्यूयं मा रक्षत किं तु जक्षतेत्यविधं ता निरक्षांसि भविष्यथेति २१ देवानां विद्यायोग्यत्वेन तद्वि

क्षुत्तृड्भ्यामुपसृष्टास्तेतंजग्धुमभिदुद्रुवुः॥ मारक्षतैनंजक्षध्वमित्यूचुःक्षुत्तृडर्दिताः २० देवस्तानाहसंविग्नोमामांजक्षतरक्षत॥ अहो मेयक्षरक्षांसिप्रजायूयंभविष्यथ २१ देवताःप्रभयायायादीव्यन्प्रमुखतोसृजत्॥ तेअहार्षुर्देवयंतोविसृष्टांतांप्रभामहः २२ देवोदेवान्जघनतःसृजतिस्मातिलोलुपान्॥ तएनंलोलुपतयामैथुनायाभिपेदिरे २३ ततोहसन्सभगवानसुरैर्निरपत्रपैः॥ अन्वीयमानस्तरसाक्रुद्धोभीतःपरापतत् २४

रोध्यविद्यासृष्ट्यनंतरं देवसृष्टिमाह। देवताइति। याया दिव्या विद्याः क्रीडादिगुणयुक्ताः प्राधान्याद्देवताः प्रभयाभादीप्ताविति धातोः सर्वप्रकाशकलक्षणया विद्याप रपर्यायया तन्वासृजदित्यन्वयः। सर्वसृष्टिभ्यः प्रधानत्वात्प्रमुखतइति। देवयंतः क्रीडादिगुणानुद्योतयंतो देवास्तां प्रभाख्यां तनुमहार्षुरंगीकृतवंतः तद् रूपमवद्य २२ अदेवानसुरान् जघनतः जघननाम्ना देहेन २३ क्रुद्धो भीत इति विडंबनं। परापतत्पलायितवान् २४ राम

भा॰ तृ॰ १२१

पलायनस्यावधिमाह। स इति। हरिं प्राप्य जगादेति शेषः। अनुरूपमुपासकानां योग्यं तानुकूलमात्मनो दर्शनं यस्य स तथा तं २५ तेन वय मितुं यभ मैथुन इति धा
तुः। मैथुनं कर्तुं। नित्यं भगवद्दीनिकृतत्वेष्वेताआपदि हरिरेव शरणं तस्य इति भावेनाह। त्वमिति। अनासन्नौ न प्राप्तौ पादौ यैस्ते तथा तेषामनासन्नपदां २७ स्वानि
ष्टवारणे समर्थस्यापि भगवानुस्वप्रियार्थं शरणागतस्य ब्रह्मणः संनिवारणोपायमाह। स इति। सर्वज्ञस्यापि विविक्तस्याज्ञवद्‌शङ्कावत्कार्पण्यमवधार्य। तदुक्तं।
जानन्नपि समर्थोऽपि विज्ञ विद्ध्याहरेः प्रियं। ज्ञात्वा करोति कर्माणि ह्यज्ञवच्चाप्यशक्तवदिति। अनेन स्वापदं परिहर्तुं समर्थस्यापि तत्त्वात् सो हरिशरणगतो हरिप्रीतिः स्या

सउपव्रज्यवरदंप्रपन्नार्तिहरंहरिं। अनुग्रहायभक्तानामनुरूपात्मदर्शनं २५ पाहिमांपरमात्मंस्तेप्रेषणेनासृजंप्रजाः। ताइमा
यभितुंपापाउपाक्रामंतिमांप्रभो २६ त्वमेकः किललोकानांक्लिष्टानांक्लेशनाशनः। त्वमेकः क्लेशदस्तेषामनासन्नपदांतव
२७ सोऽवधार्यास्यकार्पण्यंविविक्ताध्यात्मदर्शनः। विमुञ्चात्मतनुंघोरामित्युक्तोविमुमोचह २८

दिति न्यायो दर्शितः। विविक्तमनन्याधीनं अध्यात्मदर्शनं शरीरादिकमधिकृत्य वर्त्तमानं ज्ञानं यस्य स विविक्ताध्यात्मदर्शनः। अशेषविशेषज्ञानावानि
त्यर्थः। चेतनाचेतनराशेर्विविक्तो भिन्नः। अत एवाध्यात्मा सर्वजीवराशेरधिक ईश्वर इति दर्शनमपरोक्षज्ञानं यस्य स तथोक्तः। तद्भ्रष्टा वेदाहं ब्रह्मास्मीति श्रुते
रितिवास्याद्ध्यधिक ईश्वर इत्याद्यवः। हेत्यनेन स्वाज्ञाकरणाद्धरेरप्यधिका प्रीतिरभूदिति सूचयति। अत एव विमुञ्चेति। भवंतश्चन्मद्वरग्रहपात्रं ज्ञानसा
धनयोग्या तनुरस्ति किमनया घोरयेति २८

राम
१२१

निश्चेतना सा तनुः किमभूदिति तत्राह। तामिति। असुरा अत्तां तनुं स्त्रियं रूपीभूतामुपलभ्य दृष्ट्वा कीदृशीं शरीरपूर्वान्तरयोः संधौ जघनजातत्वाज्जघनसंध्यां स
वैरसुरैरितां परिवृतां। कलापो भूषणो बर्ह इत्यभिधानात् कांचीकलापेन कांचीभूषणेन विलसता दुकूलेन छन्नं पिहितं रोधः कटितटं यस्याः सा तथा तां २९
न
अन्योन्याश्लेषेण परस्परसंबंधेन उत्तुङ्गौ वुनतौ निरंतरावनवकाशौ च पयोधरौ स्तनौ यस्याः सा तथा तां ३० नीलालकानां वरूथः समूहोऽस्या अस्तीति नी

तांक्वणच्चरणांभोजांमदविह्वललोचनां। कांचीकलापविलसद्दुकूलछन्नरोधसं २९ अन्योन्याश्लेषयोत्तुंगनिरंतरपयोधरां। सुना
सांसुद्विजांस्निग्धहासलीलावलोकनां ३० गूहंतींव्रीडयात्मानंनीलालकवरूथिनीं। उपलभ्यासुराःसंध्यांसर्वेतांमुमुहुःस्त्रि
यं ३१ अहोरूपमहोधैर्यमहोअस्यानवंवयः। मध्येकामयमानानामकामेवविसर्पति ३२ वितर्कयंतोबहुधातांसंध्यांप्रम
दाकृतिं। अभिसंभाव्यविश्रंभात्पर्यपृच्छन्कुमेधसः ३३ कासिकस्यासिरंभोरुकोवार्थस्तेत्रभामिनि। रूपद्रविणपण्येनदुर्भगान्नो
विबाधसे ३४ यावाकाचित्त्वमबलेदिष्ट्यासंदर्शनंतव। उत्सुनोषीक्षमाणानांकंदुकक्रीडयामनः ३५

वा॰

लालकवरूथिनी तां तनुमुपलभ्य प्राप्य स्त्रियं जातां तां तनुं सुमुहुः विशेषेण मुमुहुरितिवा ३१ अत्र मोहो नाम न मूर्छा किंतु वैक्लव्यहेतुको वितर्क इति भावेना
हा। अहो रूपमिति ३२ ततः किं चक्रुरिति तत्राह। वितर्कयंत इति ३३ भामिनि कांतिमति। रूपमेव द्रविणं द्रव्यं तदेव पण्यं पणक्रयणयोग्यं तेन दुर्भगा
न् त्वत्संभोगभाग्यरहितान् ३४ त्वत्संदर्शनमेवास्माकं सुरतक्रियेति भावेनाहुः। यावेति। एवमपि न वेयं कंदुकक्रीडास्मन्मनः खेदयतीत्याहुः। उ
त्सुनोषीति ३५

इतरकंदुककीडायाइयंवैशेषिकीत्याह। नैकत्रेति। हेशालिनि भार्यापतत्पतंगउन्नमदवनमत्कंदुकं जयतितेपादपद्मंप्राप्नोति। विबीदृतिर्भंगंप्रा
नोति। जटावरूथः वेणीभारः अमलः मुक्तस्त्रामलबंधनइतिधातोः ३६ सर्वभावैः क्रियोबंधहेतवइतिभावेनासुराणांतद्ग्रहणमाह। इतीति। संध्या
यावर्णयतिसायंतनीमिति। प्रातःकालीनायाः पुण्यहेतुत्वात्। प्रलोभयंतीमात्मनीच्छांकुर्वंती ३७ देवासुरसर्गयोरनंतरंगंधर्वादिसर्गस्याभ्य

नैकत्रतेजयतिशालिनिपादपद्मंघ्नंत्यामुहुः करतलेनपतत्पतंगं। मध्यंविषीदति बृहत्स्तनभारभीतंशांतावदृष्टिरमलाः सु
जटावरूथः॥ ३६ इतिसायंतनीं संध्यामसुराः प्रमदायतीं॥ प्रलोभयंतीं जगृहुर्मत्वामूढधियःस्त्रियं ३७ प्रहस्यभावगंभीरं
जिघ्रंत्यात्मानमात्मना॥ कांत्याससर्जभगवान्गंधर्वाप्सरसांगणान् ३८ विससर्जतनुंतांवैज्योत्स्नांकांतिमतींप्रियां॥ तामे
वचाददुः प्रीत्याविश्वावसुपुरोगमाः ३९ सृष्ट्वाभूतपिशाचांश्चभगवानात्मतंद्रिणा॥ दिग्वाससोमुक्तकेशान्वीक्ष्यचामीलय
दृशौ ४० जगृहुस्तद्विसृष्टांतांजृंभणाख्यांतनुंप्रभो॥ निद्रामिंद्रियविक्लेदोययाभूतेषुदृश्यते ४१

र्हितत्वात्तमाहप्रहस्येति। भावगंभीरमितिक्रियाविशेषणंभावः शृंगारचेष्टा सकथंज्ञातुंशक्यतइतितमभिनयति। जिघ्रंत्यात्मानमात्मनेति। नाम्ना
कांत्यातन्वा ३८ ज्योत्स्नांचंद्रिकावदाह्लादकरीं। संज्ञांतरंवा। प्रियांमनोदृष्टिसुखकरीं ३९ भूतादीनांदेवयोनित्वात्गंधर्वादिसृष्ट्यानंतरंभूता
दिसृष्टिमाह। सृष्ट्वेति। आत्मनोदेहिनस्तंद्रीमुखव्यादानादिलक्षणामुत्पादयतीमात्मतंद्रीतेनजृंभणाख्येनदेहेन ४० तस्याः स्वभावलक्षण
माह। निद्रामिति। विक्लेदोवैक्लव्यं ४१

तयात्मनोच्छिष्टान्यस्मान्देहिनोधर्षयंतिस्वचेष्टाविशेषात्स्वचेष्टाविशिष्टान्कारयंतितंचेष्टाविशेषमुन्मादंप्रवदन्तेतज्ज्ञाः इतिशेषः व्यस्तजन्म
लवदेहंबाह्यंनतुनिजंपुरा। ब्रह्मातद्याहरणादित्वंपापदेवादिदैवतमितिवचनात्। बाह्यमेवप्रभादिशरीरंत्यजतिब्रह्मानतुनिजंदेहमितिज्ञायतेपु
राणसृष्टिसमये ४१ स्वयोग्यान्नदानेनतृप्ताः साध्यादिगणाः पितृपिशाचादिग्रहदोषनिवारणंप्राप्ततस्तत्सर्गानंतरंसाध्यादिगणसृष्टिंवक्ति। ऊ
र्जस्वंतमिति। अन्नेनप्रेतादिग्रहाणांमुख्यविकित्सेयमितिदर्शितं। ऊर्जस्वंतंसारान्नवंतं। ऊर्जसारान्नमुद्दिष्टंतदेवपितृन्नणामितिवा। नाम्नापरो

तयोच्छिष्टान्धर्षयंतितमुन्मादंप्रवदन्ते ४२ ऊर्जस्वंतंमन्यमानआत्मानंभगवानजः साध्यान्गणान्पितृगणान्परोक्षे
णासृजत्प्रभुः ४२ तआत्मसर्गतंकायंपितरः प्रतिपेदिरे॥ साध्येभ्यश्चपितृभ्यश्चकवयोयद्वितन्वते ४३ सिद्धान्विद्या
धरांश्चैवतिरोधानेनसोऽसृजत्॥ तेभ्योऽददात्तमात्मानमंतर्धानाख्यमद्भुतं ४४

क्षेणदेहेनअतएवाद्यापिमांसदृष्ट्याजगौवरेभ्यः पित्रादिभ्यः तत्तुष्टेपिंडादिकंप्रयच्छंति ४२ आत्मनः सर्गः सृष्टिर्यस्मात्तआत्मसर्गः तं। यत्साराणांवि
तन्वतेबलिहरणादिनाविस्तारयंतिवितरंति ३ सिद्धादीनांसाध्याद्यवरत्वात्तदनंतरंतत्सर्गमाह। सिद्धानिति। नाम्नातिरोधानेनकायेन। अंतर्धानाख्यमंत
र्धानापरपर्यायमात्मानंदेहमितरस्मादद्भुतमदृश्यहेतुत्वादितरेषांवरादिनाअदृश्यत्वमेतेषांस्वतएवेतिविशेषः हरिशक्तेरविंत्यत्वादितिभावः
४४

भा॰टी॰
१२३

स्वबोधनविडंबनाय स्वसन्निकृष्टपुरुषसृष्टेः प्राशस्त्यबुद्धिजननाय च पुरुषाभाससृष्टिमाह। स किन्नरानिति। किं च शरीरे रूपकुत्सायां वितर्केभास गोचर इति वचनात्। किन्नरान्नराभासान्। किंपुरुषान्पुरुषाभासान् आत्मना रूपेण कायेनासृजदित्यन्वयः। येन भावेन ब्रह्मा पदार्थान्सृजति स चेष्टादिलक्षणो भावः तेषामौत्पत्तिकतया या वल्लरी रेवर्तते इत्यतस्तं भावं दर्शयतीत्याह। मानयन्निति। आत्मना मनआदिना आत्मानं स्वशरीरं धनुष्यादिभिर्मानयन्पूजयन्दर्पणादिना आत्मनाभासं स्वच्छायां विलोकयन्नसृजदिति पूर्वेणान्वयः। अयं न्यायः पूर्वत्रत्र वानुसंधेयः ४५

रा॰
स किन्नरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः॥ मानयन्नात्मनात्मानमात्माभासं विलोकयन् ४५ ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना। मिथुनीभूय गायंतस्तमेवोषसि कर्मभिः ४६ देहेन वै भोगवता शयानो बहुचिंतया। सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ४७

परमेष्ठिना त्यक्तं ते किन्नरास्तद्रूपं स्वभावलक्षणकमाकारं जगृहुरित्यन्वयः। रूपं शब्दे पशौ श्लोके ग्रंथावृत्तौ हिनादिषु। सौंदर्ये च स्वभावे चेत्यभि धानं। तेषां कृत्यमाह। मिथुनीभूयेति। तं ब्रह्माणं कर्मभिश्चरितैः यद्यादिना यथितेः। अनेन पद्धिर्णा सृष्टिरपि व्याख्याता। किन्नरादीनां मुख्येन नराकारत्वात् नरजत्वाविशेषात् ४६ सर्पादिसृष्टिप्रकारं वक्ति देहेनेति। भोगवता सर्पशरीराकारवता देहेन शयानो ब्रह्मा प्रजासर्गे नुपचिते अलंभाव रहिते बहुचिंतया जाताक्रोधात् तद्वपुरुत्ससर्ज। हि शब्दो हेत्वर्थः। यस्मात्क्रोधादस्माज्जीवन्नस्माद्दीर्घप्रद्युतः कृद्धाः सर्वानुलो कानुपद्रवंतीति ४७

एकस्माद्देहादुत्पन्ना नामभेदांतरमस्माहाय इति। अमुतः अमुष्माच्छरीरात् ये केशा अहीयंत त्यक्ता आसंस्ते हयो जज्ञिरे इत्यन्वयः। क्रियापदस्य सुबंतत्वं यद्यपि तस्मादस्य इति वेदे दृष्टत्वाद्युक्तं। विसर्पतः विविधसर्पणात् सर्पाः। तत्स्वभावमाह। क्रूराः हिंसकाः ऋषी लत्वात्। नगं क्षेतीत्यगा अगान भवंतीति नागाः स्थितिगतत्वात्। तल्लक्षणमाह। भोगोरुकंधरा इति। भोगवद्दुर्धर्षा वृहत्स्कंधरा येषां ते तथा। यद्वा भिन्नविवक्षी पद्यायेनोद्भुशब्दः उभयत्रान्वेतव्यः। उरुभोगाश्च उरुकंधराश्च उरुभोगोरुकंधराः। उरुभोगाय विद्महे महाकंठाय धीमहि। तन्नो नागः प्रचोदयात्। इति जांगलिकतंत्रे ४८ सृष्टानां सर्वेषां सर्वकर्माधिकारित्वेनोपकारकत्वेन मनुसृष्टिमाह। स आत्मानमिति। यदा स्वयंभूर्ब्रह्मात्मानं देहं कृतकृत्यमिव मन्यमानो भूत्तदंते वसाने मनः पूर्वकं लोकभाव

येऽहीयंतामुतः केशा अहयस्तेंगजज्ञिरे॥ सर्पा विसर्पतः क्रूरा नागा भोगोरुकंधराः ४८ स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः। तदा मनून्ससर्जांते मनसा लोकभावनान् ४९ तेभ्यः स व्यसृजद्देहं परं पुरुषमात्मनः॥ तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिं॥५०॥ अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतं॥ प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदामहे ५१

नाल्लोकवृद्धिकरान्मनून्ससर्ज ४९ स परः पुरुषः ब्रह्मात्मनः तं देहं तेभ्यो व्यसृजदित्यन्वयः। सर्वस्याः सृष्टेरियं सृष्टिः प्रशस्तेति भावेनाह। तान्दृष्ट्वेति। ये सुराः सृष्टा देवास्ते तां मनुसृष्टिं दृष्ट्वा होइ इति प्रजापतिं प्रशशंसुः ५० एतद्देव विवृणोति। एतादिति। हे जगतः स्रष्टस्त्वं वे तत्कृतं कर्म सुष्ठु कृतं पर्याप्तमितो धिकं नास्तीत्यर्थः। बतेत्यनेन ताश्च कृत्वस्सुकृतं बतेति कृतिर्मीनमिति। किं च यस्मिन्मनुसर्गे यागादिक्रियाः प्रतिष्ठिताः तत्तः श्रेयो जनमाह। साकमिति। ते देवं मन्नं भवता साकमदामहे ते नास्मत्स्वसादन्नेषामपि मत्तीप्रजादिवृद्धिः स्यादित्यदामहे व्यत्ययेन प्रयोजनम सूचि। दृष्ट्वा तु पोरुषां सृष्टिं देवाः सुकृतमूचिरेत्यनेनये पुरा सृष्टा असुरास्ते तां सृष्टिं दृष्ट्वा प्रजापतिं प्रशशंसुरिति पद्यव्याख्याने पन्नुक्तं देवसृष्टानंत

राम
१२३

ऽसुरसृष्टेः प्रथमतः कृतमपि सर्गं देवासुरादिसाधारणत्वप्रकटनाय तत्सर्गं पश्चाद्दर्शयति। तपसेति। हृषीकेशो ब्रह्मांतर्यामी तपआदिना युक्तः सर्व स्मादादौ सर्वानभिमताः प्रजा ऋषीन्ससर्जेत्यन्वयः। सर्वत्रापि श्रीनारायण एव ब्रह्मांतर्यामित्वेन ब्रह्मादीनां प्रवृत्तिप्रकाशनाय हृषीकेश इति भग वत्येव रूढं नाम प्रायो जीतिज्ञातव्यं। अभेदाभिप्रायेण किं न स्यादिति चेन्न। दैत्योपद्रवे तत्परिहाराय पद्मसंभवक्रमेण विष्णुशरणोपगतेरुक्त त्वात्। यत्रापि तु हरेर्नाम तदन्यत्र प्रयुज्यते। तदंतरहरेस्तत्र दृष्टृ ही बैतिनोन्यथा भवेत्। स्वातंत्र्यात्स्वरत्वं च परस्यापि प्रयुज्यते। स्थितस्यापि विप्र

तपसा विद्यया युक्तो योगेन सुसमाधिना ॥ आदावृषीन्हृषीकेशः ससर्जाभिमताः प्रजाः ५२ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः ॥ यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ५३ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकविंशोध्यायः ॥ ॥ विदुर उवाच ॥ ॥ स्वायंभुवस्य च मनोर्वंशः परमसम्मतः ॥ कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः १

धाराज्ञः स्वानां जयपराजयौ वित्यनेन मुख्यार्थानुपपत्त्या वमुख्यार्थोपपत्तेः सिद्धत्वात् ५२ अजो ब्रह्मा यत्तत्स्वशरीरं समाधियोगर्द्धि मत्तपोविद्याविरक्तिमच्च। तस्य शरीरस्यैकैकं समाध्यादिकं तेभ्यो ऋषिभ्यः प्रादादित्यन्वयः ५३ इति श्रीभागवतटीकायां तृतीये एकविं शोऽध्यायः ॥ ॥ अकामः सर्वकामो वा मोक्षकामो हरिं यजेदिति यदुक्तं पूर्वं तत्तदिह कर्दमचरितव्याजेन प्रपंच्यतेऽध्यायत्रयेण ॥ तत्र मैत्रे यं विदुरः पृच्छति। स्वायंभुवस्येति। परमत्वेनोत्तमत्वेन संमतः संप्रतिपन्नः तस्मात्कथ्यतामिति हेत्वर्थे वशब्दः। ऐधिरे एधांचक्रिरे १

देवहूत्याः कथायाः श्रवणश्रोतव्यत्वे विषयमतस्तत्कथने मनोः कन्यावनपुत्रावितिप्रतीतायां तस्याश्च भ्रातृमतीत्वेन परिणेतुः प्राशस्त्यबुद्धि र्न स्यादिति तत्प्रतीत्यै तत्पुत्रावाह। प्रियव्रतेति। वा इत्यनेनौरसत्वमवधारयति। एतच्चरितं वक्ष्यामीत्यस्मिन्नर्थे वा २ देवहूत्या भ्रातृमतीत्वमुक्त्वा तच्चरितं श्रोतुमुक्तमनुवृषीणश्चैषद्धृच्छति। तस्या वा इति। अकृतमनोः पुत्री ततः किमित्यत आह। प्रजापतेरिति। त्वया या कर्दमस्य प्रजापतेः पत्नी जा येत्युक्ता। स कर्दमः प्रसंगात्कतिधा वीर्यं ससर्ज। तद्वीर्यसर्जनलक्षणं चरितं। ४। यमनियमादियोगलक्षणेनांतरं रुचिदक्षयोश्चरितं वक्ष्यामि

प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै ॥ यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीं २ तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता ॥ पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ३। तस्यां स वै महायोगी युक्तायां योगलक्षणैः ॥ ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ४ रुचि र्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः ॥ यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीं ५ मैत्रेय उवाच प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः ॥ सरस्वत्यां तपस्तेपे सहस्राणां समा दश ६ ततः समाधियुक्तेन क्रियायोगेन कर्दमः ॥ संप्रपेदे हरिं भक्त्या प्रपन्नवरदा यिनं ७ तावत्प्रसन्नो भगवान्पुष्कराक्षः कृते युगे ॥ दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ८

त्याह। रुचिरिति। ५ मैत्रेयः प्रथमं तो मनुपुत्रयोः कथायाश्च वक्ष्यत्वेपि सूचीकटाहन्यायेन रुचिदक्षयोश्चरितयोरनंतरं पृष्टत्वाच्च देवहूतीचरिता विनाभूतं कर्दमचरितं वक्तुमुपक्रमते। प्रजा इत्यादिना। सहस्राणां दशसमाः ६ किं विषयमिदं तप इति तत्राह। तत इति। समाधियुक्तेन क्रिया योगेन वैदिकतांत्रिकलक्षणोपायेन। शरणं प्रपन्नानां वरदं। साधनसामग्रीफलमाह। तावदिति। यः स्वयं विज्ञीकृतः स्वमात्मानं शाब्दं वेदैक वेद्यं ब्रह्म सर्वगुणाश्रयं। अथवा कस्मादुच्यते ब्रह्मेति। बृहंतो ह्यस्मिन्गुणा इति श्रुतिवेद्यत्वदर्शनाय ब्रह्मपदप्रयोगः। वपुः शुभाकारं शुभाकारे

शुभाकारत्वं विवृणोति। सतमिति ९ क्रीडनकं क्रीडासाधनं। दृष्टॄणां मनःस्पर्शि मनोविषये स्मितेक्षणे यस्य सतथा तं। १०।११। स्वभावात्मा आर्द्र
मनाः। स्वतंत्रो भावो यस्य सस्वभावो हरिः। सआत्मा निमनसि यस्य सतथेति वा। स्वभावे आत्मा यस्य सतथेति वा १२ स्तुतिरपि कृत्यस्य हरेः प्रियप्र
ीतिकरी यथार्थत्वेनानुकंपाहेतुत्वाद्दृष्टफलोदयाद्येति भावेनाह। जुष्टमिति। हे ईड्य सतां तात्पर्यं वेदादिभिः स्तुत्य। अद्य अखिलसत्वराशेः प्र
र्णीज्ञानबलसमुद्रस्य तव दर्शनात् साक्षात्कारान्नोस्माकमक्ष्णोः जुष्टं निषेवणं तत्तत्क्षेत्रलिंगादिविषयं संसिद्धं सम्यक् फलितं अभूत्। बत। आश्चर्य

स तं विरजमर्काभं सितपद्मोत्पलस्रजं॥ स्निग्धनीलालकव्रातवक्त्राब्जं विरजोंबरं ९ किरीटिनं कुंडलिनं शंखचक्रगदाधरं॥
श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणं १० विन्यस्तचरणांभोजमंसदेशे गरुत्मतः॥ दृष्ट्वा खेवस्थितं वक्षःश्रियं कौस्तुभकंध
रं ११ जातहर्षोपतन्मूर्ध्ना क्षितौ लब्धमनोरथः॥ गीर्भिस्त्वभ्यगृणात्प्रीतिःस्वभावात्मा कृतांजलिः १२ जुष्टं बताद्याखिलसत्वरा
शेः संसिद्धमक्ष्णोस्तव दर्शनान्नः॥ यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयोगाः १३

ह३

राम
१२५

मिदं दुर्लभं यस्मात्त्वमनुकंपेति। उपलक्षणमेतत्। श्रोत्रादेस्तथा श्रवणादिनिषेवणं। अक्षु एवं तत इत्यादि क्षणोः। तवानुग्रहस्त्वमुख्यनिमित्तं तत्र आस्मा
यत्तमिति भावेनाह यद्दर्शनमिति। रूढयोगा निरंतरानुष्ठितध्याना योगिनो यमादिमंतः पुरुषा यद्दर्शनमाशासते वांछंति। तादृशमिति भावः। मह
ता कालेन प्रयतमानानां योगिनां आकांक्षामात्रं अस्माकं तु अल्पेनैव कालेनाभूदित्यतो बतेति १३

इदानीमनुग्रहकातरं भगवद्भावं पश्यन् कर्दमः स्वमनोरथं गर्हयन् विज्ञापयति। येइति। ईश ऐश्वर्यवारिधे नव मायया बंधकशक्त्या हतचेतसः नष्टज्ञाना
तःकरणाः पुरुषा भवसिंधुपोतं संसारसमुद्रस्योत्तरणे तरीभूतं त्वत्पादारविंदं कामलवाय उपासते सेवंते ये कामा निरयेपि स्युः सुलभाः स्तान्न [illegible] रासि
राद्दान इति धातुः निरयः सूकरादियोनिः। अतिक्षुद्रत्वद्योतनायेदमुदितं। अनेनेदृशमपि भवत्का दान्नोपक्षितं किमुत स्वाराज्यादीनि [illegible]
किमनेन प्रकृत इत्याशंक्याह मध्येष्वेको लंपट इत्याह॥ तथेति। तथा पूर्वोक्तकामोपासकवत्। सोहं वकामदुघांघ्रिपस्य अभीष्टवर्षणाश

येमायया तेहतचेतसस्त्वत्पादारविंदं भवसिंधुपोतं॥ उपासते कामलवाय तेषां रासीश कामान्निरयेपि येस्युः १४
तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुं॥ उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य
१५

ल्पतरोः तवाशेषमूलं अपेक्षितसमस्तपुरुषार्थकारणं पादमूलमुपेयिवानित्यन्वयः। किंकामस्त्वमित्यत उक्तं परिवोढुकाम इति। समानशीलां गृह
मेधिधेनुं गृहस्थयज्ञांगभूतां भार्यां परिवोढुकामः परिणेतुकामः। तत्र निमित्तमाह। दुराशय इति। दुरशोभने विषये आशयो यस्य सतथा। दुरशो
भनदुःखयोरिति यादवः १५ ४ ४ छ छ

अघटितघटकमहिमाभगवान्यतः सकामोपास्तिं निकृष्टां जानंतोपि माहेशाम्नवेदास्त्वद्वचनमायया नियताः संसरंतीत्याह। प्रजापतेरिति। अधी
शेति संबुद्धेः प्रजापतिर्हरिरेव न विरिंचः तस्य तत्र मुख्यार्थानुपपत्तेः इंद्रादिशहवत्। अथवा ईश्वरा ब्रह्मादयस्तेषामपीश जगत्स्रष्टादिविभूतिप्र
वर्त्तकत्वात्प्रजापते स्त्वत त्वद्वचसा वेदलक्षणेन तंत्या। तस्य वाङ्तंतिर्नामानि दामानीति श्रुतेः। अयं जनः स्वर्गादिकामहेतोर्निबद्धः किल तल्लक्षणा
न्नलक्षणं बलिं वहतीति शेषः। हे शुक्ल संसारभुवं विलाप्यकं सुखमाराय ददातीति। लोकानुगतत्वादहमप्यनिमिषाय प्राणिचीर्णपुण्यपापनि

प्रजापते त्वद्वचसाधीश तंत्या लोकः किलायं कामहेतोर्निबद्धः। अहं च लोकानुगतो वहामि बलिं च शुक्लानिमिषाय
तुभ्यं १९ लोकांश्च लोकानुगतान्पशूंश्च हित्वाश्रितास्ते चरणातपत्रं। परस्परं त्वद्गुणवादसिंधुपीयूषनिर्यापितदेहधर्माः
२०

रीक्षणार्थमुन्मीलितनेत्रत्वात्तत्त्वबद्धास्यायकालांतर्यामिणे तुभ्यं बलिं वहामि तत्र सभार्यो वहेयेति वार्थः १९ अयमेव बलिर्भगवदर्पणबुध्या
विकीर्णितो मुक्तिहेतुरपि भवतीति भावेनाह। लोकांश्चेति। ये स्माल्लोकांत्त्वेत्येति श्रुतेः लोकान् जडशरीराणि च लोकानुगतान्स्वजनाक्रांते डि
याणि च हित्वा ते तव चरणातपत्रं श्रिताः पुनश्च परस्परं तव गुणवाद एव सिंधुपीयूषं सुखजनकत्वामृतगवी दुग्धं यत्नेन निर्यापिताः प्रवर्त्तिताः
देहधर्माः सच्चिदानंदात्मकशरीरधर्मा येषां ते तथा। यद्वा निर्यापिता निवारिता जननमरणादिलक्षणा देहधर्मा येषां ते तथा २०

लक्षणदर्शनात्तल्लक्षणमाह त्वान्वितग्रां। तेन तव चक्रं एषामायुर्न छिनत्तीति शेषः। सुदर्शनाद्यावर्त्तयति। अजरेति। अजरे कदापि जरादोषरहिते
अक्षेण्याभिद्वारे भ्रमतीत्यजराक्षभ्रमिः नियतलिंगत्वात् गिरिशहवत्। अधिमासैः सह त्रयोदशमासाः अराणि दलानि यस्य तत्तथा। त्रीणि शतानि षष्
टिसंख्यासहितानि अहोरात्रलक्षणानि दिनान्येव पर्वाणि यस्य तत्तथा त्रिशतं षष्टिपर्व छांदसत्वादनुस्वारलक्षणबिंदुलोपो नासि। षड्तवो नेमयश्च
कांतदेशा यस्य तत् षण्णेमि। अनंताः परमाणुद्व्यणुकादिलक्षणाः छिद्राः छिद्राणि अतिशयितछिद्रा अवयवा यस्य संतीत्यनंतछिदि। त्रुतीयोति

न ते जराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व। षण्ने
म्यनंतछिदि यत्त्रिनाभि करालस्रोतो जगदाच्छिद्य धावत् २१

शय इति सत्त्वादिकारो लोकवेलक्षण्यलक्षणातिशयार्थः। यद्वा छद इत्यस्मिन्नर्थे छिदीति निपातनं। मथनात्मिथिलो जात इति वच्चक्रं वा त्रीणि वातु
र्मास्यानि नाभिर्यस्य तत्त्रिनाभि। करालस्रोतः अतिक्रूरवेगं जगदाच्छिद्य कवलीकृत्य धावत् गच्छत् पुनः पुनरावर्त्तमानमित्यर्थः। यद्देवं विध्वंकालचक्रं त
दिति शेषः। यद्वा एषामायुराच्छिद्य धावत्। जगदाच्छिद्य धावदित्यनेन गृहाश्रमं गृही त्वापामरवत्संसरामि किं तु त्वत्स्वयं हकारं कर्म कारंकारं जरसं
गच्छन्नंते निवृत्तिमार्गमनुतिष्ठामीति ध्वनितं २१

भक्तजनविषयस्त्वेच्छानियतसंसारोन्मूलनं केवल्येन सिद्धमिति भावेनाह। एक इति। निर्गुणस्य गुणेषु सत्त्वस्य तदमृतपानेन निर्यापितदेहधर्मत्वसंभव
ति। ननु चिंत्यमित्यतो वाह। एक इति। ब्रह्मा यन्यतमासाध्य जगत्स्रजनादेस्त्वत्कराल्कलेशनियतत्वेन बंधध्वंसनं किमु वक्तव्यं। सार्वज्ञादिगुणाभावे सृष्ट्यादि
कमनुपपन्नं अतोन्यथानुपपत्त्या गुणानामानंत्यं सिद्धं अतउक्तं युक्तमिति। आत्मनि स्वोदरे स्थितस्य जगतः सिसृक्षया स्वाधीनया योगमायया चित्या जडत्व
रूपया वलोकविद्वं बनार्थं द्वितीययेत्युक्तं। द्वितीययात्मन्निति पाठे पुरुषरूपोभूत्वेत्यर्थः। स्वशक्तिभिः स्वरूपसामर्थ्योपेतमत्स्याद्यवतारैः पालनादिकं क
रोषीति। सृष्ट्यादिलक्षणं वाक्यमिति ज्ञापनाय ऊर्णनाभिनिदर्शनमुक्तं। यथोर्णनाभिः सृजते गृह्णते चेति श्रुतेः १९ यथा सृष्ट्यादिविलक्षणज्ञानं पुरुषा
र्थसाधनमित्याशयेन सृष्ट्यादिकमुक्तमेवं सृष्ट्यस्य पोर्भेदज्ञानेन तत्साधनमित्यभिप्रायेणाह। नैतदिति। अधीशयत् स्वतस्त्वं ब्रह्मांडं माययात्मेच्छयानन्यप्रेर
णया स्वरूपत्वेन जगद्देहेऽंगीकृतवान्। भूतसूक्ष्मेनो निर्मितमपि मृद्घटवदित्युच्यते। तवैतद्रूपमीक्षितं सत्यज्ञानमनंतं ब्रह्मेत्युपनिषद्भिः इष्टपदं रूपं न भवति। अतएवं

एकः स्वयं सञ्जगतः सिसृक्षयाद्वितीययात्मन्नधियोगमायया॥ सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवान्स्वशक्तिभिः १९
नैतद्बताधीशपदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं। अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या भगवान्विलक्षितः २०

ज्ञानानामेव तोषलक्षणपुरुषार्थकरमभेदेन ज्ञानांतरं वेदलक्षणं दुःखकरमित्यर्थः। तर्हि किमित्यग्रहीदित्यत उक्तं अनुग्रहायेति। त्वयि भक्तिभाजां मंदाधि
कारिणां भगवति भक्त्युत्पादकानुग्रहाय गृहीदित्यर्थः। त्वयैतत्कुतो ज्ञातं। यर्हीति। विलक्षित इति पदमावृत्य योजनीयं। स भगवान् यर्हि यदा लसंती तु
लसी यस्यां मालसत्तुलसी तया मालया। उपलक्षणमेतत्। मकरकुंडलाद्यलंकारैश्च मया विशिष्टत्वेन लक्षितो। किंतोन्यवस्तुवैलक्षण्येन लक्षितो ध्यानपदंग
मितस्तथेदानीमपि लक्षितो दृष्ट इति। यर्हि यस्मात्तस्मादिदमेवाभीष्टमिति ज्ञातं। यद्वा न्हनय इति धातोर्नानेपायवान् भवान् भूतानां सूक्ष्मं द्रष्टुमशक्य
यद्रूपं जगद्देह एतत्तवेप्सितं पदं। तर्हि कथं दृष्ट इति तत्राह। अनुग्रहायेति। तर्ह्यनुग्रहोपि तथाविशिष्टः किमिति नाभूदत आह। यर्हीति। यर्हि यदा यादृग्लक्षण
स्त्वया लक्षितो ध्यातस्तथा मया विलक्षितो दृष्ट इति यस्मात्तस्माद्भक्त्युक्तं विलावल्यत्वत्त्वामित्यज्ञानं श्रेयः साधनमिति सूचितं २०

मद्वपुर्ग्रहेणास विचिदानंदलक्षणं रूपं दर्शयतो भवतो न मयोपायनदानेन नित्यतृप्तस्य प्रत्युपकरोमीति भावेनाह। तं त्वेति। यस्त्वमनायासेन जगत्सृष्ट्या
दिकं करोषि अहं तं त्वा त्वां नमामीत्यन्वयः। ननु यदि नमतुर्नम्यो विशिष्टः स्यान्न हिं सत क्रियाविषयः स्यादित्यत आह विशिनष्टि। अनुवृत्येति। अनुवृत्त्यास्व
रूपानुभवेनोपरता निवृत्ताः क्रियार्थाः देहादिनिमित्तकर्मफलविशेषा यस्य स तथा। स्वरूपानंदानुभवेन निवृत्तविषयसुखो वा। तं स्वमाययास्व
यावर्त्तितं लोकतंत्रं देहादिलक्षणलोकप्रवृत्तिसाधनं येन स तथा तं। अभीक्ष्णशः पुनः पुनरित्यनेन तात्पर्यातिशयद्योतकेनेदमेव तत्त्वातिसाधन
मिति सूचयति। भवानोषधयानवत् बलात्कर्मण्यप्रवृत्तिविषयो न किंतु स्वतएवेति भावेनाह। नमनीयेति। इतोपि त्वमेव नंतव्य इत्याह। अल्पीयसी

तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्त्तितलोकतंत्रं॥ नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षं २१ ऋषिरु
उवाच इत्यव्यलीकं प्रणतोऽब्जनाभस्तमाबभाषे वचसामृतेन। सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २२
श्रीभगवानुवाच विदित्वा तव चैत्यं मे पुरैव समयोजि तत्॥ यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः २३ २३

ति। अल्पीयसि जात्या गुणेन वाल्पतरे भक्ते कीटव्याघ्रमित्राभीष्टं वर्षतं कामस्याभीष्टस्य वर्षो यस्मात्स तथोक्तः तमित्यक्षरयोजना। यद्वा महदहं
कारादिजगत्सृष्ट्यद्रूपं तन्निजं न भवतीति यस्मात्तद्रूपयितुमेवाह। तं त्वेति। उक्तार्थोयं श्लोकः। आवर्तितलोकाख्यराज्यव्यापारो येन स तथा तं २१
कर्दमेन प्रणतं रूपं सत्यज्ञानानंदलक्षणमेव न माययाशबलमिति भावेनाह। इतीति। प्रेमणा युक्तेन स्मितेन सह यदुत्कृष्टं वीक्षणं तेन विलोकनेन
विभ्रमंती विस्फुरंती भ्रूर्यस्य स तथोक्तः २२ पुरा मे मया तव चैत्यं चित्तस्थमभिप्रायं विदित्वैव समयोजितं प्रेरितं। तदेवाह। यदर्थमिति २२

पूजा कर्मणः क्षणभंगुरत्वेन तस्मादिदं फलमदम् इति निश्चेतुं न शक्यत इति शंकामाशंक्य मदर्पितत्वेन अक्षीणफलत्वादित्यभिप्रेत्याह। न वा इति। जातु वेक्वापि विदपि याक्षुपत शाक्रोक्तवन्मयि संगृहीतात्मनां समाहितमनसां दीव्यायां गृष्माकं यन्मदर्हणं तदिदं भवद्विधेषु गुरुरूपेषु मृषाक्षण भंगुरत्वेन निःफलं न स्यात् मदर्पणविकित्सायुक्तत्वादभक्त्यावृत्त्यर्थमतितरामिति। संगृहीतात्मनामिति षष्ठी सम्प्रदर्थे वा सन्निकृष्टत्वाद्भयोः स्वस्वामित्वसंबंधो नित्यमनुसंधेय इति तात्पर्यद्योतनाय शायोज्यन्यथा मयि संगृहीतात्मस्विति प्रयोक्तुं शक्यते। अनेनैश्वर्यार्थिभिरमे स्वार्त्ता दूरे देव

न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणं। भवद्विधेष्वतितरां मयि संगृहीतात्मनां २४ प्रजापतिपतिः संम्राण्मनुर्विख्यातमंगलः॥ ब्रह्मावर्त्तं यो धिवसन्शास्ति सप्तार्णवां महीं २५ स चेह विप्र राजर्षिर्महिष्या शतरूपया॥ आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविद॥२६ आत्मजामसितापांगीं वयः शीलगुणान्वितां। मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभुः २७

परिहृत्य भेदस्थानमेवापाद्यमिति सूचितं २४ कर्दमं प्रशास्य प्रकृतमनुसरति। प्रजापतीति। प्रजापतयो मरीच्यादयस्तेषां पतिः। सप्तार्णवामित्य नेन संम्राट्त्वं विवृतं ब्रह्मावर्त्तं क्षेत्रमधिवसन्नत्र विशिष्टस्थानं कर्मेत्यतः सम्प्रत्यर्थे द्वितीया २५ ततः किमस्माकमत आह। स चेति। हे विप्र २६ वा न सिनो मम संम्राजा किं तत्राह। आत्मजामिति। असितापांगीं नीलद्युतिनेत्रांतां। नीलांजनांजितत्वेनापि तत्स्वभावः स्यादिति गुणांतरमप्याह॥ वय इति। कियद्वय इति प्रश्नमंतरेण वयो लक्षयति। मृगयंतीमिति। आसन्नरजः कामुकत्वेन पाणिग्रहणयोग्यामित्यर्थः २७

राजपुत्र्या प्राप्सो हं कथमनुरूपः स्यामिति तत्राह। समाहितमिति। राजपुत्रीत्वादिविशेषमंतरेण यत्त्वयि एतावद्धामिमानतीतान्परिवत्सरानितेहृदयं समाहितं ममानुकूला भार्या स्यादिति संकल्पे। इदं त्वत्संकल्पात्मकं सत्यं भवतीति भावेन कन्यां विशिनष्टि। येति। या त आत्मभृतं वीर्यं रेतो लक्षणं गर्भं नवधा प्रसविष्यति। नवधा विभक्ततया प्रसूतं तव वीर्यवंशवृद्धिकरं वेत्याह। वीर्य इति। मारीच्या ऋषयो पित्वदीये वीर्ये नवधा विभज्य पुत्रीभूते आत्मनस्तेनो गर्भं लक्षणमाधास्यन्ति परिभवान्मद्रुक्तमकरिष्यन्॥ हीति शेषः। सा नृपस्य वधूः कन्या त्वां कामं भजिष्यति संप्रसविष्यति इत्यन्वयः।

समाहितं ते हृदयं यत्रेमान्परिवत्सरान्॥ सा त्वां ब्रह्मन्नृपवधूः काममाशु भजिष्यति २८ या त आत्मभृतं वीर्यं नवधा प्रसविष्यति॥ वीर्ये त्वदीये ऋषय आधास्यंत्यंजसात्मनः २९ त्वं च सम्यगनुष्ठाय निर्देशं मम शीतमः॥ मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे ३० कृत्वा दयां च जीवेषु दत्त्वा चाभयमात्मवान्॥ मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि मां ३१

आशुकालक्षेपो नैवेति २९ मदर्पणबुध्या विकित्सितस्य स्वधर्मानुष्ठानस्य मत्प्राप्तिरेव फलमित्याह। त्वं चेति ३० गार्हस्थ्यानंतरं चतुर्थाश्रमो प्यवश्य मनुष्ठेय इत्याशयेनाह। कृत्वेति। अभयं दत्त्वा सूतेभ्य इति शेषः। आत्मवान्मदेकशरणः। संन्यासाश्रमानुष्ठानफलमाह। मयीति। सहजगदिति क्रियाविशेषणं। यथा जगता सह वर्त्तमानमात्मानं त्वां मयि द्रक्ष्यसि मदाधारं पश्यसीत्यर्थः। आत्मनि त्वयि स्थितं मां च पश्यसि। अनेनाधाराधेयभावेनोपास्तिं कुर्वत एवं विधज्ञानेन मत्साक्षिरूक्त्या तो भेदज्ञानमेव परमपुरुषार्थसाधनमुक्तं भवति ३१

भा. तृ.
१२८

पि इ विच्छेदात् पितृशापः स्यादित्यातंकोमाभूदितिभावेनाह। संभूयेति। तव क्षेत्रे भार्यायां। क्षेत्रं पुरे गृहे देहे केदारे योनिभार्ययोः। पुराणपस्थाने सम्मूहे देतियादवः त्वद्वीर्येण सह गर्भं प्रविश्येतिशेषः। स्वांशकलया शुक्लरक्तसंबंधरहितया सच्चिदानंदलक्षणया संभूय सम्पग्गविव्युत्पत्त्वसंहितां तत्त्वसंख्यानलक्षणां सांख्यशास्त्रं प्रणेष्ये करिष्यइत्यन्वयः। ३२ कर्दमायाशेषपुरुषार्थसाधनमभीष्टं हरिरुपदिश्य पुनः किमकार्षीदितितत्राह। एवंतमिति। प्रत्यगक्षमंतर्यामित्वविषयमिंद्रियविषयत्वेनगच्छ्येनं प्रतीतिप्रत्यगक्षगः। अपरोक्षज्ञानविषयइत्यर्थः। प्रत्यक्षस्थितोपीदानीं इंद्रियविषयंगतो वा। ३३ अशेषसिद्धेश्वरैः समस

संभूयस्वांशकलयात्वद्वीर्येणमहामुने॥ तवक्षेत्रेदेवहूत्यांप्रणेष्येतत्वसंहितां ३२ एवंतमनुभाष्याथभगवान्प्रत्यगक्षजः॥ जगामबिंदुसरसःसरस्वत्यापरिश्रितात् ३३ निरीक्षतस्तस्यययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः॥ आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितंस्तोममुदीर्णसामं ३४ एवंसंप्रस्थितेशुक्लेकर्दमोभगवानृषिः॥ आस्तेस्मबिंदुसरसितंकालंप्रतिपालयन् ३५ मनुःस्यंदनमास्थायशातकौंभपरिच्छदं॥ आरोप्यस्वांदुहितरंसभार्यःपर्यटन्महीं ३६ तस्मिन्सुधन्वन्नहनिभगवान्यत्समादिशत्॥ उपायादाश्रमपदंमुनेःशांतव्रतस्यतत् ३७

ब्रह्मादिभिरभिष्टुतःसिद्धैःसनकादिभिर्मृग्यतइतिसिद्धमार्गश्च। मार्गोमृगेमदेमासिसौम्यर्क्षेऽन्वेषणेध्वनीति। पत्ररथाःपक्षिणस्तेषामिंद्रःगरुडस्तस्यपक्षैःपक्षैरुदीर्णमुत्कृष्टंसामयस्मिंस्तथातंस्तोमंस्तुतिविशेषं ३४ अनंतरंकर्दमोवितपश्चत्तंसपत्नीकिमत्रेत्यन्यत्रागमत् किंतत्राह। एवमिति। प्रतिपालयन्प्रतीक्षमाणः ३५ शातकुंभमपि न सुलभं भवति किं पुनस्तत्परिभावितमिति भावेन मनोर्गममेवाह। मनुरिति। पर्यटन्महीमिति। अनेनपित्रादुहित्रर्थंवरानुगमनेनलौकिकमितिराज्यपरीक्षाव्याजेनयदृच्छयाजामइतिभावं सूचयति ३६ हेसुधन्वन् विदुर। शांतव्रतस्यपूर्णव्रतस्य ३७

राम
१२९

कर्दमाश्रमस्यबिंदुसरइतिनामकस्मादितितत्राहयस्मिन्निति ३८ बिंदूनांसरणंप्रसरणंयत्रतद्बिंदुसरइतिकन्यादानकार्यमंतरेणापिश्रेयोर्थिनागंतुयोग्यमित्याशयेनतदाश्रमगुणानाह। पुण्यमिति। शिवंवामृतमपाश्रितंवजलंयस्मिंस्तत्तथा। अमृतंवामिदेवान्नेयज्ञशेषेरसायने॥ अयाचितेवदुग्धावाविरित्यभिधाने ३९ पुण्यद्रुमाअश्वत्थादयः। लताःमाधव्यादयःतेषांजालैःसमूहैःसंकुलैश्चयुक्तमितिशेषः। पुण्यमृगाःकृष्ण

यस्मिन्भगवतोनेत्रान्न्यपतन्नश्रुबिंदवः॥ कृपयासंपरीतस्यप्रपन्नेर्पितयाभृशं ३८ तद्वैबिंदुसरोनामसरस्वत्यापरिप्लुतं॥ पुण्यंशिवामृतजलंमहर्षिगणसेवितं ३९ पुण्यद्रुमलताजालैःकूजत्पुण्यमृगद्विजैः॥ सर्वर्तुफलपुष्पाढ्यंवनराजिश्रियान्वितं ४० मत्तद्विजगणैर्घुष्टंमत्तभ्रमरविभ्रमं॥ मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ४१

सारंगादयः। द्विजाजरितर्यादिपक्षिणः ४० मत्तेनद्विजगणेनविशिष्टपक्षिसमूहेनउद्घुष्टमाघोषितं। मत्तानांभ्रमराणांविभ्रमःशृंगारविशेषोयस्मिंस्तत्तथा। बर्हाये षांसंतीतिबर्हिणोमयूराःतएवनटास्तेषामाटोपोट्टत्तसंभ्रमोयस्मिंस्तत्तथा। मिथआह्वयंतोमत्ताःकोकिलायस्मिंस्तत्तथा ४१

नकेवलमस्यात्याद्येयत्रअन्येपिसंतीत्याह।कदंबेत्यादिना ४२ सामान्येनोक्तान्पक्षिणो विशेषनाम्नानिर्दिशति।कारंडवैरित्यादिना।कारंडवा ख्यमहापक्षिभिः ४३ अविशोद्रकाः।गवयाः वन्यागावः।गोपुच्छा वृर्मयः हरिभिः सिंहैः मर्कैर्वनमार्जारैः नाभिभिर्मृगनाभिभिः ४४ ४५ तपसि विषयेऽग्रेयुज्यतइत्युग्रयुक्।तीव्रयोगवतेत्यर्थः।उग्रयोगतपस्यैववपुःकार्श्यनदृष्टिसुखाजनकेकन्यादानेवैराग्यस्यात्दितितत्राह।नातिक्षा

कदंबवंजुलाशोककरंजबकुलासनैः।कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ४२ कारंडवैर्प्लवैर्हंसैःकुररैर्जलकुक्कुटैः।सारसै श्चक्रवाकैश्चचकोरैर्वल्गुकूजितं ४३ शशकैर्हरिणैःक्रोडैश्वाविद्गवयकुंजरैः।गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ४४ प्रविश्यतत्तीर्थवरमादिराजःसहानुगः।ददर्शमुनिमासीनंतस्मिन्हुतहुताशने ४५ विद्योतमानंवपुषातपस्युग्रयुजाचिरं। नातिक्षामंभगवतःस्निग्धापांगविलोकनात् तद्व्याहृतामृतकलापीयूषश्रवणेनच ४६ प्रांशुंपद्मपलाशाक्षंजटिलंचीर वाससं।उपसंसृत्यमलिनंयथार्हणमसंस्कृतं ४७ अथोटजमुपायातंनृदेवंप्रणतंपुरः।सपर्ययापर्यगृह्णात्प्रतिनंद्यानु रूपया ४८ गृहीतार्हणमासीनंसंयतंप्रीणयन्मुनिः।स्मरन्भगवदादेशमित्याहश्लक्ष्णयागिरा ४९

राम
१३०

ममिति।तत्रहेतुद्वयमाह।भगवतइति ४६ पुरुषलक्षणाभावेनातिक्षामत्वमप्रयोजकमितितत्राह।प्रांशुमिति।प्रांशुमुन्नतं।तपोवेषयुक्त त्वेनाल्पलक्षणंकुत्रनदृश्यतइतिभावेनाह।जटिलमिति।असंस्कृतमनलंकृतं ४७ उटजंपर्णशालां।अनुरूपयायत्योग्यया ४८ तथा निर्मिमिरुदकेवाक्यतर्पतेति आस्यार्थमनुसंदधानोमुनिर्वीवापितमानयतीत्याह।गृहीतेति।श्लक्ष्णयामधुरया ४९

किमर्थीसुरसांवाणीमाहेत्यत्राह।नूनमिति।मुकुरेमुखस्येवास्मिन्राज्ञिहरेर्विशेषसन्निधानस्यप्रतीयमानत्वाद्देवेतिवक्ति।क्षिपत्नेहेत्वर्थःस प्तमुपद्येमेतिसूत्रात्त्वमितिप्रसम्यर्थेत्वयिहरेःपालनीसात्विकीशक्तिःसन्निहितादियस्मात्त्वेनवर्वक्रमणंसम्यक्पर्यस्तंसतामस्माद्धर्तानांसंरक्ष णायासतामस्मद्विरोधिनांवधायनूनंनिश्चयइत्यन्वयः ५० एतदेवविवृणोति।यइति।अर्कस्यरूपप्रकाशकत्वंवद्दस्याह्लादकत्वंअभिरस्य त्वंइंद्रस्यैश्वर्यकरत्ववायोःश्रेष्ठत्वंयमस्यदुष्टजनदमनेनिष्ठात्वंधर्मस्यपुण्यापुण्यविवेकवेशद्यंप्रचेतसोवरुणस्यगंभीर्ययस्त्वमेता निरूपाणि

नूनंचंक्रमणंदेवसतांसंरक्षणायते।वधायचासतांयस्त्वंहरेःशक्तिर्हिपालनी ५० योर्केंद्वग्नींद्रवायूनांयमधर्मप्रचेतसां।रूपा णिस्थानआधत्सेतस्मैशुक्लात्मनेनमः ५१ नयदारथमास्थायजैत्रंमणिगणार्पितं।विस्फुरच्चंडकोदंडोरथेनत्रासयन्नघान् ५२ स्वसैन्यचरणक्षुण्णंवेपयन्मंडलंभुवः।विकर्षन्बृहतींसेनांपर्यटस्यंशुमानिव ५३ तदैवसेतवःसर्वेवर्णाश्रमनिबंधनाः भगवद्रचिताराजन्भिद्येरन्चतदस्युभिः ५४

स्थानेतत्तद्विनियोगकाकालेप्रासेत्राधत्सेधारयसि।तस्मैशुक्लस्यहरेरात्मनेप्रतिमायैविशेषावेशसन्निधानस्थानायनमइत्यन्वयः।प्रतीयमानं तादात्म्यंविहायतत्प्रतिमात्वकल्पनानाप्रमाणिकी।स्वायंभुवोमनुश्चैवदृष्टुरेलार्जुनावपि।ब्रह्मशेषविपारुद्रेंद्रप्राप्यादयस्तथा।विष्णावेशयुताः सर्वेनतुविष्णुस्वरूपकाइतिवचनात्शुक्लशुक्लं ५१ जगद्रक्षार्थमुत्पन्नत्वात्तवहरेर्विशेषावेशोयुक्तइत्यभिप्रेत्यव्यतिरेकमुखेनराजानंप्रशंसति नयदेति।जैत्रंजयशीलंअघान्पापयुरुषान्त्रासयन्कंपयन् ५२ अंशुमानादित्यः ५३ दस्युभिःहिंसाशीलैःपुरुषैःसेतुभेदःस्यात् ५४

ततःकिमत्राह।अधर्मश्चेति।व्यंकुशैर्निरंकुशैः।अतोपिकिमत्राह।शयानइति।शयानेन्पायान्यायविचारशून्ये ५५ अखिलाभिमानभंगभयात्किं
विज्ञानेनिवकर्द्दमःकार्यविशेषंपृच्छति।अथापीति।अनेनराज्ञोऽर्थनाशभंगभयंनिवृत्तमितिध्वनयति ५६ इतिश्रीभागवतटीकायांतृतीयेद्वा
विंशोऽध्यायः॥ ॥राज्ञाकर्द्दमःपृष्टःकृत्वास्मितवान्तूष्णीमस्थात्किमनवाग्व्यवहारीवाकारीतितत्राह।एवमिति।सव्रीडइवेतिविनयगुणेभूषयति
।उपारतंयावदपेक्षितमुक्त्वातूष्णींस्थितं।यद्वाउपाधिकेसर्वस्मिन्व्यवहारेऽवकाशहेवाकरतंनिरंतरंश्रीनारायणध्यानोपेतमित्यर्थः।अत्रात्रपुरा
णार्षरितिपाठे १ हेत्यनेनविप्रक्षत्रिययोःसूचितांसमानबंधुतांदर्शयति।ब्रह्मेति।आत्मपरीप्सयाआत्मद्रक्षणेच्छयाछंदोमयान्वेदप्र

अधर्मश्चसमेधेतलोलुपैर्व्यंकुशैर्नृभिः॥शयानेत्वयिलोकोयंदस्युग्रस्तोविनंक्ष्यति ५५ अथापिपृच्छेत्वांवीरयदर्थंत्वमिहागतः॥
तद्वयंनिर्व्यलीकेनप्रतिपद्यामहेहृदा ५६ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेएकविंशतितमोऽध्यायः मैत्रेयउवाच
एवमाविष्कृताशेषगुणकर्मोदयंमुनिं॥सव्रीडइवतंसम्राडुपारतमुवाचह १ मनुरुवाच ब्रह्मासृजत्स्वमुखतोयुष्मानात्मपरी
प्सया॥छंदोमयांस्तपोविद्यायोगयुक्तानलंपटान् २ तत्त्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात्॥हृदयंतस्यहिब्रह्मक्षत्रमंगं
प्रचक्षते ३ अतोह्यन्योन्यमात्मानंब्रह्मक्षत्रंचरक्षतः॥रक्षतिस्माव्ययोदेवःसयःसदसदात्मकः ४

धानात्।तपःकायक्लेशः।विद्याशास्त्रज्ञानं।योगोभगवद्भक्तिलक्षणः।अनेनलक्षणसामर्थ्यमुक्तंभवति।अलंपटान्विरक्तान्शमदमादिगुण
संपन्नानित्यर्थः २ विप्राणांत्राणायरक्षणाय।अनंततत्त्वप्रोतनायदोःसहस्रादिति।उभयोःहरेःकिंप्रियतममितितत्राह।हृदयमिति।तस्यहरेःब्र
ह्मकुलंहृदयमतिप्रियंहि।क्षत्रियास्तुबाहुमपीत्युक्तंहि।तर्हिकिंक्षत्रेणेत्यतउक्तं।क्षत्रमिति।अंगांगिभावेनतारतम्येनाप्रियत्वं ३ यतएवंअंगांगित्व
मतएवब्रह्मक्षत्रंरक्षतिक्षत्रंचब्रह्मरक्षणात्मानंचउपदेशादिनारक्षतिच।यःसदसदात्मकःकार्यकारणव्यापीदेवोऽस्मान्द्वयमपिरक्षतीत्यन्वयः ४

स्य:५

च·

स्वप्रार्थनांग्राहयितुंकर्दममप्रतिशंसति।तवेति।संदर्शनादिति।ह्रक्षःसंनिकर्षःशास्त्रीयवचनंवेतिद्वयंविवक्षितं।धर्मराज्यपालनादिकं ५ भवद्दर्श
नेसुभूतानामेवलभ्यतेनापुण्यानामित्याह।दिष्ट्येति।अंगसंगप्रसुततोऽप्यधिकपुण्यपाल्लभ्यतइतिभावेनाह।दिष्ट्येति ६ अथात्मनैवविहितैरुशतीरुश
तोनिर्मलाः ७ अलमनुतापेनकिमिरांमतोसितद्रूहीतितत्राह।सभवानिति ८ धात्मतीत्वेनयाह्यत्वेहेतुंप्रियकापुत्रधर्मसाहितंध्वनयन्ना

तवसंदर्शनादेवच्छिन्नामेसर्वसंशयाः॥यत्स्वयंभगवान्प्रीत्याधर्ममाहरिरक्षिषोः ५ दिष्ट्यामेभगवान्दृष्टोदुर्दर्शोयोऽकृतात्मनां॥
दिष्ट्यापादरजःस्पृष्टंशीर्ष्णामेभवतःशिवं ६ दिष्ट्यात्वयानुशिष्टोऽहंकृतश्चानुग्रहोमहान्॥अपावृतैःकर्णरंध्रैर्जुष्टादिष्ट्योशतीर्गि
रः ७ सभवान्दुहितृस्नेहपरिक्लिष्टात्मनोमम॥श्रोतुमर्हसिदीनस्यश्रावितंकृपयामुने ८ प्रियव्रतोत्तानपदोःस्वसेयंदुहितामम
॥अन्विच्छतिपतिंयुक्तंवयःशीलगुणादिभिः ९ यदातुभवतःशीलश्रुतरूपवयोगुणान्।अशृणोन्नारदादेषात्वय्यासीत्कृतनि
श्चया १०

हाप्रियव्रतेति।सामान्यविशेषाभ्यांव्यवहारःसंभवति।त्वय्येवकथमस्यावरविवरइतितत्राह।अन्विच्छतीति।यद्वावयःशीलगुणादिभिर्युक्तंप
तिमन्विच्छतीसंभोगवयःप्राप्तासीत्।नहिकन्यास्वयंपतिंमृगयतेऽन्यतुवरएवातोऽन्विच्छतीत्यनेनवयएवलक्ष्यते।यदातुनारदाच्छ्रुतःशील
दिगुणानश्रृणोत्।ततःकिमत्राह।सैवेति।याश्रुतवतीसैषात्वय्येवमतिमपतिःस्यादितिकृतनिश्चयासीत् १०

अत्रापि कीदृशोसो कुत्रास्त इत्यादिविशेषप्रश्नादिना निश्चयो लभ्यत इति यत एकोंशो निराणीयित्रतो द्वितीयोपि निर्णीयं इति भावेनाह। तत्प्रतीछेति। कन्येछायाः प्रतिनिधित्वेनेच्छां कुरु गृहाण गृहाणेत्यर्थः। अत्रास्या पिगुणोग्नीत्याह। श्रद्धयेति। उपहृतां दत्तां अनेनापि गुणात गृहाणेत्याशयेनाह। सर्वात्मनेति। गृहमेधेषु गृहस्थाश्रमयोग्ययज्ञादिषु कर्मसु तेन तव सर्वात्मना युक्तायुक्त विचारं मंतरेणापि सर्वतएवानुरूपां अनुकूलशब्दादिगुणां। रूपं शब्दप्रशो ह्लोके यथाष्टौ हितादिषु॥ सौंदर्येवस्वभावेचेति ११ किंचनेदानीमितिप्रतिवादेन कांचनपरिहेस्त्वद्भुतमितिक्रतिविरोधोपिस्यादिति भावे

तत्प्रतीछ द्विजाग्र्येमां श्रद्धयोपाहृतां मया॥ सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ११ उद्यतस्य हि कामस्य प्रतिवादो न शस्यते। अपि निर्मुक्तसंगस्य कामरक्तस्य किंपुनः १२ य उद्यतमनादृत्य कीनाशमभियाचते॥ क्षीयते तद्यशःस्फीतं मानश्चावज्ञया हतः। १३ अहं त्वाश्रृणवं विद्वन्विवाहार्थं समुद्यतं॥ अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे १४

नाह। उद्यतस्येति। निर्मुक्तसंगस्य विषयसंगमनिछतोपि ननु सर्वात्मनामुक्तसंगस्य निषिद्धत्वादनर्थहेतुत्वाच्च। तदुक्तं। यश्च प्रव्रजितो भूत्वा पुनः सेवेत मैथुनं। षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिरिति। कामरक्तस्य योग्यस्य प्रतिवादः प्रत्याख्यानं निषेध इत्यर्थः। १२ भगवंतमंतरेणान्यः कश्चित्पास्याति वेद्यापकं वास्तीत्याह। उद्यतमिति। कीनाशं कदर्यं कर्षकं वा १३ अनाहूय गमनमात्मदोषं परिहरति। अहं चेति। अनेन बहिर्मुखेष्वयं दोषो न घटत इति विनिदर्शितं। उपकुर्वाणो विवाहकामः। वेदानधीत्य यो वर्णी विवाहार्थं गुरोः कुलात्। कृतानुज्ञो निवर्तेत उपकुर्वाण उच्यते १४

प्रतिबुद्धप्रत्य त्तरो मुनिः किमकार्षीदिति राज्ञो तर्शंकां निवारयति। बाढमिति। बाढमित्युक्तं पिदृष्टोतति। उद्वोढुकाम इति बाढं त्वमि मतो देश इति वा। तव पुत्री वोढुं योग्येत्याह। अप्र॰ मत्तेति। पतिशुश्रूषणे यत्ना विषयासक्तिनिस्पृहा। धर्मार्थकामहेतुर्या त्वप्रमत्तेति तां विदुरिति। अप्रत्तेति पादेः र्थिताया न्यस्मैदावाप्यदत्तत्वात्परापूर्वशंकाभावाद्दुपयितुं योग्येत्याह। अप्रत्तेति। वशाद्वाहे त्वर्थः। किंनामायं विवाह इति तत्राह। आवयोरिति। चतुर्णां विवाहविधीनामयं वैवाहिको विधिराद्यः ब्राह्मः। शक्त्या कन्यामलंकृत्याहूय पित्रा प्रदीयते स ब्राह्म इति स्मान्नोः। मुहूर्तं प्रतीक्षनस्थेयमित्यतो वाह। आवयोरिति। आद्यो द्यतनो दिवस एव विवाहयोग्यो विधीयत इति विधिः। विभक्तप्रतिरूपकं वाव्ययं भवतीति वचनादद्येत्यव्ययं सुबंतरूपमपि विवक्षा

ऋषिरुवाच — बाढमुद्वोढुकामोहमप्रत्ता तव चात्मजा॥ आवयोरनुरूपोसावाद्यो वैवाहिको विधिः १५ कामः स भूयान्नरदेवतस्याः पुत्र्याः समाम्नायविधौ प्रतीतः॥ क एव ते तनयां नाद्रियेत स्वयैव कांत्या क्षिपतीमिव श्रियं १६

वशाद्भवति। प्रतिः प्रतिनिधिप्रतिदानयोरिति सूत्राच्च १५ संतानलक्षणं स्त्रीणां मुख्यकामः स विधिना स्याान्नाद्दशोस्याद् दिति राज्ञोभिप्रायं जानन्निव कर्दमो नियुंक्ते। काम इति। यः कामः समाम्नायविधौ वेदवाक्ये दशास्यां पुत्रानाधेहि पतिमेकादशं कृधीत्यादिरूपे प्रतीतः स्यात्। हे नरदेव स कामस्ते तवास्याः पुत्र्याः स्यादित्यन्वयः। अनंतरमविभवतामत्पुत्री लालनीयेति न शार्थनीयमिति भावेनाह। क एवेति। स्वयोत्पत्तिस्वकांत्या क्षिपंतीं निरस्यंतीं श्रियं लक्ष्मीमिव स्थितां। अनादरहेतुरूपलावण्याद्याभावाभावादित्यर्थः १६

यथापुरास्मानारदवाक्यात्तुभ्यद्गुणविषयानिरुचिरभूत्तथास्याः कमपिकेन वित्पथिकेनश्राविताया मस्यां शृंगारादिगुणपंक्तिमाकर्ण्याकं ज्ञामसुत्पन्नेतिभावेनतन्त्रावृत्तंपश्नोतियामित्यादिश्लोकद्वयेन। विश्वावसुर्गंधर्वः। सम्मीचीनोमोहोयस्मात्सौंदर्यात्तत्रथातेनसंमोहेनसौंदर्येण विमूढंहृत्पाकृत्यमूत्तंचेतोयस्यसतथा। यद्वासंमोहोदर्शनाज्जातेपारवश्यंतेनमूढचेताः। अनेनकर्दमस्यक्तबित्वमन्वर्थमितिदर्शितं। यद्वासंमो होनामवस्तुनिस्नेहविशेषस्तेन १७ प्रार्थयंतीमित्यादीनिपंचविशेषणानिस्वीकारेकारणानि। ललनानांविलासिनीनांस्त्रीणांललामांतिल कभूतां। नसेवितौश्रियोलक्ष्म्याश्चरणौयैस्तैस्तथातैपुरुषैरदृष्टामित्यनेनदृष्टिविषयीकारयोग्यतापिनकिंपुनःस्वीकारइतिसूचयति। मनोः

यांहर्म्यपृष्ठेक्वणदंघ्रिशोभांविक्रीडतींकंदुकविह्वलाक्षीं॥ विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्यसंमोहविमूढचेताः १७
तांप्रार्थयंतींललनाललाममसेवितश्रीचरणैरदृष्टां॥ वत्सांमनोरुच्चपदःस्वसारंकोनानुमन्येतबुधोभियातां॥ १८
अतोभजिष्येसमयेनसाध्वींयावत्तेजोबिभृयादात्मनोमे। अतोधर्मान्पारमहंस्यमुख्यान्शुक्लप्रोक्तान्बहुमन्येविहिंस्रान् १९

सुतामितिकुलं। उत्तपदउत्तानपादस्तस्यस्वसारंभगिनीमितिभ्रातृमतीत्वं। कोप्यस्यानेजातोविबुधस्यादतोभिजातइतिअनेनात्मनोयोग्यताति शयंद्योतयति १८ किमनुलापेनोक्तंसर्वंसत्यंपरन्त्वपरंकिंक्रियतइतितत्राह। अतइति। यतएवंविधगुणाअतइति। समयेनकालेनावका लेववक्ति। यावदिति। इयंतवपुत्रीयावद्यदामेआत्मनःशरीरस्यशुक्रात्त्रविकृततरेतोलक्षणंतेजोबिभृयात्बिभर्ति। अहमपितावदेवबिभर्मीति शेषः। ततःपरंकिमत्राह। अतइति। अतःअनापत्योत्पत्यनंतरंपारमहंस्यमुख्यान्परमहंससंबंधिनोतएवमुख्यान्शुक्लेननित्यशुद्धेनहरिणाप रिहतानविहिंसानुपश्चाद्यालंभनविधुरान्धर्मान्बहुमन्येअनुतिष्ठामिसंप्राप्स्यामीत्यर्थः १९

अस्मिन्नर्थेहरिरेवावयोःसाक्षीत्याह। यतइति। येनसंस्थास्यतेस्वप्नेतोनिधायस्थास्यतेप्रलयेयत्रयस्योदरे। सएवप्रमाणंसाक्षी। अनंतइतिसाक्षिणः कालत्रयेप्यवस्थाप्यवस्थानमाह २० मैत्रेयोविदुरंकर्दमस्यमितभाषित्वगुणंवक्ति। सउग्रधन्वन्निति। इयदेवएतावदेव। स्वमनीषितंचे दस्थितोहरिणा किमितिहरावनादरबुद्धिर्नाभूत्तत्प्रसादादेवेदंसमस्तंकार्यंजातमभूदितिसंततंश्रीनारायणंस्मृतिमानित्यतउक्तमरविंद

यतोभवद्विश्वमिदंविचित्रंसंस्थास्यतेयत्रचवावतिष्ठते॥ प्रजापतीनांपतिरेषमह्यंपरंप्रमाणंभगवाननंतः २०
मैत्रेयउवाच   सउग्रधन्वन्नियदेवाबभाषआसीच्चतूष्णीमरविंदनाभं॥ धियोपगृह्णन्स्मितशोभितेनमुखेनचेतोलु लुभेदेवहूत्याः २१ सोनुज्ञात्वाव्यवसितंमहिष्यादुहितुःस्फुटं॥ तस्मैगुणगणाढ्यायददौतुल्यांप्रहर्षितः २२

नाभमितितानवोद्वाहयोग्यायाःकन्यायाःप्रथमःकर्षणमंत्रःपन्युःस्मितशोभिमुखमन्यथेदानीमंगारत्विप्रमिवोत्तरत्रकिमुतवेमुख्यादिकंस्यादि त्यतइदमौत्पत्तिकंननैमित्तिकमितिभावेनायमेवपतिःस्यान्नान्यइतिस्मितशोभिनामुखेनदेवहूत्यामनआकर्षितंमित्याहस्मितशोभितेनेतिलु भगार्थेगृध्नुआकांक्षायामित्याकांक्षणमप्याकर्षणविशेषः २१ महिषीदुहित्रोःपूर्वसंवादइदानीमपिसन्नेतद्दर्शनेनान्यथाभूदितिविवि दिषुरिवाज्ञात्वातन्निश्चयज्ञानपूर्वकंकन्यामस्माअदादित्याह। सइति। अथानंतरं २२

तत्रश्लाकिमदायीतितत्राह। शतरूपेति। पारिबर्हान्विवर्धौदीयमानद्रव्याणि। तानिलोकविलक्षणानिकिंतेत्याह। महेति २३ पुत्रींदत्वाकिंकालं मत्रैवतत्स्थेहाहवास्मीत्किंतेत्याह। प्रत्तेति। सदृक्षायसमानाय। अनेनमनुःस्वकुमारींराजकुमाराभावात्छांदसायदत्तवानित्यपवादमपाकरोति २४ बाष्पकलाःअश्रुविंदून्नेत्रोदैर्नेत्रजलैः शिखाः केशभारान् २५ २६ राज्ञामहतिगहनेकस्मिंस्थितायकस्मैचिन्मूलफलाशनायतापसा

शतरूपामहाराज्ञीपारिबर्हान्महाधनान्॥ दंपत्योःपर्यदात्प्रीत्याभूषावासःपरिच्छदान् २३ प्रत्तांदुहितरंसम्राट्सदृक्षायगतव्यथः॥
उपगूह्यचबाहुभ्यामौत्कंठ्योन्मथिताशयः २४ अशक्नुवंस्तद्विरहंमुंचन्बाष्पकलांमुहुः॥ आसिंचदंबवत्सेतिनेत्रोदैर्दुहितुःशिखाः॥
२५ आमंत्र्यतंमुनिवरंअनुज्ञातःसहानुगः॥ प्रतस्थेरथमास्थायसभार्यःस्वपुरंनृपः २६ उभयोर्ऋषिकुल्यायाःसरस्वत्याःसुरोधसोः॥ ऋषीणामुपशांतानांपश्यन्नाश्रमसंपदः २७ तमायांतमभिप्रेत्यब्रह्मावर्तात्प्रजापतिं॥ गीतसंस्तुतिवादित्रैःप्रत्युदीयुःप्रहर्षिताः २८

यपुत्रींदत्वायाम्यहमित्यनुशोकानुत्पादकंस्वराजधानीविशिष्टसंपत्समुद्रपूर्णामाश्रममंडलंददर्शस्वपुरीमयादित्याह। उभयोरिति। ऋषिकुल्यायाःऋषिकुलप्रियायाः रोधसोस्तीरयोःस्थितानांउपशांतानांअतिशयितभगवन्निष्ठानां २७ मनोःराजेतिशब्दार्थलक्षयति। तमायांतमिति। अनेनप्रजानुरागेणरंजनाद्राजेतिशब्दोनिरुक्तइतिसूचयति २८

इयमपिनारीतत्राहि तेभ्योपिपुरापतमेतिश्रेष्ठमाह। यत्रपतन्निति। अल्पार्द्धमंगंविधुन्वतोयज्ञवाराहस्यांगाद्रोमाणिज्ञानानंदलक्षणानियत्रबर्हिष्मत्यांपतन्नसहस्रशोवताराअभिव्यक्ताःअभवन्नित्यर्थः। २८ रोम्णांभवतारत्वेकुशकाशात्मकत्वंकथमितितत्राह। तद्इति। सप्रभुप्रथमेतिसूत्रात्तेतेभ्योज्ञानानंदलक्षरोम्योवतीर्णभ्योरोमभ्यएवकुशकाशाआसन्नित्यन्वयः। प्रथमापाप्रपरित्यागेकिंकारणमितिचेत्राहरेहेयोपादेयराहित्यात्। न्यपतन्निस्तन्याकिन्नस्यादितिचेन्न। ज्ञानानंदस्वरूपेभ्योरोमभ्योस्यकुशादयः। विधुन्वतःप्रथमोनुवराहवपुषोभवन्। तानिरोमाणिदेवस्यरूपाण्यासन्सहस्रशः इतिवाक्यविरोधात्। रोम्णांकर्कशत्वात्कुशकाशानामकर्कशत्वेनसुकुमारकांतिमत्वात्तनरोमत्वंयुक्तमितिभावेनाह। लसदिति। लसद्दरित

बर्हिष्मतीनामपुरीसर्वसंपत्समन्विता॥ न्यपतन्यत्ररोमाणियज्ञस्यांगंविधुन्वतः २९ कुशकाशास्तएवासंश्लसद्धरितवर्चसः।
ऋषयोयैःपराभाव्ययज्ञघ्नान्यज्ञमीजिरे ३० कुशकाशमयंबर्हिरास्तीर्यभगवान्मनुः॥ अयजद्यज्ञपुरुषंलब्धास्थानंयतोहृ ३१

वर्चसःभास्वद्दूर्वांकुरश्यामरोचिषः। यथाग्योराहकत्वमन्यनियतमेवंकुशादीनामवध्याराक्षसपरिभावकत्वंभगवद्रोमशक्तिनियुक्तत्वमतस्तएवासन्नितिव्यपदेशइतिभावेनाह। ऋषयइति। पराभाव्यपरिभूय॥ यज्ञंभगवंतं ३० इतोपिकुशादीनांरोमत्वव्यपदेशोयुज्यतेयज्ञांगत्वेनविष्णुपदप्राप्तिहेतुत्वादित्याशयेनाह। कुशेति। कुशकाशमयंकुशकाशनिर्मितं। यत्रकुशकाशाकरेपुरेस्थित्वामनुर्यज्ञपुरुषमयजत्तेनमनुनायतोयस्यबर्हिगुणात्तस्यानुगुणाद्धाद्दृढमत्त्वंयंस्थानंविष्णुपदंलब्धं। अनेनबर्हिष्मतीतिशब्दार्थोनिरुक्तइतिज्ञायते ३१

भा॰ तृ॰
१३५

समन्वरेवं विधां बर्हिष्मतीं नाम पुरीं निर्विश्य सुखमावसदित्यन्वयः। तस्य विषयभोगाभावे श्रून्यागारस्य वत् किं सुखमत्राह। तस्यामिति। तस्यां पुर्यां विद्यमानं भवनं प्रविष्टः। कामानिति विषयभोगो धर्मादिपुरुषार्थविरोधित्वेन दुःखहेतुरित्यत उक्तमन्याविरोधत इति। अन्यस्य धर्मादेरविरोधेन।। ३२ धर्माद्यविरोधेन विषयभोगः कथमत्राह। संगीयमानेति। अनुबद्धेन स्निग्धेन ३३ ग्राहग्रस्तस्येव विषयासक्तस्य हरिकथाश्रवणेन किं फलमत्राह। निष्णातमिति। योगमायासु योगसामर्थ्येषु प्राप्तिमादिषु। मुनिं सर्वज्ञं। विन्नाविद्यस्य सर्वस्य मुनिः सद्भिरुदाहृत इत्यभिधानं। भ्रंसयितुं हरिकथा

बंधेर

बर्हिष्मतीं नाम पुरीं निर्विश्य सुखमावसत्।। तस्यां प्रविष्टो भवनं तापत्रयविनाशनं।। सभार्यः सप्रजः कामान्बुभुजे ऽन्याविरोधतः ३२ संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः।। प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन्हरेः कथाः ३३ निष्णातं योगमायासु मुनिं स्वायंभुवं मनुं।। यदा भ्रंसयितुं भोगा न शेकुर्भगवत्परं ३४ अयातयामास्तस्यासन्यामाः स्वांतरयापनाः।। शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ३५ स एवं स्वांतरं निन्ये युगानामेकसप्ततिं।। वासुदेवप्रसंगेन परिभूतगतित्रयः ३६

राम
१३५

श्रवणात् भ्रंशयितुं प्राचीनबर्हिः प्रभृत्याहृत्याहृत इव। विषयसेवायाः प्राबल्ये कथं न शेकुरिति वचनमित्याशंक्य हरिकथाश्रवणादेर्निरंतरत्वेन संबलितोपचयत्वेन ततोऽपि प्राबल्यातिशयादिति भावेनाह। अयातयामा इति। यातयामं गतसारं यामः सार इहोच्यत इति वचनाद्यातयामा अगतसाराननिष्फला इत्यर्थः। यामाः कालावयवाः स्वांतरयापनाः स्वावसानकारिणः ३५ स्वकालावधिः क्रियानित्यत्राह। स एवमिति। स्वांतरं स्वकालावधिं। परिभूतं निरस्तं गतीनां तिर्यग्पातनांतवासां त्रयं येन स तथा ३६

गत२

शारीरादिक्लेशोपद्रुतत्वेन यथा मानाश्रुतसारत्वं कथमत्राह। शारीरा इति। वैयासे मानुषत्वेनावस्थाने विभानुषा मनुष्येभ्यो जाताः। भौतिकाः भूतप्रेतादिभ्यो जाताः ३७ धर्मांश्च प्रणोक्तवान् लोकहितस्य तस्य न कोऽप्युपद्रव इत्याशयेनाह। यः पृष्ट इति ३८ मनुचरितमुपसंहृत्य वक्ष्यमाणं प्रतिजानीते। एतदिति। तस्य मनोरपत्यस्य देवहूत्या उदयं समृद्धिं शृण्विति   इति श्रीभागवतटीकायां तृतीये द्वाविंशोऽध्यायः   पितृभ्यां मातापितृभ्यां मातापितरौ पितराविति अभिधानं। इंगित

शारीरा मानसा दिव्या वैयासे ये च मानुषाः।। भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रयं ३७ यः पृष्टो मुनिभिः प्राह धर्मान्नानाविधान्शुभान् नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ३८ एतत्त आदिराजस्य मनोश्चरितमद्भुतं।। वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ३९ इति श्रीभागवते महापुराणे तृतीयस्कंधे द्वाविंशतितमोऽध्यायः   मैत्रेय उवाच   पितृभ्यां प्रस्थिते साध्वी पतिमिंगितकोविदा।। नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुं १ विश्रंभेणात्मशौचेन गौरवेण दमेन च। शुश्रूषया सौहृदेन वाचा मधुरया विभो २ विसृज्य कामं दंभं च द्वेषं लोभमघं मदं।। अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ३

कोविदा। चित्तस्थविज्ञाननिपुणा। भवानी पार्वती १ विश्रंभेण पत्युरेवाभीष्टसिद्धिः स्यादिति निश्चयलक्षणेन विश्वासेन आत्मशौचं मनःशुद्धिः शुश्रूषया हीतप्रवणेच्छया सौहृदमनिमित्तस्नेहः २ कामो विषयेच्छा। दंभः आत्मन्यविद्यमानमाहात्म्यप्रकटनं। अघं पापं प्रसनं वा। तेजीयांसमतीन्द्रियकरणशक्तिमंतं ३

स्वंतोषलक्षणमादिमंसंभाषणंतस्मादित्याह। सर्वाइति। पुत्रादिमहाशिषआशासानामिच्छंती ४ क्षामांक्षीणांअतएवकर्शितांलघीभूतशरीरयष्टिं ५ प
रमभक्त्यादिकमप्रीतिकुतोवक्तत इतितत्राह। यइति। योदेहिनामत्यंतंस्वहृत्तद्अयंस्वदेहः समुचितस्नानालंकारभोजनादिलक्षणप्रतिनावेक्षितः। किमि
तितत्राह। क्षपितुमिति। यदर्थयस्यममप्रीत्यर्थंक्षपितुंकृशीकर्तुं। ममकृशदेहदर्शनेनैवायंतुष्टःस्यादितियदत्तोहेतवतुष्टइत्यन्वयः ६॥ किमनयागुड
जिह्विकयामधुरयावाण्यापुरुषार्थानुपयोगिन्येत्याशंक्यतुष्टिफलंप्रत्यक्षयति। यामइति। स्वधर्मनिरतस्यममतपआदिसाधनैर्विजितोपार्जितानस्य

सर्वैर्वर्णितवर्ष्मांमानवीसमनुव्रता॥ देवाद्गरीयसः पत्युराशासानांमहाशिषः ४ कालेनभूयसाक्षामांकर्शितांव्रतचर्यया॥
प्रेमगद्गदयावाचापीडितः कृपयाब्रवीत् ५ तुष्टोहमद्यतवमानविमानदायाः शुश्रूषयापरमयापरयाचभक्त्या॥ योदेहिनामयमती
वसुहृत्स्वदेहोनावेक्षितः समुचितंक्षपितुंमदर्थे ६ येमेस्वधर्मनिरतस्यतपःसमाधिविद्यात्मयोगविजिताभगवत्प्रसादात्॥ तानेव
तेमदनुभावनयावरुद्धान्दृष्टिंप्रपश्यवितराम्यभयानशोकान् ७

रेरनुभावनयानिरंतरोपासनयोत्पन्नाद्भगवत्प्रसादादवरुद्धावशीकृतायातेमेममविद्यमानांदृष्टिंप्रपश्यसन्निकृष्टफलत्वात्। तुभ्यंवितरामिउपदिशा
मि। तयाकिंतत्राह। अभयामिति। अभयप्रदामशोकांदुःखविनाशिनीं। मदनुभावनयेतिपाठेममनित्यशुश्रूषालक्षणोपासनयात्वयावरुद्धाप्रदेशया
प्ताकारितेत्यर्थः। आत्मयोगश्चित्तनिरोधलक्षणः ७

मोक्षव्यतिरिक्तपुरुषार्थानांक्षणभंगुरत्वेनतत्साधनमायासेननअनुष्ठेयमेतद्विनाभूतत्वाच्चेत्यभिप्रेत्याह। अन्येइति। स्वर्गाद्यवाप्तिसाधनोपदेशं
विहायचतुर्थपुरुषार्थप्राप्त्युपायोपदेशः कस्मादित्यतोवाह। अन्येपुनरिति। उरुक्रमस्यभगवतोभ्रुवउद्विजृंभतोविनाशकलक्षणात्स्फुरणेनविभ्रंशि
ताः विनाशिताअर्थरचनाविषयभोगवैभवलक्षणायेषांतेतथोक्ताः यइतियस्मात्तस्मात्उपदेशेनकिंनकिमपीत्यर्थः। स्वर्गादीनांभगवद्भ्रूविजृंभानुग्र
हीतावस्थानत्वात्तदनुग्रहेणतत्प्राप्तिः किंवाअतिस्वनियमितंकंठेकरोति। सिद्धासीति। नकेवलंचतुर्थपुरुषार्थेनत्वंसिद्धासिकिंत्वपेक्षिता
शेषपुरुषार्थेनापितत्कथमत्राह। भुंक्ष्वेति। निजधर्मदोहान्धर्मतत्वानातान्। अश्वमेधादिविशिष्टक्रियाभिःसाधनैः नरैर्दुरधिगमान्नधिगंतुमशक्यान्

अन्येपुनर्भगवतोभ्रुवउद्विजृंभविभ्रंशितार्थरचनाः किमुरुक्रमस्य॥ सिद्धासिभुंक्ष्वविभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपविक्रि
याभिः ८ मैत्रेयउवाच एवंब्रुवाणमबलाऽखिलयोगमायाविद्याविचक्षणमवेक्ष्यगताधिरासीत्॥ संप्रश्रयप्रणयविह्वलया
गिरेषद्व्रीडावलोकविलसद्धसिताननाह ९

शकान्। अनेनभगवदनुग्रहएवालंयतदवाप्त्येनकर्मादिकमित्युक्तंभवति ८ एवमुपदिष्टायादेवहूत्यामनसिकिमभूदितितत्राह। एवमिति। अ
खिलासुयोगमायाविद्यासुअणिमाद्यष्टांगयोगसामर्थ्यसिद्धकरीषुविचक्षणंनिपुणं। भर्तुःप्रसन्नतामवेत्यावेक्ष्येत्यन्यदाशुश्रूषानिरतत्वेनतदर
वसरोचिताप्रीति। गताधिर्निरस्तमनःपीडा एतत्कथमवगतमत्राह। संप्रश्रयेति। प्रश्रयेणविनयगुणेनसहवर्ततइतिसप्रश्रयः। सवासौप्रश्रयः
स्नेहप्रसरः तेनविह्वलास्खलंतीतया। व्रीडयावलोकेनविलसत्शृंगारविशेषंकुर्वद्धसितंमंदस्मितंयस्यतत्तथा। व्रीडावलोकविलसद्धसितमाननं
यस्याःसातथा ९

भा.त.
१३१

स्वयंप्रसन्नेंद्रियत्वात् श्रोतुश्च प्रसादजनकवाक्यमाह। राद्धमिति। हे द्विजवृष त्वद्ब्राह्मणश्रेष्ठ यद्दैवी भक्तैतन्नवगच्छामि हे भर्तः अमोघयोगमायाधिपे त्वयि योगसामर्थ्यं तदहमवैमीति। अथ किं तदपेक्षितमत्राह। यस्त इति। ते तव सकृदंगसंगः शारीरस्पर्शलक्षणो ग्राम्यधर्मः समयोऽभ्यधायि समभूयादिति प्रार्थये इति शेषः सकृदंगसंगेन किं फलं स्यादिति तत्राह। वरीयसीति। सतीनां पतिव्रतानां स्त्रीणां वरीयसि गुणान्ममे पत्यौ सकृदंगसंगो गुणप्रसवः गुणाढ्यपुत्रप्रसूत इति सफल एवेत्यर्थः १० तर्हि तथा क्रियतामाशंक्याकृत्यं किंचिदस्तीत्याह। तत्रेति। तत्र सकृदंगसंगविषये यथोपदेशं शास्त्रोपदेशमनतिक्रम्य कृत्यमितिकर्तव्यतामुपशिक्ष विचारयुपादत्स्व कुतो विद्योपादानमत्राह। येनेति। अभिरिरंसया ग्राम्यधर्मेच्छया कर्शित एष मेमम आत्मा देहो येन विद्योपादानेन सिध्ये

देवहूतिरुवाच॥ ॥राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः॥ यस्तेऽभ्यधायि समयः सकृदंगसंगो भूयाद्गरीयसि गुणप्रसवः सतीनां १० तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितो ऽतिरिरंसयात्मा॥ सिद्ध्येत ते कृतमनोभवधर्षितायाः कामस्तदीशभवनं सदृशं विचक्ष्व ११ मैत्रेय उवाच प्रियायाः प्रियमन्विच्छन् कर्दमो योगमास्थितः॥ विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् १२

तस फलेऽभूयात् सकामोऽक्ष्याकि मुदिश्य पत उक्तं। ते कृतेति। त्वत्कृतमनोभवेन त्वन्निमित्तकामेन धर्षितायाः अभिभूतायाः। कीदृक् विद्योपादानं क इति तत्राह। तदीशेति। यस्माद्भो मम पुत्र्या मम सदृशं योग्यं तद्भवनं विद्यासामर्थ्येन विचक्ष्व दृष्टा कुरु विचिन्त्य स्वयः। अभिव्रति तत रिरंसया रंतुमिच्छया तत तवमनोभवधर्षितायाम एषकामः कमनीय आत्मा कायो येन विद्याबलेन रचितेन गृहादिना सिध्येत तत् सदृशं भवनं विचक्ष्वेति वा ११ विषयेष्वप्रसक्त्यात्मन्येवाधिष्ठापित सर्वेन्द्रियग्रामोऽपि कर्दमः आश्रितवत्सलो महानिति भावं दर्शयन् प्रियावचनं लालयन् योगविद्याबलेन तत्क्षण एव हे निर्ममे इत्याह। प्रियाया इति। यादृशेन भगवद्ध्यानेनाभीष्टं स्यात्तादृशं योगमास्थित इत्यर्थः आविरचीकरत् प्रकाशयामास १२

स्क
१३१

श्रोतॄणां भगवद्ध्यानमाहात्म्यश्रद्धातिशयजननाय प्राकृतं प्राकृतमिव वर्णयति। सर्वकामेत्यादिना। सर्वासां समृद्धीनामुपचयेन समाहारेण उदर्क उत्कर्षो। एतदेव विशिनष्टि। मणिस्तंभैरिति। उपस्कृतमलंकृतं १३ दिव्यानि कुलालादिरचनारहितानि उपस्करणानि भांडादि गृहसाधनानि यानि तैर्युक्तं। पट्टिकाभिः पट्टवस्त्रकृताभिः १४ विचित्रमालाभिः नानाविधपुष्परचिताभिः स्रग्भिर्मालाभिः। मंजु मधुरं सिंजंतः शब्दं कुर्वंतः षडंघ्रयो

सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं। सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतं १३ दिव्योपस्करणोपेतं सर्वकालसुखावहं॥ पट्टिकाभिर्विचित्राभिः पताकाभिरलंकृतं १४ स्रग्भिर्विचित्रमालाभिर्मंजुसिंजत्षडंघ्रिभिः॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं १५ उपर्युपरि विन्यस्तनिलयेषु पृथक् पृथक्॥ क्षिप्तैः कशिपुभिः कांतं पर्यंकव्यजनासनैः १६ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितं। महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः १७ द्वाःसु विद्रुमदेहल्या भातं वज्रकपाटवत्। शिखरेष्विन्द्रनीलेषु हेमकुंभैरधिश्रितं १८ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः॥ जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः १९ हंसपारावतव्रातैस्तत्र तत्र निकूजितं॥ कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च २०

स्क ३

भृंगा यासु ताः स्रग्भिरुक्ताः ताभिः १५ कशिपुभिः शय्याभिः पर्यंकैः मंचैः १६ १७ द्वाःसु द्वारेषु विद्रुमदेहल्या विद्रुमरत्ननिर्मितद्वारबंधेन। देहली द्वारबंधः स्यादिति वा। वज्ररत्नकृताः कपाटा यस्मिन् संतीति वज्रकपाटवत् १८ चक्षु[illegible]ष्मतो दीप्तिमंतः पद्मरागाद्या मणयः। विचित्राणां वितानानां समूहैः १९ कृत्रिमान् शोभार्थं कृतान् स्वान् कृत्रिमान्मन्यमानैः २०

शयननिवेशनंसंवेशः प्रांगणंगृहपूर्वभूमिः अजिरंगृहबाह्यसंस्कृतभूमिः। यथोपजोषंयथासुखं २१ परिवारकाभावान्नातिप्रीतेनसर्वभूतानामाश यमभिप्रायंअभितोजानातीतिसर्वभूताशयाभिज्ञः २२ आशिषाशुभानांवाञ्छयेशान्तयेएवंविधेद्रूदेतीर्थे २३ सरजंधूलिधूसरं २४ मलेनकि

विहारस्थानविश्राममसंवेशप्रांगणाजिरैः॥ यथोपजोषंरचितैर्विस्मापनमिवात्मनः २१ ईदृग्गृहंतत्पश्यंती नातिप्रीतेनचेत सा॥ सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमःस्वयं २२ निमज्ज्यास्मिन्ह्रदेभीरुविमानमिदमारुह॥ इदंशुक्लकृतंतीर्थमाशिषामा

पयेनृणां २३ सातद्भर्तुःसमादायवचः कुवलयेक्षणा॥ सरजंबिभ्रतीवासोवेणीभूतांश्चमूर्द्धजान् २४ अंगंचमलपंकेनसं छन्नंशबलस्तनं॥ आविवेशसरस्वत्याःसरःशिवजलाशयं २५ सांतःसरसिवेश्मस्थाः शतानिदशकन्यकाः॥ सर्वाःकिशोर वयसोददर्शोत्पलगंधयः २६

ट्टेनदृष्टवद्धेनयेकेनकर्दमेनकल्मषेणवा। शबलोधूसरपांडुरोस्तनोयस्मिंस्तत्तथातत्। सरस्वत्याः सरोह्रदंशिवानांजलानामाशयःस्थानं २५ ह्रदंप्रविश्यकिमकरोदित्यत्राह। सांतःसरसीति। वेश्मगृहंतत्रस्थिताः दशशतानिसहस्रंकैशोरवयसः षोडशवर्षवयसः। उत्पलगंधवत् गंधोयासांताउत्पलगंधयः २६

पश्चिन्तया दर्शनस्वदेतद्दर्शनेनकिमस्याःप्रयोजनमितितत्राह। तांदृष्ट्वेति। अनेनाभ्युत्थानप्रणामसंभाषणादिप्रयोजनमुक्तंभवति। कर्मकरीः कर्मकार्यः शाधिअनुशासनंकुरु २७ कीदृशंपरिकर्मकुर्वन्नितितत्राहस्नानेनेति। महार्हयाराज्यार्हेणेनयोग्येनमनस्विनींप्रसन्नमनसं। नूत्नेनूतने २८ वरणी यांसिवरणीयतमानिद्युमंतिकांतिमंति। सर्वगुणैः भक्ष्यभोज्यचोष्यलेह्यलक्षणैरुपेतंमधुरादिबहुरसोपेतंवा। अथ तवस्त्वंदुमधयंस्मिंस्तदृष्टता

तांदृष्ट्वासहसोत्थायप्रोचुःप्रांजलयःस्त्रियः॥ वयंकर्मकरीस्तुभ्यंशाधिनःकरवामकिं २७ स्नानेनतांमहार्हेणस्नापयित्वामनस्विनीं॥ दुकूलेनिर्मलेनूत्नेददुरस्यैचमानदं २८ भूषणानिपरार्ध्यानिवरीयांसिद्युमंतिच॥ अन्नंसर्वगुणोपेतंपानंचैवामृतासवं २९ अथा दर्शेस्वमात्मानंस्रग्विणंविरजांबरं॥ विरजंकृतस्वस्त्ययनंकन्याभिर्बहुमानितं ३० स्नातंकृतशिरःस्नानंसर्वाभरणभूषितं। निष्क ग्रीवंवलयिनंकूजत्कांचननूपुरं ३१ श्रोण्योरध्यस्तयाकांच्याकांचन्याबहुरत्नया॥ हारेणचमहार्हेणरुचकेनचभूषितं ३२ सुदती सुदतास्निग्धापांगेनचक्षुषा॥ पद्मकोशस्पृधानीलैरलकैश्चलसन्मुखं ३३

सवं २९ भर्तृसान्निध्याभावेशरीरशृंगारेणकिंतत्रवक्ति अथेति। आदर्शेदर्पणेआत्मानंशरीरंविरजंनिर्मलं। कृतस्वस्त्ययनंदासीभिःकृताशी र्वचनं ३० कुलस्त्रीणुशिरःस्नानमुत्सवेस्नानुतैलतः। वारेवापेत्यकेकर्मण्यन्यदाकंठसंप्लवाइतिस्मार्ताः ३१ पूर्वपश्चिमभागापेक्षयाश्रोण्यो रिति। रुचकेनहस्ताकारेणाकंठाभरणेन ३२ सुभ्रुवादिभिश्चलसत्प्रकाशनमुखंयस्मिंस्तथोक्तं। पद्मकोशंस्पर्द्धतइतिपद्मकोशस्पृक्शतेन ३३

एवंविधमात्मानं दृष्ट्वा यदा ऋषीणां वृषभं दयितं श्रेष्ठं पतिं। पतिसमीपे इदं सर्वं शोभत इति सस्मार। तत तदा स प्रजापतिर्यत्रास्ते स्वयं वताभिः स्त्रीभिः सह तत्रैवास्त इत्यन्वयः ३४ यदा सा भर्तुः पुरस्तात् स्थितं स्त्रीसहस्रैरावृतमात्मानमद्राक्षीत् तदा तस्य कर्दमस्य योगगतिं भगवद्ध्यानफलं निशाम्य किमिदं चित्रमिति संशयं विस्मयं प्रत्यपद्यत। न तु को टिह्यावली विविकल्पश्रागेव निश्चायायकधर्मदर्शनाद्वित्यर्थः ३५ अर्थक्रिया योग्यत्वात्र विकल्पापरपर्यायः संशयो नाभूत्। किं तु विस्मय एवेति भावेन अवाय यज्ञोपक्रमं वक्ति। सतामिति। स्नानपरिक्रियासवी तो शान्तो

यदा सस्मार ऋषभमृषीणां दयितं पतिं॥ तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः ३४ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा॥ निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ३५ स तां कृतमलस्नानां विभ्राजन्तीमपूर्ववत्॥ आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीं॥ ३६ विद्याधरीसहस्रेण सेव्यमानां सुवाससं। जातभावो विमानं तदारोहयदमित्रहन् ३७ तस्मिन्नलुप्तमहिमा प्रियया नुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने॥॥

रुचिरस्तनौ यस्य तत्तथा ३६ जातभावः प्रादुर्भूतव्यवायलीलारंभः ३७ जातभाव इत्युक्तं विवृणोति। तस्मिन्निति। स तस्मिन् विमाने बभ्राजे चकाश इत्यन्वयः। चकाशयोग्यगुणानाह। अलुप्तेत्यादिना। अलुप्तमहिमा अपरिच्छिन्नमाहात्म्यः। ग्राम्यकर्मसक्तस्यापि सामर्थ्यलोपो नास्तीत्यर्थः। सर्वेंद्रियाणां नरयंतितेन इति अतेरितरेषां सस्पादिति। माहात्म्यलोपशंकाकारणमाह। प्रिययेति। आलिंगनचुंबनेवाप्यनुषंगे नुवर्तत इति। अंगमर्दनादिना उपचीर्णं उपवृर्णं शुश्रूषितं वपुर्यस्य तत्तथा। अनेन सुरतालये स्त्रिय एव परिवारका इति सूचितं॥ ॥

कचः कलंके दोषे च कुंतले मरणे तथेत्यभिधानात् उत्कच उद्धृतदोषः। उत्कृष्टो गुणो यस्य तत् उद्गुणं तच्च पानं पातुं योग्यं अधरामृतं तत् उद्गुणपानं तत् स्वीभिः परंपरास्थास्त्रीत्कट्गुणपान वीच्यः मत्वर्थीयस्त्यः। यद्वा उद्गुणपानः उत्तमाधरामृत च अपीच्य एव अपीच्यः प्राप्तषोडशवर्षः। प्राप्तषोडशवर्षः सन्नपीच्य इति कथ्यत इति वा। बुध्यवतारार्थं दृष्टांतमाह तारामिरिति। उडुपतिश्चंद्रः उक्तविशेषणानि यथासंभवं चंद्रेपि घटनीयानि ३८ वनज्जलक्रीडादीनां सुरतांगत्वात् तदप्यनेनानुष्ठितमिति भावेन कामगमित्यर्कं विवृणोति श्लोकद्वयेन। तेन विमानेनाष्टानां लोकपालानामिंद्रादीनां वि

बभ्राज उत्कच उद्गुणपानवीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ३८ तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु॥ सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरं धनदवल्ललनावरूथी ३९ वैस्रंभके सुरवने नंदने पुष्पभद्रके॥ मानसे चैत्ररथ्ये च स रेमे रामया सह ४०

हारः क्रीडा यासु तास्तथोक्ताः। कुलाचलेंद्राणां सप्तकुलपर्वतानां द्रोण्यो नितंबगुहा यासु तासु अष्टलोकपविहारकुलाचलेंद्रद्रोणिषु वैश्रवणवच्चिरं रेम इत्यन्वयः। पाषाणसंधिषु सूर्यकिरणसंतापसंभूतनिदाघेषु स्वतः कामाग्नितप्तस्य सुरतोत्सवानुभवः कथं घटत इत्यत उक्तं। अनंगेति। अनंगसखः कामसखः मारुतो वायुस्तेन सौभगासु सुंदरसुखासु। द्युधुनी आकाशगंगा तस्याः पातेन प्रस्रवणेन शिवः कर्णसुखः स्वनः शब्दो यासु तासु यातासु। अनेन विशेषणद्वयेन माघशैत्यमिति गुणद्वयमुक्तं। ललनाः स्त्रियः। वरूथः समूहः। उभयत्र समं ३९ उद्यानानि क्रीडार्थं प्रत्युपनयति। वै

भा॰ त॰
१४०

इतरेषां वैमानिकानां विमानानां स्वाधिकृतेष्वेव प्रदेशेषु संचारादस्य विमानस्य विशेषाभावादयं सर्वातिशयीत्याह। भ्राजिष्णुनेति। विमानेन वर्तंती
ति वैमानिकाः तान् ४१ एतदैश्वर्यं न स्वनियतं श्रीनारायणप्रसादायत्तमित्याशयेनाह। किं दुरापादनमिति। उद्दामचेतसामगाधबुद्धीनां तीर्थभुद
जलं गंगापदो यस्य स तीर्थपदस्तस्य ४२ बह्वाश्चर्यात् भूगोलकादधिकैश्वर्यातिशयः स्वाश्रम इति भावेन तत्तत्स्थानि द्रष्टुं विवक्षिन्प्रेक्षयित्वेति। स्व
संस्थया स्वसमाधाया वा स्नावत्प्रदेशोपेतं भूगोलकं भूमंडलं ४३ विंदुसरः स्वाश्रमं प्राप्य किमकार्षीत्कर्दम इति तत्राह। विभज्येति। महायोगि

भ्राजिष्णुना विमानेन कामगेन महीयसा॥ वैमानिकानत्यशेत चरँल्लोकान्यथानिलः ४१ किं दुरापादनं तेषां पुंसामुद्दामचेतसां॥
यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ४२ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान्स्वसंस्थया। बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत
४३ विभज्य नवधात्मानं मानवीं सुरतोत्सुकां। रामां निरमयन्रेमे वर्षपूगान्मुहूर्तवत् ४४ तस्मिन्विमान उत्कृष्टां शय्यां रतिकरीं श्रिता॥
न चाबुध्यत तं कालं पत्यापीच्येन संगता ४५ एवं योगानुभावेन दंपत्यो रममाणयोः। शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ४६

त्वाद्बहुशरीरग्रहणसमर्थः। स कर्दम आत्मानं स्वं नवधा विभज्य योगशक्त्या नवसंख्याविशिष्टानि शरीराणि गृहीत्वा सुरतोत्कं कामानुषक्तिका
मुकीं मानवीं मनुपुत्रीं रामां मपिता बहुप्रवर्तीं नितरां रमयन्वात्स्यायनोक्तविधिना वर्षपूगान्मुहूर्तवद्रेम इत्यन्वयः ४४ तृतीयपुरुषार्थानुभव
इहगिति व्यनक्ति। तस्मिन्निति। मसृणत्वात्रतिकरीं। यो बहुतिथः तं कालं ४५ इदानीं कालं संख्याति। एवमिति। शरदो वत्सराः व्यतीयुः अ
तिक्रांताः। कामलालसयोः चंद्रोदये वर्द्धमानसमुद्रतरंगवद्विषयभोगाभिलाषयोः ४६

राम
१४०

स्करतफलितमाह। तस्यामिति। आत्मवित्त्वं विवृणोति। सत्येति। सत्यसंकल्पो हरिः तं सत्यसंकल्पत्वादिगुणविशिष्टत्वेन वेत्तीति। येन येन गुणेनाह
रावुपसंक्रियते स तत्तद्गुणविशिष्टो भवतीति न्यायात्स्वयमपि सत्यसंकल्पः स्वं स्वरूपं नवधा विधाय तामप्यात्मना मनसा नवधा भावयन्रेत
स्या गर्भलक्षणं रेत आधत्तेत्यन्वयः। योगशक्त्यानंतसुखस्य स्वाप्तिसामर्थ्यं सूचयति विभुरिति। अर्द्धमात्मन इति पाठे आत्मनोर्द्धं पत्नीं भावय
न्नित्यर्थः। अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः ४७ शुक्लेन हरिणा क्षयं आधास्यति क्षेत्रे आत्मन इत्यादावभिहितत्वादाहितः सगर्भः स्त्री

तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित्। नवधा विधाय रूपं स्वं सत्यसंकल्पविद्विभुः ४७ ततः सासुषुवे सद्यो देवहू
तिः स्त्रियः प्रजाः। सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ४८ पतिं सा प्रव्रजिष्यंतं तदालक्ष्योशती सती। स्मयमा
ना विक्लवेन हृदयेन विदूयता ४९ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया। उवाच ललितां वाचं निरुध्याश्रुकलां
शनैः ५०
चं

लिंग इति निश्चिते पिकतिषु कालावयवेषु गतेषु सा किमकरोदिति तत्राह। तत इति। सद्य इत्यनेन निरस्पत्तिकतिष्विति शंका ४८ महतीय
दुत्तरं कार्यं तत्प्रार्थनापूर्वकं कर्त्तव्यमित्यतो देवहूती पुत्रीणां दानं पुत्रं च पतिं प्रार्थयते पतिमिति। प्रव्रजिष्यंतं संन्यासं कर्त्तुमिच्छंतं आल
क्ष्य विषयविरागादिलक्षणेन ज्ञात्वा उशती पुत्रं कामयमाना अत एव स्मयमाना विषयाभिलाषिणीवात्मानं दर्शयंती उत्पत्स्यमानं भर्तृ
विरहेन विक्लवेन ४९ विषयाभिलाषं व्यनक्ति। लिखंतीति। नखा एव मणयः नखमणयस्तेषां श्रीर्यस्य स तथा तेन। अनेन कामा

किमाहेतिहन्नमनुवदति। सर्वमिति। रूपोवाहोपवकार। अथ किं तत्राह। अथापीति। अभयमभयलक्षणंपुत्रं ५१ किंवतुभ्यंतवदुहित्र सिःसमाः। अभयमिति सामान्यतउक्तं स्पष्टयति। अपीति। त्वयि वनं प्रव्रजिते सन्यस्य वनंग तेसति मम विशोकाय संसारदुःखप्रहरणाय पुत्रः स्यादपि संभवेदित्यर्थः। किं। ततंमवायमवदनुग्रहोभूयादिति शेषः। सच्चिदितिपाठे सच्चिदानंदलक्षणः परमात्मेति ब्रुवयति। काश्चिदितिपाठे प्ययमेवार्थः। सुदृष्ट्यादसः ५२ अथापि पुत्रप्रार्थनव्याजेनैवविषयाभिलाषुरितिशंकामाभूदित्याह। एतावतेति। इंद्रियार्थप्रसं

सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतं॥ अथापि मे प्रपन्नाया अभयं दातुमर्हसि ५१ ब्रह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः॥ कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनं ५२ एतावतालं कालेन व्यतिक्रांतेन मे प्रभो॥ इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ५३ इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः॥ अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ५४ संयोगः संसृतेर्हेतुरसत्सु विहितो धिया॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ५५

ङ्गादिषुप्रसंगोरुणावुध्यातिस्नेहलक्षणो यस्तेन परित्यक्तो विस्मृतः परात्मा सर्वोत्तमो हरिर्यया सा तथोक्ता तस्याः ५३ ममगतकालो वितुरुषार्थहेतुः स्यादिति प्रार्थयत इत्याह। इंद्रियार्थेष्विति। यद्यपींद्रियार्थेषु सज्जंत्या भवतः परमितरविलक्षणं भावं योगैश्वर्यम जानंत्या मे त्वयि कृतो यः प्रसंगः सतया विपरमभागवतत्वेन तत्संगत्वान्मे अभवाय अपुनर्भवायास्त्वित्यन्वयः ५४ ज्ञानं विना संगस्य पुरुषार्थहेतुत्वं कथमित्यतस्तं विशिनष्टि। संयोग इति। साधुषु भागवतेषु निःसंगत्वाय संसारविरागाय। अनेन वैराग्यभक्तिज्ञानद्वारा सत्संगः पुरुषार्थहेतुरित्युक्तं भवति ५५

सत्संगत्योत्पन्नब्रह्मार्पणबुध्या विकित्सितस्य कर्मणो द्वारद्वारिक्यापरमपुरुषार्थहेतुत्वं न केवलस्य तस्येति कतेनचेतनं त्वनवस्वामीष्टफलदानसामर्थ्याभावादित्याह। नेहेति। इह कर्मभूमौ येन पुरुषेण यत्क्रियमाणं कर्म धर्माय धर्मादिपुरुषार्थप्राप्तये न स्यात्। विरागाय च न कल्पते वैराग्यं यत्तेन समर्थं स्यात्। तीर्थपदस्य हरेः सेवायै च न स्यात् तादृशकेवलस्य कर्मणः कर्ता स पुरुषो जीवन्मृत इत्युच्यते। अयिश इत्येन तस्य जन्म गर्हयति। यस्मात् स्माद्भागवतसंगत्या शिक्षितं कर्मैव कर्तव्यमित्यर्थः ५६ तर्हि किमर्थं सकृदं गसंगो भूयादिति विषयाभिलाषः प्रार्थित इति तत्राह। साहमिति। सा ता हस्पहं भगवतो हरेर्मायया वंचकशत्रुपावं विता नूनं न तर्कयामि तर्कनिश्चितयोर्वृनमिति च। तत्रहेतुमाह। या त्वामिति। संसारविमुक्तिदं त्वा प्राप्य

नेह यत्कर्म धर्माय न विरागाय कल्पते॥ न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ५६ साहं भगवतो नूनं वंचिता मायया दृढं॥ यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ५७ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलोपाख्याने चतुर्विंशोऽध्यायः मैत्रेय उवाच निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः॥ दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् १ ऋषिरुवाच माखिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते॥ भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्यते २

संसारबंधनान्न मुमुक्षे मुक्तिं नेच्छामीति यदतइति। हेत्यनेन संसारप्रवृत्त्यारंभमेवेच्छामीति सूचयति ५७ इति श्रीभागवते टीकायां तृतीयस्कंधे चतुर्विंशोऽध्यायः हरेरवतारास्तु पिसच्चिदानंदेहत्वात् शुक्लशोणितसंपर्कपारक्षशरीरा न भवंतीत्याद्यर्थतात्पर्यावबोधायास्याध्यायस्य प्रारंभः। तत्रादौ कर्दमेन देवहूत्याः कस्य किमुत्तरत्वेनाभाणीति तत्राह। निर्वेदवादिनीमिति। निर्वेदं वैराग्यं वदितुं जातिपादयितुं शीलमस्याम्नीति निर्वेदवादिनी। तां शालिनीं भार्यां शालिनी मालिनी माल्यावार्या भार्येत्यितो अत इत्यभिधानात्। शुक्लनाम्नो हरेरभिव्याहृतं वचनं १ आत्मानं

[illegible]

कदा प्रतिपत्स्यत इत्याशंक्य मद्युक्तनियमानंतरमाविर्भविष्यतीति भावेन नियममाह। धृतव्रतेति ३१ अविस्पष्टो विशेषो का ये ति प्रश्नं प्रत्याह। सत्वयेति ब्रह्माणं चतुर्मुखं विभावयति उत्पादयतीति। ब्रह्म परमात्मतत्वं ग्राहयतीति वा। तपश्चर्या बुद्धिमुत्पादयतीति वा ब्रह्मभावनः। औरस्यः पुत्रतया वनीर्णः हृदयग्रंथिमहंकारसंबंधसंसारं ४ देवहूत्यपि हमादीनां दुःसहत्वान्नेशानी तत्कारणं प्रकारांतरं वेदुपदिश्यतामिति भावेन भर्तृवचनेनोहात्रं किंतु श्रद्धयाव तिष्ठदित्याह। देवहूतीति। संसारि चेतना ह्या हृन्नये कटस्थमिति। सर्वव्यापिरूपवन्नोदासीनं ब्रह्मादिज्ञानोपदेष्टारमिति भावेनोक्तं गुरुमिति ५ बह्वामपि साधनसामग्र्या कार्यानुत्पत्तिं वक्ता पितथा किन्नेत्याह। तस्यामिति। बहूनां तिथि विशेषाणां कालावयवानां पूरणे काले गते स

धृतव्रता सुभद्रं ते दमेन नियमेन च। तपो द्रविणदानैश्च श्रद्धया चेश्वरं भज ३ सत्वयाराधितः शुक्लो वितन्वन्मामकं यशः। छेत्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ४ मैत्रेय उवाच देवहूत्यपि संदेशं गौरवेण प्रजापतेः। सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुं ५
तस्यां बहुतिथे काले भगवान्मधुसूदनः। कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ६ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः
।। गायंति तं स्म गंधर्वा नृत्यंत्यप्सरसो मुदा ७ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः। प्रसेदुश्च दिशः सर्वा अंभांसि च मनांसि च ८

तिकार्दमं कर्दमशुक्रात्तु विकारमणीयोगं वीर्यं रतन्नापन्नः प्रविष्टः तस्य रेतस आपदं विलापन लक्षणां नयतीत्यापन्नो वा तस्यां देवहूत्यां जज्ञे प्रादुर्बभूव। अस्यायमेवार्थ इत्यत्र ता दृशं दृष्टांतमाह। अग्निरिवेति। यथा सिर्दारुणि स्थितो दारुतश्चाभिव्यक्तो भवति। अतएव तस्यामित्युक्तं पूर्वमपि तत्र सत्वात्। एतत्सर्वं नावतारेष्वपि हरेर्देहः शुक्रादिसंभवः। तथापि शुक्रसंस्थः सन्मातृदेहं प्रविश्यैव विलाप्य शुक्रं तत्रैव केवलज्ञानरूपतः उदेति भगवान्विष्णुः कालेनेति लोकं विडंबयन्नित्यादि ग्रंथांतरं सिद्धं काले दशमे मासे ६ तत्र साक्षान्नारायण एव स्वरूपांतरेणाभिव्यक्तो लोकदिनोत्सवदर्शनादिति भावेनं तं कालं विशिनष्टि। अवादयन्निति आदिना। घनाघनामेघाः जगुरिति शेषः ७ तस्मिन्नंतरीक्षस्थमाने

इतोऽपि हरिरेवाभिव्यक्तः इतरथा ब्रह्माद्यागमनासंभवादित्याशयेनाह। तत्कर्दमेति ९ सरस्वत्या परिश्रुतमिति विशेषितत्वात्तीर्थस्नानार्थं तेषामागमनं किं तत्राह। भगवंतमिति। आद्यर्त्विजानितद् इत्यजस्य चतुर्मुखत्वे सिद्धे पितस्य भक्त्याद्यतिशयत्वद्योतनाय स्वराडिति मनोवाक्कायकर्मभिः स्वतंत्रैर्भिराजत इति स्वेन राजत इति वा। नमारतीमेंगमृषेत्यादेः। सत्वेन सर्वगुणपूर्णत्वेन सिद्धे नांशेन किं प्रयोजनमित्यमवतार इत्यत उक्तं। तत्वेति। चतुर्विंशतितत्वानां संख्यानं सम्यग्ज्ञानं तस्य विज्ञप्त्यै विज्ञापनाय। सत्वस्य प्रकृतिगुणत्वेन घकत्वान्नेन प्राकृतदेहेन जात इत्येवार्थ इतीदं बोध्यं।

तत्कर्दमाश्रमपदं सरस्वत्या परिश्रुतं। स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ९ भगवंतं परं ब्रह्म सत्वेनांशेन शत्रुहन्।
तत्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् १० सभाजयन्विशुद्धेन चेतसा तच्चिकीर्षितं। प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ११ ब्रह्मोवाच त्वया मे पचितिस्तात कल्पिता निर्व्यलीकतः। यन्मे संजगृहे वाक्यं भवान्मानद मानयन् १२

महागुणाभिव्यक्तिर्वा सत्वमित्युच्यते बुधैरित्यनेन परिहर्तव्यं। केवलो निर्गुणश्चेति श्रुतेश्च। अत्र सांख्यानमित्यनेन सम्यक् ज्ञानमेव कथ्यते न तु कापिलोक्तं शास्त्रं। कुतः सम्यग्ज्ञाने तु सांख्यं स्यान्नदर्थो योग उच्यते इति वचनात् १० ब्रह्मणागत्य किं प्रियवचनमुक्तं तत्राह। सभाजयन्निति। तस्य हरेश्चिकीर्षितं सम्यग्ज्ञानसाधनशास्त्रनिर्माणेच्छोपेतं सभाजयन्साध्विति बहुमानयन्। हरेर्भक्तानुकंपित्वेन प्रहृष्यमाणैरसुभिरिंद्रियैरुपलक्षितः चशब्देन हरेश्चिकीर्षसभाजनं कर्दमसंभाषणं च समुच्चिनोति ११ सामान्येनोक्तं विशिनष्टि। त्वयेति। अपचितिः पूजा। केयमपचितिरत्राह। यन्म इति १२

एतावताकथमपचितिरभूदित्याह। एतावतीति। बाढमभिमतमनुमन्येतकरोतीतिमावत्। एतावत्येव १३ किमनयाकृत्याअथापिप्रजाःस्र
जेतिभवदाज्ञाननिष्पन्नेतितत्राह। इमाइति। सत्यः सत्विति शेषः। सतीगुणेनकिंफलंतत्राह। वत्सेति। सर्गमवशिष्टमितिशेषः। अनेनमदाज्ञाव
हत्तास्यादित्युक्तंभवति १४ मानुषसर्गस्क मिथुनेनमा अतइतियस्मात्तत्रास्मादयोग्येभ्योयथारुचिदेहीत्याह। अतइति। अनेनोभौलोकौवश
न्नोषीत्याशयेनाह। विस्तृणीहीति। विस्तृणीहिविस्तृतंकुरु १५ अयंतवगृहेऽवतीर्णःसाक्षान्नारायणएवनान्यस्तल्लक्षणसद्भावादित्याहवेदेति।

एतावत्येवशुश्रूषाकार्यापितरिपुत्रकैः॥ बाढमित्यनुमन्येतगौरवेणगुरोर्वचः १३ इमादुहितरःसत्यस्तववत्ससुमध्यमाः॥ सर्ग
मेतंप्रभावैःस्वैर्बृंहयिष्यन्त्यनेकधा १४ अतस्त्वमृषिमुख्येभ्योयथाशीलंयथारुचि॥ आत्मजाःपरिदेह्यद्यविस्तृणीहियशोभुवि १५
वेदाहमाद्यंपुरुषमवतीर्णंस्वमायया॥ भूतानांशेवधिंदेहंबिभ्राणंकपिलंमुने १६ ज्ञानविज्ञानयोगेनकर्मणामुद्धरञ्जटाः॥ हिर
ण्यकेशःपद्माक्षःपद्ममुद्रापदाम्बुजः १७ एषमानवितेगर्भंप्रविष्टःकैटभार्दनः॥ अविद्यासंशयग्रंथिंछित्त्वागांविचरिष्यति १८

त्वमपितथाविद्धीत्यभिप्रेत्याह। वेदाहमिति। भूतानांजीवानांशेवधिंपुरुषार्थसाधननिधिंदेहंबिभ्राणं। कंविबतिलातिचेतिकपिलंनाम्नाहं
वेदेत्यन्वयः १६ योज्ञानविज्ञानयोगेनकर्मणांस्वरूपमुद्धरन्प्रकाशयन्उन्मूलयन्वा। यश्चहिरण्यकेशादिस्वलक्षणलक्षितस्तमितिशेषः॥
हिरण्यश्मश्रुहिरण्यकेशइत्यादिश्रुतेः १७ स्वस्यजगद्गुरुत्वसिद्धयेदेवहूत्याअपिस्वविज्ञानमुपदिशति। एषमानवीति। तवतत्त्वविज्ञाप
नेनाविद्यासंशयग्रंथिंअज्ञानमविद्याविकल्पःसंशयस्ताभ्यामुत्पन्नग्रंथिंबंधनंपाशलक्षणंछित्वागांभूमिंविचरिष्यति। स्वपादैकशरणा
नांतत्वज्ञापनायेतिशेषः १८

नकेवलंतवाविद्यासंशयग्रंथिंछित्त्वानिर्किंत्वन्येषामपीतिभावेनाह। अयमिति। अयंभगवान्लोकेकपिलइत्याख्यांगंताप्राप्स्यन्नयः। संसारकंपनहेतुत्वा
त्कपिलइत्यस्मिन्नर्थेविप्रतिपत्तिर्नास्तीत्याह। सांख्येति। सांख्यशास्त्रंकृत्वाप्रवर्तकत्वेनतदाचार्याणांपुरुषाणांपरमगुरुत्वेतैःसुसंमतोऽविप्रतिपत्तिः
कुतर्कहेहितसांख्यकर्त्रीनायमित्याह। सिद्धेति। सिद्धामुक्तास्तेषांगणस्याधीशः। अन्यकपिलस्यैतदभावात्। इतोपिनदुष्टकपिलोयमित्याह। तेकी

अयंसिद्धगणाधीशःसांख्याचार्यैःसुसंमतः॥ लोकेकपिलइत्याख्यांगंतातेकीर्तिवर्द्धनः १९ मैत्रेयउवाच तावाश्वास्यजगत्स्र
ष्टाकुमारैःसहनारदः॥ हंसोहंसेनयानेनस्वधामप्रत्यपद्यत २० गतेशतधृतौक्षत्तःकर्दमस्तेनचोदितः॥ यथोदितंस्वदुहितॄःप्रादाद्वि
श्वसृजांततः २१ मरीचयेकलांप्रादादनसूयामथात्रये॥ श्रद्धामंगिरसेयच्छत्पुलस्त्यायहविर्भुवं २२ पुलहायगतिंयुक्तांक्रतवेच
क्रियांसतीं॥ ख्यातिंचभृगवेयच्छद्वसिष्ठायाप्यरुन्धतीं २३ अथर्वणेददाच्छान्तिंययायज्ञोवितन्यते। विप्रर्षभान्कृतोद्वाहान्सदा
रान्समलालयत् २४

र्तिवर्द्धनइति १९ मानुषैःसहबहुलंसंभाषणंनस्यात्मितिभावेनजगत्स्रष्टुःस्वधामगमनंवक्ति। अथेति। हंसोनिर्मलः २० कर्दमेनपुत्रस्य
दर्शनेनधातुर्वचनंनविस्मृतमितिभावेनतदुक्तंकरोतीत्याह। गतइति। शतधृतौस्वतानंदेचतुर्मुखे। ततइत्यनेनविलंबःकृतइतिध्वनय
ति २१ मंदमतीनांसम्यगवबोधायवरान्व्यनक्ति। मरीचयइति २२ २३ कर्दमोजामातॄणांदुहितृश्वशुरीत्यर्थंकिमकार्षीदित्यत्रा
ह। विप्रर्षभानिति। समलालयद्बहुमानान्वितानितिशेषः २४

तत्त्वानि ताजामातरः क्षत्त्रीत्यर्थः तदाश्रमस्य किमवसन्नुतस्वाश्रममयासिषुरुभयमपि संभावितमिति तत्राह। ततः इति। कृतदाराविहितभार्या भार्यांतिरश्चात्मी छाराहिता वा। युगे॥ स्त्रपाते पर्या मे कृतेन्द्री वि विहितेर्थ वदितियारवः। नंदं धनमाना प्रापुः सत्द्दिमापन्नाः प्राप्नाः २५ स्वीक याहस्यायेन कर्दमजामातृणां अत्र वसताङ्कं कथा प्रसंगं विश्रान्य पुनरपि कर्दमचरितं शेषं वक्ति। सचेति। कृतादिषु त्रियुगेषु प्रादुर्भावो यस्य स त्रियुगः तं। युगत्रयावतारेणारि युग इति कथ्यत इति वा। आत्मना ब्रह्मवचनेन च सम्यग्ज्ञात्वा। विविक्त एकांते २६ स्वाभीष्टप्रवणाय योग्यं तस्वयति। अहो इति। निरये नरकतुल्ये संसारे। देवता आत्मिका इंद्रियाभिमानिदेवताः २७ भगवत्प्रसादं विना देवताप्रसादेन किं स्यादित्या

ततस्त ऋषयः क्षत्तः कृतदारा निमंत्र्य तं॥ प्रातिष्ठन्नंदमापन्नाः स्वं स्वमाश्रममंडलं २५ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभं। विविक्त उपसंगम्य प्रणम्य समभाषत २६ अहो पापच्यमानानां निरये स्वैरमंगलैः॥ कालेन भूयसा नूनं प्रसीदंतीह देवताः २७ बहुजन्मविपाकेन सम्यग्योगसमाधिना। द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदं २८ स एव भगवानद्य हेलनं न गणय्य नः। गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः २९

शंक्य तत्प्रसादाद्विना भूतोन्यथा तत्प्रसादस्य नस्यादतस्तस्य श्रीनारायणस्य प्रसादो नैकेन जन्मना किंतु बहुभिर्जन्मभिः योग्यपानामेवो याम कानां स्यादित्याह। बहुजन्मेति। यतयो निर्जितेंद्रियग्रामाः। शून्यागारेषु एकांतस्थानेषु मठवनादिषु समीचीनेन निर्दोषेण भक्तियोगेनाष्टांग योगेन वा युक्तेन समाधिना संप्रज्ञातसंज्ञेन यस्य पदं स्वरूपं २८ पक्षः स्वानां स्वभक्तानां पक्षं पुष्णातीति पक्षपोषणः। स एव भगवान ग्रा म्याणां विषयलोलानां नो हेलनमवज्ञां न गणय्य नादृत्य केवलानुग्रहेण न्नाणावुष्माकं गृहेषु जातः प्रादुर्भूत इत्यन्वयः। नः अस्मत्संबंधिनां अस्मत्पुत्रत्वेन प्रादुर्भूतो नो अस्माकं हेलनमवज्ञां अनादरं अविवेकलक्षणं न गणयामीति बहुवचनं। नोस्माकं हशोनामितिवा २९

किं च भक्तानाममिवर्द्धनस्तेषामेव शर्म सुखं चिकीर्षुस्त्वं तव पुत्रत्वेनावतरिष्यामीति स्वीयं वाक्यमृतं सत्यं कर्तुं मे गृहे भार्यायामवतीर्णोसि त्वद्वपुः। भक्तशर्मकरणाय तदभिमानवर्द्धनाय स्ववाक्यस्य सत्यत्वकरणाय चेत्यवतार इति गम्यते ३० अर्थांतरं वान्नीति कथयति। ता न्येवेति। स्वजनानां स्वभक्तानां वसुदेवदेवक्यादिरूपाणि अभिरूपार्थं रोचंते अभीष्टानि भवंति तान्येव। नरूपं प्राकृतमस्यास्तीत्यरूपी तस्य तवाभिरूपाणि प्रियाणि तदिदानीं ब्रह्मादिभक्तानामस्मद्गृहे वतारस्येष्टत्वादस्मत्पुत्रत्वेनावतीर्णोसीति पूर्वेण चान्वयः। तदर्थानां पीय

स्वीयं वाक्यमृतं कर्तुमवतीर्णोसि मे गृहे। चिकीर्षुर्भगवञ्शर्म भक्तानाममिवर्द्धनः ३०
तान्येव तेभिरूपाणि रूपाणि भगवंस्तव। यानि यानि च रोचंते स्वजनानामरूपिणः ३१

माणानां इति स्वजनेभ्य इति वक्तव्ये स्वजनानामिति षष्ठी स्वस्वामित्वसंबंधज्ञापनाये निज्ञातव्यं। यत्तु ब्रह्मादिरूपाणि इति श्रीमद्भगव त्पादाचार्यैर्व्याख्यानं तत्प्रतिमात्वेन तद्योग्यानां भवेदुपासनादिसंग्रहार्थत्वद्योतनाय। सत्वं विष्णुर्हं च वसुदेवशद्विता मित्यादिनैवेतत्सिद्धेश्चेतिमं तोष्टव्यं। यद्भक्तानामभीष्टरूपं तत्र तत्र वावतार इत्यत्र किं प्रमाणमवलंब्याव ध्रियत इत्यत एवकारेणाव्यक्तो भवेद्दरिस्तत्र यत्स्थानं रुचितं सता मिति सूचितं ३१

कर्दमश्चात्मनः पुत्रत्वाभिमानं विहाय परोक्षज्ञानी तं विज्ञानन्ननन्यसाधारणैर्लक्षणैः स्तौतीत्याह। त्वां सूरिभिरिति। ब्रह्मादिसूरिभिः अद्धा तत्त्वसत्पयोरिति वा। श्रियेत्येकवचनमेषामन्योन्यमभेदद्योतनाय। अत्र हरेर्वैराग्यनामस्वेतरस्य समस्यासारतादर्शनं ३२ प्रधानं पुरुषं परं प्रकृतिपुरुषयोः परमुत्तमं। यद्वापि परित्रिपूरयति जनं संपदेति परः तं। सृष्ट्यापूर्वकालं ब्रह्मादेरप्यन्नीत्यतः प्रधानं। प्रकर्षेण धीयते जगदिति प्रधानं। मत्तासत्ययिमाणा विभर्त्तीति श्रुतेः। कार्यानुविष्टतया प्रकृतेरपिधान्त्वमस्तीत्यतः पुरुषमिति। पुरुगतावितिधातोर्गमनशीलत्वात्पुरुषं। ताच्छील्येर्थे उणप्रत्ययः। प्रकृतेरचेतनत्वेन गमनशक्त्यभावात्। तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेरनुविश्य पुरुषधारकत्वं हरेरेवाद्वौ विमौ पुरुषौ लोक इति पुरुषशब्दवाच्यत्वात् विस्तृकृतेरपि कथं विदुः कलक्षणायोग्यतेत्यत उक्तं महान्तमिति। त्रिविधानं त्वयुक्तं वि

त्वां सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं।। ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रियापूर्णमहंप्रपद्ये ३२
परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं।। आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ३३

धानं त्वकालयुगादिनेति भावेनाह। कालं कविं त्रिवृतमिति। न हि कालस्य काप्यंतो दृष्टः कविशब्दस्यातिक्रांतदर्शित्वार्थत्वेन गुणानंत्यमपि हतं त्रीणि पृथिव्यप्तेजांस्यात्मत्वव्याप्य तिष्ठतीति स्वरूपानंत्यमपि। अथवानेनोक्तार्थे प्रमाणमुच्यते। त्रिभिर्वेदैर्व्रियत इति वेदैर्हतत्वात् भगवांस्त्रिवृदित्युच्यते बुधैरिति। तथा च सर्वे वेदा यत्पदमामनन्तीत्यादिश्रुतिः। नवेदं लोकविलक्षणमत्राह। लोकपालमिति। लोकपालत्वमिंद्ररुद्रादीनामप्यस्यैत आत्मानुभूत्येति। आत्मानुभूत्या स्वस्वरूपज्ञानेनैव समग्रशेषविशेषतया ज्ञातः प्रपंचो येन स तथा तं। इदमपि लक्षणं तस्यैव युक्तमित्याह। स्वच्छंदशक्तिमिति। स्वेच्छानुसारि जगत्सृष्ट्यादिशक्तियुक्तं। कं ब्रह्माणं पिपिना किं न रुद्रं वलालयतीति कपिलः तं। यस्मादुत्पद्यते ब्रह्मा पद्मयोनिः पितामहः। ब्रह्मादिषु प्रलीनेषु विनिमोक्षधर्मवचनादनन्तानि लक्षणानि बहुशैरेव ज्ञातव्यानि नास्माह

एवं स्तुत्वा भगवंतं प्रसाद्य स्वाभीष्टानुज्ञां प्रार्थयत इत्याह। तं त्वामिति। उताप्यर्थे विकल्पयोरित्युक्तेरवाप्यर्थः। अवतीर्णेन त्वयास्वकामोपि तथापि पद एवं विधलक्षणं त्वानुपृच्छे अनुज्ञां प्रार्थये। किमर्थं तत्राह। परिव्राजामिति। परिव्राजां संन्यासिनां पदवीमास्थितः संन्यस्तो हृदि त्वां युंजन्ध्यात्वा सुहृद्रूपमनोयोगं कुर्वन्नत एव विशोकः त्वद्वियोगनिमित्तशोकरहितो ग्रामैकरात्रविधिना चरिष्ये अटिष्यामीत्यन्वयः।। ३४ कर्दमकृतां स्तुतिं श्रुत्वा भगवांस्तस्मै ज्ञानमुपदिशति। मयेति। आभासोऽज्ञानमालोकालोकोभासस्तक प्यते इत्यभिधानात् अत्र लोकश

तं त्वानुपृच्छेद्य पतिं प्रजानां त्वयावतीर्णर्ण उताप्तकामः।। परिव्राजां पदवीमास्थितोहं चरिष्ये त्वां हृदि युंजन्विशोकः ३४
श्रीभगवानुवाच मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके। अथाजनि मया तुभ्यं यदवोचमृतं मुने ३५

ब्देन ज्ञानं विवक्षितं। सत्यलौकिके यथार्थज्ञानविषये यन्मया प्रोक्तं तदेव लोकस्य जनस्य प्रमाणं करणं। हि शब्देनाप्ततमत्वादिति हेतुं सूचयति। ब्रह्मा विष्णुर्हि लोकस्येति स्मृतेः। द्वितीयं ब्रह्मणोक्तमपि प्रमाणमिति ध्वनयति। अज्ञानविप्रलंभादिदोषराहित्यमाप्ततं तस्मात्कमप्तीति तवसिद्धमिति भावेनाह। अथेति। अहं तुभ्यमवोचं तव पुत्रत्वेनावतरिष्य इति यद्यस्मादथ तस्मान्नहते कर्तुं मयाजनि त्वत्कृत इति शेषः। अतोहमपि न विप्रलंभक इति तवसिद्धमित्यतो हृष्मा प्रतमइत्यर्थः ३५

स्वानां पक्वणो वणा इति यदुक्तं तत्राह। एतन्मइति। स्थाने भिप्राय आशय इत्यभिधानात् दुराशयात् दुःस्थानात् संसारात् मुमुक्षूणां पुंसां देहम पिकृत्य वर्त्तमानानां परमात्मादि तत्त्वानां प्रसंख्यानाय सम्यग्ज्ञापनाय सकामस्यापि एतस्मिन्भूलोके जन्मावतार इति ज्ञानंवा। तद्धि परोक्ष ज्ञानिनां नानेनार्थ इति तत्राह। समत्वायेति। आत्मदर्शिनामात्मज्ञानिनां समत्वाय यथार्थज्ञानस्थिरीकरणाय चेति ३६ लोके सांख्यशास्त्र प्रवृत्ति दर्शनात् पुनस्त्वत्कर्त्तोन किंकार्यमिति तत्राह। एषइति। सम्यग्ज्ञानप्रवर्त्तकशून्येन भूयसा महता कालेनाव्यक्तः सूक्ष्म एव वस्तु मा णात्मपथः परमात्मतत्त्वविषयो मार्गो नष्टस्तिरोहितो भूत्। यथार्थज्ञानसाधनसांख्यशास्त्रनिर्माणेन तमात्ममार्गं प्रवर्त्तयितुं मया भृत

एतन्मेजन्मलोकेस्मिन्मुमुक्षूणां दुराशयात्॥ प्रसंख्यानाय तत्त्वानां समत्वायात्मदर्शिनां ३६ एष आत्मपथोव्यक्तो नष्टः कालेन भूयसा॥ तं प्रवर्त्तयितुं देहमिमं विद्धि मया भृतं ३७ गच्छ कामं मयापृष्टो मयि सन्यस्तकर्मणा॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३८ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयं॥ आत्मन्येवात्मना वीक्ष्य विशोको भयमृच्छसि ३९

मिमं देहं विद्धीत्यन्वयः ३७ अवतारप्रयोजनमुक्त्वा तं त्वानुष्टच्छ इत्यस्योत्तरमाह। गच्छेति। आपृष्टो नुज्ञातः कामं यथा सुखं। गत्वापि एवं कुर्वित्याह। मयीति। मयि सन्यस्तेनार्पितेन कर्मणा सुदुर्जयं मृत्युमिंद्रियग्रामं जित्वा अमृतत्वाय मां भजेत्यन्वयः ३८ भजनप्रकारमुपदिशति। मामात्मानमिति सर्वभूतानां हृदयगुहायां शेत इति सर्वभूतगुहाशयं स्वयंज्योतिः स्वप्रकाशमात्मानमादानादिकर्त्तारं आत्मनि विदू पेत्वय्येवात्मना लिंगशरीरव्यतिरिक्तत्वेन निःस्पकैकर्यलक्षणेन दिशानं रक्षरूपेणादीक्ष्य विशोको विनष्टसंसारक्लेशस्त्वमभयमृ

तमृच्छसि मुक्तो भविष्यसीत्यन्वयः ३९

मयाहितं मुक्तत्वमीदृशमित्याह। विश्वमेतदिति। विश्वमेतद्देहादि शमनित्यमसारमिति तत्त्व सिद्धं हि यस्मात् ततः शास्त्राचार्योपदेशेनात्मानमंतर्यामिणमीश्वरमखंडैश्वर्यगुणाकारं विज्ञाय मुनिरपरोक्षज्ञानी शांतमनोवाक्यः निवृत्तलिंगशरीरः अपमनः आदीद्रियोपहिंतदोपजवः दुःखाज्ञानमपशोकादिलक्षणाउपद्रवो नाश्याति न प्रकाशते एतादृशं मुक्तत्वमित्यर्थः ४० मातुः का गतिरिति शंका मा भूदित्याह। मात्र आध्यात्मिकीमिति। अहमाध्यात्मिकीं परमात्मादि तत्त्वविषयां सर्वकर्मणां शमनीं विद्यां मात्रे वितरिष्ये उपदेक्ष्यामि। यया विद्यया सो माता भयमतितरिष्यति। वरा ह्युत्तारं तीर्त्वा नित्याभयं हरिष्ववतिगच्छतीति सूचयति। न्दृञ्ञवनतरणयोरिति धातुः। ऋगतावितिधातुः ४१ मैत्रेयस्त्वैव पुत्रस्नेहात्किमकार्षी

विश्वमेतद्धिशाक्रीडाविज्ञायात्मानमीश्वरं॥ मुनिः शांतमनोवाक्यस्तदानाख्यात्युपद्रवः ४० मात्र आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणां॥ वितरिष्ये यया चासौ भयं चातितरिष्यति ४१ मैत्रेय उवाच एवं समुदितस्तेन कपिलेन प्रजापतिः॥ दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ४२ व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः॥ निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ४३

दिति विदुरस्पहार्द्दनोद्यं परिहरति। एवमिति। एवं समुदित उपदिष्टः। दक्षिणीकृत्य प्रदक्षिणीकृत्य भिक्षार्थं ग्रामप्रवेशं विनान्य दानाश्रीत्येव कार्थः ४२ वनमित्यनेनैकशकस्यानप्रतीयते। न भूवल्लयश्रमणं तथा वसन्यास्का वारसंगइति तत्राह। व्रतमिति। मौनं वागिंद्रियनिग्रहलक्षणं तेन हि प्रियाप्रियव्यवहारेणा स्नेहद्वेषसंभवेन स्वतो दुःस्थ समनसः कालुष्येणतयोः प्रियाप्रिययोः निवृत्तिः स्यात्। अयमेव संसार इति प्रथमतन्निग्रहः कर्त्तव्यः। मुनिर्मननशीलः। निःसंगो द्वितीयः। अग्नीनामात्मसमारोपणादनग्निर्गृहाद्याश्रमरहितः आत्माह

रिरेकः शरणं रक्षिता यस्य हं वयस्यसतथा ४३

स्वं विवरणं किं मंतुरनेनत्याह। मन इति। यत्तत्सदसतः मूर्त्तामूर्त्तलक्षणात्प्रपंचात्परं विलक्षणं तस्मिन्ब्रह्मणि मनो युंजानः अनेन पर्यटतश्चित्तविक्षेपेण तदुपासनानुपपत्तिः परिहृता। नन्वेवमविस्वरूपमात्र प्रतिपत्तावपि विशिष्टगुणोपसंहारः सर्वोत्तमत्वविरोधि गुणपर्युदासश्च न स्यादिति तत्राह। गुणावभासेति। गुण इति ज्ञानादिगुणा नामवभासः प्रकाशो यस्मिन्स तथा ज्ञानादिगुणात्मत्वेन प्रकाशमान इत्यर्थः तस्मिन्नयं ह्यगुणो दृष्टानुपकारकेषु महदादिषु नियामकत्वेनावभासो यस्य स तथा दृश्यमान इत्यर्थः तस्मिन्। अनेनाधिष्ठानं विशिष्टत्वेनापि तदुपास्तिरस्तीति द्योतितं। विगतानि षिद्धाः सत्वादिगुणा येन स तथोक्तः तस्मिन्। अनेन रागद्वेषादिदोषराहित्यं सूचयति। ड्रानिग्रहस्यमनसोन्यत्रानगमने कारणमाह। एकभक्त्येति। एको मुख्यः सर्वोत्तमो हरिर्नान्यः सम्यक्ज्ञानपूर्वकया भक्त्यानुभाविते अधिवासिते अनेकजन्मभिः प्रवितसंस्कारेण दृढीयः स्वयाप्रस्खलितत्वादन्यत्र न यातीत्यर्थः। किमत्र प्रमाणमित्यतो वाह। एकमक्तेति। एकभक्त्या एकयाकेव

मनो ब्रह्मणि युंजानो यत्तत्सदसतः परं॥ गुणावभासे विगुण एकभक्त्यानुभाविते ४४ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक्स्वदृक्॥
प्रत्यग्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ४५ आत्मानं सर्वभूतेषु भगवंतमवस्थितं॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्म

नि ४६

त्यया अनीशत्वादिदोषलेशशून्यया भक्त्या अनुभाविते सम्यक्ध्याते। मतां भावनात्र प्रमाणमित्यर्थः ४४ एवमरित्वा स्वकर्द्दमस्य देहावसानं। अथवा कथमेन विशेषो भूदितिमंदाशंकां परिहरन कपिलोपदिष्टानुष्ठानात् मुक्तियोग्यापरोक्षज्ञानोदयं वक्ति। निरहंकृदिति। स कर्द्दमः सर्वभूतेषु वस्थितं स देवाम गुणत्वादात्मानं भगवंतं सर्वसौभाग्यगुणाकरभूतगर्भनारायणमपश्यदपरोक्षीचकार सर्वभूतानि वात्मनि सर्वगते हरौ तदाधारतयास्थितान्यपश्यदित्यन्वयः। अनेन भूतगर्भा भूतस्य इति रूपद्वयमात्मशब्दोक्तमिति ज्ञायते। भूतगर्भश्च भूतस्य पूर्ण एव द्विरूपवान्। अत आत्मेतितं प्राहुः स देवा मगुणोयत इति वचनात्। निर्द्वंद्वः शीतोष्णादिद्वंद्वसहिष्णुः समदृक् यथास्थितवस्तुदर्शी यथार्थज्ञानीत्यर्थः स्वं स्वतन्त्रं दृष्टवान् स्वदृक्। तदुक्तं। अनन्याधीनशक्तित्वाद्धरिः स्व इति वोच्यतइति। प्रत्यग्प्रत्यगतिः स्वांतर्यामिणि रतिमान्। अयं निरहंकारादौ हेतुः। अत एव शांतधीः क्रोधग्रहाविष्टबुद्धिरहितः धीरः संपदि विपदि च निश्चलः। तत्र दृष्टांतः प्रशांतोर्मिरिति ४६

फलितमाह। वासुदेवइति। वासुदेवे सर्वत्रस्थित्वा क्रीडति। सर्वज्ञे अशेषविशेषाकारेण सर्वं जानाति। प्रत्यगात्मनि स्वांतर्यामिणि भगवति परेण प्रकृष्टेन भक्तिभावेन लब्धात्मा लब्धमनाः अत एव मुक्तबंधनः मुक्तदेहाभिमानः। यद्वा प्रथमं वासुदेवे श्रीकृष्णे भगवति लब्धात्मा समनंतरं सर्वज्ञे सर्वज्ञत्वात्स्रष्टृत्वादिकर्त्तरि भगवति लब्धात्मा क्रमेण प्रत्यगात्मनि स्वहृदयस्थे स्वबिंबभूते भगवति लब्धात्मा ४७ एवं देहे लब्धात्मनः तस्य कर्द्दमस्य संसारापत्ति

वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि॥ परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ४७ इच्छाद्वेषविहीनेन सर्वत्र सम
चेतसा॥ भगवद्भक्तियोगेन प्राप्तो भागवतीं गतिं ४८ इति श्रीभागवते महापुराणे तृतीयस्कंधे कपिलोपाख्याने पं
चविंशः॥ ॥

नास्ति किं त्वपुनरावृत्तिरूपा श्रीनारायणप्राप्तिलक्षणा मुक्तिरेवेति दर्शयति। इच्छाद्वेषेति। इच्छाद्वेषाभ्यां निषिद्धे च्छा वेदस्व द्वेषाभ्यां विहीनेन सर्वत्र सर्वपदार्थेषु स्थिताभगवद्रूपेषु निर्दोषत्वसर्वगुणपूर्णत्वादिसमत्वज्ञानयुक्तेन चेतसा ज्ञानेन भागवतीं गतिं भगवत्प्राप्तिरूपां मुक्तिं प्राप इत्य
न्वयः ४८ इति श्रीभागवतटीकायां तृतीयस्कंधे पंचविंशोध्यायः॥ ॥ ॥ श्रीराम॥ ॥ ॥

आत्यंतिकमभक्तियोगस्यहेतोर्मनोयोगप्रकारस्यभक्त्यधिकारिणस्तत्साधनस्यचप्रतिपादनायास्याध्यायस्यप्रारंभः। अत्रादौकपिलदेवहूतीसं
वादोपसंहितंश्रोतुकामः परीक्षित्कृतमनूद्यप्रश्नस्यवक्तव्यशेषंप्रार्थयतइत्याह। कपिलइति। अजाविष्णुहदक्षाणाइत्यभिधानात्कोअभिधीय
तइतिसंशयनिरासायसाक्षादितिविशेषणं। साक्षात्मत्स्यकूर्मवदुपयोरिन्यतस्यार्थोजः श्रीनारायणः स्वयमावेशंविनात्ममाययास्वेच्छयैवजनाणा
मात्माप्रज्ञानायस्वस्वरूपज्ञापनायनदर्थंतत्त्वसंख्याताअव्यक्तादितत्त्वविषयेसम्यक्ज्ञानकरिष्यन्कपिलनामाजातइतिभवतोक्तंश्रुतंचेति

राजोवाच॥ ॥कपिलस्तत्त्वसंख्याताभगवानात्ममायया॥जातःस्वयमजःसाक्षादात्मप्रज्ञप्तयेनृणां १
अर्हस्यधर्मिणांपुंसांगरिम्णाःसर्वयोगिनां॥विश्रुतौश्रुतदेवस्यभूरितृप्यंतिमेसवः २

टीका: १ श्रीनारायणस्यचरितश्रवणादौप्रवर्तमानस्याशनादीच्छारहितस्यापिलोकस्यचित्तनिरोधेनालंबुद्धिर्जायतेनममतथापस्तु
तरसायनसेविनरवृत्त्यशनादिभोगरहितस्यापीन्द्रियाणिहृष्यंतीत्याह। अर्हस्येति। निवृत्तिलक्षणमोक्षधर्माएवांस्वरूपभूताःसंतीतिध
र्मिणस्तेषांपुंसामर्हस्यसंमान्यस्य। अर्हतोजिनसंमान्यावित्यभिधानं। सनकादिसर्वयोगिनांगरिम्णाःगुरुतमस्यशास्त्रेणश्रुतादेवाःक्री
डादिगुणाःश्रीनारायणस्यविद्यमानायस्यसश्रुतदेवस्तस्यकपिलनाम्नोहरेर्महिम्नोविश्रुतौविशेषेणश्रवणेमेअसवइंद्रियाणिहृ

इंद्वेश्रुतप्रायमतःपरंकिंनुप्रार्थयतइत्यत्राह। यद्यदिति। स्वच्छंदःस्वतंत्रआत्मामनोयस्यसतथा। भागवतानांकीर्तन्यानिनित्यंकीर्तनी
यानि ३ तत्रशुकोविदुरमैत्रेयसंवादेनराज्ञःप्रश्नंपरिहरतीत्याह। द्वैपायनसखइति। यथाहंत्वयाआन्वीक्षिकींतत्त्वविद्याविषयेप्रश्नो
दितस्तथाविदुरेणापिष्टष्टोमैत्रेयोमयावक्ष्यमाणमर्थंप्राहेत्यन्वयः ४ कोयमर्थइतितत्राह। पितरीति ५ तत्रदेवहूत्यामवसरइ
तिमत्वाकपिलंवक्तीत्याह। तमासीनमिति। आसीनमकर्माणमितिविशेषणद्वयेनसर्वदानिश्चलबुद्धिःसावसरस्तथापिलोकदृष्ट्या

यद्यद्विधत्तेभगवान्स्वच्छंदात्मात्ममायया॥तानिमेश्रद्दधानस्यकीर्तन्यान्यनुकीर्तय ३ श्रीशुकउवाच द्वैपायनसख
स्त्वेवंमैत्रेयोभगवांस्तथा॥प्राहेदंविदुरंप्रीतआन्वीक्षिक्यांप्रचोदितः ४ पितरिप्रस्थितेरण्यंमातुःप्रियचिकीर्षया॥तस्मिन्बिं
दुसरेवात्सीद्भगवान्कपिलःकिल ५ तमासीनमकर्माणंतत्त्वमार्गाग्रदर्शनं॥स्वसुतंदेवहूत्याहधातुःसंस्मरतीवचः ६
देवहूतिरुवाच निर्विण्णानितरांभूमन्नसदिंद्रियतर्षणात्।येनसंभाव्यमानेनप्रपन्नांधंतमःप्रभो ७

पितयेतिस्तवयति। आसीनमित्यनेनाकर्मत्वेसिद्धेपुनस्तद्वचनंकंडूयनादिक्रियाविनोक्तिमितिस्तवनेनहरेःसच्चिदानंद[illegible]त्मत्वंविज्ञायते।
एवंविधस्यहरेःस्वपक्षस्यत्वविज्ञानमस्त्वितिकिंवक्तव्यमितिभावेनाह। तत्त्वेति। स्वसुतमितिसिद्धमात्मत्वंधातुःसंस्मरतीवचइत्यनेन
चपोते ६ श्रोतव्यार्थस्यासात्पर्यमस्तीत्युपोद्घातंरचयतीत्याह। निर्विण्णेति। भूमन्स्वतःपूर्णा। असतामभंगलानामिंद्रियाणांतर्पणा
दनितरांनिर्विण्णाविरक्ताविषयेष्वितिशेषः। असत्त्वंकथमत्राह। येनेति। संभाव्यमानेनतात्पर्यमानेनयेनेंद्रियप्रीणनेनांधंतमःतत्वा

आत्मनो विद्वांसो भविष्यति। तस्येति। अतीतानां मनेकेषां जन्मनामंते चरमत्व लक्षणे जन्मनि तस्य दुःपारस्य दूरीकृतती रांतरस्यांधस्य तमस
ःपारंगमयती तिपारगं त्वत्त्वामसच्चक्षुः सद्दत्वयहान्मया लब्धमित्यन्वयः। एतत्सन्निकृष्टं नदूरस्थमित्यर्थः। अनेन श्रोक्तार्थग्रहणे सामर्थ्यमुक्तं
गुणोप्युक्तः। प्राचीनावीतौ पुरुषनिर्वर्यनवक्तुली भावात् ८ न केवलं ममैवैतत्त्वदनुग्रहायोदितं वक्तुर्मे निमित्तं लोकस्याप्यतोहं तु उपसागराद
त्याशयेनाह। यआद्यइति। यः पुंसां ब्रह्मादीनां पुरुषाणामाद्यस्तेषामीश्वरः ऐश्वर्यप्रदः भगवानैश्वर्यादिगुणसमुद्रः स एव स एव भवांल्लसां

तस्य त्वं तमसोंधस्य दुःपारस्याद्य पारगं॥ सच्चक्षुर्जन्मनामंते लब्धमेतदनुग्रहात्॥ ८॥ यआद्यो भगवान्पुंसामीश्वरो वै
भवान्किल॥ लोकस्य तमसांधस्य चक्षुः सूर्य इवोदितः ९ अथमे देवसंमोहमपाक्रष्टुं त्वमर्हसि॥ योवग्रहोहंममे
त्येतस्मिन्योजितस्त्वया १०

धस्य लोकस्य चक्षुर्दृष्टिप्रदः सूर्य इवोदितः किल संस्तावितमिदमित्यन्वयः। वार्तासंभाव्ययोः किलेतियादवः ९ एवं भगवंतं स्वाभीष्टार्थाभि
मुखीकृत्य स्वाभिप्रायं विज्ञापयति। अथेति। यथा विहितक्रियाकरणे महताप्रत्यवायेनानर्थरूपनरकप्राप्तिस्तथाज्ञानस्याहंकेत्वादृशे
सूर्य सन्निहिते सति तस्य ग्रहणेनुत्यानतमः प्राप्तिः स्यादिति यस्मादथ तस्मात्त्वया एतस्मिन्देहगेहादावहं ममेत्यवग्रहोज्ञानदृष्टिप्रतिबंध
कोमिथ्याभिमानो योजितः पूर्वादृष्टानुसारेणेतिशेषः। तं संमोहं मिथ्याज्ञानलक्षणं भ्रमं मे विद्यमानमपाक्रष्टुमुत्कृत्य पत्यत्क्रुमर्हसि। तत्त्व
ज्ञानोपदेशेनेत्यन्वयः १०

उपसन्नायशिष्यायवक्तव्यं ब्रह्मशाश्वतमिति वचनादुपसन्नत्वभावात्तवकथमुपदिशामीतिशंका माभूदितिभावेनाह। तंत्वेति। यस्त्वमिहसिद्ध
ज्ञानोपदेशायावतीर्णस्तं त्वां शरणं गतेत्यन्वयः। केन हेतुनेत्यत उक्तं जिज्ञासयेति। नारायणो ब्रह्मवायुर्वीन्द्रशेषौ हरस्तथा। कामः शक्रोगु
रुर्दक्षमन्वाद्याभास्करादयः। सर्वजीवाश्चक्रमशः पुरुषाख्याभिशब्दिताः। एतत्पत्न्योवधशक्तिः स्त्रियः सर्वास्तथाजउ। क्रमात्प्रकृतिशब्देनाम्
स्त्यानात्मविप्रतुत्यंतेइति वचनात्। पुरुषस्य नारायणादेः प्रकृतेर्लक्ष्म्यादेश्च विवेकलक्षणतारतम्यजिज्ञासयाज्ञातुकामेन हेतुनेत्यर्थः। त्वं

तं त्वागताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारं॥ जिज्ञासयाप्रकृतेः पुरुषस्य नमामि सद्धर्मविदां वरिष्ठं ११ मैत्रेय
उवाच इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गचोदनं॥ धियाभिनंद्यात्मवतां सतां गतिर्बभाष ईषत्स्मि
तशोभिताननः १२

च सम्यगनुग्रहं कर्तुं समर्थ इत्याशयेनाह। स्वभृत्येति। न केवलं मिश्रमुपसादनं वा किंचित्किंतु काचित्कंचेत्याह। नमामीति। संसारतरोः कुठारस्यने
शित्वापास्त्वित तदुक्तिः श्रोत्रं स्यादित्यत उक्तं सद्धर्मेति ११ अत्र मैत्रेयो मात्रा प्रार्थितः कपिलस्तां प्रतिवक्तीति विदुरं प्रत्याह। इतीति। ईप्सितं ज्ञातु
मिष्टं। अपवर्गस्य संसारविनाशस्य चोदनं सूचकं। ईषद्धभाषेमितमाह। महताल्पभाषित्वगुणमनेन द्योतयति १२

नन्वहं भो हे किं पितृवत्त्वज्जीव्यामि किं वरको भवानीति चिंतत्वाह। योग इति। परमात्मादिकं देहे यदध्यात्मं कर्म रितमिति वचनात् आध्या-
त्मिकः देहमधिकृत्य वर्त्तमानानां परमात्मादितत्त्वानां स्वरूपज्ञानलक्षणो योगो मया पुंसां निःश्रेयसाय मतो निरूपितो यत्र मोक्षे शरीरभो-
ग्यस्य सुखस्य दुःखस्य साकल्येनोपरतिर्नाशस्तमिमं योगं तव वक्ष्यामीत्यन्वयः। आत्यंतिकपाठे यमलोवं इति। ऋषीणां ब्रह्मादिज्ञानिनां उ-
रूभिर्यैर्यमनियमादिसाधनैर्नैपुणं पादवगुणोपेतं। सुखेनात्विन्नसुक्तो सुखमाभवानिन दुःखमित्यात्माशीः कथं जागर्त्तीत्याशंक्याह वशहस्र

श्रीभगवानुवाच योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे॥ अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य वै १३
तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे॥ ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणं १४ चेतः खल्वस्य बंधाय मुक्तये
चात्मनो मतं॥ गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये १५

चितया सुखं शरीरभोग्यं तु दुःखं सर्वं तथैव च। सुखौ विलयमायाति नित्यानंदस्तु लुप्यत इत्यनया परिहृतेति। मुक्तावतः स्वरूपानंदएवाशा-
स्पतेनसोतिक इति सर्वतद्दुःखं। वैशहेनस्वरूपानंदावाप्तिलक्षणं निःश्रेयसं जनयति। नस्वर्गादिकं तस्य हेयत्वेनप्रोक्तत्वाद्धसमाण-
त्वात् १४ प्रतिज्ञातयोगस्य फलस्य साधनाय मनो वशीकरणं प्रथमसाधनमित्याह। चेत इति। चिनोति आत्मनि मलमिति चेतो मनः
अस्यात्मनो जीवस्य चेतः संसारबंधाय तस्मान्मुक्तये चात्मनो मम मतं। एकस्य कार्यद्वयापादनसामग्री कथमत्राह। गुणेष्विति। शब्दा-

शब्दादिगुणेषु सक्तं बालं किमित्याशंक्य विशिनष्टि। अहंममेति। यदात्मनोहंममाभिमानोत्थैः कामलोभादिभिर्मलैर्वीतं रहितं शुद्धं चित्स्वरूपं हरीभ-
ता विच्छय संपर्कपरतत्त्वानुभवेन बाह्यशब्दादिसुखेऽनासक्तेरिष्टाभावात् सुखमत एव दुःखासंस्पर्शात् दुःखं समं निश्चलं भक्तिरसायनेनैव नित्यानं-
दं भवति तदा पुरुष आत्मानं स्वबिंबभूतं हरिं परिपश्यतीत्यन्वयः। परीत्युपसर्गात्प्राणपर्यंतं परितो वर्त्तमानाः स्वबिंबदेवता आपरोक्षीकृत्य तत्प्र-
सादादिति ग्राह्यं। बाह्ये सुखे त्वनासक्तेरसुखं दुःखवर्जनात्॥ अदुःखं हरिभक्त्यैव नित्यानंदं यथा यदा मनः तदा तं परमात्मानं पश्यत्यात्मप्रसादत इति
विशेषवचनाद्दुःखमसुखं समम् इति प्रतीतार्थानुपपन्न इति। आत्मप्रसादतः त्वत्रात्मशब्देन प्राणादयोपि ग्राह्याः तस्य तेषामपि हेतुत्वेन। इयंतं का-
लं परोक्षीभूतमात्मानं संपश्यतीति मंदाशंकां परिहरति। केवलमित्यादिविशेषणैः। अभेदात् स्वावतारेषु निरंतर उदाहृतः। गुणादेहेंद्रियाभे-

अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः॥ वीतं यदा मनः शुद्धमदुःखमसुखं समं १६ तदा पुरुष आत्मानं केवलं प्रकृतेः परं॥
निरंतरं स्वयंज्योतिरणिमानमखंडितं १७ ज्ञानवैराग्ययुक्तेन भक्तियोगेन चात्मना॥ परिपश्यत्युदासीनं प्रकृतिं च हतौजसं १८

दात्केवलो ऽसदृशत्वतः। अखंडः पूर्णशक्तित्वादहमेकः सदा मत इत्यनेन व्याख्यातोयं ग्रंथः। उक्तं तु तस्मात् प्रकृतेः परत्वे तदेव कथमित्यत उक्तं
। प्रकृतेः परमिति। विज्ञातप्रकृत्याः परमेतल्लक्षणं न कस्यापीत्यतो साधारणमिदमित्यर्थः। अणिमानमित्यनेन स्वबिंबरूपमेवोच्यते। यच्चा-
त्मनि तिष्ठन्नित्यादेः किमित्यत उक्तमात्मना विज्ञानेनेति। अस्य सदातनत्वात् इतः पूर्वं किमिति नापश्यदत उक्तं। ज्ञानेति। प्रकृतिज्ञानाभावेन
त्वरत्वदर्शनं कथमित्यत उक्तमुदासीनामिति। प्रयोजकाभावेन परिणामलक्षणकार्यानभिमुखीं। कुतो तु दितमिदमित्यत उक्तं हतौजस-
मिति। हतमोजो बंधकशक्तिर्यस्याः सा तथा तां। तदुक्तं। बंधशक्तिः प्रकृत्याख्याविष्णुशक्त्याविमुच्यत इति १८

भा·तृ·
१५१

मुक्तेरंतरंगसाधनंभक्तेरप्यन्नास्तीत्याह। नयुज्यमानयेति १९ इदानींज्ञानोत्पत्तौप्रतिबंधकमाह। प्रसंगमिति। असद्वार्तादिप्रसंगमतिस्ने
हेनअजरंदुर्नरवत्वेनाहुः। तर्हिअयमेवसुकृतस्तत्रकिंकार्यंत्वमइतितत्राह। सएवेति। अपावृतमुद्घाटितंविवृतमित्यर्थः २० किंलक्षणाःसा
धवोयेनतत्संयोगोभक्तिज्ञानद्वारामुक्तिसाधनंस्यादितितत्राह। तितिक्षवइति। अजाशब्देनतत्कार्यदेहउपलक्ष्यते। अतसातत्यगमनइति
धातोश्चनसहेवसततंवर्त्तमानत्वात्तस्मिन्गतेगच्छतिस्थितेतिष्ठतीत्यतोजाताः कामलोभादयस्तेषांशत्रवः। तत्रहेतुरयंशांताः श्रीना

नयुज्यमानयाभक्त्याभगवत्यखिलात्मनि॥ सदृशोस्तिशिवःपंथायोगिनांब्रह्मसिद्धये १९ प्रसंगमजरंपाशमात्मनः
कवयोविदुः॥ सएवसाधुषुकृतोमोक्षद्वारमपावृतं २० तितिक्षवःकारुणिकाःसुहृदःसर्वदेहिनां॥ अजातशत्रवः
शांताःसाधवःसाधुभूषणाः २१ मय्यनन्येनभावेनभक्तिंकुर्वंतियेदृढां। मत्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबांधवाः २२

रायणेनिष्ठावंतः अतएवसाधवः साधननिष्ठाः साधनशीलाः साधुरुचिताभगवद्भक्तिःसेवभूषणंयेषांतेषांसाधुभूषणाः। साधुत्रिभूवि
तेसौम्यइतियादवः २१ एतदेवविशिनष्टिमयीति। अनन्येनभावेननअन्यस्मिन्विष्णोःअन्यस्मिन्ब्रह्मादौतादृशोभावःस्नेहोयस्मिन्नित्यन
न्यभावस्तेन। तदुक्तं। यादृशीमयिभक्तिःस्यात्तादृश्यन्यत्रनैवचेत्। अनन्याभक्तिरुद्देकात्सायच्चैवेतरेत्स्मृतिमिति। दृढांमरणसङ्कटेप्य
चलां। तदेवविशदयति। मत्कृतइति। स्वजनबांधवालौकिकाः नतुपारलौकिकाः २२

राम
१५१

एवंविधैःसंगानांकालयापनाकथमत्राह। मदाश्रयाइति। तपआदिकर्माभावेविद्येषुकथंतिष्ठतीतितत्राह। तपंतीति। तापानुतयांमित्राहीवा
वतपठपनिषदंब्रूतेतितस्यैवतपोदमइत्यादिश्रुतिः। नत्वेवंविविधतपःसंवरणसमर्थशीतोष्णोपवासादिनाइंद्रियदौर्बल्यहेतुनाहरेःसर्वात्ममत्वा
दिज्ञानंतिरोहितंभवतीतिमंदाशंकांपरिहरति। ऐकात्म्येति। एकःपूर्णोहरिर्नान्यन्यदस्तितद्दृशामताः। इतिज्ञानेस्थिरंयत्तदैकात्म्यज्ञानमुच्यते
इतिस्मृतिः। ऐकात्म्यहरोसर्वात्मत्वपूर्णज्ञानेगतंस्थितंचेतोयेषांतेतथोक्ताः २३ उपसंहरति। तएतइति। त्यक्तस्वजनबांधवाइत्युक्तंविशद
यति। सर्वसंगेति। दुष्टसर्वसंगवर्जिताइत्यर्थः। संत्वेवंविधाःसाधवस्तत्रममकिमुपदिशसीतितत्राह। संगस्तेष्विति। अथतस्मात्। तत्रहेतुमाह।

मदाश्रयाःकथामृष्टाःशृण्वंतिकथयंतिच॥ तपंतिविविधास्तापानैतान्मद्गतचेतसः २३ तएतेसाधवःसाध्विसर्व
संगविवर्जिताः। संगस्तेष्वथतेप्रार्थ्यःसंगदोषहराहिते २४ सतांप्रसंगान्ममवीर्यसंविदोभवंतिहृत्कर्णरसायनाः
कथाः। तज्जोषणादाश्वपवर्गवर्त्मनिश्रद्धावतीभक्तिरनुक्रमिष्यति २५

संगदोषेति २४ त्वच्चरितश्रवणादिनादुष्टसंगदोषनाशोदृष्टचरःसत्संगात्कथमित्याशंक्यसत्संगेहरिकथाश्रवणादिसंभवेनतत्संगाद्दुष्ट
संगदोषविनाशःप्रतिज्ञायते। तेषामन्यप्रसंगाभावादितिभावेनाह। सतांप्रसंगादिति। प्रसंगात्प्रकृष्टसंगात्वीर्याणांपराक्रमाणांसंपदो
यासुताःकथा। हृत्कर्णानांरसमानंदमयंतीतिहृत्कर्णरसायनाः। अयपयगताविति धातुः। ततःकिंतत्राह। तज्जोषणादिति। तच्छब्देन
उभयवग्राह्याःतेभ्यःसद्भ्यःतासांकथानांजोषणात्निषेवणादपवर्गवर्त्मनिहरौश्रद्धावतीआस्तिकबुद्ध्युपेताभक्तिःअनुक्रमिष्यति
पदंसन्निधास्यतीत्यन्वयः २५

भक्त्या किंफलेस्यादितितत्राह। भक्त्येति। पुमानधीसमर्थो विद्वान्मद्विषयशास्त्रश्रवणादिनोत्पन्नयामद्भक्त्याऐंद्रियाद्दृष्टादिविषयाज्जातविरागः॥ आब्रह्मादिस्तंबपर्यंतपदार्थानामसारत्वानित्यत्वमदुःखत्वतानवीक्षयाजातः वोपरमात्मनिरागः स्नेहः सारत्वनित्यत्वनिर्दुःखत्वज्ञानपूर्वकोयस्यसतथाकैश्चिदुत्तमाधिकारिभिर्दृष्टस्यकैश्चिन्मध्याधिकारिभिःश्रुतस्यात्मद्रचितस्यपरमात्मनाख्यवक्ष्यनोनुचिंतयानिरंतरध्यानेनतथाचित्तस्यावस्थानस्यमनसोग्रहणेविषयाख्यावर्त्तनेयत्नःप्रयत्नवान्ऋजुभिरक्लेशदैर्योगमार्गैर्यमादिसद्उपायप्रकारैर्योगयुक्तःसत्संगवान्यतिष्यतेपरमात्माप्राप्त्यर्थमितिशेषः। केषांचिद्दृष्टानांकेषांचिच्छ्रुतानामात्मद्रचितानांजीवादिपदार्थानाम्

भक्त्या पुमाञ्जातविरागऐंद्रियाद्दृष्टश्रुतान्मद्रचितानुचिंतया॥ चित्तस्ययत्तोग्रहणेयोगयुक्तोयतिष्यतेऋजुभिर्योगमार्गैः २६ असेवयायंप्रकृतेर्गुणानांज्ञानेनवैराग्यविजृंभितेन॥ योगेनमय्यर्पितयाचभक्त्यामांप्रत्यगात्मानमिहावरुंधेत् २७

सारत्वादिचिंतयेंद्रियाज्जातविरागइतिवा। अधिकारिणांएवंविधःप्रयत्नोननिष्फलः किंतुसफलएवभवतीत्याह। असेवयेति। प्रकृतेर्गुणानांसेवासुमुक्षूणांक्षुरधारावत्तत्त्वविहितसुखरूपवद्दलपरिहर्त्तव्येतिपुनर्वचनं। वैराग्येनविजृंभितेनप्रवर्द्धितेनपरमात्मादिनमांतत्वानांतारतम्यज्ञानेनचमय्यर्पितयाभक्त्यायोगेनमय्येवमनोनिधानलक्षणेनप्रत्यगात्मानंस्वांतर्यामिणंमामिहशरीरेप्राप्नोतिबंधकाभावेस्थितंजन्मन्यवरुंधेत्वशीकृतवत्पश्यतीत्यन्वयः। विरक्तिभक्त्युपाधिजनितज्ञानमेवपुरुषार्थसाधनंनकर्मेत्यतोवाह। असेवयेति। मय्यर्पितयाभक्त्यायोगेनसमुत्पन्नेनयोगेनध्यानेनोत्पन्नेनज्ञानेनप्रत्यगात्मानंस्वबिंबभूतंमांपश्यतीति। कीदृशेनभक्तियोगेन। प्रकृतेर्गुणानां

देवहूतीमय्यर्पितयेतिविशेषेणोत्पन्नोत्कंठयादत्तावसराप्टच्छतिकास्विदिति। कीदृशीममगोचरायोग्यातांशक्येति। निर्वाणंनित्यनिर्वृतं २८ ऋजुभिर्योगमार्गैरित्युक्तयोगलक्षणंपृच्छति॥ योयोगइति। निर्वाणात्मन्परमानंदमूर्त्ते। योगोयस्माद्योगात्तदेतद्योगलक्षणंभक्तिलक्षणंविजानीहिविशेषेणज्ञापय। योषेतिहेतुगर्भविशेषणं। त्वच्छास्त्रज्ञानाभावादित्यर्थः ३० मैत्रेयःविदुरायेमांकथांकथयतीतिशुकःपरिशिक्ति। विदित्वार्थमिति। यत्रयस्यांसच्चिदानंदमयकरचरणादिमत्यातनुवाभिजातःशुक्लशोणितसंपर्कदूरीकृत्यप्र

देवहूतिरुवाच — कास्वित्त्वय्युचिताभक्तिःकीदृशीममगोचरा। ययापदंतेनिर्वाणमंजसाप्राप्नयामहं २८ योयोगोभगवद्बाणोनिर्वाणात्मंस्त्वयोदितः॥ कीदृशःकतिचांगानियतस्तत्वावबोधनं २९ तदेतन्मेविजानीहियथाहंमंदधीर्हरे॥ सुखंबुद्ध्येयदुर्बोधंयोषाभवदनुग्रहात् ३० मैत्रेयउवाच — विदित्वार्थंकपिलोमातुरित्थंजातस्नेहोयत्रतन्वाभिजातः॥ तत्वाम्नायंयत्प्रवदंतिसांख्यंप्रोवाचवैभक्तिवितानयोगं ३१

काशितः तस्यामातुरित्थमर्थमभिप्रायंविदित्वामन्मातुर्भगवत्भक्तिश्रवणेतात्पर्यमभूत्सम्यगेतिजातःप्रवृद्धस्नेहोतुग्रहलक्षणोयस्यसतथा। कपिलोभगवान्यत्तत्वाम्नायंपरमात्मादितत्वप्रतिपादकंसांख्यशास्त्रंप्रवदंति। तद्भक्तियोगवितानंभक्तियोगविस्तारलक्षणंशास्त्रमात्रेप्रावोचत्व्याख्यातवानित्यन्वयः। हरेरितरवज्जननंगीकारे। शुक्लेनजनिरन्येषांहरेःस्वतनुवेदवत्। नित्योदितज्ञानतनोःकुतःस्याच्छुक्लतोजनिरतिप्रमाणविरोधोदुर्निरासः। अतएवपुरासत्येवतत्वेनुक्तं। इतरेषांप्राप्तशरीराणांपश्चाद्धरीरित्वेनजन्मदर्शनात्

यद्यपि सत्वादिगुणभेदेन भक्तिरप्यनेकविधा तथापि सात्विकमुत्तमाधिकारियोग्यं भक्तियोगं निरूपयति। देवानामिति। सत्वे एकमनसइ त्येतत्पदद्वयं तंत्रेण पात्रन्यायेन द्विरावृत्या व्याख्येयं। सदा सर्वगुणाम्यत्वात्सत्वो विष्णुरुदीर्यत इति वचनात्। सत्वे सर्वगुणाश्रये हरा वेकमनस एकाग्रमनसः पुरुषस्य मनुष्यादन्यतमस्य गुणलिंगानां शब्दादिज्ञापनलक्षणानां इंद्रियाभिमानिनामानुश्राविकक

श्रीभगवानुवाच देवानां गुणलिंगानामानुश्राविककर्मणां॥ सत्व एवैकमनसो वृत्तिः स्वाभाविकी
तु या ३२ अनिमित्ता भागवति भक्तिः सिद्धेर्गरीयसी॥ जरयत्याशु या कोशं निगीर्णमनलो यथा ३३

र्मणां वेदोक्तकर्मानुष्ठानेन तदुक्तानतिलंघिनां। आनुश्राविककर्मा सोक्तलुक्कयो लुंलघयेदित्यक्तेः। देवानां तात्विकसंज्ञानां सत्वे भ गवति एकमनसः एकाग्रतयान्यव्यापारमंतरेणांतःकरणस्य या वृत्तिः सा भक्तिरित्युच्यते। कीदृशी स्वाभाविकी गंगाप्रवाहलक्षणा
निमित्ता फलसंकल्परहिता ३३

अत्यंत विघ्ननिरोधरूपत्वात् दुःखहेतुशंकानकार्या प्रत्युत पूर्णानंदरूपत्वात्परकमभक्तावाममुक्तेरुत्तमेत्याह। सिद्धेरिति। यस्मिन्काले पूर्णभक्त्यः सत्त त्ववारिणा मुक्तिमेष्यंति। तस्मिन्नेव समये मुक्तिप्राप्तियोग्यस्य भक्तिपरिपाकमप्राप्तस्य पुंसो या सिद्धिः पूर्णसुखलक्षणा मुक्तिस्तस्याः सिद्धेर्या गरी यसी। तदुक्तं। अपूर्णभक्तेर्मुक्तौ तु नसुखं वपूर्ति मेष्यति॥ अतस्ताहृशमुक्तेरपि भक्तिः पूर्णा गरीयसीति। पूर्णसुखहेतुत्वात्तज्ज्ञानवदंतरंगत्वाच्चग रीयस्त्वं युक्तमित्याह। जरयतीति। कोशं लिंगशरीरं कोशो ऽस्त्री कुड्मले दिव्ये शास्त्रे ऽर्थौघे गृहे तनावितियादवः। समूलतूलनाशस्य विवक्षितत्वा त् तस्मिन्नेवार्थे दृष्टांतमाह। निगीर्णमिति। निगीर्णं सर्वतो यस्तं। देवानामसुरादीद्रियाभिमानित्वेन पापकर्मणि प्रेरणापातदर्शनेन दुष्टा दिना विघ्नविक्षेपसंभवेन भक्तेरात्यंतिकत्वायोगाद्यन्नोभयषामपि भगवतिमनो वृत्तेर्गंगाप्रवाहवत्सिद्धत्वेन तदभावात् सत्व एकमनसःअ सो गुणलिंगानां इति विशेषणोक्तेरभिप्रायः। संभावनामात्राभिप्रायेणोक्तमित्येतावता भक्तेर्न्यूनातिरेकभावो न कल्पनीयः। हर्याज्ञाका रित्वेन तत्प्रीतिहेतुत्वात् देवजातिमात्रपरिहाराय गुणलिंगानामिति। कल्पाद्यसुरत्वाहृत्तये आनुश्राविककर्मणामिति। वेदोक्तानुष्ठा ननियमाभावात्। उक्तविशेषणवतां देवानां सत्वे भगवत्येकमनसो वृत्तिर्भक्तिरित्युक्ते धर्माधिकारिभिः क्रियमाणाया अभक्तित्वमात्यंति कत्वाभावश्च स्यात् स्यात्की दृशी ममगोचरेति दृष्टत्वात् तत्परिहाराय विभागो वक्तव्यः। देवानां सत्व एकमनसो वृत्तिरित्येतद्देवसामान्य भक्तिलक्षणं। गुणलिंगानामिति तद्विशेषभक्तिलक्षणं। आनुश्राविककर्मणामिति सर्वसामान्यभक्तिलक्षणं। स्वाभाविक्यनिमित्ते ति सर्वत्र सममधमाधिकारिभिः क्रियमाणा भक्तिरीदृशी। सिद्धेर्गरीयसी प्रधानसाधनभूतं ३३ राम राम

केतयात्यंतिकभक्तिकर्त्तारः येनतद्भक्तेर्मुक्तेर्गरीयस्त्वंस्यादितितत्राह।नैकात्म्यतामिति। येभागवताअन्योन्यतःप्रसज्यमिलित्वाममपौरुषाणि
पराक्रमान्सभाजयंतेसंभावयंति। शृण्वंतिवा। तेमेमयादीयमानांअप्येकात्म्यतांमुक्तिंनस्पृहयंतिनेच्छंति। यद्भक्तिसंतुष्टोहरिःकिमपि
दद्यात्तितदपितदाज्ञात्वेनैवगृह्णंति। नतुभक्तिफलत्वेन। दीयमानंबालोपिसन्नगृह्णाति। किमुतप्रेक्षावान्। अतइदंभगवताप्रसूयतेनतुतत्त्वमि
तिमंदाशंका। नेच्छंतिसायुज्यमपिफलत्वेनहरिर्यद्ददातिभक्तिसंतुष्टआज्ञात्वेनैवगृह्णतेतादृशानांसुखाधिकंपुनर्मुक्तौभविष्यतीत्य
नेनपरिहृतेति। कुतोनेच्छंतीतितत्राह। मत्पादेति। ममचरणनिषेवायाःपूर्णानंदहेतुत्वादित्यर्थः। भगवदंघ्रिसेवायाःपूर्णानंदहेतुत्वंक
थंतइतानामप्यन्यप्रवृत्त्यादुःखसंभवादित्यतउक्तं। मदीहाइति। अनेनप्रसंगिकान्यप्रवृत्तावप्यतेमद्दर्शनेनसापिमत्कर्मैवतन्मत्रीति

नैकात्म्यतांमेस्पृहयंतिकेचिन्मत्पादसेवाभिरतामदीहाः। येन्योन्यतोभागवताःप्रसज्यसभाजयंतेममपौरुषाणि ३४
पश्यंतितेमेरुचिराण्यंबसंतःप्रसन्नवक्त्रारुणलोचनानि॥ रूपाणिदिव्यानिमनोहराणिसाकंवाचंस्पृहणीयांवदंति ३५ तैर्दर्श
नीयावयवैरुदारविलासहासेक्षितवामसूक्तैः॥ हृतात्मनोहृतप्राणांस्यभक्तिमनिच्छतोगतिमण्वींप्रयुंक्ते ३६

जनकत्वेनमदीहैवेत्युक्तंभवतितेवकियंतइतितत्राह। केचिदिति ३४ ऐकात्म्याकांक्षाभावेहेतुंतस्माह। पश्यंतीति। भगवद्रूपसल्लापादेः कोन्ये
त्रिसुखहेतुरिति। नेच्छंतीत्यर्थः ३५ ननुकालशक्तेर्दुरतिक्रमत्वान्नकिंचित्कालंभगवतिभक्तिंकुर्वतोन्यथापिसंभवेनसंसारस्यानिवृत्तिसंभवे
नभक्तेःकिमपिश्रेयोजनमित्याशंक्याह। तैर्दर्शनीयेति। यैःसहवाचंवदंति। यानिचपश्यंतितैरूपैर्हृतात्मनः अपहृतमनसोहृतप्राणस्यतद्दृष्ट
यीहृतसर्वेंद्रियचेष्टस्यभक्तिसेवाद्यनिच्छतोपितुंसःप्रसन्नोहमण्वींसूक्ष्मांसायुज्यलक्षणांगतिंमुक्तिंप्रयुंजेददामीत्यन्वयः। उदारशब्दःप्र
त्येकमभिसंबध्यते। उदाराणिविलासहासेक्षितवामसूक्तानियेषांतानितथावामान्यनुकूलानिसूक्तानिशोभनवचनानि ३६

ननुसायुज्यभाजामेतदैश्वर्यमहाहवतदुःखरूपंस्यादितितत्राह। अथोइति। येममममायया विततंनिर्मितंभुजरूत्नभजनादिलक्षणांविभूतिंअथो
तथाअष्टांगमनुप्रवृत्तंप्राप्तंअणिमाद्यैश्वर्यंतथाभद्रांसर्वांगसंपन्नांद्योतमानांश्रियंभगवाप्त्यादिसंपदंनस्पृहयंतितेपरस्यसर्वोत्तमस्यमेलो
केमच्चिदानंदलक्षणेदेहेअश्नुवतेप्राप्यसुखमेवानुभूय। तिष्ठंतीत्यन्वयः। हिशब्दोमुक्तेर्विलक्षणत्वात्तल्लोकवदित्यर्थद्योतनार्थः। प
द्मसालोक्यमुक्तिमनेनवक्ति। तथाहि। भक्तिज्ञानफलत्वेनविभूतिस्वर्गमहर्लोकेनुवृत्तमष्टांगमैश्वर्यंमिहलोकेवसष्टधामुनुंगप्रासादा
दिसंपदंचनेच्छंतिपरिपक्ववैराग्यसमुद्गमनत्वात्। तेमेलोकेवैकुंठादावतिसुखमश्नुवतइत्यतस्त्वमपिस्वर्गादीच्छांहित्वासर्वोत्तमःसविदा

अथोविभूतिंममामाययाविताऐश्वर्यमष्टांगमनुप्रवृत्तं॥ श्रियंनदेवींस्पृहयंतिभद्रांपरस्यमेतेश्नुवतेहिलोके ३७ ॥
नकर्हिचिन्मत्पराःशांतरूपेनंक्ष्यंतिमेनोनिमिषोलेढिहेतिः। येषामहंप्रियआत्मासुतश्चसखागुरुःसुहृदोदैवमिष्टं
३८

नंदलक्षणोममात्यंतमुपकारकत्वेनसर्वस्मादिष्टोहरिरितिकृत्वाभजस्वात्वयापीदृशोलोकःप्राप्यतइति। कीदृशीममगोचरेत्यस्यपरिहारउक्त
इति ३७ कालस्यसर्वत्रसत्वात्स्वतंत्रत्वात्ततोपिकेनचिद्धेतुनातान्निवर्तयतीतितत्राह। नकर्हिचिदिति। हेत्वभावादित्याह। मेनोइति। मे
हेतिरायुधमनिमिषःकालचक्रंतान्नोलेढिनास्वादयतिनाशलक्षणंकार्यंनकरोतीत्यर्थः। अत्रापिहेतुरस्तीत्याह। येषामिति। आ
त्मास्वामीज्ञानवतोभिव्यक्तोभवतीतिसुतःचशब्दात्पितावा। अनेकविधायत्वात्तावहमेवानिमित्तबंधुरितिसुहृदइतिबद्धवचनं
३८

किंबहुना वैराग्यविज्ञंभितया भक्त्या भजतां संसारतारकोहमेवेत्याह। इमं लोकमिति। आत्मानं जीवं ऊभयाथिनं लोकद्वयसंचारिणं विज्ञायेति शेषः। येवेमं इत्युक्तमेव विवृणोति। येरायइति। पंयोनिष्कादि। यद्वा यवेमे सुतादयः ३९ विश्वतोमुखं सर्वस्मात्मुखं मुखं सर्वज्ञं वा। मृत्योः संसारात् इति। स्वपारयेपारं मां प्रापयामि। यद्वा पारसमाप्ताविति धातोः संसारसमाप्तिं कृत्वा मुक्तान्करोमीति ४० मत्तोन्यः संसारतारकोस्तीति शंकां माकार्षीरित्याह नान्यत्रेति। प्रधानपुरुषयोः प्रकृतिहिरण्यगर्भयोः ईश्वरात् आत्मनः आदानादिकर्तुः ४१ वाय्वादीनांस्वा

इमं लोकं तथैवामुमात्मानमुभयायिनं॥ आत्मानमनुयेचेमेयेरायः पशवोगृहाः ३९ विसृज्यसर्वानन्यांश्चमामेवंविश्वतोमुखं॥ भजंत्यनन्यया भक्त्याताम्मृत्योरतिपारये ४० नान्यत्रमद्भगवतः प्रधानपुरुषेश्वरात्॥ आत्मनः सर्वभूतानां भयंतीव्रंनिवर्तते ४१ मद्भयाद्वातिवातोयं सूर्यस्तपतिमद्भयात्॥ वर्षतींद्रोदहत्यग्निर्मृत्युश्चरतिमद्भयात् ४२ ज्ञानवैराग्ययुक्तेनभक्तियोगेनयोगिनः॥ क्षेमायपादमूलंमेप्रविशंत्यकुतोभयं ४३ एतावानेवलोकेस्मिन्पुंसांनिःश्रेयसोदयः॥ तीव्रेणभक्तियोगेनमनोमय्यर्पितंस्थिरं ४४ इति श्रीभागवते महापुराणे तृतीयस्कंधे कपिलोपाख्याने षड्विंशोध्यायः॥

धिकारप्रवृत्तिर्नस्वनियता किंतु तद्भुक्तिदानप्रवृत्तिः अतएकार्थतच्छंकाहरोत्सारितेत्याशयेनाह। मद्भयादिति ४२ ॥ अहमेवमुक्तिदातेतियतः अतइदमेवात्रमुख्यसाधनमित्याह। ज्ञानेति॥ योगिनो ज्ञानिनः। वाय्वादिवदन्यनियतत्वेतवमुक्तिदानशक्तिः प्रहतास्यादिति अतउक्तमकुतोभयमिति ४३ एकयामप्रवेशेबहुमार्गवदनेकेमार्गाःसंभवेयुरित्याशंकांपरिहरन्नन्ययोगंव्यवच्छिनत्ति। एतावानेवेति॥ स्थिरमचलत्वेनेतिशेषः ४४ इति तृतीये षड्विंशः॥ ॥

अस्मिन्नध्याये प्रसंख्यानायतत्त्वानामितिप्रइत्युक्तं तत्प्रपंचः क्रियतइति प्रतिजानीते। अथतइति। अथ भक्तिनिरूपणानंतरं। पुरुषार्थोपयोगितत्त्वे वक्तव्ये किं तत्त्वानां लक्षणज्ञानेन प्रयोजनमिति तत्राह। यद्विदित्वेति। गुणैः सत्त्वादिभिः १ परमात्मज्ञानमेव निर्विकारं मुक्तिसाधनं श्रुतं। तत्त्वलक्षणज्ञानस्य कथं तत्साधनत्वं स्यादित्याशंक्य तत्त्वलक्षणज्ञानं परमात्मज्ञानाविनाभूतं तेषां मुख्यकारणत्वात् परमात्मनइति तज्ज्ञानमेव वर्णयइति प्रतिजानीते। ज्ञानमिति। आत्मानं परमात्मानं दर्शयतीत्यात्मदर्शनं यज्ज्ञानं पुरुषस्य

श्रीभगवानुवाच॥ ॥ अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्॥ यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १
ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं॥ यदाहुर्वर्णयेतत्ते हृदयग्रंथिभेदनं २ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ३

श्रेयोर्थिनो निःश्रेयसाय मोक्षादिसर्वपुरुषार्थायाहुः हृदयग्रंथिभेदनं संसारपाशच्छेदकरं ज्ञानं तद्वर्णयइत्यन्वयः २ यत्ज्ञानं हृदयग्रंथिभेदनमुक्तं तत्ज्ञानं किंगुणविशिष्टमुदीर्यमाणं संसारसमुच्छेदसमर्थं स्यादिति तत्राह। अनादिरिति। योनादिराद्यंतरहितः कारणमात्रशून्यो वात्मा विज्ञानादिगुणराशिः पुरुपूर्णमानंदं सनोतिददातीति पुरुषः सर्वांतर्यामी वा निर्गुणो देहःगुणसंबंधरहितः केन प्रकृतेः परः प्रत्यक् सर्वाभिमुखप्रधानस्वधामा स्वयंज्योतिः स्वप्रकाशेन दीप्यमानः विश्वं स्थावरजंगमात्मकं जगद्येन सम

सञ्जातात्मा परमात्मा न जातो न म्रियेत। अजआत्मा महाभूतवत् न जायते म्रियते वा कदाचिदित्यादिश्रुतिस्मृतिप्रसिद्धं। आद्यंतरहितइत्यनेनापि जन्माद्यभावे सिद्धे न जातइत्यादिपुनर्वचनं प्रमाणप्रसिद्धिप्रद्योतनार्थं। युक्तिं पूर्वं कृत्या देहेली यस्त्वन के वलस्येति भावेन केमुत्पन्नो यमाह। देहादयुपाधिभिरिति। देहेंद्रियाद्युपाधिलक्षणैर्निमित्तैरात्मतद्धर्मास्त्वीकृतजननादिधर्मा जीवो विनस्वरूपतो जायते किंतु भ्रांत्याभिमानेन जायते म्रियते भ्रांतत्वाद्देहात्मकत्वस्य। अत्र दृष्टांतमाह। यथेति। यथा स्वप्ने तस्य स्वप्नस्येक्षिता द्रष्टा जाग्रति दृष्टश्रुतजननादिसंस्कारवशाज्जातो मृतइति पश्यति। नहि ते जननमरणे सत्ये स्तः किंतु भ्रांत्यात्मनो मन्यते तथा प्रकृते किमु सर्वज्ञत्वस्वतंत्रत्वप्राकृतत्वे कृतदेहरहितत्वकूटस्थता विद्यत्वादिवैलक्षण्ययुतईश्वरो न जातइति। तदुक्तं। परस्य जन्ममृत्याद्याः सुः स्वतंत्रस्य किंतु नः। जीवस्यापि यतो भ्रांत्या

न जातो न म्रियेतात्मा सहिदेहाद्युपाधिभिः॥ निमित्तैरात्तधर्मायं यथा स्वप्नेतदीक्षिता ४ सएव प्रकृतिं सूक्ष्मां
दैवीं गुणमयीं विभुः॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया ५

जन्मसृत्यादिसंगतिरिति। निरवयवस्य जीवस्योपाधिसंबंधईशेच्छया घटतइत्यंगीकारेण न युक्तिविरोधोऽपि शंकनीयः। यद्वि युक्त्या विरुद्धं तत्तदीशकृतमेव हि इति वचनाच्च। ४। अधुना जीवेश्वरयोः पारतंत्र्यापरतंत्र्यादि वैलक्षण्यप्रज्ञापनाय परस्य जगत्सृष्ट्यादिमाहात्म्यादिकथनपूर्वकं जीवस्य तदधीनत्वेन प्रकृतिबद्धत्वं वक्तुमाह। सएवेति। यो नादित्वादिगुणविशिष्टो यश्च जन्मादिरहितो जन्मादिमज्जीवविलक्षणः सः सूक्ष्मां दैवीं क्रीडादिगुणवतीं देवस्य विष्णोरियमिति वा गुणमयीं सत्वादिगुणाभिमानिनीं यदृच्छया हरेरिच्छयोपगतां सदा समीपस्थितां प्रकृतिमभ्यपद्यत। लीलयेति प्रयोजनांतरं निवारयति। अत्र प्रकृतिशब्देन विद्चिदात्मिका उभेयाह्या। विभुः सर्वगतइत्यनेन प्रकृत्यभिपादनं नोपचारिकं किंतु स्वेच्छाभिमुखीकरणं कार्ये सूचयति तदपि स्वप्रयोजनं नेत्यतउक्तं। लीलयेति ५

अभिपद्य किमभूदिति तत्राह। गुणैरिति। स्वप्रेरणया सत्वादिगुणैः सात्विकादिभेदेन विचित्राः कस्वरूपाः स्वरूपसमान रूपाः प्रजाः सृजंतीं प्रकृतिं विलोक्य सह रिरिहं संसारे जीवस्य ज्ञानगूहया ज्ञानगूहयंती जीवज्ञानं गूहयंत्या प्रकृत्या वासद्यः संभावनानंतरमेव तं जीवं मुमुहे मोहयामास। तदेतन्मे विजानीहि। हन्याविवाहेतु कुरु रूपवीराइत्यादौ विवेतार्णीतगिजर्थीवेदितव्यः। अन्यथा सदानिरस्तकुहकमित्यादिकं विरुद्धं स्यात्। प्रकृतिविषयत्वे ज्ञानगूहशब्दो जाशब्दवदाकाशंतः। स्वस्यातंत्र्यप्रकटनार्थं वा मुमुहइति। तदुक्तं। यत्रकारयिता तीवस्वतंत्रस्तत्र कर्तृता। प्रोक्ते तु यथा ब्रह्मत्वं तत् संसारमागिति। तथैवापथवा सृष्ट्वांतरालेपि नक्वचित्॥ प्रकृत्या रहितं ब्रह्म कदापि दवति छतइति वचनात्। समीपस्थत्वं च सिद्धं ६ ज्ञानगूहनफलमाह। एवमिति। परा

गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः॥ विलोक्य मुमुहे सद्यः सइह ज्ञानगूहया ६ एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः
पुमान्॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ७ तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतं॥ भवत्यकर्तुरीशस्य साक्षिणो
निर्वृतात्मनः ८

भिध्यानेन परमात्मेच्छयैव मुग्धत्वादेव प्रकृतेः सत्वादिगुणैः सात्विकादिकर्मसु क्रियमाणेषु सत्सु पुमान् जीवः प्रकृतेः कर्तृत्वमहं कर्तेत्यात्मनि मन्यते। ७ अभिमानफलमाह। तदस्येति। तस्मादविद्यमानकर्तृत्वाभिमानादस्य जीवस्य संसृतिलक्षणो बंधस्तत्कृतं पारतंत्र्यं च स्वाधमाद्यधीनता च भवति। कस्मात्प्रयोजकादिति तत्राह। अकर्तुरिति। अक्लिष्टकारित्वात् क्रियतइति वा कर्तुः साक्षिणः पुण्यपापे साक्षाद्दीक्षमाणस्य निर्वृतात्मनः परमानंदरूपस्येश्वरस्य सकाशात् भवतीत्यर्थः। विश्वाः सुराणां गुरूणां नित्या जीवस्य तंत्रता। यतस्तत्साम्यं तंत्रतत्त्वं ज्ञाना हि निवर्तत इति वचनेन तत्रतात्पर्यार्थो विगतस्परति। क्लिष्टत्वादकर्त्रीसाद्कार्यत्वादथापिवेति वचनात् न क्रियामात्रशून्यत्वार्थीते मतइति। एवकर्त्ता

भा. तृ.
१५७

अत्र कर्तृत्वविशेषं विवेचयति। कार्यकारणेति। कार्यं शरीरं कारणानीन्द्रियाणि कर्तृ मनः एषां कारणं प्रकृतिं प्रधानाभिमानिनीं श्रियं जीवानां सुखादि
भोक्तृत्वे कारणं। प्रकृतेः परः पुरुषो विष्णुरिति विदुः। परमेष्ठिशक्तिप्रकारं प्रतीयमानं विहाय प्रसिद्धार्थकथनं कथमितीदं चोद्यं ब्रह्मादिभिः स
र्गकरी श्रीर्विष्णुबलसंश्रयात्। सुखदुःखप्रदो विष्णुः स्वयमेव सनातनः। कर्तृत्वं सुखदुःखानामन्येषां चेतनादौ तथा। भोक्तृत्वं सुखदुःखानां

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः॥ भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परं ८ देवहूतिरु
वाच प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ९

करोत्येको हरिः स्वयं। भोक्तृत्वमात्रहेतुत्वं जीवेनान्यत्र कुत्र चिदित्यनेन परिहृतं। प्रकृतिं पुरुषं चैव विद्ध्यनादी इति चोक्तार्थप्रमाणं ८ अत्र दे
वहूती प्रकृतिपुरुषयोः कारणत्वविशेषं श्रुत्वा लब्धावसरा विवेकविशेषलक्षणं पृच्छति। प्रकृतेरिति। अस्य जगतः कारणयोः सदस
त्स्थूलसूक्ष्मलक्षणं जगद्यदात्मकं याभ्यां व्याप्तं ९ वि

राम
१५७

कपिलो भगवान्स्तत्र हरेरनंतत्वेन तत्त्वरूपे बुध्यनारोहात्प्रकृतिलक्षणज्ञानेन तल्लक्षणस्य ज्ञातप्रायत्वात्प्रकृतिलक्षणं वक्ति। यत्तदिति। य
त्तत्त्वं सत्वादिगुणत्रयरूपमव्यक्तं सूक्ष्मं नित्यमविनाशि सदसदात्मकं व्यक्ताव्यक्तात्मकं ज्ञानिनस्तत्त्वं प्रधानेनाप्रकृतिमाहुः इत्यन्वयः। अत्र त्रि
गुणमित्येनदितरव्यावर्तकं लक्षणं इतराणि तु स्वरूपाख्यानपराणि। अविशेषमकार्यं विशेषवन्महदादिकार्यवत्। अनेन येषां अभिमान्य
मानाभिमानिनां प्रकृत्यादिशब्दवा[illegible]समगी कार्यं। तथाहि। सत्वादिगुणवतो जगदुपादानत्वं सत्वादिगुणाभिमानिन्याः श्रीभूदुर्गाभिधायाः
श्रियस्तु सत्वादिगुणप्रवर्तकत्वेन [illegible]तो विप्रकर्षाणा जगद्गुरुमहदादिशरीरवत्त्वं ब्रह्मादिजनिकर्तृत्वेन तच्छब्दवाच्यत्वं विवक्षितं वे

श्रीभगवानुवाच॥ [illegible]गुणमव्यक्तं नित्यं सदसदात्मकं॥ प्रधानं प्रकृतिं प्राहुरविशेषं वि
शेषवत् १०

श्रि

त्वात्स्थितिकर्मोदासीना अव्यक्तासिसृक्षुत्ववि[illegible]पृता व्यक्ताव्यक्ता। महदादिकार्यव्यापिनी व्यक्तैवेति विशेषात् त्रिरूपिणी श्रीरुच्यते। एवं
जडरूपा प्रकृतिरपि प्रधानगुणरूपा व्यक्ता तदुपादानरूपा व्यक्ताव्यक्ता। महदादित्वेन परिणममाना व्यक्तैव। सर्वकार्येषु प्रधानत्वात्प्रधानं। न
वेदस्वकपोलकल्पितं। अंकिं तु प्रमाणांतरसिद्धत्वात्। तदुक्तं। व्यक्ताव्यक्तात्मकं यत्तु हि द्व्यात्सदसदात्मकं। असर्गा केवलाव्यक्ता सिसृक्षुरुभया
त्मिका। व्यक्तैव कार्यरूपा तु प्रकृतिस्त्रिविधा मता। कार्यतः सा प्रधानत्वात्प्रधानमिति कीर्त्यते। अविशेषा ह्यकार्यत्वात्सा वक्त्री विष्णुसं
श्रयेति विशेषः कार्यमुद्दिष्टं विशेषो दृश्यते यतः इति १०

तत्त्वानि प्रधानकार्याणीत्याह। पंचभिः पंचभिरिति। चतुर्विंशतितत्त्वैः ब्रह्म शर्गुणं। नातोऽधिकसंख्यावत्। प्राधानिकं प्रधानकार्यं॥ ११॥ तानि कानी त्यतो निर्दिशति। महाभूतानीति १२ १३ अंतरात्मनोंतःकरणस्य मनसः। बुद्धिरध्यवसानात् संशयं कुरुते मनः। अभिमानेत्वहंकारश्चित्तं स्मरणं कोरणमितिलक्षणरूपया वृत्त्या वर्ण्यते। यामनोबुद्धिरहंकारश्चित्तमिति चतुर्धा भेदो लक्ष्यते इत्यन्वयः १४ तत्त्वसंख्यामुपसंहरति। एतावानेवेति। सगुणस्य ब्रह्मणः प्रधानस्य तदभिमानिन्याः श्रियश्चायं सन्निवेशः संस्थानविशेषः स एतावानेव चतुर्विंश एवं संख्यातस्तु मया

रुन्न

पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा। एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ११ महाभूतानि पंचैव भूरापोग्निर्मरुन्नभः। तन्मात्राणि च तावंति गंधादीनि मतानि मे १२ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकं॥ वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते १३ मनो बुद्धिरहंकारश्चित्तमित्यंतरात्मनः॥ चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया १४ एतावानेव संख्यातो ब्रह्मणः सगुणस्यह॥ सन्निवेशो मया प्रोक्तो यः कालः पंचविंशकः १५

कृष्णाणारः

प्रोक्तः। कालात्मा परमात्मा किमित्येतेषु न गणितः इत्याशंक्यानन्याधीनत्वद्योतनायेति भावेनाह। यः काल इति। यः काल इत्याख्यायते स पंचविंशक इति ज्ञातव्यः। ननु श्रियोपि हरिं विना नस्वाधीनत्वात् किमिति तद्गणनं कृतमित्याशंकानकार्या। हरिश्च निर्गुणं ब्रह्म श्रीर्ब्रह्म सगुणं स्मृतं। तदंगजानि तत्त्वानि तस्मात्तद्रूपमुच्यत इति वचनात्तेषु गणनीयत्वाभिप्रायेणेति १५ श्रीकृष्णायनमः

अचुलतस्य पुत्रस्य नामकरणमिव कालः परमात्मेति संज्ञाय व्याक्रियत इति एतत्कामक्षोभत इति तत्राह। प्रभावमिति। पुरुषे हृदिस्थः परमः कालः सर्वगतो हरिः। अथवा रुद्रदेहस्थो हरिः काल इतीरितः इति वचनात्। पौरुषं पुरुषस्य हृदिस्थितस्य हरेर्विद्यमानं प्रकर्षणाभावं व्याप्तरूपं पुरुषाह्कारकृद्देहस्य यः कालसंज्ञमाहुः। क इत्यत आह एक इति। एके सम्यग्ज्ञानिनो न प्राकृता इत्यर्थः। अहंकर्तेत्यहंकारेण मम इदमिति ममकारेण विमूढस्य मिथ्याज्ञानिनः प्रकृतिमीयुषः प्रकृतिबद्धस्याः तत एव पराधीनकर्तुर्जीवस्य यतो यस्मादयं जननमरणलक्षणं भवति। तदिति शेषः १६ इतो

प्रभावं पौरुषं प्राहुः कालमेके यतो भयं। अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि॥ चेष्टा यतः स भगवान्काल इत्युपलक्षितः १७ अंतः पुरुषरूपेण कालरूपेण यो बहिः॥ समन्वेत्येष सत्त्वानां भगवानात्ममायया १८ राम

विहरिरेव कालनामा न त्वतिरिक्त इत्याह। प्रकृतेरिति। निर्विशेषस्य कार्योदासीनायाः गुणसाम्यस्य ब्रह्मप्रलयावस्थाविशिष्टायाः प्रकृतेः प्रधानाभिमानिन्या मूललक्ष्म्याः पुनः श्रीदुर्गारूपभेदेन सृष्ट्यादिविशेषलक्षणा चेष्टा यतो भवति। स भगवान् काल इत्युपलक्षित इतीदं लक्षणं लक्ष्ममात्रं व्यापकत्वान्नात्याप्तिव्याप्त्यसंभवदुष्टमिति ज्ञातव्यं १७ अनेन कालरूपात्पुरुषरूपं न भिन्नमित्याह। अंतरिति। यो भगवानात्ममायया स्वरूपेच्छया सत्त्वानां सर्वप्राणिनामंतः पुरुषेण बहिः कालरूपेणासर्वांतर्यामित्वसर्वव्यापकरूपभेदेन प्राप्नोतीत्यतोऽयं तमेष एकएवेति नात्र दोषाशंका कार्येति १८

प्रकृतेश्चेष्टाप्रदत्वप्रकारंवक्ति। दैवादिति। दैवात्प्रकृतिक्षोभकनारायणाख्यात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरःपुमान्वीर्यमाधत्तेत्यन्वयः। इदमुक्तंभवति। दैवाख्यमूलरूपादभिव्यक्तोनाम्नापरःपुमानस्मनारायणस्यप्रेरणयासिसृक्षुत्वविशेषधर्मवत्याःप्रधानाभिमानिन्याःलक्ष्म्याअभिव्यक्तायांनाम्नाश्रियांप्रागुक्तविशेषवत्यांस्वभार्यायांरेतोलक्षणंवीर्यमधादिति। तदुक्तं। प्रकृतेःक्षोभकंरूपंदैवंनारायणाभिधं। प्रकृतोमहतःस्रष्टापरमःपुरुषोत्तमइति। अमोघवीर्योहरिरितिभावेनतत्फलमाह। सासूतेति। साश्रीनाम्नीहिरण्मयंमहत्तत्वमसूतेति २० प्रकृत्यागूढमिदंजग

दैवात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरःपुमान्॥ आधत्तवीर्यंसासूतमहत्तत्वंहिरण्मयं २० विश्वमात्मगतंव्यंजन्कूटस्थोजगदंकुरः॥ स्वतेजसापिबत्तीव्रंआत्मप्रस्वापनंतमः २१

द्दैवाख्यहरेःकथंकार्यत्वमुच्यते। तमसागूढमयइतिश्रुतेरितितत्राह। विश्वमात्मगतमिति। ब्रह्मादिसर्वजीवानांकूटस्थआत्मोदरगतंविश्वंव्यंजन्व्यक्तंकर्तुंकामोकेरत्नात्मत्वाज्जगदंकुरःपरमःपुरुषआत्मप्रस्वापनंयोगनिद्राकारणंतीव्रंनिबिडंतमःस्वतेजसास्वरूपप्रभयाअपिबद्विनष्टमकरोदित्यन्वयः। जगतांकुरोजगदंकुरइतिविग्रहेतद्विकारोहरिरित्यर्थोनुपपन्नोनिर्विकारोऽक्षरःपुरुषइत्यादिश्रुतिविरोधात्। अतःअंकेरमयतेयस्मात्केशवोजगदंकुरः॥ महांतंयोसृजज्जीवंमोहकंयतमोग्रसदितिप्रमाणबलादुक्तएवार्थः २१

दैवनाम्नोहरेरभिव्यक्तात्परमपुरुषान्महत्तत्वसृष्टिमुक्त्वामहत्तत्वेनाभिमन्यमानस्यचित्तस्यसृष्टिंवक्ति। यत्तत्सत्वगुणमिति। सत्वगुणंपूर्णानंदादिगुणंस्वच्छंधवलंशांतमकलुषंक्षिमितंभगवतोहरेःपदंस्वरूपंयब्रह्मज्ञानिनोवासुदेवाख्यमाहुः। तस्मान्महत्तत्वाभिगतात्वासुदेवात्महत्तत्वेनाभिमन्यमानेसर्वप्राणिनांचित्तंजायतइतिशेषः। तदुक्तं। तदेववासुदेवाख्यंमहत्तत्वनियामकमिति। सत्वशद्वेनवोच्यतेपूर्णानंदादयोगुणाइतिवा। महत्तत्वगतोयोसौवासुदेवाभिधोहरिः। सचित्तजनकःप्रोक्तःप्राणिनांहिपृथक्पृथगितिवचनात्तन्चित्तस्यवासुदेवादन्योजनकोस्तीतिज्ञायते २२ कारण

यत्तत्सत्वगुणंस्वच्छंशांतंभगवतःपदं॥ यदाहुर्वासुदेवाख्यंचित्तंतन्महदात्मकं २२ स्वछत्वमविकारित्वंशांतत्वमितिचेतसः॥ वृत्तिभिर्लक्षणंप्रोक्तंयथापांप्रकृतिःपरा २३ महत्तत्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात्॥ क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत २४

गुणाःकार्येपिसंक्राम्यंतइतिभावेनास्यचित्तस्यलक्षणमाह। स्वछत्वमिति। स्वच्छत्वंनिर्मलत्वंअविकारत्वंस्तिमितोदकवदस्यविकारत्वंनसर्वात्मनाविकाराभावः। स्तिमितोदकवित्तादेरविकारोल्पविक्रियेतिवचनात्। शांतत्वंप्रसन्नतायथापांपरा विशिष्टाप्रकृतिरूपाधिर्मतेरणाधवल्पस्वभावस्तथाचित्तस्यवृत्तिभिस्वभावैर्लक्षणंकथितमित्यन्वयः। वृत्तिःस्वभावोवृत्तंवस्थितिरित्यभिधीयतइतिवचनात्स्वाभाविकंलक्षणमुक्तमित्यर्थः। महत्तत्वादहंकारसृष्टिमाचष्टे। महत्तत्वादिति। ज्ञानप्रधानस्तुमहान्नहंकारःक्रियाधिकः। उत्तरापेक्षयाप्येपिज्ञानाधिकउदाहृतइतिविवक्षयाक्रियाशक्तिर्नतुज्ञानशक्तिरहितत्वादस्याहंकारस्यशक्तिद्वयकथनेचाप्यस्यादिति २४

पृथङ्नाम्नात्रैविध्यं वक्ति वैकारिक इति। यतो यस्मात्त्रिविधाहंकारात् मनआदीनां भवत्युत्पत्तिः स इति। महतां भूतानां पृथिव्यादीनां २५ प्रकारान्तरेणात्रैविध्यं वक्ति। वैकारिक इति। स सत्त्वप्रथमायत्वस्त्वात् तं च यद्धिवक्ष्यति तमिति वचनात् वैकारिकात्तत्राधिदैवमित्यादि प्रथमायां वक्ष्यमाणार्थवत्क्वाद्देवताविकृतं यत्तदाधिदैवमिति स्मृतमिति वचनात् दिग्वादिदेवतासर्गमधिकृत्य वर्त्तमानाद्वैकारिकाहंकारात् दिगादिदेवता जाता इत्यर्थः। तेजसात्तेजसाहंकारात्। बुद्धिर्बुद्धितत्त्वं तदभिमानि सुमाहंकारिकः प्राणाश्च जात इति शेषः। अर्थमात्रं शब्दादितन्मात्रावतां मतानां तामसाहंकारादभूदिति शेषः। तामसो हंकारोर्थानां शब्दादीनां मात्रनिर्मातेति वा उक्तेन किमुक्तं स्यादित्यत उक्तं। गुणव्यतिकर इति। गुणानां सत्त्वादीनां शान्तत्वादि तेजका

ॐ

वैकारिकस्तैजसश्च तामसश्च यतो भवः॥ मनसश्चेंद्रियाणां च भूतानां महतामपि २५ वैकारिकोधिदैवं तु बुद्धिः प्राणश्च तैजसं॥ तामसं त्वर्थमात्रं च गुणव्यतिकर त्रिवृत् २६ सहस्रशिरसं साक्षाद्यमनंतं प्रचक्षते॥ संकर्षणाख्यं पु रुषं भूतेंद्रियमनोमयं २७

नां व्यतिकरो यस्मिन्सतथा सोहंकार एवं निरुद्धस्त्रिविधः २६ अहंकारतत्त्वस्य सूक्ष्मस्थूलरूपभेदेन स्थितस्याभिमानि विशेषमाह। सहस्रशिरसमिति। भूतेंद्रियमनोमयमित्यत्र मयट् प्रत्ययः प्राधान्यार्थः। तथा च भूतादीनां प्रधानकारणं मुख्यप्रवर्त्तकमित्यर्थः। संकर्षणाख्य सूक्ष्मा हंकारधामकः। स्थूलाहंकारनियमी विष्णुः प्रद्युम्ननामकः। अनिरुद्धो मनस्तत्त्वनियंता भगवान् हरिः महत्तत्त्वाधिपतिर्जीवात्मा ब्रह्मशेषो गजस्तथा। सूक्ष्मस्थूलविभेदेन कामजश्चानिरुद्धक इति विशेषवचनादर्थविशेषोत्र बुभुत्सुभिर्ज्ञातव्य इति। साक्षादिति विशेषणात् संकर्षणादिनाम्ना त्रिधाख्येन हरिणा प्रेरितः संकर्षणनामा अनंतः त्रिविधाहंकाराभिमानीति सम्प्रगवगंतव्यं २७

अहंकारलक्षणं वक्ति। कर्त्तृत्वमिति। वैकारिकाहंकारस्य मनोरूपेण परिणतत्वात् मनोव्यापित्वेन देहाद्यहंममेत्यादकत्वेन कर्त्तृत्वं नाम लक्षणमिति तैजसाहंकारस्य करणनामिंद्रियाणां करणत्वादिंद्रियाभिमानिनियतेंद्रियद्वारा ज्ञानजनकत्वेन करणत्वं। तामसाहंकारस्य कार्यापरपर्यायदेहकारणत्वात् देहस्य पांचभौतिकत्वात् देहरूपेण कार्यत्वं चाइ निशब्दः प्रकारवाची। तदुक्तं। मनोरूपेण कर्त्तृत्वं देहरूपेण कार्यता। इंद्रियात्मकतया चैव करणत्वमहंकृतेः। यन्नो मनस्यहंभावस्तस्मात्कर्त्ता मनः स्मृतं॥ स्वभावकर्त्तृजीवस्य त्वासन्नोपाधितद्यतः। कर्मज्ञानेकारणतायतः करणमिंद्रियं। कार्यं देहः समुद्दिष्टस्त्वाद्यत्वात्पुनः पुनरिति। स्वोपन्नपदार्थेषु ततत्स्वभावस्फुरणात् समतल्लक्षणमिति भावेन लक्षणांतरमाह। शांतेति। देवपित्वं वैकारिकस्य सत्त्वांशप्रा

कर्त्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणं॥ शांतघोरविमूढत्वमिति वा स्यादहंकृतेः २८

दुर्भेणोत्पन्नत्वात् उक्तात्मनो भगवन्निरोपेतत्वात् शांतत्वं। करणपर्यायेणेंद्रियाणां प्रभुस्तैजसाहंकारस्य सत्त्वरजोंशप्राधुर्येणजातत्वात् ज्ञानेंद्रियैर्नानाविधघोरपदार्थविषयज्ञानजनकत्वात् कर्मेंद्रियैर्घोरतरनानाविधकर्मकारयितृत्वात् घोरत्वं। वैकारिकतैजसयोर्यावत् ज्ञानस्य जनकत्वं तावत् ज्ञानजनकत्वाभावेन तमोगुणप्राधुर्येणउद्भूतत्वात् भूतादेस्तामसाहंकारस्य विमूढत्वं। शांतरूपो देववित्ता घोरः करणप्रद्युम्नतः। तावत् ज्ञानस्याप्रकाशात् मूढो भूतपितास्मृतः। त्रिरूपोयमहंकारः शेषरत्येवंतं विदुरिति वचनात्। अर्थविशेषः कल्प्यत इत्यर्थः २८

वैकारिकादहंकारान्मनआदीनामुत्पत्तिरुक्ता तामधुना स्पष्टयति वैकारिकादिति। तल्लक्षणमाह। यत्संकल्पेति। यन्मनः संकल्पविकल्पाभ्यां वृत्ति विशेषाभ्यां वर्तते देह इति शेषः। लक्षणांतरमप्याह। कामसंभव इति। यदिति वर्त्तते। यद्यस्मान्मनसः कामानां नानाविधानां संभवो जन्मेत्यनेनज्ञा तुं शक्यत इति २९ तस्याभिमानिनमाह। यद्विदुरिति। स्थूलांतर्यामित्वेनआवृतीणां वयुमूर्तिरूपादभिव्यक्तम निरुद्धाख्यं यद्यस्य मनसो भिमा निनो काम पुत्रस्यानिरुद्धाख्यांतर्यामित्वेन प्रादुर्भूतं तं विदुर्ज्ञानिन इति शेषः। मनसः सर्वेंद्रियनेतृत्वात्तन्नियंतृत्वोक्त्याऽस्य सर्वेंद्रियनेतृत्व मपि सिद्धमित्याह। हृषीकाणामिति। तद्ध्यानार्थमाह। शारदेंदीवरश्याममिति। शरत्कालीनं नीलोत्पलं नीलमधिकारिणमाह। संराध्यमि

वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत॥ यत्संकल्पविकल्पाभ्यां वर्त्तते कामसंभवः २९ यद्विदुर्ह्यनिरुद्धाख्यं हृषी काणामधीश्वरं॥ शारदेंदीवरश्यामं संराध्यं योगिभिः शनैः ३० तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्सति। द्रव्यस्फुरण विज्ञानमिंद्रियाणामनुग्रहात् ३१

ति। शनैरव्ययमनसासनकादियोगिभिः। यद्वायन्मनो निरोधरहितत्वेन प्रसिद्धमत एव सर्वेंद्रियाणां नियंतृत्वेन समर्थं तद्वर्णमाह। शा रदेति। एवंविधं मनः कस्य वशे भवतीत्यत उक्तं। संराध्यमिति। योगिभिः पवनाभ्यासिभिः संराध्यं वशीकर्त्तुं शक्यमित्यर्थः ३० चक्षुरा दींद्रियाणां काचकामलादिदोषाभावलक्षणानुग्रहात् द्रव्यस्फुरणे सति यद्विज्ञानं विशेषज्ञानं जायते॥ तादृशं बुद्धितत्त्वमस्त्वित्यर्थः हे सति। सामान्यं मनसा ज्ञानं विषयाद्बुद्धिजं भवेत् इति वचनात्॥ ज्ञानस्य सामान्यविशेषलक्षणे विशेषणे स्त इति ३१

बुद्धितत्त्वलक्षणमाह। संशयमिति। न केवलमेकमेव लक्षणं किंत्वन्यान्यपि लक्षणानि संतीति भावेनोक्तमर्थेति। विपर्यासो मिथ्याज्ञानमिदमेवतत्त्वं नान्यदि त्यतत्त्वे यत् ज्ञानं तन्मिथ्येति। मनसोपि संशयो सिद्धः तः कथं बुद्धेः संशयलक्षणमुच्यत इति चेदुच्यते। निश्चायकलक्षणदर्शनेन मनः संशयो निवर्त्तते न बुद्धेः संशयः कदापीति। तदुक्तं। अचलः संशयो बुद्धेश्चलो मानस उच्यते। चंचलानुस्मृतिर्बुद्धेश्चित्तजैव स्थिरा स्मृतिरिति। येन धर्मेण यद्वस्तु ज्ञायते स धर्मस्तल्ल क्षणं। यथा सास्नादिमत्त्वमिति। येन यज्ज्ञायते वस्तु तत्तल्लक्षणमुच्यते। तत्स्वरूपं पृथगुक्तेति द्विविधं कवयो विदुरिति वचनात् स्वरूपाणां संशयादीनां नि वृत्तिर्युक्तानस्वरूपाणामिति तितात्पर्यमवगंतव्यं। स्वापोऽज्ञानं ३२ इंद्रियाणि तैजसानि तैजसाहंकारादुत्पन्नान्येवात द्विवेकमाह। क्रियाज्ञानेति। क्रि

संशयोर्थविपर्यासो निश्चयः स्मृतिरेव च॥ स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३२ तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३३ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात्॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगं॥ ३४ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३५

याज्ञानविभागेन कर्मेंद्रियज्ञानेंद्रियसंज्ञास्तेन। तदभिमानि विशेषं वक्ति। प्राणस्य हीति। प्राणस्याहंकारिकस्य क्रियाशक्तिः कर्मेंद्रियप्रेरकत्वशक्ति ः बुद्धेरूपाया विज्ञानशक्तिता श्रोत्रादींद्रियैः विज्ञानजनकत्वशक्तिः ३३ शब्दमात्रं शब्दाख्यो गुणस्तस्माच्छब्दाख्यगुणात् नभ उत्पन्नं शब्दं गमयति ज्ञा पयति शब्दगं श्रोत्रेंद्रियमुत्पन्नमिति शेषः ३४ शब्दतन्मात्रालक्षणमाह। अर्थाश्रयत्वमिति। अर्थाश्रयत्वमर्थविषयत्वमसिधेयैकनिष्ठत्वमि त्यर्थः। द्रष्टुः सर्वस्य लिंगत्वं ज्ञापकत्वं। नभसश्चाकाशस्य तन्मात्रत्वं स्पर्शाद्यभावेन तदेकनिष्ठत्वं शब्दस्य लक्षणं कवयो विदुरित्यन्वयः। तदुक्तं। श ब्दे नैवयतो ज्ञेयो हरिर्लिंगं तु तत्स्मृतं। स्पर्शाद्यभावात्तन्मात्रानभसश्चेति कीर्त्यते। स्पर्शादयश्च तन्मात्रा इतरे पूर्वसंस्थिते। तिष्ठंत्येकगुणे भूतेष्व त्येकं पद्यमुस्थितं। शब्दोवर्णात्मको नित्यो ध्वनिराकाशसंभवः। आकाश एव सूक्ष्मत्वं ध्वनिरित्यपि शब्दयते। स एव बाह्यमानस्तु भवेत्कर्णैर्निगोचर इति ३५

आकाशलक्षणं वक्ति। भूतानामिति। भूतानां जीवानां छिद्रदातृत्वं गमनाद्यर्थमवकाशदातृत्वं बहिरंतर्दिगादित्वसत्त्वमेकं प्राणापानादीना
मिंद्रियाणामात्मनां जीवानां धिष्ण्यत्वमावासस्थानत्वं च नभसो वृत्तिलक्षणं स्वभावलक्षणं कर्तव्यमिति विदुरिति शेषः ३६ नभसः स्पर्शोत्पत्ति
माह। नभस इति। शब्दात्मतन्मात्रायस्य तत्तथा तस्मान्नभसः कालगत्या भगवदीक्षणेन विकुर्वतः स्पर्शोऽभवत् स्पर्शतन्मात्राभूत्। तत्र
स्पर्शतन्मात्राया वायुरभूत्। प्रधानवायुः सूत्रात्मा महतां सह जायते। तेजसश्च त्वक् स्पर्शग्राह्या यस्य तत्कृता स्मृताः॥ तदा विषया अन्य
त्रा

भूतानां छिद्रदातृत्वं बहिरंतरमेव च॥ प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणं ३६ नभसः शब्दतन्मात्रात्का
लगत्या विकुर्वतः॥ स्पर्शोऽभवत्ततो वायुस्त्वक्स्पर्शस्य च संग्रहः ३७ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च। एत
त्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३८

जीवास्तदाधारास्त्वत इति वचनात्तेजसो वायुराकाशाज्जातः स्पर्शवायुश्च मुख्यवायोः सूत्रात्मेति ज्ञातव्यं। तेजसादिवायुभिराविष्टत्वा
त्तदुद्भूतत्वात्तद्वत्त्वाच्च तद्विशिष्टा इत्युच्यते। स्पर्शादयोऽपि वाय्वादेः सूक्ष्मावस्थाः प्रकीर्तिता इति वचनादत्र कार्यकारणभावउपच
यविवक्षयेति ज्ञायते। तदुक्तं च। सूक्ष्मेंद्रियाणि संत्येव सुः स्थूलान्यप्यहंकृतेः। एते स्पष्टोपदीयंते पुनर्ब्रह्मशरीरत इति। स्पर्शस्य स्प
र्शतन्मात्रायाः संग्रहो ज्ञातृत्वगिंद्रियं चोपचितमभूदिति शेषः ३७ स्पर्शतन्मात्रालक्षणमाह। मृदुत्वमित्यादिना। मृदुत्वमित्यादीनि

स्वरूपलक्षणमाह। चालनमित्यादि। स्वरूपमपि कर्मेति विषयत्वादुदीर्यत इति वचनादेतानि चालनादीनि कर्माभिन्नलक्षणानि। चालनं वल
नकर्तृत्वं व्यूहनं पृथक्स्थितानामेकीकरणं प्राप्तिः सर्ववस्तुप्राप्तिः। प्राप्नोति वायुः सर्वं तु स्वत एव हरेरनुज्ञयात्मतः प्राप्तिरिति प्राकृतिर्वा
युं भूतपतिं प्रभुं प्रधानवायुरन्येषु नित्या विष्टो यतः स्वतः। तद्गुणाश्रेषु चोच्यंते नीचतानास्य तत्कृतेति वचनात्। द्रव्यशब्दयोः प्रणादिद्रव्यस
शब्दस्य वर्णात्मकस्य च नेतृत्वं देशांतरप्रापकत्वमर्थेंद्रियाणामात्मत्वं स्वामित्वं तत्रैव विनाभूतप्रकृतित्वं वा। कर्माभिलक्षणं स्वरूपलक्षणं
३९ स्पर्शएव तन्मात्रा गुणो यस्य सः स्पर्शतन्मात्रः तस्मात् वायो रूपं रूपतन्मात्राभूत् ततो रूपतन्मात्रायाः तेजः समुत्थितं रूपस्योपल

चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः॥ सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणं ३९ वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरिता
दभूत्॥ समुत्थितं ततस्तेजश्चक्षू रूपोपलंभनं ४० द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च॥ तेजस्त्वं तेजसः साध्वि रूप
मात्रस्य वृत्तयः॥ ४१॥ द्योतनं पचनं पानमदनं हिममर्दनं॥ तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ४२

लब्धं ज्ञानं यस्मात्तादृशं चक्षुरिंद्रियं चोत्पन्नमित्यर्थः ४० रूपतन्मात्रायालक्षणमाह। द्रव्याकृतित्वमिति। द्रव्याकृतित्वं यावद्द्रव्यव्यापित्वं गु
णता प्रकाशित्वं व्यक्तिसंस्थात्वं व्यक्तित्वेन स्थितिः। तेजस्त्वमुष्णत्वं। आलोको गुणा इत्येवं प्रकाशश्चापि कथ्यत इति। तेजस्त्वमथवैयत्वं
क्रौर्यमित्यपि चोच्यत इति वोक्तार्थाभिधानं। रूपमात्रस्य रूपतन्मात्राया वृत्तयः स्वभावलक्षणानि ४१ तेजसो लक्षणमाह। द्योतन
मिति। द्योतनं प्रकाशनं। द्युत् प्रकाशन इति धातुः। पचनं पाककरणं पानं रसादानं मदनं भक्षणं हिममर्दनं शीतनिवारकत्वं। शोष
णं शुष्कीकरणं क्षुत्तृडुद्भवः प्राणिनां क्षुत्तृड्जनकत्वं वृत्तयः स्वभावलक्षणानि ४२

क्रमशः शांतेजसो वाशिष्टेष्विदृष्टि। रूपतन्मात्रादिति। रूपमेव तन्मात्रायस्य तत्तद्रूपतन्मात्रं तस्मात्तेजसो रसमात्रं रसतन्मात्रामभूत् तस्मादम्भ
स्यगुणादम्भो भूत्वा यथा रसग्रहो भवति। जिकाजिह्वेंद्रियं वाभूत 43 रसगुणानलक्षणं वक्ति। कषाय इत्यादिना। भौतिकानां भूतकार्याणां प
दार्थानां विकारेणारस एकोरसः षडात्मना भिद्यते 44 उदकलक्षणं वक्ति। क्लेदनमित्यादिना। क्लेदनं आर्द्रीकरणं। पिंडनं पिंडीकरणं। तृप्ति
रत्नं बुद्धिजनकत्वं। प्राणनं चेष्टाहेतुत्वं। आप्यायनं सुखकरत्वं उंदनं बिंदुभावः। तापापनोदस्तापनिवारकत्वं। अस्मेभ्यो भूतेभ्यः कार्यं सुभू
यस्त्वमाधिक्यं। इमा अम्भसो वृत्तयः जलस्य स्वरूपलक्षणानि। उंदबिंदुभाव इति धातुः। उंदनं बिंदुभावः स्यात् स्पंदनं द्रवणं स्मृतमित्यभि

रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात्॥ रसमात्रमभूत्तस्मादम्भो जिह्वा रसग्रहः 43 कषायो मधुरस्तिक्तः कट्वम्ल इ
तिनैकधा॥ भौतिकानां विकारेण रस एको विभिद्यते 44 क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोंदनं॥ तापापनोदो भूयस्त्वमम्भ
सो वृत्तयस्त्विमाः 45 रसमात्राद्विकुर्वाणाद्दैवसोदैवचोदितात्॥ गंधमात्रमभूत्तस्मात् पृथ्वी घ्राणस्तु गंधगः 46 करंभ
पूतिसौरभ्यशांतोग्राम्लादिभिः पृथक्॥ द्रव्यावयववैषम्याद्गंध एको विभिद्यते 47

धानात्। पृथिवी तेजः परमाणुसंयोगादंतस्तद्भीभाव इति 45 अद्भ्यः पृथिव्युत्पत्तिं वक्ति। रसमात्रादिति। रस एव मात्रायस्य तत्तथा त
स्मादम्भसो गंधमात्रं गंधतन्मात्रामभूत्। तस्मादेषात्पृथिव्यभूत्। गंधं गमयति ज्ञापयतीति गंधगो घ्राणइंद्रियविशेषोप्यभूत् 46 गंधलक्ष
णानि भूतेकरंभेतिकरंभो न्यपार्थिवविषयः। पूतिः क्लिन्नकृतविषयः। शांतो मिश्रगंधः। उग्रं वचादिविषयः। आम्लः आरनालादिवि
षयः। आदिशब्देन कषायादिलक्षणो विवक्ष्यते। एकस्य गंधस्य नानाविधत्वे कयमित्यत उक्तं। द्रव्येति। द्रव्याणामवयवानामंशानां वैषम्या
त् विशेषलक्षणादेको गंधो नानाविधो भवतीत्यर्थः 47

पृथिवीलक्षणं वक्ति। भवनमित्यादिना। भवनमुत्पादकत्वं। ब्रह्मणः स्थानं ब्रह्मस्थानं तु पृथिवी शरीरे ब्रह्मदर्शनादिति वचनात् पार्थिवशरी
रेषु ब्रह्मणः सन्निधानात्। तत्रैव ब्रह्मदर्शनाच्च। यः पृथिव्यां तिष्ठन्नित्यादेश्च। धारणं मूर्तद्रव्याणामिति शेषः। सद्विशेषणं भूतत्रयमपेक्ष्य वि
शेषणव्यक्तत्वं। तदुक्तं। असदव्यक्तनामस्याद्व्यक्तं सदिति वेदाव्यत इति। सर्वसत्वगुणोद्भेदः सर्वेषां सत्वानां प्राणिनां शरीरे सर्वगुणानामुद्भे
दाभिव्यक्तिः सापि संसारावस्थायामपि ज्ञातव्या। शरीरं पार्थिवं ज्ञेयमिंद्रियाण्यौदकानि तु। तैजसः कोष्ठगो वह्निः छिद्रमाकाशसंभवं। प्राण

मू॰ भवनं ब्रह्मणः स्थानं धारणं सद्विशेषणं॥ सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं 48 नभोगुणविशेषोर्थो यस्य तच्छ्रोत्रमुच्यते॥
वायोर्गुणविशेषोर्थो यस्य तत्स्पर्शनं विदुः 49 तेजोगुणविशेषोर्थो यस्य तच्चक्षुरुच्यते॥ अम्भोगुणविशेषार्थो यस्य त
द्रसनं विदुः 50 भूमेर्गुणविशेषोर्थो यस्य स घ्राण उच्यते॥ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् 51

वायुमयः सर्वे प्रत्येकं पंचधा पुनरिति वचनात्। पृथिव्याः प्राधान्यादितरेषामल्पत्वाद्युक्तमुक्तं। पृथिव्याः वृत्तिलक्षणं स्वभावलक्ष
णं 48 श्रोत्रादीनां लक्षणं वक्ति। नभ इत्यादिना। यस्य नभसो गुणविशेषः शब्दोर्थो विषयः तच्छ्रोत्रमिंद्रियमित्यादि ज्ञातव्यं। नभो
गुणविशेषोत्थ इति पाठे यस्य विषयः शब्दो द्रव्यशब्द एवार्थ इति 49 50 शब्दादयश्चाकाशादीनां विशेषगुणात्वेनाव्यावर्तकध
र्मानव्यभिचारीणं इतियावे। शेषिकाणां प्रक्रिया तां विघटयितुमाह। परस्येति परस्य पूर्वस्य कारणस्याकाशादेर्धर्मः शब्दादिगु
णोपरस्मिन्पश्चात्तने कार्ये वाय्वादौ दृश्यते हि कुतः समन्वयात्संबंधात् 51

भा.त.
१६४

ततः किं तत्राह। अत इति। यत एवं गुणानां संबंधोऽस्त्यत आकाशादिसर्वभावानां विशेषगुणो भूमावेवोपलक्ष्यते इति सर्वसत्वगुणोद्देशस्तूक्तः सा
धु। वैशेषिककल्पनायाः स्वमनीषोन्यत्वादप्रमाणत्वमित्यतोऽह स्पतइति दृष्टेर्बलवत्प्रमाणत्वान्नद्विरोधोपि दुर्वारइति। महदाद्यभि
मानिदेवताः कृतिप्रसन्नश्रीनारायणाविष्टरूपं मितशक्तिभिर्मिलितवयवविनिर्मितापरमाणुभिर्ह्यणुकादिपक्रमेणएवंअवयवस्या
वयवीवजायतइति कल्पनापिनिर्मानोत्पमिप्रेत्याह। एतानीति। यदा एतानि महदादीनि सप्ततत्वानि भोगायतनं ब्रह्मांडं स्रष्टुं पुरुषं वि
राट्पुरुषशरीरं वस्रष्टुं नशेकुः। कुतः इस्मतउक्तमसंहत्येति। असंहत्याचेतनत्वे नस्वतः संयोजनशक्त्यभावेनविश्लिष्याखस्थितत्वादि

अतो विशेषो भावानां भूमावेवोपलक्ष्यते॥ एतान्यसंहत्य यदा महदादीनि सप्त वै ५२ नशेकुः पुरुषं स्रष्टुं भोगा
यतनमंजसा॥ कालकर्मगुणोपेतो जगदादिरुपाविशत् ५३ ततस्तेनानुविद्धेभ्यो युक्तेभ्योंडमचेतनं॥ उत्थितं पु
रुषो यस्मादुदतिष्ठदसौ विराट् ५४

राम
१६४

त्यर्थः। अत एवांडजेष्टमुक्तं। तदा कालकर्मगुणोपेतो जगदादिः श्रीनारायणो महदादीनुपाविशद्यथाकार्योत्पत्तिक्रमा शक्तिः स्यात्तथा स
न्निहितवानित्यर्थः ५३ तत्फलमाह। ततइति। तदनंतरं तेन हरिणानुविश्य अनुविद्धेभ्यः प्रेरितेभ्य स्तत्वेभ्यो चेतनमंडं ब्रह्मांडमुत्थितमु
त्पन्नं। अचेतनाद्युत स्वतः ब्रह्मा समजनि स्कुरं। अतो ब्रह्मांडमित्याहुर्विराट् ब्रह्माप्रकाशनादिति वाक्यमस्मिन्नर्थमानमिति भावेना
हं पुरुष इति। यस्मादंडादसौ विराट् विशेषेणप्रकाशमानः पुरुषः हिरण्यगर्भ उदतिष्ठत उत्पन्न इत्यन्वयः ५४

अस्यां डस्याष्टधिव्यांशानांभूयस्त्वात्रामांतरं वयुक्तमिति भावेनाह। एतदंडमिति। तोयादावरणाविशेषैर्विशेषितत्वाद्विशेषाभिधानं युक्तमिति भावेनाह।
क्रमवृद्धैरिति। क्रमवृद्धिमेव विशिनष्टि। दशोत्तरैरिति। ततो बहिर्गुणत्रयेण प्रधानेन मूलप्रकृत्या चावृतं। अतश्चतुर्दशभुवनलक्षणो विशेषणैर्विशिष्टत्वा
त विशेषास्व्यमित्याशयेनाह। यत्रेति। यत्र यस्मिन्नंडे लोकवितानः पातालादिलोकविस्तारो विशेषित इति शेषः। अयमपि कस्य न विशेषाख्यत्याहाह रू
पमिति। रूपं मूर्तिः प्रतिमा संनिधानविशिष्टत्वात्। ५५ इदानीं यस्मादुदतिष्ठदसावित्युक्तं विवृणोति। हिरण्मयादिति। प्रासादास्त्रस्तन इति वत् द्वितीया

एतदंडं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः॥ तोयादिभिः परिवृतं प्रधानेनावृतं बहिः॥ यत्र लोकवितानोऽयं रूपं भगवतो हरेः ५५ हिरण्म
यादंडकोशादुत्थाय सलिलेशयात्॥ तमाविश्य महादेवो बहुधा निर्बिभेद खं ५६ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत्॥
वाण्या वह्निरथो नासे प्राणतः प्राण एतयोः ५७ प्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः॥ तस्मात्सूर्यो न्यभिद्येतां कर्णौ श्रोत्रं
ततो दिशः ५८

खं२

र्थे पंचमीयं। महादेवो देवोत्तमो हरिः सलिलेशयं हिरण्मयांडकोशमुत्थायोत्थाप्य तदंतः प्रविश्य। स्वस्मादुत्पन्नस्य विराट्पुरुषस्यांडवत् स्थितं शरीरं
पुनः समाविश्य यथासन्निधानविशेषो भवति तथांतः स्थित्वा मुखविवरादिलक्षणं खमाकाशं निर्बिभेद अक्रमकरोदित्यन्वयः ५६ ब्रह्मशरीरस्य
मुखादिव्यक्तिप्रकारं वक्ति। निरभिद्यतेत्यादिना। अस्य ब्रह्मणः प्रथमं मुखं निरभिद्यत व्यक्तमभूत् ततो मुखाद्वाणी वागिंद्रियं तस्माद्वागिंद्रियात्तद
भिमानी वह्निः स्फुरितः एवमेवोत्तरत्रानुसंधेयं। नासे नासापुटे प्राणो नाम नासिक्यः अध्यात्माधिदैवत्वे देनएकस्य प्राणो वायुरिति नाम द्वयं ५७ दिश
: दिग्देवताः ५८

विराजः ब्रह्मणः ततो रोमादिभ्यः शिश्नं लिंगं तत उपस्थेंद्रियं॥ ५९॥ ततो रेतः तस्मादेतस्मात् गुदशब्देन गुदगोलकेंद्रियरूपविवाचकः। गुदात् पायुरिंद्रियं ततोऽपानः मृत्युर्मित्रतालक्षणः ६० स्वराड् इंद्रः ताभ्यां पादाभ्यां गतिर्गंतव्यमिंद्रियं ततं इंद्रियाद्धरिरित्यत्र इंद्रियान्तर्यामी इंद्रियाधिष्ठातृदेवतानामभिमानिनी तदंतर्यामी हरिश्च ब्रह्मरूपेण गुणजलवर्षिणां फलदानार्थत्वेन कृतसन्निधानविशेषाद्धरिरिति। यज्ञनामा तु देवो ज्ञेयो विज्ञेयः पाददेवता। तमाविष्टो हरिर्नित्यं तमाहुः पाददैवतमितिवचनात् ६१ शिरीवशरीरान्नाडीभ्यस्तिं वक्ति। नाड्यश्चेति। आहृतमुत्पन्नं ततो रुधिरात् ६२ तत उदरात् तयोः क्षुत्पिपासयोः। अथ उदरो

निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः॥ ततश्चौषधयः पश्चाच्छिश्नं निर्बिभिदे ततः ५९ रेतस्तस्मादापआसन्निरभिद्यत वै गुदं। गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ६० हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट्॥ पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ६१ नाड्योऽस्य निरभिद्यंत ताभ्यो लोहितमाहृतं॥ नद्यस्ततः समभवन्नुदरं निरभिद्यत ६२ क्षुत्पिपासे ततः स्यातां समुद्रस्तयोरभूत्॥ अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं ६३ मनसश्चंद्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ६४

उत्पन्नं तरं भिन्नं मक्के ६३ तस्माद्धृदयान्मनोभेदरूपा बुद्धिर्जाता तस्या बुद्धेर्गिरांपतिर्बृहस्पतिर्जात इत्यर्थः। ततो हृदयादेव मनोभेदरूपोऽहंकारोऽभि तदभिमानी रुद्रश्च। तत एतस्माद्धृदयान्मनोविशेषरूपं चित्तं ततश्चित्ताच्चैत्यश्चित्ताभिमानी विरिंचो रूपांतरेणासीत्। अत्र चित्ताभिमानित्वेन विष्णुरपि चैत्य इति ग्राह्यं। ब्रह्मांतर्यामित्वेनापि स्वेच्छया तदभिव्यक्तरूपांतरेणात्रत्वं च युक्तं। आम्नायिकत्वादुक्तं वा चैत्योऽपि भगवान् विष्णुरंतर्यामी चतुर्मुखात्। स्वेच्छया व्यक्तिमगमत्ततोऽसौ ब्रह्मणः स्मृत इति। इदं सर्वं तस्यापि तत्सृष्टस्य मुखं निरभिद्यतेत्याद्येतेरेयोपनिषत्कृतं ६४

ब्रह्मवायरेकत्वे नैकस्योन्नमत्वं कथनेऽन्यस्य तद्विनाशत्वमिति कृत्वा प्राणस्य सर्वचेतनोन्नमत्वं ज्ञापयितुमग्न्यादिदेवानां विवादे नंतन्निर्णयप्रकारं वक्ति। एतेह्रीति। अनेनाहमुत्थमस्मीत्यादिवाक्यार्थोऽपि विवक्षित इति ज्ञातव्यः। अस्य ब्रह्मशरीरस्योत्थापने खानि गोलकस्थानानि ६५ ६८ गत्यैवेत्येवकारेण विष्णोरुत्थापनाशक्तिर्न विधीयते किं तु ब्रह्मवायोर्बलज्ञापनार्थैवेति। यज्ञात्मनः स्वयं पादौ विशन्नोत्थापयामासेति हरिः शक्तोऽपि ब्रह्मवायोः बल

एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन्॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ६५ वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट्॥ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ६६ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट्॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट्॥ ६७॥ त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट्॥ रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ६८ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् हस्ताविंद्रो बलेनैव नोदतिष्ठत्तदा विराट् ६९ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट्॥ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ७० क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट्॥ हृदयं मनसा चंद्रो नोदतिष्ठत्तदा विराट् ७१ बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट्॥

तस्यैव जनार्दनः। तस्य उत्थापयामास ब्रह्मदेहं विशन्नभुरितिवचनात्। अनेन श्रियस्तदुन्नमत्वं तस्या हरेरनंतगुणोन्नमत्वं च नितं। अहं सुवेपितरमस्यमूर्द्धनित्यादेः ७० ७१ ब्रह्मा बृहस्पतिः। यस्मिन्ब्रह्माराजनि पूर्वण्येतीतिश्रुतेः। बृहस्पतिः पुरोगश्च ब्रह्मा च ब्रह्मणस्पतिरिति चाभिधाने ७२

नन्वेवं तर्हि सलिले पतितं ब्रह्मशरीरमुत्थापएकाभावात्क्लिन्नप्रायं भवेदित्याशंक्य वायुनासह यन्निर्गमात् शरीरमपतत् स एव क्षेत्रज्ञो ब्रह्मान्तर्यामी वायुब्र
ह्मभ्यां सह प्रवेशेन शरीरमुत्थापयदित्याह। चित्तेनेति। अंशेन स्वुभो ब्रह्मा तु अंशेन निरगात्तथा। स्वदेहाद्वायुसहितो विष्णुना च जगत्प्रभुः॥ तमुत्थाप
यितुं देवास्ताः कृते त्रीन्महाबलान्। नाशक्नुवन्नेकसंख्याततमेत्य विशस्तु यः। उदतिष्ठत्तदा स्वदेहस्तदा तेषां प्रभावतः॥ विशेषणाद्धरेरेव प्रभावेन क्रियः पते
ः। चित्ताभिमानी ब्रह्मैव क्षेत्रज्ञस्तु गतो हरिः॥ प्राणो वायुरिति ज्ञेयः तयोरीशो हरिस्त्वयमित्यनेनेक्षद्रोपद्रवशंकापरिहृतेति संतोषः ७२ नन्वत्र विलो:

चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ७३ यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः॥
प्रभवंति विना येन नोत्थापयितुमोजसा ७४ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्म
नि चिंतयेत् ७५ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये तत्त्वसमाम्नाये षड्विंशोऽध्यायः॥ ॥

सर्वोत्तमत्वेन सर्वशक्तिमत्त्वं सम्यक् न प्रतीतं बलादाकृष्य प्रवेश्यते इत्याशंक्य प्राणीति को प्राणस्यापि को अन्वयव्यतिरेकौ विविच्यावेवं निविशद्यं प्रसुप्त
मिति विद्धाति। यथेति। अंशेन प्रसुप्तं पुरुषं ब्रह्माणं प्राणेन्द्रियमनोधियः प्राणेन्द्रियाद्यभिमानिनो देवास्तत्तदिंद्रियार्थक्रियावन्तं विनौजसा येन क्षे
त्रज्ञेन विना उत्थापयितुं न प्रभवंतीत्यं यथार्थं सत्यं यस्मात्तस्मात्तं सर्वोत्तमं प्रत्यगात्मानं क्षेत्रज्ञं श्रीनारायणमस्मिन् शरीरे तर्यामित्वेन स्थितं विरक्त्या
ज्ञानयोगविपक्ककमविकृत्या भक्त्या च जातधिया निश्चयलक्षणबुद्ध्या जातेन ज्ञानेनात्मनि हृदये चिंतयेदित्यन्वयः ७५ इति भागवतटीकायां तृती
यस्कंधे षड्विंशोऽध्यायः॥ ॥

श्रोत्रप्रवक्तृभेदात् गुणेनिकायतात्पर्यातिशय जनन्यायतः क्रमेव प्रपंच्यते अस्मिन्नध्याये तत्र जीवपरमयोरेकशरीरस्थत्वाज्जीववत्तद्दुःखादिभोगः प
रस्य कथं न स्यादित्याशंक्य परिहरति। प्रकृतिस्थ इति। तं वा एतं पूर्णिमावन्तं पुरुष इतीति श्रुतेः। पूर्णत्वात्पुरुषो विष्णुः। प्रकृतिस्थः जडप्रकृतौ
तत्कार्यशरीरेषु च स्थितोऽपि प्राकृतैः प्रकृतिनिर्मितशरीरगतैः सुखदुःखादिगुणैर्जननादिभिर्नाज्यते न लिप्यते। तत्र हेतुमाह। अविकारादिति।
अविकारात्षड्भावविकाररहितत्वादकर्तृत्वात्परतंत्रकर्तृरहितत्वान्निर्गुणत्वात्सत्त्वादिगुणरहितत्वाच्च। जलार्कवत् यथा जलगतः सूर्यो जलदो

श्रीभगवानुवाच प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जला
र्कवत् १ स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते॥ अहंकारविमूढात्मा कर्तास्मीत्यभिमन्यते २

षैः कंपभेदादिभिर्न संबध्यते। तथा प्राकृतैरपीत्यर्थः १ ननु यदि परमस्य सुखदुःखादिसंबंधो नास्ति तर्हि सुखी दुःखी जातो मृतो दरिद्र इति व्यवह्रियमाणः
क इति तत्राह। स एष इति। यर्हि यदानंतरातीताध्याये प्रत्यगात्मानमात्मनि चिंतयेदिति प्रकृतः सोऽहमिति प्रत्यक्प्रसिद्धत्वादेष जीवः प्रकृतेर्गुणेषु सत्त्वा
दिगुणारचितशरीरेषु अभिविषज्जते शरीरैस्तदा तेषां त्रयाणां गुणानां सन्निधाने जाताहंकारममकाराभ्यां विमूढात्मा विस्मृतपरमात्मस्वरूपः सन् पर
×आसक्तो भवति×१ धीनकर्तृत्वमेतेरणास्वतः कर्तृत्वाभावेऽप्यहं कर्तास्मीत्यभिमन्यते २

भा॰ त॰
१६७

तत्फलमाह। तेनेति। तेना विद्यमानकर्तृत्वाभिमानेन मनसा शब्दादिषु क्षणभंगुरत्वेनानिर्वृतोऽलं बुद्धिगोचरानंदरहितो पि प्रासंगिकैर्विषयासक्तिजातैः कर्मदोषैः सदसन्मिश्रयोनिषु देवासुरमनुष्ययोनिषु जातः सुखदुःखलक्षणां संसारपदवीमभ्येतीत्यन्वयः ३ आभिमानिकसंसारानिवृत्तौ किं निमित्तमित्याशंक्य विषयाभिध्यानमित्याह। अर्थेहीति। स्वतश्चित्सुखरूपस्यात्मनो जीवस्यार्थे सुखी दुःखी अहमित्यादिव्यवहारे अविद्यमाने सत्तारहिते पि संसृतिर्न निवर्त्तते। ध्यायतो विषयानिमिति हेतुगर्भविशेषणं। ध्यायतो विषयानस्य संगस्त्वेषूपजायते इत्यादिशास्त्र

तेन संसारपदवीमवशोऽभ्येत्यनिर्वृतः॥ प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ एम
अर्थे ह्यविद्यमाने पि संसृतिर्न निवर्त्तते॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ४

द्धिं हि शब्दः आपादयति। विषयध्यानसंस्कारपरंपरया बीजांकुरन्यायेनान्योन्यकारणत्वस्यानादित्वेन भगवत्प्रसादमंतरेणानुच्छेद इत्यर्थः। एतमर्थं निदर्शयति। स्वप्न इति। यथा जाग्रदवस्थायां नानाविधार्थांश्च ध्यायतः स्वप्ने गर्दभाद्यारोहणादिना मरणाद्यनर्थागमो न निवर्तते। पुरुषं हन्ति हस्तं दंतं च पश्यति। स एनं हंसी स्नादेरनेनार्थक्रियाकारित्वात्स्वप्नस्य मिथ्यात्वमपि प्रत्युक्तं। यद्वार्थे वाचित प्रयोजने असत्यपीति ४

एम
१६७

अस्य संसारस्य निवृत्त्युपायमाह। प्रबुद्धेति। अज्ञानं सुप्तिशब्देनोक्तं स्वप्नश्चैव विपर्यय इति वचनात्। स्वप्नप्रसुप्तिभ्यां विपरीतज्ञानाज्ञानाभ्यां विषयाणां सेवा यस्मात्संसारस्ततो न निवर्त्तत इति शास्त्राद्युपदेशेन प्रबुद्ध्य प्रकृष्टबोधं प्राप्यात्मवैशसं दुर्विषयसेवयात्मनाशं संस्मरन्सोऽपुरुषो विषयाणां वैतथ्यं निःफलत्वं व्यभिचारमनित्यत्वं च ज्ञात्वा ध्यायतो विषयान् संयसंसारलक्षणं स्यात्ततन्न ध्यायेन्न संस्मरेदित्यर्थः। आत्मसंसृतेरपि पादेतस्या मिथ्यात्वमनेकांतत्वं च दृश्यमानं संस्मरन्नित्यर्थः ५ मनसि विजिते सर्वं विजितं स्यादिति कृत्वा मनोविजयप्रकारं च क्ति। अत इति। यत

प्रबुद्धः स्वप्रसुप्तिभ्यां नासौ ध्यायेद्यतो भयं॥ वैतथ्यं व्यभिचारं च संस्मरन्नात्मवैशसं ५ अतएव शनैश्चित्तं
प्रसक्तमसतां पथि॥ भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ६ यमादिभिर्योगपथैरभ्यसं च्छ्रद्धयान्वितः॥
मयि भावेन सत्येन मत्कथाश्रवणेन च ७

एवं मनसो विषयेषु संगः संसारहेतुरत एव विषयसंगिनामसतां पथि प्रसक्तं चित्तं शनैः हरेरतीव्रेण भक्तियोगेन विषयविरक्त्या च स्ववशं स्ववशं नयेदित्यन्वयः। असतामेमेगत्तानां विषयाणां पथीति वा ६ मनसः स्ववशानयनमेकं नालं किं तु यमादिसाधनसामग्र्यां सत्युत्पन्ने नापरोक्षज्ञानेन नानावृत्तिलक्षणा श्रीनारायणप्राप्तिः स्यादित्याह। यमादिभिरिति। अभ्यसन्नरुणव मितिशेषः। सत्येन भूतहितवचनेन ७

सर्वभूतसमत्वेन सर्वभूतांतर्यामिणो मम पूर्णत्वादिज्ञानेन तत्तद्वस्तुयोग्यतानुकूलदर्शनेन वा निर्वैरेण वेष्यवद्वेषराहित्येनाप्रसंगतः विषयिभि: सह संलापादिप्रसंगराहित्येन मौनेनोपासनेन स्वधर्मेण स्वविहितवर्णाश्रमधर्मानुष्ठानेन ७ यदृच्छयोपलब्धेन दैवतः प्राप्तधनेन संतुष्टो लंबुद्धिमान् शांतः मदेकनिष्ठः सतामापदमित्वा ज्ञात्वा त्रायत इति मित्रेसा बुद्धिर्यस्यास्ति समैत्रः मित्रादिदृष्ट्वा निष्ठ इति वा करुणा मित्रोदासीनेषु सत्सु कृपावान् आत्मवान् वशीकृतमनाः ८ पुत्राद्यनुबंधसहितेऽस्मिन् देहे सदाग्रहं मदीयं तदीयमिति भेदज्ञानमकुर्वन् प्रकृतेः पु

सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः॥ ब्रह्मचर्येण मौनेन स्वधर्मेण महीयसा ७ यदृच्छयोपपन्नेन संतुष्टो मितभुङ्मुनिः॥ विविक्तशरणः शांतो मैत्रः करुण आत्मवान् ८ सानुबंधे च देहेऽस्मिन्नकुर्वन्सदाग्रहं॥ ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ९ निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः॥ उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् १०

रुषस्य च दृष्टतत्त्वेन यथावत्ज्ञातस्वरूपेण ज्ञानेन ९ निवृत्तबुद्ध्यवस्थानः निवृत्तं बुद्धेरवीकृत्स्यानं निद्रादिलक्षणं यस्य स तथा। दूरीभूतमन्यदर्शनं शब्दादिविषयज्ञानं दुःशास्त्रं वा यस्य स तथा। चक्षुषार्कमिवात्मना बाह्यांतरकारणविनिर्मुक्तस्वरूपांतःकरणेनात्मानं। स्वस्वरूपमुपलभ्य दृष्ट्वा दृक्ज्ञानमात्मदिप्राणादिदेवतानां वस्वरूपं दृष्ट्वा तत्स सादात्मानं स्वांतर्यामिणं वा। एकामुख्या हगेव ज्ञानमेव यस्य स तथा १०

प्रारब्धकर्मक्षये सति मुक्तलिंगः समुत्सृष्टलिंगशरीरः देवयानेन विरिंचलोकमुपागम्य सति ब्रह्मप्रलये ग्रनिरुद्धद्वारेण विरिंचे विलीयते न सह सत्प्राणः आभासः प्रतिबिंबो यस्य तद् ब्रह्म प्रतिपद्यत इत्यन्वयः। शेषस्य प्रतिबिंबात्मकदेवाः शेषश्च ब्रह्मणः। स परब्रह्मणश्चैव ते स्वबिंबप्रदर्शकाः। ततः स्वबिंबद्वारेण परमात्मप्रदर्शनमित्यनेन सर्वोऽपि मुक्तार्थो ज्ञायते। सदाभासं विशिनष्टि। सतो बंधुमिति। पितृत्वादिना सतः प्राणस्य बंधुभूतं। सतो बंधुमसति निरविंदन्नित्यादेः। सर्वस्वरूपेषु स्वर्णगुणत्वादिना समं॥ चक्षुः सर्वज्ञं सर्वेषु मुक्तामुक्तप्रपंचेषु मणिषु सूत्रमिवाधारत्वेनानुस्यूतं प्रोतमद्वयमसमाधिकं ११ मुख्यप्राणादिप्रतिबिंबस्य बिंबभूतपरमात्मप्रदर्शक

मुक्तलिंगः सदाभासमसति प्रतिपद्यते॥ सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं ११ यथा जलस्थ आभासः स्थलस्थेनावदृश्यते। स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः १२

नां

त्वमुक्तं। तत्र प्रतिबिंबस्य प्रतिबिंबप्रदर्शकत्वप्रकारः कथमिति तत्राह। यथेति। गगनतलवर्तिनः सूर्यस्याभासो जले भवति। जलस्थस्यापि कदाचित्स्थले भित्त्यादौ भवत्यपि वा स्थितेर्यथा स्थलस्थेन भित्त्यादिगतेनाभासेन जलस्थ आभासो दृश्यते ज्ञायते यथा तथा वा जलस्थेन स्वाभासेन प्रतिबिंबेन दिवि स्थितः सूर्यः बिंबभूतोऽवगम्यते। एवं वा योजना भेदः। जलस्थ आभासः स्थलस्थेन जले प्रतिबिंबितं सुखं वातीरस्थितपुरुषमुखमेनादृशलक्षणमिति यथा ज्ञापयति। यथा जलस्थेन स्वाभासेन प्रतिबिंबेन दिवि स्थितः सूर्यो दृश्यते १२

जलेस्थितसूर्यमंडलस्थो त्रिस्थितं बिंबभूतं सवितृमंडलमवगमयति एवं तथा त्रिवृदहंकारिकं तेजसा मसाहंकाराभिमानी शिवः। स्वाभासैः स्व
प्रतिबिंबैः भूतेंद्रियमनोगुणैरभिमानिभिरिंद्रादिदेवैः लक्षितो भवत्यनेन शोभाख्येन प्रतिबिंबेन सन्ब्रह्मा लक्षितस्तेन सदाभासेन चतु
सुखाख्यप्रतिबिंबेन सत्यदृग्याथार्थज्ञानी श्रीनारायणो लक्षितो भवति १३ ननु स्वतः सत्यदृक्त्वे प्याध्यासेनास्य सत्यदृक्त्वमभ्युपेयं। अ
न्यथा स्वतो संगस्य संबंधाभावेन लक्षणानुपपत्तिस्तदनुपपत्त्या वुक्तार्थानुपपत्तिरिति तत्राह। भूतसूक्ष्मेति। इह संसारे भूतसूक्ष्मेंद्रिय

एवं त्रिवृदहंकारो भूतेंद्रियमनोगुणैः। स्वाभासैर्लक्षितोनेन सदाभासेन सत्यदृक् १३ भूतसूक्ष्मेंद्रियमनोबु
ध्यादिष्विह निद्रया। लीनेष्वसत्सु यस्तत्र विनिद्रो निरहंक्रियः १४ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा।
नष्टेहंकरणे द्रष्टा नष्टवित्त इवातुरः १५

मनोबुध्यादिषु लीनेषु निद्रया नष्टत्वेनासत्सु तेषु सत्सु यो विनिद्र उत्कृष्टलोचनः स सत्यदृक्। अनेन कदाप्यस्य ब्रह्मणो ज्ञानासंभवो
दर्शितः तदुक्तानुपपत्तिः नैवास्तीत्याह दिपदत्वेन धत्ते १४ परमात्मस्थितिं निरूप्य जीवस्थितिमाह। मन्यमान इति। योनष्टोपि मनोधर्मैरहं
करणे नष्टे सत्यात्मानं नष्टवन्मृषा मन्यमानः कदा तदा सुप्तावस्थायां स नष्टवित्त इवातुरो द्रष्टा जीव इत्यन्वयः। अनेन कदाप्यविनष्टद्रष्टृ
त्वं परस्य लक्षणमितरस्य तदन्यथेति वैलक्षण्यमुभयोरुक्तं १५

जीवपरयोर्वैलक्षण्यज्ञानस्य फलमाह। एवमिति। एवमुक्तप्रकारेण ब्रह्मादिजीवराशेः परस्य हरेः जीवान्प्रत्यवमृश्य युक्त्यालोच्य निश्चित्यासावु
पासको जीवः साहंकारस्य द्रव्यस्य योवस्थानं स्थितिहेतुरनुग्रहः स्वसत्ताप्रतीतिदानेनानुगृह्णातीति ज्ञातः। तमात्मानं विशुद्धं प्रतिपद्यते इत्यन्वयः। ए
कस्यैव परब्रह्मणोऽवस्थाद्वयमत्रोच्यते न तु वैलक्षण्यं निश्चायकप्रमाणाभावादिति ग्रमाशंका नित्यदृक्परमात्मा सो स्तु तद्वद्दानकिं दन। जाना
ति जीवः सज्ञेयः परमात्मा तदाश्रयः। इत्येतन्निश्चायकेन परिकर्तव्या १६ जीवपरयोर्भेदज्ञानमेव प्रकृतिबंधमोक्षकारणं कुतो देवहूती तद

एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते। साहंकारस्य द्रव्यस्य योवस्थानमनुग्रहः १६ देवहूतिरुवाच पुरुषं प्र
कृतिर्ब्रह्मन्न विमुंचति कर्हिचित्। अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो। १७ यथा गंधस्य भूमेश्च न भा
वो व्यतिरेकतः। अपां रसस्य च यथा तथा बुद्धेः परस्य च १८

र्थमाक्षिपति। पुरुषं प्रकृतिरित्यादिना। त्रिगुणात्मिका प्रकृतिः। पुरुषं पापपुण्यलक्षणानि कर्माणि संततं भजंतं स्वनुपरोसंसक्ता विति या तु।
कर्हिचित्कदापि न मुंचति। तत्र हेतुरन्योन्येति। अनयोः प्रकृतिपुरुषयोः नित्यत्वादविनाशित्वादन्योन्यापाश्रयत्वाच्च शरीरं विना पुरुषस्य
चेष्टाभावात्पुरुषमंतरेण चेतनत्वेन प्रकृतेरपीतरेतरोपकारित्वाच्च १७ तद्दृष्टांतमाह। यथेति। भूमेस्तद्गुणस्य गंधस्य च व्यतिरेकतो भावो
विनाभावो नास्ति। अपामित्यनेनैव व्याख्यातं। बुद्धेः प्रकृतेः परस्य जीवस्य तथा पृथग्भावो नास्ति १८

इतोपि पुरुषप्रकृतिविवेकोऽज्ञानघटत इत्याह। अकर्तुरिति। अकर्तुः स्वातंत्र्येण कर्तुमशक्तस्य पुरुषस्यायं संसारबंधो यदाश्रयः यः प्रकृतिगुणसमुदाय आश्रयो यस्य बंधस्य स यदाश्रयः। तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्यातः गुणेभ्यः कैवल्यं मोक्षलक्षणं कथं न कथमपीत्यन्वयः। प्रकृतिगुणानित्यत्वात्तत्कृतसंसारबंधानिवृत्तिरित्यर्थः १९ केवलज्ञानेन बंधो निवर्त्तत इति मया यत्प्रश्नो विपरिहृतोऽनवित्तित्राह। सकृदिति। भवतो वचनश्रवणात्तत्त्वावमर्शेन तत्त्वालो

अकर्तुः कर्मबंधोऽयं पुरुषस्य यदाश्रयः॥ गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं १९ क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणं॥ अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते २० श्रीभगवानुवाच अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना॥ तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं २१

चनेनोत्पन्नं प्रकृतिबंधभयं स कृचित् निवृत्तं निर्वृत्तमपि बाह्यांतःकरणस्यानिवृत्तत्वात्पुनः संशयरूपं भयं स्वयं प्रत्यवतिष्ठते प्रत्यवस्थानं करोति नापसरतीत्यर्थः २० प्रकृतावपसृतायां तद्गुणाः स्वत एवापसरंतीति भावेन तन्निवृत्तिर्ण्यसंक्षेपफलस्वधर्मादिनास्यादिति पूर्वोक्तमेव तत्परिहारत्वेनाह। अनिमित्तप्रवृत्तेनेति। अनिमित्तेन फलाभिसंधिरहितेनप्रवृत्तेन निरंतरमनुष्ठितेन तेनैवामलात्मनाति शुद्धस्वरूपेण चिरं कृत्वा वेदांतशास्त्रश्रवणेन संभृतया संपादितया २१

दृष्टतत्त्वेनापरोक्षीकृतविश्वादिदेवतास्वरूपेण योगेनात्मसमाधिना मनस एकाग्रतालक्षणेन ध्यानेन एवमुक्तसाधनसामग्रीसंपन्नज्ञानाग्निना हर्निशं दह्यमाना पुरुषस्य प्रकृतिः शनकैस्तिरोभवित्री नाशं गंत्री स्यादित्यन्वयः। योनिरुत्पत्तिस्थानं अग्नेर्यथारणिस्तिरो भवति यथारणिः आगच्छदीपिता यस्याः अरणेः शोषणं गंधरसयोः पृथिवीजलसमवेतत्त्वेन यावद्द्रव्यभावित्वमभवेदपि प्रकृतिपुरुषयोर्द्वयत्वेनतद्भावात्तत्संयोगमात्रसंबंधलक्षणस्य नाशलक्षणविभागोपपन्नेर्विषमत्वदुक्तो दृष्टांत इति द्योतनाया स्मरणि दृष्टांतकथनं। अन्यथा तदुपपादनं व्यर्थं स्यादिति २३ समूलतत्त्वसमुत्सृष्टायाः प्रकृतेर्भयं पुनरागतं क्षोरादिवन्नास्तीत्याह। भुक्त

ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा॥ तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना २२ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः २३ भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः॥ नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च २४ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थकृत्॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते २५ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसं॥ युंजतो नापकुरुत आत्मारामस्य कर्हिचित् २६

भोगेति। भुक्तभोगत्वं नित्यशो दृष्टदोषत्वं परित्यागे हेतुः ज्ञानानंदात्मके अच्छेद्याभेद्याक्लेद्यादिस्वरूपमाहात्म्ये स्थितस्यापरोक्षीकृतस्वबिंबभगवत्प्रसादादीश्वरस्य समर्थस्याशुभं दुःखलक्षणं संसारभयं न धत्ते इत्यन्वयः २४ एतदेव सदृष्टांतं विवृणोति। यथा ह्येति। अप्रतिबुद्धस्य निद्रितस्य प्रस्वापो निद्रा बह्वनर्थकृत् व्याघ्रादिनिमित्तभयजनकः स्यात् प्रतिबुद्धस्य निद्राया उत्थितस्य जाग्रतः २५ दृष्टांतार्थं दार्ष्टांतिके योजयति। एवमिति। विदितमपरोक्षितं नामादिमदंतदेवतानां तत्त्वं निजं रूपं येन स तथा तस्य २६

इदानीमनुष्ठीयमानश्रेयःसाधनफलं वक्ति। यदैवमिति। यदैवमुक्तप्रकारेण बहुजन्मना कालेनाध्यात्मरतः स्वात्मन्येवारमणमदंततत्त्वेषु रतस्सर्वत्र ज्ञातनित्यत्वेनासारत्वेनाब्रह्मभवनात्सत्यलोकपर्यंतं जातवैराग्यो भूत्वा मुनिर्निरंतरमनुपासनाशीलो मद्भक्तो भूयसा मत्प्रसादेन प्रतिबुद्धार्थो यः परोक्षीकृतनामादिमदंतविषयो ज्ञात एव स्वरूपज्ञानेन छिन्नसंशयः निश्चिततत्त्वः स्वसंस्थानं स्वरूपावस्थानं मदाश्रयं कैवल्याख्यं निःश्रेयसं पुरुषार्थमंजसा प्राप्नोति। तं विशिनष्टि। यद्गत्वेति। योगी लिंगशरीरविनिर्गमे यद्गत्वा न निवर्तेत तादृशं पुरुषार्थमित्यर्थः २९ अप्राप्यांतरांतरायानुपहतश्च

यदैवमध्यात्मरतः कालेन बहुजन्मना॥ सर्वत्र जातवैराग्य आब्रह्मभवनान्मुनिः २७ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा॥ निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं २८ प्राप्नोतीहांजसा धीरः स्वदृशा छिन्नसंशयः॥ यद्गत्वा न निवर्तेत योगी लिंगविनिर्गमे २९ यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग। अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः ३० इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेयेऽष्टाविंशोऽध्यायः॥ ॥२॥ ॥

किंच पुरुषार्थमाप्नोतीत्याह। यदा नेति। यदैवं साधनसिद्धस्य योगोपचितासु अष्टांगयोगप्राप्तासु मायासु अणिमादिविभूतिषु बुद्धिर्न विषज्जते। अनुभवानीति न विलंबते। अथ तदायत्नत्रयसंगतो मृत्योरंतकस्य हासः पुनरावृत्तिलक्षणो न स्यात्। आत्यंतिकी मे गतिर्मुक्तिलक्षणा स्यादित्यन्वयः। नान्यो हेतुर्यासां तास्तथा ता सामर्थ्यहमेवाश्रय इत्यर्थः। ताः स्वनेनाणिमाद्यैश्वर्यमनुभूय पश्चान्मुक्तावा प्रेमभगवद्भक्तिर्निःफलेति ध्वनितं॥ इति श्रीभागवतटीकायां तृतीयस्कंधेऽष्टाविंशोऽध्यायः॥ ॥

कपिलो भगवानेवं तावद्विरक्तस्य भगवद्भक्तिसंपन्नस्य परमात्मोपासनयानितज्ञानेन स्वरूपाविर्भावलक्षणं कैवल्यमुक्त्वा इदानीं तस्य ज्ञानस्य साधनभूताष्टांगयोगप्रकारं वक्ष्यामीति प्रतिजानीते। योगस्येत्यादिना। बीजं विष्णुस्तेन सहितस्य सबीजस्येत्यर्थः। योगस्य लक्षणं वक्ष्येऽस्मिन्नध्याये इत्यन्वयः। सबीजो वै सबीजो योगो निर्बीजस्त्वन्य ईश्वरः। बीजं विष्णुर्हि जगतां शाखा द्याश्चान्यदेवताः इति। सदिति ब्रह्मेति श्रुतेः सतो ब्रह्मणः पंथानं याति। तस्माच्चायोगस्य विष्णुविषयत्वं ज्ञायते १ योगस्य ज्ञानसाधनमेव तस्य किं साधनमिति तत्राह। स्वधर्माचरणमित्यारभ्य समाधानं तथात्मन इत्यंतेन ग्रंथेन। विधर्माच्च

श्रीभगवानुवाच योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे॥ मनो येनैव विधिना प्रसन्नं याति सत्पथं १ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनं॥ दैवल्लब्धेन संतोष आत्मविच्चरणार्चनं २ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा॥ मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ३

निवर्तनं धर्मवदवभासमानानां शास्त्रनिषिद्धानां पंचविधा धर्मादीनां त्यागः। संतोषोऽलंबुद्धिः। दैवं स्वादृष्टं प्रेरको भगवान्वा तदनुग्रहतः प्राप्तेनात्मविदां ब्रह्मज्ञानिनां श्रीपादार्चनं २ ग्राम्यधर्मो विषयसेवा ततो निवृत्तिः प्रवृत्तिधर्मत्यागो वा मोक्षधर्मरतिः निवृत्तधर्मसेवा। शश्वन्मितस्य सत्त्वस्य जनस्याशनस्यार्धमुदकस्य तृतीयं वायोः संचरणार्थं चतुर्थमवशेषयेदित्येवं परिमितस्य मेध्यस्य शास्त्रविहितान्नस्यादनं। विविक्तो हरिस्थलस्य क्षेत्रसेवनं ३

अहिंसा शास्त्रनिषिद्धहिंसावर्जनं सत्यं मिथ्यावादवर्जनं भूतहितकथनं वा अस्तेयं स्वाम्यननुज्ञातस्य तृणाग्रस्याप्यग्रहणं। यावता शरीरावस्थितिर्भवति तावत्परिमाणो योऽर्थो यावदर्थः। तस्य परिग्रहः स्वीकारो यावदर्थपरिग्रहः। अष्टांगब्रह्मचर्यं तपः उपवासादि तत्त्वपर्यालोचनं वा। शौचं बाह्याभ्यंतरशुद्धिः। स्वाध्यायो ब्रह्मयज्ञः पुरुषस्य श्रीनारायणस्य वैदिकतांत्रिकार्चनं ४ सदा पद्माद्यासनजयः। वैष्णवसिद्धांतावलंबनं स्थैर्यं। विपद्यपि

अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनं ४ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः॥
प्रत्याहारश्चेंद्रियाणां विषयान्मनसा हृदि ५ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं॥ वैकुंठलीलाभिध्यानं समाधानं तथात्मनः ६ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथं॥ बुध्या युंजीत शनकैर्जितप्राणो ह्यतंद्रितः ७

र्यत्ना। प्राणायामैः प्राणानां जयः श्रोत्रादींद्रियाणां शब्दादिविषयेभ्यो मनसा हृदि स्थितं हरिं प्रत्याहरणमानीय स्थापनं प्रत्याहारः स्वस्य विष्णोर्धिष्ण्यानां पद्मादिस्थानानामेकदेशे एकैकावयवे मनसा प्राणस्य प्रणवेन धारणं। वैकुंठस्य हरेर्लीलायाः सृष्ट्यादिरूपायाः अभिध्यानं निरंतरस्मरणं तथात्मनो मनसः समाधानमप्रयत्नेन हरौ स्थितिः। तदुक्तं। समाधिरप्रयत्नेन मनसः संस्थितिर्भवेदिति ६ स्वधर्मविरागादुक्तस्य प्रयोगप्रकारमाह। एतैरन्यैरिति। अ

सद्विषयसंगेन दुष्टमत एवासत्पथं दुर्मार्गवर्ति ७

मनो योगे इति कर्तव्यतामाह। शुचाविति त्रिभिः। योगमभ्यसेदित्यन्वयः ८ प्रतिकूलेन रेचकादिक्रमेण। ९॥ प्राणायामफलमाह। मन इति। विरजं रजोगुणरहितं। एतदेव सदृष्टांतमाह। वाय्वग्निभ्यामिति १० क्रममाह। प्राणायामैरिति। रागादिदोषान्। किल्बिषान् जन्मांतरसंचितपापानि दुर्जनसंसर्गाद्दुरितानि। अनीश्वरानैश्वर्यविरोधिनः प्रकृतेः सत्वादिगुणान्। मनसि विरजसि सति इति कर्तव्यतामाह। यदा मन इति। यदा मनो विरजं स्यात्तदा

शुचौ देशे प्रतिष्ठाप्य विजितासन आसनं॥ तस्मिन्स्वस्ति समासीन ऋजुकायः समभ्यसेत् ८ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः॥
प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलं ९ मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः॥ वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं १० प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान्॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ११ यदा मनः स्वं विरजं योगेन सुसमाहितं॥ काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः १२ प्रसन्नवदनांभोजं पद्मगर्भारुणेक्षणं॥ नीलोत्पलदलश्यामं शंखचक्रगदाधरं १३ लसत्पंकजकिंजल्कपीतकौशेयवाससं॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं १४

भगवतो हरेः काष्ठां पूर्णां मूर्तिं ध्यायेत्। नासाग्रे अवलोकनं निरीक्षणं यस्य स तथा १२ काष्ठोत्कर्षसीमा दिशि स्थितिरभिधानात् काष्ठाशब्दस्याने कार्थत्वादत्र विवक्षितः। करुणापांगश्च सर्वगुणोत्कृष्टं भगवद्रूपं विवक्षितमिति तत्र ध्येयस्वरूपं वक्ति। प्रसन्नवदनेति १३ लसतः पंकजस्य किंजल्कं सकेसरं तद्वत्पीतं कौशेयं वासो यस्य स तथा तं। श्रीवत्सो वक्षसि यस्य स तथा तं। भ्राजता कौस्तुभेनामुक्ता बद्धा कंधरा यस्य स तथा तं १४

मत्तैर्द्विरेफैः भृंगैराकुलया व्याप्तया परार्ध्यो न्यूनघ्यत्वेनश्रेष्ठानि। हारश्च वलयश्च किरीटं चांगदं च नूपुरं च परार्ध्या हारवलयकिरीटांगदनूपुराणि यस्य सतथा तं १५ कांचीगुणेनोल्लसंती श्रोणी यस्य सतथा तं। भक्तानां हृदयांभोजमेव विष्टरं यस्य सतथा तं १६ अपीच्यदर्शनं प्रशस्तो उशवर्षवत्तद्दृश्यमानं। स्वतः कैशोरे वयसि द्वादशवर्षलक्षणे संतं वर्त्तमानं १७ कीर्त्तन्यं कीर्त्तनीयं तीर्थं शुद्धं यशो यस्य सतथा तं। पुण्यश्लोका ब्रह्मादयः तेषां स्तुत्यादिना यशः करोतीति पुण्यश्लोकयशस्करस्तं। यावन्मनो न चलति सर्वांगध्यानशक्तं यथा तथा ध्यायेदित्य

मत्तद्विरेफाकुलया परीतं वनमालया। परार्ध्यहारवलयकिरीटांगदनूपुरं १५ कांचीगुणोल्लसच्छ्रोणिं हृदयांभोजविष्टरं। दर्शनीयतमं शांतं मनोनयननंदनं १६ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतं। संतं वयसि कैशोरे भक्तानुग्रहकातरं १७ कीर्त्तन्यतीर्थयशसं पुण्यश्लोकयशस्करं। ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः १८ स्थितं व्रजंतमासीनं शयानं वा गुहाशयं। प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा १९ तस्मिंल्लब्धपदं चित्तं सर्वावयवसंस्थितं। विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः २०

र्थः १८ हृदयगुहायां शेत इति गुहाशयं प्रेक्षणीयमीहितं चेष्टितं यस्य सतथा तं १९ एवं समग्रांगध्यानमुक्त्वा तदशक्तावेकैकांगध्यानप्रकारमाह। तस्मिन्निति। तस्मिन् रूपे समग्रांगे लब्धपदं प्राप्तास्पदं सर्वावयवसंस्थितं सर्वावयवव्याप्य स्थितं चित्तं विलोक्य भगवतः सर्वावयवसंस्मरणाशक्तावेकत्रांगे एकस्मिन्नवयवे पादमारभ्याननांगपर्यंते केवलं चित्तं संयुज्यादित्यन्वयः। सर्वं स्मर्तुमशक्तः सन्नेकांगं चिंतयेत्क्रमशश्चेति वचनात् २०

नन्वत्र स्थगस्थगवयवस्थितं चित्तमेकत्रैकत्र भावनायां संयुज्यात्। नन्वेकैकावयवध्यानं विधिः यत्तत्र शक्तस्येत्याशंक्यैकैकांगध्यानविधानादुत्कृष्टमुक्तमिति तत्प्रकारं वक्ति। संचिंतयेदित्यादिना। भक्तानामीप्सितदानसामर्थ्यमस्यास्तीत्यतः संचिंतनीयमिति भावेन तद्विशिनष्टि। वज्रेत्यादिना। उत्तुंगास्तुन्नता निरक्ता निखिलसंति नखास्तुत्तुंगरक्तविलसन्नखास्तानि तान्येव चक्रवालं चंद्रमंडलं तस्य ज्योत्स्ना भिराहतो निर्दलितो महतां योगिनां हृदयांधकारो ज्ञानाच्छादनत

संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं। उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारं २१ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्। ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं २२ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्या ऽखिलस्य सुरवंदितया विधातुः। ऊर्वोर्निधाय करपल्लवरोचिषा यत् संलालितं हृदि विभोरभवस्य कुर्यात्॥

नखोक्तं। नखानां चक्रवालमावलिः तस्य ज्योत्स्नाभिरिव निर्मलाभिर्दीप्तिभिः २१ यस्य चरणारविंदस्य शौचात्प्रक्षालनलक्षणात् निःसृता सरित्प्रवरा गंगा तस्या उदकेन तीर्थेन पावनेन मूर्ध्ना धिकृतेनाधिगतजटाबंधे धृतेन शिवो महादेवः शिवोऽतिशयितपुण्यभाजनीभूतोऽभूत्। ध्यातुः पुरुषस्य मनसि वर्त्तमानं यच्छमलं पापं तदेव शैलः पर्वतस्तस्य विदारणाय निसृष्टं क्षिप्तं वज्रमिव वज्रतुल्योपमा २२।२३॥

जघांतं तु वरणारविंदांतर्भुतं जानुनी ऊर्वोरंसभूतिरिति पाठेनोरू पाश्विमाह। ऊरू इति। हरेरूरू ध्यायेदित्यन्वयः। सुपर्णो गरुडस्तस्य भुजयोरध्युपरिस्कंधे। ओजसां बलानां निधी ओजोवष्टंभबलयो रित्यभिधानं। अतसिकाकुसुमं प्रफुल्लकलापकुसुमं तद्वदवभासो ययोस्तौ तथोक्तौ। अथ हरेर्नितंबं ध्यायेदित्यन्वयः। व्यालंबिं व्याप्य पदीनं त्वं वर्णेन पीतं च वरं श्रेष्ठं च यद्वासः तद्व्यालंबिपीतवरवासः तत्र वर्तमानो यः कांचीकलापः स प्रगुणितरसनानुकलापभूषणं तस्य परिरंभोस्यास्तीति तं तत्र वर्तमानं इत्यर्थः २४ हरेर्नाभिह्रदं ध्यायेदित्यन्वयः। निम्नत्वद्योतनाय लोकपद्मजन्महेतुत्वाच्च ह्रदमिति। चतु

२ नितंबबिंबं हृदि कुर्या
दित्यन्वयः २.

ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ॥ व्यालंबिपीतवरवाससि वर्तमानकां
चीकलापपरिरंभि नितंबबिंबं॥ २४॥ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं॥ व्यू
ढं हरिन्मणिवृषःस्तनयोरमुष्य ध्यायेद्द्वयं विततहारमयूखगौरं २५

र्दशभुवनानां कोशो गुहं भुवनकोशो ब्रह्मांडं तद्गुहतिग्रसतीति भुवनकोशगुहं। तच्चोदरं च उदरं तत्र स्थितं यद्वा भुवनकोशनिगरणगुहास्थानीयउ दरे निहितीति। यद्वा भुवनकोशगुहोदरे ब्रह्मांडगर्भोदके रत्वा स्थितं। यत्र यस्मिन्नाभिह्रदे आत्मयोनेश्चतुर्मुखस्य धिषणाधिष्ठ्यं वाखिललोकात्मकं वपुश्च आत्मयोनिधिषणाखिललोकपद्मं। हृदमुत्पन्नमित्यर्थः। हरिन्मणिवृषः हरिन्मणिरिंद्रनीलरत्नं तस्य प्रभां वृषः तस्य स्तनौ हरेस्तनयो र्द्वयं ध्यायेत्। विततस्य विस्तृतस्य हारस्य मयूखेन गौरमतिधवलं २५

राम
१७४

स्य हृदयं पुंसां मनोनयनानां निर्वृतिमानंदमाद्धानमुत्पादयन्महाविभूतेर्लक्ष्म्या अधिवासं निवासस्थानमृषभस्य हरेर्वक्षो मनसि कुर्यादित्यन्वयः। कौस्तु भमणेरधिकं भूषणमेवार्थः प्रयोजनं यस्य तथा तं कंठं च मनसि कुर्यात्। अखिललोकनमस्कृतत्वात् वृषभत्वमुक्तं २६ हरेर्बाहूंश्च दशशतारं च शंखं चसंचिंतयेदित्यन्वयः। मंदरगिरेः परिवर्तनेन परिभ्रमणेन निर्णिक्ताः शोधिता बाहुवलया अंगुदा दलयो येषां ते तथा तान्। अधिश्रिता लोकपालाः द्वारयोये श्रुतेन यथा नानूद दशशतं सहस्रं चाराणि दलानि यस्य तत्तथोक्तं। शत्रूणामसह्यं सोढमशक्यं तेजो वीर्यं यस्य तत्तथोक्तं तस्य हरेः करा एव सरोरुहा

वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनम
स्कृतस्य २६ बाहूंश्च मंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान्॥ संचिंतयेद्दशशतारमसह्यतेजः शंखं च त
त्करसरोरुहराजहंसं २७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन॥ मालां मधुव्रतवरूथगिरोपघु
ष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे २८

णि पद्मानि तेषु राजहंसमिव वर्तमानं २७ भगवतो दयितां कौमोदकीं गदामस्य हरेः कंठे मालाममलं च मणिं स्मरेतेत्यन्वयः। कथंभूतां गदां आ रातयो दैत्यास्त एव भटा योद्धारः तेषां शोणितं रुधिरमेव कर्दमं तेन दिग्धां रूषितां अमरातीनां भटानां वा। कथंभूतां मालां मधुव्रतानां नित्यसुखानां भृंगा णमिति तानां भक्तानां वरूथाः समूहाः तेषां स्तुतिलक्षणाया गिरा उपघुष्टां शब्दायमानां। कथंभूतं मणिं चैत्यस्य चित्ताभिमानिनश्चतुर्मुखस्य तत्त्वं स्वरू पं ब्रह्मा चित्ताभिमानेन चेत्यमिति नियमाद्धरिः। स च ब्रह्मा हरेः कंठे कौस्तुभत्वेन भासत इति वचनात् २८

भगवतो वदनारविंदं संचिंतयेदित्यन्वयः। किंविशिष्टस्य इह जगति सम्यक् भृत्येषु अनुकंपिता धीर्यस्य तया इव अभिभूत विग्रहतया गृहीता मूर्तिर्आकारविशेषो येन स तथा। वदनारविंदस्य चिंतनीयत्वे गुणानाह। यदिति। यद्वदनारविंदं विस्फुरती किंचित्सचलती मकरकुंडले विस्फुरन्मकरकुंडले तयोर्वल्गितेन नृत्तेन विद्योतिता अमलौ कपोलौ यस्मिंस्तत्तथा। उदारो निर्दुष्टो हासो यस्मिंस्तत्तथा २९ यच्छ्रीनिकेतनं परममंगलायतनं यच्च सौरभ्यलोलैरलिभिः परितः सेव्यमानं। यच्च स्वया स्वरूपभूतया भूत्या श्रिया सेवितं। मा ज्ञातं श्रीसुहरेरूपमिंदिरा तु तदाश्रयात् इति वचनात्

भृत्यानुकंपितधियेह गृहीतमूर्तेः संचिंतयेद्भगवतो वदनारविंदं॥ यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामल कपोलमुदारहासं २९ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टं॥ मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ३०

तत्पत्नीभूतया श्रीत्वं भगवदाश्रयादित्यतः स्वयेत्युक्तं। यच्च कुटिलावक्राः कुंतलाः ललाटरंगे नृत्यंतः केशविशेषास्तेषां वृंदेन समूहेन जुष्टं सेवितं। किंच अब्जनेत्रं पद्मदलसदृशनेत्रं ध्यायेदित्यन्वयः। कीदृशं मीनद्वयस्याश्रयं यामत्वे श्रुमध्यत्वत नूभयभागत्वेन तत्वादिलत्त्वंश्रियंकांतिविशेषमधिक्षिपत् धिक्कुर्वत्। किंच मनोमयं ध्यानसंकल्पनात्मकं। उल्लसंती भ्रूर्यस्य तत्तथोक्तं। अतंद्रितो निरालस्यः इत्यनेन ध्यानस्य निरंतरं कर्तव्यत्वं सूचयति ३०

हृदयगुहायां निहितस्य तस्य हरेरवलोकनं वितत भावनया पूर्णभक्त्या चिरं ध्यायेदित्यन्वयः। कटाक्षनिरीक्षणं विशिनष्टि। अधिकमिति। अधिकं कृपया नन्यसाध्यकार्यं साधनपटीयस्या करुणया अति घोरस्य तापत्रयस्याध्यात्मिकादिलक्षणस्य उपशमनाय विनाशाय नितरां सृष्टं निर्मितं किं विन्तस्निग्धेन स्मितेनानुगुणितं संगीकृतं। विपुलः पुष्टः प्रसादः प्रसन्नतायस्य सत्तथा तं ३१ हरेर्हासं मंदस्मितं च ध्यायेदित्यन्वयः। कीदृशमवनतस्याखिलस्य लोकस्य प्रपन्नस्य तीव्रास्तुल्वणाः शोकस्तापत्रयोद्भूतस्तन्निमित्तान्यश्रूणि यानि तेषां सागरः समुद्रस्तं विशोषणशोषयतीवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारमत्युदारं। किंच हे मुने अस्य हरेर्भ्रूमंडलं निजमायया यो मकरध्वजस्य कामस्य संमोहनाय रचितं

तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः॥ स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विततभावनया गुहायां ३१ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं॥ संमोहनाय रचितं निजमायया स्य भ्रूमंडलं मुनिकृते मकरध्वजस्य ३२ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति॥ ध्यायेत्स्वदेहकुहरे वसि तस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत् ३३

चिंतयेदित्यन्वयः ३२ एवमेकैकावयवध्यानानायासवितस्य समग्रावयवविशिष्टवपुर्ध्यानं निर्दिशति। ध्यानायनमिति। रहस्यकांते स्थितस्य स्वहृत्कुहरके निजहृदयगुहायामवसितस्य निश्चितावस्थानस्य विष्णोस्तत् ध्यानायनं एकैकावयवध्यानास्पदं वपुर्ध्यायेदित्यन्वयः। किंविशिष्टं बहुलया सांद्रयाधरोष्ठभासारुणायिता आरक्तवद्वर्तमानाश्च ते तन्वः सूक्ष्माग्राश्च ते द्विजादंताश्च कुंदकुड्मलानि तेषां पंक्तिर्यस्मिंस्तत्तथोक्तं। ध्यातुरितिकर्तव्यतामाह। भक्त्येति। आर्द्रया स्निग्धलक्षणया भक्त्यार्पितं स्थिरीकृतचित्तं स्वं ध्यायंस्तदेवदिदृक्षेत्तदङ्गमि छेत्तत्पृथक् दितरमुक्तिदातत्वेन न चिंतयेदित्यन्वयः ३३

एवंध्यानाभ्यासस्य तत्फलं वक्ति। एवंहराविति। एवमुक्तप्रकारेण हरौ भगवति प्रतिलब्धो भावो मनो यस्य स तथा। द्रवद्धृदयः तस्मिन्नेक स्मिन्नेवार्द्रीयमानहृदयः उद्गत्का रोमपुलकपमोदो रोमांच हर्षो यस्य स तथा। औत्कंठ्येन विरहेण तया बाष्पकलया अश्रुधारया मुहुरर्द्यमान आर्द्री क्रियमाणः पुमान्यच्चित्त बलिशं लक्ष्यप्रतिपायुक्तं चित्तबलिशमपि शनकैर्वियुंक्ते। चित्तपरिवर्यात्स्ववशत्वेन विशिष्टंयोजयति। अप्रयत्नेन ध्यानानंतरसमाधिं करोति ३४ आक्रांतं तत्कारणेन श्रीभगवदितस्यस्था त्यागेन निराधा सा समाधिः फलं अप्रयत्नेन यद्धरिध्यानं तत्फलं ब्रूते। मुक्ताश्रयमिति। यथार्चिर्दीपस्तैलवर्त्त्यभावे सहसा नश्यति। तथा यर्हि यदा स्वचित्तस्वरूपचित्तेजीवचैतन्ये तत्तं तन्मय मित्यर्थः। मनो निर्विषयं शब्दादिविषयेभ्यो निर्गत्य मुक्ताश्रयं नित्यमुक्तं भगवद्धिषयं भवति तदा निर्वाणमृच्छति स्वविदभिमाने न स्थूलसूक्ष्मशरीराभिमानं जहाति। अत्रास्यामवस्थायां स पुरुष उपासको जीवः आत्मानं परमात्मानमेकं सर्वत्र मम अवधानं स्वस्य

एवंहरौभगवतिप्रतिलब्धभावोभक्त्याद्रवद्धृदयउत्पुलकःप्रमोदात्॥ औत्कंठ्यबाष्पकलयामुहुरर्द्यमानस्तच्चापिचित्तबडिशंशनकैर्वियुंक्ते
३४ मुक्ताश्रयंयर्हिनिर्विषयंविरक्तंनिर्वाणमृच्छतिमनःसहसायथार्चिः॥ आत्मानमत्रपुरुषोऽव्यवधानमेकमन्वीक्षतेप्रतिनिवृत्तगुणप्रवाहः ३५

वनस्य च मायालक्षणा भित्तिरहितेनान्वीक्षते करतलामलकवदपरोक्षीकरोति। यद्विंबादि दृष्टव्यं सर्वतस्तं पश्यतीत्यर्थः। तौ परोक्षज्ञानं तत्फलमिति। प्रतिबंधक संसारसद्भावे कथं स्वविंबादिदर्शनमत आह। प्रतिनिवृत्तेति। प्रतिनिवृत्तो गुणप्रवाहः संसारधर्मो यस्मात्स तथोक्तः। यदा बाह्यमनो निर्वाणं विनाशमृच्छति। यथार्चिर्दीपज्वाला तैलाद्यभावे। तदा स्वचित्तं स्वरूपचैतन्ये तदा स्वरूपातः करणं निर्वाणं परमानंदमाप्नोति। यथा स्तिमिततैलपात्रे स्थितो मनुष्याद्यभावे दीपोज्वलनाख्यानंदमाप्नोति। ततः किमत आह। आत्मानमिति। अत्र प्रज्वलितदीपादर्पणतत्करणे विजृंभमाणे सलिलाद्यादिपदार्थमिव एकं प्रधानमव्यवधाने स्वरूपाद्याच्छादकमायाव्यवधानरहितमात्मनः स्वरूपं स्वस्य पिष्टतमं परमात्मानं वा तु सृष्ट्यादिलक्षणं वन्वयाईक्षते
इतिवायोजनाभेदः ३५

जीवन्मुक्तावस्थानमाह। सोपीति द्वाभ्यां। सजीवन्मुक्तो भगवंतमपरोक्षं पश्यन्नेतया मनसो निवृत्त्या बाह्यांतःकरणविनाशलक्षणया पुरायोज्ञानेनाहृतः पश्चाद्दृढज्ञानेन प्रकाशिततस्मिन्महिम्नि स्वरूपज्ञानानंदलक्षणेऽवसितोऽहं निर्दोषज्ञानानंदादिरूपो भगवदधीनोऽस्मीति निश्चितः स्वात्मन्स्वात्मनि दुःखयोर्दुःखी सुखी दुःखस्य सुखनाम्नः सुखस्य च हेतुत्वं न विधत्ते अभिमानेन न करोति। दुर्दुःखमिति वित्तेयं सुखं वत तयोर्यतः। परात्परो मोविश्वस्मात् दुःखदनामवानिति चवनात्सुखदुःखयोः कर्त्तरि बाह्यांतःकरणे असति नाशंगते। सति न तु मनसो निवृत्तेः सुखदुःखावपि संभवात् दुःखाभिमानाह भावविं

सोऽप्येतयाचरमयामनसोनिवृत्त्यातस्मिन्महिम्न्यवसितःसुखदुःखबाह्ये॥ हेतुत्वमप्यसतिकर्त्तरिदुःखयोर्नस्वात्मन्विधत्तउ
पलब्धपरात्मकाष्ठः ३६ देहंतुतंनचरमःस्थितमुत्थितंवासिद्धोविपश्यतियतोऽध्यगमत्स्वरूपं॥ दैवादुपेतमथदैववशादपे
तंवासोयथापरिकृतंमदिरामदांधः ३७

शेषवर्त्तनं कथमित्यत उक्तं चरमेति। चरमया संसारावसानजातया ३६ एवमपरोक्षज्ञानिनो देहपोषणादौ प्रयत्नोऽपि नास्ति। सच्चिदानंदात्मनाराधणसंदर्शनसुधासमुद्रमग्नत्वादित्याह। देहं त्विति। येन देहेन स्वयं सिद्धो भूत्वा सिद्धः तं चरमं देहं न पश्यति। मदीयोयमिति नाभिमन्यते किं तु कपालमुक्तनालिकेरफलवत् देहात्मनोर्विविक्तत्वात्तदहरिमेव पश्यति। अनेन यतोऽध्यात्मतत्स्वरूपमिति निवृत्तं। अनभिमानप्रकारमाह। स्थितमिति। स्वप्रेरणालक्षणगुरुत्वात्स्थितं तदभावादुत्थितं पतितमिति तत्रोदाहरणमाह। दैवादिति। यथा मदिरापानेनोत्पन्नमदेनांधः पुमान् दैवादुपेतं दैववशादपेतं परिकृतं परि
हितं वासो न जानातीत्यर्थः ३७

एवंविधस्य ज्ञानिनो देहस्य ज्ञानोदयसमय एव पतनं युक्तं किं विलंबेन प्रतीक्षत इति संशये प्रारब्धकर्मक्षयपर्यंतं देहपातसमय इत्याशयेनाह देहोपीति। यावत्स्वारंभकं कर्म तावद्देहोपि सासुः सेंद्रियः प्रतीक्षते तस्मिन्स्वारंभके क्षीणे त्वधिरूढसमाधियोगः ज्ञातसमाधियोगफलः सप्रपंचमिंद्रियादिप्रपंचसहितं तं देहं पुनर्न भजते तद्दूषणादेन प्रयतते इत्यर्थः। कथमिव प्रतिबुद्धवस्तुः यथा स्वप्नादुत्थितः स्वाप्नं स्वप्नदृष्टं देहं पुनर्न भजते तथेति ३८ देह एव सर्वेषामहं गच्छामीति तिष्ठामीत्यात्मत्वेनाभिमतो यतस्तस्मात्तद्भजनं मरण एव भवतीति येव देहात्ममतनिरासायाह। यथेति। यथा पुत्रादेरात्मत्वेनाभिमतान्मर्त्यो मरणशीलो दे-

देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः॥ ते सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तु ३८ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते॥ अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ३९ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात्। अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ४० भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात्॥ आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ४१

हः पृथक्प्रतीयते तथा पुरुषो जीवश्चात्मत्वेनाभिमताद्देहादेर्भिन्न इत्यन्वयः। अपिपदेन देहात्मवादस्य निंदितत्वं सूचयति। रेतो धातुर्व रक्तादिके त्यादिवाक्यात् ३९ इदानीं जीवपरमात्मनोरपि भेद एवेत्याह। यथोल्मुकादिति। यथात्मत्वेनाभिमतादुल्मुकादेः तद्दाहकोग्निः पृथक् ततः ४० तथा भूतेंद्रियांतःकरणात् पंचभूतदशेंद्रियमनोभ्यः प्रधानात्प्रकृतेर्जीवसंज्ञितात्संसारिणश्च तथा द्रष्टा सर्वसाक्षी ब्रह्मसंज्ञित आत्मा परमात्मा भगवान्पृथगेवेत्यन्वयः ४१

भिन्नेषु जीवेषु स्थितस्य परमात्मनस्तदुपाख्यप्रकारं कथयति सर्वभूतेष्विति। सर्वभूतेष्वंतर्यामित्वेनात्मानं हरिमीक्षेत सर्वभूतान्यात्मनि हरावाधारत्वेनेक्षेत न केवलमनन्यभावेन सर्वांतर्यामिरूपाणामभेदेनेक्षेत। अभेदेनेत्यस्य फलं किं विहायानन्यभावेनेति वचनमनर्थहेतुत्वात् रूपाणामन्यान्यभावना सर्वथा न कार्येति द्योतनाय। किंवा भूतेष्विव तदात्मतां तस्य हरेः गदादानादिकर्तृतां वर्ण्यकेत। अनेनानुग्राह्यानुग्राहकत्वद्योतनेन जीवपरमात्मनोर्भेदः पारमार्थिक इत्युक्तं

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ ईक्षेतानन्यभावेन भूतेष्विव तदात्मतां॥ ४२॥ स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते॥ योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३

भवति। आदानकर्तृत्वं च भूतविषयेन स्वविषये नित्यत्वमत्वात् ४२ अधिष्ठानवैलक्षण्यादधिष्ठातृरूपाणां वैलक्षण्यं न शंकनीयमितीममर्थं सदृष्टांतं समर्थयते स्वयोनिष्विति। यथैकं ज्योतिरग्न्याख्यं स्वयोनिषु कारणेषु काष्ठेषु योनीनां दारूणां गुणवैषम्यात् आर्द्रशुष्कत्वादिवैलक्षण्यान्नानाविलक्षणमिति प्रतीयते। तथा प्रकृतौ प्रकृतिकार्ये जगति स्थित आत्मा हरिर्विलक्षण इव प्रतीयते। क्वचिद्दृक्सामर्थ्याद्दृश्यक्रिमात्र क्वाप्यल्पसामर्थ्याभिव्यक्तिमानित्यादिरूपेण ४३

मथितार्थमाह। तस्मादिति। यस्मात्सर्वस्माद्न्यः श्रीनारायणस्तस्मात्त्वां स्वाधीनां जडप्रकृतिं देवीं कार्यरूपेण द्योतमानां तदभिमानिनीं देवीं वित्प्रकृतिं वसदसदात्मिकां कार्यकारणव्यापिनीं दुर्विभाव्यां ब्रह्मादिभिरपि निरूपयितुमशक्यां पराभाव्यातिक्रम्य तदुत्तमत्वेनैव स्थितत्वान्निरस्तसाम्यातिशयेन सर्वदोषवर्जितेन सर्वगुणपूर्णेन त्रिकालेष्वेकप्रकारेण स्वरूपेणावतिष्ठतइत्यन्वयः। तदुक्तं। सर्वभूतस्थमीशं जेतारं प्रकृतेरपि। अविशेषमदेवैकं वितथ न्नविश्रुयतइति ४४ सिंहावलोकनन्यायेनोपासकस्यैश्वभावांतरं वक्ति। अन्वयेति। अन्यदेशेऽन्यरहितदेशोऽन्यकालेऽन्यरहितकाले वसत्यलक्षणा

तस्मादिमां स्वां प्रकृतिं देवीं सदसदात्मिकां। दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ४४ अन्वयव्यतिरेकाख्यसाह्याल्मा व्यभिचारिणः। वितथं व्यभिचारं वनिद्रांतेऽस्यानुचिंतयेत् ४५ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलेयेसाधनेएकोनत्रिंशोऽध्यायः॥ ॥ ३१॥ ॥

दन्वयव्यतिरेकाख्यिदोयश्चसाक्षादीक्षितइतिसाक्षी। नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइतिश्रुतेरात्मा। यद्वाऽन्नोऽतियदादन्नउत्पादेः सर्वव्यापीयस्मात्तेतियल्लक्षणात्लक्षणव्यभिचारिणः अनित्यस्यास्यप्रपंचस्यवैतिथ्यंनिःप्रयोजकत्वं व्यभिचारमनित्यं वनिद्रांते ब्राह्मेमुहूर्तउत्थायचिंतयेदेतदस्मिन्नादजनकमितिशेषः इत्यर्थः ४५ इतिश्रीभागवतटीकायांतृतीयस्कंधेएकोनत्रिंशोऽध्यायः॥ ॥

एवं तावत् ज्ञानात्मो ज्ञोऽज्ञानं वाष्टांगयोगेन प्रवितयाभगवदुपासनया जायतइत्यभिहितं अधुना भक्तियोगस्वतरं तमपमभिधीयते। अभिन्नध्यायोतत्रसंजघितुं सामान्यतो ज्ञातमपि विविच्य ज्ञातुं महदादिलक्षणं पृष्ठति देवहूतिः। लक्षणमित्यादिना। येन लक्षणेनामी धाममहदादीनां पारमार्थिकं स्वरूपं लक्ष्यते ज्ञायते १ वक्तव्यार्थनिपममाह। यथासांख्येष्विति। यथा सांख्ये शूक्तं तथा कथितं महदादिलक्षणं ज्ञानेपुरुषार्थो योगिस्यादितिशेषः। अन्यशास्त्रोक्तं किंनस्यादित्यत्राह। यन्मूलमिति। यत्सांख्यशास्त्रमूलं तत्तत्त्वंग प्रचक्षते प्राज्ञा इतिशेषः। तल्लक्षणं ममब्रूहीत्यन्वयः॥ यद्वा। यथायथावत्सांख्ये शूक्तं तथा

देवहूतिरुवाच॥ ॥लक्षणं महदादीनां प्रकृतेः पुरुषस्य च॥ स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकं १ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो २ विरागो येन पुरुषो भगवन्सर्वतो भवेत्॥ आचक्ष्व जीवलोकस्य विविधा: कर्मसंसृतीः ३

कथितं मे ब्रूहीत्यन्वयः। सांख्यमूलत्वात्तल्लक्षणस्येत्यर्थइति। उक्तमपीममर्थं विस्तरेण ब्रूहीत्याह। भक्तियोगस्येति। मार्गं प्रकारं। २। न केवलं भक्तियोगमार्गेनालं वैराग्याभावे तस्य चं वलत्वसंभवादतो विरक्तिमंतमाद्यमतस्तत्प्रकारोऽपि वक्तव्यइत्याह। ३। विरागइति। पुरुषः सर्वतो विरागो विगतरागो भवेदितियेनातो जीवलोकस्य गर्भवासादिलक्षणा विविधाः संसृतीर्ममाचक्ष्वेत्यन्वयः। यद्वा येन संसृतीनां ज्ञानेन विरागो भवेत् ता हकु ज्ञानोत्पत्तिमाचक्ष्वेति ३

कालस्वरूपज्ञानमपि पुरुषार्थोपयोगीति तद्विषयप्रश्नं करोति। कालस्येति। जनायद्धेतोर्यस्य कालनाम्नः भयनिमित्तात् कुशलं कुर्वन्ति परेषां उत्तमानां महदादीनां परस्य तस्य तेतव ईश्वरस्वरूपस्य सर्वमूर्तेः कालस्य स्वरूपमात्मस्वरूपं च वक्तुं तश्री त्वारिदं बोद्धुमशक्यं तथापि त्वत्प्रसादाच्छक्ष्यामि त्यामन्त्रयामि। बत तन्मन्त्रे णाद्भुतइति यावदत्र ४ कथिदेवादिद्रष्टृकं प्रत्ययं प्रश्नः किं न स्यात् किमिति मां प्रती त्याशंक्य तस्यता दृशप्रश्न प्रवचनप्रवृत्त्यभावादिहलोके नवज्ञानप्रवर्तनायावतीर्णत्वात्त्वमेव समर्थ इति भावेनाह। लोकस्येति। लुकुप्रकाशन इति धातोः प्रकाशात्मनो लोकस्य परमात्मज्ञानप्राप्तियोग्यस्य जनस्य संसारानुबुद्धेरित्यर्थः। हितायथोग भास्करः ज्ञानयोगादित्यस्त्वमाविर्बभूविथ। किल लोकवेदादिवार्ताज्ञानस्येदृक् साम

कालस्येश्वररूपस्य परेषां च परस्य च॥ स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं जनाः ४ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये॥ श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः ५ मैत्रेय उवाच इति मातुर्वचः श्लक्ष्णं प्रतिनन्द्य महामुनिः॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ६

र्थ्याभावादिदं संभावितं वा वार्ताः संभावयोः किलेति वा अवतारसाफल्यमेवोपपादयति। अवस्तुषु इत्यादिना। प्रत्यक्षतोदृश्यमानत्वाच्चक्षुर्हीनत्वं वचनं त्याहृतमिवेत्यत उक्तं। चिरं प्रसुप्तस्येति। अनाश्रये अपारे तमसि विद्यालक्षणे अनादित एव प्रसुप्तस्य शयानस्यातस्तत्फलमाह। मिथ्याभिमतेरिति। बोधकाभावादसथाज्ञानिनो देहादिष्वभिमानित्वादेतत्फलमाह। श्रान्तस्येति। कर्मसु पुण्यपापलक्षणेष्वनुविद्धयानुरक्तया धिया श्रान्तस्यानवस्थितेरिति ५ मातुर्वचः श्रुत्वा कपिलभगवतां किमुदाहृतप्रश्नं तत्र उत्तरं वोद्यं परिहरति मैत्रेय इत्याह॥ मैत्रेय इति। श्लक्ष्णं तावितिधातोः करुणामर्दितोगतः। अनेनकरुणैव वक्तृत्वे कारणमित्यसूचि ६

पुरुषार्थसाधनेषु भक्तियोगस्य प्राधान्यात्तत्र प्रथमतस्तत्प्रकारान्निरूपयति। भक्तियोग इति। भामिनि सौन्दर्यगुणप्रशंसया मन्त्रणं। शास्त्रमार्गैर्भाव्यते निरूप्यते। बाहुविध्येनिमित्तमाह। स्वभावेति। तामसादिस्वभावादिरागाधिकसत्वादिगुणभेदेन भावो भक्तिर्विभिद्यते। तामसादिभेदेन नानाभवतीत्यर्थः ७ बहुविधत्वं दर्शयति। अभिसंधायेति। यो हिंसां परोपद्रवं दम्भं धर्मध्वजवृत्तिं मात्सर्यं वाभिसंधाय मनसि कृत्वा हरिभक्तेषु संरंभी सदाभिगूढद्वेषः सगुणावाक्यायथार्थदर्शी सभिन्नदृक् पृथक्स्वरूपयथार्थदर्शी मयि भावं कुर्यात् स तामसभक्त उच्यत इत्यन्वयः ८ शब्दादिविषयान्निर्दिश्य प्रयशः कृत्वा मराद्यैश्वर्यं वा मनसाभिसंधाय संकल्प्यार्चादौ

श्रीभगवानुवाच॥ ॥भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते॥ स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ७ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा॥ संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः ८ विषयानभिसंधाय यश ऐश्वर्यमेव वा॥ अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ९ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं॥ यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः १०

प्रतिमादौ मामर्चयेत् स पृथग्भावः तद्रूपाणां भेददर्शी अर्चादिस्थितानां तेषां रूपाणां भेदं पश्यन्नाम्ना राजसो भक्तः ९ यः कर्मनिर्हारं पापक्षयमुद्दिश्य मां पूजेत् परस्मिन् सर्वोत्तमे मयि तदर्पणं कर्मफलानां वा उद्दिश्य यजेत्। यष्टव्यं विहितत्वात् ममेदं कर्तव्यमिति वा मां यजेत् पृथग्भावः तद्रूपाणां भेददर्शी स सात्विको भक्तः। राजससात्विकयोः भेदे पृथक्पृथग्भावनिमित्तं नत्वर्चादावर्चनं। अन्यस्य विहितत्वात् तत्तस्य गुणहेतुत्वात् तदुक्तं। अतो ह्यर्चादेरर्चा यामन्यथा दोषवान् भवेत्। तस्मादर्चयन् सगुणवानन्यथा दोषवान्नत्विति १०

निर्गुणभक्तिलक्षणं वक्ति। मद्गुणेति। यथाम्बुधौ गंगाम्भसो गतिरविच्छिन्ना तथा मद्गुणश्रवणमात्रेण यस्य सर्वगुणाश्रये सर्वगुणानामाश्रयो निषेवणं यस्मिंस्तथा न्सर्वगुणमूर्त्तिरित्यर्थः। तस्मिन्मयि मनोगतिरविच्छिन्ना निरंतरा ११ तेन क्रियमाणस्य निर्गुणस्य भक्तियोगस्य लक्षणमुदाहृतं तद्धीत्यन्वयः। आत्यंतिकभक्तिलक्षणं ब्रूते। अहैतुकीति १२ सार्ष्टिः समानैश्वर्यं १३ तद्भक्तिफलमाह। येनेति। येनात्यंतिकभक्तियोगेन त्रिगुणान्लिंगशरीरेंद्रियाणि। अतिव्रज्यातिक्रम्य सत्पञ्येत्यर्थः मद्भावाय विदानंदरेहेन मयि सन्ना ये ओत्रम स्थित्यै उपपद्यते योग्यो भवतीत्यर्थः १४ एतादृक्भक्त्युत्पत्तौ किं साधनमाह। निषेवितेनेति। नि

मद्गुणश्रुतमात्रेण मयि सर्वगुहाश्रये॥ मनोगतिरविच्छिन्ना यथा गंगाम्भसोम्बुधौ ११ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे १२ सालोक्य सार्ष्टि सामीप्य सारूप्यैकत्वमप्युत॥ दीयमानं न गृह्णंति विना मत्सेवनं जनाः १३ स एव भक्तियोगाख्य आत्यंतिक उदाहृतः॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते १४ निषेवितेनानिमित्तेन स्वधर्मेण महीयसा॥ क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः १५ मद्धिष्ण्य दर्शन स्पर्श पूजा स्तुत्यभिवंदनैः॥ भूतेषु मद्भावनया सत्वेनासंगमेन च १६ महतां बहुमानेन दीनानामनुकंपया॥ मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च १७

षवितेनानिमित्तेन निःकामेन नितरां सेवितेन अनिमित्तमिति पाठे यथा फलाभिसंधिरहितो भवति तथा निषेवितेनेत्यर्थः। अष्टवर्षं ब्राह्मणमुपनीयीत इत्यादि वेदविहितेन स्वधर्मेण क्रियायोगेन भगवत्पूजालक्षणयोगेन कर्मयोगेन नातिहिंस्रेण प्राणपुपद्रवरहितेन १५ मद्धिष्ण्यानां केशवादि प्रतिमानां दर्शनादिभिर्भूतेषु जीवेष्वंतर्यामित्वेन मद्भावनया मम स्मरणलक्षणोपासनया सत्वेन सत्त्वहितेन च वसात्रसंगमेन दुर्जनसंगराहित्येन १६ महतां स्वोत्तमानां बहुमानेनार्चनेन हीनानां स्वाधमानां अनुकंपया तुल्येषु स्वसमेषु मैत्र्या मित्रभावेन ज्ञात्वो ऽपदु – द्वाणभावेनेत्यर्थः १७

आध्यात्मिकानुश्रवणाद्वेदांतशास्त्रश्रवणात्। आर्जवेनावककबुद्धित्वेन आर्याणां पंडितानां संगेन निरहंक्रियया देहादिष्वहंममतावर्जनेन १८ मद्धर्मणः ऊर्ध्वपुंड्रधारणादिना स्वधर्माद्यनुष्ठानफलमाह। यर्हीति। पुरुषस्योपासकस्य यर्हि यदा कथितैरेतैः धर्मादिभिरनुष्ठितैरेतैः आशयः पक्करागादितः शुद्धः स्यात्तदांजसा कालक्षेपमंतरेण श्रुतमात्रगुणं केवलं गुणा एव श्रुता न दोषा यस्य तं स श्रुतमात्रगुणः तं मंजसा तत्त्वे मामभ्येतीत्यन्वयः। गुणाः श्रुताः सुविरुद्धाश्च देव इत्यादिवाक्यं हि शब्दग्रहीतं १९ परिशुद्धाशयस्य हरौ मनः प्रसादप्रकारं वक्ति। यथेति। यथाश्रयात्पुष्पादागत्य वातरथः वात एव रथो यस्य स तथा गंधो घ्राण

आध्यात्मिकानुश्रवणान्नामसंकीर्त्तनाच्च मे॥ आर्जवेनार्यसंगेन निरहंक्रियया तथा १८ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः॥ पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां १९ यथा वातरथो घ्राणमावृंक्ते गंध आश्रयात्॥ एवं योगरतं चेत आत्मानमविकारि यत् २० अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा॥ तमवज्ञाय मां मर्त्यः कुरुतेर्चाविडंबनं २१

मावृङ्क्ते आवृणोति वशीकरोति। एवमुक्तसाधनयोगेन हरौ रतं यत् चेतः अविकारि विषयविकाररहितं तच्चेत आत्मानं हरिं प्रसादाभिमुखं करोतीत्यन्वयः। अनेन निर्गुणभक्तियोगवानात्यंतिकभक्तियोगवान्भूत्वा परमात्मापरोक्षवान्भवतीत्युक्तं। २०॥ एवंविधैर्योगिभिः कुत्र ध्येय इति तत्राह। अहं सर्वेष्विति। भूतानां जीवानामादानादिकर्तृत्वात् भूतात्मा अंतर्यामित्वेन ध्येय इति भावः। तामसराजसभक्तयोरधमत्वकारणमेकोनाह। तमिति। सर्वेषु भूतेषु चित्यरतस्तिष्ठन्वर्त्तते योऽहं सर्वभूतेष्ववस्थितस्तं मामवज्ञाय मर्त्यस्तामसो राजसश्चार्चायामर्चया विडंबनं कुरुते इति यदतस्तामसो राजसश्चाधम इत्यर्थः २१

एतदेवविवृणोति। योमामिति। भस्मनीत्युक्त्यातामसात्किंचिदुत्तमत्वमववोद्धव्यं। भेदाहत्याफलसंभवात् २२ तामसस्यनकिंचित्फलमित्याह। द्विषतइति। परकायेमांद्विषतइत्यस्यविवरणंभिन्नदर्शिनइति। शांतिर्नाममनिष्ठाभूतेषुवेरमेवेषुबद्धवैरस्य २३ मत्प्रीत्यभावादर्चादिविडंबनंतस्यष्टमाह। अहमिति। भूतग्रामेभूतसमूहेस्थितंमामवमंतुंशीलमस्यास्तीतिभूतग्रामावमानीतस्य २४ नह्यर्चादिपूजाविधायकशास्त्रमनर्थमितितत्राह। अर्चादाविति। अर्चादिशब्दात्स्थंडिलस्वकर्मकृत्विहितंकुर्वंनिषिद्धंपरित्यजन्स्वहृदिस्थितंदेवदन्नादिसर्वभूतेष्ववहितंमामभेदतोनवेद सर्वभूतांतर्यामिरूपेणभेददर्शनस्यानर्थफलत्वइतिच २५। अंतर्यामिरूपाणिभिन्नानिपश्यतीतिभिन्नदृक्त्वमित्याह। आत्मनश्चेतियआत्मनःस्वस्यहृदिस्थितंपरस्यदेवस्यादेर्हृदिगतमंतरेणाभेदेनयुक्तमु

योमांसर्वेषुभूतेषुसंतमात्मानमीश्वरं॥ हित्वार्चांभजतेमौढ्याद्भस्मन्येवजुहोतिसः २२ द्विषतःपरकायेमांमानिनोभिन्नदर्शिनः॥ भूतेषुबद्धवैरस्यनमनःशांतिमृच्छति २३ अहमुच्चावचैर्द्रव्यैःक्रिययोत्पन्नयानघे॥ नैवतुष्येऽर्चितोऽर्चायांभूतग्रामावमानिनः॥२४॥ अर्चादावर्चयेत्तावदीश्वरंमांस्वकर्मकृत्॥ यावन्नवेदस्वहृदिसर्वभूतेष्ववस्थितं २५ आत्मनश्चपरस्यापियःकरोत्यंतरोदरं॥ तस्यभिन्नदृशोमृत्युर्विदधेभयमुल्बणं २६ अथमांसर्वभूतेषुभूतात्मानंकृतालयं॥ अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेनचक्षुषा २७

दरंब्रह्मकरोति। स्वतस्वभिन्नंब्रह्मभिन्नंपश्यतीत्यन्वयः। उदरंब्रह्मेतिश्रुतेः। उदरमंतरंकुरुतइतिच। अंतर्यामिरूपाणिभिन्नानिपश्यतीतिभिन्नदृक्। तस्यमृत्युःसंसारस्यदुर्निमारयिताश्रीनृसिंहस्वरूपउल्बणंभयंनित्यदुःखलक्षणंविधत्तेमोविधत्तइत्यन्वयः। २६ उक्तार्थोपहारमुखेनसर्वांतर्यामिरूपज्ञापकांरवक्तिअथेति। तदज्ञानमनर्थकरमितियस्मादयतस्मात्सर्वभूतेषुकृतालयंहरेरंतर्यामिरूपंभूतात्मानंमांदानमानाभ्यांमैत्र्यास्वस्मादयमेवममअर्हःसुहृदितिभावेनाभिन्नेनचक्षुषाभेददर्शनेनार्हयेदर्चयेदित्यर्थः २७

अंतर्यामिरूपाणांतत्रतत्रसन्निधानविशेषात्तत्तत्कृतत्वाच्चेतनानांतारतम्यंतज्ज्ञानंचपुरुषार्थसाधनमितिद्योतयन्ज्ञानतारतम्यंवक्ति। जीवाइत्यादिना। संसारावस्थायांअत्ययेपिपमुहृद्रादिभेदेनस्थितानांजीवानांमुक्तोनिजमेवरूपमपेक्ष्यतारतम्यमनेअते। तदुक्तं। पशुहृद्यादिभेदेनजीवाएवस्थिताःस्वतः। संसृतौव्यत्ययस्तेषांमुक्तोतत्तत्स्वरूपता। तत्रस्थावरमुक्तेभ्योवरजंगममुक्तकाः॥ तेभ्योमानुषमुक्ताश्चविप्रमुक्तास्ततोधिकाः॥ तत्रापिरुद्रमात्रेणमुक्तेभ्योवस्वादिनः॥ अर्थज्ञाश्चवयस्तेभ्योतेदेवाःसंशयच्छिदः॥ पूर्णधर्मातत्स्विद्योनिःसंयोगरूदस्ततः॥ भक्तिपूर्णोहरेर्ब्रह्मातस्मान्नान्योधिकस्ततः॥ मुक्तोवासंसृतोवापिसर्वयोगेषुहितेगुणइति। अजीवाश्चलनरहिताःस्थावरमुक्तास्तेषांसकाशाज्जीवाजंगममुक्ताःश्रेष्ठाः। अत्रापिविशेषद्योतनार्थइष्टेन्द्रप्रत्ययपः। हिशब्देनश्रुरशकेरत्र

जीवाःश्रेष्ठाह्यजीवानांततःप्राणभृतःशुभे॥ ततःसचित्ताःप्रवरास्ततश्चेंद्रियवृत्तयः २८ तत्रापिस्पर्शवेदिभ्यःप्रवरारसवेदिनः॥ तेभ्योगंधविदःश्रेष्ठास्ततःशब्दविदोवराः २९ रूपभेदविदस्तत्रततश्चोभयतोदतः॥ तेषांबहुपदाःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् ३० ततोवर्णाश्चचत्वारस्तेषांब्राह्मणउत्तमः॥ ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोऽभ्यधिकस्ततः ३१

विस्पष्टंस्तवयति। प्राणप्रकृष्टचेष्टाविभर्त्तीतिप्राणभृतश्रेष्ठाइत्यतवर्त्तते। सचित्तामनोव्यापारयुक्ताइंद्रियवृत्तयश्चक्षुरादींद्रियैःप्रवर्त्तमानाः २८ अत्रापींद्रियवृत्तिष्वपिस्पर्शज्ञाःप्रवराः। तेभ्योमाधुर्यादिरसज्ञाःगंधविदःगंधगुणज्ञाःशब्दविदःशब्दज्ञाः २९ रूपभेदविदःशुक्लादिरूपविशेषज्ञाः। उभयतोदतःउभयतोदंतयुक्ताःबहुपदःशरभादयःचतुष्पादोगवादयःद्विपात्मनुष्यावर्णहीनः ३० ब्राह्मणादिलक्षणाश्चत्वारोवर्णाः। ब्राह्मणोवेदसंबंधयोग्यस्तत्रब्राह्मणेष्वपुपदेशमात्रानुष्ठानेनाज्ञातापरोक्षज्ञानेनवेदज्ञोविप्रउच्यते। अर्थज्ञोवेदार्थज्ञोऽभ्यधिकः ३१

वेदार्थसंशयच्छेत्तादेवः। ज्ञातार्थकवचनं। स्वस्य स्वं तत्तत्स्वकर्तेव धर्मं करोतीति स्वधर्मकृत्। त्रैलोक्यरक्षणलक्षणधर्मकर्तृत्वादिंद्र उक्तः संगो यस्य रुद्रः। अस्य विविरागानदोग्धेति। आत्मनः स्वस्य धर्मं न दोग्धा भगवत्प्रसादमंतरेण कर्मफलमनाकांक्षमाणो भूयानुत्तरः ३२ तस्मादुक्तेभ्यः मय्यर्पिताशेषक्रियार्थश्च मय्यर्पितसमस्तक्रियाफलश्चात्मरतिश्च मय्येव मनोरतिश्च समय्यर्पिताशेषक्रियार्थात्मरतिः नात्रान्तरीयते न हीयत इति नरः पूर्णभक्तिः ब्रह्मा श्रेष्ठः पूर्वोक्तेभ्यः इव चतुर्मुखब्रह्मणोप्युत्तमोस्मि किंचेत्याह। मयीति। परमुत्तमं त्वत्रः हरिः कर्त्ता ब्रह्मा जनको यस्य सोऽकर्त्ता तस्मात्समदर्शनान्निर्दोषब्रह्मज्ञानवतः। यद्वा परं मुक्तौ संसारा

अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वधर्मकृत्॥ मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ३२ तस्मान्मय्यर्पिताशेषक्रियार्थात्मरतिर्नरः॥ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः॥ न पश्यामि परं भूतमकर्तुः समदर्शनात् ३३ मनसैतानि भूतानि प्रणमेद्बहुमानयन्॥ ईश्वरो जीवकलया प्रविष्टो भगवानिति ३४ भक्तियोगश्च योगश्च मया मानव्युदीरितः॥ ॥

वस्थायां भूतमुत्पन्नं पुरुषं ब्रह्मणः सममधिकं वा न पश्यामीति। समदर्शनात्शास्त्रे सु सम्यग्दर्शिनः ३३ एवं तारतम्यज्ञानवतां किं कर्त्तव्यमत्राह। मनसेति। अत्र जीवकलयेति द्विरावृत्त्या व्याख्येयं जीवकलया सहैतानि स्थावरादिभूतानि तानि भूतानि मनसा बहुमानयन् ईश्वरो भगवान् जीवकलया निरुद्धत्वांशेन सु प्रविष्टस्तदा लयत्वेन स्थित इति तमीश्वरं प्रणमेदियमुपासिर्योगस्येति शास्त्रांतरसिद्धमिति ज्ञातव्यं ३४ उक्तार्थमुपसंहरति। भक्तियोगश्चेति। हे मानव मया तव भक्तियोगश्च ज्ञानयोगश्च शब्दाच्चरीरा वित्यादिना कथितकर्मयोगश्चाष्टांगयोगश्च कथित इत्यन्वयः॥ ॥

एतद्द्वयमेव पुरुषार्थसाधनं नान्यदस्तीति निर्धारयति॥ ययोरिति॥ ययोर्भक्तिज्ञानयोरेकतरेणैव ज्ञानयोगेनैव पुरुषः पुरुषं परमात्मानं व्रजेदित्यन्वयः। एकतरोक्तं वेदितरविधानं व्यर्थं तस्मात् एकतरस्याविद्यत्तरस्य नियतत्वादेकतरेणैवेत्युक्तं भक्तिज्ञानयोरविनाभावात् ३५ भक्तियोगप्रश्नानंतरं दृष्टजीवसंसृतेर्वैचित्र्यत्वेऽपि बाहुल्यात्तदुक्तं घ्यस्वीकराद्यन्यायेन कालस्वरूपं वक्ति। यत्तदित्यादिना। ब्रह्मणः पूर्णस्य परमात्मनः सर्वांतर्यामिणो भगवतो भाग्यनिर्धेयत्वात्तथा नाम्रकृतेः पुरुषाद्दिविधात्परमुत्तमं दैवं सर्वदेवोत्तमं यच्च कर्मविचेष्टितं सर्वकर्मणां यस्य विशिष्टचेष्टा निमित्तानि तत्तथोक्तं। यच्च रूपभेदास्पदं मुक्तादिरूपभेदानां ब्रह्मांडादिपदा

ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ३५ यत्तद्भगवतो रूपं ब्रह्मणः परमात्मनः॥ परं प्रधानं पुरुषाद्दैवं कर्मविचेष्टितं॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते॥ भूतानां महदादीनां यतो भिन्नदृशां भयं ३७ योंतः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः॥ स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः ३८

र्थभेदानां वास्पदं दिव्यमप्राकृतं यतो यस्मात्कालाद्भिन्नदृशामन्यज्ञानिनां महदादिजीवानां भयं भवति तद्रूपं काल इत्यभिधीयते। भिन्नमल्पं विजानीयात् अभिन्नं पूर्णमिष्यते इति वचनाद्दीश्वरापेक्षया भिन्नशब्दोल्पवाची ३७ केचित्पूर्वापरकलाविकलः लक्षणः काल इत्यादिलक्षणमाचक्षते तन्नेति भावेनाह। योंतरिति। यो भूतानामन्तः प्रविश्य भूतैर्भूतान्यत्ति संहरति। यश्चाखिलानामाश्रयः प्रभुः कलयतां संहरतां रुद्रादीनां प्रभुः संहारसमर्थः। स विष्ण्वाख्यः कालोऽधियासाक्षिज्ञानेन ज्ञेय इत्यन्वयः यमादिप्रवत्तेदार्थविष्ण्वारम्भ इति ३८

वेतनत्वाच्चनोक्तलक्षणः कालोऽन्यइतिभावेनाह। नवास्येति। यथायेभ्योव्यतिरेकेणनद्वेष्यश्चद्वितीयोहरेरितिवचनात् येभ्योव्यतिरेकेणद्वयितोद्वेष्यश्चना स्तीत्यर्थः। अंतकृत्संहारकर्ता ३९ इतरेषांतदाज्ञानियतकर्तृत्वाच्चविष्णुरेवायंकालइतिभावेनाह। यद्भयादिति। भगणोनक्षत्रगणः ४० यद्यस्माद्भीताः ४१ स्रवंतिस्यंदंतेयतोयस्यभयान्नोत्सर्पतिवेलामतीत्यनागच्छति। इंधेज्वलति। नमज्जतिजलइतिशेषः ४२ अदोनभोयन्नियमात्श्वसतां

नवास्यकश्चिद्दयितोनद्वेष्योनचबांधवः॥ आविशत्यप्रमत्तोसौप्रमत्तंजनमंतकृत् ३९ यद्भयाद्वातिवातोयंसूर्यस्तपतियद्भयात्॥ यद्भयाद्वर्षतेदेवोभगणोभातियद्भयात् ४० यद्वनस्पतयोभीतालताश्चौषधिभिःसह॥ स्वेस्वेकालेभिगृह्णंतिपुष्पाणिचफलानि च ४१ स्रवंतिसरितोभीतानोत्सर्पत्युदधिर्यतः॥ अग्निरिंधेसगिरिभिर्भूर्नमज्जतियद्भयात् ४२ नभोददातिश्वसतांमार्गंयन्नि यमाददः॥ लोकंस्वदेहंतनुतेमहान्सप्तभिरावृतः ४३ गुणाभिमानिनोदेवाःसर्गादिष्वस्ययद्भयात्॥ वर्तंतेनुयुगंयेषांवशएत च्चराचरं ४४

प्राणिनांमार्गंददाति। सप्तभिरावृत्वादिभिरावृतोमहानहंकारोलोकस्यजनस्यदेहंतनुतेसृजति ४३ गुणाभिमानिनोरुद्रादिदेवायद्भयादस्यजगतो नुयुगंसर्गादिषुवर्तंते। एतच्चराचरंयेषांवशेतिष्ठति ४४

सकालः। कालशब्दनिर्वचनभावेनकालंविशिनष्टि। अनंतइत्यादिविशेषणैः। कलज्ञानइतिधातोः ज्ञानरूपत्वाद्ब्रह्मेतिकवयंतेवाब्रह्मभवतीत्यनंतः। कलच्छेदनइत्यतः छेदना त्सर्वेषामंतकरोतीत्यंतकरः। अतोभावादनादिः। जातस्यहिध्रुवोमृत्युरित्यादेः। अंतःकरत्वादादिकृत्। कलकामधेनावित्यतोव्ययः। अर्थिभ्यःसर्वेषुसहतोनिर्लीनो नभवतीति। जननमरणेवास्यैवराजवत्करोतीत्याह। जनमिति। स्वसंनिहितेनब्रह्मादिजनेनात्मनोवशेनमृत्युनारुद्रदुर्गादिना। अतएवंविधगुणविशिष्टः

सोनंतोंतकरःकालोनादिरादिकृदव्ययः॥ जनंजनेनजनयन्मारयन्मृत्युनांतकं ४५ इतिश्रीभागवतेमहापुराणे तृतीयस्कंधेकापिलेनामत्रिंशतितमोऽध्यायः श्रीभगवानुवाच तस्यैतस्यजनोनूनंनायंवेदोरुविक्रमं॥ काल्यमानोपिबलिनावायोरिवघनावलिः १

कालात्मानमप्ययतोमुमुक्षुभिरुपास्यइतिसिद्धं ४५ इतिश्रीभागवतटीकायांतृतीयस्कंधेत्रिंशोऽध्यायः भक्तिसाधनवैराग्यजननायविविधाःसंसृती श्चदेवेतिदेवहूत्याःप्रश्नःपरिक्रियतेस्मिन्नध्याये। तदर्थंजीवस्यसंसारस्यमूलकारणंब्रूते। तस्यैतस्येति। योजगत्सृष्ट्यादिकंकरोति। तस्यैतस्यकालनाम्नोबलिना कालेनकाल्यमानः। कलद्रावणे। वायोरिवघनावलिरित्येतत्तदभिदेवतापेक्षयोक्तं। विद्राव्यमाणत्वमात्रेणवायंदृष्टांतः। अनेनजनस्यपरमात्माज्ञानंसंसारका रणमुक्तंभवति १

उरुविक्रममेव दर्शयति। यंयमिति। अर्थं सुखसाधनं धुनोति विनाशयति। यत्कृते यस्यार्थस्यार्थे नष्टोभूदिति शोचति २ जनस्याधमप्यज्ञानातिरेक इत्याह। यदध्रुव स्येति। अध्रुवस्यानित्यस्य देवमानुषादिलक्षणस्य भोगसाधनानि गृहक्षेत्रधनानि। मोहादज्ञानात् ध्रुवाण्यनश्वराणि पुरुषो मन्यत इति यदतो दुर्मतिर्दुष्टज्ञानवान् ३ गृहादीनामनित्यत्वं पश्यन्नपि ततो विरक्तिमान्नेति यदतोऽज्ञानातिरेकोयमपीत्याह। जन्तुर्वा इति ४ अत्र कैमुत्यन्यायमाह। नरकस्थ इति। नरकस्थोपि पुमा

यंयमर्थमुपादत्ते दुःखेन सुखहेतवे॥ तंतं धुनोति भगवान्पुमांछोचति यत्कृते २ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः॥ ध्रुवाणि मन्यते मो हाद्गृहक्षेत्रवसूनि च ३ जंतुर्वै भव एतस्मिन्यांयां योनिमनुव्रजेत्॥ तस्यांतस्यां स लभते निर्वृतिं न विरज्यते ४ नरकस्थोपि देहं वै न पुमांस्त्य क्तुमिच्छति॥ नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणबंधुषु॥ निरूढमूलहृदय आत्मानं बहु म न्यते ६ संदह्यमानसर्वांग एषामुद्वहनादिना॥ करोत्यविरतं मूढो दुरितानि दुराशयः ७

न्नारक्यां निर्वृतौ सत्यां तं नारकं देहं त्यक्तुं नेच्छति। किमुत देवमानुषादिशरीरस्थ इति। तत्र हेतुर्देवमायेति ५ रागसागरमग्नत्वाद्विरागानुदय इति भावेनाह। आत्मजायेति। निरूढमूलं समुत्पन्नरागादिकं हृदयं यस्य स तथा ६ आत्मजायादिष्वहंममताज्ञानफलमाह। संदह्यमानेति। एषामात्मजायादीनां

क्षुत्पिपासाज्वरादिना मनो दुःखाग्निना संदीप्तांगत्वात् असारोयं संसार इति विरक्तो भविष्यति स्वयमेवेति तत्राह। आक्षिप्तात्मेति। मायया मोहकशक्त्या ८ कू टं वंचनमेव धर्मो यत्र तेन तथा तेषु वंचनधर्मयुक्तेषु वा दुःखानां तंत्रेषु साधनेषु दुःखानां प्रतीकारं सुखवन्मन्यनान्न विरक्तो न स्यादित्यर्थः ९ ननु वृद्धौ च माता पितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा वोढव्या मनुरब्रवीत् इति यथाकथा विविधया कुटुंबभरणस्य विहितत्वाद्विरक्त्या तत्त्यागे महान् दोषः स्यादतो न विरागो भूयानमित्याशंक्य शास्त्रविहितहिंसादिना शास्त्रमहापातकेनाधःपात एवेत्याह। अर्थैरिति। विप्रादेः सेवादिकमकार्यशतं म

आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया॥ रहोरचितयालापैः शिशूनां कलभाषिणां ८ गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रि तः॥ कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही ९ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान्॥ पुष्णाति येषां पोषेण शेषभुग्या त्यधः स्वयं १० वार्त्तायां लुप्यमानायामारब्धायां पुनःपुनः॥ लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहां ११

हापदि विहितत्वात् कृत्वा न दोष इत्यर्थपरं स्यान्नत्ववचनं। पोष्यजनभुक्तशेषस्य भोक्ता १० अतिरुष्यनावृष्टिव्याधिरोगजरनाशादिना कुंठितजीवन स्य वृत्तिं कथयति। वार्त्तायामिति। पुनःपुनरारब्धायां मृगणवद्व्याघ्रानीतगोवृषादिनोपक्रांतायां वार्त्तायां कृषिगोरक्षवाणिज्यादिलक्षणायां लुप्य मानायां विनाशं गच्छंत्यां लुभ गार्ध्य इति धातोर्लोभेन परद्रव्यादित्सालक्षणेनाभिभूतोऽत एव निःसत्त्वः सत्त्वगुणमूल्यो बलरहितो वा परार्थे चौर्यादि नापरद्रव्याहरणे स्पृहां कुरुत इत्यन्वयः ११

परार्थप्राप्यशक्तत्वेन स्वकुटुंबभरणाकल्पस्य चरमावस्थामाह। कुटुंबभरणाकल्प इति। श्रिया संपदा शरीरकांत्या वा ध्यायन्निति दीर्घश्वासं करोति। मूढधीः कर्तव्यबुद्धिरहितः १२ कीनाशः कर्षकः गोजरं मुख्येन वासमर्थं वृषभं १३ स्वकलत्राद्यनादरं दृष्ट्वा विरक्तः मोक्षाय यतिष्यत इति चेत्तत्राह। तत्रापीति। तस्यामवस्थायामपि १४ अपत्याद्यैरवमत्यावज्ञानेन दत्तान्नमाहरन् गृहपालः श्वेव गृहस्थाप्त इत्यन्वयः। संसारिणः आसन्नमरणावस्थायामपि विरा

कुटुंबभरणकल्पो मंदभाग्यो वृथोद्यमः॥ श्रिया विहीनः कृपणो ध्यायन्छ्वसिति मूढधीः १२ एवं स्वभरणाकल्पं तत्कलत्रादयस्तदा नाद्रियंते यथापूर्वं कीनाश इव गोजरं १३ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः॥ जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे १४ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन्॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः १५ वायुनोत्क्रमतोत्तारः कफसंरुद्धनासिकः॥ कासश्वासकृतायासः कंठे घुरघुरायते १६ शयानः परिशोचद्भिः परिवीतः स्वबंधुभिः॥ वाच्यमानोपि न ब्रूते कालपाशवशं गतः १७ एवं कुटुंबभरणे व्यापृतात्माजितेंद्रियः॥ म्रियते रुदतां स्वानामुरुवेदनयास्तधीः १८

गो नोत्पद्यत इत्याशयेनाह। आमयेनेत्यादिना १५ यस्य कासश्वासाभ्यां कृतायासः प्रयासः क्लेशः कंठः घुरुघुरायते अनुकारशब्दं करोति। स आतुरः किमपि न ब्रूत इत्यन्वयः। उत्क्रमता निर्गच्छता उत्तारः मुक्तं कफेन संरुद्धा नासिका यस्य स तथा। अनेनासनशनयनानुभवावस्थायामपि विरागो नाभूदहो हरेर्माहात्म्यमित्यदर्शि १६ १७ तस्यां तामवस्थामाह। एवमिति १८

मरिष्यतः प्रथमलक्षणमाह। यमदूताविति। यदा मरिष्यत्याप्तौ तदा शकृत्पुरीषं च विमुंचति। रभसेन क्रोधवेगेन सह वर्तमाने ईक्षणे ययोस्तौ तथोक्तौ १९ नरकदुःखभोगक्षमो देहो यातनादेहः तस्मिन्नावृत्य प्रावेश्य। २० २१ नरकं प्रति गच्छतो दशामाह। कृच्छ्रेति। वालुकाः सिकताः २२। यमसादनं यमपट्टनं नरकमित्यर्थः २३ द्वाभ्यां वेति वाशब्देन दशदिनानि पक्षो मासश्च गृह्यते। तदुक्तं। त्रिभिर्मुहूर्तैर्द्वाभ्यां वा दिनैर्दशभिरेव वा। पक्षान्मासेन वा याति यमलो

यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ॥ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति १९ यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात्॥ नयतो दीर्घमध्वानं दंड्यं राजभटा यथा २० तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः॥ पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् २१ क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके॥ कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि निराश्रमोदके २२ तत्र तत्र पतञ्छ्रांतो मूर्च्छितः पुनरुत्थितः॥ पथा पापीयसा नीतस्तमसा यमसादनं २३ योजनानां सहस्राणि नवतिं नव चाध्वनः॥ त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः २४ आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः॥ आत्ममांसादनं क्वापि स्वकृत्तं परतोपि वा २५ जीवतश्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृंतनं चावयवशो गजादिभ्यो भिदापनं॥ पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः २७ यास्तामिस्रांधतामिस्रा रौरवाद्याश्च यातनाः॥ भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः २८ अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते॥ या यातना वै नारक्यस्ता इहाप्युपलक्षिताः २९

कमितो यत इति। यातनां नरके २४ स्वायुष्छितदुःकृतानुसारेण नरकदुःखानुभवं वक्ति। आदीपनमित्यादिना। स्वगात्राणां स्वावयवानां २५ आत्मवैशसमात्मनो हिंसां रोधनं संरोधनं स्वलाबंधे। विष्ठागर्ते २७ बाहुल्यात्संक्षिप्य यातना ब्रवीति। यास्तामिस्रा इति २८ ता नातिदूरे वर्तंते किंतु समीप एवेत्याह। अत्रैवेति। तदुपपादयति। यातना इति। इहास्मिन्लोके राजादिभिर्दंड्येषु पालक्षिता दृष्टा इत्यर्थः। वैशब्देनादंड्येषु स्वर्गादिष्वपीति दर्शितं। सामीप्या
नैव प्रोक्तमत्राग्रहोऽवधारणाइति च २९

कीदृशा पापिन एवंविध नरकभोगयोग्या इति तत्राह। एवमिति। उभयं कुटुंबमुदरं वा विसृज्य तयोः कुटुंबोदरपोषणयोः फलं ३० यः पापकृत् स एक एव नारकं पंथानमाप्नोति नान्य इत्याह। एक इति। कुशलादितरत्पाथेयं तदेव पाथेयं शंबलं यस्य स तथा। यत्कलेवरं स भूतद्रोहेणाभृतं पोषितं ३१ ननु देहादिवत्पापमपि परित्यज्य गच्छति किं नेत्याह। दैवेनेति। कुटुंबपोषणात् स्यतस्य यादृक् कुशमलं दैवेन पुण्यपापयोर्नियंता हरिणा सादितं प्रापितं पुमान्नुनिरये तदेव भुंक्ते। परित्यक्तुं न शक्नोति दैवाधीनत्वात् त्यथा हृतवित्त आतुरो वा दैवोपनीतदुःखं भुंक्ते। तथेति ३२ याः तामिस्रा द्याः पातनाः प्रसुताः तासां मध्ये तामिस्रांधतामिस्रप्राप्तियोग्यं तत्साधनं वाह। केवलेनेति। यो सुरप्रकृतिर्जीवः केवलेनैकेनाधर्मेण हरिभक्तद्वेषेणद्वेषलक्षणेन तमसः पदमंधकारस्थे

एवं कुटुंबं बिभ्राण उदरंभर एव वा॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशं ३० एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरं॥ कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ३१ दैवेनासादितं तस्य शमलं निरये पुमान्॥ भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ३२ केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः॥ याति जीवोंधतामिस्रं चरमं तमसः पदं ३३ अधस्तान्नरलोकस्य यावतीर्यातनास्तुताः॥ क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ३४ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये एकत्रिंशोऽध्यायः॥ ॥

कस्थानं चरमं पश्चात्तनं पुनरावृत्तिरहितमंधतामिस्रं याति त्यन्वयः। हिंशाहोतुल्यानवावी। दुःखानुभवेतारतम्यवा वीवा। तामिस्रं धांधतामिस्रौ हो नित्यौ संप्रकीर्तिता विति वाक्यस्य वितते। मिश्रं याति त्येन दर्शनस्त्वक्रोवा ३३ अन्यो यः पुनरावृत्तिरस्तीत्याह। अधस्तादिति। अत्र मनुष्यलोके पुनः पुनः स्वकर्मानुसृतां योनिमायाति पापफलभोगात् शुचिः पुनः स्वर्गं याति। अशुचिश्चेन्नरकं याति। पुनर्दरिद्रः पुनरेव पापीति वचनात्। ३४ इति श्रीभागवतटीकायां तृतीयस्कंधे एकत्रिंशोऽध्यायः॥ ॥

अस्मिन्नध्याये संसारासारज्ञानलक्षणवैराग्याय गर्भवासादिदुःखानुभवः प्रतिपाद्यते। तस्माद्धिरक्तो भक्तिसाध्यब्रह्मज्ञानाय प्रयतत इति तत्र नरके कर्मफलं भुक्त्वा वृष्टिरूपेण नरलोकं प्राप्तो व्रीह्यादीतरजीवदेहगतो दैवाधीनेन कर्मणा शरीरस्वीकाराय पुरुषभुक्तान्नपरिणतरेतो बिंदुप्रवेशलक्षणेन ऋतुकाले योनिद्वारा स्त्रिया उदरं प्रविष्टो भवतीत्यन्वयः। दग्धकर्णाणीव इति हल्लायुधः १ स्त्रिया उदरं प्रविष्टस्य रेतसः कालेक्रमेण शरीराकारतया परिणामप्रकारं वक्ति। कलिलमिति। तु शब्दाच्छोणितसंपर्कमाह। कलिलं रक्तधातुरसमिश्रत्वाद्यविसदृशं भवति। कर्कंधुरीषत्काठिन्योपेत

श्रीभगवानुवाच कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये॥ स्त्रियाः प्रविष्ट उदरं पुंसो रेतः कणाश्रयः १ कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदं॥ दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं २ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः॥ नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः॥ षड्भिर्जरायुणा वीतः कुक्षौ भ्रमति दक्षिणे ४

मध्यमपिंडतुल्यः पेशी मांसखंडी तद्वाद्भवति। मनुष्यादीनामयं विशेषः नपक्ष्यादीनामंडं पिंडाकारवत्। नानाविधा गर्भवृद्धिः कर्मभेदाद्विख्याता। अतो नानाविधं ग्रंथेषु गर्भसंस्थानमुच्यत इति वचनात् अंडं वेति विकल्पोक्तं २ बाह्वंघ्र्यादिभिरंगैरवयवैर्युक्तो विग्रहो भवति। लिंगस्य पुल्लिंगादिलक्षणस्य छिद्रस्येंद्रियद्वारस्य चोद्भव उत्पत्तिः ३ पातवस्त्वगादयः सप्त जरायुणावीतः संवेष्टितः ४

सप्तमेमासेगर्भस्थस्यज्ञानोत्पत्तिरित्याह। सप्तमइति। जगत्यांकर्मभूमौयानिगतानिजन्मानिकर्माणिचस्वकृतानितथाचदेवस्यहरेर्मायया‍थेछयाक टाक्षितमात्मनःस्वस्यबंधंवाकषिर्ज्ञीनवानुस्मरन्नेकचित्स्मरतिक्वचिद्विस्मरति। वेदनयाग्रस्तत्वादितिद्योतनायात्मनेपदं। संधिकार्याभावश्चा ५। तत्रतस्यदेहयात्राप्रकारंवक्ति। मातुरिति। आतुरोरोगीतस्यसंमतः यद्यास्तोपरतःस्वदेहयात्रामाप्नोतितथायमित्यन्नादीनांप्रवेशस्थापावि नीनामनाडीनाभिमूलादुत्पन्ना। जरायुल्वंनिर्भिद्यास्यद्वारसंबंधाउपस्पृष्टंतुबिकमलदंडनाडीवत्तद्वारेणवर्धः। तस्यनिवासस्थानमाह। आ स्तइति

सप्तमेजन्मकर्माणिगतानिस्मरतेऽक्षिभिः॥ जगत्यांयानिदेवस्यमाययाबंधमात्मनः ५ मातुर्जग्धान्नपानाद्यैरेधत्पातुरसंमतः॥ आस्ते विण्मूत्रयोर्गर्तेसजंतुर्जंतुसंभवे ६ कृमिभिःक्षतसर्वांगःसौकुमार्यात्प्रतिक्षणं॥ मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैःक्षुधितैर्मुहुः॥ ७॥ कटुतीक्ष्णोष्णलवणक्षाराम्लादिभिरुल्बणैः॥ मातृभुक्तैरुपस्पृष्टःसर्वांगोत्थितवेदनः ८ उल्बेनसंवृतस्तस्मिन्नांत्रैश्चबहि रावृतः॥ आस्तेकृत्वाशिरःकुक्षौभुग्नपृष्ठशिरोधरः ९

।सजंतुःजंतुभिःसहवर्तमानः। अनेनैवांतैः सहेतिविवृतं। जंतूनांसंभवोयस्मिंस्तथातस्मिन्ननेनजंतूनामनवसानभयपरंपरोत्पत्तिःसूचिता॥ ६॥ इदानींतस्यदुःखानुभवप्रकारमाह। कृमिभिरित्यादिना। कृतंवकंडूखांगेषुयस्यसःक्षतकंडूगः ७ कटुमरीचिसंज्ञःउष्णाश्रितक्षर्मोवातीक्ष्णः सर्षपउष्णोऽग्निमत्त्वाविचकदुर्धक्षारंदग्घमत्स्यास्थिचूर्णमाम्लचूतादिसंज्ञः। उल्बेगौरतिकूरैरेतैरुपस्पृष्टउपतप्तःसर्वांगेषूत्थितोवेदनाविद नायस्यसतथा ८ भुग्नेकुटिलेपृष्ठशिरोधरेयस्यसतथा ९

मार्कंडेयेपितृपुत्रसंवादेकथितमेतत्। नालिकेरफलंयद्वत्सकोशंवृद्धिमृच्छति। तद्वत्स्वयात्यसौवृद्धिंसकोशोयोमुखस्थितः॥ तलेभुजानुपार्श्वाभ्यांकरयोर्मस्य वर्तते। अंगुष्ठोचोपरिन्यस्यजान्वोरग्रेतथांगुली॥ जानुपृष्ठेतथानेत्रेजानुमध्येचनासिकां। स्फिजौचपार्ष्णिद्वंद्वस्थौबाहूजंघाबहिःस्थिताविति। शकुंतोऽत्रपत्र पक्षःपक्षी। शितस्सूत्रकृतःअर्थात्पत्रकुतःपक्षोयस्यसतथेतिवा। एवंक्लिश्यमानस्यतस्यनानाजातिसंज्ञावलाप्यतइत्याह। तत्रेति। तत्रगर्भेदैवाल्लब्धास्मृति र्येनसतथा। जन्मशतोद्भवंकर्मपुण्यपापलक्षणंस्मरन्दीर्घमनुच्छ्वासंकुर्वन्देहीतस्मिन्गर्भेकिंनामविंदते। स्वकर्मवशान्नानाजातिगर्भस्थत्वात्। ब्राह्मणा दिनानाजातिनामलभतइत्यर्थः १० लब्धस्मृत्यावगर्भवासासारतांविजानतस्तस्यततोनिष्क्रमणप्रयत्नंवक्ति। आरभ्येति। विष्ठाभूः कृमिःसोदरःकि

अकल्पःस्वांगचेष्टायांशकुंतइवपंजरे। तत्रलब्धस्मृतिर्दैवात्कर्मजन्मशतोद्भवं॥ स्मरन्दीर्घमनुच्छ्वासंशर्मकिंनामविंदते १० आ रभ्यसप्तमान्मासाल्लब्धबोधोपिवेपितः॥ नैकत्रास्तेसूतिवातैर्विष्ठाभूरिवसोदरः ११ नाथमानऋषिर्भीतःसप्तवध्रिःकृतांज लिः स्तुवीततंविक्लवयावाचायेनोदरेर्पितः १२

मेसादितिसंशयोपेतः। उदरंसंशयःप्रोक्तइत्यभिधानात्। इतोनिर्गमनायस्वप्रयत्नोनिःफलःकिंतुहरेःप्रसादएवप्रयोजकइतिभावेनतंभगवंतंस्तौति। ना थमानइति। नाथृनाधृयाच्ञायामितिधातुः। एवंविधोगर्भवासोमाभूदितिनाथमानःयाचमानः। विक्लवयाऽप्रगल्भयाश्रोतृमनोद्रवणहेतुभूतया। ऋषिरितिपदेन तत्वज्ञानंतुदेवानांगर्भस्थानांभविष्यति। उत्तमानांऋषीणांवाप्यन्येषांबहुजन्मगामितिवाक्यंसूचयति। सप्तवध्रयइंद्रियाणियस्यसतथोक्तः। वध्रय स्त्विंद्रियाण्यपाकुर्हर्षीकाणीतिचाप्युक्तेति १२

कृतिमन्नमिद्देर्गुणैरूत्तमंजगते ह्यीवावपिपन्नो नोपपन्नौ। तस्य बुद्धेर्नन्यशतोद्भवकर्मविषयत्वेनदर्शितार्थत्वादनवगाहत्वेनगुणेष्वनारोहादत्तद्युक्तति
र्यीका विदित्याशंक्य हरिशक्तेरचिंत्यमाहिमत्वेन सर्वंयुक्तमितिभावेन तद्विविते र्गुणो श्लोति। तस्योपसन्नमित्यादिना॥ योसौ देवात्त्वब्रह्मस्मृतिः सोहंयेन
हरिणा असतोश्रुभस्यममेदृशीगर्भवासलक्षणा गतिरदर्शितस्य हरेर्लसञ्चरणारविंदंशरणं व्रजामि किंविशिष्टस्य तस्योपसन्नंशरणागतंजगदवितुः
अवरक्षणाइति। इच्छया भक्तानुग्रहलक्षणयात्तु विद्यान्नलीलातनोः स्वीकृतरामकृष्णादिलीलावतारस्य। प्राप्यस्यदेवदत्तवत्तस भयत्वे किंशरणंव्रज

जीवउवाच तस्योपसन्नमवितुर्जगदिच्छयात्तलीलातनोर्भुविलसच्चरणारविंदं॥ सोहंव्रजामिशरणंनकुतोभयंमे
येनेदृशीगतिरदर्शिसतोनुरूपा १४ यस्त्वत्रबद्धइवकर्मभिरावृतात्माभूतेंद्रियाशयमयीमवलंब्यमायां॥ आस्तेविशुद्धम
विकारमखंडबोधमातप्यमानहृदयेवसितंनमामि १५

नेनप्रयोजनमित्यत उक्तंनकुतोभयमिति। अभयंयश्चतिष्ठांविंदते। युक्ताह्यस्पृहरयः शताद्दशेत्यादिश्रुतिरत्रप्रमाणं १४ योश्रुतेंद्रियाशयमयी। माकाशा
दीनिपंचभूतानि श्रोत्रादीनिदशेंद्रियाणि आशयो मनः एतदात्मना विकृतां मायांप्रकृतिमवलंब्य प्रवर्तकत्वेनाश्रित्य पुण्यपापलक्षणैः कर्मभिरा
वृतात्मासक्तः कर्मबद्धोजीवइवअत्रास्मिच्छरीरेआस्ते। तुशब्देनात्यंतवैलक्षण्यमनयोरस्मीतिदर्शयति। तुच्छेनात्मपिहितमितिश्रुतिः वैलक्षण्यंपस्य
एमाह। विशुद्धमिति। अविकारमस्त्रिजायत इत्यादिश्रुतिः १५

एतस्वैवविहरणोतिः यः पंचेति। आत्मकआत्माभास इंद्रियाणि चक्षुरादीद्रियाणि गुणान्सत्वादीन् तथार्थान्शब्दादीनुपयोग्यतयावेत्रिमन्यत इतींद्रियगुणार्थविद्
हं। यथायंपंचभूतरचितेशरीरेच्छन्नोवसामि। तथायंइंद्रियगुणार्थतत्वज्ञो विष्णुः शरीरेछन्नोरहितो संगत्वेनाश्थितस्तेनहरिणाप्रेरितोहंतमकुंठमहिमानमृषि
सर्वज्ञंप्रकृतिपुरुषयोः श्रीब्रह्मणोः परमंमेनंपुंसांसंबंदइत्यन्वयः। स्वप्रत्येकृविषयत्वादेनमित्युक्तं। त्वमग्नेप्रथमो अंगिराऋषिः अत्तस्नंबरांतरस्थेते रित्याधा
नमानं १६ तत्प्रेरणायैवतद्वंदनमितिकराहितंस्पष्टयति। यन्मायायेति। यस्यहरेर्माययाइच्छयाधीनयाप्रकृत्याचोरुभिः महद्भिः सत्वादिगुणैः कर्मभिश्च
नितरांबंधनेयस्मिंस्तथा। तस्मिन्संसाराभिधाने पथिचरन्नयं लोकः पुनस्तदतिश्रमेणतापत्रयोपतापेननष्टस्मृतिर्नष्टज्ञानो महतोहरेरनुग्रहप्रेरणाल

यः पंचभूतरचितेरहितः शरीरेछन्नोयथेंद्रियगुणार्थविदात्मकोहं॥ तेनाविकुंठमहिमानमृषिंतमेनंवंदेपरंप्रकृतिपूरुषयोः पुमांसं॥
१६ यन्माययोरुगुणकर्मनिबंधनेस्मिन्सांसारिकेपथिचरंस्तदतिश्रमेण॥ नष्टस्मृतिः पुनरयंप्रवृणीतलोकोयुक्त्याकयामहदनु
ग्रहमंतरेण १७ ज्ञानंयदेतदधात्कतमः सदेवस्त्रैकालिकंस्थिरचरेष्वनुवर्तितांशः॥ तंजीवकर्मपदवीमनुवर्तमानास्तापत्रयो
पशमनायवयंभजेम १८

ग्रहमंतरेण विनाकयायुक्त्यातंहरिंप्रवृणीतममरणामीतिशरणंगच्छेदित्यन्वयः १७ अतस्तदनुग्रहेणैव तत्ज्ञानमित्याह। ज्ञानमिति। यः कतमः सुखत
मः भूमादेवस्त्रैकालिकं अतीतजन्मादिविषयमेतत्ज्ञानंमेअदधाद्ददातियदतः प्रेक्षत्वाद्भूयंतंत्वां तापत्रयोपशमनायतजेमेत्यन्वयः। नकेवलंमय्येवास्थि
तोन्यत्राप्येवमितिभावेनोक्तं स्थिरचरेष्वितिअनुवर्तितांश अंतर्यामित्वेनानुगताअंशाअनंतानिरूपाणियस्य सतथा। अनुमितजीवत्वस्ममानेनसहा
भेदोनास्तीतिभावेनोक्तंजीवेति। जीवानांकर्मपदवीं संसारमार्गमनुवर्तमानाः १८

इदानीमात्मनो गर्भाद्बहिर्निर्गमनाभिप्रायं विज्ञापयति। देहीति। अन्यदेहविवरे मातुर्देहोदरे वर्त्तमानो सृग्विण्मूत्रकूपे पतितो मातुर्जठराग्निना भृशतप्तदेहः इतो देहाद्विवसितुं निर्गंतुमिच्छन्स्वमासान्कल्पतीनाः कतमवशिष्टा इति स्वविषयाभ्यासानुगणयन्कृपणधीर्दीनबुद्धिर्भगवता कदानु निर्वास्यते निःक्षास्यत इत्यन्वयः १९ यत ईदृशमपि किं यज्ज्ञानं मह्यं येन दत्तमतो सौ सर्वस्मात्पृथग्नित्याशयेनाह। येनेति। ईश अप्रमेय दशमास्यो हं येन त्वादृशेन पुरुषेण ईदृशीं भगवद्विषयां मतिं संग्राहितः स दीननाथो भगवान्स्वेनैव कृतेन तुष्यतु। न त्वन्यत्कृतेन इत्यादि। इमं च वर्णोत्रमानं। को नाम तत्प्रति तस्य हरेः कृतस्य प्रतिनिधिं प्रत्युपकारमस्य हरेरंजलिं विना कुर्यात्। न कोपि कर्त्तुं समर्थ इत्यर्थः। करोति चेत्भवादृश एव न त्वितर इत्यतो भवादृशेनेत्युक्तं २० भगवदनुगृहीतज्ञानफ

देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः॥ इच्छन्नितो विवसितुं गणयन्स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदानु १९
येनेदृशीं मतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन। स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनांजलिमस्य कुर्यात्
२० पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे। यत्सृष्टयासं तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतं २१

लमाह। पश्यत्ययमिति। सप्तवध्रयो ज्ञानेंद्रियाणि यस्य स तथोक्तो यं जीवोस्य हरेरधीने देहे शारीरकाणां जीवानां भेदमुपलक्षणमेतत् जडादीनामपि पश्यत्यया येन हरिणानुगृहीतया धिषणया मत्याज्ञानेन पश्यति। कृतं मेव किं नावं हस न वध्रिं च सुखं तम्पि तिष्कृतिः। अन्वायिक दृष्टांतमाह। अशरीरवदिति। अशरीरः परमात्मा अशरीरं चेति कृतिर्यथा पंचविधं भेदं पश्यति तच्चेति। अनेन ज्ञानस्यनैर्मल्यं सूचितं। न त्वित्यनेनोक्तार्थावश्रुतिं प्रमाणमनुमतिं वा दर्शयति। सो हं तं पुराणं पुरुषं चैतन्यविज्ञानिभिमानिनं तु दुःखमिव हृदि च हृदि प्रतीतं विज्ञाते पश्ये संपश्य इत्यन्वयः। एतादृशज्ञानं देवानामेव योगिनां न त्वितरेषां तेषां बहुजन्मसाध्यं। तदुक्तं। तत्वज्ञानं तु देवानां गर्भस्थानां भविष्यतीति २१ श्रीराम राम

न केवलमेतत् ज्ञानं वर्त्तमानविषयं किं त्वेष्यविषयमपीति भावेनाह। सोहमिति। भो विभो बहुदुःखवासं वसन्ननुभवन्नपि सो हं गर्भाद्बहिर्विषयं न निर्जिगमिषे निर्गंतुं नेच्छामि। किं कारणमत्राह। यत्रेति। यत्र बहिरंधकूपे अज्ञानलक्षणे गर्भे उपयातं पतितं मां देवस्य मायया याक्रांता निर्मिता मिथ्यामतिर्देहेहं ममतादिलक्षणा पसर्पति व्याप्नोति। ततश्च किमत्राह। यदन्विति। यदनु यस्यामिथ्यामतेरुत्पत्यनंतरमेतत्संसृतिचक्रं जननमरणादिलक्षणं संसारमंडलं भवत्यत इत्यर्थः २२ तस्मात्किं निरणायीत्यत्राह। तस्मादिति। यस्माद्गर्भान्निर्गमने संसारमंडलं भवति तस्मादहं सुहृदात्मनैवानिमित्तबंधोर्हरेरनुग्रहाद्देव विगतविक्लवो भूत्वा

सोहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकूपे॥ यत्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत्॥
२२ तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव। भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादितविष्णुपादः
२३ श्रीभगवानुवाच एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः २४

तमसो नरकादात्मानमाशु उद्धरिष्य इत्यन्वयः। भूयः पश्चाद्यथेतद्नेकरंध्रमनेकानर्थद्वारं व्यसनं मे मा भविष्यन्माभूदिति कृत्वा। अत्र किं बलमत्राह। उपसादितेति। अनेन हरिस्मरणशरणस्य पुरुषस्य स्वात्मोद्धारे न कोपि प्रयास इति सूचितं २३ भगवतो हरेर्महिमा गणितप्रभाव इति द्योतयन् गर्भस्य प्रसूतिप्रकारं वक्ति। एवमिति। काम्यादिकुलं उत्पत्स्यमानस्य तत्क्षणे ज्ञानं भवतीति द्योतनाय स ऋषिरित्युक्तं। ऋषिस्त्रिकालदर्शी स्यादिति हलायुधः। सर्वोपि क्षणिक इत्याशयेनोक्तं सद्य इति। अवाचीनमधः शिरसं २४

तेन वायुना। येन देहाभिमानेन पूर्वमुपसृष्टः संसारमनुभूतस्तेन देहाभिमानेन सहेति वा। शिरो वाक् कृत्वेत्यर्वाचीनमित्यस्य विवरणं। तेन पादत्राघस्य नजन्मप्रा
यिकमिदमेव सर्वत्र प्रधानमिति ध्वनयति। गतस्मृतिर्नष्टजन्मांतरज्ञानः २५ विष्ठैव भूर्वस्था नेयस्य सतथा। विष्ठातो भवत्युत्पद्यत इति वा विष्ठाभूः कृमिः।
रोरूयति रोरूयते तु शब्दे। विपरीतां गतिमनुच्छ्वासनां गतः २६ परच्छंदमन्यस्याभिप्रेतं। प्रत्याख्यातुं नापेक्षितमिति निराकर्तुमनीश्वरोऽसमर्थः २७ अशु

तेनोपसृष्टः सहसा कृत्वावाक्शिर आतुरः॥ विनिःक्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः २५ पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते॥ रोरू
यति गते ज्ञाने विपरीतां गतिं गतः २६ परच्छंदं न विदुषा पुष्यमाणो जनेन सः॥ अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः २७ शायि
तोऽशुचिपर्यंके जंतुः स्वेदजदूषिते॥ नेशः कंडूयनेंऽगानामासनोत्थानचेष्टने २८ तुदंत्यामत्वचं दंशा मशका मत्कुणादयः॥ रुदंतं वि
गतज्ञानं क्रिमयः कृमिकं यथा २९ इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च॥ अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः ३० सह
देहेन मानेन वर्द्धमानेन मन्युना॥ करोति विग्रहं कामी कामिष्वंताय चात्मनः ३१

चिपर्यंके शकृन्मूत्रमिश्रत्वादशुद्धे रोगतायमाने दारुविरचिते तल्पविशेषे २८ आमत्वचं मृदुनूतनत्वचं दंशाः स्थूलमुखाः मशकाः सूक्ष्ममक्षिकाः कृमिकं म
णिकीटं २९ पंचवर्षपर्यंतं शैशवं ततश्चासप्तमवर्षात्कौमारं ततश्चाद्वादशवर्षात्पौगंडं। अज्ञानादिति अनभीष्टकर्तुरभिमानिनानमिति शेषः ३० स
ह देहेन मानेन देहाभिमानेन विग्रहं वैरमात्मनो नाशाय स्वस्य नाशाय कामिषु विषयलालसेषु ३१

सह देहेनेत्यत्तद्विवृणोति। भूतैरिति। अहं ममेत्यसत्याहो दुराग्रहो यस्याः सा तथा तां ३२ तदर्थमहं ममेत्यसद्ग्राहदृढीकरणाय। येन कर्मणा बद्धः। एतदे
व स्पष्टयति। येनेति। इह दर्शनरकादिलक्षणं क्लेशमविद्याकर्मबंधने वा ३३ मनुष्ययोनेः पुरुषार्थहेतुत्वात्कथंचिंत्यत्वमत्राह। यदीति। पथि पुरुषार्थहेतो
र्मनुष्ययोनौ स्थितोऽनंतु शिश्नोदरयोः पोषणे कृतउद्यमः प्रयत्नो यैस्तैस्तथा तैरसद्भिः जीवपरमात्माद्यभेदविद्भिश्चासुरप्रकृतिभिः सह यदि रमते तर्हि पूर्ववत्तमो वि
शतीत्यन्वयः ३४ मुक्तिसाधनसत्वादिगुणवत्वे कथमसत्संगात्तमः प्रवेश इति तत्राह। सत्यमित्यादिना। बुद्धिः पुरुषार्थविषया। श्रीर्भक्तिवैराग्यादिसंपल्लक्षणा। ह्री

भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत्॥ अहं ममेत्यसद्ग्राहं करोति कुमतिर्मतिं ३२ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं॥ योऽनुयाति ददत्क्ले
शमविद्याकर्मबंधनः ३३ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः॥ आस्थितो रमते जंतुस्तमो विशति पूर्ववत् ३४ सत्यं शौचं दया मौ
नं बुद्धिर्ह्रीः श्रीर्यशः क्षमा॥ शमो दमो भगश्चेति यत्संगाद्याति संक्षयं ३५ तेष्वशांतेषु मूढेषु खंडितात्मस्वसाधुषु॥ संगं न कुर्याच्छोच्ये
षु योषित्क्रीडामृगेषु च ३६ न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३७

रकार्यकरणे लज्जा। क्षमा सापराधेष्वपि स्वेषु तत्सहनशीलता। शमो बाह्येंद्रियनिग्रहः। दमोऽन्तःकरणनिग्रहः। भगो देशाधिपत्याद्यैश्वर्यादिलक्षणः
३५ अशांतेषु हरिनिष्ठादिगुणरहितेषु विवेकिषु अखंडितात्मा परमात्मा अपरिच्छिन्नत्वात् तद्विलक्षणः खंडितात्मा जीवः। अणुर्ह्येष आत्मेति श्रुतेः। स
एवास्मिन् शरीरेऽस्ति नान्य इत्यवसायो येषां ते तथा तेषु जीवमात्रज्ञानिषु। संगं स्नेहादिलक्षणं। योषितां क्रीडामृगवद्वर्तमानेषु ३६ जीवेश्वराभेददर्शि
संगवत् तदुष्टस्त्रीसंगो विमोहकारणतया दुःखकर इति निरूपयति। न तथेत्यादिना। अन्येभ्यो प्रकृतानामप्रसंगतः। तासां संगिनां पुंसां संगतः ३७

भा॰ त॰
१९१

अत्र किं पुनर्न्यायमाह । प्रजापतिरिति । रोहिद्भूतां मृगीभूतां ऋक्षरूपी मृगरूपी । दुहितरमिति वचनेन स्त्रीणां मतिमोहकत्वद्योतनाय दुष्टजनमोहनार्थं वेति ज्ञातव्यं । अन्यथा नकर्हिचिन्मे मनसो मृषागातिरिति वचनेन विरोधः स्यात् ३८ तस्य ब्रह्मणः सृष्टो मृष्टाः प्रियव्रतादयस्तैः स्रष्टा उत्तमादयस्तेषु । सृष्टा मरीच्यादयस्तत्स्रष्टाः कश्यपादयस्तेष्विति वा । योषिन्मय्या मायया मोहकरूपया अखण्डितधीः कः पुमान् कोऽपीत्यर्थः । तर्हि न कोऽपि किमत आह । ऋषिमिति ३९ अन्येषामपि तज्जयित्वं किं न स्यादेवमत आह । बलमिति । या केवलं भ्रूविजृम्भेण दिशां जयिनो राजादीन् निजायत्तान् स्वाधीनान् करोति । तस्या मे स्त्रीमय्या मायायाः मयस्य प्रधानस्य मम वशाया मोहकशक्त्याः बलं पश्येत्यन्वयः । मयः प्रधानमुद्दिष्टो मायायातद्वशवर्तिनीति वचनात् । मे मायया इति फलितमाह । संगं न कुर्यादिति । तत्त्वविस्मरणे हेतुत्वात् मा खण्डनसाधनत्वाद्वा पकृष्टमदजनकत्वाद्वा प्रमदाः स्त्रियस्तासु जातु कदाचित्त्वहैलिकाविषयेऽपि संगं रागादिलक्षणं न कुर्यात्

प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः ॥ रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ३८ तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान् ॥ ऋषिं नारायणमृते योषिन्मय्येह मायया ३९ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां । या करोति निजायत्तान् भ्रूविजृम्भेण केवलं ४० संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ॥ मत्सेवया प्रतिलब्धात्मलाभो वदंति यां निरयद्वारमस्य ४१

दित्यन्वयः । क इत्यत उक्तं योगस्येति । अयोग्यत्वे केवलयोगारोहेच्छया किं स्यादित्यत उक्तं । मत्सेवयेति । वेदान्तादिश्रवणश्रवणादिलक्षणया मत्सेवया प्रतिलब्ध आत्मलाभो विषयत्यागेन स्वरूपानंदो येन स तथा । निर्जितेंद्रियग्रामत्वेन स्वरूपानंदानुभवेन संतुष्ट इत्यर्थः । प्रतिलब्धात्मभाव इति पाठे सम्यक्कृतसेवः परमात्मभक्त इत्यर्थः । अनेन तद्यज्ञानदानयोग्यपुरुषेषु युक्तो नियतभार्यासु वेश्यामतेरेणतरसंगो वर्जनीय इति प्रकाशितं । तदुक्तं । सत्संगेषु वनिताः स्त्रीषु न संगो हो घमावहेत् । यथायोग्यगुणा यैव दोषहृत् तद्दुष्टं जंतुष्विति । न तत्संगात् कोऽनर्थ इत्यत उक्तं । यामिति । अस्य कामुकस्यांगने न स्त्रियः सर्वथा वर्जनीया इत्युक्तं । तदुक्तं । अंगारसदृशी नारी घृतकुंभसमः पुमान् । तस्मान्नारीषु संसर्गं दूरतः परिवर्जयेत् । गौडी माध्वी तथा पैष्टी विज्ञेया त्रिविधा सुरा । चतुर्थी प्रमदा ज्ञेया ययेदं मोहितं जगत् । माद्यति प्रमदां दृष्ट्वा सुरां पीत्वैव माद्यति । यस्माद्दृष्टिमदा नारी तस्मात्तां नावलोकयेदिति ४१

राम
१९१

इतोऽपि सर्वप्रयत्नेन दुष्टा स्त्री वर्ज्येत्याह । योपयातीति । या देवविनिर्मिता योषिन्माया भार्यात्वेनोपयाति मुमुक्षुस्तां आत्मनो मृत्युमीक्षेत किमिव तृणै राच्छन्नं कूपमिव ४२ पतिर्वा मोहात् स्त्रीसंगतस्त्रैः स्त्रीः शब्दे संघात इति धातोः । शब्दादिविषयासक्तितः कारणात् स्त्रीत्वप्रमदाभावं प्राप्तां मृषभायंतीरतो वृषीकरणनामारोपः पुरुषधर्मं भ्रमावर्तंती मन्मायां वित्तापत्यगृहप्रदां मन्यते तामिति पूर्वेण संबंधः ४३ हरिभक्त्यादियुतापत्यपि भक्तिरहितं पतिमात्मनो मृत्युमीक्षेत नरकहेतुं पश्येत् । किं विशिष्टं मृत्यापत्यगृहात्मकं । कथमिव । यथा मृगयोर्गायनं मृगस्य मृत्युहेतुस्तथेत्यर्थः । सत्संगेषु वस्तथा स्त्रीषु

योपयाति शनैर्माया योषिद्देवविनिर्मिता ॥ तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ४२ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं ॥ स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं ४३ तामात्मनो विजानीयात्पत्यपत्यगृहात्मकं ॥ दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४४ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ॥ भुंजान एव कर्माणि करोत्यविरतं पुमान् ४५ जीवो ह्यस्यानुगो देहो भूतेंद्रियमनोमयः ॥ तन्निरोधोऽस्य मरणमाविर्भावस्तु संभवः ४६

इत्याद्युक्तमत्रापि प्रमाणं ४४ ज्ञानं विना न कर्मक्षयः किंतु कर्मपरंपरामेव करोतीत्याह । देहेनेति । जीवभूतेन जीवानां कर्मजातेन लोकाल्लोकं देहाद्देहं । स्वायोग्यभार्यादिप्राप्तौ किं कारणमित्यत आह कर्मकारणमित्याह । देहेनेति ४५ जीवलक्षणमाह । जीव इति । भूतेंद्रियमनोमयो देहो यस्यानुगमनी व इति । मृतो जात इति व्यवहारात् । जीवो नित्य एवेति न शंकनीयं । तस्य देहवियोगसंयोगावेव मरणजननेन तु स्वरूपनाशः तथा सति मोक्षादियोग्यताकथनं व्यर्थं स्यादिति भावेनाह । तन्निरोध इति । अस्य जीवस्य तन्निरोधः तस्य देहनाशो भूतेषु लयो मरणमाविर्भावो भूतसंयोगलक्षणो

विरोधत्यागप्रकाशः संभवो जननं नाम । तृणाद्यैः कूपमिव
शेषयाणकं ४५

उक्तमर्थं स्फुरयति। इन्द्रियोपलब्धीति। इन्द्रियाणां पंचानां भूतानां चोपलब्धिस्थानस्य शरीरस्य पृथिव्यादिविषयज्ञानाश्रयत्वात् इन्द्रियेन्द्रियाद्याद्यादिदर्शनस्यायोग्यता यदा दिङ्मरदर्शनयोग्यत्वं यदा नास्ति तदा दर्शनं पंचत्वं मरणं संज्ञं भवत्यहं मानादहमिदं शरीरमित्यभिधानात् द्रष्टृदर्शनमेवोत्पत्तिरित्यन्वयः ४७ इदं दृष्टांतयति। यथेति। यथा ह्यक्ष्णोः चक्षुषो ईक्षावयवः शोक्तादिरूपं तस्य दर्शने अयोग्यता कामलादिदोषदुष्टतया सामर्थ्याभावः।
तदेव चक्षुषः सकाशात् द्रष्टुरात्मनो द्रष्टृत्वेनेति शेषः। यदानयोश्चक्षुषोर्योग्यता अस्तीति शेषः तदा चक्षुः सकाशाद्द्रष्टुः द्रष्टृत्वं प्रतीयत इत्यन्वयः

इन्द्रियोपलब्धिस्थानस्य इन्द्रियेन्द्राद्योग्यता यदा॥ तत्पंचत्वमहंमानादुत्पत्तिरीक्षदर्शनं ४७ यथाक्ष्णोरीक्षावयवदर्शनायोग्यता यदा॥ तदेव चक्षुषो द्रष्टुर्द्रष्टृत्वयोग्यतानयोः ४८ पुंसोयथैवेन्द्रियाणि विंदंति स्वगतं परं॥ सुखदुःखं नान्यगतं तथैशांशाः पृथक्कृताः ४९

४८ नन्विह संसरन् जीवः ब्रह्मैव चेतनत्वात् ब्रह्मैव संसरति ब्रह्मैव मुच्यत इत्याचार्यैरुक्तेः। अत्राह। पुंस इति। पुंसः पुरुषस्य चक्षुरादीन्द्रियाणि यथा परं केवलं स्वगतं स्वविषयं रूपादि तन्त्रि भिन्नं सुखादिकं च विंदंति नान्यगतं। चक्षुर्यौ ह्यो श्रोत्रं न जानाति श्रोत्रग्राह्यं चक्षुरित्याद्युतोऽपि ... यथैव
इन्द्रियाणां भेदः सिद्धः तथेशांशाजीवाः संसरंतः पृथक्कृताः अन्योन्यं हरेश्च भिन्ना इत्यत आचार्योऽपि तत्वज्ञानी नस्यादित्यर्थः। यः सर्वज्ञ इति श्रुतेश्च ४९

नन्वेवं तर्हि यावज्जीवमस्य संसार बंधस्य नाशात् मुक्तिरीदृग्दुःखनिवर्तकसाधनाभावादित्यत्राह। आत्मन इति। आत्मनो जीवस्य केवलमहं हरेर्ज्ञानमेवार्थः पुरुषार्थः ईदृग्दुःखनिहृत्तिसाधनलक्षण इत्यर्थः। एवं विधज्ञानोत्पत्तौ पुरुषसाधनं हि नयति देहादीनि। अहं ममेति देहाद्यसंगएव साधनमित्यर्थः ५० ननु देहाद्यसंगिनो जीवस्यात्यघमानं कथंकारमुत्पद्यते ज्ञानमित्यातस्तत्प्रकारमाह। सुखदुःखादय इति। बलमानंदरूपं जन्यत्वादि श्रुतेः स्वतः सुखादिरूपत्वादात्मनो जीवस्य सुखदुःखादयो भावा न संति। किमुत देहस्याचेतनत्वादिति वशहार्थः। तस्मादिति यस्माद्देहदेहितोर्न सर्वसु

आत्मनः केवलं ज्ञानमर्थो देहाद्यसंगिनः ५० सुखदुःखादयो भावा न देहस्य न चात्मनः॥ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः ५१ बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह॥ सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया॥ मायाविरचिते लोके चरेन्न्यस्य कलेवरं ५२ इतिश्रीभागवते महापुराणे तृतीयस्कंधे कापिलेयो जीवगतिर्द्वात्रिंशतितमोऽध्यायः॥ ॥

खादयो भावाः। किंत्वाभिमानिकाज्ञानादुत्पद्यंते तस्मात्त्रासादिकं न कार्यमित्यर्थः ५१ ननु जीवन्मुक्तोऽस्मिंल्लोके कथं वर्तत इति तत्राह। बुद्ध्वेति। यस्य देहाद्यसंगिनो जीवस्य कलेवरं मायाविरचिते श्रीनारायणेच्छानिर्मिते लोके कर्मभद्रमोचरेद्वरति वर्तते। स मुक्तसंगो धीरो गंभीरो ज्ञानी सम्यक् यथार्थदर्शनं ज्ञानं यस्याः सा तया। भक्तियोगवैराग्ययुक्तया बुद्ध्या जीवानां स्वगतिं स्वर्गादिनरकादिलक्षणामाश्रयं श्रीनारायणं बुद्ध्वा तमेव निरंतरं निषेवमाणश्चरेद्वर्ततेत्यन्वयः इतिश्रीभागवतटीकायां तृतीयस्कंधे द्वात्रिंशोऽध्यायः॥ ॥

अर्चिरादिमार्गएवानावृत्तिमुक्तिसाधनंसचभक्त्यैकलभ्यइत्याद्यर्थमस्मिन्नध्यायेवक्ति। तत्रादौधूमादिमार्गः कर्मिणांस्वर्गप्राप्तिसाधनंसोपीषद्भक्तिमतएवेत्यतः प्रधानसाधनंभक्तिरेवेतिदर्शयतुमाह। अथेति। अथप्रवृत्तिमार्गस्थस्यफलमुच्यते। किंतदिति। योगृहेस्थितोगृहमेधीयान्गृहस्ययोग्यान्धर्मान्एवावसन्गृहेषुवर्तमानोधर्ममर्थंचकामंचदोग्धितत्फलमितिशेषः। भूयस्तानेवपिपर्ति इष्टापालनप्रणयोरितिधातोःपुत्रादिरूपदेशेनकुरेतिस्वयंकृत्वावर्धयतीत्यर्थः। तद्वर्द्धनप्रकारमाह। सचापीति। चशब्दोहेत्वर्थः। दुःखनिवृत्तिसुखप्राप्तिसाधनभगवद्धर्मात्भक्तिलक्षणात्

श्रीभगवानुवाच अथयोगृहमेधीयान्धर्मानेवावसन्गृहे॥ काममर्थंचधर्मंचदोग्धिभूयःपिपर्तितान् १ सचापि भगवद्धर्मात्काममूढःपराङ्मुखः॥ यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः २ तच्छ्रद्धयाक्रांतमतिःपितृदेवव्रतःपुमान्॥ गत्वाचांद्रमसंलोकंसोमपाःपुनरेष्यति ३

पराङ्मुखोपिकाममूढश्चसन्नृषूंदनवनितादिकाममूढत्वेनसस्पृहीक्रतुभिर्देवान्यजते। श्राद्धादिनापितॄंश्चेत्यन्वयः २ तत्पूजाफलमाह। तच्छ्रद्धयेति। तेषांदेवादीनांयजनकर्तव्यताश्रद्धया। पितृणांदेवानांसंतुष्टियोग्यंव्रतंयस्यसतथा। धूमादिमार्गेणचांद्रमसंचंद्रेणाधिकृतंलोकंस्वर्गैकदेशंगत्वाभगवद्धर्मात्पराङ्मुखः पुमान्पुण्यफलंभुक्त्वापुनःपापफलंभोक्तुंनिरयमेष्यति। भगवतीभक्तःस्वर्गकाममूढःपुमान्स्वर्गंगत्वाभुक्तपुण्यशेषेणपुनर्भूलोकमुपैष्यतीत्यतत्रात्पर्यार्थः। ईशीङ्क्तोभगवतिसुकर्मास्वर्गमेष्यति। अभक्तोनिरयंयातिसुकर्मापिनसंशयइत्यनेनावगम्यते ३

प्रवृत्तिधर्मिणांलोकानामंतवत्त्वेनतत्प्राधान्यंकार्यंतिभावेनतन्नाशावधिमाह। यदेति। चशब्देनलोकनाशस्यावश्यंभावित्वमाह। निवृत्तिधर्मिणांमार्गगम्यंतत्साधनंचसंक्षिप्याह। निवृत्तीति। पुरुषस्वरूपधर्मःसत्वगुणःतेनायद्वासत्वेनात्मभावेनपरमात्मभक्त्यासूर्यद्वारेणार्चिरादिमार्गेणमनवनामानंपुरुषंयांति। किंतत्रैवावस्थानमुतान्यत्रापीतितत्राह। विश्वतोमुखमिति। विभक्तिविपरिणामेनपुरुषेणोत्यनुवर्त्तनीयं। मानवपुरुषेणप्रतीकालंबनाविश्वतोमुखंसर्वंतपरावरेशंमुक्तामुक्तप्रपंचेश्वरंप्रकृतिंमूलकारणमस्यजगतउत्पत्त्यंतभावनंसृष्टिसंहारकारणंविष्णुंयांति

यदाचाहींद्रशय्यायांशेतेनंतासनोहरिः॥ तदालोकालयंयांतितएतेगृहमेधिनां॥ येस्वकर्मनदुह्यंतिधीराःकामार्थहेतवे॥ निःसंगान्यस्तकर्माणःप्रशांताःशुद्धचेतसः ५ निवृत्तिधर्मनिरतानिर्ममानिरहंकृताः॥ स्वधर्माख्येनसत्वेनपरिशुद्धेनचेतसा॥ सूर्यद्वारेणतेयांतिपुरुषंविश्वतोमुखं॥ परावरेशंप्रकृतिमस्योत्पत्त्यंतभावनं ६ द्विपरार्धावसानेयःप्रलयोब्रह्मणस्तुते॥ तावदध्यासतेलोकेपरस्यपरचिंतकाः ७

त्यन्वयः। इदमुक्तंभवति। प्रतीकालमनाप्रतीकालमनाउभयेपिज्ञानिनोविष्णुप्राप्याविमानवपुरुषेणकार्यब्रह्मप्रापिताःतत्समीपेवसंतीति ६ प्रतीकालंबनानामप्रतीकालंबनानांचकियंतंकालंतत्रनिवासइतितत्राह। द्विपरार्धेति। द्विपरार्द्धस्यावसानंसमाप्तिर्यस्मिन्कालेसतथोक्तःसब्रह्मणःप्रलयःयावताकालेनभवतितावंतंकालंपरस्यपरचिंतकाःपरमात्मोपासकास्तेउभयेपिकार्यब्राह्मणोलोकेसत्याख्येध्यासते। मुक्तेर्वतीदृतीत्यन्वयः। नान्वाधीःकर्मापेक्षी। किंवाधिकस्येतिज्ञातव्यं ७

ब्रह्मप्रलये विमुक्तिः कीदृशीत्याह। क्ष्मांभ इति। गुणत्रयात्मा सत्वादिगुणत्रयाधानकर्त्ता परः सर्वजीवोत्तमः स्वयंभूर्ब्रह्मा परं हि परार्द्ध्याख्यं स्वकालमनुभूय प्रतिसंजिहीर्षुः स्वसृष्टं जगत्संहर्त्तुकामः क्ष्मांभोनलानिलवियन्मनइंद्रियार्थभूतादिभिः पृथिव्यादिपंचभूताभिमानिदेवैर्मनोभिमानिभिरिंद्रियादिभिरर्थाः शब्दादयस्तदभिमानिभिश्च भूतादिभिरहंकारतदभिमानिभिश्च देवैः स्वबिंबद्वारेण गरुडशेषमार्गद्वयेनात्मानं प्रविष्टैः परिवृतः अव्याकृतं लक्ष्मीतत्वं यर्हि यदा विशति लक्ष्मीद्वारा परं ब्रह्म विशतीत्यर्थः ९ तदा परेत्य देहान्योगेन विसृज्यैव मुक्तप्रकारेण देवयानेन गत्वा भगवंतं वि

क्ष्मांभोनलानिलवियन्मनइंद्रियार्थभूतादिभिः परिवृतः प्रतिसंजिहीर्षुः॥ अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयंभूः ९ एवं परेत्य भगवंतमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः॥ तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः १०

कुंठनार्थं ब्रह्माणं वानुप्रविष्टा जितमरुन्मनस्कैः प्राणवायुमनोजयात्प्राप्तस्ववैराग्या विषयतृष्णारहिता ये योगिनो ज्ञानिनस्तेत्वबिंबद्वारेणानुप्रविष्ट ब्रह्मणस्तेनैव ब्रह्मणा साकममृतं नित्यमुक्तं प्रधानं सर्वोत्तमं पुरुषं पूर्णषड्गुणं ब्रह्मोपयांति। लिंगशरीरत्यागलक्षणां मुक्तिं प्राप्नुवंतीत्यर्थः। ननु शरीरभावे जीवत्वज्ञानमपि न हंस्यादित्यत उक्तं। अगताभिमाना इति। अत्यक्तजीवत्वाभिमानाः १०

एतदेव मुक्तिस्वरूपं विविच्य दर्शयति। आद्य इति। यो वेदगर्भो ब्रह्मा स्थिरचराणां स्थावरजंगमानामाद्यः आदौ भूतः सन् ऋषिभिर्मुख्यो मुमुक्षुर्गरुडशेषादिभिर्मुनिभिः सिद्धैः साधनसामग्रीमद्भिर्योगेश्वरैः कुमाराद्यैः सनकादिभिर्योगाचार्यैश्च सह भेददृष्ट्या जीवेश्वरादिविषयपंचविधभेदज्ञानेन। भेदज्ञानस्य मुक्तिरंजनज्ञानवद्धेयत्वेन नत्तेन मुक्तिर्निश्चयस्त्यत उक्तं। अभिमानेनेति। अभिमानेन पूर्णज्ञानेन यावता मुक्तिः स्यात्तावता ज्ञानेनेत्यन्वयः। निःसंगेन फलाभिसंधिरहितेन ज्ञानोत्तरकालीनेन कर्मणा विजयस्य दृष्ट्यादिकर्तृत्वात्सगुणं ज्ञानैश्वर्याद्यनंतगुणोपेतं नेदं शबलमित्याह। ब्रह्मेति। अथ कस्माद्ब्रह्मोच्यते ब्रह्मेति बृंहतो ह्यस्मिन्गुणा इति श्रुतेः। स तत एव सर्वगुणपूर्णमित्यर्थः। नाकाशवन्निरूपमित्याह पुरुषमिति। भक्तानुकंपया गृहीतपुरुषाकारं। अनेन गुणाश्चैवैश्वर्यादयः न तु सत्वादय इति द्योतयति। ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः इत्यादेः इतोपि न शबलमित्याह। पुरुषर्षभमिति। क्षराक्षरपुरुषातीतत्वात्पुरुषोत्तमं संग

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः॥ योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्त्तकैः ११ भेददृष्ट्याभिमानेन निःसंगेनापि कर्मणा॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभं १२ स संसृत्य पुनः काले कालेनेश्वरमूर्त्तिना॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते १३

तः प्रविष्टो भवति सायुज्यादिलक्षणां मुक्तिमाप्नोतीत्यर्थः। स ब्रह्मादिजीवराशिः संगत्य प्रलये प्रविश्य परमेश्वरं पुनः कालेन कर्त्ता तर्याविरीश्वरमूर्त्तिना हरिणा काले गुणव्यतिकरे सृष्टिलक्षणे जाते प्राप्ते। अगुणव्यतिकरे त्रिगुणव्यतिकररहिते वहिः श्वेतद्वीपे यथा पूर्वं सृष्टजीवादिभावेन संसारदशाया मत्वेतान्योन्यभेदेन स्थितस्तथा प्रजायते। प्रादुर्भूतानंदो वर्त्तते। यो वेदगर्भः सः प्रलये प्राप्ते परमेश्वरं संगत्य पुनः सृष्टिकाले प्राप्ते यथापूर्वं प्रजायत इति वा तदुक्तं। ब्रह्मादिदेवैः परिवृतः प्रलये परमेश्वरं। प्रविश्य सर्गे तु पुनः श्वेतद्वीपे प्रमोदते। ज्ञानधर्मफलं सम्यग्भोगान्भुक्त्वा लये पुनः। नारायणं समाविश्य ज्ञानव्यक्तं निजं सुखं। भुंजते त्वेवमेवैषां काले संसर्गनिर्गमौ। नित्ये नित्यसुखं वेवत्सृष्टो भोगाश्च योत्तमाः। गुणव्यतिकराभावे सृष्टजीवादिपूर्ववत्। विशेषेव विमुक्तानां न कदाचन गच्छतीति १३

एषामुक्तानां शक्तिसर्गनिर्गमः प्रतिलयं भगवत्स्वेशश्च नित्यशक्तिभावेनाह। ऐश्वर्यमिति। ते मुक्ता अपि संभाविता हरिलोक विशेषाः। सृष्टिकाले प्राप्ते हरेर्निर्गताः श्वे तद्वीपो पत्यारमेष्ठ्यं परमेष्ठिनः सर्वोत्तमस्य हरेः प्रसादादुपपन्नं धर्मविनिर्मितं ज्ञानधर्मफलं ऐश्वर्यमणिमादि भोगजातं तन्निषेव्य मुक्ताः पुनर्गुणव्यतिकरे असति प्रलये प्राप्ते सत्यनन्तमप्रवेशपूर्वकं परमेश्वर मायांतीत्येवं मुक्तगणस्य सृष्टौ संहारे च संसर्गो निर्गमो स्वरूपानंदभोगो बहुविधविषयभोगाश्च संतीति। तदुक्तं। ज्ञानधर्मफलांस्तत्र भोगान्भुक्त्वा लये पुनः। नारायणं समाविश्य ज्ञानयुक्तं निजं सुखं॥ भुंजते त्वेवमेवैषां काले संसर्गनिर्गमौ। नित्यो नित्यसुखं चैव सृष्टौ भोगाश्च योनमाः॥ गुणव्यतिकराभावे पुष्पवनी वादि पूर्ववत्। विष्णोश्चैव विमुक्तानां कदाचन गच्छतीति॥ सर्वेषां देवानामिमाव हेतीति ष्कतेः। सर्वज्ञो नमस्य ब्रह्मणोनीचत्वं हरेरेव नान्यस्मात्। तदुक्तं। यथा पूर्वं हरेः सर्वगुणो नीचात्मता सदा। ब्रह्मणश्च तथान्येषां अन्येषां च यथापदमिति। पुंसां तेषां पर

ऐश्वर्यं पारमेष्ठ्यं तत्तेपि धर्मविनिर्मितं॥ निषेव्य पुनरायांति गुणव्यतिकरे सति १५ अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयं॥
श्रुतानुभावं शरणं व्रज भावेन भामिनि १६

मात्म प्रसादेन परमानंदावाप्तिरस्तु स्त्रियो मम कथं स्यादित्याशंक्य सर्वेषामपि सस्य योग्यताऽनुसारेण सेवा सामर्थ्यं सत्यासाम्यादि सुपसंहारं सुखेन तां से वां विधत्ते। अथेति। यतो भगवदुपासकानां नित्यानंदलक्षणमुक्तिप्राप्तिः अथ तस्मात् ब्रह्मप्रमुख्यां योग्यब्रह्मादि मुक्तिदः तेन नारायणं व्रजेत्यन्वयः। केन साधनेनेत्य तउक्तं। भावेनेति। मम स्वामी भगवानहं तत्किंकरीति भावेन भक्तिक्रियया। भावो नीलाक्रियावेष्टितियादवः। कं सुगुणमुपसंहृत्येत्यत उक्तं। श्रुतानुभावमि ति। कुत्र स्थितमहं शरणं यामीत्यत उक्तं। सर्वभूतानामिति। अनेनांगुष्ठमात्रः पुरुषो मध्य आत्मनि संस्थित इति श्रुत्युक्तं भगवद्रूपं शरणं व्रजे स्तुक्तं भवति। भक्तिगुणत्वेनेति शेषः १६

एवं मुक्तिस्वरूपं निरूप्य अनिरूप्यर्थमुनातद्योग्यानाह। येत्विति। तु शब्दोऽत्यंतवैलक्षण्यद्योतकः। इह मनुष्यादौ ये स्वर्गादावेवासक्तमनसो यज्ञादिकर्मस्वेव श्रद्धया युक्ताः। अप्रतिषिद्धानि अग्नीषोमीयं पशुमालभेतेत्यादिविहितानि यागादिविहितानि कर्माणि नित्यानि संध्यावंदनादीनि कृत्स्नशः एकाविलोपेन कुर्व ति १६ किं च रजसा रजोगुणेन कुंठमनसः उपरंजितमनसोऽत एव कामात्मनो विषयलोलस्वभावा अत एवाजितेंद्रिया अत एव गृहेष्वभिरताशया नित्यं वि षक्तमनोरथा अनुदिनं पितॄन्यजंतीति १७ हरावनर्पितश्राद्धादिकर्तारः ते पुरुषास्त्रैवर्णिकाः धर्मार्थकामयोग्या एवन तु मोक्षयोग्याः। तत्र कारणमा

येत्विहासक्तमनसः कर्मसु श्रद्धयान्विताः॥ कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः १६ रजसा कुंठमनसः का मात्मानोजितेंद्रियाः॥ पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशयाः १७ त्रैवर्णिकास्ते पुरुषा विमुखा हरिमेधसः॥ कथायां कथनीयोरुविक्रमस्य मधुद्विषः १८ नूनं दैवेन विहता ये चाच्युतकथासुधां॥ हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः
१९

हा विमुखा इति। कथनीयः प्रबंधीकर्तुं योग्यः उरुर्महान् विक्रमो यस्य मनस्तथा तस्य हरिमेधसः मनोहरजन्मस्य मधुद्विषो हरेः कथायां विमुखा इति यतो ऽतो न मुक्तियोग्या इति। भगवद्भक्तिवर्जितैः पुंभिः प्राप्यफलमाह। नूनमिति। ये चाच्युतकथासुधां हित्वा असद्गाथाः काव्यनाटकविषयाः शृण्वंति दैवेन ह रिणा विहता देहवियोगं प्रापिता। विड्भुजो विड्वराहादयः इव पुरीषमसेव्य तुल्यं निरयं यांतीति शेषः। तदुक्तं। अश्रमेवप्रजायंते ये तु भक्तिविवर्जिताः। अन्या सामान्यवेत्तारः तदन्यो न्नमवेदिनः। तद्भक्तनिंदकाश्चैव यांत्येव निरयं ध्रुवं॥ अपि धर्मैकनिश्चयाना न कार्या विचारणेति १९

नित्यसंसारिणांत्रैवर्गिकाणांकिंफलमत्राह।दक्षिणेनेति।येत्विहाप्रतिषिद्धानिनित्यानिचकर्माणिकुर्वाणाः हरावत्यल्पभक्तास्तेदक्षिणेनपथादक्षिणाध्वमार्गेणार्यम्णोयमस्यपितृणामधिपस्यलोकंव्रजंति।किंतत्रैववर्ततेनित्यनिवासइतितत्राह।प्रजेति।स्वर्गमनुष्यलोकावाप्तिमेवप्रांसदानतेत्याशयेनाह।श्मशानांतक्रियाकृतइति।त्रैवर्गिकाः स्वसंतानेषुपुत्ररूपेणभूत्वागर्भाधानादिश्मशानांतीताःक्रियाः कुर्वंतस्त्वर्गंगत्वाततः स्वर्गात्क्षीणसुकृताः भुक्तपुण्यशेषाः देवैः सद्योविभ्रंशितोदयाः अतएवविवशाइमंमनुष्यलोकंपतंतीति।पुनःशब्दःक्रियासमभिव्यवहारार्थः।तदुक्तं।अत्यल्पभुक्ताविष्णौतुसदाश्राद्धादिकारिणः।पितृलोकंसमाविश्यस्वसंतानेपुनःपुनः।क्षिप्रमेवप्रजायंतइति।देवादिमनुष्यांतमानानांमुक्तियोग्यत्वंहरावल्पभक्तानाम

दक्षिणेनपथार्यम्णःपितृलोकंव्रजंतिते॥प्रजामनुप्रजायंतेश्मशानांतक्रियाकृतः २० ततस्तेक्षीणसुकृताः
पुनर्लोकमिमंसति॥पतंतिविवशादेवैःसद्योविभ्रंशितोदयाः २१ तस्मात्त्वंसर्वभावेनभजस्वपरमेष्ठिनं।तद्गु
णाश्रययाभक्त्याभजनीयपदांबुजं २२

ध्यममनुष्याणांश्राद्धादियज्ञादिकृतांस्वर्गविशेषयोग्यत्वंहरौद्वेषयुक्तानामसुराणांतमोयोग्यत्वमित्ययंविशेषोमुक्तियोग्यास्तुदेवाद्यामानुषायज्ञभागिनः।मनुष्यभेदाःश्राद्धादिकृतोविद्वेषिणोहराविति वाक्यमावगंतव्यमिति २१ पूर्णाःगुणोपास्तिरेवमुक्तिसाधनंननिर्गुणोपासनाइतिभावेनोक्तार्थमुपसंहरति।तस्मात्त्वमिति।सर्वभावेनस्वस्वयोग्यपूर्णभक्त्या।यस्माद्भक्तिमंतरेणापेक्षितपुरुषार्थाभावः तस्माद्गुणतः सर्वत्रसत्त्वाद्योतिवा।ब्रह्मादिरूपेणवराशेर्विलक्षणोममस्वामीतिभक्त्या २२

भजनेकिंफलमितितत्राह।वासुदेवइति।ब्रह्मदृश्यतेऽनेनेतिब्रह्मदर्शनंयज्ज्ञानंतच्चजनयति।वैराग्यस्यभक्तेः पूर्वभावित्वेपिकार्यकारणभावोनदूषणं।भक्तिःप्रागुत्पन्नंवैराग्यंप्रविनोतीति २३ वैराग्यादिसाधनसंपन्नस्यास्यउपासकस्यापरोक्षज्ञानोत्पत्तिसमयमाह।यदास्येति।यदास्योपासकस्यचित्तंबंधकत्वेनसमेषुशब्दाद्यर्थेषुसमेष्विंद्रियवृत्तिभिरिंद्रियवृत्तिभिर्वैषम्यंनविगृह्णाति।किंतुशब्दाद्यर्थाःसर्वेबंधकत्वेनममाप्रियाएवसर्वस्माद्भगवा

वासुदेवेभगवतिभक्तियोगःप्रयोजितः।जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्शनं २३ यदास्यचित्तमर्थे
षुसमेष्विंद्रियवृत्तिभिः॥नविगृह्णातिवैषम्यंप्रियमप्रियमप्युत २५ सतदैवात्मनात्मानंनिःसंगं
समदर्शिनं॥हेयोपादेयरहितमारूढपदमीक्षते २६

नेवप्रेष्ठइतिनिश्चिनोति २५ सतदावाह्यांतःकरणोविनष्टशक्तिकेसत्यात्मनास्वरूपबिंबेनसात्मानंस्वबिंबंपरमात्मानमीक्षते।आत्मासंसार्यथवात्राऽव तइत्यन्यथाप्रतीतिंनिवारयति।निःसंगमित्यादिना।असंगोह्ययंपुरुषइतिश्रुतेः।समदर्शिनंयथार्थज्ञानिनं।निर्दोषंहिसमंब्रह्मेतिस्मृतेः।नित्यनिर्दोषज्ञानरूपत्वात्।हेयोपादेयरहितंअतएवारूढपदंसर्वोत्कृष्टस्थानं २६

तत्र ह्यादिसिद्धनामधेयोपित्र्ययमेवनपृथगितिभावेनविशिनष्टि। ज्ञानमात्रमिति। तत्रज्ञानमितिसंगिरंतेसोगताः। परंब्रह्मेतिवेदांतिनः। परमात्मेतियोगिनः। ईश्वरइतिवैशेषिकाः। पाशुपताश्च। पुमानितिसांख्याः। भगवानितिपौराणिकाः। इत्येतैः शब्दैरेकएवईयते। कैर्लिंगैरित्यतउक्तं दृश्यादिभिरिति। ज्ञानमेवमात्रापरिमाणंयस्यतत्तथोक्तं। ब्रह्मसुतत्वेषु परमुत्तमंपरंब्रह्म। आत्मभ्योजीवेभ्यः परमत्वात्परमात्मा। ईशनशक्तिमत्वादीश्वरः। आख्यातपुंशक्तिमत्वात्पुमान्निःपैश्वर्यादिगुणाकरत्वाद्भगवान्। एवंविधगुणोदृश्यादिभिः पृथग्भावैर्लिंगैः घटादयोजडत्वेनमूर्तत्वेनदृश्याःस्पृश्याःन

ज्ञानमात्रंपरंब्रह्मपरमात्मेश्वरःपुमान्॥ दृश्यादिभिः पृथग्भावैर्भगवानेकईय
ते २६ एतावानेवयोगेनसमग्रेणेहयोगिनः॥ युज्यतेभिमतोह्यर्थोयदसंगस्तु
कृत्स्नशः २७

तथेत्यादिरूपैः २६ इदानीमुक्तार्थनिगमनमुखेनमुक्तेरंतरंगभक्तियोगस्यमुख्यफलमाह। एतावानिति। इहोपासकानांमध्येस्थितस्यभक्तियोगिनः समग्रेणषडंगोपेतेनभक्तियोगेनसाध्योभिमतोर्थः पुरुषार्थएतावानेवयुज्यतेयुक्तोनुभूयते। कइत्यतउक्तं। यदसंगइति। यत्कृत्स्नशः साकल्येनासंगः लिंगशरीरसंबंधोभवति २७ श्रीरामचंद्रनमः

इदानींमत्स्याद्यवताररूपंब्रह्माप्यशाकृतदेहत्वेनमुमुक्षुणाज्ञातव्यमन्यथादर्शनेबंधमएवेत्याशयेनाह। ज्ञानमेकमिति। एकंसर्वोत्तमंस्वगतभेदवर्जितंज्ञानंसच्चिदानंदलक्षणंब्रह्मबहुत्वसंख्याविशेषविषयंपूर्णमत्स्यादिरूपंनिर्गुणंप्रकृतिगुणनिर्मितदेहरहितंपरमंब्रह्मशब्दादिधर्मिणा शब्दस्पर्शादिविषयधर्मवताज्ञानापराचीनैर्बहिर्विषयेषुप्रवृत्तैश्चक्षुरादींद्रियैः अर्थरूपेणभौतिकशरीरभ्रांत्यामिथ्याज्ञानेनावभाति। पूर्णमदः पूर्णमिदमितिश्रुतेः। तस्मात्तथाप्रतिभानवानबंधंतमोयातीतिशेषइत्यर्थः। तदुक्तंच। मत्स्यकूर्मादिरूपंचविज्ञोज्ञानैकमात्रकं। तन्मन्यतेभौतिकंतुयेगच्छंत्यधरंतमइति २८ ज्ञानस्यैकत्वात्इदमर्थकथंज्ञानानीत्येतदुदाहरति। यथामहानिति। महान्महत्तत्वाभिमानीब्रह्मावैकारिकात्मनात्रिवृत्त्रिधाहंकारोहंकाराभिमानीरुद्रः आकाशादिपंचभू

टिका

ज्ञानमेकंपराचीनैरिंद्रियैर्ब्रह्मनिर्गुणं॥ अवभात्यर्थरूपेणभ्रांत्याशब्दादिधर्मिणा २८ यथामहानहंरूपः
त्रिवृत्पंचविधः स्वराट्। एकादशविधस्तस्यवपुरंडंजगद्यतः २९

ताभिमानित्वेनपंचविधः मनआद्येकादशेंद्रियाभिमानित्वेनएकादशविधःस्वराडिंद्रश्चैतेअज्ञानिनांभौतिकशरीरत्वेनापिअयथाप्रतीयंते। तथामत्स्यादिरूपंपरंब्रह्मेत्यर्थः। अभिमानित्वमात्रेणाभिमन्यमानदेहत्वेकथमित्येतत्स्पष्टयति। इदमंडंसर्वंजगत्तस्येंद्रस्यवपुरितियतोतइति। अनेनब्रह्मरुद्रयोरपिभौतिकदेहत्वंस्पष्टमित्युक्तंभवति। अत्रयथाप्रतीतार्थोदाहृतिके ऽमुपयुक्तःस्यादितिसंव्याख्यानमितिज्ञातव्यं। एकादशेंद्रियात्मावपंचभूतात्मकस्तथा। सर्वाभिमानीभगवान्स्वराडिंद्रः पुरंदरः। इदमंडंजगत्सर्वंशक्रदेहंविदुर्बुधाः। तत्पतित्रिगुणोरुद्रस्तस्यब्रह्मातनोहरिरितिवचनात् २९

तर्हि तद्ब्रह्म यथावत् ज्ञातुं कथं शक्यते इति तत्राह। एतदिति। एतैः साधनैरधिकारी तन्मयत्वाद्यवस्थापन्नं ब्रह्म परिपश्यति। शाक्तं देहादिदोषपरित्यागेन ज्ञाना
नेराद्यनेन गुणप्रतीत्वेनापरोक्षीकरोतीत्यन्वयः। कैरित्यत्रोक्तं। श्रद्धयेत्यादिभिरिति। नित्यशो नुकूलतया मादियोगाभ्यासेन। कीदृशोधिकारी समाहितात्मा हरा
वेव सम्यगर्पितमनाः। निःसंगः दुष्टसंगरहितः निर्णीतसज्जनसंगो वा। निर्निर्णीय निषेधयोरिति यादवः।। विरक्तः सर्वमसारमनित्यं चेति ज्ञानवान्। वाङ्ग्यत्वेनेन एते
रेव साधनैर्नापरैरैक्यज्ञानादिभिर्ब्रह्मदर्शनं स्यादिति सूचयति। ज्ञानरूपमेकं निर्गुणं ब्रह्म भ्रांत्यार्थरूपेण प्रपंचवात्मनावभातीत्याद्युपव्याख्यानं निरासाय वम
त्य कर्मादिरूपं वविस्मोर्ज्ञानैकमात्रकमित्याकूतं दाहृतमावार्थैरिति ज्ञातव्यं ३१ तत्त्वोपदेशमुपसंहरति। इतीति। ब्रह्म दर्शयतीति ब्रह्मदर्शनं। तात्पर्यमिति श

एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः।। समाहितात्मा निःसंगो विरक्तः परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं।।
येनैवबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ३१ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः।। द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२

यजनना यज्ञानं विशिनष्टि। येनेति। प्रकृतिशब्दवाच्यस्य लक्ष्म्यादेः पुरुषशब्दवाच्यस्य विष्ण्वादेश्च तत्त्वमनारोपितं रूपं येन ज्ञानेनावबुध्यत इत्यन्वयः ३१ अव
श्यानुष्ठानार्थं येन विना मुक्तिमात्रं न स्यात्तत्साधनं निर्दिशति। ज्ञानमिति। यो नैर्गुण्यो भक्तिलक्षणो योगो यच्च ज्ञानं ज्ञानयोगस्तयोर्द्वयोरप्येक एवार्थो विषयो यस्य
सः। स क इति तत्राह। भगवच्छब्देति। भगवच्छब्दवाच्य इत्यर्थः। भक्तिज्ञानयोगयोरेकस्यैवाद्यनंतगुणपूर्णश्रीनारायणो विषय इति भक्तिज्ञाने मुक्तेः स्वरूपसाधने मयो
पदिष्टे इति। ज्ञानभक्ती विना नैव मुक्तिः कस्यापि विद्यते। तयोरेकतरेणापि विविक्तं गेनो भयं विना। एवमप्येतयोरेकभावेन्यनियतेकं वा एकेनापि भवेन्मुक्तिस्तद
र्थत्वन्यसाधनमिति वाक्यार्थं ज्ञानापलक्षणाद्युक्तं। लक्षदर्शनांकनयोरिति धातोः सूचितोयमर्थ इति ३२

एकस्यानेकधागुणविषयत्वं कुत्र दृष्टमिति तत्राह। यथेति। यथा बहूनां शब्दस्पर्शरूपरसगंधगुरुत्वादीनां गुणानामाश्रयो बहुगुणाश्रय एकोर्थः पदार्थो
नानेयते। कैः पृथग्द्वारैः पृथक्पृथक्द्वारभूतं वर्तनं येषां तानि तथा तैर्भिन्नमार्गैरिंद्रियैः श्रोत्रेण शब्दवान् त्वचा स्पर्शवांश्चक्षुषा रूपवान् जिह्वया रसवान् घ्राणेन गं
धवान् पाणिना गुरुरिति ज्ञायते। एवं स भगवानेकोपि ज्ञानानंदादिबहुगुणाश्रयः शास्त्रवर्त्मभिः वेदांतादिशास्त्रमार्गैरानंदवान् ज्ञानवान्नित्यादिबहुगुणवि

यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः।। एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ३३ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायदर्श
नैः।। आत्मेंद्रियजयेनापि संन्यासेन च कर्मणां ३४ योगेन विविधांगेन भक्तियोगेन चैव हि।। धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृ
त्तिमान् ३५ आत्मतत्त्वावबोधेन वैराग्येण दृढेन च।। ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३६

षयत्वेन ज्ञायत इत्यन्वयः ३३ भक्तिज्ञानविषयत्वात्तत्साधनक्रियादीनामपि भगवानेकानेकविषय इत्याह। क्रियेति। येनादिश्लोकद्वयेन। क्रियया संध्यावं
दनादिलक्षणया। भगवल्लिंगानां दर्शनेन। आत्मनो मनसश्चक्षुरादीन्द्रियाणां जयेन कर्मणामशास्त्रविहितानां संन्यासेन त्यागेन एकस्य धर्मस्योभयचिह्नत्वं क
थमिति तत्राह। य इति। य इति प्रत्येकमपि संबध्यते। प्रवृत्तिमान्निवृत्तिमानिति। भगवदुपासनादिप्रवृत्तिः हिंसादिनिवृत्तिः तद्वानित्यर्थः ३६

इदानीमुक्तपरमप्रमेयमुपसंहरति। प्रावोचमिति ३७ संसृतीर्गतीः। यासु संसृतिषु प्रविशन्नात्मा जीव आत्मनः स्वस्य गतिं शरणमात्मानं न वेद ३८ उपदिष्टतत्त्वज्ञानानधिकारिण आह। नैतदिति। खलः इंद्रियारामो दुर्जन इत्यर्थः स्तब्धो गुरुनियोगमकुर्वाणः। भिन्नो वैभवसमये तरसमयनिष्ठः। धर्मध्वजो दंभवान्। लोलुपो विषयाभिलाषी। खलत्वादिदोषरहितोपि ममाभक्तश्चेन्नैवोपदेशयोग्यः प्रसंगेनापि त्वाशयेनोक्तं जात्विति। नैतावतापूर्यत इत्याह नमद्भक्तद्विषामिति ४० तर्ह्यनधिकारित्वेनैनं दुत्सादनं स्यादिति तत्राह। श्रद्दधानायेति। अनसूयवे गुणेषु दोषविष्करणबुद्धिरहितः। बहिः स्वर्गादौ त्र्यायसंपि

प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं॥ कालस्य चाव्यक्तगतेर्योंतर्धावति जंतुषु ३७ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः॥ यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ३८ नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित्॥ न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ३९ न लोलुपायोपदिशेन्न गृहारूढचेतसे॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ४० श्रद्दधानाय भक्ताय विनीतायानसूयवे॥ भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ४१ बहिर्जातविरागाय शांतचित्ताय दीयतां॥ निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ४२ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत्॥ यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ४३ इति श्रीभा· तृतीयस्कंधे कापिलेये त्रयस्त्रिंशः॥ ॥

यतमात्पुत्रादीनां सकाशात्। न देतव्येय इति श्रुतेः ४२ अधिकारिणः फलज्ञानात् विषय वृत्तिः स्यादित्यतः तत्फलमाह। य इदमिति। अवहिताहितवेदन इति धातोः। तस्माग्निविक्तेचेति तत्त्वबुद्धिरंबमातः अभिधत्ते वक्ति। हि हेत्वावधारणयोः त्वभिधानादुभयमपि ग्राह्यं। इत्येव। मम पदवी मे ति हि यस्मात्तस्मात्कुमारादिकं कर्तव्यमिति॥ ॥श्री॥ ॥ ॥इति तृतीये त्रयस्त्रिंशः॥ ॥ ॥श्री॥ ॥

कपिलावतारेणोपदिष्टं तत्त्वज्ञानं देवहूत्याः सिद्धमभूदिति तत्स्तुतिव्याजेन विज्ञायत इति तदेव प्रतिपाद्यतेस्मिन्नध्याये। पूर्वं कर्दमस्य शुश्रूषया कर्शिता तत्स्त्रीति न रत्वात्तस्य दयिता प्रेष्टाभूत्। सा देवहूतिरेवं तदुक्तं निशम्य तमभिप्रणम्य। कपिलस्य विष्णुत्वं श्रद्दधाना यया तं तुष्टावेत्यन्वयः। कीदृशी विध्वस्तं उन्मूलितं मोहपटलं मङ्गरत्वात्तस्य दयिता प्रेष्टाभूत्। सा देवहूतिरेवं तदुक्तं निशम्य तमभिप्रणम्य। ... नाख्येति मिरंयस्यासा। कीदृशं तत्त्वविष्णुस्तद्विषयाश्चैते अखिलात्मनस्य सिद्धा ब्रह्मादयस्तेषां भूमिमाश्रयं। यद्वा तत्त्वस्थितमज्ञानलक्षणं विषमा पयतीति तं त्वविषया भगवत्तत्त्वज्ञानरहितेत्यर्थः १ तत्त्वाज्ञाने नास्तीति द्योतितं स्पष्टयति। अथेति। अथ मंगलमस्तु। भगवन्नेतव जठरान्नजातः उदरनाभिपद्मसंभूतो ब्रह्मा स्वयं यद्वपुर्दध्यौ। किं क्रियाविशिष्टमत्राह। अप्पर्यंत इति। अप्पर्यंते सलिले प्रलयजलमध्ये शयानं। प्रलयावसाने दध्यौ चिंतितवान्। किंगुणविशिष्टमाह। भूतेति। आकाशादीनि भूतानि श्रोत्रादीनींद्रियाणि अर्थाः शब्दादयः आत्मा मनः एतेषां मयं प्रधानं। मयं प्रधाने सृष्टमिति वचनात्। अत्र प्रधानकार्यभूता

मैत्रेय उवाच एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः॥ विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धभूमिं १ देवहूतिरुवाच अथाप्यजोंतःसलिले शयानं भूतेंद्रियार्थात्ममयं वपुस्ते॥ गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः २

दिभ्यः प्राधान्यकथनेन प्रधानादप्युत्तममिति ज्ञातव्यं। त्वं प्रधानमयो देवः प्रधानादधिको यत इति वचनात्। अत्र प्रधानादिशब्देन तदभिमानिनो लक्ष्मादयो गृह्याः ततस्तदुत्तमत्वगुणविशिष्टमित्यर्थः। स्वतंत्रमपीति भावेनाह। गुणप्रवाहमिति। सृष्ट्यादौ सत्त्वादिगुणान्प्रवाहयति प्रवर्तयतीति। ज्ञानादिगुणप्रवाहो यस्मिंस्तथा। नन्विदं सगुणं किं न स्यादित्यत उक्तं। सदिति। सत्सत्त्वं। सत्सत्त्वेप्यर्थितेषु अस्पृश्यत्वादाह। गुणप्रवाहमिति। ज्ञानादिगुणानां प्रवाहो यस्मिंस्तथा। नन्विदं सगुणं किं न स्यादित्यत उक्तं। सदिति। सत्सत्त्वं। सत्सत्त्वेप्यर्थितेत्रेषु असंतीत्यतोवाह। गुणप्रवाहमिति। ... नशबलं किंतु निर्गुणं। इदं निर्गुणं चेत् जगत्सृष्टमन्यत्स्यादिति नेत्युक्तं। अशेषसाधीयसि भगवत्यपीति यादवः। सदेव सौम्येदमग्र आसीदिति श्रुतेः। न शबलं किंतु निर्गुणं। ... बीजमिति। जगद्बीजकं निर्गुणमेव सृष्टिस्थित्यर्थः २

जगद्धेजकत्वंस्पष्टयतिभगवानपिसएवेत्याह।सएवेति।सएवतादृग्भूतस्त्वंध्यानेनाणुमात्रभेदरहितोभवान्विश्वस्यसर्गादिविधत्ते।इत्यन्वयः।युगपन्नेत्याह।गुणप्रवाहेष्विति।गुणप्रवाहेषुगुणैःसृष्ट्यादिपरंपरासुब्रह्मादिरूपेणविभक्तंराजससात्त्विकतामसभेदेनपृथक्कृतंवीर्यंमाहात्म्यंयस्यसतथा।कार्येषुप्रवर्त्तमानोदेववन्नवत्क्लिष्टकारीकिंनेत्याह।अनीहइति।अत्रहेतुगर्भविशेषणमाह।अवितथाभिसंधिरिति।सत्यसंकल्पत्वादित्यर्थः।एवंविधोऽन्योनास्तीतिभावेनाह।आत्मेश्वरइति।अविशेषेणात्मनांजीवानामीश्वरत्वादन्योनास्तीत्यर्थः।एकस्यविचित्रशक्तिस्वभावात्।ईश्वरत्वंकथमुपपद्यतइतितत्राह।अतर्क्येति।विचित्रशक्तिःपुरुषःपुराणइतिश्रुतेः ३ अतर्क्यशक्तिसहस्रत्वमनुमापयति।सत्वमिति।नाथयस्यतवजठरेएतद्विश्वमासी

सएवविश्वस्यभवान्विधत्तेगुणप्रवाहेषुविभक्तवीर्यः।सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ३ सत्वंभृतोमे
जठरेणनाथकथंनुयस्योदरएतदासीत्।विश्वंयुगान्तेवटपत्रएकःशेतेस्ममायाशिशुरंघ्रिपानः ४ त्वंदेहतंत्रःप्रशमायपा
प्मनांनिदेशभाजांचविभोविभूतये।यथावतारास्तवसूकरादयस्तथायमप्यात्मपथोपलब्धये ५

युगान्तेमाययेच्छयाशिशुरंघ्रेरंगुष्ठस्यपानंयस्यसोऽङ्घ्रिपानःसत्वमेकएवसन्वटपत्रेशेतेसत्वंमेजठरेणकथंनुभृतः।सहोप्रवातर्क्यसहस्रशक्तित्वमनुमिनोमि।यतोऽहंसर्वब्रह्माण्डमात्रभारमपिवोढुमशक्तात्रैलोक्यधरंत्वामवहमिति ४ इदानींकपिलस्यभगवतोऽतर्क्यसहस्रशक्तिनाहरिणोऽवतारप्रयोजनंविज्ञापयति।त्वंदेहतंत्रइति।विभोव्याप्तदेहेतंत्रंस्वतंत्रःप्रकाशोयस्यसतथा।सत्वंतुचिदानंदाद्यात्मकदेहेनैवप्रकाशितत्वंकतारवान्नसि।ननुजीववत्प्राकृतभौतिकदेहवत्त्वेन।देवयथातवसूकरादयोवताराहिरण्याक्षादिपाप्मनांप्रशमायतथानिदेशभाजांभाक्तानांकालिंगब्रह्मादिदेवानांविभूतयेकृताःएवमयमप्यवतारःकल्पादिनाप्रलुप्तस्यात्मपथस्यज्ञानमार्गस्योपलब्धयेप्रकाशनायकृतइतिशेषः ५

श्रीत्वित्यिदंयत्त्वद्दर्शनादिनाकृतार्थाइत्यर्थंत्रिकैमुत्यन्यायमाह।यन्नामधेयेति।श्वादःश्वभक्षकः।सवनायसोमलताविहन्यायपूर्वकरणायेत्यर्थः।कल्पतेसमर्थोभवति ६ श्रीविष्णुभक्तस्यभावसोमयाजित्वमप्रयोजकमितिभावेनाह।अहोबतेति।अनंतरातीतग्रंथेसोमयाजीसामान्यतःप्रकृतस्तत्रद्विजत्वंसंभाव्यतेवैष्णवश्चावैष्णवश्चेति।अतोऽनयोरवैष्णवसोमयाजिनःश्वपचोगरीयानहोविष्णुभक्तेःसारस्यं।सास्यासीत्याह।यज्जि

यन्नामधेयश्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादपिक्वचित्।श्वादोऽपिसद्यःसवनायकल्पतेकुतःपुनस्ते
भगवन्नुदर्शनात्। ६ अहोबतश्वपचोतोगरीयान्यज्जिह्वाग्रेवर्त्ततेनामतुभ्यं।तेपुस्तपस्तेजुहुवुःसस्नुरार्याब्रह्मा
नूचुर्नामगृणंतियेते ७

ह्वेति।यस्यश्वपचस्यजिह्वाग्रेतुभ्यंतवनामवर्त्ततेजातिक्रियासमभिव्याहारंसूचयति।तुभ्यमितिचतुर्थ्यानारायणायनमइत्यादिनामचतुर्थ्यंतंप्रयोक्तव्यमितिसूचयति।नन्विदंभक्तिमतएवसंभाव्यतेभक्तिस्तुबहुजन्मसंचीर्णपुण्यवतएवबहूनांजन्मनामंतेकृष्णेभक्तिःप्रजायतइतिवचनात्अतःकथंतामसयोनेःश्वपचस्येतितत्राह।तेपुस्तपइति।इदानींतन्नामसंकीर्त्तनेनानुमितपुरातनतपआदिनांतःकरणशुद्धिरस्तीतिज्ञापते ७

अवतारमूलरूपयोर्न कश्चिद्विशेषोस्तीति यदुक्तं तन्मयास म्यगवबुद्धमिति ज्ञापयन्ती स्तुतिमुपसंहरति। तं त्वेति। अहं ज्ञानमेकमित्यादिना प्रतिपादितो यस्त्वां वंदे इत्यन्वयः। न केवलं वाचा किंतु कायेनापीति भावेनोक्तं मद्धेति। अनेन मातृत्वाभिमानेन सूज्यत्वाभिमानमपहरत्स्यति। प्राकृताशाहृतयोरैक्यं कथंस्यादित्यत उक्तं। ब्रह्मेति। ब्रह्मशब्दस्यानेकार्थग्रहणेः कथं निर्णय इत्यत उक्तं। परं पुमांसमिति। अतोस्मिन् लोके वेदेति व प्रथितः पुरुषोत्तम इति गीतोक्तत्वात् दित्यर्थः। तत्र ज्ञानि प्रसन्न प्रमाणमिति भावेनाह। प्रत्यक स्रोतस्यात्मनीति। विषयसंवरणमुक्त्वा प्रत्यगात्मनि हृदोनदीरुपेणापि यदवस्थितं तस्मिन्नात्मनि मनसि संविभाव्यं प्रत्यक्षी करणयोग्यं। चक्षुरादीन्द्रियैः प्रत्यग्भवति। आत्मनि हृदये तिवा॥ कथमपरोक्षीकुर्वंतीतितिपंपवाहवत्स्यदमाने आत्मनि मनसि संविभाव्यं प्रत्यक्षीकरणयोग्यं। चक्षुरादीन्द्रियैः प्रत्यग्भवति। आत्मनि हृदये तिवा॥ कथमपरोक्षीकुर्वंतीति तत्राह। विसुतन्नाह। स्वतेजसेति। स्वतेजसा स्वरूपभूतसच्चिदानंदलक्षणप्रभावेन ध्वस्तगुणप्रवाहं नित्यनिरस्तसंसारं। कथं निरूप्य वंदनमिति तत्राह। विष्णु

तं त्वाहं ब्रह्म परमं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं॥ स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भं ८

कपिलमिति। सकलजगद्व्यापी नारायणः कपिलनामा अवतीर्ण इति। बलानंदस्वरूपत्वाद्विष्णुः कं सुखं पिबतीत्यानंदानुभवाद्वा जातस्सर्वदानाद्वा कपिल इत्येकार्थत्वात् बलआदन इति धातुः। अत्र प्रमाणं ध्वनयति। वेदगर्भमिति। वकारो बलमेष ह्यानंदमादत्त इत्यादिचेदेन गर्भो ज्ञानं यस्य स तथा। तां भ्रूण्यं भगमिति सोभगवान्ययहममिति श्रुतेः। यद्वा वेदतात्पर्यमित्यर्थः। वेदो गर्भो यस्य स तथा तं। स्वगुणप्रतिपादकत्वेनातिप्रियत्वादितिवा। वेदं निस्रीर्य बिभर्तीति वा। अनेन वेदस्य नित्यत्वं नित्यस्य स्वस्य ग्राहकेषु इदमेव मुख्यं प्रमाणमिति ध्वनयति। अत्र हेरन्यान्यपि यानि यानि नामानि तैस्सैर्विशिष्टं त्वां तु वंद इति द्योतनाय ब्रह्मादिबहुनामग्रहणमित्यवगंतव्यं ८

नन्वनेन स्तोत्रेण कपिलस्य कश्चित्प्रसादविशेषो जातश्चेदुक्तं सर्वसत्यं तत्त्वस्यादिदं वा येन तु प्रयोजकं स्यादतोत्र तादृशं लिंगं किमित्याशंक्य भगवांस्ता हर्षितगर्भितां वाचं वक्तीत्याह। ईडित इति। अविक्लवया अदीनया। इदमेकं प्रसाद लिंगं। इति शब्देन सूचितं प्रसादविशेषं स्पष्टयति। मार्गेणेति। काष्ठामानंदोत्कर्षमवरोत्स्यसि नित्यामभिव्यक्तं करिष्यसि। अचिरादित्यनेन कपिलस्य मातरि प्रसादातिशयं सूचयति। नमयेत ज्ञाथावदुक्तं किंतु मातोपदेशवदतोत्र त्वया सिक्व बुद्धिः कर्तव्येत्याह। श्रद्धत्स्वेत दिति। मह्यं मम मामुद्दिश्येति वा। नैतन्नत्वज्ञानमुक्तं किंतु वैदिकमेवेति भावेनाह। जुष्टं यदिति। तत्प्राप्तावहेतुश्चेद्दैदिकमप्यप्रयोजकमिति तत्राह। येनेति। अनेन त्वं साक्षात्परं ब्रह्मेति देवहूत्याय दुक्तं तत्सत्यमिति द्योतितं। विपक्षे बाधकमाह। मृत्युमिति। न तन्मतं विदंतीत्यतद्विदः मृत्युं संसारं तन्मसविह

मैत्रेय उवाच ईडितो भगवानेवं कपिलाख्यः परः पुमान्॥ वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९ श्रीभगवानुवाच मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे। आस्थितेन परां काष्ठामचिरादवरोत्स्यसि १० श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः॥ येन मामभयं याया मृत्युमृच्छंत्यतद्विदः ११ मैत्रेय उवाच इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं॥ स्वमात्रा ब्रह्मवादिन्या कपिलोनुमतो ययौ १२

ह्यैक्यमतं वृद्धंती ति मृत्युं नित्यमरणरूपमेधंतमनुच्छतीत्यर्थः ११ देवानां त्वनुविरवासोन धर्म इति विदुषा मम पितृज्ञातित्वात् पुनर्हरिणा किमकारीति तत्राह। इतीति। इतिशब्देन गते ज्ञानस्य सम्यगनुग्रहहेतुत्वलक्षणत्वं वक्ति। उपदेशेन प्रदर्श्य मातुर्विद्या सार्थक्ति विन्नसंगे स्वात्मनो गतिं स्वरूपस्थितिं वा प्रदर्श्येत्यनेन द्योतयति। उशतीति मभीष्टं वर्धितीं स्वच्छां तानोपदेष्टृत्वेन गुरुत्वादात्मपुत्रत्वेन सुहृत्वात्सादेवहूती पुत्रगमने कथमनुज्ञे। निर्दय हृदयत्वेनेत्याशंक्यापरिहार्यत्वात्। अस्य ज्ञानित्वात्स्वात्मस्थत्वाच्च १२

भा॰ त॰
२०२

तथापि तस्याः इतो पि किं दुःखं नाभूदिति। सा चापी ति। सा देवहूती तत्वगार्हस्थ्यं तत्याज। द्वित्वाप्युक्तं। शास्त्र विश्लेषणातुरा सती वदनं किंचिच्चकारेत्यु त्रविरहोत्थ दुःखानलस्तुक्त्कं कृतवती त्यन्वयः। अपि संभावितमेतच्छोक दृष्टत्वात् किं च ततो न्यत्र गत्वेत्यत उक्तं। तस्मिन्निति। सरस्वत्याः तटे आसीना तत्वात्म माहिता। समाधानस्य फलमाह। योगादेशेनेति। योगादेशेन ज्ञानलक्षणोपायोपदेशेन कारणेन योगं भगवद्ध्यानं युंक्त इति योगयुक्। यथानंतरसु क्षिस्याएवं बाह्यसुद्धिरप्यसी ति भावेनाह। अभी क्ष्णेति। अनेन नित्यस्नाने न शृंगारनिष्ठादो ष्णं न्यावर्तयति। आत्मानं देहं कृशं बिभ्रतीत्यनेन फलमूलाद्य

सा चापि तनयोक्तेन योगादेशेन योगयुक्॥ तस्मिन्नाश्रम आसीना सरस्वत्याः समाहिता १३ अभीक्ष्णावगाहकपिशां कुटिलाज टिलालकान्॥ आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशं १४ प्रजापतेः कर्दमस्य तपोयोगविजृंभितं॥ स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि १५ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च १६ स्वच्छस्फटिककु ड्येषु महामरकतेषु च॥ रत्नदीपा विभांति ललना रत्नसंयुताः १७

शनमपि नास्तीति लक्ष्यते। स्वगार्हस्थ्यत्यागे किं कारणं येन योगेन दुःखं स्यादिति तत्राह। अनौपम्यमित्यादिना निरुपमायोग्यं यस्य तदनौपम्यं वैमानिकैर्दे वैः। एवं विधमाहात्म्ये निमित्तमाह। प्रजापतेरिति। प्रार्थ्यत्वे पि निमित्तमाह। पयः फेननिभा इति। यत्र गार्हस्थ्ये गोक्षीरफेनस्य शुभ्राः शय्यादयः संतीति शेषः। दांताः गजदंतनिर्मिताः। रुक्मेण स्वर्णेन परिच्छदो लंकारो यासां ताः तथा। सुस्पर्शाः स्पर्शसुखकराः आस्तराः कटादयो येषु तानि तथा। ललनार त्नैः संयुता रत्नदीपार्चिषः कुड्येषु स्फटिकरत्नहंसेन्यस्त रत्नदीपार्चिषः स्वच्छस्फटिकादिमणिमयकुड्येषु भांतीत्यर्थः १७

राम
२०२

कुसुमितैर्बहुभिरमरद्रुमैः रम्यं गृहोद्यानं बभासीत्यर्थः। यत्र गृहोद्याने उत्पलगंधिन्यां वाप्यां प्रविष्टं कर्दमेनोपलालितमात्मानं विबुधानुचरा जगुरित्यन्वयः। पुनरपि की दृशं स्वगार्हस्थ्यमाखंडलयोषितां इंद्रस्त्रीणामीप्सिततमं अत्यर्थकमनीयं। पतिविरहादपि पुत्रविरहो दुःसह इति भावेनोक्तमेव विवृणोति। वन मिति। नन्वेवं तर्हि पुत्रविरहो द्भूत दुःखार्तमना भगवदुपास्तिमप्यभांक्षीत् किं तत्राह। तमेवेति। अनेन तस्याः मुपास्तिप्रकारो दर्शित इति। एवकारेण स्वचिंता विजा तीयवृत्तिं निःस्पृहयति। निस्पृहेति। ननु सुतोक्तमन्यदन्यदुपास्ते पुत्रवियोगभ्रांतबुद्धित्वादित्याशंक्याह। ध्यायतीति। समस्तचिंता सर्वावयवचिंता व्य स्तचिंतैकैकावयवचिंता तया। तस्या उपास्तेः फलमाह। भक्तिप्रवाहेति। सा देवहूतिर्विष्णुः सर्वात्मा इति ज्ञानसहित निरतिशयप्रेमलक्षणभक्तिनदीप्रवा

द्धा॰

गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः॥ कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं १८ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः॥ वाप्यामुत्पलगं धिन्यां कर्दमेनोपलालितं २० हित्वा तदीप्सिततममप्याखंडलयोषितां॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरं २१ वनं प्रव्रजिते पत्या वपत्यविरहातुरा॥ ज्ञाततत्वाप्यभून्नष्टे वत्से गौरिव वत्सला २२ तमेव ध्यायती देवमपत्यं कपिलं हरिं॥ बभूवाचिरतो वत्स निस्पृहा तादृ शे गृहे २३ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं॥ सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया २४ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा॥ युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना २५ विशुद्धेन तदात्मानमात्मना विश्वतोमुखं॥ स्वानुभूत्या तिरोभूतमायागुणविशेषणं २६

हयोगेन बलीयसा स्वर्गादेः पुरुषार्थत्ववादिशास्त्रार्थकृतिव्याख्यामुग्यबुद्धिरहितेन बलिष्ठेन वैराग्येण युक्तं यदनुष्ठानमखंडध्यानं तस्माज्जाते न ब्रह्महेतुना परब्रह्मप्रसादजनन कारणेन ब्रह्महेतिनेति पाठे ब्रह्मवशीकरणायुधेनेत्यर्थः। अत एव विशुद्धेन कल्मषसंशयलक्षणदोषरहितेना विश्वते न ज्ञानेनात्मना स्वस्वरूपेण मनसा ध्यात्मानं स्वबिंबभूतं विश्वतोमुखं सर्वज्ञं वास्तव एव स्वानुभूत्या तिरोभूतं दूरतो निरस्तं मायागुणैः सत्वादिभिर्देहं ब धलक्षणं यस्य स तथा तं। हरिं ददर्शेति शेषः २६

साक्षात्परोक्षज्ञानोदयानंतरं ईदृशीमवस्थां प्रापेत्याह। ब्रह्मणीति। सा यदा परमात्मानमाश्रयात्तदात्मानं स्वशरीरं न सस्मारेत्यन्वयः। कीदृशी आत्म संश्रये सर्वाधारे भगवति ब्रह्मणि। कालतो देशतो गुणतो व्याप्तिरहिते अवस्थितमतिरेकाग्रमनाः। निवृत्तजीवभावत्वान्मुक्तलिंगशरीराभिमानित्वाद्धीतक्लेशा निरस्तदुःखा। आत्मनिर्वृतिरात्मपरमानंदा। नित्यारूढसमाधित्वान्नित्यं हरावेव सन्निविष्टमनस्कत्वात्पराहृतगुणभ्रमा पराहृतः परिभूतः गुणेषु शब्दादि विषयेषु दुःखसाधनेष्वपि बुद्धिभ्रमो यस्याः सा। कथमिव स्वप्नदृष्टमिवोत्थितः स्वप्नादुत्थितः स्वप्ने दृष्टं यथा न स्मरति तथेति। नन्विदं निदर्शनं निवृत्तजीव भावत्वे कथमुपपद्यते। स्वप्नद्रष्टा जीवत्वानिवृत्तेरितीयमाशंका। जीवो पाधिप्रवृत्तयश्चामुक्ते सर्वदेहिनां नियमात्तत्स्वभावस्तु निःफलत्वादुदीर्यतइत्यने न परिहरणीया। एतात्पर्यार्थद्योतनाय स्वप्नोत्थितनिदर्शनमिति। तात्पर्यार्थो ज्ञातव्यः। इदमपरोक्षज्ञानोदयानंतरं लक्षणमित्याह। तद्देहइति। यस्य

ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये॥ निवृत्तजीवभावत्वात्क्षीणक्लेशाप्तनिर्वृतिः २५ नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा। न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः २८ तद्देहः परतः पोषोप्यकृशश्चाध्यसंभवात्। बभौ मलैरवच्छन्नः सधूमइव पावकः २९ स्वांगं तपो योगमयं मुक्तकेशं गतांबरं॥ दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ३० एवं सा कपिलोक्तेन मार्गेणाचिरतः परं॥ आत्मानं ब्रह्मनिर्वाणं भगवंतमवाप ह ३१ तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं। नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ३२ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित्॥

दोषोपगतः सत तस्याः देहो बभौ विलयत्वयः। आध्यसंभवाच्छरीरकार्श्यहेतुमनोदुःखाभावादकृश॰ श्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ३३ त्वा। अकृतइति पाठे विहितस्नानादिशून्यइत्यर्थः। पुनेत्तपातेपर्यामेत्कृतं स्त्रीषु विहितेर्थवदितियादवः। यद्वा अपर्याप्तः। असमाप्तगारघकर्मा। शरीरा भिमानाभावादाध्यसंभवोनुमीयतइति भावेनाह। स्वांगमिति। गोप्तभावात्कथं तद्देहावस्थानमत्राह। दैवेति। दैवेन हरिणा गुप्तं रक्षितं। रक्षणनिमित्तमाह। वासुदेवेति। श्रवणसुखस्याप्यस्य प्रसंगस्य तदानुसमाप्तिरितिमंदाशंकापरिहरंस्तस्य देहस्य पारवश्यकर्म। निर्वाणेनत्व स्वश्रीनारायणप्राप्तिं वक्ति। एवं सेति॥ अचिरं सर्वगतं निर्वाणं प्रकृतिप्राकृतिशरीररहितं निर्वृतं वा हेत्वेनेनेति हा स समाप्तिं सूचयति। पूर्वं मुक्तस्य हरेरश्रुबिंदुनिपातात् बिंदुसरो नामाप्यद्य दानीमस्या देवहूत्याः सिद्धपदहेतुत्वात्सिद्धपदमिति नामांतरं वक्ति। तद्वीरेति। वीर विदुर। तत्तदा हकाभावात् स्वमृण्मलादिगोचरश्वेशेकद्दितेबुण

पूर्वं कपिलागमनस्य कर्मनोक्तमधुना तत्पूर्वं तद्गमनं वक्ति। कपिलोपीति। महायोगी पूर्णज्ञानी प्रागुदीचीं दिशं शंकररहितां दिशं। महर्षिणा निके तने पूर्वं ज्ञानिवासस्थाने यस्मिन्स तथा। योगं ध्यानलक्षणं प्राणायामलक्षणं वा। सांख्याचार्यैर्यथार्थज्ञानोपदेष्टृभिः सनकादिभिः। नायं योगः स्वप्रयो जनोपदेशार्थः किंतु लोकः सुखार्थइत्याह। त्रयाणामिति। उपशांत्यै मंगलाय। मैत्रेयो विदुरं संबोधयन्नुतत्प्रश्नपरिहारकथनमुपसंहरति। एतन्निगदि तमिति। न केवलं देवहूत्या एव सिद्धिहेतुर्लोकस्य चेति चार्थः। श्रोत्रादीनामपि प्रवृत्त्यर्थं श्रवणादिफलमाह। यइदमिति। आत्मयोगगुह्यं परमात्मश

कपिलोपि महायोगी भगवान्पितुराश्रमात्॥ मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ३४ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः॥ स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ३५ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः॥ त्रयाणामपि लोकानामुपशांत्यै समाहितः॥ ३६ एतन्निगदितं तात यत्पृष्टोहं तवानघ॥ कपिलस्य च संवादो देवहूत्याश्च पावनः ३७ यइदमनुशृणोति योभिधत्ते कपिलमुने र्मतमात्मयोगगुह्यं॥ समवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदं ३८ इति श्रीभागवते महापुराणे तृतीयस्कंधे पारम हंस्यां संहितायां कापिलेयं चतुस्त्रिंशतिमोऽध्यायः समाप्तः॥ ॥

सिसाधनज्ञानोपायानां मध्ये रहस्यं यः सुपर्णकेतौ गरुडध्वजे भगवति कृतधीः श्रवणादिनेदं मतमाप्स्यति। स च भगवत्पदारविंदमुपलभते आप रोक्षीकरोतीति। सुनीलनीरदश्यामं सच्चिदानंदविग्रहं॥ रमारमणमीशेशं विट्ठलं समुपास्महे १ पदरत्नावलिर्नाम तृतीयस्कंधकाशिनी॥ वनमा लेव देवेश नवकंठे विराजतां २ तृतीयस्कंधमारुह्य गिरींद्रमिव गह्वरं। अवरूढेमयि स्निग्धाः कृपां कुर्वंतु साधवः २ इति श्रीमन्महेंद्रतीर्थ पूज्यपादशिष्यविजयध्वजतीर्थमुनींद्रकृतायां श्रीमद्भागवतटीकायां पदरत्नावल्यां तृतीयस्कंधे चतुस्त्रिंशोऽध्यायः समाप्तः॥ ॥शुभमस्तु॥ ॥
ग्रंथसंख्या ७००० सार्धशतश्लोक

॥श्रीवेंकटेशनारसिंहाभ्यांनमः॥
॥नरहरेरिदं॥
॥श्री॥

भागवतचतुर्थः
॥श्रीवेंकटेशनारसिंहाभ्यांनमः॥
॥नरहरेरिदं॥

भा॰ च॰
१

श्रीवेदव्यासायनमः निरंतरायोरुभक्त्या॥ पशुपतिरपि प्रेम्णा दक्षो यतो गमदुन्नतिं सकलजनतां वंधस्थानं भक्तो यस्तु यहात्पृथुरथ महीं दोहकीर्तिं शुभां समपापदान्तमिमम जितं वद्दारणां मम द्दमुदंनुमः १ अभिनवरविप्रद्योतवाली विभासिवपुः श्रियं हरिरिह यह स्वब्रह्मस्नाद्यं प्रसन्नं तसदात्रि षां॥ कमलनयनस्वांतं प्रेद्भाद्यादरसत्क्रियां शरणमनिशं विश्वस्यास्य स्थियं श्रियमीमहे॥ ॥ तत्तीयस्कंधतलधेरुन्मेग्राहं कथं चन॥ चतुर्थस्कंधस्सीमवगाढुं पुनर्ईथे ३ मानेतिहासरसंयोतेस्युतो फिसरोरुहो॥ आत्मप्रद्योतनी भक्तिः पुनश्च प्रतिपाद्यते ४ अत्रादौ हरेर्निरतिशयप्रेम

व॰

श्रोंनमोभगवतेवासुदेवाय मैत्रेयउवाच मनोस्तु शतरूपायां तिस्रः कन्याः प्रजज्ञिरे आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः १ श्रीरामचंद्रायनम

लक्षणभक्तिविधानाय पशुपतेर्दक्षाध्वरध्वंसलक्षणं चरितं वक्तुं स्वायंभुवमनुचरितमनुवदति मनोस्त्विति पुनः पुनः कथाप्रादुर्भावस्याभ्युन्न मेफलं॥ विज्ञापयितुकामास्तु विद्वांसस्तत्र तत्र लितिवचनात् पुनरुक्तकथानुवादेन दोषोयतिज्ञातव्यं॥ किंचैव विना तु रागेनापि फला विकंय विशिनष्टि द्वे पुत्रेभ्येति॥ पुत्रानुवर्ण्णनार्थश्च कारः॥ ॥ १ ॥ राम श्रीराम

१

आत्ममतीमप्याकूतिं पुत्रिकाधर्ममाश्रित्य रुचये प्रादा दित्यन्वयः॥ अस्यां यः पुत्रो भवेत्स मत्पुत्रस्त्वेति प्रतिज्ञाय प्रदानं पुत्रिकापुत्रधर्मः॥ राज्यार्थेन पुत्रा भावान्मनुना देहित्र पुत्रत्वेन ग्रहीतः किंतु स साक्षाद्विष्णुरितिजानता तात्पितृत्वेज्ञानातिशयवान्मुक्तोसुखातिशयवान्स्यामिति॥ आत्ममतीमिपतेन पुत्र वत्सप्रतीतेः प्रियव्रतोत्तानपादविनिवह्नमाणत्वाच्च॥ २॥ प्रजापतिशाहस्यानेकाभिधेयत्वात्तिलेन कोत्र विवक्षितइत्यपेक्षेत्र रुचिरिति॥ राजपुत्र्यां लि नपरिचर्यादावहंकारसंभवेन तत्यागसंभवेनापत्यानुत्पत्त्यामनोरोषनिष्फला भूदितिलोकापवादः परिहृतोनेनाऽत एव भगवानिति॥ अनि

आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः॥ २॥ प्रजापतिः स भगवान्रुचिस्तस्यामजीजनत्॥ मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ३ यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक्॥ या स्त्री सा दक्षिणा भूतेरंशभूताऽनपायिनी ४ आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषं॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणां ५

शुनं विविनयति॥ यस्तयोरिति॥ नाम्नायज्ञ इति स्वरूपधृक्॥ औत्पत्तिकसौंदर्यधारीयज्ञस्वरूपधृगित्येकं वा पदं यज्ञो विष्णुर्देवतेति श्रुतेः॥ अनेन विष्णुना मानं यज्ञमानं व्यावर्तयति॥ भूतेर्लक्ष्म्याः भूतिः श्रीर्भस्म जन्म स्वित्यभिधानोत्र नपायिनी जन्ममरणरहितेत्यनेनास्याश्रपि श्री नारायणवदाविर्भाव एवेति ध्वनयति ४ स्वायंभुवेन विवाहकालेयद्रुक्तं तत्सत्यं कृतं कार्यांतरासक्त्यानविस्मृतंतेनोति भावेनाह॥ आनिन्य इति

५

भा॰च॰
२

यत्तुषां पतिः। स कलवेदप्रतिपाद्यत्वेन तदनुसारिहेतुत्वेन तत्प्रवर्त्तकत्वेन वेदपतिरित्यर्थः। हरिणा यदर्थमवतीर्णं तत्प्रयोजनमाह। तुष्टायामिति। तुष्टायां दक्षिणायां॥ ६॥ द्विषट् द्वादश॥ ७॥ तोषादीनां समुदितं नामाह। तुषिता इति। आदित्या इत्यत्र लादयस्था आदित्याना मदेवा स्त्रथा तुष्टायां नु ज्ञेला तुषिता नाम देवाः। मरीचिमिश्राः मरीचिमुख्याः सुरगणेश्वर इन्द्रः यज्ञपुत्रा देवा आसत यज्ञः स्वयमिन्द्रोऽभूत्॥ ८॥ स्वायंभुवमन्वन्तरे केचन्तरमिति तत्रोह। शिष्य

तोषः प्रतोषः संतोषो भद्रः शान्तिरिडस्पतिः॥ इध्मः कवि
तो कामयानां भगवानुक्त्वा हयः तुष्टां पतिः॥ तुष्टायां तोषमापन्नो जनयन्द्वादशात्मजान्॥ ६ विर्विभुः स्वह्नः सुदेवो रोचनो द्विषट्॥ ७॥ तुषिता नाम ते देवा आसन्स्वायंभुवान्तरे॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः॥ ८॥ प्रियव्रतोत्तानपादौ
मनुपुत्रौ महौजसौ॥ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदन्तरम्॥ ९॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः॥ तत्संबंधि श्रुतप्रायं भवता गदतो मम
॥ १०॥ दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः॥ प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान्॥ ११॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षि
पत्नयः॥ तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे॥ १२॥ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा॥ कश्यपं पूर्णिमानं च ययोरापूरितं जग
त्॥ १३॥ पूर्णिमासूत विरजं विश्वगं च परंतप॥ देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः १४

तेतिनष्टारः पौत्रपुत्राः॥ सा देवहूतिकथामनुवर्तते देवहूतीति। तत्संबंधि चरितं श्रुतप्रायं प्रायशो श्रुतं॥ किंचिद्वशिष्टमस्तीत्यर्थः॥ ११॥ ताप्रसूतिं का
तेति नष्टारः पौत्रपुत्राः॥ देवहूतिकथामनुवदति देवहूतीति। तत्संबंधि चरितं श्रुतमा यांप्रायशो श्रुतं॥ प्रसूतिप्रसरं प्रसूतिप्रपंचं॥ १२॥ चंद्रकलाख्या
स्मात्प्रसादितित्राह। दक्षायेति॥ १२॥ एवमनूद्य वक्तव्यमाह। याः कर्दमेति। पत्नयः पत्न्यः॥ प्रसूतिप्रसरं प्रसूतिप्रपंचं॥ १२॥ चंद्रकलाख्या
चन्द्रर्थकर्दमात्मजेति॥ ययोः संतत्या॥ १३॥ विश्वगं विरजं नष्टिः देवकुल्येति। दिवः सरित्स्वर्गनदी देवकुल्या। देवकुलप्रिया॥ १४

५

द्भु३

दत्तेजननामास्यात्मा विष्णुरीशः रुद्रः ब्रह्मा च चतुर्मुखः ब्रह्मणः सोमे विशेषावेश एव न तु श्रंगत्वं नं॥ १५॥ विदुरस्तु तदन्ताद्यवतारे विशेषजिज्ञा
सया पृच्छतीत्याह। अत्रेरिति। गृहे भार्यायां॥ स्थित्युत्पत्त्यन्तहेतवः। पालनसंहारसृष्टीनां कारणभूताः॥ १६॥ परम भागवतस्यात्रेः प्रियचिकी
र्षया प्रथमं प्रयोजनं। द्वितीयं योगप्रवर्त्तनाय। अवतार इति भावेन मैत्रेयः प्रश्नं प्रवक्ष्यामीत्याह। ब्रह्मणेति। ऋक्षं ऋक्षनामानं। किमर्थं आत्र इति

अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान्॥ दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् १५ विदुर उवाच अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्य
न्तहेतवः॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो १६ मैत्रेय उवाच ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः॥ सह पत्न्या ययावृक्षं कुलाद्रिं
तपसि स्थितः॥ १७॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने॥ वार्भिः स्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समन्ततः॥ १८ प्राणायामेन संयम्य मनो वर्षशतं मु
निः॥ अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः॥ १९ शरणं तं प्रपद्येऽहं य एव जगदीश्वरः॥ प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् २० तप्यमानं त्रि
भुवनं प्राणायामैधसाग्निना॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः २१ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः॥ वितायमानयशसस्तदाश्रमप
दं ययुः २२

वाहा तपसीति। गत्वा तपसि स्थितोऽभूदित्यन्वयः॥ १७ तस्मिन्नृक्षे तत्र प्रसूनानां स्तबका येषां ते प्रसूनस्तवकास्तेषां पलाशाशोकानां कानने यस्मिन्
तथा॥ तस्मिन्निर्विन्ध्याया नद्याः स्रवद्भिः स्पंदमानैर्वार्भिर्जलैः समंततोऽप्युद्घुष्टे गर्जिते॥ १८॥ वर्षशतमिति द्वितीयया एकस्मिन्नपि पादे द्वयेन नाते
ष्टदितिद्योतयति॥ १९॥ तपो विषयमाह। शरणमिति॥ किं मनोगतं तव इति तत्राह। प्रजामिति॥ २०॥ अत्रेस्तपसो माहात्म्यं तेन प्रसन्नानां त्रयाणां देवानां तदाश्रम
गमनं चक्रि॥ तप्यमानमिति॥ २१॥ अप्सरआदिभिर्वितायमानं प्रपंचीक्रियमाणं यशो येषां ते तथा २२

भा॰ प॰
३

तत्राउर्भीवस्ते प्राप्र काशास्त्रस्यसंबंधस्तेन विद्योतितमतिप्रकाशितं मनो यस्य स तथा २३ अर्हणमर्घ्यादिसाधनं मञ्जलिश्च यस्य स तथा। श्लक्ष्णमंडलुचक्रादिभिश्चि ह्नितान् किताम् २४ कृपया प्रयुक्तेनावलोकेन लसता वदनेनोपलंभितानुपलक्षितान्। तच्छोचिषा तेषां वपुस्तेजसा प्रतिहते प्रतिबद्धदर्शने चक्षिणी २५ त त्प्रवणं तेषु मग्नं। संहताञ्जलिः बद्धाञ्जलिः श्लक्ष्णया मधुरया। सूक्तया वैदिक्या। २६ कान् गुणानुपसंहृत्य तुष्टावेति तत्राह। विश्वेति। विश्वस्योद्भवस्थितिल येषु विभज्यमानैः श्रष्ट्य क्रुद्ध्य क्रियमाणैः मायायाः प्रकृतेर्गुणैः रजःसत्वतमःसंज्ञैः अनुयुगं कार्यानुकूलं। सृष्टये रजोगुणप्रवर्तकत्वेन। रक्षणाय सत्वगुणप्र

तत्राउर्भावसंयोगविद्योतितमना मुनिः॥ उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान्॥ २३॥ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणाञ्जलिः॥ वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्च चिह्नितान् २४ कृपावलोकेन हसद्वदनेनोपलंभितान्॥ तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युञ्जन्नस्तावीत्संहता ञ्जलिः॥ श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः २६ अत्रिरुवाच॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं प्रगृहीतदेहाः॥ ते ब्रह्म विष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः २७

वर्तकत्वेन संहाराय तमोगुणप्रवर्तकत्वेन प्रगृहीतो देहो यैस्ते प्रगृहीतदेहाः स्वीकृतावताराः हे ब्रह्मविष्णुगिरिशाः अहं वः प्रणतोऽस्मि प्रजापतेन खदेतान्य थ्यो विश्वजातानि परिता वक्ष्यवान् आस्यजानंतोनामुचिद्धिवक्तनमहसत्वविह्नोऽस्मति भजामहे। इमा रुद्रायस्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधान्ने इ त्यादिसूक्तं यियूयंते योषम्यपं भूयो भूयः प्रणतोऽस्मीत्यन्वयः॥ भक्तिरोमाश्लिष्टमनाः ब्रह्मस्थो उद्दष्टः पृथक् स्थितः स्वयमपि विष्णुस्त्रिपुरुषस माः प्रजाः प्रयच्छत्विति यः पूर्वसंकल्पस्तं विस्मरन्निवात्रिः दुष्टमोहनार्थं विज्ञापयति। एक एवेति। भवतां मध्ये मयैक एवोपहूतोऽत्र दृत्यन्वयः॥ २७॥

राम
३

एतदेवाविष्करोति। एको मयेति। इहवनेतपः कुर्वता मया विबुधप्रधानः सर्वदेवोत्तमो ब्रह्मा स्वो रुद्रः स्वयं विष्णुरेको भगवानेव प्रजननाय पुत्रोत्पा त्यर्थं त्रिपुरुषसमानपुत्रान्मह्यं देहीति चित्तीकृतो ध्यातः त्वयोवस्थिते तनुभृतां देहिनां मनसोऽपि दूरं विषयाः यूयं कथमत्रागतास्तद्ब्रूत सं भाषणेन प्रसीदत। मे इहाऽस्मिन्नर्थे एकस्मिन् ध्याते त्रयाणामागमनलक्षणो महान् विस्मय इति॥ ब्रह्मस्वर्यः स्वयं तापिहरिः प्रभुः॥ प्रजा त्रिपुरुषसमा यच्छत्विति रैक्षतीतस्मात्स्वब्रह्मन्नुद्वरूप्पं सह विष्णुर्जगत्पतिः। आगत्य तु त्रिमूर्तिश्चाः प्रासात् पुत्रान् जनार्दनः। भाविता वैकार्यस्य लोकानां मो हनायचेति वचनात् लोकमोहनार्थं मत्रिणा विकल्पितं न तु तत्वार्थत्वेन॥ २८॥ तत्त्वस्ति इत्कार्यस्य भावित्वात्स्यथासंकल्पः तथाकार्यमपि भविष्यति

एको मयेह भगवान्विबुधप्रधानश्चित्तीकृतः प्रजननाय कथं नु यूयं॥ अत्रागतास्तनुभृतां मनसोऽपि दूराद्ब्रूत प्रसीदत महानिति विस्मयो मे २८ मैत्रेय उवाच इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः॥ प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो॥ २९ देवा ऊचुः यथा कृतस्ते सं कल्पो भाव्यं तेनैव नान्यथा॥ सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायसि ते वयं ३०

संकल्पस्त्वेक एव तस्मात्त्रय इति प्रत्ययमरणेन नं तं जानं तो त्रिलोकमोहनार्थमुक्तं विकल्पाभिप्रायजातं तन्त्वगूहनं विज्ञाय प्रहसंतस्त्रयो देवा आहु रित्याह॥ इतीति॥ २९॥ कमपि ते तैः किमाहुरिति तत्राह। यथेति। तपश्चरता त्वया यथा संकल्पः कृतस्तेन संकल्पेन तथैव भाव्यं कर्तुमकर्तुमन्यथा कर्तुं समर्था नाम भवतां मनो पितं ममनुरक्षणाद्वमिति तत्राह। नान्यथेति। संपूर्णासो संकल्पः सत्संकल्पस्य सत्संकल्पस्यान्यथा भावो नैव। तत्संकल्पा नुसारेणास्मत्संकल्पोऽपि व्याख्यात इति भावना तुर्यद्वाइति। ब्रह्मस्थो उद्दष्टस्तथा विष्णुः स्वयं च त्रिपुरुषसमानान् पुत्रान्प्रयच्छत्विति यत्संकल्पं ध्याय सि ते वयं ब्रह्मविष्णुरुद्रा इति त्रयस्त्वत्पुत्रान्दास्याम इति संकल्प्यात्रागता इति शेषः॥ निपातद्वयेन प्रमाणांतरप्रसिद्धिं द्योतयति ३०

स्कं॰ ४ अ॰ १ ...

तर्हि प्रसन्नाश्चेत्प्रजाः स्त्रष्टत्य त्रेति हव्यग्रसं वल्लनाच काशमर दातान्त्रेर्द्धाः अथास्मदिति। अथ ब्रह्म रुद्र स्थो विष्णुः स्वयमिति एतेवयमित्युक्त्यनंतरं व्यवहारांतरंवि
रम्पतेन वात्मजा भविताः रोभविष्यंतीति वरदद्ध इत्यर्थः। यद्वा यत एवं वस संकल्पः अथ तस्मादिति। लोकेतेयशोविस्तृत्यनुग्रभद्रं कल्याणं सुखंवितरिष्यंतीत्यन्वयः। अ
किमन्यद्ददुरितितत्राह॥ एवमिति॥ कामवरं कामित पुत्रवरं नाम्यमिति त्रोषतामिषतोः पश्यतोः सतोः। ततोत्रेराश्रमात्॥ ३२॥ अत्रेरेनोत्तितत्ती ययासोमः साक्षाद्ब्र
ब्रह्मणोंशेन भवति किं तु तेन विशेषेण सन्निहितः एवं तथा विष्णोरंशोदत्तः शंकरस्यांशो दुर्वासा इतीवयोगः स्यात्। ब्रह्मणो नावतारो सितिसंनिधानं तु कथं लो
न्नाते विष्णोरात्मनस्तु तंदत्तो क्रिः प्रवेश्यत इति वचनात्। आत्मनोजीवस्य तंदत्तोक्तिर्विद्वंचत्र च नं प्रवेश्यत इति ज्ञेयमित्यर्थः। कथं तर्हि ब्रह्मसंभावित इति प्रत्यक्षो
न्ति रिति चेत्॥ न। सृष्टिविशेषान्मानांतर विरुद्धवदुक्तेस्तथा चोक्तं। सृष्टिभेदाद्दिरूपं तु कथापंचोत्तरं रातं वेदूप्यमन्यद्धि ज्ञेयं तात्पर्यन्नाहनाय चेति अग्रे

अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः॥ भवितारोंग भद्रं ते विस्रप्स्यंति ते यशः॥ ३१॥ एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः॥ सभाजितास्तयोः
सम्यग्दंपत्योर्मिषतोस्ततः॥ ३२॥ सोमोऽभूद्ब्रह्मणोंशेन दत्तो विष्णोस्तु योगवित्॥ दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः॥ ३३॥ श्रद्धा त्वंगिरसः
पत्नी चतस्रो सूत कन्यकाः॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा॥ ३४॥

कथापंचोत्तरं शतं सृष्टिभेदाद्दिरूपं विपरीतमिव प्रतीयत इति शेषः। अन्यद्वैरूप्यं तात्पर्ये ज्ञानमोहनायोक्तमिति ज्ञेयमित्यर्थः। कल्पादिभेदादपिकथा
भेदो भवतीति। इतोपि विरोधो स्ति। अन्नेतु पांडव कथा काऽन्यैर्मेरामायणं तथा॥ विष्णोर्ब्रह्मादिनो चैवक्रमाद्धत्य सज्जकीर्तितं॥ एतद्वापाद्मं चान्यद्वा तो क
ल्पादिभेदतः कथाभेदस्तु विज्ञेयो मोहायैतेषु भिन्नतेति वचनात्॥ विदिकृतावितिधातोर्योग वितयोगशाखकृत्। आणिमादियोगश्चिवावोधेन अ
पुविकरणोपातितत्वात्य रसैपदं। प्रजाःसततीः॥ ३३॥ कन्यकानामान्याह सिनीवालीति॥ दृष्टचंद्रा चतुर्दशी अमा सिनीवाली। नष्टचंद्रा चतुर्दश्यमा
नी कुहूः। पूर्णचंद्रा तु पौर्णिमा राका। न्यूनचंद्रा पौर्णिमा अनुमतिः॥ तत्र चतुर्दशी चंद्र पौर्णिमा निनीराका। ३४

तत्पुत्रावत स्वाः श्रद्धा यां पुत्रौ स्वारोचिषे नामि मनोः पुत्रयोर्नामा हउतथ्य इति च ऋचितुस्थापयितुम स्पेतु उतथ्यः साक्षाद्भगवान् प्रत्यक्षरूपः बृहत्यावाचःपा
लक त्वाचस्पतिरिता द्वाद्बृहस्पतिः। ततद्वृहतोः करप्रत्यायो रे देवतयोः सुद्दत्तलोपश्चेति सूत्रात्तकारलोपः सुडागमश्चेति॥ ब्रह्मिष्ठः वैदिकतमः बृहस्पतेन
परः साक्षाद्विष्णुरितिश्रुतेः ३५ त्वयत्का गादग स्त्यः। स्त्येः श्रेयः सहसंघातउत्यतः अहादिविषय जातंप्रतिगतोनभवतीवा सोगस्त्योन्यजन्मनि अग्निपुरश्रेनामा

तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेन्तरे॥ उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः॥ ३५॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि॥ सो
न्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः॥ ३६॥ तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासुतः॥ रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः॥ ३७॥ पु
लहस्य गतिर्भार्या त्रीनसूत सती सुतान्॥ कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते॥ ३८॥ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत॥ ऋषीन्षष्टिस
हस्राणि ज्वलतो ब्रह्मतेजसा॥ ३९॥

त्रिः दह्राग्निरल्पाग्निरित्यर्थः अन्यजन्मनीति विशेषणं व्यर्थम् अत्र एणौ अग्निः सर्वेत्राल्पाग्निरिति विवेकस्तु गवेषणीय इति॥ ३६॥ तस्य विश्रवसः। कोयं यक्षपति
र्वित्यत आह देवः कुबेर इति कु विष्ठे लनइतिधातोर्धन दानेन दारिद्र्यं छिनत्तीति कुबेरः। अयमर्थः का स्मिन्निति यक्षपतिः स्यादित्यत उक्तम् इडविडासु
त इति॥ अन्यस्यां पत्न्यां ३७ ८ वालखिल्यः खिल्यायेषां ते तथा। संततिविधुराः ऊर्ध्वरेतस इत्यर्थः। तान्। ब्रह्मतेजसा ब्रह्म निमित्त तेजसा ३९

श्री·च·
५

अन्येषां नामान्यप्रतिषिद्धत्वात्किमितिनोक्तानीति शंका माभूदित्याह॥ चित्रकेतुरिति॥ अपरे सप्तभ्योन्येपि ते। कोचादयः शान्तिमुनिप्रमुखाः ४२ ३ तयोः
यतिनियत्योः ४४ यस्य कवेः ४५ अभावयन् अवर्द्धयन् ४६ कर्दमदौहित्रकथाश्रवणफलमाह॥ शृण्वत इति॥ अजात्मजो दक्षः ४७ ८ यक्तेभ्यो

ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप॥ चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ४० चित्रकेतुः सुरोचिश्च विरजा मित्र एव च॥ उल्बणो वसुभृद्यानो
द्युमान् शक्त्यादयोऽपरे ४१ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं॥ दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे ४२ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रा
नजीजनत् धातारं च विधातारं श्रियं च भगवत्परां ४३ आयतिं नियतिं चैव सुते मेरुस्तयोरदात्॥ ताभ्यां तयोरभवतां मृकंडः प्राण एव च ४४
मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः॥ कविश्च भार्गवो यस्य भगवानुशना सुतः ४५ त एते मुनयः क्षत्तर्लोकान्सर्गैरभावयन्॥ एष कर्दमदौ
हित्रसंतानः कथितस्तव ४६ शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः॥ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः॥ ४७॥ तस्यां ससर्ज दुहितॄः षोडशामल
लोचनाः॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः ४८ पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः॥
४९ बुद्धिर्मेधा तितिक्षा ह्रीः मूर्तिर्धर्मस्य पत्नयः श्रद्धासूत शुभं मैत्री प्रसादमभयं दया ५० शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत। योगं क्रियो
न्नतिर्दर्पमर्थं बुद्धिरसूयत ५१

भ्यः होमेनो योगसहितेभ्य इति वा। भवच्छिदे ज्ञानोपदेशेन संसारनिर्मूलनाय ४९ तासां संततिं स्वनामानुगुणामाह॥ श्रद्धेत्यादिना ५० ५१

राम
५

शमदमादिसर्वगुणानामुत्पत्तिर्यस्यां सा तया॥ ५२॥ अभिष्टवैः स्तोत्रैः ५५ यो विष्णुर्निजमायया खे छायारूपभेदमिव यथाकाशे वाय्वादिरूपैरस्याकाशस्य यद्वत्
न यावत्ती पतेत्तथात्मनि स्वात्मनि सृष्टयानया विरचितमिदं विश्वं तत्प्रतिचक्षणाय तस्य जगतः स्वस्य चाधाराधेयभावज्ञापनायाद्य धर्मसदने मूर्त्यां धर्म
भार्यायां। एतेनास्मद्दृष्टिगोचरेण ऋषिमूर्तिना ऋषिवेषधारिणी मूर्तिर्यस्य तेन यातेन रूपेण प्रादुश्चकार तस्मै परस्मै पुरुषाय नम इत्यन्वयः। यथाका
शस्थितो नित्यवायुः सर्वत्रगो महान्। यथाकाशे विमानादिरूपभेदः प्रतीयते। तथा हरेर्जगदिदं तत्स्मात्मन्यौत्पत्तीयत इत्यादेः॥ ५६॥ किमिदानीं विज्ञाप्य
मस्ति तोनित्य वायुः सर्वत्रगो महान्। यथाकाशे विमानादि रूपभेदः प्रतीयते। तथा हरेर्जगदिदं तत्स्मात्मन्यौ प्रतीयत इत्यादेः॥ ५६॥ किमिदानीं विज्ञाप्य
मित्यत आह सोयमिति। योऽभवान् भक्ताभीष्टैकचिंतामणिः सोयमवलोकनेन करोतु निरीक्षणेन सुरगणान्नो दृश्यादवलोकयत्वित्यन्वयः

मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतं॥ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी॥ ५२॥ ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतं॥ मनांसि ककुभो
वाताः प्रसेदुः सरितोद्रयः॥ ५३॥ दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः॥ मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिन्नराः॥ ५४॥ नृत्यंति स्म स्त्रियो देव्य
आसीत्परममंगलं॥ देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः॥ ५५॥ देवा ऊचुः॥ यो मायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्ष
णाय॥ एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै॥ ५६॥ सोयं स्थितिव्यतिकरोपशमाय सृष्टान्सत्त्वेन नः सुरगणा
ननुमेयतत्त्वः॥ दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदं॥ ५७॥

ननु भवल्लिंगेन गुणानलक्ष्यंतीति। स्तुतीति। स्थितिव्यतिकरोपशमाय स्थितिविघ्नपरिहाराय सत्त्वेन गुणेन सृष्टान्। अस्माभिरपि न साकल्येन ज्ञातुं शक्य इति
भावेनाहुः। अनुमेयतत्त्व इति। प्रत्यक्षागमानुगृहीतत्वादिकेन लिंगज्ञानेन ज्ञेयं तत्त्वं मनागेव पित ज्ञानस्वरूपं यस्य स तथा। अवलोकनस्य विषये ज्ञेने
गुणापेक्षा गुणोस्ति चेत्प्रार्थनायतामहंति। तत्कथमत आहुः। अदभ्रेणानल्पापूर्णकरुणा यस्य तेन। अवलोकनेन। ननु केवलमनुग्रहगुणैः किं नु कौतुकं गुणोप्यसी
त्याहुः। क्षिपतेति। अरविंदं क्षिपता स्वकांतिगुणेन पराकृतानि निरस्यतेत्यर्थः। एवमस्य कार्यमाहात्म्यातिशय इति तत्राहुः। श्रीनिकेतमिति। यदरविंदं श्रियो
निकेतं निवासस्थानं। श्रियो निवासस्थानीयत्वेन विदुषेण भावं संकरजितत्वाहुः। अमलमिति॥ ५७॥

नतः किंभगवंतावकार्ष्टामितितत्राह। एवमिति॥५८॥ तौ करतलामलकवत्ज्ञापयति ताविमाविति। यदूद्वहो यादवेश्वरः कृष्णः कुरूद्वहोर्जुनः। अत्र मिलितस्य विशेषावे
वेशाद्धरेरंशत्वं नतु साक्षात्। तदुक्तं। नरो विष्णुः समाविष्टः स्वयं नारायणो हरिः। अर्जुनेचनरएव शंकृष्णो नारायणः स्वयमिति॥५९॥ इन तेभ्यः स्त्रिभ्यः पितरः पावकादि
यः पितामहः स्वाहापतेरग्निः॥ ६१॥ वैतानिके कर्मणि यज्ञकर्मणि॥ ब्रह्मवादिभिर्येषामग्नीनां नामभिराग्नेय्यः अग्निदेवत्या इष्टयो निरूप्यंते तेग्नयएतान् इत्यामहिम

एवं सुरगणैस्तात भगवंतावभिष्टुतौ। लब्धावलोकैर्ययतुरर्चितौ गंधमादनं॥५८॥ ताविमौ वै भगवतो हरेरंशाविहागतौ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरू
द्वहौ॥५९॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत्॥ पावकं पवमानं च शुचिं च हुतभोजनं॥६०॥ तेभ्योग्नयः समभवंश्चत्वारिंशच्च पंच च॥ त एवैकोनपंचा
शत्साकं पितृपितामहैः॥६१॥ वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः॥ आग्नेय्य इष्टयो यज्ञे निरूप्यंतेग्नयस्तु ते॥६२॥ अग्निष्वात्ता बर्हिषदः सौम्याः पितर आ
ज्यपाः। साग्नयोनग्नयस्तेषां पत्नी दाक्षायणी स्वधा॥६३॥ तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे॥६४॥ भवस्य पत्नी
तु सती भवं देवमनुव्रता॥ आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः॥६५॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा॥ अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ६६
इति श्रीभागवते महापुराणे चतुर्थस्कंधे प्रथमोध्यायः॥ ॥ लेना २

नइत्यर्थः॥६२॥ तेषां जातिनामान्याह। अग्निष्वात्ता इति। तेषामग्नीनां॥६३॥ ब्रह्मवादिन्यौ वेदविचारविचक्षणे॥६४॥ भवपत्न्याः सत्याः कात्यायन्या नीत्यात्यकांपरि
हरति भवस्येति॥६५॥ आत्मसमापत्त्यालाभात्तत्याः सत्याः किमकारीतितत्राह॥ पितरीति॥ पितरि दक्षे अनागसे भवाय प्रतिकूले अननुकूले विरोधिनि सति त्र
प्रौढैवासौ कृते योगसंयुता प्राणानि कुंभनिरतात्मनामनसात्मानं हरिं ध्यायत्यात्मा नेदेहं अजहादित्यन्वयः॥ इति श्रीभागवते महापुराणे
प्रथमस्कंधे विजयध्वजतीर्थरचितायां पदरत्नावल्यां प्रथमोध्यायः॥ ॥

अत्र कतिपयैरध्यायैर्हरिभक्तिविधानार्थं तन्माहात्म्यातिशयख्यापनाय तन्महात्म्यातिशयाविनाभूतं रुद्राध्वरध्वंसलक्षणं तु दक्ष
माहात्म्यं कथयति। तत्रादौ विदुरः सत्या आत्मानमजहादितिकृतसतीदेहवियोगो विशेषं जिज्ञासुर्मैत्रेयं पृच्छति। भवेशीलवतामिति। वि
द्वेषाकरणे हेतवः शीलवत्त्वादिनादिविज्ञापनायोक्ता १ स्वस्य गुरुत्वेपि स्वकर्मनिंदितमितिभावेनाह। कस्मिन्निति। आत्मनि परमात्मन्ये

विदुर उवाच भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीं १ कर्मवरावरगुरुं निर्वै
रं शांतविग्रहं॥ आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् २ एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च विद्वेषस्तु यतः प्राणान
त्यजं दुस्त्यजान्सती ३ मैत्रेय उवाच पुरा विश्वसृजां सत्रे समेताः परमर्षयः॥ तथामरगणाः सर्वे सानुगा मुनयोग्नयः ४
तत्र प्रविष्टं मुनयो दृष्ट्वार्कमिव रोचिषा॥ भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः ५ उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः॥
ऋते विरिंचं शर्वं च तद्भासाक्षिप्तचेतसः ६ सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः॥ अजं लोकगुरुं नत्वा निषसाद तदाज्ञया

वारामो रतिर्यस्य सतथा तं २ तथापि किमिति तत्राह। एतदिति। विद्वेषः विद्वेषकारणं ३ विद्वेषनिमित्तं वक्तुं उपोद्घातं रचयति। पुरेति।
न केवलं महर्षयएव किं तु मुनिमात्रमप्यत्र समवेतमित्यतो मुनय इति पुनर्वचनं ४ किमनेन प्रकृत इतितत्राह। तत्रेति ५ ब्रह्मप
त्वादुदुस्पर्शत्वं शर्वत्वाच्च नायं शाक्ततः पुरुष इति भावेनाभिन्नभाबहुमानं वृष्टि। उदतिष्ठन्निति। तस्य दक्षस्य भासो ६ सर्वोत्थानल
क्षणसत्काराभावादतो निर्गम्यनमितरजनवहुमानेनोपवेशनं च संभावितमनयोर्दक्षेणाकिमकारीतितत्राह। सदसस्पतिभिरिति ७

भा॰ व॰ ७

उपविष्टश्चेदुद्द्विषयकोपोप्युपविष्टः किंतत्राह प्राक्निषण्णमिति। नामृष्यदित्यस्य किं लिंगं तत्राह उक्तावेति ८ दृष्ट्वासदाचारं ९ किमिदानीं दृष्टवक्रं प्राप्तमत्राह अयं त्विति १० स्वतउन्नतस्य शिवस्य दक्षावमानविषयत्वं कथमत्राह। एष इति। गायत्री विषये पराध्यवहारइति ध्या तोः पाणिंग्राहरणस्य स्वाद्दरणमित्यर्थः। साधुवद्योग्यवत् ११ मृगशावो मृगपोतः मर्कटलोचने रक्तलोचने यस्य स तथा केकराक्ष इत्यर्थः॥ १२ भिन्नसेतवे लंघितमर्यादाय। उशतीं गिरं पौरुषेयत्वादिदोषरहितां वेदवाणीं १३ अशुचिकर्मकरणादशुचित्वमुक्तं। न तु द्वेषादित्याह

प्राक्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः। उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ८ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः। साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ९ अयं तु लोकपालानां यशोघ्नो निरपत्रपः। सद्भिराचरितः पंथा येन स्तब्धेन दूषितः १० एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ११ गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः। प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितं १२ लुप्तक्रियायाशुचये मानिने भिन्नसेतवे। अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरं १३ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः। अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन् १४ चिताभस्मकृतस्नानः प्रेतस्रङ्नृस्थिभूषणः। शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः १५ पतिः प्रमथनाथानां तमोमात्रात्मिकात्मनां। तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे। दत्ता बत मया साध्वी चोदिते परमेष्ठिना १६

प्रेतावासेष्विति। व्युप्तकेशः मुक्तकेशः १४ चिताभस्मना श्मशानभस्मना कृतं स्नानं येन स तथा। प्रेता नाम ... भिर्ग्रथितमाला स्रगेव भूषणानि यस्य स तथा॥ शिव इति अपदेशो नाम यस्य स तथा स्वयमपि अशिवोऽशुद्धो हि १५ उन्मत्तत्वं स्पष्टयति। पतिरिति। केवलं तमो गुणास्वरूपं मनो येषां तेन तथा तेषां अतः किमत्र शोककारणमत्राह। तस्मा इति १७ ४॥ ॥

पत्रांतर टिप्पणी: ण्णं १ साक्षमां रण्य हीत्॥३ — या ४ ताछि॰ ५ — राम ७

नकेवलं दक्षेणादोषा एव गणिताः किंतु स्वानर्थहेतुः शापोपि दत्त इत्याह। विनिंद्यैवमिति। अप्रतीपमप्रतिपक्षं॥ १८॥ इंद्रोपेंद्रादिभिर्देवैः सह देवयजने यज्ञे यज्ञभागं न लभतामित्यन्वयः॥ १९॥ ततः किमकारि दक्षेणेतिऽतत्राह। तस्मादिति २० एवं दक्षेण शापे शिवाय दीयमाने सति कोपि शिवभक्तस्तमसहमानोऽभूत्किं तत्राह। विज्ञायेति। रोषनाम्ना कषायेणावह्निना दूषितः। तस्य शिवस्यावाच्यतां दोषलक्षणां २१ कोयं शापो दत्त इति तत्राह। यएतदिति। एतं मर्त्यशरीरं अघशरीरं वा नश्वरमुद्दिश्य अप्रतिद्रुहि द्रोहाभावं प्रति द्रोहकर्तरि भगवति

मैत्रेय उवाच विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं। दक्षोथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे १८ अयं तु देवयजन इंद्रोपेंद्रादिभिर्भवः। यज्ञभागं न लभतां देवैर्देवगणाधमः १९ निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापं। तस्माद्विनिःक्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनं २० विज्ञाय शापं गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः। दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः २१ नंदीश्वर उवाच यएतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि। द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् २२ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया। कर्मतंत्रं वितनुते वेदवादविपन्नधीः २३

भक्तपादिष्वो भाग्यवति द्रुह्यति वचनादिनेति शेषः॥ तत्त्वतो यथार्थज्ञानाद्विमुखः बहिर्मुखो भूयादित्यन्वयः २२ नकेवलं बहिःकृततत्त्वज्ञानः किंतु श्रीनारायणविषयकर्मव्यापारेषु मग्नश्च स्यादित्याह। गृहेष्विति वेदवादेन स्वर्गादिप्रिय्यवादिवेदवाक्येन विपन्ना नष्टा धीर्यस्य स तथा। अत्र तत्त्वज्ञानविषयः शापस्तात्कालिक एव न तु चिरकालीनः विष्णुवाक्यस्य चिरकालीनत्वात्। तदुक्तं। येज्ञानविषयाः शापाः सुक्तिगाश्चाधिकारिणां कादाचित्कास्ते भवंति नैव ते सार्वकालिकाः। तेषां ज्ञानस्पृहुक्तेश्च तारतम्यस्य वेदहि। भगवन्नियतत्वात्तु शापादिर्न्नात्र कारणमिति २३

पत्रांतर टिप्पणी: स २ — या १

भा·व·
८

इतोपि तात्कालिक एव शाप इति भावेन दक्षस्य शापविशेषं र्षुं वति। बुद्ध्येति। पराभिध्यायिन्या निरंतरशब्दादिविषयचिंताकातरया बुद्ध्या विस्मृ
तात्मगतिः विस्मृतपरमात्मगतिः विस्मृतपरमात्मज्ञानः पशुर्विवेकशून्यः अतितरां स्त्रीकामः सदक्षो विरात बस्तमुखो स्त्वित्यन्वयः
२४ शापांतरं वाह। विद्याबुद्धिरिति अजो दक्षः। अविद्याबुद्धिरस्त्विति शेषः। शंकरद्वेषिणां वशापविशेषमाह। संसरंत्विति २५ सं
सारिकारणमाह। गिरेरिति। पुष्पिण्याः स्वर्गादितुच्छप्रतिपादिकायाः गभीकृतमुक्तिफलायाः कालकूटनिगरणतद्दैत्याख्यपा
पनिगरणादि गिरिर्मुख्यप्राणास्तेन शिष्यादिषु प्रतीतत्वेन व्याख्यातत्वेन च स्पष्टुतायाः वेदवाचो भूरिणा बहुलेन मधुगंधेन विष

बुध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः। स्त्रीकामः सोस्त्वतितरां दक्षो बस्तमुखो विरात २४ विद्याबुद्धिरविद्यायां
कर्ममय्यामसावजः। संसरंत्विह ये चामुं अनुशर्वावमानिनं २५ गिरः सुतायाः पुष्पिण्या मधुगंधेन भूरिणा। मथ्ना
चोन्मथितात्मानः संमुह्यंतु हरद्विषः २६ सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः। वित्तदेहेंद्रियारामा याचका विच
रंत्विह २७

पसुखलक्षणमकरंदपरिमलेन मथ्ना कामेन उन्मथितो विलोडित आत्मा मनो येषां ते तथा कासे हरद्विषः संमुह्यंतु मोक्षफलप्रतिपाद
कवेदतात्पर्यापरिज्ञानं गच्छंत्वित्यन्वयः। मुह वैचित्त्य इति धातोर्वैचित्त्यं विपरीतज्ञानं गिरिः प्राणाः समुद्दिष्टस्तस्तुता वेदवाक्कुस्य
ता। तु अप्सु स्वर्गोदयः प्रोक्ताः फलं मोक्ष उदाहृत इति वचनात्। उक्त एवार्थो नान्य इति। अनंगो मन्मथो मंथाः कामो गज उदाहृ
त इति अभिधानात् २६ हरद्विषां शापांतरमपि विसृजति। सर्वभक्षा इति पलांड्वादि सर्वभक्षा वृत्त्यै जीवनाय न धर्माय इति
शेष। २७

राम
८

९

ब्राह्मणकुलाय दीयमानं शापं श्रुत्वापि भीत्या कश्चित्प्रतिशापदानसमर्थो नाभूदिति तत्राह। तस्यैवमिति। ब्राह्मणानामिदमेवायुधं नान्यदिति विधानना
द्ब्रह्मदंडमित्युक्तं। २८ नष्टेति शिवदीक्षायां चांडालादि जन्मनो विप्रलकारेण लक्षणायां सुरैया सूनां तर्पणपक्षित्थोक्तायद्वासुरानमके दारादि पुष्प
सम्भवं मद्य कपुष्पादि संभवमासवं वा ३० तीव्रशापप्रदाने निमित्तं वक्ति। ब्रह्मेति। विशेषेण धारयत्याश्रितानिति विधरणं ३१ सेतुविशीर्णछिण्एश्चा

तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययं २८ भवव्रतधरा ये च ये च तान्समनुव्रताः। पाखंडिनस्ते भवंतु सच्छास्त्र
परिपंथिनः २९ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः। विशंतु शिवदीक्षायां यत्र दैवं सुरासवं ३० ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ।
सेतुं विधारणं पुंसामतः पाखंडमाश्रिताः ३१ एष एव हि लोकानां शिवः पंथाः सनातनः। यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ३२ तद्ब्रह्म
परमं शुद्धं सतां वर्त्म सनातनं। विगर्ह्य यात पाखंडं दैवं वो यत्र भूतराट् ३३। मैत्रेय उवाच। तस्यैवं वदतः शापं भृगोः स भगवान्भवः। नि
श्चक्राम ततः किंचिद्विमना इव सानुगः ३४ तेपि विश्वसृजः सत्रं सहस्रपरिवत्सरान्। संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ३५

यस्य प्रमाणं सम्यक्वक्ता प्रमाणं बोधने त्यंतमार्यो दाक्षाख्रहेतुषु। सम्यक्कुलत्रकरिचार्थस्य प्रमाणं मरणे गत। वितियादयः। ३१ ब्रह्म वेदाः स्तत
दभेरकः ३३ स्वापमानं श्रुत्वापि महत्त्वविरोधि विकारो न युक्त इति भावेन तस्य हरस्य ततो निर्गमनं च वक्ति। तस्यैवमिति ॥ ३४॥ एवं विवादे
पि सत्रस्योत्तरायोनान्नदित्याह तेपीति॥ अतरायानुत्पादे निमित्तमाह। यत्रेति॥ ३५

वं २

यत्र गंगा भागीरथी यमुनयान्विता संगता तत्र प्रयाग इति शेषः ॥ अस्यैव कर्मणस्त्वभीष्टफलप्राप्तिहेतुत्वादिदं समाप्यन्न कर्मांतरं प्रारब्धौ किंतु स्वगृहगमनमेवानुष्ठितमित्याह । विरजेनेति । कर्मणा निर्मलेनांतःकरणेन युक्ता इति शेषः ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे टीकायां द्वितीयोध्यायः ॥
अत्र शंकरदक्षयोर्विवादकथनव्याजेन शंकरस्य वासुदेवचरणारविंदस्मरणं कथनेन हरेरतिमाहात्म्यमेव प्रकाशयते अस्मिन्नध्याये ॥ तत्रास्य

आप्लुत्यावभृथं यत्र गंगा यमुनयान्विता विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ३६ इति श्रीभागवते महापुराणे चतुर्थस्कंधे द्वितीयोध्यायः ॥ ॥ मैत्रेय उवाच सदा विद्विषतोरेवं कालो विवाद्दमानयोः ॥ जामातुः श्वशुरस्यापि सुमहानतिचक्रमे १ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना ॥ प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् २ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च ॥ बृहस्पतिसवं नाम समारेभे क्रतूत्तमं ३ ॥ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः ॥ आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ४

वस्यैवैरस्य दीर्घकालीनत्वं दक्षस्य गर्वाधिक्यं च वक्ति । सदा विद्विषतोरिति ॥ १ ॥ यदा दक्षः परमेष्ठिना ब्रह्मणा सर्वेषां प्रजापतीनामाधिपत्येऽभिषिक्तः सदा तस्य स्मयो मदविशेषोऽभूदित्यन्वयः ॥ २ ॥ अनु ऽभाग्यतत्कारणाद्दस्य स्मयो लक्ष्यत इत्याशयेनाह । इष्ट्वेति ॥ स दक्षो नाम्ना वाजपेयेन यज्ञेन हरिमिष्ट्वा ब्रह्मिष्ठाः कर्मप्रतिपादकवेदनिष्ठास्तेऽभूदित्यन्वयः । एतत्कुतो ज्ञातमत्राह । स्मय इति । यज्ञांतरकारणात्सिद्धमित्यर्थः ३ तस्मिन्यज्ञे त्रिलोक्याः संमेलनेन दक्षस्य स्मयातिशयो लक्ष्यत इत्याशयेनाह । तस्मिन्निति ४

ननु किमनेन प्रकृत इति तत्राह । तदुपश्रुत्येति । दाक्षायणी सती देवी मिथः प्रजल्पतां खेचराणां यत्पितृयज्ञविषयवचनं तदुपश्रुत्य ॥ ५ ॥ ततः पुरस्त्रियोऽत्या स्वनिलयसमीपगा देववरस्त्रियो दृष्ट्वा तं प्रति विस्मयपतिमभ्यभाषतेत्यन्वयः ॥ ७ ॥ किमभाषतेति तत्राह । प्रजापत इति । निर्यापितः प्रवर्तितः किल किं वदंती हे वामदेव प्रेक्षयदितं वीर्यार्थिता स्त्रियस्तत्र तर्हि । गमने हेतुमाह । यामी इति हि यस्मात् ॥ ८ ॥ गमने निर्बंधांतरमप्याह । तस्मिन्निति । भगिनीः तायातस्माज्जनानां

तदुपश्रुत्य नभसि खेचराणां प्रजल्पतां सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ५ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः ॥ विमानयानाः सप्रेष्ठा निष्ककंठ्यः सुवाससः ६ दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः ॥ पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ७ सत्युवाच प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल ॥ वयं च तत्राभिसराम वाम ते यद्यर्थितामी विबुधा व्रजंति हि ८ तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः ॥ अहं च तस्मिन्भवताभिकामये सहोपनीतं परिबर्हमर्हितुं ९ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरं ॥ द्रक्ष्ये चिरोत्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजं १०

इज्याविशेषोऽपि भविष्यतीत्याह । अहं चेति । परिबर्हं वस्त्रभूषादि यमानं ॥ ९ ॥ न केवलमुक्तमेव प्रयोजनं किंत्वर्थांतरमप्यस्तीत्याह । तत्रेति । अध्वरध्वजं यज्ञश्रेष्ठं ... स्वसॄर्भगिनीः ... तदुमहत्त्वाभिधानं । स्वसॄर्मे द्रक्ष्ये इति क्रियायोजना इति । क्लिन्नधियं स्नेहार्द्रचित्तां ... इति ॥ उत्कंठावत्तु सिद्धमिति यावत् १०

पु२

भा·च·
१०

एवंवद्दु विशालोपरिष्वविकृतेंद्रियपतिर्हदृष्ट्वा तन्माहात्म्यविज्ञापनपूर्वकं स्वाभीष्टं मुमुदलयति त्वयीति हे अज्ञ रुद्रा अज्ञा विस्तु हरच्छा गाइतीयास्त्वाः अ। एवंविधा विशालापि रम्याविकृतेंद्रियपतिर्दृष्ट्वा अनेके जेआदित्युणत्र पोपाद्दानकमाश्चर्यनानावैचित्र्योपेत मे तद्धिभूतायिभाति नित्याय रोहितां तस्वनारा त्मनोहरेमयियाद्वद्धया निर्मिति गुणत्रयात्मकं रजेआदियुणत्रपोपाद्दानकमाश्चर्यनानावैचित्र्योपेतमेत द्विश्वं तत्त्वयिभाति नित्याय रोहितां तस्वनारा यणस्वरूपत्वान्नत्वसादेनकरतला मलकवत् एतद्विश्वं तवज्ञानकोष्ठवर्तितेऽत्र यथापितवद्दृष्टव्याशा भावेपि हे मवमंगलहरा हे मेभवहितिजन्मभूमिर्दि यणस्वरूपत्वान्नत्वसादेनकरतलामलकवत् एतद्विश्वं तवज्ञानकोष्ठवर्तितेऽत्र यथापि तवदृष्टव्याशाभावेपि हे भवमंगलहरा हे मेभवहितिजन्मभूमिर्दि हृद्रूद्रत्यन्वयः॥ अत्रे हेतुगर्भविशेषणंयो विदिति ऐश्वर्याद्यस्त्रिवायांशाहृद्विषयेसे वासीलत्वादित्यर्थः॥ अत एवोत्तवेत्रत्वविद्य यथा स्थितत्व

भवमे·

त्वय्येतदाश्चर्यमजात्मभायया विनिर्मितं भाति गुणत्रयात्मकं॥ अथाप्यहं योषिदतत्त्वविच्चते दीनादिदृक्षे भवहिति ११ पश्यप्रयांतीश्च भवा न्यपो सितः स्वलंकृतांकांतसखावरूथशः॥ यासां व्रजद्भिः शितिकंठमंडितं नभो विमानैः कलहंसपांडुभिः॥ १२॥ कथं सुतायाः पितृगे हकौतुकं निशाम्य देहः सुरवर्य नेंगते॥ अनाहूता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनं १३ तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान्कारुणिको बतार्हसि॥ त्वयापि पूर्णे गायमदअयशत्रुणा निरूपितो बोनुग्रहाणया चितः १४

त्वद्रूपाज्ञानित्वात् दीनाह्णिणा ज्ञानदुर्बला ११ इतोपि गंतव्यमिति भावेनाह पश्यतिति अन्यस्त्रियोपि प्रयांति किंमम त्यतो गंतव्यापीत्यर्थः॥ शितिकंठनीलकंठाकलहंसवत्पांडुभिः धवलैः॥ १२॥ सुतयापि मत्व्यत्वयुक्तिः कपमिति नेंगते न चलति नेच्छा हृ नाभावेकथं गमनं स्यादि त्याशंक्याना हू ने प्यपारः हगमनं दुचितं भसूती त्याह अनाहूता इति देहकृतः पितुः १३॥ उपसंहरति तन्मे इति यतएवं गंतव्ये वहवा ह तवः संतिनत्तस्मात्भवान्मूल्पः त्वमगप्रसीदा हअमर्त्यदेव इदं वांछितं कर्तुमर्हसीत्यस्मिन्नर्थेवतकृपा कर्तव्या कारुणिकत्वादित्य र्थः त्वमेवकारुणिको नान्यइत्याशयेना हा त्वयेति विज्ञ दक्षं चक्षुषा सर्वज्ञेन त्वया सहायं धर्मपूर्णः गरीयान्तिर्निरूपितइतियदृतः कारुणि

राम
१०

तथापि प्रियया प्रार्थितः शंकरः किमुक्तवान्स्मयधारितिविदुरस्यमानं सीशंकांपरिहर्तुमाह एवमिति। गिरित्रो गिरित्रा। कुत्सितावाचइवइषवःशराः कुवागिषव स्तान् कोदहन्॥ १५॥ किंवावदुना प्रलापेनत्र अनाहूता अप्यभिपांतीति यदुक्तं तस्योत्तरं स्पष्टं विवतिभावेनाहा त्वयोदितमिति। किंतु दितमित्यतत्रं त्रः अना हूता इति। तद्वानभियाति किंकारणमत्राह। यदीति। तेबांधवात्र नात्मम देनदे हाभिमाननिमित्तर्येणजातेनमन्युनाक्रोधेन॥ १६॥ असतांविद्यादिकम हुताइति। तद्दानभियाने किंकारणमत्राह। यदीति। तेबाधवात्रनात्ममदेनदेहाभिमाननिमित्तरयेणजातेनमन्युनाक्रोधेन॥ १६॥ असतां विद्यादिकम द्विषयजननकर्त्वेनाप्रयोजकंअडेश्ययःपानमिवेतिभावेनाह। विद्यातपइति। असत्तमाः विद्यादिभिः षड्भिः सतां योगेषुगुणैः उत्पन्नैर्मदैः स्मृतोहतायांशा

भवी·

ऋषिरुवाच॥ एवं गिरित्रः प्रियया भिभाषितः प्रत्यभ्यधत्तप्रहसन्सुरप्रियः॥ संस्मारितोमर्मभिदः कुवागिषून्यानाह कोविश्वसृजांसमद्वतः॥ १५ श्रीभगवानुवाच॥ त्वयोदितं शोभनमेव शोभने अनाहूता अप्यभियांति बंधुषु॥ ते यद्यनुत्पादितदोषदृष्टयो बलीयसानात्ममदेनमन्युना १६ विद्यातपोवित्तवपुर्वयः कुलैः सतां गुणैः षड्भिरसत्तमेतरैः॥ स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यंति हि धाम भूयसां॥ १७॥ नैतादृशा नां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनां॥ येभ्यागतान्वक्रधियाभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः॥ १८॥ तथारिभिर्नव्यथते शिलीमुखैः शेतेर्दितांगो हृदयेन दूयता॥ स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवा निशं तप्यति मर्मताडितः १९

तच्चवरेणोत्पन्नत्वानेनष्टस्मृपसां महात्मनां धामप्रभावं न पश्यंति हि यस्मात्तस्मादितयन्वयः अदर्शनेकारणमाह अभिमानदुर्दृशइति। विद्यामदोष त्सम्स्मृतौ योभिज्ञनमदइतिमदलक्षणं॥ कामादिरिपवदुष्टेंद्रियत्वादित्यर्थः॥ अत एव तदृशः अंतरितिज्ञेयः किमतइतितत्राह। नैतादृशानामिति आरोपितभ्रूभिरिति हस्वत्वाभावश्छांदसः। उन्नमितभ्रूभंगैरमर्षणाक्षिभिस्सद्दमानत्वं दृढ्रणोपेतनेत्रैः॥ १८॥ दुःखाधिक्यनागमनेकारणांतरंचाह। तथारिभिरिति। प्रधनेयुद्धे शिलीमुखैः शरैः १९

किंचद्भ्रन्नातुलयत्वंस्त्वस्यप्रियपुत्रीत्वेपिमदाश्रयत्वेनतयमानात्पितुःपूजांनप्राप्स्यसीत्याह।व्यक्तमिति।उत्कृष्टगतेःप्राप्तसर्वाधिपत्यस्य॥२०॥मानितुर्न
नाधिकारिधिकत्वेनसत्वात्कृतोभवतिद्वेषइतिआशंक्यसाम्राज्यमदलक्षणंस्तुराग्वेशोन्मदाधिपत्यंनप्राप्नमतोद्वेषइतिभावेनाह।तातप्यमानेनेति।
पुरुषबुद्धिसाक्षिणांपुरुषेइंद्रियप्रेरकाणां।असमाद्धृत्यानांस्मृद्धिभिःएषांपुरुषबुद्धिसाक्षिणांपरंपदमंजसातत्वेनाधिरोढुमकल्पोऽसमर्थोयस्माद्

व्यक्तंत्वमुत्कृष्टगतेःप्रजापतेःप्रियात्मजानामसिसुभ्रुसंमता।।अथापिमानंनपितुःप्रपत्स्यसेमदाश्रयात्कःपरितप्यतेयतः २० तात
प्यमानेनहृदातुरेंद्रियःसमृद्धिभिःपूरुषबुद्धिसाक्षिणां।।अकल्पएषामधिरोढुमंजसापरंपदंद्वेष्टियथासुराहरिं।।२१।।प्रत्युद्गमप्रश्रयणा
भिवादनंविधीयतेसाधुमिथःसुमध्यमे।प्राज्ञैःपरस्मैपुरुषायचेतसागुहाशयायैवनदेहमानिने २२

तो
तोद्वेष्टि।इदमसुरलक्षणमितिभावेनोक्तंयथेति।।२१।।अभ्युत्थानाभिवादार्हेभवतानसंमानितोद्वेषइतिकिंनस्यादितितत्राह।प्रत्युद्गमेनेति।प्राज्ञैः
तत्वविद्भिःपुरुषेर्वेत्तुंवेद्यागमत्वत्तुमिथःप्रत्युद्गमादिकंचेतसागुहान्तर्यामायहृदयस्थितायपरस्मैपुरुषायैवविधीयतेक्रियते।देहमानिनेजीवाय
नक्रियते।इदंतस्मयो।समर्त्वेवंतुतागुरुनिमित्तेगुरुनिमित्तेगुरुत्वेनोत्तमत्तोदक्षायज्ञानाभावात्तन्निमित्तद्वेषोनसंभाव्यतइति।। २२

किंवामयाप्रत्युत्थानादिनापूज्यतःपूज्यस्तुब्रह्मादितारोरांतस्थितोहरिरित्याहसत्वमिति।विशुद्धंसत्वंवसुदेवशब्दितंयथेत्यादिपदार्थेषुस्थि
ताविद्यो।तेनतत्वमलत्वेयाभावादितिच्छेदेनशब्दितमित्यर्थः।तच्छब्दवाच्यत्वेनिमित्तमाह।यदीयतइति।व्याप्तक्रोडादियुणाकारःपुमान्नारायणोप
हृतोमयालक्षणावरणरहितईयतेज्ञायतइतियद्यस्मात्।निमित्तंतत्वमाह।सत्वेचेति।तत्सत्वेपस्मिनहरेरायदधीनतयावर्ततेतत्सत्वेवयानच्छब्दवाच्यमि
त्यर्थः।एवंवसुदेवेनिवासत्वेनरूपसंबंधाद्वासुदेवःसोधोक्षजोनिंद्रियज्ञानो।भगवान्ममनसाविशेषणाधीयतेचिंत्यते।तदुक्तं।रुद्रेणाधीयतेविष्णुः
विष्णोर्ध्येयोनकश्चनेति।अनेनपुरस्थितचतुर्मुखब्रह्मणोप्रकाशमानश्रीविष्णुगुणागणोपसंहारलक्षणोपासनेकाग्रचित्तत्वेनस्थितेनमयाका
र्यांतरप्रारंभस्यानुचितत्वात्।दक्षांतस्थहरिस्मरणनमस्कारेणतत्कृताकारोपिद्वेषइतिद्वेषकारणंनेपत्र्यामीत्युक्तंभवति।यद्वायद्विशुद्धंतमस्त्रादियुणा

सत्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतः।।सत्वेचतस्मिन्भगवान्वासुदेवोह्यधोक्षजोमेमनसाविधीयते।।२३।।तत्तेनिरीक्ष्योनपि
तापिदेहकृद्दक्षोममद्विट्तदनुव्रताश्चये।।योविश्वसृग्यज्ञगतंवरोरुमामनागसंदुर्वचसाकरोत्तिरः।।२४।।यदिव्रजिष्यस्यतिहायमद्वचो
भद्रंभवत्यानततोभविष्यति।।संभावितस्यस्वजनात्पराभवोयदासस्वद्योमरणायकल्पते।।२५।। ।।इतिश्रीभागवतेमहापुराणेचतुर्थेतृतीयो
ध्यायः

नुपरक्तंसत्वंतद्वसुदेवशब्दितं।वशब्दएवार्थे।।तत्सत्वगुणोयस्मिन्पुंस्येवावलिपुमान्श्रीहरिस्तत्रतस्मिन्नेववसुंस्सपावृतईयतइतिपतस्मात्सवासु
देवःसात्विकप्रियाधोक्षजोभगवान्मेमनसाप्रत्युत्थानादिनाविशेषणार्चित्यतइत्यतोनास्मिंद्गुरुरित्यभिमानमुग्धत्वेनरजोगुणाभिभूतचित्त
त्वेनवातहरेर्विशेषणस्तनिधानाभावात्तेतवपितानसत्कारयोग्यइतिकृत्वाप्रत्युत्थानादिनानमानितइति।अनेनतमस्त्रादियुणाभिभूतत्वे
नतत्वाज्ञानात्द्वेषोडकइत्युक्तंभवति।।२३।।ममत्वत्पलान्ममद्वेषाजनकोपित्वयादृष्टमेवायोग्योगुरुफुकदर्शनेदोषोक्तेरित्याह।तयेति
।देहकृदपिनकेवलंमातरोद्वेषोपितुवाहापीतिभावेनाह।तदनुव्रताइति।स्थानेनिर्दिष्टा।तियइति।२४।।बाधकंचाह।यदीति।मरणंनामदेहवि
योगलक्षणंनतपकीर्तिलक्षणं।।२५।। इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेतृतीयोध्यायः।।

हरेर्भक्तिविधानार्थं गुर्वादिष्वपि भक्तिरवश्यं कर्तव्येत्यभिप्रेयते तस्मिन्नध्याये तत्र देवीमेवं वाधकं ब्रुवन् शंकरः किंच कारेति तत्राह॥ एतावदिति॥ शं सुखं करोत्यस्य सः शंकरोतीति वा शंकरः भयत्रस्तापनेन निवारणोत्पन्न्या अंगनया शरीरार्धेन हियस्मात् तस्माद्विरराम ततस्तद्देवी किमकरोदिति तत्राह सुहृद्दिदृक्षुरिति॥ सा देवी सुहृद्दिदृक्षुः स्वधाम्नो निष्क्रमती भवात्परिशंकिता ध्याम निर्विशती वा भूदितिन्वयः॥ १॥ अतः कारणाद्वृत्तिभेदाद् द्विधा प्रष्टनिमतीभवानी किमकृतेत्यत्राशंक्य तस्याः भर्तुस्काम्यकत्वं ज्ञानमैत्र्यादिषेभ्योस्वभावं वक्ति सुहृद्दिदृक्षेति सुहृद्दिदृक्षया प्रतिघातो भयस्ति न दुर्मनाः दुःखितमनाः अप्रति

मैत्रेय उवाच॥ एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन्। सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधास सा १ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला॥ भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः २ ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा॥ पित्रोरगात्स्त्रैणविमूढधीर्गृहान् प्रेम्णात्मनो योऽर्धमदात्सतां प्रियः ३॥

पद्मपुरुषरहितान्यनेन कोपरोदनाभ्यां वशीकारणमंत्राभ्यां वा शिवेभिमतानुमतिप्रदा स्यादिति भावो दर्शितः॥ ३॥ अनेनापि भावेन सिमितस्य सुदृढत्वस्थितिं शिवं दृष्ट्वा तद्भूमनप्रकारं वक्ति॥ ततइति॥ दूयता तापवता॥ सर्वैश्वर्यायाः एवं भावः कथमित्यत उक्तं स्त्रैणेति॥ स्त्रीणां स्वभावः स्त्रैणं पातेन विमूढा धीर्यस्याः सा तथा॥ अहो स्त्रियः स्वभाव एवायं न तु देवस्त्रिय इति भावे नाह प्रेम्णेति॥ आत्मन इति पदं द्विरावर्त्तनीयं स्वस्य शरीरस्यार्द्धं मरास्त्वत्रादत्त शास्त्रं दानं इति धातुः ३

स्वशरीरार्द्धहरस्तस्या एकस्या गमनं कथं स सहते त्यारांक्य तत्र वविश्वमनुवरणा गमनप्रकारं तन्नितामन्विति द्रुतविक्रमः पादविक्षेपो यस्याः सा तथा तां केवलानुवराश्च त्वगच्छन्नतु मुख्या इत्यतउक्तं मणिमन्मदाद्य इति॥ पार्षदेषु मुख्येः सहवर्त्तमानाः सपार्षदमुख्याः॥ आगतव्यथाः स्वामिनस्पदस्यस्त्रिवेति प्राप्तमनोदुःखाः॥ ४॥ तां गोवृतं रंगच्छंत्याद्रुद्राणयाः पात्राकुन्नोः स्विगाग छद्धिरनुचरैः किमभूदित्याशंक्य शंकरागमनवदन्वितयात्रामभूदित्याह॥ तां सारिकेति सारिका क्रीडामृगकीमंदुकं जलक्रीडावाद्यां विलवितायथा यथा संभूयगमनस्यात्तथा शं नेश्वरं तः। विटंकित इति पाठे शृंगारिता इत्यर्थः॥ ५॥ एवं

तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः॥ सपार्षदयक्षा मणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ४ तां सारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः॥ ५॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडं यजनं समाविशत्॥ ६॥ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः॥ ऋते स्वसॄर्वै जननीं च सोदराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ७

दृष्टेषिता नुवरस्तु सितस्निहात्सूशांत मनस्कत्वेन पश्चादागता किंतु पुरस्थगवासायज्ञवाटमाविशदित्याह॥ आब्रह्मेति॥ आ समंतात् ब्रह्मघोषेण वेदध्वनिना ब्रह्मलोकपर्यंतगामिना ध्वनितेनोर्जितं संकुलं यज्ञार्थं वैशसं पशुसंज्ञपनं पशुहिंसनं वा यस्मिन् तत्तथा॥ मृद्दारुकनकायश्चर्मकांचनं वदर्भाश्च चर्माणि च मृद्दार्वयःकांचनदर्भचर्माणि तैर्निसृष्टानि निर्मितानि भांडानि यस्मिन् तत्तथा॥ ६॥ तस्याश्च अविज्ञाकरणप्रकारमाह॥ तामागतामिति। यज्ञकृतो दक्षस्य। कश्चिन्नेत्यस्य व्याप्तिमाह॥ ऋते इति॥ स्वसारः स्वस्रः॥ तत्स्नेहः कुतो वगत इति तत्राह सोदरा इति

७

सतीप्रत्यालिंगनादिकं किं कृतवतीनेतिभावेनाह। सोर्ध्यंति। प्रधानावज्ञाडुःसहेति भावेनाहापि त्रेति। अप्रतिनन्दिता अकृतमनःसंतोषा ८ ततः किमक रोदिति त्राह। अउद्भागामिति। नारुद्रस्यभागोयस्मिन्स्तथातं। छातहेलनेकृतावज्ञां। ९। अथी अर्घ्यांकुपितमित्यत्रविंलिंगमत्राह जगर्हेति। आ मर्षेणविपन्नयागद्भवस्थांवप्राप्तया। भूमपथाःकर्ममार्गाः ये षु द्विषयेऽप्रमः त्तिद्दा यस्य सतथातं। कर्ममार्गेति निष्णातमित्यर्थः। स्वतेजसा स्वप्रभावे न निगृह्य निवार्य॥ १०॥ स्त्रीत्वेपिप्रमाणवद्वानया निर्निंदेत्याह। नयस्येति। लोके भुवने विद्यमानानां देहभृतां शरीरिणां प्रियात्मनः मनोभीष्ट

सो दर्यसंप्रश्नसमर्थवात्तेयामात्रा च मातृष्वसृभिश्च सादरं॥ दत्तां सपर्यां वरमासनं च सा नादृत पित्राप्रतिनन्दिता सती ८ अरुद्र भागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ॥ अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा॥ ९॥ जगर्ह सामर्षवि पन्नया गिरा शिवद्विषं धूमपथश्रमस्मयं॥ स्वतेजसा भूतगणान्समुत्थितान्निगृह्य देवी जगतोभिशृण्वतः॥ १०॥ देव्युवाच॥ नयस्य लोकेस्त्यतिशायनः प्रियस्तथाप्रियो देहभृतां प्रियात्मनः॥ तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवंतं कतमः प्रतीपयेत्॥ ११

पस्यांयस्य उद्दृस्यायोपतातिरेकेण तिशायनः प्रियो नास्ति प्रियः तथा अप्रियं द्वेष्यश्च नास्ति तस्मिन् रुद्रे भवंतं त्वत्ते पुरुषाणां कतमः पुरुषः प्र तीपकः नकोपीत्यर्थः। प्रतीपाकारणे हेत्वंतरंचाह। समस्तात्मनीति॥ विश्वात्मनि एष द्वेष्यत्वेद्वैष्टिसमस्तस्वामिनिनहिस्वामिनिकश्चिद्वेष्टि। रो स्याविष्टाति स्वात्मपिवैरकश्चेत्तस्मिन् द्वेषः संभावितः। इत्यतउक्तं मुक्तवैरकेमुक्तं वैरं येनासौमुक्तवैरकः। वैरसंपुपलक्षणं प्रेमापि विमुक्तप्रियं इत्य र्थः॥ ११

तत्वतोपिभवानपिभवद्वेषकर्तुं नयोग्य इत्याह। दोषानिति। किंच दस्साधवोदुर्जनाः परेषाम् उत्तमानां गुणेषु दोषानेव गृह्णन्ति न्यूनगुणानपि तद्वत्। दोषेष्वेको यस्ति गुणगणोत क्वचन गुणेषु दोषग्राही भवति हि खलः स द्विका तुल्यधर्मा इति। भवादृशास्तु महत्तमा द्विजाः फल्गून् अल्पान् गुणान्बहुली करिष्यन्ति तदा वाच्यं द्रुह्यतीतिकिंतु गुणानेव दोषांश्च त्यक्त्वा गुणान्सकुभवन्नस्वल्पमण्णेति। दोषांस्त्यक्त्वा गुणानेव तिक्तमित्युपभुंक्ते अतः सलिलमिलितदुग्धपायी बहसइति। तेन्द्रियं व यशास्त्वेवस्थितमहत्तमेषुगणतिभवान् भर्वद्वेष्टा गर्वदघमविद्वानुब्रुवान् हि। अहो कष्टमितिदोषाः द्विजाइत्यनेन दक्षस्यब्राह्मणत्वं विचार्यापि तदग्रे अतिक्रम्यते । सूचयति॥ १२॥ असतांयोग्योमहत्तमेष्वेकस्यन वरिष्ठः द्वेष्टिबिवामर्मरूष्यर्यबुद्धिं जनयतीतिभावेनाह। नाश्चर्यमिति॥ कुणपं कर्मफलं पिबतीति कुण पोदेहः सएवात्मेति वादिनःकुणपात्मवादिनः। तेषु असत्सु ईर्ष्या सहवर्तमानानां महतां विनिंदा सातियत्नेतदाश्चर्यं किंतु देवमहद्विनिंदनमे

दोषान्परेषां हि गुणेषु साधवो गृह्णन्ति केचिन्नभवादृशा द्विज॥ गुणांश्च फल्गून्बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघं॥ १२ नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु॥ सेर्ष्यं महापुरुषपादपांसुभिर्निरस्ततेजःसु तदेव शोभनं॥ १३॥ य द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हन्ति तत्॥ पवित्रकीर्तिं तमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः॥ १४

वैशोभनमित्यत्र यः कुणपात्मवादित्वविद्वज्जननिषेवायाः अभावादित्याह। महापुरुषेति॥ क्वचिद्विद्वज्जनसेवयापि तत्त्वज्ञानेनहितत्व ज्ञानं स्यात् तेहि पादरजसा अस्पृष्टा अतस्तेषु कुणपात्मवादित्वेन महद्विनिंदनं भवत्येवेति तावदृशेतो ममाश्चर्यबुद्धिरिति॥ १३॥ महद्विनिंदनं मयान कृतमितिवक्तुं न शक्यत इत्याह। यद्व्यक्षरमिति। शिवइति हेअक्षरे यस्मिन् तद्व्यक्षरं यस्य भगवतो यद्व्यक्षरं नाम तत्प्रसंग कथा प्रसं गात्वगिरावाणी ईरितं उच्चारितं नृणामघं अन्योन्यहत्तुमशक्यं दुःखमाशु हंतिनाशयति। भवांस्तं शिवं द्वेष्टि [illegible] क्रियाया सूचयेदित्यतो भवां छिवेतरः [illegible] क्रियेषु विष्णु शिवरस्तु शुद्ध नाम संज्ञान्युचितहेतुं दुःखनाशानाविप्रसुचिरितिभावेन [illegible] शिवनामकीर्तनादेव नष्टं दुःखं पुनर्न जनोहतीतिभावेनाह। अलंघ्येति। नलंघ्यमन्यथाकर्तुमशक्यं शासनमकीर्तनादुत्त [illegible]

प्रेतावासेषु घोरेषु घोरैः वितामस्मकृतस्नाने इत्यादेः श्लोकद्वयेनोत्तरं ब्रुवन्नयति। तत्पादपद्ममिति। ब्रह्मरसः बृहत्तमानन्दस्तस्य आसवं इदि
यत् मिकरमधुतस्यार्थिनस्ते लब्धपानो लीना तेत थोक्ता। तेमहतां सनकादीनां मनःस्येवालपकुम्भगास्तेयं स्वपादपद्मं नितरां सेवितं। यस्य पदस्त
पारच त्रिष्फलं नेत्याह। लोकस्येति। आशिषो अस्युद्यत् हगणाः। अनेन गुरुद्रोहित्वं च प्रा[illegible]मित्युक्तं भवति। सनकादयो उ इत्या[illegible]स्तेषामपि
योगिनः ब्रह्मशिष्यस्तथा उ ऋषिब्रह्मा नारायणास्य चैतेषां शिष्यरूपेण नाम्न हता मित्यनेन सनकादयो गृह्यंते॥१५॥ त्वदन्ये ब्रह्मा[illegible]पितायेषां
ते ब्रह्मादयः। ब्रह्मपुत्राः सनकादयो रुद्रं स्तमाल्यभस्मनृकपालीयस्मिन् उपत्र्यानेविद्यमाने प्रेतालंकारमालायोग्यास्तिष्ठ अस्मन रक[illegible]ताने

यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान्द्रुह्यति विश्वबंधवे॥१५॥ किंवा
शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने। तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणावसृ
ष्टं॥१६॥ कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने। छिंद्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपि ततो वि
सृजेत्स धर्मः १७

दाश्चवकीर्यप्रसार्य पिशाचैः सह श्मशाने ऽवसद्विलिंतं शिवाख्यमशिवं विदुः किं न विदुः खलु नित्यशुद्ध इत्येव विदुः कुत इति न त्राह। यन्मूर्द्धभि
रिति। ये सनकादयः तच्चरणावसृष्टं रजआदिकं मूर्द्धभिर्दधति अनेन शिवस्याशिवत्वेना न पूर्वेकं तच्चरणारजो वारणस्य भवस्तत्कारणत्वा तानि
त्यशुद्ध इति तर्कः सूचितः मूर्द्धभिर्दधतीत्यनेन पुरुषार्थापेक्षया पादयोस्तु चरणान्तत्वं ध्वनयति॥ तदुक्तं॥ सुपर्णशेषप्राणेशब्रह्मविष्णु
श्रियप्रियै॥ कृते मुनेर्ति नो रुद्रं कारणं पुरुषार्थभागिति॥१६॥ सभायां धर्मसंकटप्राप्तस्य कर्तव्यं धर्ममाह। कर्णाविति। धर्मस्यावितरि ईश्वरे सति
नि। अधृणिभिर्दयागुणरहितैर्नृभिरस्यमाने अधिक्षिप्यमाणे सति स्मायद्यकल्पः त्रिशिर्हितुमसमर्थः तर्हि स्वकर्णौ पिधाय निरियाद्गच्छेत्
इत्यात्रिगच्छेत प्रभुश्चेद्रसतीं ऋतां परुषभाषिणीं जिह्वां प्रसह्य छिंद्यात् ततः प्रत्युत्ता सं[illegible] सर्वैविरजेत् स धर्मः इत्यन्वयः १७

रू॰ भवे॰ न्या॰

अपि शब्देनेदमेव संभावितमिति ध्वनितं स्पष्टयति॥ अतस्तवेति। तव बीजोद्भवत्वं च। शितिकंठगर्हिणः नीलकंठदूषिणः। अस्मिन्नर्थेऽपायमाह। जग्धस्ये
ति। जग्धस्य भुक्तस्यान्नस्यो ऽद्गरणं वमनं प्रचक्षते वदंति विद्वांस इति शेषः॥१८॥ ननु ममापराधे मे वक्तव्य इमान् तलस्त्वेन गुरुं मां दृष्ट्वा भुत्थानाभि
नि। जग्धस्य भुक्तस्यान्नस्य रसो ऽद्गरणं वमनं प्रचक्षते वदंति विद्वांस इति शेषः। निरोधमहामुनेः सर्वज्ञतमस्य शिवस्य स एव लोके स्वर्विनश्यत्प्रका
कुर्वात स्यापराधं किं न स्मरसी तितत्राह। नेवदवाद्य निति॥ ज्ञानित्वेन स्वेच्छातिवृत्तिर्विधिर्महामुनेः सर्वज्ञतमस्य शिवस्य स्व एव लोके स्वविवश्य्यतेप्रका

अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठगर्हिणः। जग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्योद्धरणं प्रचक्षते १८
न वेद वादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः। यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः १९

नामानेह रोरमतोरममाणस्य तद्दर्शनसुधापानेन नित्यतृप्तस्य वेदवादान्वर्णाश्रमप्रयुक्तान् अभ्युत्थानादिविधीन्नानुवर्तते लौकिकं किल
ज्ञणत्वात्॥ तत्र दृष्टांतमाह। पथ्येति। यथा देवमनुष्ययोर्गतिर्मार्गः पृथक् भिन्नः। तस्मात्स्व एव धर्मे स्वविहिते धर्मे स्थितः परमन्यं न हि पतन
दूषयेत्॥ अतस्त्वं वानर्गलोऽपराध इति भावः १९

भा॰ च॰
१५

निवृत्तमिर

ननु ज्ञानिनः प्रवृत्तिक्रमो संभवेऽपि निवृत्तिकर्म संभवतीति तत्राह। कर्मेति। वेदे प्रवृत्तं निवृत्तमित्युभयलिङ्गमुभयविधलक्षणं कर्म सविविच्याश्रितं प्रतिपादितं स्व र्गाद्यर्थं प्रवृत्तं मुमुक्षोर्निवृत्तमिति विवेकं कृत्वा कथितमित्यर्थः। ततः किं तत्राह। विरोधीति। तद्द्वयं यौगपद्येन एकदा एककाले एककर्तरि विरोधि प्रकाशतमसोरेक त्वावस्थानवद्विरुद्धं स्यादित्यर्थः। ततश्च प्रकृते किं तत्राह। तथेति। द्वयमित्यनुवर्तते यथा द्वयमेकस्मिन्कर्तरि विरुद्धत्वाद्दुष्करं तथा अत्र ज्ञानिसम्यक् ज्ञानिनि जीवन्मुक्ते पि द्वयं कर्म नर्च्छति न प्राप्नोति ब्रह्मस्थितिधर्मजीवन्मुक्त्यर्थमभिधीयते यस्तस्य न निवृत्तं च प्रवृत्तं कर्म चेष्टते तत्र न नातवस्त्रं द्वि तीयकर्त्राश्रयं कर्म न घट तदित्यर्थः स्यानुपपन्नं उक्तएवार्थः। नन्वेवं त्वरुपमुमित्यादिश्रुतेर्देवानामपि कर्मप्रतीतेः रुद्रस्यापि देवात्मभावात्तस्य कथं त दनर्हत्वमुच्यत इति चेदुच्यते। नास्माभिर्देवस्य कर्ममात्राभाव उच्यते किन्तु विशेषोऽतः यो नियताधिकारिकं नियमनामकं कर्म तद्वस्तुतो सुखोद्वेक हेतुत्वा त्। तदुक्तं यद्देवाः प्रकुर्वन्ति समहानियमः स्मृतः। समहानियमो नाम कर्मयज्ञाधिकारिकं। महतो नियमाद्धि प्राप्तः प्रीत्या सुखोद्वेको न निःश्रेयसं केचिदिति

कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिङ्गमाश्रितं विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति २० मा वः पदव्यः पित रस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः। तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिङ्गा अवधूतसेविताः २१

न्नमित्याहुर्महानियममस्तुतेति। एतदपि नृत्तं वेदे विविच्योक्तमिति निवृत्तं तस्मात्स महानियमारब्धं कर्माधिकृतस्यास्थिताः प्रवृत्तस्य तत्त्वनिन्दया युणाहीनत्वं नात्र नीयाय दिदेवाश्रमस्थाद्यानिद्धोतेयत्रकुत्रवित्। नतावता गुणेऽहीनाः स्थितप्रज्ञा इति मताः॥ यथाया यपदं तात्पर्यं निर्दिष्टान्यदेवतु इति वचना त्॥२०॥ अनन्तरातीतयं थे ननु दृदक्ष्यायाः पथ ऊर्ध्वगं त्वं हो नितं केवलं करोतीति मा व इति। हे पितः अस्मदास्थिताः अस्माभिराश्रिता अवधूतसेविताः सनकादियोगीभिः सेव्यस्ताश्च अव्यक्तलिङ्गा अन्यैरज्ञातानलक्षणाः अचिरादिमार्गलक्षणा याः पदव्यस्ता वो युष्माकं मा नैव भवन्ति। या यज्ञशालासु यज्ञा सन्नेष्टाः लक्षणेन धूमवर्त्मभूमादिमार्गयेषां तेतथोक्ताः। तेषां कर्मीकाकर्मत्वतो पयुक्तमासमह्रोमानां तत्र लवुद्धिंगतेर सुभृद्भिः पशुप्रा णिहारिभिः पुरुषैरीडिताश्च यादिलक्षणापदव्यस्ता अस्माकं नैवेतिपदं सर्वत्रा सामर्थ्यं ललात्वर्दियानुद्दस्य गुणहीनत्वं श्रतोनातद्दूषणमु चिततरमिति भावः ॥२१॥

किं बहुनोक्तेनेतित्त्ववैराग्यमासादयाति। एतेनेति। हे रेतुद्रू कृतागसः कृतापराधस्य तव देहाज्जातेन तद्भवकुजन्मना लोकनिन्दितोत्पत्तिना। कस्मादीदृशं वैराग्यं तावत्पत्तज्ञाह। व्रीडेति। कुत्सितश्चासौ जनश्च कुजनः भवादृशस्तस्य प्रसङ्गतः जन्यजनकसंबन्धकथा लक्षणात्संस्मात्। कार्यं तं त्वाह। तज्जन्मेति तज्ज न्मयन्महतामवद्यकृत् मनोऽप्रियकारि तज्जन्म धिक् निन्दामीत्यन्वयः॥२२॥ ततः किं फलितं तत्राह। गोत्रमिति। वृषध्वजो भगवान्यदा दाक्षायणीत्याह। इदं तु त्रीतित्वं

एतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना। व्रीडा ममाभूत्कुजनप्रसङ्गतस्तज्जन्म धिक्यो महतामवद्यकृत्॥२२॥ गोत्रं त्वदी यं भगवान्वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः। व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदङ्गजं २३ इति श्रीभागवते चतुर्थे चतुर्थोऽध्यायः॥

ण
त्वाश्रोपेतं नाम विशेषं यदा यावत्सुदुर्मनाः त्वन्नाम स्मरणमात्रेणैव सुतरां विषण्णमनाः अत एव व्यपेत नर्मस्मितमिति क्रियाविशेषणं। अपगतं नर्म वच नपुत्रं मस्मितं हासो यथा भवतितथा मामाह च स्मृतिहेतुतामात्रेणैव ततः पूर्वमेव त्वदङ्गजं तत्कुशरीरं ददुत्पन्नं कुणपं कुत्सितं शरीरमुत्स्रक्ष्यामि। त्यक्ष्यामि। ह्यनेन स्नेहवशाद्धदाक्षायणीति त्वदीयं गोत्रमाह तदा सुत्वदीयदेहसंस्मरणाद्व्यपेतनर्मस्मितं सुदुर्मना भवत्यतः इतः परं तथा मा भूदिति कुणपमुत्स्र क्ष्य इति वा। ममदेहत्यागस्तुणं त्याग तुल्यद्योतनायात्मने पदप्रयोगः॥२३॥ इति चतुर्थे चतुर्थः॥ ॥

इति

भा॰ च॰
१६

एवं देहत्यागस्याप्यनुत्साहे आत्मेपीति कर्तव्यतापाःफलाधिक्यस्यादिति सूचनाय योगेन निरुद्धप्राणा यच देहत्यागः इति कर्तव्यतां दर्शयत्यष्टभिः अध्वरे यज्ञे स्थितिः
उदीचीं दिशं अग्नेः उत्तरतो निषसादेत्यन्वयः पीतदुकूलसंवृता इति अयं निरुपद्रवेण सम्यक्त्वेन स्पृष्ट्वा जलं पीत्वा च अनृत कूलं च तेन संवृता आच्छन्ना । दृग्योगः निमीलनं निमी
लनपूर्वकं दृग्व्यापारयोगपथं देहोत्क्रमणयोगमार्गं ॥ १॥ तं विशदयति । कृत्वेति जितासना प्राणादिसंचार्यो येन देहः संचलनरहितास्तथा निंदिता कुत्सिता
सा सती प्रथमं रेचकपूरकेन कत्वानिलौ प्राणापानौ समानौ ऊर्ध्वाधोवृत्तिरहितौ कृत्वा एकविषयगती विधाय मूलाधारादुत्क्रमेण कर्त्रीं सुषुम्नासंचा
रिणा मुदानमुत्थाप्य धीयुक्तं वक्ष्यति नाभिचक्रमानीय ततो नाभितः हृदि स्थाप्य निश्चलतया बुध्या शनैः हृदयं विनाहदि स्थाप्य उरसि स्थितं वायुं कंठं नीला

मैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शांतवाक् ॥ स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समा
विशत् ॥ १॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदिता
नयत् ॥ २॥ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् ॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणां ३

कंठाद्भ्रुवोर्मध्यमनयदित्यन्वयः यद्वा संधिसंचारिणं वायुं व्यानमूर्द्धाधो गतिनिमित्तो प्राणापानौ समानवायुनैकीकृत्य तं समानं वायुं सोदानमुदा
नगत्या सहितं सुषुम्नामार्गेण सुदानेन कीकृत्यो पर्युपरि स्थानं नीवेन सहानयदिति ॥ अत्र च द्व्यनयनं शान्तिमता वायुनीजी वसंज्ञं द्व्यनय
नानंतु तन्मोचितस्य योगिनो नित्याप्यस्तत्वात् ॥ ३॥ एवं भ्रुवोर्मध्यमनिलं मौनी यस्वयमपि भ्रुवोर्मध्ये स्थिता किं चकारेति तत्राह । एवमिति एवमु
क्तप्रकारेण वायुं भ्रूमध्यं नीला स्वयं च तत्र स्थिता मनस्विनी वशीकृतमनी महतां श्रीमिं द्रादीनां महीयसा शंकरेण दरात् मुहुः आश्वंदंकमारोपि
तं स्वदेहं जिहासती त्यक्तुमिच्छती सोमांगात्रेषु करचरणादिषु अवयवेषु अनिलाग्निधारणां देहभस्मीकरणाय वायुमुत्पन्नमग्निं ध्यानं दधार
चकार । अनेकार्थत्वाद्धातूनां दक्षरुषेत्यनेनात्महत्यादोषमाह । ३ ल

राम
१६

ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरं ॥ ददर्श देहो हतकल्मषा सती सद्यः प्रजज्वाल समाधिजाग्निना ४ तत्पश्यतां
खे भुवि चाद्भुतं महद्धाहेति वादः सुमहानजायत ॥ हंत प्रिया दैवतमस्य देवी जहावसून्केन सती प्रकोपिता ॥ ५॥ अहो अनात्म्यं
महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ॥ जहावसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ६॥

ननु वाय्वग्निध्यानेन देहत्यागानंतरं चेदुत्क्रांतत्स्ववायोरनाहतत्वेन अग्निसंयोगाभावेनाभीष्टकार्यानुत्पत्तिः एवं चेदात्मनोपि नाशः संभवात्सवत्वनुपपन्नं तो
नस्य नित्यत्वेनानाशो दित्याशंच्य ससमय त्वेनोपपन्ने इति भावेनाह । तत इति । ततो वाय्वग्निधारणानंतरं सासती ज्ञानोपदेष्टत्वेन जगतां गुरोः चा
नस्य नित्यत्वेनाना ... पार्वती ... स्वदे
हीस्य स्वभर्तुः शिवस्य चरणयोः अंबुजात्मन्यांतरत्न सवं सुधां चिंतयत्याश्वास्यती अत एव तस्मात् अन्यं नू चिंतयती च अपरं विष्ण्वादिकं चिंतयती स्वदे
हे विष्णोर्दिकं ददर्श देहं च तत्याजेति वाक्यशेषः देहत्यागस्यान्यथानुपपत्त्या सिद्धत्वादप्यात्महत्यान्यायतःइत्यदोषः । रुद्रब्रह्मचापूर्वविष्णुश्चैवाप्रियं गिरः ॥
उमा चिंतयती देहं तत्याज । न च स्मरदिति वचनाच्च ध्याहारत्र माणिक इति पती यतो ततेर त्यव चर्तते । ततो देहत्यागानंतरं सा घस्तत्र द्रा

एवं पादादिक्रमेणैव समाधिजाताग्निना देहः प्रजज्वाल ज्वाल ॥ अनेनमृतदेहसंस्कारोपि न पित्रादिना कार्य इति ध्वनयति । हतकल्मषेत्यने
नविष्णू दिदर्शनानौरं पितृकोपनिमित्तं किल्बिषमपि नष्टमिति निसूचयति ॥ यद्वा दर्शनस्यानन्यथासिद्धा तयतो ॥ दोषाद्दृष्ट्यन्यथा ज्ञानेहायते
न चास्य सो अस्तीत्यर्थः ॥ ४॥ एवं कृत्वा गतंसु दरदेहत्यागे कस्मात्कुत्र करणखेदो नाभूत्किं तत्राह । तत्पश्यतामिति ॥ ५॥ किमनेन सिद्धं दुःखदोषण

कृतदोषानारोपणेति तत्राह । अनात्म्यमिति । अनात्म्यं मूर्खकर्म ॥ अहोत्वनात्म्यमिति पाठे अन्याय्यमित्यर्थः ॥ चराचराः प्रजा यस्य वश्योयस्य
वश्ये यस्य सं बंधिअ सूवा इति वा ॥ ६॥

ग्रानां २

ननु कथमेव ज्ञानार्थमभूदित्याशंक्य तस्य लोकास्य विद्विष्टफलदर्शनादित्याह। सोयमिति यएतान्द्दृष्टामनापेमकर्षीत्सोयं दुर्मर्षहृदयः दुःसहहृदयः अतएव ब्रह्मबन्धुर्हिताधमः। ब्राह्मणेषु दुहृदयत्वात्। अपि च अघप्रभृतिनतस्मादितिहेत्वर्थो वा यद्यस्मादित्यनेनसंबध्यते। पुरुषांशैवद्रुह्यतिपुरुषाद्विष्टात्मा पुरुषापेतिश्रुते। अनेनेविष्णुद्वेषमेविधं नयति पुरुषोविष्णुरुच्यतइतिश्रुतेः। मृतयेसरणायोद्यतोप्रयातमानां ॥७॥ शिवद्वेषात्रतिपुरुषाद्विष्टात्मा तु रुषापेतिश्रुते। अनेनेविष्णुद्वेषमेविधं नयति पुरुषोविष्णुरुच्यतइतिश्रुतेः ... दक्षस्त्रि ... वि ॥८॥ निर्गुणं ... हीनंमृवाकं देहं महीयसि महादेवेण्नोपरायमकार्षमिति दक्षपुत्रीमरणं दृष्ट्वा विमकृते तत्राह। दक्षस्त्रि वि ॥८॥

सोयं दुर्मर्षहृदयो ब्रह्मबन्धुर्लोकेपकीर्तिं महतीमवाप्स्यति ॥ यदंगजां स्वांपुरुषाद्विड्द्यतां न ... प्रत्यषेधन्मृतये पराधमः ॥७॥ दक्षःस्त्रदृष्टाद्वेसायं दुर्मर्षहृदयो ब्रह्मबन्धुर्लोकेपकीर्तिं महतीमवाप्स्यति ॥ यदंगजां स्वांपुरुषाद्विड्द्यतां ... ॥८॥ विष्णोर्विजितात्मानं निर्गुणं निरपत्रपं ॥ सोहं ... कल्पमयंकं व्यर्थमेहितुं त्वनिमित्ते विनाशेन ॥ ब ... घोरेण मयासाधु कृतं वत ॥ ९ ॥ ... दक्षं तुपार्षदाहन्तुमुद्यतेष्व ... दायुधाः ॥१०॥ तेषामापततां वेगं निशाम्य भगवान्भृगुः ॥ नामहीपरसि ॥ ... वदत्येवमजोसत्या ... सुत्यागमद्भुतं ॥ दक्षं तुपार्षदाहन्तुमुद्यतेष्व ... ॥ अध्वर्युणा हूयमानो देवा ... रोजासः ॥ ऋभवो नामतपसा ... सहस्रशः ॥१२॥ ... तैरलातायज्ञघ्नघ्नेनयजुषा दक्षिणाग्नौ जुहाव ह ॥१२॥ अध्वर्युणा हूयमानो ... तेजसा ॥१३॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे सतीदेहोत्सर्गः पंचमोध्यायः ॥ सर्वेप्रमथाः सहस्रशः ... ... ॥१३॥

त्यजायः ॥८॥ सहमरणायोपपाभूत्तागणा ... किमकार्षुरिति तत्राह चदतीति ॥ अजेदक्षेसत्यादेव्याः अ असुत्यागः प्राणवियोगलक्षणं ॥१०॥ दहादपिभृगोः शिवद्वेषोमहानिति भावेनभृतगणाः क्लिष्टाः सोपायं होमंवक्ति तेषामिति ॥ यज्ञघ्नायज्ञविनाशकास्तान्हंतीति यज्ञघ्नघ्नस्तेनयजुषा ये नाएपदुरस्रविरितो सोयहन्नता सोऽग्रहतंवयेतः ॥ तेषां वर्धने चिणजात ... हृमृतसदृशस्तेत्यादिषु मंत्रेण ॥११॥ ततः किमभूत्तत्राह अध्वर्युयोति सोमं सोमपानं ॥१२॥ अनेकहतमाना ... पसीतिद्वयंत्रैतद्वैभूकेनगणनापरभावं वक्ति तैरिति ॥ अलातानुल्मुकान्येवायुधानियेषां तेषां ... ब्रह्मतेजसा भृगुमंत्रप्रभावेन ... सं कल्पक ... स्थितिरित्यर्थः ॥१३॥ ॥ इति

विष्णुद्वेषवद्दक्षद्वेषस्याप्यनर्थहेतुत्वाल्लमुमुक्षुणासनकर्तव्य इति दर्शयते स्मिन्नध्याये। तत्र दौनारदमुखात्सवानीमरणाद्युवाहीरभद्रोत्पत्तिमाह। भवइति। प्रजापतेरवमानेन असत्कृतायाः। धिक्कृतायास्तस्य दक्षस्याध्वरेस्यत्रातइति तत्रध्वरेत्राः भृग्वादयस्तैस्तस्याध्वरेरपज्ञतद्दतितरध्वस्यजस्तैर्वोधिकुमाहाभवइति ॥ ... ॥१॥ क्रोधफलमाह। जुहुइति। दष्टोष्ठः तपुटयस्यसतथा भूताजटाअसंतातिधूर्जटिः मित्यर्थे किपूप्रत्ययः। तद्धिङ्हिसंप्रसारणं च ॥२॥ क्रोधफलमाह। जुहुइति ... ॥३॥ साजटा किमभूदितितत्राह। ततइति ॥ ततोजसज्वाला तद्दद्युग्रोचिर्यस्यासातथा ताः ॥ रोद्रः मयाहूतापद्वत्नी ... आतपः कथ्यते रौद्रइति हलायुधः ॥४॥

मैत्रेय उवाच ॥ भवोभवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात् ॥ स्वपार्षदसैन्यं च तदध्वरेभुभिर्विद्रावितं क्रोधमपारमादधे ॥१॥ क्रुद्धः सुदष्टोष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषं ॥ उत्कृत्य रुद्रः सहसोत्थितो हसन्गंभीरनादो विससर्ज तां भुवि ॥२॥ ततोतिकायस्तनुवा स्पृशन्दिवं ... सहस्रबाहुर्घनरुक्सूर्यदृक् ॥ करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विविधोद्यतायुधः ॥३॥ तं किं करोमीति गृणंतमाह बद्धांजलिं भगवान्भूतनाथः ॥ दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणीरुद्रभटांशको मे ॥४॥ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुं ॥ मेने तदात्मानमसंगरंहसा महीयसां तात सहःसहिष्णुं ॥५॥

याः कश्चित्पुरुषोभूदितिशेषः। ननु वातत्त्वाच्छरीरेणघनरक्तः संहारुणः सूर्यस्त्रदृक्त्राक्षिद्धयोयस्यसतथा। कपालानांमालास्रजोस्यास्तीतिकपालमाली ॥३॥ यदर्थमासौउत्पन्नस्तत्कृत्यमाह तं किमिति हे रुद्र महृद्रानामग्रणीत्वं हेतुर्भजस्वांशक इति। अनेनजटायाअात्मत्वं सूचयति ॥४॥ नमस्तिरुद्रमन्यव इतिश्रुतेर्मन्युनामहादेवेन। युयुत्सुस्तंनायोधानां वा स्वभावं वक्ति। मेन इतियदन्यासाध्यकर्मसाधनार्थमुपदिष्टस्तदात्मानमसंगरंहसं व्याप्यसत्कवेगं महीयसां सहनाअक्रिमन्तरांतां सहः सहन्तानिःसहिष्णुं सहन्त्रीतं मेनइत्यन्वयः। ५

मध्यात्राबिक्रमएवलोकस्योद्गजनकः।विक्रुतत्वाद्द्विक्रमइतिभावेनतद्यात्राप्रमावंवक्ति।अवीयमानइतिपथ्यासुद्धुभैरवंभयंकरंभवतितथावमनदनाजा
दनकोजगत्कृतुरत्तस्यार्थतांकंसंहर्त्ते।घोषाणांचाह्ननशालिभूषणानूपुरलक्षणंमंगद्योयस्यसतथा॥६॥अस्मैसोवीरभद्रोयज्ञवाटंनिकरमापरितिवार्त्तापुरोगामिनी
तत्सेनाधूलिरेवयन्तीतिभावेनकालिगादीनांधूलिस्पर्शनेनजिज्ञासाप्रकारंवक्ति।अथेति।उदीचांककुभिदिशि।अन्त्विजोयज्ञप्रवर्त्तकाः।यजमानोयज्ञेदीक्षि
तः।सभास्थानेस्थिताःमेत्र्यंतंत्रकमेहविरेवतांस्वैधविवेचयंतास्सदस्याः॥७॥नेकेवलंरथधूरभिदधुर्भूप्यहित्याह।वाताइति।चौराणामभावेनिमित्तमाह।प्राची

अवीयमानःसहरुद्रपार्षदैर्भ्रैत्रांनदद्भिर्व्यनदत्सुभैरवं॥उद्यम्यशूलंजगदंतकांतकंसंप्राद्रवद्धोषणभूषणांघ्रिः॥६॥अथर्त्विजोयजमानःसदस्याः
ककुभ्युदीच्यांप्रसमीक्ष्यरेणुं।तमःकिमेतत्कुतएतद्रजोभूदितिद्विजाद्विजपत्न्यश्चदध्युः ७ वातानवांतिनहिसंतिदस्यवःप्राचीनबर्हिर्जीवतिहो
ग्रदंडः॥गावोनवाल्पंतरंदकुतोरजोलोकोधुनाकिंप्रलयायकल्पते ८ प्रसूतिमिश्राःस्त्रियउद्विग्नचित्ताऊचुर्विपाकोवृजिनस्यैषतस्य।यत्पश्यं
तीनांदुहितॄणांप्रजेशःसुतांसतीमवदध्यावनागाः ९

नवर्हिरिति।उग्रोदंडोयस्या।उग्रेषुदंडोयस्येतिवा।सउग्रदंडःप्राचीनवीर्हिर्न्त्रोमतत्कालमेवोराजजीवतिसमृप्राणानवर्त्ततइत्यन्वयः।हेत्वनेनतज्जीवनंसर्वे
षांसिद्धमितिमन्तव्यं।८।तत्रकेचित्‌र्क्तभयात्कारणांजानेतोपितत्स्नीमांसन्सइयर्हमाःप्रसूतिमुख्याःकारणमूचुरित्याह।प्रसूतिमिश्राइति।मिश्रा
स्प्रेतमुख्यार्थेवन्ते।प्रजेशोदक्षोदुहितॄणांप्रपश्यतीनांसतीनांअनागसामनपराधानांनासतींसुतामवदध्यौअवज्ञातवानितियत्तस्माद्वृजिनस्य
पापस्यविपाकःफलमेवेत्यन्वयः ९

सत्यवज्ञानोत्पन्नपरमेश्वरकोपादियमनर्थोद्योतिनीधूलिरितिभावेनसख्याशिवमाहात्म्यंवदंतीत्याह।यास्त्विति।धुन्वज्जटाकलापःप्रसारितजटासमूहःवि
त्यविहृत्यबाहून्नितिनोवः।उदितान्यस्त्राणिधनुरादीनियेषुतेउदितास्त्राः।दोषोभुजास्तएवध्वजादीर्घजाथस्यसतथोक्तः।रुद्राट्टहासःकठोरसिंहनादःसएवस्तनयि
त्नुःप्रलयकालीनमेघनादस्तेनभिन्नाविद्राविताःदिशोयस्यसतथोक्तः।भिन्नदृगितिपाठस्तनयित्नुवन्मेघवद्भिन्नाव्यक्ताटहासस्यसतथेत्यर्थः।१०।अनेनप्रकृतेकिंतत्रा
ह।अमर्षयित्वेति॥एवंविधंतत्रिवममर्षयित्वाविधातुर्दक्षस्यस्वस्तिस्यात्किंनस्यादित्यन्वयः।दंष्ट्राग्रभाभिरुदस्तोनिरस्तोभगणोनक्षत्रगणोयस्यसतथोक्तस्त

यस्त्वंतकालेव्युप्तजटाकलापःस्वशूलसूच्यर्पितदिग्गजेंद्रः॥वितत्यनृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् १० अमर्षयित्वातमसह्यतेज
संमन्युप्लुतंदुर्निरीक्ष्यंभ्रुकुट्या॥करालदंष्ट्राभिरुदस्तभागणंस्यात्स्वस्तिकिंकोपयतोविधातुः ११ बह्वेवमुद्विग्नदृशोच्यमानेजनेननदक्षस्यमखेमहात्म
न॥उत्पेतुरुत्पाततमाःसहस्रशोभयावहादिविभूमौचपर्यक् १२ तावत्सरुद्रानुचरैर्मखोमहान्नानायुधैर्वामनकैरुदायुधैः॥पिंगैःपिशंगैर्मकरोदरान
नैःपर्याद्रुवद्भिर्विदुराम्वरुध्यत १३

॥११॥नकेवलंतत्कृतोदक्षस्येष्टदरिष्टंज्ञायतेकिंतुदुर्निमित्तैरपीत्याह।बह्वेवमिति।किंबहुनापर्येकुसर्वतोदिक्षु॥१२॥उत्पातानांद्विविधंप्रत्यक्षफलमप्यदि
त्याह॥तावदितियावदुत्पाताउत्पन्नास्तावत्कालंदक्षेपमतेयज्ञसमहानमखोरुद्रस्यानुचरैरावृतःरुध्यतेत्यन्वयः।नानाविधत्वमेवस्यदृश्यते।वामनकैरित्यादिना
।वामनकैःह्रस्वैःह्रस्वशिरोभिश्चपिंगैःकपिलैःपिशंगैर्हरिद्रावर्णैःमकरवदुदरमाननंयेषांतैस्तथोक्तैः॥पर्याद्रुवद्भिरित्युक्ततत्तद्भिः १३

तत्रतत्रस्वस्वस्थलंरोधंचकुरित्युक्तंविविनष्टि।केचिदिति।प्राग्वंशःमध्येहोमस्थानंयजमानशालायाःपूर्वेपश्चिमेतत्संमुखयोःपर्यंतांतरंतत्राशालेयंनेष्टवेपश्चिमाय
तद्दारुप्राग्वंशस्तं।शालायाःपश्चिमतःपत्नीशाला।शालायाःपुरतोमंडपःसदः।मंडपतःपुरतोहविर्धानी।तस्योत्तरतःआग्नीध्रशाला।पश्चिमविन्यासनस्थानं।तस्याग्नी
ध्रस्याग्निस्थानंविहारःमहानसःपचनस्थानं॥१४॥रुरुजुःरुजोभंगइतिधातुःवेदिमेखलाःउत्तरवेदिसीमासूत्राणि॥१५॥१६॥मणिमान्कश्चिद्रुद्रगणमुख्यः॥प्रजापतिंद
क्षं।चंडेशःचंडेश्वरः॥१७॥सर्वेप्येवमेवनिग्रहीताःकिंनेत्याह।सर्वएवेति॥१८॥भवोवीरभद्रः।लुलुंचेउत्पाटयामास।लुंचअपनयनइतिधातुः।अनेनकोपराधः

केचिद्बभंजुःप्राग्वंशंपत्नीशालांतथापरे।सदआग्नीध्रशालांचतद्विहारंमहानसं १४ रुरुजुर्यज्ञपात्राणितथैकेग्नीननाशयन्।कुंडेष्वमूत्रयन्केचि
द्बिभिदुर्वेदिमेखलाः १५ अबाधंतमुनीनन्यएकेपत्नीरतर्जयन्।अपरेजगृहुर्देवान्प्रत्यासन्नान्पलायितान् १६ भृगुंबबंधमणिमान्वीरभद्रःप्र
जापतिं।चंडेशःपूषणंदेवंभगंनंदीश्वरोग्रहीत्॥१७॥सर्वएवर्त्विजोदृष्ट्वासदस्याःसदिवौकसः।तैरर्द्यमानाःसुभृशंग्रावभिर्नैकधाद्रवन्॥१८॥जु
ह्वतःस्रुवहस्तस्यश्मश्रूणिभगवान्भवः।भृगोर्लुलुंचेसदसियोहसच्छ्मश्रुदर्शयन् १९ भगस्यनेत्रेभगवान्पातितस्यरुषाभुवि।उज्जहारसदस्थो
क्ष्णायःशपंतमसूसुचत्॥२०॥पूष्णोह्यपातयद्दंतान्कालिंगस्ययथाबलः।शप्यमानेगरिमणियोहसद्दर्शयन्दतः॥२१॥आक्रम्योरसिदक्षस्यशित
धारेणहेतिना।छिंदन्नपितदुद्धर्तुंनाशक्नोत्त्र्यंबकस्तदा २२

कृतइतितत्राह।सदसीति।विश्वसृजांसदसि॥१९॥अत्रवीरभद्रस्वापराधानुकूलंदंडंकरोतिसर्वेषामित्याह।भगस्येति २० कालिंगस्यदंतवक्रस्यद्यूतेबलो
बलभद्रः।भृगुणागरिमणिज्ञानोपदेष्टृत्वेनगुरुत्वमेशिवेशप्यमानेसतियःपूषादतःदंतान्दर्शयन्नहसत्तस्य॥२१॥वीरभद्रोदक्षस्यकिमकरोदितितत्राह॥
आक्रम्येति।शितधारेणतीक्ष्णधारेण।त्रीणित्र्यंबकानिनेत्राणियस्य २२

राम

श्वानफलमाह।दृष्ट्वेति।मखेपशूनांसंज्ञपनेहिंसनेयोगंमंत्रपूर्वकोपायंयजमानएवपशुस्तस्य...योगेन॥२४॥अयंविक्रमकर्मभ्येषामुभयथांतःकरणात्तेषा
कार्षीदित्याह।साधुवादइति।अन्येषांस्वपक्षिणां २५ मंत्रादिरहितंतच्छिरःसंधानमपिनकार्यमितिभावेनशिरःछेदेनाग्निक्रियावक्ति।जुहावेतिततःपरंकिमका
रोदित्याह।तदेवमिति।देवयजनंयज्ञदेशंदग्ध्वाविनाश्यगुह्यकालयंकैलासंप्रातिष्ठत्प्रयादिति।अत्रत्र्यंबकोहरःपशुपतिरितिविशेषणानामितिईशत्वाल्लिंग
चनतात्पर्यमस्तीतिध्वनयति।पूर्ववीरभद्रस्वरूपेणागत्यापत्न्यांलादिकंभक्ष्यापश्चात्स्वरूपेणागत्यदक्षमवधीत्।तत्रापुत्रपदेणहरिधर्मपुत्रेणाहरिणा

शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचंहरः॥विस्मयंपरमापन्नोदध्यौपशुपतिश्चिरं॥२३॥दृष्ट्वासंज्ञपनंयोगंपशूनांसपतिर्मखे।यजमानपशोःकस्य
कायात्तेनाहरच्छिरः॥२४॥साधुवादस्तदातेषांकर्मतत्तस्यपश्यतां॥भूतप्रेतपिशाचानामन्येषांतद्विपर्ययः॥२५ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षि
तः॥तद्देवयजनंदग्ध्वाप्रातिष्ठद्गुह्यकालयं २६ इतिश्रीभागवतेमहापुराणेचतुर्थेदक्षयज्ञविध्वंसनंनामपंचमोध्यायः मैत्रेयउवाच अथ
देवगणाःसर्वेरुद्रानीकैःपराजिताः।शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः॥१॥ राम

चजिताःशिवोन्यांस्तत्रस्थितान्जित्वाकैलासमगमदिति॥तदुक्तंच॥वीरभद्रःस्वरूपेणस्वेनपूर्वेयथोहरः।भूतरूपेणपश्चात्तुगत्वादक्षमयावधीत्॥
तत्रापिद्रागहरिणाजितोधर्मात्मजेनच॥अन्यान्विजित्यप्रययौकैलासंस्वनिकेतनमिति॥ ॥इतिश्रीचतुर्थस्कंधेटीकायांपंचमोध्यायः॥ ॥भगवद
पराधीकरणात्तत्प्रसादस्वात्वान्नभक्तपुलकर्षतारतम्येनतदनुग्रहोप्याप्यइत्यभिप्रायोवर्ण्यतेस्मिन्षष्ठाध्याये।तत्रसर्वैभक्तोत्तमब्रह्मत्वेतत्प्रसा
दनायदेवानांब्रह्माणंप्राप्यस्वसंकटविज्ञापनप्रकारःकथ्यते॥अथदेवगणाइत्यादिना।रुद्रानीकैःसैन्यैःपार्षदैरित्यर्थः॥ १

१८२

भा॰ च॰
२०

एतद्धृन्त्रे २ ननु विष्णुब्रह्मणोर्यज्ञागतेरावश्यकत्वेन तत्स्थितौ यज्ञविनाशो ब्रह्मणोऽग्र्यत्वाद्देवविज्ञापनं च कथं युक्तं। अग्रे विश्वव्यपुरोडाशनिवेद्य तिप्रजापतेनत्वदेतानीत्यादिश्रुतेरित्यत आह। उपलभ्येति। एतद्भाविकार्यं पुरैवोपलभ्य ज्ञात्वा अब्जसंभवो ब्रह्मा विश्वात्मा विश्वान्तर्यामी त्रिमूर्त्तिभेदेन रूपेण नारायणश्च कस्य दक्षस्याध्वरं नेयतुर्न जग्मतुरित्यन्वयः। अतो विष्णुब्रह्मणोस्तत्रानवस्थानाद्यज्ञविनाशादेवानां ब्रह्माणं गत्वा विज्ञापनं च युज्यत इति भावः॥ ३॥ विज्ञापितं संकटं श्रुत्वा ब्रह्मणोऽभिप्रायाकारं वाक्यमवादीदित्याह तदिति। तेजीयसि वरिष्ठे पुंसि विष्णुवा रुद्रे चिना इत्यतः प्राये

संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुलाः॥ स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्य पुरैवैतद्भगवानब्जसंभवः॥ नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ३ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि॥ क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषतां ४ अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं पराडुः॥ प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मं ५

णेत्युक्तं॥ ४॥ तर्हि तूष्णीं भवोऽस्माकं किं मुधायं गतं त्वां ज्ञापयसीति तत्राह। अथापीति॥ बर्हिषो यज्ञस्य भागं स्वविहितांशं भजतीति भाग्भाक्। तं पराडुः त्यान्यस्मास्मुरित्यर्थः। अथ कृतापराधानामपि युष्माकं॥ शिवप्रसादनमेवायायत्तमुक्तं भवति॥ प्रसादने किंसाधनमित्यत उक्तं॥ परिशुद्धेति॥ भाक्पूर्वं त्वं चन्द्रमंडलवच्छेतसा एतस्मिन्नर्थे विकत्थनं भयत्वेन स्यादिति परीतुक्तं॥ न केवलं वितो नेमल्पमलं किंतु कार्यता येति तमित्याह। प्रगृहीतेति। प्रगृहीतेत्यंघ्रिपद्मे येसेतथोक्ताः ५

राम
२०

न वै त्वलं कालांतरभाविनः श्रेयसः साधनं तत्प्रसादनं किंतु अद्यतनस्यापीति भावेनाह॥ आशासाना इति। अध्वरस्य जीवितं पुनरनुसंधानलक्षणं जीवनमाशासाना आकांक्षमाणाः सपालः सह लोकपालैर्वर्त्तमानो लोकः यस्मिन् कुपिते न भवति तं देवं प्रियया सत्या विहीनं दुरुक्तैः हृदि विद्धं क्षमापयध्वमित्यन्वयः। आशु क्षिप्रं प्रसादनमिति न तु भावान्तरमिति भावेनोक्तं। लोकाश्च ते ६ दुःशूषणे विष्णुद्वेषवत्तस्य हरेर्मनो नुसाधि तयावर्त्तमानस्य श्रीकण्ठस्य द्वेषः कर्त्तुं न योग्य इत्याचार्येणाह॥ नाहमिति॥ अहं ब्रह्मा यज्ञो यस्य विशेषास्तत्त्वं बलवीर्ययोरितु पत्तत्त्वं प्रमाणं नवेदितः यात्पत्तत्त्वं दूपिनवेत्तितथा रूपन विद्या। तथान्ये प्रजापत्याद्यो ये च देहभाजः शरीरिणो मुनयः सनकादयश्च न विदुरित्यन्वयः॥ तस्य वि

आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन्॥ तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ६ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं विधित्सेत् ७

भोरात्मनो मनसैव स तंत्रस्य वशस्य रुद्रस्य कुःप्रमानपरा धीमान्यम्यपमुद्भर्विविधित्सेत् कर्त्तुमिच्छेत् न कोऽपि कर्त्तुं शक्नुयादित्यर्थः॥ यज्ञो यज्ञपतिः स्वि इत्युरुद्रतः पुरुद्रुतु इत्यभिधानादिंद्र एवात्र यज्ञशब्दार्थः॥ नाहं नेंद्रो न चैवान्ये यत्तत्त्वं न विदुः परं॥ तस्य विज्ञो वरो रुद्रो मम त्वापो रथापि वा॥ नान्यस्य कस्यचित्तु स तस्येत्थं वं कुतः कृतमिति वचनात्स्मृतिसमाख्यानान्नयज्ञो विष्णु॥ ममवायोरथापि वि पिबेत्यनेनात्मनो ब्रह्मणो वायोश्चांतं तस्येत्यमथोऽपि च्छेनितरितिज्ञायते। अदित्यनेनतस्य रक्त दीमुत्तानुं कामो। शिव दूषो न कर्त्तव्य इति सूचयति। मो। भैक्ष्यस्पर्द्धिवो चापदिष्टज्ञानायेदितत्वात्॥ तदुक्तं। मुमुक्षवो ब्रह्मणश्च शिवा रुद्रादिभिस्तथा॥ श्रुत्वा ज्ञानपरं गुह्यं मुच्यंते ब्रह्मणा सहेति ७ शि

भा॰ च॰
२१

मयसहागतं चेद्देतेषां देवानां एवः श्रीकृष्णप्रसादमविष्यतीति महादयालो ब्रह्मणः कैलासं प्रतिपाद्यं वक्ति। सइत्थमिति। अजो ब्रह्मा हरिप्रसादपुरद्विषः
प्रियं। कैलासो गिरिश्रेष्ठो मृडस्य प्रियाना। तस्य निवास इति विग्रहे। यथा विहिताण्प्रत्युपेन कैलासं इति रूपं सिध्यति। कंटककुलैः खंडैः सर्वैः स्वर्ग
इश्रोलादिपापयोरनारोहस्य चलस्य किं महात्म्यं मृडप्रियत्वमित्यतस्तत्पर्वतं चतुर्द्दशभिः श्लोकैः वर्णयति। जन्मेत्यादिना। नरेतरैर्नरत्वजातिरहि
तैर्जन्मनाऽविशिष्टकुलोत्पत्त्या तुष्टम्। चित्रकाद्योषधेना। कुत्रचिद्यायुष्मद्दिनं तपसा श्रेष्ठं गत्वा कायायोगेनमन्त्रतुल्यया दिमंत्रेण एतैः सिद्धैरमरैः
दिसिद्धैर्गतैर्जुष्टमित्यनेन सुखसाधनत्वं व्यनयति। नरेतरैः। किंनरगंधर्वैर्जुष्टं अप्सरोभिर्वृतमिति वा। मनःशिलादिनानाविधधातुभिश्चित्रितैः। चित्र

सइत्थमादिश्य सुरान् ब्रजस्कैतैः समन्वितः पितृभिः सपुजेश्वरोः। ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासं सम्यद्रिप्रवरं प्रियं प्रभोः ८ जन्मौषधितपो
मंत्रयोगसिद्धैर्नरेतरैः। जुष्टं किंनरगंधर्वैरप्सरोभिर्वृतं सदा॥ ९॥ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः। नानाद्रुमलतागुल्मैर्नाना
मृगगणावृतैः॥ १०॥ नानामलप्रस्रवणैर्नानाकंदरसानुभिः। रमणं विहरंतीनां रमणैः सिद्धयोषितां॥ ११॥ मयूरकेकाभिरुतं मदां
धालिविमूर्च्छितं। प्लावितै रक्तकंठानां कूजितैश्च पतत्रिणां॥ १२॥ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः। व्रजंतमिव मातंगैर्गृणंतमि
व निर्झरैः॥ १३॥ मंदारैः पारिजातैश्च सरलैश्चोपशोभितं। तमालैः शालतालैश्च कोविदारासनार्जुनैः १४

कारंममिति रीति शृंगविशेषणं। नानामृगगणावृतैर्नानाद्रुमादिभिश्च वृतं॥ १०॥ निर्झरः प्रश्रवो भसामितिहलः। जलस्पन्नानाखंमस्कातादिस्थलंसे
पकालकर्दमराहित्येनामलत्वं ननु शोभत्येन। तथा लैनानात्वविरुद्धकंदरा गुहाः सानुनितटाकानि रमणैः सहरंतीनां सिद्धयोषितां
मणांरतिप्रदे॥ ११॥ मयूरकेकाभिरुतं शब्दितं। विमूर्च्छितं विविधगीतं। रक्तकंठानां कोकिलानां पतत्रिणां पक्षिणां अन्येषां पतत्रिणां चकू
जितैरुक्तं॥ १२॥ किंचपादिप्याह द्वौ। श्रेयःपुरुषैः रुद्धस्तैः द्वैर्द्विजैः करागैः कामदुद्भिर्द्रुमैराद्वयंतमिवास्थितं॥ १३॥ पारिजातैः पारिभद्रैः
सरलैर्देवदारुभिः सालतालैः सर्जतरुतालैः कोविदारैः कांचनारकैः असनैः पीतसालपुष्पैः अर्जुनैः कुकुभैः १४

विह २
राम
२१

रा ३

नागैर्नागकेसरैः पुन्नागैः सुरपुन्नागैः। कुरवकैस्तिलकैः॥ १५॥ सुवर्णैः कृतमालैः वीरकुरवैः शेफालिकैः केतकैः। कुंदैः कुंकुमतरुभिः माधवीवासंतीः ग्रन्थसंकु
ताधिका स्वात्पर्यायात रैमचलिरस्यतैनानात्वेनाप श्रेममनोते वाधनं नन्दावयते १६। हिंगुरामठः। भूर्जैः भूर्जपत्रैः ओषधीभिः जननद्रुहैः॥ १७॥ काश्मरीकुंभगृ्नि
का॥ अम्रातकः विडुलः मातुलो निंद्रुमः सकरः प्रियालो लवंगः वनुबोधः अभू पूर्काम्र्चूरकरसः इंगुदः किंशुकः नापसतरुर्वा १८ ॥ ६॥ शालवाहधोनारकोटवराह:

वृतं कदंबनीपैश्च नागपुन्नागचंपकैः॥ पाटलाशोकबकुलैः कुंदैः कुरबकैर्धपा॥ १५॥ सुवर्णशतपत्रैश्च वीररेणुकजातिभिः। कुब्जकैर्मल्लिकाभिश्च मा
धवीभिश्च मंडितं॥ १६॥ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः। भूर्जैरोषधिभिः पूगैरजपूगैश्च जंबुभिः॥ १७॥ खर्जूराम्रातकाम्राद्यैः प्रियालमधुके
गुदैः॥ द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः॥ १८॥ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः॥ नलिनीषु कलं कूजत्खगवृंदोपशोभितं॥ १९॥ मृगैः शाखा
मृगैः क्रोडैर्मृगेंद्रैरृक्षशल्यकैः॥ गवयैः शरभैर्व्याघ्रैरुरुभिर्महिषादिभिः॥ २०॥ कर्णां[illegible]त्रैकपदाश्वास्यैर्निर्जुष्टं वृकनाभिभिः। कदलीखंडसं
रुद्धनलिनीपुलिनश्रियं॥ २१॥ पर्यस्तं नंदया सत्याः स्नानपुण्यदमोदयं॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः॥ २२॥ ददृशुस्तत्र ते रम्यामम
लकां नाम वै पुरीं॥ वनं सौगंधिकं चापि यत्र तन्नाम पंकजं॥ २३

पौ ३

मोहेमेल्लुकाः शल्यकः कदकवराहः गवयावनगावः शरभोष्टापदः रुरुः हरिणः॥ २०॥ महान्कर्णो यो कर्णविहीनो वा। कर्णः कर्णविहीनः स्यादंडरुक्
छिन्नपुच्छकइतियादवः। कर्णाः कूद्रोणाश्च एकपादश्चाश्वास्याश्च कर्णादिक्पदाश्वास्यास्तैः। त्रोणादयो पिमृगविशेषाः स्थाना। भिरिक्नस्तूरिकामृगैः
कदलीखंडेन संरुद्धस्य संवृतस्य नलिनीपुलिनस्य पद्मकस्य सिकतामयस्य स्थलस्य श्रीर्यस्मिन्सतथा तं २१ नंदया भंगायात्स्वयानद्या पर्यस्तं प
रिवृतं। भूतेशगिरिं श्रीकैलासं॥ २२॥ तत्र कैलासे पुनः किंचिन्मपत्रपत्रितितत्राह। ददृशुरिति। तन्नाम सौगंधिकं नाम॥ २३

अलकायाः बाह्यतो वहिर्भागे तीर्थपादः श्रीनारायणः तयाद्यपत्रम्नसामिश्रितलान्नदतीवपावने शुद्धे ॥ २४ ॥ स्वधिष्ण्यतः स्वविमानात् ॥ २४ ॥ तासां स्त्रीणां विभ्रष्टं संक्रान्तं कुचनव कुंकुमं तेन पिंजरं पीतरक्तं ॥ २६ ॥ तारे रजतं मौक्तिकं वैदूर्यं हेम मणिः सुवर्णं महारत्नं माणिक्यादिभिर्लंकृतानां विमानानां शतैः संकुलां निविडां कथमिव स्थितां तदिताद्येन न च सह वर्तमानं खमाकाशं यथा ॥ २७ ॥ अलकां तां प्रवेशं तद्बहिर्दर्शनेन तत्संकुजनसंलापेन कालक्षेपेण छित्वा रहदहनयत्ना नुसंधानं दुर्घादंस्या दिति धियातां पुरीतं उद्वंत वृष्ट्वा हित्वा वहिरेव गच्छतः सेदेवाश्चारादुदद्दृशुरित्यन्वयः ॥ यद्वेश्वरपुरीं हित्वा ततः सौगंधिकं च वनं दृष्ट्वा समीपे च दद्दृशुरिति वा ॥ तद्वनं विशिनष्टि द्रुमैरित्यादिना ॥ चित्राणि मनोज्ञानि पुष्पाणि फलानि छदाः पत्राणि येषु तैः तथा तैः ॥ २८ ॥ रक्तं कंठे येषां तनितया

नंदा चालकनंदा च सरितौ वेद्यतः पुरः ॥ तीर्थपादपदांभोजरजसातीवपावने २४ ययोः सुरस्त्रियः क्षत्तरवरुह्यस्वधिष्ण्यतः ॥ क्रीडंति पुंसः सिंचंत्यो विगाह्य रतिकर्षिताः ॥ २५ ॥ पयोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं ॥ वितृषोऽपि पिबंत्यंभः पाययंतो गजा गजीः २६ तारहेममहारत्नविमानशतसंकुलां ॥ जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनं ॥ २७ ॥ हित्वा यक्षेश्वरपुरीं वनं सौगंधिकं च तत् ॥ द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥ २८ ॥ रक्तकंठखगानीकस्वरमंडितषट्पदं ॥ कलहंसकुलप्रेष्ठं खरदंडजलाशयं ॥ २९ ॥ वनकुंजरसंघृष्टहरिचंदनवायुना ॥ अधिपुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ३० वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटं ३१

कलहंसकुलस्य प्रेष्ठानि प्रियतमानि खरदंडानि पद्मानि येषु तेन तथोक्ताः ॥ जलाशया जलाधाराः कासारा यस्मिंस्तत्तथोक्तं ॥ २९ ॥ वनकुंजरैः वनगजैः कंडूतिनिरासार्थं संघृष्टानां हरिचंदनानां रजो गंधिमिश्रवायुना अधिकं पुण्यजनस्त्रीणां मनो मुहुरुन्मथयद्विलोलयत् ॥ ३० ॥ उत्पलानां माला आसु विद्यत इत्युत्पलमालिनीः उत्पलमालिन्यः वैदूर्यैः कृतानि सोपानानि कुट्टिमावतास्थला नियासु तास्तथा ॥ एवंविधा वाप्याय वसंतीति शोकां तलिंपुरुषैर्विलासार्थं व्याप्तं ३१

वटं विशिनष्टि सयोजनेति सवटो योजनानां शतमुत्सेधमुन्नतिर्यस्य चतुर्भिर्विभिन्नतः चातस्यपादस्य सतु यो ॥ पंचविंशतिः सरमात योनारहिता संख्यापनसद्यतिभिः पर्यक्कृत छायाय स्पसतथा ॥ निर्गतानि नीडानि पक्षिमंदिराणि यस्मात्सतथा ॥ तापवर्जितावहांर्यविर्विटपे रायतो विस्तृतः पर्यंकपरितो यतास्त्रातायूर्णा अमला छायायस्यसतथा ॥ निर्गतानि नीडानि पक्षिमंदिराणि यस्मात्तत्तथा ॥ तापवर्जितावहांर्यविटपे रायतोविस्तृतः ॥ तस्मिन्वटस्य तले आसीनं शिवं दद्दृशुरित्यन्वयः ३३ ॥ संख्या तः श्रीतो मुरहितः ॥ ३३ ॥ सुरा महायोगमयं श्रेष्ठं ऐश्वर्यं सनकं पेशुत्तदृशुं गर्णगारारोनिवास भूतेतस्मिन्वटस्य तले आसीनं शिवं ददृशुरित्यन्वयः ॥ ३३ ॥ संख्या तः श्रीतो मुरहितः ॥ ३३ ॥ सुरा महायोगमयं श्रेष्ठं स्वैश्वर्यं सम्पेशुस्तम्पेशुदृशुः ॥ विद्यारोगस्य निवासभूते तस्मिन्निवटस्थले आसीनं शिवं दद्दृशुरित्यन्वयः ॥ ३४ ॥ विद्यातपस्थितं वेद्यवगान ॥ ३४ ॥ विद्या चातपश्च योगश्चेत्येषां मार्गाः तमास्थितमनुतिष्ठंतं दक्षीश्वरं ते यां विद्यादानमथ श्चर्यविषयसुपदेशांस्ता भिनिचालोवैश्वर्यगान ॥ ३४ ॥ विद्या च तपश्च योगश्चेत्येतयातेषां पंथा मार्गाः तमास्थितमनुतिष्ठंतं दक्षीश्वरं तेषां विद्यादानमथ श्चर्यविषयमुपदेशांस्ता भिनिचालोकामभालयती निलोक मंगलं विश्वस्य सुहृदमनिमित्तं बंधुश्च नारायणं वात्सल्यादत्युद्रेकात ध्यायंतं ॥ ३५ ॥ संध्याभ्रत्ताचार्योगौरी लिंगानि न सं कंपते तस्कुवामभालयती निलोकमंगलं विश्वस्य सुहृदमनिमित्तं बंधुश्च नारायणं वात्सल्यादत्युद्रेकात ध्यायंतं ॥ ३५ ॥

सयोजनशतोत्सेधः पादोनविटपायतः ॥ पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥ ३२ ॥ तस्मिन्महायोगमये मुमुक्षुशरणे सुराः ॥ ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ॥ ३३ ॥ सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहं ॥ उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां ॥ ३४ ॥ विद्यातपोयोगपथमास्थितं तमधीश्वरं ॥ चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलं ॥ ३५ ॥ लिंगं च तापसाभीष्टं भस्मदंडजटाजिनं ॥ अंगेन संध्याभ्ररुचा चंद्रलेखां च बिभ्रतं ॥ ३६ ॥ उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनं ॥ नारदाय प्रवोचंतं पृच्छते शृण्वतां सतां ॥ ३७ ॥ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि ॥ बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ॥ ३८

चकुंकुमोपरक्तत्वात्स्तोषवलत्वात्संध्याकालभवमेघवर्णेनांगेन तापसाभीष्टं भस्मादंडजटाद्याजिनं चयस्मिंस्तत्तथा तत् ॥ लिंगं वेषां लिंगं मुनिवेषोवेचिह्नं बुध्यादिसहतां ॥ चिंतयात्वः चंद्रस्य लेखां कलां विभ्रतं भस्मा ह्रतेनेनेनत्राह्यवयवानाम् नतु ह्यसंध्या भ्रवचेति ॥ ३६ ॥ दर्भमयीं दर्भमयीपासने ॥ यतीनामासनं ब्रुशी निहला सनातनं नित्यं ब्रह्म वेदतत्त्वं ॥ ३७ ॥ दक्षिणोरौ सव्यं पादपद्मं कृत्वा सव्यजानुनि स्थापितवाम बाहुं दक्षिणबाहुं प्रकोष्ठे दक्षिणबाहुं प्रकोष्ठे करात्र अक्षमालायस्यतं ॥ तर्कमुद्रया ज्ञानमुद्रयासीनं ॥ ३८ ॥ ॥

एवंविधशिवं दृष्ट्वा किं कुर्वतीत्याह । तं ब्रह्मेति । मननं नाम मननशीलानां त्र्यक्षकानां माध्यमं कुब्रह्म निर्वाणं समाधिशरीराभिमानत्यागलक्षणं चित्ते काग्रतातादृशीमवस्थामाश्रितं योगकक्ष्यां योगपट्टिकां ॥ ३९ ॥ सर्वे ब्रुवाणामह्नुस्तस्तुब्रह्मा किमकार्षीदित्याशङ्क्याह । पितृत्वात् गुरुत्वात्पूज्यत्वात्पूज्य चित्ते काग्रतातादृशीमवस्थामाश्रितं योगकक्ष्यां योगपट्टिकां इत्यर्थः ॥ सर्वेषु ब्रह्मा पृष्ठत्वाच्छम्भोर्त्या शिवशर्माहमभिवादयामीत्यभिवाद्य शिवो ब्रह्माणं नमतीत्याह । सत्यपलभ्येति शिरसेत्यनेनाष्टाङ्गविशिष्टानतिर्लक्ष्यते विशिनष्टि । यथेति । यथा विष्णोरष्टाङ्गविशिष्टत्वेन नमनं करोति तथेत्यर्थः ॥ सर्वं च घटसूर्यादपितेति शिष्टत्वेन तु हरणं तस्य विरिञ्चस्य माहात्म्यातिशयो

तं ब्रह्मनिर्वाणसमाधिमास्थितं यपाश्रितं गिरिशो योगकक्ष्याम् ॥ स लोकपाला मुनयो मनूनामाद्यं मनुं प्राञ्जलयः प्रणेमुः ॥ ३९ ॥ सतत्पलस्यागतमात्मयोनिं सुरासुरेशैरभिवन्दिताङ्घ्रिः । उत्थाय चक्रे शिरसाभिवन्दनमहत्तमो वर्कस्य यथैव विष्णुः ॥ ४० ॥ तथापरे सिद्धगणा महर्षिभिर्ये वै समन्तादनुनीललोहितम् ॥ नमस्कृताः प्राह शशाङ्कशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ४१

सीति किं वक्तव्यमिति भावेन शिवं विशिनष्टि । महत्तम इति ॥ अर्कस्य कश्यपादपि महत्तमः तेजस्वितम इत्यर्थः ॥ गुणगुणिनोरभेदाभिप्रायेणानां प्रयोगाः तेजोर्थं तत्तमार्थं च स्यार्थे च प्रयुज्यते ॥ महत्त्वे रोमहर्षणो मात्स्यपुराणस्थेयं चेति वचनात्तेजोर्थोमहत्त्वं इति सिद्धं ॥ ४० ॥ तत्र ब्रह्मा स्वगुरुत्वमभिनयन् भवं वक्तीत्याह । तथेति । यथा रुद्रस्य समन्तात् स्थिता अपरे ये सिद्धगणास्तैर्महर्षिभिः सह नीललोहितं अनु नमस्कृतः प्रहसन्निवात्मभूः ब्रह्मात्मने कृतप्रणामं शशाङ्कशेखरं प्राहेत्यन्वयः ४१

राम
२३
राम

भक्तद्वेषमसहमान शिवार्तयोऽमिणाद्दक्षयज्ञविनाशनमकारीति ध्वनयन्स्तुवन्नसिद्धिकामस्तामिसिंकं श्रेष्ठो शिवोपितु दक्षस्य तत्र स्य भक्तलक्षणलाञ्छितस्यासभ्येषु गुणेषु शिवार्तयामिशानरसि हस्तोतीति । जाने त्वामिति । हे ईश ब्रह्माण्डस्यार्यविश्वस्याखिलस्य जगतो योनिबीजयोः मातृस्थानीयायाः शक्तेः प्रकृतेरुमाया पितृस्थानीयस्य पुरुषस्य शब्दवाच्यस्य शिवस्य च सकाशाद्यत्परं मुक्तमेनिरन्तरं स्वगतभेदरहितं शिवशक्त्योः स्थितामात्मत्वा पितृत्वलक्षणशब्दप्रवृत्तिनिमित्तं पादकत्वं जानेऽत्यन्वयः ॥ ४२ ॥ शिवशक्त्योर्योनिबीजत्वमोपचारिकं शुद्धं तु तदन्तर्यामिणो हरेरेवेत्यभिप्रेत्याह । त्वमेवेति क्रीडयोर्णाय देकूर्णनाभिर्यथौर्णास्त्वजति तत्र च क्रीडते चतां हरतीति तथा त्वं भक्तिमावत्स्वरूपयोः साक्षाद्रूपयोः शिवशक्त्योः अखिलात्मत्वाकरण्डस्तभूतः भगवस्त्वमेवेतद्विश्वं सृजसिपा

ब्रह्मोवाच जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ॥ शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरं ४२ त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः ॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ४३ राम राम राम

पासि रक्षस्यत्सि संहरसीत्यन्वयः ॥ प्रसिद्धपरित्यक्त्या प्रसिद्धात्तयोर्विकल्पनायां किं कारणमित्यत उक्तं ॥ शक्तेः शिवस्य परमिति ॥ नहि शिवशक्त्योः परः शिवश्च शक्तिं कुर्यात् । प्रतीतिविरोधान्न हि त्वमित्यादिप्रयोगप्रतीतेः का गतिरिति चेत्शक्त्योर्तर्यामीपदद्याव रितार्थत्वात् ॥ तदुक्तं ॥ श्रीयते स्कान्दे परः शिवः इति कंकुयुक्तं प्रतीतिविरोधान्न हि त्वमित्यादिप्रयोगप्रतीतेः का गतिरिति चेत्नयत्र तत्र देत्यर्थाम्यपदद्या ॥ नजीवेषु गुणाः पूर्णाः यथायोग्यं हि तत्कृता इति । तद्व्याख्या त्वरूपं तु विष्णोः सर्वमुदीर्यते । स्वरूपं स च सर्वस्य विम्बाल्लदेवज्ञ्यते । साक्षात्स्वरूपमत्स्याद्या विष्णोर्नान्यकथंचनात । तस्मादन्यगता दोषा न तस्मिन्नु रुद्रोऽस्त्वमेति वचनात् शिवादीनामस्वरूपत्वं मतस्य दीनां साक्षात्स्वरूपत्वं च सिद्धं नापनपनीयमिति भावः ४३

भा॰ च॰
२४

स्त्रायज्ञविनाशनं तत्तयोर्मिथुनं कृतमिति प्रमाणेनाह न केवलं धारयति त्वमेवेति त्वमेव नान्यो धर्मार्थदोग्ध्री त्रयी दुघाभिपन्नयोरित्याहुतिनियमार्थे द्वैः सूत्रेण प्रवृत्त्यनाधुषकर
णनिमित्तदोषस्य केन दक्षेण हेतुना विसर्जिताध्वरः विना शितयन्तोऽभवमीत्याह यो गुणरहितः सन् हि तत्र यायेनाह त्वमभिपन्नयस्येति तस्य दोषस्याभिपतये
अभिमानाय परिहारायापाणि मं के रक्षोवन इत्यादिकाय त्वत्केन दक्षेण यायायज्ञ उपक्रीतः स तु न च एवं लिङ्गेन हेतुना दोषपरिहारः कथमन्तर्मलत्वमेव ना
शितवानित्यर्थः स हि लिङ्गेनात्र वासनाविनाशं किमकार्षीरित्यत आह त्वयेवेति तत्र लोमेषु यानियानि व्रतानि यावि हितानि तानि
निवारयन्तोऽथ ब्राह्मणा वेदं आश्रयन्ति ते न श्रद्धधते मङ्गलो पितानमम मङ्गलं दृष्ट्वा किं न कुर्यादित्यादिलक्षणा धर्मसेतवो लोकेन च दक्षलक्षेण आवसिता नि

हा॰

त्वमेव धर्मार्थदुघाभिपन्नयोर्दक्षेण सूत्रेण ससर्जिथाध्वरं। त्वयैव लोकेऽवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः ४४ त्वं कर्म
णां मङ्गल मङ्गलानां कर्तुस्स्म लोकं तनुषे स्वः परं वा। अमङ्गलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ४५

श्रितानि गीतानीत्यर्थः ॥४४॥ एवं कारणमत्रादिषु स्थित्वा वर्णाश्रमादिसंहितां विधिं तस्स इति ध्वनितं स्पष्टयति त्वं कर्मणामिति ॥ मङ्गल
च ॥ अगि वगि मगि गत्यर्थाः मगेरलच् प्रत्ययो भवति संज्ञा विषये नुमागमश्चकारस्तदर्थः तेन मङ्गलमिति रूपं तस्य संबुद्धिर्हे मं
गलेति हे मङ्गलाविष्ठातर्जीवलोके स्थित्वा मङ्गलानां पुण्यानाम्मङ्गलानामशुभानां च कर्मणां कर्तारि स्वयमन्यापेक्षितानि तथानुभु
येषां कर्मणां फलं स्वर्गादिकमुल्बणं तमिस्रं नरकादिकं च ततनुषे स्वस्वधेयपताद्युसारेण विस्तारयसीत्यन्वयः ननु नायं नियमो
दृश्यते विपर्ययस्तन्नादित्यत आह विपर्यय इति केनचिद्दुष्कृतादिहेतुना कस्यचिद्धर्मादेः फलविपर्ययः ननु सर्वे स्वेत्स हानं धर्म
सूक्ष्मत्वान्न दुर्लभमिति भावः ४५

राम
२४

रोषः॰

नैवं तर्हि ब्राह्मणगृहे रोषफलं कृतदोषा यज्ञ इत्यागतमित्याशंक्य त्वद्भक्तानामप्यनुचितो रोषो नास्ति किंतु न तवेति भावेनाहानवा इति त्वच्चरणार्पि
तात्मनां सर्वेषु भूतेष्वपि स्थितं तत पश्यतामात्मन्यात्रतया भूतानि च पश्यतामेवापृथक् दिदृक्षतां यथार्थज्ञानेषु स नां सतां प्रायेण तथारो
षोऽभिभवेद्यथा पशोरज्ञानिनोऽभिभवेदित्यन्वयः अनेन रोषविषये पुरो षकर्तृत्वेनान्यत्रातो न हे रोष रोषो ब्रह्मणोऽकृतत्वं भवति च
दुर्बुद्धी तिस्मृत्वा तद्धितीयादिवत् दुर्बुद्धी वत्ते तद्धितिविधानात्तत एव त्यस्पष्टितीयार्थेऽप्युक्ततो विशुद्धिना इमं तत्रास्ती तिष्ठितम निं इत्यानू

नैवं सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ॥ भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशोः ४६
पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशं ॥ परान्दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान्मावधीर्दैववधान्भवद्विधान्
४७

श्रितं ज्ञानं पृथग्दर्शनं स्मृतं मिथ्याज्ञानं पृथग्ज्ञानमिति वेदविदो विदुः। यथैवार्थस्तथा ज्ञानं पृथक्कृष्टिरुच्यते इति वचनात् पृथ
क्दर्शनेनाभिज्ञानं किंतु यथा वस्तु विज्ञानमिति निज्ञायते ॥४६॥ हननयोग्यापराधपुरुषविषये यो रोषः स कथं महतोऽपि नाभिभ
वेदित्याशंक्य तत्रैव रोषेण हन्यमानान्मावधीरिति प्रार्थयामहा इति विज्ञापयति पृथग्धिय इति ॥ पृथक्त्वादिदोषाकरा दुरु
क्तैः परान्वितुदन्ति हे देव भवद्विधास्तान्मावधीरित्यन्वयः पृथक्कुविधान्भिन्नप्रकारान् ज्ञानिविलक्षणानित्यर्थः ॥ ४७॥

भा॰ च॰ २५

यद्यपि ब्रह्मविज्ञापनेन प्रसन्नस्य रुद्रस्य तयोर्मिथो हरेः स्थानात्या रुद्रेपि ह्यंतो भवति। तथापि रुद्रेपि स्थिरं च वा चइति धिया पुनरद्वायकोपेन कर्तव्य इति रुद्रे
वर्त्तिा यस्मिन्निति। अस्मिंल्लोके ये इह विधा जना दुर्लघ्यया पुष्करनाभस्य मायया वंचकया तया स्पृष्टधियो यथे च पृथग्दृशः। अस्मिन् जने इष्टादिकं
कुर्वंतीति यदा यस्मात् तत्रेषु जनेषु भवादृशाः साधवोनुकंपया हृदयद्रवीभावेन कृपां न मालदृशेणापकारं कर्तुमिच्छां कथं न कुर्वंतीत्यन्वयः॥
हृदयस्य द्रवीभाव रूपत्वं नु कंपेति कथ्यते। उपकारं कर्तुमिच्छा कृपेत्यादुर्मनीषिणः। तेपि सा बुद्धेः केचित्कृतएवं कुर्वंतीति तत्राह। दैवेति। तादृशमपि
दृष्ट्वैव कर्म प्रवीर्यस्य देवस्य हरेर्वंचकत्वात् बलात् तथा कृता इति हेतुगर्भं विशेषणं॥ हिंसाहेतवे नयोग्यता विशेषं कथयति॥४८॥ विष्णुमायाहे
रिक्षा वंचनात्तिष्ठ हरा॥ सर्वज्ञत्वगहरेरिक्षा वंचनात्तिर्जितेति वचनाद्वा त्सर्वज्ञत्वेन वंचनात्तिरस्य यो भायातेषि कोन स्यादत्रो

अस्मिन्यथा पुष्करनाभमायया दुर्लघ्यया स्पृष्टधियः पृथग्दृशः। कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमं॥४८॥ भ
वांस्तु पुंसः परमस्य मायया दुरंतयास्पृष्टमतिः समस्तदृक्। तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो॥४९॥ कुर्वध्वर
स्योद्धरणं हतस्य भोस्त्वयासमाप्तस्य मनो प्रजापतेः। न यत्र भागं तव भागिनो ददुः कुयाजिनो येन मखो निनीयते ५०

सिद्धा ज्ञानिजनेनुग्रहं कर्तुमर्हसीत्याह। भवान्स्त्विति। द्विवाक्यो हेत्वर्थः। तया वंचकया तया हतात्मसु नष्टबुद्धिषु एषु अतएवानुकर्मचेतःसु
हिंसात्मकेषु कर्मानुविष्टचित्तेषु दक्षादिष्विति शेषः। अस्पृष्टमतिः स्वबोधनेन तयो अपि हरिप्रसादेन च प्रसादात् भिन्नस्वरूपप्रत्येता नोन्
ग्रहः कार्य इति वक्तिः॥ कुर्वध्वरस्येति। हतस्य त्वया कृतार्तराये ण निःशेष अतएवासमाप्तस्य कृतावभृथस्नाना दिनेति शेषः मनोर्दु
हितृस्यो क्रियमध्वरइति तत्राह। न यत्रेति। येन त्वया मखो निन्यनुभावन नीचलेन नीयते। तस्य भागिनो यत्र भागार्हस्य तव कुत्सिता याजकाः भागा
ति कुत्सिर्द्विजः क्रात्विजो देवा यत्र यज्ञे भागं विहितं विभागं न ददुः तत्समारंभे रस्याध्वरस्य यत्र भागयोग्येन त्वया मखो निनिकामनीयते
तस्य भागिनो देवाः भागं यत्र न ददुस्तस्यो क्तिभिः न्यग्भावनिकामयो रित्यादवः ५०

राम २५

यजमानसद्भावे यागोद्धारः संभवति तस्य भयाहतत्वात्कथं भग्नानां ध्वंवमवारीनां च भाग निरीक्ष्य कथंचायुधाश्मभिर्भग्नगात्राणामृत्विजांहोम
गलमित्याशंकात्तदनुग्रहसुधासमुद्रमयात्सर्वे संपन्ना भवंत्वित्याह। जीवतादित्यादिना॥ अनातुरमारोग्यं॥ ५१॥ सर्वे निरवद्यं स्यात्तस्य ईममभाग
स्तिवेदित्याशंक्य तवायमनुशोको मा भूदित्याह। एषतइति। यच्छिष्टः खिष्टकृतभागः। यद्यज्ञे खिष्टकृते समवद्यतिभागयेयेनैवतद्रुद्रं समर्पयतिसद्वा
त्साक्षात्स्वद्यति सद्यद्विरुद्र उत्तरार्धादवद्यत्येषा रुद्रस्य दिक्स्वायामेव दिशि रुद्रं निरवदयतेति श्रुतेः॥ ॥इतिश्रीभागवते महापुराणे चतुर्थस्कंधे सप्तमो
ध्यायः॥ ॥अत्र भगवद्रूपान्तोपचितकर्मे हरेः साद्गुण्यात्कारमायं नमवतीति तात्पर्यं तेनोनिरूप्यते। तत्र ब्रह्मोक्तमाकर्ण्य तुष्टेन रुद्रेण चयमानमतिवचनम्

जीवताद्यजमानोयं प्रपद्येताक्षिणी भगः। भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत्॥ ५१॥ देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः। भवता
नुगृहीतानामाशु मन्योस्त्वनातुरं॥ ५२॥ एष ते रुद्र भागोस्तु यदुच्छिष्टोध्वरस्य वै। यज्ञस्ते रुद्र भागेन कल्पतामद्य यज्ञहन्॥ ५३॥ इतिश्री
भागवते महापुराणे चतुर्थस्कंधे सप्तमोध्यायः॥ ॥मैत्रेय उवाच॥ इत्यजेनानुनीतेन भवेन परितुष्यता॥ अभ्यधायि महाबाहो प्रहस्य श्रू
यतामिति॥१॥ ॥ ॥

कारं वक्ति। इतीति। भवेन परितुष्यता निर्याचत इति वा महाबाहो महांतो बाहू यस्य स तथा। तस्य संबोधनं महाबाहो। अर्जितारिकम्पमिपसिवा धर्मशुद्धिपरि
कुत्र कदीर्घह का स्यास्य सिद्धेनेह शिरणेनाकस्वकांतोत्रयमा रोपसिनात्रानेवा ष्टलो द्वनएभ्यो धातुभ्यो कु प्रत्ययो भवति। एकांधात्त्वनायश्च
संरंभद्वतिपारोतुक दीर्घह कारस्य इत्येतेना गमाद्देशा भवति। मनुरवचनात्त्र अयुत्यजो वा पुष्कमेतद्दीन श्रुतुभ्याश्च केमेकागागमः किंतु कर्त्यः
श्रमेर्नुगागमः त्रेचुजत्वं॥ पशिपेसाद्दीर्घःपासुः रज्जः॥ वाधेर्ह कारादेशः बाहुः प्राणं॥ ॥१॥ ॥ ॥

भा॰ च
२६

किमप्यधायीतितत्राह।नाघमिति।हेप्रजेश।जीवरात्मुत्तमा।अघमा।अघमपराधंनवर्णयेअनेकत्वादयाप्रकालत्वादितिभावः।तर्हिपश्चात्तापोस्तिकिंनेत्याह।नाचचिंतयइति।पश्चात्तापंनकरोमीत्यर्थः।पश्चात्तापाकरणेकारणमाह।दंडइति।अपराधमनुसारिदंडाकरणेअनुतापःस्यात्तदनुसारित्वादिदंडइत्यर्थः॥२॥प्रजेशस्यादिभिर्गुरोर्वाक्यंसंवक्तुमानग्राह्यमितिभावंस्थापयन्नुवाच।प्रजापतेरिति।अजस्यछागस्यमुखंयस्यतत्तथोक्तं।एवंशिरोसेवायाकृतेत्यर्थः॥३॥प्रत्यक्षात्रादिभिर्गुरोर्वाक्यंसवक्तुमानग्राह्यमितिभावंस्थापयन्नुवाच।प्रजापतेरिति।अजस्यछागस्यमुखंयस्यतत्तथोक्तं।एवंशिरोसेवा
नाकरणेकारणाकृष्टश्रीहीइति।स्वपोरुषत्रयस्तंभस्त्वापनाय्यत्वजनत्रिद्वाणायचभगादीनामपन्यावयवेरेववर्तनिर्वाहस्यादितिभावेनाह।मित्रस्येत्या
दिना।बर्हिषोयज्ञस्यांशं३दद्भिर्दंतैः।।।तत्रदेवानांविशेषानुग्रहंकरोति।देवाइति॥प्रकृतसर्वांगाः।पूर्ववत्स्वप्रसर्वावयवाः।उच्छेषणंभागोदेवरुद्र

रुद्रउवाच॥ ॥नाघंप्रजेशबालानांवर्णयेनानुचिंतये।देवमायाभिभूतानांदंडस्तत्रधृतोमया॥२॥प्रजापतेर्दग्धशीर्ष्णोभवत्वजमुखंशिरः।मित्रस्यचक्षुषेक्षेतभागंस्वंबर्हिषोभगः॥३॥पूषातुयजमानस्यदद्भिर्जक्षतुपिष्टभुक्।देवाःप्रकृतसर्वांगायेमउच्छेषणंददुः॥४॥बाहुभ्यामश्विनोःपूष्णोहस्ताभ्यांकृतबाहवः॥भवंत्वध्वर्यवश्चान्येबस्तश्मश्रुर्भृगुर्भवेत॥५॥

हव:१

इतिश्रोतेः।येमउच्छेषणंददुरितिविशेषानुग्रहेहेतुः॥४॥कलिंत्राणेवमित्याह।बाहुभ्यामित्यादि।अध्वर्यवस्ताविंजातेषामध्येकेचिछिन्नबाहवः।।केचनछिन्नहस्तास्तेतुछिन्नबाहवोश्विनोर्बाहुभ्यांकृतबाहवःपूर्ववद्बाहुप्रयोजनाभवंतु।अन्येचपूष्णोहस्ताभ्यांकृतहस्ताभवंतुअध्वर्युत्वोपदिष्ट्या।बाहुस्तदथोहस्तः।देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामितिश्रुतेः।।हस्तदानादानपेरितिवानुः।।बस्तस्यश्मश्रूणियस्यस
बस्तश्मश्रुः॥ ॥५॥

राम
२६

कोसावुत्तरकथाप्रसंगइतितत्राह।।तदेति।मिहसेचनइतिधातोः।प्रणतजनस्याभीष्टंवर्षतोमीढ्वांसस्तेषामतिशयेनमीढ्वान्मीढुष्टमःतेनकथितंअने
नतदानीमेतन्नामोपलब्धमितिरहस्यमितिज्ञायते॥६॥तस्यदक्षस्यशुनासीराइंद्रादयःसहोताभ्यामुद्दिष्टोभावरुद्रस्तत्प्रायतंतथोक्ताः॥७॥कस्यदक्षस्यस
वनीयपशोःयज्ञीयपशोः॥।॥८॥शीर्षणिशिरसि॥९॥शिवस्यावलोकनतुष्टस्यानुग्रहसामर्थ्यव्यक्तिः।तदेति।अर्थंसलिलेदबोशिवसबकोरद्धमापुर्वर्शतिया

मैत्रेयउवाच॥तदासर्वाणिभूतानिश्रुत्वामीढुष्टमोदितं॥परितुष्टात्मभिस्तातसाधुसाध्वित्यथाब्रुवन्॥६॥ततोमीढ्वांसमामंत्र्यशुनासीराःस
हर्षिभिः।भूयस्तद्देवयजनंसमीढ्वद्वेधसोययुः॥७॥विधायकार्त्स्न्येनचतद्यदाहभगवान्भवः॥संदधुःकस्यकायेनसवनीयपशोःशि
रः॥८॥संधीयमानेशिरसिदक्षोरुद्राभिवीक्षितः॥सद्यःसुप्तइवोत्तस्थौददृशेचाग्रतोमृडं॥९॥तदावृषध्वजद्वेषकलिलात्माप्रजापतिः॥शिवा
वलोकादभवच्छरद्ध्रदइवामलः॥१०॥भवस्तवायकृतधीर्नाशक्नोदनुरागतः॥औत्कंठ्याद्बाष्पकलयासंपरेतांसुतांस्मरन्॥११॥कृच्छ्रात्संस्तभ्य
चमनःप्रेमविह्वलितःसुधीः॥शशंसनिर्व्यलीकेनभावेनेशंप्रजापतिः॥१२॥ ॥

दवः।शरन्मेघवत्॥१०॥बाष्पस्वछत्वमेवतस्यनत्वांतरंतत्रहेतुःप्रेमभावादितितत्राह।भवस्तवायेति।औत्कंठ्यादुत्पन्नवाष्पकलैलया।अतएवमेलना
भावेरुद्रस्तवएवनप्रवृत्तःसवानेनकर्तुंप्रयस्यतेतस्मादंतरोशुद्धिरप्युत्तमास्मतइति॥११॥कायिकएवप्रयतोनतुवाचिकइतितत्रकामासंदित्या
शंक्याह।कृच्छ्रादिति।भावेनस्नेहेन॥।॥१२॥ ॥

भा॰च॰
२७

दक्षस्य शिवे लांतरो द्वेषो नासीति ज्ञापयितुं तत्खलु गुणागुणोः स्तुतिं करोति भूयानिति। त्वया प्रसह्यापि मदपराधानुगुणो दंडो धृतः॥ इतियद्यस्माद्भूयाननु
ग्रहः कृतः। अहो मम महान् नु साम नुकंपा। शिरच्छेदादिलक्षणो नुग्रहो नस्या किंतु अत्यंतोपकार एवायं मम मेवलोके कोपदर्शनादतो न पुनरुक्त इत्यत्राह।
पराधाधिकेनायं नियम इति भावेनाह। नब्रह्मेति ब्रह्मबंधुषु ब्रह्मजातिमात्रेषु तुभ्यं तव हरेश्च वायुधयोरवज्ञानास्ति अश्च तत्व्रतेषु इति धृतव्रतेषु कुत एवावज्ञाऽ
तःकृतावज्ञत्वा न्यायिं दंडकरणं युक्तं अन्यथा युष्मत्स्वज्ञानेनानुत्थानतमःप्राप्तिःस्यादिति॥१३॥ अथ वज्ञाभावे निमित्तमाह। विद्यातप इति। ब्रह्मा त्वं तावत्
हृकतां ब्रह्मणः पूर्णगुणस्य हरेरात्मतां विशेषसंनिधाने देहतां वा प्रथयितुं रक्षापयितुं स्थापयितुं यस्मात्तस्मात्तत्संनिधानपात्रभूतान्ब्रा

॥ ॥दक्ष उवाच॥ ॥ भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः। न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु
१३ विद्यातपोव्रतधरान्मुखतः स्म विप्रान् ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक्। तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृ
हीतदंडः॥१४॥ योसौ मयाविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां॥ अर्वाक्पतंतमर्हत्तमनिंदयापाद्दृष्ट्यार्द्रया स भगवा
न्स्वकृतेन तुष्येत्॥१५॥ ॥मैत्रेय उवाच॥ इत्याप्यैवं समीढुषं ब्रह्मणा चानुमंत्रितः॥ कर्म संतानयामास सोपाध्यायर्त्विगादिभिः १६ वैष्णवं
यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः॥ पुरोडाशं निरवपन्वीरसंसर्गशुद्धये॥ १७

ह्मणान्विपत्सु पासीत्यन्वयः १४ भवान्कृपालुर्हेतुर्हनिर्दंडो दुहृद्रयत्र विवक्षुकिमाह। योसाविति। नविदितातत्त्वदृग्यस्य सतथा। तेनालब्धतत्त्व
ज्ञानेनेदृग्डाहीन॥ नास्माकं पुरुषार्थ उच्यते नलब्धतत्प्रतिनिधिकं संगच्छवचने अतः स्वकर्मणा स्वयमेव तुष्टो भवेत्प्राह स्पर्शवानिति॥१५
प्रकृतमनुसरति। इत्याप्यैति संतानयामास अनुसंहितवकार। १६ दुष्टस्य यज्ञस्य प्रायश्चित्तं तरणकायमनुसंधानघटत इति तत्राह॥ वै
ह्मवमिति॥ वैष्णवं विष्णुदेवत्यं त्रीणि कपालान्यासन्नास्य पुरोडाशस्य तत् त्रिकपालं वीरो रुद्रस्तत्संसर्ग उपद्रवस्तस्य शुद्धये परिहाराय निर्वापणमत्र

श्री २

राम
२७

अधर्यौः प्रतियत्निफलमाह। अध्वर्युणेति यजुःपतिं मंत्रदेवतां॥१८॥ तदा प्रत्यक्षस्य हरेः कर्मविशेषस्वरूपविशेषं वाहात देति। तार्क्ष्येण गरुडेन। स्तो
त्रेण सामरूपेण निर्जितः वशीकृतः॥१९॥ हिरण्मया स्य नाकी चापस्य सतथा॥ हिरण्यवत्पीतं अंबरं यस्य सतथेति वा। अर्कं वत्उज्ज्वलता किरीटेन जु
ष्टः॥ नीलाश्चते अलकाश्च नीलालकाः तएव भ्रमरास्तत्कुंडले च नीलालकभ्रमरकुंडलानि एतैर्मंडितं मास्यं यस्य सतथा। कंबादिभिर्युधैर्विविधैः
ह्माप्तसहस्त्रैरिव। अंगदैः दंडैर्भूषणानि तत्त्वाद्विरण्मयैरिवस्थितैर्भुजैर्लक्षितं पुष्पितः कर्णिकारो वृक्ष विशेषः॥२०॥ वक्षस्यधिश्रिता वधूः श्रीर्
र्यस्य सतथा॥ पुत्रभार्या वत्क्षमास्यं स्वलज्जातनाया धिश्रितरमा इतिवक्तव्ये वधूरित्युक्तं। वहेर्धुः वहेर्धातो रूपत्ययो भवति पुत्रभार्यायां गम्यमान

अध्वर्युणात्तहविषा हूयमानो न्यजुष्पतिं। यथा विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः॥१८॥ तदा स्वप्रभया तेषां द्योतयंत्या दिशोदश। मुष्णंस्तेज
उपानीतः तार्क्ष्येण स्तोत्रनिर्जितः॥१९॥ श्यामो हिरण्यरशनोर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः॥ कंबब्जचक्रशरचाप
गदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः॥२०॥ वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वं॥ पार्श्वभ्रम
द्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः॥२१॥ तमुपागतमालक्ष्य सर्वे सुरगणादयः॥ प्रणेमुः सहसोत्थाय ब्रह्मेंद्र
त्र्यक्षनायकाः॥२२॥ ॥

मं चकारालकनीयोश्चान्नभार्यायां॥ थकारश्चांतादेशः॥ स्वभार्या च वधूः संपिसे वा येमत्र वसति नल्लोलिरालादिसुरवा स्य येमतः
श्रितइति॥ उदारहासावलोकः कलया चंद्रकलां वर्दहृद्रादिकया॥ पार्श्वभ्रमद्व्यजनचामरराजहंसा व्याप्तपरिशुभ्रीतपत्रश
शिनौल्लसमानाणांहृदयमानः एवं विधस्तार्क्ष्येणानीत इति पूर्वेणान्वयः॥२१॥ ब्रह्मरुद्रौ विष्णुसमौ वितित्वौ लोकप्रवादं परिहरन्
वंचकत्वात्माविमुष्टमतयइत्यन्वयः। विषयसुखंदुर्लभंचेत्कार्थंनिर्बंधःस्यादित्यतउक्तं। कुणपति। निरयेपिसुलभमित्यर्थः। यद्वाहेत्वर्थः ९

भवेत्ता भगवत्प्रसादरूपप्रार्थनीय इति रोचयन्नुक्षितस्मात्किंफलं दृष्टमिति तत्राह यानिर्वृतिरिति सा निर्वृतिः स्वमहिम नित्यानन्दाविर्लक्षणमाहात्म्ये ब्रह्मणि प
स्वरूपे स्थितस्य जीवस्यापि मा भूत् ध्यानादिकमन्तरेण न स्यात् कुतः तद्यत्रैतत्सुषुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति एष आत्मेति होवाचैतदमृतमेत
दभयमेतद् ब्रह्मेति सत्यं तह्रदयः प्रव्राजनः सह प्राप्यैवेदं वानेतद्यं नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवा
पीतो भवति नाहमत्र भोग्यं पश्यामीति श्रुतेः सुप्तोत्थितस्यापि ध्यानाभावात् सुखानुभवाभावस्य दृष्टत्वादिति तमर्थमपि पदेन द्योतयति स्वमहिमनि ब्र
ह्मणि सुखं नास्तीति ये जनास्त्वयकस्मादुच्यते ब्रह्मेति ब्रूहि तो हा किं न गुणाः एव हि वानेऽस्यतीत्यादिश्रुति विरुद्धत्वेन तत्पेहणीयेन्यतः स्थितस्य त्वयाहारा सु

यान्निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं
त्वन्तकासिलुलितात्पततां विमानात्॥१०

किं सिद्धत्वादङ्गीक्रियते ननु तर्हि स्वर्गादेश्वर्यं येन त्यक्तं किं न स्यात् ज्ञानादेव सर्वे कामान् संपद्यन्त इति श्रुतेरित्यत आह। किं त्विति अन्तकस्य हरेरसिर्विश्र
मल हृदयेन असिना विलुलितात्पर्यस्ताद्विमानात्पततां पुंसां सा निर्वृतिर्न स्यादिति किमु एतदुक्तं भवति कर्मसाध्यो ज्ञानेनात्म ग्रीदिलक्षणविमानप्रा
प्य इतस्ततो नन्दनादिषु विहारार्थं पततां गच्छतां पुंसां सा निर्वृतिर्नास्ति किमु वक्तव्यमिति विमानाद्भ्रंशतामित्यर्थो गीकारे तत्र दुःखप्राचुर्यात्सा नि
र्वृतिर्न स्यादिति वक्तुमयुक्तं ●●उक्त एवार्थः अन्तकासिलुलितत्वमनित्यत्वं द्योतनाय ●कमिति ज्ञातव्यं अत्र ध्यानं ज्ञानोत्पत्त्यावान्तरङ्गसाधनं कथा
श्रवणं तत्साधनं भक्तगुणानां पश्चादुपसंहारोपपत्तेरिति ज्ञातव्यं अधिकारिणामनन्तत्वात्तद्यो●पता विशेषं देवमुक्तमिति वा १०

भवत्कान्तःभवद्भक्तास्तेषां सुखनिःसृताया भवत्कथायाः श्रवणलक्षणोपासनयेत्युक्तं तत्र मया च ध्यानस्य चरितलक्षणकथाश्रवणेनेतीममर्थमभिप्रेत्य भवद्भ
क्तसङ्गतौ भवत्कथासु श्रवणं सुलभं स्यादिति मत्वा तत्सङ्गतिं प्रार्थयते भक्तिं मुहुरिति येन प्रसङ्गेन भवाब्धिं नेष्ये तरिष्यामि न प्राप्स्यामीति वा इत्युगता विविधा
सुः॥११॥ भक्तानां सङ्गानालक्षणमाह तेनेति ये त्वां सुतसुहृद्गृहवित्तदारान्संपदः स्मरन्ति ते अतितरां प्रियमात्मानं त्वां न स्मरन्ति हे अब्जनाभ ये भवदीयपदा
रविन्दसौगन्ध्यलुब्धहृदयेषु भवद्भक्तेषु कृतप्रसङ्गाः भवद्भक्तास्ते त्वामनुतारीन्संपदं न स्मरन्तीत्यन्वयः अनेन श्रीहरिभक्तिरेव न भवाब्धिसंतारिणी किं तु तद्भक्तभक्ति
रपीति सूचितं॥१२॥ ब्रह्मादीनामपि स्वरूपसाक्षात्त्वद्रूपदर्शनमशक्यं किं तु तमाद्दृश्यानामिति भावेनाह तिर्यङ्नगेति हे अज अशेषसर्वावयवोपपन्नं

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त महताममलाशयानां। येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ११ ते न स्मरं
त्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदारान्। ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः १२ तिर्यङ्नगद्विज
सरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः॥ १३

महदादिभिरहंतत्त्वमादिर्यस्य तत्तथोक्तं स तत्पृथिव्यादिभूतत्रयेण सत्तावाद्यादिभूतद्वयेन विशेषो यस्य तत्तथोक्तं स्थविष्ठं स्थूलतमं तिर्यगादिभिः परिचितं
ब्रह्माण्डरूपं तद्रूपं वेद्मि हि परम अतः स्थूलात्परं सूक्ष्मं रूपं न वेद्मि अत्र च हेतुगर्भं विशेषणमाह यत्रेति वाचक नुपलक्षणं वेदादि● मे●नो●ऽपार
यो यत्र यद्विषय ज्ञानं वेदाभिभवन्ति किं मुक्तं भवति लक्ष्मी ब्रह्माद्याः सुदिनं परं परमात्मपि किं चिदनन्तत्वेन न जानन्ति तथा च हन्त उक्तं परमात्मनो निग्रह
रिणं तु वेदैकिकं वचन वित्ति किं चित्प्रसादेन ●●●महेरस्य ●● रोन तथा ●●● अप्रमेयोऽपि स्मर्तव्यश्चायत्नोवा चो निवर्तन्ते अप्राप्य मनसा सह इत्या
दिश्रुते १२

भा·च·
४५

रक्षितं सहारकर्त्रोर्ब्रह्मरुद्रयोर्लोकद्वयं तां विष्णुसमत्वशंकां निवर्तयति माहा कल्पांत इति। अनंतः शेषः सखा यस्य स तथोक्तः। स्वदृक् स्वप्रकाशः पुमान् कल्पांते एतदखिलं जगज्ज
ठरेण उदरेण गृहीत्वा तदंके शेषस्यांके शेते। यस्य नाभिसिंधुरुहं नाभिसरसो जातं तदेव कांचनं सुवर्णवर्णं लोकात्मकं पद्मं तस्य गर्भे तिष्ठन् निमान् ब्रह्मा जात इति शेषः।
अनेन रुद्रस्य संहर्तृत्वं ब्रह्मणः स्रष्टृत्वं च द्वारमात्रमिति ज्ञातव्यं। एवंविधमाहात्म्यस्य हरेस्त्वया किमुपक्रियत इति तत्राह। भगवानिति ॥१४॥ पके प्रवर्तमानस्य पंकलेप
इव स्वस्यारोप्यमानस्य हरेरनित्यत्वदोषवद्धत्वमशुद्धत्वं च स्यादित्याशंक्य योगिनोऽपि दुर्भगवाशिरस्तु स्यात् तद्गतदुःखाद्यनुभावो नास्ति किमुत नित्यस्य नित्यमुक्त
स्य नित्यशुद्धस्यात एवाप्रतिहतबोधस्येति भावेनाह। त्वं नित्येति। किमेवंभूतः परिच्छिन्नः इति नेत्याह। आत्मेति। आत्मत्वादात्मा तर्हि अंतःप्रसार्थसंबंधेन तत्र द्रुमांशः स्या
त् इत्यत उक्तं। कूटस्थ इति षड्विकारशून्यः। एवंविधः कोऽयम् नाह आदिपुरुष इति। आदौ तु उपलक्षणं जगत आद्य चेतेव वर्तमानः पुरुषः पूर्णः षड्गुणः अनाद

कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंतसखस्तदंके। यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान्भगवते प्रणतोस्मि तस्मै ॥१४॥ त्वं नि
त्यमुक्तपरिशुद्धविशुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थितिमखंडितया स्वदृष्ट्या द्रष्टा स्थिताविधिमतो व्यतिरिक्त आस्से। १५

पूर्णः षड्गुणस्त्वं स्पष्टमाह। भगवानिति। ऐश्वर्यस्य समग्रस्येति श्रुतेः। कुतोस्य समग्रैश्वर्यमवगम्यत इत्यत उक्तं। त्र्यधीश्वर इति त्रयाणां लोकानां गुणानां वा
त्रिसंसारिणां वर्तमानादिकालानां वा जाग्रदाद्यवस्थानां मृगादिवेदानां वा इत्यादि त्रित्वसंख्यावतामधीश्वरः इंद्रादिवाच्यत्यर्थः मंत्रीशादि इत्युक्तं। तमेवं विशिष्य
इति यस्मात्तस्मात् अखंडितया स्वदृष्ट्या स्वरूपज्ञानेन अवधिः संसारस्यावधिभूता स्थितं त्वा दृष्ट्वा स्थिता यत्पुरुषस्ते सहातेस्मात्यं पवाद्या तिरिक्तस्त्वमास्त इत्य
न्वयः। वहिर्ये इति वृत्तोपमवाप्योरुपसर्गयोरिति वचनाद्वलोपः प्रामाणिकः १५

राम
४५

अग्र्यदित्यद्वकशक्तिमत्त्वाद्यमेवाभीप्सितं ध्येयं प्रार्थनीयमित्याह। यस्मिन्निति। विरुद्धगतयः लोके विरुद्धविषया विद्याद्या विविधशक्तयः स्थूलमरणत्वं दुःखलमिथ्या
योयस्मिन्नहरवतिशं पतंति तत्र प्रमाणमाह। आनुपूर्व्येति। आनुपूर्वी अस्ति श्रेव त्रयी चाम्नाय उच्यत इत्यभिधानात्। विचित्रशक्तिः पुरुषः पुराणः। अस्थूलमनव
ह्रस्वमित्यादिकया श्रुत्या सिद्धमित्यर्थः। अहं तद्ब्रह्मशरणं प्रपद्य इत्यन्वयः। जगत्कारणमेव ब्रह्मात्र विवक्षितं न जीव इति भावेनाह। विश्वभवमिति। विश्व
स्य भव उत्पत्तिर्यस्मात् तथा। ननु तद् ब्रह्म प्रधानं परमाणुश्च तेषां तत्त्वमित्याह। एकमिति। परमाणूनामनेकत्वादिदमेव वस्तु एककारणमित्यर्थः। कारणत्वं
शुद्धस्येत्याह। अविश्वमिति। जगतोन्यत्। अनंतमिति पाठे जीवाश्रितकर्मकरणमस्तीत्याशंक्य कर्मणः क्षणभंगुरत्वेनानित्यत्वाद्वैतनस्याद्य कारणत्वा

यस्मिन्विरुद्धगतयोप्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्या। तद्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥१६॥ सत्या
शिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः। अप्येवमार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोस्मान्। १७

नुपपत्तिरित्यर्थः। विश्वस्याद्यत्वेन अनित्यत्वादस्य तदभावात् कारणत्वं युक्तमित्याह। आद्यमिति। आद्यमित्युपलक्षणं विश्वस्याद्यं तेन भवतीति।
अनेनाद्यनंतत्वं प्रधानस्यास्तीत्यत उक्तं। आनंदमात्रमिति। इतोपि प्रधानस्य कारणत्वमनुपपन्नमित्याह। अविकारमिति ॥१६॥ इतरदेवतानुग्रहात्त्व
दनुग्रह एवाभीष्टफलप्राप्तिहेतुरित्याह। सत्याशिष इति। पुरुषार्थमूर्तेः परमानंदानुभवरूपस्य तव पादमूलमनुभजतः पुरुषस्य आशिषयं आचार्य
शिष्टाः सत्याशिषः यथार्थशुभफलप्रदा। देव एवमपि तथापि आर्य प्रभो अनुग्रहकातरो भवान् दीनानस्मान् विशिष्टफलदानेन पुनः
वास्नेव नवप्रसूता गौरिव वत्सं परिपातीत्यन्वयः। वाश्रेव विशेषतः क्रिमातिवत्सं नूमाता सिंचतीति श्रुतिः १७

सत्संकल्पेन सत्यत्वे भूर्हितश्रेष्ठे साधीयसि भवतीत्यर्थः प्रियादः॥ परमा भूयसां महतां योगिनामपि दुरापामित्यनेनायोग्यतामेव दुष्प्रापं नतु पोग्यानां तेषां साधनसामग्र्या सुलभत्वादित्यर्थः॥ सूच्यते इत्युरयं ग्रंथेन ज्ञायत इति भावेन विष्णिन ह्यि नान्यैरिति। क्रवा नित्या हिति निवासो य स्मिन्नत्र यो कं मेढी तिति खलपाडोलू रवलं। कल्पलये पि लयो नास्तीत्याशयेनाहास्थास्विति। अनेनक्रवहितात्यस्यार्थविशेषो दर्शितः॥ २०॥ पुरस्तादुर्ध्व धर्मादयोऽपत्यं प्रदक्षिणीकृत्य चरंतीति तत्तुभ्यं दास्यामीत्यन्वयः। वनौकसो वानप्रस्थाः॥ २१॥ सिंहासनाधिपतिरपि भूयाद्धृति भावेनाह प्रस्थित इति। गां भूमिं॥ २२॥ उत्तमे भ्रात

मैत्रेय उवाच॥ अथाभिष्टुत एवं वै सत्संकल्पेन धीमता॥ भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत्॥ २८॥ श्रीभगवानुवाच॥ वेदाहं ते व्यवसितं हृदि राजन्यबालक॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत॥ २९॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति॥ यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं॥ मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनां॥ २१॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः॥ चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः॥ २२॥ प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः॥ षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः॥ २३॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः॥ अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति॥ २४॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः॥ भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि॥ २५॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतं॥ उपरिष्टादृषिभ्यस्त्वं यतो नावर्त्तते गतिः॥ २६

रि सति कथं सिंहासनाधिरिति तत्राह। त्वद्भ्रातरीति॥ तस्मिन्नेव मनो यस्याः सा तन्मनाः॥ वनमन्वेष्यंती मार्गमाणा। अनेन तन्मातृभयमपि प्रत्युक्तमिति ज्ञायते॥ २३ पुष्कलदक्षिणैः॥ पुरुषं पुष्कलं पूर्णमिति हलायुधः॥ अनेनैहिकानामुत्तमकल्पत्वं ध्वनयति॥ मां संस्मरिष्यसीत्यनेन सर्वदा स्मरन्नपि मरणकाले विशेषतो मत्स्मरणं कुर्विति विधत्ते॥ एष्य स्थैर्यादुभयोरिति॥ २४॥ ततः किमत्राह॥ तत इति॥ यतो नावर्त्तते यतिरित्यनेन ध्रुवस्य मुक्तेर्नियतत्वं ध्वनयति २६

[illegible]

ध्रुवोऽतिसद्भयदत्वा॥ २७॥ सोऽपि ध्रुवोऽपि संकल्पजं संकल्पाज्जातं विष्णोः पादसेवयोपपादितं प्राप्य संकल्पनिर्वाणं प्रतिज्ञाफलं प्राप्य॥ २८॥ विदुरो मुक्तेरितरेषु पुरुषार्थेषु विरक्तोऽनभ्यासमिति जानन्नपि ध्रुवस्य अविवेकं न चायष्टच्छति। सुदुर्लभमिति। मायाविनः भक्ताभीष्टफलप्रदस्य सामर्थ्यवतः। असिद्धार्थं समापितप्रयोजनं कथं अर्थवित्॥ तत्त्वालोचितप्रयोजनं वेत्तीति॥ २९॥ विदुषोऽपि संसारिको निर्वेधो दुस्त्यज इति भावेन तच्चोद्यं परिहरति॥ मातुरिति॥ ३०॥ अनेकभवेनेति भवपदं समाहृत्य व्याख्येयं तथाहि। अनेकेषु भवेषु जन्मसु भवतीति समुत्पद्यत इति तेनास्पृहेः पादयोश्छायां प्राप्य अंतर्विषयबुद्धित्वादपहृतभिर्यक्ता डित इवाभूत्॥ ३१॥ राजभयादिना ताडितस्य वत्सस्य पश्चात्तापो इकंवति। अहो बतेति॥ अनात्म्यं जाड्यं अत्वादित्यनेन स्वस्यानित्याधिपत्यस्तवयति। तदुक्तं। आधिपत्यमनित्यं तु प्रावलोकस्य मत्

मैत्रेय उवाच॥ इत्यर्चितः स भगवानतिसृज्यात्मनः पदं॥ बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः॥ २७॥ सोऽपि संकल्पजं विष्णोः पादसेवोपसादितं॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरं॥ २८॥ विदुर उवाच॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् २९ मैत्रेय उवाच मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन्॥ नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान्॥ ३०॥ ध्रुव उवाच॥ ॥ समाधिनानेकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः॥ मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः ३१ अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत॥ भवच्छिदः पादमूलं गत्वायाचे तदंतवत् ३२

ध्रुवे। यतो नावर्त्तते यतिरित्युक्तेरपि मुक्तस्याहे। न तु तत्स्थानं संपूर्णं यतीनां स्थितिरुत्तमेति॥ आधिपत्यमनित्यं चेत्तन्तो निवृत्त्यानकार्द्यपि तस्य मुक्तिरित्यत आह॥ तस्यापि मुक्तिर्नियतेति तर्हि जानता विष्णुनेदं पदं किमिति दत्तमिति तत्राह। नियतं बालपितत्य दंतस्य अक्रमेत्वादत्तमित्यर्थः। तर्हि ध्रुवेणापि किमित्यनिदीनितत्राह तथापि कामनानिराधूरेण सुक्ताबतेति॥ मुमुक्षुणा विषयाभिलाषो न कर्त्तव्य इति शिक्षणार्थमित्यर्थः॥ कामना विषयाभिलाषस्य निंदाधिक्कुरः ३२

भा·च·
४७

शास्त्रशिक्षितबुद्धेस्तव कथं बुद्धिव्यामोहः प्राप्त इति तत्राह। मतिर्विदूषितेति।। नाद्युनाप्यवमानेत इत्यादिना रुद्रवचः।। ३३।। एतदेव विशदयति। देवीमिति सर्वत्र निर्मलत्वेन यद्यो तमानस्य देहस्य हरेर्विद्यमानां मायां बंधककारिकां सुप्ताश्रितस्य स्वप्ने प्रसुप्तो ऽज्ञानेनाश्रयितो यथा भिन्नदृक् पथा वस्तु न पश्यति विपरीतं पश्यति तथाहमपि आत्मायमुत्तमोत्राहं व्यवधानशत्रुरिति हृद्दुन्ना हृदयभेदिरोगेणात्तप्याः स्वातंत्र्यस्यान्यस्य हरेः सद्भावे संतापः संभावित इति नेत्याह। द्वितीय इति द्वितीये स्वातंत्र्ये

मतिर्विदूषिता देवैर्येतद्विरसहिष्णुभिः। यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः।। ३३।। देवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक्। तप्ये द्वितीयेप्यसति भ्रातृभ्रातृव्यहृद्रुजा।। ३४।। मय्येतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि। प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं।। ३५

भ्रा· ८०२

न्यस्मिन्नसत्यविद्यमानेपि सर्वस्वातंत्र्येण सर्वैश्वर्येण। द्वितीयत्वमीश्वरत्वे च ब्रह्मादीश्वितव्यस्य भावात्परमेश्वरत्वं हरेरेवयुक्तमिति मम अर्थमपि पदेन ध्वनयति।। तदुक्तं। द्वितीयस्य स्वतंत्रस्य तत्वभावाद्वयवर्जितः। ईश्वरस्येश्वितव्यस्य भावात्स परमेश्वर इति ३४ कच लोकस्याधिपत्यस्यानित्यत्वात्सुतरां सिंहासनाधिष्ठानस्य संप्रार्थ्यं भिक्षूणां व्यर्थमित्याह। मय्येतदिति।। जगतामिति बहुवचनेनान्येषामाधिपत्यं प्रार्थयति। तेन द्वितीयस्वातंत्र्याभावो निश्चीयत इति ज्ञातव्यं ३५

राम
४७

अभीष्टपुरुषार्थदानसामर्थ्याभावान्न भिक्षितमिति निमंतव्यमित्याह। भवच्छिदमिति। भीमयबलघोरितियातो भयमाश्रया हित्वं चेद्द्विवादिः तं लोकेप्यसौ तिकिमित्यनुयोक इत्यतउक्तं विशिनष्टि। तात्पर्यमिति। ताद्रात्म्यं हरिनियत चिन्ततयाप्य हवद्गुरिस्त्रवे शरण घ्राणो मोक्षः। तदुक्तं। हरौनियत चित्तत्वाद्रुद्रवक्त्रं तत्र्य केनात्मोहं ताद्रात्म्यमित्याद्यूर्ध्वं तु तद्रूपतः क्वचिदिति। नैकात्म्यंतां मेस्य हृदयं तिके चिद्वित्य नहरिणा कोहिताकोहि तत्वमेवैकात्म्यं नतु तत्स्वरूपत्वं। हरो द्वितेविते कात्म्यं न ते नैकस्वरूपतेति वचनात्।। कामेन मेकामस्त्रागा दित्युपात्तिसमये प्रार्थनोक्तिश्च। मेम नो वनदुःखानुभवयोग्यं वस्तु भिक्षितं क्षीणपुण्ये नैश्चित्र दृष्टां तमाह। पुलकानिति। पुलकास्तु छद्धान्यानि कुलित्थादीनि भिक्षुसिक्थानि वा।। स्यात्तु लकस्तु छुधान्यसंक्षेपे भक्तसिक्थक इत्यादि

स·५

भवच्छिदमयाचेहमेवं भाग्यविवर्जितः।। ताद्रात्म्यं यच्छतो मे भिक्षाम्नेनामे भिक्षितंवत।। ईश्वरात्क्षीणपुण्येन फलकानि वचाधनः।। ३६।। मैत्रेय उवाच। न वै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः। वांछंति तद्दास्यमृतेर्थमात्मनो यदृच्छया लब्धमनःसमृद्धयः।। ३७।। आकर्ण्यात्मजमायांतं संपरेत्य यथागतं।। राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम।। ३८।। श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः।। वार्ताहर्तुरति प्रीतो हारं प्रादान्महाधनं।। ३९।। सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतं।। ब्राह्मणैः कुलवृद्धैश्च पर्यस्तो मात्यबंधुभिः।। ४०।। शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४१ हर्षं

वः।। ३६।। मैत्रेयो ध्रुवस्यानुशोकतात्पर्यमाह।। न वै तितद्दास्यमित्यनेनात्मदात्म्यमित्येतोहि वृतं ... तथ्यं पुरुषार्थे कुतो न वांछंतीति तत्राह यदृच्छयेति। यदृच्छया भगवदिच्छया लब्धा मनसोः समृद्धयो येषां ते तथा।। ३७।। एवमस्तु त्वरस्कार्थ प्रसंगात्कइतिवेदुरीकोपरिहरन्निचाह। आकर्ण्येति।। ३८।। न च श्रद्दधायारा हृत आत्मनो दूषोनुकीयतत्प्रभद्रं वचनं चोपचारिकं निश्चायकप्रमाणाभावादिति शंकामाभूदिति तत्राह। श्रद्धायेति। हर्षवेगेन हर्षोद्रेकेन धर्षितः। विवशीकृतः प्रहेति धनानिधस्यस तथा।। ३९।। सतो भ्यर्हितात्रपर्यस्तः परिहृतः।। ४०।। इत्यमपि राज्ञः स्वहृदेकलक्षणमिति भीबनाह। शंखेति।। ४१।।

४०

भा० च०
४८

हरेः शक्तिरचिंत्यप्रभावेति ध्वनयन् सुनीतिसुरुच्योर्यानाचाह सुनीतिरिति। रुक्मं हेम। शिबिकेति दोलिके॥४२॥ हृष्टेरेवोत्कर्षोनसार्वजनीनस्येति हरिणा पुरनिकट एव घटितमिति भावेन पुरोपवनसमीपे भूमावुत्तमेन तेन सह राज्ञोमानन किमाविशेष्यं वाह। तं दृष्ट्वेति॥४३॥ अंगजं पुत्रं विष्वक्सेनांघ्रि इति विशेषणे नालिंगनव्याजेन प्रभुरपि पापपरिहारः स्यादिति ध्वनयति॥४४॥ किमनेनालिंगनमात्रेणानंदातिरेक लक्षणाहाय तेनेत्य नस्त्राहि शेतैर्नय नवारिभिरिति शीतैः सुशीतलैः सुखकंदः भ्रातया अवसिने वा अंतर्वत्सितेम्प्रियोरस्वमाघेपरमात्मनीतियाख्वः। शर्मनोपतोसुखमिति हरत्यासु पे॥ अनेन रूपा भिषेकमहूरेसूचयति। एतमर्थं च ध्वनयं स्तनविशिनष्टि। जातेति। जातः प्राप्तः उद्दाममनोरथो वीरासनादिलक्षणो येन स तथा॥४५॥ भगवद् भक्तस्यापि पितृद्रोहादिदोषो नास्ति किंतु तन्हरेतीम ममर्थं ध्वनयन् धर्मं पित्रादिकवित किंपामाचरतीत्याह। अभिवंद्येति मातरौ पवित्रसुनीतिसुरुच्यौ ततः करणकालुषं

सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते। आरुह्य शिबिकां सार्द्धमुत्तमेनाभिजग्मतुः॥४२॥ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात्। अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः॥४३॥ परिरेभेंगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन्। विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं॥४४॥ अथाजिघ्रन्मुहुर्मूर्द्धि शीतैर्नयनवारिभिः। स्नापयामास तनयं जातोद्दाममनोरथः॥४५॥ अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः। ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः॥४६॥ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकं। परिष्वज्याह जीवेति बाष्पगद्गदया गिरा॥४७॥ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः।
तस्मै नमंति भूतानि निम्नमाप इव स्वयं ४८

हरी कृतमिति व्यनक्ति। शीर्ष्णा ननामेत्यनेन पितुर्मातुर्गुरुत्वाधिक्यं सूचयति तदुक्तं दशाचार्यसमो ... पिता। पितुर्दशगुणा माता गौरवेणातिरिच्यत इति। सुरुच्यसुरुच्यमातृत्वाभावेपि तत्स्वभावत्वेन भेदबुद्धिर्न कृतेति द्योतनाय सज्जनाग्रणीरिति विशेषितं॥४६॥ ध्रुवप्रणामे सुरुच्या इदं विधापकि मम्प्यधायीति तत्राह। सुरुचिरिति। अर्भकमिति कुशोपमं। अर्भकं ... मित्यनेनकेह विशेषात् ज्ञानगुरुत्वमगणयन्समुत्थाप्येति ज्ञायते॥४७॥ ध्रुवस्य मरणमाकांक्षमाणा सुरुचिः कथं जीवेति वा ... दायीति तत्राह। यस्येति। मैत्र्यादिभिर्मैत्रीकरुणादिभिर्मंत्रितः प्रह्वीभवति ४८

बंधन

राम
४८

उत्तमस्य कृते शोकत्वेन ध्रुवे द्वेषाशंकाद्दशेत्यादितोत्तितयोः प्रणयो द्वैकनिमित्तक्रियामाह। उत्तमश्चेति। अस्रौघं वा हो अश्रौघः परंपरायं स्यातालस्रोतसि संवयइतियास्वः॥४९॥ सुरुचीकटाहन्या येन ध्रुवे सुरुच्यादिप्रणयक्रियां प्रोव्याधुना सुनीतिविषयामाह। सुनीतिरस्येति॥५०॥ अस्य जननीति विशेषणं विशिनष्टि पयइति। अस्य पुत्रस्य आवयणोदिना मातृस्तनयोः स्तन्यं स्रवणे न तज्जनकालानुमानसुलभमित्यर्थः। वीरं पुत्रं सुष्ठु प्रसूयतेति वीरसूः तस्याः वीरसुवो यद्वा सवीरस्वत्तम मिति अर्त्तिं॥५१॥ सुनीतिकयापि अर्तिहं पापप्राणेशितव्यपि भवतीति भावेन तां विशिनष्टि। तां राज्ञीं सुरीति। दिष्ट्यास्या मंगलादिष्टित्य मिथानात् दिष्ट्या पुण्येन॥५२॥ पुरुष मपि विशिष्यंतीत्या॥ अभ्यर्चित इति। यदिधारा नाहिंहरोह हरिस्त्वयानाभ्यर्चितः स हि वि

हं हत व ५
हृ

उत्तमश्च ध्रुवश्चोभावन्योन्यं प्रेमविह्वलौ। अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः॥४९॥ सुनीतिरस्य जननी प्राणेभ्योपि प्रियं सुतं। उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता॥५०॥ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः। तदाभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः॥५१॥ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा। प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः॥५२॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा। यदनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयं॥५३॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः। आरोप्य करिणीं हृष्टः स्तूयमानो विशत्पुरं॥५४॥ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः। सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः॥५५॥ चूतपल्लववासःस्रङ्मुक्तादामविलंबिभिः। उपस्कृतं
तं प्रतिद्वारमपां कुंभैः सदीपकैः॥५६

रनष्टः पुत्रो न प्रतिलब्धः स्यात्। न तथाते स्यादभ्यर्चित इति तर्कः। किं विशिष्टो भगवानिति तत्राह। यदनुध्यायिन इति। अनेन तर्कस्याप्रतिप हतां दर्शयति॥५३॥ ध्रुवस्य जनलालनप्रक्रियां संक्षिप्य मैत्रेयः पुरप्रवेशमाह। लाल्यमानमिति। कलभश्चैवकल्पानं कारिणी राजभजनं इति वचनात् करिणीमित्युक्तं॥५४॥ संवृंतैः पुष्पवधनसहितैः॥५५॥ विलंबीनि सूत्रपल्लवादीनि एवं तेन तथा तैः प्रतिद्वारमु पसंस्कृतमलंकृतं ५६

पुर

चातकुंभपरिछदेः सुवर्णालंकारैः श्रीमत्ता विमानानां शिखराणां द्युतिभिरलंकृतां अनेन देवादीनां विमानानामागमनं सूचयति ॥ ५७ ॥ चत्वरं चतुष्पथं रथ्या रथमार्गः आदिशब्देन तिर्यगाद्यंतरमार्गो गृह्यते ॥ ५८ ॥ सिद्धार्थाः सितसर्षपाः ॥ ५९ ॥ तासां पुरस्त्रीणां वल्गूनि चारूणि गीतानि ६० ॥ कशिपूत्तमैः मचोत्तमैः भोजनाच्छादनादिनाश्रेष्ठैर्वा ॥ ६१ ॥ कशिपूत्तमं ...पुकं प्रयच्छति पयःफेननिभा इति दंतैर्दंतनिर्मितरुक्म

प्राकारैर्गोपुराट्टालैः शातकुंभपरिच्छदैः सर्वतोलंकृतं श्रीमद्विमानशिखरद्युभिः ॥ ५७ ॥ मृष्टचत्वररथ्यादिमार्गं चंदनचर्चितं ॥ लाजाक्षतैः पुष्पफलैस्तंडुलैर्बलिभिर्युतं ॥ ५८ ॥ ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च ॥ ५९ ॥ उपजह्रुः प्रयुंजाना वात्सल्यादाशिषः सतीः ॥ शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः ॥ ६० ॥ महामणिव्रातमये स तस्मिन्कशिपूत्तमे ॥ लालितो नितरां पित्रान्यवसद्दिवि देववत् ॥ ६१ ॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि महार्हाणि यत्र रौक्मा उपस्कराः ॥ ६२ ॥ यत्र स्फटिककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभांति ललनारत्नसंयुताः ॥ ६३ ॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६४ ॥ वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ॥ हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥ ६५ ॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तं ॥ श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परं ॥ ६६ ॥

परिच्छदाः सुवर्णपरिच्छदाः ॥ उपस्कराः पात्राणि रौक्माः स्वर्णनिर्मितानि ॥ ६२ ॥ रत्नसंहिता चामिनीहमिति हत्वा ललनारत्नैः स्त्रीरत्नैः संयुताः यत्र शय्यादयस्ता भांति तस्मिन्निति ॥ ६३ ॥ ध्रुवप्रभावो देवादीनामाश्चर्यबुद्धिजनकः किं खित रेषा मितिभावेनोत्तानपादस्तत्कारणमद्भुतमिति विशेषं वक्ति ॥ उत्तानपाद इति ६६

विस्मयफलमाह । वीक्ष्येति ॥ ऊढवयसमित्यनेन राज्यपालनशक्तिं मनुते ॥ ६७ ॥ तत्र स्वयं किमकारीति तत्राह । आत्मानं चेति । आकलय्य ज्ञात्वा । आत्मनः स्वस्य हरेराराधनं निःस्पृहत्वं विमृश्य ध्रुवस्याभिषेकं चकारेति संबंधः ॥ ६८ ॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे टीकायां पदरत्नावल्यां ध्रुवाख्याने दशमोध्यायः ॥ अत्र स्यहरेराराधनं निःस्पृहत्वं विमृशन्विचारयन्निति ॥ ६८ ॥ प्रजापतिरित्यादिनेकचत्वारिंशतः एवं भगवतः सान्निध्यं तनः किं तु वाह्याभ्यंतरस्याक्रुजयोपात्तत्वान्माहात्म्यं वर्णयन्तौ तत्रादौ ध्रुवविवाहादिप्रकारः कथ्यते । प्रजापतिरित्यादि ॥ १ ॥ राजपुनात्स्तुतौ तस्याश्रमे सुतौ कल्पौ वत्सरस्य ॥ २ ॥ योगेश्वरमाणमाद्यं गायेगानोमीश्वरं ॥ अनेन राज्या निष्ठुत्वात्पश्चादुक्तिरिति ज्ञायते ॥ ३ ॥ राजपु

वीक्ष्योढवयसं पुत्रं प्रकृतीनां च संमतं ॥ अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिं ॥ ६७ ॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः ॥ वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिं ॥ ६८ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे दशमोध्यायः ॥ मैत्रेय उवाच ॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ॥ उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ १ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः ॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २ ॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा ॥ हतः पुण्यजनेनाद्रौ तन्मातास्य गतिं गता ३ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः ॥ जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयं ४ गत्वोदीचीं दिशं राजा रुद्रानुचरसेवितां ॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलां ५

तत्तमः किमभूत् ध्रुवभ्रातृत्वेन तत्कथायाम् अपि श्रवणहेतुत्वात्सापि वक्तव्येति तत्राह । उत्तमस्त्विति । तन्माता तस्योत्तमस्य माता सुरुचिः ॥ तस्योत्तमस्य गतिं मरणलक्षणां गतिं गता ३ अत्राप्राकृतस्वभावेन ध्रुवेण किमकारीति तत्राह ॥ ध्रुव इति । कोपामर्षशुचार्पितः । भ्रातुरन्यायेनास्य राज्ञस्य टांकं तं साक्षात् ॥ पुण्यजनालयं अलकां पुरीं ४ पुरस्य कानाह । कैत्विति । हिमवतो गिरेर्द्रोण्यां निम्नतटे गुह्यकाख्यैर्यक्षैः संकुलां निबिडां स्तिमितां ५

उपे०

उपदेवोयन्नस्थियः॥६॥उदतिष्ठन्निति पाठः।अहन्हतवान्।पत्रीरोपइषुर्द्वयोरित्यमरः।क्रव्वीरकर्मेत्यनेन नपुंसकानां रणवीरत्वमसूचितकर्मेमप्रश्नास्यपुंघेकेः
किं प्रसुप्तमिमितित्राह।तेपिचेति।युगपत्प्रभूय कृतविक्रमात्द्विगुणंप्रकर्षेणकर्तुमिच्छत एवनतु कर्तुसमर्थाः॥१०॥चित्रानानावर्णाध्वजाःपुरा
यषांते चित्रध्वजास्तेः ११ अथतानां त्रयोदशलक्षाणुपरि त्रिंशत्सहस्राणिप्राधान्यविवक्षयेतत्॥१४॥तदृक्रवः किमभूत्त्राह।श्रोत्रानपादिरिति।आसारेण

दधो त्रासंवमहत्वाङ्कः स्वंदिशश्चानुनादयन्॥येनोद्विग्नदृशाःस्तत्रुपदेवो नसन्नभरः॥६॥ततो निष्क्रम्यबलिनं उपदेवमहामयाः॥असहंतस्तन्निना
दमभिपेतुरुदायुधाः॥७॥सतानापततोवीरग्रधन्वामहारथः॥एकैकं स्वपत्सर्वानहन्नाणैस्त्रिभिःत्रिभिः ८ तेविललाद मध्येस्तैरिषुभिःसर्वएवहिामला
निरस्तमात्मानमात्रांसुःकर्मतःस्पतत ९ तेपिचासुमहत्तःपादस्पर्धामिवोरगाः॥त्रारेर्विध्यन् युगपत्द्विगुणंप्रचिकीर्षवः॥१०॥ततःपरिघनिस्त्रिं
शैःप्रासशूलपरश्वधैः॥शक्त्यृष्टिभिर्भुशुण्डीभिश्चित्रवाजैःखरेरपि॥११॥अभ्यवर्षन्नकुपिताःसरथंसहसारथिं॥इष्टंतस्तस्यतीकर्तुमयुतानांत्र
योदश॥१२॥श्रोत्रानपादिस्ततस्ताराधवर्षेणाभूयसा॥नोपादद्भपतततद्वत्प्रासारेणयथागिरिः॥१३॥हाहाकारस्ततोदेवासी॥सिद्धानांदिविपश्य
तां॥हतोयंमानवः सूर्योमग्नःपुण्यजनार्णवे १४ नेदत्सुयातुधानेषुजपकाशिषथो मृधे॥उपातिष्ठद्रथस्तस्मात्नीहारादिवभास्करः १५

वेगवतावर्षेपरासंततनिविडवर्षधारयेत्यर्थः॥१२॥मानवःमनोःपौत्रःसूर्यइवानिर्व्रियःसूर्यइवसूर्योवा॥१४॥नन्वत्रमग्नस्यश्वासनिरोधेनमरणंजलं
सत्त्वभावस्थानमधोगमनमन्यतउन्मज्जनमितिपदेष्टकःसंभवति।अन्यतउन्मज्जनेबलायनापरस्पर्यायैर्जतुसंस्पृदनमित्येतदनुपपन्नंस्यादतः
किमभूदित्यत्राह।नदत्स्विति।अथमज्जनानंतरमेवश्रावरथस्तस्मादुद्धाद्दतिष्ठदित्यन्वयः।जलमग्नस्यसूर्यस्यान्यतउन्मज्जनंभवतीतिमत्वा
यत्रनिमज्जनंतदृष्टांतस्त्वेनीहारादिति १५ ॥

द्विषतीम्रसंघेर्दधमवन्नष्ठमकरोत्॥१६॥एकप्रयोगेणयन्द्वाणांगात्रमनंतेषांचर्मभेदःशरीरच्छेदस्तंचेतिकार्यत्रयमभूदित्याह।तस्यतइति।पविरत्नानिःत्रातायारवत्रं
कुलिशंशम्बोलिरितिहलायुधः।दम्भोलिरशनिर्द्वयोरित्यमरः १७ वीरसमाह।भल्लेरिति।भल्लैरर्द्धचन्द्राकारैर्वेराहशरैर्वाहेमतालाभेस्वुचर्णतालसमानेरुरुभिरुन्नं
गैः॥१८॥१९॥कापिसर्वनाशोनदृष्टश्चतश्रूर्वइतिकिंवदंतीमनुसरन्नाह।हतेति।मृगेन्द्रेणसिंहेनविगतक्रीडोपक्रमाश्रूयथापागजा॥२०॥असामवस्थायां पुरांप्रचित्रपतन्त्स

धनुर्विस्फूर्जयन्नुग्रंद्विषतांखेदमुद्वहन्॥अस्तौघव्यधमद्बाणैर्घनानीकमिवानिलः १६ तस्यतेवाषनिर्मुक्तामिवावर्माणिरद्गुसा॥कायानाविविशुस्ति
ग्माःगिरीनिवाशनयोयथा॥१७॥भल्लेःसंछिद्यमानानांशिरोभिश्चारुकुण्डलैः॥उरुभिर्हेमतालाभैर्द्वीभिर्बलियवल्युभिः॥१८॥हारकर्करसकुटैरुरसांचश्रम
ग्माःगिरीनिवाशनयोयथा
हावनेःश्रास्तृतासारणभुवोरेणुर्वीरमनोहरा॥१९॥हतावशिष्टाइतरेरणाजिराद्द्रोणाःद्वत्रिपदर्यवसायकैः॥प्रायोनिकृत्तावयवाविदुद्रुवुर्मृगेन्द्रवि
क्रीडितयूथपाइव २० अपत्रपमानास्ततस्तेतायिनमहामृधेवंचनमानवोत्तमः॥पुरीदिदृक्षन्त्रपिनाविशन्तद्विषानमायिनोवेदचिकीर्षितंजनः २१
इतिब्रुवंश्चित्ररथःस्वसारथिंयतःपरेषांप्रतियोगशंकितः॥स्थावयामासजलधेरिविरिहेनभस्वतादिदुक्षोपवनंनृपः २२

नो·

र्वेमपत्रपमानंतत्रावस्थानंचेत्तुभयस्मादेकेप्रांगतश्चक्रवेणकिमकारीत्यांशक्त्योभयमपितन्नकुचेष्टामध्येकयेतिभावेनाह।अपत्रपमानइतितथाहि।जनोमापि
नांचिकीर्षितंनवेदनजा।नातियदताइति २१ इदंचिंतनमुत्तवाचिकमितिनस्त्रायतेइतिब्रुवतोविविनक्ति॥इतिब्रुवन्निति॥प्रतियोगेनपुनरुद्यमेनत्रांकितःज
लधेरुत्यच्चमिवनभस्वतावायुनेरितंप्रेरितं २२

पुनः किं आकाकरमभूदिति प्रपंचयति। द्गरोनेत्यादिना छादितं छन्नं। विस्फुरत्यस्तडितो यस्मिन् तथा तेन। स्तनयित्नुना गर्जितेन॥२३॥ वह्नुर्मेघा इति शेषः कं च यानि शिरारहितानि शरीराणि २४ अश्मवर्षिणो गिरिरंगदाः निपेतुः॥२५॥ अहयः अप्युपेतुः उरगा निर्मेघवह्निज्वाला तद्वन्निःश्वासो येषां तेतथा। इभकुरलयोरूमवेभ्यधामप्र वेशाये तिरित्य भिधानात्। अश्मवर्षिणः इत्यहि विशेषणं वा॥२६॥ ह्रादो नादः॥२७॥ अमनस्विनां मनोबलरहितानां। आसुर्या असुरजनप्रियया २८ स्वकर्त्तव्यत

द्गरोनाछादितं व्योमघनानीकेन सर्वतः। विस्फुरत्तडिता दिक्षु त्रासयत् स्तनयित्नुना २३ ववृषु रुधिरौघास्थिपूयविण्मूत्रमेदसः। निपेतुर्गगनादस्य कबंधान्यग्रतोऽनघ। २४ ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो दिशः। गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः॥२५॥ अहयोऽशनिनिःश्वासा वमंतो ग्निं रुषाक्षिभिः॥ अभ्यधावन् गजा मत्ताः सिंहव्याघ्राश्च यूथशः॥२६॥ समुद्र ऊर्मिभिर्भीमः प्लावयन् सर्वतो भुवं। आससाद महाह्रादः कल्पांत इव भीषणः २७ एवंविधान्यनेकानि त्रासनान्यमनस्विनां। ससृजुस्तिग्मगतय आसुर्या मायया सुराः॥२८॥ प्रादुष्कृतां मायाम् आसुरीं तां मायामतिदुस्तरां। निशाम्य तस्य मुनयः शमंसंस्तत्र संगताः॥२९॥ मुनय ऊचुः॥ औत्तानपादे भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्त्तिहरो विपक्षान्। यन्नामधेयमभिधाय निशम्य वाद्धा लोकोंजसा तरति दुस्तरमंग मृत्युं ३०

पासुनयो भगवत्प्रसादेन सर्वत्र जितायध्रुवायहितमुपदिशंतीत्याह। अक्षुवइति। सं सुखं। शर्म भेदे समीचीने सुखे प्रयुज्यते। सुखे पुचेति यादवः॥ पयोशासाविति प्रायाः इति सूत्रात् द्रुमंशं सुखमिति ज्ञायते॥२९॥ यन्नामधेयमभिधायेत्यनेन भगवन्नामस्मृत्यो र भिधायपृथक्तस्तत्त्वज्ञाः स्पीदित्युपदिष्टमिति ज्ञातव्य ३०

असुरमायाविनाशे समर्थो नारायणास्त्रमिति जानन् ध्रुवो मुनिभिरपि तदेवोपदिष्टमिति निरूप्य तदस्त्रं धनुषि संदध इत्याह। निशम्येति॥३१॥ तस्यास्त्रस्य माहात्म्यमचिंत्यमिति भावेनाह। संधीयमान इति। अविद्या सितरामद्रुष्या मिनिवेशाः क्लेशाः॥३२॥ आर्षास्त्रं ऋषिद्रष्टो देवतासहितास्त्रज्ञानास्त्राद्विज्ञान इतिधातोः। सुवर्णालंकृताः पुंखाः इत्यनुसंधानप्रदेशायेषां ते सुवर्णपुंखाः। वसन्त्याच्छादन इति धातोः। वास आच्छादनपक्षाल इति ते कलहंसानां वासांसि पक्षा

मैत्रेय उवाच निशम्य च गदतां ऋषीणां धनुषि व्यधात्। संदधे खमुपस्पृश्य यन्नारायणनिर्मितं॥३१॥ संधीयमान एतस्मिन् माया गुह्यकनिर्मिताः। क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा॥३२॥ तस्यार्षास्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः॥ विनिःसृता आविविशुर्द्विषद्बलं वनं यथा भीमरवाः शिखंडिनः ३३ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः॥ तमभ्यधावन् कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः॥३४॥ स तान् पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान्॥ निनाय लोकं परमार्कमंडलं व्रजंति निर्भिद्य यमूर्ध्वरेतसः॥३५॥ तान् हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः॥ औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः॥ ३६

वपक्षा येषां ते कलहंसवाससः। शिखंडिनो मयूराः। भीमो भयंकरो रवो नादो येषां ते तथा॥३३॥ पुण्यजनानां वीररसमाह। तैरिति तिग्मधारैरुग्राग्रैः शिलीमुखैः शरैः सुपर्णं गरुडं उन्नद्धफणाः उद्धृतफणाः॥३४॥ अर्कमंडलं निर्भिद्य यं लोकं निनाय त्यबधः ३५ किमेवं ध्रुवः सर्वानेनवशिष्टानकरोत्यस्यापये। गिकथांतरमाह। तान्हन्यमानानिति। अनागसो वधयोग्यापराधरहितान्। चित्ररथेन ध्रुवेण ३६

भा·च
५२

आगत्य निःशेषं हनेत्युक्तं। किं नेत्याह। अलमिति। तमोद्वारेण यथार्थज्ञानप्रतिबंधकत्वेन नरकद्वारेण पाप्मना पापहेतुना॥३७॥ किं च धर्मेण्या स्वानुवर्तिनामस्माकं कुलधर्मो न भवत्यपमित्याह। नास्मदिति। अकृतेन सामितियं॥३८॥ अकृता परा बलं कथं आत्मवधलक्षणापराधकरणादिति तत्राह। नन्विति। नन्वेवार्थवर्त्ते। अपराधेनेति संबध्यते। तस्यापराधिनः संगात्॥३९॥ तदपरित्यागात्त्विमपराधिन इति सूक्ष्मदर्शिने भागवतानां नोपपन्न

मनुरुवाच॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना। येन पुण्यजनानेतानवधीस्त्वमनागसः॥३७॥ नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितं। वधो यदुपदेवानामारब्धस्ते कृतैनसां॥३८॥ नन्वेकस्यापराधेन प्रसंगाद्बहवो हताः। भ्रातुर्वधाभितप्तेन त्वयांग भ्रातृवत्सल॥३९॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनां। यदात्मानं परं गृह्य पशुवद्भूतवैशसं॥४०॥ सर्वभूतात्मभावेन भूतावासं हरिं भवान्। आराध्याप दुराराध्यं विष्णोस्तत्परमं पदं॥४१॥ स त्वं हरेरनुध्यातस्तत्पुंसामपि संमतः। कथं त्ववद्यं कृतवाननुशिक्षन्सतां व्रतं॥४२॥ तितिक्षया करुणया मैत्र्या चाखिलजंतुषु। समत्वेन च सर्वात्मा भगवान्संप्रसीदति॥४३

प२ त२

मित्याह। नायमिति। आत्मानं मनो ऽसंगृह्य नियम्य पशुवन्मूढवत्॥४०॥ इतो ऽपि कारा धेर्यं न च कुर्वन्तं वधेन युक्तः सर्वप्राणिनामंतर्यामित्वेन हरिस्तु पास्य प्राप्तत्वात्सादृत्वादिति आह। सर्वभूतेति। सर्वभूतानामात्मभावेन अंतर्यामित्वेन भूतेषु प्राणिष्वावासो यस्य स तथा तं तस्मात् वसात्वात्स्मिन्निति वा तं॥४१॥ प्राप्तपदत्वात् हरिणा ति भावो नत्वा सीत्याह। स त्वमिति। तस्य हरेः पुंसां भक्तानां संमतस्ततः किं तत्राह। कथमिति॥४२॥ किं तत्साधनं तेन किं फलं तत्राह। तितिक्षयेति। तात्वनुग्रहानुलं दर्शनं सुहृत्त्व [illegible] ॥४३
संभवं
सुहृत्सु

राम
५२
ला.ति.कि.२

तत्प्रसादफलमाह। संप्रसन्न इति। ततः किं तत्राह। जीवेति। जीवत्वाभिमानान्निर्मुक्तो भवति। तत्फलमाह। ब्रह्मेति। नित्यनिर्मुक्तत्वाच्छरीरं परमानंदं वा ब्रह्मलक्षणं ब्रह्मनिर्वाणं आह्लादेनाच्छति तिर्यग्गीकारो मुक्ते अपि भावत्वेन न चोनार्थत्वस्मात्॥४४॥ सृष्टिप्रकारज्ञानेन तो विरक्त्यर्थं प्रकृतिबंधहानेच्छा स्यादतस्तमाह। भूतैरिति। पुरुषो योषिदिति भावः। पंचभिः पृथिव्यादिभिरारब्धैस्ते शरीरद्वयः स्त्रियः। अतः परं कथमारभ्यत आह। तयोरिति॥ इह जीवराशौ तयोर्योषित्पुरुषयोरवाये न मैथुनधर्मेण संभूतिः कस्वरणादिविभागलक्षणा जन्म भवति। सामित्यनेन पृथिव्यादिसंयोगेन जन्म सूचयति॥४५॥ नकेवलमादिसर्गः किंतु तत्स्थान्यो वर्तते वेत्याह। एवमिति। स्थितिसंहारयोः सर्गविपरित त्वात्कथंसर्गेवदित्युच्यत इत्यत्राह। गुणव्यतिकरादिति। रजआदिगुणानां विषमसमावस्थाभेदकारणात्। तत्र रजःप्रेरणा मतेरणाजडेभ्यो गुणेभ्यः संप्र

संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः। विमुक्तो जीवनिर्मुक्तो ब्रह्मनिर्वाणमृच्छति॥४४॥ भूतैः पंचभिरारब्धैर्योषित्पुरुष एव हि। तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह॥४५॥ एवं प्रवर्तते सर्गः स्थितिः संयम एव च। गुणव्यतिकराद्राजन्मायया परमात्मनः॥४६॥ निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः। व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत्॥४७॥

प२

सं[illegible]२

वृत्तिः कथमत्राह। माययेति। परमात्मनो माययेन्द्रयो प्रेरितेभ्य इति शेषः॥ इदमत्राकूतं। रजोगुणकार्यभूताब्रह्मदेहोत्पत्तिना स्थितिशोत्सर्गः। पालकसत्त्वगुणकार्यभूतात्ब्रह्मदेहात्स्थितिः। तमोगुणकार्यभूतारुद्रदेहात्संयम इति च एतत्सर्वमीश्वरेच्छाधीनमिति॥४६॥ एतदेव विशिनष्टि। निमित्तमात्रमिति। यत्र यस्य सन्निधाने व्यक्ताव्यक्तं कार्यकारणात्मकमिदं विश्वं भ्रमति चेष्टते॥ किमिवत्राह यस्कांतस्य सन्निधाने लोहस्ववेयथा तथा स निर्गुणः सत्त्वादिगुणरहितः नत्वनुग्रहतया तिरात्मा परमात्मा न तद्दृष्टा दो निमित्तमात्रं न तूपादानकर्तृत्वं॥४७

भा॰ च
५३

तर्हि मुख्यकर्तृत्वं हरेरेवेत्यत आह। सखल्विति। खलु अहो अन्यकारणशक्तिनिषेधार्थः। स भगवान्योगमायात्तया गुणप्रवाहेषु सत्त्वादिषु तत्तत्क्रियानुसारेण विभक्तवीर्यः विभक्तमाहात्म्यः अक्लिष्टकर्तृत्वादकर्तैव जगत्करोति अहन्तैव हन्ति च। अथवा ईहितत्वान्निहंति संहरति अनेन हरेः समावृत्वमंगीकृतं इति। एक एव कथं विरुद्धकर्तृत्वं कथमित्यत उक्तं चेष्टेति। दुर्विभाव्या ज्ञातुमशक्या स्मादृशोरीति शेषः। कर्तृत्वसामान्यनिषेधे हरिशक्तिष्टकारिता दयस्त्वाव वदुच्यते। काम कर्मस्वभावेषु कालेचावस्थितो हरिः। सर्वकारणभूतः सस्त्रकं ब्रह्मा भिधीयत इति वाक्यविरोधः स्यादिति नायमर्थः शोभते॥४८॥ दुर्विभाव्यत्वमाह। सोनंत इति। यएवं विधः स हरिरस्य विश्वस्यांतकरः स्वयमनंतः स्वमारकरहितः॥ अंतोऽवसितं मृत्या विति यादवः

सखल्विदं भगवान्योगमायात्तया गुणप्रवाहेषु विभक्तवीर्यः॥ करोत्यकर्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या॥४८॥ सोनंतोंतकरः कालो नादिरादिकृदव्ययः॥ जनं जनेन जनयन्मारयन्मृत्युनांतकम्॥४९॥ नैवास्य स्वपक्षोस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः। तं धावमानमनुधावंत्यनीशा यथा रजांस्यनिलं भूतसंघाः ५०

८ देवदत्तवदयं स्वयं दुर्मादयं हंतिकिंनेत्याह। काल इति॥ आयुरादिफलपाचकत्वात्। पूर्वापरत्वविशेषोपिनास्तीत्याह॥ अनादिरिति॥ न केवलमंतकरः किंत्वादिकृत्। चारवत्संहृतेन करोत्यतो व्ययइति। अव्ययः असंहृतः। निमितमात्रत्वं स्पष्टयन्नुभुक्तमेव वदत्यति जनमिति जनेन पित्रादिशरीरेण जनं पुत्रादिशरीरं जनयन्नात्मनो धनिनमृत्युनाकालरूपेण मारयन्शरीरवियोगं कारयन्वर्ततइत्यन्वयः॥४९ एवं प्रवर्तमानस्यापिनेर्घृण्यादिदोषापत्तिर्नास्तिसमत्वादित्याह। नवा इति। वाइत्यनेनो वैषम्यादिसूत्रप्रसिद्धिं दर्शयति। संप्रज्ञप्येषो नानुसारेण। मृत्योः परस्य विलक्षणस्य। उग्रादीनां मारकत्वादिकमेतत्कटाक्षार्थदृष्टमितिभावेनाह। तंधावमानमिति ५०

रा॰म
५३

आयुरादिफलपाचकत्वेनांतास्थिकरत्वंतत्स्पष्टयति आयुष इति। बहवं कालकर्मादिकमस्योत्पत्त्यादिकारणमितिसंगिरंते तत्त्यदर्थेतात्पर्यापरिज्ञाना दितिसंतोषयंस्तत्तदुक्तपूर्वस्थितत्वात्तत्तत्क्रियार्थप्रवर्तकत्वेनतत्रअग्राह्यमेवोच्यत इतिभावेनाह। केचिदिति। केचिन्मीमांसकाः। अपरेचार्वाकाद्यः एकेपौराणिकाः स्यःपरेमोहृत्तिकाः। अपरेवात्स्यायनकोविदाः। कामकर्मस्वभावेषु स्थितिवचनात्त्रयमेवनिश्चीयतइतिप्रमाणेकामकर्मणिशा वृता कथं निर्वचनं येन तेषां भगवद्विषयत्वं ज्ञायेतेति तत्राह। अग्रमक्रस्येति। प्रत्यक्षादिप्रमाणाविषयस्थोह्यन्यकल्पोयमित्यत उक्तं। नानात्रर्कीति। कर्मस्थिना

आयुषोपचयंजंतोस्तथैवोपचयंविभुः॥ उभाभ्यांरहितः स्वस्थोदुःस्थस्यविदधात्यसौ॥५१॥ केचित्कर्मवदंत्येनंस्वभावमपरेनृप॥ एकेकालंपरेदैवंपुंसः काममुतापरे॥५२॥ अव्यक्तस्याप्रमेयस्यनानाशक्त्युदयस्यच॥ नवेचिकीर्षितंतात कोवेदाथस्वसंभवं॥५३॥ नचैतेपुत्रकभ्रातुर्हंतारोधनदानुगाः॥ विसर्गादानयोस्तातपुंसोदैवंहिकारणं॥५४॥ सएवविश्वंसृजतिसएवावतिहंतिच॥ अथापि ह्यनहंकारान्नाज्यतेगुणकर्मभिः॥५५॥ एषभूतानिभूतात्माभूतेशोभूतभावनः॥ स्वशक्त्यामाययायुक्तःसृजत्यत्तिचपातिच॥ ५६

नाशकीनाशदर्थायस्मात्ततयोक्तः तस्यअनेनपरिशेषप्रमाणसिद्धिं सूचयति। चिकीर्षितं कर्तुमिष्टं कर्म। तस्य संभवमुत्पत्तिं निरुक्तिप्रकारं वा कोलाचवेत्तिचेत्सोप्यहानजानातीत्यर्थः॥ एवं सर्वत्रहरेः स्वातंत्र्यमुपपाद्यफलितमाह। नचेति। विसर्गादानयोः मरणजन्मनोः विसर्गस्यादानस्यापीकारस्यवेतिवाहिन्यशोहेतोः किं तद्दैवमित्यतो यज्ञगत्कारणंब्रह्मतदेवात्रोक्तमितिस्पष्टयादिविशेषणैर्विशिनष्टि। सएवेति। कर्द्रमेत्तप्रवृत्तदेववदस्यागुणकर्मलेपोनास्तीत्याह कर्तृत्वाभिमानाभावादित्याह। अथापीति॥५५॥ अनेनापिगुणकर्मलेपः कथमुद्घाटितइतितत्राह। एषइति। स्वशक्त्यास्वाधीनयास्वरूपशक्त्या ५६

कार्यपरप्रयोगाभावात्रेदमनुष्ठानं तु योग्यमित्याशंक्यैवं विधं देवमिति तिसृणां तस्मर्पणेनोपसंहरति। तमेवेति त्रिभिः। नित्यमुक्तेन ... नाद्विका यांश्च वर्धन इति धातुः। सम्नायं त्रिताबहूः॥५७॥ श्रीनारायणप्रसादेनैवाप्य संपदरत्नवतन्नियतमूर्तदृरो होनधीं तइतिभावेनाह। यः पंचवर्ष इत्यादिना। सर्वप्राणिनः प्रति प्रतिगतमक्षमिन्द्रियं यस्य स तथा तं। अनेन मया क्रियामाणा कर्मनासो अपरपती त्यां तत्त्वे रिहूता॥५८॥ विमुक्त विग्रहे देयोगि भिर्व्यपाश्रितं तनिसे विता। अनेन भूतविग्रहोस्य प्रियो न भवतीत्युक्तं। निर्गुणांत्रावृत्तिशून्या कु पितृलातु पुनः प्रसादानभिमुखमित्यर्थः॥ भूतद्रोहे कुद्रस्यास्य तपसा पितु पुनः प्रसादापादनं दुष्करं तवेति धनितां। अनेन। राज्याद्यविषयं वा॥ वागादिनापि प्रसादयितुं दुःशकमित्यर्थः। यद्वा निर्गु

तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणं॥ यस्मै बलिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः॥५७॥ यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा॥ वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः॥५८॥ तमेव मंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरं॥ आत्मानमन्विच्छ विमुक्तमात्मदृग्यस्मिन्निदं भिन्नमसत्प्रतीयते ५९

सौम्यादर्थि

णमतीन्द्रियं इंद्रियाविषयत्वादित्यर्थः॥ गुणस्वा रतिकांन्या द्विथ्यैंद्रिया मुरव्यांतु विनिपारवाः। एकं केवलं अक्षरं स्मृतत्वका बुणं आत्मानं परमात्मानं विशिष्टा मुक्तिर्यस्मात्स तथा तं एवं गुणाविशिष्टं हरिमात्मनि हृद्य विषयालोधय भज स्वेत्पत्नयः॥ तत्त्वरूपं कीदृशमिति नश्राह इति भावेनोक्तं। आत्मदृगिति॥ पूर्वमात्मा त्वं दृष्टवान्निति यत्तस्मान्। कथमित्यतउक्तं॥ यस्मिन्निति। असद्रूपं तं भिन्नं पंचविधभेदोपेतमिदं चेतनाचेतनात्मकं विश्वं यस्मिन्नधाधारतया प्रतीयत इति॥५९

ननु आत्मदर्शिनो मम संसारयाथास्वेदः किमिति नाभूदित्तस्ना। इत्यगुणानुपसंहृत्यं बिंबोपास्यभावादत्तस्तथोपास्तो स इत्यादिति भावेन तदुपास्तिप्रकारं विशदयन्नाह। त्वं प्रत्यगात्मनीति। प्रत्यग्गतमिनितवाभिमुखे विरूपे भक्तिमुपास्तिलक्षणां सर्वा। अनंत अनुपपन्ना अत्रोपपन्नो विरुद्धाः समस्ता अस्थूलानन्वीदि लक्षणाः शक्तयो यत्र स तथा तस्मिन्॥६०॥ तत्र प्रथमं साधनमिदमित्याह। संयच्छेति॥६१॥ अयं सांप्रतीपत्वं कथमत्राह। येनेति। येन दोषेण उपसृष्टात्पुरुषात्। जानानुग्रहस्यापहितत्वाल्लोको ज्ञानिजनो त्रोच्यते॥ तुक् प्रकारान्तर इति धातोः॥६२॥ वैश्रवणस्य सतत्त्वकत्वास्याज्ञाननिमित्तरोषो परिहरणीय इत्याह।

त्वं प्रत्यगात्मनि सदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ॥ भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढं॥६०॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं॥ श्रुतेन भूयसा राजन्नगदेन यथामयं॥६१॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशं॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः॥६२॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतं॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः॥६३॥ तं प्रसादय वत्साशु संनत्या प्रश्रयोक्तिभिः॥ न यावन्महतां तेजः कुलं नोभिभविष्यति॥६४॥ इत्युक्तस्तं प्रणम्याह भगवंतमनुशासनं। आतिष्ठ भातृमात्रोर्मिन्दा चतः दम्पतामिति॥ मैत्रेय उवाच॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवं॥ तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ॥६५॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकादशोऽध्यायः॥११॥

हेलनमित्यादिना। विश्रवसो हेलनमपि शिवावज्ञानस्यान्तरङ्गज्ञानेन श्रीनारायणविषयज्ञानमपि नोदेतीत्यभिप्रायेणोक्तं। गिरिशभ्रातुरिति। अत एव महतामिति बहुवचनं। धनदस्य च सतमलादुर्बलनुशासनानुज्ञानं तथा मनो ह्ययोन्नाम भिनंघस्य पुराणमन्वक्ति। इत्युक्तस्ते इति। अयं तत्काना [illegible] चतइत्यनेन पूर्ववैराग्यसंधानेन ध्रुवेणात्मज्ञानस्थितं। आत्ममातृमरणप्रतिक्रियां कर्तुं समर्थं नष्टपिजनत्रातिं परिहर्तुमिवयद्धवये अत्यन्तमिति द्योतयति॥ ॥इति श्री चतुर्थस्कंधे टीकायामेकादशोऽध्यायः॥

साधुनसामर्थ्यां भगवत्प्रसादात्स्वरूपानंदानुभवलक्षणो मोक्षोपि तेन ध्येय पताऽनुसारेण प्राप्यते पुरुषैरिति निर्दिश्यते स्मिन्नध्यायेतत्रादौ क्रुद्धस्तापरावृत्तं त्वा वैश्रवणेन भ्रातायवरप्रदान प्रकारं ख्यति। ध्रुवं निवृत्तमित्यादिना। वैशसाद्युद्धात्॥१॥ परितोषे हेतुमाह। यस्त्वमिति॥२॥ स्वस्य मनोक्षोभे कमत्यपत्वन क्रिन भवानि ति॥ अप्ययभावयोर्मरणजन्मनोः॥३॥ ननु त्वं हं मद्भ्रातृवधे न त्वमेतत्कर्ता इति दर्शनं कथमत्राह। अहं त्वमिति। पुरुषस्य परमेश्वरस्य कर्तृत्वाज्ञानाद्दहं त्वं कर्तेति धीरपार्था भ्रांता भाति। नाहं कर्ता न कर्ता त्वं कर्ता यस्तु स्वयं प्रभुरित्यनेन परमेश्वर कर्तृत्वस्य प्रामाणित्वप्रतीतेः कथमिवाभाति स्वाप्नीव यथा स्वप्ने आत्मबु द्धिः आत्मन्यविद्यमान कर्तृत्वाभिमानाद्दनर्थोपि स्यादित्याह। अतद्ध्याना दिति। अतद्ध्यानात्तु नः पुनरात्मनि कर्तृत्वस्मरणाद्यया कर्तृत्वधिया सुखदुःखादिरूपस्य

मैत्रेय उवाच॥ ॥ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान्धनेश्वरः। तत्रागतश्चारणयक्षकिंनरैः संस्तूयमानोऽभ्यवदत्कृतांजलिं १ धनद उवाच भोभोः क्षत्रियदायाद परितुष्टोस्मि तेनघ॥ यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः २ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव॥ काल एव हि भूतानां प्रभुरप्ययभावयोः ३ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि॥ स्वाप्नीवभात्यतद्ध्यानाद्यया बंधविपर्ययः ४ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजं॥ सर्वभूतात्मभावेन सर्वभूतात्मविग्रहं॥ ५॥ भजस्व भजनीयांघ्रिमभवाय भवछिदं॥

बंधोविपर्ययो मोक्षश्च भवतः॥४॥ ननु जीवकृतकार्यादिसर्वं तस्य क्रमोपसंहारदर्शनात्कथंचितस्य जीवस्य कर्तृत्वाभाव इत्याशंक्य कर्तृत्वाद्यैर्नियमाभावात्स्वतंत्रमेव कर्तृत्वं न मम स्वतंत्र कर्तृत्वमिति निश्चित्य तत्क्रिया विशिष्टं भगवंतं भजस्वेत्याह। तद्गच्छेति। सर्वभूता नामात्मभावेन कर्तृत्वस्वदानादन्योः कर्ता परमात्मेति निश्चित्य लक्षणया वुध्यास सर्वभूतेष्वात्मविग्रहोज्ञाना द्विगुण रूपा मूर्तिर्यस्य स तथा तं। यद्वा सर्वभूतानामात्म निदेहे विग्रहः प्रदेशत्वाविलक्षणोयस्य स तथा तं ५

टी॰ २

प्रादेशाद्याकरत्वेनावस्थानं कथं गुणात्मिकासत्ते रेणोत्पत्त मंत्रं। युक्तमिति। आत्मसामर्थ्यात्स्वयं या त्वन्तया युक्तं गुणमय्यात्माधीनया मायया प्रकृत्याविरहितं॥ द्यपि हरेः करुणा वर्षभारायात्रत्वेनान्यतः प्राप्यो वरं नास्ति तथापि वैश्रवणो धुवप्रसन्नः किलेति द्योतनाय वरं ख्येति वृणीहीति। अन्यतः कथं वृणोमीत्य विशं कितः। अंबुजनाभस्य हरेः पादयोः सेवायां निरंतरं स्मरणं तं तदेकमानसमित्यर्थः॥७॥ मुमुक्षुणाय मेववरो वरणीयइतिज्ञापयतस्य वरप्रदान प्रकारमाह। सराज राजेनेति॥ ऐलविलः इडविला पुत्रो वैश्रवणः॥८॥ त्र हत्स्वयं नोत्पन्नयेयज्ञ एवं कर्तव्य इति प्रकटनायतस्य यज्ञकरणप्रकारमाह। अथेति। अथवि

युक्तं विरहितं शक्त्या गुणमय्यात्ममायया॥६॥ वृणीहि कामं नृप यन्मनो गतं मत्तस्त्वमौत्तानपदे विशंकितः। वरं वराहों बुजनाभपादयोरनंतरं त्वां वयमंग शुश्रुम॥७॥ मैत्रेय उवाच॥ स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः॥ हरौ स वव्रे चलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः॥८॥ तस्य प्रीतेन मनसा तां दत्वैलविलस्ततः॥ पश्यतोंतर्दधे सोपि स्वपुरं प्रत्यपद्यत ९ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः॥ द्रव्य क्रियादेवतानां कर्म कर्मफलप्रदं १० सर्वात्मन्यच्युतेसर्वे तीव्रौघां भक्तिमुद्वहन्॥ ददर्शात्मनि भूतेषु तमेवावस्थितं विभुं ११

षयासक्तिं विहाय पुरं प्राप्यनंतरं मंगलं प्रारब्धवान्॥ किं तदित्यत उक्तं अयजतेति। द्रव्यक्रियादेवतानां कर्मविषयं तत्र कर्मफलप्रदं सोह्यारव्यं कर्मफलप्रदं॥१०॥ सर्वात्मनि सर्वांतर्यामिणि सर्वे पूर्णे विष्णुः पूर्णः स्तथा सर्वः समस्त इत्यभिधीयत इत्यभिधानात्॥ सर्वः शर्वः शिवः स्थाणुरिति नामत्वात्सर्व नामसंज्ञा नास्ति आत्मनि स्वस्मिन्भूतेषु चावस्थितं तं विभुं व्यापकं पुरा तपसा प्रत्यक्षीचकारेत्यर्थः। ११ राम राम

तस्यप्रजानुरंजनविधानमाहतमेवमिति॥१२॥धरा कतिपये मासैरेव भगवदनुग्रहमवाप्याभीष्टमाप्नवतो धुवस्य किमु वक्तव्यमेतैरिति भावेनत स्य क्षितिपालनकालावधिमाह। षट्त्रिंशदिति।प्रारब्धपुण्यफलं भुंक्त्वा श्रुभक्षयं ज्ञानसामर्थ्यात्॥१३॥ बकुसं एवं बकुतिथं॥अविकलेंद्रियः वशीकृतेंद्रियःअ रसा चक्षुरादींद्रियवैकल्पमधला दिलक्षणं नप्राप्त इति वा॥त्रयाणां वर्गाणां धर्मकामार्थानामौपयिकमुपयोगसाधनं देहं नीलादेहया त्राविधमे त्यर्थः॥१४॥पुत्रामसिंहासनं दत्त्वायं किमकामी त्यग्रहएवावस्थितश्चेद्वैराग्यादिसाधनहासोन्नलोकोपहासविषयःस्यादित्यतःस्वपुरं विहायदेशां तरं गत इति वक्तव्यमतःकेदेशस्थितीर्थमगमदिति तत्राह।मन्यमान इत्यादिना।सञ्चवइदं विश्वं कालोपसृष्टमियता कालेन न हि भवतीति मन्यमानो।

तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलं।गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः १२ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमंडलं।भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयं १३ एवं बहुसवं कालं महात्माविकलेंद्रियः।त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनं १४ मन्यमान इदं विश्वं मायारचितमात्मनि।अविद्यारचितस्वप्नगंधर्वनगरोपमं १५ आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोशमंतःपुरं परिविहारभुवश्च रम्याः भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति सप्रययौ विशालां॥१६॥तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वासनं जितमरुन्मनसा हृताक्षः॥स्थूले दधार भगवत्प्रतिरूप एतत् ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ १७

विशालां बदरिकाश्रमे स्पष्टमानानंदीप्रययावित्यन्वयः।विशालां बदरीं प्रोक्तां नगरीं निम्नगां तथेत्यभिधानं।कीदृशं विश्वं आत्मन्याधारतया हरेर्मा ययेच्छया रचितं।अनिषेधेषुमा व्विल्वादियाभिधानादस्य विशेषो विषये इच्छया रचितस्वप्नगंधर्वनगरोपमायं स्पष्टतत्त्वथोक्तां।महामायेत्यविद्येतिनियति र्मोहिनीतिचाप्रकृतिर्वासनेत्येवं तवेच्छानंतकथ्यत इत्यनेन निरूप्य यदमाया त्राह्यस्य हरेरिच्छा वा चिच्छक्तिरित्थमितीयमात्रं कापरिहृतेति ज्ञायते १५

नविद्यमीश्वरेच्छारचितामिति वक्तुं नपुनर्मा तत्याले मिथ्याभूतस्वप्रादिसाम्यं वाथ मुपपन्नं तदुक्तं तेतस्मान्मायात्राहर्षेने इंद्रजालमेवोच्यते तन्माया शब्दस्य केनेनेकार्थत्वं त्रिगावादिशाहवदुपपद्यते रित्यतउक्तां कालेति।उर्वारुकस्यामता दिव लालांतरेन्यथा दर्शनाधि दृष्टं तत्र दृष्टमिति क्षण भंगुरत्वा त्वप्रादिसाम्यं नतु मिथ्यात्वात्तस्य चार्थक्रियाकारित्वेन सत्यत्वस्य प्रामाणिकत्वात्॥तदुक्तं।अन्यथात्वात् हि प्रनाश्जगत्स्वप्रादिवत्स्मृतं। वर्तमानं नियत्येव सदैव परमात्मन इति॥आत्मनीत्युक्त्या सत्यत्वमनगम्यते अनादिनित्यनिरस्तकुहकस्य हरेरिंद्रजालाश्रयत्वं नयुज्यतेति सहानि रस्त कुहकमिति प्रोक्तेश्चानिष्कलं निष्क्रियं शांतमिति श्रुतेः॥निष्क्रियत्वं चैकयमात्मनो जानतो धुवस्य विशालागमनक्रियायोगाच्च।आत्मस्त्री पुत्रादीनाविशांतर्भूतत्वेन तद्ग्रहणे नग्रहीतानामपि पुनर्वचनं दुस्त्यजत्वात्तत्यागमपेक्षितवानिति धुवस्यैव रागप्रतिच्छेद्योतनायेति पं रितो॥विह रश्च वः आकलय्य निश्चित्य॥१६॥ ॥तत्र गतो पि पितापुत्र विषयस्नेहं मुक्त्वा वैराग्यदृढीयस्तया भगवद्भक्तिरामा लिंगितस्य मुग्धस्य वस्थितस्य तदुपास्ति प्रकारं वक्ति।तस्यामिति॥तस्यां विशालायाः शिववाः मंगलवारि स्थूले पाताला दिके॥नेतन्निज मित्यतउक्तं प्रति रूपइति॥शिलावत्प्रतिमास्थाने॥तदुक्तं॥शिलावत्प्रतिमेषा हि विष्णोर्लोकवतुर्दशीति।समाधौ निरायासेन चित्तस्य ध्येयवस्तुविष यी करणगतिप्रवाहे सति अव्यवस्थत्वात्स्थूलध्यानं व्यासृजत्स्वबिंबोपासेरावश्यकत्वेन स्थूलसंनिहितरूपे येये नसूक्ष्मरूपमस्मा रदित्यर्थः॥अव्यवहितः स्थूलसंनिहित सूक्ष्मरूपयोरभेदं प्रपन्न इत्यर्थः १७॥

भा·च
५७

तस्यासंप्रज्ञातसमाध्यवस्थामाह। भक्तिमिति। अहमसौ ध्रुव इत्यात्मानं नास्मरत्। किंतु भगवंतमेवास्मरदित्यनेन जीवन्मुक्तत्वं लक्षयति मुक्तलिंगः सू
क्ष्मशरीराभिमानरहितः॥१८॥ ध्रुवस्य हरेरपरोक्षत्वानोत्पन्नप्रसादचिह्नमाह। स ददर्शेति। विभ्राजयत् राकापतिः पूर्णचंद्रः॥१९॥ दृष्ट्वात्यतत्पर्णे मि
वरवर्गी अच्युतं चत्रमिव विमानं नाद्रीत् किंतु सनाथमित्याह। तत्रेति। अनु अनंतरं तत्र विमाने स्थितौ॥२०॥ उत्पन्ननिर्देशपञ्चानलात् विमानपुरुष

भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः॥ विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः
१८ स ददर्श विमानाग्र्यं नभसोऽवतरद्ध्रुवः॥ विभ्राजयद्दश दिशो राकापतिमिवोदितं १९ तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशो
रावरुणांबुजेक्षणौ॥ स्थिताववष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ॥ २० विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः सा
ध्वसविस्मृतक्रमः॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहतांजलिः २१॥ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्र
यनम्रकंधरं॥ सुनंदनंदावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ २२

पद्दर्शनात्तद्यातस्यं भ्रांतिज्ञानं नाभूदिति भावेन तत्स्वरूपप्रकारमाह। विज्ञायेति। प्रागदृष्टश्रुतवत्कदर्शनेन साध्वसं संभ्रमः ततः कारणवृत्तिवि
शेषः स भ्रमो भवतीति तेन स्मृतो नष्टो विक्रमः प्रवृत्तिविशेषो यस्य स तथोक्तः॥ नत्वा भावो लीला क्रियावाविर्भूतिर्वा यस्य स तथोक्तः॥ त
त्स्पर्शेन किंकरौ सह हरिगतौ भृत्यौ संहतांजलिर्बद्धांजलिः॥२१॥ आत्मनो देवत्वेन हस्तादिसंज्ञया स्वागमनज्ञापनं विनेव स्वाभिप्राय
मूचतुरित्याह। तं कृष्णेति। नपत्वम्यदृष्टा २२

साधसे ३

राम
५७

भावानयदेवमतीतृपत् त्वमकार्षीः २३ न स्पहरेः पार्षदौ त्वां भगवत्पदं नेतुमिह प्राप्तौ विद्धीत्यन्वयः॥२४॥ वैकुंठं नेतुं किं नेत्याह तुरिति। दुर्ज्ञेयमिति जि
तं साधितं सूरयः सप्तर्षिप्रभृतयो यदप्राप्य परं स्थानं हि चक्षते पश्यंति तं हि तद्गहनं विपिने किं नेत्यत उक्तं चंद्रेति चंद्रदिवाकरादयो ग्रहाः नक्षत्राणि सप्तविं
शति संख्यातानि अश्विन्यादयः ताराः मेषादिराशयो व्योमतले स्वप्रमाणा ज्योतिर्मूर्तयो वा प्रदक्षिणं यस्येति प्रदक्षिणं कुर्वंतीति तद्दानिष्ठेत्यन्वयः २५ अस्थापि स्म

सुनंदनंदावूचतुः॥ भो भो राजन्सुभद्रं ते वाचं नोऽवहितः शृणु॥ यः पंचवर्षस्तपसा भवान्देवमतीतृपत् २३ तस्याखिलजगद्धातुरावां देवस्य शा
र्ङ्गिणः॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदं॥२४॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परं॥ आतिष्ठ तच्चंद्रदिवाकराद
यो ग्रहर्क्षताराः परियंति दक्षिणं॥२५॥ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित्॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं २६ एतद्विमान
प्रवरमुत्तमश्लोकमौलिना॥ उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि २७

स्थेयमिति प्रतिपाद्यत इत्याह। अनास्थितमिति। अन्यैरनधिष्ठितं चेत् किं श्मशानवदित्यत उक्तं जगतां वंद्यमिति। सा किं वसतिरित्यत उक्तं तद्वि
ष्णोरिति। शिंशुमारो ध्रुवश्चैव संस्थितो यत्पुरे सदा तत्स्वरूपं तिर्न्यग्त्यन्यलोकं यातु सुराविनेति वचनेन तत्र तात्पर्यमवगंतव्यं॥२६॥ केनेदं वि
मानं प्रेषितमित्याशंकां निवारयत इत्याह। एतदिति॥ उत्तमश्लोकमौलिना। शिंशुमारमूर्तिना हरिणा २७

भा॰ चं॰
५८

स्ये॰

मैत्रेयोविदुरायाहेभगवद्भक्तमाहात्म्यंश्रृण्वितिभावेनतस्यपदमारोढमितिकर्तव्यतावक्तिनिशम्येति॥वैकुंठस्यहरेर्नियोज्यानांपार्षदानांमध्येमुख्ययोर्मधुपुष्परसमिवरसंच्योततिस्रवतीतिमधुच्युतांकृतनित्यकर्मास्वंमंगलयेनसकृतनित्यमंगलः॥अभ्यवादयत्अभिवंदयामास॥२८॥नेर्दंध्रुवस्यैवमंगलंशकुनमन्येषामपिमंहतांभवतीतिध्वनयंस्तद्यात्रोप्रारंभमांगल्यवक्तिपरीत्येत्यादिना॥२९॥यस्यधिष्ण्याग्र्यंविमानमधिष्ठातुमियेष

मैत्रेयउवाच॥निशम्यवैकुंठनियोज्यमुख्ययोर्मधुच्युतांवाचमुरुक्रमप्रियः॥कृताभिषेकःकृतनित्यमंगलोमुनीन्प्रणम्याशिषमभ्यवादयत॥२८॥परीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्यच॥इयेषतदधिष्ठातुंबिभ्रद्रूपंहिरण्मयं॥२९॥तदादुंदुभयोनेदुर्मृदंगपणवादयः॥गंधर्वमुख्याःप्रजगुःपेतुःकुसुमवृष्टयः॥३०॥सचस्वर्लोकमारोक्ष्यन्सुनीतिंजननींध्रुवः॥अन्वस्मरदहंहित्वादीनांयास्येत्रिविष्टपं॥३१॥इतिव्यवसितंतस्यव्यवसायसुरोत्तमौ॥दर्शयामासतुर्देवींदेवयानेनचाग्रतः ३२ तत्रतत्रप्रशंसद्भिःपथिवैमानिकैःसुरैः॥अवकीर्यमाणोददृशेकुसुमैःक्रमशोग्रहान् ३३

सत्य॰

षतदादुंदुभ्यादयोनेदुरित्यन्वयः॥३०॥नाहमेवसंकल्पशिरोमणिः किंतुमद्भक्तोपीतिभावेनहरिणास्फुरितांतःकरणइति विशेषोध्रुवएतद्दुःखंपुत्रदूरत्वंत्यक्त्वास्वकृतेत्यक्तविषयभोगायाःसुनीतेःपुत्रेणसहस्वर्लोकप्राप्तिर्भगवत्संयदानासमीचीनदितिलोकापवादंमत्वाहनुस्मरद्दुःखमातरमस्माषन्तिदाकेटमारेःसंकल्पज्ञानमानेनौषधेरेतस्यपुरतोयांतीमांतरंदर्शयामासतुरित्याह॥सचेति॥अनेनध्रुवस्यापिसंत्यसंकल्पत्वंलोकेप्रकाशितमितिज्ञापते॥३२॥अग्रगांअग्रेतांगच्छंतीं ३३

राम
५८

यतस्था

व्रजतानिश्चलागतिर्यस्यविष्णोःपदंदेवयानेनमार्गेण॥३४॥तत्पदंशास्त्रधिकारिणोन्वयव्यतिरेकाभ्यामाह॥नतदितियेतुजंतुषुखलास्तेयंनव्रजंतियेतुजंतुषुअनुग्रहाद्दयालवस्तेदनिशंभद्राणिचरंति॥३५॥एतदेवविवृणनष्ठिशाताइति॥एतेखिला इतिपाठेजंतुषुयेभद्राणिचरंति॥एतेखिला विश्वानुग्रहाद्व्रजंतिभद्राचरणंविवृणिष्टियेनिशमितिायेनिश्चेशांत्यादिगुणयुक्तास्तेच्युतपदंयांतीत्यन्वयः॥एतत्पदंप्राप्यस्वरूपाविर्भावयोग्यान्विनापुरस्ताद्न्यैरित्युक्तं॥३६॥चंद्रदिवाकारादयइत्यत्रज्योतिश्चक्रेणप्रदक्षिणंक्रियमाणमेतत्स्थानमित्युक्तं।ततिक्रियइतइतिनप्रतीतंतदिदानीलक्षय

[illegible]

त्रिलोकींदेवयानेनसोतिव्रज्यमुनीनपि॥पुरस्ताद्यत्ध्रुवगतिर्विष्णोःपदमथाभ्यगात ३४ यद्भ्राजमानंस्वरुचैवसर्वतोलोकास्त्रयोह्यनुविभ्राजतएते॥नतव्रजलजंतुषुयेत्वनुग्रहाव्रजंतिभद्राणिचरंतियेनिशं॥३५॥शांताःसमदृशःशुद्धाःसर्वभूतानुरंजनाः॥यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः॥३६॥इत्युत्तानपदःपुत्रोध्रुवःकृष्णपरायणः॥अभूत्त्रयाणांलोकानांचूडामणिरिवामलः॥३७॥गंभीरवेगोनिमिषंज्योतिषांचक्रमर्पितं॥यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ३८ महिमानंविलोक्यास्यनारदोभगवानृषिः॥आतोद्यंवितुदन्श्लोकान्सत्रेगायत्प्रचेतसां ३९ ॥ ॥ राम राम राम

ध्रौ॰४

तिगंभीरेति॥गंभीरवेगानिश्चनिमिषंचगंभीरवेगामीषितोषौ॥मिषनिमिषइतिधातोःननिमिषतिनमीलतीत्यनिमिषाःतेषामनस्तंगच्छतामित्यर्थः॥यस्मिन्नित्यनेनोपरीतिप्रतीतिनिवारयति।मेढ्यामिति।अनेनमेढ्याःसमपिपरितोभ्रमतीतियथाप्रतीतंतथात्रापीत्यर्थः॥३८॥इतिकेनायंमहिमालालितोयेनास्माकमपितत्रश्रद्धातिशयःस्यादित्यत्रआहमहिमानमिति ३९

भा॰ च॰
५९

नयसः प्रभावो महात्म्यं यस्य स तथा तस्य प्रभावमाहात्म्ययोः प्रभावः स्यादिति यादवः ॥ ४० ॥ अजितं जिगाय वशीचकार ॥ ४१ ॥ ४३ ॥ ध्रौव्यं ध्रुवस्य मोक्षस्य साधुत्वं ॥ ४४ ॥ अच्युतप्रियस्य ध्रुवस्य चेष्टितं ॥ ४५ ॥ तीर्थमुपायः साधनं मंत्राद्युपदेष्टृवदुपदेष्टृत्वा । तेजो बलं प्रभावश्च तेजो तिथ्यर्चिषि रेतसि । न च नीतेन खेधर्मेदानहास्ति मरयिवेत्यभिधानात्तदिच्छूनां तेजआकांक्षमाणानां यत्र यस्मिंश्चरिते प्रसप्यमाने तेजो भवतीत्यर्थः ॥ ४६ ॥ समवाये समूहे ॥ कीर्तयेत्

हे॰ ३

नारद उवाच ॥ नूनं सुनीतेः पतिदेवताया स्तपः प्रभावस्य सुतस्य तां गतिं । दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः ॥ ४० ॥ यः पंचवर्षो गुरुदारवाक्छरैर्भिन्नेन यातो हृदयेन दूयता ॥ वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भृत्यगुणैः पराजितं ॥ ४१ ॥ यः क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ॥ षट्पंचवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदं ॥ ४२ ॥ मैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं यत्पृष्टोऽहमिह ४४ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितं ॥ भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ४५ महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः ॥ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां ४६ ॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनां ॥ सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥ ४७ ॥ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा ॥ दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥ ४८ ॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति ॥ ४९ ॥ ४४ महत्वया ॥ ध्रुवस्योद्दामयशसश्चरितं संमतं सतां ॥ ४३ ॥ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ।
स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणं ॥ ४४

राम
५९

इत्यतस्तात्पर्यो द्विरमितिवक्ति पुण्यश्लोकस्येति ॥ ४७ ॥ ४८ ॥ श्रावयन्कुत्राभिसंधिं न कुर्यादित्याह नेच्छन्निति । तत्र चरिते श्राविते श्रुते वा फलं नेच्छन्नेवेति शेषः । कथं तर्हि फलसिद्धिरित्यत आह आत्मनेति । नेच्छंस्तत्र श्राव्यमाणे चरिते आत्मना मनसा आत्मानं परमात्मानं प्रति संतुष्टः सिध्यति प्राप्ताभीष्टफलो भवति ॥ ४९

दत्त

ध्रुवचरितव्याख्यानव्याजेन भागवतं ज्ञानमुपदिशतो न केवलं भगवानेवानुग्रहं करोति किंतु तदिंद्रियाभिमानिनो देवा अपीत्याह ज्ञानमिति ॥ ५० ॥ पुनरपि तत्स्तुवन्नुपसंहरति इदं मयेति ॥ ५१ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे द्वादशोऽध्यायः ॥ ॥ अत्र हरितइक्ककथाश्रवणेन मुद्रितांतःकरणस्य बिंबप्रतिबिंबज्ञानोदयापवर्गः स्यादिति दीप्यते स्मिन्नध्याये । तत्रादौ विदुरस्य प्रचेतसां विषयप्रश्नप्रकारस्तदुत्तरत्वेन मैत्रेयेणात्र स्ववंशावलिवर्णनं क्रियते । नित्यमित्यादिना प्ररूढभावः प्रवृद्धभक्तिः सत्रेगायत्प्रचेतासामित्युक्तिः प्रश्नबीजं ॥ १ ॥ अन्ववाये वंशे ॥ २ ॥ महाभागवतेन विदुरेण हरिकथाप्रश्नं विहाय प्रचेतसां प्रश्नः

ज्ञानमेतल्लोकयोस्त्वात्यरमार्थवित् ॥ कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥ ५० ॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ॥ हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥ ५१ इति श्रीभागवते महापुराणे चतुर्थस्कंधे द्वादशोऽध्यायः ॥ श्रीशुक उवाच निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं ॥ प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥ १ ॥ विदुर उवाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत ॥ कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत २ मन्ये महाभागवतं नारदं देवदर्शनं ॥ येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥ ३ ॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः ॥ इज्यमानो भक्तिमता नारदेनेरितः किल ४ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः ॥ मह्यं शुश्रूषवे ब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि ५

किमिति क्रियत इत्याशंक्य तेषां कथापि हरिकथा विना भूता नारदेन प्रोच्यमानत्वात् नारदस्य स्वल्पकथां न वक्ति भागवतचूडामणित्वादित्याह । मन्य इति । क्रियायोगः क इति तत्राह । परिचर्याविधिर्हरेरिति ३ प्रचेतसां नारदोपदेशः कथं निष्कामविषयो भवतीत्याशंक्य संकल्पविशेषात्सादित्याशयेनाह । स्वधर्मशीलैरिति । अयं भावः सात्विनारदेन प्रतिपादित श्रुति ४ ॥ ततः किं फलितमित्यत्राह । यास्ता इति ५ ॥

भा॰ चं॰
६०
दू॰ ४

अधिराजासनं राजासनमधिकृत्य वर्त्तमानां सार्वभौमश्रियं नैच्छदित्यन्वयः॥ ३॥ कुतो नैच्छदिति तत्राह। स जन्मनेति। जन्म प्रभृति भगवन्निष्ठादिगुणयुक्तत्वात्। समदर्शनत्वमुपपादयति ददर्शेति। आत्मानं परमात्मानं लोके विततं ददर्श। लोकं आत्मनि परमात्मनि धारतया स्थितम् ददर्शेत्यन्वयः॥ ७॥ एतदेव विशिनष्टि आत्मानमिति। ददर्शेत्यनुवर्त्तते। आत्मानं स्वबिंबं हरिं एव ददर्शेत्यन्वयः। कथं ब्रह्म अथ कस्मादुच्यते ब्रह्मेति। बृंहतो ह्यस्मिन् गुणा इति श्रुतेः। गुणैर्नितो देशतो व्याप्त्या स्य गुहाकाशस्याल्पत्वे न तत्स्थितस्यापि तथात्वात्कथं व्याप्तमित्युच्यते। नियांत्रीकथं प्राकृत देहतरूपत एवानुपपत्तिः व्याप्तत्वेन हरेस्तादृशानीराभावादिति भावेनोक्तं। निर्वाणमिति। एतदुणमवष्टभ्येति श्रुतो वाणत्वाद्‌ स्य शरीरप्रयोगात् देहविनाशे तत्रस्थस्यापि विनाशसंभवात् कथं ब्रह्मत्वमुच्यत इति श्रुतो वाह। निर्वाणं निर्गतो नाशो यस्मात्तथोक्तं। निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जन इत्यादवः। अनेन देहिनो जीवस्य देहो हमिति निमित्तदुःखिलेपि हरेस्तन्नास्तीति ज्ञापित। हरेः प्राकृतदेहो नास्तीतिस्पष्टमाह।

मैत्रेय उवाच ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनं। सार्वभौमश्रियं नैच्छदधिराजासनं पितुः॥ स जन्मनोपशान्तात्मा निःसङ्गः समदर्शनः॥ ददर्श लोके विततमात्मानं लोकमात्मनि ७ आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहं॥ अवबोधरसैकात्म्यमानन्दमनुसन्ततं ८

प्रत्यस्तमितेति। गात्रं वपुः संहननं शरीरं वर्म विग्रह इत्यमरः। प्रतीत्युपसर्गयोगेन या नियान्यवृत्तारूपाणं पतर्यामिरूपाणि ता नि ता नि सर्वाणि पिप्राकृतशरीररहितानीति सूचनेन मूलरूपस्य किमुवक्तव्यमित्याभाव्यांत ते हीदं सूक्ष्मकल्पमित्याभिमानमवबोधेति। अवबोधरसो ज्ञानरसः। स एवात्म्यं नो भिन्नरूपस्य तत्तत्तयोक्तं प्राकृतज्ञानमिश्रितं न भवतीत्येव तु उक्तं। तस्यापि ज्ञानवत्विवास्वगच्छतीत्यादौ सिद्धत्वात्॥ ज्ञानं ज्ञानं सुखं सुखं इति श्रुतिरपि सूचिता स्यात्। रूपरूपिणोरभेदद्योतनाय ऐकात्म्यमित्युक्तं। ऐकात्म्यप्रत्ययसारमिति श्रुतिश्च। एकं वेदितृज्ञानवादानुप्रवेश इति तत्राह। आनंदमिति। आनंदतीत्यानंदः सुखस्वभावमन्नरूपमित्यर्थः। विज्ञानमानंदं ब्रह्मेति श्रुतेः। उपसंहरति। अनुसंततमिति। आत्मसर्वप्राणिष्वनुगतत्वेन तद्रूपिष्वन्तेनचगुणगुणिनो रूपरूपिणोरभेदेन ततं व्याप्तमित्युपपन्नमित्यर्थः। समभेद इतियादवः ८

राम
६०

ज्ञानाग्निना दग्धवासनांतःकरणस्य एतादृशभगवद्रूपदर्शनं संगच्छत इत्याह। अव्यवच्छिन्नेति। योगशब्देन तज्ज्ञानितज्ज्ञानं लक्ष्यते अव्यवच्छिन्नयोगेन निरंतरध्यानलक्षणोपासनया जातेन ज्ञानाग्निना दग्धं भस्मीभूतं कर्ममलं पापक्रियानिमित्तं मलं यस्य स तथा। तादृशः आशयो अंतःकरणं यस्य स तथा। निर्मलतः करणपात्रे प्रज्वलितेन ज्ञानदीपेन लोके विततमात्मानमात्मनि ततं लोकं च ददर्शेत्युक्तं भवेद्वयोः। समत्वमायातमिति भेदः। कामपनुदविशदयाते। स्वरूपमिति। स्वरूपं जीवस्य विंबरूपं परमात्मानमवरुंधानः स्वज्ञानातः स्थितं कुर्वाणः साक्षात्कुर्वाणः स्मादन्यत्वं तं नमनिपततज्ज्ञग न्नादृते किंतु तत्स्पष्टतत्त्वा पितत्त्वं नियतं त्वहांतं ज्ञापितं तद्धि तन्मोचितमपत्रपदित्यर्थः। तस्य स्वरूपप्रतिविंबमस्माद्भिं वा दन्यद्भिन्नं नैक्षतेति विंबप्रतिबिंबयोरैक्यमुच्यत इति वक्तुं न युक्तं। अवरुंधान इत्यस्य निर्विषयत्वात्। तदेति कालस्य च ध्यर्थद्धिर्देशानुपपत्तेश्च ददर्शेत्यत्र लोकात्मनोराधाराधेयत्वोक्तेश्च तस्य चाभेदनिष्ठत्वात्। तदुक्तं भिन्न

अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः॥ स्वरूपमवरुंधानो नात्मनोऽन्यं तदैक्षत ९ जडान्धबधिरोन्मत्तमूकाकृतिरतन्मतिः॥ लक्षितः पथि बालानां प्रशान्तार्चिरिवानलः॥ १०॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः॥ वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतं ११ ॥ राम ॥ राम॥ ॥

स्वरूपमभिन्नं स्वरूपं तु द्विधा हरेः। भिन्नस्वरूपं ब्रह्माद्यं मत्स्याद्यभिन्नमुच्यत इति॥ ९॥ एवंविधोपि लोकसंभाषणसज्जनार्थमविवेकिनो भिन्नं ददृशुरित्याह। जडेति॥ अतन्मतिः तत्तद्धस्त विषयज्ञानशून्यः। क्वचित्किं नोपलब्धे एवं सर्वविलक्षणेन विशेष्य यथा संसारं तरति सामतिर्यस्य सो तन्मतिरिति प्रशांतार्चिः भस्मगर्भिनो अग्निर्व॥ १०॥ अस्मिन्नेवं गते कोऽभूद्राजा भूदत्राह। मत्वेति॥ कालावयवस्य वत्सरस्य राज्याहत्वं कथमित्यत उक्तं॥ यवीयांसमिति॥ कुलवृद्धेऽपि श्रेष्ठे वाल्पनाम्नि सुते स्थिते वत्सरं राज्ञोनं कथमकुर्वन्नित्यत उक्तं। कल्पः कल्पाभिमानी संवत्सरांशु मा राजनः स्थितः। वत्सरो राज्यमकरोत्यिसेवाश्चद्दत्त महाबलः। ध्रुवचक्रे नारायणः साक्षात्किंकर्तुं कल्पा मा तमिति पनेनेति हृत्तम ११

प॰

वत्सरोपिनाम्नास्ववीथ्यांभार्यायांषट्सुतानापेत्याह। स्ववीथिरिति। स्वर्गमार्गाभिमानिनीत्वात् स्ववीथिरिति॥१२॥ अत्रयंयमास्यकथाप्रवृत्तेतेससएवंवंशेहेतुभूतस्त्र
त्पलक्षतोहाहः। योगिनोप्रजाश्चेतिता तत्पर्यज्ञातव्या। एताः स्त्रियः सुताश्च कालादितत्त्वाभिमानिन्य इति च॥१३॥१४॥ ससर्वतेजाश्चक्षुर्नामानंसुतंनाम्नाकूत्यांपत्न्यामवाप

स्ववीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान्। पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयं॥१२॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः। प्रातर्मध्यंदिनं सायमि
ति ह्यासन्प्रभासुताः १३। प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः। व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे॥१४॥ स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवा
प ह॥ मनोरसूत महिषी विरजान्नड्वला सुतान्॥१५॥ पुरुं कुत्सं त्रितं द्युम्नं सत्यवन्तमृतं व्रतं। अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं॥१६॥ उल्मुकोऽजनयत्
पुत्रान्पुष्करिण्यां षडुत्तमान्। अङ्गं सुमनसं ख्यातिं क्रतुमङ्गिरसं गयं॥१७॥ सुनीथाङ्गस्य या पत्नी सुषुवे वेनमुल्बणं॥ यद्दौःशील्यात्स राजर्षिर्निर्वि
ण्णो निरगात्पुरात्॥१८॥ यमङ्ग शेपुः कुपिता वाग्वज्रा मुनयः किल॥ गतासोस्तस्य भूयस्ते ममन्थुर्दक्षिणं करं॥१९॥ अराजके तदा लोके दस्युभिः
पीडिताः प्रजाः। जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः॥२०॥ विदुर उवाच॥ ॥तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः॥ राज्ञः कथमभूद्दुष्टा
प्रजा यद्विमना ययौ २१

पेत्यन्वयः। मनोर्महिषी नड्वला विरजान्नादीन् स्वान् सुतानसूतेत्यन्वयः॥१५॥१६॥ अङ्गस्य या सुनीथा नाम पत्नी सोल्बणमसुरप्रकृतिं वेनं सुषुवे इत्यन्वयः॥१८
यं वेनं। अङ्ग विदुर। गतासोर्मृतस्य॥१९॥ ततः किमभूत्तत्राह। जात इति॥२०॥ श्रवणमङ्गलत्वात्तम्मान्पतः कथितं विस्तरेणोक्तं विदुरः श्रोतुं पृच्छती
त्याह। तस्येति। यद्विमनाः यस्याः दुष्टप्रजायाः विषण्णमनाः २१

दण्डव्रतं हिंसाख्यव्रतं धारयतीति दण्डव्रतधरः। दण्डो स्त्रीत्यासनेराज्ञां हिंसायां लकुडेषु उद्दतियांदवः। तस्मिन्नृपद्दण्डासनाख्यव्रतं विभ्रति। नेतेषज्ञानलेशः स
म्भाव्यत इत्याह। धर्मकोविदा इति। २२॥ नावध्योयो नावज्ञेयः। तत्र निमित्तमाह। यदसाविति॥२३॥ यत एवं तत्त्वतस्मादक्रमहन्त्रिमित्तमस्ति एतत्तन्मे त्राएवा

किं वांहो वेन उद्दिश्य ब्रह्मदण्डमयूयुजन्॥ दण्डव्रतधरे राज्ञि मुनयो धर्मकोविदाः॥२२॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि। यदसौ लो
कपालानां बिभर्त्योजः स्वतेजसा २३ एतदाख्याहि मे ब्रह्मन्सुनीथात्मजचेष्टितं। श्रद्दधानाय भक्ताय त्वं परावरवित्तमः॥२४॥ मैत्रेय उवाच॥ ॥
अङ्गोऽश्वमेधं राजर्षिराजहार महाक्रतुं॥ नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः॥२५॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः॥ हवींषि हूय
मानानि न ते गृह्णन्ति देवताः॥२६॥ राजन्हवींष्यदुष्टानि श्रद्धयासादितानि ते॥ छन्दांस्ययातयामानि योजितानि धृतव्रतैः २७ न विदामेह देवा
नां हेलनं वयमण्वपि॥ यन्न गृह्णन्ति भागान्स्वान्ये देवाः कर्मसाक्षिणः २८ मैत्रेय उवाच अङ्गो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः। त
त्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया २९ नागच्छन्त्याहुता देवा न गृह्णन्ति ग्रहानिह सदसस्पतयो ब्रूत किमवद्यं मया कृतं ३०

हिंस्त्यन्वयः। अस्मात्रेतिहासज्ञानं नास्तीति वक्तुं न शक्यमित्यत उक्तं परावरवित्तम इति॥२४॥ सूचितमर्थं विस्तरतो वक्तुमुपक्रमते। अङ्ग इति॥२५॥ हूयमान
इत्यादि दोषादित्याद्युक्तमित्याह। राजन्निति। आसादितान्यापादितानि। अयातयामान्यगतवीर्याणि॥२७॥ हेलनमवज्ञानं॥२८॥ आहुता
आहूताः ग्रहान् हविःपिंडान् ३०

भा॰च॰
६२

राज्ञाएकछायत्तमानकर्मगुणदोषान्विविच्यतत्परिहृत्यकर्मप्रवर्त्तनायांमांचिता:सदस्यक्षत्रिभिः किंविचोद्यमवलोक्यप्रोचुरितितत्राह।नखेवेति।इहास्मिन्
जन्मनि ईदृशः दृष्टोप्रजोनपत्यइतिपदत:प्राक्तनंपूर्वजन्मार्जितमघंवालहत्यादिकामकामघमृत्तीत्पत्तुमीयते ३१।तथातस्मात्त्वआत्मानंसप्रजं
पुत्रेणसहवर्त्तमानंसाद्यकुरुततोभद्रंभवति।तत्रकउपायइतितत्राहमाद्भुरित्याह।दृष्टइति।।३२।।किंभद्रंस्यादित्यत्राह।यथेति।दिवौकसांहरेरंगत्व
त्तेनतदाश्रितत्वेनस्थितास्तनस्कथंतथत्तुष्ट्यातत्तुष्टेःस्वभागस्यादानादानयोस्तदिच्छाविनाभूतत्वाद्धुनातदिष्टलात्त्वदंसंमजसंभवतीति
भावेनाद्भुरित्याह।यद्यज्ञपुरुषइतितेनापुत्रस्यलोकोनास्तीतिप्रायिकंसद्धर्मवतोधर्मबलाल्लोकोभवत्येव।हराद्ध्याविशिष्टपुरुषोत्पत्तयेद्र

सदस्याऊचुः।।नूनंदेवेहभवतोनावद्यंमनसास्थितं।।अस्त्येकंप्राक्तनमघंयदिहेदृक्त्वमप्रजः।।३१।।तथासाद्यभद्रंतेआत्मानंसप्रजंनृप।।इष्टस्तेपुं
त्रकामानांपुत्रंदास्यतियज्ञभुक्।।३२।।यथास्वभागधेयानिग्रहीष्यंतिदिवौकसः।।यद्यज्ञपुरुषःसाक्षादपत्यायहरिर्वृतः।।३३।।तांस्ता
नूकामान्हरिर्दद्याद्यान्यान्कामयतेजनः।।आराधितोयथैवैषतथापुंसांफलोदयः।।३४।।इतिव्यवसिताविप्रास्तस्यराज्ञःप्रजातये।।पुरो
डाशंनिरवपंश्छिपिविष्टायविष्णवे।।३५

वेहविनोहृतंअंगस्यापिवालहत्यादिदोषादनयत्योकत्मतइतिज्ञायते।तदुक्तं।अनपत्योपिसद्धर्मोलोकजिन्नात्रसंशयः।।देवैरूक्तश्चपृथुजन्म
थेहविरंगस्यनोहृतमिति।।३३।।नकेवलंहरिरिष्टयापुत्रकामस्यपुत्रावाप्तिहेतुस्तत्कामेनतत्त्वदद्याप्तिरपिस्यादित्याह।तांस्तानिति।।फलोदयः
काद्धानुसारेणदृष्ट्वापिताद्दृशीतिभावेनाह।।आराधितइति।।३४।।हितमुक्तंतेस्तंकर्मभूद्भुंकिनेत्याह।इतीति।प्रजातयेसंतत्यै।शिपि
विष्टोनामपुत्रकामेष्टिदेवताहरेरूपांतरंअतरयाशिपिविष्टस्कश्चपतोदुश्चर्मरिमहेश्वरइत्यर्थमस्यहतिनिवारणायविविष्णवइति ३५
वि

छांब२

राम
६२

· म१

तस्मात्रिरुप्यपुरोडाशंता।।३६।।अंजलिनोदनमितिपाद्मा।।३७।।पुमांसंसूतइतिपुंसवनंपायसंमुपाहृत्रेप्राप्तेअप्रजापुत्ररहिता।।३८।।वालएवकौमार
वयाएवाअधर्माचीनोदुर्वोयस्यसतथातं।मातामहमातुःपितरंमृत्युनामानंसुरंवरमनुव्रतइतियत्तेनसपुरुषोधार्मिकोधर्मविरुद्धकर्मेष्टांक्षेद्भृदि
त्यनेनविशेषणेनधर्मांशोद्रवोमृत्युरन्योस्तीतिरहस्यमवगंतव्यं।तदुक्तं।मृत्युर्देवोयमभ्राताचेनमातामहोसुरइति।।३९।।किंनामायंवालइत्यतस्तत्त्वामौनु
सतंनामलोकाअसंस्वनित्याह।।सत्राशासनइतिविनयतिपीडयतीतिवेनःपीडावेनेतिचधातोर्वेनोसौपीडनादभूदितिवचनात्।।असाधुर्दुर्जनः।।४०
आक्रीडेक्रीडास्थानेपशुमारमितिलुप्तोपमं।यथापशुमारोगोघ्नंक्रीडालस्तथेति।।४१।।स्वत्रासनमस्त्वेघावर्त्तमानंपुत्रमवलोक्यपित्राविमना

तस्मात्पुरुषउत्तस्थेहेममाल्यमलांबरः।हिरण्मयेनपात्रेणसिद्धमादायपायसं।।३६।।सविप्रानुमतोराजागृहीत्वांजलिनोदनं।।अवघ्रायमु
दायुक्तःप्रादात्पत्न्यातउदारधीः।।३७।।सातत्पुंसवनंराज्ञीप्राश्यवैपत्युरादधे।।ततःकालउपावृत्तेकुमारंसुषुवेप्रजा।।३८।।सवालएवपुरु
षोमातामहमनुव्रतः।।अधर्मांशोद्भवंमृत्युंतेनाभवदधार्मिकः।।३९।।सशरासनमुद्यम्यमृगयुर्वनगोचरः।।हंत्यसाधुर्मृगान्दीनान्वेनोसावि
त्यरौज्जनं।।४०।।आक्रीडेक्रीडतोवालान्वयस्यानतिदारुणः।।प्रसह्यनिरनुक्रोशःपशुमारममारयत्।।४१।।तंविचक्ष्यखलंपुत्रंशास
नैर्विविधैर्नृपः।।यदानशासितुंकल्पोभृशमासीत्सुदुर्मनाः ४२ प्रायेणाभ्यर्चितोदेवोयेप्रजागृहमेधिनः।।कदपत्यभृतंदुःखंयेनविंदंतिदुर्भरं
४३ यतःपापीयसीकीर्तिरधर्मश्चमहान्नृणां।।यतोविरोधःसर्वेषांयतआधिरनंतकः ४४ राम राम

रीतितत्राह।तंविलक्ष्येति।दुरत्नोमनदुःखयोरित्यनेनत्सुष्टुदुःखितमनाः।।४२।।पालापाद्भुक्वेचावगम्यतइत्याह।प्रायेणेति।येगृहमेधि
नोप्रजाएवंदुर्भरंकदपत्यकृतंदुःखनविंदंतितैःसर्वैरपिप्रायेणदेवोनारायणोभ्यर्चितइत्यन्वयः।।४३।।अपकीर्त्यादिदोषहेतुत्वात्पंडि
तोनरकत्राणहेतुत्वात्पुत्रंपुत्रइतिवहुमाननंकरोतीत्याह।यतइति ४४

मू॰स॰४

भा. च.
६३

४५ न केवलं दुःखमेव कदपत्यात् किंतु विवेकिनः प्रयोजनं चास्तीत्याह। कदपत्यमिति। क्लेशसमूहेनातु नॄणां मर्त्यो स्वगृहान्निर्विद्योतेतियस्मात् द्विते व-
णात् दिक्षु चापदात्सतोपत्यात् कदपत्यं वरं वैराग्यहेतुत्वात् साधुमन्य इत्यन्वयः॥ हलंताद्दिपिटापंचेति वचनाडुपंचेति र्दपंसाधु॥ ४६॥ न वेनैर्शोकात्मरणं
देशांतरगमनं वा स्यात् तत्र किमनेनकारीतितत्राह। एवमिति। महान्तुदयो महती विभूतिस्तस्याउदयः उद्दकोय स्मिंस्तत्रधृष्ट्या तस्मात्। ईदृस्तीनांक-
नयोरिति धातोरनुपलक्षितो दृष्टः॥ ४७॥ जनादौ सन्तो दूरं गतो वेति संशयेदूयोरेकं निश्चित्य किमकार्षुस्तदीया इति तत्राह। विज्ञायेति। विचिकुयुः
विचितवंतः॥ हृदिनिगूढं पुरुषं हरिं॥ ४८॥ अविप्राप्तवंतः किमकुर्वन्नित्यपेक्षायामाह। अलक्षयंत इति। पौरव विदुर। साश्रवः बाष्पसहिताः। साधीय

न. ८

कस्तं प्रजापदेशं वै मोहबंधनमात्मनः। पंडितो बहुमन्येत यदर्थाः क्लेशदा गृहाः॥ ४५॥ कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात्। निर्विद्येत गृहान्म-
र्त्यो यत्क्लेशनिवहा गृहाः॥ ४६॥ एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय महोदयोदयात्। अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसु-
वं प्रसुप्तां॥ ४७॥ विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः॥ विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः
४८॥ अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीं॥ ऋषीन्समेतानभिवंद्य साश्रवो न्यवेदयन्पौरव भर्तृविप्लवं॥ ४९॥ इति श्री-
भागवते महापुराणे चतुर्थस्कंधे त्रयोदशोऽध्यायः॥ ॥मैत्रेय उवाच॥ ॥भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः॥ गोप्तर्यसति वै नृणां
पश्यंतः पशुसाम्यतां॥ १॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः॥ प्रकृत्यसंमतं वेनमभ्यषिंचन्पतिं भुवः २

सो विष्णुयाजिनोंगस्यैवं दुष्टपुत्रोत्पत्तिस्तन्निमित्तेन विपरस्थ्याथमभूदिति। स्वोधग्रन्नयत्स्वकर्मासौ बालहत्या कृतेपुरा॥ अतो दुष्टोऽभवत्पुत्र इ-
ष्टो विष्णुरतः स्थ्रिरिति॥ इति त्रयोदशः॥ ॥ गुरुवाक्यस्य द्रयानुतिष्ठता मिहामुत्र श्रेयः स्यादकुर्वताम नर्थः स्थ्यित त्रिद्वष्यते स्मिन्न-
ध्याये॥ त्रयोदशे भृग्वादिभिः क्रियमाणे राज्येवेनस्याभिषेकं चक्रिरे। भृग्वादय इति। क्षेमं नाप्राप्तरक्षणं पालनमिति यावत्। पशुसाम्यतां पशु-
साधर्म्यं सांकर्यं॥ १॥ हे वीर प्रकृत्या स्वभावेन मात्यादिभिः राज्या संमतमननुचितं २

राम
६३

रा. ९

अस्मिन्नभिषिक्ते सत्ये कोपगुणेण ग्रौढ्यस्यस्यादित्याह। श्रुत्वेति। निलिल्युर्निलीनाः॥ ३॥ पालके राज्ञि विहृवेग्रगाभवंतितैनकोगुण इति किं विशिष्टो-
ऽयं तत्र तिचेत्। सत्यमस्य सर्वे दोषा एव संतीति वक्तुमुपक्रमते। स आरूढेति॥ समारूढं नृपस्थानं सिंहासनं येन स तथा। मंत्र्यमात्यहृतराज्यकोशदुर्ग-
जनपदस्थैरा हितोष्टाभिर्वांछिमादिभिर्वाष्टविभूतिभिरुन्नद्धस्तब्धः महत्कृत्या नाधाचारशून्यः॥ ४॥ अतो लोकस्य किमवद्यमभूत्तत्राह॥ एवं मदांध

श्रुत्वा नृपासनगतं वेनमत्युग्रशासनं॥ निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ३ स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः। अवमेने महा-
भागान्स्तब्धः संभावितः स्वतः ४ एवं मदांध उत्सिक्तो निरंकुश इव द्विपः॥ पर्यटन्रथमास्थाय कंपयन्निव रोदसी॥ ५॥ न यष्टव्यं न दातव्यं न होत-
व्यं द्विजाः क्वचित्॥ इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः॥ ६॥ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं॥ विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः॥ ७
अहो उभयतः प्राप्तं लोकस्य व्यसनं महत्॥ दारुण्युभयतो दीप्ते इव तस्करपालयोः॥ ८॥ अराजकभयादेष कृतो राजातदर्हणः॥ ततोप्यासीद्भयं त्वद्य कथं
स्यात्स्वस्ति देहिनां॥ ९॥ अहेरिव पयः पोषः पोषकस्याप्यनर्थकृत् १० वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः॥ ११

दांतो उत्सिक्तो दृप्तः ५ हे द्विजाः ६ तत्र निग्रहानुग्रहसमर्था मुनयः किमकार्षुरिति तत्राह। वेनस्येति। सत्रिणः यज्वानः ७। उभयतः तस्करपालनयोः दारुणी-
ति सप्रमीषष्ठ्यर्थे दारुण उभयतो दीप्ते वह्नौ ८। दारुण इव उभयतो व्यसनं कथमत्राह। अराजक इति। न तस्य राज्यस्याहर्णो योग्यो भवतीति अतदर्हणः॥
अयमप्यस्माकमनर्थकर इत्याकूरित्याह। अहेरिवेति॥ १०॥ युष्माभिः कथं पोषित इति तत्राह। प्रकृत्येति। सुनीथागर्भसंभवत्वात्। अस्माभिः प्रजापालो नि-
रूपितः सन् प्रजा जिघांसति वै हंतुमेवाकांक्षते ११

तर्हि किं क्रियते तत्राह। तथापीति। प्रकृत्या खल त्वादस्मदुक्तं न शृणोति यद्यपि तथापीति। सांत्वने हेतुमाह। नास्मानिति। युष्माभिस्त्वन्याग्रहणे किं बाधकं करिष्य तीत इत्याशंक्यातः सांत्वनैर्व्यर्थमत्राह। तद्विद्भिरिति। असद्वृत्त इति तस्य दोरात्म्यं विद्भिः॥१२॥ एवं जिज्ञासमानाः कालक्षेपं नाकुर्वन्नित्याह। एवमिति।१३ ५

तथापि सांत्वयामोऽमुं नास्मांस्तत्पातकं स्पृशेत्। तद्विद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः १२ सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत्। लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा १३ एवमध्यवसायैनं मुनयो गूढमन्यवः। उपव्रज्याब्रुवन्वेनं सांत्वयित्वाथ सामभिः १४। मुनय ऊचुः॥ नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भो। आयुःश्रीबलकीर्तीनां तव तात विवर्द्धनं १५ धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः। लोकान्विशोकान्वितरत्यथानंत्यमसंगिनां १६ स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः॥ यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति १७ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः रक्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते १८ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः॥ इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमात्मकैः १९ तस्य राज्ञो महाराज भगवान्भूतभावनः। परितुष्यति विश्वात्मा तिष्ठतो निजशासने २० तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे। लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः २१

नृपे॰ग॰

आनंत्यं मोक्षं। असंगिनां फलाभिसंधिरहितानां १६ स धर्मो मा विनश्येत्। नष्टो न स्यात्। बाधकमाह। यस्मिन्निति। अवरोहति भ्रश्यति॥१७॥ को सौ धर्मः येन लोकान्प्राप्नोतीति तत्राह। इत्याह। राजन्निति। असाधवो दुर्जना मात्याः सचिवास्तेभ्यः साधून्निधु तिसे वेभ्यः सज्जनेभ्यो ऽपि प्रमानितयमिथानां यथा स्वादृश्यया ग्येत्वयी प्रज्ञास्वार्थानतिक्रमः इति वचनात् यथा योग्यं षष्ठांशं बलिं करं १८ २० तत्तुष्ट्या किं फलं स्यादित्यत्राह। तस्मिन्निति॥२१

इतोऽपि श्रीनारायण एवेज्यत इत्याकूरित्याह। तं सर्वैति। सर्वे शब्दः प्रत्येकमभिसंबध्यते सर्वो लोका नमरान्सत्त्वान्संगृह्णातीति सर्वलोकामरयज्ञसंग्रहस्तं त्रय्यात्रिभिर्वेदैः प्रतिपाद्येषु मुख्य प्रतिपाद्यत्वात्त्रयीमयस्तं। सर्वद्रव्याणां भगवद्विषयत्वाद्दुर्द्रव्यमयस्तं। अनेनैव तपोमयमिति व्याख्यातं। सर्वसंग्रहणाद्विशु सर्वसंग्रह उच्यते वेदस्य तत्स्यवकत्वात्प्राधान्यतः त्रयीमयः। स एतद्विषयत्वेन मुख्यः सर्वमस्य तत इति वाक्यं चात्र मानं। एवंविधं श्रीहरिं विचित्रैर्यज्ञैः ते तव भवाय भद्राय यजतः स्वादेशान्स्वस्य तव आदेशाज्ञपदेशोऽप्यस्मोयज्विभ्यस्तेस्वा देशास्तान्। स्वस्य देशानिति सर्जीनं दानं येनतेतथा। विप्रास्त्वमनुरोद्धुमनुकूलीकर्तुमर्हसी

तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं। यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि २१ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः॥ स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं तद्धेलनं नार्हसि वीर चेष्टितुं २२ वेन उवाच बालिशा बत यूयं वा अधर्मे धर्ममानिनः। ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते २३ अवजानंति ये मूढा नृपरूपिणमीश्वरं॥ नानुविंदंति ते भद्रमिह लोके परत्र च २४

त्यर्थः। भवो भद्रे ह हे प्राप्ता वितियादवः॥२२॥ इंद्रादि विषये ण स्वर्गादि फलप्रदेन यज्ञेन हरिर्यजनं कथं संगच्छते प्रस्तुतत द्वियोतेनानर्थ एव स्यादित्यशंक्यं द्रष्टयो विष्णोर्मुख्यसंनिधानया नत्वेन तद्विषयातत्प्रीत्या प्रीता यजमानाय याद्य श्रीह्यतत्त द्विरूपं त्यन्यथा यजनेन तदवज्ञया नर्थमेव प्रयच्छतीत्याकूरित्याह यज्ञेनेति। विष्णोः संनिहितत्वात्तु सर्वे देवा हरेः कला इति चरनान्मत्स्यादिवत्कला न भवंतीति ज्ञातव्यं। कलयं वश्यन्नष्टीति धातोरात्मनि हरेः संनिधानं वध्नंतीति कला इत्यर्थः॥२३॥ आर्षीणं वाक्यामृतं सिरसि वज्रपातोपममिव मन्यमानो मूढाद्वेषाभिसंधिर्वेनः प्रतिवक्तीत्याह। वेन इति॥२३॥ स्वस्य बालिशत्वमुपपादयति अवजानंतीति २४

भा.च.
६५

पुनरपि वेनः शापयोग्यापराधमात्मनि कुर्वन्नुवक्ति। कोऽयमित्यादि। इति ॥२४॥ अस्मदुक्तिविषयो नाम्ना विष्णुः सृष्ट्यादिकारिणः सदा ज्ञानियन्ता विरिंचादयस्तत्वरिवारस्तु ताइति मुनीति मन्मूर्धातएवैते विष्णुप्रभृतयो मय्येव संनिहिता अतस्तत्र तद्वृत्तिमत्वादहमेवाखिलोत्तमरूपतम इत्याह। विष्णुरित्यादिना ॥२६॥ वरशापयो देहेऽप्रभवः सर्वदेवमयइत्युपसंहारः ॥२७॥ २८। किंफलितं तत्राह। इत्थमिति। तेषां नृपीणां याञ्चां ॥२५॥ आत्मनि व्यापसामर्थ्ये तु प्रसति कर्णौ पिधाय निर्याणम नुचितमिति पस्पंतः शापा सर्वेभाविकोपाय धर्मप्रयत्नहरन्नित्याह ॥ इतीति ॥ इति इत्थं प्रकारवचनः ॥ हव्यविषयायां याञ्चायां ॥३०॥ कल्पेत्याह। हन्यतामि

केऽयं यज्ञपुरुषो नामयत्र वो भक्तिरीदृशी ॥ भर्तृस्नेहविदूराणां यथा जारे कुयोषितां ॥२५॥ विष्णुर्विरिंचो गिरिशश्चेन्द्रो वायुर्यमो रविः ॥ पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः ॥२६॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः ॥ देहे तिष्ठन्ति नृपतेः सर्वदेवमयो नृपः ॥२७॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः ॥ बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक्पुमान् ॥२८॥ मैत्रेय उवाच ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ॥ अनुनीयमानस्तद्याञ्चां न चक्रे भ्रष्टमंगलः ॥२९॥ इति तेऽसत्कृतास्तेन द्विजाः पंडितमानिना ॥ भग्नायां भव्ययाञ्चायां तस्मै विदुर चुक्रुधुः ॥ ३०॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः ॥ जीवन्जगदसावाशु कुरुते भस्मसाद्ध्रुवं ॥३१॥ नायमर्हत्यसद्वृत्तो नरदेववरासनं ॥ योऽधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ॥३२॥ को वैनं परिचक्षीत वेनमेकमृते शुभं ॥ प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ३३

तिजीवंश्च जगद्भस्मसात्करोति ॥३१ २ निंद्यदोषसद्भावाद्विवर्जनीतिकिं नस्यास्तत्राह ॥ को वेति ॥ किं निरवद्य इति कृतेरयुभोयमेवनिंद्यदोषं कारतिभावः यस्यहेतेरनुग्रहस्य भाजनं यस्या अनुग्रहो यस्मिन्स्य यदनुग्रहः स एव भाजनं वा तदनुग्रहरहितत्वादयं हंतव्य इत्यर्थः ॥ अत्र को धर्वंचनयोः क्रमका रणमेकोकं दृष्ट्वास्मानं धर्ममापये दितितुध्या ह्यभिमितिज्ञातव्यं ॥ ३२ राम

राम
६५

दद्र २

अरेत्युक्तिः श्रोत्रं हेण श्रोत्रद्रुः सहेति प्रकारांतरेणातं जघ्नुरित्याह इत्थमिति। एवं मारितो वेनः कलोकभवाय तपीणां तन्मत्रूपकत्वात्कितस्यानुष्ठाता रक्षन्मतं निरासि नः पृथ्वोश्चाद्विप्रभावित्वा दुत्सन्नप्रायमिति चवक्तुं नयुक्तं तत्र तत्र हृत्रूपमानत्वादितिसर्वं अर्हं ब्रह्मेति वैन बकोध्याय तन्नाथ धरं तमः ॥ तद् इत्तो महीव्याप्तो भेयी रव्यापयतो निरुं ॥ असुराराद्धसाध्वीवपिराचार्सप्रत्वेद्धिस्थिता ॥ भूमोत तस्थ्य तुना सर्वं निरस्तं महितात्मना ॥ पुनः कलियुगे प्राप्ते अष्टाविंशतिमे मुनो ॥ चैवस्व तस्य समये जाताः कोधवशा भुवि ॥ रव्यापयंति दुरात्मानो मणिमांस्तु रुः सरः ॥ इत्यनेन निरस्तमित्यतो ग्रंथबाहुल्यादन्यत्र विस्तृतत्वाच्च ज्ञातुमन स्य हितत्वाच्चन प्रपंचिताः मितिज्ञातव्यं। तेषां क्रोधवशानां पुरः सरोऽयं गंतामुख्य इत्यर्थः ॥ ३२॥ वेनस्य पुत्राभावाद्रक्षीणं न कोऽपि तु रोहितस्य धीमस्त्रित

प्रति ३

श्रि २

इत्यध्यवसिता हंतुमृषयो रूढमन्यवः ॥ निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया ३५ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं ॥ सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३६॥ एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः ॥ हुत्वाग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ३७ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥३८॥ एवं मृशंत ऋषयो धावतां सर्वतो दिशं ॥ पांसुः समुत्थितो भूरि चोराणामभिलुंपतां ३९

स्य भीतत्वात्प्रेतकार्यमंत्र कर्तुर्भावात्पुत्रकलेवरं किं कृतमत्राह। ऋषिभिरिति। विद्यायोगेन मंत्रौषधादि विद्योपायेन। शोचतीत्यनेन माता तृस्वभावो दर्शि तः ॥३६॥ एवं वेनस्याल्पावलादन्यमेकं राजानं न चक्रुस्तद्रूपाभावात्स्त्रीमात्रु कलेवरं रक्षन्नयः किमकुर्वन्निति पारिशिष्टिताकांक्षायां परिहरन्नु तरक था प्रसंगमाह ॥ एकदेति ॥ सरस्वत्नाम्नो नद्याः सलिलेष्वाप्लुताः कृतस्नानाः सेतांभ्युहितस्य विष्णोः कथां यद्वा चक्रुः ॥३७॥ तदा महोत्पातान्वीक्ष्या हुरित्यन्वयः ॥ किमाहुरिति तत्राह। अपीति अपि त्वा दस्युभ्यः भवदित्य नेनान्वयः अनाथाया इति हेतुगर्भविशेषणाद भद्रं संभावितमिति प्रावोचन्नि त्यर्थः ॥ बहुलुंपतां चोराणां सकाशाद्भूमेः पांसुः समुत्थित इत्यन्वयः ३९॥ जं.

भा॰च॰
६६

ततः किमभूदत आह। तदुपद्रवमिति। तत्र दा लोकस्य चोराणामुपद्रवमाज्ञायैवं निश्चित्य तस्य वेनस्य महीपतेरूरुं तरसा ममन्थुरित्यन्वयः। सुष्मतोऽप्येत त्रिवारका न संति किमिति तानटस्थबोद्ध परिहरतीत्याह। चोरप्रायमिति। तद्दोषदर्शिनोऽपि यद्यधर्मकर्तारं न वारयंति तर्हि सदोषत्वात् न पिस्पष्टोऽपीति दोषयत्रपतः। किं च यतस्तत्र किं च शक्तास्तन्निवारणे समर्था अपि लोकान्नावारयन् ततः पीड्यमानाः ततस्तद्दोषदर्शिनोऽपि। तद्धेतुः सामान्यमुक्तास्ति विशेषस्य दोषाभिवद्माह इत्याह। ब्राह्मण इति। ब्रह्मेति भाव प्रधानो निर्देशः। न यदर्वीक्षुचोरान्नावारयन्निति यदत इत्यर्थः ४१। सामान्यमुक्त्वातिविशेषस्य दोषाभिवयमाह इत्याह। ब्राह्मण इति। ब्रह्मेति भाव प्रधानो निर्देशः। दुष्टेषु पदद्वैणदीनानां मुपद्रवं दृष्ट्वा समुपेक्षकस्तु स्त्रीश्रमः स्यात्तस्य ब्रह्म तपो ब्रह्मरंपस्रवते नश्यति। तन्निस्रयंति भिन्नेति तस्मादस्माभिर

तदुपद्रवमाज्ञाय लोकस्य वसु लुंपतां॥ भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसतां॥ ४० चोरप्रायं जनपदं हीनसत्वमराजकं। लोकान्नावारयं छक्ता अपि तद्दोषदर्शिनः ४१। ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः। स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ४२ नांगस्य वंशो राजर्षेरेष संस्थातुमर्हति। अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ४३ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः॥ ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः ४४ काकाकृष्णोऽतिह्रस्वांगो ह्रस्वबाहुर्महाहनुः॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः ४५ तं तु ते वनतं दृष्ट्वा किं करोमीति वादिनं। निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ४६

नुपेक्षणीयमिति भावः ४२ अमोपीत्याह इत्याह। नांगस्येति। संस्थातुं नाशं प्राप्तुं कुत इत्यत आह अमोघेति ४३ यथामृतमंथने कालकूटस्योत्पत्तिरादौ तद्वदूरुदेवात्तत्रापीति भावेन आह तत्रेति। तत्र मथ्यमाने सति बाहुको वामनः। बाहुकत्वं तु ह्रस्वदीर्घत्वं ह्रस्ववामनबाहुकादयस्त्वभिधानात् ४४ विशिनष्टि काकेति। महाहनुः स्थूलकपोलः निम्ननासाग्रं यो नत घ्राणशिराः ४५ ततो निषीदेति वचनात् ४६

राम
६६

सकरीतं विशिनष्टि योपाहरदिति। अनेन वेनस्य तत्कल्मषं विभक्त इति ज्ञायत इति तथाहि। तामसो राजसः सात्विकस्तामसस्तामस इति तत्र तामसांशो निषादः राजसांशस्तु गर्भस्थस्तस्यांशः पृथुः। तामसतामसांशो वेनः स्वयं मृतो भोगतः। तदुक्तं तामसांशो वेनदेहस्थः सत्वांशः पृथुस्तामसगात्। रजोंऽशस्तु दिवं प्राप निषादस्तामसो भवत्। स्वयं वेनश्चतुर्थस्तु महातमसि पातित इति। रजोंऽशो वेनोदिवंगत इति केनाप्युक्तं पतत्विति चोच्यतापन्नापीट्सु पृथुर्जातो निषादो वेनदेहतः। यस्मात्तस्मात्पृथोः पुत्राद्ध्रुवो वेनो दिवं ययाविति तेन न परिहृतमिति ग्रंथांतरसिद्धत्वादत्र न विस्तृतं। ४७। अथ सत्वांशात्पृथोरुत्पत्तिं वक्ति। अथेति। एष विष्णोः कलेति लिंगव्यत्ययेन मत्स्यादिवत्साक्षादवतारः प्रावचसाक्षादंशोनायं किंतु विशेषावेशान्नरंशा इति वचनमिति ध्वनयति। तदुक्तं पृथुर्हैहया द्यो जीवास्तेषां विष्णोर्हरिः स्वयं। विशेषावेशात्तेषु साक्षाद्यं शाता वक्ष॥ किंस्तव्यास ऋषभ कपिलस्तत्स्वपूर्वकाः। आकृतिजेते योविष्णे

तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः॥ योपाहरज्जायमानो वेनकल्मषमुल्वणं॥ ४७॥ मैत्रेय उवाच॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः॥ बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ४८ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः। ऊचुः परमसंतुष्टा विदित्वा भगवत्कलां॥४९॥ ऋषय ऊचुः॥ एष विष्णोर्भगवतः कला भुवनपावनी॥ इयं च लक्ष्मीः संभूतिः पुरुषस्यानपायिनी ५० इति श्रीभागवते चतुर्थस्कंधे चतुर्दशोऽध्यायः

मैत्रेय उवाच। अवतरिर्हयग्रीवो दत्तात्रेयश्च तापसः। स्वयं नारायणस्तेन रामात्मवि मेदिनः। ता कतो स्वरूपतश्च ब्रह्मणोऽपि कथं चनेति। इयं च लक्ष्मीः संभूतिर्विष्णोरनुपायिनी साक्षादंशा इति तथास्य ततः पतिस्त्वायोगादिति बुद्धिव्यामोहो न कर्तव्यः। तत्र संनिहिता श्रीश्च यत्र संनिहितो हरिः॥ नास्य संनिधिमात्रेण रमा पत्नीत्वमाव्रजेत्॥ सा ह्यादेव तु साक्षाच्च हरेः संनिहितः क्वचित्। गोप्यादि रूपा भवति विपरीतं न तु क्वचित्कैरिति निर्णयक वचनात्॥ पुरुषो धातुः पुनी पुनाङ्गं वस्त्वात्मपरमात्मनोरित्यभिधानात् प्रकरणबलाच्च पुरुषपरमात्मा नित्यमपहाय न तिष्ठतीत्यभिप्रायेण। नाः पुरुषस्यानपायिनीति लक्ष्मीविशेषणवती कापि रमणी भर्तृवियोगशून्या जातेति तात्पर्यमिति॥५०॥ इति चतुर्थे चतुर्दशः॥ ॥

स॰मु
६३

श्रीनारायणचरणारविंदमकरंदनिषेविणां महतां पुरुषाणामिहागतानामिमता अपिमर्गाववदिच्छयासकलाः संपदो भवंतीति निरूप्यतेऽस्मिन्नध्याये। पृथुकथाक
थनव्याजेन तत्रादौ विप्राणां पृथुप्रशंसाप्रकारं वक्ति छात्रे इति। तुशब्देन भेदस्वादिनाहपृथोर्हरेश्च महान्भेदोऽस्तीति सूच्यते एतदर्थद्योतकप्रमाणसद्भावात्तथाहि
कं। ब्रह्मणापनं ते गरुडे रुद्रे कामे हरा चीयतो॥ अनिरुद्धे मनौ चैव पृथौ चक्रकृतवीर्ययो। नारदे देवमाद्वे शुविशेषात्संनिविर्हरेः। सुदर्शनादिषु श्रेव पृथ्या संनि
हितो हरिः। नरलक्ष्मणयोर्बलभद्रे च विशेषस्यांशः प्रकीर्तिता॥ तथा भरतशत्रुघ्नौ चक्रशंखावुदाहृतौ। प्रद्युम्नश्च कुमारश्च स्कंदः कामांशकाः स्मृताः
ति। वैन्ये पृथौ संनिहितो राजरूपी जनार्दन इति विशेषवचनेनायं वैन्यः पृथुः श्रीनारायणांशो न्यस्तथा कश्चित्पृथुनामा तदेव्यादिति वाक्यानि निर्मू
लितेति ज्ञातव्यं अत्रास्मिन्पूर्वराज्ञां गणनसमये प्रथमः यशः प्रथयिता अतः प्रथयितृत्वात्पृथुर्नाम महाराजेत्यन्वयः चूप्रत्ययाभावश्छांदसः

विप्रास्तु॥ अत्र तु प्रथमो राज्ञां पुमान्प्रथयिता यशः॥ पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः॥१॥ इयं च देवी सुदती गुणैर्भूषणभूषिता। अर्चि
र्नाम वरारोहा पृथुमेवावरुंधती॥२॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया॥ इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी॥३॥ मैत्रेय उवाच॥ प्रशं
संति स्म तं विप्रा गंधर्वप्रमुखा जगुः॥ मुमुचुः सुमनोधाराः सिद्धा नृत्यंति स्वःस्त्रियः ४ शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि॥ तत्र सर्व उपाजग्मु
र्देवर्षिपितॄणां गणाः ५ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः। वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः॥ पादयोरविंदं चास्मिन्मेने हरेः कलां।
यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः ७

तनाथेः १ सुदती शोभमानदंता अर्चिर्नाम गुणैरर्चितत्वाद्रूपेणोज्ज्वलितत्वाच्च। अर्चिर्भा ज्वालेत्यभिधानं। वरो वरणीयः आरोहो नितंबो यस्याः
सा तथोक्ता। अवरुंधती पतित्वेन स्वीकुर्वाणा भविष्यतीत्यर्थः॥२॥ एषः पृथुः साक्षाद्धरेः साक्षादंशः पृथोर्यो जातः तस्य ज्ञाति सदृशजातिरूपेण सं
निहित इत्यर्थः। तदुक्तं। राजरूपी जनार्दन इति। एतो हरेः पृथौ संनिधानविशेषात्तदंशत्वेन तस्मा छिम्पोपितया वचनमित्यस्मिन्नर्थे हि शब्दः। हि
हेतावव धारणे इति यादवः। अवधारणार्थत्वेन स्मृतिविरोधः॥६॥ गंधर्ववरादयस्तव द्विजप्रशंसासमये गानादिकं चक्रुरित्यन्वयः ४।५ त
त्र देवादिविशिष्टान्ब्रह्मेति॥ तस्मिन्पृथौ संनिहितां हरेः कलां मेन इत्यन्वयः ७ राम

एवं प्रशस्य ब्राह्मणैः किमकारीति तत्राह तस्येति। अभिषेकसाधनानि स्वयं संपादितानि किं यान्यैरित्यत आह अभिषेचनिकानीति॥८॥ तत्रोपायनानि कश्चाजह्रुरिति त
त्राह सरिदित्यादि॥९।१०॥ न केवलं सरिदाद्य उपायनं ददुः किं त्वन्ये लोकपाला अस्योपीत्याह तस्मा इति॥११॥ तस्य हरेः पत्नी। लक्ष्मीः। नाम्ना ऋतं च द्वंद्वं लष्टा

तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः। आभिषेचनिकान्यस्मै आजह्रुः सर्वतो जनाः॥८॥ सरितः समुद्रा गिरयो नागा गावः खगा मृगाः। द्यौः क्षितिः स
र्वभूतानि समाजह्रुरुपायनं ९ सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः॥ पत्न्यार्चिषालंकृतया विरेजेऽग्निरिवापरः १० तस्मै जहार धनदो हे
मं वीरवरासनं॥ वरुणः सलिलस्रावमातपत्रं शशिप्रभं॥११॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजं॥ इंद्रः किरीटमुत्कृष्टं दंडं संयमनं यमः १२
ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमं॥ हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियं १३ दशचंद्रमसिं रुद्रः शतचंद्रं तथांबिका॥ सोमोऽमृतमयानश्वां
स्त्वष्टा रूपाश्रयं रथं १४ अग्निराजगवं चापं सूर्यो रश्मिमयानिषून्॥ भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहं १५ नाट्यं सुगीतं वादित्र
मंतर्धानं च खेचराः॥ ऋषयश्चाशिषः सत्याः समुद्रः शंखमात्मजं॥१६॥ सिंधवः पर्वता नद्यो रथवीथीर्महात्मनः॥ सूतोऽथ मागधो वंदी तं स्तो
तुमुपतस्थिरे १७ स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान्॥ मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् १८

विश्वकर्मा रूपाश्रयं रथं॥१४॥ योगमय्यौ अणिमादियोगसाधने॥१५॥ अंतर्धानं महदृश्यतां आत्मजं आत्मनो जातं॥१६॥ रथवीथीः र
थमार्गान् प्रथयात्मविद्यां राजानिषेव्य इति भावेन सूतादीनामुपस्थानप्रकारं वक्ति सूतोथेति॥१७ पृथोर्निरहंकारत्वप्रकट
नाय वक्ति स्तावकानिति। मेघनिर्ह्रादः स्तनितमेघध्वनिवत्सुनिर्ह्रादो यस्याः सा तथा तया १८

भा॰ च॰
६८

हे सूत हे मागध योऽपृतां स्तुतिं प्रयुंजानानां वो युष्माकं मे षस्तवो मे किमाश्रयः कं गुणमाश्रित्य वर्त्तमानः स्यादित्यन्वयः॥ तवशौर्यादिगुणमाश्रित्य वर्त्तत इति
तत्राह लोक इति॥ अस्पष्टगुणस्याप्रकाशितपराक्रमादिगुणस्य। यद्वा यद्यहं प्रख्यातगुणः स्यां तर्ह्येष वस्तवो योज्यतां न च तथा तस्मात् किमाश्रयो योज्य
ते। यत एवमतो वो मयि प्रयुक्ता गिरो वितथा माभूवन्नित्यन्वयः॥१९॥ किमिदानीं फलितमत्राह। तस्मादिति। यस्माद्विद्यमाना विख्यातगुणा व
यं तस्मादीच्यवाचो यूयं परोक्षे कालांतरे क्रमात् विक्रमानंतरं अस्मदुपाश्रितान्यस्मद्विषयाणि कर्माण्याश्रित्यालमत्यर्थं स्तोत्रं करिष्यथेत्यन्वयः
यद्वा कथं कारं वेदयितथास्युरस्मजिरः इति तत्राह। तस्मादिति। यतो वयमप्रकाशितगुणास्तत्र प्रवर्त्तमानाः विषयाणामसत्वाद्वितथमालभंते तस्मा

पृथुरुवाच॥ हे सूत हे मागधसौम्य वंदिन् लोकेऽधुनास्पष्टगुणस्य मे स्यात्॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः १९॥ तस्मा
त्परोक्षेऽस्मदुपाश्रितान्यलं करिष्यथ स्तोत्रमपीच्यवाचः॥ सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः २०

नि॰

इदं परोक्षे वास्मन्निकटे स्म दूरप्रदेशे वर्त्तमाने योऽहरिस्तस्यैव वाचो हरेराश्रिता निचरितान्यंगीकृत्य स्तोत्रमलं करिष्यथ यथा भूषितं कुर्वंतु अन्य
था दूषितमेव स्यादतस्तस्य गुणानां नित्यत्वात् तद्विषया युष्मज्जिरः सफलाः स्युः अविद्यमानकथकाः वंदिनः यत्किंचित् इति युष्मद्वाचोऽपि परि
पिपरिहर्ष्यंते स्युरिति हृतः स्यादिति। भाविनो गुणान्स्मृत्यस्त्वमिति तत्राह। सतीति। उत्तमश्लोकगुणानामनुवादे सत्यप्यहिते पि सभ्याः
तमस्तवं तं जुगुप्सितमिति न स्तवयंति॥ आत्मप्रशंसां मरणमिति स्मृतेः २०

राम
६८

वयं तत्र तत्र प्रभुस्तावत्तत्कुले लब्धोऽस्मि हेतुः लक्ष्यमित्याशंक्य तत्पूर्वं च विषयं न विद्वद्विषयमित्याशयेनाह। महद्गुणानिति। अनभिव्यक्तत्वेन वाल्पे सतो विद्यमा
नानपि महतो गुणानभिव्यादीनां महदादिगुणानात्मनि कर्त्तुमिच्छन् प्रकाशयितुकामः को विद्वान् स्तावकैर्वा वंदिभिः स्ववचनेन को पात्रयति यः कथंतन्मूर्खं
विषयेऽहमभूदिति तत्राह। सवाइति। यदुक्तं। हरिविषयं स्तोत्रमलंकरिष्यथेति तद्गुणस्य दृष्टस्तोत्रं निर्गुणो हरे कथं संगच्छते तथा लेवास्मज्जिरां चैतत्स्यात्सुलभस्या
दिति तत्राह। सत्तीति॥ उत्तमश्लोकस्य हरेर्गुणानामनुवादे सति स्तोतॄणां पापहरत्वेन प्रशस्ते। सभ्याः पंडिताः। चिरण्मूत्रपूर्णं मदुपेति कान्येति जुगुप्सितमात्म॥

महद्गुणानात्मनि कर्त्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि॥ तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद २१ प्रभवो ह्यात्मनः स्तोत्रं जु
गुप्संत्यपि विश्रुताः॥ ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितं॥२२॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् २३ इतिश्री भागवते महापुराणे चतुर्थस्कंधे पंचदशोऽध्यायः॥ ॥

नं न स्तावयंतीत्यन्वयः॥ सम्यक् वक्ता पितथाविधः किं न स्यादितिशंकमानो मूर्ख एवेति भावेनाह। महद्गुणानिति। आत्मन्यसतो महतो गुणान् गणनीयान्महतो महदी
कानिति। क्रतिसिद्धस्य हरेर्गुणानौदार्यादिकानात्मनि कर्त्तुमिच्छंस्तावकैः को विद्वान् स्तावयते अपि परेणोक्तं जुगुप्सितमित्यनुकर्षति किमित्याक्षेपइत्यतो
लोकापवादविषयत्वादित्याशयेनाह। सवाइति॥२१॥ विर्स्रतगुणः प्रभवोऽप्यात्मनस्तत्स्तोत्रं जुगुप्संतिकिमुतवयमितिभावेनाह। प्रभवोपीति। विद्यमानगुणास्स
द्व्यस्तोत्रं प्रत्यक्षप्रमितं पारमार्थिकमेव जुगुप्सितमपि निंदंतीत्यर्थः॥२२॥ वरीमभिर्वरणीयैः श्रेष्ठैरित्यर्थः॥ २३ इति चतुर्थे पंचदशोऽध्यायः॥

पृथुस्तुतिव्याजेन हरेर्भक्त्यवतारार्थं तन्माहात्म्यं निरूप्यते स्मिन्नध्याये। नन्वत्र सूतादयस्तत्स्तौ पृथुना निवारिताः अन्ये के स्तोतारो येन तत्र स्तुत्वा हरेर्भक्त्यवतार्यतद्गुणास्त्वंकत्व
मुनिप्रेरितास्त एव तुष्टुवुरिति तत्स्तुतिप्रकारमुपक्रमते। इति ब्रुवाणमित्यादिना॥१॥ वयं स्तोष्याम इति प्रारंभ एव श्रेयान्न तु तत्र समर्था इत्याह। नालमिति। अलं
समर्थाः पृथुसंनिहितश्रीहरिमहिमसरस्वत्वादिति भावः नोऽवतीर्य इतियो देवश्रेष्ठः श्रीनारायणो मायया भक्त्यानुकंपेच्छया वततार तस्य वेनांगजत्वेन स्वांशात्स्वयं वा जन्म तस्य
अतस्तत्पगमनमिति भातो विरोधः संनिहितत्वे न प्राप्तस्य तत्त्वयि स्थितस्य हरेः पौरुषाणि वर्णयितुं वाचस्पतीनां ब्रह्मादीनामपि धियो बभ्रमुरिति यस्मात्तस्मादयं न समर्था इ
ति किमु वर्णनीयं चन्द्राद्यैः के मुत्पर्थः। अन्यत्र देवो हरिस्तस्य देवो देवनं क्रीडनं यस्मिन् स्थितो यो सदेवदेवः पृथुः। मायया भगवदिच्छाधितमुनीच्छया वततार प्रकाशितो भूत्तस्य तेवेनस्यां

मैत्रेय उवाच॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः। तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया १ सूत उवाच नालं वयं ते महिमानुवर्णने यो देवदेवोऽवततार
मायया। वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः २ अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः। यथोपदेशं मु
निभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महे ३ एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन्। गोप्ता च धर्मसेतूनां शास्ता तत्परिपंथिनां ४

गादवयवाज्जातस्य पौरुषाणि कथयितुं वाचस्पतीनां कवीनां धियो बभ्रमुरिति यदुक्तं इति धीशब्देन मनो लक्ष्यते। मनसा वाग्रे संकल्पयति पश्चाद्वाचा व्याहरतीति
श्रुतेः वाचो भ्रमंतीति किमु वक्तव्यमित्यर्थः॥२॥ तर्हि निवर्ते तामित्याशंक्याह। अथापीति। असमर्था अपि कथामृतादृतत्वान्निवर्तितुं मनो न यातीत्यर्थः
तर्हि किं कुर्वतातित्राशंक्याह यथोपदेशमिति। सो कल्पनस्तवनाशक्तो निवर्तनं परमित्यतत्त्वं मुनिभिरिति। आज्ञोल्लंघनभीरुत्वादित्यन्मह इत्प्रपंचयाम॥
३ किं गुणविशिष्टः प्रपंच इत्यपेक्ष्यते। एष इति। तत्परिपंथिनां तस्य धर्मसेतोर्विरोधिनां ४

एषद्वौ संनिहितो हरिस्तनौ स्वदेहे तनूः शक्तिलक्षणा मूर्तीः यथाभागं विभर्ति। आभरणप्रकारं स्पष्टयति वसित्यादिना। वसु हेयं येयो येन्त्रैकैकवसु तो येमहाय
नइत्यभिधानात्। यथासंभवयोज्यं। कारादानकाले वसु धनमुपादत्ते दुर्भिक्षादौ दानयोग्यपुरुषागमनकाले विमुंचति। सूर्योपि ग्रीष्मादिकाले वसु जलमुपादत्ते व
र्षादौ विमुंचति। समो यथायोग्यं दंडादिपु प्रतपन् प्रतापं कुर्वन्नप्यन्यथा तु प्रतपन्॥६॥ उपर्याक्रमतामात्मानमतिक्रम्य वर्तमानानां सतामक्रमम् अपराधं तितिक्षति
ति सहते। हरिजननार्तानां क्षितिवृत्तिमान् भूमिलक्षणा वृत्तिर्यस्य भूमार्थमित्यर्थः॥७॥ देवेऽवर्षति अनावृष्टौ सत्यां बुभुक्षया कृच्छ्रप्राणाः क्लिष्टेन्द्रियवृत्तयः

एष वै लोकपालानां विभर्त्येकस्तनौ तनूः। काले काले यथाभागं लोकयोरुभयोर्हितं ५ वसु काल उपादत्ते काले चायं विमुंचति॥ समः सर्वेषु भूतेषु प्रत
पन् सूर्यवद्विभुः ६ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि॥ भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान्॥७॥ देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः॥ कृच्छ्र
प्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत् ८ आप्याययत्यसौ लोकं वदनामृतमूर्तिना॥ सानुरागावलोकेन विशदस्मितचारुणा ९ अव्यक्तवर्त्मैष
निगूढकार्यो गंभीरवेधा उपगुप्तवित्तः॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा १०

प्रजा रक्षिष्यतीत्यन्वयः ८ वदनामृतमूर्तिना सुखसंदर्शेन ९ अव्यक्तं सूक्ष्मं वर्त्म चारैः प्रवेश्यमार्गो यस्य स तथा। अव्यक्तानां योगिनां वर्त्म यस्येति वा। नितरां
गूढं कार्यं कर्तव्यं यस्य। उपगुप्तवित्तः सुरक्षितकोशः सुरक्षितयशा वा। वितं यशो धनं वित्तो विद्वान् विश्रुत एव चेत्यभिधानं। अनंतानां महात्म्यगुणा
नामेकधामाश्रयो यस्य स तथा। अनंतमाहात्म्यगुणा एवैकं धाम यस्य स तथा। अन्यत्र शेषस्य माहात्म्यगुणैकधामा। संवृतः आत्मा स्वरूपं यस्य स त
था १०

अग्नेः शक्तिसंनिधानस्वभावमाह। दुरासद इति ११ वायुसंनिधानफलमाह। अंतर्बहिरिति। अंतः प्राणैः। आसंचारैर्बहिश्चारिभिः। शरीरेषु पुरुषेषु प्रेमालंब नत्वादेहिनां सात्मा वायुरूपः प्राणिरूपेणोदासीनः उपरिस्थितो यो वर्तमानः सर्वमावहति यथा तथायमप्युदासीनः सर्वस्मादुपरि वर्तमानो योयथोप हृकः परितो वर्तमानं जानातीति तथेति वा ॥ १२ ॥ आत्मद्रुहो आत्मशत्रूणां सुतमप्यदंड्यं न दंडयति। दंड्यमात्मजमपि दंडयति। तत्रनिमित्तमाह। धर्मपथ

गे ३

दुरासदो दुर्विषह आसन्नोपि विदूरवत्। नैवाभिभवितुं शक्यो वेनारण्युत्थितोनलः ११ अंतर्बहिश्च भूतानां पश्यन्कर्माणि चारणैः। उदासीन इवाध्यक्षो वायुरात्मेव देहिनां ॥ १२ ॥ नादंड्यं दंडयत्येष सुतमात्मद्विषामपि। दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः १३ अस्याप्रतिहतं चक्रं पृथ्वीरामानसाचलात्। वर्तते भगवानर्को यावत्तपति गोगणैः १४ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः। अथामुमाहू राजानं मनोरंजनकैः प्रजाः १५ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः। शरण्यः सर्वभूतानां मानदो दीनवत्सलः १६ मातृभक्तिः परस्त्रीषु पत्न्यामर्द्ध इवात्मनः। प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनां १७ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदवर्द्धनः। मुक्तसंगप्रसंगोयं दंडपाणिरसाधुषु। १८

संग प्रसंगो

इति अनेन धर्मराजसंनिधानफलमुक्तं भवति ॥ १३ ॥ परमेष्ठ्यंशसंनिधानफलमाह। अस्येति। आमानसाचलात् मानसपर्वतपर्यंतमंतरं गोगणैः किरणैः। १४ चंद्रगुणसंनिधानफलमाह। रंजयिष्यतीति। यद्यस्मादथ तस्मात् १५ संधा वचः प्रतिज्ञा यामिति पादत्रयः १६ । ७ आनंदवर्द्धनः आनंदहृदिकरः मुक्तसंगोपि परमहंसेषु प्रसंगो यस्य स तथा। पूर्वं ध्वनितमर्थं स्पष्टयति दंडपाणिरिति १८

राम
७०

उक्तं किं सर्वं श्रीनारायणसंनिधानफलमित्यभिप्रेत्याह। अयंत्विति। तु शब्द एवार्थे। अस्मिन्पृथौ कलयावतीर्णः संनिहितः साक्षाद्भगवान्नत्वस्मत्प्राप्तमोत्स लिं तु नारायण एवेति तिहेतुगर्भविशेषणद्वयमाह। त्र्यधीश इति त्रयाणां मी त्राणं ड्डाद्यस्तेषामप्यधिकत्वेनेशः। स्याद्व्यधिकार्ये ईश्वर इति पादत्रयः। चेतना न्नचेतनकूटेति स्थातीति कूटस्थः स्थानदोषलेपनमस्य नास्तीत्युक्तं भवति आत्मेति गुणपूर्णात्वादात्मा। तर्हि स्थानभेदाज्ञानात्वमायातमत उक्तेतस्मिन्नितियद्ली के निरर्थकं तद्यस्मिन्हरौ प्रतीतमविद्यया हरौ बुद्ध्या रचितकल्पितं नानात्वमिव यथा पश्यंति एतदुक्तं भवति। यल्लोके खपुष्पादिकमविद्यमानं तन्मत्स्या

अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः। यस्मिन्नविद्यारचितं निरर्थकं पश्यंति नानात्वमिव प्रतीतं १८ अयं भुवो मंडलमोद याद्रेर्गोप्तैकवीरो नरदेवनाथः। आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः १९ तस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः। मंस्यंत एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरंत्यः २० अयं महीं गां दुदुहेधिराजः प्रजापतिर्वृत्तिकरः प्रजानां। यो लीलयाद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः २१ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ। तदा निलिल्युर्दिशि दिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः २२

दिमगवद्रूपे पुनः प्रतीतं नानात्वं यथा मिथ्याभूतं पश्यंति योगिनस्तथाति मदुक्तं। यल्लोके निरर्थकं तद्भगवद्रूपे पुनः प्रतीतं नानात्वं दृष्टांतेन पश्यंति संतः। मत्स्यरू पादिनानात्वं हरौ यद्यन्निरर्थकमिति पाठे। एवं धर्मान्पृथक्पृथक् पश्यन्निति वा अनुनतद्भूमीणां मपिष्टोथ तत्कदर्शनेनानर्थ इत्युक्तं भवति ॥ १८ ॥ राज्या वधिं चाह इत्याह। अयमिति। आ उदयाद्रेः उदयपर्वतपर्यंतं पर्यस्यते पर्यटति १९ अन्ये पुराजसु सत्सु अस्याधिराजत्वकथमित्याशंक्य चक्रवर्तित्वादित्युप तद्यश इति उच्यते। तस्मादिति ॥ २० ॥ कीदृशं यश उद्धरंत्य इत्यत आह। अयं महीमिति ॥ २१ ॥ निलिल्युर्निलीनाः। लांगूलं पुच्छं २२

भा॰च॰
७१

अहार्षीदित्यनेनाप्रतिभटःशतमखएवनान्यइतिद्योतनायकथितमितिज्ञातव्यं॥ चरमेऽत्रत्येश्वमेधेवर्त्तमानेसति॥२३॥ यतोज्ञानात्परंब्रह्मस्वप्रत्यक्षंभवतीतिविदंतियोगिनः॥२४॥ तद्गविष्यत्कथातोत्वेनकथंकथ्यतइत्यत्रोच्यतेतत्रेति॥ आत्माश्रिताःस्वविषयाःप्र्याख्याभिःपठिष्ट्वरणेउपलक्षिताःयत्रोनिबंधाः २५ अप्रतिरुद्धचक्रःअप्रतिहताज्ञःभविताभविष्यतीत्युपसंहरति॥२६॥ ॥इतिचतुर्थेषोडशः॥ ॥अस्मिन्नध्यायेसूतादिभिःश्रीहरिमहिमोपनिबद्धत्वेनपृथोर्महि

एषोश्वमेधाञ्छतमाजहारसरस्वतीप्रादुरभूद्यत्र॥ अहार्षीद्यस्यहयंपुरंदरःशतक्रतुश्चरमेवर्त्तमाने २३ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकं॥ आराध्यभक्त्यालभतामलंतत्ज्ञानंयतोब्रह्मपरंवदंति॥२४॥ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः॥ श्रोष्यत्यात्माश्रितागाथाःपृथुःपृथुपराक्रमः॥२५॥ दिशोविजित्याप्रतिरुद्धचक्रःस्वतेजसोत्पाटितलोकशल्यः॥ सुरासुरेंद्रैरुपगीयमानोमहानुभावोभविताप्रतिर्भुवः २६॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपृथूपाख्यानेषोडशोऽध्यायः॥ ॥एवंसभगवान्वैन्यःख्यापितोगुणकर्मभिः॥ छंदयामासतान्कामैःप्रतिपूज्याभिनंद्यच १ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः॥ पौरान्जानपदान्श्रेणीःप्रकृतीःसमपूजयत् २ विदुरउवाच॥ ॥कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी॥ यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिं ३

स्यात्कीर्त्तितंतन्माहात्म्यमेवोच्यते॥ तत्रादौसूतादिस्तुतिकरणप्रकारमाह॥ एवंसभगवानित्यादिना॥ छंदयामासतोषयामास १ राज्ञासमानवयस्कांगस्थकाइत्यभिधानाच्छ्रेण्योगरस्काः २ विदुरःसूतादिभिःसूचितंगोदोहनादिपृथुविक्रमंविस्तरतःश्रोतुंलोकोपकाराय पृच्छति॥ कस्मादिति दोहनंपात्रंद्रव्यंच ३

राम
७१

रा॰

शापापूर्वदेहःपुरातनास्तेषांकथाश्रयंसत्कथासंबंधःसुश्रवसोहरेःश्रवोयशः॥६॥ योदुह्यदितिपुनर्वचनमादरेवक्तव्यार्थे॥७॥ तत्रशुकोपिकथाप्रसंगेसंदधातीत्याह॥ चोदितइतित्वयाहंयथाचोदितएवंविदुरेणेति॥८॥ तत्रपूर्वोत्तरकथाविच्छेदपरिहारोयादितिएवंमैत्रेयोवक्तीत्याह॥ यदेति॥ क्षितिपृष्ठेभूगोलकेनिरन्नेभोजनहीनेसति॥९॥ निरन्नइत्यनेनदुःखनिमित्तमितिज्ञातंतत्कीदृशमत्राह॥ वयमिति॥ जाठरसंबंधिनाग्निनाकोटरस्थेनविवरस्थयुष्माकमीदृशाग्निपरिहारोयत्रपदार्थेरहितेसति॥९॥ रा॰

प्रकृत्याविषमादेवीकृतातेनसमाकथं॥ तस्यमेध्यंहयंदेवःकस्यहेतोरपाहरत्॥४॥ सनत्कुमाराद्भगवतोब्रह्मन्ब्रह्मविदुत्तमात्॥ लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः॥५॥ यच्चान्यदपिकृष्णस्यभवान्भगवतःप्रभोः॥ श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयं॥६॥ भक्तायमेनुरक्तायतवचाधोक्षजस्यच॥ वक्तुमर्हसियोदुह्यद्वैन्यरूपेणगामिमां॥७॥ श्रीशुकउवाच॥ ॥चोदितोविदुरेणैववासुदेवकथांप्रति॥ प्रशस्यतंप्रीतमनामैत्रेयःप्रत्यभाषत॥८॥ मैत्रेयउवाच॥ ॥यदाभिषिक्तःपृथुरंगविप्रैरामंत्रितोजनतायाश्चपालः॥ प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाःपतिमभ्यवोचन् ९ प्रजाऊचुः॥ वयंराजन्जाठरेणाभितप्तायथाग्निनाकोटरस्थेनवृक्षाः॥ त्वामद्ययाताःशरणंशरण्यंयःसाधितोवृत्तिकरःपतिर्नः॥१०॥ तन्नोभवानीहतुरातवेन्नंक्षुधार्दितानांनरदेवदेव॥ यावन्ननंक्ष्यामहउज्झितान्नावार्त्तापतिस्त्वंकिललोकपालः ११

न्यत्रशरणप्राप्तिःकिंनस्यादत्राह॥ यःशाधीतियस्त्वंनोस्माकंवृत्तिकरःपतिर्यस्मात्त्रोस्मांस्तुक्षुधिश्चलु ... शिक्षुस्त्वइत्यंबुद्धिरिति॥१०॥ वृत्तिकरइत्यनेनज्ञाताभिप्रायस्यापिराज्ञःस्वाभिप्रायमुद्घाटयंतीत्याह॥ तन्नइति॥ रातवेभरणाय॥ उज्झितान्नास्त्यक्तान्नाःपूर्वमेवेतिशेषः॥ वार्त्तापतिःजनानांअन्नेदत्वारक्षकइत्यर्थः॥११॥

रक्षोराजघनमरोत्थितसंभवेन न किंतु तं रक्षार्पमभूत्स्याह। पृथुरिति। करुणं दयाजनकं। निमित्तमन्नाभावस्य कारणं मत्वा पद्यत ज्ञातवान्॥१२॥ ज्ञात्वाप्य
हा कथमिति मत्वा सा धायिष्यामि इति गुडतीड्डिकावाणीमुक्त्वा किं कार्यमिति तेनास्थायीति तत्राह। इतीति। विशिखं बाणं त्रिपुरहा हरः॥१३॥ तत्र भूम्या किमकारी
तितत्राह। प्रवेपमानेति। वेपृ कंपने इति धातुः। गौः सती गोरूपा मृगयोर्व्याधात्। अत्र पृथुना पलायंत्या स्त्रिया किं निवृत्तं किं नेत्याह। तामेवेति। अन्वव्रजत्

पृथुः प्रजानां करुणं निशम्य परिदेवितं॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत॥१२॥ इति व्यवसितो बुध्या प्रगृहीतशरासनः॥ संदधे विशिखं भूमेः क्रु
द्धस्त्रिपुरहा यथा॥१३॥ प्रवेपमाना धरणी निशाम्योदायुधं च तं॥ गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता॥ १४ तामेवान्वव्रजद्वैन्यः कुपितोऽत्यरुणेक्षणः
शरं धनुषि संधाय यत्र यत्र पलायते॥१५॥ सा दिशो विदिशो देवी रोदसी चांतरं तयोः॥ धावती तत्र तत्रैनं ददर्शानूद्यतायुधं॥१६॥ लोके नाविंदत त्राणं वैन्या
न्मृत्योरिव प्रजाः॥ त्रस्ता तदा निववृते हृदयेन विदूयता॥ १७ उवाच च महाभागं धर्मज्ञापन्नवत्सल॥ त्राहि मामपि भूतानां पालनेऽवस्थितो भवान्
१८

दृष्टतो गतो भूत्वा। सारंगइव काये सारस्य हितात्। पृष्ठतोऽभ्यादेव नवाणं मुक्त्वावधीदित्याशयेनाह। त्रस्तेति॥१५॥ ६६ राजा पृथुः पिता हरेः संनिधानान्वित्रे
षविवाद्भुन्नरकार्यस्यापि स्वाभिप्रेतत्वात्त्रेदं हृद्यन्यत मोपितामत्रायेत्याह। लोकेनेति। वैन्यादन्यस्मिन् जीवन्भद्राणि पश्यतीति बुद्धेर्वहरेः सर्वप्राणि
प्रेरकत्वेन तत्तत्स्त्रिनूयत्वाद्वस्मयत्रनिमाह त्रस्तेति॥१७॥ अत्र च वनमेवानुसर्तव्यं नान्यदिति भाववतीव क्रिउवाचेति॥ १८ ॥

रक्षायां नियुक्तस्य तवापराधं मंतरेण मा निहननं न युक्तमित्याह। सत्वमिति। एवमपि मां हनिष्यसि चेत्तव धर्मे तत्त्वमपहास्यतीत्याशयेनाह। अहं निष्पदिति
यो भवान् धर्मज्ञ इति मतोऽभविष्यन्नहिं कथं योषामाम हनिष्यदित्यन्वयः॥१९॥ बालिशास्त्र अपि जंतवः स्त्रीवधं न कुर्वंति किं पुनर्भवादृशा इत्याह। प्रहरंतीति॥२०॥ नो
केवलमदृष्टहानिरपितु दृष्टहानिरपि स्यादित्याह। मां निहत्येति। अजरं नूतनामिव स्थितां धास्यसि धारयिष्यसि॥२१॥ स्वोक्तिकारितेकरणं यद्दृष्टभूर्मातिवेरं त्वा
कंचवक्ति। वसुधेति। ननु वधयोग्यापराधः कउ इति तत्राह। मक्षस्येति। अनेन तव पतुर्मत्स्त्रीवधो न दोषायमत्र्त इत्यासनातिक्रमएवापराधित्वादिति ध्वनितं। किं तत्
लक्ष्यासनानि लिंघनेयेनापराधिनी स्यामित्याह। भागमिति। या भवती बर्हिषि यज्ञे मत्स्वाहेति हुतं हविर्भागं टंके दृष्टणोतिसा त्वं वसु ये। गवर्णं नो तने। विपरिपाकेन

सत्वं जिघांससे कस्माद्दीनामकृतकिल्बिषां॥ अहं निहत्य कथं योषां धर्मज्ञ इति यो मतः॥ १९ प्रहरंति न वैस्त्रीषु कृतागःस्वपि जंतवः। किमुत त्वद्विधा राज
न्करुणा दीनवत्सलाः॥२०॥ मां निहत्याजरां नावं यत्र विश्वं प्रतिष्ठितं॥ आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि॥२१॥ पृथुरुवाच॥ वसुधे त्वां वधिष्या
मि मच्छासनपराङ्मुखीं॥ भागं बर्हिषि या वृंक्ते न तनोति च नो वसु॥२२॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः॥ तस्यामेवं हि दुष्टायां दंडो नात्र न शस्य
ते॥२३॥ त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा॥ न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः॥२४॥ अमूषां क्षुत्परीतानामार्तानां परिदेवितं
शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा २५

न प्रपंचयसीत्यन्वयः॥२१॥ एतदेव विविशिनष्टि। यवसमिति। हविरादिकंयवसं। पयः शाहृस्यज लेपिदृष्टेनरित्यत औधसमिति। गोरूपत्वादेवमुक्तिः। मत्पालि
तान्प्रजाभ्योयावयोनदोग्धितस्या मेवदुष्टायां भवत्यां दंडो न शस्यत इति न हि शस्यत एवेत्यर्थः॥२३॥ आत्मनस्त्राणमुंचामीति नेत्याह। त्वं
खल्विति। त्वदधिकरणत्वेन प्रजाजीवनार्थत्वेन विशिष्टं विसृष्टेर्वैयर्थ्यात् दानेच्छायां स्वदारोपितवस्यादित्यर्थः। अस्मिन्भवति न हि स्वामीति दुराग्रह
स्वल्पमिति। त्वदधिकरणत्वेन प्रजाजीवनार्थत्वेन विशिष्टं विसृष्टेः
उद्धिरवत्तेति॥२४॥ मद्बुधस्त्वत्कोप निंकृराणावसायीनतु शरणागतप्रजारक्षणोपायसिद्धिरिति तत्राह। अमूषामिति। अमूषां शरणागतानां मेद

।·च
३
स्पत ४

तथापि स्त्रीव बालवशस्त्व इति तत्राह पुमानिति । तियष्ट्वं विषसत् द्रुघाः शङ्काय इत्तं मा निहत्यात्मानमिमां प्रजाश्चं मासिकथं धारयिष्यसीति तत्राह । त्वां सत्वामिति
मायायामित्यनेन न गोवृषदोषोपि नास्तीति सूचितं ॥ आत्मयोगबलेनेत्यत्रोत्पत्तिकिंस्वरूपयायद्भवस्य इत्यन्वयः ॥ २७ ॥ तत्र निरुत्तरया धरया किमकारीति तत्राह । एवं
मिति ॥ २८ ॥ स्वयं देवतरिचे कत्वेन हरेरन्यस्ये वं विधवाक्यानुद्यादित्यादि हेतुना ज्ञातुत्वात्परारश्चैत्तस्यर्या लिंग तद्योगेपि गुणैरन्यत्रायोगेपि श्रीनारायणमेव
नौति ॥ नम इति ॥ मायया प्रकृत्या चित्प्रकृत्याच तद्योगमयया विरचितानानातनवो ब्रह्मादिजीवदेहा येन स तथोक्तस्तस्मै ब्रह्मादिजीवदेहास्तु मायादे
हात्प्रकीर्तिता इति वचनात् मायानिर्दृष्टेन नेन्द्रजालमत्रोच्यत इति । स्वस्यापि प्राकृतदेहसंभवेन देवदत्तवत्कर्मणि गत्यां तत्वेन प्रपंचस्य नानुपपत्तिरित्यत उक्तं
मगुणात्मन इति । सत्वादिगुणरहितस्वरूपाय । हरेः स्वरूपं प्राकृतगुणैरहितं कौतुकं येन देहित्वेन सृष्ट्यादौ प्रवृत्तिः स्यादित्यस्यापीदमेवोत्तरं गुणा

पुमान्योषिदुत क्लीब आत्मसंभावनो धमः ॥ भूतेषु निरनुक्रोशो नृपाणां तद्वधो वरः ॥ २६ ॥ त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ॥ आत्मयोग
बलेनेमा धारयिष्याम्यहं प्रजाः ॥ २७ ॥ एवं मन्युमयीं मूर्तिं कृतान्तमिव बिभ्रतं ॥ प्रणता प्राञ्जलिः प्राह मही संजातवेपथुः ॥ २८ ॥ धरा उवाच ॥ नमः प
रस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये २९

त्मान इति ॥ ज्ञानानंदादिहीं गुणे देहाय ॥ आत्मा जीव इतोरे हरुतियादवः ॥ अस्तु ज्ञानादिगुणे देहत्वं तथापि प्रकृत्या प्रवर्त्तमानस्य कर्तृत्वं मंगणेरविक
ल्पितदोषा निस्तारः इति तत्राह स्वरूपेति । स्वरूपानुभवेन तद्ब्रह्मवेदाहं ब्रह्मास्मीति श्रुतिसिद्धेन स्वरूपापरोक्षेण निर्धुता निरस्ता द्रव्यक्रियाका
रक निमित्ता नो विभ्रमाणां ऊर्मयो येन स तथा ॥ द्रव्यारयस्तामसते जसवैकारिकाहंकारसंज्ञाः ॥ यद्वा द्रव्यं गुणानां मा धारो देहः क्रियाः क
र्मेन्द्रियकारकं ज्ञानेन्द्रियं एतन्निमित्ता नो विभ्रमाणां संसाराख्यान्तःकरणधर्माणामूर्मयः पूरं पराहूरोत्सारिता येन स तथा ॥ विभ्रमः संशये भ्रां
तौ शोभायां चेतिया दवः ॥ तत्र किं कारणमित्युत मत्स्वरूपेति ॥ द्रव्यक्रियादिनिमित्तो विभ्रमोर्मयोऽस्माकमेव न हरेरिति निरणापि ॥ २९

राम
७३

यतः स्वामित्वेन पितृत्वेन गुरुत्वेन स्थितं हरिं शरणं विहाय मम मान्यो रक्षकोस्तीति भ्रान्तात्वं द्वानि दृत्त मित्यतः तत्स्वामित्वादिकं सपुक्तिकमाह ॥
येनेति । येन वा त्र हरिणाहं आत्मीय तनुः स्वशरीरत्वेन निर्मिता यस्य पृथिवी शरीरमिति श्रुतेः । यत्तो यस्मात्सत्वादिगुणेः सर्गसंग्रहः स्वात्सए
व पितृभूतः स्वराट् स्वामी नृ बापुधः त्रिद्रागुरुर्मां हंतु मुपस्थित इत्यन्वयः । किमत इति तत्राह । अन्यमिति । विं कुर्मेः कस्य वा कृ मोगरद्दायां स्वमा
तरी निवार्क्य ध्वनयति कुमित्यनेन ॥ ३० ॥ तव निर्मातेश्वरो न्यस्त्वां जिघांसुः स्रष्टुरा जात्वापर इति मदात्रोक्तां परिहरन्निचपूर्वोक्तार्थं विवृणोतीय

त५

एतदिति । आत्मैव आश्रयो यस्याः सा आत्माश्रया तया । ऽत एवा वितर्क्यया विविधितकर्ता विषयया । अजामेकां लो । हितसुक्लकृष्णामित्यादि श्रु
सिद्धत्वात् निर्वक्तुमशक्यत्वेत्यतः दैद्धत्वादितर्क्यो गोचरयेत्यर्थः । एवं विधयास्वमायया स्वप्रकृत्या सृष्टुं पालयितुं चैकत्वेन तस्य हंतृत्वं न यु

येनाहमात्मीय तनुर्विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ॥ स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यत्र शरणं कमाश्रये ॥ ३० ॥
य एतदादावसृजच्चराचरं स्वमायया त्माश्रयया ऽवितर्क्यया ॥ तयैव सोयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ३१ नूनं
वेशस्य समीहितं जनैस्तन्मायया दुर्जयया कृतात्मभिः ॥ न लक्ष्यते यस्त्व करोदकारयद्योनेक एकः परतश्च ईश्वरः ३२

कृश्वरः शीनादित्यर्थः । वार्त्तासंभावनयोः किलेत्यभिधानं ॥ अनः संभाविनं न भवतीति यथा स्वस्य तर्कोऽविषयत्वं तथा मायया अपीति सू
चितं ॥ ३१ ॥ हरेस्तर्को विषयत्वं स्पष्टयति नूनमिति । विभोर्विकृतात्मभिः स्वल्पबुद्धिभिः अस्मि हितबुद्धिभिर्वा जनैर्दुर्जययास्वमायया इ
त्रास्मिदादीयो दियुणाकारस्य समीहितं समीक्षितं नैव क्षितं न लक्ष्यते नूनं तर्कयामीत्यन्वयः ॥ तर्कनिश्चितयोर्नूनमिति यादवः समीहितं
दित्यत्राह यस्त्विति । यः स्वकरोत् कार्यं ब्रह्माणं रागस्कारयच्चानेकः इंद्रो मायाभिः पुरुरूप ईयते इति श्रुतेः । तत्स्तत एकः एकमेवाद्वि
तीयमिति श्रुतेः । एवं विधः स परतः परेषामीश्वरोनास्माकमित्युदाता नोश्रेण्या हेपलक्षणमर्थ विरोधं ध्वनयति ॥ अर्थनिरासंभवात् ॥ ३२

क्षितं तू३

भा॰प॰
७४

कर्तृत्वेन कारयितृत्वेन सर्वेषां प्रतीतिः पृथिव्यादीनां कार्त्स्न्येन मीश्वरस्तत्वन्तु स्मृतत्वाद्वियाह। सर्गादीति द्रव्याणि पंचभूतानि क्रिया कर्माणि इ
हित्यप्रकटनायनिरंतरमिति। एतत्स्तवनायदृढव्रताइति। सत्रादिकर्मसुदीक्षितानामन्यव्यापाराभावस्तथात्रापीति। कर्मणांफलाधिक्यद्योतनायक्षोणितलेप तनदुःखक्षयहेतुत्वात्प्रतिष्ठाहेतुत्वाच्चक्षोणितलइति। क्षितिरूपेतलप्रतिष्ठायामितिधातुः ३५ स्ववंश्यानांराज्ञांशिक्षायामाहमाजात्विति। राजकुलेवि द्यमानाभिर्महर्द्धिभिः समुत्थितेतेजःप्रभावलक्षणं। अजितःश्रीनारायणोदेवताएषांतथातेषांतितिक्षादिभिर्देदीप्यमानेद्विजानांकुलेजातुकदाचिदपिमाप्रभ वेत्कुलक्षयेसमर्थंनभवेत् ३६

नकेवलंब्रह्मकुलंनाभिभवनीयंकिंतुतत्रभक्तिरपिकर्तव्येत्यत्रकैमुत्यन्यायमाहब्रह्मण्यदेवइति। अर्कमर्कटमंडूकविष्णुवासववायवः। तुरंगसिंहशितांशुयमश्चहरयो दशेतिनिगदाद्हरिशब्दोयस्यश्रीनारायणस्यचरणाभिवंदनादनपायिनींलक्ष्मीमवाप। जगत्पवित्रंयशश्चावापसोपिपुरातनःपुरुषःब्रह्मण्यदेवःब्राह्मणप्रि यश्चदेवःक्रीडादिगुणपुरुषश्चेत्यर्थः। ब्राह्मणप्रियत्वंक्रीडामात्रमितिदर्शयितुंदेवइतिपदंस्वतएवमहत्तमाग्रणीरित्युक्तं। महतामपिब्रह्मादीनांसकाशादुत्तमा ब्रह्मादयस्तेषामग्रणीः श्रेष्ठः तस्मात्क्रीडामात्रमिदंस्वतएवानुपपत्याहरिशब्देनेंदुएवस्टहीतः। यत्प्रसादेनदेवेंद्रोदेहोहितयशाश्चभूत्। सोपिविष्णुरमेयात्मा

ब्रह्मण्यदेवःपुरुषःपुरातनोनित्यंहरिर्यच्चरणाभिवंदनात्। अवापलक्ष्मीमनपायिनींयशोजगत्पवित्रंचमहत्तमाग्रणीः ३७ यत्से वयाशेषगुहाशयःस्वराड्विप्रप्रियस्तुष्यतिकाममीश्वरः। तदेवतद्धर्मपरैर्विनीतैःसर्वात्मनाब्रह्मकुलंनिषेव्यतां ३८

सदाब्राह्मणवत्सलइतिस्मृतेश्चप्रतीतार्थपरित्यागोयुक्तः। अजितदेवतानामित्युक्तिविरोधाच्च ३७ ननुविष्णुर्द्विजप्रियस्ततःप्रकृतेकिमित्याशंक्यविष्णुभक्तिम वश्यंब्राह्मणसेवाकार्येत्याह। यत्सेवयेति। अपवर्गाविघ्नाश्रीलक्ष्मीकांतप्रसादएवापेक्षणीयोतःक्षितिदेवप्रीत्याकिमित्यतोवा। यत्सेवयेति। भगवत्प्रसा दौत्पत्तौविप्रसेवाद्वारमित्यर्थः। स्वराट्स्वतंत्रः। यतोविष्णुप्रसादोभवतितस्माद्ब्राह्मणकुलंनिषेव्यतामित्युपसंहरति। तदेवेति। तद्धर्मपरैर्विष्णुधर्मपरैः ३८

मा॰च॰
८९

ब्राह्मणसेवाप्रसन्न श्रीनारायणप्रसादात् श्रीकृष्णपरमानन्दो विभवतीत्याह। पुमानिति। यस्य हरेर्नित्यं संबंधो येषां ते नित्यसंबंधाः हरेश्चेषां निषेवया ब्रह्मसंगतः पुमान् निवेलं निरुपमं तस्यात्मनो हरेः प्रसादतो त्यंतशर्म भगवन्निष्ठाजन्यमुक्तिसुखं लभेत ततस्तस्मात् मोक्षसुखात् परमन्यत्सुखं हविर्भुजाम् अप्यत्र संसारे त्रिविक्रिंनास्त्येव। हविर्भुजो देवताः। किंविशिष्टं स्वयं स्वरूपभूतं। अस्य स्वरूपमपि स्वरूपवन्नोपवर्तितमित्याह। स्वतइति। महत्सेवां द्वारमाहुर्विमुक्तेरिति महत्सेवायाश्च विमुक्तिसाधनत्वं सिद्धं। यद्वार्थे नित्यसंबंधानां सतां निषेवया पुमानात्मनो मनसः प्रसादतो त्यंतशर्मातिशयितं भगवन्निष्ठां लभेत। ततः श्रीनारायणनिष्ठायाः स्वतोऽकृत्रिमं स्वयं स्वरूपसुखं लभेत। तत इत्युत्तरत्रापि संबध्यते शेषं पूर्ववत्। ३९ इतो पि ब्रह्मकुलसेवा कर्त्तव्ये

पुमाल्लभेताथ निवेलमात्मनः प्रसादतो त्यंतशमं स्वतः स्वयं यन्नित्यसंबंधनिषेवया ततः परं किमत्रास्ति सुखं हविर्भुजां ३९ अश्नात्यनंतः खलु तत्वकोवि

दैः श्रद्धाहुतं यन्मुखइज्यनामभिः॥ न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यवर्यगुः ४०

त्याह। अश्नातीति। भगवन्तत्वकोविदैः पुरुषैरिज्यस्य हरेर्नाम भिर्यन्मुखे श्रद्धया हुतं अनंतो यथाश्नाति। तथा चेतनया बहिष्कृते जडे हुताशने हुतं नाश्नातीत्यन्वयः॥ अनंतइत्यनेन तत्कवन मात्रफलं किं तु अनंतं तमेवेति ध्वनयति। स्वतु न यार्थः खलु शब्दार्थः। वा इत्यनेन नो हन्तथा श्नाति प्रतिद्धिन्नाय यति। ब्राह्मणो श्रयियति प्रख्याशनेन हरेर्विशेषतस्तृप्तिरित्यभिप्रेत्याह। पारमहंस्येति। पारमहंस्यैः परमहंसाश्रमस्थैः वर्या वरणीया गावो यस्य स पारमहंस्यवर्यगुः। न एवं तद् वनाभिप्रायं विदित्वा श्रद्धया ब्राह्मणा तार इत्यर्थः। यद्वा परमहंसविषया वर्याप्तिनो हरागावो यस्य स तथा। यन्नीनश्विकं स्नोति तिते षा मे व तत्त्वताना विक्या दित्यर्थः। विग्रगुशब्दवद्यं शब्दः ४० ॥ ॥

रा॰
८९

तरामर्थ=१

नन्वमितश्राधिक्ये चेतनावत्वं प्रयोजनकं वेदवैदिकानामाराधनमात्रत्वं स्यादित्याशंक्य ब्रह्मकुलस्य वैशिष्ट्यमाह। यद्ब्रह्मेति। अत्र यावत्... तावती वागितिश्रुतिर्वदस्य परब्रह्मणः श्रुतब्राह्मणसाम्याद्भूयमध्ये को न्यावत्कि। यद्ब्राह्मणकुले नित्यत्वादिगुणविशिष्टं ब्रह्म वेद हरेस्तत्त्वं बिभ्रति बिभर्त्ति ... मर्थवक्ति। अहेति। आवारहीनेन श्रुनंतिवेदाइति वचनं। मंगलं पुण्यं संयमो दमः समाधिरेग्रता। किमर्थमित्यत उक्तं अर्थसिद्धय इति। पुरुषार्थोपयोगी तत्त्वज्ञानप्रयो...विनकार्यइत्याह। यत्रेति। यत्र ब्रह्मणि श्रीनारायणे इदं जगदादर्शनिर्दर्पण इवावभासते। वेदे वेदं पुरुषार्थं च तदुपयं ज्ञायते। यद्वा यत्र ब्रह्मकुले इदमुक्तं ब्रह्मद्वयं दर्पण इवावभाति ४१ एवं ब्रह्मकुलमभिष्टूया

यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः॥ समाधिना बिभ्रति हार्थसिद्धये यत्रेदमादर्श इवावभासते ४१ तेषामहं पादसरोजरे

णुमर्या वहेयाधिकिरीटमायुः॥ यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजन्ति ४२ गुणालयं शीलधनं कृतज्ञं श्रद्धाश्रयं संवृणुते

नु संपदः॥ प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यं ४३

त्मक्रियोपदेशात् तत्सेवाया वक्ष्यमाणः कर्त्तव्ये तिविवक्षन्नेते षामिति। हे आर्याः तत्त्वज्ञानोत्पत्तौ प्रथमसाधनं पापप्रणाशः सोऽप्यनेनस्यादित्याशयेनाह। यं नित्यदेति। उत्तरफलमाह। अमुमिति। अमुं पुरुषं ४२ एतदेव विशिनष्टि। गुणालयमिति। संपदो गुणालयत्वादिविशिष्टं संवृणुत इत्यन्वयः। संवृणुत इति पाठे संवृणत इति व्याख्येयं। यं नित्यसंबंधनिषेवयेत्यादौ प्रस्तुतो जनार्दनः पारमहंस्यवर्यगुरित्यनेन ध्वनितान् गावश्च ब्रह्मकुलं च प्रसादयितुमुपसंहरति। प्रसीदतामिति। ब्रह्मकुलसेवा वक्ष्यो कुलसेवा ब्रह्मादिपरिवृत श्रीजनार्दनसेवा च यथाशास्त्रविहितं मुमुक्षुणा कर्त्तव्येत्यतो वाह। प्रसीदतामिति ४३

इदानीं मैत्रेयः पृथूक्तावपि प्रतिपत्तिः सर्वस्याभूदिति वक्तुमाह इतीति। साधुवादेन निर्दोषवाक्येन ४४ सूचितं स्पष्टयति। पुत्रेणेति। सोयं मनुष्यलोकः पुत्रेणैव जय्य इत्यादिकं श्रौतमपि दृष्टचरितमित्याहुरित्याह। ब्रह्मदंडेति। शस्त्रत्वत्तस्त्रेणपितरी त्रायत इति पुत्रत्वमिति पुनातीति। धृतमन्त्रेण ब्रह्मदंडेन शापेन हतोऽपि तनयेन त्रातस्तमसो नरकात्। पापस्य वेनस्य तमसः अन्धतामिस्रात् त्राणं सत्यं वेनस्य सर्वेऽपि युक्तिज्ञा स्त्रियोऽपि इत्याघातं। ननु नारकीकोपात्तिवेनवेनशब्दस्य तामसराजसतामसाविकमेदेना भिधेयत्रित्वस्य पापात्मकत्वाद्वेनस्योरजसो जीवः पृथुना स्वर्गतिं गतः। स्वयं तु तमएवापसात्त्विकः पृथुतामगादिति स्मृतेः। तथा च वाक्ययोजना। ब्रह्महतः विप्रशापहतः पापो दैत्यो नाम्ना वेनस्तमोतरदिति यन्तदिति प्रशंसामात्रं न तु सत्यं। सत्यं तु सर्वस्माद्रत्यधिकं दुःखोदर्कं तमोत्यनरदगच्छत्। दृष्टवनतरणयोरिति धातोः स्तुगताविति वा। अतिस्पाद्दधिका योक्तो प्रशंसायामतिक्रम इत्यभिधानात्। पत्नमस्नाम सोवेनः सर्वदुःखकरो दैत्यः श्रोत्पतरत्सुखभोगलोकमति

मैत्रेय उवाच — इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः। तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ४४ पुत्रेण जयते लोक इति सत्यवती श्रुतिः। ब्रह्मदंडहतः पापो यद्वेनोत्यतरत्तमः ४५ हिरण्यकशिपुश्चापि भगवन्निंदया तमः। विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ४६

क्रम्यागच्छदंधं तम इति शेषः ब्रह्मणां विप्राणां दंडः राजयोग्यशिक्षा तया हतो गतः दंडो नाशासनेरात्तामितियादवः। हन हिंसागत्योरिति धातोः रजोगुणपानं पातीति वा पापो रजसो वेनस्तमोत्यतरत्। तमो तिक्रम्य स्वर्गतिं गतः। पृथुगुणेनेति शेषः। यद्वतरत्तर्तुमशक्यं तमो गुण इति शेषः। तदतिक्रम्य वर्त्तमानं सत्त्वं वेनस्तीति तानांशो वेनोत्यधिकारार्थे मत्वा शिशुणविस्ताराभिधेयं पृथुत्वमतरत्। दापोहितिपापानपातिनरक्षतीति वा। पिबति संहरतीति वा पापः। ब्रह्म वेदस्तदुक्तो दंडो हिंसाया स्वपशोः स ब्रह्मदंडः तं पशुं हंतीति नान्यमविहितमिति ब्रह्मदंडहतः हिंसायां लकुदेशु उझतिव ४५ हिरण्यकशिपुरपि सनकादिशप्तो जयश्रीहरिपार्षदस्तस्य तमोभिगमनं युक्तं अन्यस्य तदा विष्टस्यासु रस्य तमोभिगमनमौपचारिकमर्थवादवत ४६ ॥ ॥

एवं तत्त्वाः सर्वे स्वमनोगतं विज्ञापयंति। वीरवर्येति हे पृथ्व्याः पितः। पालकत्वात् पितृत्वं। त्वं नु त्वयैव नाथेनेत्युत्तरश्लोके पृथाविभक्तेः कर्त्तव्यत्वं प्रतीयते अतः कथं भगवत्येव भक्तिः कर्त्तव्येति वेदुच्यते तच्च पृथुस्वरूपाभिज्ञरमपेक्ष्यैव कारणो न्ययोगव्यवच्छेदः क्रियते। यो ब्रह्मन्तत्रमाविश्येत्युत्तरत्र पृथुस्तत्त्वप्रतीतेः ४७ मुकुंदो नाथो येषां तेन तथा। अनेनाप्युक्तं शंकां परिहाधिवाने त्रिवस्थामिरपृष्टाम पिकथां च्युक्तां करोषि ४८ तवभक्त्यानामस्माकमनुशासनं नैकांतं निपतमित्याह। नात्यद्भुतमिति ४९ उपासादितः प्रापितः प्रा

वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः। यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्त्तरि ४७ अहो वयं त्वद्य पवित्रकीर्त्ते त्वयैव नाथेन मुकुंदनाथाः। य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ४८ नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनं। प्रजानुरागो महतां प्रकृतिः करुणात्मनां ४९ अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो। भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ५० नमो विवृद्धसत्त्वाय पुरुषाय महीयसे। यो ब्रह्मक्षत्रमाविश्य बिभर्त्तीदं स्वतेजसा ५१ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकविंशोऽध्यायः मैत्रेय उवाच — जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमं। तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः १

म्यतामेकत्रावस्थानमलभमानानां ५० अहो वयमित्यत्रां तयम्यपेक्ष्य येत्युक्तं तत्तत्त्वज्ञानमेषां सिद्धमिति निभावेन न तत्सिद्धांतं प्रकटयति नम इति। यो विष्णुः क्षत्रं राजकुलोत्पन्नं पृथुमाविश्येदं ब्रह्म ब्राह्मणकुलं बिभर्त्तीत्यन्वयः ५१ इति श्रीभागवते महापुराणे चतुर्थस्कंधे टीकायां एकविंशोऽध्यायः पृथुसनत्कुमारसंवादापदेशेन सर्वशास्त्रमनुग्रहमंतरेणाद्दुर्लभं भगवत्तत्त्वं निरूप्यतेऽस्मिन्नध्याये। तत्रादौ सनत्कुमारागतिं वक्ति जनेष्विति १

भा·व·
९१

अर्चिषा लक्षितान् लक्षणतो ज्ञातानचष्ट अद्राक्षीत् २ इंद्रियेशो जीवो गुणानिंद्रियाणीव ३ ५ हाटकासने सुवर्णपीठे स्वधिष्ण्येषु स्वस्थानेषु स्थितान् संयमः प्रश्रयः भवाग्रजान् शिवज्येष्ठान् तृतीयस्कंधे हरात्पूर्वं जातत्वोक्तेः संसाराग्रजातत्वं तद्विरुद्धत्वादुपेक्षणीयं ६ संसारिणां सतां संदर्शनस्य दुर्लभत्वात् तत्तत्पूर्वाचरितं मंगलं ममास्तीति चेतयन् विस्मयीकरोति अहो इति कस्मिन् कस्य विषये ७ नैतच्चित्रमित्याह किमस्येति अनुगेन प्राणेन सह वर्तन्त इति सानुगः कस्मिन्निह मितिश्रुतिः ८ दुर्दर्शत्वमधिकदृष्टांतत्वेनोपपादयति नैवेति लक्षयते लक्षणयापि भगवद्विषयं नाप्नोति असंभवपरिहाराय पर्यटत इति सर्वो जनः सर्वदृशं साक्षित्वेन पश्यंतमात्मानं परमात्मानं यथा न जाना

तांस्तु सिद्धेश्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा ॥ लोकानपापान्कुर्वाणान्सानुगोऽचष्ट लक्षितान् २ तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थितः ॥ ससदस्यानुगो वैन्य इंद्रियेशो गुणानिव ३ गौरवाद्यन्त्रितः सभ्यः प्रश्रयानतकंधरः विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ४ तत्पादशौचसलिलैर्मार्जितालकबंधनः तत्र शीलवतां वृत्तमाचरन्मानयन्निव ५ हाटकासन आसीनान् स्वधिष्ण्येष्विव पावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ६ पृथुरुवाच अहो आचरितं किं मे मंगलं मंगलायनाः ॥ यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां कुयोगिनः ७ किं तस्य दुर्लभतरमिह लोके परत्र वा ॥ यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सानुगः ८ नैव लक्षयते लोको लोकान्पर्यटतोऽपि यान् ॥ यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः ९

ति ब्रह्मादीनां तद्विषयत्वासंभवात्कथं सर्व इति सर्वैकवल्ली क्रियत इत्यत उक्तं ये हेतव इति ये ब्रह्मादयोऽस्य जगतो हेतवः कारणभूतास्तेऽपि न विदंतीति अत्रेदं तात्पर्यं यथात्मानं त्वं हरिं वेत्ति तथा न जानंतीति न वक्तव्यं सर्वज्ञास्तु विरिंचाद्या ज्ञानिनो मुहुर्हरिं परं ॥ हेतवो जगतोऽथस्य यथा सो वेद केशव इति अनेन वेदाहमेतमित्यादेर्गतिरप्युक्ता भवति दुष्टजनव्यामोहनाय वा तद्विषयत्वानस्य दुःसाधत्वज्ञापनाय वा धिकदृष्टांतप्रयोजनं ९

राम
९१

न्यतांसु स्थेयेषु अहंकारो न भवद्वाक्यसिद्धिर्सामर्थ्याभावमेव प्रयोजकं न तु धनादिकं त्वार्द्धिकामित्याशयेनाह अधना अपीति अर्हवर्याः पूज्यश्रेष्ठास्तेभ्यो देयान्यम्बुतृणभूमीश्वराः सुदावः ताः धारयंतीति बिभ्रतीति तथोक्ताः १० तीर्थपादो विष्णुस्तस्य भक्तास्तीर्थपादीयाः तेषां पादतीर्थैर्विवर्जिताः संपर्करहिताः हिंस्राश्च यथा शार्दूलायथा व्यालानामालया द्रुमा पापिष्ठया च्छन्ना वन्ध्यास्तथा ते गृहाः संपत्कृत्वेऽपि वन्ध्या इत्यर्थः ११ किं बहुजल्पनेन तिभावेन तदागमनं लालयति स्वागतमिति वो युष्माकं स्वागतमागमनं सुष्ठु सुखाकं सुखहेतुत्वादिति शेषः कथमस्मदागमनं सुखहेतुस्तत्राह यद्व्रतानीति मुमुक्षवो धीराः श्रद्धया यद्व्रतानि चरंति ते यूयं वयोदर्शनेन बाला अपि बृहंति ज्ञानेन वृद्धास्ते

अधना अपि ते धन्याः साधवो गृहमेधिनः ॥ यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः १० व्यालालयद्रुमा वै तेऽप्यरिक्ताखिलसंपदः यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ११ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः ॥ चरंति श्रद्धया धीरा बाला एव बृहंति वै १२ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवेदिनां ॥ व्यसनावाप एतस्मिन्पतितानां स्वकर्मभिः १३ भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते ॥ कुशलाकुशला यत्र न संति मतिवृत्तयः १४

तात्स्वागतमागमनं भद्रमित्यर्थः १२ राजा स्वस्य मानववचनानंतरं यत्पुंप्रतिप्रश्नं वक्तव्यं किमिति तं मुनिवचनात्पूर्वं स्वकुशलमाक्षिपति कच्चिदिति व्यसनबीजान्युप्यंते यस्मिन्निति व्यसनावापः तस्मिन् संसारे स्वकृतकर्मभिः पतितानां नः कुशलं कच्चित् किन्न किमपीत्यन्वयः आत्मनोऽवानेन कुशलं पृच्छति अस्माकं कुशलं भविष्यति कच्चिदिति १३ ननु भ्यागतानां कुशलप्रश्नं सामन्तरेणात्मकुशलप्रश्नः कथं संजात इतीति तत्राह भवत्स्विति इदं कुशलमकुशलमिति मतिवृत्तयो यत्र येषु भवत्सु न संति अतो भवत्सु सुखप्रश्नो नेष्यते कुतः आत्मना सहारामो रमणं क्रीडा येषां ते तथा तेषु अतो भवत्सु कुशलप्रश्नं शाभावादात्मकुशलप्रश्न इति भावः
१४

भा॰च॰
९२

अस्मात्तर्हितवकुशलंभविष्यतीत्यभिप्रेत्यंचेद्यतोवयमकुशलाद्विभ्यमस्तस्मादेतादृशानांकेनप्रकारेणकुशलंस्यादितितंप्रकारंपृच्छामीत्याह।तदहमिति।तपस्विनांसुहृदोवःपृच्छा
म्यभवेसंसारेक्षेमःसंसारोच्छेदलक्षणंमंगलंत्र्यंजसासाक्षादिसदित्यंजसासाह्नायेत्यमरः १५ ननुविघ्नपक्षपरिहारोदुःखबोधेतोऽन्यःसुशकंएवकथाविकेतोमरणांमानुषाज्ञादितिकु
र्वभवंतोभगवद्धिशेषसंनिधानपात्रत्वान्नृशार्थ्यव्याख्यानसमर्थाइत्यभिप्रेत्याह॥व्यक्तमिति।व्यक्तंस्पष्टंनुखेनुनेत्यमिधानात्।अत्रस्पष्टंव्यक्तमित्यर्थः।आत्मवतांज्ञानादियो
गिनांमात्माभीष्टवर्ती हिआत्मभावनोमनःप्रेरकस्तेननानांसत्रापदोजन्मादिरहितोभगवान्स्वभक्तानामनुग्रहायेमांभूमिंसिद्धरूपीभवान्दृशःसिद्धास्तएवरूपंप्रतिमा

तदहंकृतविश्रंभःसुहृदोवस्तपस्विनां॥संपृच्छेभवएतस्मिन्क्षेमःकेनांजसाभवेत् १५ व्यक्तमात्मवतामात्माभगवानात्मभावनः॥स्वानामनुग्रहा
येमांसिद्धरूपीचरत्यजः १६ मैत्रेयउवाच पृथोस्तत्सूक्तमाकर्ण्यसारंसुष्ठुमितंमधु॥स्मयमानइवप्रीत्याकुमारःप्रत्युवाचह १७ सनत्कु
मारउवाच साधुपृष्टंमहाराजसर्वभूतहितात्मना॥भवताविदुषाचापिसाधूनांमतिरीदृशी १८ संगमःखलुसाधूनामुभयेषांचसंमतः॥यत्संभा
षणसंप्रश्नःसर्वेषांवितनोतिशं १९ ॥ ॥ ॥

स्यास्तीतिचरतीत्यर्थप्रहरेस्तुप्रतिमाःप्रायास्तत्रस्थःकेशवःस्वयं॥दृष्ट्वातिज्ञानमीशेशःपरमात्मास्वयंप्रभुरित्यतोज्ञानिनांप्रतिमात्वंसिद्धमतोऽधात्मवतांव्यक्तंस्पष्टमि
तिपुनरुक्तस्ययोज्यं १६ पृथोःकंठशोमणोपर्यंतंतद्वक्तंस्फुत्वानिरपेक्षत्वादन्यतोमतंतेतिशंकामाभूत्स्वकृत्वास्तारत्वात्कर्मसुखत्वात्प्रत्युत्तरापितुंशक्त्वाद्येतित
त्रसनत्कुमारस्तुप्रत्याहेत्याह।मैत्रेयइति।मधुनामधुरंवविद्यादित्यादेः १७ किमाह।साध्विति।तथाहिसाधूनांमतिःस्थितिरीदृशी।स्वयंविद्वानपिलोकोपकारायच
र्ततइति १८ नकेवलंतवैवास्मद्दर्शनेनअस्माकमपीतिभावेनाह।संगमइति।शंभगवन्निष्ठालक्षणंसुखं १९ ॥ ॥

राम
९२

अत्रशिक्षणीयांशोस्माकंनास्तीतिभावेनाह।अस्त्येवेति।भवतोमधुद्विषःपादारविंदेगुणानुवादलक्षणारतिरस्त्येव।यारतिःकषायंमनःकलुषीकुर्वाणंकामंविषयतृष्णालक्षणं
कर्षणेनघर्षणेनगच्छतीतिकषायंपापमेवमुभयविधमंतरात्मनोमलंकिंदंविधुनोतीत्यन्वयः।अनेनहरौरतिरितरस्वहरिद्विष्यतिइतिद्वयंपुरुषार्थस्यसुखसाधनमुक्तमिति
ज्ञेयं।तदुक्तं।रतिःपरात्मनिहरावन्यत्रारतिरेवच॥पुमर्थसाधनंज्ञेयंनातोऽन्यन्मुमुक्षिभिरिष्यतेइति २० एतदेवविशिनष्टि।शास्त्रेष्विति।सध्र्यक्सम्यग्विमृशेषुसमीचीनविचारव
त्सु।कोसावित्यतआह।असंगइति।आत्मनोव्यतिरिक्तेपरमात्मनोऽतिरिक्तेब्रह्मादिस्तरंगतवस्तुनिअसंगःहेयलक्षणाबुद्धिः।ब्रह्मणिपरिपूर्णेनिर्गुणेसत्त्वादिग

अस्त्येवराजन्भवतोमधुद्विषःपादारविंदस्यगुणानुवादिनी॥रतिःसदायाविधुनोतिनैष्ठिकीकामंकषायंमलमंतरात्मनः २० शास्त्रेष्वियानेवसु
निश्चितोनृणांक्षेमस्यसध्र्यक्विमृशेषुहेतुः॥असंगआत्मव्यतिरिक्तआत्मनिदृढारतिर्ब्रह्मणिनिर्गुणेचया २१ तच्छ्रद्धयाभगवद्धर्मचर्ययाजिज्ञा
सयाध्यात्मिकयोगनिष्ठया॥योगेश्वरोपासनयाचनित्यंपुण्यश्रवःकथयापुण्ययाच २२ अर्थेंद्रियारामसगोष्ठ्यतृष्णयातत्संमतानामप
रिग्रहेणच॥विविक्तरुच्यापरितोषआत्मन्विनाहरेर्गुणपीयूषपानात् २३

णरहितेनिर्लीनानंदादिगुणेवा।निर्निर्गुणनिषेधयोरित्यभिधानात्।हरौयारतिःएतद्द्वयंमुख्यसाधनमित्यर्थः २१ एतादृशंसाधनंकथंस्यादितितत्साधनान्याह।तच्छ्रद्धयेति।
तस्मिन्हरौश्रद्धयाभगवद्धर्माणांवर्णाश्रमादिविहितानांचर्ययाचरणेनजिज्ञासयाब्रह्मविचारेणआध्यात्मिकयोगोष्टांगयोगस्तन्निष्ठया।पुण्यश्रवाहरिःतस्यकथया २२ अ
र्थस्यदेहस्यइंद्रियाणांवारामेषुक्रीडावनेषुगुणेषुविषयेषुवातृष्णयाहेयबुध्या।तेषांविषयाणांसंमतानांस्रक्चंदनवनितादीनामपरिग्रहेणास्वीकारेण।आत्मन्देहभो
गविषयेपरितोषोलंबुद्धिः २३

स्मृत्या जन्मजरादिचिंतया। सीधुसुधा सर्वत्र कथयवाक्यप्रबंधइति धातोः भगवद्गुणसंदृब्धशास्त्रेण उत्तरत्र तत्कृतकंसवधादिपराक्रमलक्षणकर्मामृतपानेन। अहिंसा सत्यमस्तेयं ब्रह्मचर्यं स्यादार्जवं। क्षमा धृतिर्मिताहारः शौचं चैते यमा दश। कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा। अक्लेशजननं प्रोक्तमहिंसात्वेन योगिभिः। तपः संतोष आस्तिक्यं दानमीश्वरपूजनं॥ सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो व्रतं॥ एते तु नियमाः प्रोक्ता इति याज्ञवल्क्ययोगशास्त्रे अभिधानात्। अवेदस्मरणेन निरीहया अनिषिद्धचेष्टया २४ तत्परा हरिपरास्तेषां कर्णं पूरयतीति कर्णपूरं तच्च कर्णाभरणं यद्धरेर्मुहुर्गुणाभिधानं तेन लिंगव्यत्ययश्छांदसः। यद्वा हरेर्गुणाभिधानेन विजृंभमाणया भक्त्या कीदृश्या तत्परकर्णपूरया। एतैस्तु कैः साधनैः सदसत्कार्यकारणात्मकप्रपंच विषयासंगः स्यात् एतत्पनिवृत्तप्रपंचस्वामिनि निर्गुणे ब्रह्मणि च रतिः स्यादित्यर्थः। यद्वा सदसतो जगतः परस्मात्मादेतिसदसत्परात्मा तस्मिन्

अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना॥ यमैरकामैर्नियमैरनिंदया निरीहया द्वंद्वतितिक्षया च २४ हरेर्मुहुस्तत्परकर्णपूरया गुणाभिधानेन विजृंभमाणया॥ भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा रतिः २५ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान्ज्ञानविरागरंहसा॥ दहत्यवीजं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः २६

२५ असक्तब्रह्मण्यसंगनिशितारतिस्ततः किं तत्राह। यदेति। यदा ब्रह्मणि नैष्ठिकी सर्वोत्कृष्टा रतिः परोक्षज्ञानलक्षणा भवति तदाचार्यवांस्तदुपदिष्टार्थसाफल्यात्तद्भक्तिमान् पुमान्ज्ञानवैराग्ययोः रंहसा वेगेन अवीजं हृदयं स्वरूपोपाधिं विना वा ह्युपाधिं दहतीत्यन्वयः। किमनेन जीवस्येत्यत उक्तं। जीवकोशमिति। जीवस्य शरहस्थानीयं। तर्हि तद्दाहे जीवो विदग्धः स्यादित्यत उक्तं। पंचात्मकमिति। पंचभूतस्वरूपमत एवं बाह्यमित्युच्यते। जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्यमेव च॥ बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः॥ स जीवोपाधिविनाशे हि प्रतिबिंबः कथं भवेत्। कथं वात्मविनाशाय प्रयत्नः सेव्यते क्वचित्॥ अपुमर्थत्वाच मुक्तेः स्यादभावात्सुखस्य तु॥ ज्ञानज्ञेयाद्यभावाच्च सर्वथानोपपद्यते तस्मादेतन्मतं येषां तमो निष्ठा हि ते मता इति वचनात्। न स्वरूपवीजहृदयदाहोत्रार्थः। किंत्वस्वरूपोपाधेरित्यभिप्रायः। तत्र दृष्टांतमाह। योनिमिति। अरणेरुत्थितोऽग्निरिवेति २६

वीजाशयनाशे तद्गुणानां ज्ञानादीनामपि नाशात् आत्मनो बहिरिति भेदं न विचष्टे न विपश्यति। अन्यदर्शनाभावेपि स्वात्मानं पश्यतीत्यत एवेति। अंधवद्दृश्याभावान्न किंचिदपि पश्यतीत्यर्थः। कथं तर्हि संसारावस्थायामत्राह। परात्मनोरिति। परस्येश्वरस्यात्मनो जीवस्य च यद्यदा पुरस्तात्संसारावस्थायां व्यवधानं यवनिकास्थानीयात्मस्थानतदा यथा स्वप्ने स्वदृग्धज्ञानमेतावद्ज्ञानं भवतीति तत्र तद्विनाशे वीजहृदयनाशे तु पुरुष एवात्मनाश एवातः स्वरूपज्ञाननाशात्संसारावस्थैवोत्तमास्यात्किंचिज्ज्ञानस्यापि संभवादित्यर्थः। उक्तं दन्यथा स्वीकारेण। निदाघदिनहरशेतजीवात्मपरमात्मनोः। मुक्तौ तदाविमो ह्यायकोयत्नं कर्तुमर्हति॥ मग्नस्य हि परे ज्ञाने किंनु दुःखतरं भवेत्॥ पुत्रान्निक्षिप्य मेदाहं मन्ये भरतर्ष

दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरंतर्विचष्टे॥ परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पूरुषस्तद्विनाशे २८ आत्मानमिंद्रियार्थं च परं यदुभयोरपि॥ सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा २९ निमित्ते सति सर्वत्र जलादावपि पूरुषः॥ आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ३०

त्तमेति प्रमाणविरोधश्चाप्येतस्मिति २८ अतः फलितमाह। आत्मानमिति। आत्मानं जीवं इंद्रियार्थं शब्दादिविषयं च यदुभयोरात्मेंद्रियार्थयोः परमुत्तममीश्वरं तत्त्वं तदपि वीजाशयलक्षणउपाधौ सत्येव पुमान्पश्यति। अन्यदा तदभावेन पश्यतीत्यन्वयः २९ तत्र दृष्टांतमाह। निमित्तइति। जीवात्मपरमात्मनोर्भेदस्यान्वयव्यतिरेकसिद्धत्वेन प्रामाणिकत्वात्तदपलापे महासुरत्वमेव स्यादिति भावः ३०

जीवपरयोः सत्यभेदाप्रतीतेः किंकारणमभिमानांशं ज्ञात्वा ज्ञानेन बंधतत्कारणं तदपि विषयातिशक्त्यास्यादित्याह। इंद्रियैरिति। पुंसो मनो बुद्धेश्चेतनां बहुस्मरणशक्तिं हरतीत्यन्वयः। बहुस्मरणशक्तिरूपचेतनेत्युच्यते बुद्धेरिति वचनात्। मनसोऽहरणे कारणमिंद्रियाणीत्याह। इंद्रियैरिति। हरिकथाश्रवणादियोगेऽपि श्रोत्रादीन्द्रियैरात्मीयविषयाक्षेपेहेतुरित्याह। विषयाकृष्टैरिति। हृष्टं तेन बुद्ध्याऽऽदृढं करोति। स्तंब इति। स्तंबो जलनिर्गमद्वारं ३१ बुद्धेर्बहुस्मरणशक्तिभ्रंशे सर्वानर्थप्राप्त इत्याह। भ्रश्यतीति। भ्रष्टं चित्तमनु बहुस्मरणशक्तिभ्रंशानंतरं स्मृतिरनेकशास्त्रयथार्थस्मरणसामर्थ्यं भ्रश्यति। स्मृतिक्षये अनेकशास्त्रयथार्थस्मरणशक्तिनाशे सर्वोत्तमः स्वतंत्रः षड्विधभेदस्वामी महदादिसर्वतद्धीनमेनतावं मरणेऽपि न मुंचामीति भगवत्स्वरूपातत्त्वलक्षणं ज्ञानं भ्रश्यति। तदस्तु ततः किं तत्राह। तद्रोधमिति। कवय आत्मनो ज्ञानस्वरूपस्य तस्य तादृशस्य ज्ञानस्य रोधं नाशं आत्मनः

इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतो मनः। चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ३१ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये। तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ३२ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः। यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ३३

स्वरूपस्यापह्नवं नाशं प्राहुरित्यन्वयः ३२ अतश्च किमनिष्टमापन्नमत्राह। नात इति। पुंसः स्वार्थव्यतिक्रमः स्वप्रयोजनस्य व्यतिक्रमो नाशोऽतः स्वरूपभूतज्ञाननाशात्परतरोऽन्यतमो नाशो लोके नास्तीत्यन्वयः। आत्मनो निरवयवत्वात्तन्नाशो न एवावशेषो घटादीनां सावयवत्वे न तन्नाशः सावशेषो दृष्ट इति विशेषद्योतनाय लोक इत्युक्तं। ननु देहपुत्रादेरपि प्रेयस्त्वात्तन्नाशस्यापि महानाशत्वेन दुःखहेतुत्वात् किं ज्ञाननाशो विशिष्यत इति तत्राह। यदध्यसीति। आत्मनोऽन्यस्य देहपुत्रादेर्यद्यपि प्रेयस्त्वमस्ति तथापि पुत्रादेरात्मशेषत्वेन प्रियत्वात्तन्नाशस्य स्वव्यतिक्रमात्स्वरूपज्ञाननाशादाधिक्यं नास्तीति पूर्वेण न अध्याहारेणान्वेतव्यं। अत एव नातः परतर इत्युक्तं। केचिन्न ह्यसीति पठंति। तस्य ह्यध्याहारं विनान्वयः कर्तव्यः ३३

अथ तस्मान्नृणामिंद्रियार्थानां विषयाणामभिध्यानं निरंतरं संचिंतनं सर्वार्थानां सर्वपुरुषार्थानामपह्नवो विनाशहेतुः येनेंद्रियेणेंद्रियार्थाभिध्यानेन ज्ञानविज्ञानात्सामान्यविशेषलक्षणज्ञानात् भ्रंसितो भ्रंशितो मुख्यतां विवेकराहित्यमाविशति प्राप्नोतीत्यर्थः ३३ विषयाभिध्यानस्यापि दुष्टसंसर्गो मूलकारणं सविपश्चिता न कार्य इत्याह। कुर्यादिति। धर्मादीनामत्यंतविघातकमिति यदतो विपश्चित्तीव्रं तमस्तितीर्षुणा मनसा कदापि दुष्टसंगं न कुर्यादित्यन्वयः। नकार्यः कर्हिचित्संग इति वा पाठः। तदा विपश्चितेति योज्यं ३४ धर्मादिभिः सह पाठान्मोक्षस्यापि तत्तुल्यतास्यादिति शंकां परिहरति। तत्रापीति। स्वपाठपात स्वसासाद्गोगार्थव्याप्तत्वस्य तु। भवेन्नतो नेकशास्त्रयथार्थस्मरणे शि

अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणां। भ्रंसितो ज्ञानविज्ञानाद्येनाविशति मुख्यतां ३३ न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीर्षुणा। धर्मार्थकाममोक्षाणां यदत्यंतविघातकं ३४ तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते। त्रैवर्ग्योऽर्थो यतो नित्यं कृतांतभयसंयुतः ३५

तानश्यत्यतः स्मृतेर्भ्रंशाद्भगवत्स्वरूपातित्ता। विनश्येत्तेन नैवास्य भवेद्धानविपर्ययः। न च ज्ञानविपर्यासादन्यन्नाशकरं क्वचित्। सर्वस्मितस्य मूलं हि दुष्टसंसर्ग एव तु। दुष्टसंगाद्विरक्तस्याप्यन्यथा ज्ञानकारणं। दुष्टसंगाद्धि विश्लेषश्च स्वात्मत्वं प्रपद्यते बुधः। अतावत्स्वात्मनोऽन्यस्य मुक्तिं वापि निरात्मतामिति स्मा व्यास्मृतिसिद्धत्वादयमेवार्थोऽनुकृतीर्थो ग्राह्यः तमोहेतुत्वात्। मोक्षस्यात्यंतिकत्वं कस्मात् हि शेष्यत्वेन धर्मादेरपि पुरुषार्थत्वादित्यत्राह। त्रैवर्ग्य इति। त्रिवर्गसंबंधिपुरुषार्थः कृतांतस्य कालात्मनो हरेर्भ्रूविभ्रमजनितनाशलक्षणभयसंयुतो यतस्तस्मादिति शेषः। भविष्यन्नाशमवलोक्यानित्यमिति ३५

नैवगम्पीर्थाब्रह्मलोकादिसंबंधीनानित्यइतितत्राह। परावरेष्विति। गुणव्यतिकरान्मूलप्रकृतेरनुअनंतरंयेसावाःपदार्थाः। परावरेष्वपदतीतकालेयेवर्त्तमानाउत्कृष्टनिकृष्टलक्षणावा। ईशस्यकालनाम्नोहरेर्भ्रूविभ्रमेणविध्वंसितानाशिषोविनाशितसुभाशनेतेषांक्षेमीनित्यानंदीनाशीत्यन्वयः॥ अनेनब्रह्मलोकादिशाखिलक्षणः पुरुषार्थोपिननित्यइत्युक्तंभवति ३६ जगतोहरिणाबुद्धिपूर्वकसृष्टत्वात्प्रसादेनतस्यबंधनिवृत्तिरित्यथोक्तानर्थएवेत्याह। मनोमात्रमिति। इदंप्रत्यक्षप्रमाणसिद्धंविश्वंब्रह्मादिस्तंबपर्यंतंहरेर्मनसामितंनिर्मितंत्रातरस्तितंमीयतेसंक्षिप्यतेमिहिंसायामितिधातोः। आमात्रेअपरिच्छिन्नेमनसिस्थितत्वाद्धामनोमात्रं। तदुक्तं। मनोमात्रंहरेर्यस्मान्मनसामीयतेजगदिति। अत्रदृष्टांतमाह। यथेति। केयंक्रियानामेतितत्राह। क्रियावेति। स्वप्नेहरेरिच्छयाजाग्रद्दृष्टकरितुरंगादिवासनयानिर्मिताः मात्रेतिप्रवर्त्तंतइतिवासनामात्रं। व्याप्नेमनसिविलोष्मस्थितत्वाद्वासनामयमिति। वसआच्छादनइतिधातोः। ईश्वरेच्छयाच्छाद्यमानत्वाद्वासनामयं। वसआच्छादनेतस्माद्धातोर्वीवासनामयमितिवा। यतएवंहरेरि

परावरेषुभावागुणव्यतिकरादनु॥ नतेषांविद्यतेक्षेमीईशविध्वंसिताशिषां ३६ मनोमात्रमिदंविश्वंयथास्वप्नेमनःक्रिया॥ क्रियास्ववासनामात्रसानीहायांप्रलीयते ३७ आत्मात्वनीहयासाक्षात्स्वयंज्योतिःप्रसिध्यति॥ एवंमुदस्यात्ममायां ज्ञात्वापरमेमुनिः ३८

च्छाधीनंजगदतोहरेरनीहायांसृष्टिव्यापाररहित्यावस्थायांसत्वादिगुणसाम्यलक्षणायांलीयतेस्वस्वकारणानुप्रवेशपूर्वकामव्यक्ततामाप्नोतिनतुभूस्मतां। तदेतदाह। अनीहायामिति। हरेरिच्छाधीनाजगतःस्थितिः। अतोविभोरनीहायांलीयतेसकलंजगदितिवा। ३७ ननुमुक्तैःकीदृशोविष्णुःप्राप्यतइतितत्राह। आत्मेति। स्वयंज्योतिर्निराविलुप्तप्रकाशःसाक्षात्तुर्यआत्माजाग्रदाद्यवस्थानुभविनोजीवात्मनोतिरिक्तोविष्णुरनीहायामवस्थितःजीवद्यापारशून्यएवव्याप्तरूपीप्रसिध्यतिप्राप्यतेमुमुक्षुभिरितिशेषइत्यन्वयः। अनीहावस्थएवासौमुमुक्षुभिरवाप्यतइतिवा। फलमाह। एवमिति। जीवपरयोरेवमुक्तविषयास्वस्वाभिप्रायंज्ञात्वामुनिःस्तिष्ठापरपर्यायात्ममायांबंधकशक्तिंमुदस्योपरमेद्धरिमुपगम्यसुखेनतिष्ठेत्रतिप्राणनिर्मूलितसंसारोभवेदित्यर्थः। एवंविद्वान्बंधकशक्तिंमुदस्यहरिमाप्नुते। प्रकृतिर्लिंगत्वमायाख्याशस्यप्रसिधीयते। बंधशक्तिर्यतःलोकाचप्रभीत्सनिशंभुवीतिच

३८

अनीहावस्थएवमुमुक्षुभिःप्राप्यइत्युक्तंतत्स्पष्टमाचष्टे। नयत्रेति। निद्रासुषुप्तिर्मूर्च्छामोहःअर्थहृदकुनायत्त्यत्रतुरतिर्जीवन्मुक्तिः। अतुरतिरितिपाठेजीवन्मुक्तिरुदीर्यतइतिवा। एतानिद्राद्यवस्थायत्रनसंति। स्वशक्तिव्यंजितानभवंति। तद्धिजितात्मनोमनोजयवतोमुमुक्षोःप्राप्यंब्रह्मेत्यन्वयः ३९ ननुजीवात्मातदुपजीव्यःपरमात्माचकथंज्ञातव्यइत्याशंक्यतत्तत्त्वंविविच्योपदिशन्नाह॥ तत्वमिति। हेनरेंद्र। यस्त्वनयोःस्थावरजंगमयोर्मध्येविषयाभिन्नोनाडुःखवःसन्नेकोजीवोसिसदुःखीतिश्रुतिःतत्त्वंहृदिस्थितमवेहि। हृदिस्थआत्मेतिश्रुतिः। अनेनजीवात्मनोदेहेकुत्रावस्थानमितिशंकापरिहृतेतिज्ञायते। त्वंकइतितत्राह। सोस्मीति। योहंतवसदृशोजीवोस्मितंमांज्ञानात्मकप्रत्यगात्मानमवेहि। अनेनतारतम्यज्ञानमावश्यकमित्युक्तंभवति। अथजीवस्वरूपज्ञानानंतरंईश्वरज्ञानंप्रददामीत्याह। अथेति। यःक्षेत्रवित्क्षेत्रज्ञःसर्वांतर्यामीसर्वस्यप्रत्यक्षवक्ता

नयत्रनिद्रामूर्च्छावानार्थहृत्स्वमनोरथः॥ नानुरतिर्नप्रलयस्तद्ब्रह्मपरमंविदुः ३९ तत्वंनरेंद्रजगतामथतस्थुषांचदेहेंद्रियासुधिषणात्मभिरावृतानां॥ यःक्षेत्रवित्तमनयोर्हृदिविश्वगाधिःप्रत्यक्चकास्तिभगवांस्तमवेहिसोस्मि ४०

क्षित्रआभिमुख्येनप्रकाशते। दुर्भगशरीरस्थोपितन्मलाद्यलिप्ततयाजीवव्यतिरिक्तोजीवस्यात्यंतोपकारत्वेनसान्निध्येनावस्थासतेसभगवांस्तत्स्वसुखादिप्रदःश्रीनारायणइत्यवेहि। तंविशिनष्टि। जगतामिति। देहश्चेंद्रियाणिचासवःप्राणाश्चधिषणाबुद्धिश्चात्माहंकारश्चतैरावृतानांजगतांजंगमानांतस्थुषांस्थावराणांचतत्त्वंसर्वसत्ताप्रदत्वात्। तदुक्तं। सर्वसत्ताप्रदत्वात्तुसर्वतत्त्वंहरिःस्मृतः॥ सर्वत्रविततत्वाद्वासोहंत्वमितिकथ्यते॥ सर्वांतर्यामकत्वात्तुनजीवात्मत्वतोहरिरितिवा। अभिमानस्त्वहंकारआत्मावेत्यभिधीयतइतिवचनाद्धात्माहंकारः। व्यवधानेनात्वयोपियोग्यतापेक्षयाभवेदितिवचनात्। सात्विकानांजीवपरभेदज्ञानेविशिष्टमुक्तिसाधनेयोग्यतामपेक्ष्यव्यवधानेनात्वयोप्युक्तः। अनेनेतरेषामभेदज्ञानेतमःसाधनेयोग्यतेतियथास्थितावयइतिदर्शितं किंचतत्वज्ञानस्यगोपनीयत्वेनपरोक्षत्वस्यदेवप्रीतिहेतुत्वात्। परोक्षप्रियाश्चाहिदेवाःप्रत्यक्षद्विषइतिश्रुतेः। अतोयथापाठमेवार्थवद्देतोसुरवहुनित्यान्नमोहंक्षाधिकारिणइतिबुधाःसद्भिःसत्संगःपरिहर्तव्यश्चंडालसंगवदितितात्पर्यं ४०

ननु मायाकल्पितपंचभूतात्मदेहे ब्रह्मैव सुखदुःखेऽनुभवति ब्रह्मैव संसरति ब्रह्मैव मुच्यत इत्याचार्यैर्विमुक्तः कथं मुच्यत इति शंकते आत्मेति न स्यामित्युपसावेनाद्वयं गीका रोपयुक्त इति तत्राह। यस्मिन्निति। इदं सत्स्थित्यादिकमसत्सर्गनादिकं जगद्यस्मिन् भगवति आत्मतया निजस्वरूपतया विभातीति योग मायोगिराद्यैः तत्र माया विवेक विधुतिः मायया ज्ञानप्रकाशस्तिसे यथा विवेको विच्छिन्नः पृथग्भाव इति धातोः ज्ञानं देहो हरिः पंचभूतदेहो नीवइति पृथग्विच्छितज्ञानाद्धि धुतिर्विध्वंसो यस्यायोगिराद्यैः तस्य तथोक्तः। एतदेव दृष्टान्तेन स्पष्टयति। स्रजीति। स्रजि मालायां रज्ज्वां वाहिबुद्धिर्वीत्रयं भावः। यथा रज्जुतत्त्वाज्ञानाद्भ्रान्तौ सर्पज्ञानं पुसत्रेगुरूपदेशात्तत्परादर्वी। शिरोलक्षणफणाद्यनावलोकनाद्वा स्पर्शकार्कश्यज्ञानाद्वा विधूयते। तथा प्रमाणबहुदर्शनात्तत्त्वज्ञानोपदेष्टा वा वेदवाक्याद्वा ब्रह्मणो जगदात्मत्वं विधूयते नित्यमुक्तत्वादि

यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुतिः स्रजि वाहिबुद्धिः॥ तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ४१

लक्षणो नामनन्यसाधारणो नासत्वात्र ब्रह्मणः संसारो युक्त इति स्पष्टयन् पूर्वछन्देनोक्तं तच्छन्देन परामृश्य प्रपद्य इति क्रियापदेनान्वेति। तमिति। जीवव्यावृत्त्यर्थं नित्यशब्दः प्रत्ये कमभिसंबध्यते। नित्यमुक्तं नित्यपरिशुद्धं च नित्यविबुद्धं च यत्तत्त्वमनारोपितं रूपं तद्यस्य तं। अतएव प्रत्यूढे निरस्ते कर्म पुण्यपापलक्षणमदृष्टं सत्वादिगुणकलिला प्रकृतिश्च येन सत था तं। यत्स्वरूपतया भातमज्ञानं मानमनादिकं। विवेकज्ञानेन रज्ज्वां सर्पभावद्धि धूयते। तं नित्यमुक्तभावेन निरस्तप्रकृतिं मन्ये। न भ्रांतिर्जगतो दृष्टिर्ब्रह्मांतिर्हि दृशिर्ना। अनयोरात्मतयाद्दृष्टिर्भ्रांतिरित्यवधार्यतां। मायेति ज्ञाननाम स्यान्मायेति प्रकृतिस्तथा। ज्ञानस्वरूपं विलोक्य प्रकृतिर्न हरेः प्रभुः। एवं विवेकिनो विश्वं ब्रह्मरूपेण भाव्यते। पंचभूतात्मकं देहं विलोः वृषं पश्यो गिनः॥ तथा नयोगिराद्यैः ज्ञानं देहो यतो हरेरिति प्रमाणबाहुल्यान्मायादिशब्दानामुक्त एवार्थो न तु वीदिकल्पितइति निरवद्यं। सर्पमावत्सर्पज्ञानवत् ४१

एवंविधसंसारो च्छेदकारणं हरेः सर्वोत्तमत्वज्ञानं तच्च विनाभूतमतो तद्भक्तिरेव प्रधानमित्याह। यत्पादेति। यस्य पादपंकजपोः पत्राणां आश्रयमाणां त्वंगुली नां तत्त्वं तेनोद्ग्रथयंति॥ कुत इति हेतुगर्भविशेषणमाह। विरुद्धेति। विरुद्धमार्गाः स्रोतोगुणाः संसारगुणा येषां तेतयोक्ताः संसारगुणानां विरुद्धत्वेन हेयत्वेन प्रतीयमानत्वादित्यर्थः। संसारगुणानां विरुद्धत्वेन प्रतीतौ किं कारणमिति चेत् तेजः सर्वगुणोत्कर्षात्स्वभावो दुष्प्राजः। तदुक्तं। तेजः सर्वगुणोत्कर्षः सर्वेभ्यो महदुत्तम इति च। अनेन तत्त्वज्ञानिषु तत्र तद्गुणोत्कर्षो महत्वकारणमित्युक्तं भवति। द्विमतो च ज्ञानदौर्बल्यं कारणं। अनाद्यंतं परं ब्रह्म न देवा ऋषयो विदुः। एकस्तद्वेद भगवान् प्रभुर्नारायणो विराडिति अनेन श्रीनारायणादन्येषां सर्वेषामपि ह्यामत्यसंभाव्यत इति सूचितं। अ

यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति संतः। तद्वन्न तद्रिक्तमतयो पि विरुद्धमार्गस्रोतोगुणास्तमरणं भज वासुदेवं ४२ कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयंति॥ तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णं ४३ मैत्रेय उवाच स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा॥ दर्शितात्मगतिः सम्यक्प्रशस्योवाच तं नृपः ४४ पृथुरुवाच कृतो मेनुग्रहः पूर्वं हरिणार्तानुकंपिना॥ तमापादयितुं ब्रह्मन्भगवन्यूयमागताः ४५

तस्मात्तं वासुदेवमरणं शरणं व्रजेत्यन्वयः ४२ संसारोत्तारहेतुत्वाद्भक्तेरेव सर्वगुणोत्कृष्टत्वमित्यभिप्रेत्याह। कृच्छ्र इति। अप्लवेशां भक्तिलक्षणतरीरहिताः षड्वर्ग एव नक्रो यस्मिन् तथा। तं भवार्णवं ये तितीर्षंति तितर्तुमिच्छंति तेषामिह महान् कृच्छ्र इति यस्मात्तस्मात्त्वं हरेर्भजनीयमंघ्रिमुडुपं नावं कृत्वा व्यसनं विविधापदः कं दुस्तरार्णं ज्ञानना विना तर्तुमशक्यं संसारसमुद्रमुत्तरेत्यन्वयः ४३ इतः परमुपदेष्टव्यांशो नास्त्यतः परं राज्ञा किमुक्तमत्राह। स एवमिति। आत्मनो हरेर्मेधा ज्ञानं यस्य सतथा तेन मनोयोगवता वा ४४ किमवोचत्तत्राह। कृत इति ४५

भाग॰ व॰
८७

तदर्शनेन भगवदागमनेनापि किं प्रयोजनमिति शंकां शेनाशीत्याशयेनाह। निष्पादितमिति। घृणालुभिर्दयाशीलैः। एवमुपकर्तृभ्यो युष्मभ्यं कापि गुरुदक्षिणा मया दातव्या तद्गुरुदक्षि
णालक्षणं किं धनमात्मदेहेन सह ददे ददामि। न मम किंचित्स्वाधीनमस्तीत्यर्थः। राज्यादिकमस्ति चेत्सर्वं तत्साधुभ्यो दत्तं तदधीनमहं कथं दास्यामि। परकीयदाने चौर्यमापद्यत इति भावे
नोक्तं साधुदत्तमिति ४६ ननु तथापि साधुभिरनुज्ञातं राज्यादिकं तद्दातव्यमिति चेत्सत्यं तद्दातुं योग्यं चेद्दास्यामीत्याह। प्राणा इति। नायोग्यानि ४७ युष्मभ्यं सर्वं निवे
दितमिति मोहाद्युक्तं तत्तु नोक्तव्यं सर्वस्य युष्मदीयत्वान्न मया दातव्यमित्याह। सैनापत्यमित्यादिना ४८ किं बहुनानुलापेनेदृग्भवदर्हणमित्याह।। येरीदृशीति। निगमिभिर्वे

निष्पादितं त्वकार्त्स्न्येन भगवद्भिर्घृणालुभिः।। साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ४६ प्राणा दाराः सुता ब्रह्मन्गृहाश्च सपरिच्छदाः।। राज्यं मही बलं को
श इति सर्वं निवेदितं ४७ सैनापत्यं च राज्यं च दंडनेतृत्वमेव च।। सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ४८ येरीदृशी भगवतो गतिरात्मवाद एकांततो नि
गमिभिः प्रतिपादिता नः।। तुष्यंत्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रं ४९ मैत्रेय उवाच तत्रात्मयोगपतय आदिराजेन
पूजिताः।। शीलं तदीयं शंसंतः खेऽभूवन्मिषतां नृणां ५० वैन्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः ५१

दिकै रात्मवादे वेदांते एकांततो मुख्येन निर्णीतत्वात् यैर्भवद्भिरीदृशी हरेर्गतिरस्माकं प्रतिपादिता ते यूयं स्वकृतेन तुष्यंत्वित्यन्वयः। किं नीरसमधुरवचनेनेत्युक्तं तु
ष्यंत्विति ४९ तन्निर्णयवचनांते तैः किमकारीत्यत्राह। तत्रात्मेति। आत्मयोगस्याध्यात्मयोगस्योपदेष्टृत्वेन पतयः मिषतां पश्यतां। खे आकाशे ५० पृथुनाते सः सम
आनुग्रहः प्राप्त इत्यस्य लक्षणमाह। वैन्य इति। महतां धुर्यः श्रेष्ठो दासंस्थित्या संश्रयेण ध्यात्मशिक्षया परमात्मतत्त्वज्ञानादानलक्षणया। इवशब्द एवार्थे ५१

राम
८७

तस्य कर्मकरणप्रकारमाह। कर्माणीति ५२ प्रकृतेः परमात्मानं श्रीहरिं कर्मणामध्यक्षं साक्षिणं मन्वानः ५३ ४ विषयासक्तो वर्तमानस्य पुत्रानुत्पादनेन स्वपुरराज्यरक्षणपुण्य
प्राप्तिः कथमत्राह। एवमिति। अर्चिषि भार्यायां ५५ एवं संपन्नसर्वकर्मापि सज्जातभगवदनुग्रहाविरोधेन तत्तत्कर्मीणींद्रादितत्तद्गुणान्दधारेत्याह। सर्वेषामिति। जगत्सृष्टेरपि

कर्माणि च यथाकालं यथादेशं यथाबलं।। यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतं ५२ फलं ब्रह्मणि विन्यस्य निर्विषंगः समाहितः।। कर्माध्यक्षं च मन्वान आ
त्मानं प्रकृतेः परं ५३ गृहेषु वर्त्तमानोपि स साम्राज्यश्रियान्वितः।। नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ५४ एवमध्यात्मयोगेन कर्माण्यनुसमाचरन्।।
पुत्रानुत्पादयामास पंचार्चिष्यात्मसंमतान्।। विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकं ५५ सर्वेषां लोकपालानां दधारैकः पृथग्गुणान्।। गोपीथाय जग
त्सृष्टेः काले स्वे स्वेऽच्युतात्मकः ५६ मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरंजयन्प्रजाः।। राजेत्यधान्नामधेयं सोमराज इवापरः ५७ सूर्यवद्विसृजन्गृह्णन्प्र
तपंश्च भुवो वसु।। दुर्द्धर्षः सेनसेवाग्निर्महेंद्र इव दुर्जयः ५८ तितिक्षयाधरित्रीव द्यौरिवाभीष्टदो नृणां।। वर्षति स्म यथाकामं पर्जन्य इव तर्पयन् ५९
समुद्र इव दुर्बोधः सत्त्वेनाचलराडिव।। धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव ६० कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा।। मातरिश्वेव सर्वात्मा
बलेन महसौजसा ६१ अविषह्यतया देवो भगवान्भूतराडिव।। कंदर्प इव सौंदर्ये मनस्वी मृगराडिव ६२ वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः।।
बृहस्पतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः ६३

यापरक्षणाय। अच्युते आत्मा मनो यस्य सोऽच्युतात्मकः ५६ राजशब्दं निर्वक्ति। मनोवागिति। रंजनाद्राजेति। इंद्रादिगुणधारणप्रकारं विविच्य वक्ति। सोमराज इत्यादिना ५७ वसु
जलं। वसुरत्नं जलं रश्मिर्वसुदेवो विभावसुरित्यभिधानं ५८ ५९ अचलराण्मेरुः ६० कोशाढ्यः धनौघपतिः सर्वात्मा सर्वान्तरस्थः ६१ भूतराट् सदाशिवः। मृगराट् सिंहः
अजो ब्रह्मा ६२ आत्मतत्त्वे परमात्मतत्त्वे। आधिक दृष्टांतोयं ६३

भा॰ च॰ अथापितमेवाह भक्त्येत्यादिना। गवादिषु भक्त्यालज्जादिगुणेन ६४ पुंभिरूर्ध्वंगीतयाउच्चैः कीर्तितयाकीर्त्यास्त्रीणांकर्णरंध्रेषु प्रविष्टः परोद्यमेवात्मतुल्यः स्वकार्यसमोराम इ
९८ वेत्यन्वयः। गुरुविप्रेषु भक्त्यावपरेषांहितकृततया। प्रश्रयेणवकीर्त्यावपृथूरामपनुव्रतइतिवचनात्नेदंस्कृतिमात्रंसत्यमित्यर्थः। न गुरूनेवधर्मोसिरामदेवस्यकुत्रवित्। तथा
पिधर्मरक्षार्थंगुरुभक्तिमदर्शयदित्यतोरामस्यलोकसंग्रहार्थंनललनवाश्फलप्राप्त्यर्थंगुरुभक्त्यादिकमितिसंतोष्टव्यं ६५ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेटीका

भक्त्यागोगुरुविप्रेषुविष्वक्सेनानुवर्तिषु॥ ह्रियाप्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ६४ कीर्त्योर्ध्वगीतयापुंभिस्त्रैलोक्येतत्रतत्रह॥ प्रविष्टः क
र्णरंध्रेषुस्त्रीणांरामः सतामिव ६५ श्रीः इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेद्वाविंशोध्यायः मैत्रेयउवाच दृष्ट्वात्मानंप्रवयसमेक
दावैन्यआत्मवान्॥ आत्मनावर्द्धिताशेषस्वानुसर्गःप्रजापतिः १ जगतस्तस्थुषश्चापिवृत्तिदोधर्मभृत्सतां॥ निष्पादितेश्वरादेशोयदर्थमिहजज्ञिवान्
२ आत्मजेष्वात्मजांन्यस्यविरहाद्रुदतीमिव॥ प्रजासुविमनास्वेकः सदारोगात्तपोवने ३

यांद्वाविंशोध्यायः॥ ॥योगेनदेहत्यागप्रकारः पृथ्व्यादितत्त्वानांतदभिमानिदेवतानांचस्वस्वकारणप्रवेशनलक्षणोन्यपश्चदेहत्यागकालेचिंतनीयइतिनिरूप्यतेस्मिन्नध्याये॥
तत्रादौपृथोस्तपसिप्रारंभप्रकारंवक्ति॥ दृष्ट्वेत्यादिना। प्रवयसंगतवयसंस्थविरं। आत्मवान्जितमनाः। सहितोनुसर्गः पुत्रपौत्रादिलक्षणोयेनजनेनसस्वानुसर्गः। वर्द्धिता
शेषःस्वानुसर्गः स्वराज्यकालीनजनोयेनसतथा १ आरामकरणेनस्थावरस्यवृत्तिदानं २ आत्मजांपृथिवीं। राज्ञएवद्वियोगाद्रुदतीमिवस्थितां ३ राम ९८

आत्मनियमः कंदमूलाद्याहारः शरीरपातार्थमापाद्योयेनसआपाद्यात्मनियमः। पुरास्वविषयेस्वराष्ट्रेजयार्णांदुष्टानांतपसिसंतापेदंडेयथाप्रारब्धस्तथाग्रतपसिकायक्लेशादिलक्ष
णप्रारब्धइत्यर्थः ४ आत्मनियमानाह। कंदेति ५ पंचतपः आह। ग्रीष्मइति। पंचतपांस्यग्नयोयस्यसपंचतपाः। आतेकोमिरर्द्धः। आसारधाराः निराश्रयतयासूरवृष्टिसेवी
शिशिरेहिमनैर्लस्थंडिलेशयोनिशीतिशेषः ६ आरिराधयिषुराराधयितुकामस्तदर्थमुग्रंतपआचरदित्यर्थः ७ ८ योगमुपासनोपायं ९ भक्तिः प्रेमपूर्वंभजनं। अन

तत्रापद्यात्मनियमोवैखानससुसंमते॥ आरब्धउग्रतपसियथास्वविजयेपुरा ४ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित्॥ अब्भक्षः कतिचित्प
क्षान्वायुभक्षस्ततः परं ५ ग्रीष्मेपंचतपावीरोवर्षास्वासारषाण्मुनिः॥ आकंठमग्नःशिशिरेउदकेस्थंडिलेशयः ६ तितिक्षुर्यतवाग्दांतऊर्ध्वरे
ताजितानिलः॥ आरिराधयिषुः कृष्णमाचरत्तपउत्तमं ७ तेनक्रमानुसिद्धेनध्वस्तकर्मामलाशयः॥ प्राणायामैःसंनिरुद्धषड्वर्गःछिन्नबंध
नः ८ सनत्कुमारोभगवान्यदाहाध्यात्मिकंपरं योगंतेनैवपुरुषमभजत्पुरुषर्षभः ९ भगवद्धर्मिणःसाधोःश्रद्धयायततःसदा॥ भक्तिर्भगवति
ब्रह्मण्यनन्यविषयाभवत् १० तस्यानयाभगवतः परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या॥ ज्ञानंविरक्तिमदभून्निशितेनयेनचिच्छेदसंशय
पदंनिजजीवकोशं ११

न्यविषयाभगवदेकविषया १० सक्तेः फलमाह। तस्येति। येनज्ञानेनसंशयपदंसंशयविपर्ययास्थानंनिजत्वेनाभिमतंजीवकोशंवाह्यांतकरणंलिंगशरीरंवाचिच्छेदच्छिन
त्ति। तादृशंभगवत्ज्ञानंतस्यपृथोरभूदित्यन्वयः। तस्यहरेरनुस्मरणंनिरंतरध्यानंतस्यपूर्त्यानयाभक्त्यापरिशुद्धंकर्मसत्वपुराणपुरुषआत्मामनोयस्यसतथातस्याभू
दित्यनेनभूत्त्वजायामितिधातोः सतएवज्ञानस्याविर्भावउच्यतेनतुप्रागसतस्तस्यज्ञानित्वात्ज्ञानिनोज्ञानस्याविर्भावतिरोभावावस्यावस्थास्थानस्यज्ञानमुत्पन्नमिति
व्यवहारोयुज्यतइत्यर्थः ११

उत्पन्नज्ञानस्य स्थितिमाह। छिन्नेति। येन वयुनेनेदमच्छिनत्तज्ज्ञानं तत्यज इत्यन्वयः॥ अन्यथा ज्ञानसंप्लवः स्यादित्युक्तं कथं युक्तं स्यादित्यत उक्तं। छिन्नान्यधीरिति। निरस्तान्यथाज्ञानः स्वरूपज्ञा
नाभावे कथमिदमित्यत उक्तं। अधिगतात्मगतिरिति। आत्मशब्देन स्वस्वरूपं परमात्मा चोच्यते। अधिगते अपरोक्षीकृते परमात्मा स्वस्वरूपं च येन स तथा। अत एव तत्साक्षर्म्यमाह। निरी
ह इति। ज्ञानोत्तरकालीनप्रवृत्तिमात्रं तु सर्वविद्धि विबद्ध इत्यर्थः। अत्र ज्ञानस्य योगेनामनिर्लेपेन स्वरूपज्ञानेन करतलामलकवत्स्पष्टत्वेन वृत्तिज्ञानस्य बाह्यान्तःकरणजन्यस्य लेदनि
रीक्षणमद्विन्नमिदं नश्वरमिति दर्शनं तत्त्यजः। तदुक्तं। अपरोक्षतया हृति क्षीनलेदनिरीक्षणं॥ स्वरूपज्ञानसंस्थित्या ज्ञानत्याग उदीर्यत इति। अयं विशेषोपि तत्त्यज इति व्याख्यानेन सूचित इ
ति। कथमस्य स्वरूपज्ञानसिद्धिरित्याशयेनाह। तावदिति। यावद्गदाग्रजस्य श्रीनारायणस्य कथासु रतिं न कुर्यात्तावद्यतिर्निरिन्द्रियग्रामोपि पुरुषो योगगतिभिः प्राणायामादि

छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन॥ तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् १२ एवं स वी
रप्रवरः संयोज्यात्मानमात्मनि॥ ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरं १३ संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सर्पयञ्छनैः॥ नाभ्यां कोष्ठेष्ववस्थाप्य हृदु
रःकंठशीर्षणि १४

लक्षणैर्योगसाधनैरप्रमत्तः अनाविर्भूतस्वरूपज्ञानो भवति। अनेन भगवत्कथारतिः स्वरूपज्ञानेनेति लक्ष्यते। तदप्युक्तं। स्वरूपज्ञानतः सम्यग्यतिर्विष्णुकथासु चेति। यद्वा योगाद्
न्यैर्योगैति शब्दवाच्यैर्हीनैः स्वरूपविषयैर्भगवत्त्वं ब्रह्मादितारतम्यं पंचविधं लेदं जीवस्वरूपमित्यादिविषयबाहुल्यात्स्वरूपज्ञानस्य बाहुल्यं प्रयत्नेन भवति १२ उपसंहरति। एवमिति। ब्र
ह्मभूतः ब्रह्मणि भूतः ब्रह्माधारतया स्थित इत्यन्वयः। काले प्रारब्धकर्मक्षयसमये। तत्याजेत्यनेन स्वकलेवरमेवात्याक्षीन्न तु स्वरूपज्ञानमित्यवगंतव्यं १३ स्वच्छंदमृत्युर्योगीना
देहत्यागप्रकारं दर्शयितुमस्योत्क्रांतिप्रकारमाह। संपीड्येति। बद्धासनस्थितो वायुमुत्सर्पयन्नूर्ध्वं नयन्मूलाधारान्नाभ्यां स्थापयन्हृदि कंठे च शीर्षणि च भ्रूमध्ये चेत्येषु कोष्ठेषु स्थानवि
शेषेषु शनैरवस्थाप्य १४

अनेन क्रमेण सूक्ष्मं वृष्ट्या वकुवचनं मूर्ध्नि शिरोमध्यप्रदेशे आवेश्य निःस्पृहः स्थिरचित्तः सिद्धेदित्यन्वयः। देहे स्थितानां पंचभूतानां स्वस्वकारणेषु लयोऽनेनो
च्यते। देहे वायुभागं तत्कारणेऽधिदैववायावयूयुजत्। आध्यात्मवायोरधिदैववायुः कारणं तत्रैव लय इत्यर्थः। चिंतयेदित्यन्वयः। तदुक्तं। आद्ये स्वकारणमिति
ज्ञानमेव विलापनं॥ समाधिकाले विज्ञेयं देहादेर्दर्शनात्तु नरैरिति। एवमेवोत्तरत्रापि ज्ञातव्यं॥१५॥ छिद्ररूपत्वात्पेक्षाखानीति बहुवचनं यथांतरोक्ते
यन्नदपेक्षया विभागशः इति। इदानीं पंचानां भूतानां स्वकारणेषु लयप्रकारं ध्यानमाह। क्षितिमिति॥१६॥ इंद्रियलयप्रकारं ध्यानमाह। इंद्रियाणीति। समस्ता

उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निःस्पृहः॥ वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत्॥१५॥ खान्याकाशे द्रवं तोये यथास्था
न विभागशः॥ क्षितिमंभसि तत्तेजस्यदो वायौ नभस्यमुं॥१६॥ इंद्रियाणि समस्तानि तन्मात्राणि यथोद्भवं॥ भूतादिनान्यु
त्कृष्य महत्यात्मनि संदधे॥१७॥

नींद्रियाणि यथोद्भवं यथोत्पत्तिः स्वस्वकारणेषु लीयंत इति। तन्मात्राणि शब्दादीनि यथोद्भवं लीयंत इति चिंतयदित्यन्वयः। अत्रायं विभागः।
इंद्रियाणि तैजसाहंकारे तदभिमानिदेवा वैकारिकाहंकारे तदभिमानिषु तेषां देहा वैकारिकाहंकारे पृथिव्यादयो गंधादिभिः सह भूतादौ तामसाहं
कारे लीयंत इति भूतादिरित्युपलक्षणं एवं त्रिविधाहंकारस्तानींद्रियादीनुत्कृष्य तत्तन्निष्ठं महत्तत्वे लीनं महत्त्वेन तदभिमानिनि चतुर्मुखे वाहंका
रोऽभिमानी रुद्रो लीयत इति मनः संदध इत्यन्वयः॥१७॥

सर्वेषां गुणानां भक्तिज्ञानादीनां विशेषेण न्यासो निधानं यस्मिन्स्तथा तं। सत्त्वादिगुणैर्विविधाश्रयं वा स्वनायेनसतथा तं वा। तं महांतं त्र्चतुर्मुखं तत्त्वल
क्षणं नडं च मायामये मायाशब्दवाच्ये जीवेषाण धारणाशक्तिमति लक्ष्मीतत्त्वे न्यस्य निवेशितीत्यर्थः। अस्य तु वडप्रकृतौ जीवतइति जीवश
ब्दगाच्यं तं व चेतनशरीराकारतया परिणामादुपचारः प्रलये केशावमनुशेतेइत्यनुशयः शब्दवाच्यत्वं उशक्तिप्युक्तत्वात्स्त्रीलिंगशब्दवाच्यप्रकृ
तिं जगदादानादात्मशब्दाभिधेयस्य हरेराधारतयानिष्ठतीत्यात्मस्थामर्पितवत्। अनुशायी लिङ्गकृत्यर्थी नत्वात्तदारागत्वाद्वानुशयीशब्द
वाच्यो सौपुमानिस्तुपलक्षणं चेतनशाशिरप्राकृतशरीरत्वात्स्वरूपाशब्दवाच्येब्रह्मणि चतुर्मुखेनसहतिष्ठतीतिध्यानं यथात्। प्रभुरित्येनेन

तं सर्वगुणविन्यासं जीवे मायामयेन्यधात्॥ तं चानुशयमात्मस्थमसावनुशयी पुमान्॥ ज्ञानवैराग्यवीर्येण स्वरूपेस्थे
व्यधात्प्रभुः॥१८॥ अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनं॥ सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः॥ ॥१९॥ ॥ ॥

मनोस्तु संधानसामर्थ्यमस्तीति घनयति के नैतत्सामर्थ्यमभिप्रेदित्यतउक्तं ज्ञानेति। यद्वा एवं विधोपासनाजनितसामर्थ्येनानुशयी हृष्टः स्वस्व
रूपे ब्रह्मणि सायुज्यलक्षणां मोक्षमाप्तुं प्रधादित्यन्वयइति। मायेतिप्रकृतिश्चेतिमायानीवक्ष्यकथ्यते। शेते नुके शर्वयस्मात्तस्मादनुशयो विष्णुः॥
एतैस्तु नाम भिर्वीआश्री विष्णोरनपायिनी॥ तथैवानुशयी जीवस्तथानुष्टेयतः सदा॥ उकष्य:शयनात्पूर्वं तथाहानादहं स्मृतः॥ अप्राकृत
तनुत्वात्तुस्वरूपं हरिरुच्यते॥ नित्यसिद्धेश्वरानात्रिस्यं ब्रह्मशर्णात्वतः सदेतिसमाख्यासिद्धत्वादुक्तएवार्थो नाद्वैतवादिकल्पितइतिसिद्धं॥
१८॥ पत्याचैवंगते तत्र वनेर्चिर्या भार्यपाकिमकारीतितत्राह। अर्चिरित्री मेति। पद्भ्यांभुवस्पर्शनं पनरदनर्हा॥१९॥ ॥

भर्तुर्व्रतं धर्मवर्ज्जनादिति तद्देहस्यापि धर्मः तत्र निष्ठया आर्षदेहयात्रया कंदमूलफलापशनलक्षणया। एवं विधानुष्ठाने परिकर्षितापि श्रेयस्करः प
त्युः करस्पर्शलक्षणमानेन लालनेन निर्वृतानंदा प्राप्तार्तिं व्रतानुष्ठानैर्निमित्तं क्लेशं नाविंदतेत्यन्वयः॥२०॥ एवं तस्याः स्थोः पतीत्वयोग्यता मनुवर्ण्यान
रक्तियां वक्ति। देहमित्यादिना। पृथिव्या आत्मनः स्वस्याश्च दयितस्य पत्युर्देहं विपन्नां खिलचेतनादिकं चेतन्यप्राणादिष्ट्वानि लक्षणरहितमालक्ष्य वितां

अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चार्षदेहयात्रया। नाविंदतार्त्तिं परिकर्षितापि सा प्रेयस्करस्पर्शनमाननिर्वृता॥२०॥ देहं विपन्ना
खिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः॥ आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि॥२१॥ विधाय कृ
त्यं ह्रदिनी जलाप्लुता दत्त्वोदकं भर्तुरुदारकर्मणः॥ नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादौ॥२२॥ विलोक्या
नुगतां साध्वीं पृथुं वीरवरं पतिं॥ तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः॥२३॥ कुर्वंत्यः कुसुमासारं तस्मिन्मंदरसानुनि॥ नदत्स्वमर
तूर्येषु गृणंति स्म परस्परं॥२४॥ देव्य ऊचुः॥ अहो इयं वधूर्धन्या या चैवं भूभुजां पतिं॥ सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव॥२५॥
सैषा नूनं व्रजत्यूर्ध्वमनु वैन्यं पतिं सती॥ पश्यतास्माननीत्यार्चिर्दुर्विभाव्येन कर्मणा॥२६॥ तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदं॥
विघ्नलोलायुषो ये वै नैष्कर्म्यं साधयंत्युत॥२७॥ ॥

शवदहनसाधनकाष्ठं॥२१॥ ह्रदिनी नदी। त्रिः परीत्य प्रदक्षिणीकृत्य॥२२॥ सत्यावनेपि राजश्री भोगलक्ष्मीसामयी समभूदित्याह। विलोक्येति॥२३॥ कु
सुमौसारं पुष्पवृष्टिं॥२४॥ धन्या सर्वगुणैः। शरण्यो। अन्यपदेर्गुणैः शरणधर्मा इत्युक्तं तेषु धर्मिरित्याभिधानं॥२५॥ ६॥ ये मर्त्या नैष्कर्म्यं मोक्षलक्षणं भ
गवत्पदं साधयंतु न विघ्नद्वलोलाला निश्चाद्यं विषये षां ते तथा तेषां मन्यदुरापं किं नाकिमपीत्यर्थः॥ २७॥ ॥

भा॰ च॰ १०१

अपवर्ग्यं मुक्तिसाधनं कारणं॥२८॥ पतिलोकं नाथवंतं लोकमिति शंकानिवृत्त्यर्थं वैन्योपलोकं प्रापतं पतिलोकं गता मूर्द्धिनि स्पष्टितं॥२९॥ उपसंहरतीत्थमिति। यो सौ पृथुरित्थंभूतानुभावः प्रभावः अनुभावः प्रभावो यस्य त्रिविधं ये सावसूचक इति यावत्॥ भगो योन्यो भगो यश्च शोवीर्यश्रीर्भूतिषु। कांतीच्छो ज्ञानवैराग्यधर्मैश्वर्यतपः सुवेति विवनात्। सम्यपत्नादिगुणानामतिशयेन प्रधानत्वान्नुभावत्तमः॥३०॥ फलमाह। य इति। पदवीं भक्तिज्ञानादिलक्ष

स वंचितो बतात्मध्रुक्कृच्छ्रेण महता भुवि॥ लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते॥२८॥ ॥मैत्रेय उवाच॥ ॥स्तुवतीष्वमरस्त्रीषु पतिलोकं गता वधूः॥ यं वा आत्मविदां धुर्यो वैन्यः प्रापाच्युताश्रयः॥२९॥ इत्थंभूतानुभावोऽसौ पृथुः स भगवत्तमः॥ कीर्तितं तस्य चरितमुद्दामचरितस्य ते॥३०॥ य इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत्॥ श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात्॥३१॥ ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः॥ वैश्यः पठन्विट्पतिः स्याच्छूद्रः सत्तमतामियात्॥३२॥ त्रिः कृत्व इदमाकर्ण्य नरो नार्यथवादृता॥ अप्रजः सुप्रजतमो निर्द्धनो धनवत्तमः॥३३॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पंडितः॥३३॥ इदं स्वस्त्ययनं पुंसाममंगल्यनिवारणं॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहं॥३४॥ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः॥ श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परं॥३५॥ संग्रामाभिमुखो राजा श्रुत्वैतदभियाति यान्॥ बलिं तस्मै हरंत्यग्रे राजानः पृथवे यथा॥३६॥

णां॥३१॥ वर्णभेदेन फलं विविनक्ति ब्राह्मण इति॥३२॥ श्रवणावृत्त्या साधारणफलमाह। त्रिः कृत्व इति॥३३॥ प्रतिपंथिनि वास्कंदभीष्टसिद्धिः स्यादनेन तत्कथं स्यादित्यतस्तद्विशिनष्टि इदमिति॥३४॥ व्याख्यातुर्विशेषफलमाह। धर्मार्थेति। यदि तस्य तादृक्सामर्थ्याभावेन द्रष्टव्या किमित्यत उक्तं। चतुर्णामिति। एतत्सामग्र्यस्याभावे किमनेनेत्यत उक्तं परमिति। परमुत्कृष्टं॥३५॥ असकृत्कृत्या दिग्विजयफलमपि सम्प्रदित्याह। संग्रामेति॥३६॥

राम १०१

६

मगवद्भक्त्याविनाभावेन श्रवणादि कुर्वत उक्तं फलं स्यान्नान्यथा इत्याह। मुक्तेति॥३७॥ पुनस्तत्पर्यादास्मिन्भक्तिं प्रथयति। वैचित्रवीर्येति। हे विदुर। पाथवीं पृथोर्विद्यमाने॥३८॥ तस्य चरितस्य श्रवणादिविषयपरत्वे कथं भागवतानामुपकार्यं तत्रेति तत्राह। अनुदिनमिति। प्रथयन्व्याख्यां कुर्वन् भवसिंधोः संसारसमुद्रस्य पारप्रतनिपुणां श्रीहरिप्रसादजनकसामर्थ्यं॥४०॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पदरत्नावल्यां त्रयोविंशोऽध्यायः॥

मुक्तान्यसंगो भगवत्यमलां भक्तिमुद्वहन्॥ वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत्पठेत्॥३७॥ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकं॥ अस्मिन्कृतमतिर्मर्त्यः पार्थवीं गतिमाप्नुयात्॥३९॥ अनुदिनमिदमादरेण शृण्वन्पृथुचरितं प्रथयन्विमुक्तसंगः॥ भगवति भवसिंधुपोतपादे स च निपुणां लभते रतिं मनुष्यः॥४०॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रयोविंशोऽध्यायः॥ ॥मैत्रेय उवाच॥ ॥विजिताश्वोऽधिराजासीत्पृथुपुत्रः पृथुश्रवाः॥ यवीयोभ्योऽददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः॥१॥ हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणां॥ प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः॥२॥ अंतर्द्धानगतिं शक्राल्लब्ध्वांतर्द्धानसंज्ञितः॥ अपत्यत्रयमाधत्त शिखंडिन्यां सुसंमतं॥३॥ पावकः पवमानश्च शुचिरित्यग्नयः पुरा॥ वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः॥४॥ अंतर्द्धानो नभस्वत्यां हविर्द्धानमविंदत॥ य इंद्रमश्वहर्त्तारं विद्वानपि न जघ्निवान्॥५॥ ॥

अराद्धानमविच्छेन्मोक्षमिच्छेज्जनार्द्दनादित्यतो मोक्षसिद्धये उद्रा ज्ञानोपदेशप्रकारो ब्रह्मपयोर्द्देगेपानाम्र जनानां देहानामुत्तमाधिकारित्वं चेति द्वयमस्मिन्नध्याये निरूप्यते। तत्रादावेतत्सोपोद्घातमाह। विजिताश्व इति। काष्ठा दिशः॥१॥ तुर्यां चतुर्थीमुत्तरां॥२॥ अंतर्द्धानगतिमदृश्यविद्यां नाम्ना। स शिखंडिन्यां भार्यायां॥३॥ पुरा पूर्वजन्मनि अग्नयो मनुष्ययोनावुत्पन्ना योगमितिमाह वसिष्ठेति। तत्कृत्यमाह। पुनरिति॥४॥ अंतर्द्धानो विजिताश्वपुत्रः। तं विशिनाहाय इंद्रमिति॥५॥ ॥

८४

१०५ प्यो ४

राम १०१

कर्माधिकारेच्छितस्य तस्य संन्यासप्रकारं वक्ति। राज्ञामिति॥ ६॥ भगवदर्पणक्रियया क्रियमाणस्य कर्मणः उत्तमज्ञानफलमाह। तत्रापीति। हंसं निर्मलं॥७॥ नाहविर्धानसुतो बर्हिषत्कर्मकांडेषु प्रवर्तमानो निष्ठान्निमार्गाविरोधेनोत्तयत्रनिष्णातो बुद्धिरित्याह। बर्हिषदमिति॥९॥ तस्य क्रियाकांडे नैष्णात्यं विशदयति। यस्येति॥ अनेन प्राचीनबर्हिरिति नामधेयं नयति देवयजनं यज्ञस्थानं॥१०॥ अपत्नीकस्यास्य यज्ञकरणं कथमिति शं-

राज्ञां वृत्तिं करादानदंडशुल्कादिदारुणां॥ मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह॥६॥ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक्॥ यजंस्तल्लोकतामाप कुशलेन समाधिना॥७॥ हविर्धानिर्हविर्धानी विदुरासूत षट्सुतान्॥ बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतं॥ ८॥ बर्हिषत्सुमहाभागो हाविर्धानिः प्रजापतिः॥ क्रियाकांडेषु निष्णातो योगेषु च कुरूद्वह॥९॥ यस्येदं देवयजनमनुयज्ञं वितन्वतः॥ प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलं॥१०॥ सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिं॥ यां वीक्ष्य चारुसर्वांगीं किशोरीं सुष्ठ्वलंकृतां॥ ११॥ परिक्रमंतीमुद्वाहे चकमेग्निः शुकीमिव॥११॥ विबुधासुरगंधर्वमुनिसिद्धमहोरगाः॥ विजिताः नवोढया दिक्षु क्वणयंत्यैव नूपुरैः॥१२॥ प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन्॥ ॥

कांचिदाश्रुपित्सुमाह। सामुद्रीमिति। समुद्रपुत्रीं। देवदेवेन ब्रह्मणोक्तां॥ तां वीक्षेति यामिति। शुकीमिव यथा नाम शुकीं राजपुत्रीं अग्निः प्रदक्षिणां कुर्वाणां कामितवान् तदा यां न स्थातथा यामेनामप्यादातुं शक्नुयाद्भावेप्यग्निश्चकमे इत्यन्वयः। राजपुत्रीमिति वचनादयं विशेषो ज्ञातव्यः॥११॥ अग्निश्चकम इति पद्मेतत्छिन्नमिति भावेनाह। विबुधेति। नैरपि विबुधैः कृत्वान्॥१२॥ ॥

श्री

तुल्यं नाम व्रतं च येषां ते तथा॥ किं तत्तुल्यनामेत्यत्राह। प्रचेतस इति॥१३॥ तत्कर्माह। पित्रादिष्टा इति॥१४॥ येषां को गुरुः। किं जप्यं किं ध्येयमत्राह। यदुक्तमिति॥ १५॥ संक्षेपेणोक्तं विस्तरतः श्रोतुं विदुरः पृच्छति। प्रचेतसामिति। यदुत किंवा। अर्थवत् प्रयोजनवत्॥१६॥ पथिकानां गुरुप्राणानां तत्र संगमः सुलभः स्यादतः किंचो घमत्राह॥ संगम इति। असंगा मुनयः सतामभीप्सितं यं दध्युस्तेनाशिवेन सह संगमः॥१७॥ जगतो निरोगत्वाय ततोपि शिवस्यात्मारामत्वेन निस्पृहस्य सं-

तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः॥१३॥ पित्रादिष्टाः प्रजासर्गे तपसेर्णवमाविशन्॥ दशवर्षसहस्राणि तपसार्चंस्तपस्पतिं॥१४॥ यदुक्तं पथिदृष्टेन गिरिशेन प्रसीदता॥ तद्ध्यायंतो जपंतश्च पूजयंतश्च संयताः॥१५॥ ॥विदुर उवाच॥ ॥प्रचेतसां गिरित्रेण यथासीत्पथि संगमः॥ यदुताह हरः प्रीतस्तन्नो ब्रह्मन्वदार्थवत्॥१६॥ संगमः खलु विप्रर्षे शिवेनेह शरीरिणां॥ दुर्लभो मुनयो दध्युरसंगाद्यमभीप्सितं॥१७॥ आत्मारामोपि यस्त्वस्य लोककल्पस्य राधसे॥ शक्त्या युक्तो विचरति घोरया भगवान्भवः॥१८॥ ॥मैत्रेय उवाच॥ ॥प्रचेतसः पितुर्वाक्यं शिरसाधाय साधवः॥ दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः॥१९॥ ससमुद्रमुप विस्तीर्णमपश्यन्सुमहत्सरः॥ महन्मन इव स्वच्छं प्रसन्नसलिलाशयं॥ ॥२०॥ ॥

गमेपि संभाषणं न संभाव्यत इत्याशयेनाह। आत्मारामोपीति। यस्य लोककल्पस्य जनस्य रोगामुक्तत्वस्य राधसे सिद्धये। तीव्रया शक्त्या तेनैनं संभाषणानुपपत्तिं सूचयति॥१८॥ संभाषणस्य योग्यावकाशं वक्ष्यन्मैत्रेयः प्रचेतसां कथमादितः आवर्तयति। प्रचेतस इति॥१९॥ ससमुद्रमुप समुद्रस्य समीपे। विस्तीर्णं दद्विगुणोत्तरायतं। महतः कस्य च स्य स्वच्छनेर्मन इव स्वच्छं। यद्वा महतां श्रीनारायणस्य चरणारविंदपरायणानां मनो यथा निर्मलं तथा॥२०॥ ॥

कतिपयैः श्लोकैः सरसः सेवनीयत्वं वक्ति । नीलेत्यादिना । नीलोत्पलानां रक्तोत्पलानां अंभोजनानां पद्मानां इंदीवराणां पुष्पविशेषाणां कल्हाराणां सौगंधिकानां च आकरः खनिस्तं हंसानां । मद्गुः कारंडवः प्लव इत्यभिधानं ॥२१॥ मत्तभ्रमराणां सौस्वर्येण शोभनस्वरपरंपरया हृष्टरोमलतं उक्ता अंघ्रिपा वृक्षा यत्र तत्तथा तत्र रोम लोमत्वगित्यर्थः । दिक्षु पद्मकोशरजः विक्षिपतः प्रसारयतः पवनस्योत्सवः शैत्यमांद्यसौरभ्यलक्षणो यस्मिंस्तथा ततं । कोशोऽस्त्री कुड्मले दिव्ये शास्त्रे इति यादवः

नीलरक्तोत्पलांभोजकह्लारेंदीवराकरं ॥ हंससारसचक्राह्वकारंडवनिकूजितं ॥२१॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपं ॥ पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवं ॥२२॥ तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरं ॥ विसस्मू राजपुत्रास्ते मृदंगपणवाद्यनु ॥२३॥ तर्ह्येव सरसस्तस्मान्निष्क्रामंतं सहानुगं ॥ उपगीयमानममरप्रवरं विबुधानुगैः ॥२४॥ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनं ॥ प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥२५॥ स तान्प्रपन्नार्त्तिहरो भगवान्धर्मवत्सलः ॥ धर्मज्ञान्शीलसंपन्नान्प्रीतान्प्रीत उवाच ह ॥२६॥ ॥

॥२२॥ दिव्यो मार्गो येषां ते दिव्यमार्गा येषां ते दिव्यमार्गा देवास्तेषां मनोहरं । दिव्यमार्गमिति पाठे दिव्याः क्रीडादिकं हेतवो मार्गाः स्वरभेदा यस्मिंस्तत्तथा तादृशं गांधर्वं गानं मृदंगादीनामनुकूलं ॥२३॥ २४॥ तप्तहेमनिकर्षः सुवर्णकर्षणपाषाणः तद्वन्निर्मलं नैर्मल्ये दृष्टांतोऽयं न तु धावल्ये । तप्तहेमनिकषाभ इत्यतो धरमः कश्चिदित्यत आह शितिकंठमिति । सोऽपि मयूरः किं न स्यादित्यतः त्रिलोचनमिति ॥२५॥ प्रणतिफलमाह स तानिति ॥२६॥ ॥

वो युष्माकमनुग्रहायैव एवं विविधं भद्रं कल्याणं दर्शनं कृतमित्यन्वयः ॥ अनेन नीचयाञ्चापि रतीत्यस्य परिहार उक्तो भवति ॥ संभावनायोग्यमुपदर्शनादिति ॥२७॥ विष्णुभक्तानस्मान् कथं भगवाननुगृह्णातीति चेत्तत्राह । यः पर इति । यः जीवसंज्ञितात् त्रिगुणात्तमसो लक्ष्मीतत्वात्साक्षात्परस्तं भग

रुद्र उवाच ॥ यूयं बर्हिषदः पुत्रा विदितं वश्चिकीर्षितं ॥ अनुग्रहाय भद्रं व एवं मे दर्शनं कृतं ॥२७॥ यः परस्तमसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् । भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे ॥२८॥

वंतं वासुदेवं शरणं प्रपन्नः स मे प्रियो हि यस्मात्तस्माद्भवंतो मदनुग्रहयोग्या इत्यर्थः । स जीव मायां प्रकृतिं सिसृक्षती । तमश्चासीत्तमसा गूढमग्रे प्रकेतमिति वचनद्वयेन लक्ष्मीतत्वस्य जीवशब्दवाच्यत्वं तमःशब्दवाच्यत्वं च सिद्धं ॥२८॥ ॥

भा॰ व॰
२०४

इतोप्युत्कृष्टफलामीतिवक्तुंस्वनामपिवक्तुंजन्मसाध्यो भगवत्प्रसादः किंपुनस्तम्पेषामितिध्वनयन्विरिंचिपदप्राप्तिसाधनसामग्रीमाह। स्वधर्मेति। वै
राग्यभक्तिज्ञानादयः स्वधर्माः स्तेषुनिष्ठानिष्ठा यंस्थितिर्यस्यसतथा। सत्त्वानुषेकः ऊर्मांछ्वतजन्मभिः एकोनशतजन्मभिः पूर्वकालमारभ्य संचीर्णाह
र्मुपासनानुष्ठानितभगवत्प्रसादेनविरिंचितामेति। ब्रह्मपदंप्राप्नोतीत्यन्वयः। ततः परं ब्रह्मपदानुभावानंतरंमां। श्रीयमेति। शिष्टेनश्रीहरिस्मार्त्तं ब्रह्मणाइति
सूचयति। अव्याकृतंविशतित्यर्थः हिगुणत्रयात्मकालंपरंस्वमनुष्येत्युक्तेस्व्याकृतंनिर्विकारंलक्ष्मीतत्वमित्यर्थः। कृतवोनामयेदेवायोग्या ब्रह्मपदस्य
तु। तएवशतजन्मानिविशेषोपोसकाहरेः। प्राप्यब्रह्मपदंपश्चाच्छ्रियंप्राप्यानुमोदिताः। तयाततोहरिंयांतिवसंतिहरिसंनिधौ। अनादिकाल
भक्ताश्चयेज्ञानिनस्तेनसंशयः। विशिष्टाज्ञानभक्त्यादौसर्वजीवनिकायतः। सर्वदापिविशेषेणशतजन्मप्रयत्नतः। स्वपदप्राप्तिरुद्दिष्टाततोमुक्ति
रप्येवोतइतिनिर्णायकवचनादुक्तएवार्थोनापरः। उक्तंचयंविशिष्टंनष्टि। भागवतइति। अथाश्रियंप्रविश्यभागवतः। भगवद्भिर्भोग्यवद्भिः प्रोक्तो ब्रह्मा

स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचितामेतिततः परंहिमां। अव्याकृतंभागवतोथवैष्णवंपदंयथाहंविबुधाः कलात्यये॥ २९॥ ॥

यथाहंयथायोग्यंविबुधैःकार्यकारणसंघातैः सहकालात्ययेषोडशकलात्मकशरीरलयोलक्षितजगत्प्रलयेवैष्णवंपदमपरिच्छिन्नंभगवत्स्वरूपमेती
त्यन्वयः। अस्मादादयोप्यनेनैवव्याख्याताः। तथाहि। यथाऽनुषेकः पुमानुवऽत्तजन्मसंचीर्णपुण्यसंचयेनब्रह्मपदंप्राप्यानुभूयश्रीद्वारासाधुज्यल
क्षणांमुक्तिमाप्नुतइतियथाहंचत्वारिंशजन्मभिराज्जितैः सुकृतैः शैवंपदंसमवाप्यानुभूयतथैवंद्रोपिविंशद्भिजन्मभिराप्यादितैः पुरापैरैंद्रंपदंसमेत्यानु
भूयतथैंद्राद्मेदशभिर्जन्मभिः सुकृतैः मित्युत्पादितैः शुभैः स्वस्ययोग्यंपदंप्राप्यतत्पदयोग्यभोग्यसुकृतंभुक्त्वाब्रह्मणासहमुक्तिमाप्नुमइति। त
दुक्तं। तथैवचत्वारिंशद्भिःपदंशैवंचजन्मभिः। विंशद्भिरैंद्रंदशभिरन्येषामप्युदीरितमिति। यथाहमितिपाठे। यथाहंश्रीहरिप्रसादेनशैवंपदमाप्तो
स्मितथानुषेकः पुमान्शतजन्मभिर्विरिंचितामेतीतियोज्यं। विदोहरेतुद्रोडद्विपंमहित्वमितिक्रतिः॥ ॥२९॥ ॥

राम
२०४

ततः प्रकृते किंफलितमात्राह। अथेति। अथैवमुक्तप्रकारेणानादिकालमारभ्यभगवद्भक्तोहंयस्मात्तस्माद्भागवतानाभगवद्भक्तत्वाद्यूयंमेप्रियाः स्थयथाभगवानि
त्यधिकदृष्टांतः। नकेवलंयूयमेवमत्प्रिया अन्येपिभगवद्भक्ताइत्याह। नमइति। भागवतानांसकाशात्। वशद्वात्सेभ्योविरूपचरितत्वामाह। अनेनामुरेभ्योवरदानेन
तत्प्रीतिरौपचारिकीतिदर्शितं। यद्वायुष्माकमपिभागवतएवप्रियोनापरोन्यथाभागवतत्वहानिरित्याशयेनाह। नमइति ममभागवतानांयुष्माकंचभागवताद
न्यःप्रेयान्नास्तीत्यन्वयः। अनेनयुष्माकंवाहमपिप्रियइतिध्वनितं॥ ३०॥ सुप्रसन्नेनभवतायत्किंचिदुपदिश्यतेचेद्वाप्रियत्वमानुभाविकंस्यादित्यस्यवाक्यस्या
वसरमद्दानआह। इदमिति। अनेनवक्ष्यमाणमंत्ररेण। स्तिषंसत्यंफलतीत्युक्तंभवति॥ ३१॥ नकेवलंप्रतिज्ञामात्रंकिंतूपदिष्टवेत्याह। इतीति। अनुक्रोश

अथभागवतायूयंप्रियाः स्थभगवान्यथा। नमेभागवतानांचप्रेयानन्योस्तिकर्हिचित्॥ ३०॥ इदंविविक्तं जप्तव्यंपवित्रंमंगलंपरं। निःश्रेयसकरं
चापिश्रूयतांतद्वदामिवः॥ ३१॥ मैत्रेयउवाच॥ इत्यनुक्रोशहृदयोभगवानाहतांछिवः। बद्धांजलीन्राजपुत्रान्नारायणपरोवचः॥ ३२॥ ॥रुद्रउ
वाच॥ जितंतआत्मविद्धुर्यस्वस्तयेस्वस्तिरस्तुमे। भवतांराधसेराद्धं सर्वस्माआत्मनेनमः॥ ३३॥ ॥

त्वादिविशेषणेनानुग्रहातिशयंद्योतयति। किंचोपदेशकालेशिष्याणामित्थंभावंचसूचयति। इत्यस्योपदेशः फलितोऽस्माकमितिभावेनाह। जितमि
ति। हेआत्मविद्धुर्यपरमात्मज्ञानिश्रेष्ठ। विजितंतंसर्वमितिशेषः। कुतः स्वस्त्ययेभगवद्धुरुपासनाख्यसत्कर्मणोमयोपदिष्टमितिपत्तस्मादितिशेषः। किंच
भगवतिभवतांभक्तिरूपुदिनमेधतामितिभावेनाह। स्वस्तिरिति। प्रश्नाकेहरौस्वस्तिः समीचीनसद्भावः सतीभक्तिरस्त्वनतः। श्रुतयाभक्तयाभवतोराधसेसिद्धयेभ
गवतिभवतांभक्तिरूपुदिनमेधतामि... गवत्तत्त्वंराध्यंइत्यंकथंसर्वस्मेसर्वांतर्यामिणे आत्मनेस्वामिनेनमइत्येतावदेवास्माकंशर्वंनान्यदितिसंकल्पेत्यर्थः। सर्वांतर्यामिकत्वाच्छिवतिवर
नात्सर्वनामानंतगदात्मत्वमनेनोप्यनइत्यर्थः॥ ३३॥ ॥

त्प

इदानीं ध्येयस्वरूपमुपदिशति पंचभिः। पंचभूतसूक्ष्माणि शब्दादीनि इंद्रियाणि श्रोत्रादीनि पतित्वात् संतन्वति तन्यात्यतिष्ठतीति अत सातत्यगमन इति धातुस्त स्मै॥३४॥ दुरंतायांतनाय वर्जिताय विश्वप्रबोधाय प्रकर्षेण ज्ञाना याविश्वस्य प्रबोधो यस्मादिति वा सतथा तस्मै॥३५॥ हृषीकमिंद्रियं तेषामीशनो हृषीकेशो जीवस्तस्यैं द्रियस्यामिनेंद्रियमिंद्रस्य विघमानं यस्य किंचन तस्मात् तस्य स्वामी हृषीकेशस्यायमिंद्रियात्मा चेति वियहस्तस्मै निभृतात्मने स्तिमितरूपाय॥३६॥ शुचावग्नौ सीदतीति शुचिषत् नित्यं शुचिषदे नमः। तस्मै योयोति छान्निति श्रुतेः। हिनोतिद्रुः त्वंरतिं या यपयतीति हिरण्यं नादशं वीर्यं यस्य स तथा तस्मै स्वर्णवर्णरेतसइति वा॥ चातुर्हो

नमः पंकजनाभाय भूतसूक्ष्मेंद्रियात्मने॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे॥३४॥ संकर्षणाय सूक्ष्माय दुरंतायांतकाय च॥ नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने॥३५॥ नमो नमोनिरुद्धाय हृषीकेशेंद्रियात्मने॥ नमः परमहंसाय पूर्णाय निभृतात्मने॥३६॥ स्वर्गा पवर्गद्वाराय नित्यं शुचिषदे नमः॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे॥३७॥ नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे॥ तृप्तिदाय च जीवानां नमः सर्वरसात्मने॥३८॥ सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे॥ नमस्त्रैलोक्यपालाय सह ओजोबलाय च॥३९॥ ॥

त्रहोतृभिः क्रियमाणं यत्कर्म तत्कर्तृत्वाच्चातुर्होत्रस्तस्मै। तंतवे व्याप्ताय। संततिप्रवर्तकाय वा॥३७॥ ऊर्जे पित्र्यन्नदात्रे इषे देवान्नदात्रे इच्छारूपाय वा यज्ञो रेतो रतिर्यस्य स तथा तस्मै। सर्वरसात्मने सर्वरसानां दात्रे॥३८॥ सर्वसत्वानां सर्वप्राणिनां आत्मा देहश्चेष्टा यस्य स तथा तस्मै। आत्मानं ददातीत्यात्मदाय आत्मदेति श्रुतेः। सर्वप्राणिषु आत्मदेहस्तदंगुष्ठमात्रस्वरूपं यस्य स तथा तस्मै इति वा। विशेषाय विशिष्टाय। स्थविष्ठत्वात् स्थवीयसे सर्वस्माद्विशेषं करोतीति वा। गुणानां गुणाभिमानी रभेदाभिप्रायेणासहइत्येकं। सह इंद्रियशक्तिः। ओजो देहशक्तिः। बलं बाह्यावयवशक्तिः॥३९॥ ॥

अर्थः शाब्दं वेदाख्यं लिंगं ज्ञापकं प्रमाणं यस्य स तथा तस्मै। अर्थस्य पुरुषार्थस्य लिंगं हेतुस्तस्मा इति वा। नभसे आकाशवदसंगाय। नभस्यते प्रकाश्यते नेन ज्ञायत इति। णभ सभत्र याद्योः रितिधातुः। पुण्याय पुनानाय लोकाय प्रकाशाय अमुष्मै अधिदैवासिने अमुष्मै पुण्याय लोकाय स्वर्गादिलोकदात्रे वा॥४०॥ प्रवृत्तिनिवृत्तिमार्गप्रवर्तकत्वात् स्मै। पितृदेवेषु भक्तित्वान्नत्युघ्रोपकारणत्वात् तत्र कर्तृत्वाच्च कर्मणो विषयाय क्रियारूपाय वा। धर्मविपाकाय पुण्यफलप्रदाय मृत्यवे दुःकृतो मृत्युस्तस्मै मृत्यो क्तित्वात्तत्कारणाद्वा मृत्युस्तस्मै। दुःखदायिने अमुष्मै इत्यस्य इति शेषः। दुःखदायिन इति दुरशोभने दुःखयोरिति यावदेः। शंसुखमिति श्रुतिः। दुःखं दायति शोधयतीति

अर्थलिंगाय नभसे नमोंतर्बहिरात्मने॥ नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे॥४०॥ प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे॥ नमोधर्मविपाकाय मृत्यवे दुःखदायिने॥४१॥ नमस्ते आशिषामीश मनवे कारणात्मने॥ नमो धर्माय बृहते कृष्णायाकुंठमेधसे॥४२॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च॥ शक्तित्रयसमेताय मीढुषेहंकृतात्मने॥४३॥ चेतआकूतिरूपाय नमो वाचो विभूतये॥ दर्शनं नो दिदृक्षूणां देहि भागवतार्चितं॥४४॥ रूपं प्रियतमं स्वानां सर्वेंद्रियगुणांजनं॥ स्निग्धप्रावृड्घनश्यामं सर्वसौंदर्यसंग्रहं॥४५॥ ॥

दुःखदापीतस्मा इति वा। दयशोधयाइति धातुः॥४१॥ मनवे मननशीलाय मंत्ररूपाय वा॥४२॥ सांख्यं यथार्थज्ञानं योगः अष्टांगविशिष्टो वा। तयोरीश्वराय। शक्तित्रयसमेताय ज्ञानक्रियेच्छाशक्तियुक्ताय। मीढुषे वीर्यवते अभीष्टदात्रे वा। अहंकृतेषु देहेषु आत्मा यस्य स तथा तस्मै॥४३॥ चेतस आकूतिरभिप्रायस्तद्रूपथति समर्थयतइति चेतआकूतिरूपस्तस्मै। किमभिप्रेत्य संकल्प मिति तत्राह। दर्शनमिति। कीदृशं दर्शनं साकारविषयं निराकारविषयं वा द्वितीयो गगनवत् व्याप्तस्तत घटाकाशवत् परिमितं पन्न हृदयमपि अनतीष्टमनाधिकारात् तस्मात् प्रथमस्वपक्षस्तत्रापि रूपाणामानंत्यादीदृशं रूपं प्रकाशयेत्याह। भागवतार्चितमिति पदेन तदी दृशं रूपं तस्वीयं पदं रूपं प्रदर्शयेत्यन्वयः॥४४॥ सर्वसौंदर्याणां संग्रहं पात्रं॥४५॥ ॥

सुजातं नं कोमलं विदुरित्यभिधानं ॥४६॥ शोभना द्विजा दंता यस्य तत् सुद्विजं। कर्णाभरणानां बहुत्वद्योतनाय मृष्टकुंडलमिति पुनर्वचनं ॥४७॥४८॥ शंखादयो यस्मिंस्त्रिद्धि
तास्तच्छंखचक्रगदापद्ममालामणिउत्तमा ऋद्धयो यस्य संतीति तत्तथा ऋद्धिमत्। सौभगेन सुभगत्वेन संबध्यते। सौभाग्ययुक्ता कौ ग्रीवा कौस्तुभो यस्मिंस्तत् उरो बिभ्रदृत्तौ ली
मिति शेषः ॥४९॥ संक्षिप्तमुरो विशिनष्टि। अनपायिन्येति। नित्यया श्रिया। आक्षिप्तः सेवनिकषाश्मस्वर्णघर्षणपाषाणस्तद्वद्वर्तमानमुरः आक्षिप्तनिकषाश्मोरस्त
नोल्लसत्। श्वासानां पूरकरेचकाभ्यां संविग्नाः संचालिता वलयो रेखा अस्य संतीति पूरकरेचकसंविग्नवलिमत्। नञ्च पल्लवेनांकुरदलेन सदृशं तत्तथा ॥५०॥ दक्षि

चार्वायतचतुर्बाहुं सुजातरुचिराननं। पद्मकोशपलाशाक्षं सुंदरभ्रु सुनासिकं ॥४६॥ सुद्विजं सुकपोलास्यं समकर्णविभूषितं। प्रीतिप्रहसि
तापांगमलकैरुपशोभितं ॥४७॥ लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलं। स्फुरत्किरीटवलयहारनूपुरमेखलं ॥४८॥ शंखचक्रगदापद्ममाला
मण्युत्तमर्द्धिमत्। सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभं ॥४९॥ श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत्। पूरकरेचकसंविग्नवलिवल्गु
दलोदरं ॥५०॥ प्रतिसंक्रामयद्विश्वं नाभ्यावर्तगभीरया। श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलं ॥५१॥ समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्श
नं ॥५२॥ पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोंऽतरघं विधुन्वता। प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषां ॥५३॥ ए
तद्रूपमनुध्येयमात्मशुद्धिमभीप्सतां। यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठतां ॥५४॥ ॥

णावर्तेन गभीरया निम्नया नाभ्या विश्वं प्रतिसंक्रामयत् प्रसदिव स्थितं ॥५१॥ समा चार्वी चारुणी अंघ्र्यादीनि यस्मिंस्तत्तयोक्तं सुदर्शनं च तत् ॥५२॥ नखद्युभि
र्नखानां तेजोभिः नोऽस्माकं अंतरघं पापं विधुन्वता नाशयता पदा दोपलक्षितः। हे गुरो मार्गगुरुस्त्वं नस्मान् चिरादिमार्गोपदेष्टा। त्वं कीदृशानां न स्तमोजुषाम ज्ञानिनां
पुरः दृत्य स्मात् पदा ह्येयो वा॥ अस्माकं पुरः प्रदर्शयेति ॥५३॥ नियोगमाह। एतदिति। आत्मनः स्वस्य शुद्धिः संसारमुक्तिलक्षणा ताम् अभिकांक्षतां स्वधर्मात्मशु
द्धिर्न स्यादित्यतो ध्येयमिति। वर्णाश्रमादिविहितस्वधर्म एव मुक्तिसाधनमिति भ्रांतिं निवारयति। यद्भक्तियोग इति। वर्णाश्रमादिविहितस्वधर्मं कुर्वतां पुंसां भगव
द्भक्तियोगो नित्याभयप्रद इति यत् ॥५४॥

तस्माद्भक्तिमतां दुर्लभो न त्वा सर्वदेहिनां भक्तिमतां लभ्य इति। न केवलं सुत्वर्थमस्मदादेर्ध्येयं किंतु ब्रह्मादेर्वापीत्यभिप्रेत्याह। स्वाराज्यस्येति। स्वरे स्वर्गे राज्यं यस्येंद्रादेः
स स्वाराज्यस्य इंद्रादेरात्मविदां महतां परमात्मा। तदात्मानमेव वेद अहं ब्रह्मास्मीति श्रुतेः। तस्य गतिर्मुक्तिलक्षणा एकांतेन नियमेनाभिमता अपि शतिपत्ता। मुक्त्यर्थमेव भ
क्तिर्न स्वर्गाद्यर्थमित्यतो वाह। स्वाराज्यस्येति। इंद्रादेरित्यध्याहार्यं इंद्रादेः स्वराज्यस्यावाप्तावपि आत्मविन्त्यरमात्मगम्यत्तेनर्येति आत्मा विश्रुतिर्भक्तिर्यागे एकांते
नाभिमते ध्यन्वयः। यद्वात्मविदां परमात्मा ज्ञानिनां गतिरूपा या भक्तिर्यादृशी नादृशीति। भक्त्या त्वनन्यया शक्य इति स्मृतेः ॥५५॥ भगवदिच्छाविनाभूतत्वादिंद्रादि
नां स्वर्गादिकं तत् सत्त्वाकांक्षितं न स्यादतो बहिर्मतां न स्वातंत्र्येणान्य ज्ञायत इति भावेनाह। त्वां दुराराध्यमिति। स नाम पादुरो पंबहिरैहिकं ॥५६॥ पास्त्रूलं विशिनष्टि।

भवान्भक्तिमतां लभ्यो दुर्लभः सर्वदेहिनां। स्वाराज्यस्याप्यभिमत एकांतेनात्मविद्गतिः ॥५५॥ त्वां दुराराध्यमाराध्य सतामपि दुरापया। एकांतभक्त्या
को वांछेत्पादमूलं विना बहिः ॥५६॥ यत्र निर्विष्टमरणं कृतांतो नाभिमन्यते। विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ॥५७॥ क्षणार्धेनापि तुलये न स्व नापिर
र्गं नापुनर्भवं। भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥५८॥ अथानघांघ्रेस्तव कीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनां। भूतेष्वनुक्रोशसुसत्व
शीलिनां स्यात्संगमोऽनुग्रह एष नस्तव ॥५९॥ ॥

यत्रेति। अरणं शरणं वीर्यशौर्याभ्यां विस्फूर्जितया स्फुरितया भ्रुवा विश्वं विष्टंभयन्। भक्तानां फलं स्वर्गादिकं न तुलय इत्यन्वयः ॥ भागवतसंगलव्याभक्तप्युक्तावानंदो दे
कलाभाभिप्रायेणेति तात्पर्यं तदुक्तं। संगो भागवतैर्भूयात् पुनर्भवमात्रतः ॥ यतो विशिष्टमानंदं भक्तो जनयति स्फुटं ॥५८॥ ननु सत्संगस्य एवंफलो कस्त्वत्तो प्रार्थ्यते कि
मपेक्षितमत्राह। अथेति। यस्मात्त्वद्भक्तानां संग एवंविधफलो यतस्मात्तवांघ्रयोर्जीव योः कीर्तितीर्थयोर्भगवताद्रिशा अन्यवर्णलक्षणा कीर्तितीर्थं विष्णुपदादित यो
रंतर्बहिः स्नानेन विधूतपाप्मनां अतएव भूतेष्वनुक्रोशसुसत्वशीलिनां स्वात्त्विकस्वभावानां सतां संगमो नोऽस्माकं स्यात्। अतोनेनैव पंक्तितार्थ इत्यत उक्तं। अनुग्रह इ
ति ॥५९॥ ॥

सत्संगमाश्रीयाः को भिप्राय इत्यत आह। नयस्येति। यदा सत्संगमस्तत्र तदा सत्संगमे भक्तियोगेनानुगृहीतं यस्य पुंसश्चित्तं स्फटिककारणं बहिरर्थेषु शब्दादिषु विवि-
धभ्रमं विभ्रमणं न गच्छति। यस्य मनश्च गुहायां हृदये निविष्टमात्मानमाविशति। स मुनिस्तैतवपदं स्वस्वरूपमञ्जसा विचष्टे पश्यति न विल्पन्द्वयः॥ सत्संगमलप्सत्सु लव्वन्न भ-
गवद्भक्त्या वैराग्यपक्वतया भगवदुपासनया परोक्षज्ञानं भवतीत्यभिप्रायः। भक्त्या त्वनन्यये त्यादेः॥ ६०॥ सत्संगतिः सर्वथा संपाद्येति प्रतिपाद्याधुना भक्तिविषयं तत्त्वं नि-
र्दिशति। यत्रेति। केचिन्नागच्छन्ता ज्ञानकल्पितमिति संशितं ते। अन्ये स्तूलं मेवसंहत्य सदिवाभातीति। अपरे तत्पारश्यातमिति। इतरे प्रागसतः सत्तासमवायिपेन
जातमित्यहृष्टत्वा न्नेश्वरे स्वेच्छन्ति। तान्सर्वानपि निरस्यन्नीत्यनेनाह। यत्रेति। यत्र यदाधारत्वया ज्ञपते ज्ञनेनेनेपद्मा अतिक्लिष्टाः॥ पूर्वं सतएव व्यक्तिसंभवात्तदनुगतं
च विविधभेदानां व्यक्तत्वेन सत्यत्वासिद्धेः। विश्वास्मिन्स्थितमप्यज्ञानी न भाती त्युक्त्या सुतरामीश्वरसद्भावो दर्शितः। ब्रह्मतत्त्वमित्यनेन सुतमां परं ज्योतिरित्यनेन ज्ञानत्वे
श संपर्कीभावः स्पष्टः। आकाशइवेति निराकारपक्षोपि निरासीति ज्ञायते। अपरिच्छिन्नत्व एवाकाशदृष्टान्तो न शून्यत्वे इति ग्रंथप्रपंचतया उपरम्यतइति॥ ६२॥ यत्रेमपि

नयस्य चित्तं बहिरर्थविभ्रमं मनो गुहायां च निविष्टमाविशत्॥ यद्भक्तियोगानुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते पदं॥ ६१॥ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्न-
वभाति यत्॥ तत्त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतं॥ ६२॥ योमायये दं पुरुरूपयासृजद्बिभर्ति भूयः क्षपयत्यविक्रियः॥ यद्भेदबुद्धिः सदिवात्मदुःस्थया त-
मात्मतंत्रं भगवन्प्रतीमहि॥ ६३॥ ॥

करणानिर्दिशति। शुक्तिकायां रजतमक्तिवयस्मिन्कल्पितत्वात्मिथ्याभूतं जनदित्रिधेति निराचष्टे। योमायेति। यो हरिः पुरुरूपया शुक्लालोहितकृष्णेनेदं बहुरूप-
यामायया प्रकृत्येदं जगदसृजत्। बिभर्ति पुनः संहरति। अत्र प्रकृतेरेव महदाद्यात्मनाविकारेण तु परमात्मन इत्याशयेनोक्तं। अविक्रिय इति। अनेन पुनात्मा ज्ञानविधि-
कारो रजतमित्युपास्तं। एवमपि परमात्मा जीवादिभ्योभिन्नतया सम्यक्काकेमिति न प्रतीयत इत्याशंक्य साधु तीति। सम्यग्ज्ञाने विषयेत्याह। यद्भेदेति। यस्य हरेर्जीवादि-
भ्योभेदबुद्धिः सदिवाविर्भिन्नज्ञानविषये वेत्यर्थः। दिनवादिना दिवाशब्देन कथंज्ञानार्थो नायनेप्रसिद्धत्वाद्दिनिरात्रिरज्ञानस्तु दिष्टं सम्यक्ज्ञानं दिवास्थितमिति वचनात्।
शुक्तिरजतज्ञानवन्नेदं तु रूप्यार्थोपयोगीति चेन्न। जीवेभ्यो जडेतस्य वनेन वचनात्। न अदुष्टत्वमिति। कीदृशीति तत्राह। आत्मसंस्थयेति। यथा त्वाधीनया प्रकृत्यानि-
विकारः सृष्ट्यादिकरोति तथा त्मसंस्थया परमात्मव्यवस्थया। स्थितंत्वां प्रतिमहि विजानीमहे। स्वाधीनामपि प्रकृतिं विहाय सृष्ट्यादिकर्तुं समर्थ इति द्योतना-

स्वस्य सृष्ट्यादिकर्तृत्वं ब्रह्म स्वर्गकामो यजेतेत्यादिवाक्यप्रमाणेने स्वर्गं इंद्रादिकं स्यान्नाद्वक्प्रमाणसंभवादिति तत्राह। क्रियाकलापैरिति। इदं प्रेत्यापि नश्व-
रामीतिश्रुद्धयान्विताये कर्मयोगिनः क्रियासमूहैर्ज्ञानसिद्धये इदं जगत्कर्तृत्वेनैव साधु यजंते नेन्द्रादिकं तएवस्वर्गकामो यजेतेत्यादि शुद्धस्फटिकसंकाशं वा सुदेवं निर-
जनमित्यादि तत्रैव कोविदास्तत्त्वदर्शिनः यज्ञादेरर्थः शनकेवलं श्रुतिस्मृतिभ्यां ज्ञात्वा यजंति किं वानुमानेनापीति भावेनाह। भूतेति। भूतेंद्रियांतःकरणोपलक्षणेन ज्ञायतद्गति
भूतेंद्रियांतःकरणोपलक्षणं ज्ञायते दीप्यमानत्वेन स्वतःप्रकृत्यसंभवान्नन्वेरको ह्यस्त्येतेनोऽस्ति सर्वेश्वर एवान्यस्यानुपपत्तेरिति रेकांशांशरूपदृष्टेरिति। यद्वा वेदेतंत्रेऽश्चहोधि-
नाये योगिन इदं यजंति त एव कोविदाः कर्मकांडसारस्य ज्ञानपरत्व इति। आनेनेंद्रादिकं यजंतो वेदार्थतात्पर्यार्थं न जानंतीति ज्ञापितं॥ ६३॥ ननु जीवादिकं दं जगत्कोऽपि
त्वं गिरितेत इदं लक्षणामतिमाप्तमिति शंकां निरासार्थमाह। त्वमेक इति। आद्य इत्वेदमयमासीदित्यादेः पुरुष इत्यनेन कर्तारमीशं पुरुषं ब्रह्मयोनिमिति वाक्यं सूचितं।
अनेन जीवव्यावृत्तो स्वब्रह्मयोनित्वोक्तेः। लक्ष्मीतत्त्वस्य द्वितीयस्य विद्यमानत्वात्कथमेक इति विशेष्टुं शक्यत इति तत्राह। सुप्तेति। अत्र सुप्तेत्यनेन प्राप्तिरुपल-

क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति सिद्धये॥ भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च त एव कोविदाः॥ ६३॥ त्वमेक आद्यः
पुरुषः सुप्तशक्तिस्तया रजः सत्त्वतमो विभिद्यते॥ महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः॥ ६४॥ ॥

क्ष्यते। यदा पुरुषः स्वपितिनामेतिक्कृतेः। स्वात्मन्येव सुप्तशक्तिः। मुख्याधीनाकारेज्ञत्वापन्ने रन्यैरदत्वं अंगीकर्तव्यं। प्रकृतेः स्वाय उद्दिष्टत्वार्थस्यत्वदर्शनं इति वचनात्। एवं प्र-
लयावस्थां संस्थित्य सृष्ट्यवस्थामाह। तयेति। यावल्लयेहरावेवरता स्थितिकालेप्रासे हरेः कटाक्षेण स्विस्वरूपत्वविशेषमासयानया शक्तिशब्दशक्तेन यापकृत्यासाम्यावस्थामापन्न-
या विलिष्यते विषमावस्थामापद्यते। सृष्टिक्रममपेक्ष्य रजः सत्त्वतम इति व्यत्यस्योक्तं। स्थित्यादेः सत्त्वनंतरत्वात्। रजःसृष्टौ सत्त्वं स्थितौ तमः संहृतौ चेति विभिद्यते। रजः सत्त्वतमोस्यां-
तिघते सत्वंरजस्तमोस्यां त मध्ये सत्त्वरजोभ्यां इत्यंय सेद प्रमाणान्न इत्याश्वकार्यस्वलावदर्थनादवमंतव्यः। उक्तंभेदं विशिनष्टि महानहमिति। ततो गुणा वैषम्यात्सत्त्वप्रधानं म-
हत्तत्त्वं तदभिमानी ब्रह्मा व्यष्टिरितिबोद्धव्यं। ततोहंकारं त्रिविधाभिन्नं तामसाहंकाराश्रुखादिवैकारिकाहंकारादिंद्रियाभिमानी येजसाहंकारात्तानहेतुत्वाद्द्वि-
शेष्टवा आनां द्वयाशिरवादिभ्यः सुरनरतिर्यगादिषु तगणा भूवना। किंबहुनोक्तेनेदं चराचरं जगद्यतो यस्मादुत्पन्नं तदेव विभिन्नमिति ज्ञातव्यं। आत्मनेत्रा आकाशः संभूत
इत्यादिश्रुत्यनुगृहीतं मानमस्मिन्नर्थे॥ ६४॥ ॥

भा॰ च॰
१०८

अचेतनस्य त्वन्नः प्रवृत्त्यनुपपत्तेश्चेतनप्रवृत्ता च स्वातंत्र्याप्रतीतेर्विचित्रप्रपंचरचनान्यथानुपपत्त्या विशिष्टचेतनसिद्धिः सर्वैश्वर्यरूपार्थापत्तेरस्याः सिद्धिपरिहारावकाशमिति। अनुप्रविश्ये त्यनेनार्थापत्तेरस्याः सिद्धिः परिहृतेति। प्रयत्नाक्षप्रथाधिका न्यान्तावं विबोधत्वात्वोपरम्यते। आन्यांशकेकेनस्वरूपांशेन। तत्र दृष्टव्या। दक्षते। जरायु जादिलेदेन चतुर्विधं उरं प्रविश्य हृषीकैरिंद्रियैः सारं संसारमात्रं मधुसुखं भुंक्ते। यस्मादेवं तस्मात् अत्र पुरे संतत्वां पुरुषं विदुरित्यन्वयः। तदस्यात्मना विशिष्टार्थे उपचरति प्रत्ययः। संतमित्यनेन निर्दिष्टत्वं सूचयति। अवधारणेऽथ शब्दः स्यादिति वचनात्। मधु नाम सुखं विषयानां केवलं संसारमेव भुंक्ते न त्वासारमित्याशयेन सारं वस्तारमात्रं तु सारघमिति इत्यतोऽपि कथितएवार्थः॥ ६५॥ संहर्तृत्वेन च स्यकालाधीनतया प्रतीयमानत्वात्तज्जातिवाप्रसक्तिमित्याह। स एष इति। योऽन्तः प्रविष्टः स एव लोकान् कालयानः कलद्रावण इति धातुः। कथितएवार्थः। कालरूपी भूत्वा त्वं भूतैः कारणैः यमादिभिः भूतानि विविकर्षसि संहरिष्यसीत्यन्वयः। अविषह्यः अपरिहार्यः। अत्र हेतुं ध्वनयति। अतिचंडेति। अत्रानुमानमानमित्याह

स त्वं त्वयाऽनादेशमनुप्रविष्टस्त्वनु विधिं परमात्मा न शक्यते॥ आत्मा विदुस्त्वां पुरुषं संतमस्य भुंक्ते हृषीकैर्मधुसारघं यतः॥ ६५॥ स एष लोकानतिचंडवेगो विकर्षसि त्वं खलु कालयानः॥ भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविषह्यः॥ ६६॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं॥ त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः॥ ६७॥ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेऽवमानव्ययमानकेतनः॥ विशंकयास्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश॥ ६८॥

हात् अनुमेयेति। उदाहरणमाह। घनावलीरिति। वलंती घनावलीर्दृष्ट्वा वलनं वायुकर्तृकमिति यथा कल्प्यते तथा अत्रापीति॥ ६६॥ अवांतरसंहारस्त्वदन्येन किं न स्यादित्याह। प्रमत्तमिति॥ ६७॥ एवंभगवतः स्वरूपं निरूप्य तदुपासनात्याज्यप्रसुरणवनविद्धानितिभावेनाह। क इति। पंडित एवं ज्ञानेश्वरतत्त्वः पुमान् कस्त्वत्पदाब्जं त्यजति। ते तव अवमानेन व्ययमानं केतनं देहो यस्य सः। ईदृशोऽपि मोक्षे निमित्तं नास्तीत्याह। यत इति। अयमस्मके तनः पुमानपि विगतशंकया तेन यत्पदाब्जमर्चतीति अस्य रतेत्यन्वयः। स्मतोऽहं यो निषेधे स्मेतिया दवः। को यमव्ययकेतन इत्यतोऽस्मद्गुरुरिति जनकत्वात् ज्ञानोपदेष्टृत्वाच्च गुरुरिति। अनेनतत्परं हि मामित्यत्र श्रीदेवो अतेन तुद इति निरूपणात्यतो मामेवादिर्नाख्यानं हूवीपरविरुद्धत्वात्तुपपत्तिरणीयमित्यस्मादिषु न्मतनिरासायाप्यासेन क्रियत इति। इतोऽपि तत्याद सेवा वा न हानव्येत्याह। यद्विनेति। चतुर्दश मनवः अस्मादेतत्फलं भवतीत्युपपत्त्यपेक्षां विनापि पद्भूरणस्य विंदमर्चंतीति॥ ६८॥ ॥

राम
१०८

अतु इदं सुषुप्तिदशायां श्रीनारायणस्पर्शेन परमानंदोऽनुभूयते किमुत कैवल्य इति वेदयंस्त्वदेव दौर्लभ्यमाह। यत्स्पृष्ट इति। येनांघ्रिणा स्पृष्टो हरहर्तुक्लेशेशोऽजनो स्मृतां लोके परमानंदमुद्देशे ते। यावन्नावसंदानी वेदस्तु खंवेऽस्यथो त्यानंतरं तेंऽघ्रिवेदनु किमित्याक्षेपः तत्सखं स्मरतेव यद्यपि सुखमहमस्वाप्समिति परामृशति तथापि तवांघ्रिनवेतिनस्मरतीति भावः। अनेन तादृशः पुरुषो दुर्लभ इति सूचितं॥ ६९॥ विचित्रे जगति कोऽपि दूरोऽस्मदभयदः किं न स्यादिति शंकां विहायैवं प्रार्थनीय इति वक्ति। अथेति। विश्वं रुद्रभयध्वस्तमिति यस्मात् अथ तस्मादेवं विपश्चितां नस्त्वमकुतश्चिद्भया गतिरसीत्यन्वयः। ब्रह्मन् परमात्मन्निति पदद्वयेन बहिरंतश्च त्वां विनान्यो

यत्स्पृष्टो हरहर्तुक्लेशः शेनस्मृतां बुधौ॥ तावद्वेदायतन्नेऽघ्रिं जनो नुस्मरतेव तत्॥ ६९॥ अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चितां॥ विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः॥ ७०॥ इदं जपत भद्रं वो [illegible] विशुद्धा नृपनंदनाः॥ स्वधर्ममनुतिष्ठंतो भगवत्यर्पिताशयाः॥ ७१॥ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितं॥ पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिं॥ ७२॥ योगादेशमुपासाद्य धारयंतो मुनिव्रताः॥ समाहितधियः सर्व एतदभ्यसतादृताः॥ ७३॥ इदमाह पुरास्माकं भगवान्विश्वसृक्पतिः॥ भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां॥ ७४॥ ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः॥ अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः॥ ७५॥ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान्॥ अचिराच्छ्रेय आप्नोति वासुदेवपरायणः॥ ७६॥ श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं स्मृतं॥ सुखं तरति दुःपारं ज्ञाननौर्व्यसनार्णवे॥ ७७॥ ॥

भयदो नास्तीति सूच्यते॥ ७०॥ ध्येयं स्वरूपं निरूप्याधुना पूर्वोक्तं जप्यं विधायोपसंहरति। इदं जपतेति। सर्वस्मा आत्मने नम इत्यारभ्य वा वो विशुद्धत्य इत्यंतं षड्क्तं तदिदं जपतेत्यन्वयः॥ ७१॥ आत्मस्थमित्युपदिश्य सर्वभूतेष्ववस्थितमिति वचनं परिच्छिन्नत्वपरिहारायोक्तमिति ज्ञायते॥ ७२॥ ७३॥ श्रद्धां जनयति। इदमाहेति। दिसृक्षतां सृष्टुमिच्छतां॥ ७४॥ नेदं श्रवणमात्रं किं त्वनुभवसिद्धमित्याह। ते वयमिति॥ ७५॥ न केवलमिदं पुष्माकमेवान्येषामपि श्रेयस्करमित्याह। अथेति॥ ७६॥ तत्किं श्रेय इति तदाह। श्रेयसामिति। श्रेयसामस्पेव प्रधानं श्रेय इति इत्याह सुखं तरतीति॥ ॥ ७७॥ ॥

भा॰ द्व॰
१०८

न केवलमनेनापवर्गिकं फलं किंत्वपेक्षितं चैहिकमपि स्यादित्याह य इदमिति ॥७८॥ मद्गीतमित्यनेन गांधर्वेन स्तवमिति । अस्मत्ते विनोऽश्रुता इति द्योतनाय श्रेयसा मित्युक्तं ॥७९॥ फलविशेषार्थं कालविशेषमाह । कल्प इति । उषसि ॥८०॥ अद्भुतिशयजननार्थं पुनरुक्तं करोति । गीतं मयेति । एकाग्रधियः श्रोयादनन्यविषयाधीर्यमाने तथोक्ताः ॥ अयेजन्दादावेकएववपः स एकाग्रस्तद्रुतानेवधीर्यषांते तथेति ॥८१॥ अंते देहांते । पुष्पांगेता पदमुक्तमिति प्रकाशनाय वरमधमित्यात्मनेपदप्रयोगः ॥ ॥ इति चतुर्थे चतुर्विंशः ॥ अध्यात्मगर्भवर्हिर्जनोपाख्यानप्रकथनेन संसारसागरे दुराग्रहग्राहदुःखरोहे निमज्जतां पुरुषाणां दूरीकृतसत्संगानां हरिचरणारविंदमकरंदसेवानभिज्ञानां गमागमानां नानाव्यसनभराक्रांतशिरोधराणां शिशुकलत्रबंधनाहतश्रवणानां कुटुंबभरणादिनाहतादिनकरमागमपेरु

य इदं श्रद्धया युक्तो मद्गीतं भगवत्स्तवं ॥ अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥७८॥ विंदते पुरुषोऽमुष्माद्यद्यदिच्छति सत्वरं ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥७९॥ य इदं कल्य उत्थाय प्रांजलिः श्रद्धयान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥८०॥ गीतं मयेदं नरदेवनंदनाः परस्य पुंसः परमात्मनस्तवं ॥ जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत आप्स्यथेप्सितं ॥८१॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे चतुर्विंशोऽध्यायः ॥ ॥
मैत्रेय उवाच ॥ ॥ इति संदिश्य भगवान्बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः ॥१॥ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः ॥ जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥२॥ प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसं ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥३॥ ॥

एवं वैराग्यरसानुभावेन निपुणावलभक्तिप्रदीपानुगृहीतानामपवर्गलक्षणपुरुषार्थसाधनं भगवदपरोक्षज्ञानलक्षणाकटाक्षप्रसन्नश्रुरमथनप्रसादमंतरेण संसारत्वच्छेदो न स्यादिति तादृशीं साधनसामग्रीं निरूपयते पंचस्वध्यायेषु । तत्रोपोद्घातं रचयति । इतीति ॥१॥ रुद्रगीतं नानंतरं तंत्रेतो भिः किमकारीति तत्राह । रुद्रगीतमिति ॥२॥ एतदनंतरं श्रोतुं योग्यं कथां वदंस्तत्कथाशेषं तदनंतरं श्रोष्याम इत्युक्तवतरां तरीशंको मैत्रेयः परिहरतीत्याह । प्राचीनबर्हिषमिति । स्पात्स्वपालुः कोउणिक इति वचना त्साधुरयं शब्दः ॥३॥

राम
१०९

ईहसे कर्मणा श्रेयसामवाप्तिरिष्यते त्वं तत्र श्रेयसां कतमच्छ्रेयो दुःखहानिलक्षणमुत आत्मन ईहसे कर्मणेच्छसि एतदेव विशिनष्टि दुःखहानिरिति । अत्रायं भावः पुरुषार्थिनां पुरुषेणाप्राप्यो निःश्रेयसः सिद्धं दृष्टमिति । तेषां कतमच्छ्रेयो युदुःखहानिलक्षणं सुतसुखावाप्तिमथ वोभयमथान्यत्तदयत्यादि लक्षणमिति ॥४॥ अत्र राजा सर्वश्रेयो वाप्नोमु सुखसाधनं ज्ञानमेवेति नारदस्य हार्दं विद्वांस्तरेवमवनोपदेष्टव्यमिति प्रार्थयते ॥ न जानामीति । नास्ति नेसहोऽन्तरपस्वंतरायासोन जानामीति वाक्यं सुखमिति मात्वेन न तथोक्तं ॥५॥ पुत्रादिरेवार्थः पुरुषार्थ इति धीर्यस्य स तथा ॥६॥ यद्यपि कर्म ज्ञानोत्पत्तौ सहकारि तथापि दिदृक्षुर्मुमुक्षुकामिनिमित्त्वा

नारद उवाच ॥ श्रेयस्त्वं कतमद्राजन्कर्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥४॥ प्राचीनबर्हिरुवाच ॥ न जानामि महाभाग परं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥५॥ नारद उवाच ॥ गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ॥ न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ॥६॥ भो भोः प्रजापते राजन्पशून्पश्य त्वयाध्वरे ॥ संज्ञापिताञ्जीवसंघान्निर्घृणेन सहस्रशः ॥७॥ एते त्वां संप्रतीक्षंते स्मरंतो वैशसं तव ॥ संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ॥८॥ ॥

निंदति । भो भो इति । यथावत्कर्मकर्तुः स्फुटानसहायकारकं । अन्यथा कुर्वतः कर्म निरयपातमपि स्यादिति । तथापि कर्मनिंदन्नियतः कर्तुमंजसा । शक्यं नान फलस्यापि वक्तव्यं मोहनाय वेति वचनान्निंदनं युक्तं । तस्मात्कर्मविधानं च न मुख्यार्थमिति तात्पर्यार्थ इति । निरयणादि संज्ञापिताः हिंसिताः ॥७॥ संप्रतीक्षंते स्म उपद्रवाभावेऽपि वैरेण स्वीयास्तीत्याह । एते त्वामिति । वैशसं शस्त्रेणच्छेदनं । संपरेतं मृतं । अयोनिर्मिताश्च श्रृंगविशेषाः कूटाः तैः कूटयेऽश्रीसुंजमापघेष्वादृष्टिं गेषु भेदपोरिति यादवः ॥८॥ ॥

भा॰ द॰
११०

अत्रेममर्थमितिहासेनबोधयिष्यामीत्याह। अत्रेति। पुरे शरीरे अनति सततं विषयीकृत्य वर्त्तत इति पुरंजनं। अध्यात्मविषयमित्यर्थः॥ अन सातत्यग
मन इति धातुः। अन्यथा इतिहासं पुरातनमिति वाक्यानुपपन्नं स्यात्। कथमधिकृत्य वर्त्तत इत्युक्तं पुरंजनस्येति॥९॥ पुरंजनो नामकः यमाश्रित्येयं कथा वर्त्तते इ
ह पुरंजन इत्यनेन विशिष्टो जीवो भवतीत्युच्यते। अभिमानेन सर्वेषां जीवानां मुख्याभिमानी चतुर्मुखो ब्रह्मा देवानां विशेषतः। अत्र पुरंजनस्य ज्ञात्वा द्वात्रियोग। किंयो
ग्येषु राज्ञि नाम मनुष्यजीवाभिमानी। असुराणां कलिः। तत्र जीवसंसारदृष्ट्यै श्रोतॄणां पापपरिहाराय पुरुष एव इत्ययं वेवनो दिन पुरंजनस्य कथाप्रसंगो कारीति।
तदुक्तं। देवजीवाभिमानी तु ब्रह्मैव चतुर्मुखः। मनुष्याणां तु जीवानामभिमानी पुरंजनः। स तु राजा हरेः पुत्र असुराणां कलिः स्मृतः। जीवसंसृतिनिवृत्त्यै मो- तु
रंजनकथा पितुः। तस्माज्जीवस्थितिशेषे पुरंजनकथां शृणु। नारदोऽश्रावयत्तस्मान्नृपं प्राचीनबर्हिषं। सोपसंहृत तत्कथा जीवेऽस्ति तात्पर्यं प्रत्येकशोपि तु। अतएव कं प

अत्र ते कथयिष्येऽहमितिहासं पुरातनं। पुरंजनस्य चरितं निबोध गदतो मम॥९॥ आसीत्पुरंजनो नाम राजा राजन्बृहच्छ्रवाः। तस्याविज्ञातना
मासीत्सखाविज्ञातचेष्टितः॥१०॥ ॥

पुपुज्येन तत्तद्ज्ञेयं यथा तथा। उक्तं भागवते ध्येनस्मरणे यावादिष्यते। प्रत्येकशक्तजीवानां नदन्यतस्य केवलमिति। अतो वयथासंभवं तत्तत्पदानि तत्तदर्थपरत
याभ्योज्यानीति तात्पर्यं ज्ञायते। पुरं स्वयोग्यानंदप्रसिद्धिजनयिष्यति स्वीकरिष्यतीति पुरंजनः। पालनपूरणयोः। अस्य कर्मभिः पुराणि शरीराणि बहुविधानि
जनयतीति निर्वक्तव्यं। आ बहुदृशत्ताद्वृक्षादित्यादेः। श्रोत्रज्ञातिज्ञापनाय राजेति। इतिहासत्वद्योतनायासीदिति। तस्य पुरंजनस्य। शरीरिणामपि नामरूपा
दिभिः स्वरूपं न ज्ञापनइत्यविज्ञा ~~~~~ तं नाम यस्येति सो विज्ञाननामा परमात्मा सखासीदित्यन्वयः। ह्यासुपर्णा साद्विश्रुते। अत्र अन्यस्क्रप्रसिद्धा। तदिष्टि
न्यद्रुत्यतो विज्ञातेति। विज्ञातं चेष्टितं जगत्सृष्ट्यादिलक्षणं यस्य स तथा। अन्यत्र नीतिशास्त्रप्रसिद्धस्यापारः॥१०॥ ॥

राम
११०

सः स्वर्मादिष्ठानान्वगतः कर्माशरणं सुखदुःखभोगयोग्यं शरीरमन्वेषमाणः पृथिवीं कर्मभूमिं बभ्राम। अन्यत्र पुरं प्रभवं त्यस्मात्कर्माणीति पुरुषः। अन्यत्र
परपापमर्द्दनसमर्थः। अनुरूपं दुःखभोगमंतरेण सुखभोगयोग्यं। अन्यत्र दुर्गादिलक्षणं॥११॥ यावतीस्तिर्यगादिलक्षणाः पुरः शरीराणि अभिपन्नः येषां प्रैक्षे।
तास्तो गामानयत्ता अनुवृत्तवैनो यमलमित्यादिश्रुतिः। अन्यत्र शत्रुसाध्यत्वात्॥१२॥ एकदा भीप्सितशुभकर्मफलोदयसमये हिमवतो दक्षिणेषु सानुषु क
र्मफलसंभजनपदेषु। संभूषणसंभक्तौ विति धातुः। भारतवर्षप्रदेशेषु। प्रत्येकं पुरंदुस्यतेऽनुन्नेयं यथा नथेत्युरुक्तत्वात्। यथासंभवमुन्नीयते श्रोत्रादिन
वद्वारैर्लक्षितलक्षणं। अंधेयगुबधिरत्वादिदुर्लक्षणराहित्यां पुरीं पुत्रपशरीरं ददर्श दृष्ट्वा प्राविशदित्यध्याहार्यं। ताभ्यः पुरभ्यः मानयत्तां अत्र वस्तु इतेब

सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः। नानुरूपं यदाविंदद्भूत्स विमना इव॥११॥ न साधु मेने ताः सर्वा भूतले यावतीः पुरः। कामान्का
मयमानोऽसौ तस्य तस्यापि पत्तये॥१२॥ स एकदा हिमवतो दक्षिणेष्वथ सानुषु। ददर्श नवभिर्द्वारैः पुरीं लक्षितलक्षणां॥१३॥ प्राकारो
पवनाट्टालपरिखैरक्षतोरणैः। स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः॥१४॥ नीलस्फटिकवैडूर्यमुक्तामरकतारुणैः। क्लृप्तहर्म्य
स्थलीं दीप्तां श्रिया भोगवतीमिव॥१५॥ सभाचत्वररथ्याभिराक्रीडायतनापणैः। चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः॥१६॥ ॥

तेतिश्रुतिः। अन्यत्र स्पष्टं॥१३॥ पुरीमित्युपक्रांतत्वात्तदनुसारेण तद्वर्णनं क्रियते। प्राकारेत्यादिना। अध्यात्मं तेः शब्दाद्येरक्षितार्थोदयो तुल्यलक्षणा। याः।
प्राकारो दुर्गभित्तिः। आट्टालो भित्त्युपरिगृहप्रदेशः। परिखा दुर्गबहिः परितः खातनदी स्वार्गादिभिरावितैः शृंगैः शिखरैः। अन्यत्र साविकराजा सनामसैः संकु
लां॥१४॥ नीलादिभिरिंद्रनीलरत्नादिभिः क्लृप्ता विरचिता हर्म्यस्थली यस्यां सा तथा तां। भोगवतीं नागपुरीं॥१५॥ आक्रीडा क्रीडाभूमिः। आपणाः क्रयस्था
नं। चैत्यं वंदनशाला। वेदिः परिष्कृता भूमिरित्यमरः॥१६॥ ॥

भा॰ च॰
१११

सराज्ञा वाह्योधीने छितः तत्र यदृच्छया गतां प्रमदोत्तमां ददर्शेति चतुर्थश्लोकेनान्वयः॥१७॥ हिमनिर्झरस्य याः शीतलजलगतः स्थूलपतज्जलधाराणां विप्रुष्मतातोय
बिंदुमता कुसुमाकरस्तोरमवता वायुना चलंतः प्रवाला येषु तेतथा ते च विटपविनष्ट लताः वाल विटपिनस्तेर्युक्ता नानलिनीतटानां पद्माकरतीराणां संपत्स्मिं
स्तत्तथा तस्मिन्॥१८॥ आवाधाम हती पीडेत्यभिधानं। अनावाधे उपद्रवरहिते कोकिलकूजितानामत्र विशेषेरे हि आ विशेषात् हूतमात्मानं निरूपयति। अस्य
नर्पिकारोदेह वर्ने। उपवनं रोमादि। अहट्टलं तन्मध्ये मेदो वसादि परिखामांसवहिस्त्वक् तोरणस्थानीयो वाङ्ः। अंगुल्यः पताकाः पार्श्वह्रदयस्थोर्ध्वमुखवंशस्था
कृतो रणांशृंगशृंगस्थानीयं कर्णादियहाः उदरादिप्रदेशाः नीलवैदूर्यादौ जीरणविशेषैः समलंकृतं। हर्म्यस्थलीस्थानीयं वर्मादि। भोगसाधनत्वाज्जी

उपर्यास्तवाह्योपवने दिव्यद्रुमलताकुले॥ नदद्विहंगालिकुलकोलाहलजलाशये॥१७॥ हिमनिर्झरविप्रुष्मत्कुसुमाकर
वायुना॥ चलत्प्रवालविटपनलिनीतटसंपदि॥१८॥ नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः॥ आहूतं मन्यते पांथो यत्र को
किलकूजितैः॥१९॥ यदृच्छयागतां तत्र ददर्श प्रमदोत्तमां॥ भृत्यैर्दशभिरायांतीमेकैकशतनायकैः॥ ॥२०॥ ॥ ॥

गवती। सभा हृदयं सर्वदेवानां निवासस्थानीयत्वात्। चत्वरं नाडीसंधिः रथ्या वहलनाडी। आक्रीडगृहाः आयतनानींद्रियगोलकानि। आपणाः वाक्चेत्यम
स्तकं ध्वजः केशपाशः पताका। विद्रुमवेदिः र्जाघले कृतकटिप्रदेशः वाह्योपवनं देहः वाह्यविषयोद्यानं। तस्य रमणीयतां वर्णयति। दिव्येत्यादिना। चक्राष
स्थान्यार्थो वर्णनीयः वाह्येसुकृत्वात् प्रकर्षेणामदयंतीति प्रमदाः। वैष्णवी का बुद्धयस्तासां मध्येउत्कृष्टत्व मोक्षानं पुरुषार्थं यस्याः सा प्रमदोत्तमा। प्रथा
नेस्तुक्ते आत्मानात्मविवेके विचक्षणा बुद्धिरित्यर्थः स्यात्सा चानुपपन्ना। तां बुद्धिं विहाय वैषयिकीं बुद्धिं आप्य मुग्धोभूदिस्पर्थः। अन्यथा प्रतीत एवाकी
दृशीदृशभिः भृत्यैः ज्ञानकर्मेंद्रियसंज्ञैः सहागच्छंतीति च कीदृशाः एकैकस्य शतमित्यनंताः। अनंताः यास्त्वयस्तासां नायका अपि केवलं तत्तद्विशेषा
स्तैर्युक्तैः॥२०॥ ॥

राम
१११

अत्र पुरंजनस्य येभृत्यायाश्चनार्या द्यास्ते पिसर्वेपिमानुषेंद्रियाभिमानिनः॥ गायत्र्याद्यादेवेंद्रियतद्वृत्तीनामभिमानिन्यइति। तदुक्तं। येपुरंजनभृत्यास्तार्याद्यास्तर्वेप्यवातेपि
मानुषबुध्यादेर्विज्ञेयाअभिमानिनः॥ गायत्र्याद्याश्च देवानां तेपि वै ते प्रसंस्थिताः॥ अलक्ष्मीद्वापराद्याश्च आसुरास्तेपि मानुषा इति। तेषां सर्वेषां परिवृढो मनो नामाजीवो
वा। तत्र द्विपर्यये विभ्रमपेक्ष्य मनसो बहुरूपत्वं जीवस्य तु योनीनां वैचित्र्यात् २१ पंचशीर्षाहिना प्राणादिपंचवृत्या स्वशिरस्थानमुख्यप्राणाख्यसर्पेण। प्रतीहारेण द्वारपा
लकवद्वर्तमानेन। ऋषभं पतिं। स्वदृत्त्यनुकूलवृत्तिलक्षणपुरुषमित्यर्थः। अतएवाप्रौढामनूढामपरिणीतां पाणिमितस्थितामित्यर्थः। कामरूपिणीं विषयेषु विचित्रा
तत्तदाकारानुमिताकारां २२ उन्नता सिमा न लक्षणानासिकां। सुदती विषयवृत्तिलक्षणदंतां। बालां सुकुमारवृत्तिं। वाह्यांसतरवृत्तिलक्षणप्रशोभनाभ्यां

तेषां परिवृढोराजन्सर्वेषां वनिमुद्वहन्॥ सस्त्रीकाणां सखा तस्य बहुरूपायणी स्त्रियः २१ पंचशीर्षाहिनागुप्तांप्रतीहारेणसर्वतः॥ अन्वेषमा
णामृषभमप्रौढां कामरूपिणीं॥ २२ सुनासां सुदतीं बालां सुकपोलां वराननां॥ समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडलश्रियं २३ पिशंगनी
वीं सुश्रोणीं श्यामां कनकमेखलां॥ पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव २४

वरं वरणीयमाननं चेष्टाश्रयस्याः सा तथा तां। अनचेष्टायामिति धातुः। समं यथा तथा विन्यस्ताभ्यां कल्पिताभ्यां वाह्यांतःकरणविशेषाभ्यां संकल्पविकल्पभेदेन द्वाभ्यां
नोन्नताभ्यां कुंडलश्रियं विषयेषु परिवर्तनश्रियं बिभ्रती वर्तयंती २३ पिशंगा विषयोपरक्तानीवीआच्छन्नवृत्तिर्यस्याः सा तथा तां सुश्रोणीं सुष्ठुआश्रयवृत्तिमतीं। श्या
मां तमोगुणप्रचुरां। कनकमेखलां रजोगुणलक्षणसुवर्णकांचीं पद्भ्यां रजस्तमोविकृतवृत्तिविशेषाभ्यां नूपुरैः शिशुकलभाषणलक्षणैः क्वणद्भ्यामित्यादिप्रयो
गाल्लक्षणवृत्त्या ऊहनीयानवाप्यवृत्त्याकचिच्चात्मयेति कचित्सिद्धिविषयवृत्तित्वाद्देवतामिवेति २४

यं जितकेशौ ऋमि(?) अं जितमध्यमावस्थौ। मध्यमाबुद्धिसंस्थामित्युक्तेः। घनस्तनशब्द इति धातोः स्तनौ शब्दौ। समवृत्तौ वर्णलक्षणोपेतौ। निरंतरमेकस्मिन्नेव वृत्ते विद्यमानौ गुणगुरुलघुसेदरहिताविर्यर्थः। व्रीडया हृत्तिविशेषेण लवस्रांतेन निगूहंती अनभिव्यक्तिं कुर्वाणा। गजगामिनी गजवद् दूर्ध्वमूलास्थाधारादायाती बुद्धिं आहेति स्वकार्यविधेयप्रवर्तयितुं मस्मिमुखीवकार २५ वीरः विशिष्टप्राणबलोपेतः। सखी उस्मितशोभिनी स्वकार्यातिमुखी। अपांगप्रेमेत्यादिना पितत्तद्योधवृत्तविशेषं लक्षयति प्रेम्णाभ्रमंती भ्रूः प्रेमभ्रमद्भूः तया २६ कान्त्वमित्यादि लोकानुकाख्यवनं आप्तप्रलापो वा उपपुरीमित्यनेन ज्ञायते। अन्यथा उपपुरीति द्रुस्वत्वेन प्रयोगः स्यात्। इदृसमी

स्तनौ व्यंजितकेशौ रौ समवृत्तौ निरंतरौ॥ वस्त्रांतेन निगूहंती व्रीडया गजगामिनी २५ तामाह ललितं वीरः सखी उस्मितशोभिनी॥ स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा २६ का त्वं कंजपलाशाक्षि कस्यासीह कुतः सति॥ इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे २७ क एते नुपथायेत एकादश महाभटाः॥ एता वा ललनाः सुभ्रु कोऽयं तेऽहिः पुरः सरः २८ त्वं ह्रीर्भवान्यस्यथ वाक् रमा पतिं विचिन्वती किं मुनिवद् रहो वने॥ त्वदंघ्रिकामाप्तसमस्तकामः क्व पद्मकोशः पतितः कराग्रात् २९

पि वर्तमानौ २७ अनुपथाः स्वमार्गमनुवर्तमानाः ये इमे महाभटा एकादश एते लल विलास इति धातोः ललना विलासोपेता वृत्तिविशेषाः। अहिगताविति धातोः आहिगतसहव्रजः पुरः सरो नासिकारंध्रवरः श्वासः २८ त्वं ह्रीरित्यादिकमनुकरणं। लज्जा वृत्ति विशिष्टत्वाद्ध्रीः। संकल्पवृत्त्या भवानीति। वचनवृत्त्या वाक्। रमणवृत्त्या रमा। पतिं देहस्वामिनं। वने देहलक्षणे वासनावने मुनिवत् मनोवत्। त्वदंघ्रिसाम्येनाप्ताः कामा येन स तथा। अधिलधिगत्यर्थ इति धातोः अंघ्रिप्रार्थनिसाधनत्वं तथा मनसो विमनस्य संकल्पपुरुषस्य विषयोपगमनात्। पद्मकोशः कंदुकलक्षणः मनः कराग्रा हृत्ति विशेषात् पतितः गतः क्व का वृत्तिमुपगत इति। वा

हे वरोरु पदि त्वमासां ह्रीमुखानां वृत्तिविशेषाणां अन्यतमा वृत्तिविशिष्टा नासि किंतु स्थिरवृत्तिविशिष्टासि भुवि सत्कर्माणि स्पृक् आशावती तर्हि दश्रकर्मणा महापराक्रमवता वीरवरेण मया सा कृमिमां पुरीं देहलक्षणमलंकर्तुमर्हसि कथमित्यत आह श्रीनारायणेन सह श्रीः परं लोकं वैकुंठाख्यमिवेत्यन्वयः। अदभ्रकर्मणेति कर्मनैपुण्यलक्ष्यति ३० हे शोभने व्रीडया सहितो हासः व्रीडाहासस्तेन युक्तेन ईक्षणेन विभ्रमं यस्या भ्रुवो यस्याः सा तथा तस्यास्तव स काशात् उपसृष्टः प्राप्त एव मनोभवो मनसा जातो रागलक्षणो वृत्तिविशेषो भगवान् तां पूज्यो ताभिः मामां प्रवाधते। स्वानुकूलकर्मणा यः सन्न द्वंद्वं करोति यस्मात् स्थितस्मात् त्वं नुग्रहाणेत्यन्वयः। कथंभूतं मां। अपांगे

नासां वरोर्वन्यतमा भुवि स्पृक् पुरीमिमां वीरवरेण साकं॥ अर्हस्यलं कर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ३० यदेष मापांग विखंडितेंद्रियं सव्रीडहासेक्षण विभ्रमद्भ्रुवा॥ त्वयोपसृष्टो भगवान्मनोभवः प्रबाधतेऽथानुगृहाण शोभने ३१ त्वदाननं सुभ्रु सुतारलोचनं व्यालंबिनीलालकवृंदसंवृतं॥ उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ३२

न शरीररहितेन वृत्तिविशेषेण विखंडितानींद्रियाणि यस्य स तथा तं ३१ हे शुचिस्मिते निर्मलविलासे त्वदाननं तव वेष्टाविशेषं मे दर्शयेत्यन्वयः। सुभ्रु शोभनभ्रूः भ्रमणशीलं विषयेषु यस्य तत्तथा सुतारं शोभनं लोचनं आलोचनं यस्य तत्तथा तत्। तत्र स्वर्हि किमिति प्रकाशत इत्यत उक्तं। व्यालंबीति। व्यालंबिना मयेति। तामसवृत्तिविशेषान् पृथक् कृत्वा पुनरपि कीदृशं वल्गु सुंदरं वाचकं वक्रं यस्य स तत्तथा तत्। यदाननं व्रीडया हृत्तिविशेषेण मम नाभिमुखं न सन्मुखं तदिति शेषः ३२

नरः पुरुषः तत्संवशिनी नारी वैषयिकी बुद्धिः। हसंती उल्लसंती। विशिष्टं ईशे ज्ञानं यस्य स वीरस्तमपि मोहयितुं शीलमस्यास्तीति ३३ किमाहेति तत्राह। नेति। हे पुरुषश्रेष्ठ कर्त्तारमुत्पादकं कर्त्तारं पोषकं वा सम्यक् लक्षणवत्तया न विदाम न जानीमहे। गुणवदाश्रयः कश्चिदस्तीति सामान्येनैव न तु विशिष्टमित्यतः सम्यगिति। किं चात्मनो मम परस्यान्यस्य कस्यापि यथा नाम कृतं यच्च गोत्रं तदपि न जानीमहे इत्यन्वयः। अनामगोत्रमिति श्रुतेः ३४ तर्हि त्वं वेत्सि वेद बुद्धित्व

इत्थं पुरंजनं नारी याचमानमधीरवत्।। अभ्यनंदत तं वीरं हसंती वीरमोहिनी ३३ न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ।। आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतं ३४ इहाद्य संतमात्मानं विदाम न ततः परं।। येनेयं निर्मिता वीर पुरी शरणमात्मनः ३५ एते सखायः सख्यो मे नरा नार्यश्च मानद।। सुप्तायां मयि जागर्ति नागोयं पालयन् पुरीं ३६ दिष्ट्यागतोसि भद्रं ते ग्राम्यान् भोगानभीप्ससे।। उद्वहिष्यामि तांस्तेहं स्वबंधुभिररिंदम।। ३७।। इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो।। मयोपनीतान् गृह्णानः कामभोगाञ्छतं समाः ३८

हानिरिति तत्राह। इहेति। इह संतमात्मानं मामहमित्यद्य इदानीं जानीमहे। उत्तरकाले संदेहः कर्मवशात् ततोन्यत् किमपि न विदाम इत्यन्वयः। तस्मात्परमीश्वरं न विदाम येनेश्वरेण मम शरणं निवासयोग्येयं पुरी विरचितेति वा ३५ के ते नु यथा इति तत्राह। एत इति ३६ स्वबंधुभिरिंद्रियैः। हस्तपादयोरेकत्वेन नवत्वं वा मुख्यानि द्वाराणि। शतं समा इत्यनेन शतायुर्वै पुरुष इति श्रुतेः मनुष्याणां शतायुष्ट्वनिर्देशान्मनुष्यशरीरमिहाभिप्रेतं ३८

तत्र हि ज्ञानोत्पत्तिः कुत इति तत्राह। कान्विति। का बुद्धिस्त्वदन्यं मनुष्यशरीरप्रविष्टं चेतनं विहायान्यं पश्वादिशरीरगं तं रमयेत् सुखिनं कुर्यादित्यन्वयः। कुत इत्यत उक्तं। अरतिज्ञमिति। यस्मान्न रतिरेव सा रात्मतत्त्वमश्वमानव इति स्मृतेः। परमात्मरतिज्ञानरहितं। शब्दादिविषयरतिज्ञानहीनं वा तदपि कुत इत्यत उक्तं। अकोविदमिति। अपंडितत्वादित्यर्थः। पांडित्याभावः कथमित्यत्राह। असंपरायेति। संपरायो मोक्षः तत्राभिमुखो न भवतीत्यसंपरायाभिमुखस्तं। दुःखाभिमुखं कामेन ज्ञानान्नास्ति सुखं तं कथमित्यत उक्तं अश्वस्तनविदमिति। श्वस्तनं भविष्यत् न वेत्तीत्यश्वस्तनवित्तं। न विदुः श्वस्तनं ननु कालो काविति श्रुतिः। अश्वस्तनत्वमपीदृशमिति न वेत्तीत्यश्वस्तनवित्तं वा

का नु त्वदन्यं रमये ह्यरतिज्ञमकोविदं।। असंपरायाभिमुखमश्वस्तनविदं पशुं ३८ धर्मो ह्यत्रार्थकामौ च प्रजानंदोमृतं यशः।। लोका विशोका विरजा यान्न केवलिनो विदुः ३९ पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह।। क्षेम्यं वदंति शरणं भवेस्मिन् यद्गृहाश्रम ४० का नाम वीर विख्यातं वदान्यं प्रियदर्शनं।। न वृणीत पतिं प्राप्तं मादृशी त्वादृशं स्वयं ४१

। कोसावेवंविध इत्युक्तं पशुमिति। तत्त्वज्ञानरहितं। अत्र सद्बुद्धिरसद्बुद्धी हेय यथासंभवं विशेषणे सन्नदर्थतया ज्ञातव्यं।। असद्बुद्धिविवक्षायां पशुपतागमज्ञानशून्यं। अन्यत्रोक्तार्थं। असद्बुद्धिपक्षेपि स्वमतानुसारेण मोक्षादिकं स्वस्यैवार्थतः इदं सम्यगुपपन्नमिति ३८ इतोपि श्वस्तनोपि नाक्षेपवेत्याह। धर्म इति। अत्र भवंति धर्मादयः संतीति हि यस्मात्तस्मात् प्रजानंदः पुत्रसुखममृतं मोक्षः। अन्योन्यमविरोधेन धर्माद्यनुष्ठानं न सुशकमिति भावनाह। यानिति। केवलिनो निःकिंचना उदरंभरिजना वा ३९ सर्वाश्रमाणामुपजीव्यत्वात् गृहाश्रम एव श्रेयानित्याह। पित्रिदेवेति। आत्मनो स्वदेहस्य क्षेम्यं मोक्षयोग्यं शरणं वदंतीति यत् तस्मादिति शेषः ४० किं बहुना ते न फलितं वक्तीत्याह। कानामेति। वदान्यं पुत्रकलत्राद्यभीष्टदानशीलं स्वयं प्राप्तत्वात् ४१

त्वां हृष्टा मित्युक्तं किंचिद्विशिनष्टि। कस्यामनइति। अनाथवर्गस्यास्मदादेराधिं मनोदुःखमलमत्यर्थं हितं च रसि। प्रणयपादयोयाहृतमुन्नृस्मितं यन्मितं तत्पूर्वको योवलोकस्तेनदर्शी
नेनक⁻श्रियः ४२ परमफलितमाह। इतीति। समयं प्रमाणपूर्वकं संमुद्धसंवादं कृत्वा देहः प्राप्तेः शईत दनंतरं च। वाद्याद्यर्थे विवन्नद्येतद्वः। पुरी देहं शतं समाः इति। शतं वर्षा
एपभ्याईदितिश्रुतेरर्थमनुकरोति। मुदहर्ष इति धातोः। हर्षशोकयोः सुखदुःखवहेतुत्वाद्दुभयं पर्यायेण बुद्धिपुरुषौ प्राप्तवंताविस्यर्थः ४३ तत्र प्रथमं मोदप्रकारमाह।
उपगीयमानइति। जाग्रदाद्यवस्थायां तत्र तत्र प्रतीन्द्रियविषयं गायकत्वलक्षणैः शब्दादिभिर्विषयैरुपगीयमानः सेव्यमानः स्वप्नावस्थायां स्त्रीभिः केवलं मनोवृत्तिलक्षणा
भिः परिवृतः। स्त्रीभिर्वा यानैर्वा इति श्रुतेः। सुषुप्तौ तु निर्मितेशोके प्रावृशीतलसमागाधत्ता घधारामि वसुषुप्तिकाले सर्वं हृदवाख्यां बुद्धिस्वरूपस्थितिमाविशत् सुप्तावस्था

कस्यामनंस्यात्तव भोगिभोगयोस्त्रियोनसज्जेद्भुजयोर्महाभुज। योनाथवर्गाधिमलं घृणोद्धृतस्मितावलोकेन चरस्यपोहितुं ४२ नारद उवाच
इति तौ दंपती तत्र समुद्यसमयं मिथः। तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ४३ उपगीयमानो ललितं तत्र तत्र च गायकैः। क्रीडन्परिवृत
स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ४४ सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः। पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ४५

यामभूदित्यन्वयः॥ ललितं यथा तथा। अन्यत्र शुचौ ऋतुविशेषे। सतासोम्यतदासंपन्नो भवतीति श्रुतेः। सत्तु उष्णष्ट्री शं हृदवाख्यैर्मन्त्राादिभिः परिवृतः॥ क्रीडन्विहरन्कालेपाप
यन्त्रा ह्रदिनीं ह्रदिन्यां। ब्रह्मनाड्यां हृदयस्थाने अष्टदलपद्मे स्थितं श्रीनारायणमाविशत्तत्र प्राप्यापयदित्यर्थः ४४ देहात्मं पुरं प्रसिद्धपुरसाम्येन वर्णयति। सप्तेति। तस्याः पुर
उपरि सप्त द्वारः कृताः द्वे नेत्रे द्वे नासिके द्वौ कर्णौ वदनं चेति। अधो द्वे पायूपस्थे इति। कृत्यमाह। विषयगत्यर्थमिति। रूपादिविषयज्ञानार्थं निर्मिता इत्यर्थः। तस्यां पुर्यां कश्चनेश्व
रः अनामरूपो लोकविलक्षणः श्रीनारायणोसौ इत्यन्वयः। जीवो वा। जगत्सामर्थ्यापत्त्वारीश्वरइत्युक्ते देहस्वामित्वाद्वा। अल्पशक्त्यादिमत्वात्तुच्छेनयः कश्चनेति ४५

तत्रापि विभागमाह। पंचेति। तासामुपरिद्वाराणां मध्ये पौरस्त्याः पुरस्ताद्भवाः पंच द्वारः नेत्रादय इत्यर्थः। पश्चात्तु द्वे। एकादक्षिणकर्णलक्षणं दक्षिणतस्तथोत्तरा वामकर्णल
क्षणा। पश्चिमे द्वे अधोभागे द्वे पायूपस्थे। अमूषां नवद्वाराणां ४६ खेद्योआकाशे सति द्योततेद्योतं तेरूपं गृह्णातीति खद्योता। खद्योतवद्योततइति वा। दक्षिणचक्षुर्लक्षणा। आ
विः प्रकाशे सति मुखं यस्याभिमुखी भवंतीति साविर्मुखी प्रकाशमुखी न तमोमुखी तमसि रूपग्रहणासावादिति वामचक्षुर्लक्षणा तासां विभ्राजितं प्रकाशितं जनपदं रूपं
पद्मालंबनं रूपाख्यं धाति विषयीकरोति गृह्णातीत्यर्थः। कथंभूतः द्युमानादित्यस्तत्संबंधित्वात्सखा यस्य स तथा चक्षुरिंद्रियसहित इत्यर्थः। द्युमानादित्यस्सख्या वा
सहेतुत्वाच्चक्षुषोपि तन्नाम। आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविशदिति श्रुतेः॥ आदित्यो ह वै चक्षुस्तेनानुगृहीतं रूपं गृह्णातीति च ४७ नलोनामश्वासः सोस्यास्तीति नलि

पंचद्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा। पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ४६ खद्योताविर्मुखी च प्राक्द्वारावेकत्र निर्मिते। विभ्राजितं ज
नपदं याति ताभ्यां द्युमत्सखः ४७ नलिनी नालिनी च प्राक्द्वारावेकत्र निर्मिते। अवधूतसखस्ताभ्यां विषयं याति सौरभं ४८ मुख्यानाम पुर
स्ताद्द्वास्तयापणबहूदनौ। विषयौ याति पुरराड्रसज्ञविपणान्वितः ४९

नी। नलनालौ श्वासोच्छ्वासौ तयोः संचारहेतुत्वान्नलिनी नालिनी इति द्वे गोलके ते नासिकारंध्रे। अवधूतः परितस्तिर्यक्धुनोतीत्यवधूतो वायुः घ्राणेंद्रियाभिमानी तेन प्रेर्यमाणं घ्राणें
द्रियमपि तच्छब्दवाच्यं तदेव सखा यस्य स तथा। घ्राणेंद्रियसहित इत्यर्थः। सौरभं विषयं गंधलक्षणं गृह्णाति ४८ पुरस्तान्मुख्या नाम द्वाः आस्यच्छिद्रलक्षणास्ति। पुरराट् पुर
जनस्तया द्वारा आपणं बहूदनं चापणं व्यवहार इति धातोः। आपणो वदनव्यापारः। बहूदनो नानाविधमोन्नजातं तौ याति व्यवहरति अपवहरति वा रसज्ञो जिह्वेंद्रियं विप
णो वागिंद्रियं ताभ्यामन्वितः ४९

नाम्नापि वभ्रूः पात्रत्वात्पितरो देवाः प्रियाभवंत्यस्य यज्ञमानस्य कर्णौ लक्षणा। शरीरलक्षणायाः पुर्याः द्वारस्थितेन दक्षिणकर्णलक्षणेन द्वारेण उत्क्रांतः प्राणः पुरंजनो य
जमानो दक्षिणपंचालं दक्षिणानां देवानां लोकलक्षणं राष्ट्रं याति प्राप्नोति। पंचेंद्रियाण्यालं याति भूषयति। अलं भूषण इति धातोः। पंचेंद्रियाणामलं वुद्धिहेतुत्वादिति
वा। पुरं ब्रह्मलक्षणं जनयति प्रादुर्भावयति प्रकाशयतीति पुरंजनः। तत्वज्ञानं दक्षिणपंचालं निवृत्तशास्त्रं यात्यपगच्छतीति वा दक्षिणतत्वज्ञापनसमर्थ इतिहासादिना स
हपंचसंख्योपेतो वेदः स एवालं तत्वज्ञानाय नान्यापेक्षेति कृत्वा मध्यमपुरंजनो दक्षिणपंचालं पंचविषयसंज्ञं राष्ट्रं याति। स्तुमिवायं पंचानां शब्दानां समूहः पांचः स एवा
लंभोक्तुमिति वुद्धिहेतुत्वादिति कृत्वा सर्वज्ञाप्ययमेव सर्वत्याह। श्रुतधरेति। श्रुतं लोकं शास्त्रं वा विषयं वा धारयतीति श्रुतधरः। श्रोत्रेंद्रियं तेन सख्या सहितः। पुर्याः वा

पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरंजनः॥ राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः॥५०॥ देवहूर्नाम पु
र्या द्वा उत्तरेण पुरंजनः॥ राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः ५१

मकर्णलक्षणा देवहूर्नाम द्वारस्थितः प्रजादिरूपेण क्रीडादिगुणोपेतत्वाद्देवपितृगणप्रियो भवत्यस्य श्रद्धादिकर्तुरिति तेनोत्तरेण वामकर्णलक्षणद्वारेणोत्क्रांतः पुरंजनः।
उत्तरं पंचालं ऊर्ध्वलोकप्राप्तिहेतुत्वादुत्तराः। उत्तरं तिरस्तीत्युत्तराः पितरस्तेषां लोकलक्षणं राष्ट्रं याति अत्रापि श्रोत्रेण सख्योपेतः पुत्रलक्षणं पुरं जनयतीति पुत्रप्रजनक
र्मलोको जीवः। उत्तर उत्कृष्टपंचालं प्रवृत्तशास्त्रमिति वा। अन्यस्तु श्रोत्र एव। किमेतत्प्रतीतार्थं परित्यज्य च्छस्य कथने कारणमिति चेत्। उच्यते। दक्षिणश्रोत्रमार्गेण
देवलोकं व्रजत्यसौ। वामश्रोत्रेण पितृणामिति वेदविदो विदुरिति प्रमाणं ५१

असुरजनहितत्वादासुरी नाम पश्चाद्द्वा शिश्नलक्षणास्ति। तया द्वारा ग्राम्यकं नाम मैथुनकं सुखं विषयं यास्मनुभवति दुष्टो मदो यस्य स तथा तेनोपस्थेंद्रियेण सहितः। असूनामिंद्रियाणां रति
हेतुत्वादासुरीति वा। सुखहेतुत्वाद्वा सततामपि याद्वं ५२ निर्गच्छत्यस्मात्पुरीषलक्षणमलमिति निर्ऋतिर्नाम पायोर्द्वाः गुदलक्षणं तस्थि वैशसं पुरीषोत्सर्गलक्षणं विषयं प्रापहिंसालक्ष
णानरकं वा। लुब्धकेनार्वागिंद्रियेण क्लेशो मलमोचनादेवास्य संज्ञा ५३ अमीषां द्वाराणां मध्येऽन्धौ निर्वाक्पेशस्कृतौ पादहस्तावन्धौ ज्ञानशून्यौ भवतः निर्गतं वाक्यं यस्मात्स निर्वा
क् पादः कर्तुः पुरुषस्योपकरणभूतत्वादुपस्करो हस्तः हस आच्छादन इति धातोराच्छादकत्वात्। अक्षाणींद्रियाणि विद्यंते येषां तेऽक्षण्वंतः जीवास्तेषां पतिः पुरंजनः तासां
पादहस्ताभ्यां याति करोति चेत्यन्वयः ५४ क्वचिदुदयांत्यांतःपुरं गतो विष्वक्सर्वतोंचतीति विषूचिर्मनस्तेन सहितः स्वयं पुरंजनो जायात्मजेभ्य उद्भवो जन्म यस्य स तथा त

आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः॥ ग्राम्यकं नाम विषयं दुर्मदेन समन्वितः ५२ निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः॥ वैशसं नाम विषयं लु
ब्धकेन समन्वितः ५३ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ॥ अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ५४ स यर्ह्यंतःपुरगतो विषूचीनसमन्वि
तः॥ मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवं ५५ एवं कर्मसु संसक्तः कामात्मा वंचितोऽबुधः॥ महिषी यद्यदीहेत तत्तदेवान्ववर्तत ५६ क्वचित्पिबं
त्यां पिबति मदिरां मदविह्वलः॥ अश्नंत्यां क्वचिदश्नाति जक्षत्यां सह जक्षिति ५७ क्वचिद्गायति गायंत्यां रुदत्यां रुदति क्वचित्॥ क्वचिद्धसंत्यां हसति जल्पंत्या
मनुजल्पति ५८

मोहं मोहादीन्यात्तमयातीत्यन्वयः। जायाभक्तिरात्मजो ज्ञानं भक्तिज्ञानेन तज्ज्ञानादुत्पन्नं प्रसीदत्यनेनेति प्रसादः परमानंदस्फुरत्यास्पनेनेति मोहो निरयः हृष्यत्यनेनेति हर्षः स्वर्ग
तार ५५ इदानीमसद्बुद्धेः प्रकारं दर्शयति। एवमिति। ग्राम्यकर्मसु काम्यत इति कामा विषयास्त एवात्मा मनो यस्य स तथा। वंचितो दैवेनेति शेषः। अबुधो विवेकशू
न्यः महिषी बुद्धिलक्षणा महं हिनस्तीति महिषी। अन्यत्र महितं ददातीति महिषी। यद्यत्कर्म कारयितुमीहेत तत्तत्कर्मान्ववर्तत अन्वकरोदेव ५६ तत्किं तदाह।
क्वचिदिति। पिबंत्यां पातुमिच्छंत्यां इत्यादि ऊह्यं। अनेन सद्बुद्धिरपि भ्रमितेति ज्ञातव्यं ५८

तथाहिमहोष्णासीतिमहीब्रह्मतस्मिन्निपात्सवसमुद्देहरोसीदतिविषयीकृत्यवर्त्ततइतिमहिषीसद्बुद्धिस्तयाविशेषेणप्रलब्धप्राप्ताभीष्टकार्यलाभः सर्वप्रकृतिवंचितः वंचि

कचिद्धावतिधावंत्यांतिष्ठंत्यामनुतिष्ठति॥ अनुशेतेशयानायामन्वासेकचिदासतीं ५९ कचिच्छृणोतिशृण्वंत्यांपश्यंत्यामनुपश्यति॥ कचिज्जिघ्रति जिघ्रंत्यांस्पृशंत्यांस्पृशतिकचित् ६० कचिच्छोचतिजायायामनुशोचतिदीनवत्॥ अनुहृष्टतिहृष्टायामनुमोदतिमोदते ६१ विप्रलब्धोमहिष्येवंसर्वप्रकृतिवंचितः॥ नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगोयथा ६२ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपंचविंशोध्यायः

तत्सर्वंस्त्रीजनस्वभावः अविद्वज्जनानामतोयतः सद्बुध्यधीनत्वात्क्रीडामृगत्वमपियुक्तं ६२ इतिश्रीभागवतेचतुर्थस्कंधेटीकायांपंचविंशः राम

अधुनाजाग्रदवस्थाप्रकारकथनेनसंसारप्रातिकूल्यं कथयन्नाग्रस्वस्थाप्रवेशंतावदाह। सएकदेति। सपुरंजनः एकदास्वप्रविषयलोगप्रापककर्मक्षयेजाग्रद्भोगप्रापककर्मोद यनेसतिपंचेंद्रियद्वारेणस्थूलार्थप्राप्त्यावर्ततिश्वते सिन्नितिपंचप्रस्थंवनेजाग्रद्विषयलक्षणंकांतारमगादनुबभूवेत्यन्वयः॥ किंकृत्वा कथंभूतइत्यतआह। महेष्वासइति। महा नइतिमहः प्रणवः सएवेष्वासोधनुर्यस्यसतथा। यथार्थकथनेमततत्। अन्यत्रमहोष्वासावित्वासोयस्येति। स्वर्णवर्णलक्षणंरजोगुणात्वं वर्मयस्यसतथा। अक्षयेषुधिनि वृत्तिलक्षणोइषुधीयस्यसतथा। एकादशेंद्रियलक्षणाःनाथः। पंचेंद्रियाणिपंचाश्वायस्यसतथाभूतं। आशुगमत्यंतक्षिप्रजायतइत्यादिविकारंयरिणामलक्षणमित्या शुगम्। द्वेपुण्यपापलक्षणेकर्मणीएवचक्रेयस्यसतथाभूतं। एकः सूत्रात्मावायुरक्षोयस्यसतथाभूतं। त्रयः सत्वादिगुणाएवबेणवोध्वजायस्यसतथाभूतं। पंचप्राणाए वविनतोन्नतप्रदेशावंधुरा यस्यसतथाभूतं। अनेनप्राणसंवारहितत्वेनाडीविशेषाः कथ्यंते आधारेवा। एकोमनआत्मा रश्मिः प्रग्रहो यस्यसतथा। एकोबुध्या

नारदउवाच स एकदामहेष्वासोरथंपंचाश्वमाशुगं॥ द्विकर्मचक्रमेकाक्षंत्रिवेणुंपंचबंधुरं १ एकरश्म्येकदमनमेकनीडंद्विकूबरं॥ पंचप्रहरणंसप्तवरूथंपंचविक्रमं २ हैमोपस्करमारुह्यस्वर्णवर्माक्षयेषुधीः॥ एकादशचमूनाथः पंचप्रस्थमगाद्वनं ३

ख्यादमनः सारथिर्यस्यसचैकरश्म्येकदमनः तं। बुद्धिंतुसारथिंविद्धिमनः प्रग्रहमेवचा॥ प्राणावंधुरमुद्दिष्टाः गुणाः सत्वादयोध्वजाः॥ मूलवायुरक्षसंज्ञः चक्रेहेतु रपदुष्कृते। इंद्रियाण्यश्वसंज्ञानिहृदयंनीडमुच्यते। शीतोष्णलक्षणौद्वौतुकूबरौतौ ईशकर्षकं॥ पंचप्रहरणंसप्तत्वगाद्याधातवः स्मृताः। शब्दाद्याश्चविक्रमा स्थादेहाद्याअरथउच्यते। इत्यध्यात्मयोगे। एकंहृदयलक्षणंनीडंयस्यसतथाभूतं। द्वौशीतोष्णलक्षणौकूबरौयुगंधरौयस्यसतथाभूतं। पंचानामिंद्रियाणांवशहानेर्वि षयाणांमनिकर्षलक्षणानिप्रहरणानियस्मिन्सतथाभूतं। पंचसूनाहोपचाराभावनिप्रहरणानियस्मिन्नितिवा। सप्तत्वगाद्याधातवोवरूथागुप्तिर्यस्यसतथाभूतं। पं चानांभूतानांविक्रमः प्रभावोयस्मिन्सतथाभूतं॥२॥ हैमोपस्करंमुकुटकुंडलाभरणैः स्वर्णविकारैर्भूषितं। रथगतावितिधातोः ज्ञानलक्षणंगमनसाधनंदेहमारुह्या धिष्ठायेति। अक्षयेषुधिरनंतहत्वालंबनांतःकरणेनावधिरितिवा। इषुभूतरागादीन्यतिनिरस्यतिनश्यतीतिविश्वासोज्ञानलक्षणः सवा ३

भानांचे ४

तत्त्वसंविदाँ २

इषवश्च कार्मुकं चात्तं गृहीतं येन स तथा। रागाद्या इषवः कार्मुकं विवेकः कार्यस्य स्पष्टत्वं त्वनेनेति निरुक्त्या। तत्र ज्ञानाग्रद्विषयकाननेमृगयांशब्दादिभोगलक्षणां चचार लुब्धु जइत्यन्वयः। अतदर्हं हिंसायोग्या मसद्बुद्धिलक्षणां सद्बुद्धिलक्षणां वा दायेतिशेषः इतिविशेषइति विवेकः। मृग्यन्त इति मृगा विषयास्तेषां व्यसने भोगलक्षणे लाल सउत्सुकः। अन्यत्र हरिणानां हिंसनाय उत्कटव्यापारवान् ४ आसुरी हिंसालक्षणां हन्नि घोरात्मा विषयप्रसंगनिमित्तसंसारभयरहितः। निर्गतोनुग्रहोदयालक्ष णोयस्मात्स तथा न्यहनत्। हननं हिंसां गतवान् रिति। नितरामगच्छदसेवतेत्यर्थः। निशितैर्बाणैः कपरमनोहृत्तिभिः वनेषु ज्ञानाग्रद्विषयप्रदेशेषु वनगोचरांस्तत्त्वशब्दादि

विषयलक्षणान् ५ ननु राज्ञो मृगयाधर्मिष्ठो यमादिषु हिंसाया राज्ञा मृगार्थी मृगयां चरन्दोषैर्न लिप्यत इति। आग्नीषोमीयं पशुमालभेतेत्यादौ विहितत्वात् कथमासुरी

> त्वारमृगयांतत्र हयमाज्ञेषु कार्मुकः॥ विहायजायामतदर्हां मृगव्यसनलालसः ४ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः॥ न्यहनन्निशि
> तैर्बाणैर्वनेषु वनगोचरान् ५ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान्पशून्वने॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते ६

हुत्तिमाश्रित्येति निंद्यत इति तत्राह॥ तीर्थेष्विति। श्रुतिदृष्टेषु श्रुतिस्मृतिविहितेषु तत्तत्स्थानेषु। राज्ञा स्वविहिताचारनिष्ठया शोभमानो मेध्यान्यपशून्वराज मृगप्रभृतीन् यावदर्थं यावत्प्रयोजनं लुब्धः फलार्थी हन्यादित्यलं नियम्यते विधिवाक्यैरिति शेषः। अध्यात्मपक्षे तु प्रमाणके तुतीर्थेषु शास्त्रेषु विहितान्मेध्यान्मेध्ययोग्यान् ज्ञानयोग्यान् पशून् रागासधर्मान् रमणीयान् वने विषयव्यवहारे वर्तमानो लुब्धोऽष्टपुरीवता देहावच्छित्तिस्तावन्मात्रमलमत्यर्थं हन्याद्भुञ्ज्यान्नेव वा ध्रुवमिति शेषः। इतिनियम्यते शिक्षा विषयी क्रियत इति। अलमिति विशेषणात् लुब्धो लोकापकारार्थं पशून् घ्नन् आत्मार्थं दधिकमपि हननमपि कुर्वन्नद्रुह्यतीतितात्पर्यं ज्ञायते। तदुक्तं। उपकारः सतां येन तत्कृत्वा नैव द्रुह्यति। अतीव निंदितमपि वक्तुं हिंसायुगेव वा। अथवा ज्ञानिनः कर्म न तु द्रष्टमपि लिप्यत इति ६

ननु नियतकर्मकरणे ज्ञानिनोऽपि तु कर्मलेपः स्यादिति तत्राह। य एवमिति। यो नियतमनियतं वा विद्वान् जानन् एवं विविधं पुण्यपापं वा कर्म कुर्वीत न वा कुर्वीत स ज्ञानी ते नोभयविधेन कर्मणा न लिप्यते। केन निमित्तेनेत्यत उक्तं ज्ञानेनेति। कर्मलेपाभावे ज्ञानं कारणमित्यर्थः। तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवं विदिपापं कर्म न श्लि ष्यत इति श्रुतेः। अथवा ज्ञानिनः कर्म न तु द्रष्टमपि लिप्यत इति स्मृतेश्च ७ अन्यपक्षे बाधकमाह। अन्यथा ज्ञानाभावे अनर्थो भवतीत्याह। गुणप्रवाह इति ८ एवं प्रासंगिकीं कथां समाप्य प्रकृतमनुसरति। तत्रेति॥ तत्र विषयलक्षणे वने चित्रवाजैः अनेकांकुरमुखान्यपत्रोपेतैः शिलीमुखैः शिलावत् दृढमुखैः। लेपदैर्दि

> य एवं कर्म नियतं विद्वान्कुर्वीत वा न वा॥ कर्मणा तेन राजेंद्र ज्ञानेन स न लिप्यते ७ अन्यथा कर्म कुर्वाणो कामरूढो निबध्यते॥ गुणप्रवा
> हपतितो नष्टप्रज्ञो व्रजत्यधः ८ तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः॥ विप्लवोऽभूत् दुःखितानां दुःसहः करुणात्मनां ९ शशा
> न्वराहान्महिषान्गवयान्रुरुशल्यकान्॥ मेध्यानन्यांश्च विविधान्विनिघ्नन्श्रममध्यगात् १०

यमनोहृत्तिविशेषैर्निर्भिन्नगात्राणां हृदितनानावयवानां करुणात्मनां पापनिमित्तेन भुक्तानामस्माकं परलोकेऽपि न गतिरस्तीति नुदितानामिव स्थितानां यद्वा शा स्त्रभुक्तानां विषयाणां विप्लवो विनाशः समाप्तिलक्षणो भूदित्यन्वयः। अन्यत्र व्यक्तं ९ शशान्वराहानिति मेध्यान्महिषानित्यादि श्वमेध्यान्। शशानतिशयि तानं दलक्षणान्। वरणीयत्वेनाहेयान्। महिषान्महितं ददातीति निरुक्त्या सनदानइति धातुः। तस्य डप्रत्ययः। सकारस्य मूर्द्धन्यादेशः। गवयान् गतवयसः। अ रसे गतानिति। रुरून् रोदनहेतून् शं सुखं विलापयतीति शल्यकानित्येवमादि विषयान्निघ्नन् गच्छन् भुंजान इत्यर्थः ११

जाग्रद्विषयाननुभूय सुषुप्तिप्राप्तिप्रकारमाह। ततइति। ततो जागरणान्निवृत्तो रूपत्वक्लक्षणमनोवृत्तिभ्यां श्रान्तः। शांतो हृल्लक्षणनाडीविशेषं प्राप्तः। कृतस्नायद्विषयेभो गरजो मार्जनलक्षणं स्नानं येन सः उचिताहारः स्वरूपसुखावाप्तिलक्षणो यस्य सतथा। संविवेश सुषुप्तोभूदित्यन्वयः ११ स्वापात्पूर्वव्यापारमाह। आत्मानमिति। महिष्यां बुद्धौ अथवा धूपादिलक्षणावृत्तिरात्मानं अंतर्यामिलक्षणं ब्रह्मस्वरूपं अर्हयांचक्रे संपत्तिलक्षणमलंकारमकरोत्।। सतासोम्य तदा संपन्नो भवतीति श्रुतेः। संपन्नलक्षणालंकारयुक्तसर्वावयवः।। तृप्त इत्यादिना सुषुप्त्यवस्थावृत्तिविशिष्ट उच्यते। अनेन स्वप्नप्राप्तिरपि निरूप्यत इति ज्ञातव्यं। तदा हृत्याद्यवस्थानुभवः स्पष्ट एव। स्वप्नप्रापककर्मोद्र

ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान्।। कृतस्नानोचिताहारः संविवेश गतक्लमः ११ आत्मानमर्हयांचक्रे धूपालेपस्रगादिभिः।। साध्वलंकृतसर्वांगो महिष्यामादधे मनः।। तृप्तो हृष्टः सुदृप्तश्च कंदर्पाकृष्टमानसः १२ न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीं।। अंतःपुरस्त्रियोपृच्छद्विमना इव वेदिषत्। १३ अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा।। न तथैतर्हि रोचंते गृहेषु गृहसंपदः १४

वेसतिवुद्धो मनआरधइत्युपपद्यते। कं स्वरूपसुखं दर्शयति प्रकटयतीति कंदर्पः स्वाप्रसंनाकृष्टमानसं यस्य सतथा स्वप्नावस्थायामपि स्वापस्य सत्वात् १२ बुद्ध्याहितमनाः किमकरोदिति तत्राह। नव्यचष्टेति। गृहमेधिनीं उपात्तज्ञानवतां गृहिणीं नानावासनाकारमनोवृत्तिमंतीं वरस्य हरेरारोहो विषयतया यस्याः सा वरारोहा तां शास्त्रीयां बुद्धिं न व्यचष्ट। दर्शनं नाम निश्चयस्तं नैनोपैतीति ज्ञातव्यं। स्वप्नस्य वासनात्मकत्वात् निर्णयज्ञानवान्नाभूदित्यर्थः। हे वेदिषत् प्राचीनबर्हिः अंतःपुरस्त्रियः इंद्रियवृत्तीर्मनोवृत्तीर्वा अपृच्छत्। स्वाप्नव्यापारमकरोत् १३ हे रामा इति हृत्तयः संबोध्यंते। ईश्वरी बुद्धिः गृहसंपदः शरीरेंद्रियादिशोभाः बुद्धेर्विद्यमानायाः रोचते नान्यदेति १४

व्यंगे चक्राद्यादिरहिते रथे प्राज्ञो बुद्धिमान् रथी। अव्यंगलक्षणेन प्राणेन देहे प्राज्ञः सुषुप्तिप्रवर्तकः परमात्मा।। १५।। पदेपदे अनुदर्शनं मम प्रज्ञां दीपयंती भगवद्विषयज्ञानसद्धौ ध्वयंती या मामुद्धरतीति संसारादिति शेषः। सा ललना शोभना बुद्धिः क्व वर्तत इत्यन्वयः।।१६।। वाह्यकथामनुसरन्यो तरकथाप्रस्तुतं रमाह।। नरनाथेति। यद्व्यवस्यति यन्निश्चिनोति यदिक्षति तन्न जानीम इत्यन्वयः।। निरवस्तारे आस्तरणरहिते भूतले। शूर्णी भगवत्यादपूर्णसेशयानां विवेकिवुद्धेःस्थानां यथार्थवर्णनमेतत्।। १७।। इदानीं मसद्बुद्धिनिमित्तप्रवृत्तिप्रकारमाह। पुरंजन इति। प्राचीनकर्मभिर्विच्छिन्नाशनित्वाख्यां स्त्रियं दोषिप्रमाणिक एवेत्यतः एतद्वचनमुपपद्यत इति। अ

यदि न स्याद्गृहे माता पत्नी वा पतिदेवता।। व्यंगे रथ इव प्राज्ञः को नामासीत दीनवत्।। १५।। क्व वर्तते सा ललना मज्जंतं व्यसनार्णवे।। या मामुद्धरते प्रज्ञां दीपयंती पदे पदे।। १६।। रामा ऊचुः।। नरनाथ न जानीमस्त्वत्प्रिया यद्व्यवस्यति।। भूतले निरवस्तारे शयानां पश्य शत्रुहन्।। १७।। नारद उवाच।। पुरंजनः स्वमहिषीं निरीक्ष्यावधुतां भुवि।। तत्संगोन्मथितज्ञानो वैक्लव्यं परमं ययौ।। १८।। सांत्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता।। प्रेयस्याः स्नेहसंरंभलिंगमात्मनि नाभ्यगात्।। अनुनिन्येथ शनैर्वीरोनुनयकोविदः।। पस्पर्श पादयुगलमाह चोत्संगलालितां।।२०।। नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे।। कृतागःस्वात्मसात्कृत्वा शिक्षादंडं न युंजते।।२१।। ।।

वध्रूतां सद्वृत्तिभिरिति शेषः।। तस्याः वैषयिक्याः बुद्धेः संगेन स्वीकारेण नानादृशाकर्मणा प्रमेन उन्माथितं नष्टं ज्ञानं यथार्थलक्षणं यस्य सतथा।। १८।। प्रेयस्याः बुद्धेः प्रेम्णा शपीतो सालक्षणो नाम यस्य लिंगं कारणं आत्मनि स्वस्मिन्नाभ्यगात् न ज्ञातवान् रजसाकुलितांतरत्वात् रक्तबुद्धिं सायां।। १९।। अनुनिन्य इत्यादि कथालंकारः। अनुनयं नाम विनययुक्तबुद्धिवृत्तिरूपत्वचकं टकं। बुद्धेर्मनआदिव्यापाराः पादाः तेषां शद्वयं पस्पर्श स्वीकृतवान्। मनो लक्षणमुत्संगे संभावितां इदमेव स्वीकरणं।। २०।। येषु भृत्यकृतापराधेषु शिक्षालक्षणदंडं न कुर्वते नूनं ते अकृतपुण्या इत्यन्वयः।। २१।। ।।

दंडस्य निग्रहलक्षणत्वात्कथं प्रार्थ्यत इत्यत आह परम इति। तर्हि लोकः कथं दुःखं मन्यत इति तत्राह बाल इति। दंडस्य पापप्रायश्चित्तरूपत्वात् न जानाती त्यर्थः। अनुरागादिष्विति विशेषण इति ज्ञातव्यं ॥२२॥ उपस्कृतं मंडितं ॥२३॥ भूसुरकुलात् ब्रह्मकुलात् कृतदुष्कर्मस्य सकाशाद्वीतभयं नष्टभयं ॥२४॥ सुजातौ कोमलौ ॥२५॥ कुसुमास्त्रस्य कामस्य वेगेन विस्रस्तं स्खलितं पौंस्यं पौरुषं यस्य स तथा तं देवं रतिक्रीडायां दीव्यतीति देवरः पतिः तं कृत्ये प्रयोजननिमित्ते प्राप्ते उशती कामयमाना

परमो नुग्रहो दंडो भृत्येषु प्रभुणार्पितः ॥ बालो न वेद तत्तन्वि बंधुकृत्यममर्षणः ॥२२॥ सा त्वं मुखं सुदति सुभ्र्वनुरागभारव्रीडाविलंबविलसद्धसितावलोकं ॥ नीलाकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यं ॥२३॥ तस्मिन्दधे दममहं तव वीरपत्नि योन्यत्र भूसुरकुलात्कृतकिल्बिषस्तं ॥ पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात् ॥२४॥ वक्त्रं न ते वितिलकं मलिनं विहर्षं संरंभभीममविमृष्टमपेतरागं ॥ पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबाधरं विगतकुंकुमपंकरागं ॥२५॥ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य ॥ का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्नमुशती न भजेत कृत्ये ॥२६॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे षड्विंशोध्यायः ॥ ॥ नारद उवाच ॥ ॥ इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः ॥ पुरंजनी महाराज रेमे रमयती पतिं ॥१॥ स राजा महिषीं राजन्सुस्नातां रुचिराननां ॥ कृतस्वस्त्ययनां तृप्तामभ्यनंदद्उपागतां ॥२॥ ॥

का स्त्री न भजेत् ॥२६॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पदरत्नावल्यां षड्विंशोध्यायः ॥ ॥ पुरंजनाख्यो जीवस्य जाग्रत्स्वप्नयोरन्यस्यामवस्थायां विषयप्रसरणमाह। इत्थमिति। प्रेमवृत्तिविशेषैर्रेमे ॥१॥ विषयेषु क्रीडावृत्तवत्वं जपनं तत्स्नानं तृप्तत्वं सुखप्रजननवत्क्लिष्टतां। रुचिरेण कमनीयेनाननेन रमणाना वासनेनेसंयुक्तां ॥ कृतं स्वस्त्ययनं स्वस्य प्रासीदवनं स्वायनं वृत्तिविशेषो यस्याः सा तथा तां नामसानां तामसत्संगमे सुखकारणाद्इति द्योतनाय वेसुक्तिः ॥२॥ ॥

कयाचिद्वृत्या परिरब्धं व्याप्तं कंधरः कंठो ग्रीवा कंधरो वेत्यभिधानं। रहो नुमंत्रैर्मंत्रिणितादिलक्षणवृत्तिभिरपकृष्टं चेतनं स्वरूपज्ञानं यस्य स तथा। इदं दिवाज्ञानं। इयं निशाज्ञानमिति कालोरंहः ज्ञानाज्ञानविशेषावच्छेपमदा वैषयिकबुद्धिरेव परिग्रहो यस्य स तथा ॥३॥ शयानः स्वस्वमज्ञानरूपं महार्हं तल्पे ज्ञाननाशिनि वृत्तिविशेषे महिषीभुजोपधेबुद्धेरहंकारलक्षणवृत्तिः। शिरोधिष्ठाने तामेवममनुत। कर्ता भोक्ता सुखी दुःखीति तद्धर्मीनात्मन्यमंस्त तत्र कारणमाह। अव्यायत इति। मैथुनलक्षणज्ञानवृत्तिविशेषान्इदमेवाह। तम इति। निजमात्मानं तत्परं ब्रह्मलक्षणं तत्त्वं नामन्यत। निजमात्मीयमित्यभिधानं ॥४॥ वयस्त्विह ज्ञा-

तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः ॥३॥ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः ॥ तामेव वीरो मनुत व्यावापतस्तमोभिभूतो न निजं परं हि तत् ॥४॥ तयैवं रममाणस्य कामकश्मलचेतसः ॥ क्षणार्द्धमिव राजेंद्र व्यतिक्रांतं नवं वयः ॥५॥ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः ॥ शतान्येकादश विराडायुषोर्द्धमथात्यगात् ॥६॥ दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः ॥ शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ॥७॥ ॥

नानंदरूपलक्षणं व्यतिक्रांतं गतं प्रायमासीत् ॥५॥ अभिशप्तं निजज्ञानस्य तस्य विषयबुद्धेर्नाशस्तु त्यन्निष्कारमाह। तस्यामिति। चक्षुरादीनि मनोनामानीन्द्रियाण्येकादशसंज्ञानि विषयी कृत्य शतमनंताः परिणामा वृत्तयो भवंति। ताः शतान्येकादश पुत्रा उच्यंते। बाल्यावस्थायां बुद्धिविस्ताराभावाद्यौवनावस्थायां तल्लाभ वनमपेक्ष्याउषोर्द्धमात्रादित्युच्यते। विषयमेव राजपतीति विराट् ॥६॥ परिणामानंतरं बुद्धिवृत्तयो दुहितॄरित्युच्यंते। वितृश दश वाह्यानामिंद्रियाणां परिणामानां आतृशद्ववाच्यानां ज्ञानानंदलक्षणायशसो नाशिनीः कृत विक्षेपप्रतिधानं च। स्वजातिप्रसिद्धशीलौदार्यगुणयुक्ताः बाल्यविवक्षया संख्याकथनमंतस्त्वनेकत्वसंख्यैवेत्या पौरंजन्यः अनेकदेहजननहेतवः। हे प्रजापते ॥७॥ ॥

पुत्रान् वृद्धिपरिणामान् दारैः परिणामानंतरं चेष्टाभिः संयोजनं दुहितॄन् दुहितॄः सदृशैर्योग्यैर्योगप्रविषये ॥ ८॥ पुत्राणां पुत्रा अभवन्निति परिणतः दृत्रिंश्योद्यंत शाणीति पांचालेषु विषयेषु ॥ ९॥ तस्य स्वकीयविषयेषु नेहरंतीति तद्रिक्थहाराः तेषु नानावासनारूढा नीतिगृहकोशो मनस्तदुपजीवका वर्तंत इति गृहकोशानुजीविनः तेषु निरूढेन प्रविष्टेन ममैते परिणामादय इति कल्पितेन ममत्वेन विशेषेण सक्तो नात्मानं पुरंजनं ज्ञानातीत्यन्वयः ॥ १०॥ देवान् काम्यफलदान् भूतपतीन्

स पांचालपतिः पुत्रान् पितृवंशविवर्द्धनान् ॥ दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ॥ ८॥ पुत्राणां चाभवन् पुत्रा एकैकस्य शतं शतं ॥ यैर्वै पौरंजनो वंशः पांचालेषु समेधितः ॥ ९॥ तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ॥ निरूढेन ममत्वेन विषयेष्वन्वबध्यत ॥ १०॥ ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान् पितॄन् भूतपतीन् नानाकामो यथा भवान् ॥ ११॥ युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः ॥ आससाद स वै कालो योऽप्रियः प्रिययोषितां ॥ १२॥ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयं ॥ १३॥ गंधर्व्यस्ता दृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति सर्वकामविनिर्मितां ॥ १४॥

नृभैरवादीन् ॥ ११॥ एवंविधया क्रियया युक्तेषु कामेषु सक्तस्येति शेषः । इहैव मनोयोगवत्सु जातेषु ॥ एवमुक्तप्रकारेण प्रमत्तस्य तत्त्वज्ञानरहितस्येति वा । यः स्त्रियां हृद्यायोषितो येषां तेन तथा तेषां विषयपरिणाममपि योनपेक्षित ॥ १२॥ गंधर्वाणां कलाकाष्ठादीनां स्यावयवानां अधिपतिश्चंडो वेगो यस्य स तथेति ख्यातः स कालः आससारेत्यन्वयः । गंधर्वा दिवसाः ॥ १३॥ गंधर्व्यो रात्रयः तावतीः तावत्यः मिथुनीभूय वर्तमाना मैथुन्यः सिता दिवाः असिता रात्रयः इति सितासितपरिवृत्त्या परिभ्रमणेन पुनः पुनरावर्तनेन कामान् विलुंपंति लुंपयंतीत्यन्वयः ॥ १४॥ ॥

के३

हर्तुं जीर्णबलान्त्रजागरः प्राणः प्राणाग्नय एवैतस्मिन् पुरे जाग्रतीति श्रुतेः प्राणबलाद्यापारायप्रवर्तत इत्यर्थः ॥ १५॥ सप्तमेकशतेन सप्तभिः शतैर्विंशत्यधिकाहोरात्रैः शतं समाः शतवर्षपर्यंतं युयुधे तेषां पराक्रमं निरुध्य स्वयं प्राणबलात् देहं पालयदित्यर्थः ॥ १६॥ राष्ट्रे स्वविषये प्राणेन बांधवैरिंद्रियैः सह वर्तमानः ॥ १७॥ स्त्रीजितः मुग्धाविवेकं प्राप्तः । विषयेषु स्वपार्षदैरिंद्रियैरुपनीतं बालिं रूपादिविषयं गृह्णन् मधुभुक् कर्मफलभुक् कालनिमित्तं भयं नाज्ञासीदित्यन्वयः ॥ १८॥ अस्ती जायते विपरिणमते वर्द्धत इति बहून् रूपविकारान् प्राप्तिशिनि रूपयति यते निनश्यतीत्येन वृद्धं जरा प्राप्तिमाहाकाल

ते चंडवेगानुचराः पुरंजनपुरीं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः ॥ १५॥ स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली ॥ १६॥ क्षीयमाणे स्वसंबंधे एकस्मिन् बहुभिर्युधि ॥ चिंतां परां जगामार्तः सराष्ट्रपुरबांधवः ॥ १७॥ स एव पुर्यां मधुभुक् पांचालेषु स्वपार्षदैः ॥ उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भयं ॥ १८॥ कालस्य दुहिता काचित् त्रिलोकीं वरमिच्छती ॥ पर्यटंती न बर्हिष्मन् प्रत्यनंदत कश्चन ॥ १९॥ दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा ॥ या तुष्टा राजर्षये तु वृतादात् पूरवे वरं ॥ २०॥ कदाचिदटमाना सा ब्रह्मलोकान्महीं गतं ॥ वव्रे बृहद्व्रतं मां तु जानती काममोहिता ॥ २१॥ मयि संरभ्य विपुलमदाच्छापं सुदुःसहं ॥ स्थातुमर्हसि नैकत्र मद्याञ्चाविमुखो मुने ॥ २२॥ ॥

द३

स्येति कालात्रसञ्जायत इति कालस्य दुहितेति विशेषनामाश्रवणात् काचिदिति ॥ १९॥ यासा आत्मनः शरीरस्य दौर्भाग्यत्वेन सौंदर्याभावेन लोके दुष्टो भगो यस्याः सा तथेति विश्रुता ॥ यां जरां तुष्टः पिता राजर्षेः छापरूरवे वरमदात् तां कश्चन न प्रत्यनंदत इत्यन्वयः ॥ २०॥ तु शब्दोऽप्यर्थो यां मां बृहद्व्रतं ब्रह्मचारिणं जानंत्यपि ब्रह्मलोकान्महीमागतं वव्रे इत्यन्वयः । तत्र हेतुः काममोहितेति ॥ २१॥ ततः किमभूदिति तत्राह ॥ मयीति ॥ २२॥ ॥ ॥

भा॰ ४॰
१२१

साकन्या नानाधिव्याधिना स्त्रात्मनत्राम्रा भयं स्वं स्तुं पतिं वव्र इत्यन्वयः॥२३॥ नरिष्यति न दत्यति॥२४॥ असन्नवग्रह आग्रहो ययोस्तौ तथा बालो स्वकार्यज्ञौ कौ तौ यो लोकशास्त्रयोरविरोधेन योपनतं तत्प्राप्तमर्थिभ्यो न राति न ददाति दायं स्वयं तेनेच्छति ताविति शेषः। नन्वेवं नेन लोकविद्विष्टं वेश्यास्त्रीयमपि न कर्तव्यमित्यायातं समत्वेन सहोक्तेन। तस्माच्छास्त्रप्रमाणेनैव कार्याकार्यव्यवस्थिता विद्यादि विधानं व्यर्थमिति यं शंका॥ अलौकिकं यच्छास्त्रीयं कर्तव्यं लौकिकं कुतः। लौकार्थे शास्त्राद्दायाति निरयं त्वितरः स्फुरा नित्यनेन परिहर्तव्या। तस्माच्छास्त्रानुसारि लौकिकं कर्तव्यं नेतरदिति तात्पर्यं। इतरः शास्त्रानुकूल लौकिं

ततो विहतसंकल्पा कन्यका यवनेश्वरं। मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिं॥२३॥ ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिं। संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति॥२४॥ द्वाविमावनुशोचंति बालावसदवग्रहौ। यल्लोकशास्त्रोपनतं न राति न तदिच्छति॥२५॥ अथो भजस्व मां भद्र भजंतीं मे दयां कुरु। एतावान्पौरुषो धर्मो यदार्ताननुकंपते॥२६॥ कालकन्योदितं वाक्यं निशम्य यवनेश्वरः। चिकीर्षुर्देवगुह्यं स सस्मितं तामभाषत॥२७॥ मया निरूपितस्तुभ्यं पतिरात्मसमाधिना। नाभिनंदति लोकोयं त्वामभद्रामसंमतां॥२८॥ त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मविनिर्मितं। या हि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि॥२९॥ प्रज्वारोयं मम भ्राता त्वं च मे भगिनी भव। चराम्युभाभ्यां लोकेस्मिन्नव्यक्तो भीमसैनिकः॥३०॥ ॥

इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तविंशोध्यायः॥ ॥

कुर्वाणः स्फुरात्याति स्वर्गादिपुरुषार्थमाप्नोतीत्यर्थः॥२५॥ उपसंहरति। अथो इति। यस्मादिदं शास्त्रीयमथो तस्मात्। संक्षिप्य स्वकार्यस्य स्वकर्तव्यतामाह। एतावानिति। पौरुषः पुरुषाणां निश्चः॥२६॥ तस्माद्भगिवत्त्वमनपेक्ष्य नद्ववनस्यादरपकारमाह। कालकन्येति। देवस्य विधातुर्गुह्यं रहस्यं संवरसमारणमर्थं सस्मितमभाषतेत्यन्वयः॥२७॥ तत्र भोगोपायमुपदिशति। नाभिनंदतीति। अयं लोकोऽसंमतां त्वां नाभिनंदतीति यस्मात्॥२८॥ तस्मात्त्वमज्ञातगतिर्लोकं भुंक्ष्व॥२९॥ योयं मम भ्राता प्रज्वारः शेवत्वे स्वैरीभयतलत्त्वराः सोपयो न पत्यस्त्वां प्रणोष्यति ग्रहिष्यतीत्यन्वयः। भीमा भयंकराः सैनिकाः सेनापतयो यस्य सतथासः॥३०॥ ॥चतुर्थे सप्तविंश॥ ॥

रामः
१२१

ओ २

ईश्वरो लोकोपनतकर्मवशाच्छरीरमनुविशच्छित तस्य जीवस्य तदा यदा घवस्थाभेदं प्रतिया या घाशुनाशरीरवियोगलक्षणामवस्थां वक्तुमुपक्रमते। सैनिका इत्यादिना। वातादिव्याधिसमूहा इमामवनिं विचेरुरित्यनेन जरादिव्याधयोऽस्मिन्नुपंच एवनान्येतिज्ञायते॥१॥ भौमभोगाश्च शतपानवसनलक्षणास्तदुढ्यः शरीरं विविशुः। जरत्पन्नगाः इति प्राणवलावेष्टाल्पत्वं लक्ष्यते। न तु प्राणस्य निःशक्तोस्नोमबलत्वात्॥२॥ कन्यापि बुभुजे इति यौवनानंतरं विवेश॥३॥ प्रादर्शयन्नि

नारद उवाच॥ ॥सैनिका भयनाम्नो ये बार्हिष्मन्दिष्टकारिणः। प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमां॥१॥ त एकदा तु रभसा पुरंजनपुरीं नृप। रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालितां॥२॥ कालकन्यापि बुभुजे पुरंजनपुरं बलात्। यया भिभूतः पुरुषः सद्यो निःसारतामियात्॥३॥ तयोपभुज्यमानां वै यवनाः सर्वतो दिशं। द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीं॥४॥ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः। अवापोरुविधांस्तापान्कुटुंबी ममताकुलः॥५॥ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः। नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात्॥६॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान्। पुत्रान्पौत्रानुगामात्यान्जायां च गतसौहृदां॥७॥ आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान्। दुरंतचिंतामापन्नो न लेभे तत्प्रतिक्रियां॥८॥ कामानभिलषन्दीनो यातयामांश्च कन्यया। विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन्॥९॥ ॥

तिजरायस्तस्य पलितस्याभिन्निमांद्यं बाधिर्यत्वं दंतभंगेन्द्रमाकुलत्वमग्निदौर्बल्यं कंठेघुरुघुरुत्वमित्यादिना व्याधयो दृश्यं तेन इति॥४॥५॥६॥ उत्रान् गोलकलक्षणान् पौत्रानिंद्रियाणि। अमात्यान्मनसहवर्तिनीया आमात्याइंद्रियाभिमानिनो देवास्तांश्च। अतसौनत्यगमनइतिधातुः। बुद्धेरपि सूर्खवदतिशयो नास्तीति गतसौहृदां॥७॥ कन्यया ग्रस्तं पंचालान्विषयानरिदूषितान्विघ्रप्रतिहतान्॥८॥ यातयामान् गतास्संवित्तनष्टपरमात्मज्ञानः। अत एव निस्नेहः परमात्मनि भक्तिरहितः विरुद्धस्नेहोवा॥९॥ ॥

एण प्रज्वरः उरीददाहे तिशरीरेचज्वरः प्रवृत्त इत्यर्थः। धातुर्मृत्तुनाम्नो हितकररणे छया॥ २१।१२॥ यवनेर्या। धीमिरूपरूढमायतनंपत्र नंशरीरनाडिलन्दरणं यस्यसत
था। सुरपालः प्राणः। अवतु तापोजी वल्लौक्रे शं प्रेत्स॥१३॥ सानलादन्ति रुता तृष्ह विलाद्वि॥ १४।१५॥ अधुनाकामिनीनांमरणमवस्थांदर्शयति। दुहितृ मिति।

गंधर्वयवनक्रांतां कालकन्योपमर्दितां॥ हा तंप्र वक्र मे राजा तांपुरीमभिकामतः॥ १०॥ भयनाम्नोग्र जोभ्राता प्रज्वारः प्रत्युपस्थितः॥ ददाह तांपुरीं कृत्स्नां
गंधर्वयवनक्रांतां कालकन्योपमर्दितां॥ ११॥ तस्यां संदह्यमानायां सपौरः सपरिच्छदः॥ कौटुंबिकः कुटुंबिन्याउपातप्यत सान्वयः॥ १२॥ यवनोपरुद्धायतनो ग्रस्ता
यां कालकन्यया॥ पुर्यां प्रज्वारसंस्पृष्टः पुरपालोन्वतप्यत॥ १३॥ न शेके सोवितुं तत्र पुरुकृच्छ्रोरुवेपथुः॥ गंतु मैच्छत्ततो वृक्षकोटरादिव सानलात्
॥ १४॥ शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः॥ यवनैररिभी राजन्नुपरुद्धो रुरोद ह॥ १५॥ दुहितॄः सुतान् पौत्रान् जामिजामातृपार्षदान्॥ स्वत्वावशिष्टं य
त्किंचिद् गृहकोशपरिच्छदं॥ १६॥ अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही॥ दध्यौ प्रमदया दीनो विप्रयोगउपस्थिते॥ १७॥ लोकांतरं गतवतीत्यादि...
तिमय्यनाथा कुटुंबिनी॥ वर्त्तिष्यते कथं त्वेषा बालकाननुशोचती॥ १८॥ न मय्यनाशिते भुंक्ते नास्नाते स्नाति मत्परा॥ मयि रुष्टे सुसंत्रस्ता
भर्त्सिते यतवाक् भयात्॥ १९॥ प्रबोधयति माऽबोधं विषण्णे शोककर्शिता॥ वर्त्मैतद् गृहमेधीयं वीरसूरपि नेष्यति॥ २०॥ कथं नु दारिका
दीना दारका मत्परायणाः॥ वर्त्तिष्यंते मयि गते भिन्ननाव इवोदधौ॥ २१॥ ॥

अन्तप्रविष्टनिमंतरेणना धुडुहि त्रादियोपि गृही तुंशक्तं ते॥ १६॥ विप्रयोगे मरणालक्षणे प्रमदया बुध्यात्र च याचा॥ १७॥ लोकांतरं गतवतीत्यादिकथालंकारः॥
१८॥ अनाशिते अभुक्ते यतवाक् नतूष्णीभाव माश्रिता॥ १९॥ ~~सुधिते संगमे भिन्नेनावः॥ २१॥~~ ॥ मृत्यउपस्थिते॥ २०॥ भिन्नानौर्येषांते भिन्ननावः॥ २१॥

अ नदर्हतां शोकाबोऽपं मरणायोप्यमितिवा॥ २२॥ स्वकं स्वयं कर्म्मकृतमाणाशरीरांतरं॥ अनुपथाः प्राणेंद्रियादयः॥ २३॥ यदाविहंगमोखुजंगमः पुरीविहायो
पगतस्तदातमनु शरीरं वा विशीर्णाप्रकृतिं पंचभूतात्मतां गतं पंचभूतेसउत्पन्नं तनस्त द्वशेषमायादित्यर्थः॥ २४॥ नमस्याविष्टः अज्ञावनिमित्तमोहं

एवं कृपणया बुध्या शोचंतमतदर्हणं॥ ग्रहीतुं कृतधीरेनं भयनामाभ्यपद्यत॥ २२॥ पशुवद्यवनैरेष नीयमानः स्वकं
क्षयं॥ अन्वद्रवन्ननुपथाः शोचंतो भृशमातुराः॥ २३॥ पुरीं विहायोपगत उपरुद्धो भुजंगमः॥ यदा तमेवानु पुरी विशीर्णा
प्रकृतिं गता॥ २४॥ विकृष्यमाणः प्रसभं यवनेन बलीयसा॥ नाविंदत्तमसाविष्टः सखायं सुहृदं पुरं॥ २५॥ तं यज्ञपशु
वो वेन संज्ञप्तायेदयालुना॥ कुठारैश्छिद्यमानास्तु ऊर्द्ध्वः स्मरंतो वैशसं तु ततः॥ २६॥ अनंतपारे तमसि मग्नो नष्टस्मृतिः स
माः॥ शाश्वतीरनुभूयार्त्तिं प्रमदासंगदूषितः॥ २७॥ ॥

प्रज्ञः॥ सखायं परं सदा सहवर्तमानं परमात्मानं सुहृदं अनिमित्तबंधुं नाविंदत्॥ नोस्मारदित्यन्वयः॥ २५॥ अदयालुना क्रूरेण हिंसाकर्मरते
नेत्यर्थः॥ वैशद्वेन ब्रह्मार्पणातुध्यानतुष्यानं सूचयति॥ २६॥ अनंतपारे अवसानरहिते तमसि निरयेषु मदासंगेन विषयबुद्धिः स्त्रीकोरेण दू
षितोस्युद्ध॥ २७॥

भा. च.
१२३

तां विषयबुद्धिमेव। उरूतमदापगतमदा मदरहिता बुद्धिरभूत्। अत्र मरणाद्वर्णनेनेकथालंकारः। अध्यात्मार्थस्य मंदकल्पलुति न्यायेन पदानि सर्वत्रापि संभ
वात्। तामिममयमुक्त्यवेतिववनात्॥२८॥ उपयमनं नाम स्वाधीनताकरणं वीर्यपणां ब्रह्मचर्यादिसाधनसाध्यां। वैदर्भी निशितां कउपयेमे मलं यापयतीति
मलयः। शांतमनसंस्कारः स एव ध्वजो यस्य स तथा॥ हरिसेवादिना संस्कृतं मन इत्यर्थः। रूपकमात्रस्य लिंगव्यत्ययोनदोषाय। मनसा वाऽश्रये संकल्पयत्यथ
वाचाव्याहरतीति श्रुतेः मनसोपि बुध्यधीनकरणात् किं तु पयातिमतीति वोद्धव्यं। किं कृत्वा। युद्धियमनियमादिलक्षणे युद्धे राजन्यान्। वा स्त्री त्वा विजित्य
तोदीपकानींद्रियाणि वशीकृत्य। वं बलस्य मनसो बुध्यधीनकरणशक्तिः कथमिति तत्राह। पांड्य इति। पांडा बुद्धिः ज्ञानं विवेकज्ञानं तेन संपन्नः। नत्कुतद्
तित्राह। परेति। परे जाग्रितिं इंद्रियाणां विषयलंपटाणंपुरंजयतीति। आत्मानि मतमार्गं गत्वा इंद्रियाणां परत्वं तदभावेषु दृत्वमेव। मननात्मकत

नामेवमनसा गृह्णन् वक्ष्यं मदोत्तमा॥ अनंतरं विदर्भस्य राज्ञा सिंहस्य वेश्मनि॥२८॥ उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः॥ युधि
निर्जित्य राजन्यान् पांड्यः परपुरंजयः॥२९॥ तस्यां संजनयां चक्रे आत्मजामसितेक्षणां॥ यवीयसः सप्तसुतान्सप्त द्राविडभूभृतः॥३०॥

दिव इति मनश्चेतनो वा। बाह्यार्थे देवां पुरंजनः। आनन्दस्य विषयसंगातिरेकलक्षणकारणत्वं सः पुरंजनी संगेन तत्र सता इति तो नाम्ना वैदर्भी प्र
मदोत्तमा भूत्। पुरंजनी तत्र रंजनसंगातिशयेन वासनावशगा आत्मा मलयध्वजः। तमानभूत्। विषयसंगातिरेकलक्षणकारणात्त्वं सः आत्मा आपुः
स्त्री वा। ततः आत्मैव अवशिष्यते। विषयसंगातिरेको न कर्तव्य इति शिक्षणार्थं चेदमुक्तमिति तात्पर्यं श्रागतव्यं॥२९॥ तस्यां बुद्धौ। असितेक्षणां नित्यबु
द्धो हरिस्तस्येक्षणं यथा भवत्यसितेक्षणा तामात्मजां विष्णुभक्तिः। विरागविनयदानधैर्यक्षमादिविवेकदमाः सप्तसंख्याता बुद्धेर्जनिता त्वात्
ताइत्सुखं तो विष्णुभक्त्यानंतरं कालेस्पष्टत्वाद्यवीयस इति। सप्तधानदयाबंधो लक्ष्यते। संबंधो ह्रतविलः प्राप्तगर्भलक्षणागतिस्तस्य जीवस्येप्र
ज्ञानं मुक्तिलक्षणं विप्रतिउत्याद्यश्रेय ददातीति सप्तद्राविडभूभृतः। इलयोरभेदः स्तुता मजित इति दर्शनात् सप्तेंद्रियाणि वा नेनोच्यंते। रागाद्यपाच
काः प्रकाशितत्वात् सुताइत्युच्यंते॥३०॥ ॥

च४

राम
१२३

अर्बुदमर्बुदमित्यनेन सप्तोक्तपयोगः शंते। महीश्रा आविरुद्धविषयलक्षणमन्वंतरं मनुष्यजीवनावधिपरं शतवर्षपारस्त्रात्परनाशात् बुध्यावरणादिभिः
प्राणेंद्रियैरेव विषयानुपभुंक्त इत्यर्थः॥३१॥ स्पेश्छोशब्दसंघात इति धातोः। अंगं भगवं तंस्याप्रतिशब्दसमूहेन स्तुतिं करोतीत्यगस्त्यो भक्तः। प्राक् चंद्ररात्रं श्री
नासपणं दोग्ध्रीति दुहिता भक्तिस्ताम् उपयेमे। संसारनिवर्तने शक्तिमत्त्वयाबलात्मकरोदित्यर्थः। कीदृशीं ब्रह्मचर्यादिव्रतसाध्यां दृढच्युतस्तु ज्ञानादिक
हो यस्मात्स दृढच्युतः सर्वस्माद्विरोगो दृढतरो भवदित्यर्थः। इध्मवासो गुरुकुलवास एवात्मजो यस्य स तथा वैराग्यादिगुरुकुलावासो भवतीप
रीक्ष्य लोकान् कर्मचितानिवात्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति श्रुतेः। सोम्येमाः समिध आहरेति च॥३२॥

क्ष्यते

एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदं॥ भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परं॥३१॥ अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रतां॥ य
स्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः॥३२॥ विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः॥ आरिराधयिषुः कृष्णं स जगाम कु
लाचलं॥३३॥ हित्वा गृहान्सुतान्भोगान्वैदर्भी मदिरेक्षणा॥ अन्वधावत पांड्येशं ज्योत्स्नेव रजनीकरं॥३४॥ ॥

वैराग्यादिसंपत्त्या राजत इति राजा विवेकित्वाद्दाविः। राजा चासावृषिश्चेति राजर्षिः वैराग्यविवेकज्ञानसंपन्नः शुद्धवासनो। कितः पुत्रेभ्यस्तनयेभ्यः
नीयस्तो विरागादिभ्य इंद्रियेभ्यो वा क्ष्मां शास्त्रलक्षणां भोग्यलक्षणां वा विभज्य दत्त्वेत्यनेन दमितिविविक्त्या यं विषयः सेवनीयो नायमिति कुलाचलं निश्चलं
वासार्थं गुरुकुलं जगाम वैराग्यादिगुणसंपन्नः शरीरयात्रानिर्वाहकविषयभोगी गुरुकुलसंनिधिमवात्सीदित्यर्थः॥ कृष्णं पूर्णानंदमाराधयितुमरोदीत्
कर्तुकामा इत्यर्थः॥३३॥ मदिरेक्षणा मदिरं मादकशमीक्षणं ज्ञानं यस्यां सा तथा। शुद्धज्ञाना विषयानुषंगं विहाय तदनुसारिणी बभूवेति पांड्ये
शमन्वधावदित्यभिप्रायः। अत्र सुतशब्देन रागादयो लक्ष्यंते तान् विहायेत्यर्थः। मुक्तावपि बुध्यात्मनो राहित्यं नास्तीति दर्शयितुं ज्योत्स्नेवेति॥३४॥ ॥

दूर॰

तत्र गुरुकुलवासे वंदूवदा दूरदिकं निर्मलं च बदति ज्ञापयतीति वेदांतश्लोकोऽयमेवोश सावि तिसृत्रा ढुका रस्पमकारः। वंद्रविवंविषयी करोतीति वा। नमलो कमंसिद्धं।पर्णी आच्छानइति धातोः।ताम्रं रजस्तमश्चपर्णीयस्याच्छादयति परिभवं तीति ताम्रपर्णी।वेदांतमार्गस्था।ततश्चामरश्चेति ताम्रं ब्रह्म हरणाती ति प्रकाशलक्षणं दानं करोतीति वा।दृ गा।दानइति धातोः।नदीवत्सदवर्णास्य रल लक्षणं प्रवाहात् श्रोतृणां सुदकं वदाह्लादजननं च द्रु।वदसुगइति धातुः।न स्याः व्याख्याया: प्रकाशिते: पुण्ये: शोधकैः सलिलैर्युक्ति लक्षणैः शात्मनोंत: करणस्य। उभयत्रप्रति वादिनि भिन्न बाह्यदुर्युक्तिमलं संशयाद्यांतरं मलं स्त्रज नृशोधयन्॥३५॥ मूलप्रतिष्ठापामिति धातोः। मूलं जगदाधारं ब्रह्म फलति निष्पादयतीति मूलफलानि तैः कं सुखं ददातीति कंदं मिताशनं तदादिर्ये षामित्यस्योपादानीतानि कंदादीनि योगसाधनानि तैः। नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नत इति स्मृतेः। पुष्पवत्सृदुलैः पर्णैः आच्छादनैस्तु द्रुतम

तत्रवं द्वद्वा नाम ताम्रपर्णी वटोदका॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन्॥३५॥ कंदादिभिर्मूलफलैः पुष्पपर्णैस्तृणोद

कैः॥ वर्तमानः शनैर्गात्रकर्षणं तप आस्थितः॥३६॥ शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये॥ सुखदुःखे इति द्वंद्वा

प ३
न्यजयत्समदर्शनः॥ तपसा विद्यया पक्वकषायो नियमैर्यमैः॥ युयुजे ब्रह्मणात्मानं विजिताक्षानिलाशयः॥३७॥ ॥

कंडुः स्वयं पेपः नासुदकानि तृणानि आस्तरणानि तैः वर्तमानः शरीरस्या त्रांकुवर्णा: ।गंज्ञानं गमयतीति गात्रं अज्ञानं कुशलयत्नस्त्यीकरोती ति गात्रकर्षणं तप आलोचनइति धातोशलोचनेमननमनुतिष्ठन् ॥ शीतोष्णादीनि द्वंद्वान्यजयत्सहवर्तमानोवर्ततइत्यन्वयः। शीतोष्णादिशब्दैः कामाद् योलक्ष्यंतइति ज्ञातव्यं। अयबोंशरीरसाधिकरणत्वात्॥३६॥ तपसा मननलक्षणेन ज्ञातं याविद्यया ज्ञानेन नियमादिभिश्च पक्वकषायः। शिथि लीकृतपापः। आत्मानमंतःकरणं ब्रह्मणा युयुजे विषयेभ्य आनीय श्रीनारायणेन सहवर्तमानमकरोत्। नदेकानि ध्यामकुकृते त्यर्थः। पद्मात्मानमंतः र्यामि रूपं ब्रह्मणा व्यापकरूपेणायुयुजे एकत्वेन दध्यावित्यर्थः। विजिताक्षानिलाशयः। वशीकृतेंद्रियप्राणांतःकरणः। आशये योत्राभिलाषो ग॥३७॥

स्थाणुरिवाच्छितत्रकत्र गुरुकुले कृतमनः शास्त्रोबुद्धिप्रसादजनको विविक्तस्थानेवादिष्टं वर्षशतं बहुकालमुपासीन आस्तइत्यन्वयः। युक्तिसाधनं म रेवनान्यादिति तस्य आतिशयफलमाह॥ वासुदेव इति। उपासको वासुदेवे भगवति वेदांतविचारनिर्णीतगुणरत्नाकरे हरावुपासनालक्षणां रतिमुद्वहन् कुर्वन्नन्य त्स्वतंत्रं वस्तु न वेद किंतु सर्वं तदधीनमेव ज्ञातवानित्यर्थः॥ ३९॥ ब्रह्मव्यतिरिक्तस्य वस्तुनो ताबादेकमेवाद्वितीयमिति श्रुतेरेतदेव नान्यदिति प्रतीत एवार्थः किं न स्या दिति तत्राह। सव्यापकतयेति। श्री संप्रश्रय विचारात्मनि जीवे द्रष्टितं सात्मिणं। स्वप्ने शरीरमतिशरहत्या सुप्तः सुप्तानमिवाकशीतिश्रुतेः॥ साक्षात्तु द्रष्टुत्वेन वर्तमा नं स्वयेव यथा परंतत्र तया जीवं पश्यति तथा अन्यदापीति विद्वान् तथात्मानं परमात्मानं व्यापकतयो सर्वव्यापित्वेन चेतनाचेतनात्मकजगद्व्यतिरिक्ततया च विद्वान्

आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थितः॥ वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिं॥३९॥ सव्यापकतयात्मानं व्यतिरिक्ततयात्मनि॥ विद्वान्स्व प्न इवामृश्य साक्षिणं विरराम ह॥४०॥ साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप॥ विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखं॥४१॥ परे ब्र ह्मणि चात्मानं परं ब्रह्म तथात्मनि॥ ईक्षमाणो विहायेक्षामस्मादुपरराम ह॥४२॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजं॥ प्रेम्णा प

र्यचरद्धित्वा भोगान्सा पतिदेवता॥४३॥ ॥

विरराम संसाराद्विरक्तो जीवन्मुक्तावस्थामापेत्यन्वयः॥ यद्वात्मानं व्यापकतयात्मनि जीवस्याश्वातंत्र्ये हरेस्तदन्यत्वं। यतः स्वप्नो न स्वतंत्रस्तत्तस्य दर्शकः परः। जीवादन्यस्तद्विज्ञेय: स विष्णुरवधार्यतामिति श्रुतिसिद्धिः सूचनैः॥४०॥ आत्मानं जीवांतर्यामिणं। ईक्षां तयोर्भेददर्शनं। अस्माच्छरीरात्। हेत्यने नइहास्यप्रामाणिकत्वं घोतयति॥४२॥ पतिस्वाश्रयं। इंद्रियद्वारेणाभोगान्विहाय परिचरणं नाम तस्य हितप्रेरकत्वं॥४३॥ ॥ ॥ ॥

२५ तर्हि तेस्फुटेः कोत्तिप्रायइत्याशंका जीवांतर्यामिणो हरेः ब्रह्मविदाप्नोति परमिति श्रुतिप्रतिपाद्यस्य व्याप्तस्याविनकोप्रि ज्ञेदोस्तीत्यर्थ इत्यभिप्रेत्याह। सादिति॥४४॥२५
स्या

वीरवासाः सत्वगुणालक्षणा एवेणी वक्रक्रशिरोरुहलक्षणा छन्नयो यस्याः सा तया उपपत्तिं पत्युः स्वमनसः समीपे शांतमग्निलनेन धूमराहित्यं न त्वानि वृणोत्वं नाहेनष्टस्याग्नेः शिखा। कथापक्षे यथा। छिन्न एवार्थः। अभूतदृष्टांतस्य संभवात्। तस्मान्निर्धूमतया ज्वलतोग्नेः शिखेवानिर्मलतयाश्रेयसीतिरंगमित्यर्थः ॥४४॥ इदानीं तुद्दृष्टान्तविशेषानलंकरयति। अजाननीति। अंगनाभगवज्ज्ञानसाधने उपरवंजी वन्मुक्तवत्स्थामाश्चं। प्रियतमंस्यस्यात्रालं तिकाषि यत्वेतमजानतीवा यद्वृत्तिविशिष्टानुसुक्ति रसनेन कैदेकवृत्तिनिष्ठालक्षणांपीठमाथ्यपूर्वसंस्कारवशात् यथापूर्वसुपवरेन् शुभकर्मणि चेरयामास॥ ४५॥ यदा एवं जरपतिवय दोषस्तुरंध्रावयवैकदेशे कुष्माणमौल्यनोपलसेनेशुष्कजलनारिकेलफलवत् देहाभिमानं विहायाच्छिन्नत्वादोष्यानुपलंभस्तस्याइति। ततो विदृत्यंतर

वीरवासाजनस्थामावेणीभूतशिरोरुहा॥ बलात्तुपपतिं शांतशिखाशांतमिवानलं॥ ४४॥ अजानतीप्रियतमं यदोपरतमंगना। सुच्छिरा

सनमासाद्य यथापूर्वमुपाचरत्॥ ४५॥ यदानोपलभेतांघ्रौ तुष्माणं पत्युरर्चती॥ आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा॥ ४६॥ आत्मानं शोचती दीनमबंधु विक्लवाश्रुभिः॥ स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा॥ ४७॥ उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलां॥ दस्युभ्यः क्षत्रबंधुभ्यो बिभ्यतीं पातुमर्हसि॥ ४८॥ ॥

वैशिष्ट्यमाह॥ आसीदिति। तदा सविग्नहृदया दुःखं तरविशिष्टासीत्। मिश्रस्तु छिम पहाय स्वरूपतुष्माव तिष्ठते। तदेवमवस्थाविशेषा इति तात्पर्यं ज्ञातव्यं॥ ४६॥ बंधुः स्वामी तदनुमानराहित्यादबंधुः शोचंती प्रकाशयंती विक्लवेत्यादिना प्रतिष्ठान्तरं आनंदवृद्धिर्हत्तयोः लक्ष्यंते। विपिने देहे लक्षणोच्छितास्सु स्वरं प्ररुरोदेति देहवृद्धेर्लक्षणं आस्याः मुक्तिकालेनाशात्। विदचित्तुष्माव्यापारविशेषात् लक्षणावेलक्षण्यं प्रतिलक्षणं ज्ञातव्यं॥ ४७॥ उदधिः कर्मतद्वमेखला स्थानीयं यस्याः सा तथा तां दस्युभ्यः अहंकारादिभ्यः क्षत्रबंधुभ्यः मिथ्याज्ञानादिभ्यः बिभ्यतीं मां रक्षितुमर्हसि त्वदनुग्रहीतया तुष्माऽज्ञाना दयो निवर्तंत इत्यर्थः॥ ४८॥ ॥

विपिने वासनावने विलपती विद्यावती वदर्शयती भर्तुः पादयोः पतिता स्वामिनं विहाय स्थिता अश्रूण्यवर्तयत् सुखे वाभवत ४९ दारुमयी भेदविषयां चितिं संविदं कृत्वा प्रकाश्यतस्यां संविदि पत्युः कलेवरं संसारकारणमादीप्य दग्ध्वा अनुमरणे अनुसूतदोषनाशे मनो दधे तादृशी वृत्तिं प्रकाशयत ५० तत्र तस्यामवस्थायां कश्चिद्वेदांतवाक्यार्थहितोपदेष्टृत्वेन सखि धर्मवर्तमानो ब्राह्मणो ब्रह्मसंबंधी निर्देविशब्दलक्षणागमसंबंधी वात्मवान्। परमात्मगुणप्रतिपादनपरः। साम्ना अखिलार्थप्रकाशनेन सांत्वयन् प्रतिसदः स्वस्मान् प्रत्ययः बुद्धिमाह आवालयदिति। कथापक्षे प्रतीतार्थः ५१ तदनुकरणतया बोध्यत इत्याह॥ केनि। का किं जातिविशिष्टा न कापि किंच कस्या

एवं विलपती बाला विपिनेनुगता पतिं॥ पतिता पादयोर्भर्तुरुदंसत्यश्रूण्यवर्तयत् ४९ चितिं दारुमयीं कृत्वा तस्यां पत्युः कलेवरं॥ आदीप्य चानुमरणे विलपंती मनो दधे ५० तत्र पूर्वतरः कश्चित्सखा ब्राह्मण आत्मवान्॥ सांत्वयन्वल्गुना साम्ना तामाह रुदतीं प्रभो ५१ कात्वं कस्यासि का वायं शयानो यस्य शोचसि॥ जानासि किं सखायं मां येनाग्रे विचचर्थ ह ५२

सि कं पुरुषमाश्रित्य तिष्ठसि न कमपि सर्ववेत्तानुसूतत्वात् न विशिष्टं शक्यते यस्य शोचसि यदीयाहमिति प्रकाश्यवर्तसे। अयं शयानः शरीरलक्षणः पदार्थः कः पाव भौतिकत्वात् तव चास्य न कोपि संबंधः किं तु वेत्तनस्यैवेत्यर्थः। त्वं का नाम ते गोत्रं ते लिंगं तत्र नत्वत्रयमप्यास्ति कस्यासि पुत्री भार्या वा न कस्यापीत्यर्थः। को वायं शयानः सत्वनिरूपितेत्यनेन संबंधः यस्य मरणे शोचसि स इति वा। अग्रे पूर्वकाले येन मया विचचर्थ विचारितवानसि वेदांतवाक्यमिति शेषः। विचार्य मां ज्ञातवानसि त वसखायं त्वया सह वर्तमानं मां जानासि किं सखित्वात्। ज्ञातुं शास्त्रिरसीत्येतदृष्टान्तेनाह ५२

किंवहेसखेत्वविज्ञातःपरमात्मासखत्वायस्यसतथातमात्मानंत्वंस्मरस्यापिनस्मरसिवेत्यन्वयःस्मरेतिवार्थीः।वित्तबुध्यात्मनोरभेदादिदंअभयविषयः।इदानींज्ञानात्मानंचेतनमविभज्येवा
हा।हित्वेति।विषयभोगरतस्तदर्थंभोगस्थानमन्विच्छन्पृथग्गतन्मांहित्वागतः।पृथङ्कृतस्त्वंवा।अयतइतिपाठेमदन्विच्छन्नभूरित्यन्वयः ५३ वाक्यार्थाभिमानीकश्चिच्चेतनःस्वात्मने।
तंप्रबोधयंस्वरूपंचतत्वतउपदिशति।हंसाविति।आर्यप्राज्ञअहंचत्वंचहंसौस्वतोनिर्लेपौमानसंज्ञानमयनंययोःसौतथा।सहस्रपरिवत्सरान्बहुकालंरमणेनरममाणौअवास्व।
अन्यत्रमानससरोवराश्रयौहंसौप्रसिद्धौ।आकुर्वीणंपुण्यनिपादवासजातिस्मृती।पुनःप्रारब्धकर्मवशात्ग्राम्यमतिर्मांविहायकर्मभूमिंगतोविचरन्पर्यटन्किंचित्पदंभोगस्था

अपिस्मरसिचात्मानमविज्ञातसखंसखे।।हित्वामांपदमन्विच्छन्भौमभोगरतोगतः ५३ हंसावहंचत्वंचार्यसखायौमानसायनौ।।अभूतामन्तरावौकःसहस्र
परिवत्सरान् ५४ सत्वंविहायमांबंधोगतोग्राम्यमतिर्महीं।।विचरन्पदमद्राक्षीःकयाचिन्निर्मितंस्त्रिया ५५ पंचारामंनवद्वारमेकपालंत्रिकोष्ठकं।।षट्
कुलंपंचविपणंपंचप्रकृतिस्त्रीधवं ५६ पंचेंद्रियार्थाआरामाद्वारःप्राणानवप्रभो तेजोबन्नानिकोष्ठानिगोलकेंद्रियसंग्रहः ५७ विपणस्तुक्रि
याशक्तिर्भूतप्रकृतिरव्यया।।शक्त्यधीशःपुमानत्रप्रविष्टोनावबुध्यते ५८

नमद्राक्षीः।स्त्रिया विषयबुध्यारचितं।एकपालःप्राणोयस्मिन्तत्तथा।स्त्रीधवःपतिर्यस्मिन्तत्स्त्रीधवं।पंचारामार्थमाह।पंचेति।इंद्रियार्थाःशब्दादयः।नवद्वारमित्यस्यार्थ
माह।द्वारइति।घ्राणादयोद्वारउच्यंते।त्रिकोष्ठमाह।तेजइति।षट्कुलमाह।गोलकेति।गोलकेष्विंद्रियाणिदृश्यंतइतिगोलकेंद्रियसंग्रहः।विपणोव्यवहारःक्रियाशक्तिः
कर्मेंद्रियशक्तिः।पंचप्रकृतीत्येतदाह।भूतेति।पंचभूतानांयाप्रकृतिर्मूलकारणंसापंचप्रकृतिरित्युच्यते।अव्ययानित्या।स्त्रीधवमाह।शक्तीति।शक्तिर्बुद्धिःसैवाधीशाप्रवर्तकभो
भोगेकारणंयस्यसशक्त्यधीशः।अन्यत्रकोष्ठानिभांडागारस्थानानि।कुलानिबहिष्ठपदार्थदर्शनायनिर्मितस्थानानि ५८

रमयाविषयबुद्ध्यास्पृष्टःकृशीकृतः।हतस्मृतिःशास्त्रज्ञानरहितःविषयबुद्धिसंगफलेननरकादिभवतीत्यर्थः ५९ नत्वमिसादिविषयवैराग्यमुच्यते ६० प्रारब्धकर्मयोगंविषफला
नुत्वाधमयामदंतर्यामिणाहरिणादृष्टासंज्ञसैवामायायाबंधकशक्तिरविद्यावा।साचाविंसमहिमेसाह।यदीति।तर्हिकिंतत्वज्ञानमितितद्धिविद्याह।हंसमिति।तत्वतोनाम
गाश्मदिरहितत्वेनचेतनंहंसंनिर्मलंपश्यात्मनोहरेर्गतिंतत्वंसत्ताप्रदत्वेनस्थितांपश्यात्मनोमन्मगतिं।त्वंप्रबोधगच्छतोममयाअत्रपश्येतिवा।अनेनबोध्यबोधकयोरनु
भवसिद्धत्वाद्वाधितोभेदइतिज्ञातव्यं ६१ ननुकथमितिविज्ञानमयात्मापरश्चयेसर्वएकीभवंतितत्वमस्यहंब्रह्मास्मीत्यादिश्रुतिनिरैक्यस्यप्रतिपाद्यत्वात्कथं
भेदोऽबाधितइतिज्ञायते।नवेदमौपचारिकंगुरुशिष्योपदेशत्वात्विप्रलंभानुपपत्तेरित्याशंक्यजीवसत्ताप्रदत्वाच्चेतनत्वेनतत्सदृशत्वाद्वाभेदव्यपदेशःतद्गुणसारत्वा
त्तुतद्व्यपदेशःप्राज्ञवदितिसूत्रात्।जीवसत्ताप्रदत्वात्तुसदृशत्वाच्चकेशवः।।कथ्यतेतदभेदेननतुजीवस्वरूपतइतिप्रमाणाविरोधवाद्वन्यापत्वस्यसर्वमात्मैवाभूत्

तस्मिंस्त्वंरामयास्पृष्टोरममाणोहतस्मृतिः।।तत्संगादीदृशींप्राप्तोदशांपापीयसींविभो ५९ नत्वंविदर्भदुहितानायंवीरपतिःप्रभो।।नपतिस्त्वं
पुरंजन्यारुद्धोनवमुखेययाा ६० मायाह्येषामयासृष्टायत्पुमांसंस्त्रियंपतिं।।मन्यसेनोभयंयद्वैहंसंपश्यात्मनोगतिं ६१ अहंभवानन्नवान्यस्त्वं
त्वमेवाहंविचक्ष्वभो।।ननौपश्यंतिकवयःछिद्रंजातुमनागपि ६२

त्केनकिंपश्येदितिदृष्टिपितत्वाद्वासेदस्येत्यपलिपेत्याह।अहमिति।भवानहंत्वंमत्तोन्योनचत्वंअहमेवेतिविचक्ष्वपश्य।अत्रप्रमाणमाह।नेति।कवयस्तत्वदर्शिनःक्वचिमनाग
ल्पमपिनावयोःछिद्रमंतरंपश्यंति।द्वयंकर्मचक्रालश्चेतिवाक्यार्थंपश्यंतोस्मदंतर्यामिणमंतरेणावयोःसत्तापिनास्तिकिमुतदृष्टा।निदृष्टाप्तिपरिहारलत्रणप्रश्नेनोश
क्तिरित्यतःस्वप्नदेशीयधीरंतर्यामिणस्त्वत्तववीप्यारिवभेदंपश्यंतोपिनपश्यंतीत्यभिप्रायः।भवदंतर्यामीमदंतर्यामीवान्योनभवतिकिंतुत्वमेवाहमेकएवेतितानीहित्व
यिस्थितस्यमित्यसाविति।प्रमाणयतांकवीनांदर्शनादिताहंभवान्नचकिंतुत्वमन्यःअतस्त्वमेवाहमहमेवेतिविरस्य।अन्यथानपश्य।कुतःनौमनाक्छिद्रंकिंपाने
वविशेषइतिनपश्यंतिकिंतुमहांतंभेदंपश्यंतीतिवा ६२

जीवसत्ताप्रदत्वाज्जीवेनाभेदः परस्येत्यत्र दृष्टांतमाह। यथेति। आदर्शचक्षुषोः प्रतीयमानस्य प्रतिबिंबस्य सत्तादेर्दृष्टुर्बिंबाधीनत्वात्तद्भेदमिति वदावयोरंतरमस्सत्ताया अप्यस्मत्ताम्यधीनत्वादावांतरमित्रावितिव्यवहारः यथादर्पणाद्युपाधिच्छेकमात्मानं बहुधा पश्यति तथावयोरंतर्यामिणोरंतरमिति वा ६३ उपसंहरति। एवमिति। तद्भ्रमिवारेण विषयबुद्धिप्रसंगातिशयेन नष्टां तिरोहितां स्मृतिं शास्त्रविषया मापेस्त्वयः। कथाध्यात्मप्रभेदेन निरूप्यते रुतेतत्कथमवगतमिति तत्राह। बर्हिष्मन्निति। परोक्षेण न्यायदेशेन एवं कथने किं कारणमित्याह। यत्परोक्षेति। परोक्षप्रिया इव हि देवा इत्यादिश्रुतिः। अनेना हं भवानित्यादेरप्यस्मद्रूक्त एवार्थो न प्रातीतिकः इत्येतत्सुतरामबोधि इति चतुर्थेऽष्टाविंशोऽध्यायः भक्तिजनितज्ञानमेव हरेः प्रसादजनकं न कर्मादिकं तत्र साधनमित्येतदस्मिन्नध्याये निरूप्यते। तत्रादौ प्राची

यथा पुरुष आत्मानमेकमादर्शचक्षुषोः। द्विधाभूतमिवेक्षेत तथैवांतरमावयोः ६३ एवं समानसो हंसो हंसेन प्रतिबोधितः। स्वस्थस्तद्व्यतिरेकेण नष्टामापपुनः स्मृतिं ६४ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितं। यत्परोक्षप्रियो देवो भगवान्विश्वभावनः ६५ इति श्रीभागवते महापुराणे चतुर्थस्कंधेऽष्टाविंशोऽध्यायः प्राचीनबर्हिरुवाच भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते। कवयस्तद्विजानंति न वयं कर्ममोहिताः १ नारदउवाच पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं। एकद्वित्रिचतुष्पादं बहुपादमपादकं २

न बर्हिः स्वयं विद्वानपि लोकोपकाराय सम्यकू पृच्छति। भगवन्निति। नारदस्य हर्षार्थं भगवन्निति संबोधनं। अस्माभिरस्मादृशैः। प्रवक्तृबोधकशक्त्यभावपरिहारार्थं सम्यगिति। तत्र किं कारणमिति तत्राह। न वयमिति। कवीनां कर्माभावेन विविदिषंति यज्ञेन दानेनेत्यादिविधानं व्यर्थमिति मा शंका कवय इत्यनेन पर्यहारि। कर्मणा शुद्धांतःकरणस्य हर्युपासनासाध्यप्रकारेनातिक्रांतदर्शनस्य कवित्वात् १ व्यनक्ती त्यनेन पुरंजनपदं निरुक्तं। पुरस्य देहस्यांजनं यस्मात्स पुरंजन इत्यर्थः। अंजू व्यक्तीकरण इति धातुः। पुरं जनयति प्रकाशयतीति वा पुरंजनः। जनि प्रादुर्भाव इति धातुः। पुरमपि नैकविधमित्याह। एकेति। एकपादा दिजातिं जतुशरीराणि तया पिशाचशरीरमपेक्ष्य वा। द्विपादौ मनुष्यादेस्त्रयः पादाः ज्वरादेः चत्वारः पदाः पश्वादेः। बहवः पादाः सहस्रपादादेः अपादं सर्पादि २

न तु परमात्मनोऽस्य विज्ञातत्वात्किं विशिष्टेभ्यो यातः इति तत्राह। यत्रेति। अनेन नमस्कानुग्रहार्थं नामरूपादिग्रहणं न स्वतो ज्ञि। न तथा परमात्मनः शुद्धभास्वरस्य पामित्यादिनिरूपितत्वादित्यादि प्रदर्शितं ३ यदा जिघृक्षन्प्रकृतेर्गुणान् स्वरूपं दनादिविषयाना सानुमिच्छति तदा नवद्वारादिलक्षणं साधुतत्साधनमिति निरूपयति ४ अभिप्राय। त्वमक्षिणी द्विर्घे श्रोत्रमित्यभिधानादक्षिणी शिरिद्वियैश्चक्षुरूपानूपंहष्ठानंतरं अन्येंद्रियप्रवृत्तिरिति चक्षुषः प्राधान्यद्योतनाया द्वैरित्युक्तिर्विहाया क्षिरिरिति गुणाद्विषया २ ५ यत्येनेंद्रियगणेन। इंद्रियाणां विषयेषु प्रवृत्तयो व्यापाराः पुरस्त्वेण यथा रणे मिन्रूपितसथा देहरहणे। उरः स्कंवस्त्वसि श्रेष्ठ इत्यभिधानात्॥ उरः श्रेष्ठश्चक्षुरकोत्र

यो विज्ञाता ह्यस्य पुरुषस्य स विश्वरः। यत्र विज्ञायते रूपैर्नाममतिर्वा क्रियागुणैः ३ यदा जिघृक्षन्पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान्। नवद्वारं द्विहस्तांघ्रिं पुरं मनुतसाध्विति ४ बुद्धिं तु प्रमदां विद्यात् ममाहमिति यत्कृतं। यामधिष्ठाय देहेऽस्मिन्पुमान्भुंक्ते क्षिभिर्गुणान् ५ सखाय इंद्रियगणा ज्ञानं कर्म च यत्कृतं। सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः ६ बृहद्बलं मनो विद्यादुभयेंद्रियनायकं। पंचालाः पंच विषया यन्मध्ये नवखं पुरं ७ अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति। द्वे द्वे द्वारौ बहिर्याति यस्तदिंद्रियसंयुतः ८

सप्राप कश्चेत्यपुरंगो मुख्यप्राणः। श्रेष्ठश्चासएनान्व्रजगमयतीति स्वत्रस्व त्येयमर्थः। अन्यत्र उरसावक्षसा गच्छतीत्युरगः सर्पः पंचधा वृत्तिर्यस्य स पंचवृत्तिः विस्तृतेव्या पारो वा फणोन्नेपणं फणाग्रभूमावक्षेपणं मंडलीकरणमाकुंचनं मंडलमोक्षः प्रसारणं दीर्घीभूयगमनमिति पंचवृत्तिः नागस्य ६ मनसा वा अये संकल्पयत्यथ वाचा व्याहरतीति श्रुतेः ज्ञानकर्मेंद्रियाणां विषयप्रवृत्तिमेतत्वादुभयेंद्रियनायकमित्युक्तं। एवां विषयाणां मध्ये नवखं नवद्वारलक्षणानि छिद्राणि यस्य तत्तथोक्तं॥ तत्पुरं शरीरं ७ तदिंद्रियसंयुतः॥ अक्षादिद्वारेण बहिर्विषयं बुभुक्षो याति नेत्रादीन्द्रियेण विषयं भुंक्त इत्यर्थः ८

भा॰ व॰
१२८

अक्षिणी इत्यादिना द्वे द्वे द्वारे उक्ते तद्विवेचयति। अक्षिणीति ९ पश्चिमे द्वे इत्युक्तं तदाह। पश्चिमे इति। खद्योतेत्यादावुक्तं विवृणोति। खद्योतेति १० नलिन्यावाह ११ अवधूतमाह घ्राण इति। मुख्या नाम पुरद्वारं इत्यस्यार्थमाह। मुख्येति। या मुख्या नाम द्वाः आस्यं। रसज्ञविपणान्वित इत्येतदाह। विपण इति। विपणो वाग् इन्द्रियं। रसवित् रसज्ञः रसो रसनेन्द्रियं। आपणं व्यावष्टे। आपण इति। चित्रमन्ध इत्यादौ बहूदनमित्यस्य विविधोदनः १२ पाञ्चालशब्दस्यार्थान्तरमाह। प्रवृत्तमिति १३ श्रुतधरेत्यस्य श्रोत्रमिति। ते

अक्षिणी नासिके आस्यमिति पञ्च पुरस्कृताः॥ दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ९ पश्चिमे इत्यधो द्वारौ गुदं शिश्नमिहोच्यते॥ खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते १० रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः नलिनी नालिनी नासे गन्धः सौरभ उच्यते ११ घ्राणोऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः॥ आपणो व्यवहारोऽत्र चित्रमन्धो बहूदनं १२ पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः॥ प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितं॥ १३ पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत्॥ आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः १४ उपस्थो दुर्मदः प्रोक्तो निरृतिर्गुद उच्यते॥ वैशसं नरकं पायुर्लुब्धकोऽन्धौ तु मे शृणु १५ हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च॥ अन्तःपुरं च हृदयं विषूचिर्मन उच्यते १६ तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः॥ यथा यथा विक्रियते गुणाक्तो विकरोति च १७

नोक्तं ततः पितृयानादिमार्गं व्रजति। आसुर्याः कृत्यमाह। मेढ्रमर्वाग्मिति। मेहनं पुरीषोत्सर्जनं। ग्रामिणां रतिर्मैथुनं १४ १६ तद्गुणैर्मनोगुणैर्बुद्धिगुणैर्वा॥ एतदेव प्रपञ्चयति। यथेति। स्वप्नकाले करितुरगादिदृष्टश्रुतवस्तुवासनावासितं मनो बुद्धिर्वा विक्रियते देवेन तिशेषः। बहुसंस्काराधिवासितत्वात्स्वप्नप्रवाहमन्तरेणैव स्वयं वा विकरोतीत्याह। गुणेति १७

यथा तथा विषयकारेण परिणमते तथा तथा स्वप्ने उपद्रष्टात्मा जीवस्तद्वृत्तीः बुद्धिमनोवृत्तीरनुकूलवृत्तीरितिकीर्त्यते। यथा यथा मनो विक्रियते गुणाक्तः कामात्मना गुणाक्तः पितावुद्धिस्तथा विकरोति। बुद्धिर्यथा विकरोति तथात्मापीतिवा। उभयेन्द्रियनायकत्वमुक्तं मनो विकारानुकारि बुद्ध्यनुकारि प्रवृत्तिमत्त्वमात्मनो युज्यते। इन्द्रियाणि पराश्वा यस्य सतथा। संवत्सरे उपलक्षणं दिनानि पक्षमाससंवत्सरलक्षणो वेगो यस्य सतथा। गतिरगतिर्यस्य सतथा १८ द्विकर्मेत्यादिषु बहुव्रीहि। पञ्चासुबन्धुरः पञ्चासवः प्राणा एव बन्धुरो यस्य सतथा। ए

तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकीर्त्यते॥ देहो रथस्त्विन्द्रियाश्वः संवत्सररयोऽगतिः १८ द्विकर्मचक्रस्त्रिगुणध्वजः पञ्चासुबन्धुरः॥ मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः १९ पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः॥ आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति २० एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत्॥ संवत्सरश्चण्डवेगः कालो येनोपलक्षितः २१ तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः॥ हरन्त्यायुः परिक्रान्त्या षष्ट्युत्तरशतत्रयं २२ कालकन्या जरा साक्षाल्लोकस्तां नाभिनन्दति॥ स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः २३ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः॥ भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः २४

करश्मेयकरमनमित्यस्यार्थमाह। मन इति १९ पञ्चप्रहरणमित्यस्यार्थमाह। पञ्चेति। प्रतीतितः सुखमनुभवेयं दुःखं मा भूदिति मृगतृष्णिकां तां तदुक्तं। सुखवद्दूरतो दृश्यं तत्काले दुःखमेव यत्। मृगतृष्णेत्यतः प्राहुर्योगं वैषयिकं बुधा इति २० पञ्चेन्द्रियद्वारेण विषयसेवा लक्षणा हिंसा कला विनोदं करोतीति पञ्चसूनाविनोदकृत्। येन संवत्सरेणाद्विपराद्धोपलक्षणः कालः २१ परिक्रान्त्या परिक्रम्य पुनः पुनरावर्तनेनेत्यर्थः २२ क्षयाय जगतः इति शेषः २३ भूतोपसर्गाः ग्रहोपद्रवाः २४

राम
१२८

भा· च·
१२९

अधुनालक्षणयाहत्या उक्तमर्थं विवृतमर्थं प्रपञ्चमाह। एवमिति। दैवभूतात्मसंभवैः आधिदैवाधिभूताध्यात्मविषयैः तथा जातैरेवं बहुविधैर्दुःखैः क्लिश्यमानस्तमोवृतस्तत्परिहारो पायमजानन् देही शेते इति श्लोकद्वयेनान्वयः। कियन्तं कालं शतं वर्षं कृत्स्नत्वात् शतायुर्वै पुरुष इति श्रुतेः न्यूनातिरेकसंभवेऽप्येवमुक्तं। दुःखोत्पत्तौ कारणमाह। कामेति। प्राणेन्द्रियमनोधर्मान् अशना पायमजानन् देही शेते इति श्लोकद्वयेनान्वयः… पिपासादीनिन्द्रियधर्मान् अन्धत्वादीन् मनोधर्मान् शोकमोहादीन् आत्मनि स्वस्मिन्नध्यस्यारोप्य बुभुक्षितः पिपासितोऽहं मंदः काणोऽहं शुद्धोऽहं मुग्धोऽहमिति निर्गुणश्चेतनत्वेन स्वतो गुणरहितः। ननु शरीरकारणत्वेन मोक्षसंभवात् क्लेशानुभवो गुणकारणात् यस्मादेहिन इत्यत्राह। कर्मकृदिति। आचतुर्दशमाहूर्तात् कर्माणि नियमेन तु। दशावरादेहानां कारणानि… करोत्ययमित्यादेन्निकर्मत्वात् मुक्तिः न चाहं कर्मकर्तृत्वं हर्षपरोन क्रियमाणेनानेन दुःखदात्वमित्यत्राह। ममेति २६ कर्मकृदित्यत्र कीदृशं कर्म करोतीति तत्राह। यदेति। यदात्र

एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः॥ क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः २५ प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः॥ शेते कामलवान् ध्यायन् ममाहमिति कर्मकृत् २६ यदात्मानमविज्ञाय भगवन्तं परं गुरुं॥ पुरुषस्तु विषज्जेत गुणेषु प्राकृतेष्वदृक् २७ गुणाभिमानी स तदा कर्माणि कुरुते वशः॥ शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते २८ शुक्लात्प्रकाशभूयिष्ठान्लोकानाप्नोति कर्हिचित्॥ दुःखोदर्कान् क्रियायासान् तमःशोकोत्कटान् क्वचित् २९

रामं
१२९

इत्यज्ञानी पुरुषः संसारे दृष्टानिष्टफलदमात्मानं स्वातन्त्र्याभिमानमविज्ञाय प्राकृतेषु गुणेषु विषज्जते। तदा स गुणाभिमानी देही शुक्लादीनि सात्विकादीनि कर्माणि यथा कुरुते तत्तथा सात्विकादिशरीरतया जायते॥ अवशः विष्णुवशः। स इत्यनेन न कर्मणः स्वातन्त्र्यमित्याह। आत्मशब्दस्य साधारणत्वेन कथं निर्णय इत्यतो भगवन्तमित्याद्यविशेषणत्रयं २८ त्रिविधानां कर्मणां फलमाह। शुक्लादिति प्रकाशभूयिष्ठान् सौम्यान् देवादीन् क्रियायासान् क्लेशकर्मसाध्यान् राजसान् दुःखोदर्कान् दुःखप्रचुरान् मनुष्यादीन् तमःशोकोत्कटान् तामसान् स्वकर्मणः शोकभूयिष्ठान् तिर्यगादीन् आप्नोतीत्यन्वयः २९

कचित्क्वचिदिति बहुजन्मापेक्षया। नोभयेन पुंसकत्वं। एतदेव विशिनष्टि। देव इति। यथा कर्मगुणं यथा यथा कर्मणां गुणानामानुगुण्यं तथा भवत्युत्पत्तिर्देवादिविषया ३० तत्र दृष्टांतमाह। कदिति। दंडप्रहारो। दिष्टं दैवतः प्राप्तं ३१ कामविषयेष्वाशयो यस्य स तथा ३२ एवं भ्रमतः सुखं क्वापि न स्यात् किं तत्राह। दुःखेष्विति। देवादिहेतुभूतदुःखेषु मध्ये एकतरेणापि दुःखेनापि जीवस्य व्यवच्छेदो वियोगो नास्तीत्यन्वयः। प्रतिक्रियया सुखं स्यादित्यत्राह। स्याच्चेति। तस्य तस्य दुःखस्य प्रतिक्रियापरिहारः ३३ स्कंधस्य यथा भवति तथा

क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमंधधीः॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः ३० क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहं॥ चरन्विंदति यद्दिष्टं दंडमोदनमेव वा ३१ तथा कामाशयो जीव उच्चावचपथा भ्रमन्॥ उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ३२ दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ३३ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन्॥ तं स्कंधेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ३४ नैकांततः प्रतीकारः कर्मणां कर्म केवलं॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ३५

सर्वाः प्रतिक्रियाः दुःखरूपा इत्यन्वयः ३४ अग्निष्टोमादिकर्मणा स्वकर्मनिवृत्तौ प्रबोधकाभावात् सर्वदुःखव्यवच्छेदो घटत इति चेत्तत्राह॥ नैकांतत इति। केवलं श्रीनारायणार्पणबुद्धिरहितं कर्म कर्मणामेकांततो नियमेन प्रतीकारो न भवति। कुत इति तत्राह। द्वयमिति। निवर्त्यनिवर्तकं चेति कर्मद्वयमविद्योपसृतं ईश्वराज्ञानानुविद्धं हि यस्मात् तस्मादिति शेषः। तत्र दृष्टांतः। स्वप्ने वर्तमानः स्वप्नो यथा तेनैव निवर्तको न भवति ३५

भा॰ त्र॰ ७
१३०

किंच। सुप्तप्रबोधोऽस्यादितितत्रप्रबोधादेरीश्वरस्य। स्वप्नसुषुप्त्योः क्रियानेवविशेषइतिस्वप्नवद्धरेः संसारोनिवर्ततामितितत्राह। अर्थइति। हरेः परोक्षज्ञानलक्षणपदार्थेऽविद्यमानेसंसृतिर्ननिवर्तते। कथमिव लीनानां मनसानागमकेनाहो धकेनमनसास्वप्नेविचरतो विषयाननुभुंजानस्यपुंसः संसारोयथाननिवर्तते॥ निद्राभ्रांतिहतत्वात्तथा। ननुस्वप्नसंसारयोः कथंसाम्यंस्वप्नदृष्टानांतत्क्षणेनष्टत्वात्संसारदृष्टानांकिंचित्स्थायित्वदर्शनादित्यस्यापीष्टमेवोत्तरमित्यभिप्रायेणाक्रमर्थइति। अयंभावः। यथार्थज्ञानाभावादुभयोः साम्यंनतुस्थायित्वास्थायित्वात्नहिदृष्टांतदार्ष्टांतिकयोः सर्वसाम्यंक्वापिदृष्टंसंसृतेःस्वप्नसाम्यंतुयथार्थज्ञानवर्जनमितिवचनात्। जाग्रत्यविद्यमानं तुदेहात्मत्वंतुकेवलं। अविद्यमानेस्वप्नेतुजाग्रत्वज्ञानमेववेतिवचनात्। उभयत्रयथार्थज्ञानाभावोविज्ञायते॥ संसारेलब्धजन्मायदिभगवद्ज्ञानंनापास्येत् तर्हियं

अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते॥ मनसालिंगरूपेणस्वप्नेविचरतोयथा ३६ अथात्मनोर्थभूतस्ययतोनर्थपरंपरा॥ संसृतिस्तद्व्यवच्छेदोभक्त्यापरमयाहरौ ३७

संसारोनिष्प्रयोजनःस्यादित्यतोह्यर्थेह्यविद्यमानेपीतिनतुमिथ्यात्वादितिममर्थंहिशब्देनसूचयति ३६ एवंविधज्ञानोत्पन्नोकिंमुख्यसाधनमत्राह। अथेति। यस्मात्केवलंकर्मणोदुःखहेतुःसंसारइतिभगवद्ज्ञानेनचनिवर्तते। अथतस्मात्संसारनिवृत्त्यर्थंअर्थभूतस्यपुरुषार्थयोग्यस्यात्मनोजीवस्ययतोयस्यहरेरज्ञानादनर्थपरंपराभूयोनेः कालासयोनिरित्यादिलक्षणासंसृतिर्यातद्व्यवच्छेदस्तस्यसंसारस्यनिवृत्तिर्ययाहरिभक्त्यास्यादितियतस्तस्मात्तस्यहरेर्ज्ञानजननींभक्तिमेवकुर्यादित्यन्वयः ३७

राम
१३०

ज्ञानद्वाराभक्तेः संसारोच्छेदकत्वमितिभावेनाह। वासुदेवइति। सध्रीचीनेनप्राणायामादिवह्निनानिर्दग्धमलेनांतःकरणेनसमाहितः सम्यक्स्थापितः सध्रीचीनेननिष्कामेनपुरुषेणेतिवा। यद्यपिभक्तेः पूर्वभाविवैराग्यंतथापिपश्चात्तद्दृढंकृतवतीत्यतोवैराग्यंजनयिष्यतीति। ज्ञानंद्विविधं॥ उक्तभक्तियोगस्यसाधनमाह। सोचिरादिति। अच्युतकथाश्रयोयस्यसतथा। अनेनहरिकथाभक्तियोगस्यसाधनं। अच्युतकथाधिकारप्रकारमाह। शृण्वतइति ३८ श्रद्धादिगुणसंपन्नोनिरधिकारलक्षणंकुत्रयेसंभूतइतितत्रा-

वासुदेवेभगवतिभक्तियोगः समाहितः॥ सध्रीचीनेनवैराग्यंज्ञानंचजनयिष्यति॥३८ सोचिरादेवराजर्षेस्यादच्युतकथाश्रयः॥ शृण्वतः श्रद्दधानस्यनित्यदास्यादधीयतः ३९ यत्रभागवताराजन्साधवोविशदाशयाः॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ४० तस्मिन्महन्मुखरितामधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति॥ तायेपिबंत्यवितृषोनृपगाढकर्णैस्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः ४१ एतैरुपद्रुतोनित्यंजीवलोकः स्वभावजैः॥ नकरोतिहरेर्नूनंकथामृतनिधौरतिं ४२ प्रजापतिपतिः साक्षाद्भगवान्गिरिशोमनुः॥ दक्षादयः प्रजाध्यक्षानैष्ठिकाः सनकादयः ४३ मरीचिरत्र्यंगिरसौपुलस्त्यः पुलहः क्रतुः॥ भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः ४४ अद्यापिवाचस्पतयस्तपोविद्यासमाधिभिः॥ पश्यंतोपिनपश्यंतितद्धिसोः परमंपदं ४५

हा। यत्रेति। अव्यग्रचेतसस्तदेकचित्ताः ४० तस्मिन्सतांसमाजेमहद्भिर्मुखरिताः शब्दात्मनानिर्गमितायास्ताः सरितस्तान्सुतृषान् ४१ अशनादिस्पर्शफलमाह। एतैरिति। एतैरशनादिभिःस्वभावजैः सहजैः। हरिकथामृतनिधिरतिरिद्धः फलं ४२ अधुनाशनाद्युपद्रवविधुरेणापिसाकल्पनश्रीहरिज्ञानेदुर्लभमित्याह। प्रजापतिपतिर्ब्रह्मा विरिंचश्चेतिकथ्यतइतिवचनात्। प्रजापतिपतिर्ब्रह्मा ४३ अहमेवांतोयेषांतेमदंताः ४४ ब्रह्मवादित्वेतिवाक्पटुत्वाभावान्नपश्यंती यतोवाचस्पतयइति। यत्पश्यंतो पिनपश्यंतितद्धिसोः परमंपदमित्यन्वयः ४५

भा॰ ट॰
१३१

तत्साधनमाननादुर्लभावान्नहिषड्ज्ञानानुदयान्नयश्यंतिचेत्तत्राह।शब्देति।निर्द्दोषशब्दब्रह्मागमइतिनिर्दोषशब्दराशेर्दुष्पारेनंते।कुतइत्यतउक्तं उरुविस्तरइति॥चरंतोजि
ज्ञासयावर्तमानानाअपिमंत्रलिंगैर्वैदेशकालक्षणैर्व्यवच्छिन्नयुक्तमाद्येननुसम्यगुक्तं।एवंविधंपरमात्मानंभजंतमुपासमानाअपितन्नविदुरित्यन्वयः।बिभ्रद्धापिहिरण्यपंत्ररूपेण
वस्तनिर्णिजमित्यादिवेदोवदत्रद्युनुभवनारोपयित्वेनवक्ति।अतोप्रसिद्धस्वरूपत्वेनसम्यक्नजानेतितस्यसेवापिनव्यर्थीतत्प्रसादेनानुभवाराहोपिक्रमेणस्यादिति।त
दुक्तंवेदोवदन्नपिहरिंनसम्यक्रुवक्तिकुत्रचित्॥नारोहयत्यनुभवंयप्रसिद्धस्वरूपतः॥तथाप्यनुभवारोहः प्रसन्नेकेशवेभवेत्।किंचिदेवस्तुसम्यक्रुवस्वयैवानुभवत्यमुमिति।य
द्वा मंत्राख्यैर्लिंगैर्हेतुभिर्व्यवच्छिन्नंकाशीकृतंरूपरामादिलक्षणंपरंभजंतोपितत्प्रसादंमंतरेणपरंब्रह्मतेषांकल्पेननविदुरिति।शब्दलंभजंतः परंमुद्धेनविदुरित्यर्थोनुपपन्नःप
रमार्थभेदाभावेनैकस्मिन्ज्ञातेयज्ञानस्यनांतरीयकत्वात्।येनाश्रुतंश्रुतंभवतीतिश्रुतेश्च।यथारामस्मरणेनरूपस्वरूपज्ञानेजंबवतस्तयोरेकत्वादित्याहुः ४६ नन्विदानीं

शब्दब्रह्मणिदुष्पारेचरंतउरुविस्तरे॥मंत्रलिंगैर्व्यवच्छिन्नंभजंतोनविदुःपरं ४६ सर्वेषामपिजंतूनांसततंदेहपोषणे॥अस्तिप्रज्ञासमायत्ताकोवि
शेषस्तथानृणां ४७ लब्ध्वेहांतेमनुष्यत्वंहित्वादेहाद्यसद्ग्रहं॥आत्मसृत्याविहायेदंजीवात्मासविशिष्यते ४८

माययान्निसमपिवेत्तनसमवेतंज्ञानमहएवशास्त्रस्मिंश्चित्कालेनुसंधानलक्षणंकिंचिद्विशेषमापादयेत्।अतोनुसंधानाननुसंधानेयुक्तेइतितत्राह।सर्वेषामिति।इहकर्मि
ष्ववि सर्वेषांजंतूनांसततदेहपोषणेप्रज्ञाबुद्धिःसमापन्नास्तितन्नाज्ञिरूणांतयाप्रज्ञयाकोविशेषः।स्वरूपानुसंधानलक्षणःसमापन्नोनकोपीत्यन्वयः ४७ तत्पसेत्वहृष्टादीनां
मिथ्यात्वेनार्थक्रियायामसामर्थ्यादिकश्चिद्देवेनुसंधानमवश्यंभावीतिजीवन्मुक्तावस्थायामपिजीवात्मत्वाहानेर्हरेर्भेदःसत्यइतिभावेनस्वरूपत्वसिद्ध्येसाधनमाह।लब्ध्वे
ति।इहबहुजन्मनामंतेभगवद्बोधितप्रवाहएवविशेषान्मनुष्यत्वंलब्ध्वाममाहमितिदेहाद्यसद्ग्रहंसंसारेहेहीहित्वात्मसृत्यात्मज्ञानेनेदंकलेवरंविहाययःसंसारीजीवात्मावि
शिष्यतेनवृन्नक्षेत्यन्वयः ४८

राम
१३१

हरिप्रसादंविनातज्ज्ञानंनस्यात्तस्सुत्पद्यमानस्यज्ञानस्यफलमाह।यदेति।यदात्मेतितूपगच्छंतिग्राहयंतिवेतिस्वेनोक्तप्रकारेणात्मभावितःममस्वामीहरिर्नित्यमितिभावेनोपासितो
भगवान्यस्योपासकस्यानुगृह्णात्यात्मानंप्रकाशयानुभवमुत्पादयतिसपुमान्लोकेदेदेपरिनिष्ठितांमतिंजहाति।बाह्यपदार्थविषयांसंविदमपहायपरमात्मानमेवसर्वेंद्रियैरनु
भवन्नास्तइत्यन्वयः।अनेनोपासकस्यमुक्तिकल्पनेकथांध्वनयति।तदुक्तं।यदात्वनुभवीभूयाच्छद्मनानानुरोधनं॥तस्मात्तंविदुःप्राज्ञास्यक्तवेदइतिस्पृह।यदेवत्यक्तवेदःस्या
दथास्याच्युच्यतेभयात्इति।निर्दोषशब्दलक्षणवेदप्रहाणेवौद्धराद्धांतानुप्रवेशःस्यात्इत्यतउक्तं।प्रायश्चवैदिकाएवतन्नद्याअपिवेपुरेति।आदिशब्देनमुक्तियोग्यमा

यदायस्यानुगृह्णातिभगवानात्मभावितः॥सजहातिमतिंलोकेवेदेचपरिनिष्ठितां ४९

गृहीतं।पुरेत्यनेनजन्मप्रभृतिवैदिकत्वमस्तीतिज्ञापयति।प्रायइत्यनेनत्यक्तवेदत्वंपश्चादिति।तदप्येतत्त्रयमेकसमुच्चयमित्यतउक्तं।वैदिकस्यक्तवेदश्चब्रह्मैवैकःप्रजापतिरिति
।रुद्रादीनांकथंकारंपश्चादपित्यक्तवेदत्वमाशंक्यतउक्तं।ततश्चकेशवंभजमानाःसंतप्तबहुजन्मसुत्यक्तवेदत्वमापन्नाः प्रसादात्परमेष्ठिनइति।केवलंवेदशब्देनजानवैदिक
उच्यते।वेदंविनाप्यनुभवाज्ज्ञानंस्थितस्यक्तंवैदिकइत्यनेनमिथोविरुद्धयोर्वैदिकत्यक्तवेदशब्दयोरेकाधिकरणत्वंकथंयुज्यतइतीदंवोद्यमपनोदितं॥तत्त्वंवेदानुसारेणचिंत
यन्वैदिकोभवेत्।वेदरूहामनुसरेद्यस्सत्यक्तवैदिकइत्यनेनवेदशब्देनज्ञातत्वंतमंतरेणानुभवितत्वंचकथंविविच्यतइतिचोद्यंपरिहृतं।त्यक्तवैदिकस्यक्तवेदशाशिरित्य
र्थः॥॥

उपसंहरति। तस्मादिति। यस्मा ज्ञानेनैव मोहस्तस्मादज्ञानाद्गुणत्वापरिज्ञानादर्थकाशिषु प्रयोजनत्वेन प्रकाशमानेष्वग्निहोत्रादिषु स्तोषु कर्मस्वर्थदृष्टिं माकृथाः ननु
उत्कृष्टफलत्वात्तत्राह। निमित्तमाह। श्रोत्रस्पर्शिष्विति। श्रयामसोममिति श्रवणेन श्रोत्रमुखे स्पृशंतीति इदानीं ति श्रोत्रस्पर्शिनि तेषु। हेयत्वे कारणं वक्ति। अस्पृष्टवस्तुष्विति। प
रमात्मात्मवस्तुसंबंधगंधरहितेषु ५० अज्ञानादित्युक्तं विवृणोति। स्वलोकमिति। ये कर्मनिष्ठास्ते यत्र लोके जनार्दनो देवो स्ति तं स्वलोकं स्वेन प्राप्यं वैकुंठादि स्थानं न विदु
रित्यन्वयः। अनेन वैकुंठादिस्थानमीदृशमिति न जानंति किमुत हरिमिति सर्वोपनिषत्तमिति ज्ञायते। अन्यथा विदुस्तत्राह। आहुरिति। धूम्रे धूमरते धूममार्गे धीर्येषां ते

तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु॥ मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ५० स्वलोकं न विदुस्ते वै यत्र देवो जनार्दनः॥
आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ५१ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं ५२

धूम्रधियः। तत्र निमित्तमाह। अतद्विद इति। तस्य वेदस्य तत्त्वं ब्रह्मलक्षणं न विंदंतीति। कर्मणा सह वर्तत इति। कर्म विना मंत्रवक्तीति सकर्मकमविवेकश्चाह। आस्ती
र्येति। बृहतां बहूनां वधात्संतापनलक्षणात्। स्वयाहमिति मानी त्वं कर्म नावैषि प्राचीनाग्रदर्भास्तरणं कृत्वा पशुसंज्ञपनमेव जानासि न तु कर्म तद्रूपमित्यर्थः। कुरु
कर्मैव तस्मात्तं श्रेष्ठं श्रेष्ठतरं कृत विद्यादिना विधीयमानं यत्परं कर्म तन्न जानासीत्युच्यते न तु कर्ममात्रं ५२

कर्त्यत्र इयमाम अक्रियमाणस्य कर्मणः कथं परत्वासावश्रतितत्राह। तत्कर्मेति। हरिस्तोषो नुग्रहलक्षणो यस्मात्कर्मणस्तस्माद्ब्रह्मार्पणबुद्ध्या क्रियमाणस्य कर्मणः परत्वं न द्रव्यसाम
ग्र्यात्तस्मादवरत्वे नद्रास्त्याहेतुत्वात्। ननु मम पि वेदविद्याधिकारित्वेन कर्मानुष्ठानस्य तत्पूर्वकत्वमस्तीति तत्राह। सा विद्येति। यया विद्यया तस्य हरेर्मतिर्ज्ञानमुत्पद्यते॥ सा विद्या वेदा
र्थज्ञानलक्षणा नान्या त्वविद्या कर्मविषया हेयपक्ष इति। कोसौ हरिर्येन तज्ज्ञानपूर्वकमनुष्ठितं कर्म सफलं स्यात्तत्राह। हरिरिति। दुरितहरणशीलत्वाद्धरिर्देहभृतां जीवानां आ
त्मा स्वामी स्वयं सर्वव्यापकः प्रकृतिमूलकारणमीश्वरो णिमाद्यष्टैश्वर्यरूपषड्गुणानामधिकरणभूतो यः स हरिरिति ज्ञातव्यं ५३ हरिरेवं विधस्ततः किमत्राह। तत्पादेति।
यतो यस्मान्नृणां क्षेमो भवेन्नृणां तस्य हरेः पादमूलं शरणं रक्षकं। शरणं गृहरक्षित्रोरिति विधानं। ननु पित्रादीनां वयसि गते पुत्रादीनामपि शरणत्वदर्शनात्किं विशिष्य यत

केचिदेवंविधसंसारोमिथ्येतिसंगिरंतेतत्राहपुंसइति।पुंसःस्त्रियासहैषःमिथुनीभावस्तयोःस्त्रीपुंसयोर्हृदयग्रंथिमनोबंधपाशमाहुरित्यर्थःक्रियानुपलात्रमिथ्येतिशेषः।सकल
तापानामेतदेवमूलमित्यतोवाह।पुंसइति।सुखसाधनान्वेषणायासेनतापाएवस्युरित्यर्थः।हृदयग्रंथिविकारप्रकारमाह।यतइति।अतएवदुःखस्यादित्यर्थः।मिथुनीभा
वस्यतापहेतुत्वेकुटुंबीक्षुद्रोदेशइत्याद्युक्त्वानवप्रनरावार्त्ततइतिकुटुंबिनोपुनरावृत्तिलक्षणमुक्तिवचनात्कथंसनिंदामर्हतीतिचेन्नप्रापिकत्वात्तस्यांब्रह्मज्ञाद्याद्यात्ववन्त्वा
द्याभ्युच्यतेस्त्रीसहायिनः।बध्यंतेकेचनैतेषांविशेषंचविदोविदुरितिवचनात्सर्वदुःखनिवृत्तिः।किंकारणमित्यतोहृदयग्रंथिविनाशएवेत्याह।यदेति।कर्म्मणामनुबं
धःपरंपरायस्यसकर्म्मानुबंधःसंसारहेतुदृढश्चयंग्रंथिमतिहायपरंब्रह्मयातीत्यन्वयः।सत्त्वादिसाधनसंपत्त्यासत्वसापिवंधस्यनिवृत्तिःसुखयागरूढध्यानेनविषनिवृ

पुंसःस्त्रियामिथुनीभावएवतयोर्मिथोहृदयग्रंथिमाहुः।यतोगृहक्षेत्रसुताप्तवित्तैर्जनस्यमोहोयमहंममेति॥८॥यदामनोहृदयग्रंथिरस्यकर्म्मा
नुबंधोदृढआश्लथेत।तदाजनःसंपरिवर्त्ततेस्मान्मुक्तःपरंयात्यतिहायहेतुं॥९॥हंसेगुरौमयिभक्त्यानुवृत्त्यावितृष्णयाद्वंद्वतितिक्षया।सर्वत्रजंतोर्व्य ॥
सनावगत्याजिज्ञासयातपसेहानिवृत्त्या।मत्कर्म्मभिर्मत्कथयाचनित्यंमद्देवसंगाद्गुणकीर्त्तनान्मे॥१०॥ ॥

निवृत्त्यमभिप्रेत्यतत्साधनमाह।हरावितिद्वाभ्यां।गुरौस्थितेहरौमयीतिवा।अनुवृत्त्यानिरंतरसेवया।सर्वत्रयोनिषुव्यसनावगत्याविविधक्लेशोस्तीतिज्ञानपूर्वकविचारेण
जिज्ञासयावेदांतवाक्यविचारेणपंचाग्निमध्यस्थित्यादितपसाईहानिवृत्त्याआत्मविहितकर्म्मव्यतिरिक्तकर्म्मपरित्यागेनतदुक्तं।आत्मनोविहितंकर्म्मवर्जयित्वान्यक
र्म्मणः।कामस्यवापरित्यागोनिरीहेत्याद्रुतन्नमाइतिमत्कर्म्मभिर्मदाराधनलक्षणैः।ममपादःस्वरूपंयेषुतेमत्पादास्तेषांमहतांसंगात्ममप्रतिमासेवालक्षणसंगाद्वा
।देवकीनंदननंदकुमारेत्यादिगुणनाम्नांकीर्त्तनात्॥१०॥ ॥राम॥ ॥ ॥राम॥ ॥ ॥राम॥ ॥ ॥

भा॰ पं॰ ८

भूतेषु निर्वैरसाम्येनोपशमेन च देहात्मगेहात्मबुद्धेर्जिहासया हानेच्छया अध्यात्मयोगेन नाडीशोधनादिलक्षणेन प्राणस्येंद्रियाणामात्मनो मनसश्चाभिजयेन वशीकरणेन। सध्र्यक्सम्यक्श्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन इति कर्तव्यतयाऽविस्मृत्या वाचां यमेन वागिंद्रियग्रहणं तु शास्त्राभ्यासनिवृत्त्यर्थं सर्वदा मौनकरणार्थं वा। मद्भावविचक्षणेन सर्वत्र मम सत्तालक्षणया त्रिदर्शनेन न च मुक्तिः स्यान्न हि ज्ञानं तेन विराजितेन तेजितेन प्रतिजीवं विष्णुः सर्वस्मादुत्तम इति यत्तेन ज्ञानेन तदुक्तं। सर्वस्मादुत्तमो विष्णुरिति ज्ञानमुदाहृतं। प्रतिजीवं येन मुक्तिः स हि ज्ञानं विदां मतमिति। यद्वा यद्विष्णोरुत्तमत्वज्ञानं तदेव प्रतिस्वरूपं विशेषविषयं तद्धि ज्ञानं तेन विराजितेन विशेषितेन ज्ञानेन ज्ञानयोर्विशेषं च सर्वज्ञो गुरुर्जानीते। तदुक्तं। ज्ञानं विष्णोरुत्तमत्वे तदेव प्रतिस्वरूपं। विशेषेण तु विज्ञानं तच्च जानाति सर्ववित् इति च। स्वस्वयोग्यतानुसारेण सर्वेषामपि सर्वज्ञत्वेन तत्तज्ज्ञानमपि विज्ञानं

निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः। अध्यात्मयोगेन विविक्तसेवया प्राणेंद्रियात्माभिजयेन सध्र्यक् ॥११॥ सच्छ्रद्धया ब्रह्मचर्येण
शश्वदसंप्रमादेन यमेन वाचां। सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ॥१२॥ योगेन धृत्युद्यमसत्वयुक्तो लिंगं व्यपोहेत्कुशलोऽहमा-
ख्यं। कर्माशयं हृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः ॥१३॥

स्यात् स्थितो व्याहृतलक्षणं वक्तव्यं। तत्किमिति चेदुच्यते। द्वात्रिंशल्लक्षणाद्युपेत एव सर्वज्ञ इत्युच्यते तेन तु स्वयोग्यतानुसारेण विज्ञानं तदुक्तं। द्वात्रिंशल्लक्षणैर्युक्तः स्त्री ह्रादं धूम्रश्च सौम्यदृक्। घोररूपेति प्रत्येकः स सर्वज्ञ उदाहृत इति। सर्वज्ञस्य गुरोः प्रसत्तलक्षणान्यपि शास्त्रैर्निरूप्यंते। यस्य वस्त्यंगुलो यस्य न्यग्रोधपरिमंडलः। सप्तपादश्चार्हेत्तु सः सदेवैरपि पूज्यते। इत्यादौ न्यग्रोधपरिमंडलो बाहुद्वयमंडलमितः। न्यग्रोधपरिमंडलो व्यामो बाहू न्यग्रोध उच्यते इति वचनात्। योगेन ध्यानेन जिह्वोपस्थेंद्रियजयो धृतिः वैसवसिद्धांतास्खलनं वा। उद्यमस्त्वस्पष्टीकृतसत्वगुणः तास्त्वायुक्तः धृत्या उद्यमेन ... जन्मनाशत्वेन ब्रह्मकल्पावध्यानशनेप्यम्लानेन युक्त इति वा। अहमाख्यमहंकारशब्दवाच्यलिंगशरीरं व्यपोहेत्त्यजेत्। किंविशिष्टं लिंगं कर्माण्याशेरते अस्मिन्निति कर्माशयं हृदयग्रंथिं मिथुनीभावलक्षणं बध्नातीति हृदयग्रंथिबंधमविद्याज्ञानेन प्राप्तं॥ ॥

राम ८

अनेनोक्तेन योगेन व्यपोह्य निरस्य पश्चाद्योगादुपरमेत। प्रासादात्प्रेक्षत इतिवल्ल्यब्लोपे पंचमी योगमुपाप्य क्रीडतस्त्वर्थः। उक्तमतिदिशति पुत्रानिति। शिक्षाफलमाह। मदनुग्रहार्थ इति। ममानुग्रह एवार्थः प्रयोजनं यस्य स तथा। मल्लोकादलस्यो मोक्षो यस्येति वा। विमन्युर्ज्ञानशीलः। विगतपापो वा निरक्रोधो वा। अतज्ज्ञान् ब्रह्मज्ञानानुन्मुकर्म कर्तृप्रेरणायां गुरुत्वेन प्रजादिना प्राप्त किमिति न योजयेदित्युच्यत इति तत्राह। कं योजयन्निति। प्रष्टानि कर्माणि प्रेरयन् कमर्थं लभेत न कमपि प्रत्युतस्तान धर्मदृष्टिहीनस्याधःपातहेतुत्वेन स्वस्यापि नरकपातः स्यादित्यतिप्रेत्याह निपातयन्निति। मा भूत्परोपदेशस्तथापि स्वयमेव प्रवर्तमानो जनोर्थान् लभतामित्याह। लोक इति। नितरां कामकामो विषयभोगेच्छा यस्य स तथा। अत एव श्रेयसि नष्टशास्त्रदृष्टिः स्वयमुपदेशं विना यो लोको जनोर्थानापादयितुं सं

अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात्। पुत्रांश्च शिष्यांश्च पिता गुरुर्वा मल्लोककामो मदनुग्रहार्थः ॥१४॥ इत्थं विम-
नृ२ न्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान्। कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥१५॥ लोकः स्वयं श्रे-
यसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः। अन्योन्यवैरः सुखलेशहेतोरनंतदुःखं च न वेद मूढः ॥१६॥ कस्तं स्वयं तदभिज्ञो विपश्चि-
दविद्यायामंतरे वर्तमानं। दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथांधं ॥१७॥ राम राम राम

मीहेत उद्योगं कुर्यात्तन्न तेषामर्थानां मध्ये कं पुरुषार्थं लभेत न कमपीति पूर्वेणान्वयः। न केवलं पुरुषार्थानवाप्तिरपि तु बहुदुःखावाप्तिश्चेत्यस्मादित्याह। अन्योन्येति। सुखलेशहेतोरन्योन्यवैरमनंतदुःखं च मूढो न वेद तन्मूढो विनिश्चाययानंतदुःखजनकं किं तत्राह। कस्तमिति। स्वयं तदभिज्ञः पृष्ठनिधर्मादिनेन दुःखस्वावाप्तिमभिजानन् को विपश्चित् ज्ञानी पुरुषः अविद्यायामंतरे अज्ञाननिमित्तसंसारे विलेवर्तमानं कुबुद्धिं दृष्ट्वा सघृणो दयालुः पुनरपि तं पुरुषं प्रवृत्तिधर्मे प्रयोजयेन्न प्रयोजयतीत्यर्थः। कथमिव उत्पथगं मार्गं विहाय गच्छंतमंधं यथा कुमार्गे न योजयति तथेत्यर्थः ॥१७॥

भा.पं. १८

इतोपिमहत्तरंधर्म्मस्योपदेष्टृत्वंगुरुत्वादिकमपिनस्यादित्याह।गुरुरिति।समुपेतमृत्युमज्ञानात्मकंसंसारंप्रवृत्तिधर्म्मस्योपदेष्टारिशिष्येषुगुर्वादिष्वपिनक
र्त्तव्येत्यतोवाह।गुरुरिति।गुरुरितिपूज्योनस्यादित्याधकर्त्ता।अतोगुर्वादिनाहरेःस्वरूपमुपदेष्टव्यमित्याशयवानाह।इदंशरीरमिति।दुर्विभाव्यंदुर्ज्ञेयम्।अपरिच्छि
न्नत्वादलौकिकत्वात्ज्ञानात्मकत्वाच्चकुतइत्यपेक्षाह।सत्त्वमिति।मेसत्त्वंबलज्ञानसमाहारलक्षणंयतःहृदयंहियस्मात्तस्मात्तस्माद्व।ज्ञानपूर्वमनुष्ठितएवधर्म्म
:तत्त्वस्वरूपमितिश्रेत्याह।यत्रेति।यत्रयस्मिन्ज्ञानात्मकेहृदयेधर्म्मःस्थितः।अनेनज्ञानपूर्वानुष्ठितोधर्म्मःनित्यफलप्रदइत्युक्तंत्वनिषङ्गादधर्म्मस्यानु
माह।पृष्ठइति।मेपृष्ठेत्वधर्म्मआरात्कृतोदूरीकृतःइतियद्यस्मात्तस्मात्त्वपन्त्वाइमोदिस्थितिहेतुत्वादृषभमाहुः।ज्ञानपूर्वमनुष्ठितधर्म्मेहृदिस्थितत्वात्

गुरुर्नसस्यात्स्वजनोनसस्यात्पितानसस्याज्जननीनसास्यात्।दैवंनतत्स्यान्नपतिश्चसस्यान्नमोचयेद्यःसमुपेतमृ
त्युं १८ इदंशरीरंममदुर्विभाव्यंसत्त्वंहिमेहृदयंयत्रधर्म्मः।पृष्ठेकृतोमेयदधर्म्मआरादतोहिमामृषभंप्राहुरार्याः
१९ तस्माद्भवन्तोहृदयेनजाताःसर्वेमहीयांसममुंसनाभम्।अक्लिष्टबुद्ध्याभरतंभजध्वंशुश्रूषणंतद्भरणंप्रजानां २०

तिकेआर्याःशास्त्रतत्त्वार्थवेदिनइति।उक्तार्थमुपसंहरन्नेषांयोगपरम्पराविशिष्टंहरिमुपदिशति।तस्मादिति।भवन्तःसर्वेममहृदयेनजाताःइतियस्मात्तस्मा
त्तस्मात्पूर्वमहीयांसंमहतोपिमहान्तंभरतंप्रजाभरणात्तंसुनाभंसर्वाधारंहरिंअक्लिष्टबुध्यास्तजध्वं।नाभिरित्यपयनामस्मात्तुहरेःसर्वाश्रयोयतइतिवचना
द्धरेरिदंयौगिकंनाम।अनेनभरतोप्येषांभूज्यइतिध्वनयति।भवकुश्रूषणेनभवतामात्मामुक्तिःकरतलगतास्यात्।ज्येष्ठानुवर्त्तनंशुश्रूषणालक्षणंनकिंभिता
शंकाभवद्भिरनुवर्त्तितेनभरतेनयप्रजानांभरणंतत्तदस्यममशुश्रूषणंभवतीत्याह।शुश्रूषणमितिज्येष्ठानुवर्त्त्याराष्ट्रभेदाभावेनभवद्भिरपिप्रजाभरणमनु
ष्ठितमितिअनेनशुश्रूषद्भिर्भवद्भिरपिममशुश्रूषणंकृतमितिज्ञातव्यं २०

राम १८

श्रा३

तारतम्यज्ञानमेवमुक्तिसाधनंनान्यदितिभावेनतदाह।भूतेष्विति।भूतेषुत्पन्नेषुप्राणिषुवीरुद्भ्यःसंवेभ्योयेसरीसृपाजङ्गमास्तउत्तमाउत्कृष्टतमाइतिज्ञेयाः।तेषुसरीसृपेषुपिसंबो
धनिष्ठाःज्ञानयुक्तास्तेपश्वादयउत्तमाइतिसर्वत्रयोज्यं।येदक्षादयोब्रह्मसुताःसमनकारयस्तेतेषांसकाशाद्वरेइन्द्रःप्रधानइत्यर्थः।अथइन्द्रानन्तरंविरिंचवीर्योविरिंचपुत्रोयो
भवःसरुद्रःउत्तमःसविरिंचस्तस्मादुत्तमःतस्मादहमेवपरोनान्यइत्यलङ्कारं।मत्परइति।अहमेवपरोयस्यसतथा।अनेनमुख्यप्राणस्यविरिंचसमत्वंसूचयति।राजति
ब्राह्मणभक्तिविशेषतोनुद्बोधयतिवेदयितुमाह।अहंद्विजेति।द्विजदेवानांदेवः।क्षत्रादीनामैश्वर्यमदेनब्राह्मणतिरस्कारसंभवेनकुलनाशःस्यात्सवानुपपन्नइतितेषु

भूतेषुवीरुद्भ्यउदुत्तमायेसरीसृपास्तेषुसबोधनिष्ठाः।ततोमनुष्याःप्रमथास्ततोपिगन्धर्वसिद्धाविबुधानुगाये २१ देवासुरेभ्योमघवत्प्रधा
नादक्षादयोब्रह्मसुतास्तुतेषां।भवःपरःसोथविरिंचवीर्यःसमत्परोहंद्विजदेवदेवः २२ नब्राह्मणैस्तुलयेभूतमन्यत्पश्यामिविप्राःकिमतः
परंतु।यस्मिन्नृभिःप्रहुतंश्रद्धयाहमश्नामिकामंनतथाग्निहोत्रे २३ धृतातनूरुशतीमेपुराणीयेनेहसत्त्वंपरमंपवित्रं।शमोदमःसत्य
मनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र २४

श्रद्धातिशयजननार्थमाह।नब्राह्मणैरिति।ज्ञानपात्रत्वादतःविप्रात्परमुत्तमंममसन्निधानपात्रंकिंतुनकिमपीत्यर्थः।कुतएतदत्राह।यस्मिन्निति।ममतत्त्वसिहेतुत्वादित्यर्थः
।नतुस्मादेःसंभवात्किंविशेष्यास्तइतितत्राह।नतथेति।अस्मादेर्गुणवैशिष्ट्यादित्याह।धृतास्तनुरिति।पवित्रंसत्त्वंशमादिगुणाअनुभवोज्ञानंचयत्रयेषुब्राह्मणेषुसंतिते
ब्राह्मणामेपुराणीरुशतीःशुद्धास्तनुर्मूर्त्तिस्मादिलक्षणावेदाख्यावाधृताधारयंतीतियेनतस्मात्ब्राह्मणेभ्यःपरंनकिमपीतिभावः।यद्वायेनब्राह्मणकुलेनापौरुषेयत्वेनअनि
र्मिताःपुराणीरनादिनिधनामेतनूस्तनवोवेदलक्षणाधृतायत्रब्रह्मकुलेसत्त्वादिगुणाःसंतितस्मात्परमुत्तमंनकिमपीति २४

त्व
त्रान्मणोऽपि विशेषोऽस्तीत्याह। मत्तइति। येषां मत्तोऽपि न किंचित्प्रयोजनमस्ति तेषामितरेण स्वर्गाद्याशीर्ह्निश्रेणेन पुरुषार्थेन किमु स्यान्न किमपीत्यन्वयः। स्वर्गापवर्गाधिपतेर्वक्ष्यमाणसार्थमनंतादित्यादि विशेषणं भक्तिमंतरेण न्यं न किमप्यपेक्षणीयमिति प्रकटनायाकिंचनानां भक्तिभाजामिति विशेषणद्वयं। इदानीं चराचरभूतानि स्वनिवासहेतुत्वेन सत्कार्याणीत्याह। सर्वाणीति। हे सुताः भवद्भिः सर्वाणि भूतानि मद्धिष्ण्यतया मम निवासस्थानत्वेन चराणि ध्रुवाणि निश्चितानि संभावितव्यानीत्यन्वयः। ननु ममधिष्ण्यतया मम विग्रहत्वेन एव नृपत्वेन संभावितव्यानीत्यर्थः किं न स्यादित्याशंक्य तस्य तदभजनत्वादित्याह। पदे पदे इति। यापदे पदे अनुक्षणं विविक्तदृष्टिः जीवानां धिष्ण्यतया परमेश्वरस्याभेददृष्टिः भेददर्शनं तदु तदेव मे अर्हणं

मत्तोऽप्यनंतात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित्। येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजां। सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि। संभावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदु हार्हणं मे। मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि। विना पुमान्येन महाविमोहात्कृतांतपाशान्न विमोक्तुमीशः २७

भवति। प्रीतिजनकं नान्यदित्यर्थः इति यद्वा भेददर्शनमेव नार्हणमपि तु भेदप्रतिपादनमप्युतार्थ इति तदुक्तं। उपपादयेत्परात्मानं जीवेभ्यो यः पदे पदे। भेदेनैव न चैतस्मात्प्रियो विष्णोर्न कश्चनेति। यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रिय इति वा। अनेन भेददर्शनात्प्रतिपादनस्य फलाधिक्यं भवतीति ध्वनितमिति। भेददर्शनस्यापि मोक्षसाधनत्वात्तदयमर्थ इति तदाह। मनोवचइति। करणैः कर्मभिः यन्मनआदिनाजीवपरयोर्भेददर्शनादिकं यस्य तस्य साक्षात्कृतं मुख्यतः पूर्णतस्य तद्धि तदेव मे परिबर्हणं पूजनं भवति। भवदर्हणेन किं फलमित्यतो वाह। मनोवचइति। मनआदिसाधनैर्यन्मदर्हणं तत्साक्षात्कृतं साक्षात्कारफलं भवति। येनार्हणेन विना पुमान्महाविमोहकृतांतपाशादज्ञानलक्षणसंसाराद्विमो

यावत्त्रयो जनमनुशासनं चेत्समाप्यतः परं हरिणा किमकार्यथापि हरिकथयाकृतपालं बुद्धिर्न्याय्यतेतः सावक्त्व्यैत्यस्य शारीरलक्षणं ज्ञो मुनिस्त्वरितशेषमुक्तमनुद्दत्य वक्ति। स एवमनुशास्येति। ऋषभोपदेशं ऋषभनामा स्वयमेव सर्वं परित्यज्येति शेषः। उर्वरितशरीरमात्रपरिग्रहः अवशिष्टशरीरमात्रपरिकरः। गगनमेव परिधानं वस्त्रं यस्य स तथा दिगंबर इत्यर्थः। गृहीतस्य प्रस्य उन्मत्तस्थितिप्रकारं कथयति। जडेति। स्वधर्मं स्वब्रह्मत्वादनस्थलं कुविंदाश्रयः। व्रजो गोकुलं घोषः आभीरपल्ली सार्थः परिव्राजनः। अवनिचरापसदैः भूमिचरेषु दुष्टैः नीचैरित्यर्थः। निष्ठीवनं थूत्कारः इति वातो धोवायुः। तर्जनादिकर्माविगणयंस्तत्प्रतिपत्तिमप्यकुर्वन्नवस्थितः कुतइति तत्राह। असदिति। असतामसंगलीनां लोके शानां संस्थानयस्मिंस्तस्मिन्नतस्मिन्देहोपलक्षणे असन्नस्वतंत्रइत्यपदेशः शब्दो यस्य स तथा तस्मिन् ब्रजउश इवाद्यदेहे अमयानुभवस्वरूपेण सर्वभयशून्यज्ञानस्वरूपेण स्वमहिमावस्थानयस्मिंस्तेन। समवरोपिताहंममा

* श्रीशुक उवाच — स एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशततज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणीतलपरिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज। जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव॥ तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः परिबभ्राम॥ ॥

भिमानत्वात्तत्त्वज्ञाहंममाभिमानत्वादखंडितः अपरिच्छिन्न इति यत्तस्मादिति शेषः। यद्वा असतां ब्रह्मणः संस्थानयस्मिंस्तत्तथा तस्मिन्। तर्हि देहे देहिनोर्भेदापत्त्यानेहनानास्ति किंचनेति श्रुतिव्याकोपः स्यात्तत्राह। असदिति। असदितिस्यपदेशो यस्य देहस्य स तथा। देहोऽपि ब्रह्मैवेत्यर्थः विज्ञानमानंदं ब्रह्मेति श्रुतेः। अस्मिन्नर्थे नैव तदभेदः सूच्यतइत्याह। समवरोपितेति। समवरोपितः सम्यग्ज्ञातः अहंममाभिमानस्य भावः समवरोपिताहंममाभिमानत्वं तस्मात्। तद्ब्रह्मवेदाहं ब्रह्मास्मीति श्रुतिश्च तर्हि स्वपरिच्छेद्यत्वेन खंडितत्वमत आह। खंडितइति। अखंडितस्य खंडितत्वेन ज्ञानात्तत्र तर्कावसरइत्यर्थः। एकचर इत्यनेनारावंते वाप्येक एव चरतीत्यर्थोऽपि गृह्यत इति आयेण क्रमिति ज्ञायते॥ ॥

अतिसुकुमारेत्यस्य तद्विशेषणांस सर्वत्रानुगमयित्वा महदशेत्यन्तत्ननयनयोः साहस्र्यंकयोलादीनामुक्तं किंतु कपोलाकर्णयोस्तथावान्योन्यसदृशौ कपोलौ कर्णौ वेत्यर्थः संपद्यतेऽसुस्नगवं कर्णादीनाम पिथात्वं विशुद्धमीषत्स्य हंस्मितं यस्य तत्तथा। कुसुमशरं कामं पराग्वधः। यर्हि वाव स भगवानृषभदेवः इतिमत्वाजगरस्य विद्यमानं व्रतमास्थितस्तदारायानस्वाद्यात्य शनादिकं करोतीत्यन्वयः। इमं लोकं योगस्याध्यानाय स्वर्गापस्यापसनस्याप्रतीपमप्रतिकूलमिवाचक्षाणः पश्यन्नित्यवशाह्यप्रतिकूलावतिकूलत्वलक्षणस्योभयस्य साक्षात्परस्प त्रित्यर्थः। तस्याव मेहनादेः प्रतिक्रियां प्रक्षालनादिकं कर्म्म वीभत्सितं योगशास्त्रनिषिद्धमिति। उच्चरितेन पुरीषेणादिग्धः उपलिप्त उद्देशो देहप्रदेशो यस्य सः पुरीषसुरभिसौगंधेन सौ

अतिसुकुमारकरचरणोरस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुंदरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतरारुणायतनय नसदृशसुभगकपोलकर्णकंठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरमुपदधानः परागवलंबमानकुटिलजटिलकपिलकेशभूरि भारो ऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत। यर्हि वाव स भगवान् लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म्म बीभत्सितमिति व्रतमा जगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमानः उच्चरितादिग्धोद्देशस्तस्य ह यः पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सुर भीचकार। एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म। इति नानायोगचर्याचरणो भगवान्कैवल्यपतिरृषभ ऽविरतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थैः परिपूर्णो योगैश्वर्याणि वैहा यसमनोजवांतर्द्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा हृदयेनाभ्यनंदत्॥ इतिश्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते पंचमोऽध्यायः॥ ॥

गंध्ययस्य सत्तथा॥ लोकशिक्षार्थं योगचर्यां तस्याह। एवमिति। आत्मभूते आधारभूते आत्मनि स्वात्मनि अव्यवधानेनानंतरोदरभावेनाभेदेन ब्रह्म भावेन नित्यसिद्धैः समस्तैरर्थैः पुरुषार्थैः परिपूर्णः। वैहायसमनोजवादीनि योगैश्वर्याणि पंजसा दर्शयितुं नैवाभ्यनंददित्यन्वयः॥ वैहायसमाकाशगमनं दूरग्रहणं दूरस्थि तस्य ग्रहणं ज्ञानं यदृच्छयासैवत्यासहसा वा॥ ॥इतिश्रीभागवते महापुराणे पंचमस्कंधे पंचमोऽध्यायः राम

मुक्तयोगिजनशिक्षार्थं षष्ठे तु योगिजनमोहनार्थं तत्प्रवृत्तिलेशं सदृशावृत्तिप्रकाशइत्येतदृषभदेवचरितापदेशेन निरूप्यते षष्ठेऽध्याये। तत्रादौ यद्यपि देवादीनामैश्वर्यभोगे मनः स ज्यामुक्तिर्गानंदह्रासो नास्ति तथा प्यल्पाधिकारिणां सः स्यादित्यादितात्पर्यं ज्ञाप्यते। अत्रानंतराततीताध्याये योगैश्वर्याणि नाभ्यनंददित्युक्तं तत्र राजाशंकते। न नूनमिति। यो गेन हरेरूपासिलक्षणेन समीरितमुत्पन्नं यत्ज्ञानं तेनावतर्जितं दग्धं कर्म्मबीजं रागादिलक्षणं येषां ते तथा तेषां परमात्मनिरतानां यदृच्छया विद्योपगतानि योगैश्व र्याणि पुनः पश्चात्क्लेशदानि भवितुं नार्हंतीति नूनं। कथं तानि नाभ्यनंददिस्यन्वयः॥ अद्धांगीकारेणापरिहरति। सत्यमिति। अनंगीकारपक्षमाह किंत्विति एके महात्मा नः शठकिरातेनूतनघटे स्थितस्य जलस्येवानवस्थानस्य विश्रंभं विश्वासं। वाइत्यनेन महैश्वर्यस्वरूपोपि भगवान् नृपमो विराट्नैश्वर्याणि स्वकीयानि ख्यापयामास सर्व वित्। उत्तमानां ज्ञापनार्थं धर्म्मतत्वस्के रतः। तेषामैश्वर्यभोगे हि मनस्सक्तिं व्रजेद्यदि। आनंदो मुक्तिगो ह्रासं विकर्म्मकरणाद्व्रजेत्। धर्म्मी धर्मविहीनोपि भगवान्न

राजोवाच न नूनं भगवन्नात्मारामाणां योगसमीरितज्ञानावभर्जितकर्म्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हंति यदृच्छयोपगता नि ऋषिरुवाच सत्यमुक्तं किंत्विह वा एके मनसोऽद्धा विश्रंभमनवस्थानस्य शठकिरात इव संगच्छंति। तथा चोक्तं। न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते। यद्विश्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरं॥ ॥

षत्वमतः। तेषां धर्म्मज्ञापनार्थं नाविश्वके परास्थिति। देवानां नाभुक्ता ह्रासः मुक्तात्किंचित्सुखोन्नतिः। आधिकारिकजीवानामेवमन्येषु तद्द्वयं अल्पाधिकारिणां तत्र ह्रासो विभ वतिध्रुवं। अभुक्ता भावजो ज्ञाहो महाधीकारिणामपि। असौ भेदतेन भवति तारतम्यं हि भूतः। प्रजापाश्रुतथा देवा महाधीकारिणः स्मृताः॥ सर्वर्णीति स यथा सप्रपितरो ऽप्सरसां शतेः। गंधर्वाणां तथा राज्ञां विंशदस्मासु जातिषु। अल्पाधिकारिणः प्रोक्ता अनधीकारिणः परइतिशाश्वतरज सिद्धतात्पर्यं ज्ञापयति। शठकिरात इति पठित्वा वा गुरेतिकेचिद्धाच क्षते। विरुद्धत्वं परिबहासंप्रदायज्ञाइति परिहरणीया इति। त्रैलोक्यशिक्षार्थं श्लोकसंग्रहणात् कथित्वाह। तथा चोक्तमिति। यथा मनो विश्वासे तपश्चादेवि भ्रमणं भवति तथा चो क्तमित्यर्थः ऐश्वरमीश्वरविषयं॥ अनेन सौभर्यादीश्वराणामपि यथा तपस्कंदितं तथेति ध्वनयति॥ ॥

छिद्रमवकाशंतमनुकामानंतरमरयः क्रोधादयः तेषांवाछिद्रंददातीत्यर्थः। कृतमैत्रस्यमनसासहेति शेषः। पुंश्चलीपुरुषमात्राभिगामिनीजायापत्युररीणामुपपतीनांप्रवेश मिवापात्रेप्राप्तेद्यानायोगेछ्लालोलः। अतीतदुःखस्मरणनिमित्तचित्तविक्षेपःशोकः विचित्यविपरीतज्ञानंमोहः। पूर्वस्थिताःसंबलनंसयाकर्म्मणसंसारबंधोयन्मनोमूलं यस्यसतथाकोनुबुधस्तन्मनोममेष्टमितिस्वीकुर्यादित्यर्थः। अधुनाप्रासंगिकंविमोहंपरिहृत्यप्रकृतमनुसरति। अथेतिनिर्विण्णोःकलेवरत्यागोभूत्यागोन्यानविद्यते। कलेवरत्यागेनेच्छापंचवंसमुदीरितमितिवक्तात्सभगवान्स्वकलेवरंस्वाधीनांपृथिवीं जिहासुस्सन्कुमिलन्नुपरराम विरतव्यापारोबभूवेत्यन्वयः। कलेवरशब्दस्यप्रती तएवार्थःकिंनस्यादित्याशंक्यवक्ष्यमाणानांविशेषणानांप्राकृतपुरुषेसंभवाद्कएवार्थउचितइतिभावेनाह। अखिललोकपालानांललामच्छूडामणिःअनेनाप्य

नित्यंददातिकामस्यछिद्रंतमनुयेरयः। योगिनःकृतमैत्रस्यपत्युर्जायेवपुंश्चली। कामोमन्युर्म्मदोलोभःशोकमोहभयादयः। कर्म्मबंधश्चयन्मूलः स्वीकुर्यात्कोनुतद्बुधः। अथैवमखिललोकपालललामोविलक्षणोजडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावोयोगिनांसांपरायविधि मनुशिक्षयन्स्वकलेवरंजिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाणउपरतानुवृत्तिरुपरराम ६

कृतत्वंकथमवगमित्यतउक्तमविलक्षणइति। लोकविपरीतलक्षणःअस्थूलमनणवह्रस्वमित्यादेः। कथंतर्हितस्यप्रभावोनलक्ष्यतइत्यतउक्तं। जडवदवधूतेतिकिमत :प्रयोजनमतउक्तं। योगिनामितिसांपरायविधिर्मोक्षसाधनप्रकारः। उपहितस्याप्यशिक्षा कथंमोक्षोपयोगिनीस्यादित्यतउक्तमात्मनीति। आत्मानंस्वस्वरूपमात्मनिब्र ह्मणिअनर्थांतरभावेनलिनेनानामीतिमनसासंव्यवहितंव्यवधानरहितमन्वीक्षमाणोनुसवत्रुपरतानुवृत्तिःनिवृत्तविषयानुवृत्तिःवृत्तिर्मुक्तपदंस्थायावानित्यमुक्तत्ववस्थ त्वादिति॥ ॥

इदानींहरेर्देहःसच्चिदानंदत्वेनतदभिन्नइतिदर्शयितुंतस्यसंचरणप्रकारंवक्ति तस्यहवेति। एकदाऋषभस्यदेहइमांजगतींविचचारेत्यन्वयः। मुक्तलिंगस्यवर्णाश्रमादिलक्षणरहितस्यभौ तिकशरीररहितस्यवा। योगमायायोगसामर्थ्यतस्यावासनेकाष्ठात्कर्त्रीयस्यसतथा। देहस्यजडस्यसंचरणंकथंघटतइत्यतउक्तमभिमानाभासेनअभितोज्ञानप्रकाशेनचंक्रमम णः पुनःपुनःपदक्षेपंकुर्वाणः ज्ञानात्मकत्वात्गमनादिक्रियानुकुर्वीणइत्यर्थः। अनेनदेहदेहिनोरभेदोपिसूचितइति। कस्मात्कांदेशानुद्दिश्यागमनमित्यतउक्तं। कोंकवेंकटकुटकादितिकोंकवेंकटकर्णाटकाङ्गमरहुषुपदनदीमात्रकदेशाद्दक्षिणकर्णाटकान्सौराष्ट्रादिदेशान्स्वेच्छयोपगतः तत्रनागपुरग्रामात्पूर्वतोरनदीनामाम्रितस्यानिकटेकुटकाख्ये वेत्यालयस्यकुत्स्यपर्वतस्यप्रांतीनसानेविद्यमानउपवनेस्थितआस्यकृताश्मकवलःमुखांतर्गतयापाषाणग्रासः। असंवीतोवस्त्राद्यावरणरहितः उन्मादेवसतिपुमान्यथाचेष्टतेतथे त्यर्थः। इदानींतस्यदेहत्यागव्याजेनदावाग्निनिविष्टस्यजगत्संहारप्रकारमाह। अथेति॥ समीरवेगेनविधुताअन्योन्यमाकंपितायेवेणवःवंशास्तेषांनिकर्षोत्रिव्येषणंजा

तस्यहवाएवंमुक्तलिंगस्यभगवतऋषभस्ययोगमायावासनोदेहइमांजगतीमभिमानाभासेनसंक्रममाणः एकदाकुंकोंकवेंकटकुटकाद्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवनेआस्यकृताश्मकवलउन्मादइवमुक्तमूर्द्धजोसंवीतएवविचचार। अथसमीरवेगविधुतवेणुनिकर्षणजा तोदावानलस्तद्वनमालेलिहानःसहतेनददाह॥

तोयोदवानलोज्वलज्जिह्वयाद्विवमालेलिहानस्तेनाग्निनासाधनेनसहऋषभगवान्तदुपवनंददाहेत्यन्वयः। वनमित्युपलक्षणंजगदपीतिशेषः। अत्रप्रतीतमनंगीकृत्यान्यांगीकारे किंप्रमाणमत्रोच्यते। ज्ञानानंदात्मकोदेहःऋषभस्यमहात्मनः। तादृशेनैवमनसाक्रमश्चकुटवाचले। दावाग्निमत्रविश्वाख्यतत्रस्थःजगद्दहज्जगत्प्रदिति। कालांतरभाविनोविश्वसं हारस्येदानींप्रयंकर्त्तृतिकथंयुज्यतइतिचेन्न। तर्हिहित्वेनाग्रेरभिव्यक्तत्वात्त्रस्थितस्यतस्ययोगान्नदुक्तं। एवमग्रेरभिव्यक्तस्यविष्णोःविक्षःसनातनइति। नकेवलंविश्वदहनयपर्यंतमेवं स्थितंकिंनुपश्चाद्दर्पयितंतर्हिहितमाहात्म्यंकिंनप्रकटितमितिचेत्त्रभूमावतारेदवशिक्षणार्थत्वेनधर्माणामप्रकाश्यस्यस्वधर्मत्वात्। अपमत्वेनसंगोप्यधर्मोनह्यापितःत्रागः। आह्नेसवासुदेवात्मावासुदेवोहमित्यजःसदास्थितइति। अनेनस्वरूपज्ञानस्यकदापितिरोभावोनास्तीतिसूचितं। निर्ह्नेयेनसर्वज्ञेनसर्वात्मनेमनहरिणाकिंप्रयोजनमकारीतिचे त्त। असुरजनमोहनार्थत्वात्॥

किमनेनैतद्भूदितित्त्राह। यस्येति। जनानुपशिक्ष्य उत्कृष्यमाणे वर्द्धमाने। भवितव्येन विधिना। निजमनीषयेत्यनेनार्हस्यासुरत्वमसूचि। मंदो निर्भाग्य इत्यनेन आनंदात्मगुरुपार्थ्यमूल्यइति ध्वनयति। भगवन्मनतात्पर्यं न जानातीतिवा। उपाकोर्पित्यनेन स्थितिं तां तु शुश्रावाहीं दुरात्मवानितिवा कस्मात्करयति। पाखंडमद्वैतमसमंजसं जैनमतमित्यनेन शास्त्रद्वयमनेनाकारीतिसूचितं। तदुक्तं॥ पूर्वं तु पौंड्रको नाम वासुदेवः सुदुर्मतिः। जातिस्मरो द्विधाशास्त्रं पाखंडं निर्ममे नृपः। एकं तु वासुदेवाख्यं वासुदेवोऽहमित्यपि। कुत्सितं वासुदेवत्वप्रतिपादकमात्मनः। लोकार्थं वापरमितिविकारार्हन्नामकमिति। अनेनार्हस्य पूर्वजन्मनि पौंड्रकाख्यासुरत्वं स्पष्टीकृतं। वासुदेवोऽहमित्यात्मनो जीवस्य वासुदेवत्वप्रतिपादकं वासुदेवाख्यं कुत्सितमेकं शास्त्रमपरमर्हन्नामकं लोकार्थमहिंसाधर्मप्रतिपादकमपरं चकारेत्यन्वयः। शास्त्रस्य प्रवर्त्तनमाह। येनेति येन शास्त्रद्वयेन हवा इ

यस्य किलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां दक्षिणकर्णाटकानां राजार्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथं पाखंडमसमंजसं निजमनीषया मंदः संप्रवर्त्तयिष्यते। येन ह वाव कलौ मनुजापसदा देवमायाविमोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजेच्छया गृह्णानाः अस्नानानाचमनाशौचकेशोल्लुंचनादीनि कलिनाधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यंति॥ ॥

तिनिपातद्वयेनतत्वशिष्येणर्हमुगणा विरचितेन शास्त्रेणेतिस्पष्टं। तदुक्तं। तत्वशिष्यः ऋषभुन्नामनज्ञानं स्वन्यंतं परं। वासुदेवात्मता सर्वजीवानामवदत्कुधीः। ऋषभेति निपातद्वयेनतत्वशिष्ये। एतदभिख्यंशास्त्रमकरोदभेदप्रतिपादकं। कुशास्त्रं सर्ववेदानां विरुद्धं तामसालयं। तद्द्रव्याद्यपि वर्तंते वर्त्तिष्यंति तथा कलौ। अशेषाज्ञात्वा तात्पारावासुदेवोऽहमित्यपीति। एतदभिप्रायेणाह्लानेत्याद्युक्तं। मनुजापसदाः मनुष्याभासाः स्वविधिः स्वकीयो वेदस्तस्य नियोगं लिंडाद्यर्थो मलद्वासनानसंवदेतेत्यादिकः तेन विहितः शौचाद्याचारः विरुद्धादिदेवानांहेलनादीन्यमेदहर्शनावज्ञानादीन्यपव्रतानि वेदविरुद्धव्रतानि स्वेच्छया प्रमाणं विना किं वा स्नानादि। गृह्णानाः। निमित्तमाह। कलिनेति। देवहेलनादिविशिनष्टि अस्नेति॥

ते रपिह्यर्वाक्तनया निजयात्रयांधपरंपरयातएवानास्थाः तमस्यंधे स्वयमेव प्रपतिष्यंति। अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थस्तस्यानुगुणान् श्लोकान्गायंति। अहो भुवः सप्तसमुद्रवत्याः द्वीपेषु वर्षेष्वधिपुण्यमेतत्। गायंति यत्रत्यजनाः मुरारेः कर्माणि भद्राण्यवतारवंति॥

तत्फलमाह। तेरपीति। तैर्हेलनादिभिः क्रियमाणया वंचितया नीयमानयांधपरंपरया निजलोकयात्रया स्वप्रमनोरथकल्पितव्यवहारेण स्वशरीरजीवनेनेवात्र्रतएवानास्थाः एकदापि व्यापारमंतरेण न स्थिता हि शद्धेनांधेनेवनीयमानायथांधा इति श्रुतिं प्रमाणयति। न केवलमसुरमोहनार्थः किंतु स्वपादपल्लशरणजनस्य मुक्तिसाधनार्थोपीत्याह अयमिति। रजसा गुणेनोपप्लुतस्य उपद्रुतस्य साधुजनस्य कैवल्यशिक्षार्थो मुक्तिसाधनशिक्षणाभिप्राय इत्यन्वयः। कुतइतितत्राह तस्येति। तस्य कैवल्यसाधनोपदेशस्यानुगुणाननुरूपानित्यर्थः। सप्तसमुद्रवत्या भुवः द्वीपेषु वर्षेषु एतद्भारताख्यं खंडमधिपुण्यमधिकपुण्यसाधनं उपलक्षणमेतत्। पापसाधनं वेति। तदुक्तं। विशेषाद्भारते पुण्यं चेरयुः पापमप्यथातथैव भगवद्भक्तिं एधिष्यंतानान्यवर्षगा इति। अनेनादृष्टसाधनमेतदन्यानि भोगसाधनानीति विशेषउक्तइतिज्ञायते। अवतारवंतिप्रकाशवंति। पैयव्रतः प्रियव्रतसंबंधी पुराणः पुरुषेणावतीर्णेन किं प्रयोजनमत्राह। पुरुष इति। अकर्महेतुं मोक्षहेतुं मोक्षकारणं धर्मं लोकशिक्षार्थं चचारेति तैरपिह्यर्वाक्तनया निजलोकयात्रया अंधपरंपरयातएवानास्थाः तमस्यंधे स्वयमेव प्रपतिष्यंति। अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थस्तस्यानुगुणान् श्लोकान् गायंति। अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत्। गायंति यत्रत्यजना मुरारेः कर्माणि भद्राण्यव

५-नु वंशो यशसावदातः पैयव्रतो यत्र पुमान्पुराणः। कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुं। को न्वस्य काष्ठामपरोनुगच्छेन्मनोरथेनाप्यभवायियोगी। यद्योगमायाः स्पृहयत्युदस्ता महानमायेन कृतप्रयत्नाः॥ ॥

तारवंति। अहोयत्रवाद्विति शेषः पुराणपुरुषस्तत्सनो ति ददातीति पूर्णफलं मोक्षं ददातीत्यर्थः। इतिकर्तुरिरसः उपन्यस्येन दिलीपः। अयषभोनामकश्चिद्योगीनहरिरिति तत्राह॥ कोन्विति अभवाय मुक्तये लोकशिक्षणार्थमेव धर्माचरणेनानुग्रफलापेक्षयेत्याह॥ यद्योगमायामिति॥ श्रीहरिवेषणाकृतप्रयत्ना महापुरुषायेनोदस्तां नित्यनिरस्तां योगमायां अणिमादिनाद्यायोगफलं स्पृहयतीति यत्तस्माल्लोकशिक्षार्थं धर्ममाचरतास्य काष्ठां स्वरूपभूतां योगशक्तिं हरिमंतरेणापरः कोनुयोगी गच्छेन्न कोपीत्यन्वयः। नित्योदस्ता योगशक्तिरनपेक्ष्यफलं यतः। निमस्वरूपभूतापि वहिः फलविवर्जनात्। अकर्मत्वमुच्यतेयदृच्छा फलविवर्जनादिति वचनात्॥ उदस्तामिति विशेषणाद्योगमायामिंद्रजालमुच्यत इत्यत निरस्तं। तस्मादणिमादियोगशक्तिर्नित्योदस्ता। कुतः फलमनपेक्ष्यमिति यतः तर्हि हरेः स्वरूपभूताणिमादिशक्तिर्नास्ति किमित्यतउक्तं नित्येति। यद्यपि स्वरूपभूताणिमादिशक्तिरस्ति। तथाप्यत्वेच्छाविषयाणिमादियोगमायाबहिर्नित्यस्वरूपशक्तेः पृथक्कृततः फलविवर्जनात्क्रियासाध्यफलानिच्छत्वात्तत्त्वदृष्टांतः। अकर्मेति। यथामोक्षस्य कर्मेतिवदंति। तत्फलानिच्छत्वात् तथात्रेति॥

ननु कस्मादिदं चरितं वर्ण्यते इत्यत्र चरितमपि यदि संसारनाशनं स्यात्तदा श्रवणमपि श्रीनारायणे श्रद्धेति निश्चयेन निरूपितं भक्तिः स्यात्तत्कथमिति शंकां परिहरन्नुपसंहरति। इतीति। इतिशब्दः प्रकृतिवचनः। हस्मेति निपातौ अत्यद्भुतातिशयजननार्थौ। न केवलं रामाद्यवतारवत् दुष्टभंजनः किंतु मत्स्याद्यवतारवद् ज्ञानस्योपदेष्टेति ज्ञापनाय परमगुरोरिति विशुद्धाचरितं कथितं विशेषः। इदमाचरितं विशेषतः शुद्धमेव न तु दुष्टमहदियस्य तात्पर्यापरिज्ञानादन्यथा गृहीतं वेतनदिति न तेनासुद्धधद्वाकर्तव्येति विज्ञापयितुं विशुद्धेति कृतएतदितितत्राह। पुंसामिति। दुश्चरित्राभिचरणं पापकर्मनाशनं न केवलं मे तदेव फलमन्यत्त्वाशीत्याह परमेति। नन्वफलोपयोगित्वयुक्तमुक्तमखिलं तत्कथमत्राह। इदमिति। उपचितयानुदिनमेधमानया इदमेव श्रेय इत्यतः करणधर्मविशेषः श्रद्धा। अनयोः श्रोतृश्रावकोरपि शद्दात्पठतः वासुदेवे निर्दिष्टा सक्तिः समनुवर्नतइत्यन्वयः। न त्वितरेषु साधनेषु सत्स्वियमेव किं

इति हस्म सकलवेदलोकब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितं पुंसां समस्तदुश्चरिताभिचरणं परममहामंगलायनमिदमनुश्रद्धयोपचितयानुशृणोत्याश्रावयति वावहितो भगवति तस्मिन् वासुदेवे एकांततो सक्तिरनयोरपि समनुवर्नते। यस्यामेव कवय आत्मानमविरतविविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयंतस्तयैव परया निर्वृत्या ह्यापवर्गिकमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नैवाद्रियंते। भागवतत्वेनैव परिसमाप्तसर्वार्थाः॥ ॥

विशेषोऽयतइत्याशंक्य सामान्यमुक्तेरस्याः परमानंदहेतुत्वादित्याह। यस्यामिति। कवयो यस्यां भक्त्या स्वात्मानमनस्नापयंतस्तयैव तत्त्व्याजातयापरयोत्कृष्टया निर्वृत्या संतिकमापवर्गिकमपवर्गसंबंधिनं पुरुषार्थस्वरूपतएव प्राप्तमपि नैवाद्रियंते। कुतो नाद्रियंते तत्राह। भागवतत्वेनेति। भक्त्या भागवता भगवतो हरेर्विशेषप्रिया इति भावेनैव परिसमाप्ताः पूर्णाः सर्वार्थाः येषां ते तथा। स्नापनेनिमित्तमाह। अविरतेति। अविरतानि निरंतराणि विविधानि वृजिनानि दुःखानि यस्मिन्निति तेर्युक्तो यः संसारः जननमरणानुसारः तन्निमित्तसंतापेनोपतप्यमानं देहाद्यभिमानं अनुसवनं सर्वदा युक्तेः श्रवैं तस्यामनादरं कुर्वतां पश्चादानंदोत्कर्षः स्यादित्येतमर्थं हि शब्देनाह। ब्रह्मणोऽस्य परमेष्ठिनः एकांतिनः कर्हिचिज्जनार्दनः मुक्तिं ददाति सर्वेषामुत्तमानां केषांचिदपीति तेषु येन नाद्रियंते तु ये मोक्षं प्रार्थयंते परं मुक्तानां तु योग्यं दत्ताज्यंते मुक्तौ तद्योक्तं तारतम्यमुक्तिरपनेन वाचत्वात्पर्यमवगंतव्यं॥ ॥

भगवति क्रियमाणायामपि कृत्रिमत्वनिराकरणेन पुरुषार्थत्वं प्रतीतम् अस्या मुक्तेरप्यतिशयोऽस्तीत्यमाह। राजन्निति। एवं गुरुत्वादिकमकृतथाप्यविगानेन मुक्तिं प्रयच्छति। कर्हिस्म कदापि ब्रह्माणं विना न कस्मैचित् पूर्णां भक्तियोगं प्रयच्छतीत्यन्वयः। ब्रह्मणोऽस्य परमेष्ठिनः पूर्णां दद्यात् किं जनार्दन इत्यादेः। अर्जुनादीनां ज्ञानोपदेष्टृत्वेन गुरुत्वं। निरहावलोकनन्यायेनावतारप्रयोजनमाह। नित्येति। अतद्रचनया श्रेयो विरुद्धकर्मणा श्रेयसि चिरसुप्तबुद्धेः नष्टज्ञानस्य लोकस्य ज्ञानग्रहणयोग्यजनस्य यो भगवानात्मलोकमाख्यातवानित्यन्वयः। तस्मा ऋषभाय नम इत्यन्वयः। ऋषभोक्तार्थविभ्रमाय अन्नपरं विशिनष्टि। नित्येति। नित्यमनुभूतो यो रोशील

राजन् पतिर्गुरुरलं भवतां यदूनां देवः प्रियः कुलपतिः क्व च किंकरो वः। अस्त्वेवमंग भगवान् भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगं॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः। लोकस्य यः करुणयाभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभचरिते षष्ठोऽध्यायः॥ शुक उवाच॥ भरतस्तु महाभागवतो यदा भगवतावनितलपरिपालनाय संचिंतितस्तदनुशासनपरः पंचजनीं विश्वरूपदुहितरमुपयेमे॥ तस्यामु ह वा आत्मजान् कार्त्स्न्येनानुरूपानात्मनः पंचजनयामास॥ ॥

तो निजलाभः स्वरूपानंदोपलब्धेन निवृत्ता तृष्णा यस्य सतथोक्तः अनेन नित्यानंदज्ञानपूर्णत्वेन नित्यसिद्धाखिलपदार्थविशेषत्वात्तद्भक्ता विशिष्टतरांसं भवतीति ज्ञायते
इति श्रीभागवते पंचमस्कंधे षष्ठोऽध्यायः॥ श्रीनारायणप्रसादजनकज्ञानसाधनकर्मकरणप्रकारो निरूप्यतेऽस्मिन्नध्याये। तत्रादावृषभेणाराधनात्परायणभवतो राज्यलक्षणकर्मणो निवृत्तेस्तत्पुत्रो भरतः किमकार्षीदित्याशंक्य भगवद्भक्तकथायाश्चापि श्रीहरिकथातद्भूतत्वात्तत्कथाप्रसंगः क्रियते॥ भरतस्त्विति। तुशब्द इतरराजकथाया अस्य कथाया विशेषं वक्ति। संचिंतितः संमंत्र्याभिषिक्तः। समंत्रणेनानुसंचिंतिता चर्चायामभिषेचनइत्युत्पलमालायां। तस्य ऋषभस्यानुशासनमाज्ञा

पंचसंख्यामात्रत्वे दृष्टान्तमाह। भूतादिरिति। भूतादिस्तामसाहंकारः। भूतसूक्ष्माणि शब्दादीनि चेतनस्य चेतनदृष्टान्तापेक्षायां भूतादिः परमात्मा भूतसूक्ष्माणि शब्दाद्यभिमानिदेवा इति वा॥ यतो भरतात्॥ आहितः प्रतिष्ठितोऽग्निर्येन स आहिताग्निः। अग्निहोत्रादयः प्रकृतयः पशुसोमादयो विकृतयः। समग्राङ्गयुक्तानि कर्माणि प्रकृतयः। एकदेशाङ्गयुक्तानि विकृतयः पशुभिरेव क्रियमाणा अश्वमेधादयः सोमरसैरेव क्रियमाणाः सोमयागाः। चत्वारो होतारो यत्र तच्चातुर्होत्रं तल्लक्षणविधानेन प्रवर्तमानेषु कर्मसु अध्वर्युषु अत एव नानायोगेषु देवताध्यानलक्षणेषु यजनादिरूपायेषु वा क्रियमाणेषु सत्सु बहुपूर्वं क्रियाफलं धर्मसंज्ञं तद्वासुदेवे भावयानः हर्षधीनत्वेन समर्पयन्

भूतादिरिव भूतसूक्ष्माणि। सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति। अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति। स हि बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः पर्यपालयत्॥ ईजे च भगवन्तं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना संप्रचरत्सु नानायोगेषु विरचिताङ्गक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत्॥ ॥

स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत्। अयमर्थः। यज्ञभाजो देवानिन्द्रादीन् यज्ञाधिकारिणो देवान् सूर्यादीन् पुरुषस्य पूर्णज्ञानस्य हरेश्चक्षुराद्यवयवेषु तदुपस्थानादाश्रितान् ध्यायन् तदावयवत्वेनैव ध्यायति स्म। कथम्। अध्वर्युभिर्हविष्षु गृह्यमाणेषु सत्सु कर्माङ्गत्वेन वासुदेवे समर्पणं नत्विष्टत्वेनेति तदुक्तम्। परेति। सर्वदेवतानां लिङ्गभूताः प्रकाशका ये मन्त्रास्तेषां वज्रधरत्वादीनां वा तत्तत्प्रार्थनार्थनियामकतया ऐश्वर्यादिधर्मप्रेरकत्वेन मुख्यकर्तरि अस्पृहितत्वात्स्वस्तु कं यज्ञपुरुष इति। न चैवं सगुणफलप्राप्तिः स्यादित्याह॥ परेति॥ कषायः पापं॥

अधुना कर्मणस्साध्यफलमाह। एवमिति। भगवदर्पणेन कर्मणः शुद्धिस्तया शुद्धं सत्त्वमन्तःकरणं यस्य तथा तस्यान्तर्हृदयेऽआकाशशरीरे सूक्ष्मरूपे ब्रह्मण्यपरिच्छिन्ने महापुरुषस्य हरेरूपलक्षणे विष्णुर्महापुरुषः श्रीनारायण इत्यादिलक्षणे। उपलक्ष्यते ज्ञाप्यते इति महापुरुषोपलक्षणो वा स्वभक्तानां हृद्युल्लिखिते न स्फुरिते नात्मना। कारणेन कीदृशः सः इत्यत आह। पुरुषरूपेणेति। आत्मनि स्वस्मिन्नेधमानरया वर्धमानवेगा। भरतस्य वैराग्यपूर्वं भजनप्रकारमाह। एवमिति। वर्षायुतसहस्रावसाने अवसितस्य प्रार

एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाजायत। एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात्स्वनिकेतनात्पुलहाश्रमं प्रवव्राज। यत्र ह वाव भगवान्हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यत इच्छारूपेण। यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति। तस्मिन्वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपहृतोपशमः परां निर्वृतिमवाप॥ ॥ राम

व्यस्य कर्मणो निर्वाणावसरः नाशक्षणो यस्य स तथा। रिक्थं राज्यादिवित्तं सकलसंपत्तिकेतात्सर्वसमृद्ध्याश्रयात् निकेतनात् गृहात्। पुलहाश्रमं शालग्रामक्षेत्रं नतवान्। ततःधीनत्वे सन्निधानमित्यभिप्रायेणाह। इच्छेति। कीदृशमिच्छानुरूपमित्यतस्तत्र विशेषणैः। यत्रेति। यत्र चक्रनदी नाम सरित्प्रवरा। उभयतो नाभिभिर्दृषच्चक्रैः चिह्नितैः शिलासमूहैः सर्वतः पवित्रीकरोतीत्यन्वयः। स एकलस्तस्मिन्पुलहाश्रमोपवने परां निर्वृतिमवापेत्यन्वयः। उपहृतः संहृतः पूर्णः उपशमो भगवन्निष्ठा यस्य स तथा॥

प्रवर्द्धमानानुरागभारेण द्रुतं गलितं हृदयशैथिल्यं संशयलक्षणं यस्य स तथा॥ आत्मनि देहे। रोमपुलककुलकः रोमांकुरसमूहः। औत्कंठ्यमेतः करणधर्मविशेषः तेन प्रवृत्तं प्रणयबाष्पमानंदाश्रु तेन निरुद्धावलोकनं यस्य स तथा। निजरमणारुणचरणारविंदयोरनुध्यानेनोपचितेन प्रवृद्धेन भक्तियोगेन परिप्लुतपरमाह्लादस्थायं गंभीरहृदयावगाढधिषणाश्चेति स तथोक्तः। गंभीरहृदये विस्तारवदगाढमप्राप्ततलमगाधं धिषणा बुद्धिर्यस्य स तथा। यद्वा परिप्लुतपरमाह्लादेन गंभीरहृदयं यस्य स तथा। अत एव हृदावगाढधिषणो यस्य स तथा। ऐणाजिनवाससा कृष्णाजिनाख्यवस्त्रेणानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च सूर्य इव विरोचमानः। एतन्मंत्रार्थवाचकपद्यमाह। परो इति। अथोश हृदयरोशब्दोऽयं नाम॥ रजसः प्रकृतेः परोऽपरः उत्तमः। निरस्तरजोगुणो वा॥ सवितुर्जगतः कर्तुः जातं सर्वं वेत्तीति जातवेदाः तस्य संबुद्धिर्जातवेदः। वेदश्रुतिप्रापकत्वाद्देवस्य भर्गं

तस्यैवमविरतपुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलकः औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविंदानुध्यानोपचितभक्तियोगपरिप्लुतपरमाह्लादगंभीरहृदयावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार। इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवंतं हिरण्मयं पुरुषं ददर्श सूर्यमंडलेऽभ्युपतिष्ठन्नेतदु होवाच॥ परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान सुरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषत्संगृणीमः॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भरतोपाख्याने सप्तमोऽध्यायः॥ राम

दस्य तनय इत्यर्थः। भगवानिदं जगज्जजान जनयामास। किमुपकरणमत्राह। मनसेति। अनेन सवितृशब्दार्थो लक्षितः। नियंतृत्वमप्यस्येवेत्याह। सुरेतसेति। सुरेतसा स्ववीर्येणादः ब्रह्मादिजगत्प्रविश्य स्थितं दुःखितं जगत्संवर्धेन दुःखलेशोऽपि नाशीत्याह। हंसमिति। सर्वस्य दुःखहंतृत्वाद्धंसः तं सर्वस्वतंत्रं॥ गृध्राणं जीवानां स्पृहयावधिनं पुष्टिस्तु सकांक्ष्याभिनिधातुः जीवानां सर्वकांक्षा हि। एवं विधं त्वां संगृणीमः कं स्मरदत्त्वे वयं॥ परोरजा रजस्कत्वाज्जयो विध्यत्वात्प्रयोतुतः। गुणात्मयात्पुरी पश्य जातवेदाश्च सर्ववित्। हंसो दुःखादिहानेन जीवेशत्वात्स्वराड् भवे। कालः सर्वनियंतृत्वात्परमात्मा प्रकीर्तित इति वचनात् उक्त एवार्थः। परोरज इत्यनेन शताक्षरगायत्री प्रतिपाद्यो नारायणो मम इष्टदेवतेत्युक्तं। परोरजा रजस्कत्वादित्यत्र रजस्कत्वादिति पदच्छेदः छांदसत्वाद्युक्त इति संतोष्टव्यं पंचमे सप्तमः

७

सत्संगतिमंतरेणांतरसंगतिः संसारहेतुरिति एतन्निरूप्यते अस्मिन्नध्याये। तत्र भरतस्यैणशावसंगत्यानर्थप्रकारं कथयितुमुपक्रमते। एकदेति। अभिषेकं स्नानमावश्यकं मूत्रपुरीषोत्सर्जनादि नैगमिकं नित्यकर्म अत्र क्रम एव विवक्षितः एतावत्करोतीति क्रियमाणमनुष्ठानं नैगमिकं संध्यानुष्ठानमावश्यकमिति वा। ब्रह्माक्षरं प्रणवः गायत्री वा। अघमर्षणसूक्तं वा। जलाशयाभ्याशं नदीकूलसमीपं। तावन्नदानी। मृगपतिः व्याघ्रः। प्रकृत्या स्वभावेन विक्लवा पारवश्येनोपेता अत एव वलितनिरीक्षणा चंचलाव

श्रीशुक उवाच — एकदा तु महानद्यां कृताभिषेकनैगमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकांत उपविवेश। तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम। तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत्। तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम तस्या उत्पतंत्या अंतर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात। तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपाताथ च ममार। तं त्वेणकुणकं कृपणं स्रोतसानूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृतमातरमेणमाश्रमपदमानयत्॥ ॥

लोकना। हरेर्व्याघ्रादेर्यदभिनिवेशः भयोद्वेगः तेन व्यग्रं व्याकुलं हृदयं यस्याः सा तथा। हरिर्व्याघ्रे प्लवंगे सुखे भेके सूर्ये रेखायामिति। अत एव पारिप्लवदृष्टिः चंचलदृष्टिः न्तृषेति रात्रिंततः। उच्चक्राम उत्पपात। अंतर्वत्न्या गर्भिण्या उरुभयेनावगलितो निर्गतः स्रोतसि प्रवाहे। प्रसवनं प्रसार उत्सर्पणमुत्पतनं सिंहभयं च खेदः श्रमस्तैरातुरा दर्या महागर्त्ते कृष्णसारसती कृष्णमृगप्रिया। एणकुणकं मृगबालकं अपविद्धं बंधुत्यक्तं वधुजनहतामातरं यस्य स तथा तं॥ ॥ ॥

पोषणं त्रणादिदानेन लालनमुत्संगारोपणादिना। अनुध्यानं क्षेमचिंतनं पोषणाद्यनुचिंतनं वा। यमाश्च अहिंसादयः पुरुषपरिचर्यादयो विष्णुपूजादयः॥ उदवसन् उत्सन्नाः॥ मृत्युः ईश्वररथचरणस्य कालचक्रस्य परिभ्रमणरयेण गमनागमनवेगेन। मामेगोपायनं गोप्तारं क्षितारं शरणं प्राप्तस्योपेक्षया महान् दोषो भवतीति दोषविदुषा। नू

तस्य ह वा एणकुणक उच्चैरेतस्मिन् कृतनिजाभिमानस्याहरहस्तत्पोषणपालनप्रीणनलालनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादयः एकैकशः कतिपयाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन्। अथेदमाह। अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः। शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा। नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्ते। इति कृतानुषंग आसनशयनाटनस्नानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत्। कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशंसमानः सह हरिणकुणकेन वनं समाविशति। पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात्स्कंधेनोद्वहति। एवमुत्संग उरसि चाधायोपलालयन् परमामवाप मुदं। क्रियायां निर्वर्त्यमानायामन्तरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति॥ ॥

गयो बृणादिनो भगवदुपासनाभंग इति तत्राह नूनमिति। इत्युक्तप्रकारेण कृतानुषंगः कृतस्नेहाभिनिवेशः॥ मृगजहुना मृगबालकेन॥ आहरिष्यमाण आनयिष्यन्॥ वर्षपतिर्भरतः वर्षनाथः॥ प्रकृतिस्थेन स्वस्थेन॥ ॥ ॥राम॥ ॥

अन्यदा अदर्शने अतितर्षेण अत्युत्कंठया करुणं सविषादं अभिरंभितः आस्थितः॥ आत्मप्रत्ययेन स्वमनः शुद्ध्या तन्मयो दासीत्यत्र अविगणयन् अविचिंतयन् सुजनः पुत्र इव क्षेमेण पुरुषेण नैकचरः आरण्या मृगविशेषः निम्लोचत्यस्तंगच्छति। मृगवध्वान्यासः मृगी निक्षेपलक्षणोऽर्थः॥ विविधा अरुचिराश्च दर्शनीयाश्च निजाः स्वजातिप्रयुक्ता मृगदारका मृगबालकास्तेषां ये विनोदा लीलाविशेषाः तैः क्ष्वेलिकया मृगजातिक्रियया नादविशेषक्रियया। प्रेमसंरंभेण स्नेहोद्रेकेण प्रणयकोपेन वा चकितः सभयः पृषत् कृष्णमृगः अपरुषविषाणाग्रेण कोमलशृंगमुखेन लुठति परिवर्तयति अभिमुखीकरोतीत्यपीत्यर्थः॥ उपहंतीति वा। लुठ उपघाते इति धातुः। लुठतीति पाठे। अमुष्टानालस्यकरोतीति अपि लुठिष्यति। आसादिते आरोपिते हविषि स्निग्धाते अस्मि

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन् किल कश्मलं महदभिरंभित इति होवाच। अपि बत स वै कृपण एणबालको मृतहरिणीसुतोऽहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति। अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं देवगुप्तं द्रक्ष्यामि। अपि च न वृकः सालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति। निम्लोचति ह भगवान् सकलजगत्क्षेमोदयस्त्रय्यात्माद्यापि मम न मृगवधून्यास आगच्छति। अपि स्विदकृतसुकृतमागत्य मां सुखयिष्यति। हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन्। क्ष्वेलिकायां मां मृषासमाधिनामीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति। आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरणकलाप आस्ते। किं वा अरे आचरितं तपस्तपस्विन्यानया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपदपंक्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति॥ ॥

न् बर्हिषि मिकृणादिना दूषिते सति। उपलब्धो भर्त्सितः उपरतः भसः शांताभिनिवेशः॥ अतएव अवहितकरणकलापः संवृतसर्वेन्द्रियः आस्ते। अनया भूम्या तपः आचरितं तत् किमिति शेषः॥ सविनयस्य कृष्णसारतनयस्य तनुतराणि अतिशयेन नाणवश्च सुभगाः सुंदराश्च शिवतमाः सुखतमाश्च अखराः अपरुषाश्च खुरा येषां पदानां निक्षेपविद्धानां पंक्तिभिः द्रविणविधुरवद्धरिणदर्शनातुरस्य न केवलं मम उपकरोति किंतु द्विजानामपीत्याह। आत्मानमिति कृष्णसारतनयस्य पदपंक्तिभिः कृतकौतुकं कृतमंगलमात्मानं द्विजानां देवयजनं करोति॥ यत्र प्रलब्धोत्थाय वरिगीस्यात्पश्यतो द्विजवरान्॥ यस्मिन्देशे कृष्णसारस्तिष्ठति स धर्म्यो विज्ञेय इति स्मृतिः॥ ॥ राम

अधुनेह दैवेनानागतं दृष्ट्वा तत्संलापप्रकारमाह॥ अपि स्विदिति। उडुपश्चंद्रः एनं मृगबालकं परिपालयत्यपि स्विदित्यन्वयः। किंवा रश्मिनाऽवाङ्कुर्वन्नयं प्रयच्छत्यपि स्विदित्याह। एष इति। उपसृतस्त्रासे मृगीतनयश्चैवमुपसृतमृगीतनयः। उपसृतमगभस्तिभिर्मामास्वदयति लेह्यपि स्विदित्यन्वयः। शिशिरा शीतलानि वा तानि अनुरागेणानुगुणितानि बहली कृतानि बहूनि। निजवदननिर्गतसलिलानि तानि च वा अमृतमयगभस्तयश्चंद्ररश्मयस्तैः। किं विशिष्टं मां आत्मजइवात्मजो मृगीतनयस्तस्य विश्लेषवियोगो ज्वरः संतापः स एव दवदहनः वनाग्निस्तस्य शिखाभिरुपतप्यमाने दह्यमाने हृदयस्थलनलिने यस्य स तथा तं। तेन फलमाह। इतीति। इत्यादि विलपन्नूत्स योगतापसो भरतो योगारंभणतो भगवदाराधनलक्षणा

अपि स्विदसौ भगवानुडुपत एनं मृगपतिभयान्मृतमातरं मम मृगबालकं स्वाश्रमपरिभ्रष्टमनुकंपया कृपणजनवत्सलः परिपालयति। एषते हरिणकुलोप

निधिर्मयायु मइति किंवा आत्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनं मामुपसृतमृगीतनयः शिशिरशांतानुरागगुणितनिज

वदनसलिलामृतमयगभस्तिभिः स्वधयति॥ इति चैवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः स योगताप

सो भगवदाराधनलक्षणाच्च। कथमितरथा जात्यंतर एणकुणके आसंगः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य॥ ॥

त्कर्मणश्च विभ्रंशितः परिभ्रंशितः प्रच्यावितइत्यन्वयः। केन मृगदारकरूपेणाभासमानं ताद्दशमतइति तेन स्वारब्धकर्मणा मनुष्यस्यैवमघटमानो मृगे मनोरथः स्नेहविशेषस्तेनाकुलं हृदयं यस्य स तथा॥ इतरथा प्रारब्धकर्माभावे जात्यंतरे क्षुद्रजातिविलक्षणे एणकुणके बालके आसंगः स्नेहः कथं स्यात्॥ योगो ध्यानं तस्य भरतस्य कथंभूतस्य साक्षान्निःश्रेयसस्य प्रतिपक्षतया विघ्नत्वेन हेतुना दुस्त्यजं परित्यक्ता स्वकुमशक्या हृदयाभिजाता औरसाः पुत्रा येन स तथा तस्य॥ ॥ ॥राम॥ ॥

एवं मृगपोतपालनाद्याकुलचेतसो भरतस्य मरणसमयमाह त्रिभिः। तस्येति॥ अंतरायेण विघ्नेन विहतो योगारंभणो ध्यानोपक्रमो यस्य स तथा तस्य पोषणादिषु सतानुषंगेन निरंतरस्नेहाभिनिवेशेनात्मानं श्रीहरिस्वं वाविगणयतो वितयतः॥ कराल रभसो वेगो यस्य स तथा॥ इमं लोकं भरतो पार्श्वे पल्वलितशरीरं मृगेण सह वर्तमानं विसृज्य इतरवत् मृगवन्मृगशरीरमवाप। पूर्वकलेवरमनु तस्यानुकूलत्वेन स्मृताजन्मानुस्मृतिः जातिस्मृतिर्येन स तथा॥ पूर्वदेहस्तत्कृतकर्मस्मृतिरित्यर्थः॥ भगवदाराधनस्य समीहानुष्ठानं तस्य सामर्थ्येन॥ किमाह॥ अहो इति। किं कष्टं तदाह॥ भ्रष्ट इति॥ आत्मवतामनुपथात् आत्मा स्वामी मम अस्तीति भाववंत आत्मवतः परमात्मज्ञानिन इत्यर्थः॥ ते वां समूह आत्मवतां जनता शब्दे स्वानुपथा

तस्यैवमंतरायविहतयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत॥ तर्हीनीमपि पार्श्ववर्तिनमात्मजमिवानुशोचंतमभिवीक्षमाणो मृग एवाभिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवापाताद्यपि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह॥ अहो कष्टं भ्रष्टोहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनुपरिसुस्राव।

दनुगमनलक्षणमार्गात्॥ आत्मास्यास्तीत्यात्मवान् तस्य भावः आत्मवत्ता तस्या अनुपथात् अनुसरणात् पथगतादिति धातोः॥ भ्रष्टश्चालयं च्युत्वाधः पतितः कुत एतदिति तदाह। यदिति। सर्वेषामात्मनां चेतनानामात्मनि अंतर्यामिणि वासुदेवे भगवति कार्त्स्न्येन कालेन समावेशितं समाहितं सन्निधाय स्थिरीकृतं यन्मम मनः पुनस्तदेव मम मनः रागात् मृगसुतमनुसुस्राव अनुद्रुतमभूदित्यन्वयः। तस्मादिति शेषः॥ विविक्तं वृतं तत्पुण्यसाधनं वृतं तत् आरण्यं विविक्तपुण्यारण्यं तदेव शरणं यस्य स तथा। तस्यात्मवतो बुद्धिमतः॥ कथं कार्त्स्न्येनेति विशेषणं संगच्छते॥ प्राणा इमन्य एवं गमं भवादिति तदाह। तदिति। तस्य वासुदेवस्यानुश्रवणादिषु यो भियोगश्चाय हृत्प्राणः प्रयत्नेनाशून्याश्चविनाकृताः फलाः सकलायामा यस्मिंस्तथा तेन॥ ॥

स वा न

निगूढनिर्वेदोंतर्गतवैराग्यः रक्षितं प्रियं कालं जराद्विरेः आत्मसहचरः एकाकी मृगत्वनिमित्तस्य दुष्कर्मणः प्रारब्धस्यावसानं नाशं मेवाण यंस्थितयन्संख्यां कुर्वन्नितिवा। क्षितमा ई पंचमस्कंधेऽष्टमः प्रायो वैराग्यसाधनसामग्री संपन्नस्यापि ब्राह्मणरा शरीरस्यमतः पुरुषस्य ज्ञानानुत्पत्तिरिति सिद्धेः त्याक्षिप्त ध्यायेतिनूप्यते। तदर्थं सुतस्य ज्ञानस्यापि भर तस्य विगतं तुल्यं प्राप्तिमाह॥ अथेति॥ अथ मृगशरीरोत्सर्जनानंतरं कल्याणकरं भारतवर्षं अत इतिवा। त्यागोदानं देवतामुद्दिश्य द्रव्यत्यागः लक्ष लाभे यज्ञो वा। संतोषो यदृच्छालाभेनालं

एवं निगूढनिर्वेदो विसृष्टमृगीमातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम॥ तस्मिन्नपि कालं प्रतीक्षमा णः संगाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज॥ इति श्रीभागवते महापुराणे पंचमस्कंधे आदिभरतचरिते अष्टमोऽध्यायः॥ श्रीशुक उवाच॥ अथ कस्यचिद्द्विजवरस्यांगिरसप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोष तितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अंगजा बभूवुः॥ मिथुनं च यवीयस्यां भार्यायां॥ यस्तु तत्र पुमां स्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः॥ तत्रापि स्वजनसंगाच्च भृशमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवण स्मरणगुणविवरणचरणारविंदयुगलं मनसा विदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिरस्वरू पेण दर्शयामास लोकस्य॥ ॥

बुद्धिः शमाद्यात्मज्ञानांतैर्धर्मानंदेन युक्तस्य इत्यादीनामानंदेन सम्बद्धायुक्तस्येति वा आत्मनः पितुर्गुणसदृशश्रुतादिगुणा येषां ते तथा सोदर्या अंगजाः एकस्यां मातुरुदरे जातत्वात् सोदर्याः अंगजाः पुत्राः॥ उत्सृष्टं मृगशरीरं येन स तथा। चरमशरीरेण अंत्यदेहेन। तत्र विप्रजन्मन्यपि लोकस्यात्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः॥ उद्वि जमानः स्वस्यानर्थप्राप्तिरिति बिभ्यत्॥ गुणविवरणं व्याख्यानं विशेषेण दधतः आत्मनः स्वस्य प्रबलादेः प्रतिघातं विघ्नमाशंकमानः नितरां पवनात् अनुस्मृता स्वस्य पूर्वजन्म नामावलिः परंपरा येन स तथा॥

स विप्रः पिता तस्यापि लोकविदिहस्यापि समावर्तनपर्यंतं ततः संस्कारान् विधिना निविहितान् जातकर्मादीन् यथोपदेशं विदधानः कुर्वाणः पुनरूपनीतस्य शौचाचमनादीक र्माणि नियमानन्नविधानपि समधिकृत्य दिसन्वयः। अनभिप्रेताश्चेति किमित्यशिक्षयदितित्राह। अनुशिष्टेनेति। हवाइत्यैतौ भरतस्यापरोक्षज्ञानित्वेन कामाचारेण दोषाय इति सू चयतः। अत एवासदाग्रह इत्युक्तं। यत्पित्रा शिक्षितं तदेव सध्रीचीनं समीचीनं रमणीयमपि च किंचिदन्यथा। हेलनेन अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः। इत्यादिस्यातीत न्यायमनुसंदधान इवेति दर्शयति। मद्रश्रणवेन शिरसा त्रिपदी सश्रणवशिरस्त्रिपदीं तां। असमवेतरूपं असमंजसरूपं यथा तथा। छंदांसि वेदान्। आत्मा वै पुत्रनामेति श्रुते

तस्यापि ह वा आत्मजस्य स विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान्यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्कर्मनियमाननभिप्रेतान पि समशिक्षयत्। अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेत्यसदाग्रहः। स वा पितर्दुह पितृसन्निधावेव सध्रीचीनमिव करोति। छंदांस्यध्यापयिष्यन्सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास। एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्र तनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य। पितास्वयं तावदनधिगत मनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः। अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात्। पित र्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बंधान्न्यवृत्संत॥ ॥

रात्मनीति व्यपदेशः। औपकुर्वाणकानि उपकुर्वाणयोग्यानि उपकुर्वाणो विवाहः भिक्षाटनं वा। अतदर्हैरयुक्तानि तस्यानपेक्षितानि एवमादीन्यपि कर्माणि ग्राहयन्पुत्र मशिक्षयदित्यन्वयः। अनधिगतमनोरथः अप्राप्तनिजाभिप्रायः। उपसंहृतो मृतो भूत्वा अनुसंस्थया अनुमरणेन अग्निप्रवेशलक्षणेन। त्रय्यां विद्यायां अग्निष्टोमनरस्वर्गका मो यजेतेत्यादिपद्यायां कर्मप्रतिपादितायां पर्यवसितमतयः पुरुषार्थबुद्धयः। ब्रह्मविदाप्नोति परमित्यादि विद्वानमृत इह भवतीत्याद्यायां न निष्ठातमतयः। अनुशासननिर्बंधाद्धि क्षालक्षणाग्रहात् न्यवृत्संत निवर्तितमेकं न॥

भा॰पं॰
२९

अतः परमसौ सरतः किमकरोदित्याह। सचेति। स चैवं विरचोत्पन्नयः। कथंभूतः क्रतेरिस्य विवरणं द्विपदेति। वत्तुष्पदः पशोर्द्विपदत्वमेव विशेषः। ननु ज्ञानेन तादृशे मधि नु प्येर्यदाहे उन्मत्तत्वादिनामलिरलिभाष्यमाणो भवति। तदा तदनुरूपाणुपन्नादिवव नानुरूलवचनानि भाषते विष्टितः कर्मीः कर्माणुरूलदृग्यस्तु तिमेते रण कर्माणि॥ वेतनतो मोल्पेनकर्मानुरूलदृश्यत्त्र येत्यर्थः। करदंकुत्थितानं। अस्य वहरतिपुंके परकेवलेनेद्रियप्रीतिभिपिन्नेनजिह्वादीद्रियतृप्तिकारणं। अन्नहेतुगर्भ विशेषणमाह। नित्येति। नित्यनिहत्तदुःखस्व सिद्धविशुद्धानुभावानंदोहमितियः स्वात्मलाभममधिगच्छतीति सतथोक्तः। यद्वा नित्यनिहत्तदुःखत्वादिविशिष्टस्वात्मा परमात्मा स एवलाभः फलं जानातीति तथोक्तः। अत एवासंभावितो नुत्पादितोदेहाभिमानो येन सतथा। शुष्कजलनालिकेरफलसम इत्यर्थः उपलिप्तभूमौ शयित्वा निराकरणं स्थंडिलसंवेशनं। अनुवा

सव पा कृतेद्विपद पशुमिरुन्मत्तजवडब धिरेत्य भिभाष्यमाणो यदा तेदनुरूपाणि प्रभाषते। कर्माणि च स कार्यमाणः परेच्छयाकरोति। विष्टितो वेतनतो वा याच्ञया यादृच्छयावोपसादितमल्पं वह मृष्टं कदन्नं वा स्यवहरति परं नेन्द्रियप्रीतिनिमित्तं। नित्यनिवृत्तदुःखस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगतः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसंभावितदेहाभिमानः शीतोष्णवातवर्षेषुवृषइवानावृतांगः पीनः संहननांगः स्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञयातज्ज्ञजनावमतो विचचार। यदातु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितः स्तदपि करोति। किंतु न समं विषमं न्यूनमधिकमिति वेद। कणपिण्याकफलीकरण कुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति॥ ॥

द्विंदेहमलात्यागः। अनुन्मज्जनमस्नानं कर्पटेन पटखण्डेनावृता कटिर्यस्य सतथा। उरुमषिणा तिमलिष्टेन। यदा परतः आहारं प्रतिवेतनतः कर्मेहमानश्चेष्टमानस्तदास्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तत्कर्मापि करोति। अयं कर्मणाइदं सूल्पं समपि दं विषममिदमाधिक्यमिदं न्यूनमिति न वेद। कणपाषाणोपेता ण्डुलास्तण्डुलं पिण्याकं निर्ग्रंथितिलपिष्टं फलीकरणमवहततण्डुलदग्धं। कुल्माषः कीटादिविद्धमाषः। वनमाषो वा। स्थालीपुरीषं स्थालीतललग्नदग्धान्नं यावनालश्यामाककोद्रवादीन्यादिशब्दग्रहीतानि अभ्यवहरति। मधुरी करोति॥ ॥

राम
२९

स

भद्रितकण्ठदिनीर्णीकरणं नातिशयितमाहात्म्यं औविध्यादिनापितत्वं भवादित्याशंक्य विष्णुमाहात्म्यगर्भितमहात्म्यांतरमाह। अथेति। अथान्यन्माहात्म्यं वक्ष्यामीति शेषः। दैवविमुक्तस्य अदृष्टोद्दोषकपरमात्मापेक्षया क्षीणायुषः। निशीथसमये रात्रिमध्यकाले अनधिगतपशवः अप्राप्तपुरुषपशवः केदारान् पूर्णालीकृत्वा शिवीरासनेन मंचे स्थित्वा संरक्ष्यमाणं पालयतं यत्नस्य सुस्वपंहरिणापात्यत इतिद्योतनपरः। रशनया रज्ज्वा। पणायो वृषलाश्चोरा वा स्वविधिना स्वागमोक्तमार्गेणाहृतेनाविच्छिन्नधौतेनवा। किसलयः पल्लवः

पूर्वोक्तहेतोः क्रममाह। यस्येति। यस्य तत्सकाशादजोब्रह्माआद्यः सूत्रपदार्थोनामादिभूतआसीत्। प्रकृतिसूत्ररूपकुसुमहत्तत्वाद्यादित्वान्नदभिमानित्वेनब्रह्मणआदित्वमुक्तमितिभावेनोक्तं। महानिति। निर्दिष्टस्याभिमानित्वं कथमित्यतउक्तं गुणविग्रहइति। रजोगुणेननिर्मितोविग्रहोयस्यसतथा। देहित्वेपिज्ञानलोपोन्यदेहवदस्यनास्तीत्यभिप्रेत्याह। विज्ञानेति। विज्ञानस्यापिधिष्ण्यं निधानस्थानं धिष्ण्यशब्दपर्यायोविज्ञानमेवस्वरूपंयस्यसतथेत्यर्थः। महत्तत्वसृष्टिसृष्टिक्रमः कथं तायतइत्यतउक्तं। यत्संभवइति। यस्मान्महत्तत्वात्संभवोयस्यसतथा। अहं त्रिवृता वैकारिकादिभेदेनत्रिधावर्तमानेनस्वतेजसास्वरूपमहिम्नावैकारिकादिकंतदभिमानिदेवादिकं वसृजे इत्यन्वयः। अस्यात्सर्जनेवश्रीनारायणानुग्रहेणास्वातंत्र्येणस्याह। एतइति। वयमितिकेइतितत्राह। महानिति। ब्रह्माप्रथमतयाद्यर्थः। सूत्रयंत्रिताः सूत्रबद्धाः शकुंताः पक्षिणः। वैकृतावैकारिकादेवाः। तामसाः भूतदेवाः। ऐंद्रियाइंद्रियाभिमानिदेवाः। शब्दाद्यभिमानिदेवताश्चौयतिरेकसुखेनसंसारतरणोपायमाह। यन्निर्मितामिति। अयंजनोयेनभवताजनेमोहप्युत्वितिनिर्मितांकल्पितां।

यस्याद्य आसीद्गुणविग्रहोमहान् विज्ञानधिष्ण्योभगवानजः किल। यत्संभवोहंत्रिवृता स्वतेजसा वैकारिकं तामसमैंद्रियं सृजे॥ एतेवयं यस्यवशे महा
त्मनः स्थिताः शकुंताइवसूत्रयंत्रिताः। महानहं वैकृततामसेंद्रियाः सृजामसर्वेयदनुग्रहादिदं ६ यन्निर्मितां कर्ह्यपिकर्मपर्वणीं मायां जनो
यं गुणसर्गमोहितः। नवेदनिस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने इतिश्रीभागवतेमहापुराणेपंचमस्कंधेसप्तदशोध्यायः

कर्मपर्वणीं विहितनिषिद्धलक्षणानिकर्माणिपर्वाणियस्याः सातथातां मायांबंधकशक्तिं आसाद्यकर्ह्यपिकदापिमायायानिस्तरणोपायं अंजसानवेदेत्तत्रकिंकारणमितितत्राह गुणेति। गुणेनसर्गोयेषांतेगुणसर्गाः शब्दादिविषयाः यैर्मोहितः शब्दादिनिमित्तान्यथाज्ञानं कारणमित्यर्थः। अनेनतत्कर्तृज्ञानरूर्वतेकं ज्ञानं संसारतरणोपायइतिसूचितमिति। इदमेवमगवत्वीतिकरं सर्वसाधारणमयत्नसाध्यंसाधनमितिभावेनोपसंहरति। तस्माइति। तद्विलयोदयात्मनेतस्यामायायानिवर्तकं ज्ञानस्वरूपायअनेनप्रणतिप्रसन्नश्रीनारायणस्वरूपज्ञानं मायानिवर्तकमितिसूचितमेतामुमुक्षुणातज्ज्ञानमापाद्यमितिभावः पंचमस्कंधेसप्तदशोध्यायः॥ ॥

भा·पं· ५७

अनंतजीवराशेः स्वयोग्यतानुसारेण पूज्या हरेरनंताः प्रादुर्भावविशेषाः संतीति दर्शयितुमिलावृतवर्षभवैः पूज्यं देवं निगद्य वशिष्टवर्षसेवैः पूज्या देवताः क्रमेणाध्यायचतुष्टयेन निरूपयति । तथा चेत्यादिना । तस्य भद्रश्रवसः कुलपतयः । धर्ममयीं ज्ञानोपदेशेन सर्वजगद्धारणप्रधानभूतां । हयग्रीवा इति विधातोः हयेति अश्ववाचकं ग्रीवेति मुखं तेन सर्वमिति हृ याः सर्वज्ञात्वात् हयग्रीवेत्यशीर्षाभिधानइति हयशीर्षा । ज्ञानं दत्वा त्मानं शोधयतीत्यात्मशोधनः तस्मै । आत्मशोधनपदार्थमाह अहो इति । अयं जनो घ्रंतं स्वं मृत्युमिपरूपं पश्यत्रपि न पश्यति हि यस्मात्तस्माद्विचित्रं भगवद्विचेष्टितमहो कालात्मनो ऽन्यस्याधरितं निरालोचितपरस्परं लोकदर्शने किं कारणमिति तत्राह । ध्यायन्निति । शास्त्रेणासत्वेन गत्वे शात्वादिविषयज्ञानं ध्यायन् विकर्मपापकर्म सेवितुं यर्हि यस्मात्तस्मात्स्वापत्यानि जनयति वर्द्धते च तत्त्रयस्य पतीत्यर्थः । अत्रत्नु न सोपममाह । निहत्येति । पुत्रो मृतं पितरं नि

ग४

श्रीशुक उवाच ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षा-

ॐ२ भिधानां परमेण समाधिना सन्निधाप्येदमभिगृणंत उपधावंति भद्रश्रवस ऊचुः ॐ नमो भगवते धर्मायात्मशोधनाय नम इति । अहो विचित्रं भगवद्विचेष्टितं

घ्नंतं जनो ऽयं हि मिषन्न पश्यति । ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः १ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो

विपश्चितः । तथापि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं नतो ऽस्मि तं २

र्हृत्य दहनादि पितृमेधक्रियां कृत्वा जिजीविषुः स्वजीवनमेवेच्छन्नस्ति तत्स्मरणादन्ममापि मरणं भवेदिति बुद्धि बलाद्वितयं न पश्यति । आत्मनो मृत्युं न चिंतयति । वयं तत्र न इति । अ तत्र तव प्रसादेन मुह्यंतः करणस्य पुरुषस्य कारतलामलकवद्विश्वं प्रकाशत इति भावः । न केवलं शास्त्रतः ननमोहकस्वं किंतु कवीनामप्यतो निरतिशयमहिमत्वं च चरितं चित्रमि त्याह । वदंतीति । अनेन कवीनां परोक्षज्ञानिनां वचनमध्यात्मविदामपरोक्षज्ञानिनां दर्शनं च जगत्प्रवाहनित्यत्वे प्रमाणमुक्तं भवति । तथापि ज्ञानसामग्रीमतो ऽपि त्वदनुग्रहमंतरेण तत्र विषये मुह्यंति । अनेन मुह्यंतीत्यस्य इत्यतद्धिरहते भवति । सुविस्मितं आश्चर्ययुक्तं कृत्यं ते । मायादोषात्सम्यग्ज्ञानतया ऽनंतोसुविस्मितं यो यथा भवति तथेति क्रियाविशेषणं वा । यत एवं ज्ञानिनो ऽपि कर्तव्यं तन्मायया नजानंति अतो भवान्नेकत्वतत्तत्त्व इत्याह कृत्यविदमिति ॥ ॥

व२

श्रम
५७

इदं चाश्चर्यकं तव चरितं चित्रमित्याह विश्वेति । जगत्सर्जनादिलक्षणं कर्म त्वयैवकर्तव्यं नान्येनेति परस्त्वमेव तदभिज्ञ इत्यतो वेत्य प्रतिपादयति । विश्वेति । न तस्य कार्यं करणं च विद्यत इति श्रुतेः कार्यकरणादिरहितस्य हरेः प्रपंचनिर्माणादिकं कथं घटत इत्याशंक्य महाशक्तित्वादित्यतो वाह । विश्वेति । अपि शब्द एवार्थे हि शब्दः अकर्तुः कर्तृत्वघ टकद्योतकः हे हरे अकर्तुस्तव जगत्सर्जनादिकर्म्माङ्गीकृतमेव नेतद्भुममपाहतं वेदादिषु प्रकाशितं । इदं च विदिस्यादिवेदसिद्धं शब्दादिवत्कर्तृत्वं युक्तिविरुद्धत्वात्कथमा नांगीक्रियते तथाप्यावृत इति तत्राह । युक्तमिति । न हरेः कर्तृत्वमात्रं निषिध्यते किं त्वायासेनान्यापासेन कर्तृत्वमकर्तृत्वमिहोच्यते । महाशक्तित्वतः सर्वं युज्यते परमस्य त्विति । दृष्टादीनां वस्तुत्वस्य प्रत्यक्षतो दर्शनाद्याक्षिप्याहक प्रमाणाभावादनुपपत्यातत्त्वांगीक्रियते । अत्र नुतानि प्रत्यक्षसिद्धत्वादिदिकत्वाद्युक्तं हीत्यभिप्रायः । तथा

विश्वोद्भवस्थाननिरोधकर्म्मते ह्यकर्तुरंगीकृतमप्यपावृतः । युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुनि ३ वेदान्युगां ते तमसा तिरस्कृतान्रसातलाद्यो नृतुरंगविग्रहः । प्रत्याददे वै कवये ऽभियाचते तस्मै नमस्ते ऽवितथेहिताय ते इति ४ श्रम

पि निर्विकारस्य हरेर्मायया कर्तृत्वमंतरेणात्र लौकिककर्तृत्वांगीकरणं चित्रमिति तत्राह । न चित्रमिति । तेन दोषमल्पादत्मात्कमेव चित्रं त्वयि न चित्रं कुतो न चित्रं कार्यकारणे आ स्वधर्मलक्षणकार्यस्यापि कारणत्वात् । इतोपि नेत्याह । सर्वात्मनि सर्वस्वामिनि । ननु कार्यकारणत्वेप्युदादिवत्तद्भिन्नत्वमापन्नमिति तत्राह । व्यतिरिक्त इति । निमित्त

स३

कारणत्वेन तद्भिन्नत्वयुक्तमिति चशब्देन घ्नयति । तर्हि लोकविलक्षणं ऽन्यत्कल्प्य इति तत्राह । वस्तुनीति । धर्मायेति पदस्याभिप्रायमाह । वेदानिति । तमसा मधु नाम्ना दैत्येन तिरस्कृतानपहृतान् प्रत्याददे दृष्टो दृष्टानपुनश्च तानेव दैत्यापहृतान् दत्तवानित्यर्थः कवये ब्रह्मणे अवितथेहिताय सत्येन न भगवतः इत्यस्यार्थ उक्तः । ऐ श्वर्यादिगुणसामग्रीमतस्तस्य कर्मत्वोपपत्तेः । अशक्तास्य दृष्टो हि मायादृष्टिं वितनुत इत्यादेः ॥ ॥

भा॰ पं॰
५८

वीर्यशौर्यादयो भक्तिज्ञानवैराग्यादयो महापुरुषगुणास्तेषां भाजनं पात्रं महापुरुषगुणभाजनः । वृत्तिंगतक्लृप्तं छांदसः । ताभ्यां भजतीति वा । प्रकृष्टो ह्लादः शोभादिगुणो यस्य सत
था । दैत्यदानवकुलस्य तीर्थीकरणशीलं वा लं चरितं वृत्तं यस्य स तथा । फलकामलक्षणव्यवधानरहितश्चानन्यः अमदर्शनं क्तियोगस्तेन । सूर्यादितेजसामधिकतेजो नृ
पायतमो क्षेपमज्ञानं तमस्तं संहर । भूयिष्ठादित्यर्थं भावय विश्वस्यार्थे स्वस्त्यस्तु नृसिंहः प्रसीदतां । हे हरिवर्षजना भद्राणि बुद्धिरूपा हरिं ध्यायंतु । शिवं नित्यं सुहृन्मनो
धिया शास्त्रमननेन उपासनालक्षणध्यानेन च मनः अस्तं दृढं सकलमंगलरूपं हरिं भजतात् । नोऽस्माकं मतिरप्यधोक्षजे आविश्यतां । अहैतुकी फलाभिसंधिरहिता

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्यामः । तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदा
नवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते । इदं चोदाहरति । ॐ नमो नृसिंहाय तेजस्तेज ६२
से आविराविर्भव वज्रनखवज्रदंष्ट्र कर्माशयान्रंधय रंधय तमो ग्रस स्वाहा ॥ अभयमभयमात्मनि भूयिष्ठात् । स्वस्त्यस्तु विश्वस्य खलः प्र
सीदतां ध्यायंतु भूतानि शिवं मनो धिया मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी १ मागारदारात्मजदेहबंधुषु संगो य
दि स्याद्भगवत्प्रियेषु नः यः प्राणवृत्त्या परितुष्ट आत्मवान्सिध्यत्यदूरान्न तथेंद्रियप्रियः २

मनश्च आदेहिकविषयत्वेऽहंभावलक्षणं साधनमाह । मागारेति । गृहादिषु संगो मा भूत् । यदि संगश्चावश्यकस्तर्ह्यस्माकं भगवत्प्रियेषु स्यात् । ननु गृहादि
संगाभावे जीवनाभावेन देहपातलक्षणोऽनर्थः स्यादिति तत्राह । य इति । यः प्राणवृत्त्या प्राणधारणलक्षणजीवनस्थितिमात्रेण परितुष्टः स आत्मवान्वशी
कृतमना अदूराच्छीघ्रं सिध्यति संसारमुक्तो भवति । यथा मुक्तसंगस्तथेंद्रियप्रियो मुक्तो न स्यादित्यर्थः ॥

राम
५८

महात्मनां संगात्किं फलं स्यादत्राह । यत्संगेति । ये भगवत्प्रियास्तेषां सेवालक्षणसंगाद्धरेर्निजमौत्पत्तिकं वीर्यं माहात्म्यं वैभवं विपुलत्वं चाखिललक्षणं च यस्मिंस्तीर्थे
तत्तथा तादृशं तीर्थं वेदांतशास्त्रं मुहुर्निरंतरं संस्पृशतां श्रवणादिना स्पृशतां पुंसां मानसं विषयसंसर्गोपगतं मनोगतं महो हरति अजः । कथं श्रुतिभिः श्रवणेंद्रियद्वा
रेणांतर्गतः हृदये प्रविष्टः ततः किं । यत एवंविधं फलमतः को वै मुकुंदविक्रमं न सेवेत स्वस्त्यर्थं इति शेषः । यद्वा यस्य हरेः श्रीपादसंगाल्लब्धं यस्य तीर्थस्य निजवीर्यवै
भवं तादृशं गंगादितीर्थं मुहुः संस्पृशतां दर्शनस्पर्शनादिना सेवमानानां पुंसां मानसमंहः सोऽजो हरति हि यस्मात्तस्मान्मुकुंदस्य गृहीतवामनाद्यवतारस्य विक्र
मं त्रैलोक्यविक्रमलक्षणं चरितं कः पुरुषो न सेवेत यद्यपि बाह्यस्नानादिना हरत्येव तथांतरमंहः कथमित्यत उक्तं । अंतरिति । बहुवारं श्रोतव्यमित्यभिप्रायेणाश्रु

यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं । हरत्यजोऽहः श्रुतिभिर्गतोंतः को वै न सेवेत मुकुंदविक्रमं ३ यस्यास्ति भक्तिर्भग
वत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः । हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ४ हरिर्हि साक्षाद्भगवाञ्छरीरिणामात्मा
धा२ झषाणामिव तोयमीप्सितः । हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां ५ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधि
मूलं । हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति ६

तिभिरित्युक्तं इति । भक्तैरिंद्रियाधीनत्वेनेंद्रियाणां च स्वस्वाभिमानिदेवताधीनत्वेन तत्समादमनंतरेणाइंद्रियाणां मात्मावशत्वेन सक्तिकरणानुपपत्तिरित्याशंक्य
भगवद्भक्तादेवप्रीतिरपि तद्विनाभूतेति भावेनाह । यस्येति । व्यतिरेकेणापि हरौ भक्तिः कर्तव्येत्याह । हराविति । महतां गुणा असत्यमंगले बहिः शब्दादि
विषयेषु धावनेन सदावशिष्यते न त्वात्मसुखमित्यतो धावत इति । भगवद्भक्त्याभिमानिदेवप्रीतिमुपपादयति । हरिर्हीति । आत्मा जीवनाश्रयाः पिव्यतिरेकमा
हा हित्वेति । महांतमनाद्यनंतकालीनं हरिं हित्वा यदि स्त्रिदेहे सज्जते बहुकालं जीवति । तदा वयसा आयुषा दंपतीनां महत्त्वं न गुणतः गुणतो महत्त्वं हरिलक्षे वेत्यर्थः
। उपसंहरति । तस्मादिति । यस्माद्धरेः रजोरागादिमूलं तस्मान्नृसिंहपादं भजते स्म नृपः । संसृतिचक्रवालं संसारावृत्तिहेतुभूतं ॥

ता॰पं॰
५९

कामदेवस्वरूपेण कामदेवस्य विहितप्रद्युम्नारव्यात्मरूपेण प्रजापतेर्दुहितॄणां केतुमालवर्षपतीनां लक्ष्म्याश्च प्रियचिकीर्षया यत्नेन हर्षलक्षवत्सलतेव प्रयोजनं नान्यदिति दर्शितं। पुरुषायुषाशतवर्षसंख्यानेन पात्यहोरात्राणि तैः षट्त्रिंशल्लक्षैः परिसंख्यानेन गणनं यासां तासाम्। यथा तासां। महापुरुषो हरिस्तस्य महास्त्रं तेजसा सुदर्शनचक्रतेजसा व्यसवः गतप्राणाः। उक्तं च तच्चक्रनिर्तं सुभगांसुंदरमिंद्रियाणि रमयते इन्द्रियाणि रमयते इत्यर्थः मायामयं इच्छामयं रमा देवी भगवतो भूमु पासते इत्यन्वयः तात्पर्यं मवगंतव्यं। रतिसन्निहितारमादेवी कामांतस्थितहर्षेरूपामुपास्ते। रतिस्तु विष्णोः प्रतिमास्थानीयं कामदेवं॥ कामदेवस्थितं विष्णुं

केतुमालेस्त भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां च तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसा उद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरांते निपतंति। अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमां रमयन्निंद्रियाणि रमयते तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेता हस्सु तद्भर्तृभिरुपास्ते। इदं चोदाहरति। ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय
३० सहसे ओजसे बलाय कांताय कामाय नमस्ते उभयत्र भूयात् राम

मुपास्ते श्री रतिस्थिता कामदेवं रतिश्चापि विष्णोः प्राकृतां तनुमिति स्मृतेः। अनेन मायामयमित्यस्य प्राकृतमित्यर्थः सूच्यते। संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरहस्सु तासां सर्तृभिरुपेता। ये येसर्वविशेषा स्याचक्रकथ मसिंतानाद्विंदंतीति सर्वविशेषविदो ब्रह्मादयस्तेषां रूपं नर्मवासस्थानमात्मा देहो यस्य स तथा तस्मै। आकूतीनामभिप्रायाणां पूर्वानुभवसंस्काराणां वा चित्तीनां स्मरणकारणानां अंतःकरणविशेषाणां चेतसां बुद्धिवृत्तीनां तन्निविशेषाणां चाधिपतये। सर्वमयाय सर्वान्नमाय। उभयत्रांतर्बहिश्च भूयादनुग्रह इति शेषः॥ राम

५२

लोके विद्यमानास्त्रियो नाना व्रतैरिंद्रियस्वामिनं त्वामाराध्य त्वत्तो न्यं पतिमाशासते ते पतिं शिशून्भुवंति इत्यर्थः। त्वमनेन व्रतलक्षणाराधनेन हेतुना तासामपत्यं प्रियं धनमायूंषि चोपभोगसाधनं धनान्यायुष्यहोरात्रगमागमलक्षणानि रक्षसि। कुतस्ताः स्त्रियः पतित्वेन वृताः पुरुषा स्वास्वतंत्रास्तपालने शक्तिहीना यतो तस्मात्पतित्वं व्यावहारिकमित्यर्थः। तर्हि मुख्यपतिः क इति तत्राह। स वा इति। यः स्वयमकुतोभयः स त्वत्प्रयातुरं जनं समंततः पाति स वै स एव पतिः स्यात्। न त्वेवं तर्हि बहवः किं न स्युरिति तत्राह। एक इति। भवानिति शेषः। इतरथा बहूनां पतित्वे मिथो न्योन्यं भयं स्यात्। स्वलेश्वरत्वं इवेति शेषः। अतस्त्वमेक एव पतिरित्यर्थः। इतोपि त्वत्तात्स एव पुरुषार्थ इत्याह। न जैत्रीति। त्वात्मलाभात् परमन्यमधिकं नैव मन्यते अ

स्त्रियो व्रतैस्त्वा हृषीकेश मीश्वरं आराध्य लोके पतिमाशासतेन्यं। अनेन तासां परिपास्युपत्यं प्रियं धनायूंषि यतोस्वतंत्राः॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं। स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परं। या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा। तदेव रासीप्सितमीप्सितोर्चितो यद्भग्नयाच्ञा भगवन्प्रतप्यते॥ ॥

भाग्यवतीति शेषः। एकमेवाद्वितीयमिति श्रुतेः। इतरथैव पुरुषार्थप्राप्तिर्हेतुत्वादित्याह। येति। निरुपचरितपत्यपर्यवस्यते न वयः पादसरोरुहयोरर्हणं पूजनं नितरां कामयेत्साखिलकामलंपटः अपेक्षिताशेषपुरुषार्थ शान्निपटुतरः हेईप्सित तेष्वतस्तदर्चितमेवासीप्सितं नान्यदन्नं विशिष्टफलहेतुत्वात्। व्यतिरेकमुखेन निर्धारयति। यद्भग्नेति। अयं भाव। यत्कामोन्यपदार्थं निकरोति तस्माकलानुदयात्। प्रतप्यत इति पद्यमानत्वादिति। वशहेन पूर्वमर्चितमिदानी मर्घ्यत इत्याखर्वि प्यत इति सूचयति॥ ॥

ये

अन्यथा दार्वीकस्य तत्प्रपंचस्त्वमत्र दृष्टान्तमित्याह। मत्तः प्रायशः इति। ये ऐन्द्रियधियः इंद्रियविषयेषु धीर्येषां ते तथा शब्दादिविषयरागांधीभूतबुद्धयः। ससुरासुरादयः उग्रं तपस्तप्यंते। तेमां न विंदंति। भक्तानीष्टं फलं न विदंतीत्यतः कारणमाह। ऋत इति। भवत्पादपरायणान्मर्थं च यतेत्वच्चरणार्चनाभावः कारणं। हेत्वंतरमाह। अहमिति। अजित अहं त्वद्धृदया यतः तस्मा दितिशेषः। त्वयि हृदयं यस्याः सा तथा यस्त्वन्यादार्वीकस्तस्य मत्प्रसादः। यो यतस्तस्य नाप्नोतीति। अयंभावो यद्यज्ञातस्य याम या त्रायतइति स्वशिरसि नित्यधृतकरांबुजं त्वेवि भगवत्सु

मत्तः प्रयेये ससुरासुरादयस्तप्यंत उग्रं तप ऐंद्रियेधियः। ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोऽजित॥ स त्वं ममाप्यच्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि सात्वतां। बिभर्षि मां लक्ष्मवरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति॥ रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयन्निदं चोदाहरति। ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति। अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः। स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियं॥ ॥

जकेरेवं प्रार्थनीयमिति आशयवत्याह। सत्वमिति। यत्करांबुजं सात्वतां भक्तानामिति शेषः शिरस्यधायि येन त्वया मत्तं मम मूर्द्धन्यपि तत्कुर्विति वचः। किंच सर्वस्मान्नाथितस्त्वमा र्दविक्यमसीति द्योतयति विभर्षीति। हे वरेण्य त्वद्वक्षसि मां मां लक्ष्मचिह्नं बिभर्षि यदेतन्मायया च स्पष्टं ईहितमूहितुं कोऽपि विभुर्न कोऽपि समर्थः। मनो र्वैवस्वतस्य एकशृंगरूपः योनापर मपुरुषः इदं जगद्वशे अनयन्नीतवान्। सत्वमीश्वरः साक्षान्नारायणः आत्मा स्वामी यद्वा यआत्मा आत्मानमसमर्थः इदं जगद्वशे न मत्वर्त्तितमत्वमीश्वरोऽसमर्थो नियुणसमुद्र इति॥ ।

लोकपालादिविश्वमेश्वरवशत्वेतद्दृष्टरूपत्वं कथमस्य तारांकस्पर्द्धा हेतोरितिभावेनाह। यमिति। वशेहा विकल्पार्थे। यं त्वां हित्वा लोकपालाः पृथक् मामेमत्वमायतंते तेपि द्विपदश्चतु ष्पदइत्यादि पत्नस्रीसृपस्थास्नुचराचरमनुहरपते। कृतिदृषि विषयं तत्पातुं न शेकुरित्यन्वयः। अशक्तत्वे निमित्तमाह। मत्सरज्वरादिति। मात्सर्यात्स्यज्वरपन्नत्वादित्यर्थः। वार्तासं भावयोः किलेति वचनादिदं स्पर्द्धालक्षणं मात्सर्यसंभावनामात्रेनतु प्रख्यमाज्ञानिमित्तंदेत्या वेशनिमित्तेवेति गमयितव्यं। तदुक्तं स्पर्द्धितश्च देवाः क्वहरिणा यत्र कुत्रचित्॥ हरे रेवाज्ञया कापि देत्यावेशाद्यथापि वेति अनेनस्पर्द्धाया अन्यानिमित्तत्वेन पालननाशक्तिः स्वरूपकृतेति ज्ञातव्या। यद्यप्यस्य मूलरूपस्य हरे र्जगत्पालनशक्तिः स्वरूपभूता तथा प्यवताराणां सानसमर्थीत्याशंक्य हृद्योरपि कोपि माहात्म्यविशेषो नास्तीति भावेनाह। भवानिति। भवान्युगांतार्णवे ऊर्मिमालिनीमूह इत्याह सत्वमेवयः तस्मै जगत्प्राणगुणात्म

यं लोकपालाः किल मत्सरज्वरा हित्वा यतंतोपि पृथक् समेत्य च। पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपस्थाणु यदत्र दृश्यते। भवान्युगांतार्णव ऊर्मिमा

 लिनि क्षोणीमिमामोषधिवीरुधां निधिं। मया सहोरुक्रमतेऽज ओजसा तस्मै जगत्प्राणगुणात्मने नम इति। हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बि

भ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मंत्रमिमं चानुजपति। ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशे षणायनोपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते इति॥ ॥

नेजग्र्येष्ठः एक गुणस्वरूपाय मत्स्यापहरयेनमइत्यन्वयः। नरूपेऽग्रोरोगमनं यस्य सतथा तस्मै महासमुद्रनिवासायेत्यर्थः। सर्वसत्वगुणपराक्रमयुणा एव विशेषणं यस्य स तथा तस्मै। सत्वगुणाज्ञानानंदादिगुणा इति वा। नोपलक्षितस्थानाय अज्ञातस्वरूपाय। वर्ष्मणे भक्तामीष्टवर्षणशीलाय। प्रमाणाय सम्यक्प्रमाणं बोधनेयन्ना मर्यादाशाश्वहे तुषु सम्यक् क्रियायस्य त्वमाणमरोगता वितियादवः। वर्ष्मदेहप्रमाणयोरितिव। अनेन दिव्यतिर्यग्योनेरपि सम्यक्कृत्स्नमहात्म्यं सूचितं। भूम्ने महते महते महीयानिति क्रतिः। अवस्थानाय जगत्स्थितिहेतवे॥ ॥

भा.पं.
६१

मंत्रसूचितगुणविशिष्टत्वेन श्रीहरिःस्तौति। यद्रूपमिति। यद्रूपमेतद्धि स्वनिजमायया तत्स्वरूपेच्छयार्पितं मदाधारतया तिष्ठत्विति मायये त्युक्ता निर्वाच्या विद्या कल्पितं किं
नस्यादिति अतोर्थेति। अबाधितरूपं जरायुजादि बहुरूपेण रूपितं शश्वितं यस्ये यतीति संख्यावना क्षिपरमाणुप्रदेशेपि द्यनंताः प्राणिराशयः इति वचनात्। यद्वोपलं मनाद
यथा अद्यपि यथा हश्यते अस्रस्तथा न तिष्ठति विकारित्वात्। उद्यीरुककफलादेरन्यथा दर्शनात् नित्यवतार्वितथ्यं विभूस्त्वमित्यादिष्कतेः। अतः प्रवाहरूपेण नित्यमित्येष्ट्यमि
त्यर्थः। रूपं सन्निधानयोग्यप्रतिमाद्यानीयं इत्यर्थः। तस्मै तुभ्यं नमः इत्यन्वयः। नव्यपदेशो यस्य तदव्यपदेशं ताहशं रूपं यस्यास्तीति अव्यपदेशरूपी तस्मै। वा शून्न साग गवरत्र

यद्रूपमेतन्निजमायायार्पितमर्थस्वरूपं बहुरूपरूपितं। संख्यान यस्यास्ययथोपलंलनात्तस्मै नमस्तेव्यपदेशरूपिणे १
जरायुजं स्वेदजमंडजोद्भिज्जं चराचरं देवर्षिभूतमेदं। द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यमिधेयएकः २

पत्वादित्यर्थः। अनेन सर्वसत्त्वविशेषणतायनोपलक्षितस्यानायेति पदद्वयं विवृतं। सद्घटः सन्पट इति सदनुविद्धत्वेन प्रतीयमानत्वात्सर्वं खल्विदं ब्रह्मेति श्रुतेश्चवि
श्वस्य ब्रह्मात्मकत्वमुक्तं किं नस्यादित्याशंक्य तत्स्पष्टयति देवादिविशिष्टत्यादेः। सर्वांतर्यामि कत्वान्नुमर्वनामा हरिः स्वयं। ननु सर्वस्वरूपत्वाद्रूपत्वं तस्य चारत इति स्मृ
तेश्च। सर्वांतर्यामित्वेन तत्तत्पालप्रदत्वेन तत्तद्रूपं हरिर्निर्मितमिस्यतत्स्थीमत्वेन तत्तन्नाम त्वं हरेरित्यभिप्रेत्याह। जरायुजमिति। देवादीनां भेदोयस्मिंस्तत्तथा। इतिशत्सआदिव
वनः। अस्त्रादिनामवानेक एवेत्यनेन योदेवानां नामधा एक एवेति श्रुतिः सूच्यते। नमाव चेत्तेन मोष्ट्ये इति मंत्रावयवस्याभिप्रायः सूचित इति २

राम
६१

असंख्ययाविशेषाया वर्त्तकधर्म्मा असंख्येयानि नामानि नारायणादीनि शुक्लादीनि रूपाणि च यस्यासा तथा ताहशी आकृतिर्विग्रहो यस्य सतथा तस्मिन्नेवंविधे यस्मिन्
स्वयि दशावताराः इत्यादिके यः संख्याकविभिः कल्पिता लगस्थितिलक्षणसूत्राणायइतिशेषः। नेयं संख्या तात्त्विकीत्याह। यथेति। यथा ह्यदशावताराः इत्यादिकयासंख्यया म
वांस्त्वदृशाव्याख्यापाद्यात्पथप्रयतात्तातावेकवचनं विनीयते विशेषेणानीयते शिष्यप्रशिष्यादिरूपादिश्यप्रवर्त्यत इत्यनेन यथोहंकवयंतः कवयोन भवंति किंतु अपरोक्षं पश्यंत
इत्युक्तं भवति। नचेदं ह्यविज्ञानं संख्याप्रणयनस्य विशेषग्रहणस्य च व्यर्थत्वापातात्। तःस्वरूपज्ञानमेवांगी कर्त्तव्यं। आचार्यैरपीत्यभिप्रायेणोक्तं। तद्ज्ञानं तद्रूपमेव हीति। जीवस्य
तिरोहितं स्वरूपज्ञानं च श्रीनारायणप्रसादेनाविर्भवतीत्यभिप्रायेण तं श्रीहरिं विशिनष्टि। सांख्यनिदर्शनायसांख्यं यथार्थज्ञानं स्वरूपविषयं निदर्शयति सम्यक् ज्ञापयति

यस्मिन्नसंख्यविशेषनामरूपाकृतौ कविभिः कल्पितेयं। संख्यायया तत्त्वहशापनीयते तस्मै नमः सांख्यनिदर्शनायहि ३ इतिउत्तरेषु
त्र२ कुरुषु भगवान्यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति। इमां च परमामुपनिषदमावर्त्तय
ति। ॐ नमो भगवते मंत्रतत्त्वलिंगाय यज्ञक्रतवे महाध्वराय महापुरुषाय नमः कर्म्मशुक्लाय त्रियुगाय नमस्तइति॥ ॥

रूप्ये ४

प्रदीपयाहि वदितिसांख्यनिदर्शनतस्मै। वल्लभानंद ॐ अश्वहो ज्ञानमनाकुलं स्वरूपाण्येव जीवस्य व्यज्यंते परमात्मिभोरिति वचनात्। स्वरूपं ज्ञानमस्तीत्यत्र किं निदर्शनमि
त्यतो वा तत्स्थलमाह। सांख्येति। हरेर्ज्ञानं यथा तद्रूपमेव जीवज्ञानमित्यर्थः। सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतिः इदं च भगवत्याद्यभिप्रेतमिति ज्ञायते रत्नज्ञानं तद्रूपमेव हीति आनेन
यथा ब्रह्मज्ञानं ब्रह्मस्वरूपं तथा जीवज्ञानं जीवस्वरूपमेव। तत्र ब्रह्मज्ञानं नित्यप्रकाशितं। जीवज्ञानं स्वाहश्येन तिरोहितं श्रीहरिप्रसादेन प्रकाशितं भवतीति विशेषं हि शब्देन प्रथ
यति। उपनिषदं न रूपं र्णगोचरं मंत्रं मंत्रतत्त्वलिंगाय मंत्रतत्त्वसूचयं मंत्रार्थज्ञापकाय वा। यज्ञक्रतवे यज्ञसंकल्पविषयाय। कर्म्मणा क्रियया पराक्रमलक्षणया शुक्लाय शु
द्धाय त्रिषु युगेषु अवतारास्त्रियुगस्तस्मै॥ ॥

वन्नगोचरस्यत्वाह स्यमंत्रतत्वलिंगादिकं कथमुपपद्यतइत्याशंक्यपेक्षावद्भिर्विमृग्यरूपत्वेनपुरुषोत्तमत्वावगमात्तद्वतारत्वेनोपपद्यतइत्याह। यस्येति। काव्यकर्तृत्वे नकवयइतिनतुवेदांतवेद्यवस्तुज्ञत्वेनेत्यन्यथाप्रतीतिनिरासायविपश्चितइति। गुणेषुसत्वादिगुणकार्येषुशरीरेंद्रियादिषुनियामकत्वेनसन्निहितंयस्यतवस्वरूपं विपश्चितःकवयोमनसामथ्नायोनिषुकाष्ठेषुजातवेदसमग्निमिवमथ्नंतिआलोडयंतिविचारयंतीत्यन्वयः। शरीरादौसन्निहितश्चेत्कुतोनप्रकाशतइतितत्राह। गू ढमिति। एकोदेवःसर्वभूतेषुगूढः। वीदंत्योतिर्हृदयआहितंयदित्यादिश्रुतिः। क्रियार्थैर्यज्ञविषयैरिंद्रायस्वाहेत्यादिनामभिरीरितात्मनेप्रतिपादितस्वरूपाय। शरीरा दिषुदेश्वरसद्भावेब्रह्मादिप्रत्यक्षंचप्रमाणमित्याह। द्रव्येतिद्रव्यक्रियाहेत्वयनेशाश्चकर्तारश्चेतितथाईशशब्दःप्रत्येकमभिसंबध्यतेहेतुःकारणमयनमाश्र

यस्यस्वरूपंकवयोविपश्चितोगुणेषुदारुष्विवजातवेदसं। मथ्नंतिमथ्नामनसादिदृक्षवोगूढंक्रियार्थैर्नमईरितात्मने। द्रव्यक्रिया हेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने। तथैवतन्नातिशयात्मबुद्धिभिर्निरस्तमायाकृतयेनमोनमः राम

रःइत्यादीनामीशेःशंकरागरुडब्रह्मवायुभिर्जगत्कर्तृभूतैर्मायागुणैर्हरीच्छानुसारिभिर्वस्तुयथातथानिरीक्षितात्मनेसाक्षात्कृतस्वरूपायत्वत्प्रसादबलात्स्वात्मज्ञा त्वेवबुद्धिपाटवंवैषाम्यसीत्याहतत्वेति। तत्रतवस्वरूपेयथाशक्त्याखिलविशेषदर्शनपटुतरबुद्धिभिः। यदुच्यतेब्रह्मविवर्तवादिभिर्मायामात्रमेवदृश्यतेनतात्विकमितित न्नाह। निरस्तेति। शंकरादीनांद्रव्येशत्वं। द्रव्येशाःशंकरःप्रोक्तःक्रियेशोगरुडःस्मृतः। कारणेशस्तथाब्रह्मावायुराधारपःस्मृतइतिवाक्यसिद्धं। यथैषांवस्तुनिरीक्षणं शक्यतेतथेतिएवशब्देनान्येषामेतादृशशक्तिंनिवारयति॥ ॥

ब्रह्मादीनामपित्वत्कटाक्षलेशमंतरेणत्वद्विज्ञानादेरभावेनास्तिनिर्माणतृत्वंवसुखंतवैवेत्यभिप्रेत्याह। करोतीति। योविश्वस्यस्थित्यादिकंकरोति। ब्रह्मादयश्चयस्यतवे क्षितमीक्षितंतुज्ञातुंनेशतेसत्वादिगुणैर्व्यवहितत्वादितिशेषः। ब्रह्मादीनामपितदीक्षितज्ञानशक्त्यभावेपिलक्ष्म्याःसाक्षात्तदनुवर्तमानत्वादिप्याशंक्याह। मायेतिपराश्र यायस्यमाश्रयोयस्याःसातथामायालक्ष्मीर्धर्ममिति। अनंतत्वात्स्वरूपेणपरिच्छिन्नेति। अनुवृत्तिरपिमत्स्वाधीनाकिंतुहर्यधीनेत्यत्रदृष्टांतमाह। यथेति। अयस्कांतरत्नसन्निधा नाद्यथायोभ्रमतेवंहृततथैवमपित्वत्सन्निधानात्त्वामनुवर्ततइत्यर्थः॥ त्वत्सन्निधानात्तावेनडपायेतिद्योतनायायोनिदर्शनमितिभावः। अनेनत्वत्सन्निहितलक्ष्मीसन्नि

करोतिविश्वस्थितिसंयमोदयंयस्येप्सितंनेप्सितुमीशतेगुणाः। मायायथायोभ्रमतेयदाश्रयाग्राव्णोनमस्तेगुणकर्मसाक्षिणे। प्रमथ्यदैत्यं प्रतिवारणंमृधेयोमांरसायाजगदादिसूकरः। कृत्वाग्रदंष्ट्रेनिरगादुदन्वतःक्रीडन्निवेभःप्रणतास्मितंविभुमिति॥ ॥ इतिश्रीभागवतेम हापुराणेपंचमस्कंधेअष्टादशोध्यायः॥ ॥श्रीशुकउवाच॥ ॥किंपुरुषेवर्षेभगवंतमादिपुरुषंलक्ष्मणाग्रजंसीताभिरामंरामंतच्च रणसन्निकर्षाभिरतःपरमभागवतोहनुमान्सहकिंपुरुषैरविरतभक्तिरुपास्ते॥ ॥

धानाजडप्रकृतिःकार्येषुप्रवर्ततेतत्रेदंनिदर्शनमितिवोरूभवति। तथाचयोजना। यस्यतवाश्रयाश्रयामायाजडप्रकृतिर्भ्रमतीति। अयस्कांतस्यायश्चेष्टकत्वशक्तिरीश्व रनियंतेतिज्ञापनायपदाश्रयेति। अतएवयाग्राव्णइति। अयस्कांतस्यत्रिधायइव्यंतश्चेष्टाशक्तिप्रदत्वात्तद्वत्स्थिरत्वाद्वातत्तुल्यत्वा आयएतदेवस्फुटितं। गुणकर्मेति। चेतनाचेतना श्रयगुणकर्मणोःसाक्षिणोकर्तृत्वेनेतिशेषः। प्रतिवारणंप्रतिगजस्थानीयंनिरस्तनिवारणंतव। अग्रदंष्ट्रेदंष्ट्राग्रेजगदादिश्रीनारायणएवसूकरःजगदादिश्चयंसूकरश्चसु ष्टुकरोतीतिसुकरएवसूकरःशुभमित्यनुकारशब्दंकरोतीतिसूकरोवराहःपदेशस्यादितिपाठ्याइतिसूत्रात्शसयोरभेदः॥ ॥पंचमेत्वष्टादशः॥ ॥सीतामभिरमयतीतिसी ताभिरामस्तं॥ ॥

सा·पं·
६३

भगवत्कथाभिमुखे कस्यचित्पूज्यस्य कथामिति तत्राह स्वयं चेदं गायति। भर्त्तास्य श्रियमाणेन दिव्यर्त्तीति श्रुतिश्चिये संगृहीतानेनेति ज्ञातव्यं। आर्यस्य हरेर्लक्षणं शीलं नित्यनि
र्दोषत्वं सत्त्वं जगत्सुहृत्त्वादि व्रतं च यस्य स तथा तस्मै। विश्वस्य संभवदानायुर्वेरिराह्य नउमिनं तिब्रतं तदामिति श्रुतिः। उपाश्रिता आत्मानो जीवा यं स तथा तस्मै लोकानुग्रहा
यांगीकृतविग्रहायेति वा। उपासित उपासनायुक्तो लोको यमुद्दिश्य स तथा तस्मै। साधुरयमिति वादस्य वचनस्य निकषणाय सम्यग्विचारकाय यद्वा साधूनां वादस्य वि
वादस्य विरोधस्य निकर्षणाय परिहारकाय। अहं तं त्वां शरणं प्रपद्य इत्यन्वयः। यत्तत्त्वं स्वरूपं विशुद्धानुभवमात्रं प्रकृतिप्राकृतवैकृतसंबंधरहितं ज्ञानात्मकं ऽद्वितीयादिम
त्वं तेजसा स्वरूपसामर्थ्येन ध्वस्ता निरस्ता गुणसत्त्वाद्यवस्थितिः जाग्रदाद्यवस्था त्रयं येन स तथा तं ध्वस्ता गुणनिमित्ता तिस्रोऽवस्था येन स तथा तं वा। प्रत्यक् जीवास्तिसु

आर्ष्टिषेणेन सह गंधर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॐ नमो भगवत उत्तमश्लोकाय नमः।
आर्यलक्षणशीलव्रताय नमः॥ उपाश्रितात्मने नमः। उपासितलोकाय नमः। साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय
महाराजाय नम इति। यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थं प्रत्यक्प्रशांतं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये १ म
र्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः। कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य २

रवावस्थितं प्रशांतं प्रकृष्टसुखस्वरूपं प्रसन्नाकारं वा। सुधिया शोधनयुक्तयोपलभ्यत इति सुधियोपलंभनं प्रत्यक्पदार्थवत् प्रत्यक्त्वप्रमाणेनोपलभ्यते प्राकृतनामरूपरहितत्वा
दित्याह। अनामरूपमिति अत एव निरहं अहंकारशून्यं तं तुभ्यं श्रीरामस्य विशुद्धानुभवादिविशेषणानि कथं संगच्छंते। सीतावियोगादिना दुःखाज्ञानादिप्रदर्शनादिति तत्राह। म
र्त्येति। विभोः अस्य हरेर्मर्त्यावतारः मर्त्याकाररूपग्रहणं रक्षोवधायैव न केवलं तावन्मात्रं न भवति। किंतु मर्त्यशिक्षणं च बहुदिश्य गुरोराज्ञाकरणं शरणागतपालनमसत्
ष्टत्यागमित्यादि मर्त्यैः कर्त्तव्यमिति। एतत्कुतोऽनेन कृतमिति ज्ञायत इत्याशंक्य दशरथाज्ञाकरणं वनातियातसीतान्वेषणादिप्राप्तव्यसनः शरणागतसुग्रीवासीष्टकरण
विभीषणराज्यप्रदानादिस्यावगम्यत इत्याह। कुत इति। स्व आत्मनि स्वस्वरूपे रमतो रममाणस्य भगवतः कस्मिन्प्रतिष्ठित इति स्वमहिम्नीति श्रुतेः॥ ॥

निर ३

राम
६३

ईश्वरस्येश्वरं दुःखानुभवीत इत्युभवीवेदेश्वर इति तत्राह। नवा इति। स आत्मा इति पदद्वयेन आत्मा वा इदमेकमेवाग्र आसीदिति श्रुतिं परामृशति। वा इत्यनेन निरन्निष्ठो
निरवद्य इति श्रुतिं प्रमाणयति। हि शब्दो हेत्वर्थः। कश्मलं मुक्तलक्षणं। अपि पदेन सीतामपीत्याह। अतो लक्ष्मणानुकंपया कृतावतारस्य श्रीरामदेवस्य दुःखलेशोऽपि न
श्वरत्वाविरोधाद्भक्तिं तमेव एव तत्त्वीति जन्न केन जन्मादिकं वा नशखुरादिपापयोनि जातस्यापि तत्कि ज्ञानसद्भावे मोक्षसमुनियततया तदर्थं। यस्य सम्यग्भगवति ज्ञानं भक्तिश्च
थेवत्। निश्चितस्तस्य मोक्षस्यात्सर्वपापकृतोऽपि नु अयो ममत्वादिना दोषस्तस्त्वत्यविषयस्तत इत्यपास्तिपेत्याह। न जन्मेति। आन्याविषयस्तदाश्रितदृष्टजीवविषय इत्यर्थः। म
हतो महात्मनो मुक्तियोग्यस्य। अंग आर्ष्टिषेणांक यथा जन्मादिदोषहेतुर्न भवतीति तत्राहा ते यद्विसृष्टानिति। तिर्यक्त्वं वधियोनो विसृष्टान् जातीन्वराहादियोनेर्वानरयो

न वै स आत्मात्मवतामधीश्वरो भुंक्ते हि दुःखं भगवान्वासुदेवः। न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं वापि जहाति कर्हिचित्। न जन्म नूनं मह
तो न सौभगं न वाग्न बुद्धिर्नाकृतिस्तोषहेतुः। तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ४ सुरोऽसुरो वाप्यथ वानरो नरः
सर्वात्मना यः सुकृतज्ञमुत्तमं॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान्दिवमिति ५ राम।

नेर्निकृष्टत्वद्योतनाय वनौकस इति। एतदेवाह। अपि पदेन गर्हितत्वं वाचितं। बत शब्देन कृपाशीलत्वमेव प्रयोजनमित्याह। अतः पुरुषार्थी सद्भक्तिज्ञानार्थी श्रीराममेव भ
जेदित्याह। सुरासुरेति। यो मुमुक्षुः स पुरुषः श्रीराममेव भजेदित्यन्वयः। असुरादिजातेर्मत्वादिदोषसंभवेन रामभजनं कथं संभाव्यत इति चेत्तत्र पुरुषो
ऽपि असुरजातिविषयत्वाद्योग्यस्य न ज्ञात्वेषितस्तस्माद्वाद्योमममत्वादिना दोषस्तस्त्वन्यविषयः स्मृत इति स्मृतेः। श्रीमहादेवानाममसुरत्वमेकमिति श्रुतेर्मुक्तियोग्यानाम
सुरजातित्वमस्तीति ज्ञायत इत्युपपत्तिश्च यायोगानामसुर इति। ननु तमो योग्यजातीस्तिष्टायते ति। न केवलं मूलरूपस्यैव भोक्तृत्वादावत्वशक्तिरपि त्ववतारसुपस्याप्यद्वीत्याशये
नाह। य इति। उत्तरान् कोशलान् अयोध्यावासिनां दिवं वैकुंठं ५

भा

दि·

सा॰ पं॰
६४

उपशमोधिकस्तगवतिष्ठा उपरमो मनआदीन्द्रियनिग्रहः स पश्चात्तामेवमपेक्षितमिति निरदर्शयितुं न तु स्वस्य नित्यनिगृहीतेंद्रियत्वात् आत्मनः स्वरूपस्योपलंभो नित्या परोऽनात्मा यस्य स तथा। सांख्ययोगाभ्यां यथार्थज्ञानतत्साधनाभ्यां भगवतो हरेरनुभावस्य माहात्म्यस्योपवर्णनं प्रतिपादनं यस्मिंस्तं ग्रंथं तस्मै च सर्वं। सावर्णेर्मनोः। उपसरत्युपास्ते। उपशान्तात्माय निरहंकृते देहादिधर्माय। आत्मारामाणामधिपतये। सर्गादिषु कर्तापि देववद्यो न बध्यते। देहगतोपि दैहिकैर्देहसंबंधिभिः शोकादिभिः यो न हन्यते न पीड्यते। द्रष्टुर्यस्य दृग्गुणैर्दर्शनाद्यर्थत्वरूपादिभिः न दूष्यते। दर्शननिमित्तपापेन न संबध्यते। तस्मै नमः। अत्र हेतुगर्भं विशेषणमाह। असक्तेति। असंगत्वाद्विविक्तत्वात्साक्षित्वाच्च

भारतेपि वर्षे भगवान्नरनारायणाख्यः आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपया तपोऽव्यक्तगतिश्चरति
तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोप
सरति इदं चाभिगृणाति। ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम
इति गायति चेदं॥ ॥ कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः। द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे १ इदं हि यो
गेश्वर योगनैपुणं हिरण्यगर्भो भगवाञ्जगाद यत्। यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुःकलेवरं २ यथैहिकामुष्मिककामलंपटः सुतेषु
दारेषु धनेषु चिंतयन्। शंकेत विद्वान्कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलं ३

देहनाशे दोषाभाव इत्यर्थः। बहुजन्मार्जितधर्मादुपायपारंपर्यमिदमित्याह। इदं हीति। हिरण्यगर्भो योगनैपुणं योगपारंपर्यमिदमेव जगाद। इदं किं तत्राह यदिति। निर्गुणे त्व
यि अंतकाले मनो निधाय दुष्कलेवरमुज्झतीति यत्तदिदमिति भावः। यस्य संपन्नभगवति ज्ञानभक्तिलक्षणे वैराग्ये दिवाक्यमत्रापि प्रमाणमित्याह। यत एवं सर्वमनित्यं
तस्माद्विदुषा देहस्यागादौ शंकात्यजनं कार्यमित्याह। यथेति। यथैहिकामुष्मिककामलंपटोऽज्ञो मूढः सुतादीनाशं विचिंतयन्नु शंकेत भयं प्राप्नोति सुतादयो नाशं गमिष्यंतीति
तथा विद्वानपि यदि कुशरीरस्य नाशाच्छंकेत तर्हि तस्य यः आत्मश्रवणादौ प्रयत्नः स केवलं श्रम एव न किंचित्फलमित्यर्थः। अतो न शंकितव्यमित्यर्थः॥

राम
६४

यतस्तद्दुःखहीनमेवमफलं अतश्चेत्तत्रस्तु यदहंननकं उपायमस्मभ्यं देहीत्याह। तन्न इति। योगं ज्ञानं ध्यानं उपायं वा येन योगेन अहंममतां संभूतेदोषस्य सुदृढं परिपंथित्वात्तत्रा
शः प्रार्थ्यते। तदुक्तं। योऽममत्वादिना दोषः सत्वस्य विषयः स्मृत इति। इदानीमस्मिन् भारतवर्षे पर्वततत्रस्रवा तत्र नदीः प्राधान्येन वक्ति। भारत इति। आत्मना कायेनांतरेण उपस्पृ
शंति। आचमनस्नानस्पर्शनमिति शेषः। पुण्यपापाङ्गं नं च सत्वादिगुणैः क्रियते। तत्फलश्रुताः स्वर्गादिगतयोपीत्याह। अस्मिन्नेवेति। शुक्ललोहितकृष्णवर्णेन सात्विकराजसता

तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्मायया हं मम तामधोक्षज। भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावितमिति। भारतेप्यस्मिन्वर्षे सरिच्छैलाः
संति बहवः मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिः ऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमानृक्षगि
रिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलः गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतशः सहस्रशः शैलास्तेषां नितंबप्रभवा नदा
नद्यश्च संत्यसंख्याताः एतासामपो भारत्यः प्रजाः नामभिरेव पुनंतीनामात्मना चोपस्पृशंति। चंद्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी
पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी सुरसा नर्मदा चर्मण्वती अंधः शोणश्च नदौ वेदस्मृतिः ऋषिकुल्या त्रिसामा
कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोधस्वती सप्तवती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वे
ति महानद्यः अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मनः आनुपूर्व्येण सर्वा ह्येव स
र्वेषां विधीयंते यथावर्णं विधानमपवर्गश्चापि भवति॥ ॥

मसेनेदत्तिन्नेन स्वारब्धेन स्वफलदानायोपक्रांतेन स्वर्गादिगतय आनुपूर्व्येण पर्यायेणात्मनः परमात्मनः प्रेरणया सर्वेषां विधीयंते यथावर्णविधानं वर्णाश्रमविहितानुसारेण
। ननु भारतीनां प्रजानां यदि त्रिगतयः तर्हि निजानंदाविर्भावलक्षणो मोक्षो दुर्लभः किमिति तत्राह। अपवर्गश्चेति। न केवलं स्वर्गादिगतयोपि तु संसारदुःखनिवार
णसमर्थो मोक्षश्चेति चशब्दार्थः॥ अपिशब्दः॥ ॥

यदा महतां पुरुषाणां श्रीनारायणपरायणानां संगतिस्तदा योसौ भगवत्यनन्यनिमित्तभक्तियोगलक्षण उपायो भवतीत्यन्वयः। नत्वन्यत् ऐश्वर्यादिप्राप्तिनिमित्तं यस्य सोन
न्यनिमित्तः तादृशो भक्तियोगलक्षणः। तस्मात्स्वरूपानंदाविर्भावलक्षणो मोक्षो भवतीति ज्ञातव्यं। केन प्रकारेणेति तदुच्यते। नानागतीति। पूर्वोक्तानां नानागतीनां निमित्त
हेतुभूता या अविद्याग्रंथिस्तस्या रंधनद्वारेण दहनप्रकारेण स भक्तियोगोप्यवप्रकारेणोत्पादनीय इति दर्शयति। सर्वभूतात्मनि भूतसर्वविश्वत्सर्वं जगदेतर्या यिति आना
त्म्यजीवधर्मरहिते अनिरुक्ते वेदैरपि सर्वात्मना निर्वक्तुमशक्ये अनिलयने अनन्याधारे। परापररूपामाधीर्यद्यातेपरमात्मसुक्तामिषाम प्यानेद्दानादिकर्तृरिक्षितामाह। वासुदे
वेति। अवताररूपाणामपि मुक्तिदानसामर्थ्यमस्तीति द्योतयितुं वा वासुदेव इति। हिशब्दोनंतरुत्पन्नो सत्संगतिः प्रयोजिकेति दर्शयति। तत्त्वा मुक्तिर्भवतीत्येतद्देवा गायंतीति। विद्वांस

योसौ भगवति सर्वभूतात्मन्यनात्म्ये निरुक्ते निलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि
महापुरुषसंगतिः। एतदेव हि देवा गायंति। अहो बतैषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः। यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवौपयिकं स्पृहा हि न
ः। किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना। न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवात् २ कल्पायुषां स्थानजयात्पु
नर्भवात् क्षणायुषां भारतभूजयो वरः। क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः ३

ः एषामिति षष्ठी तृतीयार्था। किं शोभनं कर्म। उत स्वित्। किं भारताजिरे भारतवर्षांगणे मुकुंदसेवाया औपयिकं जन्म लब्धं येषां यस्मात् स्पृहा अस्माकमिति। अभिलाषमनेन। किं द्युजयेन स्व
र्गजयेन। यत्र स्वर्गे श्रीनारायणपादपद्मस्मृतिः प्रमुष्टा कृतः। अतिशयेंद्रियोत्सवात् विषयसंभोगात्। स्वर्गस्थानां कर्मिणां तु हि स्वर्गे उद्यवनं। न देवानां स्वर्गेषां सतत हरिस्मरण
स्यप्रमाणमपि दूरत्वात्। भारतलघुजन्मनामपि पुनर्जन्मसंभवात् कथं भारतभूजयो वर इति प्रश्नस्तदुत्तिं तत्राह। क्षणेनेति। मनस्विनः क्षणकालेन मर्त्येन नश्वरेण देहेन कृतं
कर्म हरौ संन्यस्य हरेरभयं पुनर्जन्मभयरहितं पदं संयांतीति यस्मादिति शेषः। कल्पायुषामित्यनेन महरादिलोकस्थानां संप्रति कल्पायुषो विबुधा यदमंत इति भावः ३

महरादिलोके विशिष्टभोगसंभवात् कथं नीची क्रियते भारतखंडादिति तत्राह। न यत्रेति। यत्र महर्लोकादिषु तदाश्रयाः श्रीनारायणचरणसरसिजस्मरणजनकाः साधवो रागद्वेषा
दिदोषलेशशून्या भागवता न सुलभा यथेह। अतएव वैकुंठकथामृतापगा अपि न तत्र। अतएव विष्णुविषया यज्ञा न संति। तैः प्राप्यफलाभावात्। पूर्णवार्षिककर्मिलोका गात्सर्वे न गच्छंत्वात्
त्वेनावसराभावात्। यियसू सी भावाद्वेध्यायंती वदेव मनुष्या इति श्रुतेः। सुरेशस्यापि लोको महरादिः सेव्यतां न याति। प्राप्यफलांतरत्वेनेति शेषः। इतोपि भारतं पुण्यप्रदेत्र
माजुरित्याह। प्राप्ता इति। इह भारते ये जंतवः प्राणिमात्रनामानो पुनर्भवाय मोक्षाय न यतेरन् ते भूयो वनौका इव निरयवासिन एव नवैषां पुनरुत्थितिरित्याह। यांतीति। बंधनं पुन
रंको विद्यादिज्ञाने वाधिकाने इत्यस्य विधाने। ये च इह जातिं पुरुषत्वेन ज्ञानेन प्राप्ता नातिः सामान्यजन्मनोरित्यभिधानां मुक्तये न यतेरन् अत्युत्तरो भूयो वनौका महानमस्या

न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः। न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न याति सेव्यतां ४ प्राप्ता नृजातिं त्वि
ह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां। न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनं ५ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं
विधिमंत्रवस्तुतः। एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ६

न योग्याः एषः शब्दवदोक्तः शब्दोप्यकारांतः। नानार्थेषु शब्दानामनेकांतत्वेन पाठात्।। बर्हिर्वा शैवनपुंसकद्व्यादिषु। ये वत्स नयश्तिधातोर्ज्ञानकर्मयोग्यविषजातिं प्राप्ता
भेदतेतोपि भूयो वनौका अशेषसाधनत्वेन भारतस्य उत्तमत्वमितरत्वे इत्यायतो ऋक्रियमाणं कर्म यज्ञादिलक्षणं श्रीहरिप्रीतिजनकमतः कुर्वंतीत्याह। यैरिति। भारतवासि
भिर्यैः श्रद्धया बर्हिषि यज्ञे निरुप्तं [illegible] विराशिषां प्रभुरेकः स्वयं मुदा गृह्णाति। कथं निरुप्तं विधिमंत्रवस्तुतो भागशः इदं इंद्राय निर्वपामि प्रजापतये निर्वपामीति इष्टं यज्ञैः इदंइं
। इंद्रयजाग्नियेजेति इष्टं गिष्टं विधिमंत्राणां इंद्रादिविषयत्वेन सिद्धत्वात् कथमेको हरिर्गृह्णातीत्युच्यते इति तत्राह। नामभिरिति। इंद्रादिनामभिरवाहूतो विग्रहत्वादिवत्सा
मग्यफलापर्ह्निनेत्याह। पूर्ण इति। कुतः आशिषां प्रभुत्वात् ६

नकेवलं हविरादायत्त्वही मानेहरिः फलंवप्रयच्छतीत्याहु रित्याह। सत्यमिति। अर्थितो हरिस्तेषांयाचितं तस्मरणं अर्थितं स्वर्गादिकं दिशतीतिसंसेपथेनप्रतिजानते प्राप्तस्व
र्गैरर्थितोपिपुनः फलंनैवदिशतीतिश्वं वसस्य। अर्थिनो मदो सवतीतियत्। अथा मसौमपित्यादेश तस्मात्पुनरर्थितं प्रार्थितं प्राप्यपुनः प्रार्थयमानस्यप्रार्थितो न दिशतीति
अमदइतियदिनिवा॥ तर्हिततत्प्राप्तानां स्वर्गादिकमेव दिशतिनमोक्षमित्याशंक्यमाभूदित्याहुरित्याह। स्वयमिति। इच्छया विधानं यस्मात्तदिच्छा विधानं अरीहृदंनिजपादपल्लवं
सजतांफलमनिच्छतांसंकिमंतरेणतेषांस्वयं आत्मानं विधत्ते ददाति। स्वाशिषितमाहुरित्याह। यद्यत्रेति। यत्र यस्मिन् सारते वर्षे हरिर्द्विजपादपद्मं सजतां शमुखं तनो

सत्यंदिशत्यर्थितमर्थितोनृणां नैवार्थितोयत्पुनरर्थितोमदः। स्वयंविधत्ते भजतामनिच्छतामिच्छाविधानंनिजपादपल्लवं ॥ ७ ॥ यद्यत्रनः स्वर्गसु
खावशेषितं स्विष्टस्यदत्तस्यकृतस्यशोभनम्। तेनाजनाभेस्मृतिमज्जन्मनःस्याद्वर्षेहरिर्यद्भजतांशंतनोति ॥ ८ ॥ श्रीशुक उ॰ जंबूद्वीपस्यचराजन्नुपद्वीपा
नष्टौहैकउपदिशंति। सगरात्मजैरश्वान्वेषणइमांमहींपरितोनिखनद्भिरुपकल्पिताः। तद्यथास्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनोरमणकोमंदा
हरिणः पांचजन्यः सिंहलोलंकेति। एवंतवभारतोत्तमजंबूद्वीपवर्षविभागोयथोपदेशमुपवर्णितः ॥ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभुव
नकोशेजंबूद्वीपवर्णनंएकोनविंशोध्यायः ॥ राम

तीतियस्मात्रः स्विष्टादेः स्वर्गसुखावशेषितंस्वर्गसुखमनुभूयावशिष्टं यच्छोभनं तेनपुण्येनमनोभाकमजनाभस्मृतिमज्जन्मस्यादितिप्रार्थयामहेतद्दुक्तं। जनपिका
शितो देवास्वर्गस्थानारतोद्भवं तच्छेत्यात्मविमोक्षार्थमुद्देकार्थेपिकारिणइतिदेवैर्गीतमिदमितिज्ञायते। अनेनशास्त्रतात्पर्यार्थोविनिस्संदिग्धइतिबोद्धव्यं। एकइतिविशेषणं
द्विशेषविवक्षोवोष्टावुपद्वीपानुपदिशंति। सामान्यविवक्षयवस्तान्समुद्रैकदेशानिति ॥ इतिपंचमेएकोनविंशः

प्लक्षादिद्वीपप्रमाणादिज्ञानेनश्रीनारायणमाहात्म्यमेवज्ञाप्यते स्थितश्चायोप्रमाणमियत्ताप्रमाणंतेनयत्ताममर्यादाशास्त्रहेतुश्चितियादवः। लक्षणमेताव द्विरिसरिद्गाइत्तोस
स्थानंचवर्तुलत्वचतुरस्रत्वादिस्वरूपप्रकारः। तावताविस्तारेणलक्षयोजनप्रमाणेन। ततोजंबूद्वीपात्लक्षाख्येनबहिःस्थितेनतत्त्वदृष्टांतोयथेतियज्ञद्वीपेप्लक्षउस्थितः अतोप्लक्षःजंबूप्रमाण
द्वीपाख्यातिकत्वेजंबूप्रमाणीकरोति। अग्निसप्तप्रयोजनोज्वालाहृदइतिवा। यत्रेन्पुत्ररत्रापिसवध्यतेश्रीहरिमितिशेषः। आकलय्यदत्वा। अतिज्ञाताः प्रधानाश्चसिंधुशैलाःमर्यादागिर
यः। विबुधोपममंदर्शनंप्रजननेसुरतवलंवयोवानेतथा। सूर्यात्मानंसूर्यस्वरूपंप्रत्नस्यपुरातनस्यविष्णोर्यारंत्रस्यहरेर्यद्रूपंप्रतिमास्थानीयांयत्रसप्तर्षैस्त्रप्रवाचिककायिकसुकृ

कषिरुवाच ॥ ॥अतःपरंप्लक्षादिद्वीपानांप्रमाणलक्षणसंस्थानतोवर्षविभागउपवर्ण्यते। जंबूद्वीपोयंयावान्विस्तारतस्तावताक्षारोदधिनापरिवेष्टितोयथा
मेरुर्जंबूवाख्येनलवणोदधिरपितितोद्विगुणविशालेनप्लक्षाख्येनपरिक्षिप्तोयथापरिखाबाह्योपवनेन। प्लक्षोजंबूप्रमाणोद्वीपाख्यातिकरोहिरण्मयःप्लक्षउस्थितोयत्र
अग्निरुपास्तेसप्तजिह्वःतस्याधिपतिःप्रियव्रतात्मजःइध्मजिह्वःस्वंद्वीपंसप्तवर्षाणिविभज्यसप्तवर्षनामभ्यआत्मजेभ्यआकलय्यस्वयमात्मयोगेनोप
रराम। शिवंयवसंसुभद्रंशांतंक्षेममममृतमभयमितिवर्षाणितेषुगिरयोनद्यश्चसप्तैवाभिज्ञाताः। मणिकूटोवज्रकूटइंद्रसेनोज्योतिष्मान्सुपर्णोहिरण्यष्ठीवो
मेघमालइतिसेतुशैलाः। अरुणानृम्णाआंगिरसीसावित्रीसुप्रभाताऋतंभरासत्यंभरेतिमहानद्यः। यासांजलोपस्पर्शनविधूतरजस्तमसोहंसपतंग
ऊर्ध्वायनसत्यांगसंज्ञाश्चत्वारोवर्णाः सहस्रायुषोविबुधोपमसंदर्शनप्रजननाःस्वर्गद्वारंत्रय्याविद्ययाभगवंतंत्रयीमयंसूर्यमात्मानंयजंते। प्रत्नस्यविष्णोरूप
यत्सत्यस्यर्तस्यब्रह्मणः। अमृतस्यचमृत्योश्चसूर्यमात्मानमीमहीति। प्लक्षादिषुपंचसुपुरुषाणामायुरिंद्रियमोजःसहोबलंबुद्धिर्विक्रमइतिचसर्वेषामौत्पत्ति
सिद्धिरविशेषेणवर्तते ॥ ॥

तेप्रक्षस्यब्रह्मणोविरिंचस्यरूपंसन्निधाननिमित्तंयद्वाऋतस्यामरस्यसहस्यमृत्योर्मारकस्यमहेश्वरस्यरूपंएवंत्रिमूर्तिनिवासयोग्यंतंसूर्यमात्मानमीमहिशरणंप्राप्नुम इति
मंत्रार्थः। ननुसूर्यांतःस्थितंहरिंशरणंप्रपद्यामहइतिव्याख्यानंकिंप्रमाणकंप्रतीतार्थपरित्यागस्यास्यार्थांगीकारस्यप्रमाणसापेक्षत्वादितीयमाशंकासूर्यस्थमाधिवारी
रविधात्रयुष्माकंमेप्लक्षादिद्वीपस्याक्षस्थितंहरिमुपासतइत्यनेनपरिहर्तव्येति ॥ ॥

परिक्षिप्तेन वर्तुलेन तेपि तत्सर्वद्वीपसमुद्रेषु तुल्यं ज्ञेयं। यत्र शाल्मली समुत्पन्ना स द्वीपः शाल्मलः तन्नाम्ना यो मेत्यनेन शाल्मल्याः परिमाणं सम्यङ् न ज्ञातं स्यादित्यतः साक्ष्यं येति। सुपर्णोसि गरुत्मानित्यादि छंदोभिर्निर्दिदः श्रूयत इति छंदस्कृतः। शुक्लकृष्णपक्षौ रूपतयोः पक्षयोरपि स्वगोभिः सुधा तत्कृतोः पितृदेवानुद्दिश्य सोमलक्षणं मे धोत्रविसर्जनाज्जांचंद्रो

त्मकमस्मा नेनेक्षुरसोदेनावृतो यथा तथा द्वीपो शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृतेन यत्र हवै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतः छंदस्स्तुतः पतत्रिराजस्य सा द्वीपहूतये उपलक्ष्यते। तद्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत। सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमविज्ञातमिति। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृंगो वामदेवः कुंदो मुकुंदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति। तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते। स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः। प्रजानां सर्वासां राजान्धः सोमो न आस्त्विति। एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तंबो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत। वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः। तेषां वर्षेषु सीमागिरयो

अ२ नद्यश्चाभिज्ञाताः सप्त सप्तैव बभ्रुश्चतुःशृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविंदा श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति। यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवंतं जातवेदस्वरूपिणं कर्मकौशलेन यजंते॥ ॥

तर्यामी सर्वासां प्रजानां नो स्माकं च राजा रंजको स्त्विति प्रजानां नोस्माकं विभजन् पित्रादिभ्यः सोमं विभजन् राजा नः सोमं सुखमस्त्विति वा संख्यया कुशद्वीपसमानेनं यथा पूर्वः शाल्मलः सुरोदेनावृतस्तथा। स्वशष्पाणां निजबालतृणानां तेजसा॥ ॥

राम
६७

हे जातवेदः सर्वज्ञ त्वं साक्षात् परस्य ब्रह्मणः श्रीनारायणस्यार्थे हव्यवाडसि। हव्यवहनाद्धविषो नेतासि। तथा पुरुषशब्दवाच्यस्य हरेरंगभूतानां देवानां च हव्यवाडसि। अतस्त्वमस्मत्संनिहितो भूत्वा यज्ञलक्षणेन कर्मणा पुरुषं यज्ञनामानं श्रीहरिं यजेत्यन्वयः। आत्मानमिति शेषः। क्षीरोदेनमंडोदेनमंडोदेरूपेणैव चान्यासंज्ञी रसागरे। गुहः स्कंदस्तेन मुक्ता शक्तिस्तया मथितः पीडितो नितंबो मध्यं कुंजा लतादिपिहितो दरा यस्य

परस्य ब्रह्मणः साक्षाज्जातवेदोसि हव्यवाट्। देवानां पुरुषांगानां यज्ञेन पुरुषं यजेति। तथा बहिः क्रौंचद्वीपः कुशद्वीपात् द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते। योसौ गुहप्रहरणोन्मथितनितंबकुंजोपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम॥ आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्द्धमानो भोजन उपबर्हणो नंदो नंदनः सर्वतोभद्र इति। अभया अमृतौघा आर्यका दा तीर्थवती रूपवती पवित्रवती शुक्लेति। यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते॥ आपः पुरुषवीर्याः स्थ पुनंतीर्भूर्भुवः सुवः। ता नः पुनीतामीवघ्नीः स्पृशतात्मना भुव इति॥ ॥

तरा गिरिविशेषा मिथुनानां क्रीडायोग्यास्तथा। क्षीरोदेनमंडोदेनाभिषिच्यमानः। रिक्थादान् दायादान् पुत्रानित्यर्थः। अम्मयं जलाधिदेवतं देवं क्रीडादिगुणसंपन्नं। तरा गिरिविशेषा ... आपः पुरुषवीर्याः श्रीनारायणस्य रेतोभूताः आपो नारा इति प्रोक्ता आपो वै नरसूनवः इति स्मृतेः। भूर्भुवः सुवः पदैस्त्रैलोक्यमपि पुनंतीः पुनंत्यः याश्चामीवघ्नीः पापहराः

तवेशु तीर्थमुदितं ... आत्मना देहेनं चांतरेण चं स्पृशेत तता आपः पुनीयुः पुनंत्वित्यन्वयः॥ ॥

भा. पं.
६८

दधिमंडोदेन आनाम्नं तु दधिक्षीरसंज्ञं तथा दधीत्यत्र धानात् क्षीरोदार्धं दधिमंडोदश इः। आत्मकेतुभिः आत्मस्वरूपैः प्राणादिभिर्निजैर्देवैः। दधिमंडोदात् क्षीरोदात्।
ज्वलनशिखावदमलानां कनकपत्राणामयुतं यस्य तत्तथा। अर्वाचीनपराचीनयोर्बाह्याभ्यंतरप्रदेशस्थितयोर्वर्षयोर्मानसोत्तरपर्वतस्य। अहर्निशं नास्ति सूर्यस्य एकचक्रस्य देवानां

२५ एवं पुरस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमंडोदेन परीत उपक्लृप्तः। यस्मिन् शाको नाम महीरुहः स्वक्षेत्र
व्यपदेशको यस्य हि महासुरभिगंधस्तं द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान्पु
रोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधायाधिपतीन्स्वयं भगवत्यनंत आवेशितमतिस्तपोवनं प्रविवेश। तेषु वर्षमर्यादागिरयो
नद्यश्च सप्त सप्तैव। ईशान उरुशृंगो बलभद्रः शतकेशरः सहस्रस्रोतो देवपालो महानस इति। अनघायुर्दा उभयस्पृष्टिरपराजिता पंचपदी सहस्रश्रुतिर्नि
जधृतिरिति। तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायामविधुतरजस्तमसः परमसमाधिना यजंते। अंतः प्रविश्य भूतानि
यो बिभर्त्यात्मकेतुभिः। अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटमिति। एवमेव दधिमंडोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः समाने २४
न स्वादूदकेन समुद्रेण बहिरावृतः यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितं। तद्द्वीपमध्ये मान
सोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिंद्रादीनां यदुपरिष्टात्सू
र्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ
वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते।। ।।

ते।। आराः संवत्सराः पंच नेम्यः षड्ऋतवः स्मृताः।। इति मत्स्यपुराणे चक्रस्य संवत्सरात्मकत्वमुक्तं। त्रिनाभिचक्रमजरमनर्वं पंचारे चक्र इत्यादि च।। ।। ।। ।।

राम
६८

अकर्मकेण ध्यानलक्षणेन कर्मणा ध्यानस्य चित्तनिरोधलक्षणकर्मसाध्यत्वात्तत्फलाभिसंधिरहितेन वा। हे भगवन् यत्तव लिंगं सर्वलक्षणसंपन्नं स्वरूपं कर्मणा यज्ञलक्षणेन मी
यते ज्ञायत इति कर्ममयं वेदरूपमिति पाद्येषु प्रधानं वा। ब्रह्मा वा चतुर्मुखो लिंगं प्रतिमा यस्य तत्तथा। जनो वैतिकं प्रतेदेन विरिंचात्सर्वं जगत्सर्वं लक्षणेन एकांते नियमेन अद्वैतं स्वगत
भेदवर्जितं पतत्तस्मै भगवते नमस्करोमि इति मंत्रार्थः। विरिंचस्य यत्न त्रिंगं शरीरं प्रणवकर्मनिर्मितं ब्रह्मणो हरेर्लिंगविशेषसन्निधानयोग्यं। एकांतमवसानेन प्रलये केवलं निष्पा
र। एके मुख्या अन्ये केवला इत्यभिधानं।। अद्वैतं मुक्तोप्ससारे चक्री नारायणमत्स्येदेनप्रवर्त्तमानेनाज्ञामिविक्षुपाराः स्यामित्याद्यनुसंधानं चवनात्। मुख्या हेतं किं न स्यादत आह। सेदेनेति।
विरिंचपरमात्मनेदिष्टेन जनः पूजयति तस्मै भगवते पूज्याय विरिंचाय नम इति वा। ततः परस्ताद्बहिः। मानसोत्तरमेर्वोः पर्वतयोरंतरमंतराले स्थलं यावद्योजनं षोडशलक्षाधिकद
शकोटिप्रमितमस्ति तावती भूमिः कांचनी। ततो हिरण्मयी भूमिरित्यन्यत्र प्रसिद्धिः। ततो हेममयी भूमिः दशकोटियोजनानि। देवानां क्रीडनार्था यलोकालोकस्ततः पर

तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेण कर्मणाराधयंतीदं चोदाहरंति। यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोऽर्चयेत्। एकांतमद्वैतं तस्मै भगवते नमः इति। ततः
परस्ताल्लोकालोकनामाचलः लोकालोकयोरंतराले परित उपक्षिप्तः। यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः कांचन्यादर्शतलोपमा। यस्यां प्रहितः पदार्थो न कथंचित्पुनः
प्रत्युपलभ्यते। तस्मात्सर्वसत्त्वपरिहृतासीत्। लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यांतरवर्तिनावस्थाप्यत इति। स लोकत्रयांते परित ईश्वरेण विहितः
यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीन् लोकानावितन्वाना न कदाचित्पराचीना भवितुमुत्सहंते तावदुन्नहनायामः।। ।।

इति। षण्णवतिलक्षमितिकेचित्। आदर्शतलोपमा स्वच्छतलसदृशी देवत दनुगच्छति। रिक्तसर्वसत्त्वपरिहृता द्विगुणा कांचनी भूमिः सर्वसत्त्वविवर्जिता तत्र प्रवेशेः प्रकाशात्कांच
न्याभूमेर्द्विगुणत्वे हेतुत्वेदेवान् प्रस्तुयते। न पुनः संख्याया द्विगुणत्वं यथांतरविरोधात्। लोकालोक इति समाख्या। सम्यगाख्या अर्थतः संज्ञा तत्कथमिति तदाह। यदिति। अनेनाचले
न लोकस्यालोकस्य व्यापते विविच्यस्थाप्यते। अंतर्वर्तिना लोकालोकयोर्मध्यवर्तिनेति यत्नस्मादिति शेषः। असौ लोकाचल इति। स लोकत्रलोकाचलो लोकत्रयांते लोकत्रयस्यांत
रं मर्यादास्थित्यर्थं परित उपक्षिप्तः। केन परमेश्वरेण। अथवा लोकत्रयांते लोकत्रयावसाने। किंच लोकत्रयं यथा जनत एकपंचाशल्लक्षतया यावत् तावानयं वा द्विरस्त्वेव सार्द्धपंचाशल्ल
क्ष इति शेषः। तावदुन्नहनायाम इति वक्तव्यं। आयामक्कथंचिदेकतावानिति ज्ञातव्यं। स एव वा शास्त्रेह प्रश्न इति वचनात्। ध्रुवोपवर्गं अंते येषां ते ध्रुवापवर्गास्तेषां। पराचीना ऊपरिवर्त्ती

२

ऋषिः ॥ ॥ ॥

भा·प·
६७

एतावान्लोकविन्यासः। देवमनुष्यादिव्यवहारयोग्यलोकइत्युच्यमानप्रदेशस्यस्वरूपस्थितिपरिमाणमेतावत्। सार्द्धत्रिकोटियोजनात्मकं। सलोकविन्यासश्चपंचाशत्कोटियुणितस्य पंचाशत्कोटिविस्तारयोजनात्मकस्यभूगोलकस्यब्रह्मांडलक्षणस्यतुरीयभागेनचतुर्थांशत्वेनतिष्ठति। ब्रह्मांडप्रदेशचतुर्द्धाविभक्तेएकाशःसर्वस्मादंतिविद्यमानोघनोदकाख्यः। द्वितीयस्तंतआस्यांतरोधंतमआख्यः तृतीयोलोकालोकाचलाख्यः। चतुर्थकांचनीभूमिमारभ्यमेरुपर्यंतप्रदेशः। अयंचतुर्भागोलोकशब्दितः। अयंचयावल्लोकालोकः यत्रलोकालोकाचलस्तिष्ठति तावत्पर्यंतत्वेनविद्यतेयोंतर्विस्तारःलोकालोकचलाद्यल्लोकपरिमाणंसार्द्धत्रिकोटियोजनात्मकं। एतेनपरिमाणानालोकपरिमाणंव्याख्या

एतावाँल्लोकविन्यासोमानलक्षणसंस्थाभिर्विचिंतितःकविभिःसतुपंचाशत्कोटिगुणितस्यभूगोलकस्यतुरीयभागोयंलोकालोकाचलस्तदुपरिष्टाच्च स्वयंभुवःश्वात्मयोनिनाखिलजगद्गुरुणाभिनिवेशितायेद्विरदपतयःऋषभःपुष्करचूडोवामनोपराजितइति। सकललोकस्थितिहेतवस्तेषांस्वविभूतीनांमहेंद्रादीनांलोकपालानांविविधवीर्योपबृंहणायभगवान्महाविभूतिपतिस्तर्यात्मविशुद्धसत्वधर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणःविष्वक्सेनादिभिःपार्षदप्रवरैःपरिवारितोनिजवरायुधोपशोभितैर्भुजदंडैःसंधारयमाणस्तस्मिन्गिरिवरेसमंतात्सकललोकस्वस्तयआस्तेआकल्पमेवंभगवानात्मयोगमाययाविरचितविविधलोकयात्रागोपीथायायथोंतर्विस्तारएतेनह्यलोकपरिमाणंव्याख्यातं। यत्तद्बहिर्लोकालोकाचलात्ततःपरस्ताद्योगेश्वरगतिंविशुद्धामुदाहरंति॥ अंडमध्यगतःसूर्योद्यावाभूम्योर्यदंतरं। सूर्यांडगोलयोर्मध्येकोट्यःस्युःपंचविंशतिः॥ ॥

राम
६७

तंसवति। लोकालोकाचलाद्बहिस्थलेतस्यालोकशब्दवाच्यस्यलोकपरिमाणेनव्याख्यातमित्यर्थः। योगेश्वराणामष्टाणिमादिसिद्धानांगतिमुदाहरंति। पंचाशत्कोटिगुणितोब्रह्मांडकटाहइत्युक्तंतस्यदशदिगपेक्षयामध्यप्रदेशःकियानितितत्राह। अंडेति। द्यावापृथिव्योर्यदंतरंमंतरिक्षंतस्मिन्यत्रस्थितःसूर्यःअंडमध्यगतःअंतरिक्षप्रदेशेयत्रसूर्यमंडलसंचारः। सोंडमध्यप्रदेशःसर्वदिगपेक्षयासूर्यांडगोलयोर्मध्येसर्वदिक्ष्वपिसंभूयपंचविंशतिकोटियोजनानिस्युरित्यर्थः॥ ॥

एषसूर्यएतस्मिन्मृतेजीवरहितेअचेतनइवावदंडेऽत्रस्वेतनवस्यांडमध्येवर्ततेइतियत्तस्मान्मार्तंडइतिव्यपदेशः। यद्यथाहिरण्यांडसंभवोविरिंचोहिरण्यगर्भइत्युच्यतेतथैतिमत्रिधाध्यत्वात्तदंतर्यामित्वाद्वासूर्यस्तेनहिरण्यादिगादयोविभज्यंते। यदतःसूर्यःआत्मास्त्रीनारायणःसर्वेषांदृष्टिरितिकथितः॥ ॥पंचमस्कंधविंशोध्यायः॥ ॥चतुर्भिःसार्कनवतिंवनामपिश्रुकंनक्षत्रंस्तीर्वीवियतःसीषास्याद्यातःपवतेरीवादेतिसूर्यइत्यादिकृतेरवंडस्वामिनोहरेरालयाख्याधिकारेषुप्रवर्त्तमानानामिष्टदेवतात्वेनलोकेनिर्णीयमानानांतस्यैवविशेषनिवासस्थानानांसूर्यादीनांस्वरूपज्ञानमपिभगवत्तत्त्वज्ञानोपयोगीत्यतिप्रायेणतन्निरूपयत्यस्मिन्नध्याये॥ तत्रातीताध्यायार्थानुवादमुखेनैतमध्यायमवतारयति। ए

टि॰ मृतेंडएषएतस्मिन्यदभूत्ततोमार्तंडइतिव्यपदेशः। हिरण्यगर्भइतियद्धिरण्यांडसमुद्भवः। सूर्येणहिविभज्यंतेदिशःखंद्यौर्महीतथा। स्वर्गापवर्गनरकरसौकांसिचसर्वशः। देवतिर्यङ्मनुष्याणांसरीसृपसवीरुधां। सर्वजीवनिकायानांसूर्यआत्मादृगीश्वरः॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेद्वीपसमुद्रवर्षपरिमाणलक्षणंविंशोध्यायः॥ ॥श्रुकउवाच॥ ॥एतावानेवभूवलयस्यसंनिवेशःप्रमाणलक्षणतश्चव्याख्यातः। एतेनहिदिवोमंडलमानंतद्विदउपदिशंति। यथाद्विदलनिष्पावादीनांतेअंतरेणांतरिक्षंतदुभयसंधितंयन्मध्यगतोभगवांस्तपतांपतिस्तपनआतपेनत्रिलोकींप्रतपत्यवभासयत्यात्मभासा। सएषउदगयनदक्षिणायनवैषुवसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषुयथासवनमभिपद्यमानोमकरादिषुराशिष्वहोरात्राणिदीर्घह्रस्वसमानानिविधत्ते। यदामेषतुलयोर्वर्ततेतदाहोरात्राणिसमानानिभवंति॥ ॥

पं२

तावानितिभूवलयस्यलोकालोकात्मकस्यसन्निवेशःविस्तारविशेषः। द्विदलनिष्पावादीनांनिष्पावराजमाषद्विदलानांसर्वप्रकारेणपरिमाणतःसमत्वमेवंभूवलयस्यसर्वस्यपरिमाणतःसमत्वमेवंयस्यांतरिक्षस्यमध्यगतस्तदंतरिक्षंतयोर्भूविद्युष्टिथ्योरंतरेणमध्यउपसंधितंस्थापितंआत्मनःपरमात्मनोभासा। यदादित्यगतंतेजइत्यादेः। एषसूर्यउदगयनमुत्तरायणंतत्संज्ञयागत्यारोहणसंज्ञेषुमकरादिमिथुनांतेषुराशिषुयथासवनंतत्क्रमकरादिमासकालमनतिक्रम्यतन्नसंज्ञेयोदयमभिपद्यमानोदक्षिणायनसंज्ञयागत्यावरोहणसंज्ञेषुकर्कटादिधनुःपर्यंतेषुराशिषुतत्कर्कटादिमासकालमनतिक्रम्यतत्रसूर्योदयमभिपद्यमानस्तथावैषुवसंज्ञयागत्यासमवस्थानेतुलयोर्मेषतुलयोरेषाप्तत्रक्रमात्पूर्वदयंप्राप्नुवन्नहोरात्राणिदीर्घह्रस्वसमानानिकरोति॥ ॥

तुल्यं दिवसमाहुः। वर्द्धमाना न्यहानि भवंति।

सा.प.
७०

एतदेव विविच्य दर्शयति यदेति। वृषभादिकन्यांतेषु वृद्धिह्रासस्थलत्वतः। तो किं यंता वितितत्राह। मासीति। वर्द्धते ह्रसति चेति शेषः। अत्र वृद्धिह्रासयोरेकैकाघटिकेति नियमो नास्ति कि
न्तु राशिवृद्धि दर्शनात् तर्हि सूक्ष्मत्वं नाम प्रवृद्धि ह्रासो स्पातमिति नेत्याह। तुल्यं दिवसमिति। त्रिंशन्मुहूर्त्तमेव दिवसमाहुरित्यर्थः। कथं तुल्यतेति तत्राह। वर्द्धमानानीति। वर्द्धमानान्यहा
नि भवंति। तावती ह्यावत्या वर्द्धमाना रात्रयश्च संज्ञीयमानाः। क्रमेणाथ्या मासः मुहूर्त्त्यघटिका सिरिक्रीकृत्य त्रिंशन्मुहूर्त्तान्यहोरात्राणि समानानि भवंति। वृश्चिकादिषु मीनांतेषु अहो
रात्राणि विपरीतानि अह्ला निह्रसंति रात्रयो वर्द्धते मकरादिषु वृश्चिकादिषु मेषतुलयोर्स्थितेषु कथितं संग्रहाह। यावदिति। आश्रवात्राव ह्रस्व वहो वृहसंवदविवह परावह परिवहना
मानः सप्तवायवा ज्योतिश्चक्रस्य प्रवर्त्तका स्तत्रस्याति चक्रा थियस्या दित्यगमनस्पति प्रावीथ्यामध्यमोत्तरादक्षिणा वेति। तदुक्तं। सर्वग्रहाणां त्रीण्यवस्थानानि द्विजसत्तमाः। स्था
नं जारद्गवं मध्यं तथैरावत मुत्तरं। वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्वतः इति। तत्र वीथी नवमेकैकं त्रिधा निद्यते। अश्विन्यादिनक्षत्राणां त्रिभिस्त्रिभिर्नागवीथी गजवीथ्यैराव
तीवीथी त्युत्तरमार्गे वीथीत्रयं। आर्षभी गोवीथी जरद्गवी वीति वृषवत मध्यमार्गी वीथीत्रयं। अजवीथी मृगवीथी वैश्वानरी वेति दक्षिणमार्गे वीथीत्रयं। एतद्वा पुराणे कथितं। अश्विनी

यदा वृषभादिषु पंचसु राशिषु वर्त्तते तदा ह्यान्येव वर्द्धते ह्रसंति च रात्रयः। मासि मास्येकैका घटिका तावती स्तु संज्ञीयमानाः समुहूर्त्त्य समान्यहोरात्राणि त्रिंशन्मु
हूर्त्तान्येव भवंति। यदा वृश्चिकादिषु पंचसु वर्त्तते तदाहोरात्राणि विपरीतानि भवंति। यावद्दक्षिणायनमहानि वर्द्धते ह्रसंति च रात्रयः। यावदुत्तरायणमह्नानि ह्रसंति रात्र
यो विवर्द्धते।।॥

कृत्तिकायाम्याना गवीथी त्युदाहृता। रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते। पुष्याश्लेषा तथा दित्या वीथी चैरावती मता। एतास्तु वायव स्निग्धा उत्तरो मार्ग उच्यते। तथा द्वे चापि फल्गु
न्यौ मघा चैवार्षभी मता। हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दिता। ज्येष्ठा विशाखा त्वनुराधा वीथी जारद्गवी मता। एतास्तु वीथयः स्निग्धा मध्यमो मार्ग उच्यते। मूलाषाढोत्तराषाढा अ
जवीथ्यभिशब्दिता। श्रवणं च धनिष्ठा च मार्गी शतभिषक्तथा। वैश्वानरी भाद्रपदे रेवती चेति कीर्तिता। एतास्तु वीथयः स्निग्धा दक्षिणो मार्ग उच्यते इति याम्या भरणी। आदित्या अदि
तिदेवताकापुनर्वसुः। मार्गी मृगवीथी। तत्र वयुगारूको टिसंवद्धवायुपाशद्रूपस्य ध्रुवेणाकर्षणं यदा तदा संतरमंडलगमनापरयनी ड्स्यारोहणं वायुपाशशैथिल्ये बहिर्मंडलग
मनार्थमवरोहणं। आकृष्यते यदा तौ तु ध्रुवेण समधिष्ठितो। तदा संतरतः सूर्यो भ्रमते मंडलानि तु। ध्रुवेण मुच्यमानेन पुनारश्मियुगेन तु। तथैव बाह्यतः सूर्यो भ्रमते मंडलानि वै इति। तत्रा
द्धवीथ्यां गतस्य शीघ्रगतित्वात् दिनक्षयो रात्रिवृद्धिश्च। अभ्यंतरवीथ्या गतस्य मंदगतित्वात् रात्रिक्षयो दिनवृद्धिश्च। मध्यवीथ्यां गतस्य समानगतित्वात् अहोरात्रसाम्यमित्यादि विशेषस्तु कालवि
शेषवेदिभिरवगम्यत इति। तदधिकारित्वादस्माभिरत्र यत्नो न क्रियत इति।।।

राम
७०

इदानीमेकाहोरात्रेण तस्य मार्गसंख्यामाह। पंचमिति। एवं त्रिविधगतिभिः त्रिविधराशिषु वर्त्तमानस्यादित्यस्य रथचक्रस्यैकस्मिन्नहोरात्रे मानसोत्तरशिखरे पर्यावर्त्तमानेन परितो गमनेन तस्य मार्ग
मेकपंचाशल्लक्षाधिकनवकोटय इति। अथ दिशं तितन्मार्गज्ञा इति शेषः। तस्मिन्मानसोत्तरपर्वते पूर्वस्मान्मेरोः पूर्वदिक्सूत्रनिपाते दक्षिणतश्चादिष्वेवसौम्या सौम्य विद्यमाना नानापु
रीश्चतस्रो हरेश्चादित्यस्य या निगमना सुदयादिसंज्ञा निस्युः। समयविशेषेण मंकेतविशेषण न नहि सर्वदा संवत्सरतउदयादिकमस्ति मेरोश्चतुर्दिशं स्थिता नो भूतानां प्रवृत्ति निवृत्ति निमित्ता
नि तत्रोदयमध्याह्नं प्रवृत्तिनिमित्ते अस्तंगमनं निवृत्तिनिमित्तं निशीथगति रक्षा संहरमाणानां सप्तभिः वृत्ति निमित्तभूता निशीथमर्द्धरात्रे तत्रत्यानामिलावृतवर्षनिवासिनां सर्वे

एवं नवकोटय एकपंचाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्त्तमानस्याख्यादिशंति। तस्मिन्नैंद्रीपुरी मेरोः पूर्वस्मादेवधानी नाम दक्षिणतो याम्या संयमिनी
नाम पश्चाद्वारुणी निम्लोचनी नामोत्तरतः सौम्या विभावरी नाम। तासूदयमध्याह्नास्तमयनिशीथानीति। भूतानां प्रवृत्ति निवृत्तिनिमित्तानि समयविशेषेण मेरो
श्चतुर्दिशं तत्रस्थानां दिवसमध्यंगत एवादित्यस्तपति। सव्येनाचलं दक्षिणेन करोति यत्रोदेति तस्य समानसूत्रनिपाते निम्लोचति। यत्र क्वचन स्पंदते तस्य हैव समानसू
त्रनिपाते प्रस्वापयति। तत्र गतं न पश्यंति ये तं समनुपश्येरन्। राम

स्वा॰

नावन्नमचलस्य मेरुनाम्नो वामपार्श्वतो गच्छन्नचलं दक्षिणेन स्वस्य दक्षिणः सर्वदा करोति। सर्वेषां द्वीपवर्षाणां मेरुरुत्तर इति न्यायेन सर्वेषां स्वस्यापि मेरोः पूर्वाभिमुखत्वात्। म
विगच्छन्स्वयेनेव गच्छत्यादित्य इत्यर्थः।। न नियतमेनोपरिवृह्यतेवा। यत्रोदेति तस्यामानसूत्रनिपाते पश्चिमभागे निम्लोचति। दक्षिणायने किंचित्किंचिद्दक्षिणभागोदयमेति किंचित्कि
चिद्दक्षिणभागे पश्चिमे निम्लोचति। एवमुत्तरायणे किंचित्किंचिदुत्तरत उदयनिम्लोचौ याति। एवमुद्यात्रादित्य उदयप्रदेशसूत्रनिपातं विहाय यत्र क्वापि निस्पंदते न चलति तस्योदयस्य सम
नसूत्रनिपाते विना वैरी पुरिहारिस्थितो जनान् प्रस्वापयतीति द्विताकरोति। अथ तत्रैव गच्छायाविद्धितत्र विलासवर्थी गतं न पश्यति जनरूपस्तुपदेशः।। ॥४॥ ॥

सार्द्धद्वादशलक्षाणि साधिकानीति पंचविंशतिसहस्राधिकानि सार्द्धद्वादशलक्षाणीत्यर्थः। देवधान्या निर्गत्य संयमनीं प्रवेष्टुं पंचदशघटिकाभिः कालावयवैः पादोनाष्टत्रिंश
ल्लक्षोत्तरकोटिद्वयमतिक्रम्य प्रविशति तपनः। एवं चतुर्गुणितान्येतानि योजनानि सैकपंचाशल्लक्षोनकोटिसंख्यानीति सञ्ज्ञात्य नाड्यान्तं यस्य रविरथस्यैकमेव चक्रं द्वादश
मासास्तिस्मानि देवतानि मन्यमाना द्वादशारा यस्य तत्तथा। षड्ऋतुनि मानि देवताभिमन्यमाना षण्नेमयो यस्य तत्तथा। चातुर्मास्यास्तिस्मानि देवतास्ति मन्यमानास्त्रिनाभयो य

यदा चैंद्र्याः पुर्याः प्रत्त्रिचलति पंचदशभिर्घटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति। एवं ततो वा
रुणीं सौम्यामैंद्रीं च पुनस्तथान्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यंति सह वा निम्लोचंति। एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनानि
अष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्त्तते पुरीषु। यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिनाभि संवत्सरात्मकं समामनंति॥ तस्याक्षो मेरोर्मू
र्द्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयंत्रचक्रवन्मानसोत्तरगिरौ परिभ्रमति॥ ॥

स्य तत्तथा। स्वयं संवत्सरात्मिमानि देवतानि मन्यमाने तस्य रथस्याक्रमणं सार्द्धकोटिद्वयं सप्तलक्षाधिकं। सार्द्धकोटिद्वयं प्रोक्तं सप्तलक्षाधिकं तथा। रथाक्षस्य रवेर्मेरोर्मा
नसोत्तरवह्निनिष्ठति॥ यत्रेतरभागे रविरथचक्रं प्रोतं यः सूर्यरथाक्षः स क्रोशान्तेकृतागो मेरुमूर्द्धनि प्रोतकृतागः॥ ॥

तस्मिन्दीर्घाक्षे चक्रप्रोतैकभागस्तस्मिन्दीर्घे चक्रप्रोतदेशे कृतमूलः कीलितः षष्ठभागरूरीयमानेन सम्मितः दीर्घाक्षचतुर्थभागसमानः द्वितीयाक्षोऽस्ति स तु ध्रुवलोके तेनोपरिभाग
ः रथनीडः सूर्यस्य पीठस्थानीयः तुरीयभागविशालो नवलक्षविस्तारः। तावान्रविरथयुग इति षड्त्रिंशल्लक्ष तद्दीर्घाक्षसमानः। प्रकृते तसंबधातातारहस्य परामर्शः प्रमाणं त
र्हस्त्वाद्य। अक्षप्रमाणमुक्तयोः प्रमाणं तु युगार्द्धयोः। द्वयोस्तस्य युगार्द्धेन ध्रुवाधारोऽक्षस्य वा निति। अक्षप्रमाणं दीर्घत्वमक्षयोः परिमाणमुक्तयोर्युगार्द्धयोर्युगं चतर्द्धे
वयुगार्द्धेन योर्युगार्द्धयोय चाक्रमं प्रमाणं युगस्यांतरत्नागोऽक्षकं धेनिवेशितः। द्वितीयो भागस्तु क्रावद्धानादवलंबमानो वायुपाशेन बद्धः। युगार्द्धस्त्वक्षकं धान्निर्गा तयुगा

तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुरीयमानेन सम्मितस्तैलयंत्राक्षवद्ध्रुवे कृतोपरिभागः। रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावा
न्रविरथयुगो यत्र हयाश्छंदोनामानः सप्तारुणयोजिता वहंति देवमादित्यं। पुरस्तात्सवितुररुणः पश्चान्नियुक्तः सौत्ये कर्मणि किलास्ते॥ तथा वालखिल्या
ऋषयोंऽगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवंति॥ तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैक
शो गणाः सप्त चैकैकशो रथस्था मासि मासि भगवंतं सूर्यमात्मानं नानानामानं पृथङ्नामानः पृथक्कर्मभिर्द्वादश उपासते। लक्षोत्तरं सार्द्धनवकोटियोजनप
रिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुंक्ते॥ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रानुवर्णने एकविंशोऽध्यायः॥ ॥

ग्रे कीलितः चक्रप्रोतदीर्घाक्षकीलितापरभागः। तत्र रथस्य योद्धृत्वात्स्वस्थैव कीलितः। तेन युगार्द्धेन सह ध्रुवाधारो भवति। उत्तानपादपुत्रलोके वायुपाशेन बद्धं इत्यर्थः। अ
त्र स्थिरसाधारणमर्थो गम्यते। सप्ताश्वरूपच्छंदांसि वहंतेवाम तेऽधुरा चक्रपद्धति बध्नाति चक्रे वारुः समाहित इति। रविरथनीडविशालसमान इति केचित्। तत्र सरुणो
पि ज्ञानातिईषादंडपरिमाणमपि तदनुसारेणाह्वरुणी पांयुगमध्यनिर्गताप ईषादंडः। सवितुः पुरस्ताद्रथानां पश्चात्पृष्ठे। ग्रामण्यः सज्ज्ञाणाः ग्रामाधिपे तद्गुणा चग्रा
मणीः परिकीर्त्तित इति यादवः॥ ॥ इति श्रीभागवते पंचमस्कंधे एकविंशः॥ ॥

उक्ते चाध्यायसंगतिः। राशीनां प्रचलनमपि प्रदक्षिणमतइत्ययत्नस्यादेतस्यादित्यस्य राशीनामभिमुखप्रचलनमप्रदक्षिणगमनेन घटते। तदनुपपन्नं भगवता तदभिमुखप्रचलनमुप
वर्णितं। यस्मात्तस्मादमुष्यादित्यस्याभिमुखतयागमनस्य राशीनां प्रचलनस्याविप्राथं कथमनुमीमहि। युक्तिपूर्वकं बुध्यामह इति। प्रदक्षिणेन भ्रमता कुलालचक्रेण सह
प्रदक्षिणीक्रियमाणा अपि तद्गताः पिपीलिकादयो यथा स्वप्रयत्नसाध्यगत्या विपरीतं गच्छन्त्येवं प्रदक्षिणेन भ्रमता ज्योतिश्चक्रेण सह प्रदक्षिणीक्रियमाणोऽपि सविता स्व

राजोवाच ॥ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलनं भगवतोपवर्णितं। अमुष्य वयं क
थमनुमिमीमहीति। स होवाच शुकः। यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमान
त्वात्। एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणतः परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यै
व। नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात्। स एष भगवानादिपुरुषः साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभि
रपि वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यथोपजोषमृतुगुणान् विदधाति। तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचार
नुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ॥ ॥

गत्या पूर्वापरीभावतया शीघ्रमन्दमध्यभेदेन राशीनामभिमुखं चलतीत्यभिप्रायः। तारपादय इत्यादि संक्षिप्ततो गच्छन्तीत्येके दिवं प्रतिबिम्बवत्। वसन्तादिष्वृतुषु क्रियमा
णानां कर्मणां विशुद्धिनिमित्तं तदर्पणत्वेन विशेषः। कविभिः भूतभविष्यद्दर्शिभिः। ब्रह्मादिभिर्यथोपजोषं यथाक्रमं। द्वादशधा विभक्तेः कारणमाह। तमेतमिति। वर्णा
श्रमाचारमनुपथं तिष्ठन्तु गच्छन्तीति वर्णाश्रमाचारानुपथाः। पथ्यगता विविधाः। योगवितानैरीश्वरार्पणबुद्धिलक्षणैः पायविस्तरैः। आम्नाये वेदे आम्नातैः प्रतिपादितैः ॥ ॥

अथ स इति तत्तद्रूपेण सूर्यान्तर्यामी नारायण एव परामृश्यते। प्रकृतत्वात्। लोकानामात्मेत्युक्तेश्च अत्र च शब्दान्नारायणाधिष्ठानभूतः सूर्यो द्यावापृथिव्योरन्तरेण मध्ये स्थितस्य नभो
वलयस्य मध्यवर्ती कालचक्रगतः। भुक्तिं दर्शनं। राशीनां संज्ञा येषां मासानां तेते तथा तान्मेषवृषादीनित्यर्थः। संवत्सरस्य द्वादशांशा मासा इति ज्ञापनाय संवत्सरावयवानिति विशे
षणं। पक्षद्वयमित्यनेन मासपरिमाणं। सपादर्क्षद्वयमित्यनेन नक्षत्रनिमित्तमासपरिमाणं तिथ्यात्मकालांशलोकत्वे कल्पनेनोक्तं। कृत्तिकापादयुक्ताश्विनी भरण्योर्मेष इत्या
दिक्रमेण बोद्धव्यं। पक्षद्वयात्मकालभोगेन सहस्रपादर्क्षद्वयात्मकालस्य भुज्यमानत्वाद् उत्तयं वयुज्यत इत्यर्थः। संवत्सरस्य षष्ठमंशं मासद्वयं यावता कालेन नभोवीथ्यां अर्द्धेन

अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादश मासान् भुङ्क्ते। तानेव राशिसंज्ञान् संवत्सरावयवान् मासान् पक्षद्वयं सपाद
र्क्षद्वयमुपदिशन्ति। यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः। अथ च यावतार्द्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते। अथ च या
वन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमानगतिभिः समा
मनन्ति। एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुत
तरगमनो भुङ्क्ते। अथ चापूर्यमाणाभिरुपक्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं
नक्षत्रं त्रिंशता मुहूर्तैर्भुङ्क्ते ॥ ॥

प्रचरति तं कालमयनमाहुः। दक्षिणायनमुत्तरायणं च उत्तरायणे मन्दगतिर्दक्षिणायने त्वरिता गतिर्विषुवति समाना गतिरिति। द्यावापृ
थिव्योर्मण्डलाभ्यां सह नभोमण्डलं प्रचलति। तं कालं संवत्सरादिपञ्चकेन सूर्यस्य मन्दादिगतिभेदादाहुरिति। तत्र हार इति शेषः। अर्कस्य संवत्सरभुक्तिं द्वादशराशिप्राप्तिं पक्षाभ्यां भुङ्क्ते
कस्मसंज्ञस्य भुङ्क्ते मासभुक्तिं सपादर्क्षाभ्यां सक्तिकाश्विनी भरणीभ्यामित्यादिक्रमेण प्राप्नोति। पक्षभुक्तिमेकनक्षत्रसंमितां दिनेनैव भुङ्क्ते इत्यर्थः। अत्र हेतुमाह। अग्रचा
रीति। नक्षत्राणामग्रणी। त्वमग्रचारी। सर्वजीवराशिरेव प्रकुः। जीवन्त्यनेन धारकश्च दिनेन पक्षभुक्तिमप्यश्रयति॥ एकमिति। त्रिंशन्मुहूर्तैस्त्रिंशद्भिर्मुहूर्तैः ॥ ॥

सर्वजीवनिवहप्राणरंजकस्य इष्यति इ देवेति। उपजीव्यप्रधानत्वात्सर्वमय इत्यर्थः। कालायनेतादर्थ्ये सप्तमी। कालं ज्ञापनार्थमीश्वरनियुक्तानि। कालचक्र इति वा। अभिजिदुत्त
राषाढश्रवणयोः संयोगः अश्विनीरेवत्योः संधिरिति केचित्। यस्याशनस्य स्थितिद्वारेण वृष्टिविष्टंभग्रहोंगारकः तस्योपशांतिकृत्॥ शुभग्रहसंयोगे शुभसूचकोन्यथाघश

य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयंति। तत उ
परिष्टात् द्विलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते। पुर
तः पश्चात्सहैव वार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति। लोकानां नित्यदानुकूल एव प्रायेण वर्षयंस्तद्द्वारेणानुमीयते। स वृष्टिविष्टंभग्रहोपशमनः।
उशनसा बुधोऽपि व्याख्यातः। तत उपरिष्टात् द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रायानावृ
ष्ट्यादिभयमाशंसते॥ तत ऊर्ध्वमंगारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन्द्वादशानुभुंक्ते। यदि न वक्रेणाभिवर्तते। प्रायेणा
शुभग्रहो घशंसः। तत उपरिष्टाद्द्विलक्षयोजनांतरगतो भगवान्बृहस्पतिरेकैकस्मिन्राशौ परिवत्सरं चरति। यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्म
णकुलस्य॥ ॥तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्मासान्विलंबमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः। प्रायेण हि
सर्वेषामशांतिकरः। तत उत्तरस्मादृषय एकादशलक्षयोजनांतर उपलभ्यंते। य एव लोकानां शमनुभावयंतो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमंति॥ अथ तस्मा
त्परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्विष्णोः परमं पदमभिवदंति॥ यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः
सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते॥ तस्येहानुभाव उपवर्णितः॥ ॥

सद्दुःखसूचक इत्यतः प्रायेणाशुभग्रह इति। तावद्भिस्त्रिंशद्भिरनुवत्सरैः सर्वराशीनेकवत्सरं पर्येति। राशिषु विलंब्य संचरणात् शनैश्चर इति नाम प्रायेणोक्तादेशे शुभकरत्वात् ध्रु
वेण समकालं सायुज्यभाग्भिः उपास्ते श्रीहरिमिति शेषः॥

अनिमिषेणोन्मीलितलोचनेनाक्रमणपशवः परिवर्तमाना बलीवर्दाः मेढीस्तंभे नवद्धास्तंभमभितो भ्रमंत इत्यर्थः। त्रिभिः सवनैः शीघ्रमांद्यसमसंचारैर्यथास्थाने विहिता रन्ध्यान नक्षत्रवि
चरंति ध्रुवं मंडलानि मध्ये स्थित्वा परितः स्थानानि आदिशब्दगृहीतास्तारकाः। केचिदुत्सांतर्योगेन केचिद्बहिर्योगेन संचरंतीत्यर्थः। आवहादिशब्दवाच्येन वायुनोदीर्यमाणाः प्रेर्यमाणा
ः। ननु ते निरालंबाः कथं न पतंतीति तत्राह। यथेति। अयनादिलक्षणं कर्मैव सारथिर्येषां ते तथा। ओमसन्निकृष्टगाढसंस्कारो वा अदृष्टं वा। स्त्रीपुरुषसंयोगेनानुगृहीता इत्यादि

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते। यथा मेढीस्तं
ग ३ भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मंडलानि चरंति॥ एवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलंब्य वायुनो
म दीर्यमाणा आकल्पांतं परितः क्रमंति। नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तंते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मि
तगतयो भुवि न पतंति। केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति। यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव
उपकल्पितस्तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपा
र्श्वे तु नक्षत्राण्युपकल्पयंति दक्षिणायनानि तु सव्ये। यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति पृष्ठे त्वजवीथी आका
शगंगा चोदरतः। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपू व ३
ना र्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववंक्रिषु युंजीत। तथैव मृगशीर्षादीन्यु
दगयनानि दक्षिणपार्श्ववंक्रिषु प्रातिलोम्येन प्रयुंजीत। शतभिषाज्येष्ठे स्कंधयोर्दक्षिणवामयोर्न्यसेत्। उत्तरहनावगस्तिः अधरहनौ यमो मुखेष्वंगारकः। शनैश्चर उ ह ३
पस्थे बृहस्पतिः ककुदि। वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः।
एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषा

तैर्नभःसंचरणहेतुभूतैः कर्मभिर्निर्मितगतित्वात्। शिशुमारसंस्थानस्य शिशुमारावयवोपेतस्य योगबलेन धारणाक्रियायां स्थितिमनुवर्णयंति। कुंडलीभूतदे याभिधीमहीति॥ ॥
हस्य वक्रीकृतशरीरस्य पुच्छाग्र उपकल्पितो ध्रुवः। पुच्छाग्रव्यतिरिक्ते पुच्छे लांगूलेषु पुच्छमध्य इत्यर्थः। यान्युदगयनानीत्यादेर्विभागो मघादीनि इत्यादिना प्रातिलोम्येन पूर्वोत्तरभागस्य
मृगशीर्षादीनीति। अनिमिषा देवास्तेषां नाथाय [illegible]नानिमिषिति

शिंशुमाररूपग्रहणप्रयोजनमाह। एतदिति। मंत्रकृतोऽनुपतेत्न नमस्यतो नमस्कारं कुर्वतः शुंसइति शेषः। प्रातरादित्रिकालंकृतंपापंस्वयंसद्यात्मनानश्यतइत्यन्वयः। वाइत्यनेननारा
यणोनामनरोनृणामित्यादिवाक्यंप्रमाणयति॥ ॥पंचमेद्वाविंशः॥ ॥अथावशिष्टान्तलादिलोकनिवासिनोमेर्व्यैश्रीनारायणमाहात्म्यव्यंजकमितितदिहनिरूपयति। त
त्रादौशनैश्चरपर्यंतानांग्रहाणांस्थितिर्निरूपिता। राहोःस्थितिःकिमितिननिरूपितेतित्वरितमतेकेचिदस्याशंकांपरिहरंतोनिरूप्यसूर्यादीनांमंडलपरिमाणंनिरूपयति। अधस्तादि
ति। एकेपौराणिकाःस्वर्भानुर्नक्षत्रवत्भोमध्यमंडलेमेरुंपरितःप्रादक्षिण्येनवर्ततइतिवदंति। केचिन्माहात्म्यिकामानसोत्तरबहिर्भूतप्रांतभूलेशगत्यमस्तुदेत्यपुनःपश्चिमतोगेभ्
मावेवास्तमित्यपातालविवरमध्यएवपूर्वदिशंगत्वामानसोत्तरबहिःप्रांतभूमेरेवपूर्वस्यांदिश्युदेत्यपश्चिमस्यांदिशिभूमावेवास्तमेतीत्येवंसंगिरंते। अतएवकदाचित्स

महर्क्षताराभयमाधिदैविकंरूपंहरेर्मंत्रकृतत्रिकाले॥ नमस्यतस्स्मरतोनश्यतेवैस्वयंत्रिकालेकृतमाशुपापं॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कं
धेज्योतिश्चक्रशिंशुमारवक्रवर्णनंद्वाविंशोध्यायः॥ ॥श्रीशुकउवाच॥ ॥अधस्तात्सवितुर्योजनायुतेस्वर्भानुर्नक्षत्रवच्चरतीत्येके॥ योसावमरत्वंग्रहत्वं
चालभतभगवदनुकंपयास्वयमसुरापसदःसैंहिकेयोह्यतदर्हः॥ तस्यतातजन्मकर्माणिचोपरिष्टाद्वक्ष्यामः। यददस्तरणेर्मंडलंप्रतपतस्तद्विस्तार
तोयोजनायुतमाचक्षतेद्वादशसहस्रंसोमस्यत्रयोदशसहस्रंराहोर्यःपर्वणितद्व्यवधानकृद्वैरानुबंधःसूर्याचंद्रमसावभिधावति॥ ॥

तालग्रहणमभूदितिवर्णयंते। अपरेमेरोरप्रादक्षिण्येननक्षत्रवलयेचरन्पश्चिमतउदेत्यपूर्वस्यांदिश्यस्तंगच्छतीत्याचक्षते। अतदर्हः अमरत्वायोग्यः॥ तरणिमंडलंदशसह
स्रयोजनविस्तृतंततोद्विगुणंसोममंडलंविंशतिसहस्रयोजनविस्तृतं। द्वादशसहस्रंद्विदशसहस्रमित्यर्थः। सोममंडलात्तद्विगुणंचत्वारिंशत्सहस्रयोजनेनविस्तृतंराहुमंड
लंत्रयोदशसहस्रमित्यनेनत्रिदशेतियुक्त्यात्रिंशत्संख्यालस्यतेपुनश्चद्दशसंख्यासोममंडलाद्द्विगुणत्वाकृतएवंकल्पनायथाक्षितमाख्यानमंतरेणेतिचेन्नाराहुसोम
रवीणांतुमंडलद्विगुणताक्षिता। विनेवसर्वमुन्नेयमितिवचनात्॥ ॥

भागवतंभगवतःप्रियंतदस्यप्रियमित्यस्मिन्नर्थेएवत्प्रत्ययःपरिवर्तमानंमंडलमितिशेषः। चक्रासिधुरवमवस्थितःउद्विजमानःवेगेनचलनस्यआरात्दूरात्। तावन्मात्रेअयुतमात्रे। भूविवरा
:पातालादयः। तासुतस्मिन्नोयद्वासासुखादिसामान्यविशेषान्यांश्रीधरःक्रमेणेतिवा। समृद्धिरुद्रेकः। विभूतिःसंततिपरंपरा। समृद्धस्त्रवनोद्यानाक्रीडेषुआविहारोयत्रतेत्तथातेषा
क्रीडामिथुनक्रीडायोग्यपर्वतःआविहारोस्तेलोकविहारविलक्षणत्वात। ईश्वरतशिवात्तयात्वंवराह्वा। एषुविवरेषुपुरःपुराणिवकासंतिविलसंतीत्यन्वयः। माययायंत्रक्रिया

तन्निशम्यास्यत्रापिभगवतारक्षणायप्रयुक्तंसुदर्शनंनामभागवतंचक्रंदुर्विषहंपरिवर्तमानमस्यवस्थितोमुहूर्तमुद्विजमानश्चकितहृदयआरादेवनिवर्ततेत मु
हूपरागइतिवदंतिलोकाः॥ ततोधस्तात्सिद्धचारणविद्याधराणांसदनानितावन्मात्रएव। ततोधस्ताद्यक्षरक्षःपिशाचप्रेतगणानांविहाराजिरमंतरिक्षंया
वद्वायुःप्रवातियावन्मेघाउपलभ्यंते। ततोधस्ताच्छतयोजनांतरेयंपृथिवीयावद्धंसभासश्येनसुपर्णादयःपतत्रिप्रवराउत्पतंतीतिसुपर्णितमर्यादासन्नि
वेशमवस्थाने। अवनेरप्यधस्तात्सप्तभूविवराएकैकशोयोजनायुतायामविस्तारेणोपक्लृप्ताः अतलंवितलंसुतलंमहातलंतलातलंरसातलंपाताल
मिति। एतेषुहिबिलस्वर्गेषुस्वर्गादप्यधिकाःकामभोगैश्वर्यानंदभूतिविभूतिभिःसुसमृद्धभवनोद्यानक्रीडाविहारेषुदैत्यदानवकाद्रवेयानित्यप्रमुदिता
नुरक्तकलत्रापत्यसकलसंपत्सुहृद्यःबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायाविनोदानिवसंति। येषुमहाराजमयेनमाययानिर्मिताःपुरोनाना
मणिप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारापतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वर
गृहोत्तमैःसमलंकृताश्चकासंति॥ ॥

कारणशक्तिलक्षणयायापादानभूतयानिर्मिताः नानामणीनांप्रवेकैःश्रेष्ठैर्विरचितविचित्रभवनादिभिरुपलक्षिताः॥ चैत्यंदेवालयःआयतनंपाषाणवद्धवृक्षमूलस्थानंनानाश्च
नैःमिथुनानांवर्तमानैःपारावतादिभिराकीर्णाःकृत्रिमभूमयोयेषुतैस्तथा। तैर्विवरेश्वराणांगृहोत्तमैरंतःपुरश्रेष्ठैः॥ ॥

भा॰पं॰
७५

येषु विवरेषु धानानिव कासंति। विटपिनां वृक्षाणां मनआदीन्द्रियानंदहेतुभिर्विटपैः शाखाभिः कृताभिः श्रीभिः समृद्धिभिः कनेकतिह्रवविशेषणं अमृततलपूर्णानां समिथुनानां विहंगकुलानां कोलाहलशब्दयुक्तानां जलाशयानां सरसां तैवधिनां मत्स्यकुलानां मुल्लंघने नोत्पतनेन क्षुभित नीरं तैवलितनीरजलादिसमुदाये षु कृतनिवासानामनेकविहाराकुलानां मधुकराणामिंद्रियोत्सवैर्मधुकरस्वनादिभिः स्वर्गश्रियमतिशयितानि अतिशयो येतान्युद्यानिश्रितिसंवंधः। नीरजंसामान्येन कमलं। कह्लारं सौगंधि

उद्यानानि चातितरां मनइंद्रियानंदिभिः कुसुमफलस्तवककिसलयावनतरुचिरविटपैर्विटपिनां कैकनकलतालिंगितानां श्रीभिः समिथुनविविधविहंगकुलकोलाहलजलाशयानाममलजलपूर्णानां झषकुलोल्लंघनक्षुभितपयोनीरजकुमुदकुवलयकह्लारनीलोत्पलशतपत्रादिवनेषु कृतनिकेतानामेकविहाराकुलमधुकराणां मधुकरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि। यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते। यत्र हि महाहिप्रवरशिरोमणयः शार्वरं तमः प्रबाधंते। न वा एतेषु वसतां दिव्यौषधरसायनान्नपानादाधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरिति वयोवस्थाश्च भवंति। न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात्। यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवंति पतंति च। अथातले मयपुत्रोऽसुरो बलो निवसति। येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयंति। यस्य च विजृंभमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति॥ ॥

७३

कांशतपत्रं रक्तकमलं आदिशब्देन पुंडरीकादयो गृह्यंते। पुंडरीकं सितांबुजमित्यभिधानं। शार्वरं शर्वरीजन्यमिव स्थितं तमः। पानमपि तत्स्नानात्। आधयो मनोदुःखानि। ग्लानिर्मनोवलक्षयः। क्लमः शरीरबलक्षयः। वयोवस्थाः शैशवादिवयो लक्षणाः। यस्मिंश्चक्रे पुंसवना गर्भाः। एवं सामान्येन विवरलक्षणमुक्त्वा विशेषेणाह॥ अथेति। नाम्ना बलः। ताश्च काश्चन मायाः। त्रयो जातिभेदेन। स्वैरिण्यः स्वेच्छानुवर्तिन्यः। कामिन्यो तर्गतकामोद्रेकाः। पुंश्चल्यः पुरुषमात्रेण सुरतमाकांक्षमाणाः। पुरुषदर्शनमात्रेण परिक्षुतेंद्रियावा॥ ॥राम॥

राम
७५

सर्वाअपि नियतपुरुषान्नभजंतीत्याह। या इति। बिलायनं बिलस्थानं संलापो मिथो भाषणमुपगूहनमालिंगनं चुंबनादिकमादिपदग्रहीतं। यस्मिन्रसेऽसवयोः पार्वतीपरमेश्वरयोर्यत्तद्वीर्यं चित्रभानुरेध्यमानो वर्द्धमानः। अवरोधाअंतःपुराणि तेषु पुरुषीभिः पुरुषवद्बलोपेताभिः स्त्रीभिः। उरु णः वहुनः शाश्रवस्य श्रवः श्रवणं यस्य स तथा। परा

या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंतीति। यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव। ततो वितले हरो भगवान्हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिः सर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूय आस्ते। यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति। तन्निःष्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति। ततोऽधस्तात्सुतले उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेंद्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकंपयैव पुनः प्रवेशित इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवंतमपगतसाध्वस आस्ते॥ ॥

क्षिप्तमाकृष्टं स्वाधीनं लोकत्रयं यस्य स तथा। प्रवेशितः लोकत्रयेण प्रतिवत्सरं क्रियमाणपूजायामिति शेषः॥ ॥रामायराम॥ ॥ ॥राम॥ ॥ ॥

भा॰ पं॰
७६

सर्वस्य जीवराशेरधिकं बलैश्वर्यं हरये भूमिदानेन फलं तस्य फलं भुक्तिरेव किंतु पूर्वजन्मार्जितं किंचित्फलं भवितुमर्हतीत्याह ॥ ॥ अधुनापीति ॥ ॥ अधापि बलेर्बिलनिलये सुत
ललोके परैश्वर्यमेतद्भूमिदानस्य साक्षादेव नो एव मुख्यफलं नैव कुतो नेति तत्राह । भगवतीति । परमात्मनि सम्यक्प्रतिपादितस्य सु पात्रवत्कथं तदिति तत्राह । पात्र इति ।
पात्रगुणमाह । तीर्थतम इति । अतिशयेन शुद्धे अतो युक्तमित्याह । उपपन्नमिति । अन्येषु महात्म्यसु सत्स्वपि तेषां पन्निः कथमिति तत्राह । जीवेति । केषामत्राह । अशेषेति
। जीवभूतत्वेदुःखित्वेनासुहृदाप इतीति तत्राह । आत्मभूत इति । सदास्वामिनिरदेशामित्वं न लोकवत् किंतु सदातनमित्यतो भूत इति । स्वतंत्रत्वाद् दुःखनिवारणसम
र्थ इत्यर्थः । आत्मवत्सर्वभूतप्रेष्ठ इति वा । तर्हि किं तस्य फलमत्राह । साक्षादिति । नन्वश्रद्धयाहृतं दत्तमित्यादेः श्रद्धारहितेन दत्तत्वात् संकल्पदत्त्वाद्दत्तापितथात्वेन कथं सु

अधुनापि नो एवैतत्साक्षाद्धरो भूमिदानस्य यद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्रे उपपन्ने परया श्रद्धयाप
रमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यं यस्य ह वाकृतपतनप्रस्खलनादिषु विवशः सकृन्नामसिद्धगृणन्
रुषः कर्मबंधमंजसा विधुनोति । यस्य हैव प्रतिबोधनं तु मुमुक्षवोऽन्ये साहो पलभंते । यन्नद्भगवन्नामसर्वेषां आत्मनामात्मदस्मैव ॥ ॥

क्लिष्टत्वमिति तत्राह । यस्येति । प्रत्यक्षफलदर्शनाद्यायमेव पात्रभूत इत्याह यस्येति । निर्लज्जविवशेनापि नवचयेष्टं पदमागंतं इत्येतदस्मिन्नर्थे प्रमाणमित्याह हेति । य
थानामसंकीर्तनात्कर्मबंधविध्वंसो भवेद्भवं बलेरपीत्यस्मिन्नर्थे वेति । वा विकल्पोपमानयोरित्यमरः । आदिशब्दात्स्वप्नादिसत्पदर्शन इति दृष्टद्योतते । तमेव विद्वा
नमृत इह भवतीति श्रुतेर्ज्ञानमंतरेणानाशात्कर्मबंधहानिः कथमत्राह यस्येति । प्रतिबोधनं ज्ञानं नामसंकीर्तनेन लक्षणकर्मद्वारा ज्ञानं लभवति । कर्मणो ज्ञानमा
तनोति इति श्रुतेरित्येतद्धेतुमनेनाह । अविगानेन सर्वे यान्वेतन्नानामात्मदे ज्ञानजननरूढ्या सायुज्यफलप्रदं । यद्वास्मात् भगवन्नाम मुमुक्षुभिरस्मनीयमेवेत्याह य
न्नदिति तस्मिन् वासुदेव इति सर्वत्रान्वयः ॥ ॥

राम
७६

लगवत्त्वमात्मदस्वेन नाम जापिनो मनुष्यान् किमिति नानुजग्राह भगवानित्याशंक्य तत्क्रियानां तिष्ठापालावादित्यभिप्रेत्याह । नवा इति । नूनं शब्दस्य सामर्थ्यादत्र मनुष्यशब्देन पृत्तियोग्या गृह्यंते । म
नुष्यानुद्दिश्यनानुजग्राह । प्रकृतत्वादेतादृशमैश्वर्यमिति शेषः । तर्ह्यात्मदानलक्षणो मोक्षमनुजग्राह किं नेत्याह । यदिति । पूर्वं बलावस्थितनजोऽब्रधार्थारः कार्तमः । पुनरात्मानुसंहृति
मोक्षणं तत् । यया या अपि संदेहे कुर्वन्नुकाकथेति वक्ष्यानुजग्राहेति किमु तर्हि तन्नामोपासनं व्यर्थं किमितिनेत्याह । मायामयेति । मायामयं प्रकृतिनिर्मितं नश्वरं नत्वनश्वरमित्यर्थः
: इतोऽस्याप्यतिशयं ऐश्वर्येणिमित्तं मतोराज्यापहरणादिलक्षणापकारकारिणि हरौ तत्कृपातिशयादवलीह वपतेर्बलेर्दीनलक्षणकारस्त्वहे निवसतस्तेनवद्धय मुक्तस्य नहि मनुष्या
णामेतादृशप्राप्यं तादृशी या न त्वभितः समस्तमनुणोष्ठस्यधिनामित्याशयवानाह । यन्नदिति । नअधिगतोऽनिक्त्वा व्यतिरेकेणान्यः प्रसुलभोऽप्युपायोऽनेनसतयाते ते भगवतायाच्य
याजेनापहृतं स्वशरीरावशेषितलोकत्रयं यस्य सतया । भगवदाज्ञया गरुडेन प्रथमं वरुणपाशैर्बद्धस्य शक्रादिनापह्नुया पश्चान्मुक्तः । पुनरस्तवयाशतिकृतं देवैव

नैवैतद्भगवान्नूनं मनुष्यानन्वनुजग्राह यदुत पुनरात्मानुस्मृतिमोक्षणं मायामयभोगैश्वर्यमेवातानुते । यन्नद्भगवतानधिगतान्योपायेन याच्ञाच्छलेनापहृ
तस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च बद्धो गिरिदर्यां चापविद्ध इति होवाच । नूनं बतायं भगवानर्थेषु निष्णातो योऽसाविंद्रो यस्य सचिवो मंत्राय वृत एकांततो
बृहस्पतिस्तमतिहाय यदा स्वयमुपेंद्रेण आत्मानमयाचत । आशिषो नो एव तद्दास्यमपि गंभीरवयसः कालस्य मन्वंतरपरिवृतं कियल्लोकत्रयमिदं

गंतव्यमिति तेन कारागृह इति गिरिदर्यामपविद्ध इव निरुद्धो बलिरिति वक्ष्यमाणप्रकारेण अंगादेहे पतेन प्राणात्ययेऽपि भगवद्भक्तिं न कुंचामीति संनिधिं दर्शयतीति यद्यथा
तस्मान्मनुष्यान्नानुजग्राहेत्युच्यते । इंद्रस्य मंत्रिवो बुद्धिसहायभूतो यदा यो सो बृहस्पतिरस्य संबंधानार्थमिंद्रेण प्रेषितः एकांततो मंत्राय वृतस्तं नद्धदातमप्यतिहाय संधा
नात्पूर्वमेव स्मादात्मसमर्थं मनुस्वरूपादेवनाद्यलिप्सार्थेनुमिलात सन्नेत्स्वनादिकमेव दत्तं मुमुक्षोऽयं भगवान्स्वयमुपेंद्रेण वटुना मनस्वेषणात्मने स्वस्मै त्रीणि पदान्यत
दर्ह यान्वनाथागं यमामयाचतने एवाशिष इति । यत्तस्यायमभिप्रायः । इंद्रलोकत्रयं चतुर्दशभुवनापेक्षया किय स्वल्पं हितदपि कालत्वाद्य स्वल्पमित्याह । गंभीरवेगस्य महतः
कालस्य मन्वंतरलक्षणावयवपरिमितमत एवाऽनित्यं तस्मादैश्वर्यमिति मितमदानस्यादि सभैवलभेराज्यं न दास्यामीति प्रहरूलेनापहृतं नूनं निष्णातैतवत तले के मम्मनुकंपा
यस्मानुग्रहमिच्छामिह रिक्यतद्वंशने स्यादिस्व वचनात् ॥ ॥

नु८
७३

भा. पं.
७७

हरेरिममपि शापमस्मत्पितामह एवं वेत्ति न मादृश इत्याह। यस्येति। स्वपितरि हिरण्यकशिपुना त्रिविशमिते सृते भगवता दीयमानं स्वपित्र्यं पितृधनं त्यक्त्वा योगमपि यदकु
तोभयं निहतकंटकत्वात् पदं राज्यलक्षणं तन्न वव्रे किंतु यस्य हरेरनुदास्यं सेवा तदेव वव्रे। कोसावित्यत्राह अस्मत्पितामहः प्रल्हादः। तस्य वास्माकं महदंतरमस्तीत्याह तस्येति।
तस्य प्रल्हादस्यानुगमनमनुवर्तितुमस्मादृशः पुरुषः को वालं न कोपीत्यर्थः। कीदृशः परिहीनः भगवदनुग्रहो यस्य स तथा। अमृदितकषायो निरस्तपापो निरस्तवा

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं राज्यं यदकुतोभयं पदं दीयमानं भगवता विबुधेतेस्वपिरितैः स्वमहानुभावस्यानुपथमनुवर्तितुं लु
लमृदितकषायः को वास्मद्विधः परिहीनभगवदनुग्रह इति। तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते। यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वा
रि गदापाणिरवतिष्ठते निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः। ततोधस्तात्तलातले मयो नाम दानवेंद्र
स्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोक्याः शंचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसु
दर्शनभयो महीयते॥ ॥

यो नालमिति किं वक्तव्यमित्यर्थः। इति शब्दो वाक्यसमाप्तौ वर्तते। तस्य प्रल्हादस्य उत्तरस्यामन्वमे। इदं श्रीशुकवाक्यं। पुनरपि हरेर्भक्तानुकंपित्वमाह यस्येति। कपिला
स्थो नारायणः। स्वदत्तवराज्ञयावस्थानमिति शेषो तदिमिनुमवतिष्ठते इति आत्मनेपदप्रयोगः। अखिलजगद्गुरुत्वमुपपन्नं तस्मा यदि स्ववाणतरुणतज्जनरक्षकत्वेनेत्यभिप्रेत्या
ह येनेति। रावणास्यदिग्विजये उच्चाटितः प्रक्षिप्तः दूरीकृत इत्यर्थः। एवंविधस्य हरेर्भक्तजनप्रयोजनार्थितया नान्यो दुस्पराज्यपदानेच्छया समस्ताद्यापहरणालक्षणका
र्यं नान्ये दितिवाक्यशेषः। सांसुखं महीयते स्वस्थोपेषितिशेषः॥ ॥

राम
७७

महाभोगवंतः स्थूलशरीरवंतः। पुरुषोत्तमस्य वाहो वाहनं तस्मात्। पणयो दैत्या दानवा निवातकवचाः कालकन्यापुत्राः कालकेयाः विबुधप्रत्यनीकाः देवशत्रवः। प्रतिहताबलेपाः
विनाशितगर्वाः। योगबलाद्विलेशयाः सर्पाकाराः ये पणयः इंद्रदूत्या सरमया श्रूयमाणाः इति मंत्रवर्णात्सर्वाग्निः। इंद्रस्य दूती शिषिता वरासि महेंद्र इच्छंती पणयो निधीन्युष्मा
दिमंत्रवर्णात्मकगीर्भिः श्रुता निरिंद्रा बिलेशयाः तस्मादिंद्रात् बिलेशयाकारा निवसंतीत्यर्थः। सरमा त्वदूरादध्वनो बहिर्गता निर्जिह्वा लिङुंगुरिः केमपि निगरंती किमिच्छं
त्यत्र प्रानट्प्रायासीः हि गता वितिधीतोः। अस्मासव्रहती तेनका किकार्यमुद्दिश्य आगमनं तेन कापरितकापातस्यार्थद्रूतस्याथेदृत क्रियासीन्नाविरसायाः पयांसि कथं

ततोधस्तान्महातले काद्रवेयाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः पतत्रिराजाधिपतेः पुरुषवाहा
दनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति। ततोधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालके
या हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकमहानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिले
शया एव निवसंति। ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति॥ ततोधस्तात्पाताले नागपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंख
श्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति। येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचि
ता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति॥ ॥
मतर इति पणिभिः दृष्टा सरमा ब्रूते। अहमिंद्रस्य दूती तेन प्रेषिता चरामि आगतास्मि युष्मत्पयो वहुलमिति सूत्रात्। किमिच्छंतीत्यस्य परिहारमाह हे पणयो वो महो न्नदृण
मतर इति पणिभिः दृष्टा सरमा ब्रूते। ... पयांस्यतरमिति सरमायाः पत्नी अतिप
निधीनिच्छंती अपहर्तुमिति शेषः। नोस्माकमपि स्कंदो भियस्माः स्वामिनो भयेन तत्र राववश्यागमनं तथा तस्मादिमा याः पयांस्यतरमिति सरमायाः पती
विहारवनमिति मंत्रवर्णार्थः। महाभोगिनः स्थूलशरीराः बहुभोगयुक्ता वा। शीर्षाणि इति कत्रयेशीर्षाणामिति तीतरपुरुषयोरेवेलत्वरण्णद्योतनायविगतं रचितं र
वनं येषां ते तथाश्रोत्पत्तिका इत्यर्थः। विधमंति निरस्यंति॥ ॥

तस्यपातालस्यतामसीतमोगुणप्रवर्त्तिनी। अनंतस्ययत्स्वरूपंद्रष्टृदृश्ययोस्तत्रदृश्यस्यशरीरस्यसन्निकर्षणंसामीप्यापादकंममेदमित्याहंकारकार्यंदेहोहमिति। तर्हिइदंसत्वंकिं
नेत्याह। अभिमानलक्षणंअधांतिप्रत्यापादकमित्यर्थः। तत्स्वरूपंसंकर्षणमित्याचक्षतेसात्वताः। गुरुतरक्षितिमंडलेसर्षपलाघवबुद्धेरपतोपरिमितबलत्वेनानंतत्वंयुक्त

तस्यमूलदेशेत्रिंशद्योजनसहस्रांतरआस्तेयावैकलाभगवतस्तामसीसमाख्यातानंतइति। सात्वतीयाद्रष्टृदृश्ययोःसंकर्षणमहमित्यभिमानलक्ष
णंसंकर्षणमित्याचक्षते। तस्येदंक्षितिमंडलंभगवतोनंतमूर्त्तेःसहस्रशिरसएकस्मिन्नेवशीर्षणिध्रियमाणंसिद्धार्थइवलक्ष्यते। यस्यहवाइदंका
लेनोपसंजिहीर्षतोमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेणसंकर्षणोनामरुद्रएकादशव्यूहस्त्र्यक्षस्त्रिशिखंशूलमुत्तंभयन्नुदतिष्ठत्। यस्यांघ्रिकमलयु
गलारुणविशदनखमणिखंडमंडलेष्वहिपतयःसहसात्वतर्षभैरेकांतभक्तियोगेनावनमंतःस्ववदनानिपरिस्फुरत्कुंडलप्रभामंडलमंडित
गंडस्थलान्यतिमनोहराणिप्रमुदितमनसःकिलविलोकयंति। यस्यैवहिनागराजकुमार्यआशिषआशासानाश्चार्वंगवलयविलसितवि
शदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरल
लितस्मितास्तदनुरागमदमुदितामदाघूर्णितारुणावलोकनयनवदनारविंदंसव्रीडंकिलविलोकयंति। सएवभगवाननंतोनंतगुणार्णवआ
दिदेवउपसंहृतामर्षरोषवेगोलोकानांस्वस्तयआस्ते॥ ॥

मित्यभिप्रेत्याह। तस्येति। सिद्धार्थः सर्षपः। एकादशव्यूहः एकादशधाविभक्तरूपविशेषः। उत्तंभयन्नूर्ध्वंक्षिपन्। तदभिमर्शनेनभुजस्पर्शनेनसव्रीडमितिक्रियाविशेष
णं। शृंगाराद्यनंतगुणार्णवः॥ ॥

अपरिम्लानोरागःकांतिर्यस्याःसातथा। आमोदस्यधासवेनसौरभरूपमधुरसेनहलस्यनिजायुधस्यककुदग्रेकक्षामुदरबंधं। संश्लोकयामासपद्यलक्षणवाक्यैःकथया
मास। हरेश्चतस्रोमूर्त्तयस्तासुद्वितीयमूर्त्तेःशेषविशेषसंनिधानात्तस्योपयत्रानुगुणंछेषस्यवर्णयंतीति। उत्पत्तीति। अस्यजगतःउत्पत्त्यादिहेतवःसत्वाद्याःप्रकृतिगु
णायदीक्षयाकल्पाःसमर्थाआसन्नुत्पत्त्यादाविति। ननुसेतनस्यस्वतःप्रवृत्त्यनुपपत्तेस्तत्संबंधेनप्रवृत्तौतस्यापितद्विकारापत्तिरितितत्राह। यद्रूपमिति। ध्रुवंश
श्वदेकप्रकारंकुतःअकृतमकृत्रिममत्वात्रितयस्यापिजीवस्यशरीरसंबंधेनविकारादकृतस्यापिप्रधानस्यकार्यत्वेनतुतत्वदर्शनात्स्याकृतत्वमौपचारिकंकिंनस्यादिति

ध्यायमानःसुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनःसुललितमुखरिकामृतेनाप्यायमानःस्वपार्षदविबुधयू
थपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेनमाद्यन्मधुकरव्रातमधुरगीतश्रियंवैजयंतींस्वांवनमालांनीलवासाएककुंडलोहलककुदिकृत
सुभगसुंदरभुजोभगवान्महेंद्रोवारणेंद्रइवकांचनींकक्षामुदारलीलोबिभर्त्ति। यएषएवमनुश्रुतोध्यायमानोमुमुक्षूणामनादिकालकर्मवासना
ग्रथितमविद्यामयंहृदयग्रंथिंसत्वरजस्तमोमयमंतर्हृदयंगतआशुनिर्भिनत्ति। तस्यानुभावान्भगवान्स्वायंभुवोनारदःसहतुंबुरुणासभायांब्रह्मणः
संश्लोकयामास। उत्पत्तिस्थितिलयहेतवोस्यकल्पाःसत्वाद्याःप्रकृतिगुणायदीक्षयासन्यद्रूपंध्रुवमकृतंयदेकमात्मन्नानाधात्कथमुहवेदतस्यवर्त्म॥ ९॥

तत्राह। यदेकमिति। यदेकंकेवलंकार्यात्मनातत्संगेनवाविकारिनभवंति। सद्रुपस्माभवदितिश्रुतेःकार्यात्वश्रुतेःकथंनतन्मुक्तमित्यादित्यत्राह। आत्मन्निति। आत्मन्नात्मनि
स्वाधारतयानानाविधंजगद्धात्स्वृतवान्तुतद्रूपत्वेन। यदनिधातुपृथिवीमुतद्यामितिश्रुतेः। किंवाचिंत्यमहिमत्वात्तस्यरूपंदुर्ज्ञेयमित्यभिप्रेत्ययत्नेदोसंबद्धानिकथ
मितितस्यशेषातर्यामिणःसंकर्षणनामधेयस्यहरेर्वर्त्मवर्त्तनंकश्चवेदनकश्चमपीत्यर्थः। मूर्द्धन्यर्पितमित्यग्रिमश्लोकेपिसंबंधः। उक्तंहेतुनेनसमारयति॥ ॥

आत्मन्याधारादित्येतत्संक्षिप्याह मूर्द्धन्निति। सत्त्वं बलं ज्ञानं समाहारलक्षणमत एवं संमुद्रं लोकं ह स्पष्टं शीर्षे परिमिति। यत्र स्वरूपे इदं सदसत्कार्यकारणात्मकं। आधिकरणाधेययोर्भेदः शंकनीयः। मृगपतिः सिंहो यस्यली लीलाशौर्यादिलक्षणमादर्शे आश्रितः लीलाकारणप्रयोजनमाह। आदाविति। अनेनात्मन्यानाधारादित्यस्याभिप्रायमत्स्यादिनानावतारैः अप्यजनन इति ज्ञायते। यन्नामस्मरणमात्रेण शेषजन्मार्जितपापक्षयश्रवणत्वात्मकीर्तनं नाथक्षयो भवति। तिर्किं वक्तव्यमित्यभिप्रेत्य क्षत्रता शेषान्तर्यामी श्रीनारायण एव स्तूयते। अनामिलादीदर्शनाज्जान्यनामकीर्तनेनेनताहं कृपलावशीर्षना चेति भावनाह। यन्नामेति। शेषाक्षेपान्तर्यामिणो हरेरस्यं कं पुरुषं मुमुक्षुरित्यनेन अहं मोगप्रदो वत्समो कुदक्षजनार्द्दनइत्युक्ति स्मारयति। गुरुगिर्यादिधरधरणीगोलधृतिरपि शेषस्यह रिसन्निधानादेवान्यकृतानेति भावनाह। मूर्द्धनीति। विक्रमाणामानन्त्यात्साकल्येनाज्ञातपराक्रमस्य सहस्रजिह्वः शेष इत्यनेन

> मूर्द्धश्च गुरुरूपयाभ्यासस्त्वं संपुट्ठं सदसदिदं विभाति यत्र। यल्लीलां मृगपतिरादेदेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः २ यन्नाम श्रुतमनुकीर्तयेदकस्मादार्त्तो वा यदि पतितः प्रलोभनाद्वा। हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः। मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वं। आनन्त्यादविदितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः। ४ एवंप्रभावो भगवाननन्तो दुरन्तवीर्योरुगुणानुभावः। मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्ति। ५ एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्मविनिर्मिता यथोपदेशमनुवर्णिताः॥ ॥

स्यस्यतो शेषेत्वसंभावितगुणकर्म्मकथनपूर्वकं स्तवनमुपसंहरति। एवमिति॥ दुरन्तवीर्य इत्यनेनानन्तनामहेतुरेव मुख्यं नान्यस्य श्रोतानन्तेन लिंगमप्यनन्तं दृष्ट्वा दिव्यज्ञस्मृती प्रमाणमिति दर्शयति। स्वगुणानेवानुभवति भुंक्ते इति कर्म्मण्यप्रत्ययः। देहीदेहस्थितत्वेऽपि दुःखानुभवस्यापि संभवात्कथं स्वगुणभोग इत्यत उक्तं। आत्मतन्त्र इति। भारस्यतद्दुःश्रमदर्शनादोषवारिक्षमिटक्षान्तं अकिंनस्यादिमतउक्तं। यो लीलयेति। परिच्छित्स्य अपरिहारार्थं उपसंहरति एतावदिति। गम्यत इति गतयो लोकाः उपगन्तव्याः धर्मफलत्वेन यथाकर्मनिर्वर्तितास्तारतम्येनेति शेषः। एवं शब्देन निषिद्धकर्म्मप्राप्यस्थानमन्तरेणान्यस्य व्यवच्छेदः क्रियते हि शब्दः प्रमाणप्रसिद्धिं वक्ति॥ ॥

मुक्तिगतेरन्यस्याः विद्यमानत्वात्कथमेतावत्य इतीयत्तेति तत्राह। कामानिति। मुक्तेरपीच्छाविषयत्वादित्यतः सामान्येनोक्तं विशिष्टं न छि। प्रवृत्तिलक्षणस्येति। अभाववतानां सालक्षणं नास्तीत्याशयेनोक्तं। विसदृशेति। यथाप्रश्नं व्याख्याता इत्यनेनान्योऽपि वक्तव्यांशोऽस्तीति ज्ञायते। तत्र वक्तव्यांशा बहवः संति। तेषु किं वक्तव्यं तदाख्याहितस्यापि परिहारं कथयाम इत्याशयेनाह। किमन्यदिति॥ ॥ पंचमे त्रयोविंशः॥ ॥ अतिबहुलदुःखभोगस्थानत्वेन नरकलोकस्य हेयत्ववर्णनेन संसारस्याति हेयत्वेन वैराग्यस्य दार्ढ्यातिशयो ज्ञायत इति तन्निरूपयत्यस्मिन्नध्याये। तत्रादौ पूर्वोक्तार्थे प्रश्नमुद्राद्य परिहृत्य वक्तव्यार्थं प्रतिजानीते। महर्ष इति। अयमर्थः। लोकस्य स्वर्गादिपातालांतस्य स्थानस्य विशेषान्तस्य स्वजनस्यैतत्स्वप्रकृते एतद्वचनादागमेनैव सिद्धत्वात् प्रत्यक्षवदेतदिद्युस्य नैव वैचित्र्यं क

> कामानकामयमानस्तावत्यो हि राजन्पुंसः श्रद्धिलक्षणस्य धर्मस्य विपाकगतयश्चावचा विसदृशा यथा प्रश्नं व्याख्याताः किमन्यत्कथयाम इति इति श्रीभागवते महापुराणे पंचमस्कंधे विवरवर्णने शेषवर्णनं त्रयोविंशोऽध्यायः॥ ॥राजोवाच॥ ॥महर्ष एतद्वैचित्र्यं लोकस्य कथमिति श्रीशुक उवाच त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्म्मफलं विसदृशं भवति

स्यचित् दुःखित्वं कस्यचिद्भयरूपत्वं कथं घटतां सुखादिसामान्यविशेषहेतुत्वं च सुखे दुःखे वाल्पमहत्त्वभेदेन तारतम्यं च कथमिति। किं चैता गतयः सर्वाः सर्वेषां भवंति। किं चैकैकस्यैका गतिरुतैकस्यानेका गतिरित्येतत्सर्वं परिहरति त्रिगुणत्वादिति। अयमर्थः कर्तुः श्रद्धाया एतमितः प्रेत्याभिसंभवितास्मीति बुद्धिलक्षणाया त्रिगुणत्वाद्धृद्विधत्वाद्धर्मसत्वादिगुणवैचित्र्येण निर्मितत्वाल्लोकवैचित्र्यं यस्मात्सर्वाः कर्मगतयः सर्वस्य भवंति। अथ तस्माच्छास्त्रनिषिद्धस्याधर्मस्य तथैव कर्तुः श्रद्धया वैसादृश्यादिरुद्धस्वरूपत्वात्कर्म्मफलानामपि विरुद्धं॥ ॥ ॥

भा॰पं॰
८०

ततः किं तत्राह याहीति। अनाद्यविद्यया विलसितकामानां प्राणिनां तत्परिणामलक्षणास्ता अनाद्यविद्याकामानां परिपाकनिमित्तपापकर्मविकारलक्षणा याः सृतयो गतयः सहस्रशः प्रवृत्तास्तासां प्राधान्येनानुवर्णयिष्याम इत्यन्वयः। दृष्टेनैवोत्तरं वाच्यमित्यतः परीक्षित्पृच्छति। नरका इति। किं केचन देशविशेषाः उत महादुःखानुभवलक्षणा अवस्था वा। आद्ये ते त्रैलोक्याद्बहिरन्तर्वा। द्वितीये कस्यां दिशि किं वाधस्तात्किं वोपरीति। परिहरति। अन्तराल इति। दुःखानुभवसद्भावेऽपि न तन्मात्रं वाच्याः। किन्तु तदधिकरणदेशविशेषाश्च त्रैलो-

याह्यनाद्यविद्याकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राधान्येनानुवर्णयिष्यामः ॥ राजोवाच ॥ नरका नाम भगवन्किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ॥ ऋषिरुवाच ॥ अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाद् उजलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति। यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु संपरेतेषु यथाकर्मावद्यमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥ तत्र हैके नरकानेकविंशतिं गणयन्ति। अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः। तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः कृमिभोजनः सन्दंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥

क्यान्तराले। तत्रापि भारतवर्षाद्दक्षिणस्यां पातेऽधस्ताद्भूमेरधस्तादुदजलाशयस्य गर्भोदकराशेरुपरिष्टात्। यस्यां दक्षिणस्यां दिशि निर्दारितार्थमेतद्वचनं। यथाकर्मनिर्मितपापमनुल्लङ्घितमनतिक्रान्तं भगवतो हरेः शासनमाज्ञा येन स तथा। तस्यां दिशि विद्यमाना नरका नेकविंशतिसंख्याः। तत्रेति। तत्रेत्यनेन सप्तप्रधानाः सन्तीति स्मृतिप्रसिद्धिं द्योतयति ॥

राम
८०

नैतावन्त एव समाप्तिः किं त्वन्येऽपि सन्तीत्याह। किंचेति। तान्दृष्टान्त्रिंशिनष्टि। विविधेति। विविधयातनाभूमयः। नानाविधदण्डस्थानविशिष्टाः। यातनाती व्रवेदनेति वचनान्दुःखासंभिन्नप्रदेशा इत्यर्थः। तत्र नरकेषु तत्तदुःकर्मनिमित्तदुःखविशेषानाह। तत्रेति। पात्यमानः दुःखानुभवी क्रियमाणः कश्मलं बहुदुःखं एकदेति विशेषणात्तत्कदाचिन्मूर्छा न यातीति विशेषो ज्ञायते। यातनाभिः पर्यायेणापीड्यमानत्वादित्यर्थः। वृश्च्यमानमूलः छिद्यमानशिफः। यस्मान्नष्टदृष्टिस्तस्मादन्धतामिस्रमन्धत्वापादकत्वाद्धकारयुत

किंचान्येऽपि क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते। अनशनानपानदण्डताडनसन्तर्जनादिभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तामिस्रप्राये। एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं धनदारादीनुपभुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति। यथा हि वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति। यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं कुटुम्बमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति। ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद्रौरवमित्याहू रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः। एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहंभरः ॥

मिस्रमित्यर्थः तदुपदिशन्ति। मूर्छयाबुद्धिनाशात्तामिस्रमन्धतामिस्रं तु चाक्षुषज्ञानस्यापि सर्वात्मना नाशादुक्तयोः सामान्यविशेषसद्भावाद्विशेषः। एतच्छरीरमहमिदं क्षितिमण्डलं ममेति भ्रान्त्यानुवैमहातारतम्यद्योतको इति शब्दोऽप्येकं रौरवप्राप्तिनिमित्तं भवतीति द्योतयतः प्रकारान्तरेण रौरवं निर्वक्ति। ये त्वेति। एतद्रूपकर्तृत्वतरमावर्तकं। रुरवः सृगाः किं नेत्याह। रुरुरितीति। रुरुरित्यपदेशो व्यपदेशः। मृगानानाविधमुखाद्बुवः परिकीर्तिता इत्यभिधानं रौरवाद्विशेषमाह। यत्रेति। देहंभरः स्वप्राणपतनीतिशेषः ॥ ॥

रुरवः १

भा॰ पं॰
८१

उपकल्पयेति अशक्यत्वमात्मनो यथा भवति तथा परो ध्वंकारयं नीत्यर्थः। अथ सप्ताग्निरूपपर्यङ्कः। खलेधान्यादिशोषणस्थानमिति। नरके वर्त्तते। अग्निसूर्य्याभ्यां ... कोऽप्येव भिन्नाह। यावन्तीति। अनापदीति विशेषणात् आपदि कं वनात्पयं ... धाराभ्यां ... निशितप्रान्तभागत्वमत्र तालवनस्पतालसमूहस्यासिवन्निशितधारपत्रैः स्वधर्म्मः स्ववर्णादिविहितः। अदण्ड्ये दण्डनायोग्ये शरीरदण्डः ताडनादिः उपरुद्धः कारागृहे शृंखलाद्यावा निवेशितो दृष्टो दो...

यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति। यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञे नरके अयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च। यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि कालसूत्रसंज्ञके नरके निवसति। यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति। स्वधर्महा पाखण्डानुगतः फलं भुङ्क्ते। यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरके सूकरमुखे निपतति। तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः। यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति। तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति। यथा कुशरीरे जीवः॥ ॥

राम
८१

षः चौर्यादिलक्षणायामसत्त्वात् दण्ड्यते यथा तथेति। अविदितपरव्यथानाममत्ता परद्रोहे शक्तानामीश्वरेण विधात्रा कल्पिता सहजत्वेन वृत्तिर्मनुष्यादिशरीरलक्षणा येषां मत्कुणादीनां तानि तथा तेषां अपकल्पितवृत्तिः तन्निकल्पनासमर्थः। पुरुषेण श्रीहरिणोपकल्पिता प्रावरणादिलक्षणा वृत्तिर्यस्य स तथा पीनिवी। यूकाः मूलमुखाः आदिशब्दात् ... द्वादयः प्राणिविशिषाः शिरस्था दिनिलेयाः ... कुशरीरे कुत्सादिवितदेहे॥ ॥

८

स२

यः स्वयं यत्किंचनप्राप्तमन्नफलादिकमसंविभज्यातिथिपुत्रबालवृद्धादीनभोजयित्वा स्वयं भुङ्क्ते स च। पञ्चानिर्वृत्तयज्ञो पापमकृतदेवतापूजालक्षणयागादिश्रेयःसाधनेन तदन्नमश्नाति स च। पञ्चासंस्कृतमाज्याद्युपस्करणशून्यं तदन्नमश्नाति सोऽपि कृमिभोजननाम्नि निकृष्टनरके पतति। कि यथैवतो जनेऽयस्यस तथा ... यावदप्रत्तस्याति दन्नमश्नाति स च। पञ्चासंस्कृतमाज्याद्युपस्करणशून्यं तदन्नमश्नाति। अतिथिदेवतादिभ्यो प्रदत्तस्याकृतस्यासंस्कृतस्य प्रारब्धावशिष्टमात्रस्य कर्म्मणो वा निर्वेशः प्रायश्चित्तलक्षणाकृतिक्रिया यावत्तावदात्मानं नरकाद्यातयति उद्धारयति अप

यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितयज्ञो वायसंसंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति। तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते। यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिण्डैः सन्दंशैस्त्वचि निष्कुषन्ति। यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या। यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कर्षन्ति॥ ॥ राम॥ ॥

यत्र ति पठेत् यावत् प्रमत्तबुद्धिः सर्वमकृत्वा निर्वेशो येन स तथा तावत्तमात्मानं नरके पातयति प्रापयतीति चेत्येतत्सर्वत्रानुकर्षणीयं। सन्दंशैः सूचीविशेषैस्त्वचि निष्कालयन्त्युद्धृत्यन्ति। सूर्म्या लोहादिमयपुत्तल्या। सर्वाभिगमः सर्वाभिः स्त्रीभिः कृतसंसर्गः। संग्रहस्तावेपि द्विज्ञात्। गमनमभिगमः शाल्मलीकण्टकतरुः॥ ॥

भा॰पं॰
८२

आत्मना देहेन स्वासुभिः स्वप्राणैश्च ॐ॰ येन निरयप्रवाहेण ऊह्यमाना अपि ते विमुच्यमाना अपि ते योगं प्राप्यमाणा अम्रियमाणा इत्यर्थः। विशसूत्राद्यात्मना स्पंदमानायां।

यस्त्विह वा राजन्यो राजपुरुषा वा पाखंडा धर्मसेतुं भिंदंति। ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादाः। तस्यां निरयपरिखभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाः स्वासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंतो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यंते। ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंति। ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलपूर्णार्णवे निपतंति। तदेवातिबीभत्सितमश्नंति। ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थेषु मृगान्निघ्नंति। तानपि संपरेतांल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यंति। ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति। तानमुष्मिंल्लोके वैशसे नरके पातितान्निरयपतयो यातयित्वा विशसंति। यस्त्विह वै सवर्णां ने ३ भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतसा पाययंति। ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान्सार्थान्वा विलुंपंति। राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्चैतेः सरभसं खादयंति॥ ॥

अतीर्थे अपात्रमुद्दिश्य विहितकाले वा। दांभिकाः धर्मध्वजिनः विशसंति खंडशः खंडयंति॥ सवर्णां स्ववर्णां समानवर्णां। सार्थान् यात्रिकजनान्॥ ॥ ॥ ॥ ॥
रंव

राम
८२

द्रव्यविनिमये दाने व्यवहारे साक्षिनिर्णये वा अवीचिमत् जलं यत्र तत्र अश्मपृष्ठे स्थलं दूरादृशने जलमिव दृश्यते। तस्मिन्नवीचिमति जलशून्ये पाषाणपृष्ठे निरवकाशे निरालंबने। सोमपीथाः कृतसोमपानाः विप्राणां नित्यनिषिद्धं राजन्यतद्भार्याणां सोमपानानंतरं पूर्वं वीर्यपानलक्षणाद्वा करणीयादसंभवात् तद्भार्याणां सुरते मधुपानात्। वैश्यानांच

यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते। यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विकीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति। यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थितो वा पिबति। तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति। अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरंता यातना ह्यश्नुते। ये त्विह वै पुरुषाः पुरुषमेधेन यजेरन् याश्च स्त्रियो नृपशून् खादंति तांश्च ते पशव इव निहता यमसदने यातयंतो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक् पिबंति नृत्यंति गायंति च हृष्यमाणा यथेह पुरुषादाः॥ ॥राम॥ ॥

स्पर्धी क्वचित्पित्रादिमृतिनिमित्तं दीक्षालक्षणं व्रतस्थानां वेत्यादि विशेषो वगंतव्यः। वरीयसः उत्कृष्टान् योग्यान् पुरुषान् मृतकः जीवन्मृतः। क्षारकर्दमे लवणात्मपंके दुरंतयातना अनवसानदुःखानि। पुरुषमेधेन पुरुषहत्यालक्षणयज्ञेन यमसादने नरके स्वधितिना विशसनखड्गेनावदाय खंडयित्वा सौनिकाः हिंसकाः पशुमारा इत्यर्थः॥ ॥ ॥

विस्रंसनाकैः विश्वासोपायैः उपविश्रंभस्य विश्रंभस्य आदिश्य हाड्गुपातनं क्रीडनतया लीलाकारणाभावेन यमयातनासु यमेनाधिकृतेन नरके शूलवलादीर्घतुंडश्येनविशेषाः दंदशूकाः सप्तदंशनशीलाः सर्पाः उद्वेजयंभवतियमुत्पादयंति। उपसृत्य शप्प इहलोके यथा बिलेशयाः अजगरः बिलेशयस्तु अजगरः शमुरुक्रोमनी बिभिरिति। अवटनिरुद्धः सविलं कुसूलं व्रीहिगर्तं गृहं कारागृहं। आदिशद्य ज्वलमज्जनं दारुपात्रं वा। सगरेण विषसहितेनाग्निना कृतेन अपवनुषातिरश्चीनेन नेत्रेण अर्थादृष्टिमतिरभिमानो

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रंभकैरुपविश्रंभय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनतया यातयंति तेपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति। ये त्विह वै भूतान्युद्वेजयंति नरा उल्बणस्वभावा यथा दंदशूकास्तेपि प्रेत्य नरके दंदशूकाख्ये निपतंति। यत्र नृप दंदशूकाः पंचमुखाः सप्तमुखा उपसृत्य ग्रसंति। यथा बिलेशयान्। ये त्विह वा अंधावटकुसूलगुहादिषु भूतानि निरुंधंति। तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुंधंति। यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाटयंति। यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतः शंकी अर्थव्ययविनाशचिंतया परिशुष्यमाणहृदयवदनो निर्वृतिमनुपगतो ग्रह इवार्थमभिरक्षति। स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति। यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोंगेषु सूत्रैः परिवयंति॥ ॥

यस्य स तथा। अहंकृतिः अहंकारस्वरूपः अर्थव्ययविनाशयोः श्चितया ग्रहः ब्रह्मराक्षसादिलक्षणो ग्रहो यथा निधिमन्येभ्योभिरक्षति न तथेति शेषः। तस्यार्थस्य संपादने आर्जने उत्कर्षणे वृद्धीकरणे संरक्षणे च यच्छमलं तद्गृह्णातीति तत्संपादनोत्कर्षणसंरक्षणशमलग्रहः। वित्तग्रहं अर्थलुब्धपिशाचं। वायकाः पटवेरं कंथा निर्माणनिपुणाः। सूत्रधारा निशितैः सूत्रैः परिवयंति ओतप्रोतक्रियया विध्यंति॥ ॥

इयंत एव नरकाः किं ते तावन्तः अन्ये नरकाः असंख्याताः संतीत्याह। एवंविधा इति। उत्तरत्र स्वर्गादौ इह मनुष्यलोके पुनर्भवे पुनरुत्पत्तौ उभयशेषाभ्यां धर्माधर्मशेषाभ्यां च चतुर्दशधा लोकप्रकारेण स्थविष्ठं स्थूलतमं अणिष्ठं सूक्ष्मतमं उभयोः रूपयोः कस्मिन्रूपे प्रथमप्रतिपत्तिरिति क्रममाह श्रुत्वेति। आत्मानं मनः सूक्ष्मधियां सूक्ष्मरूपोपासनया। उक्तार्थमुपसंहरन् प्रतिपत्त्यर्थं सकलस्याह। भूद्वीपेति। सकलजीवानां निकायस्य धाम यः आश्रयः तस्य सकलजीवनिकायधाम यस्य स तथा तस्मै भूरस्माद्भूतं स्थूलं वपुर्मयाख्यातमिति

एवंविधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु सर्वेषु सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति। तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति। निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः। एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पितः। यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद। श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः। स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था। गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम॥ इति श्रीभागवते महापुराणे पंचमस्कंधे नरकानुवर्णनं नाम चतुर्विंशोऽध्यायः राम

नमिमतु यया कीदृशं भूद्वीपादिलोकाः एवं संस्था अवयवा यस्य तत्तथा तत्तु वा विजवासावारिजयोनित्रिनयनशतमखमुखसुरमकुटश्रेणिनिषण्णश्रीपादपीठं ससलिलसत्सलिलदशितिरुचिरुचिरं मंदहासेद्धानंदितलोकं स्मितदितिसुततति मदगिरिशिखरं हृत्कमलकमलं चिंतय चेतः श्रुतिरमतिगुणयदुकुलतिलकं। विजयध्वजतीर्थैरचितापीनेयं हरेः। पदरत्नावली नाम पंचमस्कंधसंगता॥ इति श्रीमन्महेंद्रतीर्थपूज्यपादशिष्यविजयध्वजभट्टारकस्य कृतौ श्रीभागवतटीकायां पदरत्नावल्यां पंचमस्कंधे चतुर्विंशोऽध्यायः राम

॥श्री॥

॥श्रीवेंकटेशानरसिंहाभ्यांनमः॥

॥नरहरेरिदं॥

॥श्री॥

॥श्रीवेंकटेशानारसिंहाभ्यांनमः॥

॥नरहरेरिदं॥

॥श्री॥

भा॰पं॰ १

श्रीवेदव्यासाय नमः॥ भवभयनदंष्ट्रो यस्याभिधानमद्य क्षिद्रोरलयति रागांसद्यः संकीर्तितं च बलमादिमुग्रहरिखिरदेहत्यांहो यद्यदीयपदार्थयाशरणमृनिशंशांतं नमामि गुरुहरिं च॥ अथ द्वः पंचमस्कंधे शैलाद्यं प्रष्टस्कंधसंधावगाधेन अनुतावः प्रार्थयित्वानुकामो भवतः सतोगुणार्थैकलुब्धाः २ अस्मिन् स्कंधे तीतस्कंधार्थं अथेतः प्र नमामि गुरुहरिं च॥ अथ पंचमस्कंधे शैलाद्यं प्रष्टस्कंधसंधावगाधे अनुतावः पार्थयेत्ना तुकामो भवतः सतोगुणार्थैकलुब्धाः वत्स्याश्रोतृणां फलाधिक्यप्रकटनाय संक्षिप्य निरूप्यते। तत्र प्रारिक्षिते ध्याये सर्वाधिकारिकं सुखसाध्यं श्रीहरिप्रसादजन कज्ञानसाधनमपि भक्त्या हरेर्नाम संकीर्तनं पापपरिहारद्वारा वश्यकं मुक्तिसाधनमिति निरूप्यते। तद्वर्णितान दरिद्रजनं यत्नु विहितमपि परीक्षितेन विना पापविनाशेन स्यान्नदभावे ज्ञानानुदयात् तस्मिन्नसति मोक्षमात्रमपि न स्यात् अतस्त्वया तदवश्यं वक्तव्यमिति इममेवार्थवादपि तु द्वितीयस्कंधे यथोक्तमनुवदति। निवृत्तिमार्ग इति। आदौ द्वितीयस्कंधारंभे वरीयान एष ते प्रश्न इत्यादिना निवृत्तिमार्गः स्वस्वरूपानंदाविर्भावलक्षणमोक्षसाधनविशेषः। ननु साधनविशेषप्रपंचनमंतरेण तत्प्राधिक्यं कथनं कुतो पयोगितया संगत इति तत्राह। यथेति

राजोवाच — निवृत्तिमार्गः कथित आदौ भगवता यथा क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः १

यथावत्सख्यादिलक्षणेन दोषत्रयरहितेन लक्षितं श्रीनारायणरूपं स्वस्य पुरुषार्थोपयोगीत्यभिप्रायेण तत्प्रपंचितमिति भावः। तस्य फलमाह। क्रमयोगेति। पक्षे आविर्भूतिः मार्गदर्शितां तत्त्वात्तेन ब्रह्मणा सर्वगुणपूर्णेन श्रीनारायणेन असंसृतिः संसाराभावलक्षणं फलं भवति निवृत्त्येति शेषः। कर्तृकरणयोस्तृतीयेत्युभयथापि सुखत्वं श्रीहरेरेवेति प्रकटनाय ब्रह्मणेति तृतीया। अथवा कस्मात् दृश्यते ब्रह्मेति ब्रह्मतो तस्मिन् गुणपूर्तिश्च ते गुणपरिपूर्णतया तत एव पुरुषार्थप्रदः न निर्गुणत्वेन इत्यतो ब्रह्मेति पदं प्रायोजि। कथं तत्प्राप्यते तेनेति तत्राह। क्रमेणानुष्ठितेन योगेन वैराग्यभक्तिनिरंतरध्यानज्ञानलक्षणोपायेनोपलब्धेन दृष्टेन। प्रथमं श्रवणं पश्चाद्देहे कान्तं ध्यानं ततोऽनंतरं समग्रांगध्यानमिति वा क्रमयोगः १ ॥ ॥ ॥ ॥ ॥

राम १

ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिमिति प्रवृत्तिलक्षणश्च यश्चोक्तः कथितः। स किंफल इति तत्राह। त्रैगुण्येति। त्रिगुणात्मकपुरंदरादिदेवतास्थानप्राप्तिफल इत्यर्थः। तत्फलं किं नित्यं नेत्याह। य इति। योऽसौ प्रवृत्तिमार्गः कामकर्मविद्भिः वितानकरणस्य दोषभञ्जनार्थं समर्थत्वात् अलीनप्रकृतेः अविनष्टप्रकृतिशक्तेः पुरुषस्य पुनः पुनर्गुणप्रभृतस्य देहस्य सर्गो यस्मात्तथा। सत्त्वादिगुणोत्थः सर्गो यस्मादिति वा भूयो जननमरणप्राप्त्यर्थं स्वकृतत्वाश्रिमणफलं ददातीत्यर्थः। अलीनप्रकृतेर्योगुणसर्गः सत्त्वादिगुणनिमित्तोत्पत्तिः असावपि तृतीयस्कंधादौ कथित इति वा योगविभागः॥२॥ अधर्मेण लक्ष्यंते दृश्यंते अनुभूयंते पृथक् संताप्यन्ते न क्रियन्ते इति वा। धर्मलक्षणा अधर्मलक्ष्यं तीति वा। नरकेति कंचियेषु ते नरकाः उपवर्णिताः पंचमांत इति शेषः। मन्वंतरो मन्वंतरविषयो विचारश्च वंतुर्थारंभे व्याख्यातः। कोसाविति तत्राह। आद्य इति।

प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने। योऽसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः २ अधर्मलक्षणा नाना नरकाश्चोपवर्णिताः मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ३ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च द्वीपवर्षसमुद्राद्रिनदीनदवनानि च ४ ॥ ॥ ॥ ॥ ॥ ॥

आद्यः प्राथमिकः। केनस्यष्टः इत्यतउक्तं। स्वायंभुव इति। स्वयंभुवा कल्पितत्वाय तं यस्मिन् मन्वंतरे स्वायंभुवो जातो मनुः। यद्यः सर्वमनूनामाद्य इति वा ३। ननु स्वायंभुव इति सामान्योक्तौ मनुविशेषः कुतो निश्चीयते। न च तत् वाच्यमिति वाच्यं। अत्र वर्णाता न वर्तते नैव। स्वयंभुजातानां सर्वेषामपि तत्संबंधितया तत्त्ववाच्यत्वोपपत्तेः। न च स्थातरंगीकारः किं न स्यादिति वाच्यं। विशेषमंतरेण केवलया निश्चेतुमशक्यत्वात्। स्वायंभुवकथारंभावर्तिते नेपरं वयइति ह्रदैः पहारानुस्तृतीय माशंकापतः। श्राद्धस्तत्रत्रसंबंधापरिक्षिपते। पत इति। यतोपतदिति। द्वीपादयश्च पंचमे व्याख्याता इति शेषः ४ ॥ ॥ ॥

भा०ष०
२

भागतो विभागतो लक्षणतो मानतश्च ज्योतिषां स्वरूपमिति शेषः। विवराणामधोभुवनानां संस्थानमिति शेषः। विभुरिदं जगद्यथा येन प्रकारेणासृजत्सोपि द्वितीयाध्यायोक्त इति शेषः ५ एवमनुव्याख्याने हेतुभूते एककारणापेक्षस्योक्तार्थग्रहणसामर्थ्यं प्रदर्श्य विवक्षितार्थं पृच्छति। अधुनेति। अधुनेममर्थं भवन्तं पृच्छामीति शेषः। इहैव लोके दुष्कर्माविनरोपायापेनसाधनेन नानोग्रयातनो ग्रयातनान्नरकान्नेयान्नगच्छेदधुना तत् दुष्कर्मपरिहारपटीयः साधनं व्याख्यातुमर्हसीत्यन्वयः। यातना तीव्रवेदनेति

भूमंडलसंस्थानं भागलक्षणमानतः॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ५ अधुनेह महाभाग यथैव नरकान्नरः॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ६ श्रीशुक उवाच नचेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ७

य ६ नचेदिहापचितिमिति। अपचितिर्विनष्टिरिति श्रुत्यर्थः प्रश्नप्रतिवक्ति न चेदिति। यथा गुरुपापमनउक्तिपाणिभिः मनोवाक्कायैः कृतस्यांहसोपचितिं प्रायश्चित्तं पलक्षणानां शमिहैव न कुर्याच्चेत्तर्हि स पापी नरकाननुपैतीत्यन्वयः। कीदृशान्नरकानित्याह। ये कीर्तिता इति। वाइत्यनेन पर्यायेणोक्तमर्थमाह। कथं कारमपचितिः स्यादित्यत उक्तं। यथेति। अंहसो गुरुलाघवं यथा तथा प्रायश्चित्तं करणमित्यर्थः। नचेदमौपचारिकं ध्रुवं निश्चितमिति। यस्मिन्नन्यावरितं दुरितं तस्मिन्प्रायश्चित्तं चेन्नाद्यापि क्षिप्रं गुरुदोषनिवृत्तिलक्षणफलदमित्येवैतनेनदर्शयति ७ ॥ ॥ ॥

राम
२

यस्मादेवमनर्थस्तस्मादाशु यस्मादेहवियोगात्पूर्वमेव कालकल्पमंतरेणापापनिष्कृतौ पापपरिहारे यतेत। प्रयत्नमपि मृत्युमेवयस्पेवेत्यभिप्रायेणोक्तमविपद्यतेति। बाल्ये वार्द्धके वा दौर्बल्यलक्षणविपत्तिस्संभवात्तत्तारुण्येन दृढयोग्यात्मयत्नेत्यर्थः। अनेन दुर्व्यादिसंपन्नावेवप्रयतनीयमिति ध्वनितं। यथेत्युक्तं विवृणोति। यदात्मन इति। आत्मनो दोषस्य पद्गुरुत्वं लघुत्वं च तद्दृष्ट्वा तदनुसारेणेत्यर्थः। अत्रैव दृष्टांतमाह। यथेति। रुजां रोगाणां निदानं वातादिकारणमित्यभिधानान्मूलनिमित्तं तानि। आत्मनो दोषस्य गुरुलाघवस्याभावे तन्नुरूपस्वास्थ्यविज्ञानात्कर्तव्यमिति सूचितमनेन। यद्वा यदात्मनो देहस्य मृत्योरविपन्नरणालक्षणाविपत्तमव निश्चतः पुरैव निष्कृतिविधानं च गुरुलाघवज्ञानपूर्वकमिति। इममर्थं सदृष्टांतमाह। दोषस्येति ८ राजा निष्कृतेर्वैयर्थ्यं शंकते। दृष्टेति। चौर्यादिकारिणो राजदंडादिदर्शनेन। मृतो नरकमभ्येतित्यागम्याममनान्न

तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चिकित्सेत रुजां निदानवित् ८ राजोवाच दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं॥ करोति भूयो विवशः प्रायश्चित्तमथो कथं ९ क्वचिन्निवर्त्ततेभद्रात्क्वचिच्चरति तत्पुनः प्रायश्चित्तमथोपार्थं मन्ये कुंजरशौचवत् १० श्रीशुक उवाच कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते॥ अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं ११

श्रुतेश्च तेः स्वात्मनः पापमहितं दुःखसाधनं जानन्नपि विवशः स्वकर्माधीनो भूयः पश्चादपि पापं करोतीति यदृष्टोतस्मात्प्रायश्चित्तं कथं भवतीत्यन्वयः ९ असंभवं विवृणोति। क्वचिदिति। क्वचिदभद्रात्प्रायश्चित्तेन निवर्त्तते। क्वचित्तत्सदृशमभद्रमाचरतीति यदर्थोतस्मात्प्रायश्चित्तमपार्थं मन्ये। निःप्रयोजनत्वे कुंजरशौचवदिति दृष्टांतः। शौचेन स्नानं लक्षयति १० प्रायश्चित्तलक्षणां कर्मापार्थमिति वृहन्नर्किं केवलेत्यर्थं युत विद्वद्भिर्विमृश्य विहितमाहो स्वित्तज्ञानपूर्वकमचिक्रियमाणांनदिति तन्नाद्यः संमत इत्याह। कर्मणेति। प्रायश्चित्तलक्षणेन कर्मणा कर्मनिर्हारः पापकर्मविनाशः आत्यंतिकः छिन्नमूलत्वेन नेष्यते। अमूयो रप्यज्ञानमूलत्वेनाविकृतत्वात्। द्वितीयं न त्वर्थमित्याह। प्रायश्चित्तेति। विद्वद्भिरविद्वद्भिर्धिकृत्य प्रायश्चित्तं कर्मविमर्शनं कृत्वा विहितं कर्मव्यर्थं ने ष्यत इति पूर्वेणान्वयः ११

तत्रापेदंपापमितिज्ञात्वातद्कुर्वाणोनुष्ठविहितंक्रियमाणाखलमयाकृतंपापमितिज्ञात्वातस्येदंप्रायश्चित्तमितिजानतेतिपक्षद्वयेपिक्षिप्यमाणंकर्मननिवर्तते किंतु साधर्म्यमितिभावेनाहना
श्नतइति एवमितिवचनाद्यर्थेत्यध्याहृत्यव्यापथ्यमेवान्नमश्नतः संसोव्याधयोनाभिभवंतियथादिद्दृमितिशेषः अपत्यंबुपानाद्धनजीर्यतेन्नमनंबुपानाद्धसएवदोषः तस्मान्नरोवह्निविवर्धना
यस्तुकृत्स्नकुर्वीरिविधिदेरमूरिइत्यादिविधानंहिशब्देनाह नित्यस्यएपति।एवमिति।नियमकृत्यापकर्माकुर्वन्नुत्थविहितंकुर्वन्नुशनैर्बहुजन्मार्त्ययेशुद्धापप्रवयेनज्ञानोत्पत्त्योक्षेमायकल्प
तेमोक्षायसमर्थोभवति १२ ज्ञानेनतपआदिप्रायश्चित्तकर्मणामहदवैरूप्यंपतेत्यत्वयः १३ १४ दुर्बलकायादिमतांतपआद्याचरणाशक्यानांकेनपापक्षयःस्यादितितत्राह केचिदि

नाश्नतः पथ्यमेवान्नं व्याधयोभिभवंति हि। एवं नियमकृद्राजंछनैः क्षेमाय कल्पते ११ तपसा ब्रह्मचर्येण शमेन च दमेन च॥ त्यागेन सत्य
शौचाभ्यां नियमेन यमेन च १३ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः। क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः १४ केचित्के
वलया भक्त्या वासुदेवपरायणाः अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः १५ न तथा ह्यघवान्राजन्पूयेत तपआदिभिः। यथा कृष्णा
र्पितप्राणस्तत्पुरुषनिषेवया १६ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोकुतोभयः। सुशीलाः साधवो यत्र नारायणपरायणाः १७ प्रा
यश्चित्तानि चीर्णानि नारायणपराङ्मुखैः।। न निष्पुनंति राजेंद्र सुराकुंभमिवापगाः १८ ॥ ॥

ति १५ इदमशक्ताधिकारत्वेनेत्युक्तं किंतु किंचित्ततोप्युत्तममिति भावेनाह न तथेति। कृष्णेर्पिताः प्राणाः श्रोत्रादयो यस्य स तथा। कृष्णेर्पितप्राणत्वं केन स्यात्तत्राह तत्पुरुषेति तस्य
कृष्णस्य पुरुषास्तेषां निषेवया। भक्त्यास्त्वनन्यया शक्य इत्यादि प्रसिद्धिं हि शब्देन दर्शयति १६ अत्र त्रिषु दुःकृतपरिहारमार्गेषु भक्तिमार्गस्यैव प्राधान्यमित्याह सध्रीचीन इति।
लोके प्रायश्चित्तलक्षणसाधनसमूहे। आनंदरूपत्वात्क्षेम इत्युच्यते तत्राधिकारिणमाह सुशीला इति १७ तपआदीनामभक्तोपविलानां पापनिर्हरणहेतुत्वं न देव
लानामित्युक्तोपि भक्तेरेव प्राधान्यमित्याह प्रायश्चित्तानीति १८ ॥ ॥ ॥ ॥

ननु केवलभक्त्या पापनिर्हरणप्रकारः कथमत्राह सकृदिति। यायनिर्हरणं तपआदाविव विरसाध्यं न भवति किंतु क्षिप्रसाध्यमित्यतो भक्तेः प्राधान्यमित्याह सकृदिति। कृतपापानुतापपूर्वकं श्रीकृष्णांघ्रिपद्मे सकृ
न्मनो निवेश्य नेमचीर्णनिष्कृताः कृतप्रायश्चित्ताः १९ नन्वेवं वैदिकानामस्तु अवैदिकानां शूद्रादीनां पापप्रायश्चित्तं कथं स्यादित्याशंक्य भक्त्या तेषां नामकीर्तनेन दुःकृतनिष्कृतिः स्यादिति मम थे
इतिहासेन दर्शयिष्यन्नेति। भक्त्या भगवन्नामसंकीर्तनादपि दुःकर्मनाशः स्यात् किंतु वक्तव्यं निरंतरमेकमनस्कत्वेन श्रीहरिस्मरणादिनेत्यतो देममधं माख्यापिकया दर्शयति। अत्रेति। अत्र
वैदिकानामवैदिकानामपि भक्त्या नामसंकीर्तनादघक्षये। एवंकारेणायोगव्यवच्छेदत्रिनत्वन्ययोगात् तथा त्वेपूर्वोक्ता व्यर्थाः स्युरित्यर्थः २० अनया प्रकृत्या ज्ञानस्य मीलोमीलनं तिरोभावो यस्य स

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह। न ते यमं पाशभृतश्च तद्भटान्स्वप्नेपि पश्यंति हि चीर्णनिष्कृताः १९ अत्रैवोदाहरंतीममितिहासं पुरातनं। दूतानां विष्णु
यमयोः संवादं तं निबोधमे २० कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः। नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः २१ बंद्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमाश्रितः।
बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनं २२ एवं निवसतस्तस्य लालयानस्य तत्सुतान्। कालोत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः २३ तस्य प्रवयसः पुत्रा दश ते
षां तु योवमः। बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं २४ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि। निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं २५ भुंजानः प्रपिब
न्खादन्बालकं स्नेहयंत्रितः। भोजयन्पाययन्मूढो न वेदागतमंतकं २६ ॥ ॥ ॥

तथा। पश्चादजामिलेः पूर्वगुणोपसंपन्नस्तस्य मीलनमुन्मीलनं यस्य स तथेत्युभयथाप्यजामिलत्वं पुत्रं कृत्स्नलक्षणं सासमिद्धानः आचारः सदाचारः २१ बंदीग्रहणैरक्षैर्देवनैः। कितवस्य दंभत्वादिकैतवं
तस्य भावः प्रमितत्वभिधानादसत्यव्यवहारैः चौर्यैः परस्वापहरणलक्षणाख्यापारैर्वृत्तिं वर्तनं जीवनोपायं देहिनं यातयामास नरकगमनाभिमुखमकरोत्। शरीरयात्रामुक्तमकृतेति वा २२ अष्टा
शीत्या युक्ता याः समाः ये संवत्सरास्तत्परिमाणलक्षणः कालः २३ अवमः कनिष्ठः २४ २५ अंतकं मृत्युं २६ ॥ ॥ ॥

भा०प०
४

मृत्युकाले देहवियोगलक्षणकाले ऽत्यन्तोऽसर्वदोषाद्ध हरस्य हरेरव्यग्रहाणकाले दूत्रनामानलकृतोऽपस्थिते तद्दिप्रकाशिते तनये पूर्णेस्तिने बाले पंचवर्षके स्वैष्ट्रदेशमात्रे नारायणाख्ये मत्रि विशेषेण मतिं सम र्पयामास अर्थविविक्तिवका अन्नपानासमर्पदित्यर्थः॥ अजामिलो विस्मरणाद्धर्मन्यामृत्योरम्पत्यन्ते तेनतद्धृतामहं शेषावद्धहृर्षि विद्युत्पत्न प्रमाणाल्बेनवह्नमाणं अत्रान्त्युसंधेयमितिज्ञातव्यं २७ २८ दूरेक्रीडनकासक्तं हृष्टि तंजगत्सर्जनादिलीलाविलोसोपेतं पुत्राख्यो नरकात्त्रातारं नारायणनामानं प्लावितेनाविलंबुरादिमात्रात्मनास्वरेणाप्लुतावरितगुणप्रयुयेनउतान्नपानमत्वाकुलेंद्रियः २९ हरेःकीर्तनं किंगुणरूपं नेताहा भर्तुर्विति भर्तुः स्वामिनो नारायतोति नामरूपदोषहरणाशीलं कीर्तनं यस्य नावस्तद्दकीर्तनं भर्तुर्नाम निशम्येतिवा। हरिरित्यरूदयं नारायतोत्पन्नरूपखलुष्टयमनेनोक्तमि

सएवंवर्त्तमानोज्ञोमृत्युकालउपस्थिते॥मतिंचकारतनयेबालेनारायणाह्वये २७ सपाशहस्तांस्त्रीन्दृष्ट्वापुरुषान्भृशदारुणान् वक्रतुंडानूर्ध्वरोम्णआत्मानंनेतुमागतान् २८ दूरेक्रीडनकासक्तंपुत्रंनारायणाह्वयं प्लावितेनस्वरेणोच्चैराजुहावाकुलेंद्रियः २९ निशम्यम्रियमाणस्यमुखतोहरिकीर्त्तनं॥भर्त्तुर्नाममहाराजपार्षदाःसहसापतन् ३० विकर्षतोंतर्हृदयाद्दासीपतिमजामिलं।यमप्रेष्यान्विष्णुदूतावारयामासुरोजसा ३१ ऊचुर्निषेधितास्तांस्तेवैवस्वतपुरस्सराः॥केयूयंप्रतिषेद्धारोधर्मराजस्यशासनं ३२ कस्यवाकुतआयाताःकस्मादस्यनिषेधथ किंदेवाउपदेवावायूयंकिंसिद्धसत्तमाः ३३ सर्वेपद्मपलाशाक्षाःपीतकौशेयवाससः॥किरीटिनःकुंडलिनोलसत्पुष्करमालिनः ३४ सर्वेचनूत्नवयसःसर्वेचारुचतुर्भुजाः धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ३५ दिशोवितिमिरालोकाःकुर्वंतःस्वेनरोचिषा॥किमर्थंधर्मपालस्यकिंकरान्नोनिषेधथ ३६

विस्मापनामान्वितत्वेनोक्तमिति॥ अनेन पुत्रस्नेहमंतरेण प्रावीनाहस्त्वनाद्दुतया भक्त्या भगवन्नामसंकीर्तनंकृतमिति ज्ञायते ३० अजसा स्वप्रभेण बलेन वा॥ अोजो बलं मवलयोरितिपाठवः ३१ ३२ निषेधथ अस्य नयनमिति शेषः ३३ नूत्नवयसः षोडशवर्षवयसः॥ धनुरादिभिः श्रीर्येषां ते तथा ३४ वितिमिरालोका इत्यत्र वीत्युपसर्गः प्रत्येकमभिसंबध्यते॥ विगततिमिरा तिविगताश्चालोका अन्येप्रकाशा स्वया युतिर्भिरास्तथा निरस्ता धकारान्यप्रकाशा इत्यर्थः ३६ ॥ ॥ ॥

राम
४

३५ तत्त्वमनारोपितंरूपंलक्षणंव्यावर्त्तकंधर्मं ३६ कथंस्वित्केनप्रकारेण स्थानंदेशः विषयो वा॥ दंडणं मध्ये कारिणः कर्मकारिणः सर्वे विदंड्याः किंवाहोस्वित्कतिचिदेव दंड्यास्तत्रापि किंविकारिणो वा किं कर्म कुर्वाणा इति ब्रूत। ३७ मन्वाधर्मस्यलक्षणमित्यत्राहुर्वेदेत्याह॥ वेदे ऐवेति वेदएव धर्माधर्मौ मिथोव्यावर्त्यलक्षीत्युपनेनत्र प्रमाणं चोक्तं॥ धर्मस्य तत्त्वं ब्रूतेत्युक्तो तद्विस्ताराद्ध दिष्या हवेद इति वेदा नारायणरूपं वेदेन्कृताः न पःशक्ताह एव वेदस्वतःसुनिश्चा स्त्यर्थसाक्षादितिगुद्धक्तं वेदानां प्रथमोवक्ता हरिरेव यतो विश्वः॥ अतो विश्वात्मका वेदाइत्याद्वर्वेदं वा दिन इति देवस्त्रवन्नारायणो पिकिमन्यस्मात्खाप्तदेहइति नेत्याह। स्वयंभूरिति॥ अनेन नारायणावक्तत्वेमोरुषेयत्वेनानारोपितरूपत्वाभावेन तदुक्तधर्मनिश्चया योगइत्याशंकापरिहृता।

श्रीशुकउवाच इत्युक्तेयमदूतैस्तेवासुदेवोक्तकारिणः॥तान्प्रत्यूचुःप्रहस्येदंमेघनिर्ह्रादयागिरा ३५ विष्णुदूताऊचुः यूयंवैधर्मराजस्ययदिनिर्देशकारिणः॥ब्रूतधर्मस्यनस्तत्त्वंयच्चाधर्मस्यलक्षणं ३६ कथंस्विद्ध्रियतेदंडःकिंवास्यस्थानमीप्सितं दंड्याःकिंकारिणःसर्वेआहोस्वित्कतिचिन्नृणां ३७ यमदूताऊचुः वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः॥वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम ३८ येनस्वधाम्न्यमीभावारजःसत्त्वतमोमयाः॥गुणनामक्रियारूपैर्विभाव्यंतेयथातथं ३९ सूर्योग्निःखंमरुद्गावःसोमःसंध्याहनीदिशः॥कालःस्वयंधर्मइतिएतेधर्मस्यसाक्षिणः ४० ॥ ॥

तेषांस्वयंभूतेनाभिव्यक्तिरेवहरिणानवधुराणावहस्वुरध्यारवितत्वं यावद्बुस्वविष्टितंतावतीवागिति श्रुतेः ३८ नन्वेतावतानारायणाइत्यस्मात्कथंव्यावर्त्तनतयाहायतइतितत्स्वरूपमाह येनेति॥ स्वधाम्नि स्वाधारतया॥ गुणाःशुक्लादयः॥ नामान्यश्वमाहिषदेवस्वन्यादीनि॥ क्रियाःपचति पठति इत्यादयः॥ रूपाणि द्विपाच्चतुष्पादित्यादीनि॥ क्रियापंचविधंकर्मेति वा गुणाः धर्मदमादयः॥ रूपाणि शुक्लादीनिवा॥ यथातथमसांकर्येण विभाव्यंते उत्पाद्यंते ३९ किंवास्यस्थानमीप्सितमित्यत्राहुरित्याह॥ सूर्योग्निरिति॥ गावः पः॥ गोर्भूमिरित्यर इतिवचनात् संध्यावाहश्च संध्याहनी॥ कालाभिमानी देवः॥ स्वयं पापपुण्ययोः कर्ता देवो जीवश्चः श्रीहरिर्वाकालः॥ तद्दयं मन इति देहस्वपमिति अनेन व्याख्यातं॥ धर्मस्येत्युपलक्षणंत्र धर्मस्यापि॥ साक्षादीक्षत इति साक्षिणः ४०

भा॰ष॰
५

धर्माधर्मनिरूपणमुपपादयति धर्मेति। स्वरूपतो लक्षणतः फलतश्च धर्माधर्मौ निरूपयितुं शक्यावित्याह। अधर्मस्य स्वरूपमाह। वेदविहितो धर्मः तद्विपरीतस्त्वधर्मः। ते एते धर्माधर्मौ। क्वचिद्धर्मोऽपि दंडहेतुरस्ति नेत्याह। सर्वे इति। कारिणः पापकारिणः सर्वे कर्मानुरोधेन पापकर्मतारतम्यानुसारेण दंडं अर्हन्ति। ननु पुण्यकारिणामपि किं दंडः स्यादिति। न पुण्यकारिणः इत्याह। अत्र सर्वे इत्यस्य अवयवार्थः। सर्वे दंडमर्हंतीत्यत्र न संशयः किंतु कर्मानुरोधेनेति विशेषः। यद्वि पुण्यकारिणः तर्हि सर्वेऽपि बलवत्पापकर्मानुरोधेनैव दंडं अर्हन्तीत्यनेन पापकारिण एव यमेन दंड्याः न पुण्यकारिण इत्यभिप्रायः ४१ ननु भयेषा मपि दृष्टं कर्तव्यमेव हि केषुचिद्दुःखफलेन ज्ञानता सुखमपि विषयकर्मसंभवः कथमत्राह। संभवंतीति। विपरीतानि पापविरुद्धानि पापानि राज्याद्यवाप्तिनिमित्तानि सुखफलप्रदानि। अथापि तु दृष्टमदृष्टं कर्माणि नियमेन विशिष्टेन हि शब्दगृहीतं। संभवेऽपि किं कारणमत्राह। कारणमिति। त्रिगुणसंबंध एव कारणमिति भावः। ननु एतल्लिंगशरीरोपनैकां त्यतस्य कर्माकरणा

एतैरधर्मो विज्ञातः स्थानं दंडस्य युज्यते। सर्वे कर्मानुरोधेन दंडमर्हंति कारिणः ४१ संभवंति हि भद्राणि विपरीतानि चानघाः। कारिणां गुणसंगोऽस्ति देहवान्न ह्यकर्मकृत् ४२ येन यावान्यथाधर्मो धर्मो वा समीहितः। स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ४३ यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते। गुणतो भूतगुणवैचित्र्यात्तथान्यत्रानुमीयते ४४

स्वधर्मो॰ २

दित्याशंक्य स्थूलदेहविवक्षयोक्तमिति भावेनाह देहवानिति। गुणसंगेऽपि पुण्यवान् कर्मकरोति सत्तासाधारणादिति चेत्तत्राह देहवानिति वादे हि देह कर्मरहितत्वमस्त्येव गुणानां तादृशशक्तिमत्वा त्। कारयतीत्यवश इत्युक्तेः ४२ किमत इत्यत आह फलितमाह। येनेति। अमुत्र परलोके ४३ ननु यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुत इति वचनात्स एवामुत्र स्वकृतं भुंक्त इति न घटत इत्यत आह। यथेहेति। स्वकृतफलदातारो दृश्यंते प्रमाणात इति शेषः। वाक्यप्रमाणं पानांगीकारेऽपि प्रत्यक्षगृहीतव्याप्तिकानुमाना त्सिद्धमित्याह। त्रैविध्यमिति। सत्वादिगुणानां वैचित्र्याद्भूतेषु उत्तममध्यमाधमत्वभेदेन त्रैविध्यमुपलभ्यते यथा प्रत्यक्षेणेति शेषः। अन्यत्र जन्मांतरे परलोके वा ४४ ॥ ॥

राम
५

अनुमानस्य प्रामाण्यं आह पितृमेतस्यैव सहृष्टांतमुपपादयति त्याह वर्तमान इति। वर्तमानः प्रतीयमानो वसंतादिकालः अन्ययोरतीतभविष्यवसंतयोर्गुणानां पुष्पफलादिकार्याणामभिज्ञाप कोऽयथा एवमेतज्जन्मान्यजन्मधर्माधर्मज्ञापकमन्ययोरतीतानागतजन्मनोः पौधर्मा धर्मौ तौ नितरां दर्शयति ज्ञापयतीति धर्माधर्मनिदर्शनं ४५ इतोऽप्यनुमानं प्रमाणमिति ज्ञाप यितुं जीवसमवेतधर्माधर्मसद्भावे हेतुः प्रत्यक्षं प्रमाणयंतीत्याह। मनसेति। पुरे जीवशरीरे स्थितो देवः श्रीनारायणो जीवस्य पूर्वरूपमपूर्वमनागतरूपं च तत्समवेतधर्माधि र्मौ स्वमनसैव विपश्यति अपरोक्षीकृत्य वर्तते। दर्शनस्य कार्यविवाधो नास्तीति लट्प्रयोगः। अन्ये धाम दर्शनमेव किंनेत्याह इत्याह। अनुमीमांसत इति। अजः परमेष्ठी भगवान्मनसा नुमीमांसते तेन तदनुग्रहेणानो व्यविचार्य पश्यतीत्यर्थः। सर्वजीवसाधारणत्वज्ञश्च प्रयोगादन्ये देवाश्च विषयायोग्यं जानंतीति। जीवानां मनोऽपि धर्माधर्मसमवेतपूर्वापररू

वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा। एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनं ४५ मनसैव पुरे देवः पूर्वरूपं विपश्यति। अनुमीमांसतेऽपूर्वं मनसा भगवानजः ४६ यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि। न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ४७ ॥

पं वर्तमानवत्सिद्धमित्याह। इत्यादुरित्यतो वाह मनसेति। पुरे तिर्यगादिपुरे देवः क्रीडन् भगवान्नामपद्मगुणोपेतो जीवः पूर्वाणि भवसंस्कारसंस्कृतेन मनसैव पूर्वरूपं धर्माधर्मसमवायात्मकरूपं विप श्यति जानाति। जनाति। अपूर्वं मनागामि तं मनसा अनुमीमांसते विदार्यानुमिनोति। अजोऽत्योको अप्रमाणोऽव शेत इति श्रुतिः ४६ पूर्वापररूपे जानाति चेत्तर्हि किमयमन्यत्र मृतोऽन्यत्र

६३

जातो ऽहमिति न जानातीत्याशंक्याज्ञो न भवत्युत्तमाद्युग्रहमंतरेणातादृशज्ञानेन सुखं भंसर्वेषामित्यभिप्रेत्याह इत्याह। यथेति। अज्ञोऽविवेकी अव्यक्तमेव प्रकृतिनिर्मितदेहमेवोपा स्ते देहात्मनोरभेदं कल्पयति। व्यक्तमेव पुरः स्थितमेव जानाति न तु पूर्वापरे इति वा। तत्र कारणमाह इत्याह तमसेति। विपरीतप्रत्ययापादकतमोगुणयुक्तत्वात्। अत एव पूर्व मपरं च न वेद यथा तथा नष्टजन्मविषयस्मृतिः पुरुषोऽन्यत्र जातइत्यादिकं न जानातीत्यर्थः। अनेन यावज्जीवं सुखं जीवेदिति चार्वाकप्रतमन्नप्रलपितमिति ज्ञायत इति भावः

४७

भा·ष·
६

देहीवेत्कर्मकरोत्येवेत्फलंतत्रकर्मकरणप्रकारंदर्शयति।पंचभिरितिपंचभिर्वागादिकर्मेंद्रियैःस्वार्थान्स्वविषयान्वचनशिल्पगतिविसर्गानंदांस्तथापंचभिःश्रोत्रादिज्ञानेंद्रि
यैःपंचशब्दादीन्सप्तदशःस्वयमेकआत्माषोडशेनमनसाद्दशमेदसुक्तेनलिंगशरीरेणत्रीन्सत्वादिगुणजांस्त्रिधाविभक्तंसुखंदुःखमिश्रंचभुंक्ते।सतुसुखेसंजयतीत्यादेः।देहात्मनोर्भे
दप्रकाशनायसप्तदशइत्युक्तं ४७ तर्हिकस्मात्संसारोस्यनितरांहातदेतदिति।षोडशकलाश्रोत्रादीन्द्रियाणिमनश्चपंचभूतानियस्मिंस्तथा।शक्तीनांप्रकाशक्रियावरण
लक्षणानांत्रयंयस्मिंस्तत्तथा।सत्वादिगुणशक्तियुक्तमित्यर्थः।अतएवमहत्पुरुषार्थाभिभवसमर्थंत्रिशक्तियुक्तत्वाद्धर्मादिप्रदं लिंगशरीरंपुंस्यनुस्वकर्मानुकूल्येनसंस
तिंधत्तइत्यन्वयः।अधिकरणत्वमात्रप्रदर्शनायपुंसीतिसप्तमी।तस्मादभिमाननिमित्तमिदंसर्वमित्यर्थः ४८ आत्मनःसंसारप्रकारंनिरूपयति।देहीति।अवशीकृतष

पंचभिःकुरुतेस्वार्थान्पंचवेदाथपंचभिः।एकस्तुषोडशेनत्रीन्स्वयंसप्तदशोश्नुते ४७ तदेतत्षोडशकलंलिंगंशक्तित्रयंमहत्।धत्तेनुसंसृतिंपुं
सिहर्षशोकभयार्तिदां ४८ देह्यज्ञोजितषड्वर्गोनेच्छन्कर्माणिकार्यते।कोशकारइवात्मानंकर्मणाछाद्यमुह्यति ४९ नहिकश्चित्क्षणा
मपिजातुतिष्ठत्यकर्मकृत्।कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ५० लब्ध्वानिमित्तमव्यक्तंव्यक्ताव्यक्तंभवत्युत।यथायोनिय
थाबीजंस्वभावेनवलीयसा ५१

षडिंद्रियवर्गोनिच्छन्नपिकर्माणिकार्यते।गुणाधीनप्रकृद्विंद्रियैरितिशेषः।विशिष्टग्रहीतवद्बलात्कार्यमाणश्चेत्तत्संपद्विपदौवेत्तिकिंत्वित्याह।कोशकारइति।यथाकोशका
रःकृमिःस्वकर्मणानिर्मितकेशिनात्मानमाछाद्यकोशएववसन्मुह्यतिकोशनाशनाशेनजानाति।तथादेह्यपिकर्मणात्मानमाछाद्यमुह्यतीत्यर्थः ४९ मोहो
स्यास्तीतिकुतोज्ञातइत्याशंक्यपुनःपुनःकर्मकरणादित्यभिसंधिमृतःस्वोक्तार्थेप्रमाणंदर्शयतिइत्याह।नहीति ५० जननमरणेअपिदेहस्यैवात्मनस्तदभि
मानादुपचर्यतेइत्याह।तस्याहाल्लब्ध्वेति।संसारनिमित्तमव्यक्तंप्रकृतिकार्यंशरीरंलब्ध्वाव्यक्ताव्यक्तंप्रकृतंजननमरणमेविभवतिजीवस्योपचारइतिशेषः।देहस्यसर्वथाना
शादनाशाद्वेतनस्यवेत्याहेः।निमित्तंकारणमव्यक्तंप्रकृतिलब्ध्वाप्यव्यक्ताव्यक्तंजननमरणात्मकंशरीरंभवतिजीवस्येतिशेषइतिवा।कथंयथायोनिपश्चादियोनिमन
तिलंघ्ययथाबीजंकर्मराशिमनतिक्रम्यसत्वादिनिमित्तस्वभावेन ५१ ॥ ॥ ॥

राम
६

एवंसंसारप्रसंगमुक्त्वाऽनिवृत्तपापमपिदुर्जयाहाएषइतिअयएषपुरुषस्यविपर्ययःसंसारःप्रकृतिसंगेनासीत्सएवईश्वरसंगादीश्वरसेवालक्षणान्नचिरात्क्षिप्रंविलीयतेस
मूलंविच्छिद्यते ५२ विद्वत्तादिगुणसंपन्नत्वेनबुद्धिपूर्वकमेवपापकारित्वेनप्रायश्चित्तानधिकारित्वेननाममात्रोच्चारणस्यप्रायश्चित्तत्वेसर्वेषामपिमुक्तिप्रसंगेनतस्य
जनाभावेनपुमत्स्वाम्याज्ञाकारिणोपमस्याज्ञालंघनदोषप्रसक्त्याधिकारहानिलक्षणानर्थःस्यादित्यतोयमसकाशगत्यापंतत्रदंडेमुद्धोमवत्वित्याशयेनदुर्विष्वाहाद्यः

एषप्रकृतिसंगेनपुरुषस्यविपर्ययः।आसीत्सएवनचिरादीशसंगाद्विलीयते ५२ अयंवश्रुतसंपन्नःशीलवृत्तगुणालयः।धृतव्रतोमृदु
र्दांतःसत्यवाङ्मंत्रविच्छुचिः ५३ गुर्वग्न्यतिथिवृद्धानांशुश्रूषुरनहंकृतिः।सर्वभूतसुहृत्साधुर्मितवागनसूयकः ५४ एकदासौवनंयातः
पितृसंदेशकृद्द्विजः।आदायततआवृत्तःफलपुष्पसमित्कुशान् ५५ ददर्शकामिनंकंचिच्छूद्रंसहभुजिष्यया।पीत्वाचमधुमैरेयंमदा
घूर्णितनेत्रया ५६ मत्तयाविश्लथन्नीव्याव्यपेतंनिरपत्रपं।क्रीडंतमनुगायंतंहसंतमनयांतिके ५७ दृष्ट्वातांकामलिप्तेनबाहुनाप
रिरंभितां।जगामहृच्छयवशंसहसैवविमोहितः ५८ स्तंभयन्नात्मनात्मानंयावत्सत्वंयथाश्रुतं नशशाकसमाधातुंमनोमदनवेपितं
५९ तन्निमित्तस्मरव्याजग्रहग्रस्तोविचेतनः।तामेवमनसाध्यायत्स्वधर्माद्विरराम ह ६० तामेवतोषयामासपित्र्येणार्थेनयावता।
ग्राम्यैर्मनोरमैःकामैःप्रसीदेतयथातथा ६१

पंचेति।मंत्रविद्वेदज्ञः ५३ ५४ आवृत्तोनिवृत्तः ५५ भुजिष्ययादास्यामैरेयाख्यमधुविशेषेण ५६ अयंतीनी
वीवस्त्रग्रंथिर्यस्याःसातथा ५७ स्वेदकंपादिलक्षणजनकेनकामेनलिप्तेनवशीकृतेनहृच्छयःकामस्तस्यवशं ५८ यावत्सत्वंयथाशक्ति।यथाश्रुतंश्रुत्वापोनी
पनेदेतइत्यादिशास्त्रश्रवणमनुसृत्य।मदनवेपितंकामकंपितंकामबीजावपनस्यक्षेत्रीभूतंवा ५९ स्मरइतिव्याजग्रहेणग्रस्तः।विचेतनःशास्त्रविरुद्धतानः ६०
ग्राम्यैःकामभोगसाधनैः।काम्यंतइतिकामाःविषयास्तैः ६१

भा·ष· ७

अप्रेष्ठोयं ग्रनवाप्तयौवनां ६२ ६३ स्वैरचारी निरंकुशत्वेन वर्तमानः। अघायुः पापजीवनः। मलाङ्गनादिदोषात् ६४ अकृतं निर्वेशं यावता निर्वेशेन पापशुद्धिः स्यात्तावत्प्रायश्चित्तं न कृतवांस्तं। यत्र नीतोयमभटैः कृतदंडेन शुद्धो भवति ६५ इति श्रीभागवते षष्ठस्कंधे प्रथमोऽध्यायः॥ ॥श्रीहरिनामसंकीर्तनमाहात्म्यमस्मिन्नध्याये वर्ण्यते। तदर्थं श्रीविष्णुदूता यमदूतान्प्रत्युपोद्घातं रचयंतीत्याह। बादरायणिरिति। नयकोविदाः प्रायश्चित्तशास्त्रोक्तन्यायसूक्ष्मार्थपंडिताः १ २ यद्यस्य प्रमाणत्वेन करोति तद्धास्य मनुष्यस्तत्स्यवर्तते लोको

विप्रां स्वभार्यामप्रौढां कुले महति लंभिताम्। विससर्ज विरात्पापः स्वैरिण्यापांगविद्धधीः ६२ इतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम्। बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ६३ यदसौ शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः। अवर्तत चिरं कालमघायुरशुचिर्मलात् ६४ तत एनं दंडपाणेः सकाशं कृतकिल्बिषम्। नेष्यामोऽकृतनिर्वेशं यत्र दंडेन शुध्यति ६५ इति श्रीभागवते महापुराणे षष्ठस्कंधेऽजामिलोपाख्याने प्रथमोऽध्यायः॥ ॥श्रीबादरायणिरुवाच॥ एवं ते भगवद्दूता यमदूताभिभाषितम्। उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः १ विष्णुदूता ऊचुः॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम्। यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा २ प्रजानां पितरो ये च शास्तारः साधवः समाः। यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ३ यद्यदाचरति श्रेयानितरस्तत्तदीहते। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ४ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः। स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ५ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम्। विस्रंभणीयो भूतानां सघृणो दोग्धुमर्हति ६ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि। यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ७ ॥ ॥

जनः ४ स्वयं परबोधनमंतरेण पशुः पूर्वापरादिसानभिज्ञः ५ स प्रमाणभूतः पुरुषस्तत्र न्यर्पितस्तत्त्वात्मा सर्वस्वं लक्षणो येन स तथा तं। अचेतनमज्ञानिनं। विस्रंभणीयो विश्वासनीयः। घृणा दया भावइतिधातोः। परक्लेशदर्शने यस्य चित्तं द्रवीभवति स घृणः ६ अकृतनिर्वेशमित्यत्राहुः अयमिति। यमदूतान्दृष्ट्वा पुत्रसंकेतितनामपि नारायणनाम स्मृत्वास्य नाम्नो हरिरेव मुख्यार्थ इति प्राचीनपुण्यप्रवाहात् ... इति ज्ञानोदयादत्यन्तभक्त्या विवश इति ... हरिरेवोक्तं ७ ॥ ॥

राम ७

गिचेह

भा·ष· ८

संदष्टः सर्पादिना। आहतो लकुटेनाघातनां दुःखं १५ ननु नामसंकीर्तनेन पापपरिहारे गुरुलघुपापपरिहारार्थं गुरुलघुप्रायश्चित्तविधानं व्यर्थमित्याशङ्क्य प्रायश्चित्तेनैव तत्तत्पापपरिहारेऽपि संसारहेतुभूतं पापसंस्कारव्यंजकं प्राकृतं लिंगं मनो भगवद्ग्रहणालीयते नान्येनेत्याह। गुरूणामिति १६ तद्यत्लिंगं मनः १७ अजामिलस्यापि सकृन्नामकीर्तनेन वृषलीसंगाद्यपापपरिहारेत्थं द्वयो वियोगलक्षणमृत्योर्मुक्तिः। ननु संसारान्तरं धर्मोनामोद्धारणादिसेवा हरहरेत्यंतं ... विधीयते। धर्म इति। धर्मो नामसंकीर्तनलक्षणः। आत्मनः शुद्धिः। ... नाशेन ... कैवल्यलक्षणशुद्धिर्भवति वाससो निर्णेजनेनेति शेषः १८ ननु ... मनःशुद्धिस्तथा निरंतरप्रायश्चित्तक्रियया पि सा किं न स्यादिति तत्राह। नैकांतशुद्धिरिति। अकर्तुः स्वेकर्तुं तारहितस्यात्मनो जीवस्य प्रायश्चित्तकर्मकर्तुः प्रायश्चित्तक्रियया एकांतशुद्धिरूपमनःशुद्धिपूर्वकशुद्धिर्न स्यात्। अकर्ता स्वतंत्रकर्तृत्वं नास्तीति यतः तस्मादनीहया निषिद्धकर्मकरणेन निरंतर

पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः। हरिरित्यवशेनाह पुमान्नार्हति यातनाम् १५ गुरूणां च लघूनां च गुरूणि च लघूनि च। प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः १६ तैस्तान्यघानि पूयंते तपोदानव्रतादिभिः। नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया १७ धर्मो योऽयमुपन्यस्तः परमः स सनातनः। क्रियते हरहः शुद्धिरात्मनो वाससो यथा १८ नैकांतशुद्धिः स्यात्कर्तुः क्रियया कर्तृतायतः। अकर्तुरात्मनस्तस्माद्भजेतानीहया हरिं १९ अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत्। संकीर्तितमघं पुंसो दहत्येधो यथानलः २० यथागदं वीर्यवत्तममुपयुक्तं यदृच्छया। अजानतोऽप्यात्मगुणं कुर्यान्मंत्रोऽप्युदाहृतः २१ ॥ ॥

हरिनामकीर्तनलक्षणक्रियया हरिं भजेतेत्यन्वयः १९ नामकीर्तनस्य कर्तव्यतामर्थवादरूपेणोपसंहरति। अज्ञानादिति। अज्ञानादित्यनेन सर्वात्मनाज्ञानमावोपिन विवक्षितो। किंतु अरविरूढत्वान्नारायणस्तेषामाश्रयो नारायणस्तस्यार्थविषयवेदनाभावः। अन्यथा हरेः सर्वशब्दवाच्यत्वेन घटपटादीनां नामत्वेपि ता विहाय नारायणादिनामकीर्तनाद्युपपत्तेः। अत उपचारमात्रमिदमितिज्ञातव्यं २० सर्वशब्दानां भगवन्नामत्वेपि तदर्थत्वापि फलानुदयात् नारायणादिनाम्नां तदुदयोपलंभाद् उभयेषां विशेषः कस्मादित्याशंक्य मंत्रागदवदित्याह। यथेति। अज्ञानत इत्यत्रापि ... उपदेशादिना सामान्यज्ञानमस्त्येव सूपयुक्तमित्यस्योपदेशापेक्षितत्वाद्यथैतरस्तं ... मंत्रौ ... फलत्वे ... इति भावः २१

राम ८

विश्वासजननमर्थपुनरुक्तार्थद्वयमितिएतेनेति ८ नकेवलंतदासांसंगतप्राज्ञयापहरं हरिनामकीर्त्तनं किंत्वन्यादिप्राज्ञसर्वपापरूपकरमित्याहुरित्याहस्तेनेनइति ९ यतस्तद्विषयेत्यनेनभक्तिपूर्वकत्वमाह १० ब्र
ह्मवादिभिर्निर्दिष्टैर्व्रतादिभिः। तत्राशेषाहरणे उत्तमश्लोकस्य हरेः गुणानां नं दारीत्र उपलंभयति तत्पुतिविबध्नस्तान्यापयतीतितदुत्तमश्लोकगुणोपलंभकं ११ हरेर्नामकीर्त्तनेनैवपापनिर्मूलं नं न तपश्चादिभिरित्ये
तदुपधार्यमति। निष्कृते पापप्रायश्चित्ते कृतेपि पश्चच तः मनः पुनरसत्पथे शास्त्रनिषिद्धमार्गे धावति चेत्तत्प्रायश्चित्तमैकांतिकं नियतं अव्यभिचारि न भवतीति पश्चात्तत्रतस्मात्कर्मनिर्हारमाकांक्षमाणानां ह
रेर्गुणानामनुवाद एकांतिकं यवदत्यत्वपः। नच्चनेनाविमनो दोषाकाशेपूर्ववस्मार द्विपोषःस्यादितितत्राह । खल्विति । सत्वभावनोंतःकरणशुद्धिहेतुः खल्वु ॥१२॥ अथतस्मात् १३ ननु नेन न हरेर्नामोच्चा
हि किंतु पुत्रनाम्नैवेतितत्राह । सांकेत्यमिति । पुत्रादिसंकेतादिविषयत्वेन नारायणेत्यादिभगवन्नामसंकीर्त्तनं अशेषाघहरं । तदुक्तं मावार्थैः नारायणोपमित्यन्यहेलनविषयत्वेनोक्तमघहरमिति । भक्ति
पूर्वकं तश्चोरात्तदत्तं हरिनामाशेषाघहरमिति तात्पर्यमवबोद्धव्यमेनरदप्यकृतं । सर्वथाघहरं विलोनामितद्भक्तिपूर्वकं । अभक्तो दात्तदत्तं नैवफलदातृभविष्यति । नामस्वामित्वयातस्मस्मरणं नापनेयत्वं ॥

एतेनैव त्वघोनोस्य कृतं स्यादघनिष्कृतं। यदा नारायणायेति जगाद चतुरक्षरं ८ स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगोहंता ये च पातकिनोपरे ९ सर्वेषामप्यघव
तामिदमेव सुनिष्कृतं। नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः १० न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान्व्रतादिभिः। यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणो
पलंभकं ११ नैकांतिकं तद्धि कृतेपि निष्कृते मनः पुनर्धावति चेदसत्पथे। तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभावनः १२ अथैनं मापनयत कृताशेषाघनिष्कृतं
।यदसौ भगवन्नाम म्रियमाणः समग्रहीत् १३ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा। वैकुंठनामग्रहणमशेषाघहरं विदुः १४ ॥ ॥ ॥

भमकृस्यात्तोनामकीर्त्तिः संकेतादावपीरिता। अजामिलोपि स्मरणाद्भक्त्याम्रत्योरमुच्यतेति स्मरणप्रावुर्यप्रदर्शनाय सांकेतादिस्खलनाहत्यकथनं। संकेतेतिदृष्टिमात्रेण व्यवहारनिर्वाहात्स्मरणा
संभवेन परिहासे तस्मात्स्मरणं संभवति विज्ञविकासोद्रेकव्यवहाराद्वा नतोपि स्तोभस्मरणं। कोपजननाय नर्मवचनं स्तोभः मधुमक्षिकाशूकनासमर्थस्त्वं किं मधुसूदन इति तथापि सोहरिश्चेत्थम
धोर्वधान्मधुसूदन इत्युपपन्नमिति। ततोपि हेलनेना मस्वामिस्मरणं। हरेरन्यं नारायणादिनाम्ना पित्रादिभिर्दत्तेनोपपद्यते इतिकं वनपुरुषं हृष्ट्वा निंदेपेक्षाज्ञात्पयो विष्णायी नारायणः कि
लेति। हरिहेलया हरिनामकीर्त्तनमघहरं न स्यात्। अभक्तो दात्तदत्तं नैव फलदातृभविष्यतीत्यादेश्च। नामस्वामिस्मरणाभावे देवदत्तेनार्पितार्थं भवति। मधोः सूदनात् मधुसूदन इत्यस्यार्थ
स्याभावात् हरेस्तद्ग्राहात्। अतो नाजामिलेन भक्त्या नामस्वामिनं स्मृत्वा नामकीर्त्तनं कृतमिति ज्ञातव्यं। तदुक्तं च। नामस्वामित्वयातस्मस्मरणं ज्ञापनेयत्वं इत्यादि। यानि यानि श्रीहरेर्नामानि
तानि तानि सर्वाणि पापहरणसामर्थ्योपेतानि भवंतीति ज्ञापनाय वैकुंठनामेति मंत्रे वहरिरित्यवशेनाहृप्रमाणितिवक्ष्यति। स्मरणं च ज्ञानपूर्वकमपेक्षितमित्यतो विदुरिति १३ १४

भवद्भिः सत्यथास्मदुक्तार्थो विश्रंभणीयोस्तु यत्तत्स्वाभ्युक्तार्थस्यैकत्वोपपन्नेरित्याशयेनाहुरित्याहायतिं वइति २२ मृत्योर्देहवियोगलक्षणात् २३ विष्णुदूतैरुद्धृत्तरीकृता याम्याः पुनः
किमकुर्वन्नितितत्राह इतीति २४ अजामिलेन सुकृतकृता पुनः किमकारीतितत्राह। द्विजइति। प्रकृतिंगतः सात्विकावस्थां प्राप्तः २५ मर्त्यदेहस्थेन तेन छिन्नेन संलापो गाद्विष्णुदूतैः किंकृ
तमत्राह तंविवक्षुमिति २६ उक्तमितिगतइतिश्रुतं विरणोति। अथेति। त्रैविद्यं त्रिवेदविहितं धर्मं एतरेवस्यष्टति गुणाश्रयमिति २७ स्वर्गादिविषयं विषयं त्यक्त्वा यथिकवद्दुदासीनो भू

पतिवः श्रुतमद्धा धर्मो यस्मिन्संशयः। स वेद परमं गुह्यं धर्मस्य भगवान्यमः २२ श्रीशुक उवाच एवं ते सुविनिर्णीय धर्मं भागवतं नृप। तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमु
चन् २३ इति प्रत्युदिता याम्या दूता यात्वा यमांतिकं। यमराज्ञे यथा सर्वमाचचक्षुररिंदम २४ द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः। ववंदे शिरसा विष्णोः किंकरान्द
र्शनोत्सुकः २५ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः। सहसा पश्यतस्तस्य तत्रांतर्दधिरेनघ २६ अथाजामिल आकर्ण्य दूतानां यमकृष्णयोः। धर्मं भागवतं शुद्धं त्रै
विद्यं च गुणाश्रयं २७ भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः। अनुतापो महानासीत्स्मरतोशुभमात्मनः २८ अहो मे परमं कष्टमभूदविजितात्मनः। येन विप्लावितं ब्र
ह्म वृषल्यां जायतात्मना २९ धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलं। हित्वा बालां सतीं योहं सुरापामसतीमगां ३० वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ। अहो
मयाधुना त्यक्तावकृतज्ञेन नीचवत् ३१ सोहं व्यक्तं पतिष्यामि नरके भृशदारुणे। धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः ३२ किमिदं स्वप्न आहो स्वित्साक्षाद्दृष्टमिहा
द्भुतं। क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः ३३ अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः। व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः ३४

त्विमत्राह भक्तिमानिति। अभूदितिशेषः। कुत्तरे सखायश्चिंनाभावे हरौ भक्तिः सुहृदानस्यादित्यतस्तस्याप्यंश्चितक्रियाप्रकारमाह अनुतापइति २८ ब्रह्मब्राह्मण्यं विप्लावितं विनाशितं जा
यतात्मेतोप्रेणजायमानेन २९ कुलकज्जलं ब्राह्मणकुलमषीभूतं ३० ३२ भुवोधः नरके ३४ ॥ ॥ ॥

यत्किंचित्पुण्यमस्ति येन दिष्टसुहृत्तदर्शनं साधनं तस्या इति भावः अथापीति येन पुण्येनात्मा मनश्च प्रसीदति॥ अन्यथा पूर्वविधाया पुण्याभावे ३६ ब्रह्मघ्नः शरणागतत्यागी ब्राह्मण्यः ३७ ३८ आत्ममायया हरेरधीनया लोकमोहनशक्त्या यथा यावत् ४० ४१ गंगाद्वारं नाम तीर्थविशेषं ४२ प्रत्याहृतो वशीकृत इंद्रियग्रामो येन सतथा तस्योपास्तिप्रकारं स्वकिं युयोजेति। आत्मानि हरो ४४ गुणेभ्यः शरीरेंद्रियादिभ्यः आत्मानं स्वस्वरूपं भगवद्धाम्नि भगवत्स्वरूपे ब्रह्मणि व्यापके अनुभवात्मनि ज्ञानात्मनि ४५ यर्हि यस्मिन्काले उपारतधीः स्वात्मविषया निवर्तिता आसीत्

अथापि मे दुर्भगस्य विबुधोत्तमदर्शने। भवितव्यं मंगलेन येनात्मा मे प्रसीदति ३५ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः। वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति ३६ क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः॥ क्व च नारायणेत्येतद्भगवन्नाम मंगलं ३७ सोहं तथा यतिष्यामि यतचित्तेंद्रियानिलः। यथा न भूय आत्मानमंधे तमसि मज्जये ३८ विमुच्य तमिमं बंधमविद्याकामकर्मजं। सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान् ३९ मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ४० ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिं। धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ४१ इति जातसुनिर्वेदः क्षणसंगेन साधुषु। गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः ४२ स तस्मिन्देवसदन आसीनो योगमास्थितः॥ प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि ४४ ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना। युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ४५ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः। उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः ४६ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु। सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां ४७ साकं विहायसा विप्रो महापुरुषकिंकरैः। हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ४८ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा। निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ४९

रतबुद्धिरभूत्तस्मिन्काले पुरः स्वस्याग्रभूमौ प्रागुपलब्धान्दृष्टान् ४६ भगवत्पार्श्ववर्तिनां मुक्तानां स्वरूपं निर्दोषविग्रहादिलक्षणं ४७ ४८ नामकीर्तने श्रद्धातिशयं जनयन्नुपसंहरति एवमिति। दास्याः पतिरित्याक्रोशे षष्ठी॥ अजामिलनामसुक्तो दास्याः पतिरित्यादि पतिलोक इत्यर्थः ४९ ॥ ॥ ॥

अन्यथा तीर्थपदानुकीर्तनं विना ५० ५१ अमंगलोपद्यपि तथापि ५२ दासीसंगादवाप्तपापबुद्धिकिंकरी अंते नारायणाख्य इति इति ज्ञात्वाजामिलोपि नित्यकर्मतयोपलक्षुया नित्याभ्यासेन मरणसमयेपि नामग्रहणार्थं पुत्रोपचारितं कृत्वा श्रद्धया पुत्राह्वानव्याजेन कीर्तयन्मुक्तिमाप्तस्तु पुत्रस्नेहेन भगवति श्रद्धया। भक्तियोगो भागवतिन्नामग्रहणादिभिरित्यादिभिरुक्तस्तत्र वद्धमाणत्वात्। पुत्रादिसांकेतिकं नाम रूक्षकर्मत्वेन श्रीहरिनामकीर्तयन्किमुत श्रद्धयोपेत इत्युच्यते। अस्य फलाविर्भावं दर्शयितुं एषगतो वोक्तिरिति तात्पर्यं ५३ इति षष्ठे द्वितीयः॥ ॥ भक्ति

नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात्। न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोन्यथा ५० य एवं परमं गुह्यमितिहासमघापहं। शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ५१ न वै स नरकं याति नेक्षितो यमकिंकरैः। यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ५२ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं॥ अजामिलोप्यगाद्धाम किमुत श्रद्धया गृणन् ५३ इति श्रीभागवते महापुराणे षष्ठस्कंधे द्वितीयोऽध्यायः राजोवाच निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तानपि धर्मराजः॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोयं १ यमस्य देवस्य न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत्। एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे विनिश्चितं २ श्रीबादरायणिरुवाच भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः। पतिं विज्ञापयामासुर्यमं संयमनीपतिं ३ यमदूता ऊचुः कति संतीह शास्तारो जीवलोकस्य वै प्रभो। त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ४ ॥ ॥ ॥

पूर्वकं नामसंकीर्तनं मुक्तिसाधनमित्येतदस्मिन्नध्याये अभिधीयते। तत्र राजा पृच्छति। निशम्येति। आज्ञा हता यस्य स हताज्ञः मुरारेर्नैदेशिकैराज्ञाकारिभिः किंकरैरित्यर्थः। विहतान्प्रतिहतान्दृष्ट्वा मिनिर्देशकरणाशक्तान्पापीडितानित्यर्थः। अयं जनो यस्य यमस्य वशे वर्तते १ दंडभंगः आज्ञाभंगः। वृश्चति छिनत्ति २ यामाय मेषेत पतोयमने वयमः प्रनस्य निधानात्। संशयनिराकरणाय संयमनीपतिमिति॥३॥ फलाभिव्यक्तिहेतवः फलदातारः कति संतीत्यस्यायमर्थः। किमेकः शास्ता अथवा बहवः। तत्रापि स्वयं तरतिनियमोऽस्ति किंवा नेति ४

ष·भा· १०

द्वितीयं प्रत्याहुरित्याह यदि स्युरिति। इयंत इति संख्याता बहवः। मृत्युश्चामृतं च यौ दानसमर्थौ तन्नानद्वितीयस्त्वाहुरित्याह कस्येति मृत्युलक्षणो बंधः अमृतलक्षणो मोक्षः कस्य कस्य स्यातामिति वक्तव्यो
न कस्यापि स्यातां परात्मत्वे सामर्थ्याभावात्। प्रथमं परिहरंतीत्याह न चेति। नो कस्य न स्यातां सर्वेषामपि स्यातां सामर्थ्यादिति ५ न चैतत्कर्मसंभवात् मिथो विरोधापातादित्याहुरित्याह किंतु
नि मंडलवर्त्तिनां मंडलेश्वराणां ६ यत एवं बहुत्वे दोषो न तत एकः शास्ता स चैकः त्वमेवेति प्रथमपक्षोऽभिमत इत्याहुरित्याह अत इति। शुभाशुभविवेचनः शुभाशुभयोर्विविक्तकर्त्ता ७ १० यमः स्व
दूतान्प्रतिवक्तीत्याह हरतीति ११ यदुक्तं भवद्भिस्त्वमेक एव शास्तेति तन्नालोच्य कथितं मदन्यस्यापि स्वतंत्रत्वादित्याह पर इति। मदन्यो जगतो जंगमस्य तस्थुषः स्थावरस्य च शास्ता
ति। स एक इत्यत उक्तं पर इति। परोऽरिः परमात्मनो नियमिधानात् स शास्ता परः परमात्मा तस्य लक्षणमाहोतमिति। अयमर्थः पटवत्तंतवो यथा पटः सूत्रसंततो दीर्घतया ओतस्तिरश्चीनतया

यदि स्युर्बहवो लोके शास्तारो दंडधारिणः। कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ५ किंतु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणां। शास्तृत्वमुपचारो हि यथा मंडलवर्त्तिनां ६
अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः। शास्ता दंडधरो नृणां शुभाशुभविवेचनः ७ तस्य ते विहितो दंडो न लोके वर्त्ततेऽधुना। चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ८ नी
यमानं तवादेशादस्माभिर्यातनागृहान्। व्यमोचयन्पातकिनं छित्वा पाशान्प्रसह्य ते ९ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं। नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतं
१० श्रीशुक उवाच इति देवः स आपृष्टः प्रजासंयमनो यमः। प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः ११ यम उवाच परो मदन्यो जगतस्तस्थुषश्च ओ
तं प्रोतं पटवद्यत्र विश्वं। यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः १२

पोतः तंत्वाधारत्वेन स्थितः। तथेदं विश्वं यत्र यस्मिन्नात्मनि ओतप्रोतधर्मेण तदाधारत्वेन स्थितं। यस्मिन्निदं संच विचैति सर्वं यथा कंथा पटाः सूत्रे ओताः प्रोताश्च संस्थिताः। एवं विश्वाविदं विश्वमोतं प्रो
तं च संस्थितमित्यादिश्रुतिस्मृतिबलादेतल्लक्षणमव्याप्त्यतिव्याप्त्यादिदोषरहितं। यद्यस्य धारको न स्यात्तर्हि पतिष्यति वेगाख्यसंस्काररहितशरवदित्यादितर्कश्च। लक्षणांतरमाह
यदंशत इति। यस्यांशतो वासुदेवादिस्वरूपांशैर्भिरंशांशैश्च ब्रह्मादिभिरस्य जगतः स्थितिजन्मसंहारा भवंतीति शेषः। यतो वा इमानि भूतानि जायंते इत्यादिश्रुतेः
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमित्यादेर्व्याप्तरूपमंतरेण रूपांतरेणापि धारकत्वमस्यैवेति निश्चयाय यदंशत इत्यनेन पुनर्ग्रहणं जन्मनाशा
देवलक्षणांतरे इति। ज्ञातपरूपत्वे वस्तुनः स्वाधीनं तस्यादित्येनेत्याह नसीति। नसि नासिकायामोता गाव इति १२

राम १०

हरेः शास्तृत्वं नाम दंडधरस्य दंडेनैव न किंतु वेदलक्षणया वाचेत्याह य इति। पर ईशः निजायां स्वस्मादभिव्यक्तायां वाचि वेदलक्षणायां नामभिः ब्राह्मणादिलक्षणैर्बध्नाति। निजमाला
प नित्य योऽस्त्यपि धानं। बंधनेन किं प्रयोजनमत्राह यस्मा इति। नामकर्मणा मानेन यस्य कटनाय बद्धहुव वचनं। अन्यथा नामकर्मभ्यामित्यलं। दृढबंधो निबंधस्तेन बद्धाः १३ लो
कतः सर्वज्ञानामस्मादेस्तु विषयज्ञानजनकत्वमाह। तस्य च श्रीहरिलक्षणमित्याह अहमित्यादिना १४ नस्पृष्टा रजस्तमोभ्यां मनः स्पृष्टरजस्तमस्काः शुद्धसात्विका इत्यर्थः।
ततो भृग्वादिभ्योऽन्ये मन्वादयः। सत्वप्रधाना इत्यनेन सत्वं प्रचुरमन्ये रजस्तमसी च किंचित्स्त इति ज्ञायते। कुत इत्यत उक्तं स्पृष्टेति। ईहितं इच्छाविषयमभिप्रायं १५ तत्प्रसादमं

यो नामभिर्वाचि जनं निजायां बध्नाति तंत्र्यामिव दामभिर्गाः। यस्मै बलिं त इमे नामकर्मनिबंधबद्धाश्चकिता वहंति १३ अहं महेंद्रो निरृतिः प्रचेताः सोमोऽग्नि
रीशः पवनो विरिंचिः। आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः १४ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः। यस्ये
हितं न विदुः स्पृष्टमायाः सत्वप्रधाना अपि किं ततोऽन्ये १५ यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते। आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथै
वाकृतयस्ततः परं १६ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः। प्रायेण दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः १७

तेषां दृष्टलक्षणवेश्वचक्षुरादीन्द्रियाविषयत्वेन तद्विषयं ज्ञानं दुष्करमित्याह यं वा इति। गोभिश्चक्षुरादीन्द्रियैरसुभृतो जीवा आत्मनां जीवानामप्यात्मानमंतर्यामिणं स्वरूपं न स्वाहा आत्मानमंतर्हृदि संतं
अथवा आत्मनामंतर्हृदि संतं। आकृतयो रूपाणि स्वप्रकाशं चक्षुरिंद्रियं येन निकटवर्त्तिनां चक्षुरादीन्द्रियाभिमानिनां देवानामपि तद्विषयज्ञानाभाव उक्त इति वेदितव्यं। स्वरूपत्वेन ता कृत
यः पश्यंतीति वेदत्राह तत इति तत्र्याकृतिभ्यः परं विलक्षणं भिन्नमित्यर्थः। इदमपि हरिलक्षणं स पर इति पूर्वेणान्वयः १६ तांश्च वेदितुमिच्छामः इत्यस्योत्तरमाह तस्येति। मायाधि
पतेः लक्ष्मीपतेः आत्मतंत्रत्वलक्ष्मीपतित्वे पूर्वोक्तलक्षणसाधके इति ज्ञातव्यं। प्रायेणेति कथितार्थनिर्द्धारणाय। तस्य हरे रूपं श्यामवर्णो गुणा विप्रप्रियत्वादयः स्वभावो नित्यनि
र्दोषत्वं येषां ते तथा १७

तेषां किं कृत्यमिहेति तत्राह। भूतानीति। विष्णोर्भूतानि पार्षदाः दुर्दर्शलिंगानि द्रष्टुमयोग्यलक्षणानि तद्भक्तिमतः विष्णुभक्तिमतः १८ विष्णुदूताश्चेत्तर्हि पापान किं नं कि मित्युच्यते इति
तत्राह। धर्मं त्विति। तु शब्दात्तत्त्वज्ञानं युष्माकं नास्तीत्याह १९ तर्हि के विदुरिति तत्राह। स्वयंभूरिति २० २१ किं धर्मस्वरूपं निवेदयतु भवानित्याशंक्याह अहमेव धर्मं वदामीत्यभिप्रा
येणाह। एतावानिति। तस्य हरेर्नामग्रहणादिभिर्भगवति यो भक्तियोगः एतावानेव परो धर्मः स्मृत इत्यन्वयः। एवमेव सर्वधर्माणां धर्मो धिकृतमो मत इति स्मृत इति युक्तं २२ २३

भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि। रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च। १८ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो ना
पि देवाः न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणादयः १९ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः। प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्व
यं। द्वादशैते विजानीमो धर्मं भागवतं भटाः। गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते २१ एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः भक्तियोगो भगवति तन्नाम
ग्रहणादिभिः २२ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः। अजामिलोपि येनैव मृत्युपाशादमुच्यत २३ एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भग
वतो गुणकर्मनाम्नां। विक्रुश्य पुत्रमघवान्यदजामिलोपि नारायणेति म्रियमाण उपेति मुक्तिं २४॥ प्रायेण वेद तदिदं न महाजनोयं देव्या विमोहितमतिर्ब
त माययालं त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः २५ एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयो
गं ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः २६ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः। तान्नोपसीद
त हरेर्गदयाभिगुप्तान्नैषां भयं न च वयं प्रभवाम दंडे २७ ॥ ॥

नारायणेत्यादि गुणनाम्नां मधुसूदनेत्यादि कर्मनाम्नां। गुणानां कर्मणां नाम्नां वा यत्संकीर्त्तनं। एता
वता पापनिर्हरणायालं साधनं नान्यदपेक्षितमित्यन्वयः। विक्रुश्य आहूय। २४ देव्या बहुविधविविलासोपेतया। मधुपुष्पितायां स्वर्गादिपुष्पप्रकाशिकायां वैता
निके वेदविहिते प्रसंसंबंधिनि वा युज्यमानः प्रेर्यमाणः २५ भावयोगं भक्तियोगं। उरुगायवादः भगवन्नामकीर्त्तनं। २६॥ गाथाः संकीर्त्तनानि। वेदादिभिर्न्नत्रगीतास्सं
कीर्त्तनाः। गदया कौमोदक्या २७ ॥ ॥

यो ब्रह्मणोक्तः प्रजासर्गस्तमबृंहितमपूर्णं दृष्ट्वा ब्रह्मानुज्ञया विंध्यगिरेः पादान्प्रत्यंतपर्वतानुपगम्य तपोचरत्। स प्राचेतसो दक्षः यो मनसासृजन्न सततपोवरत इत्येकवाक्यं
वा २० २१ नाम्ना हंसगुह्येन स्तोत्रेण कस्य दक्षस्य यत्तोपेन २२ सर्वनामसंज्ञाभावात्लोकवैलक्षण्यप्रदर्शनाय परायनमः इत्यन्वयः। परत्वमुपपादयति। अवितथेत्यादिना।
अवितथा यथार्था अकाध्यप्रतिहतानुभूतिर्यस्य सत्यज्ञानायेत्यर्थः। सत्यं ज्ञानमिति श्रुतेः। गुणत्रये णाभासः सृष्टिस्तत्र निमित्तयोः प्रकृतिपुरुषयोर्बंधुस्तया तत्त्वाच्छित्वा
नाम्यां सृष्टौ प्रवर्त्तमानाय। गुणत्रयप्रतीतिनिमित्तं ब्रह्मकाश्रयाय वा सतो बंधुमसति निरविंदन्निति श्रुतेः। गुणो बुशब्दादिविषयेषु यथार्थबुद्धिर्येषां तैर्यथा नैव हिर्मुखैर
दृष्टधाम्ने अज्ञातस्वरूपाय न चक्षुषा पश्यति कश्चिदेनमिति श्रुतेः। निवृत्तो मानानां प्रवृत्तिः पक्षिणा लक्षणेयन्नाय यतो मनसा सह। अनंतं ब्रह्मेति श्रुतेः। न स्मादिम

तमबृंहितमानो वै प्रजासर्गं प्रजापतिः। विंध्यपादानुपव्रज्य सोचरद्दुष्करं तपः २० तत्राघमर्षणं नाम तीर्थं पापहरं परं उपस्पृश्यानुसवनं तपसातो
षयद्धरिं २१ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजं तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः २२ प्रजापतिरुवाच नमः परायावितथानुभू
तये गुणत्रयाभासनिमित्तबंधवे। अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे २३ न यस्य सख्यं पुरुषो वैत्ति सख्युः सखा वसन्संवसतः पु
रेस्मिन्। गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि २४ ॥ ॥ ॥

तः कथमनंतत्वमिति तत्राह। स्वयंभुव इति। स्वयंभुवे स्वतः सिद्धाय सद्भावः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति श्रुतेः २३ गुणतत्त्वबुद्धिभिरदृष्टधामेत्येतदुपपादयति न यस्येति।
अयं पुरुषो यस्य सख्यं न वेत्ति तस्मै महेशाय शिवादत्यन्तमाय नमस्करोमीत्यन्वयः। कीदृशस्यास्मिन्पुरे शरीरे संवसतः स्वयं च सहैव वसन्। तत्र दूरे तदु अंतिक इति श्रुतेः। सख्यु
ः सखेत्येतदेकस्मिन्पुरे वर्त्तमानत्वादुभयोः सम्यं। द्वा सुपर्णा सयुजा सखाया समानं वृक्षमिति श्रुतेः। अत्र दृष्टांतमाह। गुण इति। यथा कश्चित्पुरः स्थितो विषयाणां भूतोपयोगी गुणि
नः प्रधानभूतस्य राज्ञो ममासौ सखेति गोचरेण न वेत्ति तं सख्यं न वेत्ति कुतो तत्राह। अव्यक्तेति। अस्य दृष्टिः अप्रत्यक्षस्थूलत्वानवरतः सूक्ष्मदृष्टित्वाद्विपर्ययः। गुणो
पाधिर्गुणिनो दृष्टस्य संबंधं यथा न वेत्ति कुतः। अव्यक्तदृष्टिः दृष्टिरहितत्वात् तदप्यात्मायं यथा त्वया तः प्रियत्वं मनुष्योवेदनवा आत्मनः। न ह्यजीवो न यस्य सख्यं वेत्ति
तस्मै नमोस्तु तत्त्वनेनापहस्तितमिति तात्पर्यं २४॥

१ मार्गं विशिनष्टि। पित्रेति २१ अनन्यशरणानां रक्षणादीश्वराराधनं वध दोषो पि तु अकस्मादेव आश्रयदाना हातो कानामिति। तोकानां बालानां पितरौ मातापितरौ बंधू इत्येतत्सर्वत्रान्वेतव्यं। गृहीत् गृहस्थः। अज्ञानानां ज्ञानदानात् सुहृत् जीवनेन २२ किं चानेन ईश्वरद्रोहो पि स्यादित्याशयवाना आह। अंतरिति। भूतानामिति विशेषणात्तु दृष्टादेहे नेश्वर इत्याह। कथं स्यात्तु भूतदाहकरणादि नितत्राह। सर्वमिति। तस्य हरेर्धिष्ण्यं निवासस्थानं। अनेन दर्शनेन किं फलं स्यादत्राह। एवमिति असौ हरिः २३ इतोपि कोपो न कार्य इत्याह। यः समुत्पतितमिति। देहे आकाशाद्दृश्याकाशात्तदुत्पतितं [illegible] युयौ यच्छेत। कथमात्मनः परमात्मनः जिज्ञासया विचारेणाश्रित तदवहितः

यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ २० आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं। पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः २१ तोकानां पितरौ बंधू दृशः पक्ष्म स्त्रियाः पतिः। पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत् २२ अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः। सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ २३ यः समुत्पतितं देह आकाशान्मन्युमुल्बणं आत्मजिज्ञासया यच्छेत्स गुणानतिवर्त्तते २४ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां २५ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृपा सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे २६ तेभ्यस्तस्यां समभूद्दक्षः प्राचेतसः किल यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः २७ यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः। रेतसा मनसा चैव तन्ममावहितः शृणु २८ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः। देवासुरमनुष्यादीन्नभस्थलजलौकसः २९

तत्सर्वव्याप्य नारायणः स्थित इति श्रुत्यर्थपर्यालोचनया भूतद्रोहेण श्रीनारायणद्रोह एव स्यादिति चिंतयाम स्वमात्र गुणान् संसारहेतुभूतांस्तरतीत्यन्वयः २४ वार्क्षी वृक्षदुहिता। वरा वरणीया २५ वरः श्रेष्ठः आरोहो नितंबप्रदेशो यस्याः सा तथा तां आप्सरसीं अप्सरोजातिमती २६ यस्य दक्षस्य २७ २८ पूर्वं आदिसृष्टौ इमाः प्रजाः मनसैवासृजत प्रजापतिः ब्रह्मा २९

निं क ग: पन

असतस्तोकाः [illegible]ति कर्मनिरतान् निरयवर्त्मनि तत्कद्वारे गृहे भार्यादौ २९ अकृतविष्णुकृत्यान् अननुष्ठितविष्णुपादार्चनादिकर्मणः ३० कृष्णांघ्रिपद्ममधुलिट् कृष्णपादारविंदमकरंदं संसेवमानः पुमान् स्वकर्मनिर्मितेषु मायायाः गुणेषु विषयेषु न रमते पुरुषार्थबुद्धिं न करोति। यतः कर्मणः पुनः रजः रागः स्यात् न हि दृशकर्मा तु शब्देन कर्दममलेन कर्दमप्रक्षालनमिव निदर्शयति ३१ यत्स्वपुरुषैरसत्कृतं नोस्माकं तत्क्षाम्यतामित्यन्वयः। न विदुषां हरेर्माहात्म्यमजानतां। ननु क्षांत्यर्थं को दंड इति तत्राह। रचिते ति। किमनेन तानायासेनेति तत्राह नमइति। भूम्ना दिक्कृताणं इमं तरेण कथं क्षांतिरिति तत्राह। क्षांतिरिति। गरीयसि वरतरे परतमे पुरुषाय नमइत्येतावता भूम्या दिगादि हृषिकेन क्षांतिर्भवती ति शेषः। भूपि

तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं। निःकिंचनैः परमहंसकुलैरसंगैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् २९ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदं। कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोकृतविष्णुकृत्यान् ३० कृष्णांघ्रिपद्ममधुलिण्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ३१ तत्क्षाम्यतां स भगवान्पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः। स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने ३२ श्रीशुक उवाच इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते। तेनाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ३३ तस्मात्संकीर्त्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतं ३४ शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः। यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ३५ इतिहासमिमं गुह्यं भगवान्कुंभसंभवः। कथयामास मलय आसीनो हरिमर्चयन् ३६ इति श्रीभागवते महापुराणे षष्ठस्कंधे यमपुरुषसंवादे तृतीयोऽध्यायः॥ ॥

एतेन मद्भक्तिं विधेमेति सूचितः। सर्वदा सन्निहिता संतिष्ठते महतिक्रमेति सप्तमी ३२ ३३ अंहसां पापानां एकांत विनिष्कृतं नियतप्रायश्चित्तं नकेवलं स्त्रीशूद्रादीनां नाम संकीर्त्तनं विधीयते अन्येषामपीति भावेन महतामिति ३४ सर्वाति साधनान्यनुष्ठीयमानान्यपि भक्तिसहितानि बलवंतीत्यभिप्रेत्याह। श्रृण्वतामिति ३५ कुंभसंभवो गस्त्यः। मलयेपर्वते ३६ इति षष्ठे तृतीयः॥ ॥ ॥ ॥

द्र

द्र ३

भा॰ष॰
१२

सुत्वांतिर्यसूरयइत्यवयदुक्तं त्वलाधज्ञेयमाहात्म्यंहरेःतज्जन्माद्यस्यपतइत्यन्त्वयसर्गविशेषः प्रतिज्ञातःसोपिप्रागवदेकनिष्ठइतिप्रतिपाद्यते स्मिन्नध्यायेतत्रतृतीयादौकथितःसर्गो
भगवदेकनिष्ठउतान्यनिष्ठश्राहोस्विदन्यनिष्ठोपिभगवत्प्रसादायत्तइत्यभिप्रेत्यराजोक्तार्थमत्रद्यतद्विस्तरंबूहिइत्याहदेवेति।सामासिकःसंक्षिप्तः १ व्यासप्रपंचं।तेनत्वसका
शाद्नुसर्गंप्रत्यंतरसर्गं २ शुकेनराजप्रश्नमात्रस्यपरिहारउक्तउतनाहत्यान्यत्कथांतरमभ्यो रिक्त्वा स्थित्वातूष्णीं स्थितेकिमितिशौनकादीनांसाई प्रश्नंपरिहरतिसूतइत्या
हासूतइति।अनेनसूतशौनकादिसंवादेनसमाप्तः।किंचशौनकादिप्रश्नोप्ययमेवाश्रयमेवपरिहारोपीतिध्वनितं ३ भगवत्प्रसादायत्तत्वान्मंदद्दद्यान्यनिष्ठवत्त्वनाय
मानोपिनैदकनिष्ठइतिलक्षणस्यनातिव्याप्तिरितिदर्शयितुंप्रकृताद्यीनुवादपूर्वकमुपक्रमते।यदाप्रचेतसइतितुल्यनामानःप्राचीनबर्हिषःदशपुत्रायदांतःसमुद्रादुत्थि

राजोवाच देवासुरनृणांसर्गोनागानांमृगपक्षिणां।सामासिकस्त्वयाप्रोक्तोयस्तुस्वायंभुवेंतरे १ तस्यैवव्यासमिच्छामिज्ञातुंतेभगवन्यथाअनुस
र्गंयथाशक्त्याससर्जभगवान्परः २ सूतउवाच इतिसंप्रश्नमाकर्ण्यराजर्षेर्बादरायणिः।प्रतिनंद्यमहायोगीजगादमुनिसत्तमाः ३ श्रीशुकउवाच
यदाप्रचेतसःपुत्रादशप्राचीनबर्हिषः।अंतःसमुद्रादुन्मग्नाददृशुर्गांद्रुमैर्वृतां ४ द्रुमेभ्यःक्रुध्यमानास्तेतपोदीपितमन्यवः।मुखतोवायुमग्निंचससृजुस्त
द्दिधक्षया ५ ताभ्यांनिर्दह्यमानांस्तानुपलभ्यकुरूद्वह राजोवाच महान्सोमोमन्युंप्रशमयन्निव ६ नद्रुमेभ्योमहाभागादीनेभ्योद्रोग्धुमर्हथ।विवर्द्ध
यिषवोयूयंप्रजानांपतयःस्मृताः ७ अहोप्रजापतिपतिर्भगवान्हरिरव्ययः।वनस्पतीनोषधीश्चससर्जोर्जमिषंविभुः ८ अन्नंचराणामचराह्यपदःपादचा
रिणां।अहस्ताहस्तयुक्तानांद्विपदांचचतुष्पदः ९

ताः द्रुमैर्वृतांगांभूमिंददृशुः ४ तदामुखतोवायुमग्निंचससृजुः तपसा तेषांद्रुमाणांदिधक्षयादग्धुमिच्छया ५
तत्रचंद्रेणतत्कोपशांतिप्रकारंकथयति।ताभ्यामिति ६ किमाहइतितत्राह।माद्रुमेभ्यइति।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपइति संप्रदानत्वं चतुर्थी।तत्रहेतुमाह।विवर्द्धयिषवइति।विवर्द्धयिषवःप्र
हे गदे निष्पिंटि निततरां पिष्टं कुरु॥निष्पिष्टीति वा पाठो॥पिष्टिपेषणा इत्यस्वरूपं २४ दंदशूकं खड्गेष॥यातुधानादि दृष्टिवत्पो राहण्छिर्येषां ते तथा तान् त्र्यरी व्रिडाव येत्यन्वयः॥अनेन
यांवजन्म नितन्धानद्यस्तपातकसंचया॥पा हिमां पापिनं घोरं संसारार्णवे घातिनं नित्यं मंत्रः सूचितः॥२५॥ममर्छिं धीति तु गाणामो विकल्पेनेति वक्तव्यं॥द्विषां चक्षुं षि छादय

गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि॥कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् २४ त्वं यातुधानप्रमथप्रेतमातृपिशाचवि
प्रग्रहान्घोरदृष्टीन्॥दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् २५ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि॥चक्षूंषि चर्मञ्छत
चंद्र छादय द्विषामघोनां हर पापचक्षुषां २६ यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च॥सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव च २७ सर्वाण्येतानि भगवन्ना
मरूपास्त्रकीर्तनात्॥प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः २८ गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः॥रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः
२९ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः॥बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः ३० ॥ ॥

नोऽस्माकमघं हरेत्यन्वयः॥शतचंद्रेति चर्मणो नाम २६ केतुभ्य इत्यनेन उल्कापातादयो लक्ष्यंते॥केतोर्ग्रहेभ्य इत्यनेन गतार्थत्वात्॥अंहोभ्यो व्यसनेभ्यः २७ श्रेयःप्रतीपकाः श्रेयो
विरोधिनस्ते वासुराः॥२८॥स्तोत्राणां स्तोभः समूहः स्तोत्रस्तोभः तद्रूपश्छंदःसामवेदस्तन्मयस्तत्प्रधान इत्यर्थः॥भगवान्पूज्यः॥विष्वक्सेनः सेना यस्य स तथा॥स्वस्य स्वा
मिनो नामभिः॥विष्वक्सेनश्च हरेर्निर्दिष्टो शनः २९ यानं रथः॥पार्षदाश्च भूषणाश्च पार्षदभूषणाः॥भूषणानाम चिज्ञानाश्रयत्वज्ञापनाय पुल्लिंगप्रयोगः॥तत्कंठगं कौ
स्तुभमणि सधानोपादेः ३० ॥ ॥

राम २८

सर्वं खल्विदं ब्रह्मेतिश्रुतेः भगवानेव यत्सदसद्रूपं वस्तु तत्सर्वं ...पातद्रूपं ज्यत इति यथा सत्यं तत्स्वरूपानदेवाद्युपाविशन्तद्रूपविश्वस्वरूपत्वं ह्याश्चवर्दितिश्रुतिविहितत्वाद्व्यापि
चरितेन सत्येन कृष्णकं सर्वकालस्थस्वभावो जीवएव वेत्यादिवाक्यं च शब्दः हीनि॥एवशब्देन सत्येन अनेन मा देवः पातु विष्णुश्च वर्धन इति स्मारयति ३१ भूषणादीनामचेतनत्वेन चेत
नत्वार्थितरात् त्वं कथमित्याशंक्य तेषु हरेस्तत्त्वार्थं क्रमशक्तिस्वरूपेणावस्थानं यथा सत्यं तेन सत्येन हरिः पात्वित्याह॥यथेति॥ऐकात्म्यानुभावेन नन्दकस्थितरूपाणाम
कात्मत्वापरोक्षत्वानेन विकल्परहितः स्वगतभेदवर्जितोऽपि स्वमायया स्वरूपसामर्थ्येन स्वयमेव भूषणायुधलिंगाः स्वाधीनत्वाच्छक्तिशब्दवाच्याख्यत्र इति यथा यत्सत्यं तेन स

यथा हि भगवानेव वस्तुतः सदसच्च यत्॥सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ३१ यथैकात्म्यानुभावानां विकल्परहितः स्वयं॥भूषणायुधलिं
गाख्या धत्ते शक्तीः स्वमायया ३२ तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः॥पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ३३ विदिक्षु दिक्षूर्ध्वमधः समंतादंत
र्बहिर्भगवान्नारसिंहः॥प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ३४ मघवन्निदमाख्यातं वर्म नारायणात्मकं॥विजेष्यस्यंजसा ये
न दंशितोऽसुरयूथपान् ३५ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा॥पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ३६ न कुतश्चिद्भयं तस्य वि
द्यां धारयतो भवेत्॥राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ३७ ॥ ॥ ॥

मानेन

त्यनेन अनेन सत्याख्यप्रमाणेन यथार्थेन सर्वज्ञत्वमपि सत्यत्वे प्रमाणमिति द्योतनाय विशेषणं गृहीतं तं न केवलं मायुधादिष्वेव संनिहितत्वं किंतु सर्वत्रापीति भावेनाह॥सर्वैरिति॥
एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः॥तत्तच्छक्तिस्वरूपेण स्वयमेव व्यवस्थितः॥सत्येनानेन मां देवः पातु सर्वेश्वरो हरिरिति॥अतो भूषणादिषु विशेषतः सन्निहितत्वात्

त्पसु २

म्नुइति ज्ञातव्यं ३३ मूलरूपस्य सर्वगतत्वे नावतारस्येति शंकां परिहरन्सर्वगतत्वं यथा सत्यं तेन सत्येन यथा नरसिंहः पात्विति तत्स्यपि दिशि च्छाहाबिदिक्षिति॥प्र
हापयन्निति स्वार्थे णिच्॥परिहरन्नित्यर्थः॥स्वतेजसा ग्रस्तानि अभिभूतानि समस्तानि तेजांसि सूर्यादीनि यस्य स तथा ३४ मघवन्रक्षन्कवचं दंशितः कवचितः ३५
साध्वसात् भयात् ३६ ३७

भा·ष·
२९

योगाभ्यासेन मरुधन्वनि निर्जलप्रदेशे ३८ द्विजक्षयः द्विजमरणं ३९ ४० प्रास्य निरस्य ४१ ४२ एतद्धारयमाणा इत्यादिनाय
कौशिकः कुशिकगोत्रे विद्यमानः योगधारणया गुरुशिष्ययोर्मिथो योग्यता वैकल्याद्योग्यत्वे विना संवत्सरं सहवासिने न ब्रूयादिति विशेषगुरुकुलवासाभक्त्या गुरुप्रसादाभावेन
फलमुच्यते तत्कस्माद्धेतोः रूपदर्शनमिति चेदुच्यते गुरुशिष्ययोर्योग्यत्वाद्गुरुवृत्तेः पूर्त्तिः अप्रसादाद्गुरोर्विद्यानियथोक्तफलप्रदेत्युक्ते । तर्हि गुरुरूपदे
वालोकोपकारादिना वा गुरोः प्राप्ता विद्या शिष्यस्य यथोक्तफलदा न स्यात् । गुरुशिष्ययोर्योग्यत्वाद्गुरुवृत्तेः पूर्त्तिः । विद्याकर्मात्तिस्मरणगुरोः प्राप्ताः फलप्रदाः । अन्यथा नैव फलदा इत्युक्ते ॥ तस्मा
श्रमंतरेण यथा लिखितपाठादिना प्राप्ता फलदा स्यादिति चेत् । न । गुरोः प्राप्तायाः फलप्रदत्वात् ।

इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः । योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ३८ तस्योपरि विमानेन गन्धर्वपतिरेकदा । ययौ चित्ररथः स्त्रीभि
र्वृतो यत्र द्विजक्षयः ३९ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ विद्यामिमां धारयतो मृतस्याऽस्थि विलंघनात् ४० स वालखिल्य
वचनादस्थीन्यादाय विस्मितः प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ४१ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यन्ति भूतानि मु
च्यते सर्वतो भयात् ४२ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः । त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ४३ इति श्रीभागवते महापु
राणे षष्ठस्कन्धे नारायणवर्मोपदेशो नामाष्टमोऽध्यायः ॥ श्रीशुक उवाच ॥ तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत । सोमपीथं सुरापी
थमन्नादमिति शुश्रुम ॥ १ ॥ ॥

इति षष्ठेऽष्टमः ॥ ब्रह्माद्यन्य
त्रसन्नगुरुदत्तां यथोक्तफलदा इति मंतव्यं प्रसन्नो रूपाञ्च फलप्रदा इति वचनात् अतउक्तफलसाकल्याद्यानां अश्रद्धेयमिति भावः ॥ इति षष्ठेऽष्टमः ॥ ब्रह्माद्यन्य
तमामरापरिहार्यापत्परिहर्तृत्वमहिमवर्णनेन हरावभिवृद्धनिश्चितभक्तिकुठारस्य योग्याधिकारिणः संसारतरुनिर्मूलनपटुतामिप्रेयते स्मिन्नध्याये तत्रा
दौ बीजदोषस्वभावो दुःसह इति प्रकटयितुं विश्वरूपस्य विप्रत्वेऽपि स्वमाजनितत्वेन दोषित्वेनासुरपक्षपाततां तावदाह तस्येति । सोमं सुरां पिबतीति सोमपीथं सुरापी
थं १

राम
२९

यजतं सविनयं गुप्तं

भागं हविर्भागं यस्य विश्वरूपस्य ॥ २ ॥ परोक्षमज्ञातवत् मातृरचनायाः स्नेहस्य परः ॥ ३ ॥ धर्मालीकं धर्मदोषं धर्मैकपरत्वात् ॥ अथ मातृ
नमपि हंतीति सा तत्तः ॥ ४ ॥ यदपि यद्यपि ईश ब्रह्महत्यादोषनिवारणे ईश्वरः समर्थः । तथापि अंजलिना ब्रह्महत्यां जग्राह इत्यन्वयः ॥ भू
तानां सा विशुद्धये लोकापवादपरिहाराय भूतहिंसापापशोधनायेति वा । हरिरिंद्रः । तत्तोऽविभजत् ॥ ६ ॥ स्वयमेव पूर्तिः स्यादि
ति खातपूरवरस्तेन हरीदत्तेन । ईरिणं ऊषरं लवणोपरं कासरसंस्पर्शः ॥ ७ ॥ छेदे रोहः पुनर्वर्द्धनं तेन वरेण ॥ रजोरूपेण रागरूपेण ८

खातकानि

स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अददद्यस्य पितरो देवाः सप्रश्रयं नृप ॥ २ ॥ स एव हि ददौ भागं परोक्षमसुरा
न्प्रति ॥ यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ३ ॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः । आलक्ष्य तरसा भीतस्तच्छी
र्षाण्यच्छिनद्रुषा ॥ ४ ॥ सोमपीथं तु यत्तस्य शिर आसीत्कपिंजलः । कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः ॥ ५ ॥ ब्रह्म
हत्यामंजलिना जग्राह यदपीश्वरः । संवत्सरान्ते तदघं भूतानां स विशुद्धये । भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥ भू
मिस्तुरीयं जग्राह खातपूरवरेण वै । ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः । तेषां निर्या
सरूपेण ब्रह्महत्या प्रदृश्यते ॥ ८ ॥ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः । रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥ ९ ॥ द्र
व्यभूयोवरेणापस्तुरीयं जगृहुर्मलं । तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥ १० ॥ हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे
इंद्रशत्रो विवर्द्धस्व मा चिरं जहि विद्विषं ॥ ११ ॥ अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ॥ कृतान्त इव लोकानां युगान्तसमये यथा १२

संवत्सरं तथैव वसित्वा
तातदत्ते ब्रह्मदत्तं

द्रव्याणां पंचानां भूतानां मध्ये स्वभूयस्त्वलक्षणेन वरेणानापनोदी भूयस्त्वं भ्रमसोऽत्र यस्त्विभाइत्युक्तेः ॥ १० ॥ इंद्रशत्रुवित्यादि
नात्वष्टा हतपुत्रोऽपि इंसो ममाहरित्यादिवेदवाक्यं स्मरयति । इंद्रः शातयिता यस्य तथा स इंद्रशत्रुः इंद्र एव तस्य संबुद्धिरिंद्रशत्रो इति । अनेन
यजमानस्याविमिप्रेतार्थोऽपि सूच्यत इति ज्ञातव्यं ॥ ११ ॥ अन्वाहार्यपचनाद्दक्षिणाग्नेः । लोकानां क्षयाय ॥ १२ ॥

इंद्राय इंद्रहेतुं शत्रवे शत्रु सत्ये । तदा इंद्रशत्रो विवर्द्धस्वेति । अत्र षष्ठ्यां तत्पुरुषपदस्याद्युदात्तत्वात् बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्मृते
बहुव्रीहिलक्षणापस्याऽन्त एव शत्रुरभवत् । तदुक्तं स्यात् । स्याहि इंद्रशत्रुर्वर्द्धस्वेति तस्माद स्वेंद्रः शत्रुरभवदिति । तथा च शिक्षायां मंत्रो हीनः
स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति । २

दृष्टिविक्षेपमात्रं प्रतिदिनं वर्द्धमानं रोदसी आरोप्येवेत्यर्थः ॥२

संध्याकालाभ्रमालावत्कपिशं वासो यस्य स तथा तं । तप्तताम्रवत्शिखा श्मश्रूणि वर्यस्य स तथा तं ॥१४॥ तिस्रः शिखाशिरांसि यस्य तत्तथा तस्मिन् ॥१५॥ दरीगंभीरवक्त्रेण गुहावद्गाधमुखेन ॥१६॥ रौद्ररूपेण दुःखं यस्य तत्तथा तेन मुखेन जृंभयंतं व्याददानं ॥१७ निरुक्तिः सर्वं कं नाम निर्दिशानियेनेति । व्याघूर्णतद्गणा मूर्त्तिर्यस्य तत्तथा तेन तमसा आहृता इति ये न तमः सोऽसुरो हन्ते इति ख्यातः वर्त्मं जघन्यं अपतद्वारीति भूते । दैत्यभेदेनां घेकारे ह्वयाहः षष्ठुत्पन्न इत्यभिधानात् । पातीति पः पालः परमात्मा धर्मविा तस्मादपगतः पापः ॥ एतदेव सूचयति । परमदारुणा इति ॥१८॥ ९॥ श्रीनारद उवाच परमानुग्रहं मन्वानेऽस्य तयोः साधन इति ज्ञात्वा देवानां हरिशरणाप्रकारं वक्ति । ततः इति । प्रत्येक प्रत्यगात्मानं । आदिपुरुषं स्वशरीरादौ भक्तानुग्रहाय गृहीतपुरुषरूपं ॥२०॥ वाध

विष्णुकृविवर्द्धमानं तमिपुमात्रं दिने दिने । दग्धशैलप्रतीकाशं संध्याभ्रानीकवाससं । तप्तताम्रशिखा श्मश्रुं मध्याह्नार्कोग्र लोचनं ॥१४॥ देदीप्यमानं त्रिशिखं शूलं आरोप्य रोदसी । नृत्यंतमुन्नदंतं च चालयंतं पदा महीं ॥१५॥ दरीगंभीरवक्त्रेण पिबंतं च नभ स्तलं । लिहंतं जिह्वया ऋक्षाणि ग्रसंतं भुवनत्रयं ॥१६॥ महता रौद्रदंष्ट्रेण जृंभयंतं मुहुर्मुहुः ॥ वित्रस्ता दुदुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥१७॥ येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्त्तिना । स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥१८॥ तं निहंतुमभिद्रुत्य सगणा विबुधर्षभाः । स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥१९॥ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः । प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः ॥२०॥ देवा ऊचुः ॥ ॥वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः । हराम यस्मै बलिमंतकोसौ बिभेति यस्मादरणं ततो नः ॥२१॥ ॥

घभिमानिनो ब्रह्मादयो ये त्रिलोका तेवयं यस्मै बलिं हराम त्रिलोकी बहिर्लक्ष्मी तत्वं तद् नियंतं स्वतंत्रं मन्वीति शंका मा भूदित्याह । अंतक इति । असावंतकः मूलप्रकृतिर्दुर्गादिनामभिर्भिन्ना यस्मान्महांतकाद्विभेति भीतवत्तद्वशेवर्त्तते यत ततः स हरिरस्माकं शरणं मुक्तिर्यत्वयः । ननु ब्रह्मादयो वयं यस्मै बलिं हरामः यस्माद् असावंतकोपि बिभेतीति तत्सूक्ष्मात्परमेश्वरादन्यो मामवतीति प्रतीता थः कस्मादपलप्यत इति चेत्र । कालांतकः प्रधानेश्वरस्तद्रूपकमित्यपि उच्यते प्रकृतिः सूक्ष्माश्रीभूदुर्गेतिनामभिः सेवब्रह्मादिभयदा विश्वोक्तवशवर्त्तिनी । अनया पि बिभेतीवतद्वशात्वाद्दीयेत इति स्मृति

महत्तामनुभवाय परपर्यायसाक्षिजन्यदं हरेरेकत्वे निर्देशत्वे संसारनिवर्त्तकमहत्त्वे हि मत्वे प्रमाणमाह ॥ अथेति । विभ्रुधाविदुना असकृदालीढ्या निरंतरसेवितया निरंतरस्यंदमानेन निरवरतेन निरंतरेण स्वरूपसुखेन हे मधुमथन यस्मात्सं सर्वात्मिनः सर्वगुणपूर्णः सर्वात्मिना निर्दोषिः सर्वात्तियोमी अथ तस्मादेकांतिनो हरावर्पितशरीरेंद्रियप्राणा सर्वस्वा भागवताः ये एतेकांत्यं त्वच्चरणांबुजसेवां विसृजंति एवेत्यन्वयः । हवा वै सत्येतेभिः पातेः परमः पुरुषार्थ इति श्रुतेः स हि त्त्रः परमपरार्ध्यत्वं सूच्यते । सर्वभूतप्रियाः स्वात्मसिनो ज्ञानशत्रवः तेषां सुहृत् । सर्वभूतानां परेशाभीष्टकर्तृत्वात् प्रियं सुहृद्वा । परेमभिमता मे निर्वचनाना निरंतरं संतुष्टमनसः । अविसर्जनेकारणमाह ॥ स्वार्थेति । यत्रत्वच्चरणसेवायां परिवर्त्तः परिभ्रमणं । स्वाभिमापविज्ञापयितु [illegible] प्रातमाह ॥ त्रिभुवनेति । त्रिभुवनमेवात्मभवनं यस्य स तथा त्रिभुवनस्य पत्रपदक्रमो वक्षंपरिहर्त्तव्य इति द्योतनायेदं विशेषणमिति ज्ञातव्यं । एवमेवात्र त्त्र विशेषणानमभिप्रायगर्भीतानि पनानिपस्स

अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदालीढया स्वमनसि निष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरंतरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपरिवर्त्तः ॥ त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोयमिति स्वात्ममायया सुरनरमृगमिश्रितज

नयाः ॥ नरसिंह इत्यर्थः ॥ ~~विष्णोर्नसिंहस्यार्थः~~ विष्णोर्नृसिंहनामानि त्रिनेत्रोग्रादिकानि उग्र इति वचनात् नृसिंहाकृतिभिः यथापराधं दंडं धर्मधरसींव नीमहसुदर्शनादपश्चिमेवा दिनामानः । त्रयो लोकास्त्रिलोकविग्रहास्तानलक्षणाः प्रकाशा यस्य स तथा सर्वलक्ष्मस्यार्थः ॥ त्रिलोकस्य त्रैलोक्य निवासिनो जनस्य मनोहरोनुभावो यस्य स तथेति वा । मायागुणकर्तनिकराघ्रुकुर्विभासीति विवचना द्विविधभावस्यपात्रत्वा द्वि नपरस्मरूपत्वेन दर्पोनसु स्वरूपत्वात् । अपि शब्दात्मस्यादयः एव सात्वा द्विभूतय एवाग्मंतो विविधभावपात्रत्वात्सर्वे विष्णो विभूतयः इति । ये विभूतिशब्दवाच्या दितिजादयोभूवत्स्रेषामनुपक्रमसमयः स्वयशोरं भकालोयमिति मत्वा स्वात्ममायया स्वरूपभूतेच्छया स्वमहिम्नाभुक्तेर्था शिनस्वंवधमंतरेणा भासुराकृतिभिस्त्वतीर्यथयापराधंत्रैलोक्यापहरणादिलक्षणापराधमनुसृत्य बल्यादीनां दंड धृतवानसीत्यन्वयः ॥ मिश्रिताकृतिभिर्नरसिंहादिभिः सुराद्याकृतिभिरिमेन तविभूतित्वं विहतमिति ज्ञातव्यं ॥

रदंदंदर्थ

लिंगानां२

भा·ष· ३५

किंवक्तुनोक्तेनापेक्षितं वक्तव्यमितितत्राह। एवमिति। यदिमन्यसेकर्त्तव्यंनहीतिशेषः। किंचंकर्त्तव्यमितिप्रार्थयंते। अस्माकमिति। हृदयनिगूढानांहृदयाख्यपृष्ठे खलानांचक्रशंखादिलांछनानां स्यच्छत्रपोधारणेनात्मयात्कतानां तद्भूतानांमनुकंपयानुरंजितंस्मितंच विशदं निर्मलं च रुचिरं वा रुचशिशिरंशीतलंच यस्मिंतंते नमुक्तेनावलोकनेन भिरीक्षणेनविगलितं भिगलितं मधुरं च मधुरितं मुखमितंमंडं च पद्यवचः तेनामृतकलयायुक्तेनेति शेषः। वचोलक्षणपापामृतकलयेतिवा क्षुत्पिपासिनवालवत्सवत्सस्य नवहृदयभावान्निरेकादुत्कंठितमित्ययद्धिज्ञापनमस्यदा यत्तदस्मदस्मदज्ञाननिमित्तमित्यभिप्रेत्याहुः। अथेति। दिव्यमायास्वरूपेच्छया विनोदो लीलायस्यसत्तथा। निकायानांराशीनांब्रह्मस्वरूपेणचहिः। प्रत्यगात्मस्वरूपेणानः। यथादेशाद्विक्रियाविशेषणंतेषांदे

दीति५

एवमेनमपिभगवञ्जहित्वाष्ट्रंत्वासुरंयदिमन्यसे। अस्माकंतावकानांनवचरणनलिनयुगलध्यानानुबद्धहृदयनिगडानांस्वलिंगविधरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकनेनविगलितमधुरमुखरितवचसामृतकलपाचांतस्तापंमनघार्हसिशमयितुम्अथभगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनो[illegible]सकलजीवनिकायानामंतर्हृदयेषुबहिरपिचब्रह्मप्रत्यगात्मस्वरूपेणप्रधानरूपेणयथादेशकालदेहावस्थानविशेषंतदुपादानोपलंभकतयानुभवतःसर्वप्रत्ययसाक्षिणआकाशशरीरस्यसाक्षात्परब्रह्मणःपरमात्मनःकियानिहवार्थविशेषोविज्ञापनीयःस्याद्विस्फुलिंगादिभिरिवहिरण्यरेतसः। अतएवस्वयंतदुपकल्पयास्माकंभगवतःपरमगुरोस्तवचरणशतपलाशच्छायांविविधवृजिनसंसारपरि

शकालादीनांउपादानोपलंभकतयाकारणत्वप्रापकत्वेनोपादानत्वेनोपालंभ्य अस्मोपशमनीमुपसंपन्नानांवयंयत्कामेनोपसादिताः॥

कत्वेनेतिवा। सर्वमनुभवतः आकाशशरीरस्याकाशवत्सूक्ष्मरूपस्य। आकाशशरीरंब्रह्मेतिश्रुतेः। लिंगशरीरस्यव्याहत्यर्थंपरब्रह्मणइतिमुक्तजीवव्यावृत्यर्थंसाक्षादिति। साक्षात्त्वंब्रह्मत्वंचिप्रकृतेश्चलीत्यतः। परमात्मनइति। हिरण्यरेतसोग्नेः महाप्रकाशस्य स्फुलिंगादिभिरल्पप्रकाशैरग्निकणैःस्व दीप्तेश्च। यतस्त्वमस्माकंसर्वापेक्षापरिहर्त्तासि अतोवयंयत्कामेनत्वामुपहतनन्वदाणवाच्छयातवपादकमलच्छायामुपागताःतदुपसन्नानांअधीहि भगवोब्रह्मेतिसमित्पाणिभिरिवच्छरणागतानामस्माकंतत्कार्यमुपकल्पयसमर्थयस्वेत्यन्वयः॥ ॥

राम ३५

घो

बहुप्रार्थनयैवस्वामीष्टफलप्राप्तिःस्यादितिदर्शयितुमेवगद्येनविज्ञापितमेवपद्यप्रबंधेनविज्ञापयंति। अथोइतितेजांसिसामर्थ्यलक्षणानि ३२ हंसवत्सारग्राहिणेद भ्रनिलयायहृदयाकाशनिवासाय। तस्यांतेसुषिरंसूक्ष्मंतस्मिन्सर्वंप्रतिष्ठितमितिश्रुतेः। निरीक्षकायचेतनकर्मसाक्षिणे। कृष्णायकृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकइत्यतःसंततपूर्णानंदाय। कृतौपूर्णौबलौवलप्राणौयस्यसतथातस्मै। निरुपक्रमायश्रमजनकप्रयत्नमंतरेणजगत्कर्त्रे। निरुपक्रमोहरिर्नित्यमत्र

अथो ईशनहित्वाष्टुं ग्रसंतं भुवनत्रयं। ग्रस्तानियेननः कृष्णतेजांस्यस्त्रायुधानिच ३२ हंसायदभ्रनिलयायनिरीक्षकायकृष्णायमृष्ट यशसेनिरुपक्रमाय। सत्संग्रहायभवपांथनिजाश्रयाप्तावंतेहरिष्टगतयेहरयेनमस्ते ३३ श्रीशुकउवाच अथैवमीडितोराजन्सादरं त्रिदशैर्हरिः॥ स्वमुपस्थानमाकर्ण्यप्राहतानभिनंदितः ३४ श्रीभगवानुवाच प्रीतोहंवःसुरश्रेष्ठामदुपस्थानविद्यया॥ आत्मैश्वर्यस्मृतिःपुं सांभक्तिश्चैवययामयि ३५ किंदुरापंमयिप्रीतेतथापिविबुधर्षभाः। मय्येकांतमतिर्नान्यन्मत्तोवांछतितत्त्ववित् ३६

यत्नोद्यमःउपक्रमेदित्यतः। सतांसंग्रहोयस्यसतथातस्मै। भवपांथाःसंसारमार्गेवर्त्तमानाःतेषांनिजाश्रयाय। निजमात्मीयमितित्वयोरित्यभिधाने। शब्दैकप्रकारावरिष्टाधर्मादेरप्यनमागतिर्मुक्तिलक्षणायस्मात्सतथातस्मै। हरयेआपत्परिहरणशीलाय ३३ स्वमुपस्थानंस्वविषयांस्तुतिं ३४ मदुपस्थानलक्षणयाविद्यया पुंसामात्मैश्वर्यस्मृतिःमाहात्म्यस्मृतिःमयिभक्तिश्चभवतीत्यन्वयः ३५ प्रसन्नोप्यहंतथापिफलप्राप्तिर्नायासेपि। भक्तिज्ञानप्रसादेभ्यान्यत्। अन्नदे तुसत्त्वविदितिअनेनायमधिकारिभुसुखाधिकप्राप्तियोगइतिज्ञायते ३६

तत्वविन्तथाप्यभिलाषकं किंफलमिति तत्राह। नेति। यः कृपणः कामानभिलषतस्तस्य मोक्षलक्षणं श्रेयो न वेद। कुतः गुणवस्तुदृक् स्वर्गादेर्गुणांशस्याविषयाणां वस्तुदृक् अप्रतिहतत्वदर्शी नित्यत्वज्ञानीत्यर्थः। अहमिच्छतोऽभिलाषकस्य तस्य तान् कामान् यच्छेद्दद्यां। तं भजमानं तस्य तथाविधफलदातृत्वेन वक्तव्यं युक्तमिति तत्राह। यदीति। यदि स मां भजमानोऽपि तथाविधः न स्वरफलस्वीकारयोग्यः उत्तमाधिकारी न स्यात्तर्हि तस्मै वै हि कान् कामान् दद्यां। यश्च तैर्विद्योत्कृष्टतमो न स्यात्तस्मै स्वर्गादिकामान् दद्यामिति विशेषमभिप्रेत्य वा यस्त्रुत्तमो न भवति चेदिति व्याख्यातं। यच्छेदिति पादे यमर्थः। तदुक्तं। तस्य कथमिति तत्राह। नेति। गुणवस्तुदृक् त्रिगुणजन्यशरीरादेर्वस्तुज्ञानी दीनो यो मुग्धः श्रेयो मोक्षाख्यं न वेद। तद्विनान्यद्वाञ्छेत् तस्य सेवकस्य सेव्यापि तथाविधोस्त्वुत्तमो न भवति चेत्तर्हि तादृशान् कामान् यच्छेद्दद्यात्। मत्सेवितत्वादिति शेषः ३७ कथमन्यत्तमो न भवतीति तत्राह। स्वयमिति। विद्वान् स्वतो योग्ययुक्तिविशेषज्ञानवान् तत्कृत्तमः स्वयमज्ञाय अज्ञानिने पुंसे

नवेद कृपणः श्रेय आत्मनो गुणवस्तुदृक्। तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ३७ स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय
कर्म हि। न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ३८ राम

कर्मभिर्निःश्रेयसं न वक्ति नोपदिशति। किंतु तमेव विद्वानिति कृतः ज्ञानेनैव यथा पथ्यमेव अभिविन्दति ददाति नापथ्यमित्यन्वयेन निबकृ जिनन्निरोगत्वं तिष्ठ प्यावयति प्राणमिति वा वेद्यः। पानीयं वाञ्छतो ज्वरादिरोगार्तस्यापथ्यं पानीयादि इष्टं न राति न ददाति। तस्मादनीदृशउत्तमो न भवतीत्यर्थः। न तु कृपणः कर्मणा सिद्धिकामित्वाद्विनात्युत्तमः स स्वाभिषेवं तत्कथमुच्यते। लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि। यदि त्वहेन वर्तेयं जातु कर्मण्यतन्द्रित इत्यादौ भगवते कर्मविधानादत्राह। स्वयमिति। मादृशो विद्वान् स्वयं केवलैः कर्मभिरज्ञाय अज्ञानिने निःश्रेयसं न वदति किं तु ज्ञानद्वारा शुद्धानकरणाय यथाभिवापि केवलफलकामिन एव तादृशफलं दीयते अतो साबल्यफलस्वीकारयोग्य इति नियम्यते तर्हि किमर्थं तस्मै तादृशमपि दीयत इति चेत्तन। युष्मद्भक्तेन तत्फलदानस्य युष्मदिष्टत्वात्तदेव मम प्रियं युष्मत्कामाभावे तत्फलं न दद्यां। भवतामस्त्रियकामित्वादेतदा वा यैरुक्तं। युष्मत्कामो मत्प्रिय एवान्यथा न दद्यामिति भा

वं। किं कैः स्त्रियं कामयन्ति देवानौ वा किं यत्क्षिता इदाघ
यं कामयति निरानी स्त्रियं मात्रं इति॥३८॥

धि

ननु यदि पुरुषेण निःकामेन भवितव्यं तर्हि स्मत्कामो निष्फलो भवतो निष्टत्वादिति शंकामाभूत्। त्वाष्ट्रहननस्य ममेष्टत्वान्यदिष्टमेव युष्माभिः कामितमित्यतो वा वार्येर्थ्यर्युक्तमित्याद्युक्तं ३८ एतत्कुत इत्याशंक्य त्वाष्ट्रहननोपायमाह। मघवन्निति। गात्रं ज्ञात्वा यत इति गात्रं। गति साधनत्वाद्धा॥३९॥ जगतो धारकत्वाद्दध्यङ् तद्वदेवति गच्छतीति दध्यङ् कृमो ऽश्विगतो धिक ज्ञानवान् प्रख्यातः। दध्यङ् हयग्रीवो ऽथर्वणो नाम अश्वस्य शीर्षा प्रयदीमुवाचेति श्रुतिः एतदेवाह। अश्विभ्यामिति। यस्माद्दधीचो ऽश्विनौ देवताभ्यां ब्रह्मविद्यालक्षणं निष्कलं प्रापिताविति तमिति यावत्। यद्वा निष्कलं प्रवर्ग्यरुपं कर्म ब्रह्म वा अश्विभ्यामुक्तवानिति शेषः। यद्वा ब्रह्माश्विभ्यामुक्तवान्। किमिति। निष्कलं तस्य प्रतिपालननिमित्तं दधीचा ब्रह्म तस्मा प्रतिज्ञातत्वात्तदनुपदेशे नृतवादित्वं स्यात्। तन्नामाह। अश्वशिर इति। यद्दधीचा अश्विभ्यामुपदिष्टं यच्च तयोर्विद्यावित्वं कादेवैर्दुर्लभीकृतास्तयोरश्विनोरमरत्वं मरणराहित्यं व्यधात्। तद्ब्रह्माश्वशिरो नाम। अत्रेतिहासमाचक्षते। आथर्वणे दध्यङ् प्रवर्ग्यब्रह्मविद्ययोर्दक्ष इति विज्ञायात्मनो ऽमरत्वं कामयमानावश्विनौ देवौ दधीचमुपागम्य तं प्रवर्ग्यब्रह्मविद्याविशारदमित्याकर्ण्यागतम्। तदर्थिभ्यामावाभ्यां ते वक्तव्य इति तं ज्ञापयामासतुः कर्मकाण्डे कर्मणि प्रवृत्तेनमयान्तत्समाप्यकालान्तरे वक्ष्येते इति

मघवन्यात भद्रं वो दध्यञ्चमृषिसत्तमम्॥ विद्याव्रततपःसारं गात्रं याचत माचिरं॥३९॥ स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलं॥ यद्वा अश्व
शिरो नाम तयोरमरतां व्यधात् ४०

तितेनोदितौ तौ निजगृहात्प्रजग्मतुः एतस्मिन्नन्तरे आत्मनो ऽस्य विद्यातिशयमसहमानः सुरपतिस्तमृषिमुपसृत्य प्रवर्ग्यब्रह्मविद्ये कस्मैचिन्न वक्तव्ये रागलोभादिना वदतस्तव शिरश्छेत्स्यामीति तमनुशशास। एवं बहुतिथे काले निर्गते तेनासत्याभ्यामागत्य श्रौतकविद्ये वक्तव्ये इत्युक्ते पुनरहमिन्द्रेण निषिद्धो ऽस्मीत्यब्रवीदत्। तौ
धि॰८
चोपायमाकलय्य निजशिरः छेत्तव्यमेवं तव शिरः छित्वा यत्र निधाय कस्यचिदश्वस्य शिरः छित्वा गलेसंधायते नैते विद्ये ब्रूहि। यदीन्द्रस्त्वदीयं शिरः छिनत्ति तर्हि स्वकीयं शिरः पूर्ववद्गले संयोज्य तुभ्यं दक्षिणां च दास्याव इति। ताभ्यां देवचिकित्सकाभ्यामुक्तो दध्यङ् अश्वशिरसा ते विद्ये तयोरुपदिदेश इत्यतो ऽश्वशिरो नामेति प्रख्यातमभूदिति। आथर्वणाश्विना दधीचेश्वं शिरः प्रत्यैरयत। स वां मधु प्रवोचदृतायन् त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वामिति श्रुतिः यात्रो दाहरन्ति हे अश्विनावाथर्वणाय दधीचे अश्वस्य शिरः प्रत्यैरयतं प्रतिसंहितमकुरुतं॥ स दध्यङ् वां मधु ब्रह्मविद्यालक्षणं प्रवोचत्। प्रावोचत् हे दस्रौ त्वष्टा विश्वरूपापशोकं लाहुक सेनारायणाकवचवबानुवाच। कीदृशः ऋतायन् यथातथं विद्या
जानन्। विद्यावक्ष्यामीति वचनं सत्यं संपादयन्निति वा ४०

भा॰ष॰ ३७

किंच नारायणकवचधारणाच्चास्य वीर्यवद्भिरस्थिभिरित्यभिप्रेत्याह। कृत्स्नेनेति। मदात्मकं वर्म नारायणकवचं वाथर्वणो दधीचिस्तस्मात् कृत्स्नेनाङ्गोपाङ्गसहितेन त्वाष्ट्राय विश्वरूपाय प्रादात् त्वं विश्वरूपादधाः। ततस्तस्मात्त्वाष्ट्रत्वं दुर्विद्यमानत्वात् त्वन्मात्रत्वात् स्वविश्वरूपस्य विद्यमानत्वाच्च तथा ४१ युष्मभ्यं याचितो भंगमयमस्तु इत्याह। युष्मभ्यमिति। अंगानीत्यवयवसाहित्यविवक्षया बहुवचनं। किंचिदपि नावशेषयतीत्यर्थः। याचितोऽश्विभ्यामिति पाठे अश्विभ्यां याचितो यथा ताभ्यां विद्याप्रदानात् तथा युष्मभ्यमप्यङ्गानि दास्यतीत्यर्थः। तैरङ्गैर्विश्वकर्मणा निर्मित आयुधश्रेष्ठो भवत्विति शेषः। येनायुधश्रेष्ठेन मत्तेजसोपबृंहितो भवान् ४२ तेजोऽस्त्रायुधसंपदः तेन प्राप्स्यथ इति शेषः। मत्परान्न हिंसन्ति केऽपीति शेषः

कृत्स्नेनाथर्वणस्त्वाष्ट्रं वर्मामेद्यं मदात्मकं। विश्वरूपाय यत्प्रादात्त्वष्ट्रा यत्त्वमधास्ततः ४१ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः। येन वृत्रशिरो हर्ता मत्तेज उपबृंहितः ४२ तस्मिन्विनिहते यूयं तेजोऽस्त्रायुधसंपदः। भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान्। ४३ इति श्रीभागवते महापुराणे षष्ठस्कन्धे नवमोऽध्यायः श्रीशुक उवाच इन्द्रमेवं समादिश्य भगवान्विश्वभावनः। पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः १ तथाभियाचितो देवैरृषिराथर्वणो महान्। मोदमान उवाचेदं प्रहसन्निव भारत २ अपि वृन्दारका यूयं न जानीथ शरीरिणां। संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ३

अत्र हर्याज्ञाकारित्वेन मुन्यादिभ्यो याचनं देवानां सामर्थ्यन्यूनत्वं च न दोषः। समर्था अपि याचन्ति देवा मुन्यादिकान् क्वचित्। आश्रये च हरेर्देवानां यशो धर्मोऽपि नान्यथेति वचनात् ४३ इति षष्ठे नवमः॥ ॥शत्रुनिग्रहोऽपि भगवद्भक्तिजनकत्वेन मुक्तिसाधनं स्यादित्यभिप्रेत्य कतिपयैरध्यायैर्वृत्रवासवयोर्युद्धं निरूप्यते। अत्रादौ सतामभीष्टमवश्यं कर्तव्यं पुरुषेणेति देवेभ्यो दधीचेः स्वांगदानप्रकारं वक्तुमाह। इन्द्रमिति। सुरमत्स्यावनिमिषावित्यमरः॥१२॥ संस्थायां चेतनापहः बुद्धिभ्रंशकरः योऽभिद्रोहो दुःखलक्षण उपद्रवः तं वृन्दारका देवा अपि यूयं न जानीथेत्यन्वयः। सर्वप्राणिनां बुद्धिहन्तृत्वाद्दुःसहतामित्यर्थः। अभिद्रोहस्य सर्वविषयज्ञाननाशकत्वात् ३

राम ३७

टी॰ ८

आत्मा देहे समीक्ष्य संसारिणि हरौ तथेत्यभिधानात्। इहापि येषु वक्षु पुरदेहः प्रेष्ठः प्रियतमः ईप्सिततम इत्यर्थः। कः पुमान् भिक्षमाणायापि विष्णवे पालयमानायापि विष्णवेऽपि तं देहं दातुमुत्सहेत प्रयतेत ४ पुण्यश्लोकैः पुरुषैरीड्यानि कृत्यानि कर्माणि देहदानानि येषां तेन तथा तेषां॥५॥ नूनं स्वार्थपरः परसंकटं परदुःखं दस्त्रं तुमशक्यं दातव्यमेवेति वा। परसंकटं वेद तर्हि न याचेत। सामान्यमुक्त्वा विशेषमाहुः। नेति। आशक्यमपि दातुं यदीश्वरः समर्थः तर्हि याचितः सन्नपि त्वां दास्यामीति नेति नाह न वक्ष्यति। ते जानन्तोऽपि दुःखदायनीयमिति जानन्तो वयं दातुं समर्थं भवन्तं याचामहे इत्यभिप्रायः। न चात्र देवानां स्वात्मनो नीचमाथर्वणं याचमानानामभिमानलक्षणेन तेजःक्षतिः शंकनीया॥ कार्यगौरववि-

जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ४ देवा ऊचुः किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूतानुकम्पिनां। भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणां ५ नूनं स्वार्थपरो लोको न वेद परसंकटं। यदि वेद न याचेत नेति नाह यदीश्वरः ६ ऋषिरुवाच धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः। एष वः प्रियमात्मानं त्यजन्तं संत्यजाम्यहं॥७॥ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान्॥ ईहेत भूतदयया स शोच्यः स्थावरैरपि॥८॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः। यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति॥९॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः। यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः॥१०॥ ॥

क्षया तदभावस्य प्रामाणिकत्वात्। हर्याज्ञाकारित्वाच्च। आत्यये च महाविपत्तौ कार्यार्थमपि च क्वचित्। नीचानपि तु याचेत स्वात्मनो गुणवत्तराः। नीचवाक्यं वेदे पुण्यपुराणे तावता क्वचित्। तेजःक्षतिर्भवेदिति जनकस्य यथार्थकमिति वचनात् ६ प्रत्युदाहृताः निराकृता इवोक्ताः। त्यजन्तं त्यक्ष्यन्तं॥७॥ अध्रुवेणात्मना अनित्येन देहेन हे नाथाः स्थावरैरपि विवेकशून्यैरित्यर्थः॥८॥ ॥९॥ पारक्यैः परेषां वृक्षगुल्मादीनां भक्ष्यभूतैः। अस्वार्थैः परप्रयोजनैः स्वज्ञातिजनैः स्वविग्रहैः स्वदेहैः

श्व १०

भा० ष०
३८

आत्मानं मनो ब्रह्मणि सम्पद्य कृत्वा आत्मानं देहं ॥११॥ यन्ता इंद्रियप्राणमनोबुद्धयो येन स तथा । हरेस्तत्त्वं स्वरूपं पश्यन् । योगं मूलाधारमारभ्य द्वादशांतपर्यंतं प्राणोन्नयनलक्षणं ॥१२॥ उत्सिक्तः उन्नद्धः ॥१३॥१४॥ पर्यस्तं परीवृत्तं ॥१५॥ ननु कस्मिन्काले कस्मिन्देशे वृत्रवासवयोर्युद्धमभूदिति तत्राह । त्रेतामुख इति । अंतरे अस्मिन्वर्तमाने वै-

॥ ॥श्रीशुक उवाच ॥ ॥ एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुं । परे भगवति ब्रह्मण्यात्मानं सन्नयन् जहौ ॥११॥ यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबंधनः । आस्थितः परमं योगं न देहं बुबुधे गतं ॥१२॥ अथेंद्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा । मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥१३॥ वृतो देवगणैः सर्वैर्गजेंद्रोपर्यशोभत । स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥१४॥ वृत्रमभ्यद्रवच्छक्रमसुरानीकयूथपैः । पर्यस्तमोजसा राजन् क्रुद्धो रुद्र इवांतकं ॥१५॥ ततः सुराणामसुरै रणः परमदारुणः । त्रेतामुखे नर्मदायामासीद्धे प्रथमेंतरे ॥१६॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः । मरुद्भिरृभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिं ॥१७॥ दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया । नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥१८॥ नमुचिः शंबरोऽनर्वा द्विमूर्धा ऋषभोऽसुरः । हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः ॥१९॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः । व्योमकेशो विरूपाक्षः कपिलोथ विभावसुः ॥२०॥ इल्वलो बल्वलश्चैव दंदशूको वृषध्वजः । कालनेमिर्महानाभो भूतसंतापनो वृकः ॥२१॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः । सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः ॥२२॥ प्रतिषिध्येंद्रसेनाग्रं मृत्योरपि दुरासदं । अभ्यद्रवन्नसंभीताः सिंहनादेन दुर्मदाः ॥२३॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः । शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः । सर्वतोवाकिरन्शस्त्रैः शस्त्रैश्च विबुधर्षभान् ॥२४॥ ॥

वस्वताख्ये मन्वंतरे । तत्रापि प्रथमे युगे प्रथमचतुर्युगे तत्रापि त्रेतामुखे त्रेतायुगस्यादौ नर्मदायां नर्मदातीरे । गाथायां द्वोष इति वक्ता तत्र तत्र लक्षणेनास्य प्रथमरणस्य नर्मदातीरे द्वितीयरणस्य स्मृतिकाले समुद्रतीरे इति विशेषो ग्रंथांतरेणावगंतव्यः ॥१६॥२१॥ कार्तस्वरपरिच्छदाः सुवर्णालंकाराः ॥२२॥२३॥ अवाकिरन् अवर्षन् ॥२४॥ ॥

ना ३

राम
३८

स्तन्यं स्तनयुतं पयः । वत्सतराः अतिशयेन बालाः । स्तन्यं प्रिया नवोढा भार्या अपि व्युषितं प्रोषितमन्यत्र स्थितमित्यर्थः २६ श्रीहरिदर्शनलालसनमाह । ममेति । न स्यात्सख्यमिति शेषः ॥२७॥ ॥इति षष्ठे एकादशः ॥ ॥ वृत्रवासवसंवादच्छलेन हरेर्जीवेनाभेदज्ञानं तमःसाधनमित्येतन्निरूप्यते द्वादशाध्याये । वृत्रवासवयोर्युद्धशेषं किं एवं जिहासुरिति । विजयं विजयात्मकं परं सुखं मन्यमानः ॥१॥२॥ भोगवत् भोगः कुष्ठिर्यस्य सतथा तं । भोगः सुखेष्वादिभितोपीनसर्पशरीरयोरित्यभिधाना-

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः । प्रियं प्रियेव व्युषितं विषण्णा मनोरविंदाक्ष दिदृक्षते त्वां २६ ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः । त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् २७ इति श्रीभागवते महापुराणे षष्ठस्कंधे एकादशोऽध्यायः ऋषिरुवाच एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयं मन्यमानः । शूलं प्रगृह्याभ्यपतत्सुरेंद्रं यथा महापुरुषं कैटभोप्सु १ ततो युगांताग्निकठोरजिह्वमाविध्य शूलं तरसासुरेंद्रः । क्षिप्त्वा महेंद्राय विनद्य वीरो हतोसि पापेति रुषा जगाद २ ख आपतत्तं ज्वलितं महोल्कवन्निरीक्ष्य दुःप्रेक्ष्यमजातविक्लवः । वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगं ३ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रं । हनौ तताडेंद्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ४ वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः । अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशं ५ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः । तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ६

वृ० ४

तस्योरगो विषयसे वा धाम हिवर्ष्मणि पालने वर्तुले स्थूलतायां च जन्मन्यास्वादने तेयतिवरं रूचिः ३ हनौ दंष्ट्रः परिघः पतितः रूढत्वभावित्पतः स्वामिमात्रेपीद्रशद्प्रयोगात्ततो विशिष्याह ममरेशमिति ४ ५ हरे त्वं स्वशत्रुं मा भिरिति शेषः ६

ननु हननेन तव पराजय इत्याशंक्य पराजयापराजयौ न नियतौ किंतु दैवकृतावित्याह। युयुत्सतामिति युयुत्सतां युद्धशीलानां मध्ये कुत्रचिदेकस्मिन्नेवैकत्रैकस्य सदा जय इत्यादि। ७। हरेरेव सदा जय इत्ययं नियम इत्यर्थः ... तमेव स्पष्टयति। लोका इति। यस्य वशे स्थिताः श्वसंति। श्वस प्राणन इति धातुः। तन्त्राधीना इति विज्ञायते। शिचाजालं तेन बद्धाः पक्षिण इव। बद्धाजालक इव तु स्वेच्छया चलितुं न शक्नुवंति ... इह जीवराशौ स्थितयोर्जयपराजययोः कारणं ८ ओजआद्या इंद्रियाणां शक्तिः। ... किंचित्तु विना विदुषो विविक्तता। ... इति। जडो जन ओज आदिगुणमूर्तिमिति भगवंतमज्ञात्वा तयोर्हेतुमात्मानं स्वं मन्यत इत्यन्वयः। स एव बलं न मित्रे हरेरधीनत्वं कुतः संगच्छत इति तत्राह।

युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै पराजयः॥ विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनं॥ ७॥ लोकाः सपाला यस्येमे श्वसंति विवशा वशे॥ द्विजा इव शिचा बद्धाः स काल इह कारणं ८ ओजः सहो बलं प्राणममृतं मृत्युमेव च॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडः ९ यथा दारुमयी नारी यथा पत्रमयो मृगः॥ एवं भूतानि मघवन्नीशतंत्राणि विद्धि भोः १० पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेंद्रियाशयाः। शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात्। अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरं ११

लिनां चापरेषामिति स्तोकेः। ओज आदिषु स्थितो जस्त्वादिगुणप्रवर्तकोयमित्यजानन् जनो जड इत्युच्यते॥ ओजआदिहेतुमिति वा॥ ९॥ १०॥ हिरण्यगर्भादीनामे ... जआदिगुणस्य हेतुत्वेन सत्वा जयपराजययोरवित नियतत्वमपि किमपराद्धमिति तत्राह। पुरुष इति। हिरण्यगर्भः पुरुषश्चात्मा वायुरुदाहृतः। शेषो यज्ञस्तथे ... वेद आशयः सम्यगाहृत इत्यतः पुरुषादिशब्देन नसंसार्यादिमात्मा निवस्तु निरुध्यते। किंतु विशिष्ट एव चेतन इत्येवं शास्त्रनिर्णये सति हिरण्यगर्भादयो यदनुग्रहं ... विनास्य जगतः सर्गादौ न शक्नुवंतीति तमात्मानमतः स्थित्वा शानादिकर्त्तारं श्रीहरिमनीशं जीवं मन्यते व्याहतमिदमित्याह। ईश्वरमिति। कोसावितितत्राह। अविद्वा नेवेति। अज्ञानादेवं मन्यतानिरयएवावस्थानं मान्यत्वेत्वमिन्नर्थ एव शब्दः। अनीशं जीवरूपेण परमात्मानमीश्वरं। येमन्यते तान्नामीसस्नेहान्निरयभाग्भवेदिति

ननु तत्स्रष्टृत्वेन सात्त्विकत्वमारूढिः कथमिति तत्राह। भूतैरिति १२ दैनंदिनसृष्टिसंहारावपि तदधीनावित्याह। आयुरिति। पुरुषस्योत्पन्नस्य यान्याशिषो भवंति ते भावाः काले कालात्मनो हरेराराधनायोगाय न भवंति हि यस्मात्तस्मादकीर्त्यादेः समः स्यादित्यन्वयः। यथाऽदुःखाद्यनुभवेच्छारहितस्यापि विपर्ययाः दुःखादिलक्षणा दर्शं ते। तथेति शेषः। अनेन सर्वभावानामायत्ताधीनाइति निरणायि १४ दुःखाद्यागमे प्रकृतिपुरुषविवेकाज्ञानं कारणमित्याह। सत्वमिति। आत्मनो जीवस्यात्मानं पर

भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं १२ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः। भवंत्येव हि तत्काले यथानिच्छोर्विपर्ययाः १३ तस्मादकीर्तियशसोर्जयापजययोरपि। समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा १४ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः। तत्र साक्षिणमात्मानं यो वेद न स बध्यते १५ पश्य मां निर्जितं शत्रो वृक्णायुधभुजं मृधे। घटमानं यथाशक्ति तव प्राणजिहीर्षया १६ प्राणग्लहोयं समर इष्वक्षो वाहनासनः। अत्र न ज्ञायतेमुष्य जयोमुष्य पराजयः १७ श्रीशुक उवाच इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः १८ अहो दानव सिद्धोसि यस्य ते मतिरीदृशी। भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरं १९ भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीं॥ यद्विहायासुरं भावं महापुरुषतां गतः २०

मात्मानं १५ श्रीहर्यधीनत्वेन याजदिकं तदपि प्रत्यक्षमित्याह। पश्येति १६ प्राण एव ग्लहः पणो यस्य स तथा इषवः शरा एवाक्षा यस्य स तथा। हस्त्यादि वाहनान्यासनेफलकं लक्षणं यस्य स तथा। द्यूतकल्पः संग्रामः। अत्र द्यूतलक्षणे समरे १७ गतव्यलीकं निर्व्याजं १८ सिद्धो जीवन्मुक्तोजानि मे देहेलिङ्गः स्यात्साधितेतिवेति। आत्मानं श्रीहरिं भक्तः भजमानः १९ आसंगतश्रुतिवत्प्रविमहापुरुषतां भक्तिज्ञानादिनागुणसंपन्नत्वेन महत्वं २० राम राम

२१ खातकोदकैः कूपतटाकादिजलैः २२ धर्मजिज्ञासया धर्मविचारेण युक्तौ। युध्येते इति युधो योद्धारः तेषां पती। युधसंप्रहार इति धातुः। अनपुंसकाद्यपपदे क्विप् प्रत्ययः पुंश
इवत २३ २४ कनिष्ठिकायः करभः करिपोते ऽपि तत्कर इत्यभिधानात् अत्र करभशब्दस्य युक्तोऽर्थो ग्राह्यः २५ भ्रष्टो भ्रंशितः २६ लिलेहतत इतिशेषः २७ कालक

खल्विदं महदाश्चर्यं यद्रजः प्रकृतेस्तव॥ वासुदेवे भगवति सत्वात्मनि दृढा मतिः २१ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे। विक्रीडतो ऽमृताम्भोधौ किं क्षुद्रैः
खातकोदकैः २२ श्रीशुक उवाच इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप॥ युयुधाते महावीर्याविंद्रवृत्रौ युधांपती २३ आविध्य परिघं वृत्रः का
र्ष्णायसमरिंदमः। इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिष २४ स तु वृत्रस्य परिघं करं च करभोपमं। चिच्छेद युगपद्देवो वज्रेण शतपर्वणा २५ दोर्भ्या
मुत्कृत्तमूलाभ्यां बभौ रक्तस्रवो ऽसुरः। छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः २६ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं। नभोगंभीरवक्त्रेण लि
लेहोल्बणजिह्वया २७ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयं। अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् २८ गिरिराट् पादचारीव पद्भ्यां निर्ज्जर
यन्महीं। जग्रास स समासाद्य वज्रिणं सहवाहनं॥ महाप्राणो महावीर्यो महासर्प इव द्विपं २९ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः। हा कष्टमिति नि
र्विण्णाश्चुक्रुशुः समहर्षयः ३० निगीर्णो ऽप्यसुरेंद्रेण न ममारोदरं गतः। महापुरुषसंनद्धो योगमायाबलेन च ३१ भित्वा वज्रेण तत्कुक्षिं निष्क्रम्य बल
भिद्विभुः। उच्चकर्त्त शिरः शत्रोर्गिरिशृंगमिवौजसा ३२

ल्पाभिः यमसदृशीभिः २९ ३० महापुरुषेण भगवता संनद्धः रक्षितो रक्षित इति यावत्। नारायणकवचाख्यविद्यया संनद्धस्तेनैव योगमायाबलेन अणिमादिमहि
मबलेन। उपायलक्षणमायाबलेन वा ३१ ३२

अहनि वै मोचेगो ऽयस्य सततथा। येयमहर्गणा आदित्यादिज्योतिषामयने दक्षिणोत्तरायणसंज्ञे संवत्सरे संभवति तावताहर्गणेन षष्ठ्यधिकत्रिशतत्रयलक्षणेन। वार्त्रहत्ये वृत्रहनने सं
बंधिनि समये काले वा तावत्कालं समंतात्कृंतन्परिवर्त्तमानो ऽश्रमन् वृत्रस्य तन्न्यपातयदित्यन्वयः। अत एतिहासं पठंति। प्रथमं युद्धं नर्मदा तीरे क्षितीयं स तु सुदतीरे तत्र वृत्रे
णा केन चित्संकेते न संधितः इंद्रः सख्यं प्राप्तस्य तस्याप्रिघततया करं प्रगृह्य फेनेनात्यवधं कर्तुं विचरन्फेनेन मां जहीति विनोदवचनं हत्वेणवा दृष्यित्वा तेन पादस्पर्शलक्ष
णतां उत्तेन हत्वा युद्धाय संनद्धः एकसंवत्सरकालं युद्धं वहन् कृत्वा विष्णुशक्तियुक्तं वज्रं फेने निवेश्य तस्मै विसृज्य श्रीनारायणं ध्यायतस्तस्य शिरः प्रजहार। संक्षितः सम

वज्रस्तु तत्कंधरमाशुवेगः कृंतन्समंतात्परिवर्त्तमानः। न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ३० तदा च खे दुंदुभयो विनेदुर्गं
धर्वविद्याधरमहर्षिसिद्धाः॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ३१ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम॥ पश्यतां
सर्वलोकानां स्वलोकं समपद्यत ३२ इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रवधो नाम द्वादशो ऽध्यायः

येनेंद्रो वृत्रेणाथो कस्य हा। स युद्धतीरे क्वचित् फेनेन वधमस्य तु। नर्मणा जहि केनेन वाचयित्वा सुरेश्वरः। पादस्पर्शविवादं च कृत्वा युद्धाय दंशितः। फेने वज्रं समावेश्य
विष्णुयुक्तं व्यसर्जयत्। आषाढशुद्धिः रक्तस्य ध्यायतो वत्सरेण स इति वाक्यमत्रमानं। कण्टहा ती तिकस्य वृहः ३० वृत्रघ्नस्येंद्रस्य संबंधीनि लिंगानि लक्षणानि
विष्णु ... लिंगानि ... यस्मिन् जलनिर्गम नादी नि तानि ये षु मंत्रेषु त्येते वार्त्रघ्नलिंगा स्तैर्मंत्रैः दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपां बिलमपिहितं यदासीत् वृ
त्रं जघन्वां अप तद्ववारेत्यादिलक्षणैः ३१ आत्मज्योतिर्जीवाख्यं तेजः स्वलोकं स्वेनाधिकृतं विद्याधरलोकं॥ ॥इति षष्ठे द्वादशः॥ ॥

अश्वमेधादिकर्मज्ञानप्रतिबंधकदुःकर्मपरिहारत्वेन तत्साधनमित्येतदस्मिन्नध्याये प्रतिपाद्यते। भूरिदबहुप्रद। स्वर्णप्रदेति वा। स्वर्णं भूरि हिरण्यं वसु रत्नं निष्कं हेम नी इत्यभि
धानाद्धिरण्यादिद्रव्यप्रद १ ततः समुद्रतीरात् २ हरेरिंद्रस्य। अर्क मर्क टमंडूक विष्णु वासव वायवः। तुरंग सिंह शीतांशु यमा अह रयोदशेति अभिधाने ३ अर्थपवि
त्युभयपदी। अर्थप्रातिपदिकानि विकृतेरूपं साधु। बृहद्वधात् ब्राह्मणवधात् ४ एनो ब्रह्महत्याख्यं मार्ज्मि संशोधय परिहरामि ५ मास्म भैः भयं मा कार्षीः स्म॥
६।७॥ यन्नामसंकीर्तनादेते शुद्धा भवंति किं वक्तव्यं तद्यजनेनेति भावेनाह। ब्रह्महेति ८ सब्रह्मेति चराचरात्त्वं अथवा ब्रह्महननस्य दोषाधिक्यसूचनाय ९ वृषा

श्रीशुक उवाच वृत्रे हते त्रयो लोका विना शक्रेण भूरिद सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः १ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयं॥ प्र
तिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः २ राजोवाच इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने। येनासन्सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ३
श्रीशुक उवाच वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः। तद्वधायार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात्॥ इंद्र उवाच स्त्रीभूजलद्रुमैरेनो विश्वरूपव
धोद्भवं। विभक्तमनुगृह्णद्भिः वृत्रहत्यां क्व मार्ज्म्यहं ५ श्रीशुक उवाच ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन्। याजयिष्याम भद्रं ते हयमेधेन मा
स्म भैः ६ हयमेधेन पुरुषं परमात्मानमीश्वरं। इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात्॥ ७॥ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान्। श्वा
दः पुल्कसको वापि शुद्ध्येरन्यस्य कीर्तनात् ८ तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन। हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनि
ग्रहेण ९ श्रीशुक उवाच एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं। ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिं १० तयेंद्रः स्मासहत्तापं निर्वृतिर्नामुमा
विशत्। ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः ११

कपिरिंद्रः। वृषाकपिर्हरिः शक्रे हरौ तज्जैर्नाईने इत्यभिधानं १० स्म हे इत्यतो ब्रह्मवधस्य लोके जुगुप्सितत्वेन स्मृतावपि नाचतथा इतीममर्थं सूचयतः सर्वस्य सुतस्य हेतु
त्वात्। नहि किमर्थमस्य निर्वृत्तिर्नाभूत्सुखहेतुर्नाशो यो यादिगुणानां मुन्मीलितत्वाच्छत्रुहननेनेतितत्राह। ह्रीमंतमिति। यद्यपि शत्रुवधसूचकशौर्यादिगुणाः सुखहेतव
स्तथापि ते ब्रह्महत्यपातमस्य नो सुखयंति। कुतः लज्जाकरत्वात्। इंद्रादिदेवानां तदानीं तन कर्मप्रारब्धकर्मणा प्राप्तिदुःखस्य सूचकं। प्रारब्धकर्मणो वैशंकुमद्दुःखस्य सू
चकं तदानीं तन कर्मस्यादुद्धराहेतुर्यथारतः। देवादीनां स्थितप्रभावान्नैवान्यथा भवेत्। प्रारब्धमपि भुक्त्वा पि किं विद्धि

ऋष्यकपटांस्कंदरंजितपटां रजस्वलामिव॥१२॥ मीनगंधिनः स्त्रीणां मीनधारिणां चंडालादाशादयस्तेषां यो दुर्गंधस्ता दृशेन असुगंधेन असुरक्षितां
१३॥ ततः सहस्राक्षो नापरिहर्तुं सर्वा दिशो गत्वा विहायसा नभोगतः समर्थः पश्चात् प्रागुदीचीं दिशं दृष्ट्वा तां प्रविष्टो मानसं नाम सरः प्राप्येत्यर्थः १४॥
तंतुनवसदित्यपाठ्याद्यः स्वर्गस्य भूमिपर्यंतमधिष्ठिता। अग्निर्दूतोऽपस्योऽग्निर्दूतः। प्रावद्दिः स सरसि पुष्करनालतंतुष्ववसत्। तावन्नहुषस्त्रिनाकं स्व
र्गं भूमिमंतरिक्षं स्थानत्रयं शशास सम्यच। अत एव त्रैलोक्यपालनलब्धसर्वैश्वर्यभोगरहितः। ब्रह्मवधाद्वधोत्पन्नदोषमोक्षे। तावत्त्रिनाकमि
ति के चित्पठंति। अत्र च शब्द एवार्थे। नहुषस्य नेन संबध्यते अन्यपोगव्यवच्छेदार्थः। तिरश्चां गतिं आजगरी स्थितिं॥१६॥ ऋतंभरेतिपाठः। ऋत

तां ददर्शानुधावंतीं चंडालीमिव रूपिणीं। जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटां॥१२॥ विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीं मी
नगंध्यसुगंधेन कुर्वंतीं मार्गदूषणं॥१३॥ नभो गतो दिशः सर्वाः सहस्राक्षो विशांपते। प्रागुदीचीं दिशं दृष्ट्वा प्रविष्टो नृप मानसं॥१४॥ स आवस
त्पुष्करनालतंतूनलब्धभोगो यदिहाग्निदूतः। वर्षाणि साहस्रमलक्षितोंऽतः संचिंतयन्ब्रह्मवधाद्विमोक्षं॥१५॥ तावत्त्रिनाकं नहुषः शशास
विद्यातपोयोगबलानुभावः। स संपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या॥१६॥ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारि
ताघः। पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या॥१७॥ ॥

गिरा चिरित्वं वाकेनापहूतः बृहस्पतिवाक्येन च अश्वमेधाय दूतमुखेनेत्यर्थः। ततः मानससरसः स्वर्गं स्वस्य पालकस्याष्टमीहस्यध्यानेन निवारितमंहो येन सतथा
। सर्वगतं श्रीनारायणं स्मृतिपहादेः कस्यचनंतमस्यं कर्तुं भावादाविर्भूतः दिशिपदत्तो हरिर्नितं भगवंतं दिवादिभिरुपहूतत्वाद्धरेः अत्रात्मा न चिदानीं भूतं भगवद्ध्यानेन नि
रस्तं गतं तु पूर्वं तेनाभिभूत इंद्रः। किं तत्राह। पापश्चेति पापो ब्रह्महत्यालक्षणो नाशयत अभिभूतः। अभूदभिभूतं नाकरोदित्यर्थः। अत्र हेतुगर्भविशेषणा
माह। दिग्देवतयेति। इंद्रहितकारिण्यादिक् देवतया हतमोजो बलं यस्य इंद्रमभिभूय सर्वदिक्षु भ्रमतः सतया कस्मात्। गंगाजलपरिप्लुत मा
नससरःसंप्रविष्टत्वेन विष्णुपत्न्या वितं रक्षितं तस्मादेवेति॥१७॥ ॥

5

अतं भरध्यानादिनाभिमवाभावेन दृष्टिमवः स्यात् स्वरूपतो नाशाभावादिति तत्राह तमिति। भगवद्विषयेण अश्वमेधेन स्वरूपनाशः कथं स्यादित्यत उक्तं पुरुषेति। अत्र पुरुषशब्देन विष्णुरुच्यते सह ऋषीणां पुरुष इति श्रुतेः॥ हे स्येनेन श्रीहरिमाहात्म्यज्ञानपूर्वकं तत्कारणाभावेन तत्फलं स्यादिति विपक्षे वा धर्कं सूचयति। अहं हि सर्वपञ्चानां भोक्ता चेति स्मृतेः॥ १८॥ यत एवं सा गोपञ्च अतस्मान्महान पित्वा त्वष्ट्रवधस्तेन यज्ञेन शून्याय नीत एव सर्वो ज्ञाननाशमाप्तः सूचयति। ... तद्विशिनष्टि। इज्यमानइति। ब्रह्मवादिभिर्वितते विस्तृते अश्वमेधे यज्ञे इज्यमाने क्रियया विना विशिष्टादिसंचयः। कथं साधुत्वमित्यत उक्तं। यपीडुक्तमेव विशिनष्टि। ... मानेत्यादि। वा इत्यनेन ज्ञानाग्निः सर्व सर्वभूतानां प्रध्वानज्ञानपापी च सर्वभूतमयात्मा तस्मिन्नपि पुरुषे इज्यमाने सन्निर्वेदे वमयात्मनीति पाठे पि स एवार्थः। वा इत्यनेन ज्ञानाग्निः सर्व

तं च ब्रह्मर्षयोभ्येत्य हयमेधेन भारत॥ यथावद्दीक्षयां चक्रुः पुरुषाराधनेन ह॥ १८॥ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि॥ अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः॥ १९॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप॥ नीतस्तेनैव शून्याय नीहार इव भानुना॥ २०॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः॥ इष्ट्वाधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः॥ २१॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनं॥ भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः॥ २२॥ पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियं॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथायुषं॥ २३॥ ॥ इति श्रीभा॰ षष्ठस्कंधे त्रयोदशः॥ ॥

कर्माणीति वचनात् भगवत्ज्ञानेन सर्वात्मना पापस्य नाशो अश्वमेधेनेन्द्रस्य महत्वातिशयो भवतीति सूचयति॥ १९॥ २०॥ तत्कुतो वा अत आह स वाजीति। मरीचिमिश्रैः मरीचि[illegible]ज्ञातविधुत यापोपि इज्यमानेस इति सर्थः। नेदमपि वेन स्वार्थं तपो तु एहानं शनि लोकोपकारत्वेन यतो सि इन्द्र पापमेकं नष्टं॥ २१॥ तच्चरितस्य [illegible]दिना सर्वाभीष्टानि सिध्यन्तीत्याह इदमिति। तीर्थपदस्य हरेरनुकीर्तनं यस्मिंस्तत्तथा॥ २२॥ इंद्रियमिंद्रियाणां शक्तिप्रदं। किं विषयमाख्यानमिमं तो वरूक्रक॥ २३॥ ॥ इति षष्ठे त्रयोदशः॥ ॥

गरं विषं॥ ४३॥ ४४॥ धात्रीं स्तनदात्रीं॥ ४५॥ उत्तारलोचनं उन्नततारापुत्रनेत्रं॥ ४६॥ अनुप्रकृतिः सप्रकृतिजनः॥ ४९॥ ५१॥ श्रोत्रं रुदत्तां चित्रं बाष्पं वदंती सुशोचेति॥ ५२॥ शोकलज्जा यांबारकं दर्शयति। अहो इति। अतीव बालिशः जडाज्जडः कथं मम जाड्यमापद्यत इति तत्राह। परेति। परस्य मातापितृ इहे रहाति रूप

विदग्धमनसो मतयः स्त्रियो दारुणचेतसः॥ गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति॥ ४३॥ कृतद्युतिरजानंती सपत्नीनामघं महत्॥ सुप्त एवेति संचिन्त्य निरीक्ष्य व्यचरद्गृहे॥ ४४॥ शयानं सुचिरं बालमुपधार्य मनीषिणी॥ पुत्रमानय मे भद्रे इति धात्रीमचोदयत्॥ ४५॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनं॥ प्राणेंद्रियात्मभिस्त्यक्तं हतास्मीत्यपतद्भुवि॥ ४६॥ तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नंत्याः कराभ्यामुर उच्चकैरपि॥ प्रविश्य राज्ञी त्वरयात्मजांतिकं ददर्श बालं सहसा मृतं सुतं॥ पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहांबरा॥ ४७॥ ततो नृपांतःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनं॥ आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः॥ ४८॥ श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन्स्खलन्पथि॥ स्नेहानुबंधैधितया शुचा भृशं विमूर्छितोनुप्रकृतिर्द्विजैर्वृतः॥ ४९॥ पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांबरः॥ दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुं॥ ५०॥ पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिं॥ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा॥ ५१॥ स्तनद्वयं कुंकुमपंकमंडितं निषिंचती सांजनबाष्पबिंदुभिः॥ विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरं॥ ५२॥ अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे॥ ॥

जनिकूलं विरुद्धमीहसे तु एवं तु स्यादेदेन कारणं इत्यभिधानात्॥ ॥ रामराम॥ ॥

स्वजः

कथमिदं विरुद्धं चेष्टामृतद्रत्राह। परस्येति। परे पूर्वतनेपि न दिमानविवाजीवत्यपरस्य पश्चादुत्पन्नस्य पुत्रस्य यामृतिः सात्वयापाद्यते यत्र स्यादिति शेषः। यद्यपि संहारेयं क्रम
:तथापि स्थितावनुपपन्नोयमिति स्नेहपति नुनेति वा। कथं तर्हि जाद्यं परिहारः इति तत्राह। विपर्यय इति उक्तो हि पर्ययो न्यथा पूर्वतनस्य पूर्वं मृतिः पश्चात्तनस्य पश्चान्मृ
तिः पदितं हि क्रवं निश्चितं त्वं परो सिनेर्दम्यः प्राज्ञोसि स्वचेष्टानुसारिचेष्टावानित्यर्थः॥ ३॥ संतापक्रोधरागादिसूचनार्थं वचःक्वचिदिति वचनात्संतापादन्यचित मि
तिः पदित हि क्रवं निश्चितं त्वं परो सिनेर्दम्यः प्राज्ञो...।। ननु संतापवचः क्व चेदिति नहि क्रमश्चेदिह मृत्युजन्मनोः क्रमो नास्ति चेत्तदा तर्हि आत्मकर्मभिः स्वकर्मानुकूल्येनास्तु। नेत्यपास्त्वंगस्तु घ्येदि इमो हपाशो मम पुत्रो हमिति स्नेहात्
त्याहामहीति। शरीरिणां मृत्युजन्मनोः क्रमो नास्ति चेत्तदा तर्हि आत्मकर्मभिः स्वकर्मानुकूल्येनास्तु।

परेनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवं परः॥ ५३॥ नहि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः। यः स्नेहपाशो
निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि॥ ५४॥ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं। अंजस्तरेम भव
ताप्रजदुस्तरं यद्ध्वांतं न याह्यकरुणेन यमेन दूरं॥ ५५॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुं। सुप्तश्चिरं ह्यशन
या च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां॥ ५६॥ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं। किं वा गतो
स्यपुनरन्वयमन्यलोकं नीतोघृणेन न शृणोमि कला गिरस्ते॥ ५७॥ ॥

वंधःकृतस्तमिमं स्नेहपाशं विवृश्चसि छिनत्सि इति नसम्यक्करोषि॥ ५४॥ त्वमकरुणेन यमेन दूरं न याहीत्यन्वयः। इदं क्रोधं कलीकृत्योक्तमिति ज्ञातव्यं॥ ५५
अशनया शनेच्छया भवान्परीतोत एवास्मान्निः स्पष्टं प्रतीयते॥ ५६॥ इदमपि रागातिमिश्रमिति भावेनाह। नाहमिति मुदितेप्रसन्ने वीक्षणे यस्य तत्तथो
क्तं क्रोधं त्यजन्यंती शोचति किंचेति। अपुनरन्वयं पुनःसंबंधशून्यं अघृणेन यमेनेति शेषः॥ ५७॥ ॥

इयमेकैव विलपंत्यभून्नान्यद्द्त्यतः पूर्वोक्तविलापं स्पष्टयति। विलपंत्यामिति॥ ५८॥ अचेतनं बुद्धिशून्यं अशमवत्प्रवृत्तिशून्यं पुरेषो॥ ५९॥ अना
कायेकरहितं अस्मित्सारस्तु हरे गिरस आगतिं वक्तिज्ञात्वेति अनेन कस्मिष्यत्रिकालदर्शीति स्पष्टितं॥ ६०॥ इति षष्ठे चतुर्दशः॥ अत्र संसारो नित्यस
दुःखे दोज्ञानेनैव तदपि निरंतरोपासितश्रीनारायणानुग्रहादुत्पद्यत इत्येतत्सर्वं निरूप्यते तस्मिन्नध्याये तत्रांगिरोनारदावागत्य किं च क्रतुरित्याशंक्य
हा। श्रीशुक इति। मृतकोपांते शववसमीपे यमनुशोचति। अयं तव कः स्यात्कीदृशो बंधुः स्यादिदानीं पुरा इति भ्रांतिः चेत्तर्हि विसिसृष्टौ पुरातीत
कालेत्वमस्य बालस्य बंधूनां मध्ये कतमो बंधुः पिता मातुलो वा सहोदरो वा अतःपरं एष्यति काले च कतमो बंधुरिति शेषः। अयं च पूर्वापरका

श्रीशुक उवाच विलपंत्यां मृतं पुत्रमिति चित्रविलापनैः। चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह॥ ५८॥ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः। रु
रुदुःस्म नरा नार्यः सर्वमासीदचेतनं॥ ५९॥ एवं कश्मलमापन्नं नष्टसंज्ञमनायकं॥ ज्ञात्वांगिरा नाम मुनिराजगाम सनारदः॥ ६०॥ ॥इति श्रीभा
गवते महापुराणे षष्ठस्कंधे चतुर्दशोऽध्यायः॥ ॥श्रीशुक उवाच॥ ऊचतुर्मृतकोपांते पतितं मृतकोपमं। शोकाभिभूतं राजानं बोधयंतौ स
दुक्तिभिः॥ १॥ कोयं स्यात्तव राजेंद्र भवान्यमनुशोचति। त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं॥ २॥ यथा प्रयांति संयांति स्रोतोवेगेन
वालुकाः। संयुज्यंते वियुज्यंते तथा कालेन देहिनः॥ ३॥ यथा धानासु वै धाना भवंति न भवंति च। एवं भूतेषु भूतानि चोदितानीशमा
यया॥ ४॥ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः। जन्ममृत्योर्यथा पश्चात्प्राङ्नैवमधुनापि भो॥ ५॥ भूतैर्भूतानि भूतेशः सृजत्य
वति हंत्यजः। आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत्॥ ६॥ देहेन देहिनो राजन्देहाद्देहोभिजायते। बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः॥ ७॥ देह
देह्यविभागोयमविवेककृतः पुरा। जातिव्यक्तिविभागोयं यथा वस्तुनि कल्पितः॥ ८॥ नानात्वेन जन्मनाशः अत्र इयोर्दृष्टि
लेनाप्रकृतमइतियोज्यं यथा पूर्वोत्तरकालयुवयोर्न कोपि संबंधः यापल्लाद्दृष्टश्च भात्यतद्दृश्यमित्यथा येर्यथा विक्रियाः॥ ९॥ ॥
वेधःतथैरानीमेपिश्रांतिमंतरेणोत्पत्तौ शोको न कार्य इति भावः॥ २॥ ननु तर्हि सर्वस्मिन्मया कल्पितमस्त्विति तत्राह यथेति॥ यथा वालुकाः सिक
ताः स्रोतोवेगेन नद्याः प्रवाहवेगेन प्रयांति संयांति एकत्र संयुज्य राशीभवंति तथा कालेन ज्ञानरहितेन धातो [illegible] कालेन ज्ञानमूर्तिना देहिनः संयुज्यंते॥
संबध्यंते कलत्रादिवर्णं निगतोः कालेन संहारमूर्तिना वियुज्यंते॥ ३॥ ननु देहात्पुनर्देहांतरमप्युत्पंतेति तत्राह धानासु भवति जायते इति लब्धर्णी
मुक्तत्रिमिति तत्राह यथेति। धानासु बीजेषु अंकुरादिसंपद्या परिणतेषु सत्सु ततो धानांतराणि बीजांतराणि ४॥ ५

बीजादेव यथा

भा० ६
४८

केनाङ्गेत्युक्ते स्थितिं तत्राह आत्मेति। भूतानि स्वयमेव सृजन्तीति किं न स्यादिति तत्राह। अस्वतन्त्रैरिति। न वार्थार्थी सृजस्य मित्याह अनपेक्ष इति। अथास्यात्सर्जनात्संयोजनापेक्षानस्य
केनाङ्गेत्युक्ते स्थितिं तत्राह आत्मेति। भूतानि स्वयमेव सृजन्तीति किं न स्यादिति तत्राह बालवदिति। यथा बालः क्रीडनकैः क्रीडति तथा। लोकवत्तु लीलाकैवल्यमिति सूत्रात्॥ ८॥ भूतैरुपकरणैरीश्वरः
स्वकं च तद्दीं सर्जनं प्रयोजनमन्तरेण प्रवृत्त्यदर्शनादिति तत्राह बालवदिति। यथा बालः क्रीडनकैः क्रीडति तथा। लोकवत्तु लीलाकैवल्यमिति सूत्रात्॥ ८॥ भूतैरुपकरणैरीश्वरः
कथं सृजतीत्यत तत्प्रकारं दर्शयति देहेनेति। पितुर्देहेन संयुक्तान्मातुर्देहाद्देहिनुत्पद्यमानस्यास्य पुत्रलक्षणस्य जीवस्य देहो भिजायते। ननु चेतनस्यानित्यत्वात् दिहउपपद्
कथं सृजतीत्यत तत्प्रकारं दर्शयति देहेनेति। पितुर्देहेन संयुक्तान्मातुर्देहाद्देहिनः पितृमातृशब्दवाच्यस्य देहादुपादानभूताद्देहः पुत्रस्येति शेषः इति वा। अमीसुपसर्गेणानेकसु
इति ध्वातो॥ देहशब्दोपलक्षितपूर्वकर्मणा फलदानायेश्वरप्रेरितेन देहिनः पितृमातृशब्दवाच्यस्य देहादुपादानभूताद्देहः पुत्रस्येति शेषः इति वा। अमीसुपसर्गेणानेकसु
इति ध्वातो॥ देहशब्दोपलक्षितपूर्वकर्मणा फलदानायेश्वरप्रेरितेन देहिनः बीजादिति। बीजात्यनसादिलक्षणात्कलतेनुआदिसाधनसामग्रीसहकृतादङ्कुराद्यथा ह्रूजीवशरीरं तेन सह जायते तस्माद्युक्ति
इवपरंपरा सृष्टिमुपलक्षयति। अत्र दृष्टान्तमाह वीजादिति। बीजात्यनसादिलक्षणात् जलतेजुआदिसाधनसामग्रीसहकृतादङ्कुराद्यथा ह्रूजीवशरीरं तेन सह जायते तस्माद्युक्ति
इवपरंपरा सृष्टिमुपलक्षयति। अत्र दृष्टान्तमाह बीजादिति। यथा कार्यपरंपरा तथैव मनवस्थालकार्यस्य प्रकृत्यात्मकत्वात्तथापि पितृमातृविकारेषु शुक्रशोणितसंबंधकलि
मा-- राजसात्यनसादिवीजात्तरमुत्पद्यते तस्माद्वृत्तिप्रथा कार्यपरंपरा तथैवमनवस्थालकार्यस्य प्रकृत्यात्मकत्वात्तथा पितृमातृविकारेषु शुक्रशोणितसंबंधकलि
लादिलक्षणकार्यमभिमानिजीवेन सह जायते। तस्मात्परिणतावयवात् स्त्रीपुरुषभूताद्देहादिक्रमेण कार्यान्तरं जायते इत्यनेन क्रमेण भगवान् सृष्टिं करोतीति।
स्थितिसंहारयोरेवमूह्यं। तदहृष्टवशात्तस्मात्सर्वा लिकार्याणि कानि विदात्मनाराधनानि कानिचित्परंपरया तद्दीनानि तत्रापि विशेषमुपमानान्तरेण नयः ननु देहनाश
वेदे हिनाशे पुरुषार्थानुपपत्तिरत्राह देहीति देहदेहिनोर्मध्ये देही शाश्वतः अभिमानमन्तरेण जन्मनाशरहितः तथा कालत्रयेप्येकप्रकारैकं घमिवअर्थ इव मोक्षलक्षणपुरुषा
र्थं इव शब्दार्थ इव वा। तर्हि ब्रह्मसाम्यमायात मित्यस्यापातद्वेत्तरं दृष्ट्यर्थं जीवात्मः पदार्थः। शाश्वत इव नित्य इव। इयं कर्मैव कालश्चेत्यादेः जीवनित्यत्वस्य श्रीनारायण
धीनत्वेनोपचरितत्वाद्दैरेव निरूपचरितनित्यत्वमतस्तयोर्न साम्यमित्यर्थः। केचिदेवं माचक्षते अर्थः। जातिमात्रमिव यथा जाते नित्यत्वं तथा जीवस्यापीत्येतहिंसोकुत्ताभ
स्मतमात्रस्य नरत्वं पुनरिष्यत इति वचनात्। तन्नरत्वादेस्तन्नाशेनाशसंभवान्नित्यत्वानुपपत्तेः क्रशोहं स्थूलोहमित्यभेदानुभवाद्देहिनो नित्यत्वं हि देहस्यानित्यत्वमि
त्ययं विशेषः कथं घटत इति तत्राह देहेति। अविवेककृतो ज्ञाननिर्मितः न वा पमाधुनिकः श्रुक्तिरजतवदित्यतउक्तं। पुरेति। पुरा पुरातनः अनादिमानित्यर्थः। अनेनज्ञानेना
ज्ञानेनैवैक्यं कृविशेषो घटत इत्युक्तं भवति। अत्र दृष्टान्तमाह जातीति। यथा गवादिव्यक्तिषु गोत्वं गवादिपिंडानां विभागो भेदः कणादादीनामज्ञानेन संकल्पितः ननु वा
ज्ञानेनैक्यं कृविशेषो घटत इत्युक्तं भवति। अत्र दृष्टान्तमाह। जातीति। यथा गवादिव्यक्तिषु गोत्वं गवादिपिंडानां विभागो भेदः कणादादीनाम कल्पितः ननु वा
स्वतः अज्ञानकृतत्वमात्रेदृष्टान्तो यतस्माद्देहभेदेत्वेवअयोजके इति कणादादीनामपि तमोयोग्यत्वप्रकटनायतन्मतोदाहरणं। वस्तुनि हरोगोपालत्वादिजातिव्यक्तिरिति
आगो यथा कल्पितः आरोपितस्तथेति वा ८ देहदेहविभागप्रतीतेरनुभवात्कथं नानावादिभ्रान्तिप्रतीतिरित्यत आह॥ नानात्वमिति। अतद्धर्मायोजीवस्मादन्यदेहस्थ
र्मः सुरोनरोहमित्यादिनानात्वादयोदुष्टुर्जीवस्यविद्यमाना इति भ्रान्तिः। क्रियाफलमिति हेतुगर्भविशेषणं कर्मफलत्वात्। अग्निनादाह्यसंघनस्यविक्रियाहृद्धिह्रासादिवि
कारा अग्नेरिति भ्रान्तिः भ्रान्तेषु धनस्प्रहेदोसमुद्रेष्विसहस्रोहूणस्त्यादयो दुष्टुर्नीनिमोहेरतद्धर्मा इत्येव भ्रान्तिः। न हि दृष्टं दृष्टे विपरिलोपो विद्यत इति श्रुतेर्नैर्देहदर्शनं भ्रान्तमनेनेदं
हि देहभेदेश्रमाणमुक्तं भवतीति वा ८

राम
४८

शास्त्रश्रवणमननशालीरेन भक्त्यादिकसाधनसामग्रीसंपादनेन शहादिसंत्यागः प्रथमसाधनमित्यत्रेति हासमाह। भोजेनामेति। शत्रुणाग्रसंकवलितं तं प
दत्वं तदेवभोजनं यस्य सत्तथा। शत्रुच्छिष्टान्नभक्षणादित्यर्थः॥ ३१॥ पूर्वं पुरातनं वैरं घ्नन्तीति पूर्ववैरघ्ना ह्यस्मै कर्मभिः पूर्ववैरादस्य यः॥ ३२॥ दुरन्तदुःखा
नामोघापस्मिन् सन्तथा तस्मात्त्वमोतत्वप्राप्तं भूतांतावत्तदानीमेव॥ ३३॥ आत्मानमुन्मत्तादिवद्दृश्यन्नात्मनामनसा। आत्मानं दर्शयन्त्वाचय
नितिवा। निर्वाणंश्च शरीरेणाजन्मानन्दपूर्णब्रह्म श्रीनारायणाख्यं प्रविशेमनसेतिशेषः। यस्मिन् कुलायेदेहे स्थितः तं कुलायं नाविदन्न बुबुधे च श

भोजोनामनृपः स्वप्नेशत्रुग्रस्तान्नभोजनः। दुःखं दुर्विषहं प्राप्तः शोकमोहभयार्दितः॥ ३१॥ केचिद्विलुलुपुर्भोग्यान्परे वैविशुश्रितान्। पूर्ववैरग्रहे
जोयांश्च सः आत्मशिरोहरन्॥ ३१॥ इत्थं दुरन्तदुःखौघादुत्थितः स्वदनुस्मरन्। तावद्दृश्यं सुनिर्विण्णो निर्जगाम मनतोग्रहात्॥ ३३॥ दर्शयन्नात्म
नात्मानं निःसंगः शान्तविग्रहः॥ प्रविष्टो ब्रह्मनिर्वाणं कुलायं नाविदच्चनं॥ ३४॥ नारद उवाच॥ इमां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम॥ यां धा
रयन् सप्तरात्राद्द्रष्टासंकर्षणं विभुं॥ ३५॥ ॥

दोहेत्यर्थः॥ असंप्रज्ञातसमाधिस्थत्वाद्धामुक्तत्वाद्दा॥ ३४॥ समाधेप्येवंविधोपायावस्थामा प्रुक्ता उपायद्वितिन्त्राह इमामिति। मंत्राख्योपनिषद्विरका
लेनसाध्यसाधिका चेत्किमनयेत्यश्रद्धां माकार्षीरित्याह। यामिति। रुद्राद्याः शेषदेहस्थं विष्णुं संकर्षणमिथं शेषान्तर्यामिणं तात्वास्वपदं प्रापुरं जसे
तिवचनात्र शेषः संकर्षणो न दृश्यते किंतु तदन्तर्यामी द्वितीयस्त्रिरन्यस्यबंधनिर्मूलनादिसामर्थ्याभावात्तदृश्यत इति॥ ३५॥ ॥ ॥

भा॰ष॰ ५२

संकर्षणांशेषस्यान्तर्यामिणः संभाविते विशेषयोर्विशिनष्टि यस्यासेति। पूर्वे शर्वादयोऽपि यस्य पादमूलमुपसृत्य योगस्य महित्वं प्रापुरित्यन्वयः। महित्वं नाम कीदृशं येन ह
रिप्रसादप्राप्यस्यादित्यत उक्तमतुलेति। अतुलं तदनधिकं वेति तथोक्तं साम्याधिक्यवर्जितमित्यर्थः। ननु तर्हीदं भगवन्माहात्म्यं विना भूतं स्यादित्यत आह। नादीय
मिति। तेषां रुद्रादीनां योऽयं ननु स्वकीयं ज्ञानं भक्त्युक्तशासाध्यायां किमन्योपासनाया: प्रयोजनं स्वतः सिद्धत्वात्तस्येत्यस्या अपनेद्वेत्तरं तत्प्रसादलभ्यत्वात्त
दीयमिति। तदीयं तस्य हरेः स्वाधीनं न तदुक्तं। तेषां तत्पादपद्मानुवृत्तिवैष्णवानिपदानि तु। तेषां महित्वं च तथा हरेरिव रुद्रादिशायदृइति। भगवन्महित्वादन्यमहित्वस्य
साम्याधिक्यस्यवर्तनं कथं यत इत्यस्यापादमुत्तरं तस्मादिन्द्रादिपदादुद्रादित्रयेष्वप्येशादिपदस्य साम्याधिक्यवेनेतं तदुक्तं। किं वशेषादिन्द्रादिष्वप्येशादि
दिपदकं चैवत त्स्यत स्यैव स्वं मुक्तिगतस्यैव पूर्वमाहात्म्यमपेक्ष्यैनिवचनात्। ननु स्वसंसाम्यमुपैतीति श्रुतेर्हरेरेवातुल्यानाधिकमहित्वं प्रापुरित्यर्थः किं न स्यादित्य
त्रापीदमेव प्रतिवचनं तस्यविद्यमानं पदमापुर्न हरेर्विद्यमाने निजमहित्वं। तदुक्तं च। न हरेः कश्चिन्माहात्म्यमन्यः प्राप्स्यातत्रे तेविष्णोरिति श्रीतेरितिहरुद्रादिजात्यं

यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिदं द्वितयं विसृज्य। सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति॥ इति भा॰ षष्ठस्कं
न चेत्तद्ब्रह्मादिप्राप्यं किं न स्यादिति चेत्तन्न विलेशनादिभिर्देवैर्यत्याप्तुं नैव शक्यते। न ह्यस्य स्वभावः कैवल्यं समभवात्केवलो हरिरिति प्रथेपञ्चदशोऽध्यायः॥ ॥
माणविशेषात्। अत्रोपायान्वित्यभावमाह। भ्रममिति देहाद्यहंममाभिमानलक्षणं भ्रमं विहाय। आचार्येरप्येतदुक्तं देहादावहंममाभिमानो भ्रम इति। व
भ्रमस्यागमं तरेणान्यासिः कथं मुक्तिमतीति तत्राह द्वितयं द्वितीयमिति। कार्यकारणयोरेकशब्दवद्दृइति वेदितिन्यायात्कारणेन कार्यं लक्ष्यते। द्विती
येनान्यथाज्ञानेन निमित्तं वं च पुत्रादिष्वहंलक्षणं विसृज्य सम्यकृत्यक्तान्तदुक्तं द्वैतेनवं ध संत्यागान्नद्वैतत्यागीभवन्तु ने जिद्वैतेनोत्पन्नवंधसंत्याग
दित्यर्थः। अनेन मुक्तावपि शेषादिप्राप्यपदमिति ध्वनितमिति ज्ञातव्यं। साधनसामग्र्याः कालक्षेपो नास्तीत्याह। सद्य इति। तस्य तावदेव चिरं या
वन्न विमोक्ष्ये तावथसंपत्स्यत इति श्रुतेः। अनेन चित्रकेतोः किमागतमत्राह। भवानपीति। भवानपि तं मनंतमुपास्यैतद्दृष्टान्तस्तत्प्रसादेन न चिरात्त्वक मेनि
तित्वयमशरणानां नंतरं तत्प्रसादलभ्यत्वात्तदीयमपि तेन पूर्वमहिम्नातुल्यमनधिकं च परमन्यान्नरुद्रादिमहित्वलक्षणं निर्दुःखानंदानुभवलक्षणं स्वयो
ग्य माहात्म्यमुपैतीत्यन्वयः। यथेषोपरता देविं मायावैशारदी मतिः। संपन्न एवेति विदुर्महिम्नि स्वे महीयत इति स्मृतिवचनात्॥ ॥इति षष्ठे पञ्चदशः॥ ॥ ॥

आ॰ नं॰

संसारस्य पुत्रमित्रादिनियतत्वसंसारित्वेन तन्नस्पृहारिविषयनित्यत्वं परमचेतनस्य परमनित्यत्वं तज्ज्ञानमेव पुरुषार्थसाधनमित्यादिकमस्मिन्नध्याये निरूप्यते। अत्रना
रदोऽयुगमाहात्म्यं विद्योतयन्नराजकुमारमुत्थाप्येदं वक्तीत्याह। श्रीशुक इति॥१॥२॥३॥ सर्वेजीवात्मना किमभवादित्यत्राह। कस्मिन्निति॥४॥५॥पण्यानि विक्रेयाणि नरे
षु विक्रेतृषु ते नः सेककर्तृषु पित्रादिषु। योनिषु मातृषु कर्तृषु पितृष्विति वा॥६॥ ननु तर्हि हाटकादिवदनित्यत्वमापतितं जीवस्येत्याशंक्य संबंधस्यैवानित्यत्वं न तु जी
वात्मनस्तस्मात्तु नित्यस्येति॥७॥ यथा संबंधस्यानित्यत्वं तथा मम पुत्रोऽयमिति ममत्वमप्यनित्यमित्याह। यावदिति। हिशब्दस्यांतस्य च्चादिप्रमाणसिद्धत्वं दर्शयति। एव
शब्देनायोगव्यवच्छेदं करोतीति निरहंकृतनहंकृतिः स्वभावाख्यानं। यत्र योनिषु स्वस्वकीयत्वं॥८॥ ननु तर्हि केन सहास्य मुख्यो नित्यसंबंध इति तत्राह एष इति। यज्ञ आत्ममाया

॥श्रीशुक उवाच॥ ॥अथ देवऋषी राजन्संपरेतं नृपात्मजं। दर्शयित्वेति होवाच ज्ञातीनामनुशोचतां॥१॥ नारद उवाच॥ ॥जीवात्मन्पश्य भद्रं ते मातरं पितरं च
ते। सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया भृशं॥२॥ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः। भुंक्ष्व भोगान्पितृप्रत्तानधितिष्ठ नृपासनं॥३॥ जीव उवाच॥ ॥
कस्मिञ्जन्मन्यमी मह्यं पितरो मातरोऽभवन्। कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु॥४॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः। सर्व एव हि सर्वे
षां भवंति क्रमशो मिथः॥५॥ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः। पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु॥६॥ नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते नृषु
। यावद्यस्य हि संबंधो ममत्वं तावदेव हि। एवं योनिगतो जीवः स नित्यो निरहंकृतः। यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत्॥८॥ एष नित्योऽव्ययः सूक्ष्म
एषः सर्वाश्रयः स्वदृक्। आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः॥९॥ ॥

गुणैः स्वाधीनप्रकृतिगुणैर्विश्वं परावरं जगत्सृजति आत्मानं चावताररूपेणाव्यनक्ति। स एष सर्वाश्रयः सर्वैर्नित्यसंबंध इत्यन्वयः। अनित्यत्वात्कथं घटनइ
त्यत उक्तं। नित्य इति। कोऽर्थ इत्यतोऽव्यय इति। अनेन नित्यशब्दो व्याख्यातः। अनुपलब्धौ हेतुमाह। सूक्ष्म इति। न चायं जीववद्धत्वसंख्योपेत इत्याह। एक इ
ति। मुख्यत एकत्वसंख्याविशिष्ट इत्यर्थः। स्तुष्टो प्रवर्तमानस्य स्वरूपसंवेधेन ज्ञानलोपो नास्तीत्याह। स्वदृगिति। स्वरूपभूतज्ञानस्यापि भवलप्रतिबंधके
नाभिभवः किं न स्यादित्यत आह। प्रभुरिति। अनेन हरिणा नित्यसंबंधः पित्रादिभिरनित्य इति तात्पर्यतो अनित्यसंबंधपुत्राः पित्रा यानित्यपुत्रो हरेरि
तिवचनात्॥९

भा॰ष॰
५२

एवंविधस्य हरेर्योग्यतातिरेकेण न कोपि प्रियोऽस्त्यहो नहीति। कुतोप्रियाद्यभाव इति तत्राह। सर्वेति गुणदोषयोः कर्तॄणां पुरुषाणां स्त्रीणां च स
र्वासां धियां कुशलाकुशलसाक्षित्वेन तदनुसारेण फलदातृत्वाद् अप्रियाद्यभाव इत्यर्थः॥ साक्षित्वे ह्नोपसङ्गावेन ह्यात् कस्मिंश्चिदपि प्रियत्वादिसंभवति
न हि हरेः साक्षाद्गुणोऽस्तीत्यभिप्रेत्याह एक इति॥१०॥ साक्षित्वं स्पष्टयति नेति। आत्मा परमात्मा। कथं गुणानादानं हरेः साहाय्यकं गृह्णाति षड्गुणैश्वर
त्वेन क्षेत्रज्ञः। हीति। हि शब्दो हेतौ गुणोपभोगेन लोकवद्धर्मभावे गुणानादानस्य तात्पर्येण न तु सर्वात्मनो भोक्तृत्वं तथात्वे भोक्तृसदृशगुणभोक्तृत्वान्न भो
क्ता तदस्ति। अचिन्त्यशक्तिस्वरूपत्वेन परमेशितुरिति न स्मृति विरोधः स्फुटः। उदासीन इव सर्वस्मादुन्नतत्वेन स्थित एव भोक्तृत्वाभोक्तृत्वरहितः

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा। एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः॥१०॥ नादत्त आत्मा हि गुणं न दोषं न क्रियाफलं
उदासीनवदासीनः परावरदृगीश्वरः॥११॥ श्रीशुक उवाच॥ ॥ इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा। विस्मिता मुमुचुः शोकं छि
त्वात्मस्नेहशृंखलां॥१२॥ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः। तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं॥१३॥ बालघ्न्यो व्रीडिता
स्तत्र बालहत्याहतप्रभाः। बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं। यमुनायां महाराज स्मरंत्यो द्विजभाषितं॥१४॥ [illegible] प्रतिबुद्धात्मा
चित्रकेतुर्द्विजोक्तिभिः। गृहांधकूपान्निःक्रांतः सरःपंकादिव द्विपः॥१५॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः। मौनेन सं
यतप्राणो ब्रह्मपुत्राववंदत॥१६॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने। भगवान्नारदः प्रीतो विद्यामेतामुवाच ह॥१७॥ नारद उवा
च॥ नमस्तुभ्यं भगवते वासुदेवाय धीमहि। प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च॥१८॥

कृत्वे लोकविरुद्धं हरेः कथं घटते इत्यत उक्तमीश्वर इति। परावरदृक् सृष्टानां मध्ये स्थित्वा तटस्थ मासीन इति। तत्र हेतु उदासीनः तरहस्यानि ज्ञात्वा
न परावरदृगित्यर्थः॥११॥ ज्ञातयस्तस्मिन्सपिंडाः आत्मनां स्वेषां तस्मिन् स्नेहार्णवं शृंखलां हित्वा॥१२॥ ज्ञातेः सपिंडस्य तस्य देहं निर्हृ
त्य दग्ध्वा उचिताः क्रियाः श्राद्धादिलक्षणाः॥१३॥१४॥ तत्र चित्रकेतुः किं चकारेति तत्राह। स इत्थमिति॥१५॥ कृताः पुण्यजलैः क्रियास्तर्पणादिलक्ष
णाः येन स तथा॥१६॥ अथ तयोर्ब्रह्मपुत्रयोर्मध्ये नारदः। हे तस्मै नाधिकारगुणसंपत्रस्य विद्योक्तफलं साकल्येन फलतीति ध्वनयति। विद्यां सविधि

घो

निवृत्तं निरस्तं द्वैतदृष्टिः स्वाविद्यारोपितभेददर्शनं येन तस्मै। निवृत्तद्वैतदृष्टये इति पाठे निवृत्तं द्वैतं नान्यथाज्ञानेन दृष्टिर्वर्तनं यस्य तस्मै
नित्यनिवृत्तदेहाद्यहंममाभिमानायेत्यर्थः। सम्यक्कृत्यक्ताः षड्भूर्मयो यस्मै तस्मै। यद्वाशनायादिषड्भिर्रहिताय। शनाया पिपासे शोकमोहौ ज
रामृत्यु मत्या विनिःक्रांते॥१९॥ मंत्रमुपदिश्य ध्यानप्रकारमाह। वचसीति। अप्राप्य मनसा सह वचस्युपरते तेन दृष्टश्चिन्मात्र मनसा सह अप्राप्य सदसत्प
रः स्थूलसूक्ष्मप्रपंचविलक्षणः॥ २०॥ अलौकिकचरकंनोलक्षणमंतरेण तज्ज्ञानं दुःसाध्यमिति तल्लक्षणमाह। यस्मिन्निति। इदं जगद्यस्मिन्
तिष्ठत्यपेति च। यतश्च जायते तस्मै ब्रह्मणे नम इत्यन्वयः। तत्र दृष्टांतमाह। मृन्मयेष्विति। जातिः सामान्यं जन्मनो रित्यभिधानान्मृदोजातिर्जन्म यस्य स तथा। यथा मृदा
दिरा शिर्मृन्मयेषु मृद्विकारेषु पृथिवी पर्वतादिषु तिष्ठत्यपैति तेभ्यो जायते च तथा। मृज्जातिर्मृत्त्वं मृन्मयेषु घटादिष्वनुगतमिति वा सामर्थ्याद्ब्रह्मणो नेयं॥

नमो विज्ञानमात्राय परमानंदरूपिणे। आत्मारामाय शांताय निवृत्तद्वैतदृष्टये॥१९॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः। हृ
षीकेशाय महते नमस्तेनंतमूर्तये॥२०॥ वचस्युपरतेऽप्राप्य य एको मनसा सह। अनामरूपश्चिन्मात्रः सोव्यान्नः सदसत्परः॥२१॥ य
स्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते। मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः॥२२॥ यन्न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः। अंतर्बहि
श्च विततं व्योमवत्तन्नतोस्म्यहं॥२३॥ देहेंद्रियप्राणमनोधियोमी यदंशविद्धाः प्रचरंति कर्मसु। नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु त
द्द्रष्ट्रुपदेशमेति॥२४॥ ॥

कर्मोपरमेन नमः हृषीकेशायेति। [illegible] मिति तेन पृथिवी पर्वतादिवत् मृन्मयांस मृदादिभिः तेषु मृज्जातिः स
वे जायते स्थावराद्यपि इत्यनेन विरुद्धत्वाच्चानुपपन्नः॥२१॥ मनोबुद्धींद्रियासवः मन आदिशब्दवाच्याः संज्ञादयो देवाः॥२०॥२३॥ भगवदनु
ग्रहभावाभावेन द्विधा प्रवृत्तानात्मानं कारणमित्यंतत्स्पष्टमाह। देहेति। यस्य हरेरंशेन विद्धाः प्रेरिता देहेंद्रियाद्यभिमानिनो देवाः
नादिकर्मसु प्रचरंति प्रवर्तंते। अन्यदा यदंशाभावे नैव प्रवर्तंते इत्यन्वयः। कथमिव अतप्तमनभिहितवह्निसामर्थ्यं लोहं दाहकार
णं प्रवर्तते। अप्रतप्तं न हि। अहं तद्ब्रह्म शरणमित्यंतर्दशेहेंद्रियादिस्थानेषु स्थितं द्रष्टृपदेशं साक्षिनाम॥२४॥ ॥

भा०ष०
५३

॥ शेषपादानन्तविष्णुपासनया शेषसमीपगमनं कथं संगच्छते इति चेदुच्यते । तत्र देवान्तर्यामिविष्णुविषयोपासनया तत्तद्देवसमीपप्राप्त्युपपत्तेः । अनेन न तत्र सद्भाव इति यो यच्छ्रद्धः स एव स इति तत्र देवसमीप्यान्तर्यामिणो विष्णुपासात्मसमीपगः । भूर्भुवः स्वः इति विधानेन मुमुक्षुः शेषसंसका शमप्यदित्यादि तेन चित्रकेतुना शेषान्तर्यामिविष्णुगतद्रूपत्वं भवति । तस्मादत्र चित्रकेतोरनेन प्रत्यक्षविधानेन शेषान्तर्यामिणो विष्णुं चित्रकेतुरुपासनु । शेषाविष्टहरेश्चापि वरान्प्राप्तवानिति वचनबलात् ॥ २४ ॥ रूपाक्षितरनिकुतइति चेत् । शेषान्तर्यामिणो विष्णुं चित्रकेतुरुपास्ते ।

नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलोत्पलालितचरणारविन्दयुगल परमपरमेष्ठिन्नमस्ते ॥ २५ ॥ श्रीशुक उवाच ॥ ॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः । ययावङ्गिरसा साकं धाम स्वायंभुवं विभो ॥ २६ ॥ चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम् । धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥ २७ ॥ ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया । विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ॥ २८ ॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः । जगाम देवदेवस्य शेषस्य चरणान्तिकं ॥ २९ ॥ मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकंकणम् । प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमंडलैः प्रभुं ॥ ३० ॥ तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वस्थामलान्तःकरणोऽभ्ययान्मुनिः । प्रवृद्धभक्त्या प्रणयाश्रुलोचनैः प्रहृष्टरोमानमदादिपूरुषं ॥ ३१ ॥ स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेचयन्मुहुः । प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरं । ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ । नियम्य सर्वेन्द्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं ॥ ३३ ॥

शितिवाससं नीलवस्त्रं । कटित्रं कांचीगुणं । कटिसूत्रं सारसनं कटित्रं कटिभूषणमित्यभिधानं ॥ ३० ॥ अतस्तद्वायोरादिकारणं पूरुषं पौरुषं पदमित्यतथा ॥ ३१ ॥ उत्तमश्लोकस्य शेषान्तर्यामिणो हरेः पादपद्मयोः । विष्टरं पीठं उपरुद्धोऽखिलानां वर्णानां शब्दोपलक्षणानां निर्गमो द्वारं यस्य सः ॥ ३२ ॥ मनीषया इति रूपपाठस्त्वयमपाठः । प्रतिलब्धः सम्यक् प्राप्तो वाग्वचनवीर्यं येन स तथा । सात्वतानां शास्त्रा विग्रहं तत्तदुपदेशविशेषो यस्य स तथा

राम
५३

देऽजित । अतिकरुणोऽपि सकामानां भजतां साधूनामात्मदोऽयदतस्त्वं साधवोऽपि भवतां जिताः । किं बाजितमनस्कैः समबुद्धिभिः साधुभिर्भवानपि जितो वशीकृतः वशी नियतत्वं सूचयति ॥ ३४ ॥ तस्य त्वेप्रमाणमाहात्म्यं वेति । जगदुत्पत्त्यादि तव विभवः स्वरूपलक्षणानि खलु पत्रं तत्त्व स्वस्थामवस्थाया शास्त्रेणाछिन्ना यां तेभित्रांशाः । विश्वसृजोऽहं जगदीश्वरोऽजगत्स्वदेति पृथक् जगदीश्वरत्वाभिमानेन निःप्रयोजनं स्पर्द्धयंतीति त्वम्मात्मसेन हरेर्माहात्म्यस्यानंतत्वं दर्शयति ॥ ३६ ॥ तव विभवरूपत्वादिना गुणानंतमुक्तमधुना कालदेशानंत्यमाह । परमाण्विति । त्वं परमाणुरपरमहान्तमध्यपरिमाणरहितोऽपि स्वतः प्राकृतपरिमाणमालोति । परमाणोः परममहतोऽन्तरादावंतेऽन्तरे च वर्तिनुशीलमस्याद्यंतांतरवर्तीपरमाणुलक्षणकालाव्ययवस्य परममहत्कालावयवस्य च मध्यकालावयवेव त्रिंदिति । सत्वानामित्युपलक्षणं । घटादीनां मध्ये दावुभयत्रेः पूर्वमंते पूर्वं सोऽहर्वर्षं वयं त्वत्स्वरूपं ध्रुवं च व्यभिचारितदेवान्तरकाले मध्यका

॥ श्रीशुक उवाच ॥ ॥ अजित जितः सममतिभिः साधुभिर्भवाञ्जितात्मभिः । भवता विजितास्तेऽपि च भजतामकामानां य आत्मदोऽतिकरुणः ॥ ३४ ॥ तव विभवः खलु भगवञ्जगदुदयस्थितिलयादीनि । विश्वसृजोंऽशांशास्तत्र मृषा स्पर्धन्ति पृथगभिमत्या ॥ ३६ ॥ परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रयविधुरः । आदावंतेऽपि च सत्वानां यद्ध्रुवं तदेवान्तरालेऽपि ॥ ३७ ॥ क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरण्डकोशः । यत्र भगवत्परमाणुकल्पः सहाण्डकोटिभिस्तदनन्तः ॥ ३८ ॥ विषयतृषो नरपशवो य उपासते विभूतीर्न परं

लेमध्यकालेऽपि वर्त्तत इति शेषः ॥ ३७ ॥ यत्राण्डकोशो दशगुणोत्तरैः सप्तभिः क्षित्यादिभिरावृतः स एषोऽण्डकोटिभि

: सह यत्र भगवत्परमाणुकल्पः सूक्ष्मात्सूक्ष्मनरो वर्त्तते तद्दूरेः स्वरूपमनंतमिति हेतुगर्भविशेषणं अपरिच्छिन्नत्वाद्विततमिति भावः ॥ ३८ ॥ एवं स्वरूपमुक्त्वा त्वपव्य तिरिक्तानादिपूर्तिप्रदातारं तेभ्यो ये फलमं तदत्तु प्राप्तिसमनंतरं । किंचित्कालं फलानुभवानन्तरं वा तेऽ । तद्वासान्ततः क्षीयत एवेति क्षते । अराजकलेपालके नराज्ञामृ

योजनसदृशो योधर्मविरुद्धानां राज्ञां कुलं वा ॥ ३९ ॥ ॥ ॥ राम राम ॥ ॥

रेक्षा । त्वत्तज्ज्ञानफलमाह । विषयेति । विषयतृषः स्रग्वस्त्रादिविषयतृष्णा × ×वां । तेषामाशिषस्तदनु विन
वत: अतएव नरपशवः विभूतीः ब्रह्मादिनाद्यच्याः । पर्वं तेषां पाताल × ×श्यन्ति यथा राजकुलं ४

भाग
५४

कामधियः शब्दादिविषयास्तानात्म्यगुणमये प्रकृतिगुणाविकृतदेहादिशून्ये ज्ञानात्मनि रचिताः त्वद्विषयत्वेनार्पिताः यस्तुस्त्व र्हि पुनर्नारोहंति नोत्पद्यंते।
करंभवीजानि भर्जितधानाः गुणगणतो विषयसमूहादस्यजनतो द्वंद्वजालानि सुखदुःखादीनि भवंतीति शेषः॥४०॥ दुःखात्मकसंसारनिवृत्तिः
केन स्यादित्याशंक्य भागवतधर्मानुष्ठानेन तन्निवृत्तिः स्यादित्याशयवानाह। जितमिति। हे अजित भवान्यदाय नुर्ग पमुनयोयंधर्ममुपासते तं भागवतधर्मम
हा तदा भवता संसारस्वरूपं जितं। भागवतधर्मकथने न भक्तानां संसारजयोपायोदर्शित इत्यर्थः॥४१॥ तस्त्वान फलं तमएवेत्याहाकरणनि न तु तर्हि याग्यादिकर्म
लक्षणधर्मेण पुरुषार्थः स्यादिति तत्राह। निजेति। स्वस्य शरीरक्लेशस्य हेतुना परस्य संज्ञपनलक्षण हिंसोहेतुना कुतो नास्तीति तत्राह। स्वद्रोहादिति। स्व

कामधियस्त्वयि रचिता न पुनरोहंति यथा करंभवीजानि। ज्ञानात्मन्यगुणमये गुणगणतोस्य द्वंद्वजालानि॥४०॥ जितमजित तदा भवता यदाह भाग
वतं धर्ममनवद्यं। निःकिंचना ये मुनय आत्मारामा यमुपासते पवर्गाय॥४१॥ विषममतिर्न यत्र नृणां त्वमहमिति ममतवेति च। यो न्यत्र विषमधिया
विपाररचितः स ह्यविशुद्धः क्षयिष्णुरधर्मवहुलः॥४२॥ कः क्षेमो निजपरयोः किया नर्थः स्वपरद्रुहा धर्मेण। स्वद्रोहात्तव कोपः परसंपीड्या च तथा धर्म
॥४३॥ न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः। स्थिरचरसत्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः॥४४॥ न हि भगवन्न
घटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः। यन्नाम सकृच्छ्रवणात्पुल्कसको पि मुच्यते संसारात्॥४५॥ ॥

विहितशरीरक्लेशं विना त्वमहमादिद्रोहात्तव वाज्ञोलंघनलक्षणात्॥४३॥ ननु शिवादिविहितवनात्वद्विहितस्यान्यथात्वेन त्वद्विहितलक्षणाज्ञातिलंघनदोषानि
मित्रकोपाभावोयपन्नेरतस्त्वत्तो पिथ्याभिवारिण्येवेति तत्र को हेतुरिति पूर्वोक्तं स्मारयति। यमिति। पूर्वस्मा द्विशिनष्टि यथागिति कुत्रेत्यत उक्तं। स्थिरेति। स्थाव
रजंगमप्राणिसमूहेषु यथा स्थितदर्शिनः। नद्यक्रमित्याह। आपदिति। नृणामात्माज्ञस्यमस्य योगव्यवच्छेदं चाह॥४४॥ प्रारब्धवशादापीत्र पितु त्पा किंकु
र्वंतिन फलोपलब्ध्यात्स्मादिदमघय पमानप्रवर्त्यतीति तत्राह। न हीति॥४५॥ ॥

राम
५४

नेह संसारतरणे सकृन्नामश्रवणमेवालं किंतु पुनर्दर्शनमिति यस्मात्स्थितस्मात्त्वद्दर्शनेनाधुनावयं परिमृष्टाशयमलाः अभूमेति शेषः। नारदवाक्यं च भगवदीक्षाया
अव्यभिचारित्वलिंगमित्याह। सुरर्षिणेति ४६। अनंतत्वाचकेन नारदेन समर्स्तं विदितमय भिचीर्णमितियदुदितं च फलमस्य भवति। निगमयति तवेति। जगदात्मने।
जगदंतर्यामिणः परमगुरोस्तव जनैश्चेष्टितं किंयद्विज्ञाप्यं न किमपीति भावः। विज्ञापनेहास्य हेतुस्त्विदृष्टांतमाह। इहेति दृष्ट्योतिः सुप्रकाशप्रकाशस्य सवितुः॥ रवेति
जगदंतर्यामिणः परमगुरोस्तव जनैश्चेष्टितं किंयद्विज्ञाप्यं न किमपीति भावः। इदमतिलदन्तुग्रहं विना न शक्यमित्याह। यं वा इति। स्वसुप्राणा
स्त्रि प्रदेशे एवद्योतःप्रकाशो येषां ते तथ्योतो॥४७॥ अस्माभिरिदमेव विज्ञाप्यमित्याह। नम इति॥४८॥ इदमतिलदन्तुग्रहं विना न शक्यमित्याह। यं वा इति। स्वसुप्राणा
इति धातोः प्राणंतमनुप्राणतीति विश्वसृज इति सूचिता। चेकितानं ज्ञानंतमनु चित्तयः ततद्वस्त्वनुगत ज्ञानवंतः उच्चकंति। सम्यग्जानंति सर्षपायति सर्षपायतिसर्ष

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ४६ विदितमनंतसमस्तं तव जगदात्मनो ज
नैरिहाचरितं। विज्ञाप्यं परमगुरोः कियदिह सवितुरिव खद्योतैः ४७॥ नमस्तुभ्यं भगवते सकलजगस्थितिलयोदयेशाय दुरवसितात्मगतये कुयो
गिनां नमः परमहंसाय ४८॥ यं वै श्वसंतमनु विश्वसृजः श्वसंति यं चेकितानमनु चित्तय उच्चकंति। भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेस्तु
सहस्रमूर्ध्ने॥४९॥ ॥श्रीशुक उवाच॥ संस्तुतो भगवानेवमनंतस्तमभाषत। विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह॥५०॥ ॥श्रीभगवानुवाच॥ ॥यन्ना
रदांगिरोभ्यां ते व्याहृतं मम शासनं। संसिद्धोसि तया राजन्विद्यया दर्शनाच्च मे॥५१॥ राम

र्द्धते तोश्री रिति हरिविवक्षायां सहस्रशीर्षा पुरुष इत्यत उपपन्नेः ४९ अनंतनामप्रवृत्तिनिमित्तक्रियावत्वादनंतः हरिगुणगतवायन दर्शनासमर्थत्वादनंत इ
त्यर्थः ५० नारदांगिरोभ्यां यन्मम शासनं तव व्याहृतं तत्करणेन या च मम विद्या भ्यस्ता तया यच्च मम मे दर्शनं तस्माच्च संसिद्धोसि प्राप्ताये हिताशेषपुरु
मे
षार्थोसीत्यर्थः ५१

अधुना हरिर्वैक्तिख्येरीकरणाय किं विद्धि शेषज्ञानायवा किं विदुपदिशामीत्यभिप्रेत्याह। अहमिति। सर्वभूतान्यहमित्यत्र यः वाद्यत्पनेन सर्वं खल्विदं ब्रह्मेति श्रु
तिं सूचयति। अनेनोपदेशस्य कोभिप्राय इतितत्राह। भूतात्मेति। भूतानामतः स्थिलासनादिकर्तृत्वान्नद्धोपदेशः। हरिरेक सर्वभूतानि तदनर्यामय्य त्यतिस्मृतेः
तिं सूचयति। अनेनोपदेशस्य ... भूतभावन इति। भूतानि भावयति सन्नागता निकरणीति। अनेनाहमस्मीत्यादिश्रुतिगतानि पदान्यन्तर्यामिणि मुख्य
सिन्ताप्रदात्वात्तद्धेपदेश इति भावः। तदाह। भूतभावन इति। भूतानि भावयति तस्थाने तस्थिचच। तस्मिन्नेव पर्यवंतं तेमुख्यवृत्त्या विशेषतइति॥ इदं खल्वपावशेषम्तानत्यमित्याह। शब्द
हृत्याप्रवर्त्ततइत्यक्तं तेथावोक्तं। तिष्ठ यदानि च सर्वाणि सुखदानि तथैवच। तस्मिन्नेव पर्यवंतं तेमुख्यवृत्त्या... ब्रह्मस्त्रभेदे अपिब्रह्मणि मम शाश्वतीतनुः प्रतिमा स्वरूपभेदनायावत्ब्रह्मविशिष्टितं तावतीवाक्
विदारिश्च हृराशिलेह्यणं शब्दब्रह्मसर्वदानंदलक्षणंपरंब्रह्मेतिपूर्वोक्तं। ५२॥ आत्मानं जीवं लोके भुवने अवितत मव्या हतज्ञानी हिलोकं चात्मनि संततं निर्व्यूढं विद्धि। विपुलस्य लो
इति श्रुतेः॥ एषनित्यो व्ययः सूक्ष्म इति पूर्वोक्तं।

अहंवैसर्वभूतानि भूतात्मा भूतभावनः। शब्दब्रह्म परं ब्रह्म ममोभेशाश्वतीतनुः॥ ५२॥ लोके ऽपिततमात्मानं लोकं चात्मनि संततं। उभयं च मया व्याप्तं म
यि दृष्टो भयं कृतं॥ ५३॥ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि। आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ५४

कं चात्मनि संततं निर्व्यूढं विद्धि। विपुलस्य लोकस्यात्मप्रदेशमंतरेणव्याकुल्यायोगात्। लोकश्चात्मेत्युभयं मया ब्रह्मरूपेण व्याप्तं॥ तर्हि जीवलोकयोरा
धारः क इतित त्राह। मयीति उभयं च मयि समाश्रितमेव कुतः अहमेवो भयाधार इति समाधत्स्व॥ ५३॥ ननु व्याप्तात्मात्मा नाश्रोतनो निर्गुण श्रु ति
श्रुतेः लोके वितत मात्मानमित्यस्य प्रतीतार्थ एव किंनस्यादित्याशंक्य दृष्टांतोनुगुणत्वात्कथ्यत इत्यभिप्रेत्याह। पश्यति। पश्यं सुषुप्तः स्वप्नमनु
भवन्पुरुषः विश्ववासनारूपेणात्मनि स्फूरितं च शब्दादिविश्वं पश्यति स्वप्ने आत्मानमेकदेशस्थं मन्यतेन तु व्याप्तं। स्वप्नाच्च प्राबुद्ध उत्थितः प्रबुद्धो विश्व
द्रष्टादिशयनः स्वं मन्यते श्रुतिगतिः स्क परमात्मविषयत्वेन जीवविद्युणविषयत्वेन वा कल्प्यते ५४ राम राम

ह

यथा स्वप्नावस्थायां भगवत्कर्तृकत्वं प्रामाणिकं मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति सूत्रात्तथा जाग्रत्यपि भवत्यवस्था अतः प्रबोधोस्मादित्यत्र भि
प्रेत्याह एवमिति। यथा स्वप्नावस्था प्रकृतिः शब्दवाच्यस्येच्छा निर्मितातथा जीवस्य सुखोपभोगस्य स्थानानि जागरणादीनि मायामात्राणि भगवदिच्छालब्
एव प्रकृतिनिर्मिता नि विज्ञापिता सा भवस्था नाम अनिषण्णस्य जीवस्य सुखोपभोगस्य द्रष्टारं साक्षिणं परं ततो भिन्नं स्मरेदित्यन्वयः। अन्यत्र न्यो अभिवाक्
य प्राप्ता तितिस्मृते॥ ५५॥ तत द्रष्टारमित्यत्र जीवात्मनः परमात्मा सम्पर्कं विद्यन प्रतीतइतितर्हि विकार्थमाहाय नेति। येनेति प्रसुप्तः प्रस्वापं प्रापितः सन्तु सुषुप्तो जीवा
त्मा तदा सुषुप्त्यवस्थायामात्मनः स्वापइयंतं कालं किं चनना वेदिषमितिस्वापश्च द्योतकम ज्ञानं कालेपुण्ये सुखमहमस्वाप्समित्यनुभूतं सुखं च सुखविनस्वा
त्मानं च वेदनात्यत्र किंचित्वेदात मात्मानं निर्गुणं ब्रह्म ज्ञानादिगुणपूर्णं मामेवेहीत्यन्वयः॥ ५६॥ इतोपि जाग्रदाद्यवस्थानुभवि नो जीवादिन्नं ब्रह्मेत्या

एवं जागरणादीनि जीवस्थानानि चात्मनः। मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत्॥ ५५॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा। सुखं च नि
र्गुणं ब्रह्म तमात्मानमवेहि मां ५६ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः। अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परं ५७

हा उभयमिति। जाग्रत्काले श्रीत्युभयं स्मरतोनुभवतः पुंसो जीवस्य प्रस्वापप्रतिबोधयोस्तद्रूपपरिज्ञानलक्षणं जाग्रति पश्चेति अनुवर्तते स्वयमपि प्र
तिबुद्धः सुप्तावस्वपन्नत्र इत्युपरिज्ञानलक्षणस्तु प्रोव्यतिरिच्येत व्यतिरिक्तं स्यात् सर्वज्ञानं संभवात्त्वं स्य प्रस्वापकस्वपनं स्वप्न इत्यभिधानात् अन्य
था ज्ञानलक्षणप्रस्वापपदोक्ते स्वप्नेपि यत्व्यतिरिक्तं वर्ततेतत्परं। ब्रह्मविदाप्नोति परमिति श्रुतेः। तत्त्वान्नज्ञानस्वरूपत्वाज्ज्ञानं तस्यावस्थान्यस्य
सतथा। सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः। अनेन सुषुप्तावस्थानुभवो जीवो नानुभूय साहित्येन तिष्ठन्परमात्मा ततो भिन्न इति ज्ञातव्यं॥ यद्वा जीव
स्याज्ञानसद्भावादस्यतदभावाज्जीवस्याल्पगुणत्वादस्यानंतगुणत्वाज्जीवस्य परिच्छिन्नत्वादस्यापरिच्छिन्नत्वात्तदेव ज्ञानं तदेव ब्रह्म तदेवपरं।
तदेव नित्यं तु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतेः ५७

भा०ष०
५६

विपद्देवाधकमाह। यर्हीति। यदि पुंस आत्मनो जीवात् भिन्न एव मद्भावः चक्रतो ममास्थितिप्रकारो विस्मृतः तर्हि तत्तयोः सयुजोः सख्योः जीवात्मपरमात्मनोः एक-
स्य सर्वभिन्नपरमात्मानं विस्मरतो जीवस्य संसारः स्यात्। किंलक्षणः कइतित्राह। देहादिति देहयोगवियोगलक्षणो देहाद्देहः। ननूक्तं। सर्वभिन्नपरात्मानं
विस्मारन् संसरेद्देहितिसर्वभिन्न इति विशेषणं विस्मृतः तर्हि तस्य जीवस्य स्तेष्टं तिर्निर्त्य दुःखात्मकं तत्त्वमेव प्राप्यतं॥ एतदप्युक्तं। अभिन्नं संस्मरन् याति
विस्मारन् संसरेद्देहीति। सर्वभिन्नइति विशेषणं विस्मृतः तर्हितस्य जीवस्य स्तेष्टं तिर्निर्त्य दुःखात्मकं तत्त्वमेव प्राप्यतं॥ एतदप्युक्तं। अभिन्नं संस्मरन्याति
तमानात्पत्र संशय इति॥५८॥ मद्भावोमद्भेलक्षणास्तस्मात् अभिन्न इत्यर्थोगीकार एवं श्लोकेन विरुध्यत इत्यभिप्रेत्याह। लब्ध्वेति ज्ञानविज्ञानयोः सं-
भवोयस्याः सा तथा तां इहजंबूद्वीपे तत्रापि भारतखंडे निर्वाणलक्षणां मानुषीं आत्मानं जीवात्मानं परमात्मानं वा निर्विशेषवादिना ज्ञानेन सामान्य
विशेषानंगीकारात्॥ व्यावहारिकस्याप्रामाणिकत्वाच्चेति॥ ज्ञानं शास्त्रार्थविषयं विज्ञानमनुभवजमित्ययं भेदोपि गतार्थ इति॥ ५९॥ ननु ज्ञानेनेह

यद्येषविस्मृतःपुंसो मद्भावोभिन्नआत्मनः। ततःसंसारएतस्य देहाद्देहोमृतेर्मृतिः॥५८॥ लब्ध्वेहमानुषींयोनिं ज्ञानविज्ञानसंभवाम्। आत्मानंयोनबु-
ध्येत नक्वचित्क्षेममाप्नुयात्॥५९॥ स्मृत्वेहायांपरिक्लेशं ततःफलविपर्ययम्। अभयंचाप्यनीहायां संकल्पाद्विरमेत्कविः॥६०॥ सुखायदुः-
खमोक्षाय कुर्वातेदंपतीक्रियाः। ततोनिवृत्तिरप्राप्तिर्दुःखस्यचसुखस्यच॥६१॥ एवंविपर्ययंबुद्ध्वा नृणांविज्ञाभिमानिनां। आत्मनश्चग-
तिंसूक्ष्मां स्थानत्रयविलक्षणां॥६२॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तःस्वेनतेजसा। ज्ञानविज्ञानसंतृप्तो मद्भक्तःपुरुषोभवेत्॥ ६३

मोमानूलयज्ञादिकर्मणस्यादिति तत्राह। स्मृत्वेति। ईहायां यज्ञादिकर्मकरणे परितः क्लेशं स्मृत्वा ततः कर्मणः फलविपर्ययं निरतिशयसुख-
प्राप्तिं दुःखापरिहारं च पश्यन् अनीहायां सर्वकर्मणि हरौ संन्यस्य ज्ञानमार्गप्रवृत्तौ भवन्निरतिशयसुखप्राप्तिं दुःखपरिहारं तयोरमिश्र-
त्व ज्ञात्वा सन्निर्विघ्न तत्त्वात् शंकं कर्म विरमन्नकुर्यादित्यन्वयः॥६०॥ अग्निहोत्रादिक्रियाकरणयोग्यो दंपती। ततः क्रियातः दुःखस्या नि-
वृत्तिः सुखस्य चाप्राप्तिः॥६१॥ कर्मविषयी विद्याभासेयं विद्येत्यभिमानिनां॥ आत्मनो जीवस्य परमात्मनश्चापेक्षया दिस्थानत्रयो
वापिभूताप्रतिमश्रुतिमत्तया विलक्षणां जाग्रदादिस्थानत्रयातीतां॥६२॥ मात्राभिर्विषयादिभिः स्वेन तेजसा विशुद्धबुद्धिसामर्थ्येति
ज्ञायेनेवं ज्ञात्वा पुरुषो भवेन्मुक्त इति शेषः॥ ६३

देहान्तरं

राम
५६

न्येष्ठा३

उक्तज्ञानमन्ययोगाद्व्यावच्छिनत्ति। एतावानेवेति। किं तदित्यत उक्तं। यदिति। परात्मन एकत्वस्य साम्याधिक्यराहित्यस्य दर्शनं॥६४॥ तव योगं चैत-
देवनान्यदित्याह त्वमेतदिति॥६५॥ चिरस्थितत्वे पुनरपि प्रश्नः स्यादित्यतस्तस्य हेरंतर्द्धानमाह। आश्वास्येति॥६६॥ ॥इति षष्ठे षोडशः॥ यथा शास्त्रा-
र्थतत्त्वेन ज्ञातः श्रीनारायणो मुनिदर्शितो नान्यथा यथाशास्त्रार्थतत्त्वं योगपानो मे वज्ञातुं सुशकं नापरो हि प्रियात्मवहिदेवा इति श्रोतः दुःखग्रहं॥

एतावानेवमनुजैर्योगनैपुण्यबुद्धिभिः। स्वार्थःसर्वात्मनाज्ञेयो यत्परात्मैकदर्शनं॥६४॥ त्वमेतच्छ्रद्धयाराजन्नप्रमत्तोवचोमम। ज्ञानवि-
ज्ञानसंपन्नो धारयन्नाशुसिध्यसि॥६५॥ श्रीशुकउवाच॥ आश्वास्यभगवानित्थं चित्रकेतुंजगद्गुरुः। पश्यतस्तस्यविश्वात्मा ततश्चांतर्दधेहरिः॥
६६ इति श्रीभागवतेमहापुराणे षष्ठस्कंधे षोडशोऽध्यायः॥ ॥श्रीशुकउवाच॥ ॥यत्रचांतर्हितोनंतस्तस्यैकृत्वादिशेनमः। वि-
द्याधरश्चित्रकेतुश्चचारगगनेचरः॥१॥ सलक्षंवर्षलक्षाणामव्याहतबलेंद्रियः। स्तूयमानोमहायोगी मुनिभिःसिद्धचारणैः॥२
कुलाचलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु। रेमेविद्याधरस्त्रीभिर्गापयन्हरिमीश्वरं॥३॥ एकदासविमानेन विष्णुदत्तेनभास्वता।
गिरिशंददृशेगच्छन्परीतंसिद्धचारणैः॥४॥ आलिंग्यांकीकृतांदेवीं बाहुनामुनिसंसदि। उवाचदेव्याःशृण्वंत्याजहासोच्चैस्त-
दंतिके॥५॥ चित्रकेतुरुवाच॥ ॥एषलोकगुरुःसाक्षाद्धर्मंवक्ताशरीरिणां। आस्तेमुख्यःसभायांवै मिथुनीभूयभार्यया॥६॥
जटाधरस्तीव्रतपा ब्रह्मवादीसभापतिः। अंकीकृत्यस्त्रियंचास्तेगतह्रीःप्राकृतोयथा॥७॥ प्रायशःप्राकृताश्चापि स्त्रियंरहसि
बिभ्रति। अयंमहाव्रतधरो बिभर्तिसदसिस्त्रियं॥८॥ भगवानपितच्छ्रुत्वा प्रहस्यागाधधीर्नृप। तूष्णींबभूवसदसिस-

ह्यार्थतत्त्वहरेः प्रीतिजनकं तथा प्रतिपादनमित्ययं प्रकारः कथ्यते स्मिन्नध्याये तत्र चित्रकेतोः ब्रह्माणीशापप्राप्तिप्रकारं च। दत्त्वा व्रतो-
कुत्वा वदाह। यत्र श्चेति॥१॥२॥ कुलाचलेंद्रस्य द्रोणीषु निम्नतटीषु तत्र एव स्त्रीणां पुरुषाणां च नानासंकल्पसिद्धिषु॥३॥ ज्ञात श्च किं प्रवृत्ते
तत्राह। एकदेति ४॥ दृष्ट्वापि किमभूत्तत्राह। उवाचेति॥५॥ इदं हि श्वरस्य श्वरत्वं यदन्ये रसत्वारै निर्विकारत्वमित्याशयेन गिरिशस्य द-
माप्रकारवक्ति। भगवानपीति। अगाधधीरन्येरज्ञातोयत्ताचद्बुद्धिः ८

भारयन्ना

दा३

भा॰ष॰ ५७

स्त्रीनिमित्तात्सत्कारपरिहारः स्त्रियैव कार्य इति परमेश्वराभिसंधिं जानती प्रतिवक्ति। इतीति। इष्टाय प्रगल्भाया निर्जितायात्माभिमानयात्मस्पर्धयेन स तथा आत्मविज्ञानवायेन स तथा तस्मै। अभिमानस्य विज्ञानं प्रणयेयेद्यपि सर्वत्रि तियादवः॥ १०॥ ११॥ अयं शापपर्यायोऽपापराधः इति ज्ञापयितुमित्यभिप्रेत्याहानवेदेति। अति वर्त्तिनमा संप्रज्ञातसमाधिस्थत्वे न व न्नमाने॥ १२॥ अनिमेषे कारणमाहाएषा मिति। एषां ब्रह्मादीनां स्वावरणे निद्रादीनामनुष्येयपदाब्जयुग्मरूद्योगोवश्रीर्यानित्यसंबंधद्योतनायवा॥ तद्वरणमित्याचार्यैर्व्याख्यातं॥ अत्र किमव लक्ष्येऽप्युच्यते इति चेत् न विष्णुब्रह्मे प्राणादीइन्द्रियाणामप्यतहरः। ध्येयो हरेः पार्षदो वै ध्याय न्हरिचतुर्मुखे। प्राणमोषांतथा दारान्नस्त्वंतत्र तया कचित्॥ इतिवचनबलाज्ज्ञायतेन

इत्यत्रहीर्यविदुषित्रुवाणे बद्धरोभनं रुषाह देवी घृष्टायनिर्जितात्माभिमानिने॥ १०॥ पार्वत्युवाच॥ अयं किमधुनालोके शास्ता दंडधरः प्रभुः॥ अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत्॥ ११॥ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्तिनं हरं॥ १२॥ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयं॥ यः क्षत्रबंधुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दंड्यः॥ १३॥ नायमर्हति वैकुंठपादमूलोपसर्पणं॥ संभावितमतिस्तब्धः साधुभिः पर्युपासितं॥ १४॥ अतः पापीयसीं योनिमासुरीं याहि दुर्मते॥ यथेह भूयो महतां न कर्ता पुत्र किल्बिषं॥ १५॥ ॥श्रीशुक उवाच॥ ॥एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः॥ प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत॥ १६॥ ॥चित्रकेतुरुवाच॥ ॥प्रतिगृह्णामि ते शापमात्मनोंजलिनाविके॥ देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत्॥ ॥१७

तु ब्रह्मादीनामनुध्येयपदाब्जयुग्ममिति। बहुप्रमाणविरोधात्। अत एवास्माभिः शास्त्रार्थो सोपरोद्धत्वेन देवप्रियत्वात् सुखगाह इत्यभिहितं। यस्मादयमपराधीतस्माद्दंड्यः॥ १३॥ किं दंडमर्हतीति तत्राह्य नायमिति। अनर्हत्वे कारणमाह संभावितात्मेति॥ १४॥ तदर्थं कउपाय इति तत्राहात इति॥ १५॥ शप्तस्य स इत्युक्तस्य तदुपसन्निधिकारमोहाएवमिति॥ १६॥ ह्यस्त्रस्थितानां पूर्वदिष्टं पूर्वजन्मनियतपुण्यपापलक्षणं कर्म देवैर्मनुष्याय प्रोक्तं विहितं तस्य मर्त्यस्य तत् कर्मत्येव सुखदुःखयोः कारणमिति शेषः॥ १७

राम ५७

स्क॰ ६

ननु भगवता शप्तं तत्स्वनियतं कर्मकारणज्ञानी मन्यते तदेव विशिनष्टि॥ संसार इति सर्वत्र जन्मसु॥ र्यानानुसुखदुःखोत्पत्तौ किं भोक्ता कारणमुतेतर इत्याशंक्य पइगवताज्ञप्तंतत्स्वनियतं कर्मकारणज्ञानी मन्यते इति च पोजनावगंतत्राज्ञानी स्वमन्यवामन्यत इत्याहानैवेति। आत्मा स्वयं परः स्वसृष्टादितरः अहरिज्ञानातीत्यज्ञःश्रीहरितत्त्वज्ञः परमात्मानमेवमन्यत इति च पोजनावगं तत्राज्ञानी स्वमन्यवामन्यत इत्याहानैवेति। आत्मास्वयं परः ... शापादिप्राप्तौ दुःखादिकं न कार्यमित्याह। गुणेति तव्या। यत्तद्भगवताज्ञप्तं तत्स्वनियतं भवेदिति वचनात्॥ १९॥ एवं श्रीहरिणाज्ञप्तमायातीत्यतः शापादिप्राप्तौ दुःखादिकं न कार्यमित्याह। स्वर्गस्यवानित्याल्पसुखत्वान्नरकं च किं विदुत्वात् ... भवात् गुणप्रवाहे संसारे शापादेः श्रीहर्यधीनप्राचीनदुष्कृतसुकृतयोः कारणत्वात्स्वतः प्राप्नुते ... तिर्वासनारूपिणोयथा॥ विद्यमानस्य मनसि पुनः सुखादेश्चाल्पत्वादनित्यत्वाच्चातत्पुक्तं अतोन्येषां वरः शापो गुणदोषप्रकर्ता। स्वतः प्राप्त ... इति शेषः। अनेनैतदुक्तं भवति। मनसि विस्वप्नेपि दर्शनं। भगवद्दशतायस्मात्सर्वेषां ज्ञेयमेव तदिति स्वतंत्रान्दुरेः प्राप्नात्कर्माणः भेदकृतिर्दृश्यत इति शेषः। अनेनैतदुक्तं भवति कर्तृत्वमेव स्वप्नेपि दर्शनं॥ ... सुखदुःखयोः॥ कर्तृत्वमेवं

संसारचक्र एतस्मिन्जंतुरज्ञानमोहितः॥ भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा १८ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः॥ कर्तारं मन्यतेऽप्राज्ञ आत्मानं परमेव च १९ गुणप्रवाह एतस्मिन्कः शापः को न्वनुग्रहः। कः स्वर्गो नरकः को वा किं सुखं दुःखमेव च २० एकः सृजति भूतानि भगवानात्ममायया। एषां बंधं च मोक्षं च सुखं दुःखं च निष्कलः॥ २१॥ न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः॥ समस्य सर्वत्र निरंजनस्य सुखे न रागः कुत एव रोषः॥ २२॥ तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय। बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते २३

ननु हरीच्छाधीनमिति २० ननु हरी घमानस्यवासलारूपिणः वस्तुनः स्वप्नेप्यथादर्शनं तथावशादिनित्यसुखादिदर्शनं स्यात्। नचैतत्सर्वं स्वाधीनं किंतु सर्वं हरीच्छाधीनमिति सूचनार्थं कइति॥ आत्ममायेत्यनेनान्यानिच्छादिनियतत्वं शापादेः कस्मात्कल्प्यत इति तत्राह एक इति ... कर्मादिसत्त्वापी शेच्छाधीनेति सूचनार्थं कइति। आत्ममायेत्यनेनान्यानिच्छादि नियतत्वं। ... हरिरिति वचनात इति सूचितं॥ २१॥ हरेः समत्वं च स्वस्वकृतसेवानातिरेकेण फलदातृत्वं शत्रो रथंपराधानतिरेकोणदंडकरणत्वं नान्यस्मात्। समो हरिरिति वचनात् ... यत इति सूचितं॥ २१॥ हरेः समत्वं ... विशिष्टस्वभाव एषां जीवानां सुखाद्यर्थं कल्प्यत इत्यन्वयः॥ यद्यपि॥ २२॥ यद्यपि विशेषतोनुरागादिकं नास्ति तथापि तस्य हरेः शक्तिर्विसर्गो विशिष्टस्वभावएषां जीवानां सुखाद्यर्थं कल्प्यत इत्यन्वयः॥ यद्यपि त॥ २२॥ यद्यपि विशेषतोनुरागादिकं नास्ति तथापि तस्य हरेः शक्तिर्विसर्गः सृष्टिरेषां शरीरिणामिति वा २३

भगवानेव सुखकर्ता तथापि तेषां पूर्वकर्मणां शक्तीनां विविधविसर्गः सृष्टिः ... शरीरिणामिति वा

अथतस्मादीश्वराधीनत्वात्॥ तर्हि किं मा कां क्षइतितत्राह यद्दिति॥ २४॥ हरेर्भृत्यभृत्यानां माहात्म्यं देहवियोगलक्षणमवस्थाप्राप्तावप्यत्रासलक्षणं॥ २७॥ असेवेनोताहशं माहात्म्यं किंत्वन्येषामप्यस्तीत्यभिप्रेत्याह। नारायणेति। कुतोन बिभ्यतीतत्राह। स्वर्गेति॥ २८॥ द्वंद्वानीत्यस्य विवरणं॥ सुखमित्यादि ईश्वरलीलया देहसंयोगा द्वंद्वानि भवंतीतिशेषः॥ २९॥ ननु देहस्य वधादुद्वंद्वानि सत्वस्य च्छस्यगात्मा द्याकारोगाभेदः किंकृत इति तत्राह। अविवेककृत इति॥ इहात्मनिजीवेश्वरयोस्त्वगालोयमित्याकारनिमित्तव्यवहारभेदः पुंसोऽविवेकेन हरेः स्वस्य च स्वरूपविषयज्ञानाभावेन

अथप्रसादयेन त्वां शापमोक्षाय भामिनि। यन्मन्यसे ह्यसाधूक्तं मम तत्क्षम्यतां सति॥ २४॥ इति प्रसाद्य गिरिशौ चित्रकेतुररिंदमः। जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः॥ २५॥ ततस्तु भगवान्रुद्रो रुद्राणीमिदमब्रवीत्। देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वतां॥ २६॥ रुद्र उवाच॥ दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः। माहात्म्यं भृत्यभृत्यानां निस्पृहाणां महात्मनां॥ २७॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥ २८॥ देहिनां देहसंयोगाद्द्वंद्वानीश्वरलीलया। सुखं दुःखं मृतिर्जन्म शापोनुग्रह एव च॥ २९॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि। गुणदोषविकल्पश्च भिदेव स्रजिकल्पिता॥ ३०॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणां॥ ज्ञानवैराग्यवीर्याणां न हि कश्चिद्व्यपाश्रयः॥ ३१॥ नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः॥ ३२॥

कृतो यस्मात्तस्मादियमनर्थपरंपरा। किंचात्मन्ययं गुणोऽस्ययं दोषोऽस्तीति विकल्पश्चाविवेकेन कृतः कथमिव स्रजि कल्पिता वासनोपादानकत्वात् गजादिलक्षणा भिदेव अनित्यत्वादेवेतत्साम्यं न तु मिथ्यात्वात्॥ अन्यथार्थक्रियायोग इति॥ ३० उदेवरते ज्ञानवदस्य ज्ञानं न सुसाधमित्याह नाहमिति॥ ३२

आत्मत्वात्स्वामित्वात्। न हि स्वामिनं सर्वभूतस्वपरभेदेषु कल्पना युक्ता हेत्वंतरमाह सर्वभूतेति॥ ३३॥ ३४॥ अथप्रसादयेन त्वां शापमोक्षायेत्यस्यार्थः चतुर्द्धा संभाव्यते। शापोऽभिमत इति कृत्वा तन्मोक्षाय प्रसादनं अनिष्ठोप्पतकित्वेन प्राप्तोऽभिमत इति कृत्वा वा तदभिभव शक्त इति कृत्वेति॥ आह। स्वित् प्रतिशापदानसमर्थ इति कृत्वेति कोयमर्थोऽनेनांगीकृत इति तत्राह। प्रतिशप्तुमिति। मूर्ध्ना संजगृहे इत्यनेन द्वितीयोऽभिमत इति न्याय तो। प्रश्रयस्य साधुलक्षणत्वादस्य चेसाधुत्वेकत्वाच्चतुर्थपक्षस्यावरितत्वेनांगी कारोनभवति देवाएवदन्येभ्यः शक्ता नास्मत्रसंशय इति वचनात्। अत्र यः कश्चिद्विशेषोस्तीति मतं। अशक्ता अपि शक्ता नाशक्ताः शापादिषु स्फुटं। तथाप्यशक्ते विहिताः शापाद्याः शक्तिमत्स्व वा॥ अत्यल्पा अल्पकाला

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा। आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः॥ ३३ तस्य चायं महाभागश्चित्रकेतुः प्रियोनुगः। सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः॥ ३४॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु। महापुरुषभक्तेषु शांतेषु समदर्शिषु ३५ श्रीशुक उवाच इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं॥ बभूव शांतधी राजन्देवी विगतविस्मया॥ ३६॥ इति भागवतो देव्याः प्रतिशप्तुमलंतमः। मूर्ध्ना स जगृहे शापमेतावत्साधुलक्षणं ३७ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः। वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः॥ ३८॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि॥ वृत्रस्यासुरजातेश्च कारणं भगवन्मते॥ ३९॥ इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः। माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ४०॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत्। इतिहासं हरिं स्मृत्वा स याति परमां गतिं॥ ४१॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे सप्तदशोऽध्यायः॥

अनसम्यक्प्रभवंतीति चाय त्वेनापो हि तुं शक्ता उत्तमे स्तनं संशयः। उत्तमेषु कृताः शापाः कष्टेणान्ज्ञानपुण्ययोः॥ निःशेषेण निहंतार इति॥ ३७॥ कु त्वाप्स जन्मीति तत्राह। जज्ञ इति॥ ३८॥ परमप्रमेयमुपसंहरति। एतदिति। वृत्रस्य यच्चरितं आख्यातं पृच्छसि। किंच सर्वं एतत्सर्वं किंचितस्यासुरजातेः सुखं शोकं न तस्य यत्कारणं तेत्त्वं कथितमितिशेषः॥ ३९ ॥ फलमाह। इतिहासमिति॥ ४०॥ श्रुत्वा विबंधमोक्षेपि बंधमोक्षः स्यात् न तु ससारबंधमोक्षं एव वैकुंठलोकप्राप्तिरस्मादव मंतेतिशं कित्वा कालविशेषइति कर्तव्योपस्यास्यादित्याह य एतदिति ४१ इति षष्ठे सप्तदशः॥

भा॰ष॰ ५९

अस्मिन्नध्याये पूर्वोक्तसृष्टिशेषं निरूपयति। पृश्निरिति तु शब्देन पूर्वस्मात्फलविशेषमाह। सावित्री गायत्र्यभिमानिनी तत्क्रमो व्यत्ययेनानुसंधेयं ॥१॥२॥ शं चंद्रह
अस्मिन्नध्याये ... सा कुहूः सिनीवाल्याद्याः ॥३॥ आधत्त ॥४॥ समनन्तरो विधाता च क्रियायां भार्यायां पुरीष्याख्यानग्नीनुत्पा
कुहूः सिनीवाली चंद्रे नष्टे कुहूः ... धातुः क्रियानामभार्यायां कुहूःसिनीवाल्याद्याः ॥ वाल्मीकिश्च वरुणवीर्याद्वल्मीकाद्भूत। ब्रह्मज्ञो वसिष्ठश्च पुलस्त्य
धात्वरुणनाम्नः सूर्यस्य वारुणी नामा भार्या। पूर्वं ब्रह्मणो जातत्वात्पुनरित्युक्तं ॥४॥ वाल्मीकिश्च ... रेतः ॥ उर्वश्या दर्शनात्तत्सन्निधौ द्रुतं स्कन्नं रेतः मित्रावरुणौ कुम्भे सिषिचतुः॥
ततोऽगस्त्यश्च द्वौ ऋषी पुनर्मित्रावरुणयोर्जातौ ॥५॥ तयोर्जन्मप्रकारमाह रेत इति।

श्रीशुक उवाच॥ ॥पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीम्। अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥१॥ सिद्धिर्भगस्य भार्याङ्ग महिमा
नं विभुं प्रभुं। आशिषं च वरारोहां कन्यां प्रासूत सुव्रतां ॥२॥ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा। सायं दर्शमथ प्रातः पूर्णमासमनुक्रमा
त् ॥३॥ अग्नीन्पुरीष्यानाधत्त क्रियायां समनन्तरः। चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ४ वाल्मीकिश्च महायोगी वल्मीकादभवत्कि
ल। अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोरृषी ५ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतं। रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ६ पौलो
म्यामिन्द्र आधत्त त्रीन्पुत्रानिति नः श्रुतं। जयन्तमृषभं तात तृतीयं मीढुषं प्रभुः ॥७॥ उरुक्रमस्य देवस्य मायावामनरूपिणः। कीर्तौ पत्न्यां बृहच्छ्लो
कस्तस्यासन्सौभगादयः ॥८॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः। पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥९॥ अथ कश्यपदायाद
न्दैतेयान्कीर्तयामि ते। यत्र भागवतः श्रीमान्प्रह्लादो बलिरेव च ॥१०॥ दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ। हिरण्यकशिपुर्नाम हिरण्याक्षश्च
कीर्तितौ ११

तस्मादुभावपि कुंभसंभवाविति प्रसिद्धिः ॥६॥७॥८॥ महात्मनः काश्यपस्य पत्न्यामदित्यां यथा सावुरुक्रमोऽवततार तत्कर्मादीनि पश्चादष्टमस्कंधे व
क्ष्यामह इत्यन्वयः ॥९॥ अथ मंगलमस्तु। ननु दैत्यवंशचरितेन किमर्थं क्रियते तत्कथनस्य श्रेयःसाधनत्वानुपयोगित्वादिति तत्राह। यत्रेति। य
त्र दितिसंतानप्रह्लादबलिचरितकीर्तनश्रवणं परमश्रेयःसाधनत्वसंभवादित्यर्थः १० ११

रामः ५९

१२ विप्रचित्तः विप्रचित्तेः सकाशाद्राहुं सुते १३। १४। १५। तस्य विरोचनस्य ॥१६॥ ततो बलेः। तस्यानुभावः पश्चादष्टमस्कंधे अनुभावमिति पाठे अभिधास्यते
वदिष्यामि। व्यास इति शेषः। आपेजन इति वा ॥१७॥ यस्य बाणस्य पार्श्वे ॥१८॥ नीताः समानत्वं नीताः सोदरत्वं ॥१९॥ साधु पुण्यं तद् २०। २१॥

हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी। जंभस्य तनया सा तु सुषुवे चतुरः सुतान् १२ संह्रादं प्रागनुह्रादं ह्रादं प्रह्लादमेव च। तत्स्वसा सिंहिका नाम रा
हुं विप्रचितोऽग्रहीत् ॥१३॥ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतं। संह्रादस्य कृतिर्भार्यासूत पंचजनं ततः १४ ह्रादस्य धमनिर्भार्यासूत वातापि
मिल्वलं ॥१५॥ अनुह्रादस्य सूर्म्यायां बाष्कलो महिषस्तथा। विरोचनस्तु प्राह्रादिर्देव्यां तस्याभवत्किल ॥१६॥ बाणज्येष्ठं पुत्रशतमशनायां
ततोऽभवत्। तस्यानुभावं सुश्लोक्यं पश्चादेवाभिधास्यते ॥१७॥ बाण आराध्य गिरिशं लेभे तद्गणमुख्यतां। यत्पार्श्वे भगवानास्ते अद्या
पि पुरपालकः १८ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः। त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मतां १९ राजोवाच॥ ॥कथं त आ
सुरं भावमपोह्यौत्पत्तिकं गुरो। इंद्रेण प्रापिताः सात्म्यं किं तु साधु कृतं हि तैः ॥२०॥ इमे श्रद्दधते विद्वन्नृषयो हि मया सह परिज्ञाना
य भगवंस्तन्नो व्याख्यातुमर्हसि ॥२१॥ ॥सूत उवाच॥ ॥विष्णुरातस्य स बादरायणिर्वचो निशम्याद्दृतमर्थवन्मुनिः। सभाजयन्सन्नि
भृतेन चेतसा जगाद सत्रायण सर्वदर्शनः ॥२२॥ ॥श्रीशुक उवाच॥ ॥हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना। मन्युना शो
कदीप्तेन ज्वलंती पर्यचिंतयत् २३ कदा नु भ्रातृहंतारमिंद्रियाराममुल्बणं। अक्लिन्नहृदयं पापं घातयित्वा स्वपे सुखं २४

तन्निभृतेन तस्मिन्निविष्टेन सत्रायण सत्रप्रधान सर्वदर्शनः सर्वज्ञः २२ पक्षपाततया कर्मकरः पार्ष्णिग्राहस्तेन। शोकसमदी
प्तेन २३। अक्लिन्नहृदयं अनार्द्रहृदयं। स्वपे निद्रां कुर्याम् २४

वाशब्दोपिशब्दार्थः ईश्वाभिहितस्येईशोहंराजाहमित्यादिशब्दवाच्यस्यापियस्यदेहस्यांतेमरणोत्तरकालंक्रिमिविड्भस्मसंज्ञाभवेत्।चिरकाला
वस्थानेक्रिमिरितिसंज्ञा आदिविशेषितेविड्संज्ञावन्हिदाहेभस्मसंज्ञातत्कृतेतस्यदेहस्यार्थभूतध्रुकुसर्वप्राणिहिंसकःस्वार्थस्वप्रयोज
नंवेदकिंनकिमपिवेदकिंज्ञानवान्किंनभवतीत्यर्थइतिकुतइतितत्राह।निरयइति।नाशोस्पतस्यनिर्गतंअयमिष्टप्रदंदैवंयस्मात्सतथासम
वतीतियतस्तस्माद्यतस्वरूपाज्ञानाद्भूतध्रुग्हाह्यं॥२६॥इत्त्रगतध्रुक्यमितेयाशासानस्यवांछतःउद्भूतबुद्धरिंद्रस्यमदशोषणेयेनसुतेनस्यात्तं

क्रिमिविड्भस्मसंज्ञांतेयस्येशाभिहितस्यवाभूतध्रुक्तत्कृतेस्वार्थकिंवेदनिरयोयतः २६ आशासानस्यातस्येदंक्षवमुद्धृतचेतसः मदशो
षणमिंद्रस्यभूयाद्येनसुतोहिमे॥२७॥इतिभावेनसाभर्तुराचचारासकृत्प्रियं॥शुश्रूषयानुरागेणप्रश्रयेणदमेनच २७ भक्त्यापरम
याराजन्मनोज्ञैर्वल्गुभाषितैः।मनोजग्राहभावज्ञासस्मितापांगवीक्षणैः॥२९॥एवंस्त्रियाजडीभूतोविद्वानपिविदग्धया॥वाढमित्या
हविवाशोनतच्चित्रंहियोषिति॥३०॥विलोक्यैकांतभूतानिभूतान्यादौप्रजापतिः॥स्त्रियंचक्रेस्वदेहार्धंययापुंसांमतिर्हृता॥३१॥एवंशु
श्रूषितस्तातभगवान्कश्यपःस्त्रियाप्रहस्यपरमप्रीतोदितिमाहाभिनंद्यच ३२ कश्यपउवाच ॥वरंवरयवामोरुप्रीतस्तेहमनिंदिते॥
स्त्रीणांभर्तरिसुप्रीतेकःकामइहचागमः ३३ पतिरेवहिनारीणांदैवतंपरमंस्मृतं॥मानसःसर्वभूतानांवासुदेवःश्रियःपतिः ३४

सुतोमेस्या॥२७॥२९॥दितिभावेनाभिप्रायेण॥३०॥जगद्यादौप्रजापतिर्ब्रह्माभूतान्येकांतभूतानिपरस्परस्नेहरहितानिकेवलंभूत्फभूतानि
विलोक्यमिथःस्नेहाहवधार्थस्वशरीरार्धंस्त्रियंचक्रेससर्जेत्यन्वयः॥३१॥३२॥भर्तरिस्त्रीणामर्थ्यसुप्रीतेसतिकिंकामःपुरुषार्थोगम्यः
प्राप्तुमशक्यइत्यन्वयः॥३३॥ननुतदेतन्मेयइतिश्रुतेरविगानेनसर्वजनस्यापरमेष्टदैवताश्रीधरइतिपतःकथंपतिरेवनारीणामिष्टदेव
तेतिविशेष्योच्यतइतितत्राह।मानसइतिवासुदेवःमानसःसर्वभूतानांमानसोमयःपनसिस्थितःसन्मनसापूज्यःकोवासुदेवइतित
त्राहश्रियइति ३४

लिपितैः

एतदेवविशदयतिसइति।वासुदेवएवनामरूपाभ्यांविविधत्वेनकल्पितैर्देवतालिंगैःदेवताविग्रहैःविशेषतःसन्निहितत्वेनपुंभिःस्त्रीभिश्चइज्यतेतत्रस्त्रीभिः
पतिसन्निहितत्वेनपूज्यतेतदर्थपतिरूपइत्यतिपुरुषैस्तुदेवतालिंगनामरूपत्वेनेति।लिंगंलक्षणंविग्रहःकोच्यते ३५ यस्मात्यात्पाद्याहितईशःतस्मात्तदिज्जनेन
वशजितःस्यादित्यपसंहरति।तस्मादिति॥पतिं पतिरुच्य॥३५॥ईदृशभावेनपतिस्थितःपरमामत्यंप्रदेसीदत्विविबुध्या॥३६॥अमृत्युमनभूरै॥३७॥३८॥स्वम

सएवदेवतालिंगैर्नामरूपविकल्पितैः॥इज्यतेभगवान्पुंभिःस्त्रीभिश्चपतिरूपधृक् ३४ तस्मात्पतिव्रतानार्यःश्रेयस्कामाःसुमध्यमेयजंतेनन्यभावेनपतिमा
त्मानमीश्वरं॥३५॥योहंत्वयार्चितोभद्रे ईदृग्भावेनभक्तितः।तंतेसंपादयेकाममसतीनांसुदुर्लभं ३६ दितिरुवाच वरदोसियदिब्रह्मन्पुत्रमिंद्रहणंवृ
णे।अमृत्युंमृतपुत्राहंयेनमेघातितौसुतौ॥३७॥निशम्यतद्वचोविप्रोविमनाःपर्यतप्यत॥अहोअधर्मःसुमहानद्यमेसमुपस्थितः ३८ अहोअ
र्थेंद्रियारामोयोषिन्मय्येहमायया॥गृहीतचेताःकृपणःपतिष्येनरकेध्रुवं॥३९॥कोतिक्रमोनुवर्तंत्याःस्वभावमिहयोषितः।धिङ्मांबताबुधं
स्वार्थेयदहंत्वजितेंद्रियः ४० शरत्पद्मोत्सवंवक्त्रं वचश्चश्रवणामृतं।हृदयंक्षुरधाराभंस्त्रीणांकोवेदचेष्टितं ४१ नहिकश्चित्प्रियः
स्त्रीणामंजसास्वाशिषात्मनां॥पतिंपुत्रंभ्रातरंवाघ्नंत्यर्थेघातयंतिहि ४१ प्रतिश्रुतंददामीतिवचस्तन्नमृषाभवेत्॥वधंनार्हतिचेंद्रोपितत्रेदमु
पकल्पये ४२ इतिसंचिंत्यभगवान्मारीचःकुरुनंदन॥उवाचकिंचित्कुपितआत्मानंचविगर्हयन् ४३ कश्यपउवाच पुत्रस्तेभविताभद्रेइं
द्रहादेवबांधवः।संवत्सरंव्रतमिदंयद्यंजोधारयिष्यसि ४४ दितिरुवाच धारयिष्येव्रतंब्रह्मन्ब्रूहिकार्याणियानिमे।यानिचेहनिषिद्धानिनव्रतंघ्नंतियान्युत ४५

वंगुणचौर्यभावमनुवर्तमानायाअतिक्रमोन्यायःस्वभावःसोशील्यमतिवर्तयाइतिवा ४० ४१ स्वार्थेआशीःसुआत्मायासांतास्तथाता
सांस्वाशिषमिच्छतीनामित्यर्थः ४२ ४३ देवानांबंधुभूतः ४४ ४५

४६ अधौतवासः अनिर्णिक्तवस्त्रं न वसीत नाच्छादयेत् ॥ विधृतामन्योपभुक्तां ४७ चंडिकान्नं सप्तमातृभ्योऽर्पितमन्नं पिपीलिकाशूपिकामोज्यान्नं दूक्ययारजस्वलया ४८ अनर्चिता अलंकाररहिता ॥ असंवीता प्रावरणादिरहिता ४९ अपराक् पश्चिमशिरा न शयीतेति प्रातराशात् प्रातःकालभोजनात्पूर्वं ५१ वरवती

कश्यप उवाच ॥ न हिंस्यात्सर्वभूतानि न शपेन्नानृतं वदेत् ॥ न छिंद्यान्नखरोमाणि न स्पृशेद्यदमंगलं ४६ नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः न वसीताधौतवासः स्रजं वा विधृतां क्वचित् ॥ ४७ ॥ नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतं ॥ भुंजीतोदक्यया दृष्टं पिबेदंजलिना त्वपः ४८ नोच्छिष्टास्पृष्टसलिला संध्यायां मुक्तमूर्द्धजा ॥ अनर्चितासंयतवाक् नासंवीता बहिश्चरेत् ४९ नाधौतपादाप्रयता नार्द्रपान्नाप्युदक्शिराः शयीत नापराङ्नान्यैर्न नग्ना न च संध्ययोः ॥ ५० ॥ धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता ॥ पूजयेत्प्रातराशात्प्राग्गोविप्रान्श्रियमच्युतं ५१ स्त्रियो वरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः ॥ पतिं चैवोपतिष्ठेत ध्यायेत्कोष्ठगतं च तं ५२ संवत्सरं पुंसवनं व्रतमेतदविप्लुतं ॥ धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ५३ बाढमित्यभ्युपेत्याथ दिती राजन्महामनाः ॥ कश्यपाद्गर्भमाधत्त व्रतं चांजो दधार सा ५४ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ५५ नित्यं वनात्सुमनसः फलमूलसमित्कुशान् पत्रांकुरमृदोपश्चकाले काल उपाहरत् ५६ एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ॥ प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ५७ नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ॥ चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥ ५८ ॥ एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ५९ ॥ लब्ध्वा तदंतरं शक्रो निद्रापहृतचेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया ६०

भर्तृसहिताः पतिमभ्यर्च्योपतिष्ठेत स्तुतिं कुर्यात् पतिस्थितं परमात्मानं कोष्ठगतं हृदिगतं ध्यायेत् स्वचात्ध्यात [illegible] ५२ नास्ताः पुंसवनं ॥ ५३ ॥ ५४ ॥ मातुरदित्यास्वसुर्दित्याः ॥ ५५ ॥ ५६ ॥ योगमा पर्याय योगसामर्थ्येन ६० राम

र जिघांससि हंतुमिच्छसि ॥ मा मैष्ट भयं मा कुरुध्वं ॥ कोऽसि कं इमं मरुतां गणाना हु ॥ साम्यां तां समानरूपतां हरिः श्रीनारायणो दित्या किं विहूनं संवत्सरसर्वितो यदतः साम्पतां यातीति किंतु ॥ कुतः पुरुषः सद्भूत्संयुज्य साम्यतां यातीति तस्मात् ६५ इंद्रेण सह अत्रिभ्यामुपसाधिता

चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभं ॥ रुदंतं सप्तधैकैकं मा रोदीरिति तान्पुनः ६१ ते तमूचुः पाट्यमानाः सर्वे प्रांजलयो नृप ॥ नो जिघांससि किमिंद्र भ्रातरो मरुतस्तव ६२ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ६३ न ममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ६४ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यतां ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥ ६५ ॥ सजूरिंद्रेण पंचाशद्देवास्ते मरुतोऽभवन् ॥ व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ६६ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इंद्रेण सहितान्देवी पर्यतुष्यदनिंदिता ६७ ॥ अथेंद्रमाह ताताहमादित्यानां भयावहं ॥ अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुष्करं ॥ ६८ ॥ एकः संकल्पितः पुत्रः सप्त सप्ताभवन्कथं ॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा ॥ ६९ ॥ इंद्र उवाच ॥ ॥ अंब तेऽहं व्यवसितमुपधार्यागतोंऽतिकं ॥ लब्ध्वांतरोच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७० ॥ कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ॥ तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७१ ॥ ततस्तत्परमाश्चर्यं वीक्ष्यावसितं मया ॥ महापुरुषपूजायाः सिद्धिः काप्यनुषंगिणी ॥ ७२ ॥ आराधनं भगवत ईहमाना निराशिषः ॥ ये तु नेच्छंत्यपि परं ते स्वार्थकुशलाः स्मृताः ७३

रिपारोद्धृतत्वात् ॥ हरिणेंद्रेण सोमपाः सोमं पिबंतः ॥ ६६ ॥ पर्यतुष्यत्सचेतनत्वात् ॥ ६७ ॥ आदित्यानामदितिपुत्राणां ६८ ७२ काप्यनुषंगिणी कार्यानुकूलं संगमयंतीति ७२ फलकामक्रियायोगभाविन्येवं विधा सिद्धिर्भूतं किंतु निराशीस्त्वेन तिभावेना हा आराधनमिति ७३

गुणस्पर्शो विषयसुखं ॥ ७३ ॥ इति षष्ठेऽष्टादशः ॥ ॥ अत्र निष्कामत्वेन क्रियमाणं पुंसवनं नाम व्रतं श्रीनारायणानुग्रहानुजनकज्ञानजनकत्वेन पुरुषार्थसाधनं भवतीत्यभिप्रायेण प्रश्नोत्तरपूर्वकमेतद्व्रतं निरूप्यते पुंसवनस्य विधानं मार्गशीर्षे धनुर्मासि शुक्लप्रतिपदि । सार्वकामिकं मोक्षादि सर्वपुरुषार्थसाधनं

आराध्यात्मप्रदं देवं मातमनं जगदीश्वरं । को वृणीत गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ७४ तदिदं मम दौर्जन्यं बालिशस्य महीयसि । क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतो स्थितः ॥ ७५ ॥ ॥ श्रीशुक उवाच ॥ ॥ इन्द्रस्तयाभ्यनुज्ञातः शुद्धभावेन तुष्टया । मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७६ ॥ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि । मंगलं मरुतां जन्म किं भूयः कथयामि ते ७७ इति श्रीभागवते महापुराणे षष्ठस्कंधेऽष्टादशोऽध्यायः ॥ ॥ राजोवाच व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितं ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ १ ॥ ॥ श्रीशुक उवाच ॥ ॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः २ निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च । स्नात्वा शुक्लदती शुक्ले वसीतालंकृताम्बरे ३ पूजयेत्प्रातराशात्प्राग्भगवंतं श्रियासह ४ नमस्ते निरपेक्षाय पूर्णकामन मोऽस्तु ते । महाविभूतिपतये नमः सकलसिद्धये ५ यथा त्वं कृपया भूत्या तेजसा महिमौजसा । जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः । विष्णुपत्नि महामाये महापुरुषलक्षणे । प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ६ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपहरामीति ॥ अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदीपोपहाराद्युपचारांश्च समाहितोपाहरेत् ७ हर२

आदितः शुक्लपक्षमारभ्य आदितो मरुतां जन्मेति वा २ शुक्ले अंबरे च ३ ४ ५ ६ ७

प्रभवोऽनन्तको ॥ पादश्चत्वारः दशसंख्या ॥ तदूर्ध्वं यथाशक्ति तावती सर्वथापेक्षिता ८ १० सर्वयज्ञः सर्वयज्ञान्तर्यामी । इयं लक्ष्मीः इज्यान्तर्यामिणी । क्रियान्तर्यामिणी । अन्तर्यामी तु यज्ञादेर्विष्णुरिज्यादिनीरमा । तत्र द्वैरन्ततो वाच्यो न तु सर्वस्वरूपतः । अतः पाम्नोऽपि पद्यापि विष्णुरेव न संशयः ॥ नान्तर्यामी कश्चिद् स्त्रीविष्णोः क्वापि कुत्रचिन्नेति वचनात् । फलस्वरूपयज्ञफलभोक्ता इयज्ञमानेस्थितत्वात्तत्फलस्य भोजकः ११ सत्त्वादिगुणानां व्यंजकः कारणं फलं व्यञ्जयुक्तः । गुणभोक्ता ईशी वेस्थितत्वात्तद्भोजकः । शरीरेन्द्रियाशयानामभिमाने स्वतन्त्रा नामरूपयोर्गुणहेतुत्वात् श्रियश्च गुणाभिमानित्वान्नामरूपे श्रीरितु

हविःशेषं च जुहुयादनले द्वादशाहुतीः ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ । भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः ८ प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा । दशवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत् ९ युवां तु विश्वस्य विभू जगतः कारणं परं । इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया १० तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः । त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ११ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान् । त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशयाः ॥ नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः १२ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ तथा म उत्तमश्लोक संतु सत्या महाशिषः १३ इत्यभिष्टूय वरदं श्रीनिवासं श्रियासह तां निःसार्योपहरणं दत्त्वाचमनमर्चयेत् १४ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं १५ पतिं च परया भक्त्या महापुरुषचेतसा ॥ १६ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ बिभृयात्सर्वकार्याणि पत्न्या उच्चावचानि च । कृतमेकतरेणापि दंपत्योरुभयोरपि

१५

प्रत्ययो निश्चितज्ञानं तत्प्रसादजनकं ॥ उपहरणं नैवेद्यं तं मोचयित्वा १४ स्तवानां स्तुतिं कुर्वाणाय यज्ञोच्छिष्टं यज्ञशेषं १५ महापुरुषो विष्णुरेवास्मिंस्तं निहितं इति बुद्ध्या ॥ १६ ॥ पतिः स्वयं यदि पत्न्याः प्रेमशीलस्तर्हि पत्नीपत्न्यर्थं उच्चावचानि सर्वकर्माणि पतिर्बिभृयात् ॥ ताहि तत्पत्नीकृतं न स्यादिति शंका मा भूत् ॥ उभयोर्दंपत्योरेकतरेण कृतमिदं पत्न्याकृतं भवति १७ राम राम

भा॰ष॰ रजसो दर्शनादिनान होपापत्न्यां कथमेतदनुष्ठानमत रितिद्यटतइतितत्राह पत्न्यामिति १८ १९ २० द्वादशमासोनुहायनं वर्षनीत्वा कार्त्तिके
६३ कोमासे चरमे अहनि अवसानदिवसे २१ २२ २३ केशवादिद्वादशात्मवित्। सोदपात्रानुदपात्रसहितान् गुडान्वितान् इडवितान् स्मृतिसहिता

पत्न्यां कुर्यादनहोयोपतिरेवसमाहितः विष्णोर्व्रतमिदं विभ्रन्नविहन्यात्कथंचन ॥ १८ ॥ विप्रान्स्त्रियो वीरवतीः स्रग्गंधबलिमंडनैः। अर्चेद
हरहर्भक्त्या देवं नियममास्थिता। उद्वास्य देवं स्वेधाम्नि तन्निवेदितमग्रतः। अद्यादात्मविशुद्ध्यर्थं सर्वकामा र्द्धयेतथा २० एतेन पूजावि
धिना मासान्द्वादश हायनं नीत्वाथोपरमेत्साध्वी कार्त्तिके चरमेहनि ॥ २१ ॥ श्वोभूतेप उपस्पृश्य कृष्णमभ्यर्च्य पू
र्ववत् ॥ पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः २३ ब्राह्मणान्भोजयेद्दत्त्वा त्वन्नं घेद्वा
दशात्मवित् ॥ तेभ्यो दद्यात्तिलान्साजन्सोदपात्रान्गुडान्वितान् २४ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः। प्रणम्य शिरसा भक्त्या
भुंजीत तदनुज्ञया ॥ २५ ॥ आचार्यमग्रतः कृत्वा वाग्यतः सुसमाहितः। दद्यात्पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभागं २६ एतच्चरित्वा वि
धिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ॥ स्त्री चैतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहान् २७

न् तिलान् ॥ इडाशब्दवाच्येः पापसद्यद् धिकान्नैर्युक्तानिति वा २४ २५ शोभनं प्रजात्वं येन ॥ सतथा २६ जीवपतिमायुष्मंतं प
ति २७ राम
६३

भा॰ष॰ अवीरा पतिरहिता जीवसुतां विदत २८ विरूपा दृष्टिविरुद्धरूपा इंद्रिय देहशक्ति रहिता यासा। विरुजो विविध रोगान्मुच्यते। अभ्युदये कर्म
६४ णि मंगलकर्माणि पितृदेवतानामनंततृप्तिं सुप्रेतीति शेषः ॥ भक्तिप्रह्वश्रीवासकृगतिः समुदितसुरसोदरा शिभिमहितश्री ब्रह्मप्राणेश
प्रमुख विवुधमुकुटतटीघदसरपादिकं वंदे लक्ष्मीकांतघनरसं सविता रुचसरोरुहलोचनं सत्यज्ञानानंदाकारं सुदितसुजनेसमुद

कन्यापि विंदेत समग्रलक्षणं पतिं त्ववीरा हतकिल्बिषां गतिं मृतप्रजा जीवसुतं धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यं २८ विंदेद्विरूपा
विरुजो विमुच्यते य आमयावींद्रियकल्पदेहं ॥ एतत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानां २९ तुष्टाः प्रयच्छंति समस्तकामा
न्होमावसाने हुतभुक् श्रीहरिश्च ॥ राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ३० इति श्रीभागवते महापुराणे अ
ष्टादशसाहस्र्यां पारमहंस्यां संहितायां षष्ठस्कंधे पुंसवनव्रतवर्णनं नामएकोनविंशोऽध्यायः ॥ ॥

रसंमदा शद्दृशन्नर्त्यनुसारेण विजयध्वजभिक्षुणा ॥ पदरत्नावली भाति षष्ठस्कंधगताकृता १ इति श्रीमन्महेंद्रद्र
षा। पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत्॥ ६२॥ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वितीयोऽध्यायः नारद उवाच हिरण्यक
शिपुराजन्नजेयमजरामरं। आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत १ स तेपे मंदरद्रोण्यां तपः परमदारुणं। ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रि
तावनिः २ ॥

ज्ञानतो। अतआत्मविदः स्वस्य वासुदेवे रतिः स्थिरा। शत्रुनाशाभ्युदयाज्ञाननाशो नान्यः कथंचनेत्यनेन तात्पर्यमवगंतव्यं। इति सिद्धं। प्रकरणमभसावि
तिशरः इतिसप्तमे द्वितीयः वल्कको टिसंख्यातत्कालेनानेकसंभारैराजनिरयोग्यं दुःखापंपोग्यंचानेकविधमाधनैः सुसाध्यं तत्सौभावेन
त्यादिकं हिरण्यकशिपुर्नपश्चरणकथनव्याजेनाभिप्रेयते स्मिन्नध्याये व्यधित्सत कर्तुमैच्छत २ ॥ ॥

संवर्त्तार्कः प्रलयसूर्यः। स्थानानि गमनवर्जनानि स्वस्वतोयात्रां मुक्त्वा सुस्थानानि भेजुः। उपशमं परिहारं। बलिहारा उपहारार्थकाः। किं तद्विज्ञापनमत्रा
ह सृष्ट्वेति। ब्रह्मा तपसा नादिनेदं चराचरं सृष्ट्वा सर्वधिष्ण्येभ्यो रुद्रादिपदेभ्यः परं यन्निजासनं अध्यास्ते। अधिशीङ्स्थासां कर्मेति सप्तम्यर्थे द्वितीया ए
अहं तदात्मनः साधयिष्य इत्यन्वयः। स्वनाशे दुर्घटमत्राह। कालात्मनोरिति। कालस्यात्मनश्चैतन्यस्य च नित्यत्वात् अविनाशात्। अन्यत्वस्य साध्यत्वे
हिरण्यकशिपोरीदृशं कर्म नाद्भुतं यतो ब्रह्मणापि केनं तरेणात्मयोगपाद्नाने न रागादिना वा मोहिता ज्ञानंतोपि स्वात्सदृशं कर्माचरंतो दृश्यंते। ततुरिति।

जटासीदीधितिभी रेजे संवर्त्तार्क इवांशुभिः॥ तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे। तस्य मूर्ध्नः समुद्भूतः सधूमोग्निस्तपोमयः। तिर्यगूर्ध्वम
धोलोकानतपद्विष्वगीरितः॥ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः॥ निपेतुः सग्रहास्ताराजज्वलुश्च दिशो दश ५ तेन तप्ता दिवं त्यक्त्वा ब्रह्म
लोकं ययुः सुराः। धात्रे विज्ञापयामासुर्देवदेव जगत्पते ६ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः। तस्य चोपशमं भूमन्विधेहि यदि मन्यसे।
लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभो। तस्यायं किल संकल्पश्चरतो दुश्चरं तपः। श्रूयतां किं न विदितं तवाथापि निवेद्यते। सृष्ट्वा चरा
चरमिदं तपोयोगसमाधिना। अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं। तदहं वर्द्धमानेन तपोयोगसमाधिना। कालात्मनोश्च नित्यत्वात्साधयि
ष्ये तथात्मनः १० ॥

ज्ञानतोपि तत्कर्त्तव्यं कर्मात्मसदृशं तदा। तच्चात्मसदृशात् ज्ञानाद्रागाद्यैर्वा विमोहिताः ज्ञानंतोपि स्वसदृशं कर्म कुर्वंतो विशुंचत्तु राख्यं सनातयोग्यं क
र्मक्रियात्कथं च नेति। न चैतन्नाम स्वादिसाध्यं। अयोग्यत्वात्। तपसा विद्यया वा विज्ञानध्यानादिना तथा व्यसुः समस्तैरथवा कुर्वतां पदं मुक्तमं। संभार
विहीय शतैर्बहुकोटिभिरेव वा न शक्यं नेममारोढुं कालात्मयोगपदानित्विति। तस्माद्योग्यमेवानुष्ठेयं। नायोग्यमिति सिद्धं। एवं तत्वं चेन्नर्हि किमर्थं तप
आदे विघ्नं कुर्वंतीति चेन्न। तपआदीनां निःफलत्वपरिहारार्थत्वात्। तथाप्याचरंतां कुर्दैत्यानां सुरनायकाः विघ्नं तत आदीनां वैयर्थ्यस्यापनुत्तयेद्
प
तिक्वनात १०

वैष्णवो ब्रह्मादिः कल्पयिष्यंते तथा तैर्वैष्णवनिर्मितैरित्यर्थः। ब्रह्मा स्वयं भर्तुर्हिरण्यो वैष्णवकः शतधृत्यथेति शब्दनिर्णये। तथापि साक्षाद्विष्णोः पदमचोच्यत इति
किं न स्यादत्राह। कालनिर्धूतैरिति। तर्हि कियंतं कालं स्थितैरिति तत्राह। कल्पांतैरिति। मन्वंतरादिकल्पा वैष्णवानि केः। नयत्र मायान रजस्तमश्चेत्यादिग
विष्णोः पदस्य वैलक्षण्योक्तेः। निर्बंधमसदाग्रहं। ननु हिरण्यकशिपोरन्येषां परावि ह्मायतवपसकां ज्ञायां को विशेषहेतुरत्राह। तवेति। तवासनं सकल
दुःखोनिनिरस्यस्थातुं योग्यं पदं पारमेष्ठ्यं त्वं तत्सुखकारणं यस्मात्तस्मात् द्विजगवां भवाय ज्ञानादिगुणसमृद्ध्यै भूत्यै समृद्धस्यतु नक्षामरादिभ्यायश्रेय
से संसारान्मुक्तये क्षेमाय रक्षणाय विजयायेंद्रियजयाय च भवति तस्माद् अनुत्तमपदत्वाद्धिरण्यकशिपुरचीक्लृपत्। तदुक्तं। नकाश्चित्सदपेक्षते। मद्

अन्यथेदं विधास्येहमयथा पूर्वमोजसा। किमन्यैः कालनिर्धूतैः कल्पांते वैष्णवादिभिः ११ इति शुश्रुम निर्बंधं तपः परममास्थितः। विधत्स्वा
नंतरं युक्तं स्वयं त्रिभुवनेश्वर १२ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते। भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो देवैर्भ
गवानात्मभूर्नृप। परितो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमं १४ ॥ ॥

केटभयोश्चैव हिरण्यादेस्त्रयोः च व। नान्यो ब्राह्मपदं वांछत्यन्योग्या त्विना कश्चित्। ततः श्रेयांसि वांछंति न तु तत्पदमाश्रयेदिति। भवोष्टर्द्धिः समृद्धिश्च
श्रेयो मोक्ष उदाहृतः। भूत्यभ्युन्नतिर्लोके भूतिरित्येव कथ्यत इति शब्दनिर्णये। दिविस्थातुं न शक्नुम इत्यतो हिरण्यकशिपुना ब्रह्मपदावाप्त्यै सकामं तप
सि स्थितमिति ज्ञायते। यः सकामं तपश्चाचरति तस्य तपसा तस्मैल्लोके स्थितिर्न घटते। संतसकटाह्वांतस्थिति वि घस्क निष्कामं तपः करोति तेन सुखावाप्तिः
स्यात्। तदुक्तं। सकामं तु तपः कुर्वंल्लोकानां क्षोभकृद्भवेत्। इतरत्वं जयेत्सर्वल्लोकानां भवति ध्रुवमिति। ब्रह्माणमभजत् ब्रह्मपदार्थं स हिरण्यकशिपु इति च

कीचकैर्निलीनत्वेन प्रच्छन्नं देहं पिपीलिकाभिर्व्याप्तत्वात् कृच्छ्रं शरीरं च पर्वभिः संमाक्रान्तत्वबाह्यचिह्नेनोत्तिष्ठेति न च युक्तं। तपन्तमित्यनेनापि तपसः कृ-
त्स्नमाह। आभापिहितं। अभ्रेणापिहितेत्यानामयो ऽपि वस्तुतोऽपि प्रयत्नाश्रयत्वाल्लोकानुत्सहमरन्तमाह। कुर्वन्तुहंसवाहनो ब्रह्मा। विस्मयप्रकाशनावुक्तौ पण्डितैर्हंस-
वाहन इत्यभिधानं। हृदोद्भवं हृदयस्य सारं दार्ढ्यं। दंशाः सूचीमुखाः पुत्तिकाः। ह्यस्थिष्वेव शेरते इति यत्तस्माद्भुतं इतोऽप्यद्भुतमित्याह। नैतदिति। निरम्बुर्ज-
लपानरहितः। नितिर्निश्चयनिषेधयोरित्यमरः। स्युरेवं तथुनर्वैचेत्यवधारणवाचका इत्यभिधानात् इत्यनेन दिव्यशतसमाख्या कापि किंचिद्धानमभवती

तं ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः। पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितं १५ तपंतं तपसा लोकान्यथाभ्रापिहितं रविं। विलक्ष्य विस्मितः प्राह हसंस्तं हंसवाहनः १६ ब्रह्मोवाच उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप। वरदोहमनुप्राप्तो व्रियतामीप्सितो वरः १७ अद्राक्षमहमेतं ते हृत्सारं महदद्भुतं। दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते १८ नैतत्पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे। निरंबुर्धारयेत्प्राणान्को वै दिव्याः समाः शतं १९ व्यवसायेन तेनेन दुष्करेण मनस्विभिः। तपोनिष्ठेन भवता जितोऽहं दितिनंदन २० ततस्त आशिषः सर्वा ददाम्यसुरपुंगव। मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं नाफलं मम २१ नारद उवाच इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः। कमंडलुजलेनौक्षद्दिव्येनामोघराधसा २२ स तत्कीचकवल्मीकात्सह ओजोबलान्वितः। सर्वावयवसंपन्नो वज्रसंहननो युवा। उत्थितस्तप्तहेमाभो विभावसुरिवैधसः २३ ॥ ॥

त्याह। इत्यसमर्थः श्रमनस्विभिर्मनोबलरहितैः दुष्करेणाडःसाधनेन। जितो वशीकृतः। पराशृंतं च शास्त्यं चाजितमित्युक्तेनेबुधैरिति शब्दनिर्णये २० इदानि-
दास्यामीति ज्ञात्वा मर्त्यस्य मरणशील मनुष्यशरीरं प्राप्तस्य ते तव अमर्त्यस्य अमरणधर्मस्य देवस्य मम दर्शनं न भूद्धिष्यत् नाफलं नैव २१ आदेहरे-
भवो जन्म यस्य स तथा। विष्णुभूरित्यर्थः। सर्वस्यादौ भवतीति वा। औक्षत् प्रोक्षितवान्। दिव्यत्वमाह। अमोघेति २२ एधसः इंधनात् २३ ॥ ॥

प्रह्वः प्रवणोऽपि श्रापि प्रभेरेव द्विविधा स्तुतिर्वर्त्तते। तत्र हिरण्यकशिपुर्भिन्नेश्वरपरो ज्ञातानुगतया स्तुत्या देवतान्तरनिरपेक्षवर्तीति। नाइ श्यपाज्ञो नि कल्पां-
तइत्यादिना। अन्वये च तत्र्वास्यार्थभाविता गुणत्रितत्त्वं तत्पर्यामिमिथ्यैककार्यत्वेनैकस्थानेस्वर्तिमैइरोयोजाः। तद्यो गपास्त्रयाज्ञाः। नचैतावता स्तुतेर्मिथ्याभि-
करणत्वमापन्नं। तस्य तदधीनत्वेन नित्योपसंधियमाणगुणानां तदुक्तत्वेन तत्स्तवणस्मरणाभ्यां तत्करणस्योल्लाससंभवात्। तदुक्तं। प्राप स्तस्तुतिशद्वे-
मिथ्या वाचो हरिं विना। केचित्तु जीवगुणास्तत्र त्रितयं तु हरेः परे। एकस्यानेककार्यत्वाद्विभोः प्राधान्यतस्तथा। जीवस्य तदधीनत्वान्नभिन्ना विरुद्धं त्वचइ-
ति। प्रलयकालप्रवर्त्तकेन हरिणा सृष्टेनांधेन तमसा दुर्गाभिमन्यमानेनावृतमिदं जगदभिव्यनक् अभिव्यक्तं कृतवान्। स्वरोचिषा स्वसामर्थ्येन २६ ए-

स निरीक्ष्यांबरे देवं हंसवाहनमास्थितं। ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः २४ उत्थाय प्रांजलिः प्रह्वः ईक्षमाणो दृशा विभुं। हर्षाश्रुपुलकोद्भे-
दो गिरा गद्गदयागृणात् २५ हिरण्यकशिपुरुवाच कल्पांते कालसृष्टेन योंधेन तमसावृतं। अभिव्यनग्जगदिदं स्वयंज्योतिः स्वरोचिषा २६
आत्मना त्रिवृता चेदं सृजत्यवति लुंपति। रजःसत्वतमोधाम्ने पराय महते नमः २७ ॥ ॥

तदेव विवृणोति। आत्मनेति। आत्मना ज्ञाभितया त्रिवृता त्रिगुणात्मिकया तेजोवशक्तिमयाया वा प्रकृत्या चेदं जगत्सर्जनादिक्रियाविशिष्टं करोतीति तस्मै नम इत्यन्व-
यः। रजःसत्वतमोधाम्न इत्यनेन सृष्ट्यादौ रजआदिगुणानां प्राधान्यं सूचयति। परायमहत इत्यनेन अणोरणीयान्महतो महीयानिति श्रुतिसिद्धोभयविधानं
संस्मारयति। इत्थं विषयान्नयास्तुत्वा किं स्यादिति नाप्रहेयं तथापि। आत्मना परमात्मना प्रेरितो वा उपादानभूतया प्रकृत्या रजःप्रधानयेदं सृजति। सत्वप्रधा-
नया मातेर्मत्स्यादिभिरिदं भवति। तमःप्रधानया जातेन रुद्रेण संहरति। तस्मै महते महत्तत्त्वाभिमानिने पराय रुद्राद्युत्कृष्टाय भगवते नम इति २७ ॥

भा॰ स॰

२१

आयाय प्रकृष्टरूपेण जगदादेर्व्यक्ताय। अन्यत्रादिकर्त्रो श्रीनारायणाद्यस्मात्ज्ञाताय। वीजाय व्यंजकाय फलरूपायेति वा। जगदुत्पत्तौ वीजशक्तियुक्ताय
वा ज्ञानविज्ञाने एव मूर्त्ती विग्रहो यस्य सतथा तस्मै। अन्यत्र ज्ञानविज्ञानयो रूपदेष्टृ विग्रहाया प्राणेंद्रियमनोबुद्धिलक्षणैर्विकारैः सप्तदशकैर्व्यक्तिमीयुषे।
ब्रह्मांडांतर्विराट्पुरुषरूपेणाविशेषः। उभयत्र समं। मुख्येन प्राणेन सह त्वंस्थावरजंगमात्मकस्य। शिषे प्रवर्त्तकोसि। चित्तस्य चित्तिः स्मरणशक्तिपदः स्या
ज्जीवा। महाभूतानां गुणानां शब्दादीनां माधायस्यांतःकरणस्य प्रवर्त्तकः। पुनर्वचनं दैनंदिनप्रवृत्त्यर्थं। अप्यानन्दा प्रतिमास्थानीयेन देहत्रयेण चाहंकर्तो
त्राख्यमंत्रप्रकाश्यं चातुर्होत्रं तद्विषयया विद्यया च सप्ततंतुं स प्रकृतं वितनोषि विस्तृत्य करोषि। इत्थं मंत्रक्रियादेवतास्यत्वेन वहिरूपदेष्टृत्वेन कर्ते

नमस्त्रय्याय वीजाय ज्ञानविज्ञानमूर्तये। प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे। त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानां।
चित्तस्य चित्तिर्मनइंद्रियाणां पतिर्महान् भूतगुणाशयेशः २९ त्वं सप्ततंतून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च। त्वमेक आत्मात्मवतामनादिर
नंतपारः कविरंतरात्मा ३० ॥ ॥

त्वेन कारयितृत्वेन शास्त्रे व्याख्यातिप्रायश्चित्तादिरूपयाच। अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं। होतारं रत्नधातममित्यादिश्रुतेः। यज्ञः सप्ततंतुर्यागः
सप्ततंतुर्मखः ऋतुरिति। आत्मवतामात्मज्ञानिनां प्रेष्ठः। आत्मा प्रेष्ठेश्वररूपे वजीवेज्ञातरि केशवे। वायौ देहे स्वयं ज्ञाने नत्वप्रोच्यते बुधैः। अनादिः कारणशू
न्यः पुरातनो वा। अनंतपारः अप्रमेयः। अप्रमेये हरावात्मनोयस्य स तथा। न भारती मेंग मृषोपलक्ष्यते इत्यादेः। अन्तरात्मा यामीनां सुकृतामात्मा स्वामी। अंतरा
र्यामी सुकृत्स्वविरागं स्थजाते ३० ॥ ॥

राम

२१

अनिमिषस्त्वनेन नित्यं ज्ञानं अन्तर्भावः कूटस्थः निर्विकारः। आत्मा व्यापकः। परमेष्ठी सर्वोत्तमः। महानजः ब्रह्मणोप्यधिक इत्यनेन सर्वोत्तमत्वं नि
र्णयति। अन्यत्र आवस्वातो वा एवमष्टा नव्यवस्थानेनतन्त्रत्वात् जीवः जीवराशेः प्राणधारकः। जीव प्राण धारणे इति धातोः। कथं धन्न इत्यत उक्तं

त्वमेव कालोनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि कूटस्थ
आत्मा परमेष्ठ्यजो महांस्त्वंजीवलोकस्य च जीव आत्मा ३१ ॥

। आत्मेति इष्टहानादिकर्त्रा अतसंतर्पण इति धातोः। अवनिरूपो यं शब्दः। सामान्यविशेषाभ्यां योजनीयः ३१ ॥ ॥श्री॥

भा॰स॰ २२

इदानीं भगवत्येव संभाव्यमानैर्विशेषणैर्विशिष्टं तदं तयोर्मिलितमानिष्टोति त्वत्त इति परमतीतमपरमेष्यदपि वर्तमानं यत्किंचिदनेकस्थावरमेजज्जंगमं च ब्रह्म
तत्सर्वं त्वत्तो व्यतिरिक्तं नास्ति त्वयैवां तवीहिश्च कामसत्वात्मा मंतरेण ज्ञातेश्चेणाक्षितेनाक्षीत्यर्थः। अत्र तर्वं हि व्याप्य तत्सर्वं व्याप्य न रोपमपगच्छति तइति श्रुतेः सर्वं ख
ल्विदं ब्रह्मेति च। परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः। तस्मात्त्वव्यतिरिक्तं त्वहित्याकुर्वेदवादि न द्रत्यतं स्वतो भिन्नं नास्ति किं तुल्यमेवेत्यर्थो न द्यरतेत्यत उ
क्त एवार्थः। ज्ञानं वेदादिविद्ययैव तदवाप्तिरपि तस्याश्चनना वाप्ति तत्वात्त्वदव्यय इमंतरेण सुशका न स्यादित्यभिप्रेत्याह। विद्येति। विद्याश्च कलाश्च विद्या
परविद्येति ते तनवः। तव बुद्धिस्थितत्वात्तयोच्यन्ते कलाः चतुःषष्टिलक्षणा वा विद्या कला वेदांगानीत्यन्यथाप्रतीतिनिरासायाचार्यैः विद्याः सकलाश्चे [illegible] विद्यातनुरिति प्रकुरु तस्मात्तत्त्ववेदिन इति मानं वोढा हरंति। तस्मादयमेवार्थ इति। इद
निविष्टहीतं। एतस्मिन्नर्थे महाविद्याः कलाश्चैव त्वन्नावाश्रिता यतः। गाभीक्रतानंतब्रह्मांडत्वात्तन्नामत चैव युक्तो हिरण्यकोशं रजसा परी
चमाहात्म्यं हरेरेव उक्तमित्याह। हिरण्यगर्भ इति। हिरण्मयं गर्भे उदरे यस्य स तथा। २२ ॥

त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याकलास्ते तनवश्च सर्वा हिरण्यगर्भोसि बृहत्त्रिपृष्ठः ३२ ॥

[illegible] निर्गुणस्य हरेरेते गुणाः कथं संभवेयुरत आह। बृहदिति। गुणशक्तित्वाद्बृहत्त्वात् अथ कस्मादु
इतमिति श्रुतेः। हिरण्मयब्रह्मांडोदराभिव्यक्तत्वाद्वा तत्रामासि। ननु तर्हीदं शबलं किं न स्यादत आह। त्रिपृष्ठेति। जाग्रदाद्यवस्थात्रयमतिक्रम्य स्थितत्वात्त्रिपृष्ठ उच्यते। जपरांगा
स्ते ब्रह्मेति। इंतोह्यस्मिन्गुणा इति श्रुतेः। चतुर्मुखात्स्याधिकं विष्णुज्ञानं ता हिरण्यकशिपुना तदंतर्यामियोगपद्युणेरयं
लोकानां पृष्ठे वर्तमानत्वपक्षव्याख्याननिरासाय तरीयस्त्वाचक्षुराचार्य इति। ब्रह्मणोऽप्याधिकं विष्णुज्ञानमपि हिरण्यकः। ब्रह्माणं तद्गुणोऽस्तीति तद्व विष्णुविवक्षयेति। अत्र वद्ब्राति
ब्रह्मा न स्वयं तं तर्यामी सूत्रात्मा इति ज्ञापनाय तदुक्तं ब्रह्मणो प्याधिकं विष्णुं ज्ञानन्नपि हिरण्यकः। ब्रह्माणं तद्गुणोऽस्तीति तद्व विष्णुवि
महत्तत्वात्मकं चाभीत्येकदेशी येरिति व्याख्यातं। तत्प्रसादप्रयत्ने हरिर्मे इत्तत्वात्मकमेवं पुणत्वेनसंगच्छतीत्यतिनिरूप्यं। ब्रह्माणं तद्गुणोऽस्तीति तद्व विष्णुवि
वक्षयेति उक्तत्वात्। न चैतद्भ्रान्तत्वेन महदात्मकत्वमुच्यते इति याचंतर्दूर्ये व्याख्येयोन व्याख्याता। चतुर्मुखस्यपेन्नदभिमानित्वेन घरतांतस्याप्युक्तदोषानिस्ता
राशिति ३२

राम २२

[illegible]शानानंदस्वल्लिलक्षणगुणश्रृंगिनिरूप्याधुना मूर्तिनिरूपयति। व्यक्तमिति। हिरण्यगर्भरूपेण ब्रह्मांडस्य शरीरस्थानीयत्वं सूचितं। तत्रतिष्ठन्नहरिः सुख
लक्षणान्तरगुणान् भुङ्क्ते। ननु हे वदन्नवदुःखलक्षणानीत्यतो वाह। व्यक्तमिति। पारमेष्ठ्ये धामनि वैकुंठादिस्थाने सत्यलोके वा स्वरूपभूते महिम्नि वा स्थितः
पुराणः पुरुषस्त्वं येन शरीरेण इंद्रियप्राणमनसं गुणान्विषयानेव भुंक्ते न तदुःखलक्षणान्। क्लतएतस्त्राह। आत्मेति। एष ह्यानंदयाति नेत आत्मेति श्रु

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ३३ ॥ ॥

तेः। आनंदस्वभावत्वात्। तर्हीति द्विषयज्ञानं कथं नोत्पद्यत इति तत्राह। अव्यक्त इति। तर व्यक्तमाह हीति सूत्रात्। हे विभो तदिदं व्यक्तं ब्रह्मांडलक्षणं तत्र
लशरीरमात्मज्ञं तत्र इति शेषः। यद्वा नेन ब्रह्माण मेवत द्योगपे विशिनोऽस्तीति। तथाहि। पुरं शरीरमणानीति पुराणः। आत्मेत्यभिधानात्। आत्मा चतुर्मुखः। अ
वतारेण व्यक्तिर्नास्तीति अव्यक्तः। जगत्सृष्ट्यादि ऐश्वर्यलक्षणगुणइतरत्स्पष्टं ३३ ॥ ॥

भा॰स॰ २३

स्थावरजंगमात्मकं जगद्व्याप्तिरिक्तं ना स्तीत्यव्याप्तत्वादित्यर्थः ततो व्याप्तिरुक्ता तदिदं कीदृशेन रूपेण व्याप्तमिति मंदाशंकापरिहाराय स्वरूपमाह अनंतेति अनन्तपरिच्छिन्नस्य सर्वस्यापरिच्छिन्नाद्धरेर्वैशिष्ट्यं युक्तिविरुद्धमित्युक्तं भवति तमस्त्रामीत्रमसा गूढमग्र इति श्रुतेः प्रकृत्याव्याप्तत्वेपि तैः कथं हरेरेव विशिष्टा शक्तिर्घटत इति तत्राह चिदचिदिति शक्तिपदस्य द्विरावृत्तिः कर्तव्या शक्यत्वाछक्तायोभार्था इति वचनात् उभयविधया शक्तिः प्रकृतिस्तस्याः कार्यं तु शक्तिः तस्यास्तु विभागवच्छक्त्यविनाभूतत्वात् द्विष्ठा सा सन्नियते यत एव युक्तायेत्युक्तं न चानेन गुणभूतत्वं हरेरिति वाच्यं शिष्येणोपाध्याय प्रज्ञाग तस्य चोपाध्याय त्वाभ्यावनुपपत्तेः ननु लोके प्रतिवस्त्वेकनियतत्वादर्शनात् चिदचिदात्मकप्रपंचेकस्य चित्तदनियतत्व संभवेनस्थातं शक्त्येण सर्वव्यापकत्वं हरेः कथं व्याप्तत्वं युज्यते

अनंताव्यक्तरूपेण येनेदमखिलं ततं। चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः। यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो। नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः। न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि। व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः। अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां। सर्वेषां लोकपालानां महिमानं यथात्मनः। तपोयोगप्रभावेन यो न रिष्यति कर्हिचित् ३८ इति सप्तमे तृतीयोऽध्यायः

इत्यत आह चिदचिदिति द्रव्यं कर्म च कालश्च स्वभावो जीव एव च इत्यादेः परमाणुमात्रवस्तुनोपि भागवदनियतत्वासंभवात् एतादृशी शक्तिरस्यास्तीति तदुक्तं भगवतः इति उक्तार्थपदं श्रुयित्वा तेन मया किं विधेयमिति वाक्यार्थस्मरता हिरण्येन नम इत्युक्तः तुस्मैः फलाधिकत्वात् किं च बहुनोक्तेन त्वदभीष्टं च हेत्याशंकित आह यदीति विविधत्वेन सृष्टेभ्यः अन्यस्मादपि कालात् अप्रसवत्वात् अवयवविशिष्टात् भूतेभ्य इत्युक्ते विभ्यः किमित्यतो विशिनष्टि न नरैरिति व्यसुभिर्विगतप्राणैः पाषाणादिभिः असुमद्भिः ग्राहादिभिः एकपत्यमेकाधिपत्यं महिमानं वृण इति शेषः आत्मनस्त्व यो महिमा स यथा न रिष्यति न नश्यति तथा मम महिमास्तु यो महिमा यथा कर्हिचित् न रिष्यति तथात्मनो मम महिमानं न नश्यत्विति चेति ३८ इति सप्तमे तृतीयः ॥ राम २३

वरदानादि संभूतं जयं च ध्वजजन्महिरण्यकस्य गर्वदमनं चैव पर्यं श्रीनारायणात् ब्रह्मादादिर्भूतमनन्तकालीनं शाश्वतं यस्मात् देवापायं भूतानि इत्यादि तात्पर्यं निरूप्यते कतिपयेष्वध्यायेषु तत्र हिरण्यकशिपवे ब्रह्मवरप्रदानप्रकारं तेनास्य सर्वविजयप्रकारं च निरूपयति एवं वृत इत्यादिना अथ शब्देन नकेवलं ब्रह्मणो वरदानमेवोच्यते अपितु हिरण्यकशिपुविषया कथा साकल्येन कथ्यत इति सूचयति मम सकाशाद्यद्यपि यद्यपि दुर्लभमनंततो दुःखप्रापकं दुरशोभनं दुःखयोरिति पादवः भगवान् प्रभुः अत्र प्रतिज्ञा अंगदृष्टकृतविस्मरणशीलानां महानां स्फुरणार्थं कृतव्यानां पदानां पुनरपि तथा वचनं न दोषाय तदर्थं हीदं यद्

नारद उवाच एवं वृतः शतधृतिर्हिरण्यकशिपोरथ। प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्रह्मोवाच तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम। तथापि वितराम्यंग वरान्यद्यपि दुर्लभान् २ ततो जगाम भगवानमोघानुग्रहो विभुः। पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः। भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ४ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः। देवासुरमनुष्येंद्रगंधर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून्। यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनपि ६ सर्वसत्त्वपतीञ्जित्वा वशमानीय विश्वजित्। जहार लोकपालानां स्थानानि सह तेजसा ७ ॥ ॥

नमिति अमोघानुग्रहः योग्यानिति शेषः ॥३॥ भगवत्यैश्वर्यादिगुणरत्नाकरे परे द्वेषमकरोदसुरावेशात् अयं शत्वेन ज्ञातो भक्तोपीति तात्पर्यं तदुक्तं स्वतो भक्ता हिरण्याद्याः परावेशाद्वै द्विष इति परो रिपुरात्मनो स्यभिधानादत्र परः शत्रुरसुरः तदावेशादित्यर्थः सर्वसत्त्वपतीन्सिंहादीन् बलश्रेष्ठान् वा किं च तानादिश्य वशानरं विजितवानिति तेजसा प्रभावेन सह जहार ७ ॥ ॥

त्रिविष्टपं स्वर्गं त्रीणि स्थानानि । श्रेष्ठानि संति तत्तोपि श्रेष्ठं महेंद्रभवनं । अमरावतीनाम । तत्साक्षान्नापेक्षया साक्षात्पुरीप । मित्युच्यते । साक्षात्त्वात्तत्तुर्य यो रित्य
निधानात् । अतएवाखिलर्द्धिमदित्युक्तं । साक्षात्त्वत्त्व ह्यमध्युवासेत्यनेन वासं गमयति तद्यं । त्रीणि विष्टपानि स्थानानि सकलसमृद्धिमंत्यस्मिंस्त्रिविष्टपशब्दार्थोप
पत्तौ चनपायमर्थः संपद्यते । त्रिदिवपदस्याप्ययमेवार्थः । अन्यथा त्रिशब्दस्य गतिर्वक्तव्येति । सोपानं आरोहावरोहलक्षणं कुट्टिमं । वितानं उपरि पिधानवस्त्रं । सुदतीः
शब्दयंत्यः नूपुरैः । त्रिभिरादित्यवसुरुद्रैर्मरुदादिदेवानामेषां तदंतर्भावविवक्षया त्रिधाभिर्हैः । तदुक्तं । आदित्या वसवो रुद्रास्त्रिविधा हि सुरापतः । मरुतश्च विश्वे च
साध्याश्च तद्गताः । अतस्त्रय इति तेषां स्वत्वात्मातृपास्मृताः इति । उपपन्नं दुःसर्वे विनादेवान्हिरण्यकस्तिवचनात्तत्नात्ब्रह्मविष्णुमहेश्वरैरित्यर्थो ग्राह्यः । किं

देवोद्यानश्रियाजुष्टमध्यास्ते स्म त्रिविष्टपं । महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा । त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् । यत्र विद्रुमसोपाना महामा
रकता भुवः । यत्र स्फाटिककुड्यानि वैदूर्यस्तंभपंक्तयः । यत्र चित्रवितानानि पद्मरागासनानि च । पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः १० कूजद्भिर्नूपुरैर्दे
व्यः शब्दयंत्य इतस्ततः । रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं । तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलोक एकराट् । रेमेभिवंद्यांघ्रियुगः सुरादिभिः
प्रतापितैरूर्जितचंडशासनः । तमंग मत्तं मधुनोरुगंधिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः । उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदं । ज
गुर्महेंद्रासनमोजसा स्थितं विश्वावसुस्तुंबुरुरस्मदादयः । गंधर्वसिद्धा ऋषयोस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्च पांडव । स एव वर्णाश्रमिभिः क्रतुभिर्भूरिद
क्षिणैः । इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा १५ ॥ ॥

चात्रेहंता त्वर्यातथाहि । द्विविधा देवा यज्ञभागभुजस्तदभुजश्च इति । तत्र प्रथमे त्रिधा भिन्नजाति भिन्नत्वात्कर्मणा द्वानेसमूहेना गमनाद्यचरमेषु सुरशब्दमात्रं वर्ततेन
दंतेवर्त्तमानावाप्तिद्धा । अयज्ञभागेष्वपि तु सुरशब्दः प्रयुज्यते । यज्ञभागभुजस्त्वेव त्रय इत्य भिशब्दतादिति वचनादयं विशेषकल्पनमिति । इतोप्यत्रैश्चिंत्वसंख्यया
हित्वा स्वयं तेरत्वं निकर्तव्यं । दैत्यस्य देवोपासत्वे देवानां सदा सद्यशो भाजामयशः स्यादत्यदनुपपत्तं प्रमाणविरोधात्तदितरेषांउभयथात्किमिति युक्तम समिरिषि
ति । यत्तत्कचयशः स्यात सन्येषां मितिकेशवः सर्वत्रापितु स्वानां मित्यस्यासूजयेत्कचिदित्युक्ते श्च । योगाः सत्र इत इत्य भिधानादितिमा दितानोपासस्थानीय

अकृष्टपच्या उप्तेन खननं तरेण सस्यादिपरिपाकोपेता । तत्पत्न्यः तेषां समुद्राणां पत्न्यो नद्यः क्षारं लवणं । यथोपजोषं यथासुखं । यतो यस्मा द्रोग्रदंड संव

अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही । तथा कामदुघा द्यौश्च नानाश्चर्यपदं नभः । रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः । क्षारसीधुघृतक्षौद्र
दधिक्षीरामृतोदकाः । शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः । दधार लोकपालानामेक एव पृथग्गुणान् । स इत्थं निर्जितककुबेकराड्विषयान्प्रि
यान् । यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः । एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः । कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः । तस्योग्रदंडसं
विग्नाः सर्वे लोकाः सपालकाः । अन्यत्रालब्धशरणाः शरणं ययुरच्युतं । तस्यै नमोस्तु काष्ठायै यत्रात्मा हरिरीश्वरः । यद्गत्वा न निवर्तंते शांताः संन्यासिनो
मलाः । इति ते संयतात्मानः समाहितधियोमलाः । उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ २१ ॥ नमो भगवते महापुरुषाय महात्मने । विश्रुद्धानुभवा
नंदसंदोहाय यतोभयं । तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना । सन्नादयंती ककुभः साधूनामभयंकरी । मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ।
मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये । ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् । तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत । यदा देवेषु वेदेषु गो
विप्रेषु साधुषु । धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २८ ॥ निर्वैराय प्रशांताय स्वसुताय महात्मने । प्रह्रादाय यदा द्रुह्येद्धनिष्येपि वरोर्जितं ।
१८ नारद उवाच इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः । न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतं । तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ।
प्रह्रादोभून्महांस्तेषां गुणैर्महदुपासकः । ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेंद्रियः ३१ ॥ ॥

वतितस्मादिति । अरूपा अशरीरिणी मद्दर्शनं मद्विषयं ज्ञानं । यस्य वेदादिषु विद्वेषः स आशु साधनसामग्र्यां १८ २१ ॥ ॥

आत्मवत्परमात्मवत्। अन्येषां हरिसाम्यं तु किंचित्साम्यमुदीरितं। साम्यमसाम्यं तु मत्पादेरितिशास्त्रस्यनिश्चयः इतिवचनात्तत्र हरिसाम्यकथनं तात्पर्ये
ण गंतव्यमानस्तंभविवर्जितः। अभिमाननिमित्तस्तंभदोषरहितः। गुणेषु शब्दादिषु। शरीरस्य दांतत्वं उपवासादिना। रहितासुरः असुरस्वभावकर्मरहि
तः। जात्यासुरः। यथा भगवतीश्वरइत्यत्राप्यन्येषां हरिसाम्यं तु किंचित्साम्यमुदीरितं इत्यादिप्रमाणमित्यत्रापि ज्ञातव्यमिति। प्रतिमानं दृष्टांतं कुर्वन्त्यो

आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः। दासवत्संनतार्यांघ्रिः पितृवद्दीनवत्सलः। भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः। विद्यार्थरूप
जन्माढ्यो मानस्तंभविवर्जितः। नोद्विग्नचित्तो व्यसनेषु निस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक्। दांतेंद्रियप्राणशरीरधीः सदा प्रशांतकामो रहितासु
रोसुरः। यस्मिन्महद्गुणा राजन्गृह्यंते कविभिर्मुहुः। न तेधुना पिधीयंते यथा भगवतीश्वरे। यं साधुगाथासदसि रिपवोपि सुरा नृप। प्रतिमानं प्रकु
र्वंति किमुतान्ये भवादृशाः। गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते। वासुदेवे भगवति यस्य नैसर्गिकी रतिः। न्यस्तक्रीडनको बालो जडवत्तन्म
नस्तया। कृष्णग्रहगृहीतात्मा न वेद जगदीदृशं। आसीनः पर्यटन्नश्नन्शयानः प्रपिबन्ब्रुवन्। नानुसंधत्त एतानि गोविंदपरिरंभितः। क्वचिद्रुदति
वैकुंठचिंताशबलचेतनः। क्वचिद्धसति तच्चिंताह्लाद उद्गायति क्वचित्। नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित्। क्वचित्तद्भावनायुक्तस्तन्मयो
नुचकार ह। क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः। अस्पंदप्रणयानंदसलिलामीलितेक्षणः। स उत्तमश्लोकपदारविंदयोर्निषेवया
किंचनसंगलब्धया। तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनस्य मनः शमं व्यधात् ४२ ॥ ॥

विहसेन वशीकृतमनाः। अनुसंदधे सस्मार। तद्भावनायुक्तः। तस्य श्रीनारायणस्य ध्यानोपेतः। तन्मयः तत्प्रधानः। स्पर्शेषु विषयेषु स्पृहारहितः। वि
षयेक्षितिः स्पर्शः प्रणयः प्राणचेष्टारहितः आनंदसलिलेन संतोषाश्रुजलेन निमित्ते नकिंचिन्मीलितनेत्रः। अकिंचनानां महतां सेवा लब्धा एतासंगेन

अदंभरणलक्षणं व्यसनं। विद्वेषोदपितेत्यनेन कथमासीन्महात्मनि इतिप्रश्नं कथांतरप्रसंगान्नारदेनापरिहृतं ज्ञात्वा राजा युधिष्ठिरः पुनरपि जानन्नकरोद्द्रा
मात्मजे इति प्रसंगात्तदेवपृच्छति। देवर्षे इति। पुत्रस्य मरणकारणमासुरकर्मनत्वशास्त्रीयमिति ज्ञापनाय साधुवेद्यमिति संहिताकार्यं नकृतं। अपरे
शत्रवः। विधमपरिहार। पुत्राय प्रयोजितो विद्वेषः पितुर्मरणाया भूदिति यत्तस्मात्कौतूहलमिति ४६ इति सप्तमे चतुर्थः हिरण्यकशिपुः प्रह्लादसंवादरूप
नभक्तिस्वरूपं हरेर्निरतिशयस्वातंत्र्यं निरूप्यपत्यस्मिन्नध्याये। काव्यः शुक्रः शंडामर्कः शंडामर्कौ तस्य शुक्रस्य। दैत्यराजगृहान्तिके स्थित्वा। राज्ञा हिरण्य
कशिपुना। अपाठस्यविशेषणभूतेनहेत्वनेनसूचितं हेतुमाह। नेति। अपाठत्वे किंकारणमत्राह। स्वरूपेति। स्वानं आत्म इति प्रोक्तः रत्यतः स्वस्य स्वतंत्रस्य हरेरू

तस्मिन्महाभागवते महाभागे महात्मनि। हिरण्यकशिपू राजन्नकरोदघमात्मजे ४३ युधिष्ठिर उवाच देवर्षे एतदिच्छामो वेदितुं तव सुव्रत। यदा
त्मजाय शुद्धाय पितादात्साधवे ह्यघं। पुत्रान्विप्रतिकूलांश्च पितरः पुत्रवत्सलाः। उपालभंते शिक्षार्थं नैवाघमपरे यथा। किमुतानुवशान्साधूंस्ता दृशा
न्गुरुदेवताः। एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो। पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ४६ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतु
र्थोध्यायः नारदउवाच पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः। शंडामर्कौ सुतौ तस्य दैत्यराजगृहांतिके १ तौ राज्ञा प्रापितं बालं प्र
ह्लादं नयकोविदं। पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् २ यत्तत्र गुरुणा प्रोक्तं शुश्रुवे नयपाठह। न साधु मनसा तेन स्वपरासद्ग्रहाश्रयं ३
एकदासुरराट् पुत्रमंकमारोप्य पांडव। पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ४ ॥ ॥

पस्यासत्वं शून्यत्वं गृह्णातीति निराकारो हरिरिति यः पक्षः स आश्रयो यस्य तत्तथा निराकारपक्षविषयत्वादित्यर्थः। अथवा स्वरूपस्यासद्ग्रहः शून्यत्वप्रतिपाद
कः शून्यवादः स आश्रयो यस्य तत्तथा शून्यसिद्धांतविषयत्वादित्यर्थः। इति वा जीवपरस्वरूपयोः सत्पृथग्भावं गृह्णातीति स्वरूपासद्ग्रहः। जीवपरमात्मानाव
भिन्नाविति यः सिद्धांतः स आश्रयो यस्य तत्तथा। अद्वैतविषयत्वादित्यर्थः इति वा। स्वरूपासद्ग्रहः श्रोतव्यक्तिकुरायइत्यवैष्णवपक्षपातः स आश्रयो यस्य तत्तथा
वैष्णवसिद्धांतविरुद्धत्वादित्यर्थः। इति वा। विन्यासभेदेन तात्पर्यतस्त्वेक एवेति ३ ४० ॥ ॥

हेत्र्प्रसुरवर्या त्र्प्रसद्ग्राहात् मिथ्याभिनिवेशात् सम्युद्विग्नधियां परवशीकृत बुद्धीनां देहिनां तत्साधुसंसारनिर्मूलसाधनं मन्ये तत्र्प्रयाणां किं तदिति तत्राह। हित्वेति। त्र्प्रात्मपातं स्वस्य निरयपातं। त्र्प्रंधमज्ञानं यत्र तत्स्वरूपनिधानस्थानं गृहं हित्वा वनं सज्जनसंगमलक्षणं गतः। सज्जनशिक्षार्थं प्रकारेन तत्त्वमुक्तमन्तु तन्याह इयतिर्व्यं। तस्यासुरावेशेन दुराग्रहगृहीतत्वात्। तत्फलमाह। श्रुत्वेति। परिहासः फलं। परबुद्धिभिः पातिपक्षबुद्धिभिः परपक्षसमीहिताः पूर्वपक्षविषयत्वेन प्रवृत्ताः ६ १६ पुत्रस्नेहेन नाभिमतोयं हासः किं तु त्र्प्रनभिमत एवेत्याह। सम्यगिति। विधार्यतां। विष्णुपक्षैः प्रतिछन्नैर्येषां तेत थातैर्विष्णुसिद्धांतमभिशुद्धस्थितैरित्यर्थः ७

२६

प्रह्लाद उवाच तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात्। हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ५ नारद उवाच श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः। जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ६ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः। विष्णुपक्षैः प्रतिछन्नैर्न भिद्येतास्य धीर्यथा ७ गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः। प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ८ वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा। बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ९ बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत्। भण्यतां श्रोतुकामानां गुरूणां कुलनंदन १० ॥ ॥

त्र्प्रवशवशीकरणाय चत्वार उपाया विहिता स्तत्र हिंसाहीनां सामोपाय एव श्रेयानिति दर्शयितुं परकृत बुद्धिभेदं चाशंक्य तं तत्रापि योग्यानां भगवत्तत्वविषयज्ञाननिश्चयाय चदैत्यभयाव दैत्ययाजकाः प्रह्लादमपृच्छन्नित्याह। गृहमिति। सामभिः वचनैः। तुभ्यं तव यो बुद्धिविपर्ययः एष बालानति अन्यस्मात् बालादपि त्र्प्रतिक्रम्य कुतो भूदिति शेषः। बालानां बुद्धिमतिक्रम्यैष बुद्धिभेदः कृतः कस्मात् तुभ्यं रोचित इति वा। एतदेव विवृण्वंति। बुद्धिभेद इति। त्र्प्रस्माकं तत्त्वेनैव वक्तव्यं त्वयेत्यतो गुरूणामिति १०

राम
२६

त्वत्त्वं वक्ति। परइति। पुंसां योयं परस्वात्मेत्यसद्ग्रहः एकमेवाद्वितीयं इति श्रुतेः परमात्मवस्तुन एकत्वे प्रामाणिके भिन्नत्वं श्रीनारायणमंतरेणापरविषयकर्तृत्वं स्वविषयकर्तृत्वमिति भेदः स्वातंत्र्यकल्पनालक्षणमन्यथाज्ञानं। एषयस्येश्वरस्येच्छयाकृतः कल्पितः सर्वकर्तृत्वात् तस्मै भगवते महामहिम्ने नमः इत्यन्वयः तत्प्रत्यक्षमित्याह। विमोहितधियामिति। दृष्टः प्रत्यक्षस्तस्मात् दृशी बुद्धिर्भवादृशैर्न कार्येति शेषः। विमोहितेत्यनेनापीश्वरैककर्तृत्वं ज्ञायते। पर्यायपेयत्तं स्पष्टं दर्शयति। सयदेति। सभगवान् यदा पुंसां स्वात्मपरबुद्धिजनकत्वेनानुगतः अनुकूलो भवति तदा पशुबुद्धिः स्वबुद्धिर्विभिद्यते तत्कथमित्यत उक्तं। त्र्प्रन्यइति।

प्रह्लाद उवाच परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः। विमोहितधियां दृष्टस्तस्मै भगवते नमः ११
स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते। त्र्प्रन्य एष तथान्योऽहमिति भेदगतासती १२ ॥ ॥

एष देवदत्तोन्यः स्वतंत्रश्चाहमन्यः स्वतंत्र इति। किमस्य त्र्प्रधिकरणमिति तत्राह। देहगतेति। त्र्प्रत एवासती हरिविज्ञानत्वेन मोक्षानुपयोगित्वात्। त्र्प्रन्योसावन्योहमस्मीति न स वेद यथा पशुरिति श्रुतेः। प्रतीकेनानेन श्लोकेन जीवपरयोर्भेदं निषिध्य चिदैक्यविधीपत इतीमर्थं विधायार्थांतरकल्पनायां किं प्रमाणमिति यमाशंका। स्वातंत्र्येणान्यस्य भावनिषेधाय श्रुतिश्चियं। त्र्प्रन्योसावन्योहमिति पश्यन्न जइति स्मृहा। त्र्प्रात्मानमंतर्यमयेदिति भेदं स्वरूपतः। त्र्प्रा इत अक्षरणो धीनाभिन्ना जीवाः सदैव तु। स्वरूपसत्ताकर्तृत्वं भोगो मोक्षस्तथैव च। मुक्तस्यावस्थितिश्चैव सर्वविष्णोर्वशे सदेत्यनेन परिहृतेति ज्ञातव्यं १२ ॥

ननु यदि जीवपरयोर्मिथो भिन्नो तर्हि किमिति घटपटभेदज्ञानवत्तद्विषयज्ञानं नोत्पद्यत इत्याशंक्य प्रतियोगिज्ञानस्य दुःसाध्यत्वादित्यभिप्रेत्याह। स एष इति। प
स्वस्वकर्मानुसारेण स्वस्वयोग्यज्ञानमुत्पादयति। स एष आत्मा परमात्मा स्वपरेत्यबुद्धिभिः यथार्थज्ञानविरोधिज्ञानवद्भिः पुरुषैः दुरत्ययानुक्रमणः दुरत्ययं दु
र्ज्ञानमनुक्रमणं तत्तद्योग्यतानुसारेण प्रवर्त्तनं यस्य स तथा। दुर्ज्ञेयचेष्ट इत्यर्थः। निरूप्यते निश्चीयते। ननु वेदाहमेतं पुरुषं महान्तमादित्यवर्णमिति श्रु
तेः ब्रह्मादेस्तद्विषयज्ञानश्रवणात्कथं प्रतियोगिज्ञानस्य दुःसाध्यत्वमित्याह। मुह्यन्तीति। ब्रह्मादीनामपि भगवद्विषयज्ञानं दुःसाध्यं किं वितरेषामित्यतो
वाह। मुह्यन्तीति। हिशब्दोप्यर्थे हेतौ वा। वेदवादेकोविदाः ब्रह्मादयोपि यद्वर्त्मनि यत्स्वरूपविषये मुह्यन्ति यस्मात्तस्मात् स एष दुरत्ययानुक्रमण इति सि
ध्यति। अनेन ईश्वरानुग्रहमन्तरेण तद्विषयज्ञानं नोत्पद्यते। तस्मिन्सति तत्स्यात्। यमेवैष वृणुते तेन लभ्यः इति श्रुतेरन्वयव्यतिरेकौ दर्शितौ किमुक्तं भवति। न

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते। मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिं
१३ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ। तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया १४ ॥ ॥

नुत्वदुक्तैव त्वद्बुद्धिभेदजनकः कश्चित्स्यात्स क इति विचार्यत इति तत्राह। एष इति। मुह्यन्तीत्येतदत्राप्यनुकृष्यते यद्वर्त्मनि मुह्यन्ति एष हरिर्मम मतिं भिन
त्ति स्वविषयां करोति। सर्वस्य स्ववशत्वं स्वस्यानन्याधीनत्वं स्वप्रसादान्मोक्षादि सकलपुरुषार्थप्राप्तिरित्यादि बुद्धिं जनयतीति भावः। तदुक्तं। आह तत्र ब्रह्म
णोधीना भिन्ना जीवाः सदैव त्वित्यादि। एतदर्थं सदृष्टान्तमाह। यथेति। यथा आकर्षस्यायस्कान्तस्य सन्निधौ सति अयः स्वयं भ्राम्यति स्वात्मनि सुदृश्यगमनशक्तिं
करोति तद्वदिति शेषः। तथा मे चेतो यदृच्छया तदिच्छया चक्रपाणेर्भिद्यते तद्विषयीकरणशक्तीक्रियते। अयोगमनशक्तिवच्चेतसोपि नैसर्गिकीति भावः। एतेन ई
वावपयोमंडभवति। एतस्य वाक्षरस्य प्रशासने गार्गि प्राच्यो न्या नद्यः स्यन्दन्ते। य आत्मानमन्तरो यमयतीति भेदस्वरूपतः आ इत्यादि श्रुतिभ्यो दर्शितोनेणवच
रस्य सर्वस्य प्राह्यधीनप्रवृत्तत्वं गमात्पश्यपत्र इत्यनेन परस्वबुद्धिरबुद्धिभिरित्येतत्पददृष्ट्याभिप्रायो दर्शितः १४ ॥ ॥

सुदीनः वाचा शिक्षायां तीक्ष्णो शक्त इत्यर्थः राजसेवक इत्यनेन भेददानासामर्थ्यं च सूचितं। उभयोरपि दिन्नसाध्यत्वात्। अयशस्कः तेदुःकीर्तिकरस्यास्य चतुर्थो दि
मोदंडसंज्ञ इति उदित इत्यर्थः। उन्मूलयतीत्युन्मूलः सचासौ उन्मूलवच्च स्वच्छंदे तेयचंदनवनस्य शूलं तन्मूलोन्मूलपरशुत्वं स्य नालायितः मंडपवत्स्वानः। त्रिवर्ग
स्योपपादनं शास्त्रं। ज्ञातं ज्ञेयानां धर्मादिपुरुषार्थानां चतुष्टयं यनेससतथा तज्ज्ञातज्ञेयसाधनचतुष्टयं वा। मात्रा मृष्टं शरीरमलत्यागेन स्नानं कारितं तं सुष्ठु अधीतं प
ठितं। मन्त्रियं त्वत्वेनात्मनिमपि स्थितो भगवान्निति निरन्तरं वेदनं ज्ञानमात्मनिवेदनं। मुक्तस्यापि समानस्यो नियतेवहरिः सदा। इति ज्ञानं सस्तद्दृष्ट सम्यगात्मनिवे

नारदउवाच   एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः। तं निर्भर्त्स्याथ कुपितः सुदीनो राजसेवकः। आनीयतामरे वेत्रमस्माकमयशस्करः
कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः। दैतेयचंदनवने जातोयं कंटकद्रुमः। तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः १७ इति तं विविधोपायैर्भी
षयंस्तर्जनादिभिः। प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनं। तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं। दैत्येन्द्रं दर्शयामास मातृमृष्टमलंकृतं १९ पादयोः
पतितं बालं प्रतिनंद्याशिषासुरः। परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं। आरोप्यांकमवघ्राय मूर्द्धन्यश्रुकलांबुभिः। आसिंचन्विकसद्वक्त्रमिदमाह युधि
ष्ठिर। प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमं। कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् २२ प्रह्लादउवाच   श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं।
अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं २३ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। क्रियेत भगवत्यद्धा तन्मन्येधीतमुत्तमं २४ ॥ ॥

नेन३ दनमित्येवं आत्मसमर्पणं नार्थः किं तूक्त एवार्थः। इत्युक्तप्रकारेण श्रवणादिभिर्नवभिर्लक्ष्यते। असंभवव्यभिचारपरिहारेणाप्यत इति नवलक्षणा विष्णौ
भक्तिर्यस्मिन् शक्त्यर्पिता प्रतिपादिता पुंसा सा भगवत्युत्तमश्लोके अद्धा ज्ञानिर्व्याजेन क्रियेत चेत्तर्हि तदधीतं शास्त्रमुत्तमं मन्ये नान्यदित्यन्वयः। नव श्रव
णादीनि लक्षणानि चिह्नानि यस्याः सा तथा २५ ॥ ॥

भा० स० नेत्वय्यासाधुत्वेनहृतस्यगुरोः दुर्मतेइतिसंबोध्यनिंदनं कथंघटतइतितत्राह। संतीति। गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः उत्पथंप्रतिपन्नस्यकार्यं भवतिशासनमितिवाक्यं दिशाद्देनस्मारयति। पातकिनां पापफलत्वेन रोगउदेतियथातथातेषामघमपराधलक्षणंव्यसनंप्रकाशतइत्यन्वयः। ननुलोके संतसाधवः नाहंतादृशः यतस्त्वत्सुतोनमयाचरितंनापिपरेणपठत्यतइतिनमद्विति। तर्हिकस्मादियंमतिरश्रदिति नत्राह। नैसर्गिकीति। तदानास्मिन्नपत्ये मामममानः स्वरूपाभिमानोममपापाग्राहितेयंमतिरितिकृतस्मात्कोपंसंहरेति। पुत्राप्रकृष्यत्राह। गुरुणेति। गुरुमुखीगुरुमुखादुत्पन्ना इयंमतिः। सत्येवमू न्मतिःत्वन्मतिरेवासतीतिपितरंकटाक्षीकृत्यपरिहरतिमतिरिति। परतोगुर्वादिबोधनप्रयत्नेनस्वतःस्वप्रयत्नेन। तत्रनिमित्तमाह। गृहेति। वनादिनिवास

१८

नारदउवाच निशम्यैतत्सुतवचोहिरण्यकशिपुस्तदा। गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः॥२५ हिरण्यकशिपुरुवाच ब्रह्मबंधो किमेतत्तेविपक्षंश्रयतासदा। असारंग्राहितोबालोमामनादृत्यदुर्मते। संतिह्यसाधवोलोकेदुर्मैत्राःछद्मवेषिणः। तेषामुदेत्यघंकालेरोगःपातकि नामिव २७ गुरुपुत्रउवाच नमत्प्रणीतंनपरप्रणीतंसुतोवदत्येषतवेंद्रशत्रो। नैसर्गिकीयंमतिरस्यराजन्नियच्छमन्युंकदादाःस्ममानः २८ नारदउवाच गुरुणैवंप्रतिप्रोक्तोभूयआहासुरःसुतं। नचेद्गुरुमुखीयंतेकुतोभद्रासतीमतिः प्रह्लादउवाच मतिर्नकृष्णेपरतःस्व तोवामिथोभिपद्येतगृहव्रतानां। अदांतगोभिर्विशतांतमिस्रंपुनःपुनश्चर्वितचर्वणानां ३० ॥ ॥

मंतरेणगृहएवावस्थानलक्षणंव्रतंयेषांतेतथा तेषां। ननुकुटुंबीभूयोदेशेस्वाध्यायमधीयानःकृतिश्चतेर्हस्थानामविधेयःशास्त्रप्रपन्नेरितितत्राह। अदांतेति। अदांतानांइंद्रियनियंत्ररहितानांपुरुषाणांगोभिर्वागिंद्रियमिस्रंनरकंसुखबुद्ध्या। विशतांभुंजानानां। तत्रापिहेतुःतनाश्चर्वभोगेनासक्तीत्यभिप्रेत्या अदांतेति। अदांतानांइंद्रियनियंत्ररहितानांपुरुषाणांगोभिर्वागिंद्रियैःतमिस्रममतत्त्वोर्थविषयमज्ञानंअन्यथाज्ञानं ह। पुनरिति। पुनःपुनःभुक्तविषयानेवभुंजानानामित्यर्थः। अदांतगोभिरशिक्षिताभिर्वाग्भिर्वेदरूपाभिस्त्रमिश्रमतत्त्वोर्थविषयमज्ञानंअन्यथाज्ञानं चविशतोपाहमानां। नतत्रापिकृतोस्त्रीत्याह। पुनरितिवा ३० ॥ ॥

एतदेवस्पष्टमाहानतइति। दुरेषुप्रतीतिसुंदरेषुपरिणामविषेषुभ्राशयोयेषांतेतथा। तत्रहेतुमाह। बहिरिति। बहिरर्थेषुसुखतःप्रतीयमानार्थेषुबा भावस्वात्वपर्याथनिर्णयोयेषांतेतथा कृतितात्पर्यार्थानभिज्ञाइत्यर्थः। एतेस्वार्थगतिंपुरुषार्थस्वरूपंस्वभक्तप्रयोजनसाधकंवाक्यंनविदुरित्य न्वयः। अत्रकारणमाह। वाचीति। ईशतंत्र्यांईशस्यवेदवाक्यलक्षणतंत्र्यांब्राह्मणादिवर्णनामाख्यलक्षणेनामदाम्निबद्धाः। अत्रोदाहरणमाह। अं धाइति। अंधैरज्ञैरुपनीयमानाउपदिश्यमानकर्ममार्गाअंधाअज्ञाउपदिष्टान्मार्गायथानविदुस्तथेति। अनेनांधेनैवनीयमानायथांधा इतिश्रुति

नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेबहिरर्थभावः। अंधायथांधैरुपनीयमानावाचीशतंत्र्यामुरुदाम्निबद्धाः। नैषांमतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमोयदर्थः। महीयसांपादरजोभिषेकंनिष्किंचनानांनवृणीतयावत ३२ नारदउवाच इत्युक्तोपरतेपुत्रेहिरण्यकशि पूरुषा। अंधीकृतात्मास्वोत्संगान्निरस्यतमहीतले। आहामर्षरुषाविष्टःकषायीकृतलोचनः ३३ हिरण्यकशिपुरुवाच वध्यतामाश्वयं वध्योनिःसारयतनैर्ऋताः। अयंमेभ्रातृहासोयंहित्वास्वान्सुहृदोधमः। पितृव्यहंतुःपादौयोविष्णोर्दासवदर्चति। विष्णोर्वासाध्वसौकिंनुक रिष्यत्यसमंजसः। सौहृदंदुस्त्यजंपित्रोरहाद्यःपंचहायनः ३५ ॥ ॥

स्मारयति। नन्वेवंतर्हिगृहव्रतानांमुक्त्युपायःकइत्यतआह। नैषामिति। यावदेषांगृहव्रतानांमतिर्महीयसांनिःकिंचनानांसंन्यासिनांपादरजोभिषेकं स्मारयति। नवृणीतनाश्रयतेतावत्तेषांमतिरुरुक्रमस्यांघ्रिंनस्पृशतिनविषयीकरोति। उरुक्रमस्यांघ्रिस्पर्शस्यकिंफलमत्राह। अनर्थेति। यस्यहरेःअंघ्रिस्पर्शोत्थफलम नर्थापगमःसंसारनिवृत्तिः अथवानर्थापगमोयस्मात्पादरजोभिषेकात्तदुत्थितःप्रकाशितोभवतितं। कषायीकृतलोचनःरक्तनेत्रः। पितृव्यस्यहिरण्या क्षस्यहंतुः। असावसमंजसःप्रह्लादःविष्णोःकिंवासाधुकरिष्यति। कथमसमंजसोऽत्रत्वाह। सौहृदमिति ३५ ॥ ॥

१८

भा·स·

१९

परःशत्रुरप्यवश्यंहितश्चेत्सोपिहितकृत्। स्वेत्सएवसुतः। औषधंतिकृत्वेमाहरीतकीमनुष्याणांमातेवहितकारिणी। निकृंतनात्स्वदेहजोपिसुतो
पि आहितोपकारित्वेदंगंछिंद्यात्तथाप्यवशिष्टस्यसर्पदष्टांगं। किंचआत्मनःसुखस्यपदहितमंगंनछिंद्यात्तदेवविशिनष्टि। यद्विवर्जनादितिशेषमंगंसुखेनजी
वतीत्यन्वयः। संभोजोभोजनं। भेदबुद्धिरिशप। अनिर्देश्यत्वादिगुणशालिनिहरौयुक्तात्मनिधियोजितमनस्केप्रह्रादेसत्पुरुषेप्रयुक्ताऽपापिनइवतत्क्रियाः
तेषांनैर्ऋतानांताडनादिक्रियाः। वधोपायमाह। दिग्गजैरित्यादिना। अवपातनंगिरिशृंगादधःपातनं। सन्निरोधैर्निर्गमाभावेगृहेनिक्षिप्यपीडनैः। पर्वताक्रमणैः

परोप्यपत्यंहितकृद्यथौषधंस्वदेहजोप्यामयवत्सुतोहितः। छिंद्यात्तदंगंयदुतात्मनोहितंशेषंसुखंजीवतियद्विसर्जनात् ३८ सर्वैर्हिपायैर्हंतव्यः
संभोजशयनासनैः। सुहृल्लिंगधरःशत्रुर्मुनेर्दुष्टमिवेंद्रियं। नैर्ऋतास्तेसमादिष्टाभर्त्रावैशूलपाणयः। तिग्मदंष्ट्राकरालास्याःताम्रश्मश्रुशिरोरुहाः। न
दंतोभैरवंनादंछिंधिभिंधीतिवादिनः। आसीनंचाहनन्शूलैःप्रह्रादंसर्वमर्मसु ४० परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनि। युक्तात्मन्यफलाआ
सन्नपुण्यस्येवसत्क्रियाः। प्रयासेपहतेतस्मिन्दैत्येंद्रःपरिशंकितः। चकारतद्वधोपायान्निर्बंधेनयुधिष्ठिर। दिग्गजैर्दंदशूकेंद्रैरभिचारावपातनैः। मायाभिः
सन्निरोधैश्चगरदानैरभोजनैः। हिमवाय्वग्निसलिलैःपर्वताक्रमणैरपि। नशशाकयदाहंतुमपापमसुरःसुतं। चिंतांदीर्घतमांप्राप्तस्तत्कर्तुंनाभ्यपद्यत।
एषमेबह्वसाधूक्तोवधोपायाश्चनिर्मिताः। तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा। वर्तमानोविदूरेवैबालोप्यजडधीरयं। नविस्मरतिमेनार्यंशुनःशेपइव
प्रभुः। अप्रमेयानुभावोयमकुतश्चिद्भयोमरः। नूनमेतद्विरोधेनमृत्युर्मेभवितानवा। इतितच्चिंतयाकिंचिन्म्लानश्रियमधोमुखं। षंडामर्कावौशनसौविविक्त
इति होचतुः ४७ ॥

उपरिपर्वतपातनैर्वा। तत्कर्तुंहननंकर्तुं। असद्धर्मैरसतांयोग्यैः। समीपेविदूरेवावर्तमानोजडधीः पटुतरबुद्धिः। अनार्यमसद्व्यवहारं। अनयामितिपाठेनयःप्राञ्जवि राम
रुद्धं। मह्यमपराधंदत्त्वाहमेनंविशसिष्यामीत्याद्यजीगर्तकृतंकर्मशुनःशेपेनयथासोढुंनशक्यतेति। इतिवत्स्मापराधकारं। हेमुच्यमानेयतास्यपातिशा १९
यंवक्ति ४७ ॥

धिष्ण्यपाश्चंद्रादित्यादयः। लोकपालावाचस्मइपधृष्याम। शिशूनांजेरवायांशयनशीलानांबुद्धिविकारसहितानांकानखकरणंगुणदोषयोःपदमास्पदंनवैहि।
गुणदोषग्रहणेबुद्धिविकासाभावादित्यर्थः। शिशूनांगुणदोषयोःपदंनास्तीतिवा। तर्हिकापरिशुद्धिरित्यत्रोच्यतइमामिति। तुनाशुनेयमेवबुद्धिरितिविशिनष्टि। कि
यंतंकालमेवमितिनत्वाह। यावदिति। तावदितिशेषः। ततश्चकिंतत्राह। बुद्धिश्चेति। यजनमीचवयसाकालविशेषविशिष्टेनापुर्लक्षणेनार्याणांसेवयास्माहितिशेषः।
यथाद्वंद्वारामोपवर्णितांरागद्वेषादिव्याप्तबुद्धिमिर्व्याख्यातां। यदाचार्योध्यापनात्परावृत्तः उपरतः गृहमेधीयकर्मस्वग्निहोत्रादिलक्षणेषुव्यापृतोवा। तदाक्ष

जितंत्वयैकेनजगत्त्रयंभ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपं। ननस्यचिंत्यंतवनाथचक्ष्महेनवैशिशूनांगुणदोषयोःपदं। इमंतुपाशैर्वरुणस्यबध्वानिधे
हिभीतोनपलायतेयथा। बुद्धिश्चपुंसोवयसार्यसेवयायावद्गुरुर्भार्गवआगमिष्यति। तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्। धर्मोह्यस्योपदेष्ट
व्योराज्ञांयोगृहमेधिनां। धर्ममर्थंचकामंचनितरांचानुपूर्वशः। प्रह्रादायोचतूराजन्प्रश्रितावनतायच। यथात्रिवर्गंगुरुभिरात्मनेउपशिक्षितं। न
साधुमेनेतच्छिक्षांद्वंद्वारामोपवर्णितां। यदाचार्यःपरावृत्तोगृहमेधीयकर्मसु। वयस्यैर्बालकैस्तत्रसोपहूतःकृतक्षणैः। अथतान्श्लक्ष्णयावाचाप्रत्या
हूयमहाबुधः। उवाचविद्वांस्तन्निष्ठांकृपयाप्रहसन्निव। तेतुतद्गौरवात्सर्वेत्यक्तक्रीडापरिच्छदाः। बालानदूषितधियोद्वंद्वारामेरितेहितैः। पर्युपासतराजेंद्र
तन्न्यस्तहृदयेक्षणाः। तानाहकरुणोमैत्रोमहाभागवतोसुरः ५६ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेपंचमोध्यायः ॥ ॥

क्षतक्षणैः कृतावसरैःवयस्यैर्बालकैः सउपहूतः क्रीडार्थमितिशेषः। सोपिचतुर्भद्राक्रमतांसोपिचतुर्भवी। सएवदाशरथीरामइत्यादिषुदृष्ट्योपप्रयोगः। अथा
गतःसत्तस्यांक्रियायांनिष्ठांस्थितिंविद्वान्तेषांवयस्यानांनिष्ठांश्रस्मिन्स्नेहविशेषंवा। द्वंद्वारामैरितैर्वचनैरीहितैःचेष्टितैश्चअदूषितधियः। सएवप्रोचुःसएव
आगाइतिकृतेप्यप्रमाणोरमतइत्यसुरः ५६ इतिसप्तमेपंचमः ॥ ॥

भा० स०

मुकुंदचरणारविंदमिंतरसेवैवेहामुत्रानन्दप्रदं अनन्यरतः सैवकुत्रप्रभृतिरनुदिने कर्तव्येति विधीयते स्मिन्नध्याये। तत्र प्रह्लादो बालकान् किमाहेत्याशंक्याह। हे तेति। बालानुकंपया बाल्यादारभ्य वा। त्वद्वचः श्रवणात्किं फलं स्यादिति तत्राह। वइति। वः सर्वतः सर्वस्माच्छिवं सुखं स्यादिति शेषः। कीदृशं वचश्शृत्यतो वाहावइति। शिवं सुभं मंगलं। ननु कस्मान्मंगलमिति तत्राह। वयस्यानिति। संसारविरक्तिजनकत्वेन पुरुषार्थहेतुत्वात् मंगलमित्यर्थः। अनेनाभुनास्माकं वाचनं मुत्रस्त्वश्रेयः संपादनाय प्रयतमहइत्याशानिरस्तेतिज्ञायते। यतोस्म हाप्रभुः कृतांतविदुलितं तस्मात्क्रीडासक्तत्वेनयुष्मद्धितविमर्शप्रमादोनकार्य इत्याह। क्रीडांधा इति। ननु बालानां लीलाधर्मत्वं स्वभावइति तत्राह। नेति। इतः पुरातना बाला श्रुतंक्षरणं क्रीडायां विवशं न कुर्वंतीति शेषः तर्हि किं कारणं प्रवर्तनमिति तत्राह। आत्मन इति अर्थे जन्म प्रभृति आत्मनोर्थेत्रात्मनः प्रिये प्रियेः परमात्मनः ज्ञाने छवः मोक्षलक्षणप्रियेच्छवो वा आत्मनः प्रियेप्रियेः स्वप्रयोजनमाकां

प्रह्लाद उवाच — हंताभकामे श्रृणुतवचो वः सर्वतः शिवं। वयस्यान्यश्यतन्मृता क्रीडांधा मा प्रमाद्यथ १ न प्रवृत्ता विवशं बालाआत्मनोर्थे प्रिये प्रियेः। मृत्यामपि नयाद्यं यदनर्थार्थकल्पनं २ यदुक्त्वा न प्रवृत्तो तस्मुनस्त्वज्ञाननिहया। नप्रहृथ्यान्मतं तत्स्य यथाधीद्वयनापकः ३ ॥

क्षमाएणः आबाल्यात्प्रबर्तंतइतिवा। नन्वस्माभिरपि शंडामर्का भ्यां गुरुभ्यां सुपदिष्टं त्रिवर्गविषयशास्त्रश्रवणं श्रेयसि प्रवर्त्यते। तत्र पूर्ववत् सरक्षतीक्षणं प्रेयं क्रीडेति तत्राह। गृहस्थमिति कुतो न श्रावयाम्यमितितत्राह। यदनर्थ इति संसारहेतुत्वादनर्थे त्रिवर्गे लक्षणे पयस्यर्थकल्पनं पत्तस्मादिति शेषः। त्रैविद्यामां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते इत्यादेः स्वार्प्रत्येनिन्यमानावरिछन्नानन्यत्वे बोवेदयं ते प्रभृहाद इत्यादेश्चानन्तपुरुषार्थया र्थत्वेनज्ञानहेतुत्वोपपत्तेः कथं तदनर्थार्थकल्पनमिति तत्राह। यदुक्त्वेति। अज्ञानलक्षणनिहया सुप्तश्चित्त्रिवर्गविषयलक्षणमाग्रहलक्षणं यथार्थज्ञानविरोधित्वाद ज्ञानं तेना मननसृज्ञानमात्रा भावः। सप्तस्यापि गुरूक्त्या प्रबोधोहिप्रयोजनं प्रगीयत्यते चेत्तदुपदेशेन किं प्रयोजनं अस्तु पतनद नुष्ठाने नानर्थ एव स्यादितिभावः। अत्रः फलितमाह नेति। अत्रो दाहरणमाह यथेति। अंधोनायको नेतायस्य सत्था। हिताहितेनोभयोरप्यधत्वात्मार्गज्ञानं नोत्पद्यते तथा अविद्यातस्माद्वद्ज्ञानकार्यो ३ ॥ रामं ३०

ननुसकल घातमर्धतः परात्रोद्यंति भूकृतः। निःक्षिप्योदर्चिमंकत्वेशेरते तेभिमारुतः। आपद्युमित्रं जानीयात्तत्र भृत्तानजन्मनि। (यतः) सत्त्वाकापेतु सनिद्योमत्तोनरः। इत्यादिनीतिशास्त्रं। शत्रुमित्रोस्य सकलक्षणज्ञापकं हितकारिद्याभ्यां नैबोध्यते जन्मतं न शृद्ध्यादित्युच्यत इति तत्राह। क इति। यः शत्रुः स आत्मनो ममपत्नोस कः। न कोपीत्याशयेोऽयं। त्वत्पक्षेश्रुद्ध भावेप्यस्मत्पक्षे स्युरिति तत्राह। देवमिति। सर्वोत्कृष्टत्वात् श्रीनारायण एव संपद्यिपदाप्रयोनतीतिमा ऽस्यान्वयव्यतिरेकाभवात्। असत्यविवादोदृष्टांतात्। आत्मनो देहस्यच्च शत्रुत्वादिसमाप्या वा सुस्थिनैर्नियैः किं स्यादपरिहार्यत्वान्मरणादिके शास्पतएव कामादिक मज्ञानसंभवंतानं तरेणनमात्रेणपरिक्षियते तेतिशेषं प्रवर्तत। ननु तर्हिमाभूद्धाम्यैनीतिशास्त्रप्रवृत्तिलक्षणधर्मशास्त्रमप्यसनीयं श्रेयोहेतुत्वात् इत्याह। य इति। यश्चात्मानं परमात्मानमुद्दिश्य धर्मकामं धर्मधर्मं न हिंस्यान्नहिंनस्त्रित्पातिकिं चानुतिष्ठतिसोतिदुर्लभः। प्रशांतात्मा कोटिष्वपिमहामतइतिस्मृतेः। अवशी हृतेंद्रियग्रामस्य भगद्विषयनिवृत्तलक्षणधर्मजिज्ञासा कथं स्यादिति तत्राह। अजन इति। येन सहजन्यतइति जनाः इंद्रियग्रामस्तस्मिन्विषये वशो न भवतिवशीकृतेंद्रियया महत्यर्थः। पद्मपुत्रमित्रादिलक्षणस्वजनवशो न स्यात्तुष्टानानुकूलपुत्रादिक इत्यर्थः। अतएवमुक्तोध्यः उक्तेछितं धर्मभावः। न चेह हि कासुष्मिकपालाकांक्षायां निह सिद्धर्मं प

कः शत्रुः क उदासीनः किंमित्रं चेह आत्मनः। भवन्त्यपिनयैः किं स्याद्देवं संपद्युपत्यदः। योन हिंस्याद्धर्मकाममात्मानं स्वजने वशः। पुनश्चौलौकयोर्हितःस्तु मुन्नां ध्योतिदुर्लभः ५ ॥

तुतिष्ठतः कथं तत्फलावाप्तिः स्यादित्याह। पुन रिति। पुनश्चार्थे निवृत्तिधर्ममनुतिष्ठतः लोकयोरिहलोकपरलोकयोर्हितश्शुभवति। पुनर्निवृत्तिधर्मानुष्ठानमंतरं वा। प्रवृत्तिनिवृत्तिधर्मयोरनुष्ठातोः पुनर्भेदो क्षिरवस्य ततः पातोस्ति इमंलोकं हीनतरं वाविशंतिक्षीणेपुण्ये मर्त्यलोकं विशंतीत्यादेः। अन्यस्य ज्ञानसामग्रीसंपाद्यततः पुनरंते वैकुंठलोकप्राप्तिश्च स्यात्। सएतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते। यं यं लोकं मनसासंविभाति विशुद्धसत्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इत्यादेः। पुनरप्यमभेद इत्यमरः। यश्चात्मानं धर्मयुक्तकामो यस्य सतथा तं वा न नैनं हिंस्यान्नपीडयति। आत्मानं प्रवृत्तिधर्मकोन्नेणापीडितं न करोति सोतिदुर्लभः। धर्मेधारके हरौ कामो यस्य सतथा निवृत्तिधर्मनिरत इत्यर्थः। तं नाधः पातयतीति वा। सततं नत्सेवानिरंतरत्वेन तदृशश्च प्रियेदिक्याः संपदः स्वतः संपद्यान्तो लोकस्यज्ञानस्यापरोक्षलक्षणस्य च पाथेयं। अत्र प्रवृत्तिनिवृत्तिलक्षणेणधर्मानुष्ठायतत्फलानि च नभगवद्भक्तिमनिशं कुर्वाणः पुरुषस्तज्जमदितितात्पर्यं ५ ॥ ॥ ३०

भा॰ स॰
सर्व ७
३१

न तु कथमिह निवृत्तिधर्मानुष्ठानस्य श्रेयःसाधनत्वं तस्य नेदानीमवसरः वार्द्धके कर्त्तव्या विनाभूतत्वात् बाल्ये विद्यां निषेवेत यौवने दारसंग्रहः स्थाविर्ये मोक्षमातिष्ठेत्तद्व
न इत्यस्मृतिरिति तत्राह । कौमार इति । सर्वदेहविशेषणाद्विद्याभ्यासकालेऽपि मोक्षधर्मानुष्ठानं कर्त्तव्यमिति न तस्य स्मृतिविरोधः । नानायोनिषु निःकायो
द्यामाचरेत इति स्मृतेरिति तत्राह । दुर्लभमिति । यन्मानुषं जन्म तदपि तदेवार्थदं ज्ञानादिप्रयोजनप्रदं । अत एव बहुपुण्यसाधनत्वाद्दुर्लभं । तर्हि चिरकालस्थायि कि
निःश्रेयसःसाधनमिति तत्राह । दुर्लभमिति । यन्मानुषं जन्म तदपि तदेवार्थदं ज्ञानादिप्रयोजनप्रदं । अत एव बहुपुण्यसाधनत्वाद्दुर्लभं । तर्हि चिरकालस्थायि कि
चेत्ताह । अध्रुवमिति । स एव मर्त्यः पश्यते स एव विनश्यते पुनः अपि सर्वजीवितमल्पमेवेत्यादिष्ठप्रदं ततः । अतः अध्रुवमपि मानुषं यज्जन्म तज्जन्म सुदुर्ल
भं तत्राप्यर्थदं दुर्लभतरं । एतद्धि दुर्लभतरं लोके जन्म यदीदृशमिति श्रुतेः । ननु कथं कारं पुरुषार्थप्रदं तत् । अन्यथा तद्वत्तां सर्वेषामपि पुरुषार्थः स्यात्तत्राऽसोऽस

कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह । दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ६ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं । यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ७ सुखमैन्द्रियकं दैत्या देहयोगेन देहिनां । सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ८ ॥ ॥

मन्निश्चत्य दर्शनादश्रवणाच्चेत्याशंक्य विविक्तिमाह । यथा हीति । इह मानुषे य यथा यदि विष्णोः पुरुषस्य विष्णोः पादोपसर्पणं संभवति तद्धि अर्थदं । यावत्सेवाप
रेतवेतावत्सुखविशेषनेतिएतद्धि शाश्वतं रञ्जयति । अतो मानुषीयो निरवनिःश्रेयसकारणं नान्या । अनेन गत्वा हि दानदं त्वेनात्यासं । अतः कौमारवयस्यारभ्य भगव
त्सेवा कर्त्तव्येति भावः । ननु श्रीहरिसेवामंतरेणान्यसेवाप्यर्थदा किं न स्यादिति तत्राह । यदेष इति । सर्वभूतप्रियत्वादिगुणयुक्त एष इति यत्तस्मादेतत्सेवैव पु
रुषार्थदानान्यसेवा । तदेतन्नेयदितिश्रुतेः । एष सर्वेश्वर इति च । इतोऽपि भगवत्सेवालक्षणनिवृत्तिधर्मानुष्ठानमेव कर्त्तव्यं न प्रवृत्तिधर्मसेवनं । विषयसुखस्यो
लभ्यायतत्त्वनुष्ठानमिति तिनोच्यतां तदंतरेणापि तल्लभ्यते । यथा दुःखमित्याह । सुखमिति । सर्वत्र नरकादावपि । सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखमिति
स्मृतेः देवात्स्वकर्मप्रेरकात् ८ ॥ ३१

अतस्तत्किमिति तत्राह । तदिति । तस्मात्प्रयासः ऐन्द्रियसुखप्राप्तये प्रवृत्तिधर्मकरणाद्बहुक्लेशोन विधेयः । कुतो न विधेय इति तत्राह । आयासेति । परं केवल
मायासेनायुषो व्ययः क्षय एवावशिष्यत इति शेषः । प्रवृत्तिधर्मानुष्ठानस्य दुःखासंभिन्नप्रदेशोद्देशात्वान्न लक्ष्यं दुःखकल्पत्वेन निंद्यत इति तत्राह । न तथेति । मु
कुंदचरणांबुजं भजन्यथा क्षेमं विंदते । प्रवृत्तिधर्मानुष्ठायी न तथानश्वरं सुखं लभत इत्यन्वयः । क्षणा द्वितेऽत्र ईदृशः यज्ञरूपा इति श्रुतेः । तस्मादिदमेव कर्त्तव्य
मिति तत्राह । तत इति चशरीरं यद्यदभीष्टं न त्वाप्रयत्नत्याह । इतोऽपि बाल्य एव मुक्तये प्रयतेतेत्याह । शरीरमिति । पौरुषं पुरुषस्य विद्यमानं पुष्कलं पुष्टं

तत्प्रयासो न कर्त्तव्यो यत आयुर्व्ययः परं । न तथा विंदते क्षेमं मुकुंदचरणांबुजं ९ ततो यतेत कुशलः क्षेमाय भयमाश्रितः । शरीरं पौरुषं या
वन्न विपद्येत पुष्कलं १० पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः । निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ११ मुग्धस्य बाल्ये कौमारे क्रीड
तो याति विंशतिः । जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः १२ दुरापूरेण कामेन मोहेन च बलीयसा । शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि १३

धपंगुत्वाद्यवयवैकल्यविधुरमित्यर्थः । विपद्येत मरणलक्षणां विपत्तिं प्राप्नोति । ततः प्रागेव यतेतेति शेषः । शतायुर्वै पुरुष इति वचनात्पुंसः शतायुः शरी
रस्थितेर्निश्चितत्वान्न दंतरान्तकालेन कश्रेयः संपादनोपपत्तेः । बाल एव निवृत्तिलक्षणश्रेयसे यतनीयमिति नियमो नापेक्षित इत्याशंक्य गर्भवासमारभ्य श
तायुः पर्यंतं द्युतः परतो वा शरीरस्यनाशदर्शनाद्यतःस्थिति निश्चयः शाश्वतः । अस्तु वा कस्य चित्तथापि तस्योपयतो दरीदृश्यते अन्यथा पारायसद्यस्त्वेन
दिनमेलनलक्षितवत्सराणां पाद्येवं नलक्षवर्षायुषेणापि मुकुंदचरणारविंदसेवालक्षणश्रेयः संपादनं दुःशकमित्याह । पुंस इति । दुरापूरेण नहि पूरा
कस्पूरणेन हि शक्यो हेतो १३ ॥ ॥

राम
३१

भा० सू०

३२

निद्रादिकमंतरायाविशिष्टकालांतरालेपिश्रेयो विघ्नहेतुरस्तीत्याह। पश्यन्नपीति। कलइलज्ञणं मतिवैषम्यं अनुसंस्मृतिमित्यनेनन्नैकोपिक्षणोनावशिष्यत इतिसूचयति। नचस्माकंश्रेयइच्छानास्ति वेदनंतेषुचेतनेषुकस्पचितांदवसरमापद्यतेतितत्राह। कइतिनच्छप्रतृत्तियर्मेणमापृच्छेयोर्थेनतत्स्पाद्धतो इतिसूचयति। मचस्माकंश्रेयइच्छानास्ति वेदनंतेषु चेतनेषु कस्पचितां इवसरमापद्यतेतितत्राह। कोन्विति। योर्थस्तदर्थतृष्णां। अर्थान्वेषणतृष्णयैवार्जितस्यव्ययोलिप्सया र्थेनसुकृतसाधयेतिवोविवेसाध मुकुंदपादसेवाकृतोनिमुच्यतइतितत्राह। कोन्विति। योर्थस्तदर्थतृष्णां। अर्थान्वेषणतृष्णयैवार्जितस्यव्ययमंतरेणकायक्लेशेनैवश्रीहरिचरणनिवे पिष्यामीतिकंठोपरिगदनिराद्वेनैवकालोयातीतिप्राणवेणापिविनेनसुकृतार्जनंदवीयइतिविन्नव्ययमंतरेणकायक्लेशेनेवश्रीहरिचरणनिवे

पश्यधृंमतिवैषम्यंज्ञातीनांनः कुटुंबिनां। श्रेयोविद्यानादायासादीहतामनुसंस्मृतिं। कोन्वर्थतृष्णां विसृजेत्प्राणेभ्योपियईप्सितः। यंक्रीणांत्यसुभिःप्रेष्ठैस्तस्करःसेवकोवणिक्। १८ कथंप्रियायाःअनुकं पितायाः संगं रहस्यंरुचिरांश्चमंत्रान्। सुहृत्सुतत्स्नेहवशःशिशूनांकलाक्षराणामनुरक्तचित्तः। पुत्रान्स्मरंस्ताडुहितृर्हृदय्याभ्रातॄन्स्वसॄर्वापितरौ चदीनौ। गृहान्मनोज्ञोरुपरिच्छदांश्चवृत्तीश्चकुल्याःपशुभृत्यवर्गान्। त्यजेतकोशस्कृदिवेहमानःकर्माणिलोभादवितृप्तकामः। औपस्थ्यजैह्वंब हुमन्यमानःकथंविरज्येतदुरंतमोहः १९

षणंजन्मसफलंकरोतीतिभावः। तत्रदर्शनंप्रमाणयति। तस्कराद्योमृताप्यर्थतृष्णांनमुंचंतीत्येतत्यरितःप्रेयकांनमुमाभूदर्थान्नेयःकामादस्त्रियांशंक्य षणंजन्मसफलंकरोतीतिभावः। नत्रदर्शनंप्रमाणयति। अभिप्रायश्च एरीतिप्रमोदानतिदीर्घेजीवितेकोरमतेत्यादिशास्त्रनिंदितत्वात्। नाद्यःविषय कीदृशोसोभगवद्भक्तिकामोवाविषयकामोवानद्वितीयः। अभिप्रायश्च एरीतिप्रमोदानतिदीर्घेजीवितेकोरमतेत्यादिशास्त्रनिंदितत्वात्। मंत्रादिदृष्टीतानांसक्तानांरसेनेतिप्रो विरक्तस्ततत्यागेनभाव्यंतस्पक्षाधनत्वादित्याह। रहस्यंरहसिभवंसंगमेपुनलक्षणंकथंत्यजेतेत्युत्तरेणान्वयः। मंत्रादिदृष्टीनांसक्तानांरसेनेतिप्रो विरक्तस्यतत्त्यागेनभाव्यं। रुचिरश्छदाश्चरुचिरयरिकराः। कुल्याःकुलपरंपरयासमागताः वृत्तीर्जीवनकरीः। कोशस्थःकोशकारीकीटः। ए षः। प्रनाः हृताः। हृदय्याःहृदयप्रियाः। रुचिरच्छदाश्चरुचिरपरिकराः। कुल्याः कुलपरंपरयासमागताः। वृत्तीर्जीवनकरीः। कोशस्थःकोशकारीकीटः। ए तदेवस्य एपतिस्रोपस्येति १९ ॥ ॥

राम

३२

यदितिज्ञत्संनिजमात्मीयमायुर्यस्यसतथा। शास्त्रविहितमर्थंश्रेयोलक्षणंनबुध्यते। स्वकुटुंबेभार्यादौरामःक्रीडायस्यसतथा। ननिर्विद्यतेविरक्तोन भवति। परवित्तहर्तुर्घोरादेरिहदेहांतेत्येपयत्सर्वमार्जितंतथाप्यनंतरमपितच्चतदेवदुःकर्महरतेनयतीत्यन्वयः। परलोकेपिविषयेष्वलंबुद्धेर्नास्ति। तिभावः। अनुत्ता विशेषप्रदर्शनायकथितमेवार्थंविशिनष्टि। विद्वानिति। स्वलोकायस्वस्मैमोक्षायस्वयोग्यज्ञानायवा। तत्रहेतुमाह। यदिति। नकेवलंमोक्षायकल्प्यतइतिन प्रत्युतानर्थंचाप्नोतीति। तमइतिविदृष्टोविपरीतज्ञानीयथातमःप्रतिपद्यतेतथायमित्यन्वयः। श्रीनारायणानुग्रहमंतरेणविद्वत्ताप्यकिंचित्करीत्याह। यतइति। शा स्त्रगुरूपदेशेनविद्वान्संसारस्यानित्यतामितिशेषः। दीनंस्वमात्मानंविमोचितुमलंसमर्थोनितियतोतइतिशेषः। यदिज्ञीवराशौकश्चिदस्तीत्यभिमानस्वद्वि

कुटुंबपोषायवियन्निजायुर्नबुध्यतेर्थंविहितंप्रमत्तः। सर्वत्रतापत्रयदुःखितात्मानिर्विद्यतेनस्वकुटुंबरामः। वित्तेषुनित्याभिनिविष्टचेताविद्वांश्चदो षंपरवित्तहर्तुः। प्रेत्येहचाथाप्यजितेंद्रियस्तदशांतकामोहरतेकुटुंबी। विद्वानपीत्थंदनुजाःकुटुंबंपुष्णन्स्वलोकायनकल्पतेवैयःस्वीयपारक्यविभि न्नभावस्तमःप्रपद्येतयथाविमूढः। यतोनकश्चित्क्वचकुत्रविद्वादीनंस्वमात्मानमलंसमर्थः। विमोचितुंवामदृशांविहारक्रीडामृगोयंनिगडोविसर्गः। ततोविदूरात्परिहृत्यदैत्यादैत्येषुसंगंविषयात्मकेषु। उपेतनारायणमादिदेवंसमुक्तसंगैरिषितोपवर्गः २४

कुत्रकस्मिन्देशेक्वचकस्मिन्कालेनकस्मिंश्चिदित्यर्थः। कुतोत्राह। वामदृशामिति। अयंपुरुषोवामदृशांविहारार्थंनिर्मितःक्रीडामृगइतिपत्रा। कथमयंत थाइदितितत्राह। निगडइति। आसामनिसर्गःकटाक्षमोक्षोयस्यनिगडःशृंखला। कृतःतस्मात्स्तइतिशेषः। एतावंतदैत्याःकटाक्षीकृत्योक्तंप्रक टमन्याचितार्थमाह। ततइति। नत्वेवंतर्हिसंसारमोक्षस्पदोर्घघ्रमापादितमितिशंकामाभूदित्यद्यर्थिताक्षितस्पुपायंवदामीत्यतीवाह। ततइति। यतोधर्मा र्थकामैर्न्यस्तार्पणबुद्धिविकित्सारद्वितेसंसारमोक्षोनसेत्स्यति। ततोदैत्येषुसंगंदूरात्परिहृत्यनारायणंशरणमुपेतयातेत्यन्वयः। सोपवर्गोमुक्तसंगैःपुत्रैरि षितोत्र्वाप्सोभवति। इच्छागताविनिधातोः २५ ॥ ॥

नेहेतुः साध्यमित्याह। नहीति। सर्वभूतानामात्मत्वान्नहिष्टत्वात्सर्वत्र व्याप्तत्वेन सुलभत्वाद्धि। नारायणस्य सेव्यत्वे हेतुधर्मविशेषणमाह। परावरेष्विति गुणसा
म्येन लयो गुणव्यतिकरे सृष्टौ। व्याप्तिप्रकारमाह। प्रत्यगात्मेति। सर्वपदार्थानामंतः प्रत्यगात्मस्वरूपेण तथा भिन्नरूपेण बहिः कालरूपेण व्याप्तेन ब्रह्मादिपर्य
पेण एवमेकरूप व्याप्यव्यापकनिर्देश्यो विकल्पितो विविधस्त्वसः। अंतर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृतः इति वाक्यसिद्धोयमर्थः। घटइव निर्देश्यो नेत्यनिर्दे
श्यः। अचिंत्यमव्यपदेश्यमेकात्म्यप्रत्ययसारमिति श्रुतिनिरूपितइत्याह। केवलेति। अनुभवो कि मितिनदृश्यतेइति तत्राह। माययेति। मायया प्रकृत्या तमसाहृ
ढ्मयइतिश्रुतेः। सत्वादिगुणैः सर्गः सृष्टिर्यस्याः सातथा तथातः सर्वभूतानि भगवन्निवासस्थानानि तस्मात्। तथाभूतदया। आसुरंभावं द्वेषं। विस्मार्य

नह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः। आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः। परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु। भौतिकेषु विकारेषु
भूतेष्वथ महत्सु च। गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा। एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः। प्रत्यगात्मस्वरूपेण कालरूपेण च स्वयं। व्याप्य
व्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः। केवलानुभवानंदस्वरूपः परमेश्वरः। माययांतर्हितैश्वर्य ईयते गुणसर्गया। तस्मात्सर्वेषु भूतेषु दयां कुरुत
सौहृदं। भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः। तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरैरिह ये स्वसिद्धाः। धर्मादिभिः किमगुणेन च कां
क्षितेन सारंजुषां चरणयोरुपगायतां नः १५ ॥ ॥

हत्वाद्भुतेषु दयाकार्या विज्ञायतेतिस्मृतेः। प्रद्विषंतोऽभ्यसूयका इति। भगवत्तुष्ट्या। किं प्रयोजनमिति तत्राह। तुष्टइति। ये स्वतःसिद्धा जन्मप्रभृतिप्राप्ताः स्तैर्गुण
व्यतिकरैर्विविधसुखैः हे ईश्वरणयोः सारंजुषां गुणलक्षणमकरंदसेवमानानां तद्गुणानांचोपगायतां गायमानानां नोऽस्माकं कांक्षितेन गुणेनान्यैर्वांछिते
न मोक्षेण किं। अपवर्गभक्तिलभ्यसुखे भक्तेः परमानंदरूपत्वात्तत्रापि सुखाधिक्यहेतुत्वात्सुतरां धर्मादिभिः कृतमां गुणव्यतिकरैः फलं नास्तीति किमु वक्त राम
व्यं। मोक्षसुखमकांक्षमाणस्य यथा सुखाविर्भवति। तथा मोक्षगं तं सुखं कांक्षमाणस्य सुखं पूर्णं न लभ्यते इत्यभिप्रायेणाकांक्षितेनेति विशेषणं। कां
क्षतो मोक्षगमपि सुखं नाकांक्षतो यथेति वचनात् १५

ननु शास्त्रविहितानां धर्मादीनां कथं कारं अफलत्वं संभवतीत्याशंकां परिहरन्नाह। धर्मेति। धर्मार्थकाम इति नाम भिन्नो यः त्रिवर्गः शास्त्रे विहितस्तस्येह ज्ञानमनुष्ठा
नं च यात्रयी त्रयो वेदास्तेषां शास्त्रतोर्थतश्च ज्ञानं यो नयदमौ नीतिदंड शास्त्रे तयोरीक्षा तात्पर्यज्ञानं या च विविधा वार्ता कृषिवाणिज्यादिलक्षणा तदीक्षा प्रयोजना
नं नाम वाक्यं चेदोपनुर्वेदः सामवेदश्च अथर्वणश्चतुर्थ इत्यारभ्य सर्वदेवयत्नन विद्येत्यंतेन पदुक्तं तस्य सर्वस्यानुकर्षणार्थश्चकारः। यदेतदुक्तं तदेतदखिलं
परमपुरुषस्य स्वात्मसर्वकसमर्पणमर्पितमुमुक्षुत्वे भवति न हि निगमस्य ऋग्वेदादिसकलशास्त्रपठितस्य सत्यं यथार्थफलमिति मन्ये इत्यन्वयः। नेदं स्व
मनीषोत्थं किंतु संप्रदायतः प्राप्तत्वाच्छ्रद्धेयमित्याह। ज्ञानमिति। नरसखोनंतसखः। अनेन विशेषणेन सनकादिभ्यउद्दिष्टमिदमिति ज्ञापितं किलशब्देन पु

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता। मन्येत देतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः १६ ज्ञा
नं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय। एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् १७ श्रुत
मेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं। धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् १८ दैत्यपुत्रा ऊचुः प्रह्लाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुं। एताभ्यां
गुरुपुत्राभ्यां बालानामपि हीश्वरौ। बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः। छिंधि नः संशयं सौम्य स्याच्चेद्विस्रंभकारणं २० इति श्रीभागवते
महापुराणे सप्तमस्कंधे षष्ठोऽध्यायः ॥ ॥

रातनत्वेन ग्राह्यत्वं दर्शयति। ज्ञानाधिकारिण आह। एकांतिनामिति। तवकुतः प्राप्तमेतदत आह। श्रुतमिति। एतस्मिन्नवसरे दैत्यपुत्राः प्रह्लादकथितार्थ
शंकयाते पृच्छंतीत्याह। प्रह्लादेति। एताभ्यां गुरुपुत्राभ्यां षंडामर्काभ्यां ऋते नान्यं गुरुं विद्महे यस्मात्। किंच विज्ञानं चेश्वरविषयं विवक्षितं तदुपाधिनापि वा
नानामपि ईश्वरौ नियंतारावस्माकं ईश्वरः न कोपि तदृति यस्मात्। अन्यगुर्वभावेपीश्वरउपदेष्टा स्यादतो आह। बालानामिति। बालानामीश्वरोस्यपि किं नाभि
प्रतिपत्त्यभावात्। कस्मिंश्चिदवसरे देशांतरे त्वया महत्संगतिः किं न स्यादिति तत्राह। बालस्येति। तस्माद्युत्पन्नं नः संशयं जहीत्यन्वयः। तन्नवृत्त्यमाज्ञ इत्याह। स्या
च्चेदिति २० इति सप्तमे षष्ठोऽध्यायः ॥ ॥

अतो भगवत्सु साधनानां भक्तेरेव प्राधान्यं हरेर्मुख्यप्रसादहेतुकत्वाद्भक्तिरेव कर्तव्येत्याद्युपदेशं चिकीर्षुः निरूप्यते अस्मिन्नध्याये। भक्तिप्रतिपादनात्मकवाक्यस्य शास्त्रस्य पुनः पुनः श्रवणं प्रतिपादनं च पुनरुक्तिः पंक्ताकार्या। तत्र दैत्यपुत्रैः पृष्टः प्रह्लादः किं चकारेति युधिष्ठिरशंकां चित्तज्ञो परिहरन्नारदस्त्राह। नारद इति। नारदस्य मातुः शासनं। अहिः सर्पः पिपीलिकैर्यथा भक्ष्यते तथा लोकोपतापनः पापो हिरण्यकशिपुः स्वपापेन भक्षितः प्रायो भूत् तद्दिष्ट्या सुखमभूल्लोकार्थेति सुराणां दिष्ट्या समुद्यो येत्यमरः। व्यलुम्पन् जयकाङ्क्षिणो जितमुद्रा अमुरजयेन प्रकाशमाना वा। तवोपभोक्तुं योग्यानां भवतीत्याह परपरिग्रहमिति। सु

नारद उवाच एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः। उवाच स्मयमानस्तान्स्मरन्मदनुभाषितं १ प्रह्लाद उवाच पितरि प्रस्थितेऽस्माकं तपसे मंदराचलं। युद्धोद्योगं परं चक्रुर्विबुधा दानवान्प्रति २ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापिनः। पापेन पापोऽभक्षीति वादिनो वासवादयः। तेषामतिबलोद्योगं निशम्यासुरयूथपाः। वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं। कलत्रपुत्रवित्ताप्तान्गृहान्पशुपरिच्छदान्। नावेक्ष्यमाणास्त्वरिताः सर्वे प्राणपरीप्सवः। व्यलुंपन्राजशिबिरममरा जयकांक्षिणः। इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत्। नीयमानां भयोद्विग्नां रुदतीं कुररीमिव। यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि। प्राह नैनां सुरपते नेतुमर्हस्यनागसीं। मुंच मुंच महाभाग सतीं परपरिग्रहं ८ इंद्र उवाच आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः। आस्यतां यावत्प्रसवो मोक्ष्येऽर्थपदवीं गतः ९ नारद उवाच अयं निष्किल्बिषः साक्षान्महाभागवतो महान्। त्वया न प्राप्स्यते संस्थामनंतानुचरो बली १० ॥ ॥

रहितो हिरण्यकशिपोर्वीर्यं रेतो लक्षणं। अस्या यावत्प्रसवः तावन्मम वशे आस्यतां पश्चादहं मोक्ष्ये। ततः पूर्वं कस्मान्न मुंचसीति तत्राह। अर्थपदवीमिति। अनया प्रसूतं पुत्रमहं हंतुं त्वया न शक्यत इत्याह न त्वया प्राप्स्यत इति। संस्थां मरणं। कुतो नाह। अनंतेति १० ॥ ॥

अनंतप्रियः श्रीनारायणः। अस्य महत्त्वादनंतस्य हरेः प्रिया वक्ष्यमानलक्षणा भक्तिरनंतप्रियां भक्तिरूपा वा। तावद्द्रोष्यतामित्याह। ऋतं त्वंपतिकेति। अंतर्वत्नी गर्भिणी गर्भक्षेमं इच्छाप्रसवं चेत्युभयं। ईश्वरो वरप्रदानसमर्थः। नारदाश्च तमित्यनेन नारदस्य पक्षपातत्वमभिप्रेतं एवंविधमित्याह। धर्मस्येति। धर्मस्य हरेर्भागवतसंज्ञस्य वा तत्त्वं तद्उभयविधज्ञानं च य द्वर्मस्यं मामुद्दिश्य मा चेउपदिष्टं तदुभयं तयोः कालस्यातिक्रांतत्वात् स्त्रीत्वात् शब्दादिविषयलोल्या

इत्युक्तस्तां विहायेंद्रो देवर्षेर्मानयन्वचः। अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ११ ततो नो मातरमृषिः समानीय निजाश्रमं। आश्वास्याहोष्यतां वत्से यावत्ते भर्तुरागमः १२ तथेत्यवात्सीद्देवर्षेरंतिके साप्यकुतोभया। यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत १३ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती। अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये १४ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः। धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलं ॥१५॥ तत्तु कालस्य दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे। ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः १६ भवतामपि भूयान्मे यदि श्रद्दधते वचः। वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा १७ ॥ ॥

च मातुस्तिरोहितमभूदित्यन्वयः। अपरे त्वधर्म इत्युक्तेः धर्मो ह्रिस्सुवत्किमभूदिति तत्राह। ऋषिणेति। ततोऽस्माकं किं प्रयोजनमिति तत्राह। भवतामपीति। यथा मे वैशारदी धीः भगवद्विषयज्ञानमस्त्तथा तद्वद्भवतामपि भूयादित्यन्वयः। न केवलं पुंसामेव स्त्रीणां बालानां च श्रद्धातः तस्या इत्याह श्रद्धात इति। यदि स्त्रीबालानां श्रद्धा स्यात्तस्मिन्निति वा १७ ॥ ॥

भा॰ स॰

मज्ञाहन्नेषांस्त्ववरुपिप्रज्ञामुत्पाद्यनारदोक्तंज्ञानमुपदिशति। जन्माद्या इति। जातः कंसवधार्थं मधुमारहरणाय चाजनि नोन विष्णोरित्यादिश्रुतेर्हरेर्जन्मादिकं प्रती
यते। तत्र जन्मादिमतो देहस्यैव न तु भगवतः शरीरस्य स्वतः शरीरयोगप्रभोगप्राप्त्या कुलचित्तस्य सर्वसमर्पणानुगुणफलदानं कथं घटते इत्यादिशंकां दैत्यपुत्रचित्त
स्थां परिहरन्निव त्वतो वाह। जन्माद्या इति। इमे षड्भावा जन्मास्तित्ववृद्धिपरिणामापक्षयविनाशाख्यविकाराः देहस्य दृष्टाः स्वत्वेनोपलभिताः आत्मनः परमात्मनोऽनंतात्म्यस्य
षड्विकाराः शरीरस्य न विष्णोर्भगवतः स्य तु विकारेण निरस्तत्वात्। दृष्टांतस्तु फलस्य यथा। फलानामिति वसंताद्य वयवविशेषेण कालेन वृक्षस्य प्रतादि फलानां
जन्मादिकं दृश्यते। यथा वृक्षस्य कालाधीनत्वं तथा देहस्येश्वराधीनत्वं इति। ज्ञापनाय ईश्वरमूर्तिनेत्युक्तं। देवदत्तस्य सर्वमिदं मदधीनमिति मिथ्याज्ञाननिरर
सायो कृमिदं नात्पर्यमिति ज्ञातव्यं। तदुक्तं। तदधीनं शरीरं च ज्ञात्वा तन्मम नोत्सृजेदिति १८ क्षेत्रज्ञः पुरुषोऽध्यात्मा सेसाक्षी चेतनो मत इत्युक्तेरात्मा जीवः

३५

किं नस्यादित्यत स्तन्निवर्तकलक्षणमाह। आत्मेति। परैरन्यासाधारणैः द्वादशभिरात्मनो हरेर्लक्षणैः स्वरूपभूतैरुपेत इति विद्वान् हं समेत्यतदभ्या

जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः। फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना। आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः। अविक्रियः स्व
दृग्धेतुर्व्यापकोऽसंग्यनावृतः। एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः। अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० ॥ ॥

वमतत्त्वं मोहजमज्ञानजं देहादौ जेत्यदित्यन्वयः। नित्यः स्वरूपतो विनाशरहितः। अव्ययः वाद्यव्ययो नाशोऽन्यव्ययः। प्रकृतिनिर्मितशरीराप्रत्वेनाविद्यारागा
दिदोषविधुरत्वाच्छुद्धः। एको मुख्यः मुख्यत्वं हरेरेव स्वरूपज्ञानेन क्षेत्राख्यशरीरज्ञातृत्वात् क्षेत्रज्ञः आश्रयः गुणानां। अविक्रियः स्वतः परतो वा परिणाम
रहितः स्वमात्मानं स्वयमेव द्रक्ष्यति पश्यतीति स्वदृक्। तद्यथावेदाहं ब्रह्मास्मीति श्रुतिः वश्योपराधीनः स्वतंत्र इति यावत् वशं यापयतिः सर्वमिति वा व्यापको
नर्वहरि विशेषः। आकाशो नालिमोदे त्यिकृतेः। भूताकाशस्य परिछिन्नत्वाद्व्याकृतस्य विव्यकृत्यात्मकत्वेन भगवदनुगृहीतत्वेन तस्याः व्यापकत्व

राम

मुपचरितमस्यनेति भावत्येव व्यापकः। अप्राकृतत्वादसंगी। असंगो ह्ययं पुरुष इति श्रुतेः। अनावृतोऽज्ञानाद्यावरणरहितः। एवं विधलक्षणोपेतस्यवि

३५

ष्णोः स्वहितत्वाच्छरीरस्य तदधीनत्वेन तस्मिन् देहे ममतां त्यजेदित्यर्थः २० ॥ ॥

हरेर्देहादिभ्यो विविक्तत्वेन ज्ञानोत्पत्तिप्रकारं वक्ति हेममिति। यथा हेमकोऽपाव सुक्षेत्रेषु निकषाश्मस्थानेषु हेमकारो क्षेत्रेषु हेमवत्सु पाषाणेषु वा योगैर्हेमावा
प्त्युपायैः कर्षणक्षालनादिपरीक्षालक्षणैः हेमं प्राप्नुयादित्यन्वयः। नसर्वस्य सुशाकमित्यत उक्तं तदभिज्ञ इति। तथा मुमुक्षुः पुरुष आत्मयोगैः श्रौत्पात्तिकमन्त्राद्य
पायैः देहेषु क्षेत्रेषु सम्यगालोच्य विविच्य ब्रह्मगतिं लभेत देहादिभ्यो वैलक्षण्येन ब्रह्मविषयज्ञानमाप्नोतीत्यन्वयः। कोऽसावधिकारी त्यत उक्तं। अध्यात्मविदि
ति। तरति शोकमात्मविदिति श्रुतेः। आत्मानमधिकृत्य वर्तमानं वेदांतशास्त्रं अध्यात्मं तद्वेत्ति सम्यक् जानातीति सात्त्विकाधिमावोध्यात्मं गृह्णातीति वा। महा
भूतादिर्वाध्यात्मं तद्वेत्तीति अध्यात्मवित्। कानि महाभूतादीनीति तत्राह। अष्टाविति। मूलप्रकृतिर्महदादयः सप्तैव मष्टौ प्रकृतयः। सत्त्वादिगुणानां प्रकृता
वंतर्भावसंभवेनाष्टत्वमुक्तमिति भावेनाह। त्रय एवेति। तस्याः प्रकृतेर्गुणास्तद्गुणाः प्रकृतिजत्वाद्विकाराश्च तद्ग्रहणेन गृहीता इति नाष्टत्वासंभव इत्याशये

हेमं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात्। क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत २१
अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः। विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२ ॥ ॥ ॥

नाह। विकारा इति। मनसा सहैकादशेंद्रियाणि शब्दादिविषयाश्चेति विकाराः षोडशेति सर्वाचार्यैः संख्याता इति शेषः हरेरेवानुगतत्वेन विकारसंभवादेभिः
सह किं न पठित इति तत्राह। पुमानिति। समन्वयादिति ल्यब्लोपे पंचमी। समन्वयमनुगतं प्राप्यैकः पुमान्नारायण एक एव स्वच्छंद इत्यतो विकारेषु न परि
गणित इत्यर्थः। अत्रेदं तात्पर्यमवगंतव्यं तथा हि। अभिमन्यमानजडापेक्षया पुमाञ्जीवः पंचविंशोऽभिमानिचेतनविवक्षया विष्णुः षड्विंश इति सम्यगनुया
त्रियं तत्त्वेनानुगतिज्ञानाक्षेप इति। तदुक्तं। अभिमानपेक्षया विष्णुः पंचविंश इति स्मृतः। जडाद्यपेक्षया जीवः सम्यक् स्रेयो हरिः स्मृत इति। यद्वाकाशादि
पंचभूतानि सत्त्वादित्रयो गुणाः इत्यष्टौ प्रकृतयः। तत्र मूलप्रकृतिमहदहंकाराणामाकाशादिष्वनुगतत्वेन पृथग्ग्रहणं न क्रियते। गुणानां तदात्मक
त्वेन गुणग्रहणेन तद्ग्रहणोपपत्तेः शेषं पूर्ववत् २२ ॥ ॥

तत्वसंख्याकथनेनङ्कृतेः किमायातमितितत्राह देह इति। सर्वेषां पञ्चतिनत्कार्याणां संघातः समूहस्तन्निर्मितइत्यर्थः तत्वेभ्योयत्तदभिमानिभ्योविविक्तम्
परमात्माज्ञातव्यइत्यभिप्रायेणतत्वसंख्यानंकृतमितीममर्थंदर्शयतितदाह्नेनदेहशह्नेनप्रपंचोविवक्षितइतिकृत्वातंदेहंविभजतिजगत्स्वप्नोद्भिष्टत्या
व्याख्येयः। जगत्समस्तंजगत्तुंगमं। तस्थुःस्थावरमितिद्विधाविभक्तं किंवानइत्यतआह। अत्रेति। नतत्वाकृञ्जतत्र भवतीत्यतत्वकृत्यादिकंयत्नशाङ्क्यत्वासुतः
सर्वदाभिन्नइत्यर्थः प्रयुक्तः स्पर्शषड्गुणोनैवदेहलक्षणेनप्रपंचेमृग्योत्वेषणीयोकिंवार्थेक्तानव्यइतियावत्। शास्त्रप्रत्ययेनसदापञ्चत्यादित्याशोनकोदावित्व
इतिभ्रुवपति। तत्रकिंप्रमाणमितितत्राह। नेति। सएषनेतिनेत्यात्मेतिश्रुतिः प्रमाणमित्यर्थः पोतत्यजभुक्तेनेतिवा। अतत्त्वजनीत्यततत्पकृतेनातस्मजेतिवा
पाठः। कयायुक्त्याशृग्यतइतितत्राह। अन्वयेति। अन्वययुक्तव्यतिरेकेणयत्रयत्रजगत्तत्रतत्रब्रह्मेत्यन्वयः। यत्रयत्रब्रह्मनतत्रतत्रजगत्परीछित्वा दि

देहस्थसर्वसंघातोजगत्तस्थुरितिद्विधा। अत्रैवस्पृश्यःप्रयुक्तोनेतिनेतीत्यतस्मजाद १३
अन्वयव्यतिरेकेणविवेकेनागतात्मना। सर्गस्थानसमाम्नायेविमृशद्भिरसत्वरैः १४

व्यतिरेकलक्षणयुक्त्याआकाशवत्तुजगदच्छितत्वेनपरेतदसंगलक्षणपृथक्कृतेनवेतियुक्त्या निश्चितेनविवेकेनागतेनयुक्तेनात्मनात्मनस्तानुव्याप्ति
याहकप्रमाणमावेनाहमत्वानयानिर्णयस्यादितितत्राहसर्गेति। अत्रसर्गस्थानाभ्यांसंहारादिकमुपलक्ष्यते। नसहितात्वरामेवैन्नअसत्वराः स्रोःसर्वेषुराधी
यंतेतावत्कृत्यइंद्रोवलंददातीतिसर्वेप्राणेयज्ञाअनिरक्षाविहृतावंकृत्याःप्रजापतेरात्मानंपरिददानीतिसर्वेसर्गात्तेशोनानमिनिहृतावकृत्याप्र
त्योरात्मानंपरिहरिणीयेतिश्रुतेः। विमृशद्भिः विचारंकुर्वद्भिः कोनआत्माकिंब्रह्मेत्यादिश्रुतेः। सर्गस्थानादिविषयैःसमाम्नायैनिर्दोषगुणोपेतैर्वेदैः। यतो
वाइमानिभूतानिजायंतेयेनजातानिजीवंतीत्यादिलक्षणैरंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितइत्यादिकैश्चानुगृहीतया। १५ ॥ ॥

विमृश्यनिर्णयप्रकारंदर्शयति। बुद्धेरिति। सत्वबुध्यादिशाहेमकाजीवोपिकविदीयतेइति वचनाबुद्धेर्जीवस्यजागरणस्याहस्त्रयः अवस्थाप्रायेनजेरितेनजी
वेनानुभूयंते। जाग्रदाद्याः कमचिवसुखदुःखेचतस्यहीति वचनात्। सपरःपुरुषोध्यक्षः जाग्रदादेर्द्रष्टा। जाग्रदादेःपरोद्रष्टासत्तुनित्योहरिःस्मृतइतिवचनात्तो
ध्यक्षःजाग्रदादिनाधिगतेंद्रियसुखदुःखपरोजीवःपरोविश्वादिविग्रहाद्धरेरन्यइत्युत्तराद्दस्याधर्मेलोज्ञानव्यः। एवशाहेनकालादिकंव्यावर्त्यतिका
र्यकारणवर्जितोविष्णेतेविश्वतैजसौ। प्राज्ञःकारणबद्धस्थितिवचनाद्विश्वादिक्रियहान्नाशयणादन्यत्वेजीवस्यकथंजीवधर्माक्रांतत्वान्नस्यतितत्राह। एभि
रिति। बुद्धीनांजीवानांभेदःतारतम्यलक्षणोपेक्षोप्यतेतैर्जीवतारतम्यज्ञापकैरतएवपर्यक्षैरेकत्रसमक्षैरेभिः त्रिगुणैःस्त्रिधावर्णैर्वर्णनंयेषांतेतथा
तैर्जाग्रदादिभिस्त्रयोवर्णाःशुक्लपीतकृष्णलक्षणायेषांतेसत्वादिगुणौर्वासपरमात्माअज्ञजनदृष्ट्यात्मनोजीवस्यसमरूपंरूपेणसमानंरूपंकामी

बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितित्रयः। तायेनैवानुभूयंतेसोध्यक्षःपुरुषःपरः २५ ॥
एभिस्त्रिवर्णैःपर्यक्षैर्बुद्धिभेदैःक्रियोद्भवैः। स्वरूपमात्मनोभजेगंधैर्वायुरिवान्वयात् २६ ॥

दिवद्भजनइतिहवपते। ननुप्राज्ञजनदृष्ट्यातद्दृष्ट्याज्ञानानंदादिसमानंरूपंधृत्वातत्स्वरूपंभजनइति। सजीदेनसहस्थानात्तत्स्वरूपःप्रदृश्यतइतिस्व
तेः। अन्वयाद्दक्षिणाद्यादिप्रगुणतत्वात्कीदृशैःक्रियोद्भवैःक्रियायाउद्भवोयेभ्यस्तेतथातैःकर्मजनितैःयद्वाक्रियायाउद्भवोयेभ्योगुणेभ्यस्तेतथातैःसु
कृततत्वजन्यंजागरणंपीतजोतत्वंस्वप्नंकृष्णतमोजन्याःसुषुप्तिःकर्माण्येवंविधानि। अत्रात्मेकांलोहितशुक्लकृष्णामितिश्रुतेः। कुत्रान्वयवद्भजतेदृष्ट
इतितत्राह। गंधैरिति। यथागंधैरन्वयात्सौरभ्यादिगंधसंपर्कात्सुगंधोदुर्गंधोमिश्रगंधोवायुरितिव्यवह्रियतेनतावतानादात्म्यंवायोस्तथात्वेसर्वदात
थास्यात्। नचैवंतस्माद्भिन्नएववायुःतथाहरिरपि। तथागेमयुतोनिलइतिच। तन्दृष्ट्वातदेवानुप्राविशत्। तदनुप्रविश्यसच्चत्यच्चाभवदितिश्रुतिःदे
हात्व्यपंचसंपर्केस्त्रिवहरेरितिभावः २६ ॥ ॥

भा॰स॰

अभेददर्शनेबाधकमाह।एतद्द्वारइति।इममभेददर्शनंद्वारंयस्यसंसारस्यसतथाद्वंसःसंसारःप्राप्यतेहियस्मात्द्रष्टेजीवपरयोर्भेदस्यापत्तिर्संसृतिरितिवचनात्
तत्रअभेददर्शनेकारणमाह।गुणेति।अभेददर्शनजनकत्वेनगुणकर्मणोःसंसारनिमित्तत्वमाहतस्येतिविशेषः।कर्मणःकारणमज्ञानंतद्द्वारासंसारस्याश
येनाह।अज्ञानेति।अज्ञाननिमित्तकर्मपरंपरयामुग्धमनसःअभेदनिश्चयादतत्त्वमेवशरणमित्याशयेनाह।अपार्थइति।अपागतनिवृत्तिरूपमसइतिशे
षः।अर्थस्याद्विषयेमोहशब्दवाच्यप्रयोजने।व्यवहारेवशास्त्रेवक्तृहेतुनिवृत्तिविषयमित्यभिधानात्।महाकार्थेऽपिमइतिप्रयोगात्।अभेदनिश्चयाद्यातित
मोनास्त्यत्रसंशयइतिस्मृतेः।अपिशब्देननित्यदुःखभूयिष्ठतमःप्राप्तिंसूचयति।दुःखरूपोऽपिसंसारोबुद्धिशर्ममवाप्यतइतिसंसारस्रमः।इंद्रियार्थसन्नि

२७

एतद्द्वारोहिसंसारोगुणकर्मनिबंधनः।अज्ञानमूलोपार्थोपिपुंसःस्वप्नइवाप्यते २७ मनोमयत्वात्सर्वार्थाःस्वप्नजागरयोःसमाः।दृष्टानर्था
नपिध्यानुःशोकमोहभयप्रदाः २८ परस्यनिर्गुणस्यापिसंबद्धजन्माप्ययोव्यक्तंनष्टतःहरिसंचिंतयासर्वेप्रयांतिपरमंपदं २९ ॥ ॥

कर्थादर्थेपिनबिभीयत।नापदनुभवसंस्कारोपस्थापितविषयाभासोपलब्धिःस्वप्नः।उपरतस्थूलइंद्रियविषयज्ञानंसुषुप्तिः।अत्रजाग्रद्दृष्टस्कृतप
दार्थसंस्कारसहकृतमनःस्वप्नेशिरश्छेदनादिलक्षणेदुःखादिहेतुर्यथातथाजाग्रदपिअज्ञाइंवहतोनर्थपरंपराहष्टिवजीवपरयोरभेदज्ञानतःपुंसस्तजाग्र
दुःखसाकल्यहेतुरित्यर्थः।यथास्वप्नेशिरःछेदंस्वयंकृत्वातन्मनोवशात्ततोदुःखमवाप्नोतितथाजाग्रदितिपितु।जानन्नप्यात्मनोदुःखमवशःकृपणवर्ततइतिस्मृ
तेर्दर्शनात्।अर्थक्रियाकारित्वात्स्वप्नादेर्मिथ्यात्वमित्याहमनोमयत्वादिति।मनसानिर्मितकर्मनिमित्तत्वादनित्यत्वाभिप्रायेणस्वप्नजाग्रत्साम्यं।अन्यथा
ध्यानकमोहभयप्रदाइत्येतदसंबद्धंस्यात्।नचात्रुक्तिरसतादिकंवलपकरणास्त्रियोपं २९ ॥ ॥

राम
२७

विपक्षेबाधकमुक्त्वाविपर्ययेपर्यवसानस्थलेनसंसारबीजनिर्हरणोपायमाह।तस्मादिति।यस्मात्संसोगुणकर्मनिमित्ताभेददर्शनद्वारासंसारस्तस्मादभेददर्शने
मित्तत्रिगुणमयकर्मबीजभर्जनोपायोभक्तिःकर्तव्यइत्यन्वयः।नचाग्निष्टोमादिकर्मांतरेणकर्मणांबीजदाहःतस्यलिंगशरीरस्यहननोपायःकोसौपमनियम
दिलक्षणःश्रेयस्योभयत्रसाधारणत्वेनानंतरंगत्वात्।तत्रअज्ञापाकनिर्लिप्तमग्निर्दहनयोगाद्दहनइवाइत्यतस्तद्बाधनंवक्तव्यमितितत्राह।प्रवाहइति।धियः
प्रवाहस्यसजातीयविजातीयप्रत्ययानंतरितत्वयाविषयाविषयीकरणनिपुणोपासनालक्षणस्यतंरूढेपातिरज्ञातीत्युपःउपाधिकइतिसूत्रउपःसर्वाधि
कोवापरमेश्वरस्वस्मिन्रमणंनिरंतरंश्रीनारायणचरणसरसिजसंचिंतनलक्षणोपासनात्मकएतदेवेत्यभिप्रायः।धियःप्रवाहस्यांतरंगसाधनमाह।तत्रे
ति।भगवतेत्यनेनत्याग्दात्वेश्रासस्नेहत्वंदर्शयति।बाधकमाह।नेति।भक्त्यागुरुशुश्रूषया।यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ।इतिश्रुतेसर्वलाभार्प

तस्माद्भवद्भिःकर्तव्यःकर्मणांत्रिगुणात्मनां।बीजनिर्हरणोयोगःप्रवाहोपरमोधियः २८ तत्रोपायसहस्राणामयंभगवतोदितः।यदीश्वरेभगव
तिभक्तिःस्यान्नान्यथारतिः २९ गुरुशुश्रूषयाभक्त्यासर्वलाभार्पणेनच।संगेनसाधुभक्तानामीश्वराराधनेनच ३० श्रद्धयातत्कथायांचकी
र्तनैर्गुणकर्मणां।तत्पदांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१ ॥ ॥

णेनहराविति शेषः।ब्रह्मार्पणंब्रह्महविरित्यादेः।साधुभक्तानां।नावेक्ष्यबाधदातव्यंनोदबिंदुनतंडुलमित्यादेः।नियतभगवद्भक्तानांसेवालक्षणप्रसंगे
नमहत्सेवांद्वारमाहुर्विमुक्तेरित्यादेः।ईश्वराराधनेनपंचरात्रोक्तेनपंचकालीनभगवत्पूजनया।पंचकालपरायणः।पंचकालेकमनस्सामित्यादेः।तत्क
थापाश्रद्धयापानेनतेदेवकथासुधापामित्यादेः।गुणकर्मणांसंकीर्तनैः।कलौसंकीर्त्यकेशवमित्यादेः।विषयविरक्तिंध्यानविधानार्थंतत्पदांबुरुहध्या
नादिभिःसंचिंतयेद्भगवतश्चरणारविंदइत्यादेः।तस्यहरेःलिंगंप्रतिमातस्येक्षणादर्शनंअर्हणंपूजनं।आदिशब्देनप्रदक्षिणादयोगृह्यन्ते।वर्हापितेतेनयने
नराणांइत्यादेः ३१

भा॰स॰

३८

इति। सर्वेषु भूतेष्वित्यादिना हरिरेव दृश्यः। ननु भूतानि योग्यतातिरेके गौणीदमेव कथ्यते। ईश्वरो जीवकलया प्रविष्ट इत्यादेर्वा। यथा सन्नाह होरोरतिमुपासनं ल
भते। तस्मात्स्वरूपानंदानुभवलक्षणां रतिं लभत इति परंपरया योत्स्यं (अ) थाह। निकर्माणि सवधादीनि वीर्याणि नृहरिनादिकं न सर्वभक्तसाधारणं। तदुक्तं।
केचिद्भक्ताः प्रहृष्यंति गायंति च यथेप्सितं। केचित्तूष्णीं भजंत्येव केचिन्मोभयकारिणः इति। एतदेवाह। तद्भावेति। तस्य भावे यथास्वरूपे भावो भक्तिस्तस्मादनु
कृते अनुकूलत्वेन प्रकटिते आशयाकृती अंतःकरणाकारौ यस्य स तथा। कश्चिद्रुद्रानंतरोभक्तिं प्रकटयति। कश्चिद्रोदनाश्रुपातकरणेन कश्चिन्नर्तनेन क
श्चित्तूष्णीं भजनेनेति। तस्य ब्रह्मणो भावो लीला तत्र यो भावो भक्तिस्तया रंधि हितानि आपाकारइतिवा। स्यानेनिभाय आशय इति वा। निर्दग्धं कर्मबीजं यस्य

इति। सर्वेषु भूतेषु भगवानास्त ईश्वरः। इति भूतानि मनसा कामैस्तैः साधु मानयेत्। एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे। वासुदेवे भगवति यया संल
भते रतिं। निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि। यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति। यदा ग्रहग्रस्त इव क्व
चिद्धसत्याक्रंदते ध्यायति वंदते जनं। मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः। तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशया
कृतिः। निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं। अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं। तद्ब्रह्मनिर्वाणसुखं वि
दुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं॥ ॥

स तथा। स चासावनुशयो अंतःकरणं यस्य स तथा। अनुशयः संस्कारो वा। भक्त्यनंतरं भगवत्कथा निर्वाणसुखजननीत्याह। अधोक्षजेति। अधोक्षजालंभं स्मृति च
क्रशातनं छिनत्ति। शातनं नाशनं। तद्धरिविषयकथाकथनं ब्रह्मनिर्वाणसुखं ब्रह्मणोनुग्रहात्प्राप्यमुक्तिसुखं विदुरिति यत्ततो देहहृदये स्थितं जीव हृदि स्थि
तमीश्वरं भजध्वमित्यन्वयः। योयं वहिर्विष्णुरुपादाकाशो यो वै संवाव सयोयमंतः पुरुष आकाशो यो वै सोंतः पुरुष आकाशो यं वाव सयो यमंतर्हृदयआकाश
इति श्रुतेः। हृदीश्वरं मनः प्रेरकत्वेन तत्स्वामिनं। सहि सर्वमनोवृत्तिप्रेरकः। समुदाहृत इति वाक्यार्थः॥ ॥

राम

३८

भक्तौ तदुपासनं दर्शयस्वेन दूरापेक्षा अभावेनैव भागीरथी पात्रवत् दुःसाधनं किंचेत्याह। कोतिप्रयास इति। अस्यात्मनो जीवस्य सख्युः स्वाधीनेन हृदि छिद्रवदाका
शवत्सतः स्थितस्य हरेरुपासने कोतिप्रयासः। न कोपि। सर्वगतत्वेन समीपस्थत्वात्। तद्दूरे तद्वंतिक इति श्रुतेः। अशेषदेहिनां सामान्यतः साधारणत्वेन हरिर्हि
तत्वेन सख्युः तस्माद्विषयोपपादनैः किं। शास्त्रैरिति शेषः। भक्तेरंतरंगसाधनं वैराग्यमेवेत्याशयेनाह। राय इति। विहितयज्ञसाध्यत्वेन स्वर्गादेर्नित्यत्वं संभाव्यापि
तिमेत्याह। एवमिति। एवं मर्त्यलोकवत्तत्र निर्मलाः प्राकृतत्वात्। न दृष्टं श्रुतं दूषणं यस्य स तथा तं। सहचरीभूतवैराग्येणैकया मुख्यया आत्मलब्धये स्वरूपा
नंदानुभवलक्षणमुक्तिप्राप्त्यर्थं। आत्मनो देहादेर्विविक्तस्य स्वरूपज्ञानलक्षणलाभाय वा। भगवदर्पणबुध्यानुष्ठितयज्ञादिकर्मानर्थानर्थहेतुरित्याशयेना

कोतिप्रयासोसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः। स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः। रायः कलत्रं पशवः सु
तादयो गृहा मही कुंजरकोशभूतयः। सर्वेर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः। एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सा
तिशया न निर्मलाः। तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये। यदर्थ इह कर्माणि विद्वन्मान्यसकृन्नरः। करोत्यतो विपर्यासममोघं विंदते
फलं। सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः। सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ३६ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः। स वै दे
हस्तु पारक्यो भंगुरो यात्युपैति च। किमु व्यवहितापत्यदारागारधनादयः। राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः। किमेतैरात्मनस्तुच्छैः सह दे
हेन नश्वरैः। अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ३९

हा। यदर्थमिति। पुत्रेत्यादिविध्यंगानि विपर्यासं दुःखं अमोघं सहातनत्वेनावध्यं। एतदेव विवृणोति। सुखायेति। ब्रह्मार्पणलक्षणेन करणमनीहा तदुक्तं।
अप्रयत्नेन करणमनीहा प्रोच्यते बुधैरिति। शाश्वतसुखानुभवकामं विहाय शरीरसुखकामं अयतमानो विमूढत्वेनेति। अस्योर्जुबुधैरित्याशयेनाह। कामानि
ति। काम्याः कामाः विषयास्तदर्थमपि स्वशरीरस्यार्थपारक्यत्वं श्वसृगालादेर्विद्यमानो न स्वकीयः। व्यवहिताः शरीरमपेक्ष्य दूरस्थाः। ननु विषयभोगार्थमपी
नारायणे पि वियहेश्क्तानीति केचिन्नत्राह। किमेतैरिति। आत्मनो हरेः। तस्मान्नित्यचिदानंदस्वरूपस्य जीवस्य भौतिकादिना किंन किमपि कृत्यं किमित्यतो वा
ह। किमेतैरिति ३९ ॥

भा० स०

विवारासहत्वान्न देहादिनाप्रयोजनमित्याह। निरूप्यतामिति। निषेकादिषु गर्भाधानादिषु अवस्थासु क्रमेण क्लिश्यमानस्य देहस्य ततः किं पार्थक्यं एवमिति नि
रूप्यतामित्यन्वयः। स सारस्य प्रवाहरूपेण नित्यत्वान्न दृष्टेर्ज्ञानमंतरेण निष्कृतिः स्यादित्याशयेनाह। कर्माणीति। आत्मानुवर्तिना परमात्माधीनेन। कर्म देहश्च
उभयमविवेकतोऽज्ञानात्। न चेश्वरसेवायां भक्तिरेव प्रयोजिका चेन्नोपायान्तरं प्रयोजनमित्याशंकां परिहरन्नुपसंहरति। तस्मादिति। अर्थो देहोऽर्थविषयत्वेषा
फल्गुमवतीत्यर्थः। ननु प्रतीतं चेष्टारहितस्य मनीहश ह्यर्थ कल्पने किं प्रमाणं उक्तं हि प्रमाणमिति चेन्न। तस्यैव इच्छया विलेनचाभिप्रेतार्थ संदेहादित्करणं का
रणं कार्यसाधने नुत्रतादिविदुक्तेरितित्याह। बीजमिति। व्यंजकत्वाद्बीजं जगतः इति शेषः। श्रमसाध्य क्रियाराहित्यादनीह। मित्यस्योक्त एवार्थः। अप्रयत्नेने   ३९

निरूपिता मिहस्वार्थः क्रियाद्देहभृतो बुधाः। निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः। कर्माण्यारभते देही देहेनात्मानुवर्तिना। कर्म मिश्रनुते देह
मुभयं त्वविवेकतः। तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः। भजतानीहयात्मानमनीहं हरिमीश्वरं। सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः। भूतै
र्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः। देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव वा। भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं। नालं द्विजत्वं देवत्वमृषित्वं वासुरा
त्मजाः। प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता। न दानं न तपो नेज्या न शौचं न व्रतानि च। प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनं। ततो हरौ भगवति भक्तिं कुरुत
दानवाः। आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे। दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः। खगा मृगाः पापजीवाः संति ह्यच्युततां गताः   ४८

निविशेषणाद्व्यश्रम साध्यक्रियाराहित्यमेवोच्यते। स्पष्टाद्भ्याक्ष्यारणा भेदेध्यानपद्मासनादिषु। व्रतबंधेनाद्यभेदे ज्ञात कर्मणीद्रियस्तुत्तरवाक्ये कर्मणप
प्रयोगाच्च। व्यंजनाज्ज्ञगतो विश्वबीजं न परिणामतः इति वचनात्त नवीजश ब्दस्य विकारोऽर्थः। अप्रयत्नेनेति अविक्रियः स्वदगावश्यइति द्योक्तेः। भूतानामुक्त   राम
त्यादिनाभक्तभावेना निविशेषो भूतादिविशेषोऽप्यकिंचित्करत्वाह। नालमिति। वृत्तमाचारः वृत्तं स्वरूपे चरित इतियादवः। आत्मौपम्येनात्मस्नेहेवत्स्नेहे
न। वेदांतादिशास्त्रानधिकारित्वेन पापजीवत्वेनत्तुपाप करणात। अच्युततां अच्युतिवर्जनं मोक्षं गताः संतिहि यस्मात्तस्मान्मुकुंदभक्तिरेव संपाद्या ४८   ३९

तात्पर्यान्नरोत्तरे वह्निकारणं श्रेयइत्याह। एतावानिति। तत्रहृहरेः सर्वभूतात्मत्वेनावस्थितेरीक्षणं दर्शनं ज्ञानमिति यदीयं भक्तिरिति   सप्तमे सप्तमः
वैराग्यावेशोपांगरुचिरभक्तिसुंदरीसुंदराकारवस्त्रविवेशलक्षणपरमपुरुषार्थकरणपटुतर चरितेत्येत निदर्शयितुं नरसिंहावतारो निरूप्यते स्मिन्नध्याये। तत्र दैत्य
सुतैः प्रह्लादवर्णितं श्रुत्वा किं कृतं मितिशुश्रूषमाणस्य मानसीशंकां परिहरति। अथेति। निरवद्यत्वान्निर्दोषत्वात्। एकांते हरौ सम्यक्स्थितां एवं क्ये स्थितां अभिविप्रमाभि
तिवाय थाथा वत्साकल्पेना यथाते स्वैनो क्तं गृहीतं तथेति वातन यस्मान्नयं च सिद्धांतविरुद्धसिद्धांतं। पापेन पापसाधनेन। यमङ्गवयं समहह। कस्य वलं यस्य

एतावानेव लोकेऽस्मिन्पुंसां स्वार्थः परः स्मृतः। एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं   ४९   इति श्रीभागवते महापुराणे सप्तमस्कंधे सप्तमोऽध्यायः
नारद उवाच   अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितं। जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं। १। अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थितां। आलक्ष्य
भीतस्त्वरितो राज्ञ आवेदयद्यथा। श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं। कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे २ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणं।
आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा। प्रश्रयावनतं दांतं बद्धांजलिमवस्थितं। सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः। हे दुर्विनीत मंदात्मन्कुलभेदक   आ५
राधम। स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं। क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः। तस्य मेऽभीतवन्मूढ शासनं किं बलोऽत्यगाः ७ प्रह्लाद उवाच
न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषां। परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः। स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेंद्रिया
त्मा। स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः   ९   ॥   ॥

स किंबलः। मद्बलमनादृत्य त्वं बलभृतः क इत्यर्थः। किं बलमित्यस्योत्तरमाह। न केवलमिति। बाहत्यनेन बलमानंदर्यं जश्च सहोजा मम नाकुलमिति श्रु
तिं सूचयति। पराश्चावराश्च परावरा एत देवविमृश्यति। स्थिरजंगमा इत्यादिना। ननु स्याण्मन्ये प्रपद्यते शरीरत्वाय देहिनामिति श्रुतेः। शिवं बलेवर्दंतिके
चित्। कालाङ्कवंतिश्रुता नि मन्यंते कालचिंतकाः इत्यतः कालमयं कथं निर्णयः परमात्मबलमिति तन्नाह। सइति   ९   ॥   ॥

भा॰स॰ कृतो न संति विद्विष इति तत्राह। ऋत इति। उत्पथस्थितात्तत्वमार्गविरुद्धमार्गनिरतादजितादवशीकृतादात्मनो मनस आदींद्रियग्रामात्ते शुद्धमन
आदिना विचार्यमाणे शत्रवो न संतीत्यर्थः। ननु तर्हि दंपुद्वेष्यमंपरं चक्रुर्विबुधा दानवाश्चेत्यादि कथं संगच्छते तत्त्वाशंक्याप्यापोगपतादर्शनं लक्षणं
समत्वं कर्तव्यं। अन्यथा शास्त्रविरोध इति भावेनोक्तस्य महत्फलमाह। तद्धीति। तत्र योरपतानुसारेण तस्मनोधारणं हरेः समर्हणं विद्धीत्यन्वयः। नेतदन्य
५० किंतु महदिति। एतदेव विशदयति। दस्यूनिति। एके मंदाः प्राक् पुरं शरीरं लुंपतः षड्दस्यून्षडिंद्रियाण्यचोरानविजित्य दशदिशः स्वेन जिता इति मन्यंते तद्व

ऋते जितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्तमर्हणं। दस्यून्पुरा षण्न विजित्य
जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः।
लुंपतो मन्यंत एके स्वजिता दिशो दश। जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ११ हिरण्यकशिपुरुवाच व्यक्तं त्वं
मर्तुकामोसि योतिमात्रं विकत्थसे। मुमूर्षूणां हि मंदात्मन्ननु स्युर्विक्लवा गिरः। यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः। क्वासौ यदि स सर्वत्र क
स्मात्स्तंभे न दृश्यते। सोहं विकत्थमानस्य शिरः कायाद्धरामि ते। गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितः॥ ॥

त्यक्ष्यः। आंतरशत्रुजयं विना कुतो बाह्यशत्रुजय इति भावेनाह। जितेति। परे बाह्यशत्रवः। मद्वाण एके माद्दृशाः षडिंद्रियजयो नास्ति चेत्तद्बाह्यशत्रुविषयाद
शादिशः सुष्ठु जिता इति मन्यंते। एवं पूर्ववत् अस्य रावे शोदधिमग्नत्वात्पुत्रोक्तं तत्वं न तस्याश्रोत्रविवरगतम् अस्तु तारिच्छित्पाद्यहोमवद्दुष्टः इति भावेनोत्त
रमवतारयति। व्यक्तमिति। अतिमात्रं वक्तव्यमाशास्य किं विकत्थसे अवद्धं भाषसे विक्लवा मंदूकक्रतिवद्संगताः। यदित्वदुक्तं मुक्तं स्यात्तर्हि तत्र प्रतीये
तत् तस्मात्संवद्ध मिति भावेनाह। यस्त्वयेति। यस्येदं फलितमित्याह। सोहमिति। गोपायेत रक्षेत १४ ॥ ॥ ५०

यदिंद्रियस्वेतिवमहार्हस्य संभावितत्वान्तत्राह। एवमिति। स्तंभभंगेनाधेयपातेन सम्यगंगं शरीरं यद्रूर्णनादिव्यथासंभाविते स्याशंक्य स्वगकर्त्तनेभानवजवक्त्रनि
भुरस्तंभोत्थनिनदं स्तंभनिर्ह्लादोह इत्याह। तदैवेति। अस्फुरत्स्फुटितम्। स्वधिष्ण्योपगतं स्वकीयत्वेनाभिमतं सत्यलोकं प्राप्तं स्वधामात्ययं स्वलोकनाशं। तदाहि
रण्यकशिपुः किं कृतवानिति तदवस्थामाह। अभिक्रमन्निति। पुत्रमभिक्रमन् पदविक्षेपं कुर्वन् तस्य निर्ह्लादस्य पदं विषयं कर्तृभूतं न ददर्शेत्यन्वयः। येन
नादेन। अनेन हिरण्यकशिपोर्हृदयसाराविष्टायोदर्शितमिति ज्ञायते। आकाशविशेषगुणस्य शब्दस्य चेतनाश्रयत्वेन दर्शनात्किमिदमिति मीमांसमानेषुस डा॰

नारद उवाच एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः। खड्गं प्रगृह्योत्पतितो वरासनात्स्तंभं तताडातिबलः स्वमुष्टिना १५ तदैव
तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत्। यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमंगमेनिरे १६ अभिक्रमन्पुत्रवधेप्सुरोज
सा निशम्य निर्ह्लादमपूर्वमद्भुतं। अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः। सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चा
त्मनः। अदृश्यतात्यद्भुतरूपमुद्वहन्स्तंभे सभायां न मृगं न मानुषं। स सत्त्वमेवं परितो विपश्यन्स्तंभस्य मध्यादनुनिर्जिहानं। नायं मृगो नापि नरो विचित्रम
हो किमेतन्नृमृगेंद्ररूपं। मीमांसमानस्य समुत्थितोग्रतो नृसिंहरूपस्तदलं भयानकं। प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननं २०

स्तुतदाश्रयोप्यदर्शि। सत्यं विधातुमिति। रूपं विशिनष्टि। न मृगमिति। नाभावान्य विरोधे भितिवृत्तमात्। न मृगं केवलं मृगस्य विद्यमानं। न भवति। न मानुषं मा
नुष्यस्य विद्यमानं। किंतु तयोः समाहार लक्षणं एवं विधं सत्वं प्राणिविशिष्टं रूपमुद्वहन्स्तस्याग्रेग्रतः समुत्थितो दृश्यते। तत्र किं विशिष्टस्य स्तंभस्य मध्यान्नि
र्जिहानमुन्निःसृमानमेतत् नृमृगेंद्ररूपं किमिति मीमांसमानस्य विचारं कुर्वतः हिरण्यकशिपोः। तद्रूपं विशिनष्टि। तदलमित्यादिना। चामीकरं सुवर्णं सटा केसरैः
कर्णांतरोमविशेषलक्षणां तैर्जृंभितं विकसितमाननं यस्य तथा॥ ॥

करालाः भूराः दंष्ट्रा यस्य स तथा। करवालवत्चंचहासवत्चंचलाच क्षुरांतः क्षुरधारावद्व्यवस्थिता जिह्वा यस्य तत् तथा। तत् भ्रुकुट्या मुखेन सर्वभागेनोल्वणं भ्र
रोः संक्षोभः दोः क्षोभः क्षोभकर्णौ यस्य तत् तथा तद्गिरिकंदरवत् अद्भुतं व्यात्तं वास्य नासापुटं च यस्य तत् तथा ततः हनु भेदेन विदीर्णकपोलेन भीषणं यथा नवका श्री
वा तोरं बृहत्वक्षस्य लंच मानितथा श्रूदीर्घपीवरा ग्रीवोरुवक्षस्थलानि यस्य तत् तथा तत् चंद्रांशुगौरैः स्फुरितं करेण विशेषिते भित्यभिधाना ततः चंद्रांशु
वर्णविशेषैः रेरुणौरस्त्रस्तरुहैः स्फुरितं व्याप्तं। पीनेत्युपोनिनो गौर इत्यभिधानं। विष्वक् व्याप्तं भुजानीकशतैर्युक्तं। वज्रवत् व्यापेक्ष्य यानी केतुं क्रां। निजमा भीयनि

करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं। स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं २१ दिविस्पृशत्कायम
दीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं। चंद्रांशुगौरैः स्फुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं २२ दुरासदं सर्वनिजेतरायुधप्रवेकवि
द्रावितदैत्यदानवं। प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किं। एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः। अलक्षितो
ग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोऽसुरस्तदा २५ ॥ ॥

त्ययोरित्यभिधानात्। निज्ञान्यात्मीयानि नखापेक्षये तराणि चक्रादीन्यायुधानि तैः आयुधप्रवेकैः आयुधश्रेष्ठैः विद्राविता दैत्यदानवा येन तत् तथाभूतं कं तत्। प
हानिजं सहजं न खलक्षणं मानुषं इतराणि पृथक्स्थितानि चक्रादीनि। मे अयं रक्षारिणा नेन हरिणा मायेन मम मायं वधः स्मृ
तो निरूपितः किं स्मृतोऽवधोऽयं किमिति वा। कीदृशस्य अमेयप्रवधे समुद्यतस्य प्रवृत्तस्य एवंविधः शास्त्रे प्रसिद्धो विहितः सोऽयमद्य प्राप्तः किं वेति। एवं विवक्ष
प्रवधाभिप्रेतः किं न्वेत्याह। एवमिति। अभ्यपतदित्यत्रोक्तं नृसिंहं प्रति दैत्यकुंजरः दैत्येन्द्रः। अथ नादं दर्शनमाह। अलक्षित इति। अलक्षितः सन् इत्याह
त्विकः पतंगमः शलभः २५ ॥

श्चिसमलोकैः कारैः केवलं तुच्छीकरणं भगवद्दृष्टिर्विशेषश्यान्नत्वनत इति नेत्याह। नतद्विति। सत्वधामनि बल ज्ञान समाहारः शूरः पराक्रम शौर्यो वा जगदादौ तमः
पानं पुरुषरूपेण अनेन जगदावकरतमः पानतो हरेः स्फुरस्य भस्मीकरणं किमिति दर्शितं। अथ लोकं विदुं वयतो हरेः स्फुरेण सहस्रमरण कारं वर्णयति। तत इ
ति। तस्य गदा शिक्षा लाघवं वक्ति। स तस्येति। हस्तोत्कलितः हस्तात् दलितः उत्प्लुतो वा। तस्य हरेः ऋद्धिं वन मजातु नाम मरारणं निरूपण प्रकारं वक्ति। अ साध्वि
ति। हतो जरः भष्टाव ऐंभाद्व घनेनच्छादनाद्धाछादनं येषां तेन आमेघ छायायां विलीनाइव लुप्तोपमेयं। स कौधिष्ण्यपाः स दिव्य चपतयः चंद्रादयो मरुतः नद
साध्वमन्यंते त्वत्रयः तत्र हेतुस्त मन्यमान इति। हरेः ईसमुक्तो सुरः तं हरिं निजवीर्यं आत्मपराक्रमे शं किं तं मन्यमानोऽभूदिति यत्र दिति। हरेः ईसमुक्तो

न तद्विचित्रं खलु सत्वधामनि स्वतेजसा यो नु पुरापिबत्तमः। ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया। तं विक्रमंतं सगदं गदाधरो महोर
गं तार्क्ष्यसुतो यथाग्रहीत्। स तस्य हस्तोत्कलितस्तदासुरो विक्रीडितो यद्वदहिर्गरुत्मतः। असाध्वमन्यंत हृतौजसो मरा घनच्छदा भारत सर्वधिष्ण्यपाः। तं
मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः। पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन गतश्रमो मृधे। तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंत
मच्छिद्रमुपर्यधो हरिः। कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः। विष्वक् स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचं
३० ॥

सुरः परात् वत्र उत्तप्याप नदिति तं कायो मा भूदित्याह। पुनस्तमिति। आसज्जत आसक्तोऽभूत् स्थं ज्ञाय संत्रद्धोऽभूदित्यर्थः। शतचंद्र चर्मभिः शतचंद्र चर्म भांरव
कचर्मणीति प्रकृतत्वात्। भद्रंकरैर्भिः स्फुरणयामरेवाद्यस्यादिक्रांतेः छांदसाभिप्रायेण यं प्रयोगः संभाव्यते वा। परिभ्रमणोशिक्षा प्रकर्षः इह हरिणा हेय एव
हनीवहृश्यतेहत्यतोवावकृवचनं मुज्यते। अच्छिद्रं निरवकाशमिति क्रियाविशेषणेनैतदेव सूचयति। असुर वीर्यमा शंकमानो हरिः किम करोदिति तत्राह। हरि
रिति। विष्वक् परितः स्फुरंतं भ्रमंतं रत्यने नापि शिक्षोत्कर्षं च न पानि हरिः पुनर्यद्गणो नानुरमक्क सेदिति शेषः। अनेनातुर स्फुरलक्षयति। तत्र दृष्टांत माह। व्या
ल इति। व्यालः सर्पः खनन शीलत्वादा खुः ३० ॥ ॥

भा॰स॰

४२

असङ्गवद्गृहीतार्थमोहाद्गृहीतिह्यार्थं धृत्विरश्चीनदारुणोयित्वोरुराबंकेउत्रानंतयापात्यश्चापिहत्वत्यंहासं सरंभेणदुष्प्रेक्ष्ये व्यात्तानने तिक्रकोपेनदुष्प्रेक्ष्ये कराले लोचने यस्य व्यात्ताननान्तं विहृत्य वदनस्याग्रे ओष्ठं असृग्लवरुधिरबिंदुभोक्तेनिरूपिते अरुणे केसराननेयस्य स तथोक्तः स हरिः सिंहः न केवल मेनमेव हतवान् किंतु तदनुचरानप्युदायुधानित्याह । नखांकुरेति । अहन् हतवान् । नखशस्त्रपाणिभिः नखैः शस्त्रैः पाणिभिश्च दोर्दण्डानां यूथाः अनुपथाः निकराः हष्टाः तद्वेग मारविक्रमं वक्ति । सटाविधूता इति । दिगिभा दिग्गजाः । जक्ष्मा क्ष्मावंतः प्रोत्सर्पत प्रोदसर्पत क्षोभितेत्यर्थः । सभायामुपविष्टं वक्ति । ततइति । संभृततेजसं

द्यार्थस्तदापातदद्दार लीलया नखैर्यथाहिं गरुडो महाविषं । संरंभदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन् स्वजिह्वया । असृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः । नखांकुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् । अहन्समस्तान्नखशस्त्रपाणिभिर्दोर्दण्डयूथोनुपथान् सहस्रशः । सटावधूता जलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः । अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः । द्यौस्तत्सटोत्क्षिप्तविमानसंकुला प्रोत्सर्पत क्ष्मा च पदाभिपीडिता । शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे । ततः सभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुं । अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन । निशाम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे । प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः । तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां । सुरानका दुंदुभयोथ जघ्निरे गंधर्वमुख्या ननृतुर्जगुः स्त्रियः ३१

राज्ञीकृतजसं अलक्षितं न केनापि दृष्टं द्वैरथं द्वंद्वयुद्धं यस्य अत्यमर्षणं यन्यतः केनापि न लक्षितः तदंकुरं व्यक्तादर्शनादित्याशंक्य उद्भवकोपोपशमनं श्रीप्रणामेव तुष्टाक मितिभावेनसुरस्त्रीपुष्पवर्षप्रकारमाह । निशाम्येति । लोकत्रयस्य मस्तकज्वरं शिरोरोगायमाणं प्रहर्षातिरेकेणोत्कलितविकासितमाननं यासां ताः स्वथा नाः सुरस्त्री हृष्टपुष्पैर्रम्याघ्राणेन किंचिच्छांतकोपित्वादस्मा कमप्युपसरमवसर इति मत्वा नानां देवानां नभसि विमानावलिसंकुलत्वप्रकारं वक्ति । तदेति । सुराणामानका दुंदुभय

राम

श ३१ ४२

वंदन्त्याशानां चिन्ताज्वरकारी इति रेखेतिभावेन ब्रह्मादीनामुपक्रममाह । तदुपव्रज्येति । येषु तेषु यथावत्तत्र नातते ब्रह्मादयः तेषु यागी इरिरित्यत्र्ययः नातिदूरचराः किंचित्समीपवर्तिनः । तत्रापृथक् पृथक् हरिलज्जायाकृतिपक्वारेतां नतोस्मीति । गुणैः सत्वादिभिः स्वलीलया प्रवर्तमानस्तल्लीलया आत्मात्मने नित्यदेहाय येनायमसुरोहतः । स कोपकालो युगांतः युगावसानो चितोनेदानीमित्यसुरहननेनतस्मात्कोपं संहृत्यानुसृतत्वदीयमिमं तत्सुतं प्रह्लादं रक्षेत्यन्वयः । हे परम नस्त्रायता भवता दैत्यहृताय ज्ञे तद्भागा यज्ञभागाः प्रत्यानीताः स्वन्वयः । तपोबलेनदैत्येनाक्रांतं निमीलितं च तव गृहं तव वासमयोग्यं हृदयकमलं त्वया बोधि विकसितमस्माकं भवतेति शेषः । विरक्तिभक्तिभ्यामेव वशीकर्तुं योग्यो नान्येनेत्याशयेनाह । कालेति । नाथ

तदुपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः । ऋषयः पितरः सिद्धा विद्याधरमहोरगाः । मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः । यक्षाः किंपुरुषास्तात वेतालाः सहकिन्नराः । ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः । मूर्ध्नि बद्धांजलिपुटा आसीनं तीव्रतेजसं । ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ४०

ब्रह्मोवाच कोपकालो युगांतस्ते हतोयमसुरोल्पकः । तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ४१ इंद्र उवाच प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यबोधि । कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किं ४२

ऋषय ऊचुः त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज । तद्विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमं

×नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे । विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदध×त्यात्मने ४४ ते

रिदं स्वर्गादिस्थानं कालग्रस्तं कियत्सुखजनकं न किमपीति मत्वा त्यजंति । तेषु शुश्रूषतां त्वां सेवमानानां तेषां करगता मुक्तिरपि बहुमता न हि यस्मात्तस्मात् हे नारसिंह तेषां भक्तानां अपरैर्धर्मादिभिः आसैः किमित्यन्वयः । हे आदिपुरुष त्वं यदात्मतेजः आत्मनो हरेर्ज्ञानलक्षणं तेजस्तपो नोस्माकं परमं श्रेयसे आत्थ । येन तपसा आलोचनेन रूपेण महि प्रेदं समस्तं आत्मगतं वा संसर्ज शरण्यपाल अमुना दैत्येन विप्रलुप्तं तत्तपोजगद्रक्षार्थं गृहीतवपुषा नरतिं ज्ञात्मना । पुनरप्यस्मान्प्रतिकर्तव्यत्वं मन्यस्वाङ्गीकुर्वित्यर्थः । तपआलोचनं तपो धानतः मत्पत्तानमयं तपइति श्रुतेश्च भगवज्ज्ञानसादृश्यादस्यात्मतेजस्त्वमेवं वचनं युज्यते । विप्रलोपस्तिरोधानं नेष्टरूपनाशः ४४ ॥ ॥

भा॰ स्क॰ ४२

येन बाल्येविदीर्णवपावक्षविदारितो ज्ञातः तस्मै हे तस्पोदराद् आर्छत । इत्यागताविति धातोः । श्राद्धान्यस्माकमगमयदित्यन्वयः । योगसिद्धामणिमाद्यष्टैश्वर्यल
क्षणां गतिं योगः पवनविजयः । तपः कायक्लेशः । बलं क्षणं तयोर्बलेन नानादर्पयिष्यमस्तथा । पृथगंगाद्विलक्षणास्य हरेर्धारणया अनुरुद्धां उपासनानुलब्धां ।
विद्यामन्तर्ध्यानलक्षणां । असंख्ये रणे । अर्थे दत्तानंदा । निदेशकारिणः आज्ञाकारिणः । हे परेश त्वयाभिसृष्टाः येन दैत्येन निषिद्धा वयं प्रजाः न सृजामो वै ।
सदैत्यस्त्वये वह इदानीं भिन्नवक्षाः शेते तत्राप्यभवतारो जगन्मंगलं जगति शुभसारभूतं जगतो मंगलमुद्दिश्य एवं हीतो वा । नटो नटनं कथाबंधवचनं ।

पितर ऊचुः ॥ श्राद्धानि नोधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेपि पिबत्तिलांबु । तस्योदरान्नखविदीर्णवपाद्य आर्छत्तस्मै नमो भगवते खि
लकर्मधर्म ॥ ४५ सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन । नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ४६
विद्याधरा ऊचुः ॥ विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः । स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ४७ नागा ऊचुः ॥
येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः । तद्वक्षःपाटनेनासां दत्तानंद नमोस्तु ते ४८ मनव ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देव प
रिभूतसेतवः । भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ४९ प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा न येन प्र
जा वै सृजामो निषिद्धाः । स एष त्वया भिन्नवक्षा नु शेते जगन्मंगलं सत्त्वमूर्तेवतारः ५० गंधर्वा ऊचुः ॥ वयं विभो ते नटनाट्यगायका येनात्मसा
द्वीर्यबलौजसा कृताः । स एव नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ५१ चारणा ऊचुः ॥ हरे तवांघ्रिपंकजं भवापवर्गमाश्रि
ताः । यदेष साधुहृच्छयस्त्वयासुरः समापितः ५२ ॥ ॥

गंधर्वा ऊचुः नाट्यं नृत्यं गायाभिनयदर्शनं एतयोर्यापकाः एतदुक्तं नटनं तु कथाबंधं नाट्यं कंभावदर्शनमिति । वीर्यबलौजसा येनात्मसात्स्वाधीनाः कृताः । कल्पते स
मर्थो भवति । साधून् हरंतीति साधुहृतः सज्जनास्तेषां शय आशयः । साधूनां हृदयं शयति तापत्वेनेति वा । समापितः विनाशं गमितः । भवस्यापवर्गस्मा
र्गं यस्मात्तत्तथा तेद्भवात्संसारान्मोक्षो यस्मात्तत्तथेति वा ५१ ॥ ॥

राम
४२

पंचतां विनाशं हे पंचविंश चतुर्विंशानां तत्त्वानां नियंतरिति शेषः । किंपुरुषाः पुरुषाभासाः । सत्रेषु सभासु सत्रकारिणः हि इष्टा तु स्वं कर्तुं वितनयाहीनतया कीर्तिमानं
कर्म विष्टिः । हरिनरयो इति द्वंद्वः एवं करोतीति वृजिनकर्तुः यः प्रत्ययः अपसादितः । अपहत्य नाशितः । विभवाय संसारान्मुक्तये हरिनरवताक्षात्मनं तांक
थं कथापहं गद इति श्रोतुरांतरीं शंकां परिहरन्नाह । एवमिति । एवं स्तुवंतोपि उपेतुं समीपं गंतुं मन्युकोपसारंभं तं । मन्युरब्दो धन इति पाठः ज्ञानसारं
४ योः सिंहनरयोः रूपं विधिकरो भृत्यः किंतु विप्रशापादसुरयोनिमाप्तस्य इति सप्तमेऽष्टमः । अत्रापि भक्तमाहात्म्यमेव प्रकटयति । ब्रह्मादिदे

यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं । स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पं
चविंश ५२ किंपुरुषा ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः । अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यतः ५३ वैतालिका ऊचुः ॥
सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे । यस्तामनैषीद्वशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथामयः ५४ किंनरा ऊचुः ॥ वय
मीश किंनरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः । भवता हरे स वृजिनोवसादितो नरसिंह नाथ विभवाय नो भव ५५ विष्णुपार्षदा
ऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म । सोयं ते विधिकर ईश विप्रशापात्तस्येदं निधनमनुग्रहाय विद्मः ५६ इति श्री
भागवते महापुराणे सप्तमस्कंधे अष्टमोध्यायः ॥ नारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः । नोपैतुमशकन्मन्युसंरंभं सुदुरासदं १

वत्यपसारमिति श्रुतेः ज्ञानिविवह्लेयेतत । ननु तर्हि कथं समीपं गंतुं नाशकन्नित्युच्यत इति चेद्दुर्ज्ञेयत्वज्ञापनायेति नात्यर्थं न तत्र वह्निर्गच्छति न वा गच्छति ।
तेभ्यो ह्यपादुर्बभूव तच्च वध्यमानं तेत्यादि श्रुतेः । एतदेव दर्शयति सुदुरासदमिति । सुखेन विषयीकर्तुमशक्यं १ ॥ ॥

एतदेव विवृणोति साक्षादिति। सरब्धत्वात्स्त्रिया इत्यर्थः साक्षादिति। अदृष्टाश्रुतपूर्वत्वादन्यैः साक्षात्रोऽनैरिति शेषः। ह्यपेतानित्यसक्ता विस्पादे। तां हित्वोपे
याय शंकिते त्येतत्कथं घटतीति चेत्। मयापीश्वरः परिच्छेद्यो न भवतीति किं तत्परिज्ञापनाया सुरजनमोहनायेति वा। अदृष्टाश्रुतपूर्वत्वादन्यैः साक्षादारो
जनैः। नृसिंहं शंकिते व श्रीर्लोकमोहायनेयया वितिवाक्यसिद्धिं समेदा नीश्रुक्राद्देवात्सल्यातिशयो ह्लिभक्तानां मत्स्ये वाति णयफलाधिक्यार्थमिति भगव
न्मनोज्ञापनाय ब्रह्मणा प्रह्लादः प्रेरित इत्याशयेनाह प्रह्लादमिति। अपमपिलक्ष्मीकांतसमीपागमने हेतुरन्यथा प्रह्लादे वात्सल्यातिशयो न प्रकटितः स्या

साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं। अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता २ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके। तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ३ तथेति शनकै राजन्महाभागवतोऽर्भकः। उपेत्य भुवि कायेन ननाम विधृतांजलिः ४ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः। उत्थाप्य तच्छीर्ष्ण्यदधात्करांबुजं कालाहिवित्रस्तधियां कृताभयं ५ ॥

ततस्तु क्तौ। प्रह्लादे देवैर्वात्सल्यं दर्शनाय हरेरपि। ज्ञात्वा मनं सदा ब्रह्मा प्रह्लादं प्रेषयन्नदेति। प्रकृष्टो ह्लादो निर्वृतिर्यस्य तं तथा। इत्यनेन प्रह्लादशब्दनि
रुक्तिः सूचिता। लक्ष्म्यादिवत्सलतो हित्वा प्रह्लादे तत्करणं हरेर्वैषम्यबुद्धिर्नाशंकनीया। असुरजनमोहनार्थापि पत्रे रुक्मं एकत्रैव वात्सल्यं विशेषाद्दर्शयेद्ध
रिः। अवरस्यापि मोहायेति। भक्त्यादिदानं नैवं करोति किंतु वात्सल्यानुसारेणेत्यभिप्रायेण दर्शितं कमेणेवापि वत्सल इत्युक्तौ। उपेत्येत्युपेत्य नृहरेः पद्म
देवात्सल्यातिशयं दर्शयति। स्वपादमूले इति। ब्रह्मादिकरांबुजेऽप्योहरेः करांबुजं विशिनष्टि कालाहीति। कालाव्याहिना निर्दष्टाश्च स्वाधीर्येषां तेषां तथा तेषां ५ ॥

इतरकरस्पर्शवैशिष्ट्यं दर्शयन्येशकरस्पर्शफलाभिव्यक्तिं वक्ति। स तत्करेति। स नरवत्करस्पर्शविभक्तासमस्तपापत्वान्नत्क्षणएवं सम्यगुक्तरीतिपरमात्मज्ञानाः अ
भिव्यक्तं हरेरात्मनः संसारिणःश्वरदर्शनं स्वरूपविषयज्ञानं यस्य स तथेति वा। किंच हृद्क्लिन्नं लक्षणाऽश्रुतंजलैनाद्रीकृतांतःकरणः। अश्रूणि पुरो लोचनेयस्य स तथा। त
त्वज्ञानमस्योत्पन्नमित्यस्य किं चिह्नमित्यतस्तत्कृत्याव्यज्यत इति भावेन दर्शयति। अस्तौषीदिति। सत्वानित्याविर्भूतं ज्ञानसमाहारः एकएव नान्य इति विज्ञानमति विशि

स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः। तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः। अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः। प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ७ प्रह्लाद उवाच ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः। नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः। मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः। नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय ९ ॥ ॥

तद्बुद्धिर्येषां ते सत्वैकतानमतयः यद्वा सत्वेइ इरारेव नियतबुद्धयः। अधुनापरतः परस्परस्यां तं नाविनैव यांतिस्म इरिरुग्रजातेरसुरजातेर्मे तोष्टुमर्हतीति किं वित्यन्वयः।
न ते विशावितिश्रुतेः। भक्त्यानन्यभक्त्यैव यूथपाय गजेंद्राय। सेनाने तं तेलि गोंद्रे पूथमाथः ... अनेन धनादिकमपि भक्त्युपष्टं हितं सफलमित्युक्तं भवति ९

इतोपि भक्तिरेव भगवत्प्रसादे प्रधानसाधनमित्याह विप्रादिति। द्विषड्गुणाद्द्वादशगुणा एते द्वादश। ज्ञानं च सत्यं च दमः शमश्चामात्सर्यं ह्रीस्तितिक्षानसूया यज्ञश्च दानं
च धृतिः श्रुतं च महाव्रता द्वादश ब्राह्मणस्य। एतेभ्यः श्वपचोद्धादशोभ्यः सर्वामपीमां पृथिवीं प्रशिष्यात् त्रिभिर्द्वाभ्यामेकतो वा विशिष्टो नास्य समस्तीति सं चेदितम् द्
येते भक्तिमत एव वशं भवंति। नान्यस्य कश्चित्तं भवेष्यत तो न ते भ्योर्थः स्यात्। अनेवंविन्तु एव कर्म करोतीति तद्व्याख्यानतः शीघ्रत एवेति श्रुतेः। तस्माद्भक्तिरेव प्रयोजिकेति
नात्पर्यं। स कुलं मनश्चादिकं पुनाति विषयोपरक्तं मलं निरस्य दर्पणवत् स्वच्छं करोति जगत्पुनातीति वा। यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा। तस्येंद्रिया
णि वश्यानि सदश्वा इव सारथेरिति श्रुतेः। अन्यत्र बाधकमाह। नत्विति। भूरिमानो अहं कर्तेत्यभिमानवान् नैव पुनाति स्वयम्। समर्थमन्यमेव यस्तु कर्तीति वंह को

> विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठं। मन्ये तदर्पि
> तमनोवचनार्थगेहप्राणः पुनाति स कुलं न तु भूरिमानः १० ॥ ॥

दर्ं। तस्मिन्नर्थाहि महत्त्वं त्वं भगवत्वेत्यभारतः। मत्समो ह्यगदासु द्वेशथिव्यां नास्ति भारतेत्यासीत्वश्चिदतिक्रान्तो भवितावानकश्चनेत्यादि भारतो उपेयं भगो क्वाह्रं
कारप्रतीते देवं विप्रो भूरिमान इत्यर्थः। नाविरतो दुश्चरितो न्नाशांतो नासमाहितः। नाशांतमानसोवापि प्रज्ञानेनैवमाप्नुयादिति श्रुतेः। शमो दमस्तपः शौचं क्षांत्यार्जवविर
क्तता। ज्ञानविज्ञानसंतोषाः सत्यास्येपि द्विषड्गुणा इति केचित्। सत्यं दमस्तपः शौचं संतोषो ह्रीः क्षमार्जवं। ज्ञानं शमो दया ध्यानं विप्रस्यैते द्विषड्गुणा इति केचित्। अमं
प्रदायस्तेरुक्तत्वात् तत्रयाह्य मेतन्मतं दूष्यमिति १० ॥ ॥

न तु श्वपचं वरिष्ठमिति दमसंभावितं वर्णहीनत्वेन तत्कृतसपर्यास्वीकाराद्युपपत्तेः नाह्यन्तथा श्रियजमानस्य विविदितात्मे रित्यादाव न्यथा कथनाद्वेति तत्राह नैवेति। अयं जनुरवि
दुषो ज्ञानोपदेशानधिकारिणः पूर्णो चीर्णोपुष्पानिव याह्यि तत्ज्ञानेन यथार्थेन त्वं ज्ञानतो वर्णह्री नाङ्गनात्मानंपुनात्वृणीतेस्वीकरोतीति यन्त्रदात्मनो र्थे अप्राप्तप्राप्त्यर्थं नैवेत्य
त्रयः। कुत इत्यत उक्तं निजेति। निजलाभेन नित्यानंदेन पूर्णः इति द्वेतुगर्भविशेषणं। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् इत्यादि श्रुतेः। ननु स्वार्थाभावे सपर्यास्वीकारे किं
कारणमिति तत्राह करुण इति। करुणयतीति करुणः। देवस्पृहालुभावोपायेनेवैषदृष्टे फलतेरित्यादि श्रुतेः। कर्मणः तथाभयुरत्वात्तपयातत्फलप्रदानाय तत्स्वीकारो
पचार इति तात्पर्यं विद्वद्भिः क्रियमाणं मानं स्वार्थमपि किं न स्यादित्याशंक्य विशेषमाह यद्यदिति। विद्वदविद्वज्जनेदमंतरेण समानो भगवते यद्यन्मानं विदधीत तत्त्वदात्म

> नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते। यद्यज्जनो भगवते
> विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ११ ॥ ॥

ने चस्वप्रयोजनाये यैतुपगंतव्यं। अत्र दृष्टांतमाह। प्रतिमुखस्येति। यथालंकृतमुखश्रीर्दर्पणादौ प्रतिफलितस्य प्रतिबिंबलक्षणमुखस्य स्वालंकारमंतरेण श्री
र्लभ्यते तथास्वबिंब भूतपरमात्मनो निर्दोषस्य गुणाशिष्यानलक्षणमानेन तत्प्रतिबिंबत्वात् स्वस्यापि निर्दोषसुखलक्षणश्रीर्लभ्यत इत्यर्थः। अनेन ब्रह्मादिनीवराशिरत्वं
न कुत्रीक्षत इति सूचितं। अपचारं पिकृष्टत्वं ब्रह्मैशानादयः सुराः इत्यादेः। अयं तु नरसिंहस्वात्मन एवन प्रभुः किंतु सर्वस्याप्यतो खं ईश्वरत्वात् चक्रवर्तीकरमिवाविदु
षो जनान्मानं वृणीते अनेन विद्वज्जनमानांगीकारो व्याख्यातः स्वतःसिद्धत्वात्। ननु जनपदार्घ्यादानादिनानाऽतः स्वप्रयोजनोपलब्धिर्वदीश्वरस्यापि न स्यात्। किमेत्याद्र

भा०स०

४६

निजेति। नन्वन्यतः किमीश्वर इत्यित आह करुणा इति। कस्यार्थे मानकरणमिति तत्राह यद्यदिति। कथमिव। यथा मुखस्य मुखस्पस्य। मिनो राज्ञो मानलक्षणा
श्रीः प्रतिमुखस्य राजमुखमनुवर्तमानस्य जनपदस्य परोपद्रवराहित्येन धनधान्यादिसमृद्धिलक्षणा श्रीर्भवति। तथा हरिविषया क्रियमाणा मानश्री रत्नरत्ना
जनस्य संसारश्लेषलाभोक्तलक्षणा श्रीर्भवतीत्यर्थः। वजमानं दर्शजश्चेत्यादेः नतु हरेर्जन्मादिमत्वेन विशेषमाहात्म्ययोगात् देवदत्तवदतो मुक्तं विप्राद्वीतरजन
परिष्टश्रीतत्वमिति तत्राह। नेवेति। अयं नृसिंह आत्मनो देहात्मभुः प्रभूतउत्पन्नोनेव। किंतु संभावइहप्रत्वादिति शेषः। अदेहस्यत्तानायोगात्तान नत एव क्षिप
य सुखानुभवोपपत्तेरतः कथं हरेर्विषयानुभूतिरिति तत्राह। निजेति। सत्यंपरतश्चेत्साप्ति नर्यंतथा निजोलप्रोपस्पसतथा। अतः सिद्धानंदानुभवश्च अपूर्णेव्या
सश्च न इत्याप्तश्चस्यपरिछिन्न गर्भवासादिकं प्रयुज्यते। प्रादेशमात्रपुरुषादौ पुरिछेदप्रतीतेरितिचेत्। तस्यांतेऽशुषिरं सत्त्वमिति श्रुतेः। आकाशवदुपपत्तेश्च पा
धिकल्पनायामनवस्थादिदोषापत्तेरतः स्वभुत्पमाप्तिं सत्यंकर्तुं स्वस्य सर्वत्र व्याप्तिं दर्शयितुमित स्वजातवद्दर्शनम् सुरजनमोहनार्थमित्यादि ज्ञातव्यं स्वभ
त्यभाषितस्य सत्यं करणायेत्येतत्कथमवगतमिति तत्राह। मानमिति। अविदुषः स्वरूपाज्ञानिनो यस्मात्तन्मानं तृणीतेन केवलमस्मजुनात्किंतु सर्वस्मादपिप्रो
ग्पादिति त्पाशयेनाह यद्यदिति शेषं पूर्ववत्। अपरोपि भक्त एववरीयानाम भक्तस्यहेषित्वे नदं नार्थत्वेन विहितस्त्वयात्र अच्छीकारादित्यतो वाहनेति। अ
यं हरिरविदुषोनित्या ज्ञानिनो मुरजनादात्मनः स्वस्य मानंलोकेदं नाभिप्रायेणकृतश्चजनेवत्तृणीते प्रत्युतानर्थं चकरोतीत्याह। कस्मणाइति। क्विन्वेपरति।
धातोरसुरजननिरसनशीलत्वादंधंतमएव प्रापयतीत्यर्थः। परास्वेवेषामिति श्रुतेः। तस्मादसुरजनकृतस पर्यानर्थजननीत्याशयेनाह। यद्यदिति। आत्मने
अनर्थायेति शेषः यथा मुखश्रीः प्रधानभटयोग्यताश्रीः प्रतिमुखस्यान्यस्य प्रतिभटस्यानर्थायमरणलक्षणाय स्यादिति शेषः ११ ॥ ॥ राम

४६

तस्मादहमिरेववयो जिकेत्याह। तस्मादिति। यस्मादचिंत्यमहिमत्वात्सर्वात्मनेश्वरस्य स्वरूपं ज्ञातुं न शक्नोमि तस्माद्विगतविक्लवो निर्भूतचापल्योहं यथाम
नीषंमत्याग्रणामी त्यन्वयः। श्रुतेः फलमाह नीचेति। अजया प्रकृत्या नीचगुणाविसर्गं संसारमनुप्रविष्टः पुमान्येनानुवर्णितेन गुणसंकीर्तनेन पूयेत शुद्धो भ
वति हि यस्मात्तेन संसारमोक्षो भवतीत्यर्थः। यथामनीषंगृणामीत्युक्तं विवृणोति। सर्वइति। अमी वयं ब्रह्मादयः सत्वधाम्नः तव विधिकरा इंगिता ज्ञाविषं शिष्टदि

तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषं। नीचोजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन १२
सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः। क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः १३
च

शाविधर्मणीति श्रुतेः तत्र विशेषो वयथावयं उद्विजंतः तथा ब्रह्मादयो नैवोद्विजंतः। प्रधानभक्तत्वात्कुत एतद्वयं विज्ञातमत इति तत्राह क्षेमायेति। अस्य हरेः रुचिरा
वतारैः विक्रीडितं। अस्य जगतः क्षेमाद्यनेक प्रयोजनाय स्यादिति। यदनेनास्मन्निधनेनास्माकमुद्वेगो ब्रह्मादिरक्षणेन तेषामनुद्वेगश्च स्यादित्यर्थः १३

अथैवं कर्तव्यमित्याह तद्यच्छेति। अद्य त्वया असुरो हतः अथ यस्मात् अस्मान् अत्यन्तिकलुषी करोतीति ज्ञानमिति। मन्युः कोपः इतरेषामेवं विधो द्वेषः कृच्छ्रेदाभरस्कु
रणादिविडंबनलक्षणं हि स्वयं च संहर प्रसन्नभावं दर्शयेत्यर्थः। मन्युं च त्वद्विषयं ज्ञानं च पक्षानुग्रहणे त्यर्थः। मनु अवबोधने इति धातोः शितिवा। त्वद्विषयं
ज्ञानलक्षणं यज्ञमिति वा। मन्युः कोपे क्रतौ शुद्धे त्यभिधानं। स जनानंदकर्ता ज्ञापि भगवत्प्रसादकरी त्याशये नाहमोदेतेति। वृश्चिकसर्पलक्षणासुरहननेन साधुरपि
जनोऽपि मोदेत साधुरपि मोदेतेति वा योगविभागः। वृश्चिकसर्पलक्षणासुरहत्या निर्वृतिं सानंदं इताः प्राप्ताः सर्वे लोकाः प्रतियंति तु स्वास्थ्यमिति शेषः। गत्वा किंकु
र्वीति तत्राह रूपमिति हे नृसिंह जनाः तव नृसिंहाकाररूपं दुरितनिवृत्तिलक्षणापविभवाय स्मरंतीत्यन्वयः। साधुरहं सापरोपि वृश्चिकादिहत्या मोदेत किंतु
नः सर्वलोकोपद्रवकृत्सुरहत्यतो वाहमोदेतेति हत्यामिति पाठे साधु शासुः तत्वतो दुष्टवृश्चिकादिहत्यां यथा मोदेत तथाहमपि भगवद्बिलेन दुष्टत्वात्पितृहत्यां

तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या। लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मरंति १४
नाहं बिभेम्यजित तेतिभयानकास्यजिह्वाग्निनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात्। आंत्रस्रजः क्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५
त्रस्तोस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः। बद्धः स्वकर्मभिरुशत्तम तेंघ्रिमूलं प्रीतोपवर्गशरणं ह्वयसे कदा नु १६

मोदे त्वभिप्रायतो वाहमोदेतेति। नृसिंहेति संबोधनं नामकरणाभिप्रायेणेति ज्ञातव्यं १४ पूर्वमज्ञातनामत्वादिति तत्कोपाकुलरूपदर्शनाज्जीत्यालो
कस्य स्मरणं मत्संभाव्यत इतित्र मनं कर्तव्यमित्युक्तं तन्मम ज्ञाततत्त्वस्य विषयो न भवति मम भयं संसारचक्रादित्याह नाहमिति। भयानकस्य तवतो रूपात्र बि
भेमीत्यन्वयः। कीदृशात् जिह्वे च नेत्रे अग्निसूर्यको नेत्रे यस्य स तथा तिह्वा याभृकुटीरभसोग्रदंष्ट्र यस्य तत्तथा। उग्रे दंष्ट्रे यस्य तत्तथा। जिह्वाग्निनेत्रं च जिह्वाभ्रुकुटीरभसंवउ
यरंदंष्ट्र तत्तथा तस्मात्। निर्ह्रादेन भीताः दिगिभाः दिग्गजाः यस्य तत्तथा तस्मात्। अरिभिन्नखाग्राणि यस्य स तत्तथा तस्मात् अरीशभिदंतीत्यरिभिन्नखानामग्राणि।
दुःसहं चोग्रं च संसारचक्रं च यत्तेनसह कदना तद्धिंसालक्षणाद्धद्वारु शत्तम सत्यकाम भीता तांघ्र अपवर्गा[illegible]नकसंसारनाशनमरणं समियं यामि १६

देवादियोनीसुखसंभवात्तस्मात् संसारचक्रात् कथं विभेषीति तत्राह यस्मादिति। देवादि सकलयोनिषु प्रीतिप्रियस्य वियोगः अप्रियस्य संयोगः तयोर्जन्म यस्य स तथा। स च शो
काग्निश्च तेन प्रियादिवियोगादिना जन्मना वयः शोकाग्निस्तेन वा दह्यमानो हं यत् दुःखपरिहारलक्षणमौषधं कर्म तदपि दुःखरूपमिति मत्वा अतद्धियानतद्धी। तद्धी अपा
दुःखपरिहारो वा आत्मनैनाभ्रमामि। अंतर्गतेन केनौषधेन वा मे सुखं स्यादित्यनवस्थितिं प्राप्नोतीति यस्मात्तस्मादिदमेव संसारनाशनमिति मत्वाभवंतं प्रार्थये किंत
दाह। वदेति। तद्दास्यलक्षणं योगमौषधं वद त्वं नृसिंहाणां त्वच्चपा। तदुपासनाख्यपायमंतरेण दास्यमात्रेणात्वत्कि स्यादित्याशंक्य व द्रुप्यत साध्या उपासनामंतरेणोपा
योऽसीत्याह सोहमिति गुणमयसंसारात् विप्रमुक्तः पादयुगलमेवालयमाश्रयो येषां ते तथा। ते च ते हंसाः निःसंगाः परमहंसास्तेषां संगः सेवालक्षणो यस्य स तथा। दुर्गा
णि कज्वादीनि नरकाणि वा। नृसिंहस्याऽऽर्तस्यैत्यनेन संधकरणे तद्दृष्टांतदार्ष्टांतिकयोर्महद्वैलक्षण्यमस्तीति ज्ञापनायाज्ञानवुध्यवत्। रायचेति ज्ञातव्यं। निदाघनस्य

यस्मात्प्रियाप्रियवियोगसुयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः। दुःखौषधं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगं। सोहं प्रियस्य सु
हृदः परदेवताया लीलाकथास्तव नृसिंह विरिंचिगीताः। अंजस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः १८ बालस्य नेह शरणं पितरौ नृसिं
ह नार्तस्य चागदमुदन्वति मज्जतो नौः। तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्तावद्विभो तनुभृतां त्वदुपासकानां १९ यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्व
परः परो वा। भावं करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपं २० ॥ ॥

जलादिना तर्पणविधिः आप्यायनलक्षणपरिहारः। जलाद्यभिपूर्तस्य जरादिपरिहारप्रकाय तद्दृष्टः इष्टसाधनं च ब्रह्माद्युपास्यतमः दृष्टः किं न स्यादित्याशंक्य कर्तृत्वाद्य
भिमतस्य ब्रह्मादेः सत्ता यात्स्यपि यदायदधीनत्वं प्रामाणिकं तदा सर्वस्मादुरोहि लाकिं वक्तव्यमिति भावेनाह यस्मिन्निति। अपरः कालादिर्यः परो ब्रह्मादिर्वाप स्मिन्न
धिष्ठाने स्थित्वा यतो हेतोः यर्हि यस्मिन् कालेयेन च कर्मसलिलादिना। यस्यादृष्टादेः सहायेन यस्मै जलाहरणाद्यर्थं यथाविधिना यं घटादि यदर्थं करोति विकरोति सामान्य
तो विशेषतो वा। कीदृशः पृथक्स्वभावः कार्यादिलक्षणः स्वरूपः संचोदितः [illegible] प्रेरितः तदखिलं कार्यकारणलक्षणं सर्वं भवतः स्वरूपं च त्वदधीनं सत्तात्मक
मित्यन्वयः। कर्तृकर्मक्रियादीनां सत्तादृष्टिः स्वयैव वा अविद्याधीनं यतः सर्वं सर्वरूपः सत्त्वदुच्यते इतिवचनान्नाभेदोस्तीति बोद्धव्यं २० ॥ ॥ ॥

नन्वपान नित्यश्रीहरिप्रसादं विना दुस्तरं न प्रसादश्चानि गृहीतमनसां दुःसाध्यो मनोभयत्वात् संसारचक्रस्यातः स एव संपाद्य इत्याशयेन संसारस्वरूपं निरूपयति मायेति
ति विस्पष्टात्याभिमत मायाप्रकृतिर्मनः हि तगुणानुमतेन उद्भूतरजआदिगुणानुसारिणा कालेन चोदितेनादृष्टेन च सहकारिणा पुंसो जीवस्य कर्ममयं नानाविकारको
ड्शाभूत एव बलीयो निग्रहीतुमशक्यं छंदोमयं संकल्पविकल्पलक्षणात्मकं यन्मनः सृजति। हे अज अन्नमनोमूलं संसारचक्रं त्वदन्यः त्वदनुग्रहरहितः पुरुषः को
वितरेत् न कोपीत्यर्थः। केवलात्परिकारोपेतस्य फलाधिक्यं स्यादित्याभिप्रायेण हृष्टजयेति। अजया तया पश्यत्यार्पिताः कल्पिताः। प्रिय वर्त्मनि मनस्यास्ह षोड
शदशेंद्रियाणि पंच प्राणा एवाराः दलस्थानीया यस्य तथा। तत्र मन एव मनुष्याणां कारणं बंधमोक्षयोरिति श्रुतेः सम्यक् निगृहीतं मुक्तिनिमित्तं चेत्त्वदनुग्रहेण तत्था

मायामनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः। छंदोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥ २१
स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः। चक्रे विसृष्टमजयेश्वर षोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नं ॥ २२
दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यां जनोयं। येस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २३

दित्याशयेनाह स त्वमिति। यस्त्वं स्वधाम्ना नित्यं विजिताः आत्मनो देहस्य गुणाः जरादिलक्षणा धर्मा जीवस्य च क्लेशा वा द्विलक्षणा येन स तथा। यश्च कलयति जानाति स
र्वमिति कालो वशीकृताः स्वमसवेना विसृज्यस्य कार्यस्य नरादिनानाविधस्य जगतो विसर्गशक्तिर्विविधसृष्टिर्यस्मिन् स तथा। हे ईश्वर स त्वं षोडशारे संसारचक्रे लिंग
शरीरे वाऽजया विसृष्टं बुद्ध्यत्र मत एव दुःखेन निःपीड्यमानं तत्परिहारायशरणं प्रपन्नं मां ततोपकर्ष उन्नय। विभोः समुद्धरणसमर्थत्वपाकं स्वर्गाद्यैश्वर्यं नेष्यत
इत्याशंक्य न स्य नश्वरत्वाद् दित्याशयेनाह दृष्टा इति। अखिलानां धिष्ण्यपानां इंद्रादीनां विभवो हिरण्यलक्षणोर्थः कुपितहासई र्ष्या स च्छेन विजृंभित यो भ्रूवः स्फु
र्तिलक्षणयोर्थे वो विस्फूर्जितेन विकाशविशेषेण लुलिताः विनाशिताः स तु हिरण्यकशिपुरपि ते त्वया ॥ २३ ॥ ॥

यस्मादेवं क्षणभंगुरं तस्मात् तदाः अनित्या इति जानन्नहं द्विधं श्रोत्रादींद्रियभोग्यमाप्यमैंद्रियं स्व विसृष्टमानं वा विरिंचपर्यंतं निजभृत्यानां भक्तानां पार्श्वं। इतोपि संसार
सुखं हेयमित्याह कुत्रेति। श्रुतिसुखाः श्रवणमात्ररमणीयाः मृगतृष्णारूपाः क इदं कलेवरं कुत्र। अशेषाणां रुजां रोगाणां विरोहो यस्मात् तत्र तथा। दुरापैः रामहुल
वेउद्विंदुकल्पैः सुखलेशैः कामाग्निं शमयन् शांतिकर्तुमिच्छन् यद्यपि पर्यायेण कलेवरं विषयसुखं च तुभयं नश्वरं विद्वानयं जनः इहोभयस्मिन्नपि न तु निर्विद्यते। नि
र्वेदं नैव प्राप्नोतीत्यर्थः। हरेर्भक्तवात्सल्यं प्रकटयन् प्रकाशयन्नात्मनो ज्ञानविधुरस्यायोग्यजनमोहमायाह। क्वाहमिति। हे ईश्वर तमोगुणप्रचुरे रजोगुणोत्पन्ने हेतोऽस्मि
न्नसुरेतरकुले असुरकुले जातोहं क्व भक्तानुग्रहलक्षणा तवानुकंपा क्व। मिथो विरुद्धस्वभावत्वात् किं चोद्य मनेनेति चाह। न ब्रह्मण इति शिरोंतर्से वामे दुरितत्वेनेत। स्मा

तस्मादमूस्तनुभृतामहमाशिषोज्ञ आयुः श्रियं विभवमैंद्रियमाविरिंच्यात्। नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वं ॥ २४ ॥ कुत्रा
शिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः। निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः ॥ २५ ॥ क्वाहं रजःप्रभव ई
श तमोधिकेस्मिन् जातः सुरेतरकुले क्व तवानुकंपा। न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेर्पितः शिरसि पद्मकरः प्रसादः ॥ २६ ॥ नैषा परावरमतिर्भवतो ननु स्याज्जं
तोर्यथात्मसुहृदो जगतस्तथापि। संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वं ॥ ॥ २७ ॥ ॥

दधिकोदयो पीडानीरमादीनां शिरसि नार्पितो मम शिरसि तत्पद्मकरः पद्मोदरजभावाद्यनिषिद्धलक्षणः प्रसादोर्पित इति यत्तस्मात् सर्वं तव चरितमित्यर्थः। श्रीब्रह्म
रुद्रादिभ्योपि विशिष्टकृतमर्थो गुणोद्भूताः। तद्येषु कमात्सर्वे सदामुक्तोस्तु तावपि हरिभक्तौ च न तु हानेष्वच्छ च नियमेन तु। परतः स्तुतः कर्मनोवानकश्यं चित् तदन्ययेति वचना
दुष्करएवार्थ इति २६ सेवाधिक्यमेव फलाधिक्ये कारणं न त्वभिजात्यादिकमिति अभिप्रेत्याह। नैषेति। यथा जंतोः परावरमतिः। न ह्येषा भवतो नस्या मम त्वनुकंपा
त्मसुहृदः न देनत्वेय इति श्रुतेः लोके यद्यप्यभिजात्यादिकं परावरत्वे निमित्तं तथापि लोकविलक्षणमहिमत्वात् भवतः प्रसादः जगतः संसेवया सेवानुगुणः फला
धिकोदयः स्यात्। यावत्सेवा परेत्वेनावत्सुख विशेषते इति स्मृतेः। परावरत्वं च सेवानिमित्तं। शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायत इति वचनात् ॥ २७ ॥

नन्वेवं सेवानुरूपफलोदये शास्त्रीये सिद्धे त्वं किं करोषीति तत्राह एवमिति फलोदयस्य सेवानुविधायित्वात्। सोहं तव भृत्यसेवां कथं नु विसृजे। मम हितरूपत्वादित्यर्थः। प्रभवाहिकूपे जन्ममरणप्रवाहरूपे अहिकूपे। प्रभवाहिकूपेन्धकूपसर्पविषकालिलसंसारगर्त्ते पतितं। कर्मभिर्विषयैः। तान् अभिकामयत इति कामाभिकामः तं जनमनु तस्य जनस्य सङ्गात् कारणात्। कामाभिकामः प्रकर्षेण जन्ममरणलक्षणे अस्मिन्नपतन्तं आत्मसात्कृत्वा आत्मीयोयमेक इति बुद्धिं कृत्वा सुरर्षिणा नारदेन गृहीतोनुगृहीतो यो हमिति। यस्मात्तस्मादिति शेषः। स्वभृत्यभाषितं सत्यं कर्तुं आदरादितिय ... चित्रं तद्विवरतीत्याह मत्प्राणेति मत्प्राणरक्षणं मम पितुर्वधं च स्वभृत्यनारदस्य ऋषिवाक्यं च। अत्र मद्विधित्सुः खड्गं प्रगृह्य हिरण्यकशिपुर्यदिदमदपरईश्वरोस्ति सत्वामवतु। तस्य तव कं शिरो हरामीति यदवोचत्। तच्च ऋतं विधातुं सत्यमवतारः इति मन्ये इत्यन्वयः। अनुविधेयं मनसा विसृजति तदैश्वर्यस्य सत्त्वित्यहं न नमस्या कं चित्रं वेदपि न नव चित्रं तस्य जगत्येकत्वात् जगत्त्वत्त्वत्पृथक् त्वदधीनसत्ताकमतः सर्वभावाविर्भावो मिथुनकृत्याह एक इति। अ

एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात्। कृत्वात्मसात्सुरर्षिणा भगवन्गृहीतः सोहं कथं नु विसृजे तव भृत्यसेवां ॥ २८

मत्प्राणरक्षणमनंतपितुर्वधं च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं। खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोवतु कं हरामि ॥ २९

एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि मध्यतश्च। सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥ ३०

यमर्थः। एतज्जगत्त्वमेव नान्यः कुतः एकः प्रधानः प्राधान्यं च कुतो वा स्यत इति तत्राह। अमुष्येति। अमुष्य जगतः आद्यंतयोः उत्पत्तेः पूर्वं विनाशादूर्ध्वं च मध्ये स्थितिकाले च त्वमेवावस्यसि सावधिर्निर्णीतोसि। शास्त्रतः इति यस्मात्त्वं तु जगत् च इदंकारत्वेन तद्विवर्त्तत्वेन वा तदवसानं कुरु मन्ये हृष्ट्यर्थिति। भिन्नत्वे नेत्यर्थः। पुनः सृष्टिकाले निजमायया स्वसामर्थ्येन स्वाधीनया चिदचिच्छक्त्या चाइदं गुणव्यतिकरं जगत्सृष्ट्वा तदनुप्रविष्टः त्वं तैर्भिन्नैः पदार्थैर्निमित्तैर्नानेवाभिन्न इव न तु भिन्न इत्यवसितोसीति यत्तस्मात्स्वप्रतिष्ठाम्निवनेक वार्कमेकमिति स्थितोसि। इदं शोभाप्राप्तिः पुरुषस्पर्शयत इति श्रुतेश्च। नेह नानास्ति किंचनेत्यादिश्रुत्या नानात्वस्य निषिद्धत्वात् तानेवानुविधावतीत्यादिना न हेतुः स्वर्थेत्वाच्च भेददृष्टेः ३० ॥ ॥

इदं जगदन्यत्वस्य स्पष्टमप्रतीतेः तदर्थं सर्वपद्योक्तं विशदयति। त्वं वा इति। हे ईश इदं सदसदुच्चावचं जगत्त्वं सत्तया अपि त्वदधीनत्वाद्यं व्यपदेशः। ननु तर्हि अन्यत्त्वत्तः स्वतंत्रं किं न स्यादिति तत्राह भवानिति। ततोऽजगतो भवानन्यो विकल्पितो भिन्नः इत्यर्थः। मन्तव्यं त्वं च जगत्त्वं च मा पि किं न स्यात्तु भयो भेदोपि द्वैतं रस्यादिति तत्राह मायेति। आत्मेत्युपलक्षणं। आत्मनोन्यलक्षणस्य प्रपंचस्य परत्वबुद्धिः आत्मन्यात्मनं पश्येयं माया अविद्यमानाकृत इति तत्राह। इयमिति। श्रीनारायणस्य तव व्यातं व्यज्ञातं यथा पृथुपार्थसाधनंतथान्यस्य व्यातं व्यज्ञातं न सन्नर्थ इति रिस्तुभयं हि शब्देन सिद्धमिति दर्शयति। स्वतंत्रात्वधिकं स्वतंत्रं जगदित्यतो वाह मायेति आत्मनो जीवस्य परमत्वबुद्धिः जीवस्य परमैक्येन यज्जन्मादिकं क्रियते। तदनेनापि कर्त्रंशं। तदनुभवविरुद्धमतो यद्यदधीनं जन्मादिकं तद्वस्तुमदेवेति प्राधान्यविवक्षया भेदव्यपदेशोपपन्न इति। प्रकारांतरेण तदेवाह यद्यस्येति अयमर्थः। यस्य जगतो जन्मादिकं यद्यदधीनं तत् जगत्तदेवेत्युच्यते इति यथा तस्माज्जगत्त्वमेवेत्यर्थः। अ

त्वं वा इदं सदसदीश भवांस्ततोन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था। यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टितर्वोः ॥ ३१

त्रिन्नर्थे दृष्टांतमाह वस्विति। अष्टितर्वोः। इष्टस्य बीजस्य तरोश्च यो कालवत् कालाधीनत्ववत्। एतदेवाचार्यैः सम्प्रदिष्टं। यथाहुः वस्वष्टत्वदाह यद्वैककालाधीनत्वाद्वंकालस्थेत्युच्यते। एवं तत्त्वदधीनत्वात्सर्वस्य सर्वमित्युच्यते स्वतो भिन्नोपीति। तथा दादृष्टान्ताद्य इति श्रुतेः। अत्र खलु शास्त्रे साक्षादेव निषेधे वर्त्तितत्र तत्त्वतो प्रतिषेधप्राचीनेति स्वात अतमेव कथा निष्टत्वमित्यर्थः। य एष आदित्ये पुरुषो दृश्यते सोहमस्मि स एवाहमस्मि य एष चंद्रमसि पुरुषो दृश्यते सोहमस्मीत्यादिश्रुतौ स्वस्मात्स्य परमात्मत्वोपदेशः प्रतीयते अतः कथं भेदः कथ्यते इत्यतो वाह मायेति। आत्माहं च परोन्यश्च परः परमेश्वर एवेतिया बुद्धिरियमपार्था मायाभ्रांतिः तस्मात्तदधीनत्वात्तदंतर्यामित्वेन स्थितत्वाच्च सोहमस्मीत्युच्यते। न तु तत्तद्रूपत्वादेतदप्याचार्यैरुक्तं। अहं त्वान्यश्च परमेश्वर एवेत्यपार्थाभ्रांतिस्तदधीनत्वात्सैवेत्युच्यते। न स्वरूपत्वादित्यर्थः इति। ईक्षणं ज्ञानं ३१ ॥ ॥

सत्वमाद्यंतयोरित्यंतर्ज्ञातो श्रीहरिरवशिष्यते इत्युक्तं। तं प्रकारं दर्शयति यस्येति विलयांबुमध्ये इदं जगदात्मनि आत्मोदरे यस्य शेषासनो भूत्वा। तुर्ये स्थितो जाग्रदाद्यवस्था
त्रयशून्य मूर्त्तौ स्थितः स्वं तमःप्रकृतिं गुणांश्च सत्वादीन्नात्मनि युंक्ते ननु प्रकृतिं तु पंचैव प्रविश्य पुरुषोत्र मा भगवानिहेत्याद्युपपत्तीनामितरत्र युक्तिः शून्यो हि दिव्य
यः। निजसुखेत्यादिना तुरीयस्वभावं दर्शयति। वीतनिद्र इति निद्रानिरासात् ज्ञानमूर्तिः शुद्धो प्राणिनिद्रा क्रं दर्शयति। तस्येति। तस्य तु रीयस्यापि जगत्कारणस्य च कस्मिंश्चिद्विशे
षो नास्तीति शंका नाभेर्यकारणात्मनि देहे जठरे रतं निलीनमिदं जगत्तु महात्मकमहाब्जं यस्य तवनाभेरभूत्तदब्जं तस्यैव तव पुंसः सन्निधानविषयत्वात्। प्रतिमा स्थानी
ये कीदृशं स्वरूपभूतसृष्टिकालशक्त्या संचोदितं सृष्टेः प्रेरितं कटाह्रीकृतं कीदृशस्य तस्य प्रकृतिधर्मिणः प्रकृतिप्रेरकधर्मवतः प्रलयोदके अनंतशय्या शयनात्तु त्या
यविरमत्समाधिरूर्ध्वसमाधियोगनिद्रालक्षणो यस्य स तथा तस्य कथमिव वटवत्। वटलक्षणांकुरो यथा स्वकणिका तदुत्पत्त्यमाननाम कणिकात्र कणिका स्व
टबीजादित्यर्थः। न त्वयं विषमो दृष्टांतस्तथा हि। कणिकानाम वटबीजविकारो हि वटाख्यांकुरः। न चायं प्रकृतेः संभवति। निर्विकारो हरिः श्रुत इति वचनात्तदुच्यते

यस्येदमात्मनि जगद्विलयांबुमध्ये शेषेत्मना निजसुखानुभवो निरीहः। योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्ते ३१
तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितं प्रकृतिधर्मिण आत्मगूढं। अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं॥ ॥ ३२

स्वकणिकेति लिंगाय त्वयेन कश्चिद्विशेषो विज्ञायते कोयमिति चेत्तदुच्यते। कणिका नाम सूक्ष्मा देवता सर्वस्या वटबीजानामभिमानिन्यपि वटाख्यत्वबीजयोर्विशेष
तः सन्निहिता तस्मात् वीजेप्यसदंकुरव्यंजकात्वात् स्थिता जातेत्युच्यते। यथा तथा श्रीहरिरपि प्रकृत्यादिस्वामित्वेन तत्र सन्निहितत्वेन च स्थितः कणिका नु तदित
त्वेन जात इत्युच्यते। आत्मन आकाशः संभूत इत्यादौ श्रुतत्वात्तत्रापि वटबीजाद्वटांकुरस्य साक्षादुत्पत्तिर्वटस्य कणिकाश्चेतनस्य चेतनाभिमानान उत्पत्तिं अभ
याभिमानिन्या देवताया अभिव्यक्तिस्थाय यथायोगं सत्वतमोमिश्ररजोगुणाः जगदात्मनः पद्मस्य साक्षादुद्भवः पद्मनोऽभिमानिनी गर्भस्याभिमानजननं हरेः पु
रुषांतरेणाविर्भाव इत्यादिकं इति। स्थावराणां तु सर्वेषां देवताभिमानिनी विशेषाद्वटबीजे च सूक्ष्मत्वे च व्यवस्थिता। अदृश्या कणिका नाम साष्टकाद्यंजनय
त्यपि। अतो बीजमिति प्रोक्ता सा जाता त्वंकुरे स्थिता। एवं हरिः कारणे सुस्थितः कार्यजनने रतः। कार्यापि यत्र प्रविष्टः सन्नथ भूतत्वं दृश्यत इत्यनेनोक्तविशेषो विज्ञाय
तइति न कापि शंका कार्येति। तस्माद्दृष्टांतदार्ष्टांतिकयोरनुरूपमेव मस्मेति युक्त एव दृष्टांतः ३२ ॥ ॥

तत्र विरिंचिस्य लोकपद्मलक्षणदेहाभिमानोत्पत्तिपूर्वकं हरेर्वटबीजाभिमानिदेवतावद्दृश्यत्वं प्रकटयंस्तस्यापि मांसाद्याहतत्संभवइति पद्मस्य प्रकृत्यात्मकत्वे
न तस्मात्पद्मात्संभवो जननं यस्य स तथा। लोकात्मकत्वेन तस्मिन्देहस्थानीयेप्यभिमानसंभवो यस्य स तथा। उभयोरप्यन्वविवक्षितत्वात् अतो जातोपद्मस्य कृतप
श्यन्नप्सु निमज्जमानो निमज्जनस्थलविचिन्वन् लोके बीजादंकुरे जाते नष्टं बीजमिव पृथिव्यां कथमुपलभेत पुनरुपदिति शंकिं तां दर्शयन्नेवं विधः। कवि ब्रह्मात्मनि
स्वस्मिन्नुत्पन्नं तस्मात् बहिश्च विततं व्यंजकत्वाद्बीजदेवतावत् बीजसंज्ञं त्वामविंदन्नोपलब्धवानित्यन्वयः। आत्मा परमात्मा योनिः कारणं यस्य स तथा। तु शब्देन

तत्संभवः कविरतोन्यदपश्यमानस्त्वां बीजमात्मनि ततं स बहिर्विचिंत्य। नाविंददब्दशतमप्सु निमज्जमानो जातेंकुरे कथमिहोपलभेत बीजं ३४
स त्वात्मयोनिरतिविस्मित आश्रितोब्जं कालेन तीव्रतपसा परिशुद्धभावः। त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मं भूतेंद्रियाशयमये विततं ददर्श ३५

कस्य हरेर्वर्द्धाज्जन्मास्तीति विशेषं दर्शयति। मतसंज्ञितेन कालेन विचिंत्य पृथिव्याद्याधाराणामनुत्पन्नत्वादस्य केन चिदाधारेणाभवितव्यं लोकबीजनाशवतना
शायोगात्। स त्वपि नंदत्पतेकुतूहलमेतदिति अतिविस्मितो अन्वाश्रितः तपेति चतुर्मुखेन कृतवान् तपस्यायोगः ब्रह्मशक्तेरनेनोक्तमभिजानन् तीव्रेण तपसा परिशु
द्धांतःकरणोभूतेंद्रियाशयजगति विततं त्वामात्मनि स्वस्मिन्नपि स्थितं ददर्शेत्यन्वयः। कथमिव भुवि व्याप्तमतिसूक्ष्मं गंधं गंधाख्यदेवतास्वरूपं यथा पश्यति यो
गीतयेत्यर्थः। गंधाख्या देवता यथा पृथिव्यां व्याप्य तिष्ठति। एवं व्याप्तं जगद्विलुब्रह्मात्मस्थं ददर्शेति वाक्यं गंधशब्देन देवता कथमयुक्तमिति भावः ३५

भा॰ स॰

यथा सूक्ष्मरूपं ह्रस्वानुसुदेतथा विराड्रूपमपि तयोरीश्वरे विशेषाभावादित्याह एवमिति। अनेन ब्रह्माण्डशरीरी ब्रह्मा पातालमेतस्य हि पादमूलमित्याद्युक्तं यद्रूपं तदेव पद्मजोपीति ज्ञातव्यं। आत्मयोनिरिति विशेषणात् सामानयं ज्ञानेन स्वरूपं। अनिर्वाच्या विद्या मायामयमिति किं न स्यादित्यत आह सदिति। आनंदादिलक्षणेन समुदायरूपं। अथ कस्माद्भवते सद्दित्युक्तं तो ह्यस्ति ज्ञानं दृश्यो लोक वलमिति स्पष्टश्रुतेः। सन्निवेशश्च यज्ञोमसमुदायो गुणाः स्मृत इत्यभिधानं। आनंदादिलक्षणसमुदायरूपं। अथ कस्माद्भवते सद्दित्युक्तं तो ह्यस्ति ज्ञानं दृश्यो लोकवलमिति स्पष्टश्रुतेः। लक्षणलक्षापना यादिशष्टेन ज्ञानयतेन ह्यभवो अतिबलो वेदद्रुहां सन्निवेशो यस्मिंस्तं तथा। तेन गुणिनो रभेदाद्रूपत्वमिथ्यतिविज्ञानमानंदं ब्रह्मेतिश्रुतेः। अनेनैतत्सिद्धमभूदित्याह सत्त्वमिति च तथ्यं दर्शयं पासिय त्वं कलौ मधुकैटभाख्यौ हत्वा श्रुतिगणानानयत आनीयाऽस्मै विरिंचायावोच इत्यन्वयः॥

५।

एवं सहस्रवदनांघ्रिशिरःकरोरुनासाद्यकर्णनयनाभरणायुधाढ्यं। मायामयं सदुपलक्षणसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिंचः ३६

तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ। हत्वानयच्छ्रुतिगणांश्च रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनंति ३७

इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान्। धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोथ स त्वं ३८

नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रं। कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ३९

जिह्वैकतोच्युत विकर्षति मावितृप्ता शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित्। घ्राणोन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ४०

छन्नो भवद् इति यत्तस्मात्त्वं त्रियुग इति ख्यातः। एवं हरेर्भक्तवात्सल्यं विज्ञाप्य स्वाशक्तिं विज्ञापयति नैतदिति। यदेतन्मनस्तव कथासु न संप्रीयते तस्मिन्मनसि तव गतिं कथं विमृशामीत्यन्वयः। ईषणं वित्तादीनामिति शेषः। मनःसमाधानाभावे इन्द्रियाण्यपि प्रतिबंधकानि तद्बाहुल्यं प्रतिपादयति जिह्वेति। स्पर्द्धाभावेन शीलत्वाज्जिह्वा दुःसंयोग पुरुषस्य नशीलत्वात् शिश्नः त्वच संपर्क इति धातोः दुःसंपर्कशीलत्वात्त्वक् कुदराकम् दंनामयतीत्युदरं। कर्मशक्तिरित्यनेन कर्मेंद्रियाणि वागादीनि लुनंति गेहपतिं देहस्वामिनं। अन्यत्र गृहपतिं ४० ॥ ॥

एम
५१

यः परे स्वस इव विग्रहलक्षणं वैरं विरुद्धाचरणं मैत्रं च यस्य तथाभूतं जनं पश्यन् भवस्य पारं अतिपीट्हि अतिपारं गमय। यद्वा मूढसत्त्वं मूढ प्राणिनं अद्य अजातित्वात् तिर्यग्जातित्वान्मम सामि बद्धिं तंगजेंद्रं पारं नीतवान् यथा पालयः तथा पारं च प्रापय मां पालयेति वा। मम संसार पारनेतृत्वं न वहु प्रयासकं नेत्याह क इति। हे अखिलगुरो भगवन् अस्य जगतो भवसंभवलोपहेतोः जन्मसंहारयोर्हेतोः कारणस्य अस्य जगत उत्तारणे तव प्रयासो नास्त्येव। मम उत्तरणे को विशेषः। कुत इति तत्राह भवेति। भवस्य संसारस्य संभवः उत्पत्तिः तस्य नाशहेतोः तव किं अक्तुं शक्याशक्याः। यद्वा अल्पमंतरेण न किमपि प्रयोजनं तवेत्याह मूढेति। गजेंद्रकल्पार्त्तजनबंधो मूढेषु महतामनुग्रहो महदनुग्रहः तेन तव किं प्रयोजनं न किमपीत्यर्थः। ननु प्रयोजनाभावे किमर्थं तथा करणमित्याशंक्य स्वभाव इत्याशयेनाह प्रियेति। प्रियजनाननुसेवमानस्य स्वमिति यत्तस्तव

द॰

एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतं। पश्यञ्जनं स्वपरविग्रहवैरमैत्रं हंतेति पारचर पीहि मूढमद्य ४१

को न्वत्र तेखिलगुरो भगवन्प्रयास उत्तारणेस्य भवसंभवलोपहेतोः। मूढेषु वै महदनुग्रह आर्त्तबंधो किं तेन ते प्रियजनाननुसेवमानः ४२

नैवोद्विजे पर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः। शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ४३

स्वभाव इति शेषः। संसारभीरूणां संसारवैतरण्युत्तरणोपायः करुणा शंक्य निरंतरं वेदांतशास्त्रश्रवणमननादिर्येषामस्ति तेषां तद्भयं नास्ति। अन्यथा न कदापि तदुत्तरणमित्याशयेनाह नैवेति। त्वत्तीर्थं च त्वद्विषयं वेदांतशास्त्रं तस्य गायनं श्रुत्वा मत्वा व्याख्यानं व्याख्यापनं च तदेव महामृतं पतेन मग्नं हृष्टं विवशं वा चित्तं यस्य स तथा एवं विधोहं भवसंसारवैतरण्या नैवोद्विजेन बिभेमि। एवशब्देन त्वत्तीर्थसेवाभावे संसारकदनाद्बिभेमि तत्संभावे नेत्ययोगव्यवच्छेदः क्रियते। अनेनासंगतप्रकादसवं न मित्येतदपि परिहृतं। सम्यगन्यत्र तत्तीदयेति वचनात् इदं च भक्तिलक्षणमिति शिक्षयनाह शोचे इति तेत्वतः। इंद्रियार्थेभ्यो विषयेभ्यो मायासुखं प्राकृतमस्वरूपं सुखं यत्तदर्थं भरं कुटुंबभारं ४३ ॥ ॥

स्वेतरेषु क्रियमाणा कृपायाश्रितेष्वेव कर्तव्या देवादिभिः क्रियमाणत्वादित्यभिप्रेत्याह प्रायेणेति। देवा मुनयश्च विजनेनैकांतस्थलेन साधनेन सहिताः काष्ठ मौनादिव्रतं चरंति। कीदृशाः स्वकीयानां जनानां विमुक्तिः स्यादिभिः स्वविमुक्तिकामाः स्वमहत्त्वं स्वभाववदित्याह परेति। परप्रयोजनतात्पर्योपेताः देव त्वदुक्ता विवेकवि शेषतो मुनिभक्तेः श्विदेवेति विशेषणं काशनाय प्रायेणेति। नतु कश्चिदाश्रितेषु कृपा कार्या विशेषान्नाविवेकः स्वरः। मुनिभिश्च तथाकेश्विलोकेश्विलकार्याखिलेष्व पि। तथापि तालिकमुख्यरूपविषयतां गताः। एत एव विमुच्यंते तत्सम्येनकथं चनेति। यतो देवा दयोप्या श्रितेषु कृपां कुर्वंति ततो हमप्याश्रितानेतान्कृपणान् रक्षपालि षयाशा। विहाय एको न विमुमुक्षे। त्वमेको मम प्रसादेन मुक्तो भव। अन्येप्येनवर्त्मनामुक्ताः संविति तत्राह नान्यमिति। स्वकर्मणा नानायोनिषु भ्रमतामेषामाश्रितजन स्यानुरूपं लं त्वदस्य शरणं नानुपश्ये इत्यन्वयः ४४ सुखानुभवार्थं हि मोक्षाकांक्षा न ऋद्धादिविषये प्योपि स्यात्तो नागलक्ष्मायितुं सुखाय को वा पेत्ता वा इम

प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परार्थनिष्ठाः। नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोनुपश्ये ४४
यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखं। तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं विषहेत धीरः॥ ४५
मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः। प्रायः परं पुरुष ते त्वजितेंद्रियाणां वार्ता भवंत्युत न वात्र तु दांभिकानां ४६

हाज्यन्नं कुर्यात उन्मत्रमंतरेणेतितत्राह। यन्मैथुनादिति मैथुनादि गृहस्थसुखं यत् तत्सर्वाहे इह कृपणाः देहमात्रपोषणपरायणाः तृप्यंति नान्ये ज्ञात्वं तरति श्व षः। तदपि न सुखमित्याह बहुदुःखेति। तत्र बुद्धिमतैवं कार्यमित्याह कंडूतिवदिति। मनसिजं कामं। मुमुक्षुभिः प्रथमतः इंद्रियजय एव समर्थनीयोन्यथा मुक्ति साधनानाम पि मौनादीनां लोके जीवनोपायमात्रत्वं भवतीत्याह मौनेति। आपवर्ग्याः मुक्तिहेतवः प्रायः सम्यगनुष्ठिता इति शेषः। हे पुरुष परं केवलं ते तत एवाजितेंद्रियाणां पुंसां वार्ताः स्वकालजीवमात्रोपाया भवंत्युत। अपि संभावनामात्रं न तु मुख्यत इत्यर्थः। लोकमोहनार्थमौनादिकमनुतिष्ठतां दांभिकानां त दपि न संभवतीत्याह। अत्र जीवलोके वा यथाजितेंद्रियाणां जीवनमात्रोपायास्तथा दांभिकानां भवंतीति वाविकल्पोयमानयोरित्यभिधानान्नवा भव त्येकंवाक्यमिति वा ४६ ॥

मौनादीनां श्रेष्ठसाध्यत्वेनासर्वोपि कारिकत्वात्सर्वाधिकारिकोपासनाविषयं निरूपयति रूपे इति। इमे सदसती कार्यकारणे तव स्वरूपे तद्रूपत्वात्तन्निधानयोग्योक्ष वमाणमाह वेदेति। वेदवद्ब्रह्मणो रूपद्वयस्याहो कार्यकारणत्वं किं विकारविकारिभावेन निमित्तनैमित्तिकभावेन वेत्याशंक्य यथा योपमित्युहनीयमित्यत्र दृष्टांतमाह बीजेति व्याख्या तमेतत् विज्ञानमानं दृष्टत्वेति वेददृष्टे चेत् किं साक्षाद्रूपे इति नेत्याह नचेति। अन्यदित्यत्र गुणज्ञानानंदादिलक्षणं नैवकुतो अरूपस्येति। प्राकृतरू पाभावादित्यर्थः। महत्तां प्रत्यक्षं चात्र प्रमाणमित्याह युक्ता इति भक्तियोगेनोभयत्र रूपद्वये युक्ता उपासनालक्षणो ध्यानेनेति शेषः। युक्ता योगिनः उभयत्र संनिहितं

रूपे इमे सदसती तव वेददृष्टे बीजांकुराविव न चान्यदरूपकस्य। युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात ४८
त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च। सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तं॥ ॥ ४९

त्वां पश्यंतीति यादर्शनप्रकारमाह वह्निमिति। योगेन मथनाद्युपायेन अन्ययोगं निवारयति नान्यत इति भक्तियोगादन्यतो नेति साक्षात्स्वरूपादन्यता प्राकृतं रूपं नैव। अरूपमक्षरं ब्रह्मेति श्रुतेः। अतो नमस्सादरूपे इति वा योजना साक्षात्स्वरूपापेक्षया स्वरूपादन्यद्रूपं नेत्या कार्य विवरणं अत्र प्रमाणत्वेन कार्यकारणोदस्य तः स्वनाम निर्देशपतत्त्वस्वाप्रदत्वेन तदृशत्वेन तद्रूपत्वाभिप्रायइत्याह वायेनाहत्वमिति। चिदनुग्रहश्चेतनस्तन्मनसा वचनेति रुक्तं। ननु दन्यत त्वां विना प्रकृतिमन्त्रि त्रिसगुणः संसारी श्रेष्ठोत्कादिगुण युक्तो वा विगुणो मुक्तः तत्पत्नानंतरक्षण विशिष्टपदार्थो वा ४९ ॥ ॥

भा॰ स॰

५३

पृथिव्यादिमहत्तत्वांतं पदार्थजातं कार्यकारणात्मना हित्वे नक्रोडीकृतं भगवद्रूपं ततोनिन्नमित्युक्तां इदानीं तद्व्यतिरिक्तं परमात्मानं तदभिमानिनो देवा अपि साकल्येन ज्ञा
नंतीत्येवं विधानं तमाहात्म्यं तु गणश इति निश्चित्य तमुपासते संत इत्याह नैत इति गुणाः सत्वादि गुणाभिमानिनः गुणिनो गुणविकाराः महदादयश्च इत्यत्र देवाः इंद्रादय
यश्च इंद्रादयो ऽहं नेतु धियो निश्चित्य शास्त्रार्थः शब्दाद् दार्शिकाद् राशिप्रमाणादेतत् आद्यंतवंत इत्यनेन विदन्तीत्येवं विमृश्य विचार्यापि स्वतस्मादेनं सहप
विरमंति संसारादिति शेषः यद्वा वानन्तु इति मित्यादिश्रुतेः शब्दाद्विरमंतीत्यत्र शब्दात् तो नार्थः किंतु वेदेन निर्णीततत्वस्य तत्वे निरंतरस्पंदमान उद्विजलराशेः पुंसोऽहं
रिगुणानुस्मरणात् प्राप्तोनास्तीति वा। श्रीनारायण प्रसादस्य तु तुभार्थसाधनमित्युक्तं तस्य भक्तिज्ञानेन योऽस्य षडंगोपासनासाध्यान्यं विना नान्यत् ध्यानस्यांहित्यादि येन
हातव्यमिति। हिशब्देनान्यथा जीवं छ्रवमित्याह अपि पादात्यादोतव क्षेत्रानुगमनेनियोऽस्याविति या हृदयं षडंगयासेवया विना जनो मुमुक्षुः परमहंसानां गतावप्य

नैते गुणा न गुणिनो महदादयो ये सर्वे मनः प्रभृतयः सह देवमर्त्याः। आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ५० तत्ते ऽर्हत्तम नमः
स्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायां। संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंसगतौ लभेत ५१ नारद उवाच एतावद्व
र्णितगुणो भक्त्या भक्तेन निर्गुणः। प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ५२ श्रीभगवानुवाच प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम। वरं वृणीष्वाभिमतं का
मपूरोऽस्म्यहं नृणां। मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे। दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ५३ ॥ ॥

यस्त्वेतत् परिभक्तिं ज्ञानं च लभेत किं साधनांतराभावात् प्राप्नोतीत्यत्र यः। भक्तिज्ञानयोर्हेतु हेतुमद्भावादेकग्रहणेन द्वयोर्ग्रहणं सुज्ञातमिति भावः। पराः शब्दैर्वा सर
व्याहरणं कीर्तिः स्मृतेः हरेरस्तु रेखु पद्वंदा शया स्वभावात् प्रह्लादस्यापि तज्जातित्वेन तत्कृत्याकोपोपशमः स्यात् किं वस्तुतो हि उपकत्वेनाथो बुद्धौ धनं प्रक्षेपणावत् तत्र च लता
यस्यापि हितिन वाहृएता बहितियोगपतानुकूल्येन भक्त्या भक्तेनेति विशेषणद्वयं शंकानिरस्येति ज्ञातत्वं जातित्वमपयोजकं भक्तिरेवेति सूचितं मनेनेति देवर
न्नवदुर्लभज्ञानं भवति भगवानिति मन्युशांते: किं गमकमिति तत्राह प्रह्लादेति वरदानासामर्थ्येहि तु माह कामपूर इति वृणीष्व भक्तानामिति शेषः। मम्यसाद
एव दर्शने कारणमित्याह मामिति। मां अप्रीणतो अप्रीणयतः। मद्दर्शनफलं च पापाद्दर्शनवत्त्वेत्याह दृष्ट्वेति ५३ ॥ ॥

राम

५३

यतो वत्स माद्य यथ तस्मात् प्रीत मां माधवं मां प्रीणंति प्रीणयंति केन सर्वभावेन सर्वात्मना माधव इत्यस्यार्थो मंगलदेवतायतिरित्यभिप्रायेणाह सर्वेषामिति। सर्वेषामविशे
षेण यायाश्च अभिलषिता आशिषः तासां आशिषां पतित्वेन दातारमित्यर्थः। प्रह्लादोपि सामान्यभक्तो न भक्तोऽनभवति किंतु भक्तोऽत्तम इति प्रकटनाय भगवता विप्र
लंभोपि तात्त्वराज्ञेद्य दित्याह एवमिति एकांतित्वात् नैसर्गिकभक्तत्वात् ५५ इति प्रसमेन वम: आशित्र ध्यायेभ नैव वभुत्रमाश्रेनिद्वेषेण स्तत्वातिपाद नंपुनः
पुनर्भक्तिः साक्षात् ज्ञापनायान्यदास्तु समोहनायेति मात्पर्यं वरान विच्छ इत्यप्रह्लादो हरिकिंचित् स्तुवाचेति हार्दं पुष्ठितिरक्त्यं परिहरन्वारदः सूत्रवक्तीत्याह नारद इति विषयसार्भको
नतलनैनेत्येतद्विशेषणकारणमायद्वीतिविशेषणं हि हेतावित्यमरः। ज्ञानसर्वेंद्रियहृत्त्विवात् हृषीकेशोऽन्मनो तंज्ञानमितियदतो मनः परीक्षणार्थेऽपि तैर्मन:प्रलो

प्रीणंति ह्यथ मां धीराः सर्वभावेन माधवं। श्रेयस्कामा महाभागाः सर्वेषामाशिषां पतिं ५४ नारद उवाच एवं प्रलोभ्यमानोपि वरैर्लोकप्रलोभनैः। एकांत
त्वाद्भगवति नैच्छत्तानसुरोत्तमः ५६ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादस्तुतिर्नाम नवमोऽध्यायः नारद उवाच भक्तियोगस्य तत्सर्वमं
तरायतयार्भकः। मन्यमानो हृषीकेशं स्मयमान उवाच ह १ प्रह्लाद उवाच मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः। तत्संगभीतो निर्विण्णो मुमुक्षु
स्त्वामुपाश्रितः ॥ २ ॥ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयात्। भवान्संसारबीजेषु हृदयग्रंथिषु प्रभो ३ ॥ ॥

भं न कुर्विति प्रार्थयत इत्याशयेनाह मामेति। गुरुवचनमज्ञातेष्टबोधकत्वेन प्रमाणं स्यामिदं च भगवज्ञातेष्टबोधकत्वात् तदर्थमिव जतिभातीत्याशयवानाह तत्
त्पत्तिश्चासक्तमिति लोकदृष्टांतप्रदर्शनपरं प्रह्लादस्यार्भकावस्थामारभ्य विष्णुधर्मैकनिष्ठत्वात् पतोविषयासंगिनां अनर्थपरंपरादृश्यतेनतस्मा द्विषयेणोदिवपा
सिध्यता वस्यहृत निर्वेदवशाप्यं निर्वेद इत्याह मुमुक्षुरिति। अनेन प्रह्लादस्याधिकारलक्षणप्रापयी विद्यत इति दर्शितं। ननु भगवद्वाक्यं प्रह्लादिविप्रलंभकंन भ
वति। अत्र स्यान्नकुचेत स इतिश्रुतेः। भगवता तथैव प्रोच्यते तथा च भगवद्वाक्यस्याविश्वसनीयत्वं स्यादिति तत्राह भृत्येति। चोदयात् चोदयति। प्रियोयोन: प्र
ंदयादिति श्रुतेः ३ ॥

वचनार्थमेवतथोक्तमितिकिंनस्यात्तत्राहनान्यथेति।अखिलगुरुत्वान्यथानुपपत्यानवचनंयुक्तमित्यर्थः।इतोपिभृत्यलक्षणजिज्ञासैवप्रयोजनंतद्दूचनस्यान्यथात्मै
सृजनत्वात्तत्कृतदोषापत्तिःस्यात्।सनिर्दोषत्वेननयुक्तमित्याशयवानाहनष्टेति।नकेवलमितरगुरुवन्मार्गमात्रप्रदर्शकः।किंतुगम्यदातेतिप्रलोभनंनयुक्तमिति
वाह।नष्टेति।पारदर्शिनःपारंयांतंद्रष्टुमिच्छतः।ननुमत्तआसिकामायाशीर्वानवचनमस्तकामप्रलोभनंतत्कामुकस्याभीष्टदानावचनेऽधुनाकांक्षितामिदानींस्यादिति
तत्राहयस्तइतितेतवसकाशात्आशिषःप्रार्थ्याःनतुर्हिसकइतितत्राहसइतिवनषणसंभक्तावितिधातोःसभजंतिक्रेयंद्रव्यंप्रसार्यदानलक्षणंतत्कर्त्तावणिग्वै
हि।अयंचकिंचित्स्तुतिकरणलक्षणदानेनभवादृशाज्ञानात्फललक्षणफलादानंकरोतीतियत्रअणाद्गुणिगित्यर्थः।आशास्तेइच्छति।अनेनफलप्रदस्यस्वामि
त्वंसविघटितंभवतीतिदर्शितं।तर्हिकयोःस्वामिभृत्यभावइतितत्राहसवाइतिलुभगाइतिधातोःभक्त्यादिगुणेइकाकांक्षिणोगुणलुब्धोमिथःफलानिच्छन्कामु

नान्यथातेऽखिलगुरोर्घटतेकरुणात्मनः।नष्टदृष्टेस्मस्पर्धेत्वंपारंपारदर्शिनः ४ यस्तआशिषआशास्तेनसभृत्यःसवैवणिक्।सवैस्वामीसवैभृत्योगुण
लुब्धोनकामुकौ ५ आशासानोनवैभृत्यःस्वामिन्याशिषआत्मनः।नस्वामीभृत्यतःस्वाम्यमिच्छन्योरातिचाशिषः ६ अहंत्वकामस्त्वद्भक्तस्त्वंचस्वाम्य
नपाश्रयः।नान्यथेहावयोरर्थोराजसेवकयोरिव ७ यदिरासीशमेकामान्वरांस्त्वंवरदर्षभ।कामानांहृद्यसंरोहंभवतस्तुवृणेवरं ८ ॥ ॥

कौ ५ नन्वनयोःफलकामित्वेकोदोषइतितत्राहआशासानइति।स्वामिनिसमवेताआशिषःआत्मनःस्वस्याशासानोयःसभृत्योनवैनैवकिंतुप्रतिघातये
वरदानादिनाभृत्यात्स्वस्यस्वामित्वमिच्छन्योभृत्यायाशिषोरातिददातिसःस्वामीनभवकल्पितस्वामित्वेनतच्छद्मस्यतुस्वार्थलाभातप्रकृतेकिमभूदितितत्राहाहा
हंत्विति।अनपाश्रयःभृत्यसाध्यफलानाश्रयःस्वामीअत्राद्भुतस्वामीत्यर्थः।एतदेवद्रढयतिनान्यथेतिनिष्कामत्वेनभृत्यत्वंममअनपाश्रयत्वेनस्वामित्वंतवाए
तस्मादन्यथाप्रकारांतरेणआवयोर्नार्थोनास्तिकिंतत्प्रकारांतरंतत्राहराजेति।इहलोकेयथाराज्ञःसेवकस्यचस्वाज्ञानतिलंघनप्रीत्यादिलक्षणेचेतनादिलक्षण
स्वार्थोस्तितथेति।ननुशास्त्रेषुप्रतिपाद्यमानस्सेवकभावोज्ञानत्वज्ञेयभावादात्मनःकर्तृभावइत्यादिसंबंधिसंबंधलक्षणार्थसंभवादावयोरर्थोनास्तीतिनि
षेधःकथंक्रियतइत्याशंकांपरिहर्तुमाहयदीतिरादानइतिधातुःकाम्यंतइतिकामाः।अभिमताएववराप्रार्थ्याःकामानांविषयाणांअसंरोहंसम्यगनुत्पत्तिं
भवतःवृणइत्यन्वयः ८

केनदोषेणतेषामनुत्पादःप्रार्थ्यतइतितत्राहइंद्रियाणीति।येषांकामानांविषयाणांजन्मनाइंद्रियादयोनश्यंतितेषामितिशेषः।सर्वेंद्रियाणिजयंतितेजइतिप्र
तेःनान्यथेश्वरभाषितमितिवचनात्भवदुक्तमन्यथामाभूदितिभीत्यावरंवृणइत्यतोवाइयदीति।आत्मादेहः।ननुकामासंरोहोनामकाममोहोविवक्षितःतस्मात्किंफ
लमितितत्राह।विमुंचतीति।भवायपुनर्जननाय।भवत्वमित्यादिलक्षणाभक्तिश्चतत्फलमित्याहनमइतिभगवतइत्यनेनकिंचिन्मात्रमानवज्ञानमितिध्यानतःपुरुषायेति
अनेनापिकश्चिद्देवेत्यतोमहात्मनइतिकोसावित्यतोहरयइतिहरिशब्दस्यानेकार्थत्वाद्धरकइत्यतोऽद्भुतेति।तिर्यक्प्राणिनात्वयाकिंस्यादित्यतोब्रह्मणइतिब्र
ह्मणोप्यनेकार्थत्वाद्वंचकइत्यतःपरमात्मनइति।अहंत्वकामइत्येकांतभक्तलक्षणंयत्त्वयोक्तंतत्सत्यंतथापिमदाज्ञाकारिणस्तवपुण्यमपिहर्तुंस्यादतएवत्वा

इंद्रियाणिमनःप्राणआत्माधर्मोधृतिर्मतिः।ह्रीःश्रीस्तेजःस्मृतिःसत्यंयेषांनश्यंतिजन्मना ९ विमुंचतियदाकामान्मानवोमनसिस्थितान्।तर्ह्येवपुंड
रीकाक्षभवायावकल्पते।नारदेनोपदिष्टंतेतवमंत्रमिमंस्मर।ॐनमोभगवतेतुभ्यंपुरुषायमहात्मने।हरयेद्भुतसिंहायब्रह्मणेपरमात्मने ११
श्रीनृसिंहउवाच नैकांतिनोमेमयिजात्विहाशिषआशासतेमुत्रतथाभवादृशाः।तथापिमन्वंतरमेतदत्रदैत्येश्वराणामनुभुंक्ष्वभोगान् १२
कथामदीयाजुषमाणःप्रियास्त्वमावेश्यमामात्मनिसंतमेकं।सर्वेषुभूतेष्वधियज्ञमीशंयजस्वयोगेनचकर्महिन्वन्।भोगेनपुण्यंकुशलेनपापंकलेवरं
कालजवेनहित्वा।कीर्तिंविशुद्धांसुरलोकगीतांवितायमामेष्यसिमुक्तबंधः १४ ॥ ॥

त्वंभुंक्ष्वेत्याहनैकांतिनइति।किंतदितितत्राहतथापीति।ननुकर्हिमहाजलसंसारानिष्कृत्याहेतावंतंकालंमयोक्तंदशोपणमकारि।तदरण्यरोदनवद्व्यर्थमभूद्यतस्त्वंत
त्रैवमहीस्तुपदिशस्यतस्त्वदाज्ञावाउल्लंघ्यात्वमेवजानासीतिशंकारोगनिर्दलनायसुखसाध्यमौषधंविधास्यामीत्याशयवानाहकथाइति।तद्वचनेनसर्वावता
रादिकथाउपलक्ष्यति।भूतेष्वित्युपलक्षणं।वरपुरोडाशादिषुएषधियज्ञप्रिंसविष्णिसितइतियोगेनभक्तिपुरःध्यानेनहिन्वन्नाशयन्वेतावतामकालांत
रभावित्वात्प्रिःस्यात्किंस्यादित्याहभोगेनेतिपुण्यावनभिमतंपुण्यंभोगेनक्षपयित्वाप्रायश्चित्तादिकुशलकर्मणापापेनिर्दलयित्वावितायविस्तार्य १४

भा॰स॰

५५

मयानवोक्तयोगकरणशक्तस्यानायाससाध्यं योगमुपदिशन्नुपसंहरति यइति महदिमं मामुद्दिश्य मुक्तकालेऽस्मिन्नमितस्तुत्वादिमं त्वभिमतं वरं वृणीष्वा इत्यर
मिति। तेसकाशात्तु अनेन दानस्य लौकिकभावसंबंधोऽस्तीति ज्ञायते। शुद्धायं साधनांतरानुष्ठानंनापेक्षितमित्याह इष्टतइति। नकेवलमयमेवपिता पूतः किंतु जन्मांतरे पिविद्यमा
नाः पितरः पूताः स्युरित्याशयवानाह त्रिःसप्तभिरिति मत्तात्यौचिविमुद्धिम्र्त्कृटाद्वह्नपात्री सू तत्वजन्मनेत्याहृयत्साक्षादिति। एतन्नायमन्यत्रानिदिशति। यत्रेति। कीटकट
इतिपाठे अभीशइत्यर्थः। ननुत्वद्भक्तानां एवंविधमाहात्म्यकस्मादित्याशंक्येतपोहुङ्हिन्नयहेतुर्हिंसाद्यभावादित्याह सर्वात्मनेति सर्वात्मना यदपि किंचन क्रुकलं
सादिकं मपितस्मात्त्वाणाद्यतः आर्णं नविद्धिः येह पिक्कलासस्येतिक्तेतः। तत्र निमिनिमाह। मद्भावेनेति ईश्वरोजीवकलयाप्रविष्टइति वचनात्। सर्वं च मम भा

यएतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः। त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते १५ प्रह्लादउवाच वरं वरय एतत्ते वरदेशान्महेश्वर। यदनिंदत्पि
ता मे त्वामविद्वांस्तेज ऐश्वरं। विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुं १६ भ्रातृहेति मृषा दृष्टिस्त्वद्भक्ते मयि चाघवान्। तस्मात्पिता मे पूयेत दुरंताद्दुस्त
रादघात्। पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल १७ श्रीभगवानुवाच त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ। यत्साधोस्य कुले जातो भवान्वै
कुलपावनः। यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शिनः। साधवः समुदाचारास्ते पूयंतेऽपि कीकटाः। सर्वात्मना न हिंसंति भूतग्रामेषु किंचन। उच्चावचेषु दै
त्येंद्र मद्भावेन गतस्पृहाः। भवंति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः। भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् २१ ॥ ॥

वः मद्भावोऽस्तीतिभावो भावना निरंतरानुस्मरणं तेन गतस्पृहाः नष्टस्पर्द्धाः हिंसायाः कारणं निमित्ताभावान्नैमित्तिकाभावइत्यर्थः। इहलोकेयेमद्भक्ताः पुरुषाभ
वंतितेविधं ते हिंसंतीत्यन्वयः। मद्भक्तेषु पितवविशेषोऽस्तीत्याह भवानिति। प्रतिरूपधृक्। दृष्टांतस्थलभूतः खलुशब्देन कांश्चिन्निषिद्धावधिष्टानां सर्वेषामि
त्यर्थोऽभिहितेनेनयावज्ञा बहित्यर्थः। अतएताविकाहे वान्नारदादीनथेवच। प्रह्लादादुत्तमः कोनु विष्णुभक्तो जगत्त्रय इतिवचनात्। निषेधवाक्यालंका
रजिज्ञासाननये खल्वित्यभिधानं २१

राम

५५

अपि तामदहे प्रीतिमत्वात्त्वेतकार्याणि न करोमीति मतिर्मा भूदित्याह। प्रोतं स्मार्ते न लंघयेत् इति वचनात्। मदाज्ञया तान्यपि कर्तव्यानि। नावेसवायहातव्यं नोर्द्धविंडं नतं
तुल्यमित्येतद् संबंधिविषयत्वेन तावकाशमित्याशयेनाह मदंगेति सुप्रजाः सुपुत्रः। पितृमेधं कृत्वा निरुत्पवनेन प्रजंकिंतु राज्यं कुर्वित्याह पित्र्यमिति राज्यं कुर्वंत पि
त्वद्भक्तोऽपद्रवं न कुरु। किंतु ब्रह्मवादिधर्मेणेत्याह यथोक्तमिति। नितावत पर्यंतास्त्वमन्त्यावधिकमित्याह मयीति। कर्मादिविविध्याणिसृजान्दीनि वा। भगवदाज्ञा उ
ल्लंघनेन भगवत्प्रीतिः स्यादिति कृत्वा तदाज्ञाकरणप्रकारमाहनारदइति संपरायिकं पारलौकिकं तत्रागतेषु देवेषु एकतमेनापि संलापोहरेरस्त्वरां वाभ्यायेकीन दि
ती येदैत्येभ्यएषांकोविशेषः किंचसे व्यसेवकादिभावाभावेन ब्रह्मविद्याधिकारोऽस्मात्स्यादित्याशंकां परिहरतिप्रसादेनि देवादिभिर्दृतइत्यनेनतेरपिकृतमि

कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः। मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः। पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः। मय्यावेश्य मनस्तात
कुरु कर्माणि मत्परः ॥२३॥ ॥ नारदउवाच प्रह्लादोऽपि तथा चक्रे पितुर्यत्सांपरायिकं। यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः। प्रह्लादस्कृतथाकार्ष
द्राम्यं निहतकंटकं। प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं। स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः २५ ब्रह्मोवाच देवदेवाखिलाध्यक्ष भूतभा
वनपूर्वज। दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः। योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः। तपोयोगबलोन्नद्धः समस्तनिगमानहन्। दिष्ट्यास्य तनयः
साधुर्महाभागवतोऽर्भकः। त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना। एतद्वपुस्ते भगवन्ध्यायतः प्रयतात्मनः। सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः २९
नृसिंहउवाच मैवं विभोऽसुराणां ते प्रदेयः पद्मसंभव। वरः क्रूरनिसर्गाणामहीनाममृतं यथा ३० ॥ ॥

तिज्ञातव्यं। दिष्ट्यास्तु खमञ्जन्मम सकाशात्वर लब्ध्वाऽनमेषफल्गितेषु छिन्नमेमंपाहु ऐरित्यर्थः। दिष्ट्या सज्जनसुखहेतुः संजुनातस्मै दिष्ट्या सुखलक्षणो वरोद
तइतिशेषः। अनेनवपुषा न केवलं दैत्यहननमेव प्रयोजनं किंत्वन्यच्चास्तीत्याह एतदिति। एवंकृतो भगवान्कमनुग्रहमकार्षीन्नेत्याह इत्याह श्रीभगवानि
ति। निसर्गतः क्रूराणां अमृतं कं पयः। देवान्नेसलिले ह्नीरेत्वमृतं नाविमुक्तिगइति। अत्रहिरण्यकशिपुमनतरेणान्येषां न दातव्या इत्या नाक्षिप्यते। तत्वस्मदि
यथा हिरण्यकस्यापादादं तस्थितइ हरिणैतइत्यादिना ब्रह्मजेरितत्वावरामादिति ३० ॥ ॥

मद्भृत्यानामपि योऽपचयस्तत्त्वे हरेरूपपुष्परिव्यावहारेण ध्यायंति देवमनुष्या इति कृतेः देवब्रह्मभावो मे स विहतः स्यादिति मत्वा तत्र ज्ञाणाई तद्विय हेणद्दष्टो दित्याह मद्भृत्यानामपि योऽपचयस्त्वे हरेरूपपुष्परि व्यावहारेण ध्यायंतीति मत्वा तत्त्वेनाहं भावेनाधिकृताः नारद इति सर्वभूतानामदृश्य इत्यनेनम त्कानुकंपित्वं दर्शितं। अनंतरं प्रकृतदेवब्रह्मादयो देवाः सत्कृता तत्रात्मनो भगवदनुग्रहपात्रत्वेनाहं भावेनाधिकृताः नारद इति सर्वभूतानामदृश्य इत्यनेनमक्तानुकंपित्वं दर्शितं। अनंतरं प्रकृतदेवब्रह्मादयो देवाः सत्कृतानुतात्मनो भगवदनुग्रहपात्रत्वेनाहंभावेनाधिकृताः नारद इति सर्वभूतानामदृश्य इत्यनेन भक्तानुकंपित्वं दर्शितं। अनंतरं प्रकृतदेवब्रह्मादयो देवाः सत्कृतानुतात्मनो भगवदनुग्रहपात्रत्वेनाहंभावेनाधिकृताः
नारद इति सर्वभूतानामदृश्य इत्यनेन भक्तानुकंपित्वं दर्शितं। भागवतः कलालेशोऽणुतेतथा भगवतोमित्रांशावा। भगवच्छिन्न
आद्ये वैसवाचारः प्रवर्त्तितः स्यात्। द्वितीये भगवच्छिन्नगुणानुष्ठानवत्स्यादिति तन्त्राहततइति। भगवतः कलालेशोऽणुतेतथा भगवतोमित्रांशावा। भगवच्छिन्न
आद्ये वैसवाचारः प्रवर्त्तितः स्यात्। द्वितीये भगवच्छिन्नगुणानुष्ठानवत्स्यादिति शास्त्राचारो दर्शितः। जक्तादवरदानानंतरं भगवतः स्वाचारत्वे
तेन ब्रह्मणा वेदम चथाहीत्याहततइति। अनेन भक्तेन भागवतकेन यथायोग्यं पूजेमकर्त्तव्यमिति शास्त्राचारो दर्शितः। जक्तादवरदानानंतरं भगवतः स्वाचारत्वे
तेन ब्रह्मणावेदम चथाहीत्याहततइति। अनेन भक्तेन भागवतकेन यथायोग्यं पूजेमकर्त्तव्यमिति

नारद उवाच — इत्युक्त्वा भगवान्राजन् ततश्चांतर्दधे हरिः। अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना। ततः संश्रुत्य विधिवद्ववंदे परमेष्ठिनं। भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः। ततः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः। दैत्यानां दानवानां च प्रह्लादमकरोत्पतिं। प्रतिनंद्य ततो देवाः प्रयुज्य परमाशिषः। स्वधामानि ययू राजन्ब्रह्माद्याः प्रतिपूजिताः। एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः। हृदि स्थितेन हरिणा वैरभावेन तौ हतौ। पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः। कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः। शयानौ युधि निर्भिन्नहृदयौ रामसायकैः। तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि। ताविहाथ पुनर्जातौ शिशुपालकरूषजौ। हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ३८ ॥ ॥

नयदद्दर्शनमकारितदास्माभिरप्यनुष्ठेयमिति कृत्वा ब्रह्माद्या अपि स्वस्य हान्यपुरित्याह प्रतिनंद्येति। इदानीं विशिकलपोक्तमर्थं निज्ञिप्योपसंहरति एवमिति। हृदि स्थितेन वैरभावेन मुनाहरिणा हतो प्राक्किं जजन्मनि जयविजय शाश्ववाच्यो पूर्वजन्मनि यथा सच्चित्तौ तथात्रापीति शेषः। हिरण्यकशिपुर्हिरण्याक्षाख्यौ पूर्वजन्मनि यथा तथेति वा। वैरानुबंधेन वैरोपसर्जनेनानुबंधेन स्नेहेन। समीयतुः हरिमिति शेषः। तत्रासुरो तमर्ययतुरित्यनुसंधेयं। सम्यग्प्राक्ते वधी हरिणामिः तद्भावेन तमेवेति द्योतना पसमितुपसर्गः। मधुकैटभौ भक्तभावात् हरौ भगवतो स्मृतौ। तमेव कामादासौ भक्त्या चैद्यो हरिंययोरितिकथनात् ३८

अन्येषामपि सदावादैतद्फलज्ञानार्थं वक्तमित्यपिपेत्याहागत इति। आपि वैरानुबंधेनेत्यनुवर्ततीये राजानः पौंड्रकादिशृगाल्याः सेथ सुरदेहे स्वात्मास्पविशेषो
येषां ते तथा। तत्रापि तस्मिन् कृष्णे आत्माचित्तं येषां ते तथा तत्स्तुष्टित पुण्यफलाद्योक्तार्थं तत्र विशिष्टाः सद्भक्ता इत्यर्थः। तमेक्तेवयत्पूर्वकृतं तत्तत्वं ध्यात्वास मेनः
पापं तज्जहुः तद्धित्वाहर्षा ज्ञाकरणाधास प्रपुण्यप्रचयेन तं हरिमीयुः तथैव कृष्णवैरिणो नादिकालमारभ्य भगवद्द्वेषिणः कृष्णाश्रुतामसाश्च वैरिणः। वैररूपिणो
राजानो राजसाः तमः प्रकृतयो दैत्याः तदात्मानो द्वेषरूपिणः तेजन्मप्रभृति वीर्ययदेनः तेन पापेन वैरानुबंधेन निरंतरं वैरचिंतया पूर्वकृतं ब्रह्मणाद्यं पूर्वकृतं
तमोजहुः जग्मुरित्यन्वयः अंगं गतावितिधातुः इति सखे कहाझंन्यस्य सभुक्तं सुरप्रवेके हास्ये इति प्रयोगश्च। अंते भक्त्यादि साधनसामर्थ्यनतइतरत्रेद
षस्पूर्यं नं तरमितरच। तस्यतावदेव चिरमिति। अनेवंविन्महत्पुण्यं कर्म करोतितन्तद्वास्यांतततः क्षीयत इत्यादेश्च। कीटाः पेशस्कृतचिंतनया पेशस्कृताकार

एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः। जहुस्त्वंते तदात्मानः कीटाः पेशस्कृतो यथा। यथा यथा भगवतो भक्त्या परमयाभिदा। नृपाश्चैद्यादयः साम्यं
हरेस्तच्चिंतया ययुः। आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान्। दमघोषसुतादीनां हरेः साम्यमपि द्विषां। एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः।
अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ४२ ॥ ॥

मा भवंति न तु तदात्मत्वं। अत्र षष्ठ्यर्थे। पौंड्रकेन रके चैव शाल्वे कंसे च रुक्मिणि। आविष्टास्ते हरेर्भक्त्या स्वस्वकारा हरिमीयिरे। अत एव कृष्णस्वयं तेनुस्तादात्म
सिपातिता इति वाकार्यं। अत्रापि तारतम्यमस्तीत्याह यथेति। भिदा विशेषं। भेदो विशेषे दलनइत्यभिधानं। अभिदा। अभंभज्ञातसमाध्यवस्यायां ययुरिति वा।
साम्यं निर्द्वेषित्वादि न तु पूर्णमलक्षणं। अन्यथा कीटाः पेशस्कृतद्ध्यानेन केचन पेशस्कृतो भवंति न तु सएव। पृथग्दृश्यमानत्वादित्ययं दृष्टांतो नर्थाः स्यादि
तिर्यथाधिकमपाडुपसंहरति आख्यातमिति अत्र चैद्यादयो दमघोषसुतादीनामित्यादि बहुवचनोक्तिरनादिकालसंबंधित्वद्योतनार्था अन्यथा चेना
दीनामित्यादि उक्तिरपि स्यात्। ब्रह्मा जननाय स्तोति एषेति ब्रह्मण्यदेवस्य परमस्य च शब्दात्तरसिंहस्य यत्र कथायां ४२ ॥ ॥

यत्र कथायां भक्त्यादिकमेव मुक्तिसाधनं न द्वेषादिकमित्येतद्वत्रतिष्ठा द्यतेऽस्मु पसंहरति नि न्ति रिति भक्त्यादिलक्षणो धर्मश्चात्र कथितश्चयन्त्रयः ४३ येन भक्त्यादि कलक्षणधर्मेण हरिमितरेऽप्योमावर्त्तयति सिर्गेतिश्च्यत्म्पयोयथास्थितत्वा आत्मानमधिकृत्य वर्त्तमानमिंद्रियादिस्वरूपं च कथितमस्मि न्नाख्याने त्वा दुःतनुपाख्याने ति। अत्रैवं मार्गदो विस्तरेणाह तत्रानुकथनं च भक्त्यादिकं मुक्तिसाधनं। न द्वेषादिकमिति शिष्टा पत्न्या येन भागवतधर्मे लक्षणवारण्यतो न द्वेषादिनेति शेषः भक्तिज्ञानं विरक्तिश्च नवकश्रवणादिकः धर्मो भागवतः सोऽत्रस्त्र कथितश्च यथानवेतिवचनात्। भागवतधर्मेणोचश्रीहरिर्गम्यत इति कथमुच्यते भक्त्यादिना विनेतियमाशंका परिहृत्य भ

प्रह्लादस्यानुचरितं महाभागवतस्य च। भक्तिर्ज्ञानं विरक्तिश्च याथातथ्यं चास्य वै हरेः। सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं। परावरेषां स्थानानां कालेन व्यत्य योमहान्। धर्मो भागवतानां च भगवान्येन गम्यते। आख्याने स्मिन्समाख्यातमाध्यात्मिकमशेषतः। य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं। कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते। एतद्य आद्यस्य पुंसस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत। दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकं। यूयं नृलोके वत भूरिभागा लोकं पुनाना मुनयोऽभियांति। येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं। स वा अयं ब्रह्म महद्विमृग्य कैवल्यनि र्वाणसुखानुभूतिः। प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ४९ ॥ ॥

न्याहेऽर्हधर्मशास्त्रवाच्यत्वात् श्रवणं कीर्तनं विष्णोरित्यादिश्रवणादिनवकं। अधुनाख्यानकीर्त्तनादिना पत्नुण्यं तदाह यइति सामान्यतउक्तं विष्णोर्वीर्यणदिति न्यादेः धर्मशास्त्रवाच्यत्वात्। ... नयोपेतानतिर्यथा अतीत्य वर्त्तमानाव नबि न नु प्रह्लादानुभवस्यानुवर्णनेन सुधिष्ठिरादीनां ततो धर्मत्व प्रतीयत इति मंदाशंकापरिहरति यूयमिति। मुनयो पेतानतिर्यथा अतीत्य वर्त्तमानावनबि स्मये खेदानुकंपो संतोष विस्मयानुमंत्रणे वनेति। न नु परब्रह्मणो मुक्तिगाढ़्त्यतः परब्रह्म शाड्गेन विष्णुत्वनिश्चयः। कथमिति तत्राह स वाइति। केवल्येनाम क्षत्वेन पत्रिर्वाणसुखमशरीरत्वं तस्यानुभूतिरनुभवो यस्य स तथा। अनन्ययोग्यस्वरूपानंदमनुभवतीत्यर्थः। अनेन विष्णुत्वनिर्णयोपि। विधिकृद्दाज्ञा कारी। गुरुर्हितोपदेष्टा ४९ ॥

न तु दुर्ज्ञेयरूपत्वं हि विष्णुलिंगत्वेन हि सुज्ञेयमपुर्वोपि ब्रह्मास इति श्रान्ततेः। स्वरूपानंदानुभवित्वं सायुज्यभाजो पश्यत्र तः कथं निर्णयः इति तत्राह नः यस्येति। स समेरी कामं दशमोऽध्यायः। अस्मिन्नध्याये हरि भक्तिविध्यानार्थं रुद्रमाहात्म्यकथनव्याजेन तन्माहात्म्यं प्रतिपद्यते। अधुनात्रैकोरु द्रोमहिमीयोव तस्य दृत्या दिक्तितेः प्रतीयमान रुद्रस्याहितीयार्थत्वं प्रतिपाद्यमाने जने महाद्रव्यव्ययेन प्रद्युम्नमानस्य रुद्रस्यासुरावेशात्तंशयो नन्न्वरद्दं सर्वभगवद्धीनं नवेति ईशानः सर्वविद्यानामीश्वरः सर्वभूता नामित्यादिमंत्रैः स्तूयमानस्य। तद्दयालुर्भक्तवत्सलः श्रीनारायणो रुद्रस्य तं संशयं सपाचक्रो कथं केनेतित त्राह। स एष इति। स भगवान् नृसिंहात्मना ब्रह्मदेवेन वरेण दृ प्तहिरण्यकशिपुः पुरः सरासुरजातिं निर्मूलयित्वा प्रह्लादादिभक्तस्य मुदायस्यानुगृहीतः स एष युष्मद्बंधुभूतः श्रीकृष्णः पुराकल्पविशेषे देवस्य इरेश्क्षति

नयस्य साक्षाद्भगवद्भवब्जादिभिरूपंधिया वकृत योपवर्णितं। मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ५० इति श्रीभाग वते महापुराणे सप्तमस्कंधे दशमोऽध्यायः नारद उवाच स एष भगवान् राजन्व्यतनोद्विहितं यशः। पुरा रुद्रस्य देवस्य मयेनानंतमायिना १ राजोवाच कस्मिन्कर्मणि देवस्य मयोऽहन् जगदीशितुः। यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यतां। २ नारद उवाच निर्जिता असुरा देवैर्यु ध्यनेनोपबृंहितैः। मायिनां परमाचार्यं मयं शरणमाययुः ३ ॥ ॥

ध्यानादिकं कुर्वाणस्य रुद्रस्य रोदनाद्याविज्ञानं गतस्यात एव तत्रापि शिवस्यानंतमायिनामेकृशतम हस्रमायावता तएवार्थ दल्पेन मयेन वत्र मारणप्रतीकारं कृत्वा तस्य तस्य रुद्रस्य भगवद्भक्त प्रधानं इत्यादियशोवितितं त्रिपुरनाशनेनव्याप्तं त्रकरोदात्मनोतिशयस्त्रामित्वेन तदनुयाह कत्वेन च विमल सकृते सुव्र पनेन पृष्टः कस्य विष्णू यादितिवचनात् प्रसक्तं प्रमेयं विस्तृत्य श्रीतं राजा पृच्छति कस्मिन्कर्मणीति कस्मिन्कर्मणि मयो विप्रीता च कारायेन ईशितुर्देव स्य यशोश्रुत्वा च कीर्तिः कृष्णेन यथा कथमुपचिता प्रचिता सा कथाविशेषो मम कथ्यतामित्यन्वयः। नारदः प्रश्नपरिहरति निर्जिता इति अनेन हरिणा उपबृंहि तैः अन्यसहायेन पुरा जिता इत्येतद्देवानां न दोषापनिरासवेन्नणस्य सतः सिद्धत्वा देवानां सायेत्वं न नु दोषाय यत्र सिद्धमपेक्षितमितिवचनात् ३ ॥

मत्वेन त्रिपुरनिर्माणकर्मणा विपरीतं कृतमित्याह सनिर्ममइति सनिर्ममः दुर्लक्ष्यो दुर्वितर्क्यो यस्यार्थो संयोगो नाम संबंधः अतः प्रवेशसंबंधो मयासानां सूर्यात्मत एवादृश्यबुद्ध
मत्वेन त्रिपुरनिर्माणकर्मणा विपरीतं कृतमित्याह सनिर्ममइति सनिर्ममः ... मयेन त्रिपुरनिर्माणकर्मणा विपरीतं कृतमित्याह हरिणा
तरा पुष्टादिपरिकराः असुरसेनायाः असुरसेनानायकाः सेश्वराः सहरयः अत्रापि विष्णुसहितं देवानां रुद्रापेक्षित्वेन दोषाय त्रिपुरहननं रुद्रेण कार्यमिति हरिणा
क्रमत्वात् इंद्रादिभिर्वा विष्णुः शिवः मामेहेत्युक्त्वा पुर्यामित्येकवचनं ज्ञाति विवक्षयात तो छत्रुघोमसूर्यवसंदोहरश्मिराशयः यतोमेशरैः पुरः पुराणि स्पृष्टानि सा
सवः शतप्राणाः इदममनेन कृतं विपरीतमित्याशयनाह तानिति सिद्धामृतरसः मृतसंजीवनरसः तान्निस्पृष्टाः प्राप्ताः वेद्धृताः विद्धतनं वज्रिनः यशहेनजलादि

सनिर्ममित्र रश्मिस्रो हैमरौप्यायसीभिः दुर्लक्ष्यापायसंयोगा दुर्वितर्कपरिच्छदाः तामिस्ते सुरसेनान्योलोकांस्त्रीन्सेश्वरा नृप स्मरंतो नाशयांचक्रुः पूर्व
वैरमलक्षिताः ततस्ते सेश्वरालोका उपासाद्येश्वरं ततः त्राहि नस्तावका न्देव विनष्टांस्त्रिपुरालयैः अथानुगृह्य भगवान्मा भैष्टेति सुरान्विभुः शरंधनुषि
संधाय पुर्येष्वस्त्रं व्यमुंचत ततोग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् यथा मयूखसंदोहा नादृश्यंत पुरो यतः तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः तान्
संधाय पुर्येष्वस्त्रं व्यमुंचत ... आनीय महायोगी मयः कूपरसे क्षिपत् सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजं तदा
नीय महायोगी मयः कूपरसे क्षिपत् सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः उत्तस्थुर्मेघदलना ...
यं भगवान्विष्णुस्तत्रोपायमकल्पयत् वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ तेसुरा ह्यपि पश्यंतो न न्यषेधन्विमोहि
ताः तद्विज्ञाय महायोगी रसपालानिदं जगौ स्मयन्विशोकः शोकार्तान्स्मरन्दैवगतिं च तां १३ ॥ ॥

नाय थाना शोनाश्रितयैषामिति सूचयति कथं कृत्स्नेनोपचिता कीर्तिरिती मं उभयं परिहरन्नाह विलोक्येति कोसाविति तत्राह वत्स इति हि शहेन विष्णुर्ब्रह्माणमपेक्षतेति
न दोषाये ति तत्संकल्पकारित्वेन सिद्धत्वादिति सूचयति कालेमध्यंदिने यथा तरसि कृत्वा हित्वा हेनभगवन्मायापाशमायायोपरिमितमाहात्म्यमस्तीति सूचयति
कृतापराधप्रह्लाणाय सुरस्यभगवच्छक्तिप्रकटनाय चमयस्त्वशिष्यज्ञानंच ममास्तीत्यपि प्रार्थेणाहेतदिति नदैत्यवधोपायकरणं किंचित्कालमसुराणां जयदायिनी
मिष्टा नीदेवानामितिदेवगतिं १३

किं नगावतः इदेवइति आत्मनः सर्वस्य अन्यस्य देवदत्तस्य चेति द्वयोः देवेन विष्णुनादिष्टं कृतं यत्त्वापोहितुं अन्यथाकर्तुं इह जीवः शोदेवो सुरो न्यो वा कश्चनेश्वरः समर्थो नास्तीत्य
तस्मात् भाव एव वरीयान्नित्यर्थानतु सिद्धरस पानं व्यर्थमिव प्रतिभाति त्रिपुरीणामनाशादित्याशंक्यतन्नाशसाधनमाह अथेति अथ देवजीवनसाधनरसनाशानंतरं
स्वाभिः शक्तिभिः भूम्यादिभिः शंभोः प्राधानिकं युद्धसाधनं रथादिकं व्यधादित्यन्वयः धर्मादि विलोपेतत्वात् धर्मादिभिः किंतत्प्राधानिकमिति तदाहरथमिति भ
गवतो हरेः जसा पुत्रा रचितः यशो वितिप्रकारमाहदिवीति जयेत्युक्ता हरेः त्रिपुरनेनयशोवितति र्ज्ञायते ब्रह्मादिभिः सनकादिभिः इमारुद्रापच्छिरथवित्रेनेमि
रः क्षिप्रेमवः इत्यादिवेदवाक्यादिभिर्वा शंभोः पुरहननमाहात्म्यपरत्वात्ना रायणोक्तनिष्ठमित्याशयेनोपसंहरतिएवं विधानीति अपरं भगवद्यतितहृदि

देवो सुरो नरोन्यो वा नेश्वरोस्तीह कश्चन आत्मनोन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः अथासौ शक्तिभिः स्वाभिः शंभोः प्राधानिकं व्यधात् धर्मज्ञानविरक्त्यृ
द्धितपोविद्याक्रियादिभिः रथं सूतं ध्वजं वाहं धनुर्वर्मशरादि यत् सन्नद्धो रथमास्थाय शरं धनुरुपाददे शरं धनुषि संधाय मुहूर्तेभिजितीश्वरः भगवन्
ददाह तेन दुर्भेद्यास्त्रिपुरं नृप दिवि दुंदुभयो नेदुर्विमानशतसंकुले देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरोगणाः
एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमात्मनः वीर्याणि
गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किं ७१ इति श्रीभागवते महापुराणे सप्तमस्कंधे एकादशोध्यायः श्रीशुक उवाच श्रुत्वेहि

तं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः युधिष्ठिरो दैत्यपतेर्मुदा युतः पप्रच्छ भूयस्तनयं स्वयंभुवः १ ॥ ॥
शेषः अपरमन्यद्धस्त्वेवंविधमाहात्म्योपेतं किं वदामि न किमपि तीवा ७० सप्तमे एकादशे भगवद्भक्त्या यथावद्धीतवर्णाश्रमधर्मस्थिरोनस इत्यत्राप रोह्य
तानेन प्रसन्नो हरिः स्वभक्तेभ्यो स्वां मुक्तिं ददातीत्येतदर्थं मुनेरेषाम ध्यायानामारंभः तत्र वर्णाश्रमधर्मान्ज्ञातुकामो युधिष्ठिरो नारदं पृच्छतीत्याह श्रुत्वेतिमह
त्तमानामग्रण्यः पथदर्शक उरुक्रमे हरावात्मा मनो यस्य तथा तस्य दैत्यपतेः प्रह्लादस्य ईहितं चरितं साधुसभा सभाजितं संभावितं महत्तमानां ब्रह्मादीनामु
त्तमानामस्य दैत्यानामपि उरुक्रमात्मनो नरसिंहस्येति वा १ ॥ ॥

धर्मं विशिनष्टि वर्णेति। वर्णाश्रमाचारयुतं पुंसि श्रेयस इति वा हुः। तुतु श्रोतुमिच्छामीत्याशयेनोत्तीर्येति। दाक्षायण्यां नाम्ना मूर्त्यां धर्मतः धर्मात् वर्त्मनार्थस्या
दाधिकरणस्य स्वरूपमभिधानादीश्वरत्वप्रदर्शपवद्बदरिकाश्रम आस्त इत्युक्तम्। बदरिकाश्रमे तपोध्यास्त इति वा। तत्रानुष्ठानधर्मविषये ज्ञानेऽपि प्रवृत्तिः स्यादधिकारि
णामिति माहू धर्ममूलमिति। धर्ममूलं धर्मविषयः। सर्ववेदमयः सर्वप्रतिपाद्येषु प्रधानः। अनेन रुद्रादयो निरस्ताः। इति ज्ञात व्यमके बल धर्मविषय एव तत्त्व निष्ठापक
स्येत्यतो धर्ममूलमित्यत्र प्रमाणं। सर्ववेदमयेति प्रमाणांतरं चाप्याह स्मृतिरिति प्रमाणमिति शेषः। भगवत्प्रसादहेतुत्वात्प्रमाणमित्याशयेनेति। अनेन भगव

युधिष्ठिर उवाच भगवंछ्रोतुमिच्छामि नृणां धर्मं सनातनं। वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं। भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः। सुता
नां संमतो ब्रह्मंस्तपोज्ञानसमाधिभिः। नारायणपरा विप्रा धर्मं गुह्यं यथा विदुः। करुणाः साधवः शांतास्त्वद्विधा न तथापरे ४ नारद उवाच नत्वा भ
गवतेऽजाय लोकानां धर्महेतवे। वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं। योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः। लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्र
मे। धर्ममूलं हि भगवान्सर्ववेदमयो हरिः। स्मृतिश्च तद्विदां राजन्येन चात्मा प्रसीदति। सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः। अहिंसा ब्रह्मचर्यं च त्यागः
स्वाध्याय आर्जवं। संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः। नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनं। अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः। तेष्वा
त्मदेवताबुद्धिः सुतरां नृषु पांडव १० ॥ ॥

ते अंगिरसः स्वः स्वर्गं यंतो गच्छंत आत्मनः सत्रपरिशेषितं धनं सत्रे परिशिष्टं तुष्टिसाधनं द्रव्यं ते तुभ्यं दास्यंति। अथ कालक्षेपमंतरेण त्वं तान् गच्छ इति गो
इस नाभाग आत्मने पिता यथोक्तं तथा कृतवानित्यर्थः। अंगिरसो वा इमे स्वर्गाय लोकाय सत्रमासते षष्ठं षष्ठमेवाहरागत्य मुह्यंति तानेते सूक्ते षष्ठेहनि शं
सयतेषां यत्सहस्रं सत्रपरिवेषणं तन्ने स्वर्यंतो दास्यंतीति तथेति तानुपेत्य प्रतिगृह्णीत मानवं सुमेधस इति तमब्रुवन् किंकामो वदसीति इमे वद षष्ठमहः प्रज्ञा
पयानीत्यब्रवीदथ यद् एतत्सहस्रं सत्रपरिवेषणं तन्मे स्वर्यंतो दत्तेति तथेति तानेते सूक्ते षष्ठेऽहन्यशंसयत्। ततो वै ते प्रयज्ञमजानन् स्वः स्वर्गं लोकं तद्यदे
तेसूक्ते षष्ठेहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्या इति हे सुमेधसः मानवं मां प्रतिगृह्णीत स्वीकुरुतेति मंत्रमुक्त्वा कश्चिन्धनेविद्यामथास्म

इमअंगिरसः सत्रमासद्यते सुमेधसः। षष्ठं षष्ठमुपेत्याहः कवे मुह्यंति कर्मणि ३ तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः। ते स्वर्यंतो धनं स
त्रपरिशेषितमात्मनः ४ दास्यंति तेऽथ तान् गच्छ तथा स कृतवान् यथा। तस्मै दत्वा ययुः स्वर्गं ते सत्रपरिवेषणं ५ तं कश्चित्स्वीकरिष्यंतं पुरुषः कृष्ण
दर्शनः। उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ६ ॥ ॥

इदमे ज्ञिते विद्योपदेशोकामो मम सत्वं किंकामः। पुष्पदक्षिकविद्यावत्वात् द्वितीयोऽधुना नानाभिमत इति तृतीयका मइत्याह इदं मे वेति। प्रथमविकल्पका मो
विभवामी माशापेनाह। अथ यदिति। सर्वयज्ञे भूमयो गमाह। तद्यदिति। अनुख्यातिः प्रकाशः। तेऽअंगिरसः। सत्रपरिवेषणं धनं तस्मै नाभागाय दत्वा स्वर्गं पु
रित्यन्वयः। तं स्वर्यतो ब्रुवन्ते तत्रैव ब्राह्मणं मह्यमिति इति। हे ब्राह्मणवेदविद्याविशारद। कृष्णदर्शनः कृष्णवर्णः तथा प्रतीयमानः। कश्चित्पुरुषः किलन्नाणः पुरुषः
रुद्रः यज्ञशालायामुत्तरदिग्भागादभ्येत्य सत्रपरिवेषणं स्वीकरिष्यंतं नाभागमुवाच। कथं। इदं वास्तुवं यज्ञशालावशिष्टं वास्तुकं वसु वस्तु ममेति। तदेन
समाकुर्वाणं पुरुषः कृष्णसेकाभ्युत्तरतः पोत्या याद्ब्रवीन्मम वाइदं मम चैवास्तु इति इति। स मां कुर्वाणं शीघ्रमुपस्वीकुर्वाणं कृष्णपुरुषः समसी। वा
इंवा स्वयमलभद्रमाबाण इह कारवकारखो पर्यायत्वांगीकारात् ॥ ६ ॥ ॥ ॥

कर्मभिर्विकुक्षिमलज्जणोऽबामानि १३ १५ इंद्रात्मक ऋषभककुदि स्थितः १६ १७ तस्य पुरंजयस्याख्योः शरस्यपातस्याभिमुखं प्रत्यवस्थानं। स्व
मालयं स्वगृहं खल्विला दैत्यादुडुडुरित्यन्वयः। सराजा पुरं जित्वा सर्वं पुरधनमयक्षद्दाप्नोत्। पुनस्तत्स्तरधनं वज्रपाणये प्रत्ययच्छत्तदनेनवाइस

ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥१३॥ कृतांत आसीत्समरो देवानां सह दानवैः। पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः १४
वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः। वाहनत्वे वृतस्तस्य बभूवेंद्रो महावृषः १५ स सन्नद्धो धनुर्दिव्यमादाय विशिखाञ्छितान्। स्तूयमा
नस्तमारुह्य युयुत्सुः ककुदि स्थितः १६ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः। प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरं १७ तैस्त
स्य चाभवद्युद्धं तुमुलं रोमहर्षणं। यमाय भल्लैरनयद्दैत्यानभ्ययुर्मृधे १८ तस्येषुपाताभिमुखं युगांताग्निमिवोल्बणं। विसृज्य दु
द्रुवुर्दैत्या हन्यमानाः स्वमालयं १९ जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये। प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः २० पुरंजयस्य पुत्रोऽभूद
नेनास्तत्सुतः पृथुः। विश्वगंधिस्ततश्चंद्रो युवनाश्वस्तु तत्सुतः २१ शावस्तस्तत्सुतो येन शावस्ती निर्मिता पुरी। बृहदश्वस्तु शावस्तस्ततः कुव
लयाश्वकः २२ यः प्रियार्थमुतंकस्य धुंधुं नामासुरं बली। सुतानामेकविंशत्या सहस्रैरहनद्वृतः २३ धुंधुमार इति ख्यातस्तत्सुता
स्ते च जज्वलुः। धुंधोर्मुखाग्निना सर्वे त्रय एवावशेषिताः २४ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत। दृढाश्वपुत्रो हर्यश्वो निकुंभस्तत्सुतः
स्मृतः २५ बर्हणाश्वो निकुंभस्य कृशाश्वोथास्य सेनजित्। युवनाश्वोऽभवत्तस्य सोऽनपत्यो वनं गतः २६ भार्याशतेन निर्विण्ण ऋषयोऽस्य
कृपालवः। इष्टिं स्म वर्तयांचक्रुरैंद्रीं ते सुसमाहिताः २७ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ॥ ॥

राजर्षिरिति पुरंजयात्पुरंजय इति नाम्नाहूतः। वृषभरूपेंद्रस्यास्य वाहनत्वादिंद्रवाह इति नाम्नाहूतः। वृषभककुदि स्थितत्वात्ककुत्स्थ इति
नाम्नाहूतः। तर्षितः तृडन्वितः ॥ ॥

मंत्रपूतं जलं। पुत्रकं जलं रक्षितं २८ पुंसवनं पुत्रोत्पत्त्यर्थमभिमंत्रितं। ईश्वरप्रहितेन दैवप्रेरितेन। स्तन्यः स्तनपाने त्रुटः अयं बालो भृशं रोरूयते पुनः
पुनरत्यंतं रोदनं करोति कं धास्यति कस्य स्त्रीजनस्य स्तनं पास्यतीति मत्वा इंद्रो हे वत्स मा रोदीरीदृशं मां कर्षीः स्वेति प्रदेशिनीं मधु स्थाने तरां अंगुली

दृष्ट्वा शयानान् विप्रांश्च तान् न पपौ स्वयं जलं स्वयं। उत्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो। पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं ॥२९॥ राज्ञा
पीतं विदित्वाथ ईश्वरप्रहितेन ते। ईश्वराय नमश्चक्रुरहो दैवबलं बलं ३० ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणं। युवनाश्वस्य तनयश्च
क्रवर्ती जजान ह ३१ कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशं। मां धाता वत्स मा रोदीरितींद्रो देशिनीमदात् ३२ न ममार पिता तस्य विप्रदेव
प्रसादतः। युवनाश्वोथ तत्रैव तपसा सिद्धिमन्वगात् ३३ त्रसद्दस्युरितींद्रोंग विदधे नाम यस्य वै। यस्मात्त्रसंति ह्युद्विग्ना दस्यवो रावणादयः
३४ यौवनाश्वोथ मांधाता चक्रवर्त्यवनिं प्रभुः। सप्तद्वीपवतीमेकः शशासाच्युततेजसा ३५ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः।
सर्वदेवमयं देवं सर्वात्मकमतींद्रियं ३६ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः। धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकं ३७ यावत्सू
र्य उदेति स्म यावच्च प्रतितिष्ठति। सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ३८ शशबिंदोर्दुहितरि बिंदुमत्यामधान्नृपः। पुरुकुत्समंबरीषं
मुचुकुंदं च योगिनं। तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिं ३९ ॥ ॥

मदादतो मांधातेति नाम। तस्य मांधातुः पिता युवनाश्वः। यज्ञं श्रीहरिं ३५ सर्वदेवप्रधानं सर्वात्मकं मंत्रतंत्रद्रव्यादि सर्वपदार्थव्यापिनं ३६
एतद्देवस्पृहयति। द्रव्यमिति। यत्र आत्मा व्यापी यस्य तत् यदात्मकं ३९ ॥ ॥

निर्वृतिमानंदं। स सौभरिरयं मुनिः स्त्रीणामसंमतो जरठः। एजत्कंपमानं कं शिरो यस्य स तथा वलीपलितो त एवाहं राज्ञा प्रत्युदाहृतः स्वयंवरे दृश्यतामिति श्लोका
दृश्यं विचिंत्यात्मानं मां तथा साधयिष्ये यथा सुरस्त्रीणामभीष्टमिति व्यवसितः। क्षत्रा कन्यांतःपुरं प्रवेशितः एकः पंचाशता राजकन्याभिः वृतश्चाभूदिति शेषः। कलिः
कलहः तदर्थं सोभरिपतिमित्येवमर्थं। सौहृदं सुहृद्भावमपोह्य परित्यज्य तस्मिन्वरे आसक्तचेतसां। बह्वृचः सौभरिः गृहेषु ताभिः कन्याभिः रेमे इत्यन्वयः। कीदृ
शेषु गृहेषु अपारणीयश्रिया अप्रतिघातलक्ष्म्या विराजंति शोभमानानि च परिच्छदैरुपकरणैः सहितानि च विराजत्सु परिच्छदानितेषु। श्रियानवारणीयः अ

यमुनांतर्जले मग्नस्तप्यमानः परंतपः। निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ४० जातस्पृहो नृपं विप्रः कन्यामेकामयाचत। सोप्याह गृह्यतां ब्रह्मन्का
मं कन्या स्वयंवरे ४१ स विचिंत्याप्रियं स्त्रीणां जरठोयमसंमतः। वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ४२ साधयिष्ये तथात्मानं सुरस्त्रीणामभीप्सि
तं। किं पुनर्मनुजस्त्रीणामिति व्यवसितः प्रभुः ४३ मुनिः प्रवेशितः क्षत्रा कन्यांतःपुरमृद्धिमत्। वृतश्च राजकन्याभिरेकः पंचाशता वरः ४४ तासां कलिरभू
द्भूयांस्तदर्थेपोह्य सौहृदं। ममानुरूपो नायं व इति तद्गतचेतसां ४५ स बह्वृचस्ताभिरपारणीयश्रियानर्घ्यपरिच्छदेषु। गृहेषु नानोपवनामलांभः
सरःसु सौगंधिककाननेषु ४६ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः। स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेनुगायद्द्विजभृंगवंदिषु
४७

निर्वोपः। तथापि वरणायोग्यः इत्यर्थः इति वा। अमलान्यंभांसि यस्य मत्ताभांसि पसरां सौगंधिकानि सो रम्याणि उपवनानि नाना विधोपवनानि च। अमलांभोभिर्युतानि
च सरांसि सौगंधिकानि च काननानि येषु गृहानि तथा तेषु ४६ अनुगायंति द्विजहंसानि अनुगाय द्विजवृंदानि द्विजाः पक्षिणां वृंदानि द्विजवृंदानि तान्येव वंदि
नो येषु गृहानि तथा तेषु ४७ ॥ ॥

एतावदेवानुवर्णयितुं शक्यं नातोऽधिकमित्याशयेनाह। यदिति। स्तंभं अहंकारनिमित्तं कर्तव्याकरणलक्षणं। आज्यस्तोकैः घृतबिंदुभिः। आत्मापह्नवं स्वरूपा पहरणं तपस्विनस्तिरस्कारं वा। यच्चिरं धृतं ब्रह्म तपः तत्प्रच्यावितं भ्रंशितं नष्टमित्यर्थः। ब्रह्म वेदस्तपश्चेत्यपि व्याख्यानं। तत्त्वमनारोपितरूपं ब्रह्मैव सनातनमेव तन्नष्टं तदपि वद्धमिति वा। लोकसंग्रहमेवापि स्वरूपकर्तुमर्हसीति वा कार्यानुसंधानमाह। संगमिति। मिथुनव्रतिनां स्त्रीपुरुषसंयोगे व्रतपरास्तान् मुमुक्षुः संगं [illegible] जेत इंद्रियाणि बहिः शब्दादिविषयेषु न विसृजेत् न प्रयुंज्यात्। एकाकी चरन् रहसि एकांते अनंते ईशे चित्तं युंजीत यदि संगोऽपेक्षितस्तर्हि तस्मिन्नेव र

यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः। विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितं ४८ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः। सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ४९ स कदाचिदुपासीन आत्मापह्नवमात्मनः। ददर्श बह्वृचाचार्यो मीनसंगसमुत्थितं ५० अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य। अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ५१ संगं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि। एकश्चरन्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ५२ एकस्तपस्व्यहमथांभसि मत्स्यसंगात्पंचाशदासमुत पंचसहस्रसंगः। नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ५३ ॥ ॥स्म

तद्व्रतिषु तेषु साधुषु निर्मत्सरजनेषु प्रसंगः स्यात्तान्सेवेतेत्यन्वयः। अहमेक एव तपस्वी अथांभसि मे गलजले मत्स्यसंगात् मत्स्यानां मिथः संगं दृष्ट्वा। अथानंतरं पंचाशता स्त्रीभिः सह सुरतप्रसंगेन सुतपंचसहस्रसंग आसं अथोभयकृत्यं पुत्राणां विवाहादिः कन्यकानां प्रदानादिरित्युभयं कर्तव्यं। तत्र ये मनोरथाः मनःसंकल्पविशेषास्तेषां। उभयेन स्त्रीपुरुषद्वयेन यत्कृत्यं तत्र विद्यमानानां मनोरथानां वा। उभयस्मिन्निहलोके परलोके च यत्कृत्यं तद्विषयमनोरथानां वा अंतमवसानं न व्रजामि तत्रेदं निमित्तमित्याह मायेति। शब्दादिविषये प्रयोजनबुद्धिः। मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः ५३

एवं विरज्य किमकार्षीत्तत्राह एवमिति। संन्यासं विरक्तगृहादित्यागलक्षणं। आत्मकर्शनं देहस्य कृशताकारकं। अग्निभिः सहात्मानं देहं दग्ध्वा परमात्मनि युयोजेत्यसावुपलक्षणं सोऽहमात्मभावानित्यर्थः। मातामहेन मातुः पित्रा मांधातुस्त्वंबरीषस्य सुतः। मांधातृप्रवरा येषां तेन तथा। भ्रातृभिः उरगैः पुरुकुत्साय मांधातृज्येष्ठपुत्राय दत्ता भुजगेंद्रप्रेरितया तया नर्मदया रसातलं नीतः स पुरुकुत्सः तत्र रसातले वध्यान् गंधर्वानवधीदित्यन्वयः। वध्यार्हान् [illegible]

एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः। वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ५३ तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्शनमात्मवित्। सहैवाग्निभिरात्मानं युयोज परमात्मनि ५४ ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिं। अन्वीयुस्तत्प्रभावेन शांतमग्निमिवार्चिषः ५५ मांधातुः पुत्रप्रवरो योऽंबरीषः प्रकीर्तितः। पितामहेन प्रवृतो यौवनाश्वस्तु तत्सुतः। ५६ हारितस्तस्य पुत्रोऽभून्मांधातृप्रवरा इमे। नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय चोरगैः ५७ तया रसातलं नीतो भुजगेंद्रप्रयुक्तया। गंधर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् ५८ नागाल्लब्धवरः सर्पादभयं स्मरतामिदं। त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् ५९ हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ त्रिबंधनः। तस्य सत्यव्रतः पुत्रस्त्रिशंकुरिति विश्रुतः ६० प्राप्तश्चांडालतां शापाद्गुरोः कौशिकतेजसा। सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ६१ ॥ ॥

त्वा। नागाः किमस्मै ददुरिति तत्राह सर्पादिति। इमं गंधर्ववधलक्षणं पुरुकुत्सविक्रमं स्मरतां पुंसां सर्पादभयलक्षणं लब्धवर इत्यर्थः। पुरुकुत्सस्यापत्यं पौरुकुत्सः यस्त्रसद्दस्युरनरण्यस्य देहकृत्पिता। अनरण्यस्त्रसद्दस्युसुत इत्यर्थः। तस्य त्रिबंधुरस्य सुतः सत्यव्रतस्त्रिशंकुरिति नाम्ना येन विश्रुत इत्यर्थः। गुरोर्वसिष्ठस्य शापात् कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेन सशरीरः प्राकृतशरीररहितः स्वर्गं गतः अद्यापि दिवि दृश्यते [illegible] त्रिशंकुः ६१ ॥

भा.न.

१६

स्वर्गं गतः कथं मानवैरीश्पत इति तत्राह यातिम इति तेन विश्वामित्रेण बलात्तपःशक्त्या त्रैशंकवः त्रिशंकोरपत्यं हरिश्चंद्रः यो हरिश्चंद्रो निमित्तं यस्य तद्यत्रिमि
तं पत्निणोः सहायिनोः यज्ञः पार्श्वमहत्ता असहायबलाभित्रिविधिनिष्पादवः। नापुत्रस्य लोकोऽस्तीति शास्त्रार्थं ज्ञात्वा नाद्विषणापनाः। अनपत्यः स हरिश्चंद्रो नारदो
पदेशात् हे प्रभो मे पुत्रो जायतामिति निवेद्य वरुणं शरणं गत इत्यन्वयः। एतदेव विवृणोति यदीति हे महाराज यदि वीरः पुत्रो जायेत तर्हि तेन पुत्रेण त्वाम्
जे पुत्रं पशुना त्वां यक्ष्य इति हरिश्चंद्रेणोक्ते वरुणेनापि तथास्त्वित्युक्ते नाम्ना रोहितः पुत्रो नाम इत्यन्वयः। अथैनमुवाच वरुणं राजानमुपधाव पुत्रो मे जाय
तां तेन त्वा यजा इति तथेति स वरुणं राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति तथेति। तस्य ह पुत्रो जज्ञे रोहितो नामेति ब्राह्मणं चैव मे वाथमनु

पातितोऽवाक्शिरा देवैस्तेनैव स्तंभितो बलात् त्रैशंकवो हरिश्चंद्रो विश्वामित्रवसिष्ठयोः ६२ यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकं सोऽनप
त्यो विषण्णात्मा नारदस्योपदेशतः ६३ वरुणं शरणं यातः पुत्रो मे जायतां प्रभो। यदि वीरो महाराज तेनैव त्वा यजा इति ६४ तथेति वरुणेनोक्तः
पुत्रो जातस्तु रोहितः। जातः सुतो ह्यनेनांग मां यजस्वेति सोऽब्रवीत् ६५ यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति। निर्दशे च समागत्य यजस्वे
त्याह सोऽब्रवीत्। दंताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति॥ ॥

वदति। अथ वरुण आगत्य हरिश्चंद्रमवादीदित्याह जात इति। अंग राजन् सुतो जातो तेन पुत्रेण मां यजस्वेति। स हरिश्चंद्रो भक्त्या सोऽब्रवीदिति। तं होवाचाज
निर्वृते पुत्रोपजस्यमानेनेति स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशोऽन्वस्य अथ त्वा यजा इति तथेति। निर्दशः दशाहातिक्रांतः नि
र्दशो जाते। स ह निर्दश आस तं होवाचानिर्दशो न्वभूद्यजस्व मानेनेतीति। यदादाय पशोर्दंता जायेरन्नथ यतदा पशुः शुचिः स्यादनंतरं त्वां यक्ष्ये इत्यब्रवी
त हरिश्चंद्रः। स होवाच यदा वै पशोर्दंता जायंतेऽथ स मेध्यो भवति दंता न्वस्य जायंतामथ त्वा यजा इति तथेतीति॥ ॥

राम

१६

स वरुण एत्याह हरिश्चंद्रं अस्य दंता जाता अथ मां यजस्वेति। तस्य ह दंता जज्ञिरे तं होवाचाज्ञत वा अस्य दंता यजस्व मानेनेतीति। अज्ञत दास प्रत्यस्य दंताः प
तंत्यथ स मेध्यो भवेदित्यब्रवीत्स होवाच यदा वै पशोर्दंताः पद्यंतेऽथ स मेध्यो भवति दंता न्वस्य पद्यंतामथ त्वा यजा इति तथेति तस्य ह दंताः पेदिरे इति
पुनः पशोर्दंताः निपतिताः अथ मां यजस्वेति वरुण आह। तं होवाचाप्यत्स त वा अस्य दंता यजस्व मानेनेतीति। यदा पशोर्दंताः पुनर्जायंते अनंतरं पशुः
शुद्धः स्यादिति स हरिश्चंद्रो ब्रवीत्। स होवाच यदा वै पशोर्दंताः पुनर्जायंतेऽथ स मेध्यो भवति दंता न्वस्य पुनर्जायंतामथ त्वा यजा इति तथेति तस्य दंताः

जाता दंता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ६७ यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति। पशोर्निपतिता दंता यजस्वेत्याह सोऽब्रवीत्
६८ यदा पशोः पुनर्दंता जायंतेऽथ पशुः शुचिः। पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत्। सान्नाहिको यदा राजन् राजन्योऽथ पशुः शुचिः ६९

पुनर्जज्ञिरे इति। अस्य दंताः पुनर्जाताः अथ मां यजस्वेति। स वरुणो हरिश्चंद्रमेत्याह तं होवाचाज्ञत वा अस्य पुनर्दंता यजस्व मानेनेति [illegible] यदा राजन्यः
क्षत्रियः सान्नाहिकः सन्नाहयोग्यः शस्त्रास्त्रग्रहणयोग्यः कवचवान् अथ राजन् पशुः शुचिरिति स हरिश्चंद्रोऽब्रवीत् स होवाच यदा वै क्ष[illegible]ः सान्नाहुको
भवत्यथ स मेध्यो भवति सन्नह्यतु प्राप्नोत्वथ त्वा यजा इति तथेति स ह संनाहं प्रापत् तं होवाच सन्नाहं नु प्रापोद्यजस्व मानेनेतीति ॥ ॥

ननु हरिश्चंद्रः किमर्थं कालमक्षिपदिति तत्राह इतीति। स्नेहपाशाबद्धचेतसा दशाहादिलक्षणं तं तं कालं वंचयता हरिश्चंद्रेणोक्तो वरुणो देवास्तं
न्तत प्रत्याहैवेत्यन्वयः। तथा च यागकाल एव तत्तेतिवा। स तथेत्युक्त्वा पुत्रमामंत्र्य यामास तताय वेमझ्युत्वा मददाहं तत्वया इमिमं यज्ञातिस हनेत्युक्त्वा
धनुराहायारण्यमपातस्थौ। स संवत्सरमरण्ये चचारेति ब्राह्मणप्रसिद्धं पितुश्चिकीर्षितं वरुणमुद्दिश्यात्मयजनं कर्तुमिष्टं तत्कर्माभिज्ञाय प्राणप्रे
प्सुरात्मजीवनेच्छू रोहितो धनुराहाय वनं प्राप तदनंतरं पितरं वरुणग्रस्तं पित्वा रभ्यप्रदायसमवंदतेत्यनेन ग्रंथेनाथ ऐक्ष्वाकं वरुणो जग्राह तस्य होद
रं जज्ञे इत्यादि ब्राह्मणप्रसिद्धोऽर्थो निरूप्यते। इयाय आजगाम। प्रशंसायां रूपप्तययविधानात् प्रशस्तस्तु रूषरूपः विप्र इति यावत्। इंद्रो वृद्धविप्रो भूत्वा तं रो

इति पुत्रानुरागेण स्नेहयंत्रितचेतसा। कालं वंचयता तं तमुक्तो देवस्तमैक्षत १० रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितं। प्राणप्रेप्सुर्धनुःपाणिररण्यं प्रत्यपद्यत ११ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरं। रोहितो ग्राममेयाय तमिंद्रः प्रत्यषेधत १२ भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः। रोहितायादिशच्छक्रः सोप्यरण्येचरत्समाः १३ ॥ ॥

हितमेत्य पर्युवाच। अथ परीवर्जन इति सन्नात् निषेधवचनं कृतवान् नर्तान्तव्यमित्युक्तवानित्यर्थः। तत्र युक्तिमाह। भो रोहित नाना श्रांताय पुण्यपतीर्थ
क्षेत्रनिषेवणेन नानाविधे नश्रांतस्य जनस्य श्रीरैहिकामुष्मिकसंपदस्तीति। नृषद्वरः अनुक्ताकारी गुर्वादिवचनमप्युल्लंघ्य वरिष्ठश्च सकारो वा
जनः पापः इति शुश्रुम। तर्हि संचरमाणस्यैकाकिनश्चोरादिभयं स्यादिति नाशंकनीयं चरतः पुंसः इंद्र एव सखा भवतीत्यतः चरैव त्वं अटनं कुरुष्वेव
कश्चिद्ब्राह्मणो यापवोचत। कथं चरेवेति। नृषद्वरोऽनुक्तकारी चरन् कुर्वन् कीर्त्तिरिति। इंद्रेणोपदिष्टो रोहितः किं चकारेति। तत्राह सोपीति। समाः वत्सरा
न् १३

एवं द्वितीयवत्सरादावरण्ये चचारेति तत्राह एवमिति द्वितीयं संवत्सरमरण्ये चचारेति आदि ब्राह्मणं चास्मिन्नर्थे मानं। पुष्पिण्यौ जंघे चरतः। पुष्पि
णी गर्भिणीमं घबोर्वलाम्बुरतिश्रूट ति ने कतास्से यथा। भूष्णुर्भूष्णुः पुरुषः आत्मा सततं सर्वफलयाहिफलं दृष्ट्वातियथा। किंतत्फलमाप्नोतीति
तत्राह शेरइति। अपथे महामार्गे तीर्थयात्राश्रमेण हता अस्य पुंसः सर्वे पाप्मानः शेरे शीर्णा भवंतीत्यनेन छद्म पि चरन् फलं लभत इत्यर्थः। चरेवेत्युक्तार्थं आ
सीनस्य निर्व्यापारस्य भगो भाग्यमप्यास्ते आसीनो भवति। स ऊर्ध्वं न भवति तिष्ठत उत्थानं कुर्वतो भग ऊर्ध्वस्तिष्ठति उत्थानं करोति। पुरुषच्छायेव निपद्यमानस्य
निकृष्टं गच्छतो भगः शेते निद्रां करोति निकृष्टो भवतीत्यर्थः। चरतः पुण्येन यथा संचरमाणस्य पुंसः भगाश्चरातिचरति प्राप्नोति तमिति शेषः। भगो योन्या
भगो पत्नेयशोवीर्यार्कश्रुतिष्विति कलिः शयान इत्यादिना कारणगुणः कार्यपरो योजनीयः। तथाहि कलौ जातः शयानः तामसत्वेन सुप्त भवतु इति निशुस्योभव

एवं द्वितीये तृतीये च तुर्ये पंचमे तथा। अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा १४ ॥ ॥

विद्वापरे जातः संजिहानः संशयानः इत्वं वा अद्रोवेति न त्वं न निश्चिनोति संबंधिपुत्रो दायादो द्वापरो युगसंशयाविति त्रेतायां जात उत्तिष्ठन्। धर्मार्थकार्यल
क्षणकार्योद्योगी भवति। कृतयुगे जातः कृतं विहितं चरन् संपद्यते ज्ञानसंपन्नो भवतीत्यतश्चरन् भवेत्यर्थः। युगेष्वमातेपर्याभेदं तत्कीवेहितेर्थं वदिति।
भूमो चरन्यर्यटनमधु सुखं विंदतिवे। अशनमेक्तोशोपिना झीत्याह चादिह मुदुंबरफलविशेषं चरन्भक्षयन्नश्चमिपर्यटनं कुर्वन्नित्यर्थभावमाहस्वरमितिश्चव
एमननाप्यांस्वादु पुनःपुनः सेवावृद्धिजनकं उदुंबरं अस्तु नाम वरं वरणीयं सर्वगुणाभिरामं हरिश्चिंद्र शरणं गच्छन्नत्वेतिवा। नित्यमटन्को शीतितत्राह सूर्य
स्येतिपश्य रत्नाविरतमटन्नतं दृश्यते आलस्यं न करोतित स्पष्टं यस्य श्रेमाणं अध्वाहतामनशिक्षाप एप। तथा प्येवमरण्ये चरतः जीवनस्तैस्मा दितिवे इ
रोहितं आशिक्षन्तेत्यन्वयः १५ ॥ ॥

एवं शिशिक्षितस्य वारणे षष्ठं संवत्सरं चरित्वा पुरीमुपव्रज्याहं रोहितो गतोऽजीगर्तात् मध्यमसुतं शुनःशेपं क्रीणाति वरं गावां शतं दत्वा प्रक्रीतवानास्ति क्रीत्वा च शुनःशे
पाख्यं पशुं हरिश्चंद्राय पित्रे प्रदाय पितरं समवंदत तं स्वपुत्रः। षष्ठं संवत्सरमरण्ये चचार सोऽजीगर्तं सौयवसिं दृष्ट्वा क्षुधया परीतमरण्यमुपेयाय तस्य ह त्र
यः पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलांगूल इति तं होवाच ऋषेऽहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा इति स ज्येष्ठं पुत्रं निगृह्णान उवाच न मि
ममिति नो एवेममिति कनिष्ठं माता तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे तस्य ह शतं दत्वा स तमादाय सोऽरण्याद्ग्राममेयाय स पितरमेत्योवाच तत हंताहं
ममेनात्मानं निष्क्रीणा इति स वरुणं राजानमुपससार अनेन त्वा यजा इति तथेति भूयान्वै ब्राह्मणः क्षत्रियादिति वरुण उवाचेति। ततः पुरुषपशुप्राप्त्यनंतरं

षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीं। उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतं ७६ शुनःशेपं पशुं पित्रे प्रदाय समवंदत। ततः पुरुषमेधेन हरिश्चं
द्रो महायशाः मुक्तोदरोऽयजद्देवान्वरुणादीन्महाक्रतौ ७६ विश्वामित्रोऽभवत्तस्मिन्होता चाध्वर्युरात्मवान्। जमदग्निरभूद्ब्रह्मा वसिष्ठोऽयास्यः सा
मगः ७७ तस्मै तुष्टो ददाविंद्रः शातकौंभमयं रथं। शुनःशेपस्य माहात्म्यमुपरिष्टात्प्रचक्ष्यते ७८

हायशा हरिश्चंद्रः पुरुषमेधेन पुरुषपशुहिंसालक्षणयज्ञेन वरुणादीन् यजत् अत एव ततः स राजा मुक्तोदरो जलोदररोगरहितोऽभवदित्यन्वयः। तस्माद्यनं
राजसूयं यज्ञक्रतुं प्रोवाच तमेतमभिषेचनीये पुरुषं पशुमालभे इति सोऽभिषेचनीय इति तादर्थ्येऽसप्तमी वरुणमुद्दिश्येति आलेभे। आलंभनमुपक्रांतवा
न्। तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मायास्य उद्गातेति ब्राह्मणार्थत्वेनास्मिन्यज्ञे होत्रादीनाह विश्वामित्र इति। अयास्य एव सामगः
अयास्यः सामगः साम गायतीति सामग उद्गातेत्यर्थः। आत्मा परमात्मा व्याप्तीति आत्मवान्। तस्मै शुनःशेपायोपरिष्टाद्भुतदर्शोऽध्याये ७८

भूपतेः भार्यया सहितस्य सत्यसारं सत्यनिष्ठितकरं वाक्यं धृतिं लौकिकमर्यादास्खलनं दृष्ट्वा अविहतां अप्रतिहितां गतिं ज्ञानलक्षणां दिव्यां भार्ययाः एतत् प्रयमप्य
ज्ञोनिष्काशनाय सभार्यस्य मुक्तिः। उपासनाकाले मनआदितत्वानां उत्तरोत्तरं स्वस्वकारणे विलयस्तदभिमानिदेवतानां भिन्नानां भिन्नेषु प्रवेशलक्षणो विलयः स्व
रूपाणां स्वस्वरूपे प्रवेशैकीभावलक्षणः श्रूयतनीयः। स्मृतं स्वप्रकारमाह मनः पृथिव्यामिति अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागिति श्रुतेः। अ
न्नं पृथिवीत्यतः पार्थिवं मनः पृथिव्यां विलीयते तेन धारयन् तां पृथिवीमद्भिरप्सु अंभस्तेजसा सोऽसंक्षीयते तत्तेजोऽनिलेन प्रस्पते तं वायुं खे आकाशे लीनं
तच्च खं शब्दादावहंकारेण महंकारं महात्मनि महत्तत्वे तदभिमानिनं तदभिमानिन्यात्मनि चतुर्मुखे ब्रह्मणि प्रविष्टं। तस्मिन्महत्तत्वे ज्ञानकलां बुद्धितत्वं लीयते

सत्यसारं धृतिं दृष्ट्वा सभार्यस्य च भूपतेः। विश्वामित्रो भृशं प्रीतो ददावविहतां गतिं ७९ मनः पृथिव्यां तामद्भिस्तेजसांभोऽनिलेन तत्। खे वायुं धार
यंस्तद्भूतादौ तन्महात्मनि ८० तस्मिंज्ज्ञानकलां ध्यात्वा तयाज्ञानं विनिर्दहन्। हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा। अनिर्देश्याप्रतर्क्येण त
स्थौ विध्वस्तबंधनः ८१ इति श्रीभागवते महापुराणे नवमस्कंधे हरिश्चंद्रोपाख्याने सप्तमोऽध्यायः ॥ ॥

तदभिमानिनी सरस्वती तत्सायुज्येन स्थीयते इति ध्यात्वा तया बुद्धिकलया ज्ञानमस्वरूपचैतन्यं निर्दहन्। तां बुद्धिमस्वरूपविषयां हित्वा विध्वस्तबंधनं येन
स तया सह हरिश्चंद्रः स्वभावेन स्वमहिम्ना निर्वाणेशरीररहितेषु खसंविदोऽयस्य स तथा तेन सच्चिदानंदेन अनिर्देश्यं वाग्वतर्क्यं च तत्तथा तेन ब्रह्मणा सह तस्थौ
महब्रह्मणा विपश्चितेति श्रुतेः। आत्मन आकाशः संभूत इति च श्रुतेः। शब्दादौ शब्दकारणे महति आत्मनि हरौ ज्ञानकलां ज्ञानलक्षणकामधेनुं ज्ञानरश्मिं
इति ध्यात्वा तया तथा ध्यानया अस्मत्संभूत इति च श्रुतेः। शब्दादौ शब्दकारणे महति आत्मनि हरौ ज्ञानकलां ज्ञानलक्षणकामधेनुं ज्ञानरश्मिं इति ध्यात्वा तया तथा
ध्यानतया अज्ञानं निमित्तं संसारं भस्मीकुर्वन् तां संस्तुतिं हित्वा परित्यज्य निर्वाणसुखसंविदा अशरीरानंदज्ञानलक्षणेन माहशोऽनिर्देश्याप्रतर्क्येण स्वेन भावेन स्वरू
पेण तस्थुः येन तस्थावितिवा ८१ इति नवमे सप्तमः ॥ ॥

भा॰ न॰

तस्माद्धरिताच्चंपः। तस्माच्चंपा विनिर्मिता पुरी चंपां नाम अत्र तच्चंपापात्यस्य सुदेवस्य। स बाहुकः। अनुमरिष्यती अनुमरणं कर्तुमिच्छंती प्रजावंतं अंतर्वत्नीं तस्या आत्म-
नं देहं ज्ञानता इयमंतर्वत्नीति विदुषे इत्यर्थः। स हृत्वा हंतीति सा हस्रो गरो गर्भे पुत्रमाज्ञाय सपत्नीभिस्तस्य बाहुकपत्न्यै दत्तः इत्यध्याय। तेन विषेण गरेण सह वर्त्तते
इति सगरः। यस्य यस्या हात्पया पृथिवी चक्रवर्ती सद्वर्यं ततेरिति सगरपुत्राः सागराः तैः कृतत्वात्सागरः। समुद्रः। तालजंघादयो द्वीपांतरवासिनो निर्देवाः पामरा

१९

श्रीबादरायणिरुवाच ॥ हरितो रोहितात् आसीत् चंपस्तस्माद्विनिर्मिता। चंपापुरी सुदेवोतो विजयो यस्य चात्मजः १ तरुकस्तत्सुतस्तस्माद्वृकस्त-
स्यापि बाहुकः। सोरिभिर्हृतराज्यस्तु सभार्यो वनमाविशत् २ वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यती। और्वेण जानतात्मानं प्रजावंतं निवारिता ३ आ-
ज्ञायास्यै सपत्नीभिर्गरो दत्तोन्धसा सह। सह तेनैव संजातः सगराख्यो महायशाः ४ सगरश्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः। यस्तालजंघान्यव-
नाञ्छकान्हैहयबर्बरान् ५ नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः। मुंडाञ्छ्मश्रुधरान्कांश्चिन्मुक्तकेशार्धमुंडितान् ६ अनंतर्वाससः कांश्चिद-
बहिर्वाससोपरान्। सोश्वमेधैरयजत्सर्ववेदसुरात्मकं ७ और्वोपदिष्टयोगेन हरिमात्मानमीश्वरं। तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ८ सुमत्या-
स्तनया दृप्ताः पितुरादेशकारिणः। हयमन्वेषमाणास्ते समंतान्न्यखनन्महीं ९ प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके। एष वाजिहरश्चोर आस्ते मी-
लितलोचनः १० हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः। उदायुधा अभिययुरुन्मिमेष तदा मुनिः ११ स्वशरीराग्निना तावन्महेंद्रहृतचेतसः। मह-
द्व्यतिक्रमहता भस्मसादभवन्क्षणात् १२

नावधीदिति गुरोर्वाक्येन। उत्सृष्टं मंत्र यित्वे तिशेषः उपाकृतमित्यर्थः। सगरस्य सुमतिः केशिनी इति द्वे भार्ये तत्र सुमतिः गरुडस्य स्वसा तस्याः पुत्राः षष्टिसहस्रं
सख्यापेषामस्तीति षष्टिसहस्रिणः। उन्मिमेष नेत्रविकाशं कृतवान्। महेंद्रेणाहृतं चेतो येषां ते तत्र यात्रामुग्धा इत्यर्थः। महतां व्यतिक्रमेण हतास्ते च हन्यमानमि-
त्यादिवचनलक्षणापराधेनैव स्वकृतदोषेण हताः नृपपुत्राः। न तु मुनिकोपदग्धाः १२ ॥ ॥

राम

१९

शरीरजानलवन्नित्यप्रसन्ने मुनौ हि रोतमोगुणकारणस्य क्रोधस्य प्रवेशदुस्थ्यपदत्वात्क्रोधसंभूतपापाटवीदहनत्वाच्चेत्याह न साधुवाद इति नृपेंद्रपु-
त्रा मुनिकोपभर्जिता इत्ययं साधुवादो नास्ति असंभवात्। तत्कथमिति तत्राह सत्वधामनीति। शुद्धस्फटिकविशदज्ञानमूर्तौ श्रीकपिलदेवे रोषमयं त-
मः कथं विभाव्यते। उत्पलु भवका शालभ तेन कथमपि किंचजगत्पवित्रीकरणसमर्थस्वभावे। आत्मा जीवे धृतो देहे स्वभावे परमात्मनीति यादवः। कथमिव
भुवो रजः पार्थिवो धूलिः खे पथि न्यपतत्सु इत्युपमा वेदेहत्वात्। इतोपि तमोगुणकार्यस्य कोपस्य हरणवनवस्थाः इत्याशयेनाह यस्येति। इह जगति सद्गुण-
ज्ञायपस्यये नेरिता यत्पहृपेण कथिता दृढा अयोक्तिफलदानाय समर्था न्यत्र तनत्वेन बलिष्ठा सांख्यमयी सम्यग्ज्ञानमयी नौस्तरीयया अज्ञानेन वा मुमु-

न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्वधामनि। कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः १३ यस्येरिता सांख्य-
मयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययं। भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः १४ योसमंजस इत्युक्तः स केशिन्या नृपा-
त्मजः। तस्य पुत्रोंशुमान्नाम पितामहहिते रतः १५ असमंजस आत्मानं दर्शयन्नसमंजसं। जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः १६
आचरन्गर्हितं लोके ज्ञातीनां कर्म विप्रियं। सरय्वां क्रीडतो बालान्प्रास्यदुद्वेजयञ्जनं १७ ॥ ॥

क्तियोग्यः पुरुषः मृत्युपथं मृत्योर्मार्गं दुरत्ययं ज्ञानं नावमंतरेणात्येतुमशक्यं भवार्णवं तरते। तादृशी येन संदृष्टेत्यर्थः। तस्य परात्मभूतस्य साक्षा-
न्नारायणावतारस्य विपश्चितः शुद्धज्ञानवतः श्रीकपिलस्य पृथक् मतिः रोषरूषिता मतिः कथं संभाव्यत इत्यन्वयः। योसमंजस इत्युक्तः हे नृप स केशिन्याः
सगरभार्यायाः आत्मजः पितामहः सगरः। पूर्वपूर्वजन्मनि योगी योगाभ्यासनिपुणो समंजसः संगाद्धेतोः योगादीश्वरोपा[illegible]णाद्विचालितो हि
यस्मात्तस्मात्पूर्वजातिं स्मरतीति जातिस्मरः। आत्मानमसमंजसं असमचेतः संगतमनसि रमणीयं दर्शयन्संगं जहाविति [illegible]। असमंजसत्वं दर्शयति
आचरन्निति। किं तत् ज्ञातीनां विप्रियं कर्मेति तत्राह सरय्वामिति जनमुद्वेजयन् कंपयन्तीरे क्रीडतो बालान् सरय्वां न्यधां प्रा[illegible]क्षिपादित्यन्वयः १७

ततः किमभूदिति तत्राह एवमिति। योगैश्वर्येण पुत्रस्य बाला एते इति तान्नदीजलमग्नान् बालान् दर्शयित्वा ततः स्थानाद्ययावित्यन्वयः १८ विस्मिताः किमकारीति तत्राह अयोध्येति। विस्मिरे विस्मयं चक्रुः। अथासमंजसेगते राजा चान्वतप्यत। पश्चात्तापं प्राप्त इत्यन्वयः १९ पितरि गते अंशुमता किमकारीति तत्राह अंशुमानिति।

एवं वृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै। योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ १८ अयोध्यावासिनः सर्वे बालकान् पुनरागतान्। दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत १९ अंशुमांश्चोदितो राज्ञा तुरगान्वेषणे ययौ। पितृव्यखातानुपथं भस्मान्ति ददृशे हयं २० तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं। अस्तौत्समाहितमनाः प्रांजलिः प्रणतो महान् २१

त्वा असमंजसहोदराः तेषामनुमार्गं पितृव्याणां शरीरभस्मद्वयमपि ददर्श इत्यन्वयः। भस्मांतीति पाठे भस्मसमीपे हयं दृष्टवानित्यर्थः २० अस्तौत्स्तुतवान् २१ ॥

स्तुतिर्द्वेधा विद्यमानगुणविषया विद्यमानगुणाविषया च। तत्राद्वितीयापि विविधा विद्वद्विषयभेदेन द्विविधा। उभयस्यापि स्तुतिफलं न सम्पद्यते। विदुषस्तु असत्यविद्यमानगुणकथनेनाक्रियाज्ञोतरिद्दुषसंवादविदुषो ज्ञानेन सुखविकासादिसंभवेपि स्तोतुः स्तुतिफलप्रदानशक्तिसामर्थ्याभावादतः अयमेव पक्षो यस्तीतिभावेन स्तौति। न पश्यतीति। अजनो जनो विरिंचः यस्य परमात्मनो त्वां न पश्यति। अनंतत्वेन साक्षादपरोक्षीकर्तुं न शक्नोति। तर्हि परोक्षतो जानाति किं नेत्याह नेति समाधियुक्तिभिरेकाग्रीकृतचित्तयोगैरद्यापि न बुध्यते सम्यक्तत्त्वेन न जानातीत्यन्वयः। पश्यतो विन पश्यंतीति सिरोरूपं विपश्चित इत्यतिवत् न पश्यत्वामिति पाठे परमात्मनोऽप्यस्यतत्त्वं न बुध्यत इति न किंतु बुध्यतेतथापि सम्यक्तत्त्वेन जानातीत्यर्थः। कः क्षुद्रसांयोगमावेद धीरः को धिष्ण्यापतिवात्वंपपा

न पश्यति त्वं परमात्मनोजनो न बुध्यतेद्यापि समाधियुक्तिभिः। कुतोपरे तस्य मनः शरीरविसर्गसृष्टा वयमप्रकाशाः २२

देक्षतेः। न पश्यतीति रूपस्य नानोपाय विशारद ज्ञानस्य परमात्मन अवतत्त्वं न बुध्यते इति वा। एकस्याभावेप्यन्यस्य संभवः किं न स्यात्तत्र थाट दृष्टत्वादित्याशंक्य प्रश्नयति ज्ञानं तिद्दर्शनादिसद्भावे एवं क्यतरविप्रयोयंस्यायोन परमात्मा विषय इति भावेनाह। कुत इति अपरे विरिंचादितरे समाधियुक्तिरहिताः कुतो हेतोः पश्यंति जानंति दर्शनादिसद्भावे न किमपि लिंगमित्यर्थः। अनेन बोध्यं कथं परिहृतमिति तत्राह। तस्येति तस्य विरिंचस्य मनसः शरीरात्त्वविसर्गाः विशिष्टा सृष्टिर्येषां मरीच्यादीनां ते मनःशरीरविसर्गाः तैः सृष्टेषु शरीरावयवेषु श्रोत्रादिष्वप्रकाशेऽभिमानित्वेन स्थितिलक्षणो येषां दिक्सूर्यादीनां ते मनःशरीरविसर्गसृष्टावयवप्रकाशाः इंद्रादयो मरीच्यादयः उभयेपि प्रत्युक्ताः। अत्र जनो न पश्यति न बुध्यते इत्यंगीकारे कुतोपर इत्येतद्गतोर्थत्वेनासंगतं स्यादिति वक्तृवचनमेवावशिष्यत इति पदच्छेदेन विरिंच एव ग्राह्यः २२

भा॰न॰

२१

येदेहभाजःशरीरिणस्तेत्रिगुणप्रधानाःसत्वप्रधानारजःप्रधानास्तमःप्रधानाइतित्रिधा।तत्ररजःप्रधानारजस्तामानुषाःत्रिगुणएवप्रधानाधर्मार्थकामपरायणाःगुणान्समदृहीनेवपश्यंतिनमोहं।तमप्रधानास्तामसाःश्रसुरापस्वरुद्रेर्मायायावंधशक्त्यामोहितचेतसः।श्रन्ययात्मानपूर्णवुद्धयःतत्नोवाश्रंधतमएवदिशिंपश्यंतिश्रनुभवंति।श्रत्रनिमित्तमाहतश्चेति।तेस्वसंस्थंहृदिस्थितंविकृंनविदुरितियत्तस्मादितिशेषः।तद्वेचेतनाःकिंतेइतिनेत्याह।वहिरितिवहिर्देहादावेवप्रकाशोयेषांतेतथाश्रनात्मन्यात्मनिरत्यर्थः।श्रात्मेवमहेप्यइतिश्रुतेः।ज्ञानाभ्रुपत्वेनचेतनत्वेपियथार्थज्ञानंनास्तीतिभावः।येसत्वप्रधानाःसात्विकप्रकृतयःतैःसनंदनाद्यैःमुनिर्विभाव्यंउपास्यंतंतत्रयोग्येभ्यस्तत्फलदातारंत्वामहंकथंपरिभावयामिचिंतयामि।चिंतनेकानुपपत्तिरितितत्राहविमूढइतिसामान्यज्ञानेवस्तुनिविविशेषु।जिज्ञासासंज्ञाघटीतिममतुतदेवनास्तितत्वद्विषयज्ञानाभावएवानुपपत्तिरित्यर्थः।सनंदमादी

येदेहभाजस्त्रिगुणप्रधानागुणान्विपश्यंत्युतवातमश्च।यन्मायया मोहितचेतसस्तेविदुःस्वसंस्थंनवहिःप्रकाशाः २३

तंत्वामहंज्ञानघनस्वभावंप्रध्वस्तमायामयभेदमोहैः।सनंदनाद्यैर्मुनिभिर्विभाव्यंकथंविमूढःपरिभावयामि २४

प्रशांतमायागुणकर्मलिंगमनाममरूपंसदसद्विमुक्तं।ज्ञानोपदेशायगृहीतलिंगंनमामहेत्वांपुरुषंपुराणं २५

नामपिदेहभाक्त्वाविशेषात्तत्परिभावनाकथंस्यादितितत्राहप्रध्वस्तेतिप्रध्वस्तोमायामयःप्रकृतिहेतुकःभेदमोहःश्रनात्मन्यात्मत्वमोहोयेस्तेतथातैःनिरस्तमिथ्याज्ञानैरित्यर्थः।श्रनेनदेहभाक्त्वेपिविशेषोस्तीतिदर्शितं।कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैरितिस्मृतिः।त्वांनमामहइत्यन्वयः।त्वामितिकइतितत्राहपुरुषमितितर्हिवेदहंवन्धिरंतमःकश्चिदयंस्यादितिनेत्याहश्रनामरूपमितिप्राकृतनामादिरहितंतत्कुतइतितत्राहसदितिसतोव्रह्मांडादेःश्रसतःपरमाण्वादेःविमुक्तंभिन्नं।तुम्मवर्णमितिश्रुतेः।शरीरत्वेननामरूपदर्शनात्तदाभावकथनंकथमितितत्राह।ज्ञानेति।लोकानुग्रहार्थंशरीरग्रहणंनतुकर्मनिमित्तंश्रतएवनित्यंदुःखाभावः २५ ॥ ॥

राम

२१

त्रिविधानांजीवानांस्वभावालिप्तवोनास्तीतिदर्शनायमानुषस्वभावमाह।यन्मायेति।यस्यहरेर्मायायाप्रकृत्याकृतयावारचितेनिर्मितेलोकेभूम्यादौरचिताग्रहादिषुवस्तुबुद्ध्या।तस्यरागोतिममसाध्यमंतिपरिवर्तंतिकेमानुषाइतिशेषः।निमित्तमाहकामेति।कामोविषयाभिलाषः।लोभोधर्मादिविनियार्थत्यागानिच्छाईर्ष्यान्यत्रस्मामोहोवैचित्र्यंएतैःविभ्रांतंचेतोयेषांतेतथाश्रनेनान्यद्वयंव्याख्यातं।उपसंहरति।श्रद्येति।श्रद्यनोस्माकंपुत्रादिषुदृढोमोहपाशःश्रज्ञानहेतुकःस्नेहपाशश्छिन्नइत्यर्थः।कामकर्मेद्रियेयाशेतइतिकामकर्मेद्रियाशयः।श्रर्हंतिश्रपेक्षंते।महदपराधपंकप्रक्षालनेतत्मज्जनोद्धारा

यन्मायारचितेलोकेवस्तुबुध्यागृहादिषु।भ्रमंतिकामलोभेर्ष्यामोहविभ्रांतचेतसः २६ श्रद्यनःसर्वभूतात्मन्कामकर्मेद्रियाशयः।मोहपाशोदृढश्छिन्नोभगवंस्तवदर्शनात् २७ श्रीशुकउवाच इत्थंगीतानुभावस्तंभगवान्कपिलोमुनिः।श्रंशुमंतमुवाचेदमनुगृह्यधियानृप २८

श्रीभगवानुवाच श्रश्वोयंनियतांवत्सपितामहपशुस्तव।इमेचपितरोदग्धागंगांभोर्हंतिनेतरत् २९ तंपरिक्रम्यशिरसाप्रसाद्यहयमानयत्।सगरस्तेनपशुनाक्रतुशेषंसमापयेत् ३० राज्यमंशुमतेन्यस्यनिःस्पृहोमुक्तवंधनः।श्रौर्वोपदिष्टमार्गेणलेभेगतिमनुत्तमां ३१ श्रंशुमांश्चतपस्तेपेगंगानयनकाम्यया।कालंमहांतंनाशक्नोत्ततःकालेनसंस्थितः ३२ दिलीपस्तत्सुतस्तद्वदशक्तःकालमेयिवान्।भगीरथस्तस्यपुत्रस्तेपेससुमहत्तपः ३३ दर्शयामासतंदेवीप्रसन्नावरदास्मितेइत्युक्तःस्वमभिप्रायंशशंसावनतोनृपः ३४ गंगोवाच कोपिधारयितावेगंपतंत्यामेमहीतले।श्रन्यथाभूतलंभित्वानृपयास्येरसातलं ३५ किंचाहंदुर्गतिंयास्येनरामय्यामृजंत्यघं।मृजामितदघंक्वाहंराजंस्तत्रविचिंत्यतां ३६

प॰३

यमहांतंकालंतपस्तेपइत्यन्वयः।संस्थितोमृतः।कालमेयिवान्मरणंप्राप्तः।प्रसन्नादेवीतववरदास्मीतिनिगद्यस्वात्मानंतेभ्यहिश्यप्रदर्शयामास।किंचरसातलप्रवेशलक्षणानर्थएवनश्रन्योप्यस्तीत्याशयेनाह।किंचेति।कुतोनरकप्राप्तिरितितत्राहनरादतिपापिनोनराःस्नानादिनामय्यघमामृजंतिशोधयंतिपापंनिक्षिप्यस्वयंशुद्धाभवंतिहेराजन्तदघंमृजामिशोधयामिक्वेतिशेषः।कानिक्षिप्यशुद्धाभवानि।श्रत्रास्मिन्नर्थेविविच्यतांनराणामघसंहर्तास्तिमदघसंहर्ताकिःइतिविवेकःक्रियतामित्यर्थः ३६ ॥ ॥

उत्तरमाह साधवइति। शमदमादिलक्षणसंपन्नाः साधवोतएवनिराशिषः स्पृहादिसुखलक्षणाशीरहिताः। कुतइतितत्राह। ब्रह्मिष्ठाइति। ब्रह्मनो
तंचैतज्ज्ञब्रह्मणः पूर्णभगवद्भक्त्योतिशेषः। अमीअतिशयेनपूर्णाः ब्रह्मिष्ठाः ब्रह्मण्येवस्थिताइत्ययंशंदसः। तथात्वेब्रह्मस्थाइतिस्याद्ब्रह्मणादयमिष्टतान्तस्त
मनुष्यत्वेवंकृतं। लोकपावनाएवंविधाःयेस्वहृदाहरिंधारयंतेतेअंगसंगात्स्पर्शालनादिनाहस्ताद्यंगसंबंधापापिनामघंहरंतीतिशेषः। तेषांस्वहृदिस्थितंह
रिसान्निध्यात्पापंनाश्येवतत्रकिंवक्तव्यमनवरतनन्नाभपादसरोजनिजवासायाइत्यर्थः। द्वितीयंप्रश्नंपरिहरत्नप्रथमंपरिहरतिधारयिष्यतीति। शरीरिणा

राजोवाच साधवोनिराशिषःब्रह्मिष्ठालोकपावनाः। हरंत्यघंतेंगसंगात्तेष्वास्तेह्यघभिद्धरिः ३७ धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणां। यस्मि
न्नोतमिदंप्रोतंविश्वंशाटीवतंतुषु ३८ इत्युक्त्वासनृपोदेवंतपसातोषयच्छिवं। कालेनाल्पीयसाराजंस्तस्येशःसमतुष्यत ३९ तथेतिराज्ञाभिहितः
सर्वलोकहितःशिवः। दधारावहितोगंगांपादपूतजलांहरेः ४० भगीरथोपिराजर्षिर्निन्येभुवनपावनीं। यत्रस्वपितृणांदेहाभस्मीभूताःस्मशेरते
४१ रथेनवायुवेगेनप्रयांतमनुधावती। देशान्पुनंतीनिर्दग्धानासिंचत्सगरात्मजान् ४२ यज्जलस्पर्शमात्रेणब्रह्मदंडहताअपि। सगरात्मजादिवंज
ग्मुःकेवलंदेहभस्मभिः ४३ भस्मीभूतांगसंगेनस्वर्याताःसगरात्मजाः। किंपुनःश्रद्धयादेवींयेसेवंतेधृतव्रताः ४४ नह्येतत्परमाश्चर्यंस्वर्धुन्यायदिहो
दितं। अनंतचरणांभोजप्रसूतायाभवच्छिदः ४५ संनिवेश्यमनोयस्मिंछ्रद्धयामुनयोमलाः। त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मतां ४६ ॥ ॥

मात्माइंकाररूपेणस्वरूपभूतइव। शाटीकंथायथातितदुपुटिकावा। तथाल्पीयसाकालेनशिवस्तुतुष्यतीतिराज्ञाभिहितं। प्रयांतंभगीरथंअनुधावतीपृष्ठ
तः आप्लांतीदेहभस्मभिःसाकं। भस्मीभूतांगस्पृष्टस्वर्धुन्याःप्रसंगेन। श्रीनारायणचरणसंगलब्धमेवास्यामाहात्म्यंनान्यतोतोनेतच्चित्रमित्याहनहीति। इहसगरात्म
जकथाप्रसंगेगंगामाहात्म्यमुदितं। अतएवभवच्छिदःसंसारछेद्याःजन्मछेत्र्यावा। भवोभवदेहदेशायोसतांसंसारजन्मच्छितिः। संसारछेदनमाहात्म्यंश्रीहरिनिष्ठ
गंगायाउपचारइत्याशयवानाह संनिवेश्येति। तदात्मतांतत्स्वरूपलक्षणांमुक्तिंतत्स्वामिकतांवा ४६ ॥ ॥

एवंभगीरथस्यगंगानयनादिमाहात्म्यमुक्त्वातत्संततिंकथयति। श्रुतइति। नाभस्यवरात्सुतः। तस्यऋतुपर्णस्ततःअयुतायोरेवऋतुपर्णः। अयुतायोस्तत्रसदा
रतत्सुतः ऋतुपर्णसुतः। यंसुदासपुत्रंरक्षोराक्षसं। भृतंभ्रातरंप्रतिचिकीर्षयाभ्रातृहंतृहननलक्षणप्रतिकारेणेच्छया। सूदरूपधरःपाचकवेषधरःनरामिषं

श्रुतोभगीरथाज्जज्ञेतस्यनाभोपरोभवत्। सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोभवत् ४७ ऋतुपर्णोनलसखोयोश्वविद्यामयान्नलात्। दत्त्वाक्षहृद
यंतस्मैसर्वकामस्तुतत्सुतः ४८ ततःसुदासस्तत्पुत्रोदमयंतीपतिर्नृपः। आहुर्मित्रसहंयंवैकल्माषांघ्रिमुतक्वचित् ४९ वसिष्ठशापाद्रक्षोभू
दनपत्यःस्वकर्मणा ५० राजोवाच किंनिमित्तोगुरोःशापःसौदासस्यमहात्मनः। एतद्वेदितुमिच्छामःकथ्यतांनरहोयदि ५१ श्रीशुकउवा
च सौदासोमृगयांकिंचिच्चरन्रक्षोजघानह। मुमोचभ्रातरंसोथगतःप्रतिचिकीर्षया ५२ संचिंतयन्नघंराज्ञःसूदरूपधरोगृहे। गुरवेभो
क्तुकामायपक्त्वानिन्येनरामिषं ५३ परिवेक्ष्यमाणंभगवान्विलोक्याभक्ष्यमंजसा। राजानमशपत्क्रुद्धोरक्षोह्येवंभविष्यसि ५४ रक्षःकृतं
तद्विदित्वाचक्रेद्वादशवार्षिकं। सोप्यपोंजलिमादायगुरुंशप्तुंसमुद्यतः ५५ वारितोमदयंत्यापोरुशतीःपादयोर्जहौ। दिशःखमवनींसर्वंप
श्यन्जीवमयंनृपः ५६ राक्षसंभावमापन्नःपादेकल्माषतांगतः। व्यवायकालेददृशेवनौकोदंपतीद्विजौ ५७ क्षुधार्तोजगृहेविप्रंत
त्पत्न्याहाकृतार्थवत्। नभवान्राक्षसःसाक्षादिक्ष्वाकूणांमहारथः ५८ मदयंत्याःपतिर्वीरनाधर्मंकर्तुमर्हसि। देहिमेपत्यकामायाअकृ
तार्थंपतिंद्विज ५९ देहोयंमानुषोराजन्पुरुषस्याखिलार्थदः। तस्मादस्यवधोवीरसर्वार्थवधउच्यते ६०

नरमांसं। एवंविधं। रक्षःकृतंराक्षसकृतं। रुशतीःक्रूराःमंत्रितत्वात्। रुशरिषहिं[illegible]हिंसयंतीर्वा। रुशशब्दे। रुतंचीकीर्षमरतिशब्दयंतीर्वामा
घमासेरटंत्यपइतिवचनात्। कल्माषतांवनमाषवर्णवत्त्वं। व्यवायकालेसुरतसमये। द्विपजत्नीराक्षसस्यकृपाजननायावध्यत्वेचानेकानिकारणान्या
हानभवानित्यादिना ५८ ५९ ६० ॥ ॥

भा॰न॰

२२

ग्रस्य ब्रह्मस्पशयमेव पुत्रस्य ब्रह्मवादिनः ब्रह्मत्यानिनः षडंगवेदाध्यायिनो वा। वभ्रुः सौरभेय्यः माद्रेयी सौरभेयी च वत्सः स्याद्गृष्टिकांक्षिणीत्यभिधानं। येन पत्या मृतकं प्राणरहितं शरीरं प्राणमंतरेण हे अकृतप्रज्ञ अशिक्षितबुद्धे तव मृत्युरेवाग्न्याधानेन समये दर्शितो भवेदा पातादन्तकिंतात्कालादिति शेषः। अप्रजास्त्वं स्त्रीसुखं क्रियं द्वारी कृत्य कर्मणा मैथुनलक्षणेन प्रजा संततिं तत्याज। तत्र स्यके न विधिना अश्मनोदरं प्रास्य निक्षिप्य ब्राह्मण्याः शापं विज्ञाय स मित्रसह। स्त्रीसुखं

एष हि ब्राह्मणो विद्वांस्तपः शीलगुणान्वितः। आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितं ६१ सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः। सोयं ब्रह्मर्षिवर्य ते राजर्षिप्रवराद्विभो ६२ कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः। तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ६३ कथं वधं यथा बभ्रोर्मन्यते संमतो भवान्। यद्ययं क्रियते भक्ष्यस्तर्हि मां खाद पूर्वतः ६४ न जीविष्ये विना येन क्षणं च मृतकं यथा। एवं करुणभाषिण्या विलपंत्या अनाथवत् ६५ व्याघ्रः पशुमिवाखादत्सौदासः शापमोहितः। ब्राह्मणी वीक्ष्य भर्तारं पुरुषादेन भक्षितं ६६ शोचंत्यात्मानमुर्वीशमशपत्कुपिता सती। यस्मान्मे भक्षितः पापकामार्तायाः पतिस्त्वया ६७ तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः। एवं मित्रसहं शप्त्वा पतिलोकपरायणा ६८ तदस्थीनि समिद्धेग्नौ प्रास्य भर्तुर्गतिं गता। विशापो द्वादशाब्दांते मैथुनाय समुद्यतः ६९ विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः। तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाप्रजाः ७० वसिष्ठस्तदनुज्ञातो मदयंत्यां प्रजामधात्। सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत ७१ जघ्नेश्मनोदरं तस्मात्सोश्मकस्तेन कथ्यते। अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ७२ नारीकवच इत्युक्तो निःक्षत्रे मूलकोभवत्। ततो दशरथस्तस्मात्पुत्र ऐलविलिः स्मृतः ७३ राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत्। यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः ७४ मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः। न मे ब्रह्मकुलात्प्राणाः कुलदैवान्न चात्मजाः ७५ ॥

तद्इति तत्राह वसिष्ठ इति। तेन सौदासेनानुज्ञातः मदयंत्यां पुत्रमुत्पादयेति। समाः संवत्सरान् निःक्षत्रे परशुरामेण दुष्टक्षत्रियसंहारे कृते सति। खट्वांगो दैत्यान्विजित्य स्वपुरं गत्वा मुहूर्तं तत्त्वाधिकं कालेन मनः संदधे। कथं तरितितत्राह न मे इति। कुलदैवं ब्राह्मणकुलात् प्रेष्ठाः प्राणादयो नातिवल्लभा इत्यन्वयः

७५

राम

२२

मद्यं मम मतिः। वस्तु प्रतिष्ठितं भूतभावनस्य हरेर्भावनात् उपासनाद् अन्यद्वस्तु कर्म मोक्षसाधनत्वेन न दृष्टो। आवर्त्ति शब्देंद्रियधियः आत्मानं हरिं किमनेन बहुनोक्तेन एवं मम सिद्धांत इति संदर्शयतीत्यर्थः। अथाहं तमीहरिं प्रपद्ये इत्याह यः किं कृत्वा ईशस्य हरेर्मायया विकृतेषु पृथिव्यादिपंचभूतैः रचितेषु गुणेषु देहेंद्रियादिषु गंधर्वपुरोपमेषु नश्वरेषु आत्मनि मनसि प्रकृत्या स्वत एव रूढं संगं स्नेहलक्षणं पाशं हित्वा। त्यागेसाधनमाह विश्वभर्तुरिति भावेन भक्त्या। सर्वस्मादन्यस्य हरेर्भावत्वमेकत्वविषयमज्ञानं हित्वा स्वं भावं स्वतत्त्वं भावं स्थितः ८० भावं शब्दस्पर्शलीलाघने कार्येषु इत्ते स्वविवाहितः कइति तत्राह यत्तदिति तत्र लिंगविवक्षया यत्

न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः। न बाल्येपि मतिर्मह्यमधर्मे रमते क्वचित् ७६ नापश्यमुत्तमश्लोकादन्यत्किंचन वस्त्वहं। देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ७७ न वृणे तमहं कामं भूतभावनभावनात्। ये विक्षिप्तेंद्रियधियो देवास्ते स्वहृदि स्थितं। न विंदंति प्रियं शश्वदात्मानं किमुतापरे ७९ अथेशमायारचितेषु संगं गुणेषु गंधर्वपुरोपमेषु। रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ८० इति व्यवसितो बुद्ध्या नारायणगृहीतया। हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ८१ यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितं। भगवान्वासुदेवेति यं गृणंति हि सात्वताः ८२ खट्वांगाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः। अजस्ततो महाराजस्तस्माद्दशरथोभवत् ८३ तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः। अंशांशेन चतुर्धागात्पुत्रत्वं प्रार्थितः सुरैः। रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ८४ ॥ ॥

यथि॰

दितिवेदांतिनो यं भावं परं ब्रह्मेति गृणंति योगिनः सूक्ष्ममिंद्रियागोचरमाकाशवदिति संगिरंते। केचिद्वैदिकाः शून्यनाम्ना कल्पितं जल्पंति न तत्तत्त्वमित्यात्मन्यपि मिति। सात्वताः पांचरात्रिकाः यं भगवान्वासुदेवेति नाम्ना गृणंति। तं भावमाश्रित इत्यन्वयः। ब्रह्मविदाप्नोति परं। तस्मात्तेषु विरिंचस्तु सूक्ष्मं ब्रह्मेति परमात्मेति भगवानिति शब्द्यते इत्यादेः। शून्यं तत्त्वमवाच्यमिति च। ब्रह्ममयः वेदमुख्यार्थरूपः। स्वयमंशेन लक्ष्मणादिषु अंशांशेन ८४ ॥ ॥

तत्वदर्शिभिः ऋषिभिर्वर्णितां तस्य सीतापतेर्भृगुकुलनोमहत्तरमनुचरितं। त्वया तु नः पुनः कृतमपि सृष्टमधस्याशयेनाह गुर्वर्थेति पित्रर्थे पद्मपदस्थां। पद्मोपम चरणाभ्यां सृजितपथिरुजः मार्गे तिमार्गक्लेशः हरिद्रानुजाभ्यां सुग्रीवलक्ष्मणाभ्यां वैरूप्यान्नासिकाछेदलक्षणात्प्रियायाः सीतायाः विरहोद्भूतरुषाऽशरोपितभूविजृंभः उन्नमितभ्रूभंगः लंकायां हतं मतश्चाविर्भावं कृत्वा खलारावर्देवः खलहवः तस्य खलहवस्य दाहे दहनोग्निः। इवोसावोवनारायण इत्यादवा। एवं विधो भगवान्नकोसलेनाम्ना भूत्वावतीर्ण इत्यन्वयः। अवतान्न इति केचित्पठंति ८५ एकपद्येन सूत्रवत्संक्षिप्तरामचरितमाह तिएवर्किंचिद्विस्तरं पंचयति। विश्वा

तस्यानुचरितं राजन्नृषिभिस्तत्वदर्शिभिः। श्रुतं हि वर्णितं भूरित्वया सीतापतेर्मुहुः ८४ गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथिरुजो यो हरीन्द्रानुजाभ्यां। वैरूप्याच्छूर्पणख्याः प्रियविरहरुषारोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेन्द्रोऽवतीर्णः ॥८५॥ विश्वामित्राध्वरे येन मारीचाद्या निशाचराः। पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुंगवाः ॥८६ यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतं। आदाय बालगजलील इवेक्षुयष्टिं सज्जीकृतं नृप विकृष्य बभंज मध्ये ८७ जित्वानुरूपगुणशीलवयोऽनुरूपां सीताभिधां श्रियमुरस्यभिलब्धमानां। मार्गे व्रजन् भृगुपतेर्व्यनयत्प्ररूढं दर्पं महीमकृत यो हतराजबीजां ८८ ॥ ॥

मित्रेति। येनैवा ८६ लोक इति वीराणां सभायां ईशस्य शिवस्य विद्यमानं त्रिशतैर्जनैः कृत्स्नैरुपनेयं समीपमानेतुं योग्यं। सज्जीकृतं ज्यया सहितं कृत्वा ८७ उरसि श्रियमिलब्धमानां प्राप्स्यमानां। आत्मनः स्वस्य रूपादिभिरनुरूपायां सीताभिधां श्रीं लक्ष्मीं स्वां जित्वा प्राप्य स्वर्जिति इति वत। मार्गे व्रजतरातं ८७ मोहतराजबीजां निर्मूलितक्षत्रसंततिं महीं कृतवतो भृगुपतेः परशुरामस्य प्ररूढं दर्पं उत्रतमदं व्यनयदपनीतवानित्यन्वयः ८८ ॥ ॥

योरामः सत्याख्यपाशेन परिवीतस्य परिवेष्टितस्य पितुर्निर्देशमात्तां शिरसापिपितसंभावनार्थं ज गृहेइत्यन्वयः। अपितुसूक्ष्मिता थेर्वा। त्रपुष्पायां किं निमित्तमित्यत उक्तं स्त्रैणस्येति स्त्रीजितस्य। सभार्य इत्यनेन तस्या अपि वर्द्धमानातिशयं सूचयति त्रस्यइनि वेत्येनेन राज्यलक्ष्म्यादीनाम शाक्यत्वाज्यतां दर्शयति। मुक्त संग इत्यनेनासंगो ह्ययं पुरुष इति श्रुतिसिद्धनित्यासंगतां दर्शयति अधिवासं अयोध्यां। रक्षः स्वसुः शूर्पणख्याः रूपं व्यकृतकर्णनासिकाछेदनलक्षणविकारं कारितवान्। अटमानः वन इति शेषः। शूर्पणखीमुखात्सीतायाः सौंदर्यादिविषयकथायाः श्रवणेनदीपितः प्रज्वालितो हृच्छयः कामो यस्य सत

यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसाजगृहे सभार्यः। राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसंगः ८९ रक्षः स्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबंधून्। जघ्ने चतुर्दशसहस्रमपारणीयकोदंडपाणिरटमान उवास कृच्छ्रं ९० सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकंधरेण। जघ्नेऽद्भुतैणवपुषाश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कपिंसुग्रः ९१ ॥

थातेन दशकंधरेण रावणेन सृष्टं प्रतिपाद्य प्रेषितं। उत्सर्जनं विसर्जनं। विश्राणनं वितरणं स्पर्शनं प्रतिपादनमित्यभिधानं। कृतैणवपुषा विरचितमृगाकारेणाश्रमतः समीपे विचरंतं विलोक्य सीतया प्रकृष्टः नह्मिखितो भेदितो वशीकृत इति यावत्। आश्रमतोपकृष्टो दूरं नीतो रामो विशिखेन मारीचमाशु जघ्ने इत्यन्वयः। नुयोनरसिंहो हिरण्यकशिपुनामानमरिं। उयोज हे वीर्यपराक्रमावानिति श्रुतिः। रुद्रोंधकारध्वंरिपुंवा। त्र्यंबकपदी श्रीकंठः शितिकंठः कपालभृदित्यभिधानं ९१ ॥

निर्ज्ञत्यादिराक्षसविडंबयारक्षोधमेनरावणेनविपिनेवृकवत्स्थितेनहृताएणेत्याहृतोत्यानमितिवेजांवोएणस्थितेनेत्यर्थः।असमक्षमप्रत्यक्षंरामस्येतिशे
षः।वेदेहराजदुहितरिसीतायामपयापितायामपनीतायांभ्रात्रावनेनियुक्तेनात्राबालकृपणेनरहितायामितिशेषः।प्रियायासीतयाविमुक्तःलोकदृष्ट्येतिशेषः।
स्त्रीसंगिनांविरहातॊरतिमितीत्थंप्रथयन्नुख्यापयन्नचचारअनेनविरहजनशिक्षणार्थमेवदर्शितमितिज्ञायते।प्रथयन्नित्युक्तेः।किमर्थमेवंकल्पनातन्नह्यपावा
नुभवात्किंनस्यादितिचेन्न।नित्यपूर्णसुखज्ञानस्वरूपोसौयतोविभुः।ततोस्यरामइत्याख्यानस्युदुःखंकुतोस्यपीत्यादिस्मृतिविरोधात्प्रियायावियुक्तस्यत्व
दर्शनमपिलोकदृष्ट्यपेक्षयेतिज्ञातव्यं।तत्कुतोवगतमितिचेत्।ज्ञापनार्थंपुनर्नित्यसंबंधंस्वात्मनःश्रियेत्यादिस्मृत्याज्ञातं।एवमन्यत्रापि।यथाविरिंचादिमध्य
कारेत्यादेभक्तिकारणार्थंतयशोर्थंदुष्टजनमोहार्थंचेतिज्ञातव्यं।तदुक्तंब्रह्मादिभक्तिकोयंशादंशोनेवावरीषके।नेवास्यस्यकस्यापितथाहहरिरीश्वरः।त

रक्षोधमेनवृकवद्विपिनेसमक्षंवैदेहराजदुहितर्यपयापितायां।भ्रात्रावनेकृपणवत्प्रियया वियुक्तःस्त्रीसंगिनामितिरतिंप्रथयंश्चचार ११ ॥

त्कालिकोपचेयत्वाद्देषांयशसश्चादिरादिति।नवंवरीषोपिकृतिंकृत्वाचक्रनिवर्त्तनेकृतवान्नब्रह्मादयपरत्पनश्चाह्रब्रह्मादयश्चतस्कीर्त्तिंव्यंजयामासुस्तमं
मोहनायचदेत्यानांब्रह्मादेनिंदनायच।अन्यार्थंचेति।निंदनायचसुरकृतायेतिशेषः।अन्यार्थमर्थवाशर्थकिंच।फलानिकृत्वज्ञापनायचविष्ठादिभिःचक्रं
ननिवर्त्तितमित्याह।स्वयंविष्णुर्ब्रह्माद्याश्चनिराशिषइत्यंवरीषस्यमनुष्याधिकारस्यभक्त्यादिगुणैरुन्नमत्वज्ञापनार्थंमानुषेष्वनेमत्वाच्चेति।ब्रह्मादीनांभक्त्यादि
गुणाधिक्यप्रकटनायच।नेषांभक्त्यादिभिर्गुणेरिति।अन्यच्चप्रयोजनं।ब्रह्मादेर्विष्णुधीनत्वज्ञापनायचक्रेवलमिति।तर्हिदुर्वासाःकइतिचेद्दुशदनाद्दुर्वासा
स्स्वयंरुद्रइति।तथापिरुद्रत्वेप्यसुरावेशादन्याप्यवचनं।तथाप्यन्याप्युक्तकथानिति।स्वज्ञानोकारित्वेननस्मिन्ननुग्रहविशेषाययभक्तजनमदविनाशाय
सनिवर्त्तनंनाकारि।तस्याप्यनुग्रहार्थायदर्पनाशार्थमेवचेतिएवंप्रमाणसामर्थ्यात्सर्वत्राप्यनुसंधेयोन्यार्थइतिविरादंसमस्तं १४ ॥ ॥

इतोपिश्रीरामःसाक्षान्नारायणावतारएव।नदेवदन्नाद्यन्यतमः।तस्यप्रियावियोगादिनादुःखप्रकटनमसुरजनमोहनाय[illegible]वतारदेवताजनशि
क्षणायचेत्येतदत्रत्येःश्लोकैरेवज्ञातुंशक्यमित्याशयेनतन्माहात्म्यंप्रकटयति।यद्रोषेति।राजमस्परोषेणातीव्रपरिवृत्तस्य[illegible]यद्रोषतीव्रपरिवृ
त्तकटाक्षःतस्यपातेनलक्षवेधवद्विषयीकरणेनसंभ्रानाइतस्ततोऽनवस्थितानक्राश्चमकराश्चयस्मिंस्तथा।भयेनगीर्णोन[illegible]पोयस्मिंस्तथा।अ
तएवनष्टोस्थितइत्यर्थः।अर्हणमर्घ्यपाद्यादिपूजासाधनं।रूपीकरचरणादिविशिष्टोवयवोपेतः।जडवदचेतनवद्दीर्येषांतेतथा।ज्ञानपूर्वप्रवृत्तिशून्या
इत्यर्थः।जडाधाराइत्येषोपिग्राह्यः।अनेनतावदेवास्मतःप्रयोजनंइतिसूचयति।वेदांतेजगत्कारणस्यब्रह्मत्वंनिरणायि।रामस्यतवभावान्तत्वंकथमि

यद्रोषतीव्रपरिवृत्तकटाक्षपातसंभ्रांतनक्रमकरोभयगीर्णघोषः।सिंधुःशिरस्यर्हणंपरिगृह्यरूपीपादारविंदमुपगम्यबभाषएतत् १३
तंत्वावयंजडधियोनविदामभूमन्कूटस्थमादिपुरुषंजगतामधीशं।त्वंसत्वतःसुरगणोरजसःप्रजेशान्मन्योश्चभूतपतयःसभवान्गुणेशः १४
कामंप्रयाहिजहिविश्रवसोवमेहंत्रैलोक्यरावणमवाप्नुहिवीरपत्नीं।बध्नीहिसेतुमिहतेयशसोवितत्यैगायंतिदिग्विजयिनोयमुपेत्यभूपाः १५

नित्वेन्नदस्याप्यस्त्रीत्यहत्वमितिःयस्त्वंसत्वगुणान्सुरगणानसात्क्षीरजोगुणान्तजेशान्मनुष्यानसृज।मन्योस्तमोगुणाद्भूतपतयःभूतपतीरुद्ररास्ति
सादिलक्षणासुरान्उद्भावयःसपरमात्मादिमहत्वान्तगतःकर्तानिवाक्लनान्यःगुणेःप्रवर्त्तमानस्यगुणनिमित्ताभिभवोनाशंकनीयःगुणानांतदधीनत्वा
दित्याशयेनाहगुणेशइति।क्रोधस्यतमःकार्यत्वात्तेननलक्ष्यति।यथावमेहोविष्टाशरीरान्निर्गतासुनामुपभोगायभवतितथायमपिविश्रवसोदेहान्नि
र्गतत्वेनावमेहस्थानीयस्त्वच्छरनिभिन्नहृदयःशुनामशनायस्यादित्यतोविश्रवसोवमेहमित्युक्तंत्रैलोक्यस्यरोदनक[illegible]त्रैलोक्यरावणं।हेवीरइहम
यिवितत्यैविस्तारायपंसेतुं १५ ॥ ॥श्रीराम॥ ॥

भा. न.

विविधास्त्रिकूटैर्नानाविधपर्वतशृङ्गैः कपीन्द्राणां करैः कंपितानि भूरुहाणां गृहाणां मंगानि शाखोपशाखा लक्षणानि येषु तानि तथा तैः। पद्मासाल
कारा मेणविष्टा। तडागजकूलैः पूर्णा ह्रदिनी वधूर्णा भूदिति शेषः। विहरंत्यस्मिन्निति विहारं क्रीडास्थानं कोष्टं तत्गृहम्। द्वारं सभाद्वारं प्रशस्तं साधारणं
द्वारं वा। गोपुरं पुरद्वारं सदः सभास्थानं। वलभी गृहाच्छादनांतर्नाली। दारुभिः परितो निर्मिता गोपानसीति कीर्त्यते। विटंकापक्षिपदिका। वानरेंद्राणां
वलेन सेनया रुद्धा आवारिताः विहारादयो यस्याः सा तथा। आच्छादनं स्यात् वलभीगृहाणां गोपानसी दारुषु वक्रसंस्था। नीप्रवलीकपटलांतमाङ्कः
कपोलपाली च विटंकसंज्ञामिति हलायुधः। गोपानसी तु वलभीच्छादने वक्रदारुणि। कपोतपालिकायां च विटंकं पुन्नपुंसकमित्यमरः॥ निर्भज्यमा
नावानरेंद्रवलेन निर्भिद्यमाना। विषण्णध्वजाः गृहालंकारहेतवः हेमकुंभाः सुवर्णकलशाः शृंगाटकाः गृहमुखाय तोन्नतत्रिप्रलांकराष्ट्रैकदेशाः य

लङ्कोद्धोर रघुपति विविधाद्रिकूटैः सेतुं कपीन्द्रकरकंपितभूरुहाग्रैः। सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लंकां विभीषणशरा विशदाशु रुध्वा ९६
सा वानरेंद्रवलरुद्धविहारकोष्ठसद्मद्वारगोपुरसदावलभीविटंका। निर्भज्यमानविषणध्वजहेमकुंभशृंगाटकागजकुलैर्ह्रदिनी वधूर्णा ९७
रक्षःपतिश्च दवलोक्य निकुंभकुंभधूम्राक्षदुर्मुखमुरांतनरांतकादीन्। पुत्रानपि हस्तमतिकाय विकंपनादीन् सर्वाननुगान्समहिनोद्रथकुंभकर्णौ ९८
तांस्तानुधानवसना मासिशूलचापपाशर्ष्टिशक्तिशरतोमरखड्गमुष्टा। सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरस्त्रिनोपात् ९९
तेनीकपारघुपतेरभियत्यसवेद्विंद्वंवरूथमभिपत्तिरथाश्वयोधं। जघ्नुर्दुमैर्गिरिगिदेपुभिरंगदाद्याः सीताभिमर्शहतमंगलरावणेशं १०० ॥

स्यां सा तथा। ध्वजोपरिस्थहेमकुंभा वा हेमकुंभैर्युक्ताः शृंगाटकाचतुष्पथा वा। तद्वानरेंद्रवलकृतं कर्म समहिनोद्यतयत। यारावणेन प्रेरितानां यातुधा
नष्टतनीरा। ससेना। रघुपते सेनीपंकयोः सेनानायकाः। वरूथं रथगुप्तिमभिपत्य प्राप्य इभाश्वपत्तयश्च रथाश्वाश्वायोधाश्च यस्मिंस्तत् दिशपतिरथा
श्वयोधं। हंद्वंद्वाभ्यां द्वाभ्यामिभादिभ्यां क्रियमाणं युद्धं अभ्युपगम्य राक्षसवलं जघ्नुरित्यन्वयः। रथगुप्तवरूथो नाकूवरा नापुंगवरव्रतियाद्वः। कीदृशं वलं सी
ताभिमर्शेन सीतापरामर्शेन सीतायाः अपहारेणेत्यर्थः। हतं नष्टं मंगलं कुशलं यस्य सतथा। सचासौ रावणः। सीताभिमर्शहतमंगलरावणः स एव ईशो य
स्य तत्तथा तत् १०० ॥

राम
२६

ऊमतिते जोवनिसः स्वर्गादवती र्णस्यंदने रथे वि भ्राजमानं सुरप्रैरर्थवंदैः अर्थवंदः सुरप्रं स्यादिति। प्रासः कुंतः ऋष्टिः प्रसिद्धा। शक्तिः शतमारणी
मरः। लोहकलदंडः दुर्लं द्विफिक्रमनयः खड्गः पट्टिशः लोहदंड इत्यर्थः॥ शतघ्नी च तुस्ताला लोहकंटकसंचिता। केचित् शतघ्नीमयः कंटकसंछन्नामहाशि
लोवदंतिमुसंडी रत्नायः क्षिलसचिता दारुमयी हस्तिवरो गजत्रासहेतुः। रष्टमुनयः देवदंडो भ्यत्रासे रोर लिमात्रः कुष्ठघणो मुद्गरः तज राक्षसाघस्त्रं हस्तमुद्गर
शरादिकं यंत्रमुक्तं। मुक्तामुक्तं नागपाशादिकं। अमुक्तं छूरिकादिकमिति चतुर्विधमायुधं प्रसंगात्कथितं। हे पुरुषाद पुरीवराक्षसा धम अपकृष्ट पुरीयं स्या न विधा

रक्षःपतिः सकलवनश्रिमवेक्ष्य तुष्टः आरुह्य यानकमथाभिससार रामं॥ स्यंस्यंदने घनतिमातलिनोपनीते बिभ्राजमानमहनान्निशितैः सुरप्रैः॥ १०॥ रामस्य
हे पुरुषाद पुरीषयन्नः कांतासमक्षमसतोपहृता कृथयतोत्य कृत्रपस्य फलमघनुगुप्सितस्य इच्छामि काल इव कर्तुमलं य्यवीर्यं॥ ११॥ एवं क्षिपन्धनुषि सं
धितमुत्ससर्ज वाणं सवज्रमिव तद्धृदयं बिभेद॥ सोऽसृग्वमन्दशमुखैर्न्यपतद्विमानाद्धाहेति निजल्पति जने सुकृतीव रक्षः॥ १२॥ ततो निष्क्रम्य लोकाया याः तु
धान्यः सह रक्षसाः॥ मंदोदर्या समं तस्मिन्प्ररुदत्य उपाद्रवन्॥ ४॥ स्वान्स्वान्वंधून्परिष्वज्य लक्ष्मणेषुभिरर्दितान्॥ रुरुदुः सुस्वरं दीनाघ्नंत्यआत्मान
मात्मना॥ हाहतास्स्वयं नाथ लोकरावण रावण। कं यायाच्छरणं लंका त्वद्विहीना परार्दिता॥ ६॥ नवैवेदमहाभागभवान्रकामवशं गतः॥ तेजोनुभावं सी
तायायेनरनीतोदशामिमां॥ ७॥

निष्कृतमसुनेति। असता अप्रशस्तकर्मणा त्वया कांतासीता नः अस्माकं असमक्षं अस्मान् वंचयित्वापहृतेति यत्तस्मादघस्य कुत्रपस्य निन्दस्य रक्षस्तेन जुगुप्सि
तस्यानेनवतस्वकर्मणः फलं कर्तुमने कार्थत्वा ख्यातुं नादातुमिच्छामि तत्वाद्यनात तुं घनमरावय मित्यासयेनोहा। काल इति। कालोंतकः कालो मृत्यो यम इतियादव। वीर्यं पराक्र
मेरे तस्य महा त्मयो रणी तिसवाणः सुकृतीभुक्त पुण्यः स्वर्गादिव अर्दितान्। हिंसिता न अर्दहिंसायां। आत्मानं देहं उदरमिति घावता आत्मनादेहे न हस्तेन नीतो येन तं नैव वेद

७

रा०न०

॥२१॥

नरकहेतव इति। नरकदुःखानुभवार्थं भवति। पितृमे वयं च विधवा सुता नाम ... मात्मा जीवो जीवनाय सुतः। यस्य प्राणरक्षणेनापि पुण्यं स्यादिति ग्राह॥ नरकहेतव इति। नरकदुःखानुभवार्थं भवति। पितृमे
विधानेन राघ ... विधिना सांपरायिकं परलोकसुखसाधनं। क्षामामित्यादि कमसुरमोहनार्थं ... भागवते ... सुपर्ण ... अंतरं नरतं। स्वर्णकक्ष्यैः सुवर्णमयी कक्ष्या ... धोये वा तेन तथा ...
र॥ तीर्णजलः पूर्वयन वासभ्रतः ... इत्यादिभिः। गोमूत्रेण सहपक्वयावकाहारः आतर नरतं।

... पितृमेधवि
धेः कृतैषा विधया लंकायां वयं वकुलनंदन॥ देहः हतोयं गच्छाणमात्मा नरकहेतवे। ८। शुकवचा वाक्या नां विभीषणाय ... अनुमोदितः। पितृमेधवि
धानेन यदुक्तं सांपरायिकं॥ ९॥ ततो ददर्श भगवान् शोकवनिक्षुभमे॥ क्षामां स्वविरहव्याधेः शिंशुपामूलमाश्रितां॥ १०॥ रामः प्रियतमां नायंदीनां वी
क्ष्यान्वकंपता। आत्मसंदर्शनाह्लादविकसन्मुखपंकजां॥ ११॥ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्धतः। विभीषणाय भगवान्दत्वा रक्षोगणेशतां॥ १२॥ ... इत्यादिभिर्मुदा। गोमूत्रयावकश्रुत्या
कामापुष्पकल्याणं यथा तीर्णव्रतः पुरीं। अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि॥ १३॥ उपगीयमानचरितः ... पादुके शिरसि न्यस्य रामं प्रत्युद्गतोग्रजं॥
भ्रातरं वल्कलांबरं॥ १४॥ महाराजकुलि ... तैलोक्यं ... भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः॥ १५॥ पादुके शिरसि ... रथैः॥ १६॥ ... हृदयक्षताः
नंदिग्रामात्स्वशिबिरान्नीतवादित्रनिस्वनैः। ... ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः॥ स्वर्णकक्ष्यैर्गजैश्चापि हेमचित्रध्वजै रथैः॥ १७॥ ... पादयोर्न्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ... तेभ्यः स्वयं नम
हेमचित्रध्वजैः ... आगात्सदोद्यतः॥ १८॥ ... पारमेष्ठ्यान्युपादाय भांडान्युच्चावचानि च। पादयोर्न्यपतत् ... वैस्ततः ... ॥ २०॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येन वै स्वतः। तेभ्यः स्वयं नम
॥ १९॥ पादुके न्यस्य पुरतः प्रांजलिर्बाष्पलोचनः। तमाश्लिष्य ... स्नापयन्नेत्रजैर्जलैः॥ २०॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येन वैस्ततः। तेभ्यः स्वयं नम
श्चक्रे प्रजाभिश्च नमस्कृतः॥ २१॥

विप्रा नानावर्णध्वजाः ये वा तैः ... स्वर्णनिर्मिताः सन्नाहाः कवचानि येषां तैः। पुरटसुवर्णं ... रगरक्षैः ... नृत्यैर्दासैः पारमेष्ठ्यानि मधुपर्केन ... प्रशस्तानि भांडान्य
न्यरणानि। विराधपक्वरणानि च॥ ततस्तत्र ये विप्रा अभवंस्तेभ्यः॥ २१॥

२१

... स्वः स्वर्गादवतीर्णस्यंदनेरपोधिभ्राजमानं क्षुरप्रैरर्धचंद्रैः अर्धचंद्रः क्षुरप्रः स्यादिति। प्रा
घमतितेजो वर्तिस्वः स्वर्गादवतीर्णस्यंदनेरपोधिभ्राजमानं क्षुरप्रैरर्धचंद्रैः ... खड्गः पट्टिशः लोहदंडः
सः कुंतः ... शक्तिः ... नमारव्याती तोमरः लोहकवलदंडः ... ध्वज्ञात ... कंटकसंघनो महाशि
सर्थः ... सिद्धा ... चतुःशाला लोहकंटकसंचिता ... मुनयः ... देवदंडो ... त्रासनो
लांवदंति ... शुंडी ... कील ... तादारुमयी हस्ति ... त्रासहेतु ... नायः ... मुक्तं ... मुक्ता मुक्तं नाग ... रत्वादिकं ...
रत्निमात्रः कुक्षिघणो मुद्गरः ... इत्युक्तं ... यत्र ... कथितं। हेमपुरुषादपुरीषराक्षसाधम। अपदक्ष्ट
अमुक्तं क्षुरिकादिकमिति चतुर्विधमायुधं प्रसंगात्कथितं। हेमपुरुषादपुरीषराक्षसाधम। अपदक्ष्ट
अमुक्तं क्षुरिकादिकमिति चतुर्विधमायुधप्रसंगात् कथितं। ... स्वः स्यंदने घमतिमातलिनोप
रक्षःपतिः सकलनहिमवेक्ष्यद्दुष्टआरूह्य यानकमथाभिससार रामं। स्वः स्यंदनेघमतिमातलिनोप
नीतेविभ्राजमानमहनन्निशितैः क्षुरप्रैः॥ १॥ रामस्तमाह पुरुषादपुरीषवन्न काँतासि मक्षम ... पहृतासयं
ते। सत्क त्रपस्य फलमद्य जुगुप्सितस्य हीयामि काल इव कर्तुमलंघ्यवीर्यः॥ २॥ एवं क्षिपन्धनु ... संधितमुत्स
सर्जबाणं स वज्रमिव तद्धृदयं बिभेद। सोऽसृग्वमन्दशमुखैर्न्यपतद्विमानात् हाहेति जल्पति जने सुकृतीव
रक्षः॥ ३॥ ततो निष्क्रम्य लंकाया यातुधान्यः सहस्रशः। मंदोदर्या समं तस्मिन् प्ररुदंत्युपाद्र ... ॥ ४॥ स्वान्
स्वान् बंधून्परिष्वज्य लक्ष्मणेषुभिरर्दितान्। रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना॥ ५॥ हा हतास्म
वयं नाथ लोकरावणरावण। कं यायाच्छरणं लंका त्वद्विहीना परार्दिता॥ ६॥ नवै वेद महाभाग भवान् कामवशं
गतः। तेजोनुभावं सीताया येन नीतो दशामिमां॥ ७॥ ॥

पुरीषं स्यात् विष्ठा निक्षतमप्युतेति। असता अप्रशस्तकर्मणा त्वया कांता सीता नः अस्मात् असमक्षं
स्मान्नु वंचयित्वापहृतेति यत् तस्मादद्य सत्क त्रपस्यानिर्लज्जस्य रक्षस्तेन जुगुप्सितस्यैतव तस्य कर्मणः फलं
कर्तुमने काध्ये हाद्वा तनां दातुमिच्छामि। तवाधुनातल्लंघनमत्राकामिस्या त्रायेनाह। काल इति। कालांतकः कर्तुं

वयंचविधवाःकृताः।शृगालाणांनात्माजीवोजीवनायकृतः एषप्राणःस्वलोणेनापिपुत्रपस्यादिनितराइ।नरकहेतवइति।नरकदुःखानुभवार्थंभवति।पितृमेधविधाने
नश्वदाहादिविधिनासांपरायिकंपरलोकसुखसाधनं।आत्मानित्यादिकमहरमोहनार्थंआत्म्यांलक्ष्मणविभीषणाभ्यांविभीषणस्यआत्तत्वसुपचारःती
र्णव्रतःपूर्ववनवासव्रतः।शतधृत्यादिभिः।गोमूत्रेणसहपक्वयावकाहारं।भ्रातरंभरतं।स्वर्णकक्ष्यैःसुवर्णमयीकक्ष्याउदरबंधायेषांतेतथातैः हैमैर्हैमालंकृतै

कृतैषाविधवालंकावयंचकुलनंदन।देहःकृतोयंश्वगृध्राणामात्मानरकहेतवे ८ श्रीशुकउवाच स्वानांविभीषणश्चक्रेकोशलेंद्रानुमोदितः।पि
तृमेधविधानेनयदुक्तंसांपरायिकं ९ ततोददर्शभगवानशोकवनिकाश्रमे।आसीनांविरहव्याधेःशिंशुपामूलमाश्रितां १० रामःप्रियतमांभा
र्यांदीनांवीक्ष्यान्वकंपत।आत्मसंदर्शनाह्लादविकसन्मुखपंकजां ११ आरोप्यारुरुहेयानंभ्रातृभ्यांहनुमद्युतः।विभीषणायभगवान्दत्वारक्षोगणे
शतां १२ लंकामायुश्चकल्पांतंययौचीर्णव्रतःपुरीं।अवकीर्यमाणःकुसुमैर्लोकपालार्पितैःपथि १२ उपगीयमानचरितःशतधृत्यादिभिर्मुदा।
गोमूत्रयावकंश्रुत्वाभ्रातरंवल्कलांबरं १३ महाकारुणिकोतप्यज्जटिलंस्थंडिलेशयं।भरतःप्राप्तमाकर्ण्यपौरामात्यपुरोहितैः १५ पादुके
शिरसिन्यस्यरामंप्रत्युद्यतोग्रजं।नंदिग्रामात्स्वशिबिराद्गीतवादित्रनिःस्वनैः १६ ब्रह्मघोषेणचमुहुःपठद्भिर्ब्रह्मवादिभिः।स्वर्णकक्षैःपताकाभि
र्हैमैश्चित्रध्वजैरथैः १७ सदश्वैरुक्मसन्नाहैर्भटैःपुरटवर्मभिः।श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चापदानुगैः।।१८।।पारमेष्ठ्यान्युपादायपण्या
न्युच्चावचानिचापादयोर्न्यपतत्प्रेम्णाप्रक्लिन्नहृदयेक्षणः १९ पादुकेन्यस्यपुरतःप्रांजलिर्बाष्पलोचनः।तमाश्लिष्यचिरंदोर्भ्यांस्नापयन्नेत्रजैर्जलैः २०
रामोलक्ष्मणसीताभ्यांविप्रेभ्योयेर्हसत्तमाः।तेभ्यःस्वयंनमश्चक्रेप्रजाभिश्चनमस्कृतः २१

चित्रानानावर्णाध्वजाःयेषांतेरुक्मसन्नाहैःस्वर्णनिर्मिताःसन्नाहाःकवचानियेषांतैः पुरटंसुवर्णंश्रेणिभिः रंगारक्तंकैर्नृत्येर्दासैः।पारमेष्ठ्यानिमर्घ्या
लेनप्रयुक्तानिसिंहासनछत्रामराणि।पण्यानिप्रकराणिवाततस्त्रयेविप्राश्चभवंस्तेभ्यः २१ ।। ।।

उत्तरासंगंउत्तरीयवस्त्रंधुन्वंतःकंपयंतः।निषंगान्तूणीरान्।क्षराड्डानंववाद्गत्वागतान्प्राणान्बाष्पतन्वः तनवःयथोत्थिताभवंतितथा।वि
रहशुचः।गुरुर्वसिष्ठः।सिंहोपपदमासनं।अग्रहीदिति।ग्रहणोहेतुमाह।भ्रात्रेति।भ्राताभरतेन।अनिच्छतांमरणमितिशेषः।अनुवृत्त्यासुश्रूषयाशीलेनानुकूल

धुन्वंतउत्तरासंगंपतिंवीक्ष्यचिरागतं।उत्तराःकोशलामाल्यैःकिरंतोनननृतुर्मुदा २४ पादुकेभरतोगृह्णाच्चामरव्यजनोत्तमे।विभीषणःससुग्रीवःश्वे
तछत्रंमरुत्सुतः २५ धनुर्निषंगांछत्रुघ्नःसीतातीर्थकमंडलुं।अबिभ्रदंगदःखड्गंहैमंचर्मक्षराइनृप २६ पुष्पकस्थेर्हतस्त्रीभिःस्तूयमानश्च
वंदिभिः।विरेजेभगवन्राजन्ग्रहैश्चंद्रइवोदितः २७ भ्रातृभिर्नंदितःसोपिसोत्सवांप्रविशत्पुरीं।प्रविश्यराजभवनंगुरुपत्नीःस्वमातरं।गुरुन्वय
स्यावरजान्पूजितःप्रत्यपूजयत।वैदेहीलक्ष्मणश्चैवयथायोग्यंप्रणेमतुः २९ पुत्रान्स्वमातरस्तास्तुप्राणांस्तन्वइवोत्थिताः।आरोप्यांके
भिषिंचंत्योबाष्पौघैर्विजहुःशुचः ३० जटानिर्मुच्यविधिवत्कुलवृद्धैःसमंगुरुः।अभिषिंचद्यथैवेंद्रंचतुःसिंधुजलादिभिः ३१ एवंकृतशि
रस्नानःसुवासाःसदलंकृतः।स्वलंकृतैःसुवासोभिर्भ्रातृभिर्भार्ययाबभौ ३२ अग्रहीदासनंभ्रात्राप्रणिपत्यप्रसादितः।प्रजाःस्वधर्मनिरतावर्णा
श्रमगुणान्विताः ३३ जुगोपपितृवद्रामोमेनिरेपितरंचतं।त्रेतायांवर्तमानायांकालःकृतसमोभवत् ३४ रामेराजनिधर्मज्ञेसर्वभूतसुखा
वहे।वनानिनद्योगिरयोवर्षाणिद्वीपसिंधवः ३५ सर्वेकामदुघाआसन्प्रजानांभरतर्षभ।नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ३६
मृत्युश्चानिच्छतांनासीद्रामेराजन्यधोक्षजे।एकपत्नीव्रतधरोराजर्षिचरितःशुचिः ३७ स्वधर्मंगृहमेधीयंशिक्षयन्स्वयमाचरत्।प्रेम्णानुवृत्त्याशी
लेनप्रश्रयावनतासती।भियाह्रियाचभावज्ञाभर्तुःसीताहरन्मनः ३८ इतिश्रीभागवतेमहापुराणेनवमस्कंधेदशमोध्यायः श्रीशुक
उवाच भगवानात्मनात्मानंरामउत्तमकल्पकैः।सर्वदेवमयंदेवमीजेआचार्यवान्मखैः १ ।। ।।

स्वभावेनप्रश्रयेणविनयेनअवनता ३८ इतिनवमेदशमोध्यायः आचार्यवानित्यनेनगुरुकुलवासित्वंशिक्षितत्वंचसूचयति।आचार्यवा
न्पुरुषोवेदेतिश्रुतेः १ ।।

रघुपतेरिदं यशो वक्ष्यमाणलक्षणं। किं तन्निषेध्यमिति तत्राह। रक्षोवध इति रक्षसवधो यः पञ्चजलधिबंधनमिदमिति। रघुपतिः कोसावितितत्राह विश्वेति।
विश्वयोजनमुद्दिश्य रघुपतिना मनुष्यरूपग्रहणमित्याशंक्यन किमपि प्रयोजनमुद्दिश्येत्याशयेनाह। लीलेति। शरीरग्रहणेन किमपि दुःखादिकमस्याभी
त्याशयेनाह। अधिकेति सर्वस्मादधिकं शांतमानंदपूर्णं नित्यमुक्तं धाम स्वरूपं यस्य सतथा तस्य। यत एवं विधमाहात्म्यो रघुपतिरतो अस्त्रपाणेर्धनुष्पा
णेरस्य कपयः शत्रुहनने सहायाः वलभूताः किं नैवेत्यर्थः। न केवलं नृपसभासु गायंति अपि तु दिगिभेंद्रपट्टं दिग्गजानां पट्टः संचारो यस्मिन् तु लोकालो
कपर्यंतदेशो यीत्यनेन सर्वत्रेत्याह। नाकपालाः इंद्रादयः। वसुपालाः कुवेरादयः। यैः स्पृष्टः नमनादिना दृष्टो वा चक्षुरादिना। कृतो वाभ्योत्रादिना संविष्टः सम

नेदं यशो रघुपतेरिह विश्वसृष्टेर्लीलातनोरधिकशांतविमुक्तधाम्नः। रक्षोवधो जलधिबंधनमस्त्रपाणेः किं तस्य शत्रुहनने कपयः सहायाः २० यस्यामलं नृपसदस्सु यशोधुनापि गायंत्यघघ्नमृषयो दिगिभेंद्रपट्टं। तं नाकपालवसुपालकिरीटजुष्टपादांबुजं रघुपतिं शरणं प्रपद्ये २१ स यैः स्पृष्टोभिदृष्टो वा संविष्टोनुगतोपि वा। कोशलास्ते ययुः स्थानं यत्र गच्छंति योगिनः २२ पुरुषो रामचरितं श्रवणैरुपधारयन्। आनृशंस्यपरो राजन्कर्मबंधैर्विमुच्यते २३ राजोवाच कथं स भगवान्रामो भ्रातृवं स्वस्य वर्त्तत। प्रजासौरसवद्रामः कथं वा राम ईश्वरः २४ ॥

कृ ज्ञातो वा सानुगतो वा पृष्ठतोयातो वा कोशलास्त्रयोध्यावासिनः सुपलक्षणं सर्वेपीतियाह्यं। यत्रयोगिनो भक्तिज्ञानयोगवंतो गच्छंति तत्स्थानं ययु
रित्यन्वयः। पुरुषमात्रस्य कृति मात्रेणापि रामनामः कर्मबंधमोक्षः स्यादित्याशयेनाह। पुरुष इति। आनृशंस्यपरः हिंसाकर्मपरोपि। अनेन रामो राम इति
सर्वेषामभवत्तदा। सर्वेरामभयो लोको यदारामस्त्वपालयदिति वाक्यमस्त्विति। तत्रैव राजा पृच्छति कथमिति स भगवान्रामो भ्रात्रादिषु कथं केन योगेन रा
मोरमयिर्त्ते नाम वर्त्तत भ्रोरसवत् यथोरसः सुदेहोत्पन्नः पुत्रः पित्रादौ कलभाषणादिना रतिप्रदत्वेन लिंगाज्ञापनामयत्वेनाप्रवर्त्तते तथायमपि
केन प्रकारेण रामो रतिप्रदः प्रजासु वर्त्तता। किंच। रामोवालवत् क्रीडनसामर्थ्याकथं केन भावेनेश्वरो यामिति सर्वजनबुद्धावर्त्तते ति इदं प्रश्नत्रयं परिहर्तव्यमि
तिशेषेणान्वयः २४ ॥

प्रथमतृतीयौ प्रश्नौ परिहरति अथेति अथराज्याभिषेकानंतरं भ्रात्रादौ आज्ञाकारित्वेनावर्त्तत दिदेशेश्वरत्वेनेन मानवेश्वरत्वं किं वक्तव्यमिति अनुशिष्टिनेनलो
कानुकरणाय पैक्रीडेति कथितमित्यर्थः। द्वितीयं परिहरति। आत्मानमिति। स्वात्मसंदर्शनेनजनस्यानंदजनकत्वेन राम इति बुद्धिं जनयामासेत्यर्थः। पुरीनिरी
क्षणं चस्वभक्तानुकंपित्वप्रदर्शनाय। गंधोदैः चंदनादिगंधद्रव्यमिश्रजलैः। लंकायाः नाथरावणं निहत्यप्राप्तं स्वामिनमालोक्य सुतरां हर्षेण मत्तामिव करिणां म

श्रीशुक उवाच अथादिशद्दिग्विजये भ्रातृंस्त्रिदशेश्वरः। आत्मानं दर्शयन्स्वानां पुरीमैक्षत सानुगः २६ आसिक्तमार्गां गंधोदैः करिणां मदसीकरैः। स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव २७ प्रासादगोपुरसभाचैत्यदेवगृहादिषु। विन्यस्तहेमकलशैः पताकाभिश्च मंडितां २८ पूगैः सवृंतै रंभाभिः पालिकाभिः सुवाससां। आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणां २९ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः। आशिषो युयुजुर्देव पाहि मां कालयोः कृतां ३० ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः। आरुह्य हर्म्याण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ३१ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः। अनंतरत्नकोशाढ्यमनर्घ्योरुपरिच्छदं ३२ विद्रुमोदुंबरद्वारैर्वैदूर्यस्तंभपंक्तिभिः। स्थलैर्मारकतैः स्वच्छैः भास्वत्स्फटिकभित्तिभिः ३३ चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुभिः। मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः ३४ धूपदीपैः सुरभिभिर्मंडितैः पुष्पमंडलैः। स्त्रीपुंभिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ३५ ॥ ॥

दसीकरैः मदजलविंदुभिर्वा मत्तामिवस्थितां। चैत्यं पाषाणादिभिर्वद्धं वृक्षमूलस्थलं बुद्धशालास्थलं वा। सवृंतैः फलसहवकसहितैः पूगैः क्रमुकैः रंभा
भिः कदलीस्तंभैः आदर्शैर्दर्पणैः अंशुकैः वस्त्रैः स्रग्भिः मालाभिश्च कृतानि कौतुकानि विरचितमंगलानि च तोरणानि यस्यां सा तथा तां। स्वकुवेरादावतारत्वयापा
लनीयत्वेन कृतां भुवमिति शेषः। विद्रुमैः सहैमैः द्वारैः कृतद्वारैः। स्थलैः भुवंचं मर्करतमयैः रक्तं कांस्यमुदुंबरमिति। भास्वद्भित्तिभिः। पट्टिकाभिर्वितानैः। भूषणा
नामपिभूषणैः ३५

भा॰ न॰

३०

ष्वारामाः शोभनैर्धामानि तत्र चारो ये षां ते सुग्रामचाराः तेषां ऋषभः । निरंतरं चारु तरो धामे शुभं चरतामीश्वर इत्यनेनातीवसौलभ्यमुक्तं च पति । अनेनापि सीतानि
योगो विनाऽसीत्युक्तं भवति । किंच सीतया क्रिपरमणेन सुखं सुखरूपत्वात् प्रजानां सुखं हि तुत्वात् सर्वजनाचित्तनिलयत्वेन रामइति भावः २६ नवमे नवमः
॥ । अथ श्री रामसुतस्य कुशस्य संततिमनुक्रामति कुशस्येति । वशाद्दृ संततेर्विच्छेदं दर्शयति । अध्यात्मपरमात्मविषयं महासुदयो मोहलक्षणो यस्य

तस्मिन्स भगवान् रामः स्निग्धया प्रिययेक्षया । रेमे स्वारामचाराणामृषभः सीतया सह २५ बुभुजे च यथाकालं कामान्धर्ममपीडयन् । वर्षपूगान्
बहूनृणामभिध्याताङ्घ्रिपल्लवः २६ इति श्रीभागवते महापुराणे नवमस्कंधे एकादशोऽध्यायः श्रीशुक उवाच कुशस्य चातिथिस्तस्मान्नि
षधस्तत्सुतो नभः । पुंडरीकोऽथ तत्पुत्रः क्षेमधन्वाभवत्ततः १ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः । ततो बलस्थलस्तस्माद्वज्रनाभोऽर्कसंभवः २
खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः । ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ३ शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः । योगं
महोदयमृषिर्हृदयग्रंथिभेदनं ४ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोऽभवत् । सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ५ योऽसावास्ते योगसि
द्धः कलापग्राममास्थितः । कलेरंते सूर्यवंशं नष्टं भावयिता पुनः ६ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः । महस्वांस्तत्सुतस्तस्माद्विश्वसा
ह्वोऽन्वजायत ७ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः । ततो बृहद्बलो यस्तु पित्रा ते समरे हतः । एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ८ बृहद्बलस्य भविता पुत्रो नाम्ना बृहद्रणः ।
ऊरुक्रियः सुतस्तस्य वत्सवृद्धो भविष्यति ९ प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः । सहदेवस्ततो भावी बृहदश्वोऽथ भानुमान् १० प्रतीकाश्वो
भानुमतः सुप्रतीकोऽथ तत्सुतः । भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ११ तस्यांतरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् । बृहद्राजस्तु तस्यापि बर्हि
स्तस्मात्कृतंजयः १२

स्तनया । एतदेव विशिनष्टि हृदयेति । अग्निवर्णीनी । तस्याग्निवर्णस्य शीघ्रनामा सुतः मरुनामा सुतस्तस्य मरुः सुतः । तस्य शीघ्रस्य मरुः सुतो भविता
५ ६ तस्मान्मरुतः । समरे तोत्तवा पित्राभिमन्युना हतः । अनागतान्भविष्यतः । तस्येत्येन सर्वजो नरवचसं बंधपितव्यं । तस्य सुतपः सुतोऽपि वजि

राम

३०

ते १२

सुमित्रो नाम राजा निष्ठायाः वंशावलेरंतो वक्ष्यते तत्र सम्मास इत्यर्थः । एतदेवाविशदयति इक्ष्वाकूणामिति सुमित्रांतो वंशः नंयस्य सततश्चास्तस्यानाशंसमासि
वाऽसंख्या बाव स्थापिताभिः समाप्याचारत्रिहिति इति नवमे द्वादशः अथ त्रयोदशे । सव सिद्धोवि । तेश क्रसस्य यागं निर्वर्त्य समाप्य प्रतिपालयतीत्युक्तार इपति
मिः । संनद्धाः यंन इति हस्वत्रायत इति वासरे ब्रह्मतद्विदं मध्ये विद्वां स्तेषां संशय छेत्ता । अपरे वसिष्ठ अतिरिक्तेः । तावत्रागमरित्याहिनागुर्दपेत्राया नियततत्वदर्शन

रणंजयस्तस्य सुतः संजयो भविता ततः । तस्माच्छाक्योऽथ शुद्धोदो लांगलस्तत्सुतः स्मृतः १३ ततः प्रसेनजित्तस्मात्क्षुद्रको भविता ततः । रणको भविता तस्मात्सुर
थस्तनयस्ततः । सुमित्रो नाम निष्ठांत एते बार्हद्बलान्वयाः १४ इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ १५
इति श्रीभागवते महापुराणे नवमस्कंधे द्वादशोऽध्यायः श्रीशुक उवाच निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजं । आरभ्य सत्रं सोऽप्याह शक्रेण प्रा
गस्मि भो १ तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय । तूष्णीमासीद्गृहपतिः सोऽपीन्द्रस्याकरोन्मखं २ निमिश्चलमिदं विद्वान्सत्रमारभतात्मवान् । ऋत्वि
ग्भिरपरैस्तावन्नागमद्यावता गुरुः ३ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः । अशपत्पततां देहो निमेः पंडितमानिनः ४ निमिः प्रतिददौ शापं गुरवेऽध
र्मवर्तिने । तवापि पतताद्देहो लोभाद्धर्ममजानतः ५ इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः । मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ६ गंधवस्तुषु
तद्देहं निधाय मुनिसत्तमाः ७ ॥ ॥

त्यमिति संधानमयाणप्य शिष्यापशापहानमधर्मरतिकृत्वा धर्मवर्तिन इत्युक्तं । लोभात्योरोहित्यविषयात । ततः किमभूदिति तत्राह मित्रावरुणयोरिति । योगि
नावरुणयोरूर्वश्यां जज्ञे मम प्रपितामहो वसिष्ठः । तद्देहं तस्य निमेर्देहं गंधवस्तुषु गंधवासिततैलेषु हारिद्रादिद्रव्यविशेषेषु निधाय ६ ॥

२१

सत्र नामयागो देहलक्षणं बंधनं। किमिति देहबंधोमाभूदिति तत्राह यस्येति। यस्य देहस्य योगं संबंधं यस्य वियोगभयेन कातराः। पच्चित्राः। हरिभक्त जनयायहर एणशीलामेधाधारणवती धीः। धीर्धारिणावती मेधा इत्यमरः। बुद्धिर्यस्य स तथा तस्मात् दुःखवस्तूर्यवस्य काश मानामेधाय स्येतिवा। तस्य विष्णोः। मुनयोवा संयमाः। तं देहं नावरुरुत्से स्वीकर्तुं नेच्छामि दुःखं तीव्र वेदना। शोको मन्युः। मन्युशोकौ तु कङ्स्त्रियामित्यमरः। भयं संचलनं। ततोपि देहत्यागेणेच्छेत्याह सर्वत्रेति। अदेहस्यास्य

समाप्ते सत्रयागे थ देवा ऊचुः समागतान् ॥ ७ ॥ राज्ञो जीवतु देहोयं प्रसन्नाः प्रभवो यदि। तथेत्युक्ते निमिः प्राह माभून्मे देहबंधनं ८ यस्य योगं न वांछंति वियोगभयकातराः। भजंति चरणांभोजं मुनयो हरिमेधसः ९ देहं नावरुरुत्सेहं दुःखशोकभयावहं। सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा १० देवा ऊचुः विदेह उष्यतां कामं लोचनेषु शरीरिणां। उन्मेषणनिमेषाभ्यां लक्षितोध्यात्मसंस्थितः ११ अराजकभयं नृणां मन्यमाना महर्षयः। देहं ममंथुः स्म निमेः कुमारः समजायत १२ जन्मना जनकः सोभूद्वैदेहस्तु विदेहजः। मिथिलो मथनाज्जातो मिथिला येन निर्मिता १३ तस्मादुदावसुस्तस्य पुत्रोभून्नंदिवर्द्धनः। ततः सुकेतुस्तस्यापि देवरातो महीपतिः १४ तस्माद्बृहद्रथस्तस्य महावीर्यः सुधृत्पिता। सुधृतेर्धृष्टकेतुर्वै हर्यश्वोथ मरुस्ततः १५ मरोः प्रतीपकस्तस्माज्जातः कृतरथो यतः। देवमीढस्तस्य सुतो विश्रुतोथ महाधृतिः १६ कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः। स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत १७ ॥ ॥

वासः कथं घटते अधिष्ठानाद्यभावादिति तत्राह लोचनेष्विति। लोचनेषु अस्य सद्भावः कथं ज्ञायत इति तत्राह। उन्मेषणेति। किमस्य कर्मेति तत्राह अध्यात्मेति वासः। कथं घटते... परमात्मोपासनायुक्तः। नाम निर्वचनपूर्वकं जनकस्य वंशं कथयति। जन्मनेत्यादिना। मथनेन जननमस्येत्यस्मिन्नर्थे मिथिलेति निपातनात्। शानानां शयन म स्मिन्निति शयनस्थानमिति वत्। मिथिलापुरी। सुधृत्पिता। सुधृतो जनकः १६ १७

सीताजननहेतुत्वेन सीरं ध्वजं गमकं ज्ञापकं यस्य स सीरध्वजः। ध्वजरानाविविधानुः। यद्देहपुत्थिता अपि योगेश्वरस्य याज्ञवल्क्यस्य प्रसादेन जनकाद्योद्वंद्वैः शीतोष्णादिभावैः मुक्ता आत्मारामा इत्यर्थः २७ इति नवमे एकादशः अथ सूर्यवंशकथनानंतरं। यतो वंशज्ञानं पुरुषार्थसाधनमतः इति हेत्वर्थः। गुणातिः

ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीं। सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः १८ कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः। धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ १९ कृतध्वजात्केशिध्वजः खांडिक्यस्तु मितध्वजात्। कृतध्वजसुतो राजन्नात्मविद्याविशारदः २० खांडिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद्द्रुतः। भानुमांस्तस्य पुत्रोभूच्छतद्युम्नस्तु तत्सुतः २१ शुचिस्तु तनयस्तस्मात्सनद्वाजस्ततोभवत्। ऊर्जकेतुः सनद्वाजादजोथ पुरुजित्सुतः २२ अरिष्टनेमिस्तस्यापि श्रुतायुः सुपार्श्वकस्ततः। ततश्चित्ररथो यस्य क्षेमाधिर्मिथिलाधिपः २३ तस्मात्समरथस्तस्य सुतः सत्यरथस्ततः। आसीदुपगुरुस्तस्मादुपगुप्तोग्निसंभवः ॥ २४ ॥ वस्वनंतोथ तत्पुत्रो युयुधो यत्सुभाषणः। श्रुतस्ततो जयस्तस्माद्विजयोस्मादृतः सुतः २५ शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः। बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी २६ एते वै मैथिला राजन्नात्मविद्याविशारदाः। योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि २७ इति श्रीभागवते महापुराणे नवमस्कंधे जनकवंशानुकीर्त्तने एकादशोध्यायः श्रीशुक उवाच अथातः श्रूयतां राजन्वंशः सोमस्य पावनः। यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्त्तयः १ सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात्। जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः २ तस्य दृग्भ्योभवत्पुत्रः सोमोमृतमयः किल। विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ३ सोयजद्राजसूयेन विजित्य भुवनत्रयं। पत्नीं बृहस्पतेर्दर्प्पात्तारां नामाहरद्बलात् ४ ॥ ॥

शिष्टपुरुषज्ञानमंतरेण वंशज्ञानेन कथं पुरुषार्थः स्यादित्यतः क्षिप्रमुक्त्यर्थं तद्वंश्यान् संक्षिप्याह यस्मिन्निति। इयमेव वार्त्ता सर्वत्र नान्या सर्वे संभाविता येसोमइति वाक्किलेत्युक्तं। वार्त्ता संभावनयोः किलेत्यमरः। योदेवो विप्राणामोषधीनां नक्षत्राणां कुमुदादीनां पतिः पोषकः ३ ४ ॥

भा०न०

तत्कृते ताराऽर्थं। असुरैः सह वर्तमानः सासुरः उडूनां नक्षत्राणां पतिः उडुपः शुक्रविशेषणे सासुर इति पदच्छेदः संधिरभावः छांदसः। बृहस्पतेर्द्वेषाद्बृहस्पतिवि-
षयद्वेषात्। हरः गुरुरंगिरास्तस्य सुतो बृहस्पतिस्तं स्नेहात्। सुरासुराणां विनाशो यस्मिन् स तथा। तारकामयः तारकार्थं विग्रमानः ७ अजो ब्रह्मा। बृहस्पतिस्त्वा-
सांतानिके पुत्रे। तस्मिन् कुमारे। अलीकलज्जया कृतनिमित्तलज्जया। न वोचसि न क-
रामा हेति शेषः। मत्क्षेत्राद्दिहितं गर्भं त्यज कृत इति तत्राह। आहितमिति।

३२

यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात्। नात्यजत्तत्कृते जज्ञे सुरदानवविग्रहः ५ शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपं। हरो गुरुसुतं स्नेहात्स-
र्वभूतगणावृतः ६ सर्वदेवगणोपेतो महेंद्रो गुरुमन्वयात्। सुरासुरविनाशोऽभूत्समरस्तारकामयः ७ निवेदितोऽथांगिरसा सोमं निर्भर्त्स्य विश्व-
कृत्। तारां स्वभर्त्रे प्रायच्छदंतर्वत्नीमवैत्पतिः ८ त्यज त्यजाशु दुःप्रज्ञे मत्क्षेत्रादाहितं परैः। नाहं त्वां भस्मसात्कुर्यां स्त्रियं सांतानिकेऽसति ९ त-
त्याज व्रीडिता तारा कुमारं कनकप्रभं। तस्मां जज्ञे दस्युहंता कुमारः कनकप्रभः १० स्पृहामांगिरसश्चक्रे कुमारे सोम एव च। ममायं न तवेत्युच्चैस्तस्मि-
न्विवदमानयोः ११ पप्रच्छुरृषयो देवा नैवोचे व्रीडिता च सा। कुमारो मातरं प्राह कुपितोऽलीकलज्जया १२ किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाशु मे।
न त्वां तु भस्मसात्कुर्यां मा त्वावद्यविरहणी १३ ब्रह्मा तं तु विनिर्भर्त्स्य ह्यसारं मा तु रंतिके। तामाहूय समप्राक्षीद्दृहुएव तु सांत्वया १४ सोमस्येत्या-
ह शनकैः सोमस्तं तावदग्रहीत्। तस्यात्मयोनिरकृत बुध इत्यभिधां नृप १५ बुद्ध्या गंभीरया येन पुत्रेणापोडुराण्मुदं। ततः पुरूरवा जज्ञे इलायां य उदा-
हृतः १६ तस्य रूपगुणौदार्यशीलद्रविणविक्रमान्। श्रुत्वोर्वशींद्रभवने गीयमानान् सुरर्षिणा १७ सभ ॥ ॥

थयसि। असद्वृत्ते दुराचारे। अमंगलस्य रूपेवा। हृत्कं दुरूपे चरिते हृत्कंठं दोदिधास्तु चेति। किं वक्ष्यामीति तत्राह। पितरमिति। आत्मावद्यविरहिणीमित्यनेन भस्मी-
करणयोग्यत्वेऽपि वर्तितेति मातृशंकावाच्या ईत्यात भस्मसात्कुर्यामिति वक्ति। सांत्वया वाचा। तारा जनकं पृष्टा त्वाह सोमस्येति। तं कुमारं। आत्मयोनिर्ज-
नकोऽयस्य स तथा। नामकरणे निमित्तमाह। बुद्ध्येति १६ उदाहृतः पूर्वमिति शेषः १७ ॥ ॥

रा०म०
३२

आगमनेकारणांतरमाह। मित्रेति। नौ आवयोः शाश्वतीः समाः बहुसंवत्सरान्यावत् रतिः ग्राम्यविषयाक्रीडाऽस्तु। मनो हरत्वे निमित्तमाह। यदंगादिति। रमायस्य हरेरंगात्
न याति न च्यवते नित्यमाश्रितवक्षःस्थलत्वात्। स हरिस्त्वा आश्रयो बृहद्दृत्यन्वयः। लक्ष्मीकांतस्य सन्निधिपात्रत्वादित्यर्थः। उरणकौ मेषौ न्यासौ निक्षेपकल्पनया स्थाप-
तो। तस्मात् रक्षस्व। संरंस्ये संप्रकृत्य यास्यरूपतिकरिष्ये। अस्माकमप्रियमेव व्रततः को क्षिपिरित्याह श्लाघ्य इति। यः श्लाघ्यः कमनीयः स एव स्त्रीणां वरः पतिरित्यन्व-

तदंतिकमुपेयाय देवी स्मरशरार्दिता। मित्रावरुणयोः शापादापन्ना नरलोकतां १८ निशम्य पुरुषश्रेष्ठं कंदर्पमिव रूपिणं। धृतिं विष्टभ्य ललना उपतस्थे
तदंतिकं १९ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः। उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः २० राजोवाच स्वागतं ते वरारोहे आस्यतां क-
रवाम किं। संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः २१ उर्वश्युवाच कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुंदर। यदंगांतरमासाद्य च्यवते ह रिरंसया
२२ एतावुरणकौ राजन्न्यासौ रक्षस्व मानद। संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः २३ घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वान्यत्र मैथुनात्। विवास-
सं तत्तथेति प्रतिपेदे महामनाः २४ अहो रूपमहो भावं नरलोकविमोहनं। को न सेवेत मनुजो देवीं त्वां स्वयमागतां २५ तया स पुरुषश्रेष्ठो रमयंत्या य-
थार्हतः। रेमे सुरविहारेषु कामं चैत्ररथादिषु २६ रममाणस्तया देव्या पद्मकिंजल्कगंधया। तन्मुखामोदमुषितो मुमुदेऽहर्गणान्बहून् २७
अपश्यन्नुर्वशीमिंद्रो गंधर्वान्समचोदयत्। उर्वशीरहितं मह्यमास्थानं नातिशोभते २८ त उपेत्य महारात्रे तमसि प्रत्युपस्थिते ॥ ॥

यः समयं वक्ष्यति नेक्षे इति मैथुनादन्यत्र सुरतसमयमंतरेण त्वा दिवा सवसनं नग्नं नेक्षे तत्पश्यामि चेत्तथैव तोगमिष्यामीति शेषः। पुरूरवसउत्तरमाह। तथेति।
तिएतत्सुकृतं तथेति प्रतिपेदे। अभ्युपगतवान्। तस्येंगितं दृष्ट्वा हर्षोल्लासं दर्शयति। अहो इति। भावः शृंगारादिकं न रीयं तद् इति नराश्च मरास्तेषां लोकः सस्वर्गः। मन-
पि विमोहयतीति नरलोकविमोहनं। एवं विधां त्वां। सुराणां विहारो येषु तत्स्थानेषु। मह्यमस्मत्संबंधि सभास्थानं सभा। एवं मत्वा गंधर्वांस्तान्समचोदयत् २८ ॥

भा॰न॰

न्याययोर्वश्यानपुंसानपुंसकेन निर्वीर्येणेत्यर्थः। हृतापत्या हृतपुत्रा। यो निशि नारी यथा सन्त्रस्तः शेते दिवा पुमान् पुरुषशक्तिमतीत थासंत्रस्तः शेते अक्षिप्तः चुकः इ
जाययोर्वश्यानपुंसानपुंसकेन निर्वीर्येणेत्यर्थः। हृतापत्या हृतपुत्रा। यो निशि नारी यथा सन्त्रस्ता शेते दिवा पुमान् पुरुषशक्तिमतीत थासंत्रस्तः शेते अक्षिप्तः चुकः इ
त्येववाक्सायकैः वचनबाणैर्विद्ध स्ताडितः प्रतोदैरंकुशैः। कुंजेषु पुंजं शील मस्येति कुंजरः। तत्र तस्मिन् समये ते गंधर्वाः स्वविद्युतः प्रद्योतं तत्प्रकाशं तात्वालेक विषयाश्चा
मेववाक्सायकैः वचनबाणैर्विद्ध स्ताडितः प्रतोदैरंकुशैः। कुंजेषु पुंजं शील मस्येति कुंजरः। तत्र तस्मिन् समये ते गंधर्वाः स्वविद्युतः प्रद्योतं तत्प्रकाशं तात्वालेक विषयाश्चा
न्नित्यर्थः। वभ्राम। भ्रमुश्चलनव स्थानइतिधातुः। पर्यटनं कृतवान्। तस्याः उर्वश्याः पंच सखीः पुरूरवाः उर्वशी इच्छा किंच कारेति तत्राह प्राहेति। किं तत् सूक्तमित्यर्थतः तत्र अति
रच्छातिअहोजायेतिष्ठेति। हेजायेमनसेत्यारभ्य ह विषायजा तिस्थर्गंतत्वमपिमा स्यासे इत्यंतमुत्तर प्रत्युत्तरात्मकं सूक्तमुर्वशीवशीकरणाभिप्रायेणाहेत्य

३३

उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥ २९ ॥ निशम्याक्रंदितं देवी पुत्रयोर्नीयमानयोः। हतास्म्यहं कुनाथेन नपुंसा वीरमानिना ॥ ३० ॥ यद्विस्रंभादहं नष्टा हृतापत्या च दस्युभिः। यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥ ३१ ॥ इति वाक्सायकैर्विद्धः प्रतोदैरिव कुंजरः। निशि निस्त्रिंशमादाय विवस्त्रोभ्यद्रवद्रुषा ॥ ३२ ॥ ते विसृज्योरणौ तत्र व्यद्योतंत स्म विद्युतः। आदाय मेषावायांतं नग्नमैक्षत सा पतिं ॥ ३३ ॥ ऐलोपि शयने जायामपश्यन्विमना इव। तच्चित्तो विह्वलः शोचन् बभ्रामोन्मत्तवन्महीं ॥ ३४ ॥ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः। पंच प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ ३५ ॥ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि। मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ ३६ ॥ ॥ ॥

रच ३

र्थः। हे जाये अहो जाये मनसा तिष्ठ मनः पूर्वकं पूर्ववत्तिष्ठ मां त्यक्तुं नार्हसीति शेषः। हे घोरे क्रूरतचोंडे। ये परतरे अङ्कर अहनि उत्तरे नरचरदिवसे मयः सुखं करं
अनकुर्वत्येव। एते नो आवयोः सुतरं मंत्राः करुणोक्तिपूर्वकाः तत् अद्याप्यनुदिता सः अनिवृत्ता अपरिसमाप्ताः इति यत् अमोनै तत् उचितमतो मिश्राणि संलापनेन
णानि वचांसि कृणवावहै करवावहै ॥ ३६ ॥ ॥

राम

३३

सारसंयत्नाभिप्रायेणामध्यकाश्यनर्चीविहाय सुदेहोयं प्रपतेदित्येतादृचमर्थं तदुदाहरति सुदेह इति। हे देवि वोहं परावतं परवंतं दीर्घच्छांदसः इदं देशं
हृतः। त्वया सह परमां गतिं गतवेद्रुगं त्वमेव। तस्मात् मे अयं सुदेहः गतिलक्षणज्ञानसाधनं शरीरं अत्र तत्क्षुद्रे चेत् अस्मान्मवस्थायां वा प्रपतेत् प्रपतिष्यतिकु
तः। अनावृतः आधाररहितः। अथ पतनानंतरं निर्ऋतेर्भूमिरूपस्योपस्थे शयीत पतेत्। अथ निर्जीवमेनं शरीरं रभसासः भक्षणसंभ्रमाकुलाः वृकाः अद्युः खा

सुदेहोयं पतत्यत्र देवि दूरं हृतस्त्वया। खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदं ॥ ३७ ॥

दंति। पतित्वा शयित्वापि कथं चित्त्वत्प्राणाश्चेत् वृकाः इंद्रियाणि भक्षयंतइति। सुदेहो अद्य प्रपतेदनावृत्य रावतं परमां गतं वाउ। अथ शयीत निर्ऋतेरुपस्थे
धेनं वृकाः रभसासो अद्युरिति हे जाये त्वत्प्रसादनत्तरं किमेतावाचेति। नवेतयावाचा हिंस्रपा वकिंकुर्वः आवयोः पूर्ववत्संगमानुपपन्नेः। किंनिमित्तं तत्राह ॥ ३७ ॥
अहमिति अहं पुत्रसा मध्येव प्राक्रमिषं यथा प्रथमो षसः अतिक्रांतवान् अस्तनाता मुषसां योगो न घटनेन तथा वयोरपीत्यर्थः

तर्हि किं करोमि तिन्नाह पुत्र स्वह्नीति हे पुरूरवः पश्चात्त्वमहं परेहि गच्छ दूरस्थानीमेवं कर्त्तव्यं त्वयेत्यर्थः। अस्मभेयायेति श्रुतेः। किमर्थं पश्चाद्गमनमित्यत्राह दुरापनेति यथा वातो वायुः दुःखेन गृहीतुमशक्यः तथाहमपि दुरापनादुर्ग्रहेत्यर्थः। इति मृदुवचनोत्तरेण यं दृष्टं तया तीर्थमिति संवाय कठिनोत्तरेण निवर्त्तिष्यामीति मत्वा। पुरूरवोमामृथाः अपमोमा त्वा वृकासोऽशिवास उक्षन्। न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येतेत्येतद्यथा निवर्त्तयिष्यामीति मत्वा। पुरूरवो मा मृथा इति। हे पुरूरवः त्वं मा मृथाः मरणं न प्राप्नुहि। प्रौढात्त्वं कथं करोति। पुरुष इति। पुल्लिङ्गशक्तिमत्त्वे बलिष्ठत्वात्काम पुत्ररत्ने नोव शीवक्रुक्तिमा मृथा इति। हे पुरूरवः त्वं मा मृथाः मरणं न प्राप्नुहि। एतादृशं मंकरोति। पुरुष इति। पुल्लिङ्गशक्तिमत्त्वेन बलिष्ठत्वात्काम निमित्तमरणं तव न युक्तं अबलायाश्चेद्बलत्वेन कथं चित्तं भावितं स्यादित्यर्थः। अनेनार्थतः मापप इत्येतद्दृष्टं भवति। वृकस्त्विति पतेते यं दुष्टनिमित्तमरणं तव न युक्तं अबला याश्चेद्बलत्वेन कथं चित्तं भावितं स्यादित्यर्थः।

उर्वश्युवाच मा मृथाः पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे। क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ३९ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः। घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ४०

गतं रूपं। कामपारवश्येन भृशं पतितो मा भूः। अभ्यासस्य दीर्घाभावः छान्दसः। इमे अशिवाः अशिवाः अशुद्धिहेतवो वृकाः वृकाः सालावृकाः मोऽनुगतिः अन्तरणार्थः। मा स्पाद्युः अन्तेन लालाजलेन शोधयित्वा भक्षयेयुरित्यर्थः। स्त्रैणानि स्त्रीसम्बन्धीनि सख्यानि ददाति प्रतिरक्षति गुह्यमाख्याति पृच्छति भुङ्क्ते भोजयते चैव षड्विधं स्नेहलक्षणमिति। स्नेहलक्षणानि न सन्ति सहातनानि न भवन्ति वै। क्वापीयेत्यनेन साला वृकाणामिति लुप्तोपमेति स्वयति हृदयमिति जातावेकवचनं। यथा सालावृकाणां हृदयानि एतान्येतानि स्त्रीणां हृदयानि तथेत्यर्थः। एतेनुक्रमेण विवृणोति। स्त्रिय इति। किं क्रूरं स्त्री हृदयं पुनरपि। किं क्रूरं गानाहृदयमित्येतद्विशदेन दर्शितं। प्रिये चेष्टे पिसाहसो बलात्कारलक्षणं कर्म न्यासं तारक्ष्या। एतदेव विविच्य दर्शयति घ्नन्तीति विश्रब्धं विश्वस्तं ४० ॥

आलीकवि सुप्रत्यकपट विश्वासं अज्ञेषु पुरुषेष्वपत्यन्तसौहृदाः। तत्र कालोपनोपसुखप्रदानत्वाशान्तिकसुखदाः पुंश्चल्य इत्यस्य विवरणं स्वैरं भजति। दृष्टजनशिक्षामत्रपाकार्पश्चेष्ठा। नियतमद्यपानादिवृत्तयः। मपाप्सेदेकरात्रं वत्स्यति सुतरलीलामनुभविष्यतीत्यर्थः। समुवास संभोगलक्षणेऽरत्यमनुभूतवान्। स्त्रियो ह्यकरुणा इत्यारभ्यनमानिशापित्यतेनोक्तं इति ज्ञातव्यं। उपधाव शरणं गच्छ। धाष्टगतिवृद्ध्योः। निकरणं शुश्रूषाक्तिं कृतिं विमर्थः। इति त्वादेवाश्मअज्ञरैल पथे पेतन वह्नि मृतस्तुवंगः प्रजाते देवाश्च विधायन्नातिस्वर्गं त्वमपि मादया सह इति। अग्निस्थाली अग्निस्थापनयोग्यपात्र

विधायालीकविश्रम्भमज्ञेषु त्यक्तसौहृदाः। नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ४१ संवत्सरान्ते हि भवानेकरात्रं मयेश्वर। वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भो ४२ अन्तर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरीं ४३ पुनस्तत्र गतोऽब्दान्ते उर्वशीं वीरमातरं। उपलभ्य मुदा युक्तः समुवास तया निशां ४३ अथैनमुर्वशी प्राह कृपणं विरहातुरं। गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ४४ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप। उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन्वने ४५ स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि। त्रेतायां सम्प्रवृत्तायां मनसि त्रय्यवर्तत ४६ स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ४७ ॥ ॥

सः पुरूरवाः अग्निस्थालीं वने न्यस्य निक्षिप्य निशित्वा। उर्वशीं मन्यमानो वने चरंस्तामुर्वशीं नाबुध्यत। नेयमुर्वशी किं त्वियमग्निस्थालीति ज्ञातवानित्यर्थः। मत्तरूरवा: अग्निस्थाली वनेम्यस्यनिहित्य निशि। गृहान् गत्वा तां निशां मध्युषितोऽभूत्। अथापरस्मिन्दिवसे त्रेतायां संप्रवृत्तायां त्रेतायुगारम्भसमये ज्ञाते सत्युर्वशीं चिन्तनस्तस्य राज्ञो मनसि त्रयी आम्नाया दिदृक्षा गृहाङ्गत्वा तां निशां मध्युषितोऽभूत्। अथापरस्मिन्दिवसे त्रेतायां संप्रवृत्तायां त्रेतायुगारम्भसमये ज्ञाते सत्युर्वशीं चिन्तनस्तस्य राज्ञो मनसि त्रय्याम्नायादिर्यप्रयत्नकाग्रवेदत्रयं प्रकाशितमभूदित्यर्थः। तदर्थं विचार्याग्निस्थाली प्रदानाभिप्रायं ज्ञात्वा अग्निस्थालीस्थानं गतः तत्र स पुरूरवाः शमीगर्भं शमीवृक्षेण परिवेष्टितमश्वत्थं विलक्ष्य विशेषतो दृष्ट्वा स्थाली शमीजाताग्निस्थाश्वत्थो जात इति ज्ञाय शमीगर्भमश्वत्थं छित्वा ४२ ॥ ॥

तेनशमी गर्भश्वत्थेनद्वे अरणी कृत्वा तत्र राधरारणिमेवैनविधाय उर्वशीलोकप्राप्तीछ्यफलविशेषार्थं जनिष्टोष्रयोनर्यः सुजातः पोर्वशीतिरत्न दीर्घमायु रिति मंत्रार्थलिनोर्वशींध्याय उर्वशीं ध्यायमधरारणिमात्मानं पुरूरवः शब्दोपलक्षितमुत्तरारणिं च चिंतयन् उभयोरारण्योर्मध्ये प्रजननसाधनं तच्च मनसाध्याय इति मंत्रार्थत्वेनोर्वशीं ध्याय तस्य भूतिजानवेदानामाग्ने अरणी निर्मथनं यतिशेषः प्रभुरित्यनेन सर्वध्यानादि सामर्थ्यं दर्शयति मथितमाहतस्येतिमस्य राज्ञो निर्मथनाज्जातवेदा जातः इति। तस्य भूतिजानवेदानामाग्ने अरणी निर्मथं यतिशेषः प्रभुरित्यनेन सर्वध्यानादि सामर्थ्यं दर्शयति मथितमा हतस्येति

तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ४७ उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तरां। आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ४८ तस्य निर्मथनाज्जातो जातवेदा विभावसुः। त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ४९ तेनायजत यज्ञेशं भगवंतमधोक्षजं। उर्वशीलोकमन्विच्छन्सर्वदेवमयं हरिं ५० एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः। देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ५१ पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप। अग्निना प्रजया राजा लोकं गांधर्वमेयिवान् ५२ इति श्रीभागवते महापुराणे नवमस्कंधे सोमवंशे ऐलोपाख्याने चतुर्दशोऽध्यायः॥ श्रीशुक उवाच ऐलस्य चोर्वशीगर्भात्षडासन्नात्मजा नृप। आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः १ श्रुतायोर्वसुमान्पुत्रः सत्यायोश्च श्रुतंजयः। रयस्य सुत एकश्च जयस्य तनयोऽमितः २ भीमस्तु विजयस्याथ कांचनो होत्रकस्ततः। तस्य जह्नुः सुतो गंगां गंडूषीकृत्य योऽपिबत् ३ ॥ ॥

रितिश्रुति। स विभावसुरग्निस्त्रय्या विद्यया वेदत्रयसंज्ञया प्रतिपाद्यो राज्ञा पुत्रत्वेन कल्पितस्त्रय्या त्रयः। त्रिभिराहवनीयादिरूपैर्वर्त्तत इति त्रिवृत् अध्यात्मिति श्रुति। तेन त्रिवृत्ताग्निना। उर्वशी सालोकं सर्वदेवमयं सर्वदेवोत्तमं पुरा कृते। अकारो वैस्वि वक्षायां अकारोकारमकारमहारोंकाररूपेण वर्त्तत इति त्रिवृत्। तेन त्रिवृताग्निना ॥४७॥ इति नवमे चतुर्दशः॥ ॥ ब्रह्मणो विरचेः सोमः सोमादुधः बुधात्पुरूरवाः तस्य पुत्रानाह। ऐलस्येति ३ ॥ ॥

कुशांबुर्नोमाधिरित्येकस्य नाम द्वयं। भार्गव ऋचीकं। कुशिका नाम चर्चयोयस्य स तथा कुशिका वयं। समयपद इति वा। ध्व श्वश्र्वा भार्यामात्रा। उभयैः सात्विकराजसैः इति चैः मंत्रैः वरुं अपयित्वा पपयामि मंत्र्य तवेदं तव मातुरिदमिति निगद्य अस्याप्य स्नातुं गतः। तावत्तदा श्वात्मीय चरुं श्रेष्ठं गत्वा नया स्वमात्रा याचितासत्यव

जह्नोः पुरुस्तस्य पुत्रो बलाकश्चात्मजोऽजकः। ततः कुशः कुशस्यापि कुशांबुर्मूर्तयो वसुः ४ कुशनाभश्च चत्वारो गाधिरासीत्कुशांबुजः। तस्य सत्यवतीं कन्यां ऋचीकोऽयाचत द्विजः। वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ६ एकतः श्यामकर्णानां हयानां चंद्रवर्चसां। सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयं ७ इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणांतिकं। आनीय दत्वा तानश्वानुपयेमे वराननां ८ स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया। श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ९ तावत्सत्यवती मात्रा स्वचरुं याचिता सती। श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत्स्वयं १० तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकार्षीनः। घोरो दंडधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ११ प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः। अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् १२ सा चाभूत्सुमहापुण्या कौशिकी लोकपावनी। रेणोः सुतां रेणुकां वै जमदग्निरुवाह यां १३ तस्यां वै भार्गवऋषेः सुता वसुमदादयः। यवीयाञ्जज्ञ एतेषां राम इत्यभिविश्रुतः १४ यमाहुर्वासुदेवांशं हैहयानां कुलांतकं। त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीं १५ दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत्। रजस्तमोवृतमहन्फल्गुन्यपि कृतेंऽहसि १६ राजोवाच किं तदंहो भगवतो राजन्यैरजितात्मभिः। कृतं तेन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः १७ ॥

ती स्वचरुं मात्रे दत्वा मातुश्चरुं स्वयमादत्स्म स्वीकृतवती। तद्विज्ञाय मुनिः प्राह घोरो दंडधरः ते भ्राता ब्रह्मवित्तमः। सा कौशिकी सत्यवती नदी वभूवेति शेषः। भार्गवऋषेर्जमदग्नेर्यवीयान् कनिष्ठः। क्षत्रवधे मुख्यकारणमाह दुष्टमिति। अहन् हतवान्। फल्गुनि अल्पेऽप्यंहस्यपराधे १६ १७ ॥ ॥

स्तंदत्तात्रेयं परिकर्मभिः परिचर्याभिराराध्य अरातिषु दुर्धर्षत्वं वरं अजश्रीरोपत्निकश्रीः यत्रतेजआदयो ऽणिमादयश्च गुणाः संति अव्याहतगतिश्चचारइत्य
न्वयः रेवायाः नर्मदायाः अंभसिरुरोधप्रवाहंसंभनं कृतवान् स्वशिविरं रावणस्य सेनाविमोचनस्थानं प्रतिस्रोतःसरिज्जलैः प्रतीपगमनं स्रोतःप्रवाहोयेषां
तानितथा प्रतिस्रोतांसिच सरिज्जलानि प्रतिस्रोतः सरिज्जलानि तैर्विप्लावितं प्रवाहवेगेन नीतं वीक्ष्येति शेषः अशोनोवतिर्गर्मद्वारंइंद्रियेषुजलस्तताविति

श्रीबादरायणिरुवाच हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः दत्तंनारायणस्यांशमाराध्य परिकर्मभिः १८ बाहून्दशशतंलेभेदुर्धर्षत्व
मरातिषु अव्याहतेंद्रियाजश्रीस्तेजोवीर्ययशोबलं १९ योगेश्वरत्वमैश्वर्यंगुणायत्राणिमादयः चचाराव्याहतगतिर्लोकेषुपवनोयथा २० स्त्री
रत्नैराहृतःक्रीडन्रेवांभसिमदोत्कटः वैजयंतींस्रजंबिभ्रद्रुरोधसरितंभुजैः २१ विप्लावितंस्वशिबिरंप्रतिस्रोतःसरिज्जलैः नामृष्यत्तस्यतद्वीर्यंवी
रमानीदशाननः २२ गृहीतोलीलयास्त्रीणांसमक्षंकृतकिल्बिषः माहिष्मत्यांसंनिरुद्धोमुक्तोयेनकपिर्यथा २३ सएकदातुमृगयांविचरन्वि
पिनेवने यदृच्छयाश्रमपदंजमदग्नेरुपाविशत् २४ तस्मैसनरदेवायमुनिरर्हणमाहरत् ससैन्यामात्यवाहायहविर्धान्यातपोधनः २५ सवीर
स्तत्रतद्दृष्ट्वाआत्मैश्वर्यातिशायिनं तन्नाद्रियताग्निहोत्रीसाभिलाषःसहैहयः २६ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् तेचमाहिष्मतींनिन्युः
सवत्सांक्रंदतींबलात् २७ अथराजनिनिर्यातेरामआश्रमआगतः श्रुत्वातत्तस्यदौरात्म्यंचुक्रोधाहिरिवाहतः २८ ॥ ॥

चायथाकेनचित्कपिः मुक्तः पुनर्बद्धोभवतितथायंदशमुखोयेनार्जुनेनमाहिष्मत्यांसन्निरुद्धोभूदित्यन्वयः हविर्धान्याकामधेन्वा आत्मनः स्व
स्यऐश्वर्यमतिशायिनंअतीत्यवर्तमानंतदैश्वर्यंनाद्रियत अनादरंकुर्वन्नग्निहोत्रीधेनुंप्रतिसाभिलाषः इच्छांकुर्वन्हविर्धानीधेनुंनरान्हर्तुम
चोदयत्प्रेरयामासेत्यन्वयः २७ २८

योजयामास तत्रेन्जितंकृतवान् कार्मुकंगृहीत्वेतिशेषः आरथेयोजयामासेतिवा एणायचर्मकृष्णाजिनंतदेवांबरंयस्यसतथातं आत्मनःस्वस्यधामतेजोयाभ
ताः तथाताभिःजटाभिर्युतंतंपुरींप्रापतंतं अर्जुनोयान्यक्षौहिणीश्चोदयत्तारामएकोहसूदयदित्यर्थः मनोवदनिलवद्योजोवेगोयस्यसतथामनोवद्वेगोअनिल
वद्बलंभवतिवा ओजोवलंभवलयोरितियादवः विग्रहोदेहः अथागत्यार्जुनःपंचशतेषुधनुःषुबाहुभिःबाणान्युगपदेकदायत्नेनसंदधे अस्त्रभृतांसम्य

परशुंयोजयामाससतूणंचर्मकार्मुकं अन्वधावतदुर्मर्षोमृगेंद्रइवयूथपं २९ तमापतंतंभृगुवर्यमोजसाधनुर्धरंबाणपरश्वधायुधं ऐणेयचर्मां
बरमर्कधामभिर्युतंजटाभिर्ददृशेपुरींनृपः ३० अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः अक्षौहिणीःसप्तदशातिभीषणास्ता
रामएकोभगवानसूदयत् ३१ यतोयतोसौप्रहरत्परश्वधोमनोनिलौजाः परचक्रसूदनः ततस्ततश्छिन्नभुजोरुकंधरानिपेतुरुर्व्यांहतसूतवाहनाः
३२ दृष्ट्वास्वसैन्यंरुधिरौघकर्दमेरणाजिरेरामकुठारसायकैः विवृक्णवर्मध्वजचापविग्रहंनिपातितंहैहयआपतद्रुषा ३३ अथार्जुनःपंचश
तेषुबाहुभिर्धनुःषुबाणान्युगपत्ससंदधे रामायरामोस्त्रभृतांसमग्रणीस्तान्येकधेषुभिराच्छिनत्समं ३४ पुनःस्वहस्तैरचलान्मृधेंघ्रिपानुत्क्षि
प्यवेगादभिधावतोयुधिभुजान्कुठारेणकठोरनेमिनाचिच्छेदरामःप्रसभंत्वहेरिव ३५ कृत्तबाहोःशिरस्तस्यगिरेःशृंगमिवाहरत् हतेपितरित
त्पुत्राअयुतंदुद्रुवुर्भयात् ३६ अग्निहोत्रीमुपावर्त्यसवत्सांपरवीरहा समुपेत्याश्रमंपित्रेपरिक्लिष्टांसमर्पयत् ३७ स्वकर्मतत्कृतंरामःपित्रे
भ्रातृभ्यएवच वर्णयामासतच्छ्रुत्वाजमदग्निरभाषत ३८ रामराममहाबाहोभवान्पापमकारषीत् अवधीन्नरदेवंयत्सर्वदेवमयंवृथा ३९
वयंहिब्राह्मणास्तातक्षमयार्हणतांगताः ॥ ॥

गग्रणीरामःसमंयुगपदेकस्मिन्नेवधनुषिबद्धेषुभिःसंधितशरैःताउपंचशतशरानच्छिनदित्यन्वयः पुनःरामःस्वहस्तैरचलान्गिरीनंघ्रिपान्वृक्षान्
मृधेउत्क्षिप्यप्रक्षिप्यवेगादभिधावतोर्जुनस्यभुजान्कठोरनेमिनातीक्ष्णधारेणविच्छेदेत्यन्वयः उपावर्त्यप्रत्यानीयपरिक्लिष्टांकर्षणादिनापरिक्लि
ष्टांक्लेशोपेतां ३७

यथा सोरी सूर्यसंबंधिनी प्रभा रोचते तथा ब्राह्मी ब्राह्मणसंबंधिनी लक्ष्मीः मन्मयाप्रकाशते ४१ मूर्द्धं विसिक्रस्य चक्रवर्त्तिनः ब्रह्मवधात् ब्राह्मणहननात् अच्युते श्रीनारायणे बुद्धिर्यस्य स तथा ४२ इति नवमे त्रयोदशः चरित्वा क्रत्वा १ यातागंगामिति शेषः २ किंचिच्चित्ररथस्पृहा स्पृहणीयचित्र

यथालोकगुरुर्देवः पारमेष्ठ्यमधात्यरं। मन्मया रोचते लक्ष्मीर्ब्राह्मी सौरी प्रभा यथा। जग्मिरणमाप्नुभगवांस्कृष्यते हरिरीश्वरः ४१ राज्ञो मूर्द्धा
वसिक्रस्य वधो ब्रह्मवधाद्गुरुः। तीर्थसंसेवया वांहो जह्यंगाच्युतचेतनः ४२ इति श्रीभागवते महापुराणे नवमस्कंधे परशुरामचरिते हैह
यार्जुनवधो नाम त्रयोदशोऽध्यायः श्रीशुक उवाच पित्रोपशिक्षितो रामस्तथेति कुरुनंदन। संवत्सरं तीर्थचर्यां चरित्वाश्रममाव्र
जत् १ कदाचिद्रेणुका याता गंगायां पद्ममालिनं। गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत २ विलोकयंती क्रीडंतमुदकार्थं नदीं गता।
होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ३ कालात्ययं तं विलोक्य मुनेः शापविशंकिता। आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ४
व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत्। घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ५ रामः संचोदितः पित्रा भ्रातॄन्मात्रा सहावधीत्
त। प्रभावज्ञो मुनेः सम्यक्समाधेस्तपसश्च सः ६ वरेण च्छंदयामास प्रीतः सत्यवतीसुतः। वव्रे हतानां रामोपि जीवितं चास्मृतिं वधे ७ ॥

रथे स्पृहावती जाता ३ कलशं भर्तुः पुरो निधाय तत्रैव कृतांजलिस्तस्थौ ४ घ्नत हतां कुरुत। तां इति मुनेः समाधेः तपसश्च सम्यक्प्रभावज्ञः
रुणो न लेप्यचेताः प्रतापमाहात्म्ययोः प्रभावः स्यादिति वाञ्छं दयामास वशीचकार वशाभिप्राययोः श्रोत्रदर्शनौ रुधिरविर्भुजाविति च। रामो वधे आ
स्मृतिं वव्रे रामो हता इति स्मृतिशून्यत्वलक्षणं वरं च ७ ॥ ॥

तेव सुप्तहृदयः जीवंति येऽजीवंत मनो वेत्यियं तामिति मत्वा सुहृद्वयो नाकारि किं वक्ष्यामि सार्वज्ञमीश्वरत्वे न दोषा भावं च प्रकटपितृभावेनेत्याह पितुरिति। वीर्यमराक्र
मेरेत स्यात्र माहात्म्ययोः पित्र्यमिधानात्। पितृतपोमाहात्म्य जानता कृतमिति भावः। साक्षान्नारायणावतारस्य निरवद्यस्य सकलगुणाकरस्य भार्गवराम स्य
ब्रह्महत्यादोषमार्जनाय तीर्थसेवा मातृभ्रातृवधात्सञ्जाता कारितेन प्रसन्नात् पितुर्वरदानमित्यादि किं कथं घटमहति इत्याशंका। जामदग्न्योर्वरं वव्रे न त शक्तिरपि सु
ये। पितुर्नान्यत्वमिति सिद्धार्थं लोके लोकेश्वरः प्रभुरित्यादिवाक्येन परिहर्तव्यमिति ज्ञातव्यं ८ ९ लब्धच्छिद्राः लब्धावसराः। विषयादाहृत्य भगवत्येव निवेशितबुद्धि

उत्तस्थुस्ते कुशलिनो निद्रापाय इवांजसा। पितुर्विद्वांस्तपो वीर्यं रामश्चक्रे सुहृद्वधं ८ येर्जुनस्य सुता राजन्स्मरंतः स्वपितुर्वधं। रामवीर्यपराभूता लेभिरे
शर्म न क्वचित् ९ एकदाश्रमतो रामे सभ्रातरि वनं गते। वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् १० दृष्ट्वाग्न्यागार आसीनमावेशितधियं मुनिं। भगव
त्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ११ याच्यमाना कृपणया राममात्रातिदारुणाः। प्रसह्य शिर उत्कृत्य जग्मुस्ते क्षत्रबंधवः १२ रेणुका दुःखशोका
र्त्ता निघ्नत्यात्मानमात्मना। राम रामेति तातेति विचुक्रोशोच्चकैः सती १३ तदुपश्रुत्य दूरस्था हा रामेत्यार्त्तवत्स्वरं। त्वरयाश्रममासाद्य ददृशुः पितरं हतं १४
ते दुःखरोषामर्षार्त्तिशोकवेगविमोहिताः। हा तात साधो धर्मिष्ठ त्यक्त्वास्मान्स्वर्गतो भवान् १५ विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयं। प्रगृह्य परशुं
रामः क्षत्रांताय मनो दधे १६ गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियं। तस्यां स शीर्षभी राज्ञां मध्ये चक्रे महागिरिं १७ तद्रक्तेन नदीं घोरामब्रह्मण्य
भयावहां। हेतुं कृत्वा पितृवधं क्षत्रेमंगलकारिणि १८

आत्मनायतेनात्मानं देहं कद्देश मुदरं। यत्तेके ग्रोमतो वाते इति यादवः। आत्मशब्दः पूर्वार्धे इरस्याः सुमित्र देणगता। क्षत्रांताय अविशेषेण क्षत्रियकुल
नाशाय। ब्रह्मघ्नैर्ब्राह्मणं हंतृभिः विहता नष्टा श्रीर्यस्याः सा तथा तां। शीर्षभिः तस्यां प्रविश्य मध्ये माहिष्मतीमध्ये। अब्रह्मण्यानां ब्राह्मणद्वेषिणां भयकरीं
नदीं चकार इति यत्तेनान्वयः। निमित्तमाह हेतुमिति। अमंगलकारिणि सति १८ ॥ ॥

स्यमंतकपंचके कुरुक्षेत्रे। शोणितान्येवोदकानि येषु ते तथा तान्ह्रदान्। अजलेराध्वरेशात्। शिरः कायेन संधाय बर्हिषि यज्ञ आधाय दर्भेषु न विशेषेण वा। स र्वदेवमयमेव स्वदेवो ऽस्य मे। उपद्रष्ट्रे न्यूनातिरिक्तकर्मपरीक्षिणे। परं अवशिष्टं विधूताशेषकिल्बिषत्वमोपचारिकं लोकशिक्षार्थत्वात्। नाम्नास रस्वत्यां ब्रह्मनद्यां वे दमध्यां न द्यां। व्यभ्रः मेघच्छायानिर्मुक्तः। अंशुमानादित्यः जने। जनेति पदाध्याहारेणावभृथस्नानं विधूताशेषकिल्बिषजनमिति वा। अवभृथस्नाने न विधू तमशेषं किल्बिषं यस्य स तथा। अवभृथस्नानविधूताशेषकिल्बिषो जनो यस्य स तथा। अनेन अवभृथस्नानेन जनस्याशेषतः। किल्बिषं विधूतं भवतीति दर्शि

त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां विभुः। स्यमंतकपंचके चक्रे शोणितोदान्ह्रदान्नव १८ पितुः कायेन संधाय शिर आधाय बर्हिषि। सर्वदेवमयं देवमात्मानमयजन्मखैः १९ ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशं। अध्वर्यवे प्रतीचीं वा उद्गात्रे उत्तरां दिशं २० अन्येभ्योऽवांतरदिशः कश्यपाय च मध्यतः। आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परं २१ ततश्चावभृथस्नानविधूताशेषकिल्बिषः। सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् २२ स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणं। ऋषीणां मंडले सोऽभूत्सप्तमो राम पूजितः २३ जामदग्न्योऽपि भगवान्रामः कमललोचनः। आगामिन्यंतरे राजन्वर्तयिष्यति वै बृहत् २४ आस्तेऽद्यापि महेंद्राद्रौ न्यस्तदंडः प्रशांतधीः। उपगीयमानचरितः सिद्धगंधर्वचारणैः २५ एवं भृगुषु विश्वात्मा भगवान्हरिरीश्वरः। अवतीर्य परं भारं भुवोऽहन्बहुशो नृपान् २६ गाधेरभून्महातेजाः समिद्ध इव पावकः। तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसं २७ विश्वामित्रस्य चैवासन्पुत्रा एकशतं नृप। मध्यमस्तु मधुच्छंदा मधुच्छंदस एव ते २८ ॥ ॥

तम। रामेणावभृथस्नानमकारीति सूचितं भवति। जमदग्निस्तु संज्ञानलक्षणं ज्योतिर्मण्डलस्थं। स्वयोग्यं देहमाकारविशेषं लब्ध्वा सप्तर्षीणां मंडले सप्तम ऋषिरिति शेषः। आगामिन्यंतरे भाविष्यमन्वंतरे बृहद्ब्रह्म वेदलक्षणं वर्तयिष्यति वेदप्रवर्तको भविष्यतीत्यर्थः। भुवः परं केवलं भारभूतान् नृपान् हन् संहृतवा न्। महातेजा विश्वामित्रः। तस्य विश्वामित्रस्यैकशतं पुत्रा आसन्। तेषामेकोत्तरशतपुत्राणां मध्ये यो मध्यमः स तु मधुच्छंदो नाम। तेऽपि मधुच्छंदसः स पुत्राः। ये पंचाशत् तत्र ये मधुच्छंदसनामानो बभूवुरित्यन्वयः। तस्य हि विश्वामित्रस्यैकशतं पुत्रा आसुः तेषां पारिशेष्यात् चेममेवार्थं वक्ति २८ ॥ ॥

शुनःशेपस्य माहात्म्यं तु परिहृत्य वक्तुं तत्सुतान् प्रपंचयितुमाह पुत्रं कृत्वेति। अत्र का विकिं वदंती। मम पुत्रो भवेति विश्वामित्रेणोक्तोऽपि आजीगर्तिः शुनःशेपो हं त्वत्सुता णां ज्येष्ठ एव पुत्रः स्यां तत्रापि मध्यमो न स्यां नापि कनिष्ठ इति विश्वामित्रं आह। तदेवमस्त्विति। विश्वामित्रः शुनःशेपं पुत्रं कृत्वा स्वानौरसान्पुत्रानब्रवीत् एषः शुनः शेपो युष्माकं ज्येष्ठः प्रकल्प्यतां भवद्भिरिति शेषः इति। शुनःशेप शब्दस्य स्वतः शुनी जायायां किमित्यन्यथा पतीतिं निवारयति भार्गवमिति। इत्थं शोऽयं अनेना पिता कथं निवारितः स्यादित्यत आह आजीगर्तमिति। आजीगर्तस्य मुनेरपत्यं। तर्हि विश्वामित्रस्य पुत्रत्वे का संगतिरित्यतो देवरातमिति। विश्वामित्राय देवै रातं विश्वामित्रस्य दत्तपुत्रत्वेन संबंध इत्यर्थः। अनेन विशेषणत्रयेण ज्येष्ठत्वकल्पनायां वैशिष्ट्यमुक्त्वा वैशिष्ट्यांतरं चाह। य इति। यः शुनःशेपः हरिश्चंद्रयज्ञे आजीगर्तेन पित्रा रोहिताय

पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवं। आजीगर्तं सुतानाह ज्येष्ठ एव प्रकल्प्यतां २९ यो वै हरिश्चंद्रमखे विक्रीतः पुरुषः पशुः। स्तुत्वा देवान्प्रजेशादीन्मुमुचे पाशबंधनात् ३० यो रातो देवयजने देवैर्गाधिषु तापसः। देवरात इति ख्यातः शुनःशेपस्तु भार्गवः ॥३१॥ ये मधुच्छंदसो ज्येष्ठाः कुशलं मेनिरे न तत्। अशपत्तान्मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ३२ ॥ ॥

विक्रीतः पुरुषरूपः पशुरश्वत्। यश्च प्रजापत्यादिदेवान् स्तुत्वा नत्वा सादातया शबंधनात् संसाराख्य पाशबंधनात् पृथक्त्वं। यदि रज्जुबंधनात् आत्मानं स्तुत्वैव मोचयामास कर्मकर्तरि प्रयोगो यस्य एवं कतमस्याभृतानां मनाम इत्यादि देवस्य नामेत्यारभ्य इत्येवं निधाय येऽपि तदेवाक्येन स्तुत्वा अन्याऽपि एतासामृचामर्थ आचार्यैरेव विस्तरेणोक्त इति नास्माभिः प्रपत्यते। देवरातशब्दनिर्वचनेन विश्वामित्रस्य तत्संबंधमाह इति यः हे न यजनेषु ज्ञेय देवैरातो रक्षितः स देवगाधिषु तापसविश्वामित्राय रातः दत्तः तस्माद्देवरात इति ख्यातः प्रसिद्धः। इत्यतो यं भार्गवः। शुनःशेपो ज्येष्ठत्वेन कल्प्यतामिति विश्वामित्रेणोक्ताः ये पंचाशत्तु नाम मधुच्छंदसो जन्मना ज्येष्ठास्ते शु नःशेपस्य ज्येष्ठत्वं स्वात्मानं कनिष्ठत्वं च तत्कुशलं साधु न मेनिरे। ततः किमभूदिति तत्राह अशपदिति ३२ ॥ ॥

भा·न·

तेषांज्येष्ठभावेनशुनःशेपस्यकिमायातमितितत्राह।सहेतिहेत्यनेनब्राह्मणमनुकरोति।सविश्वामित्रःपंचाशतासार्द्धंमधुच्छंदसमुवाचह।अयंशुनःशेपस्यज्येष्ठो
भवत्वितिविश्वामित्रेणोक्तस्येदमेववाक्यमुत्तरं।समधुच्छंदाःपंचाशतासार्द्धंपितरमुवाचह।ततस्तुतःपिताभवान्नोस्माकंयद्विजानीतेआज्ञापयतितस्मिन्ना
ज्ञमेशुनःशेपस्यज्येष्ठेअस्माकंकनिष्ठेसर्वेवयमविचारेणतिष्ठामहे।प्रकाशनस्तोमाख्ययोश्चेतिसूत्रात्निश्चितंस्थिरीकृतंचेदंकार्यमितिभावः।नर्हितथाकु
र्वित्वितिपित्राचुदितास्तेपुत्राःकस्यनूनमित्यादिमंत्रदृशंऋग्वेदद्रष्टारंशुनःशेपंज्येष्ठंचक्रुः।कथंचक्रुरितितत्राहत्वामितिभोदेवरातवयंत्वामन्वंचस्त्रनुवर्त्तमानाः
कनिष्ठास्मभवामहिस्मेतिहंहेतौवाअस्माद्धयंत्वत्कनिष्ठास्स्मतस्मान्नेज्येष्ठत्वेसंशयोमाभूदिति।अथवाहेपितःवयंत्वात्वांमन्वंचःअनुवर्त्तमानाःस्म

३९

सहोवाचमधुच्छंदाःसार्द्धंपंचशताततः।यन्नोभवान्संजानीतेतस्मिंस्तिष्ठामहेवयं ३३ ज्येष्ठंमंत्रदृशंचक्रुस्त्वामन्वंचोवयं
स्महि।विश्वामित्रःसुतानाहवीरवंतोभविष्यथ ३४ येमानंमेनुगृह्णंतोवीरवंतमकर्त्तमां।एषवःकुशिकावीरोदेवरातस्तमन्वि
त ३५ अन्येचाष्टकहारीतजयक्रतुमदादयः।एवंकौशिकगोत्रंतुविश्वामित्रैःपृथग्विधं ३६ ॥ ॥

त्वदाज्ञाकारिणइत्यर्थइति।संतुष्टःपिताकंवरंप्रायच्छदितितत्राहविश्वामित्रइति।वीरवंतःपुत्रवंतःकर्त्तव्यविशिष्टवेणवंतोवा।कुतोयंवरोदत्तइतितत्राहयइ
तियेभवंतोमेमानमनुगृह्णतःपरिपालनलक्षणेनानुग्रहंकुर्वंतःमांवीरवंतंअकर्त्तकृतवंतइतियस्मात्तस्माद्यूयंवीरवंतोभविष्यथेतिवीरवंतमकर्त्तमेतिपाठस्त
णावाक्यानुकारेणवेदतुल्यमिदमितिप्रकाशयति।अकर्त्तममवाक्यमकुर्वत(जी)वलोवाक्यकरणाद्गणसंशयेनेनच।।याथांपिंडमानाद्यत्रिभिःपुत्रस्यपुत्रतेति
स्मृतेः।हेकौशिकाःकौशिकगोत्राएषदेवरातोममवीरःपुत्रोवोयुष्माकंज्येष्ठःस्तंसमन्वितअनुवर्त्तध्वं।अन्येचाष्टकादयोनुवर्त्तंतेतिशेषः।उपसंहरतिएवमि
तिएवंकौशिकगोत्रंतद्वैश्वामित्रैःपृथग्विधमभूत ३६ ॥ ॥

राम

३९

कथंतद्धितितत्राहप्रवरांतरमिति।प्रवरांतरमापन्नंहियस्मात्तस्मादेवंपृथग्विधंकल्पितंहिप्रसिद्धमितिभावः।कृतायोःसंततिंविवक्षन्पुरूरवसःपुत्रस्यप्रथमस्या
योर्वंशंवर्णयतिवादरायणिः।यइति ३७ नहुषाद्ययस्यैवराज्यार्हत्वात्।क्षत्रवृद्धाद्यन्वयस्यतदनर्हत्वात्स्वीकाराहन्वयमनुसंदधानःक्षत्रवृद्धाद्य

प्रवरांतरमापन्नंतद्धीत्थंप्रकल्पितं।यःपुरूरवसःपुत्रआयुस्तस्याभवन्सुताः ३७ नहुषःक्षत्रवृद्धश्चरजीराभश्चवीर्यवान्।अनेनाइतिराजेंद्रक्षत्रवृ
द्धान्वयंशृणु ३८ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः।काश्यःकुशोगृत्समदइतिगृत्समदादभूत् ३९ शुनकःशौनकोयस्यबह्वृचप्रवरो
मुनिः।काश्यस्यकाशिस्तत्पुत्रोराष्ट्रोदीर्घतमःपिता ४० धन्वंतरिर्दीर्घतमसआयुर्वेदप्रवर्त्तकः।यज्ञभुग्वासुदेवांशःस्मृतिमात्रार्त्तिनाशनः ४१ तत्पु
त्रःकेतुमानस्यजज्ञेभीमरथस्ततः।दिवोदासोद्युमांस्तस्मात्प्रतर्दनइतिस्मृतः ४२ सएवशत्रुजिद्वत्सऋतध्वजइतीरितः।तथाकुवलयाश्वेतिप्रोक्तो
ऽलर्कादयस्ततः ४३ षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच।नालर्कादपरोराजाबुभुजेमेदिनींयुवा ४४ अलर्कात्संततिस्तस्मात्सुनीथोथसुकेत
नः।धर्मकेतुःसुतस्तस्मात्सत्यकेतुरजायत ४५ धृष्टकेतुस्ततस्तस्मात्सुकुमारःक्षितीश्वरः।वीतिहोत्रस्यभर्गोतोभार्गभूमिरभून्नृप ४६ इतीमेका
शयोभूपाःक्षत्रवृद्धान्वयायिनः।राभस्यरभसःपुत्रोगंभीरश्चाक्रियस्ततः ४७ तद्गोत्रंब्रह्मविज्जज्ञेशृणुवंशमनेनसः।शुद्धस्ततःशुचिस्तस्माच्चित्रकृद्धर्मसा
रथिः ४८ ततःशांतरजाजज्ञेकृतकृत्यःसआत्मवान्।रजेःपंचशतान्यासन्पुत्राणाममितौजसां ४९ देवैरभ्यर्थितोदैत्यान्हत्वेंद्रायाददाद्दिवं।इंद्रस्तस्मै
पुनर्दत्वागृहीत्वाचरणौरजेः ५० आत्मानमर्पयामासप्रह्रादाद्यरिशंकितः।पितर्युपरतेपुत्रायाचमानायनोददुः ५१ त्रिविष्टपंमहेंद्राययज्ञभागान्समाद
दुः।गुरुणाहूयमानेग्नौबलभित्तनयान्रजेः ५२ अवधीद्भ्रंशितान्मार्गान्नकश्चिदवशेषितः।प्रतिःक्षत्रवृद्धात्संजयस्तत्सुतोजयः ५३ ततःकृतःकृतस्यापि
जज्ञेवीर्यहीनोनृपः।सहदेवस्ततोहीनोजयत्सेनस्ततस्सुतः ५४ संकृतिस्तस्यचजयःक्षत्रधर्मामहारथः।क्षत्रवृद्धान्वयाभूपाइमेशृण्वथनाहुषान् ५५
इतिश्रीभागवतेमहापुराणेनवमस्कंधेचतुर्दशोध्यायः ४ ॥

च

पंक्तिक्षत्रवृद्धान्वयमिति ३८ ४३ अलर्कादपरोराजायुवातथानबुभुजे ४४ ४६ इतीमेकाश्यःकाश्यस्यसंतानजाभूपाःपुनरपिक्षत्रवृद्धान्वयतिहानोभूत
५४ ५५ इतिनवमेचतुर्दशः ॥ ॥

अथनहुषस्यसंततिमनुक्रामतियतिरित्यादिना १ तस्यराज्यस्यपरिणामवित्फलपाकपटुतांजानातीति।यत्रराज्ये २ इंद्राण्याधर्षणात्तन्यायाःसंस्पर्शनिमित्तात्।पितरिनहुषेस्वर्गस्थानाद्द्विजैर्भ्रंशितेत्याजितेअजगरत्वमहासर्पत्वंप्रापितेसति ३ यवीयसःकनिष्ठान्ययातिरुर्वींत्रकाव्यस्यशुक्रस्यपुत्र्यादेवयान्यावृषपर्वणोदैत्यस्यपुत्र्याशर्मिष्ठयाकृतदारः ४ प्रातिलोम्येनविवाहःकथंघटतइतिपृच्छति।ब्रह्मर्षिरिति ५ दैववशादिदंपाणिग्रहणंजातंनतुमानु

श्रीशुकउवाच यतिर्ययातिःसंयातिरायतिर्वियतिःकृतिः।षडिमेनहुषस्यासन्निंद्रियाणीवदेहिनः १ राज्यंनैच्छद्यतिःपित्रादत्तंतत्परिणामवित्।यत्रप्रविष्टःपुरुषआत्मानंनावबुध्यते २ पितरिभ्रंशितेस्थानादिंद्राण्याधर्षणाद्द्विजैः।प्रापितेजगरत्वंचययातिरभवन्नृपः ३ चतसृष्वादिशद्दिक्षुभ्रातॄन्भ्रातायवीयसः।कृतदारोजुगोपोर्वींकाव्यस्यवृषपर्वणः ४ राजोवाच ब्रह्मर्षिर्भगवान्काव्यःक्षत्रबंधुश्चनाहुषः।राजन्यविप्रयोःकस्माद्विवाहःप्रतिलोमकः ५ श्रीशुकउवाच एकदादानवेंद्रस्यशर्मिष्ठानामकन्यका।सखीसहस्रसंयुक्तागुरुपुत्र्याचभामिनी ६ देवयान्यापुरोद्यानेपुष्पितद्रुमसंकुले।व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ७ ताजलाशयमासाद्यकन्याःकमललोचनाः।तीरेन्यस्यदुकूलानिविजह्रुःसिंचतीर्मिथः ८ वीक्ष्यव्रजंतंगिरिशंसहदेव्यावृषेस्थितं।सहसोत्तीर्यवासांसिपर्यधुर्व्रीडिताःस्त्रियः ९ शर्मिष्ठाजानतीवासोगुरुपुत्र्याःसमव्ययत्।स्वीयंमत्वाप्रकुपितादेवयानीदमब्रवीत् १० अहोनिरीक्ष्यतामस्यादास्याःकर्मह्यसांप्रतं।अस्मद्धार्यंधृतवतीशुनीवहविरध्वरे ११

प्रवदितिप्रकाशयितुमाख्यायिकांकथयति।एकदेति ६ ७ सिंचतीःअन्योन्यंजलप्रक्षेपंकुर्वत्यः ८ पर्यधुराच्छादितवंत्यः॥९॥अजानतीशर्मिष्ठागुरुपुत्र्याःवासःस्वीयंमत्वासमव्ययत्संवीतवती।व्येञ्संवरणइतिधातुः।तदाप्रकुपिताप्राप्तकोपादेवयानीइदंवाक्यमुवाचेत्यन्वयः १० मद्धृतंममअसांप्रतमयुक्तं ११

स्वकुलप्रशंसार्थंब्राह्मणानांमाहात्म्यंकथयतियैरिदमित्यादिना।इदंविश्वंयैर्ब्राह्मणैस्तपसासृष्टंयेपरमस्यपुंसःमुखंयैरिदंपरंज्योतिर्ब्रह्मधार्यतेयेश्शिवःपंथाःवेदमार्गोदर्शितः १२ येलोकनाथाःसुरेश्वराःतेपीदंब्राह्मणकुलमुपतिष्ठंतेअग्निमुखेनहविरादानुप्रतीक्षंतेविश्वात्माभगवानपिब्राह्मणप्रियत्विष्टतीतिशेषः १३ वयंतत्रब्राह्मणेषुभृगवःभृगुकुलजाअतएवश्रेष्ठाःइतिशेषःअस्याःपितावृषपर्वासुरोनोस्माकंशिष्यःअस्मान्तिहशिष्यत्वादहमपितत्पुत्रीत्वात्तमान्येति।यस्मान्नस्मादस्मद्धार्यंदस्त्रमिदंधृतवतीयथावेदग्रहणायोग्योशूद्रस्तोवेदंधारयतितथेति १४ धर्षितातिरस्कृतापीडिताक्रुद्धीकृते

येरिदंतपसासृष्टंमुखंपुंसःपरस्यवै।धार्यतेयैःपरंज्योतिःशिवःपंथाश्चदर्शितः १२ येपीदमुपतिष्ठंतेलोकनाथाःसुरेश्वराः।भगवानपिविश्वात्मापावनःश्रीनिकेतनः १३ वयंतत्रापिभृगवःशिष्योस्यानःपितासुरः।अस्मद्धार्यंधृतवतीशूद्रोवेदमिवासती १४ एवंक्षिपंतींशर्मिष्ठागुरुपुत्रीमभाषत।रुषाश्वसंतीनागीवधर्षितादष्टदच्छदा १५ आत्मवृत्तमविज्ञायकत्थसेबहुभिक्षुकी।किंनप्रतीक्षसेस्माकंगृहान्बलिभुजोयथा १६ एवंविधैःसुपरुषैःक्षिप्त्वाचार्यसुतांसतीं।शर्मिष्ठाप्राक्षिपत्कूपेवासश्चादायमन्युना १७ तस्यांगतायांस्वगृहंययातिर्मृगयांचरन्।प्राप्तोयदृच्छयाकूपेजलार्थीतांददर्शह १८ दत्वास्वमुत्तरंवासस्तस्यैराजाविवाससे।गृहीत्वापाणिनापाणिमुज्जहारदयापरः १९ तंवीरमाहौशनसीप्रेमनिर्भरयागिरा।राजंस्त्वयागृहीतोमेपाणिःपरपुरंजय।हस्तग्राहोपरोमाभूद्गृहीतायास्त्वयाहिमे २० एषईशकृतोवीरसंबंधोनौनपौरुषः।यदिदंकूपमग्नायाभवतोदर्शनंमम २१

न्यर्थः १५ बहुकत्थसेव्यर्थवचनंवदसि।भिक्षुकीत्वंयस्यपृष्ठमित्याह।किंनेति।बलिभुजःश्वानःकाकोवा १६ १८ उत्तरमुत्तरीयं।उज्जहारऊर्ध्वादितिशेषः। १९ प्रेमनिर्भरयाप्रेमपूर्णया।हस्तंगृह्णातीतिहस्तग्राहः।पाणिग्रहणकर्ताअपरोन्योमाभूत्।हस्ताग्राहइतिपाठेहस्तेग्रहोग्रहणंयस्यसतथा।कूपमग्नावदपजत्यंतोवा २० कूपलग्नायाःममभवतोयदिदंदर्शनंएषःसंबंधःईशकृतःश्रीनारायणविहितः।नपौरुषःपुरुषाकाररचितोनभवति २१

ब्राह्मण्या ब्राह्मण एव भर्त्ता युक्तो न क्षत्रियः प्रतिलोमत्वेऽप्यसंगादिति शंकां परिहरति न ब्राह्मण इति। हे महाभुज मे ब्राह्मणो हस्तग्राहो न भविता न भविष्यति कुत इति तत्राह। कचस्येति वार्हस्पत्यस्य बृहस्पतेरपत्यस्य नाम्ना कचस्य शापात्। मृतसंजीवनीविद्यार्थी कचस्तत्र तिग्मदापवक्रतिथिं गुरुपरिचर्यां विधाय तत्प्रसादमापन्न तद्विद्यामादाय पुरोरनुज्ञया गंतुकामं कचमुपलभ्य सर्वज्ञकारेण कचस्य हितमाचत्वं त्वमया भोक्तव्यं मम भर्त्ता भवेत्युक्तो मामुवाच हे देवयानि त्वया नैवं वक्तव्यं यज्ञाता हमिति तदा कुपिताहं तमशपं मत्पितुर्वा सविद्या न फलवतीति यथाख्यायिका न वोच्यते मशपं पुरेति। अहं पुरा यं कचमशपं शाप्सवतीत स्य शापादिति २१ अनंतरं ययातिना किं कृतमित्यत्राह ययातिरिति। यद्यनभिप्रेतं प्रतिलोम्येनोद्वहनं तद्दैवात्मन उपहृतमपि

नब्राह्मणो मेभविताहस्रयाहोमहाभुजा।कचस्यवार्हस्पत्यस्यशापाद्यमशपंपुरा २२ ययातिरनभिप्रेतंदैवोपहृतमात्मनः।मनस्तुतद्गतंबुद्ध्वा प्रतिजग्राहतद्वचः २३ गतेराजनिसावीरेतत्रस्मरुदतीपितुः।न्यवेदयत्ततःसर्वमुक्तंशर्मिष्ठयाकृतं २४ दुर्मनाभगवान्काव्यःपौरोहित्यंविगर्ह्य यन्।स्तुवन्वृत्तिंचकापोतींदुहित्रासययौपुरात् २५ वृषपर्वातमाज्ञायप्रत्यनीकविवक्षितं।गुरुंप्रसादयन्मूर्ध्नापादयोःपतितःपथि २६ क्षणार्धमन्युर्भगवाञ्छिष्यंव्याचष्टभार्गवः।कामोस्याःक्रियतांराजन्नैनांत्यक्तुमिहोत्सहे २७ तथेत्यवस्थितेप्राहदेवयानीमनोगतं॥ ॥

तमात्मनो मनस्तु तत्संगतमनुरक्तं बुद्ध्वा तस्याः देवयान्याः वचः प्रतिगृहीतवानित्यन्वयः २३ २४ कापोतीं कपोतसंबंधिनीं वृत्तिं स्कन्नवराग्रं यथाधिकभयात्त्वकापोतीवृत्तिर्विद्रीयते। देवयान्या दुहित्रा सह २५ प्रत्यनीकं नाम सुरद्वेषिणां देवानां वक्तुमिष्टं कार्यं २६ अस्याः देवयान्याः कामो पेक्षा विशेषः स्वाभीष्टसाधनाय यास्विवयं शर्मिष्ठा भवान् सत्विपया स्वामिति तत्राह नैनामिति २७ यदभीष्टं तत्तथा करिष्य इत्येवमुक्त्वा वृषपर्वण्येव स्थिते सति। वृषपर्वणा तव किं कर्त्तव्यमिति पृष्टा देवयानी मनोगतं स्वमनसि स्थितं कार्यं प्राह॥ ॥

किं तदाह। पित्रेति। अहं पित्रा दत्ता यास्ये यतो तो मामियं शर्मिष्ठा सानुगा दासीसहस्रेण सहिता त्वं याह अनुयातु गच्छतु इति २८ शर्मिष्ठा तत्सर्वं कृत्वा यद्यहं नानुगामिष्यामि तदा गुरुद्रोहात्मक्ले संसर्गं न प्रभवतीति यत्स्वानां संकटं तद्वीक्ष्य तदर्थस्य तदनुगमलक्षणप्रयोजनस्य गौरवं गुरुत्वप्रसादेनस्वकुलोद्धिवृलिक्षणमहीति मनसा निश्चित्य स्त्रीसहस्रेण परिवृता तथा करिष्यामीति पितरमुक्त्वा देवयानीं दासीवत्पर्यचरत् २९ उशनाः सुतां देवयानीं नाहुषाय नहुषपुत्राय ययातये शर्मिष्ठया सह दत्त्वा तं राजानमाह। किमाह क्वचिदपि शर्मिष्ठां तल्पे शयनीयस्थाने माधाः स्थानं माकार्षीः। मिथुनीभावं न कुर्वि-

पित्रादत्तायतोयास्येसानुगायातुमामनु २८ स्वानांतत्संकटंवीक्ष्यतदर्थस्यचगौरवं।देवयानींपर्यचरत्स्त्रीसहस्रेणदासिवत् २९ नाहुषायसुतांदत्त्वासहशर्मिष्ठयोशनाः।तमाहराजञ्छर्मिष्ठांमाधास्तल्पेनकर्हिचित् ३० विलोक्यौशनसींराजञ्छर्मिष्ठासुप्रजांक्वचित्।तमेववव्रेरहसिसख्याःपतिमृतौसती ३१ राजपुत्र्यार्थितोऽपत्येधर्मंचावेक्ष्यधर्मवित्।स्मरञ्छुक्रवचःकालेदिष्टमेवाभ्यपद्यत ३२ यदुंचतुर्वसुंचैवदेवयानीव्यजायत।द्रुह्युंचानुंचपूरुंचशर्मिष्ठावार्षपर्वणी ३३ गर्भसंभवमासुर्याभर्तुर्विज्ञायमानिनी।देवयानीपितुर्गेहंययौक्रोधविमूर्छिता ३४ प्रियामनुगतःकामीवचोभिरुपमंत्रयन्।नप्रसादयितुंशेकेपादसंवाहनादिभिः ३५ शुक्रस्तमाहकुपितःस्त्रीकामानृतपूरुष।त्वांजराविशतांमंदविरूपकरणीनृणां ३६

त्यर्थः ३० औशनसीं देवयानीं कार्यमालोच्य रहसि एकांते सख्याः पतिं तमेव ययातिमेव ऋतुकाले वव्रे ३१ अपत्ये संतानार्थे। राजपुत्र्या शर्मिष्ठया प्रार्थितोऽधर्मवित् धर्मज्ञः न काचन परिहार्येत न दद्यतमिति कृतः। अपमागतां परिहर्तुमशक्यं चेति धर्मं चावेक्ष्य शुक्रवचः स्मरन्नपि काले दिष्टमेव दैवमेवाभ्यकारणमिति निश्चित्याभ्यपद्यतताम् इति शेषः ३२ ३३ आसुर्याः शर्मिष्ठायाः ३४ हे स्त्रीकाम अनृतपूरुष असत्यवादी पुरुषत्वानिपुत्रस्योनेति त्वां जरा विशत्विति त्वां लोइर्थी जरा त्वामाविशतामिति शापमदादित्यर्थः ३६ ॥ ॥

तेन वदुहितरि कामानां शब्दादिविषयाणां स्मरणे तृप्तोस्मि अलं बुद्धिं न प्राप्तोस्मि। स्मृतौ तृप्तेः निषेधेन लब्धः स्वर्गपरलोकयोरिति। अत एव मनुष्यदृहः कर्त्तव्य इत्या
इ व्यत्यस्यतेति। योम इत्यं वयो मिदास्यति तस्मिन्ने नो जरां व्यत्यस्य संक्रमय्य तद्वयसा यथाकामं भुंजइति ३७ लब्धतया स्थितिर्न लब्धव्यवस्थानो यथानिर्दिष्टं व्य
वस्थितवान् प्रतीच्छ प्रतिगृह्य। एणां मातामहेन शुक्रेण कृतां। रंस्ये सुरतमनुभवामि। कुतो नोत्सहे इति तत्राह। अविदित्वेति। अविदित्वा अननुभूय वैतृष्ण्यं वैराग्यं ४०

ययातिरुवाच अतृप्तोस्म्यद्य कामानां ब्रह्मन् दुहितरि स्मते। व्यत्यस्यतां यथाकामं वयसा योभिधास्यति ३७ श्रीशुक उवाच इति लब्धव्यवस्था
नः पुत्रं ज्येष्ठमवोचत। यदो तात प्रतीच्छेमां जरां देहि निजं वयः ३८ मातामहकृतां वत्स न तृप्तो विषयेष्वहं। वयसा भवदीयेन रंस्ये कतिपयाः समाः ३९
यदुरुवाच नोत्सहे जरसा स्थातुमंतरा प्राप्तया तव। अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ४० तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत। प्रत्याच
ख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ४१ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकं। न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ४२ पूरुरुवाच को नु लो
के मनुष्येंद्र पितुरात्मकृतः पुमान्। प्रतिकर्त्तुं क्षमो यस्य प्रसादाद्विंदते परं ४३ उत्तमश्चिंतितं कुर्यात्प्रोक्तकारी तु मध्यमः। अधमोश्रद्धया कुर्यादकर्त्तोच्चरितं
पितुः ४४ इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः। सोपि तद्वयसा कामान्यथावज्जुजुषे नृप ४५ सप्तद्वीपपतिः सम्यक् पितृवत्पालयन् प्रजाः। यथोपजोषं
विषयाञ्जुजोषाव्याहतेंद्रियः ४६ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः। प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ४७ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षि
णैः। सर्वदेवमयं देवं सर्ववेदमयं हरिं ४८ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः। नानेव भाति नाभाति स्वप्नमायामनोरथः ४९ तमेव हृदि विन्यस्य वासु
देवं गुहाशयं। नारायणमणीयांसं निराशीरयजत्प्रभुः ५० ॥ ॥

प्रत्याचख्युः निराकृतवंतः अनित्ये क्षणभंगुरे ४१ वयसोनं कनिष्ठं ममाज्ञां ४२ आत्मकृतः शरीरोत्पादनकर्त्तुः परलोकं उच्चरितं मुखनिर्गतं मलं ४४ जुजुषे
भुक्ते ४५ यथोपजोषं यथासुखं ४६ प्रेयसः भर्त्तुः ४७ ४८ स्वप्नमायामनोरथवदनित्यफलमसत्यं च ४९ निराशीः निष्कामः वासुदेवाद्य नारायणादिनामभिः हरिः ५०

कदिंद्रियैः दुष्टेंद्रियैः ५१ इति नवमे षष्ठदशः ॥ अन्यापदेशेन स्ववृत्तांतं विज्ञाकरणत्वेन भार्यायै कथयति। स इत्थमिति स्त्रैणः स्त्रीजितः स ययातिरित्थं आत्मन
नः आशु देहे तद्र कामान्विषयाश्चाचरन् भुंजानः आत्मनो पह्नवं नित्यसुखज्ञाननिहननात्मवंचनं वा बुद्ध्वा पश्चान्निर्विण्णो विरक्तः एतां वक्ष्यमाणत्वेन बुद्धिसंनिहितां गाथां
स्वकीयवृत्तांतरूपामगायतेत्यन्वयः १ भार्गवि भृगुकुलजाते। मद्विधैः मादृशैः स्त्रीजितैः पुरुषैराचरितां। वनेधीराः निःसंगा निवृत्तिमार्गलक्षणे स्थिताः मुक्तसंगाः ज्ञानि
नो यस्य ग्रामवासिनो गृहस्थस्य चरणमनुशोचंति। अहो लोकस्यायं दुःखमिति परिखिन्ना भवंतीत्यर्थः। तस्य मम सदृशैराचरितामित्यर्थः २ बस्तोजाः प्रियं स्त्रीज
नं कूपे संसारलक्षणे अजा अजशब्देन प्रकृतिगुणप्राधान्यलक्ष्यते ३ तीर्थं रूपजलेऽवतारस्थलं वा। विवर्तं किंचिद्दवतीर्थं। विषाणाग्रेण रोधसि कूपतीरे

एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखं। विदधानोपि नातृप्यत्सार्वभौमः कदिंद्रियैः ५१ इति श्रीभागवते महापुराणे नवमस्कंधे ययातिचरिते पंचद
शोध्यायः ॥ श्रीशुक उवाच स इत्थमाचरन्कामान्स्त्रैणोपह्नवमात्मनः। बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत १ शृणु भार्गव्यमूं गाथां
मद्विधाचरितां भुवि। धीरा यस्यानुशोचंति वने ग्रामनिवासिनः २ बस्त एको वने कश्चिद्विचिन्वन् प्रियमात्मनः। ददर्श कूपे पतितां स्वकर्मवशगामजां
३ तस्या उद्धरणोपायं बस्तः कामी विचिंतयन्। व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ४ सोत्तीर्य कूपात्सुश्रोणी तमेव चकमे किल ४ तया वृतं समु
द्वीक्ष्य बह्व्योजाः कांतकामिनीः। पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदं ५ स एकोजवृषस्तासां बह्वीनां रतिवर्द्धनः। रेमे कामग्रहग्रस्त आत्मानं नावबु
ध्यत ६ ॥

न्यधत्त तामितिशेषः। तीर्थं मंत्राद्युपाध्याये शास्त्रेषु भसि पावने। पात्रोपायावतारेषु स्त्रीपुष्पे योनि यज्ञयोरिति यादवः। उपायेवाविवर्त्य उद्धरणोपायं दृष्ट्वेत्यर्थः
४ कांतविषयः कामो यासामस्तीति कांतकामिन्यः। श्मश्रुलं बहलश्मश्रुयुक्तं मीढ्वांसं रेतः सेकसमर्थं। याभकोविदं याभवन्मैथुनं तत्प्रवीणं तथाबः याभकः अ
ल्पायः। तदज्ञं नोत्राक्रहतिवा। याभकः केवलकल्पा भवलकेतोयपातिकिइति। याभकोविदमितिपठित्वा मैथुनकुशलमितिव्याख्यानमि डासमित्यनेन गतार्थत्वा
त्पुनरुक्तं। अस्मत्संप्रदायस्तु ताव दसदुपेते भेषजं मेघमित्यपि तद्रजशवस्यमेषवा वित्वा सत्राणतः ५ मीढ्वांसमितिपदं विशिष्टतत्राह स एक इति ६ ॥

रूपसंलग्ना रूपगुणसंपन्ना। कूपसंलग्नेति पाठे कूपभरसन्नतमध्या वन्यतमया प्राप्तुं यो रतमयान्यया। अजाया एवं रममाणं तं विलोक्य नस्य ममतत्क र्म अभ्यासकिलक्षणं नामृष्यदित्यन्वयः ७। अनेनात्मकटाक्षीकारेण स्वामिनं शुक्रमित्रोपोर्थः सूच्यते। अन्यथा तु ८ सोपि बस्तोपि यथामति शक्त्वापि इलविलि लाकारं मैथुनानुकरणलक्षणं तिर्यक्कंठोत्थितशब्दविशेषं अन्यत्र सीत्कारादिशब्दं च कुर्वन् पथि तुं संधानं कर्तुं तिर्यक्कु विलिविलाकारो मैथुनानुकृतो रसइ त्यभिधानं ९ अजस्वामी शुक्रः अन्यत्र प्रसिद्धः। लंबंतं तद्वृषणं उपभोगसमर्थमच्छिनत् शुक्रोतेतिशेषः। अन्यत्र जराकरणेन संदधे भोगसामर्थ्यमापादितवान् योगविसंधानोपायज्ञः। अन्यत्र जराव्यत्यसनोपायकरणेन। अर्थाय मैथुनलक्षणप्रयोजनाय १० अजया रममाणतृतिशेषः ११ आत्मानं परमात्मानं स्व

तमेवं वव्रे रमया रममाणमजान्यया। विलोक्य कूपसंलग्ना नामृष्यद्बस्तकर्म तत् ७ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदं। इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ८ सोपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुं। कुर्वन्निलविलाकारं नाशक्नोत्पथि संधितुं ९ तस्य तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा। लंबंतं वृषणं भूयः संदधेर्थाय योगवित् १० संबद्धवृषणः सोपि ह्यजया कूपलब्धया। कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ११ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः। आत्मानं नाभिजानामि मोहितस्तव मायया १२ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। न दुह्यंति मनः प्रीतिं पुंसः कामहतस्य ते १३ न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १४ ॥ ॥

स्वरूपं मायया विभ्रमलक्षणया सुरतवैरस्यलक्षणया वा १२ काममोहान्नाभ्यविद्धस्य पुंसः नैनाश्चित्रमित्याह। यत्पृथिव्यामिति व्रीहिप्रभृतिषु एकस्यापि भावः स्त्रीयादयः मनः प्रीतिं न दुह्यंति न पूरयंति दुह प्रपूरणे इति। प्रपूरणं नाम आमोक्षो रिक्तीकरणं भाव इति लक्षणपात्रस्य पूर्णीकरणमित्यतः स्त्रीपुंसयोरुभयोरपिका मभोगादिनालं बुद्धिर्नास्तीति भावः १३ ननु प्राहुः परमेन नदीजलपासवत्कामानामुपभोगेन शांतिः स्यादिति तत्राह नेति कामः तृष्णा कामानां विषयाणां हवि षाज्येनाहविर्गव्येष्टतेनोये इंधिकाचेनचेतन इति कृष्णवर्त्माग्निः १४ ॥ ॥

राम ४३

न चैवं चेत्साधनाभावेन कदापि मुक्तिर्न स्यादिति तत्राह यदेति। यदा सर्वभूतेषु अमंगलं पापसाध्यं हिंसालक्षणं भावं अभावं न कुरुते यस्त्र दातस्य समदृष्टेः स र्वस्य स्वाधीनत्वेन तत्तद्योग्यता विशिष्टवस्तुदर्शिनः पुंसः सर्वाः दिशः सुखमय्यः ते प्रापयंतीति सुखमयाः। सुखस्थानानामेकस्यामपि दिश्यपोक्ता स्तीत्यर्थः। पदार्थमात्रे सत्तापामालयो निश्चभावयोरितियादवः। ननु स्याद्वीर्ये निराहारत्वे वा विषयतृष्णात्यागेन मुक्तिः किं न स्यादिति तत्राह यैति। सत्य त्यागे मुक्तिः स्यात्स एव नाश्रितस्मात्तृष्णा नेन तत्तृष्णात्यागोन तत्सुत्यागोऽतः तदेवाप्याह्यमित्यर्थः। शर्मकामः सुखार्थी। वयसान्न शानेन वा जीर्यतो जरां मा श्रवतः १६ स्वतो विषयतृष्णा न शाम्यतीत्यत्र स्वानुभवमाह। पूर्णमिति १७ अतः किंफलितमिति तत्राह तस्मादिति मृगायतेतत्वमिति मृगाः ज्ञानिनस्तैः स

यदा न कुरुते भावं सर्वभूतेष्वमंगलं। समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः १५ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते। तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् १६ पूर्णं वर्षसहस्रं मे विषयान्सेवतेऽसकृत्। तथापि चानुसवनं तृष्णा तेषूपजायते १७ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसं। निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह १८ दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संविशेत्। संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् १९
श्रीशुक उवाच इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः। दत्वा स्वां जरसं तस्मादाददे विगतस्पृहः २० ॥ ॥

ह अरण्यचरैः हरिणादिभिः वा तपस्विभिः सह चरिष्यामीत्यर्थः १८ दृष्टं श्रुतं त्यागेनादृश्य श्रुतसुखाय कः कुशलः प्रपतेत् अरण्ये कायक्लेशं विद्वानिति तत्राह दृष्टमि ति दृष्टं राज्यादि विभवं श्रुतं स्वर्गादि मंगलमपि सुखमयमसत् लक्षणं भंगुरं बुद्ध्वा न तच्चानुध्यायेत् तद्विषयचिंतां न कार्यमिति विशेत् भोगलक्षणप्रवेशो न कर्त्तव्य इत्यत्र यः। कुत इति तत्राह संसृतिमिति। तत्र अनुध्याने संवेशयोः सतोः संसारं आत्मनाशं स्वरूपज्ञाननाशं विद्वान्यः स आत्मदृक् आत्मज्ञानी उच्यत इत्यन्वयः। ध्यायतो विषया न्पुंसः संगस्तेषूपजायते इत्यादेः। अनेन दृष्टश्रुतसुखस्य सदातनत्वं विद्वान् बालिशोपतोस्पष्टः खेदर्कत्वं ज्ञानी पश्यतीति ज्ञायते। तदीयं पूरोर्विद्यमानं २०

भा.न.

दक्षिणपूर्वस्यां आग्नेय्यां। ईश्वरं राजानां दिशां प्रजानाम ईशत्वं संस्थापयित्वा। शब्दादिविषयेषु ग्राम्ये इति मम्पसंघपरिं इन्द्रियवर्गो मुमुचे विषयाद् आहृत्य भगवद्विषयं चकारेत्यर्थः। आत्मानुरूपस्या परमात्मा परोक्षज्ञानेन विधूतं त्रिभिः सत्वादिके गुणैर्निर्मितं लिंगम् अभिमानलक्षणं यस्य स तथा। विधूताध्यात्मि काधिभौतिकाधिदैविकलिंगो वा। भगवती भागवतधर्मलभ्यां गतिं मुक्तिं वव्याप्य प्रतीतः कोविदः। अक्षोभं वचनाल्लिंगशरीरं व्यधुनोद् अमुचत्। नमस्तुभ्यमपि

४४

दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं। प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरं २२ भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां। अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ २३ आसेवितं वर्षपूगान्षड्वर्गं विषयेषु सः। क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः २४ स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः। परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः २५ श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः। स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितं २६ सा सन्निवासं सुहृदां प्रपायामिव गच्छतां। विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभो॥२७॥ सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी। कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः २७ नमस्तुभ्यं भगवते वासुदेवाय वेधसे। सर्वभूताधिवासाय शांताय बृहते नमः २८ इति श्रीभागवते महापुराणे नवमस्कंधे ययातिचरिते षोडशोऽध्यायः श्रीशुक उवाच पुरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत। यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे १ जनमेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः। प्रवीरोऽथ मनस्युर्वै तस्माच्चारुपदोऽभवत् २ तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः। संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः। घृताच्यामिंद्रियाणीव मुख्यस्य जगदात्मनः ५ ॥ ॥

त्र ४

सि३

५२

नीजपित्वेति शेषः २८ इति नवमे षोडशः यत्र पुरोर्वंशे ये जज्ञिरे तेषु केचन राजर्षयो भवंति। राजवंश्याः केचन ब्रह्मवंश्याश्च भवंति। वंशे भवा वंश्याः तस्य रौद्राश्वस्य ऋतेय्वादयो दश पुत्राः। जगदात्मनः जगद्व्याप्य तिष्ठतो मुख्यस्य प्राणस्य ५ ॥ ॥

राम

४४

कण्वाद्याः राजवंश्याः। प्रस्कण्वाद्याः ब्रह्मवंश्याः। कमलगर्भाभेषप्रोहस्रमे। हृदयंगमे सुंदरि अर्हणं अर्घ्यादि गृह्णाता नीवाराः देवव्रीहयः तैरुपास्तिमनुमति शेषः। ब्राह्मो राक्षसो गांधर्वस्तयोः पादयोर्वहुवो विवाहविषयः संति तेषु गांधर्वविधिना स्वयंवरलक्षणेन समुदिताः विश्रुताः। तं कुमारं प्रमदोत्तमा शकुंत

ऋतेयो रंतिनारोऽभूत्त्रयस्तस्यात्मजा नृप। सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ६ तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः। पुत्रोऽभूत्सुमते रेभ्यो दुष्यंतस्तत्सुतो मतः ७ दुष्यंतो मृगयां यातः कण्वाश्रमपदं गतः। तत्रासीनां स्वप्रभया मंडयंतीं रमामिव ८ विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियं। बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ९ तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः। पप्रच्छ कामसंतप्तः प्रहसञ्श्लक्ष्णया गिरा १० का त्वं कमलपत्राक्षि कस्यासि हृदयंगमे। किंस्विच्चिकीर्षितं तत्र भवत्या निर्जने वने ११ व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे। न हि चेतः पौरवाणामधर्मे रमते क्वचित् १२ शकुंतलोवाच विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने। वेदैतद्भगवान्कण्वो वीर किं करवाम ते १३ आस्यतां ह्यरविंदाक्ष गृह्यतामर्हणं च नः। भुज्यतां संति नीवारा उष्यतां यदि रोचते १४ दुष्यंत उवाच उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये। स्वयं हि वृणुते राज्ञां कन्यकाः सदृशं वरं १५ श्रीशुक उवाच ओमित्युक्ते यथाधर्ममुपयेमे शकुंतलां। गांधर्वविधिना राजा देशकालविधानवित् १६ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे। श्वोभूते स्वपुरं यातः कालेनासूत सा सुतं १७ कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः। बद्ध्वा मृगेंद्रांस्तरसा क्रीडति स्म स बालकः १८ तं दुरत्ययविक्रांतमादाय प्रमदोत्तमा। हरेरंशांशसंभूतं भर्तुरंतिकमागमत् १९ यदा न जगृहे राजा भार्यापुत्रावनिंदितौ। शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी २० ॥ ॥

ला। अशरीरिणी वाक् दैवीवाणी आह। युद्धभाषया राजानमिति शेषः। त्रिभाषायोनजानातीरीतिनां शतमे वचे सुक्तेः पुराणेषु भाषात्रयस्यान्यायप्राप्तत्वात्

भा॰ न॰

५५

यथाकारु शालातुली छिता शिशकुद्दीपकत्वे नामेराधारमात्रं भस्त्राभसमन्नुणए दीसेरितिधातो भस्त्रा माता। भर्त्राहितं वीर्यं मातापकरचरणाद्यवयवविशि
ष्टदेहाकारपरिणमनात्स्ववीर्यस्य प्रथमधारकत्वात् मातुः पुत्रत्वमौपचारिकं। तर्हि किं मुख्यपुत्रत्वमिति तत्राह पितुरेव पुत्र इति। मुख्यपुत्रत्वं पितु
रेव। कुत इत्यत्राह यस्मादिति। स पितैव पुत्रो जात इति यस्मात्तस्मात्पुत्रः पितुरेवेत्यर्थः। आत्मा वै पुत्रनामासीति श्रुतेः। तदुक्तं याज्ञपाल वतियदस्मां जाये
रेव। कुत इत्यत्राह यस्मादिति। स पितैव पुत्रो जात इति यस्मात्तस्मात्पुत्रः पितुरेवेत्यर्थः। पितुर्युक्तं अन्यथा पिता पुत्र इति प्रयोगस्यापि संभवात्। ... तर्हि किमपेक्षितं इति तत्राह भर
पुनारीति वपुत्रदेहस्यापि पित्रदेहे कदेशस्योपादानत्वयोरतनायपितुरित्युक्तं अन्यथा पिता पुत्र इति प्रयोगस्यापि संभवात्। ... इति भावः। अत्र ज्ञातं नकुरु। ननु पुत्रे
स्नेहेति भरस्व ह्री कुरु अन्यपुत्रं कथं स्वीकरोमीत्यत उक्तं दौष्यन्तिमिति। औरसं पुत्रमित्यर्थः। अतः शकुन्तला स्वेति नीति भावमंस्थाः अत्र ज्ञातं नकुरु। ननु पुत्रे
एतस्य किं प्रयोजनं आद्येन भार्यास्यादिति तत्राह रेतोधा इति पुत्रं पुत्रः रेतोधाः रेतोधातारं पितरं यमक्षयं योग्ययोनं ततो लोकस्यैवेकुंठादिकं नयति प्रापयति। य
स्मात्पुत्र मनुशिष्टं लोकमाहुः तस्मादेवमनुशासतीति हि श्रुतिः। मोनरदेव दुष्यन्त। दौष्यन्तिं स्वीकुर्विति शेषः। मया नाहितगर्भजातं पुत्रं कथं दौष्यन्तिमि
त्यत्राह पुत्रमनुशिष्टं लोकमाहुः तस्मादेवमनुशासतीति हि श्रुतिः। कत्राहेति तत्राह। सत्यमिति शकुन्तला सत्यं यथार्थमेवमाह नमाह्वायः पु
ति वदसीति तत्राह। त्वं चेति। च शब्द एवार्थे। त्वमेवास्य गर्भस्य धाता आधानकर्ता। कत्राहेति तत्राह। सत्यमिति शकुन्तला सत्यं यथार्थमेवमाह न मा द्वायः पु

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः। भरस्व पुत्रं दौष्यन्तिं मावमंस्थाः शकुन्तलां॥ २१ ॥ रेतोधाः पुत्रं नयति नरदेव यमक्षयं। त्वं चास्य गर्भस्य धाता सत्यमाह शकुन्तला॥ २२ ॥

नः स रेतोधातारमक्षयं नयति नरदेव यमक्षयं। त्वं चास्य पुत्रस्य इलिंगनशाणां मितिश्चाह त्वयोक्तः॥ अथवा स्वीकारेणानर्थमाह रेतोधा इति रेतोधामवा
पुत्रं यमक्षयं यमलोकं नयति मृदुरपापकरोत्यस्वीकारात् तेनास्य पुत्रहत्यादोषप्राप्तिः तवस्मादतस्त्वमयापि स्वीकुर्वित्यर्थः। ननु नाहं रेतोधा इति तत्राह त्वं चेति
अथवा त्वदुक्तं श्रुत्वा स्वीकरोमि किमितरत्यन्तरस्वस्तुरणमाह रेतोधा इति यमयति शिक्षयति शिष्यमिति यमो गुरुः क्षिति निवासगत्योरिति क्षयो निवासः रेतोधाः पुत्रं
गुरुनिवासं नयाति। तिस्माया नभवान पि पुत्रस्वीकृत्य गुरुकुलवासमापय्य रयति न्यायशास्त्रादिविशारदं करोत्यर्थः। तत्पुत्रत्वे शकुन्तला मा द्वियाहत्वं चेति।
अथवा रेतोधाः अक्षयमतिमनन्याधारं पुत्रं नयति स्नाश्रयं करोतीति सः पुत्रस्य रेतोधातारमक्षयं लोकं नयति। अनन्याधारत्वे हेतुगर्भविशेषणमाह। त्वं चेति। अ
स्य सर्वस्य प्रमाणं शकुन्तलावचनमित्याह सत्यमिति। द्वितीया च प्रथमात्पनुवर्तते। द्वितीया विभक्तिः सप्त सुवर्तन्त इति द्वितीयायाः प्रथमात्वसंभवात्पुत्रमि
त्यादेः प्रथमात्वं प्रामाणिकं रेतोधा इत्यस्य द्वितीयात्वं चेत्यर्थः। भ्राताभस्त्रेति लुप्तोपमं। हिरण्यधान्यादि यथा हि राणिमजापुत्रस्य द्वारमात्रं पितृवीर्यात्मकत्वात्। पि
तुरेव पुत्र इति वायोजनाशेषः। पूर्ववत्‌ २१ ॥ ॥

रे॰

राम

५५

पटेवा

॥श्रीवेंकटेशनारसिंहाभ्यां नमः॥

॥नरहरेरिदं॥ ...

भा॰ द॰ पू॰

श्रीगणेशाय नमः ॥ नवमस्कंधांते संक्षिप्तं श्रीविष्णुचरितं विस्तरतः श्रोतुं राजा दशमस्कंधस्य प्रारंभे पृच्छति कथितो वंशविस्तार इत्यादिना विष्णोः जन्म नावैकलक्षणः संतानो वंशः तत्र भवो वंश्यः । व्यासः प्रपंचो विस्तार इत्यभिधानं राज्ञां चरितं च कथितं । कथने निमित्तमाह । परमेति १ तत्र विशेषमाह यदोरिति धर्मशीलस्य यदोः वंशो नितरां कथितः । धर्मो भगवान् तत्स्माधिसूक्तस्य शीलं स्वभावो यस्य तस्य । अत एव तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस न इति

२

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः । राज्ञां चोभयवंश्यानां चरितं परमाद्भुतं १ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम । तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः २ अवतीर्य यदोर्वंशे भगवान् भूतभावनः । कृतवान् यानि विश्वात्मा तानि नो वद विस्तरात् ३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् । क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ४ ॥ ॥

यदोर्वंशे वीर्याणि पराक्रमान् २ तात्पर्यं तु न रूक्षमेवाह । अवतीर्येति । यानि भूकंटकहिंसनादीनि कर्माणि विश्वात्मा विश्वव्यापीत्वेन न ब्रह्मत्वं प्रत्यवयति । विस्तरतः न केवलमर्थतः प्रपंचेन भणितुं शक्यतः । अल्पबुद्धीनामवगंतुमशक्यत्वात् । स च शब्दस्य विस्तर इत्यभिधानं ३ अतीतश्रवणे हरिकथाश्रवणेनालं बुद्धिर्नाभूत् किमिति तत्राह । निवृत्तेति । निवृत्ततर्षैर्विषयपालं बुद्धिरहितैः । भवौषधात् संसाररोगपरिहारहेतुभूतो भवात् । अनिष्टमपि तत् अन्यथा ज्ञानिनः पशुघ्नादिति वा पाठः ४ ॥ ॥

राम

१

माहात्म्यं हरेरनुभवसिद्धं प्रकटयति वक्तृश्रोतृपृच्छकानां पितामहा इति । पितामहा अर्जुनादयः अमराणां देवानां जयं नीतमरं जयाः तैर्देवव्रतादिभिः अतिरथैः तिमिंगिलतिजननलक्षणं यस्य सभीष्मः सर्वद्रोणादीनां ते तथा त एवातिरथाः । रथ्युत्तमाः तैः तिमिंगिलैः समस्तः कायेन दशयोजनप्रमाणमात्रस्थितः मत्स्यपिगिलति यस्तान् इति तिमिंगिलाः प्रत्यय नि मिलनमात्रं मत्स्यपदं गोवत्सपदमिव वत्सपदं सुलोपनं । यः कृष्णः प्लवः उडुपं येषां ते प्लवा नदीतरणाय निर्मितं वंशचर्मादि इति तत्समीपं इति । मया मेयः ज्ञेयः माधवं सम्भवदिति ५ इतोपि तद्वीर्याणि श्रोतव्यानीत्याह । द्रौण्यस्त्रेति । मातुरुदरगतायाः कुक्षिं गतः प्रविष्टः । इदं प्रत्यक्षं चेति भावेनोक्तं मेयं इति । मया मेयः ज्ञेयः अनंतवदिति शरणागताया मनसा त्रातर्थः । शुकस्य वक्तृत्वं शश्वन्महद्विषयः ६ भासनोपसंभाषा ज्ञानयत्नविमनुष्य मेने गोपुवददियतो वदस्वेत्यात्मनेपदप्रयोगो मद्विवक्षितार्थं वक्तृप्रतिसूचनार्थः

पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः । दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत्सपदं स्म यत्प्लवाः ५ द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां । जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ६ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पूरुषकालरूपैः । प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ७ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया । देवक्या गर्भसंबंधः कुतो देहांतरं विना ८ कस्मान्मुकुंदो भगवान् पितुर्गेहाद्व्रजं गतः । क्व वासं ज्ञातिभिः सार्द्धं कृतवान् सात्वतां पतिः ९ व्रजे वसन् किमकरोन्मधुपुर्यां च केशवः । भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं १० देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः । यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ११ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं । वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं १२ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते । पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं १३ ॥

न पाटवप्रदर्शनार्थं च एतदेव प्रकटितम भूद्विदित्यनेनत्रं तः पुरुषरूपैः बहिः कालरूपैः अनामयं संसारं दुःखनिरासेन सुखं । मृत्युं दुःखानुभवलक्षणं अंधतमः । अप्रकृतो देहतः । वक्तुं रूपसीदकृष्णवचनं प्रलयांत इति शेषः ७ एकस्य द्वयोर्योनिसंबंधानुपपत्तिः प्रश्नबीजं ८ ९ मधुपुर्यां च वसन् किं कर्म कृतवान् मातुर्भ्रातुरं मातुलमित्यर्थः । अतदर्हणं तस्य वधस्यायोग्यमित्यर्थः १० ११ मेमह्यं १२ क्षुधितस्य तव दौर्बल्यान्मनो नेच्छति श्रोतुमिति तत्राह । नैषेति । त्यक्तोदं त्याचमनजलमंतरेणेति शेषः । ननु दिव्यमंत्रौषधादिकमंतरेण क्षुधादिकं मानुषदेहं वाधत एव अतः कथं न बाधत इति तत्राह । पिबंतमिति सुतं गलितं १३ ॥

भा॰ द॰ प्र॰

श्रीगणेशायनमः ॥ नवमस्कंधांते संक्षिप्तं श्रीविष्णुचरितं विस्तरतः श्रोतुं राजा पृच्छन्नभ्यर्थयते। कथितो वंशविस्तार इत्यादिना विष्णुर्जन्म नावैकल्पनाः संतानो वंशस्तत्र भवो वंश्यः। व्यासः प्रपंचो विस्तार इत्यभिधानं। राज्ञां चरितं च कथितं। कथने निमित्तमाह। परमेति १ अत्र विशेषमाह यदोरिति। यदोर्ययातिपुत्रस्य वंशो नितरां कथितः। धर्मो भगवांस्तत्समाधिस्तु कृष्णस्य शीलसमाधाविति धातुः। अंशेन नामतः किमपेक्षितमिति तत्राह। तत्रेति। तत्र

१

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः। राज्ञां चोभयवंश्यानां चरितं परमाद्भुतं १ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम। तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः २ अवतीर्य यदोर्वंशे भगवान्भूतभावनः। कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात्। क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ४ ॥ ॥

यदोर्वंशे वीर्याणि पराक्रमान् २ तात्पर्यं तु न रूक्ष्मेवाह। अवतीर्येति। यानि भूकंटकहिंसनहननादीनि कर्माणि विश्वात्मा विश्वव्यापी तत्त्वेनेन इत्यर्थः न पतिः। विस्तरतः न केवलमर्थतः प्रपंचनमपि तु शब्दतः। अल्पबुद्धीनामवगंतुमशक्यत्वात्। स च शब्दस्य विस्तर इत्यभिधानं ३ अतीव श्रद्धेयं हरिकथाश्रवणे नालंबुद्धिर्न भवति किमिति तत्राह। निवृत्तेति। निवृत्ततर्षैर्विषयालंबुद्धिरहितैः। भवौषधात्संसाररोगपरिहारहेतुभूतौषधात्। अतितृष्णात् अन्यथा ज्ञानिनः पशुघ्ना इति वा पाठः ४ ॥ ॥ राम

१

माहात्म्यं हरेरनुभवसिद्धं यस्मात्ततो वक्तव्यमित्याशयेनाह। पितामहा इति। पितामहा अर्जुनादयः। अमरान्देवान्जयंतीत्यमरंजयाः। तैर्देवानामपि दुर्जयैः अप्रजाजननलक्षणं यस्य स भीष्मः सच्चाद्यो येषां द्रोणादीनां ते तथा त एवातिरथाः। स्युर्नमाः क्रोशतिमिर्ज्ञा मत्स्याः कायेन दशयोजनप्रमाणेन मात्स्यस्थितः तमपि गिलति यस्स तद्गिलितिमिंगिलः प्रत्ययनिमित्तं तु मागमः पदं गोवत्सपदमिव वत्सपदं सुखेन। यः कृष्णः प्लवरूपं येषां ते यत्प्लवाः नदीतरणाय निर्मितं वंशचर्मादि प्लवः ५ इतोपि तद्वीर्याणि श्रोतव्यानीत्याह। द्रौण्यस्त्रेति। मातुरुत्तरायाः कुक्षिं गतः प्रविष्टः। इदं प्रत्यक्षं चेति भावे नोक्तं मेपङ्क्ति। मया मेयः ज्ञेयः मधनं सज्जवदिति ५ इतोपि तद्वीर्याणि श्रोतव्यानीत्याह। द्रौण्यस्त्रेति। मातुरुत्तरायाः कुक्षिं गतः प्रविष्टः। इदं प्रत्यक्षं चेति भावेनोक्तं मेपदिति। मया मेयः ज्ञेयः मद्विषयः ६ भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वद इत्यतो वदस्वेत्यात्मनेपदप्रयोगो मद्विज्ञातार्थवक्तव्यमिति सूचनार्थः। शुकस्य वक्तव्यांशज्ञानमद्विषयः ६

पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः। दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत्सपदं स्म यत्प्लवाः ५ द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां। जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ६ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पूरुषकालरूपैः। प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ७ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया। देवक्या गर्भसंबंधः कुतो देहांतरं विना ८ कस्मान्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः। क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतां पतिः ९ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः। भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं १० देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः। यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ११ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं। वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं १२ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते। पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं १३ ॥

नपाटवप्रदर्शनार्थं च एतदेव प्रकटिनमप्रूढिदृढित्यनेनाह। अंतः पुरुषरूपैः बहिः कालरूपैः अनामयं संसारं दुःखनिरासेन मुक्तं। मृत्युं दुःखावहं बलक्षणं अंधंतमः। अथवा प्रकृतोदरतः। वक्तुरूपस्ते हृद्धवपनं बलयतं इति शेषः ७ एकस्य द्वयोर्योनिसंबंधानुपपत्तिः प्रश्नबीजं ८ ९ मधुपुर्यां च वसन्किं कृतवान्मातुर्भ्रातरं मातुलमित्यर्थः। अतदर्हणं तस्य वधस्यायोग्यमित्यर्थः १० ११ मेम एतदं १२ क्षुधितस्य तव रौर्वल्यानमनो नेच्छतीत्युक्तिमिति तत्राह। नैषेति। त्यक्तोदं त्यागमनजलमंतरेणेति शेषः। ननु दिव्यमंत्रौषधादिकमंतरेणाक्षुधादिकं मानुषदेहं वाधत एव। अतः कथं न बाधत इति तत्राह। पिबंतमिति। श्रुतं गलितं १३ ॥

द०पू० २

सूतः शौनकं प्रत्याह। सूत इति। हे भृगुनंदन शौनक प्रत्यर्च्य प्रतिसंभाष्य राजानमिति शेषः १४ कीदृशी प्रत्यर्चेति तामाह सम्यक् व्यवसितेति। नैष्ठिकी श्रीनारायणोत्कर्षसंबंधिनी। निष्ठोत्कर्षव्यवस्थायामिति यादवः। निश्चलतया स्थितिर्निष्ठा तद्युतेति वा १५ न केवलं हरिकथाप्रश्नः प्रष्टारं पुनाति किंतु वक्तारमपीत्याह। वासुदेवेति। तत्पादसलिलं भागीरथी शालग्रामतीर्थं वा। गंगा गंगेति यो ब्रूयादित्यादेः १६ एतदन्यत्रेत्येतत्प्रदत्यदिति तदिदमिति ध्वनयन् कथमारितत्र पक्रमते भूमिरित्यादिना शतायुतैरित्यनेनासंख्यातत्वं सूचयति। भूरिभारेण पीडितेति शेषः १७ यथा करुणं भवति तथा रुदंती। व्यसनं विघ्ननिरसनं १८ १९ जगन्नाथत्वं राजादेरप्यस्तीति देवदेवमिति। इंद्रादिभ्यः श्रेष्ठत्वार्थं वृषाकपिं। अभीष्टदानादानंदाय प्रजानां वृष्टत्वमुद्धृत्यादिना रक्ष

सूत उवाच एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातं। प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः १४ श्रीशुक उवाच सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम। वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः १५ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि। वक्तारं प्रच्छकं श्रोतॄंस्तत्पादसलिलं यथा १६ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः। आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ १७ गौर्भूत्वाश्रुमुखी खिन्ना रुदंती करुणं यथा। उपस्थितांतिके तस्मै व्यसनं समवोचत १८ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह। जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः १९ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं। पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः २० गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह। गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरं २१

कपेर्दुःखपेषणाद्वृषाकपिः। तं निंद्रयस्य हरेरिंद्रियविषयत्वं कथमित्यतः पुरुषमिति। तस्येदमेव शिरस्त्यादेः उपतस्थे मंत्रवचनपूर्वकमुपासनां कृत्वा स्तुत्युपारमंत्रकरणेरत्मालने पदं। कोयं मंत्रः येन धात्वर्थः समर्थितः स्यादित्यतः पुरुषसूक्तेनेति २० समाधाविति तादर्थ्ये सप्तमी समाध्यर्थं देवकार्यसमर्थनार्थं समीरितां गिरं। अत्यर्थामिति गीर्वाणी वाचि हिसंप्रतिष्ठितमिति श्रुतेः। तां स्मृतिगिरं संभृत्य पुराणध्यानसमवस्थायां वा कथितां समाधिध्यानसंधानजाते ज्ञा पुरुषार्थं इत्यर्थः। पौरुषीं पुरुषेणोक्तां गामपत्यवाममयति ज्ञापयतीत्यर्थमिति गोर्वा रूः। अथ कस्माद्धे रितिगच्छतीति निरुक्तकारनिर्वचनमपि वक्तुं श्रोतुः कर्णांतिगमनाद्गृहं २१ ॥ ॥

राम १

यदा ज्वरः श्रमः संतापः ज्वरसंताप इति पालुः। न केवलं जननमेव पूर्वं तेतावंतं कालं च व्यवस्थानं चापेक्षितमित्याह स यावदिति। स्वकालशक्त्या स्वप्रभूतोपसंहारकालाख्यशक्त्या २२ न केवलं देवानामुर्व्यामवतारः स्त्रीणामपीत्याह। वसुदेवेति २३ हरेरवताराविनाभूतस्य शेषावतारस्य प्रकारमाह। वासुदेवेति। वासुदेवकलानंत इत्येकं पदं वासुदेवस्य कलया पालित केशांशेन पुत्रः शेषः। स्वेन हरिणा राजत इति स्वराट्। स्वस्य

पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां। स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि २२ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः। जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः २३ वासुदेवकलानंतः सहस्रवदनः स्वराट्। अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ योगमाया भगवती यया संमोहितं जगत्। आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५ श्रीशुक उवाच इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः। आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २६ शूरसेनो यदुपतिर्मथुरामावसन्पुरीं। माथुराञ्छूरसेनांश्च विषयान्बुभुजे पुरा २७ राजधानी ततः साभूत्सर्वयादवभूभुजां। मथुरा भगवान्यत्र नित्यं संनिहितो हरिः २८

स्वतंत्रस्य हरेरपत्यत्वे न राजत इति वा स्वमात्मानं सनकादिभ्यो राजयति प्रकाशयतीति वा। हरेरग्रतः २४ देवकार्यार्थं सहायांतरं वक्तियोगमायेति योगमाया दुर्गा २५ महर्षिकादिभ्यः परमच वसुविभुवं सान्त्वयित्वा सत्यलोकं गते। उत्तरकथां प्रसंजयति। शूरसेन इति। अंतर्वीर्यस्तुतः पुरीमावसन्निति सप्तम्यर्थे द्वितीयोपान्वध्याङ्वस इति स्मृतात २७ ॥ ॥

द०पू०
३

ततः किमत्राह तस्यामिति २९ विवाहकाले रथहयानां कविकां (?) रश्मीन्‌ जग्राह ... उग्रसेनसुत इति ३०
विवाहकाले दुहित्रे यत्‌ दीयमानं धनं तत्‌ पारिबर्हं नाम ३१ २ प्रयाणप्रक्रमे गमनारंभे ३३ प्रग्रहः कविका तद्धंतारं अस्याः देवक्याः ३४ कुलपांसनः कु
लदूषीकरणशीलः कचे केशपाशे ३५ नृशंसं क्रूरकर्माणं परिसांत्वयन्‌ सामाद्युपायैः बोधयन्‌ ३६ संबंधलाभोपक्रतिरभेदो गुणकीर्तनं साम पं
चविधं भेदो द्विविधः ... श्लाघनीया गुणा यस्य ... गुणकीर्तनं भोजयशस्कर इति कीर्तिलाभकथनं अन्यथा
स्त्रियमिति ... भगिनीमिति संबंधवचनं उद्वाहपर्वणीति उपकृतिवचनं उद्वाहपर्वणि विवाहोत्सव एव ३७ मृत्युर्जन्मव

तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः। देवक्या भार्यया सार्धं प्रयाणे रथमारुहत्‌ २९ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया। रश्मीन्‌
हयानां जग्राह रौक्मै रथशतैर्वृतः ३० चतुःशतं पारिबर्हं गजानां हेममालिनां। अश्वानामयुतं सार्धं रथानां च त्रिषट्शतं ३१ दासीनां सुकु
मारीणां द्वे शते समलंकृते। दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ३२ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समं। प्रयाणप्रक्रमे तात वरवध्वोः
सुमंगलं ३३ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक्‌। अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ३४ इत्युक्तः स खलः पापो भोजानां कु
लपांसनः। भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत्‌ ३५ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं। वसुदेवो महाभाग उवाच परिसांत्वयन्‌
३६ वसुदेव उवाच श्लाघनीयगुणः शूरैर्भवान्‌ भोजयशस्करः। स कथं भगिनीं हन्यात्‌ स्त्रियमुद्वाहपर्वणि ३७ मृत्युर्जन्मवतां वीर देहेन
सह जायते। अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ३८ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः। देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ३९
व्रजंस्तिष्ठन्‌ पदैकेन यथैवैकेन गच्छति। यथा तृणजलौकैवं देही कर्मगतिं गतः ४० ॥ ॥

वतामित्यादिना ... ३८ देहे पंचत्वमित्यादिना ... कर्म पुण्यपापविषयं। अवशो विष्णुवेशात्‌ स्वजनेत्यनाति ३९ पूर्वदेहपरित्यागेन देहां
तरप्राप्तौ दृष्टांतमाह। व्रजन्निति। यथा व्रजन्‌ पुरुषः एकेन पादेन तिष्ठति एकेन गच्छति पूर्वदेशवियोगेन देशांतरसंयोगमाप्नोति यथा तृणजलूकान्‌
णांतरं गृहीत्वा पूर्वतृणं त्यजति एवं देही कर्मगतिं गतो भवतीत्यन्वयः। कर्मणो गतिः ... देहे त्यजति तथा तत्र देहांतरमित्यर्थः ४० ॥ ॥
राम
३

ननु देहात्मनोरभेदेन देही पूर्वदेहं परित्यज्य अभिनवदेहांतरं यातीति कथं संज्ञा घटीतीति तत्राह स्वप्न इति। जाग्रद्दृष्टश्रुतपदार्थसंस्कारवत्त्वेन मनो
रथेन अभिनिविष्टचेतना ... स्वप्ने ईदृशं जाग्रद्देहसदृशं देहं यथा पश्यति। स्वकीयत्वेनानुभवति परकीयत्वेन वा आत्मनः एकत्वेन दे
हयोर्द्वित्वेन दर्शनाद्देहात्मनोर्भेदस्त्वनुभाविकः। तथा मनसानुचिंतयन्‌ आत्मा दृष्टश्रुतस्मृतानुसृतं तत्तत्‌ तत्र किमपि देवाद्यन्यतमद्वपुः संप्रपद्यते। क्व दे
त्यत उक्तं अपस्मृतिरिति। तत्र देहे अभिमानितया पूर्वदेहस्मरणाभावेन मृत इत्यर्थः। ... तदुक्तमाचार्यैः स्वप्ने यथा दृष्ट
श्रुतस्मृत्यनुसारि देहं प्राप्नोत्यपस्मृतिर्मृतः। पूर्वदेहस्मरणाभावात्‌ अनभिमानत इति ४१ एतदेव विवृणोति यतो यत इति सार्धविभक्तिकः ...
तिवचनाद्यतो यतो यत्र यत्र मायारचितेष्विति सप्तमी षष्ठ्यर्थे भगवदिच्छोद्बोधितप्रकृतिनिर्मितानां पंचानां तेषु एकत्वेन सृष्टेः नानाविधं कथं अत्राह गुणेष्वि

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः। दृष्टश्रुताभ्यां मनसानुचिंतयन्‌ प्रपद्यते तत्किमपि ह्यपस्मृतिः ४१
यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु। गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ४२

ति। कार्यकारणभेदात्महदादिगुणविहितानां आत्मपंचसु देवगंधर्वपितृमनुष्यासुरभेदेन पंचानामात्मनां मध्ये दैवेन दृष्टेनाद्दष्टेन हरिणा चोदितं प्रे
रितं मनो धावति विषयीकरोति। मनो विशिनष्टि। विकारात्मकमिति संकल्पविकल्पविनिवेशमिति अनापि योग्यतामपेक्ष्य तत्तच्छरीरग्रहणं। तदुक्तं देवा
दित्वं योग्यतया तस्य कार्यस्य तु स्मृतेः। स्वेनं द्वीपादितस्तापि योग्यता मप्यपेक्ष्यते। विशेषः स्यानंदिनामन्नवायुश्रुता दिनामपि। नैलोक्यं देशमं देहयोग्यतान
पेक्ष्यत इति। अनेनास्य स्यात्मनो गमनं कथमिति चेद्यं परिहृतं परमात्मानमंतरेणान्यरूपचरितायामिति। अत एवोक्तं सा तेति स्मृतेः। आलोकवद्गुणे
न यथा योऽपयाति ... तथापि स्वरूपतोऽनादेव। व्यासादात्मानश्चेतना निर्गुणश्चेति श्रुतिः भिन्नास्वयं एव विसृजेतिनि रपाणि। नोचेद्गुणा गतिरेवेति
४२ ॥

नन्वनुगुणानां नानात्वान्महद्वैचित्र्यमस्तु। एकस्यात्मनो नानाविधप्रतीतिः कथमिति शंकां सदृष्टांतं परिहरति। ज्योतिरिति। यथा अदो ज्योतिरादित्यलक्षणं समीरवेगानुगतं वायुवेगनिमित्तचलनेनानुचलितमोदकपार्थिवेषु जलपूर्णशरावाद्यपाधिषु प्रतिबिंबितं विभाव्यते। विविधत्वेन भाव्यते छिन्नं भिन्नं छिन्नं येण प्रतीयते। एवमसौ पुमान् स्वमायारचितेषु परस्त्रीहरिरिति वचनात् स्वस्याविद्यारचितेषु गुणेषु देहेषु प्रतिबिंबितः अशोभने शोभनाध्यासो रागः तेनानुगतः तन्मयांतःकरणो विमुह्यति। विविधं छिन्नो भिन्नो हतोस्मीति मोहमज्ञानं प्रतिपद्यते। यथा तद्देवज्योतिः पार्थिवव ह्नौ भूतप्रर्णजले प्रतिबिंबितं वायुवेगानुगतं विशिष्टं निश्चलं भाव्यते। छेदभेदादिरहितं प्रतीयते। एवं योगपोजी वोगुणेषु प्रतिबिंबितोरागमनुरागं स्नेह विशेषमनुगतो निर्मुक्तद्वेषो विगतमोहो भवति। अज्ञाननिमित्तच्छिन्नोहमिति दुःखं न प्राप्नोतीति परिहारपरतया वा योजनीयं। उभयोरपि समाख्यानासिद्धप्रमाणत्वात्। तदुक्तं। यथैवोदशरावेष्विन्दा

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते। एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ४३ तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः। आत्मनः क्षेममन्विछन्द्रोग्धुर्वै परतो भयं ४५ एषा तवानुजा बाला कृपेणाऽजनिकोपमा। हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ४५ एवं स सामभिर्भेदैर्बोध्यमानोपि दारुणः। नन्यवर्त्तत कौरव्य पुरुषादाननुव्रतः ४६

रत्यपरेषां द्रोहमाचरन्नित्यंतेन। स्वमायेत्यनवच्छेदेन विष्णुरेवोद्यते मानसिद्धत्वात्। तदुक्तं। परस्त्रीहरिरुद्दाम इति पद्येन। गुणयोगमुक्तस्याप्रसिद्धत्वात्तद्गुणं चात्तदुक्तं। स्वतंत्रत्वात्सुखत्वा स्वस्वनाम्ना विमुह्यतीत्यद्युक्ति। रागो नु रागेत्यात्मा यामितियादवः ४३ नन्वस्त्वनामात्मनो अस्मादिकं कर्म्म निमित्तं प्रकृतेन तत्किं तत्राहतस्मादिति। यत आत्मा तथाविधः कर्म्मफलभोक्ता तस्मात्तादृशः कस्यचिद्द्रोहं हिंसां नाचरेत्। ततः किं तत्राह आत्मन इति। अनर्थं चाह द्रोग्धुरिति परतः परलोके दुःखलक्षणं भयं भवति ४४ परतोन्यस्मात् द्रोग्धानुरूपात्र द्रोहलक्षणं भयं स्यादिति मत्वा निरंतरद्रोहलक्षणं दुःखं भवतीति भयसामप्रदर्श्य भेदसामप्रदर्शयति। एषेति ४५ पुरुषादान् राक्षसाननुव्रतः तत्स्वभावमापन्न इत्यर्थः ४६ ॥ ॥

यः शास्त्रनिषिद्धस्त्रं प्राप्तकालं प्राप्तावसरं व्यसनं प्रतिव्योढुं प्रतिहर्तुं द्वंदवस्त्रमागाम व्यपद्यतत्र अपश्यत् ४७ यावत् बुद्धिबलोदयमित्यस्यायी भाव। यावदवधारणो इति स्त्रात् अपराधः शास्त्रविरोधाचरणलक्षणः ४८ किमपश्यदाह। प्रत्यर्प्य मृत्यवे मारकाय कंसाय। तुपाया भाषोयं यदपत्यार्प्यणं तत्राह वाममसुतोत्पन्नैः प्राकृनम्रियेत वेत्स्यदिन मरिष्यति ४९ विपर्ययो वाम मपुत्रः कं संवाहनिष्यतीति किं न स्यात्। कथमेतदिति तत्राह धातुरिति। धातुरीश्वरस्य गतिश्चेष्टा लक्षणा दुरत्यया अतिक्रांतुमशक्या। अतः किं तत्राह। उपस्थितइति सर्वथा तावदुपस्थितो मृत्युरस्याः निवर्त्तेत निवृत्तो यदि वरागदेरिव पुनराप तेत तर्हि तदानीमस्तु किं तावदिदानीं ५० इतोपि धातुर्गतिर्दुरत्यये त्येतत्सदृष्टांतमुपपादयति। अग्नेरिति यथाग्नेर्दावादिदह

निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः। प्राप्तकालं प्रतिव्योढुमिदं तत्रान्वपद्यत ४७ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं। यद्यसौ न निवर्त्तेत नापराधोस्ति देहिनः ४८ प्रत्यर्प्य मृत्यवे पुत्रान्मोचये कृपणामिमां। सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ४९ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया। उपस्थितो निवर्त्तेत निवृत्तः पुनरापतेत् ५० अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोन्यन्न निमित्तमास्ति। एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ५१ ॥ ॥

नस्य दारुवियोगयोगयोः काष्ठनिमित्तस्य व्यस्तयोः। दाह्यदृष्टात्मितानिजीवादृष्टं प्रेरकेश्वरात् अन्यन्निमित्तं नास्ति। अदृष्ट इत्यादौ हरिनिवेशः कस्माद्धच्यते। कुंडस्थिताग्नेर्दारुवियोगादौ स्वतः प्रवृत्त्यभावादिति वचनात्। यथा कुंडस्थिताग्नेरिति वचनाच्च। एवं जंतोरपि शरीरवियोगसंयोगहेतोर्हरेर्न्योर्दुर्विभाव्यः। केवलादृष्टलक्षणस्य कर्म्मणः स्वतः प्रवृत्त्यनुपपत्तेः। कार्यस्य दर्शनान्यथानुपपत्त्या श्रीनारायण एव भाव्य इत्यतः स्वया शास्त्रज्ञेनास्या हननं नोचितमिति भावः ५१ ॥ ॥

द०पू०

आत्मनियावद्दर्शनं परबोधलक्षणं ज्ञानं विमृश्यालोच्य ज्ञात्वा तावता सांत्वयामास सद्भावगतलोकप्रसिद्धदृष्टांतोयावांश्चारेता ५२ प्रत्यग्रंसद्यःप्रवृत्तं नवंवदनांबुजं यस्य सतथा। प्रत्यग्रमुक्तोसद्यस्कमितिहलायुधः। दूयमानेन मनसेति यस्तं तस्यापिच सूचयति। प्रहसन्निति बहिः प्रसादं दर्शं महता लक्षणं ५३ यावद्बोधेनाप्युक्ता संवादं विज्ञाय यथा संवादी स्यान्न तथा प्रत्येतुं वक्ति। नह्यस्यादिति। प्रसोदेवक्याः ५४ इतिश्रीमद्भागवतम

५

एवं विमृश्य तं पापं यावदात्मनिदर्शनं। सांत्वयामास वैशौरिर्बहुमानपुरस्सरं ५२ प्रत्यग्रवदनांभोजो नृशंसं निरपत्रपं। मनसा दूयमानेन विहसन्निदमब्रवीत ५३ नह्यस्यास्ते भयं सौम्य यद्वै त्वाहाशरीरवाक्। पुत्रान्समर्प्पयिष्येस्या यतस्ते भयमुत्थितं ५४ इति श्रीभागवते महापुराणे दशमस्कंधे प्रथमोध्यायः श्रीशुक उवाच सुहृद्वधान्निवृत्तं तं कंसं सत्यवाक्यसारवित्। वसुदेवोपि तं प्रीतः प्रशस्य प्राविशद्गृहं १ अथ काल उपावृत्ते देवकी सर्वदेवता। पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं २ कीर्त्तिमंतं प्रथमजं कंसायानकदुंदुभिः। अर्प्पयामास कृच्छ्रेण सोनृतादतिविह्वलः ३ ॥ ॥

या०

हापुराणे दशमस्कंधटीकायां विजयध्वजतीर्थभट्टारककृतौ पदरत्नावल्यां प्रथमोध्यायः अत्र कंसचरितकथनव्याजेन संसारस्यानर्थरूपत्वं वर्णयति शुकः सुहृत्स्वज्ञो हरी। भार्यावधोपरमात्प्रीतः कंसं प्रशस्य। सर्वदेवतायस्यां सन्निहिताः सा तथा अनुवत्सरं प्रतिवत्सरं १ नाम्ना कीर्त्तिमंतं २ ॥

दम
५

स्वात्मनः प्राणाशेनापि सत्यमेव रक्षंति महांत इत्याशयेनाह। किंदुःसहमिति। कंसोरसाधुश्चेक इत्याशयेनाह किमकार्यमिति। कदर्याणां कुत्सितस्वामिनां दरिद्राणां वा। वसुदेवः साधुश्चेक इत्याशयेनाह दुस्त्यजमिति। अतात्मनां सत्यस्वभावानां ४ ६ अविजितात्मनोसतः कंसस्य तद्वचनं न विश्वसनीय

किंदुःसहं नु साधूनां विदुषां किमपेक्षितं। किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ४ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिं। कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ५ प्रतियातु कुमारोयं नह्यस्मादस्ति मे भयं। अष्टमाद्युवयोः पुत्रान्मृत्युर्मे विहितः किल ६ तथेति सुतमादाय ययावानकदुंदुभिः। नाभ्यनंदत तद्वाक्यमसतोविजितात्मनः ७ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः। वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ८ सर्वे वै देवताप्राया उभयोरपि भारत। ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ९ असुराः सर्व एवैते लोकोपद्रवकारिणः। गतेथ वसुदेवेन देवक्या पार्थ मुच्यतः ॥१०॥ एतत्कंसाय भगवाञ्छशंसाभ्येत्य नारदः। भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ११ ऋषेर्विनिर्गते कंसो यदून्मत्वा सुरानिति। देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति १२ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे। जातं जातमहन्पुत्रं तयोरजनशंकया १३ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा। निघ्नंत्यसुतृपो लुब्धा राजानः प्रायशो भुवि १४ ॥ ॥

पमा३

मितितामप्यनंदत ७ नंदाद्या इत्यारभ्य श्लोकद्वयं सूत्रं तं नारदवाक्यं ८ उभयोर्यदुकुलगोकुलयोः ९ १० वधोद्यमं देवैः क्रियमाणमितिशेषः ११ १२ अहरहर्हतवान्। अजन्मो विष्णुरवतीर्ण इति शंकया १३ परप्राणैः स्वानसून्प्राणान्संतर्प्पयंतीत्यसुतृपः १४ ॥ ॥

प्राक्तपूर्वजन्मानि १५ शूरसेनान्विषयान् १६ इतिदशमेद्वितीयोध्यायः अवतारस्पंहरेर्न्न किंचिदपिभिन्नंसाक्षाद्ब्रह्मरूपमेवत ज्ञानस्य
मुक्तिहेतुत्वादित्यभिप्रायेणनिरूपणमस्मिन्नध्याये। तत्र दुष्टेंद्रियैः सदिंद्रियनिग्रह इव कंसः प्रलंबादिभिः सहितो यदुनिग्रहमकरोत् इत्यादि कंतिन्निरूप

आत्मानमिह संजातं जानन् प्राग्विष्णुना हतं। महासुरं कालनेमिं यदुभिः स व्यरुध्यत १५ उग्रसेनं च पितरं यदुभोजांधकाधिपं। स्वयं
निगृह्य बुभुजे शूरसेनान्महाबलः १६ इतिश्रीभागवते महापुराणे दशमस्कंधे द्वितीयोध्यायः श्रीशुक उवाच प्रलंबबकचा
णूरतृणावर्तमहाशनैः। मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ।। १ ।। अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः। यदूनां कदनं चक्रे
बली मागधसंश्रयः २ ते पीडिता निविविशुः कुरुपंचालकेकयान्। शाल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि ३ एके तमनुरुं
धाना ज्ञातयः पर्युपासते। हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ४ सप्तमो वैष्णवं धाम
यमनंतं प्रचक्षते। गर्भो बभूव देवक्या हर्षशोकविवर्द्धनः ५ भगवानपि विश्वात्मा विदित्वा कंसजं भयं। यदूनां निजनाथानां योगमायां
समादिशत् ६ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं। रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले ७ ॥ ॥

यति। प्रलंबेत्यादिना १ कदनं कलहं। मागधो जरासंधः संश्रयो यस्य स तथा। तं संश्रयतीति वा २ तेषादवाः निविविशुः निवेशनं चक्रुः ३
अनुरुंधानाः अनुवर्तमानाः ४ वैष्णवं धाम विष्णुतेजः संनिहितं। हर्षशोकविवर्द्धन इति उत्पत्तिश्रवणाभ्यामिति शेषः। हर्षस्य मेधयन् शोकमेध
यन्निति वा ५ ७

पर्वतविवरेषु ८ अंशांशभागेन अंशांशेन अंशस्य भागो भजनं सेवा कारः तेनेति वा ९ ११ दुरधिगमत्वाद्दुर्गा। भद्रा मंगला नीलाचेतिभद्रकाली। सर्वानरिशोवि
जयतीति विजया। विष्णोरियं वैष्णवी। कौ भूमौ मोदतीति कुमुदा। चंडिकोपशतिधातोः शत्रवेकुपितत्वाच्चंडिका। सदानंदत्वात्कृष्णा। मधुकुलोत्पन्नत्वान्माधवी
विष्णुदायितत्वाद्वा। कं शं सुखं नयतीति कन्या। नित्याकुमारी वा १२ मीयते ज्ञायतेऽनेनेति माया। मायातीति वा। नारस्य नरसमुदायस्य अयनत्वान्नारायणी।

अन्याश्च कंससंविग्ना विवरेषु वसंति हि। देवक्या जठरे गर्भं शेषाख्यं धाम मामकं ८ तत्संनिकृष्य रोहिण्या उदरे संनिवेशय। अथाहमंश
भागेन देवक्याः पुत्रतां शुभे ९ प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि। अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं १० नानोपहारब
लिभिः सर्वकामवरप्रदां। नामधेयानि कुर्वंति स्थानानि च नरा भुवि ११ दुर्गेति भद्रकालीति विजया वैष्णवीति च। कुमुदा चंडिका कृष्णा मा
धवी कन्यकेति च १२ माया नारायणीशाना शारदेत्यंबिकेति च। १३ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि। रामेति लोकरमणाद्बल
भद्रं बलोच्छ्रयात् १४ श्रीशुक उवाच संदिष्टैवं भगवता तथेत्योमिति तद्वचः। प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् १५ गर्भे
प्रणीते देवक्या रोहिणीं योगनिद्रया। अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः १६ ॥ ॥

सर्वस्येष्टे इति ईशाना। शीर्यत इति शारः तं संसारं द्यति खंडयतीति शारदा शत्रुविषयं शारं हिंसां ददातीति वा। सर्वस्य मातृत्वादंबिका १३ बलोच्छ्र
याद्बलोन्नतेः १४ तद्वचनं तथेति स्पष्टीकरणं तथेत्योमिति। तथाकरोमीति तद्वचः प्रतिगृह्येति वा १५ योगनिद्रया देवक्याः गर्भे रोहिण्यां प्रणीते सति।
विस्रंसितः स्रावितः निर्गलित इति विचुक्रुशुः १६ ॥ ॥

द॰पू॰ ७

पौरुषं धाम पुरुषाकारीभूतं विष्णुतेजः १८ वसुदेवप्रवेशानंतरं देवी अच्युतस्य हरेरंशं कृष्णकेशलक्षणं दधार। जगन्मंगल यतिभूभारहरणेन जगन्मंगलं करोतीति जगन्मंगलं। सर्वात्मनः सर्वव्यापिनो हरेः या सर्वव्यापित्वशक्तिः सास्यास्तीति सर्वात्मकः। आत्मभूतं देवक्या अत्यन्तात्मस्वरूपं आत्मनो मनसो भूतमभिव्यक्तं वा। आत्मभुवश्चतुर्मुखस्य भूतमिष्टसाधकत्वादिष्टदेवं वा। आनंदकरं शुक्लपक्षस्यापि सुखकरं कथमिव काष्ठा पूर्वदिक् आनंदोद्भूतं करोत्यस्य तथा तमानंदकरं चंद्रं। नभस्तः आकाशे यथा दधाति तथा हृदयाकाशे दधार। न तु योन्याकाशे। कीदृशी काष्ठा पूर्णमनोरथा। कीदृशं। रात्र्या

भगवानपि विश्वात्मा भक्तानामभयंकरः। आविवेशांशभागेन मन आनकदुंदुभेः १७ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः। दुरासदोतिदुर्धर्षो भूतानां संबभूव ह १८ ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी। दधार सर्वात्मकमात्मभूतं काष्ठा यथानंदकरं नभस्तः १९ ॥ ॥

मंधकारनिरासेन जगन्मंगलभूतं च्युतिरहिताः अंशाः कला यस्य स तथा तं पूर्णकलमित्यर्थः। शूरसुतः सूर्यस्तस्य सुतः सुषुम्णाख्यो रश्मिस्तेन समाहितं निष्पादितं। अमावास्यायां सूर्यलीनः तस्य सुषुम्णाख्यरश्मिना अभिव्यज्यत इति शास्त्रप्रसिद्धिः। शूरसुतेन वसुदेवेन सर्वात्मा पोषधीनामं कुरजनकत्वेन प्रेष्ठत्वात् सर्वात्मकं आत्मनो मनसोभिमानित्वादात्मभूतं लोकविडंबनार्थं पितृमातृप्रवेशक्रमः न तु शरीरस्थौ करार्थं तदुक्तं आविश पितरं विष्णुरित्यादिना १९ ॥ ॥

राम ७

सा देवकी प्रथमं भोजेंद्रगेहे रुद्धा न रेजे इति। नञ् मध्याहृत्य व्याख्येयं पश्चात् सर्वं जगत् अस्मिन् निवसतीति सर्वजगन्निवासो विष्णुः। तस्य निवासभूता इत्युगर्भविशेषणं। नितरां मत्यंतं विरेजे इति पाठे नञ् अध्याहार्यत्वं। अत्र दृष्टांतः नरादिका अग्निशिखा छाद्यत एण पटलादिना रुद्धा न राजते पुनः मुक्ते पातेन वज्वलिता यथा राजते यथा वा सती सरस्वती सत्यरूपा वाणी ज्ञानखले धूर्ते स्खलत्स्थले अनृतेन रुद्धा न राजते। सैव निर्व्याजा रोचते तथेति। अन्यथा यथा स्थितकथयनं दृष्टांतदार्ष्टांतिकविरोधादयुक्तं २० अजितं भरां विष्णुं दधानां जेतुमशक्यं गर्भं भरावा अंतस्थितविष्णुप्रभावर्द्धितस्वदेहप्रभया गर्भरूपेण हृदयगुहां च विष्टो यद्यस्मात्तस्मात् ध्रुवं २१ अस्मत् वप्राणहरो हरिरत्र स्थितः किं अत्राह किमद्येति। अद्य मे मया तस्मिन् गर्भस्थिते हरौ घटनीयं उपद्रवत्वेन कर्त्तव्यं।

सा देवकी सर्वजगन्निवासनिवासभूता नितरां विरेजे। भोजेंद्रगेहेग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती २० तां वीक्ष्य कंसः प्रभयाजितां भरां विरोचयंतीं भवनं शुचिस्मितां। आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी २१ किमद्य तस्मिन्घटनीयमाशु मे यदर्थतंत्रो न विहंति विक्रमं। स्त्रियाः स्वसुर्गुरुमत्या वधोयं यशः श्रियं हंत्यनुकालमायुषः २२ ॥ ॥

तत्केन प्रकारेणेति चिंत्यते। तदप्याशु कर्त्तव्यं न कालक्षेपणीयः कुतो वाह। अर्थेति। अधुना अहमर्थतंत्रः प्रयोजनाधीन इति यश्च स्मात्काजो न क्षेपणीय इति तत्राह यथेति। यथा अयमर्थतंत्रः देवकार्यलक्षणप्रयोजनैकपरायणो गर्भस्थितो हरिः मम विक्रमं जीवनलक्षणं न विहंति तथा झटिति कारणीयमित्यर्थः। यथा अर्थतंत्रः पुरुषः स्वविक्रमं न निहंति तथेति वा। ननु तर्हि तद्वध एव श्रेयानिति तत्राह स्त्रिया इति। अयं स्त्रिया वधो यशो हंति। अन्यच्च शक्रस्त्रतः किं तत्राह। स्वसुरिति। स्वसुर्वधः श्रियं हंति। जीवन्नभद्राणीति वचनात् तदप्यस्थितितत्राह गुरुमत्या इति। गर्भिण्या वधोनुकूलं कालमायुर्हंति। अतो वधो न घटनीय इति भावः २२ ॥ ॥

श्री

मनुजो वा अ ओ किं वा स्वार्थे हं दीर्घो शुभ्यदर्शना तथापि किं न स्यादित्यत आह । स एष इति जीवन्नपि सोऽपि मृतकल्प एवं ... कर्म ... जीवन्नत्यन्तमा
अपि तु हते पुरुषार्थ सर्वथा हानिः स्यादित्याह देहे इति अभिमानिनो देहे मृते पंचत्वं [illegible] तं देह मनुजा अर्थकामौ पुरुषार्थौ न शपतः साधकाभावात् । ईश्वरो धर्मकामा
वनुधर्म शपनतीति दर्शयति । तमनुजोः स्वर्गादि शब्दवाच्यो लोको न शपति साधकाभावात् । देह मनुमानिनो मलं यशो न शपति क्रवं तत्र संशयः इत्यर्थः । अर्थकाम
मयशास्त्रादिना शेगोर्दृष्टि ज्ञानेन शपति । तां दृष्टिमनुमानिनः पुंसो अक्षं नित्यसुखानुभवलक्षणो गोमेज्ञो न शपतीति वा । अतो हतस्यापि किं सम्य एवं विधं हा

स एष जीवन् खलु संपरेतो वर्त्तेत योत्यंतनृशंसितेन । देहे मृते तं मनुजाः शपन्ति कामोयपरो मलं गोर भिमानिनो अवं २३ इति घोरतमा
द्भावात्सन्निवृत्तः स्वयं प्रभुः । आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबंधवित् २४ आसीनः संविशंस्तिष्ठन्भुंजानः पर्यटन्महीं । चिंतया
नो हृषीकेशमपश्यत्तन्मयं जगत् २५

नं सद्योतना वेशात् उपपद्यते इति हरवाधान वकाशः गोर्दृष्टिः दीप्तिर्मा इति इह लाप्राप्य । २३ भावात् कर्मणः । भावो लीलाक्रियाचेष्टा इतियादवाः
प्रभुर्ज्ञानित्वाभिमानी स्वमनधीवसमर्थ इति वा । वैरानुबंधवित् । वैरमनुबंधं स्नेहं च वेत्तीति वैरमनुस्नेहं करोतीति विदित्कृता विति धातुः । अनेन निरंतर
तद्धिंतयास्नेहम्नर्प्यते । नन्वतात्विकः स्नत एव प्रधानो स्नेह इति स्वनयति । निरंतरवैरकृद्वा २४ तच्चिंताजकारं दर्शयति । आसीन इति । संविशन् शया
नः ह्रविरानंदस्र एव केशो यस्य स तथा तं यद्वा हृषीकाणामिंद्रियाणामीश इति तत्प्रत्यरार्थस्य कृत्स्नात्मकत्वमाशंक्य तन्मयत्वं २५ ॥

तत्र शंकरादिभिः समेतो ब्रह्मा ज्ञानिसुगमगुणविशिष्टं विष्टरश्रवसमभिष्टौति सत्यव्रतमिति वयं त्वां शरणं प्रपन्ना इत्यन्वयः कीदृशं त्वां सत्यव्रतं पूर्णानंद
ज्ञानलक्षणं सत्यं तदेव व्रतं व्याप्तं रूपं यस्य स तथा तं । सद्भ्यः पृथिव्यप्तेजोभ्यः त्यो वायुराकाशयोः परत्वाद्धिलक्षणत्वात् सत्यपरः । तंत्रयाणां वेदानां स
त्यत्वात् त्रिसत्यं भावार्थत्वाद्वि सत्यः तं सत्यस्याबाधितप्रपंचस्य योनिं मूलकारणं । सत्ये जगत्यंतर्निं यामकत्वेनानिहितं । सत्यस्य विश्वस्योत्तमानं दृष्टानं दं सत्यसत
स्य प्रपंचस्य नेत्रं नेतारं सत्यात्मकं सत्यस्य प्रपंचस्यकृतत्वादादानाद्य सत्यात्मा तकः प्रत्ययः प्रशंसायां । उत शब्दः समुच्चयार्थः । सच्छब्द उत्तमं भूयादित्यादिना
न्तरार्थज्ञानयः । प्रमाणिकत्वात्तद्ग्राह्यमेतदिति सिद्धं । यद्वा ऋतमपि पवर्ज्जं तं यथार्थकथनं सत्यं तदेवव्रतं नियमो यस्य स तथा तं । त्रिजस्यावकचेत सइति

ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः । देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयत् २६ ब्रह्मभवाद्यूचुः ॥
सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये । सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः २७ ॥

हि श्रुतिः । सत्यं संहिता वै देवा इति च । सत्यपनं धर्मपालकं सत्यं धर्माड इह तत इत्यभिधानं । सत्यपरंस्मृतिरव सादनं तस्मादपरमन्यं तदहितमित्यर्थः । अवि
नाशी वा अरेयमात्मेति श्रुतेः । त्रिषु लोकेषु सत्यं नेषु नष्टेष्वप्यविनष्टमित्यर्थः । सत्यस्य मुख्यप्राणस्य योनिं मुख्यादकं आत्मत एष प्राणो जायत इति श्रुतिः ।
सत्येषु मुख्यप्राणेषु निहितं सन्निहितं । स प्राणमसृजतेति श्रुतिः । सत्यमेव नेत्रं नयनं यस्य स तथा । सत्यस्य प्रपंचस्य प्रकाशनाद् । नित्रुपचरितत्वेन अबाधितं । अद्वै
तं परमार्थत इति श्रुतिः । सत्याद्देवास्तेनेत्रं शिष्याद्दिषु नेता रो यस्य स तथा तं देवाः प्राणयंतेति श्रुतिः । सत्यमबाधितमात्मनः कं सुखं यस्य स तथा तं । अ
बाधितस्वरूप सुखं । एष ह्येव परमानंद इति श्रुतिरिति २७ ॥ ॥

द॰पू॰

९

ननु प्रपंचोयं केचित्जीवकर्तृकः केचित्प्रधानकर्तृक इत्यादि संगिरंते तत्राह एकायन इति । अत्र यत्र शब्दमध्याहृत्या चेतव्यं । असावादिवृक्षो यत्र स्थितस्तं त्वां
शरणं प्रपन्ना इति पूर्वेणान्वयः । चेतनस्य मनुष्यस्य पुरुषार्थत्वादादिभूतमंतरंगमाश्रयं ज्ञानं तेनेनादिनाश्रयत इत्यादि विशेषणैः प्रपंचः आदेहे रथी नाह सूत
ति वा । मुमुक्षु मुक्त पंचपदीकारेण यद्रूपस्याप्यपरस्य शरीरेण परामर्शः । कचोश्चेरपरमेष्ठ्योमन्यस्मिन्द्वेवाद्यधिविशेषविशेषे द्युरुहामृततत्त्वस्येशानो इत्यादि
श्रुतिः । एकायनत्वाच्चेतनात्मलक्षणं प्रकृतिरयनं आश्रयो यस्य स एकायनः । यत्किंच जगत्यां जगदिति श्रुतिः । द्वे फले प्रवृत्तिनिवृत्तिलक्षणे यस्य स द्विफलः ।
सत्वादिगुणाः मूलानि यस्य स त्रिमूलः । चत्वारो रसा धर्मादयो यस्य स चतूरसः । तत्र प्रवृत्तफलस्य धर्मादयस्त्रयो रसाः निवृत्तफलस्य मोक्ष एको रस इति
विभागः । पंचमात्राः शब्दादयः शिफा यस्य स पंचशिफः । अस्ति जायते परिणमते विवर्धते अपक्षीयते विनश्यतीति षड्विकारा आत्मानो यस्य षडात्मा । त्वक्चर्ममांस
रुधिरमेदोमज्जास्थीनि त्वक्स्वरूपेण वर्तंते यस्य स सप्तत्वक् । देवगंधर्वदानवराक्षसपिशाचतिर्यङ्मनुष्यस्थावरलक्षणा अष्टविटपा यस्य सोष्टविटपः । नवाक्षाः इंद्रि
याधिष्ठानभूता यस्य स नवाक्षः । अक्षो रथांगं आधारे [illegible] विभीतके । शाकटे पाशके कर्षेऽक्षं तु नेदेऽक्षं इंद्रिये इति यादवः । दशछदाः प्राणाद्यानीत्यादि

एकायनोसौ द्विफलस्त्रिमूलश्चतूरसः पंचशिफः षडात्मा । सप्तत्वगष्टविटपो नवाक्षो दशछदी द्विखगो ह्यादिवृक्षः २८ ॥

णि अस्य संतीति दशछदी । प्रवृत्तिमार्गश्चा निवृत्तिमार्गश्चा इति द्विप्रकारौ । खगाः पुण्यपापरूपफलभागिनो जीवा यस्य स द्विखगः । तदुक्तं । ज्ञात्वा श्रया
इत्यादि द्विशब्देन कारणस्य सत्तामात्रत्वात् प्रवाहेण च सतत्त्वादित्यादि नाजगत्तत्त्वस्य सदातनत्वं विभुकारणत्वं च दर्शयति । इति रेकायनं यस्य अनेकं तथा ।
द्वे पुण्यपापे फले यस्य स तथा । तिस्रो जाग्रदाद्या अवस्था यस्य तिस्रो व्याहृतयो वा त्रयो वेदा वा शूलं यस्य स तथा । चत्वारो रसाः स्वर्गमोक्षनरकतमोलक्षणा यस्य स
तथा । प्राणापानव्यानोदानसमाना पंच शिफा अवांतरमूलानि यस्य स तथा । अशनायापिपासे शोकमोहौ जरामृत्यू वा षडात्मानः षडात्मा । सह ज्ञायस्य सप्तछदांसि त्व
कुलाचलानीयानि यस्य अष्टविटपाः पंचमहाभूतानि मनो बुद्धिरहंकाराः विटपाः यस्य नवनवाक्षाव्य [illegible] अष्टादश भावायस्य स तथा तं न्यायेन नवशब्दस्य एको
नारायणोपप्रधानस्तर्के त्वेनन वेद्रियाणि वा यस्य दशेंद्रियमयं दशछदी [illegible] द्विखगौ जीवपरमात्मानौ यस्य । आदिरनयोपप्रधानं हरे
रवश्यत अयं सएव वृक्षः । अनेन जगद्वृक्षस्य हरेरधीनस्वर्णनिर्ण हरेरत्यन्तमत्वमुक्तं भवतीति २८ ॥ ॥

राम

९

ननु ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता । एको रुद्रो न द्वितीयोवतस्थे इत्यादिनेतरेषामपि जगद्धातृत्वप्रतीतेर्हरेरेव तल्ल
क्षणं कथं स्यादिति तत्राह । त्वमेक एवेति । अस्य सतः सत्यस्य गतः प्रसूयत इति प्रसूतिः कारणं तिष्ठत्यस्मिन्निति स्थानं । निधीयते स्मिन्निति निधानं । अनुग्र
हातिरक्षतीत्यनुग्रहः । संवृतचेतस आवृतज्ञानाः त्वां नानापश्यंति ये विपश्चितः ते न पश्यंतीत्यनेन हरेरेवोक्तलक्षणं नान्यस्येति निरणायि २९ तत्तत्का
लप्राप्तानर्थपरिहारलक्षणं पालनं चावतारलक्षणाख्यरूपग्रहणेनेत्याह विभर्षीति । अवबोधआत्मा ज्ञानस्वरूपेत्वं प्यधिकरणेत्यनेनक्षुल्लकशोणि

त्वमेक एवास्य सतः प्रसूतिः स्थानं निधानं त्वमनुग्रहश्च । त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये २९ बिभर्षि रूपाण्यव
बोध आत्मा क्षेमाय लोकस्य चराचरस्य । सत्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानां ३० त्वय्यंबुजाक्षाखिलसत्वधाम्नि स
माधिनावेशितचेतसैके । त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिम् ३१ ॥ ॥

तत्संबंधं निवारयति । क्षेमाय तत्तत्कालप्राप्तविपत्परिहारलक्षणपालनाय । क्षेमो नाशाभरक्षायामिति यादवः । सत्वोपपन्नानि बलज्ञानसमाहारयु
क्तानि । सतां प्रसत्राकं सुखकराणि कंसादिखलानामभद्राणि तमअवाय्यमंगलकराणि ३० सतां सुखावहानीत्येतद्विवृणोति । त्वयीति । अखिल
सत्वधाम्नि । सत्वा सर्वगुणानामाधारभूते त्वयि समाधिना कृपास्पा आवेशितचेतसं ततत्विज्ञचित्ताः येपुण्या क्षेमहत्कृतेन तद्वैवोपास्याय यथा मह
द्भिर्गृहीतभवति तथा विरचितेनप्लवेन भवाब्धिं संसारसागरं घोरं गोवत्सपदं कुर्वंति । यथा वत्सचरणाभारकृतनिम्नस्थितजलमयत्नेन तरंति तथेत्यन्वयः
३१ ॥

नन्वस्माकं गोवत्सपदोपमो भवाब्धिर्भवति तेन च स्वयं तरणीयः तत्राह स्वयं समुत्तीर्येति हे द्युमन् स्वप्रकाश अदभ्रसौहृदाः सुहृदः स्वयोगप्रभक्तिप्रणीः
स्वयमञ्जसैव भवाब्धिं समुत्तीर्य भवत्पदांभोरुहनावा दुस्तरं भवार्णवं समुत्तीर्य ते तव पादांभोरुहयोगपादिषु शिष्यादिषु न पदे शोन निधाय ततो भवत्पदांभोरुह
नावमेव पातनाः नान्यत् यातां भवंतीति यस्मादतो भवाश्रत एवानुगृह्णातीति सदनुग्रहो नामेत्यर्थः नन्नु सत्वोपपन्नानीत्यादौ सत्वगुणात्मकत्वप्र
रहितः २९ पुरंत्रिपुरसंज्ञं ३० ३१ समत्वेनगुणेन।अत्रवोनन्नीयतेज्ञातुयस्मान्नस्मात्स्वोऽन्नउइतिभारतवचनात्स्वोऽहज्ञपदक्षोनिरुक्तः।
वापीकूपतडागादिपूर्त्तमग्निहोत्रंतपःसत्यंवेदानांचानुपालनं।आतिथ्यंवैश्वदेवंचइष्टमित्यभिधीयते।शरणागतसंत्राणभूतानांचा
प्यहिंसनावहिर्वेदिचयद्दानंतद्दत्तमभिधीयते।यणपंप्रेहेकुर्वद्।[illegible]समाविष्टमरः ३३ ॥ ॥

भामिनी तेजस्विनी ३४ इदं वक्ष्यमाणं ददृशे आस्य इति शेषः ३५ रोदसी द्यावापृथिव्यौ ज्योतिरनीकं ज्योतिर्गणं। तेषां पर्वतानां दुहितॄः
नदीः ३७ मृगशावाक्षी मृगबालाक्षी ३८ इति दशमेऽष्टमोध्यायः हरेस्तत्तदवतारे तत्तद्योनिविहितं कर्म कर्तव्यमिति दे वजनाशि ज्ञाणा

दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने। वसुदेववचो भूयो मानयामास विस्मितः ३४ एकदार्भकमादाय स्वांकमारोप्य भामिनी। प्र
स्नुतं पाययामास स्तनं स्नेहपरिप्लुता ३५ पीतप्रायस्य जननी सुतस्य रुचिरस्मितं। मुखं लालयती राजञ्जृंभतो ददृशे इदं ३६
खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च। द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ३७ सा वी
क्ष्य विश्वं सहसा राजन्संजातवेपथुः। संमील्य मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ३८ इति श्रीभागवते महापुराणे दशमस्कं
धे शाकटतृणावर्तभंगो नामाष्टमोध्यायः बादरायणिरुवाच गर्गः पुरोहितो राजन्यदूनां सुमहातपाः। व्रजं जगाम नं
दस्य वसुदेवप्रचोदितः १ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः। आनर्चाधोक्षजधिया प्रणिपातपुरःसरं २ सूपविष्टं
कृतातिथ्यं गिरा सूनृतया मुनिं। नंदयित्वाब्रवीद्ब्रह्मन्पूर्णस्य करवाम किं ३ महद्विचलनं नृणां गृहिणां दीनचेतसां। निःश्रेयसा
य भगवन्कल्पते नान्यथा क्वचित् ४ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतींद्रियं। प्रणीतं भवता येन पुमान्वेद परावरं ५

र्थं तद्विधीयतेऽस्मिन्नध्याये १ आनर्च पूजितवान् २ सूनृतया प्रियार्थमधुरया। पूर्णस्य कृतकृत्यस्य ३ महतां पुंसां विचलनं गमनं ४
ज्योतिषामयनं यद्गणनाशौरशास्त्रं तद्गमनगोचरं ज्योतिःशास्त्रं। ज्ञायते अनेनेति ज्ञानं। अतींद्रियं त्रिकालविषयं। परावरं भूतानागतवि
षयं ५

संस्कारान्गर्भाधानादीन् संस्कारकर्त्रा मदन्यः किं न स्यादिति तत्राह नृणामिति ६ तत्र नंदं गर्गो वक्तीत्याह। गर्ग इति। चशब्दो हिशब्दार्थः। योऽहं यदू
नामाचार्य इति सर्वतो भुवि ख्यातो हि। ततः किं। कंसेन ज्ञातेन दोषो भविष्यतीति। स कदाचित्प्राह। सुतमिति ७ कसि हिंसायामिति धातोर्हिंसाशीलः अ
त एव पापमतिः ८ तर्हि तं कुत्स्नं हंता हनिष्यति। तदा नो महाननयोऽन्यायोऽपराधो भविष्यतीति शेषः। कथमयं कंसो मया संस्कृतं ते सुतं दे

त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि। बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ६ गर्ग उवाच यदूनामहमाचार्यः
ख्यातश्च भुवि सर्वतः। सुतं मया संस्कृतं ते मन्यते देवकीसुतं ७ कंसः पापमतिः सख्यं तव चानकदुंदुभेः। देवक्या अष्टमो गर्भो न स्त्री
भवितुमर्हति ८ इति संचिंतयञ्छ्रुत्वा देवकीदारिकावचः। अपि हंता गताशंकस्तर्हि तन्नोऽनयो महान् ९ नंद उवाच
अलक्षितोऽस्मिन्रहसि मामकैरपि गोव्रजे। कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं १० श्रीशुक उवाच एवं संप्रार्थितो विप्रः
स्वचिकीर्षितमेव तत्। चकार नामकरणं गूढो रहसि बालयोः ११ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः। आख्यास्यते राम
इति बलाधिक्याद्बलं विदुः १२ यदूनामपृथग्भावात्संकर्षणमुशंत्युत। आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः १३ ॥

वकीसुतं मन्यते। निमित्तमाह। सख्यमिति। तवानकदुंदुभेश्च सख्यमस्तीति जानाति। अतोऽनयोः सुतविनिमयो भविष्यतीति मन्यते। निमित्तांत
रमप्यस्तीत्याह। देवक्या इति। संचिंतयन्निति द्वाभ्यां। तव हंता क्व विद्यत इति निश्चायकेन कन्यावचसा पितस्य तद्धनननिवृत्तिरित्याशयेनाह।
श्रुत्वेति। गताशंको नष्टहननशंकः आगमाशंकोऽपि वा ९ मामकैरप्यलक्षिते अज्ञाते अस्मिन्व्रजे। तत्रापि रहसि १० आशीर्वचनपूर्वकं।
नामकरणप्रकारमाह चकारेति ११ १२ यदूनां मध्ये उशंति। इच्छंति। तनूः शरीराणि १३ ॥ ॥

द॰पू॰

क्वचित्प्रसुरायां नियहएहे १४ अभिज्ञाः तद्वित्वयस्य विवेकज्ञाः । नकेवलमस्य वर्णा निमित्तं नामगुणानुगुणानि नामानि संतीत्याह बहू-
नीति १५ कर्मभिर्वाचकः शद्ध इति वचनात् गुणानुगुणं कृष्णेति नाम मधुहननकर्मानुरूपं मधुसूदनेति १६ यदि मयं मधुसूदनेति
पुष्यांकं तुश्रेय आधास्यत्त करिष्यति । आशास्यतीति वा । अंजः सम्यक् १७ दस्यवः चोराः अराजके राष्ट्रे । अरक्ष्यमाणाः १८ विष्णुपक्षान्
पक्षःपार्श्वगतत्वाश्रयसहायबलमिति लिष्ट्रितियादवः १९ इत्यादिश्यात्मानं नंदं २० अशकानस्ता व्रजताग च्छता रंगमाणौ रत्समानौ चेष्टमानौ

३०

शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः । प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः १४ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ।
बहूनि संति नामानि रूपाणि च सुतस्य ते १५ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः । एष वः श्रेय आधास्यद्गोपगोकुलनंदनः १६
अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ । पुरानेन व्रजपते साधवो दस्युपीडिताः १७ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः । य एत-
स्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः १८ नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः । तस्मान्नंदात्मजोयं ते नारायणसमो गुणैः २०
श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः । इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते । नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषां २०
कालेन व्रजताल्पेन गोकुले रामकेशवौ । जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः २१ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघो-
षरुचिरं व्रजकर्दमेषु । तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंति मात्रोः २२ ॥ ॥

वा २१ सरीसृपंतौ पुनः पुनः । भृशं गच्छंतौ सर्पंतौ । घोषाणां किंकिणीनां प्रघोषेण प्रकृष्टेन शद्धेन रुचिरः घोषप्रघोषरुचिरः स चासौ व्रज-
तस्य कर्दमेषु । आभीरपल्ली किंकिणी घोषो गोपालश इयोरिति वचनात् । तन्नादेन किंकिणीस्वरेण हृष्टमनसौ मुग्धप्रभीतवत् । लोकं बहिर्ग-
तमनुसृत्य विर्दश्य मात्रोः यशोदारोहिण्योः अंति अंतिके समीपे उपेयतुः प्रापतुः ॥ २२ ॥ ॥

राम

३०

घृणया दयया । स्नुवंत्यौ स्रवंत्यौ अंगरागश्चंदनं । मुग्धं कोमलं स्मितं मंदहासः अल्पदशनानामुत्कत रादं तायस्यतत् । मुग्धस्मितं वाल्पदशनाश्च स्मि-
तं वा २३ अतिरमणीयाः कुमारलीलाः बालक्रीडा ययोस्तौ तथा तौ । यर्हि यदा । अंतर्व्रजे व्रजमध्ये आगताश्च आगतौ इत्यनुपर्यति वत् । तदबलाः
व्रजयोषितः । तदा प्रेक्षंत्य उत्सृजत्यज्ञाः विस्मृतगृहव्यापाराः २४ शृंगिणो गवादयः । दंष्ट्रिणः सारमेयप्रभृतयः गृह्याणि गृहकर्माणि अनव-

तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां । दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतु-
प्रमोदं ॥ २३ ॥ यर्ह्यागतातिरमणीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः । वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उत्सृतग्र-
हाजहृषुर्हसंत्यः २४ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं । गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेका-
त आपतुरलं मनसोनवस्थां २५ कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले । अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा २६ ततश्च भग-
वान्कृष्णो वयस्यैर्व्रजबालकैः । सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २७ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं । शृण्वंत्याः कि-
ल तन्मातुरिति होचुः समागताः २८ ॥ ॥

स्थां व्याकुलतां २५ न घृष्टा निघृष्टाः अघृष्टाः तानि च जानूनि येषु तैस्तथा तैः विचक्रमतुः पादविक्षेपं चक्रतुः २६ । रुचिरं च तद्दीनं चदांचित
कुमारभावोचितं चपलत्वं पार्श्वगतामिथा । तन्मातुः शृण्वंत्याः ताइति वक्ष्यमाणप्रकारेणोचुः २८ ॥ ॥

६·पू· अस्तमयानन्तरं प्राप्तदोहनवेलायामस्मदादीनां क्रोशेन संजातो हासो यस्य सत्तथा। अथ कदाचित् स्तेयकल्पितैः स्तेययोगैः स्तेयोपायैः स्तेयं चौर्यापन्नं दधिपयश्च स्वाद्वत्ति पिबति च। सत्त्वतः मर्कटवालं मार्जारं वा वानरं वा भोक्ष्यन् भोजयिष्यन् विभजति विभागं करोति। नात्ति चेत्तत्र वनितादिभिः भांडं भिनत्ति। कदाचित् दधिपयस्त्वाद्वत्ति पिबति च। मर्कटादीनां भोजनाभावे तु भांडं भिनत्तीत्याह। ततो मार्जारकीपोरितिपायानां भावे भाण्डं भिनत्ति। द्रव्यालाभे द्रव्याप्राप्तौ कुपितः तान् डिम्भादीन् बालान् उत्क्रोश्य रोदयित्वा याति गच्छति। मर्कटमनश्च विनायोचितो केयमार्जारकीपोरिति पायानां भावे भांडेषु मध्ये तत्र नहि निवद्धनेव १९ स्तेययोगं दर्शयति हस्तेति। हस्तत्वेन हस्ताग्राह्ये सति हस्तेन ग्रहणार्थं पीठकाद्यैर्विधिं उपायं प्रकारं रचयति। शिक्यस्थितभांडेषु मध्ये अन्तर्निहितवयुनो व्यसनं छिद्रं करोतीत्यन्वयः। गृहान्धकारे कथमुपाय इति तत्राह। ध्वान्तागार इति। अन्धकारान्तर्निहितनवनीतभांडे तद्दृश्यतां कुरु शक्तं तच्छिद्रं लकुटादिना विवरं करोतीत्यन्वयः।

३१

वत्सान् मुंचन् क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः। मर्कटान् भोक्ष्यन् विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान् १९ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभांडेषु तद्वित्। ध्वान्तागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ३० एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते। इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ३१ ॥

हृतगेहे। धृतमणिगणं स्वांगं तस्य दीप्तिप्रकाशाधिकप्रकाशरत्नगणसंवीतं स्वांगं देहमर्थप्रदीपं पदार्थप्रकाशकं कृत्वेति शेषः। कस्मिन् समये इत्यत्राह काल इति २० एवं तदाधार्ष्ट्यानि निर्भयत्वादि उशति शुद्धे मिति शेषः। प्रविश्य च वास्तौ देहल्यादौ मेहनादीनि पुरीषोत्सर्जनादीनि करोति। स्तेयोपायैः स्तेयव्यापारैर्विरचितकृतिः निर्मितचौर्यव्यापारोऽन्तरः। शोभनानि प्रतीकान्यंगानि यस्य स सर्वांगसुन्दरः। सच्चरित्रः पुत्रो यथा तथास्ते इत्यन्वयः। सुप्रतीको मार्जारो नाम सव्यहस्तो वा। सभयं नयनं यस्मिन् तत् सभयनयनं श्रीमुखं च सभयनयनश्रीमुखं प्रियामुखं मुखं श्री मुखं तस्यावलोको यासां तासां स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातः प्रकाशः कथितः अर्थः सुतविषयो व्यापारो यस्याः सा तथा। उपालब्धुं निर्भर्त्सयितुं इत्थमिति शब्दः समाप्तिवचनः ३१ ॥

राम ३१

भयेन संभ्रान्ते विभ्रमवती चंचलानि प्रेक्षणानि दर्शनानि यस्य तत् तथा। तत्र कृष्णं यस्य संतर्थातं ३३ तत्र किं प्रमाणमिति तत्राह। वदन्ति ३४ मिथ्याविलंबत्वच्चातो दर्शयामी त्याशयेनाह यदीति ३५ यदि असत्यगिरो बालाः यदि त्वया न मृद्भक्षिता तर्हि मुखं विदारयेत्याह। यद्येवमिति। व्याहतं विदारितवान्। क्रीडार्थं मनुजबालकः प्रेरणामात्रेण बालवत् ३६ जगत् जंगमं स्थास्नु स्थावरं सा माम्यो कृविशिनष्टि। खमित्यादिना। खं प्रदेशः। भूगोलं

एकदा क्रीडमानास्ते रामाद्या गोपदारकाः। कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ३२ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी। यशोदा भयसंभ्रान्तप्रेक्षणाक्षमभाषत। ३३ कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः। वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययं ३४ कृष्ण उवाच नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः। यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ३५ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः। व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ३६ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः। साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकं ३७ ज्योतिश्चक्रं जलं तेजो नभस्वान् वियदेव च। वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ३८ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं। सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ३९ ॥ ॥

भूमंडलं वा द्वयं भौमो ३७ ज्योतिश्चक्रं अश्विन्यादिनक्षत्रमंडलं जलं तेजसी वाह्यान्तरगतेन भः वायुविशेषस्तत्रान्तरिक्षं वा। स्वः स्वर्गः। परलोको वा। वियद् आकाशं सर्वगतं वा। वैकारिकाणीन्द्रियाधिष्ठातृदेवता इति ३८ स्वभावः सात्विकादिः। कर्म अदृष्टं आशयः संस्कारः लिंगं लक्षणं सूक्ष्मशरीरं वा। बुध्यादिसमूहो वा भेदः तत्तद्रूपो व्यावर्तकधर्मः ३९ ॥ ॥

शंकां प्रकटयति किमिति। औत्पत्तिकः स्वाभाविकः। आत्मयोगः अलौकिकैश्वर्यातिशयः ४० ब्रह्मविदाप्नोति परमिति उपनिषद्वेद्यं ब्रह्मैव मम पुत्रतां प्राप्त
मिति यस्मात्तस्मान्मया बोद्धुमशक्यमिति न दूषणं किंतु ब्रह्मादिभिः सुष्ठु दुर्विभाव्यमित्याशयेनाह। अह इति। अदोवस्तु यथा याद्दशं तत्त्वा दृश्यमिति चेतो
मनः कर्मवचोभिः। चेतो ब्रह्मा मनो रुद्रः। कर्म पुष्करनाभादेवः। इंद्रो वा वचो वह्निर्वा इत्यपि तौ च मायाश्रयत्वा साक्षाज्ज्ञादेतैः कृतविविधतर्कगोचरं विरचि
तन्नात्मानुमानविषयं न भवति विशुद्धतर्कागोचरं न भवतीति किंचिदिति योऽर्थः। नचेदं तर्हि शून्यप्रायमिति तत्राह यदाश्रयमिति। यत्पदं आश्रयो यस्य तद्
दाश्रयं जगदिति शेषः। प्रलये ब्रह्माश्रयत्वेन तिष्ठतीत्यर्थः। येन जगद्भ्रमणो भेदैः सिद्धः स्थितिकाले च येन जीवनं लियते। सृष्टिकाले च यतः प्रतीयतेऽभिव्यक्तं

किं स्वप्न एतदुत देवमाया किंवा मदीयो बत बुद्धिभेदः। अथो अमुष्याविममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ४० ॥ ॥
अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा। यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ४१ ॥ ॥

उत्पद्यत इत्यर्थः। यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति श्रुतिः। अनेन जन्मादिकारणत्वं ब्रह्मलक्षणमित्युक्तं भवति।
मनुष्यादिवत्किमिति न ज्ञायत इति तत्राह। सुदुर्विभाव्यमिति। सुखेन दुःखेन च विभाव्यं। विशिष्टत्वेन विशुद्धत्वेन च ज्ञेयं। सुदुः शोभनदुःखयोरिति यादवः।
नैयायिकेण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति श्रुतेः। द्वैतवादिभिः सम्यक् अद्वैतवादिभिः। असम्यक्त्वज्ञाने यत्र द्वैतवादिनः सम्यक् ज्ञानेन स्व
योगं मुक्तिमद्वैतवादिनः प्रमाणविरुद्धज्ञानेनेतमदृतिविवेकः। अन्यमीशमस्य महिमानमिति वीतशोकः। तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना
इत्यादिश्रुतेः। त्वत्सुमप्रविशेषुकोतिन्नाह। प्रणतेति। यत्पदं तदिति पदं स्वरूपं। नन्वनंतभावस्य भेदनिष्ठत्वेन द्वैतनिष्ठे वाह इत्यर्थः ४१ ॥

नित्यपरतंत्रेऽप्यात्मनि ध्यातं अस्य बुद्धिरभेदबुद्धिरित्याशयेनाह। अहमिति। व्रजेश्वरस्य नंदस्याखिलवित्तानि पातीति रक्षतीति अखिलवित्तपापस्य हरेर्मा
ययाहइच्छया इत्थं कुमतिः। आत्मनः ध्यातं अस्य बुद्धिरहमभूत्। अतः स हरिर्मे गतिः। मत्सुतं अस्य बुद्धिमपनुद्य स्वध्यातं अज्ञापकत्वेनाश्रयोक्तित्यद्वया ४२
प्रजास्नेहमयी पुत्रस्नेहरूपं ४३ प्रवृद्धस्नेहकलिलहृदयाभूदिति शेषः ४४ प्रज्ञा स्नेहमयीं मायां श्रृंगग्राहिकयेवदर्पयति। त्रय्येति। त्रय्याद्यभिमीलइत्या
दिकया उपनिषद्भिः विषयेष्वारत्यादिकाभिः। सत्त्वात्महरिः तद्विषयैः सात्वतैः। सांख्ययोगैः पंचरात्रादिशास्त्रैः। यद्वा सांख्ययोगैर्यथार्थज्ञानप्रतिपादकैः श्र

अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती। गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ४२ इत्थं विदि
ततत्त्वायां गोपिकायां स ईश्वरः। वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥४३॥ सद्योनष्टस्मृतिर्गोपी साऽऽरोप्यारोहमात्मजं। प्रवृद्धस्नेहकलि
लहृदयाऽऽसीद्यथा पुरा ४४ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः। उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजं ४५ राजोवाच
नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं। यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४६ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं। गायंत्यद्या
पि कवयो यल्लोकशमलापहं ४७ ॥ ॥

श्रुतकीर्तिभिः सात्वतैः पंचरात्रादिवैष्णवतंत्रैः ४५ श्रेयः पुण्यं पूर्वजन्मनीति शेषः। स्वाङ्गर्भमप्रक्रियां उरुप्रश्रयसौख्यकृतं तत्पूर्वइत्युदारः। महानुदयः फ
लं यस्मात्तत्तथा। महाभागा गोभाग्यं यस्याः सा महाभागा। भागोभाग्यांशशक्तत्र्यंशा इति यादवः ४६ कृष्णरामनाम्नोरर्भकयोः ईहितं चेष्टितं। विंदति लो
थौ प्यवत्तानार्थः। वेदान्तरूपलक्षणलाभं नाकृतंताविति। विदेशाने तु वेत्तीति विंदुर्लाभे तु विंदतीति वचनात्। लोकशमलापहं जनपापहरं ४७ ॥

द॰ पू॰

प्रत्यारभ्यते कथांतरमिति शेषः। प्रत्यारंभे प्रसिद्धे हेति श्यादवः ४८ महादेव इत्यनेन शंकरोत्रोच्यत इति शंकाव्याप्त्यर्थं। विश्वेति। लोके जनमध्ये ४९
५० गोपागोपीषु मध्ये नितरां ५१ २ इति दशमे नवमोध्यायः   अत्रातीताध्यायसंगतिरनुसंधेया। नंदस्य गेहिनी भार्या १ दध्नो निर्मथने च
मिश्र तथा तस्मिन्काले १ क्षौमं नाम किंचित् तंतुनाकृतं क्षौमं। सूत्रेण कांच्या नद्धं बद्धं पुत्रस्नेहातिशयेन स्नुतयोः क्षरितयोः कुचयोः पुनः कीदृशं। जातः आवि

३३ ५२

श्रीशुकउवाच   द्रोणो वसूनां प्रवरो धरया सह भार्यया। करिष्यमाण आदेशं ब्रह्मणस्तमुवाच ह ४८ जातयोर्नौ महादेवे भुवि विश्वेश्व
रे हरौ। भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत ४९ अस्त्वित्युक्तः स एवेह व्रजे द्रोणो महायशाः। जज्ञे नंद इति ख्यातो यशोदा सा धरा
भवत् ॥५०॥ ततो भक्तिर्भगवति पुत्रभूते जनार्दने। दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५१ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः। सह
रामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५२ इति श्रीभागवते महापुराणे दशमस्कंधे बालक्रीडावर्णनो नाम नवमोध्यायः   बादरायणि
रुवाच   एकदा गृहदासीषु यशोदा नंदगेहिनी। कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि १ यानि यानीह गीतानि तद्बालचरितानि च।
दधिनिर्मथने काले स्मरंती तान्यगायत २ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः। रज्ज्वाकर्षश्रमभु
जचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ३ ॥ ॥

र्भूतः कंपश्चलनं यस्य तत्तथा ततः। शोभने भ्रुवौ यस्याः सा सुभ्रूः। रज्ज्वा आकर्षः तेनोत्पन्नः श्रमः आलस्यं तेनोपेतयोर्भुजयोश्चलंतौ कंकणौ
रवणे भ्रमणायमान शब्दयुक्तत्वात्तथा विधौ। स्विन्नं स्वेदजलोपेतं। कबरात्केशबंधात् विगलंती माली मल्लिका यस्याः कबरविगलन्मालती। अत्र द्विती
यांतपदस्य बिभ्रतीत्यनेनान्वयः। दृष्टिविशालं ३

राम
३३

न्यषेधत निवारितवत्य ४ अतृप्तमलं तृप्तिमप्राप्तं। अधिश्रिते चुल्ल्यां निहितो अधिकं पाकं प्राप्तेवा पयसि उत्सिच्यमाने उद्रिच्यमाने सति पयसा
वरोपयितुमिति शेषः ५ दद्भिर्दंतैः। दधिमंथभाजनं दधिमंथ श्रृणोपात्रं दधिमंथोभवेन्माम्निति इला मृषा। दृषद श्मना शिलापुत्रकेण शृ... रवि
द्यमानने चजला। दुःखोत्पन्न बाष्पो न भवतीत्यर्थः। हैयंगवं नवनीतं। अंतरं बहिर्भवं। अंतर्हितं वा गृहांतरं वा अंतरं परिधानं येवा ह्ये स्त्रीयेतरामनि रुदम

तां स्तन्यकाम आसाद्य मथ्नंती जननी हरिः। गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमी
क्षती मुखं। अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ५ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं
भित्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरं गतः ६ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं। भग्नं विलोक्य स्व
सुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ७ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं यथोप्सितं। हैयंगवं चौर्यविशंकितेक्षणं
निरीक्ष्य पश्चात्सुतमागमच्छनैः ८ ॥ ॥

ध्येकाशेवतादृर्थ्येवसरे वधौ। विशेषविवांतर्हिं ध्रुवसानविना र्थयोऽरितियादवः ६ उत्तार्य शुश्रूषा अत्यग्निधाय। दध्यमत्रकं दधिभांडं। भग्नं
त्वं सुस्मुतस्य तत्कर्म विलोक्यालोक्य ७ उद्भूखलांघ्रेः उलूखलबुध्नस्य चौर्येण विशंकिते किंचिदुन्मीलनमीलनमेव कुर्वाणे ईक्षणे यस्य सतथा तं प
श्चात्पृष्ठतः ८ ॥

अभिससाराभिसमर्पासारम्‌ अपससार अवरोहणं कृत्वा पलायितवानित्यर्थः। गोप्याः कृष्णानुधावनं न तत्त्वबुद्ध्या कृतं किंतु भ्रांतिबुध्येत्याशयेनाह। न यमिति। तपसेरितं प्रेरितं क्षमं समर्थं ९ अन्वंचमाना जवं विज्ञाय शनैरनुगच्छंती। अंचु गतिपूजनयोरिति धातुः। इंसी वद्ध मनवतीत्यर्थः। शनैर्गमने निमित्तमाह। बृहदिति। बृहत्योः स्थू लयोश्चलत्योः श्रोण्योर्भरेणाक्रांता आगता गतिर्यस्याः सा तथा। विस्रंशितात्‌ विश्लिष्टात्‌ केशबंधनात्‌ च्युतानां प्रसूनानां अनुगतिर्यस्याः सा तथा। परामृशत्‌ स्पर्शं जग्राह इवा १० अंजन्मषिणी अंजिताभ मषिः अंजनं पयोर्स्ते अंजन्मषिणी। अक्षिणी नेत्रे कषंतं निष्पीडयंतं कलुषयंतं भिषयंती भी

ता मात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार भीतवत्‌। गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ९
अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा। जवेन विस्रंशितकेशबंधनच्युतप्रसूनानुगतिः परामृशत्‌ १०
कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपाणिना। उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत्‌ ११
त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला। इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा १२ न चांतर्न बहिर्यस्य न पूर्वं नापि चापरं।
पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः १३ ॥ ॥

षयंती। अवागुरत ताडनार्थं हस्तमुद्यतवती ११ दाम्ना वत्सपाशेन। अतद्वीर्यकोविदा कृष्णमाहात्म्यमजानती १२ यशोदायाअज्ञानं प्रकट यितुं तत्स्वरूपं निरूपयति। न चेति। यस्यांतः अंतरं बक्षनेवास्ति। यस्य बहिश्च बक्षनास्ति। सर्वत्र सत्वेनांतर्बाह्यविशेषाभावात्‌। यस्मात्पूर्वम परं नास्त्येव अविनाशित्वे नसिद्धत्वात्‌। यः कृष्णः जगतः पूर्वमपरं बहिरंतश्च वर्तते इति शेषः। जगतो विनाशित्वात्परिच्छिन्नत्वाच्च। यश्च जगत्स्वरूपः।
अपितदधीनत्वेन तत्त्वव्यपदेशः १३ ॥

तमव्यक्तं ब्रह्मसंज्ञं कृष्णमर्भकम्‌ एकतरबालं मत्वा। तस्यकृष्णमाहृइहीति स्वत्वं मर्त्यलिंगं मनुष्यलक्षणशरीरं अधोक्षजमिंद्रियजं ज्ञानं तस्याः कृतं यत्का तस्य अव्यक्तं प्रत्यक्षम्‌ अधोक्षजमिंद्रियजं ज्ञानं यस्य स्मृतम्‌ इंद्रियगोचरमित्यर्थः। अनेनाव्यक्तपदं विवृतमिति ज्ञातव्यं १४ अनेनापि कृष्णस्य ब्रह्मत्वं निश्चयितुं शक्यमित्याशयेनाह। तद्दामेति। येन बं धतद्दाम द्व्यंगुलोनम भूदिति चयः। गोपिका यदा तेन द्व्यंगुलोनेनान्यद्दाम संदधे तदपि न्यूनमासीदिति १६ एवंस्वगेहस्य समस्तदाम संचयः समासोसु त्तं माहात्म्यं दृष्ट्वा स्मयंतीं मंदं हसंतीं विस्मिताभूदित्यन्वयः १७ अणिमा लघिमा योगशक्तिः स्वाभाविकी हरेरित्यभिप्रेत्याह स्वमातुरिति। मात्र वि

तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं। गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा १४ तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः।
द्व्यंगुलोनमभूत्तेन संदधेऽन्यच्च गोपिका १५ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे। तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं १६ एवं स्वगेह
दामानि यशोदा संदधत्यपि। गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत्‌ १७ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः। दृष्ट्वा परि
श्रमं कृष्णः कृपयासीत्स्वबंधने १८ एवं संदर्शिता ह्यंग हरिणा भक्तवश्यता। स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे। १९ नेमं विरिंचि
नभवो न श्रीरप्यंगसंश्रया। प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात्‌ २० नायं सुखापो भगवान्‌ देहिनां गोपिकासुतः। ज्ञानिनां चात्मभू
तानां यथा भक्तिमतामिह २१ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः। अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ २२ पुरा नारदशापा
द्वृक्षतां प्रापितौ मदात्‌। नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ २३ इतिश्रीभागवते महापुराणे दशमस्कंधे बालक्रीडायामु
लूखलबंधनं दशमोऽध्यायः ॥ ॥

पय कृपया स्वबंधनम्‌ आसीत्स्वयमेव बद्धोऽभूदित्यन्वयः १८ १९ यत्तत्तत्प्रयंत २० निरंतरनिरतिशयभक्तिमद्वेव भगवत्कर्मनिपुणेत्याशयेनाह ना यमिति। आत्मैव परमात्मैव यत्नेनो येषां तेन तथा तेषां २१ पूर्वजन्मनि गुह्यकौ अधुनार्जुननाम्नाककुभवृक्षौ २२ शापनिमित्तमाह। मदादि ति। किंनामानाविति तत्राह। नलेति। मदकारणमाह। श्रियेति २३ इति दशमे दशमोऽध्यायः ॥ ॥

हरेरेवं संसारान्मोक्ष इति दर्शयितुं नलकूवरमणिग्रीवयोः शापमोक्षप्रकारं निरूपयत्यस्मिन्नध्याये। तत्र राजा पृच्छति कथ्यतामिति। यद्विगर्हितं निंदि तं कर्म तत्कथ्यतां। येन कर्मणा देवर्षेस्तमोगुणकार्यक्रोधोभूत् १ २ वारुणीं वरुणात्मजां ३ अंभोजवनराजिनि जलइति शेषः ४ क्षीबाणौ मत्तौ अश्लीलवचनौ वा ५ पर्यधुः संवेष्टितवत्यः ६ ७ किं तदाहेति तत्राह नहीति। विषयाननुषजतः सेवमानस्य पुंसः। जोष्यान् सेव्यान् विषया

राजोवाच — कथ्यतां भगवन्नेतत्तयोः शापस्य कारणं। यत्तद्विगर्हितं कर्म येन देवर्षेस्तमः॥ श्रीशुक उवाच — रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ। कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ १ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ। स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने २ अंतः प्रविश्य गंगायामंभोजवनराजिनि। चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ४ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव। अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ५ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः। वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ६ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ। तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ७ नह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः। श्रीमदादभिजात्यादिर्यत्र स्त्री द्यूतमासवं ८ ॥ ॥

मदादयो यथा धनसंपदो त्यत्र मदादभिजात्यादेरभिजननिमित्तमदाद्विद्यादिनिमित्त[illegible]स्यान्यो बुद्धिभ्रंशः ज्ञाननाशकरो रजोगुणः रजोविकारो नास्ति विषयादिर्विज्ञाननाशकर इत्यर्थः। तत्कथमत्राह यत्रेति। यत्र विषयाभिजात्यधनमदे स्त्री द्यूतमासवं आसुतं पूर्णं मद्यपानं भवति। द्विशतोवधा रणे। द्विर्ताववधारणेतियादवः। अन्यो नाद्यप्येवं मद्यपानात्सोभवंत्येवेत्यर्थः। आसव इति पाठे मद्यमित्यर्थः ८ ॥ ॥

संतमारयसतः किमत्राह हन्यंत इति। पशवः प्राणिनः तत्र इमं नश्वरं देहमजरामृत्युवन्नरं जरामृत्युनाशरहितं मन्यमानैः पशवो भूतानि हन्यंते मत्र बहुविधं देहवियोगकरणं धनापहरणं देशोच्चाटनं अभिमानभंगकरणमित्यादि ९ यत्रैव स्वार्थं न वेद परलोकविषयत्वेन पुरुषार्थसाधनं किं इदं हिंसनं किं न स्यादित्यत्राह भूतध्रुगिति। नायं स्वार्थः किंतु पारलौकिकपापस्यानंदहृत्यत्राह किमिति। किं शरीरार्थं प्रत्येक विकल्पेकिमिति यावत् देहं हिंसजीवनमंतरेण न किमपि जानातीत्यर्थः। किमिति न वेदेति तत्राह। निरय इति। यतो निरयगमनं एहितते सो भवतीत्यर्थः। अयमाता वितिथातुः हिंसा दे नं हिन जीवनमंतरेण न किमपि जानातीत्यर्थः। किमिति न वेदेति तत्राह। निरय इति। मत्तो निर्गमनं एहि तते सो भवतीत्यर्थः। मात्रेण तमसो स्या वेद्हिंसा विशेषेण तमः स्यात्। तथाहि नित्यभूतत्वाद्भूतेष्वंतर्द्रोहः सर्वेशस्य ब्रह्मणो ६ नीयोनहुः खिताजीवेन सदैकत्व कथनो पासनं परमहिंसा सर्वज्ञादियुगानुकृतानपहाय निर्गुणत्वाचिंतनं हिंसीयां तदवतारगुणाः खंडमाज्ञानादिकल्पनं तती या प्रत्यक्षादिप्रमाण सिद्ध स्य प्रपंचस्य तद्विवर्तत्वकथनेचतुर्थी त्यादिकं एवं विधस्य तमःप्राप्तिः स्यादिति निरूप्यत इत्यर्थः १० नन्वन्नरक्षोके देहस्यानिर्वाच्यत्व मुच्यते। देहस्य

हन्यंते पशवो यत्र निर्दयैरजितात्मभिः। मन्यमानैरिमं देहमजरामृत्युनश्वरं ९ देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितं। भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः १० देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव वा। मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोपि वा ११ एवं साधारणं देहमव्यक्तप्रभवाप्ययं। को विद्वानात्मसात्कृत्वा हंति जंतूनृतेसतः १२ मन्यमानैरिमं देहमजरामृत्युनश्वरं। देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितं १३ असतः श्रीमदांधस्य दारिद्र्यं परमंजनं। आत्मोपम्येन भूतानि दरिद्रः परमीक्षते १४ ॥ ॥

स्वजगरंतः पातित्वे कृजाद्भस्म विवर्तमिति कथयतः कथंतम इत्याशंक्यात्र साधारणत्वमेवोक्तं तेषामिमन्नादादित्याशयेनाह। देह इति। अन्नदातुः पोष यितुः निषेक्तुः गर्भाधानकर्तुः। मातुः पितुः माता महस्य विक्रेतुः द्रव्यादिप्रदानेन बलिनः बलात्कारेण ग्रहीतुः ११ अव्यक्तात्प्रकृतेः प्रभव उत्पत्तिः अ प्ययः प्रलयो यस्य सतथा तं। आत्मसात् आत्मतने असतः अते १२ प्रसंगात्सायुकं स्मारयति। मन्यमानैरिति। कीदृशं प्रथमं देवसंज्ञितं मरणोत्त रकाले अपि दहनसंस्काराभावे कृमिसंज्ञितं भवति देवोयं भद्रश्लोकोयं कृमिभिर्भक्षितः विष्ठाकुलः भस्मितइति १३ ननु श्रीमदांधस्य अपरिहार्यत्वात् किमौषधं तदर्हितितत्राह। असत इति। असतः इननादिकर्तुः हारि द्रंदरिद्रभावः। कथं तदंजनमंधनाशनमस्तिदित्याह। आत्मेति। आत्मौपम्येन आत्मसाम्येन भूतानि सुखदुःखसमत्वा

द॰ स्कं॰

३६

अन्तर्दृष्टान्तमाह। यथेति। तां कंटकव्यथां जंतोरात्मव्यतिरिक्तस्य तल्लिंगैः सुखदुःखविकासकार्श्यादिसूचकैर्जीवेषु सुखादिमत्तया साम्यं साम्यमापन्नाग
तो ज्ञातवान् अविद्धकंटकस्तथा न १४ ननु दारिद्र्यं परमसुखमित्युक्तं तस्यापि दुःखानुभवः प्रतीयते तत्कथमित्यत आह। दरिद्र इति। निरहंस्तंभः अहं
मानवर्जितः विद्यादिसर्वमदैर्मुक्तः दरिद्रः यदृच्छया दैवेच्छया यत्कृच्छ्रमाप्नोति तत्कृच्छ्रं अस्य दरिद्रस्य परं तपो भवति। एतदेव परं तपो यच्चाधितस्य प्राप्तदुः
तिष्कृति हिं शद्गृहीता १५ नयुक्तस्यानुभवः कथंकारं तपो भवतीत्याशंक्य तं प्रकारं दर्शयति। नित्यमिति। अनुशुष्यंति इंद्रियशोषमनुशोषं गच्छंति।
इंद्रियप्राबल्यदौर्बल्ये प्रवृत्तिनिवृत्ती स्यातां ते चान्नसत्ताभावादिना स्यातां। अन्नाभावादिंद्रियप्राबल्याभावात् हिंसालक्षणा प्रवृत्तिर्निवर्तत इत्यर्थः १६

यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां। जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह। कृच्छ्रं यदृच्छया
प्नोति तद्धि तस्य परं तपः १५ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः। इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्तते १६ दरिद्रस्यैव युज्यंते साध
वः समदर्शिनः। सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति १७ साधूनां समचित्तानां मुकुंदचरणैषिणां। उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः
१८ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः। तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः १९ ॥ ॥

ततः किमत आह। दरिद्रस्येति। युज्यंते संगम्यंते सत्संगतिर्भवतीत्यर्थः। तत्फलमाह सद्भिरिति। रसोप्यस्य परं दृष्ट्वा निवर्तत इति स्मृतेः। विषयतृष्णानि
वर्तत इत्यर्थः। ततो विषयतृष्णानिवृत्तेरारात्क्षिप्रं विशुध्यति मुक्तो भवतीति। आराद्दूरसमीपयोरिति च १७ सद्भिस्त्यक्तेयाविद्यादिमदांधानामपि दरिद्र
स्यैव श्रेयः किं न स्यादित्याशंक्य सतामुपेक्षणीयत्वेन सत्संगत्यभावात् श्रेयःसिद्धिर्दवीयसीत्याशयेनाह। साधूनामिति। धनमानस्तंभयुक्तैः आव एव तृणरहि
तैः असतामाश्रयभूतैः १८ नन्वेवं सत्यं तेऽभवनेतयोः किं क्रियते दंड उद्दिश्यत उपेक्षा वा इत्याशंक्य दंड एव क्रियत इत्याह। तदहमिति। माध्व्या म
ध्वृत्तया १९

राम

३६

तमःप्लुतौ अज्ञानावृतौ। विवाससं वस्त्रहीनं आत्मानं न विजानीतः इति यतोऽतः २१ स्थावरतां प्राप्तुमर्हथः। तत्र च स्मारकत्वे इति २२ स्मृतेः फलमाह वा
सुदेवस्येति २३ यमलार्जुनौ सहोत्पन्नौ युगलार्जुनौ २४ ६ अंतरेण मध्ये। आत्मनिर्वेशमात्रेण द्वयोर्मध्यप्रवेशमात्रेण आत्मनः सान्नि

यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ। न विवाससमात्मानं विजानीतः सुदुर्मदौ २१ अतोर्हथः स्थावरतां स्यातां नैवं यथा पुनः। स्मृ
तिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् २२ वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते। वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यथः २३
श्रीशुक उवाच एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं। नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ २४ ऋषेर्भागवतमुख्यस्य स
त्यं कर्तुं वचो हरिः। जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ २५ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ। तत्तथा साधयिष्यामि यद्गीतं त
न्महात्मना २६ इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ। आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं २७ बालेन निष्कर्षयतान्वगुलूखलं तद्दामो
दरेण तरसोत्कलितांघ्रिबंधौ। निष्पेततुः परमविक्रमितातिवेलस्कंधप्रवालविटपौ कृतचंडशब्दौ २८ ॥ ॥

ध्यमात्रेणैव। तिर्यग्गतं तिरश्चीनं २७ यदा बालेन दामोदरेण तदुलूखलं निष्कृष्टमाकृष्टं तदा तावर्जुनौ निष्पेततुः। कीदृशौ उत्कलितांघ्रिबंधौ।
उन्मूलितहलौ। पवनस्य तदानीमुद्भूतवायोर्विक्रमितेन पराक्रमेणातिवेलैः वेलां सीमानमतिक्रांतैः स्कंधैः प्रवालैर्विटपैः। अतिः स्यादधिकायेति
प्रशंसायामतिक्रमे इति २८ ॥

तत्र तस्यामवस्थायां। कृतयोर्ईक्षयोर्जातवेदो। अग्नी इवउपेत्य अग्निवज्ज्वलितरजसो शापमोक्षेण सत्त्वस्वभावमापन्नौ बद्धांजली सिद्धौ यज्ञोशिरसाखिल लोकनाथं कृत्वा प्रणम्य इदं वक्ष्यमाणमूचतुस्तस्मै। गुणान्तरतापूर्वकसुत्कवंता वितिचयः स्तुतौ हस्तन्ननिषेधे स्मेतिवा। कत्रुभोदिशा स्फुरंतो प्रकाशवं तो २९ व्यक्ताव्यक्तं कार्यकारणात्मकं। रूपत्वात्प्रतिमात्वेन संनिधियोगपत्वाद्रूपमुच्यते। ननु साक्षाद्रूपं। रूपत्वान्नु जगद्रूपं विप्राः साक्षान्मुखात्मक मित्यादिस्मृतेः ब्राह्मणा वेदिकाः ३० सन्निधियोगपत्वं दर्शयति। त्वमिति। सर्वभूतानां देहे। आत्मनोमन सइंद्रियाणामीश्वरः स्वविषयशक्तिप्रदः। न केवलमंतरेव प्रवर्तकः बहिरपित्वं शक्तिमत्वात्तत्र क्षुक्षिप्रबोधक इति भावेनाह त्वमिति। तदुक्तं विष्णुः सर्वगुणोद्रेका काल इत्यभिधीयते इति। कलका

तत्र श्रियापरमया क्रमशः स्फुरंतो सिद्धावुपेत्य कजयोरखिजातवेदो। कृत्वा प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुस्त
स्म २९ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः। व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ३० त्वमेकः सर्वभूतानां देहेस्वात्मेंद्रि
येश्वरः। त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ३१ त्वं महान्प्रकृतिः सूक्ष्मा रजःसत्वतमोमयी। त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ३२

महेनाविति धातुः। विष्णुः व्यापनशीलः। व्याप्तस्याप्याकाशवदुत्पत्तिविनाशौ स्यातामिति नेत्याह। अव्यय इति। जातस्य हि ध्रुवो मृत्युरिति स्मृतेः। अंत र्यामीति वा। आत्मांतर्यामीति ३१ प्रकृत्यादेरचेतनत्वेन स्वतः प्रवृत्त्यनुपपत्तेः तत्सन्निधानाश्रितत्वाधीनत्वेन तद्व्यपदेशो युक्त इति भावेन स्तौति त्वमि ति। महान्महत्तत्त्वं। पूर्णगुणत्वेन पुरुषशब्दवाच्योपि त्वमेवेत्याह। त्वमिति। अध्यक्षः साक्षी। साक्षित्वं व्यनक्ति सर्वेति। सर्वक्षेत्राणां कारणभूतानि प्रा णः श्रद्धार्थाः खं वा भूरित्यादीनि विकारशब्दवाच्यानि चेन्निजानातीति त्वेन पश्यतीति सर्वक्षेत्रविकारवित् ३२ ॥ ॥

ननु व्यक्तो हरिरिति पुरस्तादुदीरितं तत्कथं दृश्यते त्वस्मयापुध्येतीति दृयविषयत्वोक्तेरित्याह। गृह्यमाण इति। स्वयमेव स्वात्मानं दृष्ट्वा तिनत्वन्य इत्य र्थः। तदुक्तं। स्वात्मना गृह्यमाण इति। किमेवंविवेकः क्रियत इति तत्राह। अग्राह्य इति। विकारैः प्राकृतैः महदहंकाराद्यभिमानिभिः ब्रह्मादिभिरग्राह्यः। न नु नित्यसमीपस्थाभिर्गुणादिभिर्ग्राह्य एवेत्यत्राह गुणैरिति। सत्वादिभिर्गुणाभिमानिनीभिरपि। ननु वेदाहमेतं पुरुषं महांतमिति श्रुतेः ब्रह्माद्यैर्वेद्यः कथमु च्यत इति तत्राह क इति। अत्र संस्थितिशब्देन तत्र निर्लक्ष्यते स्थितेरुत्पत्त्यपेक्षत्वात्। रुद्रजीवराशोकः पुमान्गुणभूतस्य हरेः क्रीडायामंतरगस्य जगतः स्थितेरुत्पत्तेः प्राक्सिद्धं आनीदवातं स्वधया तदेकमिति श्रुतिसिद्धं ब्रह्म विज्ञातुमर्हति शक्नोति। अर्हतीति चेतक एव ब्रह्म जानाति स्त्रियः स्तनीमं उमेपुंस

गृह्यमाणस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः। कोचिहार्हति विज्ञातुं प्राक्सिद्धं जगत संस्थितेः ३३ ॥ ॥
तस्मै तुभ्यं भगवते वासुदेवाय वेधसे। आत्मयोनेर्गुणैश्छन्नमहिम्ने ब्रह्मणे नमः॥ ॥ ३४ ॥ ॥

आद्युरित्यादिश्रुतेः। इदमपि दर्शनं तत्स्वसारदेवत्वं गीः कर्त्तव्यं यमेवैष वृणुते तेन लभ्य इति श्रुतेः। यद्वा उत्पत्तेः प्राक्प्रसिद्धं निरंजनत्वेन स्थितं कोत्र विज्ञा तुमर्हति लिंगाभावात्। कथं गुणानां ज्ञापकानां लिंगानां संस्थितेः विनाशनान्न जगतो नष्टत्वादिति ३३ ननु तद्विषयज्ञानाभावे तदुपासनाभावे मोक्षाशा व्यर्थेत्याशंक्य नमस्त्येव कार्यं तस्यापि तत्प्रीतिजनकत्वमतीतेरिति भावेनाह। तस्मा इति। किंनिमित्तं तद्विज्ञापनमिति तत्राह। आत्मेति। आत्मना लययो तं तत्कार्यं शक्तिमत्तया प्रकाशंतस्यात्मयोनाः नैर्गुण्यैः सत्वादिभिः छन्नो गृहीतः महिमा यस्य स तथा तस्मै। उदकेना वृषिद्धितं यदासीत परमसन्महिमानाय तैकमिति श्रुतेः। पिहितत्वमित्यपेक्षयानस्वरूपस्य परिच्छिन्नत्वे नानाद्या यत्वादिति भावेनाह। ब्रह्मण इति। तदुक्तं। छत्रोम्येवानजस्यस्य भगवान्ग्रुतुषोत्त
म इति। वेधसे कर्त्रे ३४ ॥

द० पू०

३८

इदानीं कृष्णोनाम साक्षान्नारायणावतार एव न देवदत्तवत्कश्चिच्छरीरीति ज्ञापयितुं दूरे द्विविधावतारः देहस्वाश्च देहस्वाश्चेति तत्र देहस्वाश्च तत्र्यामाद्यो इदानीं कृष्णो नाम साक्षान्नारायणावतारएव न देवदत्तवत्कश्चिच्छरीरीति ज्ञापयितुं ... पारिशेष्यं तर्यामित्वेन ज्ञायंते। अशरीरेषु शरीरव्यतिरिक्तवा इहस्थले अशरीरिणा मत्स्या मत्स्याद्याश्च देहस्वाश्चेतिभावेनाह यस्येति। यस्य हरेरवताराः पारिशेष्यं तर्यामित्वेन ज्ञायंते। अशरीरेषु शरीरव्यतिरिक्तवा ... अतुल्याति दिरूपत्वेन ज्ञायंते। कैः साधनैरित्यत्राह। तैस्तैरिति। ये ये मनसो नियमादयः शास्त्रविहिताः तैस्तैरतुल्यैः अत्यातिशयैरधिकैर्मनोनियमादिभिः अतुल्याति शयत्वं कथमत्राह तिर्यग्योनिष्विति। तिर्यग्योनिषु वराहादिसंबंधिनीषु असंगतैः असंभाव्यैः। तदुक्तं। यस्यावताराः देहस्वा अदेहस्वाश्चेति द्विधेत्यादि

यस्यावताराज्ञायंते शरीरेषु शरीरिणः। तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३५ स भवान्सर्वलोकस्य भवाय प्रभवाय च। अवती र्णोंशभागेन सांप्रतं पतिराशिषां ३६ नमः परमकल्याण नमस्ते विश्वमंगल। वासुदेवाय शांताय यदूनां पतये नमः ३७ अनुजानी हि नौ भूमन्स्तवानुचरकिंकरौ। दर्शनं नो भगवतो ऋषेरासीदनुग्रहात ३८ ॥ ॥

यद्यपि तैस्तैरतुल्यातिशयैः माहात्म्यविशेषैः भूम्युद्धरणं मंदरधारणं गोवर्द्धनोद्धरणलक्षणैरिति ३५ स तादृशो भवान्जनस्य भवाय उत्पत्तये प्रभवाय महत्त्वाय। प्रभावाय महत्त्ववर्द्धनाय। सांप्रतं यदुकुले वतीर्णोसीत्यन्वयः। आशिषां शुभानां पतिः पालयिता दाता च। भागेनांशेन ३६ इदमेव रूपं प्र लरूपाद्दन्यत्र महिमेतिभावेनाह। नमइति ३७ भूमन्ननवच्छिन्नज्ञानानंदस्वभाव सदानुचरावनुगतौ उक्तकारिणौ च तौ अनुजानीहि अनुज्ञां कुरु। यदृच्छयाप्राप्तमहत्संगमोभवदर्शनसाधनमभूत्। किं पुनर्बुद्धिपूर्वकमितिभावेनाह दर्शनमिति ३८ ॥ ॥

राम

३८

अतः परं श्रीमदादिकमावायोर्नभवितव्यं यत इंद्रियाणां विषयव्यापारः स्यात्तन्नस्यात्। किंतु तवगुणादावेव वाणादीनां व्यापारः स्यादिति प्रार्थयतो वाणीति ३९ ४० सानुग्रहः शापः मोक्षलक्षणानुग्रहसहितः ४१ मत्कृतात्मनां मय्यर्पितमनसां ४२ नरवाहो वैश्रवणः तस्य निकेतनं गृहं ४३ बद्धोलूखलं च बद्धं श्रीकृष्णं ४४ इति दशमे एकादशः हरेर्बालक्रीडाचरितं चानुत्तरनिस्वद्य महिमश्रवणमनोपासनानि मुक्तिसाध

वाणीगुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः। स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेस्तु भवत्तनूनां ३९

श्रीशुक उवाच इत्थं संकीर्तितस्ताभ्यां भगवान्गोकुलेश्वरः। दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ४० श्रीभगवानुवाच ज्ञातं मम पुरैवैतदृषिणा करुणात्मना। यच्छ्रीमदांधयोर्वाग्भिः शापः सानुग्रहः कृतः ४१ साधूनां समचित्तानां सुतरां मत्कृतात्मनां। दर्श नान्नो भवेद्बंधः पुंसोक्ष्णोः सवितुर्यथा ४२ तद्गच्छतं मत्परमौ नरवाहनिकेतनं। संजातो मयि भावो वामीप्सितः परमोऽभवः ४३ श्रीशुक उवाच इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः। बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तराम् ४४ इति श्रीभागवते महापुराणे दश मस्कंधे यमलार्जुनभंगो नामैकादशोध्यायः श्रीशुक उवाच गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं। तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः १ भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ। बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणं २ उलूखलं विकर्षंतं दाम्ना बद्धं च वालकं। कस्येदं कुत आश्चर्यमुत्पात इति कातराः ३ ॥ ॥

यमलार्जुनभंगलक्षणमहिमानमशेषं वक्तुं गोपादीनामिज्ञानसाधनत्वेन भवंतीतिभावेन तन्माहात्म्यमाश्चित्याध्याये निरूप्यते। तत्रादौ पूर्वाध्यायोक्तयमलार्जुनभंगलक्षणमहिमानमशेषं वक्तुं ... अदृष्टमात्र प्रयुक्तं त्यादिना। निर्घातरवशंकिताः मेघनिर्घोषं कस्यापामिप्फलस्तवकं कुत आश्चर्यं सहसा दृश्यमानं अश्रुतं भविष्यदनिष्टसूचकं उत्पात इति कातराः व्याकुलचित्ताः उत्पात इति कातराः इति केचित्पठंति ३ ॥ ॥

द॰ भा॰

द्वौपुत्रयोस्त्वत्प्रसादेन स्वस्थतः ४ तदुक्तं बालोक्तं ५ ७ उन्मानं प्रसंगं। पांडुकं पादपीठं पादरक्षणं वा ९ नहि हंत भगवाने वा यमवतीर्ण इति ज्ञानतां नारदादीनां ९ तत्रनंदादिषु ११ दूतवत्स्थानत्वं १२ अनस्थशाकटस्थ १३ १४ अस्तोकस्तोकोबालकः कृष्णा दन्यतमो वा बालकोऽन्म्रियेत

२९

बालाकुतूहलेनेतितिरश्चीनमुलूखलं। विकर्षतामल्पयोगेन पुत्रभावव्ययच्छल्लयाद्धि ४ ननेतदुक्तं जगदुद्धर्ष्टघटेतेति तस्पतता। बालस्योत्पात्स्नं तयोः केचित्त्वाहिविधचेतसः ५ उलूखलं विकर्षंतं दाम्ना बद्धं स्वमात्मजं। विलोक्य नंदः प्रहसद्वदनो विमुमोच ह ६ गोपीभिः स्तोभितो नृत्यन्भगवान्बालवत्क्वचित्। उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयंत्रवत् ७ बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकं। बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ८ दर्शयंस्तद्विदां लोक आत्मनो भृत्यवश्यतां। व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ९ गोपवृद्धा महोत्पातानुभूय बृहद्वने। नंदादयः समागम्य व्रजकार्यममंत्रयन् १० तत्रोपनंदनामाह गोपो ज्ञानवयोधिकः। देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ११ उत्थातव्यमितोस्माभिर्गोकुलस्य हितैषिभिः। आयांत्यत्र महोत्पाता बालानां नाशहेतवः १२ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ। हरेश्चानुग्रहान्नूनमनश्चोपरि नापतत् १३ चक्रवातेन नीतोयं दैत्येन विपदं वियत्। शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः १४ यन्न म्रियेत द्रुमयोरंतरं प्राप्य बालकः। असावन्यतमो वापि तदप्यच्युतरक्षणं १५ यावदौत्पातिकोरिष्टो व्रजं नाभिभवेदितः। तावद्बालानुपादाय यास्यामोन्यत्र सानुगाः १६ वनं वृंदावनं नाम पशव्यं नवकाननं। गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं १७ तत्तत्राद्यैव यास्यामः शकटान्युंक्त मा चिरं। गोधनान्यग्रतो यांतु भवतां यदि रोचते १८ तच्छ्रुत्वैकधियो गोपाः सर्वे नंदपुरोगमाः। उपनंदवचो राजन्प्रतिनंद्य ह्यमन्युः १९

तदपि तत्रप्यच्युतरक्षणं। अन्यबालकस्य मरणाभाव १५ औत्पातिक उत्पातलक्षं वधीयांनर्थकरः। इतोऽपि हत्वा। तावन्नतः पूर्वमेव १६ पशव्यं पशुभ्यो हितं। पुण्यपादपः पुण्यवृक्षाः तृणानि विरुधो गुल्मा नियत्त तत्र स्थातद्दीरुधः शब्दो कारांतोऽप्यस्ति। पर्वताद्दीनगासाप्तितिच १७ युंक्त योगं कुरुध्वं १८ ॥ ॥

राम ३९

नोपेयातां समीपं नागतो २० आजोहवी तदाह्वयामास २१ २ व्रजाधिपः नंदगोपः पंथेहिदेहि हे बालकाः २४ धूलिधूसरितांगः धूलिधूसरितः सर्वांगशरीरः २५ २६ स्ववाटं स्वव्रजं २७ तदुपनंदस्य वचनं। एकधियः एकस्मिन्नर्थे गाढबुद्धयः। रूढपरिच्छदाः। शकटाधिष्ठितभांडसाधना २

सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत्। रामं च रोहिणी देवी क्रीडंतौ बालकैर्भृशं १९ नोपेयातां यदाहूतौ क्रीडासंगेन पुत्रकौ। यशोदां प्रेषयामास रोहिणी पुत्रवत्सला २० क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजं। यशोदाजोहवीत्कृष्णं पुत्रस्नेहस्नुतस्तनी २१ कृष्ण कृष्णारविंदाक्ष तात एहि स्तनं पिब। अलं विहारैः क्षुत्क्षांतः ... भोक्तुमर्हसि २२ हे रामागच्छ ताताशु सानुजः कुलनंदन। प्रातरेव कृताहारः क्रीडाश्रांतोसि पुत्रक २३ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः। एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः २४ जन्मर्क्षं तेद्य भविता विप्रेभ्यो देहि गाः शुचिः। धूलिधूसरितांगस्त्वं तात मज्जनमावह २५ पश्य पश्य वयस्यांस्ते मातृमृष्टान्स्वलंकृतान्। त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः २६ इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप। हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयं २७ अथ नंदः समाहूय गोपानिदमभाषत। श्रीतो वृंदावनं यामो यद्वा भवथ मा चिरं। तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः। रथान्स्वान्स्वान्समायुत्य यथारूढपरिच्छदाः २८ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च। अनःस्वारोप्य गोपाला यत्ता आत्तशरासनाः २९ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वतः। तूर्यघोषेण महता ययुः सहपुरोहिताः ३० गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः। कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः ३१ ॥ ॥

अनस्सु शकटेषु २९ ३० नूत्नकुचेषु कुंकुमादिकांतिर्यासां ताः तथा निष्ककंठ्यः कंठभूषणोपेताः ३१ ॥ ॥ ॥

द॰पू॰

अर्द्धचंद्रवता अर्द्धचंद्राकारवत ३३ ५ अविदूरे समीपे ३६ क्षेपणैः अश्मयंत्रैः पादैः पादैः। कृत्रिमगोवृषैर्मह्यात्रुत्कृतगोवृषैः ३७ वृषाय

४०

तथा यशोदा रोहिण्यावेकं शकटमास्थिते। रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ३२ वृंदावनं संप्रविश्य सर्वकालसुखावहं।
तत्र चक्रुर्व्रजावासं शकटैरर्द्धचंद्रवत ३३ वृंदावनं गोवर्द्धनं यमुनापुलिनानि च। वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ३४ एवं व्रजौ
कसां प्रीतिं यच्छंतौ बालचेष्टितैः। कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ३५ अविदूरे व्रजभुवः सह गोपालबालकैः। चारयामासतुर्व
त्सान्नानाक्रीडापरिच्छदौ ३६ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित्। क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः ३७ वृषाय
माणौ नर्दंतौ युयुधाते परस्परं। अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ३८ कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः। वयस्यैः
कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ३९ तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः। दर्शयन्बलदेवाय शनैर्मुग्ध इवासदत ४० गृ
हीत्वापरपादाभ्यां सहलांगूलमच्युतः। भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितं ४१ स कपित्थैर्महाकायः पात्यमानैः पपात ह। तं वी
क्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ४२ देवाश्च परिसंतुष्टाः बभूवुः पुष्पवर्षिणः। तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ४३

माणौ वृषवद्वर्तमानौ। नर्दंतौ वृषभशब्दं कुर्वंतौ। अनुकृत्य विडंब्य ३९ ४० अपरपादाभ्यां प्राहिणोत चिक्षेप ४१ कपित्थैः कपित्थ
शाखायुक्तफलैः ४२ वृक्षोपरि ४३ ॥ ॥

राम
४०

सप्रातराशौ प्रातर्भोजनसहितौ ४४ जलाशयं जलस्थानं महासरइत्यर्थः। स्थाने मिषाय अशाय इति महासत्त्व। महासत्त्वं पराक्रमो व्यवसायो व्यवसात
थात् सत्वो स्त्री जंतुषु क्लीवे व्यवसायेपराक्रमे। आत्मभावे पिशाचे च वरदे द्रव्यस्वभावयो रितियादवः ४५ स महासत्त्वो महासुरो वै एव वसुरेवं तु पुनर्बेतित्ववधार
एवाच्चका इत्यमरः ४६ विचेतसः ज्ञानहीनाः पाषाणकल्पाः ४७ जगद्गुरोर्हिरण्यगर्भस्य पितरं अक्षतं पुनरपि रुषा तुंडद्वयेन कृष्णं हंतुं अभ्यपद्य

सप्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः। स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ४४ गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलं। ते तत्र ददृशुर्बा
ला महासत्वमवस्थितं ४५ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिव च्युतं। स वै बको नाम महानसुरो बकरूपधृक् ४६ आगत्य सहसा कृष्णं तीक्ष्णतुंडोऽग्र
सद्बली। कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः। बभूवुरिंद्रियाणीव विना प्राणं विचेतसः ४७ तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं
जगद्गुरोः। चच्छर्द सद्योऽतिरुषाक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ४८ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः। पश्यत्सु
बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां ४९ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः। समीडिरे चानकशं
खसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ५० मुक्तं बकास्यादुपलभ्य बालका रामादयः प्राणमिवेंद्रियो गणः। स्थानागतं तं परिरभ्य निर्वृताः
प्रणीय वत्सान्व्रजमेत्य तज्जगुः ५१ श्रुत्वा तद्विस्मिता गोपा गोप्यश्चातिप्रियादृताः। प्रेत्यागतमिवोत्सुक्यादैक्षंत तृषितेक्षणाः ५२ ॥

त ४८ कंसस्योपादानं रणं वीरणं श्रीरतं विदुरिति ४९ विसिस्मिरे विस्मिताः ५० पूर्वस्थितमाश्रमस्थानं प्रणीय नीत्वा। तज्जगुः सुरहिंस
नलक्षणं कृष्णचरितं ५१ औत्सुक्यं अतिशयेन प्रियेण आदरेण युताः। तृषितेक्षणाः अलं तुष्टिरहितनेत्राः ५२ ॥ ॥

बालखेदेयतः अप्योभयंते नाविविधियं कृतमासीद् इत्यपि च्छिद्यापि तथापि एते एवं नाभिभवंति यस्तु तज्जिघांसयाहननेच्छया एनमाससाद अग्रोपतंगद् वशाल
भरवनप्रपेति ५४ उक्तप्रेणाब्रह्मज्ञानमेवापाद्यमितिभावेनाह अहो इति अस्मत्यानाभूदस्मितिकृतो ज्ञायत इति तत्राह गार्ग इति ५५ भववेदनां संसारदु
खं ५६ कौमारैः कुमारावस्थासंबंधिभिः विहारैः क्रीडाविशेषैः कौमारं जहौ कृष्णः। तत्रापंचमाद्वात्यं आनवं वर्षात्पौगंडमाषोडशवर्षात्कैशोरं। कश्चि
त्स्वभमूले निलीयतिष्ठत्यन्यस्तं अन्विष्यतं दृष्ट्वा गृह्णातीति या क्रीडा तन्निलायनं। इत्तेनश्च शरीरेणवा सृष्टिकर्याबाजलनिवारणसेतुबंधः। यथामर्क

अहो वत स्वबालस्य वहवो मृत्यवोऽभवन्। अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयं ५३ अथाप्यभिभवंत्येनं नैव ते घोरदर्शनाः। जिघांस
येनमासाद्य नश्यंति वह्नौ पतंगवत् ५४ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित्। गर्गो यदाह भगवानन्वभावि तथैव तत् ५५ इति नंद
दयो गोपाः रामकृष्णकथा मुदा। कुर्वंतो रममाणाश्च नाविंदन् भववेदनां ५६ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे। निलायनैः सेतुबं
धैर्मर्कटोत्प्लवनादिभिः ५७ इतिश्रीभागवते महापुराणे दशमस्कंधे जिघांसुबकासुरवधो नाम द्वादशोध्यायः श्रीशुक उवाच
ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसम्मतौ। गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं पुण्यमतीव चक्रतुः १

टो वानरो विटपाद्विटपांतरं उत्प्लवतीति उत्प्लवनं तथा क्रोशेऽभंग भृंगित्रिकोनं शिशुमारएकारोपरिशिरश्चिपरं निधायपतनमुत्प्लवनं पांसुभिर्नोमणिं नि
धायतदुपरि हस्तं निदधाति एकः एकश्चविघ्यरहृह्णातीतिआदिशब्दगृहीतं ५७ इतिदशमे द्वादशोध्यायः श्रवणाननतोप्यांदुरितहरणाय
हरेः पौगंडवयसि क्रियमाणं विक्रमं निरूपयत्यस्मिन्नध्याये। ततः कौमारात्पौगंडवयः नववर्षलक्षणं वयः श्रितौ प्राप्तौ पशुपालतत्वेन सम्मतौ गोपौ
१ ॥ ॥

उदीरयद्भ्रुः यत्र। कुसुमाकरं कुसुमोत्पत्तिस्थानं २ मंजवः मनोहराः घोषा येषां अलयश्च भृंगाश्च द्विजाश्च मंजुघोषैः अलिमृगद्विजैः आकुलां म
हतां नारायणचरणारविंदानि अंतरमनसां मनः प्रख्यपयः सरस्तत्य निर्मलं पयोजलं यस्य तत्तथा। महन्मनःप्रख्यपयः यत्सरो महन्मनःप्रख्यपयः सरस्त
दस्त्यस्मिन्निति महन्मनःप्रख्यपयःसरस्वान् तेन। शतपत्राणां पद्मानां गंधोस्यास्तीति शतपत्रगंधी तेन वातेन वायुना ३ पल्लवारुणाश्रियावृक्षयोः पाद्योः
प्रसूनोरुभारेणस्पृशंत्यः। शिखा एवकराग्रकोटयो येषां ते तथा। तान् वनस्पतीन् दृष्ट्वा रहस्यान्धुन भक्तिभरभग्नग्रीवाः पुष्पाः यथा पुष्पनिचया [illegible] मुकुंद

तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः। पशून्पुरस्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनं २ तन्मंजुघोषा
लिमृगद्विजाकुलं महन्मनःप्रख्यपयःसरस्वता। वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ३ सतत्र तत्रारुणपल्लवश्रियाफ
लप्रसूनोरुभरेण पादयोः। स्पृशच्छिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ४ श्रीभगवानुवाच अहो अमी देववरा
मरार्चितं पादांबुजं ते सुमनःफलार्हणं। नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतं ५ ॥ ॥

चरणारविंदं नमंति। तथाश्रुता श्च पुष्पभरोपनत शाखाकराग्रैः पूजयंतीत्याह शिखाः शेषार्थो वोद्धव्यः ४ इममेवार्थं विशदयति। अहो इति देववरा
यद्वा देववराः ब्रह्मादयः अमरा देवाः। एतैरर्चितं सुमनःफलार्हणैः पुष्पफलोपायनैः। आत्मनः स्वस्य तमोपहत्यै अज्ञाननिमित्तपापनिरासाय तरु
जन्म येन तमो निमित्तपापेन ५ ॥ ॥

यतो मध्यादेवा दयोमनुष्यलिंगमवाप्य भवंतं सेवंते। तथा एते भ्रमरा अपि ते धेते पुतस्मात्व चरणपद्मसेवान वरतं न त्यजंत्या मुमुक्षवः इति भावेनाह। एतइति। अलिनो भ्रमराः। भ्रमराणां पद्मसूलमलमाकुर्मनी मिणइति च। अखिल लोक तीर्थं सम स्त जनस्य मानल हरणं कीर्तनपोगं मुक्ति जनन स्थानीयं। शास्त्रेपि भसि पावने इति च। यद्वा अखिल अनल्पः लोकः प्रकाशः ज्ञानं येषां तेषां तेषां सेवापोग्यशास्त्रस्थानीयं। लुक्रुप्रकाशइति धातुः। अनुपथं। पथगाता विविधा नुः। यत्र गछसि त्वं तत्रानुगमनलक्षणसेवां कुर्वंतीत्यर्थः। अनुपदं वा मुनिगणाः सर्वज्ञानां देवादीनां गणाः वेदावेद्यस्य सर्वस्य मुनिः सान्द्रिरदाद्त इत्युत्सल मा ला। तदीयेषु वैष्णवेषु मुख्याः गूढमनुष्यलिंगाधरं अहत्यजंति। ॐ हा हूत्यागइतिधातुः। जहतीति पाठे वा व्यत्ययो वहुलमिति सूत्रात्रिशंधिः। अमरा एव मा लानदीयेषु वैष्णवेषु मुख्याः आत्मदैवमिति पाठे अनघानां निर्दुःखानां मुक्तानां मात्मदैवं मुक्तानां परमा गतिः। दुःखैनोव्य सेनेप्र घाविन्य मरः। अनघेति पृथक्पदं वा। आत्मदैवं कुलदैवं। अनघात्मदैवमिति पाठे अनघानां निर्दुःखानां मुक्तानां मात्मदैवं मुक्तानां परमा गतिः। हरिण्यः मृगस्त्रियः अन्यत्र हिरण्मयवक्षसेन सा ज्वलंतः। आसमा प्रवेक्षमतिदिशातिनृत्यंतीति। शिखिनो मयूराः। अन्यत्र केशाधि धाधारिणः तापसाः। हरिण्यः मृगस्त्रियः अन्यत्र हिरण्मयवक्षसेन सा ज्वलंतः। आसमा

एतेलिनस्तव यशोखिललोकतीर्थं गायंत आदिपुरुषानुपथं भजंते। प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेपि न जहत्यनघात्मदैवं ६

नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन। सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान् हि सतां निसर्गः ७

रोक्षीतिहरिण्यःपरोपदेशसंबंधेन हरिभक्तजनतापहरिण्य इत्युच्यंते। महेशात ज्ञानमछिद्रेन्योन्न मिच्छेत्त्वनार्दनात् इतिस्मृतेः। हरिणी सा हिरण्मयी त्वचि वा तां तेन वेक्षणेनप्रियं कुर्वंति। कोकिलगणाश्च सूक्तैः कर्णरम्यैर्वचनैः प्रियं कुर्वंतीति। अन्यत्र कोकिला ब्रह्मानुशीलः तयोः किलवार्ता कीर्तनं संभावनायां पतेतेको किला इदानींपरस्परं तरतर प्राणिरक्षार्थं प्राणधारिणः। नन्वात्र्थपिरमभागवता इत्यर्थः। सोर्ग्रन्या यः गृहमागताय। पतिथयेत् हिरण्यधर्मपाद्यादिकं दातव्यमिति यस्मात् स्मात् वनौकसोप्यायोवावानप्रस्थादयो वा धन्याः कृतार्थाः स्वसंनिवासमागतं त्वां संभाजयंति। अयं सतां जातिस्वभाव इत्याह। सतां निसर्गः चित्तरां स्वभा वः। इयानेतावान् हि यस्मात्। स्माहितवृत्तिमिति भावः। वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहात्। तस्यैतां शांतिं कुर्वंति हर वैवस्वतोदकं। आशा प्रतीक्षे संगतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्। एतद्वृंक्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे इति। वार्ता संभावयोः किलेति यादवः। ईड्य सर्वकर ७ ॥

द्वाभ्यां एवं विधमाहात्म्यः वृंदावनमवाप्य रेमे इत्यन्वयः। अद्रेः पादेषु सरितो नद्याः रोधःसु तीरेषु पशून्संचारयन् ८ इति प्रकारं दर्शयति क्वचिदिति। अनुव्रतैरनुचरैः सखिभिः संकर्षणेन चान्वितः अनुगतः ९ हासयन्हासं जनयन् १० नामभिः प्रसृतिवारसुमुक्तादिलक्षणैः गवां गोपालानां मनोंतःकरणं ज्ञापयत्या बोधयंत्या मनोरमणया वा ११ व्याघ्रशार्दूलसिंहयोः सकाशाद्भीतवत्स्वयमपि भीतो भवति १२ नोपस्य उत्संगो

एवं वृंदावनं श्रीमत्प्रीतमनाः पशून्। रेमे संचारयन्नद्रेः सरिद्रोधःसु सानुगः ८ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः। उपगीयमानचरितः सखिसंकर्षणान्वितः ९ क्वचिच्च कलहंसानामनुकूजति कूजितं। अभिनृत्यति नृत्यंतं बर्हिणं हासयन्क्वचित् १० मेघगंभीरया वाचा नामभिर्दूरगान्पशून्। क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ११ चकोरक्रौंचचक्राह्वभारद्वाजांश्च बर्हिणः। अनुरौति स्म सत्वानां भीतवद्व्याघ्रसिंहयोः १२ क्वचित्क्रीडापरिश्रांतं गोपोत्संगोपबर्हणं। स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः १३ नृत्यतो गायतो वापि वल्गतो युध्यतो मिथः। गृहीतहस्तौ गोपालान्हसंतौ प्रशशंसतुः १४ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्षितः। वृक्षमूलाश्रयः शेते गोपोत्संगोपबर्हणः १५ पादसंवाहनं चक्रुः केचित्तस्य महात्मनः। अपरे हतपाप्मानो व्यजनैः समवीजयन् १६ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः। गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः १७ ॥ ॥

कमप वउपबर्हणं शिरःपीठं यस्य सतथा तं। आर्यं ज्येष्ठं पादसंवाहनादिभिः विश्राम यति क्रीडाश्रमके श्रमं नाशयति १३ रामकृष्णौ नर्त्तनादि कुर्वाणान् गोपालान् नृत्यादिविषये वदिग्र येष्ठ प्रशशंसतुः। वल्गना दिविषये हसंतौ वल्गतः उल्लवतः १४ नियुद्धं बाहुयुद्धं तस्मिन् श्रमः १५ १६ महात्मनः कृष्णस्य मनोहराणि। स्नेहेनाक्लिन्ना आर्द्रा धियो येषां ते तथा १७ ॥ ॥

बाललीलामुपसंहरति एवमिति। स्वमायया यथास्वेच्छयैव निगूढात्ममतिः प्रच्छन्नस्वरूपानुभवः। अन्यापेक्षयेति शेषः। ग्राम्यैः मूर्खजनैः किमर्थमेवं कृ
तमत्राह ग्राम्यवदिति। धर्म इति शेषः १८ शुकः परीक्षितमाह। धन्येयमिति। कस्मात् इत्यत आह। तृणवीरुध इति। तस्य कृष्णस्य पादस्पृष्टा तितन्याद
स्परणाः। करजैर्नखैः। अभिमृष्टाः अभितः स्पृष्टास्ता इत्यर्थः। नद्याद्रयो दयया सहितैः खलोकैरवलोकिताः। गोप्यः श्रीर्यद्भुजयोरंतरं वक्षःस्थलं स्पृहयतीति
यत्स्पृहा तस्मिन् भुजयोरंतरेण महस्मे आलिंगिताः इति यत्तस्मादियं पृथिवी तज्जाताः पदार्थाश्च धन्या इत्यर्थः १९ एवं वकार्यार्थमवतीर्णेऽपि एणतः छं ब्रवन्तुं

एवं निगूढात्ममतिः स्वमायया गोपात्मजत्वं चरितैर्विडंबयन्। रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः १८ धन्येयमद्य धरणि
तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः। नद्योऽद्रयः खगमृगाः सदयावलोकैर्गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः १९ श्रीदा
मानाम गोपालो रामकेशवयोः सखा। सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् २० राम राम महाबाहो कृष्ण दुष्टनिवर्हण। इतोऽविदू
रे सुमहद्वनं तालालिसंकुलं २१ फलानि तत्र भूरीणि पतंति पतितानि च। संति किंत्ववरुद्धानि धेनुकेन दुरात्मना २२ सोऽतिवीर्योऽसुरो राम हे
कृष्ण खररूपधृक्। आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः २३ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन्। न सेव्यते पशुगणैः पक्षिसंघैर्विव
र्जितः २४ ॥

उपक्रमते। श्रीदामेति। सुबलस्तोकाद्या येषां तेन तथा तान् २० दुष्टनिवर्हण दुष्टजनोन्मूलन। अविदूरे निकटे। तालानां आल्या पंक्त्या संकुलं निविडं
२१ तत्र खरतालवने। फलानि परिपाकं प्राप्तानीति नेत्याह। पतितानीति। संवृतान्यानीय भूमिं तितत्राह। किंत्विति २२ तीव्रः क्रूरः खररूपं गर्दभदे
हं धारयतीति खररूपधृक्। आत्मतुल्यायश्चेत्रिः कासनीयइतिनेत्याह। आकोति २३ कृतः नराणामाहारो येन स तथा तस्मात् २४ ॥ ॥

तृपिरमुक्तपूर्वाणि विशेषकसर्वत्रांचतीति विषूचिनः सर्वत्र व्याप्नुमान इत्यर्थः। विशेषेण गृह्यते घ्राणेंद्रियेणेति शेषः २५ लोभस्त्याकांक्षालुभगार्ध्ये।
इत्युच्यते निकांक्षायामिति धातुः २७ कांक्षा चेत्कालांतरेऽस्त्वित्याशंक्य इतित त्राह वांछेति २६ मतंगजः वारणः। ओजसा वलेन अन्वपश्चं भेनवा। ओजोत्र वर्षमव
लपोरितिच २७ रासभः गर्दभैः पक्षितैश्चसहितं २८ काशब्दं गर्दभजातिजां कारनिष्ठुरं शब्दं। पर्यसरत् परितो वर्तत ३० उपक्रोष्टुः। क्रोशतिरव

विद्यंतेऽभुक्तपूर्वाणि फलानि सुरभीणि च। एष वै सुरभिर्गंधो विषूचीनोऽविगृह्यते २५ प्रयच्छ तानि नः कृष्ण गंधलोभितचेतसां। वांछास्तीन्मह
ती राम गम्यतां यदि रोचते २६ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया। प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू २७ बलः प्रविश्य बाहुभ्यां ता
लान्संपरिकंपयन्। फलानि पातयामास मतंगज इवौजसा २८ फलानां पततां शब्दं निशम्यासुररासभः। अभ्यधावत्क्षितितलं सनगं परिकं
पयन् २९ समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां बलं बली। निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ३० पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः। च
रणावपरौ राजन्बलाय प्राक्षिपद्रुषा ३१ स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना। चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं ३२ तेनाहतो
महातालः पतमानो बृहच्छिराः। पार्श्वस्थं कंपयन्भग्नः स चान्यं सोऽपि चापरं ३३ बलस्य लीलयोत्सृष्टखरदेहहताहताः। तालाश्चकंपिरे सर्वे म
हावातेरिता इव ३४ ॥ ॥

क्षेपार्थं। ज्ञेयं पराक्स्थितः पाश्चात्यमुखः ३१ प्रपदोः पादयोः भ्रामणेन परिभ्रमणकरणेन ३२ तेन खररूपासुरशरीरेण बलेन पार्श्वस्थं तालं कंपय
न् भग्नः भुक्तिराम सचपार्श्वस्थः अन्यं तालं सोऽन्योऽप्यपरं तालमित्येवं परंपरया ३३ बलस्य लीलया कर्मणा उत्सृष्टेन उक्षिप्तेन खरदेहेन हतताला
हताः ३४ ॥

द० स्क०

४४

अस्यास्य विचित्रापि रामस्यैतत्कर्म चित्रं न भवतीति शुकः परीक्षितमाह नैतदिति। हि शब्दोऽत्राखिलेयं तंतुसर्वयात्मनी विश्वमिदं द्योतयति ३५ क्रोष्टारः
शुकाः नरः तास्त्रीलिकस्मन्नयः। अन्नातिरवं कुर्वाणा वा ३६ । फलप्रकरसंकीर्णं नालस्य शृंगैर्व्याप्ता ३८ तयोः रामकृष्णयोः ३९ आदृश्म
क्षितवंतः ४० । गोरजसा छुरितकुंतलैः छुरितकेशपाशैः वद्धानि वर्हवन्यप्रसूनानि पिच्छवनपुष्पाणि यस्य स तथा। रुचिरेक्षणे चारु हासश्च यस्य स तथा।

नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ३५ ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये। क्रोष्टारोऽभ्यद्रव
न्सर्वे संरब्धा हतबांधवाः ३६ तांस्तानापततः कृष्णो रामश्च नृप लीलया। गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णं
दैत्यदेहैर्गतासुभिः। रराज भूः सतालाग्रैर्घनैरिव नभस्तलं ३८ तयोस्तत्सुमहत्कर्म निशम्य विबुधादयः। मुमुचुः पुष्पवर्षाणि चक्रुर्वा
द्यानि तुष्टुवुः ३९ अथ तालफलान्यादन्मनुष्या गतसाध्वसाः। तृणं च पशवश्चेरुर्हतधेनुककानने ४० कृष्णः कमलपत्राक्षः पुण्यश्रवण
कीर्तनः। स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत् ४१ तं गोरजश्छुरितकुंतलबद्धवर्हवन्यप्रसूनरुचिरेक्षणचारुहासं। वेणुं क्वणंत
मनुगैरुपगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ४२ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि। तत्स
त्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षं ४३ ॥ ॥

गोरजः छुरितकुंतलं वद्धवर्हवन्यप्रसूनश्च चारु रुचिरेक्षणश्च चारुहासश्च यस्य स तथा ४२ मुकुंदस्य मुखमेव सारघं मधु। सरघा योगं सारघं।
सरघा मधुमक्षिका प्रोक्ता इति हलः। अक्षि विरहजं तापं या सा मर्पांगमोक्षः कटाक्षनिरीक्षणं व्रीडया सहितः सव्रीडः सव्रीडश्चासौ हासश्च सव्री
डहासस्तस्य विनयो राहित्यं विशेषेण प्राप्तिश्च यस्य स तथा तासां सत्कृतिं सत्कारं समधिगम्य प्राप्य ४३ ॥ ॥

राम

४४

मज्जनं स्नानं। उन्मर्दनं शरीरमलोद्वर्तनं। नीवीवस्त्रं वसित्वाच्छाद्य ४५ प्राश्य पीत्वा ४६ इदानीं कथांतरं कृष्णमुपक्रमते। एवमिति ४७ निदा
घातपः ग्रीष्मर्तुभवरविकिरणभवउष्णविशेषः तेन पीडिताः ४८ उपस्पृश्य आचम्य पीत्वा ४९ तथाभूतान्मृतप्रायान् ईक्ष्य पा दृष्ट्वा ५० संप्रतीत
स्मृतयः सम्यक्प्राप्तप्रत्यभिज्ञानाः ५१ । विषं विषमिश्रजलं पीत्वा परेतस्य मृतस्यात्मनः पुनरुत्थानं गोविंदस्यानुग्रहछुरुनिरीक्षणकृतममंसत

तयोर्यशोदारोहिण्योः पुत्रयोः पुत्रवत्सले। यथाकालं यथायोगं व्यधत्तां परमाशिषः ४४ विगताध्वश्रमौ तत्र मज्जनोन्मर्दनादिभिः। नीवीं
वसित्वा रुचिरां दिव्यस्रग्गंधमंडितौ ४५ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ। संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ४६ एवं स भ
गवान्कृष्णो वृंदावनचरः क्वचित्। ययौ राममृते राजन्कालिंदीं सखिभिर्वृतः ४७ अथ गावश्च गोपाश्च निदाघातपपीडिताः। दुष्टं जलं पपु
स्तस्यास्तृष्णार्ता विषदूषितं ४८ विषांभस्तदुपस्पृश्य दैवोपहतचेतसः। निपेतुर्व्यसवः सर्वे सलिलांते कुरूद्वह ४९ वीक्ष्य तान्वै तथाभूतान्कृ
ष्णो योगेश्वरेश्वरः। ईक्षयामृतवर्षिण्या स्वनाथान्समजीवयत् ५० ते संप्रतीतस्मृतयः समुत्थाय जलांतिकात्। आसन्सुविस्मिताः सर्वे वीक्ष
माणाः परस्परं ५१ अन्वमंसत तद्राजन्गोविंदानुग्रहेक्षितं। पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ५२ इति श्रीभागवते महापुराणे
दशमस्कंधे पंचदशोऽध्यायः श्रीशुक उवाच विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः। तस्या विशुद्धिमन्विच्छन्सर्पं तमुद
वासयत् १ ॥

४५

मन्नरूपत् ५२ इति दशमे त्रयोदशोऽध्यायः हरेर्भक्तिमतां संसारविषं निर्वीर्यं भवतीति निदर्शितं अनंतरातीताध्याये संक्षिप्योक्तं काली
यनागमर्दनमहिमानं प्रपंचयत्यास्मिन्नध्याये। तत्र राज्ञः प्रश्नमुत्थापयितुमाह। विलोक्येति। कृष्णां यमुनां कृष्णाहिना कृष्णसर्पेण। उदवास
यत् ततो निष्क्रावासमकारयत् १ ॥ ॥

अगाधेन्यगृह्णात् निगृहीतवान्। बहुयुगा वासी ययाभूत् यथायेन प्रकारेणासीत्। स प्रकारः १ ३ श्रप्यमाणं क्वाथ्यमानं पयोजलं यस्मिन् ह्रदे स तथा। यस्मिन् ह्रदे ४ विप्रुष्मता विशेषेण दहता। उष्मस्पर्शदाहइति धातुः। विषेण विशिष्टमुदं विषोदं तेन युक्ता ऊर्मयः विषोदोर्मयः यस्य स तथा। स चासौ मारुतः विषोदोर्मिमारुतः तेनाभिमर्शिता आहृत्या गृहीताः यस्य ह्रदस्य ५ तेन कालीयेन। खलानां संयमनार्थं नियमार्थं अवतारो यस्य स तथा। आस्फोट्य हि द्विगुणीकृत दृढ प्रहारं कृत्वा। गाढरसनः। दृढबद्धकेशः विषोदे विषमिश्रितजले ह्रदे इति शेषः ६ सर्पस्य निवासभूत

राजोवाच कथमंतर्जलेगाधेन्यगृह्णाद्भगवानहिं। स वै बहुयुगावासी यथासीद्विप्र कथ्यतां १ ब्रह्मन् भगवतस्तस्य भूम्नः स्वच्छंदवर्तिनः। गोपालोदारचरितं कस्तृप्येतामृतं जुषन् २ श्रीशुक उवाच कालिंद्यां कालियस्यासीत् ह्रदः कश्चिद्विषाग्निना। श्रप्यमाणपयो यस्मिन् पतंत्युपरिगाः खगाः ४ विप्रुष्मता विषदोर्मिमारुतेनाभिमर्शिताः। म्रियंते तीरगा यस्य प्राणिनः स्थिरजंगमाः ५ तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः। कृष्णः कदंबमधिरुह्य ततोतितुंगादास्फोट्य गाढरसनो न्यपतद्विषोदे ६ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः। पर्यक्प्लुतो विषकषायविभीषणोर्मिभीमो धनुःशतमनंतबलस्य किं तत् ७

तद्ह्रदः सर्पह्रदः पुरुषसारस्य पुरुषवरस्य पुरुषश्रेष्ठस्य पुरुषोत्तमस्येत्यर्थः। निपातवेगेन संक्षोभितस्य चालितस्य अत एव उच्छ्वसितं क्षिप्तं उरगस्य विषेण सह उच्छ्वसितः उद्वेलितः अंबुराशिर्यस्य ह्रदस्य स तथा। विषकषायेण विषक्वाथेन विषरागेण वा विभीषणोर्मिभिः भयंकरतरंगैर्भीमः भयजनकः। रागे क्वाथे काषायो स्त्री निर्यासे सौरभे रसे इति यादवः। एवंविधो ह्रदो धनुःशतं तीरं हस्तानि चत्वारि लंघ्य पर्यक्प्लुतः परितः उद्गत्य गतः हरेरेतत्र चित्रमित्याह। अनंतबलस्येति। लक्ष्मीपतेरनंतविस्तारं यामपरिमितभूस्तवेनं पिनष्टि किंतु धनुःशतमित्यर्थः ७ ॥ ॥

अंगवरवारणविक्रमस्य गजेंद्रविक्रमस्य यद्वा अंगे रवयवैः वरा गीयस्य वारणस्य विक्रम इव विक्रमो यस्य स तथा। तस्य हरेर्भुजदंडाभ्यां घूर्णितस्य अंब्वाः ध्वनितया ह्रदस्य वारः जलस्य घोषमाश्रुत्य तस्मात् स्वसदनाभिभवोपमस्वमृष्यमाणः असहमानः चक्षुःश्रवाः सर्पः तं कृष्णं समसरत्। समसरत् वाध्यभिमुखमागतवानित्यर्थः। वरोनारूपतामीत्वोर्व्यादेरीप्सितेवृतइति ८ अवदातः श्यामलः अवदातो रुणो पीते श्वेते श्यामे निरमय इति च।

तस्मिन् ह्रदे विहरतो भुजदंडघूर्णवार्घोषमंगवरवारणविक्रमस्य। आश्रुत्य तत्स्वसदनाभिभवं सैन्यश्चक्षुश्रवाः समसरत्तदमृष्यमाणः। तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं। क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्मसु रुषा भुजगश्छादर ९ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः। कृष्णेर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः १० गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः। कृष्णे न्यस्तेक्षणा भीता रुदंत्य इव तस्थिरे ११ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः। उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः १२ तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोगमाः। विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतं १३ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः। तत्प्राणास्तन्मनस्कास्ते दुःखशोकभयातुराः १४ आबालवृद्धवनिताः सर्वेंग पशुवृत्तयः। निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः १५ ॥ ॥

चछाद आच्छादितवान् आवृतवानित्यर्थः ९ परिवीतं परिवेष्टितं। अदृष्टचेष्टं निश्चेष्टं १० वत्सतर्यः गर्भाधानयोग्यवयसः ११ त्रिविधा इत्युक्तं विवृणोति दिवीत्यादिना त्रिविधा उत्पाताः आदित्यमंडले कबंधादिदर्शनं। निर्घाता दिग्भुवि कंपादिकं। आत्मनि देहे वामनेत्रस्फुरणादि। आसन्नभयशंसिनः समीपभयसूचकाः १२ पशुवत् दृष्टिर्येषां ते तथा दृष्टमात्रव्यवहारिणः १५ ॥ ॥

दं॰स्कं॰ माधवो मधुकुलोद्भवः १६ भगवल्लक्षणैर्हरेः पदाब्जादिलक्षणोपेतैः पदैः स्वराणाम्यासैः । सूचित पादस्थ चयं तत्पापदव्या मार्गेण १७ ते शब्दादयस्त्व
नतुकं विश्रृणोति । तत्रादित्य बीजी हि विशेषः । अशनिर्वज्रं । दंभोलिरशनिर्द्वयोरित्यमरः । विश्पतेः प्रजापतेः कृष्णस्य । गवां मार्गे कृष्णपादेनान्यस्य
गोपस्यान्यासां गवां पादेनांतरांतरे मध्ये मध्ये मिश्रितेत्यर्थः । गवां पादेनान्यपदेन वज्रादिलक्षणेन पदेनांतरांतरे मध्या विनाभूतेषु १८ जलाश
यांते ह्रदसमीपे परितः स्थितान् गोपादीनुपलभ्य परमं कश्मलं मोहं १९ तस्य कृष्णस्य सौहृदं च स्मितं च विलोकश्च गिरश्च तत्सौहृदस्मित विलोक

४६

नेत्रेष्वमाणाद् यितं सं सूचितपापंडैः । भग
तांस्तथा कातराद्वीक्ष्य भगवान् माधवो बलः । प्रहस्य किंचिन्नोवाच प्रभावज्ञोऽनुजस्य सः १६ तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः । भग
वल्लक्षणैर्जग्मुः पदव्या यमुनातटं १७ ते तत्र तत्राब्जयवांकुशाशनिध्वजोपपन्नानि पदानि विश्पतेः । मार्गे गवामन्यपदांतरांतरे निरीक्षमा
णा ययुरंग सत्वराः १८ अंतर्ह्रदे भुजगभोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते । गोपांश्च मूढधिषणान्परितः पशूंश्च संक्रंद
ताः परमकश्मलमापुरार्ताः १९ गोप्योऽनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः । ग्रस्तेऽहिना प्रियतमे भृशदुःखत
प्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकं २० ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः । तास्ता व्रजप्रियकथाः
कथयंत्य आसन् कृष्णानने र्पितदृशो मृतकप्रतीकाः २१ ॥ ॥

कृ॰

गिरः ताः स्मरंत्यः । प्रियव्यतिहृतं विरहितं २० अपत्यं अनुप्रविष्टां आत्मना पुरः स्थितह्रदे प्रविष्टां शरीरेणांतीरे स्थितां कृष्णमातरं यशोदां सम
नुगृह्य परिरभ्य यशोदादुःखतुल्यव्यथाः । शुचः शोकाश्रूणि स्रवंत्यः बाष्पधारया नदीकुर्वत्यः याः पूर्वं व्रजप्रियस्य कृष्णस्य कथाः कथयं
त्यः आसन् ता अधुना व स्थाः कृष्णाननेऽर्पितनेत्राः गोप्यो मृतकप्रतीकाः चित्रार्पिता इव नेति शेषः २१ ॥ ॥

राम
४६

कृष्ण एव प्राणो येषां ते तथा तान् ह्रदं दंनिर्विशतः प्रवेष्टुकामान् २२ आज्ञाय ज्ञात्वा उरगबंधात्सर्पकृतबंधनात् उत्तिष्ठन् । उत्थितोऽभूत् २३
भगवत्युत्थिते सर्पः किं कृतवान् इत्यत्राह । तत्प्रथ्यमानेति । तेन कृष्णेन प्रथ्यमानवपुषा वर्ध्यमानशरीरेण व्यथितः आत्मभोगः स्वशरीरं यस्य स त
था अत एव कुपितो तत एव श्वसन् दीर्घश्वासं कुर्वन् श्वसनरंध्रेण नासिकाछिद्रे विषांबरीषं विषभ्राष्ट्रं यस्य स तथा । क्लीवेंबरीषं भ्राष्ट्रो नाकदुर्नास्ति इति
तिचइत्यमरः । स्तब्धेक्षणेउल्मुकमुखेश्च स्तब्धे ईक्षणे उल्मुके मुखे यस्य स तथा । अंगारे लातउल्मुकं इत्यमरः । एवं विधो भुजगो हरिमीक्षमाणस्तस्थौ

कृष्णप्राणान्निर्विशतो नंदादीन्वीक्ष्य तं ह्रदं । प्रत्यषेधत्स भगवान्रामः कृष्णानुभाववित् २२ इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्री
कुमारमतिदुःखितमात्महेतोः । आज्ञाय मर्त्यपदवीमनुवर्त्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात् २३ तत्प्रथ्यमानवपुषा व्यथितात्म
भोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान्भुजंगः । तस्थौ श्वसन् श्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः २४ तं जिह्वया
द्विशिखया परिलेलिहानं द्वे सृक्किणी ह्यतिकरालविषाग्निदृष्टिं । क्रीडन्नमुं परिससार यथा खगेंद्रो बभ्राम सोऽप्यवसरं प्रसमीक्षमाणः २५
एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरस्स्वधिरूढ आद्यः । तन्मूर्द्धरत्ननिकरस्पर्शातिताम्रपादांबुजोऽखिलकलादिगुरुर्ननर्त्त २६

न॰

वित्यत्रयः २४ तं अमुं सर्पं परिससार परितश्चचार । द्वे सृक्किणी ओष्ठप्रांतभागौ स सर्पोऽप्यवसरं तिर्यग्वाक्चन्नबभ्राम चतुर्दिशं परिवर्तमानो भूत्
२५ हतौजसं हीनबलं आनम्य आनमय्य प्रह्वीकृत्य । अखिलकलस्पर्शस्याधिगुरुः परमगुरुः अखिलकलानामधिको गुरुः । रक्तिरागशील इति भा
वः इदं विषोपसर्गनाशार्थमुक्तं २६ ॥ ॥

उपसेदुः उपस्थिताः २७ गरकालशीर्ष्णः विषेणनीलशिरसः सर्प्पस्य तत्। मूर्च्छा तु कश्मलं मोह इत्यमरः २८ शिरस्सु मध्ये यद्यच्छिरः समुन्नमति तच्छि
रः अनुनमयन्दमयांचकार २९ अंघ्रिपातविशेषेण रुग्णं भग्नं। अरणं शरणं ३० क्षीरसागरशायी यस्तद्गर्भे जठरे जगद्यस्य स गर्भजगत् तस्य कृ
ष्णस्यातिभरेणावसन्नः पीडितः। पार्ष्णिः पादपृष्ठभागोयः तेन कृतेन प्रहारेण परिरुग्णं फणातपत्रं यस्य स तथा तं ३१ पुरस्कृतार्भाः अग्रेस्थितब

तंनर्त्तुमुद्यतमवेक्ष्य तदा तदीयगंधर्वसिद्धमुनिचारणदेववध्वः। प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः २७ य
द्यच्छिरो न नमतेगरकालशीर्ष्णस्तन्ममर्द खलदंडधरोंघ्रिपातैः। क्षीणोबले भगवतोल्बणमाशुवक्त्रात्स्रं वमन्परमकश्मलमापनागः २८
तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसतो रुषोच्चैः। नृत्यन्पदानुनमयन्दमयांबभूव पुष्पैःप्रपूजित तोथ भगवान्पुरुषः पुराणः
२९ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरु वमन्[illegible] परिभग्नगात्रः। स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं
मनसा जगाम ३० कृष्णस्य गर्भजगतोतिभरावसन्नपार्ष्णिप्रहारपरिरुग्णफणातपत्रं। दृष्ट्वाहिमाद्यमुपसेदुरमुष्यपत्न्य आर्त्ताः श्लथद्वसन
भूषणकेशबंधाः ३१ तांतां विपन्नमनसोथ पुरस्कृतार्भाः कायंनिधाय भुवि भूतपतिं प्रणेमुः। साध्व्यः कृतांजलिपुटाः परमस्य भर्तुर्मोक्षेप्सवः श
रणदं शरणं प्रपन्नाः ३२ नागपत्न्य ऊचुः न्याय्यो हि दंडः कृतकिल्बिषेस्मिंस्तवावतारः खलनिग्रहाय। रिपोः सुतानामपि तुल्यदृष्टेर्धत्से
दमं फलमेवानुशंस्यं ३३ ॥ ॥

जनाः परमस्य सर्वाशास्तपत्युर्मोक्षेप्सवः ३२ दंडः शासनं न्याय्यो युक्तः। रिपोः सुतानामिति षष्ठी सप्तम्यर्थे। रिपोः सुतेषु अपि तुल्यदृष्टेः। त्वं तेष्वपेक्षापरा
पराधेषु। दमं दंडं धत्से करोषि यं भक्ताः इति तत्राह। फलमिति। अनुशंस्यमपराधानुरूपं फलं अनुग्रह इत्यर्थः। दंडं करोषि न्याय्यः ३३ ॥ ॥

मन्ये निग्रहः कथमनुग्रहो भवतीत्याहानुग्रह इति। हि शब्द एवार्थे भवतां सर्वेश्वरेण त्वया न अस्माकं अयमनुग्रह एव कृतो न तु विरोधः कु
तः तत्र आह। यस्मात् दंडो सतां असतां खलानां दुष्टकर्म्मणां तामसयोनिप्राप्तानां कल्मषापहः खलु पापपरिहारक एव। अमुष्यास्त्वं कथमत्राह यद्य
दिति। अमुष्य कालीयनाम्नो दंदशूकत्वं तस्मात् इति दंशनशीलयोनित्वमस्तु इति यद्यस्मान्न अस्मात् दसत्वं योगपतया। अतस्तव क्रोधः क्रोधकारणदंडो
पस्य देहिनो नुग्रहः संमतः अस्माभिः प्रतिपन्न इत्यत्र यः। दंडोपि भगवद्वीर्याभ्यां मे सोनुग्रहः कृत इत्यादि स्मृते। भक्तिमत एवायं विशेष इति ज्ञायते
३४ यद्धा दंदशूकत्वमपि तदुःकर्मनिमित्तमपि तु पूर्वजन्मन्यत्युत्कटत्वद्विषयत पश्चात् दिप्र भावोपनतमिति मन्यामहे। अत्युत्कटैः पुण्यपापैरिहैव फ

अनुग्रहोयं भवतः कृतो हि नो दंडो सतां ते खलु कल्मषापहः। यद्दंदशूकत्वममुष्य देहिनः क्रोधोपि तेनुग्रह एव संमतः ३४ तपः सुतप्तं कि
मनेन पूर्वं निरस्तमानेन च मानदेन। धर्मोथ वा सर्वजनानुकंपया यतो भवांस्तुष्यति सर्वजीवः ३५ कस्यानुभावोस्य न देव विद्महे तवांघ्रि
रेणुस्पर्शाधिकारः। यद्वांछया श्रीर्ललनाचरत्तपो विहाय कामान्सुचिरं धृतव्रता ३६ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं।
न योगसिद्धीरपुनर्भवं वा वांछंति तत्पादरजः प्रपन्नाः ३७ ॥ ॥

लमश्नुते। यतो स्य गवादिषाणि शोहत्वदं शनोत्पन्नपापपरिहाराय तव लक्ष्म्यादिसर्वदेवतावांछितसेवाचरणस्य रोजरेणुसंपर्कं इदंशुद्दि
तिभावेन वर्त्तते। तप इत्यादिना। स्वदानादिलक्षणो धर्मः सर्वेषां जीवानां आण स्वतः सर्वत्रिजीवयतीति ३५ तपआदिषु कस्य पुण्यस्यायं भावोयं प्र
भावः। अध्यवसायो वा। कामयंत इति कामाः विषयाः प्रान्त ३६ की दृशा विषया इति भावेनतानाहुः। नना केति। नाकस्य पृष्ठं स्वर्गलोकं इत्यादि
नतं वा विशंतीति। पारमेष्ठ्यं सत्यलोकः। सर्वा भौमं चक्रवर्त्तिपदं। इमाराम्मासः रसयाः सत्यर्थादिइत्यादिलक्षणं रसाधिपत्यं अखिलस्वर्गविभवं। योग
सिद्धीरणिमादिलक्षणाः अपुनर्भवं अपक्कभक्तिलभ्यं मोक्षं अपुनर्भवमात्रं तु हरिसामीप्यभक्त मित्यादि स्मृतेः ३७ ॥ ॥

द०भा०

४८

किंबहुवक्तव्यमितिभावेनाहइतीति। ईशनाथशंकरश्लामिन्यपकृत्वत्समन्तंभवतः साक्षात्कारणंतदापदुरापं। नचज्ञात्वापयदितिकश्चिदेनंनाडेदे इर्विमनसानापिवाचेत्यादिश्रुतेः। साधनसामग्रीमंतरेणदुःप्रापमित्यर्थः। तमसागुणेनजानिर्जन्मयस्यसतथा। अतएवक्रोधवशभाकः। तथाप्प नीशोऽसमर्थः ३८ दंडोपिभगवद्वीर्येणइतिस्मृत्यर्थमात्मनिज्ञापयितुंकृष्णंस्तुवंति। नमस्त्यादिना। भूतावासायेत्यनेनभूतनाशेननाशःस्यादितिदुष्य नइतिशंकांनिवारयति। भूतायेति। सर्वरूपायअनायासभूतस्वायामितिधातुः ३९ अविकारायेत्युक्तंसमर्थयति। अप्राकृतायेति ४० कालायभक्त कामयेवजोकाजनामायकालाश्रयाय। विश्वायत्वाधीनप्रपंचाय। नस्यवि धस्योपद्रष्ट्रे अध्यक्षायतस्यकर्त्रे। अवांतरकारणाय। प्रकृतेर्मूलकारणत

तदीशनाथापदुरापमन्येष्वस्मीजनितःक्रोधवशोप्यनीशाः संसारचक्रे भ्रमतः शरीरिणो यदीप्सितं स्याद्धि भवत्समन्तं ३८ नमस्तुभ्यं भगवते पुरुषाय महात्मने। भूतावासाय भूताय पराय परमात्मने ३९ ज्ञानविज्ञाननिधये ब्रह्मणेऽनंतशक्तये। अगुणायाविकाराय नमस्ते प्राकृताय च ४० कालाय कालनाभाय कालावयवसाक्षिणे। विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ४१ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने। त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ४२ ॥ ॥

निवारयति विश्वहेतवइति। प्रपंचस्यस्थूलकारणाय। विश्वस्यतदधीनत्वाद्विश्वंविष्णुरुदीर्यतइत्यादिस्मृतेः। विश्वाय विराट्पुरुषाय। कर्त्रे विश्वस्यो त्पादनमायायैरकाइत्याहीत्यर्थेनयुक्तः। अप्रामाणिकत्वादिति ४२ विश्वस्यभगवदधीनत्वंविवृणोति। भूतेति। भूतानिपंचतन्मात्राः शब्दादयः इं द्रियाणिश्रोत्रादीनि। प्राणाः हरामनः संकल्पविकल्पनत्मकं। बुद्धिर्निश्चयहेतुः। एषामाशयः स्थानं आत्मास्वभावोयस्यसतथा। तस्मै। आत्मायत्नोधृतिर्बु द्धिः स्वभावोब्रह्मवर्ष्मचेत्यमरः। स्थानेभिप्रायआशयइतियादवः। निर्गुणेनसत्वादिगुणजन्मरहितेनाभिमानेनज्ञानेनगूढाअप्रकाशिताआत्मानुभू तिर्यस्यसतथातस्मै ४२ ॥ ॥

राम

४८

अनंतायानित्यायसर्वगतायसूक्ष्मायइंद्रियाविषयायनित्यंविभुंसर्वगतंसुसूक्ष्ममितिश्रुतेः। कूटस्थायशश्वदेकप्रकाराय। विपश्चितेसर्वज्ञा यनिगुणबुद्धयेवा। नानावादानांसिद्धांतानांअनुरोधायअनुकूलवर्त्मनेनाय। वाच्योऽर्थःतस्यप्रतिपादकलेयोग्यत्वंवाच्यशक्तिःवाचकःशब्दः तस्यार्थ प्रतिपादनसामर्थ्यंतद्रूपंयस्यसतथातस्मै ४३ प्रमाणमूलायप्रत्यक्षादिप्रमाणप्रतिष्ठापकाय। कवयेश्रुतिकांतदर्शिने। शास्त्रंवेदः योनिर्दर्शिका रणंयस्यसतथातस्मै। योनिःस्त्रीणांभगेस्थानेकारणेताम्रकेपणेतियादवः। निरेशकारणाय। इदंकुर्यादिदंनकुर्यादितिविधिकर्तृनिर्देशग्रंथयो शास्त्रमित्यमरः। प्रवृत्तायप्रवृत्तिमार्गप्रवर्तकाय। निवृत्तिमार्गप्रवर्तकायचस्पष्टोऽपरत्रायथलयेनिवृत्तायेतिवाउभयेषांनिगमायमार्गायविष

नमोऽनंताय सूक्ष्माय कूटस्थाय विपश्चिते। नानावादानुरोधाय वाच्यवाचकशक्तये ४३ नमः प्रमाणमूलाय कवये शास्त्रयोनये। प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ४४ नमः कृष्णाय रामाय वसुदेवसुताय च। प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ४५

यायेत्यर्थः। अथवनंपदवीमार्गःप्रियायनिगायतेनिगमइतिहलः। वेदस्वरूपायेवा। निश्चायकायवा। निगमोनिश्चयेवेदेपरेपथिवणिक्पथइतियादवः ४४ कृष्णायतत्कृष्टानंदस्वरूपायपापकृजनदुरितकर्षणशीलायवा। शत्रूणामप्रियेकानीलवर्णायवा। कृष्णोविष्णावलोहेषुकृष्णोनीलेनलेक न्तौ। पूर्विकाकेपिकेव्यासेर्जुनेदूराविति। रामायरामनाम्ने। अभिरामायवा। प्रकृष्टद्युम्नत्वामेयाय। यद्वाप्रकृष्टधनाय। कृष्णंदुर्ध्यंद्रविणानि तिहलः। अनिरुद्धायज्ञानिनांनिरोधहरिताय ४५ ॥ ॥

द० स्क०

५९

गुणाः सत्त्वादयः भक्तिज्ञानादयो वा तेषां प्रदीपाय ज्ञापकाय। गुणात्मा प्रकृतिः तस्यां स्थितः उदयः स्वरूपं यस्य स तथा तस्मै। गुणैः श्रोत्रादीन्द्रिय जन्यज्ञानैः यत्तुपलक्ष्याय। अनुमेयस्वरूपाय। गुणद्रष्ट्रे गुणसाक्षिणे। स्वसंविदे स्वयंप्रकाशाय। तद्ब्रह्म वेदाहं ब्रह्मास्मीति श्रुतिः। अत्रेनाप्यस्याप्यन्या द्रष्टा तस्याप्यन्य इत्यनवस्था निरस्तेति ज्ञातव्या ४६ अव्याकृताः व्याहर्तुमशक्याः सृष्ट्यादिविहारा यस्य स तथा तस्मै। ननु व्याहर्तुमशक्यविहार श्चेत्कथं तर्हीति तत्राह। सर्वेति। सर्वैर्व्याकृता विशता सिद्धिः स्वरूपज्ञानं यस्य स तथा हृषीकेशं प्रत्यगृह्णात इत्यर्थः तस्मै यद्वा सर्वव्याकृत

नमो गुणप्रदीपाय गुणात्मच्छादनाय च। गुणप्रवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ४६ अव्याकृतविहाराय सर्वव्याकृतसिद्धये। हृषीके शनमस्तेस्तु मुनये मौनशीलिने ४७ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः। अविश्वाय च विश्वाय तद्द्रष्ट्रे ऽस्य च हेतवे ४८ ॥

सिद्धये नामरूपात्मकं जगत्सर्वं व्याकृतं तत्स्य सिद्धिरुत्पत्तिर्येन स तथा तस्मै। मुनये सर्वज्ञाताय। मौनशीलिने। असंभावितभाषणशीलराहित्या ४७ परावरगतिज्ञाय कार्यकारणस्थितिज्ञाय। सर्वाध्यक्षाय सर्वेषामुपरि गताय। अविश्वाय विश्वस्मादन्यस्मै। शरीरेषु प्रविष्टत्वाद्विश्वो जीव उदी र्यते इत्यादि स्मृतिः। तात्पर्यं तु नरूक्तमाङ्कः विश्वायेति। जीवस्य जगदंतः पातित्वेपि चेतनत्वेन स्वातंत्र्य शंका निवारणार्थं पृथगुक्तं जीव ग्रहणं जीवस्य तदधीनत्वाद्विश्वो विष्णुरिति स्मृतः। अस्यो त्पत्त्यादिहेतुत्वाद्विश्वहेतुश्च कीर्तितः इति ४८ ॥ ॥

राम

५९

प्रातिस्विकं जीवाभीष्टत्वात्तु द्रष्टव्य इति प्रपंचस्य स्थूलकारणं ईश्वर इत्युक्तं तत्स्य ष्टयितुं माहात्म्यं हीति। सत्यधर्मा सत्यकर्मा इति श्रुतेः। अमोघविहा रस्त्वं अत एवानीहो क्लिष्टकर्मा त्वं सत्त्वादिगुणैरस्य जगतो जन्मादीनीहसे। कुर्यास्मात। देवस्यैष स्वभावो यमाप्तकामस्य कास्पृहेति श्रुतेः। तस्मात्त्व चद्रष्टत्वस्वभावात। समीक्षया सम्यक् ज्ञानेन तोः स्वान्मति बोधयन्नेत्यन्वयः। यथा तव जगत्स्रष्टृत्वं स्वभावस्तथा स्मत्प्रति बोधनमपि स्वभावो। स्वात्मा शयः। लोके स्वरूपरक्षणाय वा इहादिनायाम्यावान्यसहाये न वाश्रमेण कर्तृत्वं न तथा तवेत्याशयेनाह। अकृतेति। कालः कारणांशत्वं वा। कृतावरा

त्वं ह्यस्य जन्मस्थितिसंयमान्प्रभो गुणैरनीहोऽकृतकालशक्तिधृक्। तत्स्व स्वभावान्प्रतिबोधयन्सतः समीक्षयामोघविहार ईहसे ४९

दिनागत्य निमित्तं स्वरूपमिति यावत् एवंविधां शक्तिं धारयसीति स्वरूपभूतज्ञानक्रिया शक्तिधर इत्यर्थः। तदुक्तं। हरेः स्वरूपशक्तिर्या काल शक्तिरुदी र्यते। सदा सर्वगुणात्मत्वादिति। यथा स्वाधीनत्वात्सत्त्वादिगुणैः सृष्टिं करोषि। तथा स्वनियत दुर्गावायुभ्यां संहारस्थिती करोषीत्याशयो नोक्तं अ कृतेति। तयोरपि कालाधीनत्वेन कालशक्तित्वादित्यर्थः। तदुक्तं। दुर्गा वायुर्वरात् ततः सर्वसंहारकारित्वाद्वायुः सर्वस्य जीवनात्। कालाधिनाति नावेतो दुर्गावायू स्वकीर्तिताविति च ४९ ॥ ॥

द० पू०

५०

विध्याय इत्यादिगाहरेर्ईगराह्यत्वमुक्तमिति मंदाशंकानिरासाय स्थावरजंगमस्य स्वरूपमुक्त्वा पुनर्विभ्यकथनेन मिथोऽपि भेदः सात्विकादिरिति दर्शनार्थं
तस्य भगवत्प्रतिमात्वेन तत्तत्स्वभावेनेहरूरति त्यापितात्मा निर्भवतीति भावेनाह। तस्यैवेति। यस्त्वं नमस्कृत्यं भगवते इत्यादिना प्रसक्तस्य स्वस्य तेऽमूस्तनवः
प्रतिमाख्या नीयाः। शांता अशांता मूढयोनयश्चेति त्रिधा भिन्ना अभूवन्नित्यर्थः। त्रिलोक्यां जाता इति शेषः। अत्रापि तारतम्यमसत्त्व्याह। शांता इति। सुखं
तं सुखमेव स्वभावमाश्रवंतीति यत्नं स्वात्मशांताः देवाः सताम्प्यनिवुः तेतव प्रियाः। परापूर्वं धर्मसंरक्षणाय तत्क्रिविमर्दं राणेऽपरेभिरेतीति श्रुतिः। प्रियस्या
पि तारतम्यविशेषद्योतको हि शब्दः। प्रियं द्विविधं अंतर्बहिश्चेति। तत्रांतः प्रियाः संतः। बहिः प्रियाश्च संतः। अत्रापि कथनविशेषः। संहारहेतुत्वात्संतर्द्वि

तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः। शांताः प्रि
यास्ते ह्यधुनावितुं सतां स्थातुश्च ते कर्मपरीप्सयेहतः ५० ॥

देवाः प्रियाइव सिद्धिनि इ हेतुत्वात्संतोऽपि प्रियाः तांतः प्रियाः इत्यतो धुनेति विशेषणं। तदुक्तं। अतः प्रियं बहिश्चेति द्विधा प्रियमुदाहृतमित्यादि देवादीनां शांतत्वा
दिकं स्वांतेप्रासुखुः यस्मात् इह वा शांता ऊहीरिता इत्यादि स्मृतिसिद्धं। अशांतामाऊधाः मूढयोनयोऽसुरा इत्यर्थः। अवतारादिकर्मप्रवर्तनं च प्राणानु रक्षे
त्याकुः। स्थातुरिति। कर्मप्रवर्तनार्थं सर्वशरीरेषु स्थातुरीहतः। इह चेष्टायामिति धातुः। चेष्टकत्वमिति शशहस्य प्रवृत्तिनिमित्तं। अतः शांतत्वापितदेवा
तदीहतः प्राणस्य सकाशात्कर्मपरिप्सयाकर्मपालनेच्छया पालनं प्रवर्तनं तदिच्छया। प्राणस्य सकाशात्कर्मप्रवर्तनमिच्छति भगवानित्यतः सत्त्वोदिवि
भुरित्यर्थः। तदुक्तं। वायोः सकाशाज्जातः सृष्टिं कामयत्यज इत्यादि प्राणमिति श्रुतिश्च तादृशी ता ५० ॥ ॥

राम

५०

सोढव्यः क्षंतुमर्हसीति द्विवचनमादरार्थं स्वचापल्यप्रकटनार्थं च शांतानां देवानामात्मस्वामिन्। मूढस्येत्यस्य विवरणं त्वामजानत इति ५१
५३ अंघ्रिकुट्टनैः। अंघ्रिमर्दनैः ५४ ५५ पदसत्यहो योऽसुरग्रहः ५६ धातुर्हिरण्यगर्भस्य सकाशात् गुणसृष्टं सर्जनं सृष्टिरस्य जगतः

अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः। क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजानतः ५१ अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्
नगः। स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां ५२ विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया। यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो
भयात् ५३ श्रीशुक उवाच इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः। मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ५४ प्रति
लब्धेंद्रियप्राणः कालियः शनकैर्हरिं। कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ५५ वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्य
वः। स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ५६ त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनं। नानास्वभाववीर्यौजोयोनिबीजाशया
कृतिः ५७ वयं च तत्र भगवन्सर्पा जात्युरुमन्यवः। कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः प्रभो ५८ भवान्हि कारणं तत्र स
र्वज्ञो जगदीश्वरः। अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ५९ ॥ ॥

प्राधान्येन विष्णोरेषा सृष्टिः विष्णुः प्रधानतः स्रष्टा गुणस्रष्टा चतुर्मुख इति वचनात्। नाना स्वभावाश्च येन ऊर्ध्वज्वलनं। वायोस्तिर्यग्गमनमित्या
दि नाना विधाः स्वभावाः। वीर्याणि पराक्रमादीनि। ओजो बलं। भाः। वीर्यं शुक्लादि। आशयो निप्रायः। एषामाकृतिः स्वरूपं ५७ ५९ ॥

६०॥

देवकार्यार्थमाज्ञप्त विदंवः ६० संध्योः संध्ययोः ६१ ममाक्रीडे क्रीडास्थाने ६२ त्वं पूर्वं यस्य सुपर्णस्य भयात् नागान् रमणकद्वीपं हित्वा एतद्ह्रदमुपाश्रितः। अथ सुपर्णो मत्पादलक्षणां मत्पादलांछनं विलोक्य त्वां नायात् न भक्षयेत् ६३ ४ परार्ध्यैर्निर्घ

५१

श्रीशुक उवाच   इत्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः। नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरं ६० सज्ञात्यपत्यदाराढ्यो गो नृभिर्भुज्यते नदी। य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं। कीर्त्तयेदुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ६१ योस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्प्पयेज्जलैः। उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ६२ द्वीपं रमणकं हित्वा ह्रदमेतदुपाश्रितः। यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछनं ६३ श्रीशुक उवाच   एवमुक्तो भगवता कृष्णेनाद्भुतकर्म्मणा। तं पूजयामास मुदा नागपत्न्यश्च सादरं ६४ दिव्यांबरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः। दिव्यगंधानुलेपैश्च महत्योत्पलमालया ६५ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजं। ततः प्रीतोभ्यनुज्ञातः परिक्रम्याभिवंद्य च ६६ सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह। तदैव सामृतजला यमुना निर्विषाभवत्। अनुग्रहाद्भगवतः क्रीडामनुजरूपिणः ६७   इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्द्दशोध्यायः

उ२

राजोवाच   नागालयं रमणकं कस्मात्तत्याज कालियः। कृतं किं वा सुपर्णस्य तेनैकेनासमंजसं १

तेनोक्तमेवः ६५ ६६ ६७   इति दशमे टीकायां चतुर्द्दशोध्यायः   असमंजसमपराधं १ ॥ ॥

राम

५२

नशाद्वलं यावच्च प्रत्यय स्यात् तथा अश्रुकणाः वाष्पबिंदवः १८ ए कृत्वा सुप्त्वा अत्रैव कर्षिताः अभिभवं घासाः उपकूलतः कूलसमीपे २० शुचिः पवनः तस्य वलेनोद्भूतः। शुचिना ग्रीष्ममरुतो वलेन वाहतः परिवेष्टितः २१ निशीथे अर्द्धरात्रे। अनंतशक्तिधृक् अनिपतशक्तिधृक्

यशोदा च महाभागा नष्टलब्धप्रजा सती। परिष्वज्यांकमारोप्य मुमोचाश्रुकणान्मुहुः १८ ततश्चास्तं गते भानौ कृष्णो वासमकल्पयत्। सरामः सहगोपालैर्म्मात्रापित्रासगोधनैः १९ तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः। ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः २० एतस्मिन्नेव काले तु व्रजे कौरवसत्तम। घोरः शुचिवलोद्भूतो दावाग्निः सर्वतो वृतः २१ सुप्तान्निशीथ आवृत्य प्रदग्धुमुपचक्रमे। तत उत्थाय संभ्रांता दह्यमाना व्रजौकसः २२ कृष्णं ययुस्ते शरणं मायामनुजमीश्वरं। कृष्ण कृष्ण महाभाग हे रामामितविक्रम २३ एष घोरतमो वह्निस्तावकान्ग्रसते हि नः। सुदुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो २४ न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयं। इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः २५ तमग्निमपिबत्तीव्रमनंतोनंतशक्तिधृक्। अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः। अनुगीयमानो न्यविशद्व्रजं गोकुलमंडितम् २६   इति श्रीभागवते महापुराणे दशमस्कंधे पंचदशोध्यायः   श्रीशुक उवाच   व्रजे विक्रीडतोरेवं गोपालच्छद्मरूपिणोः। ग्रीष्मो नामर्त्तुरभवन्नातिप्रेयाञ्छरीरिणां १ ॥ ॥

२६ इति दशमे पंचदशोध्यायः   हरेर्भूभारहरणस्य परं तरंगं कर्तुमवतीर्णशेषेण इत्युपक्रमते। व्रज इत्यादिना। गोपालछद्मरूपिणोः। गोपालाविति कपटं शास्त्रिणोः रूपं शास्त्रे यशो यंथे शोके दृष्टो हितादिषु। सोऽयं पंचसु भावेषु तिथ्यादिषु नातिप्रेयान् नातिप्रियतरः घर्महेतुत्वात्

२

वसंतवल्यत्वमितिमित्राह। यत्रेति। यत्र वृंदावने निर्झरस्य निर्झरेण निहृतस्वनाः प्रतिलब्धस्वराः झिल्लिकाः कीटविशेषाः यस्मिंस्तत्तथा तस्य निर्झ-
रस्य शीकरैः वायुशीर्णवारिबिंदुभिः २ सरित्सरसी सरोदेवखातः। एतयोः प्रस्रवणं ऊर्मिस्तरंगः एतत्संबंधवायुना च। कह्लारं सौगंधिकं। कंजं पद्मं।
उत्पलं नीलोत्पलं। एषां रेणवः परागैः हारिणा मनोहरेण। यद्वा रेणूनां हारो हरणं अस्यास्तीति हारी तेन। निदाघवह्न्यर्कभवो यस्य स तथा।
दवस्तापः। दवपरिताप इति भानुः। अत्यये एतान्निध्याति। वनाधिरित्यर्थः। गोचारेव क्षीत्येवाधिकं व्यर्थं भवति। अतिशाद्वले कोमलतृणे

स च वृंदावनगुणैर्वसंत इव लक्षितः। यत्रास्ते भगवान्साक्षाद्रामेण सह केशवः १ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं। श-
श्वत्तच्छीकरर्जीषद्रुममंडलमंडितं ३ सरित्सरः प्रस्रवणोर्मिवायुना कह्लारकंजोत्पलरेणुहारिणा। न विद्यते यत्र वनौकसां दवो
निदाघवह्न्यर्कभवोतिशाद्वले ४ अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुलिन्याः पुलिनैः समंततः। न यत्र चंडांशुकरा विषोल्बणा भुवो
रसं शाद्वलितं च गृह्णते ॥५॥ श्रीमद्वनं कुसुमितं नदच्चित्रमृगद्विजं। गायन्मयूरभ्रमरं कूजत्कोकिलसारसं ६ ॥

येते ४ विषवदुल्बणाः चंडांशुकराः सूर्यरश्मयः यत्र शाद्वलितं बालतृणनिविडं भुवो गतं रसं जलं न निगृह्णते। किं कारणम् अत आह अगा-
धेति। अगाधं तोयं यस्याः सा अगाधतोया सा चासौ ह्रदिनी अगाधतोयह्रदिनी नदी तस्यास्तटेरुहैः तीरजातैः ऊर्मिभिः समंततः द्रवंत्याः स्यंदमानाया
पुलिन्याः किंभूतनद्याः शाद्वलान्यादित्यर्थः। पुलिनैर्निर्मितैः सर्वदा द्रवीभूतस्थलत्वादित्यर्थः ५ ६ ॥ ॥

उपहार्यैः उपहारकैः पूजकैः सर्पजनैर्नागपूज्यैर्वा। सर्पजनैरिह यो बलिः मासि मासि प्रतिमासं क्रियत इति शेषः। कीदृशः वानस्पत्यः सोपि
वनस्पतिं गते क्रियमाणः आमावास्यां क्रियमाण इत्यर्थः। यद्वा वनस्पतौ क्रियमाणः स बलिः। प्राक् नागानामेकमत्येनात्मरक्षणार्थं निरूपि-
त इत्यन्वयः १ आत्मनः गोपीथाय गोपनाय आत्मरक्षणाय ३ कद्रोरपत्यं काद्रवेयः। ज्ञातिज्ञानार्थमिदमुक्तं। कदर्थीकृत्य धिक्कृत्य तां बलिं

श्रीशुक उवाच उपहार्यैः सर्पजनैर्मासि मासीह यो बलिः। वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः १ स्वं स्वं भागं
प्रयच्छंति नागाः पर्वणि पर्वणि। गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ३ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः। कदर्थी-
कृत्य गरुडं स्वयं तं बुभुजे बलिं ४ तच्छ्रुत्वा कुपितो राजन्भगवान्भगवत्प्रियः। विजिघांसुर्महावेगः कालीयं समुपाद्रवत् ५ तमापतं-
तं तरसा विषायुधः प्रत्यभ्ययादुत्थितनैकमस्तकः। दद्भिः सुपर्णं व्यदशद्दशायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ६ तं तार्क्ष्यपु-
त्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः। पक्षेण सव्येन हिरण्यरोचिषा जघान कद्रुसुतमुग्रविक्रमः ७

प्रजां। बलिशब्दः पूजार्थः स्त्रीलिंगः। पूजायां स्त्री बलिर्दैत्यभेदे नाकरए बचेति ४ विजिघांसुः हंतुकामः। विषमेवायुधं यस्य स तथा ५
उद्धृतनैकमस्तकः उद्धृतानेकफणः। दद्भिर्दंतैः व्यदशत् दंशितवान्। दंता एवायुधं यस्य स तथा। करालजिह्वश्च उच्छ्वसितोग्रलोचनश्च
तथा। उच्छ्वसितः दीर्घश्वासोपेतः। उग्रे लोचने यस्य स तथा ६ जघान अहनत्। आत्मपार्श्वे स्थापितवानित्यर्थः ७ ॥ ॥

कालिंद्याः यमुनायाः तेन गरुडेन अगम्यं दुरासदं सर्पादीनामिति शेषः ८ गरुडस्यागम्यत्वे निमित्तमाह तत्रेति प्रस्तुतमिति भक्ष्यं ९
तत्क्षेमं तेषां शिशूनां क्षेमं योग्यं परहितं १० खादति भक्षयति प्राणवियोगं मरणं प्राप्नोतु ११ लेलिहा लेलिहानाः सर्पाः। ह्रदं गमपोदेव
मुक्तां गरुडाद्भीत्येवावात्सीत्। सोभरेः शापातिक्रमणे समर्थेनापि तेन किमर्थं ना कारीत्यपि आशंका। विष्णुना विष्णुभक्तेषु ब्रह्मशापोनुवर्त्तितो आ

सुपर्णपक्षाभिहतः कालीयोतीवविह्वलः। ह्रदं विवेश कालिंद्यास्तदगम्यं दुरासदं ८ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितं। नि
वारितः सोभरिणा प्रसह्य क्षुधितोहरत ९ मीनान्सुदुःखितान्दृष्ट्वा दीनान्मीनपतौ हते। कृपया सोभरिः प्राह तत्रत्यक्षेममाच
रन् १० अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति। सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहं ११ तत्कालियः परं वेद नान्यः कश्चि
ल्लेलिहा। अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः १२ कृष्णं ह्रदाद्विनिःक्रांतं दिव्यस्रग्गंधमंडितं। महामणिगणाकीर्णं जांबू
नदपरिष्कृतं १३ उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः। प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे १४ यशोदा रोहिणी
नंदो गोप्यो गोपाश्च कौरव। कृष्णं समेत्य लब्धेहा आसं लब्धमनोरथाः १५ रामश्चाच्युतमालिंग्य जहासास्यानुभाववित्। नगगा
वो वृषा वत्सा लेभिरे परमां मुदं १६ नंदं विप्राः समागम्य गुरवः सकलत्रकाः। ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः १७

प्राणानामपीडायैव लिभिः इन्द्रियादिभिः इत्यादि ब्रह्माण्डवचनेन निस्पृषी कर्त्तव्या। एतद्विवक्षया वा लेलिहेत्युक्तं १२ १३ उपलभ्य दृष्ट्वा
प्रमोदनिभृतात्मानः आनंदपूर्णात्मानः अभिरेभिरे आलिंगनं चक्रुः। अभीत्युपसर्गान्मुख्यामुख्यभेदो द्रष्टव्यः १४ लब्धेहा लब्धचेष्टाः। पूर्वं
गतप्राया इत्यर्थः ५ ७ ॥ ॥

विरयणं वा वेणुविशेषैः स्वरैः वादनपरः कृष्णस्तद्वनमविशदित्यन्वयः ७ धातुर्गैरिकः ८ १० भ्रामणैः मण्डलाकारेण तिर्यग्भ्रमणैः लंघनैः ईशपदासुत्पतनैः
क्षेपैरान्दोलनैः पाषाणक्षेपणैर्वा आस्फोटनैः एकं हस्तं दक्षिणं कृत्वेतरेण पाणिना स्फालनानि आस्फोटनानि तैः। परस्परैः पाणिना पाणिम्
बलं व्याकर्षणं विकर्षणं। नियुद्धेन मल्लयुद्धेन। काकपक्षधरौ अकृतचौलके शिखाधारिणौ चित्रं कृतवेणीधारिणाविन्यर्थः ११ १२ कुंभैः कुंभफलैः

क्रीडिष्यमाणास्तत्कृष्णो भगवान्बलसंयुतः। वेणुं विरणयन्गोपैर्गोधनैः संवृतोविशत ७ प्रवालवर्हस्तवकस्रग्धातुकृतभूषणाः।
रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ८ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन्। वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे ९
गोपजातिप्रतिछन्ना देवा गोपालरूपिणः। ईडिरे कृष्णरामौ च नटा इव नटं नृप १० भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः। चिक्री
डतुर्नियुद्धेन काकपक्षधरौ नृप ११ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयं। शशंसतुर्महाराज साधुसाध्विति वादिनो १२
क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः। अस्पृश्यनेत्रवंधाद्यैः क्वचिन्मृगखगेहया १३ ॥

र्विलाकारैः। कुंभो उलूखलं के स्त्रीवेकोशिको गुग्गुलः पुमानित्यमरः। पृष्ठतो धावमानस्य पुंसः मशकं। तं मां स्पृशेत्तु स्मा पुरतो लीलया धावती
तियत्र दिरमस्पृश्य क्रीडनं। वस्त्रेणे नेत्रमाच्छाद्य तं मुक्त्वा पुरतो भ्रमणं नेत्रवंधलीला। दूरांतरप्रदेशे स्थितं दृष्ट्वा तं लक्ष्यीकृत्यो धावन् स्पर्शी विज
यी स्यादिति क्रीडाधावनसंज्ञेत्यादिकमपि द्रष्टव्यं गृहीतं १३ ॥ ॥

दर्दुरप्लावैःमंडूकवदुत्पतनैः १४ द्रोणीनिम्नस्थानुस्थलं अंतर्जलानि बद्धोदकस्थानादि कुंजाः। निकुंजकुंजौ वा क्लीबे लतादिपिहितोदर इत्यमरः १५ १६ यस्य पोविहारसंवेत्तीति १७ १८ परिवृढौ नायकौ। कृष्णसंघट्टिनः कृष्णपक्षीयाः १९ वाह्यवाहकत्वं विशदयति। तत्रेति २० २१ उवाह कृ

क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः। क्वचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया १४ एवंतौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने। नद्य
द्रिद्रोणिकुंजेषु पुलिनेषु सरस्सु च १५ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः। गोपरूपी प्रलंबोगादसुरस्तज्जिघांसया १६ तंवि
द्वानपि दाशार्हो भगवान्सर्वदर्शनः। अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् १७ तत्रोपाहूय गोपालान्कृष्णः प्राह विहारवित्। हे
गोपा विहरिष्यामो द्वंद्वीभूय यथायथा १८ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ। कृष्णसंघट्टिनः केचिद्गोपा रामस्य चापरे १९
आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः। यत्रारोहंति जेतारो वहंति च पराजिताः २० वहंतो वाह्यमानाश्च चारयंतश्च गोधनं। भां
डीरकं नाम वटं जग्मुः कृष्णपुरोगमाः २१ रामसंघट्टिनो यर्हि श्रीदामवृषभादयः। क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप २२
उवाह कृष्णो भगवान्श्रीदामानं पराजितः। वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं २३ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः।
वहन्द्रुततरं प्रागादवरोहणतः परं २४ ॥ ॥

ष्णो भगवानित्यत्र व्यत्ययेन नेतव्यः। श्रीदामा कृष्णमुवाहेति। कुत एवं विकल्प्यते। हरिवंशादिवचनात्। तथाप्यपं दुरायह इति न वक्तव्यं न
कुमानविरोधेन व्यत्यासः शरदृतोर्थत इत्यादि निर्णयवचनात् २३ प्रलंबः कृष्णं विहाय राममावहत्तत्र किं कारणमित्याह। अविषह्यमिति
२४ ॥

धरणिधरेंद्रः पर्वतराजस्तद्वद्गौरवं अतिभारवत्त्वं यस्य स तथा तं। पुरटपरिच्छदः सुवर्णालंकारः। तडिता द्युमता आदित्येन च संयुक्तः तडिद्द्युमा
नुडुपतिश्चंद्रः। तद्वानुदस्ती यमार्थं का अप्रभूतोपमा यद्वा तडिद्द्युमान्तडिता युक्तो मेघ इव तत्र मेघस्थाने प्रलंबः तडित्स्थाने पुरटपरिच्छदः चंद्र

तमुद्वहन्धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः। सआस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपतिवाडिवांबुदः २५ निरी
क्ष्य तद्वपुरलमंबरे चरत्प्रदीप्तदृक्भ्रुकुटीतटोग्रदंष्ट्रकं। ज्वलच्छिखं कटककिरीटकुंडलत्विषाद्भुतं हलधर ईषदत्रसत् २६ अथा
गतस्मृतिरभयो रिपुं बलो विहाय सार्थमिव हरंतमात्मनः। रुषाहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा २७ स
आहतः सपदि विशीर्णशीर्षको मुखाद्वमन्रुधिरमपस्मृतोसुरः। महारवं व्यसुरपतत्समीरयन्गिरिर्यथा मघवत आयुधाहतः २८
दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना। गोपाः सुविस्मिता आसन्साधु साध्विति वादिनः २९ आशिषोभिगृणंतस्तं प्रशशंसुस्तदर्ह
णं। प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः ३० पापे प्रलंबे निहते देवाः परमनिर्वृताः। अभ्यवर्षन्बलं माल्यैः शशंसुः साधु साध्विति
३१ इति श्रीभागवते महापुराणे दशमस्कंधे षोडशोध्यायः ॥ ॥

स्थानीयो रामः २५ अंबरे चरमित्यलुक् २६ अथ कृष्णस्य वाक्यांतरं आत्तस्मृतिः उपात्तमूलस्मरणः। वज्ररंहसा वज्रवेगेन २७ महा
रवं समीरयन्। व्यसुर्गतप्राणः २८ बलशालिना रामेण राविणः वादिनः। माल्यैः पुष्पैः ३१ इति दशमे षोडशोध्यायः ॥

स्वभक्तजनसंसारविनाशानंदहरेरेवसुशकंनान्यस्येतिनिदर्शनाय दावाग्निपानप्रकटितमाहात्म्यमस्य वक्तुमुपक्रमते स्मिन्नध्याये। तेषां गोपानां गावः दूरचारिणीः दूरगामिन्यः। स्वैरं स्वेच्छया गह्वरं गहनतीरकं तृणं १ मुंजाटवीं इषिकाटवीं शराटवीं वा। उभयं चवक्षुरंतत्रेत्यर्थः। श रोमुंज इत्यमरः इति हलः। दावेन तापेन तर्षिताः जलं पातुकामाः २ अपश्यंतः अनुतापः पश्चात्तापः विचिन्वंतः अन्वेषमाणाः ३ तासां गवां खुरैः दच्छिन्नैः छिन्नैरंकितैः सुतलेः नष्टजीवाः जीवन्मृताः विचेतसः इतो गताः क्वचगता इति विविधचुद्धयः। केदि वेगतं वैतोयेजातेतया। ये

श्रीशुक उवाच — क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः। स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरं १ अजा गावो महिष्यश्च निर्विशंत्यो वनाद्वनं। मुंजाटवीं निविविशुः क्रंदंत्यो दावतर्षिताः २ तेपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा। जातानुतापा न विदुर्विचिन्वंतो गवां गतिं ३ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां। मार्गमन्वगमन्सर्वे नष्टजीवा विचेतसः ४ मुंजाटव्यां भ्रष्टमार्गं क्रंदमानं स्वगोधनं। संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्त्तयन् ५ ता आहूता भगवता मेघगंभीरया गिरा। स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ६ ततः समंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसां। समीरितः सारथिनोल्वणोल्मुकैर्विलेलिहानः स्थिरजंगमान्महान् ७ ॥ ॥

हे बामिचेतसा वयसा च दारुणं गच्छंतदत्यर्थः ४ भ्रष्टमार्गमार्गं हित्वेतस्ततो गतं। ततो मुंजाटव्याः सम्यवर्त्तयन्नगतमार्गमेवागंतुकामा अभवन्नित्यर्थः ५ ततः कृष्णेन किमकारीति तत्राह। ता इति। प्रतिनेदुः प्रत्याक्रोशं चक्रुः ६ संसारकृतमहादुःखावाकरदनिदर्शनार्थएक दुःखशमनानंतरं दुःखांतरं वदंति। ततइति। ततः गोदर्शनानंतरं। धूमकेतुरग्निः सारथिना वायुना समीरितः प्रेरितो वर्द्धितः। उल्बणोल्मु कैः क्रूरतरज्वालाभिः स्थिरजंगमान्विलेलिहानः विशेषेण ग्रासयन् ७ ॥ ॥

अपन्नाः शरणमिति शेषः ८ नूनमिदानीं ९ १० ११ योगमायानुभावितं स्वरूपसामर्थ्येन प्रभावितं। अमरं जरामरणशून्यं नारायणं मेनिरे १४ सायाह्ने संध्याकाले १५ यथा या वा म्युगशतं कालः यासां गोपीनां येन गोविंददर्शनेन विनाभावात्क्षणः कालो तावान भवत् १६ किंतत्कर्मेति

तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः। ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ८ कृष्ण कृष्ण महावीर हे रामामोघविक्रम। दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्हथः ९ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुं। वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः १० श्रीशुक उवाच — वचो निशम्य कृपणं बंधूनां भगवान्हरिः। निमीलयत मा भैष्ट लोचनानीत्यभाषत ११ तथेति मीलिताक्षेषु भगवानग्निमुल्बणं। पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत् १२ ततश्च तेक्षीण्युन्मील्य पुनर्भांडीरमापिताः। निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥ कृष्णस्य योगवीर्यं तद्योगमायानुभावितं। दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरेमरं १४ गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः। वेणुं विरणयन्गोष्ठमागाद्गोपैरभिष्टुतः १५ गोपीनां परमानंद आसीद्गोविंददर्शने। क्षणं युगशतं यासां येन विनाभवत् १६ श्रीशुक उवाच — तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः। गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च १७ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः। मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ १८ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तदशोध्यायः ॥ ॥

त्राइदवाग्नेरिति। चशब्दः समुच्चये दवाग्निमोक्षं प्रलंबवधं चेति द्वयमपि वेत्यर्थः। एकश्च शब्दः समाहारे। चो द्वान्वये समाहार इति यादवः १७ व्रजं गतौ कृष्णरामौ देवप्रवरौ मेनिरेत्यन्वयः १८ इति दशमे सप्तदशोध्यायः ॥ ॥

नारायणभक्तिविशेषाख्यानत दृष्टांतत्वेनप्रावृट् तुं वर्णयत्याविंशत्याध्याये। ततः श्री प्रावर्तत। तत्र सर्वेषां सत्वानांस्थावर जंगमलक्षणानां प्रदुर्भावो यस्यां सा तथा। सत्वं इत्येसत्वानुप्राणायोरिति यादवः। विद्योतमानाः तडिद्वंतरेखकाद्यमानाः परिधयः परिवेषा यस्यां सा तथा। विस्फूर्जितं अशनिगर्जितोपेतं नभस्तलं यस्यां एवं विधा प्रावृट् प्रावर्त्तत इत्यन्वयः १ प्रावृट्कुणान्तरं दर्शयति। सांद्रेति। जलेन सांद्रनीलांबुदैराच्छन्नं व्योम नभो बभौ। विद्युत्ता सह स्तनयित्नुना गर्जितेन सहितैः। अत एवास्पष्टसूर्यज्योतिः। परार्थे ज्योतिरेकं तत्पं तदितिश्रुतिः। कथमिव। सगुणं ब्रह्मेवं ब्रह्मेव २ अष्टौ मासानिति द्विनीयासप्तम्यर्थे। काला ध्वनोरत्यंतसंयोग इति सूत्रात् संवत्सरमधीते। क्रोशं कुटिलानदीतिप्रयोगः। उदमयं जलात्मकं। वसुवसुं धनं रस्यां विद्यमानं। स्वगोभिः स्वरश्मिभिः पीतं मात्मिरेवमोक्तुं आरब्धवान्। पर्जन्योगर्जन्मेघः। अभिमन्यमानेनाभिमा

श्रीशुकउवाच   ततः प्रावर्त्तत प्रावृट् सर्वसत्वसमुद्भवा। विद्योतमानपरिधिर्विस्फूर्जितनभस्तला १ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः। अस्पष्टज्योतिराच्छन्नं ब्रह्मेवसगुणं बभौ २ अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु। स्वगोभिर्मोक्तुमारेभे पर्जन्यः कालआगते ३ तडित्वंतो महामेघाश्चंडश्वसनवेपिताः। प्राणिनां जीवनं ह्यस्य मुमुचुः करुणा इव ४ तपः कृशा देवमीढा आसीद्वर्षीयसी मही। यथैव काम्यतपसस्तनुः संप्राप्य तत्फलम् ५ ॥ ॥

नी सविता लक्ष्यते। पर्जन्यो गर्जन्दर्शयन्नैशकेश्च यं श्विकरति। स्वगोभिरिति रश्मासविते तिगम्यते। अष्टोप्रास्ताङ्कतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा इति च ३ प्रचंडश्वसनवेपिताः कंपिताः। जीवनं जीवनसाधनं करुणयंतीति करुणाः। यद्वा अस्य करुणा इव। अनेन भक्तिसामग्री मतां तद्गोज्ञानं तु वर्षतिं कृष्णकटाक्षाद् इति सूचितं भवति ४ ग्रीष्मे तपः कृशा सूर्यतपनेन कार्श्यं गता। देवेन सवित्रा मीढा सेविता। वर्षीयसी वृद्धा तिष्टदिङ्गिता काइव काम्यतपसः तनुः तेनु सुत्फलं काम्यतपः फलं प्राप्य संपदा वर्द्धते। अनेन प्रवृत्ति प्रकारमार्गोदर्शितः ५ ॥

निशामुखेषु संध्यासु सूर्यादियुग्रहाः न भांति। पापेन कर्म्मणा। अनेन दुर्जनवृद्ध्या सज्जनाभिभवो दर्शितः ६ पर्जन्यनिनदं मंडूकार्जन्मेघनादं प्राक् पूर्वं तूष्णीं शयानाः मंडूकाः। नियमो नाम मौनेन जपादि कस्तस्यात्यये अवसाने वेदाध्ययनशीला भवंति। अनेन विष्णुरनुग्रहमाकांक्षमाणैः कालो वंध्यो न कर्त्तव्य इति दर्शितं ७ ग्रीष्मे शुष्यंती शोषं गच्छंत्यः। क्षुद्रनद्यः फल्गुजला अनुयी भानंतरं वर्षासु उत्पथवाहिन्यः जलानि वृष्णतीरमुद्धिय स्पंदमाना वभूवुः। अस्वतंत्रस्य विषयपरागादिवशंगतस्य पुंसो देहो वनितादिभोगेन वर्द्धते। अनेन रजोगुणस्वभावः प्रविततः ८

निशामुखेषु खद्योतास्तमसा भांति न ग्रहाः। यथा पापेन पाषंडा न हि वेदाः कलौ युगे ६ श्रुत्वा पर्जन्यनिनदं मंडूका व्यसृजन् गिरः। तूष्णीं शयानाः प्राग्यद्वद्ब्राह्मणा नियमात्यये ७ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः। पुंसो यथाऽस्वतंत्रस्य देहद्रविणसंपदः ८ हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिता। उच्छिलिंध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ९ ॥ ॥

हरिभिः श्यामैः शष्पैर्बालतृणैः हरिता श्यामला इंद्रगोपैः। आषाढसमयेऽत्यद्यमानैर्रक्तवर्णैः कृमिविशेषैर्लोहिता रक्ता च। उच्छिलिंध्रैः गुल्मविशेषपुष्पैः कृता कैवर्त्ताकृतच्छायाकृतशोभा नृणां श्रीरिव संपदिव वक्रविभाभूदित्यन्वयः। अनेन भूमिवदेक एव चेतनो गुणाविकारेण नानास्वभावमापन्न इवेक्षतीय तद् इति। संसारस्यासारत्वज्ञानेन हेयत्वेन हरौ भक्तिः कर्त्तव्येति सूच्यते ९ ॥ ॥

कर्षकाणां मुदं ददुः पाकवर्त्तमानानां क्षेत्रादिके दाराः सस्यानां संपद्भिः फलोद्रेकाभिमुखलक्षणाभिर्मुदं ददुः। यास्तु स्वार्थेतद्ज्ञानतां हृषि
क्रियाविशेषमजानतां मानिनां कृष्याद्यभिमानवतां पुंसां तान्येव क्षेत्राणि। अतिदृश्यनाशदृष्टिमेदुरसामग्र्याद्यभावादिनाशस्य नाशेन विपर्जितं अनु
तापं ददुः। पुनरुत्पत्तिनाशेन वीजं नष्टमित्यनुतापं। इंद्रियाणि विषयज्वाला शाकृष्य हरिचरणारविंद एव मनो निदधतां क्षेत्राणि पुण्यस्था
नानि सस्यसंपद्भिः ज्ञानसमुद्रेकैः मुदं ददति। तान्येव पुण्यस्थानानि। तदज्ञानतां ज्ञानादिक्रियाविशेषमबुध्यमानानां मानिनामहंकारिणां
पुंसामपोग्यानां विपर्जितं दुःखलक्षणां वकुलवित्तव्ययेन न किमपि फलं प्राप्तं इत्यनुतापं ददति। अतो मुमुक्षुणा स्वयं विचक्षणेऽभ्योवाकृत्वा सा
हरिचरणसरोजे भक्तिः कर्तव्येति सूचितं १० जलौकसः पातालवासिनः स्थलौकसः भूर्लोकनिवासिनः किंच सर्वे श्रीअंतरिक्षादिलोकवासि

क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः। मानिनामनुतापं वा विपर्जितं ह्यजानतां १० जलस्थलौकसः सर्वे नववारिनिषेवया।
अबिभ्रद्रुचिरं रूपं यथा हरिनिषेवया ११ सरिद्भिः संगतः सिंधुश्चुक्षोभ श्वसनोर्मिमान्। अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्य
था १२ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः। अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः १३ ॥ ॥

नः सर्वे श्रीसंस्तरदुःखं निवारयतीति यादिज्ञानं नवं नित्यदर्शनं वारितस्य नितरां सेवया अभ्यासलक्षणया रुचिरां निर्दोषं रूपमबिभ्रद्विभ्रति
कथं काः यज्ञातपाय यथा पथा वहरिनिषेवया जातया ११ अपक्वयोगिनः अपक्वाः परिपाकमप्राप्ताः योगो यस्यास्तीत्यपक्वयोगी तस्य गुण
युक्वरजोयुक्तं यद्वा। गुणेषु विषयेषु युंक्ते इति। अत एव कामाक्तं १२ न विव्यथुः न क्लिन्ना बभूवुः। कुतः गिरयः गिरणोद्गिरणसमर्थ
त्वाद्व्यथाभावमात्रेण निदर्शनं न तु वृद्धिमत्त्वा वृद्धिमत्त्वविवक्षायां। अनेन सर्वसहन शक्तिर्हरिभक्तानामेवेति दर्शितं १३ ॥ ॥

असंस्थितात्मनेरन्यकांताः। अनेन सच्छास्त्रं निरंतरमभ्यसनीयं ज्ञानोत्पन्नये इति। व्यतिरेकानिदर्शनं १४ चलसौहृदाः चलसुभावाः विद्युतः।
लोकोपकारित्वात् लोकबंधुषु मेघेषु स्थैर्यं स्थिरां स्थितिं न चक्रुः चंचला इत्यर्थः। कामिन्यः गुणिषु विविधेषु पुरुषेषु इव यथा स्थैर्यं न कुर्वंति तथा
विद्युदुच्चंचलभक्तिर्न कर्तव्या किंतु पूर्ववत् स्थिरा इति भावः। चलसौहृदाः चलस्नेहाः मातुस्वभावो दर्शित इति वा १५ गुणिनि शब्दगुणोपेते
नीलिमगुणाद्युक्ते वा वियति माहेंद्रस्य विद्यमानं निर्गुणं ज्यारहितं धनुः अभात् भाति कथमिव। गुणव्यतिकरे जगत्सर्जने व्यक्ते प्रवृत्ते पुरुषोना

मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्थिताः। नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव १४ लोकबंधुषु मेघेषु विद्युतश्चलसौहृ
दाः। स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव १५ धनुर्वियति माहेंद्रं निर्गुणं च गुणिन्यभात्। व्यक्ते गुणव्यतिकरे अगुणवान्पुरुषो
यथा १६ न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः। अहंमत्या भासितया स्वभासा पुरुषो यथा १७ ॥ ॥

रायणो यथा गुणवान् सत्त्वादिगुणैः प्रवर्त्तमानो भाति। सृष्टेः पूर्वं निर्गुणः सत्त्वादिगुणप्रवृत्तिरहितः। गुणवान् उपशम ज्ञानानंदादिगुणपूर्णो वा।
निर्गुणः देहरहितः गुणव्यतिकरेषु गुणवान् देहवान् पुरुषो हिरण्यगर्भो यथा इति वा १६ उडुपः स्वज्योत्स्नाया राजितैः संध्यारागप्राप्तैर्घनैः छन्नः उडु
पश्चंद्रः न रराज स्वरूपाभिव्यक्तिं नाप। स्वभासा स्वयंप्रकाशज्ञानेन भासितया अभिव्यक्तयाहंमत्या अहंकाराख्यया पुरुषः संसारी यथाभिव्य
क्तस्वरूपो न भवति। भगवत्प्रसादानुगृहीततत्त्वज्ञानलक्षणप्रकाशेनाभिव्यक्तस्वरूपः पुरुषः स्यादित्याशयः। शारदादिकाललक्षणप्रकाशेन प्र
काशितमंडलश्चंद्र इति सूचितं भवति १७ ॥ ॥

भा० द० पू०

५८

शिखण्डिनो मयूराः मेघागमात्मयएवोत्सवः तेन हृष्टाः रोमाञ्चत्वं प्राप्ताः कुटुम्बभरणादिना तप्ताः सज्जनदर्शनाभावाद्विनाशात्प्राय एव निर्विण्णाः विरक्ताः संसारे इयं वुद्धियुक्ताः १८ पद्भिः मूलैः फलेः पुष्पैः न घात्ममूर्तयः शरवोपशाण्तोविर्नितस्य रूपाः प्राग्ग्रीष्मे तपसा तपोमासोर्द्धितता पेन क्षामाः कृशाः। यथा कामानामनुसेवया ज्ञातेन श्रमेण श्रान्ताः इन्द्रियदोर्बल्यमापन्नाः प्राक्कुटुम्बभावस्थायां ज्ञामाः पादेन प्रासेन प्रात्मार्थं पातिरस्तं नीति पादपास्तपस्विनः। गतिसाधनत्वात्पद्भिः शास्त्रैः अपः पुरुषार्थावाप्तिहेतुत्वात्तज्ज्ञानरसाः पीत्वा घाद्यनम्राः वरुहात्वप्रीलातमनः परमात्मनो मूर्तिविग्रहविशेषो येषां तेन येतिभावः। यद्वा प्राङ्क्षामाः वनिताद्यभावेन तपसा कामाग्नितापेन श्रान्ताः जनाः कामानुसेवया प्राप्तादेव वनितादिलाभे

मेघागमोत्सवा हृष्टाः प्रत्यनन्दञ्छिखण्डिनः। गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे १८ पीत्वापः पादपाः पद्भिरासन्नात्ममूर्तयः। प्राक्क्षामास्तपसा श्रान्ता यथा कामानुसेवया १९ सरस्स्वशान्तरोधस्सु न्यूषुरङ्गापि सारसाः। गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः २० जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे। पाखण्डवादैर्वेदमार्गाः कलौ यथा २१ ॥ ॥

न निरन्तरकामभोगेन पुत्रतत्पुत्रपुष्पफलादिना नप्रात्ममूर्तयः परायणा निजशरीराः यथा भवन्तिति येति १९ अङ्गहे परीक्षित् सारसाः श्वकाकाः। अशान्ता निजलैः शुण्डा निरोधास्तिनीराणि। येषां तानि तथा तेषु सरस्सु पि ऊषुर्हि जलप्रवाहादिभूततीरवासस्थाः शान्त्यत्वे पि तत्रैवो षुरित्यर्थः। दुराशयाः ग्राम्याः प्राकृतजनाः अशान्तकृत्येष्वनुपरतकर्तव्येषु गृहेष्विव यथा वसन्ति। अनेन नित्यसंसारित्वभावो दर्शितः २० पाखण्डादि मतज्ञानेन नरकसाधकमिति ज्ञातव्यं २१ ॥ ॥

राम

५८

वायुभिर्नुन्नाः प्रेरिताः अमृतं जलं द्विजैरीरिताः प्रेरिताः विश्पतयो राजानः विशः प्रजाः आशिषः पकाले काले गुणं ज्ञात्वा अमृतं हे म विमुञ्चन्ति प्रयच्छन्ति। अमृतं व्योम्नि देवान्वेयज्ञ यो धेरसायने प्रयावितेजले दुग्धे मोक्षे नेत्रे हि स्मि गोरसह इतियादवः। यद्वा षष्ठमंशइति ब्राह्मणोक्तं दिशो वैश्या विश्पति भ्यो राजभ्यः यथा कालममृतं करात्मकं धनं ददतीति २२ वर्षिष्ठं प्रभूत वर्षोपितं २३ स्नुतस्तनीः स्रवितस्तन्यः। वनौकसो गावः। मृगादयो वा गुहा द इत्युरित्यन्वयः। कथं भूताः प्रमुदिताः प्रहृष्टानंदाः वने राजीरात्तनेयासां ताः वनराज्यः मधुच्युतः। मधु वक्षमधु स्रीस्यवंतीति मधुच्युतः गम्भीरशब्दा

व्यमुञ्चन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः। यथाशिषो विश्पतयः काले काले द्विजेरिताः २२ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजम्बुमत्। गोगोपालैर्वृतो रन्तुं सबलः प्राविशद्धरिः २३ धेनवो मन्दगामिन्य ऊधोभारेण भूयसा। ययुर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनीः २४ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः। जलधारा गिरेर्नादादासन्ना ददृशे गुहाः २५ क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति। निर्विश्य भगवान् रेमे कन्दमूलाशनैः २६ दध्योदनमुपानीतं शिलायां सलिलान्तिके। सम्भोजनीयैर्बुभुजे गोपैः सङ्कर्षणान्वितः २७ शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान्। तृप्तान् वृषान् वत्सतरान् गाश्च स्वोधोभरश्रमाः २८ ॥ ॥

सोऽसन्नादस्य गम्भीरस्य नादः तेन सन्नादेन समीचीननादाः यद्वा हृष्यभावसमये मधुच्युतः वनराजीर्वनपंक्तीर्ददृशुः हृष्टोऽसन्त्यां गुहा ददृशुरिति वनौकसः किराता वा गिरेर्निर्गम्भीरात्सन्नादान्निर्गच्छन्तः सन्नादेति वा च प्रथानो निर्देशः। नष्टराज्ञस्सत्वे न नाहरहिताः २५ अभिवर्षति सति वनस्पतिक्रोडे गुहायां चैव निर्विश्य उपभुञ्जानः २६ संभोजनीयैः सहभोक्तव्यैः २७ २८ ॥ ॥

द॰ पू॰

५९

आत्मशक्त्युपबृंहितां संवर्द्धितां २९ व्यभ्रा विगतमेघा। स्वच्छमंबु यस्यां। अपरुषस्तु शीतेन विन्दुना युतः अनिलः स्वच्छांबु अपरुषानिलास्य यस्यां तथा ३० शारदा शरत्संबंधिन्या नीरजानां पद्मानां उत्पत्त्या प्रकृतिं स्वच्छतां योगभ्रष्टानां पुनर्योगनिषेवया योगाभ्यासेन ३१ शरद् व्योम्न अब्दं आर्द्रीभावो जलस्पर्शादातारं मेघं जहार। वर्षाकालो विरत इत्यर्थः। ततो भूतशाबल्यं अर्थं जलं दक्षतमे घः न तु वर्षणं कुर्वन् तत्र निमित्तं शाबल्यं व्योम्न निःश्रवणं जहार। भ्रष्टच्छायाभावात् भुवः पंके कर्दमं अपां मलं कालुष्यं च अहरत्। तत्र दृष्टान्तमाह कृष्णे भक्तिर्यथा आश्रमिणां मि

प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहां। भगवान्पूजयां चक्रे आत्मशक्त्युपबृंहितां १९ एवं निवसतोस्तस्मिन् रामकेशवयोर्व्रजे। शरत्समभवद्व्यभ्रा स्वच्छाम्ब्वपरुषानिला ३० शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः। भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ३१ व्योम्नोऽब्दं भूतशाबल्यं भुवः पंकमपां मलं। शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथाशुभं ३२ सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः। यथा त्यक्तैषणाः शांता मुनयो मुक्तकिल्बिषाः ३३ गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवं। यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ३४ नैवाविदन्क्षीयमाणं जलं गाधजलेचराः। यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः ३५ ॥ ॥

त्तु तं। अशुभं पातकं ३२ सर्वस्वं जलं शुभ्रवर्चसः धवलवर्णाः। त्यक्ताः पुत्रादिषु एषणा येस्ते तथा ३३ शिवं जलं ज्ञानामृतं यथा स्वं मेदाग्नि प्रायेण निरिच्छेनां ज्ञानमोक्षोपयोगोत्तानि तांस्तान् दानादाने योग्यायोग्यमुमुक्षुर्मुमुक्षुर्न कालभेदं दिव ज्ञापेति ज्ञातव्यं ३४ गाधजलेचराः अल्पजलनिवासिनो मत्स्यादयः प्राणिनः क्षीयमाणं शुष्यमाणं जलं दृष्ट्वा न ज्ञानं सुखं नैवाविदन्। अन्वहं क्षय्यं क्षीयमाणं अंतं गच्छदायुः। अनेन संसारस्यानित्यत्वेन असारत्वं सूचितं भाव ३५ ॥ ॥

राम

५९

शरदर्कः शरदृतुसंबंधी सूर्यः तस्माज्जातः शरदर्कजः तं तापं वोढुं संबद्धं ३६ वीरुधः आसन् अंकुरिताः अनात्मसु आत्मव्यतिरिक्तेषु भुज उद्भिता इत्यर्थः ३७ तु परते तु परतविषयव्यापारे आत्मनिमग्नमपि च द्रष्टावपि सर्वाधिषे हृरोरने सति। उपरतामनः। निभृतस्थानास्थाप्रवणादिकः समाधिस्थ इत्यर्थः ३८ केदारेभ्यः केदारार्थे प्राणेरिंद्रियैः तेषामिंद्रियाणां निरोधेन प्रत्याहारेण ३९ अहं देह इति देहाभिमानो देहविषयं ज्ञानं तस्मात् ज्ञातं देहाभिमानजं तापं बोधः आत्मज्ञानं मुकुंदीय इति शेषः दृष्टांतद्वयं ४० खमाकाशं शरदा विमलानि विशदानि ताराः कान्तियस्मिन् तथा। सत्त्वेन व्यवसायेन युक्तं

ना॰ट

गाधवारिचरास्तापमविंदञ्छरदर्कजं। यथा दरिद्रः कृपणः कुटुंब्यविजितेंद्रियः ३६ शनैः शनैर्जहुः पंकं स्थलान्यामं च वीरुधः। यथाहंममतां धीराः शरीरादिष्वनात्मसु ३७ निश्चलांबुरभूत्तूष्णीं समुद्रः शरदागमे। आत्मन्युपरते सम्यङ् मुनिर्व्युपरतागमः ३८ केदारेभ्यस्त्वपोऽगृह्णन् कर्षका दृढसेतुभिः। यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ३९ शरदर्कांशुजांस्तापान् भूतानामुडुपोऽहरत्। देहाभिमानजं बोधो मुकुंदो व्रजयोषितां ४० खमशोभत निर्मेघं शरद्विमलतारकं। सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनं ४१ अखंडमंडलो व्योम्नि रराजोडुगणैः शशी। यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ४२ आश्लिष्य समशीतोष्णं प्रसूनवनमारुतं। जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ४३ ॥ ॥

सत्त्वयुक्तं वा शब्दात्मकं ब्रह्म वेदस्तस्य मुख्यवाच्यः श्रीनारायणः तं दर्शयतीति शब्दब्रह्मात्मदर्शनं। शब्दब्रह्म हिरण्यगर्भः तस्य आत्मा हेतुः कारणमिति वा ४१ अखंडमंडलं पूर्णमंडलं ४२ मारुतं शारदमिति शेषः। अर्कजनितं तापं। गोप्यः कामार्कजनितं तापं न जहुः। तत्र निमित्तं। कृष्णाहृतचेतसः कृष्णेनाहृतचेतो यासां तास्तथा ४३ ॥ ॥

पुष्पिण्यः कर्मिण्यः । इषभैरिति पाठे मा द्रुसहो हरी विवेकज्ञानशून्यत्वात्तद्योक्तमित्यर्थः । फलैरीशैरचीयमानाः उपमामाना ईशक्रि
याः एवेनः क्रियमाणास्ता सिद्धिया इव फलैः स्वर्गादिलक्षणैः अनुगता इव क्रियाः कुतानिरेकपरिहारार्थाः विलंबमानपाककिया इव नाभनिष्पत्ति
भोगे पुत्री जैफलधनेफलइतिवा ४४ ५ इंद्रयागमहोत्सवैः इंद्रदेवत्याग्रयणैश्चि लक्षणोत्सवैः । हरेः कलाभ्यां कृष्णरामाभ्यां नितरां बभौ । आश्रि
तां आश्रितां ग्रह स्थमात्राणांवा ४६ प्रावृषि वर्षेण रुद्धा शरदि छीयान्नगरात्यत्वनाविर्गत्यार्थान् देयादेयविषयान् प्रपेदिरे वर्षेण रुद्धा नतच्छाहि
तकालेनेत्यर्थः । रुद्धाः साधनसामग्रीसंपत्तिपर्यंतकालेन प्रतिबद्धासिद्धाः मंत्रो बधतपः संपन्नाः पुनर्षाः कालेफलदानाभिमुखेलक्षणे आगते आ
सन्ने छीयान्नगरात्तत्स्त्वेनाभिमतात्देहाद्विर्गत्य स्वपिंडात् निजफलानुभावयोग्यान् देहान्प्रपथा प्रपंद्यंतइत्यन्वयः । वर्णाश्री भारतायं पुष्प्रपिछ्ना

गावो मृगाः खगानार्यः पुष्पिण्यः शरदाभवन् । अन्वीयमाना वृषभैः फलैरीशक्रिया इव ४४ उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना । राज्ञा
तु निर्भयो लोको यथा दस्यून्विना नृप ४५ पुरग्रामेष्वाग्रयणैरिंद्रियैश्च महोत्सवैः । बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ४६
वणिङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे । वर्षरुद्धा यथा सिद्धाः स्वपिंडान्काल आगते ४७ इति श्रीभागवते महापुराणे दशमस्कं
धे अष्टादशोध्यायः श्रीशुक उवाच इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना । न्यविशद्वायुना वीतं सगोगोपालकोच्युतः १

इत्यविशुद्धिया मितियाद्वत् ४७ इति दशमे अष्टादशोध्यायः ॐ स्वयोगपतानुसारेण इह रोज्ञानसाधनं भक्तिः कर्तव्येत्यभिप्रेत्य स्त्रिया आ
तत्र गोपस्त्रीणां कृष्णे स्नेहातिशयं वक्तुमुपक्रमते । इत्थं शरत्स्वच्छजलमित्यादिना । पद्माकराणां सुगंधो यस्यास्तीति पद्माकरसुगंधिस्तेन ।
वायुना आवीतं परिसृतं । इत्थमुक्तविधिना । शरदा स्वच्छं निर्मलं जलं यस्मिंस्तत्तथा । अनेन वायोः शैत्यमुक्तं । न्यविशत् प्राविशदित्यर्थः । मे विशार
ति सूत्रेण लोकिकत्वात्मनेपदविधानं नतु छांदसत्वं । अच्युत इत्यनेन वनक्रीडासु यथार्थपि स्वच्युतिर्नास्तीति सूचयति १ ॥

अथ वनशोभा हेतुत्वेन तत्तत्समुच्चय उच्यते । कुसुमिताः पुष्पोपेताः वनराजयः वृक्षपंक्तयो यस्मिन्तत्तथा शुष्मि मिम्मतैः स्वजातिप्रेष्टैः शर्मिर्गो द्विज
गणोः पक्षिगणोश्च घुष्टं शब्दितं सरांसि सिन्धवो नतदाकाः सरितः स्यंदमानान द्यः महीध्राः पर्वताः यस्मिंस्तत्तथा । मधुपतिर्माधवः । एवं विधं वन
मवगाह्यवेणुं कूजयत्स्वयं । कूजनं मुरतमंत्रणं कामवर्द्धनं सीत्कारोपवेशौचीणां गोपीनां कर्णरागार्थमेव मुकुं १ महः कामः तस्योद
योंकुरीभादः यस्मात्तन्महोदयं । स्मरोदयमिति केचित्पठंति । तद्व्रजगीतमाकर्ण्य का । व्रजस्त्रियः परोक्षं कासांचिदग्रे कृष्णं तत्कुलस्यच

कुसुमितवनराजिसुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं । मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुं १
तद्व्रजस्त्रिय आकर्ण्य वेणुगीतं स्मरोदयं । काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योन्ववर्णयन् २ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचे
ष्टितं । नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ४ बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयंतीं च मा
लां । रंध्रान्वेणोरधरसुधया पूरयन्गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ५ ॥ ॥

रितं स्वसखीभ्योन्ववेदयत्त्रयस्य द्वयः ३ वर्णयितुं कीर्तयितुं ४ हरेस्तदाकारदर्शनेन सुखहेतुरितिभावेन तस्य स्वरूपप्रकारं वक्ति । बर्हा
पीडमित्यादिना । बर्हपिच्छमेवापीडं शेखरो यस्य सः तं नटवरवपुः शुभाकारं बिभ्रत्कनककपिशं पीतं वैजयंतीं पितव्यां स्वपदेन स्वपादेन र
मत इति रमणं रमयत् । रंध्राण्सुषिराणि ५ ॥ ॥

६०.१०

६१

वर्हमेवापिडोयस्य सतथा। वनचरवपुः किरणाकारइवाकारोयस्य सतथा। स्थुमा प्राकारेणनीवप्रुरिति च। वनचरगोपावा कर्णयोः कर्णिकारइत्येकं
पदं। कंठे कालइति वत्स्क वोविन्यासः भंगविशेषः तेन सहांगुली भि अन्यत्र हस्ते सक्तं स क्रेरणाय त्रवेणुमिति शेषः। अंगुलीभी रणयत्रितिवत्स
क्त्वं छंदोभंगभयात्कृतं। गांधर्वं त्र स्हैव भरतशास्त्रोक्त प्रकारमेव गोपवृंदानगापयन्निति द्विकर्मकोयं धातुः। भूतयामं प्राणिसमूहं रं
मन्यत्तु वृंदावनं प्रविशदिति पूर्वेणान्वयः ६ अभिरेमि रेइत्यत्र या रतिः सा सुख्य तएव स्त्रियएव तद्वीत रेस विशेष ज्ञात्वा तदन्या सांतदभावात्
तस्मा देषप्वारिकमभिरमणं। तदुक्तं। स्त्री ह्रेयी वेणुमाश्रित्यरेमे कृष्णमुखांबुजे इत्यादि स्तुरा इतर भांडगाइत्यच इतर भांडा निवेणुमंतरेणान्य

वर्हापीडशोभनचरवपुः कर्णयोः कर्णिकारः सव्येवाहोनिहितवदनः सक्तमन्यत्र हस्ते। भ्रूविन्यासांगुलिभिरणयत्रगापयन्गोपवृंदान्
भूतग्रामं तर्हिरमयत्र ब्रह्मगांधर्वमेव ६ इतिवेणुरवं राजन्सर्वभूतमनोहरं। श्रुत्वाव्रजस्त्रियः सर्वावर्णयंत्योभिरेमिरे ७
गोप्य ऊचुः अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः। वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टंयैर्वाविनि
पीतमनुरक्तकटाक्षमोक्षं ८ ॥ ॥

भूषणानि गतान्याविष्टा इत्यर्थः। इतरेषां रामादीनां वा वेणुमूलधने पात्रे भांडं भूषा भूषयोरितियादवः ७ गोपस्त्रीणां वर्णनप्रकारं दर्श
यति। अक्षण्वतामित्यादिना। यैर्वैर्व्रजेशसुतयोरामकृष्णयोर्वक्त्रं नितरां पीतं दृष्टिभिरिति शेषः। तेषां तेषामक्षण्वतां चक्षुष्मतां चक्षुष्मा मि
दं फलं लाभं विदामो न परं नान्यत्फलं नरकदुःखफलहेतुत्वात्। हे सख्यः कीदृशोर्वयस्यैः पशूननिवेशयतोः। अनु सांध्ये गोष्ठ इति शेषः। अनु
वेणोः पश्चाद्रागे जुष्टं दुवितं। अनुरक्ताः स्निग्धाः कटाक्षमोक्षो यस्मिंस्तत्तथा ८ ॥ ॥

राम

६१

चूतस्य प्रवालादिभिः अनुरक्तपरिधानेन विचित्रः नानाविधः वेषोययोर्ज्ञेतयोः। अनुरक्तो अनुरागोपेतं। पशुपालगोष्ठ्यां गोपगोष्ठ्यां मध्येगवांस
मपिसर्वा नांगोष्ठ्यांग्लाचकथ्यत इत्युत्पलमालाह्वा विलक्षत्वेगायमानौतिष्ठत इति शेषः ९ हेगोप्यः अयं वेणुः किं कुशलं तपोलक्षणं अवत्स्म
स्मरणं कर्तव्यं। किमपष्यत्। तिष्ठत्वं पूर्वजन्मनिवाणां नास्ति तोहंत। निषेधे स्मइतिच। यो वेणुः दामोदरस्याधरोष्ठ सएव सुधातया स्वरसरागमप्य
गोयं भुंक्ते आस्वादयति। ह्रदभोः ह्रदभोक्ति रे सहितास्त्ररवः हृष्टत्वं च अस्मइत्यपोमिति रोमांचितस्वर्णाद्याः येन वेणुनापीतावशिष्टः योरसस्तस्यो

×चु.२

चूतप्रवालवर्हस्तवकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ। मध्येविरेजतुरलंपशुपालगोष्ठ्यांरंगेयथानटवरौक्वचगायमानौ ९
गोप्यः किमाचरदयं कुशलंस्म वेणुर्दामोदराधरसुधामपि गोपिकानां। भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्टत्वचोश्रुमुमुचुस्तरवः सदभोः
१० वृंदावनंसखिभुवो वितनोतिकीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि। गोविंदवेणुमनुमत्तमयूरनृत्यं प्रेक्ष्याद्रितान्वपरतान्यसमस्त
सत्वं ११

घ

घः अत्राश्रेयस्मिन्स्यदवशिष्टरसोघः तस्मिन्मार्गेकृष्णेन संचरितेध्वनि। अश्रुक आनंदजलं मुमुचुरित्यन्वयः। सदर्भाः सकुशा वा १० भुवो
भूमेः हेसखिय वृंदावनं देवकीसुतस्य पादांबुजलब्धलक्ष्मीः श्रीर्येन तदेवकीसुतपदांबुजलब्धलक्ष्मी लक्ष्मीति केचित्। तत्कीर्तिंश्चित्रं गोविंद
स्य वेणुमनु वेणुस्वरानुकूलमेघनादशंकया वेणुस्वरानुकारेणवा। मत्ता नाम यूराणां नृत्यं दृष्ट्वा आद्रिताः सादरा अत्रअनुकूलं चरितं येषां ते
तथा कृष्णचरितानुकूल चरितास्तथान्ये मनुष्य विजातीयाः समस्ताः सत्वाः जंतवो यस्मिंस्तदाद्रितानुचरितान्यसमस्तसत्वं। तत्सत्वोप्त्रीतिवचना
त्स्त्रीगोप्यपेशाद्दूः। आद्रितोसादराद्भिना विति च ११ ॥ ॥

६०
६१

सुहृद्धादिविवेकरहिता मतिर्यासां तास्तथा। कृष्णसारानुसारेण पुंमृगेण वा कान्तमृगेण वा सहिताः नन्दस्य नन्दनं बर्हेणोरचितं निष्टतं बर्हं चापी
पाञ्चाद्यप्रणायेन सहितैः अवलोकनैः ईक्षणैः उत्तमपूजां कृत्वा दधुरिति १२ वनितानामुत्सवरूपं तस्य स्वरूपसारं स्थिरमोदं यस्य तस्य सतश्यातं। तत्स्मोदर्यंच
घभावेचेति। स्वारोवले स्थिरं शोचेतियाठ्वः दैव्योदेवस्त्रियः स्मरेण नुन्नं नष्टं सारं धैर्यं यासां तास्तथा। भ्रश्यत्प्रसूनकबराः विगलत्पुष्पकेशभराः
तेनक्वणितात् वातेन शब्दिताद्वेणो वीतं निर्गतं विविक्तमसम्बद्धं मिश्रं गीतं। विगता विविधान्तः। चित्रमाश्चर्यं तेरथ्य योरितियाठ्वः दे ५१

धन्याः स्म मूढमतयोपि हरिण्य एता यन्नंदनंदनमुपात्तविचित्रवेषं। आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलो
कैः ५२ कृष्णं निरीक्ष्य वनितोत्सवरूपसारं श्रुत्वा च तत्क्वणितवेणुविविक्तगीतं। देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मु
मुहुर्विनीव्यः १३ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबन्त्यः। शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गो
विंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः १४ ॥ ॥

विगताः स्रस्ता नीव्यः वस्त्राणि वस्त्रग्रंथयो वा यासां तास्तथा। नीवीवस्त्रं ग्रन्थिकयोर्ग्रन्थ्योरितिच १३ उत्तम्भितकर्णपुटैः निश्चलकर्णरंध्रभागैः
विगताः ... शावाः वत्साः स्नुतस्तनपयः कवलाः ... शावक्व तस्मिन्पयः कवलाद्रति केचित्। ग्रासाः
कवलाः कवलसहिताः गोविंदमात्मनि हृदि स्पृशंत्यः। दृशा नेत्रेण अश्रुकला बिंदवः स्रवंत्यः शावक्व तस्तनपयः कवलाद्रति ... प्रस्नुत्यये कृते कवले
वत्साः तेषां स्मरणेन कृताः संहृताः क्षीराणि कवलाः। ग्रास्या यासां या सोता स्तथा। तस्थुरित्यन्वयः। अजाद्यन्तः स्थावितिष्ठः प्र...
निष्पन्नमिदं भवति। जाया शब्दवदितिवा १४ ॥ ॥

राम
६२

विगतास्त्यक्ताः स्वजातिसिद्धा वाचो यैस्ते विगतान्यवाचो ध्यानतमोना इत्यर्थः। वनथा आश्चर्यमिदं। हे अम्ब वयं स्त्रीणां मुनीनां च मौनत्व सामान्या
देव मुच्यते १५ नद्यः मुकुंदेन गीतं तदा तदुपधार्य हृद्यवधार्य हृद्यवधार्य। आवर्तैर्भ्रमपद्मभ्रमेणा लक्षितेन मनोभवेन कामेन भग्नो वेगो पा
सांतास्तथा। ऊर्मय एव भुजाः आलिंगनेनस्थगितं लक्षणेन प्रमुदिता ऊर्मिभुजाः आलिंगनप्रमुदितोर्मिभुजास्तैः कमलमेवोपहारो यासां
तास्तथा १६ अंबुदः रूपाम वर्णसाम्यात्सख्युर्मुरारेस्स्ववपुषा तपत्रं व्यधात्। कुसुमावलीभिः नंदनवनपुष्पराजिभिः सह। पद्माजल

प्रायोवताम्ब मुनयो विहगा वनेस्मिन्कृष्णेक्षितं तदुदितं कलवेणुगीतं। आरुह्य ये द्रुमभुजान्रुचिरप्रवालान् शृण्वंति मीलितदृ
शो विगतान्यवाचः १५ नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः। आलिंगनप्रमुदितोर्मिभुजैर्मुरारेर्गृह्णंति
पादयुगलं कमलोपहाराः १६ दृष्ट्वातपे व्रजपशून्सह रामगोपैः संचारयंतमनुवेणुमुदीरयंतं। प्रेमप्रवृद्ध उदितः कुसुमाव
लीभिः सख्युर्व्यधात्स्ववपुषांबुद आतपत्रं १७ पूर्णाः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन। तद्दर्शनस्मर
रुजस्तृणरूषितेन लिंपंत्य आननकुचेषु जहुस्तदाधिं १८ ॥ ॥

कणिकैः सह पुष्पमेघ पुष्पमित्यभिधानात्। प्रेम्णा प्रवृद्धं समुद्रिक्तं हर्षितं हर्षेण रोमांचलक्षणं यस्य सतथा। अभिमान्य पेक्षयेतत् १७
पुलिंद्यः शबरस्त्रियः। तस्मात्कामादुत्पन्नमाधिं मनोदुःखं जहुरित्यन्वयः। कीदृशाः पूर्णाः कृतकृत्याः। तस्य कृष्णस्य दर्शनेन जातस्मर
एव रुग्रोगो यासां ताः। कीदृशमयेतत्तृणेन रूषितेन सह दयितायाः प्रियतमायाः गोप्याः स्तनमंडितेन स्तनयोर्धारितेन। उरुगायस्य ह
रेः पादाब्जयोः स्थितः अरुणयोरपि रागजननार्थं लिप्तेन श्रीमता कुंकुमेनाननकुचेषु लिंपंत्य इति १८ ॥ ॥

द॰पु॰

६३

हंतआश्चर्यमयमद्रिर्गोवर्द्धनो हरिदासवर्यः भगवद्भक्तश्रेष्ठः कुतः यद्यस्मात् रामकृष्णयोश्चरणस्पर्शात् आविर्भूतप्रमोदो हर्षो यस्य सः सह गोगणाभ्यां तयोः पानीयादिभिर्मानं पूजां तनोतीति। यद्यस्मादिदमेवाद्रिभक्तश्रेष्ठत्वं सूयवसं शोभनो ग्रासः। दैर्घ्यच्छिद्रं कंदरं। स्रवदम्भसा गुहा इति दर्शनात् कंदरं गुहा गृहं। हृष्टोऽस्यां तु योगपं कंदं कूरणं मूलं च कंदमूलं कूपमानं दीर्घाकारं कंदरं १९ गोपकैः सह अनुवनं गाः नयतोः संचारयतोः गतिमतां तनुभृत्सु शरीरिषु जंतुषु सख्यं विचित्रमिदं चित्रमपि चित्रं। किं तदिति। कलपदैरुदारवेणुस्वनैः विवशानां जंगमानां अ

हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः। मानं तनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः १९ गागोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः। अस्पंदनं गतिमतां पुलकस्तरूणां नियोगपाशकृतलक्षणयोर्विचित्रं २० एवंविधा भगवतो या वृंदावनचारिणः। वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः

२१ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनविंशोऽध्यायः ॥ ॥

स्पंदनं स्थावरधर्मभजनं तरूणां स्थावराणां पुलकं जंगमधर्मरोमांचभजनं विचित्रं पश्यतेति शेषः। कथमेतत्सुज्यत इति तत्राह। नियोगेति। नितरां योगपाशेन योगशक्तिलक्षणपाशेन कृतं लक्षणं अस्पंदनस्पंदनाख्यं ययोस्तयोः यद्वा नियोगपाशः क्षेपणं त्वचः तेन कृतं ययोर्गाविक्षयपोः ॥२०॥ वृंदावनचारिणो हरेरेवं विधाः याः क्रीडास्ता मिथो वर्णयंत्यो गोप्यः तन्मयतां तच्चित्ततां ययुः २१ इति दशमे एकोनविंशः १९ ॥ ॥

राम

६३

भक्तिरेव भगवत्प्रसादजननीति दर्शयितुं गोपकुमारीणां कृष्णे भक्तिं निरूपयत्यस्मिन्नध्याये। तत्र तासां हरेः स्वर्दकार्याणामंतरंगां त्यापनीतितद्दर्चनाव्रतकारणेन श्रीकृष्णः प्रसन्नो भवतीति तदर्चनाविधिं कथयति। हेमंत इति। कार्त्तिकमार्गशीर्षमासौ हेमंतः तत्र प्रथमे मासि कार्त्तिकमासे व्रतं नियमं १ कालिंद्याः यमुनायाः जलांते जलसमीपे। च शब्द एवार्थः। उदिते अरुणे अरुणोदय एव। सैकतीं

श्रीशुक उवाच हेमंते प्रथमे मासि नंदव्रजकुमारिकाः। चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनाव्रतं १ आप्लुत्यांभसि कालिंद्या जलांते चोदितेऽरुणे। कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीं २ गंधैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः। उच्चावचैश्चोपहारैः प्रवालफलतंडुलैः ३ कात्यायनि महामाये महायोगिन्यधीश्वरि। नंदगोपसुतं देवि पतिं मे कुरु ते नमः ४ इति मंत्रं जपंत्यस्ताः पूजां चक्रुः कुमारिकाः। उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः ५ कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्नातुमन्वहं। एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः ६ भद्रकालीं समानर्चुर्भूयान्नंदसुतः पतिः। नद्याः कदाचिदागत्य तीरे निक्षिप्य पूर्ववत्। वासांसि कृष्णं गायंत्यो विजह्रुः सलिले मुदा ७ ॥ ॥

तीं सिकतानिर्मितां प्रतिमामानर्चुः पूजां चक्रुः २ बलिभिः परिवारदेवताविषयपूजाभिः ३ कात्यायनि कत्यानाम्नस्त्वादके महती माया माहात्म्यं यस्याः सा तथा तस्याः संबुद्धिः महामाये। महान् योगउपायो यस्याः सा इति महायोगिनी तस्याः संबोधनं महायोगिनि। अधिगते श्वरि तेन तुल्यं न मोक्षिति ४ इति समाप्तिः एवं प्रकारं वा उषसि ब्राह्मे मुहूर्ते ५ ६ नंदस्य पाश्र्यास्मद्दत्ते वंसं कल्पनदीमागत्य नदीप्राप्य ७ ॥

द०पू०

योगेश्वरेश्वरत्वेनेदं श्रवणदर्शनादिशक्तिः सूच्यते । तासां कर्मसिद्धये संकल्पितव्रतफलसिद्ध्यर्थं ८ नीपमर्जुनं । परितो हासो यस्मिंस्तद्वचनं परिहासं ९ ॥ क्ष्वेलितं सिंहवन्नादितं । परिहासेनोदितं वा । न निर्ययुर्जलादिति शेषः १२ नर्मणा । हे इति स्नेहविनोदवचनेन ३

भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः । वयस्यैरावृतस्तत्र गतस्तत्कर्मसिद्धये ८ तासां वासांस्युपादाय नीपमारुह्य सत्वरः । हसद्भिः प्रहसन्बालैः परिहासमुवाच ह ९ अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यतां । सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्शिताः १० न मयोदितपूर्वं वा अनृतं तदिमे विदुः । एकैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः ११ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः । व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः १२ एवं ब्रुवति गोविंदे नर्मणाक्षिप्तचेतसः । आकंठमग्नाः शीतोदे वेपमानास्तमब्रुवन् १३ मानयं भोः कृथास्त्वां तु नंदगोपसुतं प्रियं । जानीमोंग व्रजश्लाघ्यं देहि वासांसि वेपिताः १४ श्यामसुंदर ते दास्यः करवाम तवोदितं । देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे १५ श्रीकृष्ण उवाच भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ । अत्रागत्य स्ववासांसि प्रतीच्छत शुचिस्मिताः १६ नो चेन्नाहं प्रदास्ये किं क्रुद्धो राजा करिष्यति । ततो जलाशयात्सर्वा दारिकाः शीतवेपिताः १७ पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुह्णीरसंगताः । भगवानथ ता वीक्ष्य शुद्धभावप्रसादितः । स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितः १८ ॥ ॥

शीतजलेषु स्थित्या वेपिताः वयं १४ ते तव दास्यः स्याम भवाम । राज्ञे नंदगोपाय १५ ६ दारिकाः कुमार्यः १७ शुद्धभावेन राम मधुरसद्भावेन प्रसादितः प्रसादं गमितः १८ ॥ ॥

यूयं वस्त्रहीना अपो जलं व्यगाहतेति यत्तदेतत् । उतापकारणं देवहेलनं देवतापराधः । अतस्तस्यांहसः अपराधस्य परिहाराय उताधोवसनमीशोनाचेति याद्दकः १९ विवस्त्राप्लवनं शीतवर्ष्मानं व्रतच्युतिनियमभंगं । तत्पूर्तिकामा तत्स्वव्रतस्य पूर्णतां कामयानाः । तासामशेषकर्मणां साक्षात्कृतं साक्षीभूतं कृष्णं नेमुः । अनेनाकिंप्रयोजनमतः । अवद्यमिति । उद्दिश्य तमुन्नलायितं २० करुणः दयाशीलः २१ तासां कृष्णमत्यतिशयं कम्पयति । दृढमिति । प्रलब्धाः वंचितवत्कारिताः । हापिताः त्याजिताः मुक्तलज्जाः कारिताः । प्रस्तोभिताः चाटुवच

यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनं । बद्ध्वांजलिं मूर्ध्न्यपनुत्तयेंहसः कृत्वा नमोधो वसनं प्रगृह्यतां १९ इत्यच्युतेनाभिहिता व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिं । तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः २० तास्तथावनता दृष्ट्वा भगवान्देवकीसुतः । वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः २१ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः । वस्त्राणि चैवापहृतान्यथाप्यमुं नैवाभ्यसूयन्प्रियसंगनिर्वृताः २२ परिधाय स्ववासांसि प्रेष्ठसंगमसज्जिताः । गृहीतचित्ता नो चेलुस्तस्मिंल्लज्जायितेक्षणाः २३ ॥ ॥

नजाले आपिताः । क्रीडनवत् ... वत् । अथापि तथापि अमुं कृष्णं प्रति । गुणेषु दोषाविष्करणमसूया । तत्र हेतुमाह प्रियेति । प्रियेण कृष्णेन सह हंसकथनलक्षणसंगेन निर्वृताः २२ प्रेष्ठस्य कृष्णस्य संगमे सज्जिताः सन्नद्धाः । न चेलुः स्थितप्रदेशादिति शेषः । लज्जया ईषन्निमील्यपेक्षितानीक्षणानि यासां ताः । यद्वा लज्जामिषिता निगतानि ईक्षणानि यासां ताः । अथवा दृष्ट्वा गता इति ख्यातिः २३ ॥

द॰भू॰

पादं शरीरां उज्ञमानां शरीरं तु पादस्पर्शेन भए पतइति २४ यन्मदर्चनं तस्मिन्कृतः नंदसुतः पतिर्भूयादिति संकल्पः अनुमोदितः अनुज्ञातः २५ मत्संभोगलालसानां भवतीनां विषयोन्मुखं कांचनः संसारवर्त्मनायन स्यादतो स्मत्संकल्पो निंद्य इति शंकामाशुरित्या

९५

तासां विज्ञाय भगवान् स्वपादस्पर्शकाम्यया। धृतव्रतानां संकल्पमाह दामोदरो बलाः २४ संकल्पो विदितः साध्व्यो भवतीनां मदर्चनं मयानुमोदितः सो सौ सत्यो भवितुमर्हति २५ न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिताः क्वथिता धाना प्रायो बीजाय नेष्यते २६ यातवाला व्रजं सिद्धाः मयेमा रंस्यथ क्षपाः। यदुद्दिश्य व्रतमिदं चरुस्थार्यार्चनं सतीः २७ श्रीशुक उवाच इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः। ध्यायंत्यस्तत्पदांभोजं कृच्छ्रान्निर्विविशुर्व्रजं २८ अथ गोपैः परिवृतो भगवान्देवकीसुतः। वृंदावनाद्गतो दूरं चारयन्गाः सहाग्रजः २९ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः। आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः ३० हे स्तोककृष्ण हे अंशो श्रीदामन्सुबलार्जुन। विशालर्षभ तेजस्विन्देवप्रस्थ वरूथप ३१ पश्यतैतान्महाभागान्परार्थैकांतजीविनः। वातवर्षातपहिमान्सहंतो वारयंति नः ३२ ॥ ॥

या॰७

शयेनाह। नेति। कामा यद्विषये छायश्रोत्राय। तत्र दृष्टांतमाह। भर्जितेति। धानाः बीजं बीजाय अंकुराय न भवति मते २६ आर्यार्चनं कात्यायनीपूजां। सतीः सत्यः २७ ८ व्रजौकसः आहेत्यन्वयः २९ तिग्मे तीव्रे ३० १ परार्थाय परोपकाराय एकांतेन नियमेन जीवनं स्वात्मरक्षणं एषां तेतान्। नः वारयंति कृच्छ्रितान्नोस्मान्सुखयंति ३२ ॥ ॥

सुजनस्य जन्मनः साफल्यमेतावता अर्थिनो येषां विमुखा न यांति। इति पत्रोक्तैः अंकुरैः साफल्यमेतावता अस्ति सारः ३५ इति दशमे विंशोध्यायः कृष्णभक्तो पोषयतैव वलीयसीन राम कृष्णानंद इत्येतत्कथ्यत्यस्मिन्नध्याये। तत्र गोपानां कृष्णस्य च प्रश्नप्रतिवचने कथयति। शुक इति। दुष्टनिवर्हण दुष्टजनोन्मर्दन कृतभोक्तृ क्षुधा बाधते क्लिश्नाति। तस्याः क्षुधः शांतिं प्रशमं। शांतिः प्रशमनं गलेतिपा स्वः

अहो एषां वरं जन्म सर्वप्राण्युपजीवनं। सुजनस्येव येषां वै विमुखा यांति नार्थिनः ३३ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ३४ एतावज्जन्मसाफल्यं देहिनामिह देहिषु। प्राणैरर्थैर्धिया वाचा श्रेयआचरणं सदा ३५ इति प्रवालस्तवकफलपुष्पदलोत्करैः। तरूणां नम्रशाखानां मध्येन यमुनां गतः ३६ तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः। ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलं ३७ तस्या उपवने कामं चारयंतः पशून्नृप। कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन् ३८ इति श्रीभागवते महापुराणे दशमस्कंधे विंशोध्यायः श्रीशुक उवाच राम राम महाबाहो कृष्ण दुष्टनिवर्हण। एषा वै बाधते क्षुन्नस्तच्छांतिं कर्तुमर्हथः १ इति विज्ञापितो गोपैर्भगवान्जगदीश्वरः। भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत्। २ श्रीशुक उवाच प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः। सत्रमांगिरसं नाम ह्यासते स्वर्गकाम्यया। ३ तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः। कीर्तयंतो भगवत आर्यस्य मम चाभिधां ४ इत्यादिष्टा भगवता गत्वायाचंत ते तथा। कृतांजलिपुटा विप्रान्दंडवत्पतिता भुवि ५ ॥

२ विप्रभार्यायाः पतित्यक्तायाः २ देवयजनं यज्ञवाटं सत्रं बहुकर्तृकं आंगिरसं अंगिरसाद्दृष्टं इत्यतिनाकथितं ब्रह्मस्य तिस्रवन प्रित्यर्थः। आसते कुर्वंति। अनेकत्वाद्ब्राह्मणानां। हि शब्दो हेतौ। यस्मात्तत्रेश्वरं देवं तस्माद्यात ३ अस्मद्विसर्जिताः मित्युक्ताः निर्मुक्ताः। आर्यस्य ज्येष्ठस्य रामस्य अभिधानाम ४ निरा भारो दंडो यथा पतति ५ ॥ ॥

८.५

६६

हे भूमिदेवाः ब्राह्मणाः भूमिदेवो द्विजोऽग्रजन्मा इति हलः ५ लषतो भिलषत इच्छतः अद्य द्युक्षाश्रिकं । अभिलाषो वा । बुभुक्षा क्षुत् अभिलाषयोः ॥ तियादवः ६ न दीक्षितान्नं न भोक्तव्यमिति शास्त्रविरोधं परिहरति । दीक्षाया इति । दीक्षायाः प्रतसंस्थः पशुपायाः वर्तमानायाः सत्याः पशुसं स्थायां सौत्रामण्यां च सौत्रामणीनामकेष्टौ अन्यच कर्मान्तरे दीक्षितस्य चान्नमन्नं दीक्षितस्यान्नमश्नन् । सौत्रामण्या अथ्यासौत्रामणीनामकेष्टौ ... कर्मणा दुष्यति ७ इति हेतुर्भगवद्याच्ञां श्रवणेऽपि ते षां बुद्धिविशेषमाह । क्षुद्राशा इति । क्षुद्राशाः तुच्छफलेच्छवः तदर्थं भूरिकर्माणः

हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः । प्राप्तान्जानीत भद्रं वो गोपान्नो रामचोदितान् ५ गाश्चारयन्तावविदूर ओदनं रा माच्युतौ वो लषतो बुभुक्षितौ । तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ६ दीक्षायाः पशुसंस्थायाः सौत्रा मण्याश्च सत्तमाः । अन्यत्र दीक्षितस्यापि नान्नमश्नन्हि दुष्यति ७ इति ते भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः । क्षुद्राशा भूरिक र्माणो बालिशा वृद्धमानिनः ८ देशः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः । देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ९ तं ब्रह्म प रमं साक्षाद्भगवन्तमधोक्षजं । मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे १० ॥ ॥

किमेते भ्रान्ता इति सत्यमित्याह । बालिशाः मूर्खाः । बालिशो बालमूर्खयोरिति । एतदेव द्रढयति । वृद्धेति । वृद्धा इत्यभिमानो येषां मन्त्रीति मातृकस्य बाह्यस्य तत्र विषयो वा ८ कालः वसन्तादिकालः । पृथक् द्रव्यं चतुष्पोडशादि । मन्त्रो देवता ब्रह्मा दक्ष काण्डकोंकारादिः । तन्त्रम नुष्ठानविधिः । ऋत्विजो ब्रह्मपुत्रः श्रुतयः । अग्नयो आहवनीयादयः । देवता इन्द्रादिः । शक्र वायवः । क्रतुः संकल्पः । यजमानो धिकारी धर्मो हृष्टं यन्मयः यत्प्रधानप्रतिपाद्यः ९ मर्त्यात्मानः देहोऽहमितिबुद्धियुक्ताः । न मेनिरे न ज्ञातवन्तः १० ॥ ॥

रा.म

६६

तथोमयं कृत्स्नमिति चेति च ११ लौकिकीं गतिं लोकसिद्धां रीतिं १२ दानेकारणमाह्रासमयीति । धिया मय्युषिताः मामेव चिंत यन्त्य इत्यर्थः १३ द्विजसतीः द्विजपत्नीः १४ चरता बुभुक्षितेन । ताच्छीलिकः शतृप्रत्ययः । चरगतिभक्षणयोरिति धातोः १५ ।

श्री

न ते यदोमिति प्रोचुर्न नेति च परंतप । गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ११ तदुपाकर्ण्य भगवान्प्रहस्य जगदीश्वरः । व्याजहार पुनर्गोपान्दर्शयन्लौकिकीं गतिं १२ मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतं । दास्यन्ति काममन्नं वः स्निग्धा मय्युषि ता धिया १३ गत्वाथ पत्नीशालायां दृष्ट्वासीनाः स्वलंकृताः । नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् १४ नमो वो द्विजपत्नी भ्यो निबोधत वचांसि नः । इतोऽविदूरे चरता कृष्णेनेहेषिता वयं १५ गाश्चारयन्स गोपालैः सरामो दूरमागतः । बुभुक्षितस्य तस्या न्नं सानुगस्य प्रदीयतां १६ श्रुत्वाच्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः । तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः १७ चतुर्वि धं बहुगुणमन्नमादाय भाजनैः । अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः १८ निषिध्यमानाः पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः । भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः १९ यमुनोपवनेऽशोकनवपल्लवमंडिते । प्रचरन्तं वृतं गोपैर्ददृशुः साग्रजं स्त्रियः २०

चतुर्विधं भक्ष्यभोज्यलेह्यचोष्यपानात्मकं बहुगुणं मधुरादिगुणोपेतं १८ दीर्घश्रुतेन बहुकालश्रवणेन भगवति धृत आशयो याभिस्ताः कदाऽनु द्रक्ष्याम इत्याशयोऽभिप्रायः १९ २० ॥ ॥

किंशुकविशिष्टं ददृशुरिति तत्राह श्याममिति मेघश्यामं हिरण्यपरिधिं सुवर्णमिवोज्ज्वलं सुवर्णवत्पीतांबरं वा। वनमाल्येन वनपुष्पेण बर्हेण धातुना गैरिकेण प्रवालेन नटवेषवद्वेषो यस्य। अंसे तथा तं। अनुव्रतांसे कस्यचित्सख्युः स्कंधे। कर्णोत्पलं च अलकाः कुंतलाः कपोलौ च मुखाब्जे हासो यस्य स तथा तं। धुनानं परिक्षिपंतं २१ दीर्घकालमारभ्य श्रुतः प्रियतमस्योदयो दीर्घश्रुतप्रियतमोदयः स एव कर्णपूराः कर्णालंकरणानि तैर्यस्मिन्कृष्णे निमग्नमनसः अवगाह्य हृष्टहृदयाः पूर्वतास्त्रियो यतं कृष्णं कर्णविवरैरंतः प्रवेश्य सुचिरं परिरभ्य

श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे। विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं २१ दीर्घश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः। अंतः प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र २२ तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया। विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः २३ श्रीभगवानुवाच स्वागतं वो महाभागा आस्यतां करवाम किं। यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः २४ ॥

परिरभ्य आलिंग्य तापं स्मरनिमित्तं ज्वरं जहुः। कथमिव यथा प्राज्ञाः सुषुप्त्यवस्थासाक्षिणः। प्राज्ञं प्राज्ञाभिमतयः इंद्रियवृत्तयः तापं त्यजंति। एतानुत्पत्तिदा संपन्नो भवतीति श्रुतेः। यद्वा भगवत्तत्त्वज्ञाननिपुणाः। प्राज्ञमिति पाठे परिरभ्येति संबंधः २२ त्यक्तसर्वाशाः त्यक्ता सर्वा तितृष्णाः। आशा दिति गतत्तत्र योरिति चा दृशा अपरोक्षज्ञानेन। तासां भक्तिं विज्ञाय अखिलदृक्‌ अखंडज्ञानी २३ अप्येताः आगताः। यद्यस्मादिदं वः उपपन्नं युक्तं २४ ॥ ॥

एवं कुशलं पुण्यमेवार्थः कुशलार्थः स्वस्य नितरां दर्शनं येषां ते कुशलार्थनिदर्शनाः। अथीसमर्थ्ये वि ह्वानाधिक्रियते इति स्वनात्। कुशला निपुणाः स्वार्थनिदर्शिनास्तु ते तथा। अथीभगवान्निदर्शनमुदाहरणं येषां ते तथा। कुशलाः स्वार्थदर्शिना इति पाठः। एते अद्धा विषयाभिलाषं न कुर्वंति किं तु आत्मप्रियेभगवति अहेतुकीं निर्निमित्तां अव्यवहितां निरंतरीभूतां भगवद्भक्तिमधिकुर्वंति। अधिकां कुर्वंति। कथमिव यथा आत्मप्रियेस्व भर्तरि भगवतीति शेषः। यथावच्छास्त्रविहितप्रकारेण। नदेतत्स्वेय इति श्रुतेः। हेहारिम्यो ति प्रियत्वं हरेरिति गतिपादयति। यद्वा स्वार्थदर्शिनाः स्वर्गादिफलार्थदृष्टयः कुशलाः यस्त विद्यानिपुणाः अहेतुक्यव्यवहितां। अद्धा साक्षात्कुर्वंति।

नन्वद्धा मधि कुर्वंति कुशलार्थनिदर्शिनाः। अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा २५ प्राणबुद्धिमनः स्वात्मदारापत्यधनादयः। यत्संपर्कात्प्रिया आसन्ततः कोन्वपरः प्रियः २६ तद्यात साध्वोपजनं पतयो वो द्विजातयः। स्वसत्रं पारयिष्यंति युष्माभिर्गृहमेधिनः २७ यज्ञपत्न्य ऊचुः मैवं विभोर्हति भवान्गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलं। प्राप्ता वयं तुलसिदामपदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् २८ ॥ ॥

अप्यधिके ईश्वरे न कुर्वंति। व्यतिरेकदृष्टांतमाह। अहैतुकीति। भक्ता आत्मप्रियेमयि यथा भक्तिं कुर्वंति। न तथेति २५ तव सर्वस्मादाधिक्यं कुतइत्यत्राह। प्राणेति २६ यस्मादेवं ईश्वरेमयि भक्तिं कुर्वंति नान्यत्र तस्माद्युष्मत्स्वीत्याह। स्वसत्रमिति। यात अद्य यज्ञं कुतुतेत्याह। तदिति। गंतव्ये निमित्तमाह। पतयइति। वः पतयः द्विजातय इति यतः। आत्मज्ञपो नो वितः अतइत्याह। निमित्तांतरमप्यस्तीत्याह। स्वसत्रमिति। पारयिष्यंति संपादयिष्यंति २७ यातेति चर्द्धांसं परुषं गदितुं। निगमं नमेभक्तः प्रणश्यतीति वचनं तं च सत्यं कुरु। पदावसृष्टं श्रीपादच्युतं। तेन दत्तं वा। तुलसीदाम श्रीतुलसीमालां केशैर्नितरां वोढुं तव पादमूलं प्राप्ताः २८ ॥ ॥

कालक्षेपात् हिंसा तपोसुभ्राच गृह्णंती निसूचितं तत्र तस्य छायाभावात् पुनर्गमनेनेन गृह्णंतीत्याकृग्गृह्णंतीति । ततश्शरणं विधेहि कुरु २९ कुत एव चान्ये इत्यत्राह लोका इति ३० तत्र पारमूलं श्रमाश्च इत्यत्रांगसंगः सूचितः तत्राह नेति । इह नृणामंगसंगो मत्प्रीतये न भवति । ममा नुरागाय चन न स्यात् । तस्मान्मयि मनो युंजानाः सूर्यं सिद्धिं मामवाप्स्यथेत्यत्र यः । अनेनाहं भक्त्यैव तुष्टो भवामि नान्येनेति सूचितं ३१ इतिश श्रोहेतो ३१ विधृता शृथ कृता तत्कृतेत्यर्थः । विनिषेधे शृथ यज्ञावेदितियादवः । कर्मानुबंधनं कर्मानुगं ३३ ४ वाशितैः सर्वोत्कर्मभिश्रागोगो

गृह्णंति नो न पतयः पितरौ सुता वा न भ्रातृबंधुसुहृदः कुत एव चान्ये । तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिंदम तद्वि धेहि २९ श्रीभगवानुवाच पतयो नाभ्यसूयेरन् पितृभ्रातृसुतादयः । लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ३० न प्रीत येनुरागाय ह्यंगसंगो नृणामिह । तन्मनो मयि युंजाना अचिरान्मामवाप्स्यथ ३१ श्रीशुक उवाच इत्युक्ता द्विजपत्न्यस्ता यज्ञवाटं पुनर्गताः । ते चानसूयवस्ताभिः स्त्रीभिः सत्रमपारयन् ३२ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रुतं । हृदोपगुह्य वि जहौ देहं कर्मानुबंधनं ३३ भगवानपि गोविंदस्तेनैवान्नेन गोपकान् । चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ३४ एवं लीला नरवपुर्नृलोकमनुशीलयन् । रेमे गोगोपगोपीनां रमयन्रूपवाक्कृतैः ३५ अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः । यद्वि श्वेश्वरयोर्याच्ञामहन्म नृविडंबयोः ३६ ॥ ॥

विघ्नता ४

पत्नीनां मनोभिरमन् ३५ न चैते विप्राः समीचीनाः उतासमीचीनाः । नाद्यः अनुभावदर्शनात् । न द्वितीयः । कृष्णपरायणानां स्त्रीणां पाणि ग्रहणसंबंधदर्शनात् । अथ कथं निर्णय इति राज्ञो मानसीं शंकां परिहरति । अथेति ते विप्राः आयमंगलाः कुतः अन्वतप्यन्त यतः कृतागसः कृतापराधत्वात् । अपराधसद्भावे किं प्रमाणमिति तत्राह । अनुस्मृत्येति । अनुस्मरणं प्रमाणमित्यर्थः । कोसावपराध इति तत्राह यदिति । अहनम हिंसितवंतः तिरस्कृतवंत इति यत्स इत्यर्थः । नृविडंबयोः मनुष्यमनुकुर्वतोः ३६ ॥ ॥

तेषामनुतापः कथमभूदितितत्राह दृष्ट्वेति ३७ किमाकारोसावितितत्राह धिगिति । ततो जन्मादिकं धिक् कुत्सितं धिग्गर्ह्यं न कुत्सन इति च ३८ शास्त्रज्ञानमप्रयोजकं प्राप्तकाले फलाभावादतो भगवदनुग्रह एव वरीयानित्याशयेनाह । नूनमिति । मायिनां ज्ञानिना मपि । अत्र हेतुमाह । यद्वयमिति । गुरवो द्विजातय इत्येते द्वयं मोहासंभवहेतुः ३९ दुरंतभावं । अव्यवहितभक्तिं । गृहाभिधान्मृत्युपाशा

दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीं । आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ३७ धिग्जन्म नस्त्रिवृद्यत्तद्धिग्व्र तं धिग्बहुज्ञतां । धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ३८ नूनं भगवतो माया योगिनामपि मोहिनी । यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ३९ अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ । दुरंतभावं यः छिंद्यान्मृत्युपाशान्गृहाभिधान् ४० नासां द्विजातिसंस्कारो न निवासो गुरावपि । न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ४१ अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे । भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ४२ ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया । अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ४३ अन्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः । ईशितव्यैः किमस्माभिरीशस्यैतद्विडंबनं ४४ ॥

रुद्धिं ग्रामत छिनत्ति ४० आसां स्त्रीणां द्विजातिसंस्कारः उपनयनलक्षणः । गुरौ गुरुकुले निवासो विद्याध्ययनार्थमिति शेषः । आत्ममीमांसा ब्रह्मविचारः । शौचं बाह्यमांतरं शुद्धिः । शुभाः क्रियाः यागादिलक्षणाः ४१ २ अन्यथास्मरणं पि दृत्वेनापि । तर्हि स्त्रीणां किमर्थं कृत मितितत्राह ईशस्येति ४४ ॥

द०स्कं०

स्वात्मदोषापवर्गेण। अन्यत्र चंचलत्वादिति स्वकीयदोषपरित्यागेन स्थैर्यस्वभावेनेत्यर्थः ४५ ९ अथापि अच्युतमात्रापि हरिं द्रष्टुं वोद्दष्टुकामा अपि नाचलन्नागच्छन् कुतः कंसाद्भीता इति ५० इति दशमे एकविंशोऽध्यायः स्वमहिमानं प्रकटयितुमुत्पथवर्त्मी

६९

हित्वान्याभजते यं श्रीः पादस्पर्शाशया सकृत्। स्वात्मदोषापवर्गेण तद्याञ्चा जनमोहिनी ४५ देशकालपृथग्द्रव्यमंत्रतंत्रर्त्विजोऽग्नयः। देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ४६ स एष भगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः। जातो यदुष्वित्यशृण्म ह्यपि मूढा न विद्महे ४७ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे। यन्मायामोहितदृशो भ्रमामः कर्मवर्त्मसु ४८ स वै न आद्यः पुरुषः स्वमायामोहितात्मनां। अविज्ञातानुभावानां क्षंतुमर्हत्यतिक्रमं ४९ इति स्वाघमनुस्मृत्य विप्रास्ते कृष्णहेलनाः। दिदृक्षवोऽप्यच्युतयोः कंसाद्भीता न चाचलन् ५० इति श्रीभागवते महापुराणे दशमस्कंधे एकविंशोऽध्यायः श्रीशुक उवाच भगवानपि तत्रैव बलदेवेन संयुतः। अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् १ तदभिज्ञोऽपि भगवान्सर्वात्मा सर्वदर्शनः। प्रश्रयावनतोऽपृच्छद्वृद्धान्नंदपुरोगमान् २ ॥ ॥

प्रभुषः अस्मागोपि देशेन शिक्षणीय इति शास्त्रशासनं अपश्यन् कृष्णः सन्मार्गं दर्शयितुमुपक्रमत इत्याह। स एक इति। तत्रैव व्रज एव निवसन् १ सर्वात्मा सर्वदर्शन इत्येतत्स्वरूपं तदभिज्ञत्वे हेतुः। प्रश्रयः सेवाशीलता २ ॥ ॥

राम ६९

कोऽयं किं विषयः मख विषयश्चेत्तत्राह। किं फलमिति दृष्टमुत नादृष्टं फलं। यद्वा किमर्थं संभ्रमः अस्य संभ्रमस्य किं फलं साध्यं मख श्रेत्याह। कस्येति कां देवतामुद्दिश्य। यद्यप्यपागमलक्षणं केनाधिकारिणा हेतुना वा ३ एतत्सर्वं मह्यं ब्रूहि किमर्थं। महान्कामः मम तस्मिन्कार्ये महत्या कांक्षा वर्त्तते। तर्हि शुश्रूषा इत्यर्थः। इह वाच्यव्यवहारविशेषे यत्सर्वात्मना कीर्त्यं तत्कुर्यो यत्तत्साधनं गोप्यं नहि। कुत इत्यं कल्प्यत इत्यतः प्रसिद्धत्वादित्याह हीति ४ कथमेतदवगतमिति तत्राह। अस्तीति। निरस्तस्वकीयपरदृष्टीनां सत्वादिसत्तानेषं विशेषो दुर्घट इति तत्राह अमित्रेति। न विद्यते मित्रं उदास उदासीनः विद्विट् येषां ते तथा तेषां मित्रादिविशेषाभावात्स्वकीयत्वादिबुद्धभा

कथ्यतां मे पितः कोऽयं संभ्रमो व उपागतः। किं फलं कस्य वोद्देशः केन वा साध्यते मखः ३ एतद्ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः। न हि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ४ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां। उदासीनोऽरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ५ ॥

वेन साधूनां गोप्यं नास्तीति प्रसिद्धमेवेत्यर्थः। ननु चेतनानां चित्तस्य प्रमितत्वेन साधूनां मित्राद्यभाववचनं कंठोपरि गव्हरोपचारिकं परो ज्ञाजियाद्वहिर्देवाः प्रत्यक्षद्विष इति श्रुतेः। मत्कर्मापि यते मंत्र इति स्मृतेः। अतः कथं गोप्यं नास्तीत्याशंक्य योग्यतातिरेकेण मित्रादिकं नास्तीति तत्त्वं ननु सर्वात्मना। अतो गोप्यं नास्त्येवेति। शत्रुः सर्वथा वर्ज्यः मित्रविपर्ययेण उदासीनपितृयातस्य शत्रोः कथनसंभवादरिवद् सुहृद् वर्ज्य आत्मवत्सुहृदवर्ज्य इत्यभिप्रायेणाह। उदासीन इति। अतस्तव सुहृत्त्वाद्गोप्यमपि मह्यं ब्रूहीति भावः ५ ॥

अस्मात व वक्तव्यं अथाप्यस्माकं फलज्ञानाभावेपि संध्योपासनादियदनुष्ठानं घटत इत्याशंक्य सत्यं ज्ञानाभावेप्यस्माकं फलप्राप्तिर्न स्यादित्याह। ज्ञात्वेति। कश्चित् ज्ञात्वानुतिष्ठते कश्चिद ज्ञात्वा तत्र विदुषः कर्मसिद्धिः अनुष्ठानफलं स्यात्। अविदुषः कर्म्मानुष्ठानमजानतः पुंसः यथा तत्फलं न भवेत्। मंत्राद्युत्पाद्यसंपत्याच अत्विगनुगुणेन वा किंचित्तं भवेत्फलं न भवेत्पूर्णफलं न स्यादित्यर्थः। यथा विदुषोन स्यात्तथाविदुष इति वा ६ अस्त्वत्र प्रकृते किमिति तत्राह। तत्रेति। तत्र देवताकर्म्मणां मध्ये तावत्त्वया मं क्रियायोगः कर्म्मानुष्ठानप्रकारः लौकिको रूढव्यवहारादेवागतः गतानुगतवत्। ७ पर्जन्य इन्द्रस्य गर्ज्जन्मेघे पिवन्तं गतस्माद्धारः ह्यन्यार्थं इंद्र इति। तद्धीन्द्र

ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुतिष्ठते। विदुषः कर्मसिद्धिः स्याद्यथा नाविदुषो भवेत् ६ तत्र तावत्क्रियायोगो भवतां किं विचारितः। अथवा लौकिकस्तन्मे पृच्छतः साधु भण्यतां॥७॥ नंद उवाच पर्ज्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्त्तयः। अभिवर्षंति भूतानां प्राणनं जीवनं पयः ८ तं तात वयमन्ये च वार्मुचां पतिमीश्वरं। द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः ९

इत्येवानमितिचेत्। अस्य मेघा मिमानित्व विशेषद्योतनार्थत्वात्तत्क्रयमत्रा इमे घा इति। आत्मवदेह इन्द्रमूर्त्तयः देहाः स्वदेहो यथाभिमन्यमानत्वेन प्रेष्ठस्तथा मेघा अपीति भावः। मेघैः किंप्रयोजनं लोकस्येत्याशंक्य मिहसेचन इति धातुनिष्पन्नमेघशब्दार्थं सूचनपूर्वकं तत्प्रयोजनमाह। अभिवर्षंतीति प्राणनं चेष्टाकरणं जीवनं शारीरप्यायनं। अनेन प्राणशब्दविवरणं कृतं। प्राणिनामिति पाठेपि प्र योगते इति तेन पयः शब्दवाच्यत्वे जलस्य पयगतिविति धातोरर्थः ८ यतो मेघा लोकोपकारिणः तन्नस्माद्धार्मुचां जलदानां मेघानां मित्यर्थः। ई श्वरत्वं पूर्णत्वे शिक्षणासमर्थं तेषां मेघानां रेतसा रतिकरलक्षणेन जलेन सिद्धैरुत्पन्नैः। अन्ये च नराः ९ ॥ ॥

तच्छेषेण इष्टावशिष्टेन। त्रिवर्गफलहेतवे धर्म्मार्थकामलक्षणपुरुषार्थसिद्धये। पुरुषकाराणां पराक्रमसिद्धकर्म्मणां फलभावनः फलसाधकः १० विपक्षे बाधकमाह। य एवमिति। कामात् दुर्विषयाभिलाषात्। लोभाद्वित्तव्ययशंकया राजभयात् देवताद्वेषात् ११ मन्युं क्रोधं १२ कर्म्मफलदातृत्वेन कर्म्मप्रेरयितृत्वेन कर्म्मशब्दवाच्यत्वेन नारायण एव सर्वस्य कर्त्तेत्यभिप्रेत्य सर्वस्य कारणं कर्म्मेत्येवाह। कर्म्मणेति १३ ननु घटस्येव बुद्धिपूर्वकत्वेन कर्म्मणोचेतनत्वेन तदयोगात् जगन्नदृष्टी नमितिवक्तुं न शक्यं। किंतु चेतनाधीनमेवचेतनोपि नदेवदत्तवत्साधारणो भवति। अपितु विशिष्ट एव कश्चिदिति श्रीकृष्णहार्दमभिज्ञस्य नंदगोपस्य मानसीं शंकां स्वढगाभिसंधिः परिहरति। अस्ति चेदि

तच्छेषेणोपजीवंति त्रिवर्गफलहेतवे। पुंसां पुरुषकाराणां पर्ज्जन्यः फलभावनः १० य एवं विसृजेद्धर्मं पारंपर्यागतं नरः। कामाल्लोभाद्भयाद्द्वेषात्स वै नाप्नोति शोभनं ११ श्रीशुक उवाच वचो निशम्य नंदस्य तथान्येषां व्रजौकसां। इंद्राय मन्युं जनयन्पितरं प्राह केशवः १२ श्रीकृष्ण उवाच कर्मणा जायते जंतुः कर्मणैव प्रलीयते। सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते १३ अस्ति चेदीश्वरः कश्चित्फलरूपः स कर्म्मणः। कर्त्तारं भजते सोपि न ह्यकर्त्तुः प्रभुर्हि सः १४ ॥ ॥

ति। यदि कश्चिदीश्वर ईश्वर इति मतं तर्हि स ईश्वरः कर्म्मणः फलं सुखादिलक्षणं रूपयति अनुरूपं फलं करोति ददातीति फलरूपः। सदृप कल्पः न स्वतंत्र इत्यर्थः। एतदेव द्रढयति। कर्त्तारमिति। फलरूपत्वेन प्रयोजकत्वात् जगत्तदधीनत्वमायातं इत्यतो वाह। कर्त्तारमिति। स त्वदभिमत ईश्वरोपि कर्त्तारं भजते फलदातृत्वेनानुवर्त्तते। नाकर्म्म कर्त्तारं कुत इत्यत आह। नहीति। स ईश्वरः कर्म्मकर्त्तुः फलदाने प्रभुः समर्थो न हि कस्मात् सामर्थ्याभाव इत्यत आह हीति। उद्देके कारणाभावात् १४ ॥ ॥

द॰ मू॰ ७१

अवांतरेश्वरत्वमभ्युपगम्येदमुदितं इदानीमीश्वर एव वस्तुतः श्रीशेनाक्षेपितः। वक्ष्यमाणस्वभावविहित कर्म्मण एव फलदातृत्वोपपत्तेः। पयःस्यंदनादिवदित्याशयेनेश्वरमाक्षिपति। किमिदं तेणेति। स्वस्माद्भावः सत्ता यस्य स तथा। न परतंत्रीनस्वभावकः। यद्वा स्वतंत्रो भावः स्वभावः। तेन नारायणेनविहितं कथितं। अन्यथा कर्त्तुमनीशेन समर्थेन १५ ननु यदि स्वभावेनैव कर्म्म क्रियते तर्हि किं कर्त्रा सृष्टं इदं सलिलादिवाह्यद्रव्यं किमर्थमपेक्ष्यत इत्याशंक्य तद्यपि स्वभावनियतमित्यतः सर्वं स्वभावाधीनमित्याह। स्वभावेति। हिशब्देन पयःस्यंदनादिकमपि नारायणकृतमित्यभिप्रैति। एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः प्राच्योन्याः नद्यः स्यंदंत इति श्रुतेः। स्वभावाद्दिशा इवास्यस्य हरेरधीनमिदं सर्वमित्यभिप्रायेणावांतरेश्वर एवात्र निषिध्यते। ननु मुख्येश्वर इत्यत आचार्यैः फलरूपः स कर्म्मण इत्याद्यवांतरेश्वरविषयमित्याद्यप्यधापि। स्वभावे कर्म्मणि चायं सत्वादिगुणेषु च। स्थितो विष्णुः सर्वकर्त्ता पृथक् स्वयं स्थस्तु सर्वग इत्यादिप्रमाणं वक्ष्यमाणं हार्द्दतात्पर्यार्थमुदाहारि १६ यद्वा स ईश्वरः कर्म्मणो हरेः फलरूपः

> किमिदं तेण हि भूतानां स्वस्वकर्म्मानुवर्त्तिनां। अनीशेनान्यथा कर्त्तुं स्वभावविहितं हरेः १५ स्वभावतं त्रो हि जनः स्वभावमनुवर्त्तते। स्वभाववशमिदं सर्वं सदेवासुरमानुषं १६ ॥ ॥

ज्ञानात्मा कर्त्तारं कर्म्मभजते। अकर्त्तुः अकर्मणः जभवतीतिप्रभुः। तदुक्तं तेन जातं फलं यस्मात्कर्म्मणः फलमीर्यतइति १४ अवांतरेश्वरः कर्म्मफलरूपः प्रकृते किमायात मित्याह। किमिति। स्वस्वकर्म्मज्ञान विषयं विवक्षितं भगवंतमनुवर्त्तिनां प्रतिविंवानां। ननु तेनोक्तेश्वर मिदं कर्म्मफलभागीति तु छीकरोषी। तत्त्वाह। अनीशेनेति। अस्मदभिमतकर्म्मशब्दवाच्यं वक्ष्यमाणकर्म्मफलभाक्तनम घतीत्याद्ययेन स्वभावेन्युक्तं। स्वः स्वाधीनः भावः क्रियाय स्य स स्वभावः। तदुक्तं। नचासौ कर्म्मफलभाक् नास्य किंचिविनश्यते। इत्यादि १५ एतदेवोपपादयति। स्वभावतंत्र इति। हि शब्देन तेजा मवांतरेशानां विष्णुवशत्वमंतरेणान्यकर्म्मवशत्वं नास्तीति दर्शयति। नान्यकर्म्मवशत्वं तत्ते यो विष्णुर्विनाक्वचिदिति। स्वभावस्वमिदं सर्वमित्यनेन सर्वशब्दवाच्यत्वं स्वभावस्य हरेरिति सूचितं। स च ब्राह्मणत्र्यादिना मा विष्णुरजःपर इत्यादिस्मृतेः १६ ॥ ॥ राम ७१

७

लत्तु विष्णोः सर्वनामत्वे एकस्यैवोत्पन्नोक्तदेहयोगवियोगआत्मा देवरत्वादि शोभाभावेन सर्वं तदधीनमिति वक्तुं न शक्यते तत्राह। देहानिति। दुः खयतीति दुःखी तितदुःखसुप्तानंत्यान्ततशब्दवाच्यत्वं। ननु तरतु भवतः अतः सर्वनामत्वं युज्यते। उत्सृजति त्यजति। सृजति। आपादयति जातस्य शत्र्वादिभावस्य हरित्वेनेत्याह। शत्रुरिति। सुखं दुःखं भवो भाव इत्यादिस्मृतेः। यद्वा यथा तत्र शक्तिप्रेरकत्वेन ब्रह्मणा दिशब्दवाच्यत्वं हरेस्तथा शत्वादिशब्दवाच्यत्वं इत्याह शत्रुरिति कर्म्मपाद्वाच्योहरिरेव शब्दादिः प्रजपत्वान्नत्वोपदेशेनशक्तुरैश्वर्यादियोगादीश्वरः

> देहान्तु ज्ञावचाक्षंतः प्राप्यो त्सृजति कर्म्मणा। शत्रुर्मित्रमुदासीनः कर्म्मैव गुरुरीश्वरः १७
> तस्मात्तु सृजयेत्कर्म्म स्वभावस्थः स्वकर्मकृत्। अंजसायेन वर्त्तेत तदेवास्य हि दैवतं १८

१७ यस्माद्दिरमितिसर्वमिदमितिगिर्यादिनामा हरिस्तस्मात्स्वविहितकर्म्मकृत्। स्वभावस्थः नारायणार्पितसर्वेन्द्रियवृत्तिः पुरुषः क्रियापतनयोः कर्म्मेत्यभिधानात् ज्ञितिधृत्यादि क्रियाश्रयत्वेन जगत्सर्जनादि क्रियाश्रयत्वेन वा परोक्षापरोक्षज्ञान विषयत्वेन वा कर्म्मसुप्रजपेदित्यन्वयः। तदुक्तं। एतस्मात्कारणात्कृष्णः शक्रस्य विमदाय च। गिर्यादिस्थितमात्मानं प्रजयामासवल्लवैरिति। स्वकर्म्मकृदित्युक्तं विवृणोति। अंजसेति। येनांजसा तत्वेन योवर्त्तेत। अस्यतदेव दैवतं कुलदैवं हि लोकप्रसिद्धं। अंजसा त्वरिते तत्वे महदद्भुतस्त्रोदयोरिति यादवः। अनेनयद्वाक्ये विप्रेभ्य इन्द्रादिना मात्यामंतदप्यस्य हरेर्नामेति सिद्धं १८ ॥ ॥

२०.१.

यस्य फलं किमिति तत्राह। वर्त्तेतेति। ब्रह्मणा वेदेन विहितेन यागादिना १८ यज्ञायोयेन कर्मणा अजस्रास्सहितो वर्त्तेत अस्य तदेव क
र्म दैवतं मान्यं हितं हि विप्राद्यैः। किं कर्म विहितं तत्राह। ब्रह्मेति। कृष्यं वाणिज्यं रायणादिलक्षणेन तपसा। ब्रह्म वेदतपस्त्वमित्यमरः। वार्त्तया कृ
ष्यादिलक्षणया चतुर्विधया १९ कृषिर्भूविलेखनादिक्रिया। वाणिज्यं सत्यानृतलक्षणक्रिया दि। गोरक्षा पशुपालनं। कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः

१२

कुसीदं तत्र कृष्यादिषु गोभिर्वृत्तिराजीवनं येषां ते तथा २० प्रकारान्तरेणेंद्रमाक्षिपति। सत्वमित्यादिना विश्वं समस्तं। अन्योन्यं नि मिश्रीकृ
त्येति शेषः २१ मेघानामिंद्रो नियोजक इत्यत्राह। रजसेति। रजयति सर्वमिति रजो भगवान् हि हि। न ह्यचेतनस्य रजोगुणस्य मेघप्रे

वर्त्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः। वैश्यस्तु वार्त्तया जीवेच्छूद्रस्तु द्विजसेवया १९ कृषिवाणिज्यगोरक्षा कुसीदं तूर्यमु
च्यते। वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोनिशं २० सत्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः। रजसोत्पद्यते विश्वमन्योन्यं विविधं जग
त्॥२१॥ रजसा चोदिता मेघा वर्षंत्यंबूनि सर्वतः। प्रजास्तैरेव सिध्यंति महेंद्रः किं करिष्यति २२ न नः पुरो जनपदा न ग्रामा न गृहा व
यं। वनौकसस्तात नित्यं वनशैलनिवासिनः २३ आजीव्यैकतरं भावं यस्त्वन्यमुपधावति। न तस्माद्विंदते क्षेमं जारं नार्यसती यथा २४

रकत्वं संजाघटीति सिध्यंति। संपन्नकार्याः किं करिष्यति न किमपीत्यर्थः। प्रश्नेऽक्षेपे विकल्पे किमिति यादवः २२ इतोप्यस्मत्कुलदेवता
त्वादिंद्रयागो नोचित इत्याशयेनाह नन इति। पुरः पुराणि ग्रामस्थितिमुपादाय गृहिणः सपत्नीकाः २३ एकतरं वहूनां सिद्धांतानां मध्ये एकं
भावं सिद्धांतमाजीव्याप्युपजीव्यान्यं भावमुपधावति। उपास्ते स पुरुषः तस्माज्जावात् क्षेमं सुखं न लभते। यो वंचनं रयती तिजारः। असती बहुभर्तृ
का २४ ॥

राम

१२

सूपो मुद्गान्नं। अंधः केवलान्नं। संयावः मिश्रयवकृतं मुद्गमिश्रोदनो वा। सर्षपपिष्टकृतं शष्कुलीच पेष्टिका मंडला कृतिः। सर्वदोहः क्षीर
रुचितकादिकः २६ बहुगुणं षड्रसोपेतं २७ यवसं तृणान्विका। गिरये। गिरिसन्निहिताय तत्रान्ते हरये २८ ३० शक्रदर्पं जिघांसया

तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः। य इंद्रयागसंभारास्तैरयं साध्यतां मखः २५ पच्यंतां विविधाः पाकाः सूपांताः पायसाद
यः। संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यतां २६ हूयंतामग्नयः सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः। अन्नं बहुगुणं तेभ्यो दीयतां वः दक्षि
णां २७ अन्येभ्यश्चाश्वचांडालपतितेभ्यो यथार्हतः। यवसं च गवां दत्वा गिरये दीयतां बलिः २८ स्वलंकृता भुक्तवंतः स्वनुलिप्ताः
सुवाससः। प्रदक्षिणं च कुरुत गोविप्रानलपर्वतान् २९ एतन्मम मतं तात क्रियतां यदि रोचते। अयं गोब्राह्मणाद्रीणां मह्यं च दयि
तो मखः ३० श्रीशुक उवाच कालात्मना भगवता शक्रदर्पं जिघांसया। प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णंत तद्वचः ३१ तथा च
विदधुः सर्वं यथाह मधुसूदनः। वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिद्विजान् ३२ उपहृत्य बलीन् सम्यगादृता यवसं गवां। गोधनानि पुरस्कृ
त्य गिरिं चक्रुः प्रदक्षिणं ३३ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः। गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजाशिषः ३४ कृष्ण
स्त्वन्यतमं रूपं गोपविश्रंभणं गतः। शैलोस्मीति ब्रुवन् भूरि बलिमादद्बृहद्वपुः ३५ तस्मै नमो व्रजजनैः सह चक्रे आत्मनात्मने। अहो
पश्यत शैलोसौ रूपी नोनुग्रहं व्यधात् ३६ एषोवजानतो मर्त्यान् कामरूपी वनौकसः। हंति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवां ३७
इत्यद्रिगोद्विजमखं वासुदेवप्रचोदिताः। यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ३८ इति दशमे द्वाविंशोध्यायः ॥॥

शक्रादिदेवानां असुरावेशादीर्ष्यादिकं भवति तदनुग्रहार्थं तदीर्ष्यारिहननेच्छया। तदुक्तं। अत्यल्पस्य सुरावेशो देवानां न भविष्यतीति ३१ गो
पविश्रंभणं गोपानां विश्वासकरं। आदत् भक्षितवान् ३५ तस्मै आत्मने पर्वतरूपिणे संकल्पनमनमिति तत्राह। अहो इति ३८ दशमे द्वाविंशः॥ ॥

गोवर्द्धनोद्धरेण स्वनाथाः सगोधनाः गोपालाः इंद्रकृतापदो रक्षिताः एवं भक्तिज्ञानसंपन्नान् संसारार्त्तीन् पालितो रक्षत्येवाधोऽत्र जडानिति प्रतिपा
दयन्नुपमप्यार्थ्या पञ्चम आरभ्यते। तत्र मुख्यप्राणमेकमंतरान्येषां देवानां नामतुल्यासुरावेशप्रसिद्धगाते प्रकृतिभावश्चेत्तु भयदर्शयितु सुपक्र
मते इंद्र इति। विहतां निराकृतां कृष्ण एव नाथो येषां ते तथा तेभ्यः। कृष्णदुर्द्धर्ष्या सुपार्थानां यं प्रति कोप इति चतुर्थी। कृष्णं प्रति चकोपेति कृतवानिति
सूचनाय दिंद्रविशेषणं। असुरावेशं सूचयति। ज्ञायते नेन हेत्यनेन शक्रकोपेन कृष्णमाहात्म्यमेव प्रकाशयते १० अंतकारिणां प्रलयंक
र्त्तानां इत्यनेन भगवंतमंतरेणान्यानिवर्त्यत्वमाह। संवर्त्तकमिति स्मृत्येनेन जगत्क्षयकारत्वे स्वचितेप्यंतकारिणामिति तद्देवविशेषितं प्रचोद

श्रीशुक उवाच इंद्रस्तदात्मनः पूजां विज्ञाय विहितां नृप। गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप ह १ गणं सांवर्त्तकं ना
म मेघानां चांतकारिणां। इंद्रः प्रचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत २ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां। कृष्णं मर्त्य
मुपाश्रित्य ये चक्रुर्देवहेलनं ३ यथादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः। विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवं ४

यात् प्रेरितवानित्यर्थः। ईशं कृष्णमुद्दिश्य मन्युना कोपेन। अहमेवेशो नान्य इति मन्युना दैत्याभिमानेन वा मन्युर्दैन्येक्रतौ क्रुधीति यादवः
२ मर्त्यं मरणधर्मत्वेनानित्यं कृष्णमुपाश्रित्य सर्वस्मादधिकाश्रयोयमिति कृत्वा देवस्य चैलोक्यं नेमुः मम हेलनमवज्ञां कृतवंत इति।
अनेन ईशमन्युनेत्येतद्विवृतं ३ देवस्वभावत्वादासुरावेशोपि तत्वमेव कथ्यत इत्याशयेनाह। यथेति। अदृढैरसारैः अप्यनंतरहारुद्दृ
तैः कर्ममयैर्बहुव्यापारसाध्यैः अप्यत्र भक्षणादिवत्कर्मसाधितैः कुत्सितैरल्पप्रयोजनैर्वाप्लवैः। कुः पापेत्यार्थः कुत्सयोरिति यादवः
आन्वीक्षिकीं स्वात्मकुलविंवदर्शनात्मिकां विद्यां। आत्मज्ञानमित्यर्थः ४ ॥ ॥

वाचालं अत्रचिदीश्वरः कश्चिदित्यादिशास्त्रकुत्सितवक्तमाषणं। अतएव वर्त्तित ब्रह्मणोत्यादिमानं प्रमाणमस्याप्तीति मानिनां राजस्यापो
दितामेघा इत्यादिना मन्नत्वमज्ञत्वं च लभ्यते। आजीव्येकतरं भावमित्यादिना पंडितमानित्वं ५ अवलिप्तानां दृप्तानां आध्मापितानां वर्द्धित
मनसां। धुनुत निराकुरुत ६ नागं गजं ७ निर्मुक्तबंधनाः विगलितनिग्रहाः त्यक्तजलसंभार इत्यर्थः। आसारैर्द्धारासंपातैः ८ स्तनयित्नु

वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं। कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ५ एषां श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां।
धुनुत श्रीमदस्तंभं पशून्नयत संक्षयं ६ अहं चैरावतं नागमारुह्यानुव्रजे व्रजं। मरुद्गणैर्महावेगैर्नंदगोष्ठजिघांसया ७
श्रीशुक उवाच इत्थं मघवताज्ञप्ता मेघा निर्मुक्तबंधनाः। नंदगोकुलमासारैः पीडयामासुरोजसा ८ विद्योतमाना विद्यु
द्भिः स्तनंतः स्तनयित्नुभिः। तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ९ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः। जलौघैः प्ला
व्यमाना भूर्नादृश्यत नतोन्नतं १० अत्यासारातिवातेन पशवो जातवेपनाः। गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ११ शिरः
सुतांश्च कायेन प्रच्छाद्यासारपीडिताः। वेपमाना भगवतः पादमूलमुपाययुः ॥ १२॥ कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो। त्रातु
मर्हसि देवान्नः कुपिताद्भक्तवत्सल १३ शिलावर्षातिवातेन हन्यमानमचेतनं। निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः १४

भिर्गर्जितैः स्तनयित्नुर्गर्जित इति यादवः। जलान्येव शर्कराः श्वेतपाषाणपिंडाः ९ स्थूणा इव स्थूलाः। नतोन्नतं निम्नोच्चस्थलं १० २
स्वकायेन शिरश्च सुतांश्च प्रच्छाद्य १२ १३ अचेतनं निःसंज्ञं १४ ॥ ॥

द० पू०

अपर्त्वत्र ऋतौ अत्र हर्षसमय इत्यर्थः १५ प्रतिविधिं परिहारं । आत्मयोगेन आत्मसामर्थ्येन स्वनिर्मितोपायेन वा । तमो ऽज्ञानं १६ अज्ञानहरणे न किं प्रयोजनमित्याशंक्य संसारबंधननिमित्तमहंकारनाशार्थमित्याशयेनाह । नहीति । सद्भावयुक्तानां सद्भक्तियुक्तानां इत्यमर्थश्चेत्यागे लेवं किं न स्यादिति चेन्न भक्तिशास्त्रार्थविवरणार्थत्वात् । तथा हि । आ बोलीलाकिंपा चेष्टा भक्त्यादिस्वरूपप्रभावशक्तिप्रदर्शनैः भगवल्लीलादि मतत्प्रदर्शनेन सर्वकालं भगवत्येव मनोवृत्तिरिति प्रकाशने भक्तेस्त्रिमितत्वमुक्तं स्यादिति । ईशो ऽहमिति स्मयो ऽस्य खण्डयन्निहि

१४

अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं । स्वे विहिते स्माभिरिन्द्रो नाशाय वर्षति १५ तत्र प्रतिविधिं सम्यगात्मयोगेन साधये । लोके शमानिनो मौढ्याद्धरिष्ये श्रीमदं तमः १६ न हि सद्भावयुक्तानां सुराणामीशविस्मयः । मत्तो ऽसतां मानभंगः प्रशमायोपपद्यते १७ तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहं । गोपाये स्वात्मयोगेन सो ऽयं मे व्रत आहितः १८ इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलं । दधार लीलया कृष्णश्छत्राकमिव बालकः १९ अथाह भगवान् गोपान् हे ऽम्ब तात व्रजौकसः । यथोपजोषं विशत गिरिगर्तं सगोधनाः २० न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातनात् । वातवर्षभयं बालं तत्त्राणं विहितं हि वः २१ तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः । यथावकाशं सधनाः सव्रजाः सोपजीविनः २२ ॥ ॥

सतां स्वभावमाह । मत्त इति । प्रशमाय शत्रुष्ट मन्निष्ठाये १७ ममायं जयस्तंभ इत्याह । तस्मादिति । अहमेव परिग्रहः स्वलेयस्य सतथा । पत्नी स्वीकारश्च पथ मूलेष विपरिग्रहः । इति व्रतो नियमो ऽजयस्तंभः । गोपाये पालयामि १८ कृत्वा उन्मूल्य हस्तेन स्थिते । छत्राकं शिलीन्ध्रं १९ यथोपजोषं यथासुखं । गर्तं बिलं २० वातवर्षनिमित्तभयं निवारितं । अलं तत्र पर्याप्तौ विनिवारणे इति याद्दवः । तत्त्राणं तस्माद्भयात्त्राणं २१ कृष्णेनाश्वासितमानसाः आप्यायितमनोरथाः सोपजीविनाः व्रीहितंडुलादि शरीरयात्रासाधनैः सहिताः २२ ॥ ॥

राम

१४

सुखापेक्षां शयनासनवसनादिसुखबोधनश्च ऽक्षां हित्वा मुक्त्वा २३ योगानुभावं योगैश्वर्यं अनुभावः प्रभावे स्यात् निश्चये भावसूचक इति । मस्ताश्रुरुचा रहस्यात्स्यात्मेवत प्रावएप राहित्यं संभ्रमः तद्रहितो निस्तंभः । भ्रष्टसंकल्पः गलितमनोरथः २४ व्यभ्रं विगतमेघं । वातश्च वर्षश्च वाता वर्षं । एकवद्भावः २५ व्युदप्रायाः विगतजलप्रायाः २६ शकटोढोपकरणं शकटगतमुपकरणं जीवनसाधनं । शकटारोपकरणेवारा

क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः । वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत्पदात् २३ शुक उवाच कृष्णयोगानुभावं तं निशाम्येन्द्रो ऽतिविस्मितः । निस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्संन्यवारयत् २४ खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणं । निशाम्योपरतं गोपान् गोवर्धनधरो ऽब्रवीत् २५ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः । उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः २६ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनं । शकटारोपकरणं स्त्रीबालस्थविराः शनैः २७ भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्रभुः । पश्यतां सर्वभूतानां स्थापयामास लीलया २८ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणादिभिः । गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः २९ यशोदा रोहिणी नंदो रामश्च बलिनां वरः । कृष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ३० दिवि देवगणाः सर्वे सिद्धगंधर्वचारणाः । तुष्टुवुर्मुमुचुः सर्वे पुष्पवर्षाणि भारत ३१ शंखदुंदुभयो नेदुर्दिवि देवप्रचोदिताः । जगुर्गंधर्वपतयस्तुंबुरुप्रमुखा नृप ३२ ततो ऽनुरक्तैः पशुपैः परिश्रितो राजन् स्वगोष्ठं सबलो ऽविशद्धरिः । तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ३३ इति श्रीभागवते महापुराणे दशमस्कंधे पंचविंशो ऽध्यायः ॥ ॥

यगतो शकटपरिवर्तनेनारोपकरणं संभ्रमविधिर्यथा भवति तथैति वा २७ २८ प्रेमवेगात्स्नेमोद्रेकात् । निभृताः निश्चलाः शर्णानंदा वासमायुः समाजं प्राप्ताः २९ स्नेहकातराः स्नेहाकुलांतःकरणाः हृदिस्पृशा मनोहराः हृद्यकथा मुपसंख्यानमित्यलुक् ३३ तस्यामेव यो विंशः

द० पू०

७५

अनुस्मरणार्थमाप्रेंद्वाश्रितवयः सप्तवर्षपर्यंतं बालचरितमनुक्रम्यते स्मिन्नध्याये तत्र श्रीशुको गोपानां संकथनप्रकारं कथयति। एवंविधानीति
। ये गोपाः कृष्णस्यैवंविधानि कर्माणि वीक्ष्य तत्र तत्र सह ज्ञात इत्यायितस्य कृष्णस्य वीर्यमाहात्म्यं विंदंति जानंति ते तद्वीर्यविदः न भवंतीति ते गोपाः
समभ्येत्य संभूय प्रोचुः व्याकुर्वन्नित्यन्वयः १ बालस्यैतानि कर्माण्यत्यद्भुतानि निर्विकृमशक्यानि वाइतियत्तस्माद् ग्राम्येषु आत्मनः सुस्पष्टं जुगु
प्सितं ग्राम्येषु विषयिजने षु जन्म कथमर्हतीति निरूप्यमाणेन योग्यमित्यन्वयः २ कानि तानि कर्माणीति तत्राह। यदिति। बिभ्रत् अबिभ्रत

श्रीशुक उवाच एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते। नतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिताः १ बालकस्य यदेता
नि कर्माण्यत्यद्भुतानि वै। कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितं २ यः सप्तहायनो बालः करेणैकेन लीलया। कथं बिभ्रद्गिरिवरं
पुष्करं गजराडिव ३ तोकेनामीलिताक्षेण पूतनाया महौजसः। पीतं स्तनं सह प्राणैः कालेनेव महात्मना ४ हिन्वतो धः शयानस्य मास्य
स्य चरणावुदक्। अनोपतद्विपर्यस्तं रुदतः प्रपदाहतं ५ एकहायन आसीनो ह्रियमाणो विहायसा। दैत्येन यस्तृणावर्तमहन्कंठग्रहा
तुरं ६ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उदूखले। गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ७ वने संचारयन्वत्सान्सरामो बालकैर्वृतः।
हंतुकामं बकं दोर्भ्यां मुखतोरिमपाटयत् ८ ॥

पुष्करं पद्मं। ३। तोकेन शिशुना। आमीलिताक्षेण ईषन्मुकुलितनेत्रेण। महौजसः महाबलायाः अष्टम्भावष्टंभाया वा। दुर्जेयवष्टंभबलयोरिति। स्तनं
पीतं। वयम् प्राप्नोमीति शेषः कालेनांतकेन ४ चरणावुदक् ऊर्ध्वं हिन्वतः उत्क्षिपतः मास्यस्य मासमात्रवयस्कस्य। प्रपदेन पादाग्रेण हतं पीडितं ५
एक एव हायनो वर्षं वत्सरो यस्य स तथा। तृणावर्तमहन्निति यत्कर्म तदपि ६ हैयंगवं ह्यस्तनगोदोहोद्भवं दधिमथनेनोत्पन्नं नवनीतं तस्य स्तैन्ये
चौर्ये सतीति ७ मुखतः मुखे इत्यर्थः इति शेषः। अपाटयत् व्यदारयत् ८ ॥ ॥

राम

७५

दैत्येन तेन। कपित्थानि कपित्थबीजानि। फलेषु कृ ९ क्षेमं प्राप्य रक्षां १० ११ इमानि गृह्णान्। उद्धास्य उत्सारयित्वा १२ अनुरागो हृदयंग
मः स्नेहः। औत्पत्तिकः जन्मसिद्धः कथं १३ ततो नो जायते शंकेत्यादिनातद्वीर्यविद इति स्पष्टीकृतं १४ येनेन विगताभवत्। वः युष्माकं प्रस
न्नक याप्रत्यंतरंगत्वेन कथांतरमारभ्यत इति सूचनाय इत्कारः। प्रत्यारंभे प्रसिद्धेः इत्यादि विप्रादः सुभानीविधितिच १५ वर्णाः शुक्लाद्याः १६

वत्सेषु वत्सरूपेण प्रविशंतं जिघांसया। हत्वा न्यपातयत्तेन कपित्थानि च लीलया ९ हत्वा रासभदैतेयं तद्बंधूंश्च बलान्वितः।
चक्रे तालवनं क्षेमं परिपक्वफलान्वितं १० प्रलंबं घातयित्वोग्रं बलेन बलशालिना। अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ११
आशीविषमहाहीन्द्रं दमित्वा विमदं ह्रदात्। प्रसह्योद्वास्य यमुनां चक्रे सौ निर्विषोदकां १२ दुस्त्यजश्चानुरागोस्मिन्सर्वेषां नो व्रजौ
कसां। नंद ते तनयेस्मासु तस्याप्यौत्पत्तिकः कथं १३ क्व सप्तहायनो बालः क्व महाद्रिविधारणं। ततो नो जायते शंका व्रजनाथ तवा
त्मजे १४ नंद उवाच श्रूयतां मे वचो गोपा व्येतु शंका च वोर्भके। एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥१५॥ वर्णास्त्रयः कि
लास्यासीन्गृह्णतोनुयुगं तनूः। शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥१६॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः। वासुदेव
इति श्रीमानभिज्ञाः संप्रचक्षते १७ बहूनि संति नामानि रूपाणि च सुतस्य ते। गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १८

८३

क्वचिन्मथुरायां वसुदेवस्य सकाशात्। अभिज्ञाः वसुदेवस्यापत्यमिति तद्धित प्रत्ययज्ञा नृपादयः १७ न केवलमेतदेव नाम रूपत्रयमेव अ
पितु अन्यान्यपि संतीत्याह। बहूनीति। नारायणादीनि गुणानुरूपाणि मधुसूदनादीनि कर्मानुरूपाणि १८ ॥ ॥

द०पू०

१६

अथास्यत आधास्यति। यद्वा यदि पूर्वमा भिर भक्त्युद्रिक्तं वित्तम करिष्यत तर्ह्ययं वः पुत्रुषार्थ लक्षणमाधास्यत। लिङ्गिमित्ते लुङ् क्रियातिपत्तौ
विति सूत्रादयं विधिः २३ आनर्चुः पूजयामासुः २४ श्रीशुक प्रथमभागवतसमाप्तिसूचनाय स्वेष्टदेवतावतारं कृष्णमभिष्टुवन् तत आत्मर
क्षामाशास्ते। देवइति। यज्ञविप्लवः यज्ञभंग इत्यर्थः तस्मादुत्पन्नया रुषा वज्राश्मवर्षपाषाणवतकर्करोवर्षैः आनिलैश्च। स्त्रियास्सहसीद
तः कंपमाना वालाश्च यस्मिंस्तत्सीदद्वालपशुस्त्री। आत्मा शरणं रक्षितायस्य सतथा। अनुकंपी दृष्ट्वा यद्वा भावयुक्तः स्मयः निरस्त दर्पः। उत्क्ष

एषवः श्रेयआधास्यद्गोपगोकुलनंदनः। अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ १९ पुरानेन व्रजपते साधवो दस्युपीडिताः। अ
राजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः २० यएतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः। नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः
२१ तस्मान्नंद कुमारोयं नारायणसमो गुणैः। श्रियाकीर्त्यानुभावेन तत्कर्म्मसु न विस्मयः॥२२॥ इत्यद्धा मां समादिश्य गर्गेच स्वगृहं ग
ते। मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं २३ इतिनंदवचः श्रुत्वा गर्गगीतं व्रजौकसः। दृष्टश्रुतानुभावस्य कृष्णस्यामिततेज
सः। मुदितानंदमानर्चुः कृष्णंच गतविस्मयाः २४ श्रीशुकउवाच देवे वर्षति यज्ञविप्लवरुषा वज्राश्मवर्षानिलैः सीदद्वाल
पशुस्त्रियात्मशरणं दृष्ट्वानुकंप्युत्स्मयन्। उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं यथा बिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न
इंद्रो गवां २५ इतिश्रीभागवते महापुराणे दशमस्कंधे चतुर्विंशोध्यायः ॥ ॥

राम

विभ्रन्दृत्नासोवा महेंद्रस्य मदं गर्वं भिनत्ति निर्मूलयतीति महेंद्रमदभित्। अवलो दृष्टलः अफर्बलिः। लीलासाधन कुक्कुरछत्रं शिलींध्रं यथा त
थैकेन हस्तेन शैलं शिलोच्चयं पर्वतमुत्पाट्य बिभ्रत् गवामिंद्रो गोविंदो नोस्माकं प्रीयात्प्रीतो भवत्वित्यन्वयः। पायान्न इति पाठे नोस्मान्र
क्षत्वित्यर्थः। गोस्वामी गोविंदोधिकृतो गवामित्यमरः २५ इतिदशमे चतुर्विंशः ॥ ॥

१६

तस्मिन्नप्यसुरावेशो गमेत्प्रकृतिरेव लितिवचनात्देवस्य भाव प्रकटनपूर्वं कंसुरभिश्चैरावतेके णशक्रकृत्या च हरिमाहात्म्यस्यातिसिद्धत्वा
त्सुस्पष्टकृतिसिद्धत्वात्सिद्धिरिति शपिनं श्रेमविधेयमित्यस्याध्यायस्यारंभः। तत्र सुरभीद्रयोरागमनं कथयति। गोवर्द्धनइति। गोकुलोकादवामभिस्कृत
स्थानात्सुरभिः इंद्रश्च स्वर्गलोकात्। दिवृष्टि रीप्सितिस्वर्गवज्रवायूणवारिभ्रंश मोपशोवविद्ववि मोशाह्रोदशा सुरत इति इत्थास्वधः। योहरे
र्विशेषमाचरत्स एवा व्रजदित्यन्वयः १ विविक्ते एकांते। विजिर पृथग्भाव इतिधातुः। जनसंमर्द राहित्यस्थल इत्यर्थः २ इदानीं दृष्टः पूर्वं श्रु
तो नुभावोयेन सतथा। इंद्र इदमाह ३ कीदृशं तत्राह विशुद्धेति। अहं तवधामष्ट इस्थानी यंस्वरूपं शरणं प्रपद्य इति शेषः। अनंतपदार्थराशिं
यज्ञातीति। ननु दृष्टवत्सत्वादिगुणहारूभारचितं चेत्कालांतरे जीर्णं स्यात् इत्यत्राह। विशुद्धेति। विगतं शुद्धसत्वं रजस्तमोमिश्र रहितं केवल स

श्रीशुकउवाच गोवर्द्धने धृते शैले आसाराद्रक्षिते व्रजे। गोलोकादाव्रजत्कृष्णं सुरभिः शक्रएवच। विविक्तउपसंगम्य व्रीडितः
कृतहेलनः। पस्पर्शपादयोरेनं किरीटेनार्कवर्चसा॥२॥ दृष्टश्रुतानुभावोस्य कृष्णस्यामिततेजसः। नष्टत्रिलोकेशमद इदमाह कृतां
जलिः ३ इंद्रउवाच विशुद्धसत्वं तवधाम शांतं तपोमयं ध्वस्तरजस्तमस्कं। मायामयोयं गुणसंप्रवाहो न विद्यते ग्रहणानुबंधः ४

ते

त्वगुणो यस्मात्तथा। आकृतरपदार्थैकुशलपुरुषेण रचितं न्वेनपनसुभगं नस्यादित्यत्राह शांतमिति। मंगलं शांतिः प्रशम मंगल इति। अतएव
वसुखनिष्ठं क्षोभरहितं वा। नचेवं चेत्पाषाणकल्पमित्यत्राह। तपोमयमिति ज्ञानात्मकं। यदा सत्वमपि नसंबध्यते तदा रजः संबंधो नास्तीति किं व
क्तव्यमिति भावेनाह ध्वस्तेति। अत्र लिंगमाह मायामय इति। एतत्त्वयि अयं मायामयः। भगवदिच्छा निमित्तगुणसंप्रवाहः त्रिगुणसंबंधो न विद्यते प
स्मात्तस्मादिति शेषः। विदसत्तायामितिधातोः। जीववत्तत्संबंधो नास्ति किंतु सृष्ट्यादौ प्रेरकत्वसंबंधोस्तीति। कल्पा न विद्यत इति। कीदृशः
अयं ग्रहणानुबंधः अग्रहणमायः इः स एवानुबंधो गुणाभूतो यस्यसतथा। यद्वा यत्र गुणसंप्रवाहे अयं ग्रहणं अज्ञानमनुबध्नातीत्य ग्रहणानु
बंधः। अनेन कार्याभावे कारणाभावोनुमीयते इतिसूचितं ४ ॥ ॥

ननु खलेन पर्वासति हन्मि भूरि किं मानिं हंति शत्रवो निंद्य इति कृतः हरेः कामक्रोधादिदर्शनात् लोभाद्यभावः कथं कथ्यत इत्यत आह कुत इति ते
गुणाः हेतवो निमित्तानि येषां ते तद्धेतवः न विद्यंत इति कुतो नु किं वक्तव्यमित्यर्थः। यद्वा तत्संसारस्य हेतवः कृताः कल्प्यंत इति शेषः। अबुध
स्याज्ञानिनः लिंगभावाः लक्षणभूताः। अत्र कारणाभावात्कार्याभावानुमानं च द्रष्टव्यमित्यर्थः। यद्यपि तव गुणनिमित्ताः कामादयो न संति तथा
पि शास्त्रविहिताः अदोषकरत्वात्संतीत्याशयेनाह। अथापीति। दंडं शासनं हिंसा वा। दंडो श्री शासनं राज्ञां हिंसायां लकुटे गुणे इति यादवः।
विशुद्धसत्त्वं निर्मलसत्त्वगुणयुक्तं इत्याद्यपव्याख्यानप्रत्याख्यानाय विगत शुद्धसत्त्वमित्याद्याख्यातमाचार्यैः सत्त्वगुणांगीकारे मायामयो
ऽयं गुणसंप्रवाहो न विद्यत इत्येतद्व्याहतं स्यादिति पश्यद्भिरिति। असत्त्वासनेन धर्मस्थापनं प्रयोजनं सत्त्वेन किं फलं स्यात्। किं च भमेणां

कुतो नु तद्धेतव ईश मन्युलोभादयो येऽबुधलिंगभावाः। अथापि दंडं भगवन्बिभर्षि धर्मस्य गुप्त्यै खलनिग्रहाय ५ पिता गुरुस्त्वं
जगतामधीशो दुरत्ययः काल उपात्तदंडः। हिताय चेच्छातनुभिः समीहसे मानं विधुन्वन् जगदीशमानिनाम् ६ ये मद्विधाः ज्ञा जग
दीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तन्मदं। हित्वार्यमार्गं प्रभजंत्यपस्मया ईहा खलानामपि तेऽनुशासनं ७ ॥ ॥

शासकाः अभये तेनैक इतीयं शंका। असतां च सतां चैव हरिरेवानुशासकः। सतां तु श्रेयसे सैव खलानां तु शास्तिर्भविष्यतीत्यनेन वचनेन परिहर्तव्येति
५ पितेत्याहु रुत्वात्त्वाक्तिवाञ्च हरेरेकस्यैवानुशासकत्वं नान्यस्येत्याशयेनाह पितेति। पुण्यपापवाचकत्वेन उपात्तदंडः गृहीतशासनः
हिताय सतामिति शेषः। गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनां। इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः इत्येतन्निरस्तमिति ज्ञातव्यं ६ सतां
मनुशासनं श्रेयस इत्यभिप्रेतं तदिदानीं व्यक्तमाह। य इति हे जगदीश मद्विधा मानिनः स्युः। ते कालेऽसुरावेशनिर्मोकसमये शास्तेऽभयं
त्वां वीक्ष्य अस्मन्मदनिर्मूलनवीर्यत्वां दृष्ट्वा येन मरेनतद्दमरा धमकार्षीत मदं हित्वा अपस्मया निरहंकाराः। आर्यमार्गं विद्वज्जनसिद्धांतं प्रभ
जंति न केवलं मत्स्याकं तवेहानुशासनं खलानामपीत्याह। ईहेति ७ ॥ ॥

तव कर्तृत्वं क्षार्थं यतो मन्नमिति। अविदुषः ८ सतां भवाय पुण्यलक्षणमद्रायादेव दमनं च जननं मत्तमोहैरवतारः कथं भवाय स्यादित्तीदमा
वेशो वसुदेवाद्देहात् ज्ञानं हरेः स्मृतमित्यादिप्रामाण्यवचनेन परिहर्तव्यं ९ १० न केवलं ग्रंथांतरसिद्धमिदं अत्रापीत्याशयेनाह स्वच्छंदेनेति। स्व
च्छंदेन स्वेच्छया सर्वस्मै सर्वव्यापिने सर्वबीजाय सर्वस्य मूलकारणाय ११ आसारस्थितिवायुभिः १२ ध्वस्तस्तंभः निरस्तस्मरणस्य भावः १३

स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्ते विदुषः प्रभावं। [illegible] भोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती ८ तवावतारोऽयमधोक्ष
जेह भुवो भराणामुरुभारजन्मनां। चमूपतीनामभवाय [illegible] भवाय युष्मच्चरणानुवर्तिनां ९ ॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने। वा
सुदेवाय कृष्णाय सात्वतां पतये नमः १० स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्तये। सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ११ मये
दं भगवन् गोष्ठनाशायासारवायुभिः। चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना १२ त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तंभो वृथोद्यमः। ईश्व
रं गुरुमात्मानं त्वामहं शरणं गतः १३ एवं संकीर्तितः कृष्णो मघोना भगवानमुं। मेघगंभीरया वाचा प्रहसन्निदमब्रवीत् १४
श्रीभगवानुवाच मया तेऽकारि मघवन्मखभंगोऽनुगृह्णता। मदनुस्मृतये नित्यं मत्तस्येंद्रश्रिया भृशं १५ मामैश्वर्यश्रीमदांधो
दंडपाणिं न पश्यति। तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहं १६ गम्यतां शक्र भद्रं वः क्रियतां मेऽनुशासनं। स्थीयतां स्वाधिकारेषु
युक्तैर्वः स्तंभवर्जितैः १७

मघोना इंद्रेण १४ अकारि कृतः इंद्रेंद्र १५ पणाय व्यवहाराय इति धातोः ज्ञानादिव्यवहारसाधनत्वात् पाणिः इंद्रियः। दंडपाणिं यमं मां भ्रंशया
मि विश्लिष्टं करोमि च शब्द एवार्थे। अनुग्रहमेव नान्यत् द्वित्रादिकं। अनुग्रहानंतरमविनश्वरसंपद श्वेति स्मृतयेवा। ऐश्वर्यमीश्वरत्वं वादि
सहद्धिः श्री तयोः राणाभ्यां युद्धतेन मदेनांधः ज्ञानलक्षणावस्तरहितः १६ मपि मनसायुक्तैः अनित्ये श्वर्यादौ विश्वभवद्भिः तैः भवद्भिः स्वाधि
कारेषु त्रैलोक्यरक्षणादिषु स्थीयतां १७ ॥ ॥

अथशक्रकथारंभे मनस्विनी हृष्टमनाः। स्वसंतानैः स्ववंशजातगोभिः सहेति शेषः १८ विश्वात्मन्निति विश्वव्यापिन् सनाथाः कृतास्म इति १९ नाप्यस्माकं परमकं अत्युत्तमं इष्टदैवं। इंद्रः ईश्वरः। देवानां देवजातीनां येच साधवो अध्यात्मयः तेषां भवाय भद्राय लत्प्राणाय श्रेयसे २० नइंद्रं इत्यस्माकमिंद्रत्वेनाभिषेक्ष्याम इति २१ सुरभिरात्मनः पयसा २२ दाशार्हं दाशार्हकुलतिलकं दाशं सुखादिदानं मर्हतीति वा अभ्यषिंचत देवमातृभिश्चोदितः इंद्र अभि षिक्त्वा २१

अथाभ्येत्य सुरभिः कृष्णमभिवंद्य मनस्विनी। स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरं १८ सुरभिरुवाच कृष्णकृष्ण महायोगिन् विश्वात्मन् विश्वसंभव। भवता लोकनाथेन सनाथा वयमच्युत १९ त्वं नः परमकं दैवं त्वं न इंद्रो जगत्पते। भवाय भव गोविप्रदेवानां ये च साधवः २० इंद्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयं। अवतीर्णोसि विश्वात्मन् भूमेर्भारापनुत्तये २१ एवं कृष्णमुपामंत्र्य सुरभिः पयसात्मनः। जलैराकाशगंगाया ऐरावतकरोद्धृतैः २२ इंद्रः सुरर्षिभिः साकं चोदितो देवमातृभिः। अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात् २३ तत्रागतास्तुंबुरुनारदादयो गंधर्वविद्याधरसिद्धचारणाः। जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदान्विताः २४ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः। लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन्पयोद्रुतां २५ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः। अकृष्टपच्यौषधयो गिरयो बिभ्रदुन्मणीन् २६ कृष्णेभिषिक्त एतानि सर्वाणि कुरुनंदन। निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः २७ ॥ ॥

रवि भिः सार्धमाकाशगंगाया जलैः कृष्णमभ्यषिंचदित्यन्वयः। गोविंदो गोविंदो लाभो यस्य सः। आलभत इति वा। गोविंद इत्यभ्यधादभिधानं कृतवांश्च २३ संननृतुः सम्यक् नृत्तं चक्रुः २४ देवनिकायानां केतवः श्रेष्ठाः। गां भूमिं पयसा द्रुतां परिप्लुतां अनयन् प्रापयामासुः २५ मधुमधुररसं स्रवंत्यः। उन्मणीन् बिभ्रत् धृतवंतः २६ २७ ॥ ॥

अनंगवर्धनो कामोद्रेककारणं। अन्योन्यं परस्परमलक्षिता शयाः। अज्ञातमनोभावाः इर्ष्याद्वेषवनस्थानाद्वा। सकृष्णो यत्रास्ते तत्रेति शेषः। कांतं स्वरांसुवर्णतेन रचिता निलोलानि कुंडलानि यासां तास्तथा ४ तदा तासां भावविशेषं कथयति। दुहंत्य इति दोहं दोहनक्रियां दोहनपात्रं वा। अधिश्रित्य पयो अपाचितुं चुल्यामारोप्य संयावं च पथ्यन्नमनुद्वास्य अनवरोप्य ५ परिवेषयंत्यः भुंजानानां पात्रे षु भोक्तव्यं विनिक्षिपंत्यः

निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः। आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ४ दुहंत्योभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः। पयोधिश्रित्य संयावमनुद्वास्यापरा ययुः ५ परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून् पयः। शुश्रूषंत्यः पतीन् काश्चिदश्नंत्योपास्य भोजनं ६ लिंपंत्यः प्रमृजंत्योन्या अंजंत्यः काश्च लोचने। व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ७ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः। गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ८ ॥ ॥

तत्परिवेषणं पाययंत्यः स्तनादिकमिति शेषः। पादमर्दनादिना शुश्रूषंत्यः ६ प्रमृजंत्यः शरीरोन्मार्जनं कुर्वंत्यः। स्थानसंमार्जनं वा। अंजंत्यो मध्यादिकं मुखकंठादिषु आरभमाणा दिधानाः कंठादिषु वस्त्राणि वसाना इति व्यत्यस्तवस्त्राभरणाः ७ वार्यमाणा निरोध्यमाना गोविंदेनापहृता आकृष्टा आत्मानो मनांसि यासां तास्तथा ८ ॥ ॥

अलब्धविनिर्गमा न लब्धो विनिर्गमो बहिर्गमनं याभिस्ताः तथा तस्य कृष्णस्य भावनया भक्तिसंस्कारेण युक्ताः ९ कायेन तास्त्रियः गुणमयं सत्वादिगुणविकृतं देहं जहुरित्यन्वयः। अयं देहत्यागः संसारिणो न किं तु मुच्यमानस्येवेत्याह। प्रक्षीणेति। बंधनहेतोर्विपाकस्य पुण्यपापप्रणोदनेन दर्शयन्नाचितथैवेत्याह। दुःसहेति। दुःसहः सोढुमशक्यः प्रेष्ठस्य कृष्णस्य विरहः सांसारिको वियोगः तेनोत्पन्नस्तीव्रतापः दुःखं स्वत्कटं च रागानुभवः तेन धुताशुभाः निरस्तपापाः ध्यानेन प्राप्त अच्युतस्याश्लेषः ध्यानप्राप्ताच्युताश्लेषः तेन जातया निर्वृत्या स्वरूपानंदाविर्भावलक्षणया क्षीणानि प्रारब्धानि मंगलानि पुण्यानि यासां तथा। अनारब्धफलानां कुतो निवृत्तिरिति तत्राह तमिति। जार उपपतिः। पत्युरप्यधिक इति संभावितास्तं कृष्णं प

अंतर्गृहगताः काश्चिद्गोप्योलब्धविनिर्गमाः। कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ९ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः।
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः १० तमेव परमात्मानं जारबुद्ध्यापि संगताः। जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ११
राजोवाच कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने। गुणप्रवाहोपरमस्तासां गुणधियां कथं १२ ॥ ॥

रमात्मानं नारायणमेव संगताः सम्यग्ज्ञातवत्यः। अनेन विंवभूतहरिज्ञानेन वा परस्त्वप्रणाश इति सूचितं ११ जारबुद्ध्यापि संगता इत्युक्तं तस्य तात्पर्यमजानन्निव राजा पृच्छति कृष्णमिति। गोप्यः कृष्णं परं कांतं जारं पतिं विदुः ब्रह्मतया श्रुतिशतगीतपरब्रह्मत्वेन न विदुः अनधिकारित्वात् तथा एवंविधानां तासां गुणेषु विषयेषु धीर्बुद्धिर्यासां तास्तथा गुणप्रवाहोपरमः संसारप्रवाहनिवृत्तिः कथं संभाव्यते। निवृत्तिमार्गलभ्या प्रवृत्तिमार्गेण कथं संसारनिवृत्तिः स्यादिति। उत्तिष्ठत जाग्रतेति श्रुतिः १२ ॥ ॥

भक्त्या संततमधुमथनमहिमसंस्मरणसमुदितसंविदा निवृत्तिर्योग्या मुक्तिस्त्वनुकामादिना। तेन स्वर्गादिप्राप्तिरेव कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः इत्यादिस्मृतेरित्यभिप्रायं हृदि कृत्वार्थवादस्यापि स्वार्थसाधनसमर्थकत्वात्तेन चोद्यं परिहरति श्रीशुकः। उक्तमिति। हे मुक्तौ स्वानंदरूपानुभवलक्षणा नित्यदुःखानुभवलक्षणेति। ते उभे अपि सिद्धिशब्दोक्ते। तत्र यथाशास्त्रविहितमंगीकर्तव्यमिति। तदुक्तं। सदा द्वेषिणामधरं तम इति श्रु क्लिश्यद्धोरितं चैद्यप्रभृतादित्यादिलोकसंग्रहार्थं किमुताधोक्षजप्रिया इति। अन्यथा कामस्य शुभकृत्वापि भक्त्या विशिष्टः प्रसादकृतत्व इत्यादिनोदाहृ रिष्यते। जगत्पितामहे विष्णौ जारबुद्धिः कथं घटत इति चेत्। अत एव जारबुद्ध्यापीत्यत्रापिपदेन जारबुद्धिं गर्हयामास। श्रीणां जारे हि प्रेष्ठत्वबुद्धिः सापि न घटत इति चेत्तन्न। सर्वेषां द्वेषे प्रेष्ठत्वबुद्धेरविगाहनया हतेस्वदेतल्लोप इति श्रुतेः। अयं भावः कुतोवगत इति चेत् ज्ञात्वा पितामहे जारबुद्धि

श्रीशुक उवाच उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः। द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः १३
नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप। अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः १४ ॥ ॥

त्रिपुद्देत्याचार्यवचनात् १३ नन्वाचार्यस्यापि यथास्थितग्रंथाभिप्रायकथनं विना वक्रगत्या व्याख्याने कोभिप्रायः इत्याशंक्योत्तरग्रंथानुकूल्यादित्याशयेनाह। नृणामिति। व्यक्तिरवतारः। अन्यथावतारो न घटत इत्यत्र हेतुमाह। अव्ययस्येति। ज्ञानादिगुणात्मनः। भगवतो व्यक्तिस्त्वं केवलमसुरनिर्हरणार्थाय किंतु मोक्षलक्षणपुरुषार्थाय पुरुषार्थं कृष्णभगवत्प्रसादेन कस्योत्सवभक्त्यासाहरे यथा स्वरूपविज्ञानेन स्वरूपविज्ञानं गुणोत्कर्षज्ञानपूर्वकं न त्वन्यथा। गुणोत्कर्षज्ञानं तदियाद्दृष्टी स्यादित्युक्तेः। तस्मात् द्वेषादिनापि नित्यसुखानंदानुभवलक्षणमोक्षो वर्षानं तेनापि न
स्यात् १४

नचैवं तद्विद्वेषादिना कांसिद्धिमाप्नोतीति तत्राह कामं मिति। ये हरौ कामादिकं विदधत उपासते ते तन्मयतां यांति कामाद्यात्मतामाश्रंकंति। ननु भगवन्मयतां। नि
त्यासिद्धिमितानं तवाविधेः हरेः कामाद्यभावाद्विशेषेयं वापिस्मरन्भावं त्यजत्यंते कलेवरं। तं तमेवेति कौंतेय सदा तद्भावभावित इत्यादि स्मृतिं सूचयति। अ
त्यासिद्धिमितानं तवा विधेः हरेः कामाद्यभावाद्विशेषेयं... विमुक्तानपि कामिन्यो विष्णुका माब्रह्म स्त्रियः। द्वेषिणश्च हरौ नित्यं द्वेषिणस्सम
वसारणार्थो वा। कामिनः कामित्वमेव क्रोधिनः क्रोधित्वमेवेत्यादि। तदुक्तं। विमुक्तानपि कामिन्यो विष्णुका माब्रह्म स्त्रियः। अतः कांततयापि मुक्तिर्भक्तिमतां हराविति च। ननु ध्यदिशेष बद्धे
सिद्धिता इति विशेषद्योतको वा। तदुक्तं। भक्त्या हि नित्यकामित्वं न तु भक्तिं विना भवेत्। अतः कांततयापि मुक्तिर्भक्तिमतां हराविति च। ननु ध्यदिशेष बद्धे
वविशेषद्योतनार्थोपि भवति। स्नेहभक्ताः सदादेवा कामित्वेनाप्सरस्त्रिय इत्यादेः। भक्त्यैव मोक्षो नान्येन साधनेनेति तमर्थविशेषं च वक्ति भक्त्या वा काम भ
क्त्या वा मोक्षो नान्येन केनचित् इत्यतः। कामभक्त्या मोक्षमप्सरस्त्री णां वक्ति कामभक्त्याप्सरं स्त्रीणामित्यादेः। उपासनायाः विशेषोक्तीति सूचयति। उपास्य
श्वशुरत्वेन हैव स्त्रीणां जनाईन इत्यादेः तन्मयोपतोपासनामंतरेण मुक्तिः कस्यापि न स्यादिती मंव्यावष्टे। योग्योपासां विनानैव मोक्षः कस्यापि सेत्स्यतीत्यादेः

काम क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा। नित्यं हरौ विदधतो यांति तन्मयतां हि ते १५ न चैवं विस्मयः कार्यो भवता भगवत्यजे। योगेश्वरेश्वरे कृष्णे
यत एतद्विमुच्यते १६ ॥ ॥

पतित्व पितृत्वादि विशेषं सूचयति पतित्वेन स्त्रियोपास्यो ब्रह्मणामेपि तेतिचेत्यादेः। गुरुत्वविशेषमपि ब्रूते। गुरुः श्रीब्रह्मणो विष्णुः सुराणां च गुरोर्गुरुरि
त्यादेः। सर्वेषामविगानेन गुरुत्वं ब्रह्मण उपास्य देवत्वं विष्णोरितीमं वादः। गुरुर्ब्रह्मास्य जगतो दैवं विष्णुः सनातन इत्यादेः १५ यथा हि शिशुपालाद्या ब्रह्मो
विशेषाः शास्त्रांतरसिद्धाः संति। तस्माद्भगवति विस्मयो न कार्यः इत्युपसंहरति तदेवमिति। विस्मय आश्चर्यबुद्धिः। भगवताप्येवमकारि किं सुताक्ष्मा नि रिति
दर्पो वा। चैत्रादेर्प्येवं च विस्मय इति यादवः। भगवत्यैश्वर्यादिगुणसामग्रीमतीत्यपि हेतुरौत्पत्तिकलक्षणे इत्याह अज इति। न जायते इत्यजः सोप्यर्यादियोगेश्वर
अपियोगबलेनाति मानुषं कर्म वर्तिकिं मुत तदनुस्थाशेयमिति भावेनाह। योगेश्वर इति। कृष्णविषयः प्रश्नः परिहारोप्यविषय इति द्वेयते। अतः कथं संशय नि
रासः इति तं कानि रासाभिप्रायेणाह। कृष्ण इति। हेत्वंतरमाह यत इति। यतो यस्मात्कृष्णादेतज्जगद्विमुच्यते संसारमुक्तो भवति यस्य प्रसादात्परमार्तिह
पादस्मात्संसारान्मुच्यते नापरे णेति श्रुतिः १६ ॥ ॥

परित्विन्यं प्रश्नं परिहृत्य तदुभुत्सितकथाशेषं वक्ति ता इति वाचः परिभाषणादुदितैः पारौः प्रेरलक्षणैः वदतां व्यक्तवाचं कवीनां श्रेष्ठः प्रश्रयस्तमः १७
वः। किं प्रियं करवाणि। युष्माकं मया भीष्टं कर्तव्यं तत्किं तदभीष्टं जानन्नप्यज्ञवत् पृच्छति। व्रजस्येति। कच्चिद्व्रजस्य स्वास्थ्यं अनामयं नाम योरोगो यस्मि
न्न तत्तथा १८ ननु यत्किंचिन्निमित्तमपेक्ष्यते भवदागमनं अन्यथास्यामवस्थायां नोचितमिति तत्राह। रजनीति। घोरसत्वा राक्षसादयः १९ विचि
त्वंतः स्त्रग्यं तः। कथं ऊत् ध्वंसाध्वसं भयं २० राकेशश्चंद्रः यमुनायाश्चानिलेन वायुना निर्भयेन एतद्भिः कंपमानैः तरुपल्लवैः शोभितां यद्वा यमुना

तांहृच्छंतिकमायाताभगवा व्रजयोषितः। अवदद्वदतां श्रेष्ठो वाचः पाशैर्विमोहयन् १७ श्रीकृष्ण उवाच स्वागतं वो महाभागाः प्रि
यं किं करवाणि वः। व्रजस्यानामयं कच्चित् ब्रूतागमनकारणं १८ रजन्येषा घोररूपा घोरसत्वनिषेविता। प्रतियात व्रजं नेह स्थेयं स्त्रीभिः
सुमध्यमाः १९ मातरः पितरः पुत्रा भ्रातरः पतयश्च वः। विचिन्वंति ह्यपश्यंतो मा कृढ्वं बंधुसाध्वसं २० दृष्टं वनं कुसुमितं राकेशकररंजि
तं। यमुनानिललीलैजत्तरुपल्लवशोभितं २१ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः। क्रंदंति वत्सा बालाश्च तान्पाययत दुह्यत २२ अथवा
मदभिस्नेहाद्भवत्यो यंत्रिताशयाः। आगता ह्युपपन्नं तत्प्रीयंते मयि जंतवः २३ ॥ ॥

निलानीतनीरेरौजद्भिः २१ यतो युष्माकं अपश्यंतो बंधवो भयमवाप्नुवंतिय स्मात्तस्मात्तासतीः सत्यः २२ ब्रूतागमनकारणमित्यप्युक्तमुक्तं
रागस्थलत्वात्स्वहृन्नेरितितत्राह अथवेति। मदभिस्नेहान्मदधिकरागस्नेहात् यंत्रिताशयाः वशीकृतांतःकरणाः। नियमिताभिप्राया वा। हि यस्मात्तस्मादाग
मनमुपपन्नं तत्कथमत्राह प्रीयंत इति। ममप्रियमाणस्य सतः सर्वोपि प्रीणाति। नीचेतनचेत्यत्र यत्प्रतिरेकाभ्यां प्रमितत्वात् २३ ॥

भर्त्तारिश्चत्रि
किंच अन्यदेकं शास्त्रविहितं वदामीत्याशयेनाह भर्त्तुरिति। स्त्रीणाम मायया अवंचनया भर्त्तुः पत्युः शुश्रूषणं धर्मो हि लोकद्वयसिद्धेः
हितो नाशयणमिति वृषाशुश्रूषणं परो धर्मो हि यस्मात्तस्मात्तस्य भर्त्तुर्बंधूनां कल्याणं च श्रेय इति च। न केवलं तद्बंधूनां च श्रेयः अपितु प्रजानां संतति
लक्षणानां चानुपोषणं समृद्धिकरणं च भवतीत्यर्थः २४ पत्युः दौःशील्यादि सद्भावेपि स्त्रीभिस्त्यागो न विहित इत्याह दुःशील इति। दुःशीलः कलह
दि शीलसंपन्नः दुर्भगो निर्वीर्यः कांतिविहीनो वा। वृद्धः गतवयाः। जडः स्वकार्यमूढः। रोगी भयंगोल्यंगः कुष्ठादिव्याधिपीडितो वा। ब्रह्महत्यादि दो
षशील्यादिदोषसद्भावे कथं न हातव्य इति तत्राह। लोकइति। दौःशील्यादिदोषसद्भावेपि ब्रह्महत्यादि पंचमहापातकरहितो वा। ब्रह्महत्यादिदोषश्चेत्
तिः श्रुतिरेव न हातव्यो अन्यथा विदोष इति भावेन लोकइत्युक्तं २५ कामस्य तुच्छार्थत्वेन पतिदोषेण तद्वाक्याज्जन्मनो निषिद्धो जनत्वमा पत्रभि

भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया। तद्बंधूनां च कल्याणं प्रजानां चानुपोषणं २४ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोपि वा। पतिः
स्त्रीभिर्न्न हातव्यो लोकेप्सुभिरपातकी २५ अस्वर्ग्यमयशस्यं तत्फल्गु कृच्छ्रं भयावहं। जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियः २६ श्रवणा
द्दर्शनाद्ध्यानान्मयि भावोनुकीर्त्तनात्। न तथा सन्निकर्षेण प्रतियात ततो गृहान् २७ ॥ ॥

तिषका रांतरेणसाफल्यमायात्मनीयं हीति विपक्षे बाधकमाह अस्वर्ग्यमिति। चशब्द एवार्थे उपपतिः पत्युः प्रतिनिधिः उपपतिर्जारस्तत्संबंधि वा भर्त्त्या
म्यं तद्गुणं। तत्कुलस्त्रियः। स्वर्वत्र परत्र लत्र साध्यमध्यमेषु पुत्रेष्वपि जुगुप्सितमेवेत्यन्वयः। कथं तदुच्यते अस्वर्ग्यं। स्वर्गविरोध्येव न भवति किंत्वयश
स्यं शरीरात्परत्र दुःकीर्त्तिकरं च। तथापि न वक्तव्यं फल्गु तुच्छफलं अल्पकालविषयत्वात्। कृच्छ्रं कष्टं स्यात्कृष्टं कृच्छ्रमित्यमरः। कृच्छ्रं कर्त्तुः श्रमसाधनं
स्य इहामुत्र च दुःकीर्त्ति करं च। तथापि न वक्तव्यं फल्गु तुच्छ फल अल्पकालविषयत्वात्। कृच्छ्रं कष्टं स्यात्कृष्टं कृच्छ्रमित्यमरः। कृच्छ्रं कर्त्तुः श्रमसाधनं
वामरणादि भयजनकं २६ ननु तव मुखलाभ इत्यात्वत्सेवनं जारसेवनवदस्वर्ग्यं न भवति। किं तु पतिसेवनान्मुख्यसाधनमेव स्यादित्यादिशंक्य
त्वं तथापि मत्श्रवणादिना मुख्या कं भक्तिः स्यात् न तथा मम सन्निकर्षनिषेवणेन यस्मात्तस्माद्भवतीभिर्गृहानवाप्य ममापि भक्तिः कर्त्तव्ये
ह। श्रवणादिति २७ ॥ ॥

प्रतिपातव्रतं चेद्गृहं स्त्रीभिः स्वेषं तु मध्यमा इति गोविंदभाषितं श्रुत्वा विप्रियं। पश्चाद्विशेषतः प्रियं चिंतां मनसि दुःखचर्चा विचारं चिंता चार्द्धिक्य
योग्यं त्येति २८ दुःखं तदपि तमाह। व्यक्त्वा इति वक्त्र वनजानि मुखकमलानि न्यक्कृत्य अधः कृत्वा बिंबफलतुल्यान्यधराणि बिंबाधराणि पत
र्गतिशोकाग्नितापेन शुष्यंति बिंबाधराणि येषु तानि तथा। कामवाणप्रविष्टांगी स्त्रियो निर्वर्त्तांगना। पादांगुष्ठनखेनाधो वदना लिखंती स्थि
मितिका मशास्त्रात्स्वसिद्धभावं दर्शपतिचरणोनेत्यादिना। उपात्तमषिभिरंगीकृतांजनैः नाश्रैर्बाष्पैः उरूणां दुःखानां भारो यासां तास्तथा। स्मकृष्ण
वाक्यावित्र्यायं संस्मृत्य काम स्यद्हनाक्षे कृष्णेराधागोत्यादिताश्रुभिः। नेत्रद्वारेण निर्यातिदुःखममर्गं तत्स्त्रिय इति २९ तदर्थेष्वित्कृष्णेविनिवर्त्ति

श्रीशुकउवाच इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितं। विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययां २८ व्यक्त्वा वक्त्रवनजान्य
तितापशुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः। अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःखभरास्म तूष्णीं॥ २९॥ प्रेष्ठं
प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्त्तितसर्वकामाः। नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभगद्गदगिरोब्रुवतानुरक्ताः ३० गो
प्य ऊचुः मैवं विभोर्हति भवान् गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलं। भक्ता भजस्व दुरवग्रह मा त्यजास्मान्देवो यथादिपुरुषो भ
जतो मुमुक्षून् ३१

तः सर्वकामो यासां ता स्तथा। रुदितेन रोदनेन उपहते क्लिष्टे संरंभेण प्रणयकोपेन गद्गदपदं स्खलदक्षरपदं यस्याः सा तथा ३० तथा विचार्य कि
मस्तु वक्ष्यतीति तत्राह मैवमिति। नृशंसं परुषं वचनमेवं गदितुं वक्तुं नार्हसि कुतः इत्यत आह संत्यज्येति। हे दुरवग्रह अवग्रहो वर्षविघातः तद्रहितः भक्ता
भीष्टवर्षणशीलेत्यर्थः शब्दादिसर्वविषयान्संत्यज्य भक्त्या तव पादमूलं भजेम सेवितुम वाप्ता इति यत्तस्मात्मा त्यजस्व अत्र दृष्टांतमाह देव इति ३१

शुश्रूषमाणं पतीनितिपदं इतिं तत्राह ।।पत्यतीति हे अंग ।। स्त्रीधर्मशास्त्रविदा त्वया स्त्रीणां पत्यादीनामनुवृत्तिरनुवर्त्तनं स्वधर्म इति यत्त्वदुक्तमेव नत्संदि ग्धं तर्हीतान्विष्ट स्तान्किमर्थमागा तमितितत्राह तद्यपीति। देववरेत्यसमित्याही नां जामात्रुं स्थानीये त्वयि तदपि कि यत इत्ति शेषः। वरणीयेवादेवाद्य मंतर्हीता विष्टर्यन्क शेषं मा स्या ज्ञारीयगाहित्यपपर्यादिति भावः। त्वय्येव शरणे यद्गुहत्प्रयोः इत्यर्थः। परमानंदविषयोपि हि पतिरयं कथं न हि विषय इत्याशं भोद्दृशांतरिवा। न केवलं पतिरिपाती ये ई शे ऐश्वर्यादिगुणसंपन्नेत स्मा द्वरणीय इत्यर्थः। परमा क्वचन केवलमस्माकमेव परमानंदगोचरः। अपितु सर्वेषामिति भावेनाहप्रेष्ठ इति। अस्माकं विशेषतोपि प्रेष्ठ इत्याह ।। वांछवेपि वंधुरूपः। परमा

रतिधर्म

यत्यत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म्मविदा त्वयोक्तं। अस्त्वेवमेतदुपदेश पदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल वंधुरात्मा ३२
कुर्वंतिहित्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्त्तिदैः किं। तन्नः प्रसीद वरदेश्वर मास्म छिंद्या आशां धृतां त्वयि चिरादरविं दनेत्र ३ ।। ।।

त्माकिलतथापुराततनावार्त्तावार्त्ता संभावयोः किलेति। यद्वात्मभूतो वंधुः ३२ इतोपि त्वमेवास्माकं मुख्यः पतिरित्याशयेनाह। कुर्वंतीति। कुशलाः सारविवेकपरवाः स्वे आत्मन् अनित्यप्रिये वंधावात्मनि स्वामिनि त्वयि रतिं कुर्वंति। नोस्माकं नित्याप्रियैः पत्यादिभिः किं प्रयोजनमिति शेषः। नि त्यप्रियत्वं कथमितितत्राह। आर्त्तिदैरिति। अनेनकं दंतिवत्साः इत्येतत्परिकुर्वंति इतं। ततः किं अत्राह। तन्न इति। यस्मात्त्वं मुख्यो भर्त्ता तत्तस्मा त्तर्हि किंरूपः प्रसादः इत्याह ।। मास्मेति आशामतिदृढां आशादिगितितद्द्वयोरितियादवः ३३ ।। ।।

प्रतियातो त्यस्पोत्तरमाह ।। चित्तमिति। हे सखे नो यच्चित्तं गृहेषु निर्विशति उपभोग्यत्वेन स्मरति। कुत इत्यत्राह। भवतैवापहृतं तस्मादितिशेषः। सहिसर्वमनोवृत्तिप्रेरकः समुदाहृत इति वचनात्। करावपि कर्मसाधनावपि गृह्यकृत्येषु योग्ये कार्ये संमार्जनोपलेपनादि लक्षणेन तिष्ठत इति शेषः। अस्मत्पादो गमनसाधनावपि तव पादमूलात्पदं एकपादन्यासमात्रमपि न चलतः इत्यथो तस्मात्कथं व्रजं यामः किं वा करवाम इति निश्चीयते इति शेषः ३४ तर्हि भवतीनां किमभीष्टमित्यत्राह। सिंचेति। शरके एणम्बाहेणाहासमहितावलोकेन कलगीतेन मधुर

चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये। पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा
३४ सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निं। नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं स खे ते ३५ यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य। अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग स्थातुं त्वयाभिरमिता वत पार यामः ३६ ।।

गानेन जातो हृच्छयः कामः स एवाग्निः तं सिंच अभिषिंच शमय। नो चेन्न शमयसि चेत्तद्विरहाज्जातेनाग्निना उपयुक्तो दग्धो देहो याभिस्ता ध्या ३५ यर्हीति। क्वचिदवने दत्तक्षणं दत्तावसरं। अस्प्राक्ष्म स्पृष्टवंत्यः अरण्यजनस्यैव स्वजनः। तत्प्रभृति तदानीमारभ्य अन्यसमक्षमन्यजनाभिमुखं न पारयामः न शक्नुमः। वत अद्भुतमाश्चर्यं तव महिमा। अनेन मदंगस्पर्शनांतरमन्यांगस्पर्शनशंका निवारिता ३६ ।। ।।

द०पू०

८५

अथापि लक्ष्यास्तव पादपद्मद्वंद्वधूलिनिषेवणं चकांक्षितं। किंभूतस्याः कं इति भावेनाह। श्रीरिति। अन्येषां सुराणां ब्रह्मादीनां प्रयासः प्रय
त्नः। यस्याः श्रियः। स्ववीक्षणकृतः स्वनिरीक्षणार्थं कृतः सा श्रीर्वक्षसि पदं लब्ध्वापि तुलस्याः परं यस्य तव पदांबुजरजः चकमे कामितवती य
था वयं च तद्वत्तथा तस्य तव पादरजोनिषेवणाय प्रपन्ना इत्यन्वयः। स्ववीक्षणकृत इति पाठे स्वदर्शनार्थ इत्यर्थः ३७ वृजिनार्दन दुःखनाश
न वसतीः गृहाः। त्वदुपासने आशा श्रद्धा यासां तास्तथा। सुंदरं च तत्स्मितं यस्य निरीक्षणेन उद्भूतेन तीव्रेण कामाग्निना तप्त आत्मा देहो या

श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टं। यस्याः स्ववीक्षणकृतोऽन्यसुरप्रयासस्तद्वद्वयं च तव पादर
जः प्रपन्नाः ३७ तन्नः प्रसीद वृजिनार्दन तेंऽघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः। त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनां
पुरुषभूषण देहि दास्यं ३८ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकं। दत्ताभयं च भुजदंडयुगं विलोक्य
वक्षः श्रियैकरमणं च भवाम दास्यः ३९ ॥ ॥

सां ताः। पुरुषभूषण पुरुषतिलक ३८ हे वीक्ष्य दर्शनीया वयं तव दास्यो भवामेत्यन्वयः। आशिषि लिङ्लोटाविति आशिषि लोट्। दासीभूत्वा
श्रियं कामयामहे इत्यर्थः। दासीभावे कारणमाह। अलकेति। कुंडलाभ्यां श्रीर्यस्य गंडस्थलं अधरसुधा च यस्य तत्तथा। हसितेन युक्तमवलोकं च
पतिजनं प्रति दत्ताभयं भुजदंडयोर्युगं च श्रियः एकरमणं प्रधानरतिस्थानं वक्षश्च विलोक्य वीक्ष्य दृष्ट्वा विचार्य वीक्ष्येति वा ३९ ॥ ॥

रा०म

८५

अस्मत्स्वरूपमनं च न चित्रमिति भावेनाह। काऽस्त्रीति। ते तव कलपदैः अव्यक्तमधुरशब्दपदैः अमृतं श्रवणानंदकरं यद्वेणुगीतं वंशगानं तेन
संमोहिता त्रिलोक्यां त्रैलोक्ये का स्त्री त्रैलोक्ये सौभाग्यमलंकारस्तमिदं तव रूपं सुंदरतत एव पयोपल्लवमाकारं च निरीक्ष्य आर्याणां सतां चरितान्मार्गा
दिति शेषः। न चलेत् स्खलिता न भवतीत्यन्वयः। इदं न चित्रमित्याह। यदिति। यद्यस्माद्धेतोः गानात् यत्स्वरूपस्य दर्शनादिनापि गावादयोऽतः प्रज्ञा
श्वेतनराशयः। पुलकानि रोमांचानि अबिभ्रत् दधुरिति ४० सर्वस्य स्वामित्वेन भर्तृगुणयोगात् अस्मत्कुले अभिजातत्वेन बंधुत्वेन संबंधयोग्यत्वाद्दास्या
कं त्वत्संबंधेन जारसंसर्गदोषागमनेन निंद्यत्वं दूरोत्सारितं स्यादिति भावेनाह। व्यक्तमिति। भगवान्यथा सुरलोकगोप्ता वामनतयाऽभिजातः। त

काऽस्त्र्यंग ते कलपदामृतवेणुगीतसंमोहितार्य्यचरितान्न चलेत्त्रिलोक्यां। त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलका
न्यबिभ्रत् ४० व्यक्तं भवान्व्रजभयार्तिहरोऽभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता। तन्नो निधेहि करपंकजमार्त्तबंधो तप्तस्तनेषु च शि
रस्सु च किंकरीणां ४१ श्रीशुक उवाच इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः। प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ४२
ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः। उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ४३ उपगी
यमान उद्गायन्वनिताशतयूथपः। मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनम् ४४ ॥ ॥

था आदिपुरुषो देवो भवान् व्रजभयार्तिहरोऽभिजात इति व्यक्तं इति दृढं संदिग्धमिति यत्तस्माद्यथा यस्मादिति वा। कामाग्नितप्ते कुचभयत्रयोऽयं
४२ विक्लवं विंता कामार्त्तवचनं। अपरीरमत नितरां रमयामास ४१ समेताभिः मिलिताभिः। उदारः उत्कृष्टः हासः द्विजा दंताः कुंदा मल्लिका आसां
दीधितिः कांतिर्यस्य सः। द्विजा एव कुंदाः द्विजकुंदाः उदारहासेन विस्तृतानां द्विजकुंदानां दीधितिर्यस्य स इति वा। एणांकश्चंद्रः। एणः कुरंगो हरिण
इति हलायुधः ४३ शतशब्दोऽनेकवाची। वैजयंती विजयावहां ४४ ॥ ॥

द०पू०

८६

हिमवालुकं शीतलसैकतं यत्स्थानं तत्स्थाः नद्याः तरलैः मंदकल्लोलैः आनंदयितुं शीलमस्यास्तीति तत्तरलानंदि। कुमुदानामामोदस्य वायुस्तत्त रलानंदी कुमुदामोदवायुः तेन। यद्वा तया नद्यास्तरलानि चंचलानि नवस्थितानि च नंदीनि कल्कुध्वानि कुमुदानि तत्तरलानंदिकुमुदानि तेषामामोदेन सौरभेण संपृक्तेन वायुना ४५ परिरंभ आलिंगनं तत्र देवकरालकेलीति क्रीडा तत्स्पर्शनी नीवी वस्त्रग्रंथिस्तत्स्पर्शस्तनेषु आलभनेन नर्म च नस्य शौ लक्षणेन नर्मणा हास्योक्त्या च कराग्राणां नखानां पातैः उल्लेखनैः लक्षणैश्च। क्ष्वेला वल्गो हसितैः बालसिंहनादैः निरीक्षणैर्मंदहासैश्च। रति

नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकं। रेमे तत्तरलानंदकुमुदामोदवायुना ४५ बाहुप्रसारपरिरंभकरालकेलीनीवीस्तनाल भननर्मकराग्रपातैः। क्ष्वेलावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन् रतिपतिं रमयांचकार ४६ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः। आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ४७ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः। प्रशमाय प्रसादाय तत्रैवां तरधीयत ४८ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तविंशोध्यायः ॥ ॥

पतिं काममुत्तंभयन् उद्भवयन् उत्तोलयन्नित्यर्थः। रमयांचकार रेमे। बाहुपीडनकुचग्रहणादिभिः रतिस्तैर्नखदंतानि खातैः बोधितस्मरं उपशमः त रुणीनां मुक्तिमिलितशमकैरपि मारद्रुतिमाद्यः ४६ भुवि स्त्रीणां मध्ये स्वात्मानमाधिक्येनाभ्यधिकं मेनिरे ४७ सौभगमदं सौभाग्यनिमित्तं मदं मानमहंकारं। मदाहंकारयोः प्रशमाय नाशाय प्रसादाय अनुग्रहाय च। प्रकर्षेण प्रसादजननाय च। अंतरधीयत तासां दृष्ट्यात्रादृश्योऽभ वदित्यर्थः ४८ इति दशमेसप्तविंशोध्यायः ॥ ॥

राम

८६

इदानीं रेवयोगैश्वर्यमौत्पत्तिकं नान्यस्येति ज्ञापनभावेन गोपस्त्रीणां श्रीकृष्णे भक्त्यतिशयं कथयत्यस्मिन्नध्याये। तत्र गोपीनां संतापादिकाम रंतर्वक्ति शुकः। अंतर्हिते इति यूथपं गजेंद्रं १ गत्या बालसिंहद्विरेबलनगामनेन अनुरागेण स्नेहेन मुदिताति स्मितानि तैः रंजितानि संपर्क गतानीक्षितानि निरीक्षणानि अनुरागस्मितरंजितेक्षितानि तैर्मनोरमैः आलापविहारौ तयोर्विभ्रमैः शृंगारैः आक्षिप्तचित्ताः आकृष्टम नस्का या भगवता रचिता विशिष्टचेष्टाः तास्ता जगृहुः अन्वकुर्वन्। तस्मिन् कृष्णे आत्मा मनो यासां ताः तथा यद्वा तदनुकरणं यत्र दात्मिकाः

श्रीशुक उवाच। अंतर्हिते भगवति सहसैव व्रजांगनाः। अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं १ गत्यानुरागस्मितरंजि तेक्षितैर्मनोरमालापविहारविभ्रमैः। आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः २ गतिस्मितप्रेक्षणभाष णादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः। असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ३ गायंत्य उच्चैरमुमेव संहता विचेरुरुन्मत्तकवद्वनाद्वनं। पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ४ ॥ ॥

न०च०३

तदाकारमिता इति पादार्थौ सुष्ठु नाम दधाते २ एतदेव विशिनष्टि गतीति। प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढाः अंकुरिताः अंगीकृ ताः मूर्तयो यासां तास्तथा। तत्र निमित्तं दर्शयति। असाविति। असौ कृष्णो हं नवेति विकल्पमन्योन्यस्य दृष्ट्वा वा तदात्मकाः तद्गतचित्ताः। प्रश्ने वि कल्पे त्वित्येति यादवः। न्यवेदिषु रात्मानमिति शेषः। कृष्णविहारविभ्रमवत् विहारविभ्रमो यासां तास्तथा। अनेनापि तदात्मकत्वं विवृ तं ३ संगता मिलिताः। आकाशवद्भूतेषु बहिरंतः संतं वा स्थाभ्यंतरदेशयोर्वर्तमानं। अंतर्बहिश्च तत्सर्वं व्याप्येति श्रुतिः ४ ॥

उन्मत्तत्वं स्पष्टयति। दृष्ट इति। हे शाखिनः प्रत्येकमभिसंबध्यते। हे न्यग्रोध वटस्य स्कंधः आवरणं यस्य सः पादैरधो भूमिमावृणोतीति।
किंशुकः फलाशः पलाशः किंशुके पर्णे इत्यमरः। रक्तपुष्पवान् ५ कुरबकः करंजः। नागः नागकेसरः। पुन्नागः पुरुषस्कंधं गाइति।
दोग्धा जिह्वा मधुरः ६ ७ मालती जातिभेदः। वो युष्माभिरदर्शि दृष्टः। यूथिका शतपत्रिका ८ प्रियालो राजादनः देवदा

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध किंशुक। रामानुजो मानिनीनां दोग्धानंदस्य चात्मजः। नंदसूनुरिहागात्किं सह हासा
वलोकनैः ५ कच्चित्कुरबकाशोक नागपुन्नाग चंपक। रामानुजो मानिनीनां दोग्धानंदस्य चात्मजः ६ कच्चित्तुलसि
कल्याणि गोविंदचरणप्रिये। सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोऽच्युतः ७ मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके।
प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ८ चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः। येऽ
न्ये परार्थभविनो यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ९ ॥ ॥

रुर्वा कोविदारः कांचननारकः। असनः पीतसारः अर्कं क्षुद्रकनामं। परार्थभविनः लोकोपकारार्थमुत्पन्नाः यमुनाकूलसमीपे जाताः।
रहित आत्मा ध्यामी कृष्णो यासां तासां तथा तासां ९ ॥ ॥

हे निति ते त्वया किं शुभं तपो लक्षणं कृतं पर्यामं अंग्रेणोपांगपूर्णं शुभं तेन किं वा नामं चिंतं सत्कारपूर्वकं व्याहृतमसि इत्यर्थः। सुमोहत्याते पर्या
मे कृतं क्लीवे द्विते धर्व दितियादवः खिदातुकं पासतो प्रविलस्याम् चरणेव तेत्यमरः। अस्रीतिक घम व गम्य तेत्वत्याह केशवेति। केशवस्य सु
केशभारस्य कृतस्यां घ्रयोः स्पर्शणे वोत्सवसे न तस्तुल कितैः। कर्दंबुवोल्लसितैः अंगरुहैः रोमलक्षणैः कृष्णैः विभासि यत्र सा इति शेषः। यद्वा के
शवांघ्रिस्पर्शेनोत्सवा प्रकृष्ट प्रसवा सती त्वमंगरुहैः हर्षैः रुत्पुलकिता रोमांचिता विभासि। यद्वा अंघ्रिस्पर्शनलक्षणेनोत्सवो त्सुलकितां

किं ते कृतं क्षिति शुभं तव केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि। अप्यं
घ्रिसंभवं उरुक्रमविक्रमाद्वा आहो वराहवपुषापरिरंभणेन १० ॥ ॥

गरुहैरंकुरितपुष्पितफलितैर्दृष्टैः। हे अंघ्रिसंभवे नारायणश्रीपादसंभवे उत्पन्ने अपि पद्भ्यां भूमिरितिश्रुत्या लोकसंभावितेः उरुक्रमस्य
त्रिविक्रमस्य विक्रमात्पादविक्रमणात्। अंगरुहैः उत्पुलकितैः विभासि वा। आहोस्वित् वराहवपुषा नारायणेन कृतेन परिरंभितेना
लिंगनेनोद्धृतिलक्षणेन। केशाद्योन्यतरस्यामिति सूत्रे णशो भमानाः केशा अस्य संतीति मत्वर्थे वप्रत्ययो विधीयते अर्थांतरं विवक्ष
मागोपीनामनभीष्टत्वाद्दर्शनेन १०

हे एणाक्षि त्रिशृंगजायेते। ईश्वरः कयाचित्प्रियया प्रियतमया इह होपगतः सामीप्यमाप्तः। किं कीदृशः। हेसाक्षि मृगभार्ये गात्रे शनैरादि शरीरावयवैः वोपुष्पाकं दृशा सुनिर्दृश्तिंत च रूअपिविशा रयश्च भ्रनेनितित्रमाइ कांतेति। कांतायाः कमनीयायाः अंगसंगात् आलिंगनलक्षण त्संक्रांतकुचकुंकुमेन रंजिताया अनुरागीकृतायाश्च स्मत्कुलपतेः कृत्स्नस्यांस मवलंबिन्याः कुंदस्रजः कुंदपुष्परचितमालाया गंधइह वाति आगच्छतीति यत्तस्मादिति शेषः। वाग्गति गंधनयोरिति धातुः। यद्वा कांतस्य भगवतोंगसंगात्संयोगोयस्याः सा तथा। अत्र श्री शब्दा हवाति आगच्छतीति यत्तस्मादिति शेषः ... गंधो स्याश्रीतिमत्वर्थेत्र चप्रत्ययात् गंधवान् सुरिच्याहार्यः। सा कांतांगसंगाश्रीतस्याः कुचकुंकुमरंजितायाः कुलपतेः कुंदस्रजः गंधोस्याश्रीतिमत्वर्थे ...

> अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः। कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपतेरिह वाति गंधः ॥ ११ ॥

इह वातीति वीजयतीति। गोपीनामेकवचनबहुवचनाभ्यां भक्तानि शयपिशाचीयहृणां सूचयतीति। यद्वा ऐएणपत्नि तुल्यनेत्रत्वात् सखीत्युपयतिवा ईश्वरो भर्त्स्यागृहाः कयाचित्प्रियया हरिण्या तुपगतः आश्लिष्टोपि किं न भवति गार्हितत्वात्। अस्मत्कुलपति रस्मात्र विहाय कयाचि दालिंगितः इत्याशयेनाहुः। कांतेति। कांतायाश्च ते उरोवयवे संगोयपोस्तौ कांतांगसंगौ तौ कुचौ च कांतांगसंगकुचौ तयोः कुंकुमेन रंजितायाः अरुणीभूतायाः कुलपतेः कुंदस्रजो गंध इह वाति। स्वयं च नद्दृश्यते तत्स्वभावो विज्ञापतरुतिव्यंग्योलंकारोक्तिः ॥ ११ ॥

विरहाग्निमनुवर्त्तमानस्य पुंसो मालत्यादि उष्या हानेच्छयातत्समीपजीगमिषासंभवेन तत्र ततउपभुज्यते। अस्वत्थादिनत्रः कोप भुज्यते इत्यतः तत्संभवं दर्शयितुमाहुः। बाहुमिति। इतरवः प्रणाम प्रहृष्णिणादिना प्रसन्नासंसारात्रा रयंतीति तरवोष्व त्वादयः। भगवद्गुरणयि य तुलसिकापुष्पमकरंदलोलैरलिकुलैः रच्यमानो रामानुजः एकेबाहुं प्रियायाः अंसे उपधायापरेणगृहीतपद्मः प्रणामं चरन्कुर्वन्। प्रणामावलोकैः वः अभिनंदति किंचेत्यन्वयः। प्रावणालंकारोक्तिः। यद्वा इह तरवः प्रणामाननुजः प्रणाममभिनंदति किं वाच्ये नस्याः वः प्रणामं भक्तु

> बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधैः। अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः ॥ १२ ॥ पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः। नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥ एवं कृष्णं पृच्छमाना वृंदावनलतास्तरून्। व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ १४ ॥ पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः। लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः ॥ १५ ॥ ॥

नतिसूचितेति १२ नूनं निश्चयेन याः तस्य कृष्णस्य करनखस्पर्शात् उत्पुलकिता निष्पुष्प फलत्वलक्षणानि विभ्रतिता लताः वनस्पतेः बाहून् शाखा आश्लिष्टा अपि संभाव्याः पृच्छत अहो अन्नु ख्यांभवतेत्यन्वयः। अयं तत्रप कालंकारः सुरतसुखस्मारकः १३ उपसंहरति। एवमिति। एवमिति। वनोद्देशे वनप्रदेशे १४ परमात्मचरणाकृतिलक्षणमवगम्य तद्गतिं लक्षणेन मुच्यते पदानीति लता कल्पलतात्रादिशब्देन चक्रादिकं गृह्यते १५ ॥

अविछं त्याः अचेषएांकुर्वत्याः। वध्वाः कस्याश्चिद्गोपस्त्रियाः पदैश्चरणानिह्नैः संपृक्तानि अंतराले मिश्रितानि। ईर्ष्ययार्त्ताः समब्रुवन् अंसे लापमकुर्वन् १६ प्रकोष्ठः करतलमूलभागः। करिणा सहितायाः करिण्याः पदानि यथा अंसन्यस्तहस्तायाः करिण्याः पदैर्मिश्रितानि क रिणाङ्कितानि पदानि वा १७ ८ हे आल्यः सख्यः धन्या निरपेक्षाः। आलिः सखी सधीचीति सख्यो रितिया दवः। निरपेक्षो गुणौ णः प्रणौ धन्य इत्यु रिणाङ्कितानि पदानि वा १७ ८ ... यस्मात्तस्मात्धन्या इत्यर्थः। तस्माद्विभो ... भिप्राय सिद्धये ... १९ न च्यते ... धे रितिचाव्रज ... मूर्द्ध्नि धारयंतु रिति यस्मात्तस्मात्धन्या इत्यर्थः ... ॥

तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योग्रतोबलाः। वध्वाः पदैः सुपृक्तानि विलोक्यार्त्ताः समब्रुवन् १६ कस्याः पदानि चैतानि यातायाः नंदसूनुना। अंसन्यस्तप्रकोष्ठायाः करेण्वाः करिणा यथा १७ अनयाराधितो नूनं भगवान्हरिरीश्वरः। यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः १८ धन्या अहो अमी आल्यो गोविंदांघ्र्यब्जरेणवः। यान्ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये १९ तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यत्। यैकापहृत्य गोपीनां रहो भुंक्तेऽच्युताधरं २० ॥ ॥

तु धन्यानां कृष्णपदतलसुक्तानां रेणूनां संदर्शनं पुण्याकमसृदितः परं शोकस्य किं कारणमित्यपेक्षायां तत्रापि तदीयमदसदृशं तस्य मत्वा शोको जायते इत्याशयेनाहुः। तस्या इति। गोपीनां मध्ये एका गोपी कृष्णमपहृत्य वशीकृत्य अच्युताधरं अच्युतस्याधरं रसयुतं संततं स्वेरमाना हृतमध्यरोष्टं रहो रहस्ये कांतदेशे भुंक्ते यत्र तस्यास्तस्या गोप्या अमूनि पदानि संदर्शनाधरपानं संस्मृत्योच्चैः क्षोभं चित्तविक्षेपं कुर्वंतीति तस्माच्छोक इत्यर्थः २० ॥ ॥

इदमधिकं शोककारणमित्याशयेनाहुः। नेति। ननु तर्हि एवं कथं तस्याः गोप्याः पदानि न लक्ष्यंते न दृश्यंते। अदर्शनकारणमूहयंति। तृणां कुरसंबंधेन खिद्यत्परिघातमाक्रम्य सुजातं ललितमंघ्रितलं यस्यास्तथा। प्रेयसीं उन्निन्ये उद्धृत्य नीतवान्। उद्धृत्य नयनेन भूमिसंबंधाभावात्पदादर्शनमविश्रुत एव तादृशं प्रेमनास्माकं प्राप्तमिति शोको स्माकं २१ पुष्पावचयाय परित्यागवत्प्रेयसीपरित्यागेन गमनात्तत्पदादर्शनं किं न स्यादित्यतः कृत उद्धृत्य गमनमनुमीयत इत्यत एतल्लिंगमपश्यतीत्याहुः। इमानीति। भूमाग्योर विनाभाववत् भारवद्वधूयुक्तपदमज्जनं भार वहनाविनाभूतं प्रत्यक्षलिंगं दृष्ट्वा उद्वहनं गमनमनुमीयत इत्यर्थः। मानयितुं शीलमस्यास्तीति मानी तस्य अधिकं श्रृंगारोक्तिरियं २२ अवरोह

न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः। खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः॥२१॥ इमान्यधिकमग्नानि पदानि वहतो वधूं। गोप्यः पश्यत कृष्णस्य भाराक्रांतस्य कामिनः २२ अत्रावरोपिता कांता पुष्पहेतोर्महात्मना। अत्र प्रसूनापचयः प्रियार्थे प्रेयसा कृतः २३ प्रपदाक्रमणे एते पश्यतासकले पदे। केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतं २४ ॥ ॥

णं क्रोडाधिक्यादित्याशयेनाहुः। महात्मनेति। कथमिदमवगतं पुष्पनिमित्तादित्यत्राहुः। अत्रेति। अपचयः नखाग्रसंयोगेन यथास्थानेन भवति तथा प्रचलनं। इदमपि ज्ञेयमस्याप्रेमातिशयप्रकटनं २३ इदमपि चित्रमित्याहुः। प्रपदेति। हे गोप्यः प्रपदयोः पादाग्रयोराक्रमणं यथोः हस्तिवित्र पदाक्रमणे एते पदे पादलग्नं उच्चैः असकले असंपूर्णे अत्र तेशाखाः पुष्पापचये प्रियकृष्णकरावनमितशाखाग्रहणे दृढस्थापयित्वा द्याबतपाद प्रमाणरहिते पश्यते त्यचयः। केशमार्जन्या केशप्रसाधनं केशसंस्कारः। कमुगताविति धातोः। काम अनंदः कामो गतिर्ज्ञानं वास्यास्तीति कामी। पूर्णानंदज्ञानवानित्यर्थः तेन कामिना प्रशस्तेच्छावता वा २४ ॥ ॥

कांतां प्रियां । तानि चूडयतेत्यत्रापि प्रकृतकेशपाशेषु दर्शनीयं निबध्नता कृष्णेनेहस्थलेऽवविष्टं परश्यतेति शेषः । इदं कृष्णपत्नीविच्छितं
संदेहेन कृष्णत्वेत्यर्थः । अयं सर्वस्मादधिकशोकतमद्रव्याकुः । रेम इति । तया कामिन्या रेमे च । सुरतली लामप्यनुबध्नत्यान ब्रार्थमितिस्वयंपति ।
आत्मरत इति । आत्मनि स्वरूपानंदे रतः । आत्मन्येवारामः क्रीडा यस्य सतथा । आत्मरत आत्मरत आत्मक्रीड इति श्रुतिः । अनेन विशेषणद्वयेन
इरोवेरिष्टकिन्निषिध्यति । भगवत्प्रीतिसाधनभक्तित्वानादिप्रारतत्वात् । प्रीतिमारतम्यमस्यचिरितिज्ञायते । तथा चात्मगोपीष्विंद्रियप्रवृत्तयः ।
दुर्नीताः कामिकामिनीभक्तिर्दुर्द्धिर्याद्येतिबुद्धिमता तन्नत्वदानितन्न दर्शबोधकत्वेन योजनीयानीति संयाद्यमिति संतोष्टव्यं । शोकादिकं

तानि चूडयता कांतामुपविष्टमिह ध्रुवं । रेमे तया चात्मरत आत्मारामोप्यखंडितः २५ इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः ।
कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मतां २६ यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने । सा च मेने तदात्मानं वरिष्ठं सर्व
योषितां २७ हित्वा गोपीः कामयाना मामसौ भजते प्रियः । ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् २८ न पारयेहं चलितुं नय
मां यत्र ते मनः । एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति २९ ॥ ॥

च युग्मानि मित्रमिति । अत एवाखंडितः कामेनेति शेषः २५ इति श्रुत्यादिवचनः पृष्ठं कृष्णविषयं प्रलापं कुर्वत्यः विष्ट विचयमन यथावच
नं कुर्वत्यश्च अविशिष्टचेतना अविपरीतचेतनाश्च कामिनां दुरात्मनां स्त्रीणामामेवं दैन्यं दर्शयन्दर्शयंत्यश्च २६ अयं भावः सर्वथात्याज
इति दर्शयितुमाह यामिति । अनेनैव राज्ञस्याः बुद्धेः स्वभावोदर्शितः २७ अत्यधिकं भजते इतीहेत्यनेन विषयलोलुपानां प्रवृत्तिरीदृशी
इति दर्शयति । कथांतरारंभं वा तमाह । तत इति । प्रत्यारंभेऽप्रसिद्धहेतिया दवः । वनोद्देशं विषयप्रदेशं । केशवं प्रशस्तकेशपाशं । वनेका
मिनं २८ पारये समर्थये । पारं गंतुं न शक्नोमीति वा । पद्भ्यां तुं विरगतस्वभावं दर्शयितुमाह । एवमिति २९ ॥ ॥

मत्त्या लभ्यो नान्यथेति भावं दर्शयति । ततइति । स्वबुद्धेः स्वभावोयमिति दर्शयितुमाह सा वधूरिति । हा विलपत्यस्मिन् वने हा विवादः सुमास्निधि
तिवा । हे नाथ आशाप्रद । हे रमण रतिप्रद । हे प्रेष्ठ प्रियतम ३० दास्याः शिक्षायोग्यायाः । दासबुद्धिं साधामिति धातुः । कृपणायाः कृपाविष
यायाः ३१ दृष्टिं यांतिरहितेति दुर्विषयगमनराहित्येनइति गोप्य इंद्रियवृत्तयः शास्त्रविषयाः । अविदूरतः ज्ञानत्वजात्या समीपेस्थिताः
मुक्तेः दर्शमपरोक्षबुद्धेः अविर्भावतिरोभावौ कृचित्स्यातामिति भावदर्शनायोच्यते । प्रियेत्यादिना अपरोक्षलक्षणमानप्राप्तिं ३२ याव

ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत । हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ३० दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिं ।
अन्विच्छंत्यो भगवतो मार्गं गोप्योविदूरतः ३१ ददृशुः प्रियविश्लेषं मोहितां दुःखितां सखीं । तया कथितमाकर्ण्य मानप्राप्तिं च
माधवात् ३२ अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ॥ ३३ ॥ ततोविशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते । तमः प्रविष्टमालक्ष्य ततो
निववृतुः स्त्रियः ३४ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः । तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ३५ पुनः पु
लिनमागत्य कालिंद्याः कृष्णभावनाः । समवेता जगुः कृष्णं तदागमनकांक्षिणीः ३६ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिंश
विंशोध्यायः ॥

चंद्रज्योत्स्ना विभाव्यते तावद्दूरादूरं गत्वा ततश्चंद्रचंद्रिकाक्रमयानंतरं प्रविष्टं प्रासं तम आलक्ष्य दृष्ट्वा । निववृतुः निवृत्ता इत्यनेनेदं
शास्त्राविवृत्त्य सद्धिः आप्यसनापयनं च कुरिति सूच्यते । स्त्रीयो शेषस्त्रसंघातइत्यभिधातोः । शास्त्रविषयबुद्धयः ३३ सत्वबुद्धीनां स्व
भावं दर्शयति । तन्मनस्का इति समवेता एकविषयीकृताः तस्य कृष्णस्य गमने कांक्षिणः ३५ इति दशमे त्रिंशोध्यायः ॥

वेदांतानधिकारिणां मुमुक्षूणां विविदिषूणां मम मर्त्यानां हरेः संकीर्तनमेव तदुपासनं स्यात् तत्प्रसादजं न स्यादिति नेत्यतः श्रीमद्भागवतानां गोपीनां उपासनप्रकारं निरूपयत्यस्मिन्नध्याये। तत्रादौ गोप्यः चित्ते सन्निहितत्वात्तं बोध्यागापयन् जयतीति। कृष्णेत्यध्याहार्यं हे कृष्ण। व्रजंत्यस्मिन्निवासं गोपा इति गोपनिवासस्थानं व्रजः अयं ते तव जन्मना अधिकं जयति सर्वोत्कर्षेण वर्तते। तत्र हेतुं तं रं वाहुः। श्रयत इति तत्र व्रजे। इन्दिरा परमैश्वर्यमिति धात्वर्थं इंदिरा ऐश्वर्यं राति ददाति इति। नित्ये श्रयते स्वरूपत्वात् इंदिरा श्रीः साधु श्रयते आश्रयते स्थिरत्वात् तत्र स्थाने इत्यर्थः। तव जन्मनिमित्तेः श्रियः श्रयणं च तव त्वया अविनाभूतत्वात् श्रीय इति भावः। क्वापि जायं दर्शयति। दयितेति। हे श्रेष्ठ भवान् स्वात्मनैव त्वां दिक्षु तां दृश्यतां। नामानां ह्य पतां तव कृ विधियो भवतु। त्वयि गतासवः समर्पित प्राणाः। त्वां विचिन्वते मृगयंते। ताः कांता त्वां दर्शनदानं मुक्तमित्यर्थः १ व्रजजनस्य आर्तिं हंतीति हिंनासि

गोप्य ऊचुः जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शाश्वतत्र हि। दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते १

व्रजजनार्तिहन्वीर योषितां निजजनस्मयध्वंसनस्मित। भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय २ ॥ ॥

नाशयतीति व्रजजनार्तिहा तस्य संबोधनं व्रजजनार्तिहन्। वीरश्रूर। निजजनस्य स्मयो गर्वः तं ध्वंसितुं स्मितं चैतत्स्मितं यस्य सत श्यात सं बुद्धिः निजजनस्मयध्वंसनस्मित। युष वृत् सम्भावितिधातोः योषितां समृद्धिकामानां न काम समृद्धिं पारयेति शेषः। कथं काः पालन स्मत्रा रीः दासीः नो भज पालय अस्मत्कृत्वा पत्याद्दीक्षिता यत्राद्य रात्रे वनं प्राप्ता इति भवे भवद्दृतिरेव राज्ञी कर्तव्या। अस्म किंकरीरिति त्यर्थः। यद्वा भवेता दर्शनसमी। अस्म इन्द्रार्थमित्यर्थः। यद्वा अस्मत्री वनसत्त्रायां विज्ञाता याः अन्यथा मरणमेवास्माकमापद्यत इत्यर्थः २ ॥

विरिंचिस्त्वप्येरपेक्षिताशेषपुरुषार्थप्रदः स्यात्तत्र कथं निर्णय इत्याशंक्य विरचितेति। श्रियः करं गृह्णातीति श्रीकरग्रहं। शरणमीयुषां नः शिरसि धेहि निधेहि। हे कांत कमनीय ६ नकेवलं करनिधानेन पूर्यते। अपि तु कुचेषु चरणनिधानं चापेक्षितमित्याशंक्य प्रणतेति। तृणचरान् पशून् अनुगच्छतीति तृणचरानुगं। फणिफणार्पितं कृणु कुरु हृच्छयं कामं कृंधि छिंधि ७ वल्गूनि मनोहराणि वाक्यानि यस्यां तया पादांतकानि यस्यां तथा तया बुधानां विदुषां मनोज्ञया हृद्यया मधुरया अपने अप्रासीं बालभाषणेऽशंकां निराकरोत्यनेन विधिकरीः दासीः अधरसीधुना

विरचिताभयं वृष्णिधुर्य ते शरणमीयुषां संसृतेर्भयात्। करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहं ६ प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनं। फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृंधि हृच्छयं ७ मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण। विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः ८ तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहं। श्रवणमंगलं श्रीमदाततं भुवि गृणंति ये भूरिदा जनाः ९ ॥ ॥

अधरामृतेन आप्याययस्व सेचय जीवय वा। मुह्यतीः मोहं गच्छतीः ८। तमादर्जीवयतीति तप्तजीवनं। श्रवणमात्रेण मंगलं श्रीमत् सुश्लिष्टं आततं विस्तृतं। भुवि ये जनाः तव कथामृतं गृणंति पानादिनाते भूरिदाः बहुलं ददः खंडं ति खंडयतीति वा। भूरीणि हिरण्यादीनि ददतीति वा। भूरिणि हिरण्यादीनि ददतीति वा। भूरि स्वर्णं जातरूपं हिरण्यं राः कल्याणं हेम रुग्मं सुवर्णमिति भवंतीति शेषः ९ ॥ ॥

अलुक्समासन्यायेन शरदुदाशय इत्येकं पदं । शरदुदाशये शरत्कालसंबंधिसरोवरे साधु सम्यक् प्रकारेण जातमुत्पन्नं अत एव सत्वशब्दं विकसितं यत्सरसिजं पद्मं तस्य उदरं अभ्यंतरं गर्भः तस्य श्रियं शोभां मुष्णातीति शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुट् तया दृशा शुल्कदासिकाः अतद्दासीः नोऽनिघ्नतः मारयतः ते सुरतनाथ वरद इह नेकिंवधो न भवति अपि तु वध एवेत्यर्थः । स्पष्टमेव ॥ ३ ॥ इदानीमपि उत्तमेदानीं भवता कार्यं न तथा पूर्वं कृतमिति इत्याशयेनाहुः । विषेति । विषजलात् विषयुक्तयमुनाजलात् यद्वा । विषजलपानेनाशयो दीर्घनिद्रामरणं तस्मात् । व्यालात् सर्पात् राक्षसात् तृणावर्तनाम्नः वर्षमारुतात् वैद्युतानलात् त्रिविधतलक्षणोऽग्नेः वृषमयात्मजात् असुरनिमित्तात् भयात् । किंबहुनोक्तेन सर्वभयेभ्यो विश्वतोमुखाद्भयात् ते त्वया वयं मुहुः रक्षिता इत्यन्वयः ४ गोप्यः

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा । सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ३ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् । वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ४ नखलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक् । विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ५ ॥ ॥

स्वतत्त्वज्ञानं विज्ञापयंति । न इति गोपिकानंदयतीति गोपिकानंदनः । भवान् । हे सखे विश्वगुप्तये जगद्रक्षार्थं सात्वतां यदूनां कुले उदेयिवान् उदयं गतः । जन्म भजनापायो गोपीनेत्याशयेनाहुः । अखिलेति । अखिलदेहिनां अंतर्यामित्वेन दृश्यति पश्यतीति । यद्वा तत्तत्साक्षितया स्वरूपं पश्यतीति । अनयोर्ननयोश्च भिवाकृशीति कृतिः । किंच विखनसा अर्थितः ब्रह्मणा प्रार्थितः विरिंचिर्विधुरित्यर्थः । यद्वा यः सात्वतां कुले उदेयिवान् सवान् गोपिकानंदनः खलु न भवतीत्यर्थः । निषेधे वालंकारे वीप्सने तु नयेखल्विति च अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रयोगः आक्षेपे सिकार्थे किंकं इति वाहुः । अखिलेति । नखल्विति पाठे वाक्यालंकारार्थः ५ ॥ ॥

तव कथामृतं तप्तजीवनादि फलं दर्शयति अधरसीधुनाप्यायनं किमर्थमित्याशंक्य तव प्रहसितादिना मुग्धा वयं तव अधरसीधुं प्रार्थयाम इत्याशयेनाहुः । प्रहसितमिति । हे प्रियप्रेम्णा वीक्षितं ध्यानमंगलं विहरणं विहारः विक्रम लक्षणः हृदिस्पृशः हृदयंगमाः संविदः संभाषणादयः । संविदः संकेतप्रतिज्ञाया संकेता चारनामसु । संभाषणे क्रियाकारे विज्ञाने तोषणादिषु चेति वचनात् । एते सर्वेऽपि सुरते संभवंति कुहक कपटेति प्रणयकोपे पद्यादिना तद्ग्ने संबोधनं । इयं स्मात्तस्मात् अधरामृतपानप्रार्थनं ॥ १० ॥ त्वच्चरितं ज्ञानिनामपि दुर्बोधं किं मुतास्माकमिति भावेनाहुः । चलसीति । पशून्चारयन् यद्यदा व्रजाद्बलसि गच्छसि । तदा शिलतृणांकुरैः छिन्नाशिखत्वेन परुषैः शिलाः शर्करास्ताभिः तृणांकुरैश्च तव सीदतीति इ

प्रहसितं प्रियप्रेमवीक्षितं विहरणं च ते ध्यानमंगलं । रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयंति हि १० चलसि यद्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ ते पदं । शिलतृणांकुरैः सीदतीति नः कलिलतां मनः कांत गच्छति ११ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं । वनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि १२ प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि । चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् १३ ॥ ॥

त्यतीति कलिलतां नानापरिणोन्योवेति संशयपंकिलां ११ ननु व्याकुलचित्तानां कामो दुर्बोधायोगात्कथमिह युष्माभिरिति कथमुक्तं अत्र वदंति दिनेति । दिनपरिक्षये संध्याकाले वनाद्गच्छन्निति शेषः । वनरजस्वलं वनभूमौ सतां गोरजसा धूसरं दर्शयन् । नीलकुंतलैरावृतं । वनरुहं जलजं कमलं तद्वत् शोभमानाननं बिभ्रत् त्वं नो मनसि स्मरं कामं मुहुरनिशं ददासि १२ धरणिमंडलं भूमिभूषणं । सर्वापदि ध्येयं । पद्मजार्चितं ब्रह्मणाराधितं । शंतमं आधिहन् मनोदुःखनाशनं ते चरणपंकजं नः स्तनेषु अर्पय निधेहीत्यन्वयः १३ ॥ ॥

स्मृतवत्सु चरणार्प्पणात् दुर्द्दुर्ज्वलितकामाग्निज्वालाः कामतापतप्ता अतस्त्वं पिपासुभ्यो अस्मभ्यं देहीत्याहुः। सुरतेति। सुरतं ग्राम्यधर्मः सुरि
तवेणुना सुष्ठु चुम्बितं वेणुनाध्वनितं वेणुना रागो रसः इतरेषां रसानां आस्वादनसुखं विस्मारयतीति इतररागविस्मारणं इतरेषु मधुरेषु वस्तु
षु रागं स्नेहं विस्मारयतीति इतररागविस्मारणं वा वितर देहि। विस्मारणं वितरणं स्पर्शने प्रतिपादनमितिहलः॥ १४ किं च अहो रात्रं अस्मा
कं त्वत्संचिंतनमेवान्यो व्यापारो नेष्यते इत्याशयेनाहुः। अटतीति। यद्यदा यस्मिन् काननमटति गच्छति तदा तस्मिन् काले त्रुटिः त्रुटीति जातिवा
चिकयह्णं तेन विभक्तं तं पदं लक्षयति। आदौ हूपलक्षणं। परमाणुद्वयः परमाणवः त्रसरेणवः त्रयस्त्रसरेणवस्त्रुटिः त्रुटीति जातिपदिकय

सुरतवर्द्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितं। इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतं ॥१४ अटति यद्भवानह्नि का
ननं त्रुटिर्युगायते त्वामपश्यतां। कुटिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां ॥ १५ ॥ ॥ ॥

सकालो नवयुवा न स्वामपश्यतामस्माकं युगायते युगवदाचरति द्विषड्वादशसहस्रपरिमितसमानावर्त्तते। पक्ष्मकृदिति व्यपयंति। पक्ष्मकृद
ताहृश्यो दृशोथासां ताः तथाता सामनिमिषनेत्रापात वक्ष्यमुखमीक्षतां ईक्षमाणानामस्माकं पक्ष्मकृत् दिर्जडइव दृश्येत न वस्त्रिश्वेक्ष्यनित्यर्थः। अन्नेन
वक्ष्का ने पिदुरितिजल्प इति सूच्यते। दुर्द्दशामिति पाठे तु नानिवस्पतवक्षमुखमीक्षतां दृशांपक्ष्मजडवद्रूपाविद्धेपलक्षणप्रष्टव्ये सूत्यामित्य
र्थः इतिचस्त्रनेन मानवस्याप्यनिमिषत्वं सूच्यते १५ ॥ ॥

भगवद्दर्शनसुखस्मरणात्मुग्धा गोप्योरतिविहारसमयोयमिति विश्रुम्य सुरतसंविदाद्यां प्रियपतिपतीति गेतवस्सकाश्चमागतास्त्वयैव स्मात्तर्हि कि
तव। कः उत्तमः निशियोषितस्त्यजेदित्यन्वयः। आगमने हेतुं वदंति। गतिविद इति। गतिविदः आकर्षलक्षणागानस्य तवोद्गीतेन स्थितो त्यानकर
गानेन मोहिताः मूर्छांप्रापिताः १६ किंच हुनोक्तेनास्माकं दवस्थेयं हीतिविज्ञापयंति। रहसीति। हृच्छयस्योदयो यस्मात्तत्तथा। वीक्षणमिति। अ
तिस्पृहां अतिशयितस्पृहायाः अतिस्पृहा मुह्यते हृ इति दधाती। तिव्यत्ययः छांदसः श्रियो निवासस्थानमिति शेषः। बृहदुरः प्रियइत्येकं पदं व इव
चनं इत्युक्तत्वमनुसरणं कांतिविशेषवाहुल्यद्योतकं १७ यदिभवानस्मत्तापदंनपरिहरिष्यति नर्ह्ययमवतारो व्यर्थो भविष्यन्नं वत इत्याहुः अतो

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेत्यच्युतागताः। गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि॥१६॥ रहसि संवि
दं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणं। बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः १७ व्रजवनौकसां व्यक्तिरंग ते वृजि
नहंत्र्यलं विश्वमंगलं। त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं १८ इतिश्री भागवते महापुराणे दशमस्कंधे एको
नत्रिंशोध्यायः ॥ ॥

अस्माकं त्वं भवता अवश्यं परिहरणीयमिति भावेनाहुः। व्रजेति। अंग भो। ते तव इयं व्यक्तिरवतारलक्षणा व्रजौकसां गोपानां गोकिसांतीर्थ
सार्थानां वानिवहौकसां ग्रामवासिनां वा। वनौकसां वनवासिनां सन्यासिनां वा वानप्रस्थानां वा जलाश्रयाणां वा। अलमत्यर्थं। वृजिनहंत्री दुःख
नाशिनी। यत्तस्मात्त्वयि स्पृहायस्यास्मत्वत्स्पृहः त्वत्स्पृहः आत्मा यासां तासां ताः तासां नः स्वकीयं मनाक् ईषदपि भजसा कान्यो भजाद्यनु नं त्यज्यं
ति। स्वजनेति विश्वमंगलं यच्च अस्मत् स्वजनस्य हृद्रुजां अंतर्गतरोगाणां निषूदनं निर्मूलकरं। तस्मादस्मकं स्वजनेनैकत्वादस्माभिः हं भवेत भवता
कर्त्तव्यमिति भावः १८ इतिदशमे एकोनत्रिंशोध्यायः ॥ ॥

द०पू०

यथा गोपीनां आत्मानं शाकाशायत भगवांस्तथा साधनसाध्याज्ञानिनामपीति समर्थं दर्शयितुमस्याध्यायस्यारंभः। तत्र श्लोकैः रोदनादिकमपि भक्तेष्वेकलत्रणमिति दर्शयितुं गोपीनां रोदनप्रकारं कथयति। इतीति। चित्रधा नानाविधेन सुस्वरं यथा स्यात् सुखकरं भवति तथा स्वरं ऊर्द्धस्याः। अनेन परिवेदनादिकं व्यावर्णयति १ भक्तेष्वेकोऽङ्गं रोदनफलमाह तासामिति मनोमथ्नातीति मन्मथः का

९४

मः साक्षात्स्वरूपीकृतस्तंगिक्षुंदरं इंद्रत्वं स्वस्यापि मन्मथः मदमथनः कामः। अनेनैवंविध भगवदुपासनात्साम मर्थ्यात् सम्भूतः सोऽद

श्रीशुक उवाच इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा। रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः १ तासामाविरभूच्छौ रिः स्मयमानमुखांबुजः। पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः २ तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः। उत्तस्थुर्यु गपत्सर्वास्तन्वः प्राणमिवागतं ३ काचित्करांबुजं शौरेर्जगृहेंऽजलिना मुदा। काचिद्दधार तद्बाहुमंसे चंदनरूषितं ४ का चिदंजलिनागृह्णात्तन्वी तांबूलचर्वितं। एका तदंघ्रियुगलं संतप्ता स्तनयोरधात् ५ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला। घ्न त्यैवैक्षत्कटाक्षेण निर्दष्टदशनच्छदा ६ ॥ ॥

र्पसागरः काम इति सूचितं भवति २ तन्वः भोगायतनशरीराणि ३ गोपीनां करादिग्रहणादि भुहरेः करादानादिना भक्तेष्वेकलभ्यः श्रीनारायण इति निदर्शयंस्तत्प्रवृत्तिं कथयति। काचिदित्यादिना। चंदनरूषितं लिप्तं ४ चर्वितं भक्षितोच्छिष्टं। अधात् दधार ५ प्रेमसं रंभविह्वला प्रणयकोपाकुलिता। भ्रुकुटिं ललाटशिरां आबध्य प्रकाश्य। निर्दष्टदशनच्छदा नितरां संदष्टोष्ठपुटा ६ ॥ ॥

राम

९४

अनिमिषं निमेषलक्षणव्यापाररहितमिति क्रियाविशेषणं जुषाणा सेवमाना ७ हृदि स्थितं कृत्वा पुलकांगी रोमांचितगात्रा अुपगुह्यालिं गय आनंदनिर्भरा परमानंदपूर्णा ८ जनः शोकाकुलः संसारी वा प्राज्ञं पंडितं दुःखशमनबोधकं परमात्मानं वा प्राज्ञे नात्मनावारूढ इति श्रुतिः ९ पुरुषो विष्णुः शक्तिभिर्लक्ष्मीविभूतिभिः १० अनिलस्य षट्पदा अनिलषट्पदाः। कुंदमंदारयोः सुरभिताः क्रीडावंतः अनिलषट्पदा यस्मिंस्तत्तथा ११ शरत्कालचंद्रांशुना आनंदसंदोहेन निरंतररश्मिधृतं निरस्तं दोषातमः रात्र्यंधकारो यस्मिंस्तत्तथा। कृष्णायाः यमु

८२

अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं। आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ७ तं काचिन्नेत्ररंध्रेण हृदि कृत्वा निमील्य च। पुलकांग्युपगुह्यास्ते योगीवानंदनिर्भरा ८ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः। जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ९ ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः। व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा १० ताः समादाय कालिंद्या निर्विश्य पु लिनं विभुः। विकसत्कुंदमंदारसुरभ्यनिलषट्पदं।।११।। शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवं। कृष्णाया हस्ततरलाचितकोमलवा लुकं १२

नायाः ईह यापना हलन्नागलेयया आपस्ताः आयासं प्राप्ता स्वरलाभ्र एकतरंगा एते तासिक्ता निचकोमलानिच वालुकानि येकतानि यत्र तत्तथोक्तं। यद्वा। कृष्णे हयाप्ती कृष्णमूर्त्तिक्रीडया आयस्ता निच तरलानि चंचलानि वातएव आचिता निश्चलतो विकीर्णानिच। योग्यं समं अएकतरं गोलोलः स्यात्तरलः कुतुलस्तथेति गोपालः। अचितं छन्नमिति कृयोरितिच १२ ॥ ॥

द०म०

मनोरथांतं आर्थितार्थ श्रुत्ति। मनोरथानामर्थानामंतं निर्णयहेतुं परमात्मानं। रध्यगता इति यावत्। श्रुतिविषये तत्प्रत्यक्षेणोदर्शनेन विषयीकरणलक्षणेन ज्ञाताह्लादेन पूर्णार्थलक्षणेनाऽवष्टंता हृद्रुजः अविषयाकरणलक्षणा यासां तास्तथा। उत्तरीयैः प्रावरणीपटैः आ

९५

सनं विमलोत्कर्षणी ज्ञानेत्यादिलक्षणमपि वपीठं अन्यत्रा आत्मनो वायोर्बंधवे। सतो बंधुमस्ति निरवं दर्शितं कृतिः १३ गोपीपरिषद्गतः

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः। स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे १३
तत्रोपविष्टो भगवान्स ईश्वरो योगेश्वरांतर्हृदि कल्पितासनः। चकास गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् १४
सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा। संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे १५

गोपश्रीसमूहमध्यवर्ती। त्रैलोक्यलक्ष्मीणां त्रैलोक्यसौंदर्याणामेकं पदं स्थानं त्रिलोकीजनसेव्या लक्ष्मीः श्रीः तस्या एकं केवलं पदं भोगयो
ग्याश्रयं वा १४ अनंगं कामं दीपयतीत्यनंगदीपनं तं लीलया लालित्येन ईक्षणं। हाससहितं सहासं सहासलीलेक्षणेन विभ्रमंत्यो भ्रुवः श्रोः
संचलंत्यः भ्रुवो यासां तास्तथा। संस्पर्शनेनोत्पन्नाउत्काउत्कंठा येषां कंलक्षणं तेन कृतं प्रश्रयं गशरीरे हृच्छयः कामः संस्पर्शनोत्कां कृ
तां गहृच्छयः तं। संस्तुत्य करचरणग्रहणस्पर्शनेनाभिव्यक्तं कामं निह्नुवत्येत्यर्थः १५ ॥ ॥

ग०म०

९५

गोप्यः शास्त्रतत्वमजानंत्यो हरेरहृततत्वकारणाभिप्रायेण पृच्छंति। भजत इति एके केचित् भजतः सेवमानाननुभजंति सेवानुकूलफल सम
र्पणेन सेवंते। एके केचित् एतस्योक्तविपर्ययं कुर्वंति फलोद्देशेन सेवमानान् विशिष्टफलदानेनानुवर्तंति। अन्ये नोभयांश्चानुवर्तंति। यदेतात्पर्य
यमत्र साधु निर्दोषं पक्षमस्माकं ब्रूहि विविच्य कथयेत्यर्थः १६ तत्र परिहारं चकृत्वा उपक्रमते मिथ इति। हे सख्यः ये मिथो भजंति उपकारं प्रत्युप
कारलक्षणां सेवां कुर्वंति। ते स्वार्थैकांतोद्यमा हि स्वप्रयोजननियतप्रयत्ना यस्मात् तस्मात्तत्र तेषु सौहृदं अनिमित्तस्नेहलक्षणो धर्मो नास्ति। ननुत

गोप्य ऊचुः भजतोनुभजंत्येक एक एतद्विपर्ययं। नोभयांश्च भजंत्यन्य एतन्नो ब्रूहि साधु भो १६ श्रीभगवानुवाच
मिथो भजंति ये सख्यः स्वार्थैकांतोद्यमा हि ते। न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा १७ भजंत्यभजतो ये वै करुणाः
पितरो यथा। धर्मो निरपवादोत्र सौहृदं च सुमध्यमाः १८ ॥ ॥

र्हि किमस्ति तत्राह स्वार्थ [illegible] पितृजानी धर्मो विपक्षं प्रतिषेधति नेति १७ ये अभजतः फलानिच्छानुगतान् भजंति फलमर्प्य
यंति। तत्र कारणमाह। करुणा इति। करुणयंति प्राणिनो दृष्ट्वा द्रवीकृतहृदया भवंतीति करुणाः। तत्र दृष्टांतः लोकानुग्रहकरणशीलाः पितरो
यथा बालादीन् दृष्ट्वा गुणं तं वा सौहृत्याद्। धर्म इति। हे सुमध्यमाः। अत्र तेषु जनेषु सौहृदलक्षणो धर्मश्च निरपवादः निर्दोषः। इदं संप्रज्ञातस
माधिस्थस्य लक्षणं १८ ॥

८०४ असंप्रज्ञातसमाधिस्थस्य लक्षणमाह। भजतोपीति। अत्र केचित् नाभजतो पि फलार्थितया सेवमानानपि न भजंति। अप्रयोजनाभावात्क
थं तर्हीत्याह आत्मेति। आत्मनि परमात्मन्येव रामः क्रीडा येषां ते तथा। वाह्यप्रवृत्तिशून्या इत्यर्थः। तदपि क प्रवृत्त्या सकलपुरुषार्थे हि प्रवृत्तिः। प्र
वृत्तेस्तु तएव पूर्णमित्याशयेनाह आप्तकामा इति। कामयत इति कामः आनंदः हि शब्दो हेतौ। आनंदसीमि निमित्तमाह। अकृतेति। अकृतं परमा
५६ त्मानं जानंतीति। तज्ज्ञानं च निष्पापत्वादित्याह गुरुद्रुह इति। गुरूणि पापानि द्रुह्यंति हिंसंतीति। नाप्यकृतः कृतेनेति श्रुतिः। ज्ञानेन पुं
क्षीणपापानामिति स्मृतिः। कीदृशोऽकृतघ्ना इत्यतो वाह भजतोपीति। ये केचित् जंतवः शरणार्थितया सेवमानानपि न भजंति। यद्वा लक्षणं से
वां न कुर्वंति अभजतः कुतो भजंति तत्र कारणमाह आत्मारामा इति। परमात्मविषयमतिरहिता देहलक्षणात्मनि निरतो रतात्मा तर्हि कुत्ररति

भजतोपि न वै केचिद्भजंत्यभजतः कुतः। आत्मारामा ह्याप्तकामा ह्यकृतज्ञा गुरुद्रुहः १९ नाहं तु सख्यो भजतोपि जंतू
न्भजाम्यमीषामनुवृत्तयो यथा। तथैव मन्त्राः फलसंपदः स्युरुच्चावचाः कल्पतरोरिवार्थिनां २० ॥ ॥

रित्याह। आत्मेति। आत्मैव विषये ह्यस्मिन् जने कामो येषां ते तथा। एतादृशाः कृतघ्ना इत्युक्तं तं न जानंतीति भावः पंतिच। अतएव गुरुद्रुहः देवादिगुरू
णां द्रोग्धार इत्युच्यंते। इति राज्या ग्रहागत १९ अहमेष्वेक इति भवतीनामाशंका माभूदित्याह। नाहमिति। अपि सख्य इत्युपे। तु शब्दो विशेष
प्रकाशकः। अहं भजतः फलार्थितया सेवमानानपि फलं न भजामि तदिच्छया फलं न ददाम्यपि च मेवैष एतेन नलभ्य इति मम विजया शिक्षा म राम
णेः ततः प्रयोजनाभावात्। तेभ्यः प्रयोजनं न ममेत्यर्थः। तर्हि तासेवानिः फला किं नेत्याह। अमीषामिति। अमीषामनुभवेषां यथा यथा सेवास्तु ५६
तथा तथा मन्त्राः उच्चावचाः फलसंपदः स्युरेव। अर्थिनां योग्यानां अधिकारिणां कल्पवृक्षाद्यथा फलानि तथेत्यर्थः २० ॥ ॥

भगवान् गोपीनां सेवाद्भवनव्याजेन स्वोपासनाप्रकारं दर्शयति यथेति। यथा अधनो धनहीनः दरिद्रः दैवात् लब्धधने नष्टे तच्चिंतया अन्यत्सर्वं नियततरमनन्यत्वेन नि
तरां भृतं गृहीतं अन्यं न वेद। यद्वा निभृतं ध्यानस्थितं निश्चलं स्थिरं पुरोवर्त्यपि न वेद। हे अबलाः एवं मदर्थं मां सुहृदं प्रपद्य उज्झिते लोकवेदस्वे लौकिककर्म वैदिककर्म स्वजन
सर्वस्वं याभिस्तास्तथा तासां वो युष्माकं अनुवृत्तये मम सेवालक्षणा उपासनानुविषयान स्मरितवयः २१ तर्हि किमर्थं भवता तत्र धाम्नीत्याशंक्याह तासां कं अभा
वो यमित्याशयेनाह। मयेति। अत्र भजतेति शतृप्रत्ययः इच्छावाची परोक्षं भजता अव्यवधानं मिलितुं मया तिरोहितं परोक्षं कृतं। परोक्षप्रिया इव हि देवा इति श्रु
तिः। व्यवधानमस्मत्प्रियं यस्मात्तस्मात्। हे प्रियाः स्वयं प्रियं मां सासूयितुं असूयाग्रहितां मतिं कर्तुं नार्हथेत्यन्वयः। सन्निकर्षो हि मर्त्यानामनादरकारणमिति
स्मृतेश्च शिक्षणापायमेवं कृतं २२ ननु युष्माकं अनुग्रहाभावात् तत्कथमित्याशंक्यानुग्रहविशेषं कथयति नेति। विबुधायुषापि व्यवत्सरकल्पितजीवनलक्ष

यथाधनो लब्धधने विनष्टे तच्चिंतयान्यन्निभृतं न वेद। एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः २१ मयापरोक्षं भजता तिरो
हितं मासूयितुं नार्हथ मा प्रियं प्रियाः २२ न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः। या माभजन्दुर्जरगेहशृंखलाः संवृश्च्य
तद्वः प्रतियातु साधुना २३ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिंशोध्यायः ॥ ॥

णेनापि अहं तव संयुजां निर्दुष्टमनो योगवर्त्तिनां वः युष्माकं स्वसाधुकृत्यं युष्माकं सर्वसमर्पणेन निर्दोषं कर्म प्रति कर्तुं न पारये न शक्नोमीत्यनेन गोपीषु अत्य
धिकोनुग्रहो मयीति दर्शितं। न केवलं युष्मत्सेवानुग्रहविशेषो मम निर्व्याजभक्त्या भजमानेभ्यः किंचिद्विशिष्यादित्याशयेनाह। यो मामिति यो मां भजेन्मा ... प्र
भक्तिं करोति स पुरुषः स्त्रीजनो वाधुना किं दुर्जन्म्ये वहुदुर्जरदेहशृंखलाः भक्तिज्ञानैर्विना जरयितुं शिथिलीकर्तुमशक्याः लिंगशरीरलक्षणाः शृंख
लाः संवृश्च्य छित्त्वा हृदि स्वरूपभूतानंदलक्षणां प्रतियाति। तस्य तावदेव चिरमित्यादिश्रुतेः। यद्वा हृदयस्थतेषिच्यन इति देहशृंखलाः दुर्जरा दुरुच्छेदाः पुत्र
मित्रादिनिवद्धदेहलक्षणाः शृंखलाः संवृश्च्य मां भजेत्सेवते। सोधुनैव भक्तिज्ञानादिसाधनसामग्री लक्षणां हृदि प्रतियातीत्यर्थः २३ इति दशमे टी
कायां त्रिंशोध्यायः ॥ ॥

भक्तिप्रसन्नभगवत्प्रीतिरेवानेहानुभवे कारणं नान्यत्साधनमिति निदर्शयितुं रासक्रीडां वर्णयत्यस्मिन्नध्याये। स तत्र पर्येति जक्षत्क्रीडन्रममाण इ तिश्रुतिः। तत्र गोपीनां कृष्णविरहसमुद्भूतसंतापप्रशमनशक्तिं सूचयति। इत्थमिति। तापत्यागे निमित्तमाह। तदंगेति। हरेः संगलक्षणासेवनेन उपचिताः फलदू येषां परिणताः आशिषः प्रार्थना यासां तास्तथा। यद्वा उपचिताः संचिताः समृद्धिं गताः आशिषः शुभानि यासां तास्तथा ॥१॥ सद्यः फलशुभाद् भवेत्प्रकारं वक्तुं प्रक्रमते तत्रेति। तत्र वने तस्यामवस्थायां च अन्योन्याबद्धबाहुभिः इति रासक्रीडाप्रकारं दर्शयति। समतलमसृणप्रदेशे वितस्तिमा त्रोन्नतशंकुं संस्थाप्य तत्परितः सर्वैः स्वपादमवष्टभ्य हस्ताकारेण स्थित्वैकस्या वामहस्तेऽन्यस्या निकटवर्तिन्या दक्षिणपाणिना संश्लिष्य शकृत्यावष्टंभेन वर्तुलाकारेण भ्रमणं चक्रवत्क्रिया रासक्रीडा ॥२॥ नृत्यादिषु भरतव्रतिसंज्ञेषु गानानुरूपकांतिभेदयो विरलोत्का सोज्ञायते स रसः रासः

श्रीशुक उवाच इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः। जहुर्विरहजं तापं तदंगोपचिताशिषः ॥१॥ तत्रारभत गोविंदो रासक्रीडामनुव्रतैः। स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥२॥ रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः। योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः। प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः ॥३॥ ॥ ॥

बंधी रसो रासः तद्रूपेण क्रीडा नृत्यविशेषः। एवंविधो रासक्रीडोत्सवः कृष्णेन सम्यक्प्रवृत्त इत्यन्वयः। कीदृशः गोपीनां मंडलेन वलयेन मंडितोऽलंकृ तः। कथंभूतेन तासां गोपीनां मध्ये प्रविष्टेन मध्ये शंकुस्थापनात्कथं मध्यप्रदेशः संगत इति तत्राह। द्वयोरिति। वलयस्थितानां तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन एकस्येदं कथं घटत इत्यतो योगेश्वरेणेति। योगैश्वर्यादेकस्य बहुत्वं घटत इति भावः। कीदृशानां कृष्णेन कंठे गृहीतानां। तत्रैवं विशेषः। कृ ष्णदक्षिणभागस्थितायाः कृष्णदक्षिणस्कंधग्रहणं। वामभागस्थिताया स्वस्य वामस्कंधग्रहणं स्वनिकटस्थस्त्रियः कंठे गृहीता तेन तत्रैवं रासोत्सवः संप्रवृत्त इति गतेनान्वय इत्यर्थः ॥३॥

नत्वेवं कृष्णे रासक्रीडाकारिणि के साक्षिण इति तत्राह यन्मन्येतेति। कृष्णो यदा रासक्रीडां कर्तुं मन्येत मन्वरूपदिति यत्समयः। तावन्नभः औत्सुक्येन निभृतात्मनां निश्चलमनसां सदाराणां सभार्याणां दिवौकसां विमानशतसंकुलं आसीदिति शेषः ॥४॥ ततः रासोत्सवप्रारंभानंतरं ॥५॥६॥ तत्रा पि रासक्रीडायामपि। यद्वा तत्रापि नभस्यपि। रासमंडले एवं चेत् सप्रियाणामिति पदं पूर्णार्थं लभते। अन्यत्र कृष्णव्यतिरेकेण प्रियाभावात् अ

यन्मन्येतन नभस्तावद्विमानशतसंकुलं। दिवौकसां सदाराणामौत्सुक्यनिभृतात्मनां ॥४॥ ततो दुंदुभयो नेदुः स्वात्येतुः पुष्प वृष्टयः। जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोमलं ॥५॥ वलयानां नूपुराणां किंकिणीनां च योषितां। सप्रियाणामभूच्छब्दस्तु मुलो रासमंडले ॥६॥ तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः। मध्ये मणीनां हैमानां महामरकतो यथा ॥७॥ ॥ ॥

स्तित्र पक्षे। प्रियेण कृष्णेन संगतेन कृष्णेन सहितानां तत्रापि अतिशुशुभे स्वसामर्थ्यात्प्रकाशात्। तस्मिन् ज्ञार्थं नभस्यपि रासक्रीडा प्रवृत्तेति तत्रत्यं। हैमानां हेमवत्संभूतानां मणीनां माणिक्यानां मध्ये मरकतश्याममणिरिव। अयं तरत्नप्रभवस्वयप्रसेनस्य कृष्णत्वजातीनां हुत्यन्निर्हिमवद्धिरेरितिप्रसि द्धं। यद्वा हेमकारसंभूतानां तत्रत्यानां मणीनां निर्मलत्वेन कांत्यातिशयात् ॥७॥ ॥

द० ५८

तत्रनृत्यप्रकारं कथयति। पादेति। पादन्यासैर्विक्षेपविशेषैः। भुजानां विधुतिभिः कंपनविशेषैः। भ्रूविलासैः भ्रूभंगैः। चलत्कुचतटैरिति केचि
त्। कबररसनाग्रंथयः बंधविश्लेषाः यासां तास्तथा। यद्वा कबररसनानामयं ग्रंथयः अबंधना नियासां ताः। मु
त्। कबरेत्यादौ सोऽन्ययरिति पदमध्याहार्यं। अथ तत्कः कबररसनाग्रंथयः। बंधविश्लेषाः यासां तास्तथा। यद्वा कबररसनानाम ग्रंथयः। कृष्ण बध्वा कृष्णपरिग्रहाः कृष्णस्य ग्रहा गोपस्त्रिय इति वा। भावैः पुत्र
च मानकं वरकांथ्य इत्यर्थः। इतितरसनाग्रंथ्य इति केचित्। स्तननष्ट इति धातुः। कृष्ण बध्वा कृष्णपरिग्रहाः। मेघचक्रे मेघमंडले। तडित इति कांतिविशेषद्योतना
त्तारव प्रतीतिव ह्यः। समस्त भावैः केलुबंधनं स्त्रियइत्युक्तेः। तं कृष्णं गायंत्यः। या एवं विधास्ताः मेघचक्रे मेघमंडले। तडित इति कांतिविशेषद्योतना
र्थदृष्टांतोपादानं। ननु पदस्य सादिविशेषप्रकाशना र्थं। अचेतनत्वात्तडितां। यद्वा यत्न द्रिन इतिनोपथा प्रकाशनाप्रकाशनेन तथा पादविन्यासाद्या
वर्णनमिति दर्शनाय। तटगता विति धातोः। तदंतिद्धि प्रतिरोधानं गच्छंतीति ह्नि जति रोधानगमनशीलार्थे डिप्रत्ययः। रक्तकंठ्यः रागयुक्तकंठगुणाः।

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः। स्विद्यन्मुख्यः कबररसनाग्रंथयः कृष्णवध्वो गायंत्य
स्तं तडित इव ता मेघचक्रे विरेजुः ८ उच्चैर्जगुः नृत्यमाना रक्तकंठ्यो रतिप्रियाः। कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ९ काचित्समं मु
कुंदेन स्वरजातीरमिश्रिताः। उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति। तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् १० काचिद्रासपरिश्रांता पा
र्श्वस्थस्य गदाभृतः। जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका ११ ॥ ॥

अभिमर्शः कामकोलो हीथक करस्पर्शविशेषः। यासां गीतेन इदं जगदावृतं व्याप्तं। देवसाहित्यात् ९ अमिश्रिताः स्वरांतराननुसरिताः स्वरजातीः
षड्जादिस्वरभेदान्। उन्निन्ये उत्कृष्टत्वेन गीतवती मूर्छयामास च। निषादर्षभगांधारषड्जमध्यमधैवताः। पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्व
राः स्वराः। कृष्णोपि तदेवाहीतं ध्रुवमुन्निन्ये ध्रुवगानेनाम्बयामास। तेन तस्यै बहुसमर्गायंत्यै। अत एव समगानेनामतत्वाणं सार्थमुकुंदेन तज्ज्ञाना
नुसारेण गीतमिति ज्ञातव्यं। अन्यथात्रिजगति मुकुंदगायनसमं गायनं कोपि स्यादिति मंतरेण १० श्लथं तीश्लथंती कबरवद्ध मल्लिका यस्याः राम
सा तथा ११ ५८

उत्पलसौरभं उत्पलमालायाः सुगंधितं १२ नाट्येन नृत्येन विक्षिप्तयोः किंचिच्चलयोः विक्षेपतरोचिषा भूषिते मंडिते विभवद्वीप्तावितिधातोः
आविष्कृते त्विषइति रूपं भवति। गंडखंडे गंडमंडले। सन्दधत्यां संलग्नं कुर्वाणायां विशारदाः इत्युत्पलमाला। अपिदधत्याः सपत्न्याः कपोलवोधा
यपक्विं विलसत्र पंत्याः १३ अथ तदधो विदं सुखपतीति सुखं गृहीतकंठ्यः। आलिंगितकंठ्यः एकांतवल्लभं निर्णीतनियतभर्तारं विजह्रि
रे क्रीडंत्यः १५ कर्णोत्पलालकाः कुंतलस्य कर्णोत्पलालकौ। ताभ्यां विटंकौ कपोलौ। कपोलस्य विटंकोलंकारः। धर्मः तेन स्वेदजलं लक्ष्य

तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभं। चंदनालिप्तमाघ्राय हृष्टरोमा चुचुंब ह १२ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितं।
गंडं गंडे संदधत्याः प्रादात्तांबूलचर्वितं १३ नृत्यती गायती काचित्कूजन्नूपुरमेखला। पार्श्वस्थाच्युतहस्ताब्जं श्रांताधात्स्तनयोः शि
वं १४ गोप्यो लब्ध्वाच्युतं कांतं श्रिय एकांतवल्लभं। गृहीतकंठ्यस्तद्दोर्भ्यां गायंत्यस्तं विजह्रिरे॥ १५॥ कर्णोत्पलालकविटंककपोलवक्त्र
श्रियो वलयनूपुरघोषवाद्यैः। गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्यां १६ एवं परिष्वंगकराभिमर्शस्निग्धे
क्षणोद्दामविलासहासैः। रेमे रमेशो व्रजकामिनीभिर्यथार्भकः स्वप्रतिबिंबविभ्रमः १७ ६८

ते। कपोलालंकारस्वेदजलेन च वक्त्राणां श्रीः शोभा यासां तास्तथा। वलयनूपुरलक्षणवाद्यघोषैः समं भगवता स्वसमं भ्रमरा एव गायकाः अ
नुस्वरदानकरा यस्यां सा तथा भ्रमरगायकारा सगोष्ठी रासक्रीडा भ्रमरगायकरासगोष्ठी तस्यां १६ स्वतंत्रः ईश्वरो विधिनिषेधाद्यविषयः
अतिघंदि विधिनिषेधविवर्जितं उत्तममद्भुतं चरित्रं रूपद्वाप्रवृत्तिधर्मं विध्याद्यगोचरे कोपे प्रवृत्ते प्रतिघं विदुरिति च १७ ॥ ॥

द०पू० ९९

तस्य कृष्णस्यांगसंगेनोत्पन्नेन प्रमदेनानंदेनाकुलानींद्रियाणि यासां तास्तथा। केशादीन्त्यक्तुं पतिंचोढुं वा त्यक्तुं स्वस्थं पर्याप्ताः श क्तिवर्जिता आसन्नित्यर्थः। अपपरिवर्जने इति स्मरणात् यद्वा शक्यभावेऽपि निवारिताः। अलंतु भूषणे शक्तौ पर्याप्तौ च निवारणे इति। प्रेमकामाल स्याहह नादिशत्यन्यावदत्यर्थः। कुरूद्वह इति विशेष्यसंबोधनेन कृष्णस्य भक्तिभामिनी लोलत्वं पश्येत्यभिमुखीकरणेन भक्तेरावश्यकत्वं सू चयति १८ तेहि रणादिनं चग्रणेन सहितः। यद्वा गणानसंख्यानंतेन सहितः १९ किमत्र संख्येयमत्राह। कृत्वेति। यद्वा योगैश्वर्यात्तव द्रूपग्रहणेन वह्वीभिः स्त्रीभी रमणं घटत इति राज्ञः सिद्धत्वेऽपि मंदाशंकां परिहरति। यावतीर्यावत्यः। रराम इति व्यत्ययेन परदाराभिमर्श

तदंगसंगप्रमदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा। त्यक्तुं पतिंचोढुमलं व्रजस्त्रियो विस्रस्तमाल्याभरणाः कुरूद्वह १८ कृष्ण विक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः। कामार्दिताः शशांकश्च सगणो विस्मितोऽभवत् १९ कृत्वा तावंतमात्मानं यावतीर्गोपयोषितः रराम भगवांस्ताभिरात्मारामोपि लीलया २० तासां रतिविहारेण श्रांतानां वदनानि सः। प्रामृजत्करुणः प्रेम्णा शंतमेनांग पाणि ना २१ गोप्यः स्फुरन्मकरकुंडलकुंतलत्विड्गंडश्रिया सुधितहासनिरीक्षणेन। मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्क ररुहस्पर्शप्रमोदाः २२ ।। ।।

नेन दोषो नास्तीति वक्ष्यमाणमर्थमिहैव सूचयति। यद्वा रराम चिक्रीडे। रासक्रीडाविरामसूचनार्थो वा २० इदं च भक्तपारवश्यं हरेरजस्रं स्म रेदित्याशयेन हरिचरितं वक्ति तासामिति। श्रांतत्वमार्जितवान् २१ ऋषभस्य प्रवृद्धस्य तु मंथितवीर्यस्य हरेः। स्फुरतो ज्वलतो मकर कुंडलयोः कुंतलानां त्विषा दीप्त्या दीप्तगंडश्रिया सुधासुरतयोग्य हासोपेताभीक्षणनिरीक्षणेन आनंदमात्मनो दधत्यः। तस्य हरेः कररु हाणां नखानां स्पर्शेन स्मरोल्लासजनकलक्षणेन मत्त तेनाभिव्यक्तः प्रमोदः प्रकृष्टआनंदो यासां तास्तथा २२ ।। ।।

रास ९९

वनक्रीडां निरूप्य जलक्रीडां वक्ति ताभिरिति। कृष्णस्यांगसंगेन घृष्टा स्रक् तस्य स्रज ओ या सा तां ताः। सुकुचानां कुंकुमरजोभिः रंजिता रागिता पाः स्रा भिर्गोपीभिः आगच्छंतीत्याह त्यगच्छंती त्वंगाः भृंगाः तत्संगेन भ्रष्टा निरस्ता। स्रजो यस्याः सा तथा तस्याः। कुचकुंकुमरेणुभिः रंजिताया यमुनाय वाः वार्यां विशादित्यन्वयः। गंधर्वाणां पालिभिः श्रेणीभिः श्रांतः भिन्नसेतुरिति दृष्टांतमिभराड्विशेषणं। यद्वा क्लिहिंसायामिति धातोः। श्रांतः नित्यनि रस्तशृत्सुः भिन्नसेतुर्विशेषितलोकमर्यादः। भेदो विशेषे दलन इति। अत्र विरोधो नाप्रव्या वन्नेकोधर्मोपिलस्यते पृथक् पृथक् कृत्स्ना पितत्सेतुरि ति वा। एः कामस्य मारी भिं राजयतीभराड्। कामस्य भां राजति क्षिपतीति वा इभराड् कृष्णः गोपीविषयेग जगज्ञिशद्द इति धातोः। गजीभिः शुद्धयं तीभिः। यद्वा भिन्नसेतुरित्यनेन गजस्य मदातिरेकसूचनेन कृष्णस्य तात्कालिकहर्षातिरेकं व्यंजयति। भिन्नभेदविहितधर्ममर्यादः दृत्सप

ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः सुकुचकुंकुमरंजितायाः। गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः २३ सोंभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसिताभिरितस्ततोंगः। वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः २४ ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे। चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः २५ ।।

रः कृष्णे स्वधामोपगते धर्मः कं शरणं गत इत्यादिस्त्वोक्तिविरुद्धं स्यादिति नासावंशी कर्तुं योग्य इति २३ अम्भसि इत्येन वारतिर्भपरत्व परेणाव यस्य सतथेत्यनेन तत्काले रमणकथनं लोकमोहनाय विरोधस्मरणाय वेति गमयितव्यं २४ कृष्णायां यमुनाया उपवने जलप्रसूना नि कुमुदादीनि स्थलपुष्पाणि सौगंधिककुंदादीनि तेषां गंधमिश्रवायुना जुष्टाः परिमलिताः दिक्तटा दिगंताः यस्य तत्र यातास्मिन्रमदच्यु मदजलस्रावी अन्यत्र दुष्टगर्वनाशनः। अदिविलखन इति धातोः। पुण्यपापयोः रदालेखनं येन स द्विरदः। चित्रयुसेन पुण्यपापलेखनकर्ते त्यर्थः। करोहस्त विषये अणक भिः लतावतदंडायतवद्भिरित्यर्थः। भृंगवद्भ्रायमान प्रमदागणपरिवृतः। यद्वा भृंगाप्रमदाः भृंगाः स्त्रियः तासांग णेन संवृतः २५ ।।

५८

उपसंहरति एवमिति। अनुरतावलागणः अनुरतस्त्रीगणः तदिच्छानुकूलस्मितस्त्रीजनो वा निशाः शशांकांशुविराजितानि शा रात्रीः एकोपि क्षणो
तिक्षिपां विनानज्ञापितइति सर्वा इति शरत्काललक्षणा वर्णानं येन काव्यकथायां संपाताः रसाः शृंगारहास्यादिरूपाः एतेषामाश्रयः आश्रया
ति पाठे निशाविशेषणं। रसानाश्रयंतीति रसाश्रयाः। आत्मन्यवरुद्धं निरुद्धं सौरतं निर्द्वंद्वरेतोलक्षणं वीर्यं येन स तथा। सुरतक्रियायां वीर्यनि
रुध्यक्रियतइत्यर्थः। यद्वा वशीकृतयोगैश्वर्यः। यद्वात्मनि देहे विकारीकृतसौरतः २६ ज्ञातव्यमत्र तात्पर्यार्थोपि परोक्षितिष्ठनातोर्थसफल
ऊर्ध्वं तथा भो तत्जनविद्धनचित्तस्य संदेह प्रश्नं पृच्छति। संस्थापनायेति। इतरस्याधर्मस्य। हि शब्देन यदा यदा हि धर्मस्य ग्लानिर्भवति।
भारतेत्यादिवाक्यं प्रमाणयति २७ प्रतीपं प्रतिकूलं। किमकारीत्यत्राह। अभिमर्शनं अभिचारार्पयहणं २८ विषयभोगलोल्यात्कृतं किं

एवं शशांकांशुविराजिता निशाः स सत्यकामोनुरतावलागणः। सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः २६
राजोवाच संस्थापनाय धर्मस्य प्रशमायेतरस्य च। अवतीर्णो हि भगवानंशेन जगदीश्वरः २७ स कथं धर्मसेतूनां वक्ता कर्ताभि
रक्षिता। प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं २८ आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं। किमभिप्राय एतन्नः संशयं छिंधि सुव्रत
२९ श्रीशुक उवाच धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ३० ॥ ॥

नेत्याह आत्माराम इति। कोभिप्रायोस्य मत्वरितं वरेत। मदुक्तमेव चरेत् चरितं वरेदिति चेति। नः परिसरवर्गिजनस्य २९ नारायणस्वरूपाणां
स्मृतिविहितधर्मव्यतिक्रमो न दोषाय दृष्टः किमुत हरीकृतविधिनिषेधबंधस्य हरेरित्याशयेन प्रश्नं परिहरति। धर्मेति। चशब्दः कैमुत्यद्यो
तकः प्रद्युर्थी यद्यपि ईश्वराणां योगैश्वर्यपारंगतानां साहसः हेतुस्तथापि धर्मव्यतिक्रमः शास्त्रविहिताचारविरुद्धाचारो अजीगर्तस्य पुत्र
विक्रयः। विश्वामित्रस्य श्वभक्षणं प्रवृत्तिः सप्तर्षीणां शवभक्षणे योग इत्यादिलक्षणो दृष्टः शास्त्रे तथापि सतेषां न दोषाय धर्मव्यतिबंधकाय
न भवति। तत्कुत इति हेतुगर्भविशेषणमाह। तेजीयसामिति। तेजो बलं प्रभावश्च ज्योतिषि अर्चिषि चेतस्मिन्नमरः। तेन लेंगुर्गइतियादवः।
तत्र दृष्टांतमाह वह्नेरिति। अमेध्यादिदहनेपि लक्षणोपि न स्यात् ३० ॥ ॥

नन्वेवं चेत्प्रश्नेष्टाचरितत्वेनाश्वेष्टस्य परावराचरणप्रसंगः। यद्यदाचरति श्रेष्ठ इति स्मृतेश्चेति तत्राह नेति। स्मृतिः सत्कर्मश्वाचारमनुजानाति। नत्व
सत्कर्मणः। लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसीति विधानाच्चेममर्थं हि शब्देन विशिनष्टि। हि स्याद्धि गुणवेदेतावितिधातुः मनसापि नाचरेत् कि
मुत कायेन। विपत्तेवाधकमाह नश्यतीति। णशञ्अदर्शनइतिधातोः। स मूलक्षुद्भिन्नो भवतीत्यर्थः। अदर्शनं लोप इति सूत्रात्। लुप्छेदन इति धातोः। मौढ्या
त्क्रोधोद्रेकात्। क्रोधाद्भवति संमोहः इति मोहो मोहनिमित्तं इति। कालोत्तरे संजाते नमिवर्धने नना श्रोनस्यादित्यतः आश्लिष्टि। किंचित्काल
मवसरं न ददातीत्यर्थः। व्यतिरेकं दर्शयति। यथेति। यथा रुद्रो विषमपिबत्तथाहमपि विषं पास्यामीति तत्पानेन नश्यति। तस्मात्तन्न कर्तव्यमित्यर्थः। वि
षपानेनाश्रुनाशः स्यादिति दर्शनाय तदुक्तं। ननु समूलनष्टो छेद विषये विषपानान्मृतिं दृष्ट्वा अन्यस्य निवृत्तिसंभवात्तन्न तथा प्रकृत इति ३१ यद्येवं त

नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः। नश्यत्याचरन्मौढ्याद्यथा रुद्रोपि विषं ३१ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित्। तेषां यत्स्व
वचोयुक्तं बुद्धिमांस्तत्समाचरेत् ३२ कुशलाचरितेनैषामिह स्वार्थो न विद्यते। विपर्ययेण वानर्थो निरहंकारिणां प्रभो ३३ ॥ ॥

र्हि तत्वनेव रोक्तमपि न याह्यमित्यायातमिति तत्राह ईश्वराणामिति। सत्यं परमार्थत्वेनाभीष्टज्ञापकं परमार्थे यथार्थमित्यादवः। तद्वचनमेव
सत्यं चेत् कुर्यादिति तथा सत्कृष्णिकीर्तिलोकसंग्रहमिति विधानं व्यर्थमिति तत्राह। तथैवेति। क्वचिदिति युधिष्ठिरादिना दृष्टत्वात्। अनुवर्तिनां वैदिक
र्ममार्गप्रदर्शनार्थं यदाचरणं तदपि सत्यफलदर्शनात् न हि वचनं सत्यं किमेत्याह। तेषामिति। अयुक्तं वेदोषमाणमित्यादिलक्षणं प्रतीति कार्यविषयं। य
दाश्चवचसोयुक्तं विरोधितेषां यदाचरितं तं बुद्धिमानेतन्नाचरेदिति श्रुतिश्च ३२ इतोपि श्रुकुलनारिकेरफलवन्निर्मुक्ताशरीराभिमानानां हरीकृतकुशला
कुशलानां फलवत्वात् धर्मव्यतिक्रमो न दोषायेत्याशयेनाह। कुशलेति। इह संसारमंडले अर्थः प्रयोजनं प्रारब्धकर्मनाशेनापातकदेहत्वात् भीष्टत्वाद्वि विप
र्ययाचरणेनानर्थो नरकपातादिलक्षणः। अत्र हेतुमाह निरहंकारिणामिति ३३ ॥ ॥

द॰पू॰ उपसंहरति किमुतेति।अखिलसत्वानांसमस्तप्राणिनां तत्सत्वविवरणं तिर्यङ्मर्त्येत्यादिना।ईशितव्यानां नियम्यानां ईशितुर्नियामकस्यवतःस्वरूपे।

ईशितव्यानामचेतनानांचकुशलाकुशलान्वयःपुण्यपापफललेपःकिमुत ३४ कथंतरामस्योक्तमुक्तमित्याशंक्यदर्शयति।यत्पादेति।भक्तियोगप्रभावेन

२०१ विधुताविधूतःसमस्तोऽखिलकर्मबंधःयेषांतेतथा।नन्वह्यमानाःअतएवबद्धत्वस्नेहेनवध्यमानानभवंति।कर्मभिर्वा ३५ क्रीडनंक्रीडासाधनंदेहंभजतीतिक्रीडनदेह

भाक्।आयुष्मान्साक्षी।अयंचबंधाभावेहेतुः ३६ क्रीडाविग्रहस्त्रीकारेनिरुद्धहस्य किंप्रयोजनमित्यतआह।अनुग्रहायेति।ताहशीमानुषदेहक्रीडा

चरितंश्रुत्वातत्परःभगवानेवपरोयस्यसतथातस्मिन्नाप्रत्ययंमुक्तोवा।यद्वासपुरुषएवजन्मश्रुत्युप्रब्धोभवेत्।।३७।।क्षेरितिग्लान्निमाश्रितानांगो

किमुताखिलसत्वानांतिर्यङ्मर्त्यदिवौकसां।ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः ३४ यत्पादपंकजपरागनिषेवतृप्तायोगप्रभा

न२ वविधुताखिलकर्मबंधाः।स्वैरंचरंतिमुनयोपिनह्यमानास्तस्येच्छयात्तवपुषःकुतएवबंधः ३५ गोपीनांतत्पतीनांचसर्वेषामपिदेहिनां।योंत

श्चरतिसोध्यक्षएषक्रीडनदेहभाक् ३६ अनुग्रहायभक्तानांमानुषंदेहमाश्रितः।भजतेताहशीःक्रीडायाःश्रुत्वातत्परोभवेत् ३७ नासूयन्खलु न

पकृष्णायमोहितास्तस्यमायया।मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ३८ ब्रह्मरात्रउपावृत्ते वासुदेवानुमोदिताः।अनिच्छंत्यो

ययुर्गोप्यःस्वगृहान्भगवत्प्रियाः ३९ विक्रीडितंव्रजवधूभिरिदंचविष्णोःश्रद्धान्वितोनुशृणुयादथवर्णयेद्यः।भक्तिंपरांभगवतिप्रतिल

भ्यकामंहृद्रोगमाश्वपहिनोत्यचिरेणधीरः ४० इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकत्रिंशोध्यायः ॥ ॥

पीतांअहरणांतन्द्रर्दतिमितिःकथंचक्रुतंकथंचलस्लेदोषाविःकरणमकृतमत्राह।नेतिगुणेषुदोषाविष्करणमसूया।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोप

इतिचतुर्थी ३८ ब्रह्मरात्रेब्राह्मेमुहूर्ते ३९ संसारनिवृत्तिहेतुत्वादस्मिन्कृष्णविक्रीडितेश्रद्धादिकंकार्यमितिविधायफलमाह।विक्रीडित

मितिचपरःश्रद्धातिशयजननार्थः।पूर्वोक्तविक्रीडितान्यियथासंसारनिवर्तकानितथेदंचेति।आशुभक्तिंप्रतिलभ्यानुदिनंश्रुत्वाहृद्रोगंकामम

राम

निरंतरमपहिनोतिप्रतित्यजति।दुष्टकामत्यागएवसंसारनिवृत्तिरित्यर्थः इतिदशमेएकत्रिंशः ॥ ॥

२०२

प्रकृष्टमस्मत्संसाराद्रियासमोक्षस्यज्ञानरत्नदानस्यनिदर्शनायनंदस्यसर्पान्मोक्षंशंखचूडंहत्वाबलभद्रायतच्छिरोरत्नदानंचनिरूपयत्यस्मिन्नध्याये।

तत्रप्रथमंतोगोपानांदेवयात्राप्रकारंकथयतिएकदेतिअंबिकामाहात्म्यविषयांकिंवदंतीमाकर्ण्यजातकौतुकाःउत्पन्नकतूहलबुद्धयः।अंबिकाव

नंदुर्गावासस्थानंवनंअनडुद्युक्तैःवृषयुक्तैःअनोभिःशकटैः १ पशवोजीवाःतेषांपतिःप्रभुःसमर्थःसमर्थेप्सितोप्रभुरितिच।तत्रवनेस्वंदमाना

श्रीशुकउवाच एकदादेवयात्रायांगोपालाःजातकौतुकाः।अनोभिरनडुद्युक्तैःप्रययुस्तेंबिकावनं १ तत्रस्नात्वासरस्वत्यांदेवंपशु

पतिंप्रभुं।आनर्चुरर्हणैर्भक्त्यादेवींचनृपतेंबिकां २ गावोहिरण्यंवासांसिमधुमध्वन्नमादृताः।ब्राह्मणेभ्योददुःसर्वेदेवोनःप्रीयतामिति ३

ऊषुःसरस्वतीतीरेजलंप्राश्ययतव्रताः।रजनींतांमहाभागनंदसुनंदकादयः ४ कश्चिन्महानहिस्तस्मिन्विपिनेतिबुभुक्षितः।यदृच्छयाग

तोनंदंशयानमुरगोग्रसीत् ५ सचुक्रोशाहिनाग्रस्तःकृष्णकृष्णमहानयं।सर्पोमांग्रसतेतातप्रपन्नंपरिमोचय ६ तस्यचाक्रंदितंश्रुत्वा

गोपालाःसहसोत्थिताः।ग्रस्तंचदृष्ट्वासंभ्रांताःसर्पंविव्यधुरुल्मुकैः ७ अलातैर्दह्यमानोपिनामुंचत्तमुरंगमः।तमस्पृशत्पदाभ्येत्यभगवान्सा

त्वतांपतिः ८ सवैभगवतःश्रीमत्पादस्पर्शहताशुभः।भेजेसर्पवपुर्हित्वारूपंविद्याधरार्चितं ९ तमपृच्छद्धृषीकेशःप्रणतंसमुपस्थितं।दी

प्यमानेनवपुषापुरुषंहेममालिनम् १० ॥ ॥

यात्रामर्हणैःपुष्पोपहारादिसाधनैः २ मध्वन्नंमधुनापुक्तमन्नं।यद्वामधुरान्नंमधुक्षीरं ३ ४ यदृच्छयातस्मिन्वनेआगतोस्तत।आगमने

निमित्तमाहअतिक्षुधितइतिशयानंनिद्रांकुर्वंतं ५ प्रकर्षेणपन्नंविपदंगतंशरणागतंवा ६ १०॥ ॥ ॥॥

द०५०

११ १२ पाप्मना अपराधेन प्रलब्धैः उपलब्धैः विप्रलब्धो वा विरूपान् सौंदर्यरहितान् तेषां दर्शने च स्वभावे च रूपशाहं प्रच्छन्न इति । अंगिरसः पुत्रान् अंगिरसः

१०२

कोभवान्परयालक्ष्म्या रोचतेद्भुतदर्शनः । कथं जुगुप्सितामेतां गतिं वा प्रापितोवशः ११ सर्प्प उवाच अहं विद्याधरः कश्चित्सुदर्शन इति श्रुतः । श्रिया स्वरूपसंपत्त्या विमानेनाचरन्दिशः १२ ऋषीन्विरूपानंगिरसः प्राहसं रूपदर्पितः । तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना १३ शापो मेनुग्रहायैव कृतस्तैः करुणात्मभिः । यदहं लोकगुरुणा पादस्पृष्टो हताशुभः १४ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं । आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् १५ प्रपन्नोस्मि महायोगिन्महापुरुष सत्पते । अनुजानीहि मां कृष्ण सर्वलोकेश्वरेश्वर १६ ब्रह्मदंडाद्विमुक्तोहं सद्यस्तेच्युत दर्शनात् । यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च । सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते १७ श्रीशुक उवाच इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवाद्य च । सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः १८ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः । समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः १९ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः । विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां २० उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः । स्वलंकृतानुलिप्तांगौ स्रग्विणौ विरजोंबरौ २१ निशामुखं मानयंतावुदितोडुपतारकं । मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना २२ ॥ ॥

१३ १४ आपृच्छे आज्ञां प्रार्थये अमीवहन् दोषनाशन १५ १६ १७ त्वां तं कृच्छ्राद्दाशार्हं कृष्णं निशाम्य दृष्ट्वा १९ २० विरजांबरौ धौतवस्त्रौ २१ मल्लिकागंधमाघ्राय तेन मत्ता अलिनो भ्रमराः यस्मिन् मल्लिकागंधमत्तालि २२ ॥ ॥

श्र्यः

राम
१०२

जगतुः गानं कृतवंतौ कथं कारं इति तत्राह । ताविति स्वरमंडलमूर्छितं सप्तानां स्वराणां मंडलानां सप्तानां मूर्छनानामेकविंशतिलक्षणां कल्पयंतौ । युगपदेकस्मिन्क्षणे यत्स्वरमंडलमाहुः तल्लक्षणं सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्छना इति भरतः २३ ५ तौ नाथो यस्य स तन्नाथः तं कालनं द्रावणं २६ स्वपरिग्रहं स्वस्त्रीजनं दस्युना व्याघ्रेण ग्रस्ताः क्रोशंतीः गावो यथा तथा क्रोशंतं विलोक्य दस्युः तस्करः शालवृक्षो हस्तौ ययोस्तौ

जगतुः सर्वभूतानां मनःश्रवणमंगलं । तौ कल्पयंतौ युगपत्स्वरमंडलमूर्छितं २३ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप । स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः २४ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् । शंखचूड इति ख्यातो धनदानुचरोभ्यगात् २५ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनं । क्रोशंतं कालयामास दिश्युदीच्यामशंकितः २६ क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहं । यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां २७ मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ । आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं २८ स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् । विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया २९ तमन्वधावद्गोविंदो यत्र यत्र स धावति । जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन्स्त्रियो बलः ३० अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः । जहार मुष्टिनैवांग सहचूडमणिं विभुः ३१ शंखचूडं निहत्यैवं मणिमादाय भास्वरं । अग्रजायाददत्प्रीत्या पश्यंतीनां च योषितां ३२ इति श्रीभागवते महापुराणे दशमस्कंधे द्वात्रिंशोध्यायः ॥ ॥

स्तो ४

हिंसकाविति च २७ मा भैष्ट भीतां मा भवंत्वित्यभयवाक्यमुक्तौ तालो गीतां गावा द्य विशेषः । यद्वा तालस्तृणराजः सहस्ते ययोस्तौ तथा । मनस्विनो विशिष्टमनो युक्तो । तरसा बलेन तरसं बलं रंहः इत्यमरः इति २८ मरणकालः कश्चिदसुरो वा मृत्युर्यमः । उद्विजन् बिभ्यन् २९ ३२
इति दशमे द्वात्रिंशोध्यायः ॥ ॥

श्रीगणेशाय उपासनाप्रकारं दर्शयितुं गोपीनां भगवल्लीलानुस्मरणं कथयत्यस्मिन्नध्याये। तत्र प्रथमं तासां कृष्णे भक्तिलक्षणं वक्ति। गोप्य इति। यः कृष्णगानेनानुद्रुतचेतस्त्वमक्रोर्लक्षणं सूचयति १ द्वौ द्वौ यं श्लोक एकस्या गीतं द्वाभ्यां श्लोकाभ्यामन्वयः। एका गोपी गोप्यन्तराणि संबोधयति। हे गोप्यः शृणुतेति शेषः। वामबाहुमूले कृतं वामकपोलं यस्य स तथा। वल्गितानर्त्तिता भ्रूर्यस्य स तथा। अधरोष्ठेऽर्पितो वेणुर्येन स तथा। मुकुन्दो यत्र यदा कोमलाङ्गुलिभिः आश्रितमार्गमाच्छादितरन्ध्रं वेणुमीरयति गायतीत्यर्थः २० तदा सिद्धैः सह व्योमयानवनिताः

श्रीशुक उवाच गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः। कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान् १ गोप्य ऊचुः वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम्। कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः २ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः। कामामार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ३ हन्त चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत्। नन्दसूनुरयमार्त्तजनानां नर्मदो यर्हि कूजितवेणुः ४ वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात्। दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ५ ॥ ॥

विमानस्थाः स्त्रियः। तद्गीतमुपधार्य श्रुत्वा विस्मिताः अनन्तरं स्वयमप्राप्त्याः सलज्जाः। कामबाणेन समर्पितं विद्धं चित्तं यासां तास्तथा अपस्मृता नीवी वस्त्रग्रन्थिर्यासां ताः मुच्यमानवस्त्रग्रन्थिस्मरणरहिताः कश्मलं मूर्च्छां ययुरित्यर्थः॥ ३॥ हारेणाभासत इति हारभासः हारवद्विशदो हासो यस्य स तथेति पाठार्थे उरसि स्थिरविद्युत् विद्युदिव विलसद्द्योतयति श्रीवत्साङ्कनाम्नेति यर्हि यदा कूजितवेणुर्भवति ४ तदा एत्य समेत्य व्रजवृषादयः लिखितचित्रमिव निश्चेष्टा आसन्नित्यन्वयः। धृतकर्णाः निश्चलकर्णाः कवलं तृणग्रासः निद्रिताः कार्यान्तररहिताः ५

हे आलि सखि कर्हिचित् कदाचित्। यत्र यदा यस्मिन्देशे स्थित्वा गाः समाह्वयति। तर्हि तदा तस्मिन्देशे स्थिताः सरितः क्षीरे पयसि वानिलनीतं तत्पदाम्बुजरजः आस्पृशन् आस्पृशन्नेच्छन्नित्यन्वयः। कथंभूतः बर्हिणस्य मयूरस्य स्तवकैः पिच्छबन्धविशेषैः धातुभिर्गिरिसंभवैः मनःशिलादिभिः पलाशैः पल्लवैः बद्धस्य मल्लपरिबर्हस्य मल्लयुद्धशिरःपरिकरस्य विडम्बोऽनुकारो यस्य स तथा। मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् इत्यमरः॥ किंच बहूनि

बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः। कर्हिचित्सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुन्दः ६ ॥ ॥
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम्। आस्पृशन्त्ययमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ७ ॥ ॥

अनेकानि पुण्यानि यासां तास्तथा। विपुलान्येक यो वर्द्धारिति पादवत्। प्रेम्णा कामोन्नत स्नेहेन वेपिताः कम्पिताः भुजास्तरङ्गलक्षणाः यासां तास्तथा। अत एव हृतवेगाः मन्दीकृतस्पन्दनलक्षणजवाः। अत एव भग्नगतयः स्तिमितप्रवाहाः आसन्नित्यन्वयः। अनेन सरन्तीति सरित इति सरिच्छब्दार्थोल्लिङ्गनं निदर्शितं ७ ॥

अनुचरैः सनकादिभिः अन्यत्र गोपैः अचलभूतिः स्थिरश्रीः भूतिः श्रीलक्ष्मस्तत्स्थितिया दवः। वनचरः कदाचित्संचरन् अन्यत्र वने चरणं शयनं जलशय न इत्यर्थः। यदा वेणुनाह्वयति वेणुध्वनिना गिरितटेषु चरंतीः त्रगोभक्षणं कुर्वतीः अन्यत्र बाणोः स्फुटं गद्गदस्ते सुखे वर्तमानाः पूर्वं अन्यत्र वेदाः प्रणीत स्तूयति सनकादिभिः स्तूयमानो जलशयानः आदिपुरुषो वा मुखे वर्तमान श्रुतीस्तदर्थकथनपूर्वकमुपदिशति ८ तदात्मनि स्थितं विष्णुं व्यंजयं त इव पुष्पफलाढ्याः अत एव प्रणतं प्रणमनं विभ्रतीति प्रणतभाराः प्रणतस्यपः विटपाः शाखा येषां तद्रूपेण पासां लता नाम वा तेतास्तथा। पद्मा पुष्प फलभारेण प्रणतानाविटपायेषां ते तथा प्रेम्णा हृष्टा रोमांचितास्तनवो येषां यासां वा ते तास्तथा। एवंविधा वनलतास्तरवश्च मधुधारा रसधाराः ससृजुः

अनुचरैः समनुवर्णितवीर्यआदिपुरुष इवाचलभूतिः। वनचरो गिरितटेषु चरंतीर्वेणुनाह्वयति गाः स यदा हि ८ वनलतास्तरव आत्मनि विष्णुं व्यंजयंत इव पुष्पफलाढ्याः। प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ९ ॥ ॥

स्म। स्मृत्वा सृष्टवंत इत्यर्थः। अन्यत्र आत्मनि हृदये स्थितं विष्णुं व्यंजयंतः अपरोक्षीकुर्वंत इव ज्ञानपुष्पेण जीवन्मुक्त्यवस्था फलेनाढ्याः। प्रणत स्य भारो भरणं येषां ते प्रणतभाराः ते विटपाः भुजा येषां ते तथा मूर्ध्नि रोपितांजलिपुटा इत्यर्थः। अत एव कृष्णेक्षणेन रोमांचितगात्राः वने अरण्ये रताः निवृ त्तिधर्ममनुतिष्ठंतो वने भासि ग्रीष्मे पंचाग्निज्वालासेवायां वर्षास्वैकानेन वने जले हिमर्तौ कंठदघ्नसलिलेवसंतः वनं भास्यसुकानन इति यादवः। तरवः संसारतरणशीलाः तीर्णसंसारा वा मुमुक्षवो मुच्यमाना मुक्ताश्च यथा योग्यमधिकारिणो मधुधाराः ज्ञानेनैः शात्मानिजानंदं तु संततीः ससृजु स्तन्मुभावावश्नुतुरित्यर्थः। धारासांगेनु संततयोसेन्यायेस्त्र गतिश्च पीतिसर्गः स्वभावनिर्मीकनिश्वयाध्यायस्मृहितिच। अन वचनरसाद्रसामर्थ्यान्मत्वा स्वावतारविषयत्वेनापि ज्ञातव्या वेतो श्लोको शास्त्रशक्तिविशारदैरितिग्रंथबाहुल्यभयादुपरम्यत इति ९ ॥ ॥

यर्हि यदा संधितवेणुः स्वरेणेति शेषः। कृष्णः दर्शनीयायाः चक्षुःप्रियाया विकचैः उत्पलैर्नीलोत्पलैः कृताया मालायादिव्यगंधायाश्च मानुषपरिमलयाः तुलस्याश्च मधुना पीतेन मत्तैरलिकुलैः अभीष्टं गातुमुपक्रांतं। अलघु गंभीरं गीतमाद्रियत। आर्वतत्। आदृतोसादरं श्लाघितवानिति च १० तदा सरसि सि हरंतीये सारसहंसविहंगाः ते पक्षिणः एत्यागत्य चारुणा गीतेन हृतचेतसः आकृष्टबुद्धयः। अत एव यतचित्ताः एकाग्रीकृतमानसाः अर्द्धनिमीलित नेत्राः धृतमौनाः त्यजातिचररहिता हरिमुपासत तेत्यन्वयः ११ हे व्रजदेव्यः बलेन सहितः स्रजा मालया अवतंसेन कर्णोत्पलेन च विलासः कांतिविशे षो यस्य सतथा। यद्वा स्रगवतंसयोः विलासोयस्य सतथा। आलंबो भाजनकत्वेन धृतयोः स्रगवतंसयोः शोभाजनक इत्यर्थः। क्षितिभृतो गिरेः सानु

दर्शनीयविकचोत्पलमालादिव्यगंधतुलसीमधुमत्तैः। अलिकुलैरलघुगीतमभीष्टमाद्रियद्यर्हि संधितवेणुः १० सरसि सारसहंसविहंगाः चारुगीतहृतचेतस एत्य। हरिमुपासत तेयतचित्ताहंत मीलितदृशो धृतमौनाः ११ सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः। आह्वयद्यर्हि वेणुरवेण जातहर्ष उपरंभति विश्वं १२ महदतिक्रमणशंकितचेता मंदमनुगर्जति मेघः। सुहृदमभ्यवर्षत्सुमनोभिः छाययाच विदधे वितपत्रं १३ ॥ ॥
मंद

षु शिखरेषु स्थितः लोकदृष्ट्या तदानीं जातहर्षः आविष्कृतानंद विशेषः। कृष्णो यर्हि यदा वेणुरवेण आह्वयत् गा इति शेषः। विश्वं देहं आविश्य वर्त मानं प्राणिजातं उपरंभति कर्ध्वमुखी करोति आह्वयति वा नूतनं कर्तुमुपक्रमते वा। उपरंभ स्वर्धमुखे चक्रमे निर्दनेतथाइति च १२ तदा मेघः महतो हरेरुच्चैर्गर्जनेन करणे वाधिर्यजननातिक्रमणमतिलघनं स्यादिति शंकितमनाः मंदं मंदं अनुवेणुरवानुकूलं यथा भवति तथा गर्जति किंच सुमनो भिः पुष्पसदृशसलिलबिंदुभिः श्याम वर्णसाम्यात् सुहृदं मित्रं अभ्यवर्षत् किं च छायया वितपत्रं वितपादातपात्त्रायत इति वितपत्रं विदधे च हरेरिति शेषः। सितपत्रमिति पाठे श्वेतछत्रमित्यर्थः। वेणुरवेण व्रजदेवी शब्दयतीति वा १३ ॥ ॥

दृ०प्र०

१०५

इति सति यशोदे विविधानां गवां गोनां तत्र स्थानां पतयः गंधर्वाः तेषां चरणेषु गीतगानेषु विदग्धाः समर्थाः । यद्वा विविधानां स्वस्वजातिस्वभावचेष्टासु नानाविधानां गोपानां चरणेषु कर्मसु विदग्धः कुशलः । यद्वा विविधो गोपो रक्षणं यस्य चरणेषु तत्र दापरक्षणे विविधं प्रविष्ट इत्यर्थः । अधरबिंबे दत्तवेणुः अधरोष्ठबिंबफले न्यस्तवेणुः । तव सुतः । यदा वेणुवाद्यमधुरां वेणुलक्षणवाद्ये कर्णसुखहेतुं निजशिक्षां आत्मीयगानशिक्षां प्रतिस्वर

विविधगोपचरणेषु विदग्धो वेणुवाद्य मधुरां निजशिक्षां । तव सुतः सति यदाधरबिंबे दत्तवेणुरनयत्स्वरजातीः १४
सुमनसस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः । कवय आनतकंधरगात्राः कश्मलं ययुरनिश्चिततत्वाः १५

जातीः षड्जादिस्वरसामान्यान् अनयत् आपयामास १४ तदा सुमनसो देवा गताः सुरेश्वरा अपि गीतविषये कश्मलं मोहं ययुरित्यन्वयः । कीदृशाः आनतकंधरगात्राः ईषन्नतकंठदेहावयवाः कवयः गानपारंगताः निश्चिताः अप्यनिश्चिततत्वाः । अश्रुतपूर्वगीतश्रवणात् तत्तत्वनिश्चयरहिताः । किंच तत्गानमुपधार्य तात्पर्येण श्रुतिनिध्याय १५ ॥ ॥

राम

१०५

ध्वजादय एव विचित्रा नानाकाराः ललामानि लांछनानि येषां तानि तथा यद्वा ललामानि तिलकाये येषां तानि तथा यद्वा ललामानि भूषणानि येषां तानि तथा तैः । ललामो ... ध्वजे ... । निजपदाब्जयोर्दलैः अंगुलीलक्षणैः यद्वा निजानि नित्यान्यनन्येनाप्रार्जितानि पदान्येव पादाब्जान्येव अब्जानि तेषां दलैर्विभागैः व्रजभुवः गवां खुरतोदं खुरनिष्पातव्यथां प्रकर्षेण शमयन् परिहरन् स्ववर्ष्मणा महता शरीरेण धुर्यो धुर्यश्रेष्ठः तस्य गतिरिव गतिर्यस्य सः वर्ष्मधुर्यगतिः । यद्वा वर्ष्मधुर्यो गजराजः तद्गतिः । यदा ईरितवेणुः शब्दितवेणुरित्यर्थः १६ तेन व्रजमितेन गमनेन कृष्णेन सवि

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः । व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीरितवेणुः १६ ॥
व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः । कुजगतिं गमिता न विदामः कश्मलेन कवरं वसनं वा १७ ॥

लासवीक्षणेन विभ्रमोपेतवीक्षणेनार्पितो मनोभवस्य कामस्य वेग उद्रेको लक्षणः संस्कारो याभ्यस्ता यथा । रात्रिविशेषे वनाद्रु जगतिं गोष्ठान्यमंदिरं गमिताः प्रापिता वयं कश्मलेन मनोनवस्थालक्षणेन मोहेन स्रस्तं कबरं केशभारं वसनं वस्त्रं वा स्थितिं वा न विदाम न जानीम इत्यन्वयः । कुजगामिनिमिति पाठे स्थावरस्वभावमित्यर्थः । ब्राह्ममुहूर्ते तुल्या यत् कृष्णानुयावनात्प्राप्त व्रजनां परश्चादागतस्य कृष्णस्य पुनर्दर्शने नमुग्धानां गोपिकानां वचनमिदमिति भावः १७ ॥

मणिधरः कौस्तुभरत्नधारी। दयितगंधा प्राणप्रियगंधा तुलसी यस्यां तथाभूतया मालया उपलक्षितः प्रणयिनः स्निग्धतमस्यानुवर्तमानस्य कस्यचि-
द्गोपस्यांसे भुजशिरसि भुजं प्रक्षिपन् निरस्यन् गा आगमयन् वनात् आवर्तयन् कृष्णः क्वचित् कस्मिंश्चित्काले यत्र यस्मिन् देशे अगायत १८
क्वणितवेणुना ... चित्ताः ... कृष्णगृहिण्यः कृष्णपरिग्रहभूताः हरिण्यो गुणगणार्णं गुणगणसमुद्रं क्वणितवेणुध्वानवेणुं कृष्णमनु
... चित्ताः प्रलोभितांतःकरणाः कृष्णगृहिण्यः कृष्णस्य परिग्रहभूताः हरिण्यो ... परित्यक्ता निजपतयः। उभयत्र समानं गोपिका गोपांगना इव अन्यत्र गोपनशीला इव १९ हे

१०६

मणिधरः क्वचिदागमयन् गा मालया दयितगंधतुलस्याः। प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र १८ क्वणितवेणुरव-
वंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः। गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः १९ कुंददामकृतकौतुकवेषो
गोपगोधनवृतो यमुनायां। नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार २० मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन।
वंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः २१ ॥ ॥

अनघे यशोदे कुंददाम्ना कुंदपुष्पमालया कृतः कौतुकवेषः विवाहकाले वरस्य हस्ते यत्सूत्रं बध्यते तत्कौतुकं। तदीयो वेषः। स यस्य सः कुंददामकृ-
तकौतुकवेषः। कौतुकं विषयाभेदेऽपि सूत्रे कुतूहल इत्यादयः। गोपादिभिः परिवृतः प्रणयिनां नर्मदः लीलावचनेनानंददः तव वत्सः बालः नंद-
सूनुर्यदा यमुनायां विजहार २० तदा मलयजस्पर्शेन चंदनगंधदानेन कृष्णं मानयन्वायुर्यथानुकूलो भवति तथा मंदं मंदमुपवाति वीजयतीत्यर्थः।
किंच तदा ये उपदेवगणाः देवसमीपे वर्तमानाः गंधर्वाः वंदिनो वंदमानाः यद्वा मंगलपाठकाः वाद्येन गीतेन बलिना उपहारेण च तं कृष्णं परिवव्रुः
२१

किंचिदुत्प्रेक्षोपयोगज्ञानावदति। व्रजगवां विषये वत्सलः गोष्ठ गोषु स्निग्धतमः। अगाधः गंभीरः अन्यविज्ञातमहिमा पथि ज्ञानादिवृद्धैः वंद्यमा-
नचरणः। स्तूयमानपादन्यासः दिनांते संध्यायामासन्नायां कृत्स्नं गोधनं समस्तपशुकुलं गोधनमुपोह्य व्याघ्र्त्य गीतवेणुः गानानुरूपकृतवेणुः
अनुगैर्वयस्यैः उद्गीतमणितं कांडकृत्ये वचका शिता कीर्तिर्यस्य स तथा। वनपरिभ्रमणोत्पन्नं श्रममपोह्य निरस्य दृशां द्रष्टॄणां दृशीनां उत्सवं सु-
खोत्सवं उन्नयन्। खुररजःछुरितस्रक् गोखुरसमुत्पन्नधूल्या मिश्रिता माला यस्य स तथा। देवक्या जठरमेव भूर्ध्व्यक्तिस्थानं यस्य स तथा। उडु-
राजश्चंद्र इव लुप्तोपमेयं स यद्यदा व्रजमेति तदा एष कृष्णः सुहृदामनिमित्तबंधूनामाशिषः इष्टफलानि दित्सुर्दातुमिच्छुर्य्येवेति इत्यन्वयः।

वत्सलो व्रजगवां यदगाधो वंद्यमानचरणः पथि वृद्धैः। कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः २२
उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररजश्छुरितस्रक्। दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः २३

चंद्रोऽपि व्रजगवां अबपशूनां पथिकानां उत्सवं प्रेमयन्नर्थात् कामोद्रेकं ददाति राती इति वत्सलः। वत्सो नाम कुंजे वर्षेदिति यादवः। गोष्ठधु-
निवहा व्रजा इति च। अगस्य उदयपर्वतस्य अधः शृंगाद्वर्तमानः उदयस्थ। चित्वका शृंगं वंदमाना गृहे धूमिति ज्योतिषिकाः संगिरंते वृद्धैः सप्तर्षि-
भिः पथि व्योममार्गे दिनांते रात्रौ कृत्स्नगोधनं समस्तकलासमेषितचंद्रिकाख्यधनमपोह्य परितः गीतवेणुः कविभिर्वर्णितस्य वंशः अनुगो-
रश्विन्यादिनक्षत्रैः वृहत्कीर्तिराश्युपरिक्षतगणानः रविकिरणसंसर्गसमुत्पन्नश्रमं निर्हृत्य उत्सवमित्युभयत्र समं २३ ॥

१०४·

१०७

जननसमये स्त्रीराज्ञि तीरवालुकासु नववीथिषु विक्रमं कुर्वंतं दृष्ट्वैः प्रवसं प्रशस्य वलभद्रप्रशंसयोपसंहरति । मदविघूर्णितेति । वारुणीपानो त्थमदेनेषद्विघूर्णिते लोचने यस्य विभ्रांतनेत्रः अन्यत्र घूर्णं प्रकाशः लुचप्रकाशदीप्तिश्चाद्व चंद्रः कीदृशः श्रीएणं मानदः अभिमानखंडनः । दो अ वखंडन इति धातुः । वनानां भासां कांतीनां माला स्या स्त्रीति वनमाली वदरषंडुः तद्वत्पांडुसुंदरं वदनं यस्य स तथा मानवो वदरः सिंधुः प्राशितस्त्रि नामकमिति वचनात् । वदरफलवद्गतो पेतं वदनमित्यर्थेन शोभते । पांडु प्राज्ञो व्यर्थः स्यात् । वदरो हूहस्पतिः पांडुः शुक्लस्त्र योर्वदनं वचन मिव वचनं यस्य स तथा चंद्रः । कनककुंडलश्रिया मृदुगंडमंडयश्चलं कुर्वन्रत्नु भयत्र समं दुरंतं व्रजगवां दिनतापं मोचयन्नित्यपि सम्मं ।

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली । वदरपांडुवदनो मृदुगंडं मंडयन्कनककुंडललक्ष्म्या २४ यदुपतिर्द्विर दराजविहारो यामिनीपतिरिवैष दिनांते । मुदितवक्त्र उपयाति दुरंतं मोचयन्व्रजगवां दिनतापं २५ श्रीशुक उवाच एवं व्र जस्त्रियो राजन्कृष्णलीलानुगायतीः । रेमिरेहस्सु तच्चित्तास्तन्मनस्का महोदयाः २६ ॥ ॥ इति दशमे त्रयस्त्रिंशोऽध्यायः

द्विरदराजवद्विहारो गमनक्रीडा यस्य स तथा । इदमपि पुत्रुपलब्लक्षणं सममं । एवंविध एष यदुपतिः वलभद्रः यामिनीपति श्चंद्र इव दिनांते सा यंतनसमये । उदयपर्वताशिखरं व्रजमुपयाति त्वद्वयः उपयातीति लरागोपस्त्रीणामेवं नित्यमनुस्मरणं नकाहावितर्कमिति सूचयति २५ एवंविधाः कृष्णलीला अनुगायतीः अनुगायंत्यः । अत्रोपछंदसो हृस्वभंगभयात्वादस्तताः यद्वा एवं चवे एकं विकल्प्या नुविकल्पे तु हृष्टाद्याभि त्यमरः । महानुदयः संपद्यासां ताः महोदयाः इति दशमे त्रयस्त्रिंशोऽध्यायः ॥ ॥

राम

१०७

अरिष्टनामासुरहननलक्षणं विक्रमं देवकार्यसिद्धिकामुकेन नारदेनोद्बोधितस्यासुरजाते कंसस्यसन्नमोपदवो द्योगं च कथयत्यस्मिन्नध्या येऽत्र यथांशकृदवधानंतरं दैत्यांतरानियहलक्षणां कथा रभ्यते । शंखचूडं निहत्य परागोपस्त्रीभिः सह व्रजमागतः श्रीकृष्ण इहितदा वृषभा सुरः वृषभाकारो दैत्यः महांतौ ककुत्कायश्च यस्य स तथा १ रवमाणः रवं कुर्वाणः २ शृङ्गाग्रोमयं शृङ्गं स्पष्टीकृते अतिस्थिरे लोचने

श्रीशुक उवाच अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः । महीं महाककुत्कायः कंपयन्खुरविक्षतां १ रवमाणः खरतरं पदा च विलिखन्महीं । उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् २ किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्धलोचनः । यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणां ३ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै । निर्विशंति घना यस्य ककुद्यचलशंकया ४ तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः । पशवो दुद्रुवुर्भीता राजन्संत्यज्य गोकुलं ५ कृष्ण कृष्णेति ते सर्वे गोविंदं शरणं ययुः । भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतं ६ मा भैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् । गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम ७ वलदर्पहाहं दुष्टानां त्वद्विधानां दुरात्मनां । इत्यास्फोट्याच्युतोरिष्टं तलशब्देन कोपयन् । सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ८ सोप्येवं कोपितो रिष्टः खुरेणावनिमुल्लिखन् । उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ९ ॥ ॥

यस्य स तथा निर्ह्रादेन गर्जितेन ॥३॥ मासन्न यादर्वाक् गर्भस्रावा ततः सप्तमासात्पतनं । ततः प्रस्रकः तृणां मनुष्यस्त्रीणां अचलशंकया पर्व तशंकया ४ तत्रसुः त्रस्ता भीता आसन् ५ ६ हे मंद निर्भाग्य ७ भुजाभोगं आभोगा भुजं पुष्टवृत्तभुजं ८ उद्यति पुच्छे भ्रमंतो मेघा यस्य स तथा ९

द० पू०

१०८

स्कन्धे निश्चले असृक्स्रुभिः रमिव रक्तलोचने यस्य स तथा। कटाक्षिप्य करी स्फिग्वेशा क्षिप्य निक्षिप्य पदं शेषं पृथ्वी कटाक्षेति पाठे कटाक्षे
ए निरीक्ष्येत्यर्थः। अशनिर्वज्रं १० प्रत्ययोवाह प्रत्यपातयत्। अप्याकृष्य ष्टब्धतोऽपनीतवान् इत्यर्थः तिर्यङ्क्षितवान्वा ११ १२ अम्बरं वस्त्रं।
कृत्वा उल्लुत्य निष्पाणमिति शेषः। तेन विषाणेन १३ मूत्रशकृती अनिमीलितेक्षणः विवृत्तनेत्रः निर्गता रतिर्यस्मात्स निर्ऋतिः यमः तस्य
क्षयं गृहं यमलोकमित्यर्थः १४ ककुद्मिनं वृषासुरं स्वजातिभिः गोपैर्देवैर्वा १५ देवो नारायणः तद्विषयं दर्शनं ज्ञानं यस्य स तथा। यद्वा दे

अथ व्यसृक्विषाणाग्रः स्वशृङ्गलोचनोऽच्युतं। कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा १० गृहीत्वा शृंगयोस्तं वा अष्टादश पदानि सः।
प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ११ सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः। आपतत्स्विन्नसर्वांगो निश्वसन्क्रोधमूर्छितः
१२ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भूतले। निष्पीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान सोऽपतत्॥
१३ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च पादाननिमीलितेक्षणः। जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः॥
१४ एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः। विवेश भगवान्गोष्ठं गोपीनां नयनोत्सवः १५ अरिष्टे निहते गोष्ठे कृष्णेनाद्भुतक
र्मणा। कंसायाथाह भगवान्नारदो देवदर्शनः १६ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च। रामं च रोहिणीपुत्रं वसुदेवेन बि
भ्यता १७

वानामिवादर्शनं यस्य स्यातीन्द्रियत्वात्स तथा। देवानां च दुर्दर्शनेऽमतं तदेव यस्य दर्शनं स तथेति वा यथा कंसहननं शीघ्रं स्यात्तथाहेति
द्योतनार्थः प्रोत्सुपसर्गः। अनेन देवकार्यमेव नारदेन साध्यते न त्वसुरकार्यमिति ज्ञायते १६ किमाहेति तत्राह। यशोदाया इति। कन्यां दुर्गां य
शोदायाः सुतां कृष्णं देवक्याः पुत्रं रामं च बलभद्रं रोहिणीपुत्रमाह वसुदेवेन तौ किं कृतावत्राह बिभ्यता त्वदिति शेषः १७ ॥

राम

१०८

स्वस्य मित्रे विश्वसनीये सुहृदि याभ्यां कृष्णरामाभ्यां ते तव पुरुषा नियोगकारिणः १७ निशातं निशितं तीक्ष्णमित्यर्थः १८ १९ आशास्य सम्यक्
शिक्षित्वा भवता महत्त्वे पुरुष्येन २० २१ मृत्युर्मारको। कालेन यमेन नितरां द्राविती २२ मल्लरंगस्य परितः सर्वासु दिक्षु आश्रिताः स्थिताः स्वैरसंयु

न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः १७ निशम्य तद्भोजपतिः कोपात्प्रचलितेन्द्रियः। निशातमसिमादत्त वसुदेवजिघांसया
१८ निवारितो नारदेन तत्सुतौ मृत्युमात्मनः। ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया १९ प्रतियाते तु देवर्षौ कंस आभाष्य केशिनं।
प्रेषयामास हन्येतां भवता रामकेशवौ २० ततो मुष्टिकचाणूरशलतोसलकादिकान्। अमात्यान्हस्तिपांश्चैव समाहूयाह भोजरा
ट् २१ भो भो निशम्यतामेतद्वीरचाणूरमुष्टिकौ। नंदव्रजे किलासाते सुतावानकदुंदुभेः २२ रामकृष्णौ ततो मह्यं मृत्युः काल नि
दर्शितः। भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया २३ मंचाः क्रियंतां विविधा मल्लरंगपरिश्रिताः। पौरा जानपदाः सर्वे पश्यंतु स्वैर
संयुगं २४ महामात्र निबोधेदं वचो मम महामते। गजः कुवलयापीडः प्रभिन्नकरटामुखः २५ संस्थाप्योद्वारि रंगस्य करारो
पितमुद्गरः। तेन ते तत्र हंतव्यौ सुतावानकदुंदुभेः २६ सोऽप्याकुलमतिः प्राह निहंतव्यौ कथं मया। क्षत्रियो भोजराजस्य कंसस्य
जगतीपतेः २७

गं योधाः कांक्षा प्रेरकं युद्धं २४ हे महामात्र हस्तिपक कुवलयं भूमंडलं आपीडयतीति। कुवलयं कैरवं आपीडे शेखरे यस्य स तथेति प्राभि
न्नकरटामुखः मदस्राविगंडमुखः २५ मुद्गरो लोहदण्डः २६ जगतीपतेः राजप्रधानलोकभर्तुः। जगती राजप्रधानेपीति हलः
२७

द०म०

१०९

सात्मानां सर्वानां मंडले नसप्त हेनालं कृते। मामवसिद्धः। सर्वेषां सत्वानां प्रातिनां ऋाशयार्थअभिप्रेतार्थवेत्तीति सर्वसत्वाशयार्थवित् ३५ इ
त्यामरवल्लभानुगाः ३८ भवादृशीनां मनुजांगनानां ज्ञानी हि भद्रे सुलभावयं न च। जराविनाशाद्यखिलाधिभागिनां ह्यंगासुराणाम
नितांतखेदेन ऋतिमात्रव्यथया ऋाविलो संकुलो लोचनो यस्याः सा तथा ३१ गीर्वाणतुल्याः स्वामरवल्लभानुगाः स्वऋमरवल्लभ इंद्रः ऋ

हृत्युक्तः सेन कंसस्य महामात्रेण दुर्मतिः। उवाच श्वयोव वचनं समेतां छाववयचूप २८ कंस उवाच ऋरे एद्धुमेतद्वचनं मयोदितं तन्नि
शम्य सर्वं हृदि धारयं नु नत। येनाहमेते भ सुहृत्त्वमादितश्चरामि विश्रुष्पितस्य कारणं २९ माता मम मंहात्मा गाकदाचित्कमलेक्षणा
। विचचार दृष्टोद्याने मंदमारुतवीजिते ३० प्रोत्फुल्ल शोकवकुलपूगपुंनाग शोभिते। भ्रमद्भ्रमरसंघाते कूजित्कोकिलसंकुले॥
३१॥ नृत्यच्छिखंडिनि वहेमकंटाटोपसुंदरे। वसंतसमये रम्ये सालमंडिलमंडिते ३२ चरंती तत्र मे माता चित्तपामास सुव्रता। भर्तारं
कामसंतप्तास्त्र नुस्नाता सुलंकृता ३३ तत्रैव कश्चिद्गंधर्वे द्रविलोना मनामतः। चरत्रंतर्हितः काले हृत्स्वा तामेक चारिणीं ३४ वि
ज्ञाय चिंतितं तस्याः सर्वसत्वाशयार्थवित्। उग्रसेनवपुर्विभ्रत्सस्मितालापवीक्षितं ३५ तामासप्तसाद कामार्त्तः कामयानां पतिव्रता।
ऋज्ञानमानासाप्येत्य रमेतेन समं वने ३६ सात्वं विदित्वा रमणेरतं सतीनितांतखेदाविललोचना शया। उवाच कस्त्वं किन वार्यगर्हितं
दुरात्मना येन कृतं त्वयेदृशं ३७ इति ब्रुवंतीपरिसांत्वयं छनैः सदीर्घबाहुर्हि मिलोभ्य भाषत। वयं हि गंधर्वकुलोद्भवाः प्रियेगीर्वाणतु
त्यामरवल्लभानुगाः ३८ भवादृशीनां मनुजांगनानां ज्ञानी हि भद्रे सुलभावयं न च। जराविनाशाद्यखिलाधिभागिनां ह्यंगासुराणाम
हृदंतरं प्रिये ३९ ॥
जराच विनाशश्च जराविनाशो तो आदी येषां ऋखिलानामाधीनां ते जराविनाशाद्यखिलाधयस्तान्भजितुं शीलमेषां म ह्यंगीति जरावि
नाशाद्यखिलाधिभागिनः तेषां मद्हृदंतरं विशेषः ३९ ॥ ॥

राम
१०९

इति ब्रुवंतं सा भूय। प्राह क्रोधाकुलेंक्षिणा। किं मां सांत्वय से भूयः कृत्वेदं दुष्टचेष्टितं ४० इमानतिक्रम्यजलाग्निमेदिनीसमी
रणाकाशनिशेशसूर्यान्। दिक्कालधर्मानवधार्य येन दुरात्मने त्वं मलिनीकृताहं ४१ गजेनेव मदांधेन पद्मनीवनमध्यमा। विष्टुं खल
लेन विमलाप्येना हं मलिनीकृता। सत्वं किवितिमांभूपः सांत्वयस्पमराधम ४२ इति ब्रुवंतीं श्रोवाच स भूयः शापशंकितः। ऋतुलोमो
सरोजाक्षि मनुष्या सुरदिवौकसां ४३ नराणां देवकांतासु प्रतिलोमो हि संगमः। जानी हि ताहृ मा गकृमेन पंकजगंधिनि ४४
तस्मात्ते जायते पुत्रो मद्वीर्येन वृथा भवेत्। श्रीमारुधीमान्म होत्साहो न मे वाञ्जायते मृषा ४५ इत्येवं वादिनं क्रुद्धा माता मम यशस्वि
नी। प्राह संतप्तसंतप्ता पातिव्रत्यं सुदुर्लभं ४६ निःसेनोर्मिन्त्र वृत्तस्य पापस्यो न्मार्गवर्तिनः। क्रूरस्ते तनयो भूयात्साहसीनिर्दयो घृणाः
४७ ॥

ऋक्षाविशेषस्ततः किं दोषस्यादितिधियावक्ति। इतीति ४० नतु कथमेतद्दुष्टचेष्टितं किमप्यतिक्रम्याकरणात्तगोप्यत्वादितितिन्नाह। इमा
निति। ऋवधार्यऋवज्ञाय ४१ मलिनत्वं सदृष्टांतमाह। गजेनेति। ऋमेरेरधमः गर्हितः ऋधमोगर्हितस्तून विति चा देवयोनिभुनीवइतिवा
४२ मया कृतस्य कर्मणः साद्यत्वे जलाग्न्यतिक्रमेण दोषापादनं स्याद्देवयोनित्वेन मम त्वत्संगमो नुकूल एव विहितत्वादितिद्धलामिसंधि
राह इतीति। दिवौकसां देवानां मनुष्यासु स्त्रीषु संगमोनुलोमोनुकूलः ४३ मनुष्याणां देवस्त्रीषु संगमः प्रतिलोमो विरुद्धः। शेषं स्पष्टं नां
गमादिषु संगमो दृष्टचरो ततः कथमेतदितिमंदाशंकां सर्वावस्थामपेक्ष्य दोषाशंकानास्तीति हिशब्देन परिहरति ४४ ६ निःसेनोरित्यस्य
विवरणं भिन्नवृत्तस्येति। वृत्तं चरितं। ऋस्यविवरणं। उन्मार्गवर्तिनइति। निर्दयः निर्गता करुणा यस्मात्सतथा। ऋघृणः ऋकृत्यजुगुप्सार हि
तः घृणाजुगुप्सा कृपयोरितिच। दयदानगतिशोषणादिषितिधातोर्यजनादिधर्मशून्यः घृणा कृपातया रहितः ४७ ॥ ॥

द॰ पु॰ तावकानां देवानामिति शेषः ४९ ५० बंधुभ्यो दुर्जनात् बंधुभूतात् दुर्जनात् च वा ५१ केते इति तत्राह उग्रसेनमिति ५२ कृतः पितृत्यादि
दोषानाह प्रीतित्वाह ममेति ५३ ८ विशंसितस्य दर्पस्य भूतराजाय भैरवविग्रहधारिणे रुद्राय मीढुषे समर्थाय। अभीष्टदानेवा। अर्थतत्व

११०

नाद्ययाह्यो देवतानां द्विजानां च तपस्विनां। इत्थं वदंत्यां तस्यां स क्रुद्धायां शापशंकितः ४८ तावकानां भवेद्दुरित्युक्त्वा तरधीयत।
ग्राते तस्मिन्महोद्यानान्माता मम तपस्विनी ४९ केनाप्यज्ञातवृत्तांता गृहानेवाभ्यपद्यत। ततः सा गर्भमाले व्यकालेनैव सुषाव तं।
५० इति मे नारदः प्राह कदाचिद्दूरगा बान्नृपिः। ततः प्रभृत्यहं द्वेष्मि ताने तात्वं धुदुर्जनात् ५१ सूर्यं तच्च प्रमाणं हि हिषंत्येते पि मांस
हा। उग्रसेनं च दुर्बुद्धिमाकुकं चडराशयं ५२ वसुदेवं च कितवमन्यांश्च तदुपाश्रयान्। हत्वा नज्ञापते दोषो मगांधवर्जन्मनः
५३ तेनाद्य हत्वा मिष्टतु षंहन्येतामिति तावहं। ताभ्यां हताभ्यां वालाभ्यां कंजुरेण वलीयसा ५४ हत्वा पारत्रिकीं दुर्गां यांतु तत्य
हवी मिमो। वसुदेवो ग्रसेनो च तत्याज्यो नंददेवकी ५५ गोपालायादवा श्चैव येचान्येतानव्रताः। परपंतु विष्टे तेनैचे ईन्मानोस्तु
हवी मिमो। वसुदेवो ग्रसेनो च तत्याज्यो नंददेवकौ ५५ गोपालाः याहवाश्चैव ये चान्ये तानव्रताः। परपंतु विष्टे ते नैचे ईन्मानोस्तु
हारकौ ५६ आहूयंतां जनपदाः पश्यंतु मम पौरुषं। माह्मामात्रत्वयाभद्रं गह्यार्थपनीयतां ५७ द्विपः कुवलयापीडो जहितेन
ममाहितो। आरभ्य गांधनुर्यागश्चतुर्दश्यां यथाविधि ५८ विशसंतु पशून्मेध्यान्रक्षत राजाय मीढुषे। इत्याज्ञाप्यार्थतत्वज्ञमाहूय
यदुपुंगवं ५९ गृहीत्वा पाणिना पाणिं तत्राक्रूर मुवाच ह। भोभोदानपते मद्यं क्रियतां मे च माद्दतः। नान्यस्तत्रोहितमो विद्यते भो
जट्टलिप्तु ६० ॥

तं प्रयोजनपार्थस्यवे ज्ञारं। पदुपुंगावंपदुश्रेष्ठं ५९ दानशद्वेन वदान्याः लक्ष्यंते ते षां पते अक्रूर मैत्रं मित्रकर्म ६० ॥ ॥ ॥

राम
११०

सौम्यसुंदर सौम्यो विप्रे सोमतनी वेसुदरे सोमदैवते इति च। कार्यतो रवसाधनं। महतः कार्यस्य साधनं समर्थनं ६१ १ निसृष्टः कृप्तः अभ्युपा
यनैः सहितैः ५३ वेड्कृतो विकृतो निर्गतो ग्रिः तस्योपमा येषां तैः ६४ मामितरं अत एव इति शेषः ६६ हेमित्र भवितीभ विष्पति। नतु त्वज्ञोधिकाज
रासंधादयः कंटकाः संतितत्राह। जरासंधइति ६७ ८ आनयने निमित्तमाह। धनुरिति। धनुर्यागलक्षणोत्सवार्थ ६९ मनीषितं मनसा कल्पितं।

अतस्त्वामाश्रितः सौम्यकार्यगौरवसाधनं। यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ६१ गच्छ नंदव्रजं तत्र सुतावानकदुंदुभेः। आसाततौ
विहानेन रथेनानय माचिरं ६२ निसृष्टः किल मे मृत्युर्दैवे वैकुंठसंभ्रमैः। तावानय सभंगो पैर्नंदाद्यैः सास्युपायनैः ६३ घातयिष्याम्यहं तौ
कालकल्पेन हस्तिना। परिमुक्तो ततो मत्तेर्घातयेनेड्कृतोपमैः ६४ तयोर्निहितयोस्तूर्णमानुवसुदेवपुरोगमान्। तहं भ्रूनित्रहं निष्यामि हस्ति
भोजं दक्षार्हकात्र ६५ उग्रसेनं मम पितरं स्वविरं राज्यकामुकं। नज्ञातं देवकं चैव ये चान्ये विद्विषो मम॥ ६६॥ ततश्चैषा मही मित्र भविता न
ष्टकंटका। जरासंधो मम गुरुर्द्विविदो दयितः सखा ६७ शंबरो नरको बाणो मय्येव कृतसौहृदाः। तैरहं सुरपक्षीयान्हत्वा भोक्ष्ये महीमहं कृष्ण
पार ६८ एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ। धनुर्यागनिरीक्षार्थं द्रष्टुं यदुपुरं श्रियं ६९ अक्रूर उवाच राजन्मनीषितं स
म्यकृतवचावद्यमार्जनं। सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ७० ॥ ॥

मरणं ज्ञात्वापि परिहारप्रयत्नो न कृत इति यदुक्तं तत्राह त्यालक्षणं यरवद्यं तस्य मार्जनं परिहरणं भवति फलनिष्कत्रिमत्त्वाद्यपत्नोव्यर्थ इति
निरूपं इत्याह सिद्धीति। फलसिद्ध्यावसिद्धौ च हर्षशोकाभ्यां न विषमो भूत्वा कर्म कुर्यादिति विधिशास्त्रं तर्हि फलावाप्तिः किमधीनेति तत्राह। दैवमिति।
फलभावनं फलकारणं ७०

द० पू०

१

तद्दीदंमपेक्षितं किंनेत्याह मनोरथानिति। जनेन क्रियमाणत्वात्त्वयाप्यनुष्ठेय इति भावः। यद्यपिफलसिद्धिः हर्षाधीनापि तथापि ३१ ३२ इति दशमे चतुस्त्रिंशोध्यायः श्रोतृणां मंत्रणं ध्यातृणां प्रवक्तृणांच बुधाराहार्थसंकलय भगवद्विक्रमे वर्त्तमानं वर्णयिष्यमाणं चकथयत्

१११

सप्तत्रध्यायेत त्रादौ केशिदैत्यवधलक्षणं भगवद्विक्रमं वक्तुमाह केशीति। निर्दरयन् भिंदन्मनोजववत् जवो यस्य स तथा। अभ्राणि च विमानानि च अभ्रविमानानि। सटाभिः स्कंधदीर्घरोमभिः अवधूतानि अभ्रविमानानि तानितैः संकुलं क्षेपितेन नाम्नाद्य जातिशद्वितेन भीषितमखिलं यस्य स तथा। मे

मनोरथान् करोत्युच्चैर्जनो दैवहता नपि। युज्यते हर्षशोकाभ्यामथाप्याज्ञां करोमि ते ३१ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः। प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयं ३२ इति श्रीभागवते महापुराणे दशमस्कंधे चतुस्त्रिंशोध्यायः श्रीशुक उवाच केशी तु कंसप्रहितः खुरैर्मही महाहयो निर्दरयन्मनोजवः। सटावधूताभ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः १ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहांबुदोपमः। दुराशयः कंसहितं चिकीर्षुर्व्रजं स नंदस्य जगाम कंपयन् २ त्रासयंतं भगवान्स्वगोकुलं तद्धेषितैर्वालविघूर्णितांबुदं। आत्मानमाजौ मृगयंतमग्रणीरुपाह्वयत्स व्यनदन्मृगेंद्रवत् ३ स तं निशाम्याभिमुखो मखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः। जघान पद्भ्यामरविंदलोचनं दुरासदश्चंडजवो दुरत्ययः ४ ॥ ॥

सं३

हेषा क्षेपा स्ववाणिनामितिहलः १ विकटं विस्तृतं आस्यकोटरं मुखगर्त्तं यस्य स तथा। दुराशयः दुष्टाभिप्रायः कृष्णहननलक्षणो यस्य स तथा २ वालेन पुच्छेन विघूर्णितो विभ्रांतोंबुदो यस्य स तथा तं। आजौ युद्धे पार्थमात्मानं स्वं मृगयंतं विचिन्वंतं। अग्रणीरिति ज्ञेयम्। यो रितिथातः। मु

राम

खेवाद्य मपितादर्थे सप्तमी। अयणी स्वस्याभिमुखेवस्थितः ३ तं नादं ४ ॥ ॥

१११

तद्वंचनं सावज्ञं अवमानसहितमिति क्रियाविशेषणं ५ मुखं व्यादाय विदार्य ६ तमस्य योनाम सलोहं स्पृशंतः। तप्तमयं तप्तायः पात्मानं पदार्थं स्पृशंतीति तप्तमयस्पृश इति वा। उपेक्षित आमयो व्याधिः ७ विक्षिपन्क्षितिप्रतः प्रसारयन् लंडं शकृत् तनु रोगस्य शक्तृ लंबं कार्य प्रकारः कोशयोः इति च। कोशं वा ८ कर्कटीकर्कटीलता तत्फलसदृशं उर्वारुकवत् मृदुलमित्यर्थः। कर्कटिकायाः फलं गर्भ इत्यत्र दृशं प्रसवे च्छयं ख्रियते यथा तथा भुजापकर्षणं कृत

तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः। सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ॥ ५ ॥ सलब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिं। सोप्यस्य वक्त्रे भुजमुत्तरं स्मयन्प्रवेशयामास यथोरगं बिले ६ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा। बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ७ समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन्। प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लंडं विसृजन्क्षितौ व्यसुः ८ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः। अविस्मितोयत्नहतारिः सुरैः प्रसूनवर्षैर्वर्षद्भिरीडितः ९ देवर्षिरुपसंगम्य भागवतप्रवरो नृप। कृष्णमक्लिष्टकर्माणं रहस्येदमभाषत १० ॥ ॥

इत्यर्थः। व्यसोर्मृतस्य। अयत्नहतारिः सुरैर्देवैः। उस्त्रिया अमरा देवास्त्रिदिवेशा दिवौकस इति च। प्रसूनवर्षैः फलं पुष्पं प्रसूनं इत्यमरः। प्रसूनं फलपुष्पयोरिति च वर्षद्भिरिति ताद्धीलिकस्तृ प्रत्ययः। तेनायं वर्षश्रोत्पत्तिको गुणो लक्ष्यते इति ९ १० ॥ ॥

द० प०

११२

अप्रमेयात्मन् अपरिच्छेद्यस्वभावानन्वेवं चेत्तर्हि अंगुष्ठमात्रपुरुषइत्यादिपरिमाणवचनस्य का गतिरितितत्राह। योगेशेति। योगिनां योगविषयत्वेन स्वेच्छाविग्रहग्रहणेन तदुपपन्नेः योगस्य वायुविषयत्वमितिमंदाणं कोनिरस्यति। जगदीश्वरेति। आत्मतएवप्राणो जायते। आकाशाद्वायुः प्राणः अद्वाविग्रहग्रहणेन तदुपपन्नेः योगस्य वायुविषयत्वमिति मंदाणं कोनिरस्यति। कृष्णशब्दस्य वक्ष्यर्थविषयत्वेनोक्तविशेषणविशिष्टः कथं वायुरित्याशंक्य तेः वायोः जगदंतःपातित्वेन तदीशत्वेन पृथक्त्वमितिभावः। एवं चेत्संशयः सदवस्थइतितत्राह सात्वतामिति। नइति संशयनिवृत्तिः कथमितितत्राह। वासुदेवेति। वासुदेवशब्दस्यार्थांतरमाह अखिलेति। नन्वेवं चेत्संशयस्सदवस्थइति तत्राह सात्वतामिति। नन्वनेन सात्वज्जातिश्रेष्ठइत्येवायातं। ननुतदाधिपत्यमित्यतउक्तं। प्रभोइति। समर्थेधिपतेप्रभुरिति ११ उक्तविशेषणानामन्यत्रापिकथंचिद्दृशि

कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर। वासुदेवाखिलावास सात्वतां प्रवर प्रभो ११
त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसां। गूढो गुहाशयः साक्षी महापुरुषईश्वरः ११

संभवेनापिविशुद्धत्वानिश्चयइत्यत्राहत्वमिति। प्रत्यगात्मांतर्यामीत्यर्थः। कीदृशोन्वो नास्तीत्याह एकइति। एकस्यचबहुत्वस्यानेकत्वमिति तत्रासंभवेनापिविशुद्धत्वानिश्चयइत्यत्राहत्वमिति। प्रत्यगात्मांतर्यामीत्यर्थः। कथं गूढत्वमित्यतउक्तं गुहेति। हृदयगुहायांशेतइति। जीवइत्योतिरिति। मथनादिना हविर्विषयत्वेनाग्नेः सत्त्राजायतेनतवेतितत्राह गूढइति। कथं गूढत्वमित्यतउक्तं गुहेति। हृदयगुहायांशेतइति। जीवइत्योतिरिति। मथनादिना द्विविषयत्वेनाग्नेः। पुण्यपापयोरीशावायोरंतस्थत्वेन साक्षित्वेपिमुख्यसाक्षित्वं तवेत्याशवन्नहित्वं संसारीचेतनः किंनेत्याहसाक्षीति। संसारिणानुष्ठीयमानयोः पुण्यपापयोरीशावायोरंतस्थत्वेनसाक्षित्वेपिमुख्यसाक्षित्वंतवेत्याशयेनाह महापुरुषइतिपुरुषोत्तमइत्यर्थः। पुरुषोत्तमस्येवमुख्यसाक्षित्वंयतोतईश्वरत्वंतस्येवमुख्यंनपशुपतेरितिभावेनाह ईश्वरइति १२

राम

११२

अलोकिकस्यवस्तुनोसाधारणलक्षणेन निर्णेतुंशक्यतेइतितदाह आत्मनेति। पूर्वजगदादौ आत्मनापरस्मैरणांतरेणकेनोपादानेनेत्यतउक्तं माययेति। माययाप्रकृत्याकुलालस्यशालाद्यधिष्ठानवत् र्षीमारस्यकिमाधिष्ठानमितितत्राह। आत्माश्रयइति। सभगवान्कस्मिन्प्रतिष्ठितइतिस्वेमहिम्नीतिश्रुतेः। गुणान्महदादीन् १३ अवनप्रकारंदर्शयति। सत्वमिति १४ अनिमिषादेवाः सुरमत्स्यावनिमिषाविति च १५ श्रोतॄणार्थं स्ववचनं प्रमाणयितुं भाविनमर्थं दिव्यचक्षुषोपलभ्यवक्ति। चाणूरमित्यादिनातेनवकरेण १६ यथाइदानीकेश्यादिहननंप्रत्यक्षं भवत्येवमेवकालांतरे कि

आत्मनात्माश्रयः पूर्वं मायया ससृजे गुणान्। तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः १३ स त्वं भूधरभूतानां दैत्यप्रमथरक्षसां। अवतीर्णो विनाशाय साधूनां रक्षणाय च १४ दिष्ट्या ते निहतो दैत्यो लीलयायं हयाकृतिः। यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवं १५ चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनं। कंसं च निहतं द्रक्ष्ये परश्वोहनि ते विभो १६ तस्यानु शंखयवनमुराणां नरकस्य च। पारिजातस्य हरणमिंद्रस्य च पराजयं १७ उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणं। नृगस्य मोक्षणं पश्चाद्द्वारकायां जगत्पते १८ स्यमंतकस्य च मणेरादानं सह भार्यया। मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः १९ पौंड्रकस्य च वधं पश्चात्काशिपुर्याश्च दीपनं। दंतवक्रस्य निधनं चैद्यस्य च महाक्रतौ २० यानि चान्यानि वीर्याणि द्वारकामावसन्भवान्। कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि २१ ॥ ॥

यमाणमपिकर्म दृष्टिविषयं भविष्यतीतिभावेनाह। तस्येति। तस्यकंसस्यअनु अनंतरं शंखादीनां हननमिति। शंखः पंचजनासुरः १७ आदिशब्देनलक्षणेयवनमाह। लक्षणां कालिकेचिक्केनाभिमुद्रांगसंगयोरितिसवीर्याणमवश्यज्ञेयत्वमाह। गेयानीति। भुवीतिविशेषणेनवीर्याणांसंसारनिवृत्त्यर्थमेवैकृतत्वंसूचयति २१ ॥

द॰ पू॰

११३

अथ भारतयुद्धे अमुष्य भूवलयस्य अवशिष्टं क्षपयिष्णोः अक्षौहिणीनां कर्तृकाम स्थाक्षौहिणी नाम सेनाविशेषः अर्जुनसारथेरित्यनेन भारतयुद्धं सूचयति २१ उपास्यरूपं विशिनष्टि विशुद्धेति। भगवन्तं शरणमीमहीत्यन्वयः। कीदृशं विशुद्धविज्ञानघनं अपाकृतज्ञानमूर्तिं स्वसंस्थया स्वरूपावस्थयैव प्राप्तसर्वार्थं समाप्ता अशेषपुरुषार्थ केचिदृष्टेर्निर्मायामयीति संगिरन्ते तत्राह अमोघेति कृत एतत्क्ष्यते इति तत्राह निरस्तमायागुणप्रवाहः परंपरायस्मिन्स्तथा न चैतन्मुक्तानामप्यस्तीति तत्राह स्वतेजसेति। स्वप्रभावेन तेजो बलेनाभावेनेति नित्यनिवृत्तमायागुणानां प्रकृतिगुणानां प्रवाहः परंपरा यस्मिन्स्तथा न चैतन्मुक्तानामप्यस्तीति तत्राह स्वतेजसेति। स्वप्रभावेन तेजो बलेन भावेनेति २३ हे आद्यं नतास्मसनाधाकर्तृईश्वरं त्वां नतोस्मि ईश्वरत्वं समर्थयते स्वाश्रयमित्यादिना। आत्माधीनया मायया प्रकृत्या स्वेच्छया वेनेति

अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै। अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः २१ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवाञ्छितं। स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवन्तमीमहि २३ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनं। क्रीडार्थमाद्यं तं मनुष्यविग्रहं नतोस्मि धुर्यं यदुवृष्णिसात्वतां २४ ॥ ॥

वा। क्रीडार्थं क्रीडितुं विनिर्मिताशेषविशेषकल्पनं विरचितसमस्तदेवब्राह्मणासुरादितारतम्यलक्षणविशेषव्यवस्थानं मनुष्यविग्रहं वा। क्रीडार्थं क्रीडितुं विनिर्मिताशेषविशेषकल्पनं ... मनुष्यविग्रहं नतोऽस्मि। धुरं वहतीति धुर्यः नायकः तं यदुवृष्णिसात्वतां धुरस्य विग्रहोपस्य सतथा तं। मां स दृश्या मनुष्याकारमित्यर्थः। मनुष्यदेहस्वीकारे कृत्यमाह धुर्यमिति। धुरं वहतीति धुर्यस्तं नायं यदुवृष्णिसात्वतां धुरस्य विग्रहोपस्य सतथा तं। आद्यं तं मनुष्यविग्रहोपस्थेत्य वोढारा आद्यं तं धुर्यविशेषणद्वयेन दुष्टविनिग्रहविशिष्टपालनलक्षणकार्यार्थं मनुष्यविग्रहस्वीकार इति विज्ञायते। आद्यं तो मनुष्यविग्रहोपस्थेत्य र्थांगीकारश्च। आदिनो राहूमतः प्रोक्तास्तु हंत त्वाद्गुनाईन इति वचनं विरुणद्धि विशुद्धविज्ञानघनमित्यादिविशेषणानि चोक्तानि व्याहृतानीत्युपरिति २४

राम

११३

तस्य दर्शनेनोत्सवउत्कृष्टआनंदोपस्यसतथा २५ ६ चोरपालापदेशतः वयं पशुं चोरयामः। वयं पालयाम इति अपदेशेन छन्नमनसा निलायनक्रीडां

श्रीशुक उवाच — एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः। प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः २५ भगवानपि गोविंदो हत्वा केशिनमाहवे। पशूनपालयत्पालैः प्रीतैर्व्रजसुखावहः २६ एकदा ते पशून्पालाश्चारयंतोऽद्रिसानुषु। चक्रुर्निलायनक्रीडां चोरपालापदेशतः २७ तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप। मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः २८ मयपुत्रो महामायो व्योमो गोपालरूपधृक्। मेषायितानपोवाह प्रायश्चोरायितो बहून् २९ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः। शिलया पिदधे द्वारं चतुःपंचावशेषिताः ३० तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां। गोपान्नयंतं जग्राह वृकं हरिरिवौजसा ३१ स निजं रूपमास्थाय गिरींद्रसदृशं बली। इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ३२ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले। पश्यतां दिवि देवानां पशुमारममारयत् ३३ गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः। स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलं ३४ इति श्रीभागवते महापुराणे दशमस्कंधे पंचत्रिंशोऽध्यायः ॥ ॥

निलीनकर्मलक्षणक्रीडां २७ ८ चोरायितः चोरवद्वर्तमानः २९ गिरिदर्यां पर्वतगुहायां ३० हरिः सिंहः ३१ ग्रहणमदृता हरिणा गृहीत इति शेषः ३२ पशुमारमारयति त्यक्तप्राणान्करोति ३३ ३४ इति दशमे पंचत्रिंशोऽध्यायः ॥ ॥

द०पू०

११४

अस्तानां भगवद्भक्तिकरणनिदर्शनार्थं गोकुलयात्राकथनं च अत्राक्रूरस्य भक्त्युद्रेकः प्रतिपाद्यतेस्मिन्नध्याये। मधुपुर्यां मधुरायां यस्यां रात्र्यां न्यपुं अ
तोरानिं १ २ भद्रं पुण्यं परमान्योक्तं विशिनष्टि किं तप्तमित्यादिना। अर्हते विस्तुभक्त्यादिगुणसंपन्नाय ३ ब्रह्मकीर्तनं वेदाध्ययने ४ उत्तमश्लव
दतिनेवमिति। अद्यैवमस्युतदर्शनं दुर्लभमितिमामात्मानं नावमंस्या मित्यावज्ञामाशिकुत इत्यत आह स्यादिति। कथमेतत्संभवतीत्यत आह। क्रियमा
णगति। कश्चन विस्तुभक्तिमान् ५ भवो जन्मयोगिभिः सनकादिभिः ६ वत आश्चर्यं अद्य अत्यनुग्रहं अधिकानुग्रहं अकृत अकरोत् वनाद्या

श्रीशुक उवाच अक्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः। उषित्वा रथमास्थाय प्रययौ नंदगोकुलं १ गच्छन्पथि महाभागो भग
वत्यंबुजेक्षणे। भक्तिं परामुपगत एतदेवमचिंतयत् २ अक्रूर उवाच किं मयाचरितं भद्रं किं तप्तं परमं तपः। किं वाथाप्यर्हते दत्तं
यद्द्रक्ष्याम्यद्य केशवं ३ ममैतद्दुर्लभं मन्ये उत्तमश्लोकदर्शनं। विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ४ मैवं ममाधमस्यापि स्या
देवाच्युतदर्शनं। ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ५ ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः। यन्नमस्ये भगवतो योगिध्येयांघ्रि
पंकजं ६ कंसो बताद्याकृत मेत्यनुग्रहं द्रक्ष्येंघ्रिपद्मं प्रहितोमुना हरेः। कृतावतारस्य दुरत्ययं तमः पूर्वेतरन्यन्नखमंडलत्विषा ७ यद
र्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः। गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुंकुमांकितं ८ ॥

कृतमेत्यनुग्रहं अत्यर्थं ममात्यनुग्रहमिति पाठे अत्यर्थं सम्मे कृतवानित्यर्थः। प्रहितः प्रेषितः। अंघ्रिपद्मं विशिनष्टि कृतावतारस्येति पूर्वे ब्रह्मादयो
यस्यांघ्रिपद्मस्य नखानां मंडलस्य त्विषा तेजसा दुरत्ययं तमो ज्ञानमयं वा भूसंवा अतरन् तीर्णवंत इत्यन्वयः ७ यच्च ब्रह्मादिभिः सुरैरर्चितं ससा
त्वतैः पांचरात्रिकैः सहितैः। यच्च गोचारणाय गवां तृणचरणार्थं अनुचरैः गोपैः समं वने भ्रांतं यच्च वने गोपिकानां कुचकुंकुमेनांकितमुद्रितं तदद्रक्ष्य

राम

११४

इति सर्वत्रान्वयः ८ ॥

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनं। मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ९ अप्यद्य विष्णो
र्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया। लावण्यधाम्नो भवितोपलंभनं मह्यं न नु स्यात्फलमंजसा दृशः १० य ईक्षिताहंरहितोप्य
सत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः। स्वमायया आत्मन्रचितैस्तदीक्षया प्राणादिभिर्ज्ञैस्तु विभाति चित्रधा ११ ॥ ॥

नूनं निश्चयात् स्मितावलोके अरुणे कंजसदृशे लोचने यस्य तत्तथा स्मितसहितोऽवलोको ययोस्ते तथा। इतीमम र्थं सूचयति। निविडाः अलकाः कुंतलाः
तैरावृतं व्याप्तं गुडा अंगुलिकाः तद्वद्वक्राः यद्वा गुडः इक्षुविकारः तद्वत्स्निग्धा अलकास्तैरावृतं। दर्शननिश्चये शकुनं वक्ति प्रदक्षिणमिति वा इत्यनेन अप्रेमा
रह्यासादिपश्चाद्योः तद्वत्तेः तिसूचयति। गुडे पिंडे इक्षुविकृतिः कृतिंगुलिकयोर्गुडे तिच ९ ईयुषः गतवतः। उपलंभनं दर्शनं भविता अविप्रतिम
ह्याममह्यमेव नेत्रस्य सम्यक् सफलं स्यान्न स्यादेव समभेदे समीचीन इति च। अध्याबधारणे तिह्यस मी त्वानुमतेन चिति। सं दृश इत्येकं वा पदं। न संदृशेति
दृष्टीति कृतिः। संदर्शन साधनस्य नेत्रस्येत्यर्थः १० चेतन्ये कुरसस्पृहरे गोपितेनावभासनं नन्योद्य मितिभावेनाह य इति योहरिः अविद्यमानं दर्शनं अ
न्नियद्यभिमन्येत तदा स्यक्रदोषः स्यात् न चासाव स्तीत्यर्थः। यस्तत्त्ववतदेहस्य स्याज्ञानादिसंभवे नाहं भावशून्यत्वं च नमोपचारिकं किं न स्यादिति त
त्राह। अपास्तेति अपास्तः निराकृतः तमोभिदा भ्रमात्तज्ञानान्यथाज्ञानाभ्यां गत्यत्रो भ्रमः प्रवृत्तिर्यस्य सः। भ्रमश्च न वस्यानइति धातो स्थानाति निरुत्त्वा वितिश्च
वस्यानं गत्यभावस्तदभावः कार्येषु वर्तमानमित्यर्थः। वस्तुतत्त्वे ज्ञानविपरीतनिमित्तप्रवृत्तिशून्यो न भवतीत्यर्थः। यद्वा तमसा वस्तुतत्त्वाज्ञानेन जाता
भिदा द्वैतं रजतमित्यन्यथाज्ञानं तदेव भ्रमो भ्रांतिः ज्ञानं यस्य दूरोत्सारितं सः। ननु मुक्तोप्येतादृश इत्यत उक्तं स्वतेजसेति सत्यं किं तु वलमानं दत्त्वोजः स्वमहि
तानमनाकुलं स्वरूपाण्येव जीवस्य व्यस्यंते परमात्मा हि भोरिति कृते रस्य परज भावेन तद्वात्मानमेव वेद। स्वमायया अछिद्या आत्मन् आत्माधारतया रचितै
भुजैः तु प्राणादिभिः सह विचित्रधा सुरनरतिर्यगादिनानाजातिमिश्रत्वेन भाति। न तु तर्हि विकारोपि स्यादित्यत आह। तत्सन्निधितथैव सदा अविकारएवाभ्य
र्हितः श्रेष्ठ इत्यर्थः। सर्वैरभ्यर्चितो वा सत्सु ते प्यर्चिति श्रेष्ठे साधौ यस्मिन्भवत्यपि इति च। अनेन स्फुलत्वी इरिर्यथा निर्विकारः तथा रूपांतरचानिति सूचितं भव
ति। हेय दैहित्वेना भासमानस्य किं कर्तीति तत्राह। ईक्षितेति। असत्सतोः अशुभशुभयोरीक्षिता द्रष्टा। जंतुभिः क्रियमाणस्य पुण्यपापलक्षणस्य कर्मणः साक्षी
त्यर्थः। न तु स्य दर्शनाभिमानलक्षणविकार आपद्यत इत्येतिवा ११ ॥ ॥

यस्य हरेरखिलामीवहभिः। अखिलानि अमीवानि पापानि घ्नंतीत्यखिलामीवहानि तैः। अत एव सुमंगलैः। गुणजन्मकर्मभिः विमिश्राः संकलिता वाचः श्री
कृष्णकृत्स्नस्य हृष्टिहृषेत्यादिलक्षणा जगत्प्राणंति आह्लादयंति जीवयंति वा। शुंभंति शोभयंति शुभयुक्तं कुर्वंति पुनंति पवित्रयंति वै गंगाशेषसिद्ध
मित्यन्वयः। या वाचः तैर्विरिक्ताः शून्या वर्जितास्तास्ताः शवशिर शोभना मताः अवबोधिता इत्यन्वयः १२ अस्त्वेवं विश्वमाहात्म्यो भगवांस्तु तः प्रकृते किम्
त्राह स चेति। च शब्द एवार्थो। ईश्वर एव व्रजे आस्ते किलेत्यन्वयः। सात्वतामन्वये यदुकुले अवतीर्णः किं कार्यायेति तत्राह स्वसेतुपालेति स्वेन कृतः से
तुर्मर्य्यादा तां पालयंति रक्षयंतीति स्वसेतुपालाः अमराणां वर्याः अमरवर्याः स्वसेतुपालानाममरवर्याणां इंद्रादीनां शर्मकृत् सुखकृत् देवकार्य

यस्याखिलामीवहभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मभिः। प्राणंति शुंभंति पुनंति वै जगद्यास्तद्विरक्ताः शवशोभना मताः १२
स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत्। यशो वितन्वन्व्रज आस्त ईश्वरो गायंति देवा यदशेषमंगलं १३ ॥
तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं। रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः १४ ॥

यावतीर्ण इत्यर्थः। अत्र किं प्रमाणमित्यत्राह गायंतीति। देवा व्यासादयः पुराणादिषु। गेयसंभवे गानं युक्तं तत्कथमित्यत्राह यश इति। यश
शो वितन्वन् व्रजे आस्ते अशेषाणां मंगलं श्रेयस्करं तद्यशः १३ सुमानसं सुमनः प्रतिवध्नाति तं त्विति। अद्य मद्यतमेव द्रक्ष्ये इत्यन्वयः। दृशिमतां चक्षु
ष्मतां महोत्सवं त्रैलोक्ये कांतं कमनीयं रूपं दधानं। भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा इति श्रुतिः। मम अद्य उषसः प्रभातका
लावयवाः अगाद्याः सुदर्शनाः सर्वजगन्नेत्रवक्त्रदर्शनप्रदा आसन्नित्यन्वयः १४ ॥ ॥

कालाख्य भुजंगस्य रंहसा रंहो लक्षणात् विशेषेण प्रोद्वेजितानां। अधास्यत् धास्यति धारयिष्यति पिहिते किं १५ यत्र निजहस्तपद्मे समर्हणां जलपूर्वपूजां निधाय दत्वा कौ
शिकः इंद्रः जगत्त्रये इंद्रतामाप। महाबलिश्च तथा इंद्रवत्तां यद्धस्तपंकजं सौगंधिकगंधि सौगंधिकस्य कह्लारस्य गंधः गंधोऽस्यास्तीति विहारे वनक्री
डायां श्रमं अपानुदत् निराकरोत् १६ ननु किं तव वक्तृप्रलापेन पतत्स्वं कंसभृत्यः तत्प्रहितश्च अतस्त्वय्य अरिबुद्धिं कुर्य्यादच्युत इति मंदाशंकां परि
हरन्निवाह न मय्यीति नो पैत्यपि किं नोपैत्येवेत्याह विश्वदृगिति विश्वद्रष्टा अन्यमम नो नैर्मल्यं विजानातीत्यर्थः। एतदेव विवृणोति। य इति। चेतस

अप्यंघ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपंकजं। दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणैषिणां नृणां १५
समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेंद्रतां। यद्वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगंधिकगंध्यपानुदत् १६
न मय्युपैत्यरिबुद्धिमच्युतः कंसस्य भृत्यः प्रहितोपि विश्वदृक्। योंतर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा १७
अप्यंघ्रिमूले पतितं कृतांजलिं मामीक्षिता सस्मितमार्द्रया दृशा। सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशंक ऊर्जितां १८

एतदीहितं संकल्पलक्षणं चेष्टितं अंतर्बहिश्च स्थितमपि ति व्याप्तिकथनमात्रेण चेतनस्य चेष्टितसाक्षित्वं सम्यक् न विदितं स्यादिति क्षेत्रज्ञ
इत्युपात्तं इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयत इत्यादिना क्षेत्रज्ञ शब्दार्थः सम्यग्विदितः १७ दयार्द्रया दृशा मां साक्षित मीक्षते किं ईक्षण
फलमाह सपदीति। ईक्षणानंतरमपास्त किल्बिषः सम्यक् श्रीराकृताः प्रभो तएव वीता विविधा शंका यस्य सः वीतविशंकः। हर्षं ऊर्जितां ऊर्जितां
मुदं वोढा वहिष्यामीत्यन्वयः १८ ॥ ॥

द० सू०

११६

अथ पदा परिरंभणे हेतुमाह सुहृत्तममिति। अयं हैव मिष्टद्वयं स्यनाज्ञि सतथा परिरंभणात् किं फलमाप्स्यं भवतीति तत्राह आत्मेति। अतो स्मात्परिरंभणात् आत्माहेह स्त्री थीक्रियते शुद्धजलवत्क्रियते पात्रीक्रियते वाज्ञानादानयोग्यो भवतीत्यर्थः। अन्येषां भगवद्भक्तो बुध्यवता री क्रियते वाज्ञानोपदेशाय वाधिक्रियते वा किमतइत्यत्राह बंधश्चेति कामात्मकः विषयतृष्णालक्षणो बंधः उच्छ्वसति निवीर्यः छिन्नो भवती त्यर्थः। चउत्तद्धेदे पि समुच्चये। अतो दे ह हेतुको वाधवाहरूपेण सत्यो वा १९ भगवतर्ईक्षणसमय इदे दृत्वा प्रायेनवक्रिलक्ष्णं संग मि

सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेथ मां। आत्मा हि तीर्थीक्रियते तदैव मे बंधश्च कामात्मक उच्छ्वसत्यतः १९
लब्धांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेक्रूर ततेत्युरुश्रवाः। तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् २०
न तस्य कश्चिद्दयितः सुहृत्तमो न वाप्रियो द्वेष्य उपेक्ष्य एव वा। तथापि भक्तान्भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोर्थदः २१

...जन्मनः साफल्यं प्राप्नो ति। उरुश्रवाः शुभ्रकीर्तिः व्याप्तश्रवणः व्याप्तः। श्रवण शक्तिमानात्मा हेभुक्रूर इत्यातवत्सेति संबोधयति च यदि तत्प्रभृतः जन्मनः साफल्यं प्राप्ना ति। उरुश्रवाः शुभ्रकीर्तिः... अमुष्य पुंसो यत्तज्जन्मतद्धिक् जन्मनिं दामिति निष्फलत्वात् वाधकमाह महीयसेति। महत्तमेन भगवतायो नादृतः वाग्मिना सा दृरमर्चितो न भवति अमुष्य पुंसोयत्तज्जन्मतद्धिक् ... वनस्पतिर्ईत्तमात्रेकल्पद्रोपुष्पवर्द्धितिइत्युत्पलमाला। यथायथा
२० अयं श्रीकृष्णः ह्रीराश्रिशाप्येवनात्यइति तत्स्वलक्षणमाह नेति। वनस्पतिर्ईत्तमात्रेकल्पद्रोपुष्पवर्द्धिति इत्युत्पलमाला। यथायथा
स्वस्वयोग्यफलदानेन २१ ॥ ॥

राम

११६

इदानीं बलभद्रमुद्दिश्याक्रूरश्चिंतां चक्रि किंचेति। गृहीतसंचितो गृहीतपशुपादवंधन रज्जौ यदूत्तमोयज्ञो वनतमालयत्र सत्त्वयत्र रामः सत्त्वमः स्वबंधुषु वसुदेवादिषु कंसकृतकर्मसंप्रक्ष्यते विचारयिष्यति किं चेत्यन्वयः। पादवंधनपाशं तु पशूनां संचितिं विदुरितिवररुचिः। यद्वा गृहीतमानने अयज इ तिपाठे सुगमः पंथाः। यदूत्तमः मन्त्रः गृहीतानां फलदानाय सुभानां संचितिः संचयः संग्रहो येन सतथा तत्स्मिन्नितिस्मयन्नयं दक्षितं कुर्वन् हृदः आ संपक्ष्यत इति क्रियाविशेषोवा २१ ३ अखिललोकपालानां किरीटेषु सत्सु जुष्टममणिषु पादरेणवो यस्य सतथा तस्य ह्लितिकौतुकानि भूमिमंग

किं चाग्रजो मावनतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमंजलौ। गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु २२ इति संचिं
तयन्कृष्णं श्वफल्कतनयोध्वनि। रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप २३ पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः
। ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः २४ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः। रथा
दवस्कंद्य स तेष्वचेष्टत प्रभोरिमान्यंघ्रिरजांस्यहो इति २५ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ। पीतनीलांबरधरौ शरदंबुरुहेक्षणौ।
२६ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ। सुमुखौ सुंदरवरौ बालद्विरदविक्रमौ ॥२७॥ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजं।
शोभयन्तौ महात्मानौ सानुक्रोशस्मितेक्षणौ २८ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ। पुण्यगंधानुलिप्तांगौ स्नातौ विरजवाससौ २९

लकराणि पदानि पादतललांछनानि अब्जादिभिर्विलक्षितानि लांछनानि विवाइहस्तस्वेच मंगले कौतुकं विदुरितिविश्व २४ संभ्रमः भक्त्युद्रेक निमित्तव्यापारविशेषः। उद्धानि रोमाणि यस्य सतथा रोमांचितगात्रः अश्रूणां कलया कुलेक्षणे यस्य। आकुले कलिले ईक्षणे यस्य सतथा। अवस्कं द्य अवरुह्य २५ गोदोहनस्थलमिति शेषः। गोदोहनक्रियां गताविति वा २६ प्रियोलक्ष्म्याः कांतेर्वा निकेतौ मंदिरायमाणौ २७ अनुक्रोशेन द यया स्मितेन च सहितमीक्षणं ययोस्तौ तथा २८ उदारा महती ख्याता वा दक्षिणा वा रुचिरा च क्रीडा ययोस्तौ। उदारो महति ख्याते दक्षिणे दानशौण्डके
इत्यमरः। स्नातौ शुद्धौ २९

जगत्यर्थे भूमेरर्थे अर्थप्रहाणे। प्रधानपुरुषावित्यादावुच्यमानाः गुणा वलभद्रे हरेः सन्निधानादुच्यंते न त्वौत्पत्तिकात्। तदुक्तं वैष्णवपार्थवले शादावाविष्टं पुरुषोत्तमं। अपेक्ष्य तद्गुणाः सर्वे इत्यादौ ३० मरकतशैलसदृशः कृष्णः। रजतपर्वतसदृशो रामः। कनकाचितौ विन्दुभयोः समं। यदेतदादित्यस्य परं रूपमित्यत्र यथादित्यस्य कृष्णप्रभा तिमिरापहा। कृष्णमरकतश्यामप्रभापि दिशो वितिमिराः करोतीति युक्तमित्यनेन कृष्णप्रभाया अथ

प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती। अवतीर्णौ जगत्यर्थे स्वांशेन वलकेशवौ ३० दिशो वितिमिरा राजन्कुर्वाणौ प्रभया स्वया। यथा मरकतः शैलो रौप्यश्च कनकाचितौ ३१ रथात्तूर्णमवप्लुत्य सोक्रूरः स्नेहविह्वलः। पपात चरणोपांते दंडवद्रामकृष्णयोः ३२ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः। पुलकाचितांग औत्कंठ्यात्स्वाख्याने नाशकन्नृप ३३ भगवांस्तमभिप्रेत्य रथांगांकितपाणिना। परिरेभेभ्युपाकृष्य प्रीतः प्रणतवत्सलः ३४ संकर्षणश्च प्रणतमुपगुह्य महामनाः। गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहं ३५ पृष्ट्वाथ स्वागतं तस्मै निवेद्य परमासनं। प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत् ३६ निवेद्य गां चातिथये संवाह्य श्रांतमादृतः। अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ३७ तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित्। मुखवासैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुनः ३८

इति श्रीभागवते महापुराणे दशमस्कंधे षट्त्रिंशोध्यायः ॥ ॥

कारनिरासकलंकं कथमिति मंदाशंका दूरतो निरस्ता इति ३१ अवप्लुत्य अवतुह्य ३२ आह्लाद आनंदः ३३ रथांगं चक्रं तेनांकितेन पाणिना ३४ ५ मधुपर्कार्हणं मधुपर्कस्य संज्ञा मधुपर्कं च सहोर्हं दाश्रिजोक्तं मनीषिभिरिति तांत्रिकाः आहरत् अदत्तवान् ३६ संवाह्य पादाविति शेषः ३७ मुखवासैः कर्पूरतांबूलादिभिः ३८ इति दशमे षट्त्रिंशोध्यायः ॥ ॥

गोचारणाय ये त्वारम्य किं वा यत्न इत्यंतेन यं यं येन पथि यान्मनोरथान् चकार ह तांतान् लेभ इत्यन्वयः। करणं कारणो काले साधने नुज्ञता दिशु। स्यशाद् द्वारणामेदे ध्यानपद्मासनादिषु इतियाहवः १ ननु सुलभमनोरथो मोक्षः सोने न नलब्धः संसारानिवृत्तेरित्यत आह किमलभ्यमिति। यत्पराः सुख्ये भागवताः तत्परास्तमंतरेणान्यं नाकांक्षंत इति भावः २ सायंतनाशनं रात्रिभोजनं सायं प्रातर्द्विजातीनां भोजनं श्रुतिचोदितमिति याज्ञवल्क्यः। सुहृत्सु वसुदेवादिषु वृत्तिं वर्त्तनं आजीवनं प्राणाद्य निर्ग्रंथा जीवयोश्चेतिव ३ माधवः मधुकुलोद्भवः यस्य कंसस्य संदेशो यस्य सत्तथा। यस्य कंसस्यार्थ इत

श्रीशुक उवाच सुखोपविष्टः पर्यंके रामकृष्णानुमोदितः। लेभे मनोरथान्सर्वान्पथि यान्स चकार ह १ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने। तथापि सत्परा राजन्नैव वांछंति किंचन २ सायंतनाशनं कृत्वा भगवान्देवकीसुतः। सुहृत्सु वृत्तिं कंसस्य पप्रच्छान्यच्चिकीर्षितं ३ पृष्टो भगवता सर्वं वर्णयामास माधवः। वैरानुबंधं यदुषु वसुदेववधोद्यमं ४ यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयं। यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः ५ श्रुत्वाक्रूरवचः कृष्णो वलश्च परवीरहा। प्रहस्य नंदं पितरं राज्ञा दिष्टं विजज्ञतुः ६ गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः। उपायनानि गृह्णीध्वं युज्यंतां शकटानि च ७ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान्। द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः किल ८ एवमाघोषयत्क्षत्रा नंदगोपः स्वगोकुले। गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिताशयाः ९ ॥ ॥

यत्संदेशो जनस्य दृष्टिः श्वेति वा तस्य कंसस्य यदुषु वैरानुबंधं वैरेण संततद्वेषाभावं प्रकृतस्य वैरस्य अनुवर्त्तनं वा। अनुबंधो दोषभावयत्क्त्वा दोषविनश्वरे। सुखानुपाधि निशि शोषद्वक्ततस्यानुवर्त्तन इति। अस्य कंसस्य नारदेन यदुक्तं तदपि। किं तदुक्तं तत्राह स्वजन्मेति ५ विजज्ञतुः विज्ञापयामासतुः ६ ७ रसान् आज्यादीन् इह मानिवा। रक्षो रागे विशेषो यैरिति क्रादो पारदे द्रवे। रेतस्यास्वादने हेम्नि निर्यासे रसधाद्ययोरिति च। पर्व उत्सवं पश्यसंधानुत्सवे चर्याथोपपर्वविदुर्बुधाः इति दत्तः ८ क्षत्रा यंत्र ९ ॥ ॥

राम कृष्णौ पुरीं नेतुं आगतं अक्रूरं श्रुत्वा गोपस्त्रियः एवमापन्नाः बभूवुरित्यन्वयः। तत्क थमिति विविच्याह काश्चिदिति तस्य कृष्णस्य मधुपुरीगमन श्रवणात् कृता या अंहोः न्यापश्वासा म्लानमुखश्रीर्यासां तास्तथा १० श्रंसद्दुकूलेत्यादावपि तत्कृतेति संबध्यते। यद्वा तत्कृते कृष्णकृतेन रंगुध्या श्रवणात्कृताम्पोद्दन्त्राप श्वासास्ताम्लानमुखश्रीर्यासां तास्तथा। दिव्याति नेन निवृत्ताशेषेंद्रियवृत्तयः ११ इमं लोकं देहं आत्मलोकं मोक्षं। दृदि स्थशः हृदयंगमाः मनोहराः अनुरागस्मितपूर्वकमीरिताः। विन्नाति प्रदानियामुतास्तथा। गतिं यानां चेष्टां अंगविषयां स्निग्धहासेन सहितमवलोकनं १३ ४ अच्युताशयात्मुतत्तुद्भयः १५ हे विधातः तव च

राम कृष्णौ पुरीं नेतुमक्रूरं व्रजमागतं। काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः १० श्रंसद्दुकूलवलयकेशग्रंथ्यश्च काश्चन। अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः ११ नाभ्यजानन्निमं लोकमात्मलोकं गता इव। स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः १२ हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः। गतिं सुललितां चेष्टां स्निग्धहासावलोकनं १३ शोकापहानि नर्माणि प्रोद्दामचरितानि च। चिंतयंत्यो मुकुंदस्य भीता विरहकातराः १४ समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः १५ गोप्य ऊचुः अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः। तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकं विचेष्टितं तेऽर्भकचेष्टितं यथा १६ यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसं। शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं १७ ॥ ॥

विदृयानाक्विकथंशणयेन देहिनः जंतून् मैत्र्या मित्रभावेन संयोज्य एकीकृत्य। पुनस्तान् देहिनः अकृतार्थान् अप्राप्तमनोरथानेव वियुनंक्षि विश्लेषयसि एकदेहान् करोषि हो इत्यन्वयः। अतस्ते तव चेष्टितं अपार्थकं निष्फलं कथमिति अर्भकचेष्टितं यथा तथेति १६ अत्र मया किमपराद्धं मम विशुद्धदेहा करोषि होइत्यन्वयः। अतस्ते तव चेष्टितं अपार्थकं निष्फलं पदर्शयित्वा पुनः पारोक्ष्यं परोक्षविषयं अक्षगोचरं करोषि यस्मात्तत्त्व रीतितत्राह यस्त्वमिति। यस्त्वं सुकपोलादिविशिष्टं मुकुंदवक्त्रं प्रदर्श्य प्रदर्शयित्वा पुनः पारोक्ष्यं परोक्षविषयं अक्षगोचरं करोषि यस्मात्तत्त्व याकृतमसाधु मंगालं इत्यन्वयः। शोकस्यापनोदानि रामो येन सः शोकापनोदः स्मितस्य लेशाः तथा तेन सुंदरं मनोहरं। स्मितस्य लेशाः स्मितलेशाः

हे विधातः त्वं अक्रूरसमाख्यया अक्रूरशंसोऽयमकठिनो यमिति गुणप्रमाननाम्ना स्मृतः प्रसिद्धः अधुना क्रूरः इति स्मर्यसे। कुतः येन चक्षुषा मधुद्विषः एकदेशे मुखे अखिलस्य विश्वस्य सर्गसौष्ठवं सौंदर्यं तददृक्षम तत्त्वया हि एव दत्तं चक्षुः अज्ञवत् प्रदद्य स्वेव तत्क्षण्मित्यन्वयः। क्रूरो भयंकरे कंषे नृशंसे कठिनो प्ययोरिति च। यद्वा तस्य मधुद्विषो विद्यमानममखिलं पूर्णं सर्गं स्वाभाविकमङ्गानि मंसोष्ठवमत्र पश्यमं १८ इदानीं कृष्णं कटाक्षीकृत्य वदंति नेति नंदसूनुः त्वामानं कृष्णं अनुदिशपानुरागः क्लिष्टा अपि नोऽस्मान् न समीक्षते न चिंतयति यस्मात् स्वात्रं दस्य क्षणभंग सौहृदः। नवप्रियः नूतनप्रियश्च कीदृशीरस्मान् गेहादीन् विहाय त्वद्दास्यमद्धा प्रत्यक्षमुपगताः अद्धा सत्ये बा। अद्धा प्रत्यक्षसत्ययोरिति च १९ सुखप्र भातत्वे निमित्तमाह। या इति। व्रजस्पतेर्गोकुलनाथस्य। सकारः छांदसः। अपांगेन कटाक्षानितीक्षणेन उत्कलितमुत्पन्नं अभीष्टवर्धकी कृतं वा। स्मित

क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत्। येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः १८ न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा अपि। विहाय गेहान्स्वजनान्सुतान्पतींस्तद्दास्यमद्धोपगतान्नवप्रियः १९ सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवं। याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवं २० तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि। कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् २१ ॥ ॥

मेवासवममृतं यस्मिंस्तथा २० इदानीं कृष्ण प्रजानं तत्यो वदंति मनस्वी महामनाः। अपि मुकुंदो मधुरांगतः पुनः नोऽस्मान् स्वांतिकं कथं प्रतियास्यते आगमि ष्यतीनकेनापीत्यन्वयः अनागमने निमित्तमाह। तासां मधुरांगनानां मधुमंजुभाषितैः मधुवत् पुष्परसवत् मंजुभिः श्रुतिमनोहरैः वचनैः गृहीतचित्तो वशीकृत चेताः अतएव परवान् पराधीनः परवान् परतंत्रः पराधीनो निघ्नः परवश इत्यमरः। तासां मधुरवचनमेव कारणं न त्वन्यदित्याशयेनाह। अबलाः सुरतधार्ष्ट्याविमु राः किंवयाम्याः अश्लीलशीलाः वयं वरापि मुख्यं नेत्याह। अचलजलज्जायारहिताः। भ्रूविलासो पि सुख सूचको नेत्याह। स्मितेन सह विभ्रमंती भ्रूर्यासां तास्तथा। स मुद्गे पि विदुषं मृदुविलासे न सुंदरी। निद्रितं मदनं या तु बोधयेत्सा वरांगनेति। काम दकः यद्वा हे अबलाः तामङ्गरांगनायाम्याः नित्यं सुरतकर्मोपेताः स्मि तास्फुटी सतां विभ्रमंती भ्रूर्यासां तास्तथा २१ ॥ ॥

तत्र मथुरायां दाशार्हादीनां दृशां महोत्सवो भवितेति शेषः। महानुत्सवो आनंदो यस्य स तथा तं। ते हि दाशार्हादयः देवकीसुतं द्रक्ष्यंतीति यस्मात्तस्मात्।
ये चाध्वनि द्रक्ष्यंति तेषां दृशां चेति २२ इदानीं अक्रूरं शपंति। मैतदिति। एवंविधस्य अतिदारुणे कर्मणि प्रवृत्तस्येतद्विधस्येतादृशस्य वा २३ छद्म
स्येश्वरत्वं संवदंते। अनार्द्रधीरिति अनेन निःसंगत्वं हरेर्दर्शितं। दुर्मदाः उत्तरकार्यधाः। स्थविरैः कुलवृद्धैः। किमनिष्टमकरिष्यन् विध्वंसिता नाम त एव

अद्य ध्रुवं तत्र दृशो महोत्सवो दाशार्हभोजांधकवृष्णिसात्वतां। महोत्सवं श्रीरमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतं २२ मैतद्विधस्या
करुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः। योसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः २३ अनार्द्रधीरेष समास्थितो
रथं तमन्वमी च त्वरयंति दुर्मदाः। गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते २४ निवारयामः समुपेत्य माधवं किं नोकरिष्य
न्कुलवृद्धबांधवाः। मुकुंदसंगान्निमिषार्द्धदुस्त्यजाद्दैवेन विध्वंसितदीनचेतसां २५ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभण
रासगोष्ठ्यां। नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतं २६ योह्नः क्षये व्रजमनंतसखः परीतो गोपैर्विशन्खुररज
श्छुरितालकस्रक्। वेणुं क्वणन्स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम २७ एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्ण
विषक्तमानसाः। विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर माधवेति २८ स्त्रीणामेवं रुदंतीनामुदिते सवितर्यथ। अक्रूरश्चोदयामास कृत
मैत्र्यादिको रथं २९

दीनचेतसां २५ हे गोप्यः। क्षणदा निद्रावसरा रात्रिः सुरतोत्सवप्रदा वा। रात्र्यंतमो दुःखं २६ अह्नः क्षये संध्यासमये तं कृष्णमृते विना। कृष्णादर
ति शय्या तत्र अवंति सखीसंबोधनं न भवेम तादृशीतिशेषः २७ ८ कृतमैत्र्यादिकः कृतसूर्यमंडलाधिष्ठितनारायणोपासनादिक्रियः २९

३० प्रत्यादेशं प्रतिवचनं तिष्ठंतु नायांतु इति गमननिषेधपरं वचनं वा ३१ समीचीनतया प्रेषयितुं यो गेपैः दौत्यकैः दूतसंबंधिभिः वाक्यैः ३२ लो
नुप्रस्थापिताः लेख्यानि चित्राणि ३३ गोविंदविनिवर्त्तने निवृत्त्याशादर्शने ३४ ५ रूपाममणिप्रभं ३६ ७ ब्रह्म सच्चिदात्मकं मर्षणं इष्टं ब्रह्म वेदतपस्

गोपास्तमन्वसज्जंत नंदाद्याः शकटैस्ततः। आदायोपायनं भूरि कुंभान्गोरससंभृतान् ३० गोप्यश्च दयितं कृष्णमनुव्रज्यानुरंजिताः।
प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ३१ तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः। सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः ३२
यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च। अनुप्रस्थापितात्मानो लेख्यानीवोपतस्थिरे ३३ ता निराशा निववृतुर्गोविंदविनिवर्त्तने। विशोका
अहनी निन्युर्गायंत्यः प्रियचेष्टितं ३४ भगवानपि संप्राप्तो रामाक्रूरयुतो नृप। रथेन वायुवेगेन कालिंदीमघनाशिनीं ३५ तत्रोप
स्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभं। वृक्षखंडमुपव्रज्य सरामो रथमाविशत् ३६ अक्रूरस्तावुपामंत्र्य निवेश्य च रथोपरि। कालिंद्या
ह्रदमागम्य स्नानं विधिवदाचरत् ३७ निमज्य तस्मिन्सलिले जपन्ब्रह्म सनातनं। तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ३८ तौ रथ
स्थौ कथमिह सुतावानकदुंदुभेः। तर्हि स्वित्स्यंदने न स्त इत्युन्मज्य व्यचष्ट सः ३९ तत्रापि च यथापूर्वमासीनौ पुनरेव सः। निमज्य दर्शनं मे
स्यात्किं सलिले तयोः ४० भूयस्तत्रापि सोद्राक्षीत्स्तूयमानमहीश्वरं। सिद्धैर्भुजंगपतिभिरसुरैर्नतकंधरैः ४१ सहस्रशिरसं देवं स
हस्रफणमौलिनं। नीलांबरं विसश्वेतं शृंगैः श्वेतमिव स्थितं ४२ ॥ ॥

त्वमिति च ३८ स्यंदने रथे। न स्तः न विद्येते स्वित् किं ३९ सलिले तयोः रामकृष्णयोः दर्शनं मृषा किमिति मे न इति शेषः ४०. असुरैः रक्षु
कुरतैः वशीकृतेंद्रियैरित्यर्थः ४१ विसवत् शुक्लं श्वेतपद्मनालतंतुवदुज्ज्वलं। शिखरैः शृंगैः श्वेतं श्वेतनामानं पर्वतं ४२ ॥ ॥

तत्संगे मोघे वपुरंगं सत्वं संगहीन जनार्दन इति च ४३ सुभ्रूश्चासौ उन्नसश्च सुभ्रून्नसस्तं ४४ तुंगांसश्चासौ उरस्थलश्रीश्चेति तुंगांसोरस्थलश्रीः तुंगावंसौ यस्य सतथा उरस्थले श्रीर्यस्य सतथा तं वलिमत् पल्लववच्चाकाशवत् उदरं यस्य सतथा तं पल्लवं च प्रकोष्ठे वा पिविस्तृतत्वादिति वैजयंतीमालायुदरे खेत्। किंतानं तांड कोटिनिवेशनो दरमित्यर्थः ४५ कनिष्ठिकामूलं करभः कांचीपदं कटितटं च श्रोणी च करभवत् रुचिरं मांसलं उरुद्वयं च तत्

तस्योत्संगे घनश्यामं पीतकौशेयवाससं। चतुर्भुजं शांतं पद्मपत्रारुणेक्षणं ४३ चारुप्रसन्नवदनं चारुहासनिरीक्षणं। सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरं ४४ प्रलंबपीवरभुजं तुंगांशोरस्थलश्रियं। कंबुकंठं निम्ननाभिं वलिमत्पल्लवोदरं ४५ बृहत्कटितटश्रोणिकरभोरुद्वयान्वितं। चारुजानुयुगं चारुजंघायुगलसंयुतं ४६ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतं। नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ४७ सुमहार्हमणिव्राजत्किरीटकटकांगदैः। कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ४८ भ्राजमानं पद्मकरं शंखचक्रगदाधरं। श्रीवत्सवक्षसंभ्राजत्कौस्तुभं वनमालिनं ४९ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः। सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ५० प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः। स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥ ५१ ॥ श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया। विद्ययाविद्यया शक्त्या मायया च निषेवितं ५२ विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः। हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः। गिरा गद्गदयास्तौषीत्सत्वमालंब्य सात्वतः। प्रणम्य मूर्द्ध्नावहितः कृतांजलिपुटः शनैः ५४ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनचत्वारिंशोऽध्यायः ॥

नितेरन्वितः ४६ ४९ नवभिः द्विजोत्तमैः कश्यपादिभिः ५० पृथग्भावैः वैदिकतांत्रिकमार्गविषयैः ५१ ऊर्जया ५२ भावेन तद्भक्तिभावेन परिक्लिन्ने आनंदाश्रुजले स्नाते आत्मलोचने यस्य सतथा ५३ सत्वं सत्वगुणं आत्मभावं वा ५४ इति दशमे सप्तत्रिंशः ॥ राम १२०

अक्रूरस्स्तुति व्यपदेशेन विद्वद्दार्थिकार्योग्यं भगवदुपासनाप्रकारं निरूपयत्यस्मिन्नध्याये तत्राक्रूरो भगवंतं तद्दृष्टोत्तरं किंचकारेति परीक्षितो मानसीं शंकां शुकः परिहरति। एवमिति १ नम्यस्यानम्यवैशिष्ट्यस्य ज्ञापनाय व्याचष्ट कलत्रगुणमाह अखिलेति। कदाचित्कारणं कदाचिन्नेत्यन्यथा वृत्तीतिं निवारयति। भूतमिति यदेतन्निमित्तकारणत्वं तत्कदाचिन्नागच्छतीत्यर्थः। अखिलहेतुहेतुमिति पाठे उपादानकारणानामपि कारणमित्यर्थः। किंत्वा मध्ये यो यमितितत्राह। नारायणमिति। अरविंदहुता नाराः गुणा स्तेषामयनं तन्नु तर्हि किमयं शब्द गुणाश्रयत्वेनाकाश इति चेन्नत्याह पुरुषमिति पूर्णानि पुरुणि आश्रयस्यैकगुणत्वा दस्यानेकगुणत्वान्महाविशेषः। नचाकाशो वेनामनु पयोर्निर्वर्हिते तेति श्रुते रविनाशित्वेना खिलहेतुत्वं नरसमुद्रायोना रमितिनरसमुदायादि सर्वपदार्थस्याचकाश अदृत्वेनाश्रयत्वेन नारायणशब्द वाच्यत्वमाकाशस्य किं न स्यादित्यतो वाह। पुरुषमिति। पूर्वस्यापि पितृ

श्रीशुक उवाच एवं दृष्ट्वात मक्रूरः प्रसन्न हृदयेंद्रियः। तुष्टाव पुंडरीकाक्षं भक्त्या वनतकंधरः १ अक्रूर उवाच नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययं। यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासीद्यत एष लोकः २ ॥ ॥

पितामहादिवद्धर्त्संसृष्टादिवद्वा बीजपरंपरास्यादिति तत्राह। आद्यमिति। वैशेषिक यज्ञेय थापरमाणो कारणत्वं पर्यासं एवं तत्रापीत्यर्थः। एवं विधस्यापि सगर्भकर्त्तुर्वह्निनाशित्वं स्यात्किं नेत्याह। अव्ययमिति। न केवलं श्रेष्ठत्वेनास्य कारणत्वमपि तु संहर्तृत्वेनापीति भावेन वाह। आदिमिति। अदभक्षणे इति धातोः। अत्तृत्वादादिमित्यर्थः। संहर्तृत्वमप्यस्मिन्पर्याप्तमिति प्रकरणायेण प्रत्यययोगः। जीवोजीवस्य जीवनमितिन्याये न अत्तुरस्याप्यन्योत्तास्यादित्यतो वाह। अव्ययमिति। सर्वकारणे विरिंचे न प्राप्ति पर्याप्तकारणत्वमस्य कथमिति तत्राह। यन्नाभीति। विरिंचस्य कारणत्वे तर्हि कथमिति तत्राह। यत इति। यतो विरिंचात् लोको रेव लोकोऽभूदिति शेषः २ ॥ ॥

आदित्वं स्रष्टपाति। भूरिति। आत्मन आकाशः संभूत इति श्रुतिः। आदिः भूतादिरहंकारः। अजा च आदिश्च अजादिः। प्रकृत्या व्यक्कारणमित्यर्थः। न केव
लमस्य समस्ताचेतनं हेतुत्वं किंतु चेतनराशेरित्याशयेनाह। अजादिरिति। ब्रह्मादिचेतनसंघोऽजादिः। ये सर्वेऽजादयो जगतो हेतवो यथायोग्यं
कारणानि। ते सर्वे तवांगभूता अंगेभ्यो जाताः। पद्भ्यां भूमिरिति श्रुतेः ३ त्वदंगजाता जाड्यविज्ञानमाहात्म्यमत्र्येन मया न ज्ञायत इति किं वक्तव्यमित्याश
येनाह। नेति। अवेदने निमित्तमाह। अन्येति। अनात्मतया गृहीताः एते जीवात्मानो मत्तोऽन्य इति भगवता गृहीताः। ईश्वरोऽपि तत्वान्तर्याम्यग्रहीता तिचे
न। अहं परो हि मद्भिन्ना जीवात्मानो न्यूनशक्तय इत्यादेः। नहीश्वरस्य सर्वज्ञस्य भ्रांतिरुपपद्यते। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति श्रुतेः। येन

भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि। सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः ३ नैते स्वरूपं विदु
रात्मनस्ते ह्यजादयो ह्यनात्मतया गृहीताः। अजोनुबद्धः स गुणैरजाया गुणात्परं वेद न ते स्वरूपं ४ ॥ ॥

वांगेभ्यो जाता अपि एते अजादयः। आत्मनस्तव स्वरूपं न विदुरित्यन्वयः। अतो ब्रह्मा आदिर्येषां सर्वेषां रुद्रादीनां ते अजादय इति तद्गुणसंविज्ञाने
बहुव्रीहौ ब्रह्मणोऽप्यज्ञानं आपद्यते। वेदाहमेतं पुरुषं महांतमिति श्रुत्यात तद्विज्ञानजीवी तेरतो ब्रह्मकारणका अजादयो न विदुरित्यर्थः। किं न स्यादित्यत्रा
ह। अजइति। अजाया गुणैर्बद्ध इति हेतुगर्भं विशेषणं। गुणात्परं दूरीभूतं। अजादय इत्यत्र अजाशब्देन कश्चित्प्राकृतिरपि ग्राह्या। तस्याश्चापि स
र्वात्मना तद्विषयज्ञानाभावात्तदुक्तम्। यथाहरिः स्वमात्मानं वेद तद्वद्मापि नेत्यादि। अनेन वेदाहमित्यस्यापि गतिरुक्ता भवति। अत ईश्वरस्य
दुर्ज्ञेयत्वात्तत्साधनानुष्ठानं व्यर्थमित्याशंकापरास्ता। तत्प्रसादेन यथायोग्यज्ञानसंभवाद्यथाशक्ति स्वविहितमनुष्ठेयं ४ ॥ ॥

अत्र किं प्रमाणमित्यतोऽत्र सदाचार एव प्रमाणमित्याह। त्वामिति। अधिष्ठानविशेषमाह। साध्यात्ममिति। आत्मशब्देनोक्तनरैः संहततोऽधिकत्वेन वर्त्तमानं भू
तैराकाशादिभिः संहतं तन्मध्ये च वर्त्तमानं देवैर्ब्रह्मादिभिः संहततो विशिष्टगुणत्वेनातिष्ठंतं। तन्न तदुपासनार्थं तत्तदधिष्ठाने स्थितं तद्गुणप्रवर्त्तकत्वेन त
त्तदुत्तमत्वेन वर्त्तमानमित्यर्थः। तदुक्तं। स्थितो ब्रह्मादिदेवेषु खादिभूतेषु चेश्वर इत्यादि ५ योगिनोऽयजंत्यद्धेति विशेषणात्केचिदन्यथा यजंतीति भिन्नत
मर्थमाह। त्रय्येति। त्रय्या विद्यया वेदविद्यया कर्मप्रधानप्रकाशिकया वैतानिकाः याज्ञिकाः यज्ञकर्मशीला इत्यर्थः। अग्निर्वितानमुक्तो वेदिमाराद्ध
रयोः तत्रैव पुरुषे चमंदेच विषाणपुत्रे तत्रष्टुंगी पुरुषे इति। उक्तविशेषणे रयमर्थो विज्ञायत इत्याह। विततैरिति विस्तृतैः। इंद्र यजाग्निष्टोमेत्यादि चक्रदे

त्वां योगिनो यजंत्यद्धा महापुरुषमीश्वरं। साध्यात्मं साधिभूतं च साधिदैवं च साधवः ५ त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः।
यजंते विततैर्यज्ञैर्नानारूपामराख्यया ६ एके त्वाखिलकर्माणि संन्यस्योपशमं गताः। ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहं ७

वत्य कर्मणामेकविषयत्वं कथं संगच्छत इत्यत आह। नानारूपेति। नानाविधानि यत्नादिरूपाणि येषां देवानां वा। स्वभावा वा। यशांसि वा येषां ते नाना
रूपाः ते चामराः देवाः नानारूपामराः तेषामाख्यया विशिष्टं विष्णुमिति शेषः। सर्वहृदेवेष्वपि हरिः सर्वदेवनियामकत्वात्तेन नवदुरूपादुपगंत
व्यं विष्णोः सर्वनामत्वं अमरेति विशेषेण वेदस्य वाच्याभावे नाप्रामाण्यं स्यादिति शंका निरस्ता। इदं च विश्वावेव युक्तमिति ६ अथ निमार्गविहि
तोपासनाप्रकारमुक्त्वा पुनर्निवृत्तिमार्गविषयोपास्तिविधानमाह। एक इति। तुशब्देन पांरुस्त्व त्वं दर्शयति। उपशमं भगवन्निष्ठां ७ ॥

वैदिकमतमुक्त्वा तांत्रिकमतमाह। अन्ये त्विति। अन्ये पांचरात्रिकाः। तुशब्देन तत्रापि बाह्यविद्यामस्तीति सूचयति। संस्कृतात्मानः शिक्षितबुद्धयः। संप्रदायाहृतशाखा वा। शुद्धदेशादावा विहितेन विधिना। पंचधा कथितेन कालेन। पंचकालपरायणैरिति वचनात्। द्विधा तु ढव कालो चेति चात्वमेव मयः सर्वेन्निमन्नाति बुद्धिर्येषां ते तथा। वह्नुरूप्यां वे वहूरूपेण। च। भक्तानुग्रहार्थं व हुत्वग्रहणं निजमेकमेवेत्याह। एकमूर्त्तिकमिति। प्रथ्यासमप्या चत्वामेव यजंतीत्यर्थः ८ ननु शैवागमे शुचिवस्मय छव्यत्वे नोक्तत्वात्सर्वे त्वामेव यजंतीति कथं श्रुत्यतइतित्राह। त्वामेवेति। शिवरूपिणं पुरुषार्थप्रत्रिशिवे तुरेरूपं नियामकमस्याक्षीति वाशिवांतर्यामिणमित्यर्थः। दधीत्यादिवक्त्राचार्य विभागेन शैवपाशुपतादुपदेष्टभेदेन वा ९ नृपसं

अन्ये तु संस्कृतात्मानो विधिना विहितेन चे। यजंति त्वन्मया स्त्वां वै वहुरूपैकमूर्त्तिकं ८ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं वह्वाचार्यविभेदेन भगवन्समुपासते ९ सर्व एव पजंति त्वां सर्वदेवमहेश्वरं। येप्यन्यदेवता भक्ताः यद्यप्यन्यधियः प्रभो १० ॥ ॥

हरति। सर्व एवेति। सर्वेषां देवानामीश्वरा इंद्रादयः तेषामपीश्वरः सर्वदेवमहेश्वरः। सर्वइति कइतितत्राह। यइति ये तु इंद्रादिनानादेवतानां भक्ताः अतएव तद्भक्तिपूर्त्यर्थमन्यधियः स्यातंत्र्य बुद्धयो यद्यपि तथापि तवसर्वस्वामित्वं ज्ञानं तो देवास्तद्दत्तवालं त्वयि समर्प्य तत्फलार्थमूयं स्त्री कुर्वंत्यथा पश्यतो हरत्वं तेषां स्यादतस्तन्न कुर्वंति। किंतु तत्फलमंतवदेवतथाक्रतत्वादितिभावः। यद्वा विष्णोरन्या विलक्षणधीर्येषां ते तथा यद्यपि तथापि सर्वादृष्टवशात्ताना देवताभक्ताः ये ते त्वत्सर्वेश्विमज्ञानाभावात्तेषामित्यतः प्रभाविलुक्तं १० ॥ ॥

एतदेव विशदयति। यथेति। अद्रिभ्यः प्रभवः उत्पत्तिर्यासां ताः अद्रिप्रभवाः। पर्जन्येन गर्जन्मेघेनापूरिताः। सिंधुं समुद्रं त्वां गतयः प्रज्ञामार्गाः पुरुषार्थसाधनानि शास्त्राणि वा येन ततः प्रजावमानो ब्रह्मापर्यंतं बुधावसिता इत्यर्थः ११ ननु प्रजा द्विकं सर्वं भगवद्विषयं चेन्मतभेदः कथमुपपद्यत इत्याशंक्य सत्वादिगुणेपरकृत्वात्तद्दृष्टबुद्धित्वेन तद्भेद इत्याशये नाह। सत्वमिति। प्राकृताः प्रकृतिनिमित्ता श्रेष्ठसत्वादिशुभोताः सम्यग्भूताः संवलिता इत्यर्थः। कार्यतेश्च वशद्वत्यादिद्विधाद्वेन गृहीतं १२ ननु प्राकृतपदार्थेष्ववस्थितस्य दूरे स्वतो विशिष्टत्वमहिमासंभवात् किं विशेष्यप्रणतिः प्रार्थ्यत इतितत्राह। तुभ्यमिति। तुभ्यं नमो स्तु यः सात्विकादिनानाजनकृतप्रज्ञाविषयत्वेनोक्तस्तस्मै ते भूयोपि नमोस्त्वित्यत्रादिश्यते। अतिविशे

यथाद्रिभवा नद्यः पर्जन्यापूरिता विभो। विशंति सर्वतः सिंधुं तद्वत्त्वां गतयो नृनः ११ सत्वं रजस्तम इति भवतः प्रकृतेर्गुणाः। तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः १२ तुभ्यं नमस्ते स्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे। गुणप्रवाहोयमविद्यया सकृत्सवर्त्तते देवनृतिर्यगात्मसु १३

षणां अनुसंधेयमितिद्योतनाय वा। अविषक्तदृष्टयेश्च प्रतिहतज्ञानाय एकैकस्येकैकप्रतिदृतेर्दृष्टत्वादस्य कथमप्रतिहतज्ञानत्वमित्याशंक्य सर्वस्वामित्वेन स्वातंत्र्य प्रतीतेर्ज्ञानप्रतिबंधकाभावोयुक्तइतिभावेनाह। सर्वात्मन इतिसर्वेषां तत्र तच्छक्तिमाकृष्य वशीकृत्य तिष्ठतइत्यर्थः। तेहेव विशिनष्टि। सर्वेति। साहि सर्वमनोवृत्तिप्रेरकः समुदाहृतइत्यादेः यद्वा। अमेनासंगत्वं स्पष्टात इति। अस्य सर्वस्वातंत्र्यमस्तीति कथमवगंतुं शक्यमित्याशंक्य संसारस्य हरीच्छाधीनत्वज्ञानास्त्याह। गुणप्रवाहइति। अस्य हरेर्विद्यये छया अनिषेधे पुमान्विषवितिविचित्रे संरंभमानिति च। देवत्वोपाधिविशिष्टआत्मनीति प्रत्येकमन्वेतव्यं १३ ॥ ॥

द॰पृ॰

१२३

नानादेवताभक्तैः क्रियमाणं यजनादिकं त्वद्विषयं कथं स्यादित्याशंक्यते तेषां त्वदंशोद्भूतत्वेन त्वत्संबंधित्वादिति भावेन तेषां तदंशजन्यत्वमाह । अ ग्निर्मुखमिति । मुखाज्जाता तोऽग्निः स्वमुखमित्युच्यते । मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायतेत्यादाविती दं त्वय्येव च प्रकल्पितमहं पश्यामीत्येवं यो जनीयं । विष्णोरंगसमुद्भूता विष्णोरंगानि देवता इत्याहुः । ईक्षणं नेत्रं । कं शिरः पुंसि कः कोऽपि रोमं तु नोरित्यमरः । सुरेंद्रा लोकपालाः अर्णावं वदंतीति शे षः १४ निमेषणं निमेषोन्मेषो निमेषो मुकुलीभावो रात्रिरुत्फुलता अहरुन्मेषः प्रजापतिर्हृदं गुह्यो वीर्यं रेतः १५ संजिहते संजायंते । जलमेवाश्रि त्य तिष्ठंतीति जलौकसः मत्स्यादयः । उदुंबरे जंतुफले मशकाः पिपीलिकाविशेषाः । मनोमये ज्ञानस्वरूपे १६ पुरुषसूक्तोक्तभगवन्मूर्तिविशेष

अग्निर्मुखं ते वनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः । द्यौः कं सुरेंद्रास्तव बाहवोऽर्णवं कुक्षिर्मरुत्प्राणबलं प्रकल्पितं १४ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः । निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रं तु वृष्टिस्तव वीर्यमिष्यते १५ त्वय्यव्ययात्मन्पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः । यथा जले संजिहते जलौकसोऽप्युदुंबरे वा मशका मनोमये १६ यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि । तैरामृष्टशुचो लोका मुदा गायंति ते यशः १७ नमः कारणमत्स्याय प्रलयाब्धिचराय च । हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे १८ ॥ ॥

कृत्वा मत्स्याद्यवतारान् स्तोतुमुपक्रमते । यानीति । आमृष्टशुचः मार्जितशोकाः परिहृतदुःखाः पूर्वं विद्यमानान्येव रूपाणि बिभर्षि नाविद्यमा नानीति रूपमर्थं हि शब्द एव कि । भूतामेव बिभर्षि शोध्यवतारत्वं सर्वेत्यादेश्च १७ कारणमत्स्याय मत्स्यादिरूपाणां निमित्तीकृत्य मत्स्यवेषधारि ण इत्यर्थः । असुरमर्दस्यतिनाशयतीति मत्स्यः । बोतं कर्मणीति धातुः । मत्स्यानामुदकमेवापरं जीवनमिति सूचनाय प्रलयाब्धिचरायेति । प्रलयाब्धि चारणमन्यस्य न शक्यमितीश्वरत्वद्योतनाय वा । च शब्दो वक्ष्यमाणसमुच्चयमेव वक्ति । मधुकैटभमृत्यवे केशवाय १८ ॥ ॥

राम

१२३

अकूपाराय कूर्मरूपाय । कूर्मेश्चाह्वावरूपा इति हृहते नित्यं वृद्धाय किं कृत्यमित्यत उक्तं मंदरेति १९ साधुलोकभयापह देवनस्य वत्पादे वास्य भयमपहंतीति । क्रांतत्रिभुवनाय त्रिविक्रमाय २० संकर्षणादिमूर्तेर्हरेः संनिधानविशेषात्तेषामवताराणां तद्भावं कृत्वा नमनं क्रियते । ननु साक्षाद्ध ज्ञानावतारत्वेन । तदुक्तं । प्रद्युम्नेऽश्वानिरुद्धे च बलदेवे च केशवादित्यादौ २१ बुद्धावतारप्रयोजनं दैत्यमोहनमेव नान्यदिति द्योतयति । दैत्येत्यादिना

अकूपाराय पृष्ठेन मो मंदरधारिणे । शिखोद्धारविहाराय नमः शूकरमूर्तये १९ नमस्तेऽद्भुतसिंहाय साधुलोकभयापह । वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च २० नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे । नमस्ते रघुवर्याय रावणांतकराय च २१ नमस्ते वासुदेवाय नमः संकर्षणाय च । प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः २२ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने । म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे २३ भगवञ्जीवलोकोऽयं मोहितस्तव मायया । अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु २४ अहं चात्मात्मजागारदारार्थस्वजनादिषु । भ्रमामि स्वप्नकल्पेषु मूढः सुखधिया विभो २५ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहं । द्वंद्वारामस्तमोविष्टो न जाने त्वा जगत्पते २६ यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः । अभ्येति मृगतृष्णां वै हित्वा हं त्वा पराङ्मुखः २७ नोत्सहेऽहं कृपणधीः कामकर्महतं मनः । रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः २८

२३ ४ आत्मा देहः । आत्मजः पुत्रः । अर्थो हिरण्यादिः स्वजनो बंधुजनादिः । भ्रमामि भ्रांतिं करोमि २५ अनित्यानात्मदुःखेषु विपर्ययमतिः । अनित्येषु नित्यबुद्धिरनात्मन्यात्मबुद्धिः २६ तदुद्भवैः जलोद्भवैः शैवलादिभिः अबुधः । मृगतृष्णां मृग्यंत इति मृगा विषयास्तत्तृष्णां च २७ मनोदुरो नोत्सहे २८

तथापि विशेषतस्वाशयेनाह । सोहमिति । यः मनः समाधानकरणाशक्तः सोहं यत्तवांघ्र्युपगमनं च । अपि शब्द एवार्थे । सुपदस्थानेनिमित्तं षष्ठ नयति । पुंस इति । यर्हि यदा संसरणात् संसारात् अपवर्गो मोक्षो भवेत् । कस्य पुंसः सन्नदा हि । हे अब्जनाभ सतां पुरुषाणाम् उपासनया सेवया हेतुना त्वयि मतिः मननं बुद्धिः अवतरतीत्यर्थः २९ मनन विषयं रूपमाह । नम इति । ज्ञान स्वरूपं नान्यत् । मात्राकार्त्स्न्ये अवधारणे इति यादवः । यद्वा विज्ञानं मात्रा मानं प्रमाणं यस्मिन् स तथा तस्मै । मात्रा परिच्छेदे दे दे शो ... कर्णभूषणे । अवयवे मान इति च । ... सर्वेषां ज्ञानानां हेतवे कारणाय विरिंचि शंकरयोः प्रत्यहेतुत्वं औपचारिकमिति भावेनाह । पुरुषेति । पुरुषेश्वरयोर्विरिंचि शंकरयोः पुरुषात्मनाय । एवं विधस्य

सोहं तवांघ्र्युपगतोस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये । पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् २९ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे । पुरुषेशप्रधानाय ब्रह्मणेनंतशक्तये ३० नमस्ते वासुदेवाय सर्वभूतक्षयाय च । हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ३१ इति श्रीभागवते महापुराणे दशमस्कंधे चत्वारिंशोध्यायः श्रीशुक उवाच स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः । भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः १ ॥ ॥

किं नामधेयमित्यत उक्तं । ब्रह्मण इति । सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः । विरिंच्यादिकृतमत्वे को हेतुरित्यत उक्तं । अनंतेति ३० वासुदेवमूर्तिमाह नमस्त इत्युत्त मितिकृत्वा तं नमति नम इति । सर्वभूतक्षयाय सर्वभूतनिवासाय । शुद्धस्फटिकसंकाशं वासुदेवं निरंजनमित्यादेः । हृषीकेश इंद्रियेश ... समर्थ ३१ इति दशमे अष्टत्रिंशः ॥ ... निजजनानियोगपतायाः अभिभवो नास्ति किंतु सर्वज्ञो दूतत्वमेव । यन्न देवेषु ... । तदादावक्रूरदृष्टभगवद्रूपस्यांतर्द्धानकारणं कृष्णाक्रूरयोः प्रश्नोत्तराभ्यां हरेः ... दिव्याद्भुतमाहात्म्यवक्ति । स्तुवत इति । आत्मनो वपुः नटः स्वनदर्शितं नाट्यं नटविषयं नुमरा । दिव्यं यथा तिरोधत्ते तथा १ ॥ ॥

आवश्यकं नित्यकर्म २ इत्यानुः श्रीकृष्णः आत्मनो माहात्म्यं तेन वा दर्शितं अज्ञातवत्पृच्छति । तमिति । अद्भुतं मदर्शि लक्षणैः त्वां लक्षयामहे । आह तं प्रश्नमः ३ अक्रूरः परिहरति । अद्भुतानीति । इह भूम्यादौ यावंति अद्भुतानि संति । विश्वात्मके विश्वरूपे त्वयि तानि विपश्यतो मे किमिदृष्टं सर्वं दृष्टमेव । तानि विश्वात्मके त्वयि संति । तस्मात् त्वां विपश्यतो मे किमदृष्टमिति वा ४ किं त्वया दृष्टमिति प्रश्नस्य सर्वं दृष्टमेवेति परि

सोपि चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः । कृत्वा चावश्यकं सर्वं विस्मितो रथमाविशत् २ तमपृच्छद्धृषीकेशः किं ते दृष्टमिहाद्भुतं । भूमौ वियति तोये वा तथा त्वां लक्षयामहे ३ अक्रूर उवाच अद्भुतानीह यावंति भूमौ वियति वा जले । त्वयि विश्वात्मके तानि किं मेदृष्टं विपश्यतः ४ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले । तं त्वानुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतं ५ श्रीशुक उवाच इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः । मथुरामनयद्रामं कृष्णं चैव दिनात्यये ६ मार्गे ग्रामजना राजंस्तत्र तत्रोपसंगताः । वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ७ तावद्व्रजौकसस्तत्र नंदगोपादयोऽग्रतः । पुरोपवनमासाद्य प्रतीक्षंतोऽवतस्थिरे ८ तान्समेत्याह भगवानक्रूरं जगदीश्वरः । गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ९ भवान्प्रविशतामग्रे सहयानः पुरीं गृहं । वयं त्विह विमुच्याथ ततो द्रक्ष्यामहे पुरीं १० अक्रूर उवाच नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो । त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ११ आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज । सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम १२ पुनीहि पादरजसा गृहान्नो गृहमेधिनां । यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः १३ ॥ ॥

हारः कथमागात इत्यत उक्तमेव स्फोटयति । यत्रेति भूम्यादौ संति सर्वाणि अद्भुतानि यत्र यस्मिन् त्वयि संतितं त्वां तु पश्यतो मे किमद्भुतमदृष्ट सर्वमद्भुतं दृष्टमित्यर्थः । प्रसंगः स्यर्ण ५ दिनात्यये अपराह्णे ६ तयोर्वसुदेवसुतयोर्ग्रामजाः प्रीताः प्रसन्नाः दृष्टिं नाददुः प्रत्याहर्तुं नेच्छन्तः ७ प्रतीक्षंतः प्रपश्यंतः ८ ९ भवान्नग्रे प्रविशतां पश्चात्त्वं गेहं व्रज अवमुच्य ... धावगेहं कृत्वा १० १३ ॥ ॥

द० पू० १२५

अवनिक्तं प्रक्षाल्यपएकांतिनांमुख्यानांया गतिः सा लब्धा १४ अपुनन् शुद्धांचक्रुः १५ १६ यदुचक्रद्रुहं कंसं १७ त्वयोक्तं कर्म संपाद्य
अवनिक्तं प्रक्षाल्यपएकांतिनां ... तथा ... इति विशालानि स्फुरंति
तं इति १८ १९ स्फाटिकानि स्फटिकरत्ननिर्मितानि तुंगानि उन्नतानि गोपुराणि पुरद्वाराणि यस्यां सा तथा। ताम्रेण रीरैरारकूटैर्हेमविशेषैर्निर्मितानि कोष्ठानि तथा वनानि यस्यां सा तां
शोभमानानि हेम्ना निर्मितानि कपाटानि तोरणानि च यस्यां सा तथा। ताम्रे रारे रारकूटैर्हेमविशेषैर्निर्मिता निकोष्ठानि ...

अवनिक्तांघ्रियुगलमासीच्छ्लाघ्यो बलिर्महान्। ऐश्वर्यमतुलं लेभे गतिं चैकांतिनां तु या १४ आपस्तेंघ्र्यवनेजन्यस्त्रिलोकान् शुचयो
ऽपुनन्। शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः १५ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन। यदूत्तमोत्तमश्लोक नारायण नमोस्तु
ते १६ श्रीभगवानुवाच आयास्ये भवतो गेहमहमार्यसमन्वितः। यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं १७ श्रीशुक
उवाच एवमुक्तो भगवता सोक्रूरो विमना इव। पुरीं प्रविश्य कंसाय कर्मावेद्य गृहं ययौ १८ अथापराह्णे भगवान्कृष्णः संक
र्षणान्वितः। मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः १९ ददर्श तां स्फाटिकतुंगगोपुरद्वारां बृहद्धेमकपाटतोरणां। ताम्रारको
ष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभितां २० ॥ ॥

था। आरकूटमित्यभिधानं। यद्वा ताम्रेण निरचिते आरकोष्ठे अट्टाला यस्यां सा। यद्वा ताम्रकूटानि अग्राणि दलानि यासां तथा
था। आरकूटमित्यभिधानं। यद्वा ताम्रेण निरचिते आरकोष्ठे अट्टालाः यस्यां सा तथा। यद्वा तास्रकूटानि अग्राणि दलानि यासां तथा
ताम्रारकोष्ठं यस्यां सा तथा। तां। आसीमा परिखा खातं नदी यस्यां सा तथा। ताम्रारकोष्ठां परिखाभ्यां नएवदुरासदां दुःप्रवेशां। ताम्रारकोष्ठां प
रिखादुरासदामिति काशांतरे पठंति। उद्यानैः सर्वसाधारणवनैः रम्या रमणीया च। उपवनानामारामाणां प्रमदावनानां आलिश्च पंक्तिश्च तया
शोभिता तां। उद्यानरम्योपवनालिशोभितां २० ॥ ॥

राम १२५

सौवर्णैः सुवर्णवद्भिः शृंगाटकैश्चतुष्पथैः हर्म्यैर्धनिनां निवासैः निष्कुटैः गृहोद्यानैः श्रेणीसभाभिः ... गृहपंक्तिभिः
ताभिः। श्रेणी वेश्मपंक्तिः ... भवनैः प्रासादैः गृहैः उपस्कृतां अलंकृतां। वेदिषु परिष्कृतस्थलेषु वलभीषु आच्छादनवक्रदा
रुषु ... मुक्ताहरिद्भिर्मुक्ता वलिरश्मिमिश्रितैः वैदूर्यादिभिर्जुष्टेषु जुष्टेषु जालानां गवाक्षाणां आमुखरंध्रं मुखछिद्रं पर्यंतेषु निद्य मा
नेषु कुट्टिमेषु बद्धभूमिकेषु स्थलेषु आविष्टैः उपविष्टैः पारावतैः कपोतैः बर्हिभिर्मयूरैश्च नादितां शब्दितां। चंदनादिजलैः संसिक्ता आर्द्रीकृता

सौवर्णशृंगाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां। वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु २१ जुष्टेषु जा
लामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादितां। संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंडुलां २२ आपूर्णकुंभैर्दधि
चंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः। सवृंतरंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां सपट्टिकां २३ तां संप्रविष्टौ वसुदेवनं
दनौ वृतौ वयस्यैर्नरदेववर्त्मना। द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः २४ ॥ ॥

रथ्या रथमार्गाः। आपणाः निषद्यामार्गाः पण्यवीथिकामार्गाः प्रतिगृहं पंथाः चत्वरं चतुष्पथाः विस्तृतमार्गाः यस्यां सा तथा तां। प्रकीर्णानि व्याप्ता
नि माल्यांकुरलाजतंडुलानि यस्यां सा तथा तां २१ २२ आपूर्णकुंभैः स्वलंकृतानि द्वाराणि येषां ते तथा। स्वलंकृतद्वाराः गृहा यस्यां सा तथा तां।
कीदृशैः आपूर्णकुंभैः दधियुक्तचंदनरसेन चोक्षितैः सिक्तैः। प्रसूनानां दीपानां आवलयो येषु तैस्तथा तैः सपल्लवैः किसलयसहितैः सवृंतैः वृंतेन प्रसव
बंधनेन सहिता सवृंता रंभा कदली सवृंतरंभा। तथा क्रमुकाः पूगाः तैः पट्टिकया उपर्याततविमानवस्त्रेण सहिता सपट्टिका तां २३ पार्श्वे कर्णिक
इति सोऽर्यातां नरदेववर्त्मना राजमार्गेण २४ ॥

द० पू०

१२६

विपर्यय धृतानि व्यत्यस्तत्वे नालंकृतानि वस्त्राणि भूषणानि याभिस्ताः वस्त्रस्थाने भूषणानि भूषणस्थाने वस्त्राणीति। युगलेषु मध्ये एकं विस्मृत्याप तदेव स्फोटयति। कृतेकेति वस्त्रं परिधानीयमात्रं। एकं श्रवणभूषणं चाएकं नूपुरं च यासां ताः। एकमंक्त्वा द्वितीयं लोचनं नांक्त्वा। अंजितमपी कृतमकृत्वा २५ अभ्यज्यमाना स्नेहलेपनं कुर्वाणाः। अकृतोपमज्जना अकृतं स्नानं याभिस्ताः अर्भकं बालं अपोह्य त्यक्त्वा। प्रागल्भ्येन धाष्ट्येन

काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः। कृतैकपत्रश्रवणैकनूपुरा नांक्त्वा द्वितीयं त्वपराश्च लोचनं २५
अश्नंत्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः। स्वपंत्य उत्थाय निशम्य निःस्वनं प्रपाययंत्योर्भमपोह्य मातरः २६
मनांसि तासामरविंदलोचनः प्रागल्भ्यलीलाहसितावलोकनैः। जहार मत्तद्विरदेंद्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवं २७
दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः। आनंदमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिं २८
प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः। अभ्यवर्षन्सौमनस्यैः प्रमदा बलकेशवौ २९ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः। तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ३० रजकं कंचिदायांतं रंगकारं गदाग्रजः। दृष्ट्वायाचत वासांसि धौतान्यत्युत्तमानि च ३१ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः। भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ३२ ॥ ॥

लीलासहित हसितेनावलोकनेन कटाक्षनिरीक्षणेन २७ श्रुतं कृतं स्वरूपसौंदर्यं श्रियः एकदापि न दृष्टोयमित्याधिं मनःपीडां तद्दर्शनेन जहुः रित्यन्वयः। तस्य कृष्णस्य प्रेक्षितं उत्स्मितं च तत्प्रेक्षितोत्स्मिते ते एव सुधा प्रेक्षितोत्स्मितसुधा। तस्या उक्षणेन लब्धो मानो याभिस्ताः सुधा। आत्म निमग्नमिलद्वं स्थितं। हृष्यत्त्वचः रोमांचिताः २८ सौमनस्यैः सुमनसां पुष्पाणां राशिभिः २९ आनर्चुः पूजयामासुः ३० रंगकारं रंगकारकं ३१ ॥

राम

१२६

साक्षेपवाक्यं विवृणोति। इहेत्यानीति। परिधाय परिधानं कृत्वा ३४ जिघ्नी विघाती वितुमिच्छा लुंपंति अवच्छेदं कुर्वंति। राजकुलानि राजसद्मः ३५ ६ वासःकोशात् वस्त्रागारात् शीर्षं कोशोस्त्री कुड्मले दिव्ये शास्त्रे थों घेय्टहेतना वितिच। वस्त्रकरंडकाश्च ३७ वस्त्रे परिधायोस्पर्शीये विसृज्य ३८ वायकोवेषं अनुरूपालंकारं। एतदेव विवृणोति। विचित्रेति। विचित्रा नानाविधा वर्णाः नीलरक्तादयो येषां तैस्तथा तैः शैलेयैः धातुभिः आक

स याचितो भगवता परिपूर्णेन सर्वतः। साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ३३ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः। परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ३४ याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा। बध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि हि ३५ एवं विकत्थमानस्य कुपितो देवकीसुतः। रजकस्य कराग्रेण शिरः कायादपाहरत् ३६ तस्यानुजीविनः सर्वे वासःकोशान्विसृज्य वै। दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेच्युतः ३७ वसित्वात्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा। शेषाण्यदत्त गोपेभ्यो विसृज्य भुवि कानिचित् ३८ ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत्। विचित्रवर्णैः शैलेयैराकल्पैरनुरूपतः ३९ नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः। स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ४० तस्य प्रसन्नो भगवान्प्रादात्सारूप्यमात्मनः। श्रियं च परमां लोके बलैश्वर्यस्मृतींद्रियां ४१

ल्पैः आभरणैः ३९ लक्षणं मुद्रा पर्वणी पौर्णमास्यमावास्ये वसितेतरौ श्वेतश्यामौ ४० बलं च ऐश्वर्यं च स्मृतिश्च इंद्रियं च बलैश्वर्यस्मृतींद्रियाः तान्। बलं शारीरशक्तिः। रूपसौंदर्यं वा। ऐश्वर्यं अणिमादि। स्मृतिर्भगवत्स्मरणं। इंद्रियं ज्ञानेंद्रियं ४१ ॥ ॥

४२ ३ सार्थकं सप्रयोजनं पावितं शुद्धीकृतं ४४ ६ शाधि शिक्षय कर्तव्यमनुजानीहीति वा एतत्कुर्विति नियुज्यते येयं तद्वतीयदेशः ४७ पर
इति दशमे एकोनचत्वारिंशोऽध्यायः अथ निर्गमनानंतरं धात्रीसैरंध्रीं दृष्ट्वा प्रच्छेत्य वयः इत्यादि तां गविलेपभाजनां दृष्टीतं जं इनमात्रां

ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः। तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ४१ तयोरासनमानीय पाद्यं चार्घ्यार्हणादिभिः। पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ४३ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो। पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ४४ भवंतौ किल विश्वस्य जगतः कारणं परं। अवतीर्णाविहांशेन क्षेमाय च भवाय च ४५ न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनः। समयोः सर्वभूतेषु भजंतं भजतोरपि ४६ शाध्याज्ञापय मां भृत्यं किमहं करवाणि वां। पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ४७ इत्यभिप्रेत्य राजेंद्र सुदामा प्रीतमानसः। शस्तैः सुगंधैः कुसुमैर्माला विरचिता ददौ ४८ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ। प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ४९ सोपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि। तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ५० इति तस्मै वरं दत्वा श्रियं चान्वयवर्द्धिनीं। बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ५१ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनचत्वारिंशोऽध्यायः श्रीशुक उवाच अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनां। विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन् रसप्रदः १

कुब्जां वक्रशरीरां वयसा युवतीं तरुणीं वच सारसप्रदः आनंदप्रदः कामरागप्रदो वा १ ॥ ॥श्रीराम॥ ॥श्रीकृष्ण॥ ॥

हे वरोरु साधु सत्यं निर्द्दिष्टे पेशले सत्ये साधुशब्दः प्रयुज्यत इति १ पद्माक्षविहितं न तु तद्देवदासी। अनुलेपकर्मणि चंदनसौरभ्यकर्मणि संमतास्य विषति पद्मात्र्यन्यतमः अन्येषामपि श्रेष्ठतमः ३ धर्षितात्मा। अस्ववशमनाः। वशीकृतमना वा ४ स्ववर्णादितरद् जतते नकर्दमेलक्ष्यते कर्पूरसंपर्केण शोभा परिमलातिशय न लक्षणस्याः स्तीति स्ववर्णेतरशोभिना। भगवच्छरीरकांतिमपेक्ष्य संप्राप्तः अपरभागो गुणोत्कर्षो राह्नि येन सतथा तेन। ईषद्गुणोत्कर्षप्राप्तेन वा भगवदंगसंगेन सम्यगुत्कर्षप्राप्तेन वा। अनुरंजितौ स्वकांत्यनुकूलरागशोभां प्राप्तौ ५ ऋज्वीं

का त्वं वरोर्वेतदिहानुलेपनं कस्यांगने वा कथयस्व साधु। देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते नचिराद्भविष्यति १ सैरंध्र्युवाच दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि। मद्भावितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः। धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनं ४ ततस्तावंगरागेण स्ववर्णेतरशोभिना। संप्राप्तपरभागेन शुशुभातेऽनुरंजितौ ५ प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननां। ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलं ६ पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्तानपाणिना। प्रगृह्य चुबुकेऽध्यात्ममुदनीनमदच्युतः ७ सा तदर्जुसमानांगी बृहच्छ्रोणिपयोधरा। मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ८ ततो रूपगुणौदार्यसंपन्ना प्राह केशवं। उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया ९ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे। त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ १० ॥ ॥

कर्तुं समीकर्तुं। आत्मनो दर्शने यत्फलं तद्दर्शयन्। एष्यत्कंसहननं लोकान्प्रत्यापयन्निति भावः ६ कुब्जायाः प्रपदे पादाग्रे स्वपादाभ्यामाक्रम्य बद्ध्वा। द्वे अंगुले उत्ताने यस्मिन्पाणौ तेन द्व्यंगुल्युत्तानपाणिना। चुबुके च स्वाधःप्रदेशे आस्यं प्रगृह्य उदनीनमत् उन्नमयांचकार ऋज्वीमकरोदित्यर्थः ७ ८ उत्तरीयांतं उत्तरीयवस्त्रांचलं। स्मयंती सस्मितं। हृच्छयः कामः ९ त्वया कारणेन उन्मथितचित्तायाः। विलोलितमनसः १० ॥

द॰ पू॰

१२८

इत्यनेनापि सेतिहासो लोके प्रवर्त्ततामिति सूचयं स्वमाहे तिज्ञाप्यत इति ११ तरुणानां पुंसां आधिकर्षणं मनःपीडा परिहार निमित्तं गृहमागमि
ष्यामि किंतु किंचित्कार्यमस्तीत्याह। साधितार्थ इति। अर्थः कंसवधलक्षणः। त्वं सर्वथा परिहारार्था नेत्याह। अगृहाणामिति। अगृहाणां गृहर
तानां वनवासिनामित्यर्थः। पांथानां पथिकानां नो स्माकं त्वं परायणं उत्तमाश्रयः। अनेनात्मनो गानामीश्वराणां मत्वा कंसभक्ता एव पूजादिनाप्य प

एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः। मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ११ एष्यामि ते गृहं सुभ्रु पुंसामाधिविकर्षणं। सा
धितार्थो गृहाणां नः पांथानां त्वं परायणं १२ विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः। नानोपायनतांबूलस्रग्गंधैः साग्रजोर्चितः
१३ ततः पौरान्पृच्छमानो धनुषः स्थानमच्युतः। तस्मिन्प्रविष्टो ददृशे धनुरैंद्रमिवाद्भुतं १४ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत्। वार्य
माणो नृभिः कृष्णः प्रसह्य धनुराददे १५ करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यतां। नृणां विकृष्य प्रबभंज मध्यतो य
थेक्षुदंडं मदकर्युरुक्रमः १६ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः। पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् १७ तद्रक्षिणः
सानुचराः कुपिता आततायिनः। गृहीतुकामा आवव्रुर्गृह्यतां वध्यतामिति १८ अथ तान्दुरभिप्रायान्विलोक्य बलकेशवौ। क्रुद्धौ धनु
ष्खंडे आदाय शकले तांश्च जघ्नतुः १९ ॥ ॥

श्रुता इति दर्शितं ११ माध्व्या मधुरया वाणिजां पंथानो येषां तेत थातैः। दर्शनार्थमागतैः पण्यवीथिकास्थितैः वैश्यैरर्चितः नानाविधोपायनादिकं
येषां तेत थातैः १३ पृच्छमानाः पृच्छन् १४ ५ ज्यया मौर्व्या सहितं सज्यं निमिषपरिमितेन कालेन अनिमिषेण निमेषरहितेन अमितमिति यत्सम्मण
नेत्रेणेत्यर्थः। मदकरी नित्यमदजलस्रावी गजः मदमुत्को गजो वा १६ रोदसी द्यावापृथिव्यौ १७ आततायिनः आयुधान्यातत्य विस्तृत्यागच्छ
तः॥१८॥ धनुषः द्वे शकले खंडे आदाय १९ ॥ ॥

शम

१२८

शालामुखाद्धनुर्गृहद्वारात् २० वीर्यं पराक्रमं तेजः बलं प्रभावं वा प्रागल्भ्यं धार्ष्ट्यं रूपं सौंदर्यं एकपद्भावादेकवचनं। तेजः प्रागल्भ्ययोः रूपं चक्रुर्योर्द्व
मिवास्थितमित्यर्थः २१ अस्तं अस्तगिरिं शकटमुपशल्यं स्वावस्थानं २२ क्षीरोपसेचनं क्षीरोपसेवकमृद्धिष्टं चान्नं २३ धनुर्रक्षिणां वधं प्रेषित
स्वबलस्य वधं च किं कृतमिति तन्नाह। गोविंदेति। गोविंदरामाभ्यां विक्रीडितं २४ दीर्घः प्रजागरः निद्राराहित्यं यस्य स तथा। अचष्ट अपश्यत। उ
भयथा दैहिकानि बाह्यानि च। यद्वा जाग्रति स्वप्ने च। दौत्यकराणि सूचकानि २५ तान्येव व्यनक्ति। अदर्शनमित्यादिना। प्रतिरूपेषु छायाल

बलं च कंसप्रहितं हत्वा शालामुखात्ततः। निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः २० तयोस्तदद्भुतं वीर्यं निशम्य पुरवासिनः। तेजः प्राग
ल्भ्यं रूपं च मेनिरे विबुधोत्तमौ २१ तयोर्विचरतोः स्वैरमादित्योस्तमुपेयिवान्। कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः २२ अवनिज्यांघ्रि
युगलं भुक्त्वा क्षीरोपसेचनं। ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं २३ कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च। वधं निशम्य गो
विंदरामविक्रीडितं परं २४ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः। बहून्यचष्टोभयथा मृत्योर्दौत्यकराणि च २५ अदर्शनं स्वशि
रसः प्रतिरूपे च सत्यपि। असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा २६ छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः। स्वर्णप्रतीतिर्वृक्षे
षु स्वपदानामदर्शनं २७ ॥ ॥

णेषु प्रतिबिंबेषु सत्स्वपि स्वशिरसो अदर्शनं। द्वितीये चंद्रादावसति अविद्यमानेपि ज्योतिषां चंद्रादीनां द्वैरूप्यं द्विरूपत्वं द्वौ चंद्रावित्यादि। बहुव
चनेन दीपादयो ग्राह्याः द्विशिखत्वमित्यादि २६ छायायां छिद्रप्रतीतिः सुषिरदर्शनं कर्णेपिहिते करेण प्राणघोषस्य शरीरस्थवायोः प्राण
ध्वनितो मंदध्वनेरनुपश्रुतिरश्रवणं। वृक्षेषु स्वर्णछायादर्शनं। पृथिव्यां स्वपदानां पादलांछनानामदर्शनं २७ ॥ ॥

द०स्क.
१२९

जेतपरिष्वंगः मृतालिंगनं। स्वप्ने विसादनं प्रत्यक रंदवभक्षणलक्षणं। नलदमाली रक्तिगणपुष्पोजापतीतिश्रुतिः। पद्ममालां शिरः कृत्वा यो
गच्छेद्दक्षिणामुखः। एवं पश्यन्निशि स्वप्ने तत्क्षणान्मृत्युमेष्यतीति स्वप्ननिदर्शनं इति। यद्वा वक्ररक्तपुष्पमृणालशून्यं वर्षा ऽपमानेन लदं तत्कृत
मालाधारी। अभ्यंगं तलं सेचनमर्दनं जलाशयमित्यमरः।। २८।। अन्यानि वनभूकर्णा सप्तानां पंचनेत्रं विनासिका। एकजिह्वे त्रिपंचत्व लक्षणं
विष्णुधाविदुरित्यादीनि २९ निशि व्युष्टायां निहतायां अभिसमुत्थिते उदयपर्वतादिति शेषः ३० पणवगोमुखादिकं तुर्यं ३१ ब्रह्माण

स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनं यायान्नलदमाल्येकस्तैलाभ्यंगो दिगंबरः २८ अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च। पश्य
न्मरणसंत्रस्तो निद्रां लेभे न चिंतया २९ व्युष्टायां निशि कौरव्य सूर्ये चाद्भिः समुत्थिते। कारयामास वै कंसो मल्लक्रीडामहोत्सवं ३० आ
नर्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे। मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ३१ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः। यथोपजो
षं विविशू राजानश्च कृतासनाः ३२ कंसः परिवृतो मात्यै राजमंच उपाविशत्। मंडलेश्वरमध्यस्थो हृदयेन विदूयता ३३ वाद्यमानेषु
तूर्येषु मल्लतालोत्तरेषु च। मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः समाविशत् ३४ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च। त आसेदुरुप
स्थानं वल्गुवाद्यप्रहर्षिताः ३५ नंदगोपादयो गोपा भोजराजसमाहुताः। निवेदितोपायनास्त एकस्मिन्मंच आविशन् ३६ इति श्री
भागवते महापुराणे दशमस्कंधे चत्वारिंशोध्यायः ।। ।।

ब्रह्ममंडलेश्वराः पुरोगमा मुख्या येषां ते तथा। यथोपजोषं यथासुखं। राज्ञो विशिनष्टि। राजान इति ३२ विदूयता तप्यमानेन ३३ मल्लानां ताल
शब्दोत्तरेषु। उत्तरैः श्रावित तालशब्देष्वित्यर्थः। उपाध्याया मल्लविद्याचार्याः तैः सहिताः ३४ कांश्चिन्मल्लान्नामानि दिशति। चाणूर इति। ये चाणूर
प्रभृतयः त एव मल्लेषु प्रधानाः त एव वल्गूपस्थानं रंगसमीपं ३५ भोजराजेन समाहूता ये नंदादिगोपास्ते किमकुर्वन्नित्यत आह। नंदगोपादय इति।
निवेदितोपायनाः दत्तप्राभृताः ३६ इति दशमे चत्वारिंशोध्यायः ।। ।।

राम
१२९

कृष्णरामाभ्यां नंदादिभिः सह स्थितयुतः एष गिरितिसंशयनिरासार्थं तत्कर्म कथयति। अथेति। कृतशौचौ मुखप्रक्षालनादिनावाप्तशुद्धी। मल्लाक्रि
तंपर्यासं स्वर्णाशौचं प्रचेरयेः सर्वं दृष्ट्वा नत्वे पयोस्सो अग्निवत्सर्वदाहका इत्यर्थः। अत्रापि विशेषोऽस्तीत्याह। परंतपाविति। शत्रूणामेव तापकौ न स
र्वेषामित्यर्थः। मल्लदुंदुभिनिर्घोषं मल्लयुद्धोचितदुंदुभिध्वनिं मल्लयुद्धं द्रष्टुं तत्समीपमाजग्मतुः १ २ परिकरं कक्ष्याबंधसुदृढबंधं कांचीं वा। कु
टिलालकान्संगृह्य एकीकृत्य बध्वा ३ अपक्राम अपसर। यमसादनं यमगृहं ४ बलादाकर्षणे कालः। मृत्युर्वा कालो मृत्यो यमे चैवेति। संज्ञारे

श्रीशुक उवाच अथ कृष्णश्च रामश्च कृतशौचौ परंतपौ। मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः १ रंगद्वारं समासाद्य तस्मि
न्नागमवस्थितं। अपश्यत्कुवलयापीडं कृष्णोंबष्ठप्रचोदितं २ बध्वा परिकरं शौरिः समुह्य कुटिलालकान्। उवाच हस्तिपं वाचा मेघ
नादगंभीरया ३ अंबष्ठांबष्ठ मार्गं नौ देह्यपक्राम मा चिरं। नोचेत्सकुंजरं त्वाद्य नयामि यमसादनं ४ एवं निर्भर्त्सितोंबष्ठः कुपितः
कोपितं गजं। चोदयामास कृष्णाय कालांतकयमोपमं ५ करींद्रस्तमभिद्रुत्य करेण तरसाग्रहीत्। कराद्विगलितः सोमुं निहत्यांघ्रि
ष्वलीयत ६ संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवं। परामृशत्पुष्करेण स प्रसह्य विनिर्गतः ७ ।। ।।

तको रुद्र इव। रुद्रो माविशांत केति श्रुतिः। क्रोशाजननेपमद्रवस्थितः कालांतकयमोपमं तं ५ करींद्रकराद्विगलितः विश्लथितः सन्नमुं
अमुं करींद्रं निहत्य मुष्टिना प्रहृत्य करींद्रस्यांघ्रिषु पादेष्वलीयत निलीनोऽभूत ६ अचक्षाणः अपश्यन्। घ्राणं दृष्टिर्यस्य स तथा। गजो घ्राणेन पाद
मध्ये निलीनं केशवं ज्ञात्वा पुष्करेण शुंडाग्रेण तं कृष्णं परामृशत् आकृष्टवान्। स कृष्णः पुष्करग्रहणात् प्रसह्य सहसा विनिर्गतः ७ ।।

द०पू०

विनिर्गत्य किंचित्कारेति तत्राह। पुच्छ इति। पंचविंशद्धनुःपरिमितस्थलं पर्यंतं नागं सर्पं ८ सोऽच्युतः। सव्यदक्षिणतो वभ्राम पुच्छं गृहीत्वेति शेषः। प रिपरितभ्रा वर्तमानेन पुनःपुनः सव्यतो दक्षिणतो भ्रमता गजेन गृह्यत इति। कवमिव। बालको भ्राम्यमाणेन गोवुच्छेन गृहीतेन भ्रमति यथा तथेति ९ ततः किमनया लीलयेति मत्वा पुच्छं मुक्त्वा करोइस्याभिमुखं गत्वा पाणिना वारणं प्रहृत्य प्राद्रवदित्यन्वयः। ततः किमभूदिति तत्राह। पापयामा

१३०

पुच्छे प्रगृह्यातिबलं धनुषः पंचविंशतिं। विचकर्ष यथा नागं सुपर्ण इव लीलया ८ स पर्यावर्त्तमानेन सव्यदक्षिणतोऽच्युतः। वभ्रामभ्रा म्यमाणेन गोवत्सेनेव बालकः ९ ततोऽभिमुखमभ्येत्य पाणिनाहत्य वारणं। प्राद्रवत्पातयामास स्पृश्यमानः पदे पदे १० स धावन्क्रीडया भूमौ पतित्वा सहसोत्थितः। तं मत्वा पतितं क्रुद्धो दंताभ्यां सोऽहनत्क्षितिं ११ स्वविक्रमे प्रतिहते कुंजरेंद्रोऽत्यमर्षितः। चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा १२ तमापतंतमासाद्य भगवान्मधुसूदनः। प्रगृह्य पाणिना हस्तं पातयामास भूतले १३ पतितस्य पदाक्रम्य मृगेंद्र इव लीलया। दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः १४ मृतकं द्विपमुत्सृज्य दंतपाणी विरेजतुः। अंसन्यस्तविषाणासृङ्मदबिंदुभिरंकितो विरूढस्वेदकणिकावदनांबुरुहो बभौ १५ वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ। रंगं विविशतू राजन्गजदंतवरायुधौ १६ ॥

सेति। प्राद्रवत्कुवलः करीडया पातयामास स्व एव पतनं ज्ञात्वा गमयामास। गजोऽपि तमज्ञात्वा द्रवदित्यर्थः १० ३ तेन दंतेन हस्तिपान्महामात्रान् १४ द्विपांसं न्यस्तं विषाणो यस्य असृजा रुधिरेण मदजलबिंदुभिश्च विरूढा विस्तृता स्वेदजलकणिका यस्मिन्निरतिशयस्वेदकणिकं तादृशं वदनांबुरुहं यस्य स तथा १५ १६

राम

१३०

मल्लानामशनिरिव मा समानाः। नृपर्षभैर्वा योगिभिः परं तत्त्वं ब्रह्म। ज्ञानवैराग्यव्यक्तमिति च। भोजपतेः कंसस्य मृत्युरिव नित्यत्वे वेतियोजनं १७ मनस्वी शूरोऽपि तद्विद्विजे ओविजी भयचलनयोरिति धातुः। भीतोऽभूत १८ देहप्रभया निरीक्षतां मनः क्षिपंतौ त्राकर्षंतौ १९ नागराः नगरवासिनः राष्ट्राः जनपदवासिनः प्रकर्षवेगेन उत्कलितमुत्फुल्लं मीलनमाननं च येषां ते तथा २० तयोः कृष्णरामयोः रूपगुणरूपगुणः

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः। मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः १७ हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ। कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप १८ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगंबरौ। यथा नटावुत्तमवेषधारिणौ मनः क्षिपंतौ प्रभया निरीक्षतां १९ निरीक्ष्य तावुत्तमपूरुषौ जना मंचस्थिता नागरराष्ट्रका नृप। प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननं २० पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया। जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुभिः २१ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतं। तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥ २२ ॥ एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि। अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि २३ स एष किल देवक्यां जातो नीतश्च गोकुलं। कालमेतं वसन्गूढो ववृधे नंदवेश्मनि २४ ॥ ॥

माधुर्यं तेन यद्वा रूपगुणेन कीर्त्तिगुणेन वा माधुर्येण वाच्य इति शेषः। प्रागल्भ्येन वैशारद्येन च स्मारिताः स्मृतिं कारिताः। रूपं शब्दे पशोरस्रो कडू त्वादेः २२ ३ एतं कालं एतावंतं कालं २४ ॥ ॥

अंतनायानीता। गृह्यकाः शंखचूडः २५ ७ अमंचरंतीति २८ इतिवदंतिअनेन श्लोकेन २९ ३० १ वीर्येण पराक्रमेण संमतो सम्यक्प्रख्या तो। नियुद्धं बाहुयुद्धं मल्लयुद्धमितिया वत्तत्र कुशलो निपुणो ३१ तत्कथमवगतमिति तत्राह। नित्येति। नियुद्धेन क्रीडंतः गोपाला वत्स

पूतनानेननीतां तं चक्रवात स्वरूप दानवः। अर्जुनौ धेनुकः केशी गुह्यकोन्ये च तद्विधाः॥ २५॥ गावः सपाला एतेन दावाग्नेः परिमोचिताः। का लियो दमितः सर्पः शक्रस्य विमदः कृतः २६ सप्ताहमेकहस्तेन धृतोद्रिप्रवरोमुना। वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं २७ गोप्य स्य नित्यमुदितहसितप्रेक्षणं मुखं। पश्यंत्यो विविधांस्तापांस्तरंति स्म श्रमं मुदा २८ वदंत्यनेन वंशोयं यदोः सुबहुविश्रुतः। श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः २९ अयं चास्याग्रजः श्रीमान्रामः कमललोचनः। प्रलंबो निहतो येन वत्सो ये बकादयः ३० ज नेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च। कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ३१ हे नंदसूनो हे राम भवंतौ वीरसंमतौ। नियु द्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा ३२ प्रियं राज्ञः प्रकुर्वत्यः श्रेयो विंदंति वै प्रजाः। मनसा कर्मणा वाचा विपरीतमतोन्यथा ३३ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटं। वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ३४ तस्माद्राज्ञः प्रियं यूयं वयं च करवाम हे। भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ३५ तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः। नियुद्धमात्मनोभीष्टं मन्यमानोभिनंद्य च ३६ श्रीभगवानुवाच प्रजा भोजपते रस्य वयं चापि वनेचराः। करवाम प्रियं नित्यं तन्नः परमनुग्रहः ३७ ॥ ॥

मालाश्च गोवत्सांश्चचारयं मीति किं वहुंत्यावगतमित्यर्थः ३४ किं फलं तेन फलमिति तत्राह। भूतानीति ३५ ६ स्वर्भं भोजपतेः प्रजाः वयं चापि विशेषोस्मि वयं वनेचराः प्रयंतस्समीपचराः। अतो विशेषप्रियाश्च तथापि वयं तस्य नित्यं प्रियं करवाम। नाज्ञियामितियत्तन्नस्मा त्परमनुग्रह एव ३७ ॥ ॥

तत्रापि किंचित्कर्तव्यमस्तीत्याह। बाला इति। वयं बाला इति यस्तः तुल्यबलैर्मल्लैः समं नियुद्धमिदमित्ययमधर्मो मा स्पृशेन्न स्पृशतु ३८ चा णूरः स्वश्लोकं परिहरति। नेति ३९ अनयोरन्यायलक्षणः अधर्मः। विक्रमविक्रमश्च मुष्टिकोवलेन रामेण सह विक्रमं करोत्विति ४० इति दशमे एकचत्वारिंशोध्यायः एवं चाणूरेणाक्रमप्रकारेण चिंतितः संकल्पो मनोरथो येन स तथा। हेविमुद्गरांस्तमार्थं प्रत्यारंभे च सिद्धे

बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितं। भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ३८ चाणूर उवाच न बालो न किशोरस्त्वं बलश्च बलिनां वरः ३९ लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ३९ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोत्र वै। मयि विक्र मवार्ष्णेय बलेन सह मुष्टिकः ४० इति श्रीभागवते महापुराणे दशमस्कंधे एकचत्वारिंशोध्यायः शुक उवाच एवं चिंतितसंकल्पो भगवान्मधुसूदनः। आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः १ अस्फोटयह स्तौ हस्ताभ्यां पद्भ्यामेव पुनः पुनः। विष्टभ्य च संगम्य परिक्रम्य परस्परं। हस्ताभ्यां हस्तयोर्बध्वा पद्भ्यामेव च पादयोः। विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया २ अ रत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी। शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ३ परिभ्रामणविक्षेपपरिरंभावपातनैः। उ त्सर्पणापसर्पैश्चाप्यन्योन्यं प्रत्यरुध्यतां ४ ॥ ॥

हेतिच १ तत्र मल्लयुद्धकरणप्रकारं कथयति। हस्ताभ्यामिति। आस्फोट्य हस्तौ हस्ताभ्यां ऊरू चैव परस्परं। विष्टभ्य संगम्य परि क्रम्य परस्परमिलेकंश्लोकमादित्वेन केचित्पठंति २ ३ विक्षेपश्चाकृष्य मोचनं। अवपातनं अधोमुखत्वेन पातनं। उत्सर्पणं उत्क्षेपः अपसर्पः पृष्ठतो गमनं ४ ॥ ॥

द०पू०

वन्न मनसुत्वानीकरणं अभिचकर्तुः कृष्ण्यानि युद्धं कृतवंतौ। मल्लयुद्धं निपुद्धनाविंशद्भेदं प्रचक्षते। द्वात्रिंशद्भेदमपरे चत्वारिंशद्भिधं तथो तिसंख्यामत्रिजयवचनात्सर्वं नियुद्धविधिदर्शनार्थं भगवतैवं विक्रीडितं तत्र द्विधा यासामावाद्यमेवार्थ उपरिमेसे वियुद्धविधिभिर्विविधैस्तु तेन तिसंख्यामवि... बालबलवतोः कृष्णचाणूरयोः युद्धं तत्त्वेस्य वरूथशः संघशः ६ राजसभायामासीदंतु प्रविशंतीति राजसभा वैरुपुधात इत्यादिनासूच्यते च ५ ... पश्यतः सतस्त्यनेन उभयेषां मध्ये धर्मः प्राप्त इति दसे षां कोप्य मध्यर्मदित्याह। य इति बालस्य बलवता सह युद्धमन्विच्छंति अनुरूलं मन्यंते। राज्ञः पश्यतः

१३२

तत्यापनैरुन्नमनै आलनैर्छापनैरपि। परस्परं जिगीषंता वन्योन्यमभिचक्रतुः ॥५॥ तद्बालबलवद्युद्धं समेताः सर्वयोषितः। ऊचुः परस्परं राजन्सानुकंपा वरूथशः ६ महानयं बताधर्म एषां राजसभासदां। ये बालबलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ७ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ। क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ८ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत्। यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ९ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन्। अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते १० वल्गतः शत्रुमभितः कृष्णस्य वदनांबुजं। वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ११ किं न पश्यत रामस्य मुखमाताम्रलोचनं। मुष्टिकं प्रति सामर्षं हाससंरंभशोभनं १२ ॥ ॥

पतोकथं मध्यर्मश्चासीदिति तत्राह। अक्षेति वज्रवत्सारा रणि बलानि यासां सर्वाणि अंगानि करचरणादीनि ययोस्तौ तथा। सारो बलेस्थिरांशे श्रेष्ठे इत्यमरः ८ समाजस्य सभ्यसमूहस्य ९ अर्थतो मचात्यियां कुर्वंतीत्याह। य इति। किमित्यप्रवेश इति तत्राह। अब्रुवन्निति न्याये वरर्थं वदितिच ८ ... अब्रुवत्रिविधं रीतं ब्रुवन्। आत्मसर्वांगसंबंधमलं किल्बिषं प्रश्नुत इति चा अनपायिमलं किल्बिषमित्यर्थः १० अमपर्यायंश्रमवारिव्याप्तं ... संपश्यकोशं पद्ममुकुलं ११ हे सख्यः रामस्य मुखं न पश्यत किं पश्यतेत्यर्थः। अमर्षेण सहितो हासः सामर्षहासः। तेन संरंभेण च शोभनं चानुतं १२

राम

१३२

इत्यां लिंगेन लक्षणेन गूढः छन्नः अयं कृष्णनामा पुराणपुरुषः यद्यासु व्रजभूमिषु विक्रीडयांचक्रीडेयुपाञ्चति गच्छति प्रादाभ्यामिति शेषः। गाः पालयन् गिरात्रं चति चताब्रजभुवः सातिरिष्ठतः पुण्याः पावना। वत आश्चर्यविषये। स्थितिः। किंविशिष्टः वनेविद्यमानानि विचित्राणि नानावर्णानि माल्यानि पुष्पाणि यस्य सः तथा गिरित्रं रुद्रं वै रमाचित्ताङ्घ्रिः व्रजभुविभ्रमेरेरमतैः भुंक्तः कारणे गोपालैः रङ्घ्रितः श्रीचरणः १३ अमुष्येत्यस्य यल्लावण्यम् रमथनोयं श्रृंगाररमयमाद्यत्पत्र नवेदं ... इत्याह। अनन्यसिद्धमिति। अन्यस्मात्तत्कृतेङ्गतं न भवतीति अन्येषामविद्यमानं वा। अनुसवं प्रतिक्षणमभिनवं दुर्लभं ज्ञानमंतरेणदुष्प्रापं श्रियोयशसश्चैकांतधामनियतस्थानं रूपं व्याख्यपलक्षणगुणान्नयाद्दग्भिः पिबंति तागोप्यः किं तपः अचरन्

पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः। गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमार्चितांघ्रिः १३ गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धं। दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य १४ या दोहनेवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ। गायंति चैनमनुरक्तधियोश्रुकंठ्यः धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः १५

रश्चकुरित्यन्वयः १४ या गोप्यो गोदोहनादावेनं कृष्णं गायंति ता गोकुलस्त्रियः पुण्या इत्यन्वयः। अवहनने व्रीहितावनकाले प्रेंखमथन वेलायां उपजल्पेमिथः संभाषणसमये उपलेपइति केचित्पठंति। गोमयादिना स्थललेपनकाले। प्रेंखेंखने डोलाचलनकाले। अर्भरुदिते बालरोदनकाले। उक्षणे धांगणसेचनसमये। मार्जने स्नानकाले। मार्जनमिति केचित्। आदिशब्देन स्खलनपतनादिकं गृह्यते। अर्भरुदिते॰ उरुक्रमचित्तेयमः कालविशेषोपासांता स्त्रयः। उरुक्रमचित्तेन गतो यानं यासां ता इति वा १५ ॥ ॥

द०पू०

वेणुरवं निशाम्य व्रजान्निर्गत्य पथि स्थित्वा १६ ७ इतरश्चाणूरः १८ ग्लानिं ग्लानं संदेहक्लेशं १९ २० ३ उर्व्युपस्थे भूमिपृष्ठे २४ सा

१३३

प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोस्य निशम्य वेणुं। निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यंति सस्मितमुखं सदयावलोकं १६ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः। शत्रुं हंतुं मनश्चक्रे भगवान्भरतर्षभ १७ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ। युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ १८ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः। चाणूरो भज्यमानांगो मुहुर्ग्लानिमवापह १९ सश्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ। भगवंतं वासुदेवं क्रुद्धो वक्षस्यताडयत् २० नाचलत्तत्प्रहारेण मालाहत इव द्विपः। बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन्हरिः २१ भूपृष्ठे पोथयामास तरसा क्षीणजीवितं। विस्रस्ताकल्पकेशस्रगिंद्रध्वज इवापतत् २२ तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै। बलभद्रेण बलिना तलेनाभिहतो भृशं २३ प्रवेपितः सरुधिरमुद्वमन्मुखतोर्दितः। व्यसुः पपातोर्व्युपस्थे वाताहत इवांघ्रिपः २४ ततः कूटमनुप्राप्तं रामः प्रहरतां वरः। अवधील्लीलया राजन्सावज्ञं वाममुष्टिना २५ तर्ह्येव हि शलः कृष्णप्रपदाहतशीर्षकः। द्विधा विदीर्णस्तोशलक उभावपि निपेततुः॥२६॥ चाणूरे मुष्टिके कूटे शले तोशलके हते। शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः २७ गोपान्वयस्यानाकृष्य तैः संसृज्य विजह्रतुः। वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ २८ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः। ऋते कंसं विप्रमुख्याः साधवः साधु साध्विति २९ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट्। न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ३० ॥ ॥

वज्ञं अनायासं २५ २६ २७ संसृज्य संगत्य। वल्गंतौ नृत्यंतौ वीक्ष्य। रुतनूपुरौ रुतनूपुरा विति केचित्। तुलाकोटिः स्यान्नूपुर इति २८ ३०

राम

१३३

निःसारयत निर्गमय ३१ २ लघिम्ना पक्षिवत् लाघवेन। अव्ययः योगवित् प्रधानपुरुषेश्वर इत्यर्थः ३३ मनस्वी धीरः ३४ दुर्विषहे चोग्रे च तेजसी बला [illegible] यस्य स तथेति ३५ उत्तुंगमंचादवपतनात् गात्रभंगः कथं नाभूत्तत्राह विश्वाश्रय इति। विश्वमाश्रयोपस्येति विग्रहे उक्तचोद्यानिष्टारस्तत उक्तं। आत्मतंत्र इति। अपराधीनत्वात् ३६ ८ स कंसः चीर्णस्य फलदानार्थकं सोपि स्थितो वासुः संसारावस्थायां तदुद्विग्नबुध्याभीतबु

निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात्। धनं हरत गोपानां नंदं बध्नीत दुर्मतिं ३१ वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः। उग्रसेनः पिता चापि सानुगः परपक्षगः ३२ एवं विकत्थमाने वै कंसे प्रकुपितोव्ययः। लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ३३ तमापतंतमालोक्य मृत्युमात्मन आसनात्। मनस्वी सहसोत्थाय जगृहे सोसिचर्मणी ३४ तं खड्गपाणिं विचरंतमाशु श्येनं यथा दक्षिणसव्यमंबरे। समग्रहीद्दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ३५ प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुंगमंचात्। तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतंत्रः ३६ कंसोपि पिष्टस्तेन जगत्त्रयैकनिवासभूतेन निपात्य सोधः। तेनात्मतंत्रेण च पीडितोसुं तत्याज राजन्निमिषांतरेण ३७ तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः। हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेंद्र ३८ स नित्यदोद्विग्नधिया तमीश्वरं पिबन्नदन्वा विचरन्स्वपञ्श्वसन्। ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमाप ३९ ॥ ॥

ध्या तत्र च मरणात् उद्विग्नबुध्या तमीश्वरं ध्यायन्नित्यदाप्पनादो पुनः दैत्यस्य मृत्युसमये मंचे अग्रतः स्थितं यदच्युतमविनाशि नित्यं च क्रसुदर्शनं च सुधं यस्य तत्तथा। ददर्श हरेः रूपमाप आश्लिष्ट इत्यर्थः। अन्यस्त्वच्युतं च कंसे प्रेवायुधं पश्यन् सम्मोहं देवताश्च चक्रायुधमन्यथा ज्ञानसाध्यं यद्दर्शतदेव तमो देवतापाः रूपं नित्यं दुःखलत्तर्णं अपदुरवापमित्युभयत्र समं। चक्रं दैत्ये जलावर्ते रथांगे च च राष्ट्रयोः। सेनारेमंडलेष्टत्रे छद्मभेदार्थभेदयोरिति च ३९ ॥

द॰ स्क॰

सिंहव्याघ्रो मृगाधिप इति च ४१ विभूतयः हरिविभूतिसन्निधानपात्राणि ४२ ३ वीरशय्यायां रणभूमौ विरलेषुः विप्रलापं चक्रुः। विसृजंत्यः ददत्यः। त्यागो विहापितं दानमुत्सर्जनविसर्जने इत्यमरः ४४ करुणया अनाथं ते प्रार्थयंते इति करुणा अनाथवत्सल स्निग्ध ते तव विद्यमाना येन पुरा इमना था॥

२३४

तस्यानुजा भ्रातरोऽष्टौ कंकन्यग्रोधकादयः। अभ्यधावन्नतिक्रुद्धा भ्रातुर्निर्वेशकारिणः ४० तथातिरभसांस्तांस्तु संयत्तान्रोहिणीसुतः। अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ४१ नेदुर्दुंदुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः। पुष्पैः किरंतस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ४२ तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः। तत्राभीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ४३ शयानान्वीरशय्यायां पतीनालिंग्य शोचतीः। विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ४४ हा नाथ प्रिय धर्मज्ञ करुणानाथवत्सल। त्वया हतेन निहता वयं ते सगृहप्रजाः ४५ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ। न शोभते वयमिव निवृत्तोत्सवमंगला ४६ अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणं। तेनेमां भो दशां नीतो भूतध्रुक्को लभेत शं ४७ सर्वेषामिह भूतानामेष हि प्रभवाप्ययः। गोप्ता च तदवध्यायी न क्वचित्सुखमेधते ४८ श्रीशुक उवाच राजयोषित आश्वास्य भगवाँल्लोकभावनः। यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ४९ मातरं पितरं चैव मोचयित्वाथ बंधनात्। कृष्णरामौ ववंदाते शिरसा स्पृश्य पादयोः ५० देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ। कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ ५१ इति श्रीभागवते महापुराणे दशमस्कंधे कंसवधो नाम द्विचत्वारिंशोऽध्यायः ॥ ॥

वयमिति वा ४५ ७ प्रभव उत्पादकः अप्ययः संहारहेतुः प्रभवाप्ययौ हि भूतानामिति श्रुतिः। यथा सुखं भवति तथा नैधते न वर्द्धते ४८ संस्थां मृतसंस्कारं ४९ ५० सस्वजाते आलिंगनं कुर्वाते ५१ इति दशमे द्विचत्वारिंशोऽध्यायः ॥ ॥

राम

२३४

मुरारेर्भगवतो बंधनशान्तेः प्रकारः प्रतिपाद्यतेऽस्मिन्नध्याये तत्र शुकः कंसवधानंतरं श्रीकृष्णेन किमकारीति राज्ञो मानसं प्रश्नं परिहरति। पितराविति। उपलब्धः अर्थः माहात्म्यं याभ्यां तौ वसुदेवदेवक्यौ तथा विदित्वा भगवत्त्वं नूनं अस्मत्सुतो नायं ताभ्यां ज्ञातो तथा विदितौ ज्ञात्वा मा भूत् तत्तत्तमस्त्वयो मा भूतामिति निजां मायां बंधकरणं किंचित् तता न विस्मृतवान् १ प्रीणयन्प्रीतिमुत्पादयन्। प्रश्रये प्रकृष्टसेवायां अवनतो नम्रः २ अस्मत्तो निमित्तात् नित्योत्कंठितयोर्युवयोः पुत्राभ्यां आवाभ्यां बाल्यपौगंडकैशोराः वयोऽवस्थाः पित्रोरानंदहेतवो न अभवन्। सुखं रतो बाल्यादिकं किंचित् लीलानं प्राप्तः इत्यर्थः ३ अत्र निमित्तमाह। नेति। दैवहतयोर्भाग्यहीनयोः नौ आवयोः भवत्समीपे वासो न लब्ध इति यस्मात्। येवालात्मे पित्रोर्गृहे स्थिताः मुदं विंदंते सापि न

श्रीशुक उवाच पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः। मा भूदिति निजां मायां ततान जनमोहिनीं १ उवाच पितरावेत्य साग्रजः सात्वतर्षभः। प्रश्रयावनतः प्रीणन्नंब तातेति सादरं २ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि। बाल्यपौगंडकैशोराः पुत्राभ्यामभवन् क्वचित् ३ न लब्धो दैवहतयोर्वासो नौ भवदंतिके। यां बालाः पितृगेहस्था विंदंते लालिता मुदं ४ सर्वार्थसंभवो देहो जनितः पोषितः पुनः। न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ५ यस्तयोरात्मजः कल्प आत्मना च धनेन च। वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयंति हि ६

लब्धेत्यन्वयः। विंदत इति छांदसः। अभयं प्रतिष्ठां विंदत इति श्रुतिः ४ सर्वेषामर्थानां मोक्षादिपुरुषार्थानां संभव उत्पत्तिर्यस्मात्स सर्वार्थसंभवो देहो याभ्यां जनितः पुनः पोषितश्च तयोः पित्रोः शतायुषा वर्षसहस्रेण पि निर्वेशं निष्कृतिं न याति मर्त्यः। अल्पायुः ५ अल्पायुश्चेत्कथं निष्करोतीत्यतो यावदायुः पितृपरिचर्याकार्यमन्यथा अनर्थः स्यादिति वक्ति। यस्तयोरिति। यस्तयोः पित्रोः आत्मना प्रेषितपुरुषमंतरेण स्वयमेव धनेनाल्लं वृद्धिजनके न च द्रव्येण वृत्तिं जीवनं न दद्यात्। तं प्रेत्य यमपकस्वमांसं खादयंति यमभय इति शेषः। आत्मज औरसोपि निर्धनश्चेत्किं कुर्यादित्यत आह कल्प इति। हेतुना धनेन च कर्तुं समर्थ इत्यर्थः। हिनात्र हेतौ च माता पितरा विति स्मृतिं प्रमाणयति ६ ॥ ॥

स्मृतिस्मृतिमर्थतः प्रतीकयतिश्चात्तरमिति। मातरंसर्वावस्थासुमानयोग्यां पितरंवृद्धंजरसाग्रस्तं भार्यांभरणपोषणामपिसाध्वीं अनन्यव्रतां शुद्धतं शि
शुंच्छ्रजीवनपत्नाबसमर्थं गुरुंज्ञानोपदेष्टारं विप्रंज्ञानपूर्णं प्रपन्नंशरणंगतंच एतानविभ्रदभरणमकुर्वन्सः श्वसन्नपि जीवन्नपि मृतः मृतकल्प इत्यर्थः।
किंचनवृद्धं कांचन साध्वीं कंचन शिशुंपि स्त्रीयां शयाने कंचन विप्रमितिद्रष्टव्या श्चेतव्यमिति ७ नन्वेवमस्मत्प्रश्नतो किमितितत्राह। तत्रावितिं
यतएवंशास्त्रार्थ स्तस्मात्कंसात् कसिहिंसायामितिधातोः सर्वहिंसाधिकारणत्वेन तत्रास्मो भोजपतेर्नित्यमहोरात्रमुद्विग्नचित्तयोः। अतएववा

मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुं। गुरुं विप्रं प्रपन्नं च कल्पोविभ्रछ्वसन्मृतः ७ तत्रावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः। मो
घमेते व्यतिक्रांता दिवसा वामनर्चतोः ८ तत्क्षंतुमर्हथस्तात मातर्नौ परतंत्रयोः। अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं ९ इतिमा
यामनुष्यस्य हरेर्विश्वात्मनो गिरा। मोहितावंकमारोप्य परिष्वज्यापतुर्मुदं १० सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ। न किंचिदू
चतू राजन्बाष्पकंठौ विमोहितौ ॥११॥ एवमाश्वास्य पितरौ भगवान्देवकीसुतः। मातामहं तूग्रसेनं यदूनामकरोन्नृपं १२ आह चा
स्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि। ययातिशापाद्यदुभिर्नासितव्यं नृपासने १३ मयि भृत्य उपासीने भवतो विबुधादयः। बलिं हरंत्य
वनताः किमुतान्ये नराधिपाः १४

मनर्चतोः परिचर्यामकुर्वतोः। अल्पकयोः शक्तिसामर्थ्यहीनयोः नौ आवयोरेते ह्यतः पूर्वे दिवसाः मोघा व्यतिक्रान्ताः इत्यन्वयः ८ एतदेवविवि
नष्टि। तत्क्षंतुमिति दुर्हृदोः दुःखयुक्तमनसोः दुरधीमनदुःखयोरितियादवः ९ विश्वात्मनः सर्वांतर्यामिणः १० ११ स्वाःप्रजाः अस्मान् र
क्षमुंज्ञाज्ञापयं। यद्वा प्रजाश्चाशुकांक्षिदस्मानिति १३ ययातिशापान्नृपासने यदुभिर्नासितव्यमनहस्थानत्वमिति शंकांत्यजेतिशेषः। शंकात्या
गेकेमुत्यनमिति माहामयीति। उपासीनेसेवमानेसति १४ ॥ ॥

विध्वंसंसर्वसृजतिददाती ति विश्वसृट्‌कृ। दिश्याज्ञानीयासि द्वाइतिवुभोपमास्त्रुक्ताइवलब्धराम्राम्यांगतज्वराः नष्टसंतापाः। क्षुलेराम्रेणरमणेनास्त्या
वा १७ ८ ततमधुरयांज्ञवयमोत्र दृश्यपितुवानः आसर १९ ततकिमौषधमितितत्राह। विकंदइति २० आत्मनःज्ञस्मादपि २१ पुलीताश्र
पुष्पातांपोषणमकुर्वतांपोषस्तस्मीपोषणारक्षणयोः २१ वयंनोस्माकं ज्ञातीवक्षे ह्रुनिमित्तेनदुःखितास्मुष्मान्दृष्टुमेष्यामो ब्रुवाणंजंमात

सर्वान्स्वज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान्। यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् १५ सभाजितान्समाश्वास्य विदेशावासक
र्शितान्। न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वसृट् १६ कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः। गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः
१७ वीक्षंतोऽहरहः प्रीता मुकुंदवदनांबुजं। नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणं १८ तत्र प्रवयसोऽप्यासन्युवानोऽतिबलौजसः। पिबंतोऽक्षै
र्मुकुंदस्य मुखांबुजसुधां मुहुः १९ अथ नंदं समासाद्य भगवान्देवकीसुतः। संकर्षणश्च राजेंद्र परिष्वज्येदमूचतुः २० पितर्युवाभ्यां स्निग्धा
भ्यां पोषितौ लालितौ भृशं। पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि २१ स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत्। शिशून्बंधुभि
रुत्सृष्टानकल्पैः पोषरक्षणे २२ यात यूयं व्रजं तात वयं च स्नेहदुःखितान्। ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं २३ एवं सांत्व
य्य भगवान्नंदं सव्रजमच्युतः। वासोऽलंकारकुप्याद्यैरर्हयामास सादरं २४ इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः। पूरयन्नश्रुभिर्नेत्रे
सह गोपैर्व्रजं ययौ २५ ॥ ॥

इदानीमागंतुकार्यमस्ति तत्संसाध्येत्याह। विधायेति २३ सांत्वय्य सांत्वयित्वा सव्रजं सगोपं। वासोभिरलंकारैश्च कुप्याद्यैः रजतहेमादि
व्यतिरिक्तद्रव्यश्रेष्ठैश्च। अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकमितिहलायुधः २४ २५ ॥ ॥

द० पू०

द्विजसंस्कृतिं ब्राह्मणसंस्कारमुपनयनलक्षणं २६ गावोगाः रुक्मस्य वर्णस्य क्षौमाणि पुष्पमालाश्च यासां संतीति क्षौममालिनीः २७ याः कृष्णरामयोः
जन्मनक्षत्रे मनसा दत्ताः संकल्पितास्तास्त्वादरात् तयाः कंसेनाधर्मेण हृताः ताश्चापि २८ द्विजत्वमुपनीतत्वं प्राप्य लब्धसंस्कारौ लब्धदेहशुद्धी गायत्रं
व्रतं गायत्रीजपनियमं ब्रह्मचर्यं वा २९ प्रभवो मूलकारणं। नान्येत्येकं पदं। नखनाकशब्दवत्। अन्यस्य सिद्धं न भवतीति नान्यसिद्धं [illegible]
अत एवामलं यज्ज्ञानं तन्नरेहितैर्मनुष्यचेष्टाभिः छादयंतौ ३० यस्मादध्य तस्मात्तत्काश्यं कश्यपगोत्रजातं ३१ यथावदुपसाद्य समित्पाणी उपे

१३६

अथशूरसुतोराजन्पुत्रयोःसमकारयत्। पुरोधसाब्राह्मणैश्चयथावद्विजसंस्कृतिं २६ तेभ्योदाद्दक्षिणागावोरुक्ममालाःस्वलंकृताः।
स्वलंकृतेभ्यःसंपूज्यसवत्साःक्षौममालिनीः २७ याःकृष्णरामजन्मर्क्षेमनोदत्तामनस्विना। ताश्चाददादनुस्मृत्यकंसेनाधर्मतोहृताः २८
ततश्चलब्धसंस्कारौद्विजत्वंप्राप्यसुव्रतौ। गर्गाद्यदुकुलाचार्याद्गायत्रंव्रतमास्थितौ २९ प्रभवौसर्वविद्यानांसर्वज्ञौजगदीश्वरौ।
नान्यसिद्धामलज्ञानंगूहमानौनरेहितैः ३० अथोगुरुकुलेवासमिच्छंतावुपजग्मतुः। काश्यंसांदीपनिंनामह्यवंतिपुरवासिनं ३१
यथोपसाद्यतौदांतौगुरौवृत्तिमनिंदितां। ग्राहयंतावुपेतौस्मभक्त्यादेवमिवादृतौ ३२ तयोर्द्विजवरस्तुष्टःशुद्धभावानुवृत्तिभिः। प्रो
वाचवेदानखिलान्सांगोपनिषदोगुरुः ३३ सरहस्यंधनुर्वेदंधर्मान्न्यायपथांस्तथा। तथाचान्वीक्षिकींविद्यांराजनीतिंचषड्विधं ३४
सर्वंतदमरश्रेष्ठौसर्वविद्याप्रवर्त्तकौ। सकृन्निगदमात्रेणतौसंजगृहतुर्नृप ३५ ॥ ॥

नौस्मप्राप्तवंतौ। भक्त्या देवमिवेत्यनेन यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ विति श्रुतिं सूचयति ३२ अंगैः शिक्षादिभिः उपनिषद्भिर्वेदांतैश्च उपयो
गितीरहस्यज्ञानैर्वासहितान् ३३ सरहस्यं प्रयोगोपसंहारसहितं। धर्मपथः वर्णाश्रमधर्मलक्षणाः पूर्वमीमांसालक्षणो वा न्यायपथाः ब्रह्मतर्की
दितर्कशास्त्रलक्षणाश्च। आन्वीक्षिकी मीमांसाशास्त्रं वेदेतिहासाद्यर्थनिर्णयकं। संधिं च विग्रहं चैव यानमासनमेव च। द्वैधीभावं संश्रयं च षड्गु
णाश्चवयोविदुरितिषड्विधां ३४ सकृन्निगदमात्रेण एकवारपाठमात्रेण ३५ ॥ ॥

राम

१३६

चतुःषष्ट्या संख्यया संख्यातैरहोरात्रैः कालावयवैर्यावतीः तावत्संख्याः कलाः चतुःषष्टिकलाविद्या इत्यर्थः संयत्तौ सम्यक् [illegible] छंदयामास

अहोरात्रैश्चतुःषष्ट्यासंयत्तौतावतीःकलाः। ततश्चकृतविद्यौतौ [illegible] रामकेशवौ। गुरुदक्षिणयाचार्यंछंदयामासतुर्नृप ३६ द्वि
जस्तयोस्तंमहिमानमद्भुतंसंलक्ष्यराजन्नतिमानुषींमतिं। संमंत्र्यपत्न्यासमहार्णवेमृतंबालंप्रभासेवरयांबभूव ३७ तथेत्यथारु
ह्यमहारथौरथंप्रभासमासाद्यदुरंतविक्रमौ। वेलामुपव्रज्यनिषीदतुःक्षणंसिंधुर्विदित्वार्हणमाहरत्तयोः ३८ तमाहभगवानाशुगुरुपु
त्रःप्रदीयतां। योसाविहत्वयाग्रस्तोबालकोमहतोर्मिणा ३९ तमाहवरुणोदेवोविनयावनतःस्थितः। नचाहार्षमहंदेवदैत्यःपंचजना
ह्वयः ४० अंतर्जलचरःकृष्णशंखरूपधरोहरिः। जलमाविश्यतंहत्वागृह्यनाभिसुवाचकः ४१ ततश्चोजलमाविश्यहत्वातंजलवासि
नं। विदार्यजठरंतस्यनापश्यदुदरेर्भकं। तदंगप्रभवंशंखमादायरथमागमत् ४२ ततःसंयमनींनामयमस्यदयितांपुरीं। गत्वाजना
र्दनःशंखंप्रदध्मौसहलायुधः ४३ शंखनिर्ह्रादमाकर्ण्यप्रजासंयमनोयमः। तयोःसपर्यांमहतींचक्रेभक्त्युपबृंहितः ४४ उवा
चावनतःकृष्णंसर्वभूताशयालयं। लीलामनुष्यहेविष्णोयुवयोःकरवामकिं। इत्युक्तस्तेनदेवेशोदेवकीनंदनोब्रवीत् ४५ श्रीभगवा
नुवाच गुरुपुत्रमिहानीतंनिजकर्मनिबंधनं। आनयस्वमहाराजमच्छासनपुरस्कृतः ४६ तथेतितेनोपनीतंगुरुपुत्रंयदूत्तमौ।
दत्वास्वगुरवेभूयोवृणीष्वेतितमूचतुः ४७ ततःप्रीतमनाराजन्निदंवचनमब्रवीत्। सांदीपनिर्महाभागोरामकृष्णावरिंदमौ ४८ ॥

तुः प्रार्थयामासतुः ३६ महार्णवे प्रभासे तीर्थे ३७ वेलां तीरं सीमांतं ३८ योऽसौ गुरुपुत्रः त्वया महतोर्मिणा ग्रस्तः स प्रदीयतामित्यर्
थः ३९ तमाह ४० शंखमत्स्यरूपधरः ४१ ४ सर्वभूतानामाशयो हृदयं स एवालयो यस्य स तथा तं ४५ ४६ ४७ ४८ ॥

दृ०पृ०

गुरुनिष्क्रियायास्तु स्वतन्त्रतिक्रिया मुख्या द्विधानां तु सांगुरोः कोनु कामानां मध्ये कामो वशिष्यते। मद्वेष्पि कामाः सिद्धो भवतीत्यर्थः ४९ ५० भगवन्मनो वशीकरणे र्थंभक्तिरेव प्रधानमितिद्रष्टुमिच्छं हरेर्गोपी वस्तुकं पित्वेनिरूपयित्य
अपश्यंतः ५१ इति दशमे त्रिचत्वारिंशः

१३७

सम्यक्संपादितावत्स भवद्भ्यां गुरुनिष्क्रिया। कोनुयुष्मद्विधगुरोः कामानामवशिष्यते। गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी
४९ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा। आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ५० समनंदन्प्रजाः सर्वाः दृष्ट्वा रामजनार्दनौ। अ
मपश्यंत्यो बह्वहानि नष्टलब्धधना इव ५१ इति श्रीभागवते महापुराणे दशमस्कंधे त्रिचत्वारिंशोध्यायः ४३ श्रीशुक उवा
च वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा। शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः १ तमाह भगवान्प्रेष्ठं भक्तमेकां
तिनं क्वचित्। गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः २ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह। गोपीनां मद्वियोगाधिं म
त्संदेशैर्विमोचय ॥३॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः। मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ४ ॥ ॥

त्रिचत्वारिंशे तत्र कृष्णस्तूद्धवं गोकुलं गमयित्वं नंदादीनां हर्षीनामिति १ एवं विधगुणोपेतमुद्धवं स्वमाह। क्वचिदिति २ मद्वियोगेन
मविरहेणाय आधिर्दुःखं मत्संदेशैर्मदीयाज्ञावचनैः ३ अहमेव प्राणो जीवनं यासां ता मत्प्राणाः। त्यक्ता दैहिका हरीकृत देहधर्माः। दयितं इष्टस्य रामः
दाताऽरं प्रेष्ठं स्वशरीरादेरपिप्रियतमं आत्मानं संततानुगतरूपं ४ ॥ ॥ १३७

स्वस्य भक्तमात्मत्वं कथयति। य इति ये जनाः मदर्थे मां निमित्तीकृत्य त्यक्तलोकधर्माः लोकोरेहस्तद्धर्माः अशनवसनानुलेपनादिलक्षणाः स्वकीये
स्तथा। यद्वा त्यक्ताः स्वर्गादिलोकविषयाः धर्माः पापादिसुकृतलक्षणाः मदर्थे मन्निमित्ते निवृत्तो वर्त्तमानापेक्षा। यद्वा मामुद्दिश्य त्यक्ताः इत्यलोकाश्च
स्तथा। यद्वात्यक्ता स्वर्गादि लोकविषयाः धर्मापायादिसुकृतलक्षणाः अहं तान्बिभर्मि तेभ्यो भीतोस्मि बिभर्मि रक्षिताः। मत्सा सुख्यमावहंतीति। भक्तवश्यतां दर्शयति। बिभर्मि
मर्जनविषयान् नाद्यावात् पेक्षे। अहं ताश्च बिभर्मि तेभ्यो भीतोस्मि बिभर्मि रक्षितास्मि। मत्सा सुख्यमावहंतीति। भक्तवश्यतां दर्शयति। विभर्मि मयि आत्मा
वा ५ विरहेणोत्पन्नमौत्कंठ्यं उत्कंठा रागित्वं तेन विक्लवाः ६ प्रत्यागमनसंदेशैः आगमिष्यति स्वस्येष्टः कृष्ण इत्यादिवाक्यैः। मयि आत्मा

ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं। मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ५ स्मरंत्योंग विमुह्यंति विरहौत्कंठ्यविक्लवाः। धा
रयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन ६ प्रत्यागमनसंदेशैर्वल्लव्यो मे मदात्मकाः। इत्युक्त उद्धवो राजन्संदेशं भर्तुराहृतः ७
आदाय रथमारुह्य प्रययौ नंदगोकुलं। प्राप्तो नंदव्रजं श्रीमान्निम्लोचति विभावसौ ८ छन्नयानः प्रविशतां पशूनां खुररेणुभिः।
वासितार्थेभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ९ धावंतीभिश्च वास्राभिरुधोभारेण वत्सकान्। इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सि
तैः १० गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च। गायंतीभिश्च कर्माणि शुभानि बलकृष्णयोः ११ स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविरा
जितं। अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः १२ ॥ ॥

मतिर्मनन शक्तिर्मतिर्बुद्धिर्यासां ता मत्स्वभावाः ७ विभावसौ सूर्ये निम्लोचति सति अस्तं गच्छति। सूर्यवह्नी विभावसू इति दिवाकर इति के
चित् ८ यानं रथः वासितार्थे संभोगार्थे। गर्भकामिनी वाशिता वास्त्वर्थे माद्दंवलमेषामस्तीति शुष्मिणस्तैः ९ ऊधोभारेणसुक्ताभिः वास्रा
भिर्वत्सलोलुपाभिर्गोभिश्च नादितं गुंफितं गवाच निनदोत्थं फेतियादवः। इतस्ततो विवल्गद्भिः गोपैर्वत्सैश्च सुविराजितं इति पाठः। वल्गद्भिः
उत्पतद्भिः नृत्यद्भिर्वा। इतस्ततो विलंघद्भिरिति केचित्पठंति। विलंघनं कुर्वद्भिः १० २ ॥ ॥

द० पू०

कशिपौ शयनतल्पे १५ । १६ मुक्तः बंधनक्लेशात् १७ दिष्ट्या दैवेन स्वेन कृतेन कृतेनयदूनामिति षष्ठी द्वितीयार्थे कर्मपदमित्यध्याहार्यं वा १८
मातरः मातृः गावो गाः १९ २० । २१ क्रियाः गृहादिविषयाः २२ तदात्मतां तल्लिनैवव्याप्ततां २३ महते अर्थाय प्रयोजनाय २४ नागायुतव

१३८

धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमां। सर्वतः पुष्पितवनं द्विजालिकुलनादितं १३ हंसकारंडवाकीर्णैः पद्मखंडैश्च मंडितं। तमागतं
समागम्य कृष्णस्यानुचरं प्रियं १४ नंदः प्रीतः परिष्वज्य वासुदेवधियार्चयत्। भोजितं परमान्नेन संविष्टं कशिपौ सुखं १५ गतश्रमं प
र्यपृच्छत्पादसंवाहनादिभिः नंद उवाच कच्चिदंग महाभाग सखा नः शूरनंदनः। आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्व्रतः १६
दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना। साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा १८ अपि स्मरति नः कृष्णो मातरं सुहृदः सखी
न्। गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिं १९ अप्यायास्यति गोविंदः स्वजनं सकृदीक्षितुं। तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्ष
णं॥२०॥ दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः। दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना २१ स्मरतां कृष्णवीर्याणि लीलापांगनि
रीक्षणं। हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः २२ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान्। आक्रीडानीक्षमाणानां मनो याति
तदात्मतां २३ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ। सुराणां महदर्थाय गर्गस्य वचनं यथा २४ कंसं नागायुतप्राणं मल्लौ गज
पतिं तथा। अवधीन्नालीलयैव पशूनिव मृगाधिपः २५ तालत्रयं महासारं धनुर्यष्टिमिवेभराट्। बभंजैकेन हस्तेन सप्ताहमदधाद्गि
रिं २६ प्रलंबो धेनुकोरिष्टस्तृणावर्तो बकादयः। दैत्याः सुरासुरजितो हता येनेह लीलया २७ ॥ ॥

त्प्राणो बलं यस्य तथाभूतं २५ अंगुष्ठमध्यमे विस्तृते प्रत्यस्मिन्गुणं सताल इत्युच्यते। एतादृशा तालत्रयपरिमाणं धारे शतालगोकर्णाय
त्रिहस्तरं २६ सुरासुरान्जयंतीति सुरासुरजिताः २७ ॥ ॥

राम

१३८

प्रेमप्रसरेण स्नेहसंरोहेन विह्वलः विवशः २८ अश्रु आस्त्रीत निरंतरममुंचत् २९ ३० नूनमिदानीं ३१ नारायणस्तावर्थैरेरावतो नागं गइतिवत्
नारायणो नाम कश्चित्किं न स्याविलगुरुत्वपाषाणवदितितत्राह। एतावितिः एतो कृष्णरामो विश्वस्य प्रपंचस्य बीजयोनी बीजत्वेन रति हेतुत्वाद्रं तश्चे
नोपजीव्यत्वेनवा योनित्वेन स्वमहिम्ना रेतो निधानस्थानत्वेन कारणत्वेन वाकी त्रितत्ववितिशेषः। बीजं शुक्ले फले हास्मानेद्गतियादवः। योनिस्त्री एणांभगे
स्थानेकारणे ताम्रकेपर्णेतिच। यद्वा विश्वनाम्नो हरेः बीजे फलेनि प्रभ्रूपो योनीगो वद्भूनस्योद्धरणादिकर्माणि तत्वस्यपोष्योप्योपरूपमातृप्रध्य
नोपाश्रिपु वंदनरतिलाभ विष्णुर्भोगेच बीजं फलेध्वनेकलमितित्वा। यद्ययं न विसुष्णुदीगोवईमो दुरणादिकर्म मकृष्यतमानवबालाहाध्यत्वाद्र्त्यादि
हिपाहो वक्ति। अनामेकांलो हित शुक्ल कृष्णां प्रधानादिदमुत्पन्नमित्यादिना प्रकृतेर्बीजयोनित्व प्रतीतेः कथमेतयोर्युज्यत इतितत्राह। इमाविति। पश्च
पपुरुषः प्रकृतिरिति श्रुतेः। प्रधानं प्रकृतिर्मूलकारणमित्यर्थः। अनेन विरिंचस्य कारणत्वबाप्यपि प्रस्तुकेत्याशयेनाह। पुरुषइति। प्रकृतिं प्रकृत्य चैव

श्रीशुक उवाच इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः। अत्युत्कंठोभवत्तूष्णीं प्रेमप्रसरविह्वलः २८ यशोदा वर्ण्यमानानि पुत्रस्य चरिता
नि च। शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा २९ तयोरित्थं भगवति कृष्णे नंदयशोदयोः। वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ३०
उद्धव उवाच युवां श्लाघ्यतमौ नूनं देहिनामिह मानद। नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ३१ एतौ हि विश्वस्य च बीजयोनी रामो
प्रधानं पुरुषः पुराणः। अन्वीय भूतेषु विलक्षणेषु विज्ञायईशात रमोऽपराणे ३२ ॥ ॥

प्रविश्य पुरुषोत्तमइत्यादेः तत्कारणत्वबोधोगतिरुक्ता भवतीति। असंगस्य तत्प्रवेशः कथमित्यत उक्तं पुराण इति। पुरमणतिप्राप्नोतीति। तदेवानुप्रवि
शदिति श्रुतेरसंगस्यापि प्रवेशो युज्यत इत्यर्थः। यद्वा बीजयोनित्वे हेतुमाह। प्रधानमिति। प्रधानत्वात्सर्वस्माद्उत्तमत्वात् एकमेवाद्वितीयमिति श्रुतिः।
तन्नमकृतइत्यत्राह। पुरुषइति। पुरातनपुरुषत्वात्। अन्ये ग्राम अर्वाचीन पुरुषत्वादित्यर्थः। केवलमवतारप्रयोजनं कंसादिहननं न भवति किंतु शिष्टोप
दिष्टज्ञानरक्षणं चेति भावेनाह। अन्वीयेति। इमौ पुराणौ पूर्णानंदौ कृष्णरामौ विलक्षणेषु विविधलक्षणेषु। नानाविधव्यावर्त्तकधर्मेषु। भूतेषु अन्वीय
अनुवर्त्य विज्ञायव्याख्याद्यात्मना विशिष्टज्ञानमुत्पाद्य पापुरजनप्रकृतिजनेन तत्रांश विज्ञायतद्वनेनतिरोहितज्ञानोपदेशेन वज्ञानस्येशाते समर्थयते र

त्तनइत्यन्वयः ३२

जन्मादिकं श्रीकृष्णस्यैव मोक्षहेतुत्वात् तस्येति भावेनाह यस्मिन्निति। कर्माशयं शरीरांतरारंभकं कर्मसमूहं अस्मिन्मनो वा निर्हृत्य विनाश्य ब्रह्म
मयः ज्ञानप्रधान इत्यर्थः। अर्कवत् स्फटिकवत् वर्णः प्रकाशो यस्य स तथा अतिशुद्ध इत्यर्थः ३३ भावं भक्तिं यद्वा लीलोद्रिक्तं तद्विषयं मनोरंजकमि
पिनास्तीत्यर्थः। अथ अन्यद्धाता कृतवंतावित्यर्थः। महात्मन् हे महात्मानौ निश्चितं तनोत्तमे इत्यर्थः ३४ ५ प्रतीपं प्रतिकूलं ३६ अंतिके कालक्षेपं विना बालक

यस्मिन्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धं। निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोर्कवर्णः ३३ तस्मिन्भवंतावखि
लात्मयोनौ नारायणे कारणमर्त्यमूर्त्तौ। भावं विधत्तां नितरां महात्मन् किं वावशिष्टं युवयोः सुकृत्यं ३४ आगमिष्यत्यदीर्घेण कालेन व्रजमच्यु
तः। प्रियं विधास्यते पित्रोर्भगवान्सात्वतांपतिः ३५ हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वतां। यदाह वः समागम्य कृष्णः सत्यं करोति तत्
३६ माखिद्येतां महाभागौ द्रक्ष्यथः कृष्णमंतिके। अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ३७ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानि
नः। नोत्तमो नाधमो वापि समानस्यासमोपि वा ३८ न माता न पिता तस्य न भार्या न सुतादयः। नात्मीयो न परश्चापि न देहो जन्म कर्म वा ३९
लोकेस्य जन्म वकर्म्माणि सदसन्मिश्रयोनिषु। क्रीडार्थं सोपि साधूनां परित्राणाय कल्पते ४० ॥ ॥

ह्मिंतरेण कृष्णस्य दूरस्थत्वं नास्तीत्याह। अंतर्हृदीति। एधसि काष्ठे ज्योतिरग्निः ३७ प्रेष्ठानां हृदये वर्त्तते नान्येषामिति नियमो नास्तीति भा
वेनाह। नहीति। अमानिनः अहंममाभिमानरहितस्य योग्यतानुसारेण समानस्य समोपि वेति वा पाठः ३८ ए नचैवं विधस्य हरेः कथं जन्मा
दिकमुपपद्यत इति तत्राह। लोक इति। सदसन्मिश्रयोनिषु सुरनरतिर्यग्योनिषु ४० ॥ ॥

अत्र गुणैस्तत्कर्मानुकूलैः सत्वादिभिः ४१ सम्यक् प्राणिहिते आत्मनि मनसि जायते प्रकाशत इत्यात्मज इत्यर्थः ४२ युवयोरेकं तत्वं संक्षिप्य
वदामीत्याह। दृष्टमिति भवद्भूतं भवद्वर्त्तमानं स्थास्नुः स्थावरं चरिष्णु जंगमं। अच्युतादिना पत्र स्मादिकवस्तुतया शातं येन वाग्नि किंतु सर्वं सएव
तदधीनमेवाह पीदृशः परमार्थरूपः नित्यार्थातिरित्यर्थः इति। बुध्येत्यमिति निरूप्य प्रज्वाल्य वास्तू इष्टगृहद्वारादिदेहल्यादिषु वास्तुदेवता मार्जनालेपनाच्छा
दिभिः समभ्यर्च्य अमंथन् ममंथुः ४४ मंथनरज्जा विकर्षन्तः उत्क्षिपंतः करकंकणानां सतां। यद्वा मथनरज्वा आविकर्षतः चलन्नितंबादिभिः स्त्रि

सत्वं रजस्तम इति भजते निर्गुणो गुणान्। क्रीडन्नतीतोत्र गुणैः सृजत्यवति हंत्यजः ४१ युवयोरेव नैवायमात्मजो भगवान्हरिः। सर्वेषामात्मजो
ह्यात्मा पिता माता स ईश्वरः ४२ दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च। विनाच्युताद्वस्तुतया न वाच्यं स एव सर्वं परमार्थभू
तः ४३ श्रीशुक उवाच एवं निशा सा ब्रुवतोर्व्यतीता नंदस्य कृष्णानुचरस्य राजन्। गोप्यः समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्य
मंथन् ४४ ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकंकणस्रजः। चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः ४५
उद्गायतीनामरविंदलोचनं व्रजांगनानां दिवमस्पृशद्ध्वनिः। दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममंगलं ४६ भगवत्युदिते सूर्ये व्र
जद्वारि व्रजौकसः। दृष्ट्वा रथं शातकौंभं कस्यायमिति चाब्रुवन् ४७ अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः। येन नीतो मधुपुरीं कृष्णः कमल
लोचनः ४८ किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिं। इति स्त्रीणां वदंतीनामुद्धवो गात्कृताह्निकः ४९ इति श्रीभागवते महापुराणे दशम
स्कंधे चतुश्चत्वारिंशोध्यायः

त्विषंति कपोलादीनि अरुणानि कुंकुमानि आननानि यासां ताः। अरुणानि कुंकुमानि येषु तानि तथा ४५ येन ध्वनिना दिशाममंगलं निरस्यते नहि गंत वा
सितांजनानाम गुभंन स्पृशतीत्युच्यते ४६ शातकौंभं शातकुंभेन सुवर्णेन विरचितं ४७ ८ वदंतीनां प्रेतस्य मृतस्य कर्तुः कंसस्य निष्कृतिमाद्यम्
अस्माभिः करिष्यति अस्मद्द्वारेण कर्तुमिच्छतीति किमित्यर्थः। कृताह्निकः अनुष्ठितप्रातःकालक्रियः ४९ इति दशमे चतुश्चत्वारिंशोध्यायः ॥

गोपस्त्रीणां व्यामोहोक्तिभंग्याविश्रीकृष्णे भक्तिं निरूपयत्यस्मिन्नध्याये तत्र गोपीनामुद्धवसंदर्शनात्कृष्णमनःसंतत्वप्रश्नप्रकारं वक्तुमाह तं वीक्ष्येति परिमृष्ट
कुंडलं । शोणोज्ज्वलीकृतं दीप्तमाभरणं १ अतीवप्रशस्ततमं दर्शनमवलोकनं यस्य स तथा । अयं क इति सामान्यप्रश्नः कुतो देशादागत इति च विशे
षप्रश्नः । अच्युतस्येव वेषभूषणानि यस्य स तथा वेषवलक्षणेनेतरमाह तत्रोक्तः वेषवेषु किंनामधेय इति ततोपि विशेषप्रश्न इति मिथो वृत्त्यस्य सामान्य
तोस्य त्वेष्ट इति स्मृत्वा तं परिवव्रुः आवेष्टितवत्य इत्यन्वयः २ पुनस्ताभिः किं कृतमित्याह तामिति । अनेन सामान्यज्ञानं विशिष्टज्ञानपर्यवसायीति निराणि
प्रश्रयेणोपचारेण । अयं सत्यं च सूनृतमिति च ३ पार्षदार्थं पार्षदानां समीपवर्तिनं । भर्त्रा नोस्मे ष्टं तैः स्वरूपं वा अनुव्रतं भगवान्मनोज्ञं कुलव्रतं ४

श्रीशुक उवाच तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं । पीतांबरं पुष्करमालिनं लसन्मुखारविंदं परिमृष्टकुंडलं १
सुविस्मिताः कोयमपीवदर्शनः कुतश्च कस्याच्युतवेषभूषणः । इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयं २ तं प्रश्रयेणाव
नताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः । रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ३ गोप्य ऊचुः जानीमस्त्वां यदुपतेः
पार्षदार्यमनुव्रतं । भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया ४ अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे । स्नेहानुबंधो बंधूनां मुनेरपि सुदु
स्त्यजः ५ अन्येष्वर्थकृता मैत्री यावदर्थविडंबना । पुंभिः स्त्रीषु कृता यद्वत्सुमनःस्विव षट्पदैः ६ ॥ ॥

अन्यथा यशोदानंदगोपयोः प्रियकरणेच्छां अंतरेण स्मरणीयं स्मरणाकारणायोग्यं न चक्ष्महे न पश्यामः । गोव्रजेष्वपि गोष्ठे सुरभिलोकव्याप्त्यर्थो
गोव्रजः । गवां व्रजः स इष्टो यस्मिन्नस्य यानेन तत्र यातस्मि अपाप सुजाति सुकृष्णगोष्ठेवा ५ इतोपि स्नेहलक्षणमुत्र्य हं विनान्यच्चास्मीति भावेनाह । अन्येष्विति ।
अन्येषु पितृव्यतिरिक्तेषु बंधुषु मैत्री स्नेहानुरक्तिलक्षणमित्रभावोक्तिः अर्थकृता प्रयोजननिबद्धा इत्यन्वयः । कथमिवेति तत्राह । यावदर्थमिति । यदुक्तयथा
पुंभिः श्रीकृष्णकृता मैत्री यावदर्थं प्रयोजनं स मासिलक्षणमभियंति विडंबनमनुकरणमात्रं यस्याः सा तथा । यावदर्थं विडंबयत्यनुकरोतीति या वदर्थ विडंबना
वा । इममर्थं दृष्टांतांतरेणाह यद्वदिति । सुमनःस्विति । षट्पदैर्भृंगैः ६ ॥ ॥

निःस्वं वित्तहीनं अकल्पं रक्षणादावसमर्थी दत्तदक्षिणं यजमानं ७ वीतफलं फलरहितं प्रणयकोपातिरेकदर्शनार्थं वक्तुं दृष्टांतकथनं । जारा उपपति
उत्तरकथाप्रसंगात् कह इतित चाह ददृशेति । गोविंदे गतमनआदिभिः त्यक्तलौकिकाः त्यक्तलोकाचाराः पुत्रभार्यादयः अथितवसनादिदृष्टीकरणात्स्निग्ध
यमिदमाह्यथा ९ गायंत्यः गायतीः रुदंतीः कैशोरं शैशवाववस्थयागतह्रियः इति लोकाचारविरुद्धाचरणं गानादिकं १० तथा चकृष्णसंगमध्यानेन मु
ग्धाकाचिन्मधुकरं दृष्ट्वा प्रियेण कृष्णेन प्रस्थापितं प्रेषितं दूतं कल्पयित्वा इदं वक्ष्यमाणमब्रवीदित्यन्वयः ११ हे मधुप सपत्न्याः मथुरायां स्थिता
याः समानभार्यायाः अधरमधुपानलोलुद्भवतस्याआलिंगनकालेदृढपीडितकुचाभ्यां विलुलिता यां इतस्ततो विक्षिप्तायां माला वामनुषक्त कुच
कुंकुमेन रूपितश्मश्रुभिरंचितश्च मस्मांश्मा स्पृश । प्रणयकोपात् कितवबंधो इति संबोधयति । कितव स्वनवनीतादिपरद्रव्यचौरस्तस्य कृष्णस्य बंधोनको वलं

निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः । अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणं ७ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहं । दग्धं मृगा
स्तथारण्यं जारा भुक्त्वा रतां स्त्रियं ८ ददृशा गोपी गोविंदे मनोवाग्देहचेष्टितैः । कृष्णदूते व्रजं प्राप्त उद्धवे त्यक्तलौकिकाः ९ गायंत्यः प्रियकर्मा
णि रुदंत्यश्च गतह्रियाः । तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः १० काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमं । प्रियप्रस्थापितं दूतं कल्पयि
त्वेदमब्रवीत् ११ गोप्युवाच मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः । वहतु मधुपतिस्तन्मानिनीनां प्र
सादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् १२ ॥ ॥

सादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् १२ ॥ ॥ तस्यां मथुरायां विद्यमानानां मानिनीनां मानवराणां स्त्रीणां
त्वमेव मा स्पृश । किंतु स कितवोपि न स्पृशत्विति भावेन वक्ति । वहत्विति । मधुपतिः श्रीकृष्णः । तस्यां मथुरायां विद्यमानानां मानिनीनां मानवराणां स्त्रीणां
प्रसादं प्रणयकोपशांतिलक्षणमनुग्रहं प्रसादं वहतु न तप्तं इति शेषः । कीदृशं यदुसदसि विडंब्यं अनुकरणयोग्यं यो त्वासपूर्वकृष्णसोप्या समान विलि
त मिति । स्वकेतवं परस्मिन्नपि संक्रामयितुं प्रयुतमइतिभावेनाह । यस्येति । यस्य कृष्णस्य इतस्त्वमपीदृग्धूर्त इत्यर्थः । हे भ्रमर कितवबंधो अन्यपुष्पबंधोस प
त्न्याः भृंगपाः कुचस्पर्शेन विलुलितमाल्यकुंकुमकाम्यश्मश्रुसमं तात्कुंकुमं अस्मत्समिष्यश्रुखरो मभिरस्मान्मास्पृश इदृक् त्वं यस्य वसंतस्य हतस्त्वं मधु आयं
पतिस्त्वेतिमधुपतिः वसंतमामापरिदृष्टः । यत्सदसि पुष्पसमूहे विडंब्यं स्थिरीकर्तव्यमेव तन्मानिनीनां भृंगीणां प्रसादं प्रसन्नभावं वहतु करोतु कृष्णवद्धेलह
प्रणनकरोत्विति वा । उन्मत्तः कितवो धूर्त इत्यमरः १२ ॥ ॥

कृष्णस्य कितवत्वं कथमापादयत इत्यत एव मि तिष्ठन्ति सकृदिति। भवादृक् भवानिव कृष्ण इव स्थितः कः पुरुषः मांस्यजेस्य जाति मस्यागे दृष्टा दोषोभव
कृष्णस्य कितवत्वं कथमापाद्यत इत्यत एव मि तिष्ठन्ति। भवादृक् मदीयाङ्गसङ्गं प्रदायातकमितिवदति भावेनकथितः स्वाम धरसुधां अधरोष्ठामृतं पाययि
ति। ग्रास्रणं स्वयमाहूय आत्मानमर्पयित्वा नं पृष्ट्वा त्याक्षीतियो स्त्या भाव्य इत्या वाग्निमा आकर्ष्य हृतक्लतेनहेतुत्वान्नतोप्यधिकइवेतिभावेनोक्तं। सकृदिति। तस्माज्जनकं च क
त्वेति निषेधवचनाभावादुक्त दोषः कथं स्यादित्याशंक्य सकृत्याने तावद्भुक्तत्वाज्जननहेतुत्वान्नतोप्यधिकइवेतिभावेनोक्तं। सुमनस इति। यथा सुमनसः पुष्पस्य
४२ वेणाणि झर्झराश्च राजाज्ञाभ्यंचकयष्टयश्च हस्तेषु येषां तैस्तथा तैः कंचुकिभिः दौवारिकैः छिन्नलिंगैः ४३ ॥ ॥

धौतपादकरांबुजा प्रक्षालितपादहस्तपद्मा ४६ प्रवयसो वृद्धाः विधिज्ञाः ब्राह्मण्यः कुशलाः । पतिमतीः भर्तृमत्यः ५० शेषाः अवशिष्टाः अपविष्टा

नानोपहारबलिभिर्वारमुख्याः सहस्रशः । स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ४४ गायंत्यश्च स्तुवंतश्च गायका वाद्यवादकाः । परिवार्य वधूं जग्मुः सूतमागधवंदिनः ४५ आसाद्य देवीसदनं धौतपादकरांबुजा । उपस्पृश्य शुचिः शांता प्रविवेशांबिकांतिकं ४६ तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः । भवानीं वंदयांचक्रुर्भवपत्नीं भवान्वितां ४७ नमस्ये त्वांबिकेऽभीक्ष्णं स्वसंतानयुतां शिवां । भूयात्पतिर्मे भगवान्कृष्णस्तदनुमोदतां ४८ अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रङ्माल्यभूषणैः । नानोपहारबलिभिः प्रदीपावलिभिः पृथक् ४९ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् । लवणापूपतांबूलकंठसूत्रफलेक्षुभिः ५० तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः । ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ५१ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात् । उपकंठे पुरस्यैव पौलोम्याश्च निकेतनं ५२ तो विदर्भप्रसूतानां नृपाणां कुलदेवते । नदंतिक समुपागम्य शचीं सुरपतिप्रियां ५३ चिराराधितपादाब्जां सा प्रणम्य विनिर्ययौ । प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभितां ५४ तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां ५५ श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकितेक्षणां । शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलां ५६ पदा चलंतीं कलहंसगामिनीं सिंजत्कलानूपुरपादशोभितां । विलोक्य वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः ५७ यां वीक्ष्य ते नृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः । पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेऽर्पयतीं स्वशोभां ५८

राजस्त्रियो वा ५१ मुनिव्रतं मौनव्रतं । उपकंठे समीपे पौलोम्याः शच्याः ५२ ५५ देवमायां मोहिनीं ५५ श्यामां अष्टवर्षां कुंतलैः रावकैः राम शंकितमिव ईक्षणं यस्याः सा तथा तां ५६ ५८ ॥ ॥

नागहृत् जह्रोह हरिः सिंहः ६१ इति दशमे अष्टपंचाशोऽध्यायः ॥ यः परैरारिभिः कृतं । के के परे इति तत्राह । अहो इति १ यादवानामनीकानां यूथानि समूहास्तान्पांति रक्षंतीति यादवानीकयूथपाः ३ अश्वपृष्ठादिषु स्थिता ४ आसारो वेगवान्वर्ष इति सुमध्यमा

सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा । उत्सार्य वामकरजैरलकानपांगैः प्राप्तान्ह्रियैक्षत नृपान्ददृशेऽच्युतं सा ५९ तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षतां । रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ६० ततो ययौ रामपुरोगमः शनैः शृगालमध्यादिव भागहृद्धरिः ६१ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टपंचाशोऽध्यायः ॥

श्रीशुक उवाच ॥ तं मानिनः स्वाभिभवं यशःक्षयं परे जरासंधवशा न सेहिरे । अहो धिगस्मान्यश आत्तधन्वनां गोपैर्हृतं केसरिणां मृगैरिव १ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः । स्वैः स्वैर्बलैः परिक्रांता अन्वीयुर्धृतकार्मुकाः २ तानापतत आलोक्य यादवानीकयूथपाः । तस्थुस्तत्संमुखा राजन्विस्फूर्य स्वधनूंषि ते ३ अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोविदाः । मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ४ पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा । सव्रीडमैक्षत्तद्वक्त्रं भयविह्वललोचना ५ प्रहस्य भगवानाह मा भैर्वामलोचने । विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवं बलं ६ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः । अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्रथान् ७ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि । सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः ८ हस्ताः सासिगदेष्वासाः करभा ऊरवोंऽघ्रयः । अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ९ हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः । राजानो विमुखा जग्मुर्जरासंधपुरःसराः १० ॥ ॥

गं

रुक्मिण्याः ईक्षत दृष्टवती ५ ८ करभाः कनिष्ठिकायाः मूलप्रदेशाः गर्दभात् अश्वायां जाताः अश्वतरी ९ आत्मनो जयकांक्षिभिः यथकाशकैः जयेच्छुभिर्वा १० ॥ ॥

द० उ०

हृतदारं बलादृप्यद्धृतभार्यं प्रभुं १९ प्रियाप्रिययोः सुखदुःखयोर्निष्ठाव्यवस्था नियतत्वं । निष्ठोत्कर्षैव्यवस्थायामितिच २२ कुहकेच्छयाम्यी इच्छया २३ योऽहं त्रयोविंशतिभिः सैन्यैरक्षौहिणीभिः शौरेः सप्तदश संयुगानि समरश संयुगेषु पराजितः । परं पश्चात्त्वेकं अष्टादशमं समरं

२३

शिशुपालं समेत्याह हृतदारमिवातुरं । नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् २१ राजान ऊचुः भो भोः पुरुषशार्दूल दौर्मनस्यमिदं त्यज । न प्रियाप्रिययो राजन्निष्ठा देहिषु दृश्यते २२ यथा दारुमयी योषित्नृत्यते कुहकेच्छया । एवमीश्वरतंत्रोयमीहते सुखदुःखयोः २३ शौरेः सप्तदशाहं वै संयुगानि पराजितः । त्रयोविंशतिभिः सैन्यैर्जिग्ये एकमहं परं २४ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित् । कालेन दैवयुक्तेन जानन्विद्रावितं जगत् २५ अधुनापि वयं सर्वे वीरयूथपयूथपाः । पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालितैः २६ रिपवो जिग्युरधुना काल आत्मानुसारिणि । तदा वयं विजेष्यामो यदा कालः प्रदक्षिणः २७ श्रीशुक उवाच एवं संबोधितो मित्रैश्चैद्योगात्सानुगः पुरं । हतशेषाः पुनस्तेपि ययुः स्वं स्वं पुरं नृपाः २८ रुक्मी तु राक्षसोद्वाहं कृष्णद्विडसहन्स्वसुः । पृष्ठतोन्वगमत्कृष्णमक्षौहिण्या वृतो बली २९ रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजां । प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ३० अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीं । कुंडिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः ३१ श्रीशुक उवाच इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः । चोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भवेत् ३२ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः । नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ३३ ॥ ॥

येकं तेनाधिविकत्थे कृष्णं जिग्ये तथापि एकमष्टादशमं संग्रामं वा २५ फल्गुतंत्रैः अल्पसेनादिपरिच्छदैः ॥२६॥ प्रदक्षिणः अनुकूलः २७ ८ असहन् असहमानः २९ ३० अप्रत्यूह्य अनाहृत्य अनपस्याहत्यवेतिवा ३१ ३ ॥ ॥

राम

२३

अरेनीचसंबोधनं । तदेव व्यनक्ति यदूनामिति २६ ७ गतः पूर्वमेव मुक्त्वा परिघं परिघातनं पट्टिशं लोहदंडं शक्तितोमरैः खड्गविच्छेद छित्वा

विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् । रथेनैकेन गोविंदमच्चधावतरंहसा २४ सगत्वान्मर्दाद्देवीतरं तं मधुसूदनं । आहाश्च सुदृस नद्ध क्षिप्र तिष्ठेति चाब्रवीत् २५ धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः । आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन २६ कुत्रयासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः । हरिष्येद्य मदं मंद मायिनः कूटयोधिनः २७ यावन्न मे हतो बाणैः शयीथा मुंच दारिकां । धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः २८ स्मयमानः कृष्णोथ छित्वा षड्भिर्विव्याध रुक्मिणं । अष्टाभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः २९ स चान्यद्धनुराधाय कृष्णं विव्याध पंचभिः । तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः ३० पुनरन्यदुपादत्त तदप्यच्छिनदच्युतः । परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ ३१ यद्यदायुधमादत्त तत्सर्वं सोच्छिनद्धरिः । ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया ३२ कृष्णमभ्यद्रवत्क्रुद्धः पतंग इव पावकं । तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ३३ छित्वासिमाददे तिग्मं रुक्मिणं हंतुमुद्यतः । दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला । पतित्वा पादयोः पत्युरुवाच करुणं सती ३४ रुक्मिण्युवाच योगेश्वराप्रमेयात्मन्देवदेव जगत्पते । हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज ३५ श्रीशुक उवाच इत्युक्त्वा जगृहे पादौ कृपणा हीनभाषिणी । भ्रातरं त्रातुकामा सा कृष्णस्य जगतीपतेः ३६ तया परित्रासविकंपितांगया शुचावशुष्यन्मुखरुद्धकंठया । कातर्यविस्रंसितहेममालया गृहीतपादः करुणो न्यवर्तत ३७ ॥ ॥

तोमरः ३१ ६ परित्रासेन परितोभयेन कंपितमंगं यस्याः सा तथा । शुचा शुष्यन्मुखं अवरुद्धकंठं यस्याः सा तथा । करुणः करुणाकरः ३७

प्रवपन्वपनं मुंडनं ऊर्ध्वरूपमन्वपयत्। सोऽर्दर्श दीनमकरोत् ३८ श्मश्रुकेशानां वपनलक्षणं वैरूप्यं सुहृदो वधो बंधं कृतवान् ४२ ननु कृतसुखादेः प्रयंहे तुरथापि बं रहामीत्रु क्लिष्टौ सांत्वयति। मेवेति। हे साध्वि तु ज्ञानिनां। अस्मात्स्वतिरुस्मादन्यः अत्र हेतुर्यत इति ४२ ननु कृतसुखादेः प्रयंहे तु रथापि बं बोर्ईह वियोगकरणलक्षणो वधो लोकाश्रयेन भवति जुगुप्सितत्वादिति तत्र समितिपाह। बंधुरिति। वधार्हो दोषो पस्यसतथा। द्वितीय बंधु हो इत्यर्थः। तत्र किं कर्तव्यमित्यत आह। त्याज्य इति। त्यागो देशनिर्यातनादिलक्षणः। किंत्याज्य इति मृतमारण दोषापत्तेरिति भावेनाह हत इति

वैलेन वध्यात मसाधुकारिणं स श्मश्रुकेशं प्रवपन्व्यरूपयत्। तावत्स्वमौर्जितशत्रुसैन्या यदुप्रवीरान् लिनीयथागजाः ३८ कृत्स्नं निकृत्य प्रगल्भदर्शनं च कृतकिल्बिणं। तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः ३९ विमुच्य बद्धं करुणो भगवान् कृष्णमब्रवीत् ४० व लभद्र उवाच असाध्विदं त्वया कृष्ण कृतमस्मज्जुगुप्सितं। वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ४१ मैवास्मान्साध्व्यसूयेथा भ्रातु वैरूप्यचिंतया। सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक्पुमान् ४२ बंधुर्वधार्हदोषोऽपि न बंधोर्वधमर्हति। त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः ४३ क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः। भ्राताऽपि भ्रातरं हन्याद्येन घोरतरस्ततः ४४ राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः। मानिनोऽन्यस्य वा हेतोः श्रीमदांधाः क्षिपंति हि ४५ ॥ ॥

४३ तर्हि तदीदृशं कर्म किमिति क्रियत इति चेत्तो यं न्यायः क्षत्रियेभ्यो न्यत्र नत्वत्रि याणामित्याह। क्षत्रियाणामिति। कोसौ धर्म इत्यत्राह। भ्राताऽपीति। ततस्तस्माद्राज्यादेर्येन कर्मणा घोरतरं इत्युच्यते। धर्मविरोधो वा घोरतरो धर्म इति ४४ ननु तर्हि स सर्वः सर्वं हन्यादित्यतिप्रसंगाशंक्या आह। राज्यस्येति। मानिनः देहाभिमानवंतः अन्यस्य श्रीमदांधा क्षिपंति घ्नंति राज्यादेः सर्वस्य हेतोरिति संबंधः ४५ ॥ ॥

किमतइत्यतः स्वस्य श्रीइर्प्यधीनत्वकल्पनामंतरेण सुकपोलकल्पना बुद्धिर्भ्रम एवेत्याह। आत्मेति। देह एवात्मेति मानं ज्ञानं एवां तेन तथा तेषां नृणां निरपेक्षत्वेनोपकर्तासुहृत्सुखदुःखं नाशकर्ता शत्रुः सह उभयकर्ता त्वमुदासीन इत्येष आत्ममोहो मनोभ्रमः। देवस्य हरेर्माययाव च कशक्त्या कल्पते। ततः सुहृदुत शत्रुरुभयोरितर उदासीन इति सुकपोलकल्पनाइत्यादौ इति भावः ४६ देवः कीदृश इति तत्स्वरूपमाह एकएवेति। आत्मा परः परमात्मा निधामक इति शेषः। न त्वेकत्वे संप्रत्यक्षा भवति इति नाम्याभावः कथमिति तत्राह। नानेति ५७ देहात्मत्वभ्रमनिमित्तान्यत्र हेतुमाह। देह इति। द्रव्याणि पंच भूतानि पंच प्राणाः त्रयो गुणाः। देह आत्मानमेतीति कत्वा तद्धटघटवदिति। आत्मनि जीवे अविद्ययाहृ

आत्ममोहो नृणामेषः कल्प्यते देवमायया। सुहृदुद्धतुरुदासीन इति देहात्ममानिनां ४६ एक एव परो ह्यात्मा सर्वेषामपि देहिनां। नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ४७ देह आद्यंतवानेष द्रव्यप्राणगुणात्मकः। आत्मन्यविद्यया क्लृप्तः संसारयति देहिनं ४८ यथा शमानश्चात्मा नविषयात्फलमेवच। अनुभुंक्तेप्य सत्यर्थे तथात्मापि धवीधवाच ४९ तस्मादज्ञानजं शोकमात्मबोधविमोहनं तत्त्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ५० एवं भगवता तन्वी रामेण प्रतिबोधिता। वैमनस्यं परित्यज्य मनो बुद्ध्या समादधे ५१

क्लृप्ता अज्ञानेन वा देहिनं देहात्मदर्शने संसारयति संसारिणं करोति। तत्करोति नीत्युपसंख्यानमिति णिच् ४८ देहः स्वेन रहावसितिनिष्ठाधिकरणं मेयत्वात् घटवदिति तत्राह यथेति। शयानः स्वप्नं पश्यन्नात्मानं विषयान् फलं दुःखादि लक्षणं यथा भुंक्ते वा समानुरुणमनुभवति। अर्थे विषये तदानीमसत्यप्यविद्यमानेपि तथात्माजीवो धवीधवाच्च निर्वाह देहादीननु भुंक्त इत्यर्थः। देहः स्वसंबंधेन तन्न इत्य नित्यनिष्ठाधिकरणमिति प्रत्यनुमानपराहतं तद्धनुमानमिति संतोष्यं ४९ उपसंहरति। तस्मादिति ५० बुद्ध्या कदाप्यतिरोहितज्ञानेन ५१

द० उ०

रुक्मी तत्र किंचकारेति तत्राह । प्राणेति ५२ अप्रत्यूह्य अनिवर्त्य पित्रा यवीयसीमनुजां ५३ ४ यदुपतौ कृष्णे अनन्यभावानां अन्यः शत्रुरिति
भावरहितानां निरतिशयभक्तियुक्तानामित्यर्थः ५५ ६ उत्तम्भितेंद्रकेतुभिः उच्छ्रितैरिंद्रध्वजैः ५७ आहूतप्रेष्ठभूभुजां गजैरितिशेषः । पद्मा

२५

प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः । स्मरन्विरूपकरणं वितथात्ममनोरथः ॥ चक्रे भोजकटं नाम निवासाय महत्पुरं ५२ अहत्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीं । कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा ५३ भगवान्भीष्मकसुतामेवं निर्जित्य भूमिपान् । पुरमानीय विधिवदुपयेमे कुरूद्वह ५४ तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे । अभूदनन्यभावानां कृष्णे यदुपतौ नृप ५५ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुंडलाः । पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ५६ सा वृष्णिपुर्युत्तम्भितेंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः । बभौ प्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभागरुधूपदीपकैः ५७ सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजां । गजैर्द्वाःसु परामृष्टरंभापूगोपशोभिता ५८ कुरुसृंजयकैकेयविदर्भयदुकुंतयः । मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतः ५९ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः । राजानो राजकन्याश्च बभूवुर्भृशविस्मिताः ६० द्वारकायामभूद्राजन्महामोदः पुरौकसां । रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियः पतिं ६१ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनषष्टितमोऽध्यायः ॥ ॥

[illegible] परामृष्टात्मकरंभापूगादिप्यमित्र [illegible] यस्यैव तत्र तस्मिन्तो धावंतः ५९ ६१ इति दशमे एकोनषष्टितमोऽध्यायः ॥

राम

२५

[illegible] त्रिविक्रमावतारस्याभिरपेत्य भक्तानुकंपिनो यदुनंदनस्य एतज्जन्मानुष्ठेतकर्म [illegible] दुर्यशः शमनहेतुविक्रममनुक्त्वा सत्यभामा [illegible]
मे । तत्र परीक्षितः प्रश्नबीजमुत्थापयति सत्राजिदिति । सत्रेण [illegible] दानलक्षणं तस्य सा सूर्यस्थितं हरिं जितवान् [illegible] सत्रा
जिदिति नाम लब्धवान् [illegible] कृतकिल्बिषः कृतापराधः । प्रतिनास्त हस्त्व यमुद्यम्य पादनादिपर [illegible]

श्रीशुक उवाच सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः । स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान् १ राजोवाच सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्बिषं । स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः २ श्रीशुक उवाच आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा । प्रीतस्तस्मै मणिं प्रादात्स च तुष्टः स्यमंतकं ३ स तं बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः । प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ४ तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः । दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशंकिताः ५ नारायण नमस्तेस्तु शंखचक्रगदाधर । दामोदरारविंदाक्ष गोविंद यदुनंदन ६ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते । मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मरुक् ७ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः । ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ८ ॥ ॥

[illegible] मंतरेण मत्कन्यां तुभ्यं दास्यामीति वचनादि [illegible] विधाय सत्राजितोंतरात्मा तत्र विषये अजितइतिवा १ २ भक्तस्य सत्राजितः
सखा ३ तेजसाच्छादितो नोपलक्षितो नरत्वेन ४ अक्षैर्दीव्यते क्रीडते ५ ६ गभस्तिचक्रेण रश्मिमंडलेन । तिग्मरुक्
सूर्यः ७ विबुधर्षभाः देवश्रेष्ठाः त्रिलोक्यां ते मार्गमन्विच्छंति मृगयंते नतु ते अजः सूर्यः अद्य यदुषु गुढं ज्ञात्वा द्रष्टुं यात्यायाति अजायलो
कत्रयभावनायेतिवचनात् ८ ॥ ॥

८०उ॰ ष्टइदेवसदनेदेवस्थानेप्रवेशयत प्रतिष्ठितवान् १० पंचविंशतिनुलाम्न कोभारः ततस्तौभारान्मुक्तानिदृशतिमारीःअकालमृत्युः अरिष्टं व्याधिकं ११ क्वापिकदाचित् १२ अतर्कयत अनिरूपयत्। प्रतिभुअवद्या १३ आज्ञाय सुस्वीकृत्य १४ क्रीडनकंलीलासाधनं १५ शोरे

२६

श्रीशुकउवाच निशम्यबालवचनंप्रहस्यांबुजलोचनः। प्राहनासौरविर्देवःसत्राजिन्मणिनाज्वलन् ९ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलं। प्रविश्यदेवसदनेमणिंविप्रैर्न्यवेशयत् १० दिनेदिनेस्वर्णभारानष्टौसस्रजतिप्रभो। दुर्भिक्षमार्यरिष्टानिसर्पाधिव्याधयोऽशुभाः ११ नसंतिमायिनस्तत्रयत्रास्तेऽभ्यर्चितोमणिः। सयाचितोमणिःक्वापियदुराजायशौरिणा १२ नैवार्थकामुकःप्रादद्याच्ञाभंगमतर्कयन्। तमेकदामणिंकंठेप्रतिमुच्यमहाप्रभं ॥१३॥ प्रसेनोहयमारुह्यमृगयायांव्यचरद्वने। प्रसेनंसहयंहत्वामणिमाच्छिद्यकेसरी १४ गिरिंविशन्जाम्बवतानिहतोमणिमिच्छता। सोपिचक्रेकुमारस्यमणिंक्रीडनकंबिले ॥१५॥ अपश्यन्भ्रातरंभ्राता सत्राजित्पर्यतप्यत। प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः १६ भ्रातामनेतितच्छ्रुत्वाकर्णेकर्णेजपञ्जनाः। भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि १७ मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः। हतंप्रसेनमश्वंचवीक्ष्यकेसरिणावने १८ तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः। ऋक्षराजबिलंभीममंधेनतमसावृतं। एकोविवेशभगवानवस्थाप्यबहिःप्रजाः १९ तत्रदृष्ट्वामणिप्रेष्ठंबालक्रीडनकंकृतं। हर्तुंकृतमतिस्तस्मिन्नवतस्थेऽर्भकांतिके २० तमपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत्। तच्छ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः २१ सवैभगवतातेनयुयुधेस्वामिनात्मनः। पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित् २२ द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः आयुधाश्मद्रुमैर्दोर्भिःक्रव्यार्थेश्येनयोरिव २३ ॥ ॥

मणिप्रभंगृहेत्यादिदृमनर्थजातमष्टत। अन्यथामणिमाहात्म्यस्तवनंव्यर्थमितितात्पर्यमवगंतव्यं। मणिःश्रीवायांयस्यनतथा १६ म एव मधातामनेननिहतइतियच्छ्रुत्वा १७ ८ आहेणजांबवता १९ २३ ॥ ॥

२६

अविश्रमंनिरंतरं २४ पसर्वभूतानांप्राणादिप्रदःप्राणःप्राणमंत्येष्टाशक्तिः। ईजःअवष्टंभशक्तिःसहःशरीरसामर्थ्यंबलंस्थैर्यं २६ नष्टानामपिसृष्टेषुवस्तुकालःसंहर्ता। आत्मनांचेतनानांपरःआत्मापरमचेतनः। नित्योनित्यानामितिश्रुतिः २७ उत्कटेनउग्रेतेनरोषेणजातैःकटाक्षमोक्षैर्ज्ञातपातैःक्षोभितानक्रामिमिंगिलाश्चयस्मिन्सतथा। स्वयशोरूपःउज्ज्वलितानाम्दग्धानांसुहतानिशारस्थिकानि २८ ९ शुंकरेणसुखकरेण३०

आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः। वज्रनिष्पेषपरुषैरविश्रममहर्निशं २४ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः। क्षीणसत्त्वःस्विन्नगात्रस्तमाहातीवविस्मितः २५ जानेत्वांसर्वभूतानांप्राणओजःसहोबलं। विष्णुंपुराणपुरुषंप्रभविष्णुमधीश्वरं २६ त्वंहिविश्वसृजांस्रष्टासृष्टानामपियच्चसत्। कालःकलयतामीशःपरआत्मातथात्मनां २७ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः। सेतुःकृतःस्वयशउज्ज्वलिताचलंकालंकाशिरांसिभिरविशिषवोभुवि पेतुरिषुक्षतानि २८ इतिविज्ञातविज्ञानमृक्षराजानमच्युतः। व्याजहारमहाराजभगवान्देवकीसुतः २९ अभिमृश्यारविंदाक्षःपाणिनाशंकरेणतं। कृपयापरयाभक्तंमेघगंभीरयागिरा ३० मणिहेतोरिहप्राप्तावयमृक्षपतेबिलं। मिथ्याभिशापंप्रमृजन्नात्मनोमणिनामुना ३१ इत्युक्तःस्वांदुहितरंकन्यांजाम्बवतींमुदा। अर्हणार्थंसहमणिनाकृष्णायोपजहारसः ३२ अदृष्ट्वानिर्गमंशौरेःप्रविष्टस्यबिलंजनाः। प्रतीक्ष्यद्वादशाहानिदुःखिताःस्वपुरंययुः ३३ निशम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः। सुहृदोज्ञातयोशोचन्बिलात्कृष्णमनिर्गतं ॥३४॥ सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः। उपतस्थुर्महामायांदुर्गांकृष्णोपलब्धये ३५ तेषांतुदेव्युपस्थानात्प्रत्यादिष्टाशिषांभवत्। प्रादुर्बभूवसिद्धार्थःसदारोहर्षयन्हरिः ३६ ॥ ॥

४ उपतस्थुःअभजन् ३५ ततःकिमभूदत्राह। तेषामितिहरिस्तेषांप्रादुर्बभूवेत्यन्वयः। देव्याउपस्थानात्रिषेवणात्प्रत्यादिष्टाशिषांआप्यागताशुदयानांभवनरहस्यः। सिद्धार्थःनिष्पलप्रयोजनः। प्रत्यादिष्टाशिषइतिपाठेयेप्रथमंनष्टकृष्णाप्त्याशिषोभवन्तेषांतुशाप्तोइत्यर्थःदेव्युपस्थानाद्धेतोरित्यर्थः। अनेनापदिमायांदेवताशरणंकर्त्तव्यमित्युक्तंभवति ३६ ॥ ॥

३८ आख्यायोक्त्वा ३८ स्वेन पाप्मनावृतस्य स्वस्य आत्मा पंजरं ३९ ४० मह्यं मम अदीर्घदर्शनं भविष्यज्ञानहीनं ४१ तस्य कोपस्य ४२ ४४ प्रतीक्षामः फलभागिनः प्रयोजनांशभेदस्वीकुर्मः ४५ इति दशमे षष्ठिरध्यायः ॥ अज्ञानिनां तमः शांतिसाधनं ज्ञानिनां भम नञ्जतु इकमारणंतो

नुपलम्भस्तृषीकेशं भूतं पुनरिहागतं । सहपत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ३७ सत्राजितं समाहूय सभायां राजसन्निधौ । प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत् ३८ स चातिव्रीडितो रत्नं गृहीत्वावाङ्मुखस्ततः । अनुतप्यमानो भवनमगमत्स्वेन पाप्मना ३९ सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः । कथं मृजाम्यात्मरजः प्रसीदेद्वाच्युतः कथं ४० किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा । अदीर्घदर्शनं क्षुद्रं मूढं द्रविणलोलुपं ४१ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च । उपायोऽयं समीचीनस्तस्य शांतिर्न चान्यथा ४२ एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां । मणिं च स्वयमुद्यम्य कृष्णायोपजहार सः ४३ तां सत्यभामां भगवानुपयेमे यथाविधि । बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ४४ भगवानाह न मणिं प्रतीच्छामो वयं नृप । तवास्तां देवभक्तस्य वयं हि फलभागिनः ४५ इति श्रीभागवते महापुराणे दशमस्कंधे षष्ठिरध्यायः ॥ श्रीशुक उवाच ॥ विज्ञातार्थोऽपि गोविंदो दग्धानाकर्ण्य पांडवान् । कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् १ भीष्मं कृपं सविदुरं गांधारीं द्रोणमेव च । तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः २ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः । अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ३ योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः । कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ४ ॥

कविदं वनार्थं भगवच्चरितविशेषं शूर्वाध्यायार्थवीजं निरूपयन्नस्मिन्नध्याये विना संदेहं निवारयति । कुल्यं शवदहनानंतरं तद्वत्स जिह्मा समतद्गृहगमनं तस्य करणे तन्निमित्तीकृत्येत्यर्थः १ २ अंतरमवकाशं ३ भ्रातरं प्रसेनमन्वियात् अनुगतः स्यात् मृतो स्तात् इत्यर्थः ४ ॥

कं दंतीनां वैक्लव्यस्वरं कुर्वतीनां । सौनिकवन्मारकवत् राक्षसवदित्यर्थः ६ ७ प्रास्य निक्षिप्य ८ अस्राक्षौ अश्रुजलकलिलेक्षणौ ९ १० याज्ञसेन्याः द्रौपद्याः ११ १२ ब्रह्मरूपधरान् ब्राह्मणवेषं बिभ्राणान् । पौरुष्येण पराक्रमेण प्रतिलब्धो मनोरथो येषां तैन्नपातैः

एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः । शयानमवधील्लोभात्स पापः क्षीणजीवितः ५ स्त्रीणां विक्रोशमानानां क्रंदंतीनामनाथवत् । हत्वा पशून्सौनिकवन्मणिमादाय जग्मिवान् ६ सत्यभामा च पितरं हतं वीक्ष्य शुचार्पिता । व्यलपत्तात तातेति हा हतास्मीति मुह्यती ७ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं । कृष्णाय विदितार्थाय तप्ताचख्यौ पितुर्वधं ८ तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकतां । अहो नः परमं कष्टमित्यस्राक्षौ विलेपतुः ९ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरं । शतधन्वानमारेभे हंतुं हर्तुं च तन्मणिं १० ततः पांचालनगराद्याज्ञसेन्याः स्वयंवरं । कृष्णता यज्ञसेनेन प्रेषितो दुत आगतः ११ आहूय स्नेनगोविंदो गत्वा पांचालके पुरे । ददर्श द्यायजं सत्राकिशोरांस्यांडुनंदनान् १२ अदृष्टपूर्वान्सुव्यक्तं ब्रह्मरूपधरान्नृपान् । तैर्विध्य लक्ष्यैः पौरुष्य प्रतिलब्धमनोरथैः १३ कुंभकारस्य शालायां समागम्याभिवंद्य चापितृष्वसामनुज्ञाप्य राजानं च युधिष्ठिरं १४ निहंतुं शतधन्वानं तूर्णं द्वारवतीमियात् । सोऽपि कृतोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया १५ साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् । नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः १६ को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् । कंसः सहानुगोऽपीतो यद्द्वेषात्त्याजितः श्रिया १७ जरासंधः सप्तदशसंयुगाद्विरथो गतः । प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत १८ सोऽप्याह को विरुध्येत विद्वानीश्वरयोर्बलं । य इदं लीलया विश्वं सृजत्यवति हंति च १९ ॥ ॥

१२ पितृष्वसां पितृष्वसारं कुंतीं १४ १६ वृजिनमपराधं अपराधाकार्यत्वे निमित्तानि कथयति । कंस इति १७ प्रत्याख्यातो निराकृतः कृतवर्मणेति शेषः १८ पार्ष्णिग्राहं पृष्ठवलं १९ ॥ ॥

९०उ०

उच्छिलींध्रं छत्राकारं २२ ३ शतयोजनगं शतयोजनगमनसमर्थं २४ गरुडध्वजेपस्यस्तथा तं रथं २५ मिथिलानगर्याः २६ पद्भ्यामा
तिः सत्तं गमनं यस्य स तथा तस्य तिग्मनेमिना चंडधाराग्रेण व्यचिनोत् अन्वेषणं कृतवान् २७ २८ अन्वेषणं मार्गणं कुर्विर २९ ३० अर्हणं

१८

योऽयं स डिंभिको युद्धे जित वा चरदुर्मदौ। अशीविषो महानागो येन निर्वासितोंदुरात् २० यद्दं लीलया विश्वं सृजत्यवति हंति च। चे
ष्टां विश्वसृजो यस्य न विदुर्मोहितामया २१ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना। दधार लीलया बाल उच्छिलींध्रमिवार्भकः २२ न
मस्तस्मै भगवते कृष्णायाद्भुतकर्मणे। अनंतायादिभूताय कूटस्थायात्मने नमः २३ प्रत्याख्यातः स तेनापि शतधन्वा महामणिं। तस्मि
न्नश्वं समारुह्य शतयोजनगं ययौ २४ गरुडध्वजमारुह्य रथं रामजनार्दनौ। अन्वयातां महावेगैरश्वै राजन्गुरुद्रुहं २५ मिथि
लायामुपवने विसृज्य पतितं हयं। पद्भ्यामधावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा २६ पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना। चक्रेण शिर उ
त्कृत्य वाससोर्व्यचिनोन्मणिं २७ अलब्धमणिरागत्य कृष्ण आहाग्रजांतिकं। वृथा हतः शतधनुर्मणिस्तत्र न विद्यते २८ तत आह बलो
नूनं स मणिः शतधन्वना। कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्रज २९ अहं वैदेहमिच्छामि द्रष्टुं प्रियतमं मम। इत्युक्त्वा मिथिलां राजन्
विवेश यदुनंदनः ३० तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः। अर्हयामास विधिवदर्हणीयं समर्हणैः ३१ उवास तस्यां कतिचिन्मि
थिलायां समा विभुः। ततोऽशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः। मानितः प्रीतियुक्तेन जनकेन महात्मना ३२ केशवो द्वारकामेत्य निधनं
शतधन्वनः। अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥३३॥ ततः स कारयामास क्रिया बंधोर्हतस्य वै। साकं सुहृद्भिर्भगवान्या या
स्युः सांपरायिकाः ३४ अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधं। व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ३५ ॥ ॥

एतं ३१ काले कृष्णवियोगसमये ३२ ३ बंधोः सत्राजितः सांपरायिकाः प्रेतविषयाः ३४ व्यूषतुः प्रवासं चक्रतुः ३५ ॥

राम
१८

इति शङ्क प्रकारवचनः। अंधेति संबोधनं। एके केचित् पूर्वमुक्तं पुराणवचनमुपदिशंति वदंति। कथमिति तत्राह। दाशार्हत इति। श्रीकृष्ण
स्य निवासनिकटे अरिष्टदर्शनमशुभदर्शनं घटेत किं वा न घटेत ३८ सुराष्ट्रे देवपर्जन्ये वर्षति काशीशः काशिराजः। सुराष्ट्रं प्रत्यागताय श्वफल्काय
अक्रूरपित्रे। गांदिनीं नाम्ना गांदिनीं स्वसुतां च प्रादात् ३९ किमनेनेति तत्राह। तत्सुत इति। तत्प्रभावः श्वफल्कप्रभावः। अतोऽक्रूरोऽपच दे

अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसां। शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ३६ ततोऽब्रवीद्धरिर्ज्ञात्वा उग्रसेनपुरोगमान्। कस्माद्धि
द्वारिष्टान्यासन्महतां सुचिरेण वः ३७ इत्यंगोपदिशंत्येके विस्मिता वै गदाहृतः। निवासनिकटे किं वा घटेतारिष्टदर्शनं ३८ देवेऽवर्षति का
शीशः श्वफल्कायागताय वै। स्वसुतां गांदिनीं प्रादात्ततोऽवर्षत्स्म काशिषु ३९ तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्र यत्र ह। देवोऽभिवर्ष
ते तत्र नोपतापा न मारिकाः ४० इति वृद्धवचः श्रुत्वा नैतावदिह कारणं। इति मत्वा समानीय रामाक्रूरौ जनार्दनः ४१ अक्रूरं मानय
पूजयित्वा प्रियाः कथाः। विज्ञाताखिलचित्तज्ञः स्मयमान उवाच ह ४२ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना। स्यमंतको म
णिः श्रीमान्विदितः पूर्वमेव नः ४३ सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः। दायं निनीयापः पिंडान्विमुच्यर्णमशेषतः। तथापि
दुर्द्धरोऽस्त्वन्यैस्त्वय्यास्तां प्रापितो मणिः ४४ ॥ ॥

शेतत्र देवोऽभिवर्षति तस्मिन्देशे उतापाद्यो न भवंति ४० अवर्षणादिसंभवे न्यन्निमित्तमस्तीति भावेनोच्यते। नैतावतेति। इह अवर्षणादौ
तावदक्रूरप्रधानमेव कारणं न भवति। किंतु स्यमंतकागमनं च कारणमिति च वृद्धवचः श्रुत्वा अक्रूरं चरमं च संमानीय्यानयना ४१ ३
किं कृत्वा गृह्णीयुरिति तत्राह। निनीयेति अपः पिंडान्निनीय दत्वा ऋणं अशेषतः पित्रादिविषयमृणं च विमुच्य गृह्णीयुरिति शेषेणान्वयः॥ ॥

नार्हति यथा स्थितिं नेत्याह। किंत्विति। प्रत्येति विश्वासं करोति। प्रत्ययः कथ्यातिरेकविश्वासाधीन हेतुश्रितिः। शांतिं मंगलं शांतिः प्रशममंगलइति
४५ वर्त्तंति तथेति शेषः। रुक्मवेदयः सुवर्णमेखलाः। आरब्धः उक्तः ४६ रजो मिथ्यावादलक्षणं मलं ४७ तदर्थं मतिर्निमित्तं ४८ स्वात्मना
इति तृतीयार्थे ४९ प्रेष्ठाद्विष्ठं विश्वस्तं ५० फलमाह। य इति शांतिं मुक्तिं ५२ इति दशमे एकषष्टितमोऽध्यायः तत्र इधिकारिणं

किंतु मामग्रजः सम्यङ्न प्रत्येति मणिं प्रति दर्शयस्व महाभाग बंधूनां शांतिमावह ४५ अव्युच्छिन्ना मखास्तेद्य वर्त्तंते रुक्मवेदयः। एवं सा
मभिरारब्धः श्वफल्कतनयो मणिं ४६ आदाय वाससाच्छन्नं ददौ सूर्यसमप्रभं स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ४७ मार्जया
मास लोकेशः अभिभाष्य हलायुधं। दृष्ट्वा मणिं हलधरस्तदर्थं सोऽप्यागतः ४८ योगपोइमिति मत्वा न श्चकमेकुतु गुंगवा। सत्यभामापि
त्यस्थानं मत्वाना स्वात्मनोचितं ४९ गृहीत्वैव द्विस्तावदहरे स्थित मजीजनौ। जांबवत्यपि कृष्णार्थं पित्रा दत्तं ममेति ह ५० स्तुहांवक्रे म
णौ तेन सर्वं विज्ञाय माधवः। अक्रूरस्य करे भूयो मणिं प्रत्यर्पयद्विभुः ५१ यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमं
गलं च। आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्तिं दुरितमपोह्य याति शांतिं ५२ इति श्रीभागवते महापुराणे दशमस्कंधे ए
कषष्टितमोऽध्यायः श्रीशुक उवाच एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः। इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः १

नत्र योगप्रगुप्तोपसंहारार्थं भक्तवात्सल्यादि विशेषं कथयति कतिपयैरध्यायैः श्रुतजादौ हरेर्भक्तवात्सल्यं दर्शयितुमाह। एकदेति। एकदा
कस्मिंश्चिदवसरे प्रतीतान् शेषाद्विमुतोन प्रख्यातान् को विलक्षा। भगवद्रूपाभरणेन भूषिता रवा। प्रतीतोऽभिप्रेते ख्याते ज्ञाने प्रत्यर्थिते त्रुथ
इतियादवः। प्रतीतः प्रथिते ख्याते वित्तविज्ञानकोविदइत्यमरः १ ॥ ॥

मुकुंदं मुक्तिप्रदं शारीरं प्रत्यागतं प्रविष्टं स्वरत्वमप्राणं इष्ट्वा चक्षुरादीनीन्द्रियाणि यथोत्तिष्ठंति २ अच्युतस्यांगसंगेन ३ ४ कृष्णा द्रौपदी ५ ६
तस्यै कृतामिवंदना। आमिरं मितो आलिंगितः। परिपृष्टवांधवत्रयेति शेषः ७ क्लेशपथायामदर्शनं क्लेशाना शकरस्वरूपदर्शनं आत्रुटहादा
वनुभूताः स्वाश्च बहुरक्लेशान्स्मरंती तं कुशलमाह इत्यन्वयः ८ किमत्राह। तदेवेति। हे कृष्ण। यद्यदा स्मरंतां नो कृतं तत्तदा तुर्यमायदा मेधा ताक्रूरः प्रेषि

दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं। उत्तस्थुर्युगपद्वीराः प्राणं मुख्यमिवागतं २ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः। सानुरा
गस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ३ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं। फाल्गुनं परिरभ्याथ यमाभ्यामभिवंदितः ४ परमास
न आसीनं कृष्णा कृष्णमनिंदिता। नवोढा व्रीडिता किंचिच्छनैरेत्याभ्यवंदत ५ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः। निषसादास
नेन्ये च पूजिताः पर्युपासते ६ पृथां समागम्य कृताभिवंदनस्तयातिहार्दार्द्रदृशाभिरंभितः। आपृष्टवांस्तां कुशलं सह स्नुषां पितृ
ष्वसारं परिपृष्टवांधवः॥ ७॥ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना। स्मरंती तान्बहून्क्लेशान्क्लेशापायात्मदर्शनं ८ तदैव कुशलं नो
भूद्यत्सनाथाः कृता वयं। ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥९॥ पांचालेषु स्थितानस्मान्स्वयंवरकृते यदा। अक्रूरस्त्वा ततो मस्वं
तेन स्मा संस्तुवोषिता १० इत्युक्ता पांतदा कुंत्या प्राह योगेश्वरः स्वयं। पांचालेषु स्थितानेत्य सुतांस्ते द्रुपदे नृपे ११ कुंभकारस्य शा
लायां सुषिता स्नुषा भार्यया। दृष्ट्वागतोऽहं दिवसे तस्मिन्नेवाविलंबितः १२ ॥ ॥

ततः तदैवास्माकं कुशलमभूदित्यन्वयः। कथमेतदत्राह यदिति। यद्दितुस्त्वया पिसंबध्यते। हे कृष्ण त्वेन अस्मत्कुशलं स्मरता त्वया सनाथाः आमि
वंतः कृता इति मत्वा इत्वा तामुपद्रवो न कर्तव्यः यतस्ते कृष्णनाथा अस्मान् घ्नंतीति ९ किंच यदा स्वयंवरकृते पांचालेषु स्थिता नस्मान् तुसृत्य
स्वमागतः तदा तेन त्वया त्वद्गुणानुसंस्मृत्यास्तु स्तोषिताः आसं इत्यन्वयः १० इदानीमागमनविलंबः किमिति कृत इति कुंत्याहाई शंकां परिहरन्न
हाइतीति ११ १२

द·उ·

३०

सीरधरो हलधरः बलभद्र इत्यर्थः १२ १३ कार्ययंत्रितः कार्यवशः। ईश्वरस्य तव इदं वचनं लोकचेष्टानुसारि न तु तथ्यमिति भावेन प्रतिवक्ति। इतीति
द्वः स्वकीयः परः परकीयः शत्रुपक्षभवः १४ शत्रुमित्रविभागाभावे जनार्दनो मुरारिर्मधुसूदनः पार्थसारथिरित्यादीनि नामानि विक्रमनिमित्तानि क
थमत आह। तथापीति १५ इति सद्धापे वार्षिकाश्चतुर्मासाः कालसंबंधिनः राज्ञाभ्यर्चितः उवासेति शेषः १६ १७ विपिनं गंभीरं १८ महिषान्रुरून्द्विषा

निहतं शतधन्वानं सत्यभामा पितुर्हृतं। शतधन्वनिरुद्दिष्टौ इति सीरधरोग्रजः १२ कुपितो मा मना इत्य विदेहा विमनायतो। एवं वंतं महा
कालं तदागमनकांक्षया १३ कुरुएवावसंक्षापि ना गच्छ कार्ययंत्रितः। इत्येवं वादिनं कृष्णं भीमाह स्नेहपरिप्लुता १४ नतेस्ति स्वः पर इति विश्व
स्य सुहृदात्मनः। तथापि स्मरतां सर्वं त्रिलोका गृहं सिद्धदिश्थितः १५ इति वैवार्षिकान्मासान्राज्ञा सोभ्यर्चितः सुखं। जनयन्नयनानंदमिंद्र
प्रस्थौकसां विभुः १६ एकदा रथमारुह्य विजयो वानरध्वजः। गांडीवं धनुरादाय तूणौ चाक्षयसायकौ १७ साकं कृष्णेन सन्नद्धो वि
हर्तुं विपिनं वनं। बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा १८ तत्राविध्यच्छरैर्व्याघ्रान्सूकरान्महिषान्रुरून्। शरभान्गवयान्खड्गा
न्हरिणान्शशशल्यकान् १९ तान्निन्युः किंकरा राज्ञे मेध्यान्पर्वण्युपागते। तृट्परीतः परिश्रांतो बीभत्सुर्यमुनामगात् २० तत्रोपस्पृश्य वि
शदं पीत्वा मृष्टमणिप्रभं। कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां २१ तामासाद्य वरारोहां सुद्विजां रुचिराननां। पप्रच्छ प्रेषितः सख्या फाल्गु
नः प्रमदोत्तमां २२ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि। मन्ये त्वां पतिमिच्छंतीं कन्यां कथय शोभने २३ ॥ ॥

रुरुस्तु कृष्णसारः शरभाः अष्टपदाः खड्गान् गण्डान् गवयाः विशेषाः हरिणान् सामान्यमृगान् शल्यकान् शलभान् १९ राज्ञे युधिष्ठिराय। पर्वणि श्राद्धो
चिते यजनकाले वा २० कृष्णौ पार्थवेंद्रार्जुनौ २१ सख्या कृष्णेन २२ कन्यां दीप्तां स्तुत्यनररजसं। अत एव पतिकामयमानां। कनदी प्रातिरि
भानुः अनवाप्तपतिः कन्या जातवीर्या वरार्थिनी तु स्यात् कमाला २३ ॥ ॥

राम

३०

वरेण्यं प्रार्थनीयं २४ अनाथवत्सलः २५ २६ गुडाकेशः घनकेशः जितनिद्रो वा। यथा कालिंदी ऊचे तथा सोपि वासुदेव २७ २८ राजाधिदेव्याः
राजाधिदेवी। नेनामक्षेपायाः ३४ नीलेत्याह्वयो नाम यस्याः सा नीलेत्याह्वया। आप्रवृषभास्तीव्रा बलक्षतां संतापकोपयोरिति पाठः ३५ वीरान्

कालिंद्युवाच अहं देवस्य सवितुर्दुहिता पतिमिच्छती। विष्णुं वरेण्यं वरदं तपः परममास्थिता २४ नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनं।
तुष्यतां मे स भगवान्मुकुंदोनाथवत्सलः २५ कालिंदीति समाख्याता वसामि यमुनाजले। निर्मिते भवने पित्रा यावदच्युतदर्शनं २६ त
थावदद्गुडाकेशो वासुदेवाय सोपि तां। रथमारोप्य तद्विद्वान्धर्मराजमुपागमत् २७ वसंस्तत्र हृषीकेशः शक्रप्रस्थे यथासुखं। वि
श्वकर्माणमाहूय शिल्पविद्याविशारदं २८ अद्भुतं कारयामास नगरे धर्मसूनवे। स प्रासादपुरद्वाराट्टाट्टालतोरणं २९ पुरंदरपुर
प्रख्यं स्वानां प्रियचिकीर्षया। अथ पार्थैरनुज्ञातः सुहृद्भिः स्वजनावृतः ३० आययौ द्वारकां भूयः साम्यकीप्रमुखैर्वृतः। अथोपयेमे का
लिंदीं पुण्येनर्त्वर्कऊर्जिते ३१ रूपयौवनसंपन्नां मनोनयननंदिनीं। वितन्वन्परमानंदं स्वानां परममंगलं ३२ विंदानुविंदावावंत्यौ दुर्यो
धनवशानुगौ। स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ३३ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः। प्रसह्य हृतवान्कृष्णो राजन्राज्ञां
प्रपश्यतां ३४ नग्नजिन्नाम कौशल्य आसीद्राजातिधार्मिकः। तस्य सत्याभवत्कन्या राजन्नीलेति चाह्वया ३५ तां न शेकुर्नृपा वोढुमजि
त्वा सप्त गोवृषान्। तीक्ष्णशृंगान्सुदुर्धर्षान्वीरगंधासहान्खलान् ३६ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः। जगाम कौशल्यपुरं सैन्ये
न महता वृतः ३७

असहान् गंधयति हिंसयंतीति वीरगंधाः तान्। गंधो लेशे च हिंसायां घ्राणग्राह्ये प्रकीर्तितः इति। वीरस्य राहोर्गंधिं च गंधो येषां तेन तथा तान्। वीरो राहो
हरौ शक्र इति। महान्तो घनाः मेघा यथा नीलाः तथा तान्। यद्वा महाकठिनान्। महाकृष्णाः एव विशिष्टितान् घनाः खलान् संपातमेघकाठिन्यकृष्ण
राः इति ३६ वृषजिल्लभ्यां लब्धुं योग्यां सेनया सेनासमूहेन ३७ ॥ ॥

द० उ०

गुरुणा बहुमानेन महार्हणेन ३८ अभिमतम् अभीष्टं वरं वरणयोग्यं रूपं च रोनानुरूप जामाता वोर्ढा देवीमिति तर्हि तावितिः। आशिषां भार्याभिलाषाणां
पतिः साधकः। आशीरु रागद्वेषाव्योरुभयाः कामाभिलाषयोः। यदि मे मया व्रतः व्रतं सम्यक् धृतः। अनुपयुक्तत्वेन निश्चितवत् भवत्वेतन्मां हिं सस्वतः स
त्रिदानंदात्मा श्रीकृष्णः करोतु मम पाणिग्रहणं करोत्विति शेषः। व्रतानां सम्यक् इत्यत्रिनृ थैव्वपृत्यय। यदि सत्यो हृतो व्रतो ऽस्ति तर्हि सव्रतः
सफलत्वेन कृष्णं नः पतिं करोत्विति भाव ३९ आत्मनाम्सलाभेन ४० सुकृतसेतुपरीप्सया स्वकल्पितवर्णाश्रमलक्षणसेतुपालनेच्छया मपि

३१

सको ऽश्वलपतिः प्रीतः प्रत्युत्थायासनादिभिः। अर्हणेनापि गुरुणा पूजयन्प्रत्यनंदत ३८ वरं विलोक्याभिमतं समागतं नरेंद्रकन्याचक
मे रमापतिं। भूयादयं मे पतिराशिषां पतिः करोतु सत्यो यदि मे धृतव्रतः ३९ अर्चितं पुनरित्याह नारायणजगत्पते। आत्मनादेव पूर्ण
स्य करवाणि किमल्पकः ४० यत्पादपंकजरजः शिरसा विभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः। लीलातनुः स्वकृतसेतुपरी
प्सया यः कालेदधत्स भगवान्मम केन तुष्येत ४१ शुक उवाच तमाह भगवान्कृष्णः कृतासनपरिग्रहः। मेघगंभीरया वाचा स
स्मितं कुरुनंदन ४२ श्रीभगवानुवाच अप्यत्र काले विदुषः स्वयंवराद याचितां वरमाकुरुत्नमे। सद्भिः भ्रूणां पुत्रार्थभागिनां वे
लो विनाह्वानमपि स्थितिश्वरः ४३ नरेंद्र याञ्चा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्त्तिनः। तथापि याचे तव सौहृदेच्छया कन्यां त्व
दीयां नहि शुल्कदा वयं ४४ ॥ ॥

स्थितः। स्वेनैव कृते न कर्मणा ४१ २ विदुषो विद्वांसः। स्वयंवरादन्यत्रकाले। अयाचितां वरम् उत्तमम् आहुः। पुत्रपार्थभागिनां प्रयोजनां शा
भावाज्ञभ्रूणां मध्ये सोऽर्थार्थी तां वेलां कालं विनाह्वायस्थानमिति शेषः। आह्वानमिति पाठे स्नोयाचिता स्वयंवरकालं विनापि स्थितिं प्रभ्रू
णामाह्वानमर्हतीति शेषः वेलेति पाठे जभ्रूणामाह्वानं विनापि स एव वेला कालः स्वयंवरात्व्यइत्याद्धरित्यर्थः ४३ सामान्यमुक्त्वा विशिन
ष्टि। नरेंद्रेति। राजन्यबंधोः राज्ञां वंशेजातस्य निजधर्मवर्त्तिनः क्षात्रधर्मम् अनुवर्त्तमानस्य। शुल्कदा वेतनप्रदाः ४४ ॥ ॥

राम
३१

कन्यायाः वरपरीप्सया वरेच्छया ४६ दुर्दांताः अशक्यशिक्षाः दुरवग्रहा ग्रहीतुम् अशक्याः ४७ ८ परिकरं चैलोत्क्षीबादिलक्षणं ४९

राजोवाच कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः। गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी ४५ किंत्वस्माभिः कृतः पूर्वं स
मयः सात्वतर्षभ। पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ४६ सप्तैते गोवृषा वीर दुर्दांता दुरवग्रहाः। एतैर्भग्नाः सुबहवो भिन्नगात्रा नृ
पात्मजाः ४७ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन। वरो भवानभिमतो दुहितुर्मे श्रियःपते ४८ श्रीशुक उवाच एवं समयमाकर्ण्य
बद्ध्वा परिकरं प्रभुः। आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ४९ बद्ध्वा तान्दामभिः शौरिर्भग्नदर्पान्हतौजसः। व्यकर्षल्ली
लया बद्धान्बालो दारुमयान्यथा ५० ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः। तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ५१ राज
पत्न्यः स्वदुहितुः कृष्णं लब्ध्वा प्रियं पतिं। लेभिरे परमानंदं जातश्च परमोत्सवः ॥५२॥ शंखभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः। नरा ना
र्यः प्रमुदिताः सुवासःस्रगलंकृताः ५३ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः। युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससां ५४ न
वनागसहस्राणि नागाच्छतगुणान्रथान्। रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ५५ दंपती रथमारोप्य महत्या सेनया वृतौ। स्ने
हप्रक्लिन्नहृदयो यापयामास कोशलः ५६ पारिबर्हं च संगृह्य द्वारकामेत्य सत्यया। रेमे यदूनामृषभो भगवान्देवकीसुतः ५७ श्रु
तकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः। कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ५८ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युतां। स्वयं
वरे जहारैकः स सुपर्णः सुधामिव ५९ ॥

५२ गीतवाद्यानि प्रमुदिता अभवन्निति शेषः ५३ परिबर्हं स्त्रीधननिकायं ५४ ५९ ॥ ॥

द॰ उ॰

भौमं हत्वा तस्य भौमस्य निरोधात् तत्कारागृहादाहृता आनीताः ६० इति दशमे द्विषष्टिरध्यायः   यथा कथं प्रष्टं तत्सर्वं २ १ छत्रे
कुण्डले यस्य महत्कुण्डलः हृतकुण्डलो वंधुर्मातायस्य स तथा तेनामरकेण हृतममराद्रेर्मेरोः स्थानं यस्य स तथा ३ तेन प्राग्ज्योतिषंपुरं न

३२

अन्याश्च विविधा भार्याः कृष्णस्यासन्महत्प्रभाः। भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ६० इति श्रीभागवते महापुराणे दशमस्कं
धे द्विषष्टिरध्यायः   राजोवाच   यथा हतो भगवता भौमो नीता यथा स्त्रियः। निरुद्धा या एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः १ श्रीशुक
उवाच   द्वारवत्यां महाभागो निवसत्सु तैर्नृपादीनेमोद्विग्रविघ्नेन समागम्य त्रिविष्टपात २ हृतछत्रेण शक्रेण हृतकुण्डलबन्धुना।
हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं ३ इन्द्रेणास्य गोविंदः सुसंप्रश्य विसृज्य तं। सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ ४
हिमाद्रेस्तुंगशिखरे जलाग्न्यनिलदुर्गमं। गिरिदुर्गैः शस्त्रदुर्गैर्मुरुपाशायुतैर्दृढैः। ५ स संप्राप्य भटैर्दुर्गं प्रदानवेंद्रपुरं महत्। गदया निर्वि
भेदाद्रिप्राकाराकारसंस्थितं ६ शरैर्भिद्य प्रविश्य तान् शस्त्रदुर्गाणि सायकैः। चक्रेण मौरवं पाशं चक्रेणामंदमच्छिनत् ७ ज्या
मालां तथाघोरांश्चिकर्त्तासिना हरिः। वायव्यास्त्रेण सलिलं वारुणास्त्रेण पावकं ८ हरिर्निमिषमात्रेण नाशयामास भारत। शंखना
देन तीव्रेण मनांसि च मनस्विनां ९ पांचजन्यध्वनिं श्रुत्वा युगांतशनिभीषणं। मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात् १० त्रिशूल
मुद्यम्य सुदुर्निरीक्ष्यो युगांतसूर्यानलरोचिरुल्बणः। ग्रसंस्त्रिलोकानिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ११ ॥ ॥

रकस्य नगरं ४ कुत्र तत्र गरमत्राह। हिमाद्राविति। जलेनाग्निना मिलेन वायुना दुर्गमं गंतुमशक्यं। मुरपाशा नाम सूतैः अनेकैः षट्सह
स्रैरित्यर्थः। यद्वा मुरपाशैरयुतैरसंवद्धैः पृथक्कृतैः। शस्त्रदुर्गैः दुर्गमोपि गिर्यादिक्रमेणाऽमंदमनलं ७ ११ ॥ ॥ राम

३२

निरस्य मुक्ता। आहूस्य प्रादेनेति शेषः १२ ४ प्रमोहिनीं संतोषजननीं १५ १६ भौमेन प्रयुक्ताः प्रेरिताः निराक्रमन्निर्गताः। आसज्य आमा

आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः। स रोदसी सर्वदिशोऽम्बरं महानापूरयन्नण्डकटाहमावृणोत् १२ तमापतंतं त्रि
शिखं गरुत्मतो व कर्तवाणे द्वितये न केशवः। मुखेषु तस्यापि शरान्समर्पयंस्तुनर्दितोसोप्यसुवन्मसुद्विषे १३ तामापतंतीं गदया गदाग्रजो
गदां सृधे निर्विभिदे सहस्रधा। उद्यम्य बाहूनभिधावतो दिशः शिरांसि चक्रेण जहार लीलया १४ व्यसुः पपातांभसि कृत्तकंधराणि विभिदे
सहस्रधा। उद्यम्य बाहूनभिधावतो दिशः। शिरां कृत्तपक्षो दिरिवेंद्रतेजसा। पपात विष्णोः शिरसि प्रमोदिनी प्रसूनवृष्टिर्निहते मुरे सुरे १५
तस्यात्मजाः सप्त पितुर्वधातुराः विक्षीर्यवस्त्रस्य रणे प्रतिक्रियां। क्रुधवध्वविप्लुः प्रवणोविभावसुर्नभोवसुस्तानरुणश्च सप्त १६ रथा
समातुस्वर्गप्रयुक्तार्भौमप्रयुक्ता भवन्नान्निराक्रमन्। प्रयुंजतासज्य शरासनान् भटाः शक्त्यष्टिशूलानजिते रुषोल्बणाः १७ तस्य
त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्च कर्त्त ह। तान्योधमुख्यान्पद्ममहायं निकृंत शीर्षोरुभुजांघ्रिकार्मुकान् १८ ततोद्भुत
तुरंगत्वा भटा राजपुरं महत्। हतान्पुत्रसुतान्सर्वान्नरकाय न्यवेदयन् १९ सेनानीकान्स्वसुतान्स्वस्य केतं ताञ्छ्रुत्वा स्वसुतकोपभूमि
जः। निरीक्ष्य दुर्मर्षणमास्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत् २० रथैरनेकसाहस्रैर्गजैश्च बहुभिर्वृतः। महात्मा सेनया पुरुष आसा
योधनं बली २१ दृष्ट्वा सभार्यां गरुडोपरि। स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा। गृहीतकोदंडसुदर्शनशंखकौमोदकीचक्रधरं स्वतर्जुनं २२
नीलजीमूतसंकाशं दृष्ट्वातं गजवाहनः। शंखमाध्माय गोविंदः सिंहनादं व्यनीनदत् २३ ॥ ॥

रोप्य १७ कूटं समूहं १८ १९ २० आयोधनं युद्धस्थानं २१ सूर्योपरिष्टात्स्थितं तडितासहितं घनं मेघं २२ २३ ॥

जोहेनायसानिर्भिनांतेन शतघ्नीप्रयोगेन विव्यधोयथाताडनइतिधातोःतडितोभूत् २४ ५ ततोभुतदनंतरं २६ इतिदशमेत्रिषष्टितमः

वक्षस्यविध्यदसिपतेःसुघोरान्शरान्नवर्षाभुतमू (?) द्रिर्दुर्जयाग्राह्लसभौमो व्यसृजच्छतघ्नीं तेनाहतः प्रैति तेन भृशोसविव्यथे २४ अनेकवाणनिर्मुक्ता नरकेणास्य पन्निवा चकर्तवाणैर्मुगपन्नरद्रुतमिवाभवात् २५ ततोसुसैन्यं भगवान् गदाग्रजो विचित्रपक्षैर्निशितैः शरौघैः निकृंतबाहूरुशिरांस्त्रि विग्रहं चकारतत्रैनृपसाश्वकुंजरं २६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रिषष्टिरध्यायः श्रीशुकउवाच यानियोधैःप्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह। अछिनत्केशवसीत्रणैः शरैरेकैकशस्त्रिभिः। उह्यमानःसुपर्णेन पक्षाभ्यां निघ्नता गजान् १ गरुत्मताहन्यमानास्तुंडपक्षनखैर्गजाः। तुरंगमाश्चदुर्दर्षाः पेतुस्तुर्व्यांगतामदः २ दृष्ट्वाविद्रावितंसैन्यं गरुडेनार्दितंस्वकं। तंभौमःप्राहरच्छक्त्या वज्रेणोवहरिर्गिरिं ३ तयाभिविद्धोगरुडोमालाविद्धइवद्विपः। नाकिंचिदपिराजेंद्रचचालनरकाहवे ४ ततःकार्मुकमादायनरकःशरसंचयान्। मुमोचकृष्णेतान्सर्वानच्छिनत्केशवःशरैः ५ ततोर्द्धचंद्रेणनरकंसुसंधायशरासने। आकृष्यकामंविस्तायतत्त्वापंकेशवोछिनत् ६ ततःकालायसमयींगदांगुर्वीधराःसुतः। आददेतांक्षुरेणवकर्तमधुसूदनः ७ ततोनिशातंपरशुंभौमःपरवलार्दनः। प्राहिणोद्गिरवेतंचविच्छेदश्रीधरोसिना ८ ततःकृष्णायचिक्षेपतोमराम्यंचसप्तभिः। चकारसिंहनादंचनरकःपरवीरहा ९ तांश्चतोमरान्कृत्वाश्रेष्ठशरेणैकेनकेशवः। विच्छेदयोगपद्येनतद्भुतमिवाभवत् १०

गरुडस्यपक्षाभ्यांनिघ्नता विद्रुताश्चगजाश्छिनत् १ २ हरिरिंद्रः ३ ५ आकृष्यकामंआकर्णंशरणाकर्षणेकृं ६ नाम्नाक्षुरप्रेणशरेण ७ १०

कुरनेमिनानिशितनेमिना ११ ७ भक्त्याप्रवणप्रासततयाभियाश्रध्या १८ भक्तोछयानुपात्रंश्रीकृतंस्वं १९ २० वासुदेवायसर्वत्रस्थित्वाद्योतमानाय। विश्ववेमक्षिद्रानंदरूपाय पुरुषायपूर्णायकुणाय। आदेर्जस्त्राणोवीजायपद्मजकाय २१ अस्यप्रपंचस्यजनयित्रेजगत्कारकाय

शूलंभौमोच्युतंहंतुमाददेवितथोद्यमः। तद्विसर्गात्पूर्वमेवनरकस्यशिरोहरिः। अपाहरद्गजस्थस्यचक्रेणक्षुरनेमिना ११ सकुंडलंचारुकिरीटभूषितं वभौपृथिव्यांपतितंसमुज्वलत्। हाहेतिसाध्वित्यृषयःसुरेश्वरामाल्यैर्मुकुंदंविकिरंतईडिरे १२ हत्वाहरिर्नरकंदैत्यवर्यमुद्ग्रीणैःप्रद्विष्ठितोलोकपालैः। समाहृतःपौरमुख्यैःसभार्यःप्राग्ज्योतिषंप्राविशदृष्टुकामः १३ तत्रापश्यद्यदुश्रेष्ठो विचित्रंमणिपर्वतं। छत्रंचवारुणंदृष्ट्वासलिलस्राविभास्वरं १४ शक्रायप्राहिणोद्भूपःकोशाद्योमणिपर्वतं। वरुणायतथाछत्रंप्राहिणोद्दैत्यकिंकरैः १५ तान्विसृज्यहरिर्दिव्यान्स्वयमेवजगत्पतिः। प्राविशद्भौमसदनंपुरंदरपुरोपमं १६ ततोधराकृष्णमुपेत्यकुंडलेप्रतप्तजांबूनदभास्वरे। पौत्रंचवीरंभगदत्तसंज्ञितंनिवेद्यमालामपिवैजयंती १७ अस्तौषीदथविश्वेशंदेवीदेववरार्चितं। प्रांजलिःप्रणताराजन्भक्तिप्रवणयाधिया १८ पृथिवीउवाच नमस्तेदेवदेवेशशंखचक्रगदाधर। भक्तेछोपात्तरूपायपरमात्मन्नमोस्तुते १९ नमःपंकजनाभायनमःपंकजमालिने। नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २० नमोभगवतेतुभ्यंवासुदेवायविष्णवे। पुरुषायादिवीजायपूर्णवोधायतेनमः २१ अजायजनयित्रेस्यब्रह्मणेनंतशक्तये। चराचरात्मन्लोकेशपरमात्मन्नमोस्तुते २२ ॥ ॥

ब्रह्मणेवेदादिशाहुराशिदेशायसर्वशब्दवाच्यत्वेहेतुमाह। अनंतेति। अनंतावैवेदाइतिश्रुतेः। चराचरात्मन्श्चराचरमात्मादेहःप्रतिमास्थानीयोयस्यसतथा। परमात्मन्प्रत्यक्ष्वरूप २२ ॥ ॥

सिसृक्षुः स्रष्टुकामः उत्कटः उत्कटस्तं रजो गुणं विभर्षि तिपालस्तेो निरोधाय संहाराय सं हृतं तज्ज्ञानं संवरणं कारणं तमो गुणं स्थानाय जगत्स्थि
ये सत्वगुणं कालः प्राणिनामदृष्टं पावकः । एवं विधः क इति तत्राह प्रधान इति । प्रधानः पुरुषो । सिद्धरूपोऽन्नमोसीत्यर्थः । न त्वमः पुरुषस्त्वन्य इति स्पृ
तेः पुरुषत्वेपिपरिछिन्नत्वं नास्तीत्याह । अपार इति । यद्वा । जगत्कारणं प्रधानं पुरुष इति केचिन्मन्यंते तदाशंका निवारयति प्रधान इति प्रधा
न शब्द वाच्यः पुरुष शब्द वाच्यश्च त्वमेव । तर्हि परिशिष्यमाणः क इत्यत्राह अस्येति । अस्य प्रपंचस्य पारः परिशिष्यमाणः सेतुरनदीपारः तीरं त
शब्दवाच्यस्त्वमित्यर्थः २३ सृष्ट्यादिकर्तृत्वमित्युक्तं तावेदं कर्तृत्वप्रतीनावपिधात्रादिशब्दाभ्यां विरिंचादेरपि कर्तृत्वमं कामिदानीं निवार

त्वं वै सिसृक्षू रज उत्कटः प्रभो तमो निरोधाय बिभर्ष्यसंवृतं । स्थानाय सत्वं जगतो जगत्प्रभो कालः प्रधानः पुरुषोस्यपारः २३
अहं पयो ज्योतिरथो निलो नभो मात्राणि देवा मन इंद्रियाणि । कर्त्ताभिमानीत्यखिलं त्वकारणं त्वय्यद्वितीये भगवन्नयं भ्रमः २४

यति । अहमिति । अहं नाम्नी पृथिवी । मीयंत इति मात्राणि शब्दादि विषयाः । मानं स्पष्टु विषयज्ञानं सत्वेन त्रायंत इति वा । देवा इंद्रियाभि
मानिनः । कर्ता अहंकाराभिमानी । महात्मा महत्तत्वाभिमानी विरिंचः । त्वशब्द एवार्थे इति शब्दः समाप्तिवचनः । महदाद्यभिमान्यंतमखिल
कारणं अद्वितीये त्वय्येव त्वमेव धारयसीत्यर्थः । आतिथ्य त्वत्क दाचिन्नेत्याह । भगवन्निति । हे ऐश्वर्यादिगुणपूर्ण वा । अयं जगद्भ्रमः
यद्भ्रमणवत् विश्वस्य परिवर्तनं त्वन्नियतमित्यर्थः । भ्रमशब्दस्यारोपार्थत्वांगीकारे अर्थक्रियानुपपत्तिरिति २५ ॥ ॥

सां प्रतं तत्र किं विधेयमित्यत्राह तस्येति । अयं पुरोवर्त्ती तस्य नरकस्यात्मजः औरसः पुत्र इति जानीहीति शेषः । तर्हि किमिति तस्य शरणं न करो
तीत्यत्राह तवेति । तव प्रपन्नार्तिहरं पादपंकजं प्राप्य त्वां प्रसादयितुं भीत अस्त इत्यन्वयः । ततः किमत्राह तदिति । यतो भीत स्ततस्मात्तत्पालनं चैत
वेत्याह कुर्विति । एतेन किं फलं स्यादित्यारांकापापनिमित्तं सर्वमनर्थजातं तत्नाशे सर्वसुखं स्यादिति भावेनाह । अखिलेति । यद्वा प्रपन्नार्तिह

तस्यात्मजोयं तव पादपंकजं भीतः प्रपन्नार्तिहर प्रसादितं । तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्मषापहं २६ इति भूम्या
र्थितो वाग्भिर्भगवान् भक्तिनम्रया । दत्वाभयं भौमगृहं प्राविशत्सकलर्द्धिमत् २७ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं । भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः २८ तं प्रविष्टं
स्त्रियो वीक्ष्य नरवर्यं विमोहिताः । मनसा वव्रिरेभीष्टं पतिं दैवोपपादितं । भूयात्पतिरयं
मह्यं धाता तदनुमोदतां ३१ इति सर्वाः पृथक्कृष्णे भावेन हृदयं दधुः । ताः प्राहिणोद्द्वारवतीं सुमृष्टविरजोंबराः ३२ नरयानैर्महाकोशान्रथाश्वान्द्रविणं महत् । ऐरावतकुलेभांश्च चतुर्दंतांस्तरस्विनः ३३ भगवान्नायदत्वेकं सुप्रतीकं ततोपरान् । पांडुरांश्च चतु
षष्टिं प्रेषयामास केशवः ३४ इति श्री भागवते महापुराणे दशमस्कंधे चतुःषष्टिरध्यायः ॥ ॥

रं भगवंतं प्रसादयितुं तव पादपंकजं भीतः संचलितः प्राप्त इत्यर्थः । भीतिभयसंचलनयोरिति धातुः । अतो रक्षेत्याह । तदिति २७ वंश
वंशप्राप्ते । तत्पदे अमात्यपदे श्रेणीपंक्तिः शालो वा २८ ३२ ऐरावतकुलेजातानिभान् ३३ पांडुरान् श्वेतदेहान् इति श्यामचतु
षष्टिः ॥

द॰ उ॰ गतद्वारैर्नष्टसंतापैः ४ ५ उपतस्थे समीपे तस्थौ ६ भामतेजोऽस्याः अस्तीति भामिनी। चिरकालदृष्टं ७ श्वश्रूः भर्तुर्माता ८ ९

३५

श्रीशुक उवाच ॥ हत्वा नरकमत्युग्रं दानवं दानवान्तकः। आरुह्य गरुडं प्रायात्प्राग्ज्योतिषपुरान्नृप १ स गरुत्मान् गगने विष्णुर्वेदितुं दे
वमातरं। जगाम त्रिदशावासं सहितः सत्यभामया २ स्वर्गद्वारं गतो विष्णुर्दध्मौ शंखं महास्वनं। उपाजग्मुस्त्रिदशाः कर्णे तस्य घोषात् दिवौक
सः ३ पूजितस्तैः सुरैः कृष्णो भक्तिनम्रैर्गतज्वरैः। सुरेंद्रभवनं दिव्यं प्रविवेश मनोरमं ४ तत्र शक्रः सभं शच्याः पूजयामास केशवं। स्वैरा
भरणैर्दिव्यैर्विमाल्यैश्च शोभनैः ५ ततः प्रायात्पुरीं मातुरदित्याः सह भार्यया। दृष्ट्वोपतस्थे तं देवी पुत्रमायांतमच्युतं ६ ववंदे तां हरि
स्तस्याः पूजयामास भामिनी। आशीर्भिः परमप्रीता चिरं दृष्ट्वा यदूत्तमं ७ सत्यभामापि कौरव्य श्वश्र्वाः कुशलेन बोधिता। पादयोः कुंडले
तस्या निधाय प्रणनाम वै ॥ ८॥ कृष्णमामाश्लिष्य संतुष्टा सा पुनर्लब्धकुंडला। आनंदबाष्पपूर्णाक्षी प्राह हंका स्वपप्रिया ९ न तेजसा न
वैरूप्यं कांतेन सह विप्रियं। भूयात्कल्याणि सुव्यक्तं मत्प्रसादात्कदाचन १० ततोऽनुज्ञाप्य तां देवीं त्रिदशानपि केशवः। आरुह्य प्रययौ ता
र्क्ष्यं सहितः सत्यभामया ११ महात्मना गगने देवदेव्यो गान्धर्व तानीयमानो विविधं। अपश्यतां नंदनं चारु यत्सं शचीभर्तुरीप्सितं सुगंधं
१२ वनं दृष्ट्वा दिव्यगंधं सुपुष्पं कृष्णः सत्याप्राह पाणौ गृहीत्वा। प्रविश्यास्मिन् साधु चित्रं विहर्तुं युक्तं मे काम्यते केशवेति १३ स्त्र आत्म
स्यागत्ता द्वास्था वचनं गौरवात्। प्रविवेश वनं कृष्णः पालितं शक्रकिंकरैः। तत्रापश्यत्तरून् दिव्यान् रत्नसारं गतान्विलाङ्क फलभारनतान्
भूरिप्रसूनरजसावृतान् १५ ॥ ॥

सत्यभामा मा आशिषा योक्ष्यति। नतेजसेति। वैरूप्यं सौंदर्याभावः विप्रियं कलहः १० ११ सुगंधं सुहृदय प्रियगंधे १२ काम्यते वन संप्रति
शेषः। कामय इति वा १३ १५ ॥ ॥

राम
३५

विविधं चित्रं मुख्यं मिश्रकलं यस्मिन् स विचित्रः। चित्रमालेख्य मिश्रयोरिति मिश्रभाविलसु व्ययोरिति च १७ एतस्य वृक्षस्य फलभागिनः कृतार्थाः
इति सत्याप्रियतत्वया। वैचित्र्यं कथयति। प्रवालेति। प्रवालो रत्नविशेष एव पल्लविका यस्य स तथा। विपुलो विस्तृतः। जातरूपं सुवर्णमेव महान्तनु
र्यस्य स तथा १८ इंद्रनीलमेव छदः यत्र इंद्रनीलच्छदः तेन छन्नः संवृतः लसद्वैडूर्यरत्नमेव वेदिः परिष्कृता भूमिर्यस्य स लसद्वैडूर्यवेदिकः। माणिक्य

चलत्किशलयोपेतान् विहंगध्वनिशोभितान्। विचरन्ती तथा तत्र पारिजातं महाद्रुमं १६ दृष्ट्वा पप्रच्छ गोविंदं विस्मयाकुललोचना। को ना
मायं तरुर्दिव्यो विचित्रो भुवनत्रये १७ सत्यमेतस्य वृक्षस्य कृतार्थाः फलभागिनः। प्रवालपल्लवो विपुलो जातरूपमहातनुः १८ इंद्रनीलच्छद
च्छन्नो लसद्वैडूर्यवेदिकः। माणिक्यपुष्पो विविधमुक्ताफलफलान्वितः १९ गोमेदपक्वफलको वज्रकिंजल्करंजितः। स्फुरन्मरकतस्थू
लशाखो शतविराजितः ॥ २०॥ तरुरेष जगन्नाथ मनो मे हरते भृशं। नेतव्यो यं पुरीं कृष्ण यद्यहं ते प्रिया प्रभो २१ छायायामुपविष्टां मा
मन्यपत्न्यस्त्वानघ। दृष्ट्वा मंस्यंति दयितां मत्तोऽन्यो मां न वा स्मृत २२ इत्युक्तो देवकीपुत्रः सत्यया प्रियकांतया। प्राह स्मायं तरुर्भद्रे न
तयोग्यं हनाहनात् २३ पुरा क्षीरांबुधेर्जातो मथ्यमानात्सुरासुरैः। शक्राय दत्तः सकलैः सदा तत्फलभोक्तृभिः २४ तत्राहार्यमनाह
त्य मयाप्यनिं शतक्रतुं। न हर्तव्यं सरोजाक्षि धर्ममेवानुतिष्ठता २५ नीयमाने च वृक्षेऽस्मिन्पारिजाते शुचिस्मिते। संग्रामो जायते घोर
स्त्रिदशैर्जयकांक्षिभिः २६ इत्युक्ता देवदेवेन सत्यभामा पुनर्दीशिं। प्राह भाषयसे किं मां व्यलीकैः कं समर्हन २७ ॥ ॥

रत्नान्येव पुष्पाणि यस्य स माणिक्यपुष्पः। विविधानि नानारत्नोपेतानि मुक्ताफलान्येव फलानि विविधमुक्ताफलानि तैरन्वितः १९ गोमेदरत्ना
न्येव पक्वानि गोमेदपक्वानि तैः पापकराय यस्य स तथा। वज्ररत्नान्येव किंजल्कानि वज्ररंजितो रुणीकृतः स्थूलाः शाखाः स्फुरंति मरकतरत्नान्ये
व स्थूलशाखो स्फुरन्मरकतस्थूलशाखः। तासां शतेन विराजितः २० १ मंस्यंति निरूपयंति २२ ३ तस्मात्सकलाज्जातानां फलानां भोक्तृभिः
२४ ५ जयकांक्षिभिः जयेच्छुभिः। जितमुद्देश्यं २६ व्यलीकैः कपटवचनैः २७ ॥ ॥

नन्नूत्वयनेमिनिनमाहनेति २८ विरमपिय माजरा।मितिशेषः उपालभ्यभर्तारंधिता ३६ ३७ सन्नाहोयुद्धोद्योगार्थंविशमानंगोकुलं।संनिपात

मामनंतदुरपाचाराम्राची मांपृहमागतां।हेतुर्हिदृत्तम्नस्यायंभर्तृपोरुषगर्विता २८ नेतव्यःसर्वथाप्यद्य पारिजातोपमच्युत।प्रिया हृतच
वेत्राथनोचेद्विरमसांप्रतं २९ इत्युक्तःसत्यपाकृष्णस्तानदात्परलकाव।उत्पाद्यारोपयामास पारिजातंगरुत्मति ३० ततोनिवारयामा
सुर्गोविंदंवनपालकाः॥ केचिद्गुत्वामंजम्युर्देवेंद्राय निवेदितुं ३१ कृष्णःकृष्णनद्युर्नव्यसुरेषोमराधिपः।इहसेयदितरस्वंफलंसद्योऽ
भोक्ष्यसि ३२ प्राप्नोषिनपुरींकृष्णसहानेनमहीरुहा।मद्यःपश्यसिदेवेंद्रंदृष्टतोऽस्मृत्युतापुष्पं ३३ सुरेंद्रांतिकमासाद्यइतंतव
नरस्तकाः।नपविष्टशांमंशाच्याशक्रंदृष्टातुवचनृप ३४ वनरक्षकाऊचुः अवज्ञयाविरदेवानिंद्राणीवत्वयासह।जहारकृष्ण
दपितापारिजातंमहाद्रुमं ३५ तत्कास्माभिर्मृशंदेववार्यमाणोहरिःप्रिया।उपालभ्याहरद्दृक्षंभर्तृपौरुषगर्विता ३६ श्रीशुकउ
वाच इत्याकर्ण्यप्रियंशक्रोदंडाहतइवोरगः।शचीविलोक्यपार्श्वस्थांनामृष्यत्सत्यराभवं ३७ सन्नाहोद्योगमाघोष्यसविपा
त्यचसैनिकान्।लोकपालान्समाहूयनिश्चक्रामसुरेश्वरः ३८ ऐरावतंचतुर्दंतमारुह्यवरवारणं।गृहीतवज्रंगच्छंतमनुजग्मुर्दिवौ
कसः ३९ वैश्वानरश्चतुरगमारुह्यदृढदंशितः।घोरांशतघ्नीमादाय्यवगच्छंपयोरणं ४० यमस्त्वारुह्यमहिषंदंडमादायवी
र्यवान्।मृत्युकालादिभिर्युक्तोयुद्धार्थीशक्रमन्वगात् ४१ निर्ऋतिश्चमहातेजाघोरमारुह्यपौरुषं।असिहस्तोमहाबाहुर्युद्धाय
प्रययौनृप ४२ ॥ ॥

सम्मेलयित्वा।सैनिकान्सेनानायकान् ३८ ३९ श्रवंगृह्णेयस्याःसातां ४० मृत्युकालादिभिःप्रभृतिभिः ४१ ४२ ॥

चक्रसृतामुखेन ४४ नरवाहनोवैश्रवणः ४५ ६ सुवर्णशुषिरैःकाहलैः ४७ क्ष्वेलितैःसिंहनादैःआस्फोटितैःभुजास्फालैः

मकरंभीषणंकामारुह्यवरुणस्त्वरन्।पाशोद्यतकरःप्रायात्युद्धायानुशचीपतिं ४३ वायुःकृष्णमृगारूढोदंशितःसोमराधुपः।
सुरेश्वरमनुप्रायाद्योद्धुंचक्रभृतासह ४४ ऊढांचतुर्भिःपुरुषैःशिविकांनरवाहनः।योद्धुकामस्त्वरन्यायाद्धस्तुनापुरुरायुधः ४५
ईशानोवृषभंतुंगमारुह्यदंशितःशूलभृत्।वासवेनसमंप्रायाद्भूतकोटिसमन्वितः ४६ भेरीशंखमृदंगैश्चपणवानकगोमुखैः।सु
वर्णशुषिरैर्दिव्यैःकांस्यतालैश्चभूरिभिः ४७ रथनेमिनिनादैश्चहयानांखरनिस्वनैः।क्ष्वेलितास्फोटितैर्घोरैःसंग्रामाह्वानगर्जितैः
४८ तिष्ठतिष्ठेतिमायाहिक्वयासीतिपुनःपुनः।प्रवदद्भिःसुरगणैःशतशोथसहस्रशः ४९ कंपयद्भिश्चशब्दौघैःप्रेषयद्भि
श्चवाहनं।पुरोहमितिगच्छद्भिःशतशोथसहस्रशः ५० घोरैर्ज्याघातनिर्घोषैःसिंहनादैश्चभूरिभिः।अभिद्रुद्रुवुरुद्धृताःसिं
हंगोमायवोयथा ५१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचषष्टितमोध्यायः श्रीशुकउवाच सुरानभिद्रुतान्दृ
ष्ट्वासत्यामाहजगत्पतिः।इमेप्राङ्गणिकाःप्राप्तास्तवदृंदारकाइति १ तथाब्रुवाणेदेवेशप्रेषितादेवसैनिकाः।नदंतोयुयुधुः
कृष्णेशरवृष्टिंकुर्वतदृढ २ ततःशार्ङ्गसमादायसत्याव्यसनविक्लवा।मुक्ताच्छिद्रेद्बाणौघैस्तान्च्छरान्देवसैनिकैः ३ तत्रोवै
श्रवणःश्रीमान्वज्रभिर्युद्धकेर्ष्टितः।विस्फारयन्स्थालमात्रंकार्मुकंकनकाढवि ४ ॥ ॥

४८ २ इतिदशमेपंचषष्टितमः प्राङ्गणिकाःसंभावनयाभोजयितव्याः।वृंदारकादेवाः १ ३ कनकाविद्धादविःकोटिर्यस्यसत
था ४ ॥

द०उ०

।विशालेजठरेविद्धस्तोत्रनोदरे ६ ७ वसहंतैः शरावि शोषैः ८ ९ अंतरेमध्ये १० ११ १२ १३ १४ १५ १६ १७ १८ १९ निष्ठुरंस्तं

३७

घूर्णाङ्गं त्वोरशरारसुं चरसिंह वद्यनदन्मुरुः । आषिंद्रुरा व समरेतिष्ठति ष्टेतिचाब्रवीत् ५ ततः पंचभिः शरैः सत्यानिशितैर्मर्मभेदिभिः
अर्पयामास वेगेन विशाले जठरे नृप ६ सोतिविद्धो रणे बाणैस्त्रिभिर्भल्लैर्हरिप्रिया । अपोधयद्ध नृपतिः सिंहनादं व्यनीनदत्
७ तान शाशानई च शैस्त्रिभिस्त्रिभिश्चेद सा शरैः । भूयोष्टभिः शरैर्देवी वत्स दंतैर्मनोजवैः ८ विव्याध युद्ध कपतेललाटे कुरुपुंगव ।
पीडितस्तैर्भृशं बाणैः पौलस्त्यः क्रोधविह्वलः ९ संदधे निशितान्बाणानेकविंशतिसंयुगे तानंतरे सत्यभामा सायकैः सम भिरप
१० चिच्छेद निमिषार्द्धेन तिथैकैकं हरिप्रिया । सत्यभामा मातनः कुद्धा पौलस्त्यस्य महद्धनुः ११ अर्द्धचंद्रेण चिच्छेद मुष्टिदेशे द्विधा
नृप । ततोन्यच्चापमादाय सज्जं कृत्वा धनेश्वरः ॥१२॥ ववर्ष शरजालानि क्रोधात्सर्प इव श्वसन् । सर्वांस्तान्सायकान् संख्ये शरैः स
न्नतपर्वभिः १३ चिच्छेद लीलया देवी तदद्भुतमिवाभवत् । ततो क्रुद्धो वैश्रवणः सत्यभामां विलोक्य च १४ प्राहप्रशय इनिष्यामिति
मद्य ममपौरुषं । इत्युक्त्वा तालमात्रेतु चापेयुद्धकसत्तम १५ पश्यतां सर्वदेवानां मार्ष्टुकामः परा भवां । संदधे सुदृढं देवी महेंद्र शरं श
रोत्तमं ॥१६॥ तदेत्वमं तप्तमहत् क्रूरश्रेणहरिप्रिया । चिच्छेद कार्मुकं तस्य मुष्टिदेशे कुरुद्वह १७ ततो मुद्गरमादाय घोरं दानवभीषणं । भ्रा
मयित्वा शतगुणं देव्यै चिक्षेप बिल्वपः १८ तं मुद्गरं महाघोरमायांतं कुरुपुंगव । वामेन पाणिना कृष्णोजग्राह देवर्षि हासच १९
ततो निवृत्तसंग्रामो विद्रुद्राव धनेश्वरः । शशंस देवी कृष्णस्य समास्थिष्यामि पूजयन् २० पलायिते धनपतौ संग्रामे कंसवैरिणा । वरुण
स्य रवत्क्रुद्धं पाशमुद्यम्य संयुगे २१ ॥ ॥

यामः निवृत्तयुद्धः २० १ ॥ ॥श्रीरामायनमः॥ ॥ ॥श्रीकृष्णायनमः॥ ॥ ॥ ॥

राम

३७

२२ २ काश्यपपुत्रस्य गरुडस्य २४ ६ वार्धिपतौ वरुणे २७ २८ २९ असाधारणं लोकोत्तरं ३० सायकांचितसर्वांगं शरसंचितस

तमायांतमभिप्रेक्ष्य नाद्यमकरवाहनं । अभ्यद्रवन्महासत्वः शार्दूल इव गोवृषं २२ तयोः समभवद्युद्धं घोरं तार्क्ष्यजलेशयोः । यथा
देवासुरेयुद्धे बलिवासवयोरिव २३ तत्र काश्यपपुत्रस्य कंठे पाशं जलेश्वरः । कृद्ध श्चकर्ष विन्यस्य सिंहः सिंहमिवौजसा २४ तं पन्नगोग्रा
गरुडः सम्यक् इत्यजलेश्वरं । पद्भ्यां गृहीत्वा मकरं चिक्षेप वरुणालये २५ कृष्णा हृहीतपाशः च वरुणो गतवाहनः । पदातिरेव संग्रामाद्वि
दुद्राव यथागतं २६ तथागते वार्धिपतौ संग्रामे वायुपावकौ । सममेवाभ्यवर्त्तेतां गोविंदं कुरुसत्तम २७ पावकः पंचभिर्बाणैर्मधि
तस्थितथास्त्रिभिः । आयोधयत् हृषीकेशं तदद्भुतमिवाभवत् २८ ततः प्रहस्य गोविंदो बाणेनैकेन पावकं । विव्याध सप्तभिश्चैव समीरण
मरिंदमः २९ एकेनाग्निः क्रूरषेणागाढं वज्ज्वलितमिनारिणा । तमसाधारणं मत्वा विदुद्राव रणाद्द्रुतं ३० दृष्ट्वा समीरणस्तूर्णा दग्धपातं हुताश
नं । सायकांचितसर्वांगमात्मानं चातिविह्वलः ॥३१॥ विदित्वा पुंडरीकाक्षं संग्रामे प्रत्युपस्थितं । न्यवर्त्तत कुरुश्रेष्ठ प्राणत्राणपरायण
३२ ततो महिषमारुह्य दंडमुद्यम्य भास्वरं । न कृष्णमभ्यद्रवद्धं द्वयमः क्रोधात्तु रणेत्तिरणः ३३ तमुद्यतमहादंडं दृष्ट्वा कमललोचनः ।
गदां विसृज्य तरसा त्पातयामास भूतले ३४ गदया ताडितो दंडेत्र सहसा परेतराट् । विदुद्राव पराङ्मुखः सिंहेणेव कुरुद्वह ३५ वैवस्व
तं गतं दृष्ट्वा निर्ऋतिर्भयविह्वलः । नाभ्यवर्त्तत गोविंदं योद्धुं विहितताडनः ३६ शंकरस्तु महातेजास्त्रिशूली वृषवाहनः । अनेकभूत
संघातैः कृष्णमभ्यद्रवद्रणे ३७ तावुभौ लोकविख्यातौ बलिनौ वीर्यशालिनौ । चक्राते कदनं घोरं परस्परजयैषिणौ ३८

वीवयवं ३१ ३२ ३३ ३४ परेतराद्यमः ३५ ३६ ३७ कदनं युद्धं ३७ ॥ ॥ ॥श्रीराम॥ ॥

३९ ४० चंचुकोट्या चंचुकोट्या। हयं नंदिकेश्वरं ४१ २ धूर्जटिः शंकरः ५३ ६ पन्नगभूषणः सर्पालंकारः शिवः पाणिभ्यामास्फालने

ईशानो दशभिर्बाणैः कृष्णं ताक्ष्यं च पंचभिः। विव्याध समरे राजन्तिष्ठ तिष्ठेति चाब्रवीत् ३९ ततः शार्ङ्गं समादाय कृष्णः परपुरंजयः। त्रिंशद्भिर्गणपं बाणैर्विव्याध वृषवाहनं ४० गरुडः पन्नगरिपुः पक्षाभ्यां च संयुगे। पक्षाभ्यां चंचुकोट्या च मर्दयामास तं वृषं ४१ भूयोपि कृष्णो नाराचैः पंचाशन्मितैर्नृप। योधयामास समरे शंकरं लोकशंकरं ४२ ततस्त्रिशूलमाविध्य त्रिशितं घोरदर्शनं। प्राहिणोद्वासुदेवाय कुपितो धूर्जटिर्नृप ४३ दृष्ट्वा त्रिशूलमायांतं केशवस्तं निवारितुं। गदां कौमोदकीं गुर्वीं प्राहिणोद्दैत्यमर्दिनीं ४४ तेनैव कौमोदकी शूलेन कृत्वा नभसि संगरं। ज्वलमानो महाघोरोपेततः समयं बुभौ ४५ निपात्याज्ञौ त्रिशूलं तत्तगदा कौमोदकी पुनः। आससाद करं विष्णोः त्रिशूलमपि शूलिनः ४६ ततउद्यम्य निशितं खड्गं पन्नगभूषणः। कृष्णमभ्यद्रवत्तूर्णं पार्ष्णिभ्यां चोदयन्वृषं ४७ तूर्णं दृष्ट्वा त्वा वाहुभ्यां विपाणोतस्मनंदिनः। सशूलपाणिं चिच्छेप वैनतेयो धनुःशतं ४८ ततो विमुच्य संग्रामं त्रिशूली वृषवाहनः। प्रमथैः सहितैः प्रायात्कुरुश्रेष्ठ यथागतं ४९ इति श्रीभागवते महापुराणे दशमस्कंधे षट्षष्ठीऽध्यायः श्रीशुक उवाच ततः स्वयं देवपतिः कृष्णमायान्तं वाहनं। किरीटी बद्धतूणीरः प्रगृहीतशरासनः १ अभ्यद्रवद्रणे कृष्णं गजः केसरिणं यथा। पारिजातकृते राजन्लोभ्या वचनं स्मरन् २ ॥ ॥

नचोदयन्प्रेरयन् ४७ शूलपाणिना सहितं नंदिनं ४८ त्रिशूलित्वं गणस्यापि संभवतीति वृषवाहन इति ४९ इति दशमे षट्षष्टितमोऽध्यायः ॥ ३८

१ ४ तेन रथ युक्तं स्यार्थस्त्री जितस्येति शेषः। आप्य संयुक्तयोर्युक्तमितियादवः ५ सशक्रः युद्धप्रारंभे ६ ७ गात्राण्यवयवाः। आहवनीतिक्रिया

तमायांतमभिप्रेक्ष्य हरिः परपुरंजयः। शंखं दध्मौ महानादं दिशः समभिपूरयन् ३ तमभिद्रुत्य देवेंद्रो महद्विस्फारयन्धनुः। क्रूरबाणैः सुतीक्ष्णैः कृष्णं विव्याध संगरे ४ हरिर्विद्धः क्रूरबाणैर्देवराजेन वज्रिणा। प्रहस्य साधु शक्रोसि युक्तं तदिति चाब्रवीत् ५ भूयोपि बाणान्दश देवराजः संधाय चापे भुजगेंद्रकल्पे। आकर्णपूर्णं विनिकृष्य कृष्णे मुमोच वक्रे सहसिंहनादं ६ तानंतरे कंसरिपुर्महात्मा छित्वा त्रिधैकेन शरेण बाणान्। विव्याध बाणैर्दशभिः सुधौतैः पुरंदरं भारत लीलयैव ७ ते शरा देवराजस्य गात्रे भित्त्वास्य मा हृति। शोणिताक्ताः प्रदृश्यते भूयो वेगेन निर्गताः ८ पुनः शक्रो कोदंडे शरान् संधाय षोडश। मुमोच कृष्ण गोविंदस्तांश्च कर्ष्ण शरैस्त्रिभिः ९ भूयोपि बाणैर्भिं शद्भिः सुरराजानमाहवे। आयोधयद्धरिस्तेन समभञ्जः शक्रवज्रासि ।१०। ततश्च कोपदेवेंद्रो दंड इतरो बोरणः। प्रेषयामास तो नेत्राणां प्रति महागजं ११ सगजः प्राप्य गरुडं पाकशासनचोदितः। वक्रमिर्धर्षयामास दंतैर्वज्र युगांतरे १२ तत्कंडेन गरुडः पक्षाभ्यां च तथा नखैः। अर्दयामास कौरव्य गजमैरावतादयं १३ शक्रश्च वज्रमुद्यम्य घोरं दानवभीषणं। पश्यतां सर्वभूतानां प्रजहार खगाधिपं १४ तमागतं मधुरिपुर्वज्रं दृष्ट्वा वनागुधं। वामेन पाणिना विष्णुर्जग्राह प्रजहास च १५ ॥ ॥

विशेषणं। मकपर्चमिभिर्द्धि ८ ९ आहवे युद्धे १० तीव्रेण गजताडनकर्मणा ।११॥ वाड्युगांतरे वज्रमिति १२ ४ दुष्प्राप्यवनागुधं वंदा सुधं। अजयेप्रहारार्थमागुधं समासमिति दर्शयितुं पुनर्वचनमिति ज्ञातव्यं १५ ॥ ॥

र.उ.

१६ ७ निवर्तस्व पुनरागच्छ मा याहि मा गच्छ यद्यसंतीत्यस्य तात्पर्यं दर्शयति। पौलोम्येति १८ अवमंस्यति अवज्ञास्यति १९ २० गतासुरावेश
इंद्रः प्रतिवक्ति येनेति २१ तत्त्ववलः अल्पबलः। मातर्मुधस्येति पाठः क्रधस्य मुखसोज्ञातं हीरां मातरि विरोधं। इह पिशिताशनि। या नीया श्रेवमां

३९

निरायुधः सुरपतिर्गरुडार्दितवाहनः। आवर्जितरणो श्याजन्द्रीडावनतकंधरः १६ तं दृष्ट्वाथ दृष्टसंकल्पं पलायनपरायणं। सत्यभामा
सुरपतिं प्रहसंतीदमब्रवीत् १७ सत्यभामोवाच   एहि शक्र निवर्तस्व मा याहि कुलिशायुध। पलायनमयुक्तं हि पौलोम्या वक्ष
भस्यते १८ ऐश्वर्यमत्ता पौलोमी भर्तृपौरुषगर्विता। अवमंस्यति सद्य त्वां भार्यारणपराजितं १९ इत्थं देव्या गिरं शक्रः सोपालंभ
मुदीरितां। निशम्याभिमुखो भूत्वा प्राह देवीं सुविस्मितां २० इंद्र उवाच   येनामरासुरसिद्धयक्षमहोरगगंधर्वकिन्नरपि
शाचनिशाचराद्याः। दृष्टाः त्रिलोकयुगुणाररणशुद्धितिन को वा न याति परिभूतिमले वितृष्ण २१ वत्सो यथा तत्त्ववलः सद्भ
देतमातर्मुधस्यपानसमये क्रुतुते विरोधं। तद्वद्वयं च निजशैशवमप्रमेये नाथे विरुद्धापिशिताशनिर्दर्शयामः २२ इति सत्राजि
तः पुत्रीमुक्त्वा भारतसत्तम। कृतांजलिः प्रणम्याह वासुदेवं पुरंदरः २३ इंद्र उवाच   नमस्ते देवदेवेश पुंडरीकाक्ष माधव।
क्षमस्व मत्कृतं विष्णुमपराधं जगत्पते २४ नमास्त्वदेकशरणं शरणागतवत्सल। भूरिबालिशमज्ञं तं परित्यक्तुं त्वमर्हसि २५ ऐरावत
श्च कुलिशं पारिजातश्च पादपः। देवाराध्यस्य भगवन् त्रयं चाप्यमरावती २६ त्वदधीनमिदं विश्वमद्रमाशाकरस्तव। अत्र यद्रोचते नेतुं नी
यतां तद्यथेच्छया २७ किंत्ववद्या मिगोविंद मूलं त्वयि विनुभ्यतः। रमसे मानुषे लोके भगवंस्त्वमनन्यधीः २८ तत्रनीते पारिजाते भ
वताकल्पपादपे। तेन सा जायते स्वर्गात्त्रिविशिष्टा वसुंधरा २९ ॥ ॥

राम

सेवयिशितं देवभोजनमिति २२ ४ भूरिबालिशं अधिकमूर्खम् २५ ७ मूलं निमित्तं। अनन्यधीः तत्रैव निरतबुद्धिः २८ २९

३९

त्वयायत्कृतं तदागः मयैव कृतं विद्धि। आवयोः परमत्यभेदात्। तत्त्वपि स्थितत्वात्त्वयैवापराधं कारयित्वा परिहरामीत्यर्थः ३२ एतदेव विवृणोति। यत्त्व

तेनाद्य पुरुशार्दूल विरोधं कृतवांस्त्वयि। तत्त्वं तत्र्यं त्वया देव कार्यं विजानता ३० शुक उवाच   इत्युक्तो देवराजेन देवदेवो जनार्दनः।
पुरंदरं कुरुश्रेष्ठ प्राह प्रहसिताननः ३१ श्रीभगवानुवाच   अपराधस्त्वया शक्र न कश्चिदपि चेष्टितः। यत्कृतं तत्तु मयैवागस्त्वभेदादा
वयोः परं ३२ यत्त्वयाद्य महत्साग्नं चेष्टितं साधु साधु वा। मयैव तत्कृतं सर्वं नात्र कार्या विचारणा ३३ पारिजातः तरुश्रेष्ठो मया प्रागटेत
नुदिवि। मनिर्दिष्टा सद्मस्यानं स्वयमेष्यति नंदनं ३४ इत्युक्तः वासुदेवेन देवराजः कुरूद्वह। गोविंदं सत्यभामां च प्रसाद्य गरुडं तथा
३५ पुत्रौ मे रक्षितव्यौ ते द्वापालो वीभत्सुरित्यपि। प्रयोग्यः पार्थ पिताङ्गनाभुज्जः पुरंदरः ३६ सार्द्धं सकलदिक्पालैर्लब्धं च च पुरं ययौ
पुरंदरं सदिक्पालं विसृज्य यदुनंदनः ३७ गारुडं प्राह कौरव्य यास्यामो द्वारकामिति। गोविंदं सत्यभामां च पारिजातं च पादपं ३८
गरुडः पत्रगरिपुर्लीलयैव वहद्यथौ। संप्रविश्य पुरीं रम्यां द्वारतोरणभूषितां ३९ पताकामालिनीं दिव्यां सिक्तसंमृष्टभूतलां। उ
द्गोपायनतांबूलसुगंधकलशान्वितां ४० उपस्थितैर्यदुश्रेष्ठैः पूजितश्चाभिवंदितः। तूर्यमंगलनिर्घोषैर्वेदस्वाध्यायनिस्वनैः ४१
प्रविवेश सभां दिव्यां सुधर्मां हृष्टसेवितां। आहूय वसुदेवं च बलभद्रं तथा ग्रजं ४२ अभिवाद्य यथान्यायं पूजितस्तैर्यथोचितं। उ
पविष्टः सभामध्ये कांचने परमासने ४३ रराज राजशार्दूल हृष्टस्य पतिर्योगैः। लोकपालैरुपासीनैर्दिवि वज्रधरो यथा ४४ जा
गतो सत्यभामायाः पारिजातं महाद्रुमं। स्थापयामास गोविंदः सर्वतो मणिकुट्टिमे ४५ आयांतं देवकीपुत्रं योषिन्त्वार्थेन भूरिणा।
श्रुत्वा दृष्टुमुपाजग्मुः सकला यादवस्त्रियः ४६ ॥ ॥

येति ३३ ४४ मणिकुट्टिमे मणिबद्धस्थाने ४५ योषित्स्वार्थेन अनिरंतरपत्नीसहेति शेषः ४६ ॥ ॥ ॥

एकानंगणुर्णा। सुभद्राविज्ञातारेति च। अनुत्यन्नरजा रयामातहूशावरवर्णिनी। अप्रसूतावेत् गौरीतिच ५० आनीतःप्रमदानां सार्थी
येन सतथा ५१ ५३ दशमेसप्तषष्टिरध्यायः सोयंमनुष्यलोकः पुत्रेणजय्य इति श्रुति विहितसदाचारो भव्यवती ऐंद्रवादिभिरनुष्ठेयइ

वसुदेवस्तु कौरव्य रोहिण्याद्याः स्त्रियो विलाः। आजग्मुः केशवं द्रष्टुं जितशत्रुमनामयं ४७ सदृष्ट्वा मातरो विष्णुर्देवक्यासहसंगताः।
चक्रे प्रणाममयाशीर्भिस्ता स्तुतं प्रत्यपूजयन् ४८ रुक्मिण्याद्यास्तथासप्तमहिष्यः कृष्णवल्लभाः। प्राणोपुर्दैवमभ्येत्य दिव्यरूपाः स्वलंकृ
ताः ४९ रेवती रामदयिता त्रिवक्राचयशस्विनी। एकानंगाच तन्वंगी चित्रा चवरवर्णिनी ५० अन्याचकृतशार्दूलभोजराजस्य कन्यकाः स्त्रियः
। आनीतप्रमदासार्थं जितशत्रुमनामयं ५१ गोविंदं सत्यभामां चप्यानीता ममरद्रुमं। प्रीत्युत्फुल्लमुखाः सर्वे कौतुकादृष्टुमीयुः
५२ तं समेताय थाजोषं लाजा प्रसवतंडुलैः। स्पृष्ट्वा मूर्ध्निश्रियं कृत्वा जग्मुः स्वंस्वं निवेशनं ५३ इति श्रीभागवते महापुराणे
दशमस्कंधे सप्तषष्टिरध्यायः श्रीशुक उवाच आराध्य देवदेवेशं शंकरं लोकशंकरं। तपसा तोषयित्वा तं कैलासगिरि
वासिनं १ रुक्मिण्यातनयं लेभे दग्धं कामं पुनर्हरिः। वीरं प्रद्युम्ननामानं रूपौदार्यगुणान्वितं २ राजोवाच पुत्रार्थमीश्वरं
दृष्ट्वा पुत्रं लब्ध्वा रोहरिः। अवापकीदृशं पुत्रं किंनामानं वदस्व मे ३ श्रीशुक उवाच कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रम
न्युना। देहोपपत्तये भूयस्त मेव प्रत्यपद्यत ४ ॥ ॥

तिदर्शयितुं श्रीकृष्णस्य तदनुष्ठानप्रकारं शंबरासुरवधलक्षणं विक्रमं च कथयत्यस्मिन्नध्याये। लोकस्य जनस्य शं सुखं करोतीति
लोकशंकरः तं देवदेवो नारायणः ईशः स्वामी यस्य स तथा तं। आराध्य लोकदृष्ट्येति शेषः १ ३ प्राग्रुद्रमन्युना दग्धो यः कामः भूय
स्तमेव कृष्णमेव देहोत्पत्तये प्रपद्यत ४ ॥ ॥

स एव कामः कृष्णवीर्यसमुद्भवो वैदर्भ्यां जातः उपात्तदेहः। कीदृशः वासुदेवस्यांशः प्रद्युम्नोयमित्याविष्टः स तथा। अत एव तदभिधानमेवास्या
भिधानमित्याह। प्रद्युम्न इति। सर्वतो वीर्यादिभिः पितुरनवमः कृष्णस्य पुत्रत्वे योग्यः ५ तोकं सद्योजातं शिशुं। निर्गतो दशमो दिवसोयस्मात्स
निर्दशः तं। उदन्वति समुद्रे ६ अपरैर्मत्स्यैर्जालेनाभिवावृतः संसृतः मत्स्यजीवि भिर्द्दीशेः ७ कैवर्त्ताः मत्स्यमारकाः। कैवर्तैर्दाशधीवराविति
च। महानसं पाकस्थानं। सूपोदिति मापरसुना। परस्वधः कुठारः स्यात्परशुः स्वधितिस्तथा। अवद्यतः च्छेदयत् ....खंड पतदोत्र वावेत् इति

स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः। प्रद्युम्न इति विख्यातः सर्वतोनवमः पितुः ५ तं शंबरः कामरूपी हृत्वा तोकमनिर्दशं। सविदि
त्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ६ तं निर्जगार बलवान् मीनः सोप्यपरैः सह। वृतो जालेन महता गृहीतो मत्स्यजीविभिः ७ तं शं
बराय कैवर्त्ता उपाजह्रुरुपायनं। सूदा महानसं नीत्वा वद्यन् स्वधितिनाद्भुतं ८ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् ९ नारदोक
थयत् सर्वं तस्याः शंकितचेतसः। बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनं १० साचकामस्य वैपत्नी रतिर्नाम यशस्विनी। पत्युर्निर्दग्ध
देहस्य देहोत्पत्तिं प्रतीक्षती ११ निरूपिता शंबरेण सासूपौदनसाधने। कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं स दार्भके १२ नातिदीर्घेण
कालेन स कार्ष्णी रूढयौवनः। जनयामास नारीणां वीक्षंतीनां च विभ्रमम् १३ ॥ ॥

धातुः ८ मायावती शंबरस्य महानससाध्यक्षी ९ किमकथयत् तत्राह। बालस्येति। मत्स्योदरनिवेशनं मत्स्योदरप्रवेशं १० ११ प
क्वानां सूपानां मुद्गानां वा सूपदं शानामोदनस्य च साधने संस्कारे। यद्वा सूपादि साधने अध्यक्षतया साधनं संलोकशाधने विश्वपायनिष्ट
त्विशु। मरणे मृतसंस्कारे वा वचने स्नेमे सेनाग्रेयात्मा यांचसेव नेस्मृत्विसिवयोषिति १२ कृष्णस्यापत्यं कार्ष्णिः विभ्रमो मनोविकारः। यद्वा है
वाद्यन्यतम इति विशिष्टभ्रमं १३ ॥ ॥

रतिरात्मनोधनैरु पतिमुपतस्थे अभिमुखेनतस्थौ। किमात्मधनानि सुवर्णादीनि नेत्याह। सव्रीडेति। व्रीडया सहितो हासः सव्रीडहासः। उत्तभि
विभ्रमः उत्क्षेपः भ्रूः तया ईक्षणं कटाक्षनिरीक्षणं गतैः १४ मातृभावं मातृ अभावं सुरतकामिनी १५ वह्नेर्भ्रमात् १६ त्वां निर्दशं दशरहितं पाठः

सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरं। सव्रीडहासोत्तभितभ्रुवेक्षिती प्रीत्योपतस्थे रतिरात्मनोधनैः १४ तामाह भगवा
न्कार्ष्णिर्मातस्ते मतिरन्यथा। मातृभावमतिक्रम्य वर्त्तसे कामिनी यथा १५ रतिरुवाच भवान्नारायणसुतः शंबरेणाहृतो गृहात्।
अहं ते धिकृता पत्नी रतिः कामो भवान्प्रभो १६ एष त्वां निर्दशं सिंधावक्षिपच्छंबरोसुरः। मत्स्योग्रसीत्तदुदरादिह प्राप्तो भवान्प्रभो १७
तमिमं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः। मायाशतविदं त्वं च मायाभिर्मोहनादिभिः १८ परिशोचति ते माता कुररीव मृतप्रजा। पु
त्रस्नेहाकुला दीना विवत्सा गौरिवातुरा १९ प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने। मायावती महामायां सर्वमायाविनाशि
नी २० स च शंबरमभ्येत्य संयुगाय समाह्वयत्। अविषह्यैस्तमाक्षेपैः क्षिपन्संजनयन्कलिं २१ सोधिक्षिप्तो दुर्वचोभिः पदाहत इ
वोरगः। निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः २२ गदामाविध्य तरसा प्रद्युम्नाय महात्मने। प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरं
२३ तामापतंतीं भगवान्प्रद्युम्नो गदया गदां। अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप २४ ॥ ॥

१७ मोहन शोषणादि मायाभिर्मायाभिः १८ कुररस्य स्त्री कुररी। उत्क्रोशः कुररी मत इति। मृतप्रजा नष्टापत्या १९ महामाया महामाया
र्थ्या ७० तुंछमवष्टभ्य संदृष्टैतैरिति शेषः २१ २ नाद मिति क्रिया विशेषणं। वज्रनिष्पेषः स्फूर्ज्जथुस्तद्वन्निष्ठुरो मा दोषव्याभवति तथा
व्यनदत्। स्फूर्ज्जथुर्वज्रनिष्पेष इति हलायुधः २३ २४ ॥ ॥

दैतेयीं दैत्यानां कुले देवमायामिव विद्यमानां वैहायसः विहायसि गगने स्थितः २५ सत्वात्मिकां बलज्ञाननिधि विष्णुदैवत्यां महाविद्यां विज्ञानाख्य
संज्ञां २६ गौह्यकादीन्यस्त्राणि प्रायुङ्क्त। गुह्यकाख्यं गौह्यकं व्यधमद् अहना शयत् २७ ताम्रश्मश्रु कपिल तद्विशिराश्रु २८ २९ बलाहकोमे

स च मायां समाश्रित्य दैतेयीं मयदर्शितां। निर्ममे शस्त्रमयं वर्षं कार्ष्णौ वैहायसोसुरः २५ बाध्यमानोस्त्रवर्षेण रौक्मिणेयो महारथः। स
त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीं २६ ततो गौह्यकगांधर्वपैशाचोरगराक्षसीः। प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्तदा २७
निशातमसिमुद्यम्य सकिरीटं सकुंडलं। शंबरस्य शिरः कायात्ताम्रश्मश्र्वोजसाहरत् २८ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्क
रैः। भार्ययांबरचारिण्या पुरं नीतो विहायसा २९ अंतःपुरवरं राजन्ललनाशतसंकुलं। विवेश पत्न्या गगनाद्विद्युतेव बलाहकः ३०
तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससं। प्रलंबबाहुं ताम्राक्षं सुस्मितं रुचिराननं ३१ स्वलंकृतमुखांभोजं नीलवक्रालकालिभिः। कृष्णं
मत्वा स्त्रियो भीता निलिल्युस्तत्र तत्र ह ३२ उपधार्य शनैरीषद्वैलक्षण्येन योषितः। उपजग्मुः प्रमुदिताः सस्त्रीरत्नं सुविस्मिताः ३३
अथ तत्रासितापांगी वैदर्भी वल्गुभाषिणी। अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ३४ को न्वयं नरवैडूर्यः कस्य वा कमलेक्षणः। धृतः कया
वा जठरे केयं लब्धा त्वनेन वा ३५ मम चाप्यात्मजो नष्टो नीतो यः सूतिकागृहात्। एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ३६

घः ३०। १ निलिल्युः निलीनाः ३२ वैलक्षण्येन कृष्णलक्षणविपरीतलक्षणानिकरेण ३३ असितापांगी नीलरुचिरकांतनेत्रांता ३४
नरवैडूर्यः नरश्रेष्ठः। नराकारं वैडूर्यरत्नमिव शोभमान इति वा। कस्य पुत्रः। कया स्त्रिया धृतो गर्भ इति शेषः। इयं का अनेन वा लब्धा ३५ प्रकारांत
रेण शंकते ममेति ३६ ॥

सारूप्यं सादृश्यं सारूप्यं केनेति तत्राह। आकृत्येति ३७ ऊनं निश्चयः ३८ मीमांसमानायां विचारयंत्यां ३९ ४१ नारीणां विभ्रमं जनयामासे तियदुक्तं न तच्चित्रं मंतव्यमित्याह। यवा इति। यं दृष्ट्वा तत्स्वपक्षस्य मातरः हरेः पत्न्यः मनसि नार्ईं दृदाकामरसक्लिन्नमनस्कत्वेनोद्भावाः वक्र तियदुक्तं न तच्चित्रं विचित्रं श्रृंगारचेष्टायुक्ताः अंगुष्ठ नखमुख मूलेन कर पुगपीडना दिविकारलक्षणलक्षिताश्च श्रृवन्नित्य च यः। किंविशिष्टाः। पितृस्वरूपतयापि हसारूप्येण निजेशोऽस्मत्पतिरयमिति भावोपि यासां ता स्तथाताः। तस्मिन् कामे मदने न चित्रं न खलु। काम्पतइति काम स्तस्मिन् कामे

कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः। आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ३७ स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः। अमुष्मिन् प्रीतिरधिका वामः स्फुरति मे भुजः ३८ एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः। देवकीवसुदेवाभ्यां नारदेन महात्मना। ३९। अन्वैश्च यादव श्रेष्ठैरुत्तमश्लोक आविशत्। विदितार्थोपि भगवांस्तूष्णीमास जनार्दनः ४० नारदोकथयत्सर्वं शंवराहरणादिकं। तच्छ्रुत्वा महदा श्चर्यं कृष्णांतःपुरयोषितां ४१ देवकी वसुदेवेच कृष्णरामौ तथा स्त्रियः। दंपती तौ परिष्वज्य रुक्मिणी च ययुर्मुदं ४२ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः। अहो मृत इवायातो बालो दिष्ट्येति चाब्रुवन् ४३ यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन् रहरूढभावाः। चित्रं न तत्खलु रमास्पदबिंबभूते कामे स्मरेऽक्षविषये किमुतान्यनार्यः ४४ इति श्रीभागवते महापुराणे दशम स्कंधे ऊषष्टिरध्यायः ॥ ॥

अक्षविषये चक्षुगोचरे किंतु। इतोपि चित्रं नेत्याह। रमेति। रमास्पदस्य लक्ष्मी भर्तुः श्रीकृष्णस्य विवादं वं लक्षणोपेतातद्देहाद्भूते जाते। आत्मावैपुत्रनामासीति श्रुतेः। श्रीकृष्णस्य विंबस्य यल्लक्षणं तत्सर्वमस्य विंबस्य निधीयत इति श्रीकृष्ण देह प्रतिविंबभूत इत्यर्थः। विंबोस्त्री मंडलसमं प्रतिमा सुखलक्ष्म सु। प्रतिरूपे प्रतिकृतौ स्याद्विंबकापालइति। अन्य नार्यः तस्मात् व्यतिरिक्ताः स्त्रियः स्मृते पि विस्मृयंतीति। तस्मात् किंच न तदिदं सर्वं कृष्ण माहात्म्यविलास इतीममर्थं विशेषं वाइत्यनेन दर्शयति ४५ इति दशमे ष्टपष्टिरध्यायः ॥ ॥

नपरस्वः परइतीममर्थं सत्यं कर्तुं पौंड्रकवधलक्षणं विक्रमं कथयन् पिंतुः सुतरां अध्याय प्रारंभः १ तस्मिन् काले कृष्ण रहितां विदित्वा कामपालो वल भद्रः २ अर्दयामास दुःशासनेति शेषः ३ ४ राज्यमेव भुक्तं यस्याः सा तथा तां ५ ६ नामांतरमाह वसुदेवेति ७ ९ उद्विजतेभीतिकं

श्रीशुक उवाच पौंड्रको नाम राजा वै तस्मिन् काले कुरूद्वह। द्वारकां रुक्मि निलयां निलयां निरुध्य वज्र सैनिकः १ अर्दयामास कृष्णेन विदित्वा रहितां निशि। तं कामपालः शौनेयो वसुदेवोद्भवादयः २ उग्रसेन श्च कौरव्यपि वान्ये यदुपुंगवाः। अर्यामाक्षरया पातं कालयोग पिवाति थिं ३ राजोवाच कश्चासौ पौंड्रको नाम कस्मिन् देशे महीपतिः। कस्य वा तनयो ब्रह्मन् सर्वमेतद्वदस्व मे ४ श्रीशुक उवाच अपुत्रः काशिराजो वै कन्यां सुतनुसंज्ञितां। प्रायच्छद्वसुदेवाय राज्य भुक्तां कुरूद्वह ॥५॥ तत्र जज्ञे महाबाहुर्दिवाकरसमद्युतिः कुमारः पौंड्रको नाम बलवीर्यमदान्वितः ६ वसुदेवसुतत्वाच्च वासुदेवेति शब्दितः जाते तस्मिन् महाराजो वसुदेवो महाद्युतिः ७ राज्यं तस्मिन् समारोप्य स कौशवलवाहनां उवाह कंसावरजां देवकीं देवतोपमां ८ निरुद्धो भोजराजेन कंसेनानकदुंदुभिः। कदाचिद्विपिनं श्रायात्कर वीरपुरीमपि ९ असह्यमात साप त्यम श्रात्वं तथात्मनः स्मरमाणः सकाशी शोय दूतं द्विजतो निशं १० स कृष्ण रहितां श्रुत्वा समेत्य द्वारकां निशि। विष्टब्धवलभद्रेण शैनेयेनापि निर्जितः ११ निहतानेक साहस्र हय कुंजर सैनिकः। जगामपरशर्वर्यां पुरीं वाराणसीं नृप १२ प्रभातायां तु शर्वर्यां हरिर्वदरिकाश्रमात्। आययौ तां द्विमां तु द्वद्वारकां रामपालितां १३ सपताकैः सार्घ्यपाद्यैर्मधुर्कस्य धकादिभिः। अभिवर्णितकृष्णांतः प्राविशत् केशवः सभां १४ ॥ ॥

रोति। भयकरणमात्मनएव फलतीति द्योतनाय स्मरमाण इति ९ द्वारकां समेत्यायमद्य ११ परस्वर्यामपरराजेरपरःकाले १२ १३

५ वालैरज्ञैः प्रस्तोभितो ह्यविद्यमानमगुणेनप्रक्तनो दृष्टा हेपमुक्तोवा १६ ८ अस्मच्चिह्नानिचक्रादीनिमांशरणमेहि १९ कत्थनंव्यर्थं

कशाविलोपौंड्रकोनामकाशिराजः प्रतापवान्। वासुदेवोहमित्यज्ञो दूतंकृष्णायप्राहिणोत् १५ त्वंवासुदेवोभगवानवतीर्णोजगत्पतिः। इतिप्रस्तोभितोवालैर्मेनेसात्मानमच्युतं १६ दूतश्च द्वारकामेत्यसभायामास्थितंहरिं। कृष्णंकमलपत्राक्षंराजसंदेशमब्रवीत् १७ वासुदेवोवतीर्णोहमेकएवनचापरः। भूतानामनुकंपार्थंत्वंतुमिथ्याभिधांत्यज १८ यानित्वमस्मच्चिह्नानिमौढ्याद्बिभर्षिसात्वत। त्यक्त्वैहिमांत्वंहिशरणंनोचेद्देहिममाहवं १९ कत्थनंतदुपाकर्ण्यपौंड्रकस्याल्पमेधसः। उग्रसेनादयःसभ्याःप्रजहसुस्तदा २० उवाचदूतंभगवान्परिहासकथामनु। उत्स्रक्ष्येमूढचिह्नानियैस्त्वमेवंविकत्थसे २१ मुखंतदपिधायाज्ञकंकगृध्रवटैर्वृतं। शयिष्यसे हतस्तत्रभविताशरणंशुनां २२ इतिदूतस्तदाक्षेपंस्वामिनेसर्वमाहरत्। कृष्णोपिरथमारुह्यधायात्काशींससैनिकः २३ पौंड्रकोपितदुद्योगमुपलभ्यमहारथः। अक्षौहिणीभिःसहितोनिश्चक्रामपुराद्द्रुतं २४ तमापतंतिरथोपस्थेसुपर्णांगरुडेस्थितं। सुवर्णवाहुयुगलमपश्यत्पौंड्रकंहरिः २५ शंखार्यसिगदाशार्ङ्गदधच्छ्रीवत्सलक्षितं। विभ्राणंकौस्तुभमणिंवनमालाविभूषितं॥२६॥ कौशेयवाससीपीतेवसानंगरुडध्वजं। आमुक्तमाल्याभरणंस्फुरन्मकरकुंडलं २७ दृष्ट्वातमात्मनासाम्यंकृत्रिमंवेषमास्थितं। यथानटंरंगगतंविजहासभृशंहरिः २८ क्षणेनतंकाशिपतेःसैनिकाद्दृढधन्विनः। शरैराच्छादयामासुर्मेघाःशैलमिवांभसा २९ ॥ ॥

भाषणं २० अनुअनंतरंउत्स्रक्ष्ये त्याजयिष्ये त्वद्विधानि चिह्नानि २१ स्वामिनेपौंड्रकाय २३ ६ आमुक्तमाल्याभरणंवद्धमालालंकारम् २७ २९

आर्ष्टिःखड्गविशेषःप्रहरस्थाहस्त ३० पार्ष्णिग्राहंपृष्ठतोगोप्तारं ३१ प्रभयाज्वलत् ३२ यद्वायोधनंयुद्धस्थानंतदुभावितयत्नयाःअवयवखंडितै रुद्धिन्नैः। खेडिखंडने। द्विपदःपदातयः। मनस्विनांशूराणांमानवर्द्धनंअभिमानवर्द्धनं। भूतपतेरुद्रस्याक्रीडनंश्मशानं ३३ किमाह यौरिरितितत्राह। यदितिभवाद्दूतवाक्येनवासुदेवोवतीर्णोहमित्यादिलक्षणेनयन्मामाहतत्स्मरेतिशेषः। किंतदितितत्राह। तानीति। यान्युत्स्रक्ष्येतिभवानाहरणेतान्य

केचिदुन्नाद्रथानश्वानास्थायरणमूर्द्धनि। शूलैर्गदाभिःपरिघैःशक्त्यृष्टिप्रासतोमरैः। असिभिःपट्टिशैर्बाणैःप्राहरंस्तेरयोहरिं ३० तस्यकाशिपतेर्मित्रंपार्ष्णिग्राहोपरोनृपः। अक्षौहिणीभिस्तिसृभिस्त्रनुपायात्तनृपसंगरं ३१ कृष्णस्तत्पौंड्रककाशिराजयोर्बलंगजस्यंदनवाजिपत्तिमत्। गदासिचक्रेषुभिरर्दयत्रभृशंयथायुगांतेहुतभुक्प्रभाज्वलत् ३२ आयोधनंतद्रथवाजिकुंजरद्विपत्खरोष्ट्रैरिपुणावखंडितैः। वभौचितम्नानवहंमनस्विनामाक्रीडनंभूतपतेरिवोल्वणं ३३ अथाहपौंड्रकंशौरिर्भोभोपौंड्रकयद्भवान्। दूतवाक्येनमामाहतान्यस्त्राण्युत्सृजामिते ३४ त्याजयिष्येभिधानंमेयत्त्वयाज्ञमृषाकृतं। व्रजामिशरणंतेद्ययदिनेच्छामिसंयुगं ३५ इतिक्षिप्त्वाशितैर्बाणैर्विरथीकृत्यपौंड्रकं। शिरोहरद्रथांगेनवज्रेणेंद्रोयथागिरेः ३६ तथाकाशिपतेःकायाच्छिरउत्कृत्यपत्रिभिः। न्यपातयत्काशिपुर्यांपद्मकोशमिवानिलः ३७ एवंमत्सरिणंहत्वापौंड्रकंससखंहरिः। द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ३८ श्रीशुकउवाच शिरःपतितमालोक्यराजद्वारिसकुंडलं। किमिदंकस्यवावक्त्रमितिसंशयिरेजनाः ३९ ॥ ॥

स्त्राण्युत्सृजामिसृजामि ३४ अद्यत्वयाहंयदेववासुदेवेत्यभिधानंमृषाकृतंतत्त्वांत्याजयिष्येप्रहारपयिष्यामि। यदिसंयुगंनेच्छामितर्हित्वांशरणंव्रजामीति ३५ ८ संशयिरेसंशयंचक्रिरे ३९ ॥ ॥

द० उ०

पू० संस्थां विधिं प्रेतक्रियां। अपचितिं आनृण्यत्वं प्रतिक्रियां वा। अर्च्यायामपचितिः पूजायेनिष्कृतौ व्यय इति ४१ आत्मना मनसा इ-
त्यभिसंधाय संकल्प्य ४२ अविमुक्ते काश्यां। अविमुक्तेश्वरनाम क्षेत्रविशेषे प्रीतः ४३ दक्षिणाग्निम् आहार्यनामानं परिचर पूजय। आभिचा-

४४

राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबांधवाः। पौराः शोकहता राजन्नाथनाथेत्यपाद्रवन् ४० सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः। निहत्य पितृहंतारं यास्याम्यपचितिं पितुः ४१ इत्यात्मनाभिसंधाय सोपाध्यायो महेश्वरं। सुदक्षिणोर्च्चयामास परमेण समाधिना ४२ प्रीतो विमुक्ते भगवांस्तस्मै वरमदाद्विभुः। पितृहंतृवधोपायं स वव्रे वरमीप्सितं ४३ दक्षिणाग्निं परिचर ब्राह्मणैः समृत्विजः। अभिचारविधानेन स चाग्निः प्रमथैर्वृतः ४४ साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः। इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्नृप ४५ ततोग्निरुत्थितः कुंडान्मूर्तिमानतिभीषणः। तप्ततांम्रशिखाश्मश्रुरंगारोद्गारिलोचनः ४६ दंष्ट्रोग्रभ्रुकुटीदंडकठोरास्यः स्वजिह्वया। आलिहन्सृक्किणी नग्नो विधुन्वंस्त्रिशिखं ज्वलत् ४७ पद्भ्यां तालप्रमाणाभ्यां कंपयन्नवनीतलं। सोभ्यधावद्वृतो भूतैर्द्वारकां प्रदहन्दिशः ४८ तमाभिचारदहनमायांतं द्वारकौकसः। विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः ४९ अक्षैः सभायां क्रीडंतं भगवंतं भयातुराः। त्राहि त्राहि त्रिलोकेश वह्नेः प्रदहतः पुरं ५० श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसं। धरणीशः प्रहस्याह मा भैष्टेत्यविताऽस्म्यहं ५१ ॥ ॥

रविधानेन कृत्याप्रयोगप्रकारेण ४४ अब्रह्मण्यैः ब्राह्मणाचारविरुद्धाचारैः प्रयोजितः। आदिष्टः ईश्वरेणेति शेषः। आभिचारं कृत्वा प्रयोगं कुर्वन् ४५ ४६ त्रिशिखं त्रिशूलमिति शेषः ४७ ४८ आभिचारदहनं कृत्यालक्षणमग्निं। अक्षैर्दुरोदरैः। धरणीशः भूमीशः। धरण्य-
स्य तत्रस्थत्रैलोक्यस्य वा ४९ अविता अभिरक्षितास्मि ५१ ॥ ॥

राम

४४

सुदर्शनं नाम चक्रमादिशत् ५२ खं विलं व्योम वा। रोदसी दिवि व्योम्नि ताम्रे द्वारि प्रतापपोरिति यादवः ५३ अभिचारः कृत्याग्निः ५४ तदनु सु-
दक्षिणदहनानंतरं। अंतःप्रविष्टं कोष्ठं अंतर्गृहं। गवन्धरथगुप्तिशाला ५५ ५६ एतच्चरित्रश्रवणादिफलमाह। य इति ५७ तावुभौ श्रोता श्रा-
वयिता च ब्रह्महत्यादिभिरुपलक्षितेभ्योऽशुभेभ्यः इति दशमे एकोनसप्ततितमः तीर्थयात्रायां वक्ष्यमाणमेव निमित्तं काले ततोपि विशिष्टं तत्र

सर्वस्यांतर्बहिः साक्षी कृत्यां माहेश्वरीं विभुः। विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ५२ तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभं। स्वतेजसा खं ककुभोथ रोदसी चक्रं मुकुंदस्य त्वग्निमर्दयत् ५३ कृत्यानलः प्रतिहतः स रथांगपाणेरस्त्रौजसा नृप विभग्नमुखो निवृत्तः। वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोभिचारः ५४ चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं साट्टसभालयापणां। सगोपुराट्टालककोष्ठतोरणां सकोशहस्त्यश्ववरूथमंदिरां ५५ दग्ध्वा वाराणसीं सर्वां विष्णोश्चक्रं सुदर्शनं। भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ५६ य एतच्छ्रावयेन्मर्त्य उत्तमश्लोकविक्रमं। समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥५७॥ तावुभौ सर्वपापेभ्यो ब्रह्महत्यादिभिर्नृप। विमुच्य देहावसाने विष्णुलोकं प्रयास्यतः ५८ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनसप्ततिरध्यायः श्रीशुक उवाच ॥ अथैकदा द्वारवत्यां वसतो रामकृष्णयोः। सूर्योपरागः सुमहानासीत्कल्पक्षये यथा १

ख्याता तस्यात्र यात्रा तत्र दर्शनात्सुपुण्यवतां पुण्यराशेरितरेषामप्युद्युक्तयापि शुद्धांतःकरणत्वेन निर्मलाः कृष्णविषयाभक्तिः मुक्तावानंदविशे-
षं मुक्तिं च ददातीति कृत्वा लौकिकाचारं विडंबयतः कृष्णस्य तीर्थयात्रादिलक्षणं चरितं वक्ष्यन्नस्मिन्नध्याये। तत्रादौ तीर्थयात्रायां निमित्तमा-
ह। अथेति। कल्पक्षय इत्यनेन सर्वग्रासं लक्षयति १ ॥ ॥

ग्रस्तासूपरागा इति शेषः। स्यमंतपंचकं कुरुक्षेत्रं। स्यमंतानां ह्रदानां पंचकं परिकीर्त्तितं तथा १ एतदेव स्पष्टयति। निःक्षत्रियामिति निषिद्धाः क्षत्रि पायस्मात् स तथा तां। यत्र देशे। यस्मिंश्च महाह्रदांश्चक्रे तत्स्यमंतपंचकं ३ कर्मणा हत्यादिमित्रपापोत्पन्नेनास्पृष्टोपि लोकसंग्रहायेति विकर्मणेति केचित्पठंति ४ भारतीः भारतखंडे विद्यमानाः ५ वारकांताः गणिकाः तदारूढकरेणुभिः ६ ८ तरलानां तरंगाणां प्रभावत्प्रभा येषां

तं ज्ञात्वा मनुजा राजन्पुरस्तादेव सर्वशः। स्यमंतपंचकं क्षेत्रं जग्मुः श्रेयो विधित्सया २ निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ३ ईजे च भगवान् रामो यत्रास्पृष्टोपि कर्मणा। लोकस्य संग्रहायैषो यथान्योघापनुत्तये॥४॥ महत्यां तीर्थयात्रायां तत्रागुर्भारतीः प्रजाः। कृष्णश्चोरुयशा हंसमहिषीशिविकान्वितः॥५॥ पुत्रपौत्रजनानीकैर्वारकांताः करेणुभिः। नगरस्त्रीकटैर्थ्यैः थियासार्थैश्च संवृतः ६ दृष्टलयश्च तथाक्रूरवसुदेवाहुकादयः। प्रद्युम्नाद्यास्ततस्तत्र जग्मुर्यदुपविप्लवः ७ शठधर्मसरशोवास्त्रसुवर्णोद्द वसारणाः। अश्वकुंकं हृतवर्माणं संख्याप्यपुररक्षणे ८ ते रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः। गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युतिः ९ व्यरोचंत महाभागाः पथि कांचनमालिनः। वेदवादित्रनिर्घोषैः शंखदुंदुभिनिस्वनैः १० गायंतः कृष्णकृष्णेति गोविंदेति च संततं। ककुभः पूरयन्नादैर्जग्मुः सर्वे कुरूद्वह ११ स्यमंतपंचकं प्राप्य क्षेत्रं त्रैलोक्यविश्रुतं। तत्पौषपौर्णिमस्यां वा काष्ठैश्चक्रिरे भवनानि च १२ कंबलाजिनवस्त्राणां शिविराणि महीभृतो। आसन्विचित्ररूपाणि शतशोथ सहस्रशः १३ तत्राजग्मुर्नृपा नैके ब्राह्मणाश्च सहस्रशः। वैश्याः शूद्राश्च निःसंख्या ये चान्ये वर्णनिंदिताः १४

ते तथा ते अतिधवलप्रभा इत्यर्थः। तैर्विद्याधरद्युतिभिः ९ १० पूरयन्पूरयंतः ११ १२ कंबलाजिनवस्त्राणां विताने शिविरशोभः १३ अनेकं इति पदच्छेदः बहव इत्यर्थः। निंदिताश्चतुर्वर्णेभ्यः पृथक्कृताः १३ ॥ ॥

संशितव्रताः निर्मलाव्रताः। स्नातकाः दंडसोदककमंडलुधराः। गृहमेधिनः पंचयज्ञाधिकारिणः १५ कुब्जाः वक्रांगाः। वामनाः ह्रस्वावयवाः। पंड काः क्लीबाः। व्यंगाः हस्ताद्यवयवहीनाः। किंसाम्यमितितचाह। कर्मेति १६ करस्कोवलयः १७ १८ वासांसि वस्त्राणि स्रजः मालाः स्वर्णमालाः

ऋषयश्च महात्मानो विख्याताः संशितव्रताः। सोपाध्यायाः साग्निहोत्राः स्नातका गृहमेधिनः १५ अंधाश्च बधिरा श्चैव कुब्जा वामनपंडकाः। व्यंगा जडाश्च मूकाश्च कर्मक्षपपरीक्षवः॥१६॥ गोविंदचरणांभोजरेणुरंजितमस्तकाः। करकांगदकेयूरहारकुंडलभूषणाः १७ प्रमोधद्दिव्यवसनाः कलत्रैः खेचराइव। तत्र स्नात्वा महाभागाः उपोष्य सुसमाहिताः १८ ब्राह्मणेभ्यो ददुर्देहर्षासः स्रग्युक्तमालिनीः। एमद्रव्येषु विविध वसुंधरायुत्यग्यहस्यः १९ ददुः स्वर्णांग्रिजाग्रेभ्यः कृष्णेनो भक्तिरस्त्विति। स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः २० भुक्त्वोपविविशुः कामं स्निग्धच्छायांघ्रिपांघ्रिषु। तत्रागतांस्ते ददृशुः सुहृत्संबंधिनो नृपान् २१ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान्। कांबोजकैकयान्मद्रान्कुंतीन्गांधारकेरलान् २२ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृपान्। नंदादीन्सुहृदो गोपान्गोपीश्चोत्कंठिताश्चिरं २३ अन्योन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः। आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदं। २४॥ स्त्रियश्च संवीक्ष्य मिथोतिसौहृदाः सचापलापांगदृशोभिरेभिरे। स्तनैः स्तनान्कुंकुमपंकरूषितान्निहत्य दोर्भिः प्रणयाश्रुलोचनाः २५ ततोभिवाद्य ते वृद्धान्यवीयेरभिवादिताः। स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथा मिथः २६ ॥ ॥

वासांसि तिवासः स्रग्युक्तमालिन्यः ताः १९ २० अंघ्रिपमूलेषु २१ ४ सचापलाः चांचल्येन सहिताः अपांगदृशः कटाक्षवीक्षणानि यासां तास्तथा। अभिरेभिरे आलिंगनं चक्रुः २५ ६ ॥ ॥

कोयं कथोतितत्राह। आर्येति। आर्य भ्रातर्ज्येष्ठभ्रातः वसुदेव। अकृताशिषं अक्षीणपुण्यां। अस्मदापत्सु मद्वार्तां नानुस्मरथेति यत्तस्मादिति शेषः २८ तत्किं कारणमिति तत्राह। सुहृद इति। अदक्षिणं विपरीतमिति २९ दैवक्रीडनकान्दैवस्य क्रीडोपकरणभूतान्। ईशस्य वशे हि

पृथा भ्रातॄन्स्वसॄर्वीक्ष्य तत्पुत्रान्पितरावपि। भ्रातृपत्नीर्मुकुंदं च जहौ संकथया शुचः २७ कुंत्युवाच आर्य भ्रातरहं मन्ये आत्मानमकृताशिषं। यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः २८ सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि। नानुस्मरंति स्वजनं यस्य दैवमदक्षिणं २९ वसुदेव उवाच अंब मास्माननसूयेथा दैवक्रीडनकान्नरान्। ईशस्य हि वशे लोकः कुरुते कार्यतेथवा ३० कंसप्रतापिताः सर्वे वयं याता दिशो दशा। एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ३१ श्रीशुक उवाच वसुदेवोग्रसेनाद्यैर्यदुभिः सेविता नृपाः। आसन्नच्युतसंदर्शपरमानंदनिर्भराः ३२ भीष्मो द्रोणोंबिकापुत्रो गांधारी ससुता तथा। सदाराः पांडवाः कुंती संजयो विदुरः कृपः ३३ कुंतिभोजो विराटश्च भीष्मको नग्नजिन्महान्। पुरुजिद्द्रुपदः शल्यो धृष्टकेतुश्च काशिराट् ३४ दमघोषो विशालाक्षो मैथिलो मद्रकेकयौ। युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ३५ राजानो ये च राजेंद्र युधिष्ठिरमनुव्रताः। श्रीनिकेतं वपुः शौरेः सस्त्रीकं वीक्ष्य विस्मिताः ३६ अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः। प्रशशंसुर्मुदा युक्ता वृष्णीन्कृष्णपरिग्रहान् ३७ अहो भोजपते यूयं जन्मभाजो नृणामिह। यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनां ३८ ॥ ॥

लोकः कर्माणि कुरुते। संगेन कार्यते वा। कार्यते ह्यवश इति स्मृतेः ३० कंसेन प्रतापिताः संतापं प्रापिताः। एतर्हि इदानीं स्वसः हे भगिनि ३१ ३६ कृष्णपरिग्रहान्कृष्णाश्रयान् ३७ ३८ ॥ ॥

युष्माकमेव धारणार्थश्च शब्दः समाहारार्थः। यस्य कृष्णस्य विश्रुतिः श्रुतं वचः वागात्मकं शास्त्रं ब्रह्मसूत्रादिलक्षणं इदं जगत्पुनात्येवं यस्य पादावनेजनपयश्च पुनाति। कालाग्निना भर्जितभगानि ह्यस्य वीर्या भूः यस्यांघ्रिपद्मस्य स्पर्शेन उद्भूता शक्तिर्यस्याः सा तथा सास्माकं अखिलार्थानभिवर्षति। तं कृष्णमसकृत्पश्यथेति यस्मात्तस्माज्जन्मभाज इति गतेनान्वयः ॥३९॥ इतोपि यूयं जन्मभाज इत्याशयेनाह। तद्दर्शनेति। निरयवर्त्मनि वृत्ते प्रवृत्तैर्विरहितमार्गे अत एव दुःखविषये वर्तमानानां वर्तमानानां स्वर्गापवर्गविरमः दुःखासंभिन्नप्रदेशः स्वर्गः। कर्मसाध्यप्रदेशः अपवर्गो मोक्षः। तयोर्विरामो यस्मात्स तथा। मुक्तेरेव दातेत्यर्थः। अपवर्गः क्रियासाध्यफलाशेतस्य गमोक्षयोरिति। पद्माविशेषेण रमणं यस्मात्स तथा। ज्ञानादेव स्वर्गो ज्ञानादेवापवर्ग इति

यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति पादावनेजनपयश्च वचश्च शास्त्रं। भूः कालभर्जितभगापि यदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोखिलार्थान् ३९ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिंडबंधः। येषां गृहे निरयवर्त्मनि वर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ४० नंदस्तत्र यदून्प्राप्तान्ज्ञात्वा कृष्णपुरोगमान्। तत्रागमद्वृतो गोपैरनःस्थार्थैर्दिदृक्षया ४१ तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः। परिषस्वजिरे गाढं चिरदर्शनकातराः ४२ वसुदेवः परिष्वज्य संप्रीतः प्रेमविह्वलः। स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासं च गोकुले ४३ कृष्णरामौ परिष्वज्य पितरावभिवाद्य च। न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह ४४ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च। यशोदा च महाभागा सुतौ विजहतुः शुचः ४५ ॥ ॥

श्रुतेः। किंच तत्संभ्याविता सिनामिति च शब्दः। एवं विधो विष्णुः [illegible] यमंगृहावेशमंतरेण येषां युष्माकं गृहे आसते स्वयं तस्य हरेर्दर्शनं च स्पर्शनं च अनुपथश्चानुगमनं च प्रजल्पश्च शय्या च आसनं च अशनं च तानि [illegible] यौनस्य सयौनस्य पिंडस्य देहस्य संतिसत तथा तत्सपिंडस्य बंधः इदालिंगनं येषां तेन तथा तस्मात्तु जन्मसाफल्यं युष्माकमिति शेषः ४० ४१ ४[illegible]३ कृष्णरामयोर्जन्मोद्भवविदं वं कथयति कृष्णरामाविति ४४ ४५

द० उ०

४७

व्रजेश्वरीं यशोदां। सस्रुवतुः संभाषणं चक्रतुः ४६ यस्याः मैत्र्याः वां युवयोः ४७ एतौ हि कृष्णरामौ युवयोः पित्रोः समीपे न्यस्तौ युवयोः संप्रीणनादि निजा ण्यकुरुतां। संप्रीणनं संप्रीतिः अभ्युदयो जातकाद्यभिवृद्धिकर्म। रक्षा पतनादिना पुष्टिकरणं पोषणं कीदृशौ। अदृष्टपितरौ पितृशङ्कास्पदात्मदृष्टिं न यस्या तौ। ससंतापर मातसम्भ्रमे भो न्यत्र। कुतश्चन भयो कुत्र चित भय युक्तौ न भवतः। कुत्र चेत्तु क्व संक्षिपति नकारेण स न्तु भय युक्तादित्यर्थः। आङ्गणादिस ञ्चनवशात् विभ्यतौ। यद्वा बाल्ये विडम्बनार्थं सङ्गमं मंतरेण ह्येष्योना कुत्र च भयौ न विभ्यतावित्यर्थः। तत्र दृष्टांतमाह। पक्ष्मेति। पक्ष्म यथा समीपस्थं स्वल्पं स्व इत्येकवचनं द्विवचनार्थे। यक्ष्मणी अक्षिलोमः नेत्रयोः कृतश्चित्तद्धयनिवारके तथा युवामिति शेषः ४८ गोप्यश्च सुचिरकालादृष्टं कृष्णमुपलभ्य दृष्ट्वा

रोहिणी देवकी चैव परिष्वज्य व्रजेश्वरीं। स्मरंत्यौ तत्कृतां मैत्रीं बाष्पकंठौ समूचतुः ४६ को विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि। अवाप्याप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया ४७ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि। प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न सतां परः स्वात् ४८ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति। दृग्भिर्हृ दीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापं ४९ भगवांस्तास्तथाभूता विविक्त उपसंगतः। आश्लिष्यानामयं पृष्ट्वा प्रहस न्निदमब्रवीत् ॥५०॥ अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया। गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ५१

सद्यः दृग्भिः हृदि कृतं अलं परिरभ्य तद्भावं तस्मिन् तन्मयत्वं भक्तिमापुरित्यन्वयः। कीदृशं। नित्ययुजां नित्यमनोयोगिनामपि दुरापं। दुरापमित्यने नमस्करेवशाधास्य सूचयति। या गोप्यः यत्प्रेक्षणे तादर्थ्ये सप्तमी प्रेक्षणार्थं दृशिषु नेत्रेषु पक्ष्मणां कृतं निमेषलक्षणं कर्म शपंति। पक्ष्मकर्तारं विधिं चेत्यनेन भक्त्यतिशयो दर्शितः ४९ ५० स्वानां यदूनामर्थं चिकीर्षवः अभीष्टं कर्तुकामाः। अन्यासंगादन्यकार्यप्रसंगेः चिरायितान् चिरा दनागतान् शत्रुपक्षक्षपणचेतसोपसांतान् पा ५१ ॥ ॥

राम

४७

मध्यापथावदवत्व्यास्मान्निदमेव विशंकये। किं तदिति तत्राह। नूनमिति ५२ एतदेव विवृणोति। वायुरिति ५३ प्रेष्ठवियोगादस्माकं अनुतापः इति तत्राह। मयीति ५४ मम परिच्छिन्नत्वे मद्वियोगशंका तदेव नास्ति सर्वगतत्वादिति हि शब्दसूचितं हेतुं व्यनक्ति। अहं हीति। आदिः कारणं अंतः संहर्ता आद्यंतकाले वर्तमानो वा। न हृच्छंकायाः कः परिहार इति तत्राह। अंतरमिति। हे अंगनाः यथा खादि भूतानि भौतिकानां घ टकादिषु एकवचनं। आत्मना परमात्मना ततं इति खादीनि ततानि जीवास्ततं इति योऽयं। विघ्नभावादौ पदार्थिको व्यपदेश इति तत्राह। उभयमि

अपवर्त्य यथास्मासु इदमेव विशंकये। नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ५२ वायुर्यथा घनानीकं तृणं तूलं रजांसि च। संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ५३ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते। दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ५४ अहं हि सर्वभूतानामादिरंतोंतरं बहिः। भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरंगनाः ५५ एवमेतानि भूतानि भूतेष्वात्मात्मना ततः। उ भयं मय्यथ परे पश्यताभातमक्षरे ५६ श्रीशुक उवाच अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः। तदनुस्मरणध्वस्तजीवको शास्तमध्यगुः ५७ ॥

मयि तत एतदुभयं शास्त्रीयम् अथ तस्मादुभयं जीव ह्युतशब्दवाच्यं तत्त्वं परे सर्वोत्तमे अक्षरे ब्रह्मणि मय्याततमिति पश्यथेत्यन्वयः। अनेनेदं पुरुषे यमिति आ प्यातमितिज्ञायते ५६ श्रीपरमयंउपदेशो घटपटसलिलादिकवदर्थ इति तत्राह। अध्यात्मेति। देहमधिकृत्य वर्तमानानां पर मात्मादितत्त्वानां शिक्षयोपदेशलक्षणया शिक्षिताः विद्योपादानं कारिताः तदनुस्मरणेन तस्य कृष्णस्यानिरंतरोपासनया जात ज्ञानाग्नि नाध्वस्तोदग्धः जीवकोशः लिंगशरीराभिमानो यासां तास्तथा तं कृष्णमध्यगुः तत्र जातवत्यः ५७ ॥ ॥

ज्ञानरूपत्वादर्दं संतुरित्याह। नताः स्मेति। अस्य श्लोकस्य व्याशीर्विषयो योगः। नताः भवामेति प्रार्थयामहे। जन्मांतरेपि तत्पादारविंदं मनसा स्मरेम इत्यर्थः। ननु किमस्य माहात्म्ये येन तत्र मनः प्रार्थनीयमिति तत्राह। योगेश्वरैरिति। यत्पादाब्जं निवृत्तज्ञानदुर्बलानेत्याह। अगाधेति। किमर्थं चिंत्यमिति हेतुगर्भं विशेषणमाह। संसारकूपपतितानामस्मादुत्तरणावलंबं कर्ध्वगमनलक्षणाधिश्रेणिरूपाधारं। किंच गेहं जुषां गेहाद्यवदेहपोषणनिरतानामपि नो मनसि सदोदियाविरंतरमुदेतुत्वन्मूरूपमिति शेषः ५७ इति दशमे सप्ततिरध्यायः श्रीवा

नताः स्मते नाथ पदारविंदं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः। संसारकूपपतितोत्तरणावलंबं गेहं जुषामपि मनस्युदियात्सदा नः ५७ इति श्रीभागवते महापुराणे दशमस्कंधे सप्ततिरध्यायः श्रीशुक उवाच तथानुगृह्य भगवान्गोपीनां स गुरुर्गतिः। युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोव्ययं १ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः। प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः २ ॥ ॥

दीनां भक्त्यतिशयजननाय विस्मरणाय तीतायाध्यायेषु श्रीकृष्णविक्रमं संक्षेपतोनुक्रामत्यस्मिन्नध्याये। तत्पादाब्जपोषहतं रघ्य ति। तथेति। यथोपदिष्टं ज्ञानं सुदृढं स्यात्तथा ज्ञानोपदेशेनानुगृह्य गतिः मुक्तिलक्षणानंददत्वेनेत्याशयः। अव्ययमनामयं कुशलमि त्यर्थः। तस्य हरेः पादेक्षया चरणनिरीक्षणेन हतांहसः निर्दलपापाः २ ॥ ॥

किंविधांकथा प्रत्यूचुरिति तत्राह। कुत इति। ये जनाः कर्णपुटैः महन्मनस्तो मुखनिःसृतं महतां व्यासादीनां मनस्तः मनः शर्करैः सुख क मलान्निःसृतं गलितं त्वच्चरणांबुजासवं तत्पदकमलकथामृतं क्वचित्कस्मिंश्चित्प्रसंगेपि अलं पिबंति। अलं बुद्धिरादिरित्येन सेवंते तेषाम शिवः अशुभः पंथाः कुतः स्यादित्यन्वयः। कीदृशो शिवमार्ग इति तत्राह। देहंभृत इति। देहभृतः उदरंभराः तत्कृतमशिवमार्गं त्रासं व्यस

कुतोशिवं त्वच्चरणांबुजासवं महन्मनस्तो मुखनिःसृतं क्वचित्। पिबं ति ये कर्णपुटैरलं प्रभो देहं भृतमस्तत्कृतमुच्छ्रसंतिहि ३ ॥

नं प्रेम्णात्यच्छ्रुसंति दीर्घं श्वसंति। यद्वा ये देहभृतः शरीरिणः कर्णपुटैः त्वच्चरणांबुजासवं पिबंति तत्र स्वात्मकृतं चरितमुच्छ्रसंति। लोकेउ पदिश्य विपाकाश्रयं तिविस्तारयंति तेषामशिवः कुत इति ३ ॥ ॥

द०श० ५९

नत्वन्नारायणस्तरणकमलाघ्रतया। पिनांअमंगलंनाशीत्यनेनान्येजामङ्गीत्यायातेंतत्रभवंतः केइति तत्राह। तत्वेति। तत्वांननासस्त्यत्र पा। यस्यपादाम्बुसुधापायिनामंगलंनास्ति। अस्य देवदत्तवदन्याधीनत्वेकिमेतत्रमनफलमित्यत्राह्। आत्मधामआत्मैवधाम स्वरूपलक्षणं आश्रमो यस्य सतथा तं। स्वाश्रयमित्यर्थः। स्वाश्रयत्वंचेतोपिमङ्गलादेवाद्यन्यतमेननियतेनकिंनस्यादित्याद्यः। विबुधेति। विबुधानामात्मगतिः स्वभावगमकंस्वामिनमाश्रयंवा। स्वभावगमकत्वं कथमत्राह। त्र्यवस्थमिति। तिस्रोवस्थाजाग्रदाद्यायस्मात्ससतथा तं। अनेन देवानांजाग्रल्लक्षणमनिमिषस्वभावंदैत्यानांसुषुप्तिलक्षणं गाढंतमस्वभावंमानुष्याणांस्वप्नलक्षणमिश्रज्ञानस्वभावंगमयतीति ज्ञातव्यंनच वस्थात्रयनियंतृत्वेनतत्कृतंश्रमलक्षणंदुःखमनिवारितमापतेद्देवदत्तवदत्राह। आनंदेति। आनंदानां संप्लवोमहौघोयस्मिन्सतथातंशरणं

तं त्वात्मधाम विबुधात्मगति त्र्यवस्थमानंदसंप्लवमखंडविकुंठबोधं। कालोपसृष्टनिगमावपनात्तयोगमायाकृतिंपरमहंसगतिंनताःस्म ५ ॥ ॥

ंदमित्यर्थः। नचतत्रमवलक्षणसाधनाभावात्पाराणामपिपूर्णानंदः किंनस्यादित्राह। अखंडेति। अखंडः निरंतरः विकुंठः अविच्छिन्नः बोधोयस्यसतथा तं। स्वामिन्निष्कलमप्रत्यन मित्यर्थः। नचैवंविधस्यजननंकिमर्थमत्राह। कालेति। कालेनयुगेनोपसृष्टस्तत्संनोनिगमोवेदादिशास्त्रनिचयः तस्यावपनाय पुनरभिव्यक्तिलक्षणांकुरीकरणाय आत्तांगीकृतयोगमाययाकृतिः स्वरूपधृतेह पादेहोयेनसतथा तं। आकारोदेहआकृतिरितियादवः। उक्तार्थसर्वस्वेकिंप्रमाणमत्राह। परमेति। परमहंसानांवेदांतेकनिष्ठानांसंन्यासिनां गतिर्ज्ञानंयस्मिन्सतथा तं। भगवत्स्वरूपविषयंपरमहंसज्ञानंप्रमाणमितरेषामित्यर्थः ५ ॥ ॥

राम ५९

अंधकुतस्यकौरवाणां स्त्रियः समेत्य एकत्रमिलित्वा यांकथामगृणन् तांवर्णयामितंशृणु ५ प्रश्नप्रतिवचनपूर्वकांगृणंतिग्गानवदत्रेतिविवेकाय। द्रौपदीति। हेषोडशसहस्रकृष्णपत्न्यः। पृथक्प्रमयगृहं तथाजल्पन्त्रजतं। स्वेच्छयालोकमनुकुर्वंस्त्वच्युतोभगवान् स्वयं वोयुष्मान्यथायेनविधिनाउपयेमे। तंविधिमस्माकंब्रूतेत्यन्वयः ७ राजसुजरासंधादिषुमामांतॄशेषभटानां मित्सुपलक्षणंराज्ञां शेखरितः मूर्द्धसुशेखरइवअंघ्रिरेणुर्येनसतथा। भागंतदर्थत्वेनक्लृप्तांशंयथाग्यभोगेदुपेत्यत्राह। श्रीनिकेतेति। श्रीत्यनेनतन्नांशंसूचयति। अ

इत्युत्तमश्लोकशिखामणिंजनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः। समेत्यगोविंदकथामिथोगृणंस्त्रिलोकगीतांशृणुवर्णयामिते ५ द्रौपद्युवाच॥ ॥ हेवैदर्भ्यच्युतोभद्रेहेजांबवतिकौशले। हेसत्यभामेकालिंदिशैब्यरोहिणिलक्ष्मणे ६ हेकृष्णपत्न्यएतन्नोब्रूतवोभगवान्स्वयं। उपयेमेयथालोकमनुकुर्वन्स्वमायया ७ रुक्मिण्युवाच चैद्यायमार्पयितुमुद्यतकार्मुकेषुराजस्वजेयभटशेखरितांघ्रिरेणुः। निन्येमृगेंद्रइवभागमजाविर्यूथात्तच्छ्रीनिकेतचरणोस्तुममार्चनाय ८ सत्यभामोवाच योमेसनाभिवधतप्तहृदाततेनलिप्ताभिशापमपमार्ष्टुमुपाजहार। जित्वर्क्षराजमथरत्नमदात्सतेनभीतःपितादिशतमांप्रभवेपिदत्तां ९

जानामवीनांयथा ८ सनाभेः सहोदरस्यप्रसेनस्यवधेनतप्तहृदातेनसहृदयेनमेततेनतातेनपित्रालिप्ताभिशापंकथितमिथ्यादोषं मार्ष्टुंपरिहर्तुंस्यमंतकंराजानंजांबवंतंजित्वारत्नमुपाजहार। अथतेनकृष्णेनभगवतानीतद्विततप्रासभेदलक्षणापराधः सभेपितामांप्रभवेकन्यकर्तुमन्यथाकर्तुंसमर्थायआदिशातदत्तवान् रत्नंचाहात। कीदृशींमामन्यस्मैवाग्दत्तामपि। यद्वास्वहस्तराजंजित्वारत्नमाहरत्। आहृत्यचतदत्तंमणिंयोअदात्तेनरत्नेनसहभगवतानीतद्विसपितातस्मैप्रभवेआदिशातेत्यन्वयः ९ ॥ ॥

द० उ०

५०

देहविकृतिं परिमाणतो वर्णतश्च विलक्षणदेहं कृष्णं प्रत्यक्षं दृष्ट्वा आज्ञाय सम्यक् ज्ञात्वा अनेन श्रीकृष्णेन। त्रिनवज्ञानि सप्तविंशतिदिनान्यतिक्र
म्य। एनं कृष्णं निजनाथदेवं स्वकुलस्वामिदेवता श्रुतं सीतापतिं पुनर्ज्ञात्वा मे पिता मां ववार अवधीरणं अवज्ञानमर्हणं अपराधपरिहारार्थं पश्चा
त्साधनं मां मणिना सह पादौ प्रगृह्योपाहरत् कृष्णायेति शेषः। यद्वा अवधिरवधानं निश्चयज्ञानं यत्र स्यैरणं प्रेरणं येन सो वधीरणः दशरथपुत्रा
वतीर्णमयमिति विशिष्टज्ञानजनक इत्यर्थः। तं पराजित इति वा पाठः। अज्ञायेति चत्वममुष्या कुमारी कीदृशी त्वयाह। अहमिति। अपि मामर्षं मयच्छिंदो
मणीकारयोदिति वचनात् त्रिनवज्ञानीति। यद्वा त्रिनरा कारयुगाख्ये नीतास्य कल्पतो गुणत्वने नपूर्वपरस्थानयोः गुणादेशेन रूपं सिद्धं भवति १० या

जांबवत्युवाच आज्ञाय देहविकृतिं निजनाथदेवं सीतापतिं त्रिनवहान्यमुनाभियुध्य। ज्ञात्वावधीरणमुपाहरदर्हणं मां पादौ
प्रगृह्य मणिनाहममुष्य दासी १० कालिंद्युवाच तपश्चरंतीमाज्ञाय स्वपादस्पर्शकाम्यया। सख्योपेतागृहीत्पाणिं योहं
तद्गृहमार्जनी ११ मित्रविंदोवाच यो मां स्वयंवरमुपेत्य विजित्य भूपान्निन्ये श्वयूथमिव चात्मबलिं द्विपारिः। भ्रातॄंश्च मेपकुरुतः
स्वपुरं श्रियोकस्तस्यास्तु मेनुभवमंघ्रवनेजनं मे १२ ॥ ॥

हमिदानीं तद्गृहमार्जनी तां मां स्वपादस्पर्शकाम्यया तपश्चरंतीं विज्ञाय सख्या अर्जुनेन सहोपेत्य मम पाणिमग्रहीत् यः कृष्णदेवता मम पाणि
मग्रहीत् अहं तद्गृहमार्जनीति वा। पापद इति व्यत्ययेनाध्ययो वा ११ यः कृष्णः द्विपारिः। सिंहः श्वयूथं विजित्यात्मने कृष्णं बलिमुपाहारमिव स्व
यंवरे भूपानुपेत्य विजित्य भ्रातॄन् अपकुर्वतो अपकुर्वतः सतः मां निन्ये स्वपुरं चागतः। अनुभवं जन्मनि जन्मनि मम तस्य हरेरंघ्र्यवनेजनं
मोस्त्वित्यन्वयः। अपकारणेऽहेतुः श्रिय इति। संपदो हेतोः श्रीः पद्मायां कांतिसंपदोरिति। तस्या अंशं मामिति वा १२ ॥ ॥

राम

५०

अत्यायिके वलवीर्यं सुतीक्ष्णशृंगाणि च येषां ते तथा तान् वलशक्तिवीर्यविक्रमदुर्मदान् ध्वेतीति दुर्मदहनः। अजतो का वृष्णा गोशृंग १३
ततः किमकारीति तत्राह। यदिति। दासीभिः सह मां निन्ये १४ इहेति इहापि १५ येन पादस्पर्शेनात्मनो मेतद्धेयः स्यात्। सपादस्पर्शो भवेत् १६
इहेत्यहीत्यपि। एकलोकपालिंद्रादीविहाय पद्महस्तया स्वयं वृतः। तस्मिन्मुकुंदे मम चित्तमास्तेत्यन्वयः १७ इहापीत्यपि स्वयंवरे इहोपध्याः पा

नीलाउवाच समोक्षणोतिबलवीर्यसुतीक्ष्णशृंगान्पित्रा कृतान्क्षितिपवीर्यपरीक्षणाय। तान्वीरदुर्मदहनस्तरसानिगृह्य क्रीडन्ब
बंध ह यथा शिशवोजतोकान् १३ य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरंगिणीं। पथि निर्जित्य राजन्यान्निन्ये तद्दास्यमस्तु मे १४ मद्रोवा
च पिता मे मातुलेयाय स्वयमाहूय दत्तवान्। कृष्णे कृष्णाय तच्चित्तामक्षौहिण्या सखीजनैः १५ अस्य मे पादसंस्पर्शो भवेज्जन्मनि ज
न्मनि। कर्मभिर्भ्राम्यमाणाया येन तच्छ्रेय आत्मनः १६ लक्षणोवाच ममापि राज्यच्युतजन्मकर्म श्रुत्वा मुहुर्नारदगीतमास
ह। चित्तं मुकुंदे किल पद्महस्तया वृतः सुसंमृश्य विहाय लोकपान् १७ ज्ञात्वा मम मतं साध्वी पिता दुहितृवत्सलः। बृहत्सेन इति ख्या
तस्तत्रोपायमचीकरत् १८ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः। अयं तु बहिराच्छन्नो दृश्यते स जले परं १९

र्थं वरे छपामत्स्यः कृतोय याततथा मे पितात त्रोपायमचीकरत्। इद मुपायमतो विशिनष्टि। अयं त्विति। तु शब्देनान्याशक्यं दर्शयति। अयं मत्स्यो
दीर्घस्तूणशिखरे वलंवितो बहिराच्छन्नः व्यवहितसर्वांगः। अदर्शनाद्वेधोऽसुकर इति तत्राह। दृश्यत इति। स मत्स्यः परं केवलं जले दृश्य
ते वेधनालनिर्गतछायया जले प्रतिविंबितत्वेन चक्षुर्विषय इत्यर्थः। तदनेनाधोमुखेन जले छायामवलोक्य वेद्धव्य इति पार्थादन्यत्वं
वेधादधिकासुकरमिति ज्ञायते १९ ॥ ॥

उपाध्याया आचार्याः पुरोहिता वा २० हेयार्थेतिसिद्धे कार्येभोगार्थमपिविद्येपेभ्यांते मद्दिषः २१ व्यस्तजन्मुक्तवंतः। आकोष्ठ्यांगुरश्य पर्यंतं २२ तस्य मत्स्यस्य स्वरूपावस्थितिर्नाविंदन्नज्ञातवंतः २३ मत्स्याभासं मत्स्याकारं यत्रोपपेन बाणा न्नस्पृष्टं न तन्नाछिनचाताईकिंकृतसत्रा हापस्टशइति २४ ५ अभिजितिदिनमध्यमुहूर्त्तेसमिति २६ भुविजयशङ्खोऽपतत्व्याप्तोभूत २७ दिशइति लक्षणादिक्षुस्थिता इत्यर्थ

कृत्वैतत्सर्वतोऽध्याय आयसुर्मतिपितुः पुरं सर्व्वेऽस्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः २० पित्रा संपूजिताः सर्वे यथावीर्यं यथावयः। आददुः प्रशरं चापं वेद्धुं पार्थीतिमद्विषः २१ आदायव्यस्तजन्केचित्सज्जीकर्तुमनीश्वराः। आकोष्ठ्यांत्यांसमाकृष्य पेतुरेके सुनाहताः २२ सज्जं कृत्वापरे वीराः प्रागज्योतिमधीश्वरो। भीमो दुर्योधनः कर्णो नाविंदंस्तदवस्थितिं २३ मत्स्याभासं जलेदृष्ट्वा ज्ञात्वा च तदवस्थितिं। पार्थोयत्तोऽस्पृत्तद्वाणेना छिनत्पत्स्यशेषरं २४ राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु। भगवान्धनुरादाय सज्जं कृत्वाथ लीलया २५ तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृज्जले। छित्वेषुणापातयत्तं सूर्ये चाभिजिति स्थिते २६ दिवि दुंदुभयो नेदुर्जयशब्दयुता भुवि। देवाश्च कुसुमासारान्मुमुचुर्हर्षविह्वलाः २७ तद्रंगमाविशत्कृष्णा कलनूपुरपाभ्यांपद्भ्यां दिशोऽभ्रमयतीचलपेशलाभ्यां। इत्तेपिधायपरिधाय च कौशिकाग्र्ये सव्रीडहासवदना कवरीधृतस्रक् २८ उन्नीयवक्त्रमुरुकुंडलकुंतलत्विड्गंडस्थलं शिशिरहासकटाक्षमोक्षैः। राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया विदधे स्रजं मालाम् २९ ॥ ॥

यश्च प्रयती कामविकारसूचकनानाचेष्टाः कलाः कारयंती। तद्रंगं तत्स्वयंवरस्थलं चलेन पदविन्यासेन पेशलाभ्यां सुंदराभ्यां इत्ते नूपुरे पेश्चतरवस्त्रौभ्यो व्याहृत्तरूपे कौशिकाग्र्ये किमिको शोभनं तनुकृतवस्त्रश्रेष्ठे। पद्भ्यां स्तनेन घनेन परिधाय (हृत्तेपीनेस्तनद्वयेपिधायवा। कवर्यां धृतस्र‍क्‌मालायस्याः सातथा २८ शिशिरखतनुषारवद्बलो हासः स्मितविधो वा ९ ॥ ॥

हेयात्तसेनिहेशेपरि ३२ ईशाःशिबोनेत्याहाचतुर्भुजइति ३२ ३ ग्रामसिंहाः सारमेयाः। हरिसिंहं ३४ नुत्राः छिन्नाः धाइवस्तांग्ययस्वकेयरक्ष्यंपांतेतथा। प्रधानेयुद्धे ३५ पत्युःस्वामिनः कुशस्थजयभूत्यात्तपश्रियाअलंकृतां। यथा जपलक्ष्मीस्तत्कृशातथालंकृतां वा। रविछ्छदश्च जपटा

ततो मृदंगपटहाः शंखभेर्यानकादयः। निनेदुर्नरनर्तक्योननृतुर्गायका जगुः ३० एवं हृते भगवति मायेशे नृपयूथपाः। न सेहिरे याज्ञसेनि स्पर्द्धिनो हृच्छया तुराः ३१ मां रथं समारोप्य हयचतुष्टयं। शार्ङ्गमुद्यम्य संनद्धः स्थावीशश्चतुर्भुजः ३२ दारुकश्चोदयामास कांचनोपस्कुरं रथं। मिषतां भूभृतां राज्ञि इव मृगगारादिव ३३ तेन्वसज्जंतराजन्या निषेद्धुं पथिके चन। संयत्ताउद्धृतेष्वासा ग्रामसिंहायथाहरिं ३४ ते शार्ङ्गच्युतबाणौघैर्नुन्नबाहूरुकंधराः। निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः ३५ ततः पुरीं पतिर्जयभूत्यलंकृतां रविछ्छदध्वजपटचित्रतोरणां। कुशस्थलीं दिविभुवि चाभिसंस्तुतां समाविशत्तरणिरिवस्वकेतनं ३६ पितामे पूजयामास सुहृत्संबंधिबांधवान्। महार्हवासोऽलंकारैः शय्यासनपरिच्छदैः ३७ दासीभिः सर्वसंपद्भिर्भटेभरथवाजिभिः। आयुधानि महार्हाणि ददौपूर्णस्य भक्तितः ३८ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः। सर्वसंगनिवृत्त्याद्धा तपसा च बभूविम ३९ ॥

चित्रतोरणाश्च यस्यां सातथा तां रविछ्छादयंतीतिरविच्छदाः आतपप्रतिष्टंभकाः। चित्रानानावर्णा स्तोरणाः स्वकेतनं आलीपोदयशिखरिणं ३६ ० पूर्णस्य अन्यपालकरहितस्य ३८ दासित्वं च तपसा इत्युणानिच येन प्राप्तमिति ज्ञापनायोक्तं। सर्वेति। अद्धा यथार्थस्तयाश्रद्दयुत्पन्नसमपोरिति ३९ ॥ ॥

द० ऊ०

५२

भोऽशसहस्रस्त्रियः स्वविवाहप्रकारं कथयंति। भौममिति। यः कृष्णः क्षितिजये भूमंडलविजये राज्ञो निर्मथ्य हृतराजकन्याः ज्ञात्वास रणं भौमं निहत्य। तेन रुकोण रुद्धाः निरोधलक्षणसंसृते मोक्षं स्मरंतीः अस्मान् पदांबुजं परिणिनाय समीपं प्रापयामास। यस्य पादांबुजं सेवयितु मूढवान्। न कामुकवुध्या कृतः आप्तकामः ४० वयमपि भगवत्पादरजःसेवामंतरेणनान्यदैश्वर्यपदं कामयामहे इत्याहुः नवयमिति। साम्राज्यमुत्तरदेशराज्यं स्वाराज्यं पूर्वदेशराज्यं भोज्यं दक्षिणदेशराज्यं वैराज्यं पश्चिमदेशराज्यं। पारमेष्ठ्यं चक्रवर्त्तिपदं। आनंत्यं सर्वदेश।

मद्रिष्यऊचुः भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथनः क्षितिजये हृतराजकन्याः। निर्मथ्य संसृतिविमोक्षमपिस्मरंतीः पादांबुजं परिणिनाय य आप्तकामः ४० नवयं साध्वि साम्राज्यं स्वाराज्यं भोज्यमप्युत। वैराज्यं पारमेष्ठ्यं वाऽऽनंत्यं वा हरेः पदं ४१ कामयामह एतस्य श्रीमत्पादरजः श्रियः। कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ४२ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः। गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ४३ इतिश्रीभागवते महापुराणे दशमस्कंधे एकसप्ततिरध्यायः ॥

षिपत्यं वा। हरेः पदं इंद्रपदं वा। साम्राज्यं चक्रवर्त्तिपदं स्वाराज्यं स्वर्गराज्यं भोज्यमंतरिक्षराज्यं। वैराज्यं पातालराज्यं आणिमादिराज्यं वा। पारमेष्ठ्यं ब्रह्मपदं। आनंत्यं मोक्षं वा न कामयामहे किंतु गदाभृतो हरेः पदं कामयामहे ४१ किमर्थं मत्वाहा एतस्येति एतस्य गदाभृतः श्रीमत्पादरजः मूर्ध्ना वोढुं। कीदृशं श्रियो लक्ष्म्याः कुचलिप्त कुंकुमरजो गंधाढ्यं ४२ व्रजस्त्रियः यत्पादरजो वांछंति। न केवलं व्रजस्त्रिय एव वांछंति पुलिंद्यादयोपी त्याह। पुलिंद्य इति। गावःगाः ४३ इति दशमे ए[क]सप्ततिरध्यायः ॥ ॥ ॥

राम

५२

हरेरौत्रीनिष्ठियमत्वं यज्ञस्य तदेकविषयत्वं तत्त्वी तेर्मुक्तिसाधनत्वं चुक्तं मित्याशिष्ये हस्य संसार मूलत्व मित्यादि कमध्यायद्वयेक थ्यपतीतत्रव्या सादिमुनीनां आगमनं वक्तुं पृथादिस्त्रीणां संतोषोक्तिं कथयति। पृथेत्यादिना। पामाधव्यः माधवपत्न्यः तासां कृष्णे प्रणया नुबंधं दृष्ट्वेति शेषः। विसिस्मुः विस्मिताः अश्रुभयत्रित्यचक्षुषः सत्पादीनां मक्षिपवाहं दृष्ट्वा १ इदानीं मुनीणामागमनप्रकारं वक्ति इतीति २ ४ द्वितस्त्रितैकताः सहो

श्रीशुकउवाच श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उतास्वगोप्यः। कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्युरलमश्रुकलाकुलाक्ष्यः १ इति संभाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु। आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया २ द्वैपायनो नारदश्च्यवनो देवलोऽसितः। विश्वामित्रः शतानंदो भारद्वाजोऽथ गौतमः ३ रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः। पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ४ द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रास्तथांगिराः। अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ५ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः। पांडवाः कृष्णरामौ च प्रणेमुर्लोकवंदितान् ६ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत्। स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ७ उवाच सुखमासीनान् भगवान्धर्मगुप्तनुः। सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ८ श्रीभगवानुवाच अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं। देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनं ९ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां। दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं १० ॥ ॥

दराः त्रितः कूपे वहितो देवान्स्तुवतऊतये इति श्रुतेः ५ प्रागुक्तायाथानर्चुः। नमनादिनेति शेषः ७ धर्मगुप् धर्मगोप्त्री तनुर्यस्य सतथा ८ तत्फलं जन्मफलं ९ तृणां युष्मद्दर्शनादिकं दुष्प्रापमिति किं वक्तव्यमित्याह। स्वल्पेति। अर्चायामिति सप्तमी प्रथमार्थे अर्चाप्रतिमैव देव इति चक्षुः दर्शनं येषां तेतथा। अर्चायां ज्ञाप्रति छयारिति १० ॥ ॥

द०उ०

५३

ननु वह्निसूर्यादीनां तीर्थादिदर्शनादेवांहसः साफल्यं स्यात्किं साधुदर्शनादिनेति तत्राह। नहीति। तत्र सन्निहिता अपि देवाश्च पुरुकालेन कालान्तरेणैवं
शुद्ध्यैव पुनंति। ननु तदा शीघ्रमेव। तत्र किं कारणमित्यपेक्षायामिदमेवोत्तरं। कलनमिव कालः ज्ञानं तावदंतः कालज्ञान इत्याहुः गुरुणा गुरूपदिष्टज्ञानेन
तत्स्वरूपं तत्तत्तीर्थगावरणादिकं ज्ञात्वा समुपास्य तद्दर्शनं प्राप्य तदनुसारेणाघक्षय इत्यतो गुरूपदेशः कारणमित्यर्थः। प्रकृते किमनेनेत्यत आह
दर्शनादिति। साधवः स्वदर्शनादन्यथाज्ञानमपनयंति। एवशब्दः गुरूपदेशं व्यवच्छिनत्ति ११ नन्ववद्यनिमित्तमन्यथाज्ञानं तापनेनतन्नास्याद
पश्चाद्दर्शनादयं ह्युपयित्वान्यथाज्ञानं नाशयंतीति ततोऽन्यसाफल्यमिति तत्राह। नेति। कस्मादघं न हरंतीत्यत उक्तं भेदकृतः अन्यथाज्ञानिनः पुंसः

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनंत्युरुकालेन दर्शनादेव साधवः ११ ॥
नाग्निर्न सूर्यो न च चंद्रतारकं न भूर्जलं खं श्वसनोऽथ वाङ्मनः। उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया १२

दाहकत्वादिशक्तिदर्शनादयमेवाग्निशब्दप्रवृत्तिहेतुरित्यन्यथाज्ञानं वह्न्यादीनां जायते। मनः मनोऽभिमानी देवः। मनो ब्रह्मेत्युपास्वेति श्रुतिः। ए
वकारेण क्रियत्कालो व्यवच्छिन्न इति तत्राह। मुहूर्तेति। अत्र प्रतीमार्थमपहाय तत्र सन्निहितदेवताकल्पनं निष्प्रमाणकमित्यादि शंका। प्राकृते
दृश्यमानं तु न द्रवं तीर्थमुच्यते इत्यादिना परिहर्तव्या। भेदस्यान्यथाज्ञानत्वं च मिथ्यास्याभेदतो दृष्टिरिति प्रमाणसिद्धं। नचेयं व्यवस्था कुतः अ
पामादिभ्यो देवानां उत्तमत्वादित्यतः। उत्तमा अपि देवेशा अवसाद्धि दुष्टोऽतृणां। पूजायैः संश्रयच्छंति परोक्षत्वाद्धि यायत इत्यादेः १२ ॥

राम

५३

ज्ञोऽपि विद्वज्जनः प्राज्ञैः कार्य इत्याशयेनाह। यस्येति। यस्य पुरुषस्य त्रिधातुके प्रधानात्मधियं तैः स्तैवातपित्तश्लेष्माकुले वा। कुणपे शव
वच्चेतने देहे आत्मबुद्धिः अहमिति ज्ञानं देहोऽहमित्यन्यथाज्ञानमित्यर्थः। यस्य च कलत्रादिषु अस्मदर्थादिषु स्वधीः मदीया एते अहमेषाम
मीना स्पृशति स्वकीयत्वबुद्धिः विषयभोगलोल्पं तत्र निमित्तं। यस्य भौमे भूविकारे शिलादौ इज्यधीः पूज्यबुद्धिः। यद्यस्य जले द्रवरूपे तीर्थबुद्धिः
अघहरत्वबुद्धिः। यस्याभिज्ञेषु शास्त्रतत्त्वज्ञेषु कर्हिचिदपि न पूज्यत्वबुद्धिः। स गोखरः गवि पृथिव्यां गर्दभः नापरः। गोस्पर्शनादिना शुद्धिः

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः। यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव
गोखरः १३ श्रीशुक उवाच निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः। वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धियः १४
चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां। जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुम् १५ ॥ ॥

स्यादिति गोष्वास्वो खरश्चेति विग्रहो न संगच्छत इत्युक्त एवार्थः १३ अकुंठमेधसः अप्रतिहतज्ञानस्य। दुरन्वयं अन्वेतुमशक्यं दुर्ज्ञेयमि
त्यर्थः। भ्रमंती अनवस्थाधीर्येषां ते तथा १४ मुनयः किमकुर्वन्पुनरिति तत्राह। चिरमिति। ईश्वरस्य जगन्नियंतुः ईशितव्यतां विडंबनान्यतिर
स्वभावं चिरं विमृश्य अयं जनसंग्रहः। उन्मार्गप्रवृत्तिनिवृत्त्यारक्षणादि इति मत्वा तं जगद्गुरुं ऊचुरित्यन्वयः १५ ॥ ॥

अहो हरेर्विडंबनमिति। कुतूहलाद् अधुना मंदस्मितं कुर्वतः किंस्वाम आगमनमुत बालकथा माहो स्विच्चित्तविषयं किंचिद्दुरितमाशंक्य तत्त्व विषयमेवेत्याह। यन्माययेति। तत्त्वविदुत्तमा वयं यस्य मायया विमोहिताः स भवानीहया लोकचेष्टया गूढः ईशितव्यायतिश्च नीशवदाचरतीति। यत्तस्मादहो भगवतो विचेष्टितं विचित्रं। लोहितादिजन्म्यं कापिति क्षपष्टत्ययः १६ चेष्टाया मतर्क्यत्वमुपपादयति। अनीह इति। आत्मना परेण अंतरेण। यथा भूमिः भौमैः स्वविकृतैः पदार्थैर्बहुनामरूपिणी कार्यरूपेण बध्यते। यथा तथा भवानत्र बध्यत इत्यन्वयः। यो भवा

ऋषय ऊचुः यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः। यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं १६ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा। भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं १७ अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय। स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान् १८ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः। यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं १९ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः। सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान् २० ॥ ॥

न्नीहः कूटस्थ एतज्जगत् बहुधा सृजत्यवत्यत्तीति। तस्माद्विभूम्नः ईश्वरं तं कीदृशं विडंबयतीति विडंबनं १७ यद्यपि लोकविडंबनमात्मा मोहयसि तथापि काले सज्जनोपद्रवसमये वेदपथं च बिभर्षि। वर्णाश्रमात्मा वर्णाश्रमरूपः। धर्माचार्यः यतो वेदमार्गप्रणेता तस्मै नत्र ब्राह्मणकुलं शुक्लत्वं चकस्मादित्यत आह। ब्रह्मेति। अत्र ब्राह्मणकुले शुक्लं परं ब्रह्म सम्यक् व्यक्तमव्यक्तमंतरेणोपलब्धं दृष्टं यस्मात् तस्मात् शास्त्रयोनेः वेदस्तिम योऽस्यात्मनः सद्धाम प्रशस्तं स्थानं यतः संभावयंति। यस्मात्त्वं ब्राह्मणपूजाग्रणीः ब्राह्मणप्रियत्वगुणेन ब्राह्मणशिखामणिः २० ॥

न केवलं जन्म न एव साफल्यमासीत्। किंतु विद्यादेरपीति तत्र निमित्तं त्वया संगम्येति। यतः नः त्वत्संगत्या श्रेयसां सकाशात् परः पुरुषार्थ इति यत्त २१ २ एकारामाः क्रीडावनेषां तेन तथा २३ अघौघं मर्षयति नाशयतीत्यघौघमर्षं तादृशस्य तीर्थस्य गंगाया आश्रयत्वादास्पदं स्थिरा अपेक्षुषु विपक्वाः परिपाकं प्राप्ताः योगाः ध्यानलक्षणाः तैः। उत्सिक्तया उद्रिक्तया भक्त्या उपहताः सम्यगुन्मूलिताः आशयः स्थानं यस्य स तथा। यस्य स जीवकोशः जीवाख्यास्य निधानस्थानीयं लिंगशरीरं येषां ते तथा उत्सिक्तभक्त्युन्मूलितस्थानलिंगशरीराः भवतो गतिं स्थानं वैकुंठलक्षणं २४ भ

अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः। त्वया संगम्य संगत्या यदंतः श्रेयसां परः २१ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे। स्वयोगमायया छन्नमहिम्ने परमात्मने २२ न यं विदंत्यमी भूपा एकारामाश्च वृष्णयः। मायायवनिकाछन्नमात्मानं कालमीश्वरं॥ २३॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः। उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान् २४ श्रीशुक उवाच इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं। राजर्षे स्वाश्रमान् गंतुं मुनयो दधिरे मनः २५ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः। प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः २६ वसुदेव उवाच नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ। कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां २७ नारद उवाच नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया। कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः २८ ॥ ॥

उपसंगृह्य अनुज्ञामिति शेषः। बभाषेदं वक्ष्यत्यघो बहुलमिति सूत्रात्। बभाषेरदमिति छांदसः २६ सर्वदेवमयेभ्यः संनिहितत्वेन सर्वदेवात्मभ्यः सर्वत्र देवो देवनं प्रकाशनं येषां ते तथा तेभ्य इति वा। निर्हारो मूलच्छेदः २७ आत्मनः स्वस्य श्रेयः शिवं नः पृच्छतीति यत्तदिदं नातिचित्रं मर्त्यस्वभावादिति शेषः २८

कोयं मर्त्यस्य भावइतिन आह। सन्निकर्षइति। तत्र गंगातीरे स्थितोन्यः शुद्ध्यर्थं तत्रत्यः बालिशः शुद्ध्यर्थं गांगं जलं हित्वान्यांभः अगस्त्यकारिष्यं जलं यथा याति तथायं विचार इत्यर्थः ३१ यस्यानुभूतिःस्वरूपचैतन्यं। कालेनास्य जगतो लयोत्पत्त्यादिना तदंतःपातित्वेन स्वतः स्वनिमित्तेनान्यस्मात्सत्वादिगुणतश्च कुतश्चनान्यतो अधर्मेनोत्र रिष्यति न हिंसितं न नष्टं स्यात्। रिषहिंसायामिति धातुः ३० ब्रह्मः अज्ञानिनं इष्कं देवं सम्मेनं स्वविषयेः छन्नं इव मायेः प्राणादिभिरिंद्रियादिभिः प्राकृतैः इदं मेन इत्यन्वयः। क्लेशैरविद्यास्मितारागद्वेषाभिनिवेशैः कर्मभिः

सन्निकर्षोत्र हि मर्त्यानामनादरणकारणं। गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये २९ यस्यानुभूतिःकालेन लयोत्पत्त्यादिनास्य वै। स्वतोन्यस्माच्च गुणतो न कुतश्चन रिष्यति ३० तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं। प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः ३१ अथोचुर्मुनयो राजन्नाभाष्यानकदुंदुभिं। सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ३२ कर्मणा कर्मनिर्हार एष साधुनिरूपितः। यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ३३

विपाकैः पुण्यापुण्यफलैर्जात्यायुर्भोगैः परिताप इति पाठे आध्यात्मिकादिभिस्तापैर्विकारैः भीतिकैर्गुणप्रवाहैः सृष्ट्यादिभिरव्याहतोनवच्छिन्नोनुभवः अनुभावो माहात्म्यं यस्य स तथा तं। अत्र हेतुगर्भविशेषणद्वयमाह। ईश्वरमद्वितीयमिति। उपरागो राहुणा मेघादिभिराच्छन्नप्रकाशत्वं सूर्यस्य प्रकाशमन्यते यथा तद्वदिति ३१ प्रश्नप्रतिवचनमकृत्वा यत्किंचित्कथनं किं केन संगतमिति मा शंकां परिहर्तुमाह। अथेति ३२ साधुभिर्विद्वद्भिर्निरूपितः ३३ ॥ ॥

कर्मणा कर्मनिर्हारः कर्मबंधस्य नाशः स यं कप्रक्षालनमिवानुपपन्नमित्याशंक्य ब्रह्मार्पणबुद्ध्यानुष्ठितं तत्समर्थं भवतीति विविक्षितं इत्याशयेनाह। चित्तस्येति। कविभिः शास्त्रचक्षुषा। चित्तस्योपशमो भगवत्येकनिष्ठालक्षणो दर्शितः। सुगमो योगउपायश्चित्तालक्षणः। आत्मनः परमात्मनो मुदावहः संतोषजनको धर्मश्चाहिंसालक्षणः कर्मनिर्बापणसाधनं ३४ उक्तं निगमयति। अयमिति। अयं ब्रह्मार्पणबुद्ध्यानुष्ठितः। स्वस्ति मंगलं तस्यानिष्पापस्य मोक्षस्य वा अयनमाश्रयः। द्विजातेस्त्रैवर्णिकस्य गृहमेधिनः गृहस्थस्य न्यायार्जितवित्तेन न्यायार्जितधनेन शुक्लेन निर्मलेन ३५ इदानीं मुक्तिकारणस्य संन्यासप्रकारं निरूपयति। वित्तैषणामिति। बुधः संसारस्यासारतां विद्वान्। यत्तदानैरनुष्ठितैर्विषणां वित्तेच्छां विसृजेदिति संबंधः। गृहैर्गृहस्थाश्रमैः सह दारसुतैषणां। आत्मनः इह अमुत्रलोके च भोगस्पृहां कालेन मनःपाकेयाम्यविजयेत्यैषणा इत्यनेन ब्रह्मचारिणामपि संन्यासं सूचयति। यदहरेव विरजेत्तदहरेव प्रव्रजेदिति विधिः ३६ तत्रातिशयितवैराग्याभावे एवंविधस्य संन्यासानधि

चित्तस्योपशमोयं वै कविभिः शास्त्रचक्षुषा। दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ३४ अयं स्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः। यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः ३५ वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणां। आत्मलोकैषणां देवकालेन विसृजेद्बुधः। ग्रामेत्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनं ३६ ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो। यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत् ३७ ब्रह्मचर्यश्रुताभ्यां वै ऋषिपितॄन्महमतो। यज्ञैर्देवर्णमुन्मुच्य निरृणोशरणो भवेत् ३८ वसुदेव भवान्नूनं भक्त्या परमया हरिं। जगतामीश्वरं प्रेजे यद्वां पुत्रतां गतः ३९ इति श्रीभागवते महापुराणे दशमस्कंधे द्विसप्ततितमोध्यायः ॥ ॥

कार इति स्मार्त्तपक्षमोक्षः। ऋणैरिति। त्रिभिर्ऋणैर्युक्तो जातः तान्यृणानि शोधननिस्तीर्य गृहादित्यजन्नधः पतेत्। ऋणबीजमर्जनवैराग्याभावादिति शेषः ३७ तत्र ऋणनिस्तारणप्रकारमाह। ब्रह्मचर्येति। अनेन वेदाध्ययनं सूचयति। अशरणः गृहरहितः ३८ कर्मनिर्हारणप्रश्नस्य प्रति वचनमुक्त्वा जनसंग्रहणाय इत्थं त्वया पृष्टमस्माभिरिति तदनुस्मृत्य प्रोक्तं। भवतस्तु जन्मांतरानुष्ठान शुद्धस्यनेदानीं कर्तव्यमस्तीति मत्वं बुनयंतः संबोधयंति। वसुदेवेति। नूनं निश्चयः। यद्यस्मात्। प्रेजइत्यनेन लिटानद्यतनेनपरोक्षवाचिना बहुभिर्पुरातनानिहारिभक्तिनिमित्तानि जन्मानि सूचितानि। बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यत इति श्लोक्तेः ३९ इति दशमे द्विसप्ततितमोध्यायः ॥ ॥

धर्मेण कात्स्न्र्येन विधिना उत्तमकल्पकैः राजसूयसमैः ईषदसमाप्तो कल्प इत्यपदेशीयरइति सूत्रात् १ दीक्षायां प्रवृत्तायां इति सुश्रक्स्रजः कमलबीजमालावलंबिकंठाः ३ आलिप्ता अंगरागेनेति शेषः। हिरण्यादि वस्तु पाणयः हिरण्यं पत्नीतं वापि दृष्टं दृष्ट्वा श्रुक्फलं। शालाविशेषयजपत्नीशापेपुरुस्त्वं यास्युराइति वचनात् ४ ५ अभ्यषिंचन्नभ्याञ्जनं ६ ७ होतापोता नेष्टाप्रशास्ता अध्वर्यु राग्नीध्रो मैत्रावरुण इत्येव मादयो ऋत्विजः षोडश ऋत्विजः दीक्षितश्चेक इति सप्तदश सदस्येन वा सह इत्यत्र वृत्रहणः इंद्रस्य यज्ञे ८ जीवानामीशोऽत्र स्वरूपभूताभिर्विभूतिभिः मूर्तिभि

श्रीशुक उवाच इति तद्वचनं श्रुत्वा वसुदेवो महामनाः। तानृषीनृत्विजो वव्रे मूर्ध्नानम्य प्रसाद्य च १ त एनमृषयो राजन् वृता धर्मेण धार्मिकं। तस्मिन्नयाजयत्क्षेत्रे मखैरुत्तमकल्पकैः २ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः। स्नाताः सुवाससो राजन्राजानः सुष्ठ्वलंकृताः ३ तन्महिष्यश्च मुदिता निष्ककंठ्यः सुवाससः। दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः ४ नेदुर्मृदंगपटहशंखभेर्यानकादयः। ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः। जगुः सुकंठ्यो गंधर्व्यः संगीतं सहभर्तृकाः ५ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः। पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः ६ ताभिर्दुकूलवलयहारनूपुरकुंडलैः। स्वलंकृताभिर्विबभौ दीक्षितो जिनसंवृतः ७ तस्यर्त्विजो महाराज रत्नकौशेयवाससः। ससदस्या विरेजुस्ते यथा वृत्रहणोऽध्वरे ८ तदा रामश्च कृष्णश्च स्वैः स्वैर्बंधुभिरन्वितौ। रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ९ ईजेनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः। प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं १०

र्तीभिः। अणिमा महिमा गरिमा लघिमा प्राप्तिरेव च ईशित्वं च वशित्वं च तथा प्राकाम्यमेव चेति। समाख्याताभिः नानाविधचेतनाचेतनसमुदाये मत्स्योपत्यानुसारेण सभाजन समर्पयेपेक्षिताभिः ९ द्रव्यज्ञानोपपदयोः क्रिययोर्यज्ञलक्षणयोः ईश्वरं द्रव्ययज्ञज्ञानयज्ञयोः स्वामिनमित्यर्थः। कथमीजइति तत्राह। अनुयज्ञं [illegible]नुश्रद्धो दीक्षावचनाः। तं तं यज्ञं प्रतिविधिना कल्पोक्तप्रकारेण अग्निहोत्रादिलक्षणैः अग्निहोत्रेष्ट्यादिचिह्नैः। प्राकृतैर्यज्ञैः समस्तक्रतुभिः। वैकृतैर्यज्ञैः सौत्रामण्यादिभिरुत्तरक्रतुभिः १० ॥ ॥

यथाम्नातं यथाकथितं। महांति धनानि यासां तास्तथा ११ पत्नीसंयाजः पत्नीभिः क्रियमाणः काश्चन देवता उद्दिश्य यजनं। अवभृथः समाप्तिकर्मस्नानं उभयत्रेति विशेषास्त्र भवंति। तैश्चरित्वा तांश्च कृत्वेत्यर्थः १२ पूजयदपूजयत। स्त्रियः स्त्रीभ्यः १३ पारिबर्हेण पूजार्हद्रव्येण वि

अथर्त्विग्भ्यो ददात्काले यथाम्नातं सुदक्षिणाः। स्वलंकृतेभ्योऽलंकृत्य गोभूकन्या महाधनाः ११ पत्नीसंयाजावभृथ्यैश्चरित्वा यमहर्षयः। सस्नू रामह्रदे विप्रा यजमानपुरस्सराः १२ स्नातोऽलंकारवासांसि वंदिभ्योऽदात्तथा स्त्रियः। ततः स्वलंकृतो वर्णानाश्वभ्योऽन्नेन पूजयत १३ बंधून्सदारान्ससुतान्पारिबर्हेण भूयसा। विदर्भकोशलकुरून्काशिकेकयसृंजयान् १४ सदस्यर्त्विक्सुरगणान्नृभूतपितृचारणान्। श्रीनिकेतमनुज्ञाप्य शंसंतः प्रययुः क्रतुं १५ धृतराष्ट्रोऽनुजः पार्थो भीष्मो द्रोणः पृथा यमौ। नारदो भगवान्व्यासः सुहृत्संबंधिबांधवान् १६ बंधून्परिष्वज्य यदून्सौहृदाक्लिन्नचेतसः। ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः १७ नंदस्तु सह गोपालैर्महत्या पूजयार्चितः। कृष्णरामोग्रसेनाद्यैर्न्यवसद्बंधुवत्सलः ॥१८॥ वसुदेवोंजसोत्तीर्य मनोरथमहार्णवं। सुहृद्वृतः प्रीतमना नंदमाह करे स्पृशन् १९ वसुदेव उवाच भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः। तं दुस्त्यजमहं मन्ये शूराणामपि योगिनां २० अस्मास्वप्रतिकल्पोयं यत्कृतज्ञानसत्तमैः। मैत्र्यर्पिताफला चापि न निवर्तेत कर्हिचित् २१ ॥ ॥

दर्भादीन्याप्यपूजयदिति शेषः १४ सदस्यर्त्विगादयः प्रययुरित्यन्वयः १५ अनुजो विदुरः १६ २० युष्माभिर्ज्ञानेन सत्तमैः स्मासु यत्कृतं सोयं स्नेहपाशोऽप्रतिकल्पः असदृशः। या चास्माभिर्युष्मास्वर्पिता मैत्री अफला वा पि निःफला वा पि कर्हिचिदपि न निवर्तेत निवृत्तास्मत्त इति शेषः २१

द॰ ट॰ एतदेव विवृणोति।आगीति।हेमातः आवां कुशलं नाचरेमहि।कुतः अकल्पौ असमर्थौ। कंसेनोपद्रुतत्वात्।अधुना श्रीमदंघ्राज्ञानःवयंपुरस्र
तःप्रस्थितानपश्यामइतिपरमइतिशेषः २२ ययारत्यामिया २३ सौहृदेनस्नेहेनशैथिल्यंशिथिलस्यभावंप्रासंचित्तंयस्यसतथा २४ २५

५१

आगाकल्याणकुशलंध्यानर्वेनाचरेमहि।अधुनाश्रीमदंघ्राज्ञानपश्यामपुरःसतः २२ माराज्यश्रीरभूत्पुंसःश्रेयस्कामस्यमानद।
स्वजनानुतबंधून्वानपश्यतियंघ्राधदृक् २३ एवंसौहृदशैथिल्यचित्तयानकदुंदुभिः।रुरोदतत्कृतांमैत्रींस्मरन्नश्रुविलोचनः २४
नंदस्तुसख्युःप्रियकृत्प्रेम्णागोविंदरामयोः।अद्यश्वइतिमासांस्त्रीन्यदुभिर्मानितोवसत् २५ ततःकामैःपूर्यमाणःसव्रजःसह
बांधवः।परार्घ्याभरणक्षौमनानानर्घ्यपरिच्छदैः २६ वसुदेवोग्रसेनाभ्यांकृष्णार्जुनवलादिभिः।दत्तमादायपारिवर्हंयापितोयदुभिर्ययौ २७
नंदोगोपाश्चगोप्यश्चगोविंदचरणांबुजे।मनःक्षिप्तंपुनर्हर्तुमनीशामथुरांययुः २८ बंधुषुप्रतियातेषुवृष्णयःकृष्णदेवताः।वीक्ष्यप्रावृषमासन्नांययुर्द्वारवतींपुनः २९ अन्येचसर्वराजानोदेवयात्रार्थमागताः।गतेमासेस्वदेशंययुःप्रस्थानेविषयांश्चययुः ३०
पांडवाश्चमहात्मानःपृथाचनृपसत्तम।अनुज्ञाताःकेशवेनबाष्पगद्गदभाषिणः।शक्रप्रस्थंययुःसर्वेस्वजनैःपरिवारिताः ३१ बंधु
षुप्रतियातेषुवृष्णयःकृष्णदेवताः।परिवार्यहृषीकेशंययुर्द्वारवतींपुरीं ३२ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रिस
प्ततिरध्यायः श्रीशुकउवाच अथैकदात्मजौप्राप्तौकृतपादाभिवंदनौ।वसुदेवोभिनंद्याहप्रीत्यासंकर्षणाच्युतौ १

इतिदशमेत्रिसप्ततितमः सुखंगुणोपसंहारार्थंसम्यक्कृत्वविज्ञानेहरेर्भक्तिविधानंसुशाकमितितुनरापिहरेर्माहात्म्यंनिरूप्यतेस्मिन्न
ध्याये।तदर्थंवसुदेवःकृष्णरामौसंबोधयन्विक्ति।अथेति १ ॥ ॥

राम
५१

पुत्रयोःकृष्णरामयोःधामस्तेजःमाहात्म्यलक्षणस्यसूचकंवदतांमुनीनांवचःश्रुत्वातयोर्वीर्यैर्माहात्म्येजातविश्रंभःपुत्रत्वंकुरितविश्वासः
२ अहंवांप्रधानपुरुषौजानेवांययासमविश्वस्यसकाशात्परौविलक्षणत्वेनान्ममौभवतस्तथेति।यद्वाअस्यजगतस्तत्वंजाने ३ तत्कथमितितत्र
हायत्रेति।यत्रयस्मिन्स्थितिपरिमितिदमितिश्रुतिः।येनजातानिजीवंतीतिश्रुतिः।यतोवाइमानिभूतानिइति।यस्यब्रह्मपत्रंयोभवतः
इतः मृत्युर्यस्योपसेचनमितिकाठकाः।यस्माद्रूदंक्रियतइति।सवत्वद्भावदिति।यथा।स्थितयदाकालेइदंस्यात्तदायथातदास्मात्।ब्रह्मेवेदं
विश्वमितिश्रुतिः।इदंजगतसाक्षात्स्वतंत्रनिर्विकारंप्रधानपुरुषेश्वरंशब्दवाच्योभगवानेवस्यात्सत्तामात्रापितदधीनत्वात्।यद्वायत्रयस्मिन्विषा

मुनीनांवदतांश्रुत्वापुत्रयोर्धामसूचकं।तद्वीर्यैर्जातविश्रंभःपरिभाष्याभ्यभाषत २ कृष्णकृष्णमहायोगिन्संकर्षणसनातन।जा
नेवामस्ययत्साक्षात्प्रधानपुरुषौपरौ ३ यत्रयेनयतोयस्ययस्मैयद्यद्यथायदा।स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः ४ एतन्ना
नाविधंविश्वमात्मसृष्टमधोक्षज।आत्मनानुप्रविश्यात्मन्प्राणोजीवोबिभर्ष्यजः ५ प्राणादीनांविश्वसृजांशक्तयोयाःपरस्यताः।
पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैवचेष्टितं ६ ॥ ॥

येयेनसाधनेनयतोहेतुःयस्यसंबंधेनयस्मैदेवदत्तायययद्कृत्ययथाप्रकारेणयदायस्मिन्काले ४ तदिदंकथितमेवस्पष्टत्वायकथय
ति।एतदिति।आत्मनात्वयासृष्टंआत्मनाअनुप्रविश्यतद्रूपेणआत्मन्आत्मनिप्राणानिद्रियाणिजीवोजीवनप्रदः ५ प्राणादीनांमुख्यप्रा
णादीनांयाःशक्तयस्ताःपरस्यहरेर्विद्यमानाः।तत्रहेतुः।पारतंत्र्येणवैसादृश्याद्वैलक्षण्यात्।तदुपपादयति।द्वयोरिति।द्वयोर्जीवेशयोः।
श्रेष्ठेअतिशयेनोत्प्रोहरेश्चेष्टितंयस्मात्तस्मादित्यर्थः ६ ॥ ॥

पदार्थगुणानां तदधीनत्वमाह। चंद्रार्कग्रहविद्युतां विद्योतादीनां मध्ये चंद्रस्य या कांतिः। अग्नेर्यत्तेजः सूर्यस्य या प्रभा विद्युदादीनां या सत्ता भूभृतां पर्वतानां स्थैर्यं भूमेर्या धृतिः। सस्यादीनां जीवनत्वं योगंधो गुणो भूत्वं च मर्थतो भिधेयत्वं पदार्थानां वाच्यं ७ किंचा अपां तर्पणं तृप्तिः प्राणं चेष्टा द्रवत्वं स्पंदनं ता आप एव ता। सारसो गुणश्च वायोः ये इज आदयः। ते सर्वे ते तदधीना इत्यन्वितिभिन्नाः ओजोबलं भः सहो मर्षणं बलं शक्तिः चे ष्टा स्पंदनं गतिः सर्वेषां ८ यो दिशामवकाशः स त्वं। यश्च स्फोटो व्योमनि आश्रयः स त्वं निर्देषि शब्द आगम इति वचनात् वर्णक्रमलक्षणो थर्व्यंजकः शब्दः त्वं किं स्फोटो वेत्य हारणादो जन्योब्धिनि राश्रयः शंखादिजन्यस्त्वमित्यर्थः। अवक्षराति गर्गर इति श्रुतेः। आकृतीनां अन्नादिपाणि

कांतिस्तेजः प्रभा सत्ताचंद्राग्न्यर्कसविद्युतां। यः स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधो र्थतो भवान् ७ तर्पणं प्राणनं चापां देवत्वं ताश्च तद्रसः। ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर ८ दिशां त्वमवकाशोसि शब्दः स्फोट आश्रयः नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः ९ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः। अवबोधो भवान् बुद्धेर्जीवस्यानुस्मृतिः सती १० भूतानामसि भूतादिरिंद्रियाणां च तैजसः। वैकारिकं विकल्पानां प्रधानमनुशायिनां ११ ॥ ॥

नां देवानां याः पृथक्कृतीः पृथग्याः आनिमेषादिलक्षणा साश्च त्वदधीनाः ९ इंद्रियाणामिंद्रियमिदं स्वरूपं तदनुग्राहकाः देवाः सूर्यादयश्च त्वं बुद्धेरवबोधो ज्ञानजननशक्तिः। जीवस्य सत्यनुस्मृतिः स्मरणशक्तिश्च भवान् १० पंचभूतानां कारणं भूतादिस्तामसाहंकारश्च इंद्रियाणां कारणं तैजसाहंकारः। विकल्पानां जगदिक्रत्यत्वेन परमात्मव्यपदेशानां विविधाः कल्पाः न्यायाः येषां ते या वा देवानां कारणं वैकारिकाहंकारः। संकल्पविकल्पानां मनोवृत्तीनां वा अनुशायिनो जीवानां कारणं प्रधानं प्रकृतिस्त्वं महदादीनां ११

सर्वभावनामादिस्त्वमिति निरूप्याधुनांतकाला व्याप्यायित्वं च तवेति समर्थयते नश्वरेष्विति। इह नश्वरेषु नाशशीलेषु भावेषु पदार्थेषु योऽनश्वरोऽविनाशी भावस्तद्रूप्यं त्वमसि। सृष्टान्यार्थत्वात् निदर्शनेन नावगमयति। द्रव्यं प्रधानं तद्विकारेषु पृथिव्यादिषु पदार्थेषु अनलयेन नश्वरेषु द्रव्यमात्रं केवलस्वरूपभूतं प्रधानमेव निरूपितं तेन त्वं विद्धीति शेषः। यद्वा द्रव्यं परमाणुतत्त्वं पुनरेषु घटादिपदार्थेषु नश्वरं द्रव्यमात्रं परमाणुमात्रं निरूपितं। परमाणुत्वमेवेदमिति शेषः १२ नन्वेवं तर्हि प्रधानादेर्नित्यत्वेन परमात्मनियतत्वमापातमिति तत्राह। सत्वमिति। इति शब्दो हेत्वर्थः। जगदुत्पत्त्यादिहेतुः सत्वादयो गुणाः ये याश्च तेषां गुणानां वृत्तयो व्यापाराः। ता अपरेब्रह्मणि तदाभासे तद्व्याप्तेश्च देशे वा प्रत्यपि अद्धा अनिर्वचनीयत्वेन कल्पिताः समर्थिताः। एतस्मिन् रूपेण च हरेगर्गपुण्यकाशकुंतश्च शोभतश्चेत्यादिवेदांतवाक्यैः सत्वादिगुणानां प्रधानस्वरूपत्वेन तेषां तदाधारत्वक

नश्वरेष्विह भावेषु तदसि त्वमनश्वरः। यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं १२ सत्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः। त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया १३ तस्मान्न संत्यमी भावा यर्हि त्वय्यविकल्पिताः। त्वं चामीषु विकारेषु ह्यन्यदाव्यावहारिकः १४

थने प्रधानस्य तदाश्रयत्वं कि पुनः कथमिति। परमाणुपक्षे शुक्लवर्णेन सत्वेनाप्याः रजसा पार्थिवाः तमसा आवरकेण वायवीयाः परमाणवो लक्ष्यंते इति शाब्दैनादिव वाचिना तेजसा लक्षिता इति वह्निविधा गुणास्तु स्थानीयाः परमाणवो यास्तद्वृत्तयः संयोगलक्षणाश्च यिकल्पिताः त्वयेरितत्वेन कार्यकरणक्षमत्वेन समर्थिता इत्यर्थः। किमनेन नियमेनेत्यत उक्तं योगमाययेति। योगमायया अघटसमवेतेच्छया १३ व्यतिरेकं दर्शयति। तस्मादिति। यर्हि यदा अमीभावा त्वय्यविकल्पिताः त्वदाधारत्वेन निरूपिताः। तदा तस्मादनाधारतया न संति। स्वरूपत एवेन स्फुरंति। तस्मात्सत्तात्रापि त्वदधीनेत्यर्थः। एतदेव विशदयति। त्वं चेति। अमीषु विकारेषु विविधप्रकारेषु पदार्थेषु त्वं तत्तदेव सत्तया वर्तमानः सदाव्यावहारिकः हीनादिव्यवहारनिर्वाहकः नान्य इत्यर्थः १४ ॥ ॥

द०रु०

पए

नन्वेवं तर्हि कस्मादेतस्य संसार इति तत्राह गुणेति। एतस्मिन् गुणप्रवाहे संसारे अखिलात्मनः अखंडस्यापि नः तव सूक्ष्मां गतिं श्रियं गतिं सर्वव्यापि सर्वनियामकत्वादि लक्षणाम् अबुधाः अज्ञात्वा तेन बोधेनाज्ञानेन इह कर्मभिः संसरंतीत्यन्वयः। तत्वाज्ञानात् संसार इति भावः १५ ननु भवतु मनुष्यत्वलाभात् ज्ञानं सुलभं तस्मान्मोक्षोपि स्यादित्याशंक्य सर्वं चैतन्मत्प्रसादं अंतरेण दुर्लभमित्याह। यदृच्छयेति। यदृच्छया भगवदिच्छया। तत्रोऽदृष्टाख्यपुण्यकर्मणा नृतां मनुष्यत्वं प्राप्य इह मनुष्यशरीरे त्वन्मायया स्वार्थे प्रमत्तस्य मम भवयोगते इत्येति शेषः। अतः सु

गुणप्रवाह एतस्मिन्नबुधाः खिलात्मनः। गतिं सूक्ष्मामबोधेन संसरंतीह कर्मभिः १५ यदृच्छयानृतां प्राप्य सुकल्पमिह दुर्लभं। स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर १६ असावहं ममैवैते देहे चास्यान्वयादिषु। स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत् १७ युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ। भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह १८

कल्पं कल्पं फलप्रदं ज्ञानं दुर्लभमभूदिति शेषः। नितरां ममत्वं त्वन्मायया १६ स्वार्थे प्रमादः कीदृश इति तत्राह। असाविति। असौ देहो ऽहमस्य देहस्यान्वयादिषु इंद्रियकलत्रादिषु ममैवेते संतत इति स्नेहदृढैर्ममत्वे नबध्नाति। न केवलं मामेव किंतु सर्वमिति भावेनोक्तं सर्व मिति १७ त्वदनुग्रहान्मम किंचिज्ज्ञानमुत्पन्नमिति भावेनाह। युवामिति। प्रधानपुरुषेश्वरौ प्रकृतिजीवेश्वरौ १८ ॥ ॥

रा०म०

पए

अतः किं तत्राह। तदिति। इंद्रियलालसेन इंद्रियाणां विषयभोगेच्छया मर्त्ये आत्मशिरस्कंदे इत्यात्मदृक् अहमिति दृष्टिः। परे परमात्मनि त्वयि अपत्यबुद्धिः पुत्रत्वं ज्ञानं १९ सूतौ इति। अजः शुक्रशोणितसंपर्कजन्यशरीररहितः भवान् सूतीगृहे आविर्भूय इयज्ञो विष्णुरिति यो लोकान् अनुगृह्णाति तस्मादनुग्रहं निजलक्षणं धर्मरक्षा येन नानातनुः सुरनरादि नानाविधशरीराणि विदधत् कुर्वन् त्वं पुनः स्वज्ञानेनासद्वत् जडवत् तिरोदधासि। कथं दधातीत्यत उक्तं। गगनवदिति। यथा गगनं कार्यकारणद्वयात्मकपदार्थजातमनुप्रविष्टं तदनुरूपत्वेन नानाभवति। तथा

तन्नो गतो ह्यस्मरणामघ्रिपदारविंदमापन्नसंसृतिभयापहमार्तबंधो। एतावतालमलमिंद्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः १९ सूतीगृहे ननु जगाद भवानजो नौ यज्ञेऽस्मदनुगृहीतमनिजधर्मगुप्त्यै। नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगायविभूतिमायां २० श्रीशुक उवाच आकर्ण्येत्थं पितुर्वाक्यं भगवान्सात्वतर्षभः। प्रत्याह प्रश्रयानम्रः प्रहसन् श्लक्ष्णया गिरा २१ श्रीभगवानुवाच वचो वः समवेतार्थं तातैतदुपमन्महे। यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः २२ अहं यूयमसावार्य इमे च द्वारकौकसः। सर्वेप्येवं यदुश्रेष्ठ विमृग्याः सचराचरं २३ ॥ ॥

भगधा०

कगनं तत्पदार्थजातस्य कारणावस्थायामेवैकमेव भवति तथेत्यर्थः। हे उरुगाय भूम्नः पूर्णानंदस्य तव विभूतीनां मायां माहात्म्यं को वेद वेदवेत्ता। वा सुर्वो नान्य। अनेन गगनादस्य विशेषो दर्शितः ॥ २० ॥ ब्रह्माद्यन्यतमं मंतरेण प्रत्यक्षं भगवतां सत्वापः कस्य सुलभो तो वसुदेवस्य भाग्यमेतिविचित्रमिति भावेन कृष्णस्य प्रतिवचनप्रकारं कथयति। आकर्ण्येत्यादिना २१ समवेतार्थं कृति स्मृत्युपपन्नार्थं प्रसिद्धार्थं वा २२ युष्मदादि विश्वमहमेव मदधीनमेव नान्याधीनं सर्वं त्वविदं ब्रह्मेति श्रुति सिद्धं २३ ॥ ॥

द०उ०

६०

मत्समो नास्तीत्याह। एक इति। केवलः द्वितीयवर्जितः। तं वा कस्य तत उक्तं। आत्मेति। आत्मशब्देन किं देह उच्यत इत्यतः स्वयंज्योतिर्नित्य इति।
अनेन विशेषणद्वयेन जीवो विद्या च न्यस्ताः। नस्य नित्यानभिभूतस्वयंज्योतिष्ट्वाभावाद्देहस्य जडत्वात्। जडाभावे दृष्टं ब्रह्मास्मीति श्रुतेः प्रत्यक्मानंद
उं न श्रेतिच। अहमेवेत्युक्ते भेदः किं न स्यादित्यत उक्तं। अन्य इति। अहमस्मादन्योन्यविलक्षणः। कुतः निर्गुणः सत्वादिगुणनिमित्तवैपरीत्या
भावात्। अन्यस्य तज्ञावात्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरित्यादेः। ननु तर्हि प्रासनिषेधः कस्मादिति तत्राह। इंद्रियश्चेत्वेषु भूतेषु
प्राणदेहेषु बहुधेयते यथा स्वविज्ञायते जनेनेति शेषः। यथात्म निमित्तैर्गुणैः पंचभूतैः तैः पंचभूतैः विरचितेषु शीत समं २४ ॥ एतदेव दृ

आत्मा ह्येकः स्वयंज्योतिर्नित्योन्यो निर्गुणो गुणैः। आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते २४ खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथा
शयं। आविस्तिरोल्पभूर्येको नानात्वं यात्यसावपि २५ एवं भगवता राजन् वसुदेव उदाहृतः। श्रुत्वा विनष्टनानाधीस्तूष्णीं प्रीतमना अभूत
२६ अथ सर्वत्र कुरुश्रेष्ठ देवकी सर्वदेवता। श्रुत्वानीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता २७ कृष्णरामौ समाश्राव्य पुत्रान्
कंसविहिंसितान्। स्मरंती कृपणं प्राह वैक्लव्यादश्रुलोचना २८ देवक्युवाच राम रामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर। वेदाहं
वां विश्वसृजामीश्वरावादिपूरुषौ २९ कालविध्वस्तसत्वानां राज्ञामुच्छास्त्रवर्तिनां। भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे ३०

टयति। खं वायुरिति। खादीनि तत्कृतेषु वस्तुषु यथाशयं यथाश्रयं स्थितानि भवंति। तथात्रासौ हरिरपि अल्पे स्वल्पत्वेन भूरि भूमहत्वेन आवि
स्तारः प्रकाशिता विस्तार एकः नानात्वं एकस्यानेकसंख्यात्वप्रयत्वं यातीत्यन्वयः। अयं भावः। स्वसृष्टतत्र दृष्टनियमार्थं तत्र दृष्टपरिमाण
श्रंतं दृष्ट्वा नीतीताधिकाः २५ विनष्टं नाम कुत्सितमाधिर्यस्य स विनष्टनामाधिः। नाम कुत्सनसंभाव्यप्रकाशेषु निपात इति २६ अथ सर्वं म
लाचरितमारभ्यते। सर्वा देवता यस्यां संनिहिताः सा तथा २७ समाश्राव्य संबोध्य। मे मत्तः सकाशात्। कालेन विध्वस्तधर्मसेतूनां ३०

राम

६०

भागो भजनं स्वीकारस्तेन पतिं शरणं गतास्मि ३१ पितृस्थानात् यमलोकात् ३२ ४ तथात्मनः स्वस्य सुतरामिष्टदैवं ३५ तज्जलं पादावनि
र्णिक्तिजलं यस्य पादजलैराब्रह्म चतुर्मुखपर्यंतं जगत्पुनन्तु नातिस्म आसीति। छांदसोयं प्रयोगः। आदित्यास्तु यथाकारहिताधिपं ३६ अमृ
तभक्षणं रसायनभोजनं। अमृतं व्योम्नि देवानामेव ज्ञेयं रसायने। अथ वितेजलं ज्ञायते मोक्षणेमिगोरसे। क्षीवेनात्वमरेस्त्री द्गर स्वर्णमयपि

यस्यांशांशांशभागेन विश्वस्थित्युदयोलयाः। भवंति किल विश्वात्मन्स्तं त्वाद्याहं गतिं गता ३१ चिरान्मृतसुतादाने गुरुणा किल चोदि
तौ। आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणां ३२ तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ। भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृ
तान् ३३ श्रीशुक उवाच एवं संचोदितौ मात्रा रामः कृष्णश्च भारत। सुतलं संविविशतुर्योगमायामुपाश्रितौ ३४ तस्मिन्प्रविष्टा
वुपलभ्य दैत्यराड्विश्वात्मदैवं सुतरां तथात्मनः। तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ३५ तयोः समानी
य वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः। दधार पादाववनिज्य तज्जलं सवृंद आब्रह्म पुनद्यदंबु ह ३६ समर्हयामास म
हाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः। स्रग्धूपदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ३७ स इंद्रसेनो भग
वत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया। उवाच हानंदजलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरं ३८ ॥ ॥

तपोरितियादवप्रकाशः। इंद्रसेनो बलिः। गोत्रं नाम्नि कुले च लेइति। आत्मा देहे धृतौ जीवइत्यिप्रेमविभिन्नया प्रेइ प्रहृष्ट्या धिया भगव
त्पदांबुजं भ्रमरशरणं गच्छन् वृत्पद्रिलिणं कुर्वन्नाह्रा शुभमितिस्मरन्हाविषादस्तु भान्निश्चितिव भावेतिसंभ्रमाद्यत्ययः। वमारेतिपाठे पादांबु
जं बभार। गद्गदाक्षरं स्वबोडगाहेतियोज्यं ३८ ॥ ॥

वेधसे ब्रह्मणे कर्त्रे। सांख्ययोगयोर्ज्ञानकर्मणोर्वितानो विस्तारः येन स तथा तस्मै। सांख्ययोगशास्त्रकारायवा। दुष्प्रापमपि लादिभ्योप्यावर्त्तनात्याह। ब्रह्मण इति। ननु मुनाव्याहृतिः कथमत्राह। परमात्मन इति ३९ अथ स्वस्य भावयोर्युवयोर्दर्शनमनुग्रहसाध्यं न तु प्रयत्नसाध्यमिति भावेनाह। दर्शनमिति। वां दर्शनं भूतानां दुष्प्रापं हि यस्मात्तस्माद्रजस्तमःस्वभावानां नोनोतिदुर्लभं। यद्यस्मादीशीनं प्राप्तं तद्यदृच्छया दैवयोर्युवयोरनुग्रहेणानुग्रहीभूतये छ्येति मन्य इति शेषः ४० रजस्तमःस्वभावफलं प्रकटयइतामत्तत्वं नाम ब्रह्मरत्नेनिर्मलीकर्तुं दर्शनं कृतमित्याशयेनाह। दैत्येति। ये दैत्यदानवास्ते वयं च। शास्त्रं वेदादिग्रंथ एव शरीरं यस्य तिमालक्षणम् स्याः स्त्री इति शास्त्रशरीरी तस्मिन् शास्त्रं ग्रंथनिर्देशयो

बलिरुवाच नमोनंताय महते नमः कृष्णाय वेधसे। सांख्ययोगवितानाय ब्रह्मणे परमात्मने ३९ दर्शनं वां हि भूतानां दुष्प्रापं चाप्यदुर्लभं। रजस्तमःस्वभावानां यन्नः प्राप्तं यदृच्छया ४० दैत्यदानवगंधर्वसिद्धविद्याधरादयः। यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ४१ विशुद्धसत्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि। नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ४२ केचनोद्बद्धवैरेण भक्त्याः केचन कामतः। न तथा सत्वसंरब्धाः संनिकृष्टाः सुरादयः ४३ ॥ ॥

रिणि। विशुद्धसत्वधाम्नि केवलज्ञाननिधाने त्वयि निबद्धवैराः। अन्ये राक्षसाश्च तादृशा निबद्धवैरा इत्यतो न कोप्यस्मद्गुणेषु प्रदर्शन इति शेषः ४२ ननु नित्यानुसंधानलक्षणांतःकरणगुणो नाविर्भूत ज्ञान गुणोस्तीति माशंकियतः सुरादीनामपि नास्तिकतो स्माकमिति भावेनाह। केचनेति। केचन चैद्यादयः उद्बद्धवैरेण क्वचिदुद्धतवैरेण भक्त्याः केचन गोपीजनाः कामतो भक्त्याः सन्निकृष्टाः सद्वर्त्तमानाः सत्वसंरब्धाः उद्रिक्तसत्वगुणाः आपणत्वयेप्यनुशिनमुख्य भक्तिनिश्चयाः सुरगंधर्वादयस्तथा नादिद्वेषसंरंभादिना भक्त्या न भवंति किंतु निश्चलभक्तिसि
द्धवः ४३

अपि तथापि ते योगेशाः ज्ञानोपायश्रेष्ठाः प्रायो बहुलं तव योगमायां जगन्मूढ्याद्यनुसंहितस्वरूपमाहात्म्यं न विंदंति। कथं इदमिद मेवं भूतमिति न जानंति। वयं कुतो हेतोर्दुर्ध्यामहइति ४४ अधुना स्वाशयं विज्ञापयति। तन्न इति। यत्र गोपुष्प इ क्लिशा नाप्यामनुग्रहएवाश्र र्थनीयस्त न्मान स्थाप सीद कथं यथा एककृतभक्ता दिष्टे हलक्षणासंगरहितएव। सत्वं श्रीनारायणएव सर्वाणि ते ततथा तैर्युष्म इत्येः सहचरा निवर्त्तमानो भवामि। किं कृत्वा गृहांधकूपात् निष्क्रम्य निर्गतो भूत्वा कीदृशो इंशांतः पुष्पनिष्ठा मुक्तः। कथमत्राह। निरपेक्षेति। निरपेक्षैः संन्यासिभिः विमृग्यपोरन्वेषणीयो युष्मत्पदारविंदयोः क्षिपणमधीर्यस्य स तथा। क्षिपणं धिष्ण्यं गृहं वा। अस्तु निवासस्थानं किं जीवन

इदमित्यभितिप्रायः तव योगेश्वरेश्वर। न विंदंत्यपि योगेशा योगमायां कुतो वयं ४४ तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविंदधिषणाः स्वगृहांधकूपात्। निष्क्रम्य विश्वशरणांघ्र्युपलब्धवृत्तिः शांतो यथैक उत सत्वसखैश्चरामि ४५ शाध्यस्मानीश नस्वेशानिष्कामान्कुतुनः प्रभो। पुमान्यश्रद्धयातिष्ठंश्चोदनाया विमुच्यते ४६ श्रीभगवानुवाच आसन्मरीचेः षट्पुत्रा ऊर्णायां प्रथमेंतरे। देवलंजहसुर्वीक्ष्य सुतां यंतुमुद्यतं ४७ तेनासुरीमगुर्योनिमम्बुना वद्यकर्मणा॥ ॥

मत्राह। विश्वेति। विश्वस्य पदपातित्वेन शरणयो रंघ्र्योः सेवयोपलब्धा प्राप्ता वृत्तिर्जीविका यस्य स तथा ४५ सत्सेवनमपि दुष्प्र छिद्रपे वमाप्यमिति भावेनाह। शाधीति। यास्मिंश्च समनेश्रद्दयातिष्ठन् स्थिरः सन्न चोदना या विधिनिषेधलक्षणा याः संसृतेर्विमुच्यते ४६ शाधीति वाक्यं कृतवारं कस्य प्राधुर्ये दंकर्त्तव्यमितिवक्तुमुपक्रमते। आसन्नित्यादिना। प्रथमे मन्वंतरे येनुचाश्च कस्मिंश्चित्का लेसुताइत्यपिता। शित्तापिर्तं ज्यतं देवलं वीक्ष्य जहसुः ४७ अधुना उपहासलक्षणपापकर्मणा निमित्तेन तेन देवलेनासुरीयोनिमगुः आसुः। कालनेमेः पुत्रत्वेनइति शेषः॥ ॥

द॰उ॰

६२

ते कालनेमेर्जाताः पुत्रा हिरण्यकशिपोः शापेन योगमायया देवक्या उदरे नीताः ततो जाताः कंसेन विहिंसिता इत्यन्वयः। सा देवकी अत्युना कुत्रास्त इत्यत आह। त इमे इति ४९ ततः किमत्राह इत इति ५० अभिज्ञानार्थं तन्नामानि निर्दिशति। स्मर इत्यादिना। सद्गतिं मम स्थानं ५१ अयच्छतां दत्तवंतौ ५२ अजिघ्रदाघ्राणं कृतवती ५३ सुतानां स्पर्शेन परिस्नुतं क्षरितं दृष्टमित्यर्थः। मायया माहिन्या ५४

हिरण्यकशिपोः शापात्पुत्राः षड्योगमायया। देवक्या जठरे जाता राजन्कंसविहिंसिताः। सा तान् शोचत्यात्मजान्स्वांस्त इमेऽध्यासतेंऽतिके ॥४८॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये। ततः शापाद्विनिर्मुक्ता लोकं यास्यंति विज्वराः ४९ स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी। षडिमे मत्प्रसादेन पुनर्यास्यंति सद्गतिं ५१ इत्युक्त्वा तान्समादाय इंद्रसेनेन सत्कृतौ। पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां ५२ तान्दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी। परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ५३ अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुतं। मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्त्तते ५४ पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः। नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ५५ ते नमस्कृत्य गोविंदं देवकीं पितरं बलं। मिषतां सर्वभूतानां ययुर्धाम दिवौकसां ५६ तां दृष्ट्वा देवकी देवी मृतागमननिर्गमं। मेने सुविस्मिता मायां कृष्णसंरचितां ५७ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः। वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत ५८ ॥ ॥

अमृतमिव सुधामिव स्वादु दुर्लभोपमं। तस्याः देवक्याः स्तनपयसा गदाभृतः कृष्णस्य पीतशेषं। नारायणस्यांगस्पर्शेन प्रतिलब्धं आत्मदर्शनं आत्मज्ञानं येषां ते तथा ५५ कृष्णस्य संसमीचीनां अबाधितां सुष्ठु रचितां नान्यस्येति कृष्णसंसुरचितां मायां महिमानं ५७ अनेनेंद्रजालं अतिदेशेनोपसंहरति। एवमिति कृष्णेन संसूचिते यं मा पाखंड्यादिवद्व्याः संतीसंतो बोपसंहरति। एवमिति ५८ ॥ ॥

राम

६२

फलमाह य इति। अमृतवन्निर्मलकीर्त्तेः जगतो दुःखापनुदः स्वं वाभिश्रनीति जगदघभिदिति। भक्तानां सत्प्रशस्तं कर्णपूरं कर्णाभरणं तस्य ह-
रेः क्षेमधाम मोक्षलक्षणं स्थानं याति ५९ इति दशमे चतुःसप्ततितमोऽध्यायः प्रेम्णा वक्तिं भागवतत्वविज्ञाने धिकार इति लक्षणाद्दृत्या
किमत्र संशयबीजमित्य-
तन्माहात्म्यं कथयत्यस्मिन्नध्याये। तत्र कृतभागवन्माहात्म्यो राजा विशेषविवित्सया शुकं पृच्छति। सर्वासामिति।

सूत उवाच य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्त्तेर्वर्णितं व्यासपुत्रैः। जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ५९ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःसप्ततितिरध्यायः राजोवाच स-
र्वासां महिषीणां तु गोविंदासक्तचेतसां। मध्ये वप्रेमवाञ्चित्सुरिति निश्चितचेतसां १ समः सर्वेषु वा कृष्णः एकस्यां प्रेमवानुत ता-
सां प्रेमवानाधिकं तस्मान्मे त्वं शंस तत्त्वेन रतिरस्ति मम प्रभो २ श्रीशुक उवाच महिषीणां तु सर्वासां पृथमाभीष्मनंदना। प्रेमवानाधिकं तस्या अ-
तिष्ठत्या तिरस्कृता ३ कदाचिन्मे कलहः केशवेन तपास मे। कृतस्त्वं कृष्णकोरव्य कामेन कथयामि ते ४ कर्हिचित्सुखमा-
सीनं स्वतल्पस्थं जगद्गुरुं। पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ५ य एतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः। सा हि जातः स्वसेतू-
नां गोपीथाय यदुष्वजः ६

तत्रोक्तं गोविंदत्यनेन। सर्वासु प्रेमवान् मध्ये वप्रेमवान् इत्यन्यस्तुता एकस्यामिति पृतीय तत्र इति प्रश्नावकाशो नास्तीति भावेन परिहरति।
महिषीणामिति ३ कथं प्राप्यातिरिति तां वक्तुमुपक्रमते। कदाचिदिति। तच्चरितं ४ सुस्यात् किं एपास्तल्पे तलिमे च्छिरं ५ राजरह-
स्यचरितं न ति चित्रमिति भावेन तत्स्वरूपमुपक्रमते माह। य इति ६ ॥ ॥

यद्गृहे रुक्मिण्यैकांतं तस्मिन्नंतर्गृहे पर्यंके दंतविहितमंचके कशिपूत्तमे तलिमे श्व इव शुभ्रा प्रावरणास्तरणे सुखासीनं पतिमुपतस्थुरी
त्यन्वयः । मुक्तादाम्नो विलंबोस्यास्तीति मुक्तादामविलंबि तेन वितानेन उपरि वस्त्रविचित्रपटेनेत्यर्थः ७ अगुरोरित्यनेन यंत्रोदयकालभवा
गावोल स्यंते ८ पारिजातानां मंदाराणां वनस्य कानस्यामोदेन युक्तेन वायुना शोभितेन कीदृशेनोद्यानश्वशालिना मनोहरेण पारिजा
तवनस्य संभजनीयस्य सेव्यस्यामोदस्य संबंधिना वायुना वा । आगरवैः अगरुसंभूतैः ९ पयःफेननिभे जलबुद्बुदवच्छुभ्रे १० किंकर्मीति

तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना । विराजिते वितानेन दीपैर्मणिमयैरपि ७ मल्लिकादामभिर्द्विरेफकुलनादिते ।
जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोमलैः ८ पारिजातवनामोदवायुनोद्यानशालिना । धूपैरगरुजैराजन्जालरंध्रविनिर्गतैः
९ पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे । उपतस्थे सुखासीनं जगतामीश्वरं पतिं १० वालव्यजनमादाय रत्नदंडं सखीकरात् ।
तेन वीजयती देवी उपासां चक्र ईश्वरं ११ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रहस्ता । वस्त्रांतगूढकु
चकुंकुमशोणहारभासा नितंबधृतया च परार्द्ध्यकांच्या १२ ॥ ॥

तत्राह । वालव्यजनमिति ११ उपाच्युतं अच्युतस्य समीपे । उत्तमस्वनवतोः पादयोर्मणिनूपुराभ्यां क्वणयंती अंगुलीयाख्यवलयेन व्य
जनेन च युक्तं हस्तं यस्याः सा तथा । पृथक्कृते वलयेऽस्य सूतेति वक्तव्यं न तु हस्तायेति । वस्त्रांतेन वस्त्रांचलेन गूढयोः कुचयोः लिप्तकुं
कुमचूर्णसंबंधनशोणस्य रक्तस्य हारस्य मुक्तादाम्नो भासा स्वलोपलक्षणेनेतनीया नितंबधृतया कटिप्रदेशवेष्टितया परार्द्ध्यकांच्या
अनर्घ्यरसनया च युक्ता १२ ॥ ॥

हरिः नीलनीरदकांतिः श्रीकृष्णः । यालीलया धृततनोर्भगवतोऽनुरूपरूपा अनुरूपं तुल्यं सौंदर्यं अनुगुणत्वात् । तां रूपिणीं आबभाषे इत्यन्वयः
निष्कं ग्रैवेयं अलककुंडलाभ्यां निष्कालंकृतकंठेन च युक्तं वक्त्रं उल्लसत्स्मितमेव सुधा यस्याः सा तथा तां १३ ईप्सिताः प्रार्थिताः श्रीमद्भिः श्री
कटाक्षविषयैः । हे राजपुत्रि १४ वरेतोगुणानां हाः प्राप्तानिति । वाचा दत्ता देवत्वे अपि पमान् देवश्रेष्ठसमानान् १५ स्ववरणानंतरं कारे दोषान्
हा । राजभ्य इति । अर्थीत्यादिगुणोपेतान् पात्राहित्वा राजभ्य इत्यादिदोषयुक्तान् अस्मान् कस्मात् वृणीषेत्यन्वयः १६ एवंविध उरुषप्राप्तौ योषितां

तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लीलया धृततनोरनुरूपरूपा । प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां
हरिराबभाषे १३ श्रीभगवानुवाच राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः । महानुभावैः श्रीमद्भिरूपौदार्यबलोर्जितैः
१४ तान्प्राप्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् । दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषेऽसमान् १५ राजभ्यो बिभ्यतः सुभ्रु समुद्रं
शरणं गतान् । बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृपासनान् १६ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषां । आस्थिताः पदवीं सुभ्रु
प्रायः सीदंति योषितः १७ निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः । तस्मात्प्रायेण नह्याढ्या मां भजंति सुमध्यमे १८ ययोरात्म
समं वित्तं जन्मैश्वर्याकृतिर्भवः । तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् १९ ॥ ॥

भयं मवतीत्याह । पुंसामीति । अलोकपथमीयुषां लोकविलक्षणमार्गवर्तिनां पुंसां पदवीमास्थिताः योषितः प्रायः सीदंतीत्यन्वयः
१७ अस्माद्दोषाच्च वयं न वरणीया इत्याह । निष्किंचना इति । आढ्याः राजकुमार्यः १८ अपं चैको हेतुर्लोके विवाहे इत्याह ययोरिति
ऐश्वर्याकृतिरैश्वर्ययुक्ताकारः भवः सौंदर्यं १९ ॥ ॥

द० नु०

६४

एतत्सुगुणासुगुणसर्वज्ञं अदीर्घसमीक्षया अल्पबुध्या सुधा अरथा २० । १ स्मयनुत्तये अहंकारनिरासाय असतां दुरात्मनां तेजोपहरता अभिमानं हरता अभावप्राप्तेः शंकुर्ध्वतामयानीतासीत्यन्वयः २३ स्वभावं सूचयति । उदासीनाइति उदासीनाविषयव्यापारशून्याः स्त्र्यपत्यादिवदप्रसिद्धावान अपत्यार्थकामुकाः कलत्रपुत्रधनलोलुपाना आत्मलब्ध्या स्वरूपलाभेन पूर्णा अलं तु दृष्टयः अ स्महे इद्वि

वैदर्भ्येतदविज्ञाय त्वया दीर्घसमीक्षया । वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा २० अथात्मनोनुरूपं वै भजस्व क्षत्रियर्षभं । येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे २१ चैद्यशाल्वजरासंधदंतवक्रादयो नृपाः । द्विषंति मां वरारोहे रुक्मी चापि तवाग्रजः २२ तेषां वीर्यमदांधानां दृप्तानां स्मयनुत्तये । आनीतासि मया भद्रे तेजोपहरतासतां २३ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः । आत्मलब्ध्यास्महे पूर्णा नेहात्मसदृशाः क्रियाः २४ एतावदुक्त्वा भगवानात्मानं वल्लभामिव । मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् २५ इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं । आश्रुत्य भीता हृदि जातवेपथुश्चिंतां दुरंतां रुदती जगाम ह २६ ॥ ॥

याश्च आत्मसदृशाः कर्माणि जीवकर्मतुल्या न भवंतीत्यर्थः २४ अविश्लेषात् निरंतरसाहित्येन स्थितेरात्मानं वल्लभामिव मन्यमानां प्रियतमां २५ यदा हरिणेतादृशं दुःखकरं वचनमुक्तो परांतरदा देवी आत्मनः प्रियस्य त्रिलोकेशपतेरश्रुतपूर्वमप्रियं वचनमाश्रुत्य दुरंतरां चिंतां जगाम । तत्पश्चात् प्रथमं प्रतिवचनोपक्रमे घोरतिवचनात् । इति वचनोपक्रमभीता अतएव हृदि जातवेपथुः उत्पन्नकंपा । तत्क्षणमाह । रुदतीति २६ ॥ ॥

राम

६४

एतदेव विवृणोति । पदेति । रक्तनखप्रभया अरुणा श्रीर्यस्य सत था तेन सुजातेन कोमलेन पदा भुवं लिखंती । अंजनासितैः कृष्णैः अश्रुभिः कुंकुमरूषितौ स्तनौ आसिंचती अधोमुखी भूत्वा तस्थावित्यन्वयः २७ सुदुःखादिभिर्विनष्टा इदं कर्तव्यमित्यपश्यंती बुद्धिर्यस्याः सा तथा श्लथद्गलय द्वलयोपस्य स तथा तस्मात् केशान् प्रविकीर्य देहश्च पपात कीदृशः विप्लवः संचलन् कंपमानः इत्यर्थः रंभा कदली २८ हास्य

पदा सुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः । आसिंचती कुंकुमरूषितौ स्तनौ तस्थावधोमुख्यतिदुःखरुद्धवाक् २७ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्तात् श्लथद्वलयतो व्यजनं पपात । देहश्च विक्लवधियः सहसैव मुह्यन् रंभेव वातविहता प्रविकीर्य केशान् २८ श्रीशुक उवाच तद्दृष्ट्वा भगवान्कृष्णः प्रियायाः प्रेमबंधनं । हास्यप्रौढिमजानंत्याः करुणः सोन्वकंपत २९ पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः । केशान्समुह्य तद्वक्त्रं प्रामृजत्पद्मपाणिना ३० प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा । आश्लिष्य बाहुना राजन्ननन्यविषयां सतीं ३१ सांत्वयामास सांत्वज्ञः कृपया कृपणां प्रभुः । हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ३२

नाम शृंगारादिषु कौतुकः तस्य प्रौढिं सम्पुटेकं करुणः करुणरसं प्राप्तः । अस्यविवरणं अन्वकंपतेति २९ चतुर्भुजः कृष्णः द्वाभ्यां भुजाभ्यां उद्धाप्य द्वाभ्यां केशान् समुह्य एकीकृत्य बध्वा वक्त्रं प्रामृजत् इति द्योतनाय चतुर्भुज इति प्रयुक्तं ३० अश्रूणां कला ययोस्ते तथा शुचोपहतौ कृशौ स्तनौ च । अनन्यविषयां अन्यस्पर्शनायोग्यां ३१ अतदर्हां प्रेमगर्भविषादवचनायोग्यां ३२ ॥ ॥

मामां प्रति असूयेथाः गुणे दोषदर्शनं न कुरु तत्र हेतुः त्वद्वचः श्रोतुकामेन मया क्ष्वेलया नर्मलक्षणलीलया आचरितं कृतं ३३ प्रेमसहितसं
रंभेण स्फुरिताधरं कंपमानाधरोष्ठं कटाक्षेण तिर्यक् दर्शनेनारुणापांगे नेत्रप्रांते न सुंदरभ्रुकुटीतटं ३४ कामिजनविडंबनं मया
कारीत्याशयेनाह अयमिति। प्रियया सह नर्मैः स्नेहगर्भपरिहासवचनैर्यामः कालावयवो नीयत इति यदयमेव गृहस्थानां गृहेषु परमो ला

श्रीभगवानुवाच मामा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां। त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमंगने ३३ मुखं च प्रेमसंरंभ
स्फुरिताधरमीक्षितुं। कटाक्षेपारुणापांगसुंदरभ्रुकुटीतटं ३४ अयं हि परमो लाभो गृहेषु गृहमेधिनां। यन्नर्मैरीयते यामः
प्रियया भीरु भामिनी ३५ सैवं भगवता राजन्वैदर्भी परिसांत्विता। ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ३६ बभा
ष ऋषभं पुंसां वीक्षंती भगवन्मुखं। सव्रीडहासरुचिरस्निग्धापांगेन भारत ३७ ॥ ॥

भोहीत्यन्वयः ३५ द्विविधं वाक्यं इष्टसाधनतावबोधकमेकं दुःखपरिहारात्मकं तत्र पश्चाद् दुःखविनाशकमिति भावेनाह। सैवमि
ति ३६ पूर्वोक्तमभीष्टसाधनतावबोधकत्वेनोपादेयमिति सूचयन्नाह। बभाषेति ३७ ॥ ॥

देव हमो मयाद्य परिहासेन त्वं उक्तासि कथं भुक्तवतीत्यत्राह नन्विति। यद्वा हे वीरशोभमानसदृशी न भवसीति अस्याः कांक्षिया तेनेति तत्राह।
नन्विति वाक्यं उक्तो वाक्यार्थः विभेदकः। नन्वित्यनुमतार्थे भवानूचे तदाह यतो नास्तीति एतदेवं नवमनुमतं। कथं तत्राह नेति। विभूम्नः दे
शतः कालतो गुणतश्चापरिच्छिन्नस्यास्य भगवता सदृशोऽन्यो नास्ति। किं च भगवानेव राजमरावणामोऽर्हमिति वतामहं सदृशी न भवामीति
नेत्याह क्वेति। भगवानैश्वर्यादिगुणसामग्रीसमुद्रो भवान्क्व। राजादिवदन्याधीनत्वं किं नस्यादिति तत्राह। स्वइति। अनेन स्वाधीनक्रिया

श्रीरुक्मिण्युवाच नन्वेतदेवमरविंदविलोचनाह यद्वै भवान्भगवतोऽसदृशी
विभूम्नः। क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ३८

नासीत्युक्तं भवति। सत्वादिगुणप्रवर्तकत्वेन प्रकृतिशब्दवाच्याहं क्व। तर्हि त्रिलोक्यां कश्चिन्न समः स्यादित्यतो नेति भावेनाह। त्र्यधी
श इति। त्रयाणां लोकानां त्रयाणां वेदानां त्रयाणां गुणानां वा ईश इत्यनेन इंद्रादिनिरासोऽभूदित्येतल्लोकपालविभूतिभिरित्यस्योत्तरं।
अज्ञा इत्यन्यत्तमोपिनेति भावेनाह। अन्येति। अन्यैर्ब्रह्मादिभिः अनेन महानुभावैरित्यस्योत्तरं। क्वाहमित्यसुनाश्रीमद्भिरित्यादे ३८

राजभ्यो बिभ्यतः समुद्र इति यदुक्तं तदङ्गीकारेण परिहरति। सत्यमिति। हे उरुक्रम वत्सा देरमिमानि जनशि रोरत्नराजिराजितमहापारम्पा समसमुद्रे अन्तः शेत इति सत्यं। किंतु राजभ्यो बिभ्यत इत्यसत्यं। तर्हि कथमुक्तं तेनाह। भयादिति। राजशब्दो दीप्तिवाची धातोः कर्तृविवक्षया शक्यते। अभ्यः सु शब्दिद्योतकेभ्यः सत्वादिगुणेभ्यो भयादिव समुद्रान्तर्निद्रार्थं स्वशब्दः। संसारहेतुभ्यो गुणेभ्यो बिभ्यज्ज्ञानः समुद्रस्थानीये सुखरादिज लवासेन यथा न पश्यति तथाऽहमिति। यद्वा पंक्तौ भूतसुद्रासहितत्वान्मसमुद्रे शरीरेंतर्हृदि शेते यत्र सत्वेन तद्दीप्यत शब्दादिगुणेभ्यो भयादिवाऽसु प्तमात्रः। अंगुष्ठमात्रः पुरुष इति श्रुतेः। शरीरान्तस्थस्य जीवाद्विशेषाज्ञ नादिकमपि स्यादितित्राह। उपलम्भनमात्र इति। केवलचिन्मयः अतो न देहधर्मा अस्य सन्तीति भावः। एकत्र स्थितयोर्जीवेशयोर्विशेषः कथमत्राह। आत्मेति। आत्मा तथाविधस्वभावः। किंनामधेयोभवानि

सत्त्वं भयादिव गुणेभ्य उरुक्रमांतः शेते समुद्र उपलंभनमात्र आत्मा। नित्यं कदिंद्रियगणैः कृतविग्रहस्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोंधं ३९

त्यतो वाह आत्मेति। आत्मा सुखमेवादत्ते तिनात्ति पिबति वेत्यात्मा। जीवस्तु शरीरमादाय शरीरांतराणि निर्मिमाति इति सुवाच्यः। बलव द्भिः सत्तैषां नित्यस्य तात्पर्यं विजिग्य इति यः अनित्यकैंद्रियगणैः कृतविग्रहः सत्वताद्ग आद्यात्मा। बलवानिंद्रियग्रामं नियन्तैः। बलवंतिय रिवर्त्तं न वर्ततिनात्मा योनि स्त्यतो नित्या नींद्रियाणि सुखंते। नियंतु मशक्यत्वाद्विलत्वे नातिभेव त्वसाहादितरेषां इंद्रियजयो भवतस्त्वं तु तत्र र तिपरं विषयाणि च गुणात्स्वयं भ्रुरिति श्रुतेः। प्रायस्यस्त्वन्नृपासनानित्यत्वाह त्वत्सेवये ति। तवसेवायस्याः साहं त्वत्सेवातया त्वत्सेवया मया नृपासनं नृपपदं नृपशब्दमाख्यमात्रं। ननु नृन्पांतीति नृपा तन्महत्त्वार्थेपि ते। अंधं तमः प्रतिविधुतं तन्न जनं कृतमित्यर्थः। तस्माद्भवानेव नृपशब्दमुख्यार्थत्वान्न त्वद्भैः सर्वैः स्पर्शं दत्तं नृपासनं यस्मै स त्यक्तनृपासनः। शिशुपालादयस्तु कृत्यनुशितं नृपासनं येस्मै तथा। त्वत्से वयाहेतुनावातेत्यर्थः ३९

अस्पष्टवर्त्मत्वमस्यापि धर्मोऽस्तीत्याह। त्वत्पादेति। तव पादपद्ममकरंदसेविनां मुनीनां ज्ञानिनां वर्त्म स्वरूपं स्फुटं स्पष्टं तथापि तद्रुक्मिणं नृपशुभिरज्ञानिभिर्दुर्विभाव्यं दुर्ज्ञेयं। तस्मादस्पष्टमित्युच्यते। यद्वा मुनीनां वर्त्म नृपशुभिः स्फुटं दुर्विभाव्यं किमुत तव वर्त्मेति। अलौकिकपथस्य प्राप्तु यामित्यस्याप्यर्थं दृष्टाह। यस्मादिति। हे भूमन् ईश्वरस्य तव ईहितमलौकिकमिव यस्मादथो तस्मात्तवेहितमनु ये अनुकुर्वन्ति ईहितानि भवंति अलौकिकानीति शेषः। तवेहितमनुक्रियमाणानि ममापि ईहितान्यलौकिकानि यस्मात्तस्मात्किमुत वेहितमलौकिकमिति वा ४० निष्किंच नावयमितीदं निबोधयतः किंचित्किंचिन्मात्रेणाप्यस्ति किंतु सर्वमेवास्यतो भवान्निष्किंचन इत्युच्यते। ननु अनात्वं निष्किंचनत्वमिष्यत्राह। यस्माद

त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यं। यस्मादलौकिकमिवे[?]तमीश्वरस्य भूमंस्तवेहितमथो अनु ये भवंति ४० निष्किंचनो ननु भवान्न यतोऽस्ति किंचिद्यस्मै बलिं बलिभुजोऽप्यहरंत्यजाद्याः। न त्वा विदंत्यसुतृपोंतिकमाढ्यतांधाः प्रेष्ठः स तांब लिभुजामपि ये न ते स्ते ४१ ॥ ॥

ति। सर्वप्राणिदत्तबलिभुजोप्यजाद्याः यस्मै बलिं हरंति। स भवान्निष्किंचन इति विदुषां परिच्छेदिनः शोभत इति शेषः। तस्मादाढ्यापेक्षणे नोपाद्यानभ जंतीत्यत्रावधारयन्नत्वेति। आढ्यतांधाः ऐश्वर्यमदांधाः त्वां न विदंति न जानंति। न लभंते वेत्यन्वयः। दूरस्थत्वान्न विंदंतीति नेत्याह। अंतिकामि ति नेदिष्टमंतिकमित्यमरः। अत्र हेतुरसुतृप इति। असुरिंद्रियपोषणपरत्वात्। अंतिकस्थत्वं स्पष्टयति। बलिभुजामिति। यस्त्वं बलिभुजां ब्रह्मादी नामपि प्रेष्ठः स तेषां तिष्ठसि। किमुत तरेषां नियंतृत्वेनेति शेषः। अत्र प्रमाणमाह। प्रेष्ठ इति। सतां प्रियतमः। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इत्यतो ज्ञानिदर्शनं प्रमाणं। कस्मै देवाय हविषा विधेम। इमं रुद्राय स्थिरधन्वने गिर इत्यादिश्रुतिः ४१ ॥ ॥

यच्छोरेवसमंविनेदृत्याह। त्वमनुवेदति। त्वंवा इति। वे शब्दोऽवधारणार्थः। त्वं फलात्मा सुखात्मा। परमानंदस्वरूपो देय स्मान्न स्मात् समस्तपुरुषार्थ मयश्च अर्थ्यत इत्यर्थः। मयट् प्रत्ययः प्रधानार्थः। सर्वस्मात्प्रधानपुरुषस्य समस्तपुरुषार्थैरर्थ्यमानस्वरूपत्वमित्यर्थः। ये सुमतयः सम्यग्ज्ञानिनोप स्यतत्वं वांछया अनुग्रहेच्छया कृत्स्नं पुत्रमित्रवित्तादि सर्वं विसृजंति मुंचंति त्यक्तसर्वैषणा इत्यर्थः। अनेन प्रकृते किमागतमत आह। तेषां विभो हे विभो तेषां सुमतीनां भवतः प्रसादः शर्णं सुखलक्षणो गुणः समुदितः सम्यग्युक्तः। समानो वा नाधीत्यस्य को भिन्नाय इत्यत उक्तं। यश्चेति चोभ र्योर्मध्ये कोपि नास्तीत्यर्थः। ननु द्वयोः कोपि गुणः समो नास्ति किमत आह। अयं चेति। अयं च शब्दात्स्मृतिश्च विचितयोर्द्वयोर्मध्ये कोपि गुणो स्ति सकृत्तोरतयोरित्यनेन सूचितः। अग्निष्टोमेन स्वर्गकामो यजेतेति वेदोक्तकर्मकर्तृत्वेन कुमतीनां त्वयी रतत्वं भवतो वेदप्रतिपाद्यत्वेन वेत्येव

त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वांछया सुमतयो विसृजंति कृत्स्नं। तेषां वि
भो समुदितो भवतः प्रसादस्त्वय्यां च पश्यतयोः सुखदुःखिनोर्न ४२

प्राकारेण समत्वे। ननु जीवस्य चेतनत्वे न ज्ञानानंदादि गुणोस्त्येवातः कथं समो गुणो नास्तीत्यत आह। सुखदुःखिनोरिति। सुखदुःखिनोर्द्वयो र्मध्ये केवलसुखपरिशर्णसुखो भवांस्ते सुमतयो भवद्ध्यानपर्यंतं दुःखिन इति। ननु पश्चात्समगुणत्वमापन्नं यो नानंदादिमुक्तः ज्ञानानंदी भ वतीति श्रुतेरितीयमाशंकाऽल्पसंपूर्णशक्तित्वादल्पशर्णसुखत्वाद इति स्मृतिवचनेन परिहरणीया। यद्वा ये सुमतयः कृत्स्नं विसृजंति तेषां भव तः पुंसां भवदीयपुरुषार्थाणां प्रकांक्षफलात्मा परमानंदमोक्षरूपः समुदितः सम्यग्युक्तः। इत्यां त्रि वेदविहितमार्गविभ्रमानयोः सुखदुःखिनोः ध र्माधर्मद्वारेन तत्तत्फललभुजोर्विहितप्रतिषिद्धकर्तोर्यस्त्वं फलात्मा न समुदितः स त्वं मे हृतोसीत्यन्वयः ४२

भिक्षानिः श्राघिता सुधेव स्वोन्नं रंगं एता त्वामिति। स्पष्टो वा अन्नः कापलत्तगो दंडो ये स्तेन्यसदंडाभवैर्मुनिभिः वा वयमेभिः मिति ते द्रियथा मेः प नि भित्यर्थः। ता हिता नु भावः स्पष्टीकृत प्रभावः स्वा अदीर्घसमीहपेति यदुक्तं तत्राह। आत्मेति। जगतामात्मा स्वामी भजतामद्य दः साधुत्वमु क्तिप्रदश्चेति दीर्घसमीहया निष्ठित्यमेमया त्वं मे भिहितः हृतोसि। हि हेतौ तावत्र धारणा इति पादवः। भवतः भवज्ञायमानमुदीरितमुदीरणं प्रेरणं यस्य स भवद्भवदुदीरितः सवाप्तो न्नालः भवद्भवदुदीरितकालः तस्य गंधेन सुप्ता शिषः निरस्तसंपदः अद्रम्येजातो ज्वः ब्रह्मा सोज्यः एवमु

त्वं न्यस्तदंडमुनिभिर्गदितानुभाव आत्मात्मदश्च जगतामिति मे हृतोसि। स्वत्काभवद्भवदुदीरितकालगंधध्वस्ताशिषो ब्जभव
नाकपतीन्कुतोन्यान् ४३ सत्येव चस्तुव गदाग्रजयस्त्वभूपान्विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वं। सिंहो यथा स्ववलिमीश प
शुंस्वभागं तेभ्यो भयाद्यदुदधिं शरणं प्रपन्नः ४४ ॥ ॥

रूपं समस्तं कृत्वा स्वर्गाद्यपहृतिः कृतः। अब्जोद्भवः नाकपतिरिंद्रः एतान्मुक्त्वा अन्यांश्चैद्यादीन् मुक्त्वेति कुतः किमु वक्तव्यमित्यर्थः। एवामदीर्घस मीहया हृतोसीत्यर्थः ४३ राजभ्यो विभ्यतः इत्येतस्य कारणांतरेणाहि पतति। सत्यमिति। हे गदाग्रज। च शब्द एवार्थे पशूनिव शार्ङ्गनिनदेन भूपान्विद्राव्य मां जहर्थ हृतवानसि। कथमिव यथा सिंहः स्वभागं पशुलक्षणं स्वबलिं स्वस्य भरणभोग्यं इरति तथा तेभ्यो राजभ्यो भयाद्य दुदधिं शरणं प्रपन्न इति यत्तन्न वचः सत्यं साधु भावं त्यजमीति। अस्मद्व्यामोहनार्थमुक्तमिति भावः ४४ ॥ ॥

आयस्यीदंतिबोधितइत्यत्रचात्मि। यद्वांछयेति। नृपाशीलामलयोगादयोयस्यतवश्रीपादनिषेवणावांछयाएकाधिपत्यं राज्यंसाम्राज्यं विसृज्यवनंविविक्तंशुन तेहाआनस्यीदंतिकिंतपादपद्मवीनास्थिताः किंश्राप्याप नसीदंतीत्यर्थः। अनुजाव्हेत्यनेननयनयो। निरपेक्षत्वंसूचयति ४४ स्थिरत्वञ्चित्वेनश्रुपाणांविषाहाभावेपिभीरूणांश्रीणांस्यादितिमंदाशंकांश्लोकद्वयेनपरिहरतिकेति। काश्रीसतरमणंकांक्षिणीजनतायाःजनसमूहस्यापवर्गोमोक्षोयस्मात्सतथातं। सङ्गिःसुखरितंस्वत्यत्वेनेरितंरत्नमुपदिष्टंश्रेयानीकृतमित्यर्थः। एवंविधंतवपादसरोजगंधमाघ्रायनिषेव्यसुनरस्त्रपात्रचकामरूपंत्वामविगणय्यमर्त्याशिषानाशशिरस्कसंपदाकारणेनतरूभपंरूपतरभीतिर्मितेजनंत्वत्तीतेत्यत्रयःकीदृशंत्वां। लक्ष्म्याःसकलसंपदश्चालयंशोर्यादिगुणानामालयंअत्रएवाद्यंचयस्मविशेषेणश्रीपुरुषाणामर्थनीयगुणारत्नाकर

यद्वांछयानृपशिखामणयोंगवैन्यनलायंतनाद्भुपगदाद्रयएकपत्यं। राज्यंविसृज्यविविभुर्वनमंबुजाक्षसीदंतितानुपदवीतइहास्थिताः किं ४४ काश्रीइरणीततवपादसरोजगंधमाघ्रायसन्मुखरितंजनतापवर्गं। लक्ष्म्यालयंत्वविगणय्यगुणालयाद्यंमर्त्याशिषोसभयमर्थविविक्तदृष्टिः ४५ तंत्वानुरूपमभजंजगतामधीशमात्मानमत्रचपरत्रचकामरूपं। स्यान्मेतवोंघ्रिशरणंश्रुतिभिर्भ्रमत्यायेनेभजंतिनुतयांत्यनृतापवर्गं ४६ ॥ ॥

त्वंबाहमभजंचैद्यादीनहित्वेतिशेषः। कथंविधंत्वामनुरूपमतुल्यंलंसौंदर्यंजगतामधीशंजगतामीश्वराणांब्रह्मादीनामपिसंपत्प्रदं। अत्रएवात्मानंतेषांस्वामिनं। कीदृश्यहंसअर्थाविविक्तदृष्टिः अर्थापमितिविवेकीकृतदृष्टिः। श्रुम्यकज्ञानेत्यर्थः। किंवहुनेत्याशेनाह। स्यादिति। कीदृशस्याः भ्रमत्याःभ्रमःतिस्रर्वंयस्याःसाभ्रमतिःतस्याविपरीतज्ञानिनामीशिष्याइत्यर्थः। केनेयमवगम्यतइत्यतउक्तं। श्रुतिभिरिति। श्रुतिप्रमाणेनसिद्धायाइतिशेषः। अभ्रमाध्रमतामनीयावेदैरधिगम्यतइत्यादिस्मृत्यावमुखंतुवदनेभुखोइतियादवः। तीन्यभानितिश्रुतिः। पारत्रिककामरूपत्वंदर्शयति। यइतियेत्वांभजंतितजमएषानृतापवर्गंसंसारान्मोक्षंयांतीत्यन्वयः। तमेवंविद्वानमृतइहभवतीतिश्रुतिर्दैशिकेनरद्वीता ४६ ॥

नृपाणांहेयत्वेहेत्वंतरमाह। कस्मादितिहेअच्युतच्युतःपरतोवाच्युतिरहित। भवतोपरिष्टान्नृपाश्रेयादयःकस्याःश्रियःस्युः। नकस्याअपिभवंतीत्यर्थः। सर्वदोषेष्वधिकोदोषोयमितिभावेनाह। यत्कर्णमूलमिति। हेअरिकर्शनमृडोरुद्रःरुद्रइवविरिंचसभासुगीतात्वत्कथायेषांनृपाणांकर्णमूलंनोपययापात्रोपमछतितइतिशेषः। तासामितिपाठेयासांकर्णमूलंतासांश्रीणांतेनृपाःस्युरित्यर्थः ४७ एन

कस्यास्युरच्युतनृपाभवतोपदिष्टाःश्रीणांगृडेभवरगोद्गविडालभृत्याः। यत्कर्णमूलमरिकर्शननोपयायाद्यत्कथामृडविरिंचसभासुगीता ४७ त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तक्रिमिविड्करितांत्रवीतं। जीवच्छवंभजतिकांतमतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री। ४८

देवस्यपश्यति। त्वक्श्मश्रुरोमेति। यास्त्रीतवपदाब्जमकरंदमजिघ्रतीअसेवमानासाजीवच्छवंजीवन्मृतंपुंभजति। तत्रानित्यंकाममतिरिति। अस्यस्वरूपमाह। बहिस्त्वगादिभिर्पिनद्धंवद्धं। अंतर्मांसादिभिःसेष्टतं। ननुविग्रहोप्येतादृशःकृष्णस्यकिंनस्यादितिशेषादितिचेत्र। आनंदश्मश्रुरानंदकेशइत्यादिश्रुतेर्हेतोःकालात्ययापदिष्टत्वात ४८ ॥ ॥

१०·३·
६९

अद्यमेवैतानृश्वीनेत्याह। अस्तीति। चरणयोरनुरागो परमभक्तिरस्तीति भक्तेः सर्वदैकप्रकारत्वं कथयति। मया तव न कोप्यर्थ इति भावेना ह। आत्मन्निति। आत्मन्यात्मनि। ममतत्वतो महानर्थोस्तीति भावेनाह। मयि चेति। मयि मदाधिकारिण्यां भक्तौ न अतिरिक्ता दृष्टिर्नुग्रह लक्षणा यस्य सतथा। भक्त्यनुकूलानुग्रहरूपार्थग्रस्य च शब्दो भक्तेरन्वयव्यतिरेकसूचकः। तत्कुत इति चेत्ताय एव स्वैः परोक्षरोमरम्यावा ये न मादृग्भक्तारस्त्वादिक्रुतिसिद्धत्वात्। अनेनैवतारत्वमपि सूचयति। अथा तो भक्ति मीमांसेति क्रतिविहितत्वात्। अन्योन्यं हेतु मद्भावं च मि लितौवावयतो भवतो यदनुग्रहस्य भक्तिश्चेति क्रतिसिद्ध मनुवदति। मिलितावन्योन्यं हेतु हेतुमद्भावोपेतौ भक्त्यनुकूलानुग्रहविशेष

अस्त्यम्बुजाक्ष मम ते चरणानुराग आत्मन्रतस्य मयि चानतिरिक्तदृष्टेः। यर्ह्यस्य वृद्धय
उपात्तरजोतिमात्रो मामीक्षसे तदुह नः परमानुकंपा ४९ ॥ ॥

कथयति। यर्हीति। यर्हियदास्य जगतोभिवृद्धये सृष्टिलक्षणायै उपात्तं स्वीकृतं रजोतिमात्रं केवलं रजो येन स तथा। यद्वा उपात्तात्प्र लयेस्थूल रजसि अतीताः संगताः मात्राः अंशायेन स तथा। स्थूल रजो गुणोपादानवानित्यर्थः। तदुत तदैव मामीक्षसे हविशेषत इत्यर्थः। यद्वा यदा स्थितिलक्षणायै उपात्ताद्रजसोतिरिक्ता मात्रा सत्वलक्षणा येन स तथा तदा मामीक्षसे यदा तिशद्धिराहितो चईनं छेदनं संहारस्तस्मै उपात्तरजोतिक्रांता मात्रा तमोलक्षणा येन स तथा। अत्रेक्षणं नाम तत्तत्कार्यं मनुस्कृत्य रजआदिमद्धीनतत्त्वगुणमिव ईनमभिप्रेतं। तदु नः। अयत्रिगुणा त्येष प्रकृतिरगुणो वा विष्णुः सर्वदात्म रजारजोस्पाउदर्दयन्ती त्यादिश्रुतो नैगत्स्य प्रयोजनं मदिशयेतिनः अस्माकं रक्ष इत्तापरमकृपेतिभावः ४९ ॥

दश
६९

भगवती भगवदुक्तेरेवं तात्पर्यं प्रकाशयन्निगमयति। नैवेति। हेमधुसूदन नेतव वचः अलीकं असत्यलक्षणं मा रंनमहरति नतु विमृश्यै व वृत्त्नमरणइतिधातुः। कथमित्यंबायाः कन्यायाद् रतिरिव। यथामातुः कन्याप्रदानकथायां रतिस्तान्यपतिनिवेशलक्षणानालीकंभवति। प्रायः एवायमर्थोंनुमतोहि। समुझयेव मत्यांवाप्येवमाप्येवधारणइतियादवः। क्वापि मातृरतिरलीकं भवति। तद्वत् वचः क्वाप्यलीकं न भवत्येवेत्युक्तं। क्वचिदिति। क्वचित्कापि ५० इदानीं कृष्णस्य निरंतरदात्मवमात्मनो नियतपातिव्रत्यं च ध्वनयं नीदेवी पुंश्चलीमर्थवादयति।

नैवालीकमहं मन्ये वचस्ते मधुसूदन। अंबाया एव हि प्रायः कन्याया द्रतिः क्वचित् ५०
ऊढायाश्चापि पुंश्चल्या मनोभ्येति नवं नवं। बुधोसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ५१

मुधाप्पाश्रति। अस्यार्थ आचार्योक्तो चलित्वेतेः यामसतीं बुधो न बिभृयात्। यां च तां बिभ्रद्दृष्टादृष्टच्युतो भवति। तस्याश्चापि पुंश्चल्याश्चापि मनोनवंनवमभ्येतीति मूर्छया मोहिन्या मूढत्वं युवयोरपि तत्र तत्र सुलभमुपलब्धमिति मंदा शंका अमुग्धेव हमुग्धेव त्वदुःखोदुःखितेति च। श्रीदर्शयिद्वाश्चैवनेवेतो मोहदुःखितादित्यादिस्मृत्या परिहर्तव्या ५१ ॥ ॥

द. उ.

१०

मगवत्योक्तं भगवता किमनुमतमुत विमतमितिविकल्पं परिहरति। आद्यमिति। एतद्वचः प्रलंभिता प्रश्नोत्थिता अन्वर्थं मनुकृत्यार्थः। हे इतरनिरीश्वरि ये यं कामं कामयसे ते सर्वे त्वयि नित्यदा संति हि यस्मात्तस्मात्का विष्टतिकामयसे न कापीत्यर्थः। यद्वा यं यं कामं कामयसे तान्सर्वान् कामय कामयस्व। तेषामभावादृष्यीत्याह। संतीति। तस्मान्मयि क्वचन शुक्तं कामयति ५३ भर्तुः स्नेहः पातिव्रत्यं चाभीष्टं संपन्नालोचनमितीदं तत्र वाह्नीत्याह। उपलब्धमिति। उपलब्धं दृष्टं। तत्र हेतुर्यद्वाक्यैरिति। मयि सेत्स्यधीनत्यक्तिर्मिता अन्यत्र मनीतापयस्मात्रित्यमुक्त्वा तत्वयोः दां पत्यमिति। ५४ तत्र मुक्तिमंतरेण दांपत्यापेक्षया सन्दजनमयुक्तमित्याशयेनाह। य इति ५५ ननु तर्हि संपदर्थमिव कृष्णजनं युक्तं हीति तत्राह।

श्रीभगवानुवाच साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्रि प्रलंभिता। मयोदितं यदन्वात्थ सर्वं तत्सत्यमेव हि ५१ यं यं कामयसे कामं मय्यकामाय भामिनि। संति ह्येकांतभक्तायास्तव कल्याणि नित्यदा ५२ उपलब्धं पतिप्रेम पातिव्रत्यं च ते नघे। यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ५४ ये मां भजंति दांपत्ये तपसा व्रतचर्यया। कामात्मानो पवर्गेशं मोहिता मम मायया ॥५५॥ मां प्राप्य मानिन्यपवर्गसंपदं वांछंति ये संपद एव तत्पतिं। ते मंदभाग्या निरयेपि ये नृणां मात्रात्मकत्वान्निरयः सुसंगमः ५६ दिष्ट्या गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी खलैः। सुदुष्करासौ सुतरां दुराशिषो ह्यसुंभराया निकृतिंजुषः स्त्रियाः ५७ ॥ ॥

मामिति। सतः सत्वस्य मोक्षस्य पतिं संपत्त्वन्यभोगाः कथं ते पां भोगानां निरयेपि लभ्यमिति तत्राह। मात्रात्मकत्वादिति। मात्रा कत्वाद्विषयभोगानां शूकरादिविषयाविनाशत्वान्निरयेषु संगमः सुलभः संगमः इत्यर्थः ५६ सर्वभक्तेषु त्वमेव मुख्या भक्तेत्याशयेनाह। दिष्ट्येति। हे गृहेश्वरि यते देवि त्वया मय्यनुवृत्तिर्भक्तिः कृतेति यत्तद्दिष्ट्या त्वदन्येषां भवमोचनी जन्ममोचनीया। अन्यास्तूक्तिः खलैः सुदुष्करा दुराशिषः दुष्टेच्छायाः पत्यासक्तदुर्वासनायाः वा असुंभरायाः प्राणपोषणपरायाः निकृतिं जुषः शठत्वं वा असेवमानायाः सुतरां सुदुष्करा। दिष्ट्या गृहे मंगलं दिष्ट्येश्वर्यमुतश्च दिष्ट्या गृहेश्वर्यमुतः तस्मिन्निति वा ५७ ॥ ॥

राम

१०

श्लोकत्रयेण देव्याः गुणैश्च भक्तिं लालयति। न त्वादृशीमित्यादिना। उपस्थितान्समीपं प्रापितान्नृपान्नावगणय्य कथा यस्य सत्कथस्य रहोहरः चूर्णिहाभि ५८ विरूपकरणं केशवपनं। प्रोद्वाहपर्वणि विवाहलग्ने तत्रिवासे। अक्षगोष्ठ्यां द्यूतविशेषक्रीडायां तस्य भ्रातुर्वधं। अस्मदयोगभीत्याऽस्मद्विरहभयेन ५९ आत्मलभने स्वलाभार्थं सुविविक्तमंत्रः स्पष्टकृतरहो वचनः। चिरायति विलंबनं कुर्वतिसतिएतद्ग

न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामि मानिनि यया स्वविवाहकाले। प्राप्तान्नृपान्न विगणय्य रहोहरो मे प्रस्थापितो द्विज उपश्रुतसत्कथस्य ५८ भ्रातुर्विरूपकरणं युधि निर्जितस्य प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्यां दुःखं समुत्थमसहोस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयं जितास्ते ५९ दूतस्त्वयात्मलभने सुविविक्तमंत्रः प्रस्थापितो मयि चिरायति शून्यमेतत्। मत्वा जिहास इदमंगमनन्ययोग्यं तिष्ठेत तत्त्वयि वयं प्रतिनंदयामः ६० श्रीशुक उवाच एवं सौरतसंलापैर्भगवाञ्जगदीश्वरः। स्वरतो रमया रेमे नरलोकं विडंबयन् ६१ तथान्यासामपि विभुर्गृहेषु गृहवानिव। आस्थितो गृहमेधीयान्धर्मान् लोकगुरुर्हरिः ६२ इति श्रीभागवते महापुराणे दशमस्कंधे पंचसप्ततितमोध्यायः ॥ ॥

शून्यं सद मंगलं मत्वा नान्ययोग्यं अन्यस्य उपसंयोगयोग्यमिदं अंगं जिहासुस्त्विष्टेरितियावत् ६० हेव्यागुणा अस्माभिः प्रतिनंदितुं न शक्या इति संक्षिपतीत्याह। श्रीशुक इति। सौरतसंलापैः सुरतसंबंधिमिथोभाषणैः। नरलोकं मनुष्यजनं विडंबयन् अनुकुर्वन् ६१ इदमन्यत्रातिदिशति। तथेति गृहवान् गृहस्थ इव आस्थितः उद्धृतश्च प्रकाशितः आरु उद्धृमन इति सूत्रं ६२ इति दशमे पंचसप्ततितमः ॥

अध्यायद्वयेनलोकविडंवनानुचरितंकथयति।तेनसर्वातासांनामिह द्विरसतामन्येति।तत्रादावेकैकस्यांदशदशपुत्रा आसन्नित्याहि कथयति।एकैकशइति।सर्वात्मसंपदाअन्यूनरेहादिस्वभावसंपत्त्या १ अनपगं अपगमरहितं २ एवमपिपराजयःस्त्रीणामेवेत्याह।चा र्विति ३ स्मयःसंदृष्टिस्मितंतेनयुक्तोऽवलोकः स्मायावलोकः।तस्यलवेनाल्पेनदर्शितेनभावेनस्वीयहृदयाभिप्रायेणाक्षिप्यहारिणामनोहरेणभ्रू वोर्मंडलवलयेनप्रहिताःसौरतमंत्राःसुरतवर्द्धनमंत्राःएतैःशौंडैःपटुत्वमाप्तैःकामबाणैःकरणैःसंभोगसाधनैःयस्यहरेरिंद्रियंलोलतांएं

श्रीशुकउवाच एकैकशस्ताःकृष्णस्यपुत्रान्दशदशाबलाः।अजीजनन्ननवमान्पितुःसर्वात्मसंपदा १ गृहादनपगंवीक्ष्यराजपुत्र्यो ऽच्युतंस्थितं।प्रेष्ठंन्यमंसतस्वंस्वंनतत्तत्त्वविदःस्त्रियः २ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः।सम्मो हिताभगवतोनमनोविजेतुंस्वैर्विभ्रमैःसमशकन्वनिताविभूम्नः ३ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमं त्रशौंडैः।पत्न्यस्तुषोडशसहस्रमनंगबाणैर्यस्येंद्रियंविमथितुंकरणैर्नशेकुः ४ याःसंस्मितंप्रभवनेऽथ—नूनमुपैत्यस्मिन् कथामसरसकृतवीक्षणेन।ऐन्द्रस्तनामपिपर्निचस्तीःकराग्रैःस्पृष्टाणांतरेणनवसंगमलज्जयेव ५ ॥ ॥

विमथितुंआलोडयितुंद्रावयितुंवावशीकृतकामत्वेनदृढवीर्यत्वात् ४ याःपत्न्यःपद्मकराग्रैःस्पृष्टाणांतरेणसंभ्रमयवथानेनस्त्रीष्वि तंस्तुतरामभीष्टंकृष्णमेत्तरअपश्यरताइतिशेषः।केनअच्युतेलक्ष्म्याःकांक्षायाएकधामप्रधानंइवसरसंप्रेक्षंस्त्रीस्मितंदीर्घकृतंकृतंवा वीक्षणंदर्शनंलज्जयेकधामसरसकृतवीक्षणांतेन।स्वभवनेषुस्थिरंअजंगमंवाप्तंअपिसंभावनार्थं।सतीःसत्यःस्पृष्टाणांतरेकिमर्थं वीक्षणमित्यतउक्तं।नवसंगमेति ५ ॥ ॥

सुरतादन्यत्रकालेतासांलीलाविशेषमाह।रामाइति।रामाःस्त्रियःगृहेविहरतःस्वदयितस्यकराभ्यांग्रहणोद्वेजनागःमुहारोमांचहे तुहर्षेणहसंत्यः।साश्रीशंकुर्वत्यः।निजपूरुषस्यनिजभर्तुःक्लेशावहानिक्लेशकराणयपिगात्राणितराणिविधेयेभ्यःस्पर्शयोग्येभ्योता ने भ्योऽन्यतमानिआपिदग्धवस्त्रादिनापिहितानिचक्रुरित्यन्वयः।कीदृशाः।तस्यांगजस्यात्रेपलक्षणात्कामस्यभंगभीताअपी ति ६ इदानींतासांपृथक्पृथक्पुत्रान्वक्तुमुपक्रमते।तासामिति।दशदशपुत्रायासांताःदशपुत्राः।तासांकृष्णस्त्रीणांमध्येयाः

रामागृहेविहरतःपुरतःकराभ्यांवद्धेक्षणाःस्वदयितस्यमुहाइसंत्यः।गात्राणितराणयपिदधुस्त्रिजपूरुषस्यक्लेशावहान्यपिमदं गजभंगभीताः ६ तासांयादशपुत्राणांकृष्णस्त्रीणांप्रोदिताः।अष्टौमहिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामितान् ७ चारु देष्णःसुदेष्णश्चचारुदेहश्चवीर्यवान्।सुचारुश्चारुगुप्तश्चभद्रचारुस्तथापरः ८ चारुचंद्रोविचारुश्चचारुमाश्चदशमोहरेः।प्र द्युम्नप्रमुखाजाताःरुक्मिण्यांनावमाःपितुः ९ भानुःसुभानुःस्वर्भानुःप्रभानुर्भानुमांस्तथा।चंद्रभानुर्बृहद्भानुरतिभानुस्तथा ष्टमः १० श्रीभानुःप्रतिभानुश्चसत्यभामात्मजादश।सांबःसुमित्रःपुरुजिच्छतजिच्चसहस्रजित् ११ विजयश्चित्रकेतुश्च वसुमान्द्रविडःक्रतुः।जांबवत्याःसुताह्येतेसांबाद्याःपितृसम्मताः १२

पुत्रोदिताःपूर्वोक्ताः।अष्टौमहिष्यस्तासांतान्पुत्रान्प्रद्युम्नादीन्गृणामितितत्रइत्यादिविशेषः ७ प्रद्युम्नादन्येकिंनामानइतीत्य चाह।चारुदेष्णइत्यादिना ८ ९ एवंक्रमेणसत्यभामादिसुतानन्वक्रामति।भानुरित्यादिना।एकःशत्रुःचंद्रस्यस्वर्भानुराहु रिव।अपरःलोकस्यभानुःसूर्यइवस्वःस्वर्गंउरोष्यितः ११ १२ ॥ ॥

ह० उ०

१२

नाग्नजिते·नग्नजित्सुत्याः लक्ष्मणायाः १३ वृषविशेषणं वीरइति अपरः सोमकोपि कालिंद्याः सुतः १४ माद्र्यालक्ष्मणायाः १५
१६ रोहिण्याः भद्रायाः १७ भोजकटपुरेस्थितस्य रुक्मिणः पुत्र्यां १८ एतेषां मातरः कृष्णभार्याणां षोडशसहस्राणि १९ अरेः ह
स्तस्य पुत्राय प्रद्युम्नाय। तं कृष्णं रंध्रमवसरं २० द्विषोः शत्रुभूतयोः वैवाहिकी विवाहसंबंधिनी। अतीतकथा नेदानीं कर्तुं शक्येति

भानुश्चंद्रोश्वसेनश्चित्रगुर्वेगवान्वृषः। आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्नजितेः सुताः १३ श्रुतः कविर्वृषोवीरः सुबा
हुर्भद्र एकलः। शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोपरः १४ प्रघोषो गात्रवान्सिंहो बलः प्रबल ऊर्ध्वगः। माद्र्याः पुत्रा म
हाशक्तिः सह ओजोपराजितः १५ वृकोहर्षोनिलो गृध्रो वर्द्धनोन्नाद एव च। महांशः पावनो वह्निर्मित्रविंदात्मजाः क्षुधिः १६ सं
ग्रामजिद्बृहत्सेनः शूरः प्रहरणोरिजित्। जयः सुभद्रो भद्रायां वाम आयुश्च सत्यकः। दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया
हरेः १७ प्रद्युम्नाच्चानिरुद्धोभूद्रुक्मवत्यां महाबलः। पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे १८ एतेषां पुत्रपौत्राश्च
बभूवुः कोटिशो नृप। मातरः कृष्णजातीनां सहस्राणि च षोडश १९ राजोवाच कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि
कृष्णेन परिभूतस्तं हंतुं रंध्रं प्रतीक्षते २० एतदाख्याहि मे ब्रह्मन्द्विषोर्वैवाहिकीं क्रियां। अनागतमतीतं च वर्त्तमानमतींद्रि
यं। विप्रकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः २१ श्रीशुक उवाच यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः। व्यतर
द्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियं २२ तदेवानुस्मरन्वैरं रुक्मी कृष्णावमानितः। तोषयामास तपसा श्रीशैलनिलयं ह

तेत्याह। अनागतमिति। विप्रकृष्टं दूरस्थं व्यवहितं मूर्त्तद्रव्यांतरितं २१ अर्द्धांगीकारेण परिहरति। यद्यपीति॥ ॥ ६ २२
व्यतरत् दत्तवान्। भागिनेयाय सहोदर्याः पुत्रायेति सूचितं प्रियं स्पष्टं आचष्टे कुर्वन्निति। इदं दानेकारणं २२ ननु ततः परं वैरं प्र
कृत्वा किं ततोधिकमभूत् कथमत्राह। तदेवेति। श्रीशैलनिलयं श्रीपर्वतवासिनं मल्लिकार्जुननामानमित्यर्थः २३ ॥

राम

१२

छंदयामास अभीष्टं दत्तवान्। अथाभिप्राययोः छंदइति २४ शत्रुसंधानां मनसेति शेषः। अजेयात्छेद्यत्वेन यामामितुल्यात
स्पर्द्धस भक्तिं दर्शयितुं वाक्यं। वाक्यं चेति २५ ८ तार्ह्यं वंधुमैत्रीनिर्दुष्टा माकार्षीत् किं नेत्याह। मैत्रीमिति। अपि तु वंधु क

तपसाराधितो रुद्रो रुक्मिणा वरदर्षभः। वरेण छंदयामास स च वव्रे दृढं धनुः २४ अजेयं शत्रुसंधानामछेद्यं त्रिदशैरपि त
थेति कार्मुकं दत्वा वाक्यं चेदं वचः शंकरः २५ यदा विरुध्यसे विष्णोस्तदेतत्कार्मुकं नृप। हित्वा तदा त्वां मामेव प्रतियास्यति नान्यथा
२६ इत्युक्त्वा कार्मुकं दत्वा शंकरोनव्यदृश्यत। सोपि लब्धवरो राजा प्राप्य भोजकटं पुरं २७ तेन चापेन सकलान्नृपान्जित्वा
तपोरुपात्। दशोचकार संग्रामे रुक्मी कृष्णप्रपेरप २८ विरोद्धुं वासुदेवेन रुक्मी नैवाकरोन्मनः। धनुर्लोभान्महाराज न मैत्री
मप्यकल्मषं २९ यद्यप्यनुस्मरन्वैरं गिरिशस्य स्मरन्वचः। ततः स्वयंवरे साक्षादनंगोंगयुतस्तया ३० राज्ञः समेतान्निर्जित्य ज
हारैकरथो युधि। अनिरुद्धो रुक्मवत्यां तस्यां जज्ञे महारथः ३१ जहारयं दिक्षु लेखा बाणपुत्र्याः प्रचोदिता। सहस्रबाहुर्बाण
श्च यत्कृते हि युद्धमभवत् ३२ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली। उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ३३ दौ
हित्रायानिरुद्धाय पौत्रीं रुक्म्यददाद्धरेः। रोचनां बद्धवैरोपि स्वसुः प्रियचिकीर्षया ३४ जानन्नधर्मं तद्यौनं स्नेहपाशानुबंधनः
तस्मिन्नभ्युदये राजन्रुक्मिणी रामकेशवौ ३५ पुरं भोजकटं जग्मुः सांबप्रद्युम्नकादयः। तस्मिन्निवृत्त उद्वाहे कालिंगप्रमुखा
नृपाः ३६

त्याकरणेन कल्मषमकरोत् २९ मैत्र्यकरणे विरोधाकारणे च निमित्तमाह। यदीति। अनंगश्चेत् किमवलोक्यत इत्यत उक्तं अंग
युत इति ३०।१ यमनिरुद्धं ३२ कृतवर्मणो रुक्मिण्याः पुत्रः स दौहित्राय हरेः पौत्रायानिरुद्धाय सुपौत्रीं मदात् ३४ तस्मिन्नभ्यु
दये अनिरुद्धविषये विवाहे प्रवृत्ते सति ३५ ६ ॥ ॥

बलं बलभद्रं तद्व्यसनी द्यूतक्रियापरः ३७ पराजये पणं लक्षं ३८ कालिंगः दंतवक्त्रः त्वां जितवान् तान्प्रशिक्षितइति ३९

दृष्ट्वाप्ते रुक्मिणं प्रोचुर्बलभद्रैर्विनिर्जय। अनक्षज्ञो बलो राजन्नपि तद्व्यसनी महान् ३७ इत्युक्तो बलमाहूय तेनाक्षै रुक्म्यदीव्यत
तां शतं सहस्रमयुतं रामस्तत्राददे पणं ३८ तं तु रुक्म्यजयत्तत्र कलिंगः प्राहसद्बलं। दंतान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः ३९
ततो लक्षं रुक्म्यगृह्णाद्ग्लहं तत्राजयद्बलः। जितवानहमित्याह रुक्मी कैतवमाश्रितः ४० मन्युना क्षुभितः श्रीमान्समुद्र इव पर्वणि।
जाताऽरुणाक्षोऽतिरुषा न्यर्बुदं ग्लहमाददे ४१ तं चापि जितवान्रामो धर्मेण छलतोऽब्रवीत्। रुक्मी जितं मयात्रेमे वदंतु प्राश्निका
इति ४२ तथेत्याह कलिंगोपि दंतान्संदर्शयन्नसौ रिराः॥ ततः कोपपरीतात्मा तूष्णीमासीद्धलायुधः ॥४३॥ तदाब्रवीन्नभोवाणी
बलेनैव जितो ग्लहः। धर्मतो वचनेनैव रुक्मी वदति वै मृषा ४४ तामनादृत्य वैदर्भो दुष्टराजन्यचोदितः। संकर्षणं परिहसन्बभा
षे कालचोदितः ४५ नैवाक्षकोविदा यूयं गोपाला वनगोचराः। अक्षैर्दीव्यंति राजानो बाणैश्च न भवादृशाः ४६ रुक्मिणैवं
माधिक्षिप्तो राजभिश्चोपहासितः। क्रुद्धः स्वपटेनैनं जघानोद्वाहपर्वणि ४७ कालिंगराजं तरसा गृहीत्वा दशमे पदे।
दंतानपातयत्क्रुद्धो योऽहसद्विवृतैर्द्विजैः ४८ अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः। राजानो दुद्रुवुर्भीता बलेन
परिघार्दिताः ४९ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा। रुक्मिणीबलयो राजन्स्नेहभंगभयाद्धरिः ५०

४० न्यर्बुदं दशकोटिधनं ४१ २ आकाशशरीरवाणी किमाह इति तत्राह बलेनेति ४४ तामाकाशवाणीं ४५ ६ अष्टपदेन अक्षफलकेन ४७ हरिः श्याले रुक्मिणि निहते सति ५० ॥ ॥

भार्यया सह अनिरुद्धं वरं रथं आरोप्य रामादयो दशार्हकाः सिद्धाखिलार्थाः संपन्नसमस्ताभीष्टाः तत्र हेतुः मधुसूदनेति ५१ इति दशमे षट्स
प्ततितमोध्यायः यथा पूर्वं श्रुतं कृष्णस्य आत्मनि वा संपतन्ती तान्प्रकरोत्। यथा त्वं वा संपततं यथा तव कथयामीति वा १ २ नरकं निहतं श्रु
त्वा तथा एकेन कृष्णेन बह्वीनां योषितां च उद्वाहं श्रुत्वा नारद स्वयं द्रष्टुमिच्छन् द्वारकां प्रति अभूदित्यन्वयः ४ ततः किमिति तत्राह। चित्रमिति। एकः एकेन

अथोऽनिरुद्धं सह भार्यया वरं समारोप्य ययुः कुशस्थलीं। रामादयो भोजकटाद्दशार्हकाः सिद्धाखिलार्था मधुसूदनाश्रयाः ५१
इति श्रीभागवते महापुराणे दशमस्कंधे षट्सप्ततितमोध्यायः श्रीशुक उवाच तथा ताभिर्वरस्त्रीभिररमत्स जनार्दनः। दिना
नि हतताप्त्यः सुबह्न्यत्यवासयत १ राजोवाच तासां षोडशसाहस्रमहिषीणां जनार्दनः। तस्मिन्कथं चकारेको मानुषं देह
माश्रितः २ श्रीशुक उवाच हंत ते कथयिष्यामि श्रोतॄणां विस्मयावहं। यथा चकार बह्वीनामेकः प्रीं जनार्दनः ३ नरकं नि
हतं श्रुत्वा तथोद्वाहं च योषितां। कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ४ चित्रं बतैतदेकेन वपुषा युगपत्पृथक्। गृहेषु द्व्यष्टसा
हस्रं स्त्रिय एक उदावहत् ५ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत्। पुष्पितोपवनारामद्विजालिकुलनादितां ६ ॥ ॥

वपुषा पृथक् गृहेषु द्व्यष्टसाहस्रं स्त्रिय एकस्मिन्मुहूर्ते उदावहदिति यत्तदिदं विचित्रमाश्चर्यमिति च संतोषाद् उत्सुको भूत्वा देवर्षिः कृष्णं विचे
ष्टितं द्रष्टुं द्वारवतीमगमदित्यन्वयः। कीदृशीं द्वारवतीनामपुरं पुष्पिता उपवनारामा यस्मिन्स द्विजानामलीनां पक्षिणां कुलेन नादितं ६

उत्फुल्लेंदीवरादिभिः स्फुरिते भ्रमिभ्रिते भ्रमरस्फुटहंसादिभिस्तत्रैः कृतस्वरेण कूजितं। यद्वा सामान्यतः कं नारदागमनं विशिनष्टि पुष्पितेत्यादिना। प्रथमतो द्विजादिनादितं पुष्पितोपवनाराममाप। पश्चादुत्फुल्लेंदीवरादिभिः स्फुरिते भ्रमरस्फुटहंसादिभिरुच्चैः कूजितं स्थलमाप ७ ततः पश्चात् स्फाटिकराजतैः स्फटिकादिनिर्मितैः नवभिः रत्नैः प्रासादलतागौर्वैर्विष्टं स्थलमाप। कीदृशैर्महामरकतप्रख्यैः इंद्रनीलविद्रुमसोपानैः स्वर्णरत्नानि सुवर्णश्रेष्ठानि परिष्कृतानि येषां तानि यथा। अन्यत्र महासुवर्णोज्ज्वलविचित्रितानीत्यर्थः ८ किंविभक्तैः विभक्तरथ्यापथैः रथमार्गैः चत्वरैः पणैश्च शोभितं। ततः परं शालाभिः सभाभिः रतिरुचिरां सुरालयैः देवगृहैश्च मनोरमां। गोमयचंदनोदकादिना संसिक्ता सिक्त रमा

उत्फुल्लेंदीवरांभोजकल्हारकुमुदोत्पलैः। स्फुरितेभ्रमरस्फुटहंसैः कूजितं हंससारसैः ७ प्रासादलक्षैरर्चनभिर्दृष्टं स्फाटिकराजतैः। महामरकतप्रख्यैः स्वर्णरत्नपरिष्कृतैः ८ विभक्तरथ्यापथचत्वरापणैः शालासभाभिः रुचिरां सुरालयैः। संसिक्तमार्गांकणवीथिदेहलीं पतत्पताकध्वजवारितातपां ९ तस्या मनः पुरं श्रीमद्दर्शितं सर्वधिष्ण्यपैः। हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं १० तत्र षोडशभिः सद्मसहस्रैः समलंकृतं। विवेश कृतमं शौरेः पत्नीनां भवनं महत् ११ ॥ ॥

र्गा अंगकणानि वीथयश्च गृहपंक्तिपुरो मार्गाश्च संसिक्तमार्गांकणवीथयः। तानि गेहानि यस्याः संतीति संसिक्तमार्गांकणवीथिदेहलीं तां पतंत्यः विवरणावरणे कुर्वंत्यः पताका येषां ते पतत्पताकाः। ते च ध्वजाः पतत्पताकध्वजा स्तैः वारित स्तंभित आतपो यत्र सा तथा तां। एवंविधायां तस्यां कुशस्थल्यां मंतर्भागो हरेः पुरं सर्वसंपदा पूर्णं स्थानमस्तीति शेषः। सर्वैधिष्ण्यपैः समस्तैः ब्रह्मादिभिरर्चितं धिष्ण्यं गृहं मध्ये गृहपतिर्ब्रह्मा परितः पतय इंद्रादयः। यत्र पुरे त्वष्ट्रा विश्वकर्मणा १० ततः परितः शौरेः कृष्णस्य पत्नीनां षोडशभिः सद्मसहस्रैः गृहसहस्रैः संदर्शनीयतया लंकृतं भवनानामेकतमं भवनं ११ ॥ ॥

कीदृशं तत्र गृहमत्राह। विष्टब्धमिति। मूलेष्वग्रेषु च फलकोत्तमानि येषां ते तथा तैः। जालैः गवाक्षैः १२ मुक्तादामविलंबिभिः अवलंबमानमौक्तिकमालैः दांतैः गजदंतनिर्मितैः। अक्षैर्गवाक्षैः निर्यातं निर्गतं विशिष्टागरुचूर्णं धूपं दृष्ट्वा शिखंडिनो मयूराः १५ चामरव्यजनेन चामराख्यव्यजनेन। तस्मिन्भवने आविवेश उपविष्टः १७ भोपरि स्थित्वैनत्त्विदमित्याह। ब्रह्मण्यदेव इतीति। यस्य चरणशौचजलमशेषाणि तीर्थानि तिष्ठ द्वारकारो

विष्टब्धं विद्रुमस्तंभैर्वैदूर्यफलकोत्तमैः। इंद्रनीलमयैः कुड्यैर्जालैर्मरकतोत्तमैः १२ वितानैर्निर्मितैस्त्वष्ट्रा मुक्तादामविलंबिभिः। दांतैरासनपर्यंकैर्मण्युत्तमपरिष्कृतैः १३ दासीभिर्निष्ककंठीभिः सुवासोभिरलंकृतं। पुंभिः सकंचुकोष्णीषसुवस्त्रमणिकुंडलैः १४ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभीषु शिखंडिनोंग। नृत्यंति यत्र विहितागरुधूपमक्षैर्निर्यांतमीक्ष्य घनबुद्धय उन्नदंतः १५ तस्मिन्समानगुणरूपवयः सुवेषदासीसहस्रयुतयानुसवं गृहिण्या। विप्रो ददर्श चमरव्यजनेन रुक्मदंडेन सात्वतपतिं परिवीजयंत्या १६ तं संनिरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यंकतः सकलधर्मभृतां वरिष्ठः। आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांजलिरवीविशदासने स्वे १७ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्ना बिभ्रज्जगद्गुरुतरोऽपि सतां पतिर्हि। ब्रह्मण्यदेव इति यद्गुणनाम युक्तं तस्यैव यच्चरणशौचमशेषतीर्थं १८ संपूज्य देवऋषिवर्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन। वाण्याभिभाष्य मितयामृतकल्पया च प्राह प्रभो भगवतः करवाम किं ते १९

तिअशेषतीर्थं। यद्वा शेषाणि तीर्थानि यस्मिंस्तत्तस्य हरेः ब्रह्मण्यदेव इति यन्नद्गुणनाम तस्यैव युक्तमित्यवधारयेत्यर्थः १८ शास्त्रोदितेन विधिना संपूज्य १९ ॥ ॥

तत्रनारदः प्रतिवक्तिनेतित्वयिअद्भुतंमैत्र्यमाना।इदानमितिशेषः।स्वैरावताराःस्वेच्छावतारइतिसुष्ठुविदाम २० अथद्रष्टंतवांघ्रियुगलं
ध्यानंस्मरणमिययास्मृतिःस्यात्तथानुगृहाण २१ २ अन्नैरिद्धैःदीव्यंतंदेवनंक्रियांकुर्वंतं २३ अविदुषेवप्रष्टुंगृहेनारदागमन

नारदउवाच नैवाद्भुतंत्वयिविभोऽखिललोकनाथेमैत्रीजनेषुदमनंखलानां। निःश्रेयसायजगतांस्थितिरक्षणाभ्यां स्वैरा
वतारउरुगायविदामसुष्ठु २० दृष्टंतवांघ्रियुगलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगाधबोधैः।संसारकूपपतितोत्तरणा
वलंबंध्यायंश्चराम्यनुगृहाणयथास्मृतिःस्यात् २१ ततोन्यदाविशद्गेहंकृष्णपत्न्याःसनारदः। योगेश्वरेश्वरस्यांगयोगमायां
विवित्सया २२ दीव्यंतमक्षैस्तत्रापिप्रियाचोद्धवेनच। पूजितःपरयाभक्त्याप्रत्युत्थानासनादिभिः॥२३॥ पृष्टश्चाविदुषेवासौकदाया
तोभवानिति। क्रियतेकिंनुपूर्णानामपूर्णैरस्मदादिभिः २४ अथापिब्रूहिनोब्रह्मन्जन्मैतच्छोभनंकुरु। सतुविस्मितउत्थायतूष्णीम
न्यदगाद्गृहं २५ तत्राप्यचष्टगोविंदंलालयंतंशिशून्सुतान्। ततोन्यस्मिन्गृहेपश्यन्मज्जनायकृतोद्यमं २६ जुह्वंतंचवितानाग्नीन्य
जंतंपंचभिर्मखैः। भोजयंतंद्विजान्क्वापिभुंजानमवशेषितं २७ क्वापिसंध्यामुपासीनंजपंतंब्रह्मवाग्यतं। एकत्रचासिचर्मभ्यां
चरंतमसिवर्त्मसु २८ अश्वैर्गजैरथैःक्वापिविचरंतंगदाग्रजं। क्वचिच्छयानंपर्यंकेस्तूयमानंचवंदिभिः २९

मज्जानतेबहिरागमनात्कदायाताइत्यसौनारदःपृष्टः २४ ६ क्वापिगृहेब्राह्मणरत्नावशेषितमन्नं २७ असिचर्मभ्यांशिष्यवर्त्म
सुचरंतंशिष्यंछिन्नयंतं २८ ९ ॥ ॥

वारमुख्याभिरवलाभिरावृतंवेष्टितं ३० ददतमितिपाठेददंतमितिपाठेददतमित्यस्यसुधातोःशत्रादेशः ३१ ३४ कालेप्राप्तेविष्णुप्रकारेणउप
नायनंउपनयनंस्वगृहप्रत्यानयनंब्राह्मणीकारणं।कल्पयंतंपुत्राणांदारैःसहसहितानांवरैःसहयोगंकल्पयंतं ३५ प्रस्थापनंपरगृहंप्रति
दुहितृप्रेषणंउपनयनंस्वगृहंप्रत्यानयनं।येषामितिषष्ठीद्वितीयार्थेलोकाःयानिकर्माणिवीक्ष्यविस्मिरेतानिकुर्वंतंयेषांकर्मणामाचरणंवी

मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः। जलक्रीडारतंक्वापिवारमुख्याबलावृतं ३० कुत्रचिद्द्विजमुख्येभ्योददतंगाःस्वलंकृताः। इ
तिहासपुराणानिशृण्वंतंमंगलानिच ३२ हसंतंहास्यकथयाकदाचित्प्रियया गृहे। क्वापिधर्मंसेवमानमर्थकामौचकुत्रचित् ३३
ध्यायंतमेकमात्मानंपुरुषंप्रकृतेःपरं। शुश्रूषंतंगुरून्क्वापिकामैर्भोगैःसपर्यया ३३ कुर्वंतंविग्रहंकैश्चित्संधिंचान्यत्रकेशवं। कु
त्रापिसहरामेणचिंतयंतंसतांशिवं ३४ पुत्राणांदुहितॄणांचकालेविध्युपनायनं। दारैर्वरैस्तत्सदृशैःकल्पयंतंविभूतिभिः ३५
प्रस्थापनोपनयनैरपत्यानांमहोत्सवान्। वीक्ष्ययोगेश्वरेशस्ययेषांलोकाविसिस्मिरे ३६ यजंतंसकलान्देवान्क्वापिक्रतु
भिरूर्जितैः। पूर्तयंतंक्वचिद्धर्मंकूपारामालयादिभिः ३७ चरंतंमृगयांक्वापिहयमारुह्यसैंधवं। घ्नंतंतत्रपशून्मेध्यान्परीतंयदु
पुंगवैः ३८ अव्यक्तलिंगंप्रकृतिष्वंतःपुरगृहादिषु। क्वचिच्चरंतंयोगेशंतत्तद्भावबुभुत्सया ३९ अथोवाचहृषीकेशंनारदःप्रह
सन्निव। योगमायोदयंवीक्ष्यमानुषीमीयुषोगतिं ४० ॥ ॥

सेतिया ३६ कूपादिभिःपूर्तयंतंपूर्तात्व्यंधर्ममाचरंतं ३७ सैंधवंसिंधुदेशभवं।तीर्थशास्त्रेविहितान्पशून्मेध्यान्वायज्ञेवा ३८
अव्यक्तलिंगप्रकृतिंअस्पष्टलक्षणस्वभावंतेषांभावानांपदार्थानांबुभुत्सयास्वभावजिज्ञासया ३९ मानुषीरतिमनुष्यक्रीडां
४०

आत्मनिहृदये निर्भातस्य प्रकाशितस्य भगवतः पादयोर्विभिन्नवया ४१ आस्कृतानीति प्रागेयगाथातीर्थेन माता नित्यपुरुषार्थः ४२ लोकानुकारिचरितदर्शनेन नारदस्य मोहमाशंक्य तं निवारयन्निति तत्वमुपदिशति। ब्रह्मन्निति। इमं लोकमास्थितः अस्मिन्लोके स्थितः तं धर्मं कर्ता वक्तानुमोदकः। अनुज्ञात ४३ उपसंहरति। इतीति। दृशति हृ आदिवचनः ५४ ५ इत्यर्थधर्मकामेषु अवहितात्मना कृष्णेन ४६

नारद उवाच विदाम योगमायांस्ते दुर्दर्शा अपि योगिनां। योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया ४१ अनुजानीहि मां देव लोकांस्ते यशसाप्लुतान्। पर्यटामि तवोद्गायन्लीलां भुवनपावनीं ४२ श्रीभगवानुवाच ब्रह्मन्धर्मस्य वक्ताहं कर्त्ता तदनुमोदकः। शिक्षयंस्त्लोकमिममास्थितः पुत्र मा खिदः ४३ श्रीशुक उवाच इत्याचरंतं सद्धर्मान्पावनान्गृहमेधिनां। तमेव सर्वगेहेषु संतमेकं ददर्श ह ४४ कृष्णस्यानंतवीर्यस्य योगमायामहोदयं। मुहुर्दृष्ट्वा ऋषिरभूद्विस्मितो जातकौतुकः ४५ इत्यर्थधर्मकामेषु कृष्णेनावहितात्मना। सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्ययौ ४६ एवं मनुष्यपदवीमनुवर्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः। रेमेच षोडशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ४७ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार। यस्त्वंग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ४८ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तसप्ततितमोऽध्यायः ॥ ॥

साक्षान्मोक्षहेतुत्वात्। भगवच्चरितमिदं तु श्रुश्रुभिरत्यसनीयमात्मसनीयं न तु विरक्तैस्त्यक्तव्यमुपेक्षणीयमिति भावेनाह। यानीति। अंग विश्वरात। विश्वविलयोद्भववृत्तिषु हेतुर्हरिः। यानि अन्यविषयाणि कर्माणि चकार। यः कृला निगायति शृणोति अनुजानाति वा तस्य पुंसोपवर्गमार्गे भगवति भक्तिर्भवति हि यस्मात्तस्मादश्यं पुमुक्षुणा सेव्यानीति इति दशमे सप्तसप्ततितमः ॥ ॥

राज्ञादैनंदिननित्यनियमप्रकारं कथयत्यस्मिन्नध्याये। तथा ह्योमाधवीनां भ्राम्यधर्मलोल्यातिशयं कथयति। अथेत्यादिना १ वयांसि कोकिलादीनि। वंदिनः कृष्णं बोधयंतीव अपतंस्तु। नित्योक्तत्वादिवेति। मंदारवनवायुभिः पारिजातवनवायुभिः सह २ तं मुहूर्तमुपलक्षितकालं प्रियस्य कृष्णस्य बाह्वंतरं वक्षस्थलं ३ नित्यप्रसन्नात्मा करणः आत्मानं ध्यमेव ४ इतरव्यवच्छेदमात्मानं व्याचष्टे पति। एकमिति। एकं मुख्यं स्वरूपभेदशून्यं वा। आदित्यादिज्योतिभ्यः परं विलक्षणं। परं ज्योतिःस्वरूपं संपद्य श्रुतिः। अनन्यं अन्याधीनस्वभावरहितं। नश्यन्यः स्वतंचोय

श्रीशुक उवाच अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन्। गृहीतकंठ्यः पतिभिर्माधव्यो विरहातुराः १ वयांस्यरूरुवन्कृष्णं बोधयंतीव वंदिनः। गायत्स्वलिष्वनिद्राणि मंदारवनवायुभिः २ मुहूर्तं तं तु वैदर्भी नामृष्यदतिशोभनं। परिरंभणविश्लेषात्प्रियबाह्वंतरं गता ३ ब्राह्मे मुहूर्ते उत्थाय वार्युपस्पृश्य माधवः। दध्यौ प्रसन्नकरण आत्मानं तमसः परं ४ एकं परं ज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं। ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृतिं ५ अथाप्लुतोऽभस्यमले यथाविधि क्रियाकलापं परिधाय वाससी। चकार संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ६

स्वात्मस्तया तं वा। अद्वयं असद्दृशां स्वसंस्थया स्वरूपावस्थया यावत्प्रमहिम्ना स्वाकारेण वा नित्यनिरस्तदोषं। किं तस्य नामधेयमजाह। ब्रह्माख्यमिति। स्वलक्षणैः स्वरूपलक्षणैः व्यावर्तकधर्मैः अस्य जगत उद्भवनादिहेतुभिः सूक्ष्मादिहेतुभिर्लक्षितभावनिर्वृतिः स्वरूपानंदोपलक्षितमात्मं। यद्वेयत्त आकाश आनंदो न स्यात् इति श्रुतेः ५ संध्योपगमादि संध्योपासनादिकं क्रियाकलापं चकार। ब्रह्म जजाप नियतश्चासावाग्यतश्चेतिवार। गायत्रीं वा जजाप ६ ॥ ॥

सन्न्यात्मनः कलाः सुसंनिधानविशेषोपेताः। आत्मवान् स्वाधीनप्रयत्नः। स्वाधीनमना वा ७ साध्वीनां पातिव्रत्यनादिक्रियानपेक्षाणां गृहिणीनां प्रथमप्रसूतानां ८ बद्धं बद्धं यद्युयं एकैकश्लोकेविप्राय ९ गोविप्रदेवताः। वयोवृद्धांश्च। गुरून् भृत्यानश्रुत्यादीनि नमस्कृत्य। एतत् सर्वं कीदृशं मनोहरं। आत्मेति। आत्मनः संभूतिं सन्निधेः प्रतिमां। मंगलानि तिलादीनि १० नरलोकस्य मुक्तामुक्तस्य भूषणं अलंकारभूतं ११ आदर्श

तुपस्थाप्यार्कमुपस्थं तत्तर्पयित्वात्मनः कलाः। देवान् ऋषीन् पितॄन् वृद्धान् विप्रान् अभ्यर्च्य चात्मवान् ७ धेनूनां रुक्मशृंगीणां साध्वीनां मौक्तिकस्रजां। पयस्विनीनां गृष्टीनां सवत्सानां सुवाससां ८ ददौ रूप्यखुराग्राणां षोमाजिनतिलैः सह। अलंकृतेभ्यो विप्रेभ्यो बद्धं बद्धं दिने दिने ९ गोविप्रदेवतावृद्धान् गुरून् भूतानि सर्वशः। नमस्कृत्यात्मसंभूतिं मंगलानि समस्पृशत् १० आत्मानं भूषयामास नरलोकविभूषणं। वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ११ अवेक्ष्याज्यं तथादर्शं गोवृषद्विजदेवताः। कामिनां सर्ववर्णानां पौरांतःपुरचारिणां। प्रादात् कामान् पृथक्कामैः प्रतोष्य प्रत्यनंदत १२ संविभज्याग्रतो विप्रान् स्रक्तांबूलानुलेपनैः। सुहृदः प्रकृतीर्दारानुपायुंक्त ततः स्वयं १३ तावत्सूत उपानीय स्यंदनं परमाद्भुतं। सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्याग्रस्थितोऽग्रतः १४ गृहीत्वा पाणिना पाणिं सारथेस्तमथारुहत्। सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः १५ ईक्षितोंतःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः। कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन् मनः १६

दर्पणं। गवादीश्च श्रेष्ठा देवताः प्रतिष्ठिताः। कामिनामर्थिनां। कामानिष्टान् कामान्न पदार्थान् इति किं बहुना सर्वान् कामैः पृथक् पृथक् रूपतोष्य संतोष्य अनयित्वा। स्वयमपि प्रत्यनंदत् तस्मान् तुष्टो भूदित्यर्थः १२ द्रव्यसंविभागक्रममाह। संविभज्येति। विप्रादीनुद्दिश्य स्रगादिभिः स्रक्तीया द्वितीयार्थे। प्रायुंक्त स्वयं चाप्युपचकार १३ तावत्सदा १४ ५ स्त्रीणां मनः १६ ॥ ॥

यत्र विष्टानां यत्र सभायामुपविष्टानां अशनपानादिषड्ऊर्मयो न संतिन बाधंते ७ नृसिंहैः पुरुषश्रेष्ठैः १८ नानाविधैर्हास्यैर्हसनविषयैः रसैः रागजनकवचनैः १९ नटादयो नरदत्ताः स्तुताः पोजगुः २० गानानंतरं कः प्रसंग इत्यत्राह। तत्रस्थाइति। छागतिनिवृत्ति वाजिना शापित्व मुप

सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः। प्राविशद्यन्निविष्टानां न संत्यंग षडूर्मयः १७ तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोवभासयन्। वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुराजो दिवि तारकागणैः १८ तत्रोपमंत्रिणो राजन्नानाहास्यरसैर्विभुं। उपतस्थुर्नटाचार्या नर्तक्यस्तांडवैः सह १९ मृदंगवीणामुरजवेणुतालदरस्वनैः। ननृतुर्जगुस्तुष्टुवुश्च सूतमागधवंदिनः २० तत्रस्याहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः। पूर्वेषां पुण्ययशसां राज्ञां चाकथयन् कथाः २१ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः। विज्ञापितो भगवते प्रतीहारैः प्रवेशितः २२ स नमस्कृत्य कृष्णाय परेशाय कृतांजलिः। राज्ञामावेदयद्दुःखं जरासंधोपरोधजं २३ ये तु दिग्विजये तस्य सन्नतिं न ययुर्नृपाः। प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे २४ राजान ऊचुः कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभंजन। वयं त्वां शरणं यामो भवभीताः पृथग्धियः २५ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे। यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै २६ ॥ ॥

ति षड्ऊर्मयो वा सूच्यते। अत्र तपोः कोविवक्ष्यत इत्यत उक्तं। आसीनाइति २१ तत्र तस्यामवस्थायां २२ जरासंधेन कृतोपरोधो निरोधः तस्माज्जातं २३ गिरिव्रजे नगरे २४ पृथग्धियः यथार्थज्ञानशून्याः २५ अयथार्थज्ञानी किं करोति किं वा तस्य फलमित्यत आह। लोक इति उक्तार्थमिं २६ ॥

भगवान्नत्रकिमर्थमवतीर्णइतितत्राह। कालइति। चशब्दएवार्थेस्मत्पक्षयेकालस्तंरक्षणायखलानांदुष्टानांनिग्रहाय। इदंजगतअस्मिन्नरक्षणा
तिकलयाऽवतीर्णोभगवानितिकिंवर्ण्यते एतद्वयंविनान्यत्कार्यंकिंनकिमपि। कुतःकालः ततत्काले तत्तत्कार्यसाधनसमर्थत्वात्। कःखलः
कोवा सत्रितिविशिनष्टि। कश्चिदितिईईशकश्चित्तन्नत्वदीयंनिदेशमतियातिअतिक्रामतिसखलः किंसुकृतमृच्छति। किंचित्त्वदीयंनि
देशमतियातिलंघयति। सत्रसन्नकिंसुकृतमृच्छतीतिवयंनविद्मः। एकःसुखस्वेष्टं दकलोकंएकःसुखकरंनाछतीतिभवाखेत्नीतिवा
कार्थः। अतिस्याद्दधिकार्थोक्तोप्रशंसायामतिक्रमइति २७ स्वर्गादिसुखस्यनिर्विषयत्वेनराज्यसुखात्परंनकिमपीतिकेचांचित्मबा

कालोभवानिजगदिदंकलयावतीर्णःसद्रक्षणायखलनिग्रहणायचान्यत्। कश्चित्त्वदीयमतियातिनिदेशमीशकिंवाजनःस्वकृ
तमृच्छतितन्नविद्मः २७ सम्पादितंत्वपसुखंपरतंत्रमीशशश्वद्भयेनमृतकेनधुरंवहामः। हित्वायदात्मनिस्वुखेनदनीहल
भ्यंक्लिश्यामहेविकृपणास्तवमायपेति २८ तन्नोभवान्प्रणतशोकहरांघ्रियुग्मोरुद्धान्विमुंचमगधाधिपकर्मपाशात्। योभ्रु
जोसुतमतंगजवीर्यमेकोबिभ्रद्रुरोधभवनेमृगराडिवावीः २९ ॥ ॥

इसचाहाहासंपादितमिति। सम्पादितंसुखमवतच्छणिकंतदपिनस्वाधीनमित्याह। परतंत्रमिति। तत्रतन्नित्यमित्याशयश्चेन्मरणभयोपेतेन
मृतकेनशवकल्पेनशरीरेणराज्यधुरंवहामइत्यस्मान्यत्किंसुखमस्तीतितदितहानोवहाथास्मत्क्लेशस्यादितितत्राह। हित्वेति।
यदनीहलभ्यंनिरीहलितप्राप्तेः साध्यमात्मनिसुखंतद्धित्वात्कृपणाःवयंक्लिश्यामहे। एवंविधंज्ञानमस्तिचेत्किमितिक्लेशइत्यतउक्तं। त
वेति २८ किमिदानींमावश्यकंतद्वदकिंवकृतिहातुवादेनेतितत्राह। तन्नइति। विमुंचवियोजयाभ्रुसुतमतंगजवीर्यंभुजसुतगजपराक्र
मविभ्रत २९

उदारंतत्रतंवक्तंसैन्यंयस्यसउदारचक्रः। आसुजआक्षेपतत्तस्यप्रतिक्रियां ३० ५ अग्रयत्रपाणांलोकानामकुतोभयमपिच्छिन्नकृतोपिभयंना
स्तिहिनोकल्कशालाकृपालजिह्वासपायपंटनोभवतोमहात्रणतोभवतीत्याहनान्विति ३६ पल्लिवन्तपर्यटतोत्तेनमयाकिंप्रयोजनमत्राह
नहीति। ईश्वरःकर्तायेषांतेतथातेभ्यअथतस्मात् ३७ मायामाहात्म्यानिमायिनःनित्याव्याहतमाहात्म्यस्यदारुभिश्चक्रेरुचवक्रेरुरइवतवे

योवेत्वयाद्विनवकृत्वउदात्तचक्रोभमोत्रक्षेखलुभवंतमनंतवीर्यं। जित्वान्नलोकनिरतंसकृदूढदर्पोयुष्मत्प्रजाक्षिपतिचाभ्रुचतद्विधेहि ३०
इतिमागधरुद्धाभवद्दर्शनकांक्षिणः। प्रपन्नाःपादमूलंतेदीनानांशंविधीयतां ३१ श्रीशुकउवाच राजदूतेब्रुवत्येवंदेवर्षिःपरम
द्युतिः। बिभ्रत्पिंगजटाभारंप्रादुरासीद्यथारविः ३२ गायन्गिरामधुरयाप्रियकर्माणिजन्मचाशववलघसंयाश्चलोकान्निरमयन्नृश्रं
३३ तंदृष्ट्वाभगवान्कृष्णःसर्वलोकेश्वरेश्वरः। ववंदउत्थितःशीर्ष्णासमस्यःसानुगोमुदा ३४ सभाजयित्वाविधिवत्कृतासनपरिग्रहं।
वभाषेसूनृतैर्वाक्यैःश्रद्धयातर्पयन्मुनिं ३५ अपिस्विदद्यलोकानांत्रयाणामकुतोभयं। ननुभूयान्भगवतोलोकान्पर्यटतोगुणः ३६
नहितेविदितंकिंचिल्लोकेष्वीश्वरकर्तृषु। अथपृच्छामहेयुष्मान्पांडवानांचिकीर्षितं ३७ नारदउवाच दृष्टामयातेबहुशोदुरत्य
यामायाविभोविश्वसृजश्चमायिनः। भूतेषुभूमंश्चरतःस्वशक्तिभिर्वह्नेरिवछन्नरुचोरुचोऽद्भुताः ३८ नतेविदितंकोईतिसाधुवेदितुंस्व
मायपेदंसृजतोनियच्छतः। योविद्ययानात्मतयावभीयतेतस्मैनमस्तेस्वविलक्षणात्मने ३९ ॥ ॥

रुचोप्यद्भुताअचिंत्याः ३८ वह्नेरुचोमथनादिनाव्यज्यंतेनतथातवरुचइतिभावेनाह। नवेति। कुतोनिर्वेदनमितितत्राह। यइति। योभवा
नविद्ययाज्ञानेनानात्मतयाअस्त्यापितयावसीयतेनिश्चीयतेशरीरिणितितशेषः। इतियद्दृतोवेदनंदुःशकमित्यर्थः। नहीतिस्तत्वंकिंनेत्याह
चेति। स्वतोविलक्षणस्वरूपाय। तस्मात्स्वामित्वमेवसत्यमितितज्ञानमेवकारणमित्यर्थः। स्वरूपतोविलक्षणस्वामिनेकदाप्यनुपदृत
स्वामिनइत्यर्थइतिवा ३९

द·उ· १९

अज्ञानं मां कदापि न स्पृशेत् प्रत्युत ज्ञानमेव नित्यं प्रज्वलितं भूयादिति प्रार्थयते जीवस्येति। अज्ञानतः संसरतो जीवस्यानर्थवहाच्छ
रीरतो विमोक्षणं न जायत इति यत्तस्मादेतद्देहहानाय लीलावतारैः स्वयशःप्रदीपकं ज्ञानं प्रज्वालये स्वं तदर्थमहं शरणं प्रपद्य इत्यन्व
यः। अनेन लीलावतारविषयाज्ञानं दूरीकृत्य तत्वज्ञानमेव विकसितं कुर्वित्युक्तं भवति ४० यतस्त्वत्प्रसादादस्मदादेर्विज्ञानं तत्र किंचिदपि

जीवस्य यत्संसरतो विमोक्षणं न जायते नर्थवहाच्छरीरतः। लीलावतारैः स्वयशः प्रदीपकं प्रज्वालये त्वं तदहं प्रपद्ये
४० अथाप्याज्ञापये ब्रह्मन्नरदेवविडंबनं। राज्ञः पैतृष्वसेयस्य भक्तस्य च चिकीर्षितं ४१ यक्ष्यति त्वां मखेंद्रेण राज
सूयेन पांडवः। नृपतिः पारमेष्ठ्येन तद्भवाननुमोदतां ४२ तस्मिन्देवक्रतुवरे भवंतं वै सुरादयः। दिदृक्षवः समेष्यंति रा
जानश्च यशस्विनः ४३ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेंत्यावसायिनः। तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ४४

वित्ताप्यं न पश्यामि अथापि तथापि अशेषपुरुषार्थप्राप्तेर्भगवद्भक्तेः मुख्यहेतुत्वेपि नरदेवानां विडंबनं यत्तत्करणं ४१ पार
मेष्ठ्येन उत्तमकल्पेन ब्रह्मपदप्राप्तिहेतुना वा ४२ ३ अंत्यावसायिनः अंत्यजातयोपि। ईक्षादर्शनमभिमर्शनं स्पर्शनादिलक्ष
णं येषां इतीक्षाभिमर्शिनः ४४ ॥ ॥

राम
१९

उक्तमेव स्फोटयति यस्येति। हे भुवनमंगल यशः मंगलकीर्त्तनं। यस्य तवाथ कल्याणमत एवामलं निर्दोषं यशः दिग्भुवनानि तनुमिततो
यशसो विष्णुपुनानत्वं कथमित्यत उक्तं। दिवीत्यादि दिवंतांतरदीपवतस्त्रस्य एष्याविक कथमित्यत उक्तं। दिशां विनानामिति। दिशामंते पु
विशेषेण तानो विस्तारो यस्य तत्तथा विनचोरवदित्याह। प्रथितमिति श्रुत्यजन्म प्रभृति श्रीमत्पादलक्षणं स्वदंगं तात तव पादरजो वज्रोमि
र्मंदाकिनी च। विश्वं पुनाति। अतस्तव माहात्म्यं किं वक्ष्यामी त्वतो नमोनम इत्युपरमासीति वाक्यार्थः ४५ इति दशमे अष्टसप्ततितमो
ध्यायः एकांतभक्तानां भक्त्यतिशयजननाय हरेर्बंधुकृत्याचरणं लक्षणमाज्ञाम्यं कथयति। तत्राद्ये कृष्णकरालक्ष्यचिंतनतत्कार्य

यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानं। मंदाकिनी च तव पादरजो वह्नोर्मिः श्रीमत्पदास्पद गा
तात्पुनाति विश्वं ४५ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टसप्ततितमोध्यायः श्रीशुक उवाच इत्युदीरितमा
कर्ण्य देवर्षेरुद्धवोब्रवीत्। सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः १ उद्धव उवाच यदुक्तमृषिणा देव साचिव्यं यक्ष्यत
स्त्वया। कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणां २ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो। अतो जरासुतवधे उभयार्थो म
तो मम ३ अस्माकं च महाननर्थो ह्येतेनैव भविष्यति। यशश्च तव गोविंद राज्ञो बंधाद्विमुच्यतः ४ ॥ ॥

विशेष उद्धवः श्रीमंतीतिवाक्याद्धुनीति १ तद्भवाननुमोदतामिति देवर्षिणा यदुक्तं तस्यायमभिप्रायः। हे देव त्वया यक्ष्यतः यागं करिष्यतः
पैतृष्वसेयस्य युधिष्ठिरस्य साचिव्यं साहाय्यं कार्यं कर्तव्यमिति। किंच शरणैषिणां राज्ञां रक्षा च कार्या २ कार्यद्वयसाधनोपायं वक्ति य
ष्टव्यमिति। तेन राज्ञा राजसूयेन यज्ञेन यष्टव्यं तच्च दिग्विजयादिनैव पागमात्रेण तत्रापीत्थं कृतेन भाव्यमित्याह। दिक्चक्रेति। दिक्चक्रं दलं जितवता
तत्रापि मत्वा जरासंधः करं न दास्यतीति यद्यतो जरासुतवध उभयेषामर्थः प्रयोजनं ३ए युधिष्ठिरकार्यसिद्धवत्कृत्वा स्वकार्यमपि
अस्माकमिति एतेन जरासंधवधेन विमुंचतः विमोचयतः ४ ॥ ॥

दुर्बलैर्दुर्विमन्नोक्षः बालिनां सुविग्रह इत्यत उक्तं। बालिनामिति। तत् हीदं दुःखसाध्यं नेत्याह। भीमसेनमिति ५ द्वैरथे द्वंद्वयुद्धे तत्त्वोपायमा
ह। ब्रह्मण्य इति ६ नीत्वा श्चैवं प्रष्ट इत्यत्र को नाम न लोभमयः सपीडइत्यज्ञ इ रेतेन भीमो मोक्ष को दर इति। इत्यननिश्चये को हेतुरित्यत उक्तं त
वेति। त्वया मह्यं गंतव्यं तदृष्टमित्यर्थः ७ तत्कुत इति तत्राह। निमित्तमात्रमिति कालरूपत्वात्ख्यातरूपं संज्ञा रूपमस्याः हीति कालाख्यारूपीणा
स्य ८ हेतुस्तत्र वेदं कर्म लोकक्षेमकरमिति भावेनाह। गायंतीति राज्ञां देव्यः महिष्यः च शब्दात्तदेव्यः स्व गृहेषु तेतव इदं विशदं कर्म गायंति।
इदमिति किमत्राह। स्वशत्र्विति। आत्मनः स्वस्याभिनो निरोधात् मोक्षणं कथं गायंतीत्यतो वस्तु स्रोपमामाह। गोप्य इति। च शब्दीय थावच मः

सर्वे वै विषहो राजन्नागायुतसमो बले। बलिना मदिधान्ये यां भीमं समबलं विना ५ द्वैरथे स तु जेतव्यो न शतात्ताक्षौहिणीयुतः। ब्रह्मण्यो भ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित ६ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः। हनिष्यति न संदेहो द्वैरथे तव संनिधौ ७
निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः। हिरण्यगर्भः शर्वश्च कालाख्यारूपिणस्तव ८ गायंति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च। गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च ९ जरासंधवधः
कृष्ण भूर्यर्थायोपकल्पते। प्रायः कालविपाकेन तव चाभिमतः क्रतुः १०

गोप्यः यथा कुंजरपतेः गजेंद्रस्य नक्राद्विमोक्षणं। नक्राख्य वधं च। यद्वा कुवलयापीडस्मात्म विमोक्षणं शरीरवियोगलक्षणं मरणं
चात्मीयारिष्टश्च शत्रुवधं च जनकात्मजायाः सीतायाः रावणवंधाद्विमोक्षणं रावणाख्य शत्रुवधं च। मुनयो वाल्मीकादयः। वयं च तथा
पित्रोः देवकीवसुदेवयोः कंसविहितशृंखलायाः विमोक्षणं। कंसाख्य शत्रुवधं गायाम स्वस्थेत्यर्थः। देव्यो देवस्त्रियो गृहेषु विमानेषु
स्थित्वा मोक्षणमित्यादि वा ९ किं च कुतो को नाम यं जरासंधवधो नेकप्रयोजनो येन इत्याह। जरासंधेति। भूभारहरणार्थं तेना
जनीर्णत्वात्तत्र कालांतरे दुर्योधनादिभारावरोपणहेतुत्वेनाभिमतः क्रतुरित्याह। प्राय इति १० ॥ ॥

सर्वतोभद्रं सर्वप्रकारेण भद्रं ११ १२ ततः किमभूदिति तत्राह। ततइति ककुभः दिशः संघृष्ट्या संघोषयंत्या १४ शिबयाश्वाच्युतं पतिं अ
नुययुः वस्त्रैः सुसंवृताः। असिचर्मपाणिभिः नृभिः परिवृताः १५ नरोष्ट्रादिभिः परिवृताः परिजनयुतवारयोषित्श्च। पटकुटि
यः वस्त्रनिर्मितमंदिराणि। पटकुटिकंबलांबराणि आदिर्येषां ते तथा। ते च उपस्कराः परिकरा येषां ते तथा। अधियुज्य संयुज्य आरोप्य वा १६

श्रीशुक उवाच

इत्युद्धववचो राजन्सर्वतोभद्रमच्युतः। देवर्षिर्यदुवृद्धाश्च रामश्च प्रत्यपूजयत् ११ अथादिशत्प्रयाणाय भगवान्देवकीसुतः। भृत्यान्दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः ॥१२॥ स निर्गम्यावरोधान्स्वान्ससुतान्सपरिच्छदान्। संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहा १३ सूतोपनीतं स्वरथमारुहद्गरुडध्वजं। ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया। मृदंगभेर्यानकशंखगोमुखैः संघुष्टया वै ककुभो निराक्रमत १४ शिबयाश्वकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनु सुव्रता ययुः। वरांबराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः १५ नरोष्ट्रगोमहिषखराश्वतर्यनः करेणुभिः परिजनवारयोषितः। स्वलंकृताः पटकुटिकंबलांबराद्युपस्करा ययुरधियुज्य सर्वशः १६ बलं बृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः। दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः १७ अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शननिर्वृतेंद्रियः १८ राजदूतमुवाचेदं भगवान्प्रेमया गिरा। मा भैष्ट दूत भद्रं वो घातयिष्यामि मागधं १९ ॥ ॥

रवेरंशुभिः दिवा दिनं यथा भाति हृष्टत्वं जपराद्देसदाहरणाभिरंक्षुभिततिमिंगिलोर्मिभिः एर्णवो यथेति नरोष्ट्रादेर्निदर्शनं १७ हृदि व्य
वसितं निश्चितं निशम्य आगात् १८ प्रेमस्नेहं यातीति प्रेमया सोमपा शब्दवद्रूपं नेयं १९ ॥ ॥

द॰ उ॰

२१ विनशनं कुरुक्षेत्रं। आकरं रत्नाद्युत्पत्तिस्थानं २२ दृषद्वतीं च नदीं २३ दृश्याश्रीरालयाशुः तयोरालयं श्रीधराश्रयमित्यर्थः। विस्मृतः लोके विभ्रमानः विविधभ्रमो येन सतथा २७ प्रेमजलेन आनंदाश्रुजलेनाकुलानि इंद्रिये यस्य सतथा २८ २९ उपसमीपे मेत्यमं

८१

इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान्। तेपि संदर्शनं शौरेः प्रत्यैक्षन्मुमुक्षवः २१ आनर्त्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः। नदीर्गिरीनतीयाय पुरग्रामव्रजाकरान् २२ ततो दृषद्वतीं तीर्त्वा मुकुंदोथ सरस्वतीं। पांचालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् २३ तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणां। अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः २४ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा। अभ्ययात्स हृषीकेशं प्राणाः प्राणमिवादृतः २५ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पांडवः। चिराद्दृष्टं प्रियतमं सस्वजेथ पुनः पुनः २६ दोर्भ्यां परिष्वज्य रमामलालयं मुकुंदगात्रं नृपतिर्हताशुभः। लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः २७ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजलाकुलेंद्रियः। यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेच्युतं २८ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः। ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः २९ मानिनो मानयामास कुरुसृंजयकैकयान्। सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः ३० मृदंगशंखपटहवीणापणवगोमुखैः। ब्राह्मणाश्चारविंदाक्षं तुष्टुवुर्ननृतुर्जगुः ३१ एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः। संस्तूयमानो भगवान्विवेशालंकृतं पुरं ३२ संसिक्तवर्त्म करिणां मदगंधतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुंभैः। मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानं ३३ ॥ ॥

त्रणशीलाः ३० पर्यस्तः परिवृतः ३२ चंदनांबुसंसिक्तवर्त्म कुरुराजधाम ददर्शेत्यन्वयः ३३ ॥ ॥

राम

८१

प्रतिसद्म ३४ ५ उत्स्मितवीक्षितेन सस्मितनिरीक्षणेन ३६ उडुपसहाः उडुपेन चंद्रेण सहिताः ताराः अमूभिः किं शुभमकारि ३७ श्रेणीमुख्याः

उद्दीप्तदीपबलिभिः प्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकं। मूर्द्धन्यहेमकलशै रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधाम ३४ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः। सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ३५ तस्मिन्सुसंकुल इभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः। नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मितवीक्षितेन ३६ ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथोडुपसहाः किमकार्यमूभिः। यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ३७ तत्र तत्रोपसंगम्य पौरा मंगलपाणयः। चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ३८ अंतःपुरजनैः प्रीत्या मुकुंदः फुल्ललोचनैः। ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ३९ पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरं। प्रीतात्मोत्थाय पर्यंकात्सस्नुषा परिषस्वजे ४० गोविंदं गृहमानीय देवदेवेशमादृतः। पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ४१ पितृस्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेभिवादनं। स्वयं च कृष्णया राजन्भगिन्या चाभिवादितः ४२ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीः स्म सर्वशः। आनर्च रुक्मिणीं सत्यां भद्रां जांबवतीं तथा ४३ कालिंदीं मित्रविंदां च शैब्यां नाग्नजितीं सतीं। अन्याश्चाभ्यागता यास्तु वासःस्रङ्मंडनादिभिः ४४ सुखं निवासयामास धर्मराजो जनार्दनं। ससैन्यं सानुगामात्यं सभार्यं च नवं नवं ४५ तर्पयित्वा खांडवेन वह्निं फाल्गुनसंयुतः। मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ४६ उवास कतिचिन्मासान्राज्ञः प्रियविकीर्षया। विहरन्रथमारुह्य फाल्गुनेन भटैर्वृतः ४७ इति श्रीभागवते महापुराणे दशमस्कंधे नवसप्ततितमोध्यायः ॥ ॥

नगरके रीप्रधानाः ३९ भ्रात्रेयं भ्रातुः पुत्रं ४० २ भगिन्या सुभद्रया च ४२ श्वश्र्वा पृथया ४३ ५ येन मयेन दिव्या सभा राज्ञ आहृता भगवदाज्ञया निर्मायदत्ता ४६ ७ दशमे एकोनशीतितमः ॥ ॥

द॰उ॰

८२

राजसूययज्ञार्थायपांडवानांदिग्जयोजरासंधवधश्चश्रीनारायणप्रसादाय्यत्नइतितन्माहात्म्यत्वेनप्रतिपादयत्यस्मिन्नध्यायेतत्रा
दौयुधिष्ठिरःआगतंश्रीकृष्णंसुविज्ञापयति।एकदेति १ आभाष्य अभिमुखीकृत्य एतेषां सर्वेषां श्रोत्रादीन्द्रियमपि जनकं इदं
वक्ष्यमाणंवचनमुवाच। कृत्यनेनकर्तव्यतां सूचयति २ पावनीः शुद्धिकरीः भवतः विभूतीः सन्निधानविशेषस्थानेंद्रादिदेवताः यष्टुकामः ३
तत्कार्यंभवदनुग्रहेनैवनतुःसाधनमित्याह। त्वत्पादुकेइति। अभद्रनशनेच शुभे विघ्नं सन्नशमर्थे परिचरंति नित्यं पूजयंति। व्यवहिताश्चेतिछंद
सि व्यवधानेऽपुपसर्गाणां क्रियायोगः सिद्धः। अयात्वस्य महतो महानीत्यादौ अनेन भागवतस्य वेदतुल्यत्वेनाध्येयत्वादौ तात्पर्यं दर्शयति। भ

श्रीशुक उवाच एकदातु सभामध्ये आस्थितो मुनिभिर्वृतः। ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्ठिरः १ आचार्यैः कुलवृद्धै
श्च ज्ञातिसंबंधिबांधवैः। सर्वेषामेव चैतेषामाभाष्येदमुवाच ह २ युधिष्ठिर उवाच क्रतुराजेन गोविंद राजसूयेन पावनीः।
यक्ष्ये विभूतिर्भवतस्तत्संपादय नः प्रभो ३ त्वत्पादुके अविरतं परि ये चरंति ध्यायंत्यभद्रनशने शुचयो गृणंति। विंदंति ये कमलना
भ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ४ तद्देवदेव भवतश्चरणारविंदसेवानुभावमिह पश्यतु लोक एषः। ये त्वां भजं
ति न भजंत्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृंजयानाम् ५ ॥ ॥

भवापवर्गं संसारत्यागं विंदंति। ननु तर्हि नानेनाभीष्टसिद्धिरिति तत्राह। आशासत इति। यदि ते सेवकाः आशासते आशिषः ऐहिकसिद्धीः काम
यंते। तर्हि ता अपि विंदंति। अन्ये अनुपासका नोभयं विंदतीति विशेषः ४ यतो भवच्चरणसेवाफलमनुभवसिद्धमतो लोकोपि जानातु प्रमा
णेनस्य माहात्म्यं दर्शयितुं करोमीत्याह। तदिति। अपि च अस्य त्वमपि भजदभजता पुंसां मध्ये विजयपलक्षणोत्कर्षं व्यवस्थापयेत्याह ये त्वा
मिति। निष्ठां उत्कर्षं व्यवस्थापयां नाशं वा ते तत्र यो रिति भावः। अनुभावः प्रभावेत्यादिति ५ ॥ ॥

राम

८२

सर्वसमस्य हरेर्वैषम्यं भजताभजतोरिति विप्रादिविपरिहरन्नित्येनेति। ब्रह्मणः पूर्णस्य सर्वात्मनः सर्वस्वामिनः ननु परापरेषां सख्याद्रणात्कीता
दिकृपामित्यत्राह। समदृश इति। यथावत्कादर्शिनः। स्वरूपसुखस्यानुभूतिरनुभवः पूर्णानंदोहमिति यस्य स तथा तस्य च अयमपि सुपरदुःख
भावहेतुः। नत्सुराणां दुःखोदय इत्यपविशेषः कस्मात्तत्राह। संसेवयेति। उदयती त्युदयः। अतो जगति विपर्ययो न विषमो नोद्दे। ६ ये

न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः। संसेवयासुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्य
योत्र ६ श्रीभगवानुवाच सम्यग्व्यवसितं राजन्भवता शत्रुकर्शन। कल्याणी येन ते कीर्तिर्लोकाननुभविष्यति ७ ऋषीणां
पितृदेवानां सुहृदामपि नः प्रभो। सर्वेषामेव भूतानामीप्सितः क्रतुराडयं ८ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे। संभृत्य सर्वसं
भारानाहरस्व महाक्रतुं ९ एते ते भ्रातरो राजंल्लोकपालांशसंभवाः। जितोस्म्यात्मवता तेहं दुर्जयो योऽकृतात्मभिः १० न कश्चिन्मत्प
रं लोके तेजसा यशसा श्रिया। विभूतिभिर्वाभिभवेद्देवोपि किमु पार्थिवः ११

मध्यवसितं तेन क्रतुराजेन अनुभविष्यति। सत्वयानुवर्तते ७ न केवलं तवाभीष्टोयमृष्यादीनां सर्वेषामपि हृदयंगम इत्याह। ऋषीणामिति।
८ तत्रेत्थं भावमाह। विजित्येति। सर्वसंभारान् संभृत्य संपाद्य आहरस्व कुरुष्व ९ सामर्थ्यं सर्वजयेऽशक्यो नेति भावेनाह। एत इति। लोकपालां
शैः संभवो येषां ते तथा। योहं अकृतात्मभिः अजितात्मभिः अजेयोस्मि। मत्प्रसादैः १० भवतो दुर्जयत्वेनाकिमस्माकमितित्वाह। नेति। मत्परं मद्भक्तं विभूतिभि
रुपकारसंपद्भिः ११ ॥ ॥

राम

विष्णो स्तेजसा प्रभावेन उपबृंहितान् परिपूरितान् ११ २ यक्ष्यते यष्टुकामाय १४ अथ दिग्विजये जरासंधो जितो मारितो वेति तत्प्रसंग नाक एवेति इति राज्ञोक्त्वा हरिणं कांपरिहर विचरन् दिग्विजय धान्यागे वत दुष्टोत्ष्ट्रं इति नाव प्रसक्त इति हृतं तत्र उनन मनु वरति। कृत्वेति। ननु दिशां अय दनंतरं तद्वधः किं नस्या द्यथा स्थितम न्यथा नूद्यते किमर्थमिति चेन्नानिर्णयं ग्रंथ विरोधात्। न नु पूर्वी परा भावे किं प्रमाणं किंच प्रयोजनमि तिचेदुच्यते। पूर्वाः कथाः परं श्रुः परा एवं तथैव चामोहनार्थी यद् दुष्टानां सर्वव्यत्यास इष्यत इत्यादिवाक्यं। किंच जरासंधं निहत्यैव पां

श्रीशुक उवाच निशाम्य भगवद्गीतं प्रसन्नमुखांबुजः। भ्रातॄन् दिग्विजयेयुंक्त विष्णुतेजोपबृंहितान् ११ सहदेवं दक्षिणस्यामादिशत् सहसृंजयैः। दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनं। प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः १३ ते विजित्य नृपान् वीरा आजह्रुर्दिग्भ्य ओजसा। अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते १४ श्रुत्वाजितं जरासंधं नृपतेर्ध्यायतो हरिः। आहोपायं तमेवाद्य उद्धवो यमुवाच ह १५ भीमसेनोर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः। जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः १६ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनं। ब्रह्मण्यं समयाचेरन् राजन्या ब्रह्मलिंगिनः १७ राजन्विध्यतिथीन् प्राप्तानर्थिनो दूरमागतान्। तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे १८ ॥

उवैक्ष्य दिशो जिता इत्यादिस्पष्टवचनं भागवत एव जरासंधमजितं श्रुत्वा तन्नृपः कथमिति ध्यायतो युधिष्ठिरस्य उद्धवो यमुपायमुवा च तमाह हरिरित्यन्वयः १५ ते इति सूचितमिति द्वासंस्पष्टयति। भीमसेन इत्यादिना। ब्रह्मलिंगधराः ब्राह्मणलक्षणानि विप्राणां उपले पद्म १६ आतिथ्यवेलायां आतिथ्यस्नानसमयो। आदित्ये दिनमध्यं गाहमान इत्यर्थः, १७ १८ ॥ ॥

राम
८३

दुर्मर्षं दुःसहं। परः शत्रुः परो रिपुरमात्मनो रिति १९ आचिनोति संचिनोति उपार्जितं करोति। वाच्यो निंद्यः २० अ[illegible]ध्रुवेण शरीरेण २१ श्रूयते किं श्रूयते एव इहीति योज्यं। इंद्रस्य श्रियं बलात् जिहीर्षता हर्तुकामेन विष्णुना ऐश्वर्याद् भ्रंशितस्य वार्यमाणोपि [illegible]गुणेति शेषः २४

किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः। किं न देयं वदान्यानां कः परः समदर्शिनां १९ योनित्येन शरीरे[illegible]सतां गेयं यशो ध्रु वं नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः २० हरिश्चंद्रो रंतिदेव उंछवृत्तिः शिविर्बलिः। व्याधः कपोतो ब[हवो] ह्यध्रुवेण ध्रुवं गताः २१ श्रीशुक उवाच स्वरैराकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि। राजन्यबंधून् विज्ञाय दृष्टपूर्वानचिंतयत् २२ राजन्यबंधवो ह्येते ब्रह्मलिंगानि बिभ्रति। ददानि भिक्षितं तेभ्य आत्मानमपि दुस्त्यजं २३ बलेर्नु श्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा। ऐश्वर्याद्भ्रंशितस्यापि विप्रव्याजेन विष्णुना २४ श्रियं जिहीर्षतेंद्रस्य विष्णवे द्विजरूपिणे। जानन्नपि महीं प्रादाद्वार्यमा[णोपि] दैत्यराट् २५ जीवता ब्राह्मणार्थाय को न्वर्थः क्षत्रबंधुना। देहेन पतमानेन नेहता विपुलं यशः २६ इत्युदारमतिः प्रा[illegible]कृष्णार्जुनवृकोदरान्। हे विप्रा व्रियतां कामो ददाम्यात्मशिरोपि वः २७ श्रीकृष्ण उवाच युद्धं नो देहि राजेंद्र द्वंद्वशो यदि मन्यसे। युद्धार्थिनो वयं प्रा[प्ता रा]जन्या नान्यकांक्षिणः २८ असौ वृकोदरः पार्थस्तस्य भ्राताऽर्जुनो ह्ययं। अनयोर्मातुलेयं मां कृष्णं जानीहि ते रिपुं २९ एवमावेदितो राजा जहा[सोच्चैः स्म मागधः] आह चामर्षितो मंदा युद्धं तर्हि ददामि वः ३० न त्वया भीरुणा योत्स्ये युधि विक्लवचेतसा। मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः

यत्क्षत्रबंधुः पतमानेन देहेन विपुलं यशो नेहतां ने हतेन[illegible]र्पति। तेन ब्राह्मणार्थाय जीवता क्षत्रबंधुना कोन्वर्थो भवति। न कोपीति विचिंत्य [illegible] द्वंद्वशः द्वंद्वयुद्धं २८ वीक्षां त्रीन् प्रतिस्पष्टयति दिशति। असाविति २९ ३० ३१ ॥ ॥

अतुल्यः नातिसत्त्वः न च शास्त्रपराक्रमः ३२ रंगिणोः रंगमतयोः। मंडलं वलनं गतिर्वा ३५ ६ अन्योन्ययोः परस्परं संगतयोः। सकटिपादकरोरु
जत्रु यथा तथा निपात्यमाने अर्कशाखे इव दीप्तमन्य्वोः प्रकाशितसंक्षिप्तमन्य्वोः ३७ अयःस्पर्शैः स्वमुष्टिभिः अपिष्टां विपेषतुः जघ्नतुरित्यर्थः। ग्रह

अयं तु वयसा तुल्यो नातिसत्त्वो न मे समः। अर्जुनो न भवेद्योद्धा भीमस्तुल्यबलो मम ३२ इत्युक्त्वा भीमसेनाय दत्त्वा स महतीं गदां। द्वितीयां
स्वयमादाय निर्जगाम पुराद्बहिः ३३ ततः सबलौ वीरौ संयुक्ताव् इतरेतरं जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ३४ मंडलानि विचि
त्राणि सव्यं दक्षिणमेव च। चरतोः शुशुभे युद्धं नटयोरिव रंगिणोः ३५ ततश्चटचटाशब्दो वज्रनिष्पेषसंनिभः। गदयोः क्षिप्तयो राजन् दंतयो
रिव दंतिनोः ३६ ते वै गदे भुजजवेन निपात्यमाने अन्योन्ययोः सकटिपादकरोरुजत्रू। चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतोर्द्विरदयो
रिव दीप्तमन्य्वोः ३७ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयःस्पर्शैरपिष्टां। शब्दस्तयोः प्रहरतोरिभयोरिवासीन्निर्घातव
ज्रपरुषस्तलताडनोत्थः ३८ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः। निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ३९ शत्रोर्जन्ममृती
विद्वान् जीवितं च जराकृतं। पार्थमाप्याययन्स्वेन तेजसाचिंतयद्धरिः ४० संचिंत्यारिवधोपायं भीमस्यामोघदर्शनः। दर्शयामास विट
पं पाटयन्निव संज्ञया ४१ तद्विज्ञाय महासत्त्वो भीमः प्रहरतां वरः। गृहीत्वा पादयोः शत्रुं पातयामास भूतले ४२ एकं पादं पदाक्रम्य
दोर्भ्यामन्यं प्रगृह्य सः। गुदतः पाटयामास शाखामिव मतंगजः ४३ ॥ ॥

तयोः प्रहरतोर्निर्घातवज्रवन्निष्ठुरः ३९ जरया पश्चात्कृतशरीरशकलसंधानात् तज्जन्म तद्विपरीतान्मरणं च जानन् ४० भीमस्य अरिवधो
पायं संज्ञया दर्शयामास। केयं संज्ञेत्याह। विटपमिति ४१ ४२ ४३ ॥ ॥

इति दशमे अशीतितमोऽध्यायः। जरासंधरोधाद्विमुक्ताः तत्र गतं भगवन्तं तत्र तानसाध्यं स्वरूपं दर्शितवान् तद्रूपासक्तानां भक्त्या
तिशयजननार्थं स्तुतमिति कृत्वा तन्माहात्म्यं कथयत्यस्मिन्नध्याये तत्राहोत्तरेणार्णोनिर्दिशति। अयुतेति। गिरिद्रोण्यां गिरिगुहायां ततो विनिर्गताः

एकपादोरुवृषणकटिपृष्ठस्तनांसके। एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ४३ हाहाकारो महानासीन्निहते मगधेश्वरे। पूज
यामासतुर्भीमं परिरभ्य जयाच्युतौ ४४ सहदेवं तत्तनयं भगवान्भूतभावनः। अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुः ४५ मोचया
मास राजन्यान् संरुद्धा मागधेन ये ४६ इति श्रीभागवते महापुराणे दशमस्कंधे जरासंधवधो नाम अशीतितमोऽध्यायः श्रीशुक
उवाच अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः। ते निर्गता गिरिद्रोण्यां मलिना मलवाससः १ क्षुत्क्षामाः शुष्कवदनाः
संरोधपरिकर्शिताः। ददृशुस्ते घनश्यामं पीतकौशेयवाससं २ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणं। चारुप्रसन्नवदनं स्फुरन्म
करकुंडलं ३ पद्महस्तं गदाशंखरथांगैरुपलक्षितं। किरीटहारकटककटिसूत्रांगदांचितं ४ भ्राजद्वरमणिग्रीवं निवीतं वनमा
लया। पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ५ जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः। प्रणेमुर्हतपाप्मानो मूर्द्धभिः पादयोर्हरेः ६
कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः। प्रशशंसुर्हृषीकेशं गीर्भिः प्रांजलयो नृपाः ७ राजान ऊचुः नमस्ते देवदेवेश प्रपन्नार्तिहरा
व्यय। प्रपन्नान्पाहि नः कृष्ण निर्विण्णान्घोरसंसृतेः ८ नैवं नाथानुसूयामो मागधं मधुसूदन। अनुग्रहो यद्भवतो राज्ञां राज्य
च्युतिर्विभो ९ राज्यैश्वर्यमदोन्नद्धो न श्रेयो विंदते नृपः। त्वन्मायामोहितोऽनित्या मन्यते संपदोऽचलाः १०

२४ निवीतं पर्यासितं ५ चेतसालिंगनार्थमीहंतः चेष्टमाना इव ६ ७ राज्यच्युतिः कथमनुग्रहो भूदित्यत आह। राज्येति। कुतो न विंदते
इति तत्राह। त्वन्मायया मोहिता इति। अचलाः क्षणिकाः संपदो नित्याः शाश्वतरूपा मन्यते यस्मात् १० ॥ ॥

एतमर्थं निदर्शयति। मृगतृष्णामिति। मृगतृष्णां मरुप्रदेशसंस्पृष्टदिवाकरकरनिकरं दृष्ट्वा उदकाशयं जलाधारं जलपूरमित्यर्थः। एवमयुक्ता
मनोयोगाकुशलाः अज्ञा वैकारिकीं विकारोपेतां अनित्यां मायां। तेऽयुक्ता महिमेत्यावहन्त इतिफलेर्महिमानं संपन्नत्वेन वस्तुप्रतिहतिराहितेति
त्यं वस्तुतेपश्यंति ११ अस्याः जगत्याः येवयं पुरः स्थितं मृत्युं त्वां अगणय्याधिष्ठिताः १२ ते च वयं कालेन श्रियो विचालिता अभूम तत्तस्माद्भवतोनु
कंपया चरणौ स्मरामहे १३ रुजो भुवा रुजोगुणोत्पन्नेन शश्वत्पतता देहेन राज्यं नोपासितव्यमिति स्पृहयामहे। प्रेत्य यत्क्रियाफलं स्वर्गादिकं

मृगतृष्णां यथा बाला मन्यंते उदकाशयं। एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ११ वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयास्या इत
रेतरस्पृधः। घ्नंतः प्रजाः स्वा अपि निर्घृणाः प्रभो मृत्युं पुरस्त्वामगणय्य दुर्मदाः १२ त एव कृष्णाद्य गभीररंहसा दुरंतवीर्येण विचालिताः श्रि
यः। कालेन तन्वा भवतोनुकंपया विनष्टदर्पाश्चरणौ स्मरामहे १३ अथो न राज्यं मृगतृष्णरूपितं देहेन शश्वत्पतता रुजोभुवा। उपासि
तव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनं १४ तन्नः समादिशोपायं येन ते चरणाब्जयोः। स्मृतिर्यथा न विरमेदपि संसरता
मिह १५ कृष्णाय वासुदेवाय हरये परमात्मने। प्रणतक्लेशनाशाय गोविंदाय नमोनमः १६ श्रीशुक उवाच संस्तूयमानो भग
वान् राजभिर्मुक्तबंधनैः। तानाह करुणस्तात शरण्यः श्लक्ष्णया गिरा १७ श्रीभगवानुवाच अद्य प्रभृति भूपाला मय्यात्मन्यखिले
श्वरे। सुदृढा जायते भक्तिर्बाढमाशंसितं तथा १८ दिष्ट्या व्यवसितं भूपा भवंत ऋतभाषिणः। श्रियैश्वर्यमदोन्नाहं पश्यतोन्मादनं नृणां
१९

तदपि न कामयामहे। कीदृशं कर्णरोचनं श्रवणसुखजनकमापातरमणीयमित्यर्थः १४ येनोपायेन १५ बाढमभिमतमाशंसितमाकां
क्षितं च जायते। बाढं त्वभिमते भृशं इति च १८ भवतां व्यवसितं दिष्ट्या मंगलं तत्र हेतुः। भवंत इति। ऋतभाषिणः ब्रह्मवादिनः यथार्थवादिनो वा
अनुभावयति। पश्य श्रियैश्वर्यमदानामुन्नाहमभिवृद्धिमुन्मादनं तु बुद्धिभ्रंशकरं पश्यत १९ ॥ ॥

कान्पश्याम इति तत्राह। हैहय इति। भ्रंशिता भ्रंशिताः २० शिक्षयति। संचिंतयतेति। उत्पाद्यं उत्पत्तियोग्यं अंतवत् नाशवत् २१ भवाभवौ मंगला
मंगले २२ आत्मारामत्वं विष्णोति मयीति। भोगैः स्रक्चंदनादिलक्षणैः धनैर्वा २६ ग्रहाः आदित्यादयः २७ प्रीणय्य प्रीतिं जनयित्वा

हैहयो नहुषो वेनो रावणो नरकोपरे। श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः २० भवंत एतद्विज्ञाय देहाद्युत्पाद्यमंतवत्। मां य
जंतोध्वरैर्युक्ताः प्रजा धर्मेण रक्षथ २१ संतन्वंतः प्रजातंतून् सुखं दुःखं भवाभवौ। प्राप्तं प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ २२ उदा
सीनाश्च देहादावात्मारामा धृतव्रताः। मय्यावेश्य मनः सम्यङ्मामंते ब्रह्म यास्यथ २३ इत्यादिश्य नृपान् कृष्णो भगवान् भुवनेश्वरः।
तेषां न्ययुंक्त पुरुषान् स्त्रियो मज्जनकर्मणि २४ सपर्यां कारयामास सहदेवेन भारत। नरदेवोचितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः २५ भो
जयित्वा वरान्नेन सुस्नातान् समलंकृतान्। भोगैश्च विविधैर्युक्तांस्तांबूलाद्यैर्नृपोचितैः २६ ते पूजिता मुकुंदेन राजानो मृष्टकुंडलाः। विरे
जुर्मोचिताः क्लेशात्प्रावृडंते यथा ग्रहाः २७ रथान् सदश्वानारोप्य मणिकांचनभूषितान्। प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान् प्रत्ययापयत् २८
त एवं मोचिताः कृच्छ्रात्कृष्णेन सुमहात्मना। ययुस्तमेव ध्यायंतः कृतानि च जगत्पतेः २९ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितं। यथा
न्वशासद्भगवांस्तथा चक्रुरतंद्रिताः ३० जरासंधं घातयित्वा भीमसेनेन केशवः। पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः ॥३१॥ ते ग
त्वा खांडवप्रस्थं शंखान् दध्मुर्जितारयः। हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहाः ३२ ॥ ॥

२८ कृतानि कार्याणि २९ प्रकृतिभ्यः विश्वस्तभृत्येभ्यः ३० खांडवप्रस्थमिदंप्रस्थं। दुर्हृदां शत्रूणां ३२ ॥ ॥ ॥

द॰उ॰

८६

शांतं मृतं। आप्तमनोरथोऽभूदिति शेषः ३३ ५ इति दशमे एकाशीतितमोऽध्यायः श्रोतृमनोहरं हृत्वा जनकं वीरवीर्यवर्द्धनं हरेः [illegible]न्निनिदर्शनं शिशुपालवधं निगदत्यस्मिन्नध्याये। तत्रादौ युधिष्ठिरो भगवंतं स्तुत्वा तदनुज्ञया राजसूयप्रारंभाणं वक्ति। एवमित्यादिना १ यस्य तव त्रिलोकगुरवः ब्रह्मादयः २ ईशमानिनां ईश्वरोऽहं महं भोगीत्याद्यभिमानवतां दीनानां मात्मतत्वज्ञानाभावात् कोष्ठगत्या कृपणानामनुशासनं दुर्मार्गप्रवृत्तिनिवृत्त्यागेन मन्मार्गवर्त्तनं ३ घेत्ता वतद्वहरेरनुशासनादिषिष्टमिः। स्वप्रयोजनोद्देशपूर्वकेत्यश

तच्छ्रुत्वा प्रीतमनस इंद्रप्रस्थनिवासिनः। मेनिरे मागधं शांतं राजा चाप्तमनोरथः ३३ अभिवाद्याथ राजानं भीमार्जुनजना र्दनाः। सर्वमाश्रावयांचक्रुरात्मना यदनुष्ठितं ३४ निशम्य धर्मराजस्तत्केशवेनानुकंपितं। आनंदाश्रुकलां मुंचन्प्रेम्णा नोवाच किंचन ३५ इति श्रीभागवते महापुराणे दशमस्कंधे एकाशीतितमोऽध्यायः श्रीशुक उवाच एवं युधिष्ठि रो राजा जरासंधवधं विभोः। कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् १ युधिष्ठिर उवाच ये स्युस्त्रिलोकगुरवः सर्वे लोकमहेश्वराः। वहंति दुर्लभं लब्ध्वा शिरसैवानुशासनं २ स भवानरविंदाक्षो दीनानामीशमानिनां। धत्तेऽनुशासनं भूमंस्तदत्यं तविडंबनं ३ न ह्येकस्याद्वितीयस्य ब्रह्मणः परमात्मनः। कर्मभिर्वर्द्धते तेजो ह्रसते च यथा रवेः ४ ॥ ॥

तार्थत्वप्रसंग इति तत्राह। अद्वितीयस्येति। अस्यापि परिच्छिन्नत्वे कथमिति मंदा नहीति। तेजः प्रभावलक्षणं जभाकर्मभिः शुभाशुभल क्षणैः। न कर्मणा वर्द्धते नो कनीयानिति श्रुतेः। एकस्यापि समाधिकसद्भावे तो किं नस्यादिति तत्राह। अद्वितीयस्येति। अस्यापि परिच्छि न्नत्वे कथमिति मंदाशंकां परिहरति। ब्रह्मण इति। वहिस्सथाम्ब्रं अंततः परिच्छिन्न इति तत्राह। परमात्मन इति। आत्मनो जीवात्परत्वेन पू र्णत्वेन मीयमानस्य परमात्मन इत्यर्थः। रवेः प्रभामंदोक्षत्वादि विशेषः कालोपाधिको न स्वाभाविक इति भवत्येवं निदर्शनं। इत्येतत्कृ वि शेषणसामर्थ्यात्स्तोपिनेत्यवगमयितव्यं ४

राम

८६

हरेरहमिति यत्वं किं पुनर्न्यायेनाह। नचेति। हे अजित माधव लक्ष्मीपते। ते तव भक्तानां पुत्रादौ ममेति देहादौ अहमिति देहांतरे त्वमिति तदीय त्वेनादौ तवेति नानाधीर्नास्ति। सर्वत्र ईश्वरसत्तां पश्यतामित्यस्मिन्नर्थे वर्त्तते। कीदृशी नानाधीः यथा पशूनां संस्काररहितानां बुद्धिर्वै कृता विविधप्रकारा घार्थे तद्धितः ५ यात्तिये यज्ञकरणयोग्ये युक्तान् कल्पोक्तन्यायवेदिनः ६ ९ उपहूतास्तु यथा तथान्येऽपि अनुप

न वै तेऽजित भक्तानां ममाहमिति माधव। त्वं तवेति च नानाधीः पशूनामिव वैकृता ५ इत्युक्त्वा यज्ञिये काले वव्रे युक्तान्स ऋत्वि जः। कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्रह्मवादिनः ६ द्वैपायनो भरद्वाजः सुमंतुर्गोतमोऽसितः। वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ७ विश्वामित्रो वामदेवः सुमंतुर्जैमिनिः क्रतुः। पैलः पराशरो गर्गो वैशंपायन एव च॥८॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः। वीतिहोत्रो मधुच्छंदो वीरसेनोऽकृतव्रणः ९ उपहूतास्तथा चान्ये द्रोणभीष्मकृपादयः। धृतराष्ट्रः सहसु तो विदुरश्च महामतिः १० ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यत्र दिदृक्षवः। तत्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ११ ततस्ते देव यजनं ब्राह्मणाः स्वर्णलांगलैः। कृष्ट्वा तत्र यथाम्नायं दीक्षयां चक्रिरे नृपं १२ हैमाः किलोपकरणा वरुणस्य यथा पुरा। इंद्रादयो लोकपाला विरिंचिभवसंयुताः १३ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः। मुनयो यक्षरक्षांसि खगकिन्नरचारणाः १४ रा जानश्च समाहूता राजपत्न्यश्च सर्वशः। राजसूयं समीयुः स्म राज्ञः पांडुसुतस्य वै १५ मेनिरे कृष्णभक्तस्य सूपपन्नमविस्मिताः। अ याजयन्महाराजं याजका देववर्चसः १६

हूता अपि तत्राजग्मुः। तत्र द्रोणादयोऽप्युपहूताः १० ११ यत्र यज्ञकरणमभिष्टुतमंतर्देवयजनं स्वर्णलांगलैः सुवर्णलांगलैः सुवर्ण मयहलैः। कृष्ट्वा विलिख्य संशोध्य शालां कृत्वा तत्र यथाम्नायं पदीक्षायां चक्रुरित्यन्वयः १२ वरुणस्य यज्ञे वरुणं प्रत्यूचे समाहृत्य तात्पर्यमस्मिन्कृत्यं करोति। इंद्रादय इति १३ १४ १५ १६ ॥

द॰ उ॰

८७

प्रचेतसं वरुणं । सुत्येऽहनि सोमाभिषवसंबन्धिन्यहनि पशुसंज्ञपनदिवसे वा १७ अग्र्यार्हणार्हं अग्रपूजायोग्यं विमृशन्तः विचारयन्तः १८ अनैकान्त्यात् नानागुणित्वात् सर्वेषां गुणानामेकत्वानियमाद्वा अच्युतः गुणतः स्वरूपतो वा न च्युतः । श्रैष्ठ्यं गुणश्रैष्ठ्ययोग्याग्रपूजां गुणाः श्रुताः सुविरुद्धाश्च देवेष्वतीत्यादिश्रुतिवाक्यैर्हि नाम सूचयति । सात्वताः तंत्रप्रणेतारः तेषां पतिः स्वामी गतिश्च । इदं वाग्रपूजायोग्यत्वे लिंगं १९ इन्द्रो वै देवानां श्रेष्ठः । अग्निर्वै देवानां मुखमित्यादेः इन्द्रादिषु सत्त्वस्य कथं संभवो भवतीति तत्राह । एष वा इति ।

राजसूयेन विधिवत्प्रचेतसमिवामराः । सुत्येऽहन्यवनीपालो याजकान्सदसस्पतीन् १७ अपूजयन्महाभागान्यथावत्सुसमाहितः । सदस्याग्र्यार्हणार्हं वै विमृशन्तः सभासदः १८ नाध्यगच्छन्ननैकान्त्यात्सहदेवस्तदाब्रवीत् । अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान्सात्वतां पतिः १९ एष वै देवताः सर्वा देशकालधनादयः । यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः २० अग्निराहुतयो मंत्राः सांख्यं योगश्च यत्परः । एक एवाद्वितीयोऽसावैतदात्म्यमिदं जगत् २१ आत्मनात्माश्रयः सभ्याः सृजत्यवति हन्त्यजः । विविधानीह कर्माणि जनयन्यदवेक्षया २२ ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणं । तस्मात्कृष्णाय महते दीयतां परमार्हणम् २३

यो देवानामिति श्रुतिं वा दृत्यनेन गृह्णाति । अचेतनमपि तदधीनसत्ताकमित्याह । देशेति । किं बहुना सर्वमपि तदात्मकमित्याह । यदात्मकमिति । तात्पर्यालिंगेन स्फुटं करोति । क्रतव इति २० सांख्यं यथार्थज्ञानं । योगः कर्मलक्षणः यत्परो विषयो यस्य स तथा । उपसंहरति । एक इति । एतदात्माधीनं २१ हे सभ्याः । एतदात्म्याधिकरणमाप्नोति । उक्तार्थसमर्थनं सृजतीत्यादि २२ फलहेतुत्वाच्चाग्रपूजायोग्यत्वमित्याह । यदयमिति २३ ॥

राम

८७

एतदत्र सर्वत्र संप्रयातीति भावेनाह । एवं चेति । सर्वभूतस्य पश्चात्तं च न पश्यतीत्यनन्यदर्शी तस्मै देयं । सहदेवस्तूष्णीमभूदिति सहदेवो देवव्रतोऽपि भ्राता भारते तद्वचनादग्रपूजादानाध्वरे २५ सत्तमाः सतां श्रेष्ठाः २६ ३१ ईशः कालो दुरत्ययः इति श्रुतिः सत्यवती अबाधितार्था । तदुपपादयति ।

एवं चेत्सर्वभूतानामात्मनश्चार्हणं भवेत् । सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने २४ देयं शान्ताय पूर्णाय दत्तस्यानन्त्यमिच्छता २५ शुक उवाच इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानुभाववित् । तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः २६ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदां । समर्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः २७ तत्पादाववनिज्यापः शिरसा लोकपावनीः । सभार्यः सानुजामात्यः सकुटुंबो वहन्मुदा २८ वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः । अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुं २९ इत्थं सभाजितं वीक्ष्य सर्वे प्रांजलयो जनाः । नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ३० इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः । उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्यभीतः ३१ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः । वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ३२ यूयं पात्रविदां श्रेष्ठा मा मंध्वं बालभाषितं । सदसस्पतयः सर्वे कृष्णो यत्संमतोऽर्हणे ३३ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् । परमर्षीन्ब्रह्मनिष्ठाँल्लोकपालैश्च पूजितान् ३४ सदसस्पतीनतिक्रम्य गोपालः कुलपांसनः । यथा काकः पुरोडाशं सपर्यां कथमर्हति ३५ वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः । स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति ३६

वृद्धानामिति ३२ मा मंध्वं हे सर्वे सदसस्पतयः । किं बालभाषितं तदाह । कृष्ण इति ३३ ३४ अतिक्रम्य । तिकृष्णस्य कुलकर्मणी एते इत्याह । गोप इति ३५ एतदेव विवृणोति । वर्णेति ३६ ॥ ॥

यदोर्वंशे जातत्वात् कथं कुलाभाव इति तत्राह यया तिनेति ३७ अब्रह्मवर्चसं गायत्रीजपसंबंधतेजोरहिता ब्रह्मवेदस्तं संबंधवचो ब्रह्मा
वर्तदेशाद्यास्समुद्रमित्यादिना दाशसंग्रममापादयति ३८ शिवारुतं शृगालशब्दितं ३९ ४० कुतो निर्गमनमिति तत्राह निंदामिति
४१ २ स्ववचनं सत्यं कर्तुं तावत्ततः पूर्वमेव क्षुरांतचक्रेण क्षुरधार क्षुरशनिना रिपोः शिरो जहारेत्यन्वयः ४४ ५ ज्योतिर्जीवचैतन्यात्मकं । खा

ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतं वृथापानरतं शश्वत्सपर्यां कथमर्हति ३७ ब्रह्मर्षिसेवितान् देशान् हित्वैते ऽब्रह्मवर्चसः
समुद्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः ३८ एवमादीन्यभद्राणि बभाषे नष्टमंगलः । नोवाच किंचिद्भगवान् यथा सिंहः शिवारुतं ३९
भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः । कर्णौ पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा ४० निंदां भगवतः शृण्वंस्तत्परस्य जनस्य च ।
ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः ४१ ततः पांडुसुताः क्रुद्धा मत्स्यकैकेयसृंजयाः । उदायुधाः समुत्तस्थुः शिशुपालजिघां
सवः ४२ ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी । भर्त्सयन् कृष्णपक्षीयान् राज्ञः सदसि भारत ४३ तावदुत्थाय भगवान् स्वान्निवार्य स्व
यं रुषा । शिरः क्षुरांतचक्रेण जहारापततो रिपोः ४४ शब्दः कोलाहलोथासीच्छिशुपाले हते महान् । तस्यानुयायिनो भूपा दुद्रुवुर्जी
वितैषिणः ४५ चैद्यदेहस्थितं ज्योतिर्वासुदेवमुपाविशत् । पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ४६ जन्मत्रयानुगुणि
तवैरसंरब्धया धिया । ध्यायंस्तन्मयतां यातो भावो हि भवकारणं ४७ ॥ ॥

दाकाशात्सुतोल्का भुवीव ४६ जन्मत्रयेनुगुणितेन संवर्धितेन वैरेण शत्रुभावेन विशिष्टेन तदेण ज्ञानेन संरब्धया समुद्रिक्तया धिया
ध्यायंस्तन्मयतां द्वेषमयतां अद्वयेरो भगवत्साधनतां ज्ञयोयातः तथाहि भावो भक्तिर्भवकारणं मां गच्छत्याराणं भवति ४७ ॥

तयोरुपाख्यानं वैकुंठवासिनोर्जयविजयोर्विप्रशापात् पुनः पुनर्जन्म ४८ भगवते अग्रपूजासमर्पणेन युधिष्ठिरः कृतकृत्य इति सुतस्त्वा त्वि
गादिभ्योपि यथाविहितदक्षिणा महादितित्राह । ऋत्विग्भ्य इत्यादिना । एकराट् चक्रवर्ती ४९ ५० राजसूयावभृथाविहितकर्मणा । ब्र
ह्मणानां विप्राणां क्षत्राणां मंडलेश्वराणां सभामध्ये । सुरराडिंद्रः ५१ २ वंद्यभूत शिशुपालवधलक्षणं हरेः कर्मनेपुण्यप्रसाधनं किं तत्तद्विप

वर्णितं तदुपाख्यानं यथा ते बहुविस्तरं । वैकुंठवासिनोर्जन्म विप्रशापात्पुनः पुनः ४८ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदा
त् । सर्वान्संपूज्य विधिवच्चक्रेवभृथमेकराट् ४९ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः । हत्वा च चेदिपं तत्र विजहार यथासुखं ५०
राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः । ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ५१ राज्ञा सभाजिताः सर्वे सुरमानवखेचराः । कृष्णं
क्रतुं च शंसंतः स्वधामानि ययुर्मुदा ५२ य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकं । राजमोक्षं वितानं च सर्वपापैः प्रमुच्यते ५३
इति श्रीभागवते महापुराणे दशमस्कंधे शिशुपालवधो नाम त्र्यशीतितमोऽध्यायः राजोवाच अजातशत्रोस्तं दृष्ट्वा राजसूयम
होदयं । सर्वे मुमुदिरे ब्रह्मन्नृदेवा ये समागताः १ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः । इति श्रुतं नो भगवंस्तत्र कारणमुच्यतां
२ श्रीशुक उवाच पितामहस्य ते यज्ञे राजसूये महात्मनः । बांधवाः परिचर्यायां तस्यासन्प्रेमबंधनाः ३ भीमो महानसाध्यक्षो
धनाध्यक्षः सुयोधनः । सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ४ ॥ ॥

रीनकारणमिति मंदाशंकां परिहरन् फलमाह य इदमिति ५३ इति दशमे त्र्यशीतितमः अनेनानंतरातीताध्यायोक्तमेव प्रश्न
र्वकं विस्तृत्य कथयति । अजातशत्रोरित्यादिना ४ ॥ ॥

दे० उ०

ऋत्विजश्च सदस्याश्च बहुविदः स्मृतास्तथा वेश्मतत्स्मे षु सुहृत्तमेषु स्विष्टेषु सूनृताजितेषु सम्यक् ततः कालव्यवधानमंतरेण ८ आराद्

८५

सतां गुरुशुश्रूषणे जिष्णुः कृष्णः पादावनेजने। परिवेषणे द्रुपदजा कर्णो दाने महामनाः ५ युयुधानो विकर्णश्च हार्दिक्यो विदुरादयः।
बाह्लीकपुत्रा भूर्याद्या ये च संतर्दनादयः ॥६॥ निरूपिता महायज्ञे नानाकर्मसु ते तदा ॥ प्रवर्तंते स्म राजेंद्र राज्ञः प्रियचिकीर्षया ७
ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणाभिः। चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथस्नप
नं द्युनद्यां ८ मृदंगशंखपणवधुंधुर्यानकगोमुखाः। वादित्राणि विचित्राणि नेदुरवभृथोत्सवे ९ नर्तक्यो ननृतुर्हृष्टा गायका
यूथशो जगुः। वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् १० चित्रध्वजपताकाग्रैरिभेंद्रस्यंदनार्वभिः। स्वलंकृतैर्भटैर्भूपा निर्य
यू रुक्ममालिनः ११ यदुसृंजयकांबोजाः कुरुकेकयकोशलाः। कंपयंतो भुवं सैन्यैर्यजमानपुरस्सराः १२ सदस्यर्त्विग्द्विज
श्रेष्ठा ब्रह्मघोषेण भूयसा। देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः १३ स्वलंकृता नरा नार्यो गंधस्रग्भूषणांबरैः। विलिंपंत्योभिषिं
चंत्यो विजह्रुर्विविधै रसैः १४ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः। पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः १५ गुप्ता नृ
भिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः। ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः
१६

रेसमीपेच ९ १३ रसैश्च हरिद्रादिरागजलैः १४ एतदेवाहृ तैलेत्यादिना १५ नृदेव्यः राज्ञ्यः। एतदुपलब्धुं च द्रष्टुं विषयं स्थलं निरगमन्नि
त्यन्वयः। देव्यः देवस्त्रियः। मातुलेयैः सखिभिश्च १६ ॥ ॥ राम

८५

इतीभिः जलसेचनपात्रैः। मलधियां विषयाविष्टानां रुचिरैर्मनोहरैः समेताः १७ ८ पत्नीसंयाजावभृथ्याख्येष्टिभिश्चरित्वा कृता १९ २०
गृहीतेधौते २१ ॥ ॥

ता देवरानुत सखीन्सिषिचुर्दृतीभिः क्लिन्नांबरा विवृतगात्रकुचोरुमध्याः। औत्सुक्यमुक्तकवराच्च्यवमानमाल्याः क्षोभं दधुर्मलधियां
रुचिरैः समेताः १७ स सम्राड्रथमारूढः सदश्वं रुक्ममालिनं। व्यरोचत स्वपत्नीभिः क्रियाभिः क्रतुराडिव १८ पत्नीसंयाजावभृथ्यै
श्चरित्वा ते तमृत्विजः। आचांतं स्नापयांचक्रुर्गंगायां सह कृष्णया १९ दिविदुंदुभयो नेदुर्नरदुंदुभिभिः समं। मुमुचुः पुष्पवर्षाणि देवर्षि
पितृमानवाः २० सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता जनाः। अथ राजाहते क्षौमे परिधाय स्वलंकृतः २१ ऋत्विक्सदस्यविप्रा
दीनानर्चाभरणांबरैः। बंधूंर्ज्ञातीन्नृपान्मित्रसुहृदोन्यांश्च सर्वशः २२ अभीक्ष्णं पूजयामास नारायणपरो नृपः २३ सर्वे ज
नाः सुररुचो मणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः। नार्यश्च कुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलया वि
रेजुः २४ अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः। विप्राः क्षत्रियविट्शूद्रा राजानो ये समागताः २५ देवर्षिपितृभूतानि लो
कपालाः सहानुगाः। पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्मुदा २६ हरिदासस्य राजर्षे राजसूयमहोदयं। नैवातृप्यन्प्रशंसंतः पि
बन्मर्त्योमृतं यथा २७ ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान्। प्रेम्णा निवारयामास कृष्णं च त्यागकातरः २८ भगवान
पि तत्रांग न्यवात्सीत्तत्प्रियंकरः। प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं २९ इत्थं राजा धर्मसुतो मनोरथमहार्णवं। सुदु
स्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ३० एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं। अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ३१

द० उ०

यस्मिन्सरेंद्रेत्यादि स्तानाः। ताभिः स्त्रीभिः सह द्रुपदराजसुता पतिसुपतस्थ इत्यन्वयः ३१ ३ स्वचक्षुषा स्वस्पर्द्दिभूतेन ३४ ५ वालव्य
जनसंकुलैः चामररश्मिमितवालव्यजनैः दोधूयमानः वीज्यमानः ३६ इतिदशमे च्यशीतितमः ॥ द्विनेत्र ध्याये तु शाल्ववधमाहात्म्यं कथयति।

८०

यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः। ताभिः पतिं द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुरा
जपुत्रः ३१ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं। मध्ये सुचारु कुचकुंकुमशोणहारं श्रीमन्मुखं च
लकुंडलकुंतलाढ्यं ३२ सभायां मयक्लृप्तायां क्वापि धर्मसुतो विराट्। वृतोनुजैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ३४ आसीनः कांच
ने साक्षादासने मघवानिव। पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ३५ उपास्यमानो विप्रेंद्रैर्नानादेशसमागतैः। दोधूयमानो
धवलैर्वालव्यजनसंकुलैः ३६ राजराजश्रियाई लोदिविदेवपतिर्यथा ३७ इति श्रीभागवते महापुराणे दशमस्कंधे च्यशीतितमो
ध्यायः ॥ श्रीशुक उवाच ॥ तत्र दुर्योधनो राजा भ्रातृभिः परीतो भ्रातृभिः प्रियैः। किरीटमाली न्यविशदसिहस्तः क्षिपन्रुषा १ स्थ
लेप्यगृह्णाद्वस्त्रांतं हरिनीलोत्पलाचिते। स्थलं पुष्करिणीं मत्वा सर्वे तं जहसुर्जनाः २ आगच्छन्नेव सद्वीशः पुरः पुष्करिणीं क्वचित्
विलोक्य स्फाटिकां भूमिं मत्वा नोव्यपतज्जले ३ जहास भीमस्तं दृष्ट्वा स्त्रियो नृपाश्च केचन। निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिता
: ४ अजातशत्रुराकर्ण्य वक्त्रमग्रभूषणादिकं। संवेष्याक्षपयामास स्त्रा स्त्रा योगेश्वरेण च ५ ॥ ॥

तत्रादो भूभारहरणे हेतुं दुर्योधनस्य तेजः क्षतिं च वक्ति। तत्रेत्यादिना। तत्र सभायां १ आचितं निचितं व्याप्तमिति इलः २ पुरः अग्रतः
स्फटिकमणिनिवद्धां ३ ४ योगेश्वरेण श्रीकृष्णेनानुज्ञातः। साम्ना सांत्ववचनेन ५ ॥ ॥

राम
८०

आत्मना स्वेनैव ईहितं चेष्टितं आत्मनि मनसि विस्मरन्न इमिति शेषः। तत्र कथांतरं वक्तुं तत्रारदागमनमाह तदेति ८ १५ तथेति रुक्म्यादीश्वरा

तदनाहत्य सत्कारं व्रीडावनतकंधरः। ज्वलमानहृदयो नजगाम तदंतिकं ६ स व्रीडितो वाक्कदनो रुषाज्वलन्निष्क्रम्य तूष्णीं श्ययो
गजाह्वयं। हाहेति शब्दः सुमहानभूत्तदा अजातशत्रुर्विमनाइवाभवत् ७ बभूव तूष्णीं भगवान्भुवो भरं जिहीर्षुराम्ने हितमात्मनिस्म
रन्। तदा विपंची ऋगदी शामनिवौ मुनिः सुराणाधिपादपंकजः ८ उपेत्य नारदः सर्वैः सदस्यैरभिपूजितः। कृष्णेनाभ्यर्चितः सम्यगु
पविष्टो नृपांतिके ९ उवाच धर्मराजं स प्रणिपत्य यथाविधि। भगवान्सर्वचगोत्रज्ञः सर्वकालेषु संगतः १० नृपाणां शोर्ययुक्ता
नां सर्वमंडलवासिनां। इदानीं कतमः शूरो नित्योद्योगेन वर्त्तते ॥ ११ ॥ इति तेनोदितां वाणीमाकर्ण्य मुनिरब्रवीत्। १२ नारद उवाच
मगधनृपाः नृपाः सर्वे कृष्णेनाप्रतिमौजसा। वसंति विषये स्वस्वे नष्टचेष्टा गतश्रियः १३ एक एव महोत्साहः क्षत्रियाणां धुराग्रहीः। जातः
शाल्वो भूद्भूपतिर्वक्रपादातिवाहनः १४ भ्रातर्युपरते युद्धे विष्णुनालोकजिष्णुना। ब्रह्मदत्तसुते हंसे यमुनायां महात्मना १५ कृष्णद्वि
ड्वेत्यराज्ञो सौ रुक्म्यादीश्वरं दिने पुरो। समाजं कारयामास धातुराष्ट्रपकांक्षया १६ शिशुपालदुर्मदमुखैर्ईतिवक्रपुरस्सरैः। पराजितेषु संग्रा
मे जरासंधादिषु प्रभो १७ शाल्वः प्रतिज्ञामकरोत् शृण्वतां सर्वभूभुजां। अयादवीं क्ष्मां करिष्ये पश्यं तु मम पौरुषं १८ इति मूढः प्रतिज्ञा
य तपसे प्राविशद्वनं। गते नस्मिन्न वत्सरं वर्षाः प्रतीक्ष्य तदुपागमं १९ तदनंतरजोमात्रैरभिषिक्तो नृपार्थिभिः। तपस्त्वास नृपतिर्देवं प
शुपतिं प्रभुं २० आराधयामास वने पांशुमुष्टिं सकृद्ग्रसन्। संवत्सरांते भगवान्संतुष्टः सत्रमापतिः २१ ॥ ॥

तः समाजं संमेलनं आनृण्यं ऋणाभावकारणं १६ शिशुपालदुर्मदमुखैः सह जरासंधादिषु युद्धे पराजितेषु सत्सु १७ १९ तस्य शाल
वस्यानंतरं अनुजः २० २१ ॥ ॥

द०उ०

छंदयामास तत्र मकरोत २२ २ अयस्मयं अयोमयं अयस्मयादीनि छंदसीति पा। णि निः। नीलरश्मि पुंजात्मकत्वात्तमोधमेत्युच्यते २४ ७
सूरतैः सूरतापिः २८ ९ ससैनिका ससेनानायकाः ३० इति दशमे चतुराशीतितमः तथा महात्मसवसतित्वे न सालः संक्रुद्धो दृशित्ति

८१

वरेण छंदयामास शाल्वं शरणमागतं। देवासुरमनुष्याणां गंधर्वोरगरक्षसां २२ अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणं। तथेति गिरिशा
दिष्टो मयः परपुरंजयः २३ पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयं। स लब्ध्वा कामगं यानं तमोधाम दुरासदं २४ आययौ स्वजनपदं स
मर्यं बलवाहनं। हत्वानीराजपुत्राणां स एवोद्योगवाहृप २५ इति धर्मसुतः श्रीमान्श्रुत्वा तन्नारदोदितं। पार्श्वे भगवतः शौरेः शनैर्मुखमवे
क्षत २६ निशम्य तद्वासुदेवो धैर्यसारो निराकुलः। किंचित्प्रहस्याक्रूरनामेत्याह साहसि महात्मना २७ पूजयित्वा अर्षिं सम्यक् कृष्णः कृते
गीर्भिः स्तुतः। विसर्जितः सोपि प्रायात् साश्चित्य चिंतयन् २८ ततः सेनां यदुपतिं युयुधानं च माधवः। अक्रूरं कृतवर्माणं मन्त्रांश्च य
दुपुंगवान् २९ प्रेषयामास रक्षार्थे द्वारवत्याः ससैनिकान् ३० इति श्रीभागवते महापुराणे दशमस्कंधे चतुरशीतितमोऽध्यायः
श्रीशुक उवाच तथा वसति गोविंदे शक्रप्रस्थे महात्मनि। ससैनाकुरुजे वैवन्दपेत तदृत्ये युधिष्ठिरे॥१॥ आकर्ण्य शाल्वः संक्रुद्धो रमघो
षसुतं हतं। जरासंधं च सुहृदं राजसूयं कृतं कृतं १ ययौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन्। समावसन्न तस्मिन् पुष्पधेमरतर्षभ २

शेषः २ आगत्य चांतरिक्षे तं विमानमावसन्नभिविमाने स्थितः पुमुखं रत्नचयः ३ ॥ ॥श्री॥ ॥श्री॥ ॥

राम
८१

संप्रहारप्रकारमाह पुरीमिति। आट्टालो हृत्तोलिका वीथिका रथ्यापंक्तिमध्यपद्धतिरित्यर्थः ४ विहायस आकाशात् आसारो वेगवान् वर्षः

पुरीं बभंजोपवनान्युद्यानानि च सर्वशः। स गोपुराणि द्वाराणि प्राकाराट्टालतोलिकाः ४ विहायसो विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः
शैलाद्रुमाश्चाशनयः सर्पाश्च आसारशर्कराः। प्रचंडश्चक्रवातोभूद्रजसा च्छादिता दिशः ५ इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशं
नाभ्यपद्यत शं राजन्त्रिपुरेण यथा मही ६ प्रद्युम्नो भगवान्वीक्ष्य मध्यमाना निजाः प्रजाः। माभैष्टेत्यभ्यधाद्वीरो वाहः पित्रो रुत्स्य
रत्र ७ सात्यकिश्चारुदेष्णश्च सांबोक्रूरः सहानुजैः। हार्दिक्यो भानुविंदश्च गदश्च शुकसारणौ ८ अपरे च महेष्वासा रथयूथपयू
थपाः। निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः॥९॥ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह। यथासुराणां विबुधैः स्तुमुलं रोमहर्ष
णं १० तां च सौभपतेर्मायां दिव्यास्त्रैः रुक्मिणीसुतः। क्षणेन नाशयामास नैशं तम इवोष्णगुः ११ विव्याध पंचविंशत्या स्वर्णपुंखैर
यो मुखैः १२ शाल्वस्य ध्वजिनीपालं शरैः संनतपर्वभिः। शतेनाताडयच्छाल्वमेकैकेनास्य सैनिकान्। विव्याध दशभिर्नेतृन्वा
हनानि त्रिभिस्त्रिभिः १३ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः। दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः १४ बहुरूपैकरूपं तद्दृ
श्यते न च दृश्यते। मयमायाकृतं यानं दुर्विभाव्यं जनैरभूत् १५ क्वचिद्भूमौ क्वचिद्व्योम्नि क्वचित्सं यो क्वचिद्गिरौ। अलातचक्रवद्भ्राम्य
त्सौभं तद्दुरवस्थितं १६ ॥ ॥

नत्सहिताः शर्कराः क्षुद्रपाषाणाः। चक्रवातो मंडलवायुः ५ शं सुखं ६ १० उष्णगावो यस्य स उष्णगुः सूर्यः ११ २ अस्य प्रद्यु
म्नस्य १४ ५ दुरवस्थे नैकत्रस्थितमभूदिति शेषः १६

तस्य सोभस्य सैनिकः सेनास्थितिः शाल्वः यत्र यत्रोपलक्ष्येत साल्वत पृथपाः ततः शरानमुंच चिन्त्य च यः १७ इतिपरैः शरैः अपीड्यमानः पृथक्स्थितानीकः १८ शाल्वस्यानीकपाः सेनानायकाः तेषां शस्त्राणामोघैः १६ रथिनिषाणेन संस्थिन्नेस्मारथीरथमाहृतो। जीवयेत सुहृत्तः साधुयुद्धधर्मविशारदइतिकुद्धधर्मविति २१ अपसर्प्यणं अपसरणं २२ कुतोसाधित्यतस्त्राह। नेति। मद्विना २३ धर्मसाधनाक्षत्रादपगतो

यत्र यत्रोपलक्ष्येत तत्र तस्य सौभस्य सैनिकाः। शाल्वसूतस्ततो मुंचन् शरान्सात्वतपृथपाः १७ शरैरग्न्यर्कसंकाशैराशीविषदुरासदैः। पीड्यमानः पृतनीकः शाल्वोऽमुह्यत्परेरिति १८ शाल्वानीकपशस्त्रौघैः वृष्णिवीराभृशार्दिताः। न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः १९ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः। आसाद्य गदया मुर्व्या व्याहत्य व्यनदद्बली २० प्रद्युम्नं गदया शीर्णवक्षस्थलमरिंदम। अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः २१ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत्। अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणं २२ न यदूनां कुले जातः श्रूयते रणविच्युतः। विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् २३ किं नु वक्ष्येऽभिसंगम्य पितरौ रामकेशवौ। युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमं २४ व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः। क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे २५ सूत उवाच धर्मं विजानताऽऽयुष्मन्कृतमेतन्मया विभो। सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी २६ एतद्विदित्वा तु भवान्मयाऽपोवाहितो रणात्। उपसृष्टः परेणेति मूर्च्छितो गदयाहतः २७ इति श्रीभागवते महापुराणे दशमस्कंधे पंचाशीतितमोऽध्यायः

हंपितरौ पृष्टः तत्र पित्रोरात्मना मयाकृतमक्षमं किं नु कथं वक्ष्ये इत्यन्वयः २४ किं चेदं दुःसह मित्याह व्यक्तमिति। जामयः सहोदर्यः कथं कथयतीति तत्राह। क्लैब्यमिति हे वीर। मृधेन्यैः सह कथं क्लैब्यं गतस्त्वं कथ्यतामिति २५ को यं धर्मइतितत्राह। सूतइति २६ उपसृष्टः उपद्रुतः इति दशमे पंचाशीतितमः ॥ ॥

यदूत्तंस्वपतीतियदुनंदनः १ एवधक्ष्मार। हंशितोरणांगणेआस्वेरति शेषः। ततः किं तत्राह। नयेति २ त्रिनवरात्रं सप्तविंशद्रात्रं

श्रीशुक उवाच इति सूतोदितां वाणीमाकर्ण्य यदुनंदनः। पुनरानप्रहरणः सूतमाहरणांगणो १ पश्यपसूतक्ष्मानेव दंशितो धृतकार्मुकः। नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिं २ आरुदंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः। प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् ३ चतुर्भिश्चतुरो वाहान्सूतमेकेन वाहनम्। द्वाभ्यां च केतुं धनुषी द्युमतोऽन्येन वै शिरः ४ गदः सात्यकिः साम्बश्च शुकसारणौ। वसुदेवो गतीनौ चजघ्नुः सौभपतेर्बलं ५ पेतुः समुद्रे सौभस्थाः शाल्वे याभिन्नकंधराः। एवं यदूनां शाल्वानां निघ्नतामितरेतरं ६ रणं त्रिनवरात्रं तु तुमुलं रोमहर्षणं। इंद्रप्रस्थगतः कृष्ण आहूतो धर्मसूनुना ७ राजसूयेऽथ निवृत्ते शिशुपाले रणे हते। अलक्षयत् दुःशकुनान्घोरान्संग्राम शंसिनः ८ कुरुवृद्धाननुज्ञाप्य मुनींश्च ब्राह्मणैः सह। आश्वीयमानः सामात्यैः पांडवैः प्रिययोऽजरात् ९ स गत्वा किंचिदश्वानं स्थापयित्वा पुरौकसः। पृथा सुता नवज्ञाप्य प्राणतानश्रु लोचना १० सुवर्णशिविकारूढैरवरोधवधूजनैः। गजाश्वरथपादातिसहस्रैरपि संवृतः ११ अक्षीनराजकटकः प्रतस्थे पश्चिमामुखः। १२ शाल्वोपि कुरुशार्दूल विमानेनखचारिणा। अपावृत्य रणाद्राद्वं स्वमेवाभ्यहितोपयो १२ गच्छमानस्य शाल्वस्य तां वोभिद्रुत्य पृष्ठतः। शाल्वामात्यं स्त्रेमक्षांग्नेविंवाणेनिर्न्निपेमहन्नयं १३ सेनापतिं विविदाख्यं शाल्वस्याखिलवज्जभम्। निरुध्य पथि गच्छंतं प्रद्युम्नः प्राहरत्कुरैः १४ प्रद्युम्नेनातिविद्धो सोऽगृहीत्वा वक्र चर्मणी। समस्तरोक्लिरोपेनतद्भूद्रणमद्भुतं १५ ॥

अमित्रवसरेक्लाशागमनं वक्ति। इंद्रप्रस्थमिति ७ रणात्पावृत्य रणं विहायेत्यर्थः १२ ३ अखिलात्समस्तप्रकृतिजनात् वल्लभं प्रियतमं १४ समस्तसंगतः १५

६० उ०

९३

सालः प्राकारः। प्रतोली विशिखा रथ्येति हलायुधः प्रतोलि रेव प्रतोलिका। प्रस्वरापूर्णा दीर्घिका वापी पाषाणः शरीतः परिखा वा तेनुमितिशेषः १९

मंडलानि विचित्राणि चरन् स्वस्य संगरे। कृपाणेन यदुश्रेष्ठः शिरः कायादपाहरत् १६ विप्रष्टमार्गा साम्बेन हतप्रवरयूथपा १७
विदुद्रुवु यथा कामं प्राणत्राणपरायणाः १७ देवोपि द्वारकामेत्य वैगेन गरुडध्वजः। ददर्श नगरीं भग्नप्रासादाट्टालगोपुरां १८
विशीर्णतोरणाद्युणाकंगसालप्रतोलिकां। विध्वस्तोपवनोद्यानां प्रस्वरापूर्णदीर्घिकां १९ निःस्वाध्यायवषट्कारां मालोक्य द्वार
कां पुरीं। अपृच्छत् कृतवर्माणं किमेतदितिदुर्मनाः २० तेनोक्तं सर्वमाकर्ण्य शाल्वराजविचेष्टितं। प्रतिजज्ञे यदुपतिः शत्रुस्तं तास्त
र्विना त्वतां २१ अनुदृत्य तमद्यैव सौभं हत्वा दुरात्मकं। सौधं निपात्य जलधौ प्रवेक्ष्ये द्वारकामिति २२ रथं सैन्यसुग्रीवमेघ
पुष्पबलाहकैः। युक्तं वज्रप्रहरणमयावस्थितदारुकं। आरुह्य भगवान् विष्णुर्गरुडध्वजमुत्तमं। प्रययौ सौभपदवीं मनोमारुतरं
हसा २४ तथा गत्वा समुद्रांतमंभोधेः कुक्षिमाश्रितं। ददर्श सौभं तन्मध्ये शाल्वं च समलंकृतं २५ शाल्वश्च कृष्णमालोक्य हतप्रा
यबलेश्वरः। प्राहरत् कृष्णसूताय शक्तिं भीमां दृढां मृधे २६ तामापतंतीं नभसि महोल्कामिव रंहसा। भासयंतीं दिशः शौरिः सा
यकैः शतधाच्छिनत् २७ तं च षोडशभिर्विद्ध्वा बाणैः सौभं च खे चरं। अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः २८ शाल्वः शौरे
स्तु तः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः। बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं २९ हाहाकारो महानासीद्भूतानां तत्र पश्यतां। वि
नद्य सौभराट् उच्चैरिदमाह जनार्दनं ३० यत्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षतां। प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा।

ज्येष्ठमित्यपि पाठः अतिर्नाम ग्रहतैव ३१ पापत्वं कथं प्रवृत्तः। परमाप्तःस्तुगरुडो युनाच्युतः तद्वत्पाशेन पादरमाह ३२

यो मूढ नः सख्युर्भार्यापहृता त्वया ३१
दुर्भिमाव्याकुजमनाश्च २० २८ सव्यं दृष्टं २९ ३० सख्युर्भार्या शिशुपालस्य संकल्पमात्रजाया रुक्मिणी ३१ ॥ ॥

राम
९३

अनुनरान्द्विभिर्विधिमरणायमत्र्यहंवा ३२ ४ यस्यतवातिकौतुकमिति व्याख्यातं वीर्येनाप्रि सत्वं दृथा कथसे पौरुषं अप्रि चेद्दर्शया ३३

प्रमत्तः सभामध्ये त्वया व्यापादितः सखा। व्यापादितः सखा ऽद्य त्वां निशितैर्बाणैरप
राजितमानिनं। नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ३३ इति तेनोदितो वाणीमाकर्ण्य मधुसूदनः। प्राहाहितो
वाणगणैः पुनराग्न्यशासनः ३४ वृथा त्वं कथसे मंद न पश्यस्यन्तिकोऽन्तकं। दर्पौ रूपं दर्शयत्वं नः शूराणां
फल्गुभाषणं ३५ इत्युक्त्वा भगवान् शाल्वं गदयाभीमवेगया। तताड जत्रौ संरब्धः सचकंपे वमन्नसृक् ३६ ततः
शाल्वः समुत्पत्य खड्गेनानकदुंदुभेः। उत्कृत्य शिर आदाय स्वयं सौभं समाविशत् ३७ ॥ ॥

राणां च भाषणं फल्गु मितं वीर्यप्रकटनं वच्छित्यर्थः। यद्वा शूराणां पौरुषं दर्शया भाषणं फल्गु तुच्छं विकत्थनमित्यर्थः ३५ शा
ल्वस्याशक्ति प्रकटनायतन्मायाप्रकारमाह। तत इति ३७ ॥ ॥

श्रीकृष्णः शाल्वसृष्टां मायां ज्ञात्वा किमकरोदित्याह। तत इति। ततो वसुदेवशिरोहरणानंतरं मुहूर्त्तकालं। तत्र युद्धे अनुतिष्ठन्प्रवर्त्तित
ष्ठ एव स्वयं वर्त्तत कीदृशः। प्रकृतौ चिद्घनस्वभावे उपस्थितोपि शाल्वमायां जानन् पिशाचकृतानुपश्यन्निति समीपे स्थितः। अज्ञानात्रिवसुना
किं च कारेतित्याह। स्वजनेति। ततो मुहूर्त्तान्महानुभावः अपरिमितप्रभावः सहरिः स्वजनस्य स्वभक्तजनस्यानुकूलात्संगतः वचनप्र
संगात तद्वसुदेवशिरोहरणमबुध्यत। कथं तदित्याह। आसुरीमिति। शाल्वेन प्रकृतां प्रपंचकां शूलबलमाह। मयेति। मयेनासुरतक्ष
णोपदिष्टामुपदिष्टामित्यर्थः। तदुक्तं। जानन् शाल्वकृतां मायामज्ञानात्रिव केशवः। अचवर्त्तनकिंचिद्वितिं। बुध्वा किं कृतमित्याह। प्र
कृतावितिं। छद्मच्छेदनइति ध्यातोः। बुध्वा मायायाः प्रकृतौ निर्मूलने सम्प्रकृस्थितो भूदिति शेषः। तत्स्वामाह राढ्रिभु रितिवचनात्। अज्ञान
प्रकटनं कस्मादित्याह। प्रकृतावितिं। प्रकृतिनिर्मितिशरीरस्थत्वादसुरजनमोहनार्थत्वाच्च। एवमेवतु सर्वत्र परमात्मानुतनः। विद्वश्च

ततो मुहूर्त्तात्प्रकृतावुपस्थितस्त्वात्तुतिष्ठन्स्वजनानुसंगतः। महानुभावस्तदबुध्यतासुरीं मायां स शाल्वप्रसृतां मयोदिताम्
३८ ॥

रुधिरस्राबीकयंचिद्रजपत्यरां। इत्यादिदर्शयो हि सु मोहय मायया जगदिति॥ चिद्घनं दधन स्वभावः इत्येतत्कृत इति चेन्न। चिद्घनेरघ
नस्यास्य कृतो वेधादिसंभवेदित्यस्मात्स्वजनानुसंगत इती दमपि सहृतेः इति सिद्धं। यदचरस्य बाह्यबाधानो बलानीर्द्दस्वबाणो अ
नेषु। मायेत्यत्र तेयानि कृष्णान्याकर्णय शत्रुंनवयुराविवित्स इत्यादिष्कृति सिद्धोपमित्यर्थः। तथाहि। हेइं इतत्वा बाहुधानः स्वरूपेण
प्रशंवदमान स्ववलानिर्वीर्यातिविक्रमलक्षणो निश्चरः अकृतेतिय स्वजने षुप्रसु वाणाः व्याकुर्वाणे वर्त्तस इति शेषः। तस्मात्स्वभा
वरहस्य स्वजनाज्ञानंतीत्यर्थः। शाल्वादिशत्रुणा किं यमारणानि यानिकृष्णानि आक्रूः पुराणादैर एतानि त्वाम् दृश्य साम स्योदितो मा
यादृतंदरजालवत्तेवत्वं पुराण अथ मतो मुहूर्त्त शत्रुसुतेनो रताम्रा यं न विवित्सेन तावानति। अथाद्भुना विवित्सेन तु पश्चात्सासिद्धा
अदित्यर्थः ३८ ॥

एतदेव स्पष्टयति नेति। अय सुतः ज्ञानस्युतिरहितः। नपितुः कलेवरं च नापश्यत्प्रबुद्धः मायामिति शेषः। आत्मा परमात्मा निदर्शयति। स्वप्न इतिय
था स्वप्नेक रितुरगादीनुपश्यति ततः प्रबुद्धः तान्पदार्थान् न पश्यति बुध्वा किं कृतमत्याह। अवस्थारिणमिति ३९ तत्स्वरूपगुणाद्यादीनामपि
ज्ञानलोपो नास्ति किं पुनः हरेरितिभावेनाह। एवमिति। कथेवदंतीत्याह। यत्स्ववाचइति। स्वस्य स्वतंत्रस्य हरेर्वाचो वेदलक्षणाय मोहादिकं हरि
विषयं प्रति विरुध्यंते विरोधवं त्योभवंति। हरेर्मोहादिकं न सहंत इत्यर्थः। अजस्यावकाचेत सहइति कृतेः। तत्रं ताक्षिका गपकमादिदेवतात्पर्य
लिंगको विदास्वेदिकास्त्रमोहादिकं स्मरंतिन्नु किं ते वस्मरंतीत्यर्थः। येषां स्ववाचो विरुध्यंते हरेर्मोहादिवाहिन्यः परस्परविरोधिन्यः स्युः

न तत्र दैत्यं न पितुः कलेवरं प्रबुद्ध आज्ञात्तदपश्यदच्युतः। स्वप्ने यथा चांबरचारिणं रिपुं सौभस्थमालोक्य निहंतुमुद्यतः ३९
एवं वदंति राजर्षे ऋषयः खेचराश्रिताः। यत्स्ववाचो विरुध्यंते तन्नूनं ते स्मरंति तु ४० क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः
क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ४१ यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यनाद्यात्मविपर्ययग्रहं। लभंत आत्मीय
मनंतमैश्वरं कुतो नु मोहः परमस्य सद्गतेः ४३ ॥ ॥

ये ज्ञा अज्ञा तारः तादृशी वाचः स्मरंति पुराणादौ ते ते वेतिवा ४० प्रस्तुतविपरीतमेव वदंतीत्याह। क्वेति। ये शोकादयोऽज्ञानिनः संभ
भवो येषां ते तथा ४१ तदेव द्रढयति। यत्पादेति। आत्मविद्यया परमात्मज्ञानेन अनादिकालेन आत्मविपर्ययग्रहं मनसि स्थितमन्यथाज्ञा
नं हिन्वंति नाशयंति। न तावदेव किंतु हरित्वं च जानंतीत्याह। लभंत इति। आत्मीयमात्मनः परमात्मनो विद्यमानं तमैश्वरमीश्वरत्वं लभं
ते जानंति। यद्वा स्वयोग्यमैश्वरमीश्वरानुगृहीतमनंतं मोक्षं लभंते आकृवंति ४२ ॥ ॥

४३ ४ आब्रह्मसदनं ब्रह्मलोकपर्यंतं ४५ ६ सौभं नाम पुरं ४७ ८ अनंतैरनेकसंख्यैः ह्रादिः सिंहः ४९ ५० शिरोमणिं किरीटं सरोज

इति ते हृदितां वाणीमाकर्ण्य कमलेक्षणः। सस्मितं हंत मा रे भे शाल्वं कुत्र कुलोद्वह ४३ ततो निशातमादाय चक्रं सूक्ष्मः सुदर्शनं। अ
ग्रेयाक्षेणाभिमंत्र्याशु हितो तस्मै भगवान् ४४ तत्रारायणएहस्तं ध्यात्वा सुक्ष्मा ग्रेयमेवितं। ज्वालाब्रह्मसदनं ज्वालामालातिभीष
णं ४५ ततो वैमानिकाः सर्वे ते विज्ञाय विद्रायतं। सुदर्शनोत्मणात भादुडुडुः सर्वतो दिशं ४६ तदर्कशतसंकाशं सौभं भित्वाद्विधापु
रं। भूयो नारायणकरं प्रापश्यत्सुदर्शनं ४७ ततः समुद्रे न्यपतत्पुरं विच्छिन्नवेष्टनं। गदापाणिर्दुराधर्षः शाल्वो विप्रत्यवस्थितः। ता
प्रेषयामास गदां क्षुद्रस्य दुर्मतिः ४८ ततो रथं दैत्यबलोपनीतं संस्थाय शाल्वो बहुशस्त्रसंचयं। अवाकिरल्लक्ष्मशिरस्य
नं तैर्महायुधैश्च व्यनदद्दुरियथा ४९ तां गदां प्रेषितां ते नच्छित्वा बाणैस्त्रिधा हरिः। पोचनन्यस्तु पाथाम सिंहनादं व्यनीनदत् ५०
तं शाखप्रोः प्रहरं तमोजसा शाल्वं शरैः शौरिरमोघविक्रमः। विद्धाच्छिनद्वर्मधनुः शिरोमणिं रथं च शार्ङ्गो गदया रुरोज ह ५१ तत्क्षम
हस्तेरितया विद्रलितं पपात तोयो ताद्यपासहस्रधा। विष्टस्य तं भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्यगाद्द्रुतं ५२ आधावतो
भीमगदस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं। वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोदयाचलः ५३ जहार तेनैव शि
रः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः। वज्रेण वृत्रस्य यथा पुरंदरो बभूव हाहेति वचस्तदा नृणां ५४ ॥ ॥

विभेद इत्यस्ति इति शतं सहस्रमयुतं नियुतं प्रयुतमर्बुदं न्यर्बुदं शंखं पद्मं देव निखर्वं खर्वमर्बुदमितियादवः ५२ ३ पुरुमायिनः। अनेक शतमा — रामयावतः ५४

५५ ७ सानंदं आनंदेन सहितं इत्यर्थो विषयानंदः न ब्रह्मरूपानंद इत्यर्थः सात्त्वोनुपपन्नः। विज्ञानमानंदं ब्रह्मेति श्रुतेः ५८ इति दशमे षट्
शीतितमोध्यायः ॥ दृगस्य दृष्ट कलास शरीरान्मोक्षकरणाल् ज्ञानमाहात्म्ये हरेः ब्राह्मणप्रियत्वं चार्थवादरूपेण कथयत्यस्मिन्नध्याये। तथा

तस्मिन्निपतिते पापे सौभे च गदया हते। नेदुर्दुंदुभयो राजन् दिवि देवगणेरिताः। सखीनामपचितिं कुर्वन् दंतवक्त्रो रुषाभ्यगात्॥ ...

तस्मिन्निपतिते पापे सौभे चैव निपातिते। देवदुंदुभयो नेदुर्दिव वर्षैः पुष्पवृष्टयः ५५ एवमागेषु निगणोःसूतमागधवंदिभिः। आज
गाम वृतः सैन्यैः पुरीं द्वारवतीं हरिः ५६ स प्रविश्य पुरीं रम्यां पताकावंदनमंडितां। अलंकृतामलंकारैः सिक्तसंमृष्टचत्वरां ५७ पूजितो
यदुभिर्वृद्धैः पौरजानपदैस्तथा। रमयन्नुद्भव साद्भुतम हिषीः प्रेमविह्वलाः। उवास देवकीपुत्रः सानंदं कृतनंदन ५८ इति श्रीभा
गवते महापुराणे दशमस्कंधे शाल्ववधो नाम षडशीतितमोऽध्यायः ॥ श्रीशुक उवाच ॥ उपविष्टं सुधर्मायां कदाचित्तं त्रियैर्वृतं। वि
ज्ञापय द्वैपपाणिर्द्वास्थो भक्तजनार्दनं १ शक्रप्रस्थाद्द्विजः कश्चिदागत्य द्वारि तिष्ठति। प्रवेशितव्यो वा देव न वेति यदुसत्तम २
प्रवेशयेति हस्तेन द्वास्थे नोक्ते न सत्वरः। प्रवेशितः प्रणम्याह ब्राह्मणः पुरुषोत्तमं ३ धर्मजो धार्तराष्ट्रेण शूद्रेणाधर्मचारिणा। अहो
पराजितो पातः सभार्यः सानुजो वनं ४ ब्राह्मणोनोदितां वाणीमित्याकर्ण्य सुदुःश्रवां। क्रोधाद्विग्नमनाः सूर्यांशु लक्ष्ये हरिरासनात् ५
स रथं दारुकानीतमारुह्य सह सत्यया। महत्या सेनया सार्द्धं ययौ यत्र पृथासुताः ६ वनमेवसंतं राजानं ब्राह्मणैः परिवारितं। दृष्ट्वानु
शोचत्सुभृशं शंसात्रुंजयं पुनं हरः ७ ॥ ॥

दौ युधिष्ठिरस्य राज्यभ्रंशेन वनवासनिमित्तं वक्तुमुपक्रमते। उपविष्टमित्यादिना १ २ हस्तेन प्रवेशयेत्युक्ते न द्वास्थेन प्रवेशितः ३ ४ इ
ति वाणीं सुदुःश्रवां श्रोतुमशक्यां कर्णदुःसहामित्यर्थः ५ ६ अनुशोचत्यत्र शोचत। अच प्रकाश इति धातोः शोकं प्रकाशयन्नन्वतप्य
शोकः ७

द०उ॰

९६

अनुभुक्तानि अनुभूतानि अन्योन्यव्यसनानि ८ हेतुवाक्यैः इतिहासविषयैः वचोभिः ९ सत्यभामया द्रौपदी समाश्वासिता ततः सत्यभामा स

व्यसनान्यनुभुक्तानि वर्त्तापयित्वा परस्परं। उषित्वा तत्र तां रात्रिं पांडवैः सह केशवः ८ हेतुवाक्यैः समाश्वास्य धर्मराजं युधिष्ठिरं। भीम
सेनार्जुनौ चैव यमौ च यदुनंदनः ९ पांचाली द्रौपदी साध्वी सत्यभामा समन्विता। आश्वास्य ताननुज्ञाप्य ब्राह्मणांश्च सहस्रशः १०
सुभद्रामभिमन्युं च रथमारोप्य माधवः। आजगाम वनाद्राजन् पुरीं द्वारवतीं प्रभुः ११ स प्रविश्य पुरीं दिव्यां पार्थविश्लेषदुर्मनाः। उवा
स पालयन् पृथ्वीं धर्मेणान्यांश्च कालयन् १२ एकदोपवनं राजन् जग्मुर्यदुकुमारकाः। विहर्तुं सांबप्रद्युम्नचारुभानुगदादयः १३
क्रीडित्वा सुचिरं तत्र विचिन्वंतः पिपासिताः। जलं निरुदके कूपे ददृशुः सत्वमद्भुतं १४ कृकलासं गिरिनिभं वीक्ष्य विस्मितचेतसः
। तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः १५ चर्मनिबद्धैस्तथा पाशैर्बद्ध्वा पतितमर्भकाः। नाशक्नुवन् समुद्धर्तुं कृष्णायाचख्युरुत्सु
काः १६ तत्रागत्यारविंदाक्षो भगवान् विश्वभावनः। वीक्ष्योज्जहार वामेन तं करेण स लीलया १७ स उत्तमश्लोककराभिमृष्टो विहा
य सद्यः कृकलासरूपं। संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक् १८ भूत्वा मुकुंदस्य पदारविंदं ननाम मूर्ध्ना पतितोथ
दंडवत्। पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः १९ ॥ ॥

मश्चितस्तेषुक्तं १० १ अस्माभिरुक्तं रकार १२ ३ विचिन्वंतः अन्वेषणं कुर्वंतः सत्वं प्राणिनं १४ कृकलासं यतिनर्त्तयति इति कृकलासः
शिरः प्रांते कृकलासं विदुरिति च १५ १९

राम

९६

२० विविक्तं तां ज्ञातुकामानां यद्यदि २१ २ तवकर्णमस्पृशं इशिनं योग्यरुत्यर्थः २३ अन्यथा पितृत्वं शक्य इत्याह किंत्विति २४
सिकतारेणवः अमिन्नरेरा स्मृदहाम। हारा नद इति धातुः सुरा माः क्षारसः २५ भ्रष्टा अन्यस्मै देशं विहायान्यदेशं गता। संसृष्टाः संकुलिता। अ

श्रीभगवानुवाच   कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनं। दशामिमां वा कतमेन कर्मणा संप्रापितोतदर्हः सुभद्र
२० आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुं २१ इति स्म राजा संपृष्टः कृष्णेनानंतमूर्तिना। माधवं प्रणिपत्या
ह किरीटेनार्कवर्चसा २२ नृग उवाच   नृगो नाम नरेंद्रोहमिक्ष्वाकुतनयः प्रभो। दानेष्वाख्यायमानेषु यदि ते कर्णमस्पृशं २३
किंतु ते विदितं नाथ सर्वभूतात्मसाक्षिणः। कालेनाव्याहतदृशो वक्ष्येथापि तवाज्ञया २४ यावंतः सिकता भूमेर्यावंत्यो दिवि तारकाः।
यावंत्यो वर्षधाराश्च तावतीरददां स्म गाः २५ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृंगीः। न्यायार्जिता रूप्यखुराः
सवत्सा दुकूलमालाभरणा ददावहं २६ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्य ऋतव्रतेभ्यः। तपः श्रुतब्रह्मवदान्यसद्भ्यः प्रादां
युवभ्यो द्विजपुंगवेभ्यः २७ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यशय्याः। वासांसि रत्नानि परिच्छदान् रथानिष्टं च य
ज्ञैश्चरितं च पूर्तैः ॥२८॥ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने। संपृक्ताविदुषा सा च मया दत्ता द्विजातये २९ तां नीयमानां त
त्स्वामी दृष्ट्वोवाच ममेति तां। ममेति प्रतिग्राह्याह नृगो मे दत्तवानिति ३० ॥ ॥

दुषा अज्ञानता २९ तस्या गोः स्वामी पूर्वतनो नाथः। अन्यः प्रतिग्रहीता ममेति प्रतिगृह्य अब्रवीत् ३० ॥ ॥ ॥

द० उ०

विवदमानौ विजातिपद्यमानौ । भासमानोपसंभ्रमा धात्रा न पतद्विष्टमुपमंत्रणेषु वदन् इत्यत आत्मनेपदं । अमा संभ्रमः ३१ ३ अपाक्रमत् अपातयत् ३४ यामैश्वर्यमदस्य विद्यमानैः ३५ भुंक्ष्व भोक्ष्यसे ३६ तवदानस्य धर्मस्यांतं अवसानं नास्ति । तल्लोकान्यलोकान्मध्यया । इत्युक्तोऽहं

५८

विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ । भवान्दातापहर्तेति तत्छ्रुत्वा मे भवद्भ्रमः ३१ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रं गतेन मे । गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयतां ३२ भवंतावनुगृह्णीतां किंकरस्याविजानतः । समुद्धरतमां कृच्छ्रात्पतंतं निरयेऽशुचौ ३३ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् । नान्यं गवामप्ययुतमिच्छामीत्यपरो ययौ ३४ ततो हंकालयोगेन धूतः परममा यया । एतस्मिन्नंतरे याम्यैर्दूतैर्नीतं यमक्षयं ३५ यमेन पृष्टस्तत्राहं देवदेव जगत्पते । त्वं पूर्वमशुभं भुंक्ष्व उताहो शुभं ३६ नांतं दानस्य धर्मस्य पश्ये लोकस्य भास्वतः । पूर्वं मे वाशुभं भुंज इति प्राह पतेतिसः ३७ तावदद्राक्षमात्मानं कृकलासं पतन्प्रभो । ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव ३८ स्मृतिर्नाद्यापि विध्वस्ता तव संदर्शनार्थिनः । देवदेव जगन्नाथ गोविंद पुरुषोत्तम ३९ नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय । अनुजानीहि मां कृष्ण यांतं देवगतिं प्रभो ४० यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदं ४१ नमस्ते सर्वभावाय ब्रह्मणेऽनंतशक्तये । कृष्णाय वासुदेवाय योगानां पतये नमः ४२ इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना । अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणां ४३ ॥ ॥

ताशुभं भुंज इत्यवदं इत्युक्तो स यमः तर्हि पतेति मां प्राह ३७ पतन् ३८ ३९ देवगतिं स्वर्गं ४० यत्र क्वापि योनिविशेषे सतः संभवतः ४१ सर्वभावाय सर्वसृष्ट्यैश्वर्यायेति सर्वोत्पादनकर्त्रे वा । अखंडलीलायेति वा ४२ ४३ ॥ ॥

राम

५८

परिजनं परितनुपास मानं जनं ४४ अग्नेरपि दुर्जरं जारणी कर्तुमशक्यं । मनागल्पमपि किं पुनरन्यस्येत्यर्थः ४५ प्रतिनिधिः प्रतिक्रिया नास्ति ४६ ब्रह्मस्वाख्यारणिजन्यपावकः । दुरनुज्ञातं अनुज्ञां विना भुक्तं अनुज्ञातं वा प्रसह्य अविचार्य राजलक्ष्म्या राजश्रियः पतन्निरयेऽन्धे

कृष्णः परिजनं प्राह भगवान्देवकीसुतः । ब्रह्मण्यदेवो धर्मात्मा राजन्यान्नुशिक्षयन् ४४ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि । तेजीयसोपि किमुत राज्ञामीश्वरमानिनां ४५ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया । ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ४६ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति । कुलं समूलं दहति ब्रह्मस्वारणिपावकः ४७ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हंति त्रिपूरुषं । प्रसह्य तु बलाद्भुक्तं दश पूर्वान्दशापरान् ४८ राजानो राजलक्ष्म्यांधा नात्मपातं प्रचक्षते । निरयेऽयं मन्यंते ब्रह्मस्वं साधु बालिशाः ४९ गृह्णंति यावतः पांशून्क्रंदतामश्रुबिंदवः । विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ५० राजानो राजकुल्याश्च तावंतोऽब्दान्निरंकुशाः । नरके तु विपच्यंते ब्रह्मदायापहारिणः ॥५१॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत यः । षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ५२ न मे ब्रह्मधनं भूयाद्यद्गृध्वाल्पायुषो नृपाः । पराजिताश्च्युता राज्याद्भवंत्युद्वेजिनोऽहयः ५३ विप्रं कृतागसमपि नैव द्रुह्यत मामकाः । घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ५४ यथाहं प्रणमे विप्राननुकालं समाहितः । तथा नमत यूयं च योन्यथा मे स दंडभाक् ५५ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः । अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव

५६

आत्मपातं च न प्रचक्षते न पश्यंति । ये ब्रह्मस्वं साधु मन्यंते ते ते बालिशाः ४९ ५२ यद्ब्रह्मस्वं जग्ध्वाल्पायुषो भवंति ५३ द्रुह्यंत द्रोहं कुरुत ५४ ६

सर्वलोकानां पावनः शुद्धिकर्त्ता ५७ ६० इति दशमे सप्ताशीतितमः भगवच्छ्रितिके शान्तिष्ठस्य शेषावतारस्य बलभद्रस्य हरिमाहात्म्यावि नाभूतं माहात्म्यं वर्ण्यते नेनत्राशिसिनेन ध्याय वर्येणतत्र च यमेयमुना महद्दरणलक्षणं विक्रमं वक्तुं बलस्य गोकुलगमनं वक्ति। द्वितीये त्रिविदवधलक्षणं तृतीये कौरवगर्वनिर्वापणार्थं तत्पुराकर्षणलक्षणं वक्तुं दुर्योधनसुताहरणं वक्ति १ पितरौ यशोदानंदगौ २ इति समासाभिवादनादि

एवं विश्राव्य भगवान्मुकुंदो द्वारकौकसः। पावनः सर्वलोकानां विवेश निजमंदिरं ५७ श्रीशुक उवाच सद्भिः समागमो राजन्यस्कदाचित्प्रफलो भवेत्। विमुक्तो नरकाद्राजा नृगः साधुसमागमात् ५८ साधूनां दर्शनं स्पर्शं कीर्त्तनं स्मरणं तथा। तीर्थानामपि च पुण्यानां सर्वमेव हि पावनं ५९ एतच्छ्रुत्वा त्वया संतः सदोपास्याः परंतप। ब्रह्मस्वं नैव हर्त्तव्यं यदीच्छसि परां गतिं ६० इति श्रीभागवते महापुराणे दशमस्कंधे नृगोपाख्याने सप्ताशीतितमोऽध्यायः श्रीशुक उवाच बलभद्रः कुरुश्रेष्ठ भगवान्रथमास्थितः। सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलं १ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च। रामोऽभिवाद्य पितरावाशीर्भिरभिनंदितः २ चिरं नः पाहि दाशार्ह सानुजो जगदीश्वर। इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ३ गोपवृद्धांश्च विधिवद्यविष्ठैरभिवादितः। यथावयो यथासख्यं यथासंबंधमात्मनः ४ समुपेत्याथ गोपालान्हास्यहस्तग्रहादिभिः। विश्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः ५ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा। कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ६ कच्चिन्नो बांधवा राम सर्वे कुशलमासते। कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः ७

कर्माणि तं राममेवं मारोप्यनेत्रैः सिषिचतुः। नेत्रोद्भवानीतरोर्वुलैरिति यादवः ३ यविष्ठैः कनिष्ठैः ४ हास्येन मंदस्मितेन हस्तग्रहेण आदिशब्देन परिरंभणादिकं गृह्यते ५ संन्यस्ताखिलराधसः समर्पितसमस्तसंपदः ६ ७ ॥ ॥

८ रामसंदर्शनेनादृताः वर्द्धमानाः ९ अस्माकमनुसेवां स्मरते वा १० यस्य कृष्णस्यार्थे हे दाशार्ह निमित्तमात्रादीन्स्वजनान्दुस्त्यजानपि अत्याक्षीद्दासत्प्रयोगः ११ स्त्रीभिरिह दशपुरजित्सिद्धिकालक्षणं भाषितं कथं नु न श्रद्धीयेत शुद्धमेवेत्यर्थः १२ अस्माद्दृष्ट्यानेव ग्रहिष्यति इत्याकुः। कथमिति। पुरस्त्रियः अस्मादृग्ताः स्त्रियः अन्यत्र अन्यस्त्रियः। अनवस्थितात्मनः चंचलमनसः। अन्यत्र संगरहितस्य कृतघ्नस्य अनुपकारिणः। अन्यत्रकारिणः विनाशिनः कृष्णस्य पुमालीनस्यान्यत्र प्रणीतानंदस्य सुधा वचः कथं नु गृह्णंति। अन्यत्र वचः सुधा कथं न गृह्णंति

दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः। निहत्य निर्जित्य रिपून्दिष्ट्या दुर्गं समाश्रिताः ८ गोप्यो हसंत्यः पप्रच्छू रामसंदर्शनादृताः। कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ९ कच्चित्स्मरति वा बंधून्पितरं मातरं च सः। अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः १० मातरं पितरं भ्रातॄन्पतीन्पुत्रान्स्वसॄनपि। यदर्थे जहिम दाशार्ह दुस्त्यजान्स्वजनान्प्रभो ११ ता नः सद्यः परित्यज्य गतः संछिन्नसौहृदः। कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितं १२ कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः। गृह्णंति वै चित्रकथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः १३ किं नस्तत्कथया गोप्यः कथाः कथयतापराः। यात्यस्माभिर्विना कालो यदि तस्य तथैव नः १४ ॥ ॥

सार्थमेव गृह्णंतीत्यर्थः। वैचित्र्या नाना विधाः कथाः वाक्यप्रबंधा यस्य स तथा। तस्य उभयत्र समं। कीदृश्यः सुंदरस्मितावलोकेनोच्छ्वसितेनोत्फुल्लेन स्मरेणातुराः अन्यत्र निरंतरस्मरणपरवत्यः १३ इत्येप्रेम्णा कंप्यंत्यो मिथो जल्पंति। किं न इति। हे गोप्यः अपराः कथाः कथयत तस्य कृष्णस्य कथया नः किं प्रयोजनं। तस्य कृष्णस्य यद्यस्माभिर्विना कालो याति। तथा तद्वितेन विना नः कालो यास्यतीत्यर्थः १४

शुकः स्त्रीणां धैर्यशिथिलं वचनं वक्ष्यारोपमिति लोकसिद्धमित्याशयेनाह इतीति। इत्थमुक्त्वा शौरेः कृष्णस्य प्रहसितादि स्मरंत्यो रु
रुदुरित्यन्वयः १५ १६ मधुंमाधवं वसंतर्तुं १७ कौमुदीकृष्णुद्दती तस्या गंधेन संपृक्तेन वायुनासेविते १८ अध्यवसायत्सौरभेणारोपेतम

श्रीशुक उवाच इति प्रहसितं शौरेर्जल्पितं चारुवीक्षितं। गतिं प्रेमपरिष्वंगं स्मरंत्यो रुरुदुः स्त्रियः १५ संकर्षणस्ताः कृष्ण
स्य संदेशैर्हृदयंगमैः। सांत्वयामास भगवान्नानानुनयकोविदः १६ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च। रामः क्षपासु भग
वान् गोपीनां रतिमावहन् १७ पूर्णचंद्रकलामृष्टे कौमुदीगंधवायुना। यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः १८ वरुणप्रेषि
ता देवी वारुणी वृक्षकोटरात्। पतंती तद्वनं सर्वं स्वगंधेनाध्यवासयत् १९ तं गंधं मधुधाराया वायुनोपहृतं बलः। आघ्रायोप
गतस्तत्र ललनाभिः पपौ समं २० नेदुर्दुंदुभयो व्योम्नि ववृषुः कुसुमैर्मुदा। गंधर्वा मुनयो रामं तद्वीर्यैरीडिरे तदा २१ उपगीय
मानचरितो वनिताभिर्हलायुधः। वनेषु व्यचरत्क्षीबो मदविह्वललोचनः २२ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया। बिभ्रत्स्मि
तमुखांभोजं स्वेदप्रालेयभूषितं २३ स आजुहाव यमुनां जलक्रीडार्थमीश्वरः। निजं वाक्यमनादृत्य मत्त इत्यापगां बलः २४
अनागतां हलाग्रेण कुपितो विचकर्ष ह। पापे त्वं मामवज्ञाय यन्नायासि मयाहुता २५ नेष्ये त्वां लांगलाग्रेण शतधा कामचारि
णीं। एवं निर्भर्त्सिता भीता यमुना यदुनंदनं २६ उवाच चकिता वाचं पतित्वा पादयोर्नृप २७ यमुनोवाच राम राम महा
बाहो न जाने तव विक्रमं। यस्यैकांशेन विधृता जगती जगतः पते २८ ॥ ॥

करोत् १९ २० ईडिरे तुष्टुवुः २१ क्षीबः मद्यपानमत्तः २२ स्वेदप्रालेयेन घर्महिमजलेन भूषितं २३ ४ हे पापे। आकृता आ
हूता २५ ॥

भावमभिज्ञायं माहात्म्यं वा २९ ३० असितांबरे नीलवस्त्रे ददौ यमुनेति शेषः ३१ २ आकृष्टेन वर्त्मना मार्गेण दृश्यते ३३ एका
निशेव व्रजस्त्रीणां माधुर्यैः सौंदर्यैः कर्णरम्यवचनैः आक्षिप्तं आकृष्टं चित्तं यस्य स तथा तस्य इति दशमेऽष्टाशीतिरध्यायः अ

परं भावो भगवतो भगवन्मामजानतीं। मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल २९ ततो व्यमुंचद्यमुनां याचितो भ
गवान्बलः। विजगाह जलं स्त्रीभिः करेणुभिरिवेभराट् ३० कामं विहृत्य सलिलादुत्तीर्णायासितांबरे। भूषणानि विचित्रा
णि ददौ कांतिर्मतिस्रजौ ३१ वसित्वा वाससी नीले मालामामुच्य कांचनीं। रेजे स्वलंकृतस्नाभिर्माहेंद्र इव वारणः ३२ अ
द्यापि दृश्यते राजन्यमुनाकृष्टवर्त्मना। बलस्यानंतवीर्यस्य वीर्यं सूचयतीव हि ३३ एवं सर्वा निशा याता एकेव रमतो व्रजे।
रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषितां ३४ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टाशीतितमोऽध्यायः राजोवाच
भूयोऽहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः। अनंतस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः १ श्रीशुक उवाच नरकस्य सखा क
श्चिद्द्विविदो नाम वानरः। सुग्रीवसचिवः सोऽथ भ्राता मैंदस्य वीर्यवान् २ सख्युः सोपचितिं कुर्वन्वानरो राष्ट्रविप्लवं। पुरग्रामा
करान्घोषानदहद्वह्निमुत्सृजन् ३ क्वचित्स शैलानुत्पाट्य तैर्देशान्समचूर्णयत्। आनर्तान्सुतरामेव यत्रास्ते मित्रहा हरिः
४ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलं। देशान्नागायुतप्राणो वेलाकूले न्यमज्जयत् ५ आश्रमानृषिमुख्यानां कृ
त्वा भग्नवनस्पतीन्। अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ६ ॥ ॥

नंतस्य शेषस्याऽनेन विष्णुना अप्रमेयस्य ज्ञेयस्य १ २ सख्युर्नरकस्य। अपचितिं निष्कृतिं ३ ४ वेलायाः समुद्रजलाभिव्याप्तकूलात्
नीचभूमौ समुद्रतीरनिकटवर्तिदेशान् अनाशयदित्यर्थः ५ वैतानिका यज्ञसंबंधिनः ६ ॥ ॥

ग्रावस्य द्रोणीगुहासुपर्वतनितंबगुहासु ७ ए अभिनंमदजलस्राविणं १० १ कपिजातिचापलंदर्शना १२ हेलयामासअवज्ञाता

पुष्पाण्यो वितोदृतः ग्रामभृंद्रोणीगुहासुसः॥ निक्षिप्यचाप्यधार्द्धंगैः पेशस्कारीवकीटकं ७ तं देशं विप्रकुर्वेधर्षपं पुष्कुलाख्रियः। श्रुत्वासुललितंगीतं गिरिंरैवतकं ययौ ८ तत्रापश्यद्यदुपतिं रामंपुष्करमालिनं। सुदर्शनीयसर्वांगं ललनायूथमध्यगं ९ गायंतंमदिरांपीत्वा मदविह्वललोचनं। विभ्राजमानंवपुषा प्रभिन्नमिववारणं १० दुष्टः शाखामृगः शाखामारूढः कंपयन्द्रुमान्। चक्रे किलिकिलाशब्दमात्मानंसंप्रदर्शयन् ११ तस्यधार्ष्ट्यंकपेर्वीक्ष्य तरुण्योजातिचापलं। हास्यप्रियाविजहसुर्बलदेवपरिग्रहाः १२ ताहेलयामासकपिर्भ्रूक्षेपैः संमुखादिभिः। संदर्शयन्गुदंतासांरामस्यचनिरीक्षतः १३ तंग्रावाणाप्राहरत्क्रुद्धोबलः प्रहरतांवरः। सवंचयित्वाग्रावाणंमदिराकलशंकपिः १४ गृहीत्वाहेलयामासधूर्तस्तंकोपयन्हसन्। निर्भिद्यकलशंवासांस्यास्फालयद्बलात् १५ कदर्थीकृत्यबलवान्विप्रचक्रेमहोद्धतः। तस्याप्यविनयंदृष्ट्वादेशांश्चतदुपद्रुतान् १६ क्रुद्धोमुशलमादत्त हलंचारिजिघांसया। द्विविदोपिमहावीर्यः शैलमुद्यम्यपाणिना १७ अभ्येत्यतरसातेनबलंमूर्द्धन्यताडयत्। तंतुसंकर्षणोमूर्द्धिपतंतमचलोयथा १८ प्रतिजग्राहभगवान्मुशलेनाहनच्चतं। मुशलाहतमस्तिष्कोविरेजेरक्तधारया १९ गिरिर्यथागैरिकयाप्रहारंनानुचिंतयन्। पुनरन्यंसमुत्पाट्यकृत्वानिष्पत्रमोजसा २० तेनाहनत्सुसंक्रुद्धस्तंबलः शतधाछिनत्। ततोन्यमुत्पाट्यजघ्ने तंचापिशतधाछिनत् २१ एवंयुध्यन्भगवताभग्नेभग्नेपुनः पुनः। आकृष्यसर्वतोवृक्षान्निर्वृक्षमकरोद्वनं २२ ॥ ॥

चक्रे संमुखादिभिः पुरस्थित्यादिभिः १३ गैरिकया गिरिधातुरसधारया १९ २० अरुजच्चूर्णयामास २१ २२ ॥ ॥

ससंकटाः वनस्पतयोयस्मिन्सतथा २६ जगतोव्यतिकरंनाशमावहतिकरोतीतिजगद्व्यतिकरावहस्तं २८ इतिदशमेएकोनसप्ततिर ध्यायः समितिशब्देनसंगरस्तमेदृश्यते। उभेअपिशब्देनवाजयतीतिसमितिंजयः॥ स्वभृत्ययोरमागमोद्धाराः। समितिःसंग

ततोमुंचच्छिलावर्षंबलस्योपर्यमर्षितः। तत्सर्वंचूर्णयामासलीलयामुसलायुधः २३ सबाहूतालसंकाशौमुष्टीकृत्यकपीश्वरः। आसाद्यरोहिणीपुत्रंताभ्यांवक्षस्यरूरुजत् २४ यादवेंद्रोपितंदोर्भ्यांत्यक्त्वामुसललांगले। जत्रावताडयत्क्रुद्धः सोपतद्रुधिरंवमन् २५ चकंपेतेनपततासटंकः सवनस्पतिः। पर्वतः कुरुशार्दूलवायुनानौरिवांभसि २६ जयशब्दोनमः शब्दः साधुसाध्वितिचांबरे। सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणां २७ एवंनिहत्यद्विविदंजगद्व्यतिकरावहं। संस्तूयमानोभगवान्जनैःस्वपुरमाविशत् २८ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्विविदवधोनामएकोनसप्ततितमोध्यायः श्रीशुकउवाच दुर्योधनसुतांराजन्लक्ष्मणांसमितिंजयः। स्वयंवरस्थामहरत्सांबोजांबवतीसुतः॥१॥ कौरवाः कुपिताऊचुर्दुर्विनीतोयमर्भकः। कदर्थीकृत्यनः कन्यामकामामहरद्बलात् २ बध्नीतेमंदुर्विनीतंकिंकरिष्यंतिवृष्णयः। येस्मत्प्रसादोपचितांदत्तांनोभुंजतेमहीं ३ निगृहीतंसुतंश्रुत्वायद्येष्यंतीहवृष्णयः। भग्नदर्पाः शमंयांतिशीर्णदंताइवाहयः॥४॥ इतिकर्णसमालोक्यभूरिश्रवसुयोधनौ। सद्यः शासनगांधारौदुर्मंत्रिकांतशीलिनौ ५ ॥ ॥

रक्षभयोरित्यभिधानं १ अकामांकुमारकामविधुरां २ अस्मत्प्रसादेनोपचिताः संवर्द्धिताः। अतएवतोमहींभुंजते। दत्तामस्माभिरितिशेषः ३ निगृहीतंबद्धं। शीर्णदंताः भग्नदंष्ट्राः ४ ॥ ॥

एते इत्यवलोक्य सांबं बंद्धुमारेभिरे। असंगताः विना भूताः। एकलः असहायः अद्वितीयः ७ जिघृक्षवः गृहीतुकामाः ८ हयानामग्र
एषांश्च यणीभवंक मतिनेन सह वर्तमानद्रुति सह यायएणां स्तावद्भिः शरैः १० एतदेव विवृणोति चतुर्भिरिति। सांबस्य मत्के

एतेतिकम्प्य विदुरं गांधारी च यशस्विनी। सांबमारेभिरे बद्धुं कुरुवृद्धैः ससंगताः ६ दृष्ट्वानुधावतः सांबो धार्तराष्ट्रान्महारथः।
प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ७ तं तं जिघृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति वादिनः। आसाद्य धन्विनो बाणैः कर्णाग्रण्याः
समाकिरन् ८ सोतिविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनंदनः। नामृष्यत्तत्परिभवं रंगजइव तस्वोरगः ९ विस्फार्य सुमहच्चापं सर्वान्विव्या-
ध सायकैः। कर्णादीन्सह यायएणां स्तावद्भिर्युगपत्पृथक् १० चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन्। रथिनश्च महेष्वा-
सांस्तस्य तत्तेभ्यपूजयन् ११ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान्। एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनं १२ तं बद्ध्वा
विरथं कृत्वा कृच्छ्रेण कुरवो युधि। कुमारं स्वस्य कन्यां च स्वपुरं जयिनोविशन् १३ तच्छ्रुत्वा नारदोक्तेन राजन्संजातमन्यवः।
कुरून्प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः १४ सांत्वयित्वा तु तान्रामः संनद्धान्वृष्णिपुंगवान्। नैच्छत्कुरूणां वृष्णीनां कलिं
कलिमलापहः १५ जगाम हास्तिनपुरं रथेनादित्यवर्चसा। ब्राह्मणैः कुलवृद्धैश्च वृतश्चंद्र इव ग्रहैः १६ गत्वा गजाह्वयं रामो बा-
ह्योपवनमास्थितः। उद्धवं प्रेषयामास धृतराष्ट्राय शांतये १७ सोभिवंद्यांबिकापुत्रं भीष्मं द्रोणं च बाह्लिकं। दुर्योधनं च विधि-
वद्रब्रवीद्राममागतं १८ तेपि प्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमं। तमर्चयित्वाभिययुः सर्वे मंगलपाणयः १९ ॥

मसिंदशप कुरवः किमकुर्वन्नत्याह। महेष्वासा इति ११ अत्र सांबस्य पराजयो नास्तीति भावेनाह चत्वार इति १२ गृह्य गृहीत्वा
जयिनो जेतुकामाः एवं न तु लब्धजयाः इति तात्पर्यं १३ ४ नारदोक्तेन नारदवचनेन १४ कलिं विरोधं १५ ॥ ॥

परस्परं शिवं सुखमनामयं आरोग्यमविक्लवं धार्ष्ट्ययुक्तं २१ २ अधर्मेण अबध्नीत बंधनमकार्ष्ट। मृष्ये सहेय २३ ४ आरुरुक्षति आरोढु-
मिच्छति २५ योनेयेन योनिनिमित्तेन संबंधेन तेषां नेतथा। ततः किमत आह सह इति २६ अस्मद्दत्तेत्युक्तं विवृणोति चामरेति। मद्युप्माहनी
यं आसनं भुंजंति भजंति। अस्मोपद्रवमंतरेण रक्षंति। भुजो नवनइति पाणिनिः २७ दातॄणामस्माकं प्रतीपैः विरोधिभिः दत्तैरमृतैः ह्री

तं संगम्य यथान्यायं गामर्घ्यं च निवेदयन्। तेषां ये तत्प्रभावज्ञाः प्रणेमुः शिरसा बलं २० बंधून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमना-
मयं। परस्परमथो रामो बभाषेविक्लवं वचः २१ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः। तदव्यग्रधियः श्रुत्वा कुरुध्वम-
विलंबितं २२ यद्यूयं बहवस्त्वेकं जित्वाधर्मेण धार्मिकं। अबध्नीताथ तन्मृष्ये बंधूनामैक्यकाम्यया २३ वीर्यशौर्यबलोन्नद्धमात्म-
शक्तिसमं वचः। कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः २४ अहो महच्चित्रमिदं कालगत्या दुरत्ययं। आरुरुक्षत्युपानद्वै
शिरो मुकुटसेवितं २५ एते यौनेन संबंधाः सहशय्यासनाशनाः। वृष्णयस्तुल्यतां नीता अस्मद्दत्तनृपासनाः २६ चामर-
व्यजने शंखमातपत्रं च पांडुरं। किरीटमासनं शय्यां भुंजंत्यस्मदुपेक्षया २७ अलं यदूनां नरदेवलांछनैर्दातुः प्रतीपैः फणि-
नामिवामृतं। येस्मत्प्रसादोपचिता हि यादवा आज्ञापयंत्यद्य गतत्रपा बत २८ कथमिंद्रोपि कुरुभिर्भीष्मद्रोणार्जुना-
दिभिः। अदत्तमवरुंधीत सिंहग्रस्तमिवोरणः २९ श्रीशुक उवाच जन्मबंधुश्रियोन्नद्धमदास्ते भरतर्षभ। आश्राव्य रा-
मं दुर्वाच्यं असंवीक्ष्य पुरमाविशन् ३० दृष्ट्वा कुरूणां दौःशील्यं श्रुत्वावाच्यानि चाच्युतः। अवोचत्कोपसंरब्धो दुष्प्रेक्ष्यः प्रहसन्मु-

राद्दिसैः विषात्मना परिणतैः दातॄणां मरणप्रदत्वेन प्रतीपैः २८ अवरुंधीत प्राप्नोति। सिंहग्रस्तं उरणः आविर्य कः २१
आकवलं न गृह्णाति सिंहग्रस्तमिति पाठे। कवलमादातुं न शक्तः २९ असंवीक्ष्य अपश्यन्तिः रामं ३० वाच्यानि वाच्यतीत्र प्रवादा-
निशयिताम्रवादस्ता ३१ ॥ ॥

अशमः शांतिकरः लकुटः पाष्टिः ३२ ४ सोसौ क्लम: ३६ ७ अद्यामहेश्वा क्रांत्वा महे। सर्वै रुपासितं निषेवितं तीर्थमागीरथी अस्या

नूनंनानामदोन्नद्धाः शांतिंनेच्छंत्यसाधवः। तेषांहि प्रशमो दंडः पशूनांलकुटोयथा ३२ अहोयदून्सुसंरब्धान्कृष्णंचकुपितंशनैः। सांत्वयित्वाहमेतेषांशममिच्छन्निहागतः ३३ तइमेमंदमतयः कलहाभिरताःखलाः। तस्मात्तंमामवज्ञाय दुर्भाषांमानिनो॥३४॥ नोग्रसेनःकिलविभुर्भोजवृष्ण्यंधकेश्वरः। शक्रादयोलोकपालायस्यादेशानुवर्त्तिनः ३५ सुधर्माक्रम्यतेयेनपारिजातोमरांघ्रिपः। आनीयभुज्यतेसोसौनकिलाध्यासनार्हकः ३६ यस्यपादयुगंसाक्षाच्छ्रीरुपास्तेखिलेश्वरी। सनार्हतिकिलश्रीशोनरदेवपरिच्छदान् ३७ यस्यांघ्रिपंकजरजोखिललोकपालमौल्युत्तमैर्धृतमुपासिततीर्थतीर्थं। ब्रह्माभवोहमपियस्यकलाकलायाःश्रीश्चोद्वहेमचिरमस्यनृपासनंक्व ३८ भुंजतेकुरुभिर्दत्तंभूखंडंवृष्णयःकिल। उपानहःकिलवयंस्वयंतुकुरवःशिरः ३९ अहोऐश्वर्यमत्तानांमत्तानामिवमानिनां। असंबद्धागिरोरुक्षाःकःसहेतानुशासिता ४० अद्यनिःकौरवांपृथ्वींकरिष्यामीत्यमर्षितः। गृहीत्वाहलमुत्तस्थौदहन्निवजगत्त्रयं ४१ लांगलाग्रेणनगरमुद्विदार्यगजाह्वयं। विचकर्षसगंगायांप्रहरिष्यन्नमर्षितः॥४२॥ जलयानमिवाघूर्णंगंगायांनगरंपतत्। आकृष्यमाणमालोक्यकौरवाजातसंभ्रमाः ४३ तमेवंशरणंजग्मुःसकुटुंबाजिजीविषवः। सलक्ष्मणंपुरस्कृत्यसांबंप्रांजलयःप्रभुं ४४ रामरामाखिलाधारप्रभावंनविदामहे। मूढानांनःकुबुद्धीनांक्षंतुमर्हस्यधीश्वर ४५ स्थित्युत्पत्त्यप्ययानांत्वमेकोहेतुर्निराश्रयः। लोकान्क्रीडनकानीशक्रीडतस्तेवदंतिहि ४६ त्वमेवमूर्ध्नीदमनंतलीलयाभूमंडलंबिभर्षिसहस्रमूर्द्धन्। अंतेचयःस्वात्मनिरुद्धविश्वःशेषेद्वितीयःपरिशिष्यमाणः ४७

अपितीर्थं शुद्धिकरं अस्यकुलस्य ३८ ९७ अनुशासिता शिक्षाकरः ४० ४ कुटुंबी नामीति दीर्घः छांदसः ४५ क्रीडनका
क्रीडासाधनानि ४६ अंतेजगत्संहारेपरिशिष्यमाणः द्वितीयः शेषे ४७ ॥ ॥

जगत् विश्वतःते कोपोखिलशिक्षार्थं सत्वंस्थित्यादितत्पराः अतः इत्थं हलधरेयथा चिंतयाद्यमनुचितमंतर्यामिविषयमितितात्पर्यमवगंतव्यं ४८
विश्वस्यप्रपंचस्याऽनुग्रहार्थं कर्मविक्रमलक्षणो व्यापारोयस्यसतथातस्यसंबुद्धिः हेविश्वकर्मन् ४९ संविग्नैर्भयसंभ्रांतैः वेपमानानांकंपमानानां
अयनोगोपानां अयनेराश्रये: ५५ रौक्माणि हेमरचितान्याभरणान्येषांसंतीतिरौक्मिणस्तेषां ५२ ४ रामविक्रमोज्ज्वले ख्यातन घ रोन किंतुस

कोपस्तेखिलशिक्षार्थंनद्वेषान्नचमत्सरात्। बिभ्रतोभगवान्सत्वंस्थितिपालनतत्परः ४८ नमस्तेसर्वभूतात्मन्सर्वशक्तिधराव्यय। विश्वकर्मन्नमस्तेस्तुत्वांवयंशरणंगताः ४९ एवंप्रपन्नैःसंविग्नैर्वेपमानायनैर्बलः। प्रसादितःसुप्रसन्नोमाभैष्टेत्यभयंददौ ५० दुर्योधनःपारिबर्हंकुंजरान्षष्टिहायनान्। ददौचद्वादशसाहस्राण्ययुतानितुरंगमान् ५१ रथानांषट्सहस्राणिरौक्मिणांसूर्यवर्चसां। दासीनांनिष्ककंठीनांसहस्रंदुहितृवत्सलः ५२ प्रतिगृह्यतुतत्सर्वंभगवान्सात्वतर्षभः। ससुतःसस्नुषःप्रायात्सुहृद्भिरभिनंदितः ५३ ततःप्रविष्टःस्वपुरींहलायुधःसमेत्यबंधूननुरक्तचेतसः। शशंससर्वंयदुपुंगवानांमध्येसभायांकुरुषुस्वचेष्टितं ५४ अद्यापिचपुरंह्येतत्सूचयद्रामविक्रमं। समुन्नतंदक्षिणतोगंगायामनुदृश्यते ५५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेनवतितमोध्यायः श्रीशुकउवाच ब्रह्मण्यासीत्सखाकश्चिद्ब्राह्मणोब्रह्मवित्तमः। विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः १

र्वचक्रविषयइत्याह अद्यापीति। रामविक्रमंसूचयत्गंगायांदक्षिणतःसमुन्नतंदृश्यतइत्यन्वयः ५५ इतिदशमेनवतितमोध्यायः यथे
तं। लक्षितं। आत्मना प्रकाशितं जगत् अनुविष्टस्त्वमात्सर्वगतो विभुरिति ज्ञातव्य इति तात्पर्यार्थः। एवंविधज्ञानेन किं प्रयोजनं तदाह। तवेति। येतव अवि
लतत्वानिमद्वपदार्थाः। अधिष्ठानतयानिकेतनानि। अधिष्ठानतया आश्रयो यस्य स तथा। तस्य भावः नत्वात्या स्वरूपं ज्ञात्वा परिचरंति पूजयंति य

न हि विकृतं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं। तवयेपरिचरं
त्यखिलतत्वनिकेततया न नुतेपदाक्रमंत्यविगणय्य शिरो निर्ऋतेः १४ ॥ ॥

ह्यखिलतत्वानां निकेततया ते ज्ञानिनः। अनात्मकं ब्रह्म प्राप्य विरुद्ध्य त्वां निर्ऋत्यास्वस्य संसारस्य शिरः स्फुरं पदाक्रमंति नन्तु। किं कृत्वा। अ
विगणय्य संसारमिति शेषः॥ आचार्यैरत्र यथाः याः कृतयोऽन्येनु परंपरासिद्धास्वाह एवोदाह्रियंते। नत्वन्याः। लोकप्रत्ययार्थं तत्र श्रुतिसूक्तानि का
र्येभ्युराणानि चोपात्रानि यथैव कुंडलं त्यक्त्वा नादातुं कनकं शक्यं तस्यैव तद्वच्छायावाक्केवलाभेदतः स्फुरं। एवं सुरासुरनरेषां स्थितो भगवान् हरिः इते
व भेदेनमंतव्यो जीव भेदेन सत्यपि। ये तथाभिन्नमीशे शांपश्यंति परमर्षयः॥ अनन्या भिविरुद्ध्य त्वा तं संसारं निर्ऋतेः शिरः॥ अगणय्य पदाक्रम्य दैवं
विलयंयनुरिति गाथदे १४

परिविषस इति श्लोकस्यायं भावः। ये देवाः स्वल्पादेव कामयाः स्वाचित्तधानपि गिरा वैदिकवाक्या परिविषसे पतितो वश्वासि वेदोक्तकर्मानुष्ठानेन वर्जयस इत्यर्थः। वषपवं धनइतिधातुः। कानि च। हाम्रापमूनि वा त्वयि द्रष्टस्तोहृदाः। गाढ वद्दृढ्रे ह्रपाशाः। प्रतुषाः पुनंति न तुञ्जगादिति शेषः। तेन वविमुखाः दूषिणोन पुनंति। प्रस्तुतमस्ती मसंकुर्वतीति शेषः। अनेन वयति गारवयः सुरादिकां स्वनस्मन स्तोजगद्रुनवभुवयोन परे इति विरूतंकृतः। स्तुहि रपि त्वन्नियते त्वाङ्कः। त्वमिति। अखिलकारकशक्तिधरः। परिपूर्णकर्तकारपित्रशक्तिधरस्त्वमेक एव नान्यः। कृतः। सुरादच कवली। अस्म

परिविषसेप श्रुतिवगिरा विदुधानपि तान्स्वयि दृढभो हृदानन्तपुनंति न ते स्तुविखाः। त्वमेकस्वरा
डखिलकारकशक्तिधरस्त्वलिमुद्दहंति समदं तिचपे निमिषाः १५ ॥ ॥

न्स्वामी। किमस्मानात्रापयसीति प्रतीत्य सर्वदा विद्रूतनयनत्वात्। ये अनिमिषाः देवास्ते तव वलिमुद्दहंति मनुजैर्दीयमानं समयगदं त्विदानेन महएकदेशाः परिपूर्णशक्तिर्वलिं हरगइतरे सुः सुराः सुखिनइति व्याख्यातं। समभेदे समीचीनेषु षुसूत्राखुखेषु चेतिमादवः। तत्र तत्र पुराणवाक्योदाहरणमेतच्छन्त्यर्थत्वेन श्लोको ग्रथितइति निश्चीयते। नाभ्यातिरपि प्रमाणीक्रियते १५ ॥ ॥

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा। यो देवानां नामधा एक एव तं संप्रश्नं भुवना यंत्यन्या। तन्नाधाजं तद्विणां सम स्मा अपयः पूर्वे जनितरो न भूना। असस्त्रे सूत्रे रजसि निषन्ने ये भूतानि समकृण्वन्निमानि इत्यादि श्रुतेः। नहो यं शादिसत्वा त्वां येर्थ भूताः गुणामताः। घूर्णी धीत्वद् इत्यप स्पृखा स्नेहरे स्यदेति। अतएक सर्वनामासो सर्व कत्त्वि केशवइत्यादिस्मृतीनां मधार्थ त्वेन संहत्य स्थापितः। रमइति श्लोकस्यायं भावः। मधुमीनि जित्युरितिवत्स्त्वे मधूनि लिप्सुरिति। फाठं गाधाभगमयास्नमाने लोपः। इति न्यायात्स्कृतः तनोइतिपठोपि वै नत्वेपरज्ञापनाय काशितत नपित रित्यर्थः। ततेति ताते ति श्रुतिः। ईश्वरः। आनंदपूर्णत्वादनामा। सर्वस्मात्कृष्टत्वाद्दुनामा। आनंदत्वादुनामानात्कृष्टत्वाद्दुनामकः। एतन्नामद्वयं विश्रोजीलायाये प्रसुच्यतइति स्मृतेः। तयोः संधिः। त्वइत्यनेन नाम्नोर्न्यमित स्वाभेदः। तुनामः संतुद्धिरस्वाचि पे पुराणः श्रुतः। सुविदुद्वा शरेवसंतीत्यादि श्रुतीतिस्वइमे विवुधनामा गुणाः। विबुधानामिंद्रादीनां नामाम सर्थभूताः परमैश्वर्यादिगुणाः। अमृते नित्यमुक्ते परमे त्वयि निलिल्युः। निलीनतया स्थिताः। कस्मिन्के इव। मधुन्यर्णवे मकरंदमधुलक्षणे समुद्रे अशेषपुष्परसाइव। यतो शेषगुणाकरो भवान्अतो हृत्सुषिरपः। निर्झारणेसमी। गुणां मध्ये समस्यकृतानिनः अंगतया सृष्टेन्येरनवगतयामायया स्वेच्छया त्वयि भेदं समस्नादन्यो। विशिष्टगुणः परस्तिभेददर्शनलक्षणं। कुशलमनु विधातुमनुप्रभवः। समस्तकृस्नसमर्थाः। अनेन

त्वयितदमेततो विबुधनामगुणाः परमेमृतइवार्णवे मधु निलिल्युरशेषरसाः। स्वगुतवमायया स्वगतया कुशलं त्वयि बुधियोग भेदमनुविधातुम
नुप्रभवः १९ कथमनुवर्तिनां भवभयं तव यत्कृशटीस्रजति मुहुर्न्नरणं॥ ॥

क्लानिर्मानिली नस्तानि नामानि व्यक्तगुणा इत्यत स्तेषां सत्त्ववोहर्षिति इति। तदुक्तं अन्यावितथा न मा विष्णोः शक्त्ये वकुशलं जनाः कुर्वंति कुशले षु भेददर्शनमेव तु। शर्गानं दादिसंपत्तिं विष्णो स्तत्वेतरेषु च। तद्पेक्ष्यपदि भामाकलत्वस्यानंत्वज्ञे ददर्शनं। अनाद्यनंतो भेदोयं स्वभावः परलीवयोः। स्वतो वा परतो वापि न कदाचिन्वयण इयति। एवं ज्ञानवतां विष्णुवर्जं जन्म न दास्यति। अतत्व निर्मेद्यन त्यासाहि सर्वेष्वरः स्फुरिति। अनेन कथमनुवर्तिनां भवभयं तव यत्कृकुटीसृजति मुहुर्न्नरणमित्येतदर्थो विवृतः। तथाहि बाह्या तव गुणाकिया न सामर्थ्यंतथा अनुकूलश्च तस्य प्रसादात्तुवर्तिनां मुहुर्न्निरंतरं चेव मानानां तव सा कुटी भवभयं कथं सृजति। न कथमपि प्रस्तुतनिर्मूलयतीत्यर्थः। यः पाता जनिता चैव कल्पको नित्यपोषकः। जापकः सर्वदेवानां पादानां प्रभुषोत्तमः। सर्वदेवाभिधोवाच्यो स्तनभव्यभवत्प्रभुः। विचार्य। सर्वदेवेशेशं ब्रह्माद्या यजंति च। त्रिगुणात्मकसंसारस्त्र यादिनयजंतितं। यतः प्राणेशशास्त्येव तेषां प्रजनमिष्यते। अतः सर्वेश्वरो विष्णुरेक एव महागुणइत्यनेन ब्रह्मादीनामवगुणत्वं स्वातंत्र्येण सर्वकर्तृत्वनित्यादिकं दूरतोपहस्तितमिति। स

मुच्यते तत्त्वसंबुद्धा साचार्यात्पुरुषो भवात्। एताबेव स्मृतो वृद्धौ परमः प्रकृतिस्तथेति कलापश्लोकस्यार्थं तथा। देशतः कालतश्चैव समयाद्वा समा-
श्रावज्ञावुभौ। ताप्याकुभययोगात्। यां ज्ञायंते ऊवाः परे इति कोंऽरव्यक्तस्यार्थं तथा ग्रथितस्याजनपरिमुच्यते इत्यस्यायं भावः। हे अज ननलोकवि-
लक्षण। जन्मरहितेन। समएकप्रकारतयानंतं व्याप्तं। अनंतमदुष्टतया निर्दोषत्वेनज्ञा ऊज्ञा नता समयज्ञानवताचार्येणउपदिष्टमार्गेण। अ-
नवगतिज्ञानवान् पुरुषः सततात्मेतत मज्ञानकल्पिता ऊवात्संसारात्परिमुच्यते सम्यग्मुक्तो भवति। कथमनुज्ञानतेतितत्राह। नेति। अज शब्दस्याने

अज नपरिमुच्यते भवात्सततात्मम मज्ञावतानतमनंतमदुष्टतया। नघटतज ऊवः प्रकृतिपुरुष-
योरजयोरुभयपुजोर्भवत्यपुष्टतो जलबुद्बुदवत्   १८ ॥ ॥

कष्टस्तित्वेनानिश्चपद्‌त्यतः प्रकृतिपुरुषयोरिति। तयोरुद्भव उत्पत्तिर्नघटतइतियतस्ततः प्रकृतिपुरुषयोर्विनात्योवंधरहितोनविद्यते। मुख्य-
तोजशब्द प्रवृत्तिनिमित्तान्यथानुपपत्या नघटत इत्युक्तं भवति। तदुभयपयोः प्रकृतिपुरुषयोर्युज्ञायोगमोरसुभूतोजीवाभवंति। देशतःकाल-
तश्चपत्नपरमस्तत्र प्रकृतिर्यत्रप्रकृतिस्तत्रपरमइत्युभयपुजोः। तत्र दृष्टांतः। जलबुद्बुदवत्। जलबुद्बुदानि यथोत्पद्यंते तथेति। सम्यक्ज्ञा-
नवसाचार्यान्मुच्यते पुरुषोभवात्। द्वावेव नित्यमुक्तौ तु परमः प्रकृतिस्तथेति स्मृतः   १८ ॥ ॥

वर्षभुजइत्यस्य श्लोकस्यायं भावः। येयत्रयस्मिन्यदेत्वधिकृताः अधिकारं प्राप्ताः विष्टक्ष्ज इत्येभवतश्चकिता भीताः तत्रस्थित्वा भवतो विम-
तिबलिमितिशेषः। कस्मैकेइव। वर्षभुजः खंडेशाः। अखिलक्षितिपतेश्चक्रवर्तिन इव। यदि पुरुषो विमुक्ताः संतो यस्मात्स विमुक्ताः स्वतस्वं वि-
मुक्तःसतः। परस्यसकाशात्। विरहे मुक्तोउदीक्षयेत। परमात्मन एवमुक्तिरिति मश्येत। तमेवं विद्वानमृतइहभवतिनान्यःपंथायनायविद्यतेइ-
तिश्रुतेः। हे अज। तर्हि यि स्थिरचरजातयः। स्थिरत्वं चरत्वंचजातिर्येषां तेतथा तेऽस्य निमित्तभुजः स्युः। अःपरमात्मा निमित्तं मुक्तयोगो संसारस्य

वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधतियत्र येत्वधिकृता भवतश्चकिताः। स्थिरचर-
जातयः स्यु रज येत्व निमित्तभुजो विरहउदीक्षयेद्यदि परस्य विमुक्ततः   १९ ॥ ॥

येषां ते तथा। भगवन्वियोगा देवसंसारभाजइत्यर्थः। मुक्तेस्तु वियतत्वाद्बंधोपि तदधीन इति भावः। खं डाधीशाः सार्वभौमस्य यद्वद्बलिशाद्याः
कुर्वंतेते उशास्त्रिः। त्वं मुक्तिहेतोर्वंधदोः तामतो नस्वंज्ञानदो ज्ञानदृष्ट्या सिद्धिसो इति श्रुतिः। आत्मानं मुक्तिदं विस्मृत्य यदि पुंसतउदीक्षयेत। मुख सत्त्व
:तदावंधस्ततएवेतिसेत्स्यतीति स्मृत्यनुगृहीतश्लोकस्यार्थमनुवदतीति   १९ ॥ ॥

नहिपरमस्येतिश्लोकस्यायंभावः। अनात्माप्राणादिःपरस्योत्तमस्य। सर्वसंदधतःयस्यपरमस्यतेतवकश्चिदपरःस्वतंत्रोनभवेत्। हेशून्यतुल्यसमा नवृत्तिर्यस्यअव्रजीवसमुदायेप्ययतः सर्वज्ञानतः सर्वज्ञस्येत्यर्थः। अयंशब्दावितिधातोः गत्यर्थानांज्ञानार्थत्वात्तद्वयथा। प्राणस्यनापरः स्वतंत्रः। तदुक्ताप्राणःश्रीरूपोवाविनाक्षतंत्रोनास्ति। त्वमेवस्वतंत्रः। हेसर्वपूर्ण। यदितत्रस्तस्मात्प्राणान्तनुभृतोजीवाःधुवाप्राणाधीनाःजीवाः कियंतःसंतीत्यर्थः। तर्हिसत्यं। तेअपरिमिताःअसंख्याताः। नत्वेवंचेत्। एकमेवाद्वितीयंइतिश्रुतिवाक्यविरोधइतितत्राह। नहीति। श्रुतेर

नहिपरमस्यकश्चिदपरोनपरस्यभवेद्वियतइवापदस्यतवशून्यतुलंदधतः। अपरिमिता
ध्रुवास्तनुभृतोयदिसर्वगतास्तर्हिनशास्यतेतिनियमोध्रुवनेतरथा ॥ १७ ॥ ॥

यंतियमोर्थोजीवानांशास्यताअधीनतानेत्यत्रार्थेनहि। किंतुस्वगतभेदस्यईश्वरस्यान्तरंतत्स्यनिषेधोनियमः। तत्रकिंप्रमाणमत्राह। ध्रुवत इति। अतोन्यदार्त्तंनेहनानास्तिकिंचन। नतत्समश्चाभ्यधिकश्चदृश्यते। इत्यादिश्रुतिस्मृतयस्तथाध्रुवतेच। तवअतंत्रोनापरोपद्वद्द्वत्रप्राण त्वान्यस्तुल्यशून्यस्यसंभवेत्। प्राणाधीनाअमिताजीवसंघाः प्राणोवशोतेप्रकृतिश्चभूमन्इतिश्रुतिरनेनगृहीता। स्वतंत्रोनापरःकश्चिद्धि

ष्णोःप्राणपतेःप्रभोरित्यादिस्मृतेः। श्रुतिरपिसत्यार्थेत्यर्थः ॥ १७ ॥ ॥

यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ। तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइतिश्रुतेः। देवाआदिवियोगाथायतंतेसर्वसाधनैः। गुरु दाराभिःसार्द्धनोसंनीहसंस्मृतेः। गुरोरनुग्रहःहतेसाधनंनहरेःप्रियं। गुरूपदेशानुसारिणाहोत्येवनसंशयइतिस्मृत्यनुगृहीतायांश्रुतेः अभिप्रायगर्भस्यइहभवच्चरणेष्वित्यादिश्लोकद्वयस्यअयमभिसंधिः। हेअजित। भक्तभक्त्यावशीकृता। जयोविशेषाअवायोअभक्त्या तस्मात्साधनांजगदीशयोःकृतोद्वेनोःसर्वशक्त्योर्बलान्नृपइतिवचनाश्भक्तिलक्षणसाधनसामग्र्यविशेषप्रसादेजयोनाम। हेइह

इहभवच्चरणेषुसुज्ञातमुक्तोजितहृषीकवायुभिरदान्तमहत्तुरगैः। यइहयतंत्यनतिजोलमुपायविरो
व्यसनशतान्विताःसमपहायगुरोश्चरणंवणिजइवोद्भुसंत्यकृतकर्णधराजलधौस्वजनसुतात्मदारधनधा
मधराः। सुखशंतिमितित्वयिहिंसंतिनतानिरृणं। विभवत्यतिअयतश्चात्मनिसर्वरसे ॥ २१ ॥

रेयइहसंसारेव्यसनशतान्वितारंगुरोश्चरणमपहायहृषीकवायुभिरदान्तमहत्तुरगैःकर्मणीयतंतीत्यन्वयः। व्यसनानांशतमेवा विर्व्यसनशताख्यिःतंतास्यतीतिसःतं। पणवत्यंमूलोपक्षित्यादिलक्षणोपेतस्यगुरोःचरणमितिसेवेहलक्ष्यतांतंसेवांत्यक्त्वा। उदान्तःसा रथिः। रथोपरिस्थीकरणादुदान्तःसारथिर्मतइतिवचनान्नवाकरेवोदान्तोयेषांतेतथा। पृथक्रूपमहत्वंछंदसं। हृषीकाण्येववायुरुदा न्तोयेषांतेतथा। महांतस्तुरगामहत्तुरगाःमहारेशाभावाश्छांदसः। तेस्तेउद्धसंतिनिश्चसंतीत्यन्वयः। अत्रदृष्टांतः। जलधावकृतक र्णधाराःअकृताःकर्ण॥ ॥

द॰ उ॰

१२१

धरः कर्णधारो यैस्ते तथा। वणिजः सांयात्रिका इवेत्यर्थः। यतमानाः कीदृशाः। स्वजनसुतात्मदारधनधामधरासुरथैः स्वजनसुतादिशरणै
पेताः। आत्मा देहः। धाम गृहं। जितहृषीकेत्येकं वा पदं। तत्कर्मेव विवरणं। ये च देवकल्पाः सुत्तमाः भवच्चरणे शुभवद्विषयसुकर्मसु
मुक्तात्मभुवः सुष्ठु ज्ञातस्याना। तत्रमयोग्यता सुकाहृषीकवायुसारथिनुशो रति लोलं बुद्धिं वा जल्पं विना निष्कामत्वे मयतं तिते च
जनादि सुकारवस्तु संति। तत्कृष्टं सुसंनिपातं तिजीवंतीत्यर्थः। श्वसप्राणन इति धातुः। किं कृत्वा गुरोश्चरणमपहाय हानं त्यागमया
कृत्य। गुरुचरणनिषेवणं कृत्वेत्यर्थः। नाश्रमकृतः कृतेनेतिकृतेरकृतो भगवानेव कर्णधारो येषां ते तथा। दैवानुकूलकर्णधारा
इत्यर्थः। ते उपायविदः सुयोगास्ताः किं इत्यंपानि विहितानि साधनानि। सुखशांतिमतित्वापि सुखस्पापि सुखं सुखयं। दुःखमिश्र
हितसुखमित्यर्थः। तस्यांतिमति पूर्णिमतिपूर्णसुखे इत्यर्थः। यस्मिन् कापि न संति हि। गुर्वभावात्। तस्माद्धि भवे विषंगतसंसा
रे देहाभिमानरहिते जीवन्मुक्ते उत्तरा तुद्यति। उपदिशंति। साधनज्ञातमुपदिशंतिसंति। सर्वरसे सर्वस्मात्सारभूते आत्मनि पर
मात्मनि श्रयत एव। तत्साधनसर्वस्वं तच्छीतिनकत्वेन श्रीहरिं विषयीकरोतीत्यर्थः। यण व त्यंतु लोयस्कतालास्पोद घातालकः
दृशा प्रादेशकः सप्तपदो हस्तवत्तयः। कलमाचर्या गुलश्चेव वामी संदेहवर्जितः। वास्तु देवैकशरणो गुरुरित्युत्तमोत्तमः। गुरु
लक्षणं संपूर्णः साक्षाद्देकस्त्वतुर्वेदः। ततः शेषं द्विवद्भ्यासः क्रमादेवप्रकीर्तितः। इत्यादिवाक्यमत्र प्रमाणं। देवा योग्यतया
ज्ञातापि विष्णुपदांबुजाश्रयाः। तथापि साधनैस्तेषां तत्प्राप्तिर्गुर्वनुग्रहादिति च २१ ॥ ॥

राम

१२१

अज्ञाज्ञात्वेति लोकप्रवृत्तिप्रवर्त्ततां कोनु मोक्षं ददाति। अतो ज्ञोपासते सा सुधीराः नाहं भावज्ञे सुतरां शिवास्रतिस्कृतेः। महामाय
नुके वल्पमज्ञानां कः प्रदास्यति। अतः संतो विजानंति हरिं तेत्वनहंकृता इति संग्राहिण्या अर्थरूपस्य। इति सदज्ञानतामित्यस्य श्लोकस्यायम
र्थः। इति शाहुः प्रकारवचः। इति लोके दृश्यमानप्रकारेण। सदज्ञस्त्वज्ञानतां ब्रह्मास्तानितां। मिथुनतः स्त्रीपुंसभावेन रतये ग्राम्यधर्माय च
रतां प्रवर्त्तमानानां को न्विह उत्तम। अथ इह विज्ञने मोक्षविषयो सुखयति। न कोपि मोक्षं ददातीत्यर्थः। कीदृशे विज्ञने। स्वनिरस्तभगे सुष्ठु अनि

इति सदज्ञानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे। भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत
भवतः पदांबुजंहृदाघभिदंदधति॥ ॥सकृन्मनस्त्वयि विदात्मनि नित्यसुखेन पुनरुपासते पुरुषसारहरावसथम् २१ ॥

रन्तो भग ऐश्वर्यादिगुणोपलक्षितस्तथा तस्मिन्। यत्र स्वदृशा नित्यं परमानंदलक्षणमोक्षाभावः। अतः भुवि स्थाने। पुरुपुण्यं शुद्धिकरं तीर्थ
शास्त्रमेव सदनं धारणं येषां ते तथा। ते च ऋषयो देवादयः। त्वामेव संतं ज्ञात्वा भवतः पदांबुजं हृदा निवसंति। कीदृशं। अघभिदं पापनाशनं।
किंच। मनो मननसमर्थमंतःकरणं। नित्यसुखे चिदात्मनि त्वयि दधति। अत्र प्रधानसाधनमाह। हे पुरुषसार पुरुषोत्तम पुनरपश्चा
त्। हरस्य रुद्रस्यावसथं ओंकारं। सकृदपि नोपासते न कुर्वंतीत्यर्थः २२ ॥ ॥

यज्जीवमीशं प्रवदंतितर्कैस्तद्वेश्वरी वचनं संदधाति नासीदादौ मरणे नो भवविष्यन्नृपात्तो ऽहं इति इत्वं स्तुकेष्विष्टार्थद्योतकस्य स्मृतेरु गृहीतस्येदृद्दमप्यथो वदंति वेत्याद्विश्लोकस्येदं तात्पर्यं । इदं जगत् । नपातीत्यपः पापालं इति धातुः । सोस्यास्तीत्यपि अनीश्वर इत्यर्थः । आदिगाङ्गित मस तपि अतएवाधतिष्ठमिति वा । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं इत्यादेः । ममत्रो न्यईश्वरश्चेतनत्वादित्यादितर्कैर्यदंतिवेदश्चोत स्मात्तर्कतः । सर्वात्मनाएतदविवचनं भगवत्स्वेरणयेत्यवगंतव्यं तदिति तर्कः प्रामाणिकः स्यादिति तत्राह । नवेति । तर्को व्यभिचरंति नश्चित्य चयः अत्र व्यभिचारित्वे पक्षधर्मत्वादिलक्षणाभावः । तथाहि विशिष्टपक्षीकारः सिद्धांतविरुद्धत्वादनुपपत्तिः । निर्विशे

इदमप्यथो वदंति चेत्ततर्का व्यभिचरंति क्वचित्क्वचित्स्पष्टावा । ततोभयदप्यवा इतयेविकल्पउषितो चहं संधपरंपरया भ्रमतिमारतावततोरुहृष्णिरिति रूढजवा २३ नपादिदमग्रआसनभविष्यदतोनिधनादनिमित्तकमंतरात्वयिविभातिद्रूपेकरसे । अतउपगीयतेइवविगजाताविकल्पयथैश्छितथमनोविलासमित्यवयेतिबुधाः २५

षेश्वरपक्षीकारे हेतोरसिद्धिरित्याद्दूषणमुपेक्ष्याचार्यैः कातात्पर्यापरिप्लत्वं प्रदर्शि । वेदोक्तोजीवव्यतिरिक्तेश्वरो न तर्कैरपनेतुं शक्य । यतस्तर्काव्यभिचारिण इति । अन्यत्र त्वयोऽभिवाकधीतीति श्रुते । जीवेश्वरयोर्विरुद्धधर्माक्रांतत्वेनभिन्नो । छायातपवदित्यादेव दूषणं नरमाह । क्वाचिदिति । अभेदस्य सिद्धावपि ह्यो वतर्कस्य शेषानापारक त्वेनाप्रयोजकत्वात् । अपिपासोः पयः पानवत् । भोजनस्येष्टसाधनत्वतर्को ह्यारितादोष्यभिवारणत्वेनव्यर्थश्चास भवशरीरसमवेतसुखदुःखानुसंधातृत्वेन कायपरिमाणो जीव इति तत्पराणा
दर्शनं परिकल्प्यतस्तर्कोविम्र ॥ ॥

षैवाञ्चएतशरीरस्य स्वकर्मादिवशाद्दस्यादि शरीरप्राप्तौ विकारित्वापत्तेः । ननु तर्हि तर्कैस्मः किं प्रयोजनमत्राह । ततइति । यतो दुष्टाभ्रतोभयदस्य वह्नितये भयउद्दीनां बुद्धिरव्यवधानायं तर्को भवंति । ननु धीरा णां विदुषां न युक्तमिति पृष्ठनाइति तत्राह । विकल्प इति विनिषेधेष्टव्यस्तु भाव इति वचनात् । विकल्पोवेद विरुद्धकल्पना । जगतो मिथ्यात्वं । जीवस्य ब्रह्मणो भेदो जगत्स्त्रष्टणि कंपडुरा ईश्वर इत्यादि लक्षणांधपरंपरयेवा वहस्तुषितः प्रवर्त्तितः अंधे नैवनीयमाना यथोधा इति श्रुतिः । अंधपरंपरा याश्चक्तो वलं इति तत्राह । भ्रमंतीति । भारती वेदवाणी च धमति वक्रधावत्ति । तात्पर्यार्थाव बोधो कुशलानज्ञानुद्दिश्येति शेषः । इति यस्मात्तस्मादंधपरंपरा । वहृक्ति स्यायान्तिः परिशिष्ट स्वकथ्यते । भ्रमइत्येव विद्वद्भिस्तथा वक्रमेण क्वचित् । इत्यतो भ्रमस्य वक्रीकृतत्वं सिद्धवेदस्य वक्रधीत्वे । किं कारणमत्राह भवेति । उरुशब्देनानंतत्वं हृतिशब्देन गुणकर्माणि विवक्ष्यंते । भवतो गुणकर्मणामनंतत्वात्तानि वक्रगूढजत्ववाल्वयवती वेदवाणी । अतो वेदेपि वहुधा वचनात्तदर्थनिर्णय शक्त्यभावात् योग्यतावशाद्विपरीतप्रतीतेश्च विरुद्धकल्पनायुक्ता अंधपरंपरया स्फुरणं २३ जीवे स्पेश्वरत्वे वाधकमाह । नेति । इदमीश्वरत्वमग्रे उत्पत्तेः पूर्वं जीवे पुगार्भस्ये पुनासनाप्ति । नभविष्यता यद्गिर्भस्य ईशो भवेत् । तर्हि तस्यापि अभविष्यत् । नचतथेति यस्मादतो निधनान्मरणादनंतरमपि न रकाहिरामनात्र विद्यतइत्यर्थः । ननु अस्येशोस्मि इति । किं निमित्ता प्रतीतिरत्राह । अनिमित्तकमिति । अविद्युन्निमित्तं यस्य तत् अनिमित्तकं भगवन्निमित्तकमेवातस्य

६०३०

१२३

जन्ममरणयोरंतरामध्येऽपि जीवे मृषैवेशित्वं भातीति न तु वस्तुतः त्वं जीवः कुतः एकरसे प्रधानसारे न च वस्तुतः जीवः सर्वोत्तमसाराग्रु
षै वत्तथा मन्यते। अतो भ्रांतिरेव तथाज्ञाने प्रयोजकेत्याह। अत इति। यतो जीवः सर्वसारेण भूयात्तो द्रविणजातिविकल्पपथैर्जीवगु
णीयत इत्यन्वयः। भ्रांत्या जीवो द्रविणवार अभिजातिमानित्यादिसाज्ञविकल्पनामार्गैः कथ्यते। अज्ञैरिति शेषः। विद्वद्भि
भवानेव द्रविणादिमानित्युच्यते। कुतः। यतस्त्वपोदमाद्या अभिजन्मकारणभूताः गुणा अभवत एवं कथमेतादितित्राह। वितथे
ति। यतोऽभिजात्यादिगुणास्तव सख्याः अत इदं जीवस्येश्वरत्वं बुधास्तत्त्वज्ञानिनो वितथमनोविलासमिथ्यामनोविकारमित्येवयं
ति जानंति। गुणा एवाभिजात्यो व्याघ्रह्नाने काभिजातिमात्र। अतो भिजात्यवाविक्षु स्वरन्येतूपवारंत इति वचनात्। येजगल्ल
वदं त्यज्ञा जीवात्मन्येशवार्जितं। तेषामपि तु तां वाचमीश एवं वदतात्यजः। न च तर्कैर्भवेदीशो जीवो वेदविरोधतः। इत्यादिस्मृत्यर्थत्वे
न अकृत्वं तरमपूर्णं॥ ॥

राम

१२३

स्मरत्स्वरूपगुणात्रित्वं मुक्तो ब्रह्मस्वरूपतां। दुर्गमां प्रकृतिं त्यक्त्वा हत्वा वाल्यं दुरत्ययायातितत्र परेशानां त्वहि स्वज्योथस्त्र कागमसे
कस्य स्वतंत्रत्वात्त्ववानंतगुणोविभुरितिश्रुत्यर्थस्वरूपस्य उद्गात्सु मानितस्यायमर्थः। अनु शब्दो विकल्पार्थः। श्रुतिश्चरुगीतगुणाश्रा च
गुह्यात्त्र व कर्म्माणि च नुपत्र। उदगात्संसारादिति शेषः। अस्मात्संसारान्मुक्तो भवतीत्यर्थः। तव सरूपतां च भजति। कश्चित्सायुज्यं कश्चि
त्सालोक्यं च। यद्वा गुणस्मरणमनुगुणो न तु नूलानुशातसादिकालविशेषानुज्जुपत्र। यज्ञायंतुप्सात्र। परमेणत्वयात्त्रभगा। अपद्गतप्र

उदगात्सु मानतु गीतगुणोऽश्वनुपद्मजति सरूपतां। तदनुत्वमुत नजहासि जिहासितां। अ
हिरिवत्वं परमात्मभगांमहसिमहीयसे ष्टगुणापारिमेयभगः २५ ॥ ॥

यत्नलव्रणशक्तिंप्रातिप्त्विकी पूर्वोक्तां द्विविधानां तां प्रकृतिं जहातित्यजति जिहासिति हंतिवा। तदुभयमपित्वमेव जहासि तनि हासिवा
उत्पतनवय योः समुच्चयार्थः तिहासिरावणांसत्वेप्यमत्वपरमाश्रिविलिखः। स्वातंत्र्यात्प्रकृतित्यागकर्तृता णपाणः परः। यद्यप्ये जातवसंत्य
हंताचभगवान्प्रभुरितिश्रितिः। महसि अमुरजनमोहनाय शिवादीश्वरत्व यासि। महीयसे च सुरजने न पूज्यसेवा। आणिमाद्यष्टगुणः। व्यामज
णोवा। अष्टपूर्व्याप्ताविति धातुः। अपरिमेयभगः। दुर्ज्ञेयपरमेश्वर्यादिगुणः २५ ॥

द॰ उ॰

१२४

यदिन समुपयंतीति अस्यायमर्थः। यदि यतयोपि हृद्दिकामजटाः। जडशरीरविष्टकामाः। न समुपयंति सम्यङ्नोद्दृष्टं ति नोचिता भवंति विषयकामाः स्युरित्यर्थः। तर्हि हृदि गतोपि तेषामसताम प्रशस्त कर्मणां पुरस्तां दुरधिगमो दुर्ज्ञेयः। अस्मृतकंठमणिरिति लुप्तोपमं। विस्मृतकंठमणिः पुरुषो यथा कंठस्थितं मणिं न जानाति तथेत्यर्थः। अनेन सयथाकामो भवति। तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते तदभिसंपद्यते इति श्रुत्युक्तकामयमान इत्येतद्धिष्टं। हे भगवन्। असुतृपयोगिनां असुतृप्तानां विषयां बुद्धिं प्राप्तानां निष्कामानामपि र्थः। निवृत्तिमार्गस्थानां पुंसां भवतोधीनात् अनधिरूढपदात्। अनारूढवैकुंठ्यादिब्रह्मस्थानात् ह्यनामनवगता दन्तानाद्वतकालात्कालादिलक्ष

यदि न समुपयंति यतयोपि हृद्दिकामजटा दुरधिगमो सतां हृदिगतो स्मृतकंठमणिः। असुतृपयोगिनाम
भयोभगवंन्ननवगतांतकादनधिरूढपदाद्भवतः ३९ ॥ ॥

एतद्भयोभयप्रदः। पूर्णानंदादिलक्षणां मुक्तिं ददातीत्यर्थः। इंद्रियाभिमानि देवानां वियोगाभावलक्षणां च अर्जुनाच यथा काम यमानो योकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिव्याख्यानं। अस्याः श्रुतेः विशेषार्थो निविड्कामयुक्तामामसतां तु विशेषतः दुर्ज्ञेयो भगवान् विस्मृतहृदिस्थोऽस्मृतिर्हारवत्। इत्यादिवाक्याद्देवावगंतव्यः। देवाश्चत्रपयच्छैव मुमुक्षवः कामिनोपि ब्रह्म इत्यादिना कामित्वेपि तत्त्वमप्रयोजकमित्युक्तं ३९ ॥ ॥

राम

१२४

सकलश्रुतिस्मृतिमात्रसंग्रहलक्षणमुपदवगमार्थसितासितयोरित्यस्यायमभावः। देहभृतां जीवानां सगिरः गिराः प्रवाचासहिता श्रोत्रादयः गुणविगुणयोः तदवगमार्थसितासितयोः आनुयमुद्दीत्यत्र यः। द्वितीयार्थे षष्ठी। गुणरूपश्रीः। विगुणो निर्गुणो विष्णुरुक्तो। पूर्वप्रकृतोर्थे स्मृतश्च हेतुनपराश्रयते। तस्य हरेरवगमो यस्याः सातदवगमा तया श्रिया र्थिता यते सम्यगित्यर्थः। परमब्रह्मेन सिता बद्धा सर्वदा नदधीनत्वेन वर्तते इति श्रीः। असितो बद्धो नित्यमुक्तो विष्णुः। तौ श्री श्रीधरौ नानुयमुत्थासूल्पे नयथास्थितरूपगुणविषयत्वेन न जानंतु। तद्विषयीकरणोपायमाह। अत्रेति। अत्रजीवराशौ। हंसकुलगीतपरंपरयेति। हंसानां ब्रह्मणां कुलेन गीतस्य उपदिष्टस्य ज्ञानस्य परंपरया इंद्रियाण्यनुयमुपश्याक तयथार्थानुरूपमुरित्युपसंख्यानं कर्तव्यं। अत्र रजांसीति रजःशब्दोपादानात् रजोगुणप्रधाना मनुष्या उपलक्ष्यंते। नुषा आवरणं कर्क्वं येषां तेन भाव

तदवगमार्थसितासितयोर्गुणविगुणयोर्न हि देहभृतां स गिरश्च नु यमुपरत्र हंसकुलगीतपरंपरया न नुषावरणा
इव रजांसि वांति वयसा सह यच्छ्रुतयस्त्वयि सफलं पतंति न पतंति विधंनाः ४० ॥ ॥

रणाः। नुषावरणाश्चंदुलपदार्थाः रजांसीव। यथा धूलीवात्र वांतिन स्पृशंतीत्यर्थः। तथा जश्रुतयः। वयसा महता कालेन सह रजोरूपाल्मनुष्या न वांति प्राप्नुवंति फलान्न कुर्वंतीति यद्यस्मात् तो बध्नातीति बंधनाः। विधिनिषेधरूपेण पुरुषं बध्नंत्यः श्रुतयः सात्विका नामर्थे विधिसफलं पतंति। त्वद्गुणगणान्त्रका श्रयवदुपासकानां पुरुषार्थहेतवो भवंती। राजसानां बुद्धिव्यामोहकत्वेन त्वयि न पतंति पुरुषार्थहेतवो न स्युरित्यर्थः। अनेन। जानाति प्रकृतिविश्वं त्वं मोविष्णुश्च निर्गुणः। तावुभौ न विजानंति कृते ब्रह्म परं परागमिति मह्योपनिषद्बिहिता। अन्ये सर्वे श्रिया बद्धा श्रीर्बद्धा विष्णुनैव तु। बंध श्व विष्णुतं तत्त्वं मुक्तानां च श्रियस्तथेत्यादि गारुडपुराणार्थोपि संगृहीतः ४० ॥ ॥

इतिशङ्खोऽस्यादिवचः एवमादिस्कत्या गीतमात्मानुशासनं ब्रह्मस्नानमास्कत्य श्रुत्वा हृदि अस्वाज्ञाम्नायमात्मवेगतिं संश्रुत्य स्थितिं
ज्ञात्वा ४१ व्योमायनमहात्मभिः ब्रह्मा श्रयेशून मेः तेः पूर्वजैः सनकादिभिः। अशेषाणां समीचीनानां आम्नायानां पुराणानामुपनिषदां च रं
सःसार इति समुद्धृतः। ब्रह्मदायाद ब्रह्मपुत्र नारदकाम्यागां निधनेनाशकरं। यद्वा काम्यानामभीष्टानां फलानां निधनं। कुलंयद्ववा। निधनो स्त्री
कुलेनाशे निर्श्रिं शङ्करवद्भयो। इतियादवः ४३ पूर्णः स्वस्थः यः सर्वभूतानां धाता दृ तियोषयोः कर्ता। यः सर्वभूतानामिति प्रकृतास्तेजी

श्रीभगवानुवाच इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं। सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिं ४१ इत्यशेष
समाम्नायपुराणोपनिषद्रसः। समुद्धृतः पूर्वजैस्तैर्व्योमायनमहात्मभिः॥४२॥ त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशासनं। धारय
श्चर जमेकामंकामानां निधनं नृणां ४३ एवं स गुरुणादिष्टो गृहीत्वा श्रद्धयात्मवान्। पूर्णः श्रुतधरो राजन्नाह वीरव्रतो गुरुं ४४
नारदउवाच नमस्तस्मै भगवते कृष्णायामलमूर्तये। योधाता सर्वभूतानामभयोयस्य ते कलाः ४५ इत्याद्यमृषिमानम्य
तच्छिष्यांश्च महात्मकान्। ततोगाद्दाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ४६ सभाजितो भगवता कृतासनपरिग्रहः। तस्मै तद्वर्णया
मास नारायणमुखाच्छ्रुतं ४७ ॥ ॥

बाः यस्य तव कला प्रतिविंबाशाः ४५ अविद्रूपत्वात् अपिः ४६ अत्र नारदेन व्यासाय कथा कथनं कृत्यर्थं। नन्वनुत्तापनाय। कथा
कथयतीशस्य व्यासस्यात्मने स नारदः कृत्यर्थं तस्य देवस्य ज्ञापनायनन्तु कश्चिदित्यादि ४७ ॥ ॥

त्वयायः प्रश्नः कृतः तस्य श्रवचनमुद्दिश्येति तत्परिहारवचनं वार्तितं। येन वर्णितप्रकारेण निर्देश्ये निर्गुणे ब्रह्मणि मनश्चरेत्। तथेति ४८ नुयास
नार्थं स्वलक्षणे लक्षं तु यतितियोऽहीति आत्मा जगदादिमध्यनिधनानि उत्पत्तिस्थितिसंहाराः यस्मात्स तथा पश्चाद्व्यक्तं जीवयोः प्रकृति चेतन
योरीश्वरः। यश्चेदं सृष्ट्वा अनुप्रविष्टः। यश्च कस्मिन् विराजविद्रूपेण पुराणं संहितां चक्रे अत्र शयीजीवः। यं संपद्य जाप्यत्रूजां बंधकं शक्तिं

नह्येतद्वर्तितं राजन्यश्च प्रश्नः कृतस्त्वया। येन ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ४८ योऽस्यात्माजगदादिमध्यनिध
नो योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुनः संहितां। यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ४९ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्नवतितमोऽध्यायः

राजोवाच सभाजयित्वा वद्धधा कृत देवं श्रियः पतिः। आगतो द्वारकां भूपः किंचकार महामुने। १

हाति। सुप्तः कुलायं शरीरादावभिमानं च यथा त्यजति। तं कैवल्यानिरस्तयोनिं समाधिका भावेन निराकृतकारणं। तं हरिं अज
स्रं निरंतरं ध्यायेदित्यन्वयः ४९ इति दशमे श्रुतिगीतार्थकार्यां चतुर्नवतितमोऽध्यायः पांडवकौरवयुद्धकथनव्याजेन श्री
कृष्णमाहात्म्यं प्रदर्शयत्यस्मिन्नध्याये। तत्र राजा पृच्छति सभाजयित्वेति १ ॥ ॥

गोग्रहे गोग्रहणे। तीर्णवनवासाज्ञातवासकलक्षणसमयाः सत्यसंगरः सत्यप्रतिज्ञः सत्ययुद्धो वा। विभीविकां भयं ७ अनुयुक्तं

श्रीशुक उवाच   तपसा व्यंगतान् पार्थाङ् गोग्रहे जितकौरवान्। सुखावतीर्णसमयान् छलेन महता हृतान् १ संग्रहृष्टमनाः कृ
ष्णो महत्या सेनया वृतः। सात्यकिं कृतवर्माणं युद्धवंशठसारणौ ३ अभिमन्युं च सौभद्रं पुरस्कृत्य महामतिः। अक्षौहिण्या हतनया
सहितः सत्यसंगरः ४ शंखदुंदुभिनिर्घोषैर्दुंदुभ्या याद्युधिष्ठिरं। संधिमिच्छन् कौरवाणां कृष्णं दैत्यमच्युतं ५ मृदोष्ट्रहीनुमारे भेवि
नाविकृः सुयोधनः। सततानं तत्रपत्वं दर्शयित्वा महाभुजः॥ ६॥ कृत्वा विभीविकां घोरां पांडवान् पुनरायपौ। विष्टद्मत्सराः सर्वे राजानो
जातमन्यवः ७ युद्धायैवानुयुद्धांते न संधिमनुकांक्षिणः। युधिष्ठिरस्य धर्मात्मा पुरस्कृत्य जनार्दनं ८ कुरुक्षेत्रं ययौ राजन् रथ्या तु भि
सह। अक्षौहिण्या विराटोपि मत्स्यराजो महामनाः ९ युधिष्ठिरमनुप्रायात् सपुत्रः कुरुसत्तम। द्रुपदश्च शिखंडी च धृष्टद्युम्नश्च दुर्जयः
१० अक्षौहिणीभिस्तिसृभिरनुजग्मुर्युधिष्ठिरं। अक्षौहिण्या परिवृतः सात्यकिर्युद्धलालसः। नियोगाद्वासुदेवस्य प्रापादथ युधि
ष्ठिरं। अक्षौहिण्या परिवृताः कैकेया पंच भूभृतः ११ अनुजग्मुर्धर्मपुत्रं राजानं मातृसोदराः। धृष्टकेतुस्तदा राजा सैन्यश्च नरपुंगवः
१२ अक्षयातां नृपश्रेष्ठ अक्षौहिण्या युधिष्ठिरं। ते गत्वा पांडवाः सर्वे नारायणपुरोगमाः १३ शिबिरं चक्रुः कुरुक्षेत्रे प्रतीक्षंतः सुयोध
नं। सुयोधनोपि कौरव्य मानी भ्रातृशतैर्वृतः १४ द्रोणभीष्मकृपद्रौणीकर्णबाह्लीकसौबलैः। हार्दिक्यसात्वमद्रेशभगदत्तजयद्र
थैः॥१५॥ अन्यैश्च राजशार्दूलैस्त्रीनादेशसमुद्भवैः। शंखदुंदुभिनिर्घोषैर्भेरीपटहनिःस्वनैः॥१६॥ वृषपर्वकक्षमो वीरः अयपयोकंपयन्
ह्री। ते समेत्य कुरुक्षेत्रे राजानः कुरुपांडवाः १७ ॥ ॥

तेअनुयुक्ताः क्रियंते ८ ११ मातृसोदराः मातृपक्षेण सोदराः १२ १३ १४ १५ १६ १७ ॥ ॥ ॥

स्वहंशिविरं ९ २२ योगमायया स्वरूपसामर्थ्येन २३ ६ परिचितां भागाम्यस्त्रं २७ २५ विरूपाक्षं रुद्रं ३३ जनक्षयस्यासीत् ३४ ॥

स्यमंतपंचके चक्रुर्व्यूहं युद्धयतिभारकरे। अक्षौहिण्यः कौरवाणामेकादश दुरात्मनां १८ सप्त पांडुसुतानां च कार्णितानां वनेश्वरं। तथा व्यू
हे ध्वनीके छतादकेपितरेयुरु १९ गांडीवधन्वी कवची बद्धतूणतलत्रवान्। आरुह्य स्यंदनं पार्थो ददर्श रिपुवाहिनीं॥२०॥ तत्राभाय
न्पितॄन् भ्रातॄन् मातुलान् श्वशुरान् प्रियान् सुतान्। शिष्यान् सपौत्रान् स्नेहेन शालान् संबंधिबांधवान् २१ दृष्ट्वा निर्वेदमापन्नो हंतुं नेग
करोन्मनः। तं विषण्णमनस्विन्नं कृपाव्युमवियातिनं २२ प्रबोधयामास केशवो योगमायया। न्यस्तशस्त्राय शांताय वैराग्यगति
कृपालवे २३ दर्शयामास पार्थाय विश्वरूपं जनार्दनः। कं पं बोधितः कंशमिदात थावासवनंदनः २४ प्रयोजयाहको दंडंसु
द्वायाच्युतसारथिः। प्रारब्धं भारतं युद्धं कृत्वा संकर्षणो बली २५ अशक्नुवन्वारयितुं किं करोमित्यचिंतयत्। प्रवृत्तं भारतं युद्ध
मवेक्ष्योद्वेगविह्वलः २६ तीर्थयात्राजेन तत्याज रामः परिचितां भुवं। सेनापतिः पांडवानां धृष्टद्युम्नो महारथः २७ गांगेयो धार्त
राष्ट्राणां दृष्टः कुरुपितामहः। स कृत्वाहवं घोरं निहतो दशमेहनि २८ भारद्वाजं ततो द्रोणं सेनापत्ये सुयोधनः। न्ययोजय
त्सयुयुधे दिवसान् पंच भूपते २९ तस्मिन्युध्यति दुर्धर्षे सैंधवेन दुरात्मना। अभिमन्युस्तवपिता निहतो रणमूर्धनि ३० सु
तशोकाभिसंतप्तः प्रतिजज्ञे धनंजयः। जयद्रथं हनिष्यामि श्वोभूत इति भारत ३१ तस्यां निशायां गोविंदस्त्वारुह्य गरुडं ह
रिः सुप्तमर्जुनमादाय कैलासमभिजग्मिवान् ३२ तत्र गत्वा विरूपाक्षं दृष्ट्वा संभाष्य वांछितं। साधयित्वार्जुनस्याशु स्वायोधन
मुपययौ ३३ ततो पराह्णे युद्धमासीद्द्रोणार्जुनस्य यं। मन्युर्महीभुजस्तत्र बहवो बाहुशालिनः ३४ ॥ ॥

अर्धदिनेनैश्च शरदशादिनैः अर्द्धदिनसहितैः समदशदिनैः ४० इति दशमे पंचनवतितमोध्यायः ॥ सितकेशावेशिनो बलभद्रस्य चरितं कृष्णमाहात्म्यानुस्मृतमेवातस्तदपि सूक्ष्मार्थोपयोगि भवतीत्यनेनाध्यायद्वयेन निरूपयति तत्राद्येऽश्रुत्वा कृष्णवैभवो विस्मितमनाः राजा भगवंतं नमति। अष्टा

हते पुराणैर्हृष्टशराजपुत्रैश्चानेकशः जयद्रथोपि पार्थेन निहतो दिवसात्यये ३५ दिनानि पंचद्रोणोपि कृत्वा युद्धमतं द्रितः। पंचमे ह्नि संध्यायां धृष्टद्युम्नेन पातितः ३६ ततः सेनापतिः कर्णो भूत्वा चक्रे महारणं। दिनद्वयांते पार्थेन सच संख्ये निपातितः ३७ शल्योप्यर्द्धदिनं कृत्वा सेनापत्यमरिंदम। मध्यंदिनगते सूर्ये धर्मराजेन पातितः ३८ युयुधाने ततो वीरो गदया दीर्घविग्रहे। भीमदुर्योधनौ कोपात्परस्परवधैषिणौ ३९ अष्टादशाक्षौहिणीनां तत्पतीनां च तद्भृतां। अष्टादशे दिने राशीर्द्दृष्टैनिः संक्षयो महान् ४० इति श्री भागवते महापुराणे दशमस्कंधे पंचनवतितमोध्यायः राजोवाच अष्टादशाक्षौहिणीनां तावद्भिर्म्मायया दिनैः। व्यापादनं येन कृतं तस्मै विश्वात्मने नमः १ श्रुत्वैतोमे कथास्तस्य चरितानि सखे घशः। वैकृव्यं विस्मयो भीतिर्वर्द्धते मे पुनः पुनः २ मन्ये प्रायेण पाप्मानं जीर्णमिमं पुरत्रयं। इंद्रियाणि प्रबुद्धानि प्रसन्नं च मनो भृशं ३ कृतं तस्मै च प्रशांतं मे आत्मा चानंदनिर्भरः। प्रसादात्तव धर्मज्ञ कृतार्थोऽहं मिहाभवं ४ ॥ ॥

दशेति। मायया महिम्ना। व्यापादनं निधनं। विश्वात्मने सर्वांतर्यामिणे १ हरिकथाश्रवणस्य प्रत्यक्षफलमाह। श्रुत्वेति। वैकृव्यं पारवश्यं कथाश्रवणतात्पर्यं। विस्मयः स्मयभावः। भीतिः विहिताकरणे प्रत्यवायबुद्धिः २ प्रबुद्धानि प्रकाशानि। स्वविषयइति शेषः ३ आत्मा भोगायतनं। आनंदनिर्भरः पूर्णानंदः ४ ॥ ॥

कृतार्थश्चेत्तूष्णीं भवेति तत्राह। अपिचेति। किंचिदित्यव्ययं। शताद्तोल्पमथतो महांतमित्यतो वा व्यत्ययः ५ ६ भोजनादिना मानवसंतर्पणं ७ प्रतिस्रोतं प्रवाहाभिमुखं। पृथूदकं नाम तीर्थं चितस्य मुनेः रूपं। विशालमप्येकं तीर्थं अभिप्रेत्याभिगम्य १० अत्यवस्थायिनं अभिमुखत्वेनास्थि

अपिच श्रोतुमिच्छामि किंचिद्दूर्धं तपोधन। युध्यतः सुहृदो दृष्ट्वा निवारितु मशक्तुवन् ५ तीर्थस्नातुं गतो रामः किंच कारतपोधन ६ श्रीशुकउवाच तीर्थाभिषेकव्याजेन मध्यस्थः किलैषयोकिल। स्नात्वा प्रभासं संतर्प्य देवर्षिपितृमानवान् ७ सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः। पृथूदकं विंदुसरस्त्रितकूपं सुदर्शनं ८ विशालं ब्रह्मतीर्थं च चक्रं प्राचीसरस्वतीं। यमुनामनुयात्येव गंगामनु च भारत ९ जगाम नैमिषं यत्र ऋषयः सत्रमासते। तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः १० अभिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन्। सोर्चितः सपरिवारः कृतासनपरिग्रहः ११ रोमहर्षणमासीनं शिष्यं मैक्षत् महामुनेः। प्रत्यवस्थायिनं सूतमकृतप्रह्वणांजलिं १२ अध्यासीनं च तान्विप्रान्स्कोपाद्दीक्ष्य माधवः। कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः १३ धर्मपालांस्तथैवास्मान्वधमर्हति दुर्म्मतिः। ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च १४ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः। अदांतस्याविनीतस्य वृथा पंडितमानिनः १५ न गुणाय भवंति स्म नटस्येवाजितात्मनः। एतदर्थो हि लोकेस्मिन्नवतारो मया कृतः १६ ॥ ॥

तं प्रह्वणं नमनं १२ तान्विप्रानध्यासीनं तेषां मध्ये उच्चासने स्थितं माधवो मधुकुलोद्भवः प्रतिलोमजः विपरीतजन्मा १३ अस्मानिति द्वितीयापंचम्यर्थे १४ सेतिहासपुराणान्यधीत्य सुदुःखस्य प्रतिजन्मनो १५ गुणाय पुण्यफलप्रदानलक्षणाय न भवंति। एतदर्थः दुष्टनिग्रहार्थः १६

असद्वधान्निवृत्तोऽपि १७ मरणस्यावश्यंभावित्वात् १८ ब्रह्मासनं ब्राह्मणमध्ये ब्राह्मणायोग्यासनं १९ अस्य निधनं त्वयाऽज्ञानतो वा यद्ब्रा जानता वा ब्राह्मणवधसमानदोषोऽयमित्याशयेनाह। अजेति। भवत आम्नायो विधिनिषेधशासि शास्त्रं नियामकं इदं कुरु नेदमिति नियंता नास्ति। कुत इत्यत आह। योगेश्वरस्येति २० विध्याद्यगोचरत्वात् अथ यः शुद्धाः इति विज्ञापयंति। यदीति। यदि भवानत्र ब्रह्महत्यायाः पावनं शुद्धि

वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः। एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि १७ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः। हाहेतिवादिनः सर्वे मुनयः खिन्नमानसाः। १८ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो। अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन १९ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते। अजानतैवाचरितस्त्वया ब्रह्मवधो यथा। योगेश्वरस्य भवतो नाम्नायोऽपि नियामकः २० यद्येतद्ब्रह्महत्यायाः पावनं लोकपावन। चरिष्यति भवांल्लोकसंग्रहोऽनन्यचोदितः २१ बलभद्र उवाच — चरिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया। नियमः प्रथमे कल्पे यावान्स तु विधीयतां २२ दीर्घमायुर्बतैतस्य सत्त्वमिंद्रियमेव च। आशासितं यद्ब्रूत तत्साधये योगमायया २३ ऋषय ऊचुः — अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च। यथा भवेद्वचः सत्यं तथा राम विधीयतां २४

लक्षणं परिहारं चरिष्यति। तर्हि लोकसंग्रहं करिष्यति। कुतो न आह। नेति। प्रथमे कल्पे उत्तमकल्पे यावान्नियमो विधिः। स त्वेव विधिर्भवद्भिर्विधीयतां २२ तस्य त्वं तं दीर्घमायुः सत्त्वमिंद्रियं दूरश्रवणदूरदर्शनादिशक्तिमत्त्वाश्चयो। किं बहुना यद्यदाशासितं कामितं तत्तत्साधय इत्याह। आशासितमिति २३ अस्त्रवीर्ययोरमोघत्वं मृत्योरस्माकं नित्यमस्मद्वचसश्च वध्यफललं यथा स्यात्तथा विधीयतां २४

पुराणानां वक्ता पुत्रः स्यात् २५ हे सुधाः सूक्ष्माभिर्वीरोदन्वदत्यज्ञानतोऽपि परिहारं बुध्यतां २६ प्रायश्चित्तं विधास्यमाह। इल्वलस्येति २७ ॥ इति दशमे षण्णवतितमोऽध्यायः ॥ ततस्तत्प्रवृत्तप्रकारमाह। शिखाश्मश्रुदंष्ट्रोग्रभ्रुकुटीभिर्युक्तं मुखं यस्य सत्तथा

बलभद्र उवाच — आत्मा वै पुत्र उत्पन्न इति वेदानुशासनं। तस्मादस्य भवेद्वक्ता आयुरिंद्रियवीर्यवान् २५ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ। अजानतस्त्वपचितिं यथा मे चिन्त्यतां बुधाः २६ ऋषय ऊचुः — इल्वलस्य सुतो घोरो बल्वलो नाम दानवः। स दूषयति नः सर्वानेत्य पर्वणि पर्वणि २७ तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परं। पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं २८ ततश्च भारतं वर्षं परीत्य सुसमाहितः। चरित्वा द्वादशमासांस्तीर्थस्नायी विशुध्यसे २९ इति श्रीभागवते महापुराणे दशमस्कंधे बलदेवतीर्थयात्रायां षण्णवतितमोऽध्यायः ॥ श्रीशुक उवाच — ततः पर्वण्युपावृत्ते प्रचंडः पांशुवर्षणः। भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः १ ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितं। अभवद्यज्ञशालायां सोऽप्यदृश्यत शूलधृक् २ तं विलोक्य बृहत्कायं भिन्नांजनचयोपमं। तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं ३ सस्मार मुसलं रामः परसैन्यविमर्दनं। हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ४ तमाकृष्य हलाग्रेण बल्वलं गगनेचरं। मुसलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ५

तं। शिखा च श्मश्रूणि च दंष्ट्रे च उग्रभ्रुकुटी च शिखाश्मश्रुदंष्ट्रोग्रभ्रुकुट्यः उग्रा भ्रुकुटी तत्र भ्रुकुटी ३ ५ ॥ ॥

श्रीयोषामानि श्रज्ञानानि च पंकजानि यस्यां मालायां तथा तां ८ यतः सरोवरात् आश्रवत् अस्पंदत ९ अनुस्रोतेन प्रवाहेन १० शोणं नदं ११

सोपतद्भुवि निर्भिन्नललाटोसृक्समुत्सृजन्। मुंचन्नार्त्तस्वरं शैलो यथा वज्रहतोसुरः ६ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः। अभिषिंचन्महाभागा निर्वृत्रघ्नं विबुधा यथा ७ वैजयंतीं ददुर्मालां श्रीधामाम्लानपंकजां। रामाय वाससी दिव्ये दिव्यान्याभरणानि च ८ अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः। स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ९ अनुस्रोतेन सरयूं प्रयागमुपगम्य सः। स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं १० गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः। गयां गत्वा पितॄनिष्ट्वा गंगासागरसंगमे ११ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य तं। सप्तगोदावरीं वेणीं पंपां भीमरथीं तथा १२ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं। द्रमिलेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः १३ कामकोष्णीं पुरीं कांचीं कावेरीं च सरिद्वरां। श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः १४ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा। समुद्रसेतुमगमन्महापातकनाशनं १५ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः। कृतमालां ताम्रपर्णीं मलयं च कुलाचलं १६ तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च। योजितस्तेन चाशीर्भिरनुज्ञातो गतोर्णवं १७ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः। ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं १८ विष्णुः संनिहितो यत्र स्नात्वास्पर्शद्गवायुतं। स्थानं दूरं हरेः स्थाने यत्र संनिहितो हरिः १९ ततोभिव्रज्य भगवान्केरलांस्तु त्रिगर्त्तकान्। गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः २० ॥ ॥

सप्तशाखाभेदेन समुद्रं गतां सप्तगोदावरीं तां। वेणीं कृष्णवेणीं १२ १८ अस्पृश्य प्रादात् ददौ। स्थानं दूरं अनंतक्षेत्रं १९ धूर्जटेः शिवस्य २०

अनुतीर्थं नाम तीर्थं २२ भुवः एतत्तत् एतं भारं हृतं कृत्वा एतत् एतावता भुवो भारं हृतं मेने इति शेष इति वा २३ विनाशनं युद्धं २४ किं वक्तुकाम आगत इति मत्वा २५ ६ प्राणाधिकं बलाधिकं २७ अन्यः पराजयो वा विरमंतु शांतो भवतु २८ दुःकृतानि जतुगृहदाहादीनि २९ तयाद्वं

तत्र द्वैपायनं दृष्ट्वा शूर्पारकमगाद्धलः। तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं २१ प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी। मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत् २२ श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगे। सर्वराजन्यनिधनं भारं मेने हृतं भुवः २३ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृधे। वारयिष्यन्विनशनं जगाम यदुनंदनः २४ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि। अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः २५ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ। मंडलानि विचित्राणि चरंताविदमब्रवीत् २६ युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदर। एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं २७ तस्मादेकतरस्येह युवयोः समवीर्ययोः। न लक्ष्यते जयोन्यो वा विरमत्वफलो रणः २८ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत्। अनुस्मरंतावन्योन्यं दुरुक्तं दुष्कृतानि च २९ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ। उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ३० ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः। अनंतस्याप्रमेयस्य कर्माण्यद्भुतकर्मणः ३१ शृण्वन्गृणंश्च तज्जन्मा विष्णोः स दयितो भवेत् इति श्रीभागवते महापुराणे दशमस्कंधे बलदेवचरिते सप्तनवतितमोध्यायः ॥

दिष्टं दैवकृतं ३० बलभद्ररामस्य विक्रमश्रवणादिना किं फलं भवतीति तत्राह। ईदृग्विधानीति ३० इति दशमे सप्तनवतिरध्यायः ॥

अनेनाध्यायद्वयेन कृपणब्राह्मणकृपातिशयकथनेन हरिभक्तस्य केवलं न पारत्रिकमेव फलं अपि तु ऐहिकमप्यतिविस्मयकरं स्यादिति द
र्शितं महात्म्यं वक्ति। तत्र प्रथमतो भारतयुद्धं समाप्य कृष्णस्य हस्तिनपुरप्रयाणप्रकारं प्रख्याति। भगवानपीति १ शून्यं शत्रवादिना पिनद्धितं। प्र
यातं गतं। अष्टादशाक्षौहिणीभ्यः शिष्टानाह कृपश्चेति २ ५ भगवत्सेवामंतरेण राज्ञा निकृष्टमित्यतो यत्नतः तिष्ठेत्यादि प्रतिपाद्यत्यर्थः ६

श्रीशुक उवाच — भगवानपि गोविंदः साधयित्वा स्ववांछितं। युयोध नेमहावाहो निहते गद्यारणे १ विसृज्याथोधनं शून्यं प्रयातु
मुपचक्रमे। कृपश्च कृतवर्मा च द्रोणिश्चापराजितो वरः २ अवशिष्टा महात्मानः युयोधनबले त्रयः। पंच पांडुसुता वीराः सात्यकिश्च महा
बलाः ।।३।। वैश्यापुत्रो युयुत्सुश्च अशिष्टाः कृष्णपक्षगामाः। तांश्च पुरस्कृत्य गोविंदो मुनिवृंदसमन्वितः ४ जगाम हस्तिनपुरं धृतराष्ट्रप्रसा
दितं। गांधारीं धृतराष्ट्रं च विदुरं च महामतिं ५ प्रसाद्य पांडवान्क्षेत्रे राज्ये संस्थाप्य यत्नतः। स्तूयमानो मुनिगणैः सूतमागधवंदि
भिः ६ अनुयातः पांडुपुत्रैः प्रेमवाष्पाविलेक्षणैः। ताननुज्ञाप्य सोत्कंठान्रथेनादित्यवर्चसा ७ शंखदुंदुभिनिर्घोषैर्वेदमंगल
निःस्वनैः। पुण्याहमंत्रघोषैश्च द्वारकां प्रययौ हरिः ८ विचित्रतोरणां रम्यां चलत्कदलिकाकुलां। अलंकृतां पौरजनैः सिक्तसंमृ
ष्टभूतलं ९ उपस्थितः पौरजनैः पालिकांकुरधारिभिः। योषिद्भिर्वारमुख्याभिर्भूषिताभिश्च भूषणैः १० वहद्भिर्दीपमुकुरकलश
अंकुरफलाक्षतान्। उपस्थितो ब्राह्मणैश्च पुत्रैः पौत्रैः सहानुजैः ११ प्रविवेश पुरीं दिव्यां दिवसे प्रजितो हरिः। सप्रविश्य सभां दिव्यां सुध
र्मां लोकविश्रुतां १२ आहूकं वसुदेवं च रामं चैवाभ्यवादयत। प्रणम्य मातरो विश्वाः कांचने परमासने १३ उपविश्य यथाजोषं
जितो पद्युंगवैः। राजराजनीनाथो यथा ग्रहगणे दिवि १४

७ वेदघोषं मंगलनिस्वनाः मंगलवचनानि तैः ८ ९ उपस्थितो मिगतः अंकुरपूरितपालिकापात्रविशेषः १० २ मातरो मातृः १३
यथाजोषं यथासुखं १४ ॥ ॥

राज्ञा एतदेव हर्षयिष्यत्यपि इति वक्ति। क्षायाणीति स्थानं तस्य गुणान् श्रृणोति तेसैवयाह। यो तत्कर्म करोति तावेव करोति अनेन करोतीति कर इति कर्तृ
यं प्रत्ययः सफल इति सूचितं पत्थिरजंगमेषु वसंतं हरिं स्मरेत तद्देवमनाः मनसा न इति धातोः स्मरणात्मक गुणानां यस्य हरेः कथाः शृणोति
सकर्णः। कृणआकर्णन इति धातुः १९ चराचरभेदेनोभयलिंगं उभयपतितमानमेघ न्नदे वशिरा अपतद् इति शिरः। शीर्षसेवायाम् इति धा

हतावशिष्टैर्भूपालैः सुतैश्च महाबलैः। अभिषिक्तैर्यथास्थानं सेव्यमानो दिवानिशं १५ अवतीर्णं महाभारं विश्रांतं विश्रांत रोहरिः।
धर्मराजं पुरस्कृत्य धर्मेणैवान्वशासत १६ राजोवाच — भगवान्व्यानिचान्यानि मुकुंदस्य महात्मनः। वीर्याण्यनंतवीर्यस्य श्रोतुमि
च्छामहे प्रभो ।।१७।। कोनु श्रुत्वा सकृद्ब्रह्मन्नुत्तमश्लोकसत्कथां। विरमेत विशेषज्ञो विषण्णः काममार्गणैः १८ सा वाग्यया तस्य गुणान्
गृणीते करौ च तत्कर्मकरौ मनश्च। स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः १९ शिरस्तु तस्योभयलिंगमानमेत्तदेव
यत्पश्यति तद्धि चक्षुः। अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यं २० सूत उवाच — विष्णुरातेन संपृष्टो भगवान्बा
दरायणिः। वासुदेवे भगवति निमग्नहृदयोऽब्रवीत ।।२१।। ।।श्रीशुक उवाच — कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो ब्रह्मवित्तमः। वि
रक्त इंद्रियार्थेषु प्रशांतात्मा जितेंद्रियः २२ यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी। तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा २३
पतिव्रता पतिं प्राह म्लायता वदनेन सा। दरिद्रं सा प्रशनया वेपमानाभिगम्य च २४ ॥ ॥

तोरभिमनल्पतापसेवायां शिर इति निपात्यते। यत् उभयलिंगं पश्यति तु देकचक्षः चष्टे पश्यतीति च स्कः चक्ष दर्शन इति धातुः। तस्य हरेर्जना
यानि विष्णोः पादोदकं नित्यं भजंति। पानस्नानलक्षणं तेषां कुर्वंति अथ मंगलानि तानि एवांगानि नाम्यानि २० २ तथाविधा भर्तृवत्क्ष
लिनवस्त्रा २३ म्लायता म्लानं गच्छता। अशनया वेपमानेत्येकं पदं अशनया अशनेच्छया कंपमाना २४ ॥ ॥

सीदते त्र्यव सन्नाय दरिद्राय २६ अर्थकामा अर्थस्पृहवती इति किंतु वक्तव्यं किं च जगद्गुरुः अन्य भुक्तो योन्य मिष्टं न पश्यति किं तु भजतः पुरुषस्य यच्छत्येवेत्यर्थः। पत्न्या वा परम प्रीतुषः अन्यमभीष्टं यच्छतीत्यतः तमुपेहीत्यन्वयः २८ ३० चेलखंडेन जीर्णवस्त्रखंडेन ३१ गुल्मानि शिबि

नन्वन्वस्त्र भगवतः सख्या साक्षाच्छ्रियः पतिः। ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः २५ तमुपैहि महाभाग साधूनां च परायणं। दास्यति द्रविणं भूरि सीदते ते कुटुंबिने २६ आस्तेधुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः। स्मरतः पादकमलमात्मानमपि यच्छति २७ किं न्वर्थकामान्भजतो नात्यभीष्टं जगद्गुरुः। स एवं भार्यया विप्रो बहुशः प्रार्थितो मृदुः २८ अयं हि परमो लाभ उत्तमश्लोकदर्शनं। इति संचिंत्य मनसा गमनाय मनो दधे २९ अप्यस्त्युपायनं किंचिद्गृहे कल्याणि दीयतां। याचित्वा चतुरो मुष्टीन्विप्रान्पृथुकतंडुलान् ३० चैलखंडेन तान्बद्ध्वा भर्त्रे प्रादादुपायनं। स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल ३१ कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन्। त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च सद्विजः ३२ विप्रोगम्यांधकवृष्णीनां गेहेष्वच्युतधर्मिणां। गृहान्द्व्यष्टसाहस्रमहिषीणां हरेर्द्विजः ३३ विवेशैकतमं श्रीमद्ब्रह्मानंदं गतो यथा। तं विलोक्याच्युतो दूरात्प्रियापर्यंक आस्थितः ३४ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा। सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः ३५ ॥ ॥

णि कक्ष्याः पुरप्रकोष्ठानि। कक्ष्या कक्षे वरत्रायां कांच्यां गेहे प्रकोष्ठक इति यादवः ॥३२॥ अंधकवृष्णीनां गृहेषु मध्ये यानि द्व्यष्टसाहस्रमहिषीणां गृहाणि गम्यगत्वा। तेष्वेकतमं गृहं विवेशेत्यन्वयः। द्विजत्वं द्विजस्याप्यप्रसिद्धमिति विप्र इति ३३ आनंदं गतो मुक्तो ब्रह्म विशतीयथा तथा ३४ पर्यग्रहीदाश्लिष्टवान् ३५ ॥ ॥

पादावनेजनीरपः पादप्रक्षालनजलानि ३७ ८ धमनिसंततं शिरासंहतोपचितगात्रं ३९ ४१ संश्रुतः सम्भाजितः संगृहीतो वा ४२ गुरुकुले सतां श्रेयांकाले ईर्वस्मिन्यागाद्यात्स्तातत्कथयांचक्रतुः ४३ सम भवान्सदृशीं भार्यां किंचिद्वा पि किं न वा। यथा प्राकृतस्य चित्तं गृहेषु कामविहतं भवति तथा प्रायस्ते चित्तं गृहेषु भार्यादिषु कामविहतं कामेन विषयेच्छया विहतं न स्यात् तद्वन्नवचित्तं धनेष्वपि नैवातिप्रीयते। कथमेतद्गृहस्थ

प्रीतो व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः। अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणं ३६ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः। अग्रहीच्छिरसा राजन्भगवाँल्लोकपावनः ३७ व्यलिंपद्दिव्यगंधेन चंदनागुरुकुंकुमैः। धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा ३८ अर्चित्वावेद्य तांबूलं गां च स्वागतमब्रवीत्। कुचैलं मलिनं क्षामं द्विजं धमनिसंततं ३९ देवी पर्यचरत्साक्षाच्चामरव्यजनेन वै। अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना ४० विस्मितोभूदतिप्रीत्या अवधूतं सभाजितं। किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ४१ श्रिया हीनेन लोकेस्मिन्गर्हितेनाधमेन च। योसौ त्रिलोकगुरुणा श्रीनिवासेन संश्रुतः ४२ पर्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा। कथयांचक्रतुर्गाथाः पूर्वं गुरुकुले सतां ४३ आत्मनो ललिता राजन्करौ गृह्य परस्परं। अपि ब्रह्मन्गुरुकुलाद्भवताल्लब्धदक्षिणात् ४४ समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा। प्रायो गृहेषु ते चित्तमकामविहतं तथा ४५ नैवातिप्रीयसे विद्वन्धनेषु विदितं हि मे। केचित्कुर्वंति कर्माणि कामैरहतचेतसः ४६ त्यजंतः प्रकृतिं दैवीं यथाहं लोकसंग्रहं। कच्चिद्गुरुकुले वासं ब्रह्मन्स्मरसि नो यतः ४७ द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते॥ ॥

स्थितमिति ४६ केचिन्निवृत्तिमार्गस्थाः प्रकृतिं देहाभिमानलक्षणां दैवीं देवाधीनां ४७ तात्पर्यान्मुनरुक्तं करोति। कच्चिदिति। यतो यस्मिन् गुरुकुलवासे विज्ञेयं विज्ञाय तमसः अज्ञानस्य पारं प्रकृतेर्वा वैकुंठमश्नुते॥ ॥

द० उ०

१३२

इतोपि गुरुकुलवासः कर्त्तव्य इत्याह। स वा इति। यस्मात् द्विजातेः साक्षात्सत्कर्म्मणां संभवो जन्म स गुरुकुलवासो वा इत्यन्वयः। अत्र हेतुमाह आद्य इति ज्ञानदो गुरुः आश्रमिणां आद्यः इति यस्मात्तस्मात् यथा अहमिति ४९ ज्ञानमपि यन्मुक्तिसाधनं तद्गुरुदेव पुर्वतिर्यग्यित्युक्तं पावावात्मत्रं अंशशिक्षिता ये गुरुणा भवार्णवं तरंतीति ते त्वेव वर्णाश्रमवतां मध्ये अर्थकोविदाः स्वप्रयोजनसंपादनपटव इत्यन्वयः ५० सर्वेभ्यः साधनेभ्यः अयमेव भगवद्गुरुयशु तरं गमित्याह। नेति। इज्या यजनं प्रजननं प्रजातिः संततिजननं। नाहं तथा तोषं प्राप्नोमीति व्यक्तिः ५१ अनुस्मृतविशेषस्मरणार्थं उभयोरनुभूतविशे

स वै सत्कर्म्मणां साक्षाद्द्विजातेरिह संभवः। आद्योंऽग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ४९ नन्वर्थकोविदा ब्रह्मन् वर्णाश्रमवतामिह। ये मया गुरुणा वाचा तरंत्यंजो भवार्णवं ५० नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा। तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ५१ अपि नः स्मर्यते ब्रह्मन् वृत्तं निवसतां गुरौ। गुरुदारैश्चोदितानामिंधनानयने क्वचित् ५२ प्रविष्टानां महारण्यमपर्तौ सुमहद्द्विज। वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ५३ सूर्यश्चास्तंगतस्तावत्तमसा संवृता दिशः। निम्नं कूलं जलमयं न प्राज्ञायत किंचन ५४ वयं भृशं तत्र महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे। दिशोऽविदंतोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ५५ ॥ ॥

संस्मारयति अपीति। गुरौ निवसतां नो यत्कर्म्म तत्स्मर्यतां अपि स्मर्यते किं ५२ अपर्तौ वर्षाकालमंतरेणवात्युतवर्षं ५३ इदं निम्नमिदं कूलमिति किंचन स्थूलजलप्रवाहेण न प्राज्ञायत न ज्ञातमभूत् ५४ अंबुसंप्लवे जलप्रवाहे दिशो विदंतः अजानंतः परिबभ्रिम परितो भ्रांता बभूविम ५५

राम

१३२

विदित्वा उदिते इत्यनेन दुःखातिशयं दर्शयति। कथमेतत् तत्राह। अरुदरिति ५६ आत्मा देहः ५७ गुरुनिष्कृतिं गुरुप्रत्युपकारः सर्वे अर्था यस्मिन् स्म तथा सर्वार्थ आत्मा सर्वार्थात्मा शरीरं तस्यार्प्पणं यत्तत् ५८ ५९ उक्तमाशिषीति इत्यमिति। इत्थंविधान्यनेकानि व्यसनान्यासन्निति शेषः। तानि व्यसनानि गुरोरनुग्रहेणानिस्तीर्य उमानुप्रशांतये प्रकृष्टसुखप्राप्तये पूर्णः कृतार्थः स्यात् ६० अस्माभिर्गुरुकुलवासे इदं कृतमिति विशेष्य किंच

एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः। अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान् ५६ अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः। आत्मा हि प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ५७ एतदेव हि सच्छिष्यैः कर्त्तव्यं गुरुनिष्कृतं। यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ५८ संतुष्टोहं द्विजश्रेष्ठाः सत्याः संतु मनोरथाः। छंदांस्ययातयामानि भवंत्विह परत्र च ५९ इत्थंविधान्यनेकानि वसतां गुरुवेश्मनि। गुरोरनुग्रहेणैव पुमान् पूर्णः प्रशांतये ६० ब्राह्मण उवाच किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो। भवता सत्यकामेन येषां वासो गुरावभूत् ६१ यस्य छंदोमयं ब्रह्म देह आवपनं विभो। श्रेयसां तस्य गुरुषु वासोऽत्यंतविडंबनं ६२ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टनवतितमोऽध्यायः ॥ ॥

कृत्यं सर्वमप्यनुष्ठितमिति ब्राह्मण आह। किमिति। सत्यकामेन भवता सह येषां नो गुरुकुलवासोऽभूत् तैरस्माभिः गुरुकुलवासे किमनिष्ठितं न कृतं किं सर्वमप्यावाप्तमेव ६१ किंमिदमस्माकं युक्तं तव त्वत्यंतविडंबकमित्याह यस्येति। छंदोमयं वेदमुख्यप्रतिपाद्यं आवपनं जगदुत्पत्तिक्षेत्रं ब्रह्म यस्य तव देहः स्वरूपं तस्य तव यो यं गुरुषु वासः सोऽयमत्यंतविडंबनं अनुकार इति ६२ दशमे अष्टनवतितमः ॥

द० उ०

संकथयन्सल्लापंकुर्वन् १ २ दरिद्रत्वेनभूरिद्रव्याभावात्भवतोमहतोल्पंमन्नकृशिकरंनस्यादितिनानीतमितिशंकामाभूदित्याह। अल्पमितिआहृतमानीतंद्रव्यभूरित्वाभूरत्वेचप्रयोजकेकिंतुभक्तिरेवेत्यनेनादर्शि ३ ५ सर्वभूतानामात्मदृक्स्वभावज्ञःआत्मादेहेन्द्र

१३३

श्रीशुकउवाच सइत्थंद्विजवर्येणसहसंकथयन्हरिः। सर्वभूतमनोभिज्ञःस्मयमानउवाचतं १ ब्रह्मण्योब्राह्मणंकृष्णो भगवान्प्रहसन्प्रियं। प्रेम्णानिरीक्षणेनैवप्रेक्षन्खलुसतांपतिः २ श्रीभगवानुवाच किमुपायनमानीतंब्रह्मन्मेभवतागृहात्। अल्पमप्याहृतंभक्तैःप्रेम्णाभूर्येवमेभवेत् ३ भूर्यप्यभक्तोपहृतंनमेतोषायकल्पते ४ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति। तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ५ इत्युक्तोपिद्विजस्तस्मैव्रीडितःपतयेश्रियः। नप्रायच्छत्पृथुकप्रसृतिंराजन्न्यायच्छदवाङ्मुखः ६ सर्वभूतात्मदृक्साक्षात्तस्यागमनकारणं। विज्ञायचिंतयन्नायंश्रीकामोमाभजत्पुरा ६ पत्न्याःपतिव्रतायास्तुसखाप्रियचिकीर्षया। प्राप्तोमामस्यदास्यामिसंपदोमर्त्यदुर्लभाः ७ इत्थंविचिंत्यवसनाच्चीरबद्धान्द्विजन्मनः। स्वयंजहारकिमिदमितिपृथुकतंदुलान् ८ एकमुष्टिंसकृज्जग्ध्वाद्वितीयांजग्धुमाददे। तावच्छ्रीर्जगृहेहस्तंसत्वरापरमेष्ठिना ९ ॥ ॥

तोजीवेस्वभावेपरमात्मनीतियादवः ६ ७ चीरंपटचीरंजीर्णवस्त्रमित्यर्थः। इदंचीरबद्धंकिमितिस्पृष्ट्वाद्विजन्मनःपृथुकतंदुलान्स्वयमाजहार राम
२८९ ॥ १३३

अनुव्रज्यअनुगम्यनंदितःकृष्णेनेतिशेषः १२ महतःकृष्णस्यदर्शनेननिर्वृतः १३ अहंब्राह्मणानांविप्राणांबंधुरितिस्मृत्वा १५ भ्रातरोयथाभ्रातरमितिशेषः १६ १७ दिविआकाशे १८ माद्यन्मदंगच्छन् १९ अंतर्हृदयेइतितच्चिंतयन्कृष्णेस्थितचित्तत्वात्स्वगृहांतिकंप्राप्तः २०

एतावतालंविश्वात्मन्सर्वसंपत्समृद्धये। अस्मिन्लोकेथवामुष्मिन्पुंसस्त्वत्तोषकारणं १० ब्राह्मणस्तांतुरजनीमुषित्वाच्युतमंदिरे। भुक्त्वापीत्वासुखंसुप्त्वामेनआत्मानमिंद्रवत् ११ श्वोभूतेविश्वभावेनस्वसुखेनाभिवंदितः। जगामस्वालयंतातपथ्यनुव्रज्यनंदितः १२ सचालब्ध्वाधनंकृष्णान्नतुयाचितवान्स्वयं। स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः ॥१३॥ अहोब्रह्मण्यदेवस्यदृष्टाब्रह्मण्यतामया। यद्दरिद्रतमोलक्ष्मीमाश्लिष्टोबिभ्रतोरसि १४ क्वाहंदरिद्रःपापीयान्क्वकृष्णःश्रीनिकेतनः। ब्रह्मबंधुरितिस्माहंबाहुभ्यांपरिरंभितः १५ निवासितःप्रियाजुष्टेपर्यंकेभ्रातरोयथा। महिष्यावीजितःश्रांतोबालव्यजनहस्तया १६ शुश्रूषयापरमयापादसंवाहनादिभिः। पूजितोदेवदेवेनविप्रदेवेनदेववत् १७ स्वर्गापवर्गयोःपुंसांरसायांदिविसंपदां। सर्वासामपिसिद्धीनांमूलंतच्चरणार्चनं १८ अधनोयंधनंप्राप्यमाद्यन्नुच्चैर्नमांस्मरेत्। इतिकारुणिकोनूनंधनंमेभूरिनाददात् १९ इतितच्चिंतयन्नंतःप्राप्तोनिजगृहांतिकं। सूर्यानलेंदुसंकाशैर्विमानैःसर्वतोवृतं २० विचित्रोपवनोद्यानैःकूजद्द्विजकुलाकुलैः। प्रोत्फुल्लकुमुदांभोजकह्लारोत्पलवारिभिः २१ जुष्टंस्वलंकृतैःपुंभिःस्त्रीभिश्चहरिणाक्षिभिः। किमिदंकस्यवास्थानंकथंतदिदमित्यभूत् २२ एवंमीमांसमानंतंनरानार्योमरप्रभाः। प्रत्यगृह्णन्महाभागंगीतवाद्येनभूयसा २३ ॥ ॥

२१ स्वमंदिरंदृष्ट्वाइदंकिंकस्यचेदंस्थानंइदंतदितितत्प्रकारकाविधंकथमभूत् २२ एवंमीमांसमानंजिज्ञासमानंतंनरादयःप्रत्यगृह्णन् अभ्यासयुरित्यन्वयः २३ ॥ ॥

द०उ०

१३४

स निजमंदिरं प्रविष्टोऽभूत् २७ ८ द्युमंति द्युतिमंति २९ ३० निर्व्यग्रः निःसंभ्रमः ३१ ममैतद्देवसमृद्धिहेतुर्म्महाविभूतेर्यदूत्तमस्यावलोकतोऽन्यन्निमित्तं नैवोपपद्येत। स एव हेतुरित्यन्वयः ३२ याचिष्णवेऽब्रुवाणस्सन् भूरिभोजः पर्जन्यवत्तन्न अब्रुवन्नपि शं दिशते ददाति। तेन योपस्थे विज्ञाते अभ्यर्थ-पितमनं ददाति भूरिभेजाः। अनल्पप्रभावो भवति स एतादृशमहिमा दाशार्हकाणामृषभः श्रीकृष्णः मे सखा न चानुमतं। लोकेनेति शेषः ३३

पतिमागतमाकर्ण्य पत्न्युद्धर्षातिसंभ्रमात्। निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात् २४ पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठाश्रुलोचना। मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे २५ पत्नीं वीक्ष्य विस्फुरंतीं देवीं वैमानिकीमिव। दासीनां निष्ककंठीनां मध्ये भांतीं स विस्मितः २६ प्रीतः स्वयं तया युक्तः प्रविष्टो निजमंदिरं। मणिस्तंभशतोपेतं महेंद्रभवनं यथा २७ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः। पर्यंका हेमदंडानि चामरव्यजनानि च २८ आसनानि च हैमानि मृदूपस्तरणानि च। मुक्तादामविलंबीनि वितानानि द्युमंति च २९ स्वच्छस्फटिककुड्येषु महामारकतेषु च। रत्नदीपान्भ्राजमानान् ललना रत्नसंयुताः ३० विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसंपदां। तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीं ३१ नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः। महाविभूतेरवलोकतोऽन्यो नैवोपपद्येत यदूत्तमस्य ३२ नन्वब्रुवाणो दिशते समक्षं याचिष्णवे भूर्यपि भूरिभोजः। पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृषभः सखा मे ३३ किंचित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी। मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा ३४ ॥

भक्तदत्तमेव हरेस्सप्रिजनकत्वेनानंतफलत्वेन परिणमतीति भक्तदत्तमित्याह। किंचिदिति। यत्स्वदत्तं भक्तिपूर्वं मदत्तं तदुर्वपि किंचित्करोति फलत इति शेषः। त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंत इत्यादेः। सुहृत्कृतं भजनं फल्ग्वपि अल्पमपि भूरिकारि। एतत्कुतो दृष्टमत आह। मयेति। हेतुगर्भविशेषणमेतत् ३४ ॥ ॥

राम

१३४

यतो न भक्तिरेव प्रधानकारणं अतः सैव संपाद्येति भावेनाह। तस्यैवेति। यो हि मनादिकालमारभ्य तच्चरणैकशरणः तस्यैव मे सौहृदादिस्यादित्यन्वयः। न केवलस्य हरेः भक्तिलक्षणसंगो मे स्यात् अपि तु तद्भक्तसंगोऽपि स्यादिति प्रार्थयते। महानुभावेनेति। भगवता सह विषज्जतः विशेषणसंगं कुर्वतः मे तत्पुरुषप्रसंगः तस्य हरेः पुरुषेषु ब्रह्मादिष्वपि प्रकृष्टसंगश्च स्यादित्यन्वयः ३५ हरिरैहिकमैश्वर्यं न ददातीति मंदभक्तानां तु मितमैश्वर्यं दोषापमार्जनायैव संपादितेति भावेनाह। भक्तायेति ३६ त्यक्ष्यन् मम तामिति शेषः ३७ देवदेवस्येत्यनेन सर्वप्रभुत्वं। यज्ञपतेरित्यनेन सर्वदेवत्वं च

तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात्। महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसंगः ३५ भक्ताय चित्रा भगवान् हि संपदो राज्यं विभूतीर्न समर्थयत्यजः। अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवं ३६ इत्थं व्यवसितो बुद्ध्या भक्तोऽतीव जनार्दने। विषयान् जायया त्यक्ष्यन् बुभुजे नातिलंपटः ॥ ३७ ॥ तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः। ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परं ३८ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितं। तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धाम लेभेऽचिरतः सतां गतिः ३९ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः। लब्धभावो भगवति कर्मबंधाद्विमुच्यते ४० इति श्रीभागवते महापुराणे दशमस्कंधे एकोनशततमोऽध्यायः ॥ ॥

हरेरेव मुख्यमिति सूचितं। अनेनैतत्तेर्ज्ञापिता भक्तिरेवावश्यं कर्तव्येति तात्पर्यं विधीयते नेन तु तस्यैवेति ३८ तस्य विप्रस्य काचित् स्थिरभक्ता इत्येव मितिं। अजितं नाम भगवंतं स्वभक्तैः पराजितं दृष्ट्वा तस्य हरेर्ध्यानवेगेन उद्ग्रथितमुन्मुक्तं आत्मबंधनं यस्य तथा। तद्धाम्नैरेव ब्राप्यं तद्धाम वैकुंठादिलक्षणं ३९ एतच्चरितोपासकस्य फलमाह। एतदिति। लब्धभावो लब्धभक्तिः अनेनास्य विप्रस्येतरभक्तवैलक्षण्यमुक्तं स्यादिति तात्पर्यमवगंतव्यं ४० इति दशमे एकोनशततमोऽध्यायः ॥ ॥

द० उ०

लोकसंग्रहायाश्वमेधयज्ञकरणमन्यासाध्यमुक्तविप्रपुत्रानयनमहात्म्यंचनिरूपयत्यस्मिन्नध्याये। तत्रादौहयस्यप्रदक्षिणप्रकारंवक्ति। कदाचिदि
ति। उद्यम्यउद्योगंविधाय १ २ वहवःसेव्याःसेवनाय कायेषांतेतथा। तान्नमहन्नंरयतीतियदुनंदनः ३ ४ इयमेधेनाश्वमेधेन। दीर्घकालंतपो

१३५

श्रीशुक उवाच कदाचिद्वाजिमेधेनयष्टुमुद्यम्यकेशवः। महींप्रदक्षिणींकर्तुंवाहिणोत्वीक्षितंहयं १ हार्दिक्यंकृतवर्माणंपु
पुधानंचसात्यकिं। चारुदेष्णंसुदेष्णंचप्रद्युम्नंसांबमेवच २ अंशुमंतंसुभानुंचवक्रसेन्यांश्चयादवान्। रक्षणार्थंतुरंगस्यप्राहिणो
द्यदुनंदनः ३ तेवैप्रदक्षिणींकृत्वावसुधांपोक्षितंहयं। उपानिन्युरदीर्घेणकालेनभरतर्षभ ४ यष्टुकामंहरिंश्रुत्वाहयमेधेनभार
त। आजग्मुर्दीर्घतपसोमुनयःसंशितव्रताः ५ होतारंचतथाध्वर्युमुद्गातारंचकेशवः। कल्पयित्वायथान्यायंतथान्यानृत्विजः॥
६॥ ऋषिभिर्ब्राह्मणैश्रेष्ठैर्यज्ञविद्याविचक्षणैः। दीक्षांप्रपेदेभगवान्कृतपुण्याहमंगलः ७ तमुपाजग्मुर्महीपालानानाजनपदेश्व
राः। आजग्मुर्देवसंकाशाःकिरीटमुकुटोज्वलाः ८ पांडवाश्चमहीपालायज्ञदर्शनलिप्सवः। आहूतावासुदेवेनद्वारकामापपुर्न्नृ
प ९ तस्मिंस्तथावर्त्तमानेहयमेधमहोत्सवे। आसंस्तत्राद्विजाभोज्यवस्त्रगोभूमिकांचनैः १० दीक्षांप्रविश्यगोविंदःकामेश्च
र्प्पयतिद्विजान्। भुंजानेषुद्विजाग्र्येषुप्रतिगृह्णत्सुवांछितं ११ आसीनेषुपथायोग्यंभूपालेषुसमंततः। वदत्सुमाधुसाध्विति वेत्र
झर्झरपाणिषु १२ तरणशूलधरःकश्चिद्ब्राह्मणोभ्येत्यसत्वरः। चुक्रोशद्वारितद्वाकृष्टद्वारदेशेस्थितः १३ ॥ ॥

येषांतेतथा ५ ६ उपाजग्मुर्निषेवितुं। किरीटैर्मुकटैःसुवर्णैश्चोज्ज्वलाः ८ ११ वेत्रेणझर्झरांश्चकर्कशाःपाणयोयेषांतेतथातेषु १२
तरणशूलधरःतरणानांपूलंज्ञडांधारयतीतितरणपूलंयष्टिंचधारयतीतिवा १३ ॥ ॥

राम

१३५

हिंसाविहारादिकर्म्मयुक्तंनृपतिंभजंत्यःसीदंति १६ द्वितीयंद्विवारं। तृतीयंत्रिवारंपुनश्चतुर्वारं १७ १८ १ केनापिपुंसानीयते २० कि
माहेत्यत्राह। किंब्राह्मणेति। इहत्वन्निवासस्थानेधनुर्द्धरोनास्ति किमित्यब्रवीत् २१ धनुर्द्धरेणकिंकार्यमत्राह। राजन्यबंधोरिति। एतेब्राह्मणाराज
न्यबंधोर्हेतोःसत्रमासतेवै २२ राज्ञापिसएवप्रश्रयाभितरोदुःखहेतुरित्याह। धनदारेति। यत्रयस्मिन्देशेराजन्यवेषेणासुंभरानेराज्ञोवंति

कृतघ्नामकंठःशुष्कास्यगलद्बाष्पाकुलेक्षणः। इदंचोवाचविलपन्नार्त्तरोदीनमानसः १४ ब्रह्मद्विषःशठधियोलुब्धस्यविषयात्मनः।
क्षत्रबंधोःकर्मदोषात्पंचत्वंमेगताःसुताः १५ हिंसाविहारंनृपतिंदुःशीलमजितेंद्रियं। प्रजाभजंत्यःसीदंतिदरिद्रानित्यदुःखिताः १६
एवंद्वितीयंविप्रर्षिस्तृतीयंत्वेवमेवच। इत्युक्त्वासपुनश्चैवचुक्रोशभृशदुःखितः १७ तदाकर्ण्यार्जुनोमाधवीसमुत्थायवचोस्तनात्।
अपृच्छत्तमुपमामाधब्राह्मणंकेशवांतिकात् १८ किमासत्वर्भकाब्रह्मन्वकेनासिदुःखिताः। ब्रूहितत्वमशेषेणात्वामद्यसुखे
याम्यहं १९ इत्युक्तोब्राह्मणःप्राहजातोजातोर्भकोमम। नीयतेनातकेनापितत्क्षणेसूतिकागृहात् २० तदाकर्ण्यार्जुनःप्राह
स्मयमानइवद्विजं। किंब्राह्मणत्वनिवासेइहनास्तिधनुर्द्धरः २१ राजन्यबंधोरेतेवैब्राह्मणाःसत्रमासते २२ धनदारात्मजैर्यत्रा
यत्रशोचंतिब्राह्मणाः। तेवैराजन्यवेषेणनटाजीवंत्यसुंभराः २३ अहंप्रजावांरक्षिष्येभगवन्दीनयोरिह। अनिस्तीर्णप्रतिज्ञोग्निंप्रवेक्ष्येह
तकल्मषः २४ ॥

नास्मिन्देशेस्थितास्तेभृत्याराज्ञाभरणीयाःब्राह्मणाःधनदारात्मजैःसहशोचंतीत्यन्वयः। यद्वायत्रयेषुराजसुसत्सुब्राह्मणाधनादिभिःस
हशोचंतितेराजन्यवेषेणनटाएवजीवंतिनतुसहर्षयाःकुतःअसुंभराःसुजातापोषणपरायणावैयस्मात्तस्मात्दीनयोर्दुःखयोःअहंतकल्म

तत्रार्जुनस्याहंकाराविष्करणाय ब्राह्मणोक्तिः। संकर्षण इति। संकर्षणादयः प्रार्थ्यं न शक्नुवंति यद्यस्मात्तस्मात् जगदीश्वरैर्दुष्करं कर्म कथं चिकीर्षसि।
बालिशो बालमूर्खयोरिति वचनात् बालिश्यात् आत्मशक्त्यनभिज्ञानात् इदृक्कर्माणि त्वत्तः ह्यावलंबन श्रद्दध्महे २६ अत्रार्जुनः स्वगर्वमुद्गलयति। अ
र्जुन इति। धनंजयपर्यायेणैरणारतिश्रुतिप्रसिद्धेः अहं धनंजयो नाम प्रख्यातः। धनुष्मत्त्वे हेतुर्गांडीवमिति २७ मावमंस्था अवमानं न कुरु। मृत्युप

ब्राह्मण उवाच संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः। अनिरुद्धोऽप्रतिरथो न त्रातुं शक्नुवंति यत् २५ तत्कथं नु भवान्कर्म दुष्क
रं जगदीश्वरैः। चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयं २६ अर्जुन उवाच नाहं संकर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च। अहं धनंज
यो नाम गांडीवं यस्य कार्मुकं २७ मावमंस्था मम ब्रह्मन्वीर्यं त्र्यंबकतोषणं। मृत्युं विजित्य प्रधने आनेष्ये ते प्रजाः प्रभो २८ इति विश्रंभयि
त्वा तं कृष्णमाहार्जुनो नृप। अनुज्ञां देहि भगवन्ब्राह्मणार्थे प्रयास्यतः २९ यज्ञं तां वा निमेषेण भवानेभिर्महात्मभिः। इति ब्रुवंतं बीभत्सु
मनुज्ञां प्रेक्ष्य मस्तुतः ३० बद्धतूणं सगांडीवं स्मयमानो ब्रवीद्वचः। श्रीभगवानुवाच अहमेवाभिष्यामि तव पाशुपतेर्जुन। मम साधा
रणं श्रुतं मन्ये येन हतोऽर्भकः ३१ अर्जुन उवाच सलोकपालो देवेंद्रः खांडवे विजितो मया। किरातरूपी सुदेवस्तोषितश्च त्रियंबकः ३२ नि
वातकवचाश्चैव वासवेनापि दुर्जयाः। मयैव निहताः संख्ये हिरण्यपुरवासिनः ३३ नेभ्योधिकतरं भूतं किं तु दानवसूदन। विभीषयसि मां क
स्मात्त्वन्नो देहि सांप्रतं ३४ शुक उवाच इत्युक्तः प्रददौ कृष्णस्त्वनुज्ञां सव्यसाचिने। निर्ययौ यज्ञशालायाः संगृहीतशरासनः ३५ रथ
मास्थाय विपुलं समुच्छ्रितकपिध्वजं। अयं ब्राह्मणमारोप्य तत्क्षणमभितो ययौ ३६ ॥ ॥

ततः किंफलं तमत्राह इतीति २९ तत्र कृष्णोऽहंकारिणो दैवप्रसादो न स्यादिति भावं बाल्यार्जुनं निवारयन्निव वक्ति इतीति ३० बद्धतूणं पृष्ठे बद्धतू
णीरं ३० अल्पकार्यहेतोः स्वदमनं किमर्थमित्यत्राह। तम साधारणमिति। भूतं देवयोनिं। अर्जुनः स्वगर्वमुद्गलयति। सलोकपाल इति ३१ ३२ भूतं दे
वयोनिं ३४ ३५ अमितद्युति इषव ३६ ॥ ॥

पुर्धां वस्तु धयंतीति पुध्यो ये योधास्तेषां वराः येऽह पाणिं पुत्रप्रपराक्रमाणां निदर्शनं दृष्टांतः ४१ ४ सूतिकागारं सूतिकागृहं शरैर्नद्धं आवृतवान्
४५ भावरक्षप्रहरहितस्य साधनवाहुल्येन किंफलमिति भावेनाह। ततइति ४६ तदनंतरं किमभूदित्यत आह। तदेति अथार्जुनं विनिंदति। तवेतियस्य

तत्रागत्वा प्रविष्टायां तत्पत्न्यां सूतिकागृहं। ब्राह्मणं प्राह बीभत्सुरवरोप्य रथात्तनृप ३७ अर्जुन उवाच याहि ब्रूम वनं ब्रह्मन्नभयं तव
सर्वतः। इत्नं मयापाद्यत जीवतां पुत्री मा स्वास्यया स्वते। ३८। इति विश्रंभितो विप्रः फाल्गुनेन परंतप। जगाम स्वगृहं प्रीत्या पार्थवीर्यं निशाम्यतत् ३९
प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः। प्रोवाच कृष्णमभ्येत्य पार्थं भ्रातृस्तुतं वरं ४० एहि पार्थ महाबाहो यत्नो भवतु तेवर। अत्र पूर्वं कृ
तानाहि येषां प्राणानिदर्शनं ४१ श्रीशुक उवाच इत्युक्तोरथ मारुह्य सज्यं कृत्वा तु गांडिवं। त्वरज्ञगाम बीभत्सुः सूतिकाभवनांतिकं
४२ ब्राह्मणेपि च विप्राह मुहूर्त्तं सूतिकागृहे। गतेन पाहि पाहीति मृत्योरर्जुन मातुरः ४३ सउपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरं। दि
व्यान्यस्त्राणि च संस्मृत्य सज्यं गांडीवमाददे ४५ न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः। तिर्यगूर्ध्वमधः पार्थश्चकार शरपंजरं ४५ ततः
कुमारः संजातः विप्रपत्न्या रुदन्मुहुः। सद्योऽदर्शनमापेदे सशरीरो विहायसा ४६ तदाह विप्रो विजयं विनिंदन्कृष्णसन्निधौ। मौढ्यं पश्यत मे यो
हं वै श्रद्दधे क्लीवकत्थनं ४७ न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः। यस्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ४८ धिगर्जुनं मृषावादं धि
गात्मश्लाघिनो धनुः

प्रमाऽर्भकं परित्रातुं न शेकुः सोऽहं कृष्णस्य संनिधौ यस्य तव विकत्थनं श्रद्दधे वै तं त्वां धिक्। आत्मश्लाघिनः स्वस्य तव धनुः धिक्। तदविकेश्वरः
तेभ्यः प्रद्युम्नादिभ्योऽधिकेश्वरः ४८ ॥ ॥

क्लिमित्येवांनिर्दंसीतीति तत्राह दैवेति दैवेनोपसृष्टयोरुपद्रुतयोरावयोः पुत्रमानिनीषतिआनेतुमिच्छति ४९ विद्यामनुष्याणाम्यगमनसामर्थ्यकरी ५० नैर्ऋतीनिर्ऋतेर्विद्यमानांदिशंसोम्यांसोमस्यवायव्यांवायोःवारुणींवरुणस्य ५१ अनिस्तीर्णप्रतिश्रुतःअसाधितप्रतिज्ञः ५२ प्रत्युक्तःनेत्युक्तः प्रतिषेधेनाभिसंधंकुर्वात कथंनेत्युक्त इतितत्राह दर्शयइतिआत्मनेवस्वयंआत्मानमावधीर्माहिंसीःसंधिरार्षः ५३ एतेनप्रत्याद्यनादिनावभिमितेन

दैवोपसृष्टयोर्मेद्य हानिनीपतिदुर्मतिः ४९ एवंशपतिविप्रर्षौविद्यामास्थाय फाल्गुनः ययौसंयमिनीमाशु यत्रास्तेभगवान्यमः ५० विप्रापत्यमचक्षाणस्तत ऐन्द्रीमगात्पुरीं । आग्नेयीनैर्ऋतींसौम्यांवायव्यांवारुणीमथ ५१ रसातलंनागपुरींधिष्ण्यान्यन्यान्युदायुधः ततोलब्धद्विजसुतोह्यनिस्तीर्णप्रतिश्रुतः ५२ अग्निंविविक्षुःकृष्णेनप्रत्युक्तःप्रतिषेधता । दर्शयेद्विजसूनुंस्तेमावज्ञात्मानमात्मना ५३ एतेनकीर्तिविमलांमानुष्यंस्थापयिष्यसि । इतिसंभाष्यभगवानर्जुनेनसमहेश्वरः । सदैवरथमास्थायप्रतीचीदिशमाविशत् ५४ सप्तद्वीपान्सप्तसिंधून्सप्तसप्तगिरीनथ । लोकालोकंतथातीत्याविवेशसुमहत्तमः ५५ तत्राश्वाःशैब्यसुग्रीवमेघपुष्पवलाहकाः । तमसिभ्रष्टगतयोबभूवुर्भरतर्षभ ५६ तान्दृष्ट्वाभगवान्कृष्णोमहायोगेश्वरेश्वरः । सहस्रादित्यसंकाशंस्वचक्रंप्राहिणोत्पुरः ५७ तमःसुघोरंगहनंकृतंमहद्विदारयद्भूरितरेणरोचिषा । मनोजवंनिर्विविशेसुदर्शनंगुणच्युतोरामशरोयथाचमूः ५८ द्वारेणचक्रानुपथेनतत्तमःपरंपरंज्योतिरनंतपारं । समश्नुवानंप्रसमीक्ष्यफाल्गुनःप्रताडिताक्षःपिदधेऽक्षिणीउभे ५९ ॥ ॥

मानुष्यलोकस्थांईश्वरादपिमहानुत्तमः ५४ गमनंछादयतीतिगमछदं । गुणच्युतःमौर्व्यामुक्तः ५८ चक्रानुपथेसुदर्शनगतानुकूलमार्गकृतद्वारेणसमश्नुवानंप्रकाशंतंपरंपरंप्रसमीक्ष्यअक्षिणीपिदधइत्यन्वयः । अनंतपारंअनंतपारवर्जितं ५९ ॥ ॥

ततस्सलिलंप्रविशप्रगतोमहनंदृदर्शतत्रस्थ्यःवलीयसानभस्वताघायुना एताद्भिःकंपमानैर्बृहद्भिरूर्मिभिःतरंगैर्भीषणंतत्रसलिले ६० तस्मिन्भवनेअनंतंददर्श । सितोवराभंश्वेताकाशवत्शोभमानंशितःनीलःकंठोयस्यसःशितिकंठः जिह्वाःनेत्रगात्रेतं ६१ तस्यानंतस्यभोगेसुखमास

ततःप्रविष्टःसलिलंनभस्वताबलीयसैजद्बृहदूर्मिभीषणं । तत्राद्भुतंवैभवनंद्युमत्तमंभ्राजन्मणिस्तंभसहस्रशोभितं ६१ तस्मिन्महाभीममनंतमद्भुतंसहस्रमूर्धन्यफणामणिद्युभिः । विभ्राजमानंद्विगुणेक्षणोल्बणंसिताचलाभंशितिकंठजिह्वं ६२ ददर्शतद्भोगसुखासनंविभुंमहानुभावंपुरुषोत्तमोत्तमं । सांद्राम्बुदाभंसुपिशंगवाससंप्रसन्नवक्त्रंरुचिरायतेक्षणं ६३ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं । प्रलंबचार्वष्टभुजंसकौस्तुभंश्रीवत्सलक्ष्मंवनमालयावृतं ६४ सुनंदनंदप्रमुखैःस्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः । पुष्ट्याश्रियाकीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणंपरमेष्ठिनांपतिं ॥६४॥ ववंदआत्मानमनंतमच्युतोजिष्णुश्चतद्दर्शनजातसाध्वसः । सचाहभूमापरमेष्ठिनांप्रभुर्बद्धांजलिंसस्मितमूर्जयागिरा ६५ द्विजात्मजामेयुवयोर्दिदृक्षुणामयोपनीताभुविधर्मगुप्तये । कलावतीर्णावनेर्भरासुरान्हत्वेहभूयस्त्वरयेतमंतिकं ६६ पूर्णकामावपियुवांनरनारायणावृषी । धर्ममाचरतांस्थित्यैऋषभौलोकसंग्रहं ६७ ॥ ॥

नःतं ६२ ३ परमेष्ठिनांब्रह्मणांपतिं ६४ अच्युतःकृष्णःजिष्णुरर्जुनः ६५ युवयोःकृष्णार्जुनयोः ६६ जगतःस्थित्यैलोकसंग्रहंधर्मं ६७ ॥

द्धस्नायर्कन्नमार्जुनोथानंदभूमानंपूर्णानंदं ६८ प्रसृयतांप्रसवंगच्छतां।रूपंयथाप्रसूतिकालेयद्रूपंतादृशंरूपंदधानात् ६९ पुंसांयत्किंचित्तौ
रुषंकृष्णानुकंपितंमेने १० १ दीक्षायांमध्येचलनेनतत्रद्धायगमनेप्रायश्चित्तमुद्दिश्ययःकर्मविशेषउदाहृतःतंचचकार ११ २ अवभृथनिमि

इत्यादिष्टौभगवतातौकृष्णौपरमेष्ठिना।ऋषिमित्यानंदभूमानमादायद्विजदारकान् ६८ न्यवर्तेतांस्वकंधामसंप्रहृष्टौयथागतं।
विप्रायददतुःपुत्रान्यथारूपंयथावयः ६९ निशाम्यवैष्णवंधामपार्थःपरमविस्मितः।यत्किंचित्पौरुषंपुंसांमेनेकृष्णानुकंपितं १०
तदाप्रविश्यगोविंदोपज्ञवाटंपुनःस्वकं।प्रारंभितोदीक्षितैर्विप्रैर्यज्ञोऋत्विग्भिःक्षत्रियर्षभैः ११ प्रायश्चित्तंतु चलनेदीक्षायांयदुदाहृतः।तच्चका
रयथान्यायंब्राह्मणैरनुमोदितः १२ समाप्ययज्ञंविधिवत्संपूज्यद्विजान्।ऋत्विग्भ्यःप्रजपित्वाप्यार्थर्षीश्चकृत्वसत्तम १३ प
मुनायांमहानद्यांकृत्वावभृथसज्जनं।विनष्टारयथाकामंमहर्षिभिर्यदूत्तमः १४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविजकृष्ण
राजयज्ञनामशततमोध्यायः श्रीशुकउवाच उद्यापनस्नानहेतोर्यमुनातीरमागतौ।श्रुत्वादर्शकलिंगोप्रोदंतवक्रोविदूरमहायवा
न् २ महत्यासेनयायुक्तोगजानीकसमन्वितः।गच्छंतंद्वारकांकृष्णंपथिरोद्धुंसमाययौ २ सोभ्येत्यपथिगच्छंतंहतंयदुकुमारकैः।कांता
षोडशसाहस्रशिबिकापरिवारितं ३ राजेंद्रसार्थानुगतंमहर्षिगणसेवितं।अत्विक्पुरोहिताचार्यब्राह्मणैश्चसमन्वितं ४ ॥

न्य

त्रमज्जनं १४ इतिदशमेशततमोध्यायः हरेरवशिष्टभूभारदंतवक्रविदूरथवधलक्षणंयच्चरितंतत्कथयत्यस्मिन्नध्याये।तत्रतद्व
टनप्रकारमाह।उद्यापनेति।उद्यापनस्नानहेतोःअथवावभृथस्नानहेतोः १ ४ ॥ ॥

अत्रुणातकृरोधःजंबुकःशृगालः ५ परोक्षसोहृदंमृतिलक्षणगतस्यक्त्वेपिबंधुनायत्कर्तव्यंसोहृदंप्रेमततरऊर्ध्वदेहिकर्तुकामः ताच्छीलका
शहप्रत्ययः ६ ७ वेलाजलवृद्धिःसिंधुनदी।कालिंगःकलिंगविषयनाथः ८ ९ मातुलोवसुदेवःतत्पुत्रःपारदारिकःपरस्त्रीरति

दंतवक्रोक्षत्राणांमूढोमृगेंद्रंजंबुकोयथा।रुक्मिणःशिशुपालस्यपौंड्रकस्यचदुर्मतेः ५ परलोकगतानांसकूर्धदेह्यारेन्परोक्षसौहृदं।
पदातिःपथिसंरोद्धुंगदापाणिःप्रकंपयन् ६ पद्भ्यांमहींमहाराजमहासत्वोव्यदृश्यत।तंतथायांतमालोक्यगदामादायसत्वरः ७
अवप्लुत्यरथात्कृष्णःसिंधुंवेलेवप्रत्यगात्।गदामुद्यम्यकालिंगोकृष्णंप्राहदुर्मदः ८ दिष्ट्याकृष्णभवानद्यममदृष्टिपथंगतः।
त्वामद्यद्वंद्वयुद्धेनहनिष्यामिबिलंबितं ९ त्वंमातुलेयोनःकृष्णःमित्रध्रुक्पारदारिकः।विश्वासघातीबंधुघ्नःसततंकलहप्रियः।
१० पौंड्रकंमातुलेयंमेसंख्येसूदितवानसि।रुक्मीचशिशुपालश्चभ्रातरौमेत्वयाहतौ ११ अतस्त्वांगदयामंदहनिष्येवज्रकल्पया।
तेनानृण्यमुपैम्यज्ञमित्राणांमित्रवत्सलः १२ बंधुरूपमरिंहत्वाव्याधिंदेहचरंयथा।इतिलोकप्रवादोस्तितेनदोषोविनाशिते १३
एवंरुक्षैश्चवचनैःकृष्णंतोत्रैरिवद्विपं।गदयाताडयत्कृष्णंसिंहवद्व्यनदच्चसः १४ गदयापिहतोप्याजौनचचालयदूत्तमः।गदयाप्य
हनत्कुर्व्यांकौमोदक्यास्तनांतरे १५ गाढनिर्भिन्नहृदयउद्वमन्रुधिरंमुखात्।प्रसार्यकेशबाह्वंघ्रीगताशुर्न्यपतद्भुवि १६

समुत्सुकः १० भ्रातरौमातृसोदरीपुत्रत्वेन ११ आनृण्यंपंकणभावं १२ देहचरंदेहगतं १३ रूक्षैर्वचनैर्व्यथयित्वेतिशेषः १४

द० उ०

दंतवक्रगतासुः कृष्णं ज्ञातापरपर्यायं तमोविग्रातश्चाम्यकृष्णद्वारपालः कृष्णं तत्कृष्णानंदरूपं श्रीहरिं १७ असिचर्मं कर्मचर्म १८ २१ कालया
मासद्रावयामास वाराणादिकमित्यत्र गजाश्वरथादिकं गृह्यते २३ पुष्परथं विवाहयोग्यं रथं २४ ६ पशुदृष्टीनां अज्ञजनबुद्धीनां पक्षे जी

१३९

ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं। पश्यतां सर्वभूतानां यथा वैद्यस्य संगरे १७ भ्रातरं निहतं दृष्ट्वा दंतवक्रं विदूरथः। मूर्छितो भ्रातृशोकेनाप्यसिचर्म समाददे १८ सोपकृत्य रथात्तूर्णं विधुन्वन्खड्गमुत्तमं। अभिदुद्राव गोविंदं पद्भ्यामुर्वीं प्रकंपयन् १९ तस्य बाणेन विच्छेद्य खड्गं यादवनंदनः। ततो जग्राह निशितां शक्तिं घोरां विदूरथः २० तया प्रहर्तुं गोविंदमभिनिश्चित्य संगरे। बाणेनापि ससाराग्रं(?) क्षुरप्रेण यथा शरः २१ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना। शिरो जहार राजेंद्र सकिरीटं सकुंडलं २२ एवं निहत्य समरे दंतवक्त्रविदूरथौ। कालयामास तत्सैन्यं जगृहे वाराणादिकं २३ भूयः पुष्परथं दिव्यमातस्थस मलंकृतां। सहितः सात्वतगणैरीडितः सुरमानवैः २४ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः। अप्सरोभिः पितृगणैर्यक्षकिन्नरचारणैः २५ उपगीयमानविजयः कुसुमैरभिवर्षितः। वृतश्च वृष्णिप्रवरैर्विवेशालंकृतं पुरं २६ एवं योगेश्वरः कृष्णो भगवान्देवकीसुतः। ईयते पशुदृष्टीनां निर्जितो जयतीति सः २७ तस्य कर्माण्युदाराणि उपश्लोकस्य भारत। शक्यंते कथितुं नैव वर्षाणामयुतैरपि २८ एवमारभ्य राज्ञस्याः प्रतनायाः परंतप। भूभारभूतानसुरान्जघान मधुसूदनः। २९ इति श्रीभागवते महापुराणे दशमस्कंधे एकशततमोध्यायः ॥

यते जयती तिर्ईयते ज्ञायते २७ ब्रह्माद्यन्यतमेनापि तत्कर्म समाप्तिं कर्तुं न शक्यते किंतु नमयेति भावेनाह। तस्येति २८ कृष्णमारभ्य य
द्दैत्यहननं तदाह्रितः उपसंहरति एवमिति २९ इति दशमे एकोनशततमोध्यायः ।। ।।

राम
१३९

अनेनाध्यायद्वयेन गृहस्थस्य धर्मानुकरणलक्षणं हरेः सन्निधानात्सर्वतीर्थोत्तमत्वं द्वारकाया वक्ष्यते। तत्र प्रथमं द्वारकाद्युद्वर्णयति सु
खमिति १ हर्म्येषु धनिनां योग्येषु समुन्नतगृहेषु सौधेषु सुधाधवलितेषूत्तमगृहेषु २ ३ निर्विशद्भिः मिथ उपभुंजानैः भृंगविहगैः नादि

श्रीशुक उवाच सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः पतिः। सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः १ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः। कंदुकैर्हर्म्यसौधेषु क्रीडंतीभिस्तडिद्द्युभिः २ नित्यं संकुलमार्गायां मदच्युद्भिर्मतंगजैः। स्वलंकृतैर्भटैरश्वै रथैश्च कनकोज्वलैः ३ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु। निर्विशद्भृंगविहगैर्नादितायां समंततः ४ रेमे षोडशसाहस्रपत्नीनामेकवल्लभः। तावंति विचित्ररूपाणि तद्गेहेषु महर्द्धिषु ५ प्रोत्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः। वासितामलतोयेषु कूजद्द्विजकुलासु च ६ विजहार विगाह्यांभो ह्रदिनीषु महोदयः। कुचकुंकुमलिप्तांगः परिरब्धश्च योषितां ७ उपगीयमानो गंधर्वैर्मृदंगपणवानकान्। वादयद्भिर्मुदा वीणाः सूतमागधवंदिभिः ८ सेव्यमानो जुतस्त्राभिर्हसंतीभिश्च रेचकैः। प्रतिषिंचन्विचिक्रीडे स्वखरः शक्तिभिः स्वयं ९ ।। ।।

तायां घोषवत्कृतायां ४ ५ वासितामलतोयेषु परिमलीकृतजलेषु ६ ह्रदिनीषु नदीषु स्त्रयोषितामिति षष्ठी तृतीयार्थे ७ वीणाइ
तिद्वितीया ८ रेचकैः जलप्रक्षेपणचर्मपात्रैः शक्तिभिर्भार्याभिः सह ९ ।। ।।

द०उ०
१४०

क्लिन्नान्यार्द्राणि वस्त्राणि यासां ता विवृतास्तत्प्रदेशाः कुचप्रदेशाश्च यासां ताः। तासां स्नानेभ्यः विषिक्तानि विसंक्रांतानि कुंकुमानि तत्स्नानविषक्ति तकुंकुमानि तैर्मिश्रास्तस्य सत्तया कुंतलेषु द्रवन्मानाः सकुंतलः क्रीडायामभिसंगतस्तथा यं सकुंतलस्य कुंदगंधस्तथा कुंद ५ दृष्ट्वेति क बराणि दृष्ट्वा कबराणि उद्धृतानि उन्मुक्तानि दृष्टकबरसूरितानि प्रसूनानि यासां ताः। कांतस्य कमनीयस्य कृष्णस्य चेतनजिहीर्षया वित्तवशीक रणेच्छया उपगूहनेन उपगूहनक्रियया आतेनाविर्भूतेन स्मरोत्स्मयेन उत्कृष्टेन मंदस्मितेन लसंति वदनानि यासां ताः ॥१०॥ ५ पुष्पवतंसीभयस्य स

ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचंत्य उद्धृतबृहत्कबरप्रसूनाः। कांतस्य चेतनजिहीर्षतयोपगूह्य जातस्मरोत्स्मयलसद्वदना विरेजुः १० कृष्णस्तु तत्स्तनविषज्जितकुंकुमस्रक्क्रीडाभिषंगधुतकुंतलवृंदबंधः। सिंचन्मुहुर्युवतिभिः परिषिंच्यमानो रेमे करेणुभिरिवेभपतिः परीतः ११ गृहेषु तासाम् अनिवार्य ईश्वरो निरस्तसाम्यातिशयोऽव्यवस्थितः। रेमे रमाभिर्निजसौख्यसंप्लुतो यथेतरो गार्हकमेधिकांश्चरन् १२ इत्थं रमापतिरवाप्य पतिं स्त्रियो या ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम्। भेजुर्मुदाऽविरतमेधितयानुरागहासावलोकनवसंगमलज्जयेव १३ इति श्रीभागवते महापुराणे दशमस्कंधे नवतितमोऽध्यायः श्रीशुक उवाच एवंवेदादि तं धर्ममनुतिष्ठन्सतां गतिः। गृहे धर्मार्थकामानां मुहुः संदर्शयन्पदम् १ एवं शासति भूचक्रं चक्रपाणौ जनार्दने। द्वारकाष्टि निलया योजनद्वादशायुता २ मुनिभिर्ब्राह्मणैश्चैव वस्त्रवियैश्चापि वंदिभिः। आसीत्पूर्णा कुतश्चेष्ठ सततं समलंकृता ३ ॥ ॥

तथासिंचञ्जलमिति शेषः ११ अनिवार्य इत्यस्य विवरणमीश्वर इति रमाभी रमाभिर्लक्ष्मीसन्निधानयुक्ताभिर्वा निजसौख्यसंप्लुतः स्वरूपानंद समुद्रमग्नः गार्हकमेधिकान् गृहस्थाश्रमयोग्यधर्मांश्चरन्कुर्वन् १२ नवसंगमे या लज्जा सेव स्थिता तया अनुरागादियुक्तया १३ इति द शमे स्कंधे नवतितमः धर्मार्थकामानां पदं विषयं संदर्शयन् त्रिवर्गाणामाश्रयो गृहस्थ इति सम्यग्दर्शयन्। द्वारकामावसति श्रीकृष्ण इति शेषः १ ततः परं किमभूदित्याह एवमिति। भूचक्रं भूमंडलं। द्वारकामुन्यादिभिः पूर्णा निविडा आसीदिति त्र्यन्वयः ३ ॥ ॥

राम
१४०

पिंडारकादितीर्थक्षेत्रेभ्यो द्वारकोत्तमतीर्थमित्याह। पिंडारकादित्यादिना ४ कुमारनिलयात्कुमारपर्वतात् ५ ८ कृतिस्तोत्रपरायणाः कृति रूपवंधरूपा स्तोत्रं प्रबंधरूपं तदुपेक्षपरायणाः ९ ध्यानैकतानमनसः श्रीहरिगुणगणसंचिंतनायामेव विस्तृतमनसः समाधौ चित्तनिग्रहे कृतनि

पिंडारकात्कुरुक्षेत्रात्सालग्रामाच्च पुष्करात्। वाराणस्याः प्रयागाच्च वेंकटाच्छ्रीगिरेरपि ४ स्थानं दृष्ट्वा च गोकर्णाच्चंद्रतीर्थाच्च शोभनात्। सह्याद्रेश्च भृगुक्षेत्रात्कुमारनिलयादपि ५ गोदावरीतटाच्चैव पंपातीर्थान्निकटादपि। शूर्पाकाशात्सभासाच्च पुण्याद्बदरिकाश्रमात् ६ पावनान्नैमिषारण्यात्कृष्णदुर्गाच्च दुर्गमात्। आययुर्मुनयः शांता नित्यं व्रतपरायणाः ७ अजलाश्चाबुभक्षाश्च निराहारा दृढव्रताः। वल्कलाजिनसंवीता जटिनश्चापि मुंडिनः ८ त्रिकालस्नानपिनश्चैव मौनव्रतपरायणाः। वेदस्वाध्यायनिरताः कृतिस्तोत्रपरायणाः ९ ध्यानैकतानमनसः समाधौ कृतनिश्चयाः। त्वगस्थिमात्रावयवाः शिराधमनिसंतताः ॥१०॥ आगत्य मुनयो राजन्स्वर्चितः शांतचेतसः। उपसतम्महाराज नित्यं तत्वेकचिंतकाः ११ अग्निहोत्रमहावीर्यैर्ब्राह्मणैश्च तपोधनैः। स्तुतैश्च मागधैश्चैव श्लोककृतिपरायणैः १२ पूर्णमंगलघोषैश्च वादित्राणां च निःस्वनैः। निर्घुष्टा ब्रह्मघोषैश्च द्वारका कृष्णनंदन १३ ह्रेषाणामपि सर्वेषां तीर्थानां चाघहारिणां। देवदेवस्य सान्निध्याद्ग्रणपाच बभूव सा १४ ॥ ॥

श्चयाः। समीचीनाधिष्ठानलक्षणमुक्तौ वा। सिरा रेखाः १० सर्वतश्चागत्य ११ २ अग्रणपाग्रमणेपेतिश्छांदसः उत्तमोत्तमा या १४ ॥

१०.उ.

कृष्णस्य षोडशसहस्रमहिष्यः १५ तासां मध्ये पारुक्मिणीप्रमुखा अष्टौ महिष्यः आसु कृष्णः अनुपूर्वशः तत्पुत्राश्चोक्ताः १६ आत्मनो यावंत्यो भार्याः तासु एकस्यामेकस्यां भार्यायां दशदशात्मजानजीजनत १७ तेषां पुत्राणां मध्ये अष्टादश महारथा आसन् १८ २० त्रिविक्रापाः सैरंध्र्याः

१५१

आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनः। आसन्षोडशसाहस्रमहिष्यश्च शताधिकाः १५ तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः रुक्मिणीप्रमुखा राजंस्तत्पुत्राश्चानुपूर्वशः १६ एकैकस्यां दश दश कृष्णोऽजीजनदात्मजान्। यावत्य आत्मनो भार्या अमोघगतिरीश्वरः १७ तेषामुद्दामवीर्याणामष्टादश महारथाः। आसन्नुदारयशसस्तेषां नामानि मे शृणु १८ प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान्भानुरेव च। सांबो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः १९ पुष्करो वेदबाहुश्च श्रुतदेवः सुनंदनः। चित्रबाहुर्विरूथश्च कविर्न्यग्रोध एव च २० त्रिवक्रापा विशोका च सुतः कृष्णमनुव्रतः। आसीच्छिष्यो नारदस्य दृष्टो चित्रमखंडितं २१ येनोक्तं सात्वतं तंत्रं यज्ज्ञात्वा मुक्तिभाग्भवेत्। यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवः स्मृतः २२ एतेषामपि राजेंद्र तनुजानां मधुद्विषः। प्रद्युम्न आसीत्प्रथमः पितृवद्रुक्मिणीसुतः २३ स रुक्मिणो दुहितरमुपयेमे महारथः। तस्यां ततोऽनिरुद्धोऽभून्नागायुतबलान्वितः २४ ॥ ॥

स नारदस्य शिष्यः शिष्याय अखंडितं चित्रं पूर्णं परान्भवस्मारणसमर्थं ज्ञानं ददौ २१ येन नारदेन सात्वतं तंत्रं पंचरात्रसंहिता यत् यं ज्ञात्वा पुमान्मुक्तिनिःश्रेयसरूपामभिव्यक्तिमान्भवेत्। यत्र यस्मिंस्तंत्रे स्त्रीशूद्रादीनां वैष्णवः संस्कारः स्मृतः विष्णुविषयानुष्ठानेन शरीरशुद्धिः कथिता २२ तनुजानां पुत्राणां २३ ॥

राम

१५१

पौत्री पुत्रपुत्री। दौहित्रः दुहितुः पुत्रः अनिरुद्धः। निहते रुक्मिणि शिशुपालेनाब्रवीत्साधु साधु वा रुक्मिणी बलयो राज दृष्ट्वे हंसं गतभयाद्धरिरित्यनेन सर्वं समस्यहरो हंसं गतभयमुच्यते तत्कथं घटत इतीयमाशंका। न हंसं गोदेव्या कृतभयं केशवस्य स हंसमीतइवाथापि नो वेदुक्तिर्वधे हरिरित्यादिना परिहर्तव्या। अत्र ... सिंहावलोकनन्यायेनाध्याहेयं ... प्रमाणमुक्तं। मौसलात् मुसलयुद्धात् २५ ६ एतस्मिन्कुले अवनादि

स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः। वज्रस्तस्याभवद्यस्तु मौसलादवशेषितः २५ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः। सुबाहोरुग्रसेनोऽभूद्भद्रसेनस्तु तत्सुतः २६ न ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः। अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे २७ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणां। संख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप २८ तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च। आसन्यदुकुमाराणामाचार्या इति नः श्रुतं २९ संख्यानं यादवानां कः करिष्यति महात्मनां। यत्रायुतानामयुतलक्षेणास्ते स आहुकः ३० देवासुराहवहता दैतेया ये सुदारुणाः। ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ३१ तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले। अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ३२ तेषां प्रमाणं भगवान्प्रभुत्वेनाभवद्धरिः॥ ॥

दोषयुक्ता न जज्ञिरे इत्यन्वयः २७ तेषां यदुवंशप्रसूतानां संख्याज्ञानाभावे ... आचार्याणां संख्यां कामयित्वा वदामीत्याह तिस्र इति २९ यत्र येषां ३० देवांशानां यादवानां अवन्यामुत्पत्तुं निमित्तमाह देवेति ३१ यादवा देवा इत्यत्र किं प्रमाणमत आह कुलयानमिति ३२ श्रीकृष्णो भगवान्तेषां प्रभुत्वे सामर्थ्ये हि वै प्रमाणं यतः श्रीकृष्णो नारायणावतारः प्रसिद्धः तेषाममानुषसामर्थ्ये हि न अतस्तो यादवा देवा इति सिद्धं॥ ॥

एतदेवदृढीकरणायपुनर्वर्णयति येचेति ३३ स्वामिनंनविदुः शय्यादिषु संतं सहवर्तमानं आत्मानं स्वरूपभूतं श्रीनारायणं ३४ सर्ववेदा
र्थत्वेन सर्ववेदविषयत्वेन सम्यक्गृह्यते ग्रहणं यस्य सतथातं स्वयोगमायया स्वरूपसामर्थ्येन रचितैः क्रत्वादिभिः ३५ आचंतिः सांदीपनिः

येचानुवर्तिनस्तस्य ववृधुः सर्वयादवाः ३३ शय्यासनाटनालापक्रीडास्नानादिषु। नविदुः संतमात्मानं वृष्णयः कृष्ण
चेतसः ३४ ईजेक्रतुभिरात्मानं सर्ववेदार्थसंग्रहं। स्वयोगमायारचितैः क्रतुभिश्चेद्विषट्शमाः ३५ कृष्णमाध्यसितावंतिरा
माद्यायोद्भवेश्वराः। रक्षितोग्रण्यपत्नीभिः पुण्यश्लोकः सहाग्रणीः ३६ ॥ ॥

अग्रण्यपत्नीभिः रुक्मिण्यादिश्रेष्ठपत्नीभिः सह संदीक्षितः अग्रणीः सर्वोत्तमः ३६ ॥ ॥श्रीराम॥ ॥ ॥

श्रीकृष्णस्मरणार्थं संक्षिप्य तद्गुणान् कथयति तीर्थमिति। तीर्थं कीर्तिलक्षणं नृणां चक्रे यत यः यदुषु जनि प्रादुर्भूतः यस्य पादशौचं पादप्रक्षालनज
लं स्वः सरित् स्वर्गनदी गंगा भूतत्यस्य स्वरूपं ऐश्वर्यादि षड्विधो रागद्वेषं प्रार्गा यस्य उरसि वक्षसो परि रमा सर्वदा श्रेयस्य शास्त्रं शासकं वचनं तत्प्रमाणं लो
कस्येति शेषः। यस्य छायां वेदादि शास्त्रं तत्प्रमाणमिति वा सदसद्भ्यां कर्मभ्यः कार्यकारणव्यक्तपाय यदुषु यस्यानंतरं विद्यमानाः यदवस्तेषु लक्ष्वेन सत्तां संबं
धिन्यः धर्मा यत्र यद्विषयत्वे नवर्तिनितस्य कृष्णस्य एतत् क्षितिभारहरणं न चित्रं किं तु स्माकमेव। इत्यंतरमाह कालेति ३७ देवकीजन्मवादः देवकी।

तीर्थं चक्रे नृपोनं यदजनियदुषुस्वः सरित्पादशौचं षड्विश्वासंस्वरूपंपरउरसि रमा सर्वदा यस्य यास्ते। यच्छास्त्रं चप्रमाणं यदनुसद
सद्भ्यः कृपोपन्नधर्माः कृष्णस्यैतन्नचित्रंक्षितिभरहरणं कालचक्रायुधस्य ३७ जयति जननिवासो देवकीजन्मवादो नियमकृतपदाजे
ईर्ष्युपीडांश्चदोर्भिः। सुदस्मुभयदृशी नो श्रीनिकेता मश्शर्म्या स्मरवपुरवलानां स्निग्धहासेक्षयाच ३८ ॥ ॥

पुत्रत्वेनवादः कीर्तिर्यस्य सतथा सः जननिवासः जगन्निवासो जयति। कथमत्राह। नियमेति। धर्मार्थप्रणयार्थं नियमेन भूमो कृता निपादाज्ञा
निपादस्या सपद्मानियानितैः स्वदोर्भिः ईर्ष्यपीडांकुर्वन्निति शेषः। उभयदृशी नांअंतर्बहिःस्थित रूपस्य दृशिर्दर्शनं येषां ते षांसुदं कुर्वन् अव
लानां श्रीणां श्रीनिकेता तमः स्मरमंलक्ष्मीमंदिरात्म स्वरूपेण स्निग्धहासेक्षया स्निग्धमंदस्मितशोभित रूपकटाक्षनिरीक्षणेन स्मरवपुः कामभूर्ति
स्विच्छितः ३८

जगतश्चादौ मध्ये निधने च वर्त्तत इति जगतः आदिमध्यनिधनः जगदुत्पत्तिस्थितिसंहारकर्त्ता अव्यक्तजीवयोरीश्वरः ऋषिणा व्यासात्मना भागवतीसंहितां च कृतवान् अशयानां जीवानां यं संपद्य प्राप्य शक्तिं च वेधकशक्तिं जहाति सता सोम्य तदा संपन्नो भवतीति श्रुतेः स्वस्थः परमानंदं प्राप्नुवन् यथा कुलायं शरीराभिमानं त्यक्त्वा स्वेनत्या केवल्येन स्वच्छिदानंदस्वरूपस्थित्याभिरक्षयोर्नित्यनिरस्तप्रकृतिं ३९ इत्थं एवं विधस्य यदूत्तमस्य कर्माणि विक्रमलक्षणानि गायेदित्यन्वयः निजधर्मरिरक्षया चकल्पितधर्मरक्षणेच्छया तस्यानुकूलविडंबनानि कर्मकषणानि दुष्कर्मनिराकरणसमर्थानि

योऽध्यात्मजगदादिमध्यनिधनो यो व्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुनः संहितां। यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं ३९ इत्थं परस्य निजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंबनानि कर्माणि कर्मकषणानि यदूत्तमस्य श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ४० मर्त्यस्तयानुसवमेधितया मुकुंद श्रीमत्कथाश्रवणकीर्तनचिंतयैति तद्धाम दुःकरकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थे ४१ ॥ ॥

निश्चानुवृत्तिं चानुगमनमिच्छन् ४० मर्त्यस्तया नु तत्स्मात तस्य हरेर्धामलोकमेति कीदृश्या श्रीमत्याः कथायाः श्रवणकीर्तनचिंतनलक्षणया दुष्करेणानपसाक्षतं साधितं जनतापाः क्रियासाध्यफलरूपं जनतापवर्गं यस्य हरेर्धामार्थे क्षितिभुजोपि ग्रामाद्वनं यामं विहाय वनं ययुः यांति किं पुनरन्य इति ४१ ॥ ॥

कथार्थमुपसंहरति य इदमिति व्यासपुत्रैः शुकादिभिः जगतो यं पापं भिनत्तीति जगद्घ्नमित् तद्भक्तानां कर्णावतंसं कर्णालंकाररूपमानां श्रवणादिकस्य धाङ्मभागवद्वीति त्वे मधामनो ज्ज्वलत्वाणं स्यात् श्रवणादिकुर्वतां इत्थं भाव्यमित्यत उक्तं भागवतीति सर्वेत्रिमोपि भगवान् गुणभवं जनार्दनः दर्शपिहासुदेवोपि स्यात्मजो जीवतामपि अज्ञाशक्तादिभावकृतकृत तस्य सस्याखिलेशितुः कृतश्च जीवतत तस्य प्रधानपुत्रुषेशितुः कुतो दोषाः सर्वगुणपूर्णस्यानंदवारिधेरित्येतत्प्रमाणं अज्ञजनेन कृष्णेक्ष्यमाणं सर्वशंकानिराकारणार्थं भगवत्पादैः स्कंधांते दर्शितमिति ज्ञातव्यमिति

सूत उवाच यइदमनुशृणोति श्रावयेद्धा मुरारेश्चरितमभृतकीर्तेर्वर्णितं व्यासपुत्रैः जगदघ्नमिदलं तद्भक्तकर्णावतंसं भगवति कृतचित्तो याति तत्क्षेमधाम ४२ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां दशमस्कंधे श्रीकृष्णावतारचरिते निशततमोध्यायः ५५ ॥ ॥ श्रीराम ॥ ॥ ॥

४२ योया विनिद्रशेः कृष्णारत्नतयेवातारियेन क्षितेोज धेयेन सुरासुहृत्सपुदयो येन त्रिलोक्यापिसा येनाधायि सुधाब्धिरो निजपदे धर्मोपि येनांजुनि श्रीकृष्णं तमकृष्णकृष्णलदयितं वंदामहे संततं पदरत्नावलिर्नामदशमस्कंधसंगता कृष्णप्रीत्या समाप्तेयं विद्वन्मानसहारिणी १ इति श्रीमन्महेंद्रतीर्थश्रीपादशिष्यस्य विजयध्वजतीर्थभट्टारकस्य कृतौ श्रीभागवतटीकायां दशमस्कंधे अधिकशततमोध्यायः ॥ ॥

॥श्रीवेंकटेशनारसिंहाभ्यांन

॥नरहरेरिदं॥

॥श्री॥

॥श्रीवेंकटेशनारसिंहाभ्यांनमः॥

॥नरहरेरिदं॥

॥श्री॥

भा० ए०

श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय जयतिजयतिजन्माद्यस्यविश्वस्ययस्मादमलनिगममुख्याविद्यमाहात्म्यधामा। दृ
ष्टिगतनयभजे शेशोयेयन्मुक्तरूपंयदुपतिरपियास्यमुद्धवायक्षधाम १ वेदव्यासमहंवंदे वेदव्यासैकवेदितं। वेदव्यासजनाराति वेदव्यासमुनीनपि
२ रत्नानामंबुद्धिः। पात्रंतेजसामुल्लदीधितिः। एवमेकादशस्कंधोवेदांतैकार्थसंनिधिः ३ दशमस्कंधरथ्यायांगत्वांतं सार्थविस्तुनः। आदृएका
दशस्कंधतीर्थविसंपदीमिव ४ दृहनानाव्यसनराशिभाराव्युग्रमिरसोकलिमलाघ कुंठितमनसोदुःखपरिहारसुखावाप्रीचाकांक्षमाणाना

१

श्रीशुकउवाच कृत्वादैत्यवधंकृष्णःसरामोयदुभिर्वृतः। भुवोवतारयद्भारंजविष्ठंजनयन्कलिं १ ॥

न्दुसुपायमजानतांपुंसामुपकारायकरुणाकरेणवादरायणेनकृतभागवतपुराणकल्पः तरोरनेकस्कंधप्रपराशेर्म्मकरंदइतएकादशस्कं
धआरभ्यते। तत्रशुकएकादशस्कंधमुत्थायपित्रोंक्तंमनुवदति। कृत्वेति। जविष्ठमितिपाठेत्वकृष्णमित्यर्थः। भारविशेषणंयविष्ठमितितिलीचमि
त्यर्थः। कलिविशेषणं। सुगोत्रकलस्यदृनिंदितत्वात्। अवतारयत्अवतारयितुकामः। ताछीलिकार्थेशतृप्रत्ययः। भुवोभारंनिरहरदितिशेषेणा
न्वयः। कथमित्यतउक्तं। दैत्यवधंकृत्वेति। अनेनन स्वप्रयोजनार्थः किंतुपरार्थइतिज्ञातव्यं १ ॥ ॥

राम

१

एतदेवविवृणोति। येकोपिताइति। ईशःक्षितिभारंनिर्हृतवानित्यन्वयः। इदंनिर्हरणमपिस्वैश्वर्यद्योतकमितिज्ञापनायेशइतिपदं। सपत्नैःकौरवैर्दुर्द्यूतादिभिः
सुबहुकोपिताः पांडुसुतास्तान्निमित्तंकृत्वाइतरेतरतःसमेतान्परस्परशत्रून्हत्वाभूभारंनिर्हरणप्रकारंवक्ति। भूभारेति। किमचिंतयदत्राह। मन्यइति। अवने
भारगतोपिअगतोननुइतिमन्ये। तत्रहेतुः। यदिति। नचिदमप्यन्यतःप्राप्तपरिभवंकिंनस्यादत्राह। नैवेति। विभवेनोन्नहनस्यदुर्द्धर्षस्यतत्रत्या। तस्यतस्मा
दयमुपायइत्याह। अंतःकलिमिति। वेणुसंघस्यांतःकलिर्मिथःसंघर्षणलक्षणतस्माज्जातंवह्निंशांतिमंगलंधामशांतौप्रशममंगलेइतियादवः। यद्वा

येकोपिताःसुबहुपांडुसुताःसपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान्। कृत्वानिमित्तमितरेतरतःसमेतान्हत्वानृपान्निरहरत्क्षितिभारमीशः २
भूभारराजपृतनायदुभिर्निरस्यगुप्तैःस्वबाहुभिरचिंतयदप्रमेयः। मन्येवनेर्ननुगतोप्यगतोपिभारोयद्यादवंकुलमहोअविषह्यमास्ते ३
नैवान्यतःपरिभवोस्यभवेत्कथंचिन्मत्संश्रयस्यविभवोन्नहनस्यनित्यं। अंतःकलिंयदुकुलस्यविधायवेणुसंघस्यवह्निमिवशांतिमुपैमिधाम ४
एवंव्यवसितोराजन्सत्यसंकल्पईश्वरः। शापव्याजेनविप्राणांसंजह्रेस्वकुलंविभुः ५ स्वमूर्त्यालोकलावण्यनिर्मुक्त्यालोचनंनृणां। गीर्भिस्ताःस्मरतां
चित्तंपदैस्तानीक्षतांक्रियाः ६ ॥ ॥

अंतःकलिंशांतिंयदुकुलस्यनाशइत्यर्थः ४ चिंताफलमाह। एवमिति ५ पुनर्हरिणाकिमकारीत्यत्राह। स्वमूर्त्येति। ईश्वरःस्वपदमगादित्यन्वयः। किं
कृत्वेति। लोकलावण्येषुसमुदितेषुसमुदितेषुयावदुमानबुद्धिःतस्यानिर्मुक्तिर्ययासातथा। तयास्वमूर्त्या। नृणांलोचनमाछिद्य। आकृष्य। गीर्भिःस्मरतां
मर्त्यस्मरतांनृणांचित्तमाछिद्य। पदैःपादन्यासैःतांपश्यतांजनानांक्रियाःकर्म्माण्याछिद्ययद्वापादसौंदर्यादिगुणनिमग्नानांअन्यक्रियासुमनोनचल
तीतितानीक्षतांपदैराछिद्य॥ ॥

कौ भूमौ । सुष्ठु श्लोका ख्यातिर्यस्याः सा सुश्लोका तां कीर्तिं निजस्यात्मत्वेन वितत्य विस्तार्य । ननु किं प्रयोजनं अत आह । तम इति । अनया कीर्त्या तमस्तरिष्यंतीति कृत्वा । कृतविप्रशापो राजायइत्याशंक्य संभावितो यस्मिति भावेन पृच्छति । ब्रह्मण्यानामित्यादिना । शापासंभवे ब्रह्मण्यादित्रयो हेतवः । यदोः कुलस्य निमित्तः किं निमित्तः यादृशः कीदृशः एकात्मनां एकमनस्कानां भेदो मिथो वैरलक्षणः । शुकः प्रश्नं प्रवदन्नुपरुक्तं करोति । बिभ्रदित्यादिना । सकलसुंदरगुणानां संनि

आछिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ । तमोनया तरिष्यंतीत्यगात्स्वं पदमीश्वरः ७ राजोवाच ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां । विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां ८ यन्निमित्तोपदो शापो यादृशो द्विजसत्तम । कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ९ बादरायणिरुवाच बिभ्रद्वपुः सकलसुंदरसन्निवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः । आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः १० कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा । कालात्मना निवसता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ११ विश्वामित्रोसितः कण्वो दुर्वासा भृगुरंगिराः । कश्यपो वामदेवोत्रिर्वसिष्ठो नारदादयः १२ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः । उपसंगृह्य पप्रच्छुरविनीता विनीतवत् १३ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं । एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा १४

वेशं निधानस्थानं धाम गृहं आस्थाय गृहे स्थित्वेत्यर्थः । प्रश्नं परिहरति । कर्माणीति । पुण्यनिवहानि पुण्यकारणानि । यदुदेव उग्रसेनस्तस्य गेहे उग्रसेनाधिकृतद्वारकायां निवसता कालात्मना कृष्णेन निसृष्टाः प्रेरिताः पिंडारकं क्षेत्रं प्राप्ता इत्यन्वयः । उपसंगृह्य सांबमिति शेषः १३ अंतर्वत्नी गर्भिणी । असितेक्षणा नीलनेत्रा १४ ॥ ॥

प्रलब्धा वंचिताः सद्योर्थे सहसा हेतुः मूल्ये पुत्रोपि सांप्रतमिति यादवः हे मंदा निर्भाग्याः तस्मिन् उदरे किं दुष्कृतं तां तरलैस्तरंगैः वेलायां तीरे लग्नानि संलग्नानि एरका

प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः । प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति १५ एवं प्रलब्धा मुनयस्तानूचुः सहसा नृप । जनयिष्यति वो मंदाः मुशलं कुलनाशनं १६ तच्छ्रुत्वा तेतिसंत्रस्ता विमुच्य सहसोदरं । सांबस्य ददृशुस्तस्मिन्मुशलं खल्वयस्मयं १७ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः । इति विह्वलिता गेहानादाय मुशलं ययुः १८ तच्चोपनीय सदसि परिम्लानमुखश्रियः । राज्ञ आवेदयांचक्रुः सर्वयादवसन्निधौ १९ श्रुत्वामोघं विप्रशापं दृष्ट्वा च मुशलं नृप । विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः ॥२०॥ तच्चूर्णयित्वा मुशलं यदुराजः स आहुकः । समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं २१ कश्चिन्मत्स्योग्रसील्लोहं चूर्णानि तरलैस्ततः । उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः २२ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे । तस्योदरगतं लोहं स शल्येषु लुब्धकोकरोत् २३ भगवान्ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा । कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत २४ इति श्रीभागवते महापुराणे एकादशस्कंधे प्रथमोध्यायः ॥ ॥

दीर्घसूचीमुखचरणा विशेषाः । शल्येषु शल्याग्रशरेषु लुब्धको व्याधः । स वै विप्रामर्षः पुत्रुषार्थेयिष्यात्स तथा । स वैरं प्यतइति वा इति श्रीमन्महेंद्रतीर्थस्वपादशिष्यस्य विजयध्वजतीर्थभट्टारककृतौ एकादशस्कंधे प्रथमोध्यायः ॥ ॥

भा॰ए॰ कतिपयैरध्यायैर्वसुदेवनारदसंवादछलेन हरेस्तत्त्वं तद्वासिनामपि तदधिकारिलक्षणं चेत्यादि निरूपयति। तत्र याद्वच्छिकस्य नारदस्यांतःपुरवासिना वसुदेवेन सह संगमः कथं संजात इतीत्याशंकां परिहर्तुमाह। गोविंदेति। वनवासिनो नारदस्य जनसंकुले पुरनिवासे हेतुः। कृष्णेति। श्रोत्रादीन्द्रियशक्तिमतः पुंसो पि श्रीहरिकथाश्रवणादिषु ह्यातिशयो जायते। किं पुनः सम्यक् विज्ञानतत्त्वस्य नारदस्येति भावेनाह। को न्विति। सर्वतो मृत्युः मरणं यस्य स

३

श्रीशुक उवाच गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह। अवात्सीन्नारदोभीक्ष्णं कृष्णोपासनलालसः १ को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं। न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २ तमेकदा तु देवर्षिं वसुदेवो गृहागतं। अर्चितं सुखमासीनमभिवंद्येदमब्रवीत् ३ वसुदेव उवाच भगवन्भवतो यात्रा स्वस्तये सर्वदेहिनां। कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनः ४ ॥ ॥

तथा। अस्मत्कं पृच्छते किमत्राह। तमेकदेति। कृत्वा भगवत्पादरिकान्यमातत्स्यार्थकथने बुद्ध्या भगवतीत्याशयेन नारदं स्तौति। भगवन्नित्यादिना। स्वस्त्ययनं शिवायेत्यादि ... यथा पित्रोरुत्तमश्लोकः इति उत्तमश्लोकवर्त्मनः इति उत्तमो हरिस्तस्य श्लोक इव श्लोको येषां तेषां तथा। महानुभावानां वर्त्मयस्य स तथा महत्मार्गानुवर्ती त्वमर्थः तस्मात् ४ ॥ ॥

राम

३

ननु सर्वभूतसुहृत्त्वे सात्विकत्वं प्रयोजकं तद्देवानामप्यस्ति तः किं विशेष उच्यत इति तत्राह भूतानीति। भूतानि त्रिविधानि सात्विकतामसमिश्रणीति तान्तत्र देवानां चरितं सात्विकभूतानां सुखायैव आत्मभजनबुद्धिमुत्पाद्य सुखलक्षणफलदानं। तामसानां दुःखाय तद्विपर्ययमुत्पाद्य दुःखलक्षणफलदानं। राजसानां सुखदुःखलक्षणमिश्रफलाय मिश्रकर्मबुद्धिमुत्पाद्य मिश्रफलदानं। इदं च शब्दद्वयगृहीतं द्वितीयचशब्दः समुच्चयार्थः भवादृशानां चरितं न तथेत्याह। सुखायैवेति। एवशब्देन दुःखव्यावर्तयति। अभूतात्मनामित्यनेन व्यापारान्तरं निवारयति। हि शब्देन तत्पंतरं अस्तीति सूचयति। देवानामात्मभजने बुद्धिमुत्पाद्यानुत्पाद्य च सुखादिफलदातृत्वमस्तीत्युक्तं। तत्स्पष्टयति। भजंतीति। ये पुरुषाः यथा येन प्रकारेण देवान् भजंति ते देवा अपि तथा कृतकर्मानुसारेण तान्पुरुषान् भजंति फलदानेन स नद्धा भवंति। न च देवेषु वैषम्यादिकमाशं

भूतानां देवचरितं दुःखाय च सुखाय च। सुखायैव हि साधूनां त्वादृशामच्युतात्मनां ५ भजंति ये यथा देवान्देवा अपि तथैव तान्। छायेव कर्मसचिवाः साधवो दीनवत्सलाः ६ ब्रह्मंस्तथापि पृच्छामो धर्मान्भागवतांस्तव। यान्श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ७ ॥ ॥

कनीयमित्येतद्विदर्शनेन दर्शयति। छायेति। कर्मसचिवाः छायावत् उत्पन्नकर्माधीनछाया यथा पुरुषानुकूला तथेत्यर्थः। भवादृशानां तथेत्याह। साधव इति। आत्मनो भजने बुद्धिमुत्पाद्य फलदा इत्येतद्विलक्षणमाणं। ननु साधुस्पा देवानामुत्तमत्वे भीष्टार्थप्रश्नस्तामतिस्याद्यथावत्प्रश्नपरिहारबहुत्वसामर्थ्यादिति। तत्राह। ब्रह्मन्निति। यद्यपि देवाः प्रशस्ता निश्चितार्थास्तथापि मानुषत्वेनास्मद्दृष्टिगोचरत्वात् अस्माकं तन्निश्चितार्थज्ञानसामर्थ्यात्तत्त्वे निश्चानपात्रत्वाच्च वयं तु तव त्वां धर्मान्पृच्छामः इत्यन्वयः। ननु किमत्राहिंसालक्षणो धर्मस्तत्राचाराद्यन्यतमः इत्यत्राह। भागवतानिति। अवशपवशव्यत्वेत हृणमाह। यानिति। अनेन यदुमर्त्यश्रवणमपि सर्वभयमोचकं किमुत तदनुष्ठानमिति दर्शितं। ॥

भवता भागवद्धिषयधर्म्माचरणं कृतं किमधुना तद्विषयप्रश्न इति तत्राह । अहमिति । तत्र पुत्रस्य जीवस्य त्वमुखदर्शनाज्ञ्यो का यानिः श्रूयते अतः कथं प्रजार्थं इति निर्द्दाक्षि-
मिरिति तत्राह । यथेति अस्मिन्न वै जन्मनि विचित्रव्यसनात् नानाक्लेशाद्धिश्वतोभयाच्च यथांजसा क्षिप्रं मुच्येमहि तथा पुनरद्धा साक्षात् शाधीत्यन्वयः अद्धा प्रत्यक्षं सत्यमेवेति
तिवा रद्वः । अनेन वसुदेवस्य पुत्रीभूतश्रीकृष्णमुखेन्दुदर्शनात् शेषव्यसनाकुलसंसारान्मुक्ते निश्चितत्वेपि विशेषप्रश्नो लोकहितायेति ज्ञातव्यं वसुदेवेन पृष्टेन नारदः किंचि-
न्न गुणोऽभूदिति राजेन्द्रो हार्द्दं चोद्यं परिहरति । राजन्निति । हरेर्गुणैः संस्मारितो हरिरितिशेषः । बुद्धेर्विकासाय प्रशंसन्नाह । सम्यगिति । विश्वस्य भाविष्टस्य भावनमुत्पादनं येभ्यस्तेन

अहं किल पुरानंतं प्रजार्थो भुवि मुक्तिदं । अपूजयं न मोक्षाय मोहितो देवमायया ८ यथा विचित्रव्यसनाद्भवद्भिर्विश्वतो भयात् मुच्येमह्यंजसैवाद्धा तथा नः
शाधि सुव्रत ९ शुक उवाच राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता । प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः १० नारद उवाच सम्यगेतद्व्यवसितं
भवता सात्वतर्षभ । यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान् ११ श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोपि हि १२
त्वया परमकल्याणः पुण्यश्रवणकीर्त्तनः । स्मारितो भगवानद्य देवो नारायणो मम १३ ॥ ॥

था तान् । एतदेव विवृणोति । श्रुत इति । देवशब्दस्य विश्वांतर्भावेपि पृथक् ग्रहणमतिवर्द्धदोषपरिहारसामर्थ्यसूचनार्थं कृतं एतदेवापि शब्देनाह यथा ब्रह्महत्यां सु-
हृद्ब्रह्मस्य पापं शाम्येत्कथंचन । न पुनस्त्वदवज्ञाने कलुष्यको हि यातेरपीदममर्थं दृष्टांतेन सूचयति । ममाप्यनेन पुण्यं बुद्धिरभूदित्याशयेनाह त्वयेति । नित्यं स्मृतोपीदानीं
विशेषतः स्मारितो गुणकथनप्रश्नेन १३ ॥ ॥

धीमत्त्वेन वसुदेवस्य नारदो न्यौविर्थंभे पि सु कपोलकल्पितत्वेन अश्रद्धेयमिति मंदाशंकापनोदाय तत्त्व अपरिहार्यत्वेन जनकार्षभसंवादमितिहासं वक्ष्यन्नेवेति ति-
श्च यजननायां च पप्रच्छ किं कथं पति प्रियव्रत इत्यादिना । अवतारप्रयोजनमाह । मोक्षेति । यन्नाम्ना भरतेतिय यस्य नाम्ना एतद्वर्षं भारतमिति विख्यातं । अद्भुतं पुण्यसाधनमि-
ति त्वेन तत्पदवीं तस्य हरेः पदवीं अपुनर्लोकमित्यर्थः । तेषां मध्ये नवास्य भूमंडलस्य नवद्वीपपतयो भवन् इति तेषां मध्ये एकाशीतिर्ब्राह्मणा द्विजातयोऽभूवन् । किं

अत्राप्युदाहरंतीममितिहासं पुरातनं । आर्षभाणां च संवादं विदेहस्य महात्मनः १४ प्रियव्रतो नाम सुतो मनोः स्वायंभुवस्य यः तस्याग्नीध्रस्ततो नाभिरृ-
षभस्तत्सुतः स्मृतः १५ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया । अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं १६ तेषां वै भरतो ज्येष्ठो नारायणपरायणः विख्या-
तं वर्षमेतद्यन्नाम्ना भारतमुच्यते ऽद्भुतं १७ स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिं । उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः १८ तेषां नव नवद्वीपपतयो
ऽस्य समंततः । कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः १९ नवाभवन्महाभागा मुनयो ह्यूर्द्ध्वमंथिनः । श्रमणा वातरशना आत्मविद्याविशारदाः २०

कर्म्मणा इत्यत्राह । कर्मेति । कर्मतंत्रप्रणेतारः कर्म्मकांडप्रणेतारः । तेषां मध्ये नवसंख्याता मुनयोऽभवन् । तत्रापि विशेषमाह । ऊर्द्ध्वमंथिन इति । ऊर्द्ध्वं मंथा रेतः एषा-
मस्तीति ऊर्द्ध्वरेतसः सन्यासं जन्तधारिण इत्यर्थः । श्रमप्रमाह । श्रमणा इति । श्रमणाभिन्नवः तत्रापि विशेषमाह । वातरशना इति । वात एव रशना कटिसूत्रं येषां तेन तथा ।
दिगंबराः परमहंसा इत्यर्थः । आत्मविद्यायां वेदांतशास्त्रे विशारदाः पटवः ॥ ॥

एतन्नामनिरुक्तिज्ञानादयमर्थः सिद्ध इति तन्नामान्याह कविरित्यादिना । द्रुमिलमिति थो मेलनं वेदार्थानामेकीकरणं येन स तथा । चाम्यंति वेदतीर्थमिति चमा वेदतीर्थपा
पिनः तेषु मारश्रमसः । स्रवन्तो द्रुतिधातोः द्रुमत्यमः । करे भातं जनयति प्रकाशयतीति करभाजनः हस्तामलकवत्प्रतिभातवेदार्थ इत्यर्थः । आत्मविद्यावैशारद्यं चात्मभे
दज्ञानेनेति भावेनाह । त एत इति । ते मुनिश्रेष्ठाः सप्त एते महीं व्यचरन्नित्यन्वयः । किं विशिष्टं विश्वं पूर्णं सदसदात्मकं कार्यकारणव्यापि भगवद्रूपं आत्मनो जीवाद्व्यति
रेकेणाविलक्षणेन पश्यंत इति यद्वा सदसदात्मकं कार्यकारणात्मकं भगवद्रूपं भगवतो मूर्तिं प्रतिमास्थानीयं विश्वं प्रपंचमात्मनो हरेर्व्यतिरेकेण पश्यंत इति । यद्वा

कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः । आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः २१ त एते भगवद्रूपं विश्वं सदसदात्मकं । आत्मनोव्यतिरेकेण पश्यंतो व्यचरन्महीं २२ अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिंनरनागलोकान् । मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामं २३

विश्वमंतः प्रविश्य वर्तमानं सदसदात्मकं बहिश्च जगद्व्याप्य वर्तमानं भगवद्रूपं ब्रह्मसंज्ञमात्मनोन्तर्यामिणो हरेरव्यतिरेकेणाभेदेन पश्यंतः । अंतर्बहिश्च तत्स
र्वं व्याप्य नारायणः स्थित इति श्रुत्यर्थं स्मरंतो भवंत इत्यर्थः । विश्वस्य परमात्मनो भेददर्शने सदसदात्मकमिति विशेषणेन विरुद्धमनंगीकारश्च इदंहस्त
णाव्यवसामाणिकीत्युपेक्षणीयं तन्मतमिति । महीसंचरणां चरकाणामप्यस्ति किं विशेषमाह । तन्मयमेवामत्राह । अव्याहतेति । मुक्ता जीवन्मुक्ताः मुनिचारणादीनां भु
वनानि लोकांश्च सुरसिद्धादीनां लोकांश्चरंतीति किं कर्मवशान्नेत्याह । काममिति । बलवत्प्रतिषेधे कामतोपि संचरणं दुःशंकं स्यादित्यत उक्तं । अव्याहतेति ॥ ॥

किमनेन प्रकृतमित्यतस्त्राह । त एकदेति । अजनाभस्य हरेः पुत्रा अजनाभाः । इदमुपगमनं न द्वेषजनकं निमित्ताभावात्किं तु संप्रीतिजनकं तल्लक्षणदर्शनादित्याह । ता
न्दृष्ट्वेत्यां जलिपुटाद्युत्था यास्सेवंत । तत्र विदेहेन इतरेभ्यः किं विशेषितमत्राह । विदेह इति । अभिप्रेत्य सम्यक् ज्ञात्वा ब्रह्मपुत्रोपमान् सनकादितुल्यान् तान् ज्ञाव नव पृ
ष्टा । अभीष्टमिति शेषः । ऋतिप्रकारः कथ्यते । मन्ये इत्यादिना । किमभिष्टमप्राक्षीदत्राह । अत इति । यतो वैकुंठप्रियदर्शनं दुर्लभमतः करतलप्राप्तरत्नत्वात् । भव

त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया । वितायमानमृषिभिरजनाभे महात्मनः २४ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृपः । यजमानोग्नयो विप्राः सर्व एवोपतस्थिरे २५ विदेहस्तानभिप्रेत्य नारायणपरायणान् । प्रीतः संपूजयांचक्रे आसनस्थान्यथार्हतः २६ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव । पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः २७ विदेह उवाच मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः । विष्णोर्भूतानि लोकानां पावनाय चरंति हि २८ दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः । तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं २९ अत आत्यंतिकं क्षेमं पृच्छामो भवतोनघाः । संसारेस्मिन्क्षणार्धोपि सत्संगः शेवधिर्नृणां ३० ॥ ॥

तो येन विनाति श्रेयो न स्यात्तदात्यंतिकं क्षेमं मंगलं पृच्छन मिति शेषः । मोक्षमाक्षेण पृच्छामहइत्यर्थः । कार्येण कारणमुपलक्ष्यत इति न्यायोपपत्तेः । न केवलं प्रप्रति
वचनाभ्यां तत्परिहारलक्षणं प्रयोजनं लभ्यते । अपि तु न योश्चिरकालापेक्षितत्वेन प्रष्टुप्रवक्तृपुरुषयोश्च तावत्कालं स्थित्यपेक्षितत्वेन लब्धेन तत्संगेन सुखनिधि
लक्षणं प्रयोजनं चेत्यभिप्रेत्य तत्संगं स्तौति । संसारइति । शेवधिः सुखनिधिः ३० ॥ ॥

भा॰ए॰ प्रधानसाधनेसाध्यनात्यपि वक्तव्या नीत्याह। धर्मानिति। श्रुतये श्रवणाय क्षमं योग्यं। कल्याणी श्रद्धा संज्ञा योग्यं पृष्ठस्त्वाहितात्मा इति यादवः। अब्रुवन्निति वदुंव च नाम यदुक्तं यमुत्पन्नं तदल्पबुद्धेरेकस्य वकुं भिर्विघ्नायोः मुगपदुच्यमान वचनार्थविधारणांदुःशक मिति तन्निवारयति। कविरिति। अत्र संसारे असत्यमंगलेदेह्यादा वहमित्यात्माभावादुद्विग्नबुद्धेः पुरुषस्य नित्यमच्युतस्य हेयोपादेयांशरहितस्य हरेः श्रीपादपद्मोपासनमकुतश्चिद्भयं नकुतश्चिद्भयं यस्मात्तत्तथा तदहं मन्य इति मन्ये इत्यर्थः। विश्वात्मना। यत्र यस्मिंश्च उपासने कृते सर्वात्मना संसारभीतिर्निवर्त्तते तदेवानुष्ठेयं पुरुषेणेति। हरेरंघ्रिनिषेवणमेव मुख्यो भागव

६

धर्मान्भागवतान्ब्रूत यदि नः श्रुतये क्षमं। यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ३१ नारद उवाच एवं ते निमिना पृष्टा वसुदेव महत्तमाः। प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपं ३२ कविरुवाच मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं। उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्त्तते भीः ३३ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये। अंजः पुंसामविदुषां विद्धि भागवतान्हि तान् ३४ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्। धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ३५ ॥ ॥

तो धर्म इति मनसि निधाय तदंगत्वेनोच्यमानानुपायानपि भागवतान्धर्मानित्याह। ये वा इति। आत्मलब्धये परमात्मज्ञानाय। भागवतान्धर्मानिति शेषः। नप्रमाद्येत न विघ्नवान्भवति। प्रमादो नवधानतेत्यभिधानं। आत्मानात्मविवेकज्ञानवान्स्यादित्यर्थः। कथमिवत्यत्र निदर्शनं सोपमामाह। धावन्निति। यथा नेत्रे उन्मील्य धावन्निह शर्करावति स्थले न स्खलेन्न पतेत्तथा भागवतधर्मरथारूढः ३५

राम

६

भगवत्कथितोपायविधिः कीदृश इति तत्राह। कायेनेति। स्वभावं योगपतामनुसृतोऽनुगतो मनसा संकल्पाद्यधिकरणेन तु ज्ञानिश्चयज्ञानाधिकरणेन। आत्मनाममनलक्षणज्ञानाधिकरणेन। अहं हरिमर्चयामीत्यादिलक्षणेनाहंकारेण वा। कायादिनाय दर्चनादिकं करोति सर्वां क्रियां पुष्पस्याद्यां तेऽपि ज्ञानेन तत्सर्वं परस्मै नारायणायास्त्विति समर्पयेत्। योगमात्मप्रसादजनकत्वेन तज्ज्ञानोपाय इति भावः। विपक्षे बाधकं तर्कं प्रदर्श्य विपर्ययेप्यर्थस्थानमाह। भयमिति। अस्मृ

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावात्। करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ३६ ॥ ॥
भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः। तन्माययातो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ३७ ॥ ॥

तिरज्ञानं विपर्ययोऽन्यथाज्ञानं। एते ईशादपेतस्य ईशानुग्रहरहितस्य प्रकृतिवद्धस्य पुंसो यस्मा हरेर्मायये द्वयाभ्यः ताभ्यां च ज्ञानान्यथाज्ञानाभ्यां द्वितीयाभिनिवेशतः द्वितीये देहगेहादौ अहं ममेत्यभिनिवेशानात्तदु रभिमानः स्यात्। तस्माद्भयं संसारलक्षणं स्यादिति यस्मादतो गुरुः परमात्मदेवता यांच आत्मा मनो यस्य तथा तस्मात्तज्ज्ञानवान् यथा यो यं गुरुः परमपुरुषयोर्द्धि किं कुर्वाणो बुधस्तं हरिमाभजेत। सर्वसमर्पणपूर्वकमुपासीतेत्यर्थः ॥ ॥ ॥

भा॰ ए॰

एतदेव सोदाहरणं निरूपयति। अविद्यमान इति। द्वयाद्यनुविनियानिति शेषः। ध्यायतो विषयान् पुंस इति स्मृतेः। पुंसः ईशाधीनत्वेन स्वस्याविद्यमानोऽपि द्वयोर्देहगेहादि स्वकीयत्वेनावभाति। हि यस्मात्। कथमिव यथा स्वप्नमनोरथाः। स्वप्नो जाग्रत्येन निद्रे सुप्तस्य कोशामायाद्य प्रकृतिवर्गं भावश्च राज्यं करिष्यामीति मनोरथः सत्त्वेन प्रतीयते तथा देहादावीशाधीने स्वाधीनताबुद्धिः संसारः। तस्मात् द्वयसंसारनिवृत्तये तत्कर्म तत् देहादिकर्मविषयो यस्य तत्तथा तत्संकल्पविकल्पकं मनो निरुन्ध्यात् मनः श्रीनारायणे निरुध्यात्। ततो हरिप्रसादादभयं संसारनिवृत्तिलक्षणो मोक्षः स्यादित्यर्थः। सर्वसमर्पणलक्षणोपासनाभावे ब्रह्मज्ञानं न स्यात् तदभावे संसारनिवृत्तिर्न स्यात् अतः सर्वं सर्वसमर्पणलक्षणमुपासनं कर्तव्यमिति भावः। आत्मनो देहगेहादिद्वयशङ्कनभयात्। अविद्यमानेऽपि द्वयप्रतिभाति तदीयब

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा। तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात् ॥ ३८ ॥

शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥ ॥ ३९ ॥

त। जाग्रद्द्वन्तु यथा स्वप्नः प्रतिभाति मनोरथः विद्यमानवदेवेदं देहादीशवशीकृतं। विभाति स्ववशत्वेन सेयं संसृतिरुच्यते। तस्माद्विषयेभ्यस्त्यक्त्वा मनो विष्णौ निवेशयेद्धि वेतमानेनेसिद्धमेतदर्थ्यज्यते। ननु न देहादेरस्वत्वाभिप्रायेणास्य प्रादिदृष्टान्तः किं न स्यादिति चेन्न तदा द्वैतस्मृतिविरोधात् तस्मात् स्वातन्त्र्यं चैव निषेध्यं इ यत इति। द्वयशब्देन भेदमनुद्यत निषेधः किं यत् द्वत्यर्थोऽप्युक्तप्रमाणविरुद्ध इत्युक्तमनाकुलमिति। अयमभिप्रायः तो धर्मरूपत्वात् इह शृण्वन्निति एवमात्मज्ञानोत्पादनसमर्थभागवतधर्मपरं प्रभूत सर्वसमर्पणात्मभागवतधर्ममनुतिष्ठतो देहाद्यभिमानविच्छेदरसभावदेकत्वात् तस्य ज्ञानिनो निरंतरं हरौ मनो नियुंजमानस्य स्वरूपमाह शृण्वन्निति त्रिभिः। शृण्वन्निति तदर्थकानि जन्मकर्मविषयाणि।। ॥ ॥

श्रम

१

एवं श्रवणाद्याचरतो परोक्षज्ञानजननी भक्तिः स्यादित्याह। एवंव्रत इति। प्रियस्य हरेर्नामकीर्त्या जातानुरागः संवर्धितानुराग इत्येकः अनेन भक्तेरेको नुमंतव्य इति भावेनाह। हसतीति। लोकबाह्य इत्यनेन भक्तवाङ्मविधिं दर्शयति। कश्चिल्लोकबाह्यो लोकविलक्षणः कश्चिल्लोकबाह्यलिंगप्रदर्शकः। कश्चिल्लोकबज्जबाह्य वड्भयलक्षणोपेतश्चा तदुक्तं। केचिदुन्मादवदुक्ता बाह्यलिंगप्रदर्शकाः। केचिदंतरभक्ताः स्युः केचिच्चैवोभयात्मकाः। सुखप्रसाददा हीयं भक्तिर्ज्ञेया नवान्यता। इत्यनादिलक्षणमुन्मादादावतिव्याप्तमित्यत उक्तं सुखप्रसादेति। नन्वयमर्थो सुखेनेनोक्त इत्यत उक्तमथो इति। अथो शब्दोऽप्यर्थः। इत्यनादेरतिव्याप्तत्वात् सुखप्रसादाद्यपेक्षितमित्यर्थः। विकल्पार्थो वा सचलोकबाह्य इत्यनेन स्पष्टीकृत इति। इदानीमेवंविधोपासकस्य हरेरुपासनार्थमधिष्ठानविशेषमाह। खं वायुमित्यादिना।

प्रिय

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ५० खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्। सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यः ४१ ॥ ॥

खादीनां यानि शब्दस्पर्शरूपाणि भिन्नानि तानि सर्वाणि हरेरधीनत्वेन तदेकनिष्ठगुणवेदकानि। उपासकानां च तत्तद्योग्यतावशाद्ध्यानदृष्टिस्थाने वा कुत्वं चोपपद्यते। हरेरवासस्थानत्वात् येषु तदुपासनाविधानमिति भावेनाह। हरेरिति। यत्किंच भूतमुत्पन्नं तत्तत्सर्वं हरेः शरीरं विषयभोगायतनत्वात् वासस्थानं पृथिव्यानितिष्ठन् पृथिव्या इत्यादि श्रुतेः। प्रकर्षेण मस्तकं तं क्रमीत किं न हरभेदेनेत्याह। अनन्य इति। अन्यत्स्वामीनां विद्यते यस्य सोऽनन्यः। तं हरिं परिणामत्वेन सर्वस्य तच्छरीरत्वात्तदभेदेनोपासनो व्याप्तेव नतिरेवं सर्वं हरेर्व्याप्यत्वेन शरीरं तस्य भावापत्त इत्यादि विरोधाभ्यास।। ॥

एवं स्वाद्याधिष्ठाने भुक्तं निष्ठुरतस्य हरेस्ततो भिन्नत्वेन तद्धावित्वेन चोपासनात्मस्यादि तुष्टिं करोतीति नान्यथेति सोदाहरणमाह। भक्तिरिति। त्वादि तुष्ट्यं हरिं प्रपद्यमानस्योऽसीनस्य। तथा परेश परमात्म नि भक्तिः। प्रेम लक्षणा भवो ऽनुभवः। तं व्यज्ञाने। अन्यत्र संसारे विरक्तिरित्येषु त्रिकस्त्रिकत्वसंख्यासाम्य एककालः स्यादिति शेषः। यथाश्नुभुञ्जोरश्नतः पुंसोऽनुग्रासं प्रति कवलं तुष्टि पायः पुष्टिरुदरं भरणं तुष्टिरलं तुष्टिश्चेत्येतत्त्रयं स्यात्। एवं क्रार्थमनुद्य तन्न फलमाह इतीति। प्रीत्या भजतोऽच्युतं तरं भगवत्प्रबोधः। भगवदपरोक्षज्ञानमनंतरं सर्वस्मा दधिका संसारविरक्तिरनंतरं। अधिकाभक्तिरित्येतानि साधनानि भागवतस्य भवंतीति वेद्य

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः। प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासं ४२ इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः। भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात् ४३ राजोवाच अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणां। यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः ४४ हरिरुवाच सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः ४५

स्मात्ततोऽनंतरं साक्षात्तु याव स्थालक्षणां परां शमं शांतिं मुक्तिमुपैतीत्यन्वयः। अत्र पूर्वाधिक्यविवक्षया भवोत्पत्ती निहेतुमाह। भावकथनमिति ज्ञातव्यं। भागवतं वक्षि भागवत इति सामान्यतो ज्ञात भागवतोऽपि विशेष विवक्षया लोकोपकाराय पृच्छति। अथेति। अथ प्रसंगावसरः पृच्छामीति शेषः। किं तत्राह। भागवतमिति। भागवतमुत्तममध्यमाधमसंसं हरेः भगवान्सर्व गुण पूर्णः। तस्य भावो भगवद्भावः सर्व गुण पूर्णतात्म॥ ॥ ॥

यदि शब्दस्य विपर्यय पर्यवसानेव स्कृत्वार्थः प्रतीयते तथात्रापि। यदि शब्दस्यावस्कृत्वेऽस्वातंत्र्ये संशये। अवस्कृशब्दस्य शक्केत्वात्
क्तो व की र्त्येत इत्यनेन यदि शब्दस्यावस्कृत्वार्थोपि ज्ञायते॥ ॥

भा॰ ए॰

४२

अयुक्तस्तोकार्थमेव विहरणोति। योषिदिति। मायारचितेषु भोगं स्त्र्याभरणेषु तत्स्यादिषु योषिद्दर्शनेषु पतंगवद्बुद्ध्या विषयभोगसाधनबुद्ध्या आलोभि
तात्मा विवशमनाः शलभवन्नश्यतीत्यन्वयः। मधुकरात् शिक्षितमतिरुपदिशति। स्तोकमिति। मधुकरस्य विद्यमानां वृत्तिं समातिष्ठन्मुनिर्गृहा
दुःखेदित्यन्वयः। अण्वाण्वल्पमहत्त्वे संख्येयोच्यते न त्वर्थतः। सारं भगवद्भक्तिजननीं भक्तिं। भिक्षितं भिक्षया लब्धमन्नं। सायंतनं सायंतनार्थं श्वस्तनं श्व

योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः। प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ८ स्तोकं स्तोकं ग्रसेद्ग्रा
सं देहो वर्तेत यावता। गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ९ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः। सर्वतः सारमाद
द्यात्पुष्पेभ्य इव षट्पदः १० सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं। पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ११ मक्षिका इव संगृह्णन्स
ह तेन विनश्यति। पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि १२ स्पृशन्करीव बध्येत करिण्या अंगसंगतः। नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्यु
मात्मनः १३ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा। न देयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितं १४ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु।
सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः १५ ॥ ॥

स्तनार्थं च न संगृह्णीत। कथं तर्हि भोजनमत आह। पाणीति। पाणिपात्रत्वेनोदरमात्रत्वेन वा भुंजान इति शेषः। संग्रहे को दोषस्तत्राह। मक्षिका इति। तेन
धनेन सह विनश्यति। चौरादिनेति शेषः। गजात्किंचित्पाठमत आह। पदेति। करिण्या अंगसंगतः स्पृशन्करीव बध्यते। एतदेव विवृणोति। नाधिगच्छेदि
ति। मधुहनो पिका बुद्धिरर्जितेति ततश्च ज्ञानदेयमिति। लुब्धैर्यद्दुःखेन संचितं न देयं दानयोग्यं नोपभोग्यं। स्वस्योपयोग्यं च न तत्संचितमर्थविद्
मोधुक्नोकथमिव कष्टसंचयद्दा मधुवत्। किमनेनात्मनो लब्धमत आह। सुदुःखेति॥ ॥

राम

४२

यतिर्निर्जितेंद्रियग्रामः हरिणाच्छ्रोत्रेंद्रियजयो लभ्य इत्याह। ग्राम्येति। अहं वनचरो यतिर्ग्राम्याणां गीतं वचनं न शृणुयात्। अमर्थं हरिणाच्छिक्षेद् शास्त्र।
मृगयोर्गीतमोहितत्वेन बद्धात्। ग्राम्यगीतश्रवणे को हानिरिति तत्राह। नृत्येति। क्रीडनकाख्यः क्रीडासाधनवद्वश्यः। मत्स्यात् जितेंद्रियत्वप्रकारं कथ
यति। जिह्वयेति। असद्बुद्धिरतत्त्वज्ञः। रसजयो दुष्परिहर इत्युपपादयति। इंद्रियाणीति। रसनं रसनेंद्रियं। असौ रसनो रस्येत्सु विषयेष्वेव वर्द्धते जिह्वेंद्रियजेय

मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां। ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् १६ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात्। नृ
त्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां १७ आसां क्रीडनको वश्य ऋष्यशृंगो मुनिर्यथा। जिह्वयातिप्रमाथिन्या जनो रसविमोहितः १८
मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा। इंद्रियाणि जयंत्याशु निराहारा मनीषिणः १९ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते। तावज्जितेंद्रियो
न स्याद्विजितान्येंद्रियः पुमान् २० न जयेद्रसनं यावज्जितं सर्वं जिते रसे। पिंगला नाम वेश्यासीद्विदेहनगरे पुरा २१ तस्या मे शिक्षितं किं
चिन्निबोध नृपनंदन। सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती २२ अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं। मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्ष
भ॥२३॥ तान्शुल्कदान्वित्तवतः कांतान्मेनेर्थकामुका। आगतेष्वपयातेषु सा संकेतोपजीविनी २४ अप्यन्यो वित्तवान्कोपि मामुपैष्यति भूरिदः।
एवं दुराशया ध्वस्तनिद्रा द्वार्यवलंबती २५ ॥ ॥

एवमिंद्रियजयो नान्यत्राह। तावदिति। रसो रागः। रसो रागे विषे वीर्य इति यादवः। पिंगलायाः वैराग्यमुपशिक्षितमिति वक्तुमुपक्रमते। पिंगलेति। सैकदा
संकेते विहारसमये कांतमुपनेष्यती आत्मसमीपं प्रापयंती द्वार्यभूदित्यन्वयः। मार्गे आगच्छतः पुरुषान्वीक्ष्य तान्। वित्तवतः शुल्कदान् कां
तान्मेने॥ ॥

भा०ए०

४३

अस्मादन्योपि हरिरेव ब्रह्मस्य प्रदः स्यादिति मत्वा वित्ताशया विश्रांतिरस्या चिंतायाः छेदने हेतिरिव यथा गीतं तथा मम सकाशाच्छृणु। श्रोतव्यत्वे हेतुमाह।
निर्वेद इति। यथा निशितोसिः पाशानां छेदने विहितस्तथा निर्वेदस्तस्मात्तृष्णापाशानां हि यस्मात्तस्मात्। अत्रापि हेत्वंतरमाह। न हीति। विततिर्विस्तरः।
वालिशा येन तस्मात्। कथं वालिशेत्यत्राह। संतमिति। नित्यमविनाशिनं आत्मानम्। अतिगर्ह्या वार्ता किं वदंती यस्याः सा तथा। तथा संकेतस्य भ

निर्गछंतीप्रविशाति निशीथं समपद्यत। तस्या वित्ताशया शुष्यद्वक्त्राया हीनचेतसः २६ निर्वेदः परमो जज्ञे चिंताहेतिः सुखावहः। तथा निर्वि
ण्णचित्ताया गीतं शृणु यथा मम २७ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः। न ह्यंगाजातनिर्वेदो देहबंधं जिहासति २८ पिंगलोवा
च अहो मे मोहवितति पश्यताविजितात्मनः। या कांतादसतः कामं कामये येन बालिशा २९ संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्य
मिमं विहाय। अकामदं दुःखभयाधिशोकमोहप्रदं तुछमहं भजेज्ञा ३० अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया। स्त्रै
णान्नराद्यार्थतृषोनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेछती ३१ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं। क्षरन्नवद्वारमगारमेत
द्विण्मूत्रपूर्णं मदुपैति कान्या ३२ ॥ ॥

वंशाः केत्यं इत्यंतेन वृत्तिरात्रौ विक्रतयापापादमिह वित्तमुद्दिश्य आत्मदेहेन। अर्थतृषा विषयतृष्णया। अनुशोच्यात् स्त्रैणान्नरात् क्रीत्वा रतिमिछत्याहं
तथेति शेषः। यदर्थं या अमा कांक्षति तदीदृशं हीत्याह। यदिति। त्वचा रोमनखैरित्येकं पदं। स्थूणा स्तंभाः मदन्या कीदृशी। एतद्देहाख्यमगारं गृहमुपै
तीत्यन्वयः। वंशा दीर्घदारुविशेषाः। वंश्यां वंशप्रोतास्तिरश्चीनवेणवः। क्षरंतीति स्रवंति। नव द्वाराणि यस्य तत्तथा॥ ॥

राम

४३

अनेनान्यकांतानां हेयत्वमुक्तं भवति। इतोपि हेया इति भावेनाह। विदेहानामिति। अस्मादस्वकीयात्। अस्वस्वामिन इत्यर्थः। अतो जगतोन्यस्मात् अभिन्ना
दित्यर्थः। अनिवेश्य पुमान्विक्रयाविति पादवा। यद्वा अस्मात्सर्वमनोवृत्तिप्रेरकत्वेन प्रसिद्धात्। योयं सुहृत्प्रेष्ठानां प्रेष्ठः। नीयते ऐश्वर्यं एव वर्त्तत इति। नाथः
शरीरिणामात्मा नियंता च तमात्मना मनसैव विक्रीयानेनाच्युतेन सह। इयं पिंगला सामान्या वेश्या न भवति किंतु विशिष्टाप्सरःका अन्यथा स्यानेतादृ
शी बुद्धिरुत्पद्यते। तदुक्तं भागवते। अर्थतायोग्याः काश्चिदप्सरसः स्त्रियः। रमावेशात्कदाचित्सुसाध्वका पिंगलीभवन्नात दन्यासां महादोषो भगवद्
र्तता स्मृतो इति। लोकेपि दृढकतत्वाद्गोलोकविलक्षणकांतस्वीकारे अलंबुद्धिगोचरकामादात्मवमाद्यंतवत्वं च निमित्तमित्याह। कियदिति। तेनरा

विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः। यान्यमिछत्यतः स्वस्मादात्मदात्काममच्युतात् ३३ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां। तं वि
क्रीयात्मनैवाहं रमेनेन यथा रमा ३४ कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः। आद्यंतवंतो भार्याया देवा वा कालविद्रुताः ३५ नूनं मे भग
वान्प्रीतो विष्णुः केनापि कर्मणा। निर्वेदोयं दुराशाया यन्मे जातः सुखावहः ३६ मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः। येनानुबंधं निर्हृत्य
पुरुषः शममृछति ३७

भार्यया मे कियत्प्रियं व्यभजन् इति भजंते स्म इत्यन्वयः। तर्हि देवाः कांताः संतीत्यत्राह। देवा इति। विश्वं बंधविछेदे सति भगवति प्रसन्ने किमलभमिति भा
वेनाह। नूनमिति। नूनमिदानीं सम्यक्प्रभूत भगवद्भक्तिसुखा पिंगला पुनः शाश्वदिविषयनिमित्तक्लेशा मा भूवन्निति प्रार्थयते। मैवमिति। येन निर्वेदेन
संसारबंधं निर्हृत्य भगवन्निष्ठालभ्यं सच्चिदानंदलक्षणं सर्वविलक्षणं ब्रह्म प्राप्नोतीत्यन्वयः। कुतो मा भूवन्नित्यतो वाह। येनेति। पुरुषोनुबंधं भगवद्भक्ति
निर्हृत्य भक्तिं कृत्वा शमं शमलं सुखोपरमं नरकमृछतीति। एतस्मादिति शेषः॥ ॥

तन्निद्रा माइ॥तेनेति॥तेन हरिणाउपकृतमनुगृहीतं निर्वेदं शिरसादाय ग्राम्यसंगता दुराशा त्यक्त्वा अत्यंतं श्रद्दधती श्रद्दधाना॥अस्मात्स्वकः आत्मानं च
तु मुषितेक्षणं नष्टज्ञानं॥आत्मनः स्वस्य गोप्ता आत्मा परमात्मैव यदा खिलान्निर्विद्येत तदेतं ग्रस्तं ज्वालाहिना पश्येत॥कांततर्षजाः कांतस्य आशा
तु मुषितेक्षणं नष्टज्ञानं॥आत्मनः स्वस्य गोप्ताआत्मा परमात्मैव यदा खिलान्निर्विद्येत तदेतं कुलगत्व ज्वालाहिना ग्रस्तं पश्येत॥कांततर्षजाः कांतस्य आशा
तु॥परिग्रहर
ना॥इममितिहास प्रश्नसूयति॥आशेति इत्येकादशे अष्टमोध्यायः तिरश्चीनात्कुररात् स्वगात्किं विशिष्टं ज्ञानं शिक्षितम त्राह॥परिग्रहर

तेनोपकृतमादाय शिरसा ग्राम्यसंगताः त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ३८ संतुष्टा श्रद्दधत्येतद्यथालाभेन जीवती॥विहराम्य
मुनैवाहमात्मना रमणेन वै ३९ संसारकूपे पतितं विषयैर्मुषितेक्षणं॥ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुमधीश्वरः ४० आत्मैव ह्यात्म
नो गोप्ता निर्विद्येत यदाखिलात्॥अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना [illegible] जगत् ४१ ब्राह्मण उवाच एवं व्यवसितमतिर्दुराशा
कांततर्षजां॥छित्वोपशममास्थाय शय्यामुपविवेश सा ४२ आशा हि परमं दुःखं नैराश्यं परमं सुखं॥यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला
४३ इति श्रीभागवते महापुराणे एकादशस्कंधे पिंगलागीते अष्टमोध्यायः ब्राह्मण उवाच परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृ
णां॥अनंतं सुखमाप्नोति तद्विद्वान्यस्त्वकिंचनः १ सामिषं कुररं जघ्नुर्बलिनो ये निरामिषाः॥तदामिषं परित्यज्य स सुखं समविंदत २ न मे
मानापमानौ स्तो॥न चिंता गेहपुत्रिणां॥आत्मक्रीड आत्मरतो विचरामीह बालवत् ३ ॥ ॥

णि॥प्रियतमं यद्यद्वित्तं तस्य परिग्रहः॥तस्य विनाशेन तनोनाशान्न दुःखाय भवति ततः किंफलितमत्राह॥नदिति॥तत्र स्मादयो विद्वान्सो किंचनो भवेत्॥इम
मर्थं विज्ञीकरोति॥सामिषमिति॥तज्ज्ञानफलमाह॥न मे इति॥गृहपुत्रवतां या चिंता पोषणादि चिंता सा मे नास्ति॥ ॥

न नु तर्हि कीदृशस्य चिंता नास्तीत्यत्राह॥द्वाविति॥गुणेभ्यः सत्वादिभ्यः परं विलक्षणं ईश्वरं गतो ज्ञातापरमात्मगुणोपकृत मनुभवन्नित्यर्थः॥कुमार्याः शि
क्षितज्ञानमाह॥क्वचिदिति॥वृत्वानाचवरणे कुर्वाश्चर्हणमभ्यागतपूजनं॥शालीनकलमान्॥दृषदि व्रीहिकुट्टनपाषाणे॥शालयः कलमाद्याश्च पवि
क्षितज्ञानमाह॥ कथाद्यापि पुरुषमीत्यमरः॥यथा महत्परिमाणं भवति तथा च कुरिति क्रियाविशेषणं॥महती विवाहोत्सवे वर्तमाना तद्योग्पेत्यर्थः॥अभ्यागतसमये व्री
क्याद्याश्च पुरुषमीत्यमरः॥यथा महत्परिमाणं भवति तथा च कुरिति क्रियाविशेषणं॥

द्वावेव चिंतया मुक्तौ परमानंद आप्लुतौ॥यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः ४ क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान्॥स्वयं
तानर्हयामास क्वापि याते षु बंधुषु ५॥तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव॥अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ६॥
सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः॥बभंजैकैकशः शंखान्द्वौ द्वौ पाण्योरशेषयत् ७ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः॥तत्राप्येकं
निरभिदैकस्मान्नाभवद्ध्वनिः ८ अन्वशिक्षमिमं तस्या उपदेशमरिंदम॥लोकाननुचरन्नेतांल्लोकतत्वविवित्सया ९ वासो बहूनां कलहो भवेद्वार्ता द्वयोरपि॥एक एव चरेत्तस्मात्कुमार्या इव कंकणः १० ॥ ॥

हिना उनंदारिद्र्यश्च कमिति॥व्रीडिता लज्जिता चोवघ्नंत्याः संधिकार्येण अभ्यागतैः शालयस्तु नो न कृत इति सूच्यते॥संधिश्च विवक्षावशात्क्रि
यत इति वे कामारणे रुक्तं त्वाद्यनिरभिदश्च निरभिनत्॥इदं कथं संभाव्यत इत्यत्राह॥लोकानिति॥एकाकित्वस्य विपक्षे वाधकमाह॥वासइति॥अत्रउ
क्तैः सहवासो निषिध्यते॥न तु सद्भिः तस्य विहितत्वात्॥असङ्गेनैकसंवासो न कर्तव्यः कथंचन॥यावद्यावच्च बहुभिः सज्जनैः सतु मुक्तिदइतिवचनात्॥

भा॰ए॰

४५

इषुकाराच्छिक्षितं बुद्धिप्रकारमाह। मन इत्यादिना। एकत्र परमात्मनि ब्रह्मणि मनो योजनेन त्विकिंफलं येनावशं कर्तुं शक्यं तदाह। द्वाभ्यां यस्मिन्निति। यस्मिन्नो दुष्कर्मरेणून्मुंचति महत्त्वमचिन्नतो निर्वाणं नारं शमुपैतीति। कथमिव। अनिंधनं ज्योतिरिवेति। तुल्योपमा। वाह्यं मनो विलीनं स्यान्मुक्तो चिन्मात्रकं मनने नैवानुभवेत्सर्वत्र। तत्राभिन्नेन मुक्तिगइति वदनात्। वाह्यमेव नश्यति न चिन्मात्रं तन्नाशे विषयभ्रमयोः किं विरुध्येतेति। अचिन्मनोनाशानंतरं चि

मन एकत्र संयुंज्याज्जितश्वासो जितासनः। वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः ११ यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुंचति कर्मरेणून्। सत्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं १२ तदेवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा। यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे १३ एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः। अलक्ष्यमाण आचारैर्मुनिरेकोल्पभाषणः १४ गृहारंभोतिदुःखाय विफलश्चाध्रुवात्मनः। सर्प्पः परकृतं वेश्म प्रविश्य सुखमेधते १५ ॥ ॥

न्मनसाध्यावप्रकारमाह। तदेवमिति। अनिकेतनत्वेन एकत्वेन संचरणं दुःखहेतुकर्म्मानारंभश्च सर्पाच्छिक्षितमित्याह। एकचारीति। अनएकचारित्वादिकं विधेयं न तु विशेषणं। गुहायां हृत्कमलमध्ये गूढायां परदेवतायां आशयोंतःकरणं यस्य स तथा। निरंतरं भगवदुपासनापरइत्यर्थः। अल्पेनाशनादिना तोषणं तद्वासिः यस्य स तथा। अध्रुवात्मनः अनित्यदेहस्य जीवस्य। अत्र तुल्योपमामाह। सर्पइति। अनेन निवासोपायोपि

एम ४५

दर्शित इति॥ ॥

र्णनाभेरुपशिक्षितमाह। एक इति। एकः केवलः निरपेक्षः नारायणो देवः स्वमायया स्वेच्छया कल्पांते कालकलया संहारकांशेन पूर्वसृष्टमिदं जगत्संहृत्य एकत्वसंख्याविशिष्टोभूत्। कालादीनां तदा सत्वात्। कथमिदमुपपद्यत इति तत्राह। अद्वितीय इति। एतादृशोन्यो नास्तीत्येवोच्यते। न तु सर्वात्मसर्वनिषेधेन। तथा सति सर्वस्य तेनैक्यमुपपन्नं स्यात्तच्च तत्कृतं तत्राह। अखिलाश्रय इति। नन्वाधाराधेययोरेकत्वकापि दृष्टचरं। न चैतद्दृष्टांतेन तस्याधारांतरकल्पनं स्यादत आह। आत्माधार इति। नच्चैतद्युक्तिविरुद्धमत्राह। ईश्वर इति। एतदेव विवृणोति। कालेनेति। आत्मनः स्वस्यानुभावेन तत्त्वकालोचितस्वस्वप्रादिभावरूपकेन कालेन तदंतर्यामिणा सत्वादिगुणवाच्यासु शक्त्यत्वाच्छक्तिषु साम्यं स

एको नारायणो देवः पूर्वसृष्टं स्वमायया। संहृत्य कालकलया क[illegible]दमीश्वरः १६ एक एवाद्वितीयोभूदात्माधारोखिलाश्रयः। कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु १७ सत्वादिष्वादिपुरुषः [illegible]पुरुषेश्वरः। परावराणां परम आस्ते कैवल्यसंज्ञितः॥ १८।

वस्थां नीतासु सतीषु प्रधानपुरुषयोर्ब्रह्मरुद्रयोरीश्वरश्च आदिपुरुषः परावराणां कार्यकारणानां परमो व्यापारमंतरेण स्थे। तदा किंनामेत्यचाह। केवल्येति। समाधिकरहितइति। सत्वादिगुणानां शक्तिशब्दवाच्यत्वे किं प्रमाणमित्यत आह। प्रकृतिश्च गुणाश्चैव शक्तत्वाच्छक्तयः स्मृताविष्णोः स्वरूपभूतानुशक्तनाच्छक्तिरुच्यत इत्यनेन परिहृतमिति ज्ञातव्यं। कालप्रकृत्यादिप्रवर्त्तनोदासीनत्वाभिप्राये एक इति वा पुनरुक्तं। कालप्रकृतिजीवादेलये सत्यप्रवर्त्तनात्। तन्निमित्तस्य कार्यस्य विस्तुरेकइतिर्यंते। स्थितिकालादिकं सर्व वर्तयत्यमितद्युतिरितिवचनात्॥ स्व

संहारप्रकारमुक्त्वा तस्मात्सृष्टिप्रकारमाह। केवलेति। निरुपाधिकोऽजरदेहरहितः। कालेन कालांतर्यामिणा। आत्मनः सूत्रमात्मसूत्रं भावोऽनन्यक्रियेयस्य सतथा तेन। स्वमायां स्वाधीनप्रकृतिं संक्षोभयन् सृष्ट्यभिमुखीं कुर्वन्। तया प्रकृत्या सूत्रं प्राणं सृजति। तां च सृजति मायायाः सूत्ररूपमाह। त्वाभित्येतति। विश्वतोमुखं सर्वविलक्षयथा सुखं भवति तथा सृजति। यस्मिन्सृष्टि सूत्ररूपे। येन प्रधानेन प्रकृतो विलीनः संसारमेतीतिश्रुतिः। कालेन तामिति। विश्वतो मुखं सर्वदिक्षु यथा सुखं भवति तथा सृजति। यस्मिन्सूत्ररूपे। येन प्रधानेन प्रकृतो विलीनः संसार सेतीतिश्रुतिः। कालेन तामिति। ... अत्रोदाहरति। यथेति। ऊर्णनाभो लालावक्त्रतो मुखेन संतत्य विसृत्य। पृथायथे सृष्टिपद्वितेन। नेता वता सापेक्षत्वं आत्मानुभावेन स्वसामर्थ्येनेतिवा। ... देही यत्र यत्र स्नेह संक्लिन्नधियामनो धारयेत्तत्स्वरूपतां तस्य तस्य सदृशरूपतां याति। ... पेशस्कृतः शिक्षितां बुद्धिमाह। यत्रेति। देही यत्र यत्र स्नेहसंक्लिन्नधियामनो धारयेत्तत्स्वरूपतां ... यातीत्यादियोऽस्मं तदुक्तं भयादपि हरिं भक्त्या चित्तं यस्य याभियाध्यायति चेत स्निग्धरूपं सुखरूपं याति। द्विष्टधिया चिंतयति चेत् द्विष्टरूपं दुःखरूपं यातीत्यादि।

केवलानुभवानंदसंदोहो निरुपाधिकः। कालेनात्मानुभावेन स्वमायां त्रिगुणात्मिकां १९ संक्षोभयन्सृजत्यादौ तया सूत्रमरिंदम। तामा-
हुस्त्रिगुणव्यक्तिं सृजंतीं विश्वतोमुखं २० यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान्। यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ११ तया विहृ-
त्य भूयस्तां ग्रसत्येवं महेश्वरः। यत्र यत्र मनो देही धारयेत्सकलं धिया। स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपतां २२ ॥ ॥

द्विषच्च प्रीतावितिधातोः। सुखरूपस्यापि हरेर्द्वेषस्य दुःखरूपत्वात्तत्स्वरूपतां यातीति स्वरूपतां। पेशस्कारिवदायातिद्विषन्द्वेषरूपतां। ... कामातिरिति चेत् उच्यते। तत्र स्नेहो रूपादीनां द्वेषादुःखावामित्रयादीनामेव तत्स्वरूपप्रवेशेन सुखानुभवं। सुखरूपं प्राप्नुयात्सुखावामित्रकृतेः ... अगाध्वरामविद्वेषाच्छिशुपालप्रभृतयश्च। ततो भक्त्या परं यातो द्वेषरूपान्नमोगतिरिति। तस्मात्सर्वगुणगतिः। नृसिंहद्वेषतो दुःखं रक्षोरूपेण रावणः। ... यथोपासनं फलानवाप्नोति। ... तेनदेवभवतीति। तं श्रुतिरिति। ... रावणादीनां एमादिद्वेषात्रिर्दुःखानंदभगवत्स्वरूपं ४ ... स्वविद्वेषो दुःखरूपदेतीयते। तस्मादुःखं सदायातिद्वेषवासुरुषो न्नमस्तीति च।

अत्रोदाहरति। कीटइति। ननु मदविशार्थे विषममुदाहरणं हेमान्नसमता प्राप्तेव गमानुरुच्यते। भक्ष्यं भोजनं दास्यामीति स्नेहस्य बाहुल्येन क्रमेणान्यस्य द्वेषस्य सर्वात्मना निवर्तनेन स्नेहस्यपवर्ईनेन च तत्समतावाप्तिरिति। तत्यप्यत्वल्पविद्वेषे भोजनं दास्यतीति च बु। स्नेहबाहुल्यतः कीटः पेशस्कारिसमो भवेशद्वेषे सर्वात्मना नष्टे स्नेहे चैव विवर्द्धिते। तद्रूपतातदैवस्यात्कीटस्यैवं हरेरपीति। किंच हरेः फलदातृत्वविशेषात्। पेशस्कृतस्तदाभावादन्यद्वेषोपि हरेः प्रवेशाद्धनकत्वमयोः। न सर्वसाम्यं। लोके च तथादर्शनात्। अत्यल्पोपि हरेर्द्वेषः स्नेहस्यानुदर्यंकरः। शोयं विशेषोनान्यस्यफलदातावको श्रवः। नाइ। पेशस्कृतः किंचित्फलदातृत्वमिष्यते। स्वातंत्र्याद्विद्विषांचैवकेशावीनसुखप्रदइतिवचनात्। उपसंहरति। एवमिति। स्वदेहाच्छिक्षितमितिमाह। स्वात्मेति। ...

कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः। याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन् १३ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः। स्वात्मोप-
शिक्षितां बुद्धिं शृणु मे वदतः प्रभो १५ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्वनिधनं सततार्त्युदर्कं। तत्वान्यनेन विमृशामि यथा तथापि पार-
क्यमित्यवसितो विचराम्यसंगः १६ ॥ ॥

देहोमम गुरुरित्यत्र देही त्वद्वयः कुतो नाह। विरक्तीति। सत्वं बलज्ञानसमाहारो निधीयते स्मिन्परमेश्वर इति सत्वनिधनः। तं सततमतिशयेनोद्वेर्तर्कस्य सुखरूपइति सततार्त्युदर्कमित्यत्रांसं बिभ्रद्देहः विरक्तिविवेकहेतुत्वात् सत्वनिधनस्य सततार्त्युदर्कस्य हरेरपि श्रवणात्। यथा वत्तत्वविचारसाधनत्वात् गुरुत्वमित्यर्थः। तर्हि हि देहस्य त्वं कुतः इति तत्राह। तथापीति। पारक्यं परकीयं मातुः पित्रादेरर्थी नमित्यवसितो निश्चितः॥ ॥

भा० ए०

४१

यो हरिणा कस्तूर्यादिमत्तुच्छजन्मप्रापिते ननिर्गते देहेन सर्वस्मा स्थितं विनाशेन तेन तस्यायं हन्त बीजमिव संसारपरंपरारंजकबीजमित्यनर्थहेतुरित्याह जाया
त्मजार्थमा जायादीनां प्रियचिकीर्षया कर्माणि वितन्वन् जायादीन् पुष्णाति स ह त्वं धर्मा वृक्षसमानो नेतु कृच्छ्राज्ञ्जायादिपोषणेनैव वरुद्ध धना
ये लादिना जायादीनां प्रियचिकीर्षया कर्माणि वितन्वन् जायादीन् पुष्णाति स ह देहः सृष्ट्वास्य बीजमवसीदति इति नित्यक्लेशवान्भवतीत्यर्थः। ब्रह्मैको हृत्तो बीजेन बीजांतरपरंपरारंभणाद्धेतुस्तथा यं देहोप्यस्य जायादि
स्यस्य बीजमिव स्थितः। सृष्ट्वा देहं सृष्ट्वावसीदति इति नित्यक्लेशवान्भवतीत्यर्थः। ब्रह्मैको हृत्तो बीजेन बीजांतरपरंपरारंभणाद्धेतुः। जिह्वेति। अमुं संसारिणं कर्मशक्तिः पाण्यादिलक्षणा श्रवोदृष्टशक्ति
प्राणलक्षणबीजैर्देहांतरपरंपरारंभकारणमित्यर्थः। अवसीदतीत्युक्तं विवृणोति। जिह्वेति। अमुं संसारिणं कर्मशक्तिः पाण्यादिलक्षणा

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन्। स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा
२७ जिह्वैकतोमुमपकर्षति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित्। घ्राणोन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति
२८ कृत्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्। तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावबोधधिषणं मुदमाप देवः २९
लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः। तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ३०

र्था। अनेन सर्वभोगायतनेभ्यो विशिष्टज्ञानेंद्रियादिमत्त्वात्पुरुषार्थोपयोगित्वेनास्य श्रेष्ठत्वं तेन रसादिविषयान्विजित्य पुरुषार्थसाधनानुष्ठानं विधेयमन्यथा
नर्थपरंपरापातः स्यादित्युक्तं। तत्र सर्वस्मादस्य शरीरस्य श्रेष्ठ्यं कथमवसीयत इति तत्राह। कृत्वेति। अजया प्रकृत्या आत्मशक्त्या स्वाधीनमायया यथेपितया पुराणि श
रीराणि। पुरुषं पुरुषशरीरं। ब्रह्मावबोधधिषणं ज्ञानार्थं यं ब्रह्मानंदमनुभवार्थं मयाप्यतनीयमित्यर्थः। अतः शरीरं स्यादित्याह। लब्ध्वेति। बहुसंभवांते बहुजन्मावसा
ने। अनुमृत्यु यावत्तावदेव यत्नः कर्तव्यः। इहेति। अनित्यमर्थदमिदं शरीरं यावत्तन्न पतेत्तावत्सर्वमेव निःश्रेयसाय यतेत। विषयः

राम

४१

निःश्रेयसार्थमाह। एवमिति। आत्मनि विज्ञानालोकः परमात्मविषयविज्ञानलक्षणप्रदीपः प्रकाशः। एकस्माद्गुरोः सार्थसिद्धेः बहुभ्यः किं प्रयोजनं सर्वस्मात्संगत्वा
त्। किंच एवमात्मार्थं इत्यत्राह। न हीति। सुपुष्कलं दृढं। तत्र हेतुमाह। ब्रह्मेति। बहुधा गीयमानत्वात्स्वल्पबुद्धेर्निश्चयो नस्यादित्यर्थः। समेव ब्रह्म। ऋषिभिर्यस्मात्तथा
हेत्यनेन। एकस्मात्तु गुरोर्ज्ञानं जायते नैव कस्यचित्। एकस्मादेव आयेत यो यो ब्रह्मपदस्य तु। स्वयं तु पदिशज्ज्ञानं वेत्ति पदयोगिति। अतु यदुराज्ञे नचा दि

एवं संजातवैराग्यो विज्ञानालोक आत्मनि। विचरामि महीमेतां मुक्तसंगोनहंकृतिः ३१ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं। ब्रह्मैतदद्वितीयं वै गी
यते बहुधर्षिभिः ३२ श्रीभगवानुवाच इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः। वंदितोभ्यर्चितो राज्ञा ययौ प्रीतो यथागतं ३३ अवधूतवचः श्रु
त्वा पूर्वेषां नः स पूर्वजः। सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ३४ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे अवधूतगीतं नाम नव
मोध्यायः श्रीभगवानुवाच मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः। वर्णाश्रमकुलाचारमकामात्मा समाचरेत् १

ज्ञानं दत्वा विमुक्तिदः। ज्ञानं प्राप्य बद्धोपि न त्रैगुण्यच्छिद्भिश्च तुर्थपदं। ज्ञानमप्राप्यते यांतु ज्ञानदो विष्णुरेव हीति वाक्योक्तविशेषं सिंहावलोकनन्यायेन सूचयति
दशमे कादशेनवमोध्यायः मुमुक्षूणां हरेः परोक्षज्ञानमाप्याथ मितिहासमुखेनोक्तं तत्साधनानि निरूपयत्यस्मिन्नध्याये। तत्रादौ वर्णाश्रमाचाराचरणप्रकार
माह। मयोदितेष्विति। कामात्मा फलाभिसंधिरहितमना भूत्वा॥ ॥ ॥

ॐ

भा॰ए॰

५८

सर्वसाधनेषु वैराग्यं प्रथमसाधनमित्याह। अन्वीक्षेतेति। अंतःकरणशुद्धिहेतुना वर्णाश्रमादिविहिताचारेण विशुद्धात्मा शुद्धमना गुणेषु शब्दादिषु तत्त्वज्ञानेन तु
रूपार्थमाश्रमतानिश्चयज्ञानेन विषयात्मनां विषयेष्वासक्तचित्तानां देहिनां सर्वेषां कर्मारंभाणां विपर्ययं फलवैपरीत्यं अन्वीक्षेतेत्यन्वयः। अन्वीक्षणानामयथावस्तुदर्शन
तदेव प्रपञ्चार्थसाधनं नान्यत्। शुक्तिरजतादिज्ञानवन्मुमुक्षूणां हेयमिदं ज्ञानमिति भावेन तदुपपादयति। सुप्तस्येति। यथा सुप्तस्य स्वप्नेन विषयाणामालोकाय
आबाध्यायतो मनोरथश्च नानात्मकत्वाद्वृक्षस्थितेरन्यथात्वाद्विफलं अन्यत एवाविद्यमानः तथान्यधीर्गुणैः स्ववाञ्छाबुद्धिस्थगुणैः स्वस्वत्वैः। कामक्रोधादिभिर्भेदो
अहंक्रोधाहंकामयितेत्यादिलक्षणो भेदो हेय इत्यर्थः। वृक्षस्थितेरन्यथात्वं नानात्वमिति कीर्तितं। ज्ञानस्येव तु नानात्वात्तत्र स्यात्काम इत्यहंमतिः। कामादिरूपधीस्थे पृथक्त्वे
लंजीवसंस्थितिः। वृक्षस्थितेरन्यथात्वं नानात्वमिति कीर्तितं। ज्ञानस्ये वस्तुनानात्वात्तत्र स्यात्कामादिः इति बुद्धिभेदः स्यात्स न कार्यैः कथंचन। अनुदृष्टकामाग्निरूपो जीवाभि

भ

अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां। गुणेषु तत्वज्ञानेन सर्वारंभविपर्ययं २ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः। नानात्मकत्वा
द्विफलस्तथा भेदात्मधीर्गुणैः ३ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत्। जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनां ४ ॥ ॥

अहंरूपतः। दुष्टकामो मनोधर्म इत्यस्मात् हेयः स्वदेवेह इति। प्रमाणेन हेयत्वं ज्ञापितमित्यर्थः। अकामात्मेत्युक्तं विवृणोति। निवृत्तमिति। फलानपेक्षतया यथा
वस्तुज्ञानपूर्वं यत्कर्म नित्यं निवृत्तं तदेव सेवेत कुर्यात्। अनीदृशं यत्काम्यं तत्प्रवृत्तं त्यजेन्न कुर्यात्। अहमेव परो यस्य स मत्परः। अनेनाकामात्मनो धर्मस्य कर्मविधा
नं प्रतीतिविरुद्धमिति परास्तं। निष्कामं ज्ञानपूर्वकं निवृत्तमिति व्याख्यातं। निवृत्तं सेवमानस्तु ब्रह्माप्नोति सनातनमिति भारते। एतदनुमानं ननु सकामस्य कर्मविधान
त्यागः कथमत आह। जिज्ञासायामिति। जिज्ञासायां ब्रह्मविचारे कर्मचोदनां कर्मविधिं। ब्रह्मज्ञानोत्पत्तेः प्रवृत्तानां सर्वेषां ज्ञानां कर्मादिविषयत्वाद्गीतारे वि
रोधापत्त्या तज्ज्ञानादेरलंकरणं त्यागो विधीयते। नतु सर्वात्मना अतः करणशुद्धिद्वारा ज्ञानांगत्वेनांगीकारार्हत्वादित्यतो नाद्रियेदित्युक्तं॥ ॥ ॥

राम

५८

ननु तर्हि यमादिश्चोदनानादरणीया किं नेत्याह। यमानिति। यमनियमाः। अहिंसासत्यमस्तेयमसंगो ह्रीरसंचयः। आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं।
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं। तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं इति वक्ष्यति क्वचिदिति इतिकालेन निवृत्तादिवसरा। ज्ञानोत्पत्तौ गुरूपासनमप्यंतरंगमि
त्याह। मदभिज्ञमिति। मय्येव आत्माध्यानसमर्था बुद्धिर्यस्य स तथा तं। मामेव नित्यं ध्याये ध्येयं मम आत्मा सप्रकीर्तितः इति वचनात्। तस्य गुरुप्रसादजनकगुणान
ह। अमानीत्यादिना। नितरां गमयतीति निगमो निष्ठा निर्णयकं वेदस्तद्वशात् अर्थ तं मिश्रा सर्वेषु जायापत्यादिष्वात्मनः सुखस्यार्थमिव प्रयोजनं भूयः समं तु विशेषम

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित्। मदभिज्ञं गुरुं शांतमुपासीत मदात्मकं ५ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः। असत्वरोर्थजि
ज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु। उदासीनः समं पश्येत्सर्वेष्वर्थमिवात्मनः ७ विलक्षणः स्थूलसूक्ष्माद्देहाद्देहात्ता (त्मेक्षि)
स्वदृक्। यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः।८। निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान्। अन्तःप्रविष्ट आधत्त एवं देहगुणान्परः ९

पश्येत्। सुखोभयेषु सादृश्ये इति च। यावत्प्रयोजनं नियच्छेदिति वा। किंच जीवपरमात्मानावपि परस्परं देहादेश्च भिन्नत्वेन ज्ञातव्याविति सदृष्टांतमाह। विलक्षण
इति। स्वदृक् स्वयंप्रकाशः इंद्रियाणामप्यसर्वस्य द्रष्टा आत्मा परमात्मा। स्थूलसूक्ष्माद्देहाद्विलक्षणो भिन्नः आत्मा जीवश्च ईश्वरे देहादेश्च भिन्न इति ज्ञातव्याविति शेषः
दाह्याद्दारुणोन्यः प्रकाशकः प्राप्तस्यादि प्रतिबिंबरूपिण्याः यादृशयोरभेदशंकायाः किं बीजमत आह। निरोधेति। यथाग्निर्दाहोधादीन् कृतान्देहकृतान्गुणान
धत्ते एवं परोपि देहे प्रविष्टो देहगुणानाधत्त इत्यन्वयः। निरोधो मरणं। अणुत्वं बृहत्त्वं गमनागमनादि नानाविशिष्टत्वमनयोर्वैलक्षण्याज्ञानं बीजमि
त्यर्थः॥ ॥

आ॰ए॰

५९

रह्यमेवात्मानं संसारकारणमित्याह। यद्गुणैर्यो सौ खल्वादिगुणैर्विरहितो देहः। अयं पुरुषस्य जीवस्यार्थेहिय स्मात्सविद्याछितात्मनः। अविद्यायां अज्ञाने छित
मनसः। पुंसोयं संसारस्त्रिविधः। देहाभिमाननिमित्तकः। अदेहधर्मवाच्चिन्तु देहधर्मवदीर्यते। जीवः स्ववेहधर्मोविपरतो देहधर्मं चार। स्वयं त्वनभिमानसन्नं
नामेव दर्शयेत्। विमुक्तजीवस्व भिमानीयावन्मुक्तिपदं व्रजेदिति वचनाद्धि लोदेहधर्मवदाभानमस्ता नां मनसानिनां जीवस्यस्तु तो देहधर्मरहितस्यापि देहाभिमानादि
तिविवेकलक्षणो विचारः कर्त्तव्य इतिउपसंहरति। तस्मादिति। उक्तप्रकारेण। जिज्ञासया आत्मस्थं देहांतस्थितं केवलं दुर्भगदेहिभोग्यदुःखरहितमात्मानं भ्रीनाय

योसौगुणैर्विरहितो देहोयं पुरुषस्य हि। संसारस्त्रिविधोयं पुंसो विद्याछितात्मनः ॥ १० ॥ तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परं। संगम्य
निरसेद्दस्य वस्तुबुद्धिं यथाक्रमं ॥ ११ ॥ आचार्यैरीरितिपैराद्यास्यादंतेवास्युत्तराणि। तल्लक्षानेषवचनं विद्यावद्भिः सुखावह ॥ १२ ॥

यत्नं। परं विलक्षणं संगम्य ज्ञात्वा स्यजीवस्य वस्तुबुद्धिं शक्तबुद्धिं निरसेत्त्यजेत्। कथं यथाक्रमं जिज्ञासया। ब्रह्मादिजीवराशेः यथास्वरूपतारतम्यं विचार्य ज्ञा
त्वा परवस्तुभावबुद्धिं त्यजेदित्यर्थः। अवस्तु शब्दमुद्दिष्टं शक्तं वस्त्विह भण्यते। तस्मादेकं परं ब्रह्म वस्तु शब्दोदितं सदेति लक्षणवचनात्। नवु ज्ञानोन्यस्य
स्वरूपाज्ञि कर्तव्ये तदुक्तं तत्र कथं कारं ज्ञानमुत्पद्यते। येन जीवस्य आत्मभावबुद्धित्यजेदहनं स्यादित्यत सत्यकारमाह। आचार्य इति ॥ ॥

राम

५९

विद्यावद्भिः सुखावहत्वं नित्यदुःखहेतुजीवब्रह्मैक्यबुद्धिमुक्तस्तद्द्वाह्येननित्यानंदनिदानत्वादिति भावेनाह। वैशारदीति। विविधं शारं सुखदुःखलक्षणं
संसारं द्यतीतिविशारदो विमुक्तस्यविद्यमानावैशारदीसाज्ञानि विशुद्धबुद्धिः। अपरोक्षबुद्धिः। गुणसंप्रसूतिं। अपोपकामादि जननीं मायां पि
शाचवच्छितां जीवस्य रूपाच्छादिकां निरस्य परमाच्छादिकां विधुनोति। उच्चाटयति। अयोग्यकामादिगुणांश्च संदह्य एतदुःखादिकं यह्यत्सं। यस्या
माया याः अरूपाधीनं तादृशीं। स्वयं शमावाह्यांतःकरणजातु द्विधनदंतःकरणं च दग्ध्वा। अस्मिन्न निरिंधनोग्निरिव शाम्यति स्वरूपज्ञानेनैव स्वरूपमी
श्वरादिकं चानुभवति मुक्तावितिशेषः। पिशाचवन्छितामायानुच्यते जीवगामसदा। दस्वंतेन तु गुणाः सर्वे साचआतिष्ठिकीन रद्द्दितिप्रमाणवचनात्। उक्तं

वैशारदीसातिविशुद्धिबुद्धिर्धुनोतिमायांगुणसंप्रसूतिं। गुणांश्च संदह्य यदात्म्यमेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः ॥ १३ ॥

गुणांश्च संदह्य यदात्म्यमेतत्स्वयं च शाम्यतीत्यस्य ज्ञाततमतो न्यस्य माणंवक्तव्येतिज्ञातव्यमि
मुक्तं। अनेन बाह्यान्तःकरणांनश्यति स्वरूपांतःकरणजन्यज्ञानेन स्वरूपेश्वरादिकं अनुभवतीत्येतस्य मस्वदावहातमतो न्यस्यमाणंवक्तव्येतिज्ञातव्यमि
तीयं शंका। मास्तांतःकरणाजन्यज्ञानंनैति मुक्तिगो। स्वरूपज्ञानतो भोगान्मुक्तो भुङ्क्ते यथेष्टत इत्यनेन परिहर्तव्येतिज्ञातव्यं। एतत्त्वद्देनदुःखादिरप
रोक्षतयोच्यते। क्वचिद्धि स्थंक्वचित् ब्रह्म क्वचिन्निद्य मितीर्यत इति वचनात्। एतच्छब्देन दुःखादिकमुच्यत इति युक्तं। तस्मत्लोहांतुनाशान्त। भेदज्ञानवि
नाशादात्मैकत्वमेवनानात्वमतएव तेषां नित्यत्वं च व्याहृहारिकमेवेतिपरव्याख्यानं तदुत्तरग्रंथविरुद्धत्वात्तद्विदुषां परिषदि हासाय मधम्रे ॥ ॥

स्प

भा ए॰

५०

तत्कथमत्राह। अथेति। एषामिति। प्रत्यक्षं लोककालागमात्मनामित्यनेन भेदे प्रत्यक्षमनुमानमागमं च प्रमाणयति। लोके काले आगमे वेदे चात्मनामनित्यं
षांते तथा तेषां लोककालवेदज्ञानामित्यर्थः। अनेन ज्ञानान्तरतम्यं च सूचितं। तस्मात्पुण्यकर्मकर्तॄणां पापकर्मकर्तॄणां मिश्रकर्मकर्तॄणां। अत एव
सुखदुःखभोक्तॄणां एषां नानात्वमथैषां नित्यत्वं च मन्यसे ज्ञानासि यदि त्वं तत्तात्रम यात्मे दस्साधनेऽध्यतनीयमित्यर्थतः। आत्माभेदो नुपपन्न इति। देहाभेदे तु
नित्यत्वं जीवानां जननेन तथा। सुतरां जाड्यनित्याश्च बहवः सुखरूपिणः। कुत्समाजीवसंघात्मनी चापे नित्यदुःखिनः। इत्यतः अनित्यत्वं जननं सुखे कभोक्तृत्व
वयुज्यते। अयं व्यवस्था कस्मादिति तत्राह। सर्वभावानामिति यथा सर्वेषां देवासुरमनुष्यादीनां तिभिन्नानां भावानां जीवानां संस्था व्यवस्था योपपत्ता। औत्पत्ति

अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः। नानात्वमथ नित्यत्वं लोककालागमात्मनां ॥१४॥ मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी
तथा। तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥१५॥ एवमप्यत्र सर्वेषां देहिनो देहयोगतः। कालावयवतः संतिभावा जन्माव्ययो सकृत् ॥१६॥

कीस्थाभाविकी हि यस्मात्तस्मात्तत्तदाकृतिभेदेन देवासुरादिशरीरभेदेन तथा जायते। जीवसंघस्य धीर्ज्ञानं च योग्यतानुसारेण भिद्यते। अनेनोत्तमयोग्य
तावतां भेदज्ञानेऽधिकार इतरेषामुभयेषां यथासंभवमन्यत्रेऽनुक्रमं भवति। ननु दृश्यमानत्वान्नित्यानामपि जन्मादिकमस्तु तन्मायायामयमितिमाशंकीत्या
ह। एवमपीति। एवमपि नित्यत्वेऽपि। अत्र जननादिलक्षणसंसारे सर्वेषां देहिनां कालावयवतः रात्रिंदिनाद्यवच्छिन्नेषु कालावयवेषु देहयोगतः देह
संबंधेन जन्माव्ययौ भावाः। असकृत् संतति प्रवाहतः सन्त्यादित्यर्थः। देहापेक्षमनित्यत्वं जीवानामित्येतदप्यनुसंधेयं॥ ॥

एम

५०

तत्सूपद्रमुपिद्धत्वात्स्वतत्यत्वं न स्तुत इत्याशंक्याध्यक्रियाद्योपपत्त्वात्स्वाभाविकमेवेति भावेनाह। तत्रापीति। तत्रापि जन्मादिमत्त्वेऽपि कर्मणां कर्तुः जाता
वेकं वचनं। अथातं भ्रं च कर्मफलसुखदुःखानां भोक्तुः स्थातेष्वेतज्ञातामवरनियतत्वम वेदजनस्योत्तमत्वं लक्ष्यते दृश्यते भवतो निर्णोधः। ततः किमत्राह। को
व्रिति। कोवाऽर्थः पुरुषार्थः सुखलक्षणं विवशानां च वशं पुरुषं भजेत्। न कोऽपि पुरुषार्थः। कं पुरुषं पुरुषार्थं आप्नोतीत्यस्यापीदमेव व्याख्येयं। विशिष्टपुरुषं व
शं पुरुषं भजेदिति। अत्र विशेषेहस्थाभिकानां वशत्वान्नु परं सुखमेव तु। तदन्येषां वशेयस्तः किं सुखं तत्स्यभएपतां। स्वाधिकानां वशत्वं च तेषु भक्तिमतः सुखं।

मा ह

तत्रापि कर्मणां कर्तुरस्वातंत्र्यं च लक्ष्यते। भोक्तुश्च सुखदुःखानां कोऽन्वर्थो विवशं भजेत् ॥१७॥
न देहिनां सुखं किंचिद्विद्यते विदुषामपि। तथा च दुःखमूढानां वृथाऽहंकारिणां परम् ॥१८॥

तदन्येषां तु दुःखायतत्स्माज्ञस्य धिको भवेदिति। अनेनावगंतव्यः। अनेन मुक्तावप्यनियतत्वे संसारधर्मत्वात्तदर्थेनिश्चयतनीयमितिशंकानिरस्ता। अ
वकेशुल्य माह। नेति। विदुषामपि देहिनां देहाभिमानिनां यदा सुखं न विद्यते तदा दुःखमूढानां अहंकारिणां च सुखं नास्तीति किं तथा ज्ञानरित्यर्थः। पुनः
शब्दे प्रसक्तानापेतितथा शब्दमूरीर्मत इति वचनात्तथा शब्दः पुनः शब्दार्थे वर्तते। दुःखमूढे ष्योप्यहंकारिणामात्मन्यविद्यमानगुणारोपवतां सुखं नास्ती
तिकिं पुनस्त्वरामतिच योज्यं। यावद्देहाभिमानित्वं अधिकं तावद्दुःखित्वं ज्ञातव्यमित्यतो देहमानिनश्चेत् दुःखमूढा इत्युक्तां परमित्यनेनाभिमानित्वमे
वप्रयोजनमिति॥ ॥

भा॰ ए॰

५१

नत्र स्वस्तानां दुःखादिकं तत्परिहारः। र आस्वपायानभिज्ञानादग्निष्टोमादिना तदभिज्ञानां तो सुखप्राप्तिदुःखपरिहारो स्यातामित्येतदनुद्य परिहरति य
ततिः। ये तु लोके विद्वत्त्वेन प्रसिद्धाः पुत्राद्युपायैः सुखस्य प्राप्तिं दुःखस्य विघातं परिहारं जानंतीति मतं तेप्यद्धा सत्यं यथार्थयोगमुपायं न विदुः। कुतो न विदु
रित्यत आह। मृत्युरिति। यथा येनोपायेन मृत्युः संसारो न प्रभवेत् नो कुरीकुर्यान्ति देहं नित्यं बहुतरदुःखप्रदत्वादित्यर्थः। ननु अर्थकामौ तदुपायः स्यातामत आह। को
न्विति। अंतिके स्थितमृत्युमेनं पुरुषं अत्र दृष्टांतमाह। आघातमिति। आघातं मरणस्थानं प्रति नीयमानस्य वध्यस्य पुंसो यथा सुखं नास्ति तथेति। ननु स्वर्गका

म।

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः। तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा १९ कोन्वर्थः सुखयत्येनं कामो वा मृत्युरंतिके। आघा
तं नीयमानस्य वध्यस्येव य देपरे २० श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः। बह्वंतरायैः कामित्वात्कृषिवच्चापि निष्फलं २१

विहतं

मस्य सुखहेतुत्वात्स्य यथा तत्कर्मानुष्ठानं व्यर्थं स्यादतः कथं कामो वा न सुखयतीति तत्राह। श्रुतं चेति। कामस्य कर्मद्वारा सुखहेतुत्वेपि तन्नित्यं नह्य
णिकत्वात् दृष्टवत्कर्मनिर्मितमंदिरादिवद्विध्वंसकर्मीयता सुसिद्धवक्त्वं च उयोजकं नेमुक्तिर्वा नित्यत्वमिति वाच्यं। ज्ञानसाध्यत्वविधौ वा स्वर्गकामिना
नुष्ठेयमानमग्निष्टोमादिकं निश्चितफलं न स्यात्। बह्वंतरायविहतत्वकृष्यादिकामवदित्याह। स्पर्द्धेत्यादिना। यथा कृषिर्वाणिज्यादिकं। मिथ स्पर्द्धासूयादि
बह्वंतरायैर्विहतं भवति। तथा स्पर्द्धादिप्रयुक्ताभिचारिककर्मणा उन्मादादिना प्यग्निष्टोमाद्यनुष्ठानमपि कुंठितं। अत्ययो विध्यतिक्रमणं। अप्ययोत्र
सालेमरणं॥ ॥

च

राम

५१

वीकी २

ननु सत्कृष्यादिरिव सुनिष्ठितोग्निष्टोमादिधर्मः स्तत्फललब्धकः किं न स्यादत्राह। अंतरायैरिति। तेन धर्मेणार्थकामयोः सुखहेतुत्वाभावोपि स्वनुष्ठितस्य धर्म
स्य तद्धेतुत्वं स्यादित्यतो वाह। अंतरायैरिति। निजधर्मार्जितान् देवीनामप्सरसां। सुराक्रीडेषु देवक्रीडास्थानवनेषु समाप्यते क्षीयते। इतो सुराणां वेला वा चार्थे
यत्नं कृत्वा स्वर्गं गत्वा कर्मफलं भुक्त्वा मर्त्यलोकमागतानां गतिमाह। यदीति। आलभ्य हिंसित्वा मनुष्ययाज्ञिकस्य स्थितिमाह। कर्माणीति। मर्त्यधर्मिणो
मरणधर्मिणः पुरुषस्य तत्र देहे किं सुखं लभ्यते। न किमपीत्यर्थः। न केवलं लोकत्रयस्यानित्यफलत्वं तत उपरितनानां महल्लोकपर्यंतानामप्येवमेवेत्या

अंतरायैरविहतो यदि धर्मः स्वनुष्ठितः। तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु २२ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः। भुंजीत देववत्तत्र भो
गान्दिव्यान्निजार्जितान् २३ स्वपुण्योपचिते शुभ्रे विमान उपगीयते। गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् २४ स्त्रीभिः कामयानेन किंकिणीजा
लमालिना। क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः २५ तावत्स मोदते स्वर्गे यावत्पुण्यं समाप्यते। क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः २६
यद्यधर्मरतः संगादसतां वाजितेंद्रियः। कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः २७ पशूनविधिनालभ्य प्रेतभूतगणान्यजन्। नरकानवशो
जंतुर्गत्वा यात्युल्बणं तमः २८ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः। देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः २९ लोकानां लोकपालानां म
द्भयं कल्पजीविनां। ब्रह्मणोपि भयं मत्तो द्विपरार्धपरायुषः ३० गुणाः सृजंति कर्माणि गुणोनुसृजते गुणान्। जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफला
न्यसौ ३१

ह लोकानामिति। एवं मनुष्याणि ब्रह्मपर्यंतलोकानां लोकपालानां च सृष्ट्यादिकर्त्ता कालात्मकेन भगवता मायागुणोपादानत्वेन तत्कर्मानुगुणादुत्प
वर्त्तितत्वात् स्वतंत्रानमेवात्यंतदुःखनिवर्त्तकत्वेन नित्यसुखदायीति भावेनोपसंहरति। गुणा इति। गुणाः सत्वादयः प्रकृते कर्मफलभोक्तृत्वमिति मिथ्येत्य
त्याह। जीव इति। तु शब्देनाचेतनस्य भोक्तृत्वानुपपत्तिं दर्शयति। सत्वादिगुणयुक्तः॥ ॥

एवं जीवपरभेदं प्रतिपाद्य तदभेदमतमनुद्य दूषयति। यावदिति। यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयमित्यन्तोऽयं ग्रन्थः पूर्वपक्षीयः। य एतन्मतमुपासीरंस्ते मुह्यन्ते ऽप्येतमसि
एवं जीवपरभेदं प्रतिपाद्य तदभेदमतमनुद्य दूषयति। ... गुणव्यतिकरे सति मुक्तिदशायां च बहुधा कालादिनामभिर्मामुपासते इति प्राहुर्वेदस्य इतिशे
षः द्वंद्वं तिदुःखोद्रेकात्। तर्हि सिद्धान्तः क इतितमाह। काल इति। गुणव्यतिकरे सति मुक्तिदशायां च बहुधा ... उपासते ...
पः। कालः सर्वगुणोद्रेकात्प्रसत्वात् नाम कः आगमो वर्तेत ... भेद बुद्धिश्च यावत्स्यात्तावदीश्वरतंत्रता। यावदीश्वरतंत्रत्वं ता
वन्नैक भागिनः। तदेतत्त्वमज्ञात्वा प्राहुर्दुर्मतयः परे। यावन्नु गुणवैषम्यं तावन्नानात्वमात्मनः।

यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः। नानात्वमात्मनो यावत्पारतंत्र्यं तदैव हि ३२ यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयं। य एतत्समुपासी
रंस्ते मुह्यंति शुचार्पिताः॥ ३३॥ कालआत्मागमो लोकः स्वभावो धर्म एव च। इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ३४ ॥ ॥

...तस्मान्नित्यं तु नानात्वं जीवानामीशतंत्रता। स्वाधिका
वत्तस्मादयं भवेत्। उपासते य एवं तु नित्यशोकेऽपतंति ते। मज्ञानमस्य नानेदं तस्मान्नैवं विचिंतयेत्। तस्मान्नित्यं तु नानात्वं जीवानामीशतंत्रता। ... कालादिनामानि हरेरेव ... गुणव्यतिकरे सति ...
नां वशत्वेऽपि मुक्तावपि सरेश्यते। एवं ज्ञात्वा विमुच्यंते यागानंदं व्रजंति ये ... इति कालः सर्वेषां सर्वस्मात् ...
मग्नेः ... इति भावः। कलकामधेनावितिधातोः कमनीयानां गुणानां धेनुरिवेति कालः सर्वेषां सर्वस्मादाम ... स्वभावो ...
वगच्छतिजानातिसर्वमित्यागमः। लुकृ प्रकाश इतिधातोः प्रकाशापरपर्यायज्ञानस्वरूपत्वाल्लोकः। स्वाधीनो भावः ...
त्यर्थः। धारयतिसर्वमितिधर्मः॥ ॥

भावदुःखासम्पन्नस्य ज्ञातत्वीक्ष्यरेणेशेषु ... गुणेष्विति। ... इहेषु गुणेषु
शादिविषयेषु वर्तमानोऽपि गुणैर्विषयैर्न बध्यते उत बध्यते द्वितीये कथं बध्यते इति कोऽर्थ इति तत्राह कथमिति। यदि बद्धः तर्हि केन प्रकारेण वर्तेत। लोके बद्धस्य प्र
... इति। बद्धस्य विभोगाभावे मरणं स्यादतः किं भुंजीतेति। भुंजानस्य ज्ञातोपादाने दृष्टे। तत्रा
स्य दर्शनात्सेष्टादिलिंगाभावेन तत्स्नानं च दुराप इति भवेनाह। ... इति।

उद्धव उवाच

गुणेषु वर्तमानोऽपि देहजेष्वनपावृतः। गुणैर्न बध्यते देही बध्यते वा कथं विभो ३५ कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्ष
णैः। किं भुंजीतोत विसृजेच्छयीतासीत याति वा ३६ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर। नित्यबद्धो नित्यमुक्त एक एवेति मे मतिः ३७
इति श्रीभागवते महापुराणे भगवदुद्धवसंवादे दशमोऽध्यायः ॥ ॥

...इत्येन एकजीवत्वादिमत
यं किं जहाति। बद्धः शयनाद्यन्यतमं करोति। तत्रायं किं करोति। ब्रूहि। परिहारेणास्पष्टीकुरु। एवं पृष्टस्तत्र वक्तोऽभिप्रायः ... देवात्ममतं ब्रुवन्नेव दुःख्यत्यमत्येन
मवलंब्य प्रश्नबीजमाह। नित्येति। कुत एतदितिचेत्तन्न मे मोक्षो न बंधनमित्यादिपरिहारात्। शिष्योऽपि पूर्वपक्षस्य ...
स्थिरत्वार्थं हीनदृश इतिवचनादुद्धवस्य नामस्यतादोषोऽपि इत्येकादशे दशमोऽध्यायः ॥ ॥

नेदृग्ज्ञानमेव मुक्तिसाधनं तत्साधनं भक्तिश्च स्पष्टं वैराग्यं इत्येतत्सर्वं वितत्य निरूप्यापेक्षयति। मत्तो दोषगुणेष्वित्यादिना यदुक्तं बद्धोबंधं तत्परिहरति बद्ध इत्या
दिना। बद्धो मुक्त इति व्याख्या जीवस्येति शेषः। हि शब्द एवार्थे जीवस्यैवेत्यर्थः। स्वतः चिद्रूपस्य कथं घटत इत्यत आह। गुणत इति। सत्वादिगुणसंबंधनिमित्त
यत्वस्य एतत्संबंधः कथं मत्त आह। मे इति। गुणानां जीवस्य च मम वशत्वान्न द्वयोर्न परस्परं नित्वायां दुर्घटघटकशक्तिमत्त्वान्ममेत्यर्थः। तर्हि शिवलाहृतशरीरत्वा
करणस्य सुखमत्राह। न वस्तुत इति। वस्तुतस्त्वात्मा नित्यनिवृत्तः केवलः छायातत्वात् मिथ्येत्यर्थः। गुणसंबंधत्वात् भवत एव तौ किं न स्यातामत आह। गुणस्ये
ति विवक्षयैकवचनं। गुणानां मायामूलत्वात्स्वतः कर्तृत्वेन संबंधः। अतोहं निर्गुण इत्यतो बंधमोक्षौ न स्त इति भावः। ब्रह्मण एव मायामयौ बंधमोक्षौ नाविद्यमान

श्रीभगवानुवाच ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनं ॥ १ ॥
शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया। स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥ २ ॥

जीवस्येत्यंगीकर्तृगुणितेः प्रतीत्यत्वात् आश्रमातिकोध्याहारोपुक्तरदिदंवोध्यं। अमायत्वान्निर्गुणत्वं बंधमोक्षौ न वा पि मे। मदधीनस्य जीवस्य बंधमोक्षौ संदेवत्विति
स्पष्टप्रमाणवचनेन परिहृतमिति तत्वमनोरथकल्पनमनं प्रकाशयेति। जीवस्य संसारो वास्तवो न चेत्तर्हि किंस्वाश्रयमस्येत्याशंक्याज्ञानाश्रितिः मोहाहरण
माह। शोकमोहाविति मायया अज्ञानेन। यथा स्वप्ने स्वप्नोपमितिस्वज्ञानेन आत्मना। शोकमोहादिख्यातिस्वयथास्वरूपज्ञानेन शोकादिनिवृत्तिस्वरूपस्य तस्य सुखात्म
कत्वात्तस्मादर्थक्रियाकारित्वेन संसृतिः सत्यापि न वास्तवी प्रतीतिं तु प्रशाम्या भवतीत्यर्थः। स्वप्नोपममिति विज्ञानात् प्रेदुःखमुपाकृते। निजस्वरूपानुभवरोदि
त्याद्ददेवत्वात्पृथग्दुःखमपि प्रोक्तं विस्तृतत्वं न पश्यतः तस्मान्न रस्य भावत्वात्सरत्येतद्वा स्वप्नमितिवचनात्। स्वप्नदृष्टान्तेन संसारस्य मिथ्यात्वमुच्यतेति॥ ॥

अत्र मायानिवृत्तिः किं न स्यात् यथाप्रसिद्धेरित्यतः तं निराकरणमाह। विद्याविद्येति। मम तनू प्रतिमावस्थिते। किंकार्यमित्यत आह। शरीरिणां देहिनां बंधमो
क्षकरी। आद्ये अनादितो विद्यमाने। मे मायया प्रकृत्या निर्मिते। मम इच्छावशं गते इति च। मञ्चाम्नरूपत्वे विद्याविद्ये मम तनू प्रतिमावत्सदोदिते। मन्यतिरि
क्तस्य नित्यज्ञानसुखात्मनः मदिच्छावशगो नित्यमविद्यानिर्मितिगुणाः मत्वाद्या मदधीनत्वादविद्यायाः न मे गुणाः। अविद्याचैव विद्या च गुणाः सत्वादि
काः अपि देहोत्पत्तिः सुखं दुःखं सर्वमेतन्मदिच्छया अतोहं बंधमोक्षाभ्यां रहितो नित्यमेव मुक्तश्चोदितो बंधराहित्यात्तु विमोक्षस्तदातिप्रमाणविरोध आपद्यते
मोक्षबंधकत्वं चाभिमानिदेवतासामर्थ्यात्। तत्र क्रियाभिमतप्राकृतसत्वगुणजाता विद्या। दुर्गाधिकृततमोगुणजन्मा त्वविद्या। तदुक्तं श्रीः क्रियाः सत्व इ

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां। मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ॥ ३ ॥
एकस्यैव ममांशस्य जीवस्यैव महामते। बंधोस्याविद्ययानादिर्विद्यया च तथेतरः ॥ ४ ॥

त्वा दुर्गाविद्याप्रकीर्तिता। तत्वनाहीहरेरिच्छानिपतेत्सर्वदेवत्विति। अदेही वध्यते चेत् कथं वध्यत इति परमात्मविषयः प्रश्नः। मे गुणतः बंधमोक्षाविति
परिहारोपि। तत्र जीवस्यैवता विविभवद्भिरुच्यते अतस्तदं कथं संगच्छत इति तदक्षु शंकापरिहरत्नुपसंत्यति। एकस्येति। जीवपरमात्मेति द्विविधं तत्वं तयोरेक
स्यैव बंधमोक्षौ सकदत्यतो ममांशस्येति। सकिं स्वरूपांश इत्यतो जीवस्येति। जीवो भिन्नांश इति। भिन्नांशस्यैव जीवस्य बंधमोक्षौ न मेकदाचित्। अभिन्नांशा
स्यमत्स्याद्यातेष्वसः कालवद्भिवत्। जीवाभिन्नांशकाश्च तन्नसः प्रतिबिंबवत् इति अनेन सिद्धं। किमुक्तं स्यादित्यात आह। एवमिति। एव मुक्तविषयस्य जीवस्याभि
द्ययानादिर्बंधः तथा विद्ययेतरत्। मोक्षस्तदंशस्यैपरत्यर्थः। अतः परमात्मा कथं वध्यत इति प्रश्नोनुपपन्न इति भावः॥ ॥

स्वातंत्र्या

एकस्मिन्भोगायतने स्थितयोर्जीवपरयोरेकस्य जीवस्यैव तौ स्त इति प्रयुज्यते। तत्र विवेकज्ञानं कथं स्यादत्राह। अथेति। यतो जीवस्यैव बंधमोक्षौ। अथ तस्मात् बद्धस्य जीवस्य मुक्तस्य विष्णोर्वैलक्षण्यं। अस्वातंत्र्यादिलक्षणं तेतुभ्यं वदामीत्यन्वयः। मुक्तनामत्वं च हरेरेव मुख्यं नित्यमुक्तत्वात्। बद्धत्वपि नामैतद्वीप्यते मोदि क्तेत्यादि पदानां हरावेवेत्युच्यत आदित्यादिषु तत्प्रोक्तमध्यानवचनात् सिद्धं। मुक्तस्य न मे मोक्षो बंधाभावात्कथं च ना मुक्तश्चापि नामैतद्वीप्यते मोदि

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते। विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ५ ॥

वाक इति बत्वं बंधएव हि त्यान्नतु कश्चिद्दिवदीप्रिवत। कादाचित्कतया वाच्यं बंधाभावाद मोक्षतः। जीवस्य बंधमोक्षक्रमस्य सादाकथं च नेति तत्वोस्य वचनाबोक्तार्थसिद्धिः। बद्धस्य जीवस्य। बद्धा जीवा इमे सर्वे पूर्वबंधसमन्वयात्। नित्यमुक्तस्ततो विष्णुर्मुक्तनामा सदोदितः। अबद्धत्वादमोक्षोपि प्यते मोरविर्यथेति स्पष्टप्रमाणात। सति वैलक्षण्ये बद्धाबद्धव्यवस्था बक्तुं शक्या तदेवकथमित्यत उक्तं। विरुद्धधर्मिणोरिति ॥ ॥

तत्र प्रथममेकधर्मिणी मुक्तं विवृणोति सुपर्णाविति। पृपालनपरतायोरिति धातोः। सुष्ठु पालकत्वात् पूर्णत्वाद्धरिः पालयत्वाच्च पर्णत्वाच्च जीवोपि सुपर्णः इत्युच्यते। अयं च विरुद्धधर्मेष्वितरस्यते विज्ञानंदत्वेन सदृशौ तत्त्वसमानधर्मे हृदि स्थितत्वात् सखायौ। यदृच्छया स्वेच्छया। अथ विरुद्धधर्मानाह एक इति। पिप्पलं कर्मफलं जीवान्योहरिर्निरन्नोभोगरहितोपि बलेन भूयान् तुष्टश्च अदनं निमित्तं बलेनाधिक्यमर्थः। आत्मानं सुष्ठु अन्यं जीवं च अबोधो भगवद्विषयज्ञ कइति। पिप्पलं कर्मफलं जीवान्योहरिर्निरन्नो भोगरहितोपि बलेन भूयान्। सुष्ठु अदनं निमित्तं बलेन नान्यस्य अर्थः। अचानन्नन्योपि चाकशीतीत्यादेयद्वा नाद्य भावेन विष्णुः। बद्धो भगवदधीनः। अनेन श्लोकद्वयेन द्वासुपर्णा सयुजा सखाया इत्यादि श्रुतिर्विवृता। अचाननन्योभिचाकशीतीत्यादेः

सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे। एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोपि बलेन भूयान् ६ ॥
आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः। योविद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७ ॥

हरेरेव ज्ञानमुच्यते। तत्र दुःखाद्यनशनमेव न तु सुखानशनमित्यादि सर्वं। अनन्यत्वं हरेर्दुःखानशनत्वादुच्यते सदा। विषयाद्भिन्नापि शीर्णत्वान्न रूपानंद भोगिनः। सुखमत्ये वहि सदा सर्वत्रापि स्थितं विभुः। स्वादीरदनं वद्यति जीवो स्वाद्भुतियत्सदा। अन्नं ततं पारवश्यात्स्वात्त्वज्ञीति ततः श्रुतिरिति। अविद्या युक्तबाद बतिजीवोनेवं जमार्द्दनः। अतो नात्रीति वचनमभ्रान्तो विष्णुरंगमुदेति। साक्षान्नारायणत्वेन नारदे॥ ॥ ॥

भा॰ ए॰

५५

वोयथोदितो। अग्निं विनाप्यहोर्बल्यान्न यान्ति हरिर्भुज इति वक्ष्यमाणमिहोयमर्थः। न देवाप्रोक्तं। निरवोपि बलेन भूयानितीति। स्वयंबूवना
दननिवंधनं तस्य वलंकृतः। यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति। इतो विश्वस्य भुवनस्य गोपा स मा धीरः पाकमत्रा विवेश।
यस्मिन्वृक्षे मध्वदः सुपर्णा निविशंते सुवते चाधि विश्वे। तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेदेत्यादिवाक्यशेषात। इत्ते छित्वाम
ध्वदः सुपर्णा यस्मिन्नश्नंति सुपर्णे अधिविश्वे सुपर्णा निविशंते। तदाधारत्वेन सुहृत्तेच तस्यैव सुपर्णस्य स्वादु पिप्पलं। अन्यस्त्वस्वादु वदन्नाति
नस्वादुयावत्यितरं परमात्मानं न वेदेति। सुपर्णोऽहो शरीरस्थो जीवश्च परमस्तथा। पारवश्ये दनाज्जीवस्त्रात्रीत्रिष्टो मोयुतः। स्वत्वशेनादनादि
स्तुर्नात्री त्यत्रापि सरश्रुतः। स एव हि शुभस्यान्नाजीवोल्पस्यैव वेदनादिति वचनादत्र जीवपरमात्मानावेवोच्येते। न सामान्यपक्षिणाविति
ज्ञायते। सर्ववागत्री तितद दितेरदितित्वं यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। अत्राच रस्वरश्च इत्यत्र। अयं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च इ
त्यादेश्च। अतएवत्वस्य लिंगत्वेनोक्तत्वात् लिंगस्योभयसंप्रतिपन्नत्वेन निर्णयहेतुत्वाद्धरेर्न सर्वात्मनानन्त्यमत्रोच्यते। किं तु अप्रभुत्वेनानन्त
लक्षतेः कृतार्थत्वेन प्रामाण्यसंभवान्नश्रुतिः धारणानाम समाकं न कापि स्तुतिरिति। जीवो मुक्तो विनोजीवान्य परमात्मानमेवच। वेचित्सर्वात्म
नाविस्तुर्वेत्त्येकः पुरुषोत्तमः। तस्य प्रसादतः किंचिद्ब्रह्माद्या अपि जानते। अन्यजीवानपेक्ष्यैको जानाति तु चतुर्मुखः॥ ॥

राम

५५

स॰

सामस्येन तदन्ये तु लेशज्ञानाः क्रमात्स्मृता इत्यनेन आत्मानमन्यं च स वेदेत्येतद्दिष्टं। सर्वज्ञत्वं लिंगं हरेरिक्तनिष्ठानदुक्तं। नान्य इवेद सर्वाणि तत्त्वं वेत्यपरं
तपेत्यादि। मुक्तेऽप्रतिव्याप्तमिदं लिंगमिति चेन्न। अज्ञातानीवाक्कथ्यंते मुक्ता अप्यल्पवेदनात्। इदुत्येवोच्यते नित्यं सर्ववेत्तत्वतो हरिरिति वचनात्। अनाद्य
विद्ययाबद्धत्वं जीवस्य यदियोग्यता। प्रयत्नश्चानुकूलः स्यात्संतत्वं बहुवतिश्रुवं। नित्यादेवान्यथाबन्धत्वं अयोग्यपां मानुषादयः। बहुत्वं सर्वजीवानां नियमान्नि
त्यमेव तु बद्धत्वं विभ्वधीनत्वमधत्वं तदर्शनं। अतः क्वचिदनित्यत्वमंधतायां भविष्यति। मुक्तस्यापि तु बद्धमस्त्रियत्वं हरेर्वशः। मुक्ताःस्युर्दुःखविमोक्ष
दुहाब्याहर्यधीनतः। नित्यबद्धा अपि ततो मुक्ता दुःखविमोक्षतः। नित्यमुक्तस्त्वेक एव हरिर्नारायणः प्रभुः। स्मृतं च त्वात्तं तत्त्वं तस्यैकस्य न चापर इ
त्यनेन सोपपत्तिकेन यो विद्यायोधः स तु नित्यबद्धो विद्यामयोः स तु नित्यमुक्त इत्येतद्दिष्टं। शतं सहस्राणि चतुर्दशेह परागतिर्जीवगणस्य देत्य
अरोहणं त्वकृतमेव विद्धि स्थानं तथानिःशरणं च तेषामिति जीवगणस्य गतिवाक्यप्रवेशनिर्गमनप्रतीतेर्नित्यमुक्तत्वं हरेर्लिंगं न हरेरन्यत्र
गतमतः स एव नित्यमुक्तः। ननु मुक्तैः सेव्यत्वे मुक्तमुक्तं तत्कथमिति चेन्न कृष्णो मुक्तैरिज्यते वीतमोहैः। मुक्तानां परमा गतिरिति वचनात्। तस्थि
तच्छ्वेतद्वीपनिवासिनां मुक्ता खोति।
धोक सानुमुक्ता खोतिचेन्न सर्वात्मना पंचदशकलानां त्यागान्नतरं तदाख्या। तदुक्तं कलाः पंचदश त्यक्त्वा श्वेतद्वीपनिवासिनां मुक्ता इत्यन्याधीनत्वादपि
पश्चादपि स्वतंत्रा इत्यतो विश्ववधीमाह्न इति। यत्प्रसादात्कलामोक्षः तदधीनत्वमञ्जनाम्याधीनताप्यतः स्वाधिकानां वशोस्थिता इत्यन्याधीनत्वादपि
पश्चादपि स्वतंत्रा इत्यतो विश्ववधीमाह्न इति। नित्यमुक्तः स एवेकः
कंसुखं नास्तीत्यत उक्तं। न चास्मादपि कं किंचित्सुखमस्ति हरेर्विनिति। अतो नित्यमुक्तत्वं सूतं त्रत्वं च नान्यनिरुक्तमित्युपसंहरति। नित्यमुक्तः स एवेकः
स्मृतं च संयतः स्मरेति॥ ॥

भा॰ए॰

५६

ननूभयोर्देहस्थत्वाविशेषाद्देकस्य मुक्तत्वेन दुःखानुत्पत्तिरितरस्य बद्धत्वेन दुःखादनं कथमित्याशंक्य विद्वत्वाविद्वत्वे कारणमिति भावेनाह देहस्थोपी
ति। विद्वान्नित्यनिर्दुःखानंदानुभवः सर्वज्ञः श्रीहरिः देहस्थोपि देहाभिमानाभावात् न देहस्थोपि तत एव दुःखं नास्ती ति कथं स्वप्नादुत्थितः पुरुषः स्व
प्नविषयसुखदुःखादिकं न भुंक्ते। तद्वदिति। एतदेव विवृणो
ति। नदुःखादिकं नान्वितत्वेति। कुमतिरविद्वाञ्जीवो देहाभिमानित्वात् देहादन्योपि देहस्थोऽयथा स्वप्नदृक्स्वप्नदृष्टदुःखादिकं भुंक्ते। तथेति। एतदेव विवृणो
ति इंद्रियैरिति। गुणेर्हरेरप्रधानैर्जीवैः श्रोत्रादीन्द्रियैः गुणेष्वप्रधानेष्वर्थेषु विषयेषु गृह्यमाणेषु सत्सु यस्त्वविक्रियः। सोशोहं छिन्नोहमित्यादिवि
कारहितो विद्वान्परमात्मा सहं न कुर्यादित्यन्वयः। शरीरस्थोपि विद्वान्नान्यत्र तैर्बध्यते कचित्। अविद्वत्वात्तु तत्रैव देहे जीवः स्वबध्यते। स्वप्नदृष्टवि
कारहितो विद्वान्परमात्मा सहं न कुर्यादित्यन्वयः। शरीरस्थोपि विद्वान्नैव तैर्बध्यते क्वचित्। अविद्वत्वात्तु तत्रैव देहे जीवः स बध्यते। स्वप्नदृग्यथा

देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ८ ॥
इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च। गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ९ ॥

मे जीवो हरिः सुप्रोत्थितो यथा। स तात्मा विद्वानोपि ज्ञापनार्थमुदीर्यत इत्यनेन। आत्मनोवशगे जीवैरात्मनोवशगेषु च। दुःखेषु गृह्यमाणेषु मनन्या
दिभिरिंद्रियैः। अहं दुःखीति नैवेश अहं कुर्यात्परः पुमान्। जीवगत्वेवत्तदुःखं किंतु पश्यति सर्वदा। अतोन दुःखभाक्किंतु स्वातंत्र्यात्तु रूपोत्तमः। ख्या
रतं आदहं दुःखीत्येवं जीवः प्रपश्यति। तस्मात्तु दुःखभाग्जीवः पदरशः प्रसीदतीति अनेनचानयोः श्लोकयोरर्थो विवृत इति। जीवगत्वेच तदुःखं वि
स्तुः पश्यति सर्वदेत्यनेन अभिवाक्यशीतीत्यस्यार्थो सूचित इति॥ ॥

एग

५६

जीवस्य दुःखभाक्त्वे कर्त्राभिमान एवानर्थप्रवाहहेतुरित्याह दैवेति दैवाधीनेस्मिन् शरीरे वर्त्तमानोबुधो जीवः अस्मिन् कर्मण्यहं गुणस्तत्तो स्वतंत्रे रेशाधीनः
जीवस्याहमस्मीत्यभिमान एवानर्थप्रवाहहेतुरित्याह दैवेति दैवाधीने अस्मिन् शरीरे वर्त्तमानोबुधो जीवः अस्मिन् कर्मण्यहं कर्ता स्वतंत्रः। स्वतंत्रोस्मीत्येवं जीवः प्रभावेपरवध्यते ईशको
इति भाव्येन भावनीयेन कर्मणा अहमेव कर्त्तास्मीतिमन्यमानस्तत्र शरीरे नितरां बध्यत इति। अस्वतंत्रः स्वतंत्रोस्मीत्येवं जीवः प्रभावेपरवध्यते ईशको
पेन राजभावेन भृत्यवदिति वचनात्। स्वातंत्र्य कर्त्तृत्वाभिमानो अविवक्षित इति। अत्राप्यस्वातंत्र्यं दैवाधीन इत्यनेन सूचितं कालोपि शरीरस्यानेतामीरयत
ति शरीरस्यकालाधीनत्वं चतर्हि किं पंककारेन बध्यत इति तत्राह। एवमिति। एवं शयनादिषु स्वस्य स्वातंत्र्याभिमानेन बध्यमानस्तत एवापारदुःखमनुभव
न विद्वानेषु विरक्तः। तत्र तत्र हरिः स्वातंत्र्यं च विद्वांस्तत्र तत्र शरीरयात्रार्थं गुणान् विषयानाददः स्वीकुर्वन्यथा कर्त्तृत्वाभिमानिवन्न बध्यत इत्यन्वयः। गुणा

दैवाधीने शरीरेस्मिन्गुणभाव्येन कर्मणा। वर्त्तमानोबुधस्तत्र कर्त्तास्मीति निबध्यते १० एवं विरक्तः शयनासनाटनमज्जने। दर्शनस्पर्शनघ्रा
णभोजनश्रवणादिषु ११ न तथा बध्यते विद्वान्तत्र तत्रादयन्गुणान्। प्रकृतिस्थोप्यसंसक्तो यथा खं सवितानिलः १२ वैशारद्येक्षयासंगशित
याछिन्नसंशयः। प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्त्तते १३ ॥ ॥

नुगुणपलक्षणान्न दददत्उपार्जयन्निति वा भेदज्ञानिन एव बद्धत्वं नाभेदज्ञानिन इत्यनेनोच्यत इति किं न स्यादिति चेत्। नित्यबद्धोपि जीवोपमात्मनो नित्यव
हृता विष्णुना नित्यमुक्तत्वं तस्य वेत्तिस मुच्यते। तदधीनत्ववंधेत्तु विद्यमानेप्यदुःखभाक्। देहस्थोपि न दुःखी स्यात् अन्यथा किमु मुक्तिगा इति वचनात्। जीव
मित्र विष्णुज्ञानाद्वंधमोक्षव्यवस्थोपपन्नेः। एतज्ज्ञानफलमाह। प्रकृतिस्थोपि असंगेन वैराग्येण शितया तेजितया वैशारद्या विशारदभूतया विज्ञो रुषय
हा तुत्पन्नया ईक्षया अपरोक्षज्ञानेन छिन्नसंशयोत एवासंसक्तः प्रकृतिस्थः शरीरस्थोपि ज्ञानी स्वप्नात्प्रतिबुद्ध इव नानात्वात् मिथ्याज्ञानाद्विनिवर्त्तत इत्य
न्वयः। नानात्वमिति वैमिथ्याज्ञाने कुत्रचिदुच्यते। वस्तुयाथात्म्यतोन्यत्वात् ज्ञानस्यो अन्यो विवाक्षित इति वचनात्। नानात्वशब्दस्य मिथ्याज्ञानवाचित्वस्य
प्रसिद्धेः उक्तं स्मृतौ॥ ॥

तु विशदयति।यस्येति।यस्य प्राणेंद्रियमनोधियां चेष्टादि वा ग्राकाशयोः सर्वत्र सत्वेपि तत्रैमित्तलेपाद्यभावो यथा नास्ति तथेति शेषः। जीवन्मुक्तावस्थामेव वदन् वृत्तयः। या वृत्ती लक्षणा वृत्तयः वीतसंकल्पाः फलानुसंधानरहिताः स्युः स देहस्थोपि तदुणोहं हृष्य स्यैः निर्मुक्तो नारिकेलकपालयुक्तोतरुणा नालिकेरवदित्यर्थः। यावदुक्ता रूपातं जीवन्मुक्तः कथंकारं तिष्ठतीत्यत्राह। यस्येति। आत्मा देहः मनो वाः हिंस्रो हिंसा सीलैः प्राणिभिः येन किंचिदनेकेन विशयदक्ष यावत्सिंद्भूनादिना तत्रलस्या मवस्थायां स बुधः नाविक्रियते इत्येतद्विशदयति। नस्तुवीतेति। कुर्वतः पुरुषान्साधु साधु इत्यादि गुणदोषाभ्यां अल्पेन तु छेना गुणेन दोषमात्रे

यस्य सुवीतसंकल्पाः प्राणेंद्रियमनोधियां। ह्त्रयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः १४ यस्यात्मा हिंस्यते हिंस्रैर्येन किंचिद्य दृच्छया तैर्वा क्वचिन्नचन विक्रियते बुधः १५ नस्तुवीत न निंदेत कुर्वतः साध्वसाधु वा। वदतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः १६ नकुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा। आत्मारामोनया वृत्त्या विचरेज्जडवन्मुनिः १७ ॥ ॥

न हेयः सविकल्पकः। सर्वज्ञानिविशेषेभ्यः स ज्ञानी सर्वथाधिक इति वचनादुक्त एवार्थः। अन्यापि भेदः हृष्याभिमानेन चेत्युक्तं। विद्यात्मनि भिदाबोध इति
च वक्ष्यति २४ शतरूपा वराङ्गीणां पुंसामप्यधिको मनुरिति। नारायणः श्च पावतारः २५ धर्माणां सुकृतानां। क्षेमाणां प्राप्तरक्षणां। अबहिर्मतिः
प्रत्यगात्मज्ञानं। गुह्यानां गोप्यानां मौनं वाक्संयमत्वं। अजः संप्रज्ञातसमाधिस्थत्वं वा २६ अनिमिषां कालावयवानां २७ धीराणां गंभीराणां। व्यासानां
वेदविभागं कुर्वाणानां कवीनां वाग्मिनां २८ ॥ ॥

भगवतामैश्वर्यादिषड्गुणवतां देवानां ऐश्वर्यादिगुणैः षड्भिः साम्यात्सर्वे देवताः। भगवच्छब्दवाच्याः साक्षात्तु भगवान् हरिः। विष्णोस्तु साम्यं तस्य स
र्वाधिक्यं यत इति वचनात्। त्वं तु भागवतेष्वहमित्यत्रात्यर्थार्थाः। सर्वभागवताधीशो रुद्रो भगवत्प्रियः। तस्मादप्यधिको जिष्णुः प्रियत्वे भक्तितो हरेः।
तस्मादप्यधिको रामः कृष्णात्वप्यधिकाततः। तस्या अप्यधिको भीमो न तत्समः शः कश्चिदिति स्मृतिप्रामाणि कस्य कः स्यादन्ते हेवधा एव इति च २९ पेशसां
मृदुलानां मध्ये ३० कितवानां दीव्यतां छलग्रहो द्यूतं ३१ सहो बलवतामोजो ... बलयोरेविष्माणां सात्वतानां भागवतानां कर्माहं
मिति विद्धि। सात्वतां पांचरात्रिकाणां श्रियादिनवमूर्तीनां आदिः मुख्या मूर्तिरहं। कीदृश्यपरा पुरा पूर्वकाले प्रथमतः प्रत्याद्रत्यर्थः। विष्णोः श्रियः
ब्रह्मणश्च वायोः संकर्षणस्य च। सुपर्णस्य च संप्रोक्ताः प्रत्येकं नवमूर्तयः। एताः सात्वततंत्रे भूतचाद्यास्तयो हरेः (प्रधान) स्ताहि सर्वासां मूर्तीनां हरिष्ठ

वासुदेवो भगवतां त्वं तु भागवतेष्वहं। किंपुरुषाणां हनुमान् विद्याध्राणां सुदर्शनः २९ रत्नानां पद्मरागोस्मि पद्मकोशः सुपेशसां। कुशोस्मि
दर्भजातीनां गव्यमाज्यं हविष्षहं ३० व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः। तितिक्षास्मि तितिक्षूणां सत्वं सत्ववतामहं ३१ ओजः स
हो बलवतां कर्माहं विद्धि सात्वतां। सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ३२ ॥ ॥

र्थयः। अभेदाद्देवमूर्तीनां एकमूर्तिश्च सा स्मृतेति मानां किंवा स्वरूपतः श्च गुणतो न विशेषः कथंचन। विष्णोस्तु नवमूर्तीनां एकावन नवधोच्यत इति वचना
दासां स्वरूपत्वसिद्धं। नारायणः परंब्रह्म वासुदेवादिकास्तथा। नरसिंहवराहौ च ... हरेर्नवा इंदिरा च रमा लक्ष्मी हरिण्या ... तथा। एका
तएतामिदिंत्रि तिश्रियो नव। ब्रह्मा चतुर्मुखो धाता विधाता विधिरेव च। कर्ता विरिंचो भूतेशः ज्ञानानंद ... वायोश्च नवरूपा
शेषोनंतो नरश्चैव लक्ष्मणो बल एव वा। संकर्षणो नीलवासा जगल्लो जलेशयः। सुपर्णो गरुडश्चैव वैनतेयो महाशनः। नववर्णः पंचवर्णः पन्नगाशो
मृताकरः। तथैव सर्वविदात्मा सुपर्णेन यथा स्मृत इति वचनान्मूर्तिभेदो ज्ञातव्यः ३२ ॥ ॥

गंधर्वाणां विश्वावसुः। अप्सरसां पूर्वचित्तिः। अहमस्मि। गंधमात्रं गंधाख्यविषयः ३३ तेजिष्ठानां अर्चिष्मतां ३४ प्रतिसंक्रमः संहारः ३५ गतिः पादवि
षयः। उक्तिर्वागिंद्रियविषयः। उत्सर्गोपादानम्। उपादानं हस्तयोः। आनंद उपस्थस्य। स्पर्श त्वगिंद्रियस्य। स्पर्श इति विशेषः। आस्वादो जिह्वाकर्म। आकृतिः कर्ण
स्य। तत्क्रिया गिंद्रियविषयः। उत्सर्गोपादानस्य। उपादानं हस्तयोः। आनंद उपस्थस्य। स्पर्श त्वगिंद्रियस्य। सर्वेंद्रियाणामिंद्रियं तच्छक्तिप्रदः ३६ विकारो ब्रह्मांडं। पुरुषो ब्रह्मांडांतस्थितः। अव्यक्तं अचेतनप्रकृतिः। रजआदिकमव्य
योः। अवघ्राणं घ्राणेंद्रियस्य। सर्वेंद्रियाणामिंद्रियं तच्छक्तिप्रदः ३६ विकारो ब्रह्मांडं। पुरुषो ब्रह्मांडांतस्थितः। अव्यक्तं अचेतनप्रकृतिः। रजआदिकमव्य
हां रज आदिशब्दत्वात् रजआदिनाम। सत्वादिनामविशेषकसत्वादिशब्दस्य केवलं जीवशब्दस्य च तत्प्रमजीवाहेरूपचारत इत्यादि वचनात्। गत्यादिनमः पर्यं

विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं। भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ३३ अपां रसश्च परमस्तेजिष्ठानां विभावसुः। प्रभा सूर्येंदुतारा
णां शब्दोऽहं नभसः परः ३४ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः। भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ३५ गत्युक्त्युत्सर्गोपादानमा
नंदस्पर्शलक्षणं। आस्वादश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियं ३६ पृथिवी वायुराकाश आपो ज्योतिरहं महान्। विकारः पुरुषोऽव्यक्तं रजः स
त्वं तमः परः। अहमेतत्प्रसंख्यानं ज्ञानं तत्वविनिश्चयः॥ ॥

त्वं तमः परः। अहमेतत्प्रसंख्यानं। नियामकत्वभाव
मयदार्थास्तत्स्वरूपं किं तत्राह। पर इति। परो विलक्षणो भिन्नः। तन्नियंतृत्वात्तत्वोपदेशः। यस्य यस्य स्वभावो यः तत्तत्राहमिति। एतत्प्रसंख्यानं एतेषा
स्पतत्व ब्रह्माद्विनामवाच। वैशेष्याख्या विभूति श्च विभूतिश्च भावजा। द्विधा विभूतिर्विज्ञेया विशेषक परमात्मन इति वचनात्। एतत्प्रसंख्यानं ...
मव्यक्तादीनां प्रकृष्टसंख्यानं गणनं यस्मात्तत्तथा। ज्ञानं चाहं भगवद्विषयत्वादिहमध्यहं यमितिने माहतत्वेति। इरेरना रोपितं स्वरूपं निश्चयपतीति
तत्वनिश्चयः ॥

ननु गतिरीतिमता मित्याद्युक्तरूपस्थार्थेन पृथक्कृताः पदार्थाः स्युस्तत्वव्याप्तिर्नास्ति। त्वयापि तेन तथात्व पुरुषेणैवेश्वरत्वं स्यान्मिन्याहृदि क्रियाविरोधः स्यादिति
तत्राह। मयेति मया विना क्वचिदपि भावः पदार्थो न विद्यत इत्यन्वयः। पुण्यवत्वं गुणादिलक्षणापरिच्छिन्नपुरुषाकारेणत्वया विना कथं नास्तीत्युच्यते इत्यत्रा
ह सर्वलीति। सर्वं समाप्नोषि ततोऽसि सर्वं इति स्मृतेः सर्वव्याप्य तिष्ठता। ननु वह्नि रेखयामोत्स्वंतरितिमिदं शंकापरिहरति। सर्वात्मनेति। सर्वथा मंत्रश्च व्या
प्तेन। ननु सर्वव्याप्तस्यापि व्योम्नः को विशेष इत्यतो वाह। सर्वात्मनेति। सर्वनियामकेन। ननु ज्ञानादिगुणरहितस्य नियंतृत्वं कथं युज्यते निर्गुणश्च वि
श्रुतेस्त्वाह। गुणिनेति। यः सर्वज्ञ इति श्रुतिः। ननु कदाचिद्दंडिनो यथा दंडाभावेनादंडित्वं तथा स्यापि संभाव्यते त्यत्राह। गुणेनेति। विज्ञानमानंदं ब्रह्मेति
श्रुतिः। न केवलं गुणानामेव तदभिन्नत्वं। प्राणधारकत्वादिक्रियाणामपीति भावेनाह। जीवेनेति। ननु गुणी चेद्गुणः स चेन्न गुणीति युक्तिविरोध इति तत्रा
श्रुतिः। न केवलं गुणानामेव तदभिन्नत्वं। प्राणधारकत्वादिक्रियाणामपीति भावेनाह। जीवेनेति। ननु गुणी चेद्गुणः स चेन्न गुणीति युक्तिविरोध इति तत्रा

मयेश्वरेण जीवेन गुणेन गुणिना विना। सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित् ३८ संख्यानं परमाणूनां कालेन क्रियते मया। न तथा मे
विभूतीनां सृजतोंऽडानि कोटिशः॥३९॥ तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः। वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ४०

हरीश्वरेणेति। अघटितघटकेनश्च नेन वैशेष्याख्यास्वभावजेति द्विधा विभूति रुक्ते विज्ञातव्ये। वैशेष्याख्या विभूतिश्च विभूतिश्च स्वभावजा। द्विधा विभू
तिर्विज्ञेया विशेषक परमात्मन इति वचनाच्च ३८ एवं विभूतीनामनंतत्वमुक्तं स्पष्टयति। संख्यानमिति। कालेन सर्वगुणात्मकेन मया। असंख्येयत्वात्तत
था न क्रियते। विज्ञानात्। अनंतमपि वेत्ति शास्त्रनंतं त्वंतवत्तया। अनंतस्य हि संख्यानेन तु सर्वज्ञता भवेत्। अनंतमपि वेत्त्रीशः पत्ये कंचविशेषतः। सर्वज्ञ
त्वात्संख्यानं अनंतस्य कुतो हि सेति वचनात्। स्वभावजविभूतेर्वैशेष्याख्याकीदृशी त्यत्राह। तेज इति। यत्र यत्र यस्मिन् पुरुषे तेज आदयो गुणविशिष्टाः सं
ति स मेंऽशकः वैशिष्ट्यापादकमदंशयोगी। सौभगं सुनैकभागित्वं। भग ऐश्वर्यादिकः। त्यागो निषिद्धत्यागः॥ ॥

उपसंहरति एताइति। यथान्यैर्वर्णाश्रमाचारीणां नानामार्गिकमग्निमित्रइत्यस्य नामसेवदन्नस्य लिखानं इत्यादिप्रकारेण संकेतितत्वेन क्रियतेतथान्यपदा र्थेषितेसर्वेशाह्यामनोविकाराः मनसावाश्रयेसंकल्प्यतथवाचाव्याहरतिइतिश्रुतेमनः संकल्पविषयान्तुमुख्यत्वाच्च कारत्वर्थः ४१ विभूतिज्ञान स्यफलितार्थमाह। वाचमिति। यतः सर्वशक्तेमप्येवस्तुतो मुख्यस्मा दितरविषयत्वंविज्ञायवागादिकं मय्येवकुर्वित्यर्थः प्राणं सर्वचेष्टां मद्विषयां त द्वारेणेंद्रियाणिमद्विषयाणिकृत्वा आत्मना प्रयत्नेनात्मानंपरमात्मानंलक्ष्यत्वेनात्मानंजीवमपिसर्वात्मनायच्छनियच्छेतिपामकलक्षणासंबंधच त्वेपुनःसंसाराध्वनेनकल्पसइत्यन्वयः ४२ वागादीनां स्वविषयाकरणेबाधकमाह। योवाइति। यतिःप्रयत्नवान्। स्रवतिनिष्फलंभवति ४३

एतास्तेकीर्त्तिताःसर्वाःसंक्षेपेणविभूतयः। मनोविकारएवैतेतथावाचाभिधीयते ४२ वाचंयच्छमनोयच्छप्राणांयच्छेंद्रियाणिच आत्मानमा त्मनायच्छनभूयःकल्पसेध्वने ४३ योवैवाङ्मनसीसम्यक्संयच्छेद्धियायतिः। तस्यव्रतंतपोज्ञानंस्रवत्यामघटांबुवत्। तस्माद्वचोमनःप्राणा न्नियच्छेन्मत्परायणः। मद्भक्तियुक्तयाबुध्यातत्तःपरिसमाप्यते ४४ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेमहाविभूतिर्नामषोडशोध्या यः ॥

मत्सर्वज्ञमत्वज्ञानमेवमुक्तिसाधनमित्युपसंहरतितस्मादिति। ततः ज्ञानसामग्र्यनंतरं समाप्यतेसंसारइतिशेषः। वाङ्मनःप्राणबुद्ध्यादिनियमे के षावेषरेप्सर्वेशक्तिभिधेयत्वंतस्यज्ञात्वाविशेषतः। मुख्यत्वन्यभिधेयत्वंअन्येषामनसोध्वमात। तस्मान्नयाचितयतःस्ववेद्यानंयथातथ्यं। तस्मात्स नोवचःप्राणान्माध्वैकपरामणाः। कुर्यान्नहितपोह्यग्यंमहाधर्म्मोत्तमश्चसःइति। यच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि। ज्ञानमात्मनिमहति नियच्छेत्तंत्वात्मनीतिवाक्यद्वयंतत्कार्थेप्रमाणं इत्येकादशेषोडशोध्यायः ॥ ॥

तत्वद्वर्णादिभिरनुष्ठीयमानेनस्वधर्मेणभगवद्भक्तिर्भवतीत्यतस्तद्वर्णविभागं तत्रतत्र स्वधर्मंनिरूपयत्यस्मिन्नध्यायद्वयेतत्रोद्धवउवाचार्धमनुद्यज्ञा तव्यांशंपृच्छतिय स्त्वयेति। पूर्वंत्वयायस्त्वद्भक्तिलक्षणःत्वद्भक्तिरेवलक्षणंसंपद्यस्यसतथाभिहितः १ तेनस्वधर्मेणानुष्ठीयमानेनवर्णाश्रमाचा रवतांनृणांयथात्वयिभक्तिर्भवेत्तंतथाख्यातुमर्हसीत्यन्वयः। द्विपदामपिवर्णादिहीनानामपियोधर्मस्त्वेनाभिहितियोऽन्वयः २ ननुमयोक्तोधर्मस्त्वया ज्ञातश्चेत्पुनःकिमितिवक्तव्यइतितत्राह। पुरेति। सधर्मइदानींप्रायोंतर्भवता तिरोभूतः अस्यधर्मस्यवक्तात्वदन्योनास्तीत्याह। वक्तेति। तेतवधर्मस्यवि

उद्धवउवाच यस्त्वयाभिहितःपूर्वंधर्मस्त्वद्भक्तिलक्षणः। वर्णाश्रमाचारवतांसर्वेषांद्विपदामपि १ यथानुष्ठीयमानेनत्वयि भक्तिर्नृणांभवेत्। स्वधर्मेणारविंदाक्षतन्ममाख्यातुमर्हसि २ पुराकिलमहाबाहोधर्मंपरमकंप्रभो। यत्तेनहंसरूपेणब्रह्म णेभ्यात्थमाधव ३ सइदानींसुमहताकालेनामित्रकर्शन। प्रायोनभविता मर्त्यलोकेप्रागनुशासितः ४ वक्ताकर्त्ताविताऽन्योधर्म स्याच्युततेभुवि। सभायामपिवैरिंच्यांयत्रमूर्त्तिधराःकलाः ५ ॥ ॥

रिंचोसीत्याह। सभायामिति। त्वत्प्रसादंविना विरिंचोपिनवक्ष्यतीत्यपिपदार्थः। किमापश्यदं विरिंचोर्न धर्मंत्रह्मामिवक्ष्यति। तत्प्रसादेनवक्तुं व ब्रह्माशक्यतिनापरइतिवचनाद्। यत्रसभायांकलाःप्राणाद्याःमूर्तिधराः अंशतोपांगाद्यवयववंतः। सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापः पृथिवींद्रियमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकेषुनामचताइमाःषोडशकलाः उक्ताप्रश्नोपनिषद्यपाणइत्यादिश्रुतेः ५ ॥ ॥

त्वदृते किमुत भूतलेऽन्यो नास्तीति भावेनाह। कर्त्रेति। भवता त्यक्ते महीतले विनष्टं धर्मं कः प्रभुः प्रवक्ष्यतीत्यन्वयः। कर्त्रेति पाठे यो भवान् धर्मस्य क-
र्त्तेति न भवता ततः किमत आह। त्वमिति यतोऽन्यो नास्ति अतस्त्वद्भक्तिलक्षणो धर्मो यस्य यथा विधीयेत तथा मे वर्णयेत्यन्वयः ७ ८ धर्म्यो धर्मविषयः
९ नृणां वर्णोऽहं हंस इति हंसाभिधानः। कृतयुगं पर्यालि पुनः १० आद्ये कृते प्रथमो वेदो भगवतः पुराणो येन स प्रणव ओंकाररूपः सद्धा। ध्यानरूपो वेद एक
एव न त्वृग्यजुरादिभेदेन विभक्तः। ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एवेति श्रुतिः। तस्य विषयः क इत्यत उक्तं।

कर्त्राविन्त्रा प्रवक्त्रा च भवता मधुसूदन। त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ६ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः। यथा यस्य
विधीयेत तथा वर्णय मे प्रभो ७ वादरायणिरुवाच इत्थं स्वभृत्यमुख्येन पृष्टः स भगवान् हरिः। प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान्
८ श्रीभगवानुवाच धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां। वर्णाश्रमाचारवतां तमुद्धव निबोध मे ९ आदौ कृतयुगे वर्णो
नृणां हंस इति स्मृतः। कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः १० वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक्। उपासते तपोनिष्ठा हंसं मां मु-
क्तकिल्बिषाः ११ त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी। विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः १२ ॥ ॥

धर्मं इति। स कइत्यतोऽहमिति। किं विशिष्टः वृषरूपधृक्। चत्वारि शृंगास्तपोऽत्रस्य पादा इति श्रीधर्मस्य हंस सोऽत्रस्येत्यादि श्रुतिः। एवंविधे त्वयि किं प्रमा-
णमत आह। उपासत इति। हंसाद्यस्य विवरणं मुक्तकिल्बिषा इति। अधुना त्रेतायुगे वेदादि प्रवर्त्तनप्रकारमाह। त्रेतामुख इति। त्रेतामुखे त्रेतारंभे।
मेम हृदयात् प्रेष्ठाद्यनापरश्वती तस्याः प्रकृतोवि रिचः तस्मात्प्राणात् त्रयी विद्या त्रित्वसंख्याविशिष्टत्वेन वेदविद्या प्रादुरभूत्। त्रीन्वेदान् यद्वा प्राणत
इति विवृतो ब्राह्मणान् मुखादस्य सतथा। अहं तस्याः विद्यायाः संविप्रह्राराचयाज्ञा भिव्यक्तो हृमित्यर्थः। विप्राणां तत्वोपदेष्टत्वात् १२

तत्र विप्रमुखत्वं किं विशेष्योच्यते क्षत्रियादिमुखत्वं किं नस्यादित्याशंक्य मम सर्वविषये भ्यो मुखस्य मुख्यत्वाद्वा गाधिकारत्वात्क्षत्रियादीनां नस्याद्वा
राधिकारत्वाच्चेति भावेनाह। विप्रेति। तवक स्मात्पुरुषविशेषाद्विप्राद्युत्पत्तिरत आह वैराजादिति वैराजात्प्रजातंत्र्यामिणः। ये आत्माचारलक्षणाः
आत्मविहिता चार एव लक्षणं येषां ते तथा इदानीमाश्रमोत्पत्तिस्थानमाह। गृहाश्रम इति वनेवासः वानप्रस्थः। मम दयवानां विशेषभावयितुमिदमतिम
पेत्य जन्मस्थानमनुस्मृत्य वर्णादीनां स्वभावविशेषो ज्ञेयाह। वर्णानामिति। प्रकृतयः स्वभावाः स्वभाव भेदानीचादिशब्दवाच्यत्वाह। नीचैरिति।

विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः। वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः १३ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम। वक्ष-
स्थलाद्वने वासो न्यासः शीर्षणि संस्थितः १४ वर्णानामाश्रमाणां च जन्मभूम्यनुसारतः। आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमाः १५
शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं। मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः १६ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः। स्थैर्यं
ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः १७ आस्तिक्यं दाननिष्ठा च अदंभो विप्रसेवनं। अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः १८ शुश्रूषणं
द्विजगवां देवानां चाप्यमायया। तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः १९ ॥ ॥

नीचैरित्यादि विप्रादिक्रमविपर्ययेणिवा रपितुं विप्रा-
नीचप्रकृतिः शूद्रः। नीचोत्तमो वैश्यः। उत्तमः क्षत्रियः। उत्तमोत्तमो विप्रः। नीचनीचोत्तेवमायी १५ नीचैरित्यादि विप्रादिक्रमविपर्ययं नि वारयितुं विप्रा-
दिस्वभावलक्षणमाह। शमइत्यादिना १६ तेजः प्रभावः। बलं शक्तिः १७ अर्थहानौ च बहूनां वियोगेष्वपि संपदि तयोः प्रामोच सर्वस्य वित्तस्य स्थापन
धृतिः। धर्माधर्मेषु विश्वासो यस्तदास्तिक्यमुच्यते। न्यायार्जितं धनं धान्यमन्यद्वायत्प्रदीयते। अर्थिभ्यः श्रद्धया युक्तं दानमेतदुदाहृतं। अर्थोपचयैरर्ज-
अर्जने। अतुष्टिरलंबुद्ध्यभावः १८ १९

शौचं तद्द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा। मृज्जलाभ्यां तथा बाह्यं मनःशुद्धिस्तथा परं। इत्येतद्विपरीतमशौचं। अनृतं अयथार्थभाषणं। जीवब्रह्मैक्य-
भाषणमित्यर्थः। कर्मणा मनसा वाचा परद्रव्येषु निःस्पृहः। अस्तेयमिति संप्रोक्तमृषिभिस्तत्त्वदर्शिभिः। इत्येतदन्यत्स्तेयं। परकीयब्रह्मत्वमात्मीयत्वे-
न वचनमित्यर्थः। शुष्कविग्रहः निष्फलकलहः। श्रुतिजनितं निदर्शनी कृत्यद्यगम्यमितिकथालक्षणः। कामो निषिद्धविषयाभिलाषः। लक्ष्मीपतिरहमि-
त्याद्यभिलाषलक्षण इत्यर्थः। क्रोधः सत्वोत्सावसहिष्णुता तर्षो न लब्धबुद्धिब्रह्मगुणदूषणोक्तावित्यर्थः। साधारणधर्ममाह। अहिंसेति। कर्मणा मनसा

अशोचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः। कामक्रोधश्च तर्षश्च भावो नैव मायिनां २० अहिंसा सत्यमस्तेयमकामक्रोधलोभता। भू-
तप्रियहितेहा च धर्मोयं सार्ववर्णिकः २१ द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः। वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहूतः २२ मेखलाजि-
नदंडाक्षब्रह्मसूत्रकमंडलून्। जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत् २३ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः। न च्छिंद्यान्नखरोमा-
णि कक्षोपस्थगतान्यपि २४ ॥

वाचा सर्वभूतेषु सर्वदा। अक्लेशजननं प्रोक्तं अहिंसा त्विह योगिभिः। सत्यं भूतहितं प्रोक्तं न यथार्थाभिभाषणं। असत्यभाषत्वमस्तेयमुक्तमानां द्विय-
द्वयं। विष्णुवैष्णवविषये द्रव्यत्यागे लोभाभावः। अन्यच्च गुणाः। आनुपूर्व्या क्रमप्राप्तवर्णाश्रमानुपनयनादि कृत्वा विहितप्रकारेणेत्यर्थः। देय-
नयनलक्षणं द्वितीयं जन्म प्राप्य ब्रह्मत्रयी ब्रह्मं दांत उपरतो विष्णुभक्त इत्यर्थः। वाग्यतो मितभाषणः। मेखलादीन् वासश्चादीन्दधत्। स्नानादि-
षु वाग्यतः काष्ठमौनवान्। जपोच्चारे पुरीषोत्सर्जने च। गुरुणा संपदिष्टोऽपि वेदब्राह्मणो विवर्जितः। विधिनोक्तेन मार्गेण मंत्राभ्यासो जपः स्मृतः। अ-
धीत्य वेदं सूत्रे वा पुराणे सेतिहासके। यदैवाध्ययनं तत्तु तदभ्यासो जपः स्मृतः २४ ॥ ॥

नअवकिरेन्नोत्सृजेत्। प्रसन्नगुरुणा पूर्वमुपदिष्टोऽप्यनुज्ञया यदुर्मार्थमात्मसिद्ध्यर्थमुपायप्रश्नं ब्रूतं प्राणापानसमायोगः प्राणायाम उदीरितः। ब्रह्म-
व्रतधरः ब्रह्मचर्यव्रतधरः। कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा। सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते। स्वप्ने सुंदर्यादिदर्शनेन स्वयमेव रेतोवकीर्णे अप्सु अव-
गाह्य निमज्य यतासुः प्राणायामोपेतस्त्रिपदीं गायत्रीं जपेदित्यन्वयः। स्वप्नेऽपि रेतःस्खलने प्रायश्चित्तं विधीयत इति स्मृतेः। अग्न्यादीन्वा अवेक्ष्य तत्परो
र्का व्यतिरिक्तगुरून् आविनीतत्वादित्यर्थः। प्रकृतेन नादिभोगवर्जितः। एवं वृत्त इत्येकपदं। उक्तसदाचारनिरत इत्यर्थः। कियंतं कालमेवं वास इति तत्राह। विद्येति

रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं। अवकीर्णेऽवगाह्याप्सु यतासुस्त्रिपदीं जपेत् २५ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुराञ्छुचिः। समाहित उपा-
सीत संध्ये च यतवाग्जपेत् २६ आचार्यं मां विजानीयान्नावमन्येत कर्हिचित्। न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः २७ सायं प्रातरुपानीय भैक्ष्यं तस्मै नि-
वेदयेत्। यच्चान्यदप्यनुज्ञातमुपयुंजीत संयतः २८ शुश्रूषमाण आचार्यं सदोपासीत नीचवत्। यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः २९
एवंवृत्तो गुरुकुले वसेद्भोगविवर्जितः। विद्या समाप्यते यावद्बिभ्रद्व्रतमखंडितं ३० यद्यसौ छंदसां लोकमारोक्ष्यन्ब्रह्मविष्टपं। गुरवे विन्यसे-
द्देहं स्वाध्यायार्थं बृहद्व्रतः ३१ अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं। अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ३२ ॥ ॥

बृहद्व्रतः ब्रह्मचारी यदि छंदसां लोकमारोक्ष्यन् आरोढुं कामो न भवति स्वाध्यायार्थं स्वाध्यायैकप्रयोजनं देहं गुरवे विन्यसेत्। गुरुशुश्रूषां कुर्या-
दित्यर्थः। कीदृशोऽसौ। ब्रह्मणाधिकृतं विष्टं प्रविष्टं पाति रक्षतीति ब्रह्मविष्टपं सत्यलोकमित्यर्थः। कस्मिन्नधिष्ठानविशेषे त्वदुपासनं चाह। अग्ना-
विति। आत्मनि स्वर्ये हृदये वा अग्नावित्यादि सम्यग्भेदेन निर्धारितेऽपि सर्वथैव भेदेनोपासितं न कर्तव्येति निश्चयार्थमाह। अपृथग्धीरिति। अपृथगव-
स्थानं पृथग्धीः। अस्य नास्ति सोऽपृथग्धीः। अग्न्यादौ एकविषयानिध्यानरहित इत्यर्थः। दृष्टफलमाह। ब्रह्मवर्चस्वीति ३२ ॥ ॥

भा॰ए॰

अप्रतिषिद्धस्यानुमानस्येव विहितोपासनस्यानीहस्याश्रमिणो ब्रह्मचर्यस्यादित्यतः प्रतिपन्नं प्रतिषिद्धप्रति। स्त्रीणामिति। क्ष्वेलनं जिह्वास्फोटः नर्मवा
चनेवा स्वानादिकमादिशब्दगृहीतं। अगृहस्थः ब्रह्मचारी अग्रतः प्रथमतः। सर्वाश्रमसाधारणधर्ममाह। शौचमित्यादिना। सर्वभूतेषु मद्भावः मनस्या
मिलक्षणः सन्नाः। ब्रह्मचर्यानुष्ठानफलमाह। एवमिति। तीव्रतपसा दग्धः कर्माशयः वासनातःकरणं यस्य सतथा। अतएवामलः संसारमलमुक्तो भव

९२

स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं। प्राणिनो मिथुनीभूतानगृहस्थोग्रतस्त्यजेत् ३२ शौचमाचमनस्नानं संध्योपासनमार्जवं तीर्थ
सेवा जपोस्पृश्याभक्ष्यासंभाष्यवर्जनं ३३ सर्वाश्रमप्रयुक्तोयं नियमः कुलनंदन। मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३४ एवं ब्रह्मव्रतध
रो ब्राह्मणोग्निरिव ज्वलन्। मद्भक्तस्तीव्रतपसा दग्धकर्माशयोमलः ३५ अथानंतरमावेक्ष्यन्यथा जिज्ञासितागमः। गुरवे दक्षिणां दत्वा स्नाया
द्गुर्वनुमोदितः ३६ गृहं वनं वोपविशेत्प्रव्रजेद्वा द्विजोत्तमः। आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरेत् ३७ गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सि
तां। यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ३८ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां। प्रतिग्रहोध्यापनं च ब्राह्मणस्यैव याजनं ३९ प्र
तिग्रहं मन्यमानस्तु तपस्तेजोयशोनुदं। अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः ४० ॥ ॥

ति। अथेति प्रमेयांतरारंभविषयः। ब्रह्मचर्याश्रमानंतरं अवेक्ष्य गृहस्थाश्रमं प्रवेष्टुकामः आपातरमणीयो न भवेत्। द्विजोत्तमेनानाश्रमत्वानस्थे पति
त्याह। गृहमिति। गृहार्थी चेत्कीदृशीमुद्वहेदित्याह। गृहार्थीति। वां सवर्णामनुक्रमादिति पाठः। द्विजन्मनां ब्राह्मणक्षत्रियवैश्यानां इज्याध्ययनं। प्रतिग
हं तपस्तेजोयशोनुदं मन्यमानः पुरुषः। अन्याभ्यां याजनाध्ययनाभ्यां जीवेतेत्यन्वयः। तयोर्याजनाध्यापनयोर्दोषदृक् शिलैः। शिलोञ्छवृत्त्या वा जीवेत
४०

राम
९२

शिलोञ्छवृत्तेः क्लेशरूपत्वात् किमिति सा प्रशस्तेति विभीयते इत्यत्राह। ब्राह्मणस्येति। क्षुद्रकामाय अल्पभोगाय। शिलोञ्छवृत्तेः सुखसा
धनत्वात् सैव निषेव्येति भावेनाह। शिलोञ्छेति। शांतिं मोक्षं। आपदः परहीनात्। आपदः इति वा। आपद्धर्ममाह। सीदन्निति। दारिद्र्येण सीदन्नन्यप
न्नवाणिज्यं कृत्वा कथमापत्तरणमत्राह। पण्यैरिति। आपदाक्रांतः खड्गेन वा क्षत्रधर्मेणेत्यर्थः। श्ववृत्त्या नीचसेवया। वैश्यवृत्त्या गोरक्षणादिना

ब्राह्मणस्य हि देहोयं क्षुद्रकामाय नेष्यते। कृच्छ्राय तपसे चेह प्रेत्यानंतसुखाय च ४१ शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषा
णः। मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिं ४३ समुद्धरंति ये विप्रं सीदंतं मत्परायणं। तानुद्धरिष्ये नचिरादापद्भ्यो नौरिवार्ण
वात् ४४ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः। आत्मानमात्मना धीरो यथा गजपतिर्गजान् ४५ एवंविधो नरपतिर्विमानेनार्कवर्च
सा। विधूयेहाशुभं कृत्स्नमिंद्रेण सह मोदते ४६ सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत्। खड्गेन वापदाक्रांतो न श्ववृत्त्या कथंचन ४७
वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययापदि। चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन ४८ शूद्रवृत्तिं भजेद्वैश्यः शूद्रो वै कारुकक्रियां। कृच्छ्रान्मुक्तो
न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ४९ वेदाध्यायीस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं। देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ५० यदृच्छयो
पपन्नेन शुक्लेनोपार्जितेन वा। धनेनापीडयन्भृत्यान्मां यजेताब्रवीद्विभुः ५१ ॥ ॥

ह्मणस्य। कारुकक्रियां कटादिक्रियां संपदि नैवेत्याह कृच्छ्रादिति। गृहस्थधर्ममाह। वेदेत्यादिना। यथोदयं संपदनतिक्रमेण। मद्रूपाणि मत्प्रतिमाध्या
नीयानि। प्रतिमावद्दूरेरूपं निर्दिष्टं रसुरादयः सा ह्याद्रूपाणि यत्स्यात्सर्व्व भिन्नान्येव सर्वदेहेतिवचनात्। शुक्लेन पशुदेन ५२ ॥ ॥

भा॰ए॰ मज्जनतात्पर्ये इदमेव प्रथमसाधनमित्याह। कुटुंबेष्विति। अदृष्टं स्वर्गादिकमपि दृष्टवत् गृहादिकवत् नश्वरं पश्येत्। कुटुंबेष्वसंगतया प्रवर्तनोपायमाह। पुत्रेत्यादिना
पांथसंगम इति लुप्तोपमा पंथानां संगम इव पुत्रादीनां संगम इति। एते पुत्रादयो देहमनु वियंत्येव अत्र दृष्टांतमाह। स्वप्न इति। पांथसंगमः क्वचित्प्रवृत्ति क्वचिन्न
९२ तथा स्वप्नः अपि तु निद्रामनुगत एव। मयि मनसा युक्तः। आश्रमान्तराश्रयमाह तिष्ठेदित्यर्थं विविधाः कामान्निकरत्याह। कर्मभिरिति। एवं मुक्तिसाधनमुक्त्वेदानीं संसारप्राप्ति

कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि। विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत्। पुत्रदाराप्तबंधूनां संगमः पांथसंगमः। अनुदेहं भवंत्येते
स्वप्नो निद्रानुगो यथा ५३ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन्। न गृहैरनुबध्येत निर्ममो निरहंकृतिः ५४ कर्मभिर्गृहमेधीयैरिष्ट्वा
मामेव भक्तिमान्। तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ५५ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः। स्त्रैणः कृपणधीर्मूढो ममाह-
मिति बध्यते ५६ अहो मे पितरौ वृद्धौ भार्या बालात्मजा सती। अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ५७ एवं गृहाशयाक्षिप्तहृदयो मू-
ढधीरयं। अतृप्तस्ताननुध्यायन्मृतोंधं विशते तमः इति श्रीभागवते महापुराणे एकादशस्कंधे वर्णाश्रमविभागो नाम सप्तदशोऽध्यायः
श्रीभगवानुवाच वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा। वनमेव वसेच्छांतस्तृतीयं भागमायुषः १ ॥ ॥

ततोऽनर्थं च वक्ति यस्त्विति। ममाहमित्यन्यथाज्ञानेन गृहाशया गृहेष्वतितृष्णया। आशादिना तिरस्कृतयोरिति इत्येकादशस्कंधे विवरणे सप्तदशोऽध्यायः राम
वने चोपविशेदित्युक्तवानप्रस्थस्य धर्मान्विस्तारमाह। वनमित्यादिना। तृतीयभागमायुषः चतुर्मासाधिकत्रयस्त्रिंशद्वर्षपरिमितं १ ॥ ॥ ९२

वन्यैः वनभवैः। व्रतीवानप्रस्थव्रतवान्। ध्यावनमत्नायनं तेवनं वा। वर्षासु वर्षन्ती आसारषाट् वेगवर्षमपि सहत इति। कालपक्वं कदलीफलादि। उलूखली उलूख-
लावद्गतनीवारादिना वर्तमानः। अश्मकुट्टः अश्मना तत्त्वं तपिष्टादि दंतिः। दंता एवोलूखलो यस्य सत थादंत त्रर्त्तितभोऽस्य स्त्यर्थः। गजदंतनिर्मितोलूखलो वा संचिनुया-
त्संग्रहं कुर्यात्। अन्यदाहृतमन्येनानीतं। कालचोदितान्। आसिन्काल इदमिति विहितान् ७ पूर्ववत् गृहस्थाश्रमे यथा तथा वनेप्यग्निहोत्रादिकं कुर्यादिति शे

कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत्। वसीत वल्कलं वासस्तृणपर्णाजिनानि च २ केशलोमनखश्मश्रुमलानि बिभृयाद्दतः। न धावेदप्सु मज्जेत
त्रिकालं स्थंडिलेशयः ३ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले। आकंठमग्नः शिशिर एवंवृत्तस्तपश्चरेत् ४ अग्निपक्वं समश्नीयात्कालपक्वमथा-
पि वा। उलूखलाश्मकुट्टो वा दंतोलूखल एव च ५ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणं। देशकालबलाभिज्ञो नाददीतान्यदाहृतं ६ वन्यैश्चरुपुरोडा-
शैर्निर्वपेत्कालचोदितान्। न तु श्रौतेन पशुना मां यजेत वनाश्रमी ७ अग्निहोत्रं च दर्शश्च पौर्णमासश्च पूर्ववत्। चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः ८
एवं चीर्णेन तपसा मुनिर्धमनिसंततः। मां तपोमयमाराध्य ऋषिलोकादुपैति मां ९ यस्त्वेवं कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत्। कामायाल्पीयसे युंज्याद्बालि-
शिय आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत् (कामायाल्पीयसे युंज्याद्बालिशः कोपरस्ततः
शः कोपरस्ततः १० यदासौ नियमेऽकल्पो जरया जातवेपथुः।
११ यदा कर्मविपाकेषु लोकेषु निरयात्मसु। विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः १२ ॥ ॥

षः। नैगमैः कल्पशास्त्रैः। तपोमयं ज्ञानरूपं। ऋषीणां लोकान्मामुपैति। एवं कृच्छ्रतश्चीर्णं तपो महत्परोक्षाय नियोक्तव्यमन्यथा युंजानः सर्वहास्य इत्याह। यस्त्वि-
ति। निःश्रेयसं मपदरोज्ज्वलज्ञानपुरुषार्थसाधनं। आश्रमविहितकर्मकरणासमर्थश्चेत् किं कुर्यादित्याह। यदेति। क्रमप्राप्तं प्रव्रजनं सर्वकंयति धर्ममाह। यदे-
ति। धर्मविपाकेषु धर्मफलेषु दुःखत्वात् निरयात्मसु नरकसमानरूपेषु १२ ॥ ॥

ब्रह्मन्वेदत्वमावमाह। इष्ट्वेति। प्राणे अंतर्यामिणि। देवास्मत्कृसं पूज्यते भ्योऽनुज्ञामाहृत्यैव संन्यासः कार्योऽन्यथा ते दारादिषु संनिधाय विघ्नं विधास्यंत्यतः
पातयंतीत्याशयेनाह। विप्रस्येति। वा इत्यनेन च असंपूज्य संन्यासिनं तु देवा वै पातयंत्यधः। सुसंपूज्य संन्यासिनं तं देवा एवानुजानंत इति वाक्यं सूचयति। द्विश
हेन अथवा तद्यशोऽपि ह्यो विघ्नं तीव्र पुनः पुनः। तात्पर्यादि ह्यनादेवैर्नोत्थानं शंकुयाल्लक्षिदिति मानं सूचयति। मौनेन वाग्दंडः। अनीहया निषिद्धाचरणत्या

इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे। अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् १३ विप्रस्य वै संन्यसतो देवा दारादिरूपिणः। विघ्नान्कु
र्वंत्ययं ह्यस्मानाक्रम्य समियात्परं १४ बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परं। त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतं न्य
सेत्पादं वस्त्रपूतं पिबेज्जलं। सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् १६ मौनानीहानिलायामा दंडा वाग्देहचेतसां। न ह्येते यस्य संत्यंग वेणुभिर्न भ
वेद्यतिः १७ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत्। सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता १८ बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः
विभज्य पावितं शेषं भुंजीताशेषमाहृतं १९ एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः। आत्मक्रीड आत्मरत आत्मवान्समदर्शनः २० विविक्तक्षेम
शरणो मद्भावविमलाशयः २० ॥ ॥

गेन देहदंडः। अनिलायामेन चेतोदंडः। आत्मना परमात्मना क्रीडा यस्य स तथा। आत्मनो रतं सुखं यस्य स तथा। आत्मवान् वशीकृतमनाः। विविक्तं क्षेमं
शरणं यस्य स तथा। यद्वा पुरुषार्थेन मम मोक्षशरणः। मद्भावेन मद्भक्त्या विमलाशयः विशुद्धबुद्धिः २० ॥ ॥

तस्योपायान्प्रकारमाह। आत्मानमिति। मुनिर्यतिरात्मानं परमात्मानमेकं प्रधानं सर्वोत्तमं चिंतयेत्। किंवा मया अभेदेन। उपलक्षणमेतत्। मत्स्याद्यवतार
भिन्नत्वेन स्वगतभेदरहितत्वेन मया लक्ष्म्या सहेति वा। सदर्किं वा मातव्यं पुरुषारंमयेति। शरणमहः शरणमिदं शरणमित्युच्यते इति श्रुतिप्रमाणेनत्वेन रः पुरुषो
ज्ञात्मेति मया भिन्नमात्मानं स्वमभेदेन चिंतयेत्। किंतु एकमन्यं चिंतयेत्। एके मुख्यान्यकेवलाद्इति अन्यमीशमस्य महिमानं वीतशोकः इति मयाहेतुना। पद्म
आत्मा वा इदमेक एवाग्र आसीदिति श्रुत्या मया भिन्नमात्मानं एकं मुख्यं चिंतयेत्। अभेदविषये जीवेनैक्यं न चिंतयेदित्यर्थः। सत्यं भिदा सत्यमिदे तिश्रुत्या

आत्मानं चिंतयेदेकमभेदेन मया मुनिः २१ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया। बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः २२ तस्मान्नियम्य ष
ड्वर्गं मद्भावेन चरेन्मुनिः। विरक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत् २३ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत्। पुण्यदेशसरिच्छैलव
नाश्रमवतीं महीम् २४ ॥

स्य मया भिन्नत्वात् लक्ष्मीप्रमाणायो यत्प्रत्यादि वेधे चापि कीर्त्यत इत्यभिधानं भगवदुपास्त्याविदमंतरंगमित्याह। अन्वीक्षेतेति ज्ञाननिष्ठयात्मनः स्वस्य बंधं मो
क्षं वात्मनो हरेः सकाशादन्वीक्षेत। ननु अयं हरिरस्य बंधमोक्षौ कथमापादयतीति तत्राह बंध इति। इंद्रियाणां विषयेषु विक्षेपः प्रसारणं च बंधः स्यादेषामिंद्रिया
णां संयमो निग्रहो विषयेभ्य आकृष्य मयि स्थापनलक्षणो मोक्ष इति यत एवं तस्मादिदं विधेयमित्याह। तस्मादिति। कर्मेंद्रियाणामैक्येन मनसा सह षड्वर्गा
नेंद्रियाणि आत्मनि भावि महत्सुखं लब्ध्वा तुच्छकामेभ्यो विरक्तो भूत्वा विषये निरपेक्षत्वेनात्मनि सुखं लब्धेति वा पुण्यपदशब्दः देशादिभिः प्रत्येकं संबध्यते॥ ॥

भा॰ए॰

९४

परंस्थानमनीत्तामित्यनेनचतुरादिषु विकल्प इति ज्ञायते वानप्रस्थाश्रमस्थानेषु नित्यं भैक्षचरणस्य किं फलमित्यत आह। संसिध्यतीति। शिलांधसा
शिला विहितान्नेन शुद्धं सत्त्वमंतःकरणं यस्य स तथा। असंमोहो मिथ्याज्ञानरहितः। आशु संसिद्ध्यति अपरोक्षज्ञानमाप्नोति। संसिद्धस्य दृष्टांतप्रकारं विवि
न्नेनेति। एतच्च न दृष्टं तथापरत्र अस्तत्वेन अत्र हेतुः विनश्वरं दृश्यमानमिति एवं पश्यता वैराग्यानुसंधानं कर्तव्यमित्याह। असक्तेति। इहामुत्रासक्तचित्त
स्यात। ततः किमत आह। विरमेदिति। चिकीर्षितात् कर्तुमिष्टात्कर्मणः विरमेत्कृतकृत्यो भवेदित्यर्थः। एतदेव स्पष्टयति यदेतदिति मनोवाक्प्राणैः संभृ
तं संपन्नमात्मनि देहे स्थितं। अत्र चोऽध्याहरेण परमेश्वरे मन्त्रित्यादि श्रुतेः यदेतत्ज्जगत्सर्वं मायेति तर्केण चेतनप्रकृति कृतत्वेनावस्थितात्गुणमायात्मीय
यः फलं तन्मानेतिमायेति विवक्तव्यमायेति श्री। लिंगत्वेन वचनमत्यंतास्थातेत्र प्रकटनायेत्यतोस्य ज्ञानेन प्रयोजनाभावान्नैतत्स्मरेत् स्वाय स्यादितित्यक्त्वा

वनप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत। संसिद्ध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा ॥ २५ ॥ नैतद्वस्तुतया पश्येद्दृश्यमानं विनश्यति। असक्तचि
त्तो विरमेदिहामुत्रचिकीर्षितात् ॥ २६ ॥ यदेतदात्मनि जगन्मनोवाक्प्राणसंभृतं। सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥ २७ ॥ ॥

तं त्यक्त्वा ज्ञो विष्णुरस्य संवादरहितत्वेन तु किं फलप्रदत्वाभावः तदेकशरणो भक्त्या तद्गुणानुस्मरेत् विष्णुमेव प्रयोजकं स्मरेदित्यर्थः। यदि विष्णुः स्वतंत्रो
न स्यात्तर्हि तद्गुणगानतिरयं न स्यात् तस्मै तेन नित्यसुखं स्यात्तथैवं तस्मात्स एव तत्त्वेत्यादि तर्केण विश्वमिथ्यात्वदृश्यत्वादिति तर्केण मायामयत्वं प्रपंचस्योक्त
तद्यत्पेत स्वर्गोत्तरयंथ्यविरोधात् विश्वं सत्यमित्यादि श्रुतिप्रामाण्यादस्य दुःखार्थे त्रिगुणप्रकृतिर्मायात्वत्वाद्विश्वमीदृशं। अनाद्यनंतकालेषु माये
त्याद्युर्विपश्चितः। अचेतनत्वान्नैवैतत्प्रयोजकतया स्मरेत्। चेतनत्वं स्वतंत्रत्वं स एको विष्णुरेव तु। आपत्फलसुदृष्टे यत्क्रं मायेति निष्फलं। फलाल्पत्वा
न्मायेया संप्रोक्ता त्रिगुणात्मिका। महाफलप्रदत्वात्तु विष्णुरायस्तिरिति इति प्रमाणमत्रावाग्रेत्सुपेक्षणीयं ॥ २७ ॥ ॥

राम

९४

ज्ञानपरिपाकं प्राप्तस्य यत्तद्वैविध्यप्रकारं विधत्ते। ज्ञाननिष्ठ इति। ज्ञानस्य निष्ठोत्कर्षो यस्य स तथा। वाशब्दौ समुच्चयार्थौ न विकल्पार्थौ अन्योन्यनियमार्थौ वा अ
नमेक्षकः शिष्यसंग्रहाद्यनिच्छुः। सलिंगान्दंडादिलक्षणसहितानाश्रमान्मुक्त्वा विधिरगोचरः अयं मतिरयं व्रतीत्यादिरूपवर्णाश्रमगोचरश्च रेद्विवेके रणेन वर्तेत
नमेन्नकः। शिष्यसंग्रहाद्यनिच्छुः सलिंगानाश्रमान्मुक्त्वा विधिरगोचरः अयं विधिचकितत्वेन संध्योपासनादिनं करोति किंतु जलस्रोतोवत्स्वत एव करोति। तं प्रकारं वक्ति। बुध इति। गोचर्यां गोवद्वृत्तिं तत्त्ववच्च
एव इत्यर्थः। यद्वा वेदोक्तविधिचकितत्वेन संध्योपासनादिनं करोति किंतु जलस्रोतोवत्स्वत एव करोति। तं प्रकारं वक्ति। बुध इति। गोचर्यां गोवद्वृत्तिं तत्त्ववच्च
रणमित्यर्थः। नैगमः वेदोक्तविधिना वर्तमानः। इत्यनेना विधिगोचरत्वं न विध्यतिक्रमो नार्थ इति निर्णीयि। नैगमस्तु उक्तं विशदयति। वेदेति। वेदेन सह वाद

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः। सलिंगानाश्रमान्मुक्त्वा चरेदविधिगोचरः ॥ २८ ॥ बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत्। वदेदुन्म
त्तवद्विद्वान् गोचर्यां नैगमश्चरेत् ॥ २९ ॥ वेदवादरतो न स्यान्न पाषंडी न हैतुकः। शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत ॥ ३० ॥ नोद्विजेत जनाद्धीरो
जनं चोद्वेजयेन्न तु। अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ ३१ ॥ ॥

विवादः विप्रतिपत्तिस्तत्र रतो न स्यात् तत्कुतर्केण वेदस्य जीवब्रह्मणोरेकार्थकथनपरो न स्यादित्यर्थः। वेदेन सह वादो यो वेदवाद इतीरितः। तर्केणैव दस्यान्या
र्थकल्पनं तद्विद्रो विदुः। तन्न कुर्यात्किदा चिद्धि न तत्कुर्वन्वेदहा न वेदितिवचनात्तदुक्त एवार्थः। वेदविदारविष्णुरहस्यार्थनिवेद। किंच पाखंडिपाशुपतादिदर्शना
भिमानी न स्यात। हैतुकीब्रह्मपारादि दर्शनाभिमानी च न स्यात। शुष्कवादविवादेन प्रसंगतः प्राप्ते निरर्थवादकलहे न। योगसांख्यकणादाक्षपादावे
हेतुवादिनः। पश्चीश शाक्य बुद्धाद्याः पाखंडा इति कीर्तिता इति वचनाच्च। नोद्विजेत दुर्जनान्नोद्विग्नः स्यात् ॥ ३२ ॥ ॥

वैराकरणो किंनिमित्तमत्राह। एक इति। परः सर्वोत्तमः आत्मा परमात्मा एक एव भूतेषु चराचरसंज्ञेषु आत्मनि स्वस्मिन्नेवावस्थितो हि यस्मात्तस्मादविष्ठान
त्वाद्वैरं न कुर्यात् तदप्रियत्वादित्यर्थः। एको देवः सर्वभूतेषु गूढः इति श्रुतेः। अत्र दृष्टांतमाह। खं यद्वदिति। यद्वद्यथा आकाशमुदपात्रेषु घटादिषु एक एवाव्स्थि
तस्तथेत्यत्र विशेषस्तु घटादिषु महाकाशो निर्विशेषश्च संततः। घटावयवरूपस्तु तथैवान्यो घटाकाशः। घटनाशे प्यनाशः स च मध्यमाकाश इष्यते। एक
देशाभिमानित्वाद्दित्याकाशास्त्रयः स्मृताः। महाकाशो विघटाज्जो विघ्रास्तत्र तु मध्यमः। स्कंद इवि घ्रास्तु दितर एवमात्मा त्रिधा स्मृतः। महाखवत्परः स्वात्मा जी
वा मध्यखवत्स्मृताः। घटाकाशवत्सोक्ता अमुरा नित्यदुःखिनः। महाकाशवशाः सर्वे आकाशा इतरे स्मृताः। परमात्मवशे तद्वज्जीवाः सर्वेपि संस्थिताः। एवं

देहबुद्धिरपपशुवद्वैरं कुर्यान्न केनचित् ३२ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः। खं यद्वदुदपात्रेषु भूतान्येकात्मकानि च ३३ अल
ब्धानविषीदेत काले कालेशनं क्वचित्। लब्धान्न हृष्येद्धृतिमानुभयं दैवतंत्रितं ३४ आहारार्थं समीहेत युक्तं तत्प्राणधारणं॥ ॥

विस्वात्मकमिदं जगत्त्वं पश्येदिति। सर्वेत्यस्मान्नानात्ववर्गतव्यः। केवलं नाकाशवत्स्वभूतानां परमात्मना व्याप्यव्यापकसंबंधोपि तु तस्माद्विशेषोप्यस्ती
त्याह। भूतानीति। एकः परमात्मा एव आत्मा व्यापकश्चाधारो येषां तानीमान्येकात्मकानि कप्रत्ययः स्वार्थे विशिनष्टि भूतानामेक एवात्मा एको भूतेषु संततः
एको भूतानि चाद्यं तेनतस्मादेकात्मकानि त्विति वचनात् ३३ अशनसिद्ध्यसिद्ध्योरपि मनागपि क्लेशोन कर्तव्य इति भावेनाह। अलब्धेति। दैवस्यमममतं वित
मश्चीनं न तु ईश्वरप्रयत्नोपि तदर्थं न कर्तव्य इति तत्राह। आहारार्थमिति। न तु नाहारं चिंतयेत् प्राज्ञ इति निषेधः कथमत्राह। युक्तमिति। यावत्प्राणधारणं
भवेन्मपि चिंतनं विहितं त्वाधिक्यं। न वा अजीविष्यतिमा न स्वादन्निति श्रुतेः॥ ॥

अशनालाभे देहस्य प्राणवियोगस्तेन देहस्यपंचत्वं तेन वागादीनां सुखकारणसंपत्तिस्तत्र पुरुषार्थेपि योगितत्त्वविमर्शो न संभाव्यते तः पुरुषार्थानुरूपो
तो देहयात्रार्थं मशमनं चिंतनमावश्यकमित्याशयेनाह। तत्त्वमिति। तेन देहेन तत्त्वं विमृश्यते। तत्त्वं फलितमाह। यदृच्छयेति। शौचादीनि कर्माणि स्वभावतः
एव कुर्यान्न तु विधिरकितत्वेनेत्याशयेनाह। शौचमिति। ज्ञानी यतिः। स्वभावतोधर्मपरो न विधेयकितश्चरेत्। अल्पफलं हि च कितेस्वभावफलमुत्तममिति व
चनात्। अत्र हेतुमाह। नहीति। तस्य ज्ञानिनो विकल्पाख्याश्रोतस्मार्त्तविधिरूद्ध कल्पना व्यक्रियानहि यस्मादतो ज्ञानी विधिं विहाय स्वतएव श्रोतादिक्रियाः कुर्या

तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ३५ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं। तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ३६
शौचमाचमनं स्नानं न तु चोदनया चरेत्। अन्यांश्च नियमान्ज्ञानी यथाहं लीलयेश्वरः ३७ नहि तस्य विकल्पाख्या क्रिया मद्वीक्षया हता।
आदेहांतं क्वचित्ख्यातिस्ततः संपद्यते मया ३८ ॥ ॥

दित्यन्वयः। ज्ञानिनोपि यावद्देहं नि षिद्धेपि मनोगमनात्कथं सा नास्तीत्यत्राह। मद्वीक्षयेति। आदेहांतं प्रारब्धकर्मनिबद्धदेहपातपर्यंतं ज्ञानिनोपि क्व
चित्रिषिद्धविषयेख्यातिर्मनो गति लक्षणा प्रतीतिः स्यात्सापि मद्वीक्षया ज्ञानप्रसन्नमत्कटाक्षनिरीक्षणेन हता स्वशक्तिमुद्बोधयितुमसमर्था
स्यादिति शेषः। ततः प्रारब्धकर्ममूलदेहपातादनंतरं मया संपद्यते मत्प्रसादेनाविर्भूतस्वरूपानंदो भवतीत्यर्थः। निषिद्धं मनसा कल्पमीतो विहित
माचरेत्। अज्ञो ज्ञस्य तु संकल्पः स्वभावाद्विहितानुगः। शरीरधर्मिणः क्वापि निषिद्धेपि मनो व्रजेत्। तथापि तस्यानर्थो मो हन्नेवान्यथा व्रजेदिति स्मृ
तेः ३८

भा॰ए॰

९६

एवंविधज्ञानप्राप्त्युपायमाह दुःखेति द्वाभ्यां तिनुपपन्नेति उपसर्पेत्। मुक्तिपर्यंतं गुरुनिकटे निवासः कर्तव्य इति ज्ञायते। शुश्रूषेत्संहितस्यावद्यावज्ज्ञा
नोत्पद्यते ततः परं च शुश्रूषेद्यथा तस्य प्रियं भवेदिति स्मृत्यर्थस्य स्पष्टमाह। तावदिति। यावद्ब्रह्म मां विजानीयात्तावद्गुरुमेव परिचरेदित्यन्वयः। आदृत
इत्यनेन ज्ञानोदयानंतरमपि गुरुशुश्रूषा कर्तव्येति ज्ञायते। वेषमात्रधारिणो यतेः प्रत्यवायमाह यस्त्विति। प्रचंडइंद्रियाणां सा

दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान्। अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ३९ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः। या
वद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ४० यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ४१ सुरानात्मा
नमात्मस्थं निह्नुते मां च धर्महा। अविपक्वकषायोस्मादमुष्माच्च विहीयते ४२ भिक्षोर्धर्मः शमोहिंसा तप ईक्षा वनौकसः। गृहिणो भूतरक्षेज्या
द्विजस्याचार्यसेवनं ४३ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं। गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ४४ इति मां यः स्वधर्मेण भजेन्नि
त्यमनन्यभाक्। सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात् ४५ ॥ ॥

रथिर्मनो यस्य स तथा। त्रिदंडं त्रिवेणुलक्षणं सुरानात्मस्थं तर्यामिणमात्मानं त्वंपदार्थं मां च निह्नुते निराकरोति। सोस्मात् लोकादमुष्मात् स्वर्गादेश्च विही
यते अधःपततीत्यर्थः। यत्यादीनां विशेषतः कर्तव्यधर्ममाह। भिक्षोरिति। यतेः शमाहिंसे धर्मः। वानप्रस्थानां तप ईक्षा आलोचनं च धर्मः। गृहस्थानामन्नादिना
प्राणिरक्षेज्या यागश्च द्विजस्य ब्रह्मचारिणः आचार्यसेवनं गुरुकुलवासः। गृहस्थस्याप्यृतौ गंतुरव गंतुः स्नात्वादेरिति शेषः ४४ एतैर्धर्मैः साध्यमाह इ
तीति ४५ ॥

राम

९६

मत्प्राप्तौ भक्तिरेव प्रयोजिकेत्याह। भक्त्येति। स्वविहितधर्मैर्निर्णिक्तः धौतं सत्त्वमंतःकरणं यस्य स तथा। निर्णीतत्वेन ज्ञाता मद्गतिः। भक्तिरेव मम परमप्रीतिसा
धनं वर्णादिविहितधर्मोपि भक्तिसंवलित एवेति भावेनाह। वर्णेति। उपसंहरति। एतदिति। च शब्द एवार्थे। यथा मां समियात्तथाभिहितं ॥ इत्येकादशे
ष्टादशोध्यायः ॥ हरेः प्रसादजनकं ज्ञानमेव तस्य भक्तिस्तस्यायमन्वयः कृष्णोद्धवेतिये ज्ञानं तत्सर्वमस्मिन्नध्याये निरूप्यते। तत्र प्रथमतः उत्पन्नमा
नं तद्देवं विधं प्रसादसंपादकमिति भावेन वक्ति। यो विद्येति। यो विद्यायाः वेदांतादिलक्षणायाः श्रुतेन श्रवणेन संपन्नः उत्पन्नज्ञानश्च अनुमानिकः उपक्रमादिभि

भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं। सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ४७ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः। ज्ञानविज्ञा
नसंपन्नो विरक्तः समुपैति मां ४८ वर्णाश्रमवतां धर्म एष आचारलक्षणः। स एव मद्भक्तियुतो निःश्रेयसकरः परः ४९ एतत्तेभिहितं साधो भवा
न्पृच्छति यच्च मां। यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ५० इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे अष्टादशोध्यायः

श्रीभगवानुवाच यो विद्याश्रुतसंपन्नः आत्मवान्नानुमानिकः। मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् १ ॥ ॥

न्यानिर्हूतसंशयविपर्ययश्च। आत्मवान् मम आत्मा स्वामी हरिरिति निश्चितहरित्वो मामपरोक्षीकृत्य मद्भिन्नमिदं जगत् मायामात्रं मदधिष्ठितो ह्यधितोपा
दानेप्रकृतिनिर्मितत्वान्मात्रं ज्ञात्वा तत् ज्ञानं च ममेदं ज्ञानं हरिप्रसादलक्षणं तत्प्रसादेनोत्पन्नं तदधीनं चेति मयि संन्यसेत्सम्यगर्पयेदित्यन्वयः। त्रिगुणा
प्रकृतिर्माया पश्चैतन्मात्रकं जगत्। निर्मितं जगत्स्वेच्छया मायेति स्मृतेरिति वचनात्। इदं ज्ञानं हरेः प्रसादहेतुरेवोदितं सदा। हृदयेधीनं च सर्वं तत्त्वेन वेन्यासो हरे
स्मृत इति वचनात् उक्तप्रकार एव हरेर्ज्ञानन्यासो न तत्र अपरप्रकारः १ ॥ ॥

कस्मात्तत्वविज्ञानमभ्यासः स्यात्तत्र निमित्तमाह। ज्ञानिनमिति। तुशब्दस्तारतम्यद्योतकः स्वस्यार्थो आनंदलक्षणो यस्मात्तथा। हेतुर्ज्ञानोत्पादकः
संमतो ज्ञातः। इतोपीत्याह। स्वर्गश्चेति। स्वार्थप्राप्तिप्रकारमाह। ज्ञानेनेति। विदुर्लभंते निगमयति। ज्ञानीति। प्रियतमत्वे निमित्तमाह। ज्ञानेनेति। तपश्च
रिनोभयशुद्धिमतस्तु प्रियत्वे न ज्ञानं विशेष्यं किं त्वोषीति तत्राह। तपइति। याशुद्धिर्ज्ञानलेशेन कृता तां शुद्धिं तपआदीनि अलं सम्यक् न कुर्वंतीत्य

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः। स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः २ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम।
ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां ३ तपस्तीर्थं जपो दानं पवित्राणीतराणि च। नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४ ज्ञानविज्ञानसहितं ज्ञात्वा स्वात्मानमुद्धव। ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ॥५॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि। सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोगमन् ६ ॥ ॥

व्रयः। यतः सर्वश्रेयसां साधनं ज्ञानस्योत्तमसाधनत्वमतः त्वयापीदमेव संपादनीयमित्याह। ज्ञानेनेति। आत्मानं परमात्मानं। तं वा एतमभिवदंतिस्वा
त्मेति श्रुतिः। कस्येदं इष्टफलं येन विश्वभ्यमज्ञनीयं स्यात्तत्राह। ज्ञानेनेति। आत्मनि हृदये समीचीना सिद्धिर्मुक्तिर्यस्मात्तस्मात्तथातं॥ ॥

ननु तदापि देहित्वेन जन्मादिना दुःखादिसंभवात्कथं तत्त्वज्ञस्यापि मुक्तिः स्यादित्याशंक्य स्वतः सिद्धानंदरूपस्य तव जन्मादिर्नास्तीत्याह। देहस्यैव। ममतु तादृशो देहएव ना
स्ति निर्गुणत्वात्। कुतो जन्मादिः अतो नित्यनिर्दुःखानंदात्मत्वस्य मम प्राप्तिरेव मुक्तिरिति भावेनाह। त्वयीति। हेतुद्वयमस्ति विधोजन्मस्थितिसंहारलक्षणो विका
रस्त्वय्याश्रयति संप्रतिवर्त्तते स मायानिर्मितो न तु स्वाभाविकः। अन्यच्च निर्मितं जीवे जन्मादि दृष्टिरीणामतः। तस्मान्मायेति तत्त्वाकर्मीया निर्माणमुच्यते
नहि जीवस्य जन्मादिः स्वतो नित्यस्य संभवेत्। सृष्टेः प्राक् प्रलये चैव यतो जन्मादिना स्पृहि। तस्मान्मध्येपि नास्यास्ति देहाद्दिष्टं तु विस्रुनां कर्मभिर्निर्मितं जीवेप्र
लयेयत्र जीवानां। यत्र विद्येत हि लये पत्र विद्येत मुक्तिगो। जीवस्य न स्वभावो सोपायेणेति विनिश्चित इति प्रकाशिकायां। किंच मायेत्युक्तं निर्मितं तुयतो जन्मादि
निर्मितं। देहादिकं परेशेन मायाजन्मादितेन त्वित्यस्माच्च। अतर्कितोपपन्नवदागतत्वाच्च स्वाभाविक इत्याह। अंतरेति। योजन्मादिरंतरा सृष्टिकाले आपति
कर्मवशादागच्छति। आद्यपवर्गयोर्न प्रलयमुक्त्योर्न विद्यते। यं न विद्येत विलये यं न विद्येत मुक्ति जीवस्य न स्वभावो मा वित्युक्तत्वाच्च क्रोधोर्थं यं तवाप्यनुभव

त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यः। जन्मादयोस्य यदमी तव तस्य किंस्यु राद्यंतयोर्यदसतोस्ति तदेव मध्ये ७

सिद्ध इत्याशयेनाह। जन्मादय इति। तस्य परिणामरूपस्य देहस्य दृश्यमाना जन्मादयोस्य चिदानंदस्वरूपस्य तव स्युः किं मो प्रतिवदवलमानं दृष्टं जगत्सहो सा
नमानाकुलं इत्यादेः। उपसंहरति। आद्यंतयोरिति। असत इति। हेतुगर्भविशेषणं। असत्त्वं तत्त्वादेव स्फुनो जगत आद्यंतयोः प्रलये मुक्तौ च पञ्चीवस्यास्ति चिदा
नंदस्वरूपं तदेव मध्ये सृष्टिकाले विश्वरूपं तस्मादाभिमानिकः संसारो मदपरोक्षज्ञानेन निवर्त्तत इति भावः। ज्ञानिनो मनुष्योहमित्यभवतः सुखे करूपा मुक्तिक
थं सेत्स्यतीत्यन्यस्यान्याद्दृश्यत्वानुपपत्तेरित्याशंक्य कालत्रयेपि जीवस्यैकरूपत्वेनाभिमानिकत्वागंतुकः संसारो मन्मुखसादेन निवर्त्तत इत्यतो वाह। त्वयीति।
आद्यंतयोरनुगमादाद्यंतरहितस्य तवाद्यंतभाविनो मध्ये कथमन्यादृशं वपुरित्यतः प्रिदं किंचाऽनित्यत्वाच्च देहस्य तस्य जन्मादिकं भवेत्। मुक्तिफलयमव
धेकयं जीवे तदित्यत इति। अनित्यस्य गुणामध्ये भवेत्पुः स्वतएव तु। न तु स्वतस्तु नित्यस्य कदाचित्क गुणोस्तितिरिति ७ ॥ ॥

एतत्ज्ञानं यथा स्थितं तथा ब्रूहि ७ १४ ज्ञानं शुद्धं तस्य ज्ञानत्वेन धर्माणां कथनं कथं संगच्छत इत्यत उक्तं। ज्ञानेनेति। येन ज्ञानेन भूतेषु जीवेषु स्थिता नव एकादश पंच त्रीन् भावान् अष्टाविंशतत्वान्यवीक्षेत तत्स्वज्ञानं तत्र एकं क्लिष्टरूपं पूर्वकं पश्यति। एषु तत्वेषु तन्नियामकतया स्थितमेकं तत्वं प्रधानं तत्तत्वपतिं हरिमपि च पश्यति। तन्मम निश्चितं ज्ञानमपि द्रष्टव्या दिपंच भूत बुद्ध्यहंकारचित्त मूलप्रकृतयो नव मनः सात्वहं श्रोत्रादीन्द्रियाणि कादश त्रयः सत्वादयो गुणाः शब्दादयः पंच इत्याततत्वानि तेष्वीशं सर्वतत्वेश्वरं प्रभुं। ज्ञानं ज्ञानीमवेत्स्वस्य योग्य ध्यानं विशेषतः। पूर्वोक्तं एवयोजानन्स विज्ञानी भवन्त्विति वचनमत्र मानं। नद्विदं ज्ञानं चेद्विज्ञानं

उद्धव उवाच ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं। आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ८ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश। पश्यामि नान्यच्छरणं तवांघ्रि द्वंद्वातपत्रादमृताभिवर्षात् ९ दष्टं जनं संपतितं बिलेऽस्मिन्कालाहिना क्षुद्रसुखोरुतर्षं। समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव १० श्रीभगवानुवाच इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं। अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृण्वतां ११ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः। श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत १२ तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान्। ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् १३ नवैकादश पंच त्रीन्भावान्भूतेषु येन वै। ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं १४ एतदेव हि विज्ञानं न तथैकेन येन यत्। स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां १५ ॥ ॥

विज्ञानं विशिनष्टि एतदेवेति। हि शब्दो विशेषद्योतकः। सुखस्य महद्विशेषतो यो यं ज्ञानं तद्विषयस्य विनस्य ज्ञानेन सहितमेतदेव ज्ञानं विज्ञानं विद्धीति शेषः। तज्ज्ञानं तर्हि किं तत्राह। एतदेवेति। हि शब्दो विशेषद्योतकः सुखस्य महद्विशेषतो यो यं ज्ञानं तद्विषयस्य विनस्य ज्ञानेन ... पूर्वोक्तप्रकारेण तत्वाभिज्ञत्वात् सर्वतत्वेश्वरं विषयीकृत्यापि तत्वेश्वराविषयत्वात्कथं विज्ञानं नेति तत्राह। न तथेति। ... इदं सत्वेश्वरत्वात्प्राधान्यं कुतः इत्यत आह। एकेनेति वेन ज्ञानं विज्ञानं न भवति। स्वयोग्य पुरुषार्थसाधनत्वात्तस्मात्सर्वं यज्ज्ञानविशिष्टमेव विज्ञानमेव इत्यर्थः। इदं सत्वेश्वरत्वात् ... त्रिगुणात्मनां सत्वादिगुणनिर्मितदेहानां भावानां स्थित्युत्पत्त्यप्ययान्पश्येत् १५ नोऽस्माकं तत्वानां मध्ये एकेनात्यतिरेकेण येन तत्वेन यच्च स्थित्वादय आधारत्वेन

यच्च तत्वमादावन्ते मध्ये यः प्राकृत प्रलयादूर्ध्वमप्यवस्थितिकालेऽवशिष्टं सर्वं तत्पुनः स्थितिसंक्रमेत ... तत्र विशतियद्योऽध्येत तत्र अविशिष्टमविनाशितदेवसत्स्वतन्त्रं। सत्वं स्यात्तत्र मुख्यं तद्ब्रह्मलेन चायरे। ... इति वचनाद्धरिरेव तत्वेषु प्रधानं तत्वमिति भावः। अत्र किं प्रमाणमिति तत्राह श्रुतिरिति। नैकमेवोऽर्थे सर्वो ब्रह्मत्वे हरेः प्रमाणमपितु श्रुत्यादिचतुष्टयमपि ऐतिह्यमागमभेदः। प्रयोजनमाह प्रमाणैरित्यादि वेदादिप्रमाणैर्विदिताशेषमत्वतदीशविशेषतया ज्ञानविज्ञानसंपन्नः पुरुषो विकल्पाद्विरुद्धकल्पनाज्जीवस्यातंत्र्यज्ञानादिलक्षणाद्विरज्येत विरक्तो भवति मिथ्याज्ञानरहितो भवतीत्यर्थः। सोपि प्रामाणिकः श्रेष्ठः कथमित्यत उक्तं। प्रमाणैरिति। श्रुत्यादिप्रमाणैः ... प्राधान्यस्यानवच्छिन्नत्वाद्यथार्थज्ञाने स्थितस्य

आदावन्ते च मध्ये च सृज्यात्सृज्यं यदन्वियात्। पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् १६ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं। प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते १७ कर्मणां परिणामित्वादाविरिंच्यादमंगलं। विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत्। भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ। पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं १९ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं। परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्यायां सर्वांगैरभिवंदनं। मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः २१ ॥ ॥

भावात्पौरवत्सलायमानत्वादित्यर्थः। प्रमाणानां नानात्वेन प्रतीयमानानां तात्पर्यार्थापरिज्ञानात् ... वैराग्यं विशिनष्टि। कर्मणामिति। आविरिंचान्मनुष्यमारभ्य विरिंचपर्यंतं जगत् अमंगलं असारं। अत एव नश्वरं पश्येत्। अदृष्टं स्वर्गादिकमपि दृष्टं गृहादिवत् पश्येत्। कर्मणां फलरूपत्वात् १८ विरक्तोऽपि भक्तिं कुर्यादिति भावेनाह। भक्तियोग इति। निरतिशयभक्त्युत्पत्तेः कारणं च भक्तिं श्रद्धेति। अमृतवच्छ्रवणमरणाद्धारिणां हरिकथायां परिनिष्ठा अत्यापद्यपि नैमंनियमः मुंचामीति निश्चयः। अभिवंदनं प्रणामः। मन्मतिः। संनिहितं इति मत्स्मरणं २१ ॥ ॥

भा॰ए॰

९९

मदर्थेषु अहमेवार्थो येषां ते तथा तेषु परमभागवतेषु । अंगचेष्टा शरीरावयवैः कृत्यलक्षणा चेष्टा मदर्थं मन्दिरमार्जनादि स्पर्शनिवेशो ग्रहस्य पार्श्वेकागव गात्केणाकि
नित्यादृष्टकोऽन्य इति । आत्मस्वरूपस्य यदा सत्वगुणेनोपबृंहितं संवर्धितं अत एव शान्तं चित्तं मय्यर्पितं भवति तदा धर्मादिकमाप्नोतीत्यनेन धर्माद्यर्थो विशिष्टो
स्त्रीत्येतत्परिहृतविपक्षे बाधकमाह यदीति यदि तच्चित्तं विकल्पेऽर्पितमिंद्रियैरपि निंदितेषु विषयेषु धावति तर्हि तच्चित्तं रजस्वलं रजोदूषितं असन्निष्ठं ता

मदर्थेऽङ्गचेष्टा वचसा मद्गुणेरणं । मय्यर्पणं च मनसः सर्वकामविवर्जनं २२ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च । इष्टं दत्तं हुतं भुक्तं मदर्थं
यद्व्रतं तपः २३ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां । मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते २४ यदात्मन्यर्पितं चित्तं शान्तं सत्वोपबृंहि
तं । धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते २५ यदर्पितं तद्विकल्पे इंद्रियैः परिधावति । रजस्वलमसन्निष्ठं चित्तं विद्धि विपर्ययं २६ धर्मो मद्भ
क्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं । गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः २७ उद्धव उवाच यमः कतिविधः प्रोक्तो नियमो वारिकर्षण
कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो २८ किं दानं किं तपः शौर्यं किं सत्यं कमलेक्षण । किमत्रं तत्र जननं किं च शौचं जनार्दन २९ कः
स्त्यागः किं धनं श्रेष्ठं को यज्ञः का च दक्षिणा । पुंसः किं स्विद्बलं श्रीमद्भगो लाभश्च केशव ३० का विद्या ह्रीः परा श्रीः का किं सुखं दुःखमेव च । कः पंडि
तः कश्च मूर्खः कः पंथा उत्पथश्च कः ३१ ॥ ॥

मस्वं च विपर्ययं दुःखकारणं च विद्धि । धर्मादिकमभिपद्यत इत्युक्तं तद्विशिनष्टि । धर्म इति । एकात्म्यदर्शनमित्येतत् । एकः प्रधान्तुदृष्टो विशेषः प्राधान्यदर्शनं ।
एकात्म्यदर्शनं प्रोक्तं सर्वज्ञानोऽशमं च तदित्यनेन व्याख्यातं । तत्र तत्र भक्तिसाधनानि यमादयः कथ्यन्ते तत्स्वरूपविवित्सया तत्रोद्धवः पृच्छति यम इत्या
दिना । श्रीमत्बलं किंस्वित् ३० ३१ ॥

राम

९९

विपरीतं पृष्टं योऽन्यदोषं दुहंति फलानीति शेषः । दंडन्यासः अशास्त्रविहितदंडत्यागः । दंडन्यास इति वा [illegible] स्वभावविजयः स्वभावोऽज्ञा[illegible] समदर्शनं यथावस्थ
दर्शनं कर्मस्वसंगः नाहं कर्तेति । इष्टं धनं धर्मः । भगवत्तमोऽहं यज्ञः यज्ञो नरः स्यादित्यर्थः । ज्ञानसंदेशः ज्ञानोपदेशः दक्षिणा ऐश्वरो भावो ममैश्वरत्वभावः भगः । आ

कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं । क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ३२ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते श्रीभग
वानुवाच अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः । आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं ३३ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं । ती
र्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ३४ एते यमाः सनियमा उभयोर्द्वादश स्मृताः । पुंसामुपासितास्तात यथाकामं दुहंति हि ३६ शमो मन्निष्ठता बु
द्धेर्दम इंद्रियसंयमः । तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ३७ दंडन्यासः परं दानं कामत्यागस्तपः स्मृतं । स्वभावविजयः शौर्यं सत्यं च सम
दर्शनं ३८ ऋतं च सूनृता वाणी कविभिः परिकीर्तिता । कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ३९ धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः । दक्षि
णा ज्ञानसंदेशः प्राणायामः परं बलं ४० भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः । विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ४१ श्रीर्गुणा नैर
पेक्ष्याद्याः सुखं दुःखसुखात्ययः । दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ४२ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः । उत्पथश्चित्तविक्षेपः
स्वर्गः सत्वगुणोदयः ४३ नरकस्तमउन्नाहो बंधुर्गुरुरहं सखे । गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ४४ ॥ ॥

त्मनि भिदाबोधः सर्वतः विलक्षणोऽहमिति ज्ञानं विद्या । दुःखात्ययात्सुखं मोक्षलक्षणं सुखं कामानां विषयाणां सुखापेक्षा दुःखं । देहादावहं बुद्धिर्यस्य स
तथा मन्निगमः मद्विषयो वेदः सत्वगुणोदयः सत्वगुणाभिवृद्धिः स्वर्गः । तमउन्नाहः अज्ञानोन्नतिः नरकः । भ नत्वादि गुणाढ्यः ४४ ॥ ॥

असंतुष्टो विषयासंतोषवान् दरिद्रः विषये दोषबुद्धिः समर्थः इन्द्रियवशे स्थितः कृपणः। विषये दोषबुद्धिः समर्थः इन्द्रियाणां वशे स्थितः। कृपणः सन्नुत्तमं प्रोक्तो गुणेषु
द्विविपर्यय इति गुणेषु विषयेषु असक्तः स्ववशः ईश्वरः गुणसंगी सर्वविषयसंगी विपर्ययो विपरीतः अनुक्तार्थमतिदेश्य विषयेष्वपि देहिनः। विपरीतः
सन् तु ज्ञेयः स्वात्मनो विपरीततः इति वचनात् चित्रामसंतोषमाचाह दरिद्रः सर्वविषयसंगी विपरीतः। निरूपिताः परिहृताः शास्त्रतात्पर्यार्थं कथयति किं व
र्णितेनेति। गुणदोषयोर्लक्षणमुद्दिश्य बहुना वर्णितेन किं। विहितकरणं गुणः। निषिद्धकरणं दोषः इति गुणदोषदृष्टिर्हि दोषः भावतिविपत्त्वादि यत्
... गुणदोषयोर्लक्षणमुद्दिश्य बहुना वर्णितेन किं ... गुणदोषयोर्भेददर्शनं गुणस्त्वर्थः। अत्र हरे यत्प्रियं स गुणः यदप्रियं स दोष इति सतां मतमिति तात्
मन्तरेणेति शेषः। उभयवर्जनं गुणः उभयोर्गुणदोषयोर्भेददर्शनत्यागो गुणस्त्वर्थः।

दरिद्रो यस्त्वसंतुष्टः कृपणो योऽजितेन्द्रियः। गुणेष्वसक्तधीरीशो गुणसंगी विपर्ययः ४५ एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः। किं वर्णि
तेन बहुना लक्षणं गुणदोषयोः ४६ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ४७ इति श्रीभागवते महापुराणे एकादशस्कन्धे एकोनविं
शोऽध्यायः उद्धव उवाच विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते। अवेक्षतेऽरविन्दाक्ष गुणं दोषं च कर्मणाम् १ ॥ ॥

यद्वा बहुना वर्णितेन किं गुणदोषयोर्लक्षणं स्वरूपं द्वन्द्वमिति शेषः। कथं तदाह गुणेति गुणदोषयोरन्योन्यदृशिर्दोषः उभयवर्जनं गुणः। अत्रापि हि
विपत्त्वादि प्रयोजनमिति इत्येकादशे एकोनविंशोऽध्यायः अधिकारिणामनेकविधत्वेन साधनानामपि तथात्वात्केषांचित् ... विविध
या कर्मयोगादिभेदेन त्रिधा विभक्तस्य तत्स्वरूपं कथयत्यस्मिन्नध्याये तत्र भगवन्प्रियमेव गुणः तदप्रियो दोष इति भगवदभिप्रायज्ञो ... विविच्य ज्ञाप
यायद उक्ति। विधिश्चेत्यादिना। हे अरविन्दाक्ष ईश्वरस्य ते तव विधिश्च प्रतिषेधश्च विधिनिषेधलक्षणो निगमो वेदः। कर्मणां गुणं दोषं चापेक्षते। विहितक
रणं गुणः निषिद्धकरणं दोष इति वक्ष्यमाणार्थः १ ॥ ॥

अत्रेदमप्यनुसंधेयमित्याह। पुरुषेति। हृदिस्थित्वा जीवानां ज्ञानोत्पादनात् पुरुषनाम्नो वस्तुनः स्थित्वा ज्ञानफलमुक्तिदानादीश्वरनाम्नश्चाण्वपि वैलक्षण्यं न दृश्यते। भेददर्शने त्वनर्थमाह। तदन्येतितयोः पुरुषेश्वरयोः अन्यत्वकल्पना भेददृष्टिलक्षणा अपार्था तत्स्वरूपापरिज्ञानप्रयोजनानर्थकारिणीत्यर्थः। ज्ञानात्मनो जीवस्य ज्ञानोत्पादनं कथमीश्वरत इति तत्राह। ज्ञानं चेति। प्रकृतेर्गुणः सत्वगुणजन्यं स्वरूपभूतं ज्ञानं तु सदा जीवस्य विद्यमानम्। नियतं प्राकृतं ज्ञानं भवत्यतस्तेनैव बद्धो जीवस्य यत इति चेन्मात्। जन्यज्ञानस्य प्राकृतत्वं साधयति प्रकृतेरिति। तु शब्दो विशेषद्योतकः प्रकृतेर्गुणसाम्ये प्रलये वर्तमानस्यात्मनो जीवस्य यथा सत्वेरजस्तम इति प्रकृतेर्गुणा आवरकाः न भवंति ईश्वरेच्छानियतप्रवृत्तिशून्यत्वात् तदा स्वरूपज्ञानादिगुणा अपि भवंति। तथा सृष्टिकाले जीवस्वरूपे तैर्गुणैरावृतं भवति। गुणानां वीर्यमाह। स्थितीति। किमायातं अनेन प्रकृतत्वमित्याह। सत्वमिति। इह सृष्टिकाले सत्वं ज्ञानं सत्वगुणजन्यं रजोगुणजन्यं कर्म तमोगुणजन्यमज्ञानमित्युच्यते। प्रलयकाले सृष्टिकाले च विशेषः इति बाह्यज्ञानं प्राकृतमिति सिद्धं। यद्वा प्रलयेपि सृष्टावपि प्रकृतेर्गुणा आत्मनः परमात्मनो विशेषापादकाः किं तु जीवस्यैव। कथमित्याह। सत्वमिति। सत्वादयो जीवस्य बाह्यज्ञानादिविशेषजनकाः इति। अतश्च पुरुषो नाम ज्ञानदः सर्वदेहिनां वृद्धिश्चेश्वरो नाम ज्ञानादिफलदो इत्युक्तं तस्य विष्णुजीवविबोधकाः फलदाता इति वा तेन परेशो न भिदां वदेत्। तदेवान्यैरुक्तं पेषु विशेषो भेददर्शकाः। ये च जीवेश्वरभेदं पश्यंते तेनर्थभागिनः इति बाध्यस्वपुरुषेश्वरानुक्तार्थाविति सिद्धं॥ ॥

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि। तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः १२ प्रकृतेर्गुणसाम्ये तु प्रकृतेर्नात्मनो गुणाः। सत्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः १३ सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते॥ ॥

इह नीलपीतादिरूपत्वानां संख्याभेदं वक्तुं तत्वकारणस्वरूपं तावदाह। गुणव्यतिकर इति। सत्वादिगुणानां महदाद्यात्मना व्यतिकरो यस्मात्स भगवान् गुणव्यतिकरः किंनामधेय इत्यत उक्तं काल इति। कलनकामधेनाविति धातोः सर्जनेन ब्रह्मादीनामभीष्टदो भूत्वा कालनामा इत्यर्थः। अनेन कारणत्वानुपपत्तिरपि परिहृतेति ज्ञायते। कारणस्य नामांतरं वाह। स्वभाव इति। स्वतंत्रो भावः स्वभावः स्वरूपभूतो भावो भूतिरैश्वर्यं यस्य स तथा इति वा स्वाधीनो भावः सत्ता यस्य स तथेति वा स्वनियतो भावो जन्मादिलीला यस्य स तथेति वा। वायुनाबैगौतमसूत्रेण त्यादेर्वायोरेव सर्जनादिप्रतीतेः कथमयमेव स

गुणव्यतिकरः कालः स्वभावः सूत्रमेव च॥ १४॥ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोनिलः। ज्योतिरापः क्षितिरिति तत्वान्युक्तानि मेनव १५ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः। वाक्पाण्युपस्थपाय्वंघ्रि कर्माण्यंगोभयं मनः १६ ॥ ॥

र्वकर्तेति तत्राह। सूत्रमिति। सूत्रं सर्वाधारः अन्तररमंतवसंतसूतेरिति सूत्रादेवल्लिंगा भगवदेकनिष्ठमित्येव शब्देनावधारयति। चशब्देन योदेवावानामिर्वकर्तेति तत्राह। पुरुष इत्यादिना। पुरुषो हिरण्यगर्भः। प्रकृतिर्गायत्री। व्यक्तो ति शक्तेर्वा सुशब्दः साधका इति दर्शयति। नवैकादश पंचत्रीनित्यत्र नवतत्वानि वक्ति। पुरुष इत्यादिना। तदाहंकारशब्देन रुद्रस्यैव वचोभवेदितिवा रुद्रः अहंकारः रुद्रः। परा पुरुषशब्देन विरिंचस्यैव वाच्यता। परस्परं पुनरेव व्यक्तस्तत्र तु शंकरः। तदाहंकारशब्देन रुद्रस्यैव वचो भवेदिति वा त्यादयं नियमः आमानिकइत्यर्थः। एकादश तत्वान्याह। श्रोत्रेत्यादिना। ज्ञानशक्तयः ज्ञानेंद्रियाणि कर्माणि कर्मेन्द्रियाणि। उभयं संकल्पविकल्पात्मकं मनः॥ ॥

एकं विषयमाह। शब्देति। अर्थजातयः विषयसामान्यानि। अनेन पंचतन्मात्राण्युक्तानि। कर्म्मायतनसिद्धयः कर्मेन्द्रियविषयाः। पायूपस्थयोर्विषयावुत्सर्गानन्दौ
द्वैनोक्तौ। द्विविधत्वात् पंचकद्वयं। पंचेत्यनेन द्विरावृत्ति प्राप्त्या पंचपंचेति। तथा च शब्दादिशिल्पांतानि दशतत्वानि। वृत्तिति सत्वादिगुणत्रयाणि तत्वानि दश
चक्रुः सत्वादित्रयाणं प्रकृतिमाह। सर्गादाविति। अस्य जगतः सर्गादौ उपादानकारणात्मक जडप्रकृत्यभिमानिनी विष्णुप्रकृतिर्हरिवाञ्छिभिन्नकारणरूपिणी। अ
तर्नियंतृ तु पेणाप्रवेशात्कार्यरूपिणी च। सत्वादिभिः श्रीर्भूर्दुर्गेति रूपभेदेन सत्वादिगुणाभिमानिनी च सेज्ञादितिशेषः। एवं च तथा दितमो गुणानां तानि हरिणा
सह चतुर्विंशतत्वानीति भागवते मतं। परस्परानुप्रवेशादित्युक्तं युक्तिं विवृणोति। प्रत्युपदृत्यादिना। कालादिना ब्रह्महरिणानुगृहीतः पुरुषनामादि

शब्दस्पर्शौ रसो गंधो रूपं चेत्यर्थजातयः। गत्युक्त्युत्सर्गशिल्पानि कर्म्मायतनसिद्धयः १० सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी। सत्वा
दिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते १८ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया। लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् १९ ॥

एषाम्भः पुरुषस्यार्थमव्यक्तानादीक्षिस्यातीति ईक्षते। संक्षोभ्य इति मत्वाव्यक्तादितत्वानि सरकं ती निमित्तीकृत्य सृजतीत्यर्थः। अत एव कार्यकारणरूपेण
प्राव्यक्तादयो धारणत्वाद्धातु नामानस्तत्वविशेषाः। पुरुषेक्षया पुरुषस्य हरेः कटाक्षगोचरत्वेन संहताः संश्लिष्टाः प्रकृतेर्बलाद्विकुर्वाणाः लब्धवीर्याः कार्यकारण
शक्तिश्चिताः अंडं ब्रह्मांडं सृजंतीत्यन्वयः। पद्मजउपकृति रस्यजगतः सर्गादौ सत्वादिगुणैर्जगद्धत्ते। पुरुषो विष्णुरव्यक्तं प्रकृतिमीक्षते। तन्नियताधातवो
इंसृजतीति कार्यकारणभावाद्धन्योन्यानुप्रवेशो युक्त इति वक्तुं दृष्टि कथनं सृज्यस्य प्रकृष्टरूपत्वादन्योन्यानुप्रवेशिनः। तिष्ठंतितात्विकारैर्वा विशेषप्रतीतिका
रणांतर इति वचनात्। अतस्तत्वानामल्पसंख्यावत्वं युक्तं १९ ॥ ॥

तत्र सत्वादीन् गत्यादीश्च विना हरिणा सहिता निर्जत्रिंशतितत्वानि। महदहंकारौ ब्रह्मरुद्रावंगीकृत्यस्कंदं विना परमात्मना सह पंचविंशतिः। व्यक्तं विनाचतुर्विं
शतेरित्येतानि न्यून संख्यां कतत्वानि मिद्धवत कृत्स्न सैकइत्यादिन्यून संख्यानिक पाति। समेवेति। यत्र पास्मिं रूपत्वे समे वधातवस्तदेवंगणानं कर्तव्या। शा
ब्दाद्यर्थाः स्वादयस्ते कीकारं गताः पंच। षष्ठो ज्ञानमात्रस्तासम सगुभयाधारः। अभिमन्यमानाभिमानिनाआधारः आत्मा परमात्मा इति महत्व। ततः शब्देन ज्ञा
नात्मानाव तु कृष्णे तदशेंद्रियाण्येकीकृत्यैकं तत्वमस्वः पंचप्राणाः। देह इति देहाभिमानी दिवाकरः। ज्ञानात्मानाविति नवतत्वानि। ज्ञानशब्दो दितोब्रह्मातदा
धारो हरिः स्मृत इति। सर्वदेहाभिमानी रुद्रो देहिनां तु दिवाकर इति च। देहप्राणौ पंचेंद्रियाणि वा ज्ञानात्मभ्यां नवेति च। यद्वा वागादीनां मनोधीनत्वेन मनसे
कात्वं पंचपंचोत्रा दीन्द्रियाणि देहप्राणौ परमात्मा नाम इत्येतिन वा षडित्यत्रैवं संख्यानं। महदादिकारणानां कार्यानुप्रवेशेन कृत्वा कार्यादिष्टतानि परम पुरुषः

समे वधातव इति यत्रार्थाः पंचखादयः। ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः २० षडित्यत्रापि भूतानि पंचषष्ठः परः पुमान्। तैर्युक्त आत्मसंभूतैः
सृष्ट्वेदं समुपाविशत् २१ चत्वार्येवेति तत्रापि तेजआपोन्नमात्मनः। जातानि तैरिदं जातं जन्मावयविनः खलु २२ संख्याने सप्तदशके भूतमात्रें
द्रियाणि च। पंचपंचैकमनसा आत्मा सप्तदशः स्मृतः २३ ॥ ॥

सृष्टिरिति षट्। नवसप्तनयोः शत्वे केषां दिक्कार्याणां कारणगुणानुप्रवेश इति ज्ञेयं। आत्मनः संभूतैस्तैराकाशादिपंचभूतैर्युक्तः आत्मा इदं सृष्ट्वा समुपावि
शत्। चत्वार्येवेति तानि कानीत्यत्राह। तत्रापीति। तत्रापि पंचस्वप्यात्मनो जातानि तेज आपो न्नमिति त्रीणि आत्मैकइति चत्वारि। अन्नं पृथिवी। अवयविन इदं
मनेतेजआदिभिर्जातं व्यक्तं खलु। अवयवी देहः। सप्तदशके संख्याने त्वेवं गणना। पंचभूतानि पंच मात्राः पंचश्रोत्रादीन्द्रियाणीति पंचदश एकेन मनसा सह आ
त्मा परमात्मा सप्तदश इति सप्तदशकं। भूतमात्रेत्यनेनैकादशानां संख्यानमपि ज्ञेयं। पंचभूतानि पंचमात्राश्चैकः परमात्मेति। भूतानि मात्राश्च परस्मत्वेकाद
शके स्मृतमिति २३ ॥ ॥

षोडशसंख्यानि तत्वानि तद्दत्तभूतमात्रेंद्रियाणि च पंचेत्युक्तवत् तद्विंश्वर्वस्मात्को विशेष इत्यत उक्तं । आत्मनेति । आत्मनः संनिधिस्थं त्वान्मन सम्बन्धो रेकत्वे न । आत्मनः संनिधिस्थत्वात्मन सम्बन्धतदुक्तितः । इत्यतोभवेत्य राणोत्तत्वं षोडशकयं देत्युक्तिः । एवं दशहो दीप्ता द्योतकः । भूतानि पंच इंद्रियाणि पंच मन आत्मा ब्रह्मा परमात्मा चेति त्रयोदशतत्वानि । भूतेंद्रियाणि च मनो ब्रह्मा विष्णुस्तथैव च । एवं त्रयोदशं चाहुस्तत्वं निपुनयो वराइति । आत्मेति परमात्मा च विरिंचोऽपि कथ्यते । वायुर्मनश्च देहश्च स्वप्नमित्यपि कुत्रचित् इति च । उपसंहरति । इतीति । उद्धव एवं तत्वसंख्याविषयानुपपत्तिशंकापरिहारश्रवणेनत

तद्दत्त्वोषोडशसंख्यानमात्मनाम न उच्यते । भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश २४ इति नानाप्रसंख्यानं तत्वानामृषिभिः कृतं । सर्वं न्याय्यं युक्तिमत्वाद्विदुषां किमशोभनं २५ उद्धव उवाच प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ । अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः २६ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि । एतन्मे पुंडरीकाक्ष महांतं संशयं हृदि । छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः २७ ॥

द्विषयेनिःशंकोऽपीदानीं प्रकारांतरेण शंकते । प्रकृतिरिति । अत्र पुरुषो विष्णुः प्रकृतिर्जडसंज्ञाता उभौ यद्यथात्मविलक्षणौ स्वरूपत एव भिन्नौ । अंतरंच भिदा चेति वैलक्षण्यं प्रकीर्तितमिति । अतो वैलक्षण्यं भेदः । तथाप्यनयोरन्योन्यापाश्रयात् भिदा न दृश्यते । तत्कुत इति चोद्याभिप्रायः । अन्योन्याश्रयत्वं विवृणोति । प्रकृताविति । हे शर्ङ्गी । हेतो । हरेः प्रकृतेराधारत्वेन ततत्त्वं प्रकृते स्वदधीनत्वेन तदवतरत्वमंतरेणानयोरन्योन्याधारत्वमेनं हृदयं तेऽहृय स्मात्तस्मात्मंदमतेर्मे संशयं छेत्तुमर्हसि त्वं त्वयः । पद्मेशेत्यनेन हरेः प्रकृत्यंत्रमत्वं किं वक्तव्यमिति ज्ञानं नेत्रेषु दृष्टो लोकविषयमस्मतित्व मा त्वमुपचरतीति ज्ञातव्यं २८ ॥

एतदेव प्रामाणिकमिति भावेनाह । त्वत्त इति । ननु शक्तितोऽल्पबुद्धित्वाज्ञानमसादि शरीर बलाद्वाज्ञानमस्य प्रमोषोऽपि त्वत्तः शक्तिः कार्यं वलं लक्ष्मीरितिका क्रतुर्बुद्धौ उवाचस्रकृत्यभिधाना इक्ति शब्देन बुद्धिरित्युच्यते । आत्ममायायास्त्वत्सामर्थ्यस्य त्वदधीन प्रकृतेर्वा गतिं स्थितिं । आधारः प्रकृतेर्विष्णुर्न धारकः क्रतुर्बुद्धौ उवाच स्कृत्यभिधाना इक्ति शब्देन बुद्धिरित्युच्यते । हरेः क्वचित् । तथाप्यव्यक्तगोयद्दत्तदृश्यते मंदचेतसामिति पाश्चोक्तवचनात् मुख्याधारत्वं हरेरितरत्वमंदमति विवृणोयेति हि शब्दद्वयेन दर्शयति २९ प्रकृतिपुरुषयोरन्योन्य विलक्षणे आत्मविलक्षणा विति यदुक्तं तत्र येचेति भावेन परिहरति । प्रकृतिरिति । चशब्दो वैलक्षण्यानुकर्षार्थो विधारणार्थश्चा प्रकृतिपुरुषयोरन्योन्य विलक्षणे वेत्यर्थः । वैलक्षण्याविवेकः किंकृत इति तत्राह । विकल्प इति । मिथ्याज्ञानकृतः । ननु विकल्पः किंकारणक इति । एष विकल्पः तमः कारण इति प्रतिज्ञायते

त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः । त्वामेव ह्यात्ममायाया गतिं वेत्थ न चापरः २९ श्रीभगवानुवाच प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ । एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ३० ममांग माया गुणमय्यनेकधा विकल्पबुद्धींश्च गुणैर्विधत्ते । वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ३१

तथा हि । गुणव्यतिकरात्मक एष सर्गो वैकारिकः विकारनिमित्तः स च गुणव्यतिकरस्त्रिविधः सत्वरजस्तमस्समेकैकप्राधान्येन त्रैविध्यं तत्र तमः प्रधाना नामेव सत्वानां विरुद्धकल्पनं यस्मात्तस्मात्तम एव कारणं । न केवलं तम एव प्रकृतिरीश्वरेच्छा चकारात् गतिमित्याह । ममेति । अंगोद्धव मम मायायाममेच्छागुणमयी ज्ञानादिगुणमयी । सत्वादिगुणमयी मम मायामदधीना प्रकृतिश्च गुणैर्गुणाश्च तैर्महदहंकारादिभिः सत्वादिगुणैर्वा अनेकधा विकल्पबुद्धिं विधत्ते करोति । महत्तत्व विकाराज्जातत्वाद्वैकारिकोऽहंकारस्त्रिविधः महत्तत्वाद्विकुर्वाणादहंतत्वमजायत इत्यादिना प्रसिद्धः सोऽपि त्रिविधोऽपि त्रिविधः । अध्यात्मादिभेदेन ३१

एतत्रैविध्यं सर्वगताइकितं पेवदर्शयति। दृग्रूपमिति। रंध्रे गोलके दृक् चक्षुरिंद्रियं तत्र दृश्यत्वमुपलक्षणमेतत्। अध्यात्ममिंद्रियाणि तैजसाहंकारस्वरूपाणि तेरेव विपरीतज्ञानं जायते। अहंकारे विद्यमाने भ्रमो भवति नान्यथेति वचनात्। परत्र रेहादृश्यं रूपं तदधिभूतं तामसं परत्र दिवि योर्कः सूर्यः तदधिदैवतं कारिकं। अनेन किं प्रयोजनमत आह। परस्परमिति। अध्यात्मादि त्रितयं च परस्परेणापेक्षया सिध्यति ज्ञानाख्यं प्रयोजनं भवति। अस्मो सिद्धिः स्वतो न एकैकस्मात् स्वात। चक्षुराद्यन्यतमाभावे ज्ञानं नोदेतीत्यर्थः। नैतावता परस्परसिद्धिः पूर्यतइत्याह। आत्मेति। यदात्मा यः प्रत्यग्जडाहंकारो वा स्वितदालिंदैवकारिकं ज्ञानं। प्रकृति प्राकृतव्यतिरिक्तं जीवपरमात्मस्वरूपं कदाचुविशदं दृश्यत इत्यत्राह। एषामिति। आत्मेत्यनुवर्त्तते। येषां प्रकृतिप्राकृतानां परामः स्वत्यतो छेदनज

दृग्रूपमर्कं वपुरत्र रंध्रे परस्परं सिद्ध्यति नस्वतो सो। आत्मा यदेषामपरो मआद्यः स्वयानुभूत्याखिलसिध्यसिद्धिः
३१ एवं त्वगादिश्रवणादिचक्षुर्जिह्वादिनासादि चचित्तयुक्तं॥ ॥

त्वगामुक्ति स्वदा स्वयानुभूत्या स्वरूपज्ञानेनात्मा जीवश्च आद्य आत्मा परमात्मा च ज्ञायत इति शेषः। कीदृशोऽहरिरखिलस्य सिध्यसिद्धी ज्ञानाज्ञानेयस्मात्तथा। सर्वज्ञानाज्ञानहेतुरित्यर्थः। सम्यक् ज्ञानं द्रष्टः शास्त्रात् मुक्तस्य विशेषतः। देवानानुग्रहो नित्यो मुक्तस्यापि द्युपेक्ष्यते। नित्यतत्त्वाति विंवत्वा जीवानामेव स्वत्वश्च शः। चक्षुर्जिह्वादिनामहत्त्व वस्तु ज्ञानं च मुक्तस्य न जडाहंकृतेः क्वचित्। किंतु स्वरूपशक्त्येवदेवेभ्यश्चाभिज्ञायते इति वचनात्। उक्तन्यायमतिदिशति। एवमिति। चक्षुर्जिह्वादिनामहत्त्व गादिश्रवणादिचैवमध्यात्मादिभेदेन त्रिविधं सादिवित्यमन्योन्यापेक्षत्वात्। कीदृशं त्वगादि चित्तयुक्तं। अनेन चित्तं मनोपि त्रिविधमिति ज्ञायते। चक्षुरिति पुनर्वचनमवधारणार्थं॥ ॥

नामसाहंकारोपि विकल्पहेतुरिति सूचितं तत्पुरस्तान्नदिशनी स्पष्टयति। योसाविति। योसौमोह विकल्पहेतुरज्ञानान्यथाज्ञानहेतुर्विकारः समसत्त्वादिगुणक्षो भमहत्तत्वं तेन कृतः सोऽहमहंकारस्त्रिवृत् त्रिरूपत्वेन वर्त्तते त्रिप्रकारमाह। वैकारिकस्तामस ऐंद्रियश्च इंद्रियोत्पत्तिहेतुः तेजसश्चेति प्रयोजनमाह। जगत इति। प्रधानेति। प्रधानं प्रकृतिर्मूलं महत्तत्वस्याकारणं यस्य स तथा। स जगतः प्रसूतिः सृष्टिर्यस्मात्तथा। जगत्सृष्टिहेतुरित्यर्थः। अनेन प्रकृतेः कारणत्वं गतमत्राह। प्रधानेति प्रधानप्रकृतिविकारत्वान्न परिज्ञानमयत्वात् ज्ञान हृदादिकार्यानुगतस्य हरेरपि गुणक्षोभकृतो विकारः स्यादिति तत्राह। आत्मेति। आत्मा परमात्मा गुणक्षोभकृतविकारवान्न परिज्ञानमयत्वात् ज्ञानस्वरूपत्वात्। विकाराभिमानित्वमंतरेण ज्ञानस्वरूपत्वेन आत्मा जीवोपि न गुणक्षोभकृतविकार इति। विकल्पस्वरूपमाह। विवाद इति। जीवेश्वराभेदज्ञानस्वरूपत्वात्। विकाराभिमानित्वमंतरेण ज्ञानस्वरूपत्वेन आत्मा जीवोपि न गुणक्षोभकृतविकार इति। विकल्पो भवति। केषां मित्यत उक्तं व्याख्यादिकमसदष्टि। जीवेश्वरभेदप्रपंचादिकं सत्प्रासीति भिदयावस्तुयाथार्थ्यादिविपर्ययेणार्थनिष्ठः पदार्थनिष्ठो विवादो विकल्पो भवति। केषां मित्यतउक्तं

योसौ गुणक्षोभकृतो विकारः प्रधानमूलो जगतः प्रसूतिः। अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐंद्रियश्च॥ ३२॥ आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः। व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात्॥ ३३ उद्धव उवाच त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो। उच्चावचान्यथा देहान् गृह्णंति विसृजंति च ३४ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः। नह्येतत्प्रायशो लोके विद्वांसो संति वंचिताः ३५

ति। सविकल्पो व्यर्थोप्यविद्यमानविषयोपि तथानिष्प्रयोजनोपि स्वलोकात् स्वाश्रयात् मत्तः परावृत्तधियामपगतबुद्धीनां पुंसां नोपरमेत पुनः पुनर्वर्द्धते इति। तदुक्तं पराष्ट्रबुद्धयः प्रवर्त्तंते इति भामोः शिवस्तु गृहीतां। बाह्येषु बाला न स्वकृतकर्मनूतनानाभोगपुनर्भवस्त्वप्यसदस्तित्वस्त्र ज्ञानिवेवं भेदाद्विवादनं। सर्वेव हरिपादाब्जविमुखानां प्रवर्त्तंते इति भामः शिवस्तु गृहीतां त्वद्भिमुखानां स्वकृतकर्मनृदानामेषां पुनर्भवोस्तीति सिद्धं तत्र नित्यानां जीवानां जन्मसृतौ कीदृश्यो कर्मैतत्कारणं चकिमितिपृच्छस्तुद्धवः। त्वत्तः इति त्वत्तः पराङ्मुखधियः सुतो नित्या जीवा अहंज्ञातोहं इत्यभिमानेन स्वकृतैः कर्मभिर्यथो च्चावचान्देहान् गृह्णंति विसृजंति च। तदुद्धहरणादिकं तथा ममाख्याहि। दुर्विभाव्यं विषुरेर्हेयं वेरपि दुर्विज्ञेयं योगैः दुर्विभाव्यमित्यभिमानेन स्वकृतैः कर्मभिर्यथोच्चावचान्देहान् गृह्णंति विसृजंति च। ननानंतेत्यर्थः। अनुगतिस्तज्ञान योरितिधातुः। गतिर्ज्ञानार्थाविंचितामोहित्वात्किमिति मया खेयमिति निर्बंधो इतिनत्राह। नहीति। मायं वंतिना वगच्छंति। ज्ञात्वयेति शेषः॥ ॥

नित्यानां जीवानां देहद्वयग्रहणे को हेतुः कारणं कर्म तत्र मनोपी त्यास्य वा इ परि द्रुरति मनसति मरणकाले कर्ममयं कर्मसंस्कारोपचितं लिंगात्मकं सूक्ष्मे पंचभिरिंद्रियैर्युतं मनो लोकाद्देहाद्न्यं लोकं देहं प्रयाति। तदात्मा जीवः तन्मनोनुवर्तते। कर्मैश्वर्यस्य न्मयं तत्प्रधानं तत्त्वेहितमिति वा। अनादितः प्रकृतिम येन तेनवद्दत्वान्न दनुवर्तनं युक्तं मनःप्रधान पुरुषोनुवर्तत इत्यनेन मनसः प्रयोजकत्वं प्रतीयते तत्कथमन्नाह। ध्यायन्निति। मनो दृष्टान् यथा श्रुतान् विषयान् ध्या यन्नस्या। दितिद्रियस्मान्नस्मानुवर्तप्रवृत्तो मनः प्रयोजकमिति शेषः। इतोपि मनः प्रयोजकमित्याह। अथेति। अथ यदा कर्मतंत्रं विषयसंस्कारसमूहमय मनः सीदद्विपन्नमात्मनो देहादुदितं भवति। तदा तदनु मनोनुजीवस्य स्मृतिरर्थस्मरणं शाम्यति नश्यति। देहात्तराभिमानपर्यंतमिति शेषः। मरणमेव स्पष्टयति।

श्रीभगवानुवाच मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतं। लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते॥ ३७॥ ध्यायन्मनोनुविषया न्दृष्टान्वानुश्रुतानथ। उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनुशाम्यति ३८ विषयाभिनिवेशेनात्मानं यत्स्मरेत्पुनः। जन्तोर्वै कस्यचिद्धेतो र्मृत्युरत्यंतविस्मृतिः ४० जन्मत्वात्मतया पुंसः सर्वभावेन भूरिद। विषयस्वीकृतिं प्राहुर्यथा स्वप्नो मनोरथः ४१ ॥ ॥

विषयेति। कस्यचित्कर्मद्धेतोरुत्तरदेहं प्रवेक्ष्यतः विषयाभिनिवेशेनात्र देहाभिनिवेशेन जंतोर्मनश्चात्मानं पूर्वदेहं न स्मरेत् स्मरणासमर्थं न स्यादिति यत्सात्य तविस्मृतिर्मृत्युरित्यन्वयः। वा इत्यनेन जातस्य द्विकृ वा मृत्युरितिस्मृतिप्रसिद्धिं द्योतयति। इदानीं जन्म स्पष्टयति। जन्मेति। पुंसो देहादिष्वहं ममेदमित्या द्यात्म तयात्मीयत्वेन सर्वभावेन सर्वचेष्टया समग्रा प्रायेण विषयस्वीकृतिं देहाभिमानं जन्म प्राहुरित्यन्वयः। देहादिष्वयं स्वकीयश्च न भवति परमात्माधीन त्वादिति तु शब्देन विशेषिते र्थे उदाहरति। यथेति। जाग्रदिदमित्ययं स्वप्नोयथा अविद्यमानो यथा च मनोरथो मनोरथविषयोप्यविद्यमानोनत्वनिर्वचनीयः। परस्यापि जीवस्यातो जन्मस्मृती युक्ते देहाभिमानः स्वप्नइति पाठे स्वप्ने जायमानो जाग्रत्त्वप्रत्ययो यथा अविद्यमान इत्यर्थः ४१ ॥ ॥

अत्यंतविस्मृतिं मरणं स्पष्टयति। स्वप्नमिति। यथा स्वप्नादेरुत्थितः स्वप्नस्य दृष्टं मनोरथं च प्राक्तनमर्थं तद्विषयं चात्मानं स्वप्नादिद्रष्टारं न स्मरतीति तथा नत्वरे ह्रातराभिमाने सति पूर्वं पुरातनमात्मानं देहं न स्मरति। इव शब्दः केषांचिन्महात्मनां स्मरणं संभवतीत्यभिप्रायः। अस्मरणे कारणमाह। अपूर्वमिति। च शब्द वार्थो। अपूर्वं पश्चात्तनं नूतनं देहमेवानुपश्यति यन्नत इति। यद्वा विषयाभिनिवेशमेव स्पष्टयति। स्वप्नमिति। प्राक्तनं स्वप्नं मनोरथं च यथा न स्मरति। असौ तथा प्राक्तनजन्माद्यनुभूतमर्थं विषयं च न स्मरति। किं तत्र निमित्तमत्राह। तत्रेति। तत्र देहांतरप्राप्तौ पूर्वमनादिमेवात्मानं अपूर्वं सादिमिवानुपश्यतीति यस्मात्तत

स्वप्नं मनोरथं चार्थं प्राक्तनं न स्मरत्यसौ। तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ४२ इंद्रियायनसृष्ट्या त्रैविध्यं भाति वस्तुनि। ॥

स्माद्विषयाभिनिवेश एव कारणमित्यर्थः। अत्र जीवस्यानादिनित्यत्वं देहस्य सादित्वेनानित्यत्वं तथाभिमानानभिमानलक्षणे जन्ममृती इत्युक्तं तत्र जीवस्यानादिनित्यत्वे युक्तमुक्तं तदेव कथमत्राह। इंद्रियेति। वस्तुनि जीवतत्त्वे द्विज्ञायविचारेणाज्ञाते सति जीवस्यानादिनित्यत्वं ज्ञायते। न थाहि। इंद्रियशः इदानीं तनकालवर्तित्वाया प्रतीत्यायएष्यकालवर्तीचायमेवमस्य अतीतकालसंबंध इति त्रैविध्यं जीवस्य त्रिकालवर्त्तित्वं भाति तदेवानादिनित्यत्वं देहस्य तदभावा दतो युक्तमुक्तं। इंद्रियशापास इत्यत्रयाभ्रदृतिदीर्घस्य लोपो वक्तव्यः स्वैपै दीर्घलोप इति यत्रज्ञानमंतरेणस्तुतार्थे निस्मान्न त्रव्द्विपंच वर्गीय मितिज्ञापनाय प्रयुक्त दीर्घलुप्यत इतिसूत्रादशत इति पाणिनः ॥ ॥

भा॰ए॰

११९

अनित्यशरीरसंबंधेनजीवस्याप्यनित्यत्वमापाद्यतइतितत्राहवह्निरितिवह्निर्नारिकेलकपालवत्तत्वहिर्भूतोदेहोजीवाद्भिन्नोनारिकेलवदंतःस्थानवर्तिनोजी
वस्यभिदायात्रनित्यत्वादिविशेषस्याहेतुःआपादकोनभवति।भेदोविशेषेइत्यनइत्यभिधानं।जीवस्यानादिनित्यत्वेपरमात्मनाअभेदःप्राप्तस्यतोवाह्वव
ह्निरितिवह्निरंतर्वर्त्तिनोहरेर्भिदायाहेतवोदुःखादयोयस्यसवह्निरंतर्भिदाहेतुःअक्षहरेर्भेदोजीवस्यदेहाद्भेदःकथमित्यतोवाह्नवह्निरिति।अयमेववह्नि
रंतस्थत्वधर्मआत्मानात्मनोर्वैलक्षण्येपिभिदाहेतुविशेषहेतुरित्यर्थः।देहस्यानात्मत्वंसोदाहरणमाहाजनइति।यथाअसत्ततोसज्जनकृत्यापोसज्जनोस
जनंपुत्रमेवजनयतीतिपितृज्ञानात्पुत्रदोरात्म्यज्ञायते।एवमनित्योदेहोप्यनित्यदेहंजनयतीति।अतोदेहस्यानित्यत्वात्जीवस्यत्रैकालिकवर्त्तित्वेननित्य

वह्निरंतर्भिदाहेतुर्जनोसज्जनकृद्यथा ४३ नित्यदाह्यंगभूतानिभवंतिनभवंतिच।कालेनालक्ष्यवेगेनसूक्ष्मत्वान्नदृश्यते ४४
यथार्चिषांस्रोतसांचफलानांवावनस्पतेः।तथैवसर्वभूतानांवयोवस्थादयःकृताः ४५ ॥ ॥

त्वात्देहस्यानात्मत्वमतएवजीवाद्भिन्नत्वंचसिद्धं।असाधुजनएवजीवपरयोरभेदंवक्तीतिसोदाहरणमाहाजनइति।यथाअसाधुर्जनएवसाधुजनंक
रोतिनसाधुः।एवमासुरोजनोपिसंतंभेदमसंतंकरोति।अतोसाधुजनपरंपरादोरात्म्यसाधुजनवाक्यात्ज्ञायतेइत्यर्थः।देहस्यानित्यत्वप्रकारमाह।नि
त्यदेतिनित्यदाअंगहेभूतानिजीवाधिष्ठितदेहाः।अंगुलोमवंतुपचितानिभवंति।नभवंतिचअपचितानिभवंतिच।किमितिनदृश्यतइतितत्राह।का
लेनेति।उपचयापचययोःसूक्ष्मत्वाल्लिंगवेद्यत्वात्प्रत्यक्षेणतन्नदृश्यते।तदेवसोदाहरणंवक्ति।यथेति।यथार्चिरादीनांसेयंज्वालेत्यादिप्रतीतिः।का
लकृतातथासर्वभूतानांसर्वप्राणिदेहानांचयोवस्थावाल्यकौमाराद्यवस्थातेनकालेनकृता ४५ ॥ ॥

राम

११९

नवस्तुकालकृतत्वमत्रविवेकःकथमित्यतःनकृतमेवविहृणोतीतिसोयमितिइमयाअर्चिषांमग्निज्वालादीनांमायामविगासभाववत्सोयंदीपइतिप्रत्यभिज्ञा
नमृषेतिनज्ञोध्याहारः।सएवायंदीपइत्यादिप्रत्यभिज्ञाघृषातथामृषागीर्भिर्मृषायुषांपुंसांलोकेप्रतिविक्षिप्तंशोभनाभाषामात्रा।केवलंविरूपगामानएवायंपुमानितिदेहवि
षयोव्यवहारोमृषाविवेकिनांसवायंदेहइत्यादिकोनमृषा।सवायमितितुज्ञानंनमृषायसएवतुइतिज्ञानंमृषेवस्यादित्यादेर्विशेषविवेकोयुज्यते।नतुदेहस्ये
वविकारघ्नेदेहंज्ञातोहंस्थूलइतीप्रतीतिःकथमत्राह।आद्यइति।आद्यस्यत्निरङ्गिनोमरोमरणरहितःआद्यंतशून्यइत्यर्थः।अव्ययःशरीरसंयोगवियोगयोर
पिहृद्धिह्रासरहितःसजीवःस्वकृतकर्मबीजेनजायतेम्रियतेचेतिव्यवहारोभ्रांत्याविवेकज्ञानराहित्येन।यथादारुसंपृक्तोग्निरुत्पन्नविनाशवानितिव्य

सोयंदीपोर्चिषांयद्वत्स्रोतसांतदिदंजलं।सोयंपुमानितिनृणांमृषागीर्धिर्मृषायुषां ४६ आद्यःस्वकर्मबीजेनजायतेसोप्ययःपुमान्।म्रियते
वामरोभ्रांत्यायथाग्निर्दारुसंयुतः ४७ निषेकगर्भजन्मानिवाल्यकौमारयौवनं।वयोमध्यंजरामृत्युरित्यवस्थास्तनोर्नव ४८ एतामनो
रथमपीह्यन्यस्योच्चावचास्तनूः।गुणसंगादुपादत्तेक्वचित्कश्चिज्जहातिच ४९ ॥ ॥

।तस्मान्नित्यस्यजीवस्यजननमरणप्रतीतिरविवेककृतेत्यर्थः।सवायमितितुज्ञानंनमृषायंसएवतुइतिज्ञानंमृषेवस्यात्भेदाभेदौयतस्तनोः।अभेदएवजी
वस्यनित्यंप्रत्येकप्राःपृथक्देहस्ददीपनदीवारिफलादीनांपृथक्कृतः।भेदाभेदौपरिज्ञेयोकार्यकारणयोरपि।गुणस्यगुणिनश्चैवज्ञातिव्यक्त्योस्तथैवच।
तथावयवावयवयोःक्रियायास्तद्वतस्तथा।एवंजडेषुनियमश्चिद्रूपेष्वभिदैवत्विति।वचनात्यावद्द्रव्यभाविनाभेदोयावद्द्रव्यमाविनांभेदोभेदावितिनिर्णय
इति ४७ अस्मात्किंजीवस्यनैवेत्युत्पन्यादेहस्यमिद्धंदृष्टव्यति।निषेकेति।विद्रूपस्यजीवस्यजडशरीरसंबंधःकथंघटतइतितत्राह।एताइति।अन्यस्य
देहधीनाःमनोरथमयीरेतास्तनूःसत्वादिगुणसंगादुपादत्तेअपिमहतोअभिमानंजहातिच।इहरेरिच्छागुणसंगस्यघटकइत्यर्थः ४९ ॥ ॥

मा॰ ए॰

११०

आभिमानश्चीकारोऽनन्तरं तं तं विस्मृतिर्मरणमित्युक्तं तद्द्वयं निष्प्रमाणकत्वेन मायामयं किं न स्यादत्राह। आत्मन इति। आत्मनो देहस्य भवाप्ययौ जन्मनाशौ
अभिमानश्चीकारोऽनन्तरं तं विस्मृतिर्मरणमित्युक्तं तद्द्वयं ... यथा। पितृशरीरं विना पुत्रो नाप्यहं यत्र स्मात्तदपि प्रत्यक्षसिद्धमेवं देहस्य
पितृपुत्राभ्यां लिंगाभ्यामनुमेयौ। यथा हि स्वदेहात्पुत्रदेहो जातः यत्र समाजन्मानि ... पितृशरीरं विना ... भवाप्ययाविति। वस्तुतो नित्यानां जीवानां
न जन्ममरणे सिद्धे इति भावः। ननु तर्हि देहस्य विद्यमाने ज्ञातोऽस्मीति चेत् न विषयत्वेन कथं व्यपदिश्यत इति तत्राह। भवाप्ययोर्हि विस्पष्टं ... मिमानद्वयमेव लक्षणं यथोक्तो तथा हि यस्माद्व्यपदेश
ज्ञातोऽहं मृतोऽहमिति व्यपदिश्यमानो भवाप्यययोरभिज्ञाद्यलक्षणो अभिज्ञाद्वयं ज्ञातो मृत इति अभिमानद्वयमेव लक्षणं ... तरोरिति। यस्य तरोर्जन्मसंयमौ बीजविकाराभ्यां बीजाङ्कुरा
इति भावः। अभिमानमात्रसमर्थनेन किं प्रयोजनमिति आशंक्य संयमलक्षणोऽर्थ इति भावेनाह। तरोरिति। ... एवं देहस्य जन्मसंयमौ द्रष्टा जीवः सर्वज्ञः परमा
काराद्वविद्वान्जानाति। यथा तेन विदुषा तर्वं वस्तितया आत्मा तद्विभामकः परमात्मा च तरोर्विलक्षणो द्रष्टा॥ एवं देहस्य ...

आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ। भवाप्ययौ हि विस्पष्टं नमभिज्ञाद्यलक्षणौ ५० तरोर्बीजविकाराभ्यां यो विद्वाञ्जन्मसंयमौ। तरोर्विलक्ष
णो द्रष्टा एवं द्रष्टा तनोः पृथक् ५१ प्रकृतेरेवमात्मानमविविच्याबुधः पुमान्। तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ५२ ॥ ॥

त्मा चतनोः पृथक् भिन्न इत्यर्थः। अनेन तरोर्बीजविकारदृष्टान्तेन विद्वान्देहाभिमानं त्यक्त्वा संयमं याति। सर्वस्मादुरे देहिज्ञानातीतिरुक्तं मत्र किं प्रमाणमित्या
त्मा ... जीवादयो ... शरीरादित्र
तोवाह। तरोरिति। विद्वद्दर्शनं मानमित्यर्थः। यो बीजविकारजन्मसंयमौ विद्वान् स तरोरेव द्रष्टा तरोर्विलक्षणो यथा दृष्ट एवं देहस्य जन्मादेर्द्रष्टा जीवादि ...
इति श्रुतानुभवसिद्धमुक्तमिति भावः। बीजाद्युद्वृक्षसंयुक्ताद्वृक्षाद्यदृश्य यथा पृथक्। एवं विकारिणो विलक्षणो जीव ... दृष्टा योवृत्तिति वचनात्। विकारिणो देहाज्जीवपरमा
त्मादिभिन्नैकत्वानं मुक्तिसाधनं तदभेदज्ञानं संसारकारणमित्याह। प्रकृतेरिति। प्रकृतेर्देहादेरात्मानं जीवं परमात्मानं च तत्त्वेनाविविच्य स्वरूपभिन्नमज्ञात्वा
अतएवाबुधः पुमान् संसारं प्रतिपद्यते अज्ञानेन भिन्नमाह। स्पर्शेति। स्पर्शादिविषयाः तत्र संसक्तत्वात्स्पृष्टः ५२ ॥ ॥

राम
११०

संसारतारतम्यमपि सत्त्वादिगुणनिमित्तमित्याह। सत्त्वसंगादिति। सत्त्वसंगात्सात्त्विकसंगात् ... कर्मणा ... प्राप्नोति। रजसा राजसकर्मणा अ
सुरमानुषांश्च सुरादिकं प्राप्नोति। तामसकर्मणा ब्रह्मराक्षसादिभूततिर्यग्योनित्वमाप्नोति। अतः सात्त्विकानां सुरादीनां दुःखित्वमितरेषां सुखित्वमित्यादि
विपरीतानुभवः कथमत्राह। नृत्यत इति। यथा लोके नर्तनादि कुर्वतः परेषान् पश्यन्ननीहोऽप्यनुकरोति ... एवमनीहोऽपि दुःखाद्यनुभवायोग्योऽपि
बुद्धिगुणान् दुःखादीन् पश्यन्ननुभवन् दुःखीत्यादिममत्वेनानुकार्यते इति शेषः। सुखशोकादयः सर्वज्ञस्य बुद्धिगुणा इति ... सुखज्ञानेन

सत्त्वसंगादृषीन्देवान् रजसासुरमानुषान्। तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ५३ नृत्यतो गायतः पश्यन् यथैवानुकरोति तान्।
एवं बुद्धिगुणान्पश्यन्ननीहोऽप्यनुकार्यते ५४ यथाम्भसा प्रचलता तरवोऽपि चला इव। चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ५५ यथा म
नोरथधियो विषयानुभवो मृषा। स्वप्नदृष्टश्च दाशार्ह तथा संसार आत्मनः ५६ ॥ ॥

जीवस्य शक्तिमेहस्यैवेत्यत्र। विपर्ययेण सुराणां जीवबुद्धिगुणमताइति वचनात्। अतः सुखादिरूपाणां चेतनानां दुःखादिरूपत्वप्रत्ययो भ्रान्तइत्येनं
वक्तुं दृष्टान्तैः समर्थयते। यथेत्यादिना। यथा प्रचलता जलेन तीरस्थाः तरवोऽपि चला इव चलन्तः ... दृश्यन्ते। यथा भ्राम्यमाणेन चक्षुषा भूर्भ्रमतीव
दृश्यते। यथा च मनोरथधियो मनोरथविषयाः मृषा वृथा यथा च स्वप्नदृष्टो विषयानुभवो मिथ्या। दाशार्ह हे उद्धव। आत्मनो जीवस्य संसारोऽपि ... अन्य
प्रयोजनः। अल्पप्रयोजनं यत्तन्मृषेत्येवतद्भ्यत इति वचनात् ५६ ॥ ॥

भा॰ए॰

१२१

अत्र रूपत्वे किमिति नानिवर्तत इति तत्राह अर्थे इति। अर्थे दुःखित्वादिलक्षणे विषयेऽविद्यमानेऽपि संसृतिः संसृष्टदुःखित्वादिप्रत्ययो न निवर्तते किंतु वर्तत एवात्र निवृत्तो निमित्तमाह। ध्यायत इति। निरंतरं शब्दादिविषयध्यानमनिवृत्तौ कारणमित्यर्थः। तत्र दृष्टांतमाह। स्वप्न इति। ध्यायत इत्यनुवर्तते। यद्वा [illegible] [illegible]स्यार्थध्यानात्स्वप्नेऽनर्थागमस्तथार्थागमो यथा न निवर्तते तद्वदित्यर्थः। तत्त्वतः [illegible] अन्नादिव्यवहारानुभावात्। अत्र यथा भस्मेत्यादि दृष्टांतानां प्रपंचमिथ्यात्वेन तात्पर्यं किंतु देहसंबंधात्सुखदुःखानुपाणां जीवानां अहं दुःखीत्यादिप्रत्ययस्य यथार्थत्वं शुक्लः शंखोऽपि जपाकुसुमसन्निधानाल्लोहित इति शंखविषये लौहित्यप्रत्ययस्य मिथ्यात्वं इदं तथापीति संतोष्टव्यं। फलितमाह। तस्मादिति। आत्माग्रहणं जीवपरमात्मनोः स्वरूपाग्रहणेन निष्पन्नं वैकल्पिकं विरुद्धकल्पनाजनितं भ्रमं पश्य

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते। ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ५७ तस्मादुद्धव मा भुंक्ष्व विषयानसदिंद्रियैः। आत्माग्रहणनिष्पन्नं पश्य वैकल्पिकं भ्रमं ५८ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽथ वा। ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ५९ निष्ठ्युतो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः। श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ६० उद्धव उवाच यथैवमनुबुध्येयं वद नो वदतां वर। सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमं ६१ विदुषामपि विश्वात्मन्प्रकृतिर्हि बलीयसी। ऋते त्वद्धर्मनिरतान्शांतांस्ते चरणालयान् इति श्रीभागवते एकादशस्कंधे द्वाविंशोऽध्यायः ॥

[illegible] विषयेभ्यः प्रत्याहृतमनसा आत्मानं संसाराद् उद्धर्तुं प्रयतेतेति शिक्षयति। क्षिप्त इत्यादिना। विषयाः [illegible] विषयोपद्रवेऽपि तत्परिहारप्रयत्नो न कार्यः किंतु [illegible] तथा वद स्पष्टीकुरु। तेत्वच्चरणालयान् चरणैकशरणान्ऋते इतरेषां विदुषामप्यसतामात्मव्यतिक्रमं दुः[illegible] यद्धरिणोक्तं तदुद्धवस्योदपतीत्यथेति। तथावद स्पष्टीकुरु। [illegible] प्रकृतिर्बलीयसी हि अहं ममेति देहाभिमानस्वभावो न लिष्टोः परिहार्यो यस्मात्तस्मादिति शेषः ६१ २ सहं मन्ये। तत्र हेतुगर्भं विशेषणमाह। प्रकृतिरिति। प्रकृतिर्बलीयसी [illegible] ॥ ॥
इति एकादशे द्वाविंशोऽध्यायः

[illegible] १२१

[illegible]

भक्तिमंतरेण सर्वसंन्यासः सुखहेतुरितरो दुःखहेतुरिति एतस्मिन्नध्याये समर्थ्यते। तत्र एकः कृतः उद्धवं किमाहेति राज्ञो मानसीं शंकां परिहरति। स एवमिति। आशंसितः पृष्टः अभिष्टामिव दुर्नापाकाङ्क्षीकारितः। किमाहेति तत्राह। बार्हस्पत्य इति। अत्र जीवराशौ बार्हस्पत्य तस्मिन् जनैः वाक्यतः शत्रुशोषकः साधुर्वै सा एवमिति। आशंसितः पृष्टः अभिष्टामिव [illegible] मनसः समाधातुमीश्वरः समर्थः यश्च योऽदुरुक्तैर्भिन्नमात्मानं समाधातुमीश्वरः स साधुः सज्जनो वै दुःखेत्यपि मतश्च सज्जनो वा दुर्जनेरितैर्दुरुक्तैर्भिन्नमात्मानं मनसः समाधातुमीश्वरः समर्थः [illegible] पृष्टे थैवि पाकं फलनिष्पत्तिं ॥ ५ ॥ वार्ता वृत्तिः कृषीदादि कृतः वाक्यातः दुर्जनोहीति। अत्र भीक्षुणः सुखबोधायेतिहासं वक्ति। कथयंतीति इह तत्वतः [illegible]

शुक उवाच स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हवर्यः। सभाजयन्भृत्यवचो मुकुंदस्तमाबभाषे श्रवणीयवीर्यः १ श्रीभगवानुवाच बार्हस्पत्य स नास्त्यत्र साधुर्वै दुर्जनेरितैः। दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः २ न तथा तप्यते विद्धः पुमान्बाणैर्हि मर्मगैः। यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ३ कथयंति महत्पुण्यमितिहासमिहोद्धव। तमहं वर्णयिष्यामि निबोध सुसमाहितः ४ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः। स्मरता धृतियुक्तेन विपाकं निजकर्मणः ५ अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया। वार्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ६ ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणाप्यनर्चिताः। शून्यावसथ आत्मापि काले कामैरनर्चितः ७ दुःशीलस्य कदर्यस्य द्रुह्यंते पुत्रबांधवाः। दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ८ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः। धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ९

[illegible] उपजीवनोपायवान्। कदर्यः दारिद्र्यभावेनोपेतः। कामी परवित्तस्पृहावान्। लुब्धत्वे हेतुमाह। ज्ञातय इति। अत्र के तुल्यमाह। शून्ये ति। [illegible] स्वयं धनशून्यगृहे तिष्ठन्नात्मापि कामैः काम्यैरशनादिभिः। पुत्रादिभिरपि [illegible] भवति किमुतान्यैरिति भावेनाह। दुःशीलस्य [illegible] कंदर्पितः [illegible] ९ ॥ ॥ [illegible] अपीति वक्ति। तस्येति। तत्पदार्थः। यक्षवित्तस्य यक्षवद्वित्तरक्षकस्य उपभोगविहीनस्य

ततः किमभूदत आह। तदेवध्यानेनेति तद्वध्यानेन तेषां देवानांस्त्र्यवज्ञा ज्ञातकोपेन विप्रः क्रमेणाविनष्टः पुण्यस्कंधः पुण्यसमूहः यस्य सतथा पुण्यस्कंधः पु
ण्यफलं सुएख अस्य शिरोवा विप्रस्य। शिथिलंधनं वा। सुकृतनाशफलमाह। अर्थ इति। नाशप्रकारमाह। ज्ञातय इति। नृपार्थिवाच्चराजतः ११ योग्य एवधननाशो देवस
ण्ण लैहरित्यादि पेनाह। स इति। तपस्विनः संतापवतः। निर्वेदप्रकारमाह। स चेति। आत्मादेहः प्रयासे। नसुखायेत्युक्तं स्पष्टयति। इह चेति। अर्थलाभो पिय श

तदध्यानविप्रस्य पुण्यस्कंधस्य परिभ्रंश। अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः १० ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव। दैवतः कालतः किं
चिद्ब्रह्मबन्धोर्नृपार्थिवात् ११ स एवं द्रविणे नष्टे धर्मकामविवर्जितः। उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययं १२ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तप
स्विनः। खिद्यतो बाष्पकण्ठस्य निर्वेदः सुमहानभूत् १३ स चाहेदमहो कष्टं वृथात्मा मे ऽनुतापितः। न धर्माय न कामाय यस्यार्थायास ईदृशः १४ प्रा
येणार्थाः कदर्याणां न सुखाय कदाचन। इह चात्मोपतापाय मृतस्य नरकाय च १५ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः। लोभः स्वल्पोपि तान्
हंति श्वित्रो रूपमिवेप्सितं १६ अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये। नाशोपभोग आयासस्त्रासश्चिंता भ्रमो नृणां १७ स्तेयं हिंसानृतं दंभः काम
क्रोधः स्मयो मदः। भेदो वैरमविश्वासः संस्पर्द्धा व्यसनानि च १८ एते पंचदशानर्था ह्यर्थमूला मता नृणां। तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत् १९

आदि गुणाः सर्वस्वहानिकरः इत्याह। यश इति। श्वित्रः श्वेतकुष्ठं। आत्मोपतापायेत्युक्तं विवृणोति। अर्थस्य साधन इति। साधनं आयासः सिद्धे साधिते उत्क
र्षे वृद्धौ रक्षणे च त्रासश्चिंता व्यये च चिंता। नाशे त्रासः। उपभोगे भ्रमो बुद्धिभ्रंशः। पिशाचावेशो नेति शेषः। किं च इदं वक्ष्यमाणविनाशे कारणं भवतीति भावेनाह। स्ते
यमिति। स्मयो हंकारः। मदो दर्पः। भेदो द्वैधीभावः। राजादिभ्यो व्यसनानि विविधनिरसनानि। ततः किं कर्त्तव्यमत आह। तस्मादिति १९ ॥ ॥

अर्थः भेदं कथं द्वैधीभावं करोतीति तत्राह। भिद्यंत इति। भिद्यंते विदीर्यंते। जातिमात्रमपि प्रतिपक्षीभवतीत्याह। एक इति। संसृष्टा अपि किं कुर्वंतीति
तत्राह। अर्थेनेति। हिरण्यार्थे विधारणार्थो वा। जन्मांतरैर्देवादिजन्मविशेषैरपि प्राप्यं मानुष्यं लब्धा तत्र द्विजाग्र्यतां च लब्ध्वा। तद्द्विजाग्र्यत्वमनादृत्य ये
तत्राह। अर्थेनेति। हिरण्यार्थे विधारणार्थो वा। जन्मांतरैर्देवादिजन्मविशेषैरपि प्राप्यं मानुष्यं लब्धा तत्र द्विजाग्र्यतां च लब्ध्वा। तद्द्विजाग्र्यत्वमनादृत्य ये
र्थार्जनादिकर्मणा सर्वं स्वं घ्नंतीति ते अशुभां गतिं गच्छंति। इदमेव विशिनष्टि स्वर्गेति तस्माद्देवा मानुष्यं प्रार्थयंते इत्यतो वा स्वर्गेति धाम निधान्ये
लोकं शरीरं। कथमनर्थधाम त्वं विनश्यन्त्यां रक्षयोग्ये। योगस्य हाने नाधःपातहेतुत्वादित्याह। देवेति। भागिनः अंशभागयोग्यान्तुष्टिप्राप्त्यान्नं यत्तपि

भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा। एकास्निग्धाः काकिणिना सद्यः सर्वे चारयः कृताः २० अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः। त्यजंत्याशु
स्पृधो घ्नंति सहसोत्सृज्य सौहृदं २१ लब्ध्वा जन्मामरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां। तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिं २२ स्वर्गापवर्ग
योर्द्वारं प्राप्य लोकमिमं पुमान्। द्रविणे को नुषज्जेत मर्त्यो नर्थस्य धामनि २३ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भागिनः। असंविभज्य चात्मानं
यक्षवित्तः पतत्यधः २४ व्यर्थयार्थेहया वित्तं प्रमत्तस्य वयो बलं। कुशला येन सिध्यंति जरठः किं नु साधयेत् ॥२५॥ तस्मात्त्वं क्लिश्यते विद्वान्व्य
र्थयार्थेहया सकृत्। कस्यचिन्मायया नूनं लोकोयं सुविमोहितः २६ ॥ ॥

नयति। वित्तं वयो बलं कुशलसाधनस्य कृत्वा रथः पातः कथमत आह। व्यर्थयेति। व्यर्थयार्थेहया एहि का मुष्मिकार्थे प्रमत्तस्य वयो बलं वित्तं हानि कुशला
विनसिध्यंति साधनानि न भवंति। स जरठः जरसंगतः किं नु साधयेत न किमपि। निगमयति। तस्मादिति। अविद्वान् सं क्लेशे कारणमनुमिनोति। कस्यचिदिति। चि
स्त्र एवार्थे। अथ कस्य परमात्मनः। दूरस्य दूरे मर्त्यो च समानं नैव विषयसुखे विमोहित इति तर्कयामि। कस्यचिल्लोकविलक्षणस्येति वा २६ ॥

एवं तर्ह्ययतस्तस्य परमात्मप्रसादाभावेन वैराग्यस्थैर्यं चाक्षिप्य किं भवेदिति। मृत्युना कालेन ग्रस्त इत्याह। येनेति। एतां दशां विरक्तिलक्षणां नीत इति येन तेन हेतुना ये
न हरिणा प्रसन्नेनेति वा। कीदृशी निर्वेद इति तत्राह। निर्वेद इति। आत्मनः संसारनदीतरणप्लवः तरीरूपः। निर्वेदस्य किं लक्षणम्। अत एव संन्यास इति तन्निश्चयं वक्ति
सोऽहमिति। शेषेण किं तत्साध्यमत्राह अप्रमत्त इति। यदि येन शेषणेन संन्यासलक्षणेन निर्वेदसाध्येन तत्परमात्मनि परमात्मविषये सिद्धः ज्ञानी स्यां तर्हि शमंगशो

किंधनैर्धनदैर्वा किं कामैर्वा कामदैरुत। मृत्युनाग्रस्यमानस्य कर्मभिर्वोतजन्मदैः २७ नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः। येन नीतो दशामेतां
निर्वेदश्चात्मनः प्लवः २८ सोऽहं कालावशेषेण शोषयिष्येंगमात्मनः। अप्रमत्तोखिलार्थस्य यदि स्यां सिद्धिआत्मनि २९ तत्र मामनुमोदेरन्देवास्त्रि
भुवनेश्वराः। मुहूर्त्तेन ब्रह्मलोकं खट्वांगः समसाधयत् ३० श्रीभगवानुवाच इत्यभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः उन्मुच्य हृदयग्रंथिं शां
तो भिक्षुरभून्मुनिः ३१ स चचार महीमेतां संयतात्मेंद्रियानिलः। भिक्षार्थं नगरग्रामानसंगोऽलक्षितोविशत् ३२ तं वै प्रवयसं भिक्षुमवधूत
मसज्जनाः। दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः ३३ केचित्त्रिवेणुं जगृहुरेके पात्रं कमंडलुं। पीठं चैकेक्षसूत्रं च कंथां चीराणि केचन ३४
प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः। अन्नं च भैक्ष्यसंपन्नं भुंजानस्य सरित्तटे ३५ मूत्रयंति च पापिष्ठा निष्ठीवंत्यस्य मूर्द्धनि। यतवाचं वाच
यंति ताडयंति न वक्ति चेत् ३६ ॥ ॥

जरां करिष्यामीत्यर्थः। नेदं दंभवचनमित्याह। तत्रेति। अल्पेन किं साध्यमिति न मंतव्यमिति आह। मुहूर्त्तेनेति। विरज्यानेन किमकारीत्यत आह। इतीति
हृदयग्रंथिं मनोबंधं। अलक्षितः अज्ञातः। त्रिवेणुं दंडं। चीराणि जीर्णवस्त्राणि। दर्शितानि प्रदाय पुनराददुः। वाचयंति वादयंति ३६ ॥

दोर्वादयंति दुर्वचनं कारयंति। किमकरोदेवं परिभूत इति तत्राह। परिभूत इति। सात्विकी आभाविकी कीदृशी गाथा मतामगतेति तत्राह। नायमिति। अयं जन
परितो वर्त्तमानः। तर्हि किं देवादय इति तत्राह। न देवतेति। देवता देवाः आत्मा देहः ग्रहाः आदित्यादयः। तर्हि किं कारणमत आह। मन इति। यत्संसारचक्रं परिवर्त्तय
तं मनः परं कारणमामनंतीत्यन्वयः। मनसः कारणत्वं विवृणोति मन इति। प्राकृतं लिंगशरीररूपं पंचलपेश्च रूपेण स्थितं मनः सृष्टिकाले गुणानात्मनि सृ

तर्जयंत्यपरे वाग्भिः स्तेनोयमिति वादिनः। बध्नंति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति ३७ क्षिपंत्येकेवजानंतः एष धर्मध्वजः शठः। क्षीणवित्त इमां
वृत्तिमग्रहीत्स्वजनोज्झितः ३८ अहो एष महासारो धृतिमान्गिरिराडिव। मौनेन साधयत्यर्थं बकवद्दृढनिश्चयः ३९ इत्येके विहसंत्येनमेके
दुर्वादयंति च। तं बबंधुर्निरुरुधुर्यथा क्रीडनकं द्विजं ४० एवं स भौतिकं दुःखं दैविकं दैहिकं च यत्। भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत
४१ परिभूत इमां गाथामगायत नराधमैः। पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकीं ४२ भिक्षुरुवाच नायं जनो मे सुखदुःखहेतुर्न देव
तात्मा ग्रहकर्मकालाः। मनः परं कारणमामनंति संसारचक्रं परिवर्त्तयेद्यत् ४३ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि। शु
क्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति ४४ ॥ ॥

जते वै सात्विकादिभेदेन त्रिविधं वाह्यावयवोपचितं भवतीत्यर्थः। अत एव बलीयः कार्यकरणसमर्थं। ततस्तस्मात् मनसः सात्विकादिभेदेन त्रिविधा
नि विलक्षणानि कर्माणि भवंति। विलक्षणानीत्युक्तं विवृणोति। शुक्लानीति। तेभ्यः कर्मभ्यः सवर्णाः शुक्लादिवर्णयोग्या गतयो भवंति। अनेन सर्वस्य सु
खादीनां परं कारणं मन इत्यवगतं ४४

ननु मनसः परमकारणत्वं विवक्षितं चेत्परमात्मनः कारणत्वं त्वप्रसिद्धितं स्यादिति तत्राह । अनीह इति । आत्मा परमात्मा मनसः समीक्षितं संसाराष्ट
त्तिहेतुश्रुतं कर्म जहिचष्टे उत्कृष्टः साक्षित्वेन न पश्यति । कीदृशः अनीहः मनोवत्क्लिष्टकारी न भवतीत्यनेनेदृशे प्रभासु कर्तृत्वं जायते । साक्षित्वेन देहांतर
र्त्रमास्य दुःखादिकं स्यादित्यत उक्तं । हिरण्मय इति । पूर्णोऽसौ रूपानंदः । अस्य दुःखाभावे हेतुमाह । मत्सरत्व इति । पूर्णानंदो हि निर्मत्सरत्वेतियस्मान्न स्व
त्परेषां दुःखकारणं मन इति भावः । अचेतनत्वेन स्वतः प्रवृत्त्यनुपपन्नस्य मनसः कारणत्वं कथमत्राह । मन इति । असौ निबद्धो देहाभिमानी जीवः स्वलि
ङ्गलिङ्गशरीररूपं मनः परिगृह्य गुणसंगतः विषयसेवनः । कामान्विषयान्नुपभुङ्क्ते इति विषयानुरक्तचेतनानुगृहीतस्याचेतनस्यापि मनसः का

अनीह आत्मा मनसा समीहितं हिरण्मयो मत्सख उद्विचष्टे । स्वलिंगं परिगृह्य कामाञ्जुषन्निबद्धो गुणसंगतोऽसौ ४५ दानं स्वधर्मो निय
मो यमश्च श्रुतानि कर्माणि च सद्व्रतानि । सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ४६ समाहितं यस्य मनः प्रशान्तं दाना
दिभिः किं वद तस्य कृत्यं । असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ४७ ॥ ॥

रणत्वं युक्तमिति भावः । न ह्यमनाः पुमांस्क्रियाप्रतीतिश्च तेः । मनसः संसारकारणत्वमुक्तं तत्र किं प्रमाणमित्यतो वाह । अनीह इति । परमात्मनो दर्शनं प्रेरणं
चयमाणां । एवंविधसंसारनिवृत्त्योक्त उपाय इति अतस्तस्य मनसो निग्रह एवेत्याह । दानमिति । मनोनिग्रहलक्षणान्ताः मनोवशीकरणस्वरूपनिर्णयाः
कृत इत्यत्राह । पर इति । मनःसमाधानस्य परमयोगत्वमुपपादयति । समाहितमिति । यस्य मनः समाहितं परमात्मध्यानयोगयुक्तं तस्य दानादिभि
किं कृत्यं वद यस्य मनो दानादिभिरसंयतं विनश्यच्चेद्भवेत् दानादिभिरपरं साध्यं किं न किमपि ४७ ॥ ॥

ननु तर्हि मनःसंयमनं कर्तव्यं तच्चाशक्यं किमित्याशंक्य स्वतंत्रत्वान्न शक्यमिति भावेनाह । मन इति । अन्ये सर्वे विष्णुप्रभृतयो देवा मनोवशे भवंति । तच्च गुणप्रवृत्त
स्य मनसः प्रवृत्तबंधकत्वप्रकारः कथमित्यतो वाह । मन इति । हि शब्देन न केवलं ब्रह्मणः कस्य मनो याति वशं कदाचित् । अयं भाव इति श्रुतिं पियाति वा मन्त्र सा
हत इति वाक्यं प्रमाणयति । विष्णुरीशोऽनुरो विनाऽन्यस्य वशं न याति कुतो वाह । भीम इति । स इषः सहनः शक्तिमतः सहीयान् अतिशयेन सहनशक्तिमान् ।
भीमो दुःसहत्वमन इति विदुन्मतं । ततः किमत्राह । नेति । विष्णुरीदृशो विनान्यः कश्चित् मनो नात्यावेशात् नातिक्रांतवान् । तत्र हेतुः । स हि देवदेवः । स भीमो देव
स्य सात्त्विकमनसो देवोऽभिमानी यस्मात्तस्मात्तु दूरेणाभिमन्यमानं वैकारिकमपि मनो हि विधं सात्त्विकतामसमिति । प्रथमं विष्ण्वादिदेवताप्रसादेन जय्यं द्वि
तीयं विष्णुप्रसादं विना दुर्जयं । विष्णुवध्यकालनेमिनाभिमतत्वात् । अतो मित्रेऽमित्रे च स्यैः सह विग्रहो मत्तां भवतीत्याशयेनाह । तमिति । अयमस्मरार्थः । अत्र

मनो वशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति । भीष्मो हि देवः सहसः सहीयान्युञ्ज्याद्वशे तं स हि देवदेवः ४८ तं दुर्जयं शत्रुमसह्यवेगं मरु
न्तुदं तन्न विजित्य केचित् । कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४९ ॥ ॥

जीवराशौ केचिदिदं मूढा आत्मसमः पूर्वापराद्दिगनभिज्ञा स्वतंत्रयोग्यं तामसमनोलक्षणं शत्रुं सुखविरोधित्वेन विजित्य मित्रैर्मर्त्यैः सह विग्रहं कुर्वंति कीदृशं
शत्रुं दुर्जयं दुष्टेन पापिना कालनेमिनाजितत्वाद्दुर्जीकृतत्वाच्चेतुमशक्यत्वाद्दतएवासह्यवेगं वायुवन्मुष्टियहणायोग्यम् रुंतुदं ऽन्तर्भिर्हितत्वात् व्रणवद्दुःखक
रं अनेन शत्रुशङ्कोविहतः । विष्णुप्रसादेन जय्य इत्याह । उदासीनेति । विष्णुभक्ता उदासीना नारिपूँश्च तन्मूढत्वात्तदुपाश्रयोऽपतमाना नाना मित्यर्थः । प्रकृतसात्त्विकम
नो विषयमात्मसमनः परामर्शः कथंमुन्नतइतीयमाशंका । एकस्थानाधिपत्येन तु भिन्नानामपि युज्यते । आभेदे तु परामर्शः स्यादृश्येऽप्यपि च स्वतोऽशिष्यनेनापि परि
हर्तव्या । यद्वा तन्मनस्त्वं मनोऽभिमानिनं कालनेमिमविजित्य मित्रैः सह विग्रहं कुर्वंति । कीदृशं तं शत्रुं । अनेन शत्रुमजित्वामित्रकलहो बालकलहवत्परिहासहे
तुकं भवति ४९

दुष्टाभिमानिवलोपचितशङ्कितात मम मनोनिर्मितदेहाभिमानमात्रेणैवोत्पन्नमिथ्याज्ञानेन जीवस्य नित्यनिरयप्राप्तिहेतुत्वात् स एव जेतव्य इति भावेन
हाहेहामिति। इहमित्यस्यार्थं। मनोमात्रं मनसा निर्मितं गुणपरिणामं देहं गृहीत्वा ममेदमहमिति स्थित्वा तेऽन्धभ्रमेण एव देहोऽहमित्यनात्मनः आत्मभ्रमेणान्यो
ऽहं देहोऽयमित्यविभ्रमेण अहमन्य इत्यात्मनोऽनात्मभ्रमेण मिथ्याज्ञानेनांधधियोऽज्ञानगतयथार्थज्ञाना मनुष्या दुरन्तपारे तमसि पतित्वा भ्रमन्ति पुनः पु
नर्दुःखसमुद्र एव मग्ना वर्तन्त इत्यतो बुद्धिमता तज्जय एव प्रयतितव्यमिति भावः। देहमात्रमात्मानं यः पञ्चजं पश्यति। अंधे तमसि मग्नस्य नोऽन्या
नंतस्य कुत्रचिदिति वचनान्मिथ्याज्ञानिनामंधं तमो नियतमिति ज्ञायते। एवं मनसः सुखदुःखकारणत्वमुक्त्वा तत्र तर्ह्यन्यस्य प्रतीयमानं सुखदुःख

देहं मनोमात्रमिदं गृहीत्वा ममाहमित्यन्धधियो मनुष्याः। एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति ५० जनोस्य हेतुः
सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत्। जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ५१ ॥ ॥

कारणत्वं अभिमाननिमित्तमेवेति ज्ञानता सुहृत्वं ज्ञानेन पुरुषेण सोढव्यं तत्र कोपो न कार्य इत्याह। जन इत्यादिना ग्रंथेन। अस्य जीवस्य सुखदुः
खयोर्हेतुर्जनः परदेहश्चेद्यदि तर्हि अत्र देहे वर्तमानस्य देहव्यतिरिक्तस्यात्मनो निर्मुक्तकपालनालिकेरवत्स्थित तस्य किं स्यात्। न किमपि दुःखं स्यात्। हि यस्मा
त्तत्सुखदुःखं विवेकेन विचारिते सति भौमयोः पृथिवीकार्ययोः साध्यतारूपयोरेव हि यस्मात्तस्मात्तदोत्मनोऽभिमानकृतं दुःखमिति ज्ञानं तेषां मनो
तद्भावाहाहीति। तत्र दुःखं विवेकेन विचारिते सति भौमयोः ... कतमाय कुप्येदित्यन्वयः। तत्रोदाहरणं। जिह्वामिति। स्वदद्भिः स्वदंतैः। तस्यां जीह्वायां वेदनायां सत्यामनेन देहस्याचेतनत्वेनाभिमानजन्यं दुःखमि
त्युक्तं भवति। जनशब्दः सूतो जीवे क्वचिद्देहे च वर्तत इति वचनात् जनशब्दोऽत्र देहवाची ५१ ॥ ॥

देहस्याचेतनत्वेन दुःखहेतुत्वसंयोगात्तदभिमानस्यपराधीनत्वेन युक्तमुक्तं किंतु देवतायाः सर्वस्याप्यात्माधान्येन तद्धेतुत्वमुचितमित्याशंक्याह। दुःखस्ये
ति। यदि दुःखस्य हेतुर्देवतास्तु चेत् तद्वचनमस्मद्विचारितेन घटते। तथा हि। विकारयोर्विकाराभिमानिनोर्दैवयोः सकाशादुत्पद्यमानं तद्दुःखमाभिमानिनि
मित्तमेव तत्र निरभिमानस्यात्मनस्तेन किं स्यादतः स्वामिदेवान्त्यति कोपो न कार्य इति भावः। तत्रोदाहरणं यदंगमिति। यदा स्वदेहे विकाराभिमानीन्द्रादिदेव
ताभिमन्यहस्ताद्यंगेन चक्षुराद्यंगं क्वचिद्विहन्यते तदा तत्सोढव्यमेव। अन्यथा पुरुषः कस्मै क्रुध्येत इन्द्रादेरकारणत्वादयोग्यक्रोधादेः मन एव कारणम्

दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत्। यदंगमंगेन विहन्यते क्वचित् क्रुध्येत कस्मै पुरुषः स्वदेहे ५२
आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः॥ ॥

वेति। अविकाराश्च ते देवा विकारा इति शङ्कितः। अभिमानाद्विकारस्य भवतः शङ्का अपि क्व वस्मिति वाक्याद्विकारशब्दवाच्यत्वेनोक्तं देवानां ५२ मनसो
पि सुखादिहेतुत्वमभिमानमन्तरेण विचारासह इत्याह। आत्मेति। यद्यात्मा मनो दुःखादिकारणं स्यादिति मतं तत्र ब्रूमः। दुःखादिकारणं भवन्मनः स्वतो
वा परतो वा नाद्य इत्याह। किमन्य इति। अन्यतो दुःखस्वभावत्वेन विलक्षणात्मनः तत्र सुखस्वभावे आत्मनि चेतने किं भवति न किमपि। उभयोः सुखादिस्वभा
वः सिद्ध इति भावेनाह निज इति चेतनस्य सुखस्वभावो मनसो दुःखस्वभावो निजो नित्यः सदातन इत्यर्थः। निजमात्मीयनित्ययोरिति यादवः॥ ॥

...खिं दृष्पेता। परिस्थापितन्मृषास्यात् शु क्रि ...तवत्। अन्यस्यात्मा
द्वितीयपक्षमाह। नीति द्वाभ्यां। आत्मनोन्यद्दुःखकारणं हि। अहं दुःखी स्यामिति दुःखं दृष्पेत। परि ... अप्रामाणिकमिति विद्वान्कस्मै
नक्रुद्ध्येत् इत्याह। न सुखमिति। सुखं सुखरूपं दुःखं दुःखरूपं न भवति। दुःखरूपं सुखरूपं न भवत्यतोभिमानं विनान्यन्निरूप्यं ... यदि मनः सुखादिहेतुः तर्हि निजस्य दु
कृष्णेतस्य ... जीवस्य सुखरूपस्य न दुःखं क्वचिद् दृश्यते। अतो मनोभिमाने न दुःखी भवति नान्यथेति वाक्यमत्र ... निज इति। मनोधर्मा दुःखमात्मनो निजस्वभावो
नहि मनोभिमाननिमित्तं तद्दुःखं विना तत्र सुखदुःखाभावश्चात्मन्यन्यतो मनसो दुःखं स्यात् किं न स्यादेव कुतो ... इत्याह। न सुखमिति।
नहि। कुतः। तदात्मनोन्यद्विषयीयमानस्य का गतिरित्याह। यदीति। ...

नह्यात्मनोन्यद्यदि तन्मृषा स्यात्क्रुद्ध्येत कस्मान्न सुखं न दुःखं ५३ ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोजस्य जन
स्य ते वै। ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुद्ध्येत कस्मै पुरुषस्ततोन्यः ५४ ॥ ॥

... गीकार्यं देहस्य दुःखादिहेतुत्वे बाधकमाह। ग्रहा इति। ग्रहाणामा
जीवस्य सुखरूपस्य न दुःखं क्वचिद् दृश्यते ... अभिमाननिमित्तं दुःखमनस्य दर्शयतीत्यर्थ ... इति विवेकिनो जनस्य ... दुःखादेर्निमि
त्तत्वाद् ग्रहा देहाः आत्मनो दुःखादेर्निमित्तं वेदविवेकहरणाय ... रूपस्य मनस एव भवंति मनोभिमाने सत्येवेत्यर्थः। ततो देहाद
न्यः। किं वैनैव ... अतो ग्रहैर्देहस्य पीडा देहनिमित्ता ... ततो ... कस्मै क्रुद्ध्येत ... ॥ ॥
न्यः पुरुषः ... क्रुद्ध्येतत्यर्थः॥ ॥

कर्मतावत्सुखदुःखयोर्हेतुस्तथाप्यात्मनो जीवस्याजडत्वे सत्यतो ... किमिति शेषः तर्हि कस्येदमत्राह। तदीति। तद्दुःखादि कं जडेजडात्मकेषु
कर्म ... क्रुद्ध्येत कर्म
नाभिहिय ... किमत्राह। देह इति। देहे ... परमात्मा ... सुपर्णः सुखात्मकः पुरुषः कस्मै क्रुद्ध्येत कर्म
... कुप्येत। यद्वा कर्म मूलमनन्त्वादेरभिमाननिमि
त्तं क्रुप्यतीत्यत्राह नहीति ... अभिमाननिमित्तं दुःखादिकं कर्ममूलं ... किम निष्ठं ततः बलादात्मनो दुःखादि ... निष्ठं
तं दुःखादिः ... इति। यदि दुःखादेर्हेतुः कालोस्तीति मतं तर्हि नित्यसुखरूपस्यावि ... किं नः आत्मनः किम निष्ठं ... अत्र ... देहस्यजड
प्राप्तं अत्राह तत्रेति तत्र तथा सत्यसौ दुःखादिः तदात्मनः कालाधीनदेहस्येति प्राप्ते। आत्मनो नित्यत्वेन कालानधीनत्वाद् देहस्य तद्दर्शनाद् ... न युक्तं देहस्यजड

कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे। देहस्त्वचित्पुरुषोयं सुपर्णः क्रुद्ध्येत कस्मै नहि कर्ममूलं ५५ कालोस्तु हेतुः सुख
दुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोसौ। नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुद्ध्येत कस्मै न परस्य द्वंद्वं ५६ ॥ ॥

त्वात्। तत्सोदाहरणमत्राह। नाग्नेरिति। ... यथाग्नेस्तापनिमित्तं दुःखं नहि यथा च हिमस्य तद्धिमनिमित्तं दुःखं न जडत्वाद्देवं देहस्यापि कालादि
त्वात्। ... अत्राह न परस्येति परस्य प्रकृतिविलक्षणस्य बोद्धुः सर्वज्ञस्येश्वरस्य तद्दुःखं न युज्यते
संबंधविद्यमानेपि न दुःखं युक्तं। ननु तर्हि ... दुःखं स्यादित्याह न परस्येति ... सर्वज्ञस्येश्वरस्य तद्दुःखं न युज्यते
... जीवस्य मनोभिमानमात्रं दुःखकारणमतः कस्मै क्रुद्ध्येतेति। ... कालादिसंबंधाद्दुःखं देहस्य युज्यते। तथापि नैव दुःखी सजडत्वान्नियमेन तु। आत्मनः
सुखरूपत्वाद् दुःखं युज्यते ... तस्मान्मनोधर्मेणैव दुःखी जीवो न चान्यथा। सर्वेषां मनसो नेता मनोरूपश्चिलोचनः। ... सर्वदेवाश्रुतेनैव सुखदुःखि
नः। नियंतात्मस्वप्राणास्ततो विकलवत्तरः। तन्नियंता हरिः ... इति वाक्यमुक्तार्थे प्रमाणं॥ ॥

भा॰ए॰

१२१

नपास्येतद्विज्ञोति। नकेनचिदिति। यथा संसृतिरूपिणः संसारकस्वभाववतः आत्मनो मनसो यथा द्वंद्वोपरागः द्वंद्वाख्यराहुग्रहणं तथास्य परतः परस्य
हरेर्द्वंद्वोपरागो न स्यात्। इदमेव स्पष्टयति भावेनाश्रयणं वसितिइति। एवं वस्तु इदुः एवं विज्ञानी एवं विधेरज्ञानिभूतैः खलैः कृतात्पुरुषान्न बिभेति एवं विरक्तिभ
गवदंघ्रिभक्तिद्वारा संसारनिर्भीकहेतुरित्याह। एतामिति। मुकुंदांघ्रिनिषेवयैव एतां परमात्मनिष्ठां मनःसंयमनलक्षणामवस्थां समास्थाय स्थिरीकृत्य प
रमात्मज्ञानलक्षणां वा प्राप्य। अत्र प्रमाणमाह। अध्यासितामिति। तिमिरस्य तनुस्थितं तमः अज्ञाननिमित्तं संसारं। अत्र इदं ये गाथेति भावेनाह गाथामिति विद्धेति। गाथा

नकेनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य। यथात्मनः संसृतिरूपिणः स्यात्स्वं प्रबुद्धो न बिभेति भूतैः ५७ एतां समास्थाय परात्मनिष्ठाम
आसितां पूर्वतमैर्महर्षिभिः। अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ५८ श्रीभगवानुवाच निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य
गां पर्यटमान इत्थं। निराकृतोऽसद्भिरपि स्वधर्मादकंपितोऽमूं मुनिराह गाथां ५९ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः। मित्रोदासीनरिपवः
संसारः स्वमनस्कृतः ६० तस्मात्सर्वात्मना तात निगृहाण मनो धिया। मय्यावेशितया युक्त एतावान्योगसंग्रहः ६१ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां
समाहितः धारयञ्छ्रावयञ्छृण्वन्द्वंद्वैर्नैवाभिभूयते ६२ इति श्रीभागवते महापुराणे एकादशस्कंधे भिक्षुगीतानाम त्रयोविंशोऽध्यायः ॥

यास्त्वत्यर्थमाह। सुखेति। आत्मनि मनसि रूढो विविधभ्रम एव सुखदुःखप्रदः अन्यो न यतो मित्रोदासीनरिपुलक्षणश्च संसारः स्वमनः स्वमनोहेतुका
मनोनिग्रहयोगमाह। तस्मादिति। एतावान्मनःसंयम एव लक्षणः। फलमाह। य इति। त्र्यस्मिन्नध्याये कर्मज्ञानं एवं कर्मनो निग्रहलक्षणं इत्येकादशे त्रयोविंशः

१२१

सृष्ट्यादियाथार्थ्यज्ञानं मिथ्याज्ञाननिवर्तकमिति कथयत्यस्मिन्नध्याये। तच्च यथार्थोपि नैवोपरमेतेत्युक्तविकल्पनिवर्तकोपायः कः स्यादित्याशंकां परिहर्तुं
कामश्चाह। अथेति। सांख्यं यथार्थज्ञानं। पूर्वैः पुरातनैः विकल्पनिवर्तकत्वेन निश्चितं। ननु विकल्पे सति तद्धानाय सांख्यवचनप्रतिज्ञानं संगच्छते स एव न संभव
ति। तथाहि। किमुत्पत्तिप्रभृति सांख्यं विकल्पितमुतांतरा लेनाद्यः अभावस्य निवृत्त्यनुपपत्तेरिति तत्राह। आसीदिति। अथो आरंभे सृष्टिसमये ज्ञानमर्थश्चैक
मेव यथैवार्थो विषयस्तथैव ज्ञानं विषयमनतिक्रम्य वर्तमानमासीत्। किमनेनोक्तं भवतीत्यत्राह। अविकल्पितमिति। तत्प्रथम विपर्ययाविषयस्य तु उक्तं भव

श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं। यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमं १ ॥ ॥
आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितं। यदा विवेकनिपुणा आदौ कृतयुगे जनाः २ ॥ ॥ ॥

तिकस्मिन्काले इदमुत्पन्नमत्राह। कृतयुग इति। तत्रापि करे त्यनुक्तावादाविति। संशयाद्यन्यथाभावः कस्मान्नाभूदिति तत्राह। यदेति। कृतयुगमारभ्य त्रे
तायुगं जना विवेकनिपुणा इति यदा यस्मात्तस्मादिति शेषः। पुरुषबुद्धिदौर्बल्यनिमित्तं ज्ञानस्यान्यथात्वं सात्विकत्वेन तदानीं तन्मात्रं भावादेकप्रकारमे
वज्ञानमितिभावः। अथो अर्थो नानात्वप्रार्थविकल्पा रंभमंगलइति यावत्। यथैवार्थस्तथा ज्ञानं ज्ञानार्थैक्यमुदाहृतं। तथाच कृतयुगे चापि सदन्ते प्रवृत्तं तद्वि
इति वाक्येन विज्ञानवादिमतमत्रोच्यत इत्येतच्चिरस्तं ॥ ॥

भा॰ ए॰

द्वितीये किं कारणमत आह। तन्मयेति। तत्सत्यं ज्ञानार्थैक्येन मिथोविरोधराहित्येनावाधितं ज्ञानं पश्चात् तत्रेतायां द्विधा इदं वा दो वेति संशयमापन्नं समभवत् संजातं तज्ज्ञापरादाविदमेवमाह इति विपरीतप्रत्ययेन समभिन्नमभवदित्यन्वयः। समभेदे समीचीनेसु सुकृतासु खेच्छिति कालद्वभावयोः सद्रातनत्वेन सदाविकल्पसंभवात् चेतनस्यापि देवदत्तादेस्तन्मयस्याल्पबुद्धित्वेनानंतवेदादिशब्दशश्यर्थस्वरूपस्यावगाढुमशक्यत्वेन कारणत्वानुपपत्तेस्तत्त्वयोगफलदा

१२८

तन्मयाफलरूपेण केवलेन विकल्पितं। वाङ्मनोगोचरं सत्यं द्विधा समभवदृतं ३ ॥ ॥

नसमर्थेनवैषम्यादिदोषविधुरेण सर्वज्ञेनकारणेनभाव्यमिति भावेनाह। मयेति। फलं रूपनिहितं कारयतीति फलरूपः तेन तन्नामसारिज्ञीबानां सुखमोगपतनस्वादिफलदात्रेत्यर्थः। केवलेन मयान थाश्रिति विकल्पितं तामसारिज्ञीवबुद्धिमनुष्ठेत्यनेनैव कल्पितं अनंतशब्दराशिगोचरस्पष्टस्तत्त्वरस्यदुर्ज्ञेयत्वेनाग्रहेयत्वं नेति भावेनोक्तं वाङ्गिति शब्दो वागोचरोऽर्थः मनोगोचरस्ताभ्यामुत्पाद्यमानत्वेन च कल्पितमिति शेषः। यद्वा तद्वन्नार्थात्मकमुभयं तृद्वत्तरमितियन्नस्मा

द्वाङ्मनसयोरगोचरत्वाद्द्विधाशदिति ॥ ॥

राम

१२८

सम्यक् विषयविषयीकरणं मंत्रेणाज्ञानार्थैक्यमन्नेनोप्यनंतइति भावेनज्ञानार्थाभिमानिदेवताद्वयरूपं तावदाह। तयोरिति। तयोर्ज्ञानार्थयोरेकतरोऽर्थोविषयलक्षणः स प्रकृतिर्गायत्रिनाम्ना प्रकृत्याभिमन्यमान इत्यर्थः। सापिन स्वतंत्रेत्याह। सेति। सा प्रकृतिरुभयोः लक्ष्मी विष्णुसंज्ञयोर्मध्ये योरात्मा हेतुः प्रपत्तस्य स्याः सा तथा मयाश्रिया चस्वरूपेणस्वाह्राचेत्यर्थः। अन्यतमो भागो ज्ञानं यत्सोपिपुरुषः पुरुषनामा ब्रह्मणाभिमन्यमानमित्यर्थः सोपुभयात्मकइत्यनुसंधेयं। मयाश्रियाच सृष्टः स्वयुगा स्वयमेत्यभिधीयते। ज्ञानाभिमानी पुरुषः स ब्रह्मास्य मुदाहृतः। अर्थाभिमंत्री प्रकृतिर्गायत्री सा प्रकीर्तिता। तयोर्नियामकोविष्णुः श्रीमयात्र्याहृतिका स्मृता। वागुक्तः ब्रह्मणः पुत्रः प्रकृतौ समजायत। त्रिगुणात्मा समुद्दिष्टः प्रापः सत्वात्मकस्तथा। पत्नी चैव सावित्री तथैव च सरस्वती। एवं त्रिरूपा प्रकृतिरिका सत्वादिभेदतः। तासु वीर्यं समुत्सृष्टं ब्रह्मणैकत्वमागतं। स सूत्रात्मा समुद्दिष्टो वायुर्लोकप्रणायकः। तस्यापि सूत्रं भगवाडधारणाद्विरू

तयोरेकतरो ह्यर्थः प्रकृतिः सोमयात्मिका। ज्ञानं त्वन्यतमो भागः पुरुषः सोऽभिधीयते ४ ॥ ॥

तमो रजः सत्वमिति प्रकृतेरभवन् गुणाः। मयाश्रयोऽप्यमाणायाः पुरुषानुमतेन वा ५ ॥

स्मयः। स्त्रत्रयुचस्य इंकारः सनुदासमुदाहृतः स्त्रात्मनाम हांश्चैव सहजातस्य तुर्मुखः। तस्यापि पुत्रो इंकारः स्थानं तद्दाहृतः। अनंतादपि रुद्रोत्तत्र ब्रह्मणाश्चेति सत्रिधा। वैकारिको ब्रह्मजस्तु तेजसो वायुजः स्मृतः। तामसोऽनंतजश्चैव सएको गुणभेदतः। इतित्रिस्त्रतिसूचकेनद्विशत्वेनकिमत्रप्रमाणमितिशंकां परिहरति। प्रतिज्ञातमांतव्यावचनं विना ज्ञानार्थैक्यादिकथनं किं केन संगतमित्यतः तत्स्वरूपं वक्ति। तमो रजइत्यादि प्रथमसंख्येइत्वं तेन वा पुरुषः ब्राह्मणः पुत्रः प्रकृतौ समजायत। त्रिगुणात्मा समुद्दिष्टः प्रायः सत्वात्मकस्तथेत्यादिना व्याख्यातमपि मंदमत्युपकाराय किंचिद्व्याक्रियते। तथाहि। सृष्ट्यादौ सत्वो गुणत्रयाभिमानिन्या लक्ष्म्या पुरुषः प्रकृतिं ब्रह्मगायत्र्याख्ये जातो वा शब्दश्चार्थे तद् नुमयालक्ष्म्या च पुरुषानुमतेन पुरुषनाम्नो ब्रह्मणः अनंकेश्वरतायसंहो भ्यमाणायाः तस्याः प्रकृतेः तमोरजः सत्वमिति गुणाभिमानान्निरूपिणीरूपाणि पत्नी सरस्वतीसंज्ञान्यभवन् ॥ ॥

ततः किमभूद् इत्याह। तेभ्यः समभवत्सूत्रमिति। अयंभावः। तेषु रूपेषु पुरुषनाम्ना ब्रह्मणा गर्भाधाने कृते सति तेभ्यो रूपेभ्यो पृथक्पृथक्जातं पश्चादेकत्वमापन्नं सूत्रमभवत्। कीदृशं। महत्सूत्रेण च संयुतं मनसर्वाधारेण रूपेण संयुतं सर्वजगदाधारवायुतत्वमुत्पन्नमित्यर्थः। वायुना वेगेन महत्सूत्रेणाव्याहतिना वायोः सर्वाधारत्वं प्रसिद्धं। अत्र सूत्रशब्देन महत्तत्वाभिमानिनो ब्रह्मणो वृत्तीयं चतुर्मुखाख्यरूपं वायुना सहोत्पन्नमिति ज्ञातव्यं। सूत्रात्मना महत्ताख्यापीति। प्रमाणानुगुणत्वात्। ततो विकुर्वत इत्यस्यायमर्थः। तस्माद्विकुर्वतः सृष्टिकामात्सूत्रनाम्नो ब्रह्मणः सः जज्ञे यो विमोहको हंकारोनंतः। अथ मेव सूत्रनाम्नो वायोरपि जज्ञे। विकुर्वतः सूत्रनाम्नो ब्रह्मणो यो विमोहको वैकारिको रुद्रः सोपि जज्ञे। पुनश्च विकुर्वतः सूत्रनाम्नो विमोहकस्तैजसरुद्रः स जज्ञे। यो ब्रह्मणो

तेभ्यः समभवत्सूत्रं महत्सूत्रेण च संयुतं। ततो विकुर्वतो जातो योहंकारो विमोहकः ॥ ६ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत्। तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः ॥ ७ ॥ अर्थस्तन्मात्रकोजज्ञे तामसादिंद्रियाणि च। तैजसाद्देवता आसन्नेकादश च वैकृतात् ॥ ८ ॥ ॥

नेतः तस्मादपि विकुर्वतः वायोर्विमोहकोहंकारस्तामसः स जज्ञ इति। वैकारिको ब्रह्मजस्तैजसो वायुजस्तामसोनंतजः इति रुद्रस्त्रिधा जातः। इदं मे वक्ष्यति। वैकारिक इति। त्रिविधस्य प्रयोजकमाह। तन्मात्रेति। तन्मात्रशब्देन पंचभूतानि लक्षितानि श्रोत्रादीन्द्रियाणि मनः शब्देन इंद्रियाभिमानिनो देवाश्च प्रोक्ताः तेषां कारणं। तामसाद्यहंकारत्रयं त्रिविधो रुद्रः कीदृशः चिदचिन्मयः वशीकृतचेतनाचेतनप्रपंचः। तत्क्रमेव विवृणोति। अर्थ इति। तामसादहंकारात्तन्मात्रकोर्थः पंचभूतलक्षणः। तैजसाहंकारादिंद्रियाणि वैकृताद्वैकारिकान्मनसा सह तदभिमानिन्य एकादश देवता आसन् ॥ ८ ॥

एवं सृष्टैश्चतुर्विंशतिसंख्यैर्महदादितत्त्वैः किं कृत्यमत आह। मयेति। आयतनं स्थानं दर्शयति। तस्मिन्निति। चिदचिद्विशेषसर्वशरुद्रश्चिदचिन्मयः इत्येतच्चिदचिदभिमानी रुद्र इत्यनुमाने। विराजं शरीरकं प्रविष्टोहं हरिः स्वयं। तन्नाभेः शं द्रेहोत्सूत्य प्राद विचतुर्मुखः। चतुर्मुखस्य सर्वांगव्यापदेहो महत्तपाः। इतिस्कांदे सर्वव्यापि भूतदेहो न तु क्वचित्। नैवास्य प्राकृतो देहः प्रादुर्भावेष्वपि क्वचित्। इत्यनेन हरेर्भूतदेहो नास्तीति ज्ञायते। समभवं समीचीनतया व्याप्तोभवं न तत्पन्नोभवमीत्यर्थः। तपसा ज्ञानेनाज्ञकोनिवासस्थानं त्रितयात्परं महदादिकं। कर्मभेदेन त्रिलोक्यां ज्ञानभेदे इत्याह त्रिलोक्यामिति। महर्लोकादिप्राप्तौ किं साधनमत्राह। योगस्येति। महदतिर्भव्याप्तिः नैव विलोवभक्तस्य महर्लोकादिकागतिः। अत्रपुद्रेकाक्रमाद्बुद्ध्या वह्निलोः प्रवेशनं। एवं ज्ञानं विना सापि महर्लोकादिकागतिः

मयासंचोदिताभावाः सर्वे संहत्यकारिणः। अंडमुत्पादयामासुर्ममायतनमुत्तमं ॥ ९ ॥ तस्मिन्नहं समभवमंडे सलिलसंस्थिते। मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः ॥ १० ॥ सोसृजत्तपसा युक्तो रजसा मदनुग्रहात्। लोकान्सपालान्विश्वात्मा भूर्भुवस्वरिति त्रिधा ॥ ११ ॥ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं। मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्परं ॥ १२ ॥ अधोसुराणां नागानां भूमेरोकोसृजत्प्रभुः। त्रिलोक्यां गतयः सर्वाः कर्मणां त्रिगुणात्मनां ॥ १३ ॥ योगस्य तपसश्चैव ज्ञानस्य गतयोमलाः। महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः ॥ १४ ॥ ॥

ज्ञानोद्रेकाक्रमाद्बुद्ध्या वह्निलोः प्रवेशनं। नित्यशो भगवद्रूपस्यापरोक्षेणदर्शनं। मुहूर्तमात्रं ज्ञानं स्यात् महाज्ञानं ततोधिकं। ज्ञानेन ब्रह्मलोकः स्यान्महाज्ञानादूर्ध्वगतिः। सदैवाखंडितं ज्ञानं तप इत्युच्यते बुधैः। अपरोक्षदृशा युक्तं नित्यं षण्मात्रकालया। अपरोक्षदृशा नित्यमेकमात्रायुजा युतं। योगनाम्ना समुद्दिष्टं ध्यानं नित्यमखंडितं। नचलुर्भागया नित्यमपरोक्षदृशा युतं। पादयोगः समुद्दिष्टं ध्यानं नित्यमखंडितं। पादयोगान्महर्लोको जनलोकश्च योगतः। तपसस्तपोलोकः प्राप्यते नान्यतः क्वचिदिति स्मार्तवाक्येन महर्लोकादिप्राप्ता वापि सा पुनर्विशेषाश्रवणं तथा ॥ ॥

मन्निपोगरहितस्यकाह्विति रत्राह। मयेति। कालात्मनाज्ञानाद्यात्मना धात्राकारकेण मया प्रेरितं कर्मयुक्तमिदं जगदेतस्मिन् गुणप्रवाहे उन्मज्जति सृष्टं भ
वति। निमज्जति संहृतं भवति। तमेव प्रेरणाप्रकारं विवृणोति। अणुरिति। अतीतानागतवर्त्तमानत्वेन यो यो भावः पदार्थः प्रसिद्ध्यति उत्पन्नो वर्त्तते तत्स
र्वमुभयसंयुक्तं मया चिन्त्यरूपया प्रकृत्या च मरस्वरूपया पुरुषेण हिरण्यगर्भेण संयुक्तमस्माभिः प्रविश्य प्रेरितं च यस्मात्तस्मादुत्पाद्यमिदं विश्वं द्विधा स्थितं दृश्य
ते। न तु कार्याणां निमित्तकारणेन भेदः कुलालेऽदृष्ट इति न तत्र शंका किं तु उपादानकारणेन कथमिति तत्राह। यस्त्विति। तस्माद्धि एव धारणाद् इति वचनात्। नु शब्दो
विशेषं वक्ति। यस्य महदादिकार्यस्य यः सत्वादिकारणविशेषः। आदिरुपादानकारणं घटस्य मृदिव अन्तश्च लयस्थानं च यस्मात्तस्य कार्यस्य मध्यं च स वै

मयाकालात्मनाधात्रा कर्मयुक्तमिदं जगत्। गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति १५ अणुर्बृहत्कृशस्थूलो यो यो भावः प्रसिध्यति। सर्वोप्युभ
यसंयुक्तं प्रकृत्या पुरुषेण च १६ यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य सन्। विकारो व्यवहारार्थो यथा तैजसपार्थिवाः १७ ॥ ॥

नान्यद्रूपं तदुपादानकारणेनाभेदः कार्यस्येति निश्चीयते। मृत्सुवर्णादितिभावानुस्यूतस्य पत्तस्य वेद्यत्वात्। व्यवहारार्थः हानोपादानादिव्यवहारविषयो विकारोऽपि
विविधप्रकार इत्येकस्मिन् जातेऽनष्टे नष्टः पर इत्यादौ व्यावारिकसामानाधिकरण्ये विनष्टं तु नैव घटस्य भेदः नान्येऽन्तोऽभेदाभेद इति जानीहि। कथमत्रोदाहरणमा
ह यथेति। यथा लोहमृदाद्युपात्तघटादिपदार्था विनाशिस्वरूपेण भेदवन्तोऽप्यादावन्ते मध्ये च कारणेनाभिन्ना अनुभूयन्ते इति। प्रकृतेस्तु विकाराणां कोऽयं
भेद उच्यते तथैवैकांशतो भेदः सोऽपि नाभेदवर्जितः। भेदाभेदमतः प्राकृतभेदं वा तयोर्ध्रुवावेति प्रमाणसिद्धो विशेषस्तु नाभ्युपगम्यते। यद्वा व्यवहारार्थो व्य
वहारनिवर्त्तको विकारो विनाशलक्षणः तस्यावयवस्य तेन भेद इति तन्मध्यं इति वा १७ ॥ ॥

ब्रह्मणो विकारोऽयं प्रपंच इति केचिन्मन्यन्तं प्रत्याह। यदुपादायेति। यद्वा मुख्यं निमित्तं ब्रह्म इतरकारणेभ्यो व्यावर्त्तयति यदिति। नु शब्दो ब्रह्मणो मुख्यत्वमभिप्रेतेति पूर्वोभा
वः उपादानलक्षणः पदार्थः प्रकृत्यादिर्यद्ब्रह्मोपादायानिमित्तकारणत्वमाहाय यस्य ब्रह्मणः साम्यर्थ्यमाश्रित्यापरं कार्यरूपं भावमुद्दिश्य विकुरुते विकारयति
वयतो ब्रह्मणोऽस्य आदिरन्तश्च यस्मिन् ब्रह्मणि मध्ये चावस्थितिः स ब्रह्म सत्यं परमार्थलक्षणं स्वतन्त्रं विकारादिदोषविधुरं चेत्यर्थः। पारमार्थिकसत्यत्वं ब्रह्मणोऽन्य
मभिधीयते। तद्धि ब्रह्मैव नान्यस्य तदन्येषां सदाश्रिचेति वचनात्। इतोऽपि विकारमंतरेण मुख्यकारणं ब्रह्मैव। प्रकृत्यादीनां मन्नायाब्रह्माधीनत्वादिति भावेनाह।
प्रकृतिरिति। सत्वादिगुणरूपा प्रकृतिरस्य जगतः उपादानमात्रा। परः पुरुषः हिरण्यगर्भः आधारः कालोऽपि रूपांतरेण हिरण्यगर्भ एव सतो जगतोऽभिव्यंजकः

यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरं। आदिरन्तो यदा यस्य तत्सत्यमभिधीयते १८ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यंजकः
कालो ब्रह्म तत्त्रितयं त्वहं १९ सर्गः प्रवर्त्तते तावत्पौर्वापर्येण नित्यशः। महान् गुणविसर्गार्थः स्थित्यन्तो यावदीक्षणं २० ॥ ॥

निमित्तकारणं। उपादानमाधारोऽभिव्यंजक इति कारणत्रयं ब्रह्म सर्वशक्तिस्फुरणो हि मेव तेषां तच्छक्तिप्रदोऽहमित्यर्थः। ईशशब्देन। कालाभिमानी ब्रह्मा तु काल
इत्यभिशब्दितः। सर्वजीवाभिमानी स परः पुरुष उच्यते। प्रकृतिर्नाम तत्पत्नी प्रकृतेरभिमानिनी। सा प्रसूते जगत्सर्वं सूक्ष्ममारभ्य सर्वश इति स्फुरयति। पुरुष
कृत्या विष्णो ब्रह्मणो महान्विशेषो भूनिस्फुरयति। तदुक्तं। आधारोऽभिव्यंजकश्चैव प्रसवीता च केशवः। कालप्रकृतिपुंसां च तन्मूलं प्रकृतेरपि। आधारोऽभिव्यंजक
श्चैव सर्वस्यापि नियामक इति इतोऽपि जगतः सृष्ट्यादेर्मुख्यकारणं ब्रह्मैव इति भावेन सृष्ट्यादेः कालावधिमाह। सर्ग इति। अयमर्थः। यावत् स्थितिरास्ति तावन्मूर्ग
उत्पत्तिरपि पौर्वापर्येण प्रवर्त्तते। यावदीक्षणं यदा प्रलयः स्यात् इति हरेः स्मरणं तदा स्थित्यन्तः स्थितेरन्तः प्रलयो भवतीति। उत्पत्त्यादिकं भगवत्कर्तृकमित्यर्थः
२० ॥

भा॰ए॰

१३२

उक्त्वा ज्ञानाधिकारि सात्त्विक एवेत्यभिप्रेत्य सत्त्वादिगुणानां वृत्तीर्वक्तुमस्मिन्नध्याये तत्र प्रथममसंमिश्रा वृत्तीराह गुणानामिति। सत्त्वादिगुणानाममिश्रा
णां च मध्ये येन गुणेन पुमान्यथा भवेत्तथा तं मे सतो मे मत्सकाशादिदमुपधारय। इतराभ्याममिश्रा गुणवृत्तीराह शमादिभिः। ईक्षा ज्ञानं स्मृतिरखंडशास्त्रार्थ
स्मरणं। त्यागो निषिद्धत्यागः। अस्पृहा निषिद्धेच्छा राहित्यं निष्कृतिरात्मप्रशंसावर्जनं धृतिर्विपद्यपि चित्तस्यानुद्वेगः एते गुणाः यस्य संति स सात्त्विकः सांख्यज्ञा
नाधिकारी सूक्तं अनेन। रजोगुणवृत्तीराह। कामइति। कामो विषयरागः ईहा निषिद्धचेष्टा। तृष्णानलं बुद्धिः। स्तंभ उक्तानंगीकारित्वं। आशीः धनाकांक्षा।

श्रीभगवानुवाच

गुणानामसम्मिश्राणां पुमान्येन यथा भवेत्। तन्मे पुरुषवर्येदमुपधारय शंसतः १ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः। तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः २ काम ईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं। मदोत्साहो यशःप्रीतिर्हास्यं वीर्यं बलोद्यमः ३ क्रोधो लोभोऽनृतं हिंसा याच्ञा दंभः क्लमः कलिः। शोकमोहौ विषादार्ती निद्राशा भीरनुद्यमः ४ सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः। वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ५ सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः। व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः ६

भिदा भेदकरणं। अन्यथा त्वात्मनेवा। असुखं दुःखं राजसस्य दुःखं तामसस्य दुःखं भवतीति किं वक्तव्यमित्यभिप्रायेणोक्तं। तदुक्तं। राजसे विषयद्वादुःखं तद
मसे किमु नेति तत्। राजसे दुःखवचनं तामसे तु विवक्षयेति। एवंविधगुणो राजस इत्यर्थः। तमोगुणवृत्तीराह। क्रोध इति। माया कपटं। अविद्यमानमहि
मप्रकटनं दंभः। अश्रद्धा नेपि क्रोधो क्लमः। कलिः कलहः। अज्ञानं मोहः। आशोल्कं ठाएवं विधस्तामसाधिकारीति उक्तवृत्तीः विविनक्ति। सत्त्वस्येति। संनि

राम

पातं गुणानां मिश्रतां। पुरुष निश्चयादि। संनिपात इति दिहेकलत्रादेर्योहंकारो ममकारश्च स सत्त्वादिगुणानां मिश्रणात्। इत्रः। मात्रा शब्दादयः ६

१३२

संनिपाते सति मनोमात्रेंद्रियासुभिर्व्यवहारोऽभिज्ञानादिलक्षणो भवतीत्युक्तं विस्तरेणेति धर्मे चेति। यदासौ पुरुषो धर्मादिषु परिनिष्ठितो भवति तदा तस्याऽयं गु
णानां संनिकर्षः श्रद्धादिकरो भवति। यदा धर्मे निष्ठा तदा श्रद्धा। यदार्थे निष्ठा तदा धनकारी। यदा कामे निष्ठा तदा रतिं करोतीत्यर्थः। यर्हि गृहाश्रमे पुमान्प्रवृत्तिलक्ष
णे निष्ठां भजमानः स्वधर्मं चानुतिष्ठेत तत्र सा गुणानां समितिः मिश्रभाव इति द्रष्टव्यं। व्यवहारस्य संनिपातरूपत्वे अयं सात्त्विकः इत्यादि कथं घटत इति तत्राह पुरुष
मिति। शमादिभिः लिंगैः पुरुषं सत्त्वगुणयुक्तं अनुमीयात् अनुमानेन जानातु। कामादिभिरप्येवं। एवं क्रोधैश्च। सात्त्विकादिविवेचनप्रकारं दर्शयति। यदेत्या
दिश्लोकद्वयेन। आशिषः संपदः आशास्य मनस्यपि संधाय। एवंविधविभागस्य गुणहेतुकत्वेन व्यापितत्त्वात् किमिति तत्राह। सत्त्वमिति। सत्त्वादयो गुणा उक्तव

धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः। गुणानां सन्निकर्षोयं श्रद्धारतिधनावहः ७ प्रवृत्तिलक्षणे निष्ठां पुमान्यर्हि गृहाश्रमे। स्वधर्मे चानुतिष्ठेत
गुणानां समितिर्हि सा ८ पुरुषं सत्त्वसंयुक्तमनुमीयाच्छमादिभिः। कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं। यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः।
तं सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा १० यदा आशिष आशास्य मां भजेत स्वकर्मभिः। तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं ११ सत्त्वं रजस्तम
इति गुणा जीवस्य नैव मे। चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते १२ यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं। तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान्
१३ यदा जयेत्तमः सत्त्वे रजः संगं भिदा चलं। तदा दुःखेन युज्येत कर्मणा यशसा श्रिया १४ यदा जयेद्रजः सत्त्वे तमो मूढो लयं जडं। युज्येत शोकमोहा
भ्यां निद्रया हिंसयाशया १५ ॥ ॥

ह्यांतःकरणे ज्ञायंते व्यज्यंत इति चित्तजाः
दृश्यमाणविशेषापादका जीवस्यैव मे नैवा तत्र हेतुगर्भविशेषणमाह। चित्तजा इति। भूतानां पंचानां समुदायरूपवा भूतानामुपादानानां सकाशादुत्पन्ने चित्ते मिथ्याक्तैः सज्जमानो निबध्यत इति तस्मा
मम प्रकृत्यादिसंबंधराहित्यात् जीवेन दृक्त्वं तत्संबंधसद्भावादित्याह। येस्त्विति। भूतानामुपादानानां सकाशादुत्पन्ने चित्ते। इतरौ रजस्तमसी। सत्त्वस्य स्वरूपमाह। भास्वरमिति। रजस्तमः सत्त्वे
त्यन्गुणाक्रांतत्वर्थं न शंकयेति भावः। साक्षिप्योक्तं सत्त्वादिगुणानां वृत्तिं प्रपंचयति। यदेति। इतरौ रजस्तमसी। सत्त्वं गुणेन येत। आश्रयात्। तत्र स्पष्टं इत्यनेन तमः अभावो
गुणेन येत। रजः स्वभावमाह। संगेति। विषयसंगकारि भेदकारि चलता कारि च। तमोगुणेन लः सत्त्वे गुणेन येत। आश्रयात्। तत्र स्पष्टं दर्शितः १५

यदा चित्तं प्रसन्नमिंद्रियाणां निर्वृतिराह्लादश्च देहेऽभयं मनोऽसंगं च भवति तदा तत्सत्त्वं मत्स्थानं सत्त्वं विद्धि क्रियया विकुर्वन्प्रभवति चेतसो विषयादनिवृत्तिश्च
भवति। गात्राणामस्वास्थ्यं शरीरावयवानां विक्षेपणं एतैर्लिंगैरिदं रज इति निशामय पश्य। तमोगुणवर्णनप्रकारं स्पष्टयति। सीददिति। यदा चित्तं स्मरणाकारं ग्रहीतुः क
रणं सीदत्तनस्य तत्र अथवा विलीयेत चेतसो ग्रहणे वस्तुस्मरणे अक्षमं चेतनाया ग्रहणेऽक्षमं मनसो मनोऽर्थे मनो नष्टं भवति। तमः अज्ञानं। ग्लानिर्ग्लानता च भवति। त
दा तमोगुणवर्तनमुपधारय। तु भृषु गुणसत्त्वमेव सेवनीयमिति भावेनाह एधमान इति। तुर्यमवस्थाम्नस्तूपे त्रिषु गुणेषु संगतं संतं दृष्टं भवति। इतोजित सत्त्व

यदा चित्तं प्रसीदेत इंद्रियाणां च निर्वृतिः। देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मत्पदं १६ विकुर्वन्क्रियया धीरमनिवृत्तिश्च चेतसां। गात्रास्वास्थ्यं मनो
भ्रांतं रज एतैर्निशामय १७ सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं। मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय १८ एधमाने गुणे सत्त्वे देवानां बलमेधते
। असुराणां च रजसि तमस्युद्धव रक्षसां १९ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत्। प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं २० उपर्युपरि गच्छं
ति सत्त्वेन ब्रह्मणा जनाः। तमसाधोऽध आमुख्याद्रजसांतरचारिणः २१ सत्त्वे प्रलीनाः स्वर्यान्ति नरलोकं रजोलयाः। तमोलयास्तु निरयं यांति मा
मेव निर्गुणाः २२ मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत्। राजसं फलसंकल्पं हिंसाप्रायादि तामसं २३ ॥ ॥

मेव श्रेयःसाधनमित्याह। उपरीति। आब्रह्मणो ब्रह्मलोकपर्यंतं। आमुख्याद्वंशतमः पर्यंतं अंतरचारिणः स्वर्गादौ चरंति। सत्त्वे सत्त्वगुणप्रवृद्धे प्रलीनाः मृ
ताः स्वर्गं रजसि प्रवृद्धे लयो येषां ते रजोलयाः। तमोलया इत्येतदनेन व्याख्यातं। निर्गुणा मन्मात्र दिगुणाभिभूता आत्यंतिकभक्तिसाधनाः वा शब्दश्चार्थे मदर्प
णत्वेन निष्फलत्वेन फलानुसंधानरहितत्वेन यत्कर्म तन्निजकर्म वर्णाश्रमविहितं कर्म सात्त्विकं कर्म २३ ॥ ॥

गुणानि निर्दिष्टं कर्मभेदं निरूप्य ज्ञानभेदमाह। कैवल्यमिति। कैवल्यं यथा शास्त्रे प्रतिपादितं तत्त्वं तद्विषयं ज्ञानं केवलं केवलमेव कैवल्यं ज्ञानं सात्त्विकं अधिष्ठाना
दिकर्मनिष्ठं शास्त्रं बहिर्मुखजनविषयं वैषयिकं निर्गुणं मुक्तिसाधनं तदुक्तं। नैर्गुण्यसाधनं यन्निर्गुणं परिकीर्तितं इति। यथा शास्त्रोक्तविज्ञानं केवलं ज्ञानमुच्य
ते। ब्रह्मशास्त्रानुरूप्यादृष्टज्ञानं तु भक्तितः। गुणानां तु हरौ भावं विनिश्चित्य तदाश्रयात्। यथा शास्त्रानुसंधानं ज्ञानं चूहरिसंश्रयमिति च। इदानीं गुणानिमि
त्तक्षेत्रभेदमाह। वनमिति। मन्निकेतनं मदाश्रयं देवालयादि। इदानीं कर्तृभेदमाह। सात्त्विक इति। असंगी कारकः कर्ता निष्कामत्वेन कर्मणां कर्तेत्यर्थः। स्मृ

कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत्। प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं २४ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते। तामसं द्यू
तसदनं मन्निकेतं तु निर्गुणं २५ सात्त्विकः कारकोऽसंगी रागांधो राजसः स्मृतः। तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः २६ सात्त्विक्या
ध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी। तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा २७ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं। राजसं चेंद्रियप्रेष्ठं तामसं चार्ति
दाशुचि २८

तिविभ्रष्टः स्मृत्याद्यविहितकारित्वेन सत्कर्मणः भ्रष्टः। निर्गुणो मोक्षगामी। श्रद्धाभेदमाह। सात्त्विकीति। आध्यात्मिकी यथाश्रुतशास्त्रविषया। श्रुतशास्त्रानु
सारेण या श्रद्धा परमात्मनि। सा सात्त्विकी तदन्यस्याप्यनुसारेण निर्गुणा। अश्रुत्वापि प्रमाणं यो वा मुदे वैकसंश्रयः स निर्गुणो भावतः समुद्दिष्टो मनीषिभि
रिति स्मृतेः। श्रुतशास्त्रश्रद्धावत्तदनुसारेण अश्रुतशास्त्रार्थेष्वपि तदुक्तप्रकारेण मत्सेवायां मत्सेवार्थं या श्रद्धा सा निर्गुणा तदन्यस्याप्यनुसारेण निर्गुणोत्प
त्तेः। आहारभेदमाह। पथ्यमिति। अनायसं मत्क्लिष्टं। इंद्रियप्रेष्ठमिंद्रियप्रीतिकरं। आर्तिदं अशुचि च ॥ ॥

सुखभेदमाह। सात्विकमिति। आत्मोत्थं परोक्षज्ञानांशात्मस्वरूपानंदसंजातं यत्तस्मादात्मनो मतेर्ज्ञानादुत्थं सुखं सात्विकं। परोक्षज्ञानमात्मोत्थमित्यादेः म
दपाश्रयं मत्परोक्षज्ञानजन्यं सुखं निर्गुणं। अपरोक्षेणादर्शनं। विषयोत्थं सुखमित्यंगाम येत तत्स्मादतइति। भगवतः स्वरूपसुखमिदं नेत्यतो मदपाश्र
यमित्युक्तं। ननु विष्णोः स्वरूपं तु सुखं केन विदाप्यते। तस्यैव विषयत्वात्सुतत्सुखं चेति भाण्यते। परोक्षज्ञानगोचरस्माद्विषयत्वमनोगतः। अतत्रात्मोत्थमि
त्येव सुखमाहुर्विपश्चितः इति च। किं बहुना सर्वपदार्था स्त्रिगुणसंबंधेन त्रिविधा इत्याह। द्रव्यमिति। फलं स्वर्गादि। कालः प्रातरादिः। अवस्था जाग्रदादि

सात्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं। तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं २९ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः। श्रद्धावस्था
कृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ३० सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः। दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ३१ एताः संसृतयः पुं
सां गुणकर्मनिबंधनाः। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ३२ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ३३ ॥ ॥

लक्षणा। कृतिः क्रिया निष्ठा व्रतं। तदेव विवृणोति। सर्व इति। पुरुषेण विष्णुनाव्यक्तेन प्रियया स्वयं निष्ठिताः अवस्थापिताः। सत्वादिकृतसंसारजयोपा
यमाह। दृष्टमिति। वाशब्दश्चार्थे शास्त्रेण श्रुतं बुद्ध्या च शास्त्रार्थरूपेण दृष्टं च परं ब्रह्मानुध्यायेत निरंतरं स्मरेत्। अनेन ध्यानेन किं फलमत्राह। एता इति।
एव मुख्या सके न येन जीवेन चित्तजाताः सत्वादिगुणा निर्जिताः। तेन गुणकर्मनिबंधनाः संसृतयश्च प्रायुक्ता निर्जिता भवंतीति शेषः। ननु त्वत्प्राप्तिमंतरेणैव
स्मृतिजयेन किं तत्राह भक्तीति॥ ॥

मथितार्थमाह। तस्मादिति। ज्ञानविज्ञानयोः संभवो यस्मात्तं तथा। तं व्यवधानेन शास्त्रद्वारा ज्ञातं ज्ञानं। अपरोक्षेण ज्ञातं विज्ञानं निर्गुणमिति संगिरंते। लब्ध्वाद्
एण ज्ञातमपि व्यवधानं विनैव तु मुक्तिदं निर्गुणं प्रोक्तं व्यवधानेन सात्विकमित्युक्तेः। यतः संसारमोक्षो मद्वशः तस्मान्मानुषं देहं लब्ध्वा सर्वोत्तमं मां विज्ञाय ब्रह्म
णः सर्वगुणपूर्णो नमयेव पूर्णाश्रितोर्ण्णा पुरुषो वहिर्विषयेषु नाचरेत्। आंतर एव इंद्रियैः प्रत्यागात्मविषयत्वेनैव चरेदित्यर्थः। संसारस्यांतत्वादंतो हंतास्मि
न्मयि रतो भूत्वेति वा। अंतरः श्छिद्रा इंद्रियव्याजीन चरेन्न स्यात् इति वा। अंतो अवसितेषु त्योः भावे परमात्मनीति। आतरो मां विना न चरेदिति वा इत्येकाद
शे पंचविंशोध्यायः अनंतरातीताध्याये सर्वतः संगमुत्सृज्य मय्येव चिष्ठेत्वकार्यत्यक्तं तमेवार्थमितिहासपूर्वकं प्रपंचयत्यस्मिन्नध्याये। तत्रादावुक्तमपि ब्रह्मध्या

तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं। मय्येव ब्रह्मणः पूर्णो न वहिर्नांतरश्चरेत् ३४ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसं
वादे पंचविंशोध्यायः श्रीभगवानुवाच मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः। आनंदं परमात्मानमात्मस्थं समुपैति मां १ गुणमय्या
जीवयोन्या विमुक्तो ज्ञाननिष्ठया। गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः। वर्तमानोपि न पुमान्युज्यतेवस्तुभिर्गुणैः २ ॥ ॥

नफलं विश्वासजननाय पुनरप्याह मल्लक्षणमिति। मां लक्षयतीति मल्लक्षणं मुज्ञाय स्यात्तथा तं। मद्धर्म भागवतसंज्ञं आस्थितः हृदि स्थितं समुपैति दर्शनेन
तिशेषः। पश्यतीत्यर्थः। दृष्टतत्वस्य तस्य पाव देहपातं स्थितिप्रकारमाह। गुणमय्येति। पुमान्सज्ञानी अवस्तुभिरसंमलेः गुणैः शद्वादिभिर्न संयुज्यते न संबध्यते। यो
तातिरेकेण सेवनात्। तत्कारणमाह। ज्ञानेति। परतत्वाद्यशेषतत्वापरोक्षज्ञाननिष्ठया। गुणमय्या सत्वादिगुणरूपया। जीवयोन्या लिंगशरीराख्यमाय
या विमुक्तस्तदभिमानरहित इत्यर्थः। मायामात्रेषु प्रकृतिनिमित्तेष्ववस्तुतोस्वातंत्र्येण दृश्यमाने गुणेषु शरीरेषु वर्तमानोपि। वस्तु स्वतंत्रस्तु द्रष्ट मह्य
तंत्रमवस्तु चेतिवचनाद्वस्तुतरत्वेन न मिथ्यात्वमुच्यते। तत्रिंशत्यर्थसाधनसामग्री विधानं वेप्यर्थापत्तेरिति २ ॥ ॥

स्त्राविनायोपपतातिरेके एव विषयनिषेवा न कार्येत्युक्तं किमुत ज्ञानार्थिनेत्यत्र केवल्यमाह। असतामिति। शिश्नोदरमेव तर्प्पयंतीति शिश्नोदरतृपस्तेषामसतां संगं स्नेहल
क्षणं न कुर्यात्। कारणे बाधकमाह। तस्येति। तस्यासतस्त इति जातावेकवचनं। अनेन विषयसंगो न कर्त्तव्य इति किं वक्तव्यमित्युक्तं भवति। संगात्तस्यानर्थक
स्य च सुखकरो निर्वेदस्था श्रुतिरिति उद्भवस्य मानसीं शंकां परिहर्तुमैलोपाख्यानमाह। ऐल इति। गाथां शिक्षाकरवचनं। जाये घोरे तिष्ठेत्यनेन हृदये जाये मनसा
तिष्ठ घोरे वचांसि मिश्रा कृणवावहै चित्वीदं रूपयति। वर्षयामिनीः वर्षरात्रीस्तदृश्यन्तीति गणनां न वेद। अज्ञाने हेतुमाह। उर्वशीति। मोहविस्तारः अज्ञानवि

संगं न कुर्यादसतां शिश्नोदरतृपां क्वचित्। तस्यानुगस्तमस्यंधे पतत्यंधानुगोऽन्धवत् ३ ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः। उर्वशीविरहात्
मुह्यन्निर्विण्णः शोकसंयुतः ४ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः। विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ५ कामानतृप्तोऽनुजुषन् क्षु
ल्लकान्वर्षयामिनीः। न वेद यान्तीर्नायान्तीरुर्वश्याकृष्टचेतनः ६ ऐल उवाच अहो मे मोहविस्तारः कामकश्मलचेतसः। देव्या गृहीतकंठस्य ना
युःखंडा इमे स्मृताः ७ नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितोऽमुया। मुषितो वर्षपूगानां बताहानि गतान्युत ८ ॥ ॥

स्तारः आयुःखंडाः अहोरात्रविभागाः। तत्कमेव विवृणोति। नाहमिति। अहं वर्षपूगानां संख्यानयोग्यानि गतानि अहानि न वेद किंतु तान्यानि। सूर्योदयादि
ना ज्ञातुं शक्यत्वात्कथमेतदत आह। अभिनिर्मुक्त इति। सूर्येणाभ्युदितो हरेशः सूर्येणाभिनिर्मुक्तः कालो रात्र्यं शइतिष्टं यावविवेकज्ञानाभावात्। कुतोऽत आह।
मुषित इति। तत्संगेन ज्ञानस्य मुष्टत्वात्। अभिनिर्मुक्त इत्यादि राजविशेषणं वा ९ ॥ ॥

पुनरपि पश्चात्तापमाह। अहो इति। आत्मा मनोवृत्तिर्गुणितो वा क्रीडामृगश्चक्रुत इति। यः क्रीडामृगत्वं लक्ष्यति। सपरिछदमिति। इत्यश्वादिपरिकरोपेतं
। अनुभावादिगुणेऽस्त्रीसंगदोषलेपो न स्यादिति। तत्राह। कुत इति। अनुभवः सत्त्वं स्थैर्यं तेजः सामर्थ्यमीशत्वं योगशक्तिविशेषः अनेन संगदोषं माईनमम
र्थाएते गुणा इत्युक्तं भवति। स्मरबाणोत्पनेनाचामनेहेतुरुच्यते। विद्याद्यपि रागदोषं मार्ष्टुं न प्रभवतीत्याह। किं विद्ययेति। जातनिर्वेदो राजा स्त्रीमाने

अहो मे आत्मसंमोहो येनात्मा योषितां कृतः। क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः १० सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं। यान्तीं स्त्रियं चा
न्वगमं नग्न उन्मत्तवद्रुदन् ११ कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा। योऽन्वगच्छं स्त्रियं यान्तीं खरवत्पादताडितः १२ किं विद्यया किं तपसा किं
त्यागेन श्रुतेन वा। किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं १३ स्वार्थस्याकोविदं धिङ्मां मूर्खं पण्डितमानिनं। योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोख
रवज्जितः १४ सेवतो वर्षपूगान्मे उर्वश्या अधरासवं। न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा १५ पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्र
भुः। आत्मारामेश्वरमृते भगवंतमधोक्षजं १६ बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः। मनोगतो महामोहो नापयात्यजितात्मनः १७

भिक्क रोति। स्वार्थस्येति। स्वार्थस्येति। स्वार्थविषये अकोविदं स्वप्रयोजनज्ञानपाटवरहितमित्यर्थः। आत्मभूशब्दस्यानेकार्थत्वेनात्र कइति शंकानि
वृत्तये कामइति। संसारकामवैरिणि शार्ङ्गिणि जायति प्रभुर्नास्तीति वचनं कथं युज्यत इति तत्राह। आत्मारामइति। बोधकाभावादेवमभूदिति नेत्याह। बो
धितस्येति। किमेतयावाचेत्यादि सूक्तवाक्येन १७ ॥ ॥

एतयोर्वश्यारइसितया किं तु सुखं न किमपि प्रत्युत दुःखमेवा तत्र दृष्टांतः॥ रज्ज्वां वै सर्प्पचेतस इति। यथा रज्ज्वां सर्प्पबुद्धेर्भयलक्षणं दुःखं तथा। अन्य था बुद्धेः किं कारणमत्राह। द्रष्टुरिति। द्रष्टुरीश्वरस्य स्वरूपाविदुषः किंच। योऽहं यादृश ईश्वराधीनसत्ताको हं तस्य मम स्वरूपाविदुषः ईश्वरस्वरूपाज्ञा नं मत्स्वरूपाज्ञानकारणमित्यर्थः। रथांगपाणेः स्वरूपाज्ञाने चाजितेंद्रियत्वमेव कारणमित्याह। यदिति। इतोपि सर्वस्याप्यज्ञानमेव कारणमित्या ह। क्वायमिति। सोमनस्यं सोर्यं दोर्गंध्यादि गुणाधिकरणस्य देहस्य सोमनस्यादिगुण समवायो न घटत इति हि यस्मात्तस्मादनाद्य विद्यया भग वत्स्वरूपाज्ञानेनाध्यासोत स्मिंस्तद्बुद्धिरश्रदित्यर्थः। अध्यासं प्रपंचयन्नपि पित्रोरिति। भार्यायाश्च पि भोगार्थत्वाद्विषय को द्येतभावः यो देहः पित्रादी

किं चैतया मम एकां ते रज्ज्वां वै सर्प्पचेतसः। द्रष्टुः स्वरूपाविदुषो योऽहं यदजितेंद्रियः १८ क्वायं मलीमसः कायो दौर्गंध्याद्यात्मकोऽशुचिः। क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः १९ पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः। किमात्मनः किं सुहृदामिति यो नावसीयते २० तस्मिन् कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते। अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियः २१ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ। विण्मूत्रपूये रमतां कृमीणां कियदंतरं २२ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित्। विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यदा २३ ॥ ॥

तस्मिन्नमेध्ये कलेवरे सु भ नामस्येति नावसीयते न निश्चीयते तस्मिंस्तुच्छानां पंचानां भूतानां निष्ठोत्कर्षाय स्मिंश्च तुच्छा निष्ठा व्यवस्थावसानं यस्य तत्र यथेति वा। तस्मिन्नमेध्ये कलेवरे सु भ इमिति विषज्जते पुरुषः अहोभ्रांतिरिति। इतोपि स्त्री व्यर्थबुद्धिं कुर्वन्नभ्रांतरत्याह। त्वगिति। संहतो त्वगादि संनिविष्टे देहे रमतां रममाणानां कृमीणां की दृकानीचांतरं व्यवच्छेदनं कियत स्त्रीषु पिरमणमपि गर्हितं यस्मात्तत्र अथ तस्मादर्थवित्स्वप्रयोजनवित् स्त्रीषु स्त्रीलोलेषु च नोपिषज्जते। यद्यपि विशेषो ना स्तितथापीदं न कर्त्तव्यमित्यतो वाह। अथापीति स्त्रीसंगात्स्विर्ज्जनमनो वशीकरणमेव प्रथमसाधनं अन्यथा सर्वं कृत्स्नं रस्मान वन्निष्फलं स्यादिति भा वेनाह। विषयेति। अन्यदा विषयेंद्रियसंयोगाभावे मनः क्षोभो नास्ति २३ ॥ ॥

तदुपपादयति। अदृष्टादिति। भावो मनः अदृष्टादश्रुताद्भावाद्भावस्य मनो नोपजायते विकारविशिष्टं न भवति संयोगलक्षणसंबंधाभावात्। अतो दृष्टश्रुत वस्त्वे तदुपपादयति। अदृष्टादिति भावो मनः ... विषयेंद्रियसंयोगात्तु क्षुब्धं भवत्यतः प्राणानिंद्रियाणि विषयेषु असंप्रयुंजतः विष वसं वक्ष्यमर्थं मनः। ननु प्रकृते किमनेनेति तत्र शङ्का। असंप्रयुंजत इति। यतो विषयेंद्रियसंयोगात्क्षुब्धं भवत्यतः प्राणानिंद्रियाणि विषयेषु असंप्रयुंजतः विष येभ्य आकृष्य स्ववशीकुर्वतः पुंसः आकर्षणपाशाभावात्स्तिमितं निश्चलं मनः शाम्यति भगवद्दर्शनेष्टं भवतीत्यर्थः। उक्तं निगमयति। तस्मादिति। कुत इति त्वाह। विदुषामिति। तन्मपरतः स्थस्य पुंसः दुःसंगस्याग्रेतु अत्कइति न मंतव्यं सत्संगेन स्वपमेव शिथिलीभूतस्य सुलभ इति भावेनाह। ततइति। तत इति।

अदृष्टादश्रुताद्भावान्न भाव उपजायते। असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः २४ तस्मात्संगो न कर्त्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः। विदुषां चाप्यवि श्रब्धः षड्वर्गः किमु मादृशां २५ श्रीभगवानुवाच एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय। आत्मानमात्मन्यवगम्य मां वै उपार मत् ज्ञानविधूतमोहः २६ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान्। संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः २७ संतोऽनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः। निर्ममा निरहंकारा निर्द्वंद्वा निःपरिग्रहाः २८ तेषु नित्यं महाभाग महाभागेषु मत्कथाः। संभवंति हिता नृणां जुषतां प्रपुनंत्यघं २९

ढावलंबरहितस्य पतनवत् दुःसंगो नर्थकरणं इति यन्नतः ते किमस्य कुर्वंतीति तत्राह। संत इति। संत एतस्य मनोवाक्कायकर्म्मभिः सम्यक् शरणं गत स्य पुंसो मनोव्यासंगं मनसो दुष्टेषु संगं उक्तिभिः छिंदंति। एवं विधमाहात्म्याश्चेते कथं ज्ञातव्या इति तत्तल्लक्षणमाह। संत इति। अनपेक्षता दिगुणानाम न्यत्रापि दर्शनात् तेषामपि दुःसंगनिवर्त्तकत्वं स्यादित्याशंक्य तच्छुद्धत्वं दुःखद्गुणसद्भावादन्यत्र तदभावादिति भावेनाह। तेष्विति। ततः किमत्राह। अ तिकथा आह उक्तयो मनोव्यासंगं छिंदंतीत्यर्थः २९ ॥ ॥

भा·ए·

२३७

त्वद्भक्तिर्ईदृशस्सत्संगाच्छेत्तत्तद्दृश्यते तासिः किमत आह। ता येशृण्वंतीति भक्तेः साधनांतरमप्याह। भक्तिमिति। एतमर्थं सोदाहरणं समर्थयते यथेति।
विभावसुमग्निं निषेवमाणस्य शीतादिकं यथा नश्यति तथा साधुं सत्स्वरूपं सेवमानस्य मनो आसंगविनाशो भवतीत्यर्थः। इतोपि संतः सेव्या इत्याह। निम
ज्ज्येति। तथा ते संतः पुंसां परायणम् प्लुमज्जतां दृढा नौरिव। सत्स्वपि प्रधानसत्वं च स्वहमेवेति सोदाहरणमाह। अन्नमिति। तुल्योपमेयं। क्षुधितानां अन्नं प्राणो
यथा प्रकृष्टचेष्टपरं। यथा प्रेत्य मरणानंतरं धर्मो वित्तं च नृणां सुखाय स्याद्यथा चार्तानां शरणं त्विहाहमेव पदतः संसाराद्बिभ्यतो जन स्यारणं शरणं

ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः। मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि ३० भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते। मय्यनंतगुणे ब्रह्म
ण्यानंदानुभवात्मनि ३१ यथोपश्रयमाणस्य भगवंतं विभावसुं। शीतं भयं तमोप्येति साधून्संसेवतस्तथा ३२ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परा
यणं। संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३३ अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं। धर्मो वित्तं नृणां प्रेत्य संतोर्वाग्बिभ्यतोरणं ३४ सं
तो दिशंति चक्षूंषि बहिरर्कः समुत्थितः। देवता बांधवाः संतः पिता माताहमेव च ३५ वैतसेनस्ततोप्येवमुर्वश्या लोकनिःस्पृहः। मुक्तसंगो महीमेतां
आत्मारामश्चचार ह ३६ इति श्रीभागवते महापुराणे एकादशस्कंधे पुरूरवगीतं षड्विंशोध्यायः ॥ ॥

संत इति। यथा समुत्थित उदितोर्को बहिश्चक्षुर्दिशति तथा संतः आंतरं चक्षुर्दिशंति वक्तृवचनादादित्यादधिकप्रयोजकत्वं सूचयति। सत्वधानो हरिरित्य
स्यावगतिः कथमभूदित्यत आह। देवता इति। देवतादयो ह्यहमेवेत्यनेन सत्वधानत्वमवगम्यते हरेरिति। विलोक्य सत्वधानत्वात्सतां विद्यते परं। इत्याह पूर्वश्लोकवि
षः साहि सर्वेश्वरेश्वर इति वाक्यशेषेण सूचयति। श्लोकार्थमितिहासेन संगमयति। वैतसेनेति। वैतसेवं निरूप्येति शेषः ३६ इत्येकादशे षड्विंशः

रा·म

२३७

कर्मयोगानुष्ठानप्रकारं प्रपंचयत्यस्मिन् सप्तविंशे तत्रोद्धवो बोधिस्थित्यादिना संक्षिप्योक्तं क्रियायोगं विस्तरतो विविदिषुः पृच्छति। क्रियायोगमित्यादि
ना। क्रिया तु निष्कृतौ शिक्षा चिकित्सा पापकर्मसु। कारणारंभइज्यासु संप्रधारणचेष्टयोरित्यतो विवक्षितमाह। भवदाराधनमिति। ये सात्वताः सात्वतंतं
त्रविधानविदुषस्ते येन केन त्वां यथा कथमर्चंति। इदमेव वक्तव्यं इति किं किमन्यन्न स्यादिति तत्राह। एतदिति। मुनयः एतद्भगवदाराधनं नृणां निःश्रेयसं
पुरुषार्थसाधनं मुहुर्मुहुरनुत्तमं वदंति। तदुक्तेः याथार्थ्येनानिर्दिशति नारद इत्यादिना। आंगिरसः सुतः आचार्यो बृहस्पतिः। इतोपि इदमेव श्रेय
व्यं नान्यदित्याह। निःसृतमिति। ननु विवचनानां विकल्पसंभवात्कथं निर्णय इत्यतोवाह। निःसृतमिति। भवदाराधनपाश्चरात्रजनमोहनायान्यथावदंति

उद्धव उवाच ॥ क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो। येन त्वां ये यथार्चंति सात्वताः सात्वतर्षभ १ एतद्वदंति मुनयो मुहुर्निश्रेयसं नृ
णां। नारदो भगवान्व्यासः आचार्योंगिरसः सुतः २ निःसृतं ते मुखांभोजाद्यदाह भगवानजः। पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ३
एतद्वै सर्ववर्णानामाश्रमाणां च संमतं। श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ४ एतत्कमलपत्राक्ष कर्मबंधविमोचनं। भक्ताय चानुरक्ता
य ब्रूहि विश्वेश्वरेश्वर ५ श्रीभगवानुवाच ॥ नह्यंतोनंतपारस्य कर्मकांडस्य चोद्धव। संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ६

वोपीदं याह्यत्वेनाह देव्या इति। देव्या इत्यनेनास्य सुलभत्वं सूचयति। उत्तमश्रोतॄणामर्थायोक्तेक्षुना परेषामधिकार इति नाश्रद्धेयमिति भावेनाह।
एतद्वै सर्वेति। संमतं समानं। अनेन कर्मबंधविधेस्याभावात्तन्नानुष्ठानार्हमिति नेत्याह। कर्मेति। कर्मकांडस्यापरिमितत्वेन तज्ज्ञानस्य दुःसाधनत्वे
न मंदमतीनां तदुक्तानुष्ठानं दूरोत्सारितमित्यतो महद्दरणीयमिति निमतिं कृतु किंतु यत्संक्षिप्योक्तं तत्वयाप्रपरिहारत्वेन वक्ष्यामीत्याह। नहीति।
कर्मकांडस्य चरात्रागमस्य च शब्देन समुच्चये। किंतु केषांचिदेवानंतपारत्वं न सर्वेषामस्मदादिबुद्धिविषयत्वात्तस्यास्मिन्नर्थे ६ ॥ ॥

वैदिकोवेदाधिकारविषयोग्निहोमादिः शांतिकः तंत्राधिकारिविषयः पुष्पांजल्यादिर्मिश्रः स्त्रीशूद्रादिविषयो नामसंकीर्तनादिः सर्वव्यापकः एवं त्रैविध्यं ज्ञा
णः तत्तदधिकारिणमाह। त्रयाणामिति। ईप्सितेन योग्येन स्वनिगमेन स्वशाखया विहितं यथा तथा द्विजत्वमुपनयनं प्राप्य श्रद्धादिभ्यः शिक्षानि
त्यनैमित्तिकं शास्त्रानियथा योग्यं उभयैर्वैदिकैस्तांत्रिकैरपि मंत्रैः। संध्योपास्त्यादिकर्माणि यानितैः मम पूजां कल्पयेत। किमर्थमेवं सं कल्प इति तत्राह। सम्य
गिति। इयं मत्पूजा मत्प्रसादकत्वेन संकल्पः कर्मशुद्धिकर इत्यर्थः। अर्चामिति प्रतिमाभेदमाह। शैलीति। शैली शिलामयी लौही लोहेन कांस्यतामादिना

वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः। त्रयाणामीप्सितेनैव विधिना मां समर्चयेत ७ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः। यथा
यजेत मां भक्त्या श्रद्धया तन्निबोध मे ८ अर्चायां स्थंडिलेग्नौ वा सूर्ये वाप्सु हृदि द्विजः द्रव्येण भक्तियुक्तोर्चेत्स्वगुरुं माममायया ९ पूर्वं स्नानं प्र
कुर्वीत धौतदंतोंगशुद्धये उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिभिः १० संध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे। पूजां तैः कल्पयेत्सम्यक्सं
कल्पः कर्मपावनः ११ शैली दारुमयी लौही लेप्या लेख्या च सैकती। मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति द्विविधा प्र
तिष्ठा जीवमंदिरं। उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने। अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं। स्नपनं त्वविलेप्यायामन्यत्र परिमार्ज
नं १४ ॥

निर्मिता। लेप्या औषधरससंलिप्तशिलाने व्यापरादि लिखिता चित्रलक्षणा। सैकती तत्तत्कालोचिता सिकतया कृता मनोमयी ध्यानकाले विरचिता
विताकृतिः मणिमयी सूर्यकांतादिरचिता। जीवमंदिरं देहः दृश्यमपि चलांतर्गतं स्थिरा। यां प्रतिमायामर्चनं उद्वासावाहने न स्तः। अन्यत्र सिता स्थिरे वस्तप
नं। विलेप्यायां तु शब्दात्स्थंडिलादावपि परिमार्जनं। स्नपनमिति सूच्यते १४ ॥ ॥

प्रसिद्धैः स्वं चेद्गुप्रशस्तत्वेन निरूपितैः सामग्र्याभावे यथालब्धैः हृदि भक्त्याभावेन ध्यानेन द्रव्यध्यानमस्तुचापेच शब्दः एव शब्दो भक्तेः सार्वत्रिकत्वे। हिशब्दो
त्यानयाधिक्य। तत्वस्य हरेः सच्चिदानंदरूपस्य विन्यासः संनिधापनं। तत्वानां प्राणप्रभृतीनां विन्यासो वा। सूर्ये उपस्थानादिभिरभ्यर्हणं प्रेष्ठं इति शयितश्रीति
नक्तं। सर्वस्माद्भक्तिरेव कमुपाहृतं प्रेष्ठमित्याह। श्रद्धयेति। प्रागुदग्वा सीनः। संमुखः अभिमुखः। कृतषडंगन्यासः कलशमग्रोदकपात्रं प्रोक्षणीयं पुष्पादि

द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायया। भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि १५ स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव स्थंडिले तत्वविन्यासो
वह्नावाज्यप्लुतं हविः १६ सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः १६ श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि। गंधो धूपः सुमनसो दीपोन्नाद्यं च किंपु
नः १७ शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः। आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः १८ कृतन्यासो मदर्चां च पाणिनाभिमृजेत्पुनः
कलशं प्रोक्षणीयं च यथावदुपसादयेत १९ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च। प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत २१ पाद्या
र्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः। हृदा शीर्ष्णाथ शिखया गायत्र्या चाभिमंत्रयेत २२ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम। अण्वीं जी
वकलां ध्यायेन्नादांते सिद्धभावितां २३

पाद्यादि देशिको मंत्रज्ञः। हृदादिमंत्रैर्नमस्त्रादिलक्षणैः। ध्येयस्वरूपमाह। पिंड इति। प्राणायामोच्चलितवाय्वग्निसंशुद्धे पिंडे देहे हृत्पद्मस्थां जीवः कलाम
स्याः सा जीवकला तां जीवविंबस्वरूपमित्यर्थः ध्यायेत्। हृदिस्थापाहरे मूर्तिं जीवोपन्नतिविंबकः। यद्वशे वर्त्तते जीवः सा तु जीवकला स्मृता। शब्दैः सर्वात्म
नानुक्तेर्नादांतं स्थातुमसमर्थत्वेन ध्यायेत्। नादांते सिद्धभावितां नादः शब्दः अंतोवसानं सर्वात्मना शब्दैरनुक्तत्वात्। शब्दागोचरतया सिद्धैः सनकादिभि
रुपासितां। शब्दैः सर्वात्मनानुक्तेरित्युक्तेः २३ ॥

आत्मा व्याप्ताङ्गानि स्वं वर्णं नानायाजी वकालात या। शरीरव्यापिन्या भगवन्मूर्त्या व्याप्ते पिण्डे देहे संपद्यते सम्यग्रूपप्रतिपन्निं हृत्वा तन्मयः एवं ध्यानेन भगवत्स्वधा
नोऽहलाद्यं चांद्रिकाबाह्यसंज्ञाप्य संनिबुध्य त्यस्तांगं मातृकादिमंत्राच्चरेर्न्यस्य तत्र रवयवं मां प्रपूजयेदित्यन्वयः। व्याप्तोऽभूत तथा नित्यं पदात्मकृतो हरिस्तु तः
नीवस्यतत्प्रधानत्वे तन्मयत्व मुपागत मितिवचनात्। अतसातत्यगमनइति धातोः पचप्रत्ययात् हात्मेति रूपं। अनेन मपि च्छित्वा स्वयमेव स्वात्मानं आवाहयेत्
र्थयत्य हंतदधीनतया स्वाहनादिकरो मीत्याद्यक्रंभवति। धर्मादिभिः विमलादिभिः नवभिः शक्तिभिश्चासनं पीठं कल्पयित्वा। तत्र धर्मादिकल्पे पीठे अष्टदलं पद्मं

तथा तन्मश्रतयापिंडेव्यासे संपद्य तन्मयः। आवाह्यार्चादि भुह्याप्य न्यस्तांगं मां प्रपूजयेत् २४ पाद्योपस्पर्शनार्घ्यादीनुपचारान्प्रकल्पयेत्। धर्मादिभिश्च
नवभिः कल्पयित्वासनं मम २५ पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं। उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये २६ सुदर्शनं पांचजन्यं गदासीषुधनुर्हला
न्। मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २७ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च। महाबलं बलं चैव कुमुदं कुमुदेक्षणं २८ दुर्गां विनायकं व्यासं
विष्वक्सेनं गुरून्सुरान्। स्वे स्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः २९ चंदनोशीरकर्पूरकुंकुमागरुवासितैः सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभ
वे सति ३० स्वर्णघर्मानुवाकेन महापुरुषविद्यया। पौरुषेणापि सूक्तेन सामभी राजनादिभिः ३१ वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः। अलंकुर्वीत
सप्रेम मद्भक्तो मां यथोचितं ३२ पाद्यमाचमनीयं च गंधं सुमनसोऽक्षतान्। धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ३३ ॥ ॥

आवाह्य तत्र प्रतिमादौ संनिहितं मां पूजयेत् उभयसिद्धये वेदतंत्रोक्तफलसिद्धये २६ अथनंतरं २७ मध्यावाहितप्रधानदेवताभिमुखान् स्वोह
णीयादिभिः अर्घ्यादिभिः स्वर्णघर्मसूक्तेन विष्णुसूक्तेन धर्मानुवाकेन। धर्मः समंतात्त्रिवृतं व्यापत्तुरित्यादिसूक्तेन। महापुरुषविद्यया जितंते पुंडरीकाक्ष
त्यादिकया पौरुषेण सूक्तेनापि। साम सूक्तं समुद्राद्मिरिति। पवमानं सूक्तं नीराजनं। व्याप्तोपि भगवान् विष्णुर्देहे सर्वगतस्तथा। तद्रूपफलदो यस्मात्
व्याप्तिश्चैव तस्य मे श्रुतिः। नितरां राजयेद्यस्मात्पवमानं हि मंडलं। विष्णुर्नीराजनं तस्माद्विद्वद्भिः समुदाहृतमितिवचनात्। आदिशब्दो लैरुप्योऽजज्ञे वीर्याणि
त्यादिसूक्तैः स्तुतिं कुर्यात् ३१

संध्यावंगोऽश्मयायसोराजनाचनवा। विज्ञेयमतिमेखलावज्र्वेदिभिः सह विहिते। ज्वलितं ज्वलितं। हविषा स मिश्राणि मिश्रितानि दारूणि समिधः। आज्य हुत्वा
आधारौ आघारौ आज्यभागौ च विधानतः कृत्वा विधानतः। धर्मादिमंत्रैः धर्मादिभ्य स्वाहेत्यादिमंत्रैः हविर्जुहुयादिति शेषः ततः स्विष्टकृतं कुर्यात् अभ्यर्च्याथ
तिपाठः अभिमुखो भूत्वा अर्चायां सन्निहितं भगवंतं नमस्कृत्येत्यर्थः। सुरभिमन्मुखवासं तांबूलाद्यं च दत्वा अनंतरं चामरछत्रपचारैः अर्हयेत् संभावयेत्। न केवलं
४२

गुडपायससर्पींषि शष्कुल्यापूपमोदकान्। संयावं दधिसूपांश्च नैवेद्यं सति कल्पयेत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं। अन्नाद्यगीतनृत्यानि
पर्वणि स्युरुतान्वहं। विधिना विहिते कुंडे मेखलागर्तवेदिभिः। अग्निमाधाय परितः समूहेत्पाणिनोदितं ३५ परिस्तीर्याथ पर्युक्ष्य अन्वाधाय यथावि
धि। प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत मां ३६ तप्तजांबूनदप्रख्यं शंखचक्रगदांबुजैः। लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं। स्फुरत्कि
रीटकटककटिसूत्रवरांगदं। श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं। ध्यायन्नभ्यर्च्य दारूणि हविषाभिघृतानि च। प्रास्याज्यभागावाधारौ दत्वा चा
ज्यप्लुतं हविः। जुहुयान्मूलमंत्रेण षोडशर्चावदानतः ३९ धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः ४० अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो
बलिं हरेत्। मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं ४१ दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत्। मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत्
४३ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम। मत्कथाः श्रावयञ्छृण्वन्मुहूर्तं क्षणिको भवेत् ४४ ॥ ॥

उपगायन् गृणन् स्तुवन् अथ किं नृत्यन् कर्माणि अन्यैः कीर्तयित्वाभिनयन् सर्वेषां प्रकाशयेत् अर्थाभिरंवाहृ। मत्कथा इति। अनेनाभिनयशब्दार्थोऽपि विवृतः किंच ॥४५ ॥
के स्यात्याह। मुहूर्तं क्षणिक इति। मत्कथार्थमेव मुहूर्तं क्षणमवस्थानं यस्य सः एवं भूतः। मत्कथाभिवाहितसर्वकालो भवेदित्यर्थः।

स्तवैरुक्तकश्लोकनिबंधनैः परस्परं बद्धाभ्यां बाहुभ्यां सह शिरः मत्पादयोः कृत्वा शेषां मालाद्युतां दिहानं शेषो श्रीब्रह्मविशिष्टपुरुषकृतमाल्याद्युत्तमा दिहा नेत्रीतियादवः। यत्र येष्वर्चादिषु यथा श्रद्धा तथा मामर्चयेत्। अर्चास्तु भावतः प्रतिमा सामर्थ्यादिवा हरूपेण प्रवर्त्तनार्थं। प्रतिष्ठा गृहकरणपूजानां फलतारतम्यमाह। प्रतिष्ठयेत्यादिना। मत्साम्यतां निर्गुःखानंदानुभवरूपतां ज्ञानं विना प्रतिष्ठादिभिरेव साम्यता कथंस्यादित्याह। मानवैति। नैरपेक्ष्येण

स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि। स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ४६ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं। प्रपन्नं पाहि मा मीश भीतं मृत्युग्रहार्णवात् ४७ ततः शेषां मया दत्तां शिरस्याधाय सादरं। उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः॥४८॥ अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत्। सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४८ एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः। अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ५० मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं। पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितां ५० पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं। क्षेत्रापणपुरग्रामान्दत्त्वा मत्सार्ष्टितामियात् ५१ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं। पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ५२ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति। स भक्तियोगं लभत एवं यः पूजयेत मां ५३ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः। वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ५४

भक्तियोगेनैव मां विंदति सा प्यं लभते। ननु एवं तर्हि प्रतिमादिपूजा व्यर्थेति तत्राह। एवमिति। य एवं मां पूजयेत्स भक्तियोगं लभते तेन मामाप्नोतीति शेषः। अ नेन ज्ञानभक्तिद्वारेण भगवत्प्राप्तिरित्युक्तं भवति। देवस्वापहरणे महान्दोषः इत्याह। य इति॥ ॥

न केवलं प्रतिमादिपूजाकर्तुरुक्तं फलं साहाय्यकर्तॄणां यथायोग्यं फलं भवतीत्याह। कर्त्तुरिति। सारथेः कार्यहेतोः प्रेत्य कर्मणां फलभागिनो भवंतीत्यर्थः। फलतारतम्यमाह। भूय इति। भूयसि भूयसि तत्फलं भूयो भवति ५४ इत्येकादशे सप्तविंशः हरेः परमभक्तस्य तदधीनस्त्वात्मत्वेन ज्ञातो यं तमस्य तं श्रमेताद्दशतत्वज्ञानेन संसारबंधनिवर्त्तनं नाभेदज्ञानेनेत्यादिकमुपदिशत्यस्मिन्नध्याये तत्रादौ दुर्जनस्वभावतत्कृतपापकर्मप्रशंसनानिंदाभ्यां सज्जन स्वभावतदनुष्ठितपुण्यकर्मस्तुतिनिंदाभ्यां चावश्यमवश्यं पुरुषेणेति शिक्षयति। परस्वभावेत्यादिना। परो रिपुः परमात्मनेत्यतः। परः शत्रुः जीवब्रह्मणो र्वैलक्षण्यसत्यतायाः असहमानित्वादिति शेषः। तस्य यः स्वभावः यानि तदाचरितानि पापकर्माणि तानि। सर्वाणि न प्रशंसेन्न प्रशंसयेन्निंदेन्निंदयेच्च।

कर्त्तुश्च सारथेर्हेतोरनुमोदितुरेव च। कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५५ इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तविंशोध्यायः श्रीभगवानुवाच परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्। विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च १

किं च। परः परमात्मा। परमेष्ठी नारायणो आत्माभिन्नो यस्य स तथा तस्य। यद्वा परो लोकवाह्यो ज्ञानी तस्य स्वभावं तेनाचीर्णानि पुण्यकर्माणि च इतरैर्न गर्हये न्निंदयेत्। यतः प्रशंसेन्न स्वयमपेक्ष। एतादृशः पुरुषो दुर्लभ इति तत्राह। विश्वमिति प्रकृत्या चेतनया पुरुषेण एकीकृत्य एकमनेकेन सह स्थितं विश्वमेकेन परमात्मनात्मकं व्याप्तमेकात्मकं पश्यन् यथार्थज्ञानिवात्र तत्र विते बातो न दुर्लभ इति। अनेन तथा पश्यत एव यथार्थज्ञानं भवतीत्युक्तं भवति। न प्रशंसेत निंदां कुर्यात्प्रशंसयोः स्वनिंदयेत्। उभयं यः करोत्येतदसत्यामसपतत्यधः। यः प्रशंसयान्नु प्रशंसेन्निंद्योयेन ननिंद्यते। सो पितद्वद्धो यातियतो खिडु दासकः वाक्यात परस्वभावकर्मणां प्रशंसा निंदा च न कार्येति प्रतीतार्थः। किं न स्यादिति यंशकाहरीत्सारितेति ज्ञानयं १ ॥ ॥

उक्तार्थानंगीकारेबाधकमाह। परस्वभावेति। परोन्योहरिविमुखत्वेन निंद्यस्तस्य स्वभावकर्माणि श्लोकोति। वरो वरणीयस्तत्रस्तः श्रीहरिपरायणः तस्य स्वभावकर्माणि निंदति स पुरुषः असत्याभिनिवेशतः मिथ्याज्ञानाभिनिवेशतः स्वार्थाद्भ्रश्यते अधंतमोयातीत्यन्वयः। यद्वा शंस्यात्र प्रशंसादित्यादेरस्याप्युक्ता एवार्थः। असत्याभिनिवेशे निमित्तमाह तैजसइति। निद्राशब्देन निद्रासुनिद्रेति द्विविधा निद्रोच्यते। तत्र निद्रा स्वप्नापरपर्याया। सुनिद्रा मरणकालीना तथा चैवमस्य श्लोकस्यार्थः। तैजसे तैजसाहंकारकार्ये श्रोत्रादीन्द्रियगणे मनसि च निद्रया देहं दिन स्वापेनापन्ने सुनेसति पिंडस्थो जीवो नष्टचेतनः सुप्तो भवति तद्वा स्वप्ने

परस्वभावकर्माणि यः प्रशंसति निंदति। स आशु भ्रश्यते स्वार्थादसत्याभिनिवेशतः १ ॥
तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः। मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृङ्मनः २ ॥

जायतामर्थी स्वप्ने ह्यप्रबोधितमनोगतसंस्कारजन्यत्वात मायां स्वप्नं प्राप्नोति। सुनिद्रयापन्ने मृत्युमरणं प्राप्नोति। नानाविधसंस्काराविष्टं मनः स्वप्नदृशायां नानार्थप्रदं दृष्टेंद्रिया जागृदवस्थायां किमु वर्णनीयमिति भावेनाह तद्वदिति तन्मनएव नानार्थदं नानाविधविषयप्रत्यायकं द्विप्रसिद्धत्वान्मन एवमिथ्याप्रत्ययनिमित्तमिति भावः। तेजसाहंकृते जातइंद्रियग्रामकेपरात्। निद्रयावशमापन्ने जीवः स्यान्नष्टचेतनः। अतो विश्वो विशेसर्वतिनव्याप्रमिति स्मरेति। निद्राचैव सुनिद्राच द्विधा निद्राप्रकीर्तिता। तत्र निद्राभवेन्नित्या सुनिद्रा मृतिकालगेति। मनोमात्रस्वरूपत्वात् स्वप्नो मायेति कथ्यते। इत्येतैर्वाक्यैः सा रूपएवार्थो गीकार्य इति २ ॥ ॥

अवस्तुनो नित्याप्रतिहतलक्षणावस्तुज्ञानतो द्वैतस्याशुभस्य मिथ्याज्ञानिनः पुंसः आशीर्वादादिना किं भद्रं भवति कालगुणान्यथात्वाद्भवति वेद्यपि तत्किं यदेवात्यत्यमेव भद्रवद्भद्रमपि विशेषापादकं न भवतीत्याह। किं भद्रमिति। नित्यमशुभात्मनः तस्य विशेषतः अभद्रं किं न किमपि भवति चेद्यपि तत्कियदेव। यत्र वतोपि मायावादिनः स्वयोग्याद्धिक्येन न भवतीति यस्मात्तत्स्मात् शुभजीवमुद्दिश्य सज्जनवाचोदितं मुक्तं मनसा शुभारिक्तं स्यात् इति ध्यातं चिंतितमपि अनृतमसत्यमेव विशेषापादकं न भवतीत्यर्थः। अनेन वेत्स्वेनावैस्व वमुद्दिश्य तस्य शंसाद्विदाशीर्वादादिकं न कर्तव्यमित्युक्तं भवति। द्वैतनिषेधो नक्रियत इत्यन्यथा व्याख्याने च शत्रुप्रवचितेन। एकं तु शुभमुद्दिश्य अशुभं द्वैतमुच्यते। पुंसोशुभस्य किं भद्रं किमभद्रं विशेषतः। सर्वदा शुभरूपत्वात् विशेषोत्यल्पस वाहीति वाक्येन निरस्तत्वादुपेक्षणीयमिति भावः। ननु अभावतो शुभजीवस्य सदाशुभरूपत्वात् अन्यस्मात् शुभाशुभयोरत्यल्पत्वान्न द्विषपशुभवर नादेरप्यकृतत्वाद शुभदेहा

किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्। वाचोदितं तदनृतं मनसा ध्यातमेव च ४ ॥
छायाप्रत्याह्वयाभासा ह्यसंतोप्यर्थकारिणः। एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ५ ॥

दिकमपि नाशुभकारणमिति तत्राह। छायाप्रत्युदकाभासा इति। हि शब्दो यथार्थे। यथा छायाप्रत्युदकाभासा सजीवमपेत्यासंतोपि निःशंक्या अप्यर्थकारिणो अर्थक्रियाकारिणो दृष्टाः एवं देहादयो भावाः अभासा अप्यामृत्युतो ध्यंतमः प्रवेशपर्यंतं भयमित्युपलक्षणं शुभाशुभफलं यच्छंति। अशुभजीवानामिति शोषः। निहारः प्रत्युदं चैव ध्वप्रमित्यपि शब्दृत इत्यतः प्रत्युदकं नीहारः। आभासाः स्वर्यकांतादयः। नेदं रजतमिति वत्तेयं छायेति बाधकप्रत्ययात्तुद्यात एतद्दृष्टांतेन न देहादीनामपि ध्यात्वं विविक्षितं किंतु निःशक्तित्वमेव व्यपेक्ष्य जीवं देहादिनिः शक्तत्वादवस्त्वपि पुनः शुभाशुभकारणं यद्वद्देवशुभाशुभं। छायानीहारकाभासानिःशक्ता अपिकार्यदाः। एवं शुभादि देहादिर्भवेत्कार्यं शुभादिकं। एतद्वचनात्रयमभयमिति वाय रुद्धेदः ५ ॥ ॥

सत्यसंकल्पेन सत्यकर्मणा विश्वस्रष्ट्रा केनापरमेश्वरेण सृष्टत्वादिदं देहादि सर्वं सत्यं न मिथ्या श्रुतमिति भावेनाह। आत्मैवेति। प्रकृत्याद्युपसर्जनं विनापि सर्जन
सत्यसंकल्पेन सत्यकर्मणा विश्वस्रष्टृत्वेन परमेश्वरेण सृष्टं इदं सर्वं सृजति। त्राति हरति च। विश्वात्मा स्वपमेव स्वात्मनैव सृज्यते त्रायते ह्रियते च दीपाद्दीपान्तरवत् ईश्वर इत्यनेनक
र्तृकं कर्तुं समर्थः इत्यर्थ एव प्रभुः। परमात्मैवेदं सर्वं सृजति। त्राति हरति च। विश्वात्मा सर्वमेव स्वात्मना न स्वात्मनः अन्यदस्ति इत्यात्मसमर्थत्वाच्चेति सूचयति। दीपाद्दीपान्तर
र्मकर्तृत्वविरोधं परिहरति। प्रभुरित्यनेन नवमानुषेच्छेनावंतं कालं स्थास्यामीति चिंतनं मे चात्मन आत्मानं नान्यदहं तदुक्ता। विष्णोः आत्मसु दृष्टं सुस्थैव स्वेच्छपैव तु। दीपाद्दीपान्तरस्येव स्वेच्छैकीभावः संहार इति दर्शयति। पूर्णमदः पूर्णमि
यं दृश्यते इति श्रुतिः कीर्त्यते। एतावत्कालं मा तिष्ठेमानुषेऽस्थितिचिंतनं। विष्णोः आत्मनः समुद्दिष्टं स्वस्यैव स्वेच्छयैव तु। दीपाद्दीपान्तरस्पर्धी पदचैकीभावः संहार इति दर्शयति। पूर्णमदः पूर्णमि
चनात्। अविद्यापाधिभ्रमतिः आत्मानं सृजतीत्यादि दुर्मतं निरस्तमित्याहिवोद्रव्यं। ह्रियत इत्यनेन दीपान्तरस्पर्धीपदचैकीभावः संहारः। ननु हिरण्यगर्भादिः सृष्ट्यादिविधिदेशात् तिकं यं हरेर्वस्तुत्वादिकमवधीयत इति
दं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते इति श्रुतेः। ननु हिरण्यगर्भादिः सृष्ट्यादिविधिदेशात्

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः। त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ६ ॥ ॥
तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः। निरूपितेऽयं त्रिविधा निर्मूला भातिरात्मनि ७ ॥ ॥

यं कोऽपि कुर्वन्नपि हरत्युपसंहरति। तस्मादिति। यस्मान्निखिलकाशप्रमाणवला हरिरेव सृष्ट्यादिकर्त्ता तस्मादन्यस्मादात्मनो हरेरन्यो भावः सृष्ट्यादिकर्त्ता न
निरूपितः कुत्रापि वेदस्य न्यायः। ननु पितेव ब्रह्मा देहहरेरपि सृष्ट्यादिकर्त्ताऽन्यः किं न स्यादित्यतो वा ह्यात इत्याहिति। यस्मात् ह्यात्मनैव स्वयं सृज्यते इत्यादिकं आमाणि
कं तस्मादात्मनः परमेश्वरस्य भावः सृष्ट्यादिकर्त्ता मुख्यात् हरेरन्यो नास्ति। सृष्टिस्थितिविष्णुसंहारोभावनं समुदाहृतं। तान्यः करोति पुरुषः सभावइति कीर्तित इति
वचनात्। भावशब्दस्य सृष्ट्यादिकर्त्ता मुख्यात् हरेरन्यो नास्ति। सृष्टिस्थितिश्च संहारो भावनं समुदाहृतं। तद्यः करोति पुरुषः सभाव इति कीर्तित इति वचनात्।
भावशब्दस्य सृष्ट्यादिकर्तृत्वशब्दवाच्यत्वं सिद्धं। अनेनोशंकायाः परिहारः आयात इति तथाह्या निरूपितेति। निरूपितानविद्भिः प्रमाणाभावतो हरेरिति वि
हृद्धिरिति विशेषणाद्दासुरमत एव तथा प्रतिभानमिति ज्ञायते ७ ॥

परमात्मनः सत्वादिगुणरहितत्वात्तस्य तः सृष्ट्यादिकं ननु कं गुणस्य गुणा वइत्याशंक्य तोऽस्त्वत इत्याशयेनाह। इदमिति। माययाहरेरिच्छया कृतमिदं त्रिविधं सृष्टिः स्थि
तिः संहार इति त्रिविधं त्रिविशिष्टमात्मनि जीवे गुणमयं सत्वादिगुणाधीनं विद्धि न परमात्मनि इति शेषः। गुणसंबंधयोग्यानां तत्पत्वाद्याः स्युस्तस्य तः। सर्वदा निर्गु
णस्यास्य सर्गाद्यास्युः कुतोऽन्यत इति। अतो विशेषः कल्प्यत इति। अनेन सत्वादिगुणेषु कारणत्वेन सिद्धेषु कथमन्यो भावोऽस्तीति समंजसं स्यादिति यथा शंकापरि
हृता। विद्धीति उपाधिपाधांगत्वादिदमेवाव धंपशेयमितिनिर्धारयति। माययेत्यनेन गुणानामचेतनत्वेन स्वतः प्रवृत्त्यनुपपत्तेः कार्येषु प्रवर्तकत्वेन हरेर्मुख्य

इदं गुणमयं विद्धि त्रिविधं मायया कृतं ८ एतद्विद्वान्मदुदितं ज्ञान विज्ञान नैपुणं। न निंदति न च स्तौति लोके चरति सूर्यवत् ९ प्रत्यक्षेणानुमाने
न निगमेनात्मसंविदा। आद्यंतवदसज्ज्ञात्वा निःसंगो विचरेदिह १० उद्धव उवाच नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः। अनात्मस्वदृशोरीश क
स्य स्यादुपलभ्यते ११

कारणत्वमवधृतं। परस्वभावेत्यादिशिक्षितज्ञानाफलमाह। एतद्विद्वानिति। मदुदितमेतद्विद्वान् सूर्यवदित्युक्तं दर्शितिके कथमित्यतो विवृणोति। प्रत्यक्षेणेति
प्रत्यक्षादिप्रमाणबलेनेदं गुणमयमाद्यंतवत्वादसमर्थमस्वतंत्रमिति ज्ञात्वा। असमर्थं च सत्वोक्तं समर्थमस्वकीर्तितमिति वचनात् असत्वं न शून्यत्वमज्ञानि
वेतं। इह जगति निःसंगो निर्लेपः। निगमेन वेदेनात्मसंविदा स्वानुभवेन। स्वप्रकाशत्वेन जडत्वेन देहपरमात्मनोः संसारासंभवं ज्ञानं न स्फुटं बोधविवेकार्थं लोकहृयात्तुः
पृच्छति नैवेति। निःसंग इत्यनेन प्रकृतः संगलक्षणः संसारः कस्यात्मनो हरेर्वा न देहस्य द्रष्टृदृश्ययोरुभयोरपि न संभवति अनात्मस्वदृशोरनात्मत्वाज्जडत्वात् दृश्यास्वं
स्वदृक्त्वात् स्वप्रकाशत्वात् दृष्टुरतः कस्येयं संसृतिरुपलभ्यते ११ ॥ ॥

परमात्मकोटावंतर्भूतत्वान्न पृथगुक्तः । कस्येति पुनरुक्तिरिवत्यपरिहार

देहस्थस्य इत्येपिमापि न युज्यत इत्याह । आत्मेति । अग्निवदीश्वरः दारुवद्देहः । जीवपक्षे आत्मनो जीवस्य यावद्देहेंद्रियप्राणैः संनिकर्षणं संबंधः तावत्संसारः । कस्येत्यपेत उक्तं । अविवेकिनः इति । नित्य
वकृत्यार्था । जीवस्यैव संसृतिरिति भावेनाह । यावदिति । फलवान्मोक्षहेतुत्वात् मिथ्या नंदादपार्थकः । जीवात्मनस्तु संसारः स्वप्नवत्तुच्छत्व
नंदाद्यार्थेपि अविवेकिन इति विशेषणाद्विवेकिनो मोक्षहेतुत्वात्फलवानपि निरर्थ एव संसार इति अवधारयति । अर्थेपीति । अविशब्दोल्पफलार्थ उच्यते तेनिः फलत्वेन यदल्पफलं भवेदिति वचना
तः इति वचनात् संसारस्याभावस्यैव फलरूपत्वान्निरर्थ एव संसार इति । तत्रेदं निमित्तं । ध्यायतो विषयानिति । कथमिव । अत्र स्वप्नदर्शिनो यथान
ता । अर्थेष्वविद्यमानेपि अक्षात्संसारात्प्रयोजनाभावेपि पुंसः संसृतिर्न निवर्तते । पावद्देहेंद्रियप्राणैरात्मनः सं

आत्माव्ययोगुणः शुद्धः स्वयंज्योतिरनावृतः । अग्निवद्दारुवदपि देहः कस्येति संसृतिः १२ श्रीभगवानुवाच
निकर्षणं । संसारः फलवांस्तावदपार्थोप्यविवेकिनः १३ अर्थेष्वविद्यमानेपि संसृतिर्न निवर्तते । ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा १४
यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थकृत् । स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १५ ॥ ॥

र्थागमः प्रयोजनविशेषस्य व्यवहारवासिर्भवति । अत्रापि निमित्तं ध्यायत इति । यथा स्वप्नार्थानामछित्त्वेपि निरंतरविषयानुस्मरणसंततसंस्कारसंतत्या
नर्थागमो न निवर्तते । एवं संसारोपि । अज्ञानिन एव संसारो नर्थकारी न ज्ञानिन इत्याह । यथाहीति । अप्रतिबुद्धस्य स्वप्ना बह्वाभासितस्य यथा प्रस्वापो बह्व
नर्थकृत् । स एव प्रबुद्धस्य प्रतिबुद्धस्य प्रमोहाय न कल्पते । एवं संसृतिरज्ञानिनामनर्थकृत् । सैव ज्ञानिनां मोहाय नैव विषयलोलुपत्वेन दुर्जनस्याफ
लः स ज्ञान एव सुरूपानंदापेक्षया फलो विमतज्ञानेन सुरूपानंदसाधनत्वेन सफलत्वादल्पफल इति ज्ञेयः संसार इत्यवधारणार्थं पुनर्वदनमिति भावः

जीवस्यापि संसारः अभिमानिक एव न स्वाभाविकः अन्यथा तन्निवृत्तिसाधनविधानानुपपत्तिरित्याशयेनाह । शोकेति । शोकादयो जन्ममृत्यु अहंका
रस्य सकाशाज्जीवस्य दृश्यंते । न स्वतः परमात्मनस्तु अभिमानात्सुतरामसंभवस्त्यर्थः । परमात्मन एव निषेधो न जीवस्येत्येतत्तत्र अहंकारस्य सकाशा
त् दृश्यंते नात्मनः स्वतः । अहंकारात्तु संसारोभवेज्जीवस्य न स्वतः । कृतश्चिदानंदतनोः स्वरूपेच्छाप्राप्तस्य सः इत्यनेन निरस्तं । कृपया सृष्टानां जीवस्यैव संसार
इति तत्राह । देहेति । देहेंद्रियप्राणमनसां संघाताभिमानोयस्य सतथा । सर्वेषामंतः स्थित्वा सर्वमादत्ते इत्यंतरात्मा । गुणैः कर्मभिश्चारुत्वा मूर्तिर्यस्य सतथा
सूत्रं महानित्याद्यधिकारनामभिः बहुधा पुराणेषु गीतश्च । कालतंत्रः कालाभिमानी दुर्गाधीनः जीवः पुरुषः हिरण्यगर्भोपि संसारश्चाधावति किमुतान्येव
जीवा इति कैमुत्यन्यायलक्षणया सुस्वाज्जीवस्यैव संसार इति निश्चीयते । संसार सुषुप्त्याद्याविसर्वजीवेश्वरेश्वरः । विष्णुधीनः सदा ज्ञानी किंतु तान्यल्पचेतना

शोकहर्षभयक्रोधलोभमोहस्पृहादयः । अहंकारस्य दृश्यंते जन्ममृत्युश्च नात्मनः १६ देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्ममू
र्तिः । सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः १७ अमूलमेतद्बहुरूपरूपं मनोवचः प्राणशरीरकर्म । ज्ञानासिनोपासनया
शितेन छित्त्वा मुनिर्गां विचरत्यतृष्णः १८ ॥ ॥

इति । अनेन जीवोपाधवच्छिन्नस्य परमात्मनः संसार इति मतं निरस्तमिति ज्ञातव्यं । न चैवं प्रबलस्य संसारस्य समनुच्छेदः कथं कार्यस्याहत्याह । अमूलमिति
सुनिर्मिरंतरानुस्मरणस्त्वर्थः सुतुषः एतत्संसारकारणमत्तानमहुपासनपाजातत्वात् निशितेन ज्ञानेन छित्वा पुनः नत्वा तल्लोनिःसंगो भूत्वा गां विचरति
याव च्छरीरनिपातमिति शेषः । यद ज्ञाने नोत्पन्नं तज्ज्ञाने न निवर्तते इति तत्कारणमाह । अमूलमिति । विस्तुकारकर्मशृंखलं बलवत्कारणेन जन्मस्य निहिति
कथमितिचोद्यमनेन परिहृतं । ज्ञानस्यापि तत्कारणकत्वात्तत्र ज्ञानस्य तत्कारणकत्वेकथितं युक्तं तदेव कथमित्यत उक्तं । बहुरूपेति । मनश्चाहि भूमनि
हितबहुरूपेण तेन रूप्यते तदहर्यात्सुगुणं निरूप्यते प्रेर्यत इति बहुरूपरूपं । मनोवचः प्राणशरीराणि कर्मविषयोपयस्य तत्तथा । अहं मंता वक्तेत्याधाका
रेणाजायमानमित्यर्थः

ज्ञानादिष्विकि मा कारो निश्चितः स्यादिनितद्विषयप्रकारमाह। ज्ञानमिति सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेरखंडं ब्रह्मैव विज्ञानमिहीत्यन्वयः। कथमस्य
जगतः। आद्यंतयोः केवलं ब्रह्मतं ब्रमेव वर्त्तते। यद्यकालः सर्गाद्युगत्वात्फलपाचकत्वाच्चयद्यहेतुर्निमित्तकारणं यच्च जगतो मध्येपि तदेव तत्वेन वर्त्तते ना

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैति ह्यमथानुमानं। आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये १९

न्यथा। यज्ञान्यतो विविक्तत्वाद्विवेकः यद्यनिरंतरं गमयतीति निगमः। यद्य सर्वैरालोच्यत्वात्तपः। तप आलोचन इति धातुः। प्रतिपत्ति अक्षे क्षिंद्रिये
प्रतिष्ठितत्वात्प्रत्यक्षं। आचार्यसंप्रदायसिद्धत्वादैतिह्यं। अथवेदादिप्रमाणसिद्धत्वादनुमीयमानत्वादनुमानं। अनेनाखिलत्रयेप्रत्यक्षादिप्रमाणगु
णं भवति १९

जगतश्चादिमध्यावसानेष्वस्य तस्य प्रतिहन्तत्वात्तत्वं सोदाहरणं स्पष्टयति यथेति। यथा हिरण्यं रथाद्यपरिष्कृतं प्रतिविवृतं पुरस्तात्तच्चितताद्यः पूर्वं
रथादेः पृथगिति शेषः। पश्चाच्च सर्वस्य हिरण्मयस्य द्रव्यस्य हिरण्यत्यागलक्षणे नाशानांतरं च पृथगेव मध्ये च पूर्णे खचितताद्शायां च तस्यैवहिरण्यस्य
रथादेः पृथगिति शेषः। व्यवहार्योयं तदेव हिरण्यं सा बाहिष्टथगेव तद्वत्तथा ब्रह्मतं च हमस्य जगतो प्यादावंते मध्ये सुवर्णादिनानाव्यपदेशे सुव
र्णांशं वद्वयादिनानापदेशेः व्यवहार्योयं तदेव हिरण्यं परिष्कारात्पूर्वं दानुमपाद्दथानत। सुवर्णं व्यवहारार्यमुत्व्येरथपरिष्कृतं मध्ये चांतरे थोप
हतपामितयामुच्यते यो व्यवहार्यः पृथगेव स्थितः। रथोपक्षेपरिष्कारात्पूर्वं दानुमपाद्दथानत। एवमुत्खेजगतः स्थानं तत्मात्मनः
स्थाननिष्कृष्य पृथगास्थितं। यद्देवं हरिः साक्षाद्वनगद्देहान्तरपृथक्कृस्थितः पूर्वं जगतिसंस्थस्थजगादंते पृथक्कृस्थितः।

यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् २० ॥

घ्रमरइति। तन्न्नियामकस्यैव नाम सर्वसुरादिकं। तत्सर्वं धातुदीप्तैतव्यवहृत्ये सुरादिषु इति च। एकलं केवलं चेति स्थानं तस्य मभिधीयते। ब्रह्मतं तत्क्ष
हरिसाक्षात्परिष्कृतो हिरण्यवदिति चेति सुरनराद्यं तत्सुः सुरनरादयपाधीनां नानात्वेप्यहमेकएव। यथा हिरण्यमकृतं पिंडीकृतं कुंडलाद्याकारेण
विविधं पुनरेकमेव तथाहमपि। यथा सुवर्णमकृतं क्रियतेकुंडलादिकं। पुनरेकीभवत्यद्यानद्वत्सृजतो विसर्गः। सुराद्यं तस्थितो भूत्वा पुनरेकीभवे
द्विश्रुतिवचनात्। किं च तदावर्धाल्प फलं सुवर्णमेव तन्निमित्तकारणं महाफलं तथा जगदल्पफलमस्यतत्वं च नाहं तथा किं तु ब्रह्मतं चामहाफलहेतुश्चे २० ॥
तिप्रत्येकं न तदावर्धा इस्मृतं तं विक्रियागतं। महाफलं तथा न्युर्णातु ब्रह्मतं तं विक्रियोपगं। तद्वद्ब्रह्मतं चैभगवान् पत्रत्वावन्यदन्यथेति वाच्यात्

भा॰ए॰

१४५

इतोपि मोक्षादिदातृत्वेन निरूपयति स्वातंत्र्यं ह्येकेष्याह। विज्ञानमिति। अंगं गणेत ब्रह्मविज्ञानं निर्दोषज्ञानस्वरूपं कुतस्त्रिपदस्थं त्रीनुत्तमाधममध्यमान
जीवान्त्रिषु पदेषु मोक्षादिस्थानेषु स्थापयतीति। मोक्षं संसारं तमश्च व्यपदेशादित्यर्थः। चेतनानामपि ज्ञानात्मत्वेन मोक्षदातृत्वे किं न स्यादित्याशंक्य तन्न
न्नारे ये दिक्षाधीनत्वेन प्रतीतिः तदेव विज्ञानं। विज्ञानमानंदं ब्रह्मेति श्रुतेरिति भावेनाह। गुणत्रयमिति। येनेति तृतीया षष्ठ्यर्थे। येन यस्य स्वरूपेण तुर्यस्य ज्ञानप्र
दायकज्ञातीतस्य विशुद्धज्ञानमूर्तेः समन्वयेनेक्षायाः सत्वेनानुयाइकलक्षणाभिमुख्येन गुणत्रयादिकं सर्वमस्तीति शेषः। व्यतिरेकतोऽसत्वेनास्थितं देवको
वलमित्युक्तं केवलं पदं सर्वत्रानुवर्तनीयं। तत्केवलमेव सत्यं सदास्थित्वेन स्वातंत्र्यमेव सत्यपदस्यानुवर्तनीयं विज्ञानं सत्यं त्रिपदस्थं सत्यमिति। गुणत्रयं सत्वा
दि। कारणं महदहंकारादुपादानं कार्यं देहादि कर्तृ कालकर्मादि निमित्तकारणं। स्वातंत्र्यमेव सत्यत्वं विश्वोरन्यस्य सत्यता। एवाहृतः सदास्थित्व प्रप

विज्ञानमेतत्त्रिपदस्थमंग गुणत्रयं कारणकार्यकर्तृ। समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यं ॥ २१
न यत्पुरस्तादुत यन्न पश्चान्मध्ये च यन्न व्यपदेशमात्रं। भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ॥ २२

कृत्योः सदास्थितेति वचनात्। ईश्वरेच्छासद्भावाभ्यां अस्तित्वनास्तित्वे इति तस्य स्वातंत्र्यमनुपहतमिति २१ ननु ब्रह्मव्यतिरिक्तस्य स्वातंत्र्यसंभवे कथं
तस्य स्वातंत्र्यमनुपहतमिति तत्राह। न यदिति। यदुत्पत्तेः पुरस्तात्केवलं नास्ति नाशात्पश्चात्तु स्वतंत्रं नास्ति मध्ये च स्थितिकाले च केवलं न। यत्परेणाश्रित
मुत्पन्नं यत्परेण प्रसिद्धं मन्त्रादिमत्तत्व्यपदेशमात्रं स्वतंत्रमिति वाचा चं अतस्तद्ब्रह्मैव सत्यं परमसत्यमिति। मे मनीषा। तत्स्वातंत्र्येणानेवास्ति यदुत्पत्तिवि
नाशवत्स्वातंत्र्येणास्थितात्तस्य यत्स्वातंत्र्यं तदानंदं सदेति। अनेन कालत्रयसत्वप्रतिषेधेन सदसद्विलक्षणं जगदिति निरस्तं तु असत्वेन प्रतीयेत सत्वेन बाध्ये
तेत्यन्यथानुपपत्तिप्रमाणसद्भावात्सदसद्विलक्षणापलापो न युज्यत इत्याशंक्य प्रपंचस्यासत्वोक्त्या स्वातंत्र्यमेव निषिध्यते। ननु प्रतीत्यन्यथानुपपत्त्या नि
र्वचनीयत्वं परमार्थसत्वाभावेन नाशोपपत्तेः २२ ॥ ॥

एम
१४५

नत्वसत्वेन प्रतीयेत सत्वेन बाध्येतेत्यन्यथानुपपत्तिप्रमाणसद्भावात्सदसद्विलक्षणापलापो न युज्यत इत्याशंक्य प्रपंचस्यासत्वोक्त्या स्वातंत्र्यमेव निषिध्य
मेन तु प्रतीत्यन्यथानुपपत्त्या निर्वचनीयत्वं परमार्थसत्वाभावेन नाशोपपत्तेः सत्वेन बाध्येतेत्यस्याप्यन्यथोपपन्नेरिति भावेनाह। अविद्यमान इति सदसद्वि
लक्षणमनुपपन्नं च जगदसदेवास्मादिति शून्यवादिमतं वानेन प्रत्याह अविद्यमान इत्यादिना। ब्रह्मणो द्वितीयो वैकारिकः विकारोऽस्मात् राजससर्गः रजो
गुणसंबंधी सर्गोऽयमप्रपंचस्य सतथा एष प्रपंचः अविद्यमानोऽपि अस्वतंत्रोऽप्यस्वतंत्रोऽपि अवभासते स्वतंत्र इति अज्ञानामिति शेषः। यतः स्वयंज्योतिर्ब्रह्म परमा
र्थसत्स्वतंत्रं विभाति विदुषामिति शेषः। इतोऽप्यविद्यमानमस्वातंत्र्यमेव न त्वन्यदिति भावेनाह। अतइति। ब्रह्म मूलप्रकृतिः श्रोत्रादींद्रियाणि अर्थाः शब्दा
यः। आत्मा जीवः विकारा इंद्रियाभिमानिदेवाः एवमादिभिश्चित्रं विचित्रं जगदतो ब्रह्मत एव विभाति यतो नानि बाध्येन शून्यमित्यर्थः। तस्य भासा स

अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः। ब्रह्म स्वयं ज्योतिरतो विभाति ब्रह्मेन्द्रियार्थात्मविकारचित्रं ॥ २३
एवं स्फुटं ब्रह्म विविच्य हेतुभिः परापवादेन विवेकबुध्या। छित्वात्मसंदेहमुपारमेत स्वानंदतुष्टोऽखिलकामुकेभ्यः ॥ २४

र्वमिदं विभातीति श्रुतेः। अविद्यमाननानात्मजगतः परतंत्रता। यथा शुक्तिस्फुटात्रादिरसन्निमुख्यतेजनैरिति। जगतो नास्तिता सैव या परधीनता सदा
अभावस्फूर्त्तस्वस्य स्थिताभातीह सर्वदेति प्रमाणद्वयेन कथित एवार्थः न स्वकपोलकल्पितः। एवं तावज्ज्ञातव्यांशं ज्ञात्वा मुनिना परं कर्तव्यं किमित्यत्राह।
एवमिति। एवमुक्तप्रकारेण विवेकप्रज्ञासर्वस्माद्विलक्षणप्रज्ञानेनानुगृहीतैर्हेतुभिः निर्दोषोपपत्तिभिः परापवादेन परस्यापवादेन नेदं नेदमिति नि
षेधमुखेन एष आत्मा नेति नेतीति श्रुतेः स्फुटं ब्रह्म विविच्य एव ज्ञात्वात्मसंदेहमनसि स्थितं संशयं छित्वाखिलकामुकेभ्यः तत्साजननशीलेभ्यो विष
येभ्य उपारमेत स्नानादिविषयोपरमे स्वरूपस्थित्याह। स्वानंदतुष्ट इति स्वानंदानुभवेनालं बुद्धिं प्राप्तः। अनेन जीवपरभेदज्ञानमेव मुक्तिसाधनं नाभेद
ज्ञानमतः श्रेयोऽर्थिभिर्भेदमतं सर्वथाश्रेयमिति दर्शितं २४ ॥ ॥

भा॰ए॰

१४६

परापवादश्च कार्यं विहरणोति। नात्मेति। अत्र नेति प्रत्येकं संबध्यते वपुः पार्थिवं वपुः शरीरं आत्मा परमात्मा न भवति। इंद्रियाणि न हि देवा इंद्रियाभिमानिनो न हि वायुर्जलं हुताशः वायुजलहुताशन कृतशरीरोसुः मुख्यप्राणः न वायुरेव सूर्यं प्राणः तत्रस्थो चोदतेजसी। उदकेन तेजसा चैव प्राणस्य हि कृतं वपुरित्यस्मात् प्राणस्य वायुरूपस्य सूत्रत्रय कृतं वपुः। यतो हि पार्थिवं नात्र खं चात्यल्पमुदाहृतमित्यस्मात् चोक्तं युक्तं मनश्चात्मा न अन्नमात्रं

नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः। मनोन्नमात्रं धिषणा च सत्वमहंकृतिः खं क्षितिरर्थसाम्यं २५

अन्नं पृथिवीमात्रं गंधादिमात्रा च न एकवद्भावविवक्षया द्रव्यत्वं धिषणा प्राकृत बुद्धिश्च न सत्वं स्थूलबुद्धिः अहं कृतिरहंकारतत्वं। खं महाकाशं न क्षितिर्दर्शनादिक्रिया च न अहं पश्यामि इत्यहं शृणोमि अहं स्पृशामि इति सर्वार्थेषु समानत्वात् अहंकारोभिमानविशेषोर्थसाम्यं चात्मा न भवतीत्यर्थः। न देहो नेंद्रियप्राणमनोबुद्ध्यहमादयः। विशुद्धश्चिदानंदतनुः सहित्री वाधिपः स्मरेतिवाक्यात्। सर्वाण्यात्मानेतितेतीतिश्रुत्यर्थ एव विविच्यते २५ ॥

राम

१४६

इंद्रियसमाधानविक्षेपयोः ईश्वरियाप्रियसाधनत्वेनोच्यमानत्वात्तयोरपि गुणदोषाभ्यां किं तत्राह। समाहितैरिति। गुणात्मभिः शब्दादिविषयमुखैः पुरुषस्य सुविषयत्वेन समाहितैरेकाग्रविरतत्वेन स्थापितैः करणैरिंद्रियैः मत्सुविविक्तधाम्नः तेभ्यो इंद्रियेभ्यो विषयेभ्यश्च पृथक् भूतस्वरूपस्य प्राकृतेंद्रियरहितस्य भगवतः को गुणो भवेत् न कोपि विषयेषु विक्षिप्यमाणैरितस्ततः आकृष्यमाणैरिंद्रियैरितैः किं दूषणं न किमपि दूषणं। अत्रोदाहरणमाह। घनैरिति। आगतैः घनैरुपेतैः सर्वाच्छादकगुणरूपस्य रवेः किं भवत् न किमपि प्रयोजनं विगतैः दोषोपि न भवेत् किं न न वेदेव। यथा खे गुणदोषाभावेपि आद्योपाधिघनरूपैरूपैः घनैरुपेतैः सर्वाच्छादकगुणरूपस्य रवेः किं भवत् न किमपि प्रयोजनं विगतैः दोषोपि न भवेत् किंन न वेदेति भावः। समाहितेपि जीवेन विक्षिप्तेवा न च आयया सुखं न भवेत् विगते स्थापेन दुःखं भवेत् तथा समीहितकरणैः समाधानकर्तुः सुखं विक्षिप्तैः दुःखं भवेदिति भावः।

समाहितैः कः करणैर्गुणात्मभिः गुणो भवेन्मत्सुविविक्तधाम्नः। विक्षिप्यमाणैरुत किंतु दूषणं घनैरुपेतैर्विगतै रवेः किं २५ यथा न भोवा घनलंघुभ्रगुणैर्गतागतैर्वात्र गुणोर्नभज्जते। तथाक्षरं सत्वरजस्तमोमयैरसंगतं संसृतिहेतुभिः परम् २६ ॥ ॥

चकचिता विशेषो विघ्नते विक्षोः तथापि तु समाहिते। प्रीतो भवति वै नित्यं सर्वधर्म कृतोपि वेत्येतदुक्तार्थे मानं। ननु हरेरपि सत्वादिगुणकार्ये शुद्धे हादिभूषि तस्य तत्कृतगुणदोषौ जीववत् किं न स्यातां मिथ्यार्थं कथं आकाशवदृष्टांत एवं नदोषवानित्याह। यथेति। यथा नभोवायुः आदीनां गुणैः स्पर्शादिभिर्न सज्जते न लि न विशेषवत् न भवति। वा शब्दश्चार्थः। अत्र नभसि गतागतैश्च देहादिभूत कार्यैः गुणैश्च सत्वादिगुणतत्कार्याणि मसार तपातदंतर्वर्त्तमानमक्षरं ब्रह्म संसृतिहेतुभिः सत्वादिगुणैस्तन्मयैः रागादिदोषैश्चासंगतमसंबद्धमेव अक्षरं हेतुः परामिति सत्वादिगुणेभ्यः गुणत्वेन विलक्षणं। अनेन निःसंगत्वेन मनः समाधानासमाधानाभ्यां हरेर्गुणदोषाभावे विषयसंगाज्जीवस्यैतौ स्यातामिति दर्शितं २६ ॥ ॥

भा. ए.

१४७

तर्हि मुमुक्षोः साक्षी न विधानं बध्यमिति न मन्तव्यं सर्वदोषाणां संगमूलत्वात्स एव मुमुक्षुणा पुरुषेण निर्मूलनीय इत्याह तथापीति द्वाभ्यां हरेर्गुणदोषप्रभा-
वेपि तावन्मायारचितेषु प्रकृतिनिमित्तेषु गुणेषु विषयेषु संगः परितो वर्जनीयः । कियंतं कालं वर्जनीयो न्यथा ज्ञाननिर्वाणं नैवेत्याशंक्य निःसंगेण विषया-
स्याद्धित्यतो वक्षिमाह । मद्भक्तीति दृढेन मद्भक्तियोगेन यावद्रजः जन्ममध्यतज्जनितं कषायेण कर्षणाल्लोभाय तेन गच्छतीति कषायं पापं च निरस्येत मुक्तिपर्यन्तमिति
शेषः । अयगमाविति आह । व्यतिरेके दोषमाह । यथेति यथा नृणाम् असाधु चिकित्सित आमयः सम्यक्चिकित्साभावात्पुनः पुनः प्ररोहन्नंकुरीकुर्वन्स-
न्तुदति एवमपक्वकषायकर्मविषयेषु संगो यस्य तत्सर्वसंगं मनः कुयोगिनं अपरिपक्वयोगं मुमुक्षुं पुरुषं विध्यति । तस्य स्मरणाव ध्यानविघ्नं क

तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् । मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायं ॥ २७ ॥ यथामयोऽसाधुचि-
कित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् । एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगं ॥ २८ ॥ कुयोगिनो ये विहितान्तराये-
र्मनुष्यभूतैस्त्रिदशोपसृष्टैः । ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं ॥ २९ ॥ ॥

रोति । पुनः पुनः विषयाभिलाषप्ररोहादिति भावः । नन्वेवं तर्ह्यपरिपक्वयोगावता मनादिकर्मफलान्तरायविहतानां योगापरिपाकेन भगवत्प्राप्तिरा-
पतितेति तत्राह । कुयोगिन इति । कुयोगिनोऽध्यानपरिपाकरहिताः त्रिदशोपसृष्टैः राधिदैवकैर्मनुष्यभूतैर्मनुष्यैर्वनिताभिराध्यात्मिकैर्भूतैराधिभौ-
तिकैरन्तरायैर्विहता हि यस्मात्तस्मात्ते अपक्वयोगिनः प्राक्पूर्वजन्मनि कृतध्याताभ्यासबलात्सत्वेन योगं ध्यानं युंजंति कुर्वंति । क्रियोमत्व स्तादेनतत्परित्या-
गेन मामयाक्रवंतीति शेषः । कर्मतन्त्रं साधनं नानुतिष्ठन्तीत्यन्वयः । अतो मद्योगाभ्यासो न व्यर्थो न मद्भजनमपि व्यर्थमिति भावः ॥ २९ ॥ ॥

राम

१४७

न च तत्कैश्चित्कर्मैव सर्वाभ्यासेनावशेषः क्रियते न योगोऽभ्यस्यते कैश्चित्सर्वाभ्यासेन योग एवाभ्यस्यते तेन कर्म क्रियत इत्यत्र वासनातिरिक्तप्रयोजकेनाभावं
स्यादिति चोद्यं परिहरति करोतीति । योग्ययोगिलक्षणे जंतुर्जीवः कर्म करोतीति प्रत्यक्षं तत्रासौ केनापि पुरुषेण चोदितः प्रेरित एव क्रियते कार्यते । आनि-
पाताच्छरीरपातपर्यंतं अनेन वासनातिरिक्तप्रयोजककर्त्रास्तीति अवगंतव्यं पूर्णानंदो हरिरेव एवमुक्त एव सा युक्त कर्म कारयति यद्देव आका-
शाज्ञानेदोनस्यात् इति श्रुतेः । ननु तर्हि विद्वदविदुषोः को विशेषः इत्यत आह । न तत्रेति । इदं सर्वं विद्वान् प्रकृतौ प्रकृतिविकृत महदादिविहितदे

करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् । न तत्र विद्वान्प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या ॥ ३० ॥
तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं । स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद ॥ ३१ ॥ ॥

च भूतनिर्मितदेहे स्थितोऽपि स्वसुखानुभूत्या भगवदनुग्रहाविर्भूतस्वरूपानुभवानंदेन विषयेभ्यो निवृत्ततृष्णः कर्माणि कुर्वन्नपि तत्र कर्मसु न स-
ज्जत इति शेषः । अधुना योगिनां संप्रज्ञातसमाध्यवस्थामाह । तिष्ठंतमिति । समर्हे देहे तिष्ठंतमासीनं व्रजंतं शयानं इत्यादिक्रियाः कुर्वत् शरीरं वेत्यात्म-
स्थमतिः परमात्मन्येव स्थितमतिः तिष्ठंतमासीनमित्यादिक्रियाकरमात्मानं देहं न वेद किं बहुना परतंत्रादृष्टेनात्मनोऽन्यत्किमपि न वे-
देत्यर्थः स्वभावं देहस्य जिघ्रादिलक्षणं ॥ ३१ ॥ ॥

यत्किञ्चित्प्रारब्धकर्मवशान्न इतितमिवपश्यतितथापिस्मृतंतत्तथानपश्यतीत्याह यदिस्मेति। यदिस्मरणाद्वामनसा इदं रूपं असदिन्द्रियार्थमसंग
लमिन्द्रियविषयं देहगेहादिजगत्कर्म्मनिबन्धनत्वात्पश्यतिमनीषी तथापिवस्तुतया सत्त्वेन न मन्यते। तत्कुतइत्यतउक्तं नानेति। तत्स्वप्नं
लमिन्द्रियविषयं देहगेहादिजगत्कर्म्मनिबन्धनत्वात् पश्यति मनीषी तथापि ... स्वप्नमिति। यथा स्वप्नदृष्टं प्रबुद्धः पश्यति तथा स्वप्नस्थानं आत्मि
नत्वंनानानुमानेनोत्पत्त्यादिमत्त्वविशिष्टानानुमानेन विरुद्धं हि। एतमर्थं निदर्शयति। स्वप्नमिति। यथा स्वप्नदृष्टं प्रबुद्धः स्वप्नं बाध्यं मन्यते। अपि तु स्वप्नमदसत्त्वे इति त्र्याख्यमेव
यं परतंत्रं स्वप्नं जायत्वेन न मन्यते। स्वप्नजागरत्वस्य नानानुमानविरुद्धत्वात् नहि स्वप्नं पश्यन् स्वप्नं बाध्यं मन्यते। अपि तु स्वप्नमदसत्त्वे इति

यदि स्म पश्यत्यसदिन्द्रियार्थं नानानुमानेन विरुद्धमन्यत्। न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानं ३२

जानाति। तथा विद्वानपि जगत्सत्यमेव स्वातंत्र्यमारोपिते पश्यतीति भावः। नानामानविरुद्धं हि स्वातंत्र्यं जगतः सदा स्वतंत्रो भगवान्विभुरेक एव
वनसंशयः इत्यनेन। सत्येव स्वप्नमखिलं वा मनाद्रूपमात्मनि। आयदेतादितिज्ञानं यन्नदेवभ्रमात्मकं। तद्रूपं जगदिदं सर्वं विद्यमानं न संशयः। स्वतंत्र
मेव दितिज्ञानं तज्ज्ञानं भ्रमात्मकं। इत्यनेन च। उत्थितो नैव जागत्वं कश्चित्स्वप्नस्य पश्यति। स्वातंत्र्यमेव जगतो ज्ञानवान्नैव पश्यतीत्यनेन च मिडद्वात्
स्वप्रदृष्टांतवलेन जगतो बाध्यत्वमुच्यते इत्येतदासुरमतमित्यवगम्यते ३२ ॥ ॥

ननु तथा नस्यातंत्र्यप्रतीतौ किं कारणमित्याशंक्या ज्ञानं कारणमित्याशयेनाह। पूर्वमिति। ज्ञानोदयात्पूर्वमात्मनि परमात्मनि अस्वतंत्रं गृहीतं परमात्मस्वरूप
विषयत्वेनाज्ञानमाश्रितं जीवेनेति शेषः। न केवलं तत्स्वरूपविषयमेवेत्यतउक्तं गुणकर्म्मचित्रमिति भगवतो गुणविषयत्वेन कर्मविषयत्वेन च चित्रं नाना
विधं। अज्ञानसद्भावे प्रमाणमाह। अविविक्तमिति। एतमहं न जानामीति विवेकशून्यं। न चैतदज्ञानं निवृत्तौ कापि प्रतिभातीति तत्राह। अंगेति अंगो त्यामंत्रणे
न नयेन कार्यमित्याह। पुनः पुनरित्तियाह ईक्षा स्वरूपस्य गुणानां कर्मणां चालोचनं लक्षणोपासनाजनितज्ञानेन तदज्ञानं निवर्तते। पुनः स्वदज्ञानं न गृह्य
ते। ज्ञानोदयानंतरं आत्मा परमात्मापि न विसृज्यः स्वरूपसुखाविष्कारादिलक्षणपरोक्षज्ञानेनापरोक्षीकृतो न परोक्षीभवति। तस्य जगतस्वातंत्र्य

पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग। निवर्त्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ३३ ॥ ॥
यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते। एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ३४ ॥ ॥

न प्रतीयत इत्यर्थः। अन्येऽज्ञाते पि वाज्ञाते न विशेषो हरेः क्वचित्। तेषामेव विशेषः स्यादज्ञानापगमे न त्विति वचनात् जीवस्यैव विशेषो न हरेर्विशेष इति
च ज्ञातव्ये ज्ञाना वित्तिति भावः। समसाज्ञात्का रोणाज्ञानं निवर्त्तते इत्युक्तं। तत्र ते न समकष्यन विशेषोनाह्नी मम र्थस्तो दाहरणमाह। यथेति। हि शब्दः
साक्षिसूचको यथा भानोः सूर्यस्य उदयो नृचक्षुषां तमो निहन्यात्तत्र तमः संविधत्ते किमप्यतिशयं नाधत्ते। एवमेव रागद्वेषादिसाधनसामग्र्या निपुणा सती
मे समीक्षा पुरुषस्य सर्वदाश्रीनारायणं शरणं गतस्य बुद्धेस्तमिस्रं हन्यात्। न तु मम कंचन विशेषं कुर्यात् ३४ ॥ ॥

भा॰ए॰

१५९

वद्धशास्त्रतपरमात्मस्वरूपस्थापितवस्तुरूपं कीदृशमित्यपेक्षायां तं बोध्यं परिहरति। एव इति एषोहं स्वयंज्योतिः स्वत एव पूर्णप्रकाशः। अजप
वाजः अतएवाप्रमेयः महती अनुभूतिर्ज्ञप्तिर्यस्य स महानुभूतिः सर्वज्ञ इत्यर्थः। सकलानुभूतिः पूर्णसुखानुभवः। एकः ज्ञानानंदादिगुणाभिन्नत्वात्
स्वगतभेदरहितः अद्वितीयः सर्वोत्तमः। अप्रमेयत्वाद्देहादिवाचामगोचरः। वाचामगोचरश्चेद्विषयज्ञानं कथमित्यपेक्षायां तत्राह। येनेति। वाग्वचना
वैदिकलौकिकसर्ववाग्व्यवहाराः येनेरिताः वर्तंत इत्यनेन भगवदनुगृहीतवाग्व्यवहारविषयत्वेन तज्ज्ञानमुदेतीति ज्ञातव्यं। ज्ञानानंदाद्यभिन्नत्वादेकः
सर्वोत्तमत्वतः। अद्वितीयो महाविष्णुः पूर्णत्वात्तु तु यः स्मृत इति वचनात्। एवं ज्ञानज्ञेयस्वरूपं निरूप्य मिथ्याज्ञानस्वरूपं तत्कारणं ज्ञानस्वरूपं च वि

एष स्वयंज्योतिरजोप्रमेयो महानुभूतिः सकलानुभूतिः। एकोद्वितीयो वचसां विरामो येनेरिता वाग्वचनाश्चरंति ३५ ॥ ॥
एतावानात्मसंमोहो यद्विकल्पस्तु केवले। आत्मामृते स्वमात्मानमचलं यन्न पश्यति ३६ ॥ ॥ ॥

विद्यां निरूपयति। एतावानिति। यद्विकल्पः प्रमाणविरुद्धं कल्पनं जीवस्वातंत्र्यपरमात्मस्वातंत्र्यं जीवमरणेशादिविषयो यः एतावानात्मसंमोहः
मनोभ्रमः। भ्रमत्वं बाधकज्ञाननिश्चयं तत्कथमत्राह। केवल इति। आत्मा जीवः केवले स्वतंत्रे अमृते नित्यमुक्ते परमात्मनि स्थितं तमदाधारतया स्थितं स्व
मात्मानं स्वस्वभावं करोप्यनपनोद्यात्मानं अचलं स्थिरं न पश्यति यद्यावत्तावद्भ्रमो न निवर्तत इत्यतः स्वस्वभावज्ञानं निमित्तं तन्निवृत्तौ निवर्तते इ
ति निश्चीयते। एतावानात्मसंमोहो यद्विरुद्धस्य कल्पनं। यत्परात्माश्रयाज्जीवत्रिष्ठ्य येन न पश्यतीति वचनात्। नाद्वैतज्ञानेन भेदभ्रमो निवर्तत इत्यर्थः

३६ ॥

राम

१५९

न्नतोपि प्रपंचविषये भ्रमः अद्वैतज्ञानेन निवर्तत इत्युपदेशो न विरुद्धः परिविदिश्वारस्य साधनं इति भावेनाह। यन्नामाकृतिभिरिति। नामाकृतिभिर्नामरूपैर्ग्राह्यं
ज्ञेयं पंचवर्णं पंचभूतात्मकं पंचभेदात्मना वर्णनीयं जगत्तत्स्वबाधितं अद्वैतज्ञानबाध्यं न भवति। जगद्बाधितमित्यपेयार्थो का हानिर्भवति। किं त्वर्थवादो यथार्थ
वादएव कुतः सुरयोजीवपरमात्मानं च द्वयं द्वित्वं संख्याविशिष्टं वदंति ज्ञात्वा परमानंदं लभंत इति भावः। अनेन जगत्ज्ञानबाध्यमिति वदंतोऽपंडिता अन्येतु प
डिता इत्युक्तं भवति। ये स्वस्वात्मकं विश्वं भ्रांतिसिद्धमपंडिताः। वदंति पंडितास्तद्वज्जगदाहुरबाधितं। यथा वा हृद्रूपेण सदा विश्लोरिकाद्वप्रोक्षितमिति वचनात्
पूर्वमंतरायहत योगारूढयोगिजन्मांतरेपि योगमभ्यस्यतीत्युक्तं। अधुना तस्मिन्जन्मन्येव प्राप्तयोगांतरायपरिहारं वक्तुमाह। योगिन इति। काल

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं। व्यर्थेनाप्यर्थवादोयं द्वये विंदति सूरयः ३७ योगिनोऽपक्वयोगस्य युंजतः कालउत्थितैः। उपसर्गै
विहन्येत तत्रायं विहितो विधिः ३८ योगधारणया काश्चिदासनैर्धारणान्वितैः। तपोमंत्रौषधैः काश्चिदुपसर्गान्विनिर्दहेत् ३९ काश्चिन्ममानुध्या
नेन नामसंकीर्तनादिभिः। योगेश्वरानुवृत्त्या वा हन्यादशुभदान्शनैः ४० केचिद्देहमिमं धीराः सुकल्पं वयसि स्थितं। विधाय विविधोपायैरथ युंजंति
सिद्धये ४१

योगाभ्यासविहितसमये। प्रभातादिलक्षणे योगं युंजतः उपसर्गैरुपद्रवैः विहन्यमानः। कोयमिति तमाह। योगधारणयेति। योगधारणया यमनि
यमादीनामावर्तनेन अनुध्यानेन तत्तदंतरायविहितपरिहारसमर्थहरिस्मरणेन नामसंकीर्तनादिभिरित्यनेनाधिकारिणः कालविशेषाश्च लक्षयति।
अशुभदान्विघ्नान्रसायनादिनानाविविधोपायैः शरीरस्य नाशाद्यंतरायपरिहारस्य सुशकत्वेन सिद्धसाधनं योगाभ्यासार्थं योगधारणादिविधानं तत्राह।
केचिदिति केचिद्विवेकिनः परोपकारार्थं सुकल्पं सिद्धिप्रसामर्थ्योपेतं वयसि स्थितं तारुण्यं च यस्योपेतं। अथ शरीरस्य विरस्थायित्वानंतरं योगसिद्ध
ये युंजंति मन इति शेषः ४१ ॥ ॥

तेनात्मनि वेकिलं कृतद्दति तत्राह। इहेति। तदायासः तस्य देहस्य पोषणायासः अपार्थकत्वमाह। अंतवत्त्वादिति। योगस्य शरीरलक्षणयोगत्वानावा
तेवामवि वेकिलं कृतद्दति तवाह इहेति। तदायासः तस्य देहस्य पोषणायासः अपार्थकत्वमाह। अंतवत्त्वादिति। योगमिति। नित्ययोगं भगवद्ध्यानलक्षणं रसायनं निषेवमानः सेवमानस्य पुंसः
न तदायासस्य तन्नाफलत्वात् बेपर्थं शरीररक्षणाया सम्येत्याशंक्याह। योगमिति। नित्ययोगं भगवद्ध्यानं। तं योगमुत्सृज्यान्यत्र रसायनादौ श्रद्धां न कुर्यात् इत्यन्वयः। मत्परः
इहिकायः कल्पतां समर्थत्वं मियात्। यो तित न हि समतिमान्योगमेव श्रद्दध्यात्। तं योग मुत्सृज्यान्यत्र रसायनादौ श्रद्धां न कुर्यात्। विवेकिनो मतिमद्भि र्योगएवाभ्यसनीय इति सिद्धं। अतउ
यनेन मतिमत्वं विहितं। अनेन योगस्यापि शरीररक्षणफलत्वात् रसायनादौ प्रवर्तमाना अविवेकिनो मतिमद्भिर्योगएवाभ्यसनीय इति सिद्धं।

नहि तत्कुशलादृत्यं तदायासो ह्यपार्थकः। अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ४२ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात्। तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः ४३ योगचर्यामिमां योगी विचरन्मदपाश्रयः। नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ४४ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे परमार्थनिर्णयो ष्टाविंशतितमोध्यायः उद्धव उवाच सुदुश्चरामिमां मन्ये योगचर्यामनात्मनः। यथांजसा पुमान्सिद्ध्येत्तन्मे ब्रूह्यंजसाच्युत १ ॥ ॥

एवं सुखं स्वरूपसुखमनुभवतीति स्वसुखानुभूरित्यनेन योगफलमुक्तं योगांतरायपरिहारमाचरन्नेव योगपारंगमिष्यतीति भावेनाह। योगचर्यामिति। अत्र सुखं स्वरूपसुखमनुभवतीति स्वसुखानुभूरित्यनेन योग
क्षमुक्तयोगांतरायपरिहारमाचरन्नेव योगपारंगमिष्यतीति भावेनाह। योगचर्यामिति। इत्थं एकादशे ऽष्टविंशः निर्विघ्नयोगाचरणसाधनं हरेर्भक्त्यनुकंपितत्वं कथितत्वज्ञान
सर्वविहिताशेषपुरुषार्थसाधनमित्युक्तं भवति इत्थं एकादशे ऽष्टविंशः निर्विघ्नयोगाचरणसाधनं हरेर्भक्त्यनुकंपितत्वं कथितत्वज्ञानं सर्वविहिताशेषपुरुषार्थसाधनमित्युक्तमेकोनत्रिंशे प्रश्नोत्तराभ्यां कृतं उद्धवस्य हरेर्भक्त्यतिशयलक्षणं भगवद्भक्तिप्रातिपदिकमयमस्मिन्नध्याये। आदौ उद्धवस्त्वयोगाचरणस्याशक्यत्वं मनसि
प्रश्नोत्तराभ्यां कृतं उद्धवस्य हरेर्भक्त्यतिशयलक्षणं भगवद्भक्तिप्रातिपदिकमयमस्मिन्नध्याये। आदौ उद्धवस्त्वयोगाचरणस्याशक्यत्वं मनसि निधायाह। सुदुश्चरामिति। अनात्मनो मनोजयरहितस्याधीरस्य यथा पुमान् यथा भवदुक्तोपायेनासिद्धोपि तु पार्थवा अनेवेत्यत योगसाध्यं
कृत्वा तत्सिद्ध्युपायं पृच्छति। सुदुश्चरामिति। अनात्मनो मनोजयरहितस्याधीरस्य यथा पुमान् यथाभवदुक्तोपायेनासिद्धोपि तु पार्थवाञ्छवेत्तथात योगसाध्यं तन्मे ब्रूहीत्यन्वयः १ ॥

तत्कथने को नर्थ इति तत्राह। प्रायस इति। मनोनिग्रहकर्षिताः विषीदंति विषण्णा भवंति। योगाचरणसाधनेरत्तो नेम नो विषीदंति अथो तस्मात्क्रः
परमहंसा एव भवत्कृत्ययोगाधिकारिणः इतिभावेनाह। अथेति। योगकर्मभिः योगात्मककर्मभिः। अतएव मानिनो तानिन स्वमायया हंकारा
यानविहतादृत्यर्थः ३। प्रकृतौ स्थित्वापि शक्त्यपिवृत्तत्वं त्वद्दासेषु नचित्रमिति विज्ञापयति। किंचित्रमिति। त्वमनन्यशरणेषु दासेषु आत्म इतिम
तोच्युत अशेषवंधो त्वद्येतच्चित्रं किं एतत्कुतश्चित्रमिति तत्राह। य इति। ईश्वराणां ब्रह्मादीनां श्रीमत्किरीटमणिसंघट्टितपादपीठः स्वयं यो गोकुलेषु
भुमिः पशुपालेषु सह आत्मत्वेनारोचयः प्रकाशितवान् तस्य तवदासेषु नचित्रं किमित्यन्वयः। भगवद्भक्तमाहात्म्यं तन्माहात्म्याविष्कृतमुक्तं तत्र वि

प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः। विषीदंत्यसमाधानान्मनोनिग्रहकर्षिताः २ अथात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन। सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्मायया मी विहता न मानिनः ३ किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं। योरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटमणिघट्टितपादपीठः ४ तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु को वा भजेत्किमपि विस्मृतये नु भूत्यैः किं वा न वेद तव पादरजो जुषां नः ५ ॥ ॥

शरद्य स्वसारासारज्ञतामाह। तंत्वेति। यो ब्रह्मादिशिरः श्रीमत्किरीटघट्टितपादपीठः तं त्वां सुकृतवित्सुष्ठु कृतोपकारज्ञः सारज्ञः कः विसृजेत कीदृशं त्वां। अखिलानामात्मनां जीवानां दयितं प्रेष्ठमीश्वरमाश्रितानां सर्वार्थदं अभीष्टं शेषपुरुषार्थप्रदं। किं च
कोवापुरुषः किमप्यद्भुतं दैवं भजेत् यद्दितज्जेत्स्वर्ह्यतोविस्मृतश्चित्तं रक्षिरसाः। चित्तं ष्टभिरुपपादयति। किंवेति। तवाभिरोमौलिमालापितपा
दरजो स्मृतो भोनवेद किंवा नेव वेदेत्यतो सोपसुरेवेत्यर्थः ५ ॥ ॥

एवमनिमित्तबंधुत्वेन सर्वस्याप्युपकारकस्य भवतः प्रत्युपकारं कर्तुं कवयोपि न समर्था इत्याह । नैवेति । न तु ऋद्धत्वेन सदा स्मरंतः कवयो ब्रह्मायुषापि
न वापचितिं प्रत्युपकारं नैवोपयांति । क्रियमाणः उपकारः कीदृश इति तं प्रकारमाह । य इति । ननु भूतानामंतर्बहिः स्थित्वा अशुभं विधुन्वन्न स्वमाचार्यच
चैत्यः चित्तस्थश्च आचार्यचैत्यः तद्रूपात्मा स्वात्मनोर्यामिवपुषा स्वयोग्यं ज्ञानं व्यनक्ति व्यक्तीकरोषि । आचार्यस्य चित्तस्थस्य वपुषा वा । तदुद्धवेन पृष्टो भग
वान् किमकरोदिति परीक्षितो माननं संचोद्य परिहरति श्रीशुक इत्याह । इतीति । जगत्क्रीडनकं क्रीडासाधनं यस्य स तथा । जगत्क्रीडनकः स्वशक्तिभिरित्ये

नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः । योंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ७
श्रीशुक उवाच इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः । गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः
८ श्रीभगवानुवाच हंत ते कथयिष्यामि मम धर्मान्सुमंगलान् । यान्श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्जयं ९ कुर्यात्सर्वाणि कर्माणि म
दर्थं शनकैः स्मरन् । मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः १० देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् । देवासुरमनुष्येषु मद्भक्ता
चरितानि च ११

र्कं वा पदं । गृहीतं मूर्तित्रयं आत्मांतरात्मा परमात्मा इति संज्ञानां त्रयं येन स तथा । जाग्रत्स्वप्नसुषुप्तिप्रेरकत्वेन तत्स्थत्वेपि जाग्रदाद्यवस्थाक्लेशपरि
हारसमर्थः । तत्प्रत ईश्वरेश्वरः इति । आत्मांतरात्मा परमात्मेति मूर्तित्रयं हरेः । जाग्रत्स्वप्नसुषुप्तीनां दृष्ट्यादेश्च प्रवर्तकमित्यत्र प्रमाणं । मृत्युं जननम
रणात्मकं संसारं जयति । मद्धर्मेषु मदात्मसु मद्रूपेषु वा मनो रतिर्यस्य स तथा । मद्भक्तानामाचरितानि ११ ॥ ॥

पृथक्स्वपर्वसत्रेण वा बंधुभिः सह वा मम यात्रा महोत्सवं अयनादिलक्षणं कुर्यात् । आत्मनि हृदि आत्मानं अंतर्यामिणं । यथा शरीरस्थं खमाकाशं निर्ले
पं तथा । इति एवं पूर्वोक्तगुणविशिष्टत्वेन सर्वभूतानि अविशेषस्थितानि इति भावना मद्भावः तेन मन्यमानं सर्वभूतेष्वस्ति विस्फुरति मद्भावेन सर्वाणि भूतानि ममालय
त्वेन मन्यमानः इति वा योजनाभेदः । केवलमप्राकृतं ज्ञानमेवाश्रयत । केवलज्ञानप्रकारं दर्शयति । ब्राह्मण इति । ब्राह्मणादिषु सर्वत्रावस्थितं ब्रह्म सममेक
प्रकारं पश्यन्समदृक् मतः समानामिति शेषः । एवं भावनाफलमाह । नरेष्विति । नरेषु मामभीक्ष्णं भावयतः पुंसो मद्भावः मयि भक्तिः स्यात् वा स्यादेव यो मत्समतो

पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवं । कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः १२ मामेव सर्वभूतेषु बहिरंतरवस्थितं । ईक्षेतात्मनि
वात्मानं यथा खममलाशयः १३ इति सर्वाणि भूतानि मद्भावेन महाद्युते । सभाजयन्मन्यमानो ज्ञानं केवलमाश्रयन् १४ ब्राह्मणे पुल्कसे
स्तेने ब्रह्मण्येर्के स्फुलिंगके । अक्रूरे क्रूरके चैव समदृक्पंडितो मतः १५ नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोचिरात् । स्पर्द्धासूयातिरस्काराः साहं
कारा वियन्ति हि १६ विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीं । प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरं १७ ॥ ॥

भावो मुक्तिलक्षणा शक्तिश्च स्यादेव । अर्चने सर्वभूतानामित्येतद्धृतात्मनेति व नात्र सर्वभूतार्चनायां विशेषो ज्ञातव्यः । भगवद्बोधकशक्तिलक्षणप्रतिबंधके
सन्निकर्षे मुक्तिः स्यादित्याह । मायेति । साहंकाराः अहंकारसहकारिणी मायापि तिरस्कारं याति । हिंसाद्वेन भक्त्या प्रसन्नो भगवान् दद्यान्मुक्तिमथाक्षरमिति
तिरस्करयति । भक्तिमता एवं भाव्यमित्याह । विसृज्येति । भक्तः स्वयं दैहिकीं आत्मस्थां मानसिद्धितां दृशं व्रीडां दृश्यमानां लज्जां विसृज्य आश्वचंडालगोखरं
दंडवद्भूमौ प्रणमेदित्यन्वयः । ब्राह्मणादीन्वर्तिष्णुमोदंडवत्प्रणमेत् । अस्यां श्वचंडालादीश्च प्रतिमानसमिति भेदः । अत्रापि तत्पर्यायेण स्मरणं प्रणमतीति शेषः १७

एतदुपासनावधिमाह। यावदिति। यावत्सर्वेषु भूतेषु विष्णुरस्तीति मद्भावो मद्विषयं ज्ञानं नोपजायते तावदेवं वाङ्मनःकायवृत्तिभिरेवमुपासीतेत्यन्वयः। एवमुपासीनस्य परोक्षज्ञानिनो भवति प्रकारमाह। सर्वमिति। तस्योपासकस्य सर्वं जगत् ब्रह्मात्मकं ब्रह्मणा तत्स्वीकृतमधीनत्वेन व्याप्तमिति मननं इदं सर्वं एवमुपासीनस्य परोक्षज्ञानिनो भवति प्रकारमाह। सर्वमिति। तस्योपासकस्य सर्वं जगत् ब्रह्मात्मकं ब्रह्मणा तत्स्वीकृतमधीनत्वेन व्याप्तमिति मननं इदं इति
तिजनकमित्यर्थः। ब्रह्मणात्मिदं सर्वं यत्किंचित्स चराचरं। इतिपश्यतो योविद्वान्स हि ब्रह्मात्म विन्मतः। इति विशिष्टवचनात्तवसेवनमुच्यत इति सिद्धं
फलमाह। विद्ययेति। विद्यया ज्ञानेनात्ममनीषया स्वरूपश्रुत बुद्ध्याचाप्यनुतं परमात्मानं ब्रह्मात्मादेः परमन्यं परिपश्यंतीत्यन्वयः। वशब्देनान्यमीश्वमितिफलमाह।
तिं प्रमाणयति। अन्येनापि युक्तिः स्यात्किमनेनेति तत्राह। अयं हीति। सर्वकल्यानां सर्वमोक्षोपायानां मध्ये अयमुपायो हि सध्रीचीनो मत इति मम सिद्धांत

यावत्सर्वेषु भूतेषु मद्भावो नोपजायते। तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः १८ सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया। परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः
परमात्मानमच्युत १९ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम। मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः २० नह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि
मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः २१ यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत्। तदायासो निरर्थः स्याद्भयादेरिव सत्तम २२ ॥

इत्यनेनास्य मूलत्वेनान्योक्तानामाभासत्वं सूचयति। अयमिति कदृष्ट्यत्वं उक्तं। मद्भाव इति। अंगोद्धवास्य धर्मस्योपक्रमे कृते पितन्नाशस्य ध्वंसो नाशो न भवति। अस्य धर्मस्य कर्तृ अणु ईषदपि। अणुमात्रोपि भूभरिक्षा यासलक्षणो नास्ति कुतः। अनाशिषः निष्कामस्य मद्धर्मस्य निर्गुणत्वात्। मुक्तिसाधनत्वान्
यासमप्यवसितं निश्चितमतो नान्यधर्मसमो मद्धर्म इत्यर्थः। अस्यैवोत्तमत्वमुपपादयति। यो य इति। अन्यदेव मोहेऽर्शनक्रियमाणो यो यो धर्मो निष्फलाय
चेन्नादिलक्षणः कल्प्यते पुंभिरितिशेषः। सनेतवनिष्फलायकल्प्यते। एतदेवाह। तदायासः इति तदा यासः इत्रक्रियमाणः प्रयत्नो निरर्थः स्यात्। कथ
मिव। भयादेरिव तुर्नयरूपाधर्मस्येव। भयादि दुर्नयः प्रोक्तोयत्र यं सोति सर्वदेहे मिथ्यावचनात २२ ॥ ॥

बुद्धिमतां निश्चयज्ञानवतां बुद्धिर्निश्चयात्मिके यमनीषिणां मननमात्रशालिनां मनीषा मननमात्रसारं चेदमेवैतत्-अनृतेन नश्वरेणेन्द्रियेणैव अस्य बालवताज्ञ
तएव मर्त्येन शरीरादिव्यजगताकृतेशब्दस्य दैकप्रकारं सत्यं ब्रह्म मा प्राप्नोतीति यत्तस्मात्। एकदा ज्ञानरूपेणायं नतिष्ठतीति सर्वदा। चपलत्वात्सत्यमपि स्वरूपतं ज्ञ
उच्यत इति सर्वदैकप्रकारत्वात्सत्यं ब्रह्मस्वदोच्यत इति चाक्षुषेन सत्यानृतशब्दयोरुक्त एवार्थ इति। सुगमोपोगोवत्क्र्यव्य इतित्वया पृष्टेन मयायोगउक्तः
इत्युपसंहरति। एष इति ब्रह्मवादः संसारमोचकं ब्रह्मज्ञानमेव त्वा शपेनाह। अभीक्ष्णश इति। सुविविक्तं तव प्रश्नमेव धार्यमपोक्तं सनातनं ब्रह्मगुह्यं

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां। यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं २३ एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः। समासव्या
सविधिना देवानामपि दुर्गमः २४ अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत्। एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः २५ सुविविक्तं तव प्रश्नं म
योक्तमपिधारयेत्। सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति २६ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं। तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्म
ना २७ य एतत्समधीयीत पवित्रं परमं शुचि। स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् २८ य एतच्छ्रद्धया नित्यमव्यग्रः शृणुयान्नरः। मयि भक्तिं परां
कुर्वन्कर्मभिर्न स बध्यते २९ अप्युद्धव त्वया ब्रह्म सखे समवधारितं। अपि ते विगतो मोहः शोकश्चासौ मनोभवः ३० ॥ ॥

वेदरहस्यं परिहारमपिधारयश्च पुरुषः परं ब्रह्म जानाति ज्ञात्वा प्राप्नोतिचेत्यन्वयः। प्रवचनगमनफलमाह। य एतदिति। सुपुष्कलं यावदपेक्षितं तावत
ज्ञानं ब्रह्मैव दायः पितृधनं यस्य स ब्रह्मदायः तस्य य द्वा ब्रह्मसंदश्यायोग्यर्थागमोयस्य सतथा। तस्य आत्मनाप्रसन्नेन मनसा आत्मानं मद्विषयं ज्ञानं दत्वा म
त्स्वरूपं ददामि। अध्येतुः फलमाह। य इति। मां दर्शयन् श्रोतुः फलमाह। य इति २९ अज्ञातां शंसम्प्रच्छकं ज्ञात्वा तानेऽवधृतिं पृच्छति। अपीति। सम
वधारितमपि किं मोहश्चविगतोप्यसौ मनोभवः मनः शल्यत्वेन जातः शोकश्चनष्टः किं ३० ॥ ॥

एतस्य ज्ञानस्योपदेष्टुः महाफलसंभवे पियोग्यायेवोपदेष्टव्यं नायोग्यायेत्याह॥ नैतदिति॥ शूद्राणां योषितां च यदि भक्तिः स्यात्तर्हि ताभ्यो विदूर्यादि
एतस्य ज्ञानस्योपदेष्टुः महाफलसंभवे पियोग्याये वोपदेष्टव्यं नायोग्याये त्याह॥ नैतद्विति॥ तर्हि लोका एतत्किंमिति विविदिषंतीति तत्राह॥ यावानिति॥ नृणां यावाञ्ज्ञातव्योऽर्थः स भवेत तावां
त्वच्यः॥ इहैव मुक्तिसाधनं नान्यदित्याशयेनाह॥ वेति द्विता तर्हि लोका एतत्किमिति विविदिषंतीति तत्राह॥ यावानिति॥ नत्वेवं द्विविधाभावेन कदाप्यनुष्ठेयो मुक्तेस्त्वाह॥ मर्त्य इति॥ अयं
चतुर्विधो मोह इत्येतदुपलक्षणं पंचपर्वा विद्यापतिरुद्धत्वान्न ज्ञातुमिष्टं नीत्यर्थः॥ न चैवं द्विविधाभावेन कदाप्यनुष्ठेयो मुक्तेरत्राह॥ मर्त्य इति॥ अहं तदधीनमेव
मोक्षं प्राप्नोतीति मोक्षोपायं प्रति मे मया विचिकीर्षितो भवेत् यदा मदुद्देशेन मर्त्यः समस्तकर्मा हरिरेव मयि विश्वित्वा सर्वं कर्म करोति॥ अहं तदधीन मेव

नैतत्त्वया दांभिकाय नास्तिकाय शठाय च। अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां ३१ एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च। साधवे शुच
ये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां ३२ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते। पीत्वा पीयूषममृतं पातव्यं नावशिष्यते॥३३॥ ज्ञाने कर्मणि
योगे च वार्तायां दंडधारणे। यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः ३४ मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे। त
दामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ३५ श्रीशुक उवाच स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य। बद्धांज
लिः प्रीत्युपरुद्धकंठो न किंचिदूचेऽश्रुपरिप्लुताक्षः ३६ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः। कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा
स्पृशंस्तच्चरणारविंदं ३७ उद्धव उवाच विद्रावितो मोहमहांधकारो य आश्रितो मे तव सन्निधानात्। विभावसोः किं नु समीपगस्य शीतं
तमो भीः प्रभवंत्यजाद्य ३८

कर्म करोमि न स्वतंत्र इति हरावेव निवेशितात्मा च भवति। तदामृतत्वं प्रतिपद्यमानः आत्मयोग्यो भवन्सोऽमयात्मभूयाय निर्दुःखानंदानुभवरूपमो
क्षायैव कल्पत इत्यन्वयः॥ यमेवैष वृणुते तेन लभ्य इति श्रुतेः॥ उद्धवस्य भक्त्या तिशयलक्षणमाह॥ स एवमिति॥ अश्रुद्धवस्य पत्युक्तं परिहरति॥ वि
द्रावित इति॥ योंऽधकारो मे मनआश्रितः स एव तव सन्निधानान्मोहांधकारामगमः कथमत्राह॥ विभावसोरिति॥ हे अजाद्य तमस्त्याभिप्रभवति किंतु नैव

३८ ॥

हरेः स्वात्मन्यनुकंपाति शयं हेतुं करोतिप्रवर्द्धितेति हि शक्नो देवो॥ अनुकंपितामपि प्रवर्द्धितेति मन्येविज्ञानमयः प्रदीपोदत्तो हि यस्मात्तस्मादिति शेषः॥
अतः सर्वस्मादुपकारकत्वाद्भवतो न विधेयत्वं इति भावेनाह हित्वेति कीदृशो मोहांधकारो यो मे ज्ञानामिना छिन्न इति तत्राह॥ वृक्ण इति मोहदृष्टिविदृढ
ख्यात्मनः सर्वस्मादुपकारकत्वाद्भवतोऽत्र निषेव्य इति भावेनाह हित्वेति कीदृशो मोहांधकारो यो मे ज्ञानामिना छिन्न इति तत्राह। वृक्ण इत्येतद्विदृढ
येत्यया प्रसारितोवि स्मारितः स एष स्वमायया एनं संसारयामीत्युद्धत निजेयत्प्रादुर्भूतात्मविबोधास्यहेत्या वृक्ण इत्यन्वयः॥ स्वात्मनो ज्ञानदेवा

प्रत्यर्पितो मे भवतानुकंपिता भृत्याय विज्ञानमयः प्रदीपः। हित्वा कृतज्ञस्तव पादमूलं कोऽन्यं समीयाच्छरणं त्वदीयं ३९ वृक्णश्च मे सुदृढः स्नेहपा
शो दाशार्हवृष्ण्यंधकसात्वतेषु। प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ४० नमोऽस्तु ते महायोगिन्प्रपन्नमनुशाधि मां।
यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी ४१ श्रीभगवानुवाच गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं। तत्र मत्पादतीर्थोदे स्नानोपस्प
र्शनैः शुचिः ४२ ईक्षयालकनंदाया विधूताशेषकल्मषः। वसानो वल्कलान्यंग वन्यभुक्सुखनिःस्पृहः ४३ तितिक्षुर्द्वंद्वमात्राणां सुशी
लः संयतेंद्रियः। शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ४४ मत्तोऽनुशिक्षितं यत्ते विविक्तमनुभावयन्। मय्यावेशितवाक्चित्तो मद्ध
र्मनिरतो भव ४५ अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं ४६ श्रीशुक उवाच स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य
पादयोः। शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोऽप्यपक्रमे। सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः। कृच्छ्रं ययौ
मूर्द्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः। ततस्तमंतर्हृदि सन्निवेश्य गतो महाभागवतो विशालां। यथोपदिष्टां जगदेकबंधुना तपः स
मास्थाय हरेरगाद्गतिं ४७

शिष्यत्वेन प्रकटयन्नाह॥ नमइति॥ इति भक्तिं प्रेंवानुशाधी त्युक्तं विवृणोति॥ गच्छेति॥ ईक्षया ज्ञानेन मत्पादतीर्थोदेति॥ मिश्रितत्वेन प्रक्षिप्ताशेषपापविधू
तस्य किमुत काया अलकनंदाया जलस्नानोपस्पर्शनैः शुद्धः तिस्रः गतीः जाग्रत्स्वप्नसुषुप्तिलक्षणाः॥ हरिमेधसा विष्णुना आत्मनो हरित्वमेधतीति वा
हरिमेधा स्मरतत्क्रमरहस्युक्तेश्चातिप्रायं विवृणोति॥ सुदुस्त्यजेति॥ विशालां बदरीम् ४८ ॥ ॥

भा·ए·

न केवलमेतत्ज्ञानप्रदं वस्येव फलप्रदं निवृत्तिमायानामितरेषामपीत्याह। यदेतदिति। आसेव्य भगवतो मत्का नुकंपितं विमृश्यमानउत्तम केवलमेतत्ज्ञानप्रदं... अहं तमाद्यं सर्वज्ञं प्रभुं पर्षभं पुरुषोत्तमं नतोस्मीत्यन्वयः। यो
रग्रंथान्नुवत्तंनार्थभरावत्प्रसादमात्रेण कामा योभगवंतं नमति। भवभयमिति। अहं तमाद्यं सर्वज्ञं प्रभुं पर्षभं पुरुषोत्तमं नतोस्मीत्यन्वयः। यो
कीदृशं ज्ञानविज्ञानयोरवसारं वरं वरणीयं सारभूतं यस्मिंस्तत्र था। निगमकृदुपद
भवभयहंतुं उपजह्रे पिर्तं निजपणो मृतं भृत्यवर्गान्पायपन्नाह्ने। कीदृशं ज्ञानविज्ञानयोरवसारं वरं वरणीयं सारभूतं यस्मिंस्तत्र था। निगमकृदुपद

१५४

यदेतदानंदसमुद्रसंभृतज्ञानामृतंभागवतायभाषितं। कृष्णेनयोगेश्वरसेवितांघ्रिणासछ्रद्धयासेव्यजगद्विमुच्यते ४९
श्रीशुकउवाच भवभयमपहंतुंज्ञानविज्ञानसारंनिगमकृदुपजह्रेभृंगवद्वेदसारं। अमृतमुदधितश्चापाययद्भृत्यवर्गा
न्पुरुषमृषभमाद्यंकृष्णसंज्ञंनतोस्मि ५० इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेउद्धवबदरीप्रवेशो
नामएकोनत्रिंशोध्यायः ॥

भवेदलक्षणंकृष्णदेकदेशसिद्धं। अनेन वेदानामनंतत्वेपितत्त्वयोगपानुसारेणोदितमितिज्ञापते। अतएववेद्यसारं वेद्येषु ज्ञातव्येषु सारं श्रेष्ठं।
ननुवेदैकसिद्धंचेत्तत्साधितसाम्यप्रभावात्तेनेदमुपादेयमितितत्राह। उदधिकल्पमिति। योगपताविशेषादधिकारिणां श्रवणेनसमुद्रसमा
नं भृंगवत्तथाभृंगोभृंगीमधुपापयतितथेति ५० इतिएकादशस्कंधटीकायांएकोनत्रिंशोध्यायः ॥ ॥

एका
१५४

भगवतोमायालक्षणमाहात्म्यंप्रकटयितुंयादवानांमिथोवधविमित्तानिधनंसकृष्णचेतोनुरागजननायतनुर्यज्ञत्वादिनिजरूपलक्षणदर्शनं दुर्जनमनो
मोहनायजराख्यव्याधशरविद्धपादत्वं तन्स्वर्गदानमित्येतत्सर्वमस्मिंस्त्रिंशाध्यायेवक्ति। तत्रादौपरीक्षितःप्रश्नप्रकारंभगवद्वाक्येनयादवानांद्वारकायाः निर्गत्यप्र
भासप्रयाणंतीर्थस्नानपूर्वकंविप्रादिपूजनंचवक्ति। ततोमहाभागवतइत्यादिना। अत्यन्नत। अतिरत्रातिशयेवर्तते। अतिस्वादधिका योक्तोप्रशंसायाम
तिक्रमइतियादवः। अत्रद्वारकाइतिवातोर्ध्वलोकान्स्वर्गलोकंप्रत्यहरत। अथाकृतरूपेचदिव्यंत्यक्रमपायोपं। स्वात्मैकत्वेनसतोश्रवणमनोगोचरत्वात्सा
रूप्यादिमुक्तिदत्वाद्धेतिभावेनाह। प्रत्याक्रष्टुमिति। अबलायत्र पत्निन्यूरेरंगेमग्नंनयनंप्रत्याक्रष्टुं ततश्चानेतुंनशेकुः। सतोकर्णाविष्टमात्मलग्नमनोमंदि

राजोवाच ततोमहाभागवतेउद्धवेनिर्गतेवनं। द्वारवत्यांकिमकरोद्भगवान्भूतभावनः १ ब्रह्मशापोपसंसृष्टेस्वकुलेयादवर्षभः।
प्रेयसींसर्वनेत्राणांतनुंसकथमत्यजत् २ प्रत्याक्रष्टुंनयनमबलायत्रलग्नंनशेकुःकर्णाविष्टंनसरतिततोयत्सतामात्मलग्नं। यच्छ्रीवा
चांजनयतिरतिंकिंनुमानंकवीनांदृष्ट्वाजिष्णोर्युधिरथगतंयच्चतत्साम्यमीयुः ३ ॥ ॥

रंयद्यशःकंसहंतृत्वादिलक्षणंनसरतिकर्णाद्देर्नापसरतिततोयत्सतामितिकेचित्पठंति। यद्रूपंचयच्छ्रीवाक्येयस्यश्रीमद्वाक्यंमनःकर्णायोरतिंनिर्दुःख
सुखंजनयतिकरोतिवा। श्रीवाचामितिपाठेलक्ष्म्यावचसांरतिंजनयतिश्रोतॄणामितिशेषः। यच्चकिंतत्तीयोतिशययदतिसूत्रात्सुखरूपंकवीनांनुमानम
नुमानंमानानुसारि। इदंसर्वमस्मितुकार्थमानेभवतिकोनुमानइतिपाठे। देहःकः सुखात्मकःकवीनांमानानुसारीत्यर्थः। यच्चयुधिभारताख्येजिष्णोर्जयस्वेत्
रर्जुनस्यरथगतंदृष्ट्वा। तत्साम्यंतस्यस्वरूपस्य। निर्दिष्टत्वादिलक्षणंसाम्यमीयुरायुधीभारस्यइतिशेषः। इत्यतएतादृशंरूपंकथमाहरदित्यन्वयः ३

राज्ञा पृष्टः शुको ऽह। दिवीति द्वारवत्यां दृश्यंते। कदंबरसधारा नुमेदिरा निर्मितं मधु। मैरेयमिति संज्ञोक्तं यत्पानात् भ्रश्यते मनः इति। दिष्टेन दैवसंतेन स्वाबत्ता

शुक उवाच ॥ दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान्। दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ४ श्रीभगवानुवाच ॥ एते घोरा महो
त्पाता द्वारवत्यां यमकेतवः। मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ५ स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः। वयं प्रभासं यास्यामो यत्र प्रत्यक्
सरस्वती ६ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः। देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ७ ब्राह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं।
गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८ विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं। देवद्विजगवां पूजा भूतेषु परमो भवः ९ इति सर्वे समाकर्ण्य
यदुवृद्धा मधुद्विषः। तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः १० तस्मिन्भगवतादिष्टं यदुदेवेन यादवाः। चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं ११
ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु। दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः १२ महापानाभिमत्तानां वीराणां दृप्तचेतसां। कृष्णमायाविमूढा
नां संघर्षः सुमहानभूत् १३ युयुधुः क्रोधसंरब्धा वेलायामाततायिनः। धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४ पतत्पताकै रथकुंजरादिभिः खरो
ष्ट्रगोभिर्महिषैर्नरैरपि। मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन्शरैर्दद्भिरिव द्विपा वने १५ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी।
सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः १६ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः। अन्योन्यमासाद्य म
दांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं १७ ॥ ॥

संघर्षः कलहः। वेलायां समुद्रजलसीम्नि। अर्वणोष्ट्राः ... दद्भिरिति। १६ १७ ॥ ॥श्रीरामः॥ ॥

अर्बुदा इति केचिद्यादवविशेषाः। एरकाः समुद्रतीररूढाः सूचीमुखतृणानि जङ्घोरुदघ्नाः ... एरकामुष्ट्या परिघोपमाः पौरुषं ...
भगवद्विषयं योगं ध्यानं समास्थाय सम्प्रयोगकाय ... त्वेन कृत्वा योगं ... विश्रुमा ... आत्मानं अन्तर्यामिणि आत्मनि व्याप्य भगवद्रूपे संयोज्ये की

दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः। विसर्जनाः कुकुराः कुंतयश्च मिथस्तु जघ्नुः सुविसृज्य सौहृदं १८ पुत्रा अयुध्य
न्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः। मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहन्ज्ञातय एव मूढाः १९ शरेषु हीयमानेषु भज्यमा
नेषु धन्वसु। शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः २० ता वज्रकल्पा ह्यभवन्परिघा मुष्टिना भृताः। जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं
च ते २१ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः। हंतुं कृतधियो राजन्नापन्ना आततायिनः २२ अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन। एर
कामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि २३ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां। स्पर्धाक्रोधः क्षयं निन्ये वैणवोग्निर्यथा वनं २४ एवं नष्टे
षु सर्वेषु कुलेषु स्वेषु केशवः। अवतारितो भुवो भार इति मेनेवशेषितः २५ रामः समुद्रवेलायां योगमास्थाय पौरुषं। तत्याज लोकं मानुष्यं सं
योज्यात्मानमात्मनि २६ रामनिर्याणमालोक्य भगवान्देवकीसुतः। निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं २७ बिभ्रच्चतुर्भुजं रूपं भ्राजि
ष्णु प्रभया स्वया। दिशो वितिमिराः कुर्वन्विधूम इव पावकः २८ श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसं। कौशेयांबरयुग्मेन परिवीतं सुमंगलं
२९ सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं। पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः। हारनूपुरमुद्राभिः
कौस्तुभेन विराजितं ३१ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः। कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं ३२ ॥ ॥

भवतीति संचिंत्य देहं त्यजत्यस्य ... आत्मनेपदप्रयोगेन सुखेन देहत्यागं सूचयति। भगवता देहं त्यक्त्वा दिवं न गतं तत्त्वदर्शन ... जननो ... इत्यादिष्टं ...
मिति ज्ञापयन् शुको देहे स्थानीतं ... विभ्रदिति २८ २९ ३० ३१ ३२ ॥ ॥

भा॰ए॰ अत्र श्रीकृष्णो मुरजनमोहकरीं मायां प्रकटयति जरानाम्ना व्याधेनेत्याह मुसलेति। मुशलावशेषायःखण्डेन कृतः इषुः शरो यस्य सः मुशलावशेषा यःखण्डकृतेषुः अगन्ति शुभाणि तेषु मुशलावशिष्टायःखण्डेन कृतशराणीत्यर्थः मृगस्याकारं मृगत्ववुद्धिजनकं। अज्ञानतामपि। अपापस्य तु चिततन्मृगलुब्धकं मृग यःखण्डकृतेषु अग्न्यादीन् मुसलावशिष्टायःखण्डेन कृत शरानि त्यर्थः तदोषपरिहारोनाऽस्येव तेनाधःपातएवातो मद्वधएव श्रीपानि तिभावेनाह यस्येति विरं लोकितं इति तत्र कृतब्रह्महत्यादिदोषपरिहारसद्भावेप्यत्र कृतदोषपरिहारो नास्त्येव तेनाधःपातएवातो म द्वधएव श्रेयानिति भावेनाह यस्येति। विरं चरुद्रादयो यस्य विरिञ्चस्य तनया गिरां याद्यो गिरां पतयो वृहस्पत्यादयो ते एते यस्य तवात्मयोगरचितं स्वरूपसामर्थ्यापि येन कृतं सृष्ट्यादिकं न विदुः।

१५६

मुशलावशेषायःखण्डकृतेषुर्लुब्धको जरः। मृगस्याकारं तच्चरणं विव्याध मृगशंकया ३३ चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः भीतः पपात शिरसा पादयोरसुरद्विषः ३४ व्याधउवाच अजानता कृतमिदं पापेन मधुसूदन क्षन्तुमर्हसि पापस्य उत्तमश्लोक मेनघ ३५ यस्यानुस्मरणं नृणामज्ञानध्वान्तनाशनं। वदंति तस्य ते विष्णो मया साधु कृतं विभो ३६ तन्माशु जहि वैकुंठ पाप्मानं मृगलुब्धकं। यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमं ३७ यस्यात्मयोगरचितं न विदुर्विरिंचि रुद्रादयोस्य तनयाः पतयो गिरां ये। त्वन्मायया पिहितदृष्टय एतदंजः किं तस्य ते वयमसद्गतयो गृणीमः ३८

तत्र निमित्तमोहात्वन्मायेति। त्वन्मायया पावंधकरा स्वाविहृतदृष्टयः प्रभुसत्ज्ञानाय स्मात्तस्मादिति शेषः। असद्गतयोः प्रशस्त्रव्याधयोनितराम् अज्ञा एव ज्ञानशून्यावयं तस्य ते तव एतद्गुणितं मंजो गृणीमः किं नैव ज्ञातुं शक्ता इत्यतः एतस्मुत्यादिकमेनाप्येतत्पापपरिहारोपाया ज्ञानादधःपातान्मर्वमेव मो जहीत्यर्थः। कुमतयहतिके त्विकेति। अनेन वो सुत्पन्यायोदर्शितिरिति ज्ञापते ३८ ॥ ॥

राम
१५६

भगवान् भक्तवत्सलत्वान्मयिमाक्रोशेवाविलपापध्वंसिनीतिमावं कृत्वा वक्तिमाभैरिति। माभैर्नर्भयं माकार्षीः। एषकृतः शरपेतोमे काम काशितः कां क्षितइत्यर्थः। हिशब्देन दुष्टजनमोहनं प्रयोजनं सूचयति। अतः किमस्मेफलं ददामीति तत्राह याहीति। सुकृतिनां पदमित्यनेन इहमपि सुकृतमेवाख्यि तिध्वनयति। नेदं प्राकृतपुरुषो कृतवत्कालं तेपि मं देहकरमिति भावेनाह। इत्यादीति। पासंगीति कृष्ममाप्यकथाशेषंप्रश्नोति। दारुकइति। अन्विच्छन्नेषु णंकुर्वन् तं कृष्णं नाधिगम्याविज्ञाय पुनः तुलसिकामोदोयस्य तथातंवायुमाघ्रायज्ञात्वा तुलसीकामोदवायुमभिमुखो तत्राश्वत्यमूले कृतकेतनं

श्रीभगवानुवाच माभैर्जरेत्वमुत्तिष्ठ काम एषकृतो हि मे। याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदं ३९ श्रीशुकउवाच इत्यादि ष्टो भगवता कृष्णेनेच्छाशरीरिणा। त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥४०॥ दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य तां। वायुं तुलसिका मोदमाघ्रायाभिमुखं ययौ ४१ तं तत्र तिग्मद्युतिभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिं। स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य सबा ष्पलोचनः ४२ अदृष्ट्वा त्वच्चरणांबुजं प्रभो दृष्टिः प्रनष्टा तमसि प्रविष्टा। दिशो न जाने न लभे च शांतिं यथा निशायामुडुपे प्रनष्टे ४३ ॥

तं कृष्णं दृष्ट्वा प्रभो ते तव चरणांबुजमदृष्ट्वतो पश्यतो मम दृष्टिः प्रनष्टा अस्तं गता दृश्यमाना या कथं नाशरित्यत उक्तं। तमसीति फलमाह। दिश इति इ। शांतिं मंगलं शांतिः प्रशममंगलइतियादवः। उडुपे चंद्रे प्रनष्टे अस्तं गते अन्ये रुडुभिः सह चंद्रस्यादर्शनं विवक्षितं अन्यथा नक्षत्रप्रेक्षणेना विदिशा दिविवेकोपपत्तेरित्यतउडुपपदप्रयोगइति। आहश्रितइति पाठे पादप्रपन्नः। अश्रुकृतः कृष्णमाह। योहं ते चरणांबुजमाश्रितः तस्य मे दृष्टिः प्रनष्टेति योज ना ४३

इदमप्यतिमाहात्म्यं हरेरिति भावेनाह इतीति। उदीक्षितः हरिणऊर्ध्वंगतो दृष्टः अत्र चेतनानियतरथाद्यचेतनप्रवृत्तिदर्शनं लौकिकानां भगवन्माहा
त्म्यबुद्धिरितरेषां ज्ञानिनां प्रेक्षणलक्षणसंज्ञया गतिं पश्यतां चैतन्यात्मकानि रथादीनीत्यज्ञो विश्वसृष्टेर्माहात्म्यमिति ज्ञातव्यं। तेन रथादिगमनेन पुत्र

श्रीशुक उवाच इति ब्रुवति सूते वै रथो गरुडलांछनः। खमुत्पपात राजेंद्र साश्वध्वज उदीक्षितः ४४ तमन्वगच्छन् दिव्यानि विष्णुप्र
हरणानि च। तेनातिविस्मितात्मानं सूतमाह जनार्दनः ४५ श्रीभगवानुवाच गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः। संकर्षण
स्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ४६ द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः। मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ४७ स्वं स्वं परि
ग्रहं सर्वे आदाय पितरौ च नः। अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ४८ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः। मन्मायारचनामेतां विज्ञा
योपशमं व्रज ४९ शुक उवाच इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः। तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ५०
इति श्रीभागवते महापुराणे एकादशस्कंधे त्रिंशोध्यायः ॥ ॥

दारुकोपेक्षकः। एतां संसारसृष्टिं मन्मायया मदिच्छया रचना प्रकारो यस्याः सा मन्मायारचना तां दुर्मनाः दुःखितांतःकरणः। पुरीं द्वारवतीं संज्ञां
५० इत्येकादशे टीकायां त्रिंशोध्यायः ॥ ॥

हरेः स्वनिर्याणप्रकारादिकं कथयत्यस्मिन्नध्याये। तत्रादौ ब्रह्मादीनामागतिमाह अथेति भवान्या रुद्राणा उमया द्विजाः ऋषयः विभूतीः पुंसं त्रिधा
न स्थानविशेषाभिः इंद्रादीनां स्वात्मानं स्वधामात्मनि स्थूलरूपे। आग्नेय्या योगधारणया ज्ञातेनाग्निना तनुमदग्ध्वा परं पदं स्वकं धामाविशत्। आग्नेय्या येषा र
णया देहं दग्धा परं पदं। यांति देवाः स्वमस्वा स्वते धामन्यां तनुं हरिः। त्विषिं हृत्पी सर्वेषां भित्वाता भिरलं शूनः। तृप्यते पलयेदेवः स्वयं क्रूशादिरूप वार।

शुक उवाच अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः। महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः १ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः। चा
रणा यक्षरक्षांसि किंनराप्सरसो द्विजाः २ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः। गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ३ ववृषुः
पुष्पवर्षाणि विमानावलिभिर्नभः। कुर्वंतः संकुलं राजन् भक्त्या परमया युताः ४ भगवान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः। संयुज्यात्मनि चा
त्मानं पद्मनेत्रे न्यमीलयत् ५ लोकाभिरामां स्वतनुं धारणाध्यानमंगलं। योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं ६ दिवि दुंदुभ
यो नेदुः पेतुः सुमनसश्च खात्। सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ७ देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि। अविज्ञातगतिं कृष्णं
ददृशुश्चातिविस्मिताः ८ सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलं। गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ९ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा यो
गगतिं हरेः। विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्तदा १० ॥ ॥

अदग्ध्वेव तनुं यातिमित्यानंदरूपत्वात् न तु दग्धा नदाहकार्यमेवांगीकरणीय इति भावः। तं कृष्णमनु अत्राप्येकं माहात्म्यातिशयमाह। देवादय इति यथा म
र्त्यैरभ्रमंडलं भित्वा आकाशे यांत्याः सौदामिन्याः गतिर्न लक्ष्यते। तथा कृष्णस्य गतिर्दैवतैर्न लक्ष्यते ९ १० ॥ ॥

जन्मादिमतो हरेर्मनुष्यत्वेति कथं घटत इति तत्राह। राजन्निति। परस्य सर्वविलक्षणस्य परमात्मनस्तनुभृज्जननवदप्ययवदीहा चेष्टा यास्तां माया
विडंबनं क्रीडानुकरणमवेहि। यथा नटस्य रागादिरूपग्रहणविषयचेष्टा। प्रजापतिश्चरति गर्भे अंतरजायमानो बहुधा विजायते। अजातो जातव
दिति श्रुतेस्ततोप्यतद्वत्तथा। मायया दर्शयन्नित्यमज्ञानां मोहनायचेति प्रमाणबाहुल्याद्दूरेऽयं स्वभाव इत्यर्थः। सृष्टो देहाद्यभावे हरेः सर्जनादिकं कथं युज्य
त इति तत्राह। सृष्ट्वेति। स हरिरात्मना स्वरूपशक्त्येदं जगत्सृष्ट्वानुविश्यावतारैर्विहृत्यांते प्रलये संहृत्य स्वात्ममहिम्नोपरतः स्वमहिम्नि स्थित आस्ते। अ
नेन स्वमहिम्नैव सर्वं घटत इत्युक्तं भवति। एवमपि सृष्ट्यानुविद्धत्वं हरेर्जन्मादिकमापादयतीत्यत्राह। मर्त्येनेति। यः कृष्णः मर्त्येन शरीरेण सह यम

राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य। सृष्ट्वात्मनेदमनुविश्य विहृत्य चांते संहृत्य चात्ममहिमोपरतः स आस्ते
११ मर्त्येन यो गुरुसुतं यमनीतलोकं त्वां चानयच्छरणदः परमास्त्रदग्धं। जिग्येंतकांतकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं १२

नीतलोकं यमेन नीतो लोकं स्वमुद्दिश्य यः स तथा तं। यमेन स्वलोकानीतमित्यर्थः। गुरोः सांदीपनेः सुतं। द्रौणेः परमास्त्रदग्धं त्वां चानयत्। तथा बाण
पुरेंतकं रुद्रमपि जिग्ये रुद्रो मा विशांतक इति श्रुतेः। यद्वा पारिजातहरणे अंतकं यममपि जिग्ये इति। अंतकांतकमिति पाठे यमस्याप्यंतकं रुद्रमित्य
र्थः। सोऽनीशोऽन्येश्वररहितः श्रीकृष्ण ईशतनौ सर्वेशानां रुद्रादीनामपीशत्वं तनोतीति ईशतनुस्तस्मिन्स्वदेहे मृगयोरनीश्वरः स्यात्किं न स्याद्वा तोपि सामर्थ्य
प्रकटनाय विप्रशापमनुस्मरन्न विद्ध एव स्वभक्तं व्याधं शरीरान्तो वयं स्नेन शल्येषुणा विद्धवतस्तस्य स्वात्मानं प्रकाशयता तेन प्रसादितस्तस्मै स्वलोकं ददादि

सर्गः १२

तर्हि किमिति बलभद्रादीन् सदेहान्स्वलोकं नानैषीदिति तत्राह। तथापीति। यद्यपि अशेषस्थितिसंभवाप्ययेष्वनन्यहेतुः स्वयमेवेश्वर ईश्वरत्वं तत्र विव
क्षितः। कुलालस्य घटादिरूपादिशक्त्यपेक्षावत् प्रकृत्यादिशक्त्यपेक्षितत्वेन कथं ईश्वरत्वं तत्राह। अशेषशक्तिधृगिति। तथापि बलभद्रादीनां व
पुः प्रणेतुं नैच्छत्। भगवान् मर्त्येन मरणशीलेन शरीरेण किं प्रयोजनमिति भावेनात्र शेषितं हरिणेति शेषः। अनेनापि किं प्रयोजनमत उक्तं। स्वस्थ
गतिमिति। स्वस्थगतिं स्वभक्तानां स्वविषयज्ञानलक्षणयोगगतिं प्रदर्शयित्रेवं प्रदर्शने प्रयोजनमित्यर्थः। अतः समर्थोपि प्रयोजनाभावान्न नीतवानि

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्। नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् १३ य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां। प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां १४ ॥ ॥

त्यर्थः। अतः स्वशरीरं नेतुं नैच्छदित्यर्थोऽनुपपन्नः उक्तहेतुविरुद्धत्वादसंभवाच्चेति। जगतो मोहनार्थाय भगवान्पुत्रपौत्रमः। दर्शयन्मानुषीं चे
ष्टां तथा मृतकवद्भिक्षुः। प्रकाशयेद्देहोऽपि मोहाय चतुरात्मना। मायया मृतकं देहं स्वदारान्सुस्थान्प्रदर्शयेत्। कुतो हि मृतकं तस्य स्वच्छंदत्वाद्भावात्मन
इति प्रमाणसद्भावाच्च। एतत् ज्ञानस्य स्वप्रसिद्धत्वाच्चोक्त एवार्थ इति भावेनोक्तं पर्यसंहरति। य एतामिति १४ ॥ ॥

कृष्णेत्क्रोशन्दारुकः किमकरोदिति तत्कथाशेषमाह। दारुक इति। पादाभ्याम्। भगवद्विप्रयोगस्मृतिं विजहुः ज्ञानेनेति शोकः। ...

दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः। पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्युतः १५ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप।
तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः॥१६॥ तत्र वै त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः। व्यसवः शेरते यत्र ज्ञातयो घ्नंत आननं १७
देवकी रोहिणी चैव वसुदेवस्तथा सुतौ। कृष्णरामावपश्यंतः शोकार्त्ता विजहुः स्मृतिं। प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः १८ उपगृह्य पतींस्तात चितामारुरुहुः स्त्रियः। रामपत्न्यश्च तं देहमुपगुह्याग्निमाविशन् १९ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः। कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः २० अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः। आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः २१ वंश्यानां नष्टगोत्राणामर्जुनः सांपरायिकं। हतानां कारयामास यथावदनुपूर्वशः २२ ॥ ॥

दात्मकाः कृष्णैकचित्ताः ॥२०॥ आत्मानं सं २१ सांपरायिकं परेतविषयं कर्म २२ ॥ ॥श्री॥ ॥ ॥

अन्यत्र ग्रंथांतरे। इहास्मिन्ग्रंथे। परमहंसगतौ परमहंसानामाश्रये हरौ शरणे वा। यन्न त्वं निगमोपि वक्तुमनलं शास्त्रेषु बद्धस्थितं वस्त्वाद्याः किमु तावलंब विभुरा निर्दोषचिन्नाऽपि। अप्येवं जलबोधवत्स्मृतिगतेरेषां मदेकंपदं तस्य हस्ताख्यमखंडबुद्धिहृदया वासं प्रवंदे परं। एकादशस्कंधगता

द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात्। वर्जयित्वा महाराज श्रीमद्भगवदालयं। नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः। स्मृत्या शेषाशुभहरं सर्वमंगलमंगलं २४ स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः। इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् २५ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः। त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं २६ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च। कीर्त्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते २७ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि। अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत २८ इति श्रीभागवते महापुराणे एकादशस्कंधे मौसलंनाम एकत्रिंशोध्यायः ॥

पदरत्नावलिं श्रियं। अधिश्रीवं मुकुंदस्य वनमालेव राजतां इति श्रीमन्महेंद्रतीर्थश्रीपादशिष्यस्य विजयध्वजतीर्थभट्टारकस्य कृतौ श्रीमद्भागवतटीकायां पदरत्नावल्यामेकादशस्कंधे एकत्रिंशोध्यायः ॥ ॥

एकादश

॥श्रीवेंकटेशनारसिंहाभ्यां नमः॥

॥नरहरेरिदं॥

॥श्री॥

॥श्रीवेंकटेशनारसिंहाभ्यां नमः॥

॥नरहरेरिदं॥ द्वादश

श्री

श्रीगणेशायनमः ॥ पद्मावासानाथंनत्वापद्मनूरर्वक्षगीद्वादशस्कंधव्याख्यादृष्टद्वादशात्मप्रीत्येनित्यं १ श्रीनारायणात्मप्रशिष्य
वंशादिकथनेनतन्माहात्म्यमेवकथयत्यस्मिन्द्वादशस्कंधे।तत्रप्रथमेध्यायेवंशशेषंकथयतियइतिश्रुत्वाःवंशावसानभवःकस्यवंशांतेभवइत्यतउक्तंबार्हद्रथ
इतिस्वामिनंपुरंजयमात्मजंतस्यैतिशेषः १ यद्यस्यप्रद्योतस्यसुतःपालकोनामयज्ञहितिस्याव्यपत्वात्मजी।यद्वायःपालकोयस्ययत्पालकःसुतस्तस्यसुत

श्रीशुकउवाच ॥ योंत्योरिपुंजयोनामभविष्योथबार्हद्रथः।तस्यामात्यस्तुशुनिकोहत्वास्वामिनमात्मजं १ प्रद्योतसंज्ञंराजानंक
र्तायत्पालकःसुतः।विशाखयूपस्तत्सुतोभवितावाजकस्ततः २ नंदिवर्धनस्तत्सुतःपंचप्रद्योतनाइमे।अष्टत्रिंशोत्तरशतंभोक्ष्यंतिपृथि
वीमिमां ३ शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः।क्षेमधर्मातस्यसुतःक्षेत्रज्ञःक्षेत्रधर्मजः ४ विधिसारःसुतस्तस्याजातशत्रुर्भ
विष्यति।दर्भकस्तत्सुतोभाव्योदर्भकस्याजयस्ततः ५ नंदिवर्धनआजेयोमहानंदिःसुतस्ततः।शैशुनागादशैवैतेषष्ट्युत्तरशतत्रयं ६
समाभोक्ष्यंतिपृथिवींकुरुश्रेष्ठकलौनृपाः।महानंदिसुतोराजन्शूद्रागर्भोद्भवोबली ७ महापद्मपतिःकश्चिन्नंदःक्षत्रविनाशकृत्।
ततोनृपाभविष्यंतिशूद्रप्रायास्त्वधार्मिकाः ८ सएकछत्रांपृथिवीमनुल्लंघितशासनः।शासिष्यतिमहापद्मोद्वितीयइवभार्गवः ९ ॥

इति २ प्राद्योतेनसाकंपंचतेषांराज्यावधिकालमाहअष्टेतिभोक्ष्यंतिपालयंतिभुंजतेनवनइत्यतःपरःक्षेपदंपूर्ववंशपवैलक्षण्यप्रद्योतनार्थेवाच्यत्वा
सः ३ ६ माहानंदिंविशिनष्टि।माहानंदिरितिमहानंदिर्वंशभवःकइतिकश्चिदितिमहापद्मसंख्यासंख्यातासेनामहापद्मातस्याःपतिःकुलक्षत्र
विनाशकृत्।ततःक्षत्राभावात ८ समहापद्मोनामानंदः ९ ॥ ॥

१० नंदेनसहनवसंख्याताचंद्रगुप्तंवंशजाउद्धरिष्यत्यापदइतिशेषः।मौर्याःमुरवंशजाःहीनजातयःकेवलाः ११ सएवनवनंदाश्चार्याः १२ १३ मौर्यसंज्ञाश्च
विमौर्याः १४ वंशव्यत्यासंकथयतिहत्वेतिपुष्यमित्रइत्यादिजातिप्रयुक्तनामशुंगइत्यादिविशेषनाम १५ १६ शुंगाःशुंगवंशजाः १७ कण्वाःकण्ववं

तस्यचाष्टौभविष्यंतिसुमाल्यप्रमुखाःसुताः।यइमांपृथिवींराजन्भोक्ष्यंतिसमाःशतं १० नवनंदान्द्विजःकश्चित्प्रपन्नानुद्धरिष्यति।तेषामभावेज
गतींमौर्याःभोक्ष्यंतिवैकलौ ११ सएवचंद्रगुप्तंवैद्विजोराज्येभिषेक्ष्यति।तत्सुतोवारिसारस्ततश्चाशोकवर्धनः १२ सुयशाभवितातस्यसंगतःसुय
शःसुतः।शालिशूकस्ततस्तस्यसोमशर्माभविष्यति १३ शतधन्वाततस्तस्यभवितातद्बृहद्रथः।मौर्याह्येतेदशनृपाःसप्तत्रिंशच्छतोत्तरं १४ समाभो
क्ष्यंतिपृथिवींकलौकुरुकुलोद्वह।हत्वाबृहद्रथंमौर्यंतस्यसेनापतिःकलौ।पुष्यमित्रस्तुशुंगाह्वःस्वयंराज्यंकरिष्यति।अग्निमित्रस्ततस्तस्मात्सुज्ये
ष्ठोभविताततः १५ वसुमित्रोभद्रकश्चपुलिंदोभविताततः।ततोघोषःसुतस्तस्माद्वज्रमित्रोभविष्यति १६ ततोभागवतस्तस्माद्देवभूतिःकुरूद्व
ह।शुंगादशैतेभोक्ष्यंतिभूमिंवर्षशताधिकं १७ ततःकण्वानियंभूमिर्यास्यत्यल्पगुणान्नृप।शुंगंहत्वादेवभूतिंकण्वोमात्यस्तुकामिनं १८
स्वयंकरिष्यतेराज्यंवसुदेवोमहामतिः।तस्यपुत्रस्तुभूमित्रस्तस्यनारायणःसुतः १९ सुशर्मास्याथनृपतिःकण्वानांभविताततः।काण्वायनाइमेभूमिं
चत्वारिंशच्चपंचच २० शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे।हत्वाकण्वंसुशर्माणंतद्भृत्योवृषलोबली २१ गांभोक्ष्यत्यंध्रजातीयःकंचित्का
लमसत्तमः।कृष्णनामाथतद्भ्राताभवितापृथिवीपतिः २२ श्रीशांतकर्णस्तत्पुत्रःपौर्णमासस्तुतत्सुतः।लंबोदरस्तुतत्पुत्रस्तस्माच्चिबिलकोनृ
पः २३ मेघस्वातिश्चिबिलकादटमानस्तुतस्यच।अनिष्टकर्माहालेयस्तलकस्तस्यचात्मजः २४ पुरीषभीरुस्तत्पुत्रस्ततोराजासुनंदनः।चकोरोबहवो
यत्रशिवस्वातिररिंदमः २५ तस्यापिगोमतीपुत्रःपुरीमान्भविताततः।शिवशिराःशिवस्कंदोयज्ञश्रीस्तत्सुतस्ततः २६ विजयस्तत्सुतोभाव्यश्चंद्र
वीजःसुलोमधिः।एतेत्रिंशन्नृपतयश्चत्वार्यब्दशतानिच।षट्पंचाशच्चपृथिवींभोक्ष्यंतिकुरुनंदन।सप्ताभीराआवभृत्यादशगर्दभिनोनृपाः।कंकाःषोडशभू
पालाःभविष्यंत्यतिलोलुपाः २८ ॥ ॥

संपतिरहिताकथंकण्वान्यास्यतीत्यतआह शुंगमिति।शुंगंशुंगाख्यराजानंदेवभूतिंहत्वानाम्नाकण्वः
शाजाः तान्नृपान्यास्यति।अल्पगुणान्कृष्यादिगुणसंपतिरहिताः २० तस्यसुशर्मणोभृत्यः २१ तस्यकृष्णस्यभ्राता २२ २३ हालेयः
तस्यशुंगस्यामात्यःकामिनंग्राम्यकर्मासक्तंकाण्वायनाःकण्ववंशभवाः हलाख्येयः २४ २८

२९ मौनाः मौनकुलेजाताः एकादश त्रीणि अब्दशतानि। कुले मौनकुले संस्थिते नष्टे किलिकिलायां नगर्यां तस्य शिशुनंदेः भ्राता भूतनंदो वंशोपवंगरेर्भ्रातरः
षडधिकानि ३० ३१ ३२ बाल्हीकाः बाल्हीकेदेशपतयः ३३ तथा आंध्राः आंध्रदेशपतयः। कोसलाः कोसलविषयपतयः वैदूरपतयः वैदूराख्यनगरप
तयः ततश्च भाव्याः भविष्यंति ३४ नैषधानां विषयाणां राजा। पुरंजयः शत्रूणामिति शेषः। स पुलिंदयदुमद्रकान वरान्वर्णान् करिष्यति। किंवञ्जनास

ततोष्टौ यवना भाव्याः चतुर्दश च तुरुष्कराः। त्रयोदश गुरुंडाश्च मौना एकादशैव तु २९ एते भोक्ष्यंति पृथिवीं दश वर्षशतानि च। नवाधिकां च नवतिं
मौना एकादश क्षितिं ३० भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते कुले। किलिकिलायां नृपतयो भूतनंदोथ वंगिरेः ३१ शिशुनंदिश्च तद्भ्राता यशोनं
दिः प्रवीरकः। सुता एते वर्षशतं भविष्यंत्यधिकानि षट् ३२ तेषां त्रयोदश सुता भवितारो ह्यथ बाल्हिकाः। पुष्पमित्रोथ राजन्यो दुर्मित्रोस्य तथैव
च ३३ एककाला इमे भूपाः सप्तांध्राः सप्त कोशलाः। वैदूरपतयो भाव्या नैषधास्तत एव हि ३४ नैषधानां तु भविता विश्वस्फूर्जिः पुरंजयः। करिष्यति
वरान्वर्णान् पुलिंदयदुमद्रकान् ३५ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः। वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ३६ अनुगंगमाप्रया
गं गुप्तां भोक्ष्यति मेदिनीं। सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः ३७ व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः। सिंधोस्तटं चंद्रभागां कौंतीं का
श्मीरमंडलं ३८ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः। तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ३९ ॥ ॥

र्वाः प्रजाश्च पिविवर्जिताः ३५ ब्रह्मभूयिष्ठाः बहुलवेदविदः स्थापयिष्यति स्थिरीकरिष्यति ३६ अनुगंगं गंगासमीपे आप्रयागं प्रयागात्व्याप्त्वपर्यं
तं दीर्घां हिंनी पद्मवत्यां उषित्वा आप्रपाणं गुप्तां पालितां। तदनंतरं सौराष्ट्राश्च आवंत्याश्च आभीराश्च शूद्राश्च अर्बुदाश्च मालवाश्च ३७ व्रात्याः संस्कारहीनाः
द्विजाः शूद्रप्रायाः जनाधिपतयो भविष्यंति ३८ ३९ ॥ ॥

किंच एते सर्वे अधर्मानृतपराः अधर्मे अनृते विपरिनिष्ठिताः फल्गुदाः अल्पदातारः ४० उदितास्तमितप्रायाः बहुलं सूर्योदयमस्तंगतमेव जानंति नाप
रं अल्पकालावस्थायिनो वा संस्काररहीनाः प्रजाभक्षयिष्यंति धनाद्यपहारादिना पीडयिष्यंति ४१ किंच। एवंविधा एते एव नाथाः येषां तेन नाथाः ४२
इति द्वादशस्कंधे प्रथमोध्यायः   कल्क्यवतारं तच्चरितं युगविभागलक्षणं च वक्तुमस्मिन्नध्याये। तत्रादौ कलिवैभवमाह तत इति। कालत्वरया नंतरं धर्मादयो न
ङ्क्ष्यंतीत्यन्वयः कारकाभावादिति शेषः। यदि कलौ नृणां वित्तमस्ति तर्ह्येव तेषां जन्मादयः पूज्याः स्युरिति शेषः। अयं धर्मोयं न्याय इति व्यवस्थायां बलमेव कार

एते धर्मानृतपराः फल्गुदास्तीव्रमन्यवः। स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ४० उदितास्तमितप्रायाः अल्पसत्वाल्पकायुषः। असंस्कृताः
क्रियाहीनाः रजसा तमसावृताः ४१ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः। तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ४२ अन्योन्यतो राजभि
श्च क्षयं यास्यंति पीडिताः ४३ इति श्रीभागवते महापुराणे द्वादशस्कंधे कोशलराजवंशानुकीर्तने प्रथमोध्यायः   श्रीशुक उवाच
ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया। कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः। वित्तमेव कलौ नृणां जन्माचारगुणोदयाः। धर्मन्यायव्यवस्था
यां कारणं बलमेव हि २ दांपत्येभिरुचिर्हेतुर्मायैव व्यावहारिके। स्त्रीत्वे पुंस्त्वे च हि रतिः विप्रत्वे सूत्रमेव हि ३ लिंगमेवाश्रमख्यातावन्योन्या
पत्तिकारणं। अवृत्त्या न्यायदौर्बल्ये पांडित्ये चापलं वचः ४ अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु। स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं ५ ॥

णं धनमितिवा पाठः। अभिरुचिरन्योन्यस्नेहलक्षणो ह्या हेतुः। न कुलगोत्रादि शास्त्रीययोगः। व्यावहारिके क्रयविक्रयादिव्यवहारविषये मायैव हेतु
अतिरतितरां मनोदर्शनीयता विशेषः। सूत्रं तल्लक्षणं आश्रमाणां ख्यातौ ज्ञाने ब्रह्मचर्याद्याश्रम इति वक्तव्ये अन्योन्यापत्तिकारणं आश्रमादाश्रमांतरप्रा
प्तिकारणं। लिंगमुपाध्यायादिलक्षणं तं ज्ञानं अन्यायप्रदौर्बल्ये अन्यायाकरणे अवृत्तिः वृत्तिराहित्यं तत्र भावहेतुः। कुतो न्यायो न्याय इत्यर्थः। अचापलं अव
चलतालक्षणं वचः कारणमित्यनुवर्तते। अनाढ्यता दरिद्रत्वं। असाधुत्वे दुष्टत्वे त्वं मम जाया इति स्वीकारः हेतुः। प्रसाधनं शरीरस्य शुद्धिरलंकारो वा ॥ ॥

दूरेवार्ययनंदूरतरजलयात्रायत्क्रियतेतत्तीर्थंकेशधारणंश्मश्रुधारणं।उदरंभरतास्वोदरपूर्णता।स्वार्थःस्वप्रयोजनं ६ ब्रह्मब्राह्मणाः ७ दस्यूनांधर्मायेषां
चौर्यादीनियेषांतेतथातैः।आच्छिन्नदारद्रविणाःबलाद्धृतधनभार्याविनाः ८ क्षौद्रंमधुकषिजसमांसीवनौषधीःतापसीत्यभिधानं।शाकादिभोजनेयेषांतेत
था ९ दुर्भिक्षकरनिमित्तपीडिताः।हिमंनीहारः १० क्षुधयातृषयाव्याधिभिःकुष्ठादिभिः ११ १२ चौर्यादयएवनानावृत्तयोयेषांतेतथा १३ छागोऽल्प

दूरेवार्ययनंतीर्थंलावण्येकेशधारणं।उदरंभरतास्वार्थःसत्यत्वेधार्ष्ट्यमेवहि ६ दाक्ष्यंकुटंबभरणंयशोर्थेधर्मसेवनं।एवंप्रजाभिर्दुष्टाभिरा
कीर्णेक्षितिमंडले ७ ब्रह्मविट्क्षत्रशूद्राणांयोबलीभवितानृपः।प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मभिः ८ आच्छिन्नदारद्रविणायास्यंति
गिरिकाननं।शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ९ अनावृष्ट्याविनंक्ष्यंतिदुर्भिक्षकरपीडिताः।शीतवातातपप्रावृड्हिमैरन्योन्यतःप्रजाः
१० क्षुत्तृड्भ्यांव्याधिभिश्चैवसंतप्स्यंतेचचिंतया।त्रिंशद्विंशतिवर्षाणिपरमायुःकलौनृणां ११ क्षीयमाणेषुदेहेषुदेहिनांकलिदोषतः।वर्णाश्रमवतां
धर्मेनष्टेवेदपथेनृणां १२ पाषंडप्रचुरेधर्मेदस्युप्रायेषुराजसु।चौर्यानृतवृथाहिंसानानावृत्तिषुवैनृषु १३ शूद्रप्रायेषुवर्णेषुछागप्रायासु
धेनुषु।गृहप्रायेष्वाश्रमेषुयौनिप्रायेषुबंधुषु १४ अणुप्रायास्वोषधीषुशमीप्रायेषुस्थास्नुषु।विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु
१५ इत्थंकलौगतप्रायेजनेषुखरधर्मिषु।धर्मत्राणायसत्वेनभगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः।धर्मत्राणाय
साधूनांजन्मकर्मापनुत्तये १७ शंबलग्राममुख्यस्यब्राह्मणस्यमहात्मनः।भवनेविष्णुयशसःकल्किःप्रादुर्भविष्यति १८ अश्वमाशुगमारु
ह्यदेवदत्तंजगत्पतिः।असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ ॥ ॥

नत्वलमाभावेलिंगयत्तासप्रतिग्रहमात्रमनाएवबंधुत्वंयोनिसंबंधमात्रं १४ अणुप्रायेषुकल्पमाषस्वल्पधान्यासुजनशून्यप्रायेषु १५ १६ विष्णो
र्जन्मकर्मचसाधूनांधर्मत्राणायदुःखमपिनुत्तयेचस्यादितिशेषः १७ शंबलग्रामेमुख्यस्यप्रधानस्यनाम्नाविष्णुयशसःब्राह्मणभवनेऽपिह १८
आशुगंशीघ्रगामिनं १९ ॥

नृपलिंगच्छदःराजलक्षणच्छन्नाः २० वासुदेवस्यांगरागस्यचंदनाद्यनुलेपनस्यस्रगाद्यलंकारस्यपुण्यगंधेनयुक्तंवायुंस्पृशंतीतिवासुदेवांगरागातिपुण्यगं
धानिलस्पृशःतेषां २१ राज्ञाविसर्गःसंततीनांउत्पत्तिःस्थविष्ठःवृद्धाप्रजासृष्टिःसंतानोत्पत्तिः २२ कृतप्रारंभेलक्षणंतरमाहयदेति।कियंतंकिंचिरम

विचरन्नाशुनाक्षोण्यांहयेनाप्रतिमद्युतिः।नृपलिंगच्छदोदस्यून्कोटिशोनिहनिष्यति २० अथतेषांभविष्यंतिमनांसिविशदानिवै।वासुदेवां
गरागातिपुण्यगंधानिलस्पृशां २१ पौरजानपदानांवैहतेष्वखिलदस्युषु।तेषांप्रजाविसर्गश्चस्थविष्ठःसंभविष्यति।वासुदेवेभगवतिसत्वमूर्तौ
हृदिस्थिते २२ यदावतीर्णोभगवान्कल्किर्धर्मपतिर्हरिः।कृतंभविष्यतितदाप्रजासूतिश्चसात्विकी २३ यदाचंद्रश्चसूर्यश्चतथातिष्यबृहस्पती
एकराशौसमेष्यंतितदाभवतितत्कृतं २४ येतीतावर्त्तमानायेभविष्यंतिपार्थिवाः।तेतउद्देशतःप्रोक्तावंशजाःसूर्यसोमयोः २५ आरभ्यभवतोजन्म
यावन्नंदाभिषेचनं।एतद्वर्षसहस्रंतुशतंपंचदशोत्तरं २६ सप्तर्षीणांतुयौपूर्वौदृश्येतेउदितौदिवि।तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि २७
तेनैतेऋषयोयुक्तास्तिष्ठंत्यब्दशतंनृणां।तेत्वदीयेद्विजाःकालेअधुनाचाश्रितामघाः २८ विष्णोर्भगवतोभानुःकृष्णाख्योसौदिवंगतः।
तदाविशत्कलिर्लोकंपापेयद्रमतेजनः २९ यावत्सपादपद्माभ्यांस्पृशन्नास्तेरमापतिः।तावत्कलिर्वैपृथिवींपराक्रांतुंनचाशकत् ३० यदादे
वर्षयःसप्तमघासुविचरंतिहि।तदाप्रवृत्तस्तुकलिर्द्वादशाब्दशतात्मकः ३१ यदामघाभ्योयास्यंतिपूर्वाषाढांमहर्षयः।तदानंदात्प्रभृत्येषकलि
र्वृद्धिंगमिष्यति ३२ यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि।प्रतिपन्नंकलियुगमितिप्राहुःपुराविदः ३३ दिव्याब्दानांसहस्रेत्रप्रतियातेतु
नःकृतंभविष्यतियदानृणांमनआत्मप्रकाशकं ३४ ॥ ॥

मित्यतउक्तंद्वादशेति॥३१॥ अस्यकलेःपरंकंचित्कालंहित्वापश्चाद्वृद्धिःस्यात्कदेतितत्राहयदेति ३१ कृष्णस्वर्गारोहणानंतरं।कंचित्कालंहित्वापश्चाद
विष्टःकिंकलिरुततस्मिन्नेवाह्नीतिसंदेहंव्यवच्छिनत्तियस्मिन्निति ३३ ततःक्रियाकालःकृतप्रारंभायेतितत्राहदिव्येति।यदायस्मिन्कृतयुगेआ
त्मप्रकाशकंपरमात्मप्रकाशकंभवतीतिशेषः ३४ ॥ ॥

इतिशब्दः समाप्तिवचनः। समाप्तिपर्यंतं कथितः। एष मानवो वंशः वैवस्वतमनुसंबंधी। भुवि यथा संख्यायते। तथा विट्शूद्रविप्राणां वंशा अपि युगे युगे
ज्ञेया बोध्यां इत्याति देशोयं ३५ एतेषां सत्वे किं ज्ञापकमत्राह एतेषामिति नामलिंगमात्रकानां अनेनेतिह्यप्रमाणमुक्तं भवति ३६ कृते धर्मप्रतिष्ठापकः
क इति तत्राह देवापिरिति। महायोगबलान्वितो महात्मानावलयुक्तो अणिमाद्यैश्वर्ययुक्तौ वा ३७ ३८ कतियुगानीत्यत्राह। कृतमिति ३९ एषामज्ञान
माह राजन्निति ४० राजन्नाम्नोपि मम शरीरस्यांते नाशोस्ति नि विद्वत्समसंज्ञा तादृशं शरीरं प्राप्य भूतष्टक्रुद्धार्थमनुतेन परस्परयो जनं यतो भूतद्रोहात्निर

इत्येष मानवो वंशो यथा संख्यायते भुवि। तथा विट्शूद्रविप्राणां संख्यानं स्यात्युगे युगे ३५ एतेषां नामलिंगानां पुरुषाणां महात्मनां। कथा
मात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ३६॥ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः। कलापग्राममास्थाते महायोगबलान्वितौ ३७ ताविहेत्य
कलेरंते वासुदेवानुशिक्षितौ। वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ३८ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं। अनेन क्रमयोगेन भुवि प्राणि
षु वर्तते ३९ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे। भूमौ ममत्वं कृत्वांते हित्वेमां निधनं गता ४० कृमिविड्भस्मसंज्ञांते राजनाम्नोपि यस्य चा भूतद्
धुक्तत्कृते स्वार्थं किं वेद निरयो यतः ४१ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता। मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा। तेजोबन्नमयं कायं गृही
त्वा त्मतया बुधाः। मही ममतया चोभौ हित्वांतेऽदर्शनं गताः ४३ ॥ ॥

योभवृतितं वेद किं न वेदे वयस्य पुरुष शरीरस्यांत इति वा स्वार्थमनन प्रकार माह कथमिति भवंत्यस्यां सत्वानीति भूः योयं मत्पूर्वैः पुरुषैः धृता सेयं भूर्मम एव
इा राजा तरानधिकृता कथं स्यात् मत्सुतस्य मत्पौत्रस्य च मद्वंशजस्याहं पूर्वोपि स्यां सा मत्पूर्वा च कथं स्यादिति मत्वा ४२ तेजोबन्नमिदं कायमात्मतयाभि
मत्वेन सुधा गृहीत्वा अमी राजानो ममत्वेन गृहीत्वा उभौ महीं च देहं च हित्वा अदर्शनं मरणं गता भवंतीत्यन्वयः ४३ ॥ ॥

सांप्रतं ते केपि न स्थिता इत्याशयेनाह य इति पुराणादिगतकथासु कथामात्राः स्वर्षात्मना कथैव येषां ते तथा कृताः स्वरूपतो न संतीति शेषः ४४ इति
द्वादशे द्वितीयोध्यायः॥ चतुर्युगधर्मविभागः कलिदोषपरिहारश्चेत्यतद्वास्तित्र्याध्याये भिधीयते। तत्रादौ राज्ञां मोहं दर्शनेन भूमेः परिहासप्रकारमाह
दृष्ट्वेति। आत्मनो नितरां जये व्यग्रान् तदेकपरायणान् १ मोहं त्वस्पपारयतीति येनेति १ कीदृशास्तेषां काम इतितत्राह पूर्वमिति षड्वर्गं षड्वाहिल इणं नि
र्जयो नामोत्कर्षः प्रशिंद्रियविषयं वा। अनेन भूम्येक धसानायइं सूचयति राजमंत्रिणः राजा च मंत्रिणश्च राजमंत्रिणः। मंत्री बुद्धिसहायः स्यादिति। ततो मंत्रि
जयानंतरं सचिवः कर्मसहायाः। अमात्याः कर्मसचिवा इत्यमरः। आशाः दिक्पत्राः अथप श्चात्कंटकारक्रूदशास्तर ३ एवं क्रमेण राज्ञो जित्वा पृथिवीं ज्ये

येये भूपतयो राजन्भुंजते भुवमोजसा। कालेन ते कृताः सर्वे कथामात्राः कथासु वै ४४ इति श्रीभागवते महापुराणे द्वादशस्कंधे वैयासिक्यां द्वि
तीयोध्यायः श्रीशुक उवाच दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियं। अहो मां विजिगीषंति मृत्योः क्रीडनका नृपाः १ काम एष नरेंद्राणां
मोघः स्याद्विदुषामपि। येन फेनोपमे पिंडे येति विश्रंभिता नृपाः २ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः। ततः सचिवपौराप्त करींद्रानस्य कंट
कान् ३ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलां। इत्याशाबद्धहृदया न पश्यंत्यंतिकेंतकं ४ समुद्रावरणां जित्वा मां विशंत्यब्धिमोजसा। कि
यदात्मजयस्यैतन्मुक्तिरात्मजये फलं ५ यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह। गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः ६ ॥ ॥

ष्यामः कश्चीकरिष्यामः इत्याशया तित्याशया। अंतकं मृत्युं ४ एवं केचित्पुनः मां जित्वाप्यतितृष्णया ब्धिं विशंतीत्यनेन द्वीपादिजमाद्यं स्वयति भूजयादिना
न किमपि प्रयोजनमपि त्वं ततो र्थ एवावशिष्यते मनोजयफलापेक्षयेत्याह। कियदिति। आत्मजयस्य मनोजयस्य फलापेक्षया एतद्भूजयादिकं कियत्फलं। आ
त्मजये किं फलं येनायमेव साध्यः स्यादिति तत्राह मुक्तिरिति। आत्मजये मुक्तिरेव फलं यस्मात्तस्मादिति शेषः ५ इतोपि मज्जयकामा अज्ञा एवेत्याह। यामि
ति मनवस्तत्सुताश्च यां मां विसृज्य यथागतां याताः अबुद्धयस्तां मां जेष्यंतीत्यन्वयः आत्मजयवती त्यागशक्तिरन्येषामन्यथेति सूचयति ६ ॥

नकेवलमितरेषांमत्कृतेविग्रहोपितुशरीरसंबंधिनामपीत्याह यत्कृतइतिअपिशब्दःपुत्रादीनामित्यनेनसंबंधयितव्यः अयमपिआपिकइत्याहअ
सतामितिअसतामप्रशस्तकर्मणां ७ किंप्रकारोविग्रहइतितत्राहममेति ८ तत्रकांश्चिन्नृपान्निर्दिशतिपृथुरित्यादिना। एतेमर्त्यशरीरधर्मिणःसर्वेप्य
मर्त्यायांनित्यायांमयिविषयेममतांकृत्वाअकृतार्थाःअसाधितपुरुषार्थाःकालेनबलिनाकथावशेषाःकृताहियस्मात्तस्मादमीषांमहत्ज्ञानमहोअत्रा
त्मजयेनभाव्यमित्यर्थः १३ निगमयतिकथाइति। लोकेषुयशोवितायविस्तार्यपरेयुषांपरलोकंप्राप्तानांमहीयसांमहात्मनांयुष्मान्प्रतिमाः
कथासंकथितामयेतिशेषः। किमर्थंकथिताइतितत्राहविज्ञानेतिवचोविभूतीःवचसांविभूतयोविविधभवनविषयावाविज्ञानवैराग्यविवक्षयायोग्यस्युः

मत्कृतेपितृपुत्राणांभ्रातॄणांचापिविग्रहः। जायतेह्यसतांराज्येममताबद्धचेतसां ७ ममैवेयंमहीकृत्स्नानतेमूढेतिवादिनः। स्पर्द्धमानामिथोघ्नंति
म्रियंतेमत्कृतेनृपाः ८ पृथुःपुरूरवागाधिर्नहुषोभरतोर्जुनः। मांधातासगरोरामःखट्वांगोधुंधुहारघुः ९ तृणबिंदुर्ययातिश्चशर्यातिःशंतनु
र्गयः। भगीरथःकुवलयाश्वःककुत्स्थोनैषधोनृगः १० हिरण्यकशिपुर्वृत्रोरावणोलोकरावणः। नमुचिःशंबरोभौमोहिरण्याक्षोथतारकः
११ अन्येचबहवोदैत्याराजानोयेमहेश्वराः। सर्वेसर्वविदःशूराःसर्वेसर्वजितोजिताः १२ ममतांमय्यवर्त्तंतकृत्वोच्चैर्मर्त्यधर्मिणः। कथावशे
षाःकालेनह्यकृतार्थाःकृताविभो १३ कथाइमास्तेकथितामहीयसांवितायलोकेषुयशःपरेयुषां। विज्ञानवैराग्यविवक्षयाविभोवचोविभूतीर्न
तुपारमार्थ्यं १४ यस्तूत्तमश्लोकगुणानुवादःसंगीयतेभीक्ष्णममंगलघ्नः। तमेवनित्यंशृणुयादभीक्ष्णंकृष्णेमलांभक्तिमभीप्समानः १५

सोविज्ञानवैराग्येस्यातामित्यभिप्रेत्यविवृताः नतुपारमार्थ्यंपरमार्थत्वमपरमार्थोविवेदमुख्योर्थोभगवांस्तत्संबंधविवक्षयानैवतस्यविधिनिषेधाविषयत्वात्।वि
ज्ञानविवक्षयाअपिमदुक्तएवयाह्योनान्योक्त इत्याह वचोविभूतीरितिअन्यावाचोविभूतयोवचसांबद्धत्वात्पारमार्थ्यमुत्तमपुरुषार्थसाधनज्ञानंसुहित्वप्र
नभवतीत्यर्थः वाचोविज्ञापनंहितदितिश्रुतेः ॥१४॥ कृतइतरीवाचोविभूतयःपुरुषार्थोपियोगिन्योनस्युःइत्यतआह यस्त्वितियत्रयस्तावादित्युत्तमश्लोक
गुणानुवादःसंगीयतेपुत्रप्रस्तामेववाचंशृणुयात्शृणोत्वित्यर्थःअभीक्ष्णमनन्तत्वादनन्त्वादितरावाचोहेयाइत्यर्थः। अन्यावाचोविलुप्तथेतिश्रुतेः १५

ज्ञातकलिदोषपरिहारोपिराज्ञोलोकोपकारायपृच्छति।केनेति।कलेरत्यन्तदोषाद्विधमिष्यन्तिपरिहरिष्यन्तिउपचितान्संवृद्धान्रमदुपाय
क्षरूपंयथायथावत् १६ कालस्यविष्णोर्गतिंगमनप्रकारंच १७ सूचीकटाहन्यायेनयुगधर्मस्वरूपमादौवक्तिकृतइति।तज्जनैःकृतयुगजनैःकेच
त्वारःपादाइत्यत्राहसत्यमितिविभोर्धर्मस्यतेपादाः १८ तत्राश्रमिणांस्वभावमाहसंतुष्टाइति।समदृशःवस्तुयाथार्थ्यज्ञानिनःकरुणामैत्रीतिकरुणाश्च
श्रमिणइत्यनेनभार्याद्यवियोगमाहनित्यगृहस्था इत्यर्थः।तुर्यांशश्चतुर्थांशोदानलक्षणःपादोहीयतेह्रसतिपादहानौप्रतिपक्षमाहअधर्मेति २० त

राजोवाच केनोपायेनभगवन्कलेर्दोषान्कलौजनाः। विधमिष्यंत्युपचितांस्तन्मेब्रूहियथामुने १६ युगानियुगधर्मांश्चमानंप्र
लयकल्पयोः। कालस्येश्वररूपस्यगतिंविष्णोर्महात्मनः १७ श्रीशुकउवाच कृतेप्रवर्त्ततेधर्मश्चतुःपात्तज्जनैर्धृतः। सत्यंदयातपोदानमिति
पादाविभोर्नृप ॥१८॥ संतुष्टाःकरुणामैत्राःशांतादांतास्तितिक्षवः। आत्मारामाःसमदृशःप्रायशःश्रमणाजनाः १९ त्रेतायांधर्मपादानांतुर्यांशो
हीयतेशनैः। अधर्मपादैरनृतहिंसासंतोषविग्रहैः २० तदाक्रियातपोनिष्ठानातिहिंस्रानलंपटाः। त्रैवर्गिकास्त्रयीवृद्धावर्णाब्रह्मोत्तरानृपाः २१
तपःसत्यदयादानेष्वर्धंह्रसतिद्वापरे। हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनोमहाशालाःस्वाध्यायाध्ययनेरताः। आढ्याःकुटुं
बिनोहृष्टाःवर्णाःक्षत्रद्विजोत्तमाः २३ कलौतुधर्महेतूनांपर्यासोधर्महेतुभिः। एधमानैःक्षीयमाणोह्यंतेसोपिविनंक्ष्यति २४ तस्मिंल्लु
ब्धादुराचारानिर्दयाःशुष्कवैरिणः। दुर्भगाभूरितर्षाश्चशूद्रदासोत्तराःप्रजाः २५ ॥ ॥

तत्रेतायांयज्ञादिक्रियातपोनिष्ठाभवंतिनलंपटाःविषयरागिणोनभवंतित्रैवर्गिकाःत्रिवर्गसहिताःत्रयीवृद्धाःवेदविद्यायांविशारदाःत्रैविद्याइत्यर्थः।
ब्रह्मोत्तराब्राह्मणोत्तराः २१ अधर्मलक्षणैःअधर्मस्वरूपपादैःहिंसातुष्ट्यानृतद्वेषैः।हिंसातुष्ट्यनृतलक्षणंद्वेषद्वित्वंयेषांतेनघातैःअसंतुष्टिरनृतम
मतुष्टइतंधर्मस्यतपःसत्यदयादानेषुपादेष्वर्धंह्रसतिअनेनद्वापरेशाद्गोनिरुक्तः २२ महाशालाइत्यनेनयज्ञकर्तारः २३ पर्यासोनिरासःसोपि
सत्यलक्षणोपिधर्मोवा २४ शुष्कवैरिणःनिःप्रयोजनवैरिणः।शूद्रदासोत्तराःप्राधान्येनशूद्राणांदासाः २५ ॥ ॥

भा० द्वा०

६

सत्वादयो गुणा आत्मनि मनसि परिवर्त्तंते पर्यायेण वर्त्तंते २६ कथं तत्राह प्रभवंतीति यदा सत्वं प्रभवति तथा मनआदीनि प्रसन्नानि भवंति लक्षणं तस्मात् ज्ञानइति यस्य दा ज्ञानादिषु रुचिः तदा कृतयुगं तत्कल्पयेत् इत्यत्राह यदीति मनआदि प्रसन्नदेन ज्ञानाद्यभिरुचि निर्णयतइति यस्मात्तस्मादिति २७ देहिनां यदा काम्यं तदिति कामास्तेषु कर्मसु यशसि वा पादनीयमिति त्रिष्विदं विशेषेण भवति तदा बुद्धिमान् रजोवृत्तिं त्रेतेति जानीत ज्ञानात् यदा आत्म

सत्वं रजस्तम इति दृश्यंते पुरुषे गुणाः। कालसंचोदितास्ते वै परिवर्त्तंत आत्मनि २६ प्रभवंति यदा सत्वं मनोबुद्धींद्रियाणि च। तदा कृतयुगं विद्यात् ज्ञाने तपसि यद्रुचिः २७ यदा धर्मार्थकामेषु भक्तिर्यशसि देहिनां। तदा त्रेता रजोवृत्तिरिति जानीत बुद्धिमान् २८ यदा लोभस्त्वसंतोषो मानो दंभोथ मत्सरः। कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः २९ यदा मायानृतं तंद्रा निद्रा हिंसा विषादनं। शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ३० यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः। कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोसतीः ३१ ॥

निलोभादयो दृश्यंते तदा रजस्तमः रजस्तमोगुणवृत्तिपुतं द्वापरं जानात् २९ यदा मायादयो दृश्यंते यत्र सकलिस्तामसस्तमोगुणवृत्तिमादृस्तुपलक्ष्यते। विषादनं विषाणता ३० यस्मात्कलिदोषात्। क्षुद्रदृशः अल्पज्ञानाः लोकोपद्रवकर्मज्ञा नावा वृत्तिहीनाजीवनोपायरहिता असतीः सत्यः ३१

राम

६

दस्यूत्कृष्टाः दस्यूपद्रुताः अण्यहिंसायामिति धातुः ३२ बटवो ब्रह्मचारिणः अव्रताः महाव्रताद्विव्रतहीनाः अग्निकार्यादिव्रतहीना वा ३३ भूर्यपत्याः बहुसंताना: ३४ क्षुद्राः दरिद्राः किराटाः परिणतफलानि पणयिष्यंति विक्रेष्यंति। कूटकारिणः धातुर्वा करणशीलाः वार्त्तां कृषीयादिवैश्यवृत्तिं ३५ अखिलोत्तमं कुलादिनिति शेषः। कौलं कुले विद्यमानं विपन्नं आयदंप्राप्तं त्यक्ष्यंति। अपयस्विनीः क्षीररहिता गाश्च त्यक्ष्यंतीति शेषः ३६ सौर

दस्यूत्कृष्टा जनपदा वेदाः पाषंडदूषिताः। राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ३२ अव्रता बटवोशौचा भिक्षवश्च कुटुंबिनः। तपस्विनो ग्रामवासान्यासिनोत्यर्थलोलुपाः ३३ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः। शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ३४ पणयिष्यंति वै क्षुद्राः किराटाः कूटकारिणः। अनापद्यपि मंस्यंते वार्त्तां साधु जुगुप्सितां ३५ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं। भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनी ३६ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः। श्वशुरश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ३७ शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः। धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं ३८ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः। निरन्ने भूतले राजन्ननावृष्टिभयातुराः ३९ वासोन्नपानशयनव्यवायस्नानभूषणैः। हीनाः पिशाचसंदर्शा भविष्यंति कलौ प्रजाः ४० कलौ काकणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः। त्यक्ष्यंति च प्रियान्प्राणान् हनिष्यंति स्वकानपि ४१ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि। पुत्रं भार्यां च कुलजां क्षुद्राः शिश्नोदरंभराः ४२ कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपादपंकजं। प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाषंडविभिन्नचेतसः ४३ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान्। विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ४४ ॥ ॥

तसुरतमेव विषये सौहृदं येषां ते तथा श्वशुरश्यालाभ्यां सह संमंत्र्य वादो येषां ते तथा ३७ ३९ पिशाचवत्संदर्शो दर्शनं येषां ते तथा ४० विगृह्य विग्रहं कृत्वा काकिणिकेर्थे अत्यल्पधनविषये ४१ ४२ पाषंडशास्त्रेणाद्वैतविषयेण विभिन्नचेतसः व्यामोहितचित्ताः ४३ किं माहात्म्यो यं भगवान्येन तद्यजनं सप्रयोजनं स्यादिति तत्राह। यन्नामधेयमिति विमुक्तं कर्मलक्षणमर्गलतालकीलं यस्य स तथा विध्वस्तकर्मबंधनइत्यर्थः ४४ ॥

केनोपायेनेत्यादिना प्रश्नं परिहर्तुमाह पुंसामित्यादिना द्रव्यदेशात्मसंभवात् द्रव्यदेशस्वभावोत्थान् ।किमपि नावशिष्यते तेनः सर्वमित्युक्तं ४५ चित्तस्थिति
भावेनानासाधनमाह श्रुतः संकीर्तित इत्यादिना अशुभमित्युपलक्षणं प्रथम कर्मभोगाभावे तन्नाशं भगवत्स्मृतिसंपादिता शुभमित्यर्थः ४६ मंदाधिकारिणः स्थित्यर्थं
सदृष्टांतमाह यथेति हेम्नि स्थितो वह्निर्दुर्वर्णमित्यनेन हृद्यं तद्धातुजं गैरिकसमुद्भूतं वा आत्मगतः चित्तगतः अशुभमाशयं पापराशिं पापसं
सत्वमनो वा ४७ विद्यादिनांतःकरणाशुध्याश्रेयः स्यात्किं चित्तस्थेन हरिणेति तत्राह विद्येत्यादिना प्राणनिरोधः प्राणायामः अंतरात्मांतःकरणं

श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा नृणां
ध्वंसां कलिकृता दोषा द्रव्यदेशात्मसंभवान् ।सर्वं हरति चित्तस्थो भगवान्पुरुषोत्तमः ४५
धुनोति भगवान् हृत्स्थो जन्मायुताशुभं ४६ यथा हेम्नि स्थितो वह्निः दुर्वर्णं हंति धातुजं ।एवमात्मगतो विष्णुर्योगिनामशुभाशयं ४७ विद्यातपः
प्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः ।नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते ४८ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु के
शवं म्रियमाणो ह्यवहितः ततो यासि परां गतिं ।म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ।आत्मभावं नयत्यंग सर्वात्मा सर्वसंभवः। कलेर्दोषनि
धे राजन्नस्ति ह्येको महान्गुणः ।कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् ।कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।द्वापरे परिचर्यायां कलौ त
द्धरिकीर्तनात् इति श्रीभागवते महापुराणे द्वादशस्कंधे युगानुवर्णनं नाम तृतीयोध्यायः ॥ ॥

हृदिस्थे सति उपसंहरति तस्मादिति ४९ आत्मभावं आत्मनि भक्तिं नयति प्रापयति ।सर्वस्मादत्र इति सर्वात्मा सर्वस्य संभवो यस्मात्स सर्वसंभवः ५०
कलिः केवलं न दोषाकर एवापि तु गुणाकरोपि भवति श्रीबभोपचितद्रव्यवदित्याह कलेरिति ५१ ध्यानादिव्यवधानसाधनमंतरेण कीर्तनमात्रेण
सारं वंधनिर्मोकः कथमित्याशंक्य तत्तद्युगे शुभगवत्कृतमत्वेन युक्तमित्यभिप्रेत्याह ।कृत इति कृते यत्तत्स्यादित्यर्थः ५२ इति द्वादशे तृतीयोध्यायः
॥

भागवत्कटाक्षेण निरूपितसकल्पप्रलयप्रकारं तत्स्वरूपं भागवतप्रवृत्तिं च कथयत्यस्मिन्नध्याये ।तत्रादौ तु क्रमप्राप्तं वक्तव्यं प्रतिविधत्ते कालइति ।कथितस्य
नीयक्रमे ध्यात्यत्र कल्पलयप्रयोरपि कालाधीनत्वेन तत्स्वरूपश्रवणानंतरं १ यत्र दिने ३ यस्य दिनस्यांते ब्राह्मी ब्रह्मसंबंधिनी यत्र रात्रौ ३ यत्र प्रलये आत्मसा
त्कृत्य आत्मनि निधाय ४ सप्तप्रकृतयः महदहंकारावाकाशादिपंचभूतानि ५ यत्र प्रकृतिप्रलये संघातश्च तु द्विशतितत्वसमुद्रात्मकः ।प्रलयप्रकारमाह इ

श्रीशुक उवाच कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप ।कथितो युगमानं च शृणु कल्पलयावथ १ चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते ।स
कल्पो यत्र मनवश्चतुर्दश विशांपते २ तदंते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता ।त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि ३ एष नैमित्तिकः प्रोक्तः
प्रलयो यत्र विश्वसृक् ।शेतेनंतासनो विश्वमात्मसात्कृत्य चात्मभूः ४ द्विपरार्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः ।तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै
५ एष प्राकृतिको राजन्प्रलयो यत्र लीयते ।अंडकोशस्तु संघातो विघात उपसादिते ६ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ।तदा निरन्ने ह्यन्योन्यं भ
क्ष्यमाणाः क्षुधार्दिताः ।क्षयं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः ७ सामुद्रं दैहिकं भौमं रसं संवर्तको रविः ।रश्मिभिः पिबति घोरैः सर्वं नैव विमुं
चति ।ततः संवर्तको वह्निः संकर्षणमुखोत्थितः ।दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ८ उपर्यधः समंताच्च शिखाभिर्वह्निसूर्ययोः ।दह्यमा
नं विभात्यंडं दग्धगोमयपिंडवत् १० ॥ ॥

द्यात इति विघाते प्रलये उपसादिते आसन्ने इति ६ कलनद्रवण इति धातोः कालेन द्रवणहेतुना ७ सामुद्रं समुद्रस्य विद्यमानं रसं जलं दैहिकं देहस्थवि
द्यमानं रसं रेतो लक्षणं वीर्यं भौमं रसं तिक्तादिलक्षणं ८ सांवर्तकः प्रलयकालीनः ९ सत्वशून्यान् प्राणरहितान् ।भूविवरान् पातालादीन् ९ १० ॥

रजसावृतं खं धूम्रस्य धानं ११ चित्रवर्णानि नीलादि नानाविधानि १२ ब्रह्मांडविवरांतरं ब्रह्मांडविलविशेषं ब्रह्मांडविलोदरं वा एकोदकं उदकात्मकं भवति
१३ पंचभूतगुणलयप्रकारमाह तदेति। उदप्लवे प्रलये १४ नीरसाः आपः १५ तद्रहितं रूपरहितं तेजो वायौ लीयते १६ स वायुः खं विशति नभसः गुण
शब्दगुणलयानंतरं तैजसानींद्रियाणि तैजसाहंकारे लीयंते देवास्तु शेषः वैकारिकाद्वा वैकारिकाहंकारे स्वगुणैः सह १७ तं महांतं अव्याकृतं मूलप्रकृतिः

ततः प्रचंडपवनो वर्षाणामधिकं शतं परः सांवर्तको वाति धूम्रं खं रजसावृतं ११ ततो मेघकुलान्यंग चित्रवर्णान्यनेकशः शतं वर्षाणि वर्षंति न
दंति रभसस्वरैः १२ तत एकोदकं विश्वं ब्रह्मांडविवरांतरं १३ तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लवे। ग्रस्तगंधा तु पृथिवी प्रलयत्वाय कल्पते १४
अपां रसमथो तेजस्ता लीयंतेथ नीरसाः १५ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा लीयते चानिले तेजो वायोः खं ग्रसते गुणं १६ स वै विशति खं रा
जंस्ततश्च नभसो गुणं। शब्दं ग्रसति भूतादिर्नभस्तमनु लीयते। तैजसानींद्रियाण्यंग देवा वैकारिका गुणैः १७ महान्ग्रसत्यहंकारं गुणाः स
त्वादयश्च तं। ग्रसते व्याकृतं बीजं गुणान्कालेन चोदितं १८ न तस्य कालावयवैः परिणामादयो गुणाः। अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययं
१९ न यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयोमी। न प्राणबुद्धींद्रियदेवता वा न संनिवेशः खलु लोककल्पः २० ॥ ॥

कालेन हरिणा चोदितं प्रेरितां सत्वादिगुणान् ग्रसते १८ मूलप्रकृतिस्वरूपं वक्ति न तस्येति। तस्याव्यक्तस्य त्रुटिलवादिकालावयवैः। परिणामाद
यो गुणा न संति। तदव्यक्तं मूलप्रकृतिं विश्वसृष्टेः कारणं आमनंतीति शेषः। इतरविशेषणमुक्तयोः सममित्याशयेनाह अनादीति १९ कालेनेत्युक्तस्य
हरेः स्वरूपं दर्शयति न यत्रेति वाणादयो यत्र कं दनविशेषं नापादयंतीति शेषः २० ॥ ॥

आकाशाद्यन्यतमन्न न भवतीत्याह न खमिति स वाएष आत्मानेति नेतीति श्रुतेः सुषुप्तवच्छून्यवदप्रतर्क्यं सुषुप्तमिव शून्यमिति सुषुप्तिपदेन सुखं लक्ष्य
ते शून्यवच्छब्देन अणुत्वमप्रतर्क्यं तर्कागोचरं भूतं सर्वस्य प्रधानकारणं परमात्मा इति पदं गम्यमित्यर्थः २१ कालाख्य परमात्मस्वरूपमुक्त्वा लयं निर्दि
शति लय इति। परायस्य ब्रह्मलये कालविदुरतः कालेन समाप्तजीवनाव्यक्तयोर्ब्रह्मप्रकृत्योः शक्तयः श्री
ब्रह्माद्यः संप्रलीयंते प्रलयः प्राकृतिको हि नामेति शेषः २२ चराचरे वर्णिष्यमाणां किं तत्राह बुद्धीति। तदा प्रलये आश्रयते नेन चराचरेण त्वा श्रयं
पंचाधारभूतं ज्ञानं नित्यनिर्दोषज्ञानात्मकं ब्रह्म बुद्धींद्रियार्थरूपेण। बुद्ध्याज्ञानात्मिकप्रकाशस्या ज्ञानहेतुत्वेन बुद्धीश इव आयया तत्प्रामुक्त भ्रेणावा च
करणं इंद्रियविषयसोदयाति शयेन भातिऽयो तीरूपेण वर्त्तते। कथंकारं वर्त्तत इति तत्राह। अन्वयव्यतिरेकाभ्यामिति प्रपंचस्य द्य बाधजा वाभ्यां कालाभ्या

न खं नवायुर्न च भूर्न खं जलं भूरनिलोग्निरर्कः सुषुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं परमामनंति २१ लयः प्राकृतिको ह्येष पुरुषा
व्यक्तयोर्यदा। शक्तयः संप्रलीयंते विवशाः कालविद्रुताः॥२२॥ बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं। अन्वयव्यतिरेकाभ्यामाद्यंतवदवस्तुयत्

वर्त्तत इति यद्वा बुद्धींद्रियात्मकाकारेणं बुद्धिमात्मनो वा नित्यादिश्रुते। अनेन संविदेव परितो विराजत इति श्रवांचार्यवचनात् ज्ञातृज्ञेयविवर्जिता
नामिति व्याख्यानं प्रत्युक्तं तदाह ज्ञानस्य पावणा कल्पत्वेन ज्ञेयत्वात् नासदासीदितीत स्वस्तक निषेधाज्ज्ञातादि प्रज्ञाकाकयमत्राह। आद्यंतवदिति यद्व
रीर योग वियोगवत्तद्वस्तुतं तत्प्रपदादावं ते च वर्त्तमानं लक्ष्मादितत्वं तदप्यवस्तुतं चं यदादिनिधनमुक्तं उत्पत्तिनाश वत्तद्वस्तुनो ब्रह्मणो व्यतिरिक्तं न भवति तद्व
स्तुत्वेन तत्र ज्ञानेलीयत इति तस्मात् तदाप्युरंतदुक्तं। जीवविश्लेषभेदश्च देहयोगवियोजने। विश्लोर्ढुः खब्रणित्वादिपराभावस्य येव च। अद्यातं अंचवेदादा
वुक्तवद्वासते विभोः क्वचित्क्वापि ह्वि मोहापरैत्यादीनां दुरात्मनामिति २३ ॥ ॥

भा॰ द्वा॰

९

एतमर्थंसोदाहरणमाहदीपइतिदीपादिकंज्योतिःप्रत्येकंसमस्तंवाकिमंतरेणपृथक्स्यात्तेनप्रकाशकंनभवेत् ।वृष्ट्यादिकमपिमारुतान्पृथक्त्वप्राप्य
दपिपृथक्त्वात्तज्जननशक्तिमत्रवायुभावेगोनमस्त्वेनप्राणेनहीदृष्टतादिक्रूतेः ।किंमुतपरब्रह्मणः ।एतस्माज्जायतेप्राणइत्यात्मएवप्राणोत्पत्तेर्ब्रह्म
णोवाएतानिकरणानीतिश्रुतेः २८ नव्वनेत्यत्रब्रह्माद्यवस्थायामपिनचसत्तेत्युक्तंतर्हिकस्यतद्दतितत्राहबुद्धेरिति ।तुतंज्ञानंधीयतेस्मिन्निनिबुद्धिर्जीवः
तस्यजागरणादिकमुच्यतेह ।सतासोम्यतदासंपन्नोभवतीत्यादिश्रुतेरिति ।अथहैनंतुरुषःस्वपितिनामेतिचा ।अनेनजागरादीनांनिरालंबनतयामिथ्यात्वमप्यासूं ।
ननुसुप्त्याद्यवस्थावद्विश्वादीनामपिनानात्वंसत्यंस्यादितितत्राहमायामात्रमितिप्रत्यगात्मनिस्थितंनानात्वंमायया स्वेच्छयामातंनिर्मितंचात्तंनस्वाभावि
कं एतेनजरामादिरूपाणांमिथोमूलरूपेणभेदोनिरस्तः ।तदुक्तं ।शत्येकांविष्णुरूपाणांभ्रांतिमात्राभिदामता ।जगतश्चैवविश्लोक्यसत्योभेदःसदे
वतुयथाकाशवनौनित्यंभिन्नावेवपरस्परं ।एवमीशोजगच्चैवभिन्नावेवपरस्परामिति १५ नव्वेवंनहिजगद्ब्रह्मणोरभेदोनपारमार्थिकःस्यादित्यत
सोदाहरणंभेदस्यसत्यत्वसमर्थयत्येयथेतिउदयाप्ययोर्मिथोविरुद्धधर्मत्वादंकथमभावः ।इदंविश्वंब्रह्माधारतयासृष्टिसंहारैर्याति गगनघनयोरथा

दीपश्चरूपंचज्योतिषोनपृथग्भवेत् ।एवंधीःखानिमात्राश्चनस्युरस्फुतमात्मनः १४ बुद्धेर्जागरणंस्वप्नंसुषुप्तिरितिहोच्यते ।मायामा
त्रमिदंराजन्नानात्वंप्रत्यगात्मनि १५ यथाजलधराव्योम्निभवंतिनभवंतिच ।ब्रह्मणीदंतथाविश्वमुत्पत्त्युदयाप्यये १६ एतेह्यवयवाः
प्रोक्ताःसर्वावयविनामिह ।विनार्थेनप्रतीयेरन्परस्येवांगतंतवः १७ ॥ ॥

राणधेययथोभेदोयथासत्यस्तथाजगद्ब्रह्मणोरपीति ।एतदप्युक्तंयथाकाशघनावित्यादिना १६ ननुजगद्ब्रह्मणोरिवावयवावयविनामपिभेदः
सन्नेवकिंनस्यात्पटस्यामीतंतवइतितत्प्रतीतेरितितत्राहएतइति ।सर्वेषामवयवनांमहदादीनांयेऽवयवाःप्रोक्ताःखादयःएतेर्थेनविनाभेदव्यवहारमंतरे
णप्रतीयेरन् हियस्मात्तस्मादभिन्नाइतिशेषः ।कथमभेदइत्यत्राहपरस्येतिपटस्यावयवास्तंतवोयथाविनापटेनाभिन्नाइतिप्रयोगःकर्तव्यः ।तंतुपटःघटइदं
मुक्ताःपटइत्याद्यभेदव्यवहारदर्शनात्प्रत्येकंतंतुनाभेदोपिसमुदायरूपेणाभेदइतिप्रकटनायतंतवइतिबहुवचनं ।अतएवावयवावयविनामभेदात्कोयं
शोभेदइतिः ।सोपिभेदोनवाभेदःपृथगेवप्रवर्ततइतिवाक्यमत्रगृह्णीते ।अनेनकार्यकारणादीनांभेदइतिमतमपास्तंपरस्यतंतवइतिप्रयोगःपटस्य
शोत्स्यमितिवन्निःकर्षणार्थः ।सोपिश्रीहरिर्नियतइतिमनुक्तिविरोधः ।अवयवावयविनांनतुकार्यकारणवत्तु ।एकएवनियंतासोहरिर्नारायणःपरइ
तिवाक्यादवगंतव्यः २७

राम

९

नन्वेवंदेवयविनिसत्यवयवनाशेवत्यापितद्भेदःस्यात्तत्राहयदितियावद्द्रव्यभावित्वसामान्यमिसुच्यते ।अपावद्द्रव्यभाविविशेषइतितत्रयदुक्तंनशावयवासि
त्वमिसुपलभ्येत ।सामान्यावयववत् ।सबुद्धेर्धर्मःकृतःअन्योन्याश्रयाद्विश्लेषात् ।तस्मादाद्यंतवदवस्थेव ।यद्वाह्रस्वमहदीमांशानांवाआद्यंशिनात्सामान्यविशेषश
क्तिदर्शनात्कथमभेदःसंगच्छतइतितत्राहयदितिअन्योन्याश्रयात्अन्योन्याभेदविषयप्रमाणात् ।अत्रराजनमोहाद्भिक्तत्वेनाद्यंतवत्वाद्वक्तुंसर्वमविद्यमानमेव
॥२८॥ यथादयव्यवयवादीनांअभेदोदुरवबोधःएवंपदार्थानामनंतत्वात्स्वरूपभेदोपिपरमात्मानमंतरेणदुर्ज्ञेयइत्याशयेनाहपिकारइतिविनिषिद्धेषयथा
वदुत्पतःपृथक्कारेणनानाविधोभेदःप्रत्यगात्मानंसाक्षीभूतंश्रीनारायणमंतरेणएदरल्पोपिनिरूप्योनास्तिसएवनिरूपयितुंशक्यः ।नासत्वान्नेत्याहख्यायमान
इति ।प्रतीयमानस्यासत्वंस्तुरुपितंप्रमाणविरोधादित्यपिशाद्यः २९ नन्वेकस्यप्रातिभानंहुक्तंतकात्रविशिष्यतइतिवन्निर्धारणायोगइतितत्राहनहीतियद्यपि

यत्सामान्यविशेषाभ्यांमुपलभ्येतसंभ्रमः ।अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तुवत् २८ विकारःख्यायमानोपिप्रत्यगात्मानमंतरा ।ननिरूप्योस्त्यणुरपि
स्याच्चेत्सममात्मनः २९ नहिसत्यस्यनानात्वमविद्वान्यदिमन्यते ।नानात्वंछिद्रयोर्यद्वज्ज्योतिषोर्वातयोरपि ३० ॥ ॥

द्वाच्चस्वरूपाणांनानात्वंमन्यतेतर्ह्यपिसत्यस्यब्रह्मणोरूपाणांनानात्वंसत्यंनभवतिअविद्वन्मतत्वात्ननुपुरुषाह्यस्यहरयःशताद्दशेतिश्रुतेःकथंसत्यं
नेत्यत्राहनानात्वमितिनेत्युवर्तते ।छिद्रयोर्वाद्यंतछ्राकाशयोःयद्वद्यथानानात्वंनास्ति एकएवमहाकाशोघटेजायमानेबहिरंतश्चेतिद्वित्वसंख्यासुपैति
उत्पद्यमानोनीलिमाकारोप्याकाशोद्वित्वमेति ।तत्रप्राउक्तोदूरेमितिमान्तःपश्चादुक्तोजीवानामित्यर्थविशेषोहिशब्दःनोपात्तः ।उक्तंचामहाकाशोबहिस्तस्य
घटाद्यंतस्थएवयद्वैधामसुदितोन्योच्चह्वावाकाशोप्रकीर्तितो ।घटरूपस्यह्रस्वस्यमहाकाशात्परोलघुः ।महाकाशवदेवात्रपरमात्मासनातनः ।घटांत
स्थमहाकाशप्रतिमोंतर्गतोविभुः ।घटस्थांतर्गताकाशोमहाकाशात्परोमतः ।तद्वद्देवादयःसर्वेदिवाप्सुरसुपयोनिनः ।तमोगाश्चैवयेसर्वेघटरूपस्ववत्तरा
इतिज्योतिषोरथिदैवाध्यात्मसंज्ञयोःसहस्रेचाश्राद्दित्यस्परणयअग्रासुराडिषानताइतिश्रुतेर्वातयोर्वातप्राणसंज्ञयोरभिदैवमथाध्यात्ममितिश्रुतेश्च
अत्रापिविशेषःपूर्ववदवगंतव्य इति ३० ॥ ॥

मा०द्वा०

१०

बहुत्वसंख्यावाचिन्याऽर्कते: किंविनिगमकमत्राह । यथेति । बहुधाकटककुंडलाद्यात्मनाहेममनानासंज्ञाविषयं समीपतेतथाभगवानपि देवोनरोवराहः श्रुतत्वे कटककुंडलाद्यात्मनाहेमनानासंज्ञाविषयंसमीपतेतथा ॥ एवं वाच्यत्वं वाचकत्वेनाप्यत एकात्मपतइति ३१ हरेस्तत्वस्वरूपंनिरूप्यसंसारप्रकारमाह । यथेति । अर्कशब्देनात्रअ
ऊष्मा: पीतोऽर्कद्योतिहदीर्घोमहानिति द्विविधाकारेणव्याख्यायते प्रकाशपतइति ३१ हरेस्तत्वस्वरूपंनिरूप्यसंसारप्रकारमाह । यथेति । अर्कशब्देनात्रअ
वायवउच्यंते । तेजःसंबंधेनधूमतपलक्षतेऽर्कप्रभवः धूमतेजोजलमरुद्यः प्रभवउत्पत्तिः यस्यसतथाऽर्केणानभसिदर्शितःसूर्यप्रकाशेनत्येवद्दश्यतेन
यथायथाघनःसूर्यदर्शनघातिबंधकःअर्णोवाऽर्क इति स्फुतेः । यथाकाशस्यचक्षुषस्तमः सूर्यदर्शनेप्रतिबंधकंआदित्यस्यत्वार्ध्वत्वाविष्णीआवि शादितिष्कतेः
एवमेवाहंकारोब्रह्माणेस्वगुणोऽस्मुख्यन्तदीक्षितःतेनप्रकाशितः । ब्रह्मांशकस्यजीवस्यपाशेस्यविष्णुभूतानीतिष्कतेः । ब्रह्मणोभिन्नांशास्यात्मनोजीवस्य
त्मनोजीवस्यात्मानंप्रतिज्ञानंवध्नाती त्यात्मवंधनः । आत्मादेहेष्टतोजीवइत्यादोयादवप्रकाशेनमतोऽप्रयुक्तत्वात ब्रह्मावेदहंब्रह्मास्मीतिष्कतेः ब्रह्मणः

यथाहिरण्यंबहुधासमीपतेहृभिःक्रियाभिर्व्यवहारवर्त्मसु । एवंवचोभिर्भगवानधोक्षजोव्याख्यायतेवैदिकलौकिकैर्जनैः ३१ यथाघनोर्कप्र
भवोर्कदर्शितोह्यर्कांशभूतस्यचचक्षुषस्तमः । एवंत्वहंब्रह्मगुणस्तदीक्षितोब्रह्मांशकस्यात्मनआत्मबंधनः ३२ घनोयदार्कप्रभवोविदीर्यतेच
क्षुःस्वरूपंपरमीक्षतेयदा । तदाह्यहंकारउपाधिरात्मनोजिज्ञासयानश्यतितर्ह्यनुस्मरेत ३३ यदैवमेतेनविवेकहेतिनामायामयाहंकरण
त्मबंधनं । छित्त्वाच्युतात्मानुभवोऽवतिष्ठतेतमाहुरात्यंतिकमंगविप्लवं ३४ ॥ ॥

विशेषभूतइतिवा ३१ यदाघनोऽर्कप्रभवात्तीव्रयासूर्यप्रभयाविदीर्यतेनष्टोभवतितदासूर्यात्पंचक्षुःस्वरूपंस्वविंवरविमीक्षतेपत्यायदाजीवस्या
त्मनः परमात्मनोदर्शनेउपाधिनिमित्तभूतोहंकारोजिज्ञासयापरमात्मोपासनयातथानश्यतितर्हिसदाजीवः परंपरमात्मानमनुस्मरेत्तत्र अनुस्मरणे
समर्थोभवतीत्यन्वयः । हिशब्देनभिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाइत्यादीदंवाक्यमयाहि ३३ असंप्रज्ञातसमाधिस्थलक्षणमाहयदेति एवमुक्तवि
धयोऽनंतयेतयाविवेकहेतिनानिशितज्ञानायुधेनमायामयाहंकारणात्मबंधनंभगवदिच्छानिर्मितलिंगशरीरलक्षणमहंकारजनितसंसारसेतुंछित्त्वा
अच्युतात्मानुभवः नित्यमुक्तपरमात्मापरोक्षदर्शनेनासंप्रज्ञातसमाधिस्थोनिर्मुक्तलिंगशरीराभिमानोवतिष्ठतेएतमंगआत्यंतिकंसंप्रवंप्रलय
माहुः । असंप्रज्ञातसमाधिस्थावस्थायानामतरमिदं ३४ ॥ ॥

राम

१०

दृष्टानीदृशं दिनजन्मलयावाहनित्यदेति दिनेदिनेब्रह्मादीनांसर्वभूतानामुत्पत्तिलयोऽस्त्वित्येके सूक्ष्मज्ञावदंतीत्यनेनान्वयः ३५ चेतनानांनिर्विकारत्वेनज
न्मादिप्रभवात्कथमुच्यतेनित्यदाजन्माद्यस्तीति तत्राह कालेतिकालस्रोतोजवेनकालनदीप्रवाहवेगेनाक्षिप्यंक्षियमाणस्यनीयमानस्यदेहस्य ३६
प्रतिदिनजीवस्योर्वीरकविकारवत्यादिमाणाद्यवस्था: किं नस्युरितितत्राहअनाद्यंतवतेतिआकाशेज्योतिषांनक्षत्राणां यथाछितेर्चयोनास्तियाचे

नित्यदासर्वभूतानांब्रह्मादीनांपरंतप । उत्पत्तिप्रलयावेकेसूक्ष्मज्ञाःसंप्रचक्षते ३५ कालस्रोतोजवेनाशुह्रियमाणस्यनित्यदा । परि
णामावस्थास्तास्तजन्मप्रलयहेतवः ३६ अनाद्यंतवतानेनकालेनेश्वरमूर्तिना । अवस्थानैवदृश्यंतेवियतिज्योतिषामिव ३७ नित्योनै
मित्तिकश्चैवतथा[illegible]तिकोलयः । आत्यंतिकश्चकथितःकालस्यगतिरीदृशी ३८ एताःकुरुश्रेष्ठजगद्विधातुर्नारायणस्याखिलसत्वधा
म्नः । लीलाकथास्तेकथिताःसमासतःकार्त्स्न्येननाजोऽप्यभिधातुमीशः ३९ ॥ ॥

नस्योतिशेषः ३७ उक्तमुपसंहरतिनित्यइत्यादिना । कालस्यकालांतर्यामिणोहरेर्गतिश्छितिरीदृशीदुरवबोधेति ३८ परमप्रमेयमुपसंहरतिए
ताइतियत्रोक्ताःक्षितितलोद्धरणाद्यविष्टकोटीतनुमित्याद्याःकथाएताःजगद्विधातत्वंचतमुखस्याङ्गीतिअतोखिलसत्वधामइतिसत्वगर्भस्य
दरंभरत्वमित्यतोनारायणस्येतिसत्वोस्त्रीजेतुपुत्रीवदतिपादयः । विस्तरतःकथनंकिंनस्यादितितत्राह कार्त्स्न्येनेति । अजोब्रह्मा ३९ ॥

कथाकथनप्रयोजनमाह संसारेति द्वाभ्याम् ४० कथारसनिषेवणाय भागवतपुराणमेव मुख्यसाधनमित्यभिप्रेत्य तस्यापि मूलत्वज्ञापनाय मूलं दर्शयति पुराणेति ४१ संहितां वेदसंहितात्वज्ञापनाय वेदसंमितामिति ४२ ४३ अस्या विषयमाह अत्रेति। कुतोऽस्या इतरेभ्यः श्रैष्ठ्यं येनादरेणाद्यास्या इति तो वाह अत्रेति विश्वात्मत्वेन ब्रह्मादयोऽन्यतमः किं न स्यादित्यत आह यस्येति। अनेनात्माऽयं पुत्रनामा सीदिति वाक्यशासात् तदात्मशंकापि दूरीकृतेति ४४ ननु जातस्तोऽहमिति बुद्धेर्विक्रियापाः कथं चेतनस्य परिणामाद्यवस्थाभावरत्याशी क्यापि इवलोकनस्यायेन तस्याविकारित्वमाह त्वं चेति मरिष्येति संपिभावेन

संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य। लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ४०
पुराणसंहितामेतामृषिर्नारायणोऽव्ययः। नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ४१ स वै मह्यं महाराज भगवान्बादरायणः। इमां भागवतीं प्रीतः संहितां वेदसंमिताम् ४२ एतां वक्ष्यत्यसौ सूत नृषिभ्यो नैमिषालये। दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ४३ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः। यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ४४ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि। न जातः प्रागभूतोऽद्य देहवत्त्वं न नंक्ष्यसि ४५ न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान्। बीजाङ्कुरवद्देहादेर्व्यतिरिक्तो यथानलः ४६ ॥ ॥

घटादिनाशवेलक्षण्यं देहवियोगस्य दर्शयति। वेलक्षण्यमेव दर्शयति नेति। न जायते म्रियते वा कदाचित्पादेः देहवदित्येतस्यत्वेकमभिसंबध्य तेनेति च। त्वं देहवत्तमजातः। तर्हि प्रागसन्नेत्याह प्रागिति देहवत्प्रागभूतो नुत्यन्न अद्य देहवन्न परिणमसि ४५ देहान्तरवन्न भविष्यसि पुत्रपौत्रादिरूपवान् भूत्वा त्वं देहवन्नवं स्यसि कथमिव पुत्रादिरूपवानिति तत्राह। बीजेति बीजांकुरपरंपरा यथा तथा। कस्मान्नाशाभावस्तिति तत्राह देहादेरिति। हेतुगर्भं विशेषणं अत्रापि निदर्शनं यथानल इति दार्वादेरिति शेषः पुत्रादिरूपत्वेन भेदोऽपि प्रास इत्यतो वाह यथा बीजपरंपरायां भेदः प्रमितः तथात्र न इति शेषः प्रावत ४६ ॥

भिर्यस्यसतथा।चलमुदरंयस्यसतथा।श्वासैजद्वलिसंविग्ननिम्ननाभिश्चचलोदरश्चसतथातं २४ धयंतंपिबंतं २५ अद्भुतभावेनाश्चर्यलीलावेष्टयाशं
कितः २६ सभार्गवः।मार्कंडेयः तावत्तः पूर्वमेवश्वसितेनांतर्गछता शिशोरंतः शरीरंमशकोयथातथाविशदित्यन्वयः।तत्रोदरांतरेविन्यस्तमदोविश्वं

श्वासेजलदकव्रातमिश्रश्रीकर्णदाडिमं।विद्रुमाधरभासेषच्छोणायितसुधास्मितं २३ पद्मगर्भारुणापांगंहृद्यहासावलोकनं।श्वासैज
द्वलिसंविग्ननिम्ननाभिचलोदरं २४ चार्वंगुलिभ्यांपाणिभ्यामुन्नीयचरणांबुजं।मुखेनिधायविप्रेंद्रोधयंतंवीक्ष्यविस्मितः २५ तद्दर्शनाद्वीत
परिश्रमोमुदाप्रोत्फुल्लहृत्पद्मविलोचनांबुजः।प्रहृष्टरोमाद्भुतभावशंकितःप्रष्टुंपुरस्तंप्रससारबालकं २६ तावच्छिशोर्वैश्वसितेनभार्ग
वःसोंऽतःशरीरंमशकोयथाविशत्।तत्राप्यदोन्यस्तमचष्टकृत्स्नशोयथापुरामुह्यदतीवविस्मितः २७ खंरोदसीभगणानद्रिसागरान्द्वी
पान्सवर्षान्ककुभःसुरासुरान्।वनानिदेशान्सरितःपुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः २८ महांतिभूतान्यथभौतिकान्यसौकालंचना
नायुगकल्पकल्पनं।यत्किंचिदन्यद्व्यवहारकारणंददर्शविश्वंसदिवावभासितं २९ ॥ ॥

कृत्स्नशोऽचष्टदृष्टवान्दृष्ट्वाचपुरायथावद्धिर्विस्मितोमुह्यत्तथामुह्यदित्यन्वयः।अत्रमोहोनामाश्चर्यबुद्धिरेवनत्वन्यथाज्ञानंतथात्वेप्राचीनाचीर्ण
पुण्यराशेर्वैयर्थ्यापत्तेरिति २७ विश्वंविशिनष्टिखंरोदसीत्यादिना।आश्रमवर्णवृत्तयोपास्ताश्च २८ महांतिभूतानिपंचभूतानिनानायुगा
कल्पानांकल्पनंयेनसतथातंकालंचअन्यद्यत्किंचिद्व्यवहारकारणंज्ञानोपादानादिसमर्थं।तद्द्राक्षीत्।सद्विवासत्त्वेनयथार्थत्वेनैवावभासि
तंप्रकाशितंनमिथ्याभूतत्वेन २९

पुनःकिमभूदत्राहविश्वमिति।श्वसतःशिशोःश्वासेनबहिर्निरस्तोऽत्रुतःजलमध्येन्यपतत् ३० तस्यशिशोःप्रेमसुधायाःप्रेमामृताद्भुतास्मितस्तहिते
नापांगनिरीक्षणेननिरीक्षितोऽभूदित्यन्वयः ३१ ३२ अनीशेनासमर्थेननिर्मिताईहामायाल्लक्षणावेशायथानिक्षिप्तमंतर्दधातितद्ध्येयस्यांतर्धानशेष्यार्थंनि
दर्शनमिदंतुमिथ्यात्वे ३४ अंतर्हितंभगवंतमनुलोकसंप्लवोयस्मात्तत्रयातितिरोधायितितिरोहितमभूत् ३५ इतिद्वादशोध्यायः मार्कंडेयःपुनःकिं

हिमालयंपुष्पवहांचतांनदींनिजाश्रमंयत्रऋषीअपश्यत।विश्वंविपश्यन्श्वसिताच्छिशोर्वैबहिर्निरस्तोन्यपतल्लयाब्धौ ३० तस्मिन्पृथिव्याः
ककुदिप्ररूढंवटंचतत्पर्णपुटेशयानं।तोकंचतत्प्रेमसुधास्मितेननिरीक्षितोऽपांगनिरीक्षणेन ३१ अथतंबालकंवीक्ष्यनेत्राभ्यांधिष्ठितंहृदि।
अभ्ययादतिसंक्लिष्टःपरिष्वक्तुमधोक्षजं ३२ तावत्सभगवान्साक्षाद्योगाधीशोगुहाशयः।अंतर्दधऋषेःसद्योयथेहानीशनिर्मिता ३३
तमन्वथवटोब्रह्मन्सलिलेलोकसंप्लवः।तिरोधायिक्षणादस्यस्वाश्रमेपूर्ववत्स्थितः ३४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेमार्कंडेयो
पाख्यानेभगवन्मायादर्शनंनामाष्टमोध्यायः सूतउवाच सएवमनुभूयेदंनारायणविनिर्मितं।वैभवंयोगमायायास्तमेवशरणंययौ
१ ऋषिरुवाच प्रपन्नोस्म्यंघ्रिमूलंतेप्रपन्नाभयदंहरे।यन्माययापिविबुधामुह्यंतिज्ञानकातराः २ ॥ ॥

किमकार्षीदित्यपेक्षायामेतांहरेर्भक्तिंसमुद्रेककरीतिहार्दंशौनकादीनांचोद्यंपरिहरतिसएवमिति।यःसर्ववस्त्वात्मनेस्थितःस्वः।योगमाया
अणिमादिविभूतेः।वैभवंव्याप्तिंस्वरूपशक्तेःप्रभावंवा १ यस्यहरेर्माययामोहनशक्त्याविबुधाअज्ञानकातराइतिपदद्वयेनान्योन्यविरुद्धेन
मायाशब्दोव्याख्यातइतिज्ञातव्यं २ ॥ ॥

निभृतात्मानं पूर्णामनसं दूरादेव निनिरांष्ठत मनसं वा। दिवि व्योम्नि ३ ४ निभृतोदनुदूर्णएव वातपापेवर्ष कालोत्रभी एणं व्रातो व्रतसमूहो पस्यसनथा।
पूर्वविशेषणार्थहेतु एषां। अस्य मुने ५ तुद्ग प्रति यत्कि। नैवेति। मोक्षमपिनेच्छति किमुतान्या आशिषः। तत्र हेतु माह। भक्तिमिति ६ यद्यप्येवं तथापि
वक्ष्यं वचनं गोरवाघृतिष्या मह इत्याशपेनाह। अथापीति। हेम वानि। एतेन साधुना मुनिना सह संकथनेन किं प्रयोजनमत्राह। अयंहीति। साधूनां समाग
मः संगतिं ७ समुपेयाय। संप्राप। अपंसाधारणोभगवान्न किंतु वेदसिद्ध एवेत्याशयेनाह। ईशान इति। अनेन श्रीहरिज्ञानमपि तद्वशत्वं सुलवल्प्या

तमित्थं निभृतात्मानं वृषेण दिवि पर्यटन्। रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ३ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत।
सूत उवाच
पश्येमं भगवन्विप्रं निभृतात्मेन्द्रियाशयं ४ निभृतोदझषव्रातो वातापाये यथार्णवः। कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ५ श्रीभ
गवानुवाच नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत। भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ६ अथापि संवदिष्यामो भवान्येतेन सा
धुना। अयं हि परमो लाभो नृणां साधुसमागमः ७ इत्युक्त्वा तमुपेयाय भगवान्स सतां गतिः। ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां ८
तयोरागमनं साक्षादीशयोर्जगदात्मनोः। न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ९ भगवांस्तदभिज्ञाय गिरिशो योगमायया। आविशत्त
द्गुहाकाशं वायुश्छिद्रमिवेश्वरः १० आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरं। त्र्यक्षमष्टभुजं शंभुमुद्यंतमिव भास्करं ११ ॥ ॥

हित्सूक्तं भवति। तत्कुत इत्यत आह। ईश्वर इति। श्रोत्रादीन्द्रियवतां जीवानां शिवाधीनत्वेन तत्तदिन्द्रियसाध्यस्य ज्ञानस्यापि तत्प्रसादायत्तत्वं सूक्तं ८ तदा
मुनिना किमकारीति तत्राह तयोरिति। अहंकाररूपेण जगदात्मनोरिति। अज्ञाने किं कारणमत्राह। रुद्धेति। धीवृत्तिर्यस्य कलादीन्द्रियवृत्तेर्निरोधेन वेदि
परोधो युक्त इति रुद्धधीवृत्तिरित्युक्तं। आत्मानं विश्वं पुरोवर्त्तिसर्वं ९ योगमायया। अणिमादियोगसामर्थ्येन छिद्रं रोमकूपादिसुषिरं १० आत्म
निस्थितमपि ११ ॥

इत्युक्तं धनुरथ असिश्चर्म वता निति तैर्युक्तं। करेरमनुक्तं अणतरं तु मवधार्य चर्मपिनद्धमुखं डमरुवाद्यं १२ व्यचष्ट अपश्यत् १३ स्तवमयासोमार्वदेदि
त्यादेः १५ येन त्वया १६ सत्त्वाय पराक्रमसमुक्ताय। सद्ब्रह्म शरणं वा तिगच्छतीति सत्त्वस्तस्मै। प्रमृडाय प्रकृष्टपालाय तद्रक्षा येषां तान्सत्त्वगुणाद्यधि
सत्त्वादिगुणप्रवर्त्तकत्वात्सत्त्वायरजोजुष इत्युक्तं १७ ८ त्रयो ब्रह्मादयो येषां त्र्याणां दर्शनममोघं तत्र हेतुमाह मर्त्य इति। मर्त्योऽमृतं मुक्तिं विंदते यद्य
स्माद्दर्शनात् येभ्यो यतं वा। ब्राह्मणभक्तिं दर्शयति। ब्राह्मणा इति। ब्राह्मणा ब्रह्मवादेकनिष्ठाः साधवो रागादिदोषविधुराः शांता भगवन्निष्ठापारंगताः। अते

व्याघ्रचर्मांबरं शूलधनुरिष्वसिचर्मभिः। अक्षमालां डमरुकं कपालं परशुं सह १२ बिभ्राणं सहसा भांतं व्यचष्ट हृदि विस्मितः। किमिदं कुत एवेति
समाधेर्विरतो मुनिः १३ नेत्रे उन्मील्य ददृशे सगणं सोमयागतं। रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः १४ तस्मै सपर्यां व्यदधात्सगणाय स
होमया। स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः १५ आह त्वात्मानुभावेन पूर्णकामस्य ते विभो। करवाम किमीशान येनेदं निर्वृतं जगत् [illegible]
नमः शिवाय शांताय सत्त्वाय प्रमृडाय च। रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे १७ सूत उवाच एवं स्तुतः स भगवानादिदेव [illegible]
तिः। परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत १८ श्रीमहादेव उवाच वरं वृणीष्व नः कामं वरदेशा वयं त्रयः। अमोघं दर्शनं येषां मर्त्यो य[illegible]
ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः। एकांतभक्ता अस्मासु निर्वैराः समदर्शिनः २० सलोका लोकपालास्तान्वंदंत्य[illegible]
[illegible] ब्रह्मा स्वयं च हरिरीश्वरः २१ ॥ ॥

एवम्भूतेषु सज्जनेषु वत्सलाः। त्रिधा एकांतेन विष्णुरेव सर्वोत्तमो नान्य इति निर्णयेनास्मासु भक्ताः योग्यता निर्वैरेणाद्वेष्टृत्वात् समं ब्रह्म तद्दर्शनं ये
षां तेतथा २० य एवंविधास्तान्वंदंतीत्यादि सपर्यां कुर्वंतीत्यर्थः। अहं च ब्रह्मा च हरिः स्वयं हरेः पृथक्त्वं तत्रैव न तदधीनावेवा तत्र हेतुरीश्वर इति
ईलक्ष्मी तद्रूपा ... तान्वदंत्यघोघरा। ईशादीशानाद्वा वर इति स्मात्तस्मात्तद्योर्वर इत्युक्तं। पूर्वपक्षे इत्यतो वाह अहमिति। स्वयमित्यनेन हरेरेव स्वातंत्र्यं
नाववोधावात्तस्मीनादितिस्पष्टमुक्तं। अत्राप्ययमेव हेतुरीश्वर इति। ईशएैश्वर्य इति धातो रत्न पदेनैश्वर्यवत्त्वादीश्वर इत्युच्यते २१ ॥

इतोपि ब्राह्मणा एव पूज्या यत एवं विधं तत्वं एव जानंतीत्याह नेति तेषां सर्वाणामपि स्थितत्वान्नमपीत्युच्यमाने हरावजेच स्थितत्वादज शब्द वाच्येवष्टथक्त्वस्थि तेऽमुतेच भिदा मरवपिपरमाणुमात्रमपिनचक्षुतेन पश्यंति। किंचज्जनस्यजननवतः स्थावरजंगमरूपस्य प्रपंचस्यात्मनोंतर्यामिणः आभिदां नपश्य ते अस्मुतेच भिदा मरवपि परमाणुमात्रमपि न चक्षुतेन पश्यंति। किंचित्तनिर्विशेषं ज्ञानं नीमहिबुध्या महे। पद्मामपिभिदा मन्यथाज्ञानविष्णुरपि किंचित्सं तो अपि शब्दे नैको देव इति शक्ति प्रमाणायति। तत्रह्मा दुयंयुक्या नविले: प्रत्यनीमहि बुध्या महे। पद्मापिभिदा मन्यथा ज्ञानविष्णुरपितिकिंचित्स त्रापि शाब्दे नैको देव इति शक्तिप्रमाणायति। तत्र ब्रह्मा दुयं युक्यानविलेः प्रत्यनीमहि ज्ञातिशक्तित्वेन जगत्संहर्तृत्वेन ततोनंतानंतशब्दीनत्वेनैव मनंतं पश्यंति च तु मुखे यथा स्थि त्येनापि न पश्यंत्यपि तु ततोचिन्महत एत्वेन तत्कटाज्ञा हितशक्तित्वेन जगत्संहर्तृत्वेन ततो नंतानंत शब्दीनत्वे नैव मनंतं पश्यंति चतुर्मुखे यथा स्थि

नतेमय्यच्युतेजे च भिदामण्वपि चक्षते। नात्मनश्च जनस्यापि तद्युष्मान्वयमीमहि २२ नह्यम्मयानि तीर्थानि न देवाश्चेतना मया:। ते पुनंत्यु रुकालेन यूयं दर्शनमात्रतः २३ ब्राह्मणेभ्यो नमस्यामो येस्मद्रूपं त्रयीमयं। बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः २४ श्रवणाद्दर्शना द्वापि महापातकिनोपि वः। शुध्येरन्नंत्यजाश्चापि किमु संभाषणादिभिः २५ ॥ ॥

तं पश्यंति। अच्युतेच तथा यथा कथंचिदिति। आत्मनश्चेतन मनुदामस्य जनस्य तदिति जनो देहस्तदादिजइत्यापि न त्वंयथा तथा अन्यथा न पश्यंति २२ सर्वस्मान्छुद्धिहेतुत्वाच्च ब्राह्मणा एव पूज्या इत्याह नहीति २३ अस्माभिश्च संभाव्य त्वाद्विप्रा एव श्रेयांस इत्याह। ब्राह्मणेभ्य इति। वयो मंत्रं वेद २१ सर्वस्माच्छुद्धिहेतुत्वाच्च ब्राह्मणा एव पूज्या इत्याह नहीति २३ अस्मामि श्रसंभाव्यत्वाद्विप्रा एव श्रेयांस इत्याह। ब्राह्मणेभ्य इति। वयो मंत्रं वेद मुख्यप्रतिपाद्यं आत्मनि सम्यगाधानमव स्थानं सविधानलक्षणं यस्य तत्तथा। आचारहीनं न पुनंति वेदा इत्यतस्तपइत्यादि २४ न केवलं दर्श नाच्छुद्धिरपितु श्रवणादपीति समुच्चित्याह। श्रवणादिति। तर्हि अधिकशुद्धिः कस्मादिति तत्राह। किमिति। आदिपदेन नामस्मरणं गृह्यते २५

वंदूललामस्य चंद्रस्येव रस्य धर्मगुह्योपबृंहितं धर्मरहस्य युक्तं अमृतायनं अमृतवद्दुर्लभमानं कर्णयोरितिं २६ भ्रामितः समन्मादेः संचालितः अत एव कं शितिः अनेन संयमिनां समाधेरन्यत्सुखं नास्तीति ज्ञापितं २७ इयं वा सतज्जनाणा वेशाद्दर्शितव्यानि भवंद्विर्नियम्यानि त्वन्हुकलाति इति ज्ञावेतियद्यस्मात्तस्मात् २८ मुनिः स्वयमेव स्ववनादेरभिप्रायं वक्ति धर्ममिति। न केवलं देहिनां धर्मस्य प्रवक्तारश्चाचरंति च। आचरतो नुमोदते। क्रियमाणं धर्मं कुर्वंति च २९ ननु विधिवद्विनानां भवतां धर्मांचारणादिना तेजः ख्यातिः स्यादित्यत आह नेति। इति कृत्यं य संदर्भ इति विवचनात्स्वमायामयशक्तिभिः स्वेच्छया कृतानि निर्यतां तेतथा स्वसंवादिभिर्विर्हिते

सूत उवाच इति वै श्रुतलामस्य धर्मगुह्योपबृंहितं। वचोमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् २६ स चिरं मापयाविष्णोः भ्रामितः कशितो भृशं। शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् २७ ऋषिरुवाच अहो ईश्वरस्येहितं दुर्विभाव्यं शरीरिणां। यन्नमंतीशितव्यानि स्तुवंति जगदी श्वराः २८ धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनां। आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च। २९ नैतावता भगवतः स्वमायामयवृत्तिभिः। न दुष्ये द्वानुभावस्तैर्मायिनः कुहकं यथा ३० सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः। गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ३१

३० प्रकारांतरे नैतावता कर्मणा भगवतोनुभावः प्रभावो न प्रदुष्येत प्रदुष्टोन भवति। कुहकेरिंद्रजाल व्यापारैर्मायिनोनुभावं निश्चयो यथा तथेति ३० प्रकारांतरे णादोषाभावं वक्ति सृष्ट्वेति। यो भगवान्मनसा स्वेच्छया इदं विश्वं सृष्ट्वांतर्यामि रूपेणांतः प्रविश्य दर्शनादिकं कुर्वद्भिर्गुणैरिंद्रियैरर्हं कर्तैव निरहंकारी वर्जीवद्वा भातीत्येतावता जीववत्दुष्टो न भवति कथमिव। स्वप्नदृग्यथा स्वप्नदृष्टा पुरुषः स्वापकाले मनसैव देहांतरं सृष्ट्वा तेन प्रविश्य तद्गुणैः कर्तेव भाति तथा ३१

भा०द्वा०

तस्मै भगवते नम इत्यन्वयः। त्रयः सत्वादयो गुणा यस्य स तथा तस्मै। गुणित्वं दोषत्वेन व्याप्तं दृष्ट्वा तत्राह केवलायेति। निर्दोषाय। निर्दोषत्वं मुक्तस्याप्यस्तीति तत्राह
अद्वितीयायेति। मुक्तनिर्दोषत्वं हरिप्रसादायत्तं न हरेस्तथा तस्य समाधिकशून्यत्वात्। कथमयमर्थः सिध्यत इत्यत्राह गुरवे इति। ब्रह्मादीनामात्मतत्वस्योपदेष्टृत्वे
न गुरुत्वात्तेषां सिद्ध इत्यर्थः। निराकारस्योपदेष्टृत्वं कथं घटत इतीत्यत्राह ब्रह्मेति। ज्ञानादिगुणाकाराय। हृद्गतो ह्यखिलगुणाईति श्रुतावच्छिन्नेतिवचनात्सका
रः सिद्ध इति ३१ यत एवं निरूप्यमाणे हरेरधिकः समो वा नास्ति सर्वप्रेष्ठश्चातस्तद्भक्तिमतेरेणात्वत्परमन्यं कं वरं वृणे। वरं वरेण्यं दर्शनं ज्ञानं यस्य स तथा तस्मात्।

२९

तस्मै नमो भगवते त्रिगुणाय गुणात्मने। केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ३२ कं वृणे नु परं भूमन् वरं त्वद्वरदर्शनात्। यद्दर्शनात्पूर्णकामः स
त्यकामः पुमान्भवेत् ३३ वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात्। भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ३४ सूत उवाच इत्यर्चितोऽभिष्टु
तश्च मुनिना सूक्तया गिरा। तमाह भगवाञ्छर्वः शर्वया चाभिनन्दितः ३५ कामो महर्षे सर्वोऽयं भक्तिमांस्त्वमधोक्षजे। आकल्पान्ताद्यशः पुण्यमजराम
रता तथा ३६ ज्ञानं त्रैकालिकं ब्रह्मन्विज्ञानं च विरक्तिमत्। ब्रह्मवर्चस्विता भूयात्पुराणाचार्यतास्तु ते ३७ ॥ ॥

एतदेवाह। यद्दर्शनादिति। यस्य तव दर्शनाद्येनोपदिष्टज्ञानाद्वा। पुमान्पूर्णकामः स्यात् अत एव सत्यकामश्च ३३ मद्दर्शनात्पूर्णकामस्त्वं वरं वृणीष्वेति म
द्वचनं व्यर्थं मा भूदिति मां प्रीणयन्नाह। वरमिति। यद्यपि वरो न प्रार्थनीयस्तथापि त्वद्वचनसाफल्यायैतं वरं वृणे। पूर्णात्कामाभिवर्षणात्त्वदिति शेषः। कोऽन्यो वर इति
तत्राह भवतीति। तत्परेषु तद्भक्तेषु तद्भक्तश्रेष्ठे त्वयि च ३४ शर्वया पार्वत्या सह ३५ त्वं चाधोक्षजे भक्तिमान्भूया इति शेषः। आकल्पान्तं पुण्यं यशो जराम
रता च भूयान्नवेति शेषः ३६ किंच वरान्तरं च स्यादित्याह। ज्ञानमिति ३७ ॥ ॥

राम

२९

अमुना मार्कण्डेयेन ३८ अवाप्तमहायोगमहिमा प्राप्तमहाज्ञानमहिमा। प्राप्तमहाणिमादियोगमहिमा वा एकान्ततां नियतभक्तितां ३९ ज्ञानवते मार्क
ण्डेयस्याप्येतदद्भुतं हरेर्मायावैभवं तेनानुवर्णितमेतच्छृण्वन्मध्ये केचिदविद्वांस आत्मनो हरेर्मायाप्रसृतिं सामर्थ्यविस्तारं कादाचित्कं प्रचक्षते तेऽप्यकालेऽपदं। इति ते
न कादाचित्कस्यादन्याह। अनादीति। अनादिकालवर्तितं नः इतन्तं। यद्वोपसंहरति अनुवर्णितमिति। मार्कण्डेयस्य तच्चरितं तेन वर्णितं। किं तच्चरितमत्राह। अनु
भूतमिति। अद्भुतत्वेन तमेव माहात्म्यमेतदिति ४० इतोऽप्येतत्कुण्डे पमितिफलमाह। य इति। अनुभावेन भावितं संवर्धितं। तयोरुभयोः श्रावयितृश्रोत्रोः कर्माशयो संसृतिः

सूत उवाच एवं वरान्स मुनये दत्त्वागात्त्र्यक्ष ईश्वरः। देव्यै तत्कर्म कथयन्ननुभूतं पुरामुना ३८ सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः। विच
रत्यधुनाप्यद्धा हरावेकान्ततां गतः ३९ अनुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः। अनुभूतं भगवतो मायावैभवमद्भुतम् ४० एतत्केचिदविद्वांसो मायासं
सृतिमात्मनः। अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ४० य एवमेतद्भृगुवर्य वर्णितं रथाङ्गपाणेरनुभावभावितम्। संश्रावयेत्संशृणुयादु तावुभौ
तयोर्न कर्माशयसंसृतिर्भवेत् ४१ इति श्रीभागवते महापुराणे द्वादशस्कन्धे मार्कण्डेयोपाख्याने आशिषं वादे नवमोऽध्यायः शौनक उवाच
अथेममर्थं पृच्छामो भवन्तं बहुवित्तमम्। समस्ततन्त्रराद्धान्ते भवान्भागवततत्त्ववित् ॥ १ ॥ ॥

कर्मणामाशयः स्यान्नदेहस्तन्निमित्तं संसारो न भवेदिति स्वरूपनाश एवोच्यते। अस्य श्रीहरिभक्तिमुख्यहेतुरुतेप्स्युतां भक्तिमित्याह ४१ इति द्वादशेन व
मः ॐ स्थूलमतीनामुपासनार्थं विभुषरूपस्य हरेर्यजनप्रकारं वदत्यस्मिन्नध्याये तत्र तद्बुभुत्सया शौनकः पृच्छति। अथेति। बुद्धिसन्निहितत्वादिममिति सू
क्ते समस्ततन्त्रराद्धान्ते सर्वेषां च तन्त्राणां पञ्चरात्रादीनां स्रोत्रोक्तसिद्धान्ते तत्र यद्भागवतं भगवद्विषयं तत्त्वं तद्वेत्तीति १ ॥ ॥

भा०द्वा०

३०

तांत्रिकाः श्रीनारायणपूजाविधायकशास्त्रप्रवर्तकाः श्रियः पतेः परमात्मनो यो यो निरूपणप्रकारः पाञ्चरात्रादिसंज्ञो वैष्णव इति बोद्धव्यं परिचर्या पूजा यां येषुर्थे आद्रियतीयाद्विपदार्थेषु कल्पितरूपेषु
तांत्रिकाः श्रीनारायणपूजाविधायकशास्त्रप्रवर्तकाः श्रियः पतेः परमात्मनः अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथा कल्पमाभरणं १ तत्रपदार्थान्। क्रियायोगं पूजालक्षणं वृत्तांतं ज्ञातुकामा नंक्रियानैपुणेन क्रियापटुत्वेन अमर्त्यता मरणाय
गोपांगायुधाकल्पं कल्पयंत्याकल्पमाभरणं १ तत्रपदार्थात्। क्रियायोगं पूजालक्षणं बुभुत्सतां ज्ञातुकामानां क्रियानैपुणेन क्रियापटुत्वेन अमर्त्यतां मरण
हित्यं मुक्तां ब्रूयं २ वेदागमतंत्राभ्यां वेदाख्यागमेन तंत्रशास्त्रलक्षणेन शास्त्रेण च। पद्मजादिभिराचार्यैः प्रतिपादिता या स्ता विभूतीः ४ मायाप्रकृतिः आदिश

तांत्रिकाः परिचर्यायां केशवस्य श्रियः पतेः। अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथैव यैः १ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सतां येन क्रियानैपु
ण्येन मर्त्यो यायादमर्त्यतां ३ सूत उवाच नमस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि। या वेदागमतंत्राभ्यामाचार्यैः पद्मजादिभिः ४ मायाद्यैर्नवभि
स्तत्वैः सविकारैरयं विराट्। निर्मितो दृश्यते यस्मिन्सचित्के भुवनत्रयं ५ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः। नाभिः सूर्योऽक्षिणी नासे वायुः क
र्णौ दिशः प्रभोः ६ प्रजापतिः प्रजननमपानो मृत्युरीशितुः। तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ यमः ७ लज्जोत्तरोऽधरो लोभो द्युतिर्ज्योत्स्ना स्म
यो भ्रमः। रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्धजाः ८ ॥ ॥

द्येन महदहंकारमनांसि पंच भूतानि च दृष्टव्यते। विकाराः इंद्रियादयः। विराट् ब्रह्मांडं सचित्के चेतनसहिते यस्मिन्ब्रह्मांडे भुवनत्रयं दृश्यते ५ एतद्ब्रह्मांडं
पौरुषं रूपं पुरुषसंनिधानयोग्यप्रतिमारूपं यैः रागादिकं कल्पयंति ताना ह। भूरित्यत्र विवरणं पूर्ववदृष्टव्यं ६ प्रजापतिरिंद्रः प्रजननमुपस्थं ७ उत्तरोष्ठो
लज्जा अधरोष्ठो लोभः द्युतिः स्वरूपकांतिः ज्योत्स्ना स्मयो भ्रांतिः स्मयोदर्पविशेषः ८ ॥ ॥

राम

३०

सोयं पुरुषः ब्रह्मांडाख्यलोकसंस्थया यावानयं पुरुषो यावत्या संस्थया मितः परिमितः सोऽसौ महापुरुषस्वरूपं तस्य पुरुषो महान्वान पिता वाङ् तावत्परिमाणोपेतः ९ उपांग
न्याह कोस्तुभेति। अजो विष्णुः स्वात्मज्योतिः ज्योतिःस्वरूपः। यद्वा स्वाधीनब्रह्माख्यज्योतिः श्रीरित्यध्याहार्यः। साक्षात् श्रीस्तस्याः श्रीवत्सस्तत्प्रभा व्यापिनी तितस्
भाव्यापिनी तिताहृदयश्रीवत्समुरसा बिभर्ति १० स्वां मायां प्रियंनानावर्णगुणमयी। छंदोमयं वेदस्वरूपं। त्रिवृत् त्रिवर्णात्मकं स्वरं प्रणवलक्षणं। ब्रह्मसूत्रं

यावानयं वै पुरुषो यावत्या संस्थया मितः। तावानसावपि महापुरुषो लोकसंस्थया ९ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः। त
त्प्रभाव्यापिनी साक्षात् श्रीवत्समुरसा विभुः १० स्वमायां वनमालाख्यां नानागुणमयीं दधत्। वासश्छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ११
बिभर्ति सांख्ययोगं च देवो मकरकुंडले। मौलिं पदं पारमेष्ठ्यं सर्वलोकनमस्कृतं १२ अव्याकृतमनंताख्यमासनं यदधिष्ठितः। धर्मज्ञानादि
भिर्युक्तं सत्वं पद्ममिहोच्यते १३ ओजःसहोबलयुतं मुख्यतत्वं गदां दधत्। अपां तत्वं दरवरं तेजस्तत्वं सुदर्शनं १४ नभोनिभं नभस्तत्वमसिं
चर्म तमोमयं। कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं १५ ॥ ॥

दधत् ११ सांख्यं ज्ञानं योगं कर्म एतद्रूपाख्ये मकरकुंडले पारमेष्ठ्यं परं स्थानं मौलिं किरीटं १२ यदधिष्ठितमासनं पीठं तदनंताख्यमव्याकृतं विकार
रहितं सत्वं सत्वगुणाभिमानिनी श्रीः पद्मं १३ मुख्यतत्वं मुख्यप्राणरूपं गदां दधत् १४ नभोनिभमाकाशवन्नीलवर्णं नभस्तत्वमाकाशस्वरूपमसिं
नंदकं तमोमयं तमोगुणावरणाच्छादनकरं चर्म दधत्। पुण्यकर्मस्वरूपेषुधिं १५ ॥ ॥

अस्य हरेः स्पर्शनमाकृतिः पृथिवी अस्याभिव्यक्तिः स्थानं तन्मात्राणि शब्दादीनि इंद्रियार्थाः कर्मेन्द्रियविषयाः क्रियामताः विसर्गादीनि कर्माणि ज्ञातव्यानि १६ देवयजनं हरेः पूजास्थानं चक्राब्जादिकमंडलं। आत्मनः परमात्मनः प्रकाशात्संस्कारः शरीरशुद्धिः दीक्षादीक्षमाहुः देहशुद्धिः भगवतः परिचर्यात्मनः १६ देवयजनं हरेः पूजास्थानं चक्राब्जादिकमंडलं। आत्मनः परमात्मनः प्रकाशात्संस्कारः ... परिचर्या ... स्य दुरितक्षपः पापनाशनी १७ भगवान्भूत्यः। भगशब्दात्मा भगशब्दस्वरूप ऐश्वर्यादिगुणस्वरूप इत्यर्थः। धर्मयशः अत्र स्वेच्छामरव्यजने १८ निजधामतदेर

इंद्रियाणि शराणक्रूराकृतिरस्य स्पर्शनं। तन्मात्राण्यस्याभिव्यक्तिरिंद्रियार्था क्रियामताः १६ मंडलं देवयजनं दीक्षासंस्कार आत्मनः। परिचर्या भगवता आत्मनो दुरितक्षयः १७ भगवान्भगशब्दात्मा लीलाकमलमुद्वहन्। धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् १८ आतपत्रं तु वैकुंठं निजधामाकुतोभयं। त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं १९ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः। विष्वक्सेनस्तंत्रमूर्तिर्विदितः पार्षदाधिपः २० नंदादयोऽष्टौ द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः। वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं। अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहोऽभिधीयते २१

कुंठं तदभिमानिदेवता आतपत्रं त्रिवृत् त्रिविधो वेदः सुपर्णाख्यो यज्ञं पुरुषं यज्ञपुरुषं वहति १९ साक्षादनपायिनी नित्ययोगिनी श्रीः हरेरात्मभूतार्थ देहनाम विष्वक्सेनः पार्षदाधिपो विदितः तंत्रमूर्तिः तंत्रग्रंथाभिमानी २० अष्टौ नंदादयो द्वाःस्थाः हरेरणिमाद्या गुणास्तदाश्रिताः मूर्तिव्यूह इत्यस्य विवरणं वासुदेवः संकर्षणः प्रद्युम्नोऽनिरुद्ध इति पुरुषः स्वयमभिधीयते २१ ॥ ॥

स भगवानेव विश्वादिशब्दवाच्य इति भाष्यते अर्थेंद्रियाशयज्ञानैः वृत्तिभिः अर्थज्ञानलक्षणवृत्त्या जाग्रदवस्थया विश्वः। मनआदींद्रियगतवासनालक्षणज्ञानवृत्त्या स्वप्नावस्थया तैजसः। आशयः सुषुप्तिस्तदवस्थाज्ञानलक्षणवृत्त्या प्रवर्तमानः प्राज्ञः एतावंतं कालं सुखमस्वाप्समित्यनुभवात्। किमेतेभिन्ना इत्यत्राह तदिति। ततो व्याप्तोऽपरिच्छिन्न इत्यर्थः। वक्तृत्वसंख्यामात्रयोगित्वं न तु मिथोभिन्नत्वं २२ अंगादिकथनस्योपयोगमाह। अंगेति अंगा

स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः। अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते ततः २२
अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं। बिभर्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः २३

हिशब्दवाच्यं वासुदेवाद्याः वरांगैः भगवान् स इत्येतदर्थत्वेन कथनमित्यर्थः। अंगादिचतुष्टयस्यापि हरिरेवाधार इत्याह तदिति। चतुर्मूर्तिर्भगवान्। गादिचतुष्टयं बिभर्ति तत्रायं विभागः। अंगात्मका वासुदेवाद्याः स्वयमुपांगादिषु ब्रह्मादिषु सन्ति इति तेन पूजाकाले तथा स्मरणार्थमित्युक्तं। भगवाँ हरिरिति। हरिरपि पुरंदरादस्य तमः किं न स्यादित्यत उक्तमीश्वर इति। सोऽपि सदाशिवः स्यादत उक्तं चतुर्मूर्तिरिति। सोऽष्टमूर्तिरिति प्रसिद्धः २३ ॥

भा॰ द्वा॰

३१

यद्देशंतद्देवाच पुत्रपक्षूपेणोच्यतेतस्मादिदंमुमुक्षुभिः श्रद्धयोपास्यमितिशौनकद्वयेनाह। द्विजऋषभेति। हेद्विजऋषभ तात्पर्येसद्भुक्तैः आत्मलभ्यः आत्म
निमनसिलभ्यः सकाश्योभवति। यद्वात्मनेवशात्मयद्दैशेवनभ्यः प्राप्यः। यत्नेवैषवृणुतेतेनलभ्यइतिश्रुतेः। किंलक्षणकः कोपंपुरुषइतितत्राह मायये
ति। स्वयामाययास्वेच्छयेवसृजतीत्याद्याख्यया निरुक्तःकथ्यतेसृजतीतिब्रह्मा। हरतीतिहरः पातीतिपाता। स्रष्टापातातथैवात्ता निखिलस्यैकएवचेत्यादेः
तत्र किंप्रमाणंतत्राह ब्रह्मेति ब्रह्मवेदादिशब्दराशियेनिर्जीविकारणंयस्यसतथावेदादिशब्दराशिरस्मिन्नर्थेमानमित्यर्थः। चतुर्मुखस्यापिसृष्ट्यादि
कर्तृत्वस्यप्रमितत्वात्कथंहरेरेवेतिनिश्चीयतेब्रह्मादेवानांप्रथमःसंबभूवेतिश्रुतेरित्यतोवाह ब्रह्मेति। ब्रह्मणश्चतुर्मुखस्यपयोनिःकारणं यो ब्रह्मा

द्विजऋषभसएषब्रह्मयोनिःस्वयंदृक्स्वमहिमपरिपूर्णोमाययाचस्वयैतत्। सृजतिहरतिपातीत्याख्ययानावृताक्षोविवृतइवनिरु
क्तस्तत्परैरात्मलभ्यः २४ श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य। गोविंदगोपवनिताव्रजभृत्यगीततीर्थश्र
वःश्रवणमंगलपाहिभृत्यान् २५ यइदंकल्यउत्थायमहापुरुषलक्षणं। तच्चित्तःप्रयतोजप्त्वाब्रह्मवेदगुहाशयं २६ इतिद्वादशेदशमो
ध्यायः

णंविदधातीतिश्रुतेः। लोकवत्परोयंदेशेनकर्मणिनप्रवर्त्तते। किंतुस्वरूपज्ञानेनेत्याशयेनाहस्वयंदृगिति स्वयंभूतज्ञानत्वेपिकर्मपरापेक्षाविनापू
र्णंविदधातीतिश्रुतेः। ... त्राहस्वमहिम्नेति। स्वेमहिम्नीतिश्रुतेः। स्वयंप्रकाशमानस्यप्रद्योतनस्यमेघाद्यावरणेनवहरेर्ज्ञानस्यापितस्यादित्यत्राह अनावृताक्षइतिश्रौ
तंदृष्टमत्राहस्वमहिमेति। स्वेमहिम्नीतिश्रुतेः। स्वयंप्रकाशमानस्यप्रद्योतनस्यमेघाद्यावरणेनवहरेर्ज्ञानस्यापितस्यादित्यत्राह अनावृताक्षइतिश्रौ
चरणरहितदृष्टिः। कथंप्रकाश्यतइत्यत्राह विवृतइति। स्वशायमित्युपासमानस्यविविधंसृजतइतिप्रकाशतेसंहर्त्तायमितिज्ञानवतःसंहरतीवरक्षती
वइतरस्यानुपलक्षणमेतत्। यान्यान्युपसंहृत्योपास्तेतत्रदुराववेनप्रकाशतइति २४ श्रीकृष्णकृष्णेत्युक्तार्थः २५ एवमुपासितुंकुर्वतःफलमा
हयइदमितिकल्येउषसिमहापुरुषलक्षणंजपतिसतस्याहृदयगुहायांशेतइतिहृदयगुहाशयंब्रह्मजानातीति। कुशेशयमितिवत् २६ द्वादशे
दशमः ॥

ए

३२

सर्वोपास्यत्वेप्यादित्यस्थस्यैवहरेर्हृदयेविशेषतउपास्तिःकर्त्तव्येतितत्स्थितिप्रकारंकथयत्यस्मिन्नध्याये। तत्रशौनकःपृच्छति। शुकइति शुकोभगवा
न्विष्णुरातायपृष्टवद्राममरूपादिमप्रकारगणोमासिमासिनानामानंसूर्यभगवंतनिषेवमाणः सौरेसूर्यस्यविद्यमानेस्यंदनेरथेनानावसतितथाअन्येचऋषयो
गंधर्वाअप्सरसोनागाइत्यादिपंचमस्कंधेयदाह १ तदातेषांपृथक्नामानिपृथक्कर्माणिवानुक्तान्यतःश्रद्धधानानांनोस्माकंतानिब्रूहीत्यन्वयः। सूर्यात्मनः
सूर्यांतर्यामिणोहरेर्व्यूहंस्थितिविशेषंचवदासूर्यात्मनोहरेःपरितःस्थितंतेषांव्यूहंपृथक्पृथगितिशेषइतिवा २ अयंकल्पोहरेर्बुद्धिपूर्वंप्रणीतत्वाद्वावि
द्याभूतइतिभावेनाह। अनादीति। लोकंतंत्रयतिव्यापारयतीतिलोकतंत्रोलोकप्रवृत्तिहेतुरयंसूर्यादिःलोकेषुपरितोवर्त्तते। उदयादिनिमित्तव्यापारायउ

शौनकउवाच शुकोयदाहभगवान्विष्णुरातायपृच्छते। सौरोगणोमासिमासिनानावसतिसप्तकः १ तेषांनामानिकर्माणिनियुक्तानामधीश्वरैः।
ब्रूहिनःश्रद्दधानानांव्यूहंसूर्यात्मनोहरेः २ सूतउवाच अनाद्यविद्ययाविष्णोरात्मनःसर्वदेहिनां। निर्मितोलोकतंत्रोयंलोकेषुपरिवर्त्तते
३ एकएवहिलोकानांसूर्यआत्मादिकृद्धरिः। सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ४ ॥ ॥

दयादिकंगच्छतीत्यर्थः। कीदृशःसर्वदेहिनामात्मनोविष्णोःअनाद्यविद्ययाकारणशून्येच्छयानिर्मितःसूर्याचंद्रमसौधातायथापूर्वमकल्पयदितिश्रु
तेः ३ सरतीतिसूर्य्यइतिसूरिशाप्यत्वात्सूर्यइतितच्छब्दप्रवृत्तिनिमित्तस्यतदेकाधीनत्वान्मुख्यकर्त्ताहरिःएकएवेत्याह। एकएवेति। लोकानामुभयेषामा
त्मास्वयंआत्मानगतस्तस्युषश्चेतिश्रुतेः। दिनस्यादिकृत्। कृतिश्छेदनइतिधातोर्दिनादिच्छित्त्वस्सकर्त्ताच। प्रातरुद्यन्त्संध्यामुपासीतेतिश्रुतेः।
सर्ववेदोक्तक्रियामूलमतएवऋषिभिर्बहुधोदितऊदितंइतिपाठेतस्यरूपंनानात्वेनकथितं। अत्रद्वादशसूर्येष्वेकःस्वयंहरिरन्यत्रांतर्यामित्वेनेतिविशेषः

नानात्वमुपपादयति कालइति। अजयामायया नवधाविद्ययानवधोक्तः कालादिषु स्थितत्वात्कर्मकारकत्वेन कालादिशब्दवाच्यत्वेन करणमिन्द्रियं कार्यं देहः इ
त्यंवर्गादिभूतपंचकं वा। आगमोवेदादिशास्त्रं फलं सुखादि ५ एकएव हरिः सर्वप्रेरयतीत्युक्तं तत्प्रकारं दर्शयति मध्वादिष्विति कालरूपधृक्भगवाल्लो
कतंत्रायलोकव्यापाराय मध्वादिषु चैत्रादिषु द्वादशसुमासेषु द्वादशभिर्गुणैर्द्वादशविधकालगुणैः पृथक्पृथक्चरतीत्यर्थः ६ तानेवाह धाता
तेत्यादिना। धातासूर्यः। कृतस्थलीअप्सराः। हेतीराक्षसः। वासुकिर्नागः। रथकृद्यक्षः। पुलस्त्यः ऋषिः। तुंबुरुर्गंधर्वः। अमीधाताद्यो मधुमासं नयंति। तद्वन्ने

कालो देशः क्रियाकर्त्ताकरणं कार्य्यमागमः। द्रव्यं फलमिति ब्रह्मन्नवधोक्तोजयाहरिः ५ मध्वादिषु द्वादशसु भगवान्कालरूपधृक् लोकतंत्रा
य चरति पृथग्द्वादशभिर्गणैः ६ धाताकृतस्थली हेतिः वासुकी रथकृन्मुने। पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ७ अर्यमापुलहोथौजाः प्र
हेतिः पुंजिकस्थली। नारदः कच्छनीरश्च नयंत्येते स्ममाधवं ८ मित्रोत्रिः पौरुषेयोथ तक्षकोमेनका हहाः। रथस्वनइतिह्येते शुक्रमासं नयंत्यमी ९
वसिष्ठोवरुणोरंभा सहजन्यस्तथाहुहूः। शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी १० इंद्रोविश्वावसुः श्रोता एलापत्रस्तथांगिराः। प्रम्लोचाराक्षसः
सूर्यो नभोमासं नयंत्यमी ११ ॥ ॥

क्रियाप्रवर्त्तकत्वेन तन्मासमभिप्रापयंति ७ अर्यमासूर्यः। पुलहः ऋषिः। अथौजाः यक्षः। प्रहेतिराक्षसः। पुंजिकस्थली अप्सराः। नारदोगंधर्वः। कच्छनीरोनागः
एते माधवमासं प्रापयंति। माधवनामानं नयंति। शरणं प्राप्योपासते एवमुत्तरत्राप्यनुसंधेयं ८ मित्रः सूर्यः। अत्रिः ऋषिः। पौरुषेयोराक्षसः। तक्षकोनागः। मेनकाप्सरा
हाहाः गंधर्वः। रथस्वनयक्षः ९ वसिष्ठऋषिः। वरुणः सूर्यः। रंभाप्सराः। सहजन्योराक्षसः। हूहूर्गंधर्वः। शुक्रोनागः। चित्रस्वनयक्षः १० इंद्रः सूर्यः
विश्वावसुर्गंधर्वः। श्रोता यक्षः। एलापत्रोनागः। अंगिराऋषिः। प्रम्लोचाप्सराः। वर्य्यनामाराक्षसः ११ ॥ ॥

विवस्वानादित्यः। उग्रसेनोगंधर्वः। व्याघ्रोराक्षसः। आसारणोयक्षः। भृगुर्ऋषिः। अनुम्लोचाप्सराः। शंखपालोनागः १२ पूषा आदित्यः। धनंजयोनागः। वातोराक्ष
सः। सुषेणस्तथा। सुरुचिर्गंधर्वः। घृताच्यप्सराः। गौतमऋषिः १३ ऋतुरप्सराः। वर्चागंधर्वः। भरद्वाजऋषिः। पर्जन्यः आदित्यः। सेनजिद्यक्षः। विश्वोराक्षसः।
ऐरावतोनागः १४ अंशुरादित्यः। कश्यपऋषिः। तार्क्ष्योयक्षः। ऋतसेनोगंधर्वः। उर्वशीअप्सराः। विद्युच्छत्रुः राक्षसः। महाशंखोनागः १५ भगआदित्यः। स्फू

विवस्वानुग्रसेनश्च व्याघ्रआसारणोभृगुः। अनुम्लोचा शंखपालो नभस्याख्यं नयंत्यमी १२ पूषाधनंजयोवातः सुषेणः सुरुचिस्तथा। घृताची
गौतमश्चेति तपोमासं नयंत्यमी १३ ऋतुर्वर्चाभरद्वाजः पर्जन्यः सेनजित्तथा। विश्वऐरावतश्चैव तपस्याख्यं नयंत्यमी १४ अथांशुः कश्यपस्ता
र्क्ष्य ऋतसेनस्तथोर्वशी। विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी १५ भगस्फूर्जोरिष्टनेमिरूर्णआयुश्च पंचमः। कर्कोटकः पूर्वचित्तिः सहस्या
ख्यं नयंत्यमी १६ त्वष्टाऋचीकतनयः कंबलश्च तिलोत्तमा। ब्रह्मरातोथ शतजित् धृतराष्ट्र इषंभराः १७ विष्णुरश्वतरोरंभा सूर्यवर्चाश्च सत्यजित्।
विश्वामित्रमखापेत ऊर्जमासं नयंत्यमी १८ एताभगवतोविष्णोरादित्यस्य विभूतयः। स्मरतां संध्ययोर्नृणां हरंत्यंहो दिनेदिने १९ ॥

र्जोराक्षसः। अरिष्टनेमिर्ऋषिः। ऊर्णोगंधर्वः। आयुर्यक्षः। कर्कोटकोनागः। पूर्वचित्तिरप्सरसः १६ त्वष्टात्रमा अप्सराः। ब्रह्मरातऋषिः। शतजिद्यक्षः। धृत
राष्ट्रोगंधर्वः। इषंभराः राक्षसः। इषमासमयणेनाद्रत्यर्थः १७ विष्णुरादित्यः। अश्वतरोनागः। रंभाप्सराः। सूर्यवर्चागंधर्वः। सत्यजिद्यक्षः। मख
राक्षसः। विश्वामित्रऋषिः १८ नुपसंहरन्नेवतत्कथनप्रयोजनमाह। एताइति। आदित्यांतर्यामिणोहरेः ध्येयः सदासवितृमंडलमध्यवर्त्तीइतिवच
नमत्रप्रमाणं १९ ॥ ॥

एतदभिप्रेत्य पुनरपि लोकद्वयोपयोग्यफलमाह । द्वादशस्विति । द्वादशस्विति । द्वादशसु मासेषु षड्भिर्गणैरर्यम्णादीन्नामेनैव संख्याया सुपालितैः सह समेता
रविर्देवोऽस्मत्सेवकस्येह परत्र लोके च सन्मतिं निर्दुःखानंदानुभवलक्षणां तनुते यथायोग्यं विस्तारयतीत्यर्थः २० इदानीं तेषां कर्माण्याह । सामेति । सा
मर्ग्यजुर्भिस्तल्लिंगैस्तल्लक्षणैस्तन्नत्वगायकेषर्षिनर्तकं च दधति । सन्नह्यंति योजयंति । यातुधानाः नैर्ऋता राक्षसाः २१ एवंगणानामंतरेणान्येपि

द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै । चरन्समंतात्तनुते परत्रेह च सन्मतिं २० सामर्ग्यजुर्भिस्तल्लिंगैरृषयः संस्तुवंत्यमुं । गंधर्वास्तं प्रगा
यंति नृत्यंत्यप्सरसोऽग्रतः २१ उन्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः । चोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः २२ वालखिल्याः सहस्राणि ष
ष्टिर्ब्रह्मर्षयोऽमलाः । पुरतोऽभिमुखं यांति स्तुवंतः स्तुतिभिर्विभुं २३ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः । २४ कल्पे कल्पे स्वमात्मानं व्यूह्य लो
कानवत्यजः २४ इति श्रीभागवते महापुराणे द्वादशस्कंधे [illegible] नामैकादशोऽध्यायः सूत उवाच न
मो धर्माय महते नमः कृष्णाय वेधसे । ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् १ एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं । भवद्भिर्यदहं
पृष्टो नराणां पुरुषोचितं २ ॥ ॥

संतीत्याह । वालिखिल्या इति २२ अध्यायार्थमुपसंहरति । एवमिति । अवति आवर्तयति २४ द्वादशे एकादशः उपसंहारमुखेनानु
संधानं द्वादशस्कंधात्मकभागवतार्थं संक्षिप्य कथयत्यस्मिन्नध्याये । एतद्व इत्यादिना । एतद्विष्णोश्चरितं । तद्वक्तव्यत्वे हेतुमाह । भवद्भिरिति । प्रश्नेऽतिवि
स्मितं सूचयति नराणामिति । नराणां मध्ये सतां पुरुषाणां मध्ये योग्यं नु उचितं । अनाधिकारसामर्थ्यं सूचितं २ ॥ ॥

श्रीतव्यार्थसंग्रहं तदेवमाह अत्रेति । अत्र श्रीभागवते । कस्मान्मुख्यत्वमत्राह । सर्वेति । हृत्वादिसर्वपापहरं तत्त्वमिदं स्याप्यस्मिंस्तत उक्तं । नारायण इति । नारायणं संकी
र्तितं नारायण इत्यो हृषीकेश इति । हृषीकाणामीशो जीवोपि स्यात् तत्राह । भगवानिति । ऐश्वर्यादिगुणसमुद्रो हि भगवान् एवंविधो नान्य इत्याह सात्व
तांपतिरिति ३ सगुणमेवोक्तं निर्गुणमत्र तत्त्वं इत्याह ब्रह्मेति । जगतः प्रभवाप्ययकृत् ब्रह्म गुह्यं ब्रह्म ततोक्तं तद्विषयज्ञानं सतामुपाख्यानं येन तत्तथा । भ
क्तिराश्रयो यस्य तत्तदाश्रयं । अत्र चेयेत व्यतिवाक्यमनुसंधातव्यं ४ योगधारणया अखंडस्मरणलक्षणया नारदादयो नारदब्रह्मणोः अवताराणाम

अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः । नारायणो हृषीकेशो भगवान्सात्वतांपतिः १ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं । ज्ञानं च तदुपाख्या
नेप्रोक्तं विज्ञानसंयुतं ३ भक्तियोगश्च व्याख्यातो वैराग्यं च तदाश्रयं । पारीक्षितमुपाख्यानं नारदाख्यानमेव च ४ प्रायोपवेशो राजर्षेर्विप्रशापात्प
रीक्षितः । शुकस्य ब्रह्मर्षभस्य संवादश्च परीक्षितः ५ योगधारणयोत्क्रांतिः संवादो नारदाजयोः । अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः ६ ।
विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः । पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ७ ततः प्राकृतिकः सर्गः सप्त वैकृतिका[illegible]ह्मांडसं
भूतिर्वैराजः पुरुषो यतः ८ कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः । भुव उद्धरणेंऽभोधेर्हिरण्याक्षवधो यतः ९ [illegible]विकस्य
इस्तथैव च । अर्धनारीनरस्याथ यथा स्वायंभुवो मनुः १० शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा । संतानो धर्म[illegible]जापतेः ११
अवतारो भगवतः कपिलस्य महात्मनः । देवहूत्याश्च संवादः कपिलेन च धीमता १२ ॥ ॥

नुगीतं कथनं । प्राधानिकः प्रकृतिसर्गः । स सृष्टतत्त्वविशेषः ६ । ७ । प्राकृतिकः प्रकृतिविकृततः । ते सप्त महदहंकारः पंच भूतानि तिवेकृतिकाः इंद्रियविषया
यतो यत्र ब्रह्मांडे ८ पद्मसमुद्भवो नाभेरिति शेषः । अंभोधेर्भुव उद्धरणं उद्धार ९ ऊर्ध्वतिर्यगधःसर्गः देवतिर्यगसुरसृष्टिः । अर्धनारीनरस्य ब्रह्मणः
सकाशात् स्वायंभुवो मनुर्यथोत्पन्नस्तथा १० या स्त्रीणां मध्ये आद्या प्रकृतिः स्त्री सा शतरूपा च यथोत्पन्ना तथा ११ १२

भा० द्वा० नवब्रह्मसमुत्पत्तिः नवप्रजापतीनां सकाशात्सृष्टिस्तेषामुत्पत्तिर्वा १३ १५ यतः संततेर्देवासुरनराश्चासन् १६ मन्वन्तरानुचरितं मन्वन्तरराजानुचरितं तारोपाख्या

३५

नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं। ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः १३ नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः। नाभेस्ततोनुचरितं ऋषभस्य भ
रतस्य च। द्वीपवर्षसमुद्राणां गिरिनद्युपवर्णनं १४ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः १५ यतो देवासु
रनरास्तिर्यङ्नगखगादयः। त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः १६ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः। मन्वन्तरानुचरितं गजेन्द्रस्य विमोक्षणं १७
मन्वन्तरावताराश्च विष्णोर्हयशिरादयः। कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पतेः १८ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां। देवासुरमहायुद्धं राजवंशानु
कीर्तनं २० इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः। इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च २१ सूर्यवंशानुकथनं शशादाद्या नृपादयः। सौकन्य
मथ शार्यातं ककुत्स्थस्य च धीमतः २२ खट्वाङ्गस्य च मांधातुः सौभरेः सगरस्य च। कौशलेन्द्रस्य चरितमद्भुतं किल्विषापहं २३ निमेरंगपरित्यागो जनका
नां च संभवः। रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः २४ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च। दौष्यन्तेर्भरतस्यापि शंतनोस्तत्सुतस्य च २५ ययाते
र्ज्येष्ठपुत्रस्य यदोर्वंशोनुकीर्तितः। यत्रावतीर्णो भगवान्कृष्णाख्यो जगदीश्वरः २६ वसुदेवगृहे जन्म तस्य वृद्धिश्च गोकुले। तस्य कर्माण्यपाराणि कीर्ति
तान्यसुरद्विषः २७ पूतनासुपयःपानं शकटोच्चाटनं शिशोः। तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः २८ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः।
गोपानां च परित्राणं दावाग्नेः परिसर्पतः २९ दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं। व्रतचर्या च कन्यानां यत्र तुष्टो व्रतैः प्रभुः ३० ॥ ॥

नं ताराहरणोपाख्यानं २१ सुकन्यायाश्चरितं ककुत्स्थस्य चरितं २२ २४ सोमवंशोद्भवस्यैलस्यैलापुत्रस्य चरितं २५ २९ यत्र व्रतचर्यायां ३०

राम

३५

राहूनंदहरणं ४० ४१ यत्रोद्धववासुदेवसंवादे। आत्मविद्याः परमात्मविद्याः अखिलाश्चतुर्वर्णित्वेनोक्ताः। वर्णाश्रमधर्मविनिर्णय उक्तः ४२ उपप्लवो नाशः राज

प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं। गोवर्धनोद्धरणं च शक्रस्य सुरभेरथ ३१ यज्ञाभिषेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु। शंखचूडस्य दुर्बुद्धेर्वधो
रिष्टस्य केशिनः ३२ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः। व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ३३ गजमुष्टिकचाणूरकंसादीनां तथा
वधः। मृतस्यानयनं सूनोः पुनः सांदीपनेर्गुरोः ३४ मथुरायां निवसता यदुचक्रस्य यत्प्रियं। कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ३५ जरासंधस
मानीतसैन्यस्य बहुशो वधः। घातनं यवनेन्द्रस्य कुशस्थल्या निवेशनं ३६ आदानं पारिजातस्य सुधर्मायाः सुरालयात्। रुक्मिण्याहरणं युद्धे प्रमथ्य
द्विषतो हरेः ३७ हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं। प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ३८ चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः। शंबरो द्वि
विदः पीठो मुरः पंचजनादयः ३९ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनं। भारावतरणं भूमेर्निमित्तीकृत्य पांडवान् ४० विप्रशापापदेशेन संहारः स्वकु
लस्य च। वसुदेवस्य संवादो नारदेन सुरर्षिणा। उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयाः। ततो मर्त्यपरित्या
गश्चात्मयोगानुभावतः ४२ युगलक्षणवृत्तिश्च कलौ नॄणामुपप्लवः। चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४३ देहत्यागश्च राजर्षेर्विष्णुदत्तस्य धीमतः।
शाखाप्रणयनमृषेर्मार्कंडेयस्य सत्कथा ४४ महापुरुषविन्यासः सूर्यस्य जगदात्मनः। इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः ४५ ॥ ॥

सादिभेदेनोत्पत्तिस्त्रिविधा ४३ विष्णुदत्तस्य परीक्षितः ४४ महापुरुषविन्यासः महापुरुषस्यांगोपांगादिस्थितिविशेषः सूर्यस्य स्थितिश्च। इतिसमाप्ति
पर्यंतं सर्वमुक्तं ४५

न्त्वाक्रांतं कृत्वा ४६ अतिशयितो वातः अभ्रं संनीरं नीरदमिव ४७ अधोक्षजो भगवान्याभिर्गीर्भिर्न कीर्त्यते ताः गिरः सत्कथा मृषा निष्फलाः असतीः असत्यो मंगलाः यद्यो भगवद्गुणोदयं तदेव सत्यं यथोक्तफलं ४८ पुनरपि श्लोकोतित देवेतित देव सत्यं सुखकरं पुण्यं पुण्यकरं मङ्गलं तत्त्वबोधेन तत्र या ४९ न यद्वच इत्यादिश्लोकत्रयं व्याख्यातार्थं तत्तु वर्णाश्रमाचारादिना निःश्रेयसं स्यात् वर्णाश्रमाचारयुतो यद्यपि विमुच्यत इत्यतो श्रुतभावेन किं तत्राह यशःश्रतियश्च

लीलावतारकर्माणि कीर्तितानीह सर्ब्बशः। पतितः स्खलितो वार्त्तः क्षुत्वा वा विवशो ब्रुवन् ४६ हरये नम इत्युच्चैर्मुच्यते सर्ब्बपातकात् ४६ संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसां। प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ४७ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः। तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ४८ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं। तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ४९ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्। तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमला ५० स वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि। नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ५१ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं। कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं ५२ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु। अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ५३ अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शं तनोति। सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ५४ ॥ ॥

तद्भाववर्जितस्य हि वर्णाश्रमाचारतपःश्रुतादिषु परः परिश्रमः यशःश्रियामेवार्थे नत्वात्यंतिकसिद्धये भवति। नन्वच्युतभावः केन स्यात्तत्राह अविस्मृतिरिति। गुणानुवादश्रवणादिभिर्हृष्टात्स्युतभक्तेः पुंसः श्रीधरपादपद्मयोरविस्मृतिः निरंतराभ्यासेनानुस्मरणं भवति ५३ सा कर्तुः किं करोति फलमत्राह। अविस्मृतिरिति। सत्त्वस्यांतःकरणस्य ५४ ॥

यूयमवाज्ञभावा अनन्यभक्ताः अदेवं देवोऽभ्योऽन्यं नारायणं देवं आत्मनि मनस्याविवेश्य भजतेति यद्यस्मात्तस्माद्भूरिभागा वत ५५ अहं चस्मारित इति चनयति अहं चेति। भवद्भिरहं चात्मतत्त्वं संस्मारितः। ममापीदमात्मतत्त्वमाश्रुतः प्राप्तमित्याह श्रुतमिति। प्रसंगोप्य उक्तं लक्ष्याह प्रायेति ५६ ७ यामं क्षणं च अन्यनंतरितार्थी द्वितीया। आत्मानं मनः ५८ कालविशेषमाह द्वादश्यामिति ५९ देशविशेषमाह पुष्कर इति। पुष्करे वा इह ह्रन्नेभयात् संसारभयात् ६० अन्ये देवादयः की

यूयं द्विजाग्र्या वत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं। नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ५५ अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात्। प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वतां ५६ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः। माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ५७ य एतच्छ्रावयेन्नित्यं यामक्षणमनन्यधीः। श्रद्धावान्योऽनुशृणुयात्पुनात्यात्मानमेव सः ५८ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत्। पठत्यनश्नन्प्रयतः ततो भवत्यपातकी ५९ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान्। उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ६० देवता मुनयः सिद्धाः पितरो मनवो नृपाः। यच्छंति कामान्गृणतः शृण्वतो येन कीर्तिताः ६१ ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते। मधुकुल्याः पयःकुल्या घृतकुल्याश्च तत्फलं ६२ पुराणसंहितामेतामधीत्य प्रयतो द्विजः। प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६३ ॥ ॥

र्तितास्तेपि संहितापाठादिकुर्वतोऽभीष्टानि ददतीत्याह देवता इति ६१ किं च ऋगादीन्यधीत्य यत्फलं स्यात्तदेतत्संहितामधीत्य स्यादित्याह ऋच इति। मधुकुल्या मधुनद्यः। मधुनद्यादिकथनं सुखविशेषार्थं ६२ न केवलमैहिकं फलं किंतु मुक्तिरपीति कथयति। पुराणेति। यद्विष्णोः परमं पदं तद्व्रजेत् ६३ ॥

भा०द्वा०

३१

इतरपुराणेभ्योस्य माहात्म्यातिशयं फलाधिक्यं माहात्म्याधिक्यंच प्रतिपदं प्रत्यहं श्रीनारायणाख्यगुणगणप्रतिपादकत्वेनेत्या
यं बुधिमे खलं भूमिं ६४ इतरपुराणेभ्योस्य माहात्म्यातिशयं फलाधिक्यं माहात्म्याधिक्यंच इतरत्र पुराणेषु इह पुराणेत्र अशेषमूर्त्तिः अनंतमूर्त्तिः कथाप्रसंगे ६५
इा कलिमलेति। कलिमलं संसारं च कालयति नाशयतीति कलिमलसंहृतिनाशनः। इतरत्र पुराणेषु। इह पुराणेत्र अशेषमूर्त्तिः अनंतमूर्त्तिः कथाप्रसंगे ६५
सूतोयं यथावसाने पि गुरुनमस्कारं करोति। स्वसुखेति। ध्यांतं ध्यातुः परमात्मा तन्निमित्तं सुखं स्वसुखं तेन निभृतं पूर्णंचितोयस्य स तथा स्वरूपसुखश्च निभृतज्ञान
सुखसुख निभृतचेताः चेतोज्ञान मिति वा तेन सुखेन अुदस्तान्यभावः निरस्तान्यविषयबुद्धिः। तेन ज्ञानेन निरस्तान्यज्ञानः इति वा। अपि कृतकृत्योपि अजितस्य

विशेषीत्यानुयात्यस्तां राजन्यां बुधिमे खलं। वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ६४ कलिमलसंहृतिकालनोखिलेशो हरिरितरत्र न गीय
तेह्यभीक्ष्णं। इह तु पुनर्भगवानशेषमूर्त्तिः परिपठितोनुपदं कथाप्रसंगैः ६५ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचिरलीलाकृष्टसारस्तदी
यं। व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोस्मि ६६ तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं। द्यु
पतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवमच्युतं नतोस्मि ६७ ॥ ॥

रेरुचिरपालीलया आकृष्टसारः विवशीकृतचित्तस्थैर्यः। तस्य हरेरिमं वंधि। अत एव तत्त्वदीपकं पुराणं व्यतनुत व्याख्यया विस्तृतवान्। तं व्याससूनुं शुकं नतो
स्मि ६६ गुरुनमस्कारानंतरं तदुपदिष्टस्वरूपं श्रीनारायणं नमति तमिति। यो भागवतस्यायद्यमारभ्य प्रतिपादितस्तं नतोस्मीत्यन्वयः। जगदुदयादिष्वात्मश
क्तिः स्वरूपशक्तिः आत्मतत्त्वं स्वतंत्रं। अजमर्वज्ञं देहवत एव ज्ञानोत्पत्तेः अस्य तदभावात्स्वज्ञानेनैव सर्वं जानातीति देशतः कालतो गुणतश्चानंतं। द्युपतिभिर्ज्ञानप
तिमिरजशंकराद्यैर्दुरवसितस्तवं। अनिश्चितकृतिं अच्युतं मायानिमित्तच्युतिरहितं ६७ ॥ ॥

राम

३१

उपचितनवशक्तिभिः स्थूलप्रकृतिमहदहंकारमनःपंचभूताख्यनवशक्तिभिः। आत्मनि स्वाधारतया उपरचितयोः स्थिरजंगमयोः पालनं येन स तथा तस्मै। उपलब्धिमा
त्रधाम्ने केवलज्ञानस्वरूपाय। सुरऋषभायदेवोत्तमाय। सनातनाय सदातनाय। शद्धमात्रैकविषयाय नमः। अनेन श्लोकद्वयेन जन्माद्यस्य यतइत्यादेरर्थोदर्शित
इति ६८ सत्यं ज्ञानमनंतमच्युतमजं निर्दुःखसौख्योदधिं निर्दोषामितवेदवेदितमहं वंदे मुकुंदं सदा। यच्छ्रत्वा कमलाच्च जेरगिरिशानंतादिदेवाः पदं सावत्य
सारंत्यनेकविधं यासत्याविरत्याचतां व्याख्या भागवतस्य कृष्णरचितात्वद्भीति कामात्मनाप्रीतश्चैत्सदृशाहितत्सतिविधित्तं ...

उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमपालनाय। भगवत उपलब्धिमात्रधाम्ने सुरऋष
भाय नमः सनातनाय ६८ इति श्रीभागवते महापुराणे द्वादशस्कंधे पारमहंस्यां संहितायां वैयासिक्यां
तिसंक्रमणेलक्षणंनाम द्वादशोध्यायः ॥ ॥

तव प्रतिभवं पादारविंदात्मनासं प्रवृत्तिं सुखतीर्थशास्त्र विजह्णारस्य पारं तथा। सुखवद्धासदृद्धे इत्वविमर्शैर्निभवतान्हृषीकेशोत्र उभयमपि त्वस्तुतिं इति
अतः किंत्वागोविमात्रि हरे मुरारे सुनताकृपातीर्थस्वानामसुचिपदरत्नावलीकंठे राजतां हिमुरद्विषः। वनमालेवमाले मौक्तिकी कृष्णवल्लभा ॥ ॥
श्रीमन्महेंद्रतीर्थश्रूपपादशिष्यविजयध्वजतीर्थयतींद्रकृतायां श्रीमद्भागवतटीकायां पदरत्नावल्यां द्वादशस्कंधे द्वादशोध्यायः

भा०द्वा०

सूतउवाच यंब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः। ध्यानावस्थिततद्गतेन मनसा पश्यंति यं
योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः १ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः
पान्तु वः। यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां पाता यातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति। पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने।
दानं दानस्य माहात्म्यं पाठादेश्च निबोधत। ब्राह्मं दशसहस्राणि पाद्मं पंचोनषष्टि कं। श्रीवैष्णवं त्रयोविंशं चतुर्विंशति शैवकं। दशाष्टौ श्रीभागव
तं नारदं पंचविंशतिः। मार्कंडेयं नवाग्नेयं दशपंचचतुःशतं। चतुर्दश भविष्यं स्यात्तथा पंचशतानि च। दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु।
चतुर्विंशति वाराहमेकाशीतिसहस्रकं। स्कांदं शतं तथा चैकं वामनं दश कीर्तितं। कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश। एकोनविंशं
सौपर्णं ब्रह्मांडं द्वादशैव तु। एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः। तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते। इदं भगवता पूर्वं ब्रह्मणे नाभिपंक
जे। स्थिताय भवभीताय कारुण्यात्संप्रकाशितं। आदिमध्यावसानेषु वैराग्याख्यानसंयुतं। हरिलीलाकथाव्रातामृतानंदसरिद्वरं। सर्ववेदांत
सारं यद्ब्रह्मात्मैकत्वलक्षणं। वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं। प्रौष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितं। ददाति यो भागवतं स याति पर
मां गतिं। राजंते तावदन्यानि पुराणानि सतां गणे। यावन्न दृश्यते साक्षात् श्रीमद्भागवतं परं। सर्ववेदांतसारं हि श्रीभागवतमिष्यते। तद्रसामृत
तृप्तस्य नान्यत्र स्याद्रतिः क्वचित्। निम्नगानां यथा गंगा देवानामच्युतो यथा। वैष्णवानां यथा शंभुः पुराणानामिदं तथा। श्रीमद्भागवतं पु

३८ राम ३८

भा०द्वा०

राणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते। यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठ
न्विचारणपरो भक्त्या विमुच्येन्नरः। कस्मै येन विभासितोयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणे। योगींद्रा
य तदाधिनाथ भगवद्राताय कारुण्यतः तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमही। नमस्तस्मै भगवते वासुदेवाय साक्षिणे। य इदं कृपया
कस्मै व्यवचक्षे मुमुक्षवे। योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे। संसारसर्पदष्टं यो विष्णुरातममूमुचत्। भवे भवे यथा भक्तिः पादयोस्तव
जायते। तथा कुरुष्व योगेश नाथस्त्वं मे यतः प्रभो। नामसंकीर्तनं यस्य सर्वपापप्रणाशनं। प्रणामो दुःखशमनस्तं नमामि हरिं परं इति ॥
श्रीभागवते महापुराणे पारमहंस्यां वैयासिक्यामष्टादशसाहस्र्यां संहितायां द्वादशस्कंधे सूतोक्तयत्रयोदशोध्यायः

३९ राम ३९

॥श्रीवें[illegible]टदासारसि[illegible]

॥नरहरविदं॥

॥श्री॥